# Brahmapurana

# બ્રહ્મપુરાણ

## Document Information

Text title : brahmapurANa

File name : brahmapur.itx

Category : purana

Location : doc_purana

Transliterated by : http://www.indologie.unizh.ch/text/text.html

Proofread by : http://www.indologie.unizh.ch/text/text.html

Description-comments : brahmapuraaNa - Thanks to Renate S�hnen-Thieme and Peter Schreiner for the T�bingen Pur�na Project, a project institutionalized at the Seminar for Indology and Comparative History of Religions of the University of T�bingen (Germany)

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# બ્રહ્મપુરાણ

૧.૧/૧યસ્માત્ સર્વમિદં પ્રપઞ્ચરચિતં માયાજગજ્જાયતે ।
૧.૧/૨યસ્મિંસ્તિષ્ઠતિ યાતિ ચાન્તસમયે કલ્પાનુકલ્પે પુનઃ ।
૧.૧/૩યં ધ્યાત્વા મુનયઃ પ્રપઞ્ચરહિતં વિન્દન્તિ મોક્ષં ધ્રુવમ્ ।
૧.૧/૪તં વન્દે પુરુષોત્તમાખ્યમમલં નિત્યં વિભું નિશ્ચલમ્ ॥ ૧.૧॥

૧.૨/૧યં ધ્યાયન્તિ બુધાઃ સમાધિસમયે શુદ્ધં વિયત્સંનિભમ્ ।
૧.૨/૨નિત્યાનન્દમયં પ્રસન્નમમલં સર્વેશ્વરં નિર્ગુણમ્ ।
૧.૨/૩વ્યક્તાવ્યક્તપરં પ્રપઞ્ચરહિતં ધ્યાનૈકગમ્યં વિભુમ્ ।
૧.૨/૪તં સંસારવિનાશહેતુમજરં વન્દે હરિં મુક્તિદમ્ ॥ ૧.૨॥

૧.૩/૧સુપુણ્યે નૈમિષારણ્યે પવિત્રે સુમનોહરે ।
૧.૩/૨નાનામુનિજનાકીર્ણે નાનાપુષ્પોપશોભિતે ॥ ૧.૩॥

૧.૪/૧સરલૈઃ કર્ણિકારૈશ્ચ પનસૈર્ધવખાદિરૈઃ ।
૧.૪/૨આમ્રજમ્બૂકપિત્થૈશ્ચ ન્યગ્રોધૈર્દેવદારુભિઃ ॥ ૧.૪॥

૧.૫/૧અશ્વત્થૈઃ પારિજાતૈશ્ચ ચન્દનાગુરુપાટલૈઃ ।
૧.૫/૨બકુલૈઃ સપ્તપર્ણૈશ્ચ પુંનાગૈર્નાગકેસરૈઃ ॥ ૧.૫॥

૧.૬/૧શાલૈસ્તાલૈસ્તમાલૈશ્ચ નારિકેલૈસ્તથાર્જુનૈઃ ।
૧.૬/૨અન્યૈશ્ચ બહુભિર્વૃક્ષૈશ્ચમ્પકાદ્યૈશ્ચ શોભિતે ॥ ૧.૬॥

૧.૭/૧નાનાપક્ષિગણાકીર્ણે નાનામૃગગણૈર્યુતે ।
૧.૭/૨નાનાજલાશયૈઃ પુણ્યૈર્દીર્ઘિકાદ્યૈરલંકૃતે ॥ ૧.૭॥

૧.૮/૧બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈશ્ચાન્યૈશ્ચ જાતિભિઃ ।
૧.૮/૨વાનપ્રસ્થૈર્ગૃહસ્થૈશ્ચ યતિભિર્બ્રહ્મચારિભિઃ ॥ ૧.૮॥

૧.૯/૧સમ્પન્નૈર્ગોકુલૈશ્ચૈવ સર્વત્ર સમલંકૃતે ।
૧.૯/૨યવગોધૂમચણકૈર્માષમુદ્ગતિલેક્ષુભિઃ ॥ ૧.૯॥

૧.૧૦/૧ચીનકાદ્યૈસ્તથા મેધ્યૈઃ સસ્યૈશ્ચાન્યૈશ્ચ શોભિતે ।
૧.૧૦/૨તત્ર દીપ્તે હુતવહે હૂયમાને મહામખે ॥ ૧.૧૦॥

૧.૧૧/૧યજતાં નૈમિષેયાણાં સત્રે દ્વાદશવાર્ષિકે ।
૧.૧૧/૨આજગ્મુસ્તત્ર મુનયસ્તથાન્યેઽપિ દ્વિજાતયઃ ॥ ૧.૧૧॥

૧.૧૨/૧તાન્ આગતાન્ દ્વિજાંસ્તે તુ પૂજાં ચક્રુર્યથોચિતામ્ ।
૧.૧૨/૨તેષુ તત્રોપવિષ્ટેષુ ઋત્વિગ્ભિઃ સહિતેષુ ચ ॥ ૧.૧૨॥

૧.૧૩/૧તત્રાજગામ સૂતસ્તુ મતિમાંલ્લોમહર્ષણઃ ।
૧.૧૩/૨તં દૃષ્ટ્વા તે મુનિવરાઃ પૂજાં ચક્રુર્મુદાન્વિતાઃ ॥ ૧.૧૩॥

૧.૧૪/૧સોઽપિ તાન્ પ્રતિપૂજ્યૈવ સંવિવેશ વરાસને ।
૧.૧૪/૨કથાં ચક્રુસ્તદાન્યોન્યં સૂતેન સહિતા દ્વિજાઃ ॥ ૧.૧૪॥

૧.૧૫/૧કથાન્તે વ્યાસશિષ્યં તે પપ્રચ્છુઃ સંશયં મુદા ।
૧.૧૫/૨ઋત્વિગ્ભિઃ સહિતાઃ સર્વે સદસ્યૈઃ સહ દીક્ષિતાઃ ॥ ૧.૧૫॥

૧.૧૬/૧મુનય ઊચુઃ । પુરાણાગમશાસ્ત્રાણિ સેતિહાસાનિ સત્તમ ।
૧.૧૬/૨જાનાસિ દેવદૈત્યાનાં ચરિતં જન્મ કર્મ ચ ॥ ૧.૧૬॥

૧.૧૭/૧ન તેઽસ્ત્યવિદિતં કિંચિદ્ વેદે શાસ્ત્રે ચ ભારતે ।
૧.૧૭/૨પુરાણે મોક્ષશાસ્ત્રે ચ સર્વજ્ઞોઽસિ મહામતે ॥ ૧.૧૭॥

૧.૧૮/૧યથાપૂર્વમિદં સર્વમુત્પન્નં સચરાચરમ્ ।
૧.૧૮/૨સસુરાસુરગન્ધર્વં સયક્ષોરગરાક્ષસમ્ ॥ ૧.૧૮॥

૧.૧૯/૧શ્રોતુમિચ્છામહે સૂત બ્રૂહિ સર્વં યથા જગત્ ।
૧.૧૯/૨બભૂવ ભૂયશ્ચ યથા મહાભાગ ભવિષ્યતિ ॥ ૧.૧૯॥

૧.૨૦/૧યતશ્ચૈવ જગત્ સૂત યતશ્ચૈવ ચરાચરમ્ ।
૧.૨૦/૨લીનમાસીત્ તથા યત્ર લયમેષ્યતિ યત્ર ચ ॥ ૧.૨૦॥

૧.૨૧/૧લોમહર્ષણ ઉવાચ । અવિકારાય શુદ્ધાય નિત્યાય પરમાત્મને ।
૧.૨૧/૨સદૈકરૂપરૂપાય વિષ્ણવે સર્વજિષ્ણવે ॥ ૧.૨૧॥

૧.૨૨/૧નમો હિરણ્યગર્ભાય હરયે શઙ્કરાય ચ ।
૧.૨૨/૨વાસુદેવાય તારાય સર્ગસ્થિત્યન્તકર્મણે ॥ ૧.૨૨॥

૧.૨૩/૧એકાનેકસ્વરૂપાય સ્થૂલસૂક્ષ્માત્મને નમઃ ।
૧.૨૩/૨અવ્યક્તવ્યક્તભૂતાય વિષ્ણવે મુક્તિહેતવે ॥ ૧.૨૩॥

૧.૨૪/૧સર્ગસ્થિતિવિનાશાય જગતો યોઽજરામરઃ ।
૧.૨૪/૨મૂલભૂતો નમસ્તસ્મૈ વિષ્ણવે પરમાત્મને ॥ ૧.૨૪॥

૧.૨૫/૧આધારભૂતં વિશ્વસ્યાપ્યણીયાંસમણીયસામ્ ।
૧.૨૫/૨પ્રણમ્ય સર્વભૂતસ્થમચ્યુતં પુરુષોત્તમમ્ ॥ ૧.૨૫॥

૧.૨૬/૧જ્ઞાનસ્વરૂપમત્યન્તં નિર્મલં પરમાર્થતઃ ।
૧.૨૬/૨તમેવાર્થસ્વરૂપેણ ભ્રાન્તિદર્શનતઃ સ્થિતમ્ ॥ ૧.૨૬॥

૧.૨૭/૧વિષ્ણું ગ્રસિષ્ણું વિશ્વસ્ય સ્થિતૌ સર્ગે તથા પ્રભુમ્ ।
૧.૨૭/૨સર્વજ્ઞં જગતામીશમજમક્ષયમવ્યયમ્ ॥ ૧.૨૭॥

૧.૨૮/૧આદ્યં સુસૂક્ષ્મં વિશ્વેશં બ્રહ્માદીન્ પ્રણિપત્ય ચ ।
૧.૨૮/૨ઇતિહાસપુરાણજ્ઞં વેદવેદાઙ્ગપારગમ્ ॥ ૧.૨૮॥

૧.૨૯/૧સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞં પરાશરસુતં પ્રભુમ્ ।
૧.૨૯/૨ગુરું પ્રણમ્ય વક્ષ્યામિ પુરાણં વેદસમ્મિતમ્ ॥ ૧.૨૯॥

૧.૩૦/૧કથયામિ યથા પૂર્વં દક્ષાદ્યૈર્મુનિસત્તમૈઃ ।
૧.૩૦/૨પૃષ્ટઃ પ્રોવાચ ભગવાન્ અબ્જયોનિઃ પિતામહઃ ॥ ૧.૩૦॥

૧.૩૧/૧શ઼ૃણુધ્વં સમ્પ્રવક્ષ્યામિ કથાં પાપપ્રણાશિનીમ્ ।
૧.૩૧/૨કથ્યમાનાં મયા ચિત્રાં બહ્વર્થાં શ્રુતિવિસ્તરામ્ ॥ ૧.૩૧॥

૧.૩૨/૧યસ્ત્વિમાં ધારયેન્ નિત્યં શ઼ૃણુયાદ્ વાપ્યભીક્ષ્ણશઃ ।
૧.૩૨/૨સ્વવંશધારણં કૃત્વા સ્વર્ગલોકે મહીયતે ॥ ૧.૩૨॥

૧.૩૩/૧અવ્યક્તં કારણં યત્ તન્ નિત્યં સદસદાત્મકમ્ ।
૧.૩૩/૨પ્રધાનં પુરુષસ્તસ્માન્ નિર્મમે વિશ્વમીશ્વરઃ ॥ ૧.૩૩॥

૧.૩૪/૧તં બુધ્યધ્વં મુનિશ્રેષ્ઠા બ્રહ્માણમમિતૌજસમ્ ।
૧.૩૪/૨સ્રષ્ટારં સર્વભૂતાનાં નારાયણપરાયણમ્ ॥ ૧.૩૪॥

૧.૩૫/૧અહંકારસ્તુ મહતસ્તસ્માદ્ ભૂતાનિ જજ્ઞિરે ।
૧.૩૫/૨ભૂતભેદાશ્ચ ભૂતેભ્ય ઇતિ સર્ગઃ સનાતનઃ ॥ ૧.૩૫॥

૧.૩૬/૧વિસ્તરાવયવં ચૈવ યથાપ્રજ્ઞં યથાશ્રુતિ ।
૧.૩૬/૨કીર્ત્યમાનં શ઼ૃણુધ્વં વઃ સર્વેષાં કીર્તિવર્ધનમ્ ॥ ૧.૩૬॥

૧.૩૭/૧કીર્તિતં સ્થિરકીર્તીનાં સર્વેષાં પુણ્યવર્ધનમ્ ।

૧.૩૭/૨તતઃ સ્વયમ્ભૂર્ભગવાન્ સિસૃક્ષુર્વિવિધાઃ પ્રજાઃ ॥ ૧.૩૭॥

૧.૩૮/૧અપ એવ સસર્જાદૌ તાસુ વીર્યમથાસૃજત્ ।
૧.૩૮/૨આપો નારા ઇતિ પ્રોક્તા આપો વૈ નરસૂનવઃ ॥ ૧.૩૮॥

૧.૩૯/૧અયનં તસ્ય તાઃ પૂર્વં તેન નારાયણઃ સ્મૃતઃ ।
૧.૩૯/૨હિરણ્યવર્ણમભવત્ તદ્ અણ્ડમુદકેશયમ્ ॥ ૧.૩૯॥

૧.૪૦/૧તત્ર જજ્ઞે સ્વયં બ્રહ્મા સ્વયમ્ભૂરિતિ નઃ શ્રુતમ્ ।
૧.૪૦/૨હિરણ્યવર્ણો ભગવાન્ ઉષિત્વા પરિવત્સરમ્ ॥ ૧.૪૦॥

૧.૪૧/૧તદ્ અણ્ડમકરોદ્ દ્વૈધં દિવં ભુવમથાપિ ચ ।
૧.૪૧/૨તયોઃ શકલયોર્મધ્ય આકાશમકરોત્ પ્રભુઃ ॥ ૧.૪૧॥

૧.૪૨/૧અપ્સુ પારિપ્લવાં પૃથ્વીં દિશશ્ચ દશધા દધે ।
૧.૪૨/૨તત્ર કાલં મનો વાચં કામં ક્રોધમથો રતિમ્ ॥ ૧.૪૨॥

૧.૪૩/૧સસર્જ સૃષ્ટિં તદ્રૂપાં સ્રષ્ટુમિચ્છન્ પ્રજાપતીન્ ।
૧.૪૩/૨મરીચિમત્ર્યઙ્ગિરસૌ પુલસ્ત્યં પુલહં ક્રતુમ્ ॥ ૧.૪૩॥

૧.૪૪/૧વસિષ્ઠં ચ મહાતેજાઃ સોઽસૃજત્ સપ્ત માનસાન્ ।
૧.૪૪/૨સપ્ત બ્રહ્માણ ઇત્યેતે પુરાણે નિશ્ચયં ગતાઃ ॥ ૧.૪૪॥

૧.૪૫/૧નારાયણાત્મકાનાં તુ સપ્તાનાં બ્રહ્મજન્મનામ્ ।
૧.૪૫/૨તતોઽસૃજત્ પુરા બ્રહ્મા રુદ્રં રોષાત્મસમ્ભવમ્ ॥ ૧.૪૫॥

૧.૪૬/૧સનત્કુમારં ચ વિભું પૂર્વેષામપિ પૂર્વજમ્ ।
૧.૪૬/૨સપ્તસ્વેતા અજાયન્ત પ્રજા રુદ્રાશ્ચ ભો દ્વિજાઃ ॥ ૧.૪૬॥

૧.૪૭/૧સ્કન્દઃ સનત્કુમારશ્ચ તેજઃ સંક્ષિપ્ય તિષ્ઠતઃ ।
૧.૪૭/૨તેષાં સપ્ત મહાવંશા દિવ્યા દેવગણાન્વિતાઃ ॥ ૧.૪૭॥

૧.૪૮/૧ક્રિયાવન્તઃ પ્રજાવન્તો મહર્ષિભિરલંકૃતાઃ ।
૧.૪૮/૨વિદ્યુતોઽશનિમેઘાંશ્ચ રોહિતેન્દ્રધનૂંષિ ચ ॥ ૧.૪૮॥

૧.૪૯/૧વયાંસિ ચ સસર્જાદૌ પર્જન્યં ચ સસર્જ હ ।
૧.૪૯/૨ઋચો યજૂંષિ સામાનિ નિર્મમે યજ્ઞસિદ્ધયે ॥ ૧.૪૯॥

૧.૫૦/૧સાધ્યાન્ અજનયદ્ દેવાન્ ઇત્યેવમનુસંજગુઃ ।
૧.૫૦/૨ઉચ્ચાવચાનિ ભૂતાનિ ગાત્રેભ્યસ્તસ્ય જજ્ઞિરે ॥ ૧.૫૦॥

૧.૫૧/૧આપવસ્ય પ્રજાસર્ગં સૃજતો હિ પ્રજાપતેઃ ।
૧.૫૧/૨સૃજ્યમાનાઃ પ્રજા નૈવ વિવર્ધન્તે યદા તદા ॥ ૧.૫૧॥

૧.૫૨/૧દ્વિધા કૃત્વાત્મનો દેહમર્ધેન પુરુષોઽભવત્ ।
૧.૫૨/૨અર્ધેન નારી તસ્યાં તુ સોઽસૃજદ્ દ્વિવિધાઃ પ્રજાઃ ॥ ૧.૫૨॥

૧.૫૩/૧દિવં ચ પૃથિવીં ચૈવ મહિમ્ના વ્યાપ્ય તિષ્ઠતિ ।
૧.૫૩/૨વિરાજમસૃજદ્ વિષ્ણુઃ સોઽસૃજત્ પુરુષં વિરાટ્ ॥ ૧.૫૩॥

૧.૫૪/૧પુરુષં તં મનું વિદ્યાત્ તસ્ય મન્વન્તરં સ્મૃતમ્ ।
૧.૫૪/૨દ્વિતીયં માનસસ્યૈતન્ મનોરન્તરમુચ્યતે ॥ ૧.૫૪॥

૧.૫૫/૧સ વૈરાજઃ પ્રજાસર્ગં સસર્જ પુરુષઃ પ્રભુઃ ।
૧.૫૫/૨નારાયણવિસર્ગસ્ય પ્રજાસ્તસ્યાપ્યયોનિજાઃ ॥ ૧.૫૫॥

૧.૫૬/૧આયુષ્માન્ કીર્તિમાન્ પુણ્ય+ ।પ્રજાવાંશ્ચ ભવેન્ નરઃ ।
૧.૫૬/૨આદિસર્ગં વિદિત્વેમં યથેષ્ટાં ચાપ્નુયાદ્ ગતિમ્ ॥ ૧.૫૬॥

૨.૧/૧લોમહર્ષણ ઉવાચ । સ સૃષ્ટ્વા તુ પ્રજાસ્ત્વેવમાપવો વૈ પ્રજાપતિઃ ।
૨.૧/૨લેભે વૈ પુરુષઃ પત્નીં શતરૂપામયોનિજામ્ ॥ ૨.૧॥

૨.૨/૧આપવસ્ય મહિમ્ના તુ દિવમાવૃત્ય તિષ્ઠતઃ ।
૨.૨/૨ધર્મેણૈવ મુનિશ્રેષ્ઠાઃ શતરૂપા વ્યજાયત ॥ ૨.૨॥

૨.૩/૧સા તુ વર્ષાયુતં તપ્ત્વા તપઃ પરમદુશ્ચરમ્ ।
૨.૩/૨ભર્તારં દીપ્તતપસં પુરુષં પ્રત્યપદ્યત ॥ ૨.૩॥

૨.૪/૧સ વૈ સ્વાયમ્ભુવો વિપ્રાઃ પુરુષો મનુરુચ્યતે ।
૨.૪/૨તસ્યૈકસપ્તતિયુગં મન્વન્તરમિહોચ્યતે ॥ ૨.૪॥

૨.૫/૧વૈરાજાત્ પુરુષાદ્ વીરં શતરૂપા વ્યજાયત ।
૨.૫/૨પ્રિયવ્રતોત્તાનપાદૌ વીરાત્ કામ્યા વ્યજાયત ॥ ૨.૫॥

૨.૬/૧કામ્યા નામ સુતા શ્રેષ્ઠા કર્દમસ્ય પ્રજાપતેઃ ।
૨.૬/૨કામ્યાપુત્રાસ્તુ ચત્વારઃ સમ્રાટ્ કુક્ષિર્વિરાટ્ પ્રભુઃ ॥ ૨.૬॥

૨.૭/૧ઉત્તાનપાદં જગ્રાહ પુત્રમત્રિઃ પ્રજાપતિઃ ।
૨.૭/૨ઉત્તાનપાદાચ્ચતુરઃ સૂનૃતા સુષુવે સુતાન્ ॥ ૨.૭॥

૨.૮/૧ધર્મસ્ય કન્યા સુશ્રોણી સૂનૃતા નામ વિશ્રુતા ।
૨.૮/૨ઉત્પન્ના વાજિમેધેન ધ્રુવસ્ય જનની શુભા ॥ ૨.૮॥

૨.૯/૧ધ્રુવં ચ કીર્તિમન્તં ચ આયુષ્મન્તં વસું તથા ।
૨.૯/૨ઉત્તાનપાદોઽજનયત્ સૂનૃતાયાં પ્રજાપતિઃ ॥ ૨.૯॥

૨.૧૦/૧ધ્રુવો વર્ષસહસ્રાણિ ત્રીણિ દિવ્યાનિ ભો દ્વિજાઃ ।
૨.૧૦/૨તપસ્તેપે મહાભાગઃ પ્રાર્થયન્ સુમહદ્ યશઃ ॥ ૨.૧૦॥

૨.૧૧/૧તસ્મૈ બ્રહ્મા દદૌ પ્રીતઃ સ્થાનમાત્મસમં પ્રભુઃ ।
૨.૧૧/૨અચલં ચૈવ પુરતઃ સપ્તર્ષીણાં પ્રજાપતિઃ ॥ ૨.૧૧॥

૨.૧૨/૧તસ્યાભિમાનમ્ ઋદ્ધિં ચ મહિમાનં નિરીક્ષ્ય ચ ।
૨.૧૨/૨દેવાસુરાણામાચાર્યઃ શ્લોકં પ્રાગ્ ઉશના જગૌ ॥ ૨.૧૨॥

૨.૧૩/૧અહોઽસ્ય તપસો વીર્યમહો શ્રુતમહોઽદ્ભુતમ્ ।
૨.૧૩/૨યમદ્ય પુરતઃ કૃત્વા ધ્રુવં સપ્તર્ષયઃ સ્થિતાઃ ॥ ૨.૧૩॥

૨.૧૪/૧તસ્માચ્છ્લિષ્ટિં ચ ભવ્યં ચ ધ્રુવાચ્છમ્ભુર્વ્યજાયત ।
૨.૧૪/૨શ્લિષ્ટેરાધત્ત સુચ્છાયા પઞ્ચ પુત્રાન્ અકલ્મષાન્ ॥ ૨.૧૪॥

૨.૧૫/૧રિપું રિપુંજયં વીરં વૃકલં વૃકતેજસમ્ ।
૨.૧૫/૨રિપોરાધત્ત બૃહતી ચક્ષુષં સર્વતેજસમ્ ॥ ૨.૧૫॥

૨.૧૬/૧અજીજનત્ પુષ્કરિણ્યાં વૈરિણ્યાં ચાક્ષુષં મનુમ્ ।
૨.૧૬/૨પ્રજાપતેરાત્મજાયાં વીરણ્યસ્ય મહાત્મનઃ ॥ ૨.૧૬॥

૨.૧૭/૧મનોરજાયન્ત દશ નડ્વલાયાં મહૌજસઃ ।
૨.૧૭/૨કન્યાયાં મુનિશાર્દૂલા વૈરાજસ્ય પ્રજાપતેઃ ॥ ૨.૧૭॥

૨.૧૮/૧કુત્સઃ પુરુઃ શતદ્યુમ્નસ્તપસ્વી સત્યવાક્ કવિઃ ।
૨.૧૮/૨અગ્નિષ્ટુદ્ અતિરાત્રશ્ચ સુદ્યુમ્નશ્ચેતિ તે નવ ॥ ૨.૧૮॥

૨.૧૯/૧અભિમન્યુશ્ચ દશમો નડ્વલાયાં મહૌજસઃ ।
૨.૧૯/૨પુરોરજનયત્ પુત્રાન્ ષડ્ આગ્નેયી મહાપ્રભાન્ ॥ ૨.૧૯॥

૨.૨૦/૧અઙ્ગં સુમનસં સ્વાતિં ક્રતુમઙ્ગિરસં મયમ્ ।
૨.૨૦/૨અઙ્ગાત્ સુનીથાપત્યં વૈ વેણમેકં વ્યજાયત ॥ ૨.૨૦॥

૨.૨૧/૧અપચારેણ વેણસ્ય પ્રકોપઃ સુમહાન્ અભૂત્ ।
૨.૨૧/૨પ્રજાર્થમ્ ઋષયો યસ્ય મમન્થુર્દક્ષિણં કરમ્ ॥ ૨.૨૧॥

૨.૨૨/૧વેણસ્ય મથિતે પાણૌ સમ્બભૂવ મહાન્ નૃપઃ ।

૨.૨૨/૨તં દૃષ્ટ્વા મુનયઃ પ્રાહુરેષ વૈ મુદિતાઃ પ્રજાઃ ॥ ૨.૨૨॥

૨.૨૩/૧કરિષ્યતિ મહાતેજા યશશ્ચ પ્રાપ્સ્યતે મહત્ ।
૨.૨૩/૨સ ધન્વી કવચી જાતો જ્વલજ્જ્વલનસંનિભઃ ॥ ૨.૨૩॥

૨.૨૪/૧પૃથુર્વૈણ્યસ્તથા ચેમાં રરક્ષ ક્ષત્રપૂર્વજઃ ।
૨.૨૪/૨રાજસૂયાભિષિક્તાનામાદ્યઃ સ વસુધાપતિઃ ॥ ૨.૨૪॥

૨.૨૫/૧તસ્માચ્ચૈવ સમુત્પન્નૌ નિપુણૌ સૂતમાગધૌ ।
૨.૨૫/૨તેનેયં ગૌર્મુનિશ્રેષ્ઠા દુગ્ધા સસ્યાનિ ભૂભૃતા ॥ ૨.૨૫॥

૨.૨૬/૧પ્રજાનાં વૃત્તિકામેન દેવૈઃ સર્ષિગણૈઃ સહ ।
૨.૨૬/૨પિતૃભિર્દાનવૈશ્ચૈવ ગન્ધર્વૈરપ્સરોગણૈઃ ॥ ૨.૨૬॥

૨.૨૭/૧સર્પૈઃ પુણ્યજનૈશ્ચૈવ વીરુદ્ભિઃ પર્વતૈસ્તથા ।
૨.૨૭/૨તેષુ તેષુ ચ પાત્રેષુ દુહ્યમાના વસુંધરા ॥ ૨.૨૭॥

૨.૨૮/૧પ્રાદાદ્ યથેપ્સિતં ક્ષીરં તેન પ્રાણાન્ અધારયન્ ।
૨.૨૮/૨પૃથોસ્તુ પુત્રૌ ધર્મજ્ઞૌ યજ્ઞાન્તેઽન્તર્ધિપાતિનૌ ॥ ૨.૨૮॥

૨.૨૯/૧શિખણ્ડિની હવિર્ધાનમન્તર્ધાનાદ્ વ્યજાયત ।
૨.૨૯/૨હવિર્ધાનાત્ ષડ્ આગ્નેયી ધિષણાજનયત્ સુતાન્ ॥ ૨.૨૯॥

૨.૩૦/૧પ્રાચીનબર્હિષં શુક્રં ગયં કૃષ્ણં વ્રજાજિનૌ ।
૨.૩૦/૨પ્રાચીનબર્હિર્ભગવાન્ મહાન્ આસીત્ પ્રજાપતિઃ ॥ ૨.૩૦॥

૨.૩૧/૧હવિર્ધાનાન્ મુનિશ્રેષ્ઠા યેન સંવર્ધિતાઃ પ્રજાઃ ।
૨.૩૧/૨પ્રાચીનબર્હિર્ભગવાન્ પૃથિવીતલચારિણીઃ ॥ ૨.૩૧॥

૨.૩૨/૧સમુદ્રતનયાયાં તુ કૃતદારોઽભવત્ પ્રભુઃ ।
૨.૩૨/૨મહતસ્તપસઃ પારે સવર્ણાયાં પ્રજાપતિઃ ॥ ૨.૩૨॥

૨.૩૩/૧સવર્ણાધત્ત સામુદ્રી દશ પ્રાચીનબર્હિષઃ ।
૨.૩૩/૨સર્વાન્ પ્રચેતસો નામ ધનુર્વેદસ્ય પારગાન્ ॥ ૨.૩૩॥

૨.૩૪/૧અપૃથગ્ધર્મચરણાસ્તેઽતપ્યન્ત મહત્ તપઃ ।
૨.૩૪/૨દશ વર્ષસહસ્રાણિ સમુદ્રસલિલેશયાઃ ॥ ૨.૩૪॥

૨.૩૫/૧તપશ્ચરત્સુ પૃથિવીં પ્રચેતઃસુ મહીરુહાઃ ।
૨.૩૫/૨અરક્ષ્યમાણામાવવ્રુર્બભૂવાથ પ્રજાક્ષયઃ ॥ ૨.૩૫॥

૨.૩૬/૧નાશકન્ મારુતો વાતું વૃતં ખમભવદ્ દ્રુમૈઃ ।
૨.૩૬/૨દશ વર્ષસહસ્રાણિ ન શેકુશ્ચેષ્ટિતું પ્રજાઃ ॥ ૨.૩૬॥

૨.૩૭/૧તદ્ ઉપશ્રુત્ય તપસા યુક્તાઃ સર્વે પ્રચેતસઃ ।
૨.૩૭/૨મુખેભ્યો વાયુમગ્નિં ચ સસૃજુર્જાતમન્યવઃ ॥ ૨.૩૭॥

૨.૩૮/૧ઉન્મૂલાન્ અથ વૃક્ષાંસ્તુ કૃત્વા વાયુરશોષયત્ ।
૨.૩૮/૨તાન્ અગ્નિરદહદ્ ઘોર એવમાસીદ્ દ્રુમક્ષયઃ ॥ ૨.૩૮॥

૨.૩૯/૧દ્રુમક્ષયમથો બુદ્ધ્વા કિંચિચ્છિષ્ટેષુ શાખિષુ ।
૨.૩૯/૨ઉપગમ્યાબ્રવીદ્ એતાંસ્તદા સોમઃ પ્રજાપતીન્ ॥ ૨.૩૯॥

૨.૪૦/૧કોપં યચ્છત રાજાનઃ સર્વે પ્રાચીનબર્હિષઃ ।
૨.૪૦/૨વૃક્ષશૂન્યા કૃતા પૃથ્વી શામ્યેતામગ્નિમારુતૌ ॥ ૨.૪૦॥

૨.૪૧/૧રત્નભૂતા ચ કન્યેયં વૃક્ષાણાં વરવર્ણિની ।
૨.૪૧/૨ભવિષ્યં જાનતા તાત ધૃતા ગર્ભેણ વૈ મયા ॥ ૨.૪૧॥

૨.૪૨/૧મારિષા નામ નામ્નૈષા વૃક્ષાણામિતિ નિર્મિતા ।
૨.૪૨/૨ભાર્યા વોઽસ્તુ મહાભાગાઃ સોમવંશવિવર્ધિની ॥ ૨.૪૨॥

૨.૪૩/૧યુષ્માકં તેજસોઽર્ધેન મમ ચાર્ધેન તેજસઃ ।
૨.૪૩/૨અસ્યામુત્પત્સ્યતે વિદ્વાન્ દક્ષો નામ પ્રજાપતિઃ ॥ ૨.૪૩॥

૨.૪૪/૧સ ઇમાં દગ્ધભૂયિષ્ઠાં યુષ્મત્તેજોમયેન વૈ ।
૨.૪૪/૨અગ્નિનાગ્નિસમો ભૂયઃ પ્રજાઃ સંવર્ધયિષ્યતિ ॥ ૨.૪૪॥

૨.૪૫/૧તતઃ સોમસ્ય વચનાજ્જગૃહુસ્તે પ્રચેતસઃ ।
૨.૪૫/૨સંહૃત્ય કોપં વૃક્ષેભ્યઃ પત્નીં ધર્મેણ મારિષામ્ ॥ ૨.૪૫॥

૨.૪૬/૧દશભ્યસ્તુ પ્રચેતોભ્યો મારિષાયાં પ્રજાપતિઃ ।
૨.૪૬/૨દક્ષો જજ્ઞે મહાતેજાઃ સોમસ્યાંશેન ભો દ્વિજાઃ ॥ ૨.૪૬॥

૨.૪૭/૧અચરાંશ્ચ ચરાંશ્ચૈવ દ્વિપદોઽથ ચતુષ્પદઃ ।
૨.૪૭/૨સ સૃષ્ટ્વા મનસા દક્ષઃ પશ્ચાદ્ અસૃજત સ્ત્રિયઃ ॥ ૨.૪૭॥

૨.૪૮/૧દદૌ દશ સ ધર્માય કશ્યપાય ત્રયોદશ ।
૨.૪૮/૨શિષ્ટાઃ સોમાય રાજ્ઞે ચ નક્ષત્રાખ્યા દદૌ પ્રભુઃ ॥ ૨.૪૮॥

૨.૪૯/૧તાસુ દેવાઃ ખગા ગાવો નાગા દિતિજદાનવાઃ ।
૨.૪૯/૨ગન્ધર્વાપ્સરસશ્ચૈવ જજ્ઞિરેઽન્યાશ્ચ જાતયઃ ॥ ૨.૪૯॥

૨.૫૦/૧તતઃ પ્રભૃતિ વિપ્રેન્દ્રાઃ પ્રજા મૈથુનસમ્ભવાઃ ।
૨.૫૦/૨સંકલ્પાદ્ દર્શનાત્ સ્પર્શાત્ પૂર્વેષાં પ્રોચ્યતે પ્રજા ॥ ૨.૫૦॥

૨.૫૧/૧મુનય ઊચુઃ । દેવાનાં દાનવાનાં ચ ગન્ધર્વોરગરક્ષસામ્ ।
૨.૫૧/૨સમ્ભવસ્તુ શ્રુતોઽસ્માભિર્દક્ષસ્ય ચ મહાત્મનઃ ॥ ૨.૫૧॥

૨.૫૨/૧અઙ્ગુષ્ઠાદ્ બ્રહ્મણો જજ્ઞે દક્ષઃ કિલ શુભવ્રતઃ ।
૨.૫૨/૨વામાઙ્ગુષ્ઠાત્ તથા ચૈવં તસ્ય પત્ની વ્યજાયત ॥ ૨.૫૨॥

૨.૫૩/૧કથં પ્રાચેતસત્વં સ પુનર્લેભે મહાતપાઃ ।
૨.૫૩/૨એતં નઃ સંશયં સૂત વ્યાખ્યાતું ત્વમિહાર્હસિ ।
૨.૫૩/૩દૌહિત્રશ્ચૈવ સોમસ્ય કથં શ્વશુરતાં ગતઃ ॥ ૨.૫૩॥

૨.૫૪/૧લોમહર્ષણ ઉવાચ । ઉત્પત્તિશ્ચ નિરોધશ્ચ નિત્યં
ભૂતેષુ ભો દ્વિજાઃ ।
૨.૫૪/૨ઋષયોઽત્ર ન મુહ્યન્તિ વિદ્યાવન્તશ્ચ યે જનાઃ ॥ ૨.૫૪॥

૨.૫૫/૧યુગે યુગે ભવન્ત્યેતે પુનર્દક્ષાદયો નૃપાઃ ।
૨.૫૫/૨પુનશ્ચૈવ નિરુધ્યન્તે વિદ્વાંસ્તત્ર ન મુહ્યતિ ॥ ૨.૫૫॥

૨.૫૬/૧જ્યૈષ્ઠ્યં કાનિષ્ઠમપ્યેષાં પૂર્વં નાસીદ્ દ્વિજોત્તમાઃ ।
૨.૫૬/૨તપ એવ ગરીયોઽભૂત્ પ્રભાવશ્ચૈવ કારણમ્ ॥ ૨.૫૬॥

૨.૫૭/૧ઇમાં વિસૃષ્ટિં દક્ષસ્ય યો વિદ્યાત્ સચરાચરામ્ ।
૨.૫૭/૨પ્રજાવાન્ આયુરુત્તીર્ણઃ સ્વર્ગલોકે મહીયતે ॥ ૨.૫૭॥

૩.૧/૧મુનય ઊચુઃ । દેવાનાં દાનવાનાં ચ ગન્ધર્વોરગરક્ષસામ્ ।
૩.૧/૨ઉત્પત્તિં વિસ્તરેણૈવ લોમહર્ષણ કીર્તય ॥ ૩.૧॥

૩.૨/૧લોમહર્ષણ ઉવાચ । પ્રજાઃ સૃજેતિ વ્યાદિષ્ટઃ પૂર્વં
દક્ષઃ સ્વયમ્ભુવા ।
૩.૨/૨યથા સસર્જ ભૂતાનિ તથા શૃણુત ભો દ્વિજાઃ ॥ ૩.૨॥

૩.૩/૧માનસાન્યેવ ભૂતાનિ પૂર્વમેવાસૃજત્ પ્રભુઃ ।
૩.૩/૨ઋષીન્ દેવાન્ સગન્ધર્વાન્ અસુરાન્ યક્ષરાક્ષસાન્ ॥ ૩.૩॥

૩.૪/૧યદાસ્ય માનસી વિપ્રા ન વ્યવર્ધત વૈ પ્રજા ।
૩.૪/૨તદા સંચિન્ત્ય ધર્માત્મા પ્રજાહેતોઃ પ્રજાપતિઃ ॥ ૩.૪॥

૩.૫/૧સ મૈથુનેન ધર્મેણ સિસૃક્ષુર્વિવિધાઃ પ્રજાઃ ।
૩.૫/૨અસિક્નીમાવહત્ પત્નીં વીરણસ્ય પ્રજાપતેઃ ॥ ૩.૫॥

૩.૬/૧સુતાં સુતપસા યુક્તાં મહતીં લોકધારિણીમ્ ।
૩.૬/૨અથ પુત્રસહસ્રાણિ વૈરણ્યાં પઞ્ચ વીર્યવાન્ ॥ ૩.૬॥

૩.૭/૧અસિક્ન્યાં જનયામાસ દક્ષ એવ પ્રજાપતિઃ ।
૩.૭/૨તાંસ્તુ દૃષ્ટ્વા મહાભાગાન્ સંવિવર્ધયિષૂન્ પ્રજાઃ ॥ ૩.૭॥

૩.૮/૧દેવર્ષિઃ પ્રિયસંવાદો નારદઃ પ્રાબ્રવીદ્ ઇદમ્ ।
૩.૮/૨નાશાય વચનં તેષાં શાપાયૈવાત્મનસ્તથા ॥ ૩.૮॥

૩.૯/૧યં કશ્યપઃ સુતવરં પરમેષ્ઠી વ્યજીજનત્ ।
૩.૯/૨દક્ષસ્ય વૈ દુહિતરિ દક્ષશાપભયાન્ મુનિઃ ॥ ૩.૯॥

૩.૧૦/૧પૂર્વં સ હિ સમુત્પન્નો નારદઃ પરમેષ્ઠિનઃ ।
૩.૧૦/૨અસિક્ન્યામથ વૈરણ્યાં ભૂયો દેવર્ષિસત્તમઃ ॥ ૩.૧૦॥

૩.૧૧/૧તં ભૂયો જનયામાસ પિતેવ મુનિપુંગવમ્ ।
૩.૧૧/૨તેન દક્ષસ્ય વૈ પુત્રા હર્યશ્વા ઇતિ વિશ્રુતાઃ ॥ ૩.૧૧॥

૩.૧૨/૧નિર્મથ્ય નાશિતાઃ સર્વે વિધિના ચ ન સંશયઃ ।
૩.૧૨/૨તસ્યોદ્યતસ્તદા દક્ષો નાશાયામિતવિક્રમઃ ॥ ૩.૧૨॥

૩.૧૩/૧બ્રહ્મર્ષીન્ પુરતઃ કૃત્વા યાચિતઃ પરમેષ્ઠિના ।
૩.૧૩/૨તતોઽભિસંધિશ્ચક્રે વૈ દક્ષસ્ય પરમેષ્ઠિના ॥ ૩.૧૩॥

૩.૧૪/૧કન્યાયાં નારદો મહ્યં તવ પુત્રો ભવેદ્ ઇતિ ।
૩.૧૪/૨તતો દક્ષઃ સુતાં પ્રાદાત્ પ્રિયાં વૈ પરમેષ્ઠિને ।
૩.૧૪/૩સ તસ્યાં નારદો જજ્ઞે ભૂયઃ શાપભયાદ્ ઋષિઃ ॥ ૩.૧૪॥

૩.૧૫/૧મુનય ઊચુઃ । કથં પ્રણાશિતાઃ પુત્રા નારદેન મહર્ષિણા ।
૩.૧૫/૨પ્રજાપતેઃ સૂતવર્ય શ્રોતુમિચ્છામ તત્ત્વતઃ ॥ ૩.૧૫॥

૩.૧૬/૧લોમહર્ષણ ઉવાચ । દક્ષસ્ય પુત્રા હર્યશ્વા
વિવર્ધયિષવઃ પ્રજાઃ ।
૩.૧૬/૨સમાગતા મહાવીર્યા નારદસ્તાન્ ઉવાચ હ ॥ ૩.૧૬॥

૩.૧૭/૧નારદ ઉવાચ । બાલિશા બત યૂયં વૈ નાસ્યા જાનીત વૈ ભુવઃ ।
૩.૧૭/૨પ્રમાણં સ્રષ્ટુકામા વૈ પ્રજાઃ પ્રાચેતસાત્મજાઃ ॥ ૩.૧૭॥

૩.૧૮/૧અન્તરૂર્ધ્વમધશ્ચૈવ કથં સૃજથ વૈ પ્રજાઃ ।
૩.૧૮/૨તે તુ તદ્વચનં શ્રુત્વા પ્રયાતાઃ સર્વતો દિશઃ ॥ ૩.૧૮॥

૩.૧૯/૧અદ્યાપિ ન નિવર્તન્તે સમુદ્રેભ્ય ઇવાપગાઃ ।
૩.૧૯/૨હર્યશ્વેષ્વથ નષ્ટેષુ દક્ષઃ પ્રાચેતસઃ પુનઃ ॥ ૩.૧૯॥

૩.૨૦/૧વૈરણ્યામથ પુત્રાણાં સહસ્રમસૃજત્ પ્રભુઃ ।
૩.૨૦/૨વિવર્ધયિષવસ્તે તુ શબલાશ્વાસ્તથા પ્રજાઃ ॥ ૩.૨૦॥

૩.૨૧/૧પૂર્વોક્તં વચનં તે તુ નારદેન પ્રચોદિતાઃ ।
૩.૨૧/૨અન્યોન્યમૂચુસ્તે સર્વે સમ્યગ્ આહ મહાન્ ઋષિઃ ॥ ૩.૨૧॥

૩.૨૨/૧ભ્રાતૃણાં પદવીં જ્ઞાતું ગન્તવ્યં નાત્ર સંશયઃ ।
૩.૨૨/૨જ્ઞાત્વા પ્રમાણં પૃથ્વ્યાશ્ચ સુખં સ્રક્ષ્યામહે પ્રજાઃ ॥ ૩.૨૨॥

૩.૨૩/૧તેઽપિ તેનૈવ માર્ગેણ પ્રયાતાઃ સર્વતો દિશમ્ ।
૩.૨૩/૨અદ્યાપિ ન નિવર્તન્તે સમુદ્રેભ્ય ઇવાપગાઃ ॥ ૩.૨૩॥

૩.૨૪/૧તદા પ્રભૃતિ વૈ ભ્રાતા ભ્રાતુરન્વેષણે દ્વિજાઃ ।
૩.૨૪/૨પ્રયાતો નશ્યતિ ક્ષિપ્રં તન્ ન કાર્યં વિપશ્ચિતા ॥ ૩.૨૪॥

૩.૨૫/૧તાંશ્ચૈવ નષ્ટાન્ વિજ્ઞાય પુત્રાન્ દક્ષઃ પ્રજાપતિઃ ।
૩.૨૫/૨ષષ્ટિં તતોઽસૃજત્ કન્યા વૈરણ્યામિતિ નઃ શ્રુતમ્ ॥ ૩.૨૫॥

૩.૨૬/૧તાસ્તદા પ્રતિજગ્રાહ ભાર્યાર્થં કશ્યપઃ પ્રભુઃ ।
૩.૨૬/૨સોમો ધર્મશ્ચ ભો વિપ્રાસ્તથૈવાન્યે મહર્ષયઃ ॥ ૩.૨૬॥

૩.૨૭/૧દદૌ સ દશ ધર્માય કશ્યપાય ત્રયોદશ ।
૩.૨૭/૨સપ્તવિંશતિ સોમાય ચતસ્રોઽરિષ્ટનેમિને ॥ ૩.૨૭॥

૩.૨૮/૧દ્વે ચૈવ બહુપુત્રાય દ્વે ચૈવાઙ્ગિરસે તથા ।
૩.૨૮/૨દ્વે કૃશાશ્વાય વિદુષે તાસાં નામાનિ મે શ઼ૃણુ ॥ ૩.૨૮॥

૩.૨૯/૧અરુન્ધતી વસુર્યામી લમ્બા ભાનુર્મરુત્વતી ।
૩.૨૯/૨સંકલ્પા ચ મુહૂર્તા ચ સાધ્યા વિશ્વા ચ ભો દ્વિજાઃ ॥ ૩.૨૯॥

૩.૩૦/૧ધર્મપત્ન્યો દશ ત્વેતાસ્તાસ્વપત્યાનિ બોધત ।
૩.૩૦/૨વિશ્વેદેવાસ્તુ વિશ્વાયાઃ સાધ્યા સાધ્યાન્ વ્યજાયત ॥ ૩.૩૦॥

૩.૩૧/૧મરુત્વત્યાં મરુત્વન્તો વસોસ્તુ વસવઃ સુતાઃ ।
૩.૩૧/૨ભાનોસ્તુ ભાનવઃ પુત્રા મુહૂર્તાસ્તુ મુહૂર્તજાઃ ॥ ૩.૩૧॥

૩.૩૨/૧લમ્બાયાશ્ચૈવ ઘોષોઽથ નાગવીથી ચ યામિજા ।
૩.૩૨/૨પૃથિવી વિષયં સર્વમરુન્ધત્યાં વ્યજાયત ॥ ૩.૩૨ ॥

૩.૩૩/૧સંકલ્પાયાસ્તુ વિશ્વાત્મા જજ્ઞે સંકલ્પ એવ હિ ।
૩.૩૩/૨નાગવીથ્યાં ચ યામિન્યાં વૃષલશ્ચ વ્યજાયત ॥ ૩.૩૩ ॥

૩.૩૪/૧પરા યાઃ સોમપત્નીશ્ચ દક્ષઃ પ્રાચેતસો દદૌ ।
૩.૩૪/૨સર્વા નક્ષત્રનામ્ન્યસ્તા જ્યોતિષે પરિકીર્તિતાઃ ॥ ૩.૩૪ ॥

૩.૩૫/૧યે ત્વન્યે ખ્યાતિમન્તો વૈ દેવા જ્યોતિષ્પુરોગમાઃ ।
૩.૩૫/૨વસવોઽષ્ટૌ સમાખ્યાતાસ્તેષાં વક્ષ્યામિ વિસ્તરમ્ ॥ ૩.૩૫ ॥

૩.૩૬/૧આપો ધ્રુવશ્ચ સોમશ્ચ ધવશ્ચૈવાનિલોઽનલઃ ।
૩.૩૬/૨પ્રત્યૂષશ્ચ પ્રભાસશ્ચ વસવો નામભિઃ સ્મૃતાઃ ॥ ૩.૩૬ ॥

૩.૩૭/૧આપસ્ય પુત્રો વૈતણ્ડ્યઃ શ્રમઃ શ્રાન્તો મુનિસ્તથા ।
૩.૩૭/૨ધ્રુવસ્ય પુત્રો ભગવાન્ કાલો લોકપ્રકાલનઃ ॥ ૩.૩૭ ॥

૩.૩૮/૧સોમસ્ય ભગવાન્ વર્ચા વર્ચસ્વી યેન જાયતે ।
૩.૩૮/૨ધવસ્ય પુત્રો દ્રવિણો હુતહવ્યવહસ્તથા ।
૩.૩૮/૩મનોહરાયાઃ શિશિરઃ પ્રાણોઽથ રમણસ્તથા ॥ ૩.૩૮ ॥

૩.૩૯/૧અનિલસ્ય શિવા ભાર્યા તસ્યાઃ પુત્રો મનોજવઃ ।
૩.૩૯/૨અવિજ્ઞાતગતિશ્ચૈવ દ્વૌ પુત્રાવનિલસ્ય ચ ॥ ૩.૩૯ ॥

૩.૪૦/૧અગ્નિપુત્રઃ કુમારસ્તુ શરસ્તમ્બે શ્રિયા વૃતઃ ।
૩.૪૦/૨તસ્ય શાખો વિશાખશ્ચ નૈગમેયશ્ચ પૃષ્ઠજઃ ॥ ૩.૪૦ ॥

૩.૪૧/૧અપત્યં કૃત્તિકાનાં તુ કાર્ત્તિકેય ઇતિ સ્મૃતઃ ।
૩.૪૧/૨પ્રત્યૂષસ્ય વિદુઃ પુત્રમ્ ઋષિં નામ્નાથ દેવલમ્ ॥ ૩.૪૧ ॥

૩.૪૨/૧દ્વૌ પુત્રૌ દેવલસ્યાપિ ક્ષમાવન્તૌ મનીષિણૌ ।
૩.૪૨/૨બૃહસ્પતેસ્તુ ભગિની વરસ્ત્રી બ્રહ્મવાદિની ॥ ૩.૪૨ ॥

૩.૪૩/૧યોગસિદ્ધા જગત્ કૃત્સ્નમસક્તા વિચચાર હ ।
૩.૪૩/૨પ્રભાસસ્ય તુ સા ભાર્યા વસૂનામષ્ટમસ્ય તુ ॥ ૩.૪૩ ॥

૩.૪૪/૧વિશ્વકર્મા મહાભાગો યસ્યાં જજ્ઞે પ્રજાપતિઃ ।
૩.૪૪/૨કર્તા શિલ્પસહસ્રાણાં ત્રિદશાનાં ચ વાર્ધકિઃ ॥ ૩.૪૪ ॥

૩.૪૫/૧ભૂષણાનાં ચ સર્વેષાં કર્તા શિલ્પવતાં વરઃ ।
૩.૪૫/૨યઃ સર્વેષાં વિમાનાનિ દૈવતાનાં ચકાર હ ॥ ૩.૪૫॥

૩.૪૬/૧માનુષાશ્ચોપજીવન્તિ યસ્ય શિલ્પં મહાત્મનઃ ।
૩.૪૬/૨સુરભી કશ્યપાદ્ રુદ્રાન્ એકાદશ વિનિર્મમે ॥ ૩.૪૬॥

૩.૪૭/૧મહાદેવપ્રસાદેન તપસા ભાવિતા સતી ।
૩.૪૭/૨અજૈકપાદ્ અહિર્બુધ્ન્યસ્ત્વષ્ટા રુદ્રશ્ચ વીર્યવાન્ ॥ ૩.૪૭॥

૩.૪૮/૧હરશ્ચ બહુરૂપશ્ચ ત્ર્યમ્બકશ્ચાપરાજિતઃ ।
૩.૪૮/૨વૃષાકપિશ્ચ શમ્ભુશ્ચ કપર્દી રૈવતસ્તથા ॥ ૩.૪૮॥

૩.૪૯/૧મૃગવ્યાધશ્ચ શર્વશ્ચ કપાલી ચ દ્વિજોત્તમાઃ ।
૩.૪૯/૨એકાદશૈતે વિખ્યાતા રુદ્રાસ્ત્રિભુવનેશ્વરાઃ ॥ ૩.૪૯॥

૩.૫૦/૧શતં ત્વેવં સમાખ્યાતં રુદ્રાણામમિતૌજસામ્ ।
૩.૫૦/૨પુરાણે મુનિશાર્દૂલા યૈર્વ્યાપ્તં સચરાચરમ્ ॥ ૩.૫૦॥

૩.૫૧/૧દારાગ્ શ ૃણુધ્વં વિપ્રેન્દ્રાઃ કશ્યપસ્ય પ્રજાપતેઃ ।
૩.૫૧/૨અદિતિર્દિતિર્દનુશ્ચૈવ અરિષ્ટા સુરસા ખસા ॥ ૩.૫૧॥

૩.૫૨/૧સુરભિર્વિનતા ચૈવ તામ્રા ક્રોધવશા ઇરા ।
૩.૫૨/૨કદ્રુર્મુનિશ્ચ ભો વિપ્રાસ્તાસ્વપત્યાનિ બોધત ॥ ૩.૫૨॥

૩.૫૩/૧પૂર્વમન્વન્તરે શ્રેષ્ઠા દ્વાદશાસન્ સુરોત્તમાઃ ।
૩.૫૩/૨તુષિતા નામ તેઽન્યોન્યમૂચુર્વૈવસ્વતેઽન્તરે ॥ ૩.૫૩॥

૩.૫૪/૧ઉપસ્થિતેઽતિયશસશ્ચાક્ષુષસ્યાન્તરે મનોઃ ।
૩.૫૪/૨હિતાર્થં સર્વલોકાનાં સમાગમ્ય પરસ્પરમ્ ॥ ૩.૫૪॥

૩.૫૫/૧આગચ્છત દ્રુતં દેવા અદિતિં સમ્પ્રવિશ્ય વૈ ।
૩.૫૫/૨મન્વન્તરે પ્રસૂયામસ્તન્ નઃ શ્રેયો ભવિષ્યતિ ॥ ૩.૫૫॥

૩.૫૬/૧લોમહર્ષણ ઉવાચ । એવમુક્ત્વા તુ તે સર્વે ચાક્ષુષસ્યાન્તરે મનોઃ ।
૩.૫૬/૨મારીચાત્ કશ્યપાજ્જાતાસ્ત્વદિત્યા દક્ષકન્યયા ॥ ૩.૫૬॥

૩.૫૭/૧તત્ર વિષ્ણુશ્ચ શક્રશ્ચ જજ્ઞાતે પુનરેવ હિ ।
૩.૫૭/૨અર્યમા ચૈવ ધાતા ચ ત્વષ્ટા પૂષા તથૈવ ચ ॥ ૩.૫૭॥

૩.૫૮/૧વિવસ્વાન્ સવિતા ચૈવ મિત્રો વરુણ એવ ચ ।
૩.૫૮/૨અંશો ભગશ્ચાતિતેજા આદિત્યા દ્વાદશ સ્મૃતાઃ ॥ ૩.૫૮॥

૩.૫૯/૧સપ્તવિંશતિ યાઃ પ્રોક્તાઃ સોમપત્ન્યો મહાવ્રતાઃ ।
૩.૫૯/૨તાસામપત્યાન્યભવન્ દીપ્તાન્યમિતતેજસઃ ॥ ૩.૫૯॥

૩.૬૦/૧અરિષ્ટનેમિપત્નીનામપત્યાનીહ ષોડશ ।
૩.૬૦/૨બહુપુત્રસ્ય વિદુષશ્ચતસ્રો વિદ્યુતઃ સ્મૃતાઃ ॥ ૩.૬૦॥

૩.૬૧/૧ચાક્ષુષસ્યાન્તરે પૂર્વે ઋચો બ્રહ્મર્ષિસત્કૃતાઃ ।
૩.૬૧/૨કૃશાશ્વસ્ય ચ દેવર્ષેર્દેવપ્રહરણાઃ સ્મૃતાઃ ॥ ૩.૬૧॥

૩.૬૨/૧એતે યુગસહસ્રાન્તે જાયન્તે પુનરેવ હિ ।
૩.૬૨/૨સર્વે દેવગણાશ્ચાત્ર ત્રયસ્ત્રિંશત્ તુ કામજાઃ ॥ ૩.૬૨॥

૩.૬૩/૧તેષામપિ ચ ભો વિપ્રા નિરોધોત્પત્તિરુચ્યતે ।
૩.૬૩/૨યથા સૂર્યસ્ય ગગન ઉદયાસ્તમયાવિહ ॥ ૩.૬૩॥

૩.૬૪/૧એવં દેવનિકાયાસ્તે સમ્ભવન્તિ યુગે યુગે ।
૩.૬૪/૨દિત્યાઃ પુત્રદ્વયં જજ્ઞે કશ્યપાદ્ ઇતિ નઃ શ્રુતમ્ ॥ ૩.૬૪॥

૩.૬૫/૧હિરણ્યકશિપુશ્ચૈવ હિરણ્યાક્ષશ્ચ વીર્યવાન્ ।
૩.૬૫/૨સિંહિકા ચાભવત્ કન્યા વિપ્રચિત્તેઃ પરિગ્રહઃ ॥ ૩.૬૫॥

૩.૬૬/૧સૈંહિકેયા ઇતિ ખ્યાતા યસ્યાઃ પુત્રા મહાબલાઃ ।
૩.૬૬/૨હિરણ્યકશિપોઃ પુત્રાશ્ચત્વારઃ પ્રથિતૌજસઃ ॥ ૩.૬૬॥

૩.૬૭/૧હ્રાદશ્ચ અનુહ્રાદશ્ચ પ્રહ્રાદશ્ચૈવ વીર્યવાન્ ।
૩.૬૭/૨સંહ્રાદશ્ચ ચતુર્થોઽભૂદ્ ધ્રાદપુત્રો હ્રદસ્તથા ॥ ૩.૬૭॥

૩.૬૮/૧હ્રદસ્ય પુત્રૌ દ્વૌ વીરૌ શિવઃ કાલસ્તથૈવ ચ ।
૩.૬૮/૨વિરોચનશ્ચ પ્રાહ્રાદિર્બલિર્જજ્ઞે વિરોચનાત્ ॥ ૩.૬૮॥

૩.૬૯/૧બલેઃ પુત્રશતમાસીદ્ બાણજ્યેષ્ઠં તપોધનાઃ ।
૩.૬૯/૨ધૃતરાષ્ટ્રશ્ચ સૂર્યશ્ચ ચન્દ્રમાશ્ચન્દ્રતાપનઃ ॥ ૩.૬૯॥

૩.૭૦/૧કુમ્ભનાભો ગર્દભાક્ષઃ કુક્ષિરિત્યેવમાદયઃ ।
૩.૭૦/૨બાણસ્તેષામતિબલો જ્યેષ્ઠઃ પશુપતેઃ પ્રિયઃ ॥ ૩.૭૦॥

૩.૭૧/૧પુરા કલ્પે તુ બાણેન પ્રસાદ્યોમાપતિં પ્રભુમ્ ।
૩.૭૧/૨પાર્શ્વતો વિહરિષ્યામિ ઇત્યેવં યાચિતો વરઃ ॥ ૩.૭૧॥

૩.૭૨/૧હિરણ્યાક્ષસુતાશ્ચૈવ વિદ્વાંસશ્ચ મહાબલાઃ ।

૩.૭૨/૨ભર્ભરઃ શકુનિશ્ચૈવ ભૂતસંતાપનસ્તથા ॥ ૩.૭૨॥

૩.૭૩/૧મહાનાભશ્ચ વિક્રાન્તઃ કાલનાભસ્તથૈવ ચ ।
૩.૭૩/૨અભવન્ દનુપુત્રાશ્ચ શતં તીવ્રપરાક્રમાઃ ॥ ૩.૭૩॥

૩.૭૪/૧તપસ્વિનો મહાવીર્યાઃ પ્રાધાન્યેન બ્રવીમિ તાન્ ।
૩.૭૪/૨દ્વિમૂર્ધા શઙ્કુકર્ણશ્ચ તથા હયશિરા વિભુઃ ॥ ૩.૭૪॥

૩.૭૫/૧અયોમુખઃ શમ્બરશ્ચ કપિલો વામનસ્તથા ।
૩.૭૫/૨મારીચિર્મઘવાંશ્ચૈવ ઇલ્વલઃ સ્વસૃમસ્તથા ॥ ૩.૭૫॥

૩.૭૬/૧વિક્ષોભણશ્ચ કેતુશ્ચ કેતુવીર્યશતહ્રદૌ ।
૩.૭૬/૨ઇન્દ્રજિત્ સર્વજિચ્ચૈવ વજ્રનાભસ્તથૈવ ચ ॥ ૩.૭૬॥

૩.૭૭/૧એકચક્રો મહાબાહુસ્તારકશ્ચ મહાબલઃ ।
૩.૭૭/૨વૈશ્વાનરઃ પુલોમા ચ વિદ્રાવણમહાશિરાઃ ॥ ૩.૭૭॥

૩.૭૮/૧સ્વર્ભાનુર્વૃષપર્વા ચ વિપ્રચિત્તિશ્ચ વીર્યવાન્ ।
૩.૭૮/૨સર્વ એતે દનોઃ પુત્રાઃ કશ્યપાદ્ અભિજજ્ઞિરે ॥ ૩.૭૮॥

૩.૭૯/૧વિપ્રચિત્તિપ્રધાનાસ્તે દાનવાઃ સુમહાબલાઃ ।
૩.૭૯/૨એતેષાં પુત્રપૌત્રં તુ ન તચ્છક્યં દ્વિજોત્તમાઃ ॥ ૩.૭૯॥

૩.૮૦/૧પ્રસંખ્યાતું બહુત્વાચ્ચ પુત્રપૌત્રમનન્તકમ્ ।
૩.૮૦/૨સ્વર્ભાનોસ્તુ પ્રભા કન્યા પુલોમ્નસ્તુ શચી સુતા ॥ ૩.૮૦॥

૩.૮૧/૧ઉપદીપ્તિર્હયશિરાઃ શર્મિષ્ઠા વાર્ષપર્વણી ।
૩.૮૧/૨પુલોમા કાલિકા ચૈવ વૈશ્વાનરસુતે ઉભે ॥ ૩.૮૧॥

૩.૮૨/૧બહ્વપત્યે મહાપત્યે મરીચેસ્તુ પરિગ્રહઃ ।
૩.૮૨/૨તયોઃ પુત્રસહસ્રાણિ ષષ્ટિર્દાનવનન્દનાઃ ॥ ૩.૮૨॥

૩.૮૩/૧ચતુર્દશશતાન્ અન્યાન્ હિરણ્યપુરવાસિનઃ ।
૩.૮૩/૨મરીચિર્જનયામાસ મહતા તપસાન્વિતઃ ॥ ૩.૮૩॥

૩.૮૪/૧પૌલોમાઃ કાલકેયાશ્ચ દાનવાસ્તે મહાબલાઃ ।
૩.૮૪/૨અવધ્યા દેવતાનાં હિ હિરણ્યપુરવાસિનઃ ॥ ૩.૮૪॥

૩.૮૫/૧પિતામહપ્રસાદેન યે હતાઃ સવ્યસાચિના ।
૩.૮૫/૨તતોઽપરે મહાવીર્યા દાનવાસ્ત્વતિદારુણાઃ ॥ ૩.૮૫॥

૩.૮૬/૧સિંહિકાયામથોત્પન્ના વિપ્રચિત્તેઃ સુતાસ્તથા ।
૩.૮૬/૨દૈત્યદાનવસંયોગાજ્જાતાસ્તીવ્રપરાક્રમાઃ ॥ ૩.૮૬॥

૩.૮૭/૧સૈંહિકેયા ઇતિ ખ્યાતાસ્ત્રયોદશ મહાબલાઃ ।
૩.૮૭/૨વંશ્યઃ શલ્યશ્ચ બલિનૌ નલશ્ચૈવ તથા બલઃ ॥ ૩.૮૭॥

૩.૮૮/૧વાતાપિર્નમુચિશ્ચૈવ ઇલ્વલઃ સ્વસૃમસ્તથા ।
૩.૮૮/૨અઞ્જિકો નરકશ્ચૈવ કાલનાભસ્તથૈવ ચ ॥ ૩.૮૮॥

૩.૮૯/૧સરમાનસ્તથા ચૈવ સ્વરકલ્પશ્ચ વીર્યવાન્ ।
૩.૮૯/૨એતે વૈ દાનવાઃ શ્રેષ્ઠા દનોર્વંશવિવર્ધનાઃ ॥ ૩.૮૯॥

૩.૯૦/૧તેષાં પુત્રાશ્ચ પૌત્રાશ્ચ શતશોઽથ સહસ્રશઃ ।
૩.૯૦/૨સંહ્રાદસ્ય તુ દૈત્યસ્ય નિવાતકવચાઃ કુલે ॥ ૩.૯૦॥

૩.૯૧/૧સમુત્પન્નાઃ સુમહતા તપસા ભાવિતાત્મનઃ ।
૩.૯૧/૨તિસ્રઃ કોટ્યઃ સુતાસ્તેષાં મણિવત્યાં નિવાસિનઃ ॥ ૩.૯૧॥

૩.૯૨/૧અવધ્યાસ્તેઽપિ દેવાનામર્જુનેન નિપાતિતાઃ ।
૩.૯૨/૨ષટ્ સુતાઃ સુમહાભાગાસ્તામ્રાયાઃ પરિકીર્તિતાઃ ॥ ૩.૯૨॥

૩.૯૩/૧ક્રૌઞ્ચી શ્યેની ચ ભાસી ચ સુગ્રીવી શુચિગૃધ્રિકા ।
૩.૯૩/૨ક્રૌઞ્ચી તુ જનયામાસ ઉલૂકપ્રત્યુલૂકકાન્ ॥ ૩.૯૩॥

૩.૯૪/૧શ્યેની શ્યેનાંસ્તથા ભાસી ભાસાન્ ગૃધ્રાંશ્ચ ગૃધ્ર્યપિ ।
૩.૯૪/૨શુચિરૌદકાન્ પક્ષિગણાન્ સુગ્રીવી તુ દ્વિજોત્તમાઃ ॥ ૩.૯૪॥

૩.૯૫/૧અશ્વાન્ ઉષ્ટ્રાન્ ગર્દભાંશ્ચ તામ્રાવંશઃ પ્રકીર્તિતઃ ।
૩.૯૫/૨વિનતાયાસ્તુ દ્વૌ પુત્રૌ વિખ્યાતૌ ગરુડારુણૌ ॥ ૩.૯૫॥

૩.૯૬/૧ગરુડઃ પતતાં શ્રેષ્ઠો દારુણઃ સ્વેન કર્મણા ।
૩.૯૬/૨સુરસાયાઃ સહસ્રં તુ સર્પાણામમિતૌજસામ્ ॥ ૩.૯૬॥

૩.૯૭/૧અનેકશિરસાં વિપ્રાઃ ખચરાણાં મહાત્મનામ્ ।
૩.૯૭/૨કાદ્રવેયાસ્તુ બલિનઃ સહસ્રમમિતૌજસઃ ॥ ૩.૯૭॥

૩.૯૮/૧સુપર્ણવશગા નાગા જજ્ઞિરે નૈકમસ્તકાઃ ।
૩.૯૮/૨યેષાં પ્રધાનાઃ સતતં શેષવાસુકિતક્ષકાઃ ॥ ૩.૯૮॥

૩.૯૯/૧ઐરાવતો મહાપદ્મઃ કમ્બલાશ્વતરાવુભૌ ।
૩.૯૯/૨એલાપત્રશ્ચ શઙ્ખશ્ચ કર્કોટકધનંજયૌ ॥ ૩.૯૯॥

૩.૧૦૦/૧મહાનીલમહાકર્ણૌ ધૃતરાષ્ટ્રબલાહકૌ ।
૩.૧૦૦/૨કુહરઃ પુષ્પદંષ્ટ્રશ્ચ દુર્મુખઃ સુમુખસ્તથા ॥ ૩.૧૦૦॥

૩.૧૦૧/૧શઙ્ખશ્ચ શઙ્ખપાલશ્ચ કપિલો વામનસ્તથા ।
૩.૧૦૧/૨નહુષઃ શઙ્ખરોમા ચ મણિરિત્યેવમાદયઃ ॥ ૩.૧૦૧॥

૩.૧૦૨/૧તેષાં પુત્રાશ્ચ પૌત્રાશ્ચ શતશોઽથ સહસ્રશઃ ।
૩.૧૦૨/૨ચતુર્દશસહસ્રાણિ ક્રૂરાણામનિલાશિનામ્ ॥ ૩.૧૦૨॥

૩.૧૦૩/૧ગણં ક્રોધવંશં વિપ્રાસ્તસ્ય સર્વે ચ દંષ્ટ્રિણઃ ।
૩.૧૦૩/૨સ્થલજાઃ પક્ષિણોઽબ્જાશ્ચ ધરાયાઃ પ્રસવાઃ સ્મૃતાઃ ॥ ૩.૧૦૩॥

૩.૧૦૪/૧ગાસ્તુ વૈ જનયામાસ સુરભિર્મહિષીસ્તથા ।
૩.૧૦૪/૨ઇરા વૃક્ષલતા વલ્લીસ્તૃણજાતીશ્ચ સર્વશઃ ॥ ૩.૧૦૪॥

૩.૧૦૫/૧ખસા તુ યક્ષરક્ષાંસિ મુનિરપ્સરસસ્તથા ।
૩.૧૦૫/૨અરિષ્ટા તુ મહાસિદ્ધા ગન્ધર્વાન્ અમિતૌજસઃ ॥ ૩.૧૦૫॥

૩.૧૦૬/૧એતે કશ્યપદાયાદાઃ કીર્તિતાઃ સ્થાણુજઙ્ગમાઃ ।
૩.૧૦૬/૨યેષાં પુત્રાશ્ચ પૌત્રાશ્ચ શતશોઽથ સહસ્રશઃ ॥ ૩.૧૦૬॥

૩.૧૦૭/૧એષ મન્વન્તરે વિપ્રાઃ સર્ગઃ સ્વારોચિષે સ્મૃતઃ ।
૩.૧૦૭/૨વૈવસ્વતેઽતિમહતિ વારુણે વિતતે ક્રતૌ ॥ ૩.૧૦૭॥

૩.૧૦૮/૧જુહ્વાનસ્ય બ્રહ્મણો વૈ પ્રજાસર્ગ ઇહોચ્યતે ।
૩.૧૦૮/૨પૂર્વં યત્ર સમુત્પન્નાન્ બ્રહ્મર્ષીન્ સપ્ત માનસાન્ ॥ ૩.૧૦૮॥

૩.૧૦૯/૧પુત્રત્વે કલ્પયામાસ સ્વયમેવ પિતામહઃ ।
૩.૧૦૯/૨તતો વિરોધે દેવાનાં દાનવાનાં ચ ભો દ્વિજાઃ ॥ ૩.૧૦૯॥

૩.૧૧૦/૧દિતિર્વિનષ્ટપુત્રા વૈ તોષયામાસ કશ્યપમ્ ।
૩.૧૧૦/૨કશ્યપસ્તુ પ્રસન્નાત્મા સમ્યગ્ આરાધિતસ્તયા ॥ ૩.૧૧૦॥

૩.૧૧૧/૧વરેણ ચ્છન્દયામાસ સા ચ વવ્રે વરં તદા ।
૩.૧૧૧/૨પુત્રમિન્દ્રવધાર્થાય સમર્થમમિતૌજસમ્ ॥ ૩.૧૧૧॥

૩.૧૧૨/૧સ ચ તસ્મૈ વરં પ્રાદાત્ પ્રાર્થિતઃ સુમહાતપાઃ ।
૩.૧૧૨/૨દત્ત્વા ચ વરમત્યુગ્રો મારીચઃ સમભાષત ॥ ૩.૧૧૨॥

૩.૧૧૩/૧ઇન્દ્રં પુત્રો નિહન્તા તે ગર્ભં વૈ શરદાં શતમ્ ।

૩.૧૧૩/૨યદિ ધારયસે શૌચ+ ।તત્પરા વ્રતમાસ્થિતા ॥ ૩.૧૧૩॥

૩.૧૧૪/૧તથેત્યભિહિતો ભર્તા તયા દેવ્યા મહાતપાઃ ।
૩.૧૧૪/૨ધારયામાસ ગર્ભં તુ શુચિઃ સા મુનિસત્તમાઃ ॥ ૩.૧૧૪॥

૩.૧૧૫/૧તતોઽભ્યુપાગમદ્ દિત્યાં ગર્ભમાધાય કશ્યપઃ ।
૩.૧૧૫/૨રોધયન્ વૈ ગણં શ્રેષ્ઠં દેવાનામમિતૌજસમ્ ॥ ૩.૧૧૫॥

૩.૧૧૬/૧તેજઃ સંહૃત્ય દુર્ધર્ષમવધ્યમમરૈરપિ ।
૩.૧૧૬/૨જગામ પર્વતાયૈવ તપસે સંશિતવ્રતા ॥ ૩.૧૧૬॥

૩.૧૧૭/૧તસ્યાશ્ચૈવાન્તરપ્રેપ્સુરભવત્ પાકશાસનઃ ।
૩.૧૧૭/૨જાતે વર્ષશતે ચાસ્યા દદર્શાન્તરમચ્યુતઃ ॥ ૩.૧૧૭॥

૩.૧૧૮/૧અકૃત્વા પાદયોઃ શૌચં દિતિઃ શયનમાવિશત્ ।
૩.૧૧૮/૨નિદ્રાં ચાહારયામાસ તસ્યાં કુક્ષિં પ્રવિશ્ય સઃ ॥ ૩.૧૧૮॥

૩.૧૧૯/૧વજ્રપાણિસ્તતો ગર્ભં સપ્તધા તં ન્યકૃન્તયત્ ।
૩.૧૧૯/૨સ પાટ્યમાનો ગર્ભોઽથ વજ્રેણ પ્રરુરોદ હ ॥ ૩.૧૧૯॥

૩.૧૨૦/૧મા રોદીરિતિ તં શક્રઃ પુનઃ પુનરથાબ્રવીત્ ।
૩.૧૨૦/૨સોઽભવત્ સપ્તધા ગર્ભસ્તમિન્દ્રો રુષિતઃ પુનઃ ॥ ૩.૧૨૦॥

૩.૧૨૧/૧એકૈકં સપ્તધા ચક્રે વજ્રેણૈવારિકર્ષણઃ ।
૩.૧૨૧/૨મરુતો નામ તે દેવા બભૂવુર્દ્વિજસત્તમાઃ ॥ ૩.૧૨૧॥

૩.૧૨૨/૧યથોક્તં વૈ મઘવતા તથૈવ મરુતોઽભવન્ ।
૩.૧૨૨/૨દેવાશ્ચૈકોનપઞ્ચાશત્ સહાયા વજ્રપાણિનઃ ॥ ૩.૧૨૨॥

૩.૧૨૩/૧તેષામેવં પ્રવૃત્તાનાં ભૂતાનાં દ્વિજસત્તમાઃ ।
૩.૧૨૩/૨રોચયન્ વૈ ગણશ્રેષ્ઠાન્ દેવાનામમિતૌજસામ્ ॥ ૩.૧૨૩॥

૩.૧૨૪/૧નિકાયેષુ નિકાયેષુ હરિઃ પ્રાદાત્ પ્રજાપતીન્ ।
૩.૧૨૪/૨ક્રમશસ્તાનિ રાજ્યાનિ પૃથુપૂર્વાણિ ભો દ્વિજાઃ ॥ ૩.૧૨૪॥

૩.૧૨૫/૧સ હરિઃ પુરુષો વીરઃ કૃષ્ણો જિષ્ણુઃ પ્રજાપતિઃ ।
૩.૧૨૫/૨પર્જન્યસ્તપનોઽનન્તસ્તસ્ય સર્વમિદં જગત્ ॥ ૩.૧૨૫॥

૩.૧૨૬/૧ભૂતસર્ગમિમં સમ્યગ્ જાનતો દ્વિજસત્તમાઃ ।
૩.૧૨૬/૨નાવૃત્તિભયમસ્તીહ પરલોકભયં કુતઃ ॥ ૩.૧૨૬॥

૪.૧/૧લોમહર્ષણ ઉવાચ । અભિષિચ્યાધિરાજેન્દ્રં પૃથું
વૈણ્યં પિતામહઃ ।
૪.૧/૨તતઃ ક્રમેણ રાજ્યાનિ વ્યાદેષ્ટુમુપચક્રમે ॥ ૪.૧॥

૪.૨/૧દ્વિજાનાં વીરુધાં ચૈવ નક્ષત્રગ્રહયોસ્તથા ।
૪.૨/૨યજ્ઞાનાં તપસાં ચૈવ સોમં રાજ્યેઽભ્યષેચયત્ ॥ ૪.૨॥

૪.૩/૧અપાં તુ વરુણં રાજ્યે રાજ્ઞાં વૈશ્રવણં પતિમ્ ।
૪.૩/૨આદિત્યાનાં તથા વિષ્ણું વસૂનામથ પાવકમ્ ॥ ૪.૩॥

૪.૪/૧પ્રજાપતીનાં દક્ષં તુ મરુતામથ વાસવમ્ ।
૪.૪/૨દૈત્યાનાં દાનવાનાં વૈ પ્રહ્લાદમમિતૌજસમ્ ॥ ૪.૪॥

૪.૫/૧વૈવસ્વતં પિતૃણાં ચ યમં રાજ્યેઽભ્યષેચયત્ ।
૪.૫/૨યક્ષાણાં રાક્ષસાનાં ચ પાર્થિવાનાં તથૈવ ચ ॥ ૪.૫॥

૪.૬/૧સર્વભૂતપિશાચાનાં ગિરીશં શૂલપાણિનમ્ ।
૪.૬/૨શૈલાનાં હિમવન્તં ચ નદીનામથ સાગરમ્ ॥ ૪.૬॥

૪.૭/૧ગન્ધર્વાણામધિપતિં ચક્રે ચિત્રરથં પ્રભુમ્ ।
૪.૭/૨નાગાનાં વાસુકિં ચક્રે સર્પાણામથ તક્ષકમ્ ॥ ૪.૭॥

૪.૮/૧વારણાનાં તુ રાજાનમૈરાવતમથાદિશત્ ।
૪.૮/૨ઉચ્ચૈઃશ્રવસમશ્વાનાં ગરુડં ચૈવ પક્ષિણામ્ ॥ ૪.૮॥

૪.૯/૧મૃગાણામથ શાર્દૂલં ગોવૃષં તુ ગવાં પતિમ્ ।
૪.૯/૨વનસ્પતીનાં રાજાનં પ્લક્ષમેવાભ્યષેચયત્ ॥ ૪.૯॥

૪.૧૦/૧એવં વિભજ્ય રાજ્યાનિ ક્રમેણૈવ પિતામહઃ ।
૪.૧૦/૨દિશાં પાલાન્ અથ તતઃ સ્થાપયામાસ સ પ્રભુઃ ॥ ૪.૧૦॥

૪.૧૧/૧પૂર્વસ્યાં દિશિ પુત્રં તુ વૈરાજસ્ય પ્રજાપતેઃ ।
૪.૧૧/૨દિશઃ પાલં સુધન્વાનં રાજાનં સોઽભ્યષેચયત્ ॥ ૪.૧૧॥

૪.૧૨/૧દક્ષિણસ્યાં દિશિ તથા કર્દમસ્ય પ્રજાપતેઃ ।
૪.૧૨/૨પુત્રં શઙ્ખપદં નામ રાજાનં સોઽભ્યષેચયત્ ॥ ૪.૧૨॥

૪.૧૩/૧પશ્ચિમસ્યાં દિશિ તથા રજસઃ પુત્રમચ્યુતમ્ ।
૪.૧૩/૨કેતુમન્તં મહાત્માનં રાજાનં સોઽભ્યષેચયત્ ॥ ૪.૧૩॥

૪.૧૪/૧તથા હિરણ્યરોમાણં પર્જન્યસ્ય પ્રજાપતેઃ ।

૪.૧૪/૨ઉદીચ્યાં દિશિ દુર્ધર્ષં રાજાનં સોઽભ્યષેચયત્ ॥ ૪.૧૪॥

૪.૧૫/૧તૈરિયં પૃથિવી સર્વા સપ્તદ્વીપા સપત્તના ।
૪.૧૫/૨યથાપ્રદેશમદ્યાપિ ધર્મેણ પ્રતિપાલ્યતે ॥ ૪.૧૫॥

૪.૧૬/૧રાજસૂયાભિષિક્તસ્તુ પૃથુરેતૈર્નરાધિપૈઃ ।
૪.૧૬/૨વેદદૃષ્ટેન વિધિના રાજા રાજ્યે નરાધિપઃ ॥ ૪.૧૬॥

૪.૧૭/૧તતો મન્વન્તરેઽતીતે ચાક્ષુષેઽમિતતેજસિ ।
૪.૧૭/૨વૈવસ્વતાય મનવે પૃથિવ્યાં રાજ્યમાદિશત્ ॥ ૪.૧૭॥

૪.૧૮/૧તસ્ય વિસ્તરમાખ્યાસ્યે મનોર્વૈવસ્વતસ્ય હ ।
૪.૧૮/૨ભવતાં ચાનુકૂલ્યાય યદિ શ્રોતુમિહેચ્છથ ।
૪.૧૮/૩મહદ્ એતદ્ અધિષ્ઠાનં પુરાણે તદ્ અધિષ્ઠિતમ્ ॥ ૪.૧૮॥

૪.૧૯/૧મુનય ઊચુઃ । વિસ્તરેણ પૃથોર્જન્મ લોમહર્ષણ કીર્તય ।
૪.૧૯/૨યથા મહાત્મના તેન દુગ્ધા વેયં વસુંધરા ॥ ૪.૧૯॥

૪.૨૦/૧યથા વાપિ નૃભિર્દુગ્ધા યથા દેવૈર્મહર્ષિભિઃ ।
૪.૨૦/૨યથા દૈત્યૈશ્ચ નાગૈશ્ચ યથા યક્ષૈર્યથા દ્રુમૈઃ ॥ ૪.૨૦॥

૪.૨૧/૧યથા શૈલૈઃ પિશાચૈશ્ચ ગન્ધર્વૈશ્ચ દ્વિજોત્તમૈઃ ।
૪.૨૧/૨રાક્ષસૈશ્ચ મહાસત્ત્વૈર્યથા દુગ્ધા વસુંધરા ॥ ૪.૨૧॥

૪.૨૨/૧તેષાં પાત્રવિશેષાંશ્ચ વક્તુમર્હસિ સુવ્રત ।
૪.૨૨/૨વત્સક્ષીરવિશેષાંશ્ચ દોગ્ધારં ચાનુપૂર્વશઃ ॥ ૪.૨૨॥

૪.૨૩/૧યસ્માચ્ચ કારણાત્ પાણિર્વેણસ્ય મથિતઃ પુરા ।
૪.૨૩/૨ક્રુદ્ધૈર્મહર્ષિભિસ્તાત કારણં તચ્ચ કીર્તય ॥ ૪.૨૩॥

૪.૨૪/૧લોમહર્ષણ ઉવાચ । શ઼ૃણુધ્વં કીર્તયિષ્યામિ
પૃથોર્વૈણ્યસ્ય વિસ્તરમ્ ।
૪.૨૪/૨એકાગ્રાઃ પ્રયતાશ્ચૈવ પુણ્યાર્થં વૈ દ્વિજર્ષભાઃ ॥ ૪.૨૪॥

૪.૨૫/૧નાશુચેઃ ક્ષુદ્રમનસો નાશિષ્યસ્યાવ્રતસ્ય ચ ।
૪.૨૫/૨કીર્તયેયમિદં વિપ્રાઃ કૃતઘ્નાયાહિતાય ચ ॥ ૪.૨૫॥

૪.૨૬/૧સ્વર્ગ્યં યશસ્યમાયુષ્યં ધન્યં વેદૈશ્ચ સમ્મિતમ્ ।
૪.૨૬/૨રહસ્યમ્ ઋષિભિઃ પ્રોક્તં શ઼ૃણુધ્વં વૈ યથાતથમ્ ॥ ૪.૨૬॥

૪.૨૭/૧યશ્ચેમં કીર્તયેન્ નિત્યં પૃથોર્વૈણ્યસ્ય વિસ્તરમ્ ।

૪.૨૭/૨બ્રાહ્મણેભ્યો નમસ્કૃત્ય ન સ શોચેત્ કૃતાકૃતમ્ ॥ ૪.૨૭॥

૪.૨૮/૧આસીદ્ ધર્મસ્ય સંગોપ્તા પૂર્વમત્રિસમઃ પ્રભુઃ ।
૪.૨૮/૨અત્રિવંશે સમુત્પન્નસ્ત્વઙ્ગો નામ પ્રજાપતિઃ ॥ ૪.૨૮॥

૪.૨૯/૧તસ્ય પુત્રોઽભવદ્ વેણો નાત્યર્થં ધર્મકોવિદઃ ।
૪.૨૯/૨જાતો મૃત્યુસુતાયાં વૈ સુનીથાયાં પ્રજાપતિઃ ॥ ૪.૨૯॥

૪.૩૦/૧સ માતામહદોષેણ તેન કાલાત્મજાત્મજઃ ।
૪.૩૦/૨સ્વધર્મં પૃષ્ઠતઃ કૃત્વા કામલોભેષ્વવર્તત ॥ ૪.૩૦॥

૪.૩૧/૧મર્યાદાં ભેદયામાસ ધર્મોપેતાં સ પાર્થિવઃ ।
૪.૩૧/૨વેદધર્માન્ અતિક્રમ્ય સોઽધર્મનિરતોઽભવત્ ॥ ૪.૩૧॥

૪.૩૨/૧નિઃસ્વાધ્યાયવષટ્કારાઃ પ્રજાસ્તસ્મિન્ પ્રજાપતૌ ।
૪.૩૨/૨પ્રવૃત્તં ન પપુઃ સોમં હુતં યજ્ઞેષુ દેવતાઃ ॥ ૪.૩૨॥

૪.૩૩/૧ન યષ્ટવ્યં ન હોતવ્યમિતિ તસ્ય પ્રજાપતેઃ ।
૪.૩૩/૨આસીત્ પ્રતિજ્ઞા ક્રૂરેયં વિનાશે પ્રત્યુપસ્થિતે ॥ ૪.૩૩॥

૪.૩૪/૧અહમિજ્યશ્ચ યષ્ટા ચ યજ્ઞશ્ચેતિ ભૃગૂદ્વહ ।
૪.૩૪/૨મયિ યજ્ઞો વિધાતવ્યો મયિ હોતવ્યમિત્યપિ ॥ ૪.૩૪॥

૪.૩૫/૧તમતિક્રાન્તમર્યાદમાદદાનમસામ્પ્રતમ્ ।
૪.૩૫/૨ઊચુર્મહર્ષયઃ સર્વે મરીચિપ્રમુખાસ્તદા ॥ ૪.૩૫॥

૪.૩૬/૧વયં દીક્ષાં પ્રવેક્ષ્યામઃ સંવત્સરગણાન્ બહૂન્ ।
૪.૩૬/૨અધર્મં કુરુ મા વેણ એષ ધર્મઃ સનાતનઃ ॥ ૪.૩૬॥

૪.૩૭/૧નિધનેઽત્રેઃ પ્રસૂતસ્ત્વં પ્રજાપતિરસંશયમ્ ।
૪.૩૭/૨પ્રજાશ્ચ પાલયિષ્યેઽહમિતીહ સમયઃ કૃતઃ ॥ ૪.૩૭॥

૪.૩૮/૧તાંસ્તથા બ્રુવતઃ સર્વાન્ મહર્ષીન્ અબ્રવીત્ તદા ।
૪.૩૮/૨વેણઃ પ્રહસ્ય દુર્બુદ્ધિરિમમર્થમનર્થવિત્ ॥ ૪.૩૮॥

૪.૩૯/૧વેણ ઉવાચ । સ્રષ્ટા ધર્મસ્ય કશ્ચાન્યઃ શ્રોતવ્યં કસ્ય વા મયા ।
૪.૩૯/૨શ્રુતવીર્યતપઃસત્યૈર્મયા વા કઃ સમો ભુવિ ॥ ૪.૩૯॥

૪.૪૦/૧પ્રભવં સર્વભૂતાનાં ધર્માણાં ચ વિશેષતઃ ।
૪.૪૦/૨સમ્મૂઢા ન વિદુર્નૂનં ભવન્તો માં વિચેતસઃ ॥ ૪.૪૦॥

૪.૪૧/૧ઇચ્છન્ દહેયં પૃથિવીં પ્લાવયેયં જલૈસ્તથા ।
૪.૪૧/૨દ્યાં વૈ ભુવં ચ રુન્ધેયં નાત્ર કાર્યા વિચારણા ॥ ૪.૪૧॥

૪.૪૨/૧યદા ન શક્યતે મોહાદ્ અવલેપાચ્ચ પાર્થિવઃ ।
૪.૪૨/૨અપનેતું તદા વેણસ્તતઃ ક્રુદ્ધા મહર્ષયઃ ॥ ૪.૪૨॥

૪.૪૩/૧તં નિગૃહ્ય મહાત્માનો વિસ્ફુરન્તં મહાબલમ્ ।
૪.૪૩/૨તતોઽસ્ય સવ્યમૂરું તે મમન્થુર્જાતમન્યવઃ ॥ ૪.૪૩॥

૪.૪૪/૧તસ્મિન્ નિમથ્યમાને વૈ રાજ્ઞ ઊરૌ તુ જજ્ઞિવાન્ ।
૪.૪૪/૨હ્રસ્વોઽતિમાત્રઃ પુરુષઃ કૃષ્ણશ્ચેતિ બભૂવ હ ॥ ૪.૪૪॥

૪.૪૫/૧સ ભીતઃ પ્રાઞ્જલિર્ભૂત્વા તસ્થિવાન્ દ્વિજસત્તમાઃ ।
૪.૪૫/૨તમત્રિર્વિહ્વલં દૃષ્ટ્વા નિષીદેત્યબ્રવીત્ તદા ॥ ૪.૪૫॥

૪.૪૬/૧નિષાદવંશકર્તાસૌ બભૂવ વદતાં વરાઃ ।
૪.૪૬/૨ધીવરાન્ અસૃજચ્ચાપિ વેણકલ્મષસમ્ભવાન્ ॥ ૪.૪૬॥

૪.૪૭/૧યે ચાન્યે વિન્ધ્યનિલયાસ્તથા પર્વતસંશ્રયાઃ ।
૪.૪૭/૨અધર્મરુચયો વિપ્રાસ્તે તુ વૈ વેણકલ્મષાઃ ॥ ૪.૪૭॥

૪.૪૮/૧તતઃ પુનર્મહાત્માનઃ પાણિં વેણસ્ય દક્ષિણમ્ ।
૪.૪૮/૨અરણીમિવ સંરબ્ધા મમન્થુર્જાતમન્યવઃ ॥ ૪.૪૮॥

૪.૪૯/૧પૃથુસ્તસ્માત્ સમુત્પન્નઃ કરાજ્જ્વલનસંનિભઃ ।
૪.૪૯/૨દીપ્યમાનઃ સ્વવપુષા સાક્ષાદ્ અગ્નિરિવ જ્વલન્ ॥ ૪.૪૯॥

૪.૫૦/૧અથ સોઽજગવં નામ ધનુર્ગૃહ્ય મહારવમ્ ।
૪.૫૦/૨શરાંશ્ચ દિવ્યાન્ રક્ષાર્થં કવચં ચ મહાપ્રભમ્ ॥ ૪.૫૦॥

૪.૫૧/૧તસ્મિઞ્ જાતેઽથ ભૂતાનિ સમ્પ્રહૃષ્ટાનિ સર્વશઃ ।
૪.૫૧/૨સમાપેતુર્મહાભાગા વેણસ્તુ ત્રિદિવં યયૌ ॥ ૪.૫૧॥

૪.૫૨/૧સમુત્પન્નેન ભો વિપ્રાઃ સત્પુત્રેણ મહાત્મના ।
૪.૫૨/૨ત્રાતઃ સ પુરુષવ્યાઘ્રઃ પુંનામ્નો નરકાત્ તદા ॥ ૪.૫૨॥

૪.૫૩/૧તં સમુદ્રાશ્ચ નદ્યશ્ચ રત્નાન્યાદાય સર્વશઃ ।
૪.૫૩/૨તોયાનિ ચાભિષેકાર્થં સર્વ એવોપતસ્થિરે ॥ ૪.૫૩॥

૪.૫૪/૧પિતામહશ્ચ ભગવાન્ દેવૈરાઙ્ગિરસૈઃ સહ ।
૪.૫૪/૨સ્થાવરાણિ ચ ભૂતાનિ જઙ્ગમાનિ ચ સર્વશઃ ॥ ૪.૫૪॥

૪.૫૫/૧સમાગમ્ય તદા વૈણ્યમભ્યષિઞ્ચન્ નરાધિપમ્ ।
૪.૫૫/૨મહતા રાજરાજેન પ્રજાસ્તેનાનુરઞ્જિતાઃ ॥ ૪.૫૫ ॥

૪.૫૬/૧સોઽભિષિક્તો મહાતેજા વિધિવદ્ ધર્મકોવિદૈઃ ।
૪.૫૬/૨આધિરાજ્યે તદા રાજ્ઞાં પૃથુર્વૈણ્યઃ પ્રતાપવાન્ ॥ ૪.૫૬ ॥

૪.૫૭/૧પિત્રાપરઞ્જિતાસ્તસ્ય પ્રજાસ્તેનાનુરઞ્જિતાઃ ।
૪.૫૭/૨અનુરાગાત્ તતસ્તસ્ય નામ રાજાભ્યજાયત ॥ ૪.૫૭ ॥

૪.૫૮/૧આપસ્તસ્તમ્ભિરે તસ્ય સમુદ્રમભિયાસ્યતઃ ।
૪.૫૮/૨પર્વતાશ્ચ દદુર્માર્ગં ધ્વજભઙ્ગશ્ચ નાભવત્ ॥ ૪.૫૮ ॥

૪.૫૯/૧અકૃષ્ટપચ્યા પૃથિવી સિધ્યન્ત્યન્નાનિ ચિન્તનાત્ ।
૪.૫૯/૨સર્વકામદુઘા ગાવઃ પુટકે પુટકે મધુ ॥ ૪.૫૯ ॥

૪.૬૦/૧એતસ્મિન્ન્ એવ કાલે તુ યજ્ઞે પૈતામહે શુભે ।
૪.૬૦/૨સૂતઃ સૂત્યાં સમુત્પન્નઃ સૌત્યેઽહનિ મહામતિઃ ॥ ૪.૬૦ ॥

૪.૬૧/૧તસ્મિન્ન્ એવ મહાયજ્ઞે જજ્ઞે પ્રાજ્ઞોઽથ માગધઃ ।
૪.૬૧/૨પૃથોઃ સ્તવાર્થં તૌ તત્ર સમાહૂતૌ મહર્ષિભિઃ ॥ ૪.૬૧ ॥

૪.૬૨/૧તાવૂચુરૃષયઃ સર્વે સ્તૂયતામેષ પાર્થિવઃ ।
૪.૬૨/૨કર્મૈતદ્ અનુરૂપં વાં પાત્રં ચાયં નરાધિપઃ ॥ ૪.૬૨ ॥

૪.૬૩/૧તાવૂચતુસ્તદા સર્વાંસ્તાન્ ઋષીન્ સૂતમાગધૌ ।
૪.૬૩/૨આવાં દેવાન્ ઋષીંશ્ચૈવ પ્રીણયાવઃ સ્વકર્મભિઃ ॥ ૪.૬૩ ॥

૪.૬૪/૧ન ચાસ્ય વિદ્મો વૈ કર્મ નામ વા લક્ષણં યશઃ ।
૪.૬૪/૨સ્તોત્રં યેનાસ્ય કુર્યાવ રાજ્ઞસ્તેજસ્વિનો દ્વિજાઃ ॥ ૪.૬૪ ॥

૪.૬૫/૧ઋષિભિસ્તૌ નિયુક્તૌ તુ ભવિષ્યૈઃ સ્તૂયતામિતિ ।
૪.૬૫/૨યાનિ કર્માણિ કૃતવાન્ પૃથુઃ પશ્ચાન્ મહાબલઃ ॥ ૪.૬૫ ॥

૪.૬૬/૧તતઃ પ્રભૃતિ વૈ લોકે સ્તવેષુ મુનિસત્તમાઃ ।
૪.૬૬/૨આશીર્વાદાઃ પ્રયુજ્યન્તે સૂતમાગધબન્દિભિઃ ॥ ૪.૬૬ ॥

૪.૬૭/૧તયોઃ સ્તવાન્તે સુપ્રીતઃ પૃથુઃ પ્રાદાત્ પ્રજેશ્વરઃ ।
૪.૬૭/૨અનૂપદેશં સૂતાય મગધં માગધાય ચ ॥ ૪.૬૭ ॥

૪.૬૮/૧તં દૃષ્ટ્વા પરમપ્રીતાઃ પ્રજાઃ પ્રોચુર્મનીષિણઃ ।

૪.૬૮/૨વૃત્તીનામેષ વો દાતા ભવિષ્યતિ નરાધિપઃ ॥ ૪.૬૮॥

૪.૬૯/૧તતો વૈણ્યં મહાત્માનં પ્રજાઃ સમભિદુદ્રુવુઃ ।
૪.૬૯/૨ત્વં નો વૃત્તિં વિધત્સ્વેતિ મહર્ષિવચનાત્ તદા ॥ ૪.૬૯॥

૪.૭૦/૧સોઽભિદ્રુતઃ પ્રજાભિસ્તુ પ્રજાહિતચિકીર્ષયા ।
૪.૭૦/૨ધનુર્ગૃહ્ય પૃષત્કાંશ્ચ પૃથિવીમાદ્રવદ્ બલી ॥ ૪.૭૦॥

૪.૭૧/૧તતો વૈણ્યભયત્રસ્તા ગૌર્ભૂત્વા પ્રાદ્રવન્ મહી ।
૪.૭૧/૨તાં પૃથુર્ધનુરાદાય દ્રવન્તીમન્વધાવત ॥ ૪.૭૧॥

૪.૭૨/૧સા લોકાન્ બ્રહ્મલોકાદીન્ ગત્વા વૈણ્યભયાત્ તદા ।
૪.૭૨/૨પ્રદદર્શાગ્રતો વૈણ્યં પ્રગૃહીતશરાસનમ્ ॥ ૪.૭૨॥

૪.૭૩/૧જ્વલદ્ભિર્નિશિતૈર્બાણૈર્દીપ્તતેજસમન્તતઃ ।
૪.૭૩/૨મહાયોગં મહાત્માનં દુર્ધર્ષમમરૈરપિ ॥ ૪.૭૩॥

૪.૭૪/૧અલભન્તી તુ સા ત્રાણં વૈણ્યમેવાન્વપદ્યત ।
૪.૭૪/૨કૃતાઞ્જલિપુટા ભૂત્વા પૂજ્યા લોકૈસ્ત્રિભિસ્તદા ॥ ૪.૭૪॥

૪.૭૫/૧ઉવાચ વૈણ્યં નાધર્મં સ્ત્રીવધે પરિપશ્યસિ ।
૪.૭૫/૨કથં ધારયિતા ચાસિ પ્રજા રાજન્ વિના મયા ॥ ૪.૭૫॥

૪.૭૬/૧મયિ લોકાઃ સ્થિતા રાજન્ મયેદં ધાર્યતે જગત્ ।
૪.૭૬/૨મદ્વિનાશે વિનશ્યેયુઃ પ્રજાઃ પાર્થિવ વિદ્ધિ તત્ ॥ ૪.૭૬॥

૪.૭૭/૧ન મામર્હસિ હન્તું વૈ શ્રેયશ્ચેત્ ત્વં ચિકીર્ષસિ ।
૪.૭૭/૨પ્રજાનાં પૃથિવીપાલ શ૱ૃણુ ચેદં વચો મમ ॥ ૪.૭૭॥

૪.૭૮/૧ઉપાયતઃ સમારબ્ધાઃ સર્વે સિધ્યન્ત્યુપક્રમાઃ ।
૪.૭૮/૨ઉપાયં પશ્ય યેન ત્વં ધારયેથાઃ પ્રજામિમામ્ ॥ ૪.૭૮॥

૪.૭૯/૧હત્વાપિ માં ન શક્તસ્ત્વં પ્રજાનાં પોષણે નૃપ ।
૪.૭૯/૨અનુકૂલા ભવિષ્યામિ યચ્છ કોપં મહામતે ॥ ૪.૭૯॥

૪.૮૦/૧અવધ્યાં ચ સ્ત્રિયં પ્રાહુસ્તિર્યગ્યોનિગતેષ્વપિ ।
૪.૮૦/૨યદ્યેવં પૃથિવીપાલ ન ધર્મં ત્યક્તુમર્હસિ ॥ ૪.૮૦॥

૪.૮૧/૧એવં બહુવિધં વાક્યં શ્રુત્વા રાજા મહામનાઃ ।
૪.૮૧/૨કોપં નિગૃહ્ય ધર્માત્મા વસુધામિદમબ્રવીત્ ॥ ૪.૮૧॥

૪.૮૨/૧પૃથુરુવાચ । એકસ્યાર્થે તુ યો હન્યાદ્ આત્મનો વા પરસ્ય વા ।
૪.૮૨/૨બહૂન્ વા પ્રાણિનોઽનન્તં ભવેત્ તસ્યેહ પાતકમ્ ॥ ૪.૮૨॥

૪.૮૩/૧સુખમેધન્તિ બહવો યસ્મિંસ્તુ નિહતેઽશુભે ।
૪.૮૩/૨તસ્મિન્ હતે નાસ્તિ ભદ્રે પાતકં ચોપપાતકમ્ ॥ ૪.૮૩॥

૪.૮૪/૧સોઽહં પ્રજાનિમિત્તં ત્વાં હનિષ્યામિ વસુંધરે ।
૪.૮૪/૨યદિ મે વચનાન્ નાદ્ય કરિષ્યસિ જગદ્ધિતમ્ ॥ ૪.૮૪॥

૪.૮૫/૧ત્વાં નિહત્યાદ્ય બાણેન મચ્છાસનપરાઙ્મુખીમ્ ।
૪.૮૫/૨આત્માનં પ્રથયિત્વાહં પ્રજા ધારયિતા સ્વયમ્ ॥ ૪.૮૫॥

૪.૮૬/૧સા ત્વં શાસનમાસ્થાય મમ ધર્મભૃતાં વરે ।
૪.૮૬/૨સંજીવય પ્રજાઃ સર્વાઃ સમર્થા હ્યસિ ધારણે ॥ ૪.૮૬॥

૪.૮૭/૧દુહિતૃત્વં ચ મે ગચ્છ તત એનમહં શરમ્ ।
૪.૮૭/૨નિયચ્છેયં ત્વદ્વધાર્થમુદ્યન્તં ઘોરદર્શનમ્ ॥ ૪.૮૭॥

૪.૮૮/૧વસુધોવાચ । સર્વમેતદ્ અહં વીર વિધાસ્યામિ ન સંશયઃ ।
૪.૮૮/૨વત્સં તુ મમ સમ્પશ્ય ક્ષરેયં યેન વત્સલા ॥ ૪.૮૮॥

૪.૮૯/૧સમાં ચ કુરુ સર્વત્ર માં ત્વં ધર્મભૃતાં વર ।
૪.૮૯/૨યથા વિસ્યન્દમાનં મે ક્ષીરં સર્વત્ર ભાવયેત્ ॥ ૪.૮૯॥

૪.૯૦/૧લોમહર્ષણ ઉવાચ । તત ઉત્સારયામાસ શૈલાન્ શતસહસ્રશઃ ।
૪.૯૦/૨ધનુષ્કોટ્યા તદા વૈણ્યસ્તેન શૈલા વિવર્ધિતાઃ ॥ ૪.૯૦॥

૪.૯૧/૧નહિ પૂર્વવિસર્ગે વૈ વિષમે પૃથિવીતલે ।
૪.૯૧/૨સંવિભાગઃ પુરાણાં વા ગ્રામાણાં વાભવત્ તદા ॥ ૪.૯૧॥

૪.૯૨/૧ન સસ્યાનિ ન ગોરક્ષ્યં ન કૃષિર્ન વણિક્પથઃ ।
૪.૯૨/૨નૈવ સત્યાનૃતં ચાસીન્ ન લોભો ન ચ મત્સરઃ ॥ ૪.૯૨॥

૪.૯૩/૧વૈવસ્વતેઽન્તરે તસ્મિન્ સામ્પ્રતં સમુપસ્થિતે ।
૪.૯૩/૨વૈણ્યાત્ પ્રભૃતિ વૈ વિપ્રાઃ સર્વસ્યૈતસ્ય સમ્ભવઃ ॥ ૪.૯૩॥

૪.૯૪/૧યત્ર યત્ર સમં ત્વસ્યા ભૂમેરાસીત્ તદા દ્વિજાઃ ।
૪.૯૪/૨તત્ર તત્ર પ્રજાઃ સર્વા નિવાસં સમરોચયન્ ॥ ૪.૯૪॥

૪.૯૫/૧આહારઃ ફલમૂલાનિ પ્રજાનામભવત્ તદા ।
૪.૯૫/૨કૃચ્છ્રેણ મહતા યુક્ત ઇત્યેવમનુશુશ્રુમ ॥ ૪.૯૫॥

૪.૯૬/૧સ કલ્પયિત્વા વત્સં તુ મનું સ્વાયમ્ભુવં પ્રભુમ્ ।
૪.૯૬/૨સ્વપાણૌ પુરુષવ્યાઘ્રો દુદોહ પૃથિવીં તતઃ ॥ ૪.૯૬॥

૪.૯૭/૧સસ્યજાતાનિ સર્વાણિ પૃથુર્વૈણ્યઃ પ્રતાપવાન્ ।
૪.૯૭/૨તેનાન્નેન પ્રજાઃ સર્વા વર્તન્તેઽદ્યાપિ સર્વશઃ ॥ ૪.૯૭॥

૪.૯૮/૧ઋષયશ્ચ તદા દેવાઃ પિતરોઽથ સરીસૃપાઃ ।
૪.૯૮/૨દૈત્યા યક્ષાઃ પુણ્યજના ગન્ધર્વાઃ પર્વતા નગાઃ ॥ ૪.૯૮॥

૪.૯૯/૧એતે પુરા દ્વિજશ્રેષ્ઠા દુદુહુર્ધરણીં કિલ ।
૪.૯૯/૨ક્ષીરં વત્સશ્ચ પાત્રં ચ તેષાં દોગ્ધા પૃથક્
પૃથક્ ॥ ૪.૯૯॥

૪.૧૦૦/૧ઋષીણામભવત્ સોમો વત્સો દોગ્ધા બૃહસ્પતિઃ ।
૪.૧૦૦/૨ક્ષીરં તેષાં તપો બ્રહ્મ પાત્રં છન્દાંસિ ભો દ્વિજાઃ ॥ ૪.૧૦૦॥

૪.૧૦૧/૧દેવાનાં કાઞ્ચનં પાત્રં વત્સસ્તેષાં શતક્રતુઃ ।
૪.૧૦૧/૨ક્ષીરમોજસ્કરં ચૈવ દોગ્ધા ચ ભગવાન્ રવિઃ ॥ ૪.૧૦૧॥

૪.૧૦૨/૧પિતૃણાં રાજતં પાત્રં યમો વત્સઃ પ્રતાપવાન્ ।
૪.૧૦૨/૨અન્તકશ્ચાભવદ્ દોગ્ધા ક્ષીરં તેષાં સુધા સ્મૃતા ॥ ૪.૧૦૨॥

૪.૧૦૩/૧નાગાનાં તક્ષકો વત્સઃ પાત્રં ચાલાબુસંજ્ઞકમ્ ।
૪.૧૦૩/૨દોગ્ધા ત્વૈરાવતો નાગસ્તેષાં ક્ષીરં વિષં સ્મૃતમ્ ॥ ૪.૧૦૩॥

૪.૧૦૪/૧અસુરાણાં મધુર્દોગ્ધા ક્ષીરં માયામયં સ્મૃતમ્ ।
૪.૧૦૪/૨વિરોચનસ્તુ વત્સોઽભૂદ્ આયસં પાત્રમેવ ચ ॥ ૪.૧૦૪॥

૪.૧૦૫/૧યક્ષાણામામપાત્રં તુ વત્સો વૈશ્રવણઃ પ્રભુઃ ।
૪.૧૦૫/૨દોગ્ધા રજતનાભસ્તુ ક્ષીરાન્તર્ધાનમેવ ચ ॥ ૪.૧૦૫॥

૪.૧૦૬/૧સુમાલી રાક્ષસેન્દ્રાણાં વત્સઃ ક્ષીરં ચ શોણિતમ્ ।
૪.૧૦૬/૨દોગ્ધા રજતનાભસ્તુ કપાલં પાત્રમેવ ચ ॥ ૪.૧૦૬॥

૪.૧૦૭/૧ગન્ધર્વાણાં ચિત્રરથો વત્સઃ પાત્રં ચ પઙ્કજમ્ ।
૪.૧૦૭/૨દોગ્ધા ચ સુરુચિઃ ક્ષીરં તેષાં ગન્ધઃ શુચિઃ સ્મૃતઃ
॥ ૪.૧૦૭॥

૪.૧૦૮/૧શૈલં પાત્રં પર્વતાનાં ક્ષીરં રત્નૌષધીસ્તથા ।

૪.૧૦૮/૨વત્સસ્તુ હિમવાન્ આસીદ્ દોગ્ધા મેરુર્મહાગિરિઃ ॥ ૪.૧૦૮॥

૪.૧૦૯/૧પ્લક્ષો વત્સસ્તુ વૃક્ષાણાં દોગ્ધા શાલસ્તુ પુષ્પિતઃ ।
૪.૧૦૯/૨પાલાશપાત્રં ક્ષીરં ચ *ચ્છિન્નદગ્ધપ્રરોહણમ્ ॥ ૪.૧૦૯॥

૪.૧૧૦/૧સેયં ધાત્રી વિધાત્રી ચ પાવની ચ વસુંધરા ।
૪.૧૧૦/૨ચરાચરસ્ય સર્વસ્ય પ્રતિષ્ઠા યોનિરેવ ચ ॥ ૪.૧૧૦॥

૪.૧૧૧/૧સર્વકામદુઘા દોગ્ધ્રી સર્વસસ્યપ્રરોહણી ।
૪.૧૧૧/૨આસીદ્ ઇયં સમુદ્રાન્તા મેદિની પરિવિશ્રુતા ॥ ૪.૧૧૧॥

૪.૧૧૨/૧મધુકૈટભયોઃ કૃત્સ્ના મેદસા સમભિપ્લુતા ।
૪.૧૧૨/૨તેનેયં મેદિની દેવી ઉચ્યતે બ્રહ્મવાદિભિઃ ॥ ૪.૧૧૨॥

૪.૧૧૩/૧તતોઽભ્યુપગમાદ્ રાજ્ઞઃ પૃથોર્વૈણ્યસ્ય ભો દ્વિજાઃ ।
૪.૧૧૩/૨દુહિતૃત્વમનુપ્રાપ્તા દેવી પૃથ્વીતિ ચોચ્યતે ॥ ૪.૧૧૩॥

૪.૧૧૪/૧પૃથુના પ્રવિભક્તા ચ શોધિતા ચ વસુંધરા ।
૪.૧૧૪/૨સસ્યાકરવતી સ્ફીતા પુરપત્તનશાલિની ॥ ૪.૧૧૪॥

૪.૧૧૫/૧એવમ્પ્રભાવો વૈણ્યઃ સ રાજાસીદ્ રાજસત્તમઃ ।
૪.૧૧૫/૨નમસ્યશ્ચૈવ પૂજ્યશ્ચ ભૂતગ્રામૈર્ન સંશયઃ ॥ ૪.૧૧૫॥

૪.૧૧૬/૧બ્રાહ્મણૈશ્ચ મહાભાગૈર્વેદવેદાઙ્ગપારગૈઃ ।
૪.૧૧૬/૨પૃથુરેવ નમસ્કાર્યો બ્રહ્મયોનિઃ સનાતનઃ ॥ ૪.૧૧૬॥

૪.૧૧૭/૧પાર્થિવૈશ્ચ મહાભાગૈઃ પાર્થિવત્વમિહેચ્છુભિઃ ।
૪.૧૧૭/૨આદિરાજો નમસ્કાર્યઃ પૃથુર્વૈણ્યઃ પ્રતાપવાન્ ॥ ૪.૧૧૭॥

૪.૧૧૮/૧યોધૈરપિ ચ વિક્રાન્તૈઃ પ્રાપ્તુકામૈર્જયં યુધિ ।
૪.૧૧૮/૨આદિરાજો નમસ્કાર્યો યોધાનાં પ્રથમો નૃપઃ ॥ ૪.૧૧૮॥

૪.૧૧૯/૧યો હિ યોદ્ધા રણં યાતિ કીર્તયિત્વા પૃથું નૃપમ્ ।
૪.૧૧૯/૨સ ઘોરરૂપાત્ સંગ્રામાત્ ક્ષેમી ભવતિ કીર્તિમાન્ ॥ ૪.૧૧૯॥

૪.૧૨૦/૧વૈશ્યૈરપિ ચ વિત્તાઢ્યૈર્વૈશ્યવૃત્તિવિધાયિભિઃ ।
૪.૧૨૦/૨પૃથુરેવ નમસ્કાર્યો વૃત્તિદાતા મહાયશાઃ ॥ ૪.૧૨૦॥

૪.૧૨૧/૧તથૈવ શૂદ્રૈઃ શુચિભિસ્ત્રિવર્ણપરિચારિભિઃ ।
૪.૧૨૧/૨પૃથુરેવ નમસ્કાર્યઃ શ્રેયઃ પરમિહેપ્સુભિઃ ॥ ૪.૧૨૧॥

૪.૧૨૨/૧એતે વત્સવિશેષાશ્ચ દોગ્ધારઃ ક્ષીરમેવ ચ ।
૪.૧૨૨/૨પાત્રાણિ ચ મયોક્તાનિ કિં ભૂયો વર્ણયામિ વઃ ॥ ૪.૧૨૨॥

૫.૧/૧ઋષય ઊચુઃ । મન્વન્તરાણિ સર્વાણિ વિસ્તરેણ મહામતે ।
૫.૧/૨તેષાં પૂર્વવિસૃષ્ટિં ચ લોમહર્ષણ કીર્તય ॥ ૫.૧॥

૫.૨/૧યાવન્તો મનવશ્ચૈવ યાવન્તં કાલમેવ ચ ।
૫.૨/૨મન્વન્તરાણિ ભોઃ સૂત શ્રોતુમિચ્છામ તત્ત્વતઃ ॥ ૫.૨॥

૫.૩/૧લોમહર્ષણ ઉવાચ । ન શક્યો વિસ્તરો વિપ્રા વક્તું વર્ષશતૈરપિ ।
૫.૩/૨મન્વન્તરાણાં સર્વેષાં સંક્ષેપાચ્છૃણુત દ્વિજાઃ ॥ ૫.૩॥

૫.૪/૧સ્વાયમ્ભુવો મનુઃ પૂર્વં મનુઃ સ્વારોચિષસ્તથા ।
૫.૪/૨ઉત્તમસ્તામસશ્ચૈવ રૈવતશ્ચાક્ષુષસ્તથા ॥ ૫.૪॥

૫.૫/૧વૈવસ્વતશ્ચ ભો વિપ્રાઃ સામ્પ્રતં મનુરુચ્યતે ।
૫.૫/૨સાવર્ણિશ્ચ મનુસ્તદ્વદ્ રૈભ્યો રૌચ્યસ્તથૈવ ચ ॥ ૫.૫॥

૫.૬/૧તથૈવ મેરુસાવર્ણ્યશ્ચત્વારો મનવઃ સ્મૃતાઃ ।
૫.૬/૨અતીતા વર્તમાનાશ્ચ તથૈવાનાગતા દ્વિજાઃ ॥ ૫.૬॥

૫.૭/૧કીર્તિતા મનવસ્તુભ્યં મયૈવૈતે યથા શ્રુતાઃ ।
૫.૭/૨ઋષીંસ્ત્વેષાં પ્રવક્ષ્યામિ પુત્રાન્ દેવગણાંસ્તથા ॥ ૫.૭॥

૫.૮/૧મરીચિરત્રિર્ભગવાન્ અઙ્ગિરાઃ પુલહઃ ક્રતુઃ ।
૫.૮/૨પુલસ્ત્યશ્ચ વસિષ્ઠશ્ચ સપ્તૈતે બ્રહ્મણઃ સુતાઃ ॥ ૫.૮॥

૫.૯/૧ઉત્તરસ્યાં દિશિ તથા દ્વિજાઃ સપ્તર્ષયસ્તથા ।
૫.૯/૨આગ્નીધ્રશ્ચાગ્નિબાહુશ્ચ મેધ્યો મેધાતિથિર્વસુઃ ॥ ૫.૯॥

૫.૧૦/૧જ્યોતિષ્માન્ દ્યુતિમાન્ હવ્યઃ સવલઃ પુત્રસંજ્ઞકઃ ।
૫.૧૦/૨મનોઃ સ્વાયમ્ભુવસ્યૈતે દશ પુત્રા મહૌજસઃ ॥ ૫.૧૦॥

૫.૧૧/૧એતદ્ વૈ પ્રથમં વિપ્રા મન્વન્તરમુદાહૃતમ્ ।
૫.૧૧/૨ઔર્વો વસિષ્ઠપુત્રશ્ચ સ્તમ્બઃ કશ્યપ એવ ચ ॥ ૫.૧૧॥

૫.૧૨/૧પ્રાણો બૃહસ્પતિશ્ચૈવ દત્તોઽત્રિશ્ચ્યવનસ્તથા ।
૫.૧૨/૨એતે મહર્ષયો વિપ્રા વાયુપ્રોક્તા મહાવ્રતાઃ ॥ ૫.૧૨॥

૫.૧૩/૧દેવાશ્ચ તુષિતા નામ સ્મૃતાઃ સ્વારોચિષેઽન્તરે ।
૫.૧૩/૨હવિધ્રઃ સુકૃતિર્જ્યોતિરાપો મૂર્તિરપિ સ્મૃતઃ ॥ ૫.૧૩॥

પ.૧૪/૧પ્રતીતશ્ચ નભસ્યશ્ચ નભ ઊર્જસ્તથૈવ ચ ।
પ.૧૪/૨સ્વારોચિષસ્ય પુત્રાસ્તે મનોર્વિપ્રા મહાત્મનઃ ॥ પ.૧૪॥

પ.૧૫/૧કીર્તિતાઃ પૃથિવીપાલા મહાવીર્યપરાક્રમાઃ ।
પ.૧૫/૨દ્વિતીયમેતત્ કથિતં વિપ્રા મન્વન્તરં મયા ॥ પ.૧૫॥

પ.૧૬/૧ઇદં તૃતીયં વક્ષ્યામિ તદ્ બુધ્યધ્વં દ્વિજોત્તમાઃ ।
પ.૧૬/૨વસિષ્ઠપુત્રાઃ સપ્તાસન્ વાસિષ્ઠા ઇતિ વિશ્રુતાઃ ॥ પ.૧૬॥

પ.૧૭/૧હિરણ્યગર્ભસ્ય સુતા ઊર્જા જાતાઃ સુતેજસઃ ।
પ.૧૭/૨ઋષયોઽત્ર મયા પ્રોક્તાઃ કીર્ત્યમાનાન્ નિબોધત ॥ પ.૧૭॥

પ.૧૮/૧ઔત્તમેયાન્ મુનિશ્રેષ્ઠા દશ પુત્રાન્ મનોરિમાન્ ।
પ.૧૮/૨ઇષ ઊર્જસ્તનૂર્જસ્તુ મધુર્માધવ એવ ચ ॥ પ.૧૮॥

પ.૧૯/૧શુચિઃ શુક્રઃ સહશ્ચૈવ નભસ્યો નભ એવ ચ ।
પ.૧૯/૨ભાનવસ્તત્ર દેવાશ્ચ મન્વન્તરમુદાહૃતમ્ ॥ પ.૧૯॥

પ.૨૦/૧મન્વન્તરં ચતુર્થં વઃ કથયિષ્યામિ સામ્પ્રતમ્ ।
પ.૨૦/૨કાવ્યઃ પૃથુસ્તથૈવાગ્નિર્જહ્નુર્ધાતા દ્વિજોત્તમાઃ ॥ પ.૨૦॥

પ.૨૧/૧કપીવાન્ અકપીવાંશ્ચ તત્ર સપ્તર્ષયો દ્વિજાઃ ।
પ.૨૧/૨પુરાણે કીર્તિતા વિપ્રાઃ પુત્રાઃ પૌત્રાશ્ચ ભો દ્વિજાઃ ॥ પ.૨૧॥

પ.૨૨/૧તથા દેવગણાશ્ચૈવ તામસસ્યાન્તરે મનોઃ ।
પ.૨૨/૨ધુતિસ્તપસ્યઃ સુતપાસ્તપોભૂતઃ સનાતનઃ ॥ પ.૨૨॥

પ.૨૩/૧તપોરતિરકલ્માષસ્તન્વી ધન્વી પરંતપઃ ।
પ.૨૩/૨તામસસ્ય મનોરેતે દશ પુત્રાઃ પ્રકીર્તિતાઃ ॥ પ.૨૩॥

પ.૨૪/૧વાયુપ્રોક્તા મુનિશ્રેષ્ઠાશ્ચતુર્થં ચૈતદ્ અન્તરમ્ ।
પ.૨૪/૨દેવબાહુર્યદુધ્રશ્ચ મુનિર્વેદશિરાસ્તથા ॥ પ.૨૪॥

પ.૨૫/૧હિરણ્યરોમા પર્જન્ય ઊર્ધ્વબાહુશ્ચ સોમજઃ ।
પ.૨૫/૨સત્યનેત્રસ્તથાત્રેય એતે સપ્તર્ષયોઽપરે ॥ પ.૨૫॥

પ.૨૬/૧દેવાશ્ચાભૂતરજસસ્તથા પ્રકૃતયઃ સ્મૃતાઃ ।
પ.૨૬/૨વારિપ્લવશ્ચ રૈભ્યશ્ચ મનોરન્તરમુચ્યતે ॥ પ.૨૬॥

પ.૨૭/૧અથ પુત્રાન્ ઇમાંસ્તસ્ય બુધ્યધ્વં ગદતો મમ ।

પ.૨૭/૨ધૃતિમાન્ અવ્યયો યુક્તસ્તત્ત્વદર્શી નિરુત્સુકઃ ॥ પ.૨૭॥

પ.૨૮/૧આરણ્યશ્ચ પ્રકાશશ્ચ નિર્મોહઃ સત્યવાક્ કૃતી ।
પ.૨૮/૨રૈવતસ્ય મનોઃ પુત્રાઃ પઞ્ચમં ચૈતદ્ અન્તરમ્ ॥ પ.૨૮॥

પ.૨૯/૧ષષ્ઠં તુ સમ્પ્રવક્ષ્યામિ તદ્ બુધ્યધ્વં દ્વિજોત્તમાઃ ।
પ.૨૯/૨ભૃગુર્નભો વિવસ્વાંશ્ચ સુધામા વિરજાસ્તથા ॥ પ.૨૯॥

પ.૩૦/૧અતિનામા સહિષ્ણુશ્ચ સપ્તૈતે ચ મહર્ષયઃ ।
પ.૩૦/૨ચાક્ષુષસ્યાન્તરે વિપ્રા મનોર્દેવાસ્ત્વિમે સ્મૃતાઃ ॥ પ.૩૦॥

પ.૩૧/૧આબાલપ્રથિતાસ્તે વૈ પૃથક્ત્વેન દિવૌકસઃ ।
પ.૩૧/૨લેખાશ્ચ નામતો વિપ્રાઃ પઞ્ચ દેવગણાઃ સ્મૃતાઃ ॥ પ.૩૧॥

પ.૩૨/૧ઋષેરઙ્ગિરસઃ પુત્રા મહાત્માનો મહૌજસઃ ।
પ.૩૨/૨નાડ્વલેયા મુનિશ્રેષ્ઠા દશ પુત્રાસ્તુ વિશ્રુતાઃ ॥ પ.૩૨॥

પ.૩૩/૧રુરુપ્રભૃતયો વિપ્રાશ્ચાક્ષુષસ્યાન્તરે મનોઃ ।
પ.૩૩/૨ષષ્ઠં મન્વન્તરં પ્રોક્તં સપ્તમં તુ નિબોધત ॥ પ.૩૩॥

પ.૩૪/૧અત્રિર્વસિષ્ઠો ભગવાન્ કશ્યપશ્ચ મહાન્ ઋષિઃ ।
પ.૩૪/૨ગૌતમોઽથ ભરદ્વાજો વિશ્વામિત્રસ્તથૈવ ચ ॥ પ.૩૪॥

પ.૩૫/૧તથૈવ પુત્રો ભગવાન્ ઋચીકસ્ય મહાત્મનઃ ।
પ.૩૫/૨સપ્તમો જમદગ્નિશ્ચ ઋષયઃ સામ્પ્રતં દિવિ ॥ પ.૩૫॥

પ.૩૬/૧સાધ્યા રુદ્રાશ્ચ વિશ્વે ચ વસવો મરુતસ્તથા ।
પ.૩૬/૨આદિત્યાશ્ચાશ્વિનૌ ચાપિ દેવૌ વૈવસ્વતૌ સ્મૃતૌ ॥ પ.૩૬॥

પ.૩૭/૧મનોર્વૈવસ્વતસ્યૈતે વર્તન્તે સામ્પ્રતેઽન્તરે ।
પ.૩૭/૨ઇક્ષ્વાકુપ્રમુખાશ્ચૈવ દશ પુત્રા મહાત્મનઃ ॥ પ.૩૭॥

પ.૩૮/૧એતેષાં કીર્તિતાનાં તુ મહર્ષીણાં મહૌજસામ્ ।
પ.૩૮/૨તેષાં પુત્રાશ્ચ પૌત્રાશ્ચ દિક્ષુ સર્વાસુ ભો દ્વિજાઃ ॥ પ.૩૮॥

પ.૩૯/૧મન્વન્તરેષુ સર્વેષુ પ્રાગ્ આસન્ સપ્ત સપ્તકાઃ ।
પ.૩૯/૨લોકે ધર્મવ્યવસ્થાર્થં લોકસંરક્ષણાય ચ ॥ પ.૩૯॥

પ.૪૦/૧મન્વન્તરે વ્યતિક્રાન્તે ચત્વારઃ સપ્તકા ગણાઃ ।
પ.૪૦/૨કૃત્વા કર્મ દિવં યાન્તિ બ્રહ્મલોકમનામયમ્ ॥ પ.૪૦॥

પ.૪૧/૧તતોઽન્યે તપસા યુક્તાઃ સ્થાનં તત્ પૂરયન્ત્યુત ।
પ.૪૧/૨અતીતા વર્તમાનાશ્ચ ક્રમેણૈતેન ભો દ્વિજાઃ ॥ પ.૪૧॥

પ.૪૨/૧અનાગતાશ્ચ સપ્તૈતે સ્મૃતા દિવિ મહર્ષયઃ ।
પ.૪૨/૨મનોરન્તરમાસાદ્ય સાવર્ણસ્યેહ ભો દ્વિજાઃ ॥ પ.૪૨॥

પ.૪૩/૧રામો વ્યાસસ્તથાત્રેયો દીપ્તિમન્તો બહુશ્રુતાઃ ।
પ.૪૩/૨ભારદ્વાજસ્તથા દ્રૌણિરશ્વત્થામા મહાદ્યુતિઃ ॥ પ.૪૩॥

પ.૪૪/૧ગૌતમશ્ચાજરશ્ચૈવ શરદ્વાન્ નામ ગૌતમઃ ।
પ.૪૪/૨કૌશિકો ગાલવશ્ચૈવ ઔર્વઃ કાશ્યપ એવ ચ ॥ પ.૪૪॥

પ.૪૫/૧એતે સપ્ત મહાત્માનો ભવિષ્યા મુનિસત્તમાઃ ।
પ.૪૫/૨વૈરી ચૈવાધ્વરીવાંશ્ચ શમનો ધૃતિમાન્ વસુઃ ॥ પ.૪૫॥

પ.૪૬/૧અરિષ્ટશ્ચાપ્યધૃષ્ટશ્ચ વાજી સુમતિરેવ ચ ।
પ.૪૬/૨સાવર્ણસ્ય મનોઃ પુત્રા ભવિષ્યા મુનિસત્તમાઃ ॥ પ.૪૬॥

પ.૪૭/૧એતેષાં કલ્યમુત્થાય કીર્તનાત્ સુખમેધતે ।
પ.૪૭/૨યશશ્ચાપ્નોતિ સુમહદ્ આયુષ્માંશ્ચ ભવેન્ નરઃ ॥ પ.૪૭॥

પ.૪૮/૧એતાન્યુક્તાનિ ભો વિપ્રાઃ સપ્ત સપ્ત ચ તત્ત્વતઃ ।
પ.૪૮/૨મન્વન્તરાણિ સંક્ષેપાચ્છૃણુતાનાગતાન્યપિ ॥ પ.૪૮॥

પ.૪૯/૧સાવર્ણા મનવો વિપ્રાઃ પઞ્ચ તાંશ્ચ નિબોધત ।
પ.૪૯/૨એકો વૈવસ્વતસ્તેષાં ચત્વારસ્તુ પ્રજાપતેઃ ॥ પ.૪૯॥

પ.૫૦/૧પરમેષ્ઠિસુતા વિપ્રા મેરુસાવર્ણ્યતાં ગતાઃ ।
પ.૫૦/૨દક્ષસ્યૈતે હિ દૌહિત્રાઃ પ્રિયાયાસ્તનયા નૃપાઃ ॥ પ.૫૦॥

પ.૫૧/૧મહતા તપસા યુક્તા મેરુપૃષ્ઠે મહૌજસઃ ।
પ.૫૧/૨રુચેઃ પ્રજાપતેઃ પુત્રો રૌચ્યો નામ મનુઃ સ્મૃતઃ ॥ પ.૫૧॥

પ.૫૨/૧ભૂત્યાં ચોત્પાદિતો દેવ્યાં ભૌત્યો નામ રુચેઃ સુતઃ ।
પ.૫૨/૨અનાગતાશ્ચ સપ્તૈતે કલ્પેઽસ્મિન્ મનવઃ સ્મૃતાઃ ॥ પ.૫૨॥

પ.૫૩/૧તૈરિયં પૃથિવી સર્વા સપ્તદ્વીપા સપત્તના ।
પ.૫૩/૨પૂર્ણં યુગસહસ્રં તુ પરિપાલ્યા દ્વિજોત્તમાઃ ॥ પ.૫૩॥

પ.૫૪/૧પ્રજાપતિશ્ચ તપસા સંહારં તેષુ નિત્યશઃ ।
પ.૫૪/૨યુગાનિ સપ્તતિસ્તાનિ સાગ્રાણિ કથિતાનિ ચ ॥ પ.૫૪॥

પ.પપ/૧કૃતત્રેતાદિયુક્તાનિ મનોરન્તરમુચ્યતે ।
પ.પપ/૨ચતુર્દશૈતે મનવઃ કથિતાઃ કીર્તિવર્ધનાઃ ॥ પ.પપ॥

પ.પ૬/૧વેદેષુ સપુરાણેષુ સર્વેષુ પ્રભવિષ્ણવઃ ।
પ.પ૬/૨પ્રજાનાં પતયો વિપ્રા ધન્યમેષાં પ્રકીર્તનમ્ ॥ પ.પ૬॥

પ.પ૭/૧મન્વન્તરેષુ સંહારાઃ સંહારાન્તેષુ સમ્ભવાઃ ।
પ.પ૭/૨ન શક્યતેઽન્તસ્તેષાં વૈ વક્તું વર્ષશતૈરપિ ॥ પ.પ૭॥

પ.પ૮/૧વિસર્ગસ્ય પ્રજાનાં વૈ સંહારસ્ય ચ ભો દ્વિજાઃ ।
પ.પ૮/૨મન્વન્તરેષુ સંહારાઃ શ્રૂયન્તે દ્વિજસત્તમાઃ ॥ પ.પ૮॥

પ.પ૯/૧સશેષાસ્તત્ર તિષ્ઠન્તિ દેવાઃ સમર્ષિભિઃ સહ ।
પ.પ૯/૨તપસા બ્રહ્મચર્યેણ શ્રુતેન ચ સમન્વિતાઃ ॥ પ.પ૯॥

પ.૬૦/૧પૂર્ણે યુગસહસ્રે તુ કલ્પો નિઃશેષ ઉચ્યતે ।
પ.૬૦/૨તત્ર ભૂતાનિ સર્વાણિ દગ્ધાન્યાદિત્યરશ્મિભિઃ ॥ પ.૬૦॥

પ.૬૧/૧બ્રહ્માણમગ્રતઃ કૃત્વા સહાદિત્યગણૈર્દ્વિજાઃ ।
પ.૬૧/૨પ્રવિશન્તિ સુરશ્રેષ્ઠં હરિનારાયણં પ્રભુમ્ ॥ પ.૬૧॥

પ.૬૨/૧સ્રષ્ટારં સર્વભૂતાનાં કલ્પાન્તેષુ પુનઃ પુનઃ ।
પ.૬૨/૨અવ્યક્તઃ શાશ્વતો દેવસ્તસ્ય સર્વમિદં જગત્ ॥ પ.૬૨॥

પ.૬૩/૧અત્ર વઃ કીર્તયિષ્યામિ મનોર્વૈવસ્વતસ્ય વૈ ।
પ.૬૩/૨વિસર્ગં મુનિશાર્દૂલાઃ સામ્પ્રતસ્ય મહાદ્યુતેઃ ॥ પ.૬૩॥

પ.૬૪/૧અત્ર વંશપ્રસઙ્ગેન કથ્યમાનં પુરાતનમ્ ।
પ.૬૪/૨યત્રોત્પન્નો મહાત્મા સ હરિર્વૃષ્ણિકુલે પ્રભુઃ ॥ પ.૬૪॥

૬.૧/૧લોમહર્ષણ ઉવાચ । વિવસ્વાન્ કશ્યપાજ્જજ્ઞે દાક્ષાયણ્યાં દ્વિજોત્તમાઃ ।
૬.૧/૨તસ્ય ભાર્યાભવત્ સંજ્ઞા ત્વાષ્ટ્રી દેવી વિવસ્વતઃ ॥ ૬.૧॥

૬.૨/૧સુરેશ્વરીતિ વિખ્યાતા ત્રિષુ લોકેષુ ભાવિની ।
૬.૨/૨સા વૈ ભાર્યા ભગવતો માર્તણ્ડસ્ય મહાત્મનઃ ॥ ૬.૨॥

૬.૩/૧ભર્તૃરૂપેણ નાતુષ્યદ્ રૂપયૌવનશાલિની ।
૬.૩/૨સંજ્ઞા નામ સુતપસા સુદીપ્તેન સમન્વિતા ॥ ૬.૩॥

૬.૪/૧આદિત્યસ્ય હિ તદ્ રૂપં મણ્ડલસ્ય સુતેજસા ।

૬.૪/૨ગાત્રેષુ પરિદગ્ધં વૈ નાતિકાન્તમિવાભવત્ ॥ ૬.૪॥

૬.૫/૧ન ખલ્વયં મૃતોઽણ્ડસ્થ ઇતિ સ્નેહાદ્ અભાષત ।
૬.૫/૨અજાનન્ કાશ્યપસ્તસ્માન્ માર્તણ્ડ ઇતિ ચોચ્યતે ॥ ૬.૫॥

૬.૬/૧તેજસ્ત્વભ્યધિકં તસ્ય નિત્યમેવ વિવસ્વતઃ ।
૬.૬/૨યેનાતિતાપયામાસ ત્રીંલ્લોકાન્ કશ્યપાત્મજઃ ॥ ૬.૬॥

૬.૭/૧ત્રીણ્યપત્યાનિ ભો વિપ્રાઃ સંજ્ઞાયાં તપતાં વરઃ ।
૬.૭/૨આદિત્યો જનયામાસ કન્યાં દ્વૌ ચ પ્રજાપતી ॥ ૬.૭॥

૬.૮/૧મનુર્વૈવસ્વતઃ પૂર્વં શ્રાદ્ધદેવઃ પ્રજાપતિઃ ।
૬.૮/૨યમશ્ચ યમુના ચૈવ યમજૌ સમ્બભૂવતુઃ ॥ ૬.૮॥

૬.૯/૧શ્યામવર્ણં તુ તદ્ રૂપં સંજ્ઞા દૃષ્ટ્વા વિવસ્વતઃ ।
૬.૯/૨અસહન્તી તુ સ્વાં છાયાં સવર્ણાં નિર્મમે તતઃ ॥ ૬.૯॥

૬.૧૦/૧માયામયી તુ સા સંજ્ઞા તસ્યાં છાયાસમુત્થિતામ્ ।
૬.૧૦/૨પ્રાઞ્જલિઃ પ્રણતા ભૂત્વા છાયા સંજ્ઞાં દ્વિજોત્તમાઃ ॥ ૬.૧૦॥

૬.૧૧/૧ઉવાચ કિં મયા કાર્યં કથયસ્વ શુચિસ્મિતે ।
૬.૧૧/૨સ્થિતાસ્મિ તવ નિર્દેશે શાધિ માં વરવર્ણિનિ ॥ ૬.૧૧॥

૬.૧૨/૧સંજ્ઞોવાચ । અહં યાસ્યામિ ભદ્રં તે સ્વમેવ ભવનં પિતુઃ ।
૬.૧૨/૨ત્વયૈવ ભવને મહ્યં વસ્તવ્યં નિર્વિશઙ્કયા ॥ ૬.૧૨॥

૬.૧૩/૧ઇમૌ ચ બાલકૌ મહ્યં કન્યા ચેયં સુમધ્યમા ।
૬.૧૩/૨સમ્ભાવ્યાસ્તે ન ચાખ્યેયમિદં ભગવતે ક્વચિત્ ॥ ૬.૧૩॥

૬.૧૪/૧સવર્ણોવાચ । આ કચગ્રહણાદ્ દેવિ આ શાપાન્ નૈવ કર્હિચિત્ ।
૬.૧૪/૨આખ્યાસ્યામિ નમસ્તુભ્યં ગચ્છ દેવિ યથાસુખમ્ ॥ ૬.૧૪॥

૬.૧૫/૧લોમહર્ષણ ઉવાચ । સમાદિશ્ય સવર્ણાં તુ તથેત્યુક્તા તયા ચ સા ।
૬.૧૫/૨ત્વષ્ટુઃ સમીપમગમદ્ વ્રીડિતેવ તપસ્વિની ॥ ૬.૧૫॥

૬.૧૬/૧પિતુઃ સમીપગા સા તુ પિત્રા નિર્ભર્ત્સિતા શુભા ।
૬.૧૬/૨ભર્તુઃ સમીપં ગચ્છેતિ નિયુક્તા ચ પુનઃ પુનઃ ॥ ૬.૧૬॥

૬.૧૭/૧આગચ્છદ્ વડવા ભૂત્વા *આચ્છાદ્ય રૂપમનિન્દિતા ।
૬.૧૭/૨કુરૂન્ અથોત્તરાન્ ગત્વા તૃણાન્યથ ચચાર હ ॥ ૬.૧૭॥

૬.૧૮/૧દ્વિતીયાયાં તુ સંજ્ઞાયાં સંજ્ઞેયમિતિ ચિન્તયન્ ।
૬.૧૮/૨આદિત્યો જનયામાસ પુત્રમાત્મસમં તદા ॥ ૬.૧૮॥

૬.૧૯/૧પૂર્વજસ્ય મનોર્વિપ્રાઃ સદૃશોઽયમિતિ પ્રભુઃ ।
૬.૧૯/૨મનુરેવાભવન્ નામ્ના સાવર્ણ ઇતિ ચોચ્યતે ॥ ૬.૧૯॥

૬.૨૦/૧દ્વિતીયો યઃ સુતસ્તસ્યાઃ સ વિજ્ઞેયઃ શનૈશ્ચરઃ ।
૬.૨૦/૨સંજ્ઞા તુ પાર્થિવી વિપ્રાઃ સ્વસ્ય પુત્રસ્ય વૈ તદા ॥ ૬.૨૦॥

૬.૨૧/૧ચકારાભ્યધિકં સ્નેહં ન તથા પૂર્વજેષુ વૈ ।
૬.૨૧/૨મનુસ્તસ્યાઃ ક્ષમત્ તત્ તુ યમસ્તસ્યા ન ચક્ષમે ॥ ૬.૨૧॥

૬.૨૨/૧સ વૈ રોષાચ્ચ બાલ્યાચ્ચ ભાવિનોઽર્થસ્ય વાનઘ ।
૬.૨૨/૨પદા સંતર્જયામાસ સંજ્ઞાં વૈવસ્વતો યમઃ ॥ ૬.૨૨॥

૬.૨૩/૧તં શશાપ તતઃ ક્રોધાત્ સાવર્ણજનની તદા ।
૬.૨૩/૨ચરણઃ પતતામેષ તવેતિ ભૃશદુઃખિતા ॥ ૬.૨૩॥

૬.૨૪/૧યમસ્તુ તત્ પિતુઃ સર્વં પ્રાઞ્જલિઃ પ્રત્યવેદયત્ ।
૬.૨૪/૨ભૃશં શાપભયોદ્વિગ્નઃ સંજ્ઞાવાક્યૈર્વિશઙ્કિતઃ ॥ ૬.૨૪॥

૬.૨૫/૧શાપોઽયં વિનિવર્તેત પ્રોવાચ પિતરં દ્વિજાઃ ।
૬.૨૫/૨માત્રા સ્નેહેન સર્વેષુ વર્તિતવ્યં સુતેષુ વૈ ॥ ૬.૨૫॥

૬.૨૬/૧સેયમસ્માન્ અપાસ્યેહ વિવસ્વન્ સમ્બુભૂષતિ ।
૬.૨૬/૨તસ્યાં મયોદ્યતઃ પાદો ન તુ દેહે નિપાતિતઃ ॥ ૬.૨૬॥

૬.૨૭/૧બાલ્યાદ્ વા યદિ વા લૌલ્યાન્ મોહાત્ તત્ ક્ષન્તુમર્હસિ ।
૬.૨૭/૨શપ્તોઽહમસ્મિ લોકેશ જનન્યા તપતાં વર ।
૬.૨૭/૩તવ પ્રસાદાચ્ચરણો ન પતેન્ મમ ગોપતે ॥ ૬.૨૭॥

૬.૨૮/૧વિવસ્વાન્ ઉવાચ । અસંશયં પુત્ર મહદ્ ભવિષ્યત્યત્ર કારણમ્ ।
૬.૨૮/૨યેન ત્વામાવિશત્ ક્રોધો ધર્મજ્ઞં સત્યવાદિનમ્ ॥ ૬.૨૮॥

૬.૨૯/૧ન શક્યમેતન્ મિથ્યા તુ કર્તું માતૃવચસ્તવ ।
૬.૨૯/૨કૃમયો માંસમાદાય યાસ્યન્ત્યવનિમેવ ચ ॥ ૬.૨૯॥

૬.૩૦/૧કૃતમેવં વચસ્તથ્યં માતુસ્તવ ભવિષ્યતિ ।
૬.૩૦/૨શાપસ્ય પરિહારેણ ત્વં ચ ત્રાતો ભવિષ્યસિ ॥ ૬.૩૦॥

૬.૩૧/૧આદિત્યશ્ચાબ્રવીત્ સંજ્ઞાં કિમર્થં તનયેષુ વૈ ।

૬.૩૧/૨તુલ્યેષ્વભ્યધિકઃ સ્નેહ એકસ્મિન્ ક્રિયતે ત્વયા ॥ ૬.૩૧॥

૬.૩૨/૧સા તત્ પરિહરન્તી તુ નાચચક્ષે વિવસ્વતે ।
૬.૩૨/૨સ ચાત્માનં સમાધાય યોગાત્ તથ્યમપશ્યત ॥ ૬.૩૨॥

૬.૩૩/૧તાં શપ્તુકામો ભગવાન્ નાશપન્ મુનિસત્તમાઃ ।
૬.૩૩/૨મૂર્ધજેષુ નિજગ્રાહ સ તુ તાં મુનિસત્તમાઃ ॥ ૬.૩૩॥

૬.૩૪/૧તતઃ સર્વં યથાવૃત્તમાચચક્ષે વિવસ્વતે ।
૬.૩૪/૨વિવસ્વાન્ અથ તચ્છ્રુત્વા ક્રુદ્ધસ્ત્વષ્ટારમભ્યગાત્ ॥ ૬.૩૪॥

૬.૩૫/૧દૃષ્ટ્વા તુ તં યથાન્યાયમર્ચયિત્વા વિભાવસુમ્ ।
૬.૩૫/૨નિર્દગ્ધુકામં રોષેણ સાન્ત્વયામાસ વૈ તદા ॥ ૬.૩૫॥

૬.૩૬/૧ત્વષ્ટોવાચ । તવાતિતેજસાવિષ્ટમિદં રૂપં ન શોભતે ।
૬.૩૬/૨અસહન્તી ચ સંજ્ઞા સા વને ચરતિ શાડ્વલે ॥ ૬.૩૬॥

૬.૩૭/૧દ્રષ્ટા હિ તાં ભવાન્ અદ્ય સ્વાં ભાર્યાં શુભચારિણીમ્ ।
૬.૩૭/૨શ્લાઘ્યાં યોગબલોપેતાં યોગમાસ્થાય ગોપતે ॥ ૬.૩૭॥

૬.૩૮/૧અનુકૂલં તુ તે દેવ યદિ સ્યાન્ મમ સમ્મતમ્ ।
૬.૩૮/૨રૂપં નિર્વર્તયામ્યદ્ય તવ કાન્તમરિંદમ ॥ ૬.૩૮॥

૬.૩૯/૧તતોઽભ્યુપગમાત્ ત્વષ્ટા માર્તણ્ડસ્ય વિવસ્વતઃ ।
૬.૩૯/૨ભ્રમિમારોપ્ય તત્ તેજઃ શાતયામાસ ભો દ્વિજાઃ ॥ ૬.૩૯॥

૬.૪૦/૧તતો નિર્ભાસિતં રૂપં તેજસા સંહતેન વૈ ।
૬.૪૦/૨કાન્તાત્ કાન્તતરં દ્રષ્ટુમધિકં શુશુભે તદા ॥ ૬.૪૦॥

૬.૪૧/૧દદર્શ યોગમાસ્થાય સ્વાં ભાર્યાં વડવાં તતઃ ।
૬.૪૧/૨અધૃષ્યાં સર્વભૂતાનાં તેજસા નિયમેન ચ ॥ ૬.૪૧॥

૬.૪૨/૧વડવાવપુષા વિપ્રાશ્ચરન્તીમકુતોભયામ્ ।
૬.૪૨/૨સોઽશ્વરૂપેણ ભગવાંસ્તાં મુખે સમભાવયત્ ॥ ૬.૪૨॥

૬.૪૩/૧મૈથુનાય વિચેષ્ટન્તીં પરપુંસોઽવશઙ્કયા ।
૬.૪૩/૨સા તન્ નિરવમચ્છુક્રં નાસિકાભ્યાં વિવસ્વતઃ ॥ ૬.૪૩॥

૬.૪૪/૧દેવૌ તસ્યામજાયેતામશ્વિનૌ ભિષજાં વરૌ ।
૬.૪૪/૨નાસત્યશ્ચૈવ દસ્રશ્ચ સ્મૃતૌ દ્વાવશ્વિનાવિતિ ॥ ૬.૪૪॥

૬.૪૫/૧માર્તણ્ડસ્યાત્મજાવેતાવષ્ટમસ્ય પ્રજાપતેઃ ।
૬.૪૫/૨તાં તુ રૂપેણ કાન્તેન દર્શયામાસ ભાસ્કરઃ ॥ ૬.૪૫ ॥

૬.૪૬/૧સા તુ દૃષ્ટ્વૈવ ભર્તારં તુતોષ મુનિસત્તમાઃ ।
૬.૪૬/૨યમસ્તુ કર્મણા તેન ભૃશં પીડિતમાનસઃ ॥ ૬.૪૬ ॥

૬.૪૭/૧ધર્મેણ રઞ્જયામાસ ધર્મરાજ ઇમાઃ પ્રજાઃ ।
૬.૪૭/૨સ લેભે કર્મણા તેન શુભેન પરમદ્યુતિઃ ॥ ૬.૪૭ ॥

૬.૪૮/૧પિતૃણામાધિપત્યં ચ લોકપાલત્વમેવ ચ ।
૬.૪૮/૨મનુઃ પ્રજાપતિસ્ત્વાસીત્ સાવર્ણિઃ સ તપોધનાઃ ॥ ૬.૪૮ ॥

૬.૪૯/૧ભાવ્યઃ સમાગતે તસ્મિન્ મનુઃ સાવર્ણિકેઽન્તરે ।
૬.૪૯/૨મેરુપૃષ્ઠે તપો નિત્યમદ્યાપિ સ ચરત્યુત ॥ ૬.૪૯ ॥

૬.૫૦/૧ભ્રાતા શનૈશ્ચરસ્તસ્ય ગ્રહત્વં સ તુ લબ્ધવાન્ ।
૬.૫૦/૨ત્વષ્ટા તુ તેજસા તેન વિષ્ણોશ્ચક્રમકલ્પયત્ ॥ ૬.૫૦ ॥

૬.૫૧/૧તદ્ અપ્રતિહતં યુદ્ધે દાનવાન્તચિકીર્ષયા ।
૬.૫૧/૨યવીયસી તુ સાપ્યાસીદ્ યમી કન્યા યશસ્વિની ॥ ૬.૫૧ ॥

૬.૫૨/૧અભવચ્ચ સરિચ્છ્રેષ્ઠા યમુના લોકપાવની ।
૬.૫૨/૨મનુરિત્યુચ્યતે લોકે સાવર્ણ ઇતિ ચોચ્યતે ॥ ૬.૫૨ ॥

૬.૫૩/૧દ્વિતીયો યઃ સુતસ્તસ્ય મનોર્ભ્રાતા શનૈશ્ચરઃ ।
૬.૫૩/૨ગ્રહત્વં સ ચ લેભે વૈ સર્વલોકાભિપૂજિતઃ ॥ ૬.૫૩ ॥

૬.૫૪/૧ય ઇદં જન્મ દેવાનાં શૃણુયાન્ નરસત્તમઃ ।
૬.૫૪/૨આપદં પ્રાપ્ય મુચ્યેત પ્રાપ્નુયાચ્ચ મહદ્ યશઃ ॥ ૬.૫૪ ॥

૭.૧/૧લોમહર્ષણ ઉવાચ । મનોર્વૈવસ્વતસ્યાસન્ પુત્રા વૈ નવ તત્સમાઃ ।
૭.૧/૨ઇક્ષ્વાકુશ્ચૈવ નાભાગો ધૃષ્ટઃ શર્યાતિરેવ ચ ॥ ૭.૧ ॥

૭.૨/૧નરિષ્યન્તશ્ચ ષષ્ઠો વૈ પ્રાંશૂ રિષ્ટશ્ચ સપ્તમઃ ।
૭.૨/૨કરૂષશ્ચ પૃષધ્રશ્ચ નવૈતે મુનિસત્તમાઃ ॥ ૭.૨ ॥

૭.૩/૧અકરોત્ પુત્રકામસ્તુ મનુરિષ્ટિં પ્રજાપતિઃ ।
૭.૩/૨મિત્રાવરુણયોર્વિપ્રાઃ પૂર્વમેવ મહામતિઃ ॥ ૭.૩ ॥

૭.૪/૧અનુત્પન્નેષુ બહુષુ પુત્રેષ્વેતેષુ ભો દ્વિજાઃ ।
૭.૪/૨તસ્યાં ચ વર્તમાનાયામિષ્ટ્યાં ચ દ્વિજસત્તમાઃ ॥ ૭.૪ ॥

૭.૫/૧મિત્રાવરુણયોરંશે મનુરાહુતિમાવહત્ ।
૭.૫/૨તત્ર દિવ્યામ્બરધરા દિવ્યાભરણભૂષિતા ॥ ૭.૫॥

૭.૬/૧દિવ્યસંહનના ચૈવ ઇલા જજ્ઞ ઇતિ શ્રુતિઃ ।
૭.૬/૨તામિલેત્યેવ હોવાચ મનુર્દણ્ડધરસ્તદા ॥ ૭.૬॥

૭.૭/૧અનુગચ્છસ્વ માં ભદ્રે તમિલા પ્રત્યુવાચ હ ।
૭.૭/૨ધર્મયુક્તમિદં વાક્યં પુત્રકામં પ્રજાપતિમ્ ॥ ૭.૭॥

૭.૮/૧ઇલોવાચ । મિત્રાવરુણયોરંશે જાતાસ્મિ વદતાં વર ।
૭.૮/૨તયોઃ સકાશં યાસ્યામિ ન માં ધર્મહતાં કુરુ ॥ ૭.૮॥

૭.૯/૧સૈવમુક્ત્વા મનું દેવં મિત્રાવરુણયોરિલા ।
૭.૯/૨ગત્વાન્તિકં વરારોહા પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ॥ ૭.૯॥

૭.૧૦/૧ઇલોવાચ । અંશેઽસ્મિ યુવયોર્જાતા દેવૌ કિં કરવાણિ વામ્ ।
૭.૧૦/૨મનુના ચાહમુક્તા વૈ અનુગચ્છસ્વ મામિતિ ॥ ૭.૧૦॥

૭.૧૧/૧તૌ તથાવાદિનીં સાધ્વીમિલાં ધર્મપરાયણામ્ ।
૭.૧૧/૨મિત્રશ્ચ વરુણશ્ચોભાવૂચતુસ્તાં દ્વિજોત્તમાઃ ॥ ૭.૧૧॥

૭.૧૨/૧મિત્રાવરુણાવૂચતુઃ । અનેન તવ ધર્મેણ પ્રશ્રયેણ દમેન ચ ।
૭.૧૨/૨સત્યેન ચૈવ સુશ્રોણિ પ્રીતૌ સ્વો વરવર્ણિનિ ॥ ૭.૧૨॥

૭.૧૩/૧આવયોસ્ત્વં મહાભાગે ખ્યાતિં કન્યેતિ યાસ્યસિ ॥ ૭.૧૩॥

૭.૧૪/૧મનોર્વંશકરઃ પુત્રસ્ત્વમેવ ચ ભવિષ્યસિ ।
૭.૧૪/૨સુદ્યુમ્ન ઇતિ વિખ્યાતસ્ત્રિષુ લોકેષુ શોભને ॥ ૭.૧૪॥

૭.૧૫/૧જગત્પ્રિયો ધર્મશીલો મનોર્વંશવિવર્ધનઃ ।
૭.૧૫/૨નિવૃત્તા સા તુ તચ્છ્રુત્વા ગચ્છન્તી પિતુરન્તિકાત્ ॥ ૭.૧૫॥

૭.૧૬/૧બુધેનાન્તરમાસાદ્ય મૈથુનાયોપમન્ત્રિતા ।
૭.૧૬/૨સોમપુત્રાદ્ બુધાદ્ વિપ્રાસ્તસ્યાં જજ્ઞે પુરૂરવાઃ ॥ ૭.૧૬॥

૭.૧૭/૧જનયિત્વા તતઃ સા તમિલા સુદ્યુમ્નતાં ગતા ।
૭.૧૭/૨સુદ્યુમ્નસ્ય તુ દાયાદાસ્ત્રયઃ પરમધાર્મિકાઃ ॥ ૭.૧૭॥

૭.૧૮/૧ઉત્કલશ્ચ ગયશ્ચૈવ વિનતાશ્વશ્ચ ભો દ્વિજાઃ ।
૭.૧૮/૨ઉત્કલસ્યોત્કલા વિપ્રા વિનતાશ્વસ્ય પશ્ચિમાઃ ॥ ૭.૧૮॥

૭.૧૯/૧દિક્ પૂર્વા મુનિશાર્દૂલા ગયસ્ય તુ ગયા સ્મૃતા ।
૭.૧૯/૨પ્રવિષ્ટે તુ મનૌ વિપ્રા દિવાકરમરિંદમમ્ ॥ ૭.૧૯॥

૭.૨૦/૧દશધા તત્ પુનઃ ક્ષત્રમકરોત્ પૃથિવીમિમામ્ ।
૭.૨૦/૨ઇક્ષ્વાકુર્જ્યેષ્ઠદાયાદો મધ્યદેશમવાપ્તવાન્ ॥ ૭.૨૦॥

૭.૨૧/૧કન્યાભાવાત્ તુ સુદ્યુમ્નો નૈતદ્ રાજ્યમવાપ્તવાન્ ।
૭.૨૧/૨વસિષ્ઠવચનાત્ ત્વાસીત્ પ્રતિષ્ઠાને મહાત્મનઃ ॥ ૭.૨૧॥

૭.૨૨/૧પ્રતિષ્ઠા ધર્મરાજસ્ય સુદ્યુમ્નસ્ય દ્વિજોત્તમાઃ ।
૭.૨૨/૨તત્ પુરૂરવસે પ્રાદાદ્ રાજ્યં પ્રાપ્ય મહાયશાઃ ॥ ૭.૨૨॥

૭.૨૩/૧માનવેયો મુનિશ્રેષ્ઠાઃ સ્ત્રીપુંસોર્લક્ષણૈર્યુતઃ ।
૭.૨૩/૨ધૃતવાંસ્તામિલેત્યેવં સુદ્યુમ્નેતિ ચ વિશ્રુતઃ ॥ ૭.૨૩॥

૭.૨૪/૧નારિષ્યન્તાઃ શકાઃ પુત્રા નાભાગસ્ય તુ ભો દ્વિજાઃ ।
૭.૨૪/૨અમ્બરીષોઽભવત્ પુત્રઃ પાર્થિવર્ષભસત્તમઃ ॥ ૭.૨૪॥

૭.૨૫/૧ધૃષ્ટસ્ય ધાર્ષ્ટકં ક્ષત્રં રણદૃપ્તં બભૂવ હ ।
૭.૨૫/૨કરૂષસ્ય ચ કારૂષાઃ ક્ષત્રિયા યુદ્ધદુર્મદાઃ ॥ ૭.૨૫॥

૭.૨૬/૧નાભાગધૃષ્ટપુત્રાશ્ચ ક્ષત્રિયા વૈશ્યતાં ગતાઃ ।
૭.૨૬/૨પ્રાંશોરેકોઽભવત્ પુત્રઃ પ્રજાપતિરિતિ સ્મૃતઃ ॥ ૭.૨૬॥

૭.૨૭/૧નરિષ્યન્તસ્ય દાયાદો રાજા દણ્ડધરો યમઃ ।
૭.૨૭/૨શર્યાતેર્મિથુનં ત્વાસીદ્ આનર્તો નામ વિશ્રુતઃ ॥ ૭.૨૭॥

૭.૨૮/૧પુત્રઃ કન્યા સુકન્યા ચ યા પત્ની ચ્યવનસ્ય હ ।
૭.૨૮/૨આનર્તસ્ય તુ દાયાદો રૈવો નામ મહાદ્યુતિઃ ॥ ૭.૨૮॥

૭.૨૯/૧આનર્તવિષયશ્ચૈવ પુરી ચાસ્ય કુશસ્થલી ।
૭.૨૯/૨રૈવસ્ય રૈવતઃ પુત્રઃ કકુદ્મી નામ ધાર્મિકઃ ॥ ૭.૨૯॥

૭.૩૦/૧જ્યેષ્ઠઃ પુત્રઃ સ તસ્યાસીદ્ રાજ્યં પ્રાપ્ય કુશસ્થલીમ્ ।
૭.૩૦/૨સ કન્યાસહિતઃ શ્રુત્વા ગાન્ધર્વં બ્રહ્મણોઽન્તિકે ॥ ૭.૩૦॥

૭.૩૧/૧મુહૂર્તભૂતં દેવસ્ય તસ્થૌ બહુયુગં દ્વિજાઃ ।
૭.૩૧/૨આજગામ સ ચૈવાથ સ્વાં પુરીં યાદવૈર્વૃતામ્ ॥ ૭.૩૧॥

૭.૩૨/૧કૃતાં દ્વારવતીં નામ બહુદ્વારાં મનોરમામ્ ।

૭.૩૨/૨ભોજવૃષ્ણ્યન્ધકૈર્ગુપ્તાં વસુદેવપુરોગમૈઃ ॥ ૭.૩૨॥

૭.૩૩/૧તત્રૈવ રૈવતો જ્ઞાત્વા યથાતત્ત્વં દ્વિજોત્તમાઃ ।
૭.૩૩/૨કન્યાં તાં બલદેવાય સુભદ્રાં નામ રેવતીમ્ ॥ ૭.૩૩॥

૭.૩૪/૧દત્ત્વા જગામ શિખરં મેરોસ્તપસિ સંસ્થિતઃ ।
૭.૩૪/૨રેમે રામોઽપિ ધર્માત્મા રેવત્યા સહિતઃ સુખી ॥ ૭.૩૪॥

૭.૩૫/૧મુનય ઊચુઃ । કથં બહુયુગે કાલે સમતીતે મહામતે ।
૭.૩૫/૨ન જરા રેવતીં પ્રાપ્તા રૈવતં ચ કકુદ્મિનમ્ ॥ ૭.૩૫॥

૭.૩૬/૧મેરું ગતસ્ય વા તસ્ય શર્યાતેઃ સંતતિઃ કથમ્ ।
૭.૩૬/૨સ્થિતા પૃથિવ્યામદ્યાપિ શ્રોતુમિચ્છામ તત્ત્વતઃ ॥ ૭.૩૬॥

૭.૩૭/૧લોમહર્ષણ ઉવાચ । ન જરા ક્ષુત્પિપાસા વા ન મૃત્યુર્મુનિસત્તમાઃ ।
૭.૩૭/૨ઋતુચક્રં પ્રભવતિ બ્રહ્મલોકે સદાનઘાઃ ।
૭.૩૭/૩કકુદ્મિનઃ સ્વર્લોકં તુ રૈવતસ્ય ગતસ્ય હ ॥ ૭.૩૭॥

૭.૩૮/૧હૃતા પુણ્યજનૈર્વિપ્રા રાક્ષસૈઃ સા કુશસ્થલી ।
૭.૩૮/૨તસ્ય ભ્રાતૃશતં ત્વાસીદ્ ધાર્મિકસ્ય મહાત્મનઃ ॥ ૭.૩૮॥

૭.૩૯/૧તદ્ વધ્યમાનં રક્ષોભિર્દિશઃ પ્રાક્રામદ્ અચ્યુતાઃ ।
૭.૩૯/૨વિદ્રુતસ્ય ચ વિપ્રેન્દ્રાસ્તસ્ય ભ્રાતૃશતસ્ય વૈ ॥ ૭.૩૯॥

૭.૪૦/૧અન્વવાયસ્તુ સુમહાંસ્તત્ર તત્ર દ્વિજોત્તમાઃ ।
૭.૪૦/૨તેષાં હ્યેતે મુનિશ્રેષ્ઠાઃ શર્યાતા ઇતિ વિશ્રુતાઃ ॥ ૭.૪૦॥

૭.૪૧/૧ક્ષત્રિયા ગુણસમ્પન્ના દિક્ષુ સર્વાસુ વિશ્રુતાઃ ।
૭.૪૧/૨શર્વશઃ સર્વગહનં પ્રવિષ્ટાસ્તે મહૌજસઃ ॥ ૭.૪૧॥

૭.૪૨/૧નાભાગરિષ્ટપુત્રૌ દ્વૌ વૈશ્યૌ બ્રાહ્મણતાં ગતૌ ।
૭.૪૨/૨કરૂષસ્ય તુ કારૂષાઃ ક્ષત્રિયા યુદ્ધદુર્મદાઃ ॥ ૭.૪૨॥

૭.૪૩/૧પૃષધ્રો હિંસયિત્વા તુ ગુરોર્ગાં દ્વિજસત્તમાઃ ।
૭.૪૩/૨શાપાચ્છૂદ્રત્વમાપન્નો નવૈતે પરિકીર્તિતાઃ ॥ ૭.૪૩॥

૭.૪૪/૧વૈવસ્વતસ્ય તનયા મુનેર્વૈ મુનિસત્તમાઃ ।
૭.૪૪/૨ક્ષુવતસ્તુ મનોર્વિપ્રા ઇક્ષ્વાકુરભવત્ સુતઃ ॥ ૭.૪૪॥

૭.૪૫/૧તસ્ય પુત્રશતં ત્વાસીદ્ ઇક્ષ્વાકોર્ભૂરિદક્ષિણમ્ ।
૭.૪૫/૨તેષાં વિકુક્ષિર્જ્યેષ્ઠસ્તુ વિકુક્ષિત્વાદ્ અયોધતામ્ ॥ ૭.૪૫॥

૭.૪૬/૧પ્રાંશઃ પરમધર્મજ્ઞ સોઽયોધ્યાધિપતિઃ પ્રભુઃ ।
૭.૪૬/૨શકુનિપ્રમુખાસ્તસ્ય પુત્રાઃ પઞ્ચશતં સ્મૃતાઃ ॥ ૭.૪૬॥

૭.૪૭/૧ઉત્તરાપથદેશસ્ય રક્ષિતારો મહાબલાઃ ।
૭.૪૭/૨ચત્વારિંશદ્ દશાષ્ટૌ ચ દક્ષિણસ્યાં તથા દિશિ ॥ ૭.૪૭॥

૭.૪૮/૧વશાતિપ્રમુખાશ્ચાન્યે રક્ષિતારો દ્વિજોત્તમાઃ ।
૭.૪૮/૨ઇક્ષ્વાકુસ્તુ વિકુક્ષિં વૈ અષ્ટકાયામથાદિશત્ ॥ ૭.૪૮॥

૭.૪૯/૧માંસમાનય શ્રાદ્ધાર્થં મૃગાન્ હત્વા મહાબલ ।
૭.૪૯/૨શ્રાદ્ધકર્મણિ ચોદ્દિષ્ટો અકૃતે શ્રાદ્ધકર્મણિ ॥ ૭.૪૯॥

૭.૫૦/૧ભક્ષયિત્વા શશં વિપ્રાઃ શશાદો મૃગયાં ગતઃ ।
૭.૫૦/૨ઇક્ષ્વાકુણા પરિત્યક્તો વસિષ્ઠવચનાત્ પ્રભુઃ ॥ ૭.૫૦॥

૭.૫૧/૧ઇક્ષ્વાકૌ સંસ્થિતે વિપ્રાઃ શશાદસ્તુ નૃપોઽભવત્ ।
૭.૫૧/૨શશાદસ્ય તુ દાયાદઃ કકુત્સ્થો નામ વીર્યવાન્ ॥ ૭.૫૧॥

૭.૫૨/૧અનેનાસ્તુ કકુત્સ્થસ્ય પૃથુશ્ચાનેનસઃ સ્મૃતઃ ।
૭.૫૨/૨વિષ્ટરાશ્વઃ પૃથોઃ પુત્રસ્તસ્માદ્ આર્દ્રસ્ત્વજાયત ॥ ૭.૫૨॥

૭.૫૩/૧આર્દ્રસ્તુ યુવનાશ્વસ્તુ શ્રાવસ્તસ્તત્સુતો દ્વિજાઃ ।
૭.૫૩/૨જજ્ઞે શ્રાવસ્તકો રાજા શ્રાવસ્તી યેન નિર્મિતા ॥ ૭.૫૩॥

૭.૫૪/૧શ્રાવસ્તસ્ય તુ દાયાદો બૃહદશ્વો મહીપતિઃ ।
૭.૫૪/૨કુવલાશ્વઃ સુતસ્તસ્ય રાજા પરમધાર્મિકઃ ॥ ૭.૫૪॥

૭.૫૫/૧યઃ સ ધુન્ધુવધાદ્ રાજા ધુન્ધુમારત્વમાગતઃ ॥ ૭.૫૫॥

૭.૫૬/૧મુનય ઊચુઃ । ધુન્ધોર્વધં મહાપ્રાજ્ઞ શ્રોતુમિચ્છામ તત્ત્વતઃ ।
૭.૫૬/૨યદ્વધાત્ કુવલાશ્વોઽસૌ ધુન્ધુમારત્વમાગતઃ ॥ ૭.૫૬॥

૭.૫૭/૧લોમહર્ષણ ઉવાચ । કુવલાશ્વસ્ય પુત્રાણાં શતમુત્તમધન્વિનામ્ ।
૭.૫૭/૨સર્વે વિદ્યાસુ નિષ્ણાતા બલવન્તો દુરાસદાઃ ॥ ૭.૫૭॥

૭.૫૮/૧બભૂવુર્ધાર્મિકાઃ સર્વે યજ્વાનો ભૂરિદક્ષિણાઃ ।
૭.૫૮/૨કુવલાશ્વં પિતા રાજ્યે બૃહદશ્વો ન્યયોજયત્ ॥ ૭.૫૮॥

૭.૫૯/૧પુત્રસંક્રામિતશ્રીસ્તુ વનં રાજા વિવેશ હ ।
૭.૫૯/૨તમુત્તઙ્કોઽથ વિપ્રર્ષિઃ પ્રયાન્તં પ્રત્યવારયત્ ॥ ૭.૫૯॥

૭.૬૦/૧ઉત્તઙ્ક ઉવાચ । ભવતા રક્ષણં કાર્યં તચ્ચ કર્તું ત્વમર્હસિ ।
૭.૬૦/૨નિરુદ્વિગ્નસ્તપશ્ચર્તું નહિ શક્નોમિ પાર્થિવ ॥ ૭.૬૦॥

૭.૬૧/૧મમાશ્રમસમીપે વૈ સમેષુ મરુધન્વસુ ।
૭.૬૧/૨સમુદ્રો વાલુકાપૂર્ણ ઉદ્દાલક ઇતિ સ્મૃતઃ ॥ ૭.૬૧॥

૭.૬૨/૧દેવતાનામવધ્યશ્ચ મહાકાયો મહાબલઃ ।
૭.૬૨/૨અન્તર્ભૂમિગતસ્તત્ર વાલુકાન્તર્હિતો મહાન્ ॥ ૭.૬૨॥

૭.૬૩/૧રાક્ષસસ્ય મધોઃ પુત્રો ધુન્ધુર્નામ મહાસુરઃ ।
૭.૬૩/૨શેતે લોકવિનાશાય તપ આસ્થાય દારુણમ્ ॥ ૭.૬૩॥

૭.૬૪/૧સંવત્સરસ્ય પર્યન્તે સ નિશ્વાસં વિમુઞ્ચતિ ।
૭.૬૪/૨યદા તદા મહી તત્ર ચલતિ સ્મ નરાધિપ ॥ ૭.૬૪॥

૭.૬૫/૧તસ્ય નિઃશ્વાસવાતેન રજ ઉદ્ધૂયતે મહત્ ।
૭.૬૫/૨આદિત્યપથમાવૃત્ય સપ્તાહં ભૂમિકમ્પનમ્ ॥ ૭.૬૫॥

૭.૬૬/૧સવિસ્ફુલિઙ્ગં સાઙ્ગારં સધૂમમતિદારુણમ્ ।
૭.૬૬/૨તેન તાત ન શક્નોમિ તસ્મિન્ સ્થાતું સ્વ આશ્રમે ॥ ૭.૬૬॥

૭.૬૭/૧તં મારય મહાકાયં લોકાનાં હિતકામ્યયા ।
૭.૬૭/૨લોકાઃ સ્વસ્થા ભવન્ત્વદ્ય તસ્મિન્ વિનિહતે ત્વયા ॥ ૭.૬૭॥

૭.૬૮/૧ત્વં હિ તસ્ય વધાયૈકઃ સમર્થઃ પૃથિવીપતે ।
૭.૬૮/૨વિષ્ણુના ચ વરો દત્તો મહ્યં પૂર્વયુગે નૃપ ॥ ૭.૬૮॥

૭.૬૯/૧યસ્તં મહાસુરં રૌદ્રં હનિષ્યતિ મહાબલમ્ ।
૭.૬૯/૨તસ્ય ત્વં વરદાનેન તેજશ્ચાપ્યાયયિષ્યસિ ॥ ૭.૬૯॥

૭.૭૦/૧નહિ ધુન્ધુર્મહાતેજાસ્તેજસાલ્પેન શક્યતે ।
૭.૭૦/૨નિર્દગ્ધું પૃથિવીપાલ ચિરં યુગશતૈરપિ ॥ ૭.૭૦॥

૭.૭૧/૧વીર્યં ચ સુમહત્ તસ્ય દેવૈરપિ દુરાસદમ્ ।
૭.૭૧/૨સ એવમુક્તો રાજર્ષિરુત્તઙ્કેન મહાત્મના ।
૭.૭૧/૩કુવલાશ્વં સુતં પ્રાદાત્ તસ્મૈ ધુન્ધુનિબર્હણે ॥ ૭.૭૧॥

૭.૭૨/૧બૃહદશ્વ ઉવાચ । ભગવન્ ન્યસ્તશસ્ત્રોઽહમયં તુ તનયો મમ ।
૭.૭૨/૨ભવિષ્યતિ દ્વિજશ્રેષ્ઠ ધુન્ધુમારો ન સંશયઃ ॥ ૭.૭૨॥

૭.૭૩/૧સ તં વ્યાદિશ્ય તનયં રાજર્ષિર્ધુન્ધુમારણે ।
૭.૭૩/૨જગામ પર્વતાયૈવ નૃપતિઃ સંશિતવ્રતઃ ॥ ૭.૭૩॥

૭.૭૪/૧લોમહર્ષણ ઉવાચ । કુવલાશ્વસ્તુ પુત્રાણાં શતેન સહ ભો દ્વિજાઃ ।
૭.૭૪/૨પ્રાયાદ્ ઉત્તઙ્કસહિતો ધુન્ધોસ્તસ્ય નિબર્હણે ॥ ૭.૭૪॥

૭.૭૫/૧તમાવિશત્ તદા વિષ્ણુસ્તેજસા ભગવાન્ પ્રભુઃ ।
૭.૭૫/૨ઉત્તઙ્કસ્ય નિયોગાદ્ વૈ લોકાનાં હિતકામ્યયા ॥ ૭.૭૫॥

૭.૭૬/૧તસ્મિન્ પ્રયાતે દુર્ધર્ષે દિવિ શબ્દો મહાન્ અભૂત્ ।
૭.૭૬/૨એષ શ્રીમાન્ અવધ્યોઽદ્ય ધુન્ધુમારો ભવિષ્યતિ ॥ ૭.૭૬॥

૭.૭૭/૧દિવ્યૈર્ગન્ધૈશ્ચ માલ્યૈશ્ચ તં દેવાઃ સમવાકિરન્ ।
૭.૭૭/૨દેવદુન્દુભયશ્ચૈવ પ્રણેદુર્દ્વિજસત્તમાઃ ॥ ૭.૭૭॥

૭.૭૮/૧સ ગત્વા જયતાં શ્રેષ્ઠસ્તનયૈઃ સહ વીર્યવાન્ ।
૭.૭૮/૨સમુદ્રં ખાનયામાસ વાલુકાન્તરમવ્યયમ્ ॥ ૭.૭૮॥

૭.૭૯/૧તસ્ય પુત્રૈઃ ખનદ્ભિશ્ચ વાલુકાન્તર્હિતસ્તદા ।
૭.૭૯/૨ધુન્ધુરાસાદિતો વિપ્રા દિશમાવૃત્ય પશ્ચિમામ્ ॥ ૭.૭૯॥

૭.૮૦/૧મુખજેનાગ્નિના ક્રોધાલ્લોકાન્ ઉદ્વર્તયન્ન્ ઇવ ।
૭.૮૦/૨વારિ સુસ્રાવ વેગેન મહોદધિરિવોદયે ॥ ૭.૮૦॥

૭.૮૧/૧સૌમસ્ય મુનિશાર્દૂલા વરોર્મિકલિલો મહાન્ ।
૭.૮૧/૨તસ્ય પુત્રશતં દગ્ધં ત્રિભિરૂનં તુ રક્ષસા ॥ ૭.૮૧॥

૭.૮૨/૧તતઃ સ રાજા દ્યુતિમાન્ રાક્ષસં તં મહાબલમ્ ।
૭.૮૨/૨આસસાદ મહાતેજા ધુન્ધું ધુન્ધુવિનાશનઃ ॥ ૭.૮૨॥

૭.૮૩/૧તસ્ય વારિમયં વેગમાપીય સ નરાધિપઃ ।
૭.૮૩/૨યોગી યોગેન વહ્નિં ચ શમયામાસ વારિણા ॥ ૭.૮૩॥

૭.૮૪/૧નિહત્ય તં મહાકાયં બલેનોદકરાક્ષસમ્ ।
૭.૮૪/૨ઉત્તઙ્કં દર્શયામાસ કૃતકર્મા નરાધિપઃ ॥ ૭.૮૪॥

૭.૮૫/૧ઉત્તઙ્કસ્તુ વરં પ્રાદાત્ તસ્મૈ રાજ્ઞે મહાત્મને ।
૭.૮૫/૨દદૌ તસ્યાક્ષયં વિત્તં શત્રુભિશ્ચાપરાજિતમ્ ॥ ૭.૮૫॥

૭.૮૬/૧ધર્મે રતિં ચ સતતં સ્વર્ગે વાસં તથાક્ષયમ્ ।
૭.૮૬/૨પુત્રાણાં ચાક્ષયાંલ્લોકાન્ સ્વર્ગે યે રક્ષસા હતાઃ ॥ ૭.૮૬॥

૭.૮૭/૧તસ્ય પુત્રાસ્ત્રયઃ શિષ્ટા દૃઢાશ્વો જ્યેષ્ઠ ઉચ્યતે ।
૭.૮૭/૨ચન્દ્રાશ્વકપિલાશ્વૌ તુ કનીયાંસૌ કુમારકૌ ॥ ૭.૮૭॥

૭.૮૮/૧ધૌન્ધુમારેર્દૃઢાશ્વસ્ય હર્યશ્વશ્ચાત્મજઃ સ્મૃતઃ ।
૭.૮૮/૨હર્યશ્વસ્ય નિકુમ્ભોઽભૂત્ ક્ષત્રધર્મરતઃ સદા ॥ ૭.૮૮॥

૭.૮૯/૧સંહતાશ્વો નિકુમ્ભસ્ય સુતો રણવિશારદઃ ।
૭.૮૯/૨અકૃશાશ્વકૃશાશ્વૌ તુ સંહતાશ્વસુતૌ દ્વિજાઃ ॥ ૭.૮૯॥

૭.૯૦/૧તસ્ય હૈમવતી કન્યા સતાં મતા દૃષદ્વતી ।
૭.૯૦/૨વિખ્યાતા ત્રિષુ લોકેષુ પુત્રશ્ચાસ્યાઃ પ્રસેનજિત્ ॥ ૭.૯૦॥

૭.૯૧/૧લેભે પ્રસેનજિદ્ ભાર્યાં ગૌરીં નામ પતિવ્રતામ્ ।
૭.૯૧/૨અભિશસ્તા તુ સા ભર્ત્રા નદી વૈ બાહુદાભવત્ ॥ ૭.૯૧॥

૭.૯૨/૧તસ્ય પુત્રો મહાન્ આસીદ્ યુવનાશ્વો નરાધિપઃ ।
૭.૯૨/૨માન્ધાતા યુવનાશ્વસ્ય ત્રિલોકવિજયી સુતઃ ॥ ૭.૯૨॥

૭.૯૩/૧તસ્ય ચૈત્રરથી ભાર્યા શશબિન્દોઃ સુતાભવત્ ।
૭.૯૩/૨સાધ્વી બિન્દુમતી નામ રૂપેણાસદૃશી ભુવિ ॥ ૭.૯૩॥

૭.૯૪/૧પતિવ્રતા ચ જ્યેષ્ઠા ચ ભ્રાતૃણામયુતસ્ય વૈ ।
૭.૯૪/૨તસ્યામુત્પાદયામાસ માન્ધાતા દ્વૌ સુતૌ દ્વિજાઃ ॥ ૭.૯૪॥

૭.૯૫/૧પુરુકુત્સં ચ ધર્મજ્ઞં મુચુકુન્દં ચ પાર્થિવમ્ ।
૭.૯૫/૨પુરુકુત્સસુતસ્ત્વાસીત્ ત્રસદસ્યુર્મહીપતિઃ ॥ ૭.૯૫॥

૭.૯૬/૧નર્મદાયામથોત્પન્નઃ સમ્ભૂતસ્તસ્ય ચાત્મજઃ ।
૭.૯૬/૨સમ્ભૂતસ્ય તુ દાયાદસ્- ।
૭.૯૬/૩ત્રિધન્વા રિપુમર્દનઃ ॥ ૭.૯૬॥

૭.૯૭/૧રાજ્ઞસ્ત્રિધન્વનસ્ત્વાસીદ્ વિદ્વાંસ્ત્રય્યારુણઃ પ્રભુઃ ।
૭.૯૭/૨તસ્ય સત્યવ્રતો નામ કુમારોઽભૂન્ મહાબલઃ ॥ ૭.૯૭॥

૭.૯૮/૧પરિગ્રહણમન્ત્રાણાં વિઘ્નં ચક્રે સુદુર્મતિઃ ।
૭.૯૮/૨યેન ભાર્યા કૃતોદ્વાહા હૃતા ચૈવ પરસ્ય હ ॥ ૭.૯૮॥

૭.૯૯/૧બાલ્યાત્ કામાચ્ચ મોહાચ્ચ સાહસાચ્ચાપલેન ચ ।
૭.૯૯/૨જહાર કન્યાં કામાર્તઃ કસ્યચિત્ પુરવાસિનઃ ॥ ૭.૯૯॥

૭.૧૦૦/૧અધર્મશઙ્કુના તેન તં સ ત્રય્યારુણોઽત્યજત્ ।
૭.૧૦૦/૨અપધ્વંસેતિ બહુશો વદન્ ક્રોધસમન્વિતઃ ॥ ૭.૧૦૦॥

૭.૧૦૧/૧સોઽબ્રવીત્ પિતરં ત્યક્તઃ ક્વ ગચ્છામીતિ વૈ મુહુઃ ।
૭.૧૦૧/૨પિતા ચ તમથોવાચ શ્વપાકૈઃ સહ વર્તય ॥ ૭.૧૦૧॥

૭.૧૦૨/૧નાહં પુત્રેણ પુત્રાર્થી ત્વયાદ્ય કુલપાંસન ।
૭.૧૦૨/૨ઇત્યુક્તઃ સ નિરાક્રામન્ નગરાદ્ વચનાત્ પિતુઃ ॥ ૭.૧૦૨॥

૭.૧૦૩/૧ન ચ તં વારયામાસ વસિષ્ઠો ભગવાન્ ઋષિઃ ।
૭.૧૦૩/૨સ તુ સત્યવ્રતો વિપ્રાઃ શ્વપાકાવસથાન્તિકે ॥ ૭.૧૦૩॥

૭.૧૦૪/૧પિત્રા ત્યક્તોઽવસદ્ વીરઃ પિતાપ્યસ્ય વનં યયૌ ।
૭.૧૦૪/૨તતસ્તસ્મિંસ્તુ વિષયે નાવર્ષત્ પાકશાસનઃ ॥ ૭.૧૦૪॥

૭.૧૦૫/૧સમા દ્વાદશ ભો વિપ્રાસ્તેનાધર્મેણ વૈ તદા ।
૭.૧૦૫/૨દારાંસ્તુ તસ્ય વિષયે વિશ્વામિત્રો મહાતપાઃ ॥ ૭.૧૦૫॥

૭.૧૦૬/૧સંન્યસ્ય સાગરાન્તે તુ ચકાર વિપુલં તપઃ ।
૭.૧૦૬/૨તસ્ય પત્ની ગલે બદ્ધ્વા મધ્યમં પુત્રમૌરસમ્ ॥ ૭.૧૦૬॥

૭.૧૦૭/૧શેષસ્ય ભરણાર્થાય વ્યક્રીણાદ્ ગોશતેન વૈ ।
૭.૧૦૭/૨તં ચ બદ્ધં ગલે દૃષ્ટ્વા વિક્રયાર્થં નૃપાત્મજઃ ॥ ૭.૧૦૭॥

૭.૧૦૮/૧મહર્ષિપુત્રં ધર્માત્મા મોક્ષયામાસ ભો દ્વિજાઃ ।
૭.૧૦૮/૨સત્યવ્રતો મહાબાહુર્ભરણં તસ્ય ચાકરોત્ ॥ ૭.૧૦૮॥

૭.૧૦૯/૧વિશ્વામિત્રસ્ય તુષ્ટ્યર્થમનુકમ્પાર્થમેવ ચ ।
૭.૧૦૯/૨સોઽભવદ્ ગાલવો નામ ગલે બન્ધાન્ મહાતપાઃ ।
૭.૧૦૯/૩મહર્ષિઃ કૌશિકો ધીમાંસ્તેન વીરેણ મોક્ષિતઃ ॥ ૭.૧૦૯॥

૮.૧/૧લોમહર્ષણ ઉવાચ । સત્યવ્રતસ્તુ ભક્ત્યા ચ કૃપયા ચ પ્રતિજ્ઞયા ।
૮.૧/૨વિશ્વામિત્રકલત્રં તુ બભાર વિનયે સ્થિતઃ ॥ ૮.૧॥

૮.૨/૧હત્વા મૃગાન્ વરાહાંશ્ચ મહિષાંશ્ચ વનેચરાન્ ।
૮.૨/૨વિશ્વામિત્રાશ્રમાભ્યાશે માંસં વૃક્ષે બબન્ધ ચ ॥ ૮.૨॥

૮.૩/૧ઉપાંશુવ્રતમાસ્થાય દીક્ષાં દ્વાદશવાર્ષિકીમ્ ।
૮.૩/૨પિતુર્નિયોગાદ્ અવસત્ તસ્મિન્ વનગતે નૃપે ॥ ૮.૩॥

૮.૪/૧અયોધ્યાં ચૈવ રાજ્યં ચ તથૈવાન્તઃપુરં મુનિઃ ।

૮.૪/૨યાજ્યોપાધ્યાયસંયોગાદ્ વસિષ્ઠઃ પર્યરક્ષત ॥ ૮.૪॥

૮.૫/૧સત્યવ્રતસ્તુ બાલ્યાચ્ચ ભાવિનોઽર્થસ્ય વૈ બલાત્ ।
૮.૫/૨વસિષ્ઠેઽભ્યધિકં મન્યું ધારયામાસ નિત્યશઃ ॥ ૮.૫॥

૮.૬/૧પિત્રા હિ તં તદા રાષ્ટ્રાત્ ત્યજ્યમાનં પ્રિયં સુતમ્ ।
૮.૬/૨નિવારયામાસ મુનિર્બહુના કારણેન ન ॥ ૮.૬॥

૮.૭/૧પાણિગ્રહણમન્ત્રાણાં નિષ્ઠા સ્યાત્ સપ્તમે પદે ।
૮.૭/૨ન ચ સત્યવ્રતસ્તસ્માદ્ ધતવાન્ સપ્તમે પદે ॥ ૮.૭॥

૮.૮/૧જાનન્ ધર્મં વસિષ્ઠસ્તુ ન માં ત્રાતીતિ ભો દ્વિજાઃ ।
૮.૮/૨સત્યવ્રતસ્તદા રોષં વસિષ્ઠે મનસાકરોત્ ॥ ૮.૮॥

૮.૯/૧ગુણબુદ્ધ્યા તુ ભગવાન્ વસિષ્ઠઃ કૃતવાંસ્તથા ।
૮.૯/૨ન ચ સત્યવ્રતસ્તસ્ય તમુપાંશુમબુધ્યત ॥ ૮.૯॥

૮.૧૦/૧તસ્મિન્ન્ અપરિતોષશ્ચ પિતુરાસીન્ મહાત્મનઃ ।
૮.૧૦/૨તેન દ્વાદશ વર્ષાણિ નાવર્ષત્ પાકશાસનઃ ॥ ૮.૧૦॥

૮.૧૧/૧તેન ત્વિદાનીં વિહિતાં દીક્ષાં તાં દુર્વહાં ભુવિ ।
૮.૧૧/૨કુલસ્ય નિષ્કૃતિર્વિપ્રાઃ કૃતા સા વૈ ભવેદ્ ઇતિ ॥ ૮.૧૧॥

૮.૧૨/૧ન તં વસિષ્ઠો ભગવાન્ પિત્રા ત્યક્તં ન્યવારયત્ ।
૮.૧૨/૨અભિષેક્ષ્યામ્યહં પુત્રમસ્યેત્યેવમ્મતિર્મુનિઃ ॥ ૮.૧૨॥

૮.૧૩/૧સ તુ દ્વાદશ વર્ષાણિ તાં દીક્ષામવહદ્ બલી ।
૮.૧૩/૨અવિદ્યમાને માંસે તુ વસિષ્ઠસ્ય મહાત્મનઃ ॥ ૮.૧૩॥

૮.૧૪/૧સર્વકામદુધાં દોગ્ધ્રીં સ દદર્શ નૃપાત્મજઃ ।
૮.૧૪/૨તાં વૈ ક્રોધાચ્ચ મોહાચ્ચ શ્રમાચ્ચૈવ ક્ષુધાન્વિતઃ ॥ ૮.૧૪॥

૮.૧૫/૧દેશધર્મગતો રાજા જઘાન મુનિસત્તમાઃ ।
૮.૧૫/૨તન્માંસં સ સ્વયં ચૈવ વિશ્વામિત્રસ્ય ચાત્મજાન્ ॥ ૮.૧૫॥

૮.૧૬/૧ભોજયામાસ તચ્છ્રુત્વા વસિષ્ઠોઽપ્યસ્ય ચુકુધે ॥ ૮.૧૬॥

૮.૧૭/૧વસિષ્ઠ ઉવાચ । પાતયેયમહં ક્રૂર તવ શઙ્કુમસંશયમ્ ।
૮.૧૭/૨યદિ તે દ્વાવિમૌ શઙ્કૂ ન સ્યાતાં વૈ કૃતૌ પુનઃ ॥ ૮.૧૭॥

૮.૧૮/૧પિતુશ્ચાપરિતોષેણ ગુરુદોગ્ધ્રીવધેન ચ ।

૮.૧૮/૨અપ્રોક્ષિતોપયોગાચ્ચ ત્રિવિધસ્તે વ્યતિક્રમઃ ॥ ૮.૧૮॥

૮.૧૯/૧એવં ત્રીણ્યસ્ય શઙ્કૂનિ તાનિ દૃષ્ટ્વા મહાતપાઃ ।
૮.૧૯/૨ત્રિશઙ્કુરિતિ હોવાચ ત્રિશઙ્કુસ્તેન સ સ્મૃતઃ ॥ ૮.૧૯॥

૮.૨૦/૧વિશ્વામિત્રસ્ય દારાણામનેન ભરણં કૃતમ્ ।
૮.૨૦/૨તેન તસ્મૈ વરં પ્રાદાન્ મુનિઃ પ્રીતસ્ત્રિશઙ્કવે ॥ ૮.૨૦॥

૮.૨૧/૧છન્દ્યમાનો વરેણાથ વરં વવ્રે નૃપાત્મજઃ ।
૮.૨૧/૨સશરીરો વ્રજે સ્વર્ગમિત્યેવં યાચિતો વરઃ ॥ ૮.૨૧॥

૮.૨૨/૧અનાવૃષ્ટિભયે તસ્મિન્ ગતે દ્વાદશવાર્ષિકે ।
૮.૨૨/૨પિત્ર્યે રાજ્યેઽભિષિચ્યાથ યાજયામાસ પાર્થિવમ્ ॥ ૮.૨૨॥

૮.૨૩/૧મિષતાં દેવતાનાં ચ વસિષ્ઠસ્ય ચ કૌશિકઃ ।
૮.૨૩/૨દિવમારોપયામાસ સશરીરં મહાતપાઃ ॥ ૮.૨૩॥

૮.૨૪/૧તસ્ય સત્યરથા નામ પત્ની કૈકેયવંશજા ।
૮.૨૪/૨કુમારં જનયામાસ હરિશ્ચન્દ્રમકલ્મષમ્ ॥ ૮.૨૪॥

૮.૨૫/૧સ વૈ રાજા હરિશ્ચન્દ્રસ્ત્રૈશઙ્કવ ઇતિ સ્મૃતઃ ।
૮.૨૫/૨આહર્તા રાજસૂયસ્ય સમ્રાડ્ ઇતિ હ વિશ્રુતઃ ॥ ૮.૨૫॥

૮.૨૬/૧હરિશ્ચન્દ્રસ્ય પુત્રોઽભૂદ્ રોહિતો નામ પાર્થિવઃ ।
૮.૨૬/૨હરિતો રોહિતસ્યાથ ચઞ્ચુર્હારિત ઉચ્યતે ॥ ૮.૨૬॥

૮.૨૭/૧વિજયશ્ચ મુનિશ્રેષ્ઠાશ્ચઞ્ચુપુત્રો બભૂવ હ ।
૮.૨૭/૨જેતા સ સર્વપૃથિવીં વિજયસ્તેન સ સ્મૃતઃ ॥ ૮.૨૭॥

૮.૨૮/૧રુરુકસ્તનયસ્તસ્ય રાજા ધર્માર્થકોવિદઃ ।
૮.૨૮/૨રુરુકસ્ય વૃકઃ પુત્રો વૃકાદ્ બાહુસ્તુ જજ્ઞિવાન્ ॥ ૮.૨૮॥

૮.૨૯/૧હૈહયાસ્તાલજઙ્ઘાશ્ચ નિરસ્યન્તિ સ્મ તં નૃપમ્ ।
૮.૨૯/૨તત્પત્ની ગર્ભમાદાય ઔર્વસ્યાશ્રમમાવિશત્ ॥ ૮.૨૯॥

૮.૩૦/૧નાસત્યો ધાર્મિકશ્ચૈવ સ હ ધર્મયુગેઽભવત્ ।
૮.૩૦/૨સગરસ્તુ સુતો બાહોર્યજ્ઞે સહ ગરેણ વૈ ॥ ૮.૩૦॥

૮.૩૧/૧ઔર્વસ્યાશ્રમમાસાદ્ય ભાર્ગવેણાભિરક્ષિતઃ ।
૮.૩૧/૨આગ્નેયમસ્ત્રં લબ્ધ્વા ચ ભાર્ગવાત્ સગરો નૃપઃ ॥ ૮.૩૧॥

૮.૩૨/૧જિગાય પૃથિવીં હત્વા તાલજઙ્ઘાન્ સહૈહયાન્ ।
૮.૩૨/૨શકાનાં પહ્લવાનાં ચ ધર્મં નિરસદ્ અચ્યુતઃ ।
૮.૩૨/૩ક્ષત્રિયાણાં મુનિશ્રેષ્ઠાઃ પારદાનાં ચ ધર્મવિત્ ॥ ૮.૩૨॥

૮.૩૩/૧મુનય ઊચુઃ । કથં સ સગરો જાતો ગરેણૈવ સહાચ્યુતઃ ।
૮.૩૩/૨કિમર્થં ચ શકાદીનાં ક્ષત્રિયાણાં મહૌજસામ્ ॥ ૮.૩૩॥

૮.૩૪/૧ધર્માન્ કુલોચિતાન્ રાજા ક્રુદ્ધો નિરસદ્ અચ્યુતઃ ।
૮.૩૪/૨એતન્ નઃ સર્વમાચક્ષ્વ વિસ્તરેણ મહામતે ॥ ૮.૩૪॥

૮.૩૫/૧લોમહર્ષણ ઉવાચ । બાહોર્વ્યસનિનઃ પૂર્વં હૃતં રાજ્યમભૂત્ કિલ ।
૮.૩૫/૨હૈહયૈસ્તાલજઙ્ઘૈશ્ચ શકૈઃ સાર્ધં દ્વિજોત્તમાઃ ॥ ૮.૩૫॥

૮.૩૬/૧યવનાઃ પારદાશ્ચૈવ કામ્બોજાઃ પહ્લવાસ્તથા ।
૮.૩૬/૨એતે હ્યપિ ગણાઃ પઞ્ચ હૈહયાર્થે પરાક્રમન્ ॥ ૮.૩૬॥

૮.૩૭/૧હૃતરાજ્યસ્તદા રાજા સ વૈ બાહુર્વનં યયૌ ।
૮.૩૭/૨પત્ન્યા ચાનુગતો દુઃખી તત્ર પ્રાણાન્ અવાસૃજત્ ॥ ૮.૩૭॥

૮.૩૮/૧પત્ની તુ યાદવી તસ્ય સગર્ભા પૃષ્ઠતોઽન્વગાત્ ।
૮.૩૮/૨સપત્ન્યા ચ ગરસ્તસ્યૈ દત્તઃ પૂર્વં કિલાનઘાઃ ॥ ૮.૩૮॥

૮.૩૯/૧સા તુ ભર્તુશ્ચિતાં કૃત્વા વને તામભ્યરોહત ।
૮.૩૯/૨ઔર્વસ્તાં ભાર્ગવો વિપ્રાઃ કારુણ્યાત્ સમવારયત્ ॥ ૮.૩૯॥

૮.૪૦/૧તસ્યાશ્રમે ચ ગર્ભઃ સ ગરેણૈવ સહાચ્યુતઃ ।
૮.૪૦/૨વ્યજાયત મહાબાહુઃ સગરો નામ પાર્થિવઃ ॥ ૮.૪૦॥

૮.૪૧/૧ઔર્વસ્તુ જાતકર્માદીંસ્તસ્ય કૃત્વા મહાત્મનઃ ।
૮.૪૧/૨અધ્યાપ્ય વેદશાસ્ત્રાણિ તતોઽસ્ત્રં પ્રત્યપાદયત્ ॥ ૮.૪૧॥

૮.૪૨/૧આગ્નેયં તુ મહાભાગા અમરૈરપિ દુઃસહમ્ ।
૮.૪૨/૨સ તેનાસ્ત્રબલેનાજૌ બલેન ચ સમન્વિતઃ ॥ ૮.૪૨॥

૮.૪૩/૧હૈહયાન્ વિજઘાનાશુ ક્રુદ્ધો રુદ્રઃ પશૂન્ ઇવ ।
૮.૪૩/૨આજહાર ચ લોકેષુ કીર્તિં કીર્તિમતાં વરઃ ॥ ૮.૪૩॥

૮.૪૪/૧તતઃ શકાંશ્ચ યવનાન્ કામ્બોજાન્ પારદાંસ્તથા ।
૮.૪૪/૨પહ્લવાંશ્ચૈવ નિઃશેષાન્ કર્તું વ્યવસિતો નૃપઃ ॥ ૮.૪૪॥

૮.૪૫/૧તે વધ્યમાના વીરેણ સગરેણ મહાત્મના ।

૮.૪૫/૨વસિષ્ઠં શરણં ગત્વા પ્રણિપેતુર્મનીષિણમ્ ॥ ૮.૪૫॥

૮.૪૬/૧વસિષ્ઠસ્ત્વથ તાન્ દૃષ્ટ્વા સમયેન મહાદ્યુતિઃ ।
૮.૪૬/૨સગરં વારયામાસ તેષાં દત્ત્વાભયં તદા ॥ ૮.૪૬॥

૮.૪૭/૧સગરઃ સ્વાં પ્રતિજ્ઞાં તુ ગુરોર્વાક્યં નિશમ્ય ચ ।
૮.૪૭/૨ધર્મં જઘાન તેષાં વૈ વેષાન્ અન્યાંશ્ચકાર હ ॥ ૮.૪૭॥

૮.૪૮/૧અર્ધં શકાનાં શિરસો મુણ્ડયિત્વા વ્યસર્જયત્ ।
૮.૪૮/૨યવનાનાં શિરઃ સર્વં કામ્બોજાનાં તથૈવ ચ ॥ ૮.૪૮॥

૮.૪૯/૧પારદા મુક્તકેશાશ્ચ પહ્લવાઞ્ શ્મશ્રુધારિણઃ ।
૮.૪૯/૨નિઃસ્વાધ્યાયવષટ્કારાઃ કૃતાસ્તેન મહાત્મના ॥ ૮.૪૯॥

૮.૫૦/૧શકા યવનકામ્બોજાઃ પારદાશ્ચ દ્વિજોત્તમાઃ ।
૮.૫૦/૨કોણિસર્પા માહિષકા દર્વાશ્ચોલાઃ સકેરલાઃ ॥ ૮.૫૦॥

૮.૫૧/૧સર્વે તે ક્ષત્રિયા વિપ્રા ધર્મસ્તેષાં નિરાકૃતઃ ।
૮.૫૧/૨વસિષ્ઠવચનાદ્ રાજ્ઞા સગરેણ મહાત્મના ॥ ૮.૫૧॥

૮.૫૨/૧સ ધર્મવિજયી રાજા વિજિત્યેમાં વસુંધરામ્ ।
૮.૫૨/૨અશ્વં પ્રચારયામાસ વાજિમેધાય દીક્ષિતઃ ॥ ૮.૫૨॥

૮.૫૩/૧તસ્ય ચારયતઃ સોઽશ્વઃ સમુદ્રે પૂર્વદક્ષિણે ।
૮.૫૩/૨વેલાસમીપેઽપહૃતો ભૂમિં ચૈવ પ્રવેશિતઃ ॥ ૮.૫૩॥

૮.૫૪/૧સ તં દેશં તદા પુત્રૈઃ ખાનયામાસ પાર્થિવઃ ।
૮.૫૪/૨આસેદુસ્તે તદા તત્ર ખન્યમાને મહાર્ણવે ॥ ૮.૫૪॥

૮.૫૫/૧તમાદિપુરુષં દેવં હરિં કૃષ્ણં પ્રજાપતિમ્ ।
૮.૫૫/૨વિષ્ણું કપિલરૂપેણ સ્વપન્તં પુરુષં તદા ॥ ૮.૫૫॥

૮.૫૬/૧તસ્ય ચક્ષુઃસમુત્થેન તેજસા પ્રતિબુધ્યતઃ ।
૮.૫૬/૨દગ્ધાઃ સર્વે મુનિશ્રેષ્ઠાશ્ચત્વારસ્ત્વવશેષિતાઃ ॥ ૮.૫૬॥

૮.૫૭/૧બર્હિકેતુઃ સુકેતુશ્ચ તથા ધર્મરથો નૃપઃ ।
૮.૫૭/૨શૂરઃ પઞ્ચનદશ્ચૈવ તસ્ય વંશકરા નૃપાઃ ॥ ૮.૫૭॥

૮.૫૮/૧પ્રાદાચ્ચ તસ્મૈ ભગવાન્ હરિર્નારાયણો વરમ્ ।
૮.૫૮/૨અક્ષયં વંશમિક્ષ્વાકોઃ કીર્તિં ચાપ્યનિવર્તિનીમ્ ॥ ૮.૫૮॥

૮.૫૯/૧પુત્રં સમુદ્રં ચ વિભુઃ સ્વર્ગે વાસં તથાક્ષયમ્ ।
૮.૫૯/૨સમુદ્રશ્ચાર્ઘમાદાય વવન્દે તં મહીપતિમ્ ॥ ૮.૫૯ ॥

૮.૬૦/૧સાગરત્વં ચ લેભે સ કર્મણા તેન તસ્ય હ ।
૮.૬૦/૨તં ચાશ્વમેધિકં સોઽશ્વં સમુદ્રાદ્ ઉપલબ્ધવાન્ ॥ ૮.૬૦ ॥

૮.૬૧/૧આજહારાશ્વમેધાનાં શતં સ સુમહાતપાઃ ।
૮.૬૧/૨પુત્રાણાં ચ સહસ્રાણિ ષષ્ટિસ્તસ્યેતિ નઃ શ્રુતમ્ ॥ ૮.૬૧ ॥

૮.૬૨/૧મુનય ઊચુઃ । સગરસ્યાત્મજા વીરાઃ કથં જાતા મહાબલાઃ ।
૮.૬૨/૨વિક્રાન્તાઃ ષષ્ટિસાહસ્રા વિધિના કેન સત્તમ ॥ ૮.૬૨ ॥

૮.૬૩/૧લોમહર્ષણ ઉવાચ । દ્વે ભાર્યે સગરસ્યાસ્તાં તપસા દગ્ધકિલ્બિષે ।
૮.૬૩/૨જ્યેષ્ઠા વિદર્ભદુહિતા કેશિની નામ નામતઃ ॥ ૮.૬૩ ॥

૮.૬૪/૧કનીયસી તુ મહતી પત્ની પરમધર્મિણી ।
૮.૬૪/૨અરિષ્ટનેમિદુહિતા રૂપેણાપ્રતિમા ભુવિ ॥ ૮.૬૪ ॥

૮.૬૫/૧ઔર્વસ્તાભ્યાં વરં પ્રાદાત્ તદ્ બુધ્યધ્વં દ્વિજોત્તમાઃ ।
૮.૬૫/૨ષષ્ટિં પુત્રસહસ્રાણિ ગૃહ્ણાત્વેકા નિતમ્બિની ॥ ૮.૬૫ ॥

૮.૬૬/૧એકં વંશધરં ત્વેકા યથેષ્ટં વરયત્વિતિ ।
૮.૬૬/૨તત્રૈકા જગૃહે પુત્રાન્ ષષ્ટિસાહસ્રસમ્મિતાન્ ॥ ૮.૬૬ ॥

૮.૬૭/૧એકં વંશધરં ત્વેકા તથેત્યાહ તતો મુનિઃ ।
૮.૬૭/૨રાજા પઞ્ચજનો નામ બભૂવ સ મહાદ્યુતિઃ ॥ ૮.૬૭ ॥

૮.૬૮/૧ઇતરા સુષુવે તુમ્બીં બીજપૂર્ણામિતિ શ્રુતિઃ ।
૮.૬૮/૨તત્ર ષષ્ટિસહસ્રાણિ ગર્ભાસ્તે તિલસમ્મિતાઃ ॥ ૮.૬૮ ॥

૮.૬૯/૧સમ્બભૂવુર્યથાકાલં વવૃધુશ્ચ યથાસુખમ્ ।
૮.૬૯/૨ઘૃતપૂર્ણેષુ કુમ્ભેષુ તાન્ ગર્ભાન્ નિદધે તતઃ ॥ ૮.૬૯ ॥

૮.૭૦/૧ધાત્રીશ્ચૈકૈકશઃ પ્રાદાત્ તાવતીઃ પોષણે નૃપઃ ।
૮.૭૦/૨તતો દશસુ માસેષુ સમુત્તસ્થુર્યથાક્રમમ્ ॥ ૮.૭૦ ॥

૮.૭૧/૧કુમારાસ્તે યથાકાલં સગરપ્રીતિવર્ધનાઃ ।
૮.૭૧/૨ષષ્ટિપુત્રસહસ્રાણિ તસ્યૈવમભવન્ દ્વિજાઃ ॥ ૮.૭૧ ॥

૮.૭૨/૧ગર્ભાદ્ અલાબૂમધ્યાદ્ વૈ જાતાનિ પૃથિવીપતેઃ ।
૮.૭૨/૨તેષાં નારાયણં તેજઃ પ્રવિષ્ટાનાં મહાત્મનામ્ ॥ ૮.૭૨ ॥

૮.૭૩/૧એકઃ પઞ્ચજનો નામ પુત્રો રાજા બભૂવ હ ।
૮.૭૩/૨શૂરઃ પઞ્ચજનસ્યાસીદ્ અંશુમાન્ નામ વીર્યવાન્ ॥ ૮.૭૩॥

૮.૭૪/૧દિલીપસ્તસ્ય તનયઃ ખટ્વાઙ્ગ ઇતિ વિશ્રુતઃ ।
૮.૭૪/૨યેન સ્વર્ગાદ્ ઇહાગત્ય મુહૂર્તં પ્રાપ્ય જીવિતમ્ ॥ ૮.૭૪॥

૮.૭૫/૧ત્રયોઽભિસંધિતા લોકા બુદ્ધ્યા સત્યેન ચાનઘાઃ ।
૮.૭૫/૨દિલીપસ્ય તુ દાયાદો મહારાજો ભગીરથઃ ॥ ૮.૭૫॥

૮.૭૬/૧યઃ સ ગઙ્ગાં સરિચ્છ્રેષ્ઠામવાતારયત પ્રભુઃ ।
૮.૭૬/૨સમુદ્રમાનયચ્ચૈનાં દુહિતૃત્વેઽપ્યકલ્પયત્ ॥ ૮.૭૬॥

૮.૭૭/૧તસ્માદ્ ભાગીરથી ગઙ્ગા કથ્યતે વંશચિન્તકૈઃ ।
૮.૭૭/૨ભગીરથસુતો રાજા શ્રુત ઇત્યભિવિશ્રુતઃ ॥ ૮.૭૭॥

૮.૭૮/૧નાભાગસ્તુ શ્રુતસ્યાસીત્ પુત્રઃ પરમધાર્મિકઃ ।
૮.૭૮/૨અમ્બરીષસ્તુ નાભાગિઃ સિન્ધુદ્વીપપિતાભવત્ ॥ ૮.૭૮॥

૮.૭૯/૧અયુતાજિત્ તુ દાયાદઃ સિન્ધુદ્વીપસ્ય વીર્યવાન્ ।
૮.૭૯/૨અયુતાજિત્સુતસ્ત્વાસીદ્ ઋતુપર્ણો મહાયશાઃ ॥ ૮.૭૯॥

૮.૮૦/૧દિવ્યાક્ષહૃદયજ્ઞો વૈ રાજા નલસખો બલી ।
૮.૮૦/૨ઋતુપર્ણસુતસ્ત્વાસીદ્ આર્તપર્ણિર્મહાયશાઃ ॥ ૮.૮૦॥

૮.૮૧/૧સુદાસસ્તસ્ય તનયો રાજા ઇન્દ્રસખોઽભવત્ ।
૮.૮૧/૨સુદાસસ્ય સુતઃ પ્રોક્તઃ સૌદાસો નામ પાર્થિવઃ ॥ ૮.૮૧॥

૮.૮૨/૧ખ્યાતઃ કલ્માષપાદો વૈ રાજા મિત્રસહોઽભવત્ ।
૮.૮૨/૨કલ્માષપાદસ્ય સુતઃ સર્વકર્મેતિ વિશ્રુતઃ ॥ ૮.૮૨॥

૮.૮૩/૧અનરણ્યસ્તુ પુત્રોઽભૂદ્ વિશ્રુતઃ સર્વકર્મણઃ ।
૮.૮૩/૨અનરણ્યસુતો નિઘ્નો નિઘ્નતો દ્વૌ બભૂવતુઃ ॥ ૮.૮૩॥

૮.૮૪/૧અનમિત્રો રઘુશ્ચૈવ પાર્થિવર્ષભસત્તમૌ ।
૮.૮૪/૨અનમિત્રસુતો રાજા વિદ્વાન્ દુલિદુહોઽભવત્ ॥ ૮.૮૪॥

૮.૮૫/૧દિલીપસ્તનયસ્તસ્ય રામસ્ય પ્રપિતામહઃ ।
૮.૮૫/૨દીર્ઘબાહુર્દિલીપસ્ય રઘુર્નામ્ના સુતોઽભવત્ ॥ ૮.૮૫॥

૮.૮૬/૧અયોધ્યાયાં મહારાજો યઃ પુરાસીન્ મહાબલઃ ।

૮.૮૬/૨અજસ્તુ રાઘવો જજ્ઞે તથા દશરથોઽપ્યજાત્ ॥ ૮.૮૬॥

૮.૮૭/૧રામો દશરથાજ્જજ્ઞે ધર્માત્મા સુમહાયશાઃ ।
૮.૮૭/૨રામસ્ય તનયો જજ્ઞે કુશ ઇત્યભિસંજ્ઞિતઃ ॥ ૮.૮૭॥

૮.૮૮/૧અતિથિસ્તુ કુશાજ્જજ્ઞે ધર્માત્મા સુમહાયશાઃ ।
૮.૮૮/૨અતિથેસ્ત્વભવત્ પુત્રો નિષધો નામ વીર્યવાન્ ॥ ૮.૮૮॥

૮.૮૯/૧નિષધસ્ય નલઃ પુત્રો નભઃ પુત્રો નલસ્ય ચ ।
૮.૮૯/૨નભસ્ય પુણ્ડરીકસ્તુ ક્ષેમધન્વા તતઃ સ્મૃતઃ ॥ ૮.૮૯॥

૮.૯૦/૧ક્ષેમધન્વસુતસ્ત્વાસીદ્ દેવાનીકઃ પ્રતાપવાન્ ।
૮.૯૦/૨આસીદ્ અહીનગુર્નામ દેવાનીકાત્મજઃ પ્રભુઃ ॥ ૮.૯૦॥

૮.૯૧/૧અહીનગોસ્તુ દાયાદઃ સુધન્વા નામ પાર્થિવઃ ।
૮.૯૧/૨સુધન્વનઃ સુતશ્ચાપિ તતો જજ્ઞે શલો નૃપઃ ॥ ૮.૯૧॥

૮.૯૨/૧ઉક્થો નામ સ ધર્માત્મા શલપુત્રો બભૂવ હ ।
૮.૯૨/૨વજ્રનાભઃ સુતસ્તસ્ય નલસ્તસ્ય મહાત્મનઃ ॥ ૮.૯૨॥

૮.૯૩/૧નલૌ દ્વાવેવ વિખ્યાતૌ પુરાણે મુનિસત્તમાઃ ।
૮.૯૩/૨વીરસેનાત્મજશ્ચૈવ યશ્ચેક્ષ્વાકુકુલોદ્વહઃ ॥ ૮.૯૩॥

૮.૯૪/૧ઇક્ષ્વાકુવંશપ્રભવાઃ પ્રાધાન્યેન પ્રકીર્તિતાઃ ।
૮.૯૪/૨એતે વિવસ્વતો વંશે રાજાનો ભૂરિતેજસઃ ॥ ૮.૯૪॥

૮.૯૫/૧પઠન્ સમ્યગ્ ઇમાં સૃષ્ટિમાદિત્યસ્ય વિવસ્વતઃ ।
૮.૯૫/૨શ્રાદ્ધદેવસ્ય દેવસ્ય પ્રજાનાં પુષ્ટિદસ્ય ચ ।
૮.૯૫/૩પ્રજાવાન્ એતિ સાયુજ્યમાદિત્યસ્ય વિવસ્વતઃ ॥ ૮.૯૫॥

૯.૧/૧લોમહર્ષણ ઉવાચ । પિતા સોમસ્ય ભો વિપ્રા જજ્ઞેઽત્રિર્ભગવાન્ ઋષિઃ ।
૯.૧/૨બ્રહ્મણો માનસાત્ પૂર્વં પ્રજાસર્ગં વિધિત્સતઃ ॥ ૯.૧॥

૯.૨/૧અનુત્તરં નામ તપો યેન તપ્તં હિ તત્ પુરા ।
૯.૨/૨ત્રીણિ વર્ષસહસ્રાણિ દિવ્યાનીતિ હિ નઃ શ્રુતમ્ ॥ ૯.૨॥

૯.૩/૧ઊર્ધ્વમાચક્રમે તસ્ય રેતઃ સોમત્વમીયિવત્ ।
૯.૩/૨નેત્રાભ્યાં વારિ સુસ્રાવ દશધા દ્યોતયન્ દિશઃ ॥ ૯.૩॥

૯.૪/૧તં ગર્ભં વિધિનાદિષ્ટા દશ દેવ્યો દધુસ્તતઃ ।
૯.૪/૨સમેત્ય ધારયામાસુર્ન ચ તાઃ સમશક્નુવન્ ॥ ૯.૪॥

૯.૫/૧યદા ન ધારણે શક્તાસ્તસ્ય ગર્ભસ્ય તા દિશઃ ।
૯.૫/૨તતસ્તાભિઃ સ ત્યક્તસ્તુ નિપપાત વસુંધરામ્ ॥ ૯.૫॥

૯.૬/૧પતિતં સોમમાલોક્ય બ્રહ્મા લોકપિતામહઃ ।
૯.૬/૨રથમારોપયામાસ લોકાનાં હિતકામ્યયા ॥ ૯.૬॥

૯.૭/૧તસ્મિન્ નિપતિતે દેવાઃ પુત્રેઽત્રેઃ પરમાત્મનિ ।
૯.૭/૨તુષ્ટુવુર્બ્રહ્મણઃ પુત્રાસ્તથાન્યે મુનિસત્તમાઃ ॥ ૯.૭॥

૯.૮/૧તસ્ય સંસ્તૂયમાનસ્ય તેજઃ સોમસ્ય ભાસ્વતઃ ।
૯.૮/૨આપ્યાયનાય લોકાનાં ભાવયામાસ સર્વતઃ ॥ ૯.૮॥

૯.૯/૧સ તેન રથમુખ્યેન સાગરાન્તાં વસુંધરામ્ ।
૯.૯/૨ત્રિઃસપ્તકૃત્વોઽતિયશાશ્ચકારાભિપ્રદક્ષિણામ્ ॥ ૯.૯॥

૯.૧૦/૧તસ્ય યચ્ચરિતં તેજઃ પૃથિવીમન્વપદ્યત ।
૯.૧૦/૨ઓષધ્યસ્તાઃ સમુદ્ભૂતા યાભિઃ સંધાર્યતે જગત્ ॥ ૯.૧૦॥

૯.૧૧/૧સ લબ્ધતેજા ભગવાન્ સંસ્તવૈશ્ચ સ્વકર્મભિઃ ।
૯.૧૧/૨તપસ્તેપે મહાભાગઃ પદ્માનાં દર્શનાય સઃ ॥ ૯.૧૧॥

૯.૧૨/૧તતસ્તસ્મૈ દદૌ રાજ્યં બ્રહ્મા બ્રહ્મવિદાં વરઃ ।
૯.૧૨/૨બીજૌષધીનાં વિપ્રાણામપાં ચ મુનિસત્તમાઃ ॥ ૯.૧૨॥

૯.૧૩/૧સ તત્ પ્રાપ્ય મહારાજ્યં સોમઃ સૌમ્યવતાં વરઃ ।
૯.૧૩/૨સમાજહ્રે રાજસૂયં સહસ્રશતદક્ષિણમ્ ॥ ૯.૧૩॥

૯.૧૪/૧દક્ષિણામદદાત્ સોમસ્ત્રીંલ્લોકાન્ ઇતિ નઃ શ્રુતમ્ ।
૯.૧૪/૨તેભ્યો બ્રહ્મર્ષિમુખ્યેભ્યઃ સદસ્યેભ્યશ્ચ ભો દ્વિજાઃ ॥ ૯.૧૪॥

૯.૧૫/૧હિરણ્યગર્ભો બ્રહ્માત્રિર્ભૃગુશ્ચ ઋત્વિજોઽભવત્ ।
૯.૧૫/૨સદસ્યોઽભૂદ્ ધરિસ્તત્ર મુનિભિર્બહુભિર્વૃતઃ ॥ ૯.૧૫॥

૯.૧૬/૧તં સિનીશ્ચ કુહૂશ્ચૈવ દ્યુતિઃ પુષ્ટિઃ પ્રભા વસુઃ ।
૯.૧૬/૨કીર્તિર્ધૃતિશ્ચ લક્ષ્મીશ્ચ નવ દેવ્યઃ સિષેવિરે ॥ ૯.૧૬॥

૯.૧૭/૧પ્રાપ્યાવભૃથમપ્યગ્ર્યં સર્વદેવર્ષિપૂજિતઃ ।
૯.૧૭/૨વિરરાજાધિરાજેન્દ્રો દશધા ભાસયન્ દિશઃ ॥ ૯.૧૭॥

૯.૧૮/૧તસ્ય તત્ પ્રાપ્ય દુષ્પ્રાપ્યમૈશ્વર્યમ્ ઋષિસત્કૃતમ્ ।

૯.૧૮/૨વિબભ્રામ મતિસ્તાતા+ ।વિનયાદ્ અનયાહૃતા ॥ ૯.૧૮॥

૯.૧૯/૧બૃહસ્પતેઃ સ વૈ ભાર્યામૈશ્વર્યમદમોહિતઃ ।
૯.૧૯/૨જહાર તરસા સોમો વિમત્યાઙ્ગિરસઃ સુતમ્ ॥ ૯.૧૯॥

૯.૨૦/૧સ યાચ્યમાનો દેવૈશ્ચ તથા દેવર્ષિભિર્મુહુઃ ।
૯.૨૦/૨નૈવ વ્યસર્જયત્ તારાં તસ્મૈ અઙ્ગિરસે તદા ॥ ૯.૨૦॥

૯.૨૧/૧ઉશના તસ્ય જગ્રાહ પાર્ષ્ણિમઙ્ગિરસસ્તદા ।
૯.૨૧/૨રુદ્રશ્ચ પાર્ષ્ણિં જગ્રાહ ગૃહીત્વાજગવં ધનુઃ ॥ ૯.૨૧॥

૯.૨૨/૧તેન બ્રહ્મશિરો નામ પરમાસ્ત્રં મહાત્મના ।
૯.૨૨/૨ઉદ્દિશ્ય દેવાન્ ઉત્સૃષ્ટં યેનૈષાં નાશિતં યશઃ ॥ ૯.૨૨॥

૯.૨૩/૧તત્ર તદ્ યુદ્ધમભવત્ પ્રખ્યાતં તારકામયમ્ ।
૯.૨૩/૨દેવાનાં દાનવાનાં ચ લોકક્ષયકરં મહત્ ॥ ૯.૨૩॥

૯.૨૪/૧તત્ર શિષ્ટાસ્તુ યે દેવાસ્તુષિતાશ્ચૈવ યે દ્વિજાઃ ।
૯.૨૪/૨બ્રહ્માણં શરણં જગ્મુરાદિદેવં સનાતનમ્ ॥ ૯.૨૪॥

૯.૨૫/૧તદા નિવાર્યોશનસં તં વૈ રુદ્રં ચ શંકરમ્ ।
૯.૨૫/૨દદાવઙ્ગિરસે તારાં સ્વયમેવ પિતામહઃ ॥ ૯.૨૫॥

૯.૨૬/૧તામન્તઃપ્રસવાં દૃષ્ટ્વા ક્રુદ્ધઃ પ્રાહ બૃહસ્પતિઃ ।
૯.૨૬/૨મદીયાયાં ન તે યોનૌ ગર્ભો ધાર્યઃ કથંચન ॥ ૯.૨૬॥

૯.૨૭/૧ઇષીકાસ્તમ્બમાસાદ્ય ગર્ભં સા ચોત્સસર્જ હ ।
૯.૨૭/૨જાતમાત્રઃ સ ભગવાન્ દેવાનામાક્ષિપદ્ વપુઃ ॥ ૯.૨૭॥

૯.૨૮/૧તતઃ સંશયમાપન્નાસ્તારામૂચુઃ સુરોત્તમાઃ ।
૯.૨૮/૨સત્યં બ્રૂહિ સુતઃ કસ્ય સોમસ્યાથ બૃહસ્પતેઃ ॥ ૯.૨૮॥

૯.૨૯/૧પૃચ્છ્યમાના યદા દેવૈર્નાહ સા વિબુધાન્ કિલ ।
૯.૨૯/૨તદા તાં શપ્તુમારબ્ધઃ કુમારો દસ્યુહન્તમઃ ॥ ૯.૨૯॥

૯.૩૦/૧તં નિવાર્ય તતો બ્રહ્મા તારાં પપ્રચ્છ સંશયમ્ ।
૯.૩૦/૨યદ્ અત્ર તથ્યં તદ્ બ્રૂહિ તારે કસ્ય સુતસ્ત્વયમ્ ॥ ૯.૩૦॥

૯.૩૧/૧ઉવાચ પ્રાઞ્જલિઃ સા તં સોમસ્યેતિ પિતામહમ્ ।
૯.૩૧/૨તદા તં મૂર્ધ્નિ ચાઘ્રાય સોમો રાજા સુતં પ્રતિ ॥ ૯.૩૧॥

૯.૩૨/૧બુધ ઇત્યકરોન્ નામ તસ્ય બાલસ્ય ધીમતઃ ।
૯.૩૨/૨પ્રતિકૂલં ચ ગગને સમભ્યુત્તિષ્ઠતે બુધઃ ॥ ૯.૩૨॥

૯.૩૩/૧ઉત્પાદયામાસ તદા પુત્રં વૈરાજપુત્રિકમ્ ।
૯.૩૩/૨તસ્યાપત્યં મહાતેજા બભૂવૈલઃ પુરૂરવાઃ ॥ ૯.૩૩॥

૯.૩૪/૧ઉર્વશ્યાં જજ્ઞિરે યસ્ય પુત્રાઃ સપ્ત મહાત્મનઃ ।
૯.૩૪/૨એતત્ સોમસ્ય વો જન્મ કીર્તિતં કીર્તિવર્ધનમ્ ॥ ૯.૩૪॥

૯.૩૫/૧વંશમસ્ય મુનિશ્રેષ્ઠાઃ કીર્ત્યમાનં નિબોધત ।
૯.૩૫/૨ધન્યમાયુષ્યમારોગ્યં પુણ્યં સંકલ્પસાધનમ્ ॥ ૯.૩૫॥

૯.૩૬/૧સોમસ્ય જન્મ શ્રુત્વૈવ પાપેભ્યો વિપ્રમુચ્યતે ॥ ૯.૩૬॥

૧૦.૧/૧લોમહર્ષણ ઉવાચ । બુધસ્ય તુ મુનિશ્રેષ્ઠા વિદ્વાન્ પુત્રઃ પુરૂરવાઃ ।
૧૦.૧/૨તેજસ્વી દાનશીલશ્ચ યજ્વા વિપુલદક્ષિણઃ ॥ ૧૦.૧॥

૧૦.૨/૧બ્રહ્મવાદી પરાક્રાન્તઃ શત્રુભિર્યુધિ દુર્દમઃ ।
૧૦.૨/૨આહર્તા ચાગ્નિહોત્રસ્ય યજ્ઞાનાં ચ મહીપતિઃ ॥ ૧૦.૨॥

૧૦.૩/૧સત્યવાદી પુણ્યમતિઃ સમ્યક્સંવૃતમૈથુનઃ ।
૧૦.૩/૨અતીવ ત્રિષુ લોકેષુ યશસાપ્રતિમઃ સદા ॥ ૧૦.૩॥

૧૦.૪/૧તં બ્રહ્મવાદિનં શાન્તં ધર્મજ્ઞં સત્યવાદિનમ્ ।
૧૦.૪/૨ઉર્વશી વરયામાસ હિત્વા માનં યશસ્વિની ॥ ૧૦.૪॥

૧૦.૫/૧તયા સહાવસદ્ રાજા દશ વર્ષાણિ પઞ્ચ ચ ।
૧૦.૫/૨ષટ્ પઞ્ચ સપ્ત ચાષ્ટૌ ચ દશ ચાષ્ટૌ ચ ભો દ્વિજાઃ ॥ ૧૦.૫॥

૧૦.૬/૧વને ચૈત્રરથે રમ્યે તથા મન્દાકિનીતટે ।
૧૦.૬/૨અલકાયાં વિશાલાયાં નન્દને ચ વનોત્તમે ॥ ૧૦.૬॥

૧૦.૭/૧ઉત્તરાન્ સ કુરૂન્ પ્રાપ્ય મનોરમફલદ્રુમાન્ ।
૧૦.૭/૨ગન્ધમાદનપાદેષુ મેરુશૃઙ્ગે તથોત્તરે ॥ ૧૦.૭॥

૧૦.૮/૧એતેષુ વનમુખ્યેષુ સુરૈરાચરિતેષુ ચ ।
૧૦.૮/૨ઉર્વશ્યા સહિતો રાજા રેમે પરમયા મુદા ॥ ૧૦.૮॥

૧૦.૯/૧દેશે પુણ્યતમે ચૈવ મહર્ષિભિરભિષ્ટુતે ।
૧૦.૯/૨રાજ્યં સ કારયામાસ પ્રયાગે પૃથિવીપતિઃ ॥ ૧૦.૯॥

૧૦.૧૦/૧એવમ્પ્રભાવો રાજાસીદ્ ઐલસ્તુ નરસત્તમઃ ।
૧૦.૧૦/૨ઉત્તરે જાહ્નવીતીરે પ્રતિષ્ઠાને મહાયશાઃ ॥ ૧૦.૧૦ ॥

૧૦.૧૧/૧લોમહર્ષણ ઉવાચ । ઐલપુત્રા બભૂવુસ્તે સપ્ત દેવસુતોપમાઃ ।
૧૦.૧૧/૨ગન્ધર્વલોકે વિદિતા આયુર્ધીમાન્ અમાવસુઃ ॥ ૧૦.૧૧ ॥

૧૦.૧૨/૧વિશ્વાયુશ્ચૈવ ધર્માત્મા શ્રુતાયુશ્ચ તથાપરઃ ।
૧૦.૧૨/૨દૃઢાયુશ્ચ વનાયુશ્ચ બહ્વાયુશ્ચોર્વશીસુતાઃ ॥ ૧૦.૧૨ ॥

૧૦.૧૩/૧અમાવસોસ્તુ દાયાદો ભીમો રાજાથ રાજરાટ્ ।
૧૦.૧૩/૨શ્રીમાન્ ભીમસ્ય દાયાદો રાજાસીત્ કાઞ્ચનપ્રભઃ ॥ ૧૦.૧૩ ॥

૧૦.૧૪/૧વિદ્વાંસ્તુ કાઞ્ચનસ્યાપિ સુહોત્રોઽભૂન્ મહાબલઃ ।
૧૦.૧૪/૨સુહોત્રસ્યાભવજ્જહ્નુઃ કેશિન્યા ગર્ભસમ્ભવઃ ॥ ૧૦.૧૪ ॥

૧૦.૧૫/૧આજહ્રે યો મહત્ સત્રં સર્પમેધં મહામખમ્ ।
૧૦.૧૫/૨પતિલોભેન યં ગઙ્ગા પતિત્વેન સસાર હ ॥ ૧૦.૧૫ ॥

૧૦.૧૬/૧નેચ્છતઃ પ્લાવયામાસ તસ્ય ગઙ્ગા તદા સદઃ ।
૧૦.૧૬/૨સ તયા પ્લાવિતં દૃષ્ટ્વા યજ્ઞવાટં સમન્તતઃ ॥ ૧૦.૧૬ ॥

૧૦.૧૭/૧સૌહોત્રિરશપદ્ ગઙ્ગાં ક્રુદ્ધો રાજા દ્વિજોત્તમાઃ ।
૧૦.૧૭/૨એષ તે વિફલં યત્નં પિબન્ન્ અમ્ભઃ કરોમ્યહમ્ ॥ ૧૦.૧૭ ॥

૧૦.૧૮/૧અસ્ય ગઙ્ગેઽવલેપસ્ય સદ્યઃ ફલમવાપ્નુહિ ।
૧૦.૧૮/૨જહ્નુરાજર્ષિણા પીતાં ગઙ્ગાં દૃષ્ટ્વા મહર્ષયઃ ॥ ૧૦.૧૮ ॥

૧૦.૧૯/૧ઉપનિન્યુર્મહાભાગાં દુહિતૃત્વેન જાહ્નવીમ્ ।
૧૦.૧૯/૨યુવનાશ્વસ્ય પુત્રીં તુ કાવેરીં જહ્નુરાવહત્ ॥ ૧૦.૧૯ ॥

૧૦.૨૦/૧યુવનાશ્વસ્ય શાપેન ગઙ્ગાર્ધેન વિનિર્ગતા ।
૧૦.૨૦/૨કાવેરીં સરિતાં શ્રેષ્ઠાં જહ્નોર્ભાર્યામનિન્દિતામ્ ॥ ૧૦.૨૦ ॥

૧૦.૨૧/૧જહ્નુસ્તુ દયિતં પુત્રં સુનદ્યં નામ ધાર્મિકમ્ ।
૧૦.૨૧/૨કાવેર્યાં જનયામાસ અજકસ્તસ્ય ચાત્મજઃ ॥ ૧૦.૨૧ ॥

૧૦.૨૨/૧અજકસ્ય તુ દાયાદો બલાકાશ્વો મહીપતિઃ ।
૧૦.૨૨/૨બભૂવ મૃગયાશીલઃ કુશસ્તસ્યાત્મજોઽભવત્ ॥ ૧૦.૨૨ ॥

૧૦.૨૩/૧કુશપુત્રા બભૂવુર્હિ ચત્વારો દેવવર્ચસઃ ।
૧૦.૨૩/૨કુશિકઃ કુશનાભશ્ચ કુશામ્બો મૂર્તિમાંસ્તથા ॥ ૧૦.૨૩ ॥

૧૦.૨૪/૧બલ્લવૈઃ સહ સંવૃદ્ધો રાજા વનચરઃ સદા ।
૧૦.૨૪/૨કુશિકસ્તુ તપસ્તેપે પુત્રમિન્દ્રસમં પ્રભુઃ ॥ ૧૦.૨૪॥

૧૦.૨૫/૧લભેયમિતિ તં શક્રસ્ત્રાસાદ્ અભ્યેત્ય જજ્ઞિવાન્ ।
૧૦.૨૫/૨પૂર્ણે વર્ષસહસ્રે વૈ તતઃ શક્રો હ્યપશ્યત ॥ ૧૦.૨૫॥

૧૦.૨૬/૧અત્યુગ્રતપસં દૃષ્ટ્વા સહસ્રાક્ષઃ પુરંદરઃ ।
૧૦.૨૬/૨સમર્થઃ પુત્રજનને સ્વયમેવાસ્ય શાશ્વતઃ ॥ ૧૦.૨૬॥

૧૦.૨૭/૧પુત્રાર્થં કલ્પયામાસ દેવેન્દ્રઃ સુરસત્તમઃ ।
૧૦.૨૭/૨સ ગાધિરભવદ્ રાજા મઘવાન્ કૌશિકઃ સ્વયમ્ ॥ ૧૦.૨૭॥

૧૦.૨૮/૧પૌરા યસ્યાભવદ્ ભાર્યા ગાધિસ્તસ્યામજાયત ।
૧૦.૨૮/૨ગાધેઃ કન્યા મહાભાગા નામ્ના સત્યવતી શુભા ॥ ૧૦.૨૮॥

૧૦.૨૯/૧તાં ગાધિઃ કાવ્યપુત્રાય ઋચીકાય દદૌ પ્રભુઃ ।
૧૦.૨૯/૨તસ્યાઃ પ્રીતઃ સ વૈ ભર્તા ભાર્ગવો ભૃગુનન્દનઃ ॥ ૧૦.૨૯॥

૧૦.૩૦/૧પુત્રાર્થં સાધયામાસ ચરું ગાધેસ્તથૈવ ચ ।
૧૦.૩૦/૨ઉવાચાહૂય તાં ભાર્યામ્ ઋચીકો ભાર્ગવસ્તદા ॥ ૧૦.૩૦॥

૧૦.૩૧/૧ઉપયોજ્યશ્ચરુરયં ત્વયા માત્રા સ્વયં શુભે ।
૧૦.૩૧/૨તસ્યાં જનિષ્યતે પુત્રો દીપ્તિમાન્ ક્ષત્રિયર્ષભઃ ॥ ૧૦.૩૧॥

૧૦.૩૨/૧અજેયઃ ક્ષત્રિયૈર્લોકે ક્ષત્રિયર્ષભસૂદનઃ ।
૧૦.૩૨/૨તવાપિ પુત્રં કલ્યાણિ ધૃતિમન્તં તપોધનમ્ ॥ ૧૦.૩૨॥

૧૦.૩૩/૧શમાત્મકં દ્વિજશ્રેષ્ઠં ચરુરેષ વિધાસ્યતિ ।
૧૦.૩૩/૨એવમુક્ત્વા તુ તાં ભાર્યામ્ ઋચીકો ભૃગુનન્દનઃ ॥ ૧૦.૩૩॥

૧૦.૩૪/૧તપસ્યભિરતો નિત્યમરણ્યં પ્રવિવેશ હ ।
૧૦.૩૪/૨ગાધિઃ સદારસ્તુ તદા ઋચીકાશ્રમમભ્યગાત્ ॥ ૧૦.૩૪॥

૧૦.૩૫/૧તીર્થયાત્રાપ્રસઙ્ગેન સુતાં દ્રષ્ટું નરેશ્વરઃ ।
૧૦.૩૫/૨ચરુદ્વયં ગૃહીત્વા સા ઋષેઃ સત્યવતી તદા ॥ ૧૦.૩૫॥

૧૦.૩૬/૧ચરુમાદાય યત્નેન સા તુ માત્રે ન્યવેદયત્ ।
૧૦.૩૬/૨માતા તુ તસ્યા દૈવેન દુહિત્રે સ્વં ચરું દદૌ ॥ ૧૦.૩૬॥

૧૦.૩૭/૧તસ્યાશ્ચરુમથાજ્ઞાનાદ્ આત્મસંસ્થં ચકાર હ ।

૧૦.૩૭/૨અથ સત્યવતી સર્વં ક્ષત્રિયાન્તકરં તદા ॥ ૧૦.૩૭॥

૧૦.૩૮/૧ધારયામાસ દીપ્તેન વપુષા ઘોરદર્શના ।
૧૦.૩૮/૨તામ્ ઋચીકસ્તતો દૃષ્ટ્વા યોગેનાભ્યુપસૃત્ય ચ ॥ ૧૦.૩૮॥

૧૦.૩૯/૧તતોઽબ્રવીદ્ દ્વિજશ્રેષ્ઠઃ સ્વાં ભાર્યાં વરવર્ણિનીમ્ ।
૧૦.૩૯/૨માત્રાસિ વઞ્ચિતા ભદ્રે ચરુવ્યત્યાસહેતુના ॥ ૧૦.૩૯॥

૧૦.૪૦/૧જનયિષ્યતિ હિ પુત્રસ્તે ક્રૂરકર્માતિદારુણઃ ।
૧૦.૪૦/૨ભ્રાતા જનિષ્યતે ચાપિ બ્રહ્મભૂતસ્તપોધનઃ ॥ ૧૦.૪૦॥

૧૦.૪૧/૧વિશ્વં હિ બ્રહ્મ તપસા મયા તસ્મિન્ સમર્પિતમ્ ।
૧૦.૪૧/૨એવમુક્તા મહાભાગા ભર્ત્રા સત્યવતી તદા ॥ ૧૦.૪૧॥

૧૦.૪૨/૧પ્રસાદયામાસ પતિં પુત્રો મે નેદૃશો ભવેત્ ।
૧૦.૪૨/૨બ્રાહ્મણાપસદસ્ત્વત્ત ઇત્યુક્તો મુનિરબ્રવીત્ ॥ ૧૦.૪૨॥

૧૦.૪૩/૧ઋચીક ઉવાચ । નૈષ સંકલ્પિતઃ કામો મયા ભદ્રે તથાસ્ત્વિતિ ।
૧૦.૪૩/૨ઉગ્રકર્મા ભવેત્ પુત્રઃ પિતુર્માતુશ્ચ કારણાત્ ॥ ૧૦.૪૩॥

૧૦.૪૪/૧પુનઃ સત્યવતી વાક્યમેવમુક્ત્વાબ્રવીદ્ ઇદમ્ ।
૧૦.૪૪/૨ઇચ્છંલ્લોકાન્ અપિ મુને સૃજેથાઃ કિં પુનઃ સુતમ્ ॥ ૧૦.૪૪॥

૧૦.૪૫/૧શમાત્મકમ્ ઋજું ત્વં મે પુત્રં દાતુમિહાર્હસિ ।
૧૦.૪૫/૨કામમેવંવિધઃ પૌત્રો મમ સ્યાત્ તવ ચ પ્રભો ॥ ૧૦.૪૫॥

૧૦.૪૬/૧યદ્યન્યથા ન શક્યં વૈ કર્તુમેતદ્ દ્વિજોત્તમ ।
૧૦.૪૬/૨તતઃ પ્રસાદમકરોત્ સ તસ્યાસ્તપસો બલાત્ ॥ ૧૦.૪૬॥

૧૦.૪૭/૧પુત્રે નાસ્તિ વિશેષો મે પૌત્રે વા વરવર્ણિનિ ।
૧૦.૪૭/૨ત્વયા યથોક્તં વચનં તથા ભદ્રે ભવિષ્યતિ ॥ ૧૦.૪૭॥

૧૦.૪૮/૧તતઃ સત્યવતી પુત્રં જનયામાસ ભાર્ગવમ્ ।
૧૦.૪૮/૨તપસ્યભિરતં દાન્તં જમદગ્નિં સમાત્મકમ્ ॥ ૧૦.૪૮॥

૧૦.૪૯/૧ભૃગોર્જગત્યાં વંશેઽસ્મિઞ્ ।
૧૦.૪૯/૨જમદગ્નિરજાયત ।
૧૦.૪૯/૩સા હિ સત્યવતી પુણ્યા સત્યધર્મપરાયણા ॥ ૧૦.૪૯॥

૧૦.૫૦/૧કૌશિકીતિ સમાખ્યાતા પ્રવૃત્તેયં મહાનદી ।
૧૦.૫૦/૨ઇક્ષ્વાકુવંશપ્રભવો રેણુર્નામ નરાધિપઃ ॥ ૧૦.૫૦॥

૧૦.૫૧/૧તસ્ય કન્યા મહાભાગા કામલી નામ રેણુકા ।
૧૦.૫૧/૨રેણુકાયાં તુ કામલ્યાં તપોવિદ્યાસમન્વિતઃ ॥ ૧૦.૫૧॥

૧૦.૫૨/૧આર્ચીકો જનયામાસ જામદગ્ન્યં સુદારુણમ્ ।
૧૦.૫૨/૨સર્વવિદ્યાન્તગં શ્રેષ્ઠં ધનુર્વેદસ્ય પારગમ્ ॥ ૧૦.૫૨॥

૧૦.૫૩/૧રામં ક્ષત્રિયહન્તારં પ્રદીપ્તમિવ પાવકમ્ ।
૧૦.૫૩/૨ઔર્વસ્યૈવમ્ ઋચીકસ્ય સત્યવત્યાં મહાયશાઃ ॥ ૧૦.૫૩॥

૧૦.૫૪/૧જમદગ્નિસ્તપોવીર્યાજ્જજ્ઞે બ્રહ્મવિદાં વરઃ ।
૧૦.૫૪/૨મધ્યમશ્ચ શુનઃશેફઃ શુનઃપુચ્છઃ કનિષ્ઠકઃ ॥ ૧૦.૫૪॥

૧૦.૫૫/૧વિશ્વામિત્રં તુ દાયાદં ગાધિઃ કુશિકનન્દનઃ ।
૧૦.૫૫/૨જનયામાસ પુત્રં તુ તપોવિદ્યાશમાત્મકમ્ ॥ ૧૦.૫૫॥

૧૦.૫૬/૧પ્રાપ્ય બ્રહ્મર્ષિસમતાં યોઽયં બ્રહ્મર્ષિતાં ગતઃ ।
૧૦.૫૬/૨વિશ્વામિત્રસ્તુ ધર્માત્મા નામ્ના વિશ્વરથઃ સ્મૃતઃ ॥ ૧૦.૫૬॥

૧૦.૫૭/૧જજ્ઞે ભૃગુપ્રસાદેન કૌશિકાદ્ વંશવર્ધનઃ ।
૧૦.૫૭/૨વિશ્વામિત્રસ્ય ચ સુતા દેવરાતાદયઃ સ્મૃતાઃ ॥ ૧૦.૫૭॥

૧૦.૫૮/૧પ્રખ્યાતાસ્ત્રિષુ લોકેષુ તેષાં નામાન્યતઃપરમ્ ।
૧૦.૫૮/૨દેવરાતઃ કતિશ્ચૈવ યસ્માત્ કાત્યાયનાઃ સ્મૃતાઃ ॥ ૧૦.૫૮॥

૧૦.૫૯/૧શાલાવત્યાં હિરણ્યાક્ષો રેણુર્જજ્ઞેઽથ રેણુકઃ ।
૧૦.૫૯/૨સાંકૃતિર્ગાલવશ્ચૈવ મુદ્ગલશ્ચૈવ વિશ્રુતઃ ॥ ૧૦.૫૯॥

૧૦.૬૦/૧મધુચ્છન્દો જયશ્ચૈવ દેવલશ્ચ તથાષ્ટકઃ ।
૧૦.૬૦/૨કચ્છપો હારિતશ્ચૈવ વિશ્વામિત્રસ્ય તે સુતાઃ ॥ ૧૦.૬૦॥

૧૦.૬૧/૧તેષાં ખ્યાતાનિ ગોત્રાણિ કૌશિકાનાં મહાત્મનામ્ ।
૧૦.૬૧/૨પાણિનો બભ્રવશ્ચૈવ ધ્યાનજપ્યાસ્તથૈવ ચ ॥ ૧૦.૬૧॥

૧૦.૬૨/૧પાર્થિવા દેવરાતાશ્ચ શાલઙ્કાયનબાષ્કલાઃ ।
૧૦.૬૨/૨લોહિતા યમદૂતાશ્ચ તથા કારૂષકાઃ સ્મૃતાઃ ॥ ૧૦.૬૨॥

૧૦.૬૩/૧પૌરવસ્ય મુનિશ્રેષ્ઠા બ્રહ્મર્ષેઃ કૌશિકસ્ય ચ ।
૧૦.૬૩/૨સમ્બન્ધોઽપ્યસ્ય વંશેઽસ્મિન્ બ્રહ્મક્ષત્રસ્ય વિશ્રુતઃ ॥ ૧૦.૬૩॥

૧૦.૬૪/૧વિશ્વામિત્રાત્મજાનાં તુ શુનઃશેફોઽગ્રજઃ સ્મૃતઃ ।

૧૦.૬૪/૨ભાર્ગવઃ કૌશિકત્વં હિ પ્રાપ્તઃ સ મુનિસત્તમઃ ॥ ૧૦.૬૪॥

૧૦.૬૫/૧વિશ્વામિત્રસ્ય પુત્રસ્તુ શુનઃશેફોઽભવત્ કિલ ।
૧૦.૬૫/૨હરિદશ્વસ્ય યજ્ઞે તુ પશુત્વે વિનિયોજિતઃ ॥ ૧૦.૬૫॥

૧૦.૬૬/૧દેવૈર્દત્તઃ શુનઃશેફો વિશ્વામિત્રાય વૈ પુનઃ ।
૧૦.૬૬/૨દેવૈર્દત્તઃ સ વૈ યસ્માદ્ દેવરાતસ્તતોઽભવત્ ॥ ૧૦.૬૬॥

૧૦.૬૭/૧દેવરાતાદયઃ સપ્ત વિશ્વામિત્રસ્ય વૈ સુતાઃ ।
૧૦.૬૭/૨દૃષદ્વતીસુતશ્ચાપિ વૈશ્વામિત્રસ્તથાષ્ટકઃ ॥ ૧૦.૬૭॥

૧૦.૬૮/૧અષ્ટકસ્ય સુતો લૌહિઃ પ્રોક્તો જહ્નુગણો મયા ।
૧૦.૬૮/૨અત ઊર્ધ્વં પ્રવક્ષ્યામિ વંશમાયોર્મહાત્મનઃ ॥ ૧૦.૬૮॥

૧૧.૧/૧લોમહર્ષણ ઉવાચ । આયોઃ પુત્રાશ્ચ તે પઞ્ચ સર્વે વીરા મહારથાઃ ।
૧૧.૧/૨સ્વર્ભાનુતનયાયાં ચ પ્રભાયાં જજ્ઞિરે નૃપાઃ ॥ ૧૧.૧॥

૧૧.૨/૧નહુષઃ પ્રથમં જજ્ઞે વૃદ્ધશર્મા તતઃ પરમ્ ।
૧૧.૨/૨રમ્ભો રજિરનેનાશ્ચ ત્રિષુ લોકેષુ વિશ્રુતાઃ ॥ ૧૧.૨॥

૧૧.૩/૧રજિઃ પુત્રશતાનીહ જનયામાસ પઞ્ચ વૈ ।
૧૧.૩/૨રાજેયમિતિ વિખ્યાતં ક્ષત્રમિન્દ્રભયાવહમ્ ॥ ૧૧.૩॥

૧૧.૪/૧યત્ર દૈવાસુરે યુદ્ધે સમુત્પન્ને સુદારુણે ।
૧૧.૪/૨દેવાશ્ચૈવાસુરાશ્ચૈવ પિતામહમથાબ્રુવન્ ॥ ૧૧.૪॥

૧૧.૫/૧દેવાસુરા ઊચુઃ ।  આવયોર્ભગવન્ યુદ્ધે કો વિજેતા ભવિષ્યતિ ।
૧૧.૫/૨બ્રૂહિ નઃ સર્વભૂતેશ શ્રોતુમિચ્છામ તત્ત્વતઃ ॥ ૧૧.૫॥

૧૧.૬/૧બ્રહ્મોવાચ । યેષામર્થાય સંગ્રામે રજિરાત્તાયુધઃ પ્રભુઃ ।
૧૧.૬/૨યોત્સ્યતે તે વિજેષ્યન્તિ ત્રીંલ્લોકાન્ નાત્ર સંશયઃ ॥ ૧૧.૬॥

૧૧.૭/૧યતો રજિર્ધૃતિસ્તત્ર શ્રીશ્ચ તત્ર યતો ધૃતિઃ ।
૧૧.૭/૨યતો ધૃતિશ્ચ શ્રીશ્ચૈવ ધર્મસ્તત્ર જયસ્તથા ॥ ૧૧.૭॥

૧૧.૮/૧તે દેવા દાનવાઃ પ્રીતા દેવેનોક્તા રજિં તદા ।
૧૧.૮/૨અભ્યયુર્જયમિચ્છન્તો વૃણ્વાનાસ્તં નરર્ષભમ્ ॥ ૧૧.૮॥

૧૧.૯/૧સ હિ સ્વર્ભાનુદૌહિત્રઃ પ્રભાયાં સમપદ્યત ।
૧૧.૯/૨રાજા પરમતેજસ્વી સોમવંશવિવર્ધનઃ ॥ ૧૧.૯॥

૧૧.૧૦/૧તે હૃષ્ટમનસઃ સર્વે રજિં વૈ દેવદાનવાઃ ।
૧૧.૧૦/૨ઊચુરસ્મજ્જયાય ત્વં ગૃહાણ વરકાર્મુકમ્ ॥ ૧૧.૧૦॥

૧૧.૧૧/૧અથોવાચ રજિસ્તત્ર તયોર્વૈ દેવદૈત્યયોઃ ।
૧૧.૧૧/૨અર્થજ્ઞઃ સ્વાર્થમુદ્દિશ્ય યશઃ સ્વં ચ પ્રકાશયન્ ॥ ૧૧.૧૧॥

૧૧.૧૨/૧રજિરુવાચ । યદિ દૈત્યગણાન્ સર્વાઞ્ જિત્વા વીર્યેણ વાસવઃ ।
૧૧.૧૨/૨ઇન્દ્રો ભવામિ ધર્મેણ તતો યોત્સ્યામિ સંયુગે ॥ ૧૧.૧૨॥

૧૧.૧૩/૧દેવાઃ પ્રથમતો વિપ્રાઃ પ્રતીયુર્હૃષ્ટમાનસાઃ ।
૧૧.૧૩/૨એવં યથેષ્ટં નૃપતે કામઃ સમ્પદ્યતાં તવ ॥ ૧૧.૧૩॥

૧૧.૧૪/૧શ્રુત્વા સુરગણાનાં તુ વાક્યં રાજા રજિસ્તદા ।
૧૧.૧૪/૨પપ્રચ્છાસુરમુખ્યાંસ્તુ યથા દેવાન્ અપૃચ્છત ॥ ૧૧.૧૪॥

૧૧.૧૫/૧દાનવા દર્પસમ્પૂર્ણાઃ સ્વાર્થમેવાવગમ્ય હ ।
૧૧.૧૫/૨પ્રત્યૂચુસ્તં નૃપવરં સાભિમાનમિદં વચઃ ॥ ૧૧.૧૫॥

૧૧.૧૬/૧દાનવા ઊચુઃ । અસ્માકમિન્દ્રઃ પ્રહ્રાદો યસ્યાર્થે વિજયામહે ।
૧૧.૧૬/૨અસ્મિંસ્તુ સમરે રાજંસ્તિષ્ઠ ત્વં રાજસત્તમ ॥ ૧૧.૧૬॥

૧૧.૧૭/૧સ તથેતિ બ્રુવન્ન્ એવ દેવૈરપ્યતિચોદિતઃ ।
૧૧.૧૭/૨ભવિષ્યસીન્દ્રો જિત્વૈનં દેવૈરુક્તસ્તુ પાર્થિવઃ ॥ ૧૧.૧૭॥

૧૧.૧૮/૧જઘાન દાનવાન્ સર્વાન્ યેઽવધ્યા વજ્રપાણિનઃ ।
૧૧.૧૮/૨સ વિપ્રનષ્ટાં દેવાનાં પરમશ્રીઃ શ્રિયં વશી ॥ ૧૧.૧૮॥

૧૧.૧૯/૧નિહત્ય દાનવાન્ સર્વાન્ આજહાર રજિઃ પ્રભુઃ ।
૧૧.૧૯/૨તતો રજિં મહાવીર્યં દેવૈઃ સહ શતક્રતુઃ ॥ ૧૧.૧૯॥

૧૧.૨૦/૧રજિપુત્રોઽહમિત્યુક્ત્વા પુનરેવાબ્રવીદ્ વચઃ ।
૧૧.૨૦/૨ઇન્દ્રોઽસિ તાત દેવાનાં સર્વેષાં નાત્ર સંશયઃ ॥ ૧૧.૨૦॥

૧૧.૨૧/૧યસ્યાહમિન્દ્રઃ પુત્રસ્તે ખ્યાતિં યાસ્યામિ કર્મભિઃ ।
૧૧.૨૧/૨સ તુ શક્રવચઃ શ્રુત્વા વઞ્ચિતસ્તેન માયયા ॥ ૧૧.૨૧॥

૧૧.૨૨/૧તથૈવેત્યબ્રવીદ્ રાજા પ્રીયમાણઃ શતક્રતુમ્ ।
૧૧.૨૨/૨તસ્મિંસ્તુ દેવૈઃ સદૃશો દિવં પ્રાપ્તે મહીપતૌ ॥ ૧૧.૨૨॥

૧૧.૨૩/૧દાયાદ્યમિન્દ્રાદ્ આજહ્રૂ રાજ્યં તત્તનયા રજેઃ ।
૧૧.૨૩/૨પઞ્ચ પુત્રશતાન્યસ્ય તદ્ વૈ સ્થાનં શતક્રતોઃ ॥ ૧૧.૨૩॥

૧૧.૨૪/૧સમાક્રામન્ત બહુધા સ્વર્ગલોકં ત્રિવિષ્ટપમ્ ।
૧૧.૨૪/૨તે યદા તુ સ્વસમ્મૂઢા રાગોન્મત્તા વિધર્મિણઃ ॥ ૧૧.૨૪ ॥

૧૧.૨૫/૧બ્રહ્મદ્વિષશ્ચ સંવૃત્તા હતવીર્યપરાક્રમાઃ ।
૧૧.૨૫/૨તતો લેભે સ્વમૈશ્વર્યમિન્દ્રઃ સ્થાનં તથોત્તમમ્ ॥ ૧૧.૨૫ ॥

૧૧.૨૬/૧હત્વા રજિસુતાન્ સર્વાન્ કામક્રોધપરાયણાન્ ।
૧૧.૨૬/૨ય ઇદં ચ્યાવનં સ્થાનાત્ પ્રતિષ્ઠાનં શતક્રતોઃ ।
૧૧.૨૬/૩શ ૃણુયાદ્ ધારયેદ્ વાપિ ન સ દૌર્ગત્યમાપ્નુયાત્ ॥ ૧૧.૨૬ ॥

૧૧.૨૭/૧લોમહર્ષણ ઉવાચ । રમ્ભોઽનપત્યસ્ત્વાસીચ્ચ વંશં
વક્ષ્યામ્યનેનસઃ ।
૧૧.૨૭/૨અનેનસઃ સુતો રાજા પ્રતિક્ષત્રો મહાયશાઃ ॥ ૧૧.૨૭ ॥

૧૧.૨૮/૧પ્રતિક્ષત્રસુતશ્ચાસીત્ સંજયો નામ વિશ્રુતઃ ।
૧૧.૨૮/૨સંજયસ્ય જયઃ પુત્રો વિજયસ્તસ્ય ચાત્મજઃ ॥ ૧૧.૨૮ ॥

૧૧.૨૯/૧વિજયસ્ય કૃતિઃ પુત્રસ્તસ્ય હર્યત્વતઃ સુતઃ ।
૧૧.૨૯/૨હર્યત્વતસુતો રાજા સહદેવઃ પ્રતાપવાન્ ॥ ૧૧.૨૯ ॥

૧૧.૩૦/૧સહદેવસ્ય ધર્માત્મા નદીન ઇતિ વિશ્રુતઃ ।
૧૧.૩૦/૨નદીનસ્ય જયત્સેનો જયત્સેનસ્ય સંકૃતિઃ ॥ ૧૧.૩૦ ॥

૧૧.૩૧/૧સંકૃતેરપિ ધર્માત્મા ક્ષત્રવૃદ્ધો મહાયશાઃ ।
૧૧.૩૧/૨અનેનસઃ સમાખ્યાતાઃ ક્ષત્રવૃદ્ધસ્ય ચાપરઃ ॥ ૧૧.૩૧ ॥

૧૧.૩૨/૧ક્ષત્રવૃદ્ધાત્મજસ્તત્ર સુનહોત્રો મહાયશાઃ ।
૧૧.૩૨/૨સુનહોત્રસ્ય દાયાદાસ્ત્રયઃ પરમધાર્મિકાઃ ॥ ૧૧.૩૨ ॥

૧૧.૩૩/૧કાશઃ શલશ્ચ દ્વાવેતૌ તથા ગૃત્સમદઃ પ્રભુઃ ।
૧૧.૩૩/૨પુત્રો ગૃત્સમદસ્યાપિ શુનકો યસ્ય શૌનકઃ ॥ ૧૧.૩૩ ॥

૧૧.૩૪/૧બ્રાહ્મણાઃ ક્ષત્રિયાશ્ચૈવ વૈશ્યાઃ શૂદ્રાસ્તથૈવ ચ ।
૧૧.૩૪/૨શલાત્મજ આર્ષ્ટિસેણસ્તનયસ્તસ્ય કાશ્યપઃ ॥ ૧૧.૩૪ ॥

૧૧.૩૫/૧કાશસ્ય કાશિપો રાજા પુત્રો દીર્ઘતપાસ્તથા ।
૧૧.૩૫/૨ધનુસ્તુ દીર્ઘતપસો વિદ્વાન્ ધન્વન્તરિસ્તતઃ ॥ ૧૧.૩૫ ॥

૧૧.૩૬/૧તપસોઽન્તે સુમહતો જાતો વૃદ્ધસ્ય ધીમતઃ ।

૧૧.૩૬/૨પુનર્ધન્વન્તરિર્દેવો માનુષેષ્વિહ જન્મનિ ॥ ૧૧.૩૬॥

૧૧.૩૭/૧તસ્ય ગેહે સમુત્પન્નો દેવો ધન્વન્તરિસ્તદા ।
૧૧.૩૭/૨કાશિરાજો મહારાજઃ સર્વરોગપ્રણાશનઃ ॥ ૧૧.૩૭॥

૧૧.૩૮/૧આયુર્વેદં ભરદ્વાજાત્ પ્રાપ્યેહ સ ભિષક્ક્રિયઃ ।
૧૧.૩૮/૨તમષ્ટધા પુનર્વ્યસ્ય શિષ્યેભ્યઃ પ્રત્યપાદયત્ ॥ ૧૧.૩૮॥

૧૧.૩૯/૧ધન્વન્તરેસ્તુ તનયઃ કેતુમાન્ ઇતિ વિશ્રુતઃ ।
૧૧.૩૯/૨અથ કેતુમતઃ પુત્રો વીરો ભીમરથઃ સ્મૃતઃ ॥ ૧૧.૩૯॥

૧૧.૪૦/૧પુત્રો ભીમરથસ્યાપિ દિવોદાસઃ પ્રજેશ્વરઃ ।
૧૧.૪૦/૨દિવોદાસસ્તુ ધર્માત્મા વારાણસ્યધિપોઽભવત્ ॥ ૧૧.૪૦॥

૧૧.૪૧/૧એતસ્મિન્ન્ એવ કાલે તુ પુરીં વારાણસીં દ્વિજાઃ ।
૧૧.૪૧/૨શૂન્યાં નિવેશયામાસ ક્ષેમકો નામ રાક્ષસઃ ॥ ૧૧.૪૧॥

૧૧.૪૨/૧શપ્તા હિ સા મતિમતા નિકુમ્ભેન મહાત્મના ।
૧૧.૪૨/૨શૂન્યા વર્ષસહસ્રં વૈ ભવિત્રી તુ ન સંશયઃ ॥ ૧૧.૪૨॥

૧૧.૪૩/૧તસ્યાં હિ શપ્તમાત્રાયાં દિવોદાસઃ પ્રજેશ્વરઃ ।
૧૧.૪૩/૨વિષયાન્તે પુરીં રમ્યાં ગોમત્યાં સંન્યવેશયત્ ॥ ૧૧.૪૩॥

૧૧.૪૪/૧ભદ્રશ્રેણ્યસ્ય પૂર્વં તુ પુરી વારાણસી અભૂત્ ।
૧૧.૪૪/૨ભદ્રશ્રેણ્યસ્ય પુત્રાણાં શતમુત્તમધન્વિનામ્ ॥ ૧૧.૪૪॥

૧૧.૪૫/૧હત્વા નિવેશયામાસ દિવોદાસો નરાધિપઃ ।
૧૧.૪૫/૨ભદ્રશ્રેણ્યસ્ય તદ્ રાજ્યં હૃતં યેન બલીયસા ॥ ૧૧.૪૫॥

૧૧.૪૬/૧ભદ્રશ્રેણ્યસ્ય પુત્રસ્તુ દુર્દમો નામ વિશ્રુતઃ ।
૧૧.૪૬/૨દિવોદાસેન બાલેતિ ઘૃણયા સ વિસર્જિતઃ ॥ ૧૧.૪૬॥

૧૧.૪૭/૧હૈહયસ્ય તુ દાયાદ્યં હૃતવાન્ વૈ મહીપતિઃ ।
૧૧.૪૭/૨આજહ્રે પિતૃદાયાદ્યં દિવોદાસહૃતં બલાત્ ॥ ૧૧.૪૭॥

૧૧.૪૮/૧ભદ્રશ્રેણ્યસ્ય પુત્રેણ દુર્દમેન મહાત્મના ।
૧૧.૪૮/૨વૈરસ્યાન્તો મહાભાગાઃ કૃતશ્ચાત્મીયતેજસા ॥ ૧૧.૪૮॥

૧૧.૪૯/૧દિવોદાસાદ્ દૃષદ્વત્યાં વીરો જજ્ઞે પ્રતર્દનઃ ।
૧૧.૪૯/૨તેન બાલેન પુત્રેણ પ્રહૃતં તુ પુનર્બલમ્ ॥ ૧૧.૪૯॥

૧૧.૫૦/૧પ્રતર્દનસ્ય પુત્રૌ દ્વૌ વત્સભર્ગૌ સુવિશ્રુતૌ ।
૧૧.૫૦/૨વત્સપુત્રો હ્યલર્કસ્તુ સંનતિસ્તસ્ય ચાત્મજઃ ॥ ૧૧.૫૦ ॥

૧૧.૫૧/૧અલર્કસ્તસ્ય પુત્રસ્તુ બ્રહ્મણ્યઃ સત્યસંગરઃ ।
૧૧.૫૧/૨અલર્કં પ્રતિ રાજર્ષિં શ્લોકો ગીતઃ પુરાતનૈઃ ॥ ૧૧.૫૧ ॥

૧૧.૫૨/૧ષષ્ટિર્વર્ષસહસ્રાણિ ષષ્ટિર્વર્ષશતાનિ ચ ।
૧૧.૫૨/૨યુવા રૂપેણ સમ્પન્નઃ પ્રાગ્ આસીચ્ચ કુલોદ્વહઃ ॥ ૧૧.૫૨ ॥

૧૧.૫૩/૧લોપામુદ્રાપ્રસાદેન પરમાયુરવાપ્તવાન્ ।
૧૧.૫૩/૨તસ્યાસીત્ સુમહદ્ રાજ્યં રૂપયૌવનશાલિનઃ ॥ ૧૧.૫૩ ॥

૧૧.૫૪/૧શાપસ્યાન્તે મહાબાહુર્હત્વા ક્ષેમકરાક્ષસમ્ ।
૧૧.૫૪/૨રમ્યાં નિવેશયામાસ પુરીં વારાણસીં પુનઃ ॥ ૧૧.૫૪ ॥

૧૧.૫૫/૧સંનતેરપિ દાયાદઃ સુનીથો નામ ધાર્મિકઃ ।
૧૧.૫૫/૨સુનીથસ્ય તુ દાયાદઃ ક્ષેમો નામ મહાયશાઃ ॥ ૧૧.૫૫ ॥

૧૧.૫૬/૧ક્ષેમસ્ય કેતુમાન્ પુત્રઃ સુકેતુસ્તસ્ય ચાત્મજઃ ।
૧૧.૫૬/૨સુકેતોસ્તનયશ્ચાપિ ધર્મકેતુરિતિ સ્મૃતઃ ॥ ૧૧.૫૬ ॥

૧૧.૫૭/૧ધર્મકેતોસ્તુ દાયાદઃ સત્યકેતુર્મહારથઃ ।
૧૧.૫૭/૨સત્યકેતુસુતશ્ચાપિ વિભુર્નામ પ્રજેશ્વરઃ ॥ ૧૧.૫૭ ॥

૧૧.૫૮/૧આનર્તસ્તુ વિભોઃ પુત્રઃ સુકુમારશ્ચ તત્સુતઃ ।
૧૧.૫૮/૨સુકુમારસ્ય પુત્રસ્તુ ધૃષ્ટકેતુઃ સુધાર્મિકઃ ॥ ૧૧.૫૮ ॥

૧૧.૫૯/૧ધૃષ્ટકેતોસ્તુ દાયાદો વેણુહોત્રઃ પ્રજેશ્વરઃ ।
૧૧.૫૯/૨વેણુહોત્રસુતશ્ચાપિ ભાર્ગો નામ પ્રજેશ્વરઃ ॥ ૧૧.૫૯ ॥

૧૧.૬૦/૧વત્સસ્ય વત્સભૂમિસ્તુ ભાર્ગભૂમિસ્તુ ભાર્ગજઃ ।
૧૧.૬૦/૨એતે ત્વઙ્ગિરસઃ પુત્રા જાતા વંશેઽથ ભાર્ગવ ॥ ૧૧.૬૦ ॥

૧૧.૬૧/૧બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાસ્ત્રયઃ પુત્રાઃ સહસ્રશઃ ।
૧૧.૬૧/૨ઇત્યેતે કાશ્યપાઃ પ્રોક્તા નહુષસ્ય નિબોધત ॥ ૧૧.૬૧ ॥

૧૨.૧/૧લોમહર્ષણ ઉવાચ । ઉત્પન્નાઃ પિતૃકન્યાયાં વિરજાયાં મહૌજસઃ ।
૧૨.૧/૨નહુષસ્ય તુ દાયાદાઃ ષડ્ ઇન્દ્રોપમતેજસઃ ॥ ૧૨.૧ ॥

૧૨.૨/૧યતિર્યયાતિઃ સંયાતિર્।
૧૨.૨/૨આયાતિઃ પાર્શ્વકોઽભવત્ ।

૧૨.૨/૩યતિર્જ્યેષ્ઠસ્તુ તેષાં વૈ યયાતિસ્તુ તતઃ પરમ્ ॥ ૧૨.૨॥

૧૨.૩/૧કકુત્સ્થકન્યાં ગાં નામ લેભે પરમધાર્મિકઃ ।
૧૨.૩/૨યતિસ્તુ મોક્ષમાસ્થાય બ્રહ્મભૂતોઽભવન્ મુનિઃ ॥ ૧૨.૩॥

૧૨.૪/૧તેષાં યયાતિઃ પઞ્ચાનાં વિજિત્ય વસુધામિમામ્ ।
૧૨.૪/૨દેવયાનીમુશનસઃ સુતાં ભાર્યામવાપ સઃ ॥ ૧૨.૪॥

૧૨.૫/૧શર્મિષ્ઠામાસુરીં ચૈવ તનયાં વૃષપર્વણઃ ।
૧૨.૫/૨યદું ચ તુર્વસું ચૈવ દેવયાની વ્યજાયત ॥ ૧૨.૫॥

૧૨.૬/૧દ્રુહ્યં ચાનું ચ પુરું ચ શર્મિષ્ઠા વાર્ષપર્વણી ।
૧૨.૬/૨તસ્મૈ શક્રો દદૌ પ્રીતો રથં પરમભાસ્વરમ્ ॥ ૧૨.૬॥

૧૨.૭/૧અઙ્ગદં કાઞ્ચનં દિવ્યં દિવ્યૈઃ પરમવાજિભિઃ ।
૧૨.૭/૨યુક્તં મનોજવૈઃ શુભ્રૈર્યેન કાર્યં સમુદ્વહન્ ॥ ૧૨.૭॥

૧૨.૮/૧સ તેન રથમુખ્યેન ષડ્રાત્રેણાજયન્ મહીમ્ ।
૧૨.૮/૨યયાતિર્યુધિ દુર્ધર્ષસ્તથા દેવાન્ સદાનવાન્ ॥ ૧૨.૮॥

૧૨.૯/૧સરથઃ કૌરવાણાં તુ સર્વેષામભવત્ તદા ।
૧૨.૯/૨સંવર્તવસુનામ્નસ્તુ કૌરવાજ્જનમેજયાત્ ॥ ૧૨.૯॥

૧૨.૧૦/૧કુરોઃ પુત્રસ્ય રાજેન્દ્ર+ ।રાજ્ઞઃ પારીક્ષિતસ્ય હ ।
૧૨.૧૦/૨જગામ સ રથો નાશં શાપાદ્ ગર્ગસ્ય ધીમતઃ ॥ ૧૨.૧૦॥

૧૨.૧૧/૧ગર્ગસ્ય હિ સુતં બાલં સ રાજા જનમેજયઃ ।
૧૨.૧૧/૨કાલેન હિંસયામાસ બ્રહ્મહત્યામવાપ સઃ ॥ ૧૨.૧૧॥

૧૨.૧૨/૧સ લોહગન્ધી રાજર્ષિઃ પરિધાવન્ન્ ઇતસ્તતઃ ।
૧૨.૧૨/૨પૌરજાનપદૈસ્ત્યક્તો ન લેભે શર્મ કર્હિચિત્ ॥ ૧૨.૧૨॥

૧૨.૧૩/૧તતઃ સ દુઃખસંતપ્તો નાલભત્ સંવિદં ક્વચિત્ ।
૧૨.૧૩/૨વિપ્રેન્દ્રં શૌનકં રાજા શરણં પ્રત્યપદ્યત ॥ ૧૨.૧૩॥

૧૨.૧૪/૧યાજયામાસ ચ જ્ઞાની શૌનકો જનમેજયમ્ ।
૧૨.૧૪/૨અશ્વમેધેન રાજાનં પાવનાર્થં દ્વિજોત્તમાઃ ॥ ૧૨.૧૪॥

૧૨.૧૫/૧સ લોહગન્ધો વ્યનશત્ તસ્યાવભૃથમેત્ય ચ ।
૧૨.૧૫/૨સ ચ દિવ્યરથો રાજ્ઞો વશશ્ચેદિપતેસ્તદા ॥ ૧૨.૧૫॥

૧૨.૧૬/૧દત્તઃ શક્રેણ તુષ્ટેન લેભે તસ્માદ્ બૃહદ્રથઃ ।
૧૨.૧૬/૨બૃહદ્રથાત્ ક્રમેણૈવ ગતો બાર્હદ્રથં નૃપમ્ ॥ ૧૨.૧૬॥

૧૨.૧૭/૧તતો હત્વા જરાસંધં ભીમસ્તં રથમુત્તમમ્ ।
૧૨.૧૭/૨પ્રદદૌ વાસુદેવાય પ્રીત્યા કૌરવનન્દનઃ ॥ ૧૨.૧૭॥

૧૨.૧૮/૧સપ્તદ્વીપાં યયાતિસ્તુ જિત્વા પૃથ્વીં સસાગરામ્ ।
૧૨.૧૮/૨વિભજ્ય પઞ્ચધા રાજ્યં પુત્રાણાં નાહુષસ્તદા ॥ ૧૨.૧૮॥

૧૨.૧૯/૧યયાતિર્દિશિ પૂર્વસ્યાં યદું જ્યેષ્ઠં ન્યયોજયત્ ।
૧૨.૧૯/૨મધ્યે પુરું ચ રાજાનમભ્યષિઞ્ચત્ સ નાહુષઃ ॥ ૧૨.૧૯॥

૧૨.૨૦/૧દિશિ દક્ષિણપૂર્વસ્યાં તુર્વસું મતિમાન્ નૃપઃ ।
૧૨.૨૦/૨તૈરિયં પૃથિવી સર્વા સપ્તદ્વીપા સપત્તના ॥ ૧૨.૨૦॥

૧૨.૨૧/૧યથાપ્રદેશમદ્યાપિ ધર્મેણ પ્રતિપાલ્યતે ।
૧૨.૨૧/૨પ્રજાસ્તેષાં પુરસ્તાત્ તુ વક્ષ્યામિ મુનિસત્તમાઃ ॥ ૧૨.૨૧॥

૧૨.૨૨/૧ધનુર્ન્યસ્ય પૃષત્કાંશ્ચ પઞ્ચભિઃ પુરુષર્ષભૈઃ ।
૧૨.૨૨/૨જરાવાન્ અભવદ્ રાજા ભારમાવેશ્ય બન્ધુષુ ॥ ૧૨.૨૨॥

૧૨.૨૩/૧નિક્ષિપ્તશસ્ત્રઃ પૃથિવીં ચચાર પૃથિવીપતિઃ ।
૧૨.૨૩/૨પ્રીતિમાન્ અભવદ્ રાજા યયાતિરપરાજિતઃ ॥ ૧૨.૨૩॥

૧૨.૨૪/૧એવં વિભજ્ય પૃથિવીં યયાતિર્યદુમબ્રવીત્ ।
૧૨.૨૪/૨જરાં મે પ્રતિગૃહ્ણીષ્વ પુત્ર કૃત્યાન્તરેણ વૈ ॥ ૧૨.૨૪॥

૧૨.૨૫/૧તરુણસ્તવ રૂપેણ ચરેયં પૃથિવીમિમામ્ ।
૧૨.૨૫/૨જરાં ત્વયિ સમાધાય તં યદુઃ પ્રત્યુવાચ હ ॥ ૧૨.૨૫॥

૧૨.૨૬/૧યદુરુવાચ । અનિર્દિષ્ટા મયા ભિક્ષા બ્રાહ્મણસ્ય પ્રતિશ્રુતા ।
૧૨.૨૬/૨અનપાકૃત્ય તાં રાજન્ ન ગ્રહીષ્યામિ તે જરામ્ ॥ ૧૨.૨૬॥

૧૨.૨૭/૧જરાયાં બહવો દોષાઃ પાનભોજનકારિતાઃ ।
૧૨.૨૭/૨તસ્માજ્જરાં ન તે રાજન્ ગ્રહીતુમહમુત્સહે ॥ ૧૨.૨૭॥

૧૨.૨૮/૧સન્તિ તે બહવઃ પુત્રા મત્તઃ પ્રિયતરા નૃપ ।
૧૨.૨૮/૨પ્રતિગ્રહીતું ધર્મજ્ઞ પુત્રમન્યં વૃણીષ્વ વૈ ॥ ૧૨.૨૮॥

૧૨.૨૯/૧સ એવમુક્તો યદુના રાજા કોપસમન્વિતઃ ।
૧૨.૨૯/૨ઉવાચ વદતાં શ્રેષ્ઠો યયાતિર્ગર્હયન્ સુતમ્ ॥ ૧૨.૨૯॥

૧૨.૩૦/૧યયાતિરુવાચ । ક આશ્રમસ્તવાન્યોઽસ્તિ કો વા ધર્મો વિધીયતે ।
૧૨.૩૦/૨મામનાદૃત્ય દુર્બુદ્ધે યદ્ અહં તવ દેશિકઃ ॥ ૧૨.૩૦॥

૧૨.૩૧/૧એવમુક્ત્વા યદું વિપ્રાઃ શશાપૈનં સ મન્યુમાન્ ।
૧૨.૩૧/૨અરાજ્યા તે પ્રજા મૂઢ ભવિત્રીતિ ન સંશયઃ ॥ ૧૨.૩૧॥

૧૨.૩૨/૧દ્રુહ્યું ચ તુર્વસું ચૈવાપ્યનું ચ દ્વિજસત્તમાઃ ।
૧૨.૩૨/૨એવમેવાબ્રવીદ્ રાજા પ્રત્યાખ્યાતશ્ચ તૈરપિ ॥ ૧૨.૩૨॥

૧૨.૩૩/૧શશાપ તાન્ અતિક્રુદ્ધો યયાતિરપરાજિતઃ ।
૧૨.૩૩/૨યથાવત્ કથિતં સર્વં મયાસ્ય દ્વિજસત્તમાઃ ॥ ૧૨.૩૩॥

૧૨.૩૪/૧એવં શપ્ત્વા સુતાન્ સર્વાંશ્ચતુરઃ પુરુપૂર્વજાન્ ।
૧૨.૩૪/૨તદ્ એવ વચનં રાજા પુરુમપ્યાહ ભો દ્વિજાઃ ॥ ૧૨.૩૪॥

૧૨.૩૫/૧તરુણસ્તવ રૂપેણ ચરેયં પૃથિવીમિમામ્ ।
૧૨.૩૫/૨જરાં ત્વયિ સમાધાય ત્વં પુરો યદિ મન્યસે ॥ ૧૨.૩૫॥

૧૨.૩૬/૧સ જરાં પ્રતિજગ્રાહ પિતુઃ પુરુઃ પ્રતાપવાન્ ।
૧૨.૩૬/૨યયાતિરપિ રૂપેણ પુરોઃ પર્યચરન્ મહીમ્ ॥ ૧૨.૩૬॥

૧૨.૩૭/૧સ માર્ગમાણઃ કામાનામન્તં નૃપતિસત્તમઃ ।
૧૨.૩૭/૨વિશ્વાચ્યા સહિતો રેમે વને ચૈત્રરથે પ્રભુઃ ॥ ૧૨.૩૭॥

૧૨.૩૮/૧યદા ચ તૃપ્તઃ કામેષુ ભોગેષુ ચ નરાધિપઃ ।
૧૨.૩૮/૨તદા પુરોઃ સકાશાદ્ વૈ સ્વાં જરાં પ્રત્યપદ્યત ॥ ૧૨.૩૮॥

૧૨.૩૯/૧યત્ર ગાથા મુનિશ્રેષ્ઠા ગીતાઃ કિલ યયાતિના ।
૧૨.૩૯/૨યાભિઃ પ્રત્યાહરેત્ કામાન્ સર્વશોઽઙ્ગાનિ કૂર્મવત્ ॥ ૧૨.૩૯॥

૧૨.૪૦/૧ન જાતુ કામઃ કામાનામુપભોગેન શામ્યતિ ।
૧૨.૪૦/૨હવિષા કૃષ્ણવર્ત્મેવ ભૂય એવાભિવર્ધતે ॥ ૧૨.૪૦॥

૧૨.૪૧/૧યત્ પૃથિવ્યાં વ્રીહિયવં હિરણ્યં પશવઃ સ્ત્રિયઃ ।
૧૨.૪૧/૨નાલમેકસ્ય તત્ સર્વમિતિ કૃત્વા ન મુહ્યતિ ॥ ૧૨.૪૧॥

૧૨.૪૨/૧યદા ભાવં ન કુરુતે સર્વભૂતેષુ પાપકમ્ ।
૧૨.૪૨/૨કર્મણા મનસા વાચા બ્રહ્મ સમ્પદ્યતે તદા ॥ ૧૨.૪૨॥

૧૨.૪૩/૧યદા તેભ્યો ન બિભેતિ યદા ચાસ્માન્ ન બિભ્યતિ ।

૧૨.૪૩/૨યદા નેચ્છતિ ન દ્વેષ્ટિ બ્રહ્મ સમ્પદ્યતે તદા ॥ ૧૨.૪૩॥

૧૨.૪૪/૧યા દુસ્ત્યજા દુર્મતિભિર્યા ન જીર્યતિ જીર્યતઃ ।
૧૨.૪૪/૨યોઽસૌ પ્રાણાન્તિકો રોગસ્તાં તૃષ્ણાં ત્યજતઃ સુખમ્ ॥ ૧૨.૪૪॥

૧૨.૪૫/૧જીર્યન્તિ જીર્યતઃ કેશા દન્તા જીર્યન્તિ જીર્યતઃ ।
૧૨.૪૫/૨ધનાશા જીવિતાશા ચ જીર્યતોઽપિ ન જીર્યતિ ॥ ૧૨.૪૫॥

૧૨.૪૬/૧યચ્ચ કામસુખં લોકે યચ્ચ દિવ્યં મહત્ સુખમ્ ।
૧૨.૪૬/૨તૃષ્ણાક્ષયસુખસ્યૈતે નાર્હન્તિ ષોડશીં કલામ્ ॥ ૧૨.૪૬॥

૧૨.૪૭/૧એવમુક્ત્વા સ રાજર્ષિઃ સદારઃ પ્રાવિશદ્ વનમ્ ।
૧૨.૪૭/૨કાલેન મહતા ચાયં ચચાર વિપુલં તપઃ ॥ ૧૨.૪૭॥

૧૨.૪૮/૧ભૃગુતુઙ્ગે ગતિં પ્રાપ તપસોઽન્તે મહાયશાઃ ।
૧૨.૪૮/૨અનશ્નન્ દેહમુત્સૃજ્ય સદારઃ સ્વર્ગમાપ્તવાન્ ॥ ૧૨.૪૮॥

૧૨.૪૯/૧તસ્ય વંશે મુનિશ્રેષ્ઠાઃ પઞ્ચ રાજર્ષિસત્તમાઃ ।
૧૨.૪૯/૨યૈર્વ્યાપ્તા પૃથિવી સર્વા સૂર્યસ્યેવ ગભસ્તિભિઃ ॥ ૧૨.૪૯॥

૧૨.૫૦/૧યદોસ્તુ વંશં વક્ષ્યામિ શૃણુધ્વં રાજસત્કૃતમ્ ।
૧૨.૫૦/૨યત્ર નારાયણો જજ્ઞે હરિર્વૃષ્ણિકુલોદ્વહઃ ॥ ૧૨.૫૦॥

૧૨.૫૧/૧સુસ્થઃ પ્રજાવાન્ આયુષ્માન્ કીર્તિમાંશ્ચ ભવેન્ નરઃ ।
૧૨.૫૧/૨યયાતિચરિતં નિત્યમિદં શૃણ્વન્ દ્વિજોત્તમાઃ ॥ ૧૨.૫૧॥

૧૩.૧/૧બ્રાહ્મણા ઊચુઃ । પુરોર્વંશં વયં સૂત શ્રોતુમિચ્છામ તત્ત્વતઃ ।
૧૩.૧/૨દ્રુહ્યસ્યાનોર્યદોશ્ચૈવ તુર્વસોશ્ચ પૃથક્ પૃથક્ ॥ ૧૩.૧॥

૧૩.૨/૧લોમહર્ષણ ઉવાચ । શૃણુધ્વં મુનિશાર્દૂલાઃ પુરોર્વંશં મહાત્મનઃ ।
૧૩.૨/૨વિસ્તરેણાનુપૂર્વ્યા ચ પ્રથમં વદતો મમ ॥ ૧૩.૨॥

૧૩.૩/૧પુરોઃ પુત્રઃ સુવીરોઽભૂન્ મનસ્યુસ્તસ્ય ચાત્મજઃ ।
૧૩.૩/૨રાજા ચાભયદો નામ મનસ્યોરભવત્ સુતઃ ॥ ૧૩.૩॥

૧૩.૪/૧તથૈવાભયદસ્યાસીત્ સુધન્વા નામ પાર્થિવઃ ।
૧૩.૪/૨સુધન્વનઃ સુબાહુશ્ચ રૌદ્રાશ્વસ્તસ્ય ચાત્મજઃ ॥ ૧૩.૪॥

૧૩.૫/૧રૌદ્રાશ્વસ્ય દશાર્ણેયુઃ કૃકણેયુસ્તથૈવ ચ ।
૧૩.૫/૨કક્ષેયુસ્થણ્ડિલેયુશ્ચ સન્નતેયુસ્તથૈવ ચ ॥ ૧૩.૫॥

૧૩.૬/૧ઋચેયુશ્ચ જલેયુશ્ચ સ્થલેયુશ્ચ મહાબલઃ ।
૧૩.૬/૨ધનેયુશ્ચ વનેયુશ્ચ પુત્રકાશ્ચ દશ સ્ત્રિયઃ ॥ ૧૩.૬॥

૧૩.૭/૧ભદ્રા શૂદ્રા ચ મદ્રા ચ શલદા મલદા તથા ।
૧૩.૭/૨ખલદા ચ તતો વિપ્રા નલદા સુરસાપિ ચ ॥ ૧૩.૭॥

૧૩.૮/૧તથા ગોચપલા ચ સ્ત્રી+ ।રત્નકૂટા ચ તા દશ ।
૧૩.૮/૨ઋષિર્જાતોઽત્રિવંશે ચ તાસાં ભર્તા પ્રભાકરઃ ॥ ૧૩.૮॥

૧૩.૯/૧ભદ્રાયાં જનયામાસ સુતં સોમં યશસ્વિનમ્ ।
૧૩.૯/૨સ્વર્ભાનુના હતે સૂર્યે પતમાને દિવો મહીમ્ ॥ ૧૩.૯॥

૧૩.૧૦/૧તમોભિભૂતે લોકે ચ પ્રભા યેન પ્રવર્તિતા ।
૧૩.૧૦/૨સ્વસ્તિ તેઽસ્ત્વિતિ ચોક્ત્વા વૈ પતમાનો દિવાકરઃ ॥ ૧૩.૧૦॥

૧૩.૧૧/૧વચનાત્ તસ્ય વિપ્રર્ષેર્ન પપાત દિવો મહીમ્ ।
૧૩.૧૧/૨અત્રિશ્રેષ્ઠાનિ ગોત્રાણિ યશ્ચકાર મહાતપાઃ ॥ ૧૩.૧૧॥

૧૩.૧૨/૧યજ્ઞેષ્વત્રેર્બલં ચૈવ દેવૈર્યસ્ય પ્રતિષ્ઠિતમ્ ।
૧૩.૧૨/૨સ તાસુ જનયામાસ પુત્રિકાસ્વાત્મકામજાન્ ॥ ૧૩.૧૨॥

૧૩.૧૩/૧દશ પુત્રાન્ મહાસત્ત્વાંસ્તપસ્યુગ્રે રતાંસ્તથા ।
૧૩.૧૩/૨તે તુ ગોત્રકરા વિપ્રા ઋષયો વેદપારગાઃ ॥ ૧૩.૧૩॥

૧૩.૧૪/૧સ્વસ્ત્યાત્રેયા ઇતિ ખ્યાતાઃ કિંચ ત્રિધનવર્જિતાઃ ।
૧૩.૧૪/૨કક્ષેયોસ્તનયાસ્ત્વાસંસ્ત્રય એવ મહારથાઃ ॥ ૧૩.૧૪॥

૧૩.૧૫/૧સભાનરશ્ચાક્ષુષશ્ચ પરમન્યુસ્તથૈવ ચ ।
૧૩.૧૫/૨સભાનરસ્ય પુત્રસ્તુ વિદ્વાન્ કાલાનલો નૃપઃ ॥ ૧૩.૧૫॥

૧૩.૧૬/૧કાલાનલસ્ય ધર્મજ્ઞઃ સૃઞ્જયો નામ વૈ સુતઃ ।
૧૩.૧૬/૨સૃઞ્જયસ્યાભવત્ પુત્રો વીરો રાજા પુરંજયઃ ॥ ૧૩.૧૬॥

૧૩.૧૭/૧જનમેજયો મુનિશ્રેષ્ઠાઃ પુરંજયસુતોઽભવત્ ।
૧૩.૧૭/૨જનમેજયસ્ય રાજર્ષેર્મહાશાલોઽભવત્ સુતઃ ॥ ૧૩.૧૭॥

૧૩.૧૮/૧દેવેષુ સ પરિજ્ઞાતઃ પ્રતિષ્ઠિતયશા ભુવિ ।
૧૩.૧૮/૨મહામના નામ સુતો મહાશાલસ્ય વિશ્રુતઃ ॥ ૧૩.૧૮॥

૧૩.૧૯/૧જજ્ઞે વીરઃ સુરગણૈઃ પૂજિતઃ સુમહામનાઃ ।
૧૩.૧૯/૨મહામનાસ્તુ પુત્રૌ દ્વૌ જનયામાસ ભો દ્વિજાઃ ॥ ૧૩.૧૯॥

૧૩.૨૦/૧ઉશીનરં ચ ધર્મજ્ઞં તિતિક્ષું ચ મહાબલમ્ ।
૧૩.૨૦/૨ઉશીનરસ્ય પત્ન્યસ્તુ પઞ્ચ રાજર્ષિવંશજાઃ ॥ ૧૩.૨૦ ॥

૧૩.૨૧/૧નૃગા કૃમિર્નવા દર્વા પઞ્ચમી ચ દૃષદ્વતી ।
૧૩.૨૧/૨ઉશીનરસ્ય પુત્રાસ્તુ પઞ્ચ તાસુ કુલોદ્વહાઃ ॥ ૧૩.૨૧ ॥

૧૩.૨૨/૧તપસા ચૈવ મહતા જાતા વૃદ્ધસ્ય ચાત્મજાઃ ।
૧૩.૨૨/૨નૃગાયાસ્તુ નૃગઃ પુત્રઃ કૃમ્યાં કૃમિરજાયત ॥ ૧૩.૨૨ ॥

૧૩.૨૩/૧નવાયાસ્તુ નવઃ પુત્રો દર્વાયાઃ સુવ્રતોઽભવત્ ।
૧૩.૨૩/૨દૃષદ્વત્યાસ્તુ સંજજ્ઞે શિબિરૌશીનરો નૃપઃ ॥ ૧૩.૨૩ ॥

૧૩.૨૪/૧શિબેસ્તુ શિબયો વિપ્રા યૌધેયાસ્તુ નૃગસ્ય હ ।
૧૩.૨૪/૨નવસ્ય નવરાષ્ટ્રં તુ કૃમેસ્તુ કૃમિલા પુરી ॥ ૧૩.૨૪ ॥

૧૩.૨૫/૧સુવ્રતસ્ય તથામ્બષ્ઠાઃ શિબિપુત્રાન્ નિબોધત ।
૧૩.૨૫/૨શિબેસ્તુ શિબયઃ પુત્રાશ્ચત્વારો લોકવિશ્રુતાઃ ॥ ૧૩.૨૫ ॥

૧૩.૨૬/૧વૃષદર્ભઃ સુવીરશ્ચ કેકયો મદ્રકસ્તથા ।
૧૩.૨૬/૨તેષાં જનપદાઃ સ્ફીતા કેકયા મદ્રકાસ્તથા ॥ ૧૩.૨૬ ॥

૧૩.૨૭/૧વૃષદર્ભાઃ સુવીરાશ્ચ તિતિક્ષોસ્તુ પ્રજાસ્ત્વિમાઃ ।
૧૩.૨૭/૨તિતિક્ષુરભવદ્ રાજા પૂર્વસ્યાં દિશિ ભો દ્વિજાઃ ॥ ૧૩.૨૭ ॥

૧૩.૨૮/૧ઉષદ્રથો મહાવીર્યઃ ફેનસ્તસ્ય સુતોઽભવત્ ।
૧૩.૨૮/૨ફેનસ્ય સુતપા જજ્ઞે તતઃ સુતપસો બલિઃ ॥ ૧૩.૨૮ ॥

૧૩.૨૯/૧જાતો માનુષયોનૌ તુ સ રાજા કાઞ્ચનેષુધિઃ ।
૧૩.૨૯/૨મહાયોગી સ તુ બલિર્બભૂવ નૃપતિઃ પુરા ॥ ૧૩.૨૯ ॥

૧૩.૩૦/૧પુત્રાન્ ઉત્પાદયામાસ પઞ્ચ વંશકરાન્ ભુવિ ।
૧૩.૩૦/૨અઙ્ગઃ પ્રથમતો જજ્ઞે વઙ્ગઃ સુહ્મસ્તથૈવ ચ ॥ ૧૩.૩૦ ॥

૧૩.૩૧/૧પુણ્ડ્રઃ કલિઙ્ગશ્ચ તથા બાલેયં ક્ષત્રમુચ્યતે ।
૧૩.૩૧/૨બાલેયા બ્રાહ્મણાશ્ચૈવ તસ્ય વંશકરા ભુવિ ॥ ૧૩.૩૧ ॥

૧૩.૩૨/૧બલેશ્ચ બ્રહ્મણા દત્તો વરઃ પ્રીતેન ભો દ્વિજાઃ ।
૧૩.૩૨/૨મહાયોગિત્વમાયુશ્ચ કલ્પસ્ય પરિમાણતઃ ॥ ૧૩.૩૨ ॥

૧૩.૩૩/૧બલે ચાપ્રતિમત્વં વૈ ધર્મતત્ત્વાર્થદર્શનમ્ ।

૧૩.૩૩/૨સંગ્રામે ચાપ્યજેયત્વં ધર્મે ચૈવ પ્રધાનતામ્ ॥ ૧૩.૩૩॥

૧૩.૩૪/૧ત્રૈલોક્યદર્શનં ચાપિ પ્રાધાન્યં પ્રસવે તથા ।
૧૩.૩૪/૨ચતુરો નિયતાન્ વર્ણાંસ્ત્વં ચ સ્થાપયિતેતિ ચ ॥ ૧૩.૩૪॥

૧૩.૩૫/૧ઇત્યુક્તો વિભુના રાજા બલિઃ શાન્તિં પરાં યયૌ ।
૧૩.૩૫/૨કાલેન મહતા વિપ્રાઃ સ્વં ચ સ્થાનમુપાગમત્ ॥ ૧૩.૩૫॥

૧૩.૩૬/૧તેષાં જનપદાઃ પઞ્ચ અઙ્ગા વઙ્ગાઃ સસુહ્મકાઃ ।
૧૩.૩૬/૨કલિઙ્ગાઃ પુણ્ડ્રકાશ્ચૈવ પ્રજાસ્ત્વઙ્ગસ્ય સામ્પ્રતમ્ ॥ ૧૩.૩૬॥

૧૩.૩૭/૧અઙ્ગપુત્રો મહાન્ આસીદ્ રાજેન્દ્રો દધિવાહનઃ ।
૧૩.૩૭/૨દધિવાહનપુત્રસ્તુ રાજા દિવિરથોઽભવત્ ॥ ૧૩.૩૭॥

૧૩.૩૮/૧પુત્રો દિવિરથસ્યાસીચ્છક્રતુલ્યપરાક્રમઃ ।
૧૩.૩૮/૨વિદ્વાન્ ધર્મરથો નામ તસ્ય ચિત્રરથઃ સુતઃ ॥ ૧૩.૩૮॥

૧૩.૩૯/૧તેન ધર્મરથેનાથ તદા કાલઞ્જરે ગિરૌ ।
૧૩.૩૯/૨યજતા સહ શક્રેણ સોમઃ પીતો મહાત્મના ॥ ૧૩.૩૯॥

૧૩.૪૦/૧અથ ચિત્રરથસ્યાપિ પુત્રો દશરથોઽભવત્ ।
૧૩.૪૦/૨લોમપાદ ઇતિ ખ્યાતો યસ્ય શાન્તા સુતાભવત્ ॥ ૧૩.૪૦॥

૧૩.૪૧/૧તસ્ય દાશરથિર્વીરશ્ચતુરઙ્ગો મહાયશાઃ ।
૧૩.૪૧/૨ઋષ્યશૃઙ્ગપ્રસાદેન જજ્ઞે વંશવિવર્ધનઃ ॥ ૧૩.૪૧॥

૧૩.૪૨/૧ચતુરઙ્ગસ્ય પુત્રસ્તુ પૃથુલાક્ષ ઇતિ સ્મૃતઃ ।
૧૩.૪૨/૨પૃથુલાક્ષસુતો રાજા ચમ્પો નામ મહાયશાઃ ॥ ૧૩.૪૨॥

૧૩.૪૩/૧ચમ્પસ્ય તુ પુરી ચમ્પા યા માલિન્યભવત્ પુરા ।
૧૩.૪૩/૨પૂર્ણભદ્રપ્રસાદેન હર્યઙ્ગોઽસ્ય સુતોઽભવત્ ॥ ૧૩.૪૩॥

૧૩.૪૪/૧તતો વૈભાણ્ડકિસ્તસ્ય વારણં શક્રવારણમ્ ।
૧૩.૪૪/૨અવતારયામાસ મહીં મન્ત્રૈર્વાહનમુત્તમમ્ ॥ ૧૩.૪૪॥

૧૩.૪૫/૧હર્યઙ્ગસ્ય સુતસ્તત્ર રાજા ભદ્રરથઃ સ્મૃતઃ ।
૧૩.૪૫/૨પુત્રો ભદ્રરથસ્યાસીદ્ બૃહત્કર્મા પ્રજેશ્વરઃ ॥ ૧૩.૪૫॥

૧૩.૪૬/૧બૃહદ્દર્ભઃ સુતસ્તસ્ય યસ્માજ્જજ્ઞે બૃહન્મનાઃ ।
૧૩.૪૬/૨બૃહન્મનાસ્તુ રાજેન્દ્રો જનયામાસ વૈ સુતમ્ ॥ ૧૩.૪૬॥

૧૩.૪૭/૧નામ્ના જયદ્રથં નામ યસ્માદ્ દૃઢરથો નૃપઃ ।
૧૩.૪૭/૨આસીદ્ દૃઢરથસ્યાપિ વિશ્વજિજ્જનમેજયી ॥ ૧૩.૪૭॥

૧૩.૪૮/૧દાયાદસ્તસ્ય વૈકર્ણો વિકર્ણસ્તસ્ય ચાત્મજઃ ।
૧૩.૪૮/૨તસ્ય પુત્રશતં ત્વાસીદ્ અઙ્ગાનાં કુલવર્ધનમ્ ॥ ૧૩.૪૮॥

૧૩.૪૯/૧એતેઽઙ્ગવંશજાઃ સર્વે રાજાનઃ કીર્તિતા મયા ।
૧૩.૪૯/૨સત્યવ્રતા મહાત્માનઃ પ્રજાવન્તો મહારથાઃ ॥ ૧૩.૪૯॥

૧૩.૫૦/૧ઋચેયોસ્તુ મુનિશ્રેષ્ઠા રૌદ્રાશ્વતનયસ્ય વૈ ।
૧૩.૫૦/૨શ‍ૃણુધ્વં સમ્પ્રવક્ષ્યામિ વંશં રાજ્ઞસ્તુ ભો દ્વિજાઃ ॥ ૧૩.૫૦॥

૧૩.૫૧/૧ઋચેયોસ્તનયો રાજા મતિનારો મહીપતિઃ ।
૧૩.૫૧/૨મતિનારસુતાસ્ત્વાસંસ્ત્રયઃ પરમધાર્મિકાઃ ॥ ૧૩.૫૧॥

૧૩.૫૨/૧વસુરોધઃ પ્રતિરથઃ સુબાહુશ્ચૈવ ધાર્મિકઃ ।
૧૩.૫૨/૨સર્વે વેદવિદશ્ચૈવ બ્રહ્મણ્યાઃ સત્યવાદિનઃ ॥ ૧૩.૫૨॥

૧૩.૫૩/૧ઇલા નામ તુ યસ્યાસીત્ કન્યા વૈ મુનિસત્તમાઃ ।
૧૩.૫૩/૨બ્રહ્મવાદિન્યધિસ્ત્રી સા તંસુસ્તામભ્યગચ્છત ॥ ૧૩.૫૩॥

૧૩.૫૪/૧તંસોઃ સુતોઽથ રાજર્ષિર્ધર્મનેત્રઃ પ્રતાપવાન્ ।
૧૩.૫૪/૨બ્રહ્મવાદી પરાક્રાન્તસ્તસ્ય ભાર્યોપદાનવી ॥ ૧૩.૫૪॥

૧૩.૫૫/૧ઉપદાનવી તતઃ પુત્રાંશ્ચતુરોઽજનયચ્છુભાન્ ।
૧૩.૫૫/૨દુષ્યન્તમથ સુષ્મન્તં પ્રવીરમનઘં તથા ॥ ૧૩.૫૫॥

૧૩.૫૬/૧દુષ્યન્તસ્ય તુ દાયાદો ભરતો નામ વીર્યવાન્ ।
૧૩.૫૬/૨સ સર્વદમનો નામ નાગાયુતબલો મહાન્ ॥ ૧૩.૫૬॥

૧૩.૫૭/૧ચક્રવર્તી સુતો જજ્ઞે દુષ્યન્તસ્ય મહાત્મનઃ ।
૧૩.૫૭/૨શકુન્તલાયાં ભરતો યસ્ય નામ્ના તુ ભારતાઃ ॥ ૧૩.૫૭॥

૧૩.૫૮/૧ભરતસ્ય વિનષ્ટેષુ તનયેષુ મહીપતેઃ ।
૧૩.૫૮/૨માતૃણાં તુ પ્રકોપેણ મયા તત્ કથિતં પુરા ॥ ૧૩.૫૮॥

૧૩.૫૯/૧બૃહસ્પતેરઙ્ગિરસઃ પુત્રો વિપ્રો મહામુનિઃ ।
૧૩.૫૯/૨અયાજયદ્ ભરદ્વાજો મહદ્ભિઃ ક્રતુભિર્વિભુઃ ॥ ૧૩.૫૯॥

૧૩.૬૦/૧પૂર્વં તુ વિતથે તસ્ય કૃતે વૈ પુત્રજન્મનિ ।
૧૩.૬૦/૨તતોઽથ વિતથો નામ ભરદ્વાજાત્ સુતોઽભવત્ ॥ ૧૩.૬૦॥

૧૩.૬૧/૧તતોઽથ વિતથે જાતે ભરતસ્તુ દિવં યયૌ ।
૧૩.૬૧/૨વિતથં ચાભિષિચ્યાથ ભરદ્વાજો વનં યયૌ ॥ ૧૩.૬૧॥

૧૩.૬૨/૧સ ચાપિ વિતથઃ પુત્રાઞ્ જનયામાસ પઞ્ચ વૈ ।
૧૩.૬૨/૨સુહોત્રં ચ સુહોતારં ગયં ગર્ગં તથૈવ ચ ॥ ૧૩.૬૨॥

૧૩.૬૩/૧કપિલં ચ મહાત્માનં સુહોત્રસ્ય સુતદ્વયમ્ ।
૧૩.૬૩/૨કાશિકં ચ મહાસત્યં તથા ગૃત્સમતિં નૃપમ્ ॥ ૧૩.૬૩॥

૧૩.૬૪/૧તથા ગૃત્સમતેઃ પુત્રા બ્રાહ્મણાઃ ક્ષત્રિયા વિશઃ ।
૧૩.૬૪/૨કાશિકસ્ય તુ કાશેયઃ પુત્રો દીર્ઘતપાસ્તથા ॥ ૧૩.૬૪॥

૧૩.૬૫/૧બભૂવ દીર્ઘતપસો વિદ્વાન્ ધન્વન્તરિઃ સુતઃ ।
૧૩.૬૫/૨ધન્વન્તરેસ્તુ તનયઃ કેતુમાન્ ઇતિ વિશ્રુતઃ ॥ ૧૩.૬૫॥

૧૩.૬૬/૧તથા કેતુમતઃ પુત્રો વિદ્વાન્ ભીમરથઃ સ્મૃતઃ ।
૧૩.૬૬/૨પુત્રો ભીમરથસ્યાપિ વારાણસ્યધિપોઽભવત્ ॥ ૧૩.૬૬॥

૧૩.૬૭/૧દિવોદાસ ઇતિ ખ્યાતઃ સર્વક્ષત્રપ્રણાશનઃ ।
૧૩.૬૭/૨દિવોદાસસ્ય પુત્રસ્તુ વીરો રાજા પ્રતર્દનઃ ॥ ૧૩.૬૭॥

૧૩.૬૮/૧પ્રતર્દનસ્ય પુત્રૌ દ્વૌ વત્સો ભાર્ગવ એવ ચ ।
૧૩.૬૮/૨અલર્કો રાજપુત્રસ્તુ રાજા સન્મતિમાન્ ભુવિ ॥ ૧૩.૬૮॥

૧૩.૬૯/૧હૈહયસ્ય તુ દાયાદ્યં હૃતવાન્ વૈ મહીપતિઃ ।
૧૩.૬૯/૨આજહ્રે પિતૃદાયાદ્યં દિવોદાસહૃતં બલાત્ ॥ ૧૩.૬૯॥

૧૩.૭૦/૧ભદ્રશ્રેણ્યસ્ય પુત્રેણ દુર્દમેન મહાત્મના ।
૧૩.૭૦/૨દિવોદાસેન બાલેતિ ઘૃણયાસૌ વિસર્જિતઃ ॥ ૧૩.૭૦॥

૧૩.૭૧/૧અષ્ટારથો નામ નૃપઃ સુતો ભીમરથસ્ય વૈ ।
૧૩.૭૧/૨તેન પુત્રેણ બાલસ્ય પ્રહૃતં તસ્ય ભો દ્વિજાઃ ॥ ૧૩.૭૧॥

૧૩.૭૨/૧વૈરસ્યાન્તં મુનિશ્રેષ્ઠાઃ ક્ષત્રિયેણ વિધિત્સતા ।
૧૩.૭૨/૨અલર્કઃ કાશિરાજસ્તુ બ્રહ્મણ્યઃ સત્યસંગરઃ ॥ ૧૩.૭૨॥

૧૩.૭૩/૧ષષ્ટિં વર્ષસહસ્રાણિ ષષ્ટિં વર્ષશતાનિ ચ ।
૧૩.૭૩/૨યુવા રૂપેણ સમ્પન્ન આસીત્ કાશિકુલોદ્વહઃ ॥ ૧૩.૭૩॥

૧૩.૭૪/૧લોપામુદ્રાપ્રસાદેન પરમાયુરવાપ સઃ ।

૧૩.૭૪/૨વયસોઽન્તે મુનિશ્રેષ્ઠા હત્વા ક્ષેમકરાક્ષસમ્ ॥ ૧૩.૭૪॥

૧૩.૭૫/૧રમ્યાં નિવેશયામાસ પુરીં વારાણસીં નૃપઃ ।
૧૩.૭૫/૨અલર્કસ્ય તુ દાયાદઃ ક્ષેમકો નામ પાર્થિવઃ ॥ ૧૩.૭૫॥

૧૩.૭૬/૧ક્ષેમકસ્ય તુ પુત્રો વૈ વર્ષકેતુસ્તતોઽભવત્ ।
૧૩.૭૬/૨વર્ષકેતોશ્ચ દાયાદો વિભુર્નામ પ્રજેશ્વરઃ ॥ ૧૩.૭૬॥

૧૩.૭૭/૧આનર્તસ્તુ વિભોઃ પુત્રઃ સુકુમારસ્તતોઽભવત્ ।
૧૩.૭૭/૨સુકુમારસ્ય પુત્રસ્તુ સત્યકેતુર્મહારથઃ ॥ ૧૩.૭૭॥

૧૩.૭૮/૧સુતોઽભવન્ મહાતેજા રાજા પરમધાર્મિકઃ ।
૧૩.૭૮/૨વત્સસ્ય વત્સભૂમિસ્તુ ભર્ગભૂમિસ્તુ ભાર્ગવાત્ ॥ ૧૩.૭૮॥

૧૩.૭૯/૧એતે ત્વઙ્ગિરસઃ પુત્રા જાતા વંશેઽથ ભાર્ગવે ।
૧૩.૭૯/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચ મુનિસત્તમાઃ ॥ ૧૩.૭૯॥

૧૩.૮૦/૧આજમીઢોઽપરો વંશઃ શ્રૂયતાં દ્વિજસત્તમાઃ ।
૧૩.૮૦/૨સુહોત્રસ્ય બૃહત્ પુત્રો બૃહતસ્તનયાસ્ત્રયઃ ॥ ૧૩.૮૦॥

૧૩.૮૧/૧અજમીઢો દ્વિમીઢશ્ચ પુરુમીઢશ્ચ વીર્યવાન્ ।
૧૩.૮૧/૨અજમીઢસ્ય પત્ન્યસ્તુ તિસ્રો વૈ યશસાન્વિતાઃ ॥ ૧૩.૮૧॥

૧૩.૮૨/૧નીલી ચ કેશિની ચૈવ ધૂમિની ચ વરાઙ્ગનાઃ ।
૧૩.૮૨/૨અજમીઢસ્ય કેશિન્યાં જજ્ઞે જહ્નુઃ પ્રતાપવાન્ ॥ ૧૩.૮૨॥

૧૩.૮૩/૧આજહ્રે યો મહાસત્રં સર્વમેધમખં વિભુમ્ ।
૧૩.૮૩/૨પતિલોભેન યં ગઙ્ગા વિનીતેવ સસાર હ ॥ ૧૩.૮૩॥

૧૩.૮૪/૧નેચ્છતઃ પ્લાવયામાસ તસ્ય ગઙ્ગા ચ તત્ સદઃ ।
૧૩.૮૪/૨તત્ તયા પ્લાવિતં દૃષ્ટ્વા યજ્ઞવાટં સમન્તતઃ ॥ ૧૩.૮૪॥

૧૩.૮૫/૧જહ્નુરપ્યબ્રવીદ્ ગઙ્ગાં ક્રુદ્ધો વિપ્રાસ્તદા નૃપઃ ।
૧૩.૮૫/૨એષ તે ત્રિષુ લોકેષુ સંક્ષિપ્યાપઃ પિબામ્યહમ્ ।
૧૩.૮૫/૩અસ્ય ગઙ્ગેઽવલેપસ્ય સદ્યઃ ફલમવાપ્નુહિ ॥ ૧૩.૮૫॥

૧૩.૮૬/૧તતઃ પીતાં મહાત્માનો દૃષ્ટ્વા ગઙ્ગાં મહર્ષયઃ ।
૧૩.૮૬/૨ઉપનિન્યુર્મહાભાગા દુહિતૃત્વેન જાહ્નવીમ્ ॥ ૧૩.૮૬॥

૧૩.૮૭/૧યુવનાશ્વસ્ય પુત્રીં તુ કાવેરીં જહ્નુરાવહત્ ।
૧૩.૮૭/૨ગઙ્ગાશાપેન દેહાર્ધં યસ્યાઃ પશ્ચાન્ નદીકૃતમ્ ॥ ૧૩.૮૭॥

૧૩.૮૮/૧જહ્નોસ્તુ દયિતઃ પુત્રો અજકો નામ વીર્યવાન્ ।
૧૩.૮૮/૨અજકસ્ય તુ દાયાદો બલાકાશ્વો મહીપતિઃ ॥ ૧૩.૮૮॥

૧૩.૮૯/૧બભૂવ મૃગયાશીલઃ કુશિકસ્તસ્ય ચાત્મજઃ ।
૧૩.૮૯/૨પહ્નવૈઃ સહ સંવૃદ્ધો રાજા વનચરૈઃ સહ ॥ ૧૩.૮૯॥

૧૩.૯૦/૧કુશિકસ્તુ તપસ્તેપે પુત્રમિન્દ્રસમં વિભુમ્ ।
૧૩.૯૦/૨લભેયમિતિ તં શક્રસ્ત્રાસાદ્ અભ્યેત્ય જજ્ઞિવાન્ ॥ ૧૩.૯૦॥

૧૩.૯૧/૧સ ગાધિરભવદ્ રાજા મઘવા કૌશિકઃ સ્વયમ્ ।
૧૩.૯૧/૨વિશ્વામિત્રસ્તુ ગાધેયો વિશ્વામિત્રાત્ તથાષ્ટકઃ ॥ ૧૩.૯૧॥

૧૩.૯૨/૧અષ્ટકસ્ય સુતો લૌહિઃ પ્રોક્તો જહ્નુગણો મયા ।
૧૩.૯૨/૨આજમીઢોઽપરો વંશઃ શ્રૂયતાં મુનિસત્તમાઃ ॥ ૧૩.૯૨॥

૧૩.૯૩/૧અજમીઢાત્ તુ નીલ્યાં વૈ સુશાન્તિરુદપદ્યત ।
૧૩.૯૩/૨પુરુજાતિઃ સુશાન્તેશ્ચ બાહ્યાશ્વઃ પુરુજાતિતઃ ॥ ૧૩.૯૩॥

૧૩.૯૪/૧બાહ્યાશ્વતનયાઃ પઞ્ચ સ્ફીતા જનપદાવૃતાઃ ।
૧૩.૯૪/૨મુદ્ગલઃ સૃઞ્જયશ્ચૈવ રાજા બૃહદિષુસ્તદા ॥ ૧૩.૯૪॥

૧૩.૯૫/૧યવીનરશ્ચ વિક્રાન્તઃ કૃમિલાશ્વશ્ચ પઞ્ચમઃ ।
૧૩.૯૫/૨પઞ્ચૈતે રક્ષણાયાલં દેશાનામિતિ વિશ્રુતાઃ ॥ ૧૩.૯૫॥

૧૩.૯૬/૧પઞ્ચાનાં તે તુ પઞ્ચાલાઃ સ્ફીતા જનપદાવૃતાઃ ।
૧૩.૯૬/૨અલં સંરક્ષણે તેષાં પઞ્ચાલા ઇતિ વિશ્રુતાઃ ॥ ૧૩.૯૬॥

૧૩.૯૭/૧મુદ્ગલસ્ય તુ દાયાદો મૌદ્ગલ્યઃ સુમહાયશાઃ ।
૧૩.૯૭/૨ઇન્દ્રસેના યતો ગર્ભં વધ્ર્યં ચ પ્રત્યપદ્યત ॥ ૧૩.૯૭॥

૧૩.૯૮/૧આસીત્ પઞ્ચજનઃ પુત્રઃ સૃઞ્જયસ્ય મહાત્મનઃ ।
૧૩.૯૮/૨સુતઃ પઞ્ચજનસ્યાપિ સોમદત્તો મહીપતિઃ ॥ ૧૩.૯૮॥

૧૩.૯૯/૧સોમદત્તસ્ય દાયાદઃ સહદેવો મહાયશાઃ ।
૧૩.૯૯/૨સહદેવસુતશ્ચાપિ સોમકો નામ વિશ્રુતઃ ॥ ૧૩.૯૯॥

૧૩.૧૦૦/૧અજમીઢસુતો જાતઃ ક્ષીણે વંશે તુ સોમકઃ ।
૧૩.૧૦૦/૨સોમકસ્ય સુતો જન્તુર્યસ્ય પુત્રશતં બભૌ ॥ ૧૩.૧૦૦॥

૧૩.૧૦૧/૧તેષાં યવીયાન્ પૃષતો દ્રુપદસ્ય પિતા પ્રભુઃ ।

૧૩.૧૦૧/૨આજમીઢાઃ સ્મૃતાશ્ચૈતે મહાત્માનસ્તુ સોમકાઃ ॥ ૧૩.૧૦૧॥

૧૩.૧૦૨/૧મહિષી ત્વજમીઢસ્ય ધૂમિની પુત્રગૃદ્ધિની ।
૧૩.૧૦૨/૨પતિવ્રતા મહાભાગા કુલજા મુનિસત્તમાઃ ॥ ૧૩.૧૦૨॥

૧૩.૧૦૩/૧સા ચ પુત્રાર્થિની દેવી વ્રતચર્યાસમન્વિતા ।
૧૩.૧૦૩/૨તતો વર્ષાયુતં તપ્ત્વા તપઃ પરમદુશ્ચરમ્ ॥ ૧૩.૧૦૩॥

૧૩.૧૦૪/૧હુત્વાગ્નિં વિધિવત્ સા તુ પવિત્રા મિતભોજના ।
૧૩.૧૦૪/૨અગ્નિહોત્રકુશેષ્વેવ સુષ્વાપ મુનિસત્તમાઃ ॥ ૧૩.૧૦૪॥

૧૩.૧૦૫/૧ધૂમિન્યા સ તયા દેવ્યા ત્વજમીઢઃ સમીયિવાન્ ।
૧૩.૧૦૫/૨ઋક્ષં સંજનયામાસ ધૂમ્રવર્ણં સુદર્શનમ્ ॥ ૧૩.૧૦૫॥

૧૩.૧૦૬/૧ઋક્ષાત્ સંવરણો જજ્ઞે કુરુઃ સંવરણાત્ તથા ।
૧૩.૧૦૬/૨યઃ પ્રયાગાદ્ અતિક્રમ્ય કુરુક્ષેત્રં ચકાર હ ॥ ૧૩.૧૦૬॥

૧૩.૧૦૭/૧પુણ્યં ચ રમણીયં ચ પુણ્યકૃદ્ભિર્નિષેવિતમ્ ।
૧૩.૧૦૭/૨તસ્યાન્વવાયઃ સુમહાન્ યસ્ય નામ્નાથ કૌરવાઃ ॥ ૧૩.૧૦૭॥

૧૩.૧૦૮/૧કુરોશ્ચ પુત્રાશ્ચત્વારઃ સુધન્વા સુધનુસ્તથા ।
૧૩.૧૦૮/૨પરીક્ષિચ્ચ મહાબાહુઃ પ્રવરશ્ચારિમેજયઃ ॥ ૧૩.૧૦૮॥

૧૩.૧૦૯/૧પરીક્ષિતસ્તુ દાયાદો ધાર્મિકો જનમેજયઃ ।
૧૩.૧૦૯/૨શ્રુતસેનોઽગ્રસેનશ્ચ ભીમસેનશ્ચ નામતઃ ॥ ૧૩.૧૦૯॥

૧૩.૧૧૦/૧એતે સર્વે મહાભાગા વિક્રાન્તા બલશાલિનઃ ।
૧૩.૧૧૦/૨જનમેજયસ્ય પુત્રસ્તુ સુરથો મતિમાંસ્તથા ॥ ૧૩.૧૧૦॥

૧૩.૧૧૧/૧સુરથસ્ય તુ વિક્રાન્તઃ પુત્રો જજ્ઞે વિદૂરથઃ ।
૧૩.૧૧૧/૨વિદૂરથસ્ય દાયાદ ઋક્ષ એવ મહારથઃ ॥ ૧૩.૧૧૧॥

૧૩.૧૧૨/૧દ્વિતીયસ્તુ ભરદ્વાજાન્ નામ્ના તેનૈવ વિશ્રુતઃ ।
૧૩.૧૧૨/૨દ્વાવૃક્ષૌ સોમવંશેઽસ્મિન્ દ્વાવેવ ચ પરીક્ષિતૌ ॥ ૧૩.૧૧૨॥

૧૩.૧૧૩/૧ભીમસેનાસ્ત્રયો વિપ્રા દ્વૌ ચાપિ જનમેજયૌ ।
૧૩.૧૧૩/૨ઋક્ષસ્ય તુ દ્વિતીયસ્ય ભીમસેનોઽભવત્ સુતઃ ॥ ૧૩.૧૧૩॥

૧૩.૧૧૪/૧પ્રતીપો ભીમસેનાત્ તુ પ્રતીપસ્ય તુ શાંતનુઃ ।
૧૩.૧૧૪/૨દેવાપિર્બાહ્લિકશ્ચૈવ ત્રય એવ મહારથાઃ ॥ ૧૩.૧૧૪॥

૧૩.૧૧૫/૧શાંતનોસ્ત્વભવદ્ ભીષ્મસ્તસ્મિન્ વંશે દ્વિજોત્તમાઃ ।
૧૩.૧૧૫/૨બાહ્લિકસ્ય તુ રાજર્ષેર્વંશં શ઼ૃણુત ભો દ્વિજાઃ ॥ ૧૩.૧૧૫ ॥

૧૩.૧૧૬/૧બાહ્લિકસ્ય સુતશ્ચૈવ સોમદત્તો મહાયશાઃ ।
૧૩.૧૧૬/૨જજ્ઞિરે સોમદત્તાત્ તુ ભૂરિર્ભૂરિશ્રવાઃ શલઃ ॥ ૧૩.૧૧૬ ॥

૧૩.૧૧૭/૧ઉપાધ્યાયસ્તુ દેવાનાં દેવાપિરભવન્ મુનિઃ ।
૧૩.૧૧૭/૨ચ્યવનપુત્રઃ કૃતક ઇષ્ટ આસીન્ મહાત્મનઃ ॥ ૧૩.૧૧૭ ॥

૧૩.૧૧૮/૧શાંતનુસ્ત્વભવદ્ રાજા કૌરવાણાં ધુરંધરઃ ।
૧૩.૧૧૮/૨શાંતનોઃ સમ્પ્રવક્ષ્યામિ વંશં ત્રૈલોક્યવિશ્રુતમ્ ॥ ૧૩.૧૧૮ ॥

૧૩.૧૧૯/૧ગાઙ્ગં દેવવ્રતં નામ પુત્રં સોઽજનયત્ પ્રભુઃ ।
૧૩.૧૧૯/૨સ તુ ભીષ્મ ઇતિ ખ્યાતઃ પાણ્ડવાનાં પિતામહઃ ॥ ૧૩.૧૧૯ ॥

૧૩.૧૨૦/૧કાલી વિચિત્રવીર્યં તુ જનયામાસ ભો દ્વિજાઃ ।
૧૩.૧૨૦/૨શાંતનોર્દયિતં પુત્રં ધર્માત્માનમકલ્મષમ્ ॥ ૧૩.૧૨૦ ॥

૧૩.૧૨૧/૧કૃષ્ણદ્વૈપાયનાચ્ચૈવ ક્ષેત્રે વૈચિત્રવીર્યકે ।
૧૩.૧૨૧/૨ધૃતરાષ્ટ્રં ચ પાણ્ડું ચ વિદુરં ચાપ્યજીજનત્ ॥ ૧૩.૧૨૧ ॥

૧૩.૧૨૨/૧ધૃતરાષ્ટ્રસ્તુ ગાન્ધાર્યાં પુત્રાન્ ઉત્પાદયચ્છતમ્ ।
૧૩.૧૨૨/૨તેષાં દુર્યોધનઃ શ્રેષ્ઠઃ સર્વેષામપિ સ પ્રભુઃ ॥ ૧૩.૧૨૨ ॥

૧૩.૧૨૩/૧પાણ્ડોર્ધનંજયઃ પુત્રઃ સૌભદ્રસ્તસ્ય ચાત્મજઃ ।
૧૩.૧૨૩/૨અભિમન્યોઃ પરીક્ષિત્ તુ પિતા પારીક્ષિતસ્ય હ ॥ ૧૩.૧૨૩ ॥

૧૩.૧૨૪/૧પારીક્ષિતસ્ય કાશ્યાયાં દ્વૌ પુત્રૌ સમ્બભૂવતુઃ ।
૧૩.૧૨૪/૨ચન્દ્રાપીડસ્તુ નૃપતિઃ સૂર્યાપીડશ્ચ મોક્ષવિત્ ॥ ૧૩.૧૨૪ ॥

૧૩.૧૨૫/૧ચન્દ્રાપીડસ્ય પુત્રાણાં શતમુત્તમધન્વિનામ્ ।
૧૩.૧૨૫/૨જાનમેજયમિત્યેવં ક્ષાત્રં ભુવિ પરિશ્રુતમ્ ॥ ૧૩.૧૨૫ ॥

૧૩.૧૨૬/૧તેષાં જ્યેષ્ઠસ્તુ તત્રાસીત્ પુરે વારણસાહ્વયે ।
૧૩.૧૨૬/૨સત્યકર્ણો મહાબાહુર્યજ્વા વિપુલદક્ષિણઃ ॥ ૧૩.૧૨૬ ॥

૧૩.૧૨૭/૧સત્યકર્ણસ્ય દાયાદઃ શ્વેતકર્ણઃ પ્રતાપવાન્ ।
૧૩.૧૨૭/૨અપુત્રઃ સ તુ ધર્માત્મા પ્રવિવેશ તપોવનમ્ ॥ ૧૩.૧૨૭ ॥

૧૩.૧૨૮/૧તસ્માદ્ વનગતા ગર્ભં યાદવી પ્રત્યપદ્યત ।
૧૩.૧૨૮/૨સુચારોર્દુહિતા સુભ્રૂર્માલિની ગ્રાહમાલિની ॥ ૧૩.૧૨૮ ॥

૧૩.૧૨૯/૧સમ્ભૂતે સ ચ ગર્ભે ચ શ્વેતકર્ણઃ પ્રજેશ્વરઃ ।
૧૩.૧૨૯/૨અન્વગચ્છત્ કૃતં પૂર્વં મહાપ્રસ્થાનમચ્યુતમ્ ॥ ૧૩.૧૨૯॥

૧૩.૧૩૦/૧સા તુ દૃષ્ટ્વા પ્રિયં તં તુ માલિની પૃષ્ઠતોઽન્વગાત્ ।
૧૩.૧૩૦/૨સુચારોર્દુહિતા સાધ્વી વને રાજીવલોચના ॥ ૧૩.૧૩૦॥

૧૩.૧૩૧/૧પથિ સા સુષુવે બાલા સુકુમારં કુમારકમ્ ।
૧૩.૧૩૧/૨તમપાસ્યાથ તત્રૈવ રાજાનં સાન્વગચ્છત ॥ ૧૩.૧૩૧॥

૧૩.૧૩૨/૧પતિવ્રતા મહાભાગા દ્રૌપદીવ પુરા સતી ।
૧૩.૧૩૨/૨કુમારઃ સુકુમારોઽસૌ ગિરિપૃષ્ઠે રુરોદ હ ॥ ૧૩.૧૩૨॥

૧૩.૧૩૩/૧દયાર્થં તસ્ય મેઘાસ્તુ પ્રાદુરાસન્ મહાત્મનઃ ।
૧૩.૧૩૩/૨શ્રવિષ્ઠાયાસ્તુ પુત્રૌ દ્વૌ પૈપ્પલાદિશ્ચ કૌશિકઃ ॥ ૧૩.૧૩૩॥

૧૩.૧૩૪/૧દૃષ્ટ્વા કૃપાન્વિતૌ ગૃહ્ય તૌ પ્રાક્ષાલયતાં જલે ।
૧૩.૧૩૪/૨નિઘૃષ્ટૌ તસ્ય પાર્શ્વૌ તુ શિલાયાં રુધિરપ્લુતૌ ॥ ૧૩.૧૩૪॥

૧૩.૧૩૫/૧અજશ્યામઃ સ પાર્શ્વાભ્યાં ઘૃષ્ટાભ્યાં સુસમાહિતઃ ।
૧૩.૧૩૫/૨અજશ્યામૌ તુ તત્પાર્શ્વૌ દેવેન સમ્બભૂવતુઃ ॥ ૧૩.૧૩૫॥

૧૩.૧૩૬/૧અથાજપાર્શ્વ ઇતિ વૈ ચક્રાતે નામ તસ્ય તૌ ।
૧૩.૧૩૬/૨સ તુ રેમકશાલાયાં દ્વિજાભ્યામભિવર્ધિતઃ ॥ ૧૩.૧૩૬॥

૧૩.૧૩૭/૧રેમકસ્ય તુ ભાર્યા તમુદ્વહત્ પુત્રકારણાત્ ।
૧૩.૧૩૭/૨રેમત્યાઃ સ તુ પુત્રોઽભૂદ્ બ્રાહ્મણૌ સચિવૌ તુ તૌ ॥ ૧૩.૧૩૭॥

૧૩.૧૩૮/૧તેષાં પુત્રાશ્ચ પૌત્રાશ્ચ યુગપત્તુલ્યજીવિનઃ ।
૧૩.૧૩૮/૨સ એષ પૌરવો વંશઃ પાણ્ડવાનાં મહાત્મનામ્ ॥ ૧૩.૧૩૮॥

૧૩.૧૩૯/૧શ્લોકોઽપિ ચાત્ર ગીતોઽયં નાહુષેણ યયાતિના ।
૧૩.૧૩૯/૨જરાસંક્રમણે પૂર્વં તદા પ્રીતેન ધીમતા ॥ ૧૩.૧૩૯॥

૧૩.૧૪૦/૧અચન્દ્રાર્કગ્રહા ભૂમિર્ભવેદ્ ઇયમસંશયમ્ ।
૧૩.૧૪૦/૨અપૌરવા મહી નૈવ ભવિષ્યતિ કદાચન ॥ ૧૩.૧૪૦॥

૧૩.૧૪૧/૧એષ વઃ પૌરવો વંશો વિખ્યાતઃ કથિતો મયા ।
૧૩.૧૪૧/૨તુર્વસોસ્તુ પ્રવક્ષ્યામિ દ્રુહ્યોશ્ચાનોર્યદોસ્તથા ॥ ૧૩.૧૪૧॥

૧૩.૧૪૨/૧તુર્વસોસ્તુ સુતો વહ્નિર્ગોભાનુસ્તસ્ય ચાત્મજઃ ।

૧૩.૧૪૨/૨ગોભાનોસ્તુ સુતો રાજા ઐશાનુરપરાજિતઃ ॥ ૧૩.૧૪૨॥

૧૩.૧૪૩/૧કરંધમસ્તુ ઐશાનોર્મરુત્તસ્તસ્ય ચાત્મજઃ ।
૧૩.૧૪૩/૨અન્યસ્ત્વાવિક્ષિતો રાજા મરુત્તઃ કથિતો મયા ॥ ૧૩.૧૪૩॥

૧૩.૧૪૪/૧અનપત્યોઽભવદ્ રાજા યજ્વા વિપુલદક્ષિણઃ ।
૧૩.૧૪૪/૨દુહિતા સંયતા નામ તસ્યાસીત્ પૃથિવીપતેઃ ॥ ૧૩.૧૪૪॥

૧૩.૧૪૫/૧દક્ષિણાર્થં તુ સા દત્તા સંવર્તાય મહાત્મને ।
૧૩.૧૪૫/૨દુષ્યન્તં પૌરવં ચાપિ લેભે પુત્રમકલ્મષમ્ ॥ ૧૩.૧૪૫॥

૧૩.૧૪૬/૧એવં યયાતિશાપેન જરાસંક્રમણે તદા ।
૧૩.૧૪૬/૨પૌરવં તુર્વસોર્વંશં પ્રવિવેશ દ્વિજોત્તમાઃ ॥ ૧૩.૧૪૬॥

૧૩.૧૪૭/૧દુષ્યન્તસ્ય તુ દાયાદઃ કરૂરોમઃ પ્રજેશ્વરઃ ।
૧૩.૧૪૭/૨કરૂરોમાદ્ અથાહ્રીદશ્ચત્વારસ્તસ્ય ચાત્મજાઃ ॥ ૧૩.૧૪૭॥

૧૩.૧૪૮/૧પાણ્ડ્યશ્ચ કેરલશ્ચૈવ કાલશ્ચોલશ્ચ પાર્થિવઃ ।
૧૩.૧૪૮/૨દ્રુહ્યોશ્ચ તનયો રાજન્ બભ્રુસેતુશ્ચ પાર્થિવઃ ॥ ૧૩.૧૪૮॥

૧૩.૧૪૯/૧અઙ્ગારસેતુસ્તત્પુત્રો મરુતાં પતિરુચ્યતે ।
૧૩.૧૪૯/૨યૌવનાશ્વેન સમરે કૃચ્છ્રેણ નિહતો બલી ॥ ૧૩.૧૪૯॥

૧૩.૧૫૦/૧યુદ્ધં સુમહદ્ અપ્યાસીન્ માસાન્ પરિચરદ્ દશ ।
૧૩.૧૫૦/૨અઙ્ગારસેતોર્દાયાદો ગાન્ધારો નામ પાર્થિવઃ ॥ ૧૩.૧૫૦॥

૧૩.૧૫૧/૧ખ્યાયતે યસ્ય નામ્ના વૈ ગાન્ધારવિષયો મહાન્ ।
૧૩.૧૫૧/૨ગાન્ધારદેશજાશ્ચૈવ તુરગા વાજિનાં વરાઃ ॥ ૧૩.૧૫૧॥

૧૩.૧૫૨/૧અનોસ્તુ પુત્રો ધર્મોઽભૂદ્ ધૃતસ્તસ્યાત્મજોઽભવત્ ।
૧૩.૧૫૨/૨ધૃતાદ્ વનદુહો જજ્ઞે પ્રચેતાસ્તસ્ય ચાત્મજઃ ॥ ૧૩.૧૫૨॥

૧૩.૧૫૩/૧પ્રચેતસઃ સુચેતાસ્તુ કીર્તિતાસ્ત્વનવો મયા ।
૧૩.૧૫૩/૨બભૂવુસ્તુ યદોઃ પુત્રાઃ પઞ્ચ દેવસુતોપમાઃ ॥ ૧૩.૧૫૩॥

૧૩.૧૫૪/૧સહસ્રાદઃ પયોદશ્ચ ક્રોષ્ટા નીલોઽઞ્જિકસ્તથા ।
૧૩.૧૫૪/૨સહસ્રાદસ્ય દાયાદાસ્ત્રયઃ પરમધાર્મિકાઃ ॥ ૧૩.૧૫૪॥

૧૩.૧૫૫/૧હૈહયશ્ચ હયશ્ચૈવ રાજા વેણુહયસ્તથા ।
૧૩.૧૫૫/૨હૈહયસ્યાભવત્ પુત્રો ધર્મનેત્ર ઇતિ શ્રુતઃ ॥ ૧૩.૧૫૫॥

૧૩.૧૫૬/૧ધર્મનેત્રસ્ય કાર્તસ્તુ સાહઞ્જસ્તસ્ય ચાત્મજઃ ।
૧૩.૧૫૬/૨સાહઞ્જની નામ પુરી તેન રાજ્ઞા નિવેશિતા ॥ ૧૩.૧૫૬॥

૧૩.૧૫૭/૧આસીન્ મહિષ્મતઃ પુત્રો ભદ્રશ્રેણ્યઃ પ્રતાપવાન્ ।
૧૩.૧૫૭/૨ભદ્રશ્રેણ્યસ્ય દાયાદો દુર્દમો નામ વિશ્રુતઃ ॥ ૧૩.૧૫૭॥

૧૩.૧૫૮/૧દુર્દમસ્ય સુતો ધીમાન્ કનકો નામ નામતઃ ।
૧૩.૧૫૮/૨કનકસ્ય તુ દાયાદાશ્ચત્વારો લોકવિશ્રુતાઃ ॥ ૧૩.૧૫૮॥

૧૩.૧૫૯/૧કૃતવીર્યઃ કૃતૌજાશ્ચ કૃતધન્વા તથૈવ ચ ।
૧૩.૧૫૯/૨કૃતાગ્નિસ્તુ ચતુર્થોઽભૂત્ કૃતવીર્યાદ્ અથાર્જુનઃ ॥ ૧૩.૧૫૯॥

૧૩.૧૬૦/૧યોઽસૌ બાહુસહસ્રેણ સપ્તદ્વીપેશ્વરોઽભવત્ ।
૧૩.૧૬૦/૨જિગાય પૃથિવીમેકો રથેનાદિત્યવર્ચસા ॥ ૧૩.૧૬૦॥

૧૩.૧૬૧/૧સ હિ વર્ષાયુતં તપ્ત્વા તપઃ પરમદુશ્ચરમ્ ।
૧૩.૧૬૧/૨દત્તમારાધયામાસ કાર્તવીર્યોઽત્રિસમ્ભવમ્ ॥ ૧૩.૧૬૧॥

૧૩.૧૬૨/૧તસ્મૈ દત્તો વરાન્ પ્રાદાચ્ચતુરો ભૂરિતેજસઃ ।
૧૩.૧૬૨/૨પૂર્વં બાહુસહસ્રં તુ પ્રાર્થિતં સુમહદ્ વરમ્ ॥ ૧૩.૧૬૨॥

૧૩.૧૬૩/૧અધર્મેઽધીયમાનસ્ય સદ્ભિસ્તત્ર નિવારણમ્ ।
૧૩.૧૬૩/૨ઉગ્રેણ પૃથિવીં જિત્વા ધર્મેણૈવાનુરઞ્જનમ્ ॥ ૧૩.૧૬૩॥

૧૩.૧૬૪/૧સંગ્રામાન્ સુબહૂન્ જિત્વા હત્વા ચારીન્ સહસ્રશઃ ।
૧૩.૧૬૪/૨સંગ્રામે વર્તમાનસ્ય વધં ચાભ્યધિકાદ્ રણે ॥ ૧૩.૧૬૪॥

૧૩.૧૬૫/૧તસ્ય બાહુસહસ્રં તુ યુધ્યતઃ કિલ ભો દ્વિજાઃ ।
૧૩.૧૬૫/૨યોગાદ્ યોગીશ્વરસ્યેવ પ્રાદુર્ભવતિ માયયા ॥ ૧૩.૧૬૫॥

૧૩.૧૬૬/૧તેનેયં પૃથિવી સર્વા સપ્તદ્વીપા સપત્તના ।
૧૩.૧૬૬/૨સસમુદ્રા સનગરા ઉગ્રેણ વિધિના જિતા ॥ ૧૩.૧૬૬॥

૧૩.૧૬૭/૧તેન સપ્તસુ દ્વીપેષુ સપ્ત યજ્ઞશતાનિ ચ ।
૧૩.૧૬૭/૨પ્રાપ્તાનિ વિધિના રાજ્ઞા શ્રૂયન્તે મુનિસત્તમાઃ ॥ ૧૩.૧૬૭॥

૧૩.૧૬૮/૧સર્વે યજ્ઞા મુનિશ્રેષ્ઠાઃ સહસ્રશતદક્ષિણાઃ ।
૧૩.૧૬૮/૨સર્વે કાઞ્ચનયૂપાશ્ચ સર્વે કાઞ્ચનવેદયઃ ॥ ૧૩.૧૬૮॥

૧૩.૧૬૯/૧સર્વે દેવૈર્મુનિશ્રેષ્ઠા વિમાનસ્થૈરલંકૃતૈઃ ।
૧૩.૧૬૯/૨ગન્ધર્વૈરપ્સરોભિશ્ચ નિત્યમેવોપશોભિતાઃ ॥ ૧૩.૧૬૯॥

૧૩.૧૭૦/૧યસ્ય યજ્ઞે જગૌ ગાથાં ગન્ધર્વો નારદસ્તથા ।
૧૩.૧૭૦/૨વરીદાસાત્મજો વિદ્વાન્ મહિમ્ના તસ્ય વિસ્મિતઃ ॥ ૧૩.૧૭૦॥

૧૩.૧૭૧/૧નારદ ઉવાચ । ન નૂનં કાર્તવીર્યસ્ય ગતિં યાસ્યન્તિ પાર્થિવાઃ ।
૧૩.૧૭૧/૨યજ્ઞૈર્દાનૈસ્તપોભિશ્ચ વિક્રમેણ શ્રુતેન ચ ॥ ૧૩.૧૭૧॥

૧૩.૧૭૨/૧સ હિ સપ્તસુ દ્વીપેષુ ચર્મી ખડ્ગી શરાસની ।
૧૩.૧૭૨/૨રથી દ્વીપાન્ અનુચરન્ યોગી સંદૃશ્યતે નૃભિઃ ॥ ૧૩.૧૭૨॥

૧૩.૧૭૩/૧અનષ્ટદ્રવ્યતા ચૈવ ન શોકો ન ચ વિભ્રમઃ ।
૧૩.૧૭૩/૨પ્રભાવેણ મહારાજ્ઞઃ પ્રજા ધર્મેણ રક્ષતઃ ॥ ૧૩.૧૭૩॥

૧૩.૧૭૪/૧સ સર્વરત્નભાક્ સમ્રાટ્ ચક્રવર્તી બભૂવ હ ।
૧૩.૧૭૪/૨સ એવ પશુપાલોઽભૂત્ ક્ષેત્રપાલઃ સ એવ ચ ॥ ૧૩.૧૭૪॥

૧૩.૧૭૫/૧સૈવ વૃષ્ટ્યા પર્જન્યો યોગિત્વાદ્ અર્જુનોઽભવત્ ।
૧૩.૧૭૫/૨સ વૈ બાહુસહસ્રેણ જ્યાઘાતકઠિનત્વચા ॥ ૧૩.૧૭૫॥

૧૩.૧૭૬/૧ભાતિ રશ્મિસહસ્રેણ શરદીવ ચ ભાસ્કરઃ ।
૧૩.૧૭૬/૨સ હિ નાગાન્ મનુષ્યેષુ માહિષ્મત્યાં મહાદ્યુતિઃ ॥ ૧૩.૧૭૬॥

૧૩.૧૭૭/૧કર્કોટકસુતાઞ્ જિત્વા પુર્યાં તસ્યાં ન્યવેશયત્ ।
૧૩.૧૭૭/૨સ વૈ વેગં સમુદ્રસ્ય પ્રાવૃટ્કાલેઽમ્બુજેક્ષણઃ ॥ ૧૩.૧૭૭॥

૧૩.૧૭૮/૧ક્રીડન્ન્ ઇવ ભુજોદ્ભિન્નં પ્રતિસ્રોતશ્ચકાર હ ।
૧૩.૧૭૮/૨લુણ્ઠિતા ક્રીડતા તેન નદી તદ્ગ્રામમાલિની ॥ ૧૩.૧૭૮॥

૧૩.૧૭૯/૧ચલદૂર્મિસહસ્રેણ શઙ્કિતાભ્યેતિ નર્મદા ।
૧૩.૧૭૯/૨તસ્ય બાહુસહસ્રેણ ક્ષિપ્યમાણે મહોદધૌ ॥ ૧૩.૧૭૯॥

૧૩.૧૮૦/૧ભયાન્ નિલીના નિશ્ચેષ્ટાઃ પાતાલસ્થા મહીસુરાઃ ।
૧૩.૧૮૦/૨ચૂર્ણીકૃતમહાવીચિં ચલન્મીનમહાતિમિમ્ ॥ ૧૩.૧૮૦॥

૧૩.૧૮૧/૧મારુતાવિદ્ધફેનૌઘમાવર્તક્ષોભસંકુલમ્ ।
૧૩.૧૮૧/૨પ્રાવર્તયત્ તદા રાજા સહસ્રેણ ચ બાહુના ॥ ૧૩.૧૮૧॥

૧૩.૧૮૨/૧દેવાસુરસમાક્ષિપ્તઃ ક્ષીરોદમિવ મન્દરઃ ।
૧૩.૧૮૨/૨મન્દરક્ષોભચકિતા અમૃતોત્પાદશઙ્કિતાઃ ॥ ૧૩.૧૮૨॥

૧૩.૧૮૩/૧સહસોત્પતિતા ભીતા ભીમં દૃષ્ટ્વા નૃપોત્તમમ્ ।

૧૩.૧૮૩/૨નતા નિશ્ચલમૂર્ધાનો બભૂવુસ્તે મહોરગાઃ ॥ ૧૩.૧૮૩॥

૧૩.૧૮૪/૧સાયાહ્ને કદલીખણ્ડાઃ કમ્પિતા ઇવ વાયુના ।
૧૩.૧૮૪/૨સ વૈ બદ્ધ્વા ધનુર્જ્યાભિરુત્સિક્તં પઞ્ચભિઃ શરૈઃ ॥ ૧૩.૧૮૪॥

૧૩.૧૮૫/૧લઙ્કેશં મોહયિત્વા તુ સબલં રાવણં બલાત્ ।
૧૩.૧૮૫/૨નિર્જિત્ય વશમાનીય માહિષ્મત્યાં બબન્ધ તમ્ ॥ ૧૩.૧૮૫॥

૧૩.૧૮૬/૧શ્રુત્વા તુ બદ્ધં પૌલસ્ત્યં રાવણં ત્વર્જુનેન ચ ।
૧૩.૧૮૬/૨તતો ગત્વા પુલસ્ત્યસ્તમર્જુનં દદૃશે સ્વયમ્ ॥ ૧૩.૧૮૬॥

૧૩.૧૮૭/૧મુમોચ રક્ષઃ પૌલસ્ત્યં પુલસ્ત્યેનાભિયાચિતઃ ।
૧૩.૧૮૭/૨યસ્ય બાહુસહસ્રસ્ય બભૂવ જ્યાતલસ્વનઃ ॥ ૧૩.૧૮૭॥

૧૩.૧૮૮/૧યુગાન્તે તોયદસ્યેવ સ્ફુટતો હ્યશનેરિવ ।
૧૩.૧૮૮/૨અહો બત મૃધે વીર્યં ભાર્ગવસ્ય યદ્ અચ્છિનત્ ॥ ૧૩.૧૮૮॥

૧૩.૧૮૯/૧રાજ્ઞો બાહુસહસ્રસ્ય હૈમં તાલવનં યથા ।
૧૩.૧૮૯/૨તૃષિતેન કદાચિત્ સ ભિક્ષિતશ્ચિત્રભાનુના ॥ ૧૩.૧૮૯॥

૧૩.૧૯૦/૧સ ભિક્ષામદદાદ્ વીરઃ સપ્ત દ્વીપાન્ વિભાવસોઃ ।
૧૩.૧૯૦/૨પુરાણિ ગ્રામઘોષાંશ્ચ વિષયાંશ્ચૈવ સર્વશઃ ॥ ૧૩.૧૯૦॥

૧૩.૧૯૧/૧જજ્વાલ તસ્ય સર્વાણિ ચિત્રભાનુર્દિધૃક્ષયા ।
૧૩.૧૯૧/૨સ તસ્ય પુરુષેન્દ્રસ્ય પ્રભાવેણ મહાત્મનઃ ॥ ૧૩.૧૯૧॥

૧૩.૧૯૨/૧દદાહ કાર્તવીર્યસ્ય શૈલાંશ્ચૈષ વનાનિ ચ ।
૧૩.૧૯૨/૨સ શૂન્યમાશ્રમં રમ્યં વરુણસ્યાત્મજસ્ય વૈ ॥ ૧૩.૧૯૨॥

૧૩.૧૯૩/૧દદાહ બલવદ્ભીતશ્ચિત્રભાનુઃ સ હૈહયઃ ।
૧૩.૧૯૩/૨યં લેભે વરુણઃ પુત્રં પુરા ભાસ્વન્તમુત્તમમ્ ॥ ૧૩.૧૯૩॥

૧૩.૧૯૪/૧વસિષ્ઠં નામ સ મુનિઃ ખ્યાત આપવ ઇત્યુત ।
૧૩.૧૯૪/૨યત્રાપવસ્તુ તં ક્રોધાચ્છપ્તવાન્ અર્જુનં વિભુઃ ॥ ૧૩.૧૯૪॥

૧૩.૧૯૫/૧યસ્માન્ ન વર્જિતમિદં વનં તે મમ હૈહય ।
૧૩.૧૯૫/૨તસ્માત્ તે દુષ્કરં કર્મ કૃતમન્યો હનિષ્યતિ ॥ ૧૩.૧૯૫॥

૧૩.૧૯૬/૧રામો નામ મહાબાહુર્જામદગ્ન્યઃ પ્રતાપવાન્ ।
૧૩.૧૯૬/૨છિત્ત્વા બાહુસહસ્રં તે પ્રમથ્ય તરસા બલી ॥ ૧૩.૧૯૬॥

૧૩.૧૯૭/૧તપસ્વી બ્રાહ્મણસ્ત્વાં તુ હનિષ્યતિ સ ભાર્ગવઃ ।
૧૩.૧૯૭/૨અનષ્ટદ્રવ્યતા યસ્ય બભૂવામિત્રકર્ષિણઃ ॥ ૧૩.૧૯૭॥

૧૩.૧૯૮/૧પ્રતાપેન નરેન્દ્રસ્ય પ્રજા ધર્મેણ રક્ષતઃ ।
૧૩.૧૯૮/૨પ્રાપ્તસ્તતોઽસ્ય મૃત્યુર્વૈ તસ્ય શાપાન્ મહામુનેઃ ॥ ૧૩.૧૯૮॥

૧૩.૧૯૯/૧વરસ્તથૈવ ભો વિપ્રાઃ સ્વયમેવ વૃતઃ પુરા ।
૧૩.૧૯૯/૨તસ્ય પુત્રશતં ત્વાસીત્ પઞ્ચ શેષા મહાત્મનઃ ॥ ૧૩.૧૯૯॥

૧૩.૨૦૦/૧કૃતાસ્ત્રા બલિનઃ શૂરા ધર્માત્માનો યશસ્વિનઃ ।
૧૩.૨૦૦/૨શૂરસેનશ્ચ શૂરશ્ચ વૃષણો મધુપધ્વજઃ ॥ ૧૩.૨૦૦॥

૧૩.૨૦૧/૧જયધ્વજશ્ચ નામ્નાસીદ્ આવન્ત્યો નૃપતિર્મહાન્ ।
૧૩.૨૦૧/૨કાર્તવીર્યસ્ય તનયા વીર્યવન્તો મહાબલાઃ ॥ ૧૩.૨૦૧॥

૧૩.૨૦૨/૧જયધ્વજસ્ય પુત્રસ્તુ તાલજઙ્ઘો મહાબલઃ ।
૧૩.૨૦૨/૨તસ્ય પુત્રશતં ખ્યાતાસ્તાલજઙ્ઘા ઇતિ સ્મૃતાઃ ॥ ૧૩.૨૦૨॥

૧૩.૨૦૩/૧તેષાં કુલે મુનિશ્રેષ્ઠા હૈહયાનાં મહાત્મનામ્ ।
૧૩.૨૦૩/૨વીતિહોત્રાઃ સુજાતાશ્ચ ભોજાશ્ચાવન્તયઃ સ્મૃતાઃ ॥ ૧૩.૨૦૩॥

૧૩.૨૦૪/૧તૌણ્ડિકેરાશ્ચ વિખ્યાતાસ્તાલજઙ્ઘાસ્તથૈવ ચ ।
૧૩.૨૦૪/૨ભરતાશ્ચ સુજાતાશ્ચ બહુત્વાન્ નાનુકીર્તિતાઃ ॥ ૧૩.૨૦૪॥

૧૩.૨૦૫/૧વૃષપ્રભૃતયો વિપ્રા યાદવાઃ પુણ્યકર્મિણઃ ।
૧૩.૨૦૫/૨વૃષો વંશધરસ્તત્ર તસ્ય પુત્રોઽભવન્ મધુઃ ॥ ૧૩.૨૦૫॥

૧૩.૨૦૬/૧મધોઃ પુત્રશતં ત્વાસીદ્ વૃષણસ્તસ્ય વંશકૃત્ ।
૧૩.૨૦૬/૨વૃષણાદ્ વૃષ્ણયઃ સર્વે મધોસ્તુ માધવાઃ સ્મૃતાઃ ॥ ૧૩.૨૦૬॥

૧૩.૨૦૭/૧યાદવા યદુનામ્ના તે નિરુચ્યન્તે ચ હૈહયાઃ ।
૧૩.૨૦૭/૨ન તસ્ય વિત્તનાશઃ સ્યાન્ નષ્ટં પ્રતિ લભેચ્ચ સઃ ॥ ૧૩.૨૦૭॥

૧૩.૨૦૮/૧કાર્તવીર્યસ્ય યો જન્મ કથયેદ્ ઇહ નિત્યશઃ ।
૧૩.૨૦૮/૨એતે યયાતિપુત્રાણાં પઞ્ચ વંશા દ્વિજોત્તમાઃ ॥ ૧૩.૨૦૮॥

૧૩.૨૦૯/૧કીર્તિતા લોકવીરાણાં યે લોકાન્ ધારયન્તિ વૈ ।
૧૩.૨૦૯/૨ભૂતાનીવ મુનિશ્રેષ્ઠાઃ પઞ્ચ સ્થાવરજઙ્ગમાન્ ॥ ૧૩.૨૦૯॥

૧૩.૨૧૦/૧શ્રુત્વા પઞ્ચ વિસર્ગાંસ્તુ રાજા ધર્માર્થકોવિદઃ ।
૧૩.૨૧૦/૨વશી ભવતિ પઞ્ચાનામાત્મજાનાં તથેશ્વરઃ ॥ ૧૩.૨૧૦॥

૧૩.૨૧૧/૧લભેત્ પઞ્ચ વરાંશ્ચૈવ દુર્લભાન્ ઇહ લૌકિકાન્ ।
૧૩.૨૧૧/૨આયુઃ કીર્તિં તથા પુત્રાન્ ઐશ્વર્યં ભૂતિમેવ ચ ॥ ૧૩.૨૧૧॥

૧૩.૨૧૨/૧ધારણાચ્છ્રવણાચ્ચૈવ પઞ્ચવર્ગસ્ય ભો દ્વિજાઃ ।
૧૩.૨૧૨/૨ક્રોષ્ટોર્વંશં મુનિશ્રેષ્ઠાઃ શ◌ૃણુધ્વં ગદતો મમ ॥ ૧૩.૨૧૨॥

૧૩.૨૧૩/૧યદોર્વંશધરસ્યાથ યજ્વિનઃ પુણ્યકર્મિણઃ ।
૧૩.૨૧૩/૨ક્રોષ્ટોર્વંશં હિ શ્રુત્વૈવ સર્વપાપૈઃ પ્રમુચ્યતે ।
૧૩.૨૧૩/૩યસ્યાન્વવાયજો વિષ્ણુર્હરિર્વૃષ્ણિકુલોદ્વહઃ ॥ ૧૩.૨૧૩॥

૧૪.૧/૧લોમહર્ષણ ઉવાચ । ગાન્ધારી ચૈવ માદ્રી ચ ક્રોષ્ટોર્ભાર્યે બભૂવતુઃ ।
૧૪.૧/૨ગાન્ધારી જનયામાસ અનમિત્રં મહાબલમ્ ॥ ૧૪.૧॥

૧૪.૨/૧માદ્રી યુધાજિતં પુત્રં તતોઽન્યં દેવમીઢુષમ્ ।
૧૪.૨/૨તેષાં વંશસ્ત્રિધા ભૂતો વૃષ્ણીનાં કુલવર્ધનઃ ॥ ૧૪.૨॥

૧૪.૩/૧માદ્ર્યાઃ પુત્રૌ તુ જજ્ઞાતે શ્રુતૌ વૃષ્ણ્યન્ધકાવુભૌ ।
૧૪.૩/૨જજ્ઞાતે તનયૌ વૃષ્ણેઃ શ્વફલ્કશ્ચિત્રકસ્તથા ॥ ૧૪.૩॥

૧૪.૪/૧શ્વફલ્કસ્તુ મુનિશ્રેષ્ઠા ધર્માત્મા યત્ર વર્તતે ।
૧૪.૪/૨નાસ્તિ વ્યાધિભયં તત્ર નાવર્ષસ્તપમેવ ચ ॥ ૧૪.૪॥

૧૪.૫/૧કદાચિત્ કાશિરાજસ્ય વિષયે મુનિસત્તમાઃ ।
૧૪.૫/૨ત્રીણિ વર્ષાણિ પૂર્ણાનિ નાવર્ષત્ પાકશાસનઃ ॥ ૧૪.૫॥

૧૪.૬/૧સ તત્ર ચાનયામાસ શ્વફલ્કં પરમાર્ચિતમ્ ।
૧૪.૬/૨શ્વફલ્કપરિવર્તેન વવર્ષ હરિવાહનઃ ॥ ૧૪.૬॥

૧૪.૭/૧શ્વફલ્કઃ કાશિરાજસ્ય સુતાં ભાર્યામવિન્દત ।
૧૪.૭/૨ગાન્દિનીં નામ ગાં સા ચ દદૌ વિપ્રાય નિત્યશઃ ॥ ૧૪.૭॥

૧૪.૮/૧દાતા યજ્વા ચ વીરશ્ચ શ્રુતવાન્ અતિથિપ્રિયઃ ।
૧૪.૮/૨અક્રૂરઃ સુષુવે તસ્માચ્છ્વફલ્કાદ્ ભૂરિદક્ષિણઃ ॥ ૧૪.૮॥

૧૪.૯/૧ઉપમદ્ગુસ્તથા મદ્ગુર્મેદુરશ્ચારિમેજયઃ ।
૧૪.૯/૨અવિક્ષિતસ્તથાક્ષેપઃ શત્રુઘ્નશ્ચારિમર્દનઃ ॥ ૧૪.૯॥

૧૪.૧૦/૧ધર્મધૃગ્ યતિધર્મા ચ ધર્મોક્ષાન્ધકરુસ્તથા ।
૧૪.૧૦/૨આવાહપ્રતિવાહૌ ચ સુન્દરી ચ વરાઙ્ગના ॥ ૧૪.૧૦॥

૧૪.૧૧/૧અક્રૂરેણોગ્રસેનાયાં સુગાત્ર્યાં દ્વિજસત્તમાઃ ।
૧૪.૧૧/૨પ્રસેનશ્ચોપદેવશ્ચ જજ્ઞાતે દેવવર્ચસૌ ॥ ૧૪.૧૧॥

૧૪.૧૨/૧ચિત્રકસ્યાભવન્ પુત્રાઃ પૃથુર્વિપૃથુરેવ ચ ।
૧૪.૧૨/૨અશ્વગ્રીવોઽશ્વબાહુશ્ચ સ્વપાર્શ્વકગવેષણૌ ॥ ૧૪.૧૨॥

૧૪.૧૩/૧અરિષ્ટનેમિરશ્વશ્ચ સુધર્મા ધર્મભૃત્ તથા ।
૧૪.૧૩/૨સુબાહુર્બહુબાહુશ્ચ શ્રવિષ્ઠાશ્રવણે સ્ત્રિયૌ ॥ ૧૪.૧૩॥

૧૪.૧૪/૧અસિક્ન્યાં જનયામાસ શૂરં વૈ દેવમીઢુષમ્ ।
૧૪.૧૪/૨મહિષ્યાં જજ્ઞિરે શૂરા ભોજ્યાયાં પુરુષા દશ ॥ ૧૪.૧૪॥

૧૪.૧૫/૧વસુદેવો મહાબાહુઃ પૂર્વમાનકદુન્દુભિઃ ।
૧૪.૧૫/૨જજ્ઞે યસ્ય પ્રસૂતસ્ય દુન્દુભ્યઃ પ્રાણદન્ દિવિ ॥ ૧૪.૧૫॥

૧૪.૧૬/૧આનકાનાં ચ સંહ્રાદઃ સુમહાન્ અભવદ્ દિવિ ।
૧૪.૧૬/૨પપાત પુષ્પવર્ષશ્ચ શૂરસ્ય જનને મહાન્ ॥ ૧૪.૧૬॥

૧૪.૧૭/૧મનુષ્યલોકે કૃત્સ્નેઽપિ રૂપે નાસ્તિ સમો ભુવિ ।
૧૪.૧૭/૨યસ્યાસીત્ પુરુષાગ્ર્યસ્ય કાન્તિશ્ચન્દ્રમસો યથા ॥ ૧૪.૧૭॥

૧૪.૧૮/૧દેવભાગસ્તતો જજ્ઞે તથા દેવશ્રવાઃ પુનઃ ।
૧૪.૧૮/૨અનાધૃષ્ટિઃ કનવકો વત્સવાન્ અથ ગૃઞ્જમઃ ॥ ૧૪.૧૮॥

૧૪.૧૯/૧શ્યામઃ શમીકો ગણ્ડૂષઃ પઞ્ચ ચાસ્ય વરાઙ્ગનાઃ ।
૧૪.૧૯/૨પૃથુકીર્તિઃ પૃથા ચૈવ શ્રુતદેવા શ્રુતશ્રવા ॥ ૧૪.૧૯॥

૧૪.૨૦/૧રાજાધિદેવી ચ તથા પઞ્ચૈતા વીરમાતરઃ ।
૧૪.૨૦/૨શ્રુતશ્રવાયાં ચૈદ્યસ્તુ શિશુપાલોઽભવન્ નૃપઃ ॥ ૧૪.૨૦॥

૧૪.૨૧/૧હિરણ્યકશિપુર્યોઽસૌ દૈત્યરાજોઽભવત્ પુરા ।
૧૪.૨૧/૨પૃથુકીર્ત્યાં તુ સંજજ્ઞે તનયો વૃદ્ધશર્મણઃ ॥ ૧૪.૨૧॥

૧૪.૨૨/૧કરૂષાધિપતિર્વીરો દન્તવક્રો મહાબલઃ ।
૧૪.૨૨/૨પૃથાં દુહિતરં ચક્રે કુન્તિસ્તાં પાણ્ડુરાવહત્ ॥ ૧૪.૨૨॥

૧૪.૨૩/૧યસ્યાં સ ધર્મવિદ્ રાજા ધર્મો જજ્ઞે યુધિષ્ઠિરઃ ।
૧૪.૨૩/૨ભીમસેનસ્તથા વાતાદ્ ઇન્દ્રાચ્ચૈવ ધનંજયઃ ॥ ૧૪.૨૩॥

૧૪.૨૪/૧લોકે પ્રતિરથો વીરઃ શક્રતુલ્યપરાક્રમઃ ।
૧૪.૨૪/૨અનમિત્રાચ્છિનિર્જજ્ઞે કનિષ્ઠાદ્ વૃષ્ણિનન્દનાત્ ॥ ૧૪.૨૪॥

૧૪.૨૫/૧શૈનેયઃ સત્યકસ્તસ્માદ્ યુયુધાનશ્ચ સાત્યકિઃ ।
૧૪.૨૫/૨ઉદ્ધવો દેવભાગસ્ય મહાભાગઃ સુતોઽભવત્ ॥ ૧૪.૨૫॥

૧૪.૨૬/૧પણ્ડિતાનાં પરં પ્રાહુર્દેવશ્રવસમુત્તમમ્ ।
૧૪.૨૬/૨અશ્મક્યં પ્રાપ્તવાન્ પુત્રમનાધૃષ્ટિર્યશસ્વિનમ્ ॥ ૧૪.૨૬॥

૧૪.૨૭/૧નિવૃત્તશત્રું શત્રુઘ્નં શ્રુતદેવા ત્વજાયત ।
૧૪.૨૭/૨શ્રુતદેવાત્મજાસ્તે તુ નૈષાદિર્યઃ પરિશ્રુતઃ ॥ ૧૪.૨૭॥

૧૪.૨૮/૧એકલવ્યો મુનિશ્રેષ્ઠા નિષાદૈઃ પરિવર્ધિતઃ ।
૧૪.૨૮/૨વત્સવતે ત્વપુત્રાય વસુદેવઃ પ્રતાપવાન્ ।
૧૪.૨૮/૩અદ્ભિર્દદૌ સુતં વીરં શૌરિઃ કૌશિકમૌરસમ્ ॥ ૧૪.૨૮॥

૧૪.૨૯/૧ગણ્ડૂષાય હ્યપુત્રાય વિષ્વક્સેનો દદૌ સુતાન્ ।
૧૪.૨૯/૨ચારુદેષ્ણં સુદેષ્ણં ચ પઞ્ચાલં કૃતલક્ષણમ્ ॥ ૧૪.૨૯॥

૧૪.૩૦/૧અસંગ્રામેણ યો વીરો નાવર્તત કદાચન ।
૧૪.૩૦/૨રૌક્મિણેયો મહાબાહુઃ કનીયાન્ દ્વિજસત્તમાઃ ॥ ૧૪.૩૦॥

૧૪.૩૧/૧વાયસાનાં સહસ્રાણિ યં યાન્તં પૃષ્ઠતોઽન્વયુઃ ।
૧૪.૩૧/૨ચારૂન્ અદ્યોપભોક્ષ્યામશ્ચારુદેષ્ણહતાન્ ઇતિ ॥ ૧૪.૩૧॥

૧૪.૩૨/૧તન્ત્રિજસ્તન્ત્રિપાલશ્ચ સુતૌ કનવકસ્ય તૌ ।
૧૪.૩૨/૨વીરુશ્ચાશ્વહનુશ્ચૈવ વીરૌ તાવથ ગૃઞ્જિમૌ ॥ ૧૪.૩૨॥

૧૪.૩૩/૧શ્યામપુત્રઃ શમીકસ્તુ શમીકો રાજ્યમાવહત્ ।
૧૪.૩૩/૨જુગુપ્સમાનો ભોજત્વાદ્ રાજસૂયમવાપ સઃ ॥ ૧૪.૩૩॥

૧૪.૩૪/૧અજાતશત્રુઃ શત્રૂણાં જજ્ઞે તસ્ય વિનાશનઃ ।
૧૪.૩૪/૨વસુદેવસુતાન્ વીરાન્ કીર્તયિષ્યામ્યતઃ પરમ્ ॥ ૧૪.૩૪॥

૧૪.૩૫/૧વૃષ્ણેસ્ત્રિવિધમેવં તુ બહુશાખં મહૌજસમ્ ।
૧૪.૩૫/૨ધારયન્ વિપુલં વંશં નાનર્થૈરિહ યુજ્યતે ॥ ૧૪.૩૫॥

૧૪.૩૬/૧યાઃ પત્ન્યો વસુદેવસ્ય ચતુર્દશ વરાઙ્ગનાઃ ।
૧૪.૩૬/૨પૌરવી રોહિણી નામ મદિરાદિતથાવરા ॥ ૧૪.૩૬॥

૧૪.૩૭/૧વૈશાખી ચ તથા ભદ્રા સુનામ્ની ચૈવ પઞ્ચમી ।
૧૪.૩૭/૨સહદેવા શાન્તિદેવા શ્રીદેવી દેવરક્ષિતા ॥ ૧૪.૩૭॥

૧૪.૩૮/૧વૃકદેવ્યુપદેવી ચ દેવકી ચૈવ સપ્તમી ।
૧૪.૩૮/૨સુતનુર્વડવા ચૈવ દ્વે એતે પરિચારિકે ॥ ૧૪.૩૮॥

૧૪.૩૯/૧પૌરવી રોહિણી નામ બાહ્લિકસ્યાત્મજાભવત્ ।
૧૪.૩૯/૨જ્યેષ્ઠા પત્ની મુનિશ્રેષ્ઠા દયિતાનકદુન્દુભેઃ ॥ ૧૪.૩૯॥

૧૪.૪૦/૧લેભે જ્યેષ્ઠં સુતં રામં શરણ્યં શઠમેવ ચ ।
૧૪.૪૦/૨દુર્દમં દમનં શુભ્રં પિણ્ડારકમુશીનરમ્ ॥ ૧૪.૪૦॥

૧૪.૪૧/૧ચિત્રા નામ કુમારી ચ રોહિણીતનયા નવ ।
૧૪.૪૧/૨ચિત્રા સુભદ્રેતિ પુનર્વિખ્યાતા મુનિસત્તમાઃ ॥ ૧૪.૪૧॥

૧૪.૪૨/૧વસુદેવાચ્ચ દેવક્યાં જજ્ઞે શૌરિર્મહાયશાઃ ।
૧૪.૪૨/૨રામાચ્ચ નિશઠો જજ્ઞે રેવત્યાં દયિતઃ સુતઃ ॥ ૧૪.૪૨॥

૧૪.૪૩/૧સુભદ્રાયાં રથી પાર્થાદ્ અભિમન્યુરજાયત ।
૧૪.૪૩/૨અક્રૂરાત્ કાશિકન્યાયાં સત્યકેતુરજાયત ॥ ૧૪.૪૩॥

૧૪.૪૪/૧વસુદેવસ્ય ભાર્યાસુ મહાભાગાસુ સપ્તસુ ।
૧૪.૪૪/૨યે પુત્રા જજ્ઞિરે શૂરાઃ સમસ્તાંસ્તાન્ નિબોધત ॥ ૧૪.૪૪॥

૧૪.૪૫/૧ભોજશ્ચ વિજયશ્ચૈવ શાન્તિદેવાસુતાવુભૌ ।
૧૪.૪૫/૨વૃકદેવઃ સુનામાયાં ગદશ્ચાસ્તાં સુતાવુભૌ ॥ ૧૪.૪૫॥

૧૪.૪૬/૧અગાવહં મહાત્માનં વૃકદેવી વ્યજાયત ।
૧૪.૪૬/૨કન્યા ત્રિગર્તરાજસ્ય ભાર્યા વૈ શિશિરાયણેઃ ॥ ૧૪.૪૬॥

૧૪.૪૭/૧જિજ્ઞાસાં પૌરુષે ચક્રે ન ચસ્કન્દે ચ પૌરુષમ્ ।
૧૪.૪૭/૨કૃષ્ણાયસસમપ્રખ્યો વર્ષે દ્વાદશમે તથા ॥ ૧૪.૪૭॥

૧૪.૪૮/૧મિથ્યાભિશસ્તો ગાર્ગ્યસ્તુ મન્યુનાતિસમીરિતઃ ।
૧૪.૪૮/૨ઘોષકન્યામુપાદાય મૈથુનાયોપચક્રમે ॥ ૧૪.૪૮॥

૧૪.૪૯/૧ગોપાલી ચાપ્સરાસ્તસ્ય ગોપસ્ત્રીવેષધારિણી ।
૧૪.૪૯/૨ધારયામાસ ગાર્ગ્યસ્ય ગર્ભં દુર્ધરમચ્યુતમ્ ॥ ૧૪.૪૯॥

૧૪.૫૦/૧માનુષ્યાં ગર્ગભાર્યાયાં નિયોગાચ્છૂલપાણિનઃ ।
૧૪.૫૦/૨સ કાલયવનો નામ જજ્ઞે રાજા મહાબલઃ ॥ ૧૪.૫૦॥

૧૪.૫૧/૧વૃત્તપૂર્વાર્ધકાયસ્તુ સિંહસંહનનો યુવા ।
૧૪.૫૧/૨અપુત્રસ્ય સ રાજ્ઞસ્તુ વવૃધેઽન્તઃપુરે શિશુઃ ॥ ૧૪.૫૧॥

૧૪.૫૨/૧યવનસ્ય મુનિશ્રેષ્ઠાઃ સ કાલયવનોઽભવત્ ।
૧૪.૫૨/૨આયુધ્યમાનો નૃપતિઃ પર્યપૃચ્છદ્ દ્વિજોત્તમમ્ ॥ ૧૪.૫૨॥

૧૪.૫૩/૧વૃષ્ણ્યન્ધકકુલં તસ્ય નારદોઽકથયદ્ વિભુઃ ।
૧૪.૫૩/૨અક્ષૌહિણ્યા તુ સૈન્યસ્ય મથુરામભ્યયાત્ તદા ॥ ૧૪.૫૩॥

૧૪.૫૪/૧દૂતં સમ્પ્રેષયામાસ વૃષ્ણ્યન્ધકનિવેશનમ્ ।
૧૪.૫૪/૨તતો વૃષ્ણ્યન્ધકાઃ કૃષ્ણં પુરસ્કૃત્ય મહામતિમ્ ॥ ૧૪.૫૪॥

૧૪.૫૫/૧સમેતા મન્ત્રયામાસુર્યવનસ્ય ભયાત્ તદા ।
૧૪.૫૫/૨કૃત્વા વિનિશ્ચયં સર્વે પલાયનમરોચયન્ ॥ ૧૪.૫૫॥

૧૪.૫૬/૧વિહાય મથુરાં રમ્યાં માનયન્તઃ પિનાકિનમ્ ।
૧૪.૫૬/૨કુશસ્થલીં દ્વારવતીં નિવેશયિતુમીપ્સવઃ ॥ ૧૪.૫૬॥

૧૪.૫૯/૧ઇતિ કૃષ્ણસ્ય જન્મેદં યઃ શુચિર્નિયતેન્દ્રિયઃ ।
૧૪.૫૯/૨પર્વસુ શ્રાવયેદ્ વિદ્વાન્ અનૃણઃ સ સુખી ભવેત્ ॥ ૧૪.૫૯॥

૧૫.૧/૧લોમહર્ષણ ઉવાચ । ક્રોષ્ટોરથાભવત્ પુત્રો વૃજિનીવાન્ મહાયશાઃ ।
૧૫.૧/૨વાર્જિનીવતમિચ્છન્તિ સ્વાહિં સ્વાહાકૃતાં વરમ્ ॥ ૧૫.૧॥

૧૫.૨/૧સ્વાહિપુત્રોઽભવદ્ રાજા ઉષદ્ગુર્વદતાં વરઃ ।
૧૫.૨/૨મહાક્રતુભિરીજે યો વિવિધૈર્ભૂરિદક્ષિણૈઃ ॥ ૧૫.૨॥

૧૫.૩/૧તતઃ પ્રસૂતિમિચ્છન્ વૈ ઉષદ્ગુઃ સોઽગ્ર્યમાત્મજમ્ ।
૧૫.૩/૨જજ્ઞે ચિત્રરથસ્તસ્ય પુત્રઃ કર્મભિરન્વિતઃ ॥ ૧૫.૩॥

૧૫.૪/૧આસીચ્ચૈત્રરથિર્વીરો યજ્વા વિપુલદક્ષિણઃ ।
૧૫.૪/૨શશબિન્દુઃ પરં વૃત્તં રાજર્ષીણામનુષ્ઠિતઃ ॥ ૧૫.૪॥

૧૫.૫/૧પૃથુશ્રવાઃ પૃથુયશા રાજાસીચ્છાશિબિન્દવઃ ।
૧૫.૫/૨શંસન્તિ ચ પુરાણજ્ઞાઃ પાર્થશ્રવસમન્તરમ્ ॥ ૧૫.૫॥

૧૫.૬/૧અન્તરસ્ય સુયજ્ઞસ્તુ સુયજ્ઞાતનયોઽભવત્ ।
૧૫.૬/૨ઉષતો યજ્ઞમખિલં સ્વધર્મે ચ કૃતાદરઃ ॥ ૧૫.૬॥

૧૫.૭/૧શિનેયુરભવત્ પુત્ર ઉષતઃ શત્રુતાપનઃ ।
૧૫.૭/૨મરુતસ્તસ્ય તનયો રાજર્ષિરભવન્ નૃપઃ ॥ ૧૫.૭॥

૧૫.૮/૧મરુતોઽલભત જ્યેષ્ઠં સુતં કમ્બલબર્હિષમ્ ।

૧૫.૮/૨ચચાર વિપુલં ધર્મમમર્ષાત્ પ્રત્યભાગ્ અપિ ॥ ૧૫.૮॥

૧૫.૯/૧સ સત્પ્રસૂતિમિચ્છન્ વૈ સુતં કમ્બલબર્હિષઃ ।
૧૫.૯/૨બભૂવ રુક્મકવચઃ શતપ્રસવતઃ સુતઃ ॥ ૧૫.૯॥

૧૫.૧૦/૧નિહત્ય રુક્મકવચઃ શતં કવચિનાં રણે ।
૧૫.૧૦/૨ધન્વિનાં નિશિતૈર્બાણૈરવાપ શ્રિયમુત્તમામ્ ॥ ૧૫.૧૦॥

૧૫.૧૧/૧જજ્ઞે ચ રુક્મકવચાત્ પરજિત્ પરવીરહા ।
૧૫.૧૧/૨જજ્ઞિરે પઞ્ચ પુત્રાસ્તુ મહાવીર્યાઃ પરાજિતાઃ ॥ ૧૫.૧૧॥

૧૫.૧૨/૧રુક્મેષુઃ પૃથુરુક્મશ્ચ જ્યામઘઃ પાલિતો હરિઃ ।
૧૫.૧૨/૨પાલિતં ચ હરિં ચૈવ વિદેહેભ્યઃ પિતા દદૌ ॥ ૧૫.૧૨॥

૧૫.૧૩/૧રુક્મેષુરભવદ્ રાજા પૃથુરુક્મસ્ય સંશ્રયાત્ ।
૧૫.૧૩/૨તાભ્યાં પ્રવ્રાજિતો રાજા જ્યામઘોઽવસદ્ આશ્રમે ॥ ૧૫.૧૩॥

૧૫.૧૪/૧પ્રશાન્તશ્ચ તદા રાજા બ્રાહ્મણૈશ્ચાવબોધિતઃ ।
૧૫.૧૪/૨જગામ ધનુરાદાય દેશમન્યં ધ્વજી રથી ॥ ૧૫.૧૪॥

૧૫.૧૫/૧નર્મદાકૂલમેકાકીમેકલાં મૃત્તિકાવતીમ્ ।
૧૫.૧૫/૨ઋક્ષવન્તં ગિરિં જિત્વા શુક્તિમત્યામુવાસ સઃ ॥ ૧૫.૧૫॥

૧૫.૧૬/૧જ્યામઘસ્યાભવદ્ ભાર્યા શૈબ્યા બલવતી સતી ।
૧૫.૧૬/૨અપુત્રોઽપિ સ રાજા વૈ નાન્યાં ભાર્યામવિન્દત ॥ ૧૫.૧૬॥

૧૫.૧૭/૧તસ્યાસીદ્ વિજયો યુદ્ધે તત્ર કન્યામવાપ સઃ ।
૧૫.૧૭/૨ભાર્યામુવાચ સંત્રસ્તઃ સ્નુષેતિ સ જનેશ્વરઃ ॥ ૧૫.૧૭॥

૧૫.૧૮/૧એતચ્છ્રુત્વાબ્રવીદ્ દેવી કસ્ય દેવ સ્નુષેતિ વૈ ।
૧૫.૧૮/૨અબ્રવીત્ તદ્ ઉપશ્રુત્ય જ્યામઘો રાજસત્તમઃ ॥ ૧૫.૧૮॥

૧૫.૧૯/૧રાજોવાચ । યસ્તે જનિષ્યતે પુત્રસ્તસ્ય ભાર્યોપપાદિતા ॥ ૧૫.૧૯॥

૧૫.૨૦/૧લોમહર્ષણ ઉવાચ । ઉગ્રેણ તપસા તસ્યાઃ કન્યાયાઃ સા વ્યજાયત ।
૧૫.૨૦/૨પુત્રં વિદર્ભં સુભાગા શૈબ્યા પરિણતા સતી ॥ ૧૫.૨૦॥

૧૫.૨૧/૧રાજપુત્ર્યાં તુ વિદ્વાંસૌ સ્નુષાયાં ક્રથકૈશિકૌ ।
૧૫.૨૧/૨પશ્ચાદ્ વિદર્ભોઽજનયચ્છૂરૌ રણવિશારદૌ ॥ ૧૫.૨૧॥

૧૫.૨૨/૧ભીમો વિદર્ભસ્ય સુતઃ કુન્તિસ્તસ્યાત્મજોઽભવત્ ।

૧૫.૨૨/૨કુન્તેર્ધૃષ્ટઃ સુતો જજ્ઞે રણધૃષ્ટઃ પ્રતાપવાન્ ॥ ૧૫.૨૨॥

૧૫.૨૩/૧ધૃષ્ટસ્ય જજ્ઞિરે શૂરાસ્ત્રયઃ પરમધાર્મિકાઃ ।
૧૫.૨૩/૨આવન્તશ્ચ દશાર્હશ્ચ બલી વિષહરશ્ચ સઃ ॥ ૧૫.૨૩॥

૧૫.૨૪/૧દશાર્હસ્ય સુતો વ્યોમા વ્યોમ્નો જીમૂત ઉચ્યતે ।
૧૫.૨૪/૨જીમૂતપુત્રો વિકૃતિસ્તસ્ય ભીમરથઃ સ્મૃતઃ ॥ ૧૫.૨૪॥

૧૫.૨૫/૧અથ ભીમરથસ્યાસીત્ પુત્રો નવરથસ્તથા ।
૧૫.૨૫/૨તસ્ય ચાસીદ્ દશરથઃ શકુનિસ્તસ્ય ચાત્મજઃ ॥ ૧૫.૨૫॥

૧૫.૨૬/૧તસ્માત્ કરમ્ભઃ કારમ્ભિર્દેવરાતોઽભવન્ નૃપઃ ।
૧૫.૨૬/૨દેવક્ષત્રોઽભવત્ તસ્ય વૃદ્ધક્ષત્રો મહાયશાઃ ॥ ૧૫.૨૬॥

૧૫.૨૭/૧દેવગર્ભસમો જજ્ઞે દેવક્ષત્રસ્ય નન્દનઃ ।
૧૫.૨૭/૨મધૂનાં વંશકૃદ્ રાજા મધુર્મધુરવાગ્ અપિ ॥ ૧૫.૨૭॥

૧૫.૨૮/૧મધોર્જજ્ઞેઽથ વૈદર્ભ્યાં પુરુદ્વાન્ પુરુષોત્તમઃ ।
૧૫.૨૮/૨ઐક્ષ્વાકી ચાભવદ્ ભાર્યા મધોસ્તસ્યાં વ્યજાયત ॥ ૧૫.૨૮॥

૧૫.૨૯/૧સત્વાન્ સર્વગુણોપેતઃ સાત્વતા કીર્તિવર્ધનઃ ।
૧૫.૨૯/૨ઇમાં વિસૃષ્ટિં વિજ્ઞાય જ્યામઘસ્ય મહાત્મનઃ ।
૧૫.૨૯/૩યુજ્યતે પરમપ્રીત્યા પ્રજાવાંશ્ચ ભવેત્ સદા ॥ ૧૫.૨૯॥

૧૫.૩૦/૧લોમહર્ષણ ઉવાચ । સત્વતઃ સત્ત્વસમ્પન્નાન્ કૌશલ્યા સુષુવે સુતાન્ ।
૧૫.૩૦/૨ભાગિનં ભજમાનં ચ દિવ્યં દેવાવૃધં નૃપમ્ ॥ ૧૫.૩૦॥

૧૫.૩૧/૧અન્ધકં ચ મહાબાહું વૃષ્ણિં ચ યદુનન્દનમ્ ।
૧૫.૩૧/૨તેષાં વિસર્ગાશ્ચત્વારો વિસ્તરેણેહ કીર્તિતાઃ ॥ ૧૫.૩૧॥

૧૫.૩૨/૧ભજમાનસ્ય સૃઞ્જય્યૌ બાહ્યકાથોપબાહ્યકા ।
૧૫.૩૨/૨આસ્તાં ભાર્યે તયોસ્તસ્માજ્જજ્ઞિરે બહવઃ સુતાઃ ॥ ૧૫.૩૨॥

૧૫.૩૩/૧ક્રિમિશ્ચ ક્રમણશ્ચૈવ ધૃષ્ટઃ શૂરઃ પુરંજયઃ ।
૧૫.૩૩/૨એતે બાહ્યકસૃઞ્જય્યાં ભજમાનાદ્ વિજજ્ઞિરે ॥ ૧૫.૩૩॥

૧૫.૩૪/૧આયુતાજિત્ સહસ્રાજિચ્છતાજિત્ ત્વથ દાસકઃ ।
૧૫.૩૪/૨ઉપબાહ્યકસૃઞ્જય્યાં ભજમાનાદ્ વિજજ્ઞિરે ॥ ૧૫.૩૪॥

૧૫.૩૫/૧યજ્વા દેવાવૃધો રાજા ચચાર વિપુલં તપઃ ।
૧૫.૩૫/૨પુત્રઃ સર્વગુણોપેતો મમ સ્યાદ્ ઇતિ નિશ્ચિતઃ ॥ ૧૫.૩૫॥

૧૫.૩૬/૧સંયુજ્યમાનસ્તપસા પર્ણાશાયા જલં સ્પૃશન્ ।
૧૫.૩૬/૨સદોપસ્પૃશતસ્તસ્ય ચકાર પ્રિયમાપગા ॥ ૧૫.૩૬॥

૧૫.૩૭/૧ચિન્તયાભિપરીતા સા ન જગામૈવ નિશ્ચયમ્ ।
૧૫.૩૭/૨કલ્યાણત્વાન્ નરપતેસ્તસ્ય સા નિમ્નગોત્તમા ॥ ૧૫.૩૭॥

૧૫.૩૮/૧નાધ્યગચ્છત્ તુ તાં નારીં યસ્યામેવંવિધઃ સુતઃ ।
૧૫.૩૮/૨ભવેત્ તસ્માત્ સ્વયં ગત્વા ભવામ્યસ્ય સહાનુગા ॥ ૧૫.૩૮॥

૧૫.૩૯/૧અથ ભૂત્વા કુમારી સા બિભ્રતી પરમં વપુઃ ।
૧૫.૩૯/૨વરયામાસ નૃપતિં તામિયેષ ચ સ પ્રભુઃ ॥ ૧૫.૩૯॥

૧૫.૪૦/૧તસ્યામાધત્ત ગર્ભં સ તેજસ્વિનમુદારધીઃ ।
૧૫.૪૦/૨અથ સા દશમે માસિ સુષુવે સરિતાં વરા ॥ ૧૫.૪૦॥

૧૫.૪૧/૧પુત્રં સર્વગુણોપેતં બભ્રું દેવાવૃધં દ્વિજાઃ ।
૧૫.૪૧/૨અત્ર વંશે પુરાણજ્ઞા ગાયન્તીતિ પરિશ્રુતમ્ ॥ ૧૫.૪૧॥

૧૫.૪૨/૧ગુણાન્ દેવાવૃધસ્યાપિ કીર્તયન્તો મહાત્મનઃ ।
૧૫.૪૨/૨યથૈવાગ્રે તથા દૂરાત્ પશ્યામસ્તાવદ્ અન્તિકાત્ ॥ ૧૫.૪૨॥

૧૫.૪૩/૧બભ્રુઃ શ્રેષ્ઠો મનુષ્યાણાં દેવૈર્દેવાવૃધઃ સમઃ ।
૧૫.૪૩/૨ષષ્ટિશ્ચ ષટ્ ચ પુરુષાઃ સહસ્રાણિ ચ સપ્ત ચ ॥ ૧૫.૪૩॥

૧૫.૪૪/૧એતેઽમૃતત્વં પ્રાપ્તા વૈ બભ્રોર્દેવાવૃધાદ્ અપિ ।
૧૫.૪૪/૨યજ્વા દાનપતિર્ધીમાન્ બ્રહ્મણ્યઃ સુદૃઢાયુધઃ ॥ ૧૫.૪૪॥

૧૫.૪૫/૧તસ્યાન્વવાયઃ સુમહાન્ ભોજા યે સાર્તિકાવતાઃ ।
૧૫.૪૫/૨અન્ધકાત્ કાશ્યદુહિતા ચતુરોઽલભતાત્મજાન્ ॥ ૧૫.૪૫॥

૧૫.૪૬/૧કુકુરં ભજમાનં ચ સસકં બલબર્હિષમ્ ।
૧૫.૪૬/૨કુકુરસ્ય સુતો વૃષ્ટિર્વૃષ્ટેસ્તુ તનયસ્તથા ॥ ૧૫.૪૬॥

૧૫.૪૭/૧કપોતરોમા તસ્યાથ તિલિરિસ્તનયોઽભવત્ ।
૧૫.૪૭/૨જજ્ઞે પુનર્વસુસ્તસ્માદ્ અભિજિચ્ચ પુનર્વસોઃ ॥ ૧૫.૪૭॥

૧૫.૪૮/૧તથા વૈ પુત્રમિથુનં બભૂવાભિજિતઃ કિલ ।
૧૫.૪૮/૨આહુકઃ શ્રાહુકશ્ચૈવ ખ્યાતૌ ખ્યાતિમતાં વરૌ ॥ ૧૫.૪૮॥

૧૫.૪૯/૧ઇમાં ચોદાહરન્ત્યત્ર ગાથાં પ્રતિ તમાહુકમ્ ।

૧૫.૪૯/૨શ્વેતેન પરિવારેણ કિશોરપ્રતિમો મહાન્ ॥ ૧૫.૪૯॥

૧૫.૫૦/૧અશીતિવર્મણા યુક્ત આહુકઃ પ્રથમં વ્રજેત્ ।
૧૫.૫૦/૨નાપુત્રવાન્ નાશતદો નાસહસ્રશતાયુષઃ ॥ ૧૫.૫૦॥

૧૫.૫૧/૧નાશુદ્ધકર્મા નાયજ્વા યો ભોજમભિતો વ્રજેત્ ।
૧૫.૫૧/૨પૂર્વસ્યાં દિશિ નાગાનાં ભોજસ્ય પ્રયયુઃ કિલ ॥ ૧૫.૫૧॥

૧૫.૫૨/૧સોમાત્ સઙ્ગાનુકર્ષાણાં ધ્વજિનાં સવરૂથિનામ્ ।
૧૫.૫૨/૨રથાનાં મેઘઘોષાણાં સહસ્રાણિ દશૈવ તુ ॥ ૧૫.૫૨॥

૧૫.૫૩/૧રૌપ્યકાઞ્ચનકક્ષાણાં સહસ્રાણ્યેકવિંશતિઃ ।
૧૫.૫૩/૨તાવત્યેવ સહસ્રાણિ ઉત્તરસ્યાં તથા દિશિ ॥ ૧૫.૫૩॥

૧૫.૫૪/૧આભૂમિપાલા ભોજાસ્તુ સન્તિ જ્યાકિઙ્કિણીકિનઃ ।
૧૫.૫૪/૨આહુઃ કિં ચાપ્યવન્તિભ્યઃ સ્વસારં દદુરન્ધકાઃ ॥ ૧૫.૫૪॥

૧૫.૫૫/૧આહુકસ્ય તુ કાશ્યાયાં દ્વૌ પુત્રૌ સમ્બભૂવતુઃ ।
૧૫.૫૫/૨દેવકશ્ચોગ્રસેનશ્ચ દેવગર્ભસમાવુભૌ ॥ ૧૫.૫૫॥

૧૫.૫૬/૧દેવકસ્યાભવન્ પુત્રાશ્ચત્વારસ્ત્રિદશોપમાઃ ।
૧૫.૫૬/૨દેવવાન્ ઉપદેવશ્ચ સંદેવો દેવરક્ષિતઃ ॥ ૧૫.૫૬॥

૧૫.૫૭/૧કુમાર્યઃ સપ્ત ચાસ્યાથ વસુદેવાય તા દદૌ ।
૧૫.૫૭/૨દેવકી શાન્તિદેવા ચ સુદેવા દેવરક્ષિતા ॥ ૧૫.૫૭॥

૧૫.૫૮/૧વૃકદેવ્યુપદેવી ચ સુનામ્ની ચૈવ સપ્તમી ।
૧૫.૫૮/૨નવોગ્રસેનસ્ય સુતાસ્તેષાં કંસસ્તુ પૂર્વજઃ ॥ ૧૫.૫૮॥

૧૫.૫૯/૧ન્યગ્રોધશ્ચ સુનામા ચ તથા કઙ્કઃ સુભૂષણઃ ।
૧૫.૫૯/૨રાષ્ટ્રપાલોઽથ સુતનુરનાવૃષ્ટિસ્તુ પુષ્ટિમાન્ ॥ ૧૫.૫૯॥

૧૫.૬૦/૧તેષાં સ્વસારઃ પઞ્ચાસન્ કંસા કંસવતી તથા ।
૧૫.૬૦/૨સુતનૂ રાષ્ટ્રપાલી ચ કઙ્કા ચૈવ વરાઙ્ગના ॥ ૧૫.૬૦॥

૧૫.૬૧/૧ઉગ્રસેનઃ સહાપત્યો વ્યાખ્યાતઃ કુકુરોદ્ભવઃ ।
૧૫.૬૧/૨કુકુરાણામિમં વંશં ધારયન્ન્ અમિતૌજસામ્ ॥ ૧૫.૬૧॥

૧૫.૬૨/૧આત્મનો વિપુલં વંશં પ્રજાવાન્ આપ્નુયાન્ નરઃ ॥ ૧૫.૬૨॥

૧૬.૧/૧લોમહર્ષણ ઉવાચ । ભજમાનસ્ય પુત્રોઽથ રથમુખ્યો વિદૂરથઃ ।

૧૬.૧/૨રાજાધિદેવઃ શૂરસ્તુ વિદૂરથસુતોઽભવત્ ॥ ૧૬.૧॥

૧૬.૨/૧રાજાધિદેવસ્ય સુતા જજ્ઞિરે વીર્યવત્તરાઃ ।
૧૬.૨/૨દત્તાતિદત્તૌ બલિનૌ શોણાશ્વઃ શ્વેતવાહનઃ ॥ ૧૬.૨॥

૧૬.૩/૧શમી ચ દણ્ડશર્મા ચ દન્તશત્રુશ્ચ શત્રુજિત્ ।
૧૬.૩/૨શ્રવણા ચ શ્રવિષ્ઠા ચ સ્વસારૌ સમ્બભૂવતુઃ ॥ ૧૬.૩॥

૧૬.૪/૧શમિપુત્રઃ પ્રતિક્ષત્રઃ પ્રતિક્ષત્રસ્ય ચાત્મજઃ ।
૧૬.૪/૨સ્વયમ્ભોજઃ સ્વયમ્ભોજાદ્ ભદિકઃ સમ્બભૂવ હ ॥ ૧૬.૪॥

૧૬.૫/૧તસ્ય પુત્રા બભૂવુર્હિ સર્વે ભીમપરાક્રમાઃ ।
૧૬.૫/૨કૃતવર્માગ્રજસ્તેષાં શતધન્વા તુ મધ્યમઃ ॥ ૧૬.૫॥

૧૬.૬/૧દેવાન્તશ્ચ નરાન્તશ્ચ ભિષગ્વૈતરણશ્ચ યઃ ।
૧૬.૬/૨સુદાન્તશ્ચાતિદાન્તશ્ચ નિકાશ્યઃ કામદમ્ભકઃ ॥ ૧૬.૬॥

૧૬.૭/૧દેવાન્તસ્યાભવત્ પુત્રો વિદ્વાન્ કમ્બલબર્હિષઃ ।
૧૬.૭/૨અસમૌજાઃ સુતસ્તસ્ય નાસમૌજાશ્ચ તાવુભૌ ॥ ૧૬.૭॥

૧૬.૮/૧અજાતપુત્રાય સુતાન્ પ્રદદાવસમૌજસે ।
૧૬.૮/૨સુદંષ્ટ્રશ્ચ સુચારુશ્ચ કૃષ્ણ ઇત્યન્ધકાઃ સ્મૃતાઃ ॥ ૧૬.૮॥

૧૬.૯/૧ગાન્ધારી ચૈવ માદ્રી ચ ક્રોષ્ટુભાર્યે બભૂવતુઃ ।
૧૬.૯/૨ગાન્ધારી જનયામાસ અનમિત્રં મહાબલમ્ ॥ ૧૬.૯॥

૧૬.૧૦/૧માદ્રી યુધાજિતં પુત્રં તતો વૈ દેવમીઢુષમ્ ।
૧૬.૧૦/૨અનમિત્રમમિત્રાણાં જેતારમપરાજિતમ્ ॥ ૧૬.૧૦॥

૧૬.૧૧/૧અનમિત્રસુતો નિઘ્નો નિઘ્નતો દ્વૌ બભૂવતુઃ ।
૧૬.૧૧/૨પ્રસેનશ્ચાથ સત્રાજિચ્છત્રુસેનાજિતાવુભૌ ॥ ૧૬.૧૧॥

૧૬.૧૨/૧પ્રસેનો દ્વારવત્યાં તુ નિવસન્ યો મહામણિમ્ ।
૧૬.૧૨/૨દિવ્યં સ્યમન્તકં નામ સ સૂર્યાદ્ ઉપલબ્ધવાન્ ॥ ૧૬.૧૨॥

૧૬.૧૩/૧તસ્ય સત્રાજિતઃ સૂર્યઃ સખા પ્રાણસમોઽભવત્ ।
૧૬.૧૩/૨સ કદાચિન્ નિશાપાયે રથેન રથિનાં વરઃ ॥ ૧૬.૧૩॥

૧૬.૧૪/૧તોયકૂલમપઃ સ્પ્રષ્ટુમુપસ્થાતું યયૌ રવિમ્ ।
૧૬.૧૪/૨તસ્યોપતિષ્ઠતઃ સૂર્યં વિવસ્વાન્ અગ્રતઃ સ્થિતઃ ॥ ૧૬.૧૪॥

૧૬.૧૫/૧વિસ્પષ્ટમૂર્તિર્ભગવાંસ્તેજોમણ્ડલવાન્ વિભુઃ ।
૧૬.૧૫/૨અથ રાજા વિવસ્વન્તમુવાચ સ્થિતમગ્રતઃ ॥ ૧૬.૧૫॥

૧૬.૧૬/૧યથૈવ વ્યોમ્નિ પશ્યામિ સદા ત્વાં જ્યોતિષાં પતે ।
૧૬.૧૬/૨તેજોમણ્ડલિનં દેવં તથૈવ પુરતઃ સ્થિતમ્ ॥ ૧૬.૧૬॥

૧૬.૧૭/૧કો વિશેષોઽસ્તિ મે ત્વત્તઃ સખ્યેનોપગતસ્ય વૈ ।
૧૬.૧૭/૨એતચ્છ્રુત્વા તુ ભગવાન્ મણિરત્નં સ્યમન્તકમ્ ॥ ૧૬.૧૭॥

૧૬.૧૮/૧સ્વકણ્ઠાદ્ અવમુચ્યાથ એકાન્તે ન્યસ્તવાન્ વિભુઃ ।
૧૬.૧૮/૨તતો વિગ્રહવન્તં તં દદર્શ નૃપતિસ્તદા ॥ ૧૬.૧૮॥

૧૬.૧૯/૧પ્રીતિમાન્ અથ તં દૃષ્ટ્વા મુહૂર્તં કૃતવાન્ કથામ્ ।
૧૬.૧૯/૨તમભિપ્રસ્થિતં ભૂયો વિવસ્વન્તં સ સત્રજિત્ ॥ ૧૬.૧૯॥

૧૬.૨૦/૧લોકાન્ ભાસયસે સર્વાન્ યેન ત્વં સતતં પ્રભો ।
૧૬.૨૦/૨તદ્ એતન્ મણિરત્નં મે ભગવન્ દાતુમર્હસિ ॥ ૧૬.૨૦॥

૧૬.૨૧/૧તતઃ સ્યમન્તકમણિં દત્તવાન્ ભાસ્કરસ્તદા ।
૧૬.૨૧/૨સ તમાબધ્ય નગરીં પ્રવિવેશ મહીપતિઃ ॥ ૧૬.૨૧॥

૧૬.૨૨/૧તં જનાઃ પર્યધાવન્ત સૂર્યોઽયં ગચ્છતીતિ હ ।
૧૬.૨૨/૨સ્વાં પુરીં સ વિસિષ્માય રાજા ત્વન્તઃપુરં તથા ॥ ૧૬.૨૨॥

૧૬.૨૩/૧તં પ્રસેનજિતં દિવ્યં મણિરત્નં સ્યમન્તકમ્ ।
૧૬.૨૩/૨દદૌ ભ્રાત્રે નરપતિઃ પ્રેમ્ણા સત્રાજિદ્ ઉત્તમમ્ ॥ ૧૬.૨૩॥

૧૬.૨૪/૧સ મણિઃ સ્યન્દતે રુક્મં વૃષ્ણ્યન્ધકનિવેશને ।
૧૬.૨૪/૨કાલવર્ષી ચ પર્જન્યો ન ચ વ્યાધિભયં હ્યભૂત્ ॥ ૧૬.૨૪॥

૧૬.૨૫/૧લિપ્સાં ચક્રે પ્રસેનસ્ય મણિરત્ને સ્યમન્તકે ।
૧૬.૨૫/૨ગોવિન્દો ન ચ તં લેભે શક્તોઽપિ ન જહાર સઃ ॥ ૧૬.૨૫॥

૧૬.૨૬/૧કદાચિન્ મૃગયાં યાતઃ પ્રસેનસ્તેન ભૂષિતઃ ।
૧૬.૨૬/૨સ્યમન્તકકૃતે સિંહાદ્ વધં પ્રાપ વનેચરાત્ ॥ ૧૬.૨૬॥

૧૬.૨૭/૧અથ સિંહં પ્રધાવન્તમ્ ઋક્ષરાજો મહાબલઃ ।
૧૬.૨૭/૨નિહત્ય મણિરત્નં તદ્ આદાય પ્રાવિશદ્ ગુહામ્ ॥ ૧૬.૨૭॥

૧૬.૨૮/૧તતો વૃષ્ણ્યન્ધકાઃ કૃષ્ણં પ્રસેનવધકારણાત્ ।
૧૬.૨૮/૨પ્રાર્થનાં તાં મણેર્બદ્ધ્વા સર્વ એવ શશઙ્કિરે ॥ ૧૬.૨૮॥

૧૬.૨૯/૧સ શઙ્ક્યમાનો ધર્માત્મા અકારી તસ્ય કર્મણઃ ।
૧૬.૨૯/૨આહરિષ્યે મણિમિતિ પ્રતિજ્ઞાય વનં યયૌ ॥ ૧૬.૨૯ ॥

૧૬.૩૦/૧યત્ર પ્રસેનો મૃગયાં વ્યચરત્ તત્ર ચાપ્યથ ।
૧૬.૩૦/૨પ્રસેનસ્ય પદં ગૃહ્ય પુરુષૈરાપ્તકારિભિઃ ॥ ૧૬.૩૦ ॥

૧૬.૩૧/૧ઋક્ષવન્તં ગિરિવરં વિન્ધ્યં ચ ગિરિમુત્તમમ્ ।
૧૬.૩૧/૨અન્વેષયન્ પરિશ્રાન્તઃ સ દદર્શ મહામનાઃ ॥ ૧૬.૩૧ ॥

૧૬.૩૨/૧સાશ્વં હતં પ્રસેનં તુ નાવિન્દત ચ તન્મણિમ્ ।
૧૬.૩૨/૨અથ સિંહઃ પ્રસેનસ્ય શરીરસ્યાવિદૂરતઃ ॥ ૧૬.૩૨ ॥

૧૬.૩૩/૧ઋક્ષેણ નિહતો દૃષ્ટઃ પદૈરૃક્ષસ્તુ સૂચિતઃ ।
૧૬.૩૩/૨પદૈસ્તૈરન્વિયાયાથ ગુહામ્ ઋક્ષસ્ય માધવઃ ॥ ૧૬.૩૩ ॥

૧૬.૩૪/૧સ હિ ઋક્ષબિલે વાણીં શુશ્રાવ પ્રમદેરિતામ્ ।
૧૬.૩૪/૨ધાત્ર્યા કુમારમાદાય સુતં જામ્બવતો દ્વિજાઃ ॥ ૧૬.૩૪ ॥

૧૬.૩૫/૧ક્રીડયન્ત્યા ચ મણિના મા રોદીરિત્યથેરિતામ્ ॥ ૧૬.૩૫ ॥

૧૬.૩૬/૧ધાત્ર્યુવાચ । સિંહઃ પ્રસેનમવધીત્ સિંહો જામ્બવતા હતઃ ।
૧૬.૩૬/૨સુકુમારક મા રોદીસ્તવ હ્યેષ સ્યમન્તકઃ ॥ ૧૬.૩૬ ॥

૧૬.૩૭/૧વ્યક્તિતસ્તસ્ય શબ્દસ્ય તૂર્ણમેવ બિલં યયૌ ।
૧૬.૩૭/૨પ્રવિશ્ય તત્ર ભગવાંસ્તદ્ ઋક્ષબિલમઞ્જસા ॥ ૧૬.૩૭ ॥

૧૬.૩૮/૧સ્થાપયિત્વા બિલદ્વારે યદૂંલ્લાઙ્ગલિના સહ ।
૧૬.૩૮/૨શાર્ઙ્ગધન્વા બિલસ્થં તુ જામ્બવન્તં દદર્શ સઃ ॥ ૧૬.૩૮ ॥

૧૬.૩૯/૧યુયુધે વાસુદેવસ્તુ બિલે જામ્બવતા સહ ।
૧૬.૩૯/૨બાહુભ્યામેવ ગોવિન્દો દિવસાન્ એકવિંશતિમ્ ॥ ૧૬.૩૯ ॥

૧૬.૪૦/૧પ્રવિષ્ટેઽથ બિલે કૃષ્ણે બલદેવપુરઃસરાઃ ।
૧૬.૪૦/૨પુરીં દ્વારવતીમેત્ય હતં કૃષ્ણં ન્યવેદયન્ ॥ ૧૬.૪૦ ॥

૧૬.૪૧/૧વાસુદેવોઽપિ નિર્જિત્ય જામ્બવન્તં મહાબલમ્ ।
૧૬.૪૧/૨લેભે જામ્બવતીં કન્યામ્ ઋક્ષરાજસ્ય સમ્મતામ્ ॥ ૧૬.૪૧ ॥

૧૬.૪૨/૧મણિં સ્યમન્તકં ચૈવ જગ્રાહાત્મવિશુદ્ધયે ।
૧૬.૪૨/૨અનુનીયર્ક્ષરાજં તુ નિર્યયૌ ચ તતો બિલાત્ ॥ ૧૬.૪૨ ॥

૧૬.૪૩/૧ઉપાયાદ્ દ્વારકાં કૃષ્ણઃ સ વિનીતૈઃ પુરઃસરૈઃ ।
૧૬.૪૩/૨એવં સ મણિમાહૃત્ય વિશોધ્યાત્માનમચ્યુતઃ ॥ ૧૬.૪૩॥

૧૬.૪૪/૧દદૌ સત્રાજિતે તં વૈ સર્વસાત્વતસંસદિ ।
૧૬.૪૪/૨એવં મિથ્યાભિશસ્તેન કૃષ્ણેનામિત્રઘાતિના ॥ ૧૬.૪૪॥

૧૬.૪૫/૧આત્મા વિશોધિતઃ પાપાદ્ વિનિર્જિત્ય સ્યમન્તકમ્ ।
૧૬.૪૫/૨સત્રાજિતો દશ ત્વાસન્ ભાર્યાસ્તાસાં શતં સુતાઃ ॥ ૧૬.૪૫॥

૧૬.૪૬/૧ખ્યાતિમન્તસ્ત્રયસ્તેષાં ભગંકારસ્તુ પૂર્વજઃ ।
૧૬.૪૬/૨વીરો વાતપતિશ્ચૈવ વસુમેધસ્તથૈવ ચ ॥ ૧૬.૪૬॥

૧૬.૪૭/૧કુમાર્યશ્ચાપિ તિસ્રો વૈ દિક્ષુ ખ્યાતા દ્વિજોત્તમાઃ ।
૧૬.૪૭/૨સત્યભામોત્તમા તાસાં વ્રતિની ચ દૃઢવ્રતા ॥ ૧૬.૪૭॥

૧૬.૪૮/૧તથા પ્રસ્વાપિની ચૈવ ભાર્યાં કૃષ્ણાય તાં દદૌ ।
૧૬.૪૮/૨સભાક્ષો ભઙ્ગકારિસ્તુ નાવેયશ્ચ નરોત્તમૌ ॥ ૧૬.૪૮॥

૧૬.૪૯/૧જજ્ઞાતે ગુણસમ્પન્નૌ વિશ્રુતૌ રૂપસમ્પદા ।
૧૬.૪૯/૨માદ્યાઃ પુત્રોऽથ જજ્ઞેऽથ વૃષ્ણિપુત્રો યુધાજિતઃ ॥ ૧૬.૪૯॥

૧૬.૫૦/૧જજ્ઞાતે તનયૌ વૃષ્ણેઃ શ્વફલ્કશ્ચિત્રકસ્તથા ।
૧૬.૫૦/૨શ્વફલ્કઃ કાશિરાજસ્ય સુતાં ભાર્યામવિન્દત ॥ ૧૬.૫૦॥

૧૬.૫૧/૧ગાન્દિનીં નામ તસ્યાશ્ચ ગાઃ સદા પ્રદદૌ પિતા ।
૧૬.૫૧/૨તસ્યાં જજ્ઞે મહાબાહુઃ શ્રુતવાન્ અતિથિપ્રિયઃ ॥ ૧૬.૫૧॥

૧૬.૫૨/૧અક્રૂરોऽથ મહાભાગો જજ્ઞે વિપુલદક્ષિણઃ ।
૧૬.૫૨/૨ઉપમદ્ગુસ્તથા મદ્ગુર્મુદરશ્ચારિમર્દનઃ ॥ ૧૬.૫૨॥

૧૬.૫૩/૧આરિક્ષેપસ્તથોપેક્ષઃ શત્રુહા ચારિમેજયઃ ।
૧૬.૫૩/૨ધર્મભૃચ્ચાપિ ધર્મા ચ ગૃધ્રભોજાન્ધકસ્તથા ॥ ૧૬.૫૩॥

૧૬.૫૪/૧આવાહપ્રતિવાહૌ ચ સુન્દરી ચ વરાઙ્ગના ।
૧૬.૫૪/૨વિશ્રુતાશ્વસ્ય મહિષી કન્યા ચાસ્ય વસુંધરા ॥ ૧૬.૫૪॥

૧૬.૫૫/૧રૂપયૌવનસમ્પન્ના સર્વસત્ત્વમનોહરા ।
૧૬.૫૫/૨અક્રૂરેણોગ્રસેનાયાં સુતૌ વૈ કુલનન્દનૌ ॥ ૧૬.૫૫॥

૧૬.૫૬/૧વસુદેવશ્ચોપદેવશ્ચ જજ્ઞાતે દેવવર્ચસૌ ।

૧૬.૫૬/૨ચિત્રકસ્યાભવન્ પુત્રાઃ પૃથુર્વિપૃથુરેવ ચ ॥ ૧૬.૫૬॥

૧૬.૫૭/૧અશ્વગ્રીવોઽશ્વબાહુશ્ચ સુપાર્શ્વકગવેષણૌ ।
૧૬.૫૭/૨અરિષ્ટનેમિશ્ચ સુતા ધર્મો ધર્મભૃદ્ એવ ચ ॥ ૧૬.૫૭॥

૧૬.૫૮/૧સુબાહુર્બહુબાહુશ્ચ શ્રવિષ્ઠાશ્રવણે સ્ત્રિયૌ ।
૧૬.૫૮/૨ઇમાં મિથ્યાભિશસ્તિં યઃ કૃષ્ણસ્ય સમુદાહૃતામ્ ॥ ૧૬.૫૮॥

૧૬.૫૯/૧વેદ મિથ્યાભિશાપાસ્તં ન સ્પૃશન્તિ કદાચન ॥ ૧૬.૫૯॥

૧૭.૧/૧લોમહર્ષણ ઉવાચ । યત્ તુ સત્રાજિતે કૃષ્ણો મણિરત્નં સ્યમન્તકમ્ ।
૧૭.૧/૨દદાવહારયદ્ બભ્રુર્ભોજેન શતધન્વના ॥ ૧૭.૧॥

૧૭.૨/૧સદા હિ પ્રાર્થયામાસ સત્યભામામનિન્દિતામ્ ।
૧૭.૨/૨અક્રૂરોઽન્તરમન્વિષ્યન્ મણિં ચૈવ સ્યમન્તકમ્ ॥ ૧૭.૨॥

૧૭.૩/૧સત્રાજિતં તતો હત્વા શતધન્વા મહાબલઃ ।
૧૭.૩/૨રાત્રૌ તં મણિમાદાય તતોઽક્રૂરાય દત્તવાન્ ॥ ૧૭.૩॥

૧૭.૪/૧અક્રૂરસ્તુ તદા વિપ્રા રત્નમાદાય ચોત્તમમ્ ।
૧૭.૪/૨સમયં કારયાં ચક્રે નાવેદ્યોઽહં ત્વયેત્યુત ॥ ૧૭.૪॥

૧૭.૫/૧વયમભ્યુત્પ્રપત્સ્યામઃ કૃષ્ણેન ત્વાં પ્રધર્ષિતમ્ ।
૧૭.૫/૨મમાદ્ય દ્વારકા સર્વા વશે તિષ્ઠત્યસંશયમ્ ॥ ૧૭.૫॥

૧૭.૬/૧હતે પિતરિ દુઃખાર્તા સત્યભામા મનસ્વિની ।
૧૭.૬/૨પ્રયયૌ રથમારુહ્ય નગરં વારણાવતમ્ ॥ ૧૭.૬॥

૧૭.૭/૧સત્યભામા તુ તદ્ વૃત્તં ભોજસ્ય શતધન્વનઃ ।
૧૭.૭/૨ભર્તુર્નિવેદ્ય દુઃખાર્તા પાર્શ્વસ્થાશ્રૂણ્યવર્તયત્ ॥ ૧૭.૭॥

૧૭.૮/૧પાણ્ડવાનાં ચ દગ્ધાનાં હરિઃ કૃત્વોદકક્રિયામ્ ।
૧૭.૮/૨કુલ્યાર્થે ચાપિ પાણ્ડૂનાં ન્યયોજયત સાત્યકિમ્ ॥ ૧૭.૮॥

૧૭.૯/૧તતસ્ત્વરિતમાગમ્ય દ્વારકાં મધુસૂદનઃ ।
૧૭.૯/૨પૂર્વજં હલિનં શ્રીમાન્ ઇદં વચનમબ્રવીત્ ॥ ૧૭.૯॥

૧૭.૧૦/૧શ્રીકૃષ્ણ ઉવાચ । હતઃ પ્રસેનઃ સિંહેન સત્રાજિચ્છતધન્વના ।
૧૭.૧૦/૨સ્યમન્તકસ્તુ મદ્ગામી તસ્ય પ્રભુરહં વિભો ॥ ૧૭.૧૦॥

૧૭.૧૧/૧તદ્ આરોહ રથં શીઘ્રં ભોજં હત્વા મહારથમ્ ।

૧૭.૧૧/૨સ્યમન્તકો મહાબાહો અસ્માકં સ ભવિષ્યતિ ॥ ૧૭.૧૧॥

૧૭.૧૨/૧લોમહર્ષણ ઉવાચ । તતઃ પ્રવવૃતે યુદ્ધં તુમુલં ભોજકૃષ્ણયોઃ ।
૧૭.૧૨/૨શતધન્વા તતોઽક્રૂરં સર્વતોદિશમૈક્ષત ॥ ૧૭.૧૨॥

૧૭.૧૩/૧સંરબ્ધૌ તાવુભૌ તત્ર દૃષ્ટ્વા ભોજજનાર્દનૌ ।
૧૭.૧૩/૨શક્તોઽપિ શાપાદ્ ધાર્દિક્યમક્રૂરો નાન્વપદ્યત ॥ ૧૭.૧૩॥

૧૭.૧૪/૧અપયાને તતો બુદ્ધિં ભોજશ્ચક્રે ભયાર્દિતઃ ।
૧૭.૧૪/૨યોજનાનાં શતં સાગ્રં હૃદયા પ્રત્યપદ્યત ॥ ૧૭.૧૪॥

૧૭.૧૫/૧વિખ્યાતા હૃદયા નામ શતયોજનગામિની ।
૧૭.૧૫/૨ભોજસ્ય વડવા વિપ્રા યયા કૃષ્ણમયોધયત્ ॥ ૧૭.૧૫॥

૧૭.૧૬/૧ક્ષીણાં જવેન હૃદયામધ્વનઃ શતયોજને ।
૧૭.૧૬/૨દૃષ્ટ્વા રથસ્ય સ્વાં વૃદ્ધિં શતધન્વાનમર્દયત્ ॥ ૧૭.૧૬॥

૧૭.૧૭/૧તતસ્તસ્યા હતાયાસ્તુ શ્રમાત્ ખેદાચ્ચ ભો દ્વિજાઃ ।
૧૭.૧૭/૨ખમુત્પેતુરથ પ્રાણાઃ કૃષ્ણો રામમથાબ્રવીત્ ॥ ૧૭.૧૭॥

૧૭.૧૮/૧શ્રીકૃષ્ણ ઉવાચ । તિષ્ઠેહ ત્વં મહાબાહો દૃષ્ટદોષા હયા મયા ।
૧૭.૧૮/૨પદ્ભ્યાં ગત્વા હરિષ્યામિ મણિરત્નં સ્યમન્તકમ્ ॥ ૧૭.૧૮॥

૧૭.૧૯/૧પદ્ભ્યામેવ તતો ગત્વા શતધન્વાનમચ્યુતઃ ।
૧૭.૧૯/૨મિથિલામભિતો વિપ્રા જઘાન પરમાસ્ત્રવિત્ ॥ ૧૭.૧૯॥

૧૭.૨૦/૧સ્યમન્તકં ચ નાપશ્યદ્ ધત્વા ભોજં મહાબલમ્ ।
૧૭.૨૦/૨નિવૃત્તં ચાબ્રવીત્ કૃષ્ણં મણિં દેહીતિ લાઙ્ગલી ॥ ૧૭.૨૦॥

૧૭.૨૧/૧નાસ્તીતિ કૃષ્ણશ્ચોવાચ તતો રામો રુષાન્વિતઃ ।
૧૭.૨૧/૨ધિક્ષબ્દપૂર્વમસકૃત્ પ્રત્યુવાચ જનાર્દનમ્ ॥ ૧૭.૨૧॥

૧૭.૨૨/૧બલરામ ઉવાચ । ભ્રાતૃત્વાન્ મર્ષયામ્યેષ સ્વસ્તિ તેઽસ્તુ વ્રજામ્યહમ્ ।
૧૭.૨૨/૨કૃત્યં ન મે દ્વારકયા ન ત્વયા ન ચ વૃષ્ણિભિઃ ॥ ૧૭.૨૨॥

૧૭.૨૩/૧પ્રવિવેશ તતો રામો મિથિલામરિમર્દનઃ ।
૧૭.૨૩/૨સર્વકામૈરુપહૃતૈર્મિથિલેનાભિપૂજિતઃ ॥ ૧૭.૨૩॥

૧૭.૨૪/૧એતસ્મિન્ન્ એવ કાલે તુ બભ્રુર્મતિમતાં વરઃ ।
૧૭.૨૪/૨નાનારૂપાન્ ક્રતૂન્ સર્વાન્ આજહાર નિરર્ગલાન્ ॥ ૧૭.૨૪॥

૧૭.૨૫/૧દીક્ષામયં સ કવચં રક્ષાર્થં પ્રવિવેશ હ ।
૧૭.૨૫/૨સ્યમન્તકકૃતે પ્રાજ્ઞો ગાન્દીપુત્રો મહાયશાઃ ॥ ૧૭.૨૫॥

૧૭.૨૬/૧અથ રત્નાનિ ચાન્યાનિ ધનાનિ વિવિધાનિ ચ ।
૧૭.૨૬/૨ષષ્ટિં વર્ષાણિ ધર્માત્મા યજ્ઞેષ્વેવ ન્યયોજયત્ ॥ ૧૭.૨૬॥

૧૭.૨૭/૧અક્રૂરયજ્ઞા ઇતિ તે ખ્યાતાસ્તસ્ય મહાત્મનઃ ।
૧૭.૨૭/૨બહ્વન્નદક્ષિણાઃ સર્વે સર્વકામપ્રદાયિનઃ ॥ ૧૭.૨૭॥

૧૭.૨૮/૧અથ દુર્યોધનો રાજા ગત્વા સ મિથિલાં પ્રભુઃ ।
૧૭.૨૮/૨ગદાશિક્ષાં તતો દિવ્યાં બલદેવાદ્ અવાપ્તવાન્ ॥ ૧૭.૨૮॥

૧૭.૨૯/૧સમ્પ્રસાદ્ય તતો રામો વૃષ્ણ્યન્ધકમહારથૈઃ ।
૧૭.૨૯/૨આનીતો દ્વારકામેવ કૃષ્ણેન ચ મહાત્મના ॥ ૧૭.૨૯॥

૧૭.૩૦/૧અક્રૂરશ્ચાન્ધકૈઃ સાર્ધમાયાતઃ પુરુષર્ષભઃ ।
૧૭.૩૦/૨હત્વા સત્રાજિતં સુપ્તં સહબન્ધું મહાબલઃ ॥ ૧૭.૩૦॥

૧૭.૩૧/૧જ્ઞાતિભેદભયાત્ કૃષ્ણસ્તમુપેક્ષિતવાંસ્તદા ।
૧૭.૩૧/૨અપયાતે તદાક્રૂરે નાવર્ષત્ પાકશાસનઃ ॥ ૧૭.૩૧॥

૧૭.૩૨/૧અનાવૃષ્ટ્યા તદા રાષ્ટ્રમભવદ્ બહુધા કૃશમ્ ।
૧૭.૩૨/૨તતઃ પ્રસાદયામાસુરક્રૂરં કુકુરાન્ધકાઃ ॥ ૧૭.૩૨॥

૧૭.૩૩/૧પુનર્દ્વારવતીં પ્રાપ્તે તસ્મિન્ દાનપતૌ તતઃ ।
૧૭.૩૩/૨પ્રવવર્ષ સહસ્રાક્ષઃ કક્ષે જલનિધેસ્તદા ॥ ૧૭.૩૩॥

૧૭.૩૪/૧કન્યાં ચ વાસુદેવાય સ્વસારં શીલસમ્મતામ્ ।
૧૭.૩૪/૨અક્રૂરઃ પ્રદદૌ ધીમાન્ પ્રીત્યર્થં મુનિસત્તમાઃ ॥ ૧૭.૩૪॥

૧૭.૩૫/૧અથ વિજ્ઞાય યોગેન કૃષ્ણો બભ્રુગતં મણિમ્ ।
૧૭.૩૫/૨સભામધ્યગતઃ પ્રાહ તમક્રૂરં જનાર્દનઃ ॥ ૧૭.૩૫॥

૧૭.૩૬/૧શ્રીકૃષ્ણ ઉવાચ । યત્ તદ્ રત્નં મણિવરં તવ હસ્તગતં વિભો ।
૧૭.૩૬/૨તત્ પ્રયચ્છ ચ માનાર્હ મયિ માનાર્યકં કૃથાઃ ॥ ૧૭.૩૬॥

૧૭.૩૭/૧ષષ્ટિવર્ષગતે કાલે યો રોષોઽભૂન્ મમાનઘ ।
૧૭.૩૭/૨સ સંરૂઢોઽસકૃત્ પ્રાપ્તસ્તતઃ કાલાત્યયો મહાન્ ॥ ૧૭.૩૭॥

૧૭.૩૮/૧સ તતઃ કૃષ્ણવચનાત્ સર્વસાત્વતસંસદિ ।
૧૭.૩૮/૨પ્રદદૌ તં મણિં બભ્રુરક્લેશેન મહામતિઃ ॥ ૧૭.૩૮॥

૧૭.૩૯/૧તતસ્તમાર્જવાત્ પ્રાપ્તં બભ્રોર્હસ્તાદ્ અરિંદમઃ ।
૧૭.૩૯/૨દદૌ હૃષ્ટમનાઃ કૃષ્ણસ્તં મણિં બભ્રવે પુનઃ ॥ ૧૭.૩૯ ॥

૧૭.૪૦/૧સ કૃષ્ણહસ્તાત્ સમ્પ્રાપ્તં મણિરત્નં સ્યમન્તકમ્ ।
૧૭.૪૦/૨આબધ્ય ગાન્દિનીપુત્રો વિરરાજાંશુમાન્ ઇવ ॥ ૧૭.૪૦ ॥

૧૮.૧/૧મુનય ઊચુઃ । અહો સુમહદ્ આખ્યાનં ભવતા પરિકીર્તિતમ્ ।
૧૮.૧/૨ભારતાનાં ચ સર્વેષાં પાર્થિવાનાં તથૈવ ચ ॥ ૧૮.૧ ॥

૧૮.૨/૧દેવાનાં દાનવાનાં ચ ગન્ધર્વોરગરક્ષસામ્ ।
૧૮.૨/૨દૈત્યાનામથ સિધ્દ્ધાનાં ગુહ્યકાનાં તથૈવ ચ ॥ ૧૮.૨ ॥

૧૮.૩/૧અત્યદ્ભુતાનિ કર્માણિ વિક્રમા ધર્મનિશ્ચયાઃ ।
૧૮.૩/૨વિવિધાશ્ચ કથા દિવ્યા જન્મ ચાગ્ર્યમનુત્તમમ્ ॥ ૧૮.૩ ॥

૧૮.૪/૧સૃષ્ટિઃ પ્રજાપતેઃ સમ્યક્ ત્વયા પ્રોક્તા મહામતે ।
૧૮.૪/૨પ્રજાપતીનાં સર્વેષાં ગુહ્યકાપ્સરસાં તથા ॥ ૧૮.૪ ॥

૧૮.૫/૧સ્થાવરં જઙ્ગમં સર્વમુત્પન્નં વિવિધં જગત્ ।
૧૮.૫/૨ત્વયા પ્રોક્તં મહાભાગ શ્રુતં ચૈતન્ મનોહરમ્ ॥ ૧૮.૫ ॥

૧૮.૬/૧કથિતં પુણ્યફલદં પુરાણં શ્લક્ષ્ણયા ગિરા ।
૧૮.૬/૨મનઃકર્ણસુખં સમ્યક્ પ્રીણાત્યમૃતસમ્મિતમ્ ॥ ૧૮.૬ ॥

૧૮.૭/૧ઇદાનીં શ્રોતુમિચ્છામઃ સકલં મણ્ડલં ભુવઃ ।
૧૮.૭/૨વક્તુમર્હસિ સર્વજ્ઞ પરં કૌતૂહલં હિ નઃ ॥ ૧૮.૭ ॥

૧૮.૮/૧યાવન્તઃ સાગરા દ્વીપાસ્તથા વર્ષાણિ પર્વતાઃ ।
૧૮.૮/૨વનાનિ સરિતઃ પુણ્ય+ ।દેવાદીનાં મહામતે ॥ ૧૮.૮ ॥

૧૮.૯/૧યત્પ્રમાણમિદં સર્વં યદાધારં યદાત્મકમ્ ।
૧૮.૯/૨સંસ્થાનમસ્ય જગતો યથાવદ્ વક્તુમર્હસિ ॥ ૧૮.૯ ॥

૧૮.૧૦/૧લોમહર્ષણ ઉવાચ । મુનયઃ શ્રૂયતામેતત્ સંક્ષેપાદ્ વદતો મમ ।
૧૮.૧૦/૨નાસ્ય વર્ષશતેનાપિ વક્તું શક્યોऽતિવિસ્તરઃ ॥ ૧૮.૧૦ ॥

૧૮.૧૧/૧જમ્બૂપ્લક્ષાહ્વયૌ દ્વીપૌ શાલ્મલશ્ચાપરો દ્વિજાઃ ।
૧૮.૧૧/૨કુશઃ ક્રૌઞ્ચસ્તથા શાકઃ પુષ્કરશ્ચૈવ સપ્તમઃ ॥ ૧૮.૧૧ ॥

૧૮.૧૨/૧એતે દ્વીપાઃ સમુદ્રૈસ્તુ સપ્ત સપ્તભિરાવૃતાઃ ।

૧૮.૧૨/૨લવણેક્ષુસુરાસર્પિર્દધિદુગ્ધજલૈઃ સમમ્ ॥ ૧૮.૧૨॥

૧૮.૧૩/૧જમ્બૂદ્વીપઃ સમસ્તાનામેતેષાં મધ્યસંસ્થિતઃ ।
૧૮.૧૩/૨તસ્યાપિ મધ્યે વિપ્રેન્દ્રા મેરુઃ કનકપર્વતઃ ॥ ૧૮.૧૩॥

૧૮.૧૪/૧ચતુરશીતિસાહસ્રૈર્યોજનૈસ્તસ્ય ચોચ્છ્રયઃ ।
૧૮.૧૪/૨પ્રવિષ્ટઃ ષોડશાધસ્તાદ્ દ્વાત્રિંશન્ મૂર્ધ્નિ વિસ્તૃતઃ ॥ ૧૮.૧૪॥

૧૮.૧૫/૧મૂલે ષોડશસાહસ્રૈર્વિસ્તારસ્તસ્ય સર્વતઃ ।
૧૮.૧૫/૨ભૂપદ્મસ્યાસ્ય શૈલોઽસૌ કર્ણિકાકારસંસ્થિતઃ ॥ ૧૮.૧૫॥

૧૮.૧૬/૧હિમવાન્ હેમકૂટશ્ચ નિષધસ્તસ્ય દક્ષિણે ।
૧૮.૧૬/૨નીલઃ શ્વેતશ્ચ શ‍ૃઙ્ગી ચ ઉત્તરે વર્ષપર્વતાઃ ॥ ૧૮.૧૬॥

૧૮.૧૭/૧લક્ષપ્રમાણૌ દ્વૌ મધ્યે દશહીનાસ્તથાપરે ।
૧૮.૧૭/૨સહસ્રદ્વિતયોચ્છ્રાયાસ્તાવદ્વિસ્તારિણશ્ચ તે ॥ ૧૮.૧૭॥

૧૮.૧૮/૧ભારતં પ્રથમં વર્ષં તતઃ કિમ્પુરુષં સ્મૃતમ્ ।
૧૮.૧૮/૨હરિવર્ષં તથૈવાન્યન્ મેરોર્દક્ષિણતો દ્વિજાઃ ॥ ૧૮.૧૮॥

૧૮.૧૯/૧રમ્યકં ચોત્તરં વર્ષં તસ્યૈવ તુ હિરણ્મયમ્ ।
૧૮.૧૯/૨ઉત્તરાઃ કુરવશ્ચૈવ યથા વૈ ભારતં તથા ॥ ૧૮.૧૯॥

૧૮.૨૦/૧નવસાહસ્રમેકૈકમેતેષાં દ્વિજસત્તમાઃ ।
૧૮.૨૦/૨ઇલાવૃતં ચ તન્મધ્યે સૌવર્ણો મેરુરુચ્છ્રિતઃ ॥ ૧૮.૨૦॥

૧૮.૨૧/૧મેરોશ્ચતુર્દિશં તત્ર નવસાહસ્રવિસ્તૃતમ્ ।
૧૮.૨૧/૨ઇલાવૃતં મહાભાગાશ્ચત્વારશ્ચાત્ર પર્વતાઃ ॥ ૧૮.૨૧॥

૧૮.૨૨/૧વિષ્કમ્ભા વિતતા મેરોર્યોજનાયુતવિસ્તૃતાઃ ।
૧૮.૨૨/૨પૂર્વેણ મન્દરો નામ દક્ષિણે ગન્ધમાદનઃ ॥ ૧૮.૨૨॥

૧૮.૨૩/૧વિપુલઃ પશ્ચિમે પાર્શ્વે સુપાર્શ્વશ્ચોત્તરે સ્થિતઃ ।
૧૮.૨૩/૨કદમ્બસ્તેષુ જમ્બૂશ્ચ પિપ્પલો વટ એવ ચ ॥ ૧૮.૨૩॥

૧૮.૨૪/૧એકાદશશતાયામાઃ પાદપા ગિરિકેતવઃ ।
૧૮.૨૪/૨જમ્બૂદ્વીપસ્ય સા જમ્બૂર્નામહેતુર્દ્વિજોત્તમાઃ ॥ ૧૮.૨૪॥

૧૮.૨૫/૧મહાગજપ્રમાણાનિ જમ્બ્વાસ્તસ્યાઃ ફલાનિ વૈ ।
૧૮.૨૫/૨પતન્તિ ભૂભૃતઃ પૃષ્ઠે શીર્યમાણાનિ સર્વતઃ ॥ ૧૮.૨૫॥

૧૮.૨૬/૧રસેન તેષાં વિખ્યાતા તત્ર જમ્બૂનદીતિ વૈ ।
૧૮.૨૬/૨સરિત્ પ્રવર્તતે સા ચ પીયતે તન્નિવાસિભિઃ ॥ ૧૮.૨૬ ॥

૧૮.૨૭/૧ન ખેદો ન ચ દૌર્ગન્ધ્યં ન જરા નેન્દ્રિયક્ષયઃ ।
૧૮.૨૭/૨તત્પાનસ્વસ્થમનસાં જનાનાં તત્ર જાયતે ॥ ૧૮.૨૭ ॥

૧૮.૨૮/૧તીરમૃત્ તદ્રસં પ્રાપ્ય સુખવાયુવિશોષિતા ।
૧૮.૨૮/૨જામ્બૂનદાખ્યં ભવતિ સુવર્ણં સિદ્ધભૂષણમ્ ॥ ૧૮.૨૮ ॥

૧૮.૨૯/૧ભદ્રાશ્વં પૂર્વતો મેરોઃ કેતુમાલં ચ પશ્ચિમે ।
૧૮.૨૯/૨વર્ષે દ્વે તુ મુનિશ્રેષ્ઠાસ્તયોર્મધ્યે ત્વિલાવૃતમ્ ॥ ૧૮.૨૯ ॥

૧૮.૩૦/૧વનં ચૈત્રરથં પૂર્વે દક્ષિણે ગન્ધમાદનમ્ ।
૧૮.૩૦/૨વૈભ્રાજં પશ્ચિમે તદ્વદ્ ઉત્તરે નન્દનં સ્મૃતમ્ ॥ ૧૮.૩૦ ॥

૧૮.૩૧/૧અરુણોદં મહાભદ્રમસિતોદં સમાનસમ્ ।
૧૮.૩૧/૨સરાંસ્યેતાનિ ચત્વારિ દેવભોગ્યાનિ સર્વદા ॥ ૧૮.૩૧ ॥

૧૮.૩૨/૧શાન્તવાંશ્ચક્રકુઞ્જશ્ચ કુરરી માલ્યવાંસ્તથા ।
૧૮.૩૨/૨વૈકઙ્કપ્રમુખા મેરોઃ પૂર્વતઃ કેસરાચલાઃ ॥ ૧૮.૩૨ ॥

૧૮.૩૩/૧ત્રિકૂટઃ શિશિરશ્ચૈવ પતંગો રુચકસ્તથા ।
૧૮.૩૩/૨નિષધાદયો દક્ષિણતસ્તસ્ય કેસરપર્વતાઃ ॥ ૧૮.૩૩ ॥

૧૮.૩૪/૧શિખિવાસઃ સવૈદૂર્યઃ કપિલો ગન્ધમાદનઃ ।
૧૮.૩૪/૨જાનુધિપ્રમુખાસ્તદ્વત્ પશ્ચિમે કેસરાચલાઃ ॥ ૧૮.૩૪ ॥

૧૮.૩૫/૧મેરોરનન્તરાસ્તે ચ જઠરાદિષ્વવસ્થિતાઃ ।
૧૮.૩૫/૨શઙ્ખકૂટોઽથ ઋષભો હંસો નાગસ્તથાપરાઃ ॥ ૧૮.૩૫ ॥

૧૮.૩૬/૧કાલઞ્જરાદ્યાશ્ચ તથા ઉત્તરે કેસરાચલાઃ ।
૧૮.૩૬/૨ચતુર્દશ સહસ્રાણિ યોજનાનાં મહાપુરી ॥ ૧૮.૩૬ ॥

૧૮.૩૭/૧મેરોરુપરિ વિપ્રેન્દ્રા બ્રહ્મણઃ કથિતા દિવિ ।
૧૮.૩૭/૨તસ્યાં સમન્તતશ્ચાષ્ટૌ દિશાસુ વિદિશાસુ ચ ॥ ૧૮.૩૭ ॥

૧૮.૩૮/૧ઇન્દ્રાદિલોકપાલાનાં પ્રખ્યાતાઃ પ્રવરાઃ પુરઃ ।
૧૮.૩૮/૨વિષ્ણુપાદવિનિષ્ક્રાન્તા પ્લાવયન્તીન્દુમણ્ડલમ્ ॥ ૧૮.૩૮ ॥

૧૮.૩૯/૧સમન્તાદ્ બ્રહ્મણઃ પુર્યાં ગઙ્ગા પતતિ વૈ દિવિ ।
૧૮.૩૯/૨સા તત્ર પતિતા દિક્ષુ ચતુર્ધા પ્રત્યપદ્યત ॥ ૧૮.૩૯ ॥

૧૮.૪૦/૧સીતા ચાલકનન્દા ચ ચક્ષુર્ભદ્રા ચ વૈ ક્રમાત્ ।
૧૮.૪૦/૨પૂર્વેણ સીતા શૈલાચ્ચ શૈલં યાન્ત્યન્તરિક્ષગા ॥ ૧૮.૪૦॥

૧૮.૪૧/૧તતશ્ચ પૂર્વવર્ષેણ ભદ્રાશ્વેનૈતિ સાર્ણવમ્ ।
૧૮.૪૧/૨તથૈવાલકનન્દા ચ દક્ષિણેનૈત્ય ભારતમ્ ॥ ૧૮.૪૧॥

૧૮.૪૨/૧પ્રયાતિ સાગરં ભૂત્વા સપ્તભેદા દ્વિજોત્તમાઃ ।
૧૮.૪૨/૨ચક્ષુશ્ચ પશ્ચિમગિરીન્ અતીત્ય સકલાંસ્તતઃ ॥ ૧૮.૪૨॥

૧૮.૪૩/૧પશ્ચિમં કેતુમાલાખ્યં વર્ષમન્વેતિ સાર્ણવમ્ ।
૧૮.૪૩/૨ભદ્રા તથોત્તરગિરીન્ ઉત્તરાંશ્ચ તથા કુરૂન્ ॥ ૧૮.૪૩॥

૧૮.૪૪/૧અતીત્યોત્તરમમ્ભોધિં સમભ્યેતિ દ્વિજોત્તમાઃ ।
૧૮.૪૪/૨આનીલનિષધાયામૌ માલ્યવદ્ગન્ધમાદનૌ ॥ ૧૮.૪૪॥

૧૮.૪૫/૧તયોર્મધ્યગતો મેરુઃ કર્ણિકાકારસંસ્થિતઃ ।
૧૮.૪૫/૨ભારતાઃ કેતુમાલાશ્ચ ભદ્રાશ્વાઃ કુરવસ્તથા ॥ ૧૮.૪૫॥

૧૮.૪૬/૧પત્રાણિ લોકશૈલસ્ય મર્યાદાશૈલબાહ્યતઃ ।
૧૮.૪૬/૨જઠરો દેવકૂટશ્ચ મર્યાદાપર્વતાવુભૌ ॥ ૧૮.૪૬॥

૧૮.૪૭/૧તૌ દક્ષિણોત્તરાયામાવાનીલનિષધાયતૌ ।
૧૮.૪૭/૨ગન્ધમાદનકૈલાસૌ પૂર્વપશ્ચાત્ તુ તાવુભૌ ॥ ૧૮.૪૭॥

૧૮.૪૮/૧અશીતિયોજનાયામાવર્ણવાન્તર્વ્યવસ્થિતૌ ।
૧૮.૪૮/૨નિષધઃ પારિયાત્રશ્ચ મર્યાદાપર્વતાવુભૌ ॥ ૧૮.૪૮॥

૧૮.૪૯/૧તૌ દક્ષિણોત્તરાયામાવાનીલનિષધાયતૌ ।
૧૮.૪૯/૨મેરોઃ પશ્ચિમદિગ્ભાગે યથા પૂર્વૌ તથા સ્થિતૌ ॥ ૧૮.૪૯॥

૧૮.૫૦/૧ત્રિશૃઙ્ગો જારુધિશ્ચૈવ ઉત્તરૌ વર્ષપર્વતૌ ।
૧૮.૫૦/૨પૂર્વપશ્ચાયતાવેતાવર્ણવાન્તર્વ્યવસ્થિતૌ ॥ ૧૮.૫૦॥

૧૮.૫૧/૧ઇત્યેતે હિ મયા પ્રોક્તા મર્યાદાપર્વતા દ્વિજાઃ ।
૧૮.૫૧/૨જઠરાવસ્થિતા મેરોર્યેષાં દ્વૌ દ્વૌ ચતુર્દિશમ્ ॥ ૧૮.૫૧॥

૧૮.૫૨/૧મેરોશ્ચતુર્દિશં યે તુ પ્રોક્તાઃ કેસરપર્વતાઃ ।
૧૮.૫૨/૨શીતાન્તાદ્યા દ્વિજાસ્તેષામતીવ હિ મનોહરાઃ ॥ ૧૮.૫૨॥

૧૮.૫૩/૧શૈલાનામન્તરદ્રોણ્યઃ સિદ્ધચારણસેવિતાઃ ।

૧૮.૫૩/૨સુરમ્યાણિ તથા તાસુ કાનનાનિ પુરાણિ ચ ॥ ૧૮.૫૩॥

૧૮.૫૪/૧લક્ષ્મીવિષ્ણ્વગ્નિસૂર્યેન્દ્ર+ ।દેવાનાં મુનિસત્તમાઃ ।
૧૮.૫૪/૨તાસ્વાયતનવર્યાણિ જુષ્ટાનિ નરકિંનરૈઃ ॥ ૧૮.૫૪॥

૧૮.૫૫/૧ગન્ધર્વયક્ષરક્ષાંસિ તથા દૈતેયદાનવાઃ ।
૧૮.૫૫/૨ક્રીડન્તિ તાસુ રમ્યાસુ શૈલદ્રોણીષ્વહર્નિશમ્ ॥ ૧૮.૫૫॥

૧૮.૫૬/૧ભૌમા હ્યેતે સ્મૃતાઃ સ્વર્ગા ધર્મિણામાલયા દ્વિજાઃ ।
૧૮.૫૬/૨નૈતેષુ પાપકર્તારો યાન્તિ જન્મશતૈરપિ ॥ ૧૮.૫૬॥

૧૮.૫૭/૧ભદ્રાશ્વે ભગવાન્ વિષ્ણુરાસ્તે હયશિરા દ્વિજાઃ ।
૧૮.૫૭/૨વારાહઃ કેતુમાલે તુ ભારતે કૂર્મરૂપધૃક્ ॥ ૧૮.૫૭॥

૧૮.૫૮/૧મત્સ્યરૂપશ્ચ ગોવિન્દઃ કુરુષ્વાસ્તે સનાતનઃ ।
૧૮.૫૮/૨વિશ્વરૂપેણ સર્વત્ર સર્વઃ સર્વેશ્વરો હરિઃ ॥ ૧૮.૫૮॥

૧૮.૫૯/૧સર્વસ્યાધારભૂતોઽસૌ દ્વિજા આસ્તેઽખિલાત્મકઃ ।
૧૮.૫૯/૨યાનિ કિમ્પુરુષાદ્યાનિ વર્ષાણ્યષ્ટૌ દ્વિજોત્તમાઃ ॥ ૧૮.૫૯॥

૧૮.૬૦/૧ન તેષુ શોકો નાયાસો નોદ્વેગઃ ક્ષુદ્ભયાદિકમ્ ।
૧૮.૬૦/૨સુસ્થાઃ પ્રજા નિરાતઙ્કાઃ સર્વદુઃખવિવર્જિતાઃ ॥ ૧૮.૬૦॥

૧૮.૬૧/૧દશદ્વાદશવર્ષાણાં સહસ્રાણિ સ્થિરાયુષઃ ।
૧૮.૬૧/૨નૈતેષુ ભૌમાન્યન્યાનિ ક્ષુત્પિપાસાદિ નો દ્વિજાઃ ॥ ૧૮.૬૧॥

૧૮.૬૨/૧કૃતત્રેતાદિકા નૈવ તેષુ સ્થાનેષુ કલ્પના ।
૧૮.૬૨/૨સર્વેષ્વેતેષુ વર્ષેષુ સપ્ત સપ્ત કુલાચલાઃ ।
૧૮.૬૨/૩નદ્યશ્ચ શતશસ્તેભ્યઃ પ્રસૂતા યા દ્વિજોત્તમાઃ ॥ ૧૮.૬૨॥

૧૯.૧/૧લોમહર્ષણ ઉવાચ । ઉત્તરેણ સમુદ્રસ્ય હિમાદ્રેશ્ચૈવ દક્ષિણે ।
૧૯.૧/૨વર્ષં તદ્ ભારતં નામ ભારતી યત્ર સંતતિઃ ॥ ૧૯.૧॥

૧૯.૨/૧નવયોજનસાહસ્રો વિસ્તારશ્ચ દ્વિજોત્તમાઃ ।
૧૯.૨/૨કર્મભૂમિરિયં સ્વર્ગમપવર્ગં ચ પૃચ્છતામ્ ॥ ૧૯.૨॥

૧૯.૩/૧મહેન્દ્રો મલયઃ સહ્યઃ શુક્તિમાન્ ઋક્ષપર્વતઃ ।
૧૯.૩/૨વિન્ધ્યશ્ચ પારિયાત્રશ્ચ સપ્તાત્ર કુલપર્વતાઃ ॥ ૧૯.૩॥

૧૯.૪/૧અતઃ સમ્પ્રાપ્યતે સ્વર્ગો મુક્તિમસ્માત્ પ્રયાતિ વૈ ।
૧૯.૪/૨તિર્યક્ત્વં નરકં ચાપિ યાન્ત્યતઃ પુરુષા દ્વિજાઃ ॥ ૧૯.૪॥

૧૯.૫/૧ઇતઃ સ્વર્ગશ્ચ મોક્ષશ્ચ મધ્યં ચાન્તે ચ ગચ્છતિ ।
૧૯.૫/૨ન ખલ્વન્યત્ર મર્ત્યાનાં કર્મ ભૂમૌ વિધીયતે ॥ ૧૯.૫॥

૧૯.૬/૧ભારતસ્યાસ્ય વર્ષસ્ય નવ ભેદાન્ નિશામય ।
૧૯.૬/૨ઇન્દ્રદ્વીપઃ કસેતુમાંસ્તામ્રપર્ણો ગભસ્તિમાન્ ॥ ૧૯.૬॥

૧૯.૭/૧નાગદ્વીપસ્તથા સૌમ્યો ગન્ધર્વસ્ત્વથ વારુણઃ ।
૧૯.૭/૨અયં તુ નવમસ્તેષાં દ્વીપઃ સાગરસંવૃતઃ ॥ ૧૯.૭॥

૧૯.૮/૧યોજનાનાં સહસ્રં ચ દ્વીપોઽયં દક્ષિણોત્તરાત્ ।
૧૯.૮/૨પૂર્વે કિરાતાસ્તિષ્ઠન્તિ પશ્ચિમે યવનાઃ સ્થિતાઃ ॥ ૧૯.૮॥

૧૯.૯/૧બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા મધ્યે શૂદ્રાશ્ચ ભાગશઃ ।
૧૯.૯/૨ઇજ્યાયુદ્ધવણિજ્યાદ્ય+ ।વૃત્તિમન્તો વ્યવસ્થિતાઃ ॥ ૧૯.૯॥

૧૯.૧૦/૧શતદ્રુચન્દ્રભાગાદ્યા હિમવત્પાદનિઃસૃતાઃ ।
૧૯.૧૦/૨વેદસ્મૃતિમુખાશ્ચાન્યાઃ પારિયાત્રોદ્ભવા મુને ॥ ૧૯.૧૦॥

૧૯.૧૧/૧નર્મદાસુરમાદ્યાશ્ચ નદ્યો વિન્ધ્યવિનિઃસૃતાઃ ।
૧૯.૧૧/૨તાપીપયોષ્ણીનિર્વિન્ધ્યા+ ।કાવેરીપ્રમુખા નદીઃ ॥ ૧૯.૧૧॥

૧૯.૧૨/૧ઋક્ષપાદોદ્ભવા હ્યેતાઃ શ્રુતાઃ પાપં હરન્તિ યાઃ ।
૧૯.૧૨/૨ગોદાવરીભીમરથી+ ।કૃષ્ણવેણ્યાદિકાસ્તથા ॥ ૧૯.૧૨॥

૧૯.૧૩/૧સહ્યપાદોદ્ભવા નદ્યઃ સ્મૃતાઃ પાપભયાપહાઃ ।
૧૯.૧૩/૨કૃતમાલાતામ્રપર્ણી+ ।પ્રમુખા મલયોદ્ભવાઃ ॥ ૧૯.૧૩॥

૧૯.૧૪/૧ત્રિસાંધ્યર્ષિકુલ્યાદ્યા મહેન્દ્રપ્રભવાઃ સ્મૃતાઃ ।
૧૯.૧૪/૨ઋષિકુલ્યાકુમારાદ્યાઃ શુક્તિમત્પાદસમ્ભવાઃ ॥ ૧૯.૧૪॥

૧૯.૧૫/૧આસાં નદ્યુપનદ્યશ્ચ સન્ત્યન્યાસ્તુ સહસ્રશઃ ।
૧૯.૧૫/૨તાસ્વિમે કુરુપઞ્ચાલ+ ંઅધ્યદેશાદયો જનાઃ ॥ ૧૯.૧૫॥

૧૯.૧૬/૧પૂર્વદેશાદિકાશ્ચૈવ કામરૂપનિવાસિનઃ ।
૧૯.૧૬/૨પૌણ્ડ્રાઃ કલિઙ્ગા મગધા દાક્ષિણાત્યાશ્ચ સર્વશઃ ॥ ૧૯.૧૬॥

૧૯.૧૭/૧તથા પરાન્ત્યાઃ સૌરાષ્ટ્રાઃ શૂદ્રાભીરાસ્તથાર્બુદાઃ ।
૧૯.૧૭/૨મારુકા માલવાશ્ચૈવ પારિયાત્રનિવાસિનઃ ॥ ૧૯.૧૭॥

૧૯.૧૮/૧સૌવીરાઃ સૈન્ધવાપન્નાઃ શાલ્વાઃ શાકલવાસિનઃ ।

૧૯.૧૮/૨મદ્રારામાસ્તથામ્બષ્ઠાઃ પારસીકાદયસ્તથા ॥ ૧૯.૧૮॥

૧૯.૧૯/૧આસાં પિબન્તિ સલિલં વસન્તિ સરિતાં સદા ।
૧૯.૧૯/૨સમોપેતા મહાભાગ હૃષ્ટપુષ્ટજનાકુલાઃ ॥ ૧૯.૧૯॥

૧૯.૨૦/૧વસન્તિ ભારતે વર્ષે યુગાન્યત્ર મહામુને ।
૧૯.૨૦/૨કૃતં ત્રેતા દ્વાપરં ચ કલિશ્ચાન્યત્ર ન ક્વચિત્ ॥ ૧૯.૨૦॥

૧૯.૨૧/૧તપસ્તપ્યન્તિ યતયો જુહ્વતે ચાત્ર યજ્વિનઃ ।
૧૯.૨૧/૨દાનાનિ ચાત્ર દીયન્તે પરલોકાર્થમાદરાત્ ॥ ૧૯.૨૧॥

૧૯.૨૨/૧પુરુષૈર્યજ્ઞપુરુષો જમ્બૂદ્વીપે સદેજ્યતે ।
૧૯.૨૨/૨યજ્ઞૈર્યજ્ઞમયો વિષ્ણુરન્યદ્વીપેષુ ચાન્યથા ॥ ૧૯.૨૨॥

૧૯.૨૩/૧અત્રાપિ ભારતં શ્રેષ્ઠં જમ્બૂદ્વીપે મહામુને ।
૧૯.૨૩/૨યતો હિ કર્મભૂરેષા યતોઽન્યા ભોગભૂમયઃ ॥ ૧૯.૨૩॥

૧૯.૨૪/૧અત્ર જન્મસહસ્રાણાં સહસ્રૈરપિ સત્તમ ।
૧૯.૨૪/૨કદાચિલ્લભતે જન્તુર્માનુષ્યં પુણ્યસંચયન્ ॥ ૧૯.૨૪॥

૧૯.૨૫/૧ગાયન્તિ દેવાઃ કિલ ગીતકાનિ ।
૧૯.૨૫/૨ધન્યાસ્તુ યે ભારતભૂમિભાગે ।
૧૯.૨૫/૩સ્વર્ગાપવર્ગાસ્પદહેતુભૂતે ।
૧૯.૨૫/૪ભવન્તિ ભૂયઃ પુરુષા મનુષ્યાઃ ॥ ૧૯.૨૫॥

૧૯.૨૬/૧કર્માણ્યસંકલ્પિતતત્ફલાનિ ।
૧૯.૨૬/૨સંન્યસ્ય વિષ્ણૌ પરમાત્મરૂપે ।
૧૯.૨૬/૩અવાપ્ય તાં કર્મમહીમનન્તે ।
૧૯.૨૬/૪તસ્મિંલ્લયં યે ત્વમલાઃ પ્રયાન્તિ ॥ ૧૯.૨૬॥

૧૯.૨૭/૧જાનીમ નો તત્કૂવયં વિલીને ।
૧૯.૨૭/૨સ્વર્ગપ્રદે કર્મણિ દેહબન્ધમ્ ।
૧૯.૨૭/૩પ્રાપ્સ્યન્તિ ધન્યાઃ ખલુ તે મનુષ્યા ।
૧૯.૨૭/૪યે ભારતેનેન્દ્રિયવિપ્રહીનાઃ ॥ ૧૯.૨૭॥

૧૯.૨૮/૧નવવર્ષં ચ ભો વિપ્રા જમ્બૂદ્વીપમિદં મયા ।
૧૯.૨૮/૨લક્ષયોજનવિસ્તારં સંક્ષેપાત્ કથિતં દ્વિજાઃ ॥ ૧૯.૨૮॥

૧૯.૨૯/૧જમ્બૂદ્વીપં સમાવૃત્ય લક્ષયોજનવિસ્તરઃ ।

૧૯.૨૯/૨ભો દ્વિજા વલયાકારઃ સ્થિતઃ ક્ષીરોદધિર્બહિઃ ॥ ૧૯.૨૯॥

૨૦.૧/૧લોમહર્ષણ ઉવાચ । ક્ષારોદેન યથા દ્વીપો જમ્બૂસંજ્ઞોઽભિવેષ્ટિતઃ ।
૨૦.૧/૨સંવેષ્ટ્ય ક્ષારમુદધિં પ્લક્ષદ્વીપસ્તથા સ્થિતઃ ॥ ૨૦.૧॥

૨૦.૨/૧જમ્બૂદ્વીપસ્ય વિસ્તારઃ શતસાહસ્રસમ્મિતઃ ।
૨૦.૨/૨સ એવ દ્વિગુણો વિપ્રાઃ પ્લક્ષદ્વીપેઽપ્યુદાહૃતઃ ॥ ૨૦.૨॥

૨૦.૩/૧સપ્ત મેધાતિથેઃ પુત્રાઃ પ્લક્ષદ્વીપેશ્વરસ્ય વૈ ।
૨૦.૩/૨શ્રેષ્ઠઃ શાન્તભયો નામ શિશિરસ્તદનન્તરમ્ ॥ ૨૦.૩॥

૨૦.૪/૧સુખોદયસ્તથાનન્દઃ શિવઃ ક્ષેમક એવ ચ ।
૨૦.૪/૨ધ્રુવશ્ચ સપ્તમસ્તેષાં પ્લક્ષદ્વીપેશ્વરા હિ તે ॥ ૨૦.૪॥

૨૦.૫/૧પૂર્વં શાન્તભયં વર્ષં શિશિરં સુખદં તથા ।
૨૦.૫/૨આનન્દં ચ શિવં ચૈવ ક્ષેમકં ધ્રુવમેવ ચ ॥ ૨૦.૫॥

૨૦.૬/૧મર્યાદાકારકાસ્તેષાં તથાન્યે વર્ષપર્વતાઃ ।
૨૦.૬/૨સપ્તૈવ તેષાં નામાનિ શ ૃણુધ્વં મુનિસત્તમાઃ ॥ ૨૦.૬॥

૨૦.૭/૧ગોમેદશ્ચૈવ ચન્દ્રશ્ચ નારદો દન્દુભિસ્તથા ।
૨૦.૭/૨સોમકઃ સુમનાઃ શૈલો વૈભ્રાજશ્ચૈવ સપ્તમઃ ॥ ૨૦.૭॥

૨૦.૮/૧વર્ષાચલેષુ રમ્યેષુ વર્ષેષ્વેતેષુ ચાનઘાઃ ।
૨૦.૮/૨વસન્તિ દેવગન્ધર્વ+ ।સહિતાઃ સહિતં પ્રજાઃ ॥ ૨૦.૮॥

૨૦.૯/૧તેષુ પુણ્યા જનપદા વીરા ન મ્રિયતે જનઃ ।
૨૦.૯/૨નાધયો વ્યાધયો વાપિ સર્વકાલસુખં હિ તત્ ॥ ૨૦.૯॥

૨૦.૧૦/૧તેષાં નદ્યશ્ચ સપ્તૈવ વર્ષાણાં તુ સમુદ્રગાઃ ।
૨૦.૧૦/૨નામતસ્તાઃ પ્રવક્ષ્યામિ શ્રુતાઃ પાપં હરન્તિ યાઃ ॥ ૨૦.૧૦॥

૨૦.૧૧/૧અનુતપ્તા શિખા ચૈવ વિપ્રાશા ત્રિદિવા ક્રમુઃ ।
૨૦.૧૧/૨અમૃતા સુકૃતા ચૈવ સપ્તૈતાસ્તત્ર નિમ્નગાઃ ॥ ૨૦.૧૧॥

૨૦.૧૨/૧એતે શૈલાસ્તથા નદ્યઃ પ્રધાનાઃ કથિતા દ્વિજાઃ ।
૨૦.૧૨/૨ક્ષુદ્રનદ્યસ્તથા શૈલાસ્તત્ર સન્તિ સહસ્રશઃ ॥ ૨૦.૧૨॥

૨૦.૧૩/૧તાઃ પિબન્તિ સદા હૃષ્ટા નદીર્જનપદાસ્તુ તે ।
૨૦.૧૩/૨અવસર્પિણી નદી તેષાં ન ચૈવોત્સર્પિણી દ્વિજાઃ ॥ ૨૦.૧૩॥

૨૦.૧૪/૧ન તેષ્વસ્તિ યુગાવસ્થા તેષુ સ્થાનેષુ સપ્તસુ ।
૨૦.૧૪/૨ત્રેતાયુગસમઃ કાલઃ સર્વદૈવ દ્વિજોત્તમાઃ ॥ ૨૦.૧૪॥

૨૦.૧૫/૧પ્લક્ષદ્વીપાદિકે વિપ્રાઃ શાકદ્વીપાન્તિકેષુ વૈ ।
૨૦.૧૫/૨પઞ્ચવર્ષસહસ્રાણિ જના જીવન્ત્યનામયાઃ ॥ ૨૦.૧૫॥

૨૦.૧૬/૧ધર્મશ્ચતુર્વિધસ્તેષુ વર્ણાશ્રમવિભાગજઃ ।
૨૦.૧૬/૨વર્ણાશ્ચ તત્ર ચત્વારસ્તાન્ બુધાઃ પ્રવદામિ વઃ ॥ ૨૦.૧૬॥

૨૦.૧૭/૧આર્યકાઃ કુરવશ્ચૈવ વિવિશ્વા ભાવિનશ્ચ યે ।
૨૦.૧૭/૨વિપ્રક્ષત્રિયવૈશ્યાસ્તે શૂદ્રાશ્ચ મુનિસત્તમાઃ ॥ ૨૦.૧૭॥

૨૦.૧૮/૧જમ્બૂવૃક્ષપ્રમાણસ્તુ તન્મધ્યે સુમહાતરુઃ ।
૨૦.૧૮/૨પ્લક્ષસ્તન્નામસંજ્ઞોઽયં પ્લક્ષદ્વીપો દ્વિજોત્તમાઃ ॥ ૨૦.૧૮॥

૨૦.૧૯/૧ઇજ્યતે તત્ર ભગવાંસ્તૈર્વર્ણૈરાર્યકાદિભિઃ ।
૨૦.૧૯/૨સોમરૂપી જગત્સ્રષ્ટા સર્વઃ સર્વેશ્વરો હરિઃ ॥ ૨૦.૧૯॥

૨૦.૨૦/૧પ્લક્ષદ્વીપપ્રમાણેન પ્લક્ષદ્વીપઃ સમાવૃતઃ ।
૨૦.૨૦/૨તથૈવેક્ષુરસોદેન પરિવેષાનુકારિણા ॥ ૨૦.૨૦॥

૨૦.૨૧/૧ઇત્યેતદ્ વો મુનિશ્રેષ્ઠાઃ પ્લક્ષદ્વીપ ઉદાહૃતઃ ।
૨૦.૨૧/૨સંક્ષેપેણ મયા ભૂયઃ શાલ્મલં તં નિબોધત ॥ ૨૦.૨૧॥

૨૦.૨૨/૧શાલ્મલસ્યેશ્વરો વીરો વપુષ્માંસ્તત્સુતા દ્વિજાઃ ।
૨૦.૨૨/૨તેષાં તુ નામ સંજ્ઞાનિ સપ્તવર્ષાણિ તાનિ વૈ ॥ ૨૦.૨૨॥

૨૦.૨૩/૧શ્વેતોઽથ હરિતશ્ચૈવ જીમૂતો રોહિતસ્તથા ।
૨૦.૨૩/૨વૈદ્યુતો માનસશ્ચૈવ સુપ્રભશ્ચ દ્વિજોત્તમાઃ ॥ ૨૦.૨૩॥

૨૦.૨૪/૧શાલ્મનશ્ચ સમુદ્રોઽસૌ દ્વીપેનેક્ષુરસોદકઃ ।
૨૦.૨૪/૨વિસ્તારાદ્ દ્વિગુણેનાથ સર્વતઃ સંવૃતઃ સ્થિતઃ ॥ ૨૦.૨૪॥

૨૦.૨૫/૧તત્રાપિ પર્વતાઃ સપ્ત વિજ્ઞેયા રત્નયોનયઃ ।
૨૦.૨૫/૨વર્ષાભિવ્યઞ્જકાસ્તે તુ તથા સપ્તૈવ નિમ્નગાઃ ॥ ૨૦.૨૫॥

૨૦.૨૬/૧કુમુદશ્ચોન્નતશ્ચૈવ તૃતીયસ્તુ બલાહકઃ ।
૨૦.૨૬/૨દ્રોણો યત્ર મહૌષધ્યઃ સ ચતુર્થો મહીધરઃ ॥ ૨૦.૨૬॥

૨૦.૨૭/૧કઙ્કસ્તુ પઞ્ચમઃ ષષ્ઠો મહિષઃ સપ્તમસ્તથા ।
૨૦.૨૭/૨કકુદ્માન્ પર્વતવરઃ સરિન્નામાન્યતો દ્વિજાઃ ॥ ૨૦.૨૭॥

૨૦.૨૮/૧શ્રોણી તોયા વિતૃષ્ણા ચ ચન્દ્રા શુક્રા વિમોચની ।
૨૦.૨૮/૨નિવૃત્તિઃ સપ્તમી તાસાં સ્મૃતાસ્તાઃ પાપશાન્તિદાઃ ॥ ૨૦.૨૮॥

૨૦.૨૯/૧શ્વેતં ચ લોહિતં ચૈવ જીમૂતં હરિતં તથા ।
૨૦.૨૯/૨વૈદ્યુતં માનસં ચૈવ સુપ્રભં નામ સપ્તમમ્ ॥ ૨૦.૨૯॥

૨૦.૩૦/૧સપ્તૈતાનિ તુ વર્ષાણિ ચાતુર્વર્ણ્યયુતાનિ ચ ।
૨૦.૩૦/૨વર્ણાશ્ચ શાલ્મલે યે ચ વસન્ત્યેષુ દ્વિજોત્તમાઃ ॥ ૨૦.૩૦॥

૨૦.૩૧/૧કપિલાશ્ચારુણાઃ પીતાઃ કૃષ્ણાશ્ચૈવ પૃથક્ પૃથક્ ।
૨૦.૩૧/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચૈવ યજન્તિ તમ્ ॥ ૨૦.૩૧॥

૨૦.૩૨/૧ભગવન્તં સમસ્તસ્ય વિષ્ણુમાત્માનમવ્યયમ્ ।
૨૦.૩૨/૨વાયુભૂતં મખશ્રેષ્ઠૈર્યજ્વાનો યજ્ઞસંસ્થિતમ્ ॥ ૨૦.૩૨॥

૨૦.૩૩/૧દેવાનામત્ર સાંનિધ્યમતીવ સુમનોહરે ।
૨૦.૩૩/૨શાલ્મલિશ્ચ મહાવૃક્ષો નામનિર્વૃત્તિકારકઃ ॥ ૨૦.૩૩॥

૨૦.૩૪/૧એષ દ્વીપઃ સમુદ્રેણ સુરોદેન સમાવૃતઃ ।
૨૦.૩૪/૨વિસ્તારાચ્છાલ્મલેશ્ચૈવ સમેન તુ સમન્તતઃ ॥ ૨૦.૩૪॥

૨૦.૩૫/૧સુરોદકઃ પરિવૃતઃ કુશદ્વીપેન સર્વતઃ ।
૨૦.૩૫/૨શાલ્મલસ્ય તુ વિસ્તારાદ્ દ્વિગુણેન સમન્તતઃ ॥ ૨૦.૩૫॥

૨૦.૩૬/૧જ્યોતિષ્મતઃ કુશદ્વીપે શ ૃણુધ્વં તસ્ય પુત્રકાન્ ।
૨૦.૩૬/૨ઉદ્ભિદો વેણુમાંશ્ચૈવ સ્વૈરથો રન્ધનો ધૃતિઃ ॥ ૨૦.૩૬॥

૨૦.૩૭/૧પ્રભાકરોઽથ કપિલસ્તન્નામ્ના વર્ષપદ્ધતિઃ ।
૨૦.૩૭/૨તસ્યાં વસન્તિ મનુજૈઃ સહ દૈતેયદાનવાઃ ॥ ૨૦.૩૭॥

૨૦.૩૮/૧તથૈવ દેવગન્ધર્વા યક્ષકિમ્પુરુષાદયઃ ।
૨૦.૩૮/૨વર્ણાસ્તત્રાપિ ચત્વારો નિજાનુષ્ઠાનતત્પરાઃ ॥ ૨૦.૩૮॥

૨૦.૩૯/૧દમિનઃ શુષ્મિણઃ સ્નેહા માન્દહાશ્ચ દ્વિજોત્તમાઃ ।
૨૦.૩૯/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચાનુક્રમોદિતાઃ ॥ ૨૦.૩૯॥

૨૦.૪૦/૧યથોક્તકર્મકર્તૃત્વાત્ સ્વાધિકારક્ષયાય તે ।
૨૦.૪૦/૨તત્ર તે તુ કુશદ્વીપે બ્રહ્મરૂપં જનાર્દનમ્ ॥ ૨૦.૪૦॥

૨૦.૪૧/૧યજન્તઃ ક્ષપયન્ત્યુગ્રમધિકારફલપ્રદમ્ ।

૨૦.૪૧/૨વિદ્રુમો હેમશૈલશ્ચ દ્યુતિમાન્ પુષ્ટિમાંસ્તથા ॥ ૨૦.૪૧॥

૨૦.૪૨/૧કુશેશયો હરિશ્ચૈવ સપ્તમો મન્દરાચલઃ ।
૨૦.૪૨/૨વર્ષાચલાસ્તુ સપ્તૈતે દ્વીપે તત્ર દ્વિજોત્તમાઃ ॥ ૨૦.૪૨॥

૨૦.૪૩/૧નદ્યશ્ચ સપ્ત તાસાં તુ વક્ષ્યે નામાન્યનુક્રમાત્ ।
૨૦.૪૩/૨ધૂતપાપા શિવા ચૈવ પવિત્રા સમ્મતિસ્તથા ॥ ૨૦.૪૩॥

૨૦.૪૪/૧વિદ્યુદ્ અમ્ભો મહી ચાન્યા સર્વપાપહરાસ્ત્વિમાઃ ।
૨૦.૪૪/૨અન્યાઃ સહસ્રશસ્તત્ર ક્ષુદ્રનદ્યસ્તથાચલાઃ ॥ ૨૦.૪૪॥

૨૦.૪૫/૧કુશદ્વીપે કુશસ્તમ્બઃ સંજ્ઞાયા તસ્ય તત્ સ્મૃતમ્ ।
૨૦.૪૫/૨તત્પ્રમાણેન સ દ્વીપો ઘૃતોદેન સમાવૃતઃ ॥ ૨૦.૪૫॥

૨૦.૪૬/૧ઘૃતોદશ્ચ સમુદ્રો વૈ ક્રૌઞ્ચદ્વીપેન સંવૃતઃ ।
૨૦.૪૬/૨ક્રૌઞ્ચદ્વીપો મુનિશ્રેષ્ઠાઃ શ્રૂયતાં ચાપરો મહાન્ ॥ ૨૦.૪૬॥

૨૦.૪૭/૧કુશદ્વીપસ્ય વિસ્તારાદ્ દ્વિગુણો યસ્ય વિસ્તરઃ ।
૨૦.૪૭/૨ક્રૌઞ્ચદ્વીપે દ્યુતિમતઃ પુત્રાઃ સપ્ત મહાત્મનઃ ॥ ૨૦.૪૭॥

૨૦.૪૮/૧તન્નામાનિ ચ વર્ષાણિ તેષાં ચક્રે મહામનાઃ ।
૨૦.૪૮/૨કુશગો મન્દગશ્ચોષ્ણઃ પીવરોઽથાન્ધકારકઃ ॥ ૨૦.૪૮॥

૨૦.૪૯/૧મુનિશ્ચ દુન્દુભિશ્ચૈવ સપ્તૈતે તત્સુતા દ્વિજાઃ ।
૨૦.૪૯/૨તત્રાપિ દેવગન્ધર્વ+ ।સેવિતાઃ સુમનોરમાઃ ॥ ૨૦.૪૯॥

૨૦.૫૦/૧વર્ષાચલા મુનિશ્રેષ્ઠાસ્તેષાં નામાનિ ભો દ્વિજાઃ ।
૨૦.૫૦/૨ક્રૌઞ્ચશ્ચ વામનશ્ચૈવ તૃતીયશ્ચાન્ધકારકઃ ॥ ૨૦.૫૦॥

૨૦.૫૧/૧દેવવ્રતો ધમશ્ચૈવ તથાન્યઃ પુણ્ડરીકવાન્ ।
૨૦.૫૧/૨દુન્દુભિશ્ચ મહાશૈલો દ્વિગુણાસ્તે પરસ્પરમ્ ॥ ૨૦.૫૧॥

૨૦.૫૨/૧દ્વીપાદ્ દ્વીપેષુ યે શૈલાસ્તથા દ્વીપાનિ તે તથા ।
૨૦.૫૨/૨વર્ષેષ્વેતેષુ રમ્યેષુ વર્ષશૈલવરેષુ ચ ॥ ૨૦.૫૨॥

૨૦.૫૩/૧નિવસન્તિ નિરાતઙ્કાઃ સહ દેવગણૈઃ પ્રજાઃ ।
૨૦.૫૩/૨પુષ્કલા પુષ્કરા ધન્યાસ્તે ખ્યાતાશ્ચ દ્વિજોત્તમાઃ ॥ ૨૦.૫૩॥

૨૦.૫૪/૧બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચાનુક્રમોદિતાઃ ।
૨૦.૫૪/૨તત્ર નદ્યો મુનિશ્રેષ્ઠા યાઃ પિબન્તિ તુ તે સદા ॥ ૨૦.૫૪॥

૨૦.૫૫/૧સપ્ત પ્રધાનાઃ શતશસ્તથાન્યાઃ ક્ષુદ્રનિમ્નગાઃ ।
૨૦.૫૫/૨ગૌરી કુમુદ્વતી ચૈવ સંધ્યા રાત્રિર્મનોજવા ॥ ૨૦.૫૫॥

૨૦.૫૬/૧ખ્યાતિશ્ચ પુણ્ડરીકા ચ સપ્તૈતા વર્ષનિમ્નગાઃ ।
૨૦.૫૬/૨તત્રાપિ વર્ણૈર્ભગવાન્ પુષ્કરાદ્યૈર્જનાર્દનઃ ॥ ૨૦.૫૬॥

૨૦.૫૭/૧ધ્યાનયોગૈ રુદ્રરૂપ ઈજ્યતે યજ્ઞસંનિધૌ ।
૨૦.૫૭/૨ક્રૌઞ્ચદ્વીપઃ સમુદ્રેણ દધિમણ્ડોદકેન તુ ॥ ૨૦.૫૭॥

૨૦.૫૮/૧આવૃતઃ સર્વતઃ ક્રૌઞ્ચ+ ।દ્વીપતુલ્યેન માનતઃ ।
૨૦.૫૮/૨દધિમણ્ડોદકશ્ચાપિ શાકદ્વીપેન સંવૃતઃ ॥ ૨૦.૫૮॥

૨૦.૫૯/૧ક્રૌઞ્ચદ્વીપસ્ય વિસ્તાર+ ।દ્વિગુણેન દ્વિજોત્તમાઃ ।
૨૦.૫૯/૨શાકદ્વીપેશ્વરસ્યાપિ ભવ્યસ્ય સુમહાત્મનઃ ॥ ૨૦.૫૯॥

૨૦.૬૦/૧સપ્તૈવ તનયાસ્તેષાં દદૌ વર્ષાણિ સપ્ત સઃ ।
૨૦.૬૦/૨જલદશ્ચ કુમારશ્ચ સુકુમારો મનીરકઃ ॥ ૨૦.૬૦॥

૨૦.૬૧/૧કુસમોદશ્ચ મોદાકિઃ સપ્તમશ્ચ મહાદ્રુમઃ ।
૨૦.૬૧/૨તત્સંજ્ઞાન્યેવ તત્રાપિ સપ્ત વર્ષાણ્યનુક્રમાત્ ॥ ૨૦.૬૧॥

૨૦.૬૨/૧તત્રાપિ પર્વતાઃ સપ્ત વર્ષવિચ્છેદકારકાઃ ।
૨૦.૬૨/૨પૂર્વસ્તત્રોદયગિરિર્જલધારસ્તથાપરઃ ॥ ૨૦.૬૨॥

૨૦.૬૩/૧તથા રૈવતકઃ શ્યામસ્તથૈવામ્ભોગિરિર્દ્વિજાઃ ।
૨૦.૬૩/૨આસ્તિકેયસ્તથા રમ્યઃ કેસરી પર્વતોત્તમઃ ॥ ૨૦.૬૩॥

૨૦.૬૪/૧શાકશ્ચાત્ર મહાવૃક્ષઃ સિધ્દગન્ધર્વસેવિતઃ ।
૨૦.૬૪/૨યત્પત્રવાતસંસ્પર્શાદ્ આહ્લાદો જાયતે પરઃ ॥ ૨૦.૬૪॥

૨૦.૬૫/૧તત્ર પુણ્યા જનપદાશ્ચાતુર્વર્ણ્યસમન્વિતાઃ ।
૨૦.૬૫/૨નિવસન્તિ મહાત્માનો નિરાતઙ્કા નિરામયાઃ ॥ ૨૦.૬૫॥

૨૦.૬૬/૧નદ્યશ્ચાત્ર મહાપુણ્યાઃ સર્વપાપભયાપહાઃ ।
૨૦.૬૬/૨સુકુમારી કુમારી ચ નલિની રેણુકા ચ યા ॥ ૨૦.૬૬॥

૨૦.૬૭/૧ઇક્ષુશ્ચ ધેનુકા ચૈવ ગભસ્તી સપ્તમી તથા ।
૨૦.૬૭/૨અન્યાસ્ત્વયુતશસ્તત્ર ક્ષુદ્રનદ્યો દ્વિજોત્તમાઃ ॥ ૨૦.૬૭॥

૨૦.૬૮/૧મહીધરાસ્તથા સન્તિ શતશોઽથ સહસ્રશઃ ।
૨૦.૬૮/૨તાઃ પિબન્તિ મુદા યુક્તા જલદાદિષુ યે સ્થિતાઃ ॥ ૨૦.૬૮॥

૨૦.૬૯/૧વર્ષેષુ યે જનપદાશ્ચતુર્થાર્થસમન્વિતાઃ ।
૨૦.૬૯/૨નદ્યશ્ચાત્ર મહાપુણ્યાઃ સ્વર્ગાદ્ અભ્યેત્ય મેદિનીમ્ ॥ ૨૦.૬૯ ॥

૨૦.૭૦/૧ધર્મહાનિર્ન તેષ્વસ્તિ ન સંહર્ષો ન શુક્ તથા ।
૨૦.૭૦/૨મર્યાદાવ્યુત્ક્રમશ્ચાપિ તેષુ દેશેષુ સપ્તસુ ॥ ૨૦.૭૦ ॥

૨૦.૭૧/૧મગાશ્ચ માગધાશ્ચૈવ માનસા મન્દગાસ્તથા ।
૨૦.૭૧/૨મગા બ્રાહ્મણભૂયિષ્ઠા માગધાઃ ક્ષત્રિયાસ્તુ તે ॥ ૨૦.૭૧ ॥

૨૦.૭૨/૧વૈશ્યાસ્તુ માનસાસ્તેષાં શૂદ્રા જ્ઞેયાસ્તુ મન્દગાઃ ।
૨૦.૭૨/૨શાકદ્વીપે સ્થિતૈર્વિષ્ણુઃ સૂર્યરૂપધરો હરિઃ ॥ ૨૦.૭૨ ॥

૨૦.૭૩/૧યથોક્તૈરિજ્યતે સમ્યક્ કર્મભિર્નિયતાત્મભિઃ ।
૨૦.૭૩/૨શાકદ્વીપસ્તતો વિપ્રાઃ ક્ષીરોદેન સમન્તતઃ ॥ ૨૦.૭૩ ॥

૨૦.૭૪/૧શાકદ્વીપપ્રમાણેન વલયેનેવ વેષ્ટિતઃ ।
૨૦.૭૪/૨ક્ષીરાબ્ધિઃ સર્વતો વિપ્રાઃ પુષ્કરાખ્યેન વેષ્ટિતઃ ॥ ૨૦.૭૪ ॥

૨૦.૭૫/૧દ્વીપેન શાકદ્વીપાત્ તુ દ્વિગુણેન સમન્તતઃ ।
૨૦.૭૫/૨પુષ્કરે સવનસ્યાપિ મહાવીતોઽભવત્ સુતઃ ॥ ૨૦.૭૫ ॥

૨૦.૭૬/૧ધાતકિશ્ચ તયોસ્તદ્વદ્ દ્વે વર્ષે નામસંજ્ઞિતે ।
૨૦.૭૬/૨મહાવીતં તથૈવાન્યદ્ ધાતકીખણ્ડસંજ્ઞિતમ્ ॥ ૨૦.૭૬ ॥

૨૦.૭૭/૧એકશ્ચાત્ર મહાભાગાઃ પ્રખ્યાતો વર્ષપર્વતઃ ।
૨૦.૭૭/૨માનસોત્તરસંજ્ઞો વૈ મધ્યતો વલયાકૃતિઃ ॥ ૨૦.૭૭ ॥

૨૦.૭૮/૧યોજનાનાં સહસ્રાણિ ઊર્ધ્વં પઞ્ચાશદ્ ઉચ્છ્રિતઃ ।
૨૦.૭૮/૨તાવદ્ એવ ચ વિસ્તીર્ણઃ સર્વતઃ પરિમણ્ડલઃ ॥ ૨૦.૭૮ ॥

૨૦.૭૯/૧પુષ્કરદ્વીપવલયં મધ્યેન વિભજન્ન્ ઇવ ।
૨૦.૭૯/૨સ્થિતોઽસૌ તેન વિચ્છિન્નં જાતં વર્ષદ્વયં હિ તત્ ॥ ૨૦.૭૯ ॥

૨૦.૮૦/૧વલયાકારમેકૈકં તયોર્મધ્યે મહાગિરિઃ ।
૨૦.૮૦/૨દશવર્ષસહસ્રાણિ તત્ર જીવન્તિ માનવાઃ ॥ ૨૦.૮૦ ॥

૨૦.૮૧/૧નિરામયા વિશોકાશ્ચ રાગદ્વેષવિવર્જિતાઃ ।
૨૦.૮૧/૨અધમોત્તમૌ ન તેષ્વાસ્તાં ન વધ્યવધકૌ દ્વિજાઃ ॥ ૨૦.૮૧ ॥

૨૦.૮૨/૧નેર્ષ્યાસૂયા ભયં રોષો દોષો લોભાદિકં ન ચ ।

૨૦.૮૨/૨મહાવીતં બહિર્વર્ષં ધાતકીખણ્ડમન્તતઃ ॥ ૨૦.૮૨॥

૨૦.૮૩/૧માનસોત્તરશૈલસ્ય દેવદૈત્યાદિસેવિતમ્ ।
૨૦.૮૩/૨સત્યાનૃતે ન તત્રાસ્તાં દ્વીપે પુષ્કરસંજ્ઞિતે ॥ ૨૦.૮૩॥

૨૦.૮૪/૧ન તત્ર નદ્યઃ શૈલા વા દ્વીપે વર્ષદ્વયાન્વિતે ।
૨૦.૮૪/૨તુલ્યવેષાસ્તુ મનુજા દેવૈસ્તત્રૈકરૂપિણઃ ॥ ૨૦.૮૪॥

૨૦.૮૫/૧વર્ણાશ્રમાચારહીનં ધર્માહરણવર્જિતમ્ ।
૨૦.૮૫/૨ત્રયીવાર્ત્તાદણ્ડનીતિ+ ।શુશ્રૂષારહિતં ચ તત્ ॥ ૨૦.૮૫॥

૨૦.૮૬/૧વર્ષદ્વયં તતો વિપ્રા ભૌમસ્વર્ગોઽયમુત્તમઃ ।
૨૦.૮૬/૨સર્વસ્ય સુખદઃ કાલો જરારોગવિવર્જિતઃ ॥ ૨૦.૮૬॥

૨૦.૮૭/૧પુષ્કરે ધાતકીખણ્ડે મહાવીતે ચ વૈ દ્વિજાઃ ।
૨૦.૮૭/૨ન્યગ્રોધઃ પુષ્કરદ્વીપે બ્રહ્મણઃ સ્થાનમુત્તમમ્ ॥ ૨૦.૮૭॥

૨૦.૮૮/૧તસ્મિન્ નિવસતિ બ્રહ્મા પૂજ્યમાનઃ સુરાસુરૈઃ ।
૨૦.૮૮/૨સ્વાદૂદકેનોદધિના પુષ્કરઃ પરિવેષ્ટિતઃ ॥ ૨૦.૮૮॥

૨૦.૮૯/૧સમેન પુષ્કરસ્યૈવ વિસ્તારાન્ મણ્ડલાત્ તથા ।
૨૦.૮૯/૨એવં દ્વીપાઃ સમુદ્રૈસ્તુ સપ્ત સપ્તભિરાવૃતાઃ ॥ ૨૦.૮૯॥

૨૦.૯૦/૧દ્વીપશ્ચૈવ સમુદ્રશ્ચ સમાનૌ દ્વિગુણૌ પરૌ ।
૨૦.૯૦/૨પયાંસિ સર્વદા સર્વ+ ।સમુદ્રેષુ સમાનિ વૈ ॥ ૨૦.૯૦॥

૨૦.૯૧/૧ન્યૂનાતિરિક્તતા તેષાં કદાચિન્ નૈવ જાયતે ।
૨૦.૯૧/૨સ્થાલીસ્થમગ્નિસંયોગાદ્ ઉદ્રેકિ સલિલં યથા ॥ ૨૦.૯૧॥

૨૦.૯૨/૧તથેન્દુવૃદ્ધૌ સલિલમમ્ભોધૌ મુનિસત્તમાઃ ।
૨૦.૯૨/૨અન્યૂનાનતિરિક્તાશ્ચ વર્ધન્ત્યાપો હ્રસન્તિ ચ ॥ ૨૦.૯૨॥

૨૦.૯૩/૧ઉદયાસ્તમને ત્વિન્દોઃ પક્ષયોઃ શુક્લકૃષ્ણયોઃ ।
૨૦.૯૩/૨દશોત્તરાણિ પઞ્ચૈવ અઙ્ગુલાનાં શતાનિ ચ ॥ ૨૦.૯૩॥

૨૦.૯૪/૧અપાં વૃદ્ધિક્ષયૌ દૃષ્ટૌ સામુદ્રીણાં દ્વિજોત્તમાઃ ।
૨૦.૯૪/૨ભોજનં પુષ્કરદ્વીપે તત્ર સ્વયમુપસ્થિતમ્ ॥ ૨૦.૯૪॥

૨૦.૯૫/૧ભુઞ્જન્તિ ષડ્રસં વિપ્રાઃ પ્રજાઃ સર્વાઃ સદૈવ હિ ।
૨૦.૯૫/૨સ્વાદૂદકસ્ય પરિતો દૃશ્યતે લોકસંસ્થિતિઃ ॥ ૨૦.૯૫॥

૨૦.૯૬/૧દ્વિગુણા કાઞ્ચની ભૂમિઃ સર્વજન્તુવિવર્જિતા ।
૨૦.૯૬/૨લોકાલોકસ્તતઃ શૈલો યોજનાયુતવિસ્તૃતઃ ॥ ૨૦.૯૬॥

૨૦.૯૭/૧ઉચ્છ્રયેણાપિ તાવન્તિ સહસ્રાણ્યાવલોહિ સઃ ।
૨૦.૯૭/૨તતસ્તમઃ સમાવૃત્ય તં શૈલં સર્વતઃ સ્થિતમ્ ॥ ૨૦.૯૭॥

૨૦.૯૮/૧તમશ્ચાણ્ડકટાહેન સમન્તાત્ પરિવેષ્ટિતમ્ ।
૨૦.૯૮/૨પઞ્ચાશત્કોટિવિસ્તારા સેયમુર્વી દ્વિજોત્તમાઃ ॥ ૨૦.૯૮॥

૨૦.૯૯/૧સહૈવાણ્ડકટાહેન સદ્વીપા સમહીધરા ।
૨૦.૯૯/૨સેયં ધાત્રી વિધાત્રી ચ સર્વભૂતગુણાધિકા ।
૨૦.૯૯/૩આધારભૂતા જગતાં સર્વેષાં સા દ્વિજોત્તમાઃ ॥ ૨૦.૯૯॥

૨૧.૧/૧લોમહર્ષણ ઉવાચ । વિસ્તાર એષ કથિતઃ પૃથિવ્યા મુનિસત્તમાઃ ।
૨૧.૧/૨સપ્તતિસ્તુ સહસ્રાણિ તદુચ્છ્રાયોऽપિ કથ્યતે ॥ ૨૧.૧॥

૨૧.૨/૧દશસાહસ્રમેકૈકં પાતાલં મુનિસત્તમાઃ ।
૨૧.૨/૨અતલં વિતલં ચૈવ નિતલં સુતલં તથા ॥ ૨૧.૨॥

૨૧.૩/૧તલાતલં રસાતલં પાતાલં ચાપિ સપ્તમમ્ ।
૨૧.૩/૨કૃષ્ણા શુક્લારુણા પીતા શર્કરા શૈલકાઞ્ચની ॥ ૨૧.૩॥

૨૧.૪/૧ભૂમયો યત્ર વિપ્રેન્દ્રા વરપ્રાસાદશોભિતાઃ ।
૨૧.૪/૨તેષુ દાનવદૈતેયજાતયઃ શતશઃ સ્થિતાઃ ॥ ૨૧.૪॥

૨૧.૫/૧નાગાનાં ચ મહાઙ્ગાનાં જ્ઞાતયશ્ચ દ્વિજોત્તમાઃ ।
૨૧.૫/૨સ્વર્લોકાદ્ અપિ રમ્યાણિ પાતાલાનીતિ નારદઃ ॥ ૨૧.૫॥

૨૧.૬/૧પ્રાહ સ્વર્ગસદોમધ્યે પાતાલેભ્યો ગતો દિવમ્ ।
૨૧.૬/૨આહ્લાદકારિણઃ શુભ્રા મણયો યત્ર સુપ્રભાઃ ॥ ૨૧.૬॥

૨૧.૭/૧નાગાભરણભૂષાશ્ચ પાતાલં કેન તત્સમમ્ ।
૨૧.૭/૨દૈત્યદાનવકન્યાભિરિતશ્ચેતશ્ચ શોભિતે ॥ ૨૧.૭॥

૨૧.૮/૧પાતાલે કસ્ય ન પ્રીતિર્વિમુક્તસ્યાપિ જાયતે ।
૨૧.૮/૨દિવાર્કરશ્મયો યત્ર પ્રભાસ્તન્વન્તિ નાતપમ્ ॥ ૨૧.૮॥

૨૧.૯/૧શશિનશ્ચ ન શીતાય નિશિ દ્યોતાય કેવલમ્ ।
૨૧.૯/૨ભક્ષ્યભોજ્યમહાપાન+ ઁઅદમત્તૈશ્ચ ભોગિભિઃ ॥ ૨૧.૯॥

૨૧.૧૦/૧યત્ર ન જ્ઞાયતે કાલો ગતોऽપિ દનુજાદિભિઃ ।

૨૧.૧૦/૨વનાનિ નદ્યો રમ્યાણિ સરાંસિ કમલાકરાઃ ॥ ૨૧.૧૦॥

૨૧.૧૧/૧પુંસ્કોકિલાદિલાપાશ્ચ મનોજ્ઞાન્યમ્બરાણિ ચ ।
૨૧.૧૧/૨ભૂષણાન્યતિરમ્યાણિ ગન્ધાદ્યં ચાનુલેપનમ્ ॥ ૨૧.૧૧॥

૨૧.૧૨/૧વીણાવેણુમૃદઙ્ગાનાં નિઃસ્વનાશ્ચ સદા દ્વિજાઃ ।
૨૧.૧૨/૨એતાન્યન્યાનિ રમ્યાણિ ભાગ્યભોગ્યાનિ દાનવૈઃ ॥ ૨૧.૧૨॥

૨૧.૧૩/૧દૈત્યોરગૈશ્ચ ભુજ્યન્તે પાતાલાન્તરગોચરૈઃ ।
૨૧.૧૩/૨પાતાલાનામધશ્ચાસ્તે વિષ્ણોર્યા તામસી તનુઃ ॥ ૨૧.૧૩॥

૨૧.૧૪/૧શેષાખ્યા યદ્ગુણાન્ વક્તું ન શક્તા દૈત્યદાનવાઃ ।
૨૧.૧૪/૨યોઽનન્તઃ પઠ્યતે સિદ્ધૈર્દેવદેવર્ષિપૂજિતઃ ॥ ૨૧.૧૪॥

૨૧.૧૫/૧સહસ્રશિરસા વ્યક્તઃ સ્વસ્તિકામલભૂષણઃ ।
૨૧.૧૫/૨ફણામણિસહસ્રેણ યઃ સ વિદ્યોતયન્ દિશઃ ॥ ૨૧.૧૫॥

૨૧.૧૬/૧સર્વાન્ કરોતિ નિર્વીર્યાન્ હિતાય જગતોઽસુરાન્ ।
૨૧.૧૬/૨મદાઘૂર્ણિતનેત્રોઽસૌ યઃ સદૈવૈકકુણ્ડલઃ ॥ ૨૧.૧૬॥

૨૧.૧૭/૧કિરીટી સ્રગ્ધરો ભાતિ સાગ્નિશ્વેત ઇવાચલઃ ।
૨૧.૧૭/૨નીલવાસા મદોત્સિક્તઃ શ્વેતહારોપશોભિતઃ ॥ ૨૧.૧૭॥

૨૧.૧૮/૧સાભ્રગઙ્ગાપ્રપાતોઽસૌ કૈલાસાદ્રિરિવોત્તમઃ ।
૨૧.૧૮/૨લાઙ્ગલાસક્તહસ્તાગ્રો બિભ્રન્ મુશલમુત્તમમ્ ॥ ૨૧.૧૮॥

૨૧.૧૯/૧ઉપાસ્યતે સ્વયં કાન્ત્યા યો વારુણ્યા ચ મૂર્તયા ।
૨૧.૧૯/૨કલ્પાન્તે યસ્ય વક્ત્રેભ્યો વિષાનલશિખોજ્જ્વલઃ ॥ ૨૧.૧૯॥

૨૧.૨૦/૧સંકર્ષણાત્મકો રુદ્રો નિષ્ક્રમ્યાત્તિ જગત્ત્રયમ્ ।
૨૧.૨૦/૨સ બિભ્રચ્છિખરીભૂતમશેષં ક્ષિતિમણ્ડલમ્ ॥ ૨૧.૨૦॥

૨૧.૨૧/૧આસ્તે પાતાલમૂલસ્થઃ શેષોઽશેષસુરાર્ચિતઃ ।
૨૧.૨૧/૨તસ્ય વીર્યં પ્રભાવશ્ચ સ્વરૂપં રૂપમેવ ચ ॥ ૨૧.૨૧॥

૨૧.૨૨/૧નહિ વર્ણયિતું શક્યં જ્ઞાતું વા ત્રિદશૈરપિ ।
૨૧.૨૨/૨યસ્યૈષા સકલા પૃથ્વી ફણામણિશિખારુણા ॥ ૨૧.૨૨॥

૨૧.૨૩/૧આસ્તે કુસુમમાલેવ કસ્તદ્વીર્યં વદિષ્યતિ ।
૨૧.૨૩/૨યદા વિજૃમ્ભતેઽનન્તો મદાઘૂર્ણિતલોચનઃ ॥ ૨૧.૨૩॥

૨૧.૨૪/૧તદા ચલતિ ભૂરેષા સાદ્રિતોયાધિકાનના ।
૨૧.૨૪/૨ગન્ધર્વાપ્સરસઃ સિદ્ધાઃ કિંનરોરગવારણાઃ ॥ ૨૧.૨૪॥

૨૧.૨૫/૧નાન્તં ગુણાનાં ગચ્છન્તિ તતોઽનન્તોઽયમવ્યયઃ ।
૨૧.૨૫/૨યસ્ય નાગવધૂહસ્તૈર્લાપિતં હરિચન્દનમ્ ॥ ૨૧.૨૫॥

૨૧.૨૬/૧મુહુઃ શ્વાસાનિલાયસ્તં યાતિ દિક્પટવાસતામ્ ।
૨૧.૨૬/૨યમારાધ્ય પુરાણર્ષિર્ગર્ગો જ્યોતીંષિ તત્ત્વતઃ ॥ ૨૧.૨૬॥

૨૧.૨૭/૧જ્ઞાતવાન્ સકલં ચૈવ નિમિત્તપઠિતં ફલમ્ ।
૨૧.૨૭/૨તેનેયં નાગવર્યેણ શિરસા વિધૃતા મહી ।
૨૧.૨૭/૩બિભર્તિ સકલાંલ્લોકાન્ સદેવાસુરમાનુષાન્ ॥ ૨૧.૨૭॥

૨૨.૧/૧લોમહર્ષણ ઉવાચ । તતશ્ચાનન્તરં વિપ્રા નરકા રૌરવાદયઃ ।
૨૨.૧/૨પાપિનો યેષુ પાત્યન્તે તાઞ્ શ◌ૃણુધ્વં દ્વિજોત્તમાઃ ॥ ૨૨.૧॥

૨૨.૨/૧રૌરવઃ શૌકરો રોધસ્તાનો વિશસનસ્તથા ।
૨૨.૨/૨મહાજ્વાલસ્તપ્તકુડ્યો મહાલોભો વિમોહનઃ ॥ ૨૨.૨॥

૨૨.૩/૧રુધિરાન્ધો વસાતપ્તઃ કૃમીશઃ કૃમિભોજનઃ ।
૨૨.૩/૨અસિપત્રવનં કૃષ્ણો લાલાભક્ષશ્ચ દારુણઃ ॥ ૨૨.૩॥

૨૨.૪/૧તથા પૂયવહઃ પાપો વહ્નિજ્વાલો હ્યધઃશિરાઃ ।
૨૨.૪/૨સદંશઃ કૃષ્ણસૂત્રશ્ચ તમશ્ચાવીચિરેવ ચ ॥ ૨૨.૪॥

૨૨.૫/૧શ્વભોજનોઽથાપ્રતિષ્ઠોમ+ ।આવીચિશ્ચ તથાપરઃ ।
૨૨.૫/૨ઇત્યેવમાદયશ્ચાન્યે નરકા ભૃશદારુણાઃ ॥ ૨૨.૫॥

૨૨.૬/૧યમસ્ય વિષયે ઘોરાઃ શસ્ત્રાગ્નિવિષદર્શિનઃ ।
૨૨.૬/૨પતન્તિ યેષુ પુરુષાઃ પાપકર્મરતાશ્ચ યે ॥ ૨૨.૬॥

૨૨.૭/૧કૂટસાક્ષી તથા સમ્યક્ પક્ષપાતેન યો વદેત્ ।
૨૨.૭/૨યશ્ચાન્યદ્ અનૃતં વક્તિ સ નરો યાતિ રૌરવમ્ ॥ ૨૨.૭॥

૨૨.૮/૧ભ્રૂણહા પુરહન્તા ચ ગોઘ્નશ્ચ મુનિસત્તમાઃ ।
૨૨.૮/૨યાન્તિ તે રૌરવં ઘોરં યશ્ચોચ્છ્વાસનિરોધકઃ ॥ ૨૨.૮॥

૨૨.૯/૧સુરાપો બ્રહ્મહા હર્તા સુવર્ણસ્ય ચ શૂકરે ।
૨૨.૯/૨પ્રયાતિ નરકે યશ્ચ તૈઃ સંસર્ગમુપૈતિ વૈ ॥ ૨૨.૯॥

૨૨.૧૦/૧રાજન્યવૈશ્યહા ચૈવ તથૈવ ગુરુતલ્પગઃ ।

૨૨.૧૦/૨તપ્તકુમ્ભે સ્વસૃગામી હન્તિ રાજભટં ચ યઃ ॥ ૨૨.૧૦॥

૨૨.૧૧/૧માધ્વીવિક્રયકૃન્ વધ્યપાલઃ કેસરવિક્રયી ।
૨૨.૧૧/૨તપ્તલોહે પતન્ત્યેતે યશ્ચ ભક્તં પરિત્યજેત્ ॥ ૨૨.૧૧॥

૨૨.૧૨/૧સુતાં સ્નુષાં ચાપિ ગત્વા મહાજ્વાલે નિપાત્યતે ।
૨૨.૧૨/૨અવમન્તા ગુરૂણાં યો યશ્ચાક્રોષ્ટા નરાધમઃ ॥ ૨૨.૧૨॥

૨૨.૧૩/૧વેદદૂષયિતા યશ્ચ વેદવિક્રયકશ્ચ યઃ ।
૨૨.૧૩/૨અગમ્યગામી યશ્ચ સ્યાત્ તે યાન્તિ શબલં દ્વિજાઃ ॥ ૨૨.૧૩॥

૨૨.૧૪/૧ચૌરો વિમોહે પતતિ મર્યાદાદૂષકસ્તથા ।
૨૨.૧૪/૨દેવદ્વિજપિતૃદ્વેષ્ટા રત્નદૂષયિતા ચ યઃ ॥ ૨૨.૧૪॥

૨૨.૧૫/૧સ યાતિ કૃમિભક્ષ્યે વૈ કૃમીશે તુ દુરિષ્ટિકૃત્ ।
૨૨.૧૫/૨પિતૃદેવાતિથીન્ યસ્તુ પર્યશ્નાતિ નરાધમઃ ॥ ૨૨.૧૫॥

૨૨.૧૬/૧લાલાભક્ષ્યે સ યાત્યુગ્રે શરકર્તા ચ વેધકે ।
૨૨.૧૬/૨કરોતિ કર્ણિનો યશ્ચ યશ્ચ ખડ્ગાદિકૃન્ નરઃ ॥ ૨૨.૧૬॥

૨૨.૧૭/૧પ્રયાન્ત્યેતે વિશસને નરકે ભૃશદારુણે ।
૨૨.૧૭/૨અસત્પ્રતિગ્રહીતા ચ નરકે યાત્યધોમુખે ॥ ૨૨.૧૭॥

૨૨.૧૮/૧અયાજ્યયાજકસ્તત્ર તથા નક્ષત્રસૂચકઃ ।
૨૨.૧૮/૨કૃમિપૂયે નરશ્ચૈકો યાતિ મિષ્ટાન્નભુક્ સદા ॥ ૨૨.૧૮॥

૨૨.૧૯/૧લાક્ષામાંસરસાનાં ચ તિલાનાં લવણસ્ય ચ ।
૨૨.૧૯/૨વિક્રેતા બ્રાહ્મણો યાતિ તમેવ નરકં દ્વિજાઃ ॥ ૨૨.૧૯॥

૨૨.૨૦/૧માર્જારકુક્કુટચ્છાગ+ ।શ્વવરાહવિહંગમાન્ ।
૨૨.૨૦/૨પોષયન્ નરકં યાતિ તમેવ દ્વિજસત્તમાઃ ॥ ૨૨.૨૦॥

૨૨.૨૧/૧રઙ્ગોપજીવી કૈવર્તઃ કુણ્ડાશી ગરદસ્તથા ।
૨૨.૨૧/૨સૂચી માહિષિકશ્ચૈવ પર્વગામી ચ યો દ્વિજઃ ॥ ૨૨.૨૧॥

૨૨.૨૨/૧અગારદાહી મિત્રઘ્નઃ શકુનિગ્રામયાજકઃ ।
૨૨.૨૨/૨રુધિરાન્ધે પતન્ત્યેતે સોમં વિક્રીણતે ચ યે ॥ ૨૨.૨૨॥

૨૨.૨૩/૧મધુહા ગ્રામહન્તા ચ યાતિ વૈતરણીં નરઃ ।
૨૨.૨૩/૨રેતઃપાનાદિકર્તારો મર્યાદાભેદિનશ્ચ યે ॥ ૨૨.૨૩॥

૨૨.૨૪/૧તે કૃચ્છ્રે યાન્ત્યશૌચાશ્ચ કુહકાજીવિનશ્ચ યે ।
૨૨.૨૪/૨અસિપત્રવનં યાતિ વનચ્છેદી વૃથૈવ યઃ ॥ ૨૨.૨૪॥

૨૨.૨૫/૧ઔરભ્રિકા મૃગવ્યાધા વહ્નિજ્વાલે પતન્તિ વૈ ।
૨૨.૨૫/૨યાન્તિ તત્રૈવ તે વિપ્રા યશ્ચાપાકેષુ વહ્નિદઃ ॥ ૨૨.૨૫॥

૨૨.૨૬/૧વ્રતોપલોપકો યશ્ચ સ્વાશ્રમાદ્ વિચ્યુતશ્ચ યઃ ।
૨૨.૨૬/૨સંદંશયાતનામધ્યે પતતસ્તાવુભાવપિ ॥ ૨૨.૨૬॥

૨૨.૨૭/૧દિવા સ્વપ્નેષુ સ્યન્દન્તે યે નરા બ્રહ્મચારિણઃ ।
૨૨.૨૭/૨પુત્રૈરધ્યાપિતા યે તુ તે પતન્તિ શ્વભોજને ॥ ૨૨.૨૭॥

૨૨.૨૮/૧એતે ચાન્યે ચ નરકાઃ શતશોઽથ સહસ્રશઃ ।
૨૨.૨૮/૨યેષુ દુષ્કૃતકર્માણઃ પચ્યન્તે યાતનાગતાઃ ॥ ૨૨.૨૮॥

૨૨.૨૯/૧તથૈવ પાપાન્યેતાનિ તથાન્યાનિ સહસ્રશઃ ।
૨૨.૨૯/૨ભુજ્યન્તે જાતિપુરુષૈર્નરકાન્તરગોચરૈઃ ॥ ૨૨.૨૯॥

૨૨.૩૦/૧વર્ણાશ્રમવિરુદ્ધં ચ કર્મ કુર્વન્તિ યે નરાઃ ।
૨૨.૩૦/૨કર્મણા મનસા વાચા નિરયેષુ પતન્તિ તે ॥ ૨૨.૩૦॥

૨૨.૩૧/૧અધઃશિરોભિર્દૃશ્યન્તે નારકૈર્દિવિ દેવતાઃ ।
૨૨.૩૧/૨દેવાશ્ચાધોમુખાન્ સર્વાન્ અધઃ પશ્યન્તિ નારકાન્ ॥ ૨૨.૩૧॥

૨૨.૩૨/૧સ્થાવરાઃ કૃમયોઽજ્વાશ્ચ પક્ષિણઃ પશવો નરાઃ ।
૨૨.૩૨/૨ધાર્મિકાસ્ત્રિદશાસ્તદ્વન્ મોક્ષિણશ્ચ યથાક્રમમ્ ॥ ૨૨.૩૨॥

૨૨.૩૩/૧સહસ્રભાગઃ પ્રથમાદ્ દ્વિતીયોઽનુક્રમાત્ તથા ।
૨૨.૩૩/૨સર્વે હ્યેતે મહાભાગા યાવન્ મુક્તિસમાશ્રયાઃ ॥ ૨૨.૩૩॥

૨૨.૩૪/૧યાવન્તો જન્તવઃ સ્વર્ગે તાવન્તો નરકૌકસઃ ।
૨૨.૩૪/૨પાપકૃદ્ યાતિ નરકં પ્રાયશ્ચિત્તપરાઙ્મુખઃ ॥ ૨૨.૩૪॥

૨૨.૩૫/૧પાપાનામનુરૂપાણિ પ્રાયશ્ચિત્તાનિ યદ્ યથા ।
૨૨.૩૫/૨તથા તથૈવ સંસ્મૃત્ય પ્રોક્તાનિ પરમર્ષિભિઃ ॥ ૨૨.૩૫॥

૨૨.૩૬/૧પાપે ગુરૂણિ ગુરુણિ સ્વલ્પાન્યલ્પે ચ તદ્વિદઃ ।
૨૨.૩૬/૨પ્રાયશ્ચિત્તાનિ વિપ્રેન્દ્રા જગુઃ સ્વાયમ્ભુવાદયઃ ॥ ૨૨.૩૬॥

૨૨.૩૭/૧પ્રાયશ્ચિત્તાન્યશેષાણિ તપઃકર્માત્મકાનિ વૈ ।
૨૨.૩૭/૨યાનિ તેષામશેષાણાં કૃષ્ણાનુસ્મરણં પરમ્ ॥ ૨૨.૩૭॥

૨૨.૩૮/૧કૃતે પાપેઽનુતાપો વૈ યસ્ય પુંસઃ પ્રજાયતે ।
૨૨.૩૮/૨પ્રાયશ્ચિત્તં તુ તસ્યૈકં હરિસંસ્મરણં પરમ્ ॥ ૨૨.૩૮॥

૨૨.૩૯/૧પ્રાતર્નિશિ તથા સંધ્યા+ ઽઅધ્યાહ્નાદિષુ સંસ્મરન્ ।
૨૨.૩૯/૨નારાયણમવાપ્નોતિ સદ્યઃ પાપક્ષયાન્ નરઃ ॥ ૨૨.૩૯॥

૨૨.૪૦/૧વિષ્ણુસંસ્મરણાત્ ક્ષીણ+ ।સમસ્તક્લેશસંચયઃ ।
૨૨.૪૦/૨મુક્તિં પ્રયાતિ ભો વિપ્રા વિષ્ણોસ્તસ્યાનુકીર્તનાત્ ॥ ૨૨.૪૦॥

૨૨.૪૧/૧વાસુદેવે મનો યસ્ય જપહોમાર્ચનાદિષુ ।
૨૨.૪૧/૨તસ્યાન્તરાયો વિપ્રેન્દ્રા દેવેન્દ્રત્વાદિકં ફલમ્ ॥ ૨૨.૪૧॥

૨૨.૪૨/૧ક્વ નાકપૃષ્ઠગમનં પુનરાવૃત્તિલક્ષણમ્ ।
૨૨.૪૨/૨ક્વ જપો વાસુદેવેતિ મુક્તિબીજમનુત્તમમ્ ॥ ૨૨.૪૨॥

૨૨.૪૩/૧તસ્માદ્ અહર્નિશં વિષ્ણું સંસ્મરન્ પુરુષો દ્વિજઃ ।
૨૨.૪૩/૨ન યાતિ નરકં શુદ્ધઃ સંક્ષીણાખિલપાતકઃ ॥ ૨૨.૪૩॥

૨૨.૪૪/૧મનઃપ્રીતિકરઃ સ્વર્ગો નરકસ્તદ્વિપર્યયઃ ।
૨૨.૪૪/૨નરકસ્વર્ગસંજ્ઞે વૈ પાપપુણ્યે દ્વિજોત્તમાઃ ॥ ૨૨.૪૪॥

૨૨.૪૫/૧વસ્ત્વેકમેવ દુઃખાય સુખાયેર્ષ્યોદયાય ચ ।
૨૨.૪૫/૨કોપાય ચ યતસ્તસ્માદ્ વસ્તુ દુઃખાત્મકં કુતઃ ॥ ૨૨.૪૫॥

૨૨.૪૬/૧તદ્ એવ પ્રીતયે ભૂત્વા પુનર્દુઃખાય જાયતે ।
૨૨.૪૬/૨તદ્ એવ કોપાલયતઃ પ્રસાદાય ચ જાયતે ॥ ૨૨.૪૬॥

૨૨.૪૭/૧તસ્માદ્ દુઃખાત્મકં નાસ્તિ ન ચ કિંચિત્ સુખાત્મકમ્ ।
૨૨.૪૭/૨મનસઃ પરિણામોઽયં સુખદુઃખાદિલક્ષણઃ ॥ ૨૨.૪૭॥

૨૨.૪૮/૧જ્ઞાનમેવ પરં બ્રહ્મા+ ।જ્ઞાનં બન્ધાય ચેષ્યતે ।
૨૨.૪૮/૨જ્ઞાનાત્મકમિદં વિશ્વં ન જ્ઞાનાદ્ વિદ્યતે પરમ્ ॥ ૨૨.૪૮॥

૨૨.૪૯/૧વિદ્યાવિદ્યે હિ ભો વિપ્રા જ્ઞાનમેવાવધાર્યતામ્ ।
૨૨.૪૯/૨એવમેતદ્ મયાખ્યાતં ભવતાં મણ્ડલં ભુવઃ ॥ ૨૨.૪૯॥

૨૨.૫૦/૧પાતાલાનિ ચ સર્વાણિ તથૈવ નરકા દ્વિજાઃ ।
૨૨.૫૦/૨સમુદ્રાઃ પર્વતાશ્ચૈવ દ્વીપા વર્ષાણિ નિમ્નગાઃ ।
૨૨.૫૦/૩સંક્ષેપાત્ સર્વમાખ્યાતં કિં ભૂયઃ શ્રોતુમિચ્છથ ॥ ૨૨.૫૦॥

૨૩.૧/૧મુનય ઊચુઃ । કથિતં ભવતા સર્વમસ્માકં સકલં તથા ।
૨૩.૧/૨ભુવર્લોકાદિકાંલ્લોકાઞ્ શ્રોતુમિચ્છામહે વયમ્ ॥ ૨૩.૧॥

૨૩.૨/૧તથૈવ ગ્રહસંસ્થાનં પ્રમાણાનિ યથા તથા ।
૨૩.૨/૨સમાચક્ષ્વ મહાભાગ યથાવલ્લોમહર્ષણ ॥ ૨૩.૨॥

૨૩.૩/૧લોમહર્ષણ ઉવાચ । રવિચન્દ્રમસોર્યાવન્ મયૂખૈરવભાસ્યતે ।
૨૩.૩/૨સસમુદ્રસરિચ્છૈલા તાવતી પૃથિવી સ્મૃતા ॥ ૨૩.૩॥

૨૩.૪/૧યાવત્પ્રમાણા પૃથિવી વિસ્તારપરિમણ્ડલા ।
૨૩.૪/૨નભસ્તાવત્પ્રમાણં હિ વિસ્તારપરિમણ્ડલમ્ ॥ ૨૩.૪॥

૨૩.૫/૧ભૂમેર્યોજનલક્ષે તુ સૌરં વિપ્રાસ્તુ મણ્ડલમ્ ।
૨૩.૫/૨લક્ષે દિવાકરાચ્ચાપિ મણ્ડલં શશિનઃ સ્થિતમ્ ॥ ૨૩.૫॥

૨૩.૬/૧પૂર્ણે શતસહસ્રે તુ યોજનાનાં નિશાકરાત્ ।
૨૩.૬/૨નક્ષત્રમણ્ડલં કૃત્સ્નમુપરિષ્ટાત્ પ્રકાશતે ॥ ૨૩.૬॥

૨૩.૭/૧દ્વિલક્ષે ચોત્તરે વિપ્રા બુધો નક્ષત્રમણ્ડલાત્ ।
૨૩.૭/૨તાવત્પ્રમાણભાગે તુ બુધસ્યાપ્યુશના સ્થિતઃ ॥ ૨૩.૭॥

૨૩.૮/૧અઙ્ગારકોऽપિ શુક્રસ્ય તત્પ્રમાણે વ્યવસ્થિતઃ ।
૨૩.૮/૨લક્ષદ્વયેન ભૌમસ્ય સ્થિતો દેવપુરોહિતઃ ॥ ૨૩.૮॥

૨૩.૯/૧સૌરિર્બૃહસ્પતેરૂર્ધ્વં દ્વિલક્ષે સમવસ્થિતઃ ।
૨૩.૯/૨સપ્તર્ષિમણ્ડલં તસ્માલ્લક્ષમેકં દ્વિજોત્તમાઃ ॥ ૨૩.૯॥

૨૩.૧૦/૧ઋષિભ્યસ્તુ સહસ્રાણાં શતાદ્ ઊર્ધ્વં વ્યવસ્થિતઃ ।
૨૩.૧૦/૨મેઢીભૂતઃ સમસ્તસ્ય જ્યોતિશ્ચક્રસ્ય વૈ ધ્રુવઃ ॥ ૨૩.૧૦॥

૨૩.૧૧/૧ત્રૈલોક્યમેતત્ કથિતં સંક્ષેપેણ દ્વિજોત્તમાઃ ।
૨૩.૧૧/૨ઇજ્યાફલસ્ય ભૂરેષા ઇજ્યા ચાત્ર પ્રતિષ્ઠિતા ॥ ૨૩.૧૧॥

૨૩.૧૨/૧ધ્રુવાદ્ ઊર્ધ્વં મહર્લોકો યત્ર તે કલ્પવાસિનઃ ।
૨૩.૧૨/૨એકયોજનકોટી તુ મહર્લોકો વિધીયતે ॥ ૨૩.૧૨॥

૨૩.૧૩/૧દ્વે કોટ્યૌ તુ જનો લોકો યત્ર તે બ્રહ્મણઃ સુતાઃ ।
૨૩.૧૩/૨સનન્દનાદ્યાઃ કથિતા વિપ્રાશ્ચામલચેતસઃ ॥ ૨૩.૧૩॥

૨૩.૧૪/૧ચતુર્ગુણોત્તરં ચોર્ધ્વં જનલોકાત્ તપઃ સ્મૃતમ્ ।
૨૩.૧૪/૨વૈરાજા યત્ર તે દેવાઃ સ્થિતા દેહવિવર્જિતાઃ ॥ ૨૩.૧૪॥

૨૩.૧૫/૧ષડ્ગુણેન તપોલોકાત્ સત્યલોકો વિરાજતે ।
૨૩.૧૫/૨અપુનર્મારકં યત્ર સિદ્ધાદિમુનિસેવિતમ્ ॥ ૨૩.૧૫॥

૨૩.૧૬/૧પાદગમ્યં તુ યત્ કિંચિદ્ વસ્ત્વસ્તિ પૃથિવીમયમ્ ।
૨૩.૧૬/૨સ ભૂર્લોકઃ સમાખ્યાતો વિસ્તારોઽસ્ય મયોદિતઃ ॥ ૨૩.૧૬॥

૨૩.૧૭/૧ભૂમિસૂર્યાન્તરં યત્ તુ સિદ્ધાદિમુનિસેવિતમ્ ।
૨૩.૧૭/૨ભુવર્લોકસ્તુ સોઽપ્યુક્તો દ્વિતીયો મુનિસત્તમાઃ ॥ ૨૩.૧૭॥

૨૩.૧૮/૧ધ્રુવસૂર્યાન્તરં યત્ તુ નિયુતાનિ ચતુર્દશ ।
૨૩.૧૮/૨સ્વર્લોકઃ સોઽપિ કથિતો લોકસંસ્થાનચિન્તકૈઃ ॥ ૨૩.૧૮॥

૨૩.૧૯/૧ત્રૈલોક્યમેતત્ કૃતકં વિપ્રૈશ્ચ પરિપઠ્યતે ।
૨૩.૧૯/૨જનસ્તપસ્તથા સત્યમિતિ ચાકૃતકં ત્રયમ્ ॥ ૨૩.૧૯॥

૨૩.૨૦/૧કૃતકાકૃતકો મધ્યે મહર્લોક ઇતિ સ્મૃતઃ ।
૨૩.૨૦/૨શૂન્યો ભવતિ કલ્પાન્તે યોઽન્તં ન ચ વિનશ્યતિ ॥ ૨૩.૨૦॥

૨૩.૨૧/૧એતે સપ્ત મહાલોકા મયા વઃ કથિતા દ્વિજાઃ ।
૨૩.૨૧/૨પાતાલાનિ ચ સપ્તૈવ બ્રહ્માણ્ડસ્યૈષ વિસ્તરઃ ॥ ૨૩.૨૧॥

૨૩.૨૨/૧એતદ્ અણ્ડકટાહેન તિર્યગ્ ઊર્ધ્વમધસ્તથા ।
૨૩.૨૨/૨કપિત્થસ્ય યથા બીજં સર્વતો વૈ સમાવૃતમ્ ॥ ૨૩.૨૨॥

૨૩.૨૩/૧દશોત્તરેણ પયસા દ્વિજાશ્ચાણ્ડં ચ તદ્ વૃતમ્ ।
૨૩.૨૩/૨સ ચામ્બુપરિવારોઽસૌ વહ્નિના વેષ્ટિતો બહિઃ ॥ ૨૩.૨૩॥

૨૩.૨૪/૧વહ્નિસ્તુ વાયુના વાયુર્વિપ્રાસ્તુ નભસાવૃતઃ ।
૨૩.૨૪/૨આકાશોઽપિ મુનિશ્રેષ્ઠા મહતા પરિવેષ્ટિતઃ ॥ ૨૩.૨૪॥

૨૩.૨૫/૧દશોત્તરાણ્યશેષાણિ વિપ્રાશ્ચૈતાનિ સપ્ત વૈ ।
૨૩.૨૫/૨મહાન્તં ચ સમાવૃત્ય પ્રધાનં સમવસ્થિતમ્ ॥ ૨૩.૨૫॥

૨૩.૨૬/૧અનન્તસ્ય ન તસ્યાન્તઃ સંખ્યાનં ચાપિ વિદ્યતે ।
૨૩.૨૬/૨તદ્ અનન્તમસંખ્યાતં પ્રમાણેનાપિ વૈ યતઃ ॥ ૨૩.૨૬॥

૨૩.૨૭/૧હેતુભૂતમશેષસ્ય પ્રકૃતિઃ સા પરા દ્વિજાઃ ।
૨૩.૨૭/૨અણ્ડાનાં તુ સહસ્રાણાં સહસ્રાણ્યયુતાનિ ચ ॥ ૨૩.૨૭॥

૨૩.૨૮/૧ઈદૃશાનાં તથા તત્ર કોટિકોટિશતાનિ ચ ।

૨૩.૨૮/૨દારુણ્યગ્નિર્યથા તૈલં તિલે તદ્વત્ પુમાન્ ઇહ ॥ ૨૩.૨૮॥

૨૩.૨૯/૧પ્રધાનેઽવસ્થિતો વ્યાપી ચેતનાત્મનિવેદનઃ ।
૨૩.૨૯/૨પ્રધાનં ચ પુમાંશ્ચૈવ સર્વભૂતાનુભૂતયા ॥ ૨૩.૨૯॥

૨૩.૩૦/૧વિષ્ણુશક્ત્યા દ્વિજશ્રેષ્ઠા ધૃતૌ સંશ્રયધર્મિણૌ ।
૨૩.૩૦/૨તયોઃ સૈવ પૃથગ્ભાવે કારણં સંશ્રયસ્ય ચ ॥ ૨૩.૩૦॥

૨૩.૩૧/૧ક્ષોભકારણભૂતા ચ સર્ગકાલે દ્વિજોત્તમાઃ ।
૨૩.૩૧/૨યથા શૈત્યં જલે વાતો બિભર્તિ કણિકાગતમ્ ॥ ૨૩.૩૧॥

૨૩.૩૨/૧જગચ્છક્તિસ્તથા વિષ્ણોઃ પ્રધાનપુરુષાત્મકમ્ ।
૨૩.૩૨/૨યથા ચ પાદપો મૂલ+ ।સ્કન્ધશાખાદિસંયુતઃ ॥ ૨૩.૩૨॥

૨૩.૩૩/૧આદ્યબીજાત્ પ્રભવતિ બીજાન્યન્યાનિ વૈ તતઃ ।
૨૩.૩૩/૨પ્રભવન્તિ તતસ્તેભ્યો ભવન્ત્યન્યે પરે દ્રુમાઃ ॥ ૨૩.૩૩॥

૨૩.૩૪/૧તેઽપિ તલ્લક્ષણદ્રવ્ય+ ।કારણાનુગતા દ્વિજાઃ ।
૨૩.૩૪/૨એવમવ્યાકૃતાત્ પૂર્વં જાયન્તે મહદાદયઃ ॥ ૨૩.૩૪॥

૨૩.૩૫/૧વિશેષાન્તાસ્તતસ્તેભ્યઃ સમ્ભવન્તિ સુરાદયઃ ।
૨૩.૩૫/૨તેભ્યશ્ચ પુત્રાસ્તેષાં તુ પુત્રાણાં પરમે સુતાઃ ॥ ૨૩.૩૫॥

૨૩.૩૬/૧બીજાદ્ વૃક્ષપ્રરોહેણ યથા નાપચયસ્તરોઃ ।
૨૩.૩૬/૨ભૂતાનાં ભૂતસર્ગેણ નૈવાસ્ત્યપચયસ્તથા ॥ ૨૩.૩૬॥

૨૩.૩૭/૧સંનિધાનાદ્ યથાકાશ+ ।કાલાદ્યાઃ કારણં તરોઃ ।
૨૩.૩૭/૨તથૈવાપરિણામેન વિશ્વસ્ય ભગવાન્ હરિઃ ॥ ૨૩.૩૭॥

૨૩.૩૮/૧વ્રીહિબીજે યથા મૂલં નાલં પત્રાઙ્કુરૌ તથા ।
૨૩.૩૮/૨કાણ્ડકોષાસ્તથા પુષ્પં ક્ષીરં તદ્વચ્ચ તણ્ડુલઃ ॥ ૨૩.૩૮॥

૨૩.૩૯/૧તુષાઃ કણાશ્ચ સન્તો વૈ યાન્ત્યાવિર્ભાવમાત્મનઃ ।
૨૩.૩૯/૨પ્રરોહહેતુસામગ્ર્યમાસાદ્ય મુનિસત્તમાઃ ॥ ૨૩.૩૯॥

૨૩.૪૦/૧તથા કર્મસ્વનેકેષુ દેવાદ્યાસ્તનવઃ સ્થિતાઃ ।
૨૩.૪૦/૨વિષ્ણુશક્તિં સમાસાદ્ય પ્રરોહમુપયાન્તિ વૈ ॥ ૨૩.૪૦॥

૨૩.૪૧/૧સ ચ વિષ્ણુઃ પરં બ્રહ્મ યતઃ સર્વમિદં જગત્ ।
૨૩.૪૧/૨જગચ્ચ યો યત્ર ચેદં યસ્મિન્ વિલયમેષ્યતિ ॥ ૨૩.૪૧॥

૨૩.૪૨/૧તદ્ બ્રહ્મ પરમં ધામ સદસત્ પરમં પદમ્ ।
૨૩.૪૨/૨યસ્ય સર્વમભેદેન જગદ્ એતચ્ચરાચરમ્ ॥ ૨૩.૪૨॥

૨૩.૪૩/૧સ એવ મૂલપ્રકૃતિર્વ્યક્તરૂપી જગચ્ચ સઃ ।
૨૩.૪૩/૨તસ્મિન્ન્ એવ લયં સર્વં યાતિ તત્ર ચ તિષ્ઠતિ ॥ ૨૩.૪૩॥

૨૩.૪૪/૧કર્તા ક્રિયાણાં સ ચ ઇજ્યતે ક્રતુઃ ।
૨૩.૪૪/૨સ એવ તત્કર્મફલં ચ તસ્ય યત્ ।
૨૩.૪૪/૩યુગાદિ યસ્માચ્ચ ભવેદ્ અશેષતો ।
૨૩.૪૪/૪હરેર્ન કિંચિદ્ વ્યતિરિક્તમસ્તિ તત્ ॥ ૨૩.૪૪॥

૨૪.૧/૧લોમહર્ષણ ઉવાચ । તારામયં ભગવતઃ શિશુમારાકૃતિ પ્રભોઃ ।
૨૪.૧/૨દિવિ રૂપં હરેર્યત્ તુ તસ્ય પુચ્છે સ્થિતો ધ્રુવઃ ॥ ૨૪.૧॥

૨૪.૨/૧સએષ ભ્રમન્ ભ્રામયતિ ચન્દ્રાદિત્યાદિકાન્ ગ્રહાન્ ।
૨૪.૨/૨ભ્રમન્તમનુ તં યાન્તિ નક્ષત્રાણિ ચ ચક્રવત્ ॥ ૨૪.૨॥

૨૪.૩/૧સૂર્યાચન્દ્રમસૌ તારા નક્ષત્રાણિ ગ્રહૈઃ સહ ।
૨૪.૩/૨વાતાનીકમયૈર્બન્ધૈર્ધ્રુવે બદ્ધાનિ તાનિ વૈ ॥ ૨૪.૩॥

૨૪.૪/૧શિશુમારાકૃતિ પ્રોક્તં યદ્ રૂપં જ્યોતિષાં દિવિ ।
૨૪.૪/૨નારાયણઃ પરં ધામ તસ્યાધારઃ સ્વયં હૃદિ ॥ ૨૪.૪॥

૨૪.૫/૧ઉત્તાનપાદતનયસ્તમારાધ્ય પ્રજાપતિમ્ ।
૨૪.૫/૨સ તારાશિશુમારસ્ય ધ્રુવઃ પુચ્છે વ્યવસ્થિતઃ ॥ ૨૪.૫॥

૨૪.૬/૧આધારઃ શિશુમારસ્ય સર્વાધ્યક્ષો જનાર્દનઃ ।
૨૪.૬/૨ધ્રુવસ્ય શિશુમારશ્ચ ધ્રુવે ભાનુર્વ્યવસ્થિતઃ ॥ ૨૪.૬॥

૨૪.૭/૧તદ્ આધારં જગચ્ચેદં સદેવાસુરમાનુષમ્ ।
૨૪.૭/૨યેન વિપ્રા વિધાનેન તન્ મે શ઼ૃણુત સામ્પ્રતમ્ ॥ ૨૪.૭॥

૨૪.૮/૧વિવસ્વાન્ અષ્ટભિર્માસૈર્ગ્રસત્યપો રસાત્મિકાઃ ।
૨૪.૮/૨વર્ષત્યમ્બુ તતશ્ચાન્નમન્નાદમખિલં જગત્ ॥ ૨૪.૮॥

૨૪.૯/૧વિવસ્વાન્ અંશુભિસ્તીક્ષ્ણૈરાદાય જગતો જલમ્ ।
૨૪.૯/૨સોમં પુષ્યત્યથેન્દુશ્ચ વાયુનાડીમયૈર્દિવિ ॥ ૨૪.૯॥

૨૪.૧૦/૧જલૈર્વિક્ષિપ્યતેઽભ્રેષુ ધૂમાગ્ન્યનિલમૂર્તિષુ ।
૨૪.૧૦/૨ન ભ્રશ્યન્તિ યતસ્તેભ્યો જલાન્યભ્રાણિ તાન્યતઃ ॥ ૨૪.૧૦॥

૨૪.૧૧/૧અભ્રસ્થાઃ પ્રપતન્ત્યાપો વાયુના સમુદીરિતાઃ ।
૨૪.૧૧/૨સંસ્કારં કાલજનિતં વિપ્રાશ્ચાસાદ્ય નિર્મલાઃ ॥ ૨૪.૧૧॥

૨૪.૧૨/૧સરિત્સમુદ્રા ભૌમાસ્તુ તથાપઃ પ્રાણિસમ્ભવાઃ ।
૨૪.૧૨/૨ચતુષ્પ્રકારા ભગવાન્ આદત્તે સવિતા દ્વિજાઃ ॥ ૨૪.૧૨॥

૨૪.૧૩/૧આકાશગઙ્ગાસલિલં તથાહૃત્ય ગભસ્તિમાન્ ।
૨૪.૧૩/૨અનભ્રગતમેવોર્વ્યાં સદ્યઃ ક્ષિપતિ રશ્મિભિઃ ॥ ૨૪.૧૩॥

૨૪.૧૪/૧તસ્ય સંસ્પર્શનિર્ધૂત+ ।પાપપઙ્કો દ્વિજોત્તમાઃ ।
૨૪.૧૪/૨ન યાતિ નરકં મર્ત્યો દિવ્યં સ્નાનં હિ તત્ સ્મૃતમ્ ॥ ૨૪.૧૪॥

૨૪.૧૫/૧દૃષ્ટસૂર્યં હિ તદ્ વારિ પતત્યભ્રૈર્વિના દિવઃ ।
૨૪.૧૫/૨આકાશગઙ્ગાસલિલં તદ્ ગોભિઃ ક્ષિપ્યતે રવેઃ ॥ ૨૪.૧૫॥

૨૪.૧૬/૧કૃત્તિકાદિષુ ઋક્ષેષુ વિષમેષ્વમ્બુ યદ્ દિવઃ ।
૨૪.૧૬/૨દૃષ્ટ્વાર્કં પતિતં જ્ઞેયં તદ્ ગાઙ્ગં દિગ્ગજોજ્ઝિતમ્ ॥ ૨૪.૧૬॥

૨૪.૧૭/૧યુગ્મર્ક્ષેષુ તુ યત્ તોયં પતત્યર્કોજ્ઝિતં દિવઃ ।
૨૪.૧૭/૨તત્ સૂર્યરશ્મિભિઃ સદ્યઃ સમાદાય નિરસ્યતે ॥ ૨૪.૧૭॥

૨૪.૧૮/૧ઉભયં પુણ્યમત્યર્થં નૃણાં પાપહરં દ્વિજાઃ ।
૨૪.૧૮/૨આકાશગઙ્ગાસલિલં દિવ્યં સ્નાનં દ્વિજોત્તમાઃ ॥ ૨૪.૧૮॥

૨૪.૧૯/૧યત્ તુ મેઘૈઃ સમુત્સૃષ્ટં વારિ તત્ પ્રાણિનાં દ્વિજાઃ ।
૨૪.૧૯/૨પુષ્ણાત્યોષધયઃ સર્વા જીવનાયામૃતં હિ તત્ ॥ ૨૪.૧૯॥

૨૪.૨૦/૧તેન વૃદ્ધિં પરાં નીતઃ સકલશ્ચૌષધીગણઃ ।
૨૪.૨૦/૨સાધકઃ ફલપાકાન્તઃ પ્રજાનાં તુ પ્રજાયતે ॥ ૨૪.૨૦॥

૨૪.૨૧/૧તેન યજ્ઞાન્ યથાપ્રોક્તાન્ માનવાઃ શાસ્ત્રચક્ષુષઃ ।
૨૪.૨૧/૨કુર્વતેઽહરહશ્ચૈવ દેવાન્ આપ્યાયયન્તિ તે ॥ ૨૪.૨૧॥

૨૪.૨૨/૧એવં યજ્ઞાશ્ચ વેદાશ્ચ વર્ણાશ્ચ દ્વિજપૂર્વકાઃ ।
૨૪.૨૨/૨સર્વદેવનિકાયાશ્ચ પશુભૂતગણાશ્ચ યે ॥ ૨૪.૨૨॥

૨૪.૨૩/૧વૃષ્ટ્યા ધૃતમિદં સર્વં જગત્ સ્થાવરજઙ્ગમમ્ ।
૨૪.૨૩/૨સાપિ નિષ્પાદ્યતે વૃષ્ટિઃ સવિત્રા મુનિસત્તમાઃ ॥ ૨૪.૨૩॥

૨૪.૨૪/૧આધારભૂતઃ સવિતુર્ધ્રુવો મુનિવરોત્તમાઃ ।
૨૪.૨૪/૨ધ્રુવસ્ય શિશુમારોઽસૌ સોઽપિ નારાયણાશ્રયઃ ॥ ૨૪.૨૪॥

૨૪.૨૫/૧હૃદિ નારાયણસ્તસ્ય શિશુમારસ્ય સંસ્થિતઃ ।
૨૪.૨૫/૨વિભર્તા સર્વભૂતાનામાદિભૂતઃ સનાતનઃ ॥ ૨૪.૨૫॥

૨૪.૨૬/૧એવં મયા મુનિશ્રેષ્ઠા બ્રહ્માણ્ડં સમુદાહૃતમ્ ।
૨૪.૨૬/૨ભૂસમુદ્રાદિભિર્યુક્તં કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૨૪.૨૬॥

૨૫.૧/૧મુનય ઊચુઃ । પૃથિવ્યાં યાનિ તીર્થાનિ પુણ્યાન્યાયતનાનિ ચ ।
૨૫.૧/૨વક્તુમર્હસિ ધર્મજ્ઞ શ્રોતું નો વર્તતે મનઃ ॥ ૨૫.૧॥

૨૫.૨/૧લોમહર્ષણ ઉવાચ । યસ્ય હસ્તૌ ચ પાદૌ ચ મનશ્ચૈવ સુસંયતમ્ ।
૨૫.૨/૨વિદ્યા તપશ્ચ કીર્તિશ્ચ સ તીર્થફલમશ્નુતે ॥ ૨૫.૨॥

૨૫.૩/૧મનો વિશુદ્ધં પુરુષસ્ય તીર્થમ્ ।
૨૫.૩/૨વાચાં તથા ચેન્દ્રિયનિગ્રહશ્ચ ।
૨૫.૩/૩એતાનિ તીર્થાનિ શરીરજાનિ ।
૨૫.૩/૪સ્વર્ગસ્ય માર્ગં પ્રતિબોધયન્તિ ॥ ૨૫.૩॥

૨૫.૪/૧ચિત્તમન્તર્ગતં દુષ્ટં તીર્થસ્નાનૈર્ન શુધ્યતિ ।
૨૫.૪/૨શતશોઽપિ જલૈર્ધૌતં સુરાભાણ્ડમિવાશુચિ ॥ ૨૫.૪॥

૨૫.૫/૧ન તીર્થાનિ ન દાનાનિ ન વ્રતાનિ ન ચાશ્રમાઃ ।
૨૫.૫/૨દુષ્ટાશયં દમ્ભરુચિં પુનન્તિ વ્યુત્થિતેન્દ્રિયમ્ ॥ ૨૫.૫॥

૨૫.૬/૧ઇન્દ્રિયાણિ વશે કૃત્વા યત્ર યત્ર વસેન્ નરઃ ।
૨૫.૬/૨તત્ર તત્ર કુરુક્ષેત્રં પ્રયાગં પુષ્કરં તથા ॥ ૨૫.૬॥

૨૫.૭/૧તસ્માચ્છૃણુધ્વં વક્ષ્યામિ તીર્થાન્યાયતનાનિ ચ ।
૨૫.૭/૨સંક્ષેપેણ મુનિશ્રેષ્ઠાઃ પૃથિવ્યાં યાનિ કાનિ વૈ ॥ ૨૫.૭॥

૨૫.૮/૧વિસ્તરેણ ન શક્યન્તે વક્તું વર્ષશતૈરપિ ।
૨૫.૮/૨પ્રથમં પુષ્કરં તીર્થં નૈમિષારણ્યમેવ ચ ॥ ૨૫.૮॥

૨૫.૯/૧પ્રયાગં ચ પ્રવક્ષ્યામિ ધર્મારણ્યં દ્વિજોત્તમાઃ ।
૨૫.૯/૨ધેનુકં ચમ્પકારણ્યં સૈન્ધવારણ્યમેવ ચ ॥ ૨૫.૯॥

૨૫.૧૦/૧પુણ્યં ચ મગધારણ્યં દણ્ડકારણ્યમેવ ચ ।
૨૫.૧૦/૨ગયા પ્રભાસં શ્રીતીર્થં દિવ્યં કનખલં તથા ॥ ૨૫.૧૦॥

૨૫.૧૧/૧ભૃગુતુઙ્ગં હિરણ્યાક્ષં ભીમારણ્યં કુશસ્થલીમ્ ।

૨૫.૧૧/૨લોહાકુલં સકેદારં મન્દરારણ્યમેવ ચ ॥ ૨૫.૧૧॥

૨૫.૧૨/૧મહાબલં કોટિતીર્થં સર્વપાપહરં તથા ।
૨૫.૧૨/૨રૂપતીર્થં શૂકરવં ચક્રતીર્થં મહાફલમ્ ॥ ૨૫.૧૨॥

૨૫.૧૩/૧યોગતીર્થં સોમતીર્થં તીર્થં સાહોટકં તથા ।
૨૫.૧૩/૨તીર્થં કોકામુખં પુણ્યં બદરીશૈલમેવ ચ ॥ ૨૫.૧૩॥

૨૫.૧૪/૧સોમતીર્થં તુઙ્ગકૂટં તીર્થં સ્કન્દાશ્રમં તથા ।
૨૫.૧૪/૨કોટિતીર્થં ચાગ્નિપદં તીર્થં પઞ્ચશિખં તથા ॥ ૨૫.૧૪॥

૨૫.૧૫/૧ધર્મોદ્ભવં કોટિતીર્થં તીર્થં બાધપ્રમોચનમ્ ।
૨૫.૧૫/૨ગઙ્ગાદ્વારં પઞ્ચકૂટં મધ્યકેસરમેવ ચ ॥ ૨૫.૧૫॥

૨૫.૧૬/૧ચક્રપ્રભં મતઙ્ગં ચ કુશદણ્ડં ચ વિશ્રુતમ્ ।
૨૫.૧૬/૨દંષ્ટ્રાકુણ્ડં વિષ્ણુતીર્થં સાર્વકામિકમેવ ચ ॥ ૨૫.૧૬॥

૨૫.૧૭/૧તીર્થં મત્સ્યતિલં ચૈવ બદરી સુપ્રભં તથા ।
૨૫.૧૭/૨બ્રહ્મકુણ્ડં વહ્નિકુણ્ડં તીર્થં સત્યપદં તથા ॥ ૨૫.૧૭॥

૨૫.૧૮/૧ચતુઃસ્રોતશ્ચતુઃશૃઙ્ગં શૈલં દ્વાદશધારકમ્ ।
૨૫.૧૮/૨માનસં સ્થૂલશૃઙ્ગં ચ સ્થૂલદણ્ડં તથોર્વશી ॥ ૨૫.૧૮॥

૨૫.૧૯/૧લોકપાલં મનુવરં સોમાહ્વશૈલમેવ ચ ।
૨૫.૧૯/૨સદાપ્રભં મેરુકુણ્ડં તીર્થં સોમાભિષેચનમ્ ॥ ૨૫.૧૯॥

૨૫.૨૦/૧મહાસ્રોતં કોટરકં પઞ્ચધારં ત્રિધારકમ્ ।
૨૫.૨૦/૨સપ્તધારૈકધારં ચ તીર્થં ચામરકણ્ટકમ્ ॥ ૨૫.૨૦॥

૨૫.૨૧/૧શાલગ્રામં ચક્રતીર્થં કોટિદ્રુમમનુત્તમમ્ ।
૨૫.૨૧/૨બિલ્વપ્રભં દેવહ્રદં તીર્થં વિષ્ણુહ્રદં તથા ॥ ૨૫.૨૧॥

૨૫.૨૨/૧શઙ્ખપ્રભં દેવકુણ્ડં તીર્થં વજ્રાયુધં તથા ।
૨૫.૨૨/૨અગ્નિપ્રભં ચ પુંનાગં દેવપ્રભમનુત્તમમ્ ॥ ૨૫.૨૨॥

૨૫.૨૩/૧વિદ્યાધરં સગાન્ધર્વં શ્રીતીર્થં બ્રહ્મણો હ્રદમ્ ।
૨૫.૨૩/૨સાતીર્થં લોકપાલાખ્યં મણિપુરગિરિં તથા ॥ ૨૫.૨૩॥

૨૫.૨૪/૧તીર્થં પઞ્ચહ્રદં ચૈવ પુણ્યં પિણ્ડારકં તથા ।
૨૫.૨૪/૨મલવ્યં ગોપ્રભાવં ચ ગોવરં વટમૂલકમ્ ॥ ૨૫.૨૪॥

૨૫.૨૫/૧સ્નાનદણ્ડં પ્રયાગં ચ ગુહ્યં વિષ્ણુપદં તથા ।
૨૫.૨૫/૨કન્યાશ્રમં વાયુકુણ્ડં જમ્બૂમાર્ગં તથોત્તમમ્ ॥ ૨૫.૨૫॥

૨૫.૨૬/૧ગભસ્તિતીર્થં ચ તથા યયાતિપતનં શુચિ ।
૨૫.૨૬/૨કોટિતીર્થં ભદ્રવટં મહાકાલવનં તથા ॥ ૨૫.૨૬॥

૨૫.૨૭/૧નર્મદાતીર્થમપરં તીર્થવજ્રં તથાર્બુદમ્ ।
૨૫.૨૭/૨પિઙ્ગુતીર્થં સવાસિષ્ઠં તીર્થં ચ પૃથસંગમમ્ ॥ ૨૫.૨૭॥

૨૫.૨૮/૧તીર્થં દૌર્વાસિકં નામ તથા પિઞ્જરકં શુભમ્ ।
૨૫.૨૮/૨ઋષિતીર્થં બ્રહ્મતુઙ્ગં વસુતીર્થં કુમારિકમ્ ॥ ૨૫.૨૮॥

૨૫.૨૯/૧શક્રતીર્થં પઞ્ચનદં રેણુકાતીર્થમેવ ચ ।
૨૫.૨૯/૨પૈતામહં ચ વિમલં રુદ્રપાદં તથોત્તમમ્ ॥ ૨૫.૨૯॥

૨૫.૩૦/૧મણિમત્તં ચ કામાખ્યં કૃષ્ણતીર્થં કુશાવિલમ્ ।
૨૫.૩૦/૨યજનં યાજનં ચૈવ તથૈવ બ્રહ્મવાલુકમ્ ॥ ૨૫.૩૦॥

૨૫.૩૧/૧પુષ્પન્યાસં પુણ્ડરીકં મણિપૂરં તથોત્તરમ્ ।
૨૫.૩૧/૨દીર્ઘસત્ત્રં હયપદં તીર્થં ચાનશનં તથા ॥ ૨૫.૩૧॥

૨૫.૩૨/૧ગઙ્ગોદ્ભેદં શિવોદ્ભેદં નર્મદોદ્ભેદમેવ ચ ।
૨૫.૩૨/૨વસ્ત્રાપદં દારુવલં છાયારોહણમેવ ચ ॥ ૨૫.૩૨॥

૨૫.૩૩/૧સિદ્ધેશ્વરં મિત્રવલં કાલિકાશ્રમમેવ ચ ।
૨૫.૩૩/૨વટાવટં ભદ્રવટં કૌશામ્બી ચ દિવાકરમ્ ॥ ૨૫.૩૩॥

૨૫.૩૪/૧દ્વીપં સારસ્વતં ચૈવ વિજયં કામદં તથા ।
૨૫.૩૪/૨રુદ્રકોટિં સુમનસં તીર્થં સદ્રાવનામિતમ્ ॥ ૨૫.૩૪॥

૨૫.૩૫/૧સ્યમન્તપઞ્ચકં તીર્થં બ્રહ્મતીર્થં સુદર્શનમ્ ।
૨૫.૩૫/૨સતતં પૃથિવીસર્વં પારિપ્લવપૃથૂદકૌ ॥ ૨૫.૩૫॥

૨૫.૩૬/૧દશાશ્વમેધિકં તીર્થં સર્પિજં વિષયાન્તિકમ્ ।
૨૫.૩૬/૨કોટિતીર્થં પઞ્ચનદં વારાહં યક્ષિણીહ્રદમ્ ॥ ૨૫.૩૬॥

૨૫.૩૭/૧પુણ્ડરીકં સોમતીર્થં મુઞ્જવટં તથોત્તમમ્ ।
૨૫.૩૭/૨બદરીવનમાસીનં રત્નમૂલકમેવ ચ ॥ ૨૫.૩૭॥

૨૫.૩૮/૧લોકદ્વારં પઞ્ચતીર્થં કપિલાતીર્થમેવ ચ ।
૨૫.૩૮/૨સૂર્યતીર્થં શઙ્ખિની ચ ગવાં ભવનમેવ ચ ॥ ૨૫.૩૮॥

૨૫.૩૯/૧તીર્થં ચ યક્ષરાજસ્ય બ્રહ્માવર્તં સુતીર્થકમ્ ।
૨૫.૩૯/૨કામેશ્વરં માત્રિતીર્થં તીર્થં શીતવનં તથા ॥ ૨૫.૩૯॥

૨૫.૪૦/૧સ્નાનલોમાપહં ચૈવ માસસંસરકં તથા ।
૨૫.૪૦/૨દશાશ્વમેધં કેદારં બ્રહ્મોદુમ્બરમેવ ચ ॥ ૨૫.૪૦॥

૨૫.૪૧/૧સમર્ષિકુણ્ડં ચ તથા તીર્થં દેવ્યાઃ સુજમ્બુકમ્ ।
૨૫.૪૧/૨ઈટાસ્પદં કોટિકૂટં કિંદાનં કિંજપં તથા ॥ ૨૫.૪૧॥

૨૫.૪૨/૧કારણ્ડવં ચાવેધ્યં ચ ત્રિવિષ્ટપમથાપરમ્ ।
૨૫.૪૨/૨પાણિષાતં મિશ્રકં ચ મધૂવટમનોજવૌ ॥ ૨૫.૪૨॥

૨૫.૪૩/૧કૌશિકી દેવતીર્થં ચ તીર્થં ચ ઋણમોચનમ્ ।
૨૫.૪૩/૨દિવ્યં ચ નૃગધૂમાખ્યં તીર્થં વિષ્ણુપદં તથા ॥ ૨૫.૪૩॥

૨૫.૪૪/૧અમરાણાં હ્રદં પુણ્યં કોટિતીર્થં તથાપરમ્ ।
૨૫.૪૪/૨શ્રીકુઞ્જં શાલિતીર્થં ચ નૈમિષેયં ચ વિશ્રુતમ્ ॥ ૨૫.૪૪॥

૨૫.૪૫/૧બ્રહ્મસ્થાનં સોમતીર્થં કન્યાતીર્થં તથૈવ ચ ।
૨૫.૪૫/૨બ્રહ્મતીર્થં મનસ્તીર્થં તીર્થં વૈ કારુપાવનમ્ ॥ ૨૫.૪૫॥

૨૫.૪૬/૧સૌગન્ધિકવનં ચૈવ મણિતીર્થં સરસ્વતી ।
૨૫.૪૬/૨ઈશાનતીર્થં પ્રવરં પાવનં પાઞ્ચયજ્ઞિકમ્ ॥ ૨૫.૪૬॥

૨૫.૪૭/૧ત્રિશૂલધારં માહેન્દ્રં દેવસ્થાનં કૃતાલયમ્ ।
૨૫.૪૭/૨શાકમ્ભરી દેવતીર્થં સુવર્ણાખ્યં કિલં હ્રદમ્ ॥ ૨૫.૪૭॥

૨૫.૪૮/૧ક્ષીરશ્રવં વિરૂપાક્ષં ભૃગુતીર્થં કુશોદ્ભવમ્ ।
૨૫.૪૮/૨બ્રહ્મતીર્થં બ્રહ્મયોનિં નીલપર્વતમેવ ચ ॥ ૨૫.૪૮॥

૨૫.૪૯/૧કુબ્જામ્બકં ભદ્રવટં વસિષ્ઠપદમેવ ચ ।
૨૫.૪૯/૨સ્વર્ગદ્વારં પ્રજાદ્વારં કાલિકાશ્રમમેવ ચ ॥ ૨૫.૪૯॥

૨૫.૫૦/૧રુદ્રાવર્તં સુગન્ધાશ્વં કપિલાવનમેવ ચ ।
૨૫.૫૦/૨ભદ્રકર્ણહ્રદં ચૈવ શઙ્કુકર્ણહ્રદં તથા ॥ ૨૫.૫૦॥

૨૫.૫૧/૧સપ્તસારસ્વતં ચૈવ તીર્થમૌશનસં તથા ।
૨૫.૫૧/૨કપાલમોચનં ચૈવ અવકીર્ણં ચ કામ્યકમ્ ॥ ૨૫.૫૧॥

૨૫.૫૨/૧ચતુઃસામુદ્રિકં ચૈવ શતકિં ચ સહસ્રિકમ્ ।

૨૫.૫૨/૨રેણુકં પઞ્ચવટકં વિમોચનમથૌજસમ્ ॥ ૨૫.૫૨॥

૨૫.૫૩/૧સ્થાણુતીર્થં કુરોસ્તીર્થં સ્વર્ગદ્વારં કુશધ્વજમ્ ।
૨૫.૫૩/૨વિશ્વેશ્વરં માનવકં કૂપં નારાયણાશ્રયમ્ ॥ ૨૫.૫૩॥

૨૫.૫૪/૧ગઙ્ગાહ્રદં વટં ચૈવ બદરીપાટનં તથા ।
૨૫.૫૪/૨ઇન્દ્રમાર્ગમેકરાત્રં ક્ષીરકાવાસમેવ ચ ॥ ૨૫.૫૪॥

૨૫.૫૫/૧સોમતીર્થં દધીચં ચ શ્રુતતીર્થં ચ ભો દ્વિજાઃ ।
૨૫.૫૫/૨કોટિતીર્થસ્થલીં ચૈવ ભદ્રકાલીહ્રદં તથા ॥ ૨૫.૫૫॥

૨૫.૫૬/૧અરુન્ધતીવનં ચૈવ બ્રહ્માવર્તં તથોત્તમમ્ ।
૨૫.૫૬/૨અશ્વવેદી કુબ્જાવનં યમુનાપ્રભવં તથા ॥ ૨૫.૫૬॥

૨૫.૫૭/૧વીરં પ્રમોક્ષં સિન્ધૂત્થમ્ ઋષ કુલ્યા સકૃત્તિકમ્ ।
૨૫.૫૭/૨ઉર્વીસંક્રમણં ચૈવ માયાવિદ્યોદ્ભવં તથા ॥ ૨૫.૫૭॥

૨૫.૫૮/૧મહાશ્રમો વૈતસિકા+ ।રૂપં સુન્દરિકાશ્રમમ્ ।
૨૫.૫૮/૨બાહુતીર્થં ચારુનદીં વિમલાશોકમેવ ચ ॥ ૨૫.૫૮॥

૨૫.૫૯/૧તીર્થં પઞ્ચનદં ચૈવ માર્કણ્ડેયસ્ય ધીમતઃ ।
૨૫.૫૯/૨સોમતીર્થં સિતોદં ચ તીર્થં મત્સ્યોદરીં તથા ॥ ૨૫.૫૯॥

૨૫.૬૦/૧સૂર્યપ્રભં સૂર્યતીર્થમશોકવનમેવ ચ ।
૨૫.૬૦/૨અરુણાસ્પદં કામદં ચ શુક્રતીર્થં સવાલુકમ્ ॥ ૨૫.૬૦॥

૨૫.૬૧/૧પિશાચમોચનં ચૈવ સુભદ્રાહ્રદમેવ ચ ।
૨૫.૬૧/૨કુણ્ડં વિમલદણ્ડસ્ય તીર્થં ચણ્ડેશ્વરસ્ય ચ ॥ ૨૫.૬૧॥

૨૫.૬૨/૧જ્યેષ્ઠસ્થાનહ્રદં ચૈવ પુણ્યં બ્રહ્મસરં તથા ।
૨૫.૬૨/૨જૈગીષવ્યગુહા ચૈવ હરિકેશવનં તથા ॥ ૨૫.૬૨॥

૨૫.૬૩/૧અજામુખસરં ચૈવ ઘણ્ટાકર્ણહ્રદં તથા ।
૨૫.૬૩/૨પુણ્ડરીકહ્રદં ચૈવ વાપી કર્કોટકસ્ય ચ ॥ ૨૫.૬૩॥

૨૫.૬૪/૧સુવર્ણસ્યોદપાનં ચ શ્વેતતીર્થહ્રદં તથા ।
૨૫.૬૪/૨કુણ્ડં ઘર્ઘરિકાયાશ્ચ શ્યામકૂપં ચ ચન્દ્રિકા ॥ ૨૫.૬૪॥

૨૫.૬૫/૧શ્મશાનસ્તમ્ભકૂપં ચ વિનાયકહ્રદં તથા ।
૨૫.૬૫/૨કૂપં સિન્ધૂદ્ભવં ચૈવ પુણ્યં બ્રહ્મસરં તથા ॥ ૨૫.૬૫॥

૨૫.૬૬/૧રુદ્રાવાસં તથા તીર્થં નાગતીર્થં પુલોમકમ્ ।
૨૫.૬૬/૨ભક્તહ્રદં ક્ષીરસરઃ પ્રેતાધારં કુમારકમ્ ॥ ૨૫.૬૬॥

૨૫.૬૭/૧બ્રહ્માવર્તં કુશાવર્તં દધિકર્ણોદપાનકમ્ ।
૨૫.૬૭/૨શૃઙ્ગતીર્થં મહાતીર્થં તીર્થશ્રેષ્ઠા મહાનદી ॥ ૨૫.૬૭॥

૨૫.૬૮/૧દિવ્યં બ્રહ્મસરં પુણ્યં ગયાશીર્ષાક્ષયં વટમ્ ।
૨૫.૬૮/૨દક્ષિણં ચોત્તરં ચૈવ ગોમયં રૂપશીતિકમ્ ॥ ૨૫.૬૮॥

૨૫.૬૯/૧કપિલાહ્રદં ગૃધ્રવટં સાવિત્રીહ્રદમેવ ચ ।
૨૫.૬૯/૨પ્રભાસનં સીતવનં યોનિદ્વારં ચ ધેનુકમ્ ॥ ૨૫.૬૯॥

૨૫.૭૦/૧ધન્યકં કોકિલાખ્યં ચ મતઙ્ગહ્રદમેવ ચ ।
૨૫.૭૦/૨પિતૃકૂપં રુદ્રતીર્થં શક્રતીર્થં સુમાલિનમ્ ॥ ૨૫.૭૦॥

૨૫.૭૧/૧બ્રહ્મસ્થાનં સપ્તકુણ્ડં મણિરત્નહ્રદં તથા ।
૨૫.૭૧/૨કૌશિક્યં ભરતં ચૈવ તીર્થં જ્યેષ્ઠાલિકા તથા ॥ ૨૫.૭૧॥

૨૫.૭૨/૧વિશ્વેશ્વરં કલ્પસરઃ કન્યાસંવેત્યમેવ ચ ।
૨૫.૭૨/૨નિશ્ચીવા પ્રભવશ્ચૈવ વસિષ્ઠાશ્રમમેવ ચ ॥ ૨૫.૭૨॥

૨૫.૭૩/૧દેવકૂટં ચ કૂપં ચ વસિષ્ઠાશ્રમમેવ ચ ।
૨૫.૭૩/૨વીરાશ્રમં બ્રહ્મસરો બ્રહ્મવીરાવકાપિલી ॥ ૨૫.૭૩॥

૨૫.૭૪/૧કુમારધારા શ્રીધારા ગૌરીશિખરમેવ ચ ।
૨૫.૭૪/૨શુનઃ કુણ્ડોઽથ તીર્થં ચ નન્દિતીર્થં તથૈવ ચ ॥ ૨૫.૭૪॥

૨૫.૭૫/૧કુમારવાસં શ્રીવાસમૌર્વીશીતાર્થમેવ ચ ।
૨૫.૭૫/૨કુમ્ભકર્ણહ્રદં ચૈવ કૌશિકીહ્રદમેવ ચ ॥ ૨૫.૭૫॥

૨૫.૭૬/૧ધર્મતીર્થં કામતીર્થં તીર્થમુદ્દાલકં તથા ।
૨૫.૭૬/૨સંધ્યાતીર્થં કારતોયં કપિલં લોહિતાર્ણવમ્ ॥ ૨૫.૭૬॥

૨૫.૭૭/૧શોણોદ્ભવં વંશગુલ્મમ્ ઋષભં કલતીર્થકમ્ ।
૨૫.૭૭/૨પુણ્યાવતીહ્રદં તીર્થં તીર્થં બદરિકાશ્રમમ્ ॥ ૨૫.૭૭॥

૨૫.૭૮/૧રામતીર્થં પિતૃવનં વિરજાતીર્થમેવ ચ ।
૨૫.૭૮/૨માર્કણ્ડેયવનં ચૈવ કૃષ્ણતીર્થં તથા વટમ્ ॥ ૨૫.૭૮॥

૨૫.૭૯/૧રોહિણીકૂપપ્રવરમિન્દ્રદ્યુમ્નસરં ચ યત્ ।
૨૫.૭૯/૨સાનુગર્તં સમાહેન્દ્રં શ્રીતીર્થં શ્રીનદં તથા ॥ ૨૫.૭૯॥

૨૫.૮૦/૧ઇષુતીર્થં વાર્ષભં ચ કાવેરીહ્રદમેવ ચ ।
૨૫.૮૦/૨કન્યાતીર્થં ચ ગોકર્ણં ગાયત્રીસ્થાનમેવ ચ ॥ ૨૫.૮૦॥

૨૫.૮૧/૧બદરીહ્રદમન્યચ્ચ મધ્યસ્થાનં વિકર્ણકમ્ ।
૨૫.૮૧/૨જાતીહ્રદં દેવકૂપં કુશપ્રવણમેવ ચ ॥ ૨૫.૮૧॥

૨૫.૮૨/૧સર્વદેવવ્રતં ચૈવ કન્યાશ્રમહ્રદં તથા ।
૨૫.૮૨/૨તથાન્યદ્ વાલખિલ્યાનાં સપૂર્વાણાં તથાપરમ્ ॥ ૨૫.૮૨॥

૨૫.૮૩/૧તથાન્યચ્ચ મહર્ષીણામખણ્ડિતહ્રદં તથા ।
૨૫.૮૩/૨તીર્થેષ્વેતેષુ વિધિવત્ સમ્યક્ શ્રદ્ધાસમન્વિતઃ ॥ ૨૫.૮૩॥

૨૫.૮૪/૧સ્નાનં કરોતિ યો મર્ત્યઃ સોપવાસો જિતેન્દ્રિયઃ ।
૨૫.૮૪/૨દેવાન્ ઋષીન્ મનુષ્યાંશ્ચ પિતૃન્ સંતર્પ્ય ચ ક્રમાત્ ॥ ૨૫.૮૪॥

૨૫.૮૫/૧અભ્યર્ચ્ય દેવતાસ્તત્ર સ્થિત્વા ચ રજનીત્રયમ્ ।
૨૫.૮૫/૨પૃથક્ પૃથક્ ફલં તેષુ પ્રતિતીર્થેષુ ભો દ્વિજાઃ ॥ ૨૫.૮૫॥

૨૫.૮૬/૧પ્રાપ્નોતિ હયમેધસ્ય નરો નાસ્ત્યત્ર સંશયઃ ।
૨૫.૮૬/૨યસ્ત્વિદં શ ृણુયાન્ નિત્યં તીર્થમાહાત્મ્યમુત્તમમ્ ।
૨૫.૮૬/૩પઠેચ્ચ શ્રાવયેદ્ વાપિ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૫.૮૬॥

૨૬.૧/૧મુનય ઊચુઃ । પૃથિવ્યામુત્તમાં ભૂમિં ધર્મકામાર્થમોક્ષદામ્ ।
૨૬.૧/૨તીર્થાનામુત્તમં તીર્થં બ્રૂહિ નો વદતાં વર ॥ ૨૬.૧॥

૨૬.૨/૧લોમહર્ષણ ઉવાચ । ઇમં પ્રશ્નં મમ ગુરું પપ્રચ્છુર્મુનયઃ પુરા ।
૨૬.૨/૨તમહં સમ્પ્રવક્ષ્યામિ યત્ પૃચ્છધ્વં દ્વિજોત્તમાઃ ॥ ૨૬.૨॥

૨૬.૩/૧સ્વાશ્રમે સુમહાપુણ્યે નાનાપુષ્પોપશોભિતે ।
૨૬.૩/૨નાનાદ્રુમલતાકીર્ણે નાનામૃગગણૈર્યુતે ॥ ૨૬.૩॥

૨૬.૪/૧પુંનાગૈઃ કર્ણિકારૈશ્ચ સરલૈર્દેવદારુભિઃ ।
૨૬.૪/૨શાલૈસ્તાલૈસ્તમાલૈશ્ચ પનસૈર્ધવખાદિરૈઃ ॥ ૨૬.૪॥

૨૬.૫/૧પાટલાશોકબકુલૈઃ કરવીરૈઃ સચમ્પકૈઃ ।
૨૬.૫/૨અન્યૈશ્ચ વિવિધૈર્વૃક્ષૈર્નાનાપુષ્પોપશોભિતૈઃ ॥ ૨૬.૫॥

૨૬.૬/૧કુરુક્ષેત્રે સમાસીનં વ્યાસં મતિમતાં વરમ્ ।
૨૬.૬/૨મહાભારતકર્તારં સર્વશાસ્ત્રવિશારદમ્ ॥ ૨૬.૬॥

૨૬.૭/૧અધ્યાત્મનિષ્ઠં સર્વજ્ઞં સર્વભૂતહિતે રતમ્ ।
૨૬.૭/૨પુરાણાગમવક્તારં વેદવેદાઙ્ગપારગમ્ ॥ ૨૬.૭॥

૨૬.૮/૧પરાશરસુતં શાન્તં પદ્મપત્રાયતેક્ષણમ્ ।
૨૬.૮/૨દ્રષ્ટુમભ્યાયયુઃ પ્રીત્યા મુનયઃ સંશિતવ્રતાઃ ॥ ૨૬.૮॥

૨૬.૯/૧કશ્યપો જમદગ્નિશ્ચ ભરદ્વાજોઽથ ગૌતમઃ ।
૨૬.૯/૨વસિષ્ઠો જૈમિનિર્ધૌમ્યો માર્કણ્ડેયોઽથ વાલ્મિકિઃ ॥ ૨૬.૯॥

૨૬.૧૦/૧વિશ્વામિત્રઃ શતાનન્દો વાત્સ્યો ગાર્ગ્યોઽથ આસુરિઃ ।
૨૬.૧૦/૨સુમન્તુર્ભાર્ગવો નામ કણ્વો મેધાતિથિર્ગુરુઃ ॥ ૨૬.૧૦॥

૨૬.૧૧/૧માણ્ડવ્યશ્ચ્યવનો ધૂમ્રો હ્યસિતો દેવલસ્તથા ।
૨૬.૧૧/૨મૌદ્ગલ્યસ્તૃણયજ્ઞશ્ચ પિપ્પલાદોઽકૃતવ્રણઃ ॥ ૨૬.૧૧॥

૨૬.૧૨/૧સંવર્તઃ કૌશિકો રૈભ્યો મૈત્રેયો હરિતસ્તથા ।
૨૬.૧૨/૨શાણ્ડિલ્યશ્ચ વિભાણ્ડશ્ચ દુર્વાસા લોમશસ્તથા ॥ ૨૬.૧૨॥

૨૬.૧૩/૧નારદઃ પર્વતશ્ચૈવ વૈશમ્પાયનગાલવૌ ।
૨૬.૧૩/૨ભાસ્કરિઃ પૂરણઃ સૂતઃ પુલસ્ત્યઃ કપિલસ્તથા ॥ ૨૬.૧૩॥

૨૬.૧૪/૧ઉલૂકઃ પુલહો વાયુર્દેવસ્થાનશ્ચતુર્ભુજઃ ।
૨૬.૧૪/૨સનત્કુમારઃ પૈલશ્ચ કૃષ્ણઃ કૃષ્ણાનુભૌતિકઃ ॥ ૨૬.૧૪॥

૨૬.૧૫/૧એતૈર્મુનિવરૈશ્ચાન્યૈર્વૃતઃ સત્યવતીસુતઃ ।
૨૬.૧૫/૨રરાજ સ મુનિઃ શ્રીમાન્ નક્ષત્રૈરિવ ચન્દ્રમાઃ ॥ ૨૬.૧૫॥

૨૬.૧૬/૧તાન્ આગતાન્ મુનીન્ સર્વાન્ પૂજયામાસ વેદવિત્ ।
૨૬.૧૬/૨તેઽપિ તં પ્રતિપૂજ્યૈવ કથાં ચક્રુઃ પરસ્પરમ્ ॥ ૨૬.૧૬॥

૨૬.૧૭/૧કથાન્તે તે મુનિશ્રેષ્ઠાઃ કૃષ્ણં સત્યવતીસુતમ્ ।
૨૬.૧૭/૨પપ્રચ્છુઃ સંશયં સર્વે તપોવનનિવાસિનઃ ॥ ૨૬.૧૭॥

૨૬.૧૮/૧મુનય ઊચુઃ । મુને વેદાંશ્ચ શાસ્ત્રાણિ પુરાણાગમભારતમ્ ।
૨૬.૧૮/૨ભૂતં ભવ્યં ભવિષ્યં ચ સર્વં જાનાસિ વાઙ્મયમ્ ॥ ૨૬.૧૮॥

૨૬.૧૯/૧કષ્ટેઽસ્મિન્ દુઃખબહુલે નિઃસારે ભવસાગરે ।
૨૬.૧૯/૨રાગગ્રાહાકુલે રૌદ્રે વિષયોદકસમ્પ્લવે ॥ ૨૬.૧૯॥

૨૬.૨૦/૧ઇન્દ્રિયાવર્તકલિલે દૃષ્ટોર્મિશતસંકુલે ।
૨૬.૨૦/૨મોહપઙ્કાવિલે દુર્ગે લોભગમ્ભીરદુસ્તરે ॥ ૨૬.૨૦॥

૨૬.૨૧/૧નિમજ્જજ્જગદ્ આલોક્ય નિરાલમ્બમચેતનમ્ ।
૨૬.૨૧/૨પૃચ્છામસ્ત્વાં મહાભાગં બ્રૂહિ નો મુનિસત્તમ ॥ ૨૬.૨૧॥

૨૬.૨૨/૧શ્રેયઃ કિમત્ર સંસારે ભૈરવે લોમહર્ષણે ।
૨૬.૨૨/૨ઉપદેશપ્રદાનેન લોકાન્ ઉદ્ધર્તુમર્હસિ ॥ ૨૬.૨૨॥

૨૬.૨૩/૧દુર્લભં પરમં ક્ષેત્રં વક્તુમર્હસિ મોક્ષદમ્ ।
૨૬.૨૩/૨પૃથિવ્યાં કર્મભૂમિં ચ શ્રોતુમિચ્છામહે વયમ્ ॥ ૨૬.૨૩॥

૨૬.૨૪/૧કૃત્વા કિલ નરઃ સમ્યક્ કર્મ ભૂમૌ યથોદિતમ્ ।
૨૬.૨૪/૨પ્રાપ્નોતિ પરમાં સિદ્ધિં નરકં ચ વિકર્મતઃ ॥ ૨૬.૨૪॥

૨૬.૨૫/૧મોક્ષક્ષેત્રે તથા મોક્ષં પ્રાપ્નોતિ પુરુષઃ સુધીઃ ।
૨૬.૨૫/૨તસ્માદ્ બ્રૂહિ મહાપ્રાજ્ઞ યત્ પૃષ્ટોઽસિ દ્વિજોત્તમ ॥ ૨૬.૨૫॥

૨૬.૨૬/૧શ્રુત્વા તુ વચનં તેષાં મુનીનાં ભાવિતાત્મનામ્ ।
૨૬.૨૬/૨વ્યાસઃ પ્રોવાચ ભગવાન્ ભૂતભવ્યભવિષ્યવિત્ ॥ ૨૬.૨૬॥

૨૬.૨૭/૧વ્યાસ ઉવાચ । શ઼ૃણુધ્વં મુનયઃ સર્વે વક્ષ્યામિ યદિ પૃચ્છથ ।
૨૬.૨૭/૨યઃ સંવાદોઽભવત્ પૂર્વમ્ ઋષીણાં બ્રહ્મણા સહ ॥ ૨૬.૨૭॥

૨૬.૨૮/૧મેરુપૃષ્ઠે તુ વિસ્તીર્ણે નાનારત્નવિભૂષિતે ।
૨૬.૨૮/૨નાનાદ્રુમલતાકીર્ણે નાનાપુષ્પોપશોભિતે ॥ ૨૬.૨૮॥

૨૬.૨૯/૧નાનાપક્ષિરુતે રમ્યે નાનાપ્રસવનાકુલે ।
૨૬.૨૯/૨નાનાસત્ત્વસમાકીર્ણે નાનાશ્ચર્યસમન્વિતે ॥ ૨૬.૨૯॥

૨૬.૩૦/૧નાનાવર્ણશિલાકીર્ણે નાનાધાતુવિભૂષિતે ।
૨૬.૩૦/૨નાનામુનિજનાકીર્ણે નાનાશ્રમસમન્વિતે ॥ ૨૬.૩૦॥

૨૬.૩૧/૧તત્રાસીનં જગન્નાથં જગદ્યોનિં ચતુર્મુખમ્ ।
૨૬.૩૧/૨જગત્પતિં જગદ્વન્દ્યં જગદાધારમીશ્વરમ્ ॥ ૨૬.૩૧॥

૨૬.૩૨/૧દેવદાનવગન્ધર્વૈર્યક્ષવિદ્યાધરોરગૈઃ ।
૨૬.૩૨/૨મુનિસિદ્ધાપ્સરોભિશ્ચ વૃતમન્યૈર્દિવાલયૈઃ ॥ ૨૬.૩૨॥

૨૬.૩૩/૧કેચિત્ સ્તુવન્તિ તં દેવં કેચિદ્ ગાયન્તિ ચાગ્રતઃ ।
૨૬.૩૩/૨કેચિદ્ વાદ્યાનિ વાદ્યન્તે કેચિન્ નૃત્યન્તિ ચાપરે ॥ ૨૬.૩૩॥

૨૬.૩૪/૧એવં પ્રમુદિતે કાલે સર્વભૂતસમાગમે ।

૨૬.૩૪/૨નાનાકુસુમગન્ધાઢ્યે દક્ષિણાનિલસેવિતે ॥ ૨૬.૩૪॥

૨૬.૩૫/૧ભૃગ્વાદ્યાસ્તં તદા દેવં પ્રણિપત્ય પિતામહમ્ ।
૨૬.૩૫/૨ઇમમર્થમ્ ઋષિવરાઃ પપ્રચ્છુઃ પિતરં દ્વિજાઃ ॥ ૨૬.૩૫॥

૨૬.૩૬/૧ઋષય ઊચુઃ । ભગવઞ્ શ્રોતુમિચ્છામઃ કર્મભૂમિં મહીતલે ।
૨૬.૩૬/૨વક્તુમર્હસિ દેવેશ મોક્ષક્ષેત્રં ચ દુર્લભમ્ ॥ ૨૬.૩૬॥

૨૬.૩૭/૧વ્યાસ ઉવાચ । તેષાં વચનમાકર્ણ્ય પ્રાહ બ્રહ્મા સુરેશ્વરઃ ।
૨૬.૩૭/૨પપ્રચ્છુસ્તે યથા પ્રશ્નં તત્ સર્વં મુનિસત્તમાઃ ॥ ૨૬.૩૭॥

૨૭.૧/૧બ્રહ્મોવાચ । શ઼ૃણુધ્વં મુનયઃ સર્વે યદ્ વો વક્ષ્યામિ સામ્પ્રતમ્ ।
૨૭.૧/૨પુરાણં વેદસમ્બદ્ધં ભુક્તિમુક્તિપ્રદં શુભમ્ ॥ ૨૭.૧॥

૨૭.૨/૧પૃથિવ્યાં ભારતં વર્ષં કર્મભૂમિરુદાહૃતા ।
૨૭.૨/૨કર્મણઃ ફલભૂમિશ્ચ સ્વર્ગં ચ નરકં તથા ॥ ૨૭.૨॥

૨૭.૩/૧તસ્મિન્ વર્ષે નરઃ પાપં કૃત્વા ધર્મં ચ ભો દ્વિજાઃ ।
૨૭.૩/૨અવશ્યં ફલમાપ્નોતિ અશુભસ્ય શુભસ્ય ચ ॥ ૨૭.૩॥

૨૭.૪/૧બ્રાહ્મણાદ્યાઃ સ્વકં કર્મ કૃત્વા સમ્યક્ સુસંયતાઃ ।
૨૭.૪/૨પ્રાપ્નુવન્તિ પરાં સિદ્ધિં તસ્મિન્ વર્ષે ન સંશયઃ ॥ ૨૭.૪॥

૨૭.૫/૧ધર્મં ચાર્થં ચ કામં ચ મોક્ષં ચ દ્વિજસત્તમાઃ ।
૨૭.૫/૨પ્રાપ્નોતિ પુરુષઃ સર્વં તસ્મિન્ વર્ષે સુસંયતઃ ॥ ૨૭.૫॥

૨૭.૬/૧ઇન્દ્રાદ્યાશ્ચ સુરાઃ સર્વે તસ્મિન્ વર્ષે દ્વિજોત્તમાઃ ।
૨૭.૬/૨કૃત્વા સુશોભનં કર્મ દેવત્વં પ્રતિપેદિરે ॥ ૨૭.૬॥

૨૭.૭/૧અન્યેઽપિ લેભિરે મોક્ષં પુરુષાઃ સંયતેન્દ્રિયાઃ ।
૨૭.૭/૨તસ્મિન્ વર્ષે બુધાઃ શાન્તા વીતરાગા વિમત્સરાઃ ॥ ૨૭.૭॥

૨૭.૮/૧યે ચાપિ સ્વર્ગે તિષ્ઠન્તિ વિમાનેન ગતજ્વરાઃ ।
૨૭.૮/૨તેઽપિ કૃત્વા શુભં કર્મ તસ્મિન્ વર્ષે દિવં ગતાઃ ॥ ૨૭.૮॥

૨૭.૯/૧નિવાસં ભારતે વર્ષે આકાઙ્ક્ષન્તિ સદા સુરાઃ ।
૨૭.૯/૨સ્વર્ગાપવર્ગફલદે તત્ પશ્યામઃ કદા વયમ્ ॥ ૨૭.૯॥

૨૭.૧૦/૧મુનય ઊચુઃ । યદ્ એતદ્ ભવતા પ્રોક્તં કર્મ નાન્યત્ર પુણ્યદમ્ ।
૨૭.૧૦/૨પાપાય વા સુરશ્રેષ્ઠ વર્જયિત્વા ચ ભારતમ્ ॥ ૨૭.૧૦॥

૨૭.૧૧/૧તતઃ સ્વર્ગશ્ચ મોક્ષશ્ચ મધ્યમં તચ્ચ ગમ્યતે ।
૨૭.૧૧/૨ન ખલ્વન્યત્ર મર્ત્યાનાં ભૂમૌ કર્મ વિધીયતે ॥ ૨૭.૧૧॥

૨૭.૧૨/૧તસ્માદ્ વિસ્તરતો બ્રહ્મન્ અસ્માકં ભારતં વદ ।
૨૭.૧૨/૨યદિ તેઽસ્તિ દયાસ્માસુ યથાવસ્થિતિરેવ ચ ॥ ૨૭.૧૨॥

૨૭.૧૩/૧તસ્માદ્ વર્ષમિદં નાથ યે વાસ્મિન્ વર્ષપર્વતાઃ ।
૨૭.૧૩/૨ભેદાશ્ચ તસ્ય વર્ષસ્ય બ્રૂહિ સર્વાન્ અશેષતઃ ॥ ૨૭.૧૩॥

૨૭.૧૪/૧બ્રહ્મોવાચ । શ઼ૃણુધ્વં ભારતં વર્ષં નવભેદેન ભો દ્વિજાઃ ।
૨૭.૧૪/૨સમુદ્રાન્તરિતા જ્ઞેયાસ્તે સમાશ્ચ પરસ્પરમ્ ॥ ૨૭.૧૪॥

૨૭.૧૫/૧ઇન્દ્રદ્વીપઃ કશેરુશ્ચ તામ્રવર્ણો ગભસ્તિમાન્ ।
૨૭.૧૫/૨નાગદ્વીપસ્તથા સૌમ્યો ગાન્ધર્વો વારુણસ્તથા ॥ ૨૭.૧૫॥

૨૭.૧૬/૧અયં તુ નવમસ્તેષાં દ્વીપઃ સાગરસંવૃતઃ ।
૨૭.૧૬/૨યોજનાનાં સહસ્રં વૈ દ્વીપોઽયં દક્ષિણોત્તરઃ ॥ ૨૭.૧૬॥

૨૭.૧૭/૧પૂર્વે કિરાતા યસ્યાસન્ પશ્ચિમે યવનાસ્તથા ।
૨૭.૧૭/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચાન્તે સ્થિતા દ્વિજાઃ ॥ ૨૭.૧૭॥

૨૭.૧૮/૧ઇજ્યાયુદ્ધવણિજ્યાદ્યૈઃ કર્મભિઃ કૃતપાવનાઃ ।
૨૭.૧૮/૨તેષાં સંવ્યવહારશ્ચ એભિઃ કર્મભિરિષ્યતે ॥ ૨૭.૧૮॥

૨૭.૧૯/૧સ્વર્ગાપવર્ગહેતુશ્ચ પુણ્યં પાપં ચ વૈ તથા ।
૨૭.૧૯/૨મહેન્દ્રો મલયઃ સહ્યઃ શુક્તિમાન્ ઋક્ષપર્વતઃ ॥ ૨૭.૧૯॥

૨૭.૨૦/૧વિન્ધ્યશ્ચ પારિયાત્રશ્ચ સપ્તૈવાત્ર કુલાચલાઃ ।
૨૭.૨૦/૨તેષાં સહસ્રશશ્ચાન્યે ભૂધરા યે સમીપગાઃ ॥ ૨૭.૨૦॥

૨૭.૨૧/૧વિસ્તારોચ્છ્રયિણો રમ્યા વિપુલાશ્ચિત્રસાનવઃ ।
૨૭.૨૧/૨કોલાહલઃ સ વૈભ્રાજો મન્દરો દર્દલાચલઃ ॥ ૨૭.૨૧॥

૨૭.૨૨/૧વાતંધયો વૈદ્યુતશ્ચ મૈનાકઃ સુરસસ્તથા ।
૨૭.૨૨/૨તુઙ્ગપ્રસ્થો નાગગિરિર્ગોધનઃ પાણ્ડરાચલઃ ॥ ૨૭.૨૨॥

૨૭.૨૩/૧પુષ્પગિરિર્વૈજયન્તો રૈવતોઽર્બુદ એવ ચ ।
૨૭.૨૩/૨ઋષ્યમૂકઃ સ ગોમન્થઃ કૃતશૈલઃ કૃતાચલઃ ॥ ૨૭.૨૩॥

૨૭.૨૪/૧શ્રીપાર્વતશ્ચકોરશ્ચ શતશોઽન્યે ચ પર્વતાઃ ।
૨૭.૨૪/૨તૈર્વિમિશ્રા જનપદા મ્લેચ્છાદ્યાશ્ચૈવ ભાગશઃ ॥ ૨૭.૨૪॥

૨૭.૨૫/૧તૈઃ પીયન્તે સરિચ્છ્રેષ્ઠાસ્તા બુધ્યધ્વં દ્વિજોત્તમાઃ ।
૨૭.૨૫/૨ગઙ્ગા સરસ્વતી સિન્ધુશ્ચન્દ્રભાગા તથાપરા ॥ ૨૭.૨૫॥

૨૭.૨૬/૧યમુના શતદ્રુર્વિપાશા વિતસ્તૈરાવતી કુહૂઃ ।
૨૭.૨૬/૨ગોમતી ધૂતપાપા ચ બાહુદા ચ દૃષદ્વતી ॥ ૨૭.૨૬॥

૨૭.૨૭/૧વિપાશા દેવિકા ચક્ષુર્નિષ્ઠીવા ગણ્ડકી તથા ।
૨૭.૨૭/૨કૌશિકી ચાપગા ચૈવ હિમવત્પાદનિઃસૃતાઃ ॥ ૨૭.૨૭॥

૨૭.૨૮/૧દેવસ્મૃતિર્દેવવતી વાતઘ્ની સિન્ધુરેવ ચ ।
૨૭.૨૮/૨વેણ્યા તુ ચન્દના ચૈવ સદાનીરા મહી તથા ॥ ૨૭.૨૮॥

૨૭.૨૯/૧ચર્મણ્વતી વૃષી ચૈવ વિદિશા વેદવત્યપિ ।
૨૭.૨૯/૨સિપ્રા હ્યવન્તી ચ તથા પારિયાત્રાનુગાઃ સ્મૃતાઃ ॥ ૨૭.૨૯॥

૨૭.૩૦/૧શોણા મહાનદી ચૈવ નર્મદા સુરથા ક્રિયા ।
૨૭.૩૦/૨મન્દાકિની દશાર્ણા ચ ચિત્રકૂટા તથાપરા ॥ ૨૭.૩૦॥

૨૭.૩૧/૧ચિત્રોત્પલા વેત્રવતી કરમોદા પિશાચિકા ।
૨૭.૩૧/૨તથાન્યાતિલઘુશ્રોણી વિપાપ્મા શૈવલા નદી ॥ ૨૭.૩૧॥

૨૭.૩૨/૧સધેરુજા શક્તિમતી શકુની ત્રિદિવા ક્રમુઃ ।
૨૭.૩૨/૨ઋક્ષપાદપ્રસૂતા વૈ તથાન્યા વેગવાહિની ॥ ૨૭.૩૨॥

૨૭.૩૩/૧સિપ્રા પયોષ્ણી નિર્વિન્ધ્યા તાપી ચૈવ સરિદ્વરા ।
૨૭.૩૩/૨વેણા વૈતરણી ચૈવ સિનીવાલી કુમુદ્વતી ॥ ૨૭.૩૩॥

૨૭.૩૪/૧તોયા ચૈવ મહાગૌરી દુર્ગા ચાન્તઃશિલા તથા ।
૨૭.૩૪/૨વિન્ધ્યપાદપ્રસૂતાસ્તા નદ્યઃ પુણ્યજલાઃ શુભાઃ ॥ ૨૭.૩૪॥

૨૭.૩૫/૧ગોદાવરી ભીમરથી કૃષ્ણવેણા તથાપગા ।
૨૭.૩૫/૨તુઙ્ગભદ્રા સુપ્રયોગા તથાન્યા પાપનાશિની ॥ ૨૭.૩૫॥

૨૭.૩૬/૧સહ્યપાદવિનિષ્ક્રાન્તા ઇત્યેતાઃ સરિતાં વરાઃ ।
૨૭.૩૬/૨કૃતમાલા તામ્રપર્ણી પુષ્પજા પ્રત્યલાવતી ॥ ૨૭.૩૬॥

૨૭.૩૭/૧મલયાદ્રિસમુદ્ભૂતાઃ પુણ્યાઃ શીતજલાસ્ત્વિમાઃ ।
૨૭.૩૭/૨પિતૃસોમર્ષિકુલ્યા ચ વઞ્જુલા ત્રિદિવા ચ યા ॥ ૨૭.૩૭॥

૨૭.૩૮/૧લાઙ્ગુલિની વંશકરા મહેન્દ્રપ્રભવાઃ સ્મૃતાઃ ।

૨૭.૩૮/૨સુવિકાલા કુમારી ચ મનૂગા મન્દગામિની ॥ ૨૭.૩૮॥

૨૭.૩૯/૧ક્ષયાપલાસિની ચૈવ શુક્તિમત્પ્રભવાઃ સ્મૃતાઃ ।
૨૭.૩૯/૨સર્વાઃ પુણ્યાઃ સરસ્વત્યઃ સર્વા ગઙ્ગાઃ સમુદ્રગાઃ ॥ ૨૭.૩૯॥

૨૭.૪૦/૧વિશ્વસ્ય માતરઃ સર્વાઃ સર્વાઃ પાપહરાઃ સ્મૃતાઃ ।
૨૭.૪૦/૨અન્યાઃ સહસ્રશઃ પ્રોક્તાઃ ક્ષુદ્રનદ્યો દ્વિજોત્તમાઃ ॥ ૨૭.૪૦॥

૨૭.૪૧/૧પ્રાવૃટ્કાલવહાઃ સન્તિ સદાકાલવહાશ્ચ યાઃ ।
૨૭.૪૧/૨મત્સ્યા મુકુટકુલ્યાશ્ચ કુન્તલાઃ કાશિકોશલાઃ ॥ ૨૭.૪૧॥

૨૭.૪૨/૧અન્ધ્રકાશ્ચ કલિઙ્ગાશ્ચ શમકાશ્ચ વૃકૈઃ સહ ।
૨૭.૪૨/૨મધ્યદેશા જનપદાઃ પ્રાયશોઽમી પ્રકીર્તિતાઃ ॥ ૨૭.૪૨॥

૨૭.૪૩/૧સહ્યસ્ય ચોત્તરે યસ્તુ યત્ર ગોદાવરી નદી ।
૨૭.૪૩/૨પૃથિવ્યામપિ કૃત્સ્નાયાં સ પ્રદેશો મનોરમઃ ॥ ૨૭.૪૩॥

૨૭.૪૪/૧ગોવર્ધનપુરં રમ્યં ભાર્ગવસ્ય મહાત્મનઃ ।
૨૭.૪૪/૨વાહીકરાટધાનાશ્ચ સુતીરાઃ કાલતોયદાઃ ॥ ૨૭.૪૪॥

૨૭.૪૫/૧અપરાન્તાશ્ચ શૂદ્રાશ્ચ વાહ્લિકાશ્ચ સકેરલાઃ ।
૨૭.૪૫/૨ગાન્ધારા યવનાશ્ચૈવ સિન્ધુસૌવીરમદ્રકાઃ ॥ ૨૭.૪૫॥

૨૭.૪૬/૧શતદ્રુહાઃ કલિઙ્ગાશ્ચ પારદા હારભૂષિકાઃ ।
૨૭.૪૬/૨માઠરાશ્ચૈવ કનકાઃ કૈકેયા દમ્ભમાલિકાઃ ॥ ૨૭.૪૬॥

૨૭.૪૭/૧ક્ષત્રિયોપમદેશાશ્ચ વૈશ્યશૂદ્રકુલાનિ ચ ।
૨૭.૪૭/૨કામ્બોજાશ્ચૈવ વિપ્રેન્દ્રા બર્બરાશ્ચ સલૌકિકાઃ ॥ ૨૭.૪૭॥

૨૭.૪૮/૧વીરાશ્ચૈવ તુષારાશ્ચ પહ્લવાધાયતા નરાઃ ।
૨૭.૪૮/૨આત્રેયાશ્ચ ભરદ્વાજાઃ પુષ્કલાશ્ચ દશેરકાઃ ॥ ૨૭.૪૮॥

૨૭.૪૯/૧લમ્પકાઃ શુનશોકાશ્ચ કુલિકા જાઙ્ગલૈઃ સહ ।
૨૭.૪૯/૨ઔષધ્યશ્ચલચન્દ્રા ચ કિરાતાનાં ચ જાતયઃ ॥ ૨૭.૪૯॥

૨૭.૫૦/૧તોમરા હંસમાર્ગાશ્ચ કાશ્મીરાઃ કરુણાસ્તથા ।
૨૭.૫૦/૨શૂલિકાઃ કુહકાશ્ચૈવ માગધાશ્ચ તથૈવ ચ ॥ ૨૭.૫૦॥

૨૭.૫૧/૧એતે દેશા ઉદીચ્યાસ્તુ પ્રાચ્યાન્ દેશાન્ નિબોધત ।
૨૭.૫૧/૨અન્ધા વામઙ્કુરાકાશ્ચ વલ્લકાશ્ચ મખાન્તકાઃ ॥ ૨૭.૫૧॥

૨૭.૫૨/૧તથાપરેઙ્ગા વઙ્ગાશ્ચ મલદા માલવર્તિકાઃ ।
૨૭.૫૨/૨ભદ્રતુઙ્ગાઃ પ્રતિજયા ભાર્યાઙ્ગાશ્ચાપમર્દકાઃ ॥ ૨૭.૫૨॥

૨૭.૫૩/૧પ્રાગ્જ્યોતિષાશ્ચ મદ્રાશ્ચ વિદેહાસ્તામ્રલિપ્તકાઃ ।
૨૭.૫૩/૨મલ્લા મગધકા નન્દાઃ પ્રાચ્યા જનપદાસ્તથા ॥ ૨૭.૫૩॥

૨૭.૫૪/૧અથાપરે જનપદા દક્ષિણાપથવાસિનઃ ।
૨૭.૫૪/૨પૂર્ણાશ્ચ કેવલાશ્ચૈવ ગોલાઙ્ગૂલાસ્તથૈવ ચ ॥ ૨૭.૫૪॥

૨૭.૫૫/૧ઋષિકા મુષિકાશ્ચૈવ કુમારા રામઠાઃ શકાઃ ।
૨૭.૫૫/૨મહારાષ્ટ્રા માહિષકાઃ કલિઙ્ગાશ્ચૈવ સર્વશઃ ॥ ૨૭.૫૫॥

૨૭.૫૬/૧આભીરાઃ સહ વૈશિક્યા અટવ્યાઃ સરવાશ્ચ યે ।
૨૭.૫૬/૨પુલિન્દાશ્ચૈવ મૌલેયા વૈદર્ભા દણ્ડકૈઃ સહ ॥ ૨૭.૫૬॥

૨૭.૫૭/૧પૌલિકા મૌલિકાશ્ચૈવ અશ્મકા ભોજવર્ધનાઃ ।
૨૭.૫૭/૨કૌલિકાઃ કુન્તલાશ્ચૈવ દમ્ભકા નીલકાલકાઃ ॥ ૨૭.૫૭॥

૨૭.૫૮/૧દાક્ષિણાત્યાસ્ત્વમી દેશા અપરાન્તાન્ નિબોધત ।
૨૭.૫૮/૨શૂર્પારકાઃ કાલિધના લોલાસ્તાલકટૈઃ સહ ॥ ૨૭.૫૮॥

૨૭.૫૯/૧ઇત્યેતે હ્યપરાન્તાશ્ચ શ‍ૃણુધ્વં વિન્ધ્યવાસિનઃ ।
૨૭.૫૯/૨મલજાઃ કર્કશાશ્ચૈવ મેલકાશ્ચોલકૈઃ સહ ॥ ૨૭.૫૯॥

૨૭.૬૦/૧ઉત્તમાર્ણા દશાર્ણાશ્ચ ભોજાઃ કિષ્કિન્ધકૈઃ સહ ।
૨૭.૬૦/૨તોષલાઃ કોશલાશ્ચૈવ ત્રૈપુરા વૈદિશાસ્તથા ॥ ૨૭.૬૦॥

૨૭.૬૧/૧તુમ્બુરાસ્તુ ચરાશ્ચૈવ યવનાઃ પવનૈઃ સહ ।
૨૭.૬૧/૨અભયા રુણ્ડિકેરાશ્ચ ચર્ચરા હોત્રધર્તયઃ ॥ ૨૭.૬૧॥

૨૭.૬૨/૧એતે જનપદાઃ સર્વે તત્ર વિન્ધ્યનિવાસિનઃ ।
૨૭.૬૨/૨અતો દેશાન્ પ્રવક્ષ્યામિ પર્વતાશ્રયિણશ્ચ યે ॥ ૨૭.૬૨॥

૨૭.૬૩/૧નીહારાસ્તુષમાર્ગાશ્ચ કુરવસ્તુઙ્ગણાઃ ખસાઃ ।
૨૭.૬૩/૨કર્ણપ્રાવરણાશ્ચૈવ ઊર્ણા દર્ઘાઃ સકુન્તકાઃ ॥ ૨૭.૬૩॥

૨૭.૬૪/૧ચિત્રમાર્ગા માલવાશ્ચ કિરાતાસ્તોમરૈઃ સહ ।
૨૭.૬૪/૨કૃતત્રેતાદિકશ્ચાત્ર ચતુર્યુગકૃતો વિધિઃ ॥ ૨૭.૬૪॥

૨૭.૬૫/૧એવં તુ ભારતં વર્ષં નવસંસ્થાનસંસ્થિતમ્ ।
૨૭.૬૫/૨દક્ષિણે પરતો યસ્ય પૂર્વે ચૈવ મહોદધિઃ ॥ ૨૭.૬૫॥

૨૭.૬૬/૧હિમવાન્ ઉત્તરેણાસ્ય કાર્મુકસ્ય યથા ગુણઃ ।
૨૭.૬૬/૨તદ્ એતદ્ ભારતં વર્ષં સર્વબીજં દ્વિજોત્તમાઃ ॥ ૨૭.૬૬॥

૨૭.૬૭/૧બ્રહ્મત્વમમરેશત્વં દેવત્વં મરુતાં તથા ।
૨૭.૬૭/૨મૃગયક્ષાપ્સરોયોનિં તદ્વત્ સર્પસરીસૃપાઃ ॥ ૨૭.૬૭॥

૨૭.૬૮/૧સ્થાવરાણાં ચ સર્વેષાં મિતો વિપ્રાઃ શુભાશુભૈઃ ।
૨૭.૬૮/૨પ્રયાન્તિ કર્મભૂર્વિપ્રા નાન્યા લોકેષુ વિદ્યતે ॥ ૨૭.૬૮॥

૨૭.૬૯/૧દેવાનામપિ ભો વિપ્રાઃ સદૈવૈષ મનોરથઃ ।
૨૭.૬૯/૨અપિ માનુષ્યમાપ્સ્યામો દેવત્વાત્ પ્રચ્યુતાઃ ક્ષિતૌ ॥ ૨૭.૬૯॥

૨૭.૭૦/૧મનુષ્યઃ કુરુતે યત્ તુ તન્ ન શક્યં સુરાસુરૈઃ ।
૨૭.૭૦/૨તત્કર્મનિગડગ્રસ્તૈસ્તત્કર્મક્ષપણોન્મુખૈઃ ॥ ૨૭.૭૦॥

૨૭.૭૧/૧ન ભારતસમં વર્ષં પૃથિવ્યામસ્તિ ભો દ્વિજાઃ ।
૨૭.૭૧/૨યત્ર વિપ્રાદયો વર્ણાઃ પ્રાપ્નુવન્ત્યભિવાઞ્છિતમ્ ॥ ૨૭.૭૧॥

૨૭.૭૨/૧ધન્યાસ્તે ભારતે વર્ષે જાયન્તે યે નરોત્તમાઃ ।
૨૭.૭૨/૨ધર્માર્થકામમોક્ષાણાં પ્રાપ્નુવન્તિ મહાફલમ્ ॥ ૨૭.૭૨॥

૨૭.૭૩/૧પ્રાપ્યતે યત્ર તપસઃ ફલં પરમદુર્લભમ્ ।
૨૭.૭૩/૨સર્વદાનફલં ચૈવ સર્વયજ્ઞફલં તથા ॥ ૨૭.૭૩॥

૨૭.૭૪/૧તીર્થયાત્રાફલં ચૈવ ગુરુસેવાફલં તથા ।
૨૭.૭૪/૨દેવતારાધનફલં સ્વાધ્યાયસ્ય ફલં દ્વિજાઃ ॥ ૨૭.૭૪॥

૨૭.૭૫/૧યત્ર દેવાઃ સદા હૃષ્ટા જન્મ વાઞ્છન્તિ શોભનમ્ ।
૨૭.૭૫/૨નાનાવ્રતફલં ચૈવ નાનાશાસ્ત્રફલં તથા ॥ ૨૭.૭૫॥

૨૭.૭૬/૧અહિંસાદિફલં સમ્યક્ ફલં સર્વાભિવાઞ્છિતમ્ ।
૨૭.૭૬/૨બ્રહ્મચર્યફલં ચૈવ ગાર્હસ્થ્યેન ચ યત્ ફલમ્ ॥ ૨૭.૭૬॥

૨૭.૭૭/૧યત્ ફલં વનવાસેન સંન્યાસેન ચ યત્ ફલમ્ ।
૨૭.૭૭/૨ઇષ્ટાપૂર્તફલં ચૈવ તથાન્યચ્છુભકર્મણામ્ ॥ ૨૭.૭૭॥

૨૭.૭૮/૧પ્રાપ્યતે ભારતે વર્ષે ન ચાન્યત્ર દ્વિજોત્તમાઃ ।
૨૭.૭૮/૨કઃ શક્નોતિ ગુણાન્ વક્તું ભારતસ્યાખિલાન્ દ્વિજાઃ ॥ ૨૭.૭૮॥

૨૭.૭૯/૧એવં સમ્યઙ્ મયા પ્રોક્તં ભારતં વર્ષમુત્તમમ્ ।

૨૭.૭૯/૨સર્વપાપહરં પુણ્યં ધન્યં બુદ્ધિવિવર્ધનમ્ ॥ ૨૭.૭૯॥

૨૭.૮૦/૧ય ઇદં શ ृણુયાન્ નિત્યં પઠેદ્ વા નિયતેન્દ્રિયઃ ।
૨૭.૮૦/૨સર્વપાપૈર્વિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૨૭.૮૦॥

૨૮.૧/૧બ્રહ્મોવાચ । તત્રાસ્તે ભારતે વર્ષે દક્ષિણોદધિસંસ્થિતઃ ।
૨૮.૧/૨ઓણ્ડ્રદેશ ઇતિ ખ્યાતઃ સ્વર્ગમોક્ષપ્રદાયકઃ ॥ ૨૮.૧॥

૨૮.૨/૧સમુદ્રાદ્ ઉત્તરં તાવદ્ યાવદ્ વિરજમણ્ડલમ્ ।
૨૮.૨/૨દેશોઽસૌ પુણ્યશીલાનાં ગુણૈઃ સર્વૈરલંકૃતઃ ॥ ૨૮.૨॥

૨૮.૩/૧તત્ર દેશપ્રસૂતા યે બ્રાહ્મણાઃ સંયતેન્દ્રિયાઃ ।
૨૮.૩/૨તપઃસ્વાધ્યાયનિરતા વન્દ્યાઃ પૂજ્યાશ્ચ તે સદા ॥ ૨૮.૩॥

૨૮.૪/૧શ્રાદ્ધે દાને વિવાહે ચ યજ્ઞે વાચાર્યકર્મણિ ।
૨૮.૪/૨પ્રશસ્તાઃ સર્વકાર્યેષુ તત્રદેશોદ્ભવા દ્વિજાઃ ॥ ૨૮.૪॥

૨૮.૫/૧ષટ્કર્મનિરતાસ્તત્ર બ્રાહ્મણા વેદપારગાઃ ।
૨૮.૫/૨ઇતિહાસવિદશ્ચૈવ પુરાણાર્થવિશારદાઃ ॥ ૨૮.૫॥

૨૮.૬/૧સર્વશાસ્ત્રાર્થકુશલા યજ્વાનો વીતમત્સરાઃ ।
૨૮.૬/૨અગ્નિહોત્રરતાઃ કેચિત્ કેચિત્ સ્માર્તાગ્નિતત્પરાઃ ॥ ૨૮.૬॥

૨૮.૭/૧પુત્રદારધનૈર્યુક્તા દાતારઃ સત્યવાદિનઃ ।
૨૮.૭/૨નિવસન્ત્યુત્કલે પુણ્યે યજ્ઞોત્સવવિભૂષિતે ॥ ૨૮.૭॥

૨૮.૮/૧ઇતરેઽપિ ત્રયો વર્ણાઃ ક્ષત્રિયાદ્યાઃ સુસંયતાઃ ।
૨૮.૮/૨સ્વકર્મનિરતાઃ શાન્તાસ્તત્ર તિષ્ઠન્તિ ધાર્મિકાઃ ॥ ૨૮.૮॥

૨૮.૯/૧કોણાદિત્ય ઇતિ ખ્યાતસ્તસ્મિન્ દેશે વ્યવસ્થિતઃ ।
૨૮.૯/૨યં દૃષ્ટ્વા ભાસ્કરં મર્ત્યઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૮.૯॥

૨૮.૧૦/૧મુનય ઊચુઃ । શ્રોતુમિચ્છામ તદ્ બ્રૂહિ ક્ષેત્રં સૂર્યસ્ય સામ્પ્રતમ્ ।
૨૮.૧૦/૨તસ્મિન્ દેશે સુરશ્રેષ્ઠ યત્રાસ્તે સ દિવાકરઃ ॥ ૨૮.૧૦॥

૨૮.૧૧/૧બ્રહ્મોવાચ । લવણસ્યોદધેસ્તીરે પવિત્રે સુમનોહરે ।
૨૮.૧૧/૨સર્વત્ર વાલુકાકીર્ણે દેશે સર્વગુણાન્વિતે ॥ ૨૮.૧૧॥

૨૮.૧૨/૧ચમ્પકાશોકબકુલૈઃ કરવીરૈઃ સપાટલૈઃ ।
૨૮.૧૨/૨પુંનાગૈઃ કર્ણિકારૈશ્ચ બકુલૈર્નાગકેસરૈઃ ॥ ૨૮.૧૨॥

૨૮.૧૩/૧તગરૈર્ધવબાણૈશ્ચ અતિમુક્તૈઃ સકુબ્જકૈઃ ।
૨૮.૧૩/૨માલતીકુન્દપુષ્પૈશ્ચ તથાન્યૈર્મલ્લિકાદિભિઃ ॥ ૨૮.૧૩ ॥

૨૮.૧૪/૧કેતકીવનખણ્ડૈશ્ચ સર્વર્તુકુસુમોજ્જ્વલૈઃ ।
૨૮.૧૪/૨કદમ્બૈર્લકુચૈઃ શાલૈઃ પનસૈર્દેવદારુભિઃ ॥ ૨૮.૧૪ ॥

૨૮.૧૫/૧સરલૈર્મુચુકુન્દૈશ્ચ ચન્દનૈશ્ચ સિતેતરૈઃ ।
૨૮.૧૫/૨અશ્વત્થૈઃ સપ્તપર્ણૈશ્ચ આમ્રૈરામ્રાતકૈસ્તથા ॥ ૨૮.૧૫ ॥

૨૮.૧૬/૧તાલૈઃ પૂગફલૈશ્ચૈવ નારિકેરૈઃ કપિત્થકૈઃ ।
૨૮.૧૬/૨અન્યૈશ્ચ વિવિધૈર્વૃક્ષૈઃ સર્વતઃ સમલંકૃતમ્ ॥ ૨૮.૧૬ ॥

૨૮.૧૭/૧ક્ષેત્રં તત્ર રવેઃ પુણ્યમાસ્તે જગતિ વિશ્રુતમ્ ।
૨૮.૧૭/૨સમન્તાદ્ યોજનં સાગ્રં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૨૮.૧૭ ॥

૨૮.૧૮/૧આસ્તે તત્ર સ્વયં દેવઃ સહસ્રાંશુર્દિવાકરઃ ।
૨૮.૧૮/૨કોણાદિત્ય ઇતિ ખ્યાતો ભુક્તિમુક્તિફલપ્રદઃ ॥ ૨૮.૧૮ ॥

૨૮.૧૯/૧માઘે માસિ સિતે પક્ષે સપ્તમ્યાં સંયતેન્દ્રિયઃ ।
૨૮.૧૯/૨કૃતોપવાસો યત્રેત્ય સ્નાત્વા તુ મકરાલયે ॥ ૨૮.૧૯ ॥

૨૮.૨૦/૧કૃતશૌચો વિશુદ્ધાત્મા સ્મરન્ દેવં દિવાકરમ્ ।
૨૮.૨૦/૨સાગરે વિધિવત્ સ્નાત્વા શર્વર્યન્તે સમાહિતઃ ॥ ૨૮.૨૦ ॥

૨૮.૨૧/૧દેવાન્ ઋષીન્ મનુષ્યાંશ્ચ પિતૄન્ સંતર્પ્ય ચ દ્વિજાઃ ।
૨૮.૨૧/૨ઉત્તીર્ય વાસસી ધૌતે પરિધાય સુનિર્મલે ॥ ૨૮.૨૧ ॥

૨૮.૨૨/૧આચમ્ય પ્રયતો ભૂત્વા તીરે તસ્ય મહોદધેઃ ।
૨૮.૨૨/૨ઉપવિશ્યોદયે કાલે પ્રાઙ્મુખઃ સવિતુસ્તદા ॥ ૨૮.૨૨ ॥

૨૮.૨૩/૧વિલિખ્ય પદ્મં મેધાવી રક્તચન્દનવારિણા ।
૨૮.૨૩/૨અષ્ટપત્રં કેસરાઢ્યં વર્તુલં ચોર્ધ્વકર્ણિકમ્ ॥ ૨૮.૨૩ ॥

૨૮.૨૪/૧તિલતણ્ડુલતોયં ચ રક્તચન્દનસંયુતમ્ ।
૨૮.૨૪/૨રક્તપુષ્પં સદર્ભં ચ પ્રક્ષિપેત્ તામ્રભાજને ॥ ૨૮.૨૪ ॥

૨૮.૨૫/૧તામ્રાભાવેઽર્કપત્રસ્ય પુટે કૃત્વા તિલાદિકમ્ ।
૨૮.૨૫/૨પિધાય તન્ મુનિશ્રેષ્ઠાઃ પાત્રં પાત્રેણ વિન્યસેત્ ॥ ૨૮.૨૫ ॥

૨૮.૨૬/૧કરન્યાસાઙ્ગવિન્યાસં કૃત્વાઙ્ગૈર્હૃદયાદિભિઃ ।
૨૮.૨૬/૨આત્માનં ભાસ્કરં ધ્યાત્વા સમ્યક્ શ્રદ્ધાસમન્વિતઃ ॥ ૨૮.૨૬ ॥

૨૮.૨૭/૧મધ્યે ચાગ્નિદલે ધીમાન્ નૈરૃતે શ્વસને દલે ।
૨૮.૨૭/૨કામારિગોચરે ચૈવ પુનર્મધ્યે ચ પૂજયેત્ ॥ ૨૮.૨૭॥

૨૮.૨૮/૧પ્રભૂતં વિમલં સારમારાધ્યં પરમં સુખમ્ ।
૨૮.૨૮/૨સમ્પૂજ્ય પદ્મમાવાહ્ય ગગનાત્ તત્ર ભાસ્કરમ્ ॥ ૨૮.૨૮॥

૨૮.૨૯/૧કર્ણિકોપરિ સંસ્થાપ્ય તતો મુદ્રાં પ્રદર્શયેત્ ।
૨૮.૨૯/૨કૃત્વા સ્નાનાદિકં સર્વં ધ્યાત્વા તં સુસમાહિતઃ ॥ ૨૮.૨૯॥

૨૮.૩૦/૧સિતપદ્મોપરિ રવિં તેજોબિમ્બે વ્યવસ્થિતમ્ ।
૨૮.૩૦/૨પિઙ્ગાક્ષં દ્વિભુજં રક્તં પદ્મપત્રારુણામ્બરમ્ ॥ ૨૮.૩૦॥

૨૮.૩૧/૧સર્વલક્ષણસંયુક્તં સર્વાભરણભૂષિતમ્ ।
૨૮.૩૧/૨સુરૂપં વરદં શાન્તં પ્રભામણ્ડલમણ્ડિતમ્ ॥ ૨૮.૩૧॥

૨૮.૩૨/૧ઉદ્યન્તં ભાસ્કરં દૃષ્ટ્વા સાન્દ્રસિન્દૂરસંનિભમ્ ।
૨૮.૩૨/૨તતસ્તત્ પાત્રમાદાય જાનુભ્યાં ધરણીં ગતઃ ॥ ૨૮.૩૨॥

૨૮.૩૩/૧કૃત્વા શિરસિ તત્ પાત્રમેકચિત્તસ્તુ વાગ્યતઃ ।
૨૮.૩૩/૨ત્ર્યક્ષરેણ તુ મન્ત્રેણ સૂર્યાયાર્ઘ્યં નિવેદયેત્ ॥ ૨૮.૩૩॥

૨૮.૩૪/૧અદીક્ષિતસ્તુ તસ્યૈવ નામ્નૈવાર્ઘં પ્રયચ્છતિ ।
૨૮.૩૪/૨શ્રદ્ધયા ભાવયુક્તેન ભક્તિગ્રાહ્યો રવિર્યતઃ ॥ ૨૮.૩૪॥

૨૮.૩૫/૧અગ્નિનિરૃતિવાય્વીશ+ ંઅધ્યપૂર્વાદિદિક્ષુ ચ ।
૨૮.૩૫/૨હૃચ્છિરશ્ચ શિખાવર્મ+ ંએત્રાણ્યસ્ત્રં ચ પૂજયેત્ ॥ ૨૮.૩૫॥

૨૮.૩૬/૧દત્ત્વાર્ઘ્યં ગન્ધધૂપં ચ દીપં નૈવેદ્યમેવ ચ ।
૨૮.૩૬/૨જપ્ત્વા સ્તુત્વા નમસ્કૃત્વા મુદ્રાં બદ્ધ્વા વિસર્જયેત્ ॥ ૨૮.૩૬॥

૨૮.૩૭/૧યે વાર્ઘ્યં સમ્પ્રયચ્છન્તિ સૂર્યાય નિયતેન્દ્રિયાઃ ।
૨૮.૩૭/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ સ્ત્રિયઃ શૂદ્રાશ્ચ સંયતાઃ ॥ ૨૮.૩૭॥

૨૮.૩૮/૧ભક્તિભાવેન સતતં વિશુદ્ધેનાન્તરાત્મના ।
૨૮.૩૮/૨તે ભુક્ત્વાભિમતાન્ કામાન્ પ્રાપ્નુવન્તિ પરાં ગતિમ્ ॥ ૨૮.૩૮॥

૨૮.૩૯/૧ત્રૈલોક્યદીપકં દેવં ભાસ્કરં ગગનેચરમ્ ।
૨૮.૩૯/૨યે સંશ્રયન્તિ મનુજાસ્તે સ્યુઃ સુખસ્ય ભાજનમ્ ॥ ૨૮.૩૯॥

૨૮.૪૦/૧યાવન્ ન દીયતે ચાર્ઘ્યં ભાસ્કરાય યથોદિતમ્ ।

૨૮.૪૦/૨તાવન્ ન પૂજયેદ્ વિષ્ણું શંકરં વા સુરેશ્વરમ્ ॥ ૨૮.૪૦॥

૨૮.૪૧/૧તસ્માત્ પ્રયત્નમાસ્થાય દદ્યાદ્ અર્ઘ્યં દિને દિને ।
૨૮.૪૧/૨આદિત્યાય શુચિર્ભૂત્વા પુષ્પૈર્ગન્ધૈર્મનોરમૈઃ ॥ ૨૮.૪૧॥

૨૮.૪૨/૧એવં દદાતિ યશ્ચાર્ઘ્યં સપ્તમ્યાં સુસમાહિતઃ ।
૨૮.૪૨/૨આદિત્યાય શુચિઃ સ્નાતઃ સ લભેદ્ ઈપ્સિતં ફલમ્ ॥ ૨૮.૪૨॥

૨૮.૪૩/૧રોગાદ્ વિમુચ્યતે રોગી વિત્તાર્થી લભતે ધનમ્ ।
૨૮.૪૩/૨વિદ્યાં પ્રાપ્નોતિ વિદ્યાર્થી સુતાર્થી પુત્રવાન્ ભવેત્ ॥ ૨૮.૪૩॥

૨૮.૪૪/૧યં યં કામમભિધ્યાયન્ સૂર્યાયાર્ઘ્યં પ્રયચ્છતિ ।
૨૮.૪૪/૨તસ્ય તસ્ય ફલં સમ્યક્ પ્રાપ્નોતિ પુરુષઃ સુધીઃ ॥ ૨૮.૪૪॥

૨૮.૪૫/૧સ્નાત્વા વૈ સાગરે દત્ત્વા સૂર્યાયાર્ઘ્યં પ્રણમ્ય ચ ।
૨૮.૪૫/૨નરો વા યદિ વા નારી સર્વકામફલં લભેત્ ॥ ૨૮.૪૫॥

૨૮.૪૬/૧તતઃ સૂર્યાલયં ગચ્છેત્ પુષ્પમાદાય વાગ્યતઃ ।
૨૮.૪૬/૨પ્રવિશ્ય પૂજયેદ્ ભાનું કૃત્વા તુ ત્રિઃ પ્રદક્ષિણમ્ ॥ ૨૮.૪૬॥

૨૮.૪૭/૧પૂજયેત્ પરયા ભક્ત્યા કોણાર્કં મુનિસત્તમાઃ ।
૨૮.૪૭/૨ગન્ધૈઃ પુષ્પૈસ્તથા દીપૈર્ધૂપૈર્નૈવેદ્યકૈરપિ ॥ ૨૮.૪૭॥

૨૮.૪૮/૧દણ્ડવત્ પ્રણિપાતૈશ્ચ જયશબ્દૈસ્તથા સ્તવૈઃ ।
૨૮.૪૮/૨એવં સમ્પૂજ્ય તં દેવં સહસ્રાંશું જગત્પતિમ્ ॥ ૨૮.૪૮॥

૨૮.૪૯/૧દશાનામશ્વમેધાનાં ફલં પ્રાપ્નોતિ માનવઃ ।
૨૮.૪૯/૨સર્વપાપવિનિર્મુક્તો યુવા દિવ્યવપુર્નરઃ ॥ ૨૮.૪૯॥

૨૮.૫૦/૧સપ્તાવરાન્ સપ્ત પરાન્ વંશાન્ ઉદ્ધૃત્ય ભો દ્વિજાઃ ।
૨૮.૫૦/૨વિમાનેનાર્કવર્ણેન કામગેન સુવર્ચસા ॥ ૨૮.૫૦॥

૨૮.૫૧/૧ઉપગીયમાનો ગન્ધર્વૈઃ સૂર્યલોકં સ ગચ્છતિ ।
૨૮.૫૧/૨ભુક્ત્વા તત્ર વરાન્ ભોગાન્ યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૨૮.૫૧॥

૨૮.૫૨/૧પુણ્યક્ષયાદ્ ઇહાયાતઃ પ્રવરે યોગિનાં કુલે ।
૨૮.૫૨/૨ચતુર્વેદો ભવેદ્ વિપ્રઃ સ્વધર્મનિરતઃ શુચિઃ ॥ ૨૮.૫૨॥

૨૮.૫૩/૧યોગં વિવસ્વતઃ પ્રાપ્ય તતો મોક્ષમવાપ્નુયાત્ ।
૨૮.૫૩/૨ચૈત્રે માસિ સિતે પક્ષે યાત્રાં દમનભઞ્જિકામ્ ॥ ૨૮.૫૩॥

૨૮.૫૪/૧યઃ કરોતિ નરસ્તત્ર પૂર્વોક્તં સ ફલં લભેત્ ।
૨૮.૫૪/૨શયનોત્થાપને ભાનોઃ સંક્રાન્ત્યાં વિષુવાયને ॥ ૨૮.૫૪॥

૨૮.૫૫/૧વારે રવેસ્તિથૌ ચૈવ પર્વકાલેઽથવા દ્વિજાઃ ।
૨૮.૫૫/૨યે તત્ર યાત્રાં કુર્વન્તિ શ્રદ્ધયા સંયતેન્દ્રિયાઃ ॥ ૨૮.૫૫॥

૨૮.૫૬/૧વિમાનેનાર્કવર્ણેન સૂર્યલોકં વ્રજન્તિ તે ।
૨૮.૫૬/૨આસ્તે તત્ર મહાદેવસ્તીરે નદનદીપતેઃ ॥ ૨૮.૫૬॥

૨૮.૫૭/૧રામેશ્વર ઇતિ ખ્યાતઃ સર્વકામફલપ્રદઃ ।
૨૮.૫૭/૨યે તં પશ્યન્તિ કામારિં સ્નાત્વા સમ્યઙ્ મહોદધૌ ॥ ૨૮.૫૭॥

૨૮.૫૮/૧ગન્ધૈઃ પુષ્પૈસ્તથા ધૂપૈર્દીપૈર્નૈવેદ્યકૈર્વરૈઃ ।
૨૮.૫૮/૨પ્રણિપાતૈસ્તથા સ્તોત્રૈર્ગીતૈર્વાદ્યૈર્મનોહરૈઃ ॥ ૨૮.૫૮॥

૨૮.૫૯/૧રાજસૂયફલં સમ્યગ્ વાજિમેધફલં તથા ।
૨૮.૫૯/૨પ્રાપ્નુવન્તિ મહાત્માનઃ સંસિદ્ધિં પરમાં તથા ॥ ૨૮.૫૯॥

૨૮.૬૦/૧કામગેન વિમાનેન કિઙ્કિણીજાલમાલિના ।
૨૮.૬૦/૨ઉપગીયમાના ગન્ધર્વૈઃ શિવલોકં વ્રજન્તિ તે ॥ ૨૮.૬૦॥

૨૮.૬૧/૧આહૂતસમ્પ્લવં યાવદ્ ભુક્ત્વા ભોગાન્ મનોરમાન્ ।
૨૮.૬૧/૨પુણ્યક્ષયાદ્ ઇહાગત્ય ચાતુર્વેદા ભવન્તિ તે ॥ ૨૮.૬૧॥

૨૮.૬૨/૧શાંકરં યોગમાસ્થાય તતો મોક્ષં વ્રજન્તિ તે ।
૨૮.૬૨/૨યસ્તત્ર સવિતુઃ ક્ષેત્રે પ્રાણાંસ્ત્યજતિ માનવઃ ॥ ૨૮.૬૨॥

૨૮.૬૩/૧સ સૂર્યલોકમાસ્થાય દેવવન્ મોદતે દિવિ ।
૨૮.૬૩/૨પુનર્માનુષતાં પ્રાપ્ય રાજા ભવતિ ધાર્મિકઃ ॥ ૨૮.૬૩॥

૨૮.૬૪/૧યોગં રવેઃ સમાસાદ્ય તતો મોક્ષમવાપ્નુયાત્ ।
૨૮.૬૪/૨એવં મયા મુનિશ્રેષ્ઠાઃ પ્રોક્તં ક્ષેત્રં સુદુર્લભમ્ ॥ ૨૮.૬૪॥

૨૮.૬૫/૧કોણાર્કસ્યોદધેસ્તીરે ભુક્તિમુક્તિફલપ્રદઃ ॥ ૨૮.૬૫॥

૨૯.૧/૧મુનય ઊચુઃ । શ્રુતોઽસ્માભિઃ સુરશ્રેષ્ઠ ભવતા યદ્ ઉદાહૃતમ્ ।
૨૯.૧/૨ભાસ્કરસ્ય પરં ક્ષેત્રં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૨૯.૧॥

૨૯.૨/૧ન તૃપ્તિમધિગચ્છામઃ શ઼્રૃણ્વન્તઃ સુખદાં કથામ્ ।
૨૯.૨/૨તવ વક્ત્રોદ્ભવાં પુણ્યામાદિત્યસ્યાઘનાશિનીમ્ ॥ ૨૯.૨॥

૨૯.૩/૧અતઃ પરં સુરશ્રેષ્ઠ બ્રૂહિ નો વદતાં વર ।
૨૯.૩/૨દેવપૂજાફલં યચ્ચ યચ્ચ દાનફલં પ્રભો ॥ ૨૯.૩ ॥

૨૯.૪/૧પ્રણિપાતે નમસ્કારે તથા ચૈવ પ્રદક્ષિણે ।
૨૯.૪/૨દીપધૂપપ્રદાને ચ સમ્માર્જનવિધૌ ચ યત્ ॥ ૨૯.૪ ॥

૨૯.૫/૧ઉપવાસે ચ યત્ પુણ્યં યત્ પુણ્યં નક્તભોજને ।
૨૯.૫/૨અર્ઘશ્ચ કીદૃશઃ પ્રોક્તઃ કુત્ર વા સમ્પ્રદીયતે ॥ ૨૯.૫ ॥

૨૯.૬/૧કથં ચ ક્રિયતે ભક્તિઃ કથં દેવઃ પ્રસીદતિ ।
૨૯.૬/૨એતત્ સર્વં સુરશ્રેષ્ઠ શ્રોતુમિચ્છામહે વયમ્ ॥ ૨૯.૬ ॥

૨૯.૭/૧બ્રહ્મોવાચ । અર્ઘ્યં પૂજાદિકં સર્વં ભાસ્કરસ્ય દ્વિજોત્તમાઃ ।
૨૯.૭/૨ભક્તિં શ્રદ્ધાં સમાધિં ચ કથ્યમાનં નિબોધત ॥ ૨૯.૭ ॥

૨૯.૮/૧મનસા ભાવના ભક્તિરિષ્ટા શ્રદ્ધા ચ કીર્ત્યતે ।
૨૯.૮/૨ધ્યાનં સમાધિરિત્યુક્તં શૃણુધ્વં સુસમાહિતાઃ ॥ ૨૯.૮ ॥

૨૯.૯/૧તત્કથાં શ્રાવયેદ્ યસ્તુ તદ્ભક્તાન્ પૂજયીત વા ।
૨૯.૯/૨અગ્નિશુશ્રૂષકશ્ચૈવ સ વૈ ભક્તઃ સનાતનઃ ॥ ૨૯.૯ ॥

૨૯.૧૦/૧તચ્ચિત્તસ્તન્મનાશ્ચૈવ દેવપૂજારતઃ સદા ।
૨૯.૧૦/૨તત્કર્મકૃદ્ ભવેદ્ યસ્તુ સ વૈ ભક્તઃ સનાતનઃ ॥ ૨૯.૧૦ ॥

૨૯.૧૧/૧દેવાર્થે ક્રિયમાણાનિ યઃ કર્માણ્યનુમન્યતે ।
૨૯.૧૧/૨કીર્તનાદ્ વા પરો વિપ્રાઃ સ વૈ ભક્તતરો નરઃ ॥ ૨૯.૧૧ ॥

૨૯.૧૨/૧નાભ્યસૂયેત તદ્ભક્તાન્ ન નિન્દ્યાચ્ચાન્યદેવતામ્ ।
૨૯.૧૨/૨આદિત્યવ્રતચારી ચ સ વૈ ભક્તતરો નરઃ ॥ ૨૯.૧૨ ॥

૨૯.૧૩/૧ગચ્છંસ્તિષ્ઠન્ સ્વપઞ્ જિઘ્રન્ ઉન્મિષન્ નિમિષન્ન્ અપિ ।
૨૯.૧૩/૨યઃ સ્મરેદ્ ભાસ્કરં નિત્યં સ વૈ ભક્તતરો નરઃ ॥ ૨૯.૧૩ ॥

૨૯.૧૪/૧એવંવિધા ત્વિયં ભક્તિઃ સદા કાર્યા વિજાનતા ।
૨૯.૧૪/૨ભક્ત્યા સમાધિના ચૈવ સ્તવેન મનસા તથા ॥ ૨૯.૧૪ ॥

૨૯.૧૫/૧ક્રિયતે નિયમો યસ્તુ દાનં વિપ્રાય દીયતે ।
૨૯.૧૫/૨પ્રતિગૃહ્ણન્તિ તં દેવા મનુષ્યાઃ પિતરસ્તથા ॥ ૨૯.૧૫ ॥

૨૯.૧૬/૧પત્રં પુષ્પં ફલં તોયં યદ્ ભક્ત્યા સમુપાહૃતમ્ ।
૨૯.૧૬/૨પ્રતિગૃહ્ણન્તિ તદ્ દેવા નાસ્તિકાન્ વર્જયન્તિ ચ ॥ ૨૯.૧૬ ॥

૨૯.૧૭/૧ભાવશુદ્ધિઃ પ્રયોક્તવ્યા નિયમાચારસંયુતા ।

૨૯.૧૭/૨ભાવશુદ્ધ્યા ક્રિયતે યત્ તત્ સર્વં સફલં ભવેત્ ॥ ૨૯.૧૭॥

૨૯.૧૮/૧સ્તુતિજપ્યોપહારેણ પૂજયાપિ વિવસ્વતઃ ।

૨૯.૧૮/૨ઉપવાસેન ભક્ત્યા વૈ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૯.૧૮॥

૨૯.૧૯/૧પ્રણિધાય શિરો ભૂમ્યાં નમસ્કારં કરોતિ યઃ ।

૨૯.૧૯/૨તત્ક્ષણાત્ સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૨૯.૧૯॥

૨૯.૨૦/૧ભક્તિયુક્તો નરો યોઽસૌ રવેઃ કુર્યાત્ પ્રદક્ષિણામ્ ।

૨૯.૨૦/૨પ્રદક્ષિણીકૃતા તેન સપ્તદ્વીપા વસુંધરા ॥ ૨૯.૨૦॥

૨૯.૨૧/૧સૂર્યં મનસિ યઃ કૃત્વા કુર્યાદ્ વ્યોમપ્રદક્ષિણામ્ ।

૨૯.૨૧/૨પ્રદક્ષિણીકૃતાસ્તેન સર્વે દેવા ભવન્તિ હિ ॥ ૨૯.૨૧॥

૨૯.૨૨/૧એકાહારો નરો ભૂત્વા ષષ્ઠ્યાં યોઽર્ચયતે રવિમ્ ।

૨૯.૨૨/૨નિયમવ્રતચારી ચ ભવેદ્ ભક્તિસમન્વિતઃ ॥ ૨૯.૨૨॥

૨૯.૨૩/૧સપ્તમ્યાં વા મહાભાગાઃ સોઽશ્વમેધફલં લભેત્ ।

૨૯.૨૩/૨અહોરાત્રોપવાસેન પૂજયેદ્ યસ્તુ ભાસ્કરમ્ ॥ ૨૯.૨૩॥

૨૯.૨૪/૧સપ્તમ્યામથવા ષષ્ઠ્યાં સ યાતિ પરમાં ગતિમ્ ।

૨૯.૨૪/૨કૃષ્ણપક્ષસ્ય સપ્તમ્યાં સોપવાસો જિતેન્દ્રિયઃ ॥ ૨૯.૨૪॥

૨૯.૨૫/૧સર્વરત્નોપહારેણ પૂજયેદ્ યસ્તુ ભાસ્કરમ્ ।

૨૯.૨૫/૨પદ્મપ્રભેણ યાનેન સૂર્યલોકં સ ગચ્છતિ ॥ ૨૯.૨૫॥

૨૯.૨૬/૧શુક્લપક્ષસ્ય સપ્તમ્યામુપવાસપરો નરઃ ।

૨૯.૨૬/૨સર્વશુક્લોપહારેણ પૂજયેદ્ યસ્તુ ભાસ્કરમ્ ॥ ૨૯.૨૬॥

૨૯.૨૭/૧સર્વપાપવિનિર્મુક્તઃ સૂર્યલોકં સ ગચ્છતિ ।

૨૯.૨૭/૨અર્કસમ્પુટસંયુક્તમુદકં પ્રસૃતં પિબેત્ ॥ ૨૯.૨૭॥

૨૯.૨૮/૧ક્રમવૃદ્ધ્યા ચતુર્વિંશમેકૈકં ક્ષપયેત્ પુનઃ ।

૨૯.૨૮/૨દ્વાભ્યાં સંવત્સરાભ્યાં તુ સમાપ્તનિયમો ભવેત્ ॥ ૨૯.૨૮॥

૨૯.૨૯/૧સર્વકામપ્રદા હ્યેષા પ્રશસ્તા હ્યર્કસપ્તમી ।

૨૯.૨૯/૨શુક્લપક્ષસ્ય સપ્તમ્યાં યદાદિત્યદિનં ભવેત્ ॥ ૨૯.૨૯॥

૨૯.૩૦/૧સપ્તમી વિજયા નામ તત્ર દત્તં મહત્ ફલમ્ ।

૨૯.૩૦/૨સ્નાનં દાનં તપો હોમ ઉપવાસસ્તથૈવ ચ ॥ ૨૯.૩૦॥

૨૯.૩૧/૧સર્વં વિજયસપ્તમ્યાં મહાપાતકનાશનમ્ ।
૨૯.૩૧/૨યે ચાદિત્યદિને પ્રાપ્તે શ્રાદ્ધં કુર્વન્તિ માનવાઃ ॥ ૨૯.૩૧॥

૨૯.૩૨/૧યજન્તિ ચ મહાશ્વેતં તે લભન્તે યથેપ્સિતમ્ ।
૨૯.૩૨/૨યેષાં ધર્મ્યાઃ ક્રિયાઃ સર્વાઃ સદૈવોદ્દિશ્ય ભાસ્કરમ્ ॥ ૨૯.૩૨॥

૨૯.૩૩/૧ન કુલે જાયતે તેષાં દરિદ્રો વ્યાધિતોઽપિ વા ।
૨૯.૩૩/૨શ્વેતયા રક્તયા વાપિ પીતમૃત્તિકયાપિ વા ॥ ૨૯.૩૩॥

૨૯.૩૪/૧ઉપલેપનકર્તા તુ ચિન્તિતં લભતે ફલમ્ ।
૨૯.૩૪/૨ચિત્રભાનું વિચિત્રૈસ્તુ કુસુમૈશ્ચ સુગન્ધિભિઃ ॥ ૨૯.૩૪॥

૨૯.૩૫/૧પૂજયેત્ સોપવાસો યઃ સ કામાન્ ઈપ્સિતાંલ્લભેત્ ।
૨૯.૩૫/૨ઘૃતેન દીપં પ્રજ્વાલ્ય તિલતૈલેન વા પુનઃ ॥ ૨૯.૩૫॥

૨૯.૩૬/૧આદિત્યં પૂજયેદ્ યસ્તુ ચક્ષુષા ન સ હીયતે ।
૨૯.૩૬/૨દીપદાતા નરો નિત્યં જ્ઞાનદીપેન દીપ્યતે ॥ ૨૯.૩૬॥

૨૯.૩૭/૧તિલાઃ પવિત્રં તૈલં વા તિલગોદાનમુત્તમમ્ ।
૨૯.૩૭/૨અગ્નિકાર્યે ચ દીપે ચ મહાપાતકનાશનમ્ ॥ ૨૯.૩૭॥

૨૯.૩૮/૧દીપં દદાતિ યો નિત્યં દેવતાયતનેષુ ચ ।
૨૯.૩૮/૨ચતુષ્પથેષુ રથ્યાસુ રૂપવાન્ સુભગો ભવેત્ ॥ ૨૯.૩૮॥

૨૯.૩૯/૧હવિર્ભિઃ પ્રથમઃ કલ્પો દ્વિતીયશ્ચૌષધીરસૈઃ ।
૨૯.૩૯/૨વસામેદોસ્થિનિર્યાસૈર્ન તુ દેયઃ કથંચન ॥ ૨૯.૩૯॥

૨૯.૪૦/૧ભવેદ્ ઊર્ધ્વગતિર્દીપો ન કદાચિદ્ અધોગતિઃ ।
૨૯.૪૦/૨દાતા દીપ્યતિ ચાપ્યેવં ન તિર્યગ્ગતિમાપ્નુયાત્ ॥ ૨૯.૪૦॥

૨૯.૪૧/૧જ્વલમાનં સદા દીપં ન હરેન્ નાપિ નાશયેત્ ।
૨૯.૪૧/૨દીપહર્તા નરો બન્ધં નાશં ક્રોધં તમો વ્રજેત્ ॥ ૨૯.૪૧॥

૨૯.૪૨/૧દીપદાતા સ્વર્ગલોકે દીપમાલેવ રાજતે ।
૨૯.૪૨/૨યઃ સમાલભતે નિત્યં કુઙ્કુમાગુરુચન્દનૈઃ ॥ ૨૯.૪૨॥

૨૯.૪૩/૧સમ્પદ્યતે નરઃ પ્રેત્ય ધનેન યશસા શ્રિયા ।
૨૯.૪૩/૨રક્તચન્દનસમ્મિશ્રૈ રક્તપુષ્પૈઃ શુચિર્નરઃ ॥ ૨૯.૪૩॥

૨૯.૪૪/૧ઉદયેઽર્ઘ્યં સદા દત્ત્વા સિદ્ધિં સંવત્સરાલ્લભેત્ ।
૨૯.૪૪/૨ઉદયાત્ પરિવર્તેત યાવદ્ અસ્તમને સ્થિતઃ ॥ ૨૯.૪૪॥

૨૯.૪૫/૧જપન્ન્ અભિમુખઃ કિંચિન્ મન્ત્રં સ્તોત્રમથાપિ વા ।
૨૯.૪૫/૨આદિત્યવ્રતમેતત્ તુ મહાપાતકનાશનમ્ ॥ ૨૯.૪૫॥

૨૯.૪૬/૧અર્ઘ્યેણ સહિતં ચૈવ સર્વં સાઙ્ગં પ્રદાપયેત્ ।
૨૯.૪૬/૨ઉદયે શ્રદ્ધયા યુક્તઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૯.૪૬॥

૨૯.૪૭/૧સુવર્ણધેનુઅનડ્વાહ+ ।વસુધાવસ્ત્રસંયુતમ્ ।
૨૯.૪૭/૨અર્ઘ્યપ્રદાતા લભતે સપ્તજન્માનુગં ફલમ્ ॥ ૨૯.૪૭॥

૨૯.૪૮/૧અગ્નૌ તોયેઽન્તરિક્ષે ચ શુચૌ ભૂમ્યાં તથૈવ ચ ।
૨૯.૪૮/૨પ્રતિમાયાં તથા પિણ્ડ્યાં દેયમર્ઘ્યં પ્રયત્નતઃ ॥ ૨૯.૪૮॥

૨૯.૪૯/૧નાપસવ્યં ન સવ્યં ચ દદ્યાદ્ અભિમુખઃ સદા ।
૨૯.૪૯/૨સઘૃતં ગુગ્ગુલં વાપિ રવેર્ભક્તિસમન્વિતઃ ॥ ૨૯.૪૯॥

૨૯.૫૦/૧તત્ક્ષણાત્ સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ।
૨૯.૫૦/૨શ્રીવાસં ચતુરસ્રં ચ દેવદારું તથૈવ ચ ॥ ૨૯.૫૦॥

૨૯.૫૧/૧કર્પૂરાગરુધૂપાનિ દત્ત્વા વૈ સ્વર્ગગામિનઃ ।
૨૯.૫૧/૨અયને તૂત્તરે સૂર્યમથવા દક્ષિણાયને ॥ ૨૯.૫૧॥

૨૯.૫૨/૧પૂજયિત્વા વિશેષેણ સર્વપાપૈઃ પ્રમુચ્યતે ।
૨૯.૫૨/૨વિષુવેષૂપરાગેષુ ષડશીતિમુખેષુ ચ ॥ ૨૯.૫૨॥

૨૯.૫૩/૧પૂજયિત્વા વિશેષેણ સર્વપાપૈઃ પ્રમુચ્યતે ।
૨૯.૫૩/૨એવં વેલાસુ સર્વાસુ સર્વકાલં ચ માનવઃ ॥ ૨૯.૫૩॥

૨૯.૫૪/૧ભક્ત્યા પૂજયતે યોઽર્કં સોઽર્કલોકે મહીયતે ।
૨૯.૫૪/૨કૃસરૈઃ પાયસૈઃ પૂપૈઃ ફલમૂલઘૃતૌદનૈઃ ॥ ૨૯.૫૪॥

૨૯.૫૫/૧બલિં કૃત્વા તુ સૂર્યાય સર્વાન્ કામાન્ અવાપ્નુયાત્ ।
૨૯.૫૫/૨ઘૃતેન તર્પણં કૃત્વા સર્વસિદ્ધો ભવેન્ નરઃ ॥ ૨૯.૫૫॥

૨૯.૫૬/૧ક્ષીરેણ તર્પણં કૃત્વા મનસ્તાપૈર્ન યુજ્યતે ।
૨૯.૫૬/૨દધ્ના તુ તર્પણં કૃત્વા કાર્યસિદ્ધિં લભેન્ નરઃ ॥ ૨૯.૫૬॥

૨૯.૫૭/૧સ્નાનાર્થમાહરેદ્ યસ્તુ જલં ભાનોઃ સમાહિતઃ ।
૨૯.૫૭/૨તીર્થેષુ શુચિતાપન્નઃ સ યાતિ પરમાં ગતિમ્ ॥ ૨૯.૫૭॥

૨૯.૫૮/૧છત્રં ધ્વજં વિતાનં વા પતાકાં ચામરાણિ ચ ।
૨૯.૫૮/૨શ્રદ્ધયા ભાનવે દત્ત્વા ગતિમિષ્ટામવાપ્નુયાત્ ॥ ૨૯.૫૮॥

૨૯.૫૯/૧યદ્ યદ્ દ્રવ્યં નરો ભક્ત્યા આદિત્યાય પ્રયચ્છતિ ।
૨૯.૫૯/૨તત્ તસ્ય શતસાહસ્રમુત્પાદયતિ ભાસ્કરઃ ॥ ૨૯.૫૯॥

૨૯.૬૦/૧માનસં વાચિકં વાપિ કાયજં યચ્ચ દુષ્કૃતમ્ ।
૨૯.૬૦/૨સર્વં સૂર્યપ્રસાદેન તદ્ અશેષં વ્યપોહતિ ॥ ૨૯.૬૦॥

૨૯.૬૧/૧એકાહેનાપિ યદ્ ભાનોઃ પૂજાયાઃ પ્રાપ્યતે ફલમ્ ।
૨૯.૬૧/૨યથોક્તદક્ષિણૈર્વિપ્રૈર્ન તત્ ક્રતુશતૈરપિ ॥ ૨૯.૬૧॥

૩૦.૧/૧મુનય ઊચુઃ । અહો દેવસ્ય માહાત્મ્યં શ્રુતમેવં જગત્પતે ।
૩૦.૧/૨ભાસ્કરસ્ય સુરશ્રેષ્ઠ વદતસ્તેષુ દુર્લભમ્ ॥ ૩૦.૧॥

૩૦.૨/૧ભૂયઃ પ્રબ્રૂહિ દેવેશ યત્ પૃચ્છામો જગત્પતે ।
૩૦.૨/૨શ્રોતુમિચ્છામહે બ્રહ્મન્ પરં કૌતૂહલં હિ નઃ ॥ ૩૦.૨॥

૩૦.૩/૧ગૃહસ્થો બ્રહ્મચારી ચ વાનપ્રસ્થોઽથ ભિક્ષુકઃ ।
૩૦.૩/૨ય ઇચ્છેન્ મોક્ષમાસ્થાતું દેવતાં કાં યજેત સઃ ॥ ૩૦.૩॥

૩૦.૪/૧કુતો હ્યસ્યાક્ષયઃ સ્વર્ગઃ કુતો નિઃશ્રેયસં પરમ્ ।
૩૦.૪/૨સ્વર્ગતશ્ચૈવ કિં કુર્યાદ્ યેન ન ચ્યવતે પુનઃ ॥ ૩૦.૪॥

૩૦.૫/૧દેવાનાં ચાત્ર કો દેવઃ પિતૃણાં ચૈવ કઃ પિતા ।
૩૦.૫/૨યસ્માત્ પરતરં નાસ્તિ તન્ મે બ્રૂહિ સુરેશ્વર ॥ ૩૦.૫॥

૩૦.૬/૧કુતઃ સૃષ્ટમિદં વિશ્વં સર્વં સ્થાવરજઙ્ગમમ્ ।
૩૦.૬/૨પ્રલયે ચ કમભ્યેતિ તદ્ ભવાન્ વક્તુમર્હતિ ॥ ૩૦.૬॥

૩૦.૭/૧બ્રહ્મોવાચ । ઉદ્યન્ન્ એવૈષ કુરુતે જગદ્ વિતિમિરં કરૈઃ ।
૩૦.૭/૨નાતઃ પરતરો દેવઃ કશ્ચિદ્ અન્યો દ્વિજોત્તમાઃ ॥ ૩૦.૭॥

૩૦.૮/૧અનાદિનિધનો હ્યેષ પુરુષઃ શાશ્વતોઽવ્યયઃ ।
૩૦.૮/૨તાપયત્યેષ ત્રીંલ્લોકાન્ ભવન્ રશ્મિભિરુલ્બણઃ ॥ ૩૦.૮॥

૩૦.૯/૧સર્વદેવમયો હ્યેષ તપતાં તપનો વરઃ ।
૩૦.૯/૨સર્વસ્ય જગતો નાથઃ સર્વસાક્ષી જગત્પતિઃ ॥ ૩૦.૯॥

૩૦.૧૦/૧સંક્ષિપત્યેષ ભૂતાનિ તથા વિસૃજતે પુનઃ ।

૩૦.૧૦/૨એષ ભાતિ તપત્યેષ વર્ષત્યેષ ગભસ્તિભિઃ ॥ ૩૦.૧૦॥

૩૦.૧૧/૧એષ ધાતા વિધાતા ચ ભૂતાદિર્ભૂતભાવનઃ ।

૩૦.૧૧/૨ન હ્યેષ ક્ષયમાયાતિ નિત્યમક્ષયમણ્ડલઃ ॥ ૩૦.૧૧॥

૩૦.૧૨/૧પિતૃણાં ચ પિતા હ્યેષ દેવતાનાં હિ દેવતા ।

૩૦.૧૨/૨ધ્રુવં સ્થાનં સ્મૃતં હ્યેતદ્ યસ્માન્ ન ચ્યવતે પુનઃ ॥ ૩૦.૧૨॥

૩૦.૧૩/૧સર્ગકાલે જગત્ કૃત્સ્નમાદિત્યાત્ સમ્પ્રસૂયતે ।

૩૦.૧૩/૨પ્રલયે ચ તમભ્યેતિ ભાસ્કરં દીપ્તતેજસમ્ ॥ ૩૦.૧૩॥

૩૦.૧૪/૧યોગિનશ્ચાપ્યસંખ્યાતાસ્ત્યક્ત્વા ગૃહકલેવરમ્ ।

૩૦.૧૪/૨વાયુર્ભૂત્વા વિશન્ત્યસ્મિંસ્તેજોરાશૌ દિવાકરે ॥ ૩૦.૧૪॥

૩૦.૧૫/૧અસ્ય રશ્મિસહસ્રાણિ શાખા ઇવ વિહંગમાઃ ।

૩૦.૧૫/૨વસન્ત્યાશ્રિત્ય મુનયઃ સંસિદ્ધા દૈવતૈઃ સહ ॥ ૩૦.૧૫॥

૩૦.૧૬/૧ગૃહસ્થા જનકાદ્યાશ્ચ રાજાનો યોગધર્મિણઃ ।

૩૦.૧૬/૨વાલખિલ્યાદયશ્ચૈવ ઋષયો બ્રહ્મવાદિનઃ ॥ ૩૦.૧૬॥

૩૦.૧૭/૧વાનપ્રસ્થાશ્ચ યે ચાન્યે વ્યાસાદ્યા ભિક્ષવસ્તથા ।

૩૦.૧૭/૨યોગમાસ્થાય સર્વે તે પ્રવિષ્ટાઃ સૂર્યમણ્ડલમ્ ॥ ૩૦.૧૭॥

૩૦.૧૮/૧શુકો વ્યાસસુતઃ શ્રીમાન્ યોગધર્મમવાપ્ય સઃ ।

૩૦.૧૮/૨આદિત્યકિરણાન્ ગત્વા હ્યપુનર્ભાવમાસ્થિતઃ ॥ ૩૦.૧૮॥

૩૦.૧૯/૧શબ્દમાત્રશ્રુતિમુખા બ્રહ્મવિષ્ણુશિવાદયઃ ।

૩૦.૧૯/૨પ્રત્યક્ષોઽયં પરો દેવઃ સૂર્યસ્તિમિરનાશનઃ ॥ ૩૦.૧૯॥

૩૦.૨૦/૧તસ્માદ્ અન્યત્ર ભક્તિર્હિ ન કાર્યા શુભમિચ્છતા ।

૩૦.૨૦/૨યસ્માદ્ દૃષ્ટેરગમ્યાસ્તે દેવા વિષ્ણુપુરોગમાઃ ॥ ૩૦.૨૦॥

૩૦.૨૧/૧અતો ભવદ્ભિઃ સતતમભ્યર્ચ્યો ભગવાન્ રવિઃ ।

૩૦.૨૧/૨સ હિ માતા પિતા ચૈવ કૃત્સ્નસ્ય જગતો ગુરુઃ ॥ ૩૦.૨૧॥

૩૦.૨૨/૧અનાદ્યો લોકનાથોઽસૌ રશ્મિમાલી જગત્પતિઃ ।

૩૦.૨૨/૨મિત્રત્વે ચ સ્થિતો યસ્માત્ તપસ્તેપે દ્વિજોત્તમાઃ ॥ ૩૦.૨૨॥

૩૦.૨૩/૧અનાદિનિધનો બ્રહ્મા નિત્યશ્ચાક્ષય એવ ચ ।

૩૦.૨૩/૨સૃષ્ટ્વા સસાગરાન્ દ્વીપાન્ ભુવનાનિ ચતુર્દશ ॥ ૩૦.૨૩॥

૩૦.૨૪/૧લોકાનાં સ હિતાર્થાય સ્થિતશ્ચન્દ્રસરિત્તટે ।
૩૦.૨૪/૨સૃષ્ટ્વા પ્રજાપતીન્ સર્વાન્ સૃષ્ટ્વા ચ વિવિધાઃ પ્રજાઃ ॥ ૩૦.૨૪॥

૩૦.૨૫/૧તતઃ શતસહસ્રાંશુરવ્યક્તશ્ચ પુનઃ સ્વયમ્ ।
૩૦.૨૫/૨કૃત્વા દ્વાદશધાત્માનમાદિત્યમુપપદ્યતે ॥ ૩૦.૨૫॥

૩૦.૨૬/૧ઇન્દ્રો ધાતાથ પર્જન્યસ્ત્વષ્ટા પૂષાર્યમા ભગઃ ।
૩૦.૨૬/૨વિવસ્વાન્ વિષ્ણુરંશશ્ચ વરુણો મિત્ર એવ ચ ॥ ૩૦.૨૬॥

૩૦.૨૭/૧આભિર્દ્વાદશભિસ્તેન સૂર્યેણ પરમાત્મના ।
૩૦.૨૭/૨કૃત્સ્નં જગદ્ ઇદં વ્યાપ્તં મૂર્તિભિશ્ચ દ્વિજોત્તમાઃ ॥ ૩૦.૨૭॥

૩૦.૨૮/૧તસ્ય યા પ્રથમા મૂર્તિરાદિત્યસ્યેન્દ્રસંજ્ઞિતા ।
૩૦.૨૮/૨સ્થિતા સા દેવરાજત્વે દેવાનાં રિપુનાશિની ॥ ૩૦.૨૮॥

૩૦.૨૯/૧દ્વિતીયા તસ્ય યા મૂર્તિર્નામ્ના ધાતેતિ કીર્તિતા ।
૩૦.૨૯/૨સ્થિતા પ્રજાપતિત્વેન વિવિધાઃ સૃજતે પ્રજાઃ ॥ ૩૦.૨૯॥

૩૦.૩૦/૧તૃતીયાર્કસ્ય યા મૂર્તિઃ પર્જન્ય ઇતિ વિશ્રુતા ।
૩૦.૩૦/૨મેઘેષ્વેવ સ્થિતા સા તુ વર્ષતે ચ ગભસ્તિભિઃ ॥ ૩૦.૩૦॥

૩૦.૩૧/૧ચતુર્થી તસ્ય યા મૂર્તિર્નામ્ના ત્વષ્ટેતિ વિશ્રુતા ।
૩૦.૩૧/૨સ્થિતા વનસ્પતૌ સા તુ ઓષધીષુ ચ સર્વતઃ ॥ ૩૦.૩૧॥

૩૦.૩૨/૧પઞ્ચમી તસ્ય યા મૂર્તિર્નામ્ના પૂષેતિ વિશ્રુતા ।
૩૦.૩૨/૨અન્ને વ્યવસ્થિતા સા તુ પ્રજાં પુષ્ણાતિ નિત્યશઃ ॥ ૩૦.૩૨॥

૩૦.૩૩/૧મૂર્તિઃ ષષ્ઠી રવેર્યા તુ અર્યમા ઇતિ વિશ્રુતા ।
૩૦.૩૩/૨વાયોઃ સંસરણા સા તુ દેવેષ્વેવ સમાશ્રિતા ॥ ૩૦.૩૩॥

૩૦.૩૪/૧ભાનોર્યા સપ્તમી મૂર્તિર્નામ્ના ભગેતિ વિશ્રુતા ।
૩૦.૩૪/૨ભૂયિષ્વ્ અવસ્થિતા સા તુ શરીરેષુ ચ દેહિનામ્ ॥ ૩૦.૩૪॥

૩૦.૩૫/૧મૂર્તિર્યા ત્વષ્ટમી તસ્ય વિવસ્વાન્ ઇતિ વિશ્રુતા ।
૩૦.૩૫/૨અગ્નૌ પ્રતિષ્ઠિતા સા તુ પચત્યન્નં શરીરિણામ્ ॥ ૩૦.૩૫॥

૩૦.૩૬/૧નવમી ચિત્રભાનોર્યા મૂર્તિર્વિષ્ણુશ્ચ નામતઃ ।
૩૦.૩૬/૨પ્રાદુર્ભવતિ સા નિત્યં દેવાનામરિસૂદની ॥ ૩૦.૩૬॥

૩૦.૩૭/૧દશમી તસ્ય યા મૂર્તિરંશુમાન્ ઇતિ વિશ્રુતા ।
૩૦.૩૭/૨વાયૌ પ્રતિષ્ઠિતા સા તુ પ્રહ્લાદયતિ વૈ પ્રજાઃ ॥ ૩૦.૩૭॥

૩૦.૩૮/૧મૂર્તિસ્ત્વેકાદશી ભાનોર્નામ્ના વરુણસંજ્ઞિતા ।
૩૦.૩૮/૨જલેષ્વવસ્થિતા સા તુ પ્રજાં પુષ્ણાતિ નિત્યશઃ ॥ ૩૦.૩૮॥

૩૦.૩૯/૧મૂર્તિર્યા દ્વાદશી ભાનોર્નામ્ના મિત્રેતિ સંજ્ઞિતા ।
૩૦.૩૯/૨લોકાનાં સા હિતાર્થાય સ્થિતા ચન્દ્રસરિત્તટે ॥ ૩૦.૩૯॥

૩૦.૪૦/૧વાયુભક્ષસ્તપસ્તેપે સ્થિત્વા મૈત્રેણ ચક્ષુષા ।
૩૦.૪૦/૨અનુગૃહ્ણન્ સદા ભક્તાન્ વરૈર્નાનાવિધૈસ્તુ સઃ ॥ ૩૦.૪૦॥

૩૦.૪૧/૧એવં સા જગતાં મૂર્તિર્હિતા વિહિતા પુરા ।
૩૦.૪૧/૨તત્ર મિત્રઃ સ્થિતો યસ્માત્ તસ્માન્ મિત્રં પરં સ્મૃતમ્ ॥ ૩૦.૪૧॥

૩૦.૪૨/૧આભિર્દ્વાદશભિસ્તેન સવિત્રા પરમાત્મના ।
૩૦.૪૨/૨કૃત્સ્નં જગદ્ ઇદં વ્યાપ્તં મૂર્તિભિશ્ચ દ્વિજોત્તમાઃ ॥ ૩૦.૪૨॥

૩૦.૪૩/૧તસ્માદ્ ધ્યેયો નમસ્યશ્ચ દ્વાદશસ્થાસુ મૂર્તિષુ ।
૩૦.૪૩/૨ભક્તિમદ્ભિર્નરૈર્નિત્યં તદ્ગતેનાન્તરાત્મના ॥ ૩૦.૪૩॥

૩૦.૪૪/૧ઇત્યેવં દ્વાદશાદિત્યાન્ નમસ્કૃત્વા તુ માનવઃ ।
૩૦.૪૪/૨નિત્યં શ્રુત્વા પઠિત્વા ચ સૂર્યલોકે મહીયતે ॥ ૩૦.૪૪॥

૩૦.૪૫/૧મુનય ઊચુઃ । યદિ તાવદ્ અયં સૂર્યશ્ચાદિદેવઃ સનાતનઃ ।
૩૦.૪૫/૨તતઃ કસ્માત્ તપસ્તેપે વરેપ્સુઃ પ્રાકૃતો યથા ॥ ૩૦.૪૫॥

૩૦.૪૬/૧બ્રહ્મોવાચ । એતદ્ વઃ સમ્પ્રવક્ષ્યામિ પરં ગુહ્યં વિભાવસોઃ ।
૩૦.૪૬/૨પૃષ્ટે મિત્રેણ યત્ પૂર્વં નારદાય મહાત્મને ॥ ૩૦.૪૬॥

૩૦.૪૭/૧પ્રાઙ્ મયોક્તાસ્તુ યુષ્મભ્યં રવેર્દ્વાદશ મૂર્તયઃ ।
૩૦.૪૭/૨મિત્રશ્ચ વરુણશ્ચોભૌ તાસાં તપસિ સંસ્થિતૌ ॥ ૩૦.૪૭॥

૩૦.૪૮/૧અબ્ભક્ષો વરુણસ્તાસાં તસ્થૌ પશ્ચિમસાગરે ।
૩૦.૪૮/૨મિત્રો મિત્રવને ચાસ્મિન્ વાયુભક્ષોઽભવત્ તદા ॥ ૩૦.૪૮॥

૩૦.૪૯/૧અથ મેરુગિરેઃ શૃઙ્ગાત્ પ્રચ્યુતો ગન્ધમાદનાત્ ।
૩૦.૪૯/૨નારદસ્તુ મહાયોગી સર્વાંલ્લોકાંશ્ચરન્ વશી ॥ ૩૦.૪૯॥

૩૦.૫૦/૧આજગામાથ તત્રૈવ યત્ર મિત્રોઽચરત્ તપઃ ।
૩૦.૫૦/૨તં દૃષ્ટ્વા તુ તપસ્યન્તં તસ્ય કૌતૂહલં હ્યભૂત્ ॥ ૩૦.૫૦॥

૩૦.૫૧/૧યોઽક્ષયશ્ચાવ્યયશ્ચૈવ વ્યક્તાવ્યક્તઃ સનાતનઃ ।

૩૦.૫૧/૨ધૃતમેકાત્મકં યેન ત્રૈલોક્યં સુમહાત્મના ॥ ૩૦.૫૧॥

૩૦.૫૨/૧યઃ પિતા સર્વદેવાનાં પરાણામપિ યઃ પરઃ ।
૩૦.૫૨/૨અયજદ્ દેવતાઃ કાસ્તુ પિતૄન્ વા કાન્ અસૌ યજેત્ ।
૩૦.૫૨/૩ઇતિ સંચિન્ત્ય મનસા તં દેવં નારદોઽબ્રવીત્ ॥ ૩૦.૫૨॥

૩૦.૫૩/૧નારદ ઉવાચ । વેદેષુ સપુરાણેષુ સાઙ્ગોપાઙ્ગેષુ ગીયસે ।
૩૦.૫૩/૨ત્વમજઃ શાશ્વતો ધાતા ત્વં નિધાનમનુત્તમમ્ ॥ ૩૦.૫૩॥

૩૦.૫૪/૧ભૂતં ભવ્યં ભવચ્ચૈવ ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ।
૩૦.૫૪/૨ચત્વારશ્ચાશ્રમા દેવ ગૃહસ્થાદ્યાસ્તથૈવ હિ ॥ ૩૦.૫૪॥

૩૦.૫૫/૧યજન્તિ ત્વામહરહસ્ત્વાં મૂર્તિત્વં સમાશ્રિતમ્ ।
૩૦.૫૫/૨પિતા માતા ચ સર્વસ્ય દૈવતં ત્વં હિ શાશ્વતમ્ ॥ ૩૦.૫૫॥

૩૦.૫૬/૧યજસે પિતરં કં ત્વં દેવં વાપિ ન વિદ્મહે ॥ ૩૦.૫૬॥

૩૦.૫૭/૧મિત્ર ઉવાચ । અવાચ્યમેતદ્ વક્તવ્યં પરં ગુહ્યં સનાતનમ્ ।
૩૦.૫૭/૨ત્વયિ ભક્તિમતિ બ્રહ્મન્ પ્રવક્ષ્યામિ યથાતથમ્ ॥ ૩૦.૫૭॥

૩૦.૫૮/૧યત્ તત્ સૂક્ષ્મમવિજ્ઞેયમવ્યક્તમચલં ધ્રુવમ્ ।
૩૦.૫૮/૨ઇન્દ્રિયૈરિન્દ્રિયાર્થૈશ્ચ સર્વભૂતૈર્વિવર્જિતમ્ ॥ ૩૦.૫૮॥

૩૦.૫૯/૧સ હ્યન્તરાત્મા ભૂતાનાં ક્ષેત્રજ્ઞશ્ચૈવ કથ્યતે ।
૩૦.૫૯/૨ત્રિગુણાદ્ વ્યતિરિક્તોઽસૌ પુરુષશ્ચૈવ કલ્પિતઃ ॥ ૩૦.૫૯॥

૩૦.૬૦/૧હિરણ્યગર્ભો ભગવાન્ સૈવ બુદ્ધિરિતિ સ્મૃતઃ ।
૩૦.૬૦/૨મહાન્ ઇતિ ચ યોગેષુ પ્રધાનમિતિ કથ્યતે ॥ ૩૦.૬૦॥

૩૦.૬૧/૧સાંખ્યે ચ કથ્યતે યોગે નામભિર્બહુધાત્મકઃ ।
૩૦.૬૧/૨સ ચ ત્રિરૂપો વિશ્વાત્મા શર્વોઽક્ષર ઇતિ સ્મૃતઃ ॥ ૩૦.૬૧॥

૩૦.૬૨/૧ધૃતમેકાત્મકં તેન ત્રૈલોક્યમિદમાત્મના ।
૩૦.૬૨/૨અશરીરઃ શરીરેષુ સર્વેષુ નિવસત્યસૌ ॥ ૩૦.૬૨॥

૩૦.૬૩/૧વસન્ અપિ શરીરેષુ ન સ લિપ્યેત કર્મભિઃ ।
૩૦.૬૩/૨મમાન્તરાત્મા તવ ચ યે ચાન્યે દેહસંસ્થિતાઃ ॥ ૩૦.૬૩॥

૩૦.૬૪/૧સર્વેષાં સાક્ષિભૂતોઽસૌ ન ગ્રાહ્યઃ કેનચિત્ ક્વચિત્ ।
૩૦.૬૪/૨સગુણો નિર્ગુણો વિશ્વો જ્ઞાનગમ્યો હ્યસૌ સ્મૃતઃ ॥ ૩૦.૬૪॥

૩૦.૬૫/૧સર્વતઃપાણિપાદાન્તઃ સર્વતોક્ષિશિરોમુખઃ ।
૩૦.૬૫/૨સર્વતઃશ્રુતિમાંલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૩૦.૬૫॥

૩૦.૬૬/૧વિશ્વમૂર્ધા વિશ્વભુજો વિશ્વપાદાક્ષિનાસિકઃ ।
૩૦.૬૬/૨એકશ્ચરતિ વૈ ક્ષેત્રે સ્વૈરચારી યથાસુખમ્ ॥ ૩૦.૬૬॥

૩૦.૬૭/૧ક્ષેત્રાણીહ શરીરાણિ તેષાં ચૈવ યથાસુખમ્ ।
૩૦.૬૭/૨તાનિ વેત્તિ સ યોગાત્મા તતઃ ક્ષેત્રજ્ઞ ઉચ્યતે ॥ ૩૦.૬૭॥

૩૦.૬૮/૧અવ્યક્તે ચ પુરે શેતે પુરુષસ્તેન ચોચ્યતે ।
૩૦.૬૮/૨વિશ્વં બહુવિધં જ્ઞેયં સ ચ સર્વત્ર ઉચ્યતે ॥ ૩૦.૬૮॥

૩૦.૬૯/૧તસ્માત્ સ બહુરૂપત્વાદ્ વિશ્વરૂપ ઇતિ સ્મૃતઃ ।
૩૦.૬૯/૨તસ્યૈકસ્ય મહત્ત્વં હિ સ ચૈકઃ પુરુષઃ સ્મૃતઃ ॥ ૩૦.૬૯॥

૩૦.૭૦/૧મહાપુરુષશબ્દં હિ બિભર્ત્યેકઃ સનાતનઃ ।
૩૦.૭૦/૨સ તુ વિધિક્રિયાયત્તઃ સૃજત્યાત્માનમાત્મના ॥ ૩૦.૭૦॥

૩૦.૭૧/૧શતધા સહસ્રધા ચૈવ તથા શતસહસ્રધા ।
૩૦.૭૧/૨કોટિશશ્ચ કરોત્યેષ પ્રત્યગાત્માનમાત્મના ॥ ૩૦.૭૧॥

૩૦.૭૨/૧આકાશાત્ પતિતં તોયં યાતિ સ્વાદ્વન્તરં યથા ।
૩૦.૭૨/૨ભૂમે રસવિશેષેણ તથા ગુણરસાત્ તુ સઃ ॥ ૩૦.૭૨॥

૩૦.૭૩/૧એક એવ યથા વાયુર્દેહેષ્વેવ હિ પઞ્ચધા ।
૩૦.૭૩/૨એકત્વં ચ પૃથક્ત્વં ચ તથા તસ્ય ન સંશયઃ ॥ ૩૦.૭૩॥

૩૦.૭૪/૧સ્થાનાન્તરવિશેષાચ્ચ યથાગ્નિર્લભતે પરામ્ ।
૩૦.૭૪/૨સંજ્ઞાં તથા મુને સોऽયં બ્રહ્માદિષુ તથાપ્નુયાત્ ॥ ૩૦.૭૪॥

૩૦.૭૫/૧યથા દીપસહસ્રાણિ દીપ એકઃ પ્રસૂયતે ।
૩૦.૭૫/૨તથા રૂપસહસ્રાણિ સ એકઃ સમ્પ્રસૂયતે ॥ ૩૦.૭૫॥

૩૦.૭૬/૧યદા સ બુધ્યત્યાત્માનં તદા ભવતિ કેવલઃ ।
૩૦.૭૬/૨એકત્વપ્રલયે ચાસ્ય બહુત્વં ચ પ્રવર્તતે ॥ ૩૦.૭૬॥

૩૦.૭૭/૧નિત્યં હિ નાસ્તિ જગતિ ભૂતં સ્થાવરજઙ્ગમમ્ ।
૩૦.૭૭/૨અક્ષયશ્ચાપ્રમેયશ્ચ સર્વગશ્ચ સ ઉચ્યતે ॥ ૩૦.૭૭॥

૩૦.૭૮/૧તસ્માદ્ અવ્યક્તમુત્પન્નં ત્રિગુણં દ્વિજસત્તમાઃ ।
૩૦.૭૮/૨અવ્યક્તાવ્યક્તભાવસ્થા યા સા પ્રકૃતિરુચ્યતે ॥ ૩૦.૭૮॥

૩૦.૭૯/૧તાં યોનિં બ્રહ્મણો વિદ્ધિ યોઽસૌ સદસદાત્મકઃ ।
૩૦.૭૯/૨લોકે ચ પૂજ્યતે યોઽસૌ દૈવે પિત્ર્યે ચ કર્મણિ ॥ ૩૦.૭૯॥

૩૦.૮૦/૧નાસ્તિ તસ્માત્ પરો હ્યન્યઃ પિતા દેવોઽપિ વા દ્વિજાઃ ।
૩૦.૮૦/૨આત્મના સ તુ વિજ્ઞેયસ્તતસ્તં પૂજયામ્યહમ્ ॥ ૩૦.૮૦॥

૩૦.૮૧/૧સ્વર્ગેષ્વપિ હિ યે કેચિત્ તં નમસ્યન્તિ દેહિનઃ ।
૩૦.૮૧/૨તેન ગચ્છન્તિ દેવર્ષે તેનોદ્દિષ્ટફલાં ગતિમ્ ॥ ૩૦.૮૧॥

૩૦.૮૨/૧તં દેવાઃ સ્વાશ્રમસ્થાશ્ચ નાનામૂર્તિસમાશ્રિતાઃ ।
૩૦.૮૨/૨ભક્ત્યા સમ્પૂજયન્ત્યાદ્યં ગતિશ્ચૈષાં દદાતિ સઃ ॥ ૩૦.૮૨॥

૩૦.૮૩/૧સ હિ સર્વગતશ્ચૈવ નિર્ગુણશ્ચૈવ કથ્યતે ।
૩૦.૮૩/૨એવં મત્વા યથાજ્ઞાનં પૂજયામિ દિવાકરમ્ ॥ ૩૦.૮૩॥

૩૦.૮૪/૧યે ચ તદ્ભાવિતા લોક એકતત્ત્વં સમાશ્રિતાઃ ।
૩૦.૮૪/૨એતદ્ અપ્યધિકં તેષાં યદ્ એકં પ્રવિશન્ત્યુત ॥ ૩૦.૮૪॥

૩૦.૮૫/૧ઇતિ ગુહ્યસમુદ્દેશસ્તવ નારદ કીર્તિતઃ ।
૩૦.૮૫/૨અસ્મદ્ભક્ત્યાપિ દેવર્ષે ત્વયાપિ પરમં સ્મૃતમ્ ॥ ૩૦.૮૫॥

૩૦.૮૬/૧સુરૈર્વા મુનિભિર્વાપિ પુરાણૈર્વરદં સ્મૃતમ્ ।
૩૦.૮૬/૨સર્વે ચ પરમાત્માનં પૂજયન્તિ દિવાકરમ્ ॥ ૩૦.૮૬॥

૩૦.૮૭/૧બ્રહ્મોવાચ । એવમેતત્ પુરાખ્યાતં નારદાય તુ ભાનુના ।
૩૦.૮૭/૨મયાપિ ચ સમાખ્યાતા કથા ભાનોર્દ્વિજોત્તમાઃ ॥ ૩૦.૮૭॥

૩૦.૮૮/૧ઇદમાખ્યાનમાખ્યેયં મયાખ્યાતં દ્વિજોત્તમાઃ ।
૩૦.૮૮/૨ન હ્યનાદિત્યભક્તાય ઇદં દેયં કદાચન ॥ ૩૦.૮૮॥

૩૦.૮૯/૧યશ્ચૈતચ્છ્રાવયેન્ નિત્યં યશ્ચૈવ શૄણુયાન્ નરઃ ।
૩૦.૮૯/૨સ સહસ્રાર્ચિષં દેવં પ્રવિશેન્ નાત્ર સંશયઃ ॥ ૩૦.૮૯॥

૩૦.૯૦/૧મુચ્યેતાર્તસ્તથા રોગાચ્છ્રુત્વેમામાદિતઃ કથામ્ ।
૩૦.૯૦/૨જિજ્ઞાસુર્લભતે જ્ઞાનં ગતિમિષ્ટાં તથૈવ ચ ॥ ૩૦.૯૦॥

૩૦.૯૧/૧ક્ષણેન લભતેઽધ્વાનમિદં યઃ પઠતે મુને ।
૩૦.૯૧/૨યો યં કામયતે કામં સ તં પ્રાપ્નોત્યસંશયમ્ ॥ ૩૦.૯૧॥

૩૦.૯૨/૧તસ્માદ્ ભવદ્ભિઃ સતતં સ્મર્તવ્યો ભગવાન્ રવિઃ ।

૩૦.૯૨/૨સ ચ ધાતા વિધાતા ચ સર્વસ્ય જગતઃ પ્રભુઃ ॥ ૩૦.૯૨॥

૩૧.૧/૧બ્રહ્મોવાચ । આદિત્યમૂલમખિલં ત્રૈલોક્યં મુનિસત્તમાઃ ।
૩૧.૧/૨ભવત્યસ્માજ્જગત્ સર્વં સદેવાસુરમાનુષમ્ ॥ ૩૧.૧॥

૩૧.૨/૧રુદ્રોપેન્દ્રમહેન્દ્રાણાં વિપ્રેન્દ્રત્રિદિવૌકસામ્ ।
૩૧.૨/૨મહાદ્યુતિમતાં ચૈવ તેજોઽયં સાર્વલૌકિકમ્ ॥ ૩૧.૨॥

૩૧.૩/૧સર્વાત્મા સર્વલોકેશો દેવદેવઃ પ્રજાપતિઃ ।
૩૧.૩/૨સૂર્ય એવ ત્રિલોકસ્ય મૂલં પરમદૈવતમ્ ॥ ૩૧.૩॥

૩૧.૪/૧અગ્નૌ પ્રાસ્તાહુતિઃ સમ્યગ્ આદિત્યમુપતિષ્ઠતે ।
૩૧.૪/૨આદિત્યાજ્જાયતે વૃષ્ટિર્વૃષ્ટેરન્નં તતઃ પ્રજાઃ ॥ ૩૧.૪॥

૩૧.૫/૧સૂર્યાત્ પ્રસૂયતે સર્વં તત્ર ચૈવ પ્રલીયતે ।
૩૧.૫/૨ભાવાભાવૌ હિ લોકાનામાદિત્યાન્ નિઃસૃતૌ પુરા ॥ ૩૧.૫॥

૩૧.૬/૧એતત્ તુ ધ્યાનિનાં ધ્યાનં મોક્ષશ્ચાપ્યેષ મોક્ષિણામ્ ।
૩૧.૬/૨તત્ર ગચ્છન્તિ નિર્વાણં જાયન્તેઽસ્માત્ પુનઃ પુનઃ ॥ ૩૧.૬॥

૩૧.૭/૧ક્ષણા મુહૂર્તા દિવસા નિશા પક્ષાશ્ચ નિત્યશઃ ।
૩૧.૭/૨માસાઃ સંવત્સરાશ્ચૈવ ઋતવશ્ચ યુગાનિ ચ ॥ ૩૧.૭॥

૩૧.૮/૧અથાદિત્યાદ્ ઋતે હ્યેષાં કાલસંખ્યા ન વિદ્યતે ।
૩૧.૮/૨કાલાદ્ ઋતે ન નિયમો નાગ્નૌ વિહરણક્રિયા ॥ ૩૧.૮॥

૩૧.૯/૧ઋતૂનામવિભાગશ્ તતઃ પુષ્પફલં કુતઃ ।
૩૧.૯/૨કુતો વૈ સસ્યનિષ્પત્તિસ્તૃણૌષધિગણઃ કુતઃ ॥ ૩૧.૯॥

૩૧.૧૦/૧અભાવો વ્યવહારાણાં જન્તૂનાં દિવિ ચેહ ચ ।
૩૧.૧૦/૨જગત્પ્રભાવાદ્ વિશતે ભાસ્કરાદ્ વારિતસ્કરાત્ ॥ ૩૧.૧૦॥

૩૧.૧૧/૧નાવૃષ્ટ્યા તપતે સૂર્યો નાવૃષ્ટ્યા પરિશુષ્યતિ ।
૩૧.૧૧/૨નાવૃષ્ટ્યા પરિધિં ધત્તે વારિણા દીપ્યતે રવિઃ ॥ ૩૧.૧૧॥

૩૧.૧૨/૧વસન્તે કપિલઃ સૂર્યો ગ્રીષ્મે કાઞ્ચનસંનિભઃ ।
૩૧.૧૨/૨શ્વેતો વર્ષાસુ વર્ણેન પાણ્ડુઃ શરદિ ભાસ્કરઃ ॥ ૩૧.૧૨॥

૩૧.૧૩/૧હેમન્તે તામ્રવર્ણાભઃ શિશિરે લોહિતો રવિઃ ।
૩૧.૧૩/૨ઇતિ વર્ણાઃ સમાખ્યાતાઃ સૂર્યસ્ય ઋતુસમ્ભવાઃ ॥ ૩૧.૧૩॥

૩૧.૧૪/૧ઋતુસ્વભાવવર્ણૈશ્ચ સૂર્યઃ ક્ષેમસુભિક્ષકૃત્ ।
૩૧.૧૪/૨અથાદિત્યસ્ય નામાનિ સામાન્યાનિ દ્વિજોત્તમાઃ ॥ ૩૧.૧૪॥

૩૧.૧૫/૧દ્વાદશૈવ પૃથક્ત્વેન તાનિ વક્ષ્યામ્યશેષતઃ ।
૩૧.૧૫/૨આદિત્યઃ સવિતા સૂર્યો મિહિરોઽર્કઃ પ્રભાકરઃ ॥ ૩૧.૧૫॥

૩૧.૧૬/૧માર્તણ્ડો ભાસ્કરો ભાનુશ્ચિત્રભાનુર્દિવાકરઃ ।
૩૧.૧૬/૨રવિર્દ્વાદશભિસ્તેષાં જ્ઞેયઃ સામાન્યનામભિઃ ॥ ૩૧.૧૬॥

૩૧.૧૭/૧વિષ્ણુર્ધાતા ભગઃ પૂષા મિત્રેન્દ્રૌ વરુણોઽર્યમા ।
૩૧.૧૭/૨વિવસ્વાન્ અંશુમાંસ્ત્વષ્ટા પર્જન્યો દ્વાદશઃ સ્મૃતઃ ॥ ૩૧.૧૭॥

૩૧.૧૮/૧ઇત્યેતે દ્વાદશાદિત્યાઃ પૃથક્ત્વેન વ્યવસ્થિતાઃ ।
૩૧.૧૮/૨ઉત્તિષ્ઠન્તિ સદા હ્યેતે માસૈર્દ્વાદશભિઃ ક્રમાત્ ॥ ૩૧.૧૮॥

૩૧.૧૯/૧વિષ્ણુસ્તપતિ ચૈત્રે તુ વૈશાખે ચાર્યમા તથા ।
૩૧.૧૯/૨વિવસ્વાઞ્ જ્યેષ્ઠમાસે તુ આષાઢે ચાંશુમાન્ સ્મૃતઃ ॥ ૩૧.૧૯॥

૩૧.૨૦/૧પર્જન્યઃ શ્રાવણે માસિ વરુણઃ પ્રૌષ્ઠસંજ્ઞકે ।
૩૧.૨૦/૨ઇન્દ્ર આશ્વયુજે માસિ ધાતા તપતિ કાર્ત્તિકે ॥ ૩૧.૨૦॥

૩૧.૨૧/૧માર્ગશીર્ષે તથા મિત્રઃ પૌષે પૂષા દિવાકરઃ ।
૩૧.૨૧/૨માઘે ભગસ્તુ વિજ્ઞેયસ્ત્વષ્ટા તપતિ ફાલ્ગુને ॥ ૩૧.૨૧॥

૩૧.૨૨/૧શતૈર્દ્વાદશભિર્વિષ્ણૂ રશ્મિભિર્દીપ્યતે સદા ।
૩૧.૨૨/૨દીપ્યતે ગોસહસ્રેણ શતૈશ્ચ ત્રિભિરર્યમા ॥ ૩૧.૨૨॥

૩૧.૨૩/૧દ્વિઃસપ્તકૈર્વિવસ્વાંસ્તુ અંશુમાન્ પઞ્ચભિસ્ત્રિભિઃ ।
૩૧.૨૩/૨વિવસ્વાન્ ઇવ પર્જન્યો વરુણશ્ચાર્યમા તથા ॥ ૩૧.૨૩॥

૩૧.૨૪/૧મિત્રવદ્ ભગવાંસ્ત્વષ્ટા સહસ્રેણ શતેન ચ ।
૩૧.૨૪/૨ઇન્દ્રસ્તુ દ્વિગુણૈઃ ષડ્ભિર્ધાતૈકાદશભિઃ શતૈઃ ॥ ૩૧.૨૪॥

૩૧.૨૫/૧સહસ્રેણ તુ મિત્રો વૈ પૂષા તુ નવભિઃ શતૈઃ ।
૩૧.૨૫/૨ઉત્તરોપક્રમેઽર્કસ્ય વર્ધન્તે રશ્મયસ્તથા ॥ ૩૧.૨૫॥

૩૧.૨૬/૧દક્ષિણોપક્રમે ભૂયો હ્રસન્તે સૂર્યરશ્મયઃ ।
૩૧.૨૬/૨એવં રશ્મિસહસ્રં તુ સૂર્યલોકાદ્ અનુગ્રહમ્ ॥ ૩૧.૨૬॥

૩૧.૨૭/૧એવં નામ્નાં ચતુર્વિંશદ્ એક એષાં પ્રકીર્તિતઃ ।
૩૧.૨૭/૨વિસ્તરેણ સહસ્રં તુ પુનરન્યત્ પ્રકીર્તિતમ્ ॥ ૩૧.૨૭॥

૩૧.૨૮/૧મુનય ઊચુઃ । યે તન્નામસહસ્રેણ સ્તુવન્ત્યર્કં પ્રજાપતે ।
૩૧.૨૮/૨તેષાં ભવતિ કિં પુણ્યં ગતિશ્ચ પરમેશ્વર ॥ ૩૧.૨૮॥

૩૧.૨૯/૧બ્રહ્મોવાચ । શ્ ृણુધ્વં મુનિશાર્દૂલાઃ સારભૂતં સનાતનમ્ ।
૩૧.૨૯/૨અલં નામસહસ્રેણ પઠન્ન્ એવં સ્તવં શુભમ્ ॥ ૩૧.૨૯॥

૩૧.૩૦/૧યાનિ નામાનિ ગુહ્યાનિ પવિત્રાણિ શુભાનિ ચ ।
૩૧.૩૦/૨તાનિ વઃ કીર્તયિષ્યામિ શ્ ृણુધ્વં ભાસ્કરસ્ય વૈ ॥ ૩૧.૩૦॥

૩૧.૩૧/૧વિકર્તનો વિવસ્વાંશ્ચ માર્તણ્ડો ભાસ્કરો રવિઃ ।
૩૧.૩૧/૨લોકપ્રકાશકઃ શ્રીમાંલ્લોકચક્ષુર્મહેશ્વરઃ ॥ ૩૧.૩૧॥

૩૧.૩૨/૧લોકસાક્ષી ત્રિલોકેશઃ કર્તા હર્તા તમિસ્રહા ।
૩૧.૩૨/૨તપનસ્તાપનશ્ચૈવ શુચિઃ સપ્તાશ્વવાહનઃ ॥ ૩૧.૩૨॥

૩૧.૩૩/૧ગભસ્તિહસ્તો બ્રહ્મા ચ સર્વદેવનમસ્કૃતઃ ।
૩૧.૩૩/૨એકવિંશતિ ઇત્યેષ સ્તવ ઇષ્ટઃ સદા રવેઃ ॥ ૩૧.૩૩॥

૩૧.૩૪/૧શરીરારોગ્યદશ્ચૈવ ધનવૃદ્ધિયશસ્કરઃ ।
૩૧.૩૪/૨સ્તવરાજ ઇતિ ખ્યાતસ્ત્રિષુ લોકેષુ વિશ્રુતઃ ॥ ૩૧.૩૪॥

૩૧.૩૫/૧ય એતેન દ્વિજશ્રેષ્ઠા દ્વિસંધ્યેઽસ્તમનોદયે ।
૩૧.૩૫/૨સ્તૌતિ સૂર્યં શુચિર્ભૂત્વા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૩૧.૩૫॥

૩૧.૩૬/૧માનસં વાચિકં વાપિ દેહજં કર્મજં તથા ।
૩૧.૩૬/૨એકજપ્યેન તત્ સર્વં નશ્યત્યર્કસ્ય સંનિધૌ ॥ ૩૧.૩૬॥

૩૧.૩૭/૧એકજપ્યશ્ચ હોમશ્ચ સંધ્યોપાસનમેવ ચ ।
૩૧.૩૭/૨ધૂપમન્ત્રાર્ઘ્યમન્ત્રશ્ચ બલિમન્ત્રસ્તથૈવ ચ ॥ ૩૧.૩૭॥

૩૧.૩૮/૧અન્નપ્રદાને દાને ચ પ્રણિપાતે પ્રદક્ષિણે ।
૩૧.૩૮/૨પૂજિતોઽયં મહામન્ત્રઃ સર્વપાપહરઃ શુભઃ ॥ ૩૧.૩૮॥

૩૧.૩૯/૧તસ્માદ્ યૂયં પ્રયત્નેન સ્તવેનાનેન વૈ દ્વિજાઃ ।
૩૧.૩૯/૨સ્તુવીધ્વં વરદં દેવં સર્વકામફલપ્રદમ્ ॥ ૩૧.૩૯॥

૩૨.૧/૧મુનય ઊચુઃ । નિર્ગુણઃ શાશ્વતો દેવસ્ત્વયા પ્રોક્તો દિવાકરઃ ।
૩૨.૧/૨પુનર્દ્વાદશધા જાતઃ શ્રુતોઽસ્માભિસ્ત્વયોદિતઃ ॥ ૩૨.૧॥

૩૨.૨/૧સ કથં તેજસો રશ્મિઃ સ્ત્રિયા ગર્ભે મહાદ્યુતિઃ ।

૩૨.૨/૨સમ્ભૂતો ભાસ્કરો જાતસ્તત્ર નઃ સંશયો મહાન્ ॥ ૩૨.૨॥

૩૨.૩/૧બ્રહ્મોવાચ । દક્ષસ્ય હિ સુતાઃ શ્રેષ્ઠા બભૂવુઃ ષષ્ટિઃ શોભનાઃ ।
૩૨.૩/૨અદિતિર્દિતિર્દનુશ્ચૈવ વિનતાદ્યાસ્તથૈવ ચ ॥ ૩૨.૩॥

૩૨.૪/૧દક્ષસ્તાઃ પ્રદદૌ કન્યાઃ કશ્યપાય ત્રયોદશ ।
૩૨.૪/૨અદિતિર્જનયામાસ દેવાંસ્ત્રિભુવનેશ્વરાન્ ॥ ૩૨.૪॥

૩૨.૫/૧દૈત્યાન્ દિતિર્દનુશ્ચોગ્રાન્ દાનવાન્ બલદર્પિતાન્ ।
૩૨.૫/૨વિનતાદ્યાસ્તથા ચાન્યાઃ સુષુવુઃ સ્થાનુજઙ્ગમાન્ ॥ ૩૨.૫॥

૩૨.૬/૧તસ્યાથ પુત્રદૌહિત્રૈઃ પૌત્રદૌહિત્રકાદિભિઃ ।
૩૨.૬/૨વ્યાપ્તમેતજ્જગત્ સર્વં તેષાં તાસાં ચ વૈ મુને ॥ ૩૨.૬॥

૩૨.૭/૧તેષાં કશ્યપપુત્રાણાં પ્રધાના દેવતાગણાઃ ।
૩૨.૭/૨સાત્ત્વિકા રાજસાશ્ચાન્યે તામસાશ્ચ ગણાઃ સ્મૃતાઃ ॥ ૩૨.૭॥

૩૨.૮/૧દેવાન્ યજ્ઞભુજશ્ચક્રે તથા ત્રિભુવનેશ્વરાન્ ।
૩૨.૮/૨સ્રષ્ટા બ્રહ્મવિદાં શ્રેષ્ઠઃ પરમેષ્ઠી પ્રજાપતિઃ ॥ ૩૨.૮॥

૩૨.૯/૧તાન્ અબાધન્ત સહિતાઃ સાપત્ન્યાદ્ દૈત્યદાનવાઃ ।
૩૨.૯/૨તતો નિરાકૃતાન્ પુત્રાન્ દૈતેયૈર્દાનવૈસ્તથા ॥ ૩૨.૯॥

૩૨.૧૦/૧હતં ત્રિભુવનં દૃષ્ટ્વા અદિતિર્મુનિસત્તમાઃ ।
૩૨.૧૦/૨આચ્છિનદ્ યજ્ઞભાગાંશ્ચ ક્ષુધા સમ્પીડિતાન્ ભૃશમ્ ॥ ૩૨.૧૦॥

૩૨.૧૧/૧આરાધનાય સવિતુઃ પરં યત્નં પ્રચક્રમે ।
૩૨.૧૧/૨એકાગ્રા નિયતાહારા પરં નિયમમાસ્થિતા ।
૩૨.૧૧/૩તુષ્ટાવ તેજસાં રાશિં ગગનસ્થં દિવાકરમ્ ॥ ૩૨.૧૧॥

૩૨.૧૨/૧અદિતિરુવાચ । નમસ્તુભ્યં પરં સૂક્ષ્મં સુપુણ્યં બિભ્રતેઽતુલમ્ ।
૩૨.૧૨/૨ધામ ધામવતામીશં ધામાધારં ચ શાશ્વતમ્ ॥ ૩૨.૧૨॥

૩૨.૧૩/૧જગતામુપકારાય ત્વામહં સ્તૌમિ ગોપતે ।
૩૨.૧૩/૨આદદાનસ્ય યદ્ રૂપં તીવ્રં તસ્મૈ નમામ્યહમ્ ॥ ૩૨.૧૩॥

૩૨.૧૪/૧ગ્રહીતુમષ્ટમાસેન કાલેનામ્બુમયં રસમ્ ।
૩૨.૧૪/૨બિભ્રતસ્તવ યદ્ રૂપમતિતીવ્રં નતાસ્મિ તત્ ॥ ૩૨.૧૪॥

૩૨.૧૫/૧સમેતમગ્નિસોમાભ્યાં નમસ્તસ્મૈ ગુણાત્મને ।
૩૨.૧૫/૨યદ્ રૂપમ્ ઋગ્યજુઃસામ્નામૈક્યેન તપતે તવ ॥ ૩૨.૧૫॥

૩૨.૧૬/૧વિશ્વમેતત્ ત્રયીસંજ્ઞં નમસ્તસ્મૈ વિભાવસો ।
૩૨.૧૬/૨યત્ તુ તસ્માત્ પરં રૂપમોમિત્યુક્ત્વાભિસંહિતમ્ ।
૩૨.૧૬/૩અસ્થૂલં સ્થૂલમમલં નમસ્તસ્મૈ સનાતન ॥ ૩૨.૧૬॥

૩૨.૧૭/૧બ્રહ્મોવાચ । એવં સા નિયતા દેવી ચક્રે સ્તોત્રમહર્નિશમ્ ।
૩૨.૧૭/૨નિરાહારા વિવસ્વન્તમારિરાધયિષુર્દ્વિજાઃ ॥ ૩૨.૧૭॥

૩૨.૧૮/૧તતઃ કાલેન મહતા ભગવાંસ્તપનો દ્વિજાઃ ।
૩૨.૧૮/૨પ્રત્યક્ષતામગાત્ તસ્યા દાક્ષાયણ્યા દ્વિજોત્તમાઃ ॥ ૩૨.૧૮॥

૩૨.૧૯/૧સા દદર્શ મહાકૂટં તેજસોઽમ્બરસંવૃતમ્ ।
૩૨.૧૯/૨ભૂમૌ ચ સંસ્થિતં ભાસ્વજ્+ ।જ્વાલાભિરતિદુર્દૃશમ્ ।
૩૨.૧૯/૩તં દૃષ્ટ્વા ચ તતો દેવી સાધ્વસં પરમં ગતા ॥ ૩૨.૧૯॥

૩૨.૨૧/૧અદિતિરુવાચ । જગદાદ્ય પ્રસીદેતિ ન ત્વાં પશ્યામિ ગોપતે ।
૩૨.૨૧/૨પ્રસાદં કુરુ પશ્યેયં યદ્ રૂપં તે દિવાકર ।
૩૨.૨૧/૩ભક્તાનુકમ્પક વિભો ત્વદ્ભક્તાન્ પાહિ મે સુતાન્ ॥ ૩૨.૨૧॥

૩૨.૨૨/૧બ્રહ્મોવાચ । તતઃ સ તેજસસ્તસ્માદ્ આવિર્ભૂતો વિભાવસુઃ ।
૩૨.૨૨/૨અદૃશ્યત તદાદિત્યસ્તપ્તતામ્રોપમઃ પ્રભુઃ ॥ ૩૨.૨૨॥

૩૨.૨૩/૧તતસ્તાં પ્રણતાં દેવીં તસ્યાસંદર્શને દ્વિજાઃ ।
૩૨.૨૩/૨પ્રાહ ભાસ્વાન્ વૃણુષ્વૈકં વરં મત્તો યમિચ્છસિ ॥ ૩૨.૨૩॥

૩૨.૨૪/૧પ્રણતા શિરસા સા તુ જાનુપીડિતમેદિની ।
૩૨.૨૪/૨પ્રત્યુવાચ વિવસ્વન્તં વરદં સમુપસ્થિતમ્ ॥ ૩૨.૨૪॥

૩૨.૨૫/૧અદિતિરુવાચ । દેવ પ્રસીદ પુત્રાણાં હૃતં ત્રિભુવનં મમ ।
૩૨.૨૫/૨યજ્ઞભાગાશ્ચ દૈતેયૈર્દાનવૈશ્ચ બલાધિકૈઃ ॥ ૩૨.૨૫॥

૩૨.૨૬/૧તન્નિમિત્તં પ્રસાદં ત્વં કુરુષ્વ મમ ગોપતે ।
૩૨.૨૬/૨અંશેન તેષાં ભ્રાતૃત્વં ગત્વા તાન્ નાશયે રિપૂન્ ॥ ૩૨.૨૬॥

૩૨.૨૭/૧યથા મે તનયા ભૂયો યજ્ઞભાગભુજઃ પ્રભો ।
૩૨.૨૭/૨ભવેયુરધિપાશ્ચૈવ ત્રૈલોક્યસ્ય દિવાકર ॥ ૩૨.૨૭॥

૩૨.૨૮/૧તથાનુકલ્પં પુત્રાણાં સુપ્રસન્નો રવે મમ ।
૩૨.૨૮/૨કુરુ પ્રસન્નાર્તિહર કાર્યં કર્તા ઉચ્યતે ॥ ૩૨.૨૮॥

૩૨.૨૯/૧બ્રહ્મોવાચ । તતસ્તામાહ ભગવાન્ ભાસ્કરો વારિતસ્કરઃ ।
૩૨.૨૯/૨પ્રણતામદિતિં વિપ્રાઃ પ્રસાદસુમુખો વિભુઃ ॥ ૩૨.૨૯॥

૩૨.૩૦/૧સૂર્ય ઉવાચ । સહસ્રાંશેન તે ગર્ભઃ સમ્ભૂયાહમશેષતઃ ।
૩૨.૩૦/૨ત્વત્પુત્રશત્રૂન્ દક્ષોઽહં નાશયામ્યાશુ નિર્વૃતઃ ॥ ૩૨.૩૦॥

૩૨.૩૧/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા ભગવાન્ ભાસ્વાન્ અન્તર્ધાનમુપાગતઃ ।
૩૨.૩૧/૨નિવૃત્તા સાપિ તપસઃ સમ્પ્રાપ્તાખિલવાઞ્છિતા ॥ ૩૨.૩૧॥

૩૨.૩૨/૧તતો રશ્મિસહસ્રાત્ તુ સુષુમ્નાખ્યો રવેઃ કરઃ ।
૩૨.૩૨/૨તતઃ સંવત્સરસ્યાન્તે તત્કામપૂરણાય સઃ ॥ ૩૨.૩૨॥

૩૨.૩૩/૧નિવાસં સવિતા ચક્રે દેવમાતુસ્તદોદરે ।
૩૨.૩૩/૨કૃચ્છ્રચાન્દ્રાયણાદીંશ્ચ સા ચક્રે સુસમાહિતા ॥ ૩૨.૩૩॥

૩૨.૩૪/૧શુચિના ધારયામ્યેનં દિવ્યં ગર્ભમિતિ દ્વિજાઃ ।
૩૨.૩૪/૨તતસ્તાં કશ્યપઃ પ્રાહ કિંચિત્કોપપ્લુતાક્ષરમ્ ॥ ૩૨.૩૪॥

૩૨.૩૫/૧કશ્યપ ઉવાચ । કિં મારયસિ ગર્ભાણ્ડમિતિ નિત્યોપવાસિની ।
૩૨.૩૫/૨બ્રહ્મોવાચ । સા ચ તં પ્રાહ ગર્ભાણ્ડમેતત્ પશ્યેતિ કોપના ।
૩૨.૩૫/૩ન મારિતં વિપક્ષાણાં મૃત્યુરેવ ભવિષ્યતિ ॥ ૩૨.૩૫॥

૩૨.૩૬/૧ઇત્યુક્ત્વા તં તદા ગર્ભમુત્સસર્જ સુરારણિઃ ।
૩૨.૩૬/૨જાજ્વલ્યમાનં તેજોભિઃ પત્યુર્વચનકોપિતા ॥ ૩૨.૩૬॥

૩૨.૩૭/૧તં દૃષ્ટ્વા કશ્યપો ગર્ભમુદ્યદ્ભાસ્કરવર્ચસમ્ ।
૩૨.૩૭/૨તુષ્ટાવ પ્રણતો ભૂત્વા વાગ્ભિરાદ્યાભિરાદરાત્ ॥ ૩૨.૩૭॥

૩૨.૩૮/૧સંસ્તૂયમાનઃ સ તદા ગર્ભાણ્ડાત્ પ્રકટોઽભવત્ ।
૩૨.૩૮/૨પદ્મપત્રસવર્ણાભસ્તેજસા વ્યાપ્તદિઙ્મુખઃ ॥ ૩૨.૩૮॥

૩૨.૩૯/૧અથાન્તરિક્ષાદ્ આભાષ્ય કશ્યપં મુનિસત્તમમ્ ।
૩૨.૩૯/૨સતોયમેઘગમ્ભીરા વાગ્ ઉવાચાશરીરિણી ॥ ૩૨.૩૯॥

૩૨.૪૦/૧વાગ્ ઉવાચ । મારિતંતેપતઃ પ્રોક્તમેતદ્ અણ્ડં ત્વયાદિતેઃ ।
૩૨.૪૦/૨તસ્માન્ મુને સુતસ્તેઽયં માર્તણ્ડાખ્યો ભવિષ્યતિ ॥ ૩૨.૪૦॥

૩૨.૪૧/૧હનિષ્યત્યસુરાંશ્ચાયં યજ્ઞભાગહરાન્ અરીન્ ।
૩૨.૪૧/૨દેવા નિશમ્યેતિ વચો ગગનાત્ સમુપાગતમ્ ॥ ૩૨.૪૧॥

૩૨.૪૨/૧પ્રહર્ષમતુલં યાતા દાનવાશ્ચ હતૌજસઃ ।

૩૨.૪૨/૨તતો યુદ્ધાય દૈતેયાન્ આજુહાવ શતક્રતુઃ ॥ ૩૨.૪૨॥

૩૨.૪૩/૧સહ દેવૈર્મુદા યુક્તો દાનવાશ્ચ તમભ્યયુઃ ।
૩૨.૪૩/૨તેષાં યુદ્ધમભૂદ્ ઘોરં દેવાનામસુરૈઃ સહ ॥ ૩૨.૪૩॥

૩૨.૪૪/૧શસ્ત્રાસ્ત્રવૃષ્ટિસંદીપ્ત+ ।સમસ્તભુવનાન્તરમ્ ।
૩૨.૪૪/૨તસ્મિન્ યુદ્ધે ભગવતા માર્તણ્ડેન નિરીક્ષિતાઃ ॥ ૩૨.૪૪॥

૩૨.૪૫/૧તેજસા દહ્યમાનાસ્તે ભસ્મીભૂતા મહાસુરાઃ ।
૩૨.૪૫/૨તતઃ પ્રહર્ષમતુલં પ્રાપ્તાઃ સર્વે દિવૌકસઃ ॥ ૩૨.૪૫॥

૩૨.૪૬/૧તુષ્ટુવુસ્તેજસાં યોનિં માર્તણ્ડમદિતિં તથા ।
૩૨.૪૬/૨સ્વાધિકારાંસ્તતઃ પ્રાપ્તા યજ્ઞભાગાંશ્ચ પૂર્વવત્ ॥ ૩૨.૪૬॥

૩૨.૪૭/૧ભગવાન્ અપિ માર્તણ્ડઃ સ્વાધિકારમથાકરોત્ ।
૩૨.૪૭/૨કદમ્બપુષ્પવદ્ ભાસ્વાન્ અધશ્ચોર્ધ્વં ચ રશ્મિભિઃ ।
૩૨.૪૭/૩વૃતોઽગ્નિપિણ્ડસદૃશો દધ્રે નાતિસ્ફુટં વપુઃ ॥ ૩૨.૪૭॥

૩૨.૪૮/૧મુનય ઊચુઃ । કથં કાન્તતરં પશ્ચાદ્ રૂપં સંલબ્ધવાન્ રવિઃ ।
૩૨.૪૮/૨કદમ્બગોલકાકારં તન્ મે બ્રૂહિ જગત્પતે ॥ ૩૨.૪૮॥

૩૨.૪૯/૧બ્રહ્મોવાચ । ત્વષ્ટા તસ્મૈ દદૌ કન્યાં સંજ્ઞાં નામ વિવસ્વતે ।
૩૨.૪૯/૨પ્રસાદ્ય પ્રણતો ભૂત્વા વિશ્વકર્મા પ્રજાપતિઃ ॥ ૩૨.૪૯॥

૩૨.૫૦/૧ત્રીણ્યપત્યાન્યસૌ તસ્યાં જનયામાસ ગોપતિઃ ।
૩૨.૫૦/૨દ્વૌ પુત્રૌ સુમહાભાગૌ કન્યાં ચ યમુનાં તથા ॥ ૩૨.૫૦॥

૩૨.૫૧/૧યત્ તેજોઽભ્યધિકં તસ્ય માર્તણ્ડસ્ય વિવસ્વતઃ ।
૩૨.૫૧/૨તેનાતિતાપયામાસ ત્રીંલ્લોકાન્ સચરાચરાન્ ॥ ૩૨.૫૧॥

૩૨.૫૨/૧તદ્ રૂપં ગોલકાકારં દૃષ્ટ્વા સંજ્ઞા વિવસ્વતઃ ।
૩૨.૫૨/૨અસહન્તી મહત્ તેજઃ સ્વાં છાયાં વાક્યમબ્રવીત્ ॥ ૩૨.૫૨॥

૩૨.૫૩/૧સંજ્ઞોવાચ । અહં યાસ્યામિ ભદ્રં તે સ્વમેવ ભવનં પિતુઃ ।
૩૨.૫૩/૨નિર્વિકારં ત્વયાત્રૈવ સ્થેયં મચ્છાસનાચ્છુભે ॥ ૩૨.૫૩॥

૩૨.૫૪/૧ઇમૌ ચ બાલકૌ મહ્યં કન્યા ચ વરવર્ણિની ।
૩૨.૫૪/૨સમ્ભાવ્યા નૈવ ચાખ્યેયમિદં ભગવતે ત્વયા ॥ ૩૨.૫૪॥

૩૨.૫૫/૧છાયોવાચ । આ કચગ્રહણાદ્ દેવિ આ શાપાન્ નૈવ કર્હિચિત્ ।
૩૨.૫૫/૨આખ્યાસ્યામિ મતં તુભ્યં ગમ્યતાં યત્ર વાઞ્છિતમ્ ॥ ૩૨.૫૫॥

૩૨.૫૬/૧ઇત્યુક્ત્વા વ્રીડિતા સંજ્ઞા જગામ પિતૃમન્દિરમ્ ।
૩૨.૫૬/૨વત્સરાણાં સહસ્રં તુ વસમાના પિતુર્ગૃહે ॥ ૩૨.૫૬॥

૩૨.૫૭/૧ભર્તુઃ સમીપં યાહીતિ પિત્રોક્તા સા પુનઃ પુનઃ ।
૩૨.૫૭/૨આગચ્છદ્ વડવા ભૂત્વા કુરૂન્ અથોત્તરાંસ્તતઃ ॥ ૩૨.૫૭॥

૩૨.૫૮/૧તત્ર તેપે તપઃ સાધ્વી નિરાહારા દ્વિજોત્તમાઃ ।
૩૨.૫૮/૨પિતુઃ સમીપં યાતાયાં સંજ્ઞાયાં વાક્યતત્પરા ॥ ૩૨.૫૮॥

૩૨.૫૯/૧તદ્રૂપધારિણી છાયા ભાસ્કરં સમુપસ્થિતા ।
૩૨.૫૯/૨તસ્યાં ચ ભગવાન્ સૂર્યઃ સંજ્ઞેયમિતિ ચિન્તયન્ ॥ ૩૨.૫૯॥

૩૨.૬૦/૧તથૈવ જનયામાસ દ્વૌ પુત્રૌ કન્યકાં તથા ।
૩૨.૬૦/૨સંજ્ઞા તુ પાર્થિવી તેષામાત્મજાનાં તથાકરોત્ ॥ ૩૨.૬૦॥

૩૨.૬૧/૧સ્નેહં ન પૂર્વજાતાનાં તથા કૃતવતી તુ સા ।
૩૨.૬૧/૨મનુસ્તત્ ક્ષાન્તવાંસ્તસ્યા યમસ્તસ્યા ન ચક્ષમે ॥ ૩૨.૬૧॥

૩૨.૬૨/૧બહુધા પીડ્યમાનસ્તુ પિતુઃ પત્યા સુદુઃખિતઃ ।
૩૨.૬૨/૨સ વૈ કોપાચ્ચ બાલ્યાચ્ચ ભાવિનોઽર્થસ્ય વૈ બલાત્ ।
૩૨.૬૨/૩પદા સંતર્જયામાસ ન તુ દેહે ન્યપાતયત્ ॥ ૩૨.૬૨॥

૩૨.૬૩/૧છાયોવાચ । પદા તર્જયસે યસ્માત્ પિતુર્ભાર્યાં ગરીયસીમ્ ।
૩૨.૬૩/૨તસ્માત્ તવૈષ ચરણઃ પતિષ્યતિ ન સંશયઃ ॥ ૩૨.૬૩॥

૩૨.૬૪/૧બ્રહ્મોવાચ । યમસ્તુ તેન શાપેન ભૃશં પીડિતમાનસઃ ।
૩૨.૬૪/૨મનુના સહ ધર્માત્મા પિત્રે સર્વં ન્યવેદયત્ ॥ ૩૨.૬૪॥

૩૨.૬૫/૧યમ ઉવાચ । સ્નેહેન તુલ્યમસ્માસુ માતા દેવ ન વર્તતે ।
૩૨.૬૫/૨વિસૃજ્ય જ્યાયસં ભક્ત્યા કનીયાંસં બુભૂષતિ ॥ ૩૨.૬૫॥

૩૨.૬૬/૧તસ્યાં મયોદ્યતઃ પાદો ન તુ દેહે નિપાતિતઃ ।
૩૨.૬૬/૨બાલ્યાદ્ વા યદિ વા મોહાત્ તદ્ ભવાન્ ક્ષન્તુમર્હસિ ॥ ૩૨.૬૬॥

૩૨.૬૭/૧શપ્તોઽહં તાત કોપેન જનન્યા તનયો યતઃ ।
૩૨.૬૭/૨તતો મન્યે ન જનનીમિમાં વૈ તપતાં વર ॥ ૩૨.૬૭॥

૩૨.૬૮/૧તવ પ્રસાદાચ્ચરણો ભગવન્ ન પતેદ્ યથા ।
૩૨.૬૮/૨માતૃશાપાદ્ અયં મેઽદ્ય તથા ચિન્તય ગોપતે ॥ ૩૨.૬૮॥

૩૨.૬૯/૧રવિરુવાચ । અસંશયં મહત્ પુત્ર ભવિષ્યત્યત્ર કારણમ્ ।
૩૨.૬૯/૨યેન ત્વામાવિશત્ ક્રોધો ધર્મજ્ઞં ધર્મશીલિનમ્ ॥ ૩૨.૬૯॥

૩૨.૭૦/૧સર્વેષામેવ શાપાનાં પ્રતિઘાતો હિ વિદ્યતે ।
૩૨.૭૦/૨ન તુ માત્રાભિશપ્તાનાં ક્વચિચ્છાપનિવર્તનમ્ ॥ ૩૨.૭૦॥

૩૨.૭૧/૧ન શક્યમેતન્ મિથ્યા તુ કર્તું માતુર્વચસ્તવ ।
૩૨.૭૧/૨કિંચિત્ તેઽહં વિધાસ્યામિ પુત્રસ્નેહાદ્ અનુગ્રહમ્ ॥ ૩૨.૭૧॥

૩૨.૭૨/૧કૃમયો માંસમાદાય પ્રયાસ્યન્તિ મહીતલમ્ ।
૩૨.૭૨/૨કૃતં તસ્યા વચઃ સત્યં ત્વં ચ ત્રાતો ભવિષ્યસિ ॥ ૩૨.૭૨॥

૩૨.૭૩/૧બ્રહ્મોવાચ । આદિત્યસ્ત્વબ્રવીચ્છાયાં કિમર્થં તનયેષુ વૈ ।
૩૨.૭૩/૨તુલ્યેષ્વપ્યધિકઃ સ્નેહ એકં પ્રતિ કૃતસ્ત્વયા ॥ ૩૨.૭૩॥

૩૨.૭૪/૧નૂનં નૈષાં ત્વં જનની સંજ્ઞા કાપિ ત્વમાગતા ।
૩૨.૭૪/૨નિર્ગુણેષ્વપ્યપત્યેષુ માતા શાપં ન દાસ્યતિ ॥ ૩૨.૭૪॥

૩૨.૭૫/૧સા તત્પરિહરન્તી ચ શાપાદ્ ભીતા તદા રવેઃ ।
૩૨.૭૫/૨કથયામાસ વૃત્તાન્તં સ શ્રુત્વા શ્વશુરં યયૌ ॥ ૩૨.૭૫॥

૩૨.૭૬/૧સ ચાપિ તં યથાન્યાયમર્ચયિત્વા તદા રવિમ્ ।
૩૨.૭૬/૨નિર્દગ્ધુકામં રોષેણ સાન્ત્વયાનસ્તમબ્રવીત્ ॥ ૩૨.૭૬॥

૩૨.૭૭/૧વિશ્વકર્મોવાચ । તવાતિતેજસા વ્યાપ્તમિદં રૂપં સુદુઃસહમ્ ।
૩૨.૭૭/૨અસહન્તી તુ તત્ સંજ્ઞા વને ચરતિ વૈ તપઃ ॥ ૩૨.૭૭॥

૩૨.૭૮/૧દ્રક્ષ્યતે તાં ભવાન્ અદ્ય સ્વાં ભાર્યાં શુભચારિણીમ્ ।
૩૨.૭૮/૨રૂપાર્થં ભવતોઽરણ્યે ચરન્તીં સુમહત્ તપઃ ॥ ૩૨.૭૮॥

૩૨.૭૯/૧શ્રુતં મે બ્રહ્મણો વાક્યં તવ તેજોવરોધને ।
૩૨.૭૯/૨રૂપં નિર્વર્તયામ્યદ્ય તવ કાન્તં દિવસ્પતે ॥ ૩૨.૭૯॥

૩૨.૮૦/૧બ્રહ્મોવાચ । તતસ્તથેતિ તં પ્રાહ ત્વષ્ટારં ભગવાન્ રવિઃ ।
૩૨.૮૦/૨તતો વિવસ્વતો રૂપં પ્રાગ્ આસીત્ પરિમણ્ડલમ્ ॥ ૩૨.૮૦॥

૩૨.૮૧/૧વિશ્વકર્મા ત્વનુજ્ઞાતઃ શાકદ્વીપે વિવસ્વતા ।
૩૨.૮૧/૨ભ્રમિમારોપ્ય તત્તેજઃ+ ।શાતનાયોપચક્રમે ॥ ૩૨.૮૧॥

૩૨.૮૨/૧ભ્રમતાશેષજગતાં નાભિભૂતેન ભાસ્વતા ।
૩૨.૮૨/૨સમુદ્રાદ્રિવનોપેતા ત્વારુરોહ મહી નભઃ ॥ ૩૨.૮૨॥

૩૨.૮૩/૧ગગનં ચાખિલં વિપ્રાઃ સચન્દ્રગ્રહતારકમ્ ।
૩૨.૮૩/૨અધોગતં મહાભાગા બભૂવાક્ષિપ્તમાકુલમ્ ॥ ૩૨.૮૩ ॥

૩૨.૮૪/૧વિક્ષિપ્તસલિલાઃ સર્વે બભૂવુશ્ચ તથાર્ણવાઃ ।
૩૨.૮૪/૨વ્યભિદ્યન્ત મહાશૈલાઃ શીર્ણસાનુનિબન્ધનાઃ ॥ ૩૨.૮૪ ॥

૩૨.૮૫/૧ધ્રુવાધારાણ્યશેષાણિ ધિષ્ણ્યાનિ મુનિસત્તમાઃ ।
૩૨.૮૫/૨ત્રુટ્યદ્રશ્મિનિબન્ધીનિ બન્ધનાનિ અધો યયુઃ ॥ ૩૨.૮૫ ॥

૩૨.૮૬/૧વેગભ્રમણસમ્પાત+ ।વાયુક્ષિપ્તાઃ સહસ્રશઃ ।
૩૨.૮૬/૨વ્યશીર્યન્ત મહામેઘા ઘોરારાવવિરાવિણઃ ॥ ૩૨.૮૬ ॥

૩૨.૮૭/૧ભાસ્વદ્ભ્રમણવિભ્રાન્ત+ ।ભૂમ્યાકાશરસાતલમ્ ।
૩૨.૮૭/૨જગદ્ આકુલમત્યર્થં તદાસીન્ મુનિસત્તમાઃ ॥ ૩૨.૮૭ ॥

૩૨.૮૮/૧ત્રૈલોક્યમાકુલં વીક્ષ્ય ભ્રમમાણં સુરર્ષયઃ ।
૩૨.૮૮/૨દેવાશ્ચ બ્રહ્મણા સાર્ધં ભાસ્વન્તમભિતુષ્ટુવુઃ ॥ ૩૨.૮૮ ॥

૩૨.૮૯/૧આદિદેવોઽસિ દેવાનાં જાતસ્ત્વં ભૂતયે ભુવઃ ।
૩૨.૮૯/૨સર્ગસ્થિત્યન્તકાલેષુ ત્રિધા ભેદેન તિષ્ઠસિ ॥ ૩૨.૮૯ ॥

૩૨.૯૦/૧સ્વસ્તિ તેઽસ્તુ જગન્નાથ ઘર્મવર્ષદિવાકર ।
૩૨.૯૦/૨ઇન્દ્રાદયસ્તદા દેવા લિખ્યમાનમથાસ્તુવન્ ॥ ૩૨.૯૦ ॥

૩૨.૯૧/૧જય દેવ જગત્સ્વામિઞ્ જયાશેષજગત્પતે ।
૩૨.૯૧/૨ઋષયશ્ચ તતઃ સપ્ત વસિષ્ઠાત્રિપુરોગમાઃ ॥ ૩૨.૯૧ ॥

૩૨.૯૨/૧તુષ્ટુવુર્વિવિધૈઃ સ્તોત્રૈઃ સ્વસ્તિ સ્વસ્તીતિવાદિનઃ ।
૩૨.૯૨/૨વેદોક્તિભિરથાગ્ર્યાભિર્વાલખિલ્યાશ્ચ તુષ્ટુવુઃ ॥ ૩૨.૯૨ ॥

૩૨.૯૩/૧અગ્નિરાધ્યાશ્ચ ભાસ્વન્તં લિખ્યમાનં મુદા યુતાઃ ।
૩૨.૯૩/૨ત્વં નાથ મોક્ષિણાં મોક્ષો ધ્યેયસ્ત્વં ધ્યાનિનાં પરઃ ॥ ૩૨.૯૩ ॥

૩૨.૯૪/૧ત્વં ગતિઃ સર્વભૂતાનાં કર્મકાણ્ડવિવર્તિનામ્ ।
૩૨.૯૪/૨સમ્પૂજ્યસ્ત્વં તુ દેવેશ શં નોઽસ્તુ જગતાં પતે ॥ ૩૨.૯૪ ॥

૩૨.૯૫/૧શં નોઽસ્તુ દ્વિપદે નિત્યં શં નશ્ચાસ્તુ ચતુષ્પદે ।
૩૨.૯૫/૨તતો વિદ્યાધરગણા યક્ષરાક્ષસપન્નગાઃ ॥ ૩૨.૯૫ ॥

૩૨.૯૬/૧કૃતાઞ્જલિપુટાઃ સર્વે શિરોભિઃ પ્રણતા રવિમ્ ।

૩૨.૯૬/૨ઊચુસ્તે વિવિધા વાચો મનઃશ્રોત્રસુખાવહાઃ ॥ ૩૨.૯૬॥

૩૨.૯૭/૧સહ્યં ભવતુ તેજસ્તે ભૂતાનાં ભૂતભાવન ।
૩૨.૯૭/૨તતો હાહાહૂહૂશ્ચૈવ નારદસ્તુમ્બુરુસ્તથા ॥ ૩૨.૯૭॥

૩૨.૯૮/૧ઉપગાયિતુમારબ્ધા ગાન્ધર્વકુશલા રવિમ્ ।
૩૨.૯૮/૨ષડ્જમધ્યમગાન્ધાર+ ।ગાનત્રયવિશારદાઃ ॥ ૩૨.૯૮॥

૩૨.૯૯/૧મૂર્છનાભિશ્ચ તાલૈશ્ચ સમ્પ્રયોગૈઃ સુખપ્રદમ્ ।
૩૨.૯૯/૨વિશ્વાચી ચ ઘૃતાચી ચ ઉર્વશ્યથ તિલોત્તમાઃ ॥ ૩૨.૯૯॥

૩૨.૧૦૦/૧મેનકા સહજન્યા ચ રમ્ભા ચાપ્સરસાં વરા ।
૩૨.૧૦૦/૨નનૃતુર્જગતામીશે લિખ્યમાને વિભાવસૌ ॥ ૩૨.૧૦૦॥

૩૨.૧૦૧/૧ભાવહાવવિલાસાદ્યાન્ કુર્વત્યોઽભિનયાન્ બહૂન્ ।
૩૨.૧૦૧/૨પ્રાવાદ્યન્ત તતસ્તત્ર વીણા વેણ્વાદિઝર્ઝરાઃ ॥ ૩૨.૧૦૧॥

૩૨.૧૦૨/૧પણવાઃ પુષ્કરાશ્ચૈવ મૃદઙ્ગાઃ પટહાનકાઃ ।
૩૨.૧૦૨/૨દેવદુન્દુભયઃ શઙ્ખાઃ શતશોઽથ સહસ્રશઃ ॥ ૩૨.૧૦૨॥

૩૨.૧૦૩/૧ગાયદ્ભિશ્ચૈવ નૃત્યદ્ભિર્ગન્ધર્વૈરપ્સરોગણૈઃ ।
૩૨.૧૦૩/૨તૂર્યવાદિત્રઘોષૈશ્ચ સર્વં કોલાહલીકૃતમ્ ॥ ૩૨.૧૦૩॥

૩૨.૧૦૪/૧તતઃ કૃતાઞ્જલિપુટા ભક્તિનમ્રાત્મમૂર્તયઃ ।
૩૨.૧૦૪/૨લિખ્યમાનં સહસ્રાંશું પ્રણેમુઃ સર્વદેવતાઃ ॥ ૩૨.૧૦૪॥

૩૨.૧૦૫/૧તતઃ કોલાહલે તસ્મિન્ સર્વદેવસમાગમે ।
૩૨.૧૦૫/૨તેજસઃ શાતનં ચક્રે વિશ્વકર્મા શનૈઃ શનૈઃ ॥ ૩૨.૧૦૫॥

૩૨.૧૦૬/૧આજાનુલિખિતશ્ચાસૌ નિપુણં વિશ્વકર્મણા ।
૩૨.૧૦૬/૨નાભ્યનન્દત્ તુ લિખનં તતસ્તેનાવતારિતઃ ॥ ૩૨.૧૦૬॥

૩૨.૧૦૭/૧ન તુ નિર્ભર્ત્સિતં રૂપં તેજસો હનનેન તુ ।
૩૨.૧૦૭/૨કાન્તાત્ કાન્તતરં રૂપમધિકં શુશુભે તતઃ ॥ ૩૨.૧૦૭॥

૩૨.૧૦૮/૧ઇતિ હિમજલઘર્મકાલહેતોર્।
૩૨.૧૦૮/૨હરકમલાસનવિષ્ણુસંસ્તુતસ્ય ।
૩૨.૧૦૮/૩તદુપરિ લિખનં નિશમ્ય ભાનોર્।
૩૨.૧૦૮/૪વ્રજતિ દિવાકરલોકમાયુષોઽન્તે ॥ ૩૨.૧૦૮॥

૩૨.૧૦૯/૧એવં જન્મ રવેઃ પૂર્વં બભૂવ મુનિસત્તમાઃ ।

૩૨.૧૦૯/૨રૂપં ચ પરમં તસ્ય મયા સમ્પરિકીર્તિતમ્ ॥ ૩૨.૧૦૯॥

૩૩.૧/૧મુનય ઊચુઃ । ભૂયોऽપિ કથયાસ્માકં કથાં સૂર્યસમાશ્રિતામ્ ।
૩૩.૧/૨ન તૃપ્તિમધિગચ્છામઃ શ‍ૃણ્વન્તસ્તાં કથાં શુભામ્ ॥ ૩૩.૧॥

૩૩.૨/૧યોऽયં દીપ્તો મહાતેજા વહ્નિરાશિસમપ્રભઃ ।
૩૩.૨/૨એતદ્ વેદિતુમિચ્છામઃ પ્રભાવોऽસ્ય કુતઃ પ્રભો ॥ ૩૩.૨॥

૩૩.૩/૧બ્રહ્મોવાચ । તમોભૂતેષુ લોકેષુ નષ્ટે સ્થાવરજઙ્ગમે ।
૩૩.૩/૨પ્રકૃતેર્ગુણહેતુસ્તુ પૂર્વં બુદ્ધિરજાયત ॥ ૩૩.૩॥

૩૩.૪/૧અહંકારસ્તતો જાતો મહાભૂતપ્રવર્તકઃ ।
૩૩.૪/૨વાય્વગ્નિરાપઃ ખં ભૂમિસ્તતસ્ત્વણ્ડમજાયત ॥ ૩૩.૪॥

૩૩.૫/૧તસ્મિન્ન્ અણ્ડે ત્વિમે લોકાઃ સપ્ત ચૈવ પ્રતિષ્ઠિતાઃ ।
૩૩.૫/૨પૃથિવી સપ્તભિર્દ્વીપૈઃ સમુદ્રૈશ્ચૈવ સપ્તભિઃ ॥ ૩૩.૫॥

૩૩.૬/૧તત્રૈવાવસ્થિતો હ્યાસીદ્ અહં વિષ્ણુર્મહેશ્વરઃ ।
૩૩.૬/૨વિમૂઢાસ્તામસાઃ સર્વે પ્રધ્યાયન્તિ તમીશ્વરમ્ ॥ ૩૩.૬॥

૩૩.૭/૧તતો વૈ સુમહાતેજાઃ પ્રાદુર્ભૂતસ્તમોનુદઃ ।
૩૩.૭/૨ધ્યાનયોગેન ચાસ્માભિર્વિજ્ઞાતઃ સવિતા તદા ॥ ૩૩.૭॥

૩૩.૮/૧જ્ઞાત્વા ચ પરમાત્માનં સર્વ એવ પૃથક્ પૃથક્ ।
૩૩.૮/૨દિવ્યાભિઃ સ્તુતિભિર્દેવઃ સ્તુતોऽસ્માભિસ્તદેશ્વરઃ ॥ ૩૩.૮॥

૩૩.૯/૧આદિદેવોऽસિ દેવાનામૈશ્વર્યાચ્ચ ત્વમીશ્વરઃ ।
૩૩.૯/૨આદિકર્તાસિ ભૂતાનાં દેવદેવો દિવાકરઃ ॥ ૩૩.૯॥

૩૩.૧૦/૧જીવનઃ સર્વભૂતાનાં દેવગન્ધર્વરક્ષસામ્ ।
૩૩.૧૦/૨મુનિકિંનરસિદ્ધાનાં તથૈવોરગપક્ષિણામ્ ॥ ૩૩.૧૦॥

૩૩.૧૧/૧ત્વં બ્રહ્મા ત્વં મહાદેવસ્ત્વં વિષ્ણુસ્ત્વં પ્રજાપતિઃ ।
૩૩.૧૧/૨વાયુરિન્દ્રશ્ચ સોમશ્ચ વિવસ્વાન્ વરુણસ્તથા ॥ ૩૩.૧૧॥

૩૩.૧૨/૧ત્વં કાલઃ સૃષ્ટિકર્તા ચ હર્તા ભર્તા તથા પ્રભુઃ ।
૩૩.૧૨/૨સરિતઃ સાગરાઃ શૈલા વિદ્યુદિન્દ્રધનૂંષિ ચ ॥ ૩૩.૧૨॥

૩૩.૧૩/૧પ્રલયઃ પ્રભવશ્ચૈવ વ્યક્તાવ્યક્તઃ સનાતનઃ ।
૩૩.૧૩/૨ઈશ્વરાત્ પરતો વિદ્યા વિદ્યાયાઃ પરતઃ શિવઃ ॥ ૩૩.૧૩॥

૩૩.૧૪/૧શિવાત્ પરતરો દેવસ્ત્વમેવ પરમેશ્વરઃ ।
૩૩.૧૪/૨સર્વતઃપાણિપાદાન્તઃ સર્વતોક્ષિશિરોમુખઃ ॥ ૩૩.૧૪॥

૩૩.૧૫/૧સહસ્રાંશુઃ સહસ્રાસ્યઃ સહસ્રચરણેક્ષણઃ ।
૩૩.૧૫/૨ભૂતાદિર્ભૂર્ભુવઃ સ્વશ્ચ મહઃ સત્યં તપો જનઃ ॥ ૩૩.૧૫॥

૩૩.૧૬/૧પ્રદીપ્તં દીપનં દિવ્યં સર્વલોકપ્રકાશકમ્ ।
૩૩.૧૬/૨દુર્નિરીક્ષં સુરેન્દ્રાણાં યદ્ રૂપં તસ્ય તે નમઃ ॥ ૩૩.૧૬॥

૩૩.૧૭/૧સુરસિદ્ધગણૈર્જુષ્ટં ભૃગ્વત્રિપુલહાદિભિઃ ।
૩૩.૧૭/૨સ્તુતં પરમમવ્યક્તં યદ્ રૂપં તસ્ય તે નમઃ ॥ ૩૩.૧૭॥

૩૩.૧૮/૧વેદ્યં વેદવિદાં નિત્યં સર્વજ્ઞાનસમન્વિતમ્ ।
૩૩.૧૮/૨સર્વદેવાતિદેવસ્ય યદ્ રૂપં તસ્ય તે નમઃ ॥ ૩૩.૧૮॥

૩૩.૧૯/૧વિશ્વકૃદ્ વિશ્વભૂતં ચ વૈશ્વાનરસુરાર્ચિતમ્ ।
૩૩.૧૯/૨વિશ્વસ્થિતમચિન્ત્યં ચ યદ્ રૂપં તસ્ય તે નમઃ ॥ ૩૩.૧૯॥

૩૩.૨૦/૧પરં યજ્ઞાત્ પરં વેદાત્ પરં લોકાત્ પરં દિવઃ ।
૩૩.૨૦/૨પરમાત્મેત્યભિખ્યાતં યદ્ રૂપં તસ્ય તે નમઃ ॥ ૩૩.૨૦॥

૩૩.૨૧/૧અવિજ્ઞેયમનાલક્ષ્યમધ્યાનગતમવ્યયમ્ ।
૩૩.૨૧/૨અનાદિનિધનં ચૈવ યદ્ રૂપં તસ્ય તે નમઃ ॥ ૩૩.૨૧॥

૩૩.૨૨/૧નમો નમઃ કારણકારણાય ।
૩૩.૨૨/૨નમો નમઃ પાપવિમોચનાય ।
૩૩.૨૨/૩નમો નમસ્તે દિતિજાર્દનાય ।
૩૩.૨૨/૪નમો નમો રોગવિમોચનાય ॥ ૩૩.૨૨॥

૩૩.૨૩/૧નમો નમઃ સર્વવરપ્રદાય ।
૩૩.૨૩/૨નમો નમઃ સર્વસુખપ્રદાય ।
૩૩.૨૩/૩નમો નમઃ સર્વધનપ્રદાય ।
૩૩.૨૩/૪નમો નમઃ સર્વમતિપ્રદાય ॥ ૩૩.૨૩॥

૩૩.૨૪/૧સ્તુતઃ સ ભગવાન્ એવં તૈજસં રૂપમાસ્થિતઃ ।
૩૩.૨૪/૨ઉવાચ વાચા કલ્યાણ્યા કો વરો વઃ પ્રદીયતામ્ ॥ ૩૩.૨૪॥

૩૩.૨૫/૧દેવા ઊચુઃ । તવાતિતૈજસં રૂપં ન કશ્ચિત્ સોઢુમુત્સહેત્ ।
૩૩.૨૫/૨સહનીયં તદ્ ભવતુ હિતાય જગતઃ પ્રભો ॥ ૩૩.૨૫॥

૩૩.૨૬/૧એવમસ્ત્વિતિ સોઽપ્યુક્ત્વા ભગવાન્ આદિકૃત્ પ્રભુઃ ।
૩૩.૨૬/૨લોકાનાં કાર્યસિદ્ધ્યર્થં ઘર્મવર્ષહિમપ્રદઃ ॥ ૩૩.૨૬॥

૩૩.૨૭/૧તતઃ સાંખ્યાશ્ચ યોગાશ્ચ યે ચાન્યે મોક્ષકાઙ્ક્ષિણઃ ।
૩૩.૨૭/૨ધ્યાયન્તિ ધ્યાયિનો દેવં હૃદયસ્થં દિવાકરમ્ ॥ ૩૩.૨૭॥

૩૩.૨૮/૧સર્વલક્ષણહીનોઽપિ યુક્તો વા સર્વપાતકૈઃ ।
૩૩.૨૮/૨સર્વં ચ તરતે પાપં દેવમર્કં સમાશ્રિતઃ ॥ ૩૩.૨૮॥

૩૩.૨૯/૧અગ્નિહોત્રં ચ વેદાશ્ચ યજ્ઞાશ્ચ બહુદક્ષિણાઃ ।
૩૩.૨૯/૨ભાનોર્ભક્તિનમસ્કાર+ ।કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૩૩.૨૯॥

૩૩.૩૦/૧તીર્થાનાં પરમં તીર્થં મઙ્ગલાનાં ચ મઙ્ગલમ્ ।
૩૩.૩૦/૨પવિત્રં ચ પવિત્રાણાં પ્રપદ્યન્તે દિવાકરમ્ ॥ ૩૩.૩૦॥

૩૩.૩૧/૧શક્રાદ્યૈઃ સંસ્તુતં દેવં યે નમસ્યન્તિ ભાસ્કરમ્ ।
૩૩.૩૧/૨સર્વકિલ્બિષનિર્મુક્તાઃ સૂર્યલોકં વ્રજન્તિ તે ॥ ૩૩.૩૧॥

૩૩.૩૨/૧મુનય ઊચુઃ । ચિરાત્ પ્રભૃતિ નો બ્રહ્મન્ શ્રોતુમિચ્છા પ્રવર્તતે ।
૩૩.૩૨/૨નામ્નામષ્ટશતં બ્રૂહિ યત્ ત્વયોક્તં પુરા રવેઃ ॥ ૩૩.૩૨॥

૩૩.૩૩/૧બ્રહ્મોવાચ । અષ્ટોત્તરશતં નામ્નાં શૃણુધ્વં ગદતો મમ ।
૩૩.૩૩/૨ભાસ્કરસ્ય પરં ગુહ્યં સ્વર્ગમોક્ષપ્રદં દ્વિજાઃ ॥ ૩૩.૩૩॥

૩૩.૩૪/૧ઓં સૂર્યોઽર્યમા ભગસ્ત્વષ્ટા પૂષાર્કઃ સવિતા રવિઃ ।
૩૩.૩૪/૨ગભસ્તિમાન્ અજઃ કાલો મૃત્યુર્ધાતા પ્રભાકરઃ ॥ ૩૩.૩૪॥

૩૩.૩૫/૧પૃથિવ્યાપશ્ચ તેજશ્ચ ખં વાયુશ્ચ પરાયણમ્ ।
૩૩.૩૫/૨સોમો બૃહસ્પતિઃ શુક્રો બુધોઽઙ્ગારક એવ ચ ॥ ૩૩.૩૫॥

૩૩.૩૬/૧ઇન્દ્રો વિવસ્વાન્ દીપ્તાંશુઃ શુચિઃ શૌરિઃ શનૈશ્ચરઃ ।
૩૩.૩૬/૨બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ સ્કન્દો વૈશ્રવણો યમઃ ॥ ૩૩.૩૬॥

૩૩.૩૭/૧વૈદ્યુતો જાઠરશ્ચાગ્નિરૈન્ધનસ્તેજસાં પતિઃ ।
૩૩.૩૭/૨ધર્મધ્વજો વેદકર્તા વેદાઙ્ગો વેદવાહનઃ ॥ ૩૩.૩૭॥

૩૩.૩૮/૧કૃતં ત્રેતા દ્વાપરશ્ચ કલિઃ સર્વામરાશ્રયઃ ।
૩૩.૩૮/૨કલાકાષ્ઠામુહૂર્તાશ્ચ ક્ષપા યામાસ્તથા ક્ષણાઃ ॥ ૩૩.૩૮॥

૩૩.૩૯/૧સંવત્સરકરોઽશ્વત્થઃ કાલચક્રો વિભાવસુઃ ।
૩૩.૩૯/૨પુરુષઃ શાશ્વતો યોગી વ્યક્તાવ્યક્તઃ સનાતનઃ ॥ ૩૩.૩૯॥

૩૩.૪૦/૧કાલાધ્યક્ષઃ પ્રજાધ્યક્ષો વિશ્વકર્મા તમોનુદઃ ।
૩૩.૪૦/૨વરુણઃ સાગરોऽંશશ્ચ જીમૂતો જિવનોऽરિહા ॥ ૩૩.૪૦॥

૩૩.૪૧/૧ભૂતાશ્રયો ભૂતપતિઃ સર્વલોકનમસ્કૃતઃ ।
૩૩.૪૧/૨સ્રષ્ટા સંવર્તકો વહ્નિઃ સર્વસ્યાદિરલોલુપઃ ॥ ૩૩.૪૧॥

૩૩.૪૨/૧અનન્તઃ કપિલો ભાનુઃ કામદઃ સર્વતોમુખઃ ।
૩૩.૪૨/૨જયો વિશાલો વરદઃ સર્વભૂતનિષેવિતઃ ॥ ૩૩.૪૨॥

૩૩.૪૩/૧મનઃ સુપર્ણો ભૂતાદિઃ શીઘ્રગઃ પ્રાણધારણઃ ।
૩૩.૪૩/૨ધન્વન્તરિર્ધૂમકેતુરાદિદેવોऽદિતેઃ સુતઃ ॥ ૩૩.૪૩॥

૩૩.૪૪/૧દ્વાદશાત્મા રવિર્દક્ષઃ પિતા માતા પિતામહઃ ।
૩૩.૪૪/૨સ્વર્ગદ્વારં પ્રજાદ્વારં મોક્ષદ્વારં ત્રિવિષ્ટપમ્ ॥ ૩૩.૪૪॥

૩૩.૪૫/૧દેહકર્તા પ્રશાન્તાત્મા વિશ્વાત્મા વિશ્વતોમુખઃ ।
૩૩.૪૫/૨ચરાચરાત્મા સૂક્ષ્માત્મા મૈત્રેયઃ કરુણાન્વિતઃ ॥ ૩૩.૪૫॥

૩૩.૪૬/૧એતદ્ વૈ કીર્તનીયસ્ય સૂર્યસ્યામિતતેજસઃ ।
૩૩.૪૬/૨નામ્નામષ્ટશતં રમ્યં મયા પ્રોક્તં દ્વિજોત્તમાઃ ॥ ૩૩.૪૬॥

૩૩.૪૭/૧સુરગણપિતૃયક્ષસેવિતં હ્ય્।
૩૩.૪૭/૨અસુરનિશાકરસિદ્ધવન્દિતમ્ ।
૩૩.૪૭/૩વરકનકહુતાશનપ્રભમ્ ।
૩૩.૪૭/૪પ્રણિપતિતોऽસ્મિ હિતાય ભાસ્કરમ્ ॥ ૩૩.૪૭॥

૩૩.૪૮/૧સૂર્યોદયે યઃ સુસમાહિતઃ પઠેત્ ।
૩૩.૪૮/૨સ પુત્રદારાન્ ધનરત્નસંચયાન્ ।
૩૩.૪૮/૩લભેત જાતિસ્મરતાં નરઃ સ તુ ।
૩૩.૪૮/૪સ્મૃતિં ચ મેધાં ચ સ વિન્દતે પરામ્ ॥ ૩૩.૪૮॥

૩૩.૪૯/૧ઇમં સ્તવં દેવવરસ્ય યો નરઃ ।
૩૩.૪૯/૨પ્રકીર્તયેચ્છુદ્ધમનાઃ સમાહિતઃ ।
૩૩.૪૯/૩વિમુચ્યતે શોકદવાગ્નિસાગરાલ્ ।
૩૩.૪૯/૪લભેત કામાન્ મનસા યથેપ્સિતાન્ ॥ ૩૩.૪૯॥

૩૪.૧/૧બ્રહ્મોવાચ । યોऽસૌ સર્વગતો દેવસ્ત્રિપુરારિસ્ત્રિલોચનઃ ।
૩૪.૧/૨ઉમાપ્રિયકરો રુદ્રશ્ચન્દ્રાર્ધકૃતશેખરઃ ॥ ૩૪.૧॥

૩૪.૨/૧વિદ્રાવ્ય વિબુધાન્ સર્વાન્ સિદ્ધવિદ્યાધરાન્ ઋષીન્ ।
૩૪.૨/૨ગન્ધર્વયક્ષનાગાંશ્ચ તથાન્યાંશ્ચ સમાગતાન્ ॥ ૩૪.૨॥

૩૪.૩/૧જઘાન પૂર્વં દક્ષસ્ય યજતો ધરણીતલે ।
૩૪.૩/૨યજ્ઞં સમૃદ્ધં રત્નાઢ્યં સર્વસમ્ભારસમ્ભૃતમ્ ॥ ૩૪.૩॥

૩૪.૪/૧યસ્ય પ્રતાપસંત્રસ્તાઃ શક્રાદ્યાસ્ત્રિદિવૌકસઃ ।
૩૪.૪/૨શાન્તિં ન લેભિરે વિપ્રાઃ કૈલાસં શરણં ગતાઃ ॥ ૩૪.૪॥

૩૪.૫/૧સ આસ્તે તત્ર વરદઃ શૂલપાણિર્વૃષધ્વજઃ ।
૩૪.૫/૨પિનાકપાણિર્ભગવાન્ દક્ષયજ્ઞવિનાશનઃ ॥ ૩૪.૫॥

૩૪.૬/૧મહાદેવોઽકલે દેશે કૃત્તિવાસા વૃષધ્વજઃ ।
૩૪.૬/૨એકામ્રકે મુનિશ્રેષ્ઠાઃ સર્વકામપ્રદો હરઃ ॥ ૩૪.૬॥

૩૪.૭/૧મુનય ઊચુઃ । કિમર્થં સ ભવો દેવઃ સર્વભૂતહિતે રતઃ ।
૩૪.૭/૨જઘાન યજ્ઞં દક્ષસ્ય દેવૈઃ સર્વૈરલંકૃતમ્ ॥ ૩૪.૭॥

૩૪.૮/૧ન હ્યલ્પં કારણં તત્ર પ્રભો મન્યામહે વયમ્ ।
૩૪.૮/૨શ્રોતુમિચ્છામહે બ્રૂહિ પરં કૌતૂહલં હિ નઃ ॥ ૩૪.૮॥

૩૪.૯/૧બ્રહ્મોવાચ । દક્ષસ્યાસન્ન્ અષ્ટ કન્યા યાશ્ચૈવં પતિસંગતાઃ ।
૩૪.૯/૨સ્વેભ્યો ગૃહેભ્યશ્ચાનીય તાઃ પિતાભ્યર્ચયદ્ ગૃહે ॥ ૩૪.૯॥

૩૪.૧૦/૧તતસ્ત્વભ્યર્ચિતા વિપ્રા ન્યવસંસ્તાઃ પિતુર્ગૃહે ।
૩૪.૧૦/૨તાસાં જ્યેષ્ઠા સતી નામ પત્ની યા ત્ર્યમ્બકસ્ય વૈ ॥ ૩૪.૧૦॥

૩૪.૧૧/૧નાજુહાવાત્મજાં તાં વૈ દક્ષો રુદ્રમભિદ્વિષન્ ।
૩૪.૧૧/૨અકરોત્ સંનતિં દક્ષે ન ચ કાંચિન્ મહેશ્વરઃ ॥ ૩૪.૧૧॥

૩૪.૧૨/૧જામાતા શ્વશુરે તસ્મિન્ સ્વભાવાત્ તેજસિ સ્થિતઃ ।
૩૪.૧૨/૨તતો જ્ઞાત્વા સતી સર્વાસ્તાસ્તુ પ્રાપ્તાઃ પિતુર્ગૃહમ્ ॥ ૩૪.૧૨॥

૩૪.૧૩/૧જગામ સાપ્યનાહૂતા સતી તુ સ્વપિતુર્ગૃહમ્ ।
૩૪.૧૩/૨તાભ્યો હીનાં પિતા ચક્રે સત્યાઃ પૂજામસમ્મતામ્ ।
૩૪.૧૩/૩તતોઽબ્રવીત્ સા પિતરં દેવી ક્રોધસમાકુલા ॥ ૩૪.૧૩॥

૩૪.૧૪/૧સત્યુવાચ । યવીયસીભ્યઃ શ્રેષ્ઠાહં કિં ન પૂજસિ માં પ્રભો ।
૩૪.૧૪/૨અસત્કૃતામવસ્થાં યઃ કૃતવાન્ અસિ ગર્હિતામ્ ।

૩૪.૧૪/૩અહં જ્યેષ્ઠા વરિષ્ઠા ચ માં ત્વં સત્કર્તુમર્હસિ ॥ ૩૪.૧૪॥

૩૪.૧૫/૧બ્રહ્મોવાચ । એવમુક્તોઽબ્રવીદ્ એનાં દક્ષઃ સંરક્તલોચનઃ ॥ ૩૪.૧૫॥

૩૪.૧૬/૧દક્ષ ઉવાચ । ત્વત્તઃ શ્રેષ્ઠા વરિષ્ઠાશ્ચ પૂજ્યા બાલાઃ સુતા મમ ।
૩૪.૧૬/૨તાસાં યે ચૈવ ભર્તારસ્તે મે બહુમતાઃ સતિ ॥ ૩૪.૧૬॥

૩૪.૧૭/૧બ્રહ્મિષ્ઠાશ્ચ વ્રતસ્થાશ્ચ મહાયોગાઃ સુધાર્મિકાઃ ।
૩૪.૧૭/૨ગુણૈશ્ચૈવાધિકાઃ શ્લાઘ્યાઃ સર્વે તે ત્ર્યમ્બકાત્ સતિ ॥ ૩૪.૧૭॥

૩૪.૧૮/૧વસિષ્ઠોઽત્રિઃ પુલસ્ત્યશ્ચ અઙ્ગિરાઃ પુલહઃ ક્રતુઃ ।
૩૪.૧૮/૨ભૃગુર્મરીચિશ્ચ તથા શ્રેષ્ઠા જામાતરો મમ ॥ ૩૪.૧૮॥

૩૪.૧૯/૧તૈશ્ચાપિ સ્પર્ધતે શર્વઃ સર્વે તે ચૈવ તં પ્રતિ ।
૩૪.૧૯/૨તેન ત્વાં ન બુભૂષામિ પ્રતિકૂલો હિ મે ભવઃ ॥ ૩૪.૧૯॥

૩૪.૨૦/૧ઇત્યુક્તવાંસ્તદા દક્ષઃ સમ્પ્રમૂઢેન ચેતસા ।
૩૪.૨૦/૨શાપાર્થમાત્મનશ્ચૈવ યેનોક્તા વૈ મહર્ષયઃ ।
૩૪.૨૦/૩તથોક્તા પિતરં સા વૈ ક્રુદ્ધા દેવી તમબ્રવીત્ ॥ ૩૪.૨૦॥

૩૪.૨૧/૧સત્યુવાચ । વાઙ્મનઃકર્મભિર્યસ્માદ્ અદુષ્ટાં માં વિગર્હસિ ।
૩૪.૨૧/૨તસ્માત્ ત્યજામ્યહં દેહમિમં તાત તવાત્મજમ્ ॥ ૩૪.૨૧॥

૩૪.૨૨/૧બ્રહ્મોવાચ । તતસ્તેનાપમાનેન સતી દુઃખાદ્ અમર્ષિતા ।
૩૪.૨૨/૨અબ્રવીદ્ વચનં દેવી નમસ્કૃત્ય સ્વયમ્ભુવે ॥ ૩૪.૨૨॥

૩૪.૨૩/૧સત્યુવાચ । યેનાહમપદેહા વૈ પુનર્દેહેન ભાસ્વતા ।
૩૪.૨૩/૨તત્રાપ્યહમસમ્મૂઢા સમ્ભૂતા ધાર્મિકી પુનઃ ।
૩૪.૨૩/૩ગચ્છેયં ધર્મપત્નીત્વં ત્ર્યમ્બકસ્યૈવ ધીમતઃ ॥ ૩૪.૨૩॥

૩૪.૨૪/૧બ્રહ્મોવાચ । તત્રૈવાથ સમાસીના રુષ્ટાત્માનં સમાદધે ।
૩૪.૨૪/૨ધારયામાસ ચાગ્નેયીં ધારણામાત્મનાત્મનિ ॥ ૩૪.૨૪॥

૩૪.૨૫/૧તતઃ સ્વાત્માનમુત્થાપ્ય વાયુના સમુદીરિતઃ ।
૩૪.૨૫/૨સર્વાઙ્ગેભ્યો વિનિઃસૃત્ય વહ્નિર્ભસ્મ ચકાર તામ્ ॥ ૩૪.૨૫॥

૩૪.૨૬/૧તદ્ ઉપશ્રુત્ય નિધનં સત્યા દેવ્યાઃ સ શૂલધૃક્ ।
૩૪.૨૬/૨સંવાદં ચ તયોર્બુદ્ધ્વા યાથાતથ્યેન શંકરઃ ।
૩૪.૨૬/૩દક્ષસ્ય ચ વિનાશાય ચુકોપ ભગવાન્ પ્રભુઃ ॥ ૩૪.૨૬॥

૩૪.૨૭/૧શ્રીશંકર ઉવાચ । યસ્માદ્ અવમતા દક્ષ સહસૈવાગતા સતી ।

૩૪.૨૭/૨પ્રશસ્તાશ્ચેતરાઃ સર્વાસ્ત્વત્સુતા ભર્તૃભિઃ સહ ॥ ૩૪.૨૭॥

૩૪.૨૮/૧તસ્માદ્ વૈવસ્વતે પ્રાપ્તે પુનરેતે મહર્ષયઃ ।
૩૪.૨૮/૨ઉત્પત્સ્યન્તિ દ્વિતીયે વૈ તવ યજ્ઞે હ્યયોનિજાઃ ॥ ૩૪.૨૮॥

૩૪.૨૯/૧હુતે વૈ બ્રહ્મણઃ સત્રે ચાક્ષુષસ્યાન્તરે મનોઃ ।
૩૪.૨૯/૨અભિવ્યાહૃત્ય સપ્તર્ષીન્ દક્ષં સોઽભ્યશપત્ પુનઃ ॥ ૩૪.૨૯॥

૩૪.૩૦/૧ભવિતા માનુષો રાજા ચાક્ષુષસ્યાન્તરે મનોઃ ।
૩૪.૩૦/૨પ્રાચીનબર્હિષઃ પૌત્રઃ પુત્રશ્ચાપિ પ્રચેતસઃ ॥ ૩૪.૩૦॥

૩૪.૩૧/૧દક્ષ ઇત્યેવ નામ્ના ત્વં મારિષાયાં જનિષ્યસિ ।
૩૪.૩૧/૨કન્યાયાં શાખિનાં ચૈવ પ્રાપ્તે વૈ ચાક્ષુષાન્તરે ॥ ૩૪.૩૧॥

૩૪.૩૨/૧અહં તત્રાપિ તે વિઘ્નમાચરિષ્યામિ દુર્મતે ।
૩૪.૩૨/૨ધર્મકામાર્થયુક્તેષુ કર્મસ્વિહ પુનઃ પુનઃ ॥ ૩૪.૩૨॥

૩૪.૩૩/૧તતો વૈ વ્યાહૃતો દક્ષો રુદ્રં સોઽભ્યશપત્ પુનઃ ॥ ૩૪.૩૩॥

૩૪.૩૪/૧દક્ષ ઉવાચ । યસ્માત્ ત્વં મત્કૃતે ક્રૂર ઋષીન્ વ્યાહૃતવાન્ અસિ ।
૩૪.૩૪/૨તસ્માત્ સાર્ધં સુરૈર્યજ્ઞે ન ત્વાં યક્ષ્યન્તિ વૈ દ્વિજાઃ ॥ ૩૪.૩૪॥

૩૪.૩૫/૧કૃત્વાહુતિં તવ ક્રૂર અપઃ સ્પૃશન્તિ કર્મસુ ।
૩૪.૩૫/૨ઇહૈવ વત્સ્યસે લોકે દિવં હિત્વાયુગક્ષયાત્ ।
૩૪.૩૫/૩તતો દેવૈસ્તુ તે સાર્ધં ન તુ પૂજા ભવિષ્યતિ ॥ ૩૪.૩૫॥

૩૪.૩૬/૧રુદ્ર ઉવાચ । ચાતુર્વર્ણ્યં તુ દેવાનાં તે ચાપ્યેકત્ર ભુઞ્જતે ।
૩૪.૩૬/૨ન ભોક્ષ્યે સહિતસ્તૈસ્તુ તતો ભોક્ષ્યામ્યહં પૃથક્ ॥ ૩૪.૩૬॥

૩૪.૩૭/૧સર્વેષાં ચૈવ લોકાનામાદિર્ભૂર્લોક ઉચ્યતે ।
૩૪.૩૭/૨તમહં ધારયામ્યેકઃ સ્વેચ્છયા ન તવાજ્ઞયા ॥ ૩૪.૩૭॥

૩૪.૩૮/૧તસ્મિન્ ધૃતે સર્વલોકાઃ સર્વે તિષ્ઠન્તિ શાશ્વતાઃ ।
૩૪.૩૮/૨તસ્માદ્ અહં વસામીહ સતતં ન તવાજ્ઞયા ॥ ૩૪.૩૮॥

૩૪.૩૯/૧બ્રહ્મોવાચ । તતોઽભિવ્યાહૃતો દક્ષો રુદ્રેણામિતતેજસા ।
૩૪.૩૯/૨સ્વાયમ્ભુવીં તનું ત્યક્ત્વા ઉત્પન્નો માનુષેષ્વિહ ॥ ૩૪.૩૯॥

૩૪.૪૦/૧યદા ગૃહપતિર્દક્ષો યજ્ઞાનામીશ્વરઃ પ્રભુઃ ।
૩૪.૪૦/૨સમસ્તેનેહ યજ્ઞેન સોઽયજદ્ દૈવતૈઃ સહ ॥ ૩૪.૪૦॥

૩૪.૪૧/૧અથ દેવી સતી યત્ તે પ્રાપ્તે વૈવસ્વતેऽન્તરે ।
૩૪.૪૧/૨મેનાયાં તામુમાં દેવીં જનયામાસ શૈલરાટ્ ॥ ૩૪.૪૧॥

૩૪.૪૨/૧સા તુ દેવી સતી પૂર્વમાસીત્ પશ્ચાદ્ ઉમાભવત્ ।
૩૪.૪૨/૨સહવ્રતા ભવસ્યૈષા નૈતયા મુચ્યતે ભવઃ ॥ ૩૪.૪૨॥

૩૪.૪૩/૧યાવદ્ ઇચ્છતિ સંસ્થાનં પ્રભુર્મન્વન્તરેષ્વિહ ।
૩૪.૪૩/૨મારીચં કશ્યપં દેવી યથાદિતિરનુવ્રતા ॥ ૩૪.૪૩॥

૩૪.૪૪/૧સાર્ધં નારાયણં શ્રીસ્તુ મઘવન્તં શચી યથા ।
૩૪.૪૪/૨વિષ્ણું કીર્તિરુષા સૂર્યં વસિષ્ઠં ચાપ્યરુન્ધતી ॥ ૩૪.૪૪॥

૩૪.૪૫/૧નૈતાંસ્તુ વિજહત્યેતા ભર્તૄન્ દેવ્યઃ કથંચન ।
૩૪.૪૫/૨એવં પ્રાચેતસો દક્ષો જજ્ઞે વૈ ચાક્ષુષેऽન્તરે ॥ ૩૪.૪૫॥

૩૪.૪૬/૧પ્રાચીનબર્હિષઃ પૌત્રઃ પુત્રશ્ચાપિ પ્રચેતસામ્ ।
૩૪.૪૬/૨દશભ્યસ્તુ પ્રચેતોભ્યો મારિષાયાં પુનર્નૃપ ॥ ૩૪.૪૬॥

૩૪.૪૭/૧જજ્ઞે રુદ્રાભિશાપેન દ્વિતીયમિતિ નઃ શ્રુતમ્ ।
૩૪.૪૭/૨ભૃગ્વાદયસ્તુ તે સર્વે જજ્ઞિરે વૈ મહર્ષયઃ ॥ ૩૪.૪૭॥

૩૪.૪૮/૧આદ્યે ત્રેતાયુગે પૂર્વં મનોર્વૈવસ્વતસ્ય હ ।
૩૪.૪૮/૨દેવસ્ય મહતો યજ્ઞે વારુણીં બિભ્રતસ્તનુમ્ ॥ ૩૪.૪૮॥

૩૪.૪૯/૧ઇત્યેષોऽનુશયો હ્યાસીત્ તયોર્જાત્યન્તરે ગતઃ ।
૩૪.૪૯/૨પ્રજાપતેશ્ચ દક્ષસ્ય ત્ર્યમ્બકસ્ય ચ ધીમતઃ ॥ ૩૪.૪૯॥

૩૪.૫૦/૧તસ્માન્ નાનુશયઃ કાર્યો વરેષ્વિહ કદાચન ।
૩૪.૫૦/૨જાત્યન્તરગતસ્યાપિ ભાવિતસ્ય શુભાશુભૈઃ ।
૩૪.૫૦/૩જન્તોર્ન ભૂતયે ખ્યાતિસ્તન્ ન કાર્યં વિજાનતા ॥ ૩૪.૫૦॥

૩૪.૫૧/૧મુનય ઊચુઃ । કથં રોષેણ સા પૂર્વં દક્ષસ્ય દુહિતા સતી ।
૩૪.૫૧/૨ત્યક્ત્વા દેહં પુનર્જાતા ગિરિરાજગૃહે પ્રભો ॥ ૩૪.૫૧॥

૩૪.૫૨/૧દેહાન્તરે કથં તસ્યાઃ પૂર્વદેહો બભૂવ હ ।
૩૪.૫૨/૨ભવેન સહ સંયોગઃ સંવાદશ્ચ તયોઃ કથમ્ ॥ ૩૪.૫૨॥

૩૪.૫૩/૧સ્વયંવરઃ કથં વૃત્તસ્તસ્મિન્ મહતિ જન્મનિ ।
૩૪.૫૩/૨વિવાહશ્ચ જગન્નાથ સર્વાશ્ચર્યસમન્વિતઃ ॥ ૩૪.૫૩॥

૩૪.૫૪/૧તત્ સર્વં વિસ્તરાદ્ બ્રહ્મન્ વક્તુમર્હસિ સામ્પ્રતમ્ ।

૩૪.૫૪/૨શ્રોતુમિચ્છામહે પુણ્યાં કથાં ચાતિમનોહરામ્ ॥ ૩૪.૫૪॥

૩૪.૫૫/૧બ્રહ્મોવાચ । શ‍ૃણુધ્વં મુનિશાર્દૂલાઃ કથાં પાપપ્રણાશિનીમ્ ।
૩૪.૫૫/૨ઉમાશંકરયોઃ પુણ્યાં સર્વકામફલપ્રદામ્ ॥ ૩૪.૫૫॥

૩૪.૫૬/૧કદાચિત્ સ્વગૃહાત્ પ્રાપ્તં કશ્યપં દ્વિપદાં વરમ્ ।
૩૪.૫૬/૨અપૃચ્છદ્ ધિમવાન્ વૃત્તં લોકે ખ્યાતિકરં હિતમ્ ॥ ૩૪.૫૬॥

૩૪.૫૭/૧કેનાક્ષયાશ્ચ લોકાઃ સ્યુઃ ખ્યાતિશ્ચ પરમા મુને ।
૩૪.૫૭/૨તથૈવ ચાર્ચનીયત્વં સત્સુ તત્ કથયસ્વ મે ॥ ૩૪.૫૭॥

૩૪.૫૮/૧કશ્યપ ઉવાચ । અપત્યેન મહાબાહો સર્વમેતદ્ અવાપ્યતે ।
૩૪.૫૮/૨મમાખ્યાતિરપત્યેન બ્રહ્મણા ઋષિભિઃ સહ ॥ ૩૪.૫૮॥

૩૪.૫૯/૧કિં ન પશ્યસિ શૈલેન્દ્ર યતો માં પરિપૃચ્છસિ ।
૩૪.૫૯/૨વર્તયિષ્યામિ યચ્ચાપિ યથાદૃષ્ટં પુરાચલ ॥ ૩૪.૫૯॥

૩૪.૬૦/૧વારાણસીમહં ગચ્છન્ન્ અપશ્યં સંસ્થિતં દિવિ ।
૩૪.૬૦/૨વિમાનં સુનવં દિવ્યમનૌપમ્યં મહર્ધિમત્ ॥ ૩૪.૬૦॥

૩૪.૬૧/૧તસ્યાધસ્તાદ્ આર્તનાદં ગર્તસ્થાને શ‍ૃણોમ્યહમ્ ।
૩૪.૬૧/૨તમહં તપસા જ્ઞાત્વા તત્રૈવાન્તર્હિતઃ સ્થિતઃ ॥ ૩૪.૬૧॥

૩૪.૬૨/૧અથાગાત્ તત્ર શૈલેન્દ્ર વિપ્રો નિયમવાઞ્ શુચિઃ ।
૩૪.૬૨/૨તીર્થાભિષેકપૂતાત્મા પરે તપસિ સંસ્થિતઃ ॥ ૩૪.૬૨॥

૩૪.૬૩/૧અથ સ વ્રજમાનસ્તુ વ્યાઘ્રેણાભીષિતો દ્વિજઃ ।
૩૪.૬૩/૨વિવેશ તં તદા દેશં સ ગર્તો યત્ર ભૂધર ॥ ૩૪.૬૩॥

૩૪.૬૪/૧ગર્તાયાં વીરણસ્તમ્બે લમ્બમાનાંસ્તદા મુનીન્ ।
૩૪.૬૪/૨અપશ્યદ્ આર્તો દુઃખાર્તાંસ્તાન્ અપૃચ્છચ્ચ સ દ્વિજઃ ॥ ૩૪.૬૪॥

૩૪.૬૫/૧દ્વિજ ઉવાચ । કે યૂયં વીરણસ્તમ્બે લમ્બમાના હ્યધોમુખાઃ ।
૩૪.૬૫/૨દુઃખિતાઃ કેન મોક્ષશ્ચ યુષ્માકં ભવિતાનઘાઃ ॥ ૩૪.૬૫॥

૩૪.૬૬/૧પિતર ઊચુઃ । વયં તે કૃતપુણ્યસ્ય પિતરઃ સપિતામહાઃ ।
૩૪.૬૬/૨પ્રપિતામહાશ્ચ ક્લિશ્યામસ્તવ દુષ્ટેન કર્મણા ॥ ૩૪.૬૬॥

૩૪.૬૭/૧નરકોઽયં મહાભાગ ગર્તરૂપેણ સંસ્થિતઃ ।
૩૪.૬૭/૨ત્વં ચાપિ વીરણસ્તમ્બસ્ત્વયિ લમ્બામહે વયમ્ ॥ ૩૪.૬૭॥

૩૪.૬૮/૧યાવત્ ત્વં જીવસે વિપ્ર તાવદ્ એવ વયં સ્થિતાઃ ।
૩૪.૬૮/૨મૃતે ત્વયિ ગમિષ્યામો નરકં પાપચેતસઃ ॥ ૩૪.૬૮॥

૩૪.૬૯/૧યદિ ત્વં દારસંયોગં કૃત્વાપત્યં ગુણોત્તરમ્ ।
૩૪.૬૯/૨ઉત્પાદયસિ તેનાસ્માન્ મુચ્યેમ વયમેનસઃ ॥ ૩૪.૬૯॥

૩૪.૭૦/૧નાન્યેન તપસા પુત્ર તીર્થાનાં ચ ફલેન ચ ।
૩૪.૭૦/૨એતત્ કુરુ મહાબુદ્ધે તારયસ્વ પિતૃન્ ભયાત્ ॥ ૩૪.૭૦॥

૩૪.૭૧/૧કશ્યપ ઉવાચ । સ તથેતિ પ્રતિજ્ઞાય આરાધ્ય વૃષભધ્વજમ્ ।
૩૪.૭૧/૨પિતૃન્ ગર્તાત્ સમુદ્ધૃત્ય ગણપાન્ પ્રચકાર હ ॥ ૩૪.૭૧॥

૩૪.૭૨/૧સ્વયં રુદ્રસ્ય દયિતઃ સુવેશો નામ નામતઃ ।
૩૪.૭૨/૨સમ્મતો બલવાંશ્ચૈવ રુદ્રસ્ય ગણપોઽભવત્ ॥ ૩૪.૭૨॥

૩૪.૭૩/૧તસ્માત્ કૃત્વા તપો ઘોરમપત્યં ગુણવદ્ ભૃશમ્ ।
૩૪.૭૩/૨ઉત્પાદયસ્વ શૈલેન્દ્ર સુતાં ત્વં વરવર્ણિનીમ્ ॥ ૩૪.૭૩॥

૩૪.૭૪/૧બ્રહ્મોવાચ । સ એવમુક્ત્વા ઋષિણા શૈલેન્દ્રો નિયમસ્થિતઃ ।
૩૪.૭૪/૨તપશ્ચકારાપ્યતુલં યેન તુષ્ટિરભૂન્ મમ ॥ ૩૪.૭૪॥

૩૪.૭૫/૧તદા તમુત્પપાતાહં વરદોઽસ્મીતિ ચાબ્રવમ્ ।
૩૪.૭૫/૨બ્રૂહિ તુષ્ટોઽસ્મિ શૈલેન્દ્ર તપસાનેન સુવ્રત ॥ ૩૪.૭૫॥

૩૪.૭૬/૧હિમવાન્ ઉવાચ । ભગવન્ પુત્રમિચ્છામિ ગુણૈઃ સર્વૈરલંકૃતમ્ ।
૩૪.૭૬/૨એવં વરં પ્રયચ્છસ્વ યદિ તુષ્ટોઽસિ મે પ્રભો ॥ ૩૪.૭૬॥

૩૪.૭૭/૧બ્રહ્મોવાચ । તસ્ય તદ્ વચનં શ્રુત્વા ગિરિરાજસ્ય ભો દ્વિજાઃ ।
૩૪.૭૭/૨તદા તસ્મૈ વરં ચાહં દત્તવાન્ મનસેપ્સિતમ્ ॥ ૩૪.૭૭॥

૩૪.૭૮/૧કન્યા ભવિત્રી શૈલેન્દ્ર તપસાનેન સુવ્રત ।
૩૪.૭૮/૨યસ્યાઃ પ્રભાવાત્ સર્વત્ર કીર્તિમાપ્સ્યસિ શોભનામ્ ॥ ૩૪.૭૮॥

૩૪.૭૯/૧અર્ચિતઃ સર્વદેવાનાં તીર્થકોટિસમાવૃતઃ ।
૩૪.૭૯/૨પાવનશ્ચૈવ પુણ્યેન દેવાનામપિ સર્વતઃ ॥ ૩૪.૭૯॥

૩૪.૮૦/૧જ્યેષ્ઠા ચ સા ભવિત્રી તે અન્યે ચાત્ર તતઃ શુભે ॥ ૩૪.૮૦॥

૩૪.૮૧/૧સોઽપિ કાલેન શૈલેન્દ્રો મેનાયામુદપાદયત્ ।
૩૪.૮૧/૨અપર્ણામેકપર્ણાં ચ તથા ચૈવૈકપાટલામ્ ॥ ૩૪.૮૧॥

૩૪.૮૨/૧ન્યગ્રોધમેકપર્ણં તુ પાટલં ચૈકપાટલામ્ ।
૩૪.૮૨/૨અશિત્વા ત્વેકપર્ણાં તુ અનિકેતસ્તપોઽચરત્ ॥ ૩૪.૮૨॥

૩૪.૮૩/૧શતં વર્ષસહસ્રાણાં દુશ્ચરં દેવદાનવૈઃ ।
૩૪.૮૩/૨આહારમેકપર્ણં તુ એકપર્ણા સમાચરત્ ॥ ૩૪.૮૩॥

૩૪.૮૪/૧પાટલેન તથૈકેન વિદધે ચૈકપાટલા ।
૩૪.૮૪/૨પૂર્ણે વર્ષસહસ્રે તુ આહારં તાઃ પ્રચક્રતુઃ ॥ ૩૪.૮૪॥

૩૪.૮૫/૧અપર્ણા તુ નિરાહારા તાં માતા પ્રત્યભાષત ।
૩૪.૮૫/૨નિષેધયન્તી ચો મેતિ માતૃસ્નેહેન દુઃખિતા ॥ ૩૪.૮૫॥

૩૪.૮૬/૧સા તથોક્તા તયા માત્રા દેવી દુશ્ચરચારિણી ।
૩૪.૮૬/૨તેનૈવ નામ્ના લોકેષુ વિખ્યાતા સુરપૂજિતા ॥ ૩૪.૮૬॥

૩૪.૮૭/૧એતત્ તુ ત્રિકુમારીકં જગત્ સ્થાવરજઙ્ગમમ્ ।
૩૪.૮૭/૨એતાસાં તપસાં વૃત્તં યાવદ્ ભૂમિર્ધરિષ્યતિ ॥ ૩૪.૮૭॥

૩૪.૮૮/૧તપઃશરીરાસ્તાઃ સર્વાસ્તિસ્રો યોગં સમાશ્રિતાઃ ।
૩૪.૮૮/૨સર્વાશ્ચૈવ મહાભાગાસ્તથા ચ સ્થિરયૌવનાઃ ॥ ૩૪.૮૮॥

૩૪.૮૯/૧તા લોકમાતરશ્ચૈવ બ્રહ્મચારિણ્ય એવ ચ ।
૩૪.૮૯/૨અનુગૃહ્ણન્તિ લોકાંશ્ચ તપસા સ્વેન સર્વદા ॥ ૩૪.૮૯॥

૩૪.૯૦/૧ઉમા તાસાં વરિષ્ઠા ચ જ્યેષ્ઠા ચ વરવર્ણિની ।
૩૪.૯૦/૨મહાયોગબલોપેતા મહાદેવમુપસ્થિતા ॥ ૩૪.૯૦॥

૩૪.૯૧/૧દત્તકશ્ચોશના તસ્ય પુત્રઃ સ ભૃગુનન્દનઃ ।
૩૪.૯૧/૨આસીત્ તસ્યૈકપર્ણા તુ દેવલં સુષુવે સુતમ્ ॥ ૩૪.૯૧॥

૩૪.૯૨/૧યા તુ તાસાં કુમારીણાં તૃતીયા હ્યેકપાટલા ।
૩૪.૯૨/૨પુત્રં સા તમલર્કસ્ય જૈગીષવ્યમુપસ્થિતા ॥ ૩૪.૯૨॥

૩૪.૯૩/૧તસ્યાશ્ચ શઙ્ખલિખિતૌ સ્મૃતૌ પુત્રાવયોનિજૌ ।
૩૪.૯૩/૨ઉમા તુ યા મયા તુભ્યં કીર્તિતા વરવર્ણિની ॥ ૩૪.૯૩॥

૩૪.૯૪/૧અથ તસ્યાસ્તપોયોગાત્ ત્રૈલોક્યમખિલં તદા ।
૩૪.૯૪/૨પ્રધૂપિતમિહાલક્ષ્ય વચસ્તામહમબ્રવમ્ ॥ ૩૪.૯૪॥

૩૪.૯૫/૧દેવિ કિં તપસા લોકાંસ્તાપયિષ્યસિ શોભને ।
૩૪.૯૫/૨ત્વયા સૃષ્ટમિદં સર્વં મા કૃત્વા તદ્ વિનાશય ॥ ૩૪.૯૫॥

૩૪.૯૬/૧ત્વં હિ ધારયસે લોકાન્ ઇમાન્ સર્વાન્ સ્વતેજસા ।
૩૪.૯૬/૨બ્રૂહિ કિં તે જગન્માતઃ પ્રાર્થિતં સમ્પ્રતીહ નઃ ॥ ૩૪.૯૬॥

૩૪.૯૭/૧દેવ્યુવાચ । યદર્થં તપસો હ્યસ્ય ચરણં મે પિતામહ ।
૩૪.૯૭/૨ત્વમેવ તદ્ વિજાનીષે તતઃ પૃચ્છસિ કિં પુનઃ ॥ ૩૪.૯૭॥

૩૪.૯૮/૧બ્રહ્મોવાચ । તતસ્તામબ્રવં ચાહં યદર્થં તપ્યસે શુભે ।
૩૪.૯૮/૨સ ત્વાં સ્વયમુપાગમ્ય ઇહૈવ વરયિષ્યતિ ॥ ૩૪.૯૮॥

૩૪.૯૯/૧શર્વ એવ પતિઃ શ્રેષ્ઠઃ સર્વલોકેશ્વરેશ્વરઃ ।
૩૪.૯૯/૨વયં સદૈવ યસ્યેમે વશ્યા વૈ કિંકરાઃ શુભે ॥ ૩૪.૯૯॥

૩૪.૧૦૦/૧સ દેવદેવઃ પરમેશ્વરઃ સ્વયમ્ ।
૩૪.૧૦૦/૨સ્વયમ્ભુરાયાસ્યતિ દેવિ તેઽન્તિકમ્ ।
૩૪.૧૦૦/૩ઉદારરૂપો વિકૃતાદિરૂપઃ ।
૩૪.૧૦૦/૪સમાનરૂપોઽપિ ન યસ્ય કસ્યચિત્ ॥ ૩૪.૧૦૦॥

૩૪.૧૦૧/૧મહેશ્વરઃ પર્વતલોકવાસી ।
૩૪.૧૦૧/૨ચરાચરેશઃ પ્રથમોઽપ્રમેયઃ ।
૩૪.૧૦૧/૩વિનેન્દુના હીન્દ્રસમાનવર્ચસા ।
૩૪.૧૦૧/૪વિભીષણં રૂપમિવાસ્થિતો યઃ ॥ ૩૪.૧૦૧॥

૩૫.૧/૧બ્રહ્મોવાચ । તતસ્તામબ્રુવન્ દેવાસ્તદા ગત્વા તુ સુન્દરીમ્ ।
૩૫.૧/૨દેવિ શીઘ્રેણ કાલેન ધૂર્જટિર્નીલલોહિતઃ ॥ ૩૫.૧॥

૩૫.૨/૧સ ભર્તા તવ દેવેશો ભવિતા મા તપઃ કૃથાઃ ।
૩૫.૨/૨તતઃ પ્રદક્ષિણીકૃત્ય દેવા વિપ્રા ગિરેઃ સુતામ્ ॥ ૩૫.૨॥

૩૫.૩/૧જગ્મુશ્ચાદર્શનં તસ્યાઃ સા ચાપિ વિરરામ હ ।
૩૫.૩/૨સા દેવી સૂક્તમિત્યેવમુક્ત્વા સ્વસ્યાશ્રમે શુભે ॥ ૩૫.૩॥

૩૫.૪/૧દ્વારિ જાતમશોકં ચ સમુપાશ્રિત્ય ચાસ્થિતા ।
૩૫.૪/૨અથાગાચ્ચન્દ્રતિલકસ્ત્રિદશાર્તિહરો હરઃ ॥ ૩૫.૪॥

૩૫.૫/૧વિકૃતં રૂપમાસ્થાય હ્રસ્વો બાહુક એવ ચ ।
૩૫.૫/૨વિભગ્નનાસિકો ભૂત્વા કુબ્જઃ કેશાન્તપિઙ્ગલઃ ॥ ૩૫.૫॥

૩૫.૬/૧ઉવાચ વિકૃતાસ્યશ્ચ દેવિ ત્વાં વરયામ્યહમ્ ।

૩૫.૬/૨અથોમા યોગસંસિદ્ધા જ્ઞાત્વા શંકરમાગતમ્ ॥ ૩૫.૬॥

૩૫.૭/૧અન્તર્ભાવવિશુદ્ધાત્મા કૃપાનુષ્ઠાનલિપ્સયા ।
૩૫.૭/૨તમુવાચાર્ઘપાદ્યાભ્યાં મધુપર્કેણ ચૈવ હ ॥ ૩૫.૭॥

૩૫.૮/૧સમ્પૂજ્ય સુમનોભિસ્તં બ્રાહ્મણં બ્રાહ્મણપ્રિયા ॥ ૩૫.૮॥

૩૫.૯/૧દેવ્યુવાચ । ભગવન્ ન સ્વતન્ત્રાહં પિતા મે ત્વગ્રણીર્ગૃહે ।
૩૫.૯/૨સ પ્રભુર્મમ દાને વૈ કન્યાહં દ્વિજપુંગવ ॥ ૩૫.૯॥

૩૫.૧૦/૧ગત્વા યાચસ્વ પિતરં મમ શૈલેન્દ્રમવ્યયમ્ ।
૩૫.૧૦/૨સ ચેદ્ દદાતિ માં વિપ્ર તુભ્યં તદ્ ઉચિતં મમ ॥ ૩૫.૧૦॥

૩૫.૧૧/૧બ્રહ્મોવાચ । તતઃ સ ભગવાન્ દેવસ્તથૈવ વિકૃતઃ પ્રભુઃ ।
૩૫.૧૧/૨ઉવાચ શૈલરાજાનં સુતાં મે યચ્છ શૈલરાટ્ ॥ ૩૫.૧૧॥

૩૫.૧૨/૧સ તં વિકૃતરૂપેણ જ્ઞાત્વા રુદ્રમથાવ્યયમ્ ।
૩૫.૧૨/૨ભીતઃ શાપાચ્ચ વિમના ઇદં વચનમબ્રવીત્ ॥ ૩૫.૧૨॥

૩૫.૧૩/૧શૈલેન્દ્ર ઉવાચ । ભગવન્ નાવમન્યેऽહં બ્રાહ્મણાન્ ભુવિ દેવતાઃ ।
૩૫.૧૩/૨મનીષિતં તુ યત્ પૂર્વં તચ્છૃણુષ્વ મહામતે ॥ ૩૫.૧૩॥

૩૫.૧૪/૧સ્વયંવરો મે દુહિતુર્ભવિતા વિપ્રપૂજિતઃ ।
૩૫.૧૪/૨વરયેદ્ યં સ્વયં તત્ર સ ભર્તાસ્યા ભવિષ્યતિ ॥ ૩૫.૧૪॥

૩૫.૧૫/૧તચ્છ્રુત્વા શૈલવચનં ભગવાન્ વૃષભધ્વજઃ ।
૩૫.૧૫/૨દેવ્યાઃ સમીપમાગત્ય ઇદમાહ મહામનાઃ ॥ ૩૫.૧૫॥

૩૫.૧૬/૧શિવ ઉવાચ । દેવિ પિત્રા ત્વનુજ્ઞાતઃ સ્વયંવર ઇતિ શ્રુતિઃ ।
૩૫.૧૬/૨તત્ર ત્વં વરયિત્રી યં સ તે ભર્તા ભવેદ્ ઇતિ ॥ ૩૫.૧૬॥

૩૫.૧૭/૧તદ્ આપૃચ્છ્ય ગમિષ્યામિ દુર્લભાં ત્વાં વરાનને ।
૩૫.૧૭/૨રૂપવન્તં સમુત્સૃજ્ય વૃણોષ્યસદૃશં કથમ્ ॥ ૩૫.૧૭॥

૩૫.૧૮/૧બ્રહ્મોવાચ । તેનોક્તા સા તદા તત્ર ભાવયન્તી તદીરિતમ્ ।
૩૫.૧૮/૨ભાવં ચ રુદ્રનિહિતં પ્રસાદં મનસસ્તથા ॥ ૩૫.૧૮॥

૩૫.૧૯/૧સમ્પ્રાપ્યોવાચ દેવેશં મા તેऽભૂદ્ બુદ્ધિરન્યથા ।
૩૫.૧૯/૨અહં ત્વાં વરયિષ્યામિ નાદ્ભુતં તુ કથંચન ॥ ૩૫.૧૯॥

૩૫.૨૦/૧અથવા તેऽસ્તિ સંદેહો મયિ વિપ્ર કથંચન ।

૩૫.૨૦/૨ઇહૈવ ત્વાં મહાભાગ વરયામિ મનોગતમ્ ॥ ૩૫.૨૦॥

૩૫.૨૧/૧બ્રહ્મોવાચ । ગૃહીત્વા સ્તબકં સા તુ હસ્તાભ્યાં તત્ર સંસ્થિતા ।
૩૫.૨૧/૨સ્કન્ધે શમ્ભોઃ સમાધાય દેવી પ્રાહ વૃતોઽસિ મે ॥ ૩૫.૨૧॥

૩૫.૨૨/૧તતઃ સ ભગવાન્ દેવસ્તયા દેવ્યા વૃતસ્તદા ।
૩૫.૨૨/૨ઉવાચ તમશોકં વૈ વાચા સંજીવયન્ન્ ઇવ ॥ ૩૫.૨૨॥

૩૫.૨૩/૧શિવ ઉવાચ । યસ્માત્ તવ સુપુણ્યેન સ્તબકેન વૃતોઽસ્મ્યહમ્ ।
૩૫.૨૩/૨તસ્માત્ ત્વં જરયા ત્યક્તસ્ત્વમરઃ સમ્ભવિષ્યસિ ॥ ૩૫.૨૩॥

૩૫.૨૪/૧કામરૂપી કામપુષ્પઃ કામદો દયિતો મમ ।
૩૫.૨૪/૨સર્વાભરણપુષ્પાઢ્યઃ સર્વપુષ્પફલોપગઃ ॥ ૩૫.૨૪॥

૩૫.૨૫/૧સર્વાન્નભક્ષકશ્ચૈવ અમૃતસ્વાદ એવ ચ ।
૩૫.૨૫/૨સર્વગન્ધશ્ચ દેવાનાં ભવિષ્યસિ દૃઢપ્રિયઃ ॥ ૩૫.૨૫॥

૩૫.૨૬/૧નિર્ભયઃ સર્વલોકેષુ ભવિષ્યસિ સુનિર્વૃતઃ ।
૩૫.૨૬/૨આશ્રમં વેદમત્યર્થં ચિત્રકૂટેતિ વિશ્રુતમ્ ॥ ૩૫.૨૬॥

૩૫.૨૭/૧યો હિ યાસ્યતિ પુણ્યાર્થી સોઽશ્વમેધમવાપ્સ્યતિ ।
૩૫.૨૭/૨યસ્તુ તત્ર મૃતશ્ચાપિ બ્રહ્મલોકં સ ગચ્છતિ ॥ ૩૫.૨૭॥

૩૫.૨૮/૧યશ્ચાત્ર નિયમૈર્યુક્તઃ પ્રાણાન્ સમ્યક્ પરિત્યજેત્ ।
૩૫.૨૮/૨સ દેવ્યાસ્તપસા યુક્તો મહાગણપતિર્ભવેત્ ॥ ૩૫.૨૮॥

૩૫.૨૯/૧બ્રહ્મોવાચ । એવમુક્ત્વા તદા દેવ આપૃચ્છ્ય હિમવત્સુતામ્ ।
૩૫.૨૯/૨અન્તર્દધે જગત્સ્રષ્ટા સર્વભૂતપ ઈશ્વરઃ ॥ ૩૫.૨૯॥

૩૫.૩૦/૧સાપિ દેવી ગતે તસ્મિન્ ભગવત્યમિતાત્મનિ ।
૩૫.૩૦/૨તત એવોન્મુખી ભૂત્વા શિલાયાં સમ્બભૂવ હ ॥ ૩૫.૩૦॥

૩૫.૩૧/૧ઉન્મુખી સા ભવે તસ્મિન્ મહેશે જગતાં પ્રભૌ ।
૩૫.૩૧/૨નિશેવ ચન્દ્રરહિતા ન બભૌ વિમનાસ્તદા ॥ ૩૫.૩૧॥

૩૫.૩૨/૧અથ શુશ્રાવ શબ્દં ચ બાલસ્યાર્તસ્ય શૈલજા ।
૩૫.૩૨/૨સરસ્યુદકસમ્પૂર્ણે સમીપે ચાશ્રમસ્ય ચ ॥ ૩૫.૩૨॥

૩૫.૩૩/૧સ કૃત્વા બાલરૂપં તુ દેવદેવઃ સ્વયં શિવઃ ।
૩૫.૩૩/૨ક્રીડાહેતોઃ સરોમધ્યે ગ્રાહગ્રસ્તોઽભવત્ તદા ॥ ૩૫.૩૩॥

૩૫.૩૪/૧યોગમાયાં સમાસ્થાય પ્રપઞ્ચોદ્ભવકારણમ્ ।
૩૫.૩૪/૨તદ્ રૂપં સરસો મધ્યે કૃત્વૈવં સમભાષત ॥ ૩૫.૩૪॥

૩૫.૩૫/૧બાલ ઉવાચ । ત્રાતુ માં કશ્ચિદ્ ઇત્યાહ ગ્રાહેણ હૃતચેતસમ્ ।
૩૫.૩૫/૨ધિક્ કષ્ટં બાલ એવાહમપ્રાપ્તાર્થમનોરથઃ ॥ ૩૫.૩૫॥

૩૫.૩૬/૧પ્રયામિ નિધનં વક્ત્રે ગ્રાહસ્યાસ્ય દુરાત્મનઃ ।
૩૫.૩૬/૨શોચામિ ન સ્વકં દેહં ગ્રાહગ્રસ્તઃ સુદુઃખિતઃ ॥ ૩૫.૩૬॥

૩૫.૩૭/૧યથા શોચામિ પિતરં માતરં ચ તપસ્વિનીમ્ ।
૩૫.૩૭/૨ગ્રાહગૃહીતં માં શ્રુત્વા પ્રાપ્તં નિધનમુત્સુકૌ ॥ ૩૫.૩૭॥

૩૫.૩૮/૧પ્રિયપુત્રાવેકપુત્રૌ પ્રાણાન્ નૂનં ત્યજિષ્યતઃ ।
૩૫.૩૮/૨અહો બત સુકષ્ટં વૈ યોઽહં બાલોઽકૃતાશ્રમઃ ।
૩૫.૩૮/૩અન્તર્ગ્રાહેણ ગ્રસ્તસ્તુ યાસ્યામિ નિધનં કિલ ॥ ૩૫.૩૮॥

૩૫.૩૯/૧બ્રહ્મોવાચ । શ્રુત્વા તુ દેવી તં નાદં વિપ્રસ્યાર્તસ્ય શોભના ।
૩૫.૩૯/૨ઉત્થાય પ્રસ્થિતા તત્ર યત્ર તિષ્ઠત્યસૌ દ્વિજઃ ॥ ૩૫.૩૯॥

૩૫.૪૦/૧સાપશ્યદ્ ઇન્દુવદના બાલકં ચારુરૂપિણમ્ ।
૩૫.૪૦/૨ગ્રાહસ્ય મુખમાપન્નં વેપમાનમવસ્થિતમ્ ॥ ૩૫.૪૦॥

૩૫.૪૧/૧સોઽપિ ગ્રાહવરઃ શ્રીમાન્ દૃષ્ટ્વા દેવીમુપાગતામ્ ।
૩૫.૪૧/૨તં ગૃહીત્વા દ્રુતં યાતો મધ્યં સરસ એવ હિ ॥ ૩૫.૪૧॥

૩૫.૪૨/૧સ કૃષ્યમાણસ્તેજસ્વી નાદમાર્તં તદાકરોત્ ।
૩૫.૪૨/૨અથાહ દેવી દુઃખાર્તા બાલં દૃષ્ટ્વા ગ્રહાવૃતમ્ ॥ ૩૫.૪૨॥

૩૫.૪૩/૧પાર્વત્યુવાચ । ગ્રાહરાજ મહાસત્ત્વ બાલકં હ્યેકપુત્રકમ્ ।
૩૫.૪૩/૨વિમુઞ્ચેમં મહાદંષ્ટ્ર ક્ષિપ્રં ભીમપરાક્રમ ॥ ૩૫.૪૩॥

૩૫.૪૪/૧ગ્રાહ ઉવાચ । યો દેવિ દિવસે ષષ્ઠે પ્રથમં સમુપૈતિ મામ્ ।
૩૫.૪૪/૨સ આહારો મમ પુરા વિહિતો લોકકર્તૃભિઃ ॥ ૩૫.૪૪॥

૩૫.૪૫/૧સોઽયં મમ મહાભાગે ષષ્ઠેઽહનિ ગિરીન્દ્રજે ।
૩૫.૪૫/૨બ્રહ્મણા પ્રેરિતો નૂનં નૈનં મોક્ષ્યે કથંચન ॥ ૩૫.૪૫॥

૩૫.૪૬/૧દેવ્યુવાચ । યન્ મયા હિમવચ્છૃઙ્ગે ચરિતં તપ ઉત્તમમ્ ।
૩૫.૪૬/૨તેન બાલમિમં મુઞ્ચ ગ્રાહરાજ નમોઽસ્તુ તે ॥ ૩૫.૪૬॥

૩૫.૪૭/૧ગ્રાહ ઉવાચ । મા વ્યયસ્તપસો દેવિ ભૃશં બાલે શુભાનને ।

૩૫.૪૭/૨યદ્ બ્રવીમિ કુરુ શ્રેષ્ઠે તથા મોક્ષમવાપ્સ્યતિ ॥ ૩૫.૪૭॥

૩૫.૪૮/૧દેવ્યુવાચ । ગ્રાહાધિપ વદસ્વાશુ યત્ સતામવિગર્હિતમ્ ।
૩૫.૪૮/૨તત્ કૃતં નાત્ર સંદેહો યતો મે બ્રાહ્મણાઃ પ્રિયાઃ ॥ ૩૫.૪૮॥

૩૫.૪૯/૧ગ્રાહ ઉવાચ । યત્ કૃતં વૈ તપઃ કિંચિદ્ ભવત્યા સ્વલ્પમુત્તમમ્ ।
૩૫.૪૯/૨તત્ સર્વં મે પ્રયચ્છાશુ તતો મોક્ષમવાપ્સ્યતિ ॥ ૩૫.૪૯॥

૩૫.૫૦/૧દેવ્યુવાચ । જન્મપ્રભૃતિ યત્ પુણ્યં મહાગ્રાહ કૃતં મયા ।
૩૫.૫૦/૨તત્ તે સર્વં મયા દત્તં બાલં મુઞ્ચ મહાગ્રહ ॥ ૩૫.૫૦॥

૩૫.૫૧/૧બ્રહ્મોવાચ । પ્રજજ્વાલ તતો ગ્રાહસ્તપસા તેન ભૂષિતઃ ।
૩૫.૫૧/૨આદિત્ય ઇવ મધ્યાહ્ને દુર્નિરીક્ષસ્તદાભવત્ ।
૩૫.૫૧/૩ઉવાચ ચૈવં તુષ્ટાત્મા દેવીં લોકસ્ય ધારિણીમ્ ॥ ૩૫.૫૧॥

૩૫.૫૨/૧ગ્રાહ ઉવાચ । દેવિ કિં કૃત્યમેતત્ તે સુનિશ્ચિત્ય મહાવ્રતે ।
૩૫.૫૨/૨તપસોઽપ્યર્જનં દુઃખં તસ્ય ત્યાગો ન શસ્યતે ॥ ૩૫.૫૨॥

૩૫.૫૩/૧ગૃહાણ તપ એવ ત્વં બાલં ચેમં સુમધ્યમે ।
૩૫.૫૩/૨તુષ્ટોઽસ્મિ તે વિપ્રભક્ત્યા વરં તસ્માદ્ દદામિ તે ।
૩૫.૫૩/૩સા ત્વેવમુક્તા ગ્રાહેણ ઉવાચેદં મહાવ્રતા ॥ ૩૫.૫૩॥

૩૫.૫૪/૧દેવ્યુવાચ । દેહેનાપિ મયા ગ્રાહ રક્ષ્યો વિપ્રઃ પ્રયત્નતઃ ।
૩૫.૫૪/૨તપઃ પુનર્મયા પ્રાપ્યં ન પ્રાપ્યો બ્રાહ્મણઃ પુનઃ ॥ ૩૫.૫૪॥

૩૫.૫૫/૧સુનિશ્ચિત્ય મહાગ્રાહ કૃતં બાલસ્ય મોક્ષણમ્ ।
૩૫.૫૫/૨ન વિપ્રેભ્યસ્તપઃ શ્રેષ્ઠં શ્રેષ્ઠા મે બ્રાહ્મણા મતાઃ ॥ ૩૫.૫૫॥

૩૫.૫૬/૧દત્ત્વા ચાહં ન ગૃહ્ણામિ ગ્રાહેન્દ્ર વિહિતં હિ તે ।
૩૫.૫૬/૨નહિ કશ્ચિન્ નરો ગ્રાહ પ્રદત્તં પુનરાહરેત્ ॥ ૩૫.૫૬॥

૩૫.૫૭/૧દત્તમેતન્ મયા તુભ્યં નાદદાનિ હિ તત્ પુનઃ ।
૩૫.૫૭/૨ત્વય્યેવ રમતામેતદ્ બાલશ્ચાયં વિમુચ્યતામ્ ॥ ૩૫.૫૭॥

૩૫.૫૮/૧બ્રહ્મોવાચ । તથોક્તસ્તાં પ્રશસ્યાથ મુક્ત્વા બાલં નમસ્ય ચ ।
૩૫.૫૮/૨દેવીમાદિત્યાવભાસસ્તત્રૈવાન્તરધીયત ॥ ૩૫.૫૮॥

૩૫.૫૯/૧બાલોઽપિ સરસસ્તીરે મુક્તો ગ્રાહેણ વૈ તદા ।
૩૫.૫૯/૨સ્વપ્નલબ્ધ ઇવાર્થૌઘસ્તત્રૈવાન્તરધીયત ॥ ૩૫.૫૯॥

૩૫.૬૦/૧તપસોઽપચયં મત્વા દેવી હિમગિરીન્દ્રજા ।

૩૫.૬૦/૨ભૂય એવ તપઃ કર્તુમારેભે નિયમસ્થિતા ॥ ૩૫.૬૦॥

૩૫.૬૧/૧કર્તુકામાં તપો ભૂયો જ્ઞાત્વા તાં શંકરઃ સ્વયમ્ ।
૩૫.૬૧/૨પ્રોવાચ વચનં વિપ્રા મા કૃથાસ્તપ ઇત્યુત ॥ ૩૫.૬૧॥

૩૫.૬૨/૧મહ્યમેતત્ તપો દેવિ ત્વયા દત્તં મહાવ્રતે ।
૩૫.૬૨/૨તત્ તેનૈવાક્ષયં તુભ્યં ભવિષ્યતિ સહસ્રધા ॥ ૩૫.૬૨॥

૩૫.૬૩/૧ઇતિ લબ્ધ્વા વરં દેવી તપસોઽક્ષયમુત્તમમ્ ।
૩૫.૬૩/૨સ્વયંવરમુદીક્ષન્તી તસ્થૌ પ્રીતા મુદા યુતા ॥ ૩૫.૬૩॥

૩૫.૬૪/૧ઇદં પઠેદ્ યો હિ નરઃ સદૈવ ।
૩૫.૬૪/૨બાલાનુભાવાચરણં હિ શમ્ભોઃ ।
૩૫.૬૪/૩સ દેહભેદં સમવાપ્ય પૂતો ।
૩૫.૬૪/૪ભવેદ્ ગણેશસ્તુ કુમારતુલ્યઃ ॥ ૩૫.૬૪॥

૩૬.૧/૧બ્રહ્મોવાચ । વિસ્તૃતે હિમવત્પૃષ્ઠે વિમાનશતસંકુલે ।
૩૬.૧/૨અભવત્ સ તુ કાલેન શૈલપુત્ર્યાઃ સ્વયંવરઃ ॥ ૩૬.૧॥

૩૬.૨/૧અથ પર્વતરાજોઽસૌ હિમવાન્ ધ્યાનકોવિદઃ ।
૩૬.૨/૨દુહિતુર્દેવદેવેન જ્ઞાત્વા તદ્ અભિમન્ત્રિતમ્ ॥ ૩૬.૨॥

૩૬.૩/૧જાનન્ન્ અપિ મહાશૈલઃ સમયારક્ષણેપ્સયા ।
૩૬.૩/૨સ્વયંવરં તતો દેવ્યાઃ સર્વલોકેષ્વઘોષયત્ ॥ ૩૬.૩॥

૩૬.૪/૧દેવદાનવસિદ્ધાનાં સર્વલોકનિવાસિનામ્ ।
૩૬.૪/૨વૃણુયાત્ પરમેશાનં સમક્ષં યદિ મે સુતા ॥ ૩૬.૪॥

૩૬.૫/૧તદ્ એવ સુકૃતં શ્લાઘ્યં મમાભ્યુદયસમ્મતમ્ ।
૩૬.૫/૨ઇતિ સંચિન્ત્ય શૈલેન્દ્રઃ કૃત્વા હૃદિ મહેશ્વરમ્ ॥ ૩૬.૫॥

૩૬.૬/૧આબ્રહ્મકેષુ દેવેષુ દેવ્યાઃ શૈલેન્દ્રસત્તમઃ ।
૩૬.૬/૨કૃત્વા રત્નાકુલં દેશં સ્વયંવરમચીકરત્ ॥ ૩૬.૬॥

૩૬.૭/૧અથૈવમાઘોષિતમાત્ર એવ ।
૩૬.૭/૨સ્વયંવરે તત્ર નગેન્દ્રપુત્ર્યાઃ ।
૩૬.૭/૩દેવાદયઃ સર્વજગન્નિવાસાઃ ।
૩૬.૭/૪સમાયયુસ્તત્ર ગૃહીતવેશાઃ ॥ ૩૬.૭॥

૩૬.૮/૧પ્રફુલ્લપદ્માસનસંનિવિષ્ટઃ ।

૩૬.૮/૨સિદ્ધૈર્વૃતો યોગિભિરપ્રમેયૈઃ ।
૩૬.૮/૩વિજ્ઞાપિતસ્તેન મહીધ્રરાજ્ઞા ।
૩૬.૮/૪આગતસ્તદાહં ત્રિદિવૈરુપેતઃ ॥ ૩૬.૮॥

૩૬.૯/૧અક્ષ્ણાં સહસ્રં સુરરાટ્ સ બિભ્રદ્ ।
૩૬.૯/૨દિવ્યાઙ્ગહારસ્રગુદારરૂપઃ ।
૩૬.૯/૩ઐરાવતં સર્વગજેન્દ્રમુખ્યમ્ ।
૩૬.૯/૪સ્રવન્મદાસારકૃતપ્રવાહમ્ ॥ ૩૬.૯॥

૩૬.૧૦/૧આરુહ્ય સર્વામરરાટ્ સ વજ્રમ્ ।
૩૬.૧૦/૨બિભ્રત્ સમાગાત્ પુરતઃ સુરાણામ્ ।
૩૬.૧૦/૩તેજઃપ્રભાવાધિકતુલ્યરૂપી ।
૩૬.૧૦/૪પ્રોદ્ભાસયન્ સર્વદિશો વિવસ્વાન્ ॥ ૩૬.૧૦॥

૩૬.૧૧/૧હૈમં વિમાનં સવલત્પતાકમ્ ।
૩૬.૧૧/૨આરૂઢ આગાત્ ત્વરિતં જવેન ।
૩૬.૧૧/૩મણિપ્રદીપ્તોજ્જ્વલકુણ્ડલશ્ચ ।
૩૬.૧૧/૪વહ્ન્યર્કતેજઃપ્રતિમે વિમાને ॥ ૩૬.૧૧॥

૩૬.૧૨/૧સમભ્યગાત્ કશ્યપસૂનુરેક ।
૩૬.૧૨/૨આદિત્યમધ્યાદ્ ભગનામધારી ।
૩૬.૧૨/૩પીનાઙ્ગયષ્ટિઃ સુકૃતાઙ્ગહાર+ ।
૩૬.૧૨/૪તેજોબલાજ્ઞાસદૃશપ્રભાવઃ ॥ ૩૬.૧૨॥

૩૬.૧૩/૧દણ્ડં સમાગૃહ્ય કૃતાન્ત આગાદ્ ।
૩૬.૧૩/૨આરુહ્ય ભીમં મહિષં જવેન ।
૩૬.૧૩/૩મહામહીધ્રોચ્છ્રયપીનગાત્રઃ ।
૩૬.૧૩/૪સ્વર્ણાદિરત્નાઞ્ચિતચારુવેશઃ ॥ ૩૬.૧૩॥

૩૬.૧૪/૧સમીરણઃ સર્વજગદ્વિભર્તા ।
૩૬.૧૪/૨વિમાનમારુહ્ય સમભ્યગાદ્ ધિ ।
૩૬.૧૪/૩સંતાપયન્ સર્વસુરાસુરેશાંસ્- ।
૩૬.૧૪/૪તેજોધિકસ્તેજસિ સંનિવિષ્ટઃ ॥ ૩૬.૧૪॥

૩૬.૧૫/૧વહ્નિઃ સમભ્યેત્ય સુરેન્દ્રમધ્યે ।
૩૬.૧૫/૨જ્વલન્ પ્રતસ્થૌ વરવેશધારી ।
૩૬.૧૫/૩નાનામણિપ્રજ્વલિતાઙ્ગયષ્ટિર્।

૩૬.૧૫/૪જગદ્વરં દિવ્યવિમાનમગ્ર્યમ્ ॥ ૩૬.૧૫॥

૩૬.૧૬/૧આરુહ્ય સર્વદ્રવિણાધિપેશઃ ।
૩૬.૧૬/૨સ રાજરાજસ્ત્વરિતોઽભ્યગાચ્ચ ।
૩૬.૧૬/૩આપ્યાયયન્ સર્વસુરાસુરેશાન્ ।
૩૬.૧૬/૪કાન્ત્યા ચ વેશેન ચ ચારુરૂપઃ ॥ ૩૬.૧૬॥

૩૬.૧૭/૧જ્વલન્ મહારત્નવિચિત્રરૂપમ્ ।
૩૬.૧૭/૨વિમાનમારુહ્ય શશી સમાયાત્ ।
૩૬.૧૭/૩શ્યામાઙ્ગયષ્ટિઃ સુવિચિત્રવેશઃ ।
૩૬.૧૭/૪સર્વાઙ્ગ આબદ્ધસુગન્ધિમાલ્યઃ ॥ ૩૬.૧૭॥

૩૬.૧૮/૧તાર્ક્ષ્યં સમારુહ્ય મહીધ્રકલ્પમ્ ।
૩૬.૧૮/૨ગદાધરોઽસૌ ત્વરિતઃ સમેતઃ ।
૩૬.૧૮/૩અથાશ્વિનૌ ચાપિ ભિષગ્વરૌ દ્વાવ્।
૩૬.૧૮/૪એકં વિમાનં ત્વરયાધિરુહ્ય ॥ ૩૬.૧૮॥

૩૬.૧૯/૧મનોહરૌ પ્રજ્વલચારુવેશૌ ।
૩૬.૧૯/૨આજગ્મતુર્દેવવરૌ સુવીરૌ ।
૩૬.૧૯/૩સહસ્રનાગઃ સ્ફુરદગ્નિવર્ણમ્ ।
૩૬.૧૯/૪બિભ્રત્ તદાનીં જ્વલનાર્કતેજાઃ ॥ ૩૬.૧૯॥

૩૬.૨૦/૧સાર્ધં સ નાગૈરપરૈર્મહાત્મા ।
૩૬.૨૦/૨વિમાનમારુહ્ય સમભ્યગાચ્ચ ।
૩૬.૨૦/૩દિતેઃ સુતાનાં ચ મહાસુરાણામ્ ।
૩૬.૨૦/૪વહ્ન્યર્કશક્રાનિલતુલ્યભાસામ્ ॥ ૩૬.૨૦॥

૩૬.૨૧/૧વરાનુરૂપં પ્રવિધાય વેશમ્ ।
૩૬.૨૧/૨વૃન્દં સમાગાત્ પુરતઃ સુરાણામ્ ।
૩૬.૨૧/૩ગન્ધર્વરાજઃ સ ચ ચારુરૂપી ।
૩૬.૨૧/૪દિવ્યાઙ્ગદો દિવ્યવિમાનચારી ॥ ૩૬.૨૧॥

૩૬.૨૨/૧ગન્ધર્વસંઘૈઃ સહિતોઽપ્સરોભિઃ ।
૩૬.૨૨/૨શક્રાજ્ઞયા તત્ર સમાજગામ ।
૩૬.૨૨/૩અન્યે ચ દેવાસ્ત્રિદિવાત્ તદાનીમ્ ।
૩૬.૨૨/૪પૃથક્ પૃથક્ ચારુગૃહીતવેશાઃ ॥ ૩૬.૨૨॥

૩૬.૨૩/૧આજગ્મુરારુહ્ય વિમાનપૃષ્ઠમ્ ।
૩૬.૨૩/૨ગન્ધર્વયક્ષોરગકિંનરાશ્ચ ।
૩૬.૨૩/૩શચીપતિસ્તત્ર સુરેન્દ્રમધ્યે ।
૩૬.૨૩/૪રરાજ રાજાધિકલક્ષ્યમૂર્તિઃ ॥ ૩૬.૨૩॥

૩૬.૨૪/૧આજ્ઞાબલૈશ્વર્યકૃતપ્રમોદઃ ।
૩૬.૨૪/૨સ્વયંવરં તં સમલંચકાર ।
૩૬.૨૪/૩હેતુસ્ત્રિલોકસ્ય જગત્પ્રસૂતેર્ ।
૩૬.૨૪/૪માતા ચ તેષાં સસુરાસુરાણામ્ ॥ ૩૬.૨૪॥

૩૬.૨૫/૧પત્ની ચ શમ્ભોઃ પુરુષસ્ય ધીમતો ।
૩૬.૨૫/૨ગીતા પુરાણે પ્રકૃતિઃ પરા યા ।
૩૬.૨૫/૩દક્ષસ્ય કોપાદ્ ધિમવદ્ગૃહં સા ।
૩૬.૨૫/૪કાર્યાર્થમાયાત્ ત્રિદિવૌકસાં હિ ॥ ૩૬.૨૫॥

૩૬.૨૬/૧વિમાનપૃષ્ઠે મણિહેમજુષ્ટે ।
૩૬.૨૬/૨સ્થિતા વલચ્ચામરવીજિતાઙ્ગી ।
૩૬.૨૬/૩સર્વર્તુપુષ્પાં સુસુગન્ધમાલામ્ ।
૩૬.૨૬/૪પ્રગૃહ્ય દેવી પ્રસભં પ્રતસ્થે ॥ ૩૬.૨૬॥

૩૬.૨૭/૧બ્રહ્મોવાચ । માલાં પ્રગૃહ્ય દેવ્યાં તુ સ્થિતાયાં દેવસંસદિ ।
૩૬.૨૭/૨શક્રાદ્યૈરાગતૈર્દેવૈઃ સ્વયંવર ઉપાગતે ॥ ૩૬.૨૭॥

૩૬.૨૮/૧દેવ્યા જિજ્ઞાસયા શમ્ભુર્ભૂત્વા પઞ્ચશિખઃ શિશુઃ ।
૩૬.૨૮/૨ઉત્સઙ્ગતલસંસુપ્તો બભૂવ સહસા વિભુઃ ॥ ૩૬.૨૮॥

૩૬.૨૯/૧તતો દદર્શ તં દેવી શિશું પઞ્ચશિખં સ્થિતમ્ ।
૩૬.૨૯/૨જ્ઞાત્વા તં સમવધ્યાનાજ્જગૃહે પ્રીતિસંયુતા ॥ ૩૬.૨૯॥

૩૬.૩૦/૧અથ સા શુદ્ધસંકલ્પા કાઙ્ક્ષિતં પ્રાપ્ય સત્પતિમ્ ।
૩૬.૩૦/૨નિવૃત્તા ચ તદા તસ્થૌ કૃત્વા સા હૃદિ તં વિભુમ્ ॥ ૩૬.૩૦॥

૩૬.૩૧/૧તતો દૃષ્ટ્વા શિશું દેવા દેવ્યા ઉત્સઙ્ગવર્તિનમ્ ।
૩૬.૩૧/૨કોઽયમત્રેતિ સમ્મન્ત્ર્ય ચુક્રુશુર્ભૃશમોહિતાઃ ॥ ૩૬.૩૧॥

૩૬.૩૨/૧વજ્રમાહારયત્ તસ્ય બાહુમુત્ક્ષિપ્ય વૃત્રહા ।
૩૬.૩૨/૨સ બાહુરુત્થિતસ્તસ્ય તથૈવ સમતિષ્ઠત ॥ ૩૬.૩૨॥

૩૬.૩૩/૧સ્તમ્ભિતઃ શિશુરૂપેણ દેવદેવેન શમ્ભુના ।

૩૬.૩૩/૨વજ્રં ક્ષેમું ન શશાક વૃત્રહા ચલિતું ન ચ ॥ ૩૬.૩૩॥

૩૬.૩૪/૧ભગો નામ તતો દેવ આદિત્યઃ કાશ્યપો બલી ।
૩૬.૩૪/૨ઉત્ક્ષિપ્ય આયુધં દીપ્તં છેત્તુમિચ્છન્ વિમોહિતઃ ॥ ૩૬.૩૪॥

૩૬.૩૫/૧તસ્યાપિ ભગવાન્ બાહું તથૈવાસ્તમ્ભયત્ તદા ।
૩૬.૩૫/૨બલં તેજશ્ચ યોગશ્ચ તથૈવાસ્તમ્ભયદ્ વિભુઃ ॥ ૩૬.૩૫॥

૩૬.૩૬/૧શિરઃ પ્રકમ્પયન્ વિષ્ણુઃ શંકરં સમવૈક્ષત ।
૩૬.૩૬/૨અથ તેષુ સ્થિતેષ્વેવં મન્યુમત્સુ સુરેષુ ચ ॥ ૩૬.૩૬॥

૩૬.૩૭/૧અહં પરમસંવિગ્નો ધ્યાનમાસ્થાય સાદરમ્ ।
૩૬.૩૭/૨બુદ્ધવાન્ દેવદેવેશમુમોત્સઙ્ગે સમાસ્થિતમ્ ॥ ૩૬.૩૭॥

૩૬.૩૮/૧જ્ઞાત્વાહં પરમેશાનં શીઘ્રમુત્થાય સાદરમ્ ।
૩૬.૩૮/૨વવન્દે ચરણં શમ્ભોઃ સ્તુતવાંસ્તમહં દ્વિજાઃ ॥ ૩૬.૩૮॥

૩૬.૩૯/૧પુરાણૈઃ સામસંગીતૈઃ પુણ્યાખ્યૈર્ગુહ્યનામભિઃ ।
૩૬.૩૯/૨અજસ્ત્વમજરો દેવઃ સ્રષ્ટા વિભુઃ પરાપરમ્ ॥ ૩૬.૩૯॥

૩૬.૪૦/૧પ્રધાનં પુરુષો યસ્ત્વં બ્રહ્મ ધ્યેયં તદ્ અક્ષરમ્ ।
૩૬.૪૦/૨અમૃતં પરમાત્મા ચ ઈશ્વરઃ કારણં મહત્ ॥ ૩૬.૪૦॥

૩૬.૪૧/૧બ્રહ્મસૃક્ પ્રકૃતેઃ સ્રષ્ટા સર્વકૃત્ પ્રકૃતેઃ પરઃ ।
૩૬.૪૧/૨ઇયં ચ પ્રકૃતિર્દેવી સદા તે સૃષ્ટિકારણમ્ ॥ ૩૬.૪૧॥

૩૬.૪૨/૧પત્નીરૂપં સમાસ્થાય જગત્કારણમાગતા ।
૩૬.૪૨/૨નમસ્તુભ્યં મહાદેવ દેવ્યા વૈ સહિતાય ચ ॥ ૩૬.૪૨॥

૩૬.૪૩/૧પ્રસાદાત્ તવ દેવેશ નિયોગાચ્ચ મયા પ્રજાઃ ।
૩૬.૪૩/૨દેવાદ્યાસ્તુ ઇમાઃ સૃષ્ટા મૂઢાસ્ત્વદ્યોગમાયયા ॥ ૩૬.૪૩॥

૩૬.૪૪/૧કુરુ પ્રસાદમેતેષાં યથાપૂર્વં ભવન્ત્વિમે ।
૩૬.૪૪/૨તત એવમહં વિપ્રા વિજ્ઞાપ્ય પરમેશ્વરમ્ ॥ ૩૬.૪૪॥

૩૬.૪૫/૧સ્તમ્ભિતાન્ સર્વદેવાંસ્તાન્ ઇદં ચાહં તદોક્તવાન્ ।
૩૬.૪૫/૨મૂઢાશ્ચ દેવતાઃ સર્વા નૈનં બુધ્યત શંકરમ્ ॥ ૩૬.૪૫॥

૩૬.૪૬/૧ગચ્છધ્વં શરણં શીઘ્રમેનમેવ મહેશ્વરમ્ ।
૩૬.૪૬/૨સાર્ધં મયૈવ દેવેશં પરમાત્માનમવ્યયમ્ ॥ ૩૬.૪૬॥

૩૬.૪૭/૧તતસ્તે સ્તમ્ભિતાઃ સર્વે તથૈવ ત્રિદિવૌકસઃ ।
૩૬.૪૭/૨પ્રણેમુર્મનસા શર્વં ભાવશુદ્ધેન ચેતસા ॥ ૩૬.૪૭॥

૩૬.૪૮/૧અથ તેષાં પ્રસન્નોઽભૂદ્ દેવદેવો મહેશ્વરઃ ।
૩૬.૪૮/૨યથાપૂર્વં ચકારાશુ દેવતાનાં તનૂસ્તદા ॥ ૩૬.૪૮॥

૩૬.૪૯/૧તત એવં પ્રવૃત્તે તુ સર્વદેવનિવારણે ।
૩૬.૪૯/૨વપુશ્ચકાર દેવેશસ્ત્ર્યક્ષં પરમમદ્ભુતમ્ ॥ ૩૬.૪૯॥

૩૬.૫૦/૧તેજસા તસ્ય તે ધ્વસ્તાશ્ચક્ષુઃ સર્વે ન્યમીલયન્ ।
૩૬.૫૦/૨તેભ્યઃ સ પરમં ચક્ષુઃ સ્વવપુર્દૃષ્ટિશક્તિમત્ ॥ ૩૬.૫૦॥

૩૬.૫૧/૧પ્રાદાત્ પરમદેવેશમપશ્યંસ્તે તદા વિભુમ્ ।
૩૬.૫૧/૨તે દૃષ્ટ્વા પરમેશાનં તૃતીયેક્ષણધારિણમ્ ॥ ૩૬.૫૧॥

૩૬.૫૨/૧શક્રાદ્યા મેનિરે દેવાઃ સર્વ એવ સુરેશ્વરાઃ ।
૩૬.૫૨/૨તસ્ય દેવી તદા હૃષ્ટા સમક્ષં ત્રિદિવૌકસામ્ ॥ ૩૬.૫૨॥

૩૬.૫૩/૧પાદયોઃ સ્થાપયામાસ સ્રઙ્માલામમિતદ્યુતિઃ ।
૩૬.૫૩/૨સાધુ સાધ્વિતિ તે હોચુઃ સર્વે દેવાઃ પુનર્વિભુમ્ ॥ ૩૬.૫૩॥

૩૬.૫૪/૧સહ દેવ્યા નમશ્ચક્રુઃ શિરોભિર્ભૂતલાશ્રિતૈઃ ।
૩૬.૫૪/૨અથાસ્મિન્ન્ અન્તરે વિપ્રાસ્તમહં દૈવતૈઃ સહ ॥ ૩૬.૫૪॥

૩૬.૫૫/૧હિમવન્તં મહાશૈલમુક્તવાંશ્ચ મહાદ્યુતિમ્ ।
૩૬.૫૫/૨શ્લાઘ્યઃ પૂજ્યશ્ચ વન્દ્યશ્ચ સર્વેષાં ત્વં મહાન્ અસિ ॥ ૩૬.૫૫॥

૩૬.૫૬/૧શર્વેણ સહ સમ્બન્ધો યસ્ય તેઽભ્યુદયો મહાન્ ।
૩૬.૫૬/૨ક્રિયતાં ચારુરુદ્વાહઃ કિમર્થં સ્થીયતે પરમ્ ।
૩૬.૫૬/૩તતઃ પ્રણમ્ય હિમવાંસ્તદા માં પ્રત્યભાષત ॥ ૩૬.૫૬॥

૩૬.૫૭/૧હિમવાન્ ઉવાચ । ત્વમેવ કારણં દેવ યસ્ય સર્વોદયે મમ ।
૩૬.૫૭/૨પ્રસાદઃ સહસોત્પન્નો હેતુશ્ચાપિ ત્વમેવ હિ ।
૩૬.૫૭/૩ઉદ્વાહસ્તુ યદા યાદૃક્ તદ્ વિધત્સ્વ પિતામહ ॥ ૩૬.૫૭॥

૩૬.૫૮/૧બ્રહ્મોવાચ । તત એવં વચઃ શ્રુત્વા ગિરિરાજસ્ય ભો દ્વિજાઃ ।
૩૬.૫૮/૨ઉદ્વાહઃ ક્રિયતાં દેવ ઇત્યહં ચોક્તવાન્ વિભુમ્ ॥ ૩૬.૫૮॥

૩૬.૫૯/૧મામાહ શંકરો દેવો યથેષ્ટમિતિ લોકપઃ ।
૩૬.૫૯/૨તત્ક્ષણાચ્ચ તતો વિપ્રા અસ્માભિર્નિર્મિતં પુરમ્ ॥ ૩૬.૫૯॥

૩૬.૬૦/૧ઉદ્વાહાર્થં મહેશસ્ય નાનારત્નોપશોભિતમ્ ।
૩૬.૬૦/૨રત્નાનિ મણયશ્ચિત્રા હેમમૌક્તિકમેવ ચ ॥ ૩૬.૬૦॥

૩૬.૬૧/૧મૂર્તિમન્ત ઉપાગમ્ય અલંચક્રુઃ પુરોત્તમમ્ ।
૩૬.૬૧/૨ચિત્રા મારકતી ભૂમિઃ સુવર્ણસ્તમ્ભશોભિતા ॥ ૩૬.૬૧॥

૩૬.૬૨/૧ભાસ્વત્સ્ફટિકભિત્તિશ્ચ મુક્તાહારપ્રલમ્બિતા ।
૩૬.૬૨/૨તસ્મિન્ દ્વારિ પુરે રમ્ય ઉદ્વાહાર્થં વિનિર્મિતા ॥ ૩૬.૬૨॥

૩૬.૬૩/૧શુશુભે દેવદેવસ્ય મહેશસ્ય મહાત્મનઃ ।
૩૬.૬૩/૨સોમાદિત્યૌ સમં તત્ર તાપયન્તૌ મહામણી ॥ ૩૬.૬૩॥

૩૬.૬૪/૧સૌરભેયં મનોરમ્યં ગન્ધમાદાય મારુતઃ ।
૩૬.૬૪/૨પ્રવવૌ સુખસંસ્પર્શો ભવભક્તિં પ્રદર્શયન્ ॥ ૩૬.૬૪॥

૩૬.૬૫/૧સમુદ્રાસ્તત્ર ચત્વારઃ શક્રાદ્યાશ્ચ સુરોત્તમાઃ ।
૩૬.૬૫/૨દેવનદ્યો મહાનદ્યઃ સિદ્ધા મુનય એવ ચ ॥ ૩૬.૬૫॥

૩૬.૬૬/૧ગન્ધર્વાપ્સરસઃ સર્વે નાગા યક્ષાઃ સરાક્ષસાઃ ।
૩૬.૬૬/૨ઔદકાઃ ખેચરાશ્ચાન્યે કિંનરા દેવચારણાઃ ॥ ૩૬.૬૬॥

૩૬.૬૭/૧તુમ્બુરુર્નારદો હાહા હૂહૂશ્ચૈવ તુ સામગાઃ ।
૩૬.૬૭/૨રમ્યાણ્યાદાય વાદ્યાનિ તત્રાજગ્મુસ્તદા પુરમ્ ॥ ૩૬.૬૭॥

૩૬.૬૮/૧ઋષયસ્તુ કથાસ્તત્ર વેદગીતાસ્તપોધનાઃ ।
૩૬.૬૮/૨પુણ્યાન્ વૈવાહિકાન્ મન્ત્રાઞ્ જેપુઃ સંહૃષ્ટમાનસાઃ ॥ ૩૬.૬૮॥

૩૬.૬૯/૧જગતો માતરઃ સર્વા દેવકન્યાશ્ચ કૃત્સ્નશઃ ।
૩૬.૬૯/૨ગાયન્તિ હર્ષિતાઃ સર્વા ઉદ્વાહે પરમેષ્ઠિનઃ ॥ ૩૬.૬૯॥

૩૬.૭૦/૧ઋતવઃ ષટ્ સમં તત્ર નાનાગન્ધસુખાવહાઃ ।
૩૬.૭૦/૨ઉદ્વાહઃ શંકરસ્યેતિ મૂર્તિમન્ત ઉપસ્થિતાઃ ॥ ૩૬.૭૦॥

૩૬.૭૧/૧નીલજીમૂતસંકાશૈર્મન્ત્રધ્વનિપ્રહર્ષિભિઃ ।
૩૬.૭૧/૨કેકાયમાનૈઃ શિખિભિર્નૃત્યમાનૈશ્ચ સર્વશઃ ॥ ૩૬.૭૧॥

૩૬.૭૨/૧વિલોલપિઙ્ગલસ્પષ્ટ+ । વિદ્યુલ્લેખાવિહાસિતા ।
૩૬.૭૨/૨કુમુદાપીડશુક્લાભિર્બલાકાભિશ્ચ શોભિતા ॥ ૩૬.૭૨॥

૩૬.૭૩/૧પ્રત્યગ્રસંજાતશિલીન્ધ્રકન્દલી+ ।
૩૬.૭૩/૨લતાદ્રુમાદ્યુદ્ગતપલ્લવા શુભા ।

૩૬.૭૩/૩શુભામ્બુધારાપ્રણયપ્રબોધિતૈર્।
૩૬.૭૩/૪મહાલસૈર્ભેકગણૈશ્ચ નાદિતા ॥ ૩૬.૭૩॥

૩૬.૭૪/૧પ્રિયેષુ માનોદ્ધતમાનસાનામ્ ।
૩૬.૭૪/૨મનસ્વિનીનામપિ કામિનીનામ્ ।
૩૬.૭૪/૩મયૂરકેકાભિરુતૈઃ ક્ષણેન ।
૩૬.૭૪/૪મનોહરૈર્માનવિભઙ્ગહેતુભિઃ ॥ ૩૬.૭૪॥

૩૬.૭૫/૧તથા વિવર્ણોજ્જ્વલચારુમૂર્તિના ।
૩૬.૭૫/૨શશાઙ્કલેખાકુટિલેન સર્વતઃ ।
૩૬.૭૫/૩પયોદસંઘાતસમીપવર્તિના ।
૩૬.૭૫/૪મહેન્દ્રચાપેન ભૃશં વિરાજિતા ॥ ૩૬.૭૫॥

૩૬.૭૬/૧વિચિત્રપુષ્પામ્બુભવૈઃ સુગન્ધિભિર્।
૩૬.૭૬/૨ઘનામ્બુસમ્પર્કતયા સુશીતલૈઃ ।
૩૬.૭૬/૩વિકમ્પયન્તી પવનૈર્મનોહરૈઃ ।
૩૬.૭૬/૪સુરાઙ્ગનાનામલકાવલીઃ શુભાઃ ॥ ૩૬.૭૬॥

૩૬.૭૭/૧ગર્જત્પયોદસ્થગિતેન્દુબિમ્બા ।
૩૬.૭૭/૨નવામ્બુસિક્તોદકચારુદૂર્વા ।
૩૬.૭૭/૩નિરીક્ષિતા સાદરમુત્સુકાભિર્।
૩૬.૭૭/૪નિશ્વાસધૂમ્રં પથિકાઙ્ગનાભિઃ ॥ ૩૬.૭૭॥

૩૬.૭૮/૧હંસનૂપુરશબ્દાઢ્યા સમુન્નતપયોધરા ।
૩૬.૭૮/૨ચલદ્વિદ્યુલ્લતાહારા સ્પષ્ટપદ્મવિલોચના ॥ ૩૬.૭૮॥

૩૬.૭૯/૧અસિતજલદધીરધ્વાનવિત્રસ્તહંસા ।
૩૬.૭૯/૨વિમલસલિલધારોત્પાતનમ્રોત્પલાગ્રા ।
૩૬.૭૯/૩સુરભિકુસુમરેણુક્।લ્પ્તસર્વાઙ્ગશોભા ।
૩૬.૭૯/૪ગિરિદુહિતૃવિવાહે પ્રાવૃડ્ આવિર્બભૂવ ॥ ૩૬.૭૯॥

૩૬.૮૦/૧મેઘકઞ્ચુકનિર્મુક્તા પદ્મકોશોદ્ભવસ્તની ।
૩૬.૮૦/૨હંસનૂપુરનિહ્રાદા સર્વસસ્યદિગન્તરા ॥ ૩૬.૮૦॥

૩૬.૮૧/૧વિસ્તીર્ણપુલિનશ્રોણી કૂજત્સારસમેખલા ।
૩૬.૮૧/૨પ્રફુલ્લેન્દીવરશ્યામ+।વિલોચનમનોહરા ॥ ૩૬.૮૧॥

૩૬.૮૨/૧પક્વબિમ્બાધરપુટા કુન્દદન્તપ્રહાસિની ।

૩૬.૮૨/૨નવશ્યામલતાશ્યામ+ ।રોમરાજિપુરસ્કૃતા ॥ ૩૬.૮૨॥

૩૬.૮૩/૧ચન્દ્રાંશુહારવર્ગેણ કણ્ઠોરસ્થલગામિના ।
૩૬.૮૩/૨પ્રહ્લાદયન્તી ચેતાંસિ સર્વેષાં ત્રિદિવૌકસામ્ ॥ ૩૬.૮૩॥

૩૬.૮૪/૧સમદાલિકુલોદ્ગીત+ ંઅધુરસ્વરભાષિણી ।
૩૬.૮૪/૨ચલત્કુમુદસંઘાત+ ેહારુકુણ્ડલશોભિની ॥ ૩૬.૮૪॥

૩૬.૮૫/૧રક્તાશોકપ્રશાખોત્થ+ ।પલ્લવાઙ્ગુલિધારિણી ।
૩૬.૮૫/૨તત્પુષ્પસંચયમયૈર્વાસોભિઃ સમલંકૃતા ॥ ૩૬.૮૫॥

૩૬.૮૬/૧રક્તોત્પલાગ્રચરણા જાતીપુષ્પનખાવલી ।
૩૬.૮૬/૨કદલીસ્તમ્ભવામોરૂઃ શશાઙ્કવદના તથા ॥ ૩૬.૮૬॥

૩૬.૮૭/૧સર્વલક્ષણસમ્પન્ના સર્વાલંકારભૂષિતા ।
૩૬.૮૭/૨પ્રેમ્ણા સ્પૃશતિ કાન્તેવ સાનુરાગા મનોરમા ॥ ૩૬.૮૭॥

૩૬.૮૮/૧નિર્મુક્તાસિતમેઘકઞ્ચુકપટા પૂર્ણેન્દુબિમ્બાનના ।
૩૬.૮૮/૨નીલામ્ભોજવિલોચના રવિકરપ્રોદ્ભિન્નપદ્મસ્તની ।
૩૬.૮૮/૩નાનાપુષ્પરજઃસુગન્ધિપવનપ્રહ્લાદની ચેતસામ્ ।
૩૬.૮૮/૪તત્રાસીત્ કલહંસનૂપુરરવા દેવ્યા વિવાહે શરત્ ॥ ૩૬.૮૮॥

૩૬.૮૯/૧અત્યર્થશીતલામ્ભોભિઃ પ્લાવયન્તૌ દિશઃ સદા ।
૩૬.૮૯/૨ઋતૂ હેમન્તશિશિરૌ આજગ્મતુરતિદ્યુતી ॥ ૩૬.૮૯॥

૩૬.૯૦/૧તાભ્યામ્ ઋતુભ્યાં સમ્પ્રાપ્તો હિમવાન્ સ નગોત્તમઃ ।
૩૬.૯૦/૨પ્રાલેયચૂર્ણવર્ષિભ્યાં ક્ષિપ્રં રૌપ્યહરો બભૌ ॥ ૩૬.૯૦॥

૩૬.૯૧/૧તેન પ્રાલેયવર્ષેણ ઘનેનૈવ હિમાલયઃ ।
૩૬.૯૧/૨અગાધેન તદા રેજે ક્ષીરોદ ઇવ સાગરઃ ॥ ૩૬.૯૧॥

૩૬.૯૨/૧ઋતુપાર્યયસમ્પ્રાપ્તો બભૂવ સ મહાગિરિઃ ।
૩૬.૯૨/૨સાધૂપચારાત્ સહસા કૃતાર્થ ઇવ દુર્જનઃ ॥ ૩૬.૯૨॥

૩૬.૯૩/૧પ્રાલેયપટલચ્છન્નૈઃ શ ૃઙ્ગૈસ્તુ શુશુભે નગઃ ।
૩૬.૯૩/૨છત્રૈરિવ મહાભાગૈઃ પાણ્ડરૈઃ પૃથિવીપતિઃ ॥ ૩૬.૯૩॥

૩૬.૯૪/૧મનોભવોદ્રેકકરાઃ સુરાણામ્ ।
૩૬.૯૪/૨સુરાઙ્ગનાનાં ચ મુહુઃ સમીરાઃ ।
૩૬.૯૪/૩સ્વચ્છામ્બુપૂર્ણાશ્ચ તથા નલિન્યઃ ।

૩૬.૯૪/૪પદ્મોત્પલાનાં કુસુમૈરુપેતાઃ ॥ ૩૬.૯૪॥

૩૬.૯૫/૧વિવાહે ગુરુકન્યાયા વસન્તઃ સમગાદ્ ઋતુઃ ॥ ૩૬.૯૫॥

૩૬.૯૬/૧ઈષત્સમુદ્ભિન્નપયોધરાગ્રા ।
૩૬.૯૬/૨નાર્યો યથા રમ્યતરા બભૂવુઃ ।
૩૬.૯૬/૩નાત્યુષ્ણશીતાનિ પયઃસરાંસિ ।
૩૬.૯૬/૪કિઞ્જલ્કચૂર્ણૈઃ કપિલીકૃતાનિ ।
૩૬.૯૬/૫ચક્રાહ્વયુગ્મૈરુપનાદિતાનિ ।
૩૬.૯૬/૬યયુઃ પ્રહૃષ્ટાઃ સુરદન્તિમુખ્યાઃ ॥ ૩૬.૯૬॥

૩૬.૯૭/૧પ્રિયઙ્ગૂશ્ચૂતતરવશ્ચૂતાંશ્ચાપિ પ્રિયઙ્ગવઃ ।
૩૬.૯૭/૨તર્જયન્ત ઇવાન્યોન્યં મઞ્જરીભિશ્ચકાશિરે ॥ ૩૬.૯૭॥

૩૬.૯૮/૧હિમશૃઙ્ગેષુ શુક્લેષુ તિલકાઃ કુસુમોત્કરાઃ ।
૩૬.૯૮/૨શુશુભુઃ કાર્યમુદ્દિશ્ય વૃદ્ધા ઇવ સમાગતાઃ ॥ ૩૬.૯૮॥

૩૬.૯૯/૧ફુલ્લાશોકલતાસ્તત્ર રેજિરે શાલસંશ્રિતાઃ ।
૩૬.૯૯/૨કામિન્ય ઇવ કાન્તાનાં કણ્ઠાલમ્બિતબાહવઃ ॥ ૩૬.૯૯॥

૩૬.૧૦૦/૧તસ્મિન્ ઋતૌ શુભ્રકદમ્બનીપાસ્- ।
૩૬.૧૦૦/૨તાલાઃ સ્તમાલાઃ સરલાઃ કપિત્થાઃ ॥ ૩૬.૧૦૦॥

૩૬.૧૦૧/૧અશોકસર્જાર્જુનકોવિદારાઃ ।
૩૬.૧૦૧/૨પુંનાગનાગેશ્વરકર્ણિકારાઃ ।
૩૬.૧૦૧/૩લવઙ્ગતાલાગુરુસપ્તપર્ણા ।
૩૬.૧૦૧/૪ન્યગ્રોધશોભાઞ્જનનારિકેલાઃ ॥ ૩૬.૧૦૧॥

૩૬.૧૦૨/૧વૃક્ષાસ્તથાન્યે ફલપુષ્પવન્તો ।
૩૬.૧૦૨/૨દૃશ્યા બભૂવુઃ સુમનોહરાઙ્ગાઃ ।
૩૬.૧૦૨/૩જલાશયાશ્ચૈવ સુવર્ણતોયાશ્ ।
૩૬.૧૦૨/૪ચક્રાઙ્ગકારણ્ડવહંસજુષ્ટાઃ ॥ ૩૬.૧૦૨॥

૩૬.૧૦૩/૧કોયષ્ટિદાત્યૂહબલાકયુક્તા ।
૩૬.૧૦૩/૨દૃશ્યાસ્તુ પદ્મોત્પલમીનપૂર્ણાઃ ।
૩૬.૧૦૩/૩ખગાશ્ચ નાનાવિધભૂષિતાઙ્ગા ।
૩૬.૧૦૩/૪દૃશ્યાસ્તુ વૃક્ષેષુ સુચિત્રપક્ષાઃ ॥ ૩૬.૧૦૩॥

૩૬.૧૦૪/૧ક્રીડાસુ યુક્તાન્ અથ તર્જયન્તઃ ।

૩૬.૧૦૪/૨કુર્વન્તિ શબ્દં મદનેરિતાઙ્ગાઃ ।
૩૬.૧૦૪/૩તસ્મિન્ ગિરાવદ્રિસુતાવિવાહે ।
૩૬.૧૦૪/૪વવુશ્ચ વાતાઃ સુખશીતલાઙ્ગાઃ ॥ ૩૬.૧૦૪॥

૩૬.૧૦૫/૧પુષ્પાણિ શુભ્રાણ્યપિ પાતયન્તઃ ।
૩૬.૧૦૫/૨શનૈર્નગેભ્યો મલયાદ્રિજાતાઃ ।
૩૬.૧૦૫/૩તથૈવ સર્વે ઋતવશ્ચ પુણ્યાશ્ ।
૩૬.૧૦૫/૪ચકાશિરેઽન્યોન્યવિમિશ્રિતાઙ્ગાઃ ॥ ૩૬.૧૦૫॥

૩૬.૧૦૬/૧યેષાં સુલિઙ્ગાનિ ચ કીર્તિતાનિ ।
૩૬.૧૦૬/૨તે તત્ર આસન્ સુમનોજ્ઞરૂપાઃ ॥ ૩૬.૧૦૬॥

૩૬.૧૦૭/૧સમદાલિકુલોદ્ગીત+ ।શિલાકુસુમસંચયૈઃ ।
૩૬.૧૦૭/૨પરસ્પરં હિ માલત્યો ભાવયન્ત્યો વિરેજિરે ॥ ૩૬.૧૦૭॥

૩૬.૧૦૮/૧નીલાનિ નીલામ્બુરુહૈઃ પયાંસિ ।
૩૬.૧૦૮/૨ગૌરાણિ ગૌરૈશ્ચ મૃણાલદણ્ડૈઃ ।
૩૬.૧૦૮/૩રક્તૈશ્ચ રક્તાનિ ભૃશં કૃતાનિ ।
૩૬.૧૦૮/૪મત્તદ્વિરેફાવલિજુષ્ટપત્રૈઃ ॥ ૩૬.૧૦૮॥

૩૬.૧૦૯/૧હૈમાનિ વિસ્તીર્ણજલેષુ કેષુચિન્ ।
૩૬.૧૦૯/૨નિરન્તરં ચારુતરાણિ કેષુચિત્ ।
૩૬.૧૦૯/૩વૈદૂર્યનાલાનિ સરઃસુ કેષુચિત્ ।
૩૬.૧૦૯/૪પ્રજજ્ઞિરે પદ્મવનાનિ સર્વતઃ ॥ ૩૬.૧૦૯॥

૩૬.૧૧૦/૧વાપ્યસ્તત્રાભવન્ રમ્યાઃ કમલોત્પલપુષ્પિતાઃ ।
૩૬.૧૧૦/૨નાનાવિહંગસંજુષ્ટા હૈમસોપાનપઙ્ક્તયઃ ॥ ૩૬.૧૧૦॥

૩૬.૧૧૧/૧શ◌ૃઙ્ગાણિ તસ્ય તુ ગિરેઃ કર્ણિકારૈઃ સુપુષ્પિતૈઃ ।
૩૬.૧૧૧/૨સમુચ્છ્રિતાન્યવિરલૈર્હેમાનીવ બભુર્દ્વિજાઃ ॥ ૩૬.૧૧૧॥

૩૬.૧૧૨/૧ઈષદ્વિભિન્નકુસુમૈઃ પાટલૈશ્ચાપિ પાટલાઃ ।
૩૬.૧૧૨/૨સમ્બભૂવુર્દિશઃ સર્વાઃ પવનાકમ્પિમૂર્તિભિઃ ॥ ૩૬.૧૧૨॥

૩૬.૧૧૩/૧કૃષ્ણાર્જુના દશગુણા નીલાશોકમહીરુહાઃ ।
૩૬.૧૧૩/૨ગિરૌ વવૃધિરે ફુલ્લાઃ સ્પર્ધયન્તઃ પરસ્પરમ્ ॥ ૩૬.૧૧૩॥

૩૬.૧૧૪/૧ચારુરાવવિજુષ્ટાનિ કિંશુકાનાં વનાનિ ચ ।
૩૬.૧૧૪/૨પર્વતસ્ય નિતમ્બેષુ સર્વેષુ ચ વિરેજિરે ॥ ૩૬.૧૧૪॥

૩૬.૧૧૫/૧તમાલગુલ્મૈસ્તસ્યાસીચ્છોભા હિમવતસ્તદા ।
૩૬.૧૧૫/૨નીલજીમૂતસંઘાતૈર્નિલીનૈરિવ સંધિષુ ॥ ૩૬.૧૧૫॥

૩૬.૧૧૬/૧નિકામપુષ્પૈઃ સુવિશાલશાખૈઃ ।
૩૬.૧૧૬/૨સમુચ્છ્રિતૈશ્ચન્દનચમ્પકૈશ્ચ ।
૩૬.૧૧૬/૩પ્રમત્તપુંસ્કોકિલસમ્પ્રલાપૈર્ ।
૩૬.૧૧૬/૪હિમાચલોઽતીવ તદા રરાજ ॥ ૩૬.૧૧૬॥

૩૬.૧૧૭/૧શ્રુત્વા શબ્દં મૃદુમદકલં સર્વતઃ કોકિલાનામ્ ।
૩૬.૧૧૭/૨ચઞ્ચત્પક્ષાઃ સમધુરતરં નીલકણ્ઠા વિનેદુઃ ।
૩૬.૧૧૭/૩તેષાં શબ્દૈરુપચિતબલઃ પુષ્પચાપેષુહસ્તઃ ।
૩૬.૧૧૭/૪સજ્જીભૂતસ્ત્રિદશવનિતા વેદ્ધુમઙ્ગેષ્વનઙ્ગઃ ॥ ૩૬.૧૧૭॥

૩૬.૧૧૮/૧પટુઃ સૂર્યાતપશ્ચાપિ પ્રાયશોઽલ્પજલાશયઃ ।
૩૬.૧૧૮/૨દેવીવિવાહસમયે ગ્રીષ્મ આગાદ્ ધિમાચલમ્ ॥ ૩૬.૧૧૮॥

૩૬.૧૧૯/૧સ ચાપિ તરુભિસ્તત્ર બહુભિઃ કુસુમોત્કરૈઃ ।
૩૬.૧૧૯/૨શોભયામાસ શ‍ૃઙ્ગાણિ પ્રાલેયાદ્રેઃ સમન્તતઃ ॥ ૩૬.૧૧૯॥

૩૬.૧૨૦/૧તથાપિ ચ ગિરૌ તત્ર વાયવઃ સુમનોહરાઃ ।
૩૬.૧૨૦/૨વવુઃ પાટલવિસ્તીર્ણ+ ।કદમ્બાર્જુનગન્ધિનઃ ॥ ૩૬.૧૨૦॥

૩૬.૧૨૧/૧વાપ્યઃ પ્રફુલ્લપદ્મૌઘ+ ।કેસરારુણમૂર્તયઃ ।
૩૬.૧૨૧/૨અભવંસ્તટસંઘુષ્ટ+ ।ફલહંસકદમ્બકાઃ ॥ ૩૬.૧૨૧॥

૩૬.૧૨૨/૧તથા કુરબકાશ્ચાપિ કુસુમાપાણ્ડુમૂર્તયઃ ।
૩૬.૧૨૨/૨સર્વેષુ નગશ‍ૃઙ્ગેષુ ભ્રમરાવલિસેવિતાઃ ॥ ૩૬.૧૨૨॥

૩૬.૧૨૩/૧બકુલાશ્ચ નિતમ્બેષુ વિશાલેષુ મહીભૃતઃ ।
૩૬.૧૨૩/૨ઉત્સસર્જ મનોજ્ઞાનિ કુસુમાનિ સમન્તતઃ ॥ ૩૬.૧૨૩॥

૩૬.૧૨૪/૧ઇતિ કુસુમવિચિત્રસર્વવૃક્ષા ।
૩૬.૧૨૪/૨વિવિધવિહંગમનાદરમ્યદેશાઃ ।
૩૬.૧૨૪/૩હિમગિરિતનયાવિવાહભૂત્યૈ ।
૩૬.૧૨૪/૪ષડ્ ઉપયયુરૃતવો મુનિપ્રવીરાઃ ॥ ૩૬.૧૨૪॥

૩૬.૧૨૫/૧તત એવં પ્રવૃત્તે તુ સર્વભૂતસમાગમે ।
૩૬.૧૨૫/૨નાનાવાદ્યસમાકીર્ણે અહં તત્ર દ્વિજાતયઃ ॥ ૩૬.૧૨૫॥

૩૬.૧૨૬/૧શૈલપુત્રીમલંકૃત્ય યોગ્યાભરણસમ્પદા ।
૩૬.૧૨૬/૨પુરં પ્રવેશિતવાંસ્તાં સ્વયમાદાય ભો દ્વિજાઃ ॥ ૩૬.૧૨૬॥

૩૬.૧૨૭/૧તતસ્તુ પુનરેવેશમહં ચૈવોક્તવાન્ વિભુમ્ ।
૩૬.૧૨૭/૨હવિર્જુહોમિ વહ્નૌ તે ઉપાધ્યાયપદે સ્થિતઃ ॥ ૩૬.૧૨૭॥

૩૬.૧૨૮/૧દદાસિ મહ્યં યદ્યાજ્ઞાં કર્તવ્યોઽયં ક્રિયાવિધિઃ ।
૩૬.૧૨૮/૨મામાહ શંકરશ્ચૈવં દેવદેવો જગત્પતિઃ ॥ ૩૬.૧૨૮॥

૩૬.૧૨૯/૧શિવ ઉવાચ । યદ્ ઉદ્દિષ્ટં સુરેશાન તત્ કુરુષ્વ યથેપ્સિતમ્ ।
૩૬.૧૨૯/૨કર્તાસ્મિ વચનં સર્વં બ્રહ્મંસ્તવ જગદ્વિભો ॥ ૩૬.૧૨૯॥

૩૬.૧૩૦/૧બ્રહ્મોવાચ । તતશ્ચાહં પ્રહૃષ્ટાત્મા કુશાન્ આદાય સત્વરમ્ ।
૩૬.૧૩૦/૨હસ્તં દેવસ્ય દેવ્યાશ્ચ યોગબન્ધેન યુક્તવાન્ ॥ ૩૬.૧૩૦॥

૩૬.૧૩૧/૧જ્વલનશ્ચ સ્વયં તત્ર કૃતાઞ્જલિપુટઃ સ્થિતઃ ।
૩૬.૧૩૧/૨શ્રુતિગીતૈર્મહામન્ત્રૈર્મૂર્તિમદ્ભિરુપસ્થિતૈઃ ॥ ૩૬.૧૩૧॥

૩૬.૧૩૨/૧યથોક્તવિધિના હુત્વા સર્પિસ્તદ્ અમૃતં હવિઃ ।
૩૬.૧૩૨/૨તતસ્તં જ્વલનં સર્વં કારયિત્વા પ્રદક્ષિણમ્ ॥ ૩૬.૧૩૨॥

૩૬.૧૩૩/૧મુક્ત્વા હસ્તસમાયોગં સહિતઃ સર્વદૈવતૈઃ ।
૩૬.૧૩૩/૨પુત્રૈશ્ચ માનસૈઃ સિદ્ધૈઃ પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૩૬.૧૩૩॥

૩૬.૧૩૪/૧વૃત્ત ઉદ્વાહકાલે તુ પ્રણમ્ય ચ વૃષધ્વજમ્ ।
૩૬.૧૩૪/૨યોગેનૈવ તયોર્વિપ્રાસ્તદ્ ઉમાપરમેશયોઃ ॥ ૩૬.૧૩૪॥

૩૬.૧૩૫/૧ઉદ્વાહઃ સ પરો વૃત્તો યં દેવા ન વિદુઃ ક્વચિત્ ।
૩૬.૧૩૫/૨ઇતિ વઃ સર્વમાખ્યાતં સ્વયંવરમિદં શુભમ્ ।
૩૬.૧૩૫/૩ઉદ્વાહશ્ચૈવ દેવસ્ય શ‌ૃણુધ્વં પરમાદ્ભુતમ્ ॥ ૩૬.૧૩૫॥

૩૭.૧/૧બ્રહ્મોવાચ । અથ વૃત્તે વિવાહે તુ ભવસ્યામિતતેજસઃ ।
૩૭.૧/૨પ્રહર્ષમતુલં ગત્વા દેવાઃ શક્રપુરોગમાઃ ।
૩૭.૧/૩તુષ્ટુવુર્વાગ્ભિરાદ્યાભિઃ પ્રણેમુસ્તે મહેશ્વરમ્ ॥ ૩૭.૧॥

૩૭.૨/૧દેવા ઊચુઃ । નમઃ પર્વતલિઙ્ગાય પર્વતેશાય વૈ નમઃ ।
૩૭.૨/૨નમઃ પવનવેગાય વિરૂપાયાજિતાય ચ ।
૩૭.૨/૩નમઃ ક્લેશવિનાશાય દાત્રે ચ શુભસમ્પદામ્ ॥ ૩૭.૨॥

૩૭.૩/૧નમો નીલશિખણ્ડાય અમ્બિકાપતયે નમઃ ।

૩૭.૩/૨નમઃ પવનરૂપાય શતરૂપાય વૈ નમઃ ॥ ૩૭.૩॥

૩૭.૪/૧નમો ભૈરવરૂપાય વિરૂપનયનાય ચ ।

૩૭.૪/૨નમઃ સહસ્રનેત્રાય સહસ્રચરણાય ચ ॥ ૩૭.૪॥

૩૭.૫/૧નમો દેવવયસ્યાય વેદાઙ્ગાય નમો નમઃ ।

૩૭.૫/૨વિષ્ટમ્ભનાય શક્રસ્ય બાહ્વોર્વેદાઙ્કુરાય ચ ॥ ૩૭.૫॥

૩૭.૬/૧ચરાચરાધિપતયે શમનાય નમો નમઃ ।

૩૭.૬/૨સલિલાશયલિઙ્ગાય યુગાન્તાય નમો નમઃ ॥ ૩૭.૬॥

૩૭.૭/૧નમઃ કપાલમાલાય કપાલસૂત્રધારિણે ।

૩૭.૭/૨નમઃ કપાલહસ્તાય દણ્ડિને ગદિને નમઃ ॥ ૩૭.૭॥

૩૭.૮/૧નમસ્ત્રૈલોક્યનાથાય પશુલોકરતાય ચ ।

૩૭.૮/૨નમઃ ખટ્વાઙ્ગહસ્તાય પ્રમથાર્તિહરાય ચ ॥ ૩૭.૮॥

૩૭.૯/૧નમો યજ્ઞશિરોહન્ત્રે કૃષ્ણકેશાપહારિણે ।

૩૭.૯/૨ભગનેત્રનિપાતાય પૂષ્ણો દન્તહરાય ચ ॥ ૩૭.૯॥

૩૭.૧૦/૧નમઃ પિનાકશૂલાસિ+ ।ખડ્ગમુદ્ગરધારિણે ।

૩૭.૧૦/૨નમોઽસ્તુ કાલકાલાય તૃતીયનયનાય ચ ॥ ૩૭.૧૦॥

૩૭.૧૧/૧અન્તકાન્તકૃતે ચૈવ નમઃ પર્વતવાસિને ।

૩૭.૧૧/૨સુવર્ણરેતસે ચૈવ નમઃ કુણ્ડલધારિણે ॥ ૩૭.૧૧॥

૩૭.૧૨/૧દૈત્યાનાં યોગનાશાય યોગિનાં ગુરવે નમઃ ।

૩૭.૧૨/૨શશાઙ્કાદિત્યનેત્રાય લલાટનયનાય ચ ॥ ૩૭.૧૨॥

૩૭.૧૩/૧નમઃ શ્મશાનરતયે શ્મશાનવરદાય ચ ।

૩૭.૧૩/૨નમો દૈવતનાથાય ત્ર્યમ્બકાય નમો નમઃ ॥ ૩૭.૧૩॥

૩૭.૧૪/૧ગૃહસ્થસાધવે નિત્યં જટિલે બ્રહ્મચારિણે ।

૩૭.૧૪/૨નમો મુણ્ડાર્ધમુણ્ડાય પશૂનાં પતયે નમઃ ॥ ૩૭.૧૪॥

૩૭.૧૫/૧સલિલે તપ્યમાનાય યોગૈશ્વર્યપ્રદાય ચ ।

૩૭.૧૫/૨નમઃ શાન્તાય દાન્તાય પ્રલયોત્પત્તિકારિણે ॥ ૩૭.૧૫॥

૩૭.૧૬/૧નમોઽનુગ્રહકર્ત્રે ચ સ્થિતિકર્ત્રે નમો નમઃ ।

૩૭.૧૬/૨નમો રુદ્રાય વસવ આદિત્યાયાશ્વિને નમઃ ॥ ૩૭.૧૬॥

૩૭.૧૭/૧નમઃ પિત્રેઽથ સાંખ્યાય વિશ્વેદેવાય વૈ નમઃ ।
૩૭.૧૭/૨નમઃ શર્વાય ઉગ્રાય શિવાય વરદાય ચ ॥ ૩૭.૧૭॥

૩૭.૧૮/૧નમો ભીમાય સેનાન્યે પશૂનાં પતયે નમઃ ।
૩૭.૧૮/૨શુચયે વૈરિહાનાય સદ્યોજાતાય વૈ નમઃ ॥ ૩૭.૧૮॥

૩૭.૧૯/૧મહાદેવાય ચિત્રાય વિચિત્રાય ચ વૈ નમઃ ।
૩૭.૧૯/૨પ્રધાનાયાપ્રમેયાય કાર્યાય કારણાય ચ ॥ ૩૭.૧૯॥

૩૭.૨૦/૧પુરુષાય નમસ્તેઽસ્તુ પુરુષેચ્છાકરાય ચ ।
૩૭.૨૦/૨નમઃ પુરુષસંયોગ+ ।પ્રધાનગુણકારિણે ॥ ૩૭.૨૦॥

૩૭.૨૧/૧પ્રવર્તકાય પ્રકૃતેઃ પુરુષસ્ય ચ સર્વશઃ ।
૩૭.૨૧/૨કૃતાકૃતસ્ય સત્કર્ત્રે ફલસંયોગદાય ચ ॥ ૩૭.૨૧॥

૩૭.૨૨/૧કાલજ્ઞાય ચ સર્વેષાં નમો નિયમકારિણે ।
૩૭.૨૨/૨નમો વૈષમ્યકર્ત્રે ચ ગુણાનાં વૃત્તિદાય ચ ॥ ૩૭.૨૨॥

૩૭.૨૩/૧નમસ્તે દેવદેવેશ નમસ્તે ભૂતભાવન ।
૩૭.૨૩/૨શિવ સૌમ્યમુખો દ્રષ્ટું ભવ સૌમ્યો હિ નઃ પ્રભો ॥ ૩૭.૨૩॥

૩૭.૨૪/૧બ્રહ્મોવાચ । એવં સ ભગવાન્ દેવો જગત્પતિરુમાપતિઃ ।
૩૭.૨૪/૨સ્તૂયમાનઃ સુરૈઃ સર્વૈરમરાન્ ઇદમબ્રવીત્ ॥ ૩૭.૨૪॥

૩૭.૨૫/૧શ્રીશંકર ઉવાચ । દ્રષ્ટું સુખશ્ચ સૌમ્યશ્ચ
દેવાનામસ્મિ ભોઃ સુરાઃ ।
૩૭.૨૫/૨વરં વરયત ક્ષિપ્રં દાતાસ્મિ તમસંશયમ્ ॥ ૩૭.૨૫॥

૩૭.૨૬/૧બ્રહ્મોવાચ । તતસ્તે પ્રણતાઃ સર્વે સુરા ઊચુસ્ત્રિલોચનમ્ ॥ ૩૭.૨૬॥

૩૭.૨૭/૧દેવા ઊચુઃ । તવૈવ ભગવન્ હસ્તે વર એષોઽવતિષ્ઠતામ્ ।
૩૭.૨૭/૨યદા કાર્યં તદા નસ્ત્વં દાસ્યસે વરમીપ્સિતમ્ ॥ ૩૭.૨૭॥

૩૭.૨૮/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ તાન્ ઉક્ત્વા વિસૃજ્ય ચ સુરાન્ હરઃ ।
૩૭.૨૮/૨લોકાંશ્ચ પ્રમથૈઃ સાર્ધં વિવેશ ભવનં સ્વકમ્ ॥ ૩૭.૨૮॥

૩૭.૨૯/૧યસ્તુ હરોત્સવમદ્ભુતમેનમ્ ।
૩૭.૨૯/૨ગાયતિ દૈવતવિપ્રસમક્ષમ્ ।
૩૭.૨૯/૩સોઽપ્રતિરૂપગણેશસમાનો ।

૩૭.૨૯/૪દેહવિપર્યયમેત્ય સુખી સ્યાત્ ॥ ૩૭.૨૯॥

૩૭.૩૦/૧બ્રહ્મોવાચ । વિપ્રવર્યાઃ સ્તવં હીમં શ ृણુયાદ્ વા પઠેચ્ચ યઃ ।
૩૭.૩૦/૨સ સર્વલોકગો દેવૈઃ પૂજ્યતેઽમરરાડ્ ઇવ ॥ ૩૭.૩૦॥

૩૮.૧/૧બ્રહ્મોવાચ । પ્રવિષ્ટે ભવનં દેવે સૂપવિષ્ટે વરાસને ।
૩૮.૧/૨સ વક્રો મન્મથઃ ક્રૂરો દેવં વેદ્ધુમના ભવત્ ॥ ૩૮.૧॥

૩૮.૨/૧તમનાચારસંયુક્તં દુરાત્માનં કુલાધમમ્ ।
૩૮.૨/૨લોકાન્ સર્વાન્ પીડયન્તં સર્વાઙ્ગાવરણાત્મકમ્ ॥ ૩૮.૨॥

૩૮.૩/૧ઋષીણાં વિઘ્નકર્તારં નિયમાનાં વ્રતૈઃ સહ ।
૩૮.૩/૨ચક્રાક્ષયસ્ય રૂપેણ રત્યા સહ સમાગતમ્ ॥ ૩૮.૩॥

૩૮.૪/૧અથાતતાયિનં વિપ્રા વેદ્ધુકામં સુરેશ્વરઃ ।
૩૮.૪/૨નયનેન તૃતીયેન સાવજ્ઞં સમવૈક્ષત ॥ ૩૮.૪॥

૩૮.૫/૧તતોઽસ્ય નેત્રજો વહ્નિર્જ્વાલામાલાસહસ્રવાન્ ।
૩૮.૫/૨સહસા રતિભર્તારમદહત્ સપરિચ્છદમ્ ॥ ૩૮.૫॥

૩૮.૬/૧સ દહ્યમાનઃ કરુણમાર્તોઽક્રોશત વિસ્વરમ્ ।
૩૮.૬/૨પ્રસાદયંશ્ચ તં દેવં પપાત ધરણીતલે ॥ ૩૮.૬॥

૩૮.૭/૧અથ સોઽગ્નિપરીતાઙ્ગો મન્મથો લોકતાપનઃ ।
૩૮.૭/૨પપાત સહસા મૂર્છાં ક્ષણેન સમપદ્યત ॥ ૩૮.૭॥

૩૮.૮/૧પત્ની તુ કરુણં તસ્ય વિલલાપ સુદુઃખિતા ।
૩૮.૮/૨દેવીં દેવં ચ દુઃખાર્તા અયાચત્ કરુણાવતી ॥ ૩૮.૮॥

૩૮.૯/૧તસ્યાશ્ચ કરુણાં જ્ઞાત્વા દેવૌ તૌ કરુણાત્મકૌ ।
૩૮.૯/૨ઊચતુસ્તાં સમાલોક્ય સમાશ્વાસ્ય ચ દુઃખિતામ્ ॥ ૩૮.૯॥

૩૮.૧૦/૧ઉમામહેશ્વરાવૂચતુઃ । દગ્ધ એવ ધ્રુવં ભદ્રે નાસ્યોત્પત્તિરિહેષ્યતે ।
૩૮.૧૦/૨અશરીરોઽપિ તે ભદ્રે કાર્યં સર્વં કરિષ્યતિ ॥ ૩૮.૧૦॥

૩૮.૧૧/૧યદા તુ વિષ્ણુર્ભગવાન્ વસુદેવસુતઃ શુભે ।
૩૮.૧૧/૨તદા તસ્ય સુતો યશ્ચ પતિસ્તે સમ્ભવિષ્યતિ ॥ ૩૮.૧૧॥

૩૮.૧૨/૧બ્રહ્મોવાચ । તતઃ સા તુ વરં લબ્ધ્વા કામપત્ની શુભાનના ।
૩૮.૧૨/૨જગામેષ્ટં તદા દેશં પ્રીતિયુક્તા ગતક્લમા ॥ ૩૮.૧૨॥

૩૮.૧૩/૧દગ્ધ્વા કામં તતો વિપ્રાઃ સ તુ દેવો વૃષધ્વજઃ ।
૩૮.૧૩/૨રેમે તત્રોમયા સાર્ધં પ્રહૃષ્ટસ્તુ હિમાચલે ॥ ૩૮.૧૩॥

૩૮.૧૪/૧કન્દરેષુ ચ રમ્યેષુ પદ્મિનીષુ ગુહાસુ ચ ।
૩૮.૧૪/૨નિર્ઝરેષુ ચ રમ્યેષુ કર્ણિકારવનેષુ ચ ॥ ૩૮.૧૪॥

૩૮.૧૫/૧નદીતીરેષુ કાન્તેષુ કિંનરાચરિતેષુ ચ ।
૩૮.૧૫/૨શ◌ૃઙ્ગેષુ શૈલરાજસ્ય તડાગેષુ સરઃસુ ચ ॥ ૩૮.૧૫॥

૩૮.૧૬/૧વનરાજિષુ રમ્યાસુ નાનાપક્ષિરુતેષુ ચ ।
૩૮.૧૬/૨તીર્થેષુ પુણ્યતોયેષુ મુનીનામાશ્રમેષુ ચ ॥ ૩૮.૧૬॥

૩૮.૧૭/૧એતેષુ પુણ્યેષુ મનોહરેષુ ।
૩૮.૧૭/૨દેશેષુ વિદ્યાધરભૂષિતેષુ ।
૩૮.૧૭/૩ગન્ધર્વયક્ષામરસેવિતેષુ ।
૩૮.૧૭/૪રેમે સ દેવ્યા સહિતસ્ત્રિનેત્રઃ ॥ ૩૮.૧૭॥

૩૮.૧૮/૧દેવૈઃ સહેન્દ્રૈર્મુનિયક્ષસિદ્ધૈર્।
૩૮.૧૮/૨ગન્ધર્વવિદ્યાધરદૈત્યમુખ્યૈઃ ।
૩૮.૧૮/૩અન્યૈશ્ચ સર્વૈર્વિવિધૈર્વૃતોઽસૌ ।
૩૮.૧૮/૪તસ્મિન્ નગે હર્ષમવાપ શમ્ભુઃ ॥ ૩૮.૧૮॥

૩૮.૧૯/૧નૃત્યન્તિ તત્રાપ્સરસઃ સુરેશા ।
૩૮.૧૯/૨ગાયન્તિ ગન્ધર્વગણાઃ પ્રહૃષ્ટાઃ ।
૩૮.૧૯/૩દિવ્યાનિ વાદ્યાન્યથ વાદયન્તિ ।
૩૮.૧૯/૪કેચિદ્ દ્રુતં દેવવરં સ્તુવન્તિ ॥ ૩૮.૧૯॥

૩૮.૨૦/૧એવં સ દેવઃ સ્વગણૈરુપેતો ।
૩૮.૨૦/૨મહાબલૈઃ શક્રયમાગ્નિતુલ્યૈઃ ।
૩૮.૨૦/૩દેવ્યાઃ પ્રિયાર્થં ભગનેત્રહન્તા ।
૩૮.૨૦/૪ગિરિં ન તત્યાજ તદા મહાત્મા ॥ ૩૮.૨૦॥

૩૮.૨૧/૧ઋષય ઊચુઃ । દેવ્યાઃ સમં તુ ભગવાંસ્તિષ્ઠંસ્તત્ર સ કામહા ।
૩૮.૨૧/૨અકરોત્ કિં મહાદેવ એતદ્ ઇચ્છામ વેદિતુમ્ ॥ ૩૮.૨૧॥

૩૮.૨૨/૧બ્રહ્મોવાચ । ભગવાન્ હિમવચ્છૃઙ્ગે સ હિ દેવ્યાઃ પ્રિયેચ્છયા ।
૩૮.૨૨/૨ગણેશૈર્વિવિધાકારૈર્હાસં સંજનયન્ મુહુઃ ॥ ૩૮.૨૨॥

૩૮.૨૩/૧દેવીં બાલેન્દુતિલકો રમયંશ્ચ રરામ ચ ।

૩૮.૨૩/૨મહાનુભાવૈઃ સર્વજ્ઞૈઃ કામરૂપધરૈઃ શુભૈઃ ॥ ૩૮.૨૩॥

૩૮.૨૪/૧અથ દેવ્યાસસાદૈકા માતરં પરમેશ્વરી ।
૩૮.૨૪/૨આસીનાં કાઞ્ચને શુભ્ર આસને પરમાદ્ભુતે ॥ ૩૮.૨૪॥

૩૮.૨૫/૧અથ દૃષ્ટ્વા સતીં દેવીમાગતાં સુરરૂપિણીમ્ ।
૩૮.૨૫/૨આસનેન મહાર્હેણડસમ્પાદયદ્ અનિન્દિતામ્ ।
૩૮.૨૫/૩આસીનાં તામથોવાચ મેના હિમવતઃ પ્રિયા ॥ ૩૮.૨૫॥

૩૮.૨૬/૧મેનોવાચ । ચિરસ્યાગમનં તેડદ્ય વદ પુત્રિ શુભેક્ષણે ।
૩૮.૨૬/૨દરિદ્રા ક્રીડનૈસ્ત્વં હિ ભર્ત્રા ક્રીડસિ સંગતા ॥ ૩૮.૨૬॥

૩૮.૨૭/૧યે દરિદ્રા ભવન્તિ સ્મ તથૈવ ચ નિરાશ્રયાઃ ।
૩૮.૨૭/૨ઉમે ત એવં ક્રીડન્તિ યથા તવ પતિઃ શુભે ॥ ૩૮.૨૭॥

૩૮.૨૮/૧બ્રહ્મોવાચ । સૈવમુક્તાથ માત્રા તુ નાતિહૃષ્ટમના ભવત્ ।
૩૮.૨૮/૨મહત્યા ક્ષમયા યુક્તા ન કિંચિત્ તામુવાચ હ ।
૩૮.૨૮/૩વિસૃષ્ટા ચ તદા માત્રા ગત્વા દેવમુવાચ હ ॥ ૩૮.૨૮॥

૩૮.૨૯/૧પાર્વત્યુવાચ । ભગવન્ દેવદેવેશ નેહ વત્સ્યામિ ભૂધરે ।
૩૮.૨૯/૨અન્યં કુરુ મમાવાસં ભુવનેષુ મહાદ્યુતે ॥ ૩૮.૨૯॥

૩૮.૩૦/૧દેવ ઉવાચ । સદા ત્વમુચ્યમાના વૈ મયા વાસાર્થમીશ્વરિ ।
૩૮.૩૦/૨અન્યં ન રોચિતવતી વાસં વૈ દેવિ કર્હિચિત્ ॥ ૩૮.૩૦॥

૩૮.૩૧/૧ઇદાનીં સ્વયમેવ ત્વં વાસમન્યત્ર શોભને ।
૩૮.૩૧/૨કસ્માન્ મૃગયસે દેવિ બ્રૂહિ તન્ મે શુચિસ્મિતે ॥ ૩૮.૩૧॥

૩૮.૩૨/૧દેવ્યુવાચ । ગૃહં ગતાસ્મિ દેવેશ પિતુરદ્ય મહાત્મનઃ ।
૩૮.૩૨/૨દૃષ્ટ્વા ચ તત્ર મે માતા વિજને લોકભાવને ॥ ૩૮.૩૨॥

૩૮.૩૩/૧આસનાદિભિરભ્યર્ચ્ય સા મામેવમભાષત ।
૩૮.૩૩/૨ઉમે તવ સદા ભર્તા દરિદ્રઃ ક્રીડનૈઃ શુભે ॥ ૩૮.૩૩॥

૩૮.૩૪/૧ક્રીડતે નહિ દેવાનાં ક્રીડા ભવતિ તાદૃશી ।
૩૮.૩૪/૨યત્ કિલ ત્વં મહાદેવ ગણૈશ્ચ વિવિધૈસ્તથા ।
૩૮.૩૪/૩રમસે તદ્ અનિષ્ટં હિ મમ માતુર્વૃષધ્વજ ॥ ૩૮.૩૪॥

૩૮.૩૫/૧બ્રહ્મોવાચ । તતો દેવઃ પ્રહસ્યાહ દેવીં હાસયિતું પ્રભુઃ ॥ ૩૮.૩૫॥

૩૮.૩૬/૧દેવ ઉવાચ । એવમેવ ન સંદેહઃ કસ્માન્ મન્યુરભૂત્ તવ ।

૩૮.૩૬/૨કૃત્તિવાસા હ્યવાસાશ્ચ શ્મશાનનિલયશ્ચ હ ॥ ૩૮.૩૬॥

૩૮.૩૭/૧અનિકેતો હ્યરણ્યેષુ પર્વતાનાં ગુહાસુ ચ ।
૩૮.૩૭/૨વિચરામિ ગણૈર્નગ્નૈર્વૃતોઽમ્ભોજવિલોચને ॥ ૩૮.૩૭॥

૩૮.૩૮/૧મા ક્રુધો દેવિ માત્રે ત્વં તથ્યં માતાવદત્ તવ ।
૩૮.૩૮/૨નહિ માતૃસમો બન્ધુર્જન્તૂનામસ્તિ ભૂતલે ॥ ૩૮.૩૮॥

૩૮.૩૯/૧દેવ્યુવાચ । ન મેઽસ્તિ બન્ધુભિઃ કિંચિત્ કૃત્યં સુરવરેશ્વર ।
૩૮.૩૯/૨તથા કુરુ મહાદેવ યથાહં સુખમાપ્નુયામ્ ॥ ૩૮.૩૯॥

૩૮.૪૦/૧બ્રહ્મોવાચ । શ્રુત્વા સ દેવ્યા વચનં સુરેશસ્- ।
૩૮.૪૦/૨તસ્યાઃ પ્રિયાર્થે સ્વગિરિં વિહાય ।
૩૮.૪૦/૩જગામ મેરું સુરસિદ્ધસેવિતમ્ ।
૩૮.૪૦/૪ભાર્યાસહાયઃ સ્વગણૈશ્ચ યુક્તઃ ॥ ૩૮.૪૦॥

૩૯.૧/૧ઋષય ઊચુઃ । પ્રાચેતસસ્ય દક્ષસ્ય કથં વૈવસ્વતેઽન્તરે ।
૩૯.૧/૨વિનાશમગમદ્ બ્રહ્મન્ હયમેધઃ પ્રજાપતેઃ ॥ ૩૯.૧॥

૩૯.૨/૧દેવ્યા મન્યુકૃતં બુદ્ધ્વા ક્રુદ્ધઃ સર્વાત્મકઃ પ્રભુઃ ।
૩૯.૨/૨કથં વિનાશિતો યજ્ઞો દક્ષસ્યામિતતેજસઃ ।
૩૯.૨/૩મહાદેવેન રોષાદ્ વૈ તન્ નઃ પ્રબ્રૂહિ વિસ્તરાત્ ॥ ૩૯.૨॥

૩૯.૩/૧બ્રહ્મોવાચ । વર્ણયિષ્યામિ વો વિપ્રા મહાદેવેન વૈ યથા ।
૩૯.૩/૨ક્રોધાદ્ વિધ્વંસિતો યજ્ઞો દેવ્યાઃ પ્રિયચિકીર્ષયા ॥ ૩૯.૩॥

૩૯.૪/૧પુરા મેરોર્દ્વિજશ્રેષ્ઠાઃ શ઼ૃઙ્ગં ત્રૈલોક્યપૂજિતમ્ ।
૩૯.૪/૨જ્યોતિઃસ્થલં નામ ચિત્રં સર્વરત્નવિભૂષિતમ્ ॥ ૩૯.૪॥

૩૯.૫/૧અપ્રમેયમનાધૃષ્યં સર્વલોકનમસ્કૃતમ્ ।
૩૯.૫/૨તત્ર દેવો ગિરિતટે સર્વધાતુવિચિત્રિતે ॥ ૩૯.૫॥

૩૯.૬/૧પર્યઙ્ક ઇવ વિસ્તીર્ણ ઉપવિષ્ટો બભૂવ હ ।
૩૯.૬/૨શૈલરાજસુતા ચાસ્ય નિત્યં પાર્શ્વસ્થિતાભવત્ ॥ ૩૯.૬॥

૩૯.૭/૧આદિત્યાશ્ચ મહાત્માનો વસવશ્ચ મહૌજસઃ ।
૩૯.૭/૨તથૈવ ચ મહાત્માનાવશ્વિનૌ ભિષજાં વરૌ ॥ ૩૯.૭॥

૩૯.૮/૧તથા વૈશ્રવણો રાજા ગુહ્યકૈઃ પરિવારિતઃ ।
૩૯.૮/૨યક્ષાણામીશ્વરઃ શ્રીમાન્ કૈલાસનિલયઃ પ્રભુઃ ॥ ૩૯.૮॥

૩૯.૯/૧ઉપાસતે મહાત્માનમુશના ચ મહામુનિઃ ।
૩૯.૯/૨સનત્કુમારપ્રમુખાસ્તથૈવ પરમર્ષયઃ ॥ ૩૯.૯ ॥

૩૯.૧૦/૧અઙ્ગિરઃપ્રમુખાશ્ચૈવ તથા દેવર્ષયોઽપિ ચ ।
૩૯.૧૦/૨વિશ્વાવસુશ્ચ ગન્ધર્વસ્તથા નારદપર્વતૌ ॥ ૩૯.૧૦ ॥

૩૯.૧૧/૧અપ્સરોગણસંઘાશ્ચ સમાજગ્મુરનેકશઃ ।
૩૯.૧૧/૨વવૌ સુખશિવો વાયુર્નાનાગન્ધવહઃ શુચિઃ ॥ ૩૯.૧૧ ॥

૩૯.૧૨/૧સર્વર્તુકુસુમોપેતઃ પુષ્પવન્તોઽભવન્ દ્રુમાઃ ।
૩૯.૧૨/૨તથા વિદ્યાધરાઃ સાધ્યાઃ સિદ્ધાશ્ચૈવ તપોધનાઃ ॥ ૩૯.૧૨ ॥

૩૯.૧૩/૧મહાદેવં પશુપતિં પર્યુપાસત તત્ર વૈ ।
૩૯.૧૩/૨ભૂતાનિ ચ તથાન્યાનિ નાનારૂપધરાણ્યથ ॥ ૩૯.૧૩ ॥

૩૯.૧૪/૧રાક્ષસાશ્ચ મહારૌદ્રાઃ પિશાચાશ્ચ મહાબલાઃ ।
૩૯.૧૪/૨બહુરૂપધરા ધૃષ્ટા નાનાપ્રહરણાયુધાઃ ॥ ૩૯.૧૪ ॥

૩૯.૧૫/૧દેવસ્યાનુચરાસ્તત્ર તસ્થુર્વૈશ્વાનરોપમાઃ ।
૩૯.૧૫/૨નન્દીશ્વરશ્ચ ભગવાન્ દેવસ્યાનુમતે સ્થિતઃ ॥ ૩૯.૧૫ ॥

૩૯.૧૬/૧પ્રગૃહ્ય જ્વલિતં શૂલં દીપ્યમાનં સ્વતેજસા ।
૩૯.૧૬/૨ગઙ્ગા ચ સરિતાં શ્રેષ્ઠા સર્વતીર્થજલોદ્ભવા ॥ ૩૯.૧૬ ॥

૩૯.૧૭/૧પર્યુપાસત તં દેવં રૂપિણી દ્વિજસત્તમાઃ ।
૩૯.૧૭/૨એવં સ ભગવાંસ્તત્ર પૂજ્યમાનઃ સુરર્ષિભિઃ ॥ ૩૯.૧૭ ॥

૩૯.૧૮/૧દેવૈશ્ચ સુમહાભાગૈર્મહાદેવો વ્યતિષ્ઠત ।
૩૯.૧૮/૨કસ્યચિત્ ત્વથ કાલસ્ય દક્ષો નામ પ્રજાપતિઃ ॥ ૩૯.૧૮ ॥

૩૯.૧૯/૧પૂર્વોક્તેન વિધાનેન યક્ષ્યમાણોઽભ્યપદ્યત ।
૩૯.૧૯/૨તતસ્તસ્ય મખે દેવાઃ સર્વે શક્રપુરોગમાઃ ॥ ૩૯.૧૯ ॥

૩૯.૨૦/૧સ્વર્ગસ્થાનાદ્ અથાગમ્ય દક્ષમાપેદિરે તથા ।
૩૯.૨૦/૨તે વિમાનૈર્મહાત્માનો જ્વલદ્ભિર્જ્વલનપ્રભાઃ ॥ ૩૯.૨૦ ॥

૩૯.૨૧/૧દેવસ્યાનુમતેઽગચ્છન્ ગઙ્ગાદ્વારમિતિ શ્રુતિઃ ।
૩૯.૨૧/૨ગન્ધર્વાપ્સરસાકીર્ણં નાનાદ્રુમલતાવૃતમ્ ॥ ૩૯.૨૧ ॥

૩૯.૨૨/૧ઋષિસિદ્ધૈઃ પરિવૃતં દક્ષં ધર્મભૃતાં વરમ્ ।
૩૯.૨૨/૨પૃથિવ્યામન્તરિક્ષે ચ યે ચ સ્વર્લોકવાસિનઃ ॥ ૩૯.૨૨ ॥

૩૯.૨૩/૧સર્વે પ્રાઞ્જલયો ભૂત્વા ઉપતસ્થુઃ પ્રજાપતિમ્ ।
૩૯.૨૩/૨આદિત્યા વસવો રુદ્રાઃ સાધ્યાઃ સર્વે મરુદ્ગણાઃ ॥ ૩૯.૨૩ ॥

૩૯.૨૪/૧વિષ્ણુના સહિતાઃ સર્વ આગતા યજ્ઞભાગિનઃ ।
૩૯.૨૪/૨ઊષ્મપા ધૂમપાશ્ચૈવ આજ્યપાઃ સોમપાસ્તથા ॥ ૩૯.૨૪ ॥

૩૯.૨૫/૧અશ્વિનૌ મરુતશ્ચૈવ નાનાદેવગણૈઃ સહ ।
૩૯.૨૫/૨એતે ચાન્યે ચ બહવો ભૂતગ્રામાસ્તથૈવ ચ ॥ ૩૯.૨૫ ॥

૩૯.૨૬/૧જરાયુજાણ્ડજાશ્ચૈવ તથૈવ સ્વેદજોદ્ભિદઃ ।
૩૯.૨૬/૨આગતાઃ સત્રિણઃ સર્વે દેવાઃ સ્ત્રીભિઃ સહર્ષિભિઃ ॥ ૩૯.૨૬ ॥

૩૯.૨૭/૧વિરાજન્તે વિમાનસ્થા દીપ્યમાના ઇવાગ્નયઃ ।
૩૯.૨૭/૨તાન્ દૃષ્ટ્વા મન્યુનાવિષ્ટો દધીચિર્વાક્યમબ્રવીત્ ॥ ૩૯.૨૭ ॥

૩૯.૨૮/૧દધીચિરુવાચ । અપૂજ્યપૂજને ચૈવ પૂજ્યાનાં ચાપ્યપૂજને ।
૩૯.૨૮/૨નરઃ પાપમવાપ્નોતિ મહદ્ વૈ નાત્ર સંશયઃ ॥ ૩૯.૨૮ ॥

૩૯.૨૯/૧બ્રહ્મોવાચ । એવમુક્ત્વા તુ વિપ્રર્ષિઃ પુનર્દક્ષમભાષત ॥ ૩૯.૨૯ ॥

૩૯.૩૦/૧દધીચિરુવાચ । પૂજ્યં ચ પશુભર્તારં કસ્માન્
નાર્ચયસે પ્રભુમ્ ॥ ૩૯.૩૦ ॥

૩૯.૩૧/૧દક્ષ ઉવાચ । સન્તિ મે બહવો રુદ્રાઃ શૂલહસ્તાઃ કપર્દિનઃ ।
૩૯.૩૧/૨એકાદશસ્થાનગતા નાન્યં વિદ્મો મહેશ્વરમ્ ॥ ૩૯.૩૧ ॥

૩૯.૩૨/૧દધીચિરુવાચ । સર્વેષામેકમન્ત્રોઽયં મમેશો ન
નિમન્ત્રિતઃ ।
૩૯.૩૨/૨યથાહં શંકરાદ્ ઊર્ધ્વં નાન્યં પશ્યામિ દૈવતમ્ ।
૩૯.૩૨/૩તથા દક્ષસ્ય વિપુલો યજ્ઞોઽયં ન ભવિષ્યતિ ॥ ૩૯.૩૨ ॥

૩૯.૩૩/૧દક્ષ ઉવાચ ।  દક્ષ ઉવાચ । વિષ્ણોશ્ચ ભાગા વિવિધાઃ પ્રદત્તાસ્- ।
૩૯.૩૩/૨તથા ચ રુદ્રેભ્ય ઉત પ્રદત્તાઃ ।
૩૯.૩૩/૩અન્યેઽપિ દેવા નિજભાગયુક્તા ।
૩૯.૩૩/૪દદામિ ભાગં ન તુ શંકરાય ॥ ૩૯.૩૩ ॥

૩૯.૩૪/૧બ્રહ્મોવાચ । ગતાસ્તુ દેવતા જ્ઞાત્વા શૈલરાજસુતા તદા ।
૩૯.૩૪/૨ઉવાચ વચનં શર્વં દેવં પશુપતિં પતિમ્ ॥ ૩૯.૩૪ ॥

૩૯.૩૫/૧ઉમોવાચ । ભગવન્ કુત્ર યાન્ત્યેતે દેવાઃ શક્રપુરોગમાઃ ।
૩૯.૩૫/૨બ્રૂહિ તત્ત્વેન તત્ત્વજ્ઞ સંશયો મે મહાન્ અયમ્ ॥ ૩૯.૩૫॥

૩૯.૩૬/૧મહેશ્વર ઉવાચ । દક્ષો નામ મહાભાગે પ્રજાનાં પતિરુત્તમઃ ।
૩૯.૩૬/૨હયમેધેન યજતે તત્ર યાન્તિ દિવૌકસઃ ॥ ૩૯.૩૬॥

૩૯.૩૭/૧દેવ્યુવાચ । યજ્ઞમેતં મહાભાગ કિમર્થં નાનુગચ્છસિ ।
૩૯.૩૭/૨કેન વા પ્રતિષેધેન ગમનં તે ન વિદ્યતે ॥ ૩૯.૩૭॥

૩૯.૩૮/૧મહેશ્વર ઉવાચ । સુરૈરેવ મહાભાગે સર્વમેતદ્ અનુષ્ઠિતમ્ ।
૩૯.૩૮/૨યજ્ઞેષુ મમ સર્વેષુ ન ભાગ ઉપકલ્પિતઃ ॥ ૩૯.૩૮॥

૩૯.૩૯/૧પૂર્વાગતેન ગન્તવ્યં માર્ગેણ વરવર્ણિનિ ।
૩૯.૩૯/૨ન મે સુરાઃ પ્રયચ્છન્તિ ભાગં યજ્ઞસ્ય ધર્મતઃ ॥ ૩૯.૩૯॥

૩૯.૪૦/૧ઉમોવાચ । ભગવન્ સર્વદેવેષુ પ્રભાવાભ્યધિકો ગુણૈઃ ।
૩૯.૪૦/૨અજેયશ્ચાપ્યધૃષ્યશ્ચ તેજસા યશસા શ્રિયા ॥ ૩૯.૪૦॥

૩૯.૪૧/૧અનેન તુ મહાભાગ પ્રતિષેધેન ભાગતઃ ।
૩૯.૪૧/૨અતીવ દુઃખમાપન્ના વેપથુશ્ચ મહાન્ અયમ્ ॥ ૩૯.૪૧॥

૩૯.૪૨/૧કિં નામ દાનં નિયમં તપો વા ।
૩૯.૪૨/૨કુર્યામહં યેન પતિર્મમાદ્ય ।
૩૯.૪૨/૩લભેત ભાગં ભગવાન્ અચિન્ત્યો ।
૩૯.૪૨/૪યજ્ઞસ્ય ચેન્દ્રાદ્યમરૈર્વિચિત્રમ્ ॥ ૩૯.૪૨॥

૩૯.૪૩/૧બ્રહ્મોવાચ । એવં બ્રુવાણાં ભગવાન્ વિચિન્ત્ય ।
૩૯.૪૩/૨પત્નીં પ્રહૃષ્ટઃ ક્ષુભિતામુવાચ ।
૩૯.૪૩/૩મહેશ્વર ઉવાચ । ન વેત્સિ માં દેવિ કૃશોદરાઙ્ગિ ।
૩૯.૪૩/૪કિં નામ યુક્તં વચનં તવેદમ્ ॥ ૩૯.૪૩॥

૩૯.૪૪/૧અહં વિજાનામિ વિશાલનેત્રે ।
૩૯.૪૪/૨ધ્યાનેન સર્વે ચ વિદન્તિ સન્તઃ ।
૩૯.૪૪/૩તવાદ્ય મોહેન સહેન્દ્રદેવા ।
૩૯.૪૪/૪લોકત્રયં સર્વમથો વિનષ્ટમ્ ॥ ૩૯.૪૪॥

૩૯.૪૫/૧મામધ્વરેશં નિતરાં સ્તુવન્તિ ।
૩૯.૪૫/૨રથંતરં સામ ગાયન્તિ મહ્યમ્ ।
૩૯.૪૫/૩માં બ્રાહ્મણા બ્રહ્મમન્ત્રૈર્યજન્તિ ।

૩૯.૪૫/૪મમાધ્વર્યવઃ કલ્પયન્તે ચ ભાગમ્ ॥ ૩૯.૪૫॥

૩૯.૪૬/૧દેવ્યુવાચ । વિકત્થસે પ્રાકૃતવત્ સર્વસ્ત્રીજનસંસદિ ।
૩૯.૪૬/૨સ્તૌષિ ગર્વાયસે ચાપિ સ્વમાત્માનં ન સંશયઃ ॥ ૩૯.૪૬॥

૩૯.૪૭/૧ભગવાન્ ઉવાચ । નાત્માનં સ્તૌમિ દેવેશિ યથા ત્વમનુગચ્છસિ ।
૩૯.૪૭/૨સંસ્રક્ષ્યામિ વરારોહે ભાગાર્થે વરવર્ણિનિ ॥ ૩૯.૪૭॥

૩૯.૪૮/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા ભગવાન્ પત્નીમુમાં પ્રાણૈરપિ પ્રિયામ્ ।
૩૯.૪૮/૨સોઽસૃજદ્ ભગવાન્ વક્ત્રાદ્ ભૂતં ક્રોધાગ્નિસમ્ભવમ્ ॥ ૩૯.૪૮॥

૩૯.૪૯/૧તમુવાચ મખં ગચ્છ દક્ષસ્ય ત્વં મહેશ્વરઃ ।
૩૯.૪૯/૨નાશયાશુ ક્રતું તસ્ય દક્ષસ્ય મદનુજ્ઞયા ॥ ૩૯.૪૯॥

૩૯.૫૦/૧બ્રહ્મોવાચ । તતો રુદ્રપ્રયુક્તેન સિંહવેષેણ લીલયા ।
૩૯.૫૦/૨દેવ્યા મન્યુકૃતં જ્ઞાત્વા હતો દક્ષસ્ય સ ક્રતુઃ ॥ ૩૯.૫૦॥

૩૯.૫૧/૧મન્યુના ચ મહાભીમા ભદ્રકાલી મહેશ્વરી ।
૩૯.૫૧/૨આત્મનઃ કર્મસાક્ષિત્વે તેન સાર્ધં સહાનુગા ॥ ૩૯.૫૧॥

૩૯.૫૨/૧સ એષ ભગવાન્ ક્રોધઃ પ્રેતાવાસકૃતાલયઃ ।
૩૯.૫૨/૨વીરભદ્રેતિ વિખ્યાતો દેવ્યા મન્યુપ્રમાર્જકઃ ॥ ૩૯.૫૨॥

૩૯.૫૩/૧સોઽસૃજદ્ રોમકૂપેભ્ય આત્મનૈવ ગણેશ્વરાન્ ।
૩૯.૫૩/૨રુદ્રાનુગાન્ ગણાન્ રૌદ્રાન્ રુદ્રવીર્યપરાક્રમાન્ ॥ ૩૯.૫૩॥

૩૯.૫૪/૧રુદ્રસ્યાનુચરાઃ સર્વે સર્વે રુદ્રપરાક્રમાઃ ।
૩૯.૫૪/૨તે નિપેતુસ્તતસ્તૂર્ણં શતશોઽથ સહસ્રશઃ ॥ ૩૯.૫૪॥

૩૯.૫૫/૧તતઃ કિલકિલાશબ્દ આકાશં પૂરયન્ન્ ઇવ ।
૩૯.૫૫/૨સમભૂત્ સુમહાન્ વિપ્રાઃ સર્વરુદ્રગણૈઃ કૃતઃ ॥ ૩૯.૫૫॥

૩૯.૫૬/૧તેન શબ્દેન મહતા ત્રસ્તાઃ સર્વે દિવૌકસઃ ।
૩૯.૫૬/૨પર્વતાશ્ચ વ્યશીર્યન્ત ચકમ્પે ચ વસુંધરા ॥ ૩૯.૫૬॥

૩૯.૫૭/૧મરુતશ્ચ વવુઃ ક્રૂરાશ્ચુક્ષુભે વરુણાલયઃ ।
૩૯.૫૭/૨અગ્નયો વૈ ન દીપ્યન્તે ન ચાદીપ્યત ભાસ્કરઃ ॥ ૩૯.૫૭॥

૩૯.૫૮/૧ગ્રહા નૈવ પ્રકાશન્તે નક્ષત્રાણિ ન તારકાઃ ।
૩૯.૫૮/૨ઋષયો ન પ્રભાસન્તે ન દેવા ન ચ દાનવાઃ ॥ ૩૯.૫૮॥

૩૯.૫૯/૧એવં હિ તિમિરીભૂતે નિર્દહન્તિ ગણેશ્વરાઃ ।
૩૯.૫૯/૨પ્રભઞ્જન્ત્યપરે યૂપાન્ ઘોરાન્ ઉત્પાટયન્તિ ચ ॥ ૩૯.૫૯॥

૩૯.૬૦/૧પ્રણદન્તિ તથા ચાન્યે વિકુર્વન્તિ તથા પરે ।
૩૯.૬૦/૨ત્વરિતં વૈ પ્રધાવન્તિ વાયુવેગા મનોજવાઃ ॥ ૩૯.૬૦॥

૩૯.૬૧/૧ચૂર્ણ્યન્તે યજ્ઞપાત્રાણિ યજ્ઞસ્યાયતનાનિ ચ ।
૩૯.૬૧/૨શીર્યમાણાન્યદૃશ્યન્ત તારા ઇવ નભસ્તલાત્ ॥ ૩૯.૬૧॥

૩૯.૬૨/૧દિવ્યાન્નપાનભક્ષ્યાણાં રાશયઃ પર્વતોપમાઃ ।
૩૯.૬૨/૨ક્ષીરનદ્યસ્તથા ચાન્યા ઘૃતપાયસકર્દમાઃ ॥ ૩૯.૬૨॥

૩૯.૬૩/૧મધુમણ્ડોદકા દિવ્યાઃ ખણ્ડશર્કરવાલુકાઃ ।
૩૯.૬૩/૨ષડ્રસાન્ નિવહન્ત્યન્યા ગુડકુલ્યા મનોરમાઃ ॥ ૩૯.૬૩॥

૩૯.૬૪/૧ઉચ્ચાવચાનિ માંસાનિ ભક્ષ્યાણિ વિવિધાનિ ચ ।
૩૯.૬૪/૨યાનિ કાનિ ચ દિવ્યાનિ લેહ્યચોષ્યાણિ યાનિ ચ ॥ ૩૯.૬૪॥

૩૯.૬૫/૧ભુઞ્જન્તિ વિવિધૈર્વક્ત્રૈર્વિલુમ્પન્તિ ક્ષિપન્તિ ચ ।
૩૯.૬૫/૨રુદ્રકોપા મહાકોપાઃ કાલાગ્નિસદૃશોપમાઃ ॥ ૩૯.૬૫॥

૩૯.૬૬/૧ભક્ષયન્તોઽથ શૈલાભા ભીષયન્તશ્ચ સર્વતઃ ।
૩૯.૬૬/૨ક્રીડન્તિ વિવિધાકારાશ્ચિક્ષિપુઃ સુરયોષિતઃ ॥ ૩૯.૬૬॥

૩૯.૬૭/૧એવં ગણાશ્ચ તૈર્યુક્તો વીરભદ્રઃ પ્રતાપવાન્ ।
૩૯.૬૭/૨રુદ્રકોપપ્રયુક્તશ્ચ સર્વદેવૈઃ સુરક્ષિતમ્ ॥ ૩૯.૬૭॥

૩૯.૬૮/૧તં યજ્ઞમદહચ્છીઘ્રં ભદ્રકાલ્યાઃ સમીપતઃ ।
૩૯.૬૮/૨ચક્રુરન્યે તથા નાદાન્ સર્વભૂતભયંકરાન્ ॥ ૩૯.૬૮॥

૩૯.૬૯/૧છિત્ત્વા શિરોઽન્યે યજ્ઞસ્ય વ્યનદન્ત ભયંકરમ્ ।
૩૯.૬૯/૨તતઃ શક્રાદયો દેવા દક્ષશ્ચૈવ પ્રજાપતિઃ ।
૩૯.૬૯/૩ઊચુઃ પ્રાઞ્જલયો ભૂત્વા કથ્યતાં કો ભવાન્ ઇતિ ॥ ૩૯.૬૯॥

૩૯.૭૦/૧વીરભદ્ર ઉવાચ । નાહં દેવો ન દૈત્યો વા ન ચ ભોક્તુમિહાગતઃ ।
૩૯.૭૦/૨નૈવ દ્રષ્ટું ચ દેવેન્દ્રા ન ચ કૌતૂહલાન્વિતાઃ ॥ ૩૯.૭૦॥

૩૯.૭૧/૧દક્ષયજ્ઞવિનાશાર્થં સમ્પ્રાપ્તોઽહં સુરોત્તમાઃ ।
૩૯.૭૧/૨વીરભદ્રેતિ વિખ્યાતો રુદ્રકોપાદ્ વિનિઃસૃતઃ ॥ ૩૯.૭૧॥

૩૯.૭૨/૧ભદ્રકાલી ચ વિખ્યાતા દેવ્યાઃ ક્રોધાદ્ વિનિર્ગતા ।

૩૯.૭૨/૨પ્રેષિતા દેવદેવેન યજ્ઞાન્તિકમુપાગતા ॥ ૩૯.૭૨॥

૩૯.૭૩/૧શરણં ગચ્છ રાજેન્દ્ર દેવદેવમુમાપતિમ્ ।
૩૯.૭૩/૨વરં ક્રોધોઽપિ દેવસ્ય ન વરઃ પરિચારકૈઃ ॥ ૩૯.૭૩॥

૩૯.૭૪/૧બ્રહ્મોવાચ । નિખાતોત્પાટિતૈર્યૂપૈરપવિદ્ધૈસ્તતસ્તતઃ ।
૩૯.૭૪/૨ઉત્પતદ્ભિઃ પતદ્ભિશ્ચ ગૃધ્રૈરામિષગૃધ્નુભિઃ ॥ ૩૯.૭૪॥

૩૯.૭૫/૧પક્ષવાતવિનિર્ધૂતૈઃ શિવારુતવિનાદિતૈઃ ।
૩૯.૭૫/૨સ તસ્ય યજ્ઞો નૃપતેર્બાધ્યમાનસ્તદા ગણૈઃ ॥ ૩૯.૭૫॥

૩૯.૭૬/૧આસ્થાય મૃગરૂપં વૈ ખમેવાભ્યપતત્ તદા ।
૩૯.૭૬/૨તં તુ યજ્ઞં તથારૂપં ગચ્છન્તમુપલભ્ય સઃ ॥ ૩૯.૭૬॥

૩૯.૭૭/૧ધનુરાદાય બાણં ચ તદર્થમગમત્ પ્રભુઃ ।
૩૯.૭૭/૨તતસ્તસ્ય ગણેશસ્ય ક્રોધાદ્ અમિતતેજસઃ ॥ ૩૯.૭૭॥

૩૯.૭૮/૧લલાટાત્ પ્રસૃતો ઘોરઃ સ્વેદબિન્દુર્બભૂવ હ ।
૩૯.૭૮/૨તસ્મિન્ પતિતમાત્રે ચ સ્વેદબિન્દૌ તદા ભુવિ ॥ ૩૯.૭૮॥

૩૯.૭૯/૧પ્રાદુર્ભૂતો મહાન્ અગ્નિર્જ્વલત્કાલાનલોપમઃ ।
૩૯.૭૯/૨તત્રોદપદ્યત તદા પુરુષો દ્વિજસત્તમાઃ ॥ ૩૯.૭૯॥

૩૯.૮૦/૧હ્રસ્વોઽતિમાત્રો રક્તાક્ષો હરિચ્છ્મશ્રુર્વિભીષણઃ ।
૩૯.૮૦/૨ઊર્ધ્વકેશોઽતિરોમાઙ્ગઃ શોણકર્ણસ્તથૈવ ચ ॥ ૩૯.૮૦॥

૩૯.૮૧/૧કરાલકૃષ્ણવર્ણશ્ચ રક્તવાસાસ્તથૈવ ચ ।
૩૯.૮૧/૨તં યજ્ઞં સ મહાસત્ત્વોઽદહત્ કક્ષમિવાનલઃ ॥ ૩૯.૮૧॥

૩૯.૮૨/૧દેવાશ્ચ પ્રદ્રુતાઃ સર્વે ગતા ભીતા દિશો દશ ।
૩૯.૮૨/૨તેન તસ્મિન્ વિચરતા વિક્રમેણ તદા તુ વૈ ॥ ૩૯.૮૨॥

૩૯.૮૩/૧પૃથિવી વ્યચલત્ સર્વા સપ્તદ્વીપા સમન્તતઃ ।
૩૯.૮૩/૨મહાભૂતે પ્રવૃત્તે તુ દેવલોકભયંકરે ॥ ૩૯.૮૩॥

૩૯.૮૪/૧તદા ચાહં મહાદેવમબ્રવં પ્રતિપૂજયન્ ।
૩૯.૮૪/૨ભવતેઽપિ સુરાઃ સર્વે ભાગં દાસ્યન્તિ વૈ પ્રભો ॥ ૩૯.૮૪॥

૩૯.૮૫/૧ક્રિયતાં પ્રતિસંહારઃ સર્વદેવેશ્વર ત્વયા ।
૩૯.૮૫/૨ઇમાશ્ચ દેવતાઃ સર્વા ઋષયશ્ચ સહસ્રશઃ ॥ ૩૯.૮૫॥

૩૯.૮૬/૧તવ ક્રોધાન્ મહાદેવ ન શાન્તિમુપલેભિરે ।
૩૯.૮૬/૨યશ્ચૈષ પુરુષો જાતઃ સ્વેદજસ્તે સુરર્ષભ ॥ ૩૯.૮૬॥

૩૯.૮૭/૧જ્વરો નામૈષ ધર્મજ્ઞ લોકેષુ પ્રચરિષ્યતિ ।
૩૯.૮૭/૨એકીભૂતસ્ય ન હ્યસ્ય ધારણે તેજસઃ પ્રભો ॥ ૩૯.૮૭॥

૩૯.૮૮/૧સમર્થા સકલા પૃથ્વી બહુધા સૃજ્યતામયમ્ ।
૩૯.૮૮/૨ઇત્યુક્તઃ સ મયા દેવો ભાગે ચાપિ પ્રકલ્પિતે ॥ ૩૯.૮૮॥

૩૯.૮૯/૧ભગવાન્ માં તથેત્યાહ દેવદેવઃ પિનાકધૃક્ ।
૩૯.૮૯/૨પરાં ચ પ્રીતિમગમત્ સ સ્વયં ચ પિનાકધૃક્ ॥ ૩૯.૮૯॥

૩૯.૯૦/૧દક્ષોઽપિ મનસા દેવં ભવં શરણમન્વગાત્ ।
૩૯.૯૦/૨પ્રાણાપાનૌ સમારુધ્ય ચક્ષુઃસ્થાને પ્રયત્નતઃ ॥ ૩૯.૯૦॥

૩૯.૯૧/૧વિધાર્ય સર્વતો દૃષ્ટિં બહુદૃષ્ટિરમિત્રજિત્ ।
૩૯.૯૧/૨સ્મિતં કૃત્વાબ્રવીદ્ વાક્યં બ્રૂહિ કિં કરવાણિ તે ॥ ૩૯.૯૧॥

૩૯.૯૨/૧શ્રાવિતે ચ મહાખ્યાને દેવાનાં પિતૃભિઃ સહ ।
૩૯.૯૨/૨તમુવાચાઞ્જલિં કૃત્વા દક્ષો દેવં પ્રજાપતિઃ ।
૩૯.૯૨/૩ભીતઃ શઙ્કિતચિત્તસ્તુ સબાષ્પવદનેક્ષણઃ ॥ ૩૯.૯૨॥

૩૯.૯૩/૧દક્ષ ઉવાચ । યદિ પ્રસન્નો ભગવાન્ યદિ વાહં તવ પ્રિયઃ ।
૩૯.૯૩/૨યદિ ચાહમનુગ્રાહ્યો યદિ દેયો વરો મમ ॥ ૩૯.૯૩॥

૩૯.૯૪/૧યદ્ ભક્ષ્યં ભક્ષિતં પીતં ત્રાસિતં યચ્ચ નાશિતમ્ ।
૩૯.૯૪/૨ચૂર્ણીકૃતાપવિદ્ધં ચ યજ્ઞસમ્ભારમીદૃશમ્ ॥ ૩૯.૯૪॥

૩૯.૯૫/૧દીર્ઘકાલેન મહતા પ્રયત્નેન ચ સંચિતમ્ ।
૩૯.૯૫/૨ન ચ મિથ્યા ભવેન્ મહ્યં ત્વત્પ્રસાદાન્ મહેશ્વર ॥ ૩૯.૯૫॥

૩૯.૯૬/૧બ્રહ્મોવાચ । તથાસ્ત્વિત્યાહ ભગવાન્ ભગનેત્રહરો હરઃ ।
૩૯.૯૬/૨ધર્માધ્યક્ષં મહાદેવં ત્ર્યમ્બકં ચ પ્રજાપતિઃ ॥ ૩૯.૯૬॥

૩૯.૯૭/૧જાનુભ્યામવનીં ગત્વા દક્ષો લબ્ધ્વા ભવાદ્ વરમ્ ।
૩૯.૯૭/૨નામ્નાં ચાષ્ટસહસ્રેણ સ્તુતવાન્ વૃષભધ્વજમ્ ॥ ૩૯.૯૭॥

૪૦.૧/૧બ્રહ્મોવાચ । એવં દૃષ્ટ્વા તદા દક્ષઃ શમ્ભોર્વીર્યં દ્વિજોત્તમાઃ ।
૪૦.૧/૨પ્રાઞ્જલિઃ પ્રણતો ભૂત્વા સંસ્તોતુમુપચક્રમે ॥ ૪૦.૧॥

૪૦.૨/૧દક્ષ ઉવાચ । નમસ્તે દેવદેવેશ નમસ્તેઽન્ધકસૂદન ।

૪૦.૨/૨દેવેન્દ્ર ત્વં બલશ્રેષ્ઠ દેવદાનવપૂજિત ॥ ૪૦.૨॥

૪૦.૩/૧સહસ્રાક્ષ વિરૂપાક્ષ ત્ર્યક્ષ યક્ષાધિપપ્રિય ।
૪૦.૩/૨સર્વતઃપાણિપાદસ્ત્વં સર્વતોક્ષિશિરોમુખઃ ॥ ૪૦.૩॥

૪૦.૪/૧સર્વતઃશ્રુતિમાંલ્લોકે સર્વમાવૃત્ય તિષ્ઠસિ ।
૪૦.૪/૨શઙ્કુકર્ણો મહાકર્ણઃ કુમ્ભકર્ણોઽર્ણવાલયઃ ॥ ૪૦.૪॥

૪૦.૫/૧ગજેન્દ્રકર્ણો ગોકર્ણઃ શતકર્ણો નમોઽસ્તુ તે ।
૪૦.૫/૨શતોદરઃ શતાવર્તઃ શતજિહ્વઃ સનાતનઃ ॥ ૪૦.૫॥

૪૦.૬/૧ગાયન્તિ ત્વાં ગાયત્રિણો અર્ચયન્ત્યર્કમર્કિણઃ ।
૪૦.૬/૨દેવદાનવગોપ્તા ચ બ્રહ્મા ચ ત્વં શતક્રતુઃ ॥ ૪૦.૬॥

૪૦.૭/૧મૂર્તિમાંસ્ત્વં મહામૂર્તિઃ સમુદ્રઃ સરસાં નિધિઃ ।
૪૦.૭/૨ત્વયિ સર્વા દેવતા હિ ગાવો ગોષ્ઠ ઇવાસતે ॥ ૪૦.૭॥

૪૦.૮/૧ત્વત્તઃ શરીરે પશ્યામિ સોમમગ્નિજલેશ્વરમ્ ।
૪૦.૮/૨આદિત્યમથ વિષ્ણું ચ બ્રહ્માણં સબૃહસ્પતિમ્ ॥ ૪૦.૮॥

૪૦.૯/૧ક્રિયા કરણકાર્યે ચ કર્તા કારણમેવ ચ ।
૪૦.૯/૨અસચ્ચ સદસચ્ચૈવ તથૈવ પ્રભવાવ્યયૌ ॥ ૪૦.૯॥

૪૦.૧૦/૧નમો ભવાય શર્વાય રુદ્રાય વરદાય ચ ।
૪૦.૧૦/૨પશૂનાં પતયે ચૈવ નમોઽસ્ત્વન્ધકઘાતિને ॥ ૪૦.૧૦॥

૪૦.૧૧/૧ત્રિજટાય ત્રિશીર્ષાય ત્રિશૂલવરધારિણે ।
૪૦.૧૧/૨ત્ર્યમ્બકાય ત્રિનેત્રાય ત્રિપુરઘ્નાય વૈ નમઃ ॥ ૪૦.૧૧॥

૪૦.૧૨/૧નમશ્ચણ્ડાય મુણ્ડાય વિશ્વચણ્ડધરાય ચ ।
૪૦.૧૨/૨દણ્ડિને શઙ્કુકર્ણાય દણ્ડિદણ્ડાય વૈ નમઃ ॥ ૪૦.૧૨॥

૪૦.૧૩/૧નમોઽર્ધદણ્ડિકેશાય શુષ્કાય વિકૃતાય ચ ।
૪૦.૧૩/૨વિલોહિતાય ધૂમ્રાય નીલગ્રીવાય વૈ નમઃ ॥ ૪૦.૧૩॥

૪૦.૧૪/૧નમોઽસ્ત્વપ્રતિરૂપાય વિરૂપાય શિવાય ચ ।
૪૦.૧૪/૨સૂર્યાય સૂર્યપતયે સૂર્યધ્વજપતાકિને ॥ ૪૦.૧૪॥

૪૦.૧૫/૧નમઃ પ્રમથનાશાય વૃષસ્કન્ધાય વૈ નમઃ ।
૪૦.૧૫/૨નમો હિરણ્યગર્ભાય હિરણ્યકવચાય ચ ॥ ૪૦.૧૫॥

૪૦.૧૬/૧હિરણ્યકૃતચૂડાય હિરણ્યપતયે નમઃ ।
૪૦.૧૬/૨શત્રુઘાતાય ચણ્ડાય પર્ણસંઘશયાય ચ ॥ ૪૦.૧૬॥

૪૦.૧૭/૧નમઃ સ્તુતાય સ્તુતયે સ્તૂયમાનાય વૈ નમઃ ।
૪૦.૧૭/૨સર્વાય સર્વભક્ષાય સર્વભૂતાન્તરાત્મને ॥ ૪૦.૧૭॥

૪૦.૧૮/૧નમો હોમાય મન્ત્રાય શુક્લધ્વજપતાકિને ।
૪૦.૧૮/૨નમોઽનમ્યાય નમ્યાય નમઃ કિલકિલાય ચ ॥ ૪૦.૧૮॥

૪૦.૧૯/૧નમસ્ત્વાં શયમાનાય શયિતાયોત્થિતાય ચ ।
૪૦.૧૯/૨સ્થિતાય ધાવમાનાય કુબ્જાય કુટિલાય ચ ॥ ૪૦.૧૯॥

૪૦.૨૦/૧નમો નર્તનશીલાય મુખવાદિત્રકારિણે ।
૪૦.૨૦/૨બાધાપહાય લુબ્ધાય ગીતવાદિત્રકારિણે ॥ ૪૦.૨૦॥

૪૦.૨૧/૧નમો જ્યેષ્ઠાય શ્રેષ્ઠાય બલપ્રમથનાય ચ ।
૪૦.૨૧/૨ઉગ્રાય ચ નમો નિત્યં નમશ્ચ દશબાહવે ॥ ૪૦.૨૧॥

૪૦.૨૨/૧નમઃ કપાલહસ્તાય સિતભસ્મપ્રિયાય ચ ।
૪૦.૨૨/૨વિભીષણાય ભીમાય ભીષ્મવ્રતધરાય ચ ॥ ૪૦.૨૨॥

૪૦.૨૩/૧નાનાવિકૃતવક્ત્રાય ખડ્ગજિહ્વોગ્રદંષ્ટ્રિણે ।
૪૦.૨૩/૨પક્ષમાસલવાર્ધાય તુમ્બીવીણાપ્રિયાય ચ ॥ ૪૦.૨૩॥

૪૦.૨૪/૧અઘોરઘોરરૂપાય ઘોરાઘોરતરાય ચ ।
૪૦.૨૪/૨નમઃ શિવાય શાન્તાય નમઃ શાન્તતમાય ચ ॥ ૪૦.૨૪॥

૪૦.૨૫/૧નમો બુદ્ધાય શુદ્ધાય સંવિભાગપ્રિયાય ચ ।
૪૦.૨૫/૨પવનાય પતંગાય નમઃ સાંખ્યપરાય ચ ॥ ૪૦.૨૫॥

૪૦.૨૬/૧નમશ્ચણ્ડૈકઘણ્ટાય ઘણ્ટાજલ્પાય ઘણ્ટિને ।
૪૦.૨૬/૨સહસ્રશતઘણ્ટાય ઘણ્ટામાલાપ્રિયાય ચ ॥ ૪૦.૨૬॥

૪૦.૨૭/૧પ્રાણદણ્ડાય નિત્યાય નમસ્તે લોહિતાય ચ ।
૪૦.૨૭/૨હૂંહૂંકારાય રુદ્રાય ભગાકારપ્રિયાય ચ ॥ ૪૦.૨૭॥

૪૦.૨૮/૧નમોઽપારવતે નિત્યં ગિરિવૃક્ષપ્રિયાય ચ ।
૪૦.૨૮/૨નમો યજ્ઞાધિપતયે ભૂતાય પ્રસુતાય ચ ॥ ૪૦.૨૮॥

૪૦.૨૯/૧યજ્ઞવાહાય દાન્તાય તપ્યાય ચ ભગાય ચ ।
૪૦.૨૯/૨નમસ્તટાય તટ્યાય તટિનીપતયે નમઃ ॥ ૪૦.૨૯॥

૪૦.૩૦/૧અન્નદાયાન્નપતયે નમસ્ત્વન્નભુજાય ચ ।
૪૦.૩૦/૨નમઃ સહસ્રશીર્ષાય સહસ્રચરણાય ચ ॥ ૪૦.૩૦॥

૪૦.૩૧/૧સહસ્રોદ્ધતશૂલાય સહસ્રનયનાય ચ ।
૪૦.૩૧/૨નમો બાલાર્કવર્ણાય બાલરૂપધરાય ચ ॥ ૪૦.૩૧॥

૪૦.૩૨/૧નમો બાલાર્કરૂપાય બાલક્રીડનકાય ચ ।
૪૦.૩૨/૨નમઃ શુદ્ધાય બુદ્ધાય ક્ષોભણાય ક્ષયાય ચ ॥ ૪૦.૩૨॥

૪૦.૩૩/૧તરંગાઙ્કિતકેશાય મુક્તકેશાય વૈ નમઃ ।
૪૦.૩૩/૨નમઃ ષટ્કર્મનિષ્ઠાય ત્રિકર્મનિયતાય ચ ॥ ૪૦.૩૩॥

૪૦.૩૪/૧વર્ણાશ્રમાણાં વિધિવત્ પૃથગ્ધર્મપ્રવર્તિને ।
૪૦.૩૪/૨નમઃ શ્રેષ્ઠાય જ્યેષ્ઠાય નમઃ કલકલાય ચ ॥ ૪૦.૩૪॥

૪૦.૩૫/૧શ્વેતપિઙ્ગલનેત્રાય કૃષ્ણરક્તેક્ષણાય ચ ।
૪૦.૩૫/૨ધર્મકામાર્થમોક્ષાય ક્રથાય ક્રથનાય ચ ॥ ૪૦.૩૫॥

૪૦.૩૬/૧સાંખ્યાય સાંખ્યમુખ્યાય યોગાધિપતયે નમઃ ।
૪૦.૩૬/૨નમો રથ્યાધિરથ્યાય ચતુષ્પથપથાય ચ ॥ ૪૦.૩૬॥

૪૦.૩૭/૧કૃષ્ણાજિનોત્તરીયાય વ્યાલયજ્ઞોપવીતિને ।
૪૦.૩૭/૨ઈશાન રુદ્રસંઘાત હરિકેશ નમોઽસ્તુ તે ॥ ૪૦.૩૭॥

૪૦.૩૮/૧ત્ર્યમ્બકાયામ્બિકાનાથ વ્યક્તાવ્યક્ત નમોઽસ્તુ તે ।
૪૦.૩૮/૨કાલકામદકામઘ્ન દુષ્ટોદ્વૃત્તનિષૂદન ॥ ૪૦.૩૮॥

૪૦.૩૯/૧સર્વગર્હિત સર્વઘ્ન સદ્યોજાત નમોઽસ્તુ તે ।
૪૦.૩૯/૨ઉન્માદન શતાવર્ત+ ।ગઙ્ગાતોયાર્દ્રમૂર્ધજ ॥ ૪૦.૩૯॥

૪૦.૪૦/૧ચન્દ્રાર્ધસંયુગાવર્ત મેઘાવર્ત નમોઽસ્તુ તે ।
૪૦.૪૦/૨નમોઽન્નદાનકર્ત્રે ચ અન્નદપ્રભવે નમઃ ॥ ૪૦.૪૦॥

૪૦.૪૧/૧અન્નભોક્ત્રે ચ ગોપ્ત્રે ચ ત્વમેવ પ્રલયાનલ ।
૪૦.૪૧/૨જરાયુજાણ્ડજાશ્ચૈવ સ્વેદજોદ્ભિજ્જ એવ ચ ॥ ૪૦.૪૧॥

૪૦.૪૨/૧ત્વમેવ દેવદેવેશ ભૂતગ્રામશ્ચતુર્વિધઃ ।
૪૦.૪૨/૨ચરાચરસ્ય સ્રષ્ટા ત્વં પ્રતિહર્તા ત્વમેવ ચ ॥ ૪૦.૪૨॥

૪૦.૪૩/૧ત્વમેવ બ્રહ્મા વિશ્વેશ અપ્સુ બ્રહ્મ વદન્તિ તે ।

૪૦.૪૩/૨સર્વસ્ય પરમા યોનિઃ સુધાંશો જ્યોતિષાં નિધિઃ ॥ ૪૦.૪૩॥

૪૦.૪૪/૧ઋક્સામાનિ તથૌંકારમાહુસ્ત્વાં બ્રહ્મવાદિનઃ ।
૪૦.૪૪/૨હાયિ હાયિ હરે હાયિ હુવાહાવેતિ વાસકૃત્ ॥ ૪૦.૪૪॥

૪૦.૪૫/૧ગાયન્તિ ત્વાં સુરશ્રેષ્ઠાઃ સામગા બ્રહ્મવાદિનઃ ।
૪૦.૪૫/૨યજુર્મય ઋઙ્મયશ્ચ સામાથર્વયુતસ્તથા ॥ ૪૦.૪૫॥

૪૦.૪૬/૧પઠ્યસે બ્રહ્મવિદ્ભિસ્ત્વં કલ્પોપનિષદાં ગણૈઃ ।
૪૦.૪૬/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રા વર્ણાશ્રમાશ્ચ યે ॥ ૪૦.૪૬॥

૪૦.૪૭/૧ત્વમેવાશ્રમસંધાશ્ચ વિદ્યુત્ સ્તનિતમેવ ચ ।
૪૦.૪૭/૨સંવત્સરસ્ત્વમ્ ઋતવો માસા માસાર્ધમેવ ચ ॥ ૪૦.૪૭॥

૪૦.૪૮/૧કલા કાષ્ઠા નિમેષાશ્ચ નક્ષત્રાણિ યુગાનિ ચ ।
૪૦.૪૮/૨વૃષાણાં કકુદં ત્વં હિ ગિરીણાં શિખરાણિ ચ ॥ ૪૦.૪૮॥

૪૦.૪૯/૧સિંહો મૃગાણાં પતયસ્તક્ષકાનન્તભોગિનામ્ ।
૪૦.૪૯/૨ક્ષીરોદો હ્યુદધીનાં ચ મન્ત્રાણાં પ્રણવસ્તથા ॥ ૪૦.૪૯॥

૪૦.૫૦/૧વજ્રં પ્રહરણાનાં ચ વ્રતાનાં સત્યમેવ ચ ।
૪૦.૫૦/૨ત્વમેવેચ્છા ચ દ્વેષશ્ચ રાગો મોહઃ શમઃ ક્ષમા ॥ ૪૦.૫૦॥

૪૦.૫૧/૧વ્યવસાયો ધૃતિર્લોભઃ કામક્રોધૌ જયાજયૌ ।
૪૦.૫૧/૨ત્વં ગદી ત્વં શરી ચાપી ખટ્વાઙ્ગી મુદ્ગરી તથા ॥ ૪૦.૫૧॥

૪૦.૫૨/૧છેત્તા ભેત્તા પ્રહર્તા ચ નેતા મન્તાસિ નો મતઃ ।
૪૦.૫૨/૨દશલક્ષણસંયુક્તો ધર્મોઽર્થઃ કામ એવ ચ ॥ ૪૦.૫૨॥

૪૦.૫૩/૧ઇન્દુઃ સમુદ્રઃ સરિતઃ પલ્વલાનિ સરાંસિ ચ ।
૪૦.૫૩/૨લતાવલ્લ્યસ્તૃણૌષધ્યઃ પશવો મૃગપક્ષિણઃ ॥ ૪૦.૫૩॥

૪૦.૫૪/૧દ્રવ્યકર્મગુણારમ્ભઃ કાલપુષ્પફલપ્રદઃ ।
૪૦.૫૪/૨આદિશ્ચાન્તશ્ચ મધ્યશ્ચ ગાયત્ર્યોંકાર એવ ચ ॥ ૪૦.૫૪॥

૪૦.૫૫/૧હરિતો લોહિતઃ કૃષ્ણો નીલઃ પીતસ્તથા ક્ષણઃ ।
૪૦.૫૫/૨કદ્રુશ્ચ કપિલો બભ્રુઃ કપોતો મચ્છકસ્તથા ॥ ૪૦.૫૫॥

૪૦.૫૬/૧સુવર્ણરેતા વિખ્યાતઃ સુવર્ણશ્ચાપ્યથો મતઃ ।
૪૦.૫૬/૨સુવર્ણનામા ચ તથા સુવર્ણપ્રિય એવ ચ ॥ ૪૦.૫૬॥

૪૦.૫૭/૧ત્વમિન્દ્રશ્ચ યમશ્ચૈવ વરુણો ધનદોઽનલઃ ।
૪૦.૫૭/૨ઉત્ફુલ્લશ્ચિત્રભાનુશ્ચ સ્વર્ભાનુર્ભાનુરેવ ચ ॥ ૪૦.૫૭॥

૪૦.૫૮/૧હોત્રં હોતા ચ હોમ્યં ચ હુતં ચૈવ તથા પ્રભુઃ ।
૪૦.૫૮/૨ત્રિસૌપર્ણસ્તથા બ્રહ્મન્ યજુષાં શતરુદ્રિયમ્ ॥ ૪૦.૫૮॥

૪૦.૫૯/૧પવિત્રં ચ પવિત્રાણાં મઙ્ગલાનાં ચ મઙ્ગલમ્ ।
૪૦.૫૯/૨પ્રાણશ્ચ ત્વં રજશ્ચ ત્વં તમઃ સત્ત્વયુતસ્તથા ॥ ૪૦.૫૯॥

૪૦.૬૦/૧પ્રાણોઽપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
૪૦.૬૦/૨ઉન્મેષશ્ચ નિમેષશ્ચ ક્ષુત્તૃઙ્જૃમ્ભા તથૈવ ચ ॥ ૪૦.૬૦॥

૪૦.૬૧/૧લોહિતાઙ્ગશ્ચ દંષ્ટ્રી ચ મહાવક્ત્રો મહોદરઃ ।
૪૦.૬૧/૨શુચિરોમા હરિચ્છ્મશ્રુરૂર્ધ્વકેશશ્ચલાચલઃ ॥ ૪૦.૬૧॥

૪૦.૬૨/૧ગીતવાદિત્રનૃત્યાઙ્ગો ગીતવાદનકપ્રિયઃ ।
૪૦.૬૨/૨મત્સ્યો જાલો જલોઽજય્યો જલવ્યાલઃ કુટીચરઃ ॥ ૪૦.૬૨॥

૪૦.૬૩/૧વિકાલશ્ચ સુકાલશ્ચ દુષ્કાલઃ કાલનાશનઃ ।
૪૦.૬૩/૨મૃત્યુશ્ચૈવાક્ષયોઽન્તશ્ચ ક્ષમામાયાકરોત્કરઃ ॥ ૪૦.૬૩॥

૪૦.૬૪/૧સંવર્તો વર્તકશ્ચૈવ સંવર્તકબલાહકૌ ।
૪૦.૬૪/૨ઘણ્ટાકી ઘણ્ટકી ઘણ્ટી ચૂડાલો લવણોદધિઃ ॥ ૪૦.૬૪॥

૪૦.૬૫/૧બ્રહ્મા કાલાગ્નિવક્ત્રશ્ચ દણ્ડી મુણ્ડસ્ત્રિદણ્ડધૃક્ ।
૪૦.૬૫/૨ચતુર્યુગશ્ચતુર્વેદશ્ચતુર્હોત્રશ્ચતુષ્પથઃ ॥ ૪૦.૬૫॥

૪૦.૬૬/૧ચાતુરાશ્રમ્યનેતા ચ ચાતુર્વર્ણ્યકરશ્ચ હ ।
૪૦.૬૬/૨ક્ષરાક્ષરઃ પ્રિયો ધૂર્તો ગણૈર્ગણ્યો ગણાધિપઃ ॥ ૪૦.૬૬॥

૪૦.૬૭/૧રક્તમાલ્યામ્બરધરો ગિરીશો ગિરિજાપ્રિયઃ ।
૪૦.૬૭/૨શિલ્પીશઃ શિલ્પિનઃ શ્રેષ્ઠઃ સર્વશિલ્પિપ્રવર્તકઃ ॥ ૪૦.૬૭॥

૪૦.૬૮/૧ભગનેત્રાન્તકશ્ચણ્ડઃ પૂષ્ણો દન્તવિનાશનઃ ।
૪૦.૬૮/૨સ્વાહા સ્વધા વષટ્કારો નમસ્કાર નમોઽસ્તુ તે ॥ ૪૦.૬૮॥

૪૦.૬૯/૧ગૂઢવ્રતશ્ચ ગૂઢશ્ચ ગૂઢવ્રતનિષેવિતઃ ।
૪૦.૬૯/૨તરણસ્તારણશ્ચૈવ સર્વભૂતેષુ તારણઃ ॥ ૪૦.૬૯॥

૪૦.૭૦/૧ધાતા વિધાતા સંધાતા નિધાતા ધારણો ધરઃ ।
૪૦.૭૦/૨તપો બ્રહ્મ ચ સત્યં ચ બ્રહ્મચર્યં તથાર્જવમ્ ॥ ૪૦.૭૦॥

૪૦.૭૧/૧ભૂતાત્મા ભૂતકૃદ્ ભૂતો ભૂતભવ્યભવોદ્ભવઃ ।
૪૦.૭૧/૨ભૂર્ભુવઃ સ્વરિતશ્ચૈવ ભૂતો હ્યગ્નિર્મહેશ્વરઃ ॥ ૪૦.૭૧॥

૪૦.૭૨/૧બ્રહ્માવર્તઃ સુરાવર્તઃ કામાવર્ત નમોऽસ્તુ તે ।
૪૦.૭૨/૨કામબિમ્બવિનિર્હન્તા કર્ણિકારસ્રજપ્રિયઃ ॥ ૪૦.૭૨॥

૪૦.૭૩/૧ગોનેતા ગોપ્રચારશ્ચ ગોવૃષેશ્વરવાહનઃ ।
૪૦.૭૩/૨ત્રૈલોક્યગોપ્તા ગોવિન્દો ગોપ્તા ગોગર્ગ એવ ચ ॥ ૪૦.૭૩॥

૪૦.૭૪/૧અખણ્ડચન્દ્રાભિમુખઃ સુમુખો દુર્મુખોऽમુખઃ ।
૪૦.૭૪/૨ચતુર્મુખો બહુમુખો રણેષ્વભિમુખઃ સદા ॥ ૪૦.૭૪॥

૪૦.૭૫/૧હિરણ્યગર્ભઃ શકુનિર્ધનદોऽર્થપતિર્વિરાટ્ ।
૪૦.૭૫/૨અધર્મહા મહાદક્ષો દણ્ડધારો રણપ્રિયઃ ॥ ૪૦.૭૫॥

૪૦.૭૬/૧તિષ્ઠન્ સ્થિરશ્ચ સ્થાણુશ્ચ નિષ્કમ્પશ્ચ સુનિશ્ચલઃ ।
૪૦.૭૬/૨દુર્વારણો દુર્વિષહો દુઃસહો દુરતિક્રમઃ ॥ ૪૦.૭૬॥

૪૦.૭૭/૧દુર્ધરો દુર્વશો નિત્યો દુર્દર્પો વિજયો જયઃ ।
૪૦.૭૭/૨શશઃ શશાઙ્કનયન+ ।શીતોષ્ણઃ ક્ષુત્ તૃષા જરા ॥ ૪૦.૭૭॥

૪૦.૭૮/૧આધયો વ્યાધયશ્ચૈવ વ્યાધિહા વ્યાધિપશ્ચ યઃ ।
૪૦.૭૮/૨સહ્યો યજ્ઞમૃગવ્યાધો વ્યાધીનામાકરોऽકરઃ ॥ ૪૦.૭૮॥

૪૦.૭૯/૧શિખણ્ડી પુણ્ડરીકશ્ચ પુણ્ડરીકાવલોકનઃ ।
૪૦.૭૯/૨દણ્ડધૃક્ ચક્રદણ્ડશ્ચ રૌદ્રભાગવિનાશનઃ ॥ ૪૦.૭૯॥

૪૦.૮૦/૧વિષપોऽમૃતપશ્ચૈવ સુરાપઃ ક્ષીરસોમપઃ ।
૪૦.૮૦/૨મધુપશ્ચાપપશ્ચૈવ સર્વપશ્ચ બલાબલઃ ॥ ૪૦.૮૦॥

૪૦.૮૧/૧વૃષાઙ્ગરામ્ભો વૃષભસ્તથા વૃષભલોચનઃ ।
૪૦.૮૧/૨વૃષભશ્ચૈવ વિખ્યાતો લોકાનાં લોકસંસ્કૃતઃ ॥ ૪૦.૮૧॥

૪૦.૮૨/૧ચન્દ્રાદિત્યૌ ચક્ષુષી તે હૃદયં ચ પિતામહઃ ।
૪૦.૮૨/૨અગ્નિષ્ટોમસ્તથા દેહો ધર્મકર્મપ્રસાધિતઃ ॥ ૪૦.૮૨॥

૪૦.૮૩/૧ન બ્રહ્મા ન ચ ગોવિન્દઃ પુરાણર્ષયો ન ચ ।
૪૦.૮૩/૨માહાત્મ્યં વેદિતું શક્તા યાથાતથ્યેન તે શિવ ॥ ૪૦.૮૩॥

૪૦.૮૪/૧શિવા યા મૂર્તયઃ સૂક્ષ્માસ્તે મહ્યં યાન્તુ દર્શનમ્ ।

૪૦.૮૪/૨તાભિર્માં સર્વતો રક્ષ પિતા પુત્રમિવૌરસમ્ ॥ ૪૦.૮૪॥

૪૦.૮૫/૧રક્ષ માં રક્ષણીયોઽહં તવાનઘ નમોઽસ્તુ તે ।
૪૦.૮૫/૨ભક્તાનુકમ્પી ભગવાન્ ભક્તશ્ચાહં સદા ત્વયિ ॥ ૪૦.૮૫॥

૪૦.૮૬/૧યઃ સહસ્રાણ્યનેકાનિ પુંસામાવૃત્ય દુર્દૃશામ્ ।
૪૦.૮૬/૨તિષ્ઠત્યેકઃ સમુદ્રાન્તે સ મે ગોપ્તાસ્તુ નિત્યશઃ ॥ ૪૦.૮૬॥

૪૦.૮૭/૧યં વિનિદ્રા જિતશ્વાસાઃ સત્ત્વસ્થાઃ સમદર્શિનઃ ।
૪૦.૮૭/૨જ્યોતિઃ પશ્યન્તિ યુઞ્જાનાસ્તસ્મૈ યોગાત્મને નમઃ ॥ ૪૦.૮૭॥

૪૦.૮૮/૧સમ્ભક્ષ્ય સર્વભૂતાનિ યુગાન્તે સમુપસ્થિતે ।
૪૦.૮૮/૨યઃ શેતે જલમધ્યસ્થસ્તં પ્રપદ્યેઽમ્બુશાયિનમ્ ॥ ૪૦.૮૮॥

૪૦.૮૯/૧પ્રવિશ્ય વદનં રાહોર્યઃ સોમં પિબતે નિશિ ।
૪૦.૮૯/૨ગ્રસત્યર્કં ચ સ્વર્ભાનુર્ભૂત્વા સોમાગ્નિરેવ ચ ॥ ૪૦.૮૯॥

૪૦.૯૦/૧અઙ્ગુષ્ઠમાત્રાઃ પુરુષા દેહસ્થાઃ સર્વદેહિનામ્ ।
૪૦.૯૦/૨રક્ષન્તુ તે ચ માં નિત્યં નિત્યં ચાપ્યાયયન્તુ મામ્ ॥ ૪૦.૯૦॥

૪૦.૯૧/૧યેનાપ્યુત્પાદિતા ગર્ભા અપો ભાગગતાશ્ચ યે ।
૪૦.૯૧/૨તેષાં સ્વાહા સ્વધા ચૈવ આપ્નુવન્તિ સ્વદન્તિ ચ ॥ ૪૦.૯૧॥

૪૦.૯૨/૧યેન રોહન્તિ દેહસ્થાઃ પ્રાણિનો રોદયન્તિ ચ ।
૪૦.૯૨/૨હર્ષયન્તિ ન કૃષ્યન્તિ નમસ્તેભ્યસ્તુ નિત્યશઃ ॥ ૪૦.૯૨॥

૪૦.૯૩/૧યે સમુદ્રે નદીદુર્ગે પર્વતેષુ ગુહાસુ ચ ।
૪૦.૯૩/૨વૃક્ષમૂલેષુ ગોષ્ઠેષુ કાન્તારગહનેષુ ચ ॥ ૪૦.૯૩॥

૪૦.૯૪/૧ચતુષ્પથેષુ રથ્યાસુ ચત્વરેષુ સભાસુ ચ ।
૪૦.૯૪/૨હસ્ત્યશ્વરથશાલાસુ જીર્ણોદ્યાનાલયેષુ ચ ॥ ૪૦.૯૪॥

૪૦.૯૫/૧યેષુ પઞ્ચસુ ભૂતેષુ દિશાસુ વિદિશાસુ ચ ।
૪૦.૯૫/૨ઇન્દ્રાર્કયોર્મધ્યગતા યે ચ ચન્દ્રાર્કરશ્મિષુ ॥ ૪૦.૯૫॥

૪૦.૯૬/૧રસાતલગતા યે ચ યે ચ તસ્માત્ પરં ગતાઃ ।
૪૦.૯૬/૨નમસ્તેભ્યો નમસ્તેભ્યો નમસ્તેભ્યસ્તુ સર્વશઃ ॥ ૪૦.૯૬॥

૪૦.૯૭/૧સર્વસ્ત્વં સર્વગો દેવઃ સર્વભૂતપતિર્ભવઃ ।
૪૦.૯૭/૨સર્વભૂતાન્તરાત્મા ચ તેન ત્વં ન નિમન્ત્રિતઃ ॥ ૪૦.૯૭॥

૪૦.૯૮/૧ત્વમેવ ચેજ્યસે દેવ યજ્ઞૈર્વિવિધદક્ષિણૈઃ ।
૪૦.૯૮/૨ત્વમેવ કર્તા સર્વસ્ય તેન ત્વં ન નિમન્ત્રિતઃ ॥ ૪૦.૯૮॥

૪૦.૯૯/૧અથવા માયયા દેવ મોહિતઃ સૂક્ષ્મયા તવ ।
૪૦.૯૯/૨તસ્માત્ તુ કારણાદ્ વાપિ ત્વં મયા ન નિમન્ત્રિતઃ ॥ ૪૦.૯૯॥

૪૦.૧૦૦/૧પ્રસીદ મમ દેવેશ ત્વમેવ શરણં મમ ।
૪૦.૧૦૦/૨ત્વં ગતિસ્ત્વં પ્રતિષ્ઠા ચ ન ચાન્યોઽસ્તીતિ મે મતિઃ ॥ ૪૦.૧૦૦॥

૪૦.૧૦૧/૧બ્રહ્મોવાચ । સ્તુત્વૈવં સ મહાદેવં વિરરામ મહામતિઃ ।
૪૦.૧૦૧/૨ભગવાન્ અપિ સુપ્રીતઃ પુનર્દક્ષમભાષત ॥ ૪૦.૧૦૧॥

૪૦.૧૦૨/૧શ્રીભગવાન્ ઉવાચ । પરિતુષ્ટોઽસ્મિ તે દક્ષ સ્તવેનાનેન સુવ્રત ।
૪૦.૧૦૨/૨બહુના તુ કિમુક્તેન મત્સમીપં ગમિષ્યસિ ॥ ૪૦.૧૦૨॥

૪૦.૧૦૩/૧બ્રહ્મોવાચ । તથૈવમબ્રવીદ્ વાક્યં ત્રૈલોક્યાધિપતિર્ભવઃ ।
૪૦.૧૦૩/૨કૃત્વાશ્વાસકરં વાક્યં સર્વજ્ઞો વાક્યસંહિતમ્ ॥ ૪૦.૧૦૩॥

૪૦.૧૦૪/૧શ્રીશિવ ઉવાચ । દક્ષ દુઃખં ન કર્તવ્યં
યજ્ઞવિધ્વંસનં પ્રતિ ।
૪૦.૧૦૪/૨અહં યજ્ઞહનસ્તુભ્યં દૃષ્ટમેતત્ પુરાનઘ ॥ ૪૦.૧૦૪॥

૪૦.૧૦૫/૧ભૂયશ્ચ ત્વં વરમિમં મત્તો ગૃહ્ણીષ્વ સુવ્રત ।
૪૦.૧૦૫/૨પ્રસન્નસુમુખો ભૂત્વા મમૈકાગ્રમનાઃ શ‌ૃણુ ॥ ૪૦.૧૦૫॥

૪૦.૧૦૬/૧અશ્વમેધસહસ્રસ્ય વાજપેયશતસ્ય વૈ ।
૪૦.૧૦૬/૨પ્રજાપતે મત્પ્રસાદાત્ ફલભાગી ભવિષ્યસિ ॥ ૪૦.૧૦૬॥

૪૦.૧૦૭/૧વેદાન્ ષડઙ્ગાન્ બુધ્યસ્વ સાંખ્યયોગાંશ્ચ કૃત્સ્નશઃ ।
૪૦.૧૦૭/૨તપશ્ચ વિપુલં તપ્ત્વા દુશ્ચરં દેવદાનવૈઃ ॥ ૪૦.૧૦૭॥

૪૦.૧૦૮/૧અબ્દૈર્દ્વાદશભિર્યુક્તં ગૂઢમપ્રજ્ઞનિન્દિતમ્ ।
૪૦.૧૦૮/૨વર્ણાશ્રમકૃતૈર્ધર્મૈર્વિનીતં ન ક્વચિત્ ક્વચિત્ ॥ ૪૦.૧૦૮॥

૪૦.૧૦૯/૧સમાગતં વ્યવસિતં પશુપાશવિમોક્ષણમ્ ।
૪૦.૧૦૯/૨સર્વેષામાશ્રમાણાં ચ મયા પાશુપતં વ્રતમ્ ॥ ૪૦.૧૦૯॥

૪૦.૧૧૦/૧ઉત્પાદિતં દક્ષ શુભં સર્વપાપવિમોચનમ્ ।
૪૦.૧૧૦/૨અસ્ય ચીર્ણસ્ય યત્ સમ્યક્ ફલં ભવતિ પુષ્કલમ્ ।
૪૦.૧૧૦/૩તચ્ચાસ્તુ સુમહાભાગ માનસસ્ત્યજ્યતાં જ્વરઃ ॥ ૪૦.૧૧૦॥

૪૦.૧૧૧/૧બ્રહ્મોવાચ । એવમુક્ત્વા તુ દેવેશઃ સપત્નીકઃ સહાનુગઃ ।
૪૦.૧૧૧/૨અદર્શનમનુપ્રાપ્તો દક્ષસ્યામિતતેજસઃ ॥ ૪૦.૧૧૧॥

૪૦.૧૧૨/૧અવાપ્ય ચ તથા ભાગં યથોક્તં ચોમયા ભવઃ ।
૪૦.૧૧૨/૨જ્વરં ચ સર્વધર્મજ્ઞો બહુધા વ્યભજત્ તદા ॥ ૪૦.૧૧૨॥

૪૦.૧૧૩/૧શાન્ત્યર્થં સર્વભૂતાનાં શ઼ૃણુધ્વમથ વૈ દ્વિજાઃ ।
૪૦.૧૧૩/૨શિખાભિતાપો નાગાનાં પર્વતાનાં શિલાજતુ ॥ ૪૦.૧૧૩॥

૪૦.૧૧૪/૧અપાં તુ નીલિકાં વિદ્યાન્ નિર્મોકો ભુજગેષુ ચ ।
૪૦.૧૧૪/૨ખોરકઃ સૌરભેયાણામૂખરઃ પૃથિવીતલે ॥ ૪૦.૧૧૪॥

૪૦.૧૧૫/૧શુનામપિ ચ ધર્મજ્ઞા દૃષ્ટિપ્રત્યવરોધનમ્ ।
૪૦.૧૧૫/૨રન્ધ્રાગતમથાશ્વાનાં શિખોદ્ભેદશ્ચ બર્હિણામ્ ॥ ૪૦.૧૧૫॥

૪૦.૧૧૬/૧નેત્રરાગઃ કોકિલાનાં દ્વેષઃ પ્રોક્તો મહાત્મનામ્ ।
૪૦.૧૧૬/૨જનાનામપિ ભેદશ્ચ સર્વેષામિતિ નઃ શ્રુતમ્ ॥ ૪૦.૧૧૬॥

૪૦.૧૧૭/૧શુકાનામપિ સર્વેષાં હિક્કિકા પ્રોચ્યતે જ્વરઃ ।
૪૦.૧૧૭/૨શાર્દૂલેષ્વથ વૈ વિપ્રાઃ શ્રમો જ્વર ઇહોચ્યતે ॥ ૪૦.૧૧૭॥

૪૦.૧૧૮/૧માનુષેષુ ચ સર્વજ્ઞા જ્વરો નામૈષ કીર્તિતઃ ।
૪૦.૧૧૮/૨મરણે જન્મનિ તથા મધ્યે ચાપિ નિવેશિતઃ ॥ ૪૦.૧૧૮॥

૪૦.૧૧૯/૧એતન્ માહેશ્વરં તેજો જ્વરો નામ સુદારુણઃ ।
૪૦.૧૧૯/૨નમસ્યશ્ચૈવ માન્યશ્ચ સર્વપ્રાણિભિરીશ્વરઃ ॥ ૪૦.૧૧૯॥

૪૦.૧૨૦/૧ઇમાં જ્વરોત્પત્તિમદીનમાનસઃ ।
૪૦.૧૨૦/૨પઠેત્ સદા યઃ સુસમાહિતો નરઃ ।
૪૦.૧૨૦/૩વિમુક્તરોગઃ સ નરો મુદાયુતો ।
૪૦.૧૨૦/૪લભેત કામાંશ્ચ યથામનીષિતાન્ ॥ ૪૦.૧૨૦॥

૪૦.૧૨૧/૧દક્ષપ્રોક્તં સ્તવં ચાપિ કીર્તયેદ્ યઃ શ઼ૃણોતિ વા ।
૪૦.૧૨૧/૨નાશુભં પ્રાપ્નુયાત્ કિંચિદ્ દીર્ઘમાયુરવાપ્નુયાત્ ॥ ૪૦.૧૨૧॥

૪૦.૧૨૨/૧યથા સર્વેષુ દેવેષુ વરિષ્ઠો ભગવાન્ ભવઃ ।
૪૦.૧૨૨/૨તથા સ્તવો વરિષ્ઠોઽયં સ્તવાનાં દક્ષનિર્મિતઃ ॥ ૪૦.૧૨૨॥

૪૦.૧૨૩/૧યશઃસ્વર્ગસુરૈશ્વર્ય+ । વિત્તાદિજયકાઙ્ક્ષિભિઃ ।
૪૦.૧૨૩/૨સ્તોતવ્યો ભક્તિમાસ્થાય વિદ્યાકામૈશ્ચ યત્નતઃ ॥ ૪૦.૧૨૩॥

૪૦.૧૨૪/૧વ્યાધિતો દુઃખિતો દીનો નરો ગ્રસ્તો ભયાદિભિઃ ।
૪૦.૧૨૪/૨રાજકાર્યનિયુક્તો વા મુચ્યતે મહતો ભયાત્ ॥ ૪૦.૧૨૪॥

૪૦.૧૨૫/૧અનેનૈવ ચ દેહેન ગણાનાં ચ મહેશ્વરાત્ ।
૪૦.૧૨૫/૨ઇહ લોકે સુખં પ્રાપ્ય ગણરાડ્ ઉપજાયતે ॥ ૪૦.૧૨૫॥

૪૦.૧૨૬/૧ન યક્ષા ન પિશાચા વા ન નાગા ન વિનાયકાઃ ।
૪૦.૧૨૬/૨કુર્યુર્વિઘ્નં ગૃહે તસ્ય યત્ર સંસ્તૂયતે ભવઃ ॥ ૪૦.૧૨૬॥

૪૦.૧૨૭/૧શૃણુયાદ્ વા ઇદં નારી ભક્ત્યાથ ભવભાવિતા ।
૪૦.૧૨૭/૨પિતૃપક્ષે ભર્તૃપક્ષે પૂજ્યા ભવતિ ચૈવ હ ॥ ૪૦.૧૨૭॥

૪૦.૧૨૮/૧શૃણુયાદ્ વા ઇદં સર્વં કીર્તયેદ્ વાપ્યભીક્ષ્ણશઃ ।
૪૦.૧૨૮/૨તસ્ય સર્વાણિ કાર્યાણિ સિદ્ધિં ગચ્છન્ત્યવિઘ્નતઃ ॥ ૪૦.૧૨૮॥

૪૦.૧૨૯/૧મનસા ચિન્તિતં યચ્ચ યચ્ચ વાચાપ્યુદાહૃતમ્ ।
૪૦.૧૨૯/૨સર્વં સમ્પદ્યતે તસ્ય સ્તવસ્યાસ્યાનુકીર્તનાત્ ॥ ૪૦.૧૨૯॥

૪૦.૧૩૦/૧દેવસ્ય સગુહસ્યાથ દેવ્યા નન્દીશ્વરસ્ય ચ ।
૪૦.૧૩૦/૨બલિં વિભજતઃ કૃત્વા દમેન નિયમેન ચ ॥ ૪૦.૧૩૦॥

૪૦.૧૩૧/૧તતઃ પ્રયુક્તો ગૃહ્ણીયાન્ નામાન્યાશુ યથાક્રમમ્ ।
૪૦.૧૩૧/૨ઈપ્સિતાંલ્લભતેઽપ્યર્થાન્ કામાન્ ભોગાંશ્ચ માનવઃ ॥ ૪૦.૧૩૧॥

૪૦.૧૩૨/૧મૃતશ્ચ સ્વર્ગમાપ્નોતિ સ્ત્રીસહસ્રસમાવૃતઃ ।
૪૦.૧૩૨/૨સર્વકામસુયુક્તો વા યુક્તો વા સર્વપાતકૈઃ ॥ ૪૦.૧૩૨॥

૪૦.૧૩૩/૧પઠન્ દક્ષકૃતં સ્તોત્રં સર્વપાપૈઃ પ્રમુચ્યતે ।
૪૦.૧૩૩/૨મૃતશ્ચ ગણસાયુજ્યં પૂજ્યમાનઃ સુરાસુરૈઃ ॥ ૪૦.૧૩૩॥

૪૦.૧૩૪/૧વૃષેણ વિનિયુક્તેન વિમાનેન વિરાજતે ।
૪૦.૧૩૪/૨આભૂતસમ્પ્લવસ્થાયી રુદ્રસ્યાનુચરો ભવેત્ ॥ ૪૦.૧૩૪॥

૪૦.૧૩૫/૧ઇત્યાહ ભગવાન્ વ્યાસઃ પરાશરસુતઃ પ્રભુઃ ।
૪૦.૧૩૫/૨નૈતદ્ વેદયતે કશ્ચિન્ નૈતચ્છ્રાવ્યં ચ કસ્યચિત્ ॥ ૪૦.૧૩૫॥

૪૦.૧૩૬/૧શ્રુત્વેમં પરમં ગુહ્યં યેઽપિ સ્યુઃ પાપયોનયઃ ।
૪૦.૧૩૬/૨વૈશ્યાઃ સ્ત્રિયશ્ચ શૂદ્રાશ્ચ રુદ્રલોકમવાપ્નુયુઃ ॥ ૪૦.૧૩૬॥

૪૦.૧૩૭/૧શ્રાવયેદ્ યશ્ચ વિપ્રેભ્યઃ સદા પર્વસુ પર્વસુ ।
૪૦.૧૩૭/૨રુદ્રલોકમવાપ્નોતિ દ્વિજો વૈ નાત્ર સંશયઃ ॥ ૪૦.૧૩૭॥

૪૧.૧/૧લોમહર્ષણ ઉવાચ । શ્રુત્વૈવં વૈ મુનિશ્રેષ્ઠાઃ કથાં
પાપપ્રણાશિનીમ્ ।
૪૧.૧/૨રુદ્રક્રોધોદ્ભવાં પુણ્યાં વ્યાસસ્ય વદતો દ્વિજાઃ ॥ ૪૧.૧॥

૪૧.૨/૧પાર્વત્યાશ્ચ તથા રોષં ક્રોધં શમ્ભોશ્ચ દુઃસહમ્ ।
૪૧.૨/૨ઉત્પત્તિં વીરભદ્રસ્ય ભદ્રકાલ્યાશ્ચ સમ્ભવમ્ ॥ ૪૧.૨॥

૪૧.૩/૧દક્ષયજ્ઞવિનાશં ચ વીર્યં શમ્ભોસ્તથાદ્ભુતમ્ ।
૪૧.૩/૨પુનઃ પ્રસાદં દેવસ્ય દક્ષસ્ય સુમહાત્મનઃ ॥ ૪૧.૩॥

૪૧.૪/૧યજ્ઞભાગં ચ રુદ્રસ્ય દક્ષસ્ય ચ ફલં ક્રતોઃ ।
૪૧.૪/૨હૃષ્ટા બભૂવુઃ સમ્પ્રીતા વિસ્મિતાશ્ચ પુનઃ પુનઃ ॥ ૪૧.૪॥

૪૧.૫/૧પપ્રચ્છુશ્ચ પુનર્વ્યાસં કથાશેષં તથા દ્વિજાઃ ।
૪૧.૫/૨પૃષ્ટઃ પ્રોવાચ તાન્ વ્યાસઃ ક્ષેત્રમેકામ્રકં પુનઃ ॥ ૪૧.૫॥

૪૧.૬/૧વ્યાસ ઉવાચ । બ્રહ્મપ્રોક્તાં કથાં પુણ્યાં શ્રુત્વા તુ ઋષિપુંગવાઃ ।
૪૧.૬/૨પ્રશશંસુસ્તદા હૃષ્ટા રોમાઞ્ચિતતનૂરુહાઃ ॥ ૪૧.૬॥

૪૧.૭/૧ઋષય ઊચુઃ । અહો દેવસ્ય માહાત્મ્યં ત્વયા શમ્ભોઃ પ્રકીર્તિતમ્ ।
૪૧.૭/૨દક્ષસ્ય ચ સુરશ્રેષ્ઠ યજ્ઞવિધ્વંસનં તથા ॥ ૪૧.૭॥

૪૧.૮/૧એકામ્રકં ક્ષેત્રવરં વક્તુમર્હસિ સામ્પ્રતમ્ ।
૪૧.૮/૨શ્રોતુમિચ્છામહે બ્રહ્મન્ પરં કૌતૂહલં હિ નઃ ॥ ૪૧.૮॥

૪૧.૯/૧વ્યાસ ઉવાચ । તેષાં તદ્ વચનં શ્રુત્વા લોકનાથશ્ચતુર્મુખઃ ।
૪૧.૯/૨પ્રોવાચ શમ્ભોસ્તત્ ક્ષેત્રં ભૂતલે દુષ્કૃતચ્છદમ્ ॥ ૪૧.૯॥

૪૧.૧૦/૧બ્રહ્મોવાચ । શ ૃણુધ્વં મુનિશાર્દૂલાઃ પ્રવક્ષ્યામિ સમાસતઃ ।
૪૧.૧૦/૨સર્વપાપહરં પુણ્યં ક્ષેત્રં પરમદુર્લભમ્ ॥ ૪૧.૧૦॥

૪૧.૧૧/૧લિઙ્ગકોટિસમાયુક્તં વારાણસીસમં શુભમ્ ।
૪૧.૧૧/૨એકામ્રકેતિ વિખ્યાતં તીર્થાષ્ટકસમન્વિતમ્ ॥ ૪૧.૧૧॥

૪૧.૧૨/૧એકામ્રવૃક્ષસ્તત્રાસીત્ પુરા કલ્પે દ્વિજોત્તમાઃ ।
૪૧.૧૨/૨નામ્ના તસ્યૈવ તત્ ક્ષેત્રમેકામ્રકમિતિ શ્રુતમ્ ॥ ૪૧.૧૨॥

૪૧.૧૩/૧હૃષ્ટપુષ્ટજનાકીર્ણં નરનારીસમન્વિતમ્ ।
૪૧.૧૩/૨વિદ્વાંસગણ ભૂયિષ્ઠં ધનધાન્યાદિસંયુતમ્ ॥ ૪૧.૧૩॥

૪૧.૧૪/૧ગૃહગોપુરસમ્બાધં ત્રિકચત્વારભૂષિતમ્ ।
૪૧.૧૪/૨નાનાવણિક્સમાકીર્ણં નાનારત્નોપશોભિતમ્ ॥ ૪૧.૧૪॥

૪૧.૧૫/૧પુરાટ્ટાલકસંયુક્તં રથિભિઃ સમલંકૃતમ્ ।
૪૧.૧૫/૨રાજહંસનિભૈઃ શુભ્રૈઃ પ્રાસાદૈરુપશોભિતમ્ ॥ ૪૧.૧૫॥

૪૧.૧૬/૧માર્ગગદ્વારસંયુક્તં સિતપ્રાકારશોભિતમ્ ।
૪૧.૧૬/૨રક્ષિતં શસ્ત્રસંઘૈશ્ચ પરિખાભિરલંકૃતમ્ ॥ ૪૧.૧૬॥

૪૧.૧૭/૧સિતરક્તૈસ્તથા પીતૈઃ કૃષ્ણશ્યામૈશ્ચ વર્ણકૈઃ ।
૪૧.૧૭/૨સમીરણોદ્ધુતાભિશ્ચ પતાકાભિરલંકૃતમ્ ॥ ૪૧.૧૭॥

૪૧.૧૮/૧નિત્યોત્સવપ્રમુદિતં નાનાવાદિત્રનિસ્વનૈઃ ।
૪૧.૧૮/૨વીણાવેણુમૃદઙ્ગૈશ્ચ ક્ષેપણીભિરલંકૃતમ્ ॥ ૪૧.૧૮॥

૪૧.૧૯/૧દેવતાયતનૈર્દિવ્યૈઃ પ્રાકારોદ્યાનમણ્ડિતૈઃ ।
૪૧.૧૯/૨પૂજાવિચિત્રરચિતૈઃ સર્વત્ર સમલંકૃતમ્ ॥ ૪૧.૧૯॥

૪૧.૨૦/૧સ્ત્રિયઃ પ્રમુદિતાસ્તત્ર દૃશ્યન્તે તનુમધ્યમાઃ ।
૪૧.૨૦/૨હારૈરલંકૃતગ્રીવાઃ પદ્મપત્રાયતેક્ષણાઃ ॥ ૪૧.૨૦॥

૪૧.૨૧/૧પીનોન્નતકુચાઃ શ્યામાઃ પૂર્ણચન્દ્રનિભાનનાઃ ।
૪૧.૨૧/૨સ્થિરાલકાઃ સુકપોલાઃ કાઞ્ચીનૂપુરનાદિતાઃ ॥ ૪૧.૨૧॥

૪૧.૨૨/૧સુકેશ્યશ્ચારુજઘનાઃ કર્ણાન્તાયતલોચનાઃ ।
૪૧.૨૨/૨સર્વલક્ષણસમ્પન્નાઃ સર્વાભરણભૂષિતાઃ ॥ ૪૧.૨૨॥

૪૧.૨૩/૧દિવ્યવસ્ત્રધરાઃ શુભ્રાઃ કાશ્ચિત્ કાઞ્ચનસંનિભાઃ ।
૪૧.૨૩/૨હંસવારણગામિન્યઃ કુચભારાવનામિતાઃ ॥ ૪૧.૨૩॥

૪૧.૨૪/૧દિવ્યગન્ધાનુલિપ્તાઙ્ગાઃ કર્ણાભરણભૂષિતાઃ ।
૪૧.૨૪/૨મદાલસાશ્ચ સુશ્રોણ્યો નિત્યં પ્રહસિતાનનાઃ ॥ ૪૧.૨૪॥

૪૧.૨૫/૧ઈષદ્વિસ્પષ્ટદશના બિમ્બૌષ્ઠા મધુરસ્વરાઃ ।
૪૧.૨૫/૨તામ્બૂલરઞ્જિતમુખા વિદગ્ધાઃ પ્રિયદર્શનાઃ ॥ ૪૧.૨૫॥

૪૧.૨૬/૧સુભગાઃ પ્રિયવાદિન્યો નિત્યં યૌવનગર્વિતાઃ ।
૪૧.૨૬/૨દિવ્યવસ્ત્રધરાઃ સર્વાઃ સદા ચારિત્રમણ્ડિતાઃ ॥ ૪૧.૨૬॥

૪૧.૨૭/૧ક્રીડન્તિ તાઃ સદા તત્ર સ્ત્રિયશ્ચાપ્સરસોપમાઃ ।
૪૧.૨૭/૨સ્વે સ્વે ગૃહે પ્રમુદિતા દિવા રાત્રૌ વરાનનાઃ ॥ ૪૧.૨૭॥

૪૧.૨૮/૧પુરુષાસ્તત્ર દૃશ્યન્તે રૂપયૌવનગર્વિતાઃ ।
૪૧.૨૮/૨સર્વલક્ષણસમ્પન્નાઃ સુમૃષ્ટમણિકુણ્ડલાઃ ॥ ૪૧.૨૮॥

૪૧.૨૯/૧બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચ મુનિસત્તમાઃ ।
૪૧.૨૯/૨સ્વધર્મનિરતાસ્તત્ર નિવસન્તિ સુધાર્મિકાઃ ॥ ૪૧.૨૯॥

૪૧.૩૦/૧અન્યાશ્ચ તત્ર તિષ્ઠન્તિ વારમુખ્યાઃ સુલોચનાઃ ।
૪૧.૩૦/૨ઘૃતાચીમેનકાતુલ્યાસ્તથા સમતિલોત્તમાઃ ॥ ૪૧.૩૦॥

૪૧.૩૧/૧ઉર્વશીસદૃશાશ્ચૈવ વિપ્રચિત્તિનિભાસ્તથા ।
૪૧.૩૧/૨વિશ્વાચીસહજન્યાભાઃ પ્રમ્લોચાસદૃશાસ્તથા ॥ ૪૧.૩૧॥

૪૧.૩૨/૧સર્વાસ્તાઃ પ્રિયવાદિન્યઃ સર્વા વિહસિતાનનાઃ ।
૪૧.૩૨/૨કલાકૌશલસંયુક્તાઃ સર્વાસ્તા ગુણસંયુતાઃ ॥ ૪૧.૩૨॥

૪૧.૩૩/૧એવં પણ્યસ્ત્રિયસ્તત્ર નૃત્યગીતવિશારદાઃ ।
૪૧.૩૩/૨નિવસન્તિ મુનિશ્રેષ્ઠાઃ સર્વસ્ત્રીગુણગર્વિતાઃ ॥ ૪૧.૩૩॥

૪૧.૩૪/૧પ્રેક્ષણાલાપકુશલાઃ સુન્દર્યઃ પ્રિયદર્શનાઃ ।
૪૧.૩૪/૨ન રૂપહીના દુર્વૃત્તા ન પરદ્રોહકારિકાઃ ॥ ૪૧.૩૪॥

૪૧.૩૫/૧યાસાં કટાક્ષપાતેન મોહં ગચ્છન્તિ માનવાઃ ।
૪૧.૩૫/૨ન તત્ર નિર્ધનાઃ સન્તિ ન મૂર્ખા ન પરદ્વિષઃ ॥ ૪૧.૩૫॥

૪૧.૩૬/૧ન રોગિણો ન મલિના ન કદર્યા ન માયિનઃ ।
૪૧.૩૬/૨ન રૂપહીના દુર્વૃત્તા ન પરદ્રોહકારિણઃ ॥ ૪૧.૩૬॥

૪૧.૩૭/૧તિષ્ઠન્તિ માનવાસ્તત્ર ક્ષેત્રે જગતિ વિશ્રુતે ।
૪૧.૩૭/૨સર્વત્ર સુખસંચારં સર્વસત્ત્વસુખાવહમ્ ॥ ૪૧.૩૭॥

૪૧.૩૮/૧નાનાજનસમાકીર્ણં સર્વસસ્યસમન્વિતમ્ ।
૪૧.૩૮/૨કર્ણિકારૈશ્ચ પનસૈશ્ચમ્પકૈર્નાગકેસરૈઃ ॥ ૪૧.૩૮॥

૪૧.૩૯/૧પાટલાશોકબકુલૈઃ કપિત્થૈર્બહુલૈર્ધવૈઃ ।
૪૧.૩૯/૨ચૂતનિમ્બકદમ્બૈશ્ચ તથાન્યૈઃ પુષ્પજાતિભિઃ ॥ ૪૧.૩૯॥

૪૧.૪૦/૧નીપકૈર્ધવખદિરૈર્લતાભિશ્ચ વિરાજિતમ્ ।
૪૧.૪૦/૨શાલૈસ્તાલૈસ્તમાલૈશ્ચ નારિકેલૈઃ શુભાઞ્જનૈઃ ॥ ૪૧.૪૦॥

૪૧.૪૧/૧અર્જુનૈઃ સમપર્ણૈશ્ચ કોવિદારૈઃ સપિપ્પલૈઃ ।

૪૧.૪૧/૨લકુચૈઃ સરલૈર્લોધ્રૈર્હિન્તાલૈર્દેવદારુભિઃ ॥ ૪૧.૪૧॥

૪૧.૪૨/૧પલાશૈર્મુચુકુન્દૈશ્ચ પારિજાતૈઃ સકુબ્જકૈઃ ।
૪૧.૪૨/૨કદલીવનખણ્ડૈશ્ચ જમ્બૂપૂગફલૈસ્તથા ॥ ૪૧.૪૨॥

૪૧.૪૩/૧કેતકીકરવીરૈશ્ચ અતિમુક્તૈશ્ચ કિંશુકૈઃ ।
૪૧.૪૩/૨મન્દારકુન્દપુષ્પૈશ્ચ તથાન્યૈઃ પુષ્પજાતિભિઃ ॥ ૪૧.૪૩॥

૪૧.૪૪/૧નાનાપક્ષિરુતૈઃ સેવ્યૈરુદ્યાનૈર્નન્દનોપમૈઃ ।
૪૧.૪૪/૨ફલભારાનતૈર્વૃક્ષૈઃ સર્વર્તુકુસુમોત્કરૈઃ ॥ ૪૧.૪૪॥

૪૧.૪૫/૧ચકોરૈઃ શતપત્રૈશ્ચ ભૃઙ્ગરાજૈશ્ચ કોકિલૈઃ ।
૪૧.૪૫/૨કલવિઙ્કૈર્મયૂરૈશ્ચ પ્રિયપુત્રૈઃ શુકૈસ્તથા ॥ ૪૧.૪૫॥

૪૧.૪૬/૧જીવંજીવકહારીતૈશ્ચાતકૈર્વનવેષ્ટિતૈઃ ।
૪૧.૪૬/૨નાનાપક્ષિગણૈશ્ચાન્યૈઃ કૂજદ્ભિર્મધુરસ્વરૈઃ ॥ ૪૧.૪૬॥

૪૧.૪૭/૧દીર્ઘિકાભિસ્તડાગૈશ્ચ પુષ્કરિણીભિશ્ચ વાપિભિઃ ।
૪૧.૪૭/૨નાનાજલાશયૈશ્ચાન્યૈઃ પદ્મિનીખણ્ડમણ્ડિતૈઃ ॥ ૪૧.૪૭॥

૪૧.૪૮/૧કુમુદૈઃ પુણ્ડરીકૈશ્ચ તથા નીલોત્પલૈઃ શુભૈઃ ।
૪૧.૪૮/૨કાદમ્બૈશ્ચક્રવાકૈશ્ચ તથૈવ જલકુક્કુટૈઃ ॥ ૪૧.૪૮॥

૪૧.૪૯/૧કારણ્ડવૈઃ પ્લવૈર્હંસૈસ્તથાન્યૈર્જલચારિભિઃ ।
૪૧.૪૯/૨એવં નાનાવિધૈર્વૃક્ષૈઃ પુષ્પૈર્નાનાવિધૈર્વરૈઃ ॥ ૪૧.૪૯॥

૪૧.૫૦/૧નાનાજલાશયૈઃ પુણ્યૈઃ શોભિતં તત્ સમન્તતઃ ।
૪૧.૫૦/૨આસ્તે તત્ર સ્વયં દેવઃ કૃત્તિવાસા વૃષધ્વજઃ ॥ ૪૧.૫૦॥

૪૧.૫૧/૧હિતાય સર્વલોકસ્ય ભુક્તિમુક્તિપ્રદઃ શિવઃ ।
૪૧.૫૧/૨પૃથિવ્યાં યાનિ તીર્થાનિ સરિતશ્ચ સરાંસિ ચ ॥ ૪૧.૫૧॥

૪૧.૫૨/૧પુષ્કરિણ્યસ્તડાગાનિ વાપ્યઃ કૂપાશ્ચ સાગરાઃ ।
૪૧.૫૨/૨તેભ્યઃ પૂર્વં સમાહૃત્ય જલબિન્દૂન્ પૃથક્ પૃથક્ ॥ ૪૧.૫૨॥

૪૧.૫૩/૧સર્વલોકહિતાર્થાય રુદ્રઃ સર્વસુરૈઃ સહ ।
૪૧.૫૩/૨તીર્થં બિન્દુસરો નામ તસ્મિન્ ક્ષેત્રે દ્વિજોત્તમાઃ ॥ ૪૧.૫૩॥

૪૧.૫૪/૧ચકાર ઋષિભિઃ સાર્ધં તેન બિન્દુસરઃ સ્મૃતમ્ ।
૪૧.૫૪/૨અષ્ટમ્યાં બહુલે પક્ષે માર્ગશીર્ષે દ્વિજોત્તમાઃ ॥ ૪૧.૫૪॥

૪૧.૫૫/૧યસ્તત્ર યાત્રાં કુરુતે વિષુવે વિજિતેન્દ્રિયઃ ।
૪૧.૫૫/૨વિધિવદ્ બિન્દુસરસિ સ્નાત્વા શ્રદ્ધાસમન્વિતઃ ॥ ૪૧.૫૫॥

૪૧.૫૬/૧દેવાન્ ઋષીન્ મનુષ્યાંશ્ચ પિતૃન્ સંતર્પ્ય વાગ્યતઃ ।
૪૧.૫૬/૨તિલોદકેન વિધિના નામગોત્રવિધાનવિત્ ॥ ૪૧.૫૬॥

૪૧.૫૭/૧સ્નાત્વૈવં વિધિવત્ તત્ર સોઽશ્વમેધફલં લભેત્ ।
૪૧.૫૭/૨ગ્રહોપરાગે વિષુવે સંક્રાન્ત્યામયને તથા ॥ ૪૧.૫૭॥

૪૧.૫૮/૧યુગાદિષુ ષડશીત્યાં તથાન્યત્ર શુભે તિથૌ ।
૪૧.૫૮/૨યે તત્ર દાનં વિપ્રેભ્યઃ પ્રયચ્છન્તિ ધનાદિકમ્ ॥ ૪૧.૫૮॥

૪૧.૫૯/૧અન્યતીર્થાચ્છતગુણં ફલં તે પ્રાપ્નુવન્તિ વૈ ।
૪૧.૫૯/૨પિણ્ડં યે સમ્પ્રયચ્છન્તિ પિતૃભ્યઃ સરસસ્તટે ॥ ૪૧.૫૯॥

૪૧.૬૦/૧પિતૃણામક્ષયાં તૃપ્તિં તે કુર્વન્તિ ન સંશયઃ ।
૪૧.૬૦/૨તતઃ શમ્ભોર્ગૃહં ગત્વા વાગ્યતઃ સંયતેન્દ્રિયઃ ॥ ૪૧.૬૦॥

૪૧.૬૧/૧પ્રવિશ્ય પૂજયેચ્છર્વં કૃત્વા તં ત્રિઃ પ્રદક્ષિણમ્ ।
૪૧.૬૧/૨ઘૃતક્ષીરાદિભિઃ સ્નાનં કારયિત્વા ભવં શુચિઃ ॥ ૪૧.૬૧॥

૪૧.૬૨/૧ચન્દનેન સુગન્ધેન વિલિપ્ય કુઙ્કુમેન ચ ।
૪૧.૬૨/૨તતઃ સમ્પૂજયેદ્ દેવં ચન્દ્રમૌલિમુમાપતિમ્ ॥ ૪૧.૬૨॥

૪૧.૬૩/૧પુષ્પૈર્નાનાવિધૈર્મેધ્યૈર્બિલ્વાર્કકમલાદિભિઃ ।
૪૧.૬૩/૨આગમોક્તેન મન્ત્રેણ વેદોક્તેન ચ શંકરમ્ ॥ ૪૧.૬૩॥

૪૧.૬૪/૧અદીક્ષિતસ્તુ નામ્નૈવ મૂલમન્ત્રેણ ચાર્ચયેત્ ।
૪૧.૬૪/૨એવં સમ્પૂજ્ય તં દેવં ગન્ધપુષ્પાનુરાગિભિઃ ॥ ૪૧.૬૪॥

૪૧.૬૫/૧ધૂપદીપૈશ્ચ નૈવેદ્યૈરુપહારૈસ્તથા સ્તવૈઃ ।
૪૧.૬૫/૨દણ્ડવત્પ્રણિપાતૈશ્ચ ગીતૈર્વાદ્યૈર્મનોહરૈઃ ॥ ૪૧.૬૫॥

૪૧.૬૬/૧નૃત્યજપ્યનમસ્કારૈર્જયશબ્દૈઃ પ્રદક્ષિણૈઃ ।
૪૧.૬૬/૨એવં સમ્પૂજ્ય વિધિવદ્ દેવદેવમુમાપતિમ્ ॥ ૪૧.૬૬॥

૪૧.૬૭/૧સર્વપાપવિનિર્મુક્તો રૂપયૌવનગર્વિતઃ ।
૪૧.૬૭/૨કુલૈકવિંશમુદ્ધૃત્ય દિવ્યાભરણભૂષિતાઃ ॥ ૪૧.૬૭॥

૪૧.૬૮/૧સૌવર્ણેન વિમાનેન કિઙ્કિણીજાલમાલિના ।
૪૧.૬૮/૨ઉપગીયમાનો ગન્ધર્વૈરપ્સરોભિરલંકૃતઃ ॥ ૪૧.૬૮॥

૪૧.૬૯/૧ઉદ્યોતયન્ દિશઃ સર્વાઃ શિવલોકં સ ગચ્છતિ ।
૪૧.૬૯/૨ભુક્ત્વા તત્ર સુખં વિપ્રા મનસઃ પ્રીતિદાયકમ્ ॥ ૪૧.૬૯॥

૪૧.૭૦/૧તલ્લોકવાસિભિઃ સાર્ધં યાવદ્ આભૂતસમ્પ્લવમ્ ।
૪૧.૭૦/૨તતસ્તસ્માદ્ ઇહાયાતઃ પૃથિવ્યાં પુણ્યસંક્ષયે ॥ ૪૧.૭૦॥

૪૧.૭૧/૧જાયતે યોગિનાં ગેહે ચતુર્વેદી દ્વિજોત્તમાઃ ।
૪૧.૭૧/૨યોગં પાશુપતં પ્રાપ્ય તતો મોક્ષમવાપ્નુયાત્ ॥ ૪૧.૭૧॥

૪૧.૭૨/૧શયનોત્થાપને ચૈવ સંક્રાન્ત્યામયને તથા ।
૪૧.૭૨/૨અશોકાખ્યાં તથાષ્ટમ્યાં પવિત્રારોપણે તથા ॥ ૪૧.૭૨॥

૪૧.૭૩/૧યે ચ પશ્યન્તિ તં દેવં કૃત્તિવાસસમુત્તમમ્ ।
૪૧.૭૩/૨વિમાનેનાર્કવર્ણેન શિવલોકં વ્રજન્તિ તે ॥ ૪૧.૭૩॥

૪૧.૭૪/૧સર્વકાલેઽપિ તં દેવં યે પશ્યન્તિ સુમેધસઃ ।
૪૧.૭૪/૨તેઽપિ પાપવિનિર્મુક્તાઃ શિવલોકં વ્રજન્તિ વૈ ॥ ૪૧.૭૪॥

૪૧.૭૫/૧દેવસ્ય પશ્ચિમે પૂર્વે દક્ષિણે ચોત્તરે તથા ।
૪૧.૭૫/૨યોજનદ્વિતયં સાર્ધં ક્ષેત્રં તદ્ ભુક્તિમુક્તિદમ્ ॥ ૪૧.૭૫॥

૪૧.૭૬/૧તસ્મિન્ ક્ષેત્રવરે લિઙ્ગં ભાસ્કરેશ્વરસંજ્ઞિતમ્ ।
૪૧.૭૬/૨પશ્યન્તિ યે તુ તં દેવં સ્નાત્વા કુણ્ડે મહેશ્વરમ્ ॥ ૪૧.૭૬॥

૪૧.૭૭/૧આદિત્યેનાર્ચિતં પૂર્વં દેવદેવં ત્રિલોચનમ્ ।
૪૧.૭૭/૨સર્વપાપવિનિર્મુક્તા વિમાનવરમાસ્થિતાઃ ॥ ૪૧.૭૭॥

૪૧.૭૮/૧ઉપગીયમાના ગન્ધર્વૈઃ શિવલોકં વ્રજન્તિ તે ।
૪૧.૭૮/૨તિષ્ઠન્તિ તત્ર મુદિતાઃ કલ્પમેકં દ્વિજોત્તમાઃ ॥ ૪૧.૭૮॥

૪૧.૭૯/૧ભુક્ત્વા તુ વિપુલાન્ ભોગાઞ્ શિવલોકે મનોરમાન્ ।
૪૧.૭૯/૨પુણ્યક્ષયાદ્ ઇહાયાતા જાયન્તે પ્રવરે કુલે ॥ ૪૧.૭૯॥

૪૧.૮૦/૧અથવા યોગિનાં ગેહે વેદવેદાઙ્ગપારગાઃ ।
૪૧.૮૦/૨ઉત્પદ્યન્તે દ્વિજવરાઃ સર્વભૂતહિતે રતાઃ ॥ ૪૧.૮૦॥

૪૧.૮૧/૧મોક્ષશાસ્ત્રાર્થકુશલાઃ સર્વત્ર સમબુદ્ધયઃ ।
૪૧.૮૧/૨યોગં શમ્ભોર્વરં પ્રાપ્ય તતો મોક્ષં વ્રજન્તિ તે ॥ ૪૧.૮૧॥

૪૧.૮૨/૧તસ્મિન્ ક્ષેત્રવરે પુણ્યે લિઙ્ગં યદ્ દૃશ્યતે દ્વિજાઃ ।

૪૧.૮૨/૨પૂજ્યાપૂજ્યં ચ સર્વત્ર વને રથ્યાન્તરેऽપિ વા ॥ ૪૧.૮૨॥

૪૧.૮૩/૧ચતુષ્પથે શ્મશાને વા યત્ર કુત્ર ચ તિષ્ઠતિ ।
૪૧.૮૩/૨દૃષ્ટ્વા તલ્લિઙ્ગમવ્યગ્રઃ શ્રદ્ધયા સુસમાહિતઃ ॥ ૪૧.૮૩॥

૪૧.૮૪/૧સ્નાપયિત્વા તુ તં ભક્ત્યા ગન્ધૈઃ પુષ્પૈર્મનોહરૈઃ ।
૪૧.૮૪/૨ધૂપૈર્દીપૈઃ સનૈવેદ્યૈર્નમસ્કારૈસ્તથા સ્તવૈઃ ॥ ૪૧.૮૪॥

૪૧.૮૫/૧દણ્ડવત્પ્રણિપાતૈશ્ચ નૃત્યગીતાદિભિસ્તથા ।
૪૧.૮૫/૨સમ્પૂજ્યૈવં વિધાનેન શિવલોકં વ્રજેન્ નરઃ ॥ ૪૧.૮૫॥

૪૧.૮૬/૧નારી વા દ્વિજશાર્દૂલાઃ સમ્પૂજ્ય શ્રદ્ધયાન્વિતા ।
૪૧.૮૬/૨પૂર્વોક્તં ફલમાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૪૧.૮૬॥

૪૧.૮૭/૧કઃ શક્નોતિ ગુણાન્ વક્તું સમગ્રાન્ મુનિસત્તમાઃ ।
૪૧.૮૭/૨તસ્ય ક્ષેત્રવરસ્યાથ ઋતે દેવાન્ મહેશ્વરાત્ ॥ ૪૧.૮૭॥

૪૧.૮૮/૧તસ્મિન્ ક્ષેત્રોત્તમે ગત્વા શ્રદ્ધયાશ્રદ્ધયાપિ વા ।
૪૧.૮૮/૨માધવાદિષુ માસેષુ નરો વા યદિ વાઙ્ગના ॥ ૪૧.૮૮॥

૪૧.૮૯/૧યસ્મિન્ યસ્મિંસ્તિથૌ વિપ્રાઃ સ્નાત્વા બિન્દુસરોમ્ભસિ ।
૪૧.૮૯/૨પશ્યેદ્ દેવં વિરૂપાક્ષં દેવીં ચ વરદાં શિવામ્ ॥ ૪૧.૮૯॥

૪૧.૯૦/૧ગણં ચણ્ડં કાર્ત્તિકેયં ગણેશં વૃષભં તથા ।
૪૧.૯૦/૨કલ્પદ્રુમં ચ સાવિત્રીં શિવલોકં સ ગચ્છતિ ॥ ૪૧.૯૦॥

૪૧.૯૧/૧સ્નાત્વા ચ કાપિલે તીર્થે વિધિવત્ પાપનાશને ।
૪૧.૯૧/૨પ્રાપ્નોત્યભિમતાન્ કામાગ્ શિવલોકં સ ગચ્છતિ ॥ ૪૧.૯૧॥

૪૧.૯૨/૧યઃ સ્તમ્ભ્યં તત્ર વિધિવત્ કરોતિ નિયતેન્દ્રિયઃ ।
૪૧.૯૨/૨કુલૈકવિંશમુદ્ધૃત્ય શિવલોકં સ ગચ્છતિ ॥ ૪૧.૯૨॥

૪૧.૯૩/૧એકામ્રકે શિવક્ષેત્રે વારાણસીસમે શુભે ।
૪૧.૯૩/૨સ્નાનં કરોતિ યસ્તત્ર મોક્ષં સ લભતે ધ્રુવમ્ ॥ ૪૧.૯૩॥

૪૨.૧/૧બ્રહ્મોવાચ । વિરજે વિરજા માતા બ્રહ્માણી સમ્પ્રતિષ્ઠિતા ।
૪૨.૧/૨યસ્યાઃ સંદર્શનાન્ મર્ત્યઃ પુનાત્યાસપ્તમં કુલમ્ ॥ ૪૨.૧॥

૪૨.૨/૧સકૃદ્ દૃષ્ટ્વા તુ તાં દેવીં ભક્ત્યાપૂજ્ય પ્રણમ્ય ચ ।
૪૨.૨/૨નરઃ સ્વવંશમુદ્ધૃત્ય મમ લોકં સ ગચ્છતિ ॥ ૪૨.૨॥

૪૨.૩/૧અન્યાશ્ચ તત્ર તિષ્ઠન્તિ વિરજે લોકમાતરઃ ।
૪૨.૩/૨સર્વપાપહરા દેવ્યો વરદા ભક્તિવત્સલાઃ ॥ ૪૨.૩॥

૪૨.૪/૧આસ્તે વૈતરણી તત્ર સર્વપાપહરા નદી ।
૪૨.૪/૨યસ્યાં સ્નાત્વા નરશ્રેષ્ઠઃ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૪૨.૪॥

૪૨.૫/૧આસ્તે સ્વયમ્ભૂસ્તત્રૈવ ક્રોડરૂપી હરિઃ સ્વયમ્ ।
૪૨.૫/૨દૃષ્ટ્વા પ્રણમ્ય તં ભક્ત્યા પરં વિષ્ણું વ્રજન્તિ તે ॥ ૪૨.૫॥

૪૨.૬/૧કાપિલે ગોગ્રહે સોમે તીર્થે ચાલાબુસંજ્ઞિતે ।
૪૨.૬/૨મૃત્યુંજયે ક્રોડતીર્થે વાસુકે સિદ્ધકેશ્વરે ॥ ૪૨.૬॥

૪૨.૭/૧તીર્થેષ્વેતેષુ મતિમાન્ વિરજે સંયતેન્દ્રિયઃ ।
૪૨.૭/૨ગત્વાષ્ટતીર્થં વિધિવત્ સ્નાત્વા દેવાન્ પ્રણમ્ય ચ ॥ ૪૨.૭॥

૪૨.૮/૧સર્વપાપવિનિર્મુક્તો વિમાનવરમાસ્થિતઃ ।
૪૨.૮/૨ઉપગીયમાનો ગન્ધર્વૈર્મમ લોકે મહીયતે ॥ ૪૨.૮॥

૪૨.૯/૧વિરજે યો મમ ક્ષેત્રે પિણ્ડદાનં કરોતિ વૈ ।
૪૨.૯/૨સ કરોત્યક્ષયાં તૃપ્તિં પિતૃણાં નાત્ર સંશયઃ ॥ ૪૨.૯॥

૪૨.૧૦/૧મમ ક્ષેત્રે મુનિશ્રેષ્ઠા વિરજે યે કલેવરમ્ ।
૪૨.૧૦/૨પરિત્યજન્તિ પુરુષાસ્તે મોક્ષં પ્રાપ્નુવન્તિ વૈ ॥ ૪૨.૧૦॥

૪૨.૧૧/૧સ્નાત્વા યઃ સાગરે મર્ત્યો દૃષ્ટ્વા ચ કપિલં હરિમ્ ।
૪૨.૧૧/૨પશ્યેદ્ દેવીં ચ વારાહીં સ યાતિ ત્રિદશાલયમ્ ॥ ૪૨.૧૧॥

૪૨.૧૨/૧સન્તિ ચાન્યાનિ તીર્થાનિ પુણ્યાન્યાયતનાનિ ચ ।
૪૨.૧૨/૨તત્કાલે તુ મુનિશ્રેષ્ઠા વેદિતવ્યાનિ તાનિ વૈ ॥ ૪૨.૧૨॥

૪૨.૧૩/૧સમુદ્રસ્યોત્તરે તીરે તસ્મિન્ દેશે દ્વિજોત્તમાઃ ।
૪૨.૧૩/૨આસ્તે ગુહ્યં પરં ક્ષેત્રં મુક્તિદં પાપનાશનમ્ ॥ ૪૨.૧૩॥

૪૨.૧૪/૧સર્વત્ર વાલુકાકીર્ણં પવિત્રં સર્વકામદમ્ ।
૪૨.૧૪/૨દશયોજનવિસ્તીર્ણં ક્ષેત્રં પરમદુર્લભમ્ ॥ ૪૨.૧૪॥

૪૨.૧૫/૧અશોકાર્જુનપુંનાગૈર્બકુલૈઃ સરલદ્રુમૈઃ ।
૪૨.૧૫/૨પનસૈર્નારિકેલૈશ્ચ શાલૈસ્તાલૈઃ કપિત્થકૈઃ ॥ ૪૨.૧૫॥

૪૨.૧૬/૧ચમ્પકૈઃ કર્ણિકારૈશ્ચ ચૂતબિલ્વૈઃ સપાટલૈઃ ।
૪૨.૧૬/૨કદમ્બૈઃ કોવિદારૈશ્ચ લકુચૈર્નાગકેસરૈઃ ॥ ૪૨.૧૬॥

૪૨.૧૭/૧પ્રાચીનામલકૈર્લોધ્રૈર્નારઙ્ગૈર્ધવખાદિરૈઃ ।
૪૨.૧૭/૨સર્જભૂર્જાશ્વકર્ણૈશ્ચ તમાલૈર્દેવદારુભિઃ ॥ ૪૨.૧૭॥

૪૨.૧૮/૧મન્દારૈઃ પારિજાતૈશ્ચ ન્યગ્રોધાગુરુચન્દનૈઃ ।
૪૨.૧૮/૨ખર્જૂરામ્રાતકૈઃ સિદ્ધૈર્મુચુકુન્દૈઃ સકિંશુકૈઃ ॥ ૪૨.૧૮॥

૪૨.૧૯/૧અશ્વત્થૈઃ સપ્તપર્ણૈશ્ચ મધુધારશુભાઞ્જનૈઃ ।
૪૨.૧૯/૨શિંશપામલકૈર્નીપૈર્નિમ્બતિન્દુવિભીતકૈઃ ॥ ૪૨.૧૯॥

૪૨.૨૦/૧સર્વર્તુફલગન્ધાઢ્યૈઃ સર્વર્તુકુસુમોજ્જ્વલૈઃ ।
૪૨.૨૦/૨મનોહ્લાદકરૈઃ શુભ્રૈર્નાનાવિહગનાદિતૈઃ ॥ ૪૨.૨૦॥

૪૨.૨૧/૧શ્રોત્રરમ્યૈઃ સુમધુરૈર્બલનિર્મદનેરિતૈઃ ।
૪૨.૨૧/૨મનસઃ પ્રીતિજનકૈઃ શબ્દૈઃ ખગમુખેરિતૈઃ ॥ ૪૨.૨૧॥

૪૨.૨૨/૧ચકોરૈઃ શતપત્રૈશ્ચ ભૃઙ્ગરાજૈસ્તથા શુકૈઃ ।
૪૨.૨૨/૨કોકિલૈઃ કલવિઙ્કૈશ્ચ હારીતૈર્જીવજીવકૈઃ ॥ ૪૨.૨૨॥

૪૨.૨૩/૧પ્રિયપુત્રૈશ્ચાતકૈશ્ચ તથાન્યૈર્મધુરસ્વરૈઃ ।
૪૨.૨૩/૨શ્રોત્રરમ્યૈઃ પ્રિયકરૈઃ કૂજદ્ભિશ્ચાર્વધિષ્ઠિતૈઃ ॥ ૪૨.૨૩॥

૪૨.૨૪/૧કેતકીવનખણ્ડૈશ્ચ અતિમુક્તૈઃ સકુબ્જકૈઃ ।
૪૨.૨૪/૨માલતીકુન્દબાણૈશ્ચ કરવીરૈઃ સિતેતરૈઃ ॥ ૪૨.૨૪॥

૪૨.૨૫/૧જમ્બીરકરુણાઙ્કોલૈર્દાડિમૈર્બીજપૂરકૈઃ ।
૪૨.૨૫/૨માતુલુઙ્ગૈઃ પૂગફલૈર્હિન્તાલૈઃ કદલીવનૈઃ ॥ ૪૨.૨૫॥

૪૨.૨૬/૧અન્યૈશ્ચ વિવિધૈર્વૃક્ષૈઃ પુષ્પૈશ્ચાન્યૈર્મનોહરૈઃ ।
૪૨.૨૬/૨લતાવિતાનગુલ્મૈશ્ચ વિવિધૈશ્ચ જલાશયૈઃ ॥ ૪૨.૨૬॥

૪૨.૨૭/૧દીર્ઘિકાભિસ્તડાગૈશ્ચ પુષ્કરિણીભિશ્ચ વાપિભિઃ ।
૪૨.૨૭/૨નાનાજલાશયૈઃ પુણ્યૈઃ પદ્મિનીખણ્ડમણ્ડિતૈઃ ॥ ૪૨.૨૭॥

૪૨.૨૮/૧સરાંસિ ચ મનોજ્ઞાનિ પ્રસન્નસલિલાનિ ચ ।
૪૨.૨૮/૨કુમુદૈઃ પુણ્ડરીકૈશ્ચ તથા નીલોત્પલૈઃ શુભૈઃ ॥ ૪૨.૨૮॥

૪૨.૨૯/૧કહ્લારૈઃ કમલૈશ્ચાપિ આચિતાનિ સમન્તતઃ ।
૪૨.૨૯/૨કાદમ્બૈશ્ચક્રવાકૈશ્ચ તથૈવ જલકુક્કુટૈઃ ॥ ૪૨.૨૯॥

૪૨.૩૦/૧કારણ્ડવૈઃ પ્લવૈર્હંસૈઃ કૂર્મૈર્મત્સ્યૈશ્ચ મદ્ગુભિઃ ।

૪૨.૩૦/૨દાત્યૂહસારસાકીર્ણૈઃ કોયષ્ટિબકશોભિતૈઃ ॥ ૪૨.૩૦॥

૪૨.૩૧/૧એતૈશ્ચાન્યૈશ્ચ કૂજદ્ભિઃ સમન્તાજ્જલચારિભિઃ ।
૪૨.૩૧/૨ખગૈર્જલચરૈશ્ચાન્યૈઃ કુસુમૈશ્ચ જલોદ્ભવૈઃ ॥ ૪૨.૩૧॥

૪૨.૩૨/૧એવં નાનાવિધૈર્વૃક્ષૈઃ પુષ્પૈઃ સ્થલજલોદ્ભવૈઃ ।
૪૨.૩૨/૨બ્રહ્મચારિગૃહસ્થૈશ્ચ વાનપ્રસ્થૈશ્ચ ભિક્ષુભિઃ ॥ ૪૨.૩૨॥

૪૨.૩૩/૧સ્વધર્મનિરતૈર્વર્ણૈસ્તથાન્યૈઃ સમલંકૃતમ્ ।
૪૨.૩૩/૨હૃષ્ટપુષ્ટજનાકીર્ણં નરનારીસમાકુલમ્ ॥ ૪૨.૩૩॥

૪૨.૩૪/૧અશેષવિદ્યાનિલયં સર્વધર્મગુણાકરમ્ ।
૪૨.૩૪/૨એવં સર્વગુણોપેતં ક્ષેત્રં પરમદુર્લભમ્ ॥ ૪૨.૩૪॥

૪૨.૩૫/૧આસ્તે તત્ર મુનિશ્રેષ્ઠા વિખ્યાતઃ પુરુષોત્તમઃ ।
૪૨.૩૫/૨યાવદ્ ઉત્કલમર્યાદા દિક્ ક્રમેણ પ્રકીર્તિતા ॥ ૪૨.૩૫॥

૪૨.૩૬/૧તાવત્ કૃષ્ણપ્રસાદેન દેશઃ પુણ્યતમો હિ સઃ ।
૪૨.૩૬/૨યત્ર તિષ્ઠતિ વિશ્વાત્મા દેશે સ પુરુષોત્તમઃ ॥ ૪૨.૩૬॥

૪૨.૩૭/૧જગદ્વ્યાપી જગન્નાથસ્તત્ર સર્વં પ્રતિષ્ઠિતમ્ ।
૪૨.૩૭/૨અહં રુદ્રશ્ચ શક્રશ્ચ દેવાશ્ચાગ્નિપુરોગમાઃ ॥ ૪૨.૩૭॥

૪૨.૩૮/૧નિવસામો મુનિશ્રેષ્ઠાસ્તસ્મિન્ દેશે સદા વયમ્ ।
૪૨.૩૮/૨ગન્ધર્વાપ્સરસઃ સર્વાઃ પિતરો દેવમાનુષાઃ ॥ ૪૨.૩૮॥

૪૨.૩૯/૧યક્ષા વિદ્યાધરાઃ સિદ્ધા મુનયઃ સંશિતવ્રતાઃ ।
૪૨.૩૯/૨ઋષયો વાલખિલ્યાશ્ચ કશ્યપાદ્યાઃ પ્રજેશ્વરાઃ ॥ ૪૨.૩૯॥

૪૨.૪૦/૧સુપર્ણાઃ કિંનરા નાગાસ્તથાન્યે સ્વર્ગવાસિનઃ ।
૪૨.૪૦/૨સાઙ્ગાશ્ચ ચતુરો વેદાઃ શાસ્ત્રાણિ વિવિધાનિ ચ ॥ ૪૨.૪૦॥

૪૨.૪૧/૧ઇતિહાસપુરાણાનિ યજ્ઞાશ્ચ વરદક્ષિણાઃ ।
૪૨.૪૧/૨નદ્યશ્ચ વિવિધાઃ પુણ્યાસ્તીર્થાન્યાયતનાનિ ચ ॥ ૪૨.૪૧॥

૪૨.૪૨/૧સાગરાશ્ચ તથા શૈલાસ્તસ્મિન્ દેશે વ્યવસ્થિતાઃ ।
૪૨.૪૨/૨એવં પુણ્યતમે દેશે દેવર્ષિપિતૃસેવિતે ॥ ૪૨.૪૨॥

૪૨.૪૩/૧સર્વોપભોગસહિતે વાસઃ કસ્ય ન રોચતે ।
૪૨.૪૩/૨શ્રેષ્ઠત્વં કસ્ય દેશસ્ય કિં ચાન્યદ્ અધિકં તતઃ ॥ ૪૨.૪૩॥

૪૨.૪૪/૧આસ્તે યત્ર સ્વયં દેવો મુક્તિદઃ પુરુષોત્તમઃ ।
૪૨.૪૪/૨ધન્યાસ્તે વિબુધપ્રખ્યા યે વસન્ત્યુત્કલે નરાઃ ॥ ૪૨.૪૪॥

૪૨.૪૫/૧તીર્થરાજજલે સ્નાત્વા પશ્યન્તિ પુરુષોત્તમમ્ ।
૪૨.૪૫/૨સ્વર્ગે વસન્તિ તે મર્ત્યા ન તે યાન્તિ યમાલયે ॥ ૪૨.૪૫॥

૪૨.૪૬/૧યે વસન્ત્યુત્કલે ક્ષેત્રે પુણ્યે શ્રીપુરુષોત્તમે ।
૪૨.૪૬/૨સફલં જીવિતં તેષામુત્કલાનાં સુમેધસામ્ ॥ ૪૨.૪૬॥

૪૨.૪૭/૧યે પશ્યન્તિ સુરશ્રેષ્ઠં પ્રસન્નાયતલોચનમ્ ।
૪૨.૪૭/૨ચારુભ્રૂકેશમુકુટં ચારુકર્ણાવતંસકમ્ ॥ ૪૨.૪૭॥

૪૨.૪૮/૧ચારુસ્મિતં ચારુદન્તં ચારુકુણ્ડલમણ્ડિતમ્ ।
૪૨.૪૮/૨સુનાસં સુકપોલં ચ સુલલાટં સુલક્ષણમ્ ॥ ૪૨.૪૮॥

૪૨.૪૯/૧ત્રૈલોક્યાનન્દજનનં કૃષ્ણસ્ય મુખપઙ્કજમ્ ॥ ૪૨.૪૯॥

૪૩.૧/૧બ્રહ્મોવાચ । પુરા કૃતયુગે વિપ્રાઃ શક્રતુલ્યપરાક્રમઃ ।
૪૩.૧/૨બભૂવ નૃપતિઃ શ્રીમાન્ ઇન્દ્રદ્યુમ્ન ઇતિ શ્રુતઃ ॥ ૪૩.૧॥

૪૩.૨/૧સત્યવાદી શુચિર્દક્ષઃ સર્વશાસ્ત્રવિશારદઃ ।
૪૩.૨/૨રૂપવાન્ સુભગઃ શૂરો દાતા ભોક્તા પ્રિયંવદઃ ॥ ૪૩.૨॥

૪૩.૩/૧યષ્ટા સમસ્તયજ્ઞાનાં બ્રહ્મણ્યઃ સત્યસંગરઃ ।
૪૩.૩/૨ધનુર્વેદે ચ વેદે ચ શાસ્ત્રે ચ નિપુણઃ કૃતી ॥ ૪૩.૩॥

૪૩.૪/૧વલ્લભો નરનારીણાં પૌર્ણમાસ્યાં યથા શશી ।
૪૩.૪/૨આદિત્ય ઇવ દુષ્પ્રેક્ષ્યઃ શત્રુસંઘભયંકરઃ ॥ ૪૩.૪॥

૪૩.૫/૧વૈષ્ણવઃ સત્ત્વસમ્પન્નો જિતક્રોધો જિતેન્દ્રિયઃ ।
૪૩.૫/૨અધ્યેતા યોગસાંખ્યાનાં મુમુક્ષુર્ધર્મતત્પરઃ ॥ ૪૩.૫॥

૪૩.૬/૧એવં સ પાલયન્ પૃથ્વીં રાજા સર્વગુણાકરઃ ।
૪૩.૬/૨તસ્ય બુદ્ધિઃ સમુત્પન્ના હરેરારાધનં પ્રતિ ॥ ૪૩.૬॥

૪૩.૭/૧કથમારાધયિષ્યામિ દેવદેવં જનાર્દનમ્ ।
૪૩.૭/૨કસ્મિન્ ક્ષેત્રેઽથવા તીર્થે નદીતીરે તથાશ્રમે ॥ ૪૩.૭॥

૪૩.૮/૧એવં ચિન્તાપરઃ સોઽથ નિરીક્ષ્ય મનસા મહીમ્ ।
૪૩.૮/૨આલોક્ય સર્વતીર્થાનિ ક્ષેત્રાણ્યથ પુરાણ્યપિ ॥ ૪૩.૮॥

૪૩.૯/૧તાનિ સર્વાણિ સંત્યજ્ય જગામાયતનં પુનઃ ।
૪૩.૯/૨વિખ્યાતં પરમં ક્ષેત્રં મુક્તિદં પુરુષોત્તમમ્ ॥ ૪૩.૯॥

૪૩.૧૦/૧સ ગત્વા તત્ ક્ષેત્રવરં સમૃદ્ધબલવાહનઃ ।
૪૩.૧૦/૨અયજચ્ચાશ્વમેધેન વિધિવદ્ ભૂરિદક્ષિણઃ ॥ ૪૩.૧૦॥

૪૩.૧૧/૧કારયિત્વા મહોત્સેધં પ્રાસાદં ચૈવ વિશ્રુતમ્ ।
૪૩.૧૧/૨તત્ર સંકર્ષણં કૃષ્ણં સુભદ્રાં સ્થાપ્ય વીર્યવાન્ ॥ ૪૩.૧૧॥

૪૩.૧૨/૧પઞ્ચતીર્થં ચ વિધિવત્ કૃત્વા તત્ર મહીપતિઃ ।
૪૩.૧૨/૨સ્નાનં દાનં તપો હોમં દેવતાપ્રેક્ષણં તથા ॥ ૪૩.૧૨॥

૪૩.૧૩/૧ભક્ત્યા ચારાધ્ય વિધિવત્ પ્રત્યહં પુરુષોત્તમમ્ ।
૪૩.૧૩/૨પ્રસાદાદ્ દેવદેવસ્ય તતો મોક્ષમવાપ્તવાન્ ॥ ૪૩.૧૩॥

૪૩.૧૪/૧માર્કણ્ડેયં ચ કૃષ્ણં ચ દૃષ્ટ્વા રામં ચ ભો દ્વિજાઃ ।
૪૩.૧૪/૨સાગરે ચેન્દ્રદ્યુમ્નાખ્યે સ્નાત્વા મોક્ષં લભેદ્ ધ્રુવમ્ ॥ ૪૩.૧૪॥

૪૩.૧૫/૧મુનય ઊચુઃ । કસ્માત્ સ નૃપતિઃ પૂર્વમિન્દ્રદ્યુમ્નો જગત્પતિઃ ।
૪૩.૧૫/૨જગામ પરમં ક્ષેત્રં મુક્તિદં પુરુષોત્તમમ્ ॥ ૪૩.૧૫॥

૪૩.૧૬/૧ગત્વા તત્ર સુરશ્રેષ્ઠ કથં સ નૃપસત્તમઃ ।
૪૩.૧૬/૨વાજિમેધેન વિધિવદ્ ઇષ્ટવાન્ પુરુષોત્તમમ્ ॥ ૪૩.૧૬॥

૪૩.૧૭/૧કથં સ સર્વફલદે ક્ષેત્રે પરમદુર્લભે ।
૪૩.૧૭/૨પ્રાસાદં કારયામાસ ચેષ્ટં ત્રૈલોક્યવિશ્રુતમ્ ॥ ૪૩.૧૭॥

૪૩.૧૮/૧કથં સ કૃષ્ણં રામં ચ સુભદ્રાં ચ પ્રજાપતે ।
૪૩.૧૮/૨નિર્મમે રાજશાર્દૂલઃ ક્ષેત્રં રક્ષિતવાન્ કથમ્ ॥ ૪૩.૧૮॥

૪૩.૧૯/૧કથં તત્ર મહીપાલઃ પ્રાસાદે ભુવનોત્તમે ।
૪૩.૧૯/૨સ્થાપયામાસ મતિમાન્ કૃષ્ણાદીંસ્ત્રિદશાર્ચિતાન્ ॥ ૪૩.૧૯॥

૪૩.૨૦/૧એતત્ સર્વં સુરશ્રેષ્ઠ વિસ્તરેણ યથાતથમ્ ।
૪૩.૨૦/૨વક્તુમર્હસ્યશેષેણ ચરિતં તસ્ય ધીમતઃ ॥ ૪૩.૨૦॥

૪૩.૨૧/૧ન તૃપ્તિમધિગચ્છામસ્તવ વાક્યામૃતેન વૈ ।
૪૩.૨૧/૨શ્રોતુમિચ્છામહે બ્રહ્મન્ પરં કૌતૂહલં હિ નઃ ॥ ૪૩.૨૧॥

૪૩.૨૨/૧બ્રહ્મોવાચ । સાધુ સાધુ દ્વિજશ્રેષ્ઠા યત્ પૃચ્છધ્વં પુરાતનમ્ ।
૪૩.૨૨/૨સર્વપાપહરં પુણ્યં ભુક્તિમુક્તિપ્રદં શુભમ્ ॥ ૪૩.૨૨॥

૪૩.૨૩/૧વક્ષ્યામિ તસ્ય ચરિતં યથાવૃત્તં કૃતે યુગે ।
૪૩.૨૩/૨શ્ૃણુધ્વં મુનિશાર્દૂલાઃ પ્રયતાઃ સંયતેન્દ્રિયાઃ ॥ ૪૩.૨૩ ॥

૪૩.૨૪/૧અવન્તી નામ નગરી માલવે ભુવિ વિશ્રુતા ।
૪૩.૨૪/૨બભૂવ તસ્ય નૃપતેઃ પૃથિવી કકુદોપમા ॥ ૪૩.૨૪ ॥

૪૩.૨૫/૧હૃષ્ટપુષ્ટજનાકીર્ણા દૃઢપ્રાકારતોરણા ।
૪૩.૨૫/૨દૃઢયન્ત્રાર્ગલદ્વારા પરિખાભિરલંકૃતા ॥ ૪૩.૨૫ ॥

૪૩.૨૬/૧નાનાવણિક્સમાકીર્ણા નાનાભાણ્ડસુવિક્રિયા ।
૪૩.૨૬/૨રથ્યાપણવતી રમ્યા ।
૪૩.૨૬/૩સુવિભક્તચતુષ્પથા ॥ ૪૩.૨૬ ॥

૪૩.૨૭/૧ગૃહગોપુરસમ્બાધા વીથીભિઃ સમલંકૃતા ।
૪૩.૨૭/૨રાજહંસનિભૈઃ શુભ્રૈશ્ચિત્રગ્રીવૈર્મનોહરૈઃ ॥ ૪૩.૨૭ ॥

૪૩.૨૮/૧અનેકશતસાહસ્રૈઃ પ્રાસાદૈઃ સમલંકૃતા ।
૪૩.૨૮/૨યજ્ઞોત્સવપ્રમુદિતા ગીતવાદિત્રનિસ્વના ॥ ૪૩.૨૮ ॥

૪૩.૨૯/૧નાનાવર્ણપતાકાભિર્ધ્વજૈશ્ચ સમલંકૃતા ।
૪૩.૨૯/૨હસ્ત્યશ્વરથસંકીર્ણા પદાતિગણસંકુલા ॥ ૪૩.૨૯ ॥

૪૩.૩૦/૧નાનાયોધસમાકીર્ણા નાનાજનપદૈર્યુતા ।
૪૩.૩૦/૨બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈશ્ચૈવ દ્વિજાતિભિઃ ॥ ૪૩.૩૦ ॥

૪૩.૩૧/૧સમૃદ્ધા સા મુનિશ્રેષ્ઠા વિદ્વદ્ભિઃ સમલંકૃતા ।
૪૩.૩૧/૨ન તત્ર મલિનાઃ સન્તિ ન મૂર્ખા નાપિ નિર્ધનાઃ ॥ ૪૩.૩૧ ॥

૪૩.૩૨/૧ન રોગિણો ન હીનાઙ્ગા ન ધૂતવ્યસનાન્વિતાઃ ।
૪૩.૩૨/૨સદા હૃષ્ટાઃ સુમનસો દૃશ્યન્તે પુરુષાઃ સ્ત્રિયઃ ॥ ૪૩.૩૨ ॥

૪૩.૩૩/૧ક્રીડન્તિ સ્મ દિવા રાત્રૌ હૃષ્ટાસ્તત્ર પૃથક્ પૃથક્ ।
૪૩.૩૩/૨સુવેષાઃ પુરુષાસ્તત્ર દૃશ્યન્તે મૃષ્ટકુણ્ડલાઃ ॥ ૪૩.૩૩ ॥

૪૩.૩૪/૧સુરૂપાઃ સુગુણાશ્ચૈવ દિવ્યાલંકારભૂષિતાઃ ।
૪૩.૩૪/૨કામદેવપ્રતીકાશાઃ સર્વલક્ષણલક્ષિતાઃ ॥ ૪૩.૩૪ ॥

૪૩.૩૫/૧સુકેશાઃ સુકપોલાશ્ચ સુમુખાઃ શ્મશ્રુધારિણઃ ।
૪૩.૩૫/૨જ્ઞાતારઃ સર્વશાસ્ત્રાણાં ભેત્તારઃ શત્રુવાહિનીમ્ ॥ ૪૩.૩૫ ॥

૪૩.૩૬/૧દાતારઃ સર્વરત્નાનાં ભોક્તારઃ સર્વસમ્પદામ્ ।
૪૩.૩૬/૨સ્ત્રિયસ્તત્ર મુનિશ્રેષ્ઠા દૃશ્યન્તે સુમનોહરાઃ ॥ ૪૩.૩૬॥

૪૩.૩૭/૧હંસવારણગામિન્યઃ પ્રફુલ્લામ્ભોજલોચનાઃ ।
૪૩.૩૭/૨સુમધ્યમાઃ સુજઘનાઃ પીનોન્નતપયોધરાઃ ॥ ૪૩.૩૭॥

૪૩.૩૮/૧સુકેશાશ્ચારુવદનાઃ સુકપોલાઃ સ્થિરાલકાઃ ।
૪૩.૩૮/૨હાવભાવાનતગ્રીવાઃ કર્ણાભરણભૂષિતાઃ ॥ ૪૩.૩૮॥

૪૩.૩૯/૧બિમ્બૌષ્ઠ્યો રઞ્જિતમુખાસ્તામ્બૂલેન વિરાજિતાઃ ।
૪૩.૩૯/૨સુવર્ણાભરણોપેતાઃ સર્વાલંકારભૂષિતાઃ ॥ ૪૩.૩૯॥

૪૩.૪૦/૧શ્યામાવદાતાઃ સુશ્રોણ્યઃ કાઞ્ચીનૂપુરનાદિતાઃ ।
૪૩.૪૦/૨દિવ્યમાલ્યામ્બરધરા દિવ્યગન્ધાનુલેપનાઃ ॥ ૪૩.૪૦॥

૪૩.૪૧/૧વિદગ્ધાઃ સુભગાઃ કાન્તાશ્ચાર્વઙ્ગ્યઃ પ્રિયદર્શનાઃ ।
૪૩.૪૧/૨રૂપલાવણ્યસંયુક્તાઃ સર્વાઃ પ્રહસિતાનનાઃ ॥ ૪૩.૪૧॥

૪૩.૪૨/૧ક્રીડન્ત્યશ્ચ મદોન્મત્તાઃ ચ ।
૪૩.૪૨/૨ગીતવાદ્યકથાલાપૈ રમયન્ત્યશ્ચ તાઃ સ્ત્રિયઃ ॥ ૪૩.૪૨॥

૪૩.૪૩/૧વારમુખ્યાશ્ચ દૃશ્યન્તે નૃત્યગીતવિશારદાઃ ।
૪૩.૪૩/૨પ્રેક્ષણાલાપકુશલાઃ સર્વયોષિદ્ગુણાન્વિતાઃ ॥ ૪૩.૪૩॥

૪૩.૪૪/૧અન્યાશ્ચ તત્ર દૃશ્યન્તે ગુણાચાર્યાઃ કુલસ્ત્રિયઃ ।
૪૩.૪૪/૨પતિવ્રતાશ્ચ સુભગા ગુણૈઃ સર્વૈરલંકૃતાઃ ॥ ૪૩.૪૪॥

૪૩.૪૫/૧વનૈશ્ચોપવનૈઃ પુણ્યૈરુદ્યાનૈશ્ચ મનોરમૈઃ ।
૪૩.૪૫/૨દેવતાયતનૈર્દિવ્યૈર્નાનાકુસુમશોભિતૈઃ ॥ ૪૩.૪૫॥

૪૩.૪૬/૧શાલૈસ્તાલૈસ્તમાલૈશ્ચ બકુલૈર્નાગકેસરૈઃ ।
૪૩.૪૬/૨પિપ્પલૈઃ કર્ણિકારૈશ્ચ ચન્દનાગુરુચમ્પકૈઃ ॥ ૪૩.૪૬॥

૪૩.૪૭/૧પુંનાગૈર્નારિકેરૈશ્ચ પનસૈઃ સરલદ્રુમૈઃ ।
૪૩.૪૭/૨નારઙ્ગૈર્લકુચૈર્લોધ્રૈઃ સપ્તપર્ણૈઃ શુભાઞ્જનૈઃ ॥ ૪૩.૪૭॥

૪૩.૪૮/૧ચૂતબિલ્વકદમ્બૈશ્ચ શિંશપૈર્ધવખાદિરૈઃ ।
૪૩.૪૮/૨પાટલાશોકતગરૈઃ કરવીરૈઃ સિતેતરૈઃ ॥ ૪૩.૪૮॥

૪૩.૪૯/૧પીતાર્જુનકભલ્લાતૈઃ સિદ્ધૈરામ્રાતકૈસ્તથા ।
૪૩.૪૯/૨ન્યગ્રોધાશ્વત્થકાશ્મર્યૈઃ પલાશૈર્દેવદારુભિઃ ॥ ૪૩.૪૯॥

૪૩.૫૦/૧મન્દારૈઃ પારિજાતૈશ્ચ તિન્તિડીકવિભીતકૈઃ ।
૪૩.૫૦/૨પ્રાચીનામલકૈઃ પ્લક્ષૈર્જમ્બૂશિરીષપાદપૈઃ ॥ ૪૩.૫૦॥

૪૩.૫૧/૧કાલેયૈઃ કાઞ્ચનારૈશ્ચ મધુજમ્બીરતિન્દુકૈઃ ।
૪૩.૫૧/૨ખર્જૂરાગસ્ત્યબકુલૈઃ શાખોટકહરીતકૈઃ ॥ ૪૩.૫૧॥

૪૩.૫૨/૧કઙ્કોલૈર્મુચુકુન્દૈશ્ચ હિન્તાલૈર્બીજપૂરકૈઃ ।
૪૩.૫૨/૨કેતકીવનખણ્ડૈશ્ચ અતિમુક્તૈઃ સકુબ્જકૈઃ ॥ ૪૩.૫૨॥

૪૩.૫૩/૧મલ્લિકાકુન્દબાણૈશ્ચ કદલીખણ્ડમણ્ડિતૈઃ ।
૪૩.૫૩/૨માતુલુઙ્ગૈઃ પૂગફલૈઃ કરુણૈઃ સિન્ધુવારકૈઃ ॥ ૪૩.૫૩॥

૪૩.૫૪/૧બહુવારૈઃ કોવિદારૈર્બદરૈઃ સકરઞ્જકૈઃ ।
૪૩.૫૪/૨અન્યૈશ્ચ વિવિધૈઃ પુષ્પ+ ।વૃક્ષૈશ્ચાન્યૈર્મનોહરૈઃ ॥ ૪૩.૫૪॥

૪૩.૫૫/૧લતાગુલ્મૈર્વિતાનૈશ્ચ ઉદ્યાનૈર્નન્દનોપમૈઃ ।
૪૩.૫૫/૨સદા કુસુમગન્ધાઢ્યૈઃ સદા ફલભરાનતૈઃ ॥ ૪૩.૫૫॥

૪૩.૫૬/૧નાનાપક્ષિરુતૈ રમ્યૈર્નાનામૃગગણાવૃતૈઃ ।
૪૩.૫૬/૨ચકોરૈઃ શતપત્રૈશ્ચ ભૃઙ્ગારૈઃ પ્રિયપુત્રકૈઃ ॥ ૪૩.૫૬॥

૪૩.૫૭/૧કલવિઙ્કૈર્મયૂરૈશ્ચ શુકૈઃ કોકિલકૈસ્તથા ।
૪૩.૫૭/૨કપોતૈઃ ખઞ્જરીટૈશ્ચ શ્યેનૈઃ પારાવતૈસ્તથા ॥ ૪૩.૫૭॥

૪૩.૫૮/૧ખગૈશ્ચાન્યૈર્બહુવિધૈઃ શ્રોત્રરમ્યૈર્મનોરમૈઃ ।
૪૩.૫૮/૨સરિતઃ પુષ્કરિણ્યશ્ચ સરાંસિ સુબહૂનિ ચ ॥ ૪૩.૫૮॥

૪૩.૫૯/૧અન્યૈર્જલાશયૈઃ પુણ્યૈઃ કુમુદોત્પલમણ્ડિતૈઃ ।
૪૩.૫૯/૨પદ્મૈઃ સિતેતરૈઃ શુભ્રૈઃ કહ્લારૈશ્ચ સુગન્ધિભિઃ ॥ ૪૩.૫૯॥

૪૩.૬૦/૧અન્યૈર્બહુવિધૈઃ પુષ્પૈર્જલજૈઃ સુમનોહરૈઃ ।
૪૩.૬૦/૨ગન્ધામોદકરૈર્દિવ્યૈઃ સર્વર્તુકુસુમોજ્જ્વલૈઃ ॥ ૪૩.૬૦॥

૪૩.૬૧/૧હંસકારણ્ડવાકીર્ણૈશ્ચક્રવાકોપશોભિતૈઃ ।
૪૩.૬૧/૨સારસૈશ્ચ બલાકૈશ્ચ કૂર્મૈર્મત્સ્યૈઃ સનક્રકૈઃ ॥ ૪૩.૬૧॥

૪૩.૬૨/૧જલપાદૈઃ કદમ્બૈશ્ચ પ્લવૈશ્ચ જલકુક્કુટૈઃ ।
૪૩.૬૨/૨ખગૈર્જલચરૈશ્ચાન્યૈર્નાનારવવિભૂષિતૈઃ ॥ ૪૩.૬૨॥

૪૩.૬૩/૧નાનાવર્ણૈઃ સદા હૃષ્ટૈરઞ્ચિતાનિ સમન્તતઃ ।

૪૩.૬૩/૨એવં નાનાવિધૈઃ પુષ્પૈર્વિવિધૈશ્ચ જલાશયૈઃ ॥ ૪૩.૬૩॥

૪૩.૬૪/૧વિવિધૈઃ પાદપૈઃ પુણ્યૈરુદ્યાનૈર્વિવિધૈસ્તથા ।
૪૩.૬૪/૨જલસ્થલચરૈશ્ચૈવ વિહગૈશ્ચાર્વધિષ્ઠિતૈઃ ॥ ૪૩.૬૪॥

૪૩.૬૫/૧દેવતાયતનૈર્દિવ્યૈઃ શોભિતા સા મહાપુરી ।
૪૩.૬૫/૨તત્રાસ્તે ભગવાન્ દેવસ્ત્રિપુરારિસ્ત્રિલોચનઃ ॥ ૪૩.૬૫॥

૪૩.૬૬/૧મહાકાલેતિ વિખ્યાતઃ સર્વકામપ્રદઃ શિવઃ ।
૪૩.૬૬/૨શિવકુણ્ડે નરઃ સ્નાત્વા વિધિવત્ પાપનાશને ॥ ૪૩.૬૬॥

૪૩.૬૭/૧દેવાન્ પિતૃન્ ઋષીંશ્ચૈવ સંતર્પ્ય વિધિવદ્ બુધઃ ।
૪૩.૬૭/૨ગત્વા શિવાલયં પશ્ચાત્ કૃત્વા તં ત્રિઃ પ્રદક્ષિણમ્ ॥ ૪૩.૬૭॥

૪૩.૬૮/૧પ્રવિશ્ય સંયતો ભૂત્વા ધૌતવાસા જિતેન્દ્રિયઃ ।
૪૩.૬૮/૨સ્નાનૈઃ પુષ્પૈસ્તથા ગન્ધૈર્ધૂપૈર્દીપૈશ્ચ ભક્તિતઃ ॥ ૪૩.૬૮॥

૪૩.૬૯/૧નૈવેદ્યૈરુપહારૈશ્ચ ગીતવાદ્યૈઃ પ્રદક્ષિણૈઃ ।
૪૩.૬૯/૨દણ્ડવત્પ્રણિપાતૈશ્ચ નૃત્યૈઃ સ્તોત્રૈશ્ચ શંકરમ્ ॥ ૪૩.૬૯॥

૪૩.૭૦/૧સમ્પૂજ્ય વિધિવદ્ ભક્ત્યા મહાકાલં સકૃચ્છિવમ્ ।
૪૩.૭૦/૨અશ્વમેધસહસ્રસ્ય ફલં પ્રાપ્નોતિ માનવઃ ॥ ૪૩.૭૦॥

૪૩.૭૧/૧પાપૈઃ સર્વૈર્વિનિર્મુક્તો વિમાનૈઃ સાર્વકામિકૈઃ ।
૪૩.૭૧/૨આરુહ્ય ત્રિદિવં યાતિ યત્ર શમ્ભોર્નિકેતનમ્ ॥ ૪૩.૭૧॥

૪૩.૭૨/૧દિવ્યરૂપધરઃ શ્રીમાન્ દિવ્યાલંકારભૂષિતઃ ।
૪૩.૭૨/૨ભુઙ્ક્તે તત્ર વરાન્ ભોગાન્ યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૪૩.૭૨॥

૪૩.૭૩/૧શિવલોકે મુનિશ્રેષ્ઠા જરામરણવર્જિતઃ ।
૪૩.૭૩/૨પુણ્યક્ષયાદ્ ઇહાયાતઃ પ્રવરે બ્રાહ્મણે કુલે ॥ ૪૩.૭૩॥

૪૩.૭૪/૧ચતુર્વેદી ભવેદ્ વિપ્રઃ સર્વશાસ્ત્રવિશારદઃ ।
૪૩.૭૪/૨યોગં પાશુપતં પ્રાપ્ય તતો મોક્ષમવાપ્નુયાત્ ॥ ૪૩.૭૪॥

૪૩.૭૫/૧આસ્તે તત્ર નદી પુણ્યા શિપ્રા નામેતિ વિશ્રુતા ।
૪૩.૭૫/૨તસ્યાં સ્નાતસ્તુ વિધિવત્ સંતર્પ્ય પિતૃદેવતાઃ ॥ ૪૩.૭૫॥

૪૩.૭૬/૧સર્વપાપવિનિર્મુક્તો વિમાનવરમાસ્થિતઃ ।
૪૩.૭૬/૨ભુઙ્ક્તે બહુવિધાન્ ભોગાન્ સ્વર્ગલોકે નરોત્તમઃ ॥ ૪૩.૭૬॥

૪૩.૭૭/૧આસ્તે તત્રૈવ ભગવાન્ દેવદેવો જનાર્દનઃ ।
૪૩.૭૭/૨ગોવિન્દસ્વામિનામાસૌ ભુક્તિમુક્તિપ્રદો હરિઃ ॥ ૪૩.૭૭॥

૪૩.૭૮/૧તં દૃષ્ટ્વા મુક્તિમાપ્નોતિ ત્રિસપ્તકુલસંયુતઃ ।
૪૩.૭૮/૨વિમાનેનાર્કવર્ણેન કિઙ્કિણીજાલમાલિના ॥ ૪૩.૭૮॥

૪૩.૭૯/૧સર્વકામસમૃદ્ધેન કામગેનાસ્થિરેણ ચ ।
૪૩.૭૯/૨ઉપગીયમાનો ગન્ધર્વૈર્વિષ્ણુલોકે મહીયતે ॥ ૪૩.૭૯॥

૪૩.૮૦/૧ભુઙ્ક્તે ચ વિવિધાન્ કામાન્ નિરાતઙ્કો ગતજ્વરઃ ।
૪૩.૮૦/૨આભૂતસમ્પ્લવં યાવત્ સુરૂપઃ સુભગઃ સુખી ॥ ૪૩.૮૦॥

૪૩.૮૧/૧કાલેનાગત્ય મતિમાન્ બ્રાહ્મણઃ સ્યાન્ મહીતલે ।
૪૩.૮૧/૨પ્રવરે યોગિનાં ગેહે વેદશાસ્ત્રાર્થતત્ત્વવિત્ ॥ ૪૩.૮૧॥

૪૩.૮૨/૧વૈષ્ણવં યોગમાસ્થાય તતો મોક્ષમવાપ્નુયાત્ ।
૪૩.૮૨/૨વિક્રમસ્વામિનામાનં વિષ્ણું તત્રૈવ ભો દ્વિજાઃ ॥ ૪૩.૮૨॥

૪૩.૮૩/૧દૃષ્ટ્વા નરો વા નારી વા ફલં પૂર્વોદિતં લભેત્ ।
૪૩.૮૩/૨અન્યેઽપિ તત્ર તિષ્ઠન્તિ દેવાઃ શક્રપુરોગમાઃ ॥ ૪૩.૮૩॥

૪૩.૮૪/૧માતરશ્ચ મુનિશ્રેષ્ઠાઃ સર્વકામફલપ્રદાઃ ।
૪૩.૮૪/૨દૃષ્ટ્વા તાન્ વિધિવદ્ ભક્ત્યા સમ્પૂજ્ય પ્રણિપત્ય ચ ॥ ૪૩.૮૪॥

૪૩.૮૫/૧સર્વપાપવિનિર્મુક્તો નરો યાતિ ત્રિવિષ્ટપમ્ ।
૪૩.૮૫/૨એવં સા નગરી રમ્યા રાજસિંહેન પાલિતા ॥ ૪૩.૮૫॥

૪૩.૮૬/૧નિત્યોત્સવપ્રમુદિતા યથેન્દ્રસ્યામરાવતી ।
૪૩.૮૬/૨પુરાષ્ટાદશસંયુક્તા સુવિસ્તીર્ણચતુષ્પથા ॥ ૪૩.૮૬॥

૪૩.૮૭/૧ધનુર્જ્યાઘોષનિનદા સિદ્ધસંગમભૂષિતા ।
૪૩.૮૭/૨વિદ્યાવદ્બ્રણભૂયિષ્ઠા વેદનિર્ઘોષનાદિતા ॥ ૪૩.૮૭॥

૪૩.૮૮/૧ઇતિહાસપુરાણાનિ શાસ્ત્રાણિ વિવિધાનિ ચ ।
૪૩.૮૮/૨કાવ્યાલાપકથાશ્ચૈવ શ્રૂયન્તેઽહર્નિશં દ્વિજાઃ ॥ ૪૩.૮૮॥

૪૩.૮૯/૧એવં મયા ગુણાઢ્યા સા તદુયિની?? સમુદાહૃતા ।
૪૩.૮૯/૨યસ્યાં રાજાભવત્ પૂર્વમિન્દ્રદ્યુમ્નો મહામતિઃ ॥ ૪૩.૮૯॥

૪૪.૧/૧બ્રહ્મોવાચ । તસ્યાં સ નૃપતિઃ પૂર્વં કુર્વન્ રાજ્યમનુત્તમમ્ ।
૪૪.૧/૨પાલયામાસ મતિમાન્ પ્રજાઃ પુત્રાન્ ઇવૌરસાન્ ॥ ૪૪.૧॥

૪૪.૨/૧સત્યવાદી મહાપ્રાજ્ઞઃ શૂરઃ સર્વગુણાકરઃ ।
૪૪.૨/૨મતિમાન્ ધર્મસમ્પન્નઃ સર્વશસ્ત્રભૃતાં વરઃ ॥ ૪૪.૨॥

૪૪.૩/૧સત્યવાગ્ શીલવાન્ દાન્તઃ શ્રીમાન્ પરપુરંજયઃ ।
૪૪.૩/૨આદિત્ય ઇવ તેજોભી રૂપૈરાશ્વિનયોરિવ ॥ ૪૪.૩॥

૪૪.૪/૧વર્ધમાનસુરાશ્ચર્યઃ શક્રતુલ્યપરાક્રમઃ ।
૪૪.૪/૨શારદેન્દુરિવાભાતિ લક્ષણૈઃ સમલંકૃતઃ ॥ ૪૪.૪॥

૪૪.૫/૧આહર્તા સર્વયજ્ઞાનાં હયમેધાદિકૃત્ તથા ।
૪૪.૫/૨દાનૈર્યજ્ઞૈસ્તપોભિશ્ચ તત્તુલ્યો નાસ્તિ ભૂપતિઃ ॥ ૪૪.૫॥

૪૪.૬/૧સુવર્ણમણિમુક્તાનાં ગજાશ્વાનાં ચ ભૂપતિઃ ।
૪૪.૬/૨પ્રદદૌ વિપ્રમુખ્યેભ્યો યાગે યાગે મહાધનમ્ ॥ ૪૪.૬॥

૪૪.૭/૧હસ્ત્યશ્વરથમુખ્યાનાં કમ્બલાજિનવાસસામ્ ।
૪૪.૭/૨રત્નાનાં ધનધાન્યાનામન્તસ્તસ્ય ન વિદ્યતે ॥ ૪૪.૭॥

૪૪.૮/૧એવં સર્વધનૈર્યુક્તો ગુણૈઃ સર્વૈરલંકૃતઃ ।
૪૪.૮/૨સર્વકામસમૃદ્ધાત્મા કુર્વન્ રાજ્યમકણ્ટકમ્ ॥ ૪૪.૮॥

૪૪.૯/૧તસ્યેયં મતિરુત્પન્ના સર્વયોગેશ્વરં હરિમ્ ।
૪૪.૯/૨કથમારાધયિષ્યામિ ભુક્તિમુક્તિપ્રદં પ્રભુમ્ ॥ ૪૪.૯॥

૪૪.૧૦/૧વિચાર્ય સર્વશાસ્ત્રાણિ તન્ત્રાણ્યાગમવિસ્તરમ્ ।
૪૪.૧૦/૨ઇતિહાસપુરાણાનિ વેદાઙ્ગાનિ ચ સર્વશઃ ॥ ૪૪.૧૦॥

૪૪.૧૧/૧ધર્મશાસ્ત્રાણિ સર્વાણિ નિયમાન્ ઋષિભાષિતાન્ ।
૪૪.૧૧/૨વેદાઙ્ગાનિ ચ શાસ્ત્રાણિ વિદ્યાસ્થાનાનિ યાનિ ચ ॥ ૪૪.૧૧॥

૪૪.૧૨/૧ગુરું સંસેવ્ય યત્નેન બ્રાહ્મણાન્ વેદપારગાન્ ।
૪૪.૧૨/૨આધાય પરમાં કાષ્ઠાં કૃતકૃત્યોઽભવત્ તદા ॥ ૪૪.૧૨॥

૪૪.૧૩/૧સમ્પ્રાપ્ય પરમં તત્ત્વં વાસુદેવાખ્યમવ્યયમ્ ।
૪૪.૧૩/૨ભ્રાન્તિજ્ઞાનાદ્ અતીતસ્તુ મુમુક્ષુઃ સંયતેન્દ્રિયઃ ॥ ૪૪.૧૩॥

૪૪.૧૪/૧કથમારાધયિષ્યામિ દેવદેવં સનાતનમ્ ।
૪૪.૧૪/૨પીતવસ્ત્રં ચતુર્બાહું શઙ્ખચક્રગદાધરમ્ ॥ ૪૪.૧૪॥

૪૪.૧૫/૧વનમાલાવૃતોરસ્કં પદ્મપત્ત્રાયતેક્ષણમ્ ।

૪૪.૧૫/૨શ્રીવત્સોરઃસમાયુક્તં મુકુટાઙ્ગદશોભિતમ્ ॥ ૪૪.૧૫॥

૪૪.૧૬/૧સ્વપુરાત્ સ તુ નિષ્ક્રાન્ત ઉજ્જયિન્યાઃ પ્રજાપતિઃ ।
૪૪.૧૬/૨બલેન મહતા યુક્તઃ સભૃત્યઃ સપુરોહિતઃ ॥ ૪૪.૧૬॥

૪૪.૧૭/૧અનુજગ્મુસ્તુ તં સર્વે રથિનઃ શસ્ત્રપાણયઃ ।
૪૪.૧૭/૨રથૈર્વિમાનસંકાશૈઃ પતાકાધ્વજસેવિતૈઃ ॥ ૪૪.૧૭॥

૪૪.૧૮/૧સાદિનશ્ચ તથા સર્વે પ્રાસતોમરપાણયઃ ।
૪૪.૧૮/૨અશ્વૈઃ પવનસંકાશૈરનુજગ્મુસ્તુ તં નૃપમ્ ॥ ૪૪.૧૮॥

૪૪.૧૯/૧હિમવત્સમ્ભવૈર્મત્તૈર્વારણૈઃ પર્વતોપમૈઃ ।
૪૪.૧૯/૨ઈષાદન્તૈઃ સદા મત્તૈઃ પ્રચણ્ડૈઃ ષષ્ટિહાયનૈઃ ॥ ૪૪.૧૯॥

૪૪.૨૦/૧હેમકક્ષૈઃ સપતાકૈર્ઘણ્ટારવવિભૂષિતૈઃ ।
૪૪.૨૦/૨અનુજગ્મુશ્ચ તં સર્વે ગજયુદ્ધવિશારદાઃ ॥ ૪૪.૨૦॥

૪૪.૨૧/૧અસંખ્યેયાશ્ચ પાદાતા ધનુષ્પ્રાસાસિપાણયઃ ।
૪૪.૨૧/૨દિવ્યમાલ્યામ્બરધરા દિવ્યગન્ધાનુલેપનાઃ ॥ ૪૪.૨૧॥

૪૪.૨૨/૧અનુજગ્મુશ્ચ તં સર્વે યુવાનો મૃષ્ટકુણ્ડલાઃ ।
૪૪.૨૨/૨સર્વાસ્ત્રકુશલાઃ શૂરાઃ સદા સંગ્રામલાલસાઃ ॥ ૪૪.૨૨॥

૪૪.૨૩/૧અન્તઃપુરનિવાસિન્યઃ સ્ત્રિયઃ સર્વાઃ સ્વલંકૃતાઃ ।
૪૪.૨૩/૨બિમ્બૌષ્ઠચારુદશનાઃ સર્વાભરણભૂષિતાઃ ॥ ૪૪.૨૩॥

૪૪.૨૪/૧દિવ્યવસ્ત્રધરાઃ સર્વા દિવ્યમાલ્યવિભૂષિતાઃ ।
૪૪.૨૪/૨દિવ્યગન્ધાનુલિપ્તાઙ્ગાઃ શરચ્ચન્દ્રનિભાનનાઃ ॥ ૪૪.૨૪॥

૪૪.૨૫/૧સુમધ્યમાશ્ચારુવેષાશ્ચારુકર્ણાલકાઞ્ચિતાઃ ।
૪૪.૨૫/૨તામ્બૂલરઞ્જિતમુખા રક્ષિભિશ્ચ સુરક્ષિતાઃ ॥ ૪૪.૨૫॥

૪૪.૨૬/૧યાનૈરુચ્ચાવચૈઃ શુભ્રૈર્મણિકાઞ્ચનભૂષિતૈઃ ।
૪૪.૨૬/૨ઉપગીયમાનાસ્તાઃ સર્વા ગાયનૈઃ સ્તુતિપાઠકૈઃ ॥ ૪૪.૨૬॥

૪૪.૨૭/૧વેષ્ટિતાઃ શસ્ત્રહસ્તૈશ્ચ પદ્મપત્રાયતેક્ષણાઃ ।
૪૪.૨૭/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા અનુજગ્મુશ્ચ તં નૃપમ્ ॥ ૪૪.૨૭॥

૪૪.૨૮/૧વણિગ્ગ્રામગણાઃ સર્વે નાનાપુરનિવાસિનઃ ।
૪૪.૨૮/૨ધનૈ રત્નૈઃ સુવર્ણૈશ્ચ સદારાઃ સપરિચ્છદાઃ ॥ ૪૪.૨૮॥

૪૪.૨૯/૧અસ્ત્રવિક્રયકાશ્ચૈવ તામ્બૂલપણ્યજીવિનઃ ।
૪૪.૨૯/૨તૃણવિક્રયકાશ્ચૈવ કાષ્ઠવિક્રયકારકાઃ ॥ ૪૪.૨૯॥

૪૪.૩૦/૧રઙ્ગોપજીવિનઃ સર્વે માંસવિક્રયિણસ્તથા ।
૪૪.૩૦/૨તૈલવિક્રયકાશ્ચૈવ વસ્ત્રવિક્રયકાસ્તથા ॥ ૪૪.૩૦॥

૪૪.૩૧/૧ફલવિક્રયિણશ્ચૈવ પત્રવિક્રયિણસ્તથા ।
૪૪.૩૧/૨તથા જવસહારાશ્ચ રજકાશ્ચ સહસ્રશઃ ॥ ૪૪.૩૧॥

૪૪.૩૨/૧ગોપાલા નાપિતાશ્ચૈવ તથાન્યે વસ્ત્રસૂચકાઃ ।
૪૪.૩૨/૨મેષપાલાશ્ચાજપાલા મૃગપાલાશ્ચ હંસકાઃ ॥ ૪૪.૩૨॥

૪૪.૩૩/૧ધાન્યવિક્રયિણશ્ચૈવ સક્તુવિક્રયિણશ્ચ યે ।
૪૪.૩૩/૨ગુડવિક્રયિકાશ્ચૈવ તથા લવણજીવિનઃ ॥ ૪૪.૩૩॥

૪૪.૩૪/૧ગાયના નર્તકાશ્ચૈવ તથા મઙ્ગલપાઠકાઃ ।
૪૪.૩૪/૨શૈલૂષાઃ કથકાશ્ચૈવ પુરાણાર્થવિશારદાઃ ॥ ૪૪.૩૪॥

૪૪.૩૫/૧કવયઃ કાવ્યકર્તારો નાનાકાવ્યવિશારદાઃ ।
૪૪.૩૫/૨વિષઘ્ના ગારુડાશ્ચૈવ નાનારત્નપરીક્ષકાઃ ॥ ૪૪.૩૫॥

૪૪.૩૬/૧વ્યોકારાસ્તામ્રકારાશ્ચ કાંસ્યકારાશ્ચ રૂઠકાઃ ।
૪૪.૩૬/૨કૌષકારાશ્ચિત્રકારાઃ કુન્દકારાશ્ચ પાવકાઃ ॥ ૪૪.૩૬॥

૪૪.૩૭/૧દણ્ડકારાશ્ચાસિકારાઃ સુરાધૂર્તોપજીવિનઃ ।
૪૪.૩૭/૨મલ્લા દૂતાશ્ચ કાયસ્થા યે ચાન્યે કર્મકારિણઃ ॥ ૪૪.૩૭॥

૪૪.૩૮/૧તન્તુવાયા રૂપકારા વાર્તિકાસ્તૈલપાઠકાઃ ।
૪૪.૩૮/૨લાવજીવાસ્તૈત્તિરિકા મૃગપક્ષ્યુપજીવિનઃ ॥ ૪૪.૩૮॥

૪૪.૩૯/૧ગજવૈદ્યાશ્ચ વૈદ્યાશ્ચ નરવૈદ્યાશ્ચ યે નરાઃ ।
૪૪.૩૯/૨વૃક્ષવૈદ્યાશ્ચ ગોવૈદ્યા યે ચાન્યે છેદદાહકાઃ ॥ ૪૪.૩૯॥

૪૪.૪૦/૧એતે નાગરકાઃ સર્વે યે ચાન્યે નાનુકીર્તિતાઃ ।
૪૪.૪૦/૨અનુજગ્મુસ્તુ રાજાનં સમસ્તપુરવાસિનઃ ॥ ૪૪.૪૦॥

૪૪.૪૧/૧યથા વ્રજન્તં પિતરં ગ્રામાન્તરં સમુત્સુકાઃ ।
૪૪.૪૧/૨અનુયાન્તિ યથા પુત્રાસ્તથા તં તેઽપિ નાગરાઃ ॥ ૪૪.૪૧॥

૪૪.૪૨/૧એવં સ નૃપતિઃ શ્રીમાન્ વૃતઃ સર્વૈર્મહાજનૈઃ ।
૪૪.૪૨/૨હસ્ત્યશ્વરથપાદાતૈર્જગામ ચ શનૈઃ શનૈઃ ॥ ૪૪.૪૨॥

૪૪.૪૩/૧એવં ગત્વા સ નૃપતિર્દક્ષિણસ્યોદધેસ્તટમ્ ।
૪૪.૪૩/૨સર્વૈસ્તૈર્દીર્ઘકાલેન બલૈરનુગતઃ પ્રભુઃ ॥ ૪૪.૪૩ ॥

૪૪.૪૪/૧દદર્શ સાગરં રમ્યં નૃત્યન્તમિવ ચ સ્થિતમ્ ।
૪૪.૪૪/૨અનેકશતસાહસ્રૈરૂર્મિભિશ્ચ સમાકુલમ્ ॥ ૪૪.૪૪ ॥

૪૪.૪૫/૧નાનારત્નાલયં પૂર્ણં નાનાપ્રાણિસમાકુલમ્ ।
૪૪.૪૫/૨વીચીતરઙ્ગબહુલં મહાશ્ચર્યસમન્વિતમ્ ॥ ૪૪.૪૫ ॥

૪૪.૪૬/૧તીર્થરાજં મહાશબ્દમપારં સુભયંકરમ્ ।
૪૪.૪૬/૨મેઘવૃન્દપ્રતીકાશમગાધં મકરાલયમ્ ॥ ૪૪.૪૬ ॥

૪૪.૪૭/૧મત્સ્યૈઃ કૂર્મૈશ્ચ શઙ્ખૈશ્ચ શુક્તિકાનક્રશઙ્કુભિઃ ।
૪૪.૪૭/૨શિંશુમારૈઃ કર્કટૈશ્ચ વૃતં સર્પૈર્મહાવિષૈઃ ॥ ૪૪.૪૭ ॥

૪૪.૪૮/૧લવણોદં હરેઃ સ્થાનં શયનસ્ય નદીપતિમ્ ।
૪૪.૪૮/૨સર્વપાપહરં પુણ્યં સર્વવાઞ્છાફલપ્રદમ્ ॥ ૪૪.૪૮ ॥

૪૪.૪૯/૧અનેકાવર્તગમ્ભીરં દાનવાનાં સમાશ્રયમ્ ।
૪૪.૪૯/૨અમૃતસ્યારણિં દિવ્યં દેવયોનિમપાં પતિમ્ ॥ ૪૪.૪૯ ॥

૪૪.૫૦/૧વિશિષ્ટં સર્વભૂતાનાં પ્રાણિનાં જીવધારણમ્ ।
૪૪.૫૦/૨સુપવિત્રં પવિત્રાણાં મઙ્ગલાનાં ચ મઙ્ગલમ્ ॥ ૪૪.૫૦ ॥

૪૪.૫૧/૧તીર્થાનામુત્તમં તીર્થમવ્યયં યાદસાં પતિમ્ ।
૪૪.૫૧/૨ચન્દ્રવૃદ્ધિક્ષયસ્યેવ યસ્ય માનં પ્રતિષ્ઠિતમ્ ॥ ૪૪.૫૧ ॥

૪૪.૫૨/૧અભેદ્યં સર્વભૂતાનાં દેવાનામમૃતાલયમ્ ।
૪૪.૫૨/૨ઉત્પત્તિસ્થિતિસંહાર+ એતુભૂતં સનાતનમ્ ॥ ૪૪.૫૨ ॥

૪૪.૫૩/૧ઉપજીવ્યં ચ સર્વેષાં પુણ્યં નદનદીપતિમ્ ।
૪૪.૫૩/૨દૃષ્ટ્વા તં નૃપતિશ્રેષ્ઠો વિસ્મયં પરમં ગતઃ ॥ ૪૪.૫૩ ॥

૪૪.૫૪/૧નિવાસમકરોત્ તત્ર વેલામસાદ્ય સાગરીમ્ ।
૪૪.૫૪/૨પુણ્યે મનોહરે દેશે સર્વભૂમિગુણૈર્યુતે ॥ ૪૪.૫૪ ॥

૪૪.૫૫/૧વૃતં શાલૈઃ કદમ્બૈશ્ચ પુંનાગૈઃ સરલદ્રુમૈઃ ।
૪૪.૫૫/૨પનસૈર્નારિકેલૈશ્ચ બકુલૈર્નાગકેસરૈઃ ॥ ૪૪.૫૫ ॥

૪૪.૫૬/૧તાલૈઃ પિપ્પલૈઃ ખર્જૂરૈર્નારઙ્ગૈર્બીજપૂરકૈઃ ।

૪૪.૫૬/૨શાલૈરામ્રાતકૈર્લોધ્રૈર્બકુલૈર્બહુવારકૈઃ ॥ ૪૪.૫૬॥

૪૪.૫૭/૧કપિત્થૈઃ કર્ણિકારૈશ્ચ પાટલાશોકચમ્પકૈઃ ।
૪૪.૫૭/૨દાડિમૈશ્ચ તમાલૈશ્ચ પારિજાતૈસ્તથાર્જુનૈઃ ॥ ૪૪.૫૭॥

૪૪.૫૮/૧પ્રાચીનામલકૈર્બિલ્વૈઃ પ્રિયઙ્ગુવટખાદિરૈઃ ।
૪૪.૫૮/૨ઇઙ્ગુદીસપ્તપર્ણૈશ્ચ અશ્વત્થાગસ્ત્યજમ્બુકૈઃ ॥ ૪૪.૫૮॥

૪૪.૫૯/૧મધુકૈઃ કર્ણિકારૈશ્ચ બહુવારૈઃ સતિન્દુકૈઃ ।
૪૪.૫૯/૨પલાશબદરૈર્નીપૈઃ સિદ્ધનિમ્બશુભાઞ્જનૈઃ ॥ ૪૪.૫૯॥

૪૪.૬૦/૧વારકૈઃ કોવિદારૈશ્ચ ભલ્લાતામલકૈસ્તથા ।
૪૪.૬૦/૨ઇતિ હિન્તાલકાઙ્કોલૈઃ કરઞ્જૈઃ સવિભીતકૈઃ ॥ ૪૪.૬૦॥

૪૪.૬૧/૧સસર્જમધુકાશ્મર્યૈઃ શાલ્મલીદેવદારુભિઃ ।
૪૪.૬૧/૨શાખોટકૈર્નિમ્બવટૈઃ કુમ્ભીકૌષ્ઠહરીતકૈઃ ॥ ૪૪.૬૧॥

૪૪.૬૨/૧ગુગ્ગુલૈશ્ચન્દનૈર્વૃક્ષૈસ્તથૈવાગુરુપાટલૈઃ ।
૪૪.૬૨/૨જમ્બીરકરુણૈર્વૃક્ષૈસ્તિન્તિડીરક્તચન્દનૈઃ ॥ ૪૪.૬૨॥

૪૪.૬૩/૧એવં નાનાવિધૈર્વૃક્ષૈસ્તથાન્યૈર્બહુપાદપૈઃ ।
૪૪.૬૩/૨કલ્પદ્રુમૈર્નિત્યફલૈઃ સર્વર્તુકુસુમોત્કરૈઃ ॥ ૪૪.૬૩॥

૪૪.૬૪/૧નાનાપક્ષિરુતૈર્દિવ્યૈર્મત્તકોકિલનાદિતૈઃ ।
૪૪.૬૪/૨મયૂરવરસંઘુષ્ટૈઃ શુકસારિકસંકુલૈઃ ॥ ૪૪.૬૪॥

૪૪.૬૫/૧હારીતૈર્ભૃઙ્ગરાજૈશ્ચ ચાતકૈર્બહુપુત્રકૈઃ ।
૪૪.૬૫/૨જીવંજીવકકાકોલૈઃ કલવિઙ્કૈઃ કપોતકૈઃ ॥ ૪૪.૬૫॥

૪૪.૬૬/૧ખગૈર્નાનાવિધૈશ્ચાન્યૈઃ શ્રોત્રરમ્યૈર્મનોહરૈઃ ।
૪૪.૬૬/૨પુષ્પિતાગ્રેષુ વૃક્ષેષુ કૂજદ્ભિશ્ચાર્વધિષ્ઠિતૈઃ ॥ ૪૪.૬૬॥

૪૪.૬૭/૧કેતકીવનખણ્ડૈશ્ચ સદા પુષ્પધરૈઃ સિતૈઃ ।
૪૪.૬૭/૨મલ્લિકાકુન્દકુસુમૈર્યૂથિકાતગરૈસ્તથા ॥ ૪૪.૬૭॥

૪૪.૬૮/૧કુટજૈર્બાણપુષ્પૈશ્ચ અતિમુક્તૈઃ સકુબ્જકૈઃ ।
૪૪.૬૮/૨માલતીકરવીરૈશ્ચ તથા કદલકાઞ્ચનૈઃ ॥ ૪૪.૬૮॥

૪૪.૬૯/૧અન્યૈર્નાનાવિધૈઃ પુષ્પૈઃ સુગન્ધૈશ્ચારુદર્શનૈઃ ।
૪૪.૬૯/૨વનોદ્યાનોપવનજૈર્નાનાવર્ણૈઃ સુગન્ધિભિઃ ॥ ૪૪.૬૯॥

૪૪.૭૦/૧વિદ્યાધરગણાકીર્ણૈઃ સિદ્ધચારણસેવિતૈઃ ।
૪૪.૭૦/૨ગન્ધર્વોરગરક્ષોભિર્ભૂતાપ્સરસકિંનરૈઃ ॥ ૪૪.૭૦॥

૪૪.૭૧/૧મુનિયક્ષગણાકીર્ણૈર્નાનાસત્ત્વનિષેવિતૈઃ ।
૪૪.૭૧/૨મૃગૈઃ શાખામૃગૈઃ સિંહૈર્વરાહમહિષાકુલૈઃ ॥ ૪૪.૭૧॥

૪૪.૭૨/૧તથાન્યૈઃ કૃષ્ણસારાદ્યૈર્મૃગૈઃ સર્વત્ર શોભિતૈઃ ।
૪૪.૭૨/૨શાર્દૂલૈર્દીપ્તમાતઙ્ગૈસ્તથાન્યૈર્વનચારિભિઃ ॥ ૪૪.૭૨॥

૪૪.૭૩/૧એવં નાનાવિધૈર્વૃક્ષૈરુદ્યાનૈર્નન્દનોપમૈઃ ।
૪૪.૭૩/૨લતાગુલ્મવિતાનૈશ્ચ વિવિધૈશ્ચ જલાશયૈઃ ॥ ૪૪.૭૩॥

૪૪.૭૪/૧હંસકારણ્ડવાકીર્ણૈઃ પદ્મિનીખણ્ડમણ્ડિતૈઃ ।
૪૪.૭૪/૨કાદમ્બૈશ્ચ પ્લવૈર્હંસૈશ્ચક્રવાકોપશોભિતૈઃ ॥ ૪૪.૭૪॥

૪૪.૭૫/૧કમલૈઃ શતપત્રૈશ્ચ કહ્લારૈઃ કુમુદોત્પલૈઃ ।
૪૪.૭૫/૨ખગૈર્જલચરૈશ્ચાન્યૈઃ પુષ્પૈર્જલસમુદ્ભવૈઃ ॥ ૪૪.૭૫॥

૪૪.૭૬/૧પર્વતૈર્દીપ્તશિખરૈશ્ચારુકન્દરમણ્ડિતૈઃ ।
૪૪.૭૬/૨નાનાવૃક્ષસમાકીર્ણૈર્નાનાધાતુવિભૂષિતૈઃ ॥ ૪૪.૭૬॥

૪૪.૭૭/૧સર્વાશ્ચર્યમયૈઃ શૃઙ્ગૈઃ સર્વભૂતાલયૈઃ શુભૈઃ ।
૪૪.૭૭/૨સર્વૌષધિસમાયુક્તૈર્વિપુલૈશ્ચિત્રસાનુભિઃ ॥ ૪૪.૭૭॥

૪૪.૭૮/૧એવં સર્વૈઃ સમુદિતૈઃ શોભિતં સુમનોહરૈઃ ।
૪૪.૭૮/૨દદર્શ સ મહીપાલઃ સ્થાનં ત્રૈલોક્યપૂજિતમ્ ॥ ૪૪.૭૮॥

૪૪.૭૯/૧દશયોજનવિસ્તીર્ણં પઞ્ચયોજનમાયતમ્ ।
૪૪.૭૯/૨નાનાશ્ચર્યસમાયુક્તં ક્ષેત્રં પરમદુર્લભમ્ ॥ ૪૪.૭૯॥

૪૫.૧/૧મુનય ઊચુઃ । તસ્મિન્ ક્ષેત્રવરે પુણ્યે વૈષ્ણવે પુરુષોત્તમે ।
૪૫.૧/૨કિં તત્ર પ્રતિમા પૂર્વં ન સ્થિતા વૈષ્ણવી પ્રભો ॥ ૪૫.૧॥

૪૫.૨/૧યેનાસૌ નૃપતિસ્તત્ર ગત્વા સબલવાહનઃ ।
૪૫.૨/૨સ્થાપયામાસ કૃષ્ણં ચ રામં ભદ્રાં શુભપ્રદામ્ ॥ ૪૫.૨॥

૪૫.૩/૧સંશયો નો મહાન્ અત્ર વિસ્મયશ્ચ જગત્પતે ।
૪૫.૩/૨શ્રોતુમિચ્છામહે સર્વં બ્રૂહિ તત્કારણં ચ નઃ ॥ ૪૫.૩॥

૪૫.૪/૧બ્રહ્મોવાચ । શૃણુધ્વં પૂર્વસંવૃત્તાં કથાં પાપપ્રણાશિનીમ્ ।
૪૫.૪/૨પ્રવક્ષ્યામિ સમાસેન શ્રિયા પૃષ્ટઃ પુરા હરિઃ ॥ ૪૫.૪॥

૪૫.૫/૧સુમેરોઃ કાઞ્ચને શ ૃઙ્ગે સર્વાશ્ચર્યસમન્વિતે ।
૪૫.૫/૨સિદ્ધવિદ્યાધરૈર્યક્ષૈઃ કિંનરૈરુપશોભિતે ॥ ૪૫.૫॥

૪૫.૬/૧દેવદાનવગન્ધર્વૈર્નાગૈરપ્સરસાં ગણૈઃ ।
૪૫.૬/૨મુનિભિર્ગુહ્યકૈઃ સિદ્ધૈઃ સૌપર્ણૈઃ સમરુદ્ગણૈઃ ॥ ૪૫.૬॥

૪૫.૭/૧અન્યૈર્દેવાલયૈઃ સાધ્યૈઃ કશ્યપાદ્યૈઃ પ્રજેશ્વરૈઃ ।
૪૫.૭/૨વાલખિલ્યાદિભિશ્ચૈવ શોભિતે સુમનોહરે ॥ ૪૫.૭॥

૪૫.૮/૧કર્ણિકારવનૈર્દિવ્યૈઃ સર્વર્તુકુસુમોત્કરૈઃ ।
૪૫.૮/૨જાતરૂપપ્રતીકાશૈર્ભૂષિતે સૂર્યસંનિભૈઃ ॥ ૪૫.૮॥

૪૫.૯/૧અન્યૈશ્ચ બહુભિર્વૃક્ષૈઃ શાલતાલાદિભિર્વનૈઃ ।
૪૫.૯/૨પુંનાગાશોકસરલ+ ંયગ્રોધામ્રાતકાર્જુનૈઃ ॥ ૪૫.૯॥

૪૫.૧૦/૧પારિજાતામ્રખદિર+ ંઈપબિલ્વકદમ્બકૈઃ ।
૪૫.૧૦/૨ધવખાદિરપાલાશ+ ।શીર્ષામલકતિન્દુકૈઃ ॥ ૪૫.૧૦॥

૪૫.૧૧/૧નારિઙ્ગકોલબકુલ+ ।લોધ્રદાડિમદારુકૈઃ ।
૪૫.૧૧/૨સર્જૈશ્ચ કર્ણૈસ્તગરૈઃ શિંશિભૂર્જવનિમ્બકૈઃ ॥ ૪૫.૧૧॥

૪૫.૧૨/૧અન્યૈશ્ચ કાઞ્ચનૈશ્ચૈવ ફલભારૈશ્ચ નામિતૈઃ ।
૪૫.૧૨/૨નાનાકુસુમગન્ધાઢ્યૈર્ભૂષિતે પુષ્પપાદપૈઃ ॥ ૪૫.૧૨॥

૪૫.૧૩/૧માલતીયૂથિકામલ્લી+ ।કુન્દબાણકુરુણ્ટકૈઃ ।
૪૫.૧૩/૨પાટલાગસ્ત્યકુટજ+ ંઅન્દારકુસુમાદિભિઃ ॥ ૪૫.૧૩॥

૪૫.૧૪/૧અન્યૈશ્ચ વિવિધૈઃ પુષ્પૈર્મનસઃ પ્રીતિદાયકૈઃ ।
૪૫.૧૪/૨નાનાવિહગસંઘૈશ્ચ કૂજદ્ભિર્મધુરસ્વરૈઃ ॥ ૪૫.૧૪॥

૪૫.૧૫/૧પુંસ્કોકિલરુતૈર્દિવ્યૈર્મત્તબર્હિણનાદિતૈઃ ।
૪૫.૧૫/૨એવં નાનાવિધૈર્વૃક્ષૈઃ પુષ્પૈર્નાનાવિધૈસ્તથા ॥ ૪૫.૧૫॥

૪૫.૧૬/૧ખગૈર્નાનાવિધૈશ્ચૈવ શોભિતે સુરસેવિતે ।
૪૫.૧૬/૨તત્ર સ્થિતં જગન્નાથં જગત્સ્રષ્ટારમવ્યયમ્ ॥ ૪૫.૧૬॥

૪૫.૧૭/૧સર્વલોકવિધાતારં વાસુદેવાખ્યમવ્યયમ્ ।
૪૫.૧૭/૨પ્રણમ્ય શિરસા દેવી લોકાનાં હિતકામ્યયા ।
૪૫.૧૭/૩પપ્રચ્છેમં મહાપ્રશ્નં પદ્મજા તમનુત્તમમ્ ॥ ૪૫.૧૭॥

૪૫.૧૮/૧શ્રીરુવાચ । બ્રૂહિ ત્વં સર્વલોકેશ સંશયં મે હૃદિ સ્થિતમ્ ।
૪૫.૧૮/૨મર્ત્યલોકે મહાશ્ચર્યે કર્મભૂમૌ સુદુર્લભે ॥ ૪૫.૧૮॥

૪૫.૧૯/૧લોભમોહગ્રહગ્રસ્તે કામક્રોધમહાર્ણવે ।
૪૫.૧૯/૨યેન મુચ્યેત દેવેશ અસ્માત્ સંસારસાગરાત્ ॥ ૪૫.૧૯॥

૪૫.૨૦/૧આચક્ષ્વ સર્વદેવેશ પ્રણતાં યદિ મન્યસે ।
૪૫.૨૦/૨ત્વદૃતે નાસ્તિ લોકેઽસ્મિન્ વક્તા સંશયનિર્ણયે ॥ ૪૫.૨૦॥

૪૫.૨૧/૧બ્રહ્મોવાચ । શ્રુત્વૈવં વચનં તસ્યા દેવદેવો જનાર્દનઃ ।
૪૫.૨૧/૨પ્રોવાચ પરયા પ્રીત્યા પરં સારામૃતોપમમ્ ॥ ૪૫.૨૧॥

૪૫.૨૨/૧શ્રીભગવાન્ ઉવાચ । સુખોપાસ્યઃ સુસાધ્યશ્ચાઽભિરામશ્ચ સુસત્ફલઃ ।
૪૫.૨૨/૨આસ્તે તીર્થવરે દેવિ વિખ્યાતઃ પુરુષોત્તમઃ ॥ ૪૫.૨૨॥

૪૫.૨૩/૧ન તેન સદૃશઃ કશ્ચિત્ ત્રિષુ લોકેષુ વિદ્યતે ।
૪૫.૨૩/૨કીર્તનાદ્ યસ્ય દેવેશિ મુચ્યતે સર્વપાતકૈઃ ॥ ૪૫.૨૩॥

૪૫.૨૪/૧ન વિજ્ઞાતોઽમરૈઃ સર્વૈર્ન દૈત્યૈર્ન ચ દાનવૈઃ ।
૪૫.૨૪/૨મરીચ્યાદ્યૈર્મુનિવરૈર્ગોપિતં મે વરાનને ॥ ૪૫.૨૪॥

૪૫.૨૫/૧તત્ તેઽહં સમ્પ્રવક્ષ્યામિ તીર્થરાજં ચ સામ્પ્રતમ્ ।
૪૫.૨૫/૨ભાવેનૈકેન સુશ્રોણિ શ‍ૃણુષ્વ વરવર્ણિનિ ॥ ૪૫.૨૫॥

૪૫.૨૬/૧આસીત્ કલ્પે સમુત્પન્ને નષ્ટે સ્થાવરજઙ્ગમે ।
૪૫.૨૬/૨પ્રલીના દેવગન્ધર્વ+ ।દૈત્યવિદ્યાધરોરગાઃ ॥ ૪૫.૨૬॥

૪૫.૨૭/૧તમોભૂતમિદં સર્વં ન પ્રાજ્ઞાયત કિંચન ।
૪૫.૨૭/૨તસ્મિગ્ જાગર્તિ ભૂતાત્મા પરમાત્મા જગદ્ગુરુઃ ॥ ૪૫.૨૭॥

૪૫.૨૮/૧શ્રીમાંસ્ત્રિમૂર્તિકૃદ્ દેવો જગત્કર્તા મહેશ્વરઃ ।
૪૫.૨૮/૨વાસુદેવેતિ વિખ્યાતો યોગાત્મા હરિરીશ્વરઃ ॥ ૪૫.૨૮॥

૪૫.૨૯/૧સોઽસૃજદ્ યોગનિદ્રાન્તે નાભ્યમ્ભોરુહમધ્યગમ્ ।
૪૫.૨૯/૨પદ્મકેશરસંકાશં બ્રહ્માણં ભૂતમવ્યયમ્ ॥ ૪૫.૨૯॥

૪૫.૩૦/૧તાદૃગ્ભૂતસ્તતો બ્રહ્મા સર્વલોકમહેશ્વરઃ ।
૪૫.૩૦/૨પઞ્ચભૂતસમાયુક્તં સૃજતે ચ શનૈઃ શનૈઃ ॥ ૪૫.૩૦॥

૪૫.૩૧/૧માત્રાયોનીનિ ભૂતાનિ સ્થૂલસૂક્ષ્માણિ યાનિ ચ ।
૪૫.૩૧/૨ચતુર્વિધાનિ સર્વાણિ સ્થાવરાણિ ચરાણિ ચ ॥ ૪૫.૩૧॥

૪૫.૩૨/૧તતઃ પ્રજાપતિર્બ્રહ્મા ચક્રે સર્વં ચરાચરમ્ ।
૪૫.૩૨/૨સંચિન્ત્ય મનસાત્માનં સસર્જ વિવિધાઃ પ્રજાઃ ॥ ૪૫.૩૨॥

૪૫.૩૩/૧મરીચ્યાદીન્ મુનીન્ સર્વાન્ દેવાસુરપિતૄન્ અપિ ।
૪૫.૩૩/૨યક્ષવિદ્યાધરાંશ્ચાન્યાન્ ગઙ્ગાદ્યાઃ સરિતસ્તથા ॥ ૪૫.૩૩॥

૪૫.૩૪/૧નરવાનરસિંહાંશ્ચ વિવિધાંશ્ચ વિહંગમાન્ ।
૪૫.૩૪/૨જરાયૂન્ અણ્ડજાન્ દેવિ સ્વેદજોદ્ભેદજાંસ્તથા ॥ ૪૫.૩૪॥

૪૫.૩૫/૧બ્રહ્મ ક્ષત્રં તથા વૈશ્યં શૂદ્રં ચૈવ ચતુષ્ટયમ્ ।
૪૫.૩૫/૨અન્ત્યજાતાંશ્ચ મ્લેચ્છાંશ્ચ સસર્જ વિવિધાન્ પૃથક્ ॥ ૪૫.૩૫॥

૪૫.૩૬/૧યત્ કિંચિજ્જીવસંજ્ઞં તુ તૃણગુલ્મપિપીલિકમ્ ।
૪૫.૩૬/૨બ્રહ્મા ભૂત્વા જગત્ સર્વં નિર્મમે સ ચરાચરમ્ ॥ ૪૫.૩૬॥

૪૫.૩૭/૧દક્ષિણાઙ્ગે તથાત્માનં સંચિન્ત્ય પુરુષં સ્વયમ્ ।
૪૫.૩૭/૨વામે ચૈવ તુ નારીં સ દ્વિધા ભૂતમકલ્પયત્ ॥ ૪૫.૩૭॥

૪૫.૩૮/૧તતઃ પ્રભૃતિ લોકેઽસ્મિન્ પ્રજા મૈથુનસમ્ભવાઃ ।
૪૫.૩૮/૨અધમોત્તમમધ્યાશ્ચ મમ ક્ષેત્રાણિ યાનિ ચ ॥ ૪૫.૩૮॥

૪૫.૩૯/૧એવં સંચિન્ત્ય દેવોઽસૌ પુરા સલિલયોનિજઃ ।
૪૫.૩૯/૨જગામ ધ્યાનમાસ્થાય વાસુદેવાત્મિકાં તનુમ્ ॥ ૪૫.૩૯॥

૪૫.૪૦/૧ધ્યાનમાત્રેણ દેવેન સ્વયમેવ જનાર્દનઃ ।
૪૫.૪૦/૨તસ્મિન્ ક્ષણે સમુત્પન્નઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૪૫.૪૦॥

૪૫.૪૧/૧સહસ્રશીર્ષા પુરુષઃ પુણ્ડરીકનિભેક્ષણઃ ।
૪૫.૪૧/૨સલિલધ્વાન્તમેઘાભઃ શ્રીમાઞ્ શ્રીવત્સલક્ષણઃ ॥ ૪૫.૪૧॥

૪૫.૪૨/૧અપશ્યત્ સહસા તં તુ બ્રહ્મા લોકપિતામહઃ ।
૪૫.૪૨/૨આસનૈરર્ઘ્યપાદ્યૈશ્ચ અક્ષતૈરભિનન્દ્ય ચ ॥ ૪૫.૪૨॥

૪૫.૪૩/૧તુષ્ટાવ પરમૈઃ સ્તોત્રૈર્વિરિઞ્ચિઃ સુસમાહિતઃ ।
૪૫.૪૩/૨તતોઽહમુક્તવાન્ દેવં બ્રહ્માણં કમલોદ્ભવમ્ ।
૪૫.૪૩/૩કારણં વદ માં તાત મમ ધ્યાનસ્ય સામ્પ્રતમ્ ॥ ૪૫.૪૩॥

૪૫.૪૪/૧બ્રહ્મોવાચ । જગદ્ધિતાય દેવેશ મર્ત્યલોકૈશ્ચ દુર્લભમ્ ।
૪૫.૪૪/૨સ્વર્ગદ્વારસ્ય માર્ગાણિ યજ્ઞદાનવ્રતાનિ ચ ॥ ૪૫.૪૪॥

૪૫.૪૫/૧યોગઃ સત્યં તપઃ શ્રદ્ધા તીર્થાનિ વિવિધાનિ ચ ।
૪૫.૪૫/૨વિહાય સર્વમેતેષાં સુખં તત્સાધનં વદ ॥ ૪૫.૪૫॥

૪૫.૪૬/૧સ્થાનં જગત્પતે મહ્યામુત્કૃષ્ટં ચ યદ્ ઉચ્યતે ।
૪૫.૪૬/૨સર્વેષામુત્તમં સ્થાનં બ્રૂહિ મે પુરુષોત્તમ ॥ ૪૫.૪૬॥

૪૫.૪૭/૧વિધાતુર્વચનં શ્રુત્વા તતોઽહં પ્રોક્તવાન્ પ્રિયે ।
૪૫.૪૭/૨શ઼ૃણુ બ્રહ્મન્ પ્રવક્ષ્યામિ નિર્મલં ભુવિ દુર્લભમ્ ॥ ૪૫.૪૭॥

૪૫.૪૮/૧ઉત્તમં સર્વક્ષેત્રાણાં ધન્યં સંસારતારણમ્ ।
૪૫.૪૮/૨ગોબ્રાહ્મણહિતં પુણ્યં ચાતુર્વર્ણ્યસુખોદયમ્ ॥ ૪૫.૪૮॥

૪૫.૪૯/૧ભુક્તિમુક્તિપ્રદં નૃણાં ક્ષેત્રં પરમદુર્લભમ્ ।
૪૫.૪૯/૨મહાપુણ્યં તુ સર્વેષાં સિદ્ધિદં વૈ પિતામહે ॥ ૪૫.૪૯॥

૪૫.૫૦/૧તસ્માદ્ આસીત્ સમુત્પન્નં તીર્થરાજં સનાતનમ્ ।
૪૫.૫૦/૨વિખ્યાતં પરમં ક્ષેત્રં ચતુર્યુગનિષેવિતમ્ ॥ ૪૫.૫૦॥

૪૫.૫૧/૧સર્વેષામેવ દેવાનામ્ ઋષીણાં બ્રહ્મચારિણામ્ ।
૪૫.૫૧/૨દૈત્યદાનવસિદ્ધાનાં ગન્ધર્વોરગરક્ષસામ્ ॥ ૪૫.૫૧॥

૪૫.૫૨/૧નાગવિદ્યાધરાણાં ચ સ્થાવરસ્ય ચરસ્ય ચ ।
૪૫.૫૨/૨ઉત્તમઃ પુરુષો યસ્માત્ તસ્માત્ સ પુરુષોત્તમઃ ॥ ૪૫.૫૨॥

૪૫.૫૩/૧દક્ષિણસ્યોદધેસ્તીરે ન્યગ્રોધો યત્ર તિષ્ઠતિ ।
૪૫.૫૩/૨દશયોજનવિસ્તીર્ણં ક્ષેત્રં પરમદુર્લભમ્ ॥ ૪૫.૫૩॥

૪૫.૫૪/૧યસ્તુ કલ્પે સમુત્પન્ને મહદુલ્કાનિબર્હણે ।
૪૫.૫૪/૨વિનાશં નૈવમભ્યેતિ સ્વયં તત્રૈવમાસ્થિતઃ ॥ ૪૫.૫૪॥

૪૫.૫૫/૧દૃષ્ટમાત્રે વટે તસ્મિંશ્છાયામાક્રમ્ય ચાસકૃત્ ।
૪૫.૫૫/૨બ્રહ્મહત્યાત્ પ્રમુચ્યેત પાપેષ્વન્યેષુ કા કથા ॥ ૪૫.૫૫॥

૪૫.૫૬/૧પ્રદક્ષિણા કૃતા યૈસ્તુ નમસ્કારશ્ચ જન્તુભિઃ ।
૪૫.૫૬/૨સર્વે વિધૂતપાપ્માનસ્તે ગતાઃ કેશવાલયમ્ ॥ ૪૫.૫૬॥

૪૫.૫૭/૧ન્યગ્રોધસ્યોત્તરે કિંચિદ્ દક્ષિણે કેશવસ્ય તુ ।
૪૫.૫૭/૨પ્રાસાદસ્તત્ર તિષ્ઠેત્ તુ પદં ધર્મમયં હિ તત્ ॥ ૪૫.૫૭॥

૪૫.૫૮/૧પ્રતિમાં તત્ર વૈ દૃષ્ટ્વા સ્વયં દેવેન નિર્મિતામ્ ।
૪૫.૫૮/૨અનાયાસેન વૈ યાન્તિ ભુવનં મે તતો નરાઃ ॥ ૪૫.૫૮॥

૪૫.૫૯/૧ગચ્છમાનાંસ્તુ તાન્ પ્રેક્ષ્ય એકદા ધર્મરાટ્ પ્રિયે ।
૪૫.૫૯/૨મદન્તિકમનુપ્રાપ્ય પ્રણમ્ય શિરસાબ્રવીત્ ॥ ૪૫.૫૯ ॥

૪૫.૬૦/૧યમ ઉવાચ । નમસ્તે ભગવન્ દેવ લોકનાથ જગત્પતે ।
૪૫.૬૦/૨ક્ષીરોદવાસિનં દેવં શેષભોગાનુશાયિનમ્ ॥ ૪૫.૬૦ ॥

૪૫.૬૧/૧વરં વરેણ્યં વરદં કર્તારમકૃતં પ્રભુમ્ ।
૪૫.૬૧/૨વિશ્વેશ્વરમજં વિષ્ણું સર્વજ્ઞમપરાજિતમ્ ॥ ૪૫.૬૧ ॥

૪૫.૬૨/૧નીલોત્પલદલશ્યામં પુણ્ડરીકનિભેક્ષણમ્ ।
૪૫.૬૨/૨સર્વજ્ઞં નિર્ગુણં શાન્તં જગદ્ધાતારમવ્યયમ્ ॥ ૪૫.૬૨ ॥

૪૫.૬૩/૧સર્વલોકવિધાતારં સર્વલોકસુખાવહમ્ ।
૪૫.૬૩/૨પુરાણં પુરુષં વેદ્યં વ્યક્તાવ્યક્તં સનાતનમ્ ॥ ૪૫.૬૩ ॥

૪૫.૬૪/૧પરાવરાણાં સ્રષ્ટારં લોકનાથં જગદ્ગુરુમ્ ।
૪૫.૬૪/૨શ્રીવત્સોરસ્કસંયુક્તં વનમાલાવિભૂષિતમ્ ॥ ૪૫.૬૪ ॥

૪૫.૬૫/૧પીતવસ્ત્રં ચતુર્બાહું શઙ્ખચક્રગદાધરમ્ ।
૪૫.૬૫/૨હારકેયૂરસંયુક્તં મુકુટાઙ્ગદધારિણમ્ ॥ ૪૫.૬૫ ॥

૪૫.૬૬/૧સર્વલક્ષણસમ્પૂર્ણં સર્વેન્દ્રિયવિવર્જિતમ્ ।
૪૫.૬૬/૨કૂટસ્થમચલં સૂક્ષ્મં જ્યોતીરૂપં સનાતનમ્ ॥ ૪૫.૬૬ ॥

૪૫.૬૭/૧ભાવાભાવવિનિર્મુક્તં વ્યાપિનં પ્રકૃતેઃ પરમ્ ।
૪૫.૬૭/૨નમસ્યામિ જગન્નાથમીશ્વરં સુખદં પ્રભુમ્ ॥ ૪૫.૬૭ ॥

૪૫.૬૮/૧ઇત્યેવં ધર્મરાજસ્તુ પુરા ન્યગ્રોધસંનિધૌ ।
૪૫.૬૮/૨સ્તુત્વા નાનાવિધૈઃ સ્તોત્રૈઃ પ્રણામમકરોત્ તદા ॥ ૪૫.૬૮ ॥

૪૫.૬૯/૧તં દૃષ્ટ્વા તુ મહાભાગે પ્રણતં પ્રાઞ્જલિસ્થિતમ્ ।
૪૫.૬૯/૨સ્તોત્રસ્ય કારણં દેવિ પૃષ્ટવાન્ અહમન્તકમ્ ॥ ૪૫.૬૯ ॥

૪૫.૭૦/૧વૈવસ્વત મહાબાહો સર્વદેવોત્તમો હ્યસિ ।
૪૫.૭૦/૨કિમર્થં સ્તુતવાન્ માં ત્વં સંક્ષેપાત્ તદ્ બ્રવીહિ મે ॥ ૪૫.૭૦ ॥

૪૫.૭૧/૧ધર્મરાજ ઉવાચ । અસ્મિન્ન્ આયતને પુણ્યે વિખ્યાતે પુરુષોત્તમે ।
૪૫.૭૧/૨ઇન્દ્રનીલમયી શ્રેષ્ઠા પ્રતિમા સાર્વકામિકી ॥ ૪૫.૭૧ ॥

૪૫.૭૨/૧તાં દૃષ્ટ્વા પુણ્ડરીકાક્ષ ભાવેનૈકેન શ્રદ્ધયા ।

૪૫.૭૨/૨શ્વેતાખ્યં ભવનં યાન્તિ નિષ્કામાશ્ચૈવ માનવાઃ ॥ ૪૫.૭૨॥

૪૫.૭૩/૧અતઃ કર્તું ન શક્નોમિ વ્યાપારમરિસૂદન ।
૪૫.૭૩/૨પ્રસીદ સુમહાદેવ સંહર પ્રતિમાં વિભો ॥ ૪૫.૭૩॥

૪૫.૭૪/૧શ્રુત્વા વૈવસ્વતસ્યૈતદ્ વાક્યમેતદ્ ઉવાચ હ ।
૪૫.૭૪/૨યમ તાં ગોપયિષ્યામિ સિકતાભિઃ સમન્તતઃ ॥ ૪૫.૭૪॥

૪૫.૭૫/૧તતઃ સા પ્રતિમા દેવિ વલ્લિભિર્ગોપિતા મયા ।
૪૫.૭૫/૨યથા તત્ર ન પશ્યન્તિ મનુજાઃ સ્વર્ગકાઙ્ક્ષિણઃ ॥ ૪૫.૭૫॥

૪૫.૭૬/૧પ્રચ્છાદ્ય વલ્લિકૈર્દેવિ જાતરૂપપરિચ્છદૈઃ ।
૪૫.૭૬/૨યમં પ્રસ્થાપયામાસ સ્વાં પુરીં દક્ષિણાં દિશમ્ ॥ ૪૫.૭૬॥

૪૫.૭૭/૧બ્રહ્મોવાચ । લુપ્તાયાં પ્રતિમાયાં તુ ઇન્દ્રનીલસ્ય ભો દ્વિજાઃ ।
૪૫.૭૭/૨તસ્મિન્ ક્ષેત્રવરે પુણ્યે વિખ્યાતે પુરુષોત્તમે ॥ ૪૫.૭૭॥

૪૫.૭૮/૧યો ભૂતસ્તત્ર વૃત્તાન્તો દેવદેવો જનાર્દનઃ ।
૪૫.૭૮/૨તં સર્વં કથયામાસ સ તસ્યૈ ભગવાન્ પુરા ॥ ૪૫.૭૮॥

૪૫.૭૯/૧ઇન્દ્રદ્યુમ્નસ્ય ગમનં ક્ષેત્રસંદર્શનં તથા ।
૪૫.૭૯/૨ક્ષેત્રસ્ય વર્ણનં ચૈવ પ્રાસાદકરણં તથા ॥ ૪૫.૭૯॥

૪૫.૮૦/૧હયમેધસ્ય યજનં સ્વપ્નદર્શનમેવ ચ ।
૪૫.૮૦/૨લવણસ્યોદધેસ્તીરે કાષ્ઠસ્ય દર્શનં તથા ॥ ૪૫.૮૦॥

૪૫.૮૧/૧દર્શનં વાસુદેવસ્ય શિલ્પિરાજસ્ય ચ દ્વિજાઃ ।
૪૫.૮૧/૨નિર્માણં પ્રતિમાયાસ્તુ યથાવર્ણં વિશેષતઃ ॥ ૪૫.૮૧॥

૪૫.૮૨/૧સ્થાપનં ચૈવ સર્વેષાં પ્રાસાદે ભુવનોત્તમે ।
૪૫.૮૨/૨યાત્રાકાલે ચ વિપ્રેન્દ્રાઃ કલ્પસંકીર્તનં તથા ॥ ૪૫.૮૨॥

૪૫.૮૩/૧માર્કણ્ડેયસ્ય ચરિતં સ્થાપનં શંકરસ્ય ચ ।
૪૫.૮૩/૨પઞ્ચતીર્થસ્ય માહાત્મ્યં દર્શનં શૂલપાણિનઃ ॥ ૪૫.૮૩॥

૪૫.૮૪/૧વટસ્ય દર્શનં ચૈવ વ્યુષ્ટિં તસ્ય ચ ભો દ્વિજાઃ ।
૪૫.૮૪/૨દર્શનં બલદેવસ્ય કૃષ્ણસ્ય ચ વિશેષતઃ ॥ ૪૫.૮૪॥

૪૫.૮૫/૧સુભદ્રાયાશ્ચ તત્રૈવ માહાત્મ્યં ચૈવ સર્વશઃ ।
૪૫.૮૫/૨દર્શનં નરસિંહસ્ય વ્યુષ્ટિસંકીર્તનં તથા ॥ ૪૫.૮૫॥

૪૫.૮૬/૧અનન્તવાસુદેવસ્ય દર્શનં ગુણકીર્તનમ્ ।
૪૫.૮૬/૨શ્વેતમાધવમાહાત્મ્યં સ્વર્ગદ્વારસ્ય દર્શનમ્ ॥ ૪૫.૮૬॥

૪૫.૮૭/૧ઉદધેર્દર્શનં ચૈવ સ્નાનં તર્પણમેવ ચ ।
૪૫.૮૭/૨સમુદ્રસ્નાનમાહાત્મ્યમિન્દ્રદ્યુમ્નસ્ય ચ દ્વિજાઃ ॥ ૪૫.૮૭॥

૪૫.૮૮/૧પઞ્ચતીર્થફલં ચૈવ મહાજ્યેષ્ઠં તથૈવ ચ ।
૪૫.૮૮/૨સ્થાનં કૃષ્ણસ્ય હલિનઃ પર્વયાત્રાફલં તથા ॥ ૪૫.૮૮॥

૪૫.૮૯/૧વર્ણનં વિષ્ણુલોકસ્ય ક્ષેત્રસ્ય ચ પુનઃ પુનઃ ।
૪૫.૮૯/૨પૂર્વં કથિતવાન્ સર્વં તસ્યૈ સ પુરુષોત્તમઃ ॥ ૪૫.૮૯॥

૪૬.૧/૧મુનય ઊચુઃ । શ્રોતુમિચ્છામહે દેવ કથાશેષં મહીપતેઃ ।
૪૬.૧/૨તસ્મિન્ ક્ષેત્રવરે ગત્વા કિં ચકાર નરાધિપઃ ॥ ૪૬.૧॥

૪૬.૨/૧બ્રહ્મોવાચ । શ ૃણુધ્વં મુનિશાર્દૂલાઃ પ્રવક્ષ્યામિ સમાસતઃ ।
૪૬.૨/૨ક્ષેત્રસંદર્શનં ચૈવ કૃત્યં તસ્ય ચ ભૂપતેઃ ॥ ૪૬.૨॥

૪૬.૩/૧ગત્વા તત્ર મહીપાલઃ ક્ષેત્રે ત્રૈલોક્યવિશ્રુતે ।
૪૬.૩/૨દદર્શ રમણીયાનિ સ્થાનાનિ સરિતસ્તથા ॥ ૪૬.૩॥

૪૬.૪/૧નદી તત્ર મહાપુણ્યા વિન્ધ્યપાદવિનિર્ગતા ।
૪૬.૪/૨સ્વિત્રોપલેતિ વિખ્યાતા સર્વપાપહરા શિવા ॥ ૪૬.૪॥

૪૬.૫/૧ગઙ્ગાતુલ્યા મહાસ્રોતા દક્ષિણાર્ણવગામિની ।
૪૬.૫/૨મહાનદીતિ નામ્ના સા પુણ્યતોયા સરિદ્વરા ॥ ૪૬.૫॥

૪૬.૬/૧દક્ષિણસ્યોદધેર્ગર્ભં શોભિતા ।
૪૬.૬/૨ઉભયોસ્તટયોર્યસ્યા ગ્રામાશ્ચ નગરાણિ ચ ॥ ૪૬.૬॥

૪૬.૭/૧દૃશ્યન્તે મુનિશાર્દૂલાઃ સુસસ્યાઃ સુમનોહરાઃ ।
૪૬.૭/૨હૃષ્ટપુષ્ટજનાકીર્ણા વસ્ત્રાલંકારભૂષિતાઃ ॥ ૪૬.૭॥

૪૬.૮/૧બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાસ્તત્ર પૃથક્ પૃથક્ ।
૪૬.૮/૨સ્વધર્મનિરતાઃ શાન્તા દૃશ્યન્તે શુભલક્ષણાઃ ॥ ૪૬.૮॥

૪૬.૯/૧તામ્બૂલપૂર્ણવદના માલાદામવિભૂષિતાઃ ।
૪૬.૯/૨વેદપૂર્ણમુખા વિપ્રાઃ સષડઙ્ગપદક્રમાઃ ॥ ૪૬.૯॥

૪૬.૧૦/૧અગ્નિહોત્રરતાઃ કેચિત્ કેચિદ્ ઔપાસનક્રિયાઃ ।
૪૬.૧૦/૨સર્વશાસ્ત્રાર્થકુશલા યજ્વાનો ભૂરિદક્ષિણાઃ ॥ ૪૬.૧૦॥

૪૬.૧૧/૧ચત્વારે રાજમાર્ગેષુ વનેષૂપવનેષુ ચ ।
૪૬.૧૧/૨સભામણ્ડલહર્મ્યેષુ દેવતાયતનેષુ ચ ॥ ૪૬.૧૧॥

૪૬.૧૨/૧ઇતિહાસપુરાણાનિ વેદાઃ સાઙ્ગાઃ સુલક્ષણાઃ ।
૪૬.૧૨/૨કાવ્યશાસ્ત્રકથાસ્તત્ર શ્રૂયન્તે ચ મહાજનૈઃ ॥ ૪૬.૧૨॥

૪૬.૧૩/૧સ્ત્રિયસ્તદ્દેશવાસિન્યો રૂપયૌવનગર્વિતાઃ ।
૪૬.૧૩/૨સમ્પૂર્ણલક્ષણોપેતા વિસ્તીર્ણશ્રોણિમણ્ડલાઃ ॥ ૪૬.૧૩॥

૪૬.૧૪/૧સરોરુહમુખાઃ શ્યામાઃ શરચ્ચન્દ્રનિભાનનાઃ ।
૪૬.૧૪/૨પીનોન્નતસ્તનાઃ સર્વાઃ સમૃદ્ધ્યા ચારુદર્શનાઃ ॥ ૪૬.૧૪॥

૪૬.૧૫/૧સૌવર્ણવલયાક્રાન્તા દિવ્યૈર્વસ્ત્રૈરલંકૃતાઃ ।
૪૬.૧૫/૨કદલીગર્ભસંકાશાઃ પદ્મકિઞ્જલ્કસપ્રભાઃ ॥ ૪૬.૧૫॥

૪૬.૧૬/૧બિમ્બાધરપુટાઃ કાન્તાઃ કર્ણાન્તાયતલોચનાઃ ।
૪૬.૧૬/૨સુમુખાશ્ચારુકેશાશ્ચ હાવભાવાવનામિતાઃ ॥ ૪૬.૧૬॥

૪૬.૧૭/૧કાશ્ચિત્ પદ્મપલાશાક્ષ્યઃ કાશ્ચિદ્ ઇન્દીવરેક્ષણાઃ ।
૪૬.૧૭/૨વિદ્યુદ્વિસ્પષ્ટદશનાસ્તન્વઙ્ગ્યશ્ચ તથાપરાઃ ॥ ૪૬.૧૭॥

૪૬.૧૮/૧કુટિલાલકસંયુક્તાઃ સીમન્તેન વિરાજિતાઃ ।
૪૬.૧૮/૨ગ્રીવાભરણસંયુક્તા માલ્યદામવિભૂષિતાઃ ॥ ૪૬.૧૮॥

૪૬.૧૯/૧કુણ્ડલૈ રત્નસંયુક્તૈઃ કર્ણપૂરૈર્મનોહરૈઃ ।
૪૬.૧૯/૨દેવયોષિત્પ્રતીકાશા દૃશ્યન્તે શુભલક્ષણાઃ ॥ ૪૬.૧૯॥

૪૬.૨૦/૧દિવ્યગીતવરૈર્ધન્યૈઃ ક્રીડમાના વરાઙ્ગનાઃ ।
૪૬.૨૦/૨વીણાવેણુમૃદઙ્ગૈશ્ચ પણવૈશ્ચૈવ ગોમુખૈઃ ॥ ૪૬.૨૦॥

૪૬.૨૧/૧શઙ્ખદુન્દુભિનિર્ઘોષૈર્નાનાવાદ્યૈર્મનોહરૈઃ ।
૪૬.૨૧/૨ક્રીડન્ત્યસ્તાઃ સદા હૃષ્ટા વિલાસિન્યઃ પરસ્પરમ્ ॥ ૪૬.૨૧॥

૪૬.૨૨/૧એવમાદિ તથાનેક+ ।ગીતવાદ્યવિશારદાઃ ।
૪૬.૨૨/૨દિવા રાત્રૌ સમાયુક્તાઃ કામોન્મત્તા વરાઙ્ગનાઃ ॥ ૪૬.૨૨॥

૪૬.૨૩/૧ભિક્ષુવૈખાનસૈઃ સિદ્ધૈઃ સ્નાતકૈર્બ્રહ્મચારિભિઃ ।
૪૬.૨૩/૨મન્ત્રસિદ્ધૈસ્તપઃસિદ્ધૈર્યજ્ઞસિદ્ધૈર્નિષેવિતમ્ ॥ ૪૬.૨૩॥

૪૬.૨૪/૧ઇત્યેવં દદૃશે રાજા ક્ષેત્રં પરમશોભનમ્ ।

૪૬.૨૪/૨અત્રૈવારાધયિષ્યામિ ભગવન્તં સનાતનમ્ ॥ ૪૬.૨૪॥

૪૬.૨૫/૧જગદ્ગુરું પરં દેવં પરં પારં પરં પદમ્ ।
૪૬.૨૫/૨સર્વેશ્વરેશ્વરં વિષ્ણુમનન્તમપરાજિતમ્ ॥ ૪૬.૨૫॥

૪૬.૨૬/૧ઇદં તન્માનસં તીર્થં જ્ઞાતં મે પુરુષોત્તમમ્ ।
૪૬.૨૬/૨કલ્પવૃક્ષો મહાકાયો ન્યગ્રોધો યત્ર તિષ્ઠતિ ॥ ૪૬.૨૬॥

૪૬.૨૭/૧પ્રતિમા ચેન્દ્રનીલાખ્યા સ્વયં દેવેન ગોપિતા ।
૪૬.૨૭/૨ન ચાત્ર દૃશ્યતે ચાન્યા પ્રતિમા વૈષ્ણવી શુભા ॥ ૪૬.૨૭॥

૪૬.૨૮/૧તથા યત્નં કરિષ્યામિ યથા દેવો જગત્પતિઃ ।
૪૬.૨૮/૨પ્રત્યક્ષં મમ ચાભ્યેતિ વિષ્ણુઃ સત્યપરાક્રમઃ ॥ ૪૬.૨૮॥

૪૬.૨૯/૧યજ્ઞૈર્દાનૈસ્તપોભિશ્ચ હોમૈર્ધ્યાનૈસ્તથાર્ચનૈઃ ।
૪૬.૨૯/૨ઉપવાસૈશ્ચ વિધિવચ્ચરેયં વ્રતમુત્તમમ્ ॥ ૪૬.૨૯॥

૪૬.૩૦/૧અનન્યમનસા ચૈવ તન્મના નાન્યમાનસઃ ।
૪૬.૩૦/૨વિષ્ણ્વાયતનવિન્યાસે પ્રારમ્ભં ચ કરોમ્યહમ્ ॥ ૪૬.૩૦॥

૪૭.૧/૧બ્રહ્મોવાચ ।  એવં સ પૃથિવીપાલશ્ચિન્તયિત્વા દ્વિજોત્તમાઃ ।
૪૭.૧/૨પ્રાસાદાર્થં હરેસ્તત્ર પ્રારમ્ભમકરોત્ તદા ॥ ૪૭.૧॥

૪૭.૨/૧આનાય્ય ગણકાન્ સર્વાન્ આચાર્યાગ્ શાસ્ત્રપારગાન્ ।
૪૭.૨/૨ભૂમિં સંશોધ્ય યત્નેન રાજા તુ પરયા મુદા ॥ ૪૭.૨॥

૪૭.૩/૧બ્રાહ્મણૈર્જ્ઞાનસમ્પન્નૈર્વેદશાસ્ત્રાર્થપારગૈઃ ।
૪૭.૩/૨અમાત્યૈર્મન્ત્રિભિશ્ચૈવ વાસ્તુવિદ્યાવિશારદૈઃ ॥ ૪૭.૩॥

૪૭.૪/૧તૈઃ સાર્ધં સ સમાલોચ્ય સુમુહૂર્તે શુભે દિને ।
૪૭.૪/૨સુચન્દ્રતારાસંયોગે ગ્રહાનુકૂલ્યસંયુતે ॥ ૪૭.૪॥

૪૭.૫/૧જયમઙ્ગલશબ્દૈશ્ચ નાનાવાદ્યૈર્મનોહરૈઃ ।
૪૭.૫/૨વેદાધ્યયનનિર્ઘોષૈર્ગીતૈઃ સુમધુરસ્વરૈઃ ॥ ૪૭.૫॥

૪૭.૬/૧પુષ્પલાજાક્ષતૈર્ગન્ધૈઃ પૂર્ણકુમ્ભૈઃ સદીપકૈઃ ।
૪૭.૬/૨દદાવર્ધ્યં તતો રાજા શ્રદ્ધયા સુસમાહિતઃ ॥ ૪૭.૬॥

૪૭.૭/૧દત્ત્વૈવમર્ધ્યં વિધિવદ્ આનાય્ય સ મહીપતિઃ ।
૪૭.૭/૨કલિઙ્ગાધિપતિં શૂરમુત્કલાધિપતિં તથા ।
૪૭.૭/૩કોશલાધિપતિં ચૈવ તાન્ ઉવાચ તદા નૃપઃ ॥ ૪૭.૭॥

૪૭.૮/૧રાજોવાચ । ગચ્છધ્વં સહિતાઃ સર્વે શિલાર્થે સુસમાહિતાઃ ।
૪૭.૮/૨ગૃહીત્વા શિલ્પિમુખ્યાંશ્ચ શિલાકર્મવિશારદાન્ ॥ ૪૭.૮॥

૪૭.૯/૧વિન્ધ્યાચલં સુવિસ્તીર્ણં બહુકન્દરશોભિતમ્ ।
૪૭.૯/૨નિરૂપ્ય સર્વસાનૂનિ *च्छेदयित्वा શિલાઃ શુભાઃ ।
૪૭.૯/૩સંવાહ્યન્તાં ચ શકટૈર્નૌકાભિર્મા વિલમ્બથ ॥ ૪૭.૯॥

૪૭.૧૦/૧બ્રહ્મોવાચ । એવં ગન્તું સમાદિશ્ય તાન્ નૃપાન્ સ મહીપતિઃ ।
૪૭.૧૦/૨પુનરેવાબ્રવીદ્ વાક્યં સામાત્યાન્ સપુરોહિતાન્ ॥ ૪૭.૧૦॥

૪૭.૧૧/૧રાજોવાચ । ગચ્છન્તુ દૂતાઃ સર્વત્ર મમાજ્ઞાં પ્રવદન્તુ વૈ ।
૪૭.૧૧/૨યત્ર તિષ્ઠન્તિ રાજાનઃ પૃથિવ્યાં તાન્ સુશીઘ્રગાઃ ॥ ૪૭.૧૧॥

૪૭.૧૨/૧હસ્ત્યશ્વરથપાદાતૈઃ સામાત્યૈઃ સપુરોહિતૈઃ ।
૪૭.૧૨/૨ગચ્છત સહિતાઃ સર્વ ઇન્દ્રદ્યુમ્નસ્ય શાસનાત્ ॥ ૪૭.૧૨॥

૪૭.૧૩/૧બ્રહ્મોવાચ । એવં દૂતાઃ સમાજ્ઞાતા રાજ્ઞા તેન મહાત્મના ।
૪૭.૧૩/૨ગત્વા તદા નૃપાન્ ઊચુર્વચનં તસ્ય ભૂપતેઃ ॥ ૪૭.૧૩॥

૪૭.૧૪/૧શ્રુત્વા તુ તે તથા સર્વે દૂતાનાં વચનં નૃપાઃ ।
૪૭.૧૪/૨આજગ્મુસ્ત્વરિતાઃ સર્વે સ્વસૈન્યૈઃ પરિવારિતાઃ ॥ ૪૭.૧૪॥

૪૭.૧૫/૧યે નૃપાઃ સર્વદિગ્ભાગે યે ચ દક્ષિણતઃ સ્થિતાઃ ।
૪૭.૧૫/૨પશ્ચિમાયાં સ્થિતા યે ચ ઉત્તરાપથસંસ્થિતાઃ ॥ ૪૭.૧૫॥

૪૭.૧૬/૧પ્રત્યન્તવાસિનો યેઽપિ યે ચ સંનિધિવાસિનઃ ।
૪૭.૧૬/૨પાર્વતીયાશ્ચ યે કેચિત્ તથા દ્વીપનિવાસિનઃ ॥ ૪૭.૧૬॥

૪૭.૧૭/૧રથૈર્નાગૈઃ પદાતૈશ્ચ વાજિભિર્ધનવિસ્તરૈઃ ।
૪૭.૧૭/૨સમ્પ્રાપ્તા બહુશો વિપ્રાઃ શ્રુત્વેન્દ્રદ્યુમ્નશાસનમ્ ॥ ૪૭.૧૭॥

૪૭.૧૮/૧તાન્ આગતાન્ નૃપાન્ દૃષ્ટ્વા સામાત્યાન્ સપુરોહિતાન્ ।
૪૭.૧૮/૨પ્રોવાચ રાજા હૃષ્ટાત્મા કાર્યમુદ્દિશ્ય સાદરમ્ ॥ ૪૭.૧૮॥

૪૭.૧૯/૧રાજોવાચ । શ ૃણુધ્વં નૃપશાર્દૂલા યથા કિંચિદ્ બ્રવીમ્યહમ્ ।
૪૭.૧૯/૨અસ્મિન્ ક્ષેત્રવરે પુણ્યે ભુક્તિમુક્તિપ્રદે શિવે ॥ ૪૭.૧૯॥

૪૭.૨૦/૧હયમેધં મહાયજ્ઞં પ્રાસાદં ચૈવ વૈષ્ણવમ્ ।
૪૭.૨૦/૨કથં શક્નોમ્યહં કર્તુમિતિ ચિન્તાકુલં મનઃ ॥ ૪૭.૨૦॥

૪૭.૨૧/૧ભવદ્ભિઃ સુસહાયૈસ્તુ સર્વમેતત્ કરોમ્યહમ્ ।
૪૭.૨૧/૨યદિ યૂયં સહાયા મે ભવધ્વં નૃપસત્તમાઃ ॥ ૪૭.૨૧॥

૪૭.૨૨/૧બ્રહ્મોવાચ । ઇત્યેવં વદમાનસ્ય રાજરાજસ્ય ધીમતઃ ।
૪૭.૨૨/૨સર્વે પ્રમુદિતા હૃષ્ટા ભૂપાસ્તે તસ્ય શાસનાત્ ॥ ૪૭.૨૨॥

૪૭.૨૩/૧વવૃષુર્ધનરત્નૈશ્ચ સુવર્ણમણિમૌક્તિકૈઃ ।
૪૭.૨૩/૨કમ્બલાજિનરત્નૈશ્ચ રાઙ્કુવાસ્તરણૈઃ શુભૈઃ ॥ ૪૭.૨૩॥

૪૭.૨૪/૧વજ્રવૈદૂર્યમાણિક્યૈઃ પદ્મરાગેન્દ્રનીલકૈઃ ।
૪૭.૨૪/૨ગજૈરશ્વૈર્ધનૈશ્ચાન્યૈ રથૈશ્ચૈવ કરેણુભિઃ ॥ ૪૭.૨૪॥

૪૭.૨૫/૧અસંખ્યેયૈર્બહુવિધૈર્દ્રવ્યૈરુચ્ચાવચૈસ્તથા ।
૪૭.૨૫/૨શાલિવ્રીહિયવૈશ્ચૈવ માષમુદ્ગતિલૈસ્તથા ॥ ૪૭.૨૫॥

૪૭.૨૬/૧સિદ્ધાર્થચણકૈશ્ચૈવ ગોધૂમૈર્મસુરાદિભિઃ ।
૪૭.૨૬/૨શ્યામાકૈર્મધુકૈશ્ચૈવ નીવારૈઃ સકુલત્થકૈઃ ॥ ૪૭.૨૬॥

૪૭.૨૭/૧અન્યૈશ્ચ વિવિધૈર્ધાન્યૈર્ગ્રામ્યારણ્યૈઃ સહસ્રશઃ ।
૪૭.૨૭/૨બહુધાન્યસહસ્રાણાં તણ્ડુલાનાં ચ રાશિભિઃ ॥ ૪૭.૨૭॥

૪૭.૨૮/૧ગવ્યસ્ય હવિષઃ કુમ્ભૈઃ શતશોઽથ સહસ્રશઃ ।
૪૭.૨૮/૨તથાન્યૈર્વિવિધૈર્દ્રવ્યૈર્ભક્ષ્યભોજ્યાનુલેપનૈઃ ॥ ૪૭.૨૮॥

૪૭.૨૯/૧રાજાનઃ પૂરયામાસુર્યત્ કિંચિદ્ દ્રવ્યસમ્ભવૈઃ ।
૪૭.૨૯/૨તાન્ દૃષ્ટ્વા યજ્ઞસમ્ભારાન્ સર્વસમ્પત્સમન્વિતાન્ ॥ ૪૭.૨૯॥

૪૭.૩૦/૧યજ્ઞકર્મવિદો વિપ્રાન્ વેદવેદાઙ્ગપારગાન્ ।
૪૭.૩૦/૨શાસ્ત્રેષુ નિપુણાન્ દક્ષાન્ કુશલાન્ સર્વકર્મસુ ॥ ૪૭.૩૦॥

૪૭.૩૧/૧ઋષીંશ્ચૈવ મહર્ષીંશ્ચ દેવર્ષીંશ્ચૈવ તાપસાન્ ।
૪૭.૩૧/૨બ્રહ્મચારિગૃહસ્થાંશ્ચ વાનપ્રસ્થાન્ યતીંસ્તથા ॥ ૪૭.૩૧॥

૪૭.૩૨/૧સ્નાતકાન્ બ્રાહ્મણાંશ્ચાન્યાન્ અગ્નિહોત્રે સદા સ્થિતાન્ ।
૪૭.૩૨/૨આચાર્યોપાધ્યાયવરાન્ સ્વાધ્યાયતપસાન્વિતાન્ ॥ ૪૭.૩૨॥

૪૭.૩૩/૧સદસ્યાગ્ શાસ્ત્રકુશલાંસ્તથાન્યાન્ પાવકાન્ બહૂન્ ।
૪૭.૩૩/૨દૃષ્ટ્વા તાન્ નૃપતિઃ શ્રીમાન્ ઉવાચ સ્વં પુરોહિતમ્ ॥ ૪૭.૩૩॥

૪૭.૩૪/૧રાજોવાચ । તતઃ પ્રયાન્તુ વિદ્વાંસો બ્રાહ્મણા વેદપારગાઃ ।
૪૭.૩૪/૨વાજિમેધાર્થસિદ્ધ્યર્થં દેશં પશ્યન્તુ યજ્ઞિયમ્ ॥ ૪૭.૩૪॥

૪૭.૩૫/૧બ્રહ્મોવાચ । ઇત્યુક્તઃ સ તથા ચક્રે વચનં તસ્ય ભૂપતેઃ ।
૪૭.૩૫/૨હૃષ્ટઃ સ મન્ત્રિભિઃ સાર્ધં તદા રાજપુરોહિતઃ ॥ ૪૭.૩૫॥

૪૭.૩૬/૧તતો યયૌ પુરોધાશ્ચ પ્રાજ્ઞઃ સ્થપતિભિઃ સહ ।
૪૭.૩૬/૨બ્રાહ્મણાન્ અગ્રતઃ કૃત્વા કુશલાન્ યજ્ઞકર્મણિ ॥ ૪૭.૩૬॥

૪૭.૩૭/૧તં દેશં ધીવરગ્રામં સપ્રતોલિવિટઙ્કિનમ્ ।
૪૭.૩૭/૨કારયામાસ વિપ્રોઽસૌ યજ્ઞવાટં યથાવિધિ ॥ ૪૭.૩૭॥

૪૭.૩૮/૧પ્રાસાદશતસમ્બાધં મણિપ્રવરશોભિતમ્ ।
૪૭.૩૮/૨ઇન્દ્રસદ્મનિભં રમ્યં હેમરત્નવિભૂષિતમ્ ॥ ૪૭.૩૮॥

૪૭.૩૯/૧સ્તમ્ભાન્ કનકચિત્રાંશ્ચ તોરણાનિ બૃહન્તિ ચ ।
૪૭.૩૯/૨યજ્ઞાયતનદેશેષુ દત્ત્વા શુદ્ધં ચ કાઞ્ચનમ્ ॥ ૪૭.૩૯॥

૪૭.૪૦/૧અન્તઃપુરાણિ રાજ્ઞાં ચ નાનાદેશનિવાસિનામ્ ।
૪૭.૪૦/૨કારયામાસ ધર્માત્મા તત્ર તત્ર યથાવિધિ ॥ ૪૭.૪૦॥

૪૭.૪૧/૧બ્રાહ્મણાનાં ચ વૈશ્યાનાં નાનાદેશસમીયુષામ્ ।
૪૭.૪૧/૨કારયામાસ વિધિવચ્છાલાસ્તત્રાપ્યનેકશઃ ॥ ૪૭.૪૧॥

૪૭.૪૨/૧પ્રિયાર્થં તસ્ય નૃપતેરાયયુર્નૃપસત્તમાઃ ।
૪૭.૪૨/૨રત્નાન્યનેકાન્યાદાય સ્ત્રિયશ્ચાયયુરુત્સવે ॥ ૪૭.૪૨॥

૪૭.૪૩/૧તેષાં નિર્વિશતાં સ્વેષુ શિબિરેષુ મહાત્મનામ્ ।
૪૭.૪૩/૨નદતઃ સાગરસ્યેવ દિવિસ્પૃગ્ અભવદ્ ધ્વનિઃ ॥ ૪૭.૪૩॥

૪૭.૪૪/૧તેષામભ્યાગતાનાં ચ સ રાજા મુનિસત્તમાઃ ।
૪૭.૪૪/૨વ્યાદિદેશાયતનાનિ શય્યાશ્ચાપ્યુપચારતઃ ॥ ૪૭.૪૪॥

૪૭.૪૫/૧ભોજનાનિ વિચિત્રાણિ શાલીક્ષુયવગોરસૈઃ ।
૪૭.૪૫/૨ઉપેત્ય નૃપતિશ્રેષ્ઠો વ્યાદિદેશ સ્વયં તદા ॥ ૪૭.૪૫॥

૪૭.૪૬/૧તથા તસ્મિન્ મહાયજ્ઞે બહવો બ્રહ્મવાદિનઃ ।
૪૭.૪૬/૨યે ચ દ્વિજાતિપ્રવરાસ્તત્રાસન્ દ્વિજસત્તમાઃ ॥ ૪૭.૪૬॥

૪૭.૪૭/૧સમાજગ્મુઃ સશિષ્યાસ્તાન્ પ્રતિજગ્રાહ પાર્થિવઃ ।
૪૭.૪૭/૨સર્વાંશ્ચ તાન્ અનુયયૌ યાવદ્ આવસથાન્ ઇતિ ॥ ૪૭.૪૭॥

૪૭.૪૮/૧સ્વયમેવ મહાતેજા દમ્ભં ત્યક્ત્વા નૃપોત્તમઃ ।

૪૭.૪૮/૨તતઃ કૃત્વા સ્વશિલ્પં ચ શિલ્પિનોઽન્યે ચ યે તદા ॥ ૪૭.૪૮॥

૪૭.૪૯/૧કૃત્સ્નં યજ્ઞવિધિં રાજ્ઞે તદા તસ્મૈ ન્યવેદયન્ ।
૪૭.૪૯/૨તતઃ શ્રુત્વા નૃપશ્રેષ્ઠઃ કૃતં સર્વમતન્દ્રિતઃ ।
૪૭.૪૯/૩હૃષ્ટરોમાભવદ્ રાજા સહ મન્ત્રિભિરચ્યુતઃ ॥ ૪૭.૪૯॥

૪૭.૫૦/૧બ્રહ્મોવાચ । તસ્મિન્ યજ્ઞે પ્રવૃત્તે તુ વાગ્મિનો હેતુવાદિભિઃ ।
૪૭.૫૦/૨હેતુવાદાન્ બહૂન્ આહુઃ પરસ્પરજિગીષવઃ ॥ ૪૭.૫૦॥

૪૭.૫૧/૧દેવેન્દ્રસ્યેવ વિહિતં રાજસિંહેન ભો દ્વિજાઃ ।
૪૭.૫૧/૨દદૃશુસ્તોરણાન્યત્ર શાતકુમ્ભમયાનિ ચ ॥ ૪૭.૫૧॥

૪૭.૫૨/૧શય્યાસનવિકારાંશ્ચ સુબહૂન્ રત્નસંચયાન્ ।
૪૭.૫૨/૨ઘટપાત્રીકટાહાનિ કલશાન્ વર્ધમાનકાન્ ॥ ૪૭.૫૨॥

૪૭.૫૩/૧નહિ કશ્ચિદ્ અસૌવર્ણમપશ્યદ્ વસુધાધિપઃ ।
૪૭.૫૩/૨યૂપાંશ્ચ શાસ્ત્રપઠિતાન્ દારવાન્ હેમભૂષિતાન્ ॥ ૪૭.૫૩॥

૪૭.૫૪/૧ઉપક્ષિપ્તાન્ યથાકાલં વિધિવદ્ ભૂરિવર્ચસઃ ।
૪૭.૫૪/૨સ્થલજા જલજા યે ચ પશવઃ કેચન દ્વિજાઃ ॥ ૪૭.૫૪॥

૪૭.૫૫/૧સર્વાન્ એવ સમાનીતાન્ અપશ્યંસ્તત્ર તે નૃપાઃ ।
૪૭.૫૫/૨ગાશ્ચૈવ મહિષીશ્ચૈવ તથા વૃદ્ધસ્ત્રિયોઽપિ ચ ॥ ૪૭.૫૫॥

૪૭.૫૬/૧ઔદકાનિ ચ સત્ત્વાનિ શ્વાપદાનિ વયાંસિ ચ ।
૪૭.૫૬/૨જરાયુજાણ્ડજાતાનિ સ્વેદજાન્યુદ્ભિદાનિ ચ ॥ ૪૭.૫૬॥

૪૭.૫૭/૧પર્વતાન્યુપધાન્યાનિ ભૂતાનિ દદૃશુશ્ચ તે ।
૪૭.૫૭/૨એવં પ્રમુદિતં સર્વં પશુતો ધનધાન્યતઃ ॥ ૪૭.૫૭॥

૪૭.૫૮/૧યજ્ઞવાટં નૃપા દૃષ્ટ્વા વિસ્મયં પરમં ગતાઃ ।
૪૭.૫૮/૨બ્રાહ્મણાનાં વિશાં ચૈવ બહુમિષ્ટાન્નમ્ ઋદ્ધિમત્ ॥ ૪૭.૫૮॥

૪૭.૫૯/૧પૂર્ણે શતસહસ્રે તુ વિપ્રાણાં તત્ર ભુઞ્જતામ્ ।
૪૭.૫૯/૨દુન્દુભિર્મેઘનિર્ઘોષાન્ મુહુર્મુહુરથાકરોત્ ॥ ૪૭.૫૯॥

૪૭.૬૦/૧વિનનાદાસકૃચ્ચાપિ દિવસે દિવસે ગતે ।
૪૭.૬૦/૨એવં સ વવૃધે યજ્ઞાસ્તસ્ય રાજ્ઞાસ્તુ ધીમતઃ ॥ ૪૭.૬૦॥

૪૭.૬૧/૧અન્નસ્ય સુબહૂન્ વિપ્રા ઉત્સર્ગાન્ નિર્ગતોપમાન્ ।
૪૭.૬૧/૨દધિકુલ્યાશ્ચ દદૃશુઃ પયસશ્ચ હ્રદાંસ્તથા ॥ ૪૭.૬૧॥

૪૭.૬૨/૧જમ્બૂદ્વીપો હિ સકલો નાનાજનપદૈર્યુતઃ ।
૪૭.૬૨/૨દ્વિજાશ્ચ તત્ર દૃશ્યન્તે રાજ્ઞસ્તસ્ય મહામખે ॥ ૪૭.૬૨॥

૪૭.૬૩/૧તત્ર યાનિ સહસ્રાણિ પુરુષાણાં તતસ્તતઃ ।
૪૭.૬૩/૨ગૃહીત્વા ભાજનં જગ્મુર્બહૂનિ દ્વિજસત્તમાઃ ॥ ૪૭.૬૩॥

૪૭.૬૪/૧શ્રાવિણશ્ચાપિ તે સર્વે સુમૃષ્ટમણિકુણ્ડલાઃ ।
૪૭.૬૪/૨પર્યવેષયન્ દ્વિજાતીઞ્ શતશોઽથ સહસ્રશઃ ॥ ૪૭.૬૪॥

૪૭.૬૫/૧વિવિધાન્યનુપાનાનિ પુરુષા યેઽનુયાયિનઃ ।
૪૭.૬૫/૨તે વૈ નૃપોપભોજ્યાનિ બ્રાહ્મણેભ્યો દદુઃ સહ ॥ ૪૭.૬૫॥

૪૭.૬૬/૧સમાગતાન્ વેદવિદો રાજ્ઞશ્ચ પૃથિવીશ્વરાન્ ।
૪૭.૬૬/૨પૂજાં ચક્રે તદા તેષાં વિધિવદ્ ભૂરિદક્ષિણઃ ॥ ૪૭.૬૬॥

૪૭.૬૭/૧દિગ્દેશાદ્ આગતાન્ રાજ્ઞો મહાસંગ્રામશાલિનઃ ।
૪૭.૬૭/૨નટનર્તકકાદીંશ્ચ ગીતસ્તુતિવિશારદાન્ ॥ ૪૭.૬૭॥

૪૭.૬૮/૧પત્ન્યો મનોરમાસ્તસ્ય પીનોન્નતપયોધરાઃ ।
૪૭.૬૮/૨ઇન્દીવરપલાશાક્ષ્યઃ શરચ્ચન્દ્રનિભાનનાઃ ॥ ૪૭.૬૮॥

૪૭.૬૯/૧કુલશીલગુણોપેતાઃ સહસ્રૈકં શતાધિકમ્ ।
૪૭.૬૯/૨એવં તદ્ભૂપપરમ+ ।પત્નીગણસમન્વિતમ્ ॥ ૪૭.૬૯॥

૪૭.૭૦/૧રત્નમાલાકુલં દિવ્યં પતાકાધ્વજસેવિતમ્ ।
૪૭.૭૦/૨રત્નહારયુતં રમ્યં ચન્દ્રકાન્તિસમપ્રભમ્ ॥ ૪૭.૭૦॥

૪૭.૭૧/૧કરિણઃ પર્વતાકારાન્ મદસિક્તાન્ મહાબલાન્ ।
૪૭.૭૧/૨શતશઃ કોટિસંઘાતૈર્દન્તિભિર્દન્તભૂષણૈઃ ॥ ૪૭.૭૧॥

૪૭.૭૨/૧વાતવેગજવૈરશ્વૈઃ સિન્ધુજાતૈઃ સુશોભનૈઃ ।
૪૭.૭૨/૨શ્વેતાશ્વૈઃ શ્યામકર્ણૈશ્ચ કોટ્યનેકૈર્જવાન્વિતૈઃ ॥ ૪૭.૭૨॥

૪૭.૭૩/૧સંનદ્ધબદ્ધકક્ષૈશ્ચ નાનાપ્રહરણોદ્યતૈઃ ।
૪૭.૭૩/૨અસંખ્યેયૈઃ પદાતૈશ્ચ દેવપુત્રોપમૈસ્તથા ॥ ૪૭.૭૩॥

૪૭.૭૪/૧ઇત્યેવં દદૃશે રાજા યજ્ઞસમ્ભારવિસ્તરમ્ ।
૪૭.૭૪/૨મુદં લેભે તદા રાજા સંહૃષ્ટો વાક્યમબ્રવીત્ ॥ ૪૭.૭૪॥

૪૭.૭૫/૧રાજોવાચ । આનયધ્વં હયશ્રેષ્ઠં સર્વલક્ષણલક્ષિતમ્ ।

૪૭.૭૫/૨ચારયધ્વં પૃથિવ્યાં વૈ રાજપુત્રાઃ સુસંયતાઃ ॥ ૪૭.૭૫॥

૪૭.૭૬/૧વિદ્વદ્ભિર્ધર્મવિદ્ભિશ્ચ અત્ર હોમો વિધીયતામ્ ।
૪૭.૭૬/૨કૃષ્ણચ્છાગં ચ મહિષં કૃષ્ણસારમૃગં દ્વિજાન્ ॥ ૪૭.૭૬॥

૪૭.૭૭/૧અનડ્વાહં ચ ગાશ્ચૈવ સર્વાંશ્ચ પશુપાલકાન્ ।
૪૭.૭૭/૨ઇષ્ટયશ્ચ પ્રવર્તન્તાં પ્રાસાદં વૈષ્ણવં તતઃ ॥ ૪૭.૭૭॥

૪૭.૭૮/૧સર્વમેતચ્ચ વિપ્રેભ્યો દીયતાં મનસેપ્સિતમ્ ।
૪૭.૭૮/૨સ્ત્રિયશ્ચ રત્નકોટ્યશ્ચ ગ્રામાશ્ચ નગરાણિ ચ ॥ ૪૭.૭૮॥

૪૭.૭૯/૧સમ્યક્ સમૃદ્ધભૂમ્યશ્ચ વિષયાશ્ચૈવમર્થિનામ્ ।
૪૭.૭૯/૨અન્યાનિ દ્રવ્યજાતાનિ મનોજ્ઞાનિ બહૂનિ ચ ॥ ૪૭.૭૯॥

૪૭.૮૦/૧સર્વેષાં યાચમાનાનાં નાસ્તિ હ્યેતન્ ન ભાષયેત્ ।
૪૭.૮૦/૨તાવત્ પ્રવર્તતાં યજ્ઞો યાવદ્ દેવઃ પુરા ત્વિહ ।
૪૭.૮૦/૩પ્રત્યક્ષં મમ ચાભ્યેતિ યજ્ઞસ્યાસ્ય સમીપતઃ ॥ ૪૭.૮૦॥

૪૭.૮૧/૧બ્રહ્મોવાચ । એવમુક્ત્વા તદા વિપ્રા રાજસિંહો મહાભુજઃ ।
૪૭.૮૧/૨દદૌ સુવર્ણસંઘાતં કોટીનાં ચૈવ ભૂષણમ્ ॥ ૪૭.૮૧॥

૪૭.૮૨/૧કરેણુશતસાહસ્રં વાજિનો નિયુતાનિ ચ ।
૪૭.૮૨/૨અર્બુદં ચૈવ વૃષભં સ્વર્ણશ\ૃઙ્ગીશ્ચ ધેનુકાઃ ॥ ૪૭.૮૨॥

૪૭.૮૩/૧સુરૂપાઃ સુરભીશ્ચૈવ કાંસ્યદોહાઃ પયસ્વિનીઃ ।
૪૭.૮૩/૨પ્રાયચ્છત્ સ તુ વિપ્રેભ્યો વેદવિદ્ભ્યો મુદા યુતઃ ॥ ૪૭.૮૩॥

૪૭.૮૪/૧વાસાંસિ ચ મહાર્હાણિ રાઙ્કવાસ્તરણાનિ ચ ।
૪૭.૮૪/૨સુશુક્લાનિ ચ શુભ્રાણિ પ્રવાલમણિમુત્તમમ્ ॥ ૪૭.૮૪॥

૪૭.૮૫/૧અદદાત્ સ મહાયજ્ઞે રત્નાનિ વિવિધાનિ ચ ॥ ૪૭.૮૫॥

૪૭.૮૬/૧વજ્રવૈદૂર્યમાણિક્ય+ ંઉક્તિકાદ્યાનિ યાનિ ચ ।
૪૭.૮૬/૨અલંકારવતીઃ શુભ્રાઃ કન્યા રાજીવલોચનાઃ ॥ ૪૭.૮૬॥

૪૭.૮૭/૧શતાનિ પઞ્ચ વિપ્રેભ્યો રાજા હૃષ્ટઃ પ્રદત્તવાન્ ।
૪૭.૮૭/૨સ્ત્રિયઃ પીનપયોભારાઃ કઞ્ચુકૈઃ સ્વસ્તનાવૃતાઃ ॥ ૪૭.૮૭॥

૪૭.૮૮/૧મધ્યહીનાશ્ચ સુશ્રોણ્યઃ પદ્મપત્રાયતેક્ષણાઃ ।
૪૭.૮૮/૨હાવભાવાન્વિતગ્રીવા બહ્વ્યો વલયભૂષિતાઃ ॥ ૪૭.૮૮॥

૪૭.૮૯/૧પાદનૂપુરસંયુક્તાઃ પટ્ટદુકૂલવાસસઃ ।
૪૭.૮૯/૨એકૈકશોઽદદાત્ તસ્મિન્ કામ્યાશ્ચ કામિનીર્બહૂઃ ॥ ૪૭.૮૯॥

૪૭.૯૦/૧અર્થિભ્યો બ્રાહ્મણાદિભ્યો હયમેધે દ્વિજોત્તમાઃ ।
૪૭.૯૦/૨ભક્ષ્યં ભોજ્યં ચ સમ્પૂર્ણં નાનાસમ્ભારસંયુતમ્ ॥ ૪૭.૯૦॥

૪૭.૯૧/૧ખણ્ડકાદ્યાન્યનેકાનિ સ્વિન્નપક્વાંશ્ચ પિષ્ટકાન્ ।
૪૭.૯૧/૨અન્નાન્યન્યાનિ મેધ્યાંશ્ચ ઘૃતપૂરાંશ્ચ ખાણ્ડવાન્ ॥ ૪૭.૯૧॥

૪૭.૯૨/૧મધુરાંસ્તર્જિતાન્ પૂપાન્ અન્નં મૃષ્ટં સુપાકિકમ્ ।
૪૭.૯૨/૨પ્રીત્યર્થં સર્વસત્ત્વાનાં દીયતેઽન્નં પુનઃ પુનઃ ॥ ૪૭.૯૨॥

૪૭.૯૩/૧દત્તસ્ય દીયમાનસ્ય ધનસ્યાન્તો ન વિદ્યતે ।
૪૭.૯૩/૨એવં દૃષ્ટ્વા મહાયજ્ઞં દેવદૈત્યાઃ સવારણાઃ ॥ ૪૭.૯૩॥

૪૭.૯૪/૧ગન્ધર્વાપ્સરસઃ સિદ્ધા ઋષયશ્ચ પ્રજેશ્વરાઃ ।
૪૭.૯૪/૨વિસ્મયં પરમં યાતા દૃષ્ટ્વા ક્રતુવરં શુભમ્ ॥ ૪૭.૯૪॥

૪૭.૯૫/૧પુરોધા મન્ત્રિણો રાજા હૃષ્ટાસ્તત્રૈવ સર્વશઃ ।
૪૭.૯૫/૨ન તત્ર મલિનઃ કશ્ચિન્ ન દીનો ન ક્ષુધાન્વિતઃ ॥ ૪૭.૯૫॥

૪૭.૯૬/૧ન વોપસર્ગો ન ગ્લાનિર્નાધયો વ્યાધયસ્તથા ।
૪૭.૯૬/૨નાકાલમરણં તત્ર ન દંશો ન ગ્રહા વિષમ્ ॥ ૪૭.૯૬॥

૪૭.૯૭/૧હૃષ્ટપુષ્ટજનાઃ સર્વે તસ્મિન્ રાજ્ઞો મહોત્સવે ।
૪૭.૯૭/૨યે ચ તત્ર તપઃસિદ્ધા મુનયશ્ચિરજીવિનઃ ॥ ૪૭.૯૭॥

૪૭.૯૮/૧ન જાતં તાદૃશં યજ્ઞં ધનધાન્યસમન્વિતમ્ ।
૪૭.૯૮/૨એવં સ રાજા વિધિવદ્ વાજિમેધં દ્વિજોત્તમાઃ ।
૪૭.૯૮/૩ક્રતું સમાપયામાસ પ્રાસાદં વૈષ્ણવં તથા ॥ ૪૭.૯૮॥

૪૮.૧/૧મુનય ઊચુઃ । બ્રૂહિ નો દેવદેવેશ યત્ પૃચ્છામઃ પુરાતનમ્ ।
૪૮.૧/૨યથા તાઃ પ્રતિમાઃ પૂર્વમિન્દ્રદ્યુમ્નેન નિર્મિતાઃ ॥ ૪૮.૧॥

૪૮.૨/૧કેન ચૈવ પ્રકારેણ તુષ્ટસ્તસ્મૈ સ માધવઃ ।
૪૮.૨/૨તત્ સર્વં વદ ચાસ્માકં પરં કૌતૂહલં હિ નઃ ॥ ૪૮.૨॥

૪૮.૩/૧બ્રહ્મોવાચ । શ઼ૃણુધ્વં મુનિશાર્દૂલાઃ પુરાણં વેદસમ્મિતમ્ ।
૪૮.૩/૨કથયામિ પુરા વૃત્તં પ્રતિમાનાં ચ સમ્ભવમ્ ॥ ૪૮.૩॥

૪૮.૪/૧પ્રવૃત્તે ચ મહાયજ્ઞે પ્રાસાદે ચૈવ નિર્મિતે ।

૪૮.૪/૨ચિન્તા તસ્ય બભૂવાથ પ્રતિમાર્થમહર્નિશમ્ ॥ ૪૮.૪॥

૪૮.૫/૧ન વેદ્મિ કેન દેવેશં સર્વેશં લોકપાવનમ્ ।

૪૮.૫/૨સર્ગસ્થિત્યન્તકર્તારં પશ્યામિ પુરુષોત્તમમ્ ॥ ૪૮.૫॥

૪૮.૬/૧ચિન્તાવિષ્ટસ્ત્વભૂદ્ રાજા શેતે રાત્રૌ દિવાપિ ન ।

૪૮.૬/૨ન ભુઙ્ક્તે વિવિધાન્ ભોગાન્ ન ચ સ્નાનં પ્રસાધનમ્ ॥ ૪૮.૬॥

૪૮.૭/૧નૈવ વાદ્યેન ગન્ધેન ગાયનૈર્વર્ણકૈરપિ ।

૪૮.૭/૨ન ગજૈર્મદયુક્તૈશ્ચ ન ચાનેકૈર્હયાન્વિતૈઃ ॥ ૪૮.૭॥

૪૮.૮/૧નેન્દ્રનીલૈર્મહાનીલૈઃ પદ્મરાગમયૈર્ન ચ ।

૪૮.૮/૨સુવર્ણરજતાદ્યૈશ્ચ વજ્રસ્ફટિકસંયુતૈઃ ॥ ૪૮.૮॥

૪૮.૯/૧બહુરાગાર્થકામૈર્વા ન વન્યૈરન્તરિક્ષગૈઃ ।

૪૮.૯/૨બભૂવ તસ્ય નૃપતેર્મનસસ્તુષ્ટિવર્ધનમ્ ॥ ૪૮.૯॥

૪૮.૧૦/૧શૈલમૃદ્દારુજાતેષુ પ્રશસ્તં કિં મહીતલે ।

૪૮.૧૦/૨વિષ્ણુપ્રતિમાયોગ્યં ચ સર્વલક્ષણલક્ષિતમ્ ॥ ૪૮.૧૦॥

૪૮.૧૧/૧એતૈરેવ ત્રયાણાં તુ દયિતં સ્યાત્ સુરાર્ચિતમ્ ।

૪૮.૧૧/૨સ્થાપિતે પ્રીતિમભ્યેતિ ઇતિ ચિન્તાપરોઽભવત્ ॥ ૪૮.૧૧॥

૪૮.૧૨/૧પઞ્ચરાત્રવિધાનેન સમ્પૂજ્ય પુરુષોત્તમમ્ ।

૪૮.૧૨/૨ચિન્તાવિષ્ટો મહીપાલઃ સંસ્તોતુમુપચક્રમે ॥ ૪૮.૧૨॥

૪૯.૧/૧વાસુદેવ નમસ્તેઽસ્તુ નમસ્તે મોક્ષકારણ ।

૪૯.૧/૨ત્રાહિ માં સર્વલોકેશ જન્મસંસારસાગરાત્ ॥ ૪૯.૧॥

૪૯.૨/૧નિર્મલામ્બરસંકાશ નમસ્તે પુરુષોત્તમ ।

૪૯.૨/૨સંકર્ષણ નમસ્તેઽસ્તુ ત્રાહિ માં ધરણીધર ॥ ૪૯.૨॥

૪૯.૩/૧નમસ્તે હેમગર્ભાભ નમસ્તે મકરધ્વજ ।

૪૯.૩/૨રતિકાન્ત નમસ્તેઽસ્તુ ત્રાહિ માં સંવરાન્તક ॥ ૪૯.૩॥

૪૯.૪/૧નમસ્તેઽઞ્જનસંકાશ નમસ્તે ભક્તવત્સલ ।

૪૯.૪/૨અનિરુદ્ધ નમસ્તેઽસ્તુ ત્રાહિ માં વરદો ભવ ॥ ૪૯.૪॥

૪૯.૫/૧નમસ્તે વિબુધાવાસ નમસ્તે વિબુધપ્રિય ।

૪૯.૫/૨નારાયણ નમસ્તેઽસ્તુ ત્રાહિ માં શરણાગતમ્ ॥ ૪૯.૫॥

૪૯.૬/૧નમસ્તે બલિનાં શ્રેષ્ઠ નમસ્તે લાઙ્ગલાયુધ ।
૪૯.૬/૨ચતુર્મુખ જગદ્ધામ ત્રાહિ માં પ્રપિતામહ ॥ ૪૯.૬॥

૪૯.૭/૧નમસ્તે નીલમેઘાભ નમસ્તે ત્રિદશાર્ચિત ।
૪૯.૭/૨ત્રાહિ વિષ્ણો જગન્નાથ મગ્નં માં ભવસાગરે ॥ ૪૯.૭॥

૪૯.૮/૧પ્રલયાનલસંકાશ નમસ્તે દિતિજાન્તક ।
૪૯.૮/૨નરસિંહ મહાવીર્ય ત્રાહિ માં દીપ્તલોચન ॥ ૪૯.૮॥

૪૯.૯/૧યથા રસાતલાદ્ ઉર્વી ત્વયા દંષ્ટ્રોદ્ધૃતા પુરા ।
૪૯.૯/૨તથા મહાવરાહસ્ત્વં ત્રાહિ માં દુઃખસાગરાત્ ॥ ૪૯.૯॥

૪૯.૧૦/૧તવૈતા મૂર્તયઃ કૃષ્ણ વરદાઃ સંસ્તુતા મયા ।
૪૯.૧૦/૨તવેમે બલદેવાદ્યાઃ પૃથગ્રૂપેણ સંસ્થિતાઃ ॥ ૪૯.૧૦॥

૪૯.૧૧/૧અઙ્ગાનિ તવ દેવેશ ગરુત્માદ્યાસ્તથા પ્રભો ।
૪૯.૧૧/૨દિક્પાલાઃ સાયુધાશ્ચૈવ કેશવાદ્યાસ્તથાચ્યુત ॥ ૪૯.૧૧॥

૪૯.૧૨/૧યે ચાન્યે તવ દેવેશ ભેદાઃ પ્રોક્તા મનીષિભિઃ ।
૪૯.૧૨/૨તેઽપિ સર્વે જગન્નાથ પ્રસન્નાયતલોચન ॥ ૪૯.૧૨॥

૪૯.૧૩/૧મયાર્ચિતાઃ સ્તુતાઃ સર્વે તથા યૂયં નમસ્કૃતાઃ ।
૪૯.૧૩/૨પ્રયચ્છત વરં મહ્યં ધર્મકામાર્થમોક્ષદમ્ ॥ ૪૯.૧૩॥

૪૯.૧૪/૧ભેદાસ્તે કીર્તિતા યે તુ હરે સંકર્ષણાદયઃ ।
૪૯.૧૪/૨તવ પૂજાર્થસમ્ભૂતાસ્તતસ્ત્વયિ સમાશ્રિતાઃ ॥ ૪૯.૧૪॥

૪૯.૧૫/૧ન ભેદસ્તવ દેવેશ વિદ્યતે પરમાર્થતઃ ।
૪૯.૧૫/૨વિવિધં તવ યદ્ રૂપમુક્તં તદ્ ઉપચારતઃ ॥ ૪૯.૧૫॥

૪૯.૧૬/૧અદ્વૈતં ત્વાં કથં દ્વૈતં વક્તું શક્નોતિ માનવઃ ।
૪૯.૧૬/૨એકસ્ત્વં હિ હરે વ્યાપી ચિત્સ્વભાવો નિરઞ્જનઃ ॥ ૪૯.૧૬॥

૪૯.૧૭/૧પરમં તવ યદ્ રૂપં ભાવાભાવવિવર્જિતમ્ ।
૪૯.૧૭/૨નિર્લેપં નિર્ગુણં શ્રેષ્ઠં કૂટસ્થમચલં ધ્રુવમ્ ॥ ૪૯.૧૭॥

૪૯.૧૮/૧સર્વોપાધિવિનિર્મુક્તં સત્તામાત્રવ્યવસ્થિતમ્ ।
૪૯.૧૮/૨તદ્ દેવાશ્ચ ન જાનન્તિ કથં જાનામ્યહં પ્રભો ॥ ૪૯.૧૮॥

૪૯.૧૯/૧અપરં તવ યદ્ રૂપં પીતવસ્ત્રં ચતુર્ભુજમ્ ।
૪૯.૧૯/૨શઙ્ખચક્રગદાપાણિ+ ઉકુટાઙ્ગદધારિણમ્ ॥ ૪૯.૧૯॥

૪૯.૨૦/૧શ્રીવત્સોરસ્કસંયુક્તં વનમાલાવિભૂષિતમ્ ।
૪૯.૨૦/૨તદ્ અર્ચયન્તિ વિબુધા યે ચાન્યે તવ સંશ્રયાઃ ॥ ૪૯.૨૦॥

૪૯.૨૧/૧દેવદેવ સુરશ્રેષ્ઠ ભક્તાનામભયપ્રદ ।
૪૯.૨૧/૨ત્રાહિ માં પદ્મપત્રાક્ષ મગ્નં વિષયસાગરે ॥ ૪૯.૨૧॥

૪૯.૨૨/૧નાન્યં પશ્યામિ લોકેશ યસ્યાહં શરણં વ્રજે ।
૪૯.૨૨/૨ત્વામ્ ઋતે કમલાકાન્ત પ્રસીદ મધુસૂદન ॥ ૪૯.૨૨॥

૪૯.૨૩/૧જરાવ્યાધિશતૈર્યુક્તો નાનાદુઃખૈર્નિપીડિતઃ ।
૪૯.૨૩/૨હર્ષશોકાન્વિતો મૂઢઃ કર્મપાશૈઃ સુયન્ત્રિતઃ ॥ ૪૯.૨૩॥

૪૯.૨૪/૧પતિતોઽહં મહારૌદ્રે ઘોરે સંસારસાગરે ।
૪૯.૨૪/૨વિષમોદકદુષ્પારે રાગદ્વેષઝષાકુલે ॥ ૪૯.૨૪॥

૪૯.૨૫/૧ઇન્દ્રિયાવર્તગમ્ભીરે તૃષ્ણાશોકોર્મિસંકુલે ।
૪૯.૨૫/૨નિરાશ્રયે નિરાલમ્બે નિઃસારેઽત્યન્તચઞ્ચલે ॥ ૪૯.૨૫॥

૪૯.૨૬/૧માયયા મોહિતસ્તત્ર ભ્રમામિ સુચિરં પ્રભો ।
૪૯.૨૬/૨નાનાજાતિસહસ્રેષુ જાયમાનઃ પુનઃ પુનઃ ॥ ૪૯.૨૬॥

૪૯.૨૭/૧મયા જન્માન્યનેકાનિ સહસ્રાણ્યયુતાનિ ચ ।
૪૯.૨૭/૨વિવિધાન્યનુભૂતાનિ સંસારેઽસ્મિઞ્ જનાર્દન ॥ ૪૯.૨૭॥

૪૯.૨૮/૧વેદાઃ સાઙ્ગા મયાધીતાઃ શાસ્ત્રાણિ વિવિધાનિ ચ ।
૪૯.૨૮/૨ઇતિહાસપુરાણાનિ તથા શિલ્પાન્યનેકશઃ ॥ ૪૯.૨૮॥

૪૯.૨૯/૧અસંતોષાશ્ચ સંતોષાઃ સંચયાપચયા વ્યયાઃ ।
૪૯.૨૯/૨મયા પ્રાપ્તા જગન્નાથ ક્ષયવૃદ્ધ્યક્ષયેતરાઃ ॥ ૪૯.૨૯॥

૪૯.૩૦/૧ભાર્યારિમિત્રબન્ધૂનાં વિયોગાઃ સંગમાસ્તથા ।
૪૯.૩૦/૨પિતરો વિવિધા દૃષ્ટા માતરશ્ચ તથા મયા ॥ ૪૯.૩૦॥

૪૯.૩૧/૧દુઃખાનિ ચાનુભૂતાનિ યાનિ સૌખ્યાન્યનેકશઃ ।
૪૯.૩૧/૨પ્રાપ્તાશ્ચ બાન્ધવાઃ પુત્રા ભ્રાતરો જ્ઞાતયસ્તથા ॥ ૪૯.૩૧॥

૪૯.૩૨/૧મયોષિતં તથા સ્ત્રીણાં કોષ્ઠે વિણ્મૂત્રપિચ્છલે ।
૪૯.૩૨/૨ગર્ભવાસે મહાદુઃખમનુભૂતં તથા પ્રભો ॥ ૪૯.૩૨॥

૪૯.૩૩/૧દુઃખાનિ યાન્યનેકાનિ બાલ્યયૌવનગોચરે ।

૪૯.૩૩/૨વાર્ધકે ચ હૃષીકેશ તાનિ પ્રાપ્તાનિ વૈ મયા ॥ ૪૯.૩૩॥

૪૯.૩૪/૧મરણે યાનિ દુઃખાનિ યમમાર્ગે યમાલયે ।
૪૯.૩૪/૨મયા તાન્યનુભૂતાનિ નરકે યાતનાસ્તથા ॥ ૪૯.૩૪॥

૪૯.૩૫/૧કૃમિકીટદ્રુમાણાં ચ હસ્ત્યશ્વમૃગપક્ષિણામ્ ।
૪૯.૩૫/૨મહિષોષ્ટ્રગવાં ચૈવ તથાન્યેષાં વનૌકસામ્ ॥ ૪૯.૩૫॥

૪૯.૩૬/૧દ્વિજાતીનાં ચ સર્વેષાં શૂદ્રાણાં ચૈવ યોનિષુ ।
૪૯.૩૬/૨ધનિનાં ક્ષત્રિયાણાં ચ દરિદ્રાણાં તપસ્વિનામ્ ॥ ૪૯.૩૬॥

૪૯.૩૭/૧નૃપાણાં નૃપભૃત્યાનાં તથાન્યેષાં ચ દેહિનામ્ ।
૪૯.૩૭/૨ગૃહેષુ તેષામુત્પન્નો દેવ ચાહં પુનઃ પુનઃ ॥ ૪૯.૩૭॥

૪૯.૩૮/૧ગતોઽસ્મિ દાસતાં નાથ ભૃત્યાનાં બહુશો નૃણામ્ ।
૪૯.૩૮/૨દરિદ્રત્વં ચેશ્વરત્વં સ્વામિત્વં ચ તથા ગતઃ ॥ ૪૯.૩૮॥

૪૯.૩૯/૧હતો મયા હતાશ્ચાન્યે ઘાતિતો ઘાતિતાસ્તથા ।
૪૯.૩૯/૨દત્તં મમાન્યૈરન્યેભ્યો મયા દત્તમનેકશઃ ॥ ૪૯.૩૯॥

૪૯.૪૦/૧પિતૃમાતૃસુહૃદ્ભ્રાતૃ+ ।કલત્રાણાં કૃતેન ચ ।
૪૯.૪૦/૨ધનિનાં શ્રોત્રિયાણાં ચ દરિદ્રાણાં તપસ્વિનામ્ ॥ ૪૯.૪૦॥

૪૯.૪૧/૧ઉક્તં દૈન્યં ચ વિવિધં ત્યક્ત્વા લજ્જાં જનાર્દન ।
૪૯.૪૧/૨દેવતિર્યઙ્મનુષ્યેષુ સ્થાવરેષુ ચરેષુ ચ ॥ ૪૯.૪૧॥

૪૯.૪૨/૧ન વિદ્યતે તથા સ્થાનં યત્રાહં ન ગતઃ પ્રભો ।
૪૯.૪૨/૨કદા મે નરકે વાસઃ કદા સ્વર્ગે જગત્પતે ॥ ૪૯.૪૨॥

૪૯.૪૩/૧કદા મનુષ્યલોકેષુ કદા તિર્યગ્ગતેષુ ચ ।
૪૯.૪૩/૨જલયન્ત્રે યથા ચક્રે ઘટી રજ્જુનિબન્ધના ॥ ૪૯.૪૩॥

૪૯.૪૪/૧યાતિ ચોર્ધ્વમધશ્ચૈવ કદા મધ્યે ચ તિષ્ઠતિ ।
૪૯.૪૪/૨તથા ચાહં સુરશ્રેષ્ઠ કર્મરજ્જુસમાવૃતઃ ॥ ૪૯.૪૪॥

૪૯.૪૫/૧અધશ્ચોર્ધ્વં તથા મધ્યે ભ્રમન્ ગચ્છામિ યોગતઃ ।
૪૯.૪૫/૨એવં સંસારચક્રેઽસ્મિન્ ભૈરવે રોમહર્ષણે ॥ ૪૯.૪૫॥

૪૯.૪૬/૧ભ્રમામિ સુચિરં કાલં નાન્તં પશ્યામિ કર્હિચિત્ ।
૪૯.૪૬/૨ન જાને કિં કરોમ્યદ્ય હરે વ્યાકુલિતેન્દ્રિયઃ ॥ ૪૯.૪૬॥

૪૯.૪૭/૧શોકતૃષ્ણાભિભૂતોऽહં કાંદિશીકો વિચેતનઃ ।
૪૯.૪૭/૨ઇદાનીં ત્વામહં દેવ વિહ્વલઃ શરણં ગતઃ ॥ ૪૯.૪૭॥

૪૯.૪૮/૧ત્રાહિ માં દુઃખિતં કૃષ્ણ મગ્નં સંસારસાગરે ।
૪૯.૪૮/૨કૃપાં કુરુ જગન્નાથ ભક્તં માં યદિ મન્યસે ॥ ૪૯.૪૮॥

૪૯.૪૯/૧ત્વદૃતે નાસ્તિ મે બન્ધુર્યોऽસૌ ચિન્તાં કરિષ્યતિ ।
૪૯.૪૯/૨દેવ ત્વાં નાથમાસાદ્ય ન ભયં મેऽસ્તિ કુત્રચિત્ ॥ ૪૯.૪૯॥

૪૯.૫૦/૧જીવિતે મરણે ચૈવ યોગક્ષેમેऽથવા પ્રભો ।
૪૯.૫૦/૨યે તુ ત્વાં વિધિવદ્ દેવ નાર્ચયન્તિ નરાધમાઃ ॥ ૪૯.૫૦॥

૪૯.૫૧/૧સુગતિસ્તુ કથં તેષાં ભવેત્ સંસારબન્ધનાત્ ।
૪૯.૫૧/૨કિં તેષાં કુલશીલેન વિદ્યયા જીવિતેન ચ ॥ ૪૯.૫૧॥

૪૯.૫૨/૧યેષાં ન જાયતે ભક્તિર્જગદ્ધાતરિ કેશવે ।
૪૯.૫૨/૨પ્રકૃતિં ત્વાસુરીં પ્રાપ્ય યે ત્વાં નિન્દન્તિ મોહિતાઃ ॥ ૪૯.૫૨॥

૪૯.૫૩/૧પતન્તિ નરકે ઘોરે જાયમાનાઃ પુનઃ પુનઃ ।
૪૯.૫૩/૨ન તેષાં નિષ્કૃતિસ્તસ્માદ્ વિદ્યતે નરકાર્ણવાત્ ॥ ૪૯.૫૩॥

૪૯.૫૪/૧યે દૂષયન્તિ દુર્વૃત્તાસ્ત્વાં દેવ પુરુષાધમાઃ ।
૪૯.૫૪/૨યત્ર યત્ર ભવેજ્જન્મ મમ કર્મનિબન્ધનાત્ ॥ ૪૯.૫૪॥

૪૯.૫૫/૧તત્ર તત્ર હરે ભક્તિસ્ત્વયિ ચાસ્તુ દૃઢા સદા ।
૪૯.૫૫/૨આરાધ્ય ત્વાં સુરા દૈત્યા નરાશ્ચાન્યેऽપિ સંયતાઃ ॥ ૪૯.૫૫॥

૪૯.૫૬/૧અવાપુઃ પરમાં સિદ્ધિં કસ્ત્વાં દેવ ન પૂજયેત્ ।
૪૯.૫૬/૨ન શક્નુવન્તિ બ્રહ્માદ્યાઃ સ્તોતું ત્વાં ત્રિદશા હરે ॥ ૪૯.૫૬॥

૪૯.૫૭/૧કથં માનુષબુદ્ધ્યાહં સ્તૌમિ ત્વાં પ્રકૃતેઃ પરમ્ ।
૪૯.૫૭/૨તથા ચાજ્ઞાનભાવેન સંસ્તુતોऽસિ મયા પ્રભો ॥ ૪૯.૫૭॥

૪૯.૫૮/૧તત્ ક્ષમસ્વાપરાધં મે યદિ તેऽસ્તિ દયા મયિ ।
૪૯.૫૮/૨કૃતાપરાધેऽપિ હરે ક્ષમાં કુર્વન્તિ સાધવઃ ॥ ૪૯.૫૮॥

૪૯.૫૯/૧તસ્માત્ પ્રસીદ દેવેશ ભક્તસ્નેહં સમાશ્રિતઃ ।
૪૯.૫૯/૨સ્તુતોऽસિ યન્ મયા દેવ ભક્તિભાવેન ચેતસા ।
૪૯.૫૯/૩સાઙ્ગં ભવતુ તત્ સર્વં વાસુદેવ નમોऽસ્તુ તે ॥ ૪૯.૫૯॥

૪૯.૬૦/૧બ્રહ્મોવાચ । ઇત્થં સ્તુતસ્તદા તેન પ્રસન્નો ગરુડધ્વજઃ ।

૪૯.૬૦/૨દદૌ તસ્મૈ મુનિશ્રેષ્ઠાઃ સકલં મનસેપ્સિતમ્ ॥ ૪૯.૬૦ ॥

૪૯.૬૧/૧યઃ સમ્પૂજ્ય જગન્નાથં પ્રત્યહં સ્તૌતિ માનવઃ ।
૪૯.૬૧/૨સ્તોત્રેણાનેન મતિમાન્ સ મોક્ષં લભતે ધ્રુવમ્ ॥ ૪૯.૬૧ ॥

૪૯.૬૨/૧ત્રિસંધ્યં યો જપેદ્ વિદ્વાન્ ઇદં સ્તોત્રવરં શુચિઃ ।
૪૯.૬૨/૨ધર્મં ચાર્થં ચ કામં ચ મોક્ષં ચ લભતે નરઃ ॥ ૪૯.૬૨ ॥

૪૯.૬૩/૧યઃ પઠેચ્છૃણુયાદ્ વાપિ શ્રાવયેદ્ વા સમાહિતઃ ।
૪૯.૬૩/૨સ લોકં શાશ્વતં વિષ્ણોર્યાતિ નિર્ધૂતકલ્મષઃ ॥ ૪૯.૬૩ ॥

૪૯.૬૪/૧ધન્યં પાપહરં ચેદં ભુક્તિમુક્તિપ્રદં શિવમ્ ।
૪૯.૬૪/૨ગુહ્યં સુદુર્લભં પુણ્યં ન દેયં યસ્ય કસ્યચિત્ ॥ ૪૯.૬૪ ॥

૪૯.૬૫/૧ન નાસ્તિકાય મૂર્ખાય ન કૃતઘ્નાય માનિને ।
૪૯.૬૫/૨ન દુષ્ટમતયે દદ્યાન્ નાભક્તાય કદાચન ॥ ૪૯.૬૫ ॥

૪૯.૬૬/૧દાતવ્યં ભક્તિયુક્તાય ગુણશીલાન્વિતાય ચ ।
૪૯.૬૬/૨વિષ્ણુભક્તાય શાન્તાય શ્રદ્ધાનુષ્ઠાનશાલિને ॥ ૪૯.૬૬ ॥

૪૯.૬૭/૧ઇદં સમસ્તાઘવિનાશહેતુઃ ।
૪૯.૬૭/૨કારુણ્યસંજ્ઞં સુખમોક્ષદં ચ ।
૪૯.૬૭/૩અશેષવાઞ્છાફલદં વરિષ્ઠમ્ ।
૪૯.૬૭/૪સ્તોત્રં મયોક્તં પુરુષોત્તમસ્ય ॥ ૪૯.૬૭ ॥

૪૯.૬૮/૧યે તં સુસૂક્ષ્મં વિમલા મુરારિમ્ ।
૪૯.૬૮/૨ધ્યાયન્તિ નિત્યં પુરુષં પુરાણમ્ ।
૪૯.૬૮/૩તે મુક્તિભાજઃ પ્રવિશન્તિ વિષ્ણુમ્ ।
૪૯.૬૮/૪મન્ત્રૈર્યથાજ્યં હુતમધ્વરાગ્નૌ ॥ ૪૯.૬૮ ॥

૪૯.૬૯/૧એકઃ સ દેવો ભવદુઃખહન્તા ।
૪૯.૬૯/૨પરઃ પરેષાં ન તતોઽસ્તિ ચાન્યત્ ।
૪૯.૬૯/૩દ્રષ્ટા સ પાતા સ તુ નાશકર્તા ।
૪૯.૬૯/૪વિષ્ણુઃ સમસ્તાખિલસારભૂતઃ ॥ ૪૯.૬૯ ॥

૪૯.૭૦/૧કિં વિદ્યયા કિં સ્વગુણૈશ્ચ તેષામ્ ।
૪૯.૭૦/૨યજ્ઞૈશ્ચ દાનૈશ્ચ તપોભિરુગ્રૈઃ ।
૪૯.૭૦/૩યેષાં ન ભક્તિર્ભવતીહ કૃષ્ણે ।
૪૯.૭૦/૪જગદ્ગુરૌ મોક્ષસુખપ્રદે ચ ॥ ૪૯.૭૦ ॥

૪૯.૭૧/૧લોકે સ ધન્યઃ સ શુચિઃ સ વિદ્વાન્ ।
૪૯.૭૧/૨મખૈસ્તપોભિઃ સ ગુણૈર્વરિષ્ઠઃ ।
૪૯.૭૧/૩જ્ઞાતા સ દાતા સ તુ સત્યવક્તા ।
૪૯.૭૧/૪યસ્યાસ્તિ ભક્તિઃ પુરુષોત્તમાખ્યે ॥ ૪૯.૭૧॥

૫૦.૧/૧બ્રહ્મોવાચ । સ્તુત્વૈવં મુનિશાર્દૂલાઃ પ્રણમ્ય ચ સનાતનમ્ ।
૫૦.૧/૨વાસુદેવં જગન્નાથં સર્વકામફલપ્રદમ્ ॥ ૫૦.૧॥

૫૦.૨/૧ચિન્તાવિષ્ટો મહીપાલઃ કુશાન્ આસ્તીર્ય ભૂતલે ।
૫૦.૨/૨વસ્ત્રં ચ તન્મના ભૂત્વા સુષ્વાપ ધરણીતલે ॥ ૫૦.૨॥

૫૦.૩/૧કથં પ્રત્યક્ષમભ્યેતિ દેવદેવો જનાર્દનઃ ।
૫૦.૩/૨મમ ચાર્તિહરો દેવસ્તદાસાવિતિ ચિન્તયન્ ॥ ૫૦.૩॥

૫૦.૪/૧સુપ્તસ્ય તસ્ય નૃપતેર્વાસુદેવો જગદ્ગુરુઃ ।
૫૦.૪/૨આત્માનં દર્શયામાસ શઙ્ખચક્રગદાભૃતમ્ ॥ ૫૦.૪॥

૫૦.૫/૧સ દદર્શ તુ સપ્રેમ દેવદેવં જગદ્ગુરુમ્ ।
૫૦.૫/૨શઙ્ખચક્રધરં દેવં ગદાચક્રોગ્રપાણિનમ્ ॥ ૫૦.૫॥

૫૦.૬/૧શાર્ઙ્ગબાણધરં દેવં જ્વલત્તેજોતિમણ્ડલમ્ ।
૫૦.૬/૨યુગાન્તાદિત્યવર્ણાભં નીલવૈદૂર્યસંનિભમ્ ॥ ૫૦.૬॥

૫૦.૭/૧સુપર્ણાંસે તમાસીનં ષોડશાર્ધભુજં શુભમ્ ।
૫૦.૭/૨સ ચાસ્મૈ પ્રાબ્રવીદ્ ધીરાઃ સાધુ રાજન્ મહામતે ॥ ૫૦.૭॥

૫૦.૮/૧ક્રતુનાનેન દિવ્યેન તથા ભક્ત્યા ચ શ્રદ્ધયા ।
૫૦.૮/૨તુષ્ટોઽસ્મિ તે મહીપાલ વૃથા કિમનુશોચસિ ॥ ૫૦.૮॥

૫૦.૯/૧યદ્ અત્ર પ્રતિમા રાજઞ્ જગત્પૂજ્યા સનાતની ।
૫૦.૯/૨યથા સા પ્રાપ્યતે ભૂપ તદુપાયં બ્રવીમિ તે ॥ ૫૦.૯॥

૫૦.૧૦/૧ગતાયામદ્ય શર્વર્યાં નિર્મલે ભાસ્કરોદિતે ।
૫૦.૧૦/૨સાગરસ્ય જલસ્યાન્તે નાનાદ્રુમવિભૂષિતે ॥ ૫૦.૧૦॥

૫૦.૧૧/૧જલં તથૈવ વેલાયાં દૃશ્યતે તત્ર વૈ મહત્ ।
૫૦.૧૧/૨લવણસ્યોદધે રાજંસ્તરઙ્ગૈઃ સમભિપ્લુતમ્ ॥ ૫૦.૧૧॥

૫૦.૧૨/૧કૂલાન્તે હિ મહાવૃક્ષઃ સ્થિતઃ સ્થલજલેષુ ચ ।

૫૦.૧૨/૨વેલાભિર્હન્યમાનશ્ચ ન ચાસૌ કમ્પતે દ્રુમઃ ॥ ૫૦.૧૨॥

૫૦.૧૩/૧પરશુમાદાય હસ્તેન ઊર્મેરન્તસ્તતો વ્રજ ।
૫૦.૧૩/૨એકાકી વિહરન્ રાજન્ સ ત્વં પશ્યસિ પાદપમ્ ॥ ૫૦.૧૩॥

૫૦.૧૪/૧ઈદૃક્ ચિહ્નં સમાલોક્ય છેદય ત્વમશઙ્કિતઃ ।
૫૦.૧૪/૨છેદ્યમાનં તુ તં વૃક્ષં પ્રાતરદ્ભુતદર્શનમ્ ॥ ૫૦.૧૪॥

૫૦.૧૫/૧દૃષ્ટ્વા તેનૈવ સંચિન્ત્ય તતો ભૂપાલ દર્શનાત્ ।
૫૦.૧૫/૨કુરુ તાં પ્રતિમાં દિવ્યાં જહિ ચિન્તાં વિમોહિનીમ્ ॥ ૫૦.૧૫॥

૫૦.૧૬/૧બ્રહ્મોવાચ । એવમુક્ત્વા મહાભાગો જગામાદર્શનં હરિઃ ।
૫૦.૧૬/૨સ ચાપિ સ્વપ્નમાલોક્ય પરં વિસ્મયમાગતઃ ॥ ૫૦.૧૬॥

૫૦.૧૭/૧તાં નિશાં સ સમુદ્વીક્ષ્ય સ્થિતસ્તદ્ગતમાનસઃ ।
૫૦.૧૭/૨વ્યાહરન્ વૈષ્ણવાન્ મન્ત્રાન્ સૂક્તં ચૈવ તદાત્મકમ્ ॥ ૫૦.૧૭॥

૫૦.૧૮/૧પ્રગતાયાં રજન્યાં તુ ઉત્થિતો નાન્યમાનસઃ ।
૫૦.૧૮/૨સ સ્નાત્વા સાગરે સમ્યગ્ યથાવદ્ વિધિના તતઃ ॥ ૫૦.૧૮॥

૫૦.૧૯/૧દત્ત્વા દાનં ચ વિપ્રેભ્યો ગ્રામાંશ્ચ નગરાણિ ચ ।
૫૦.૧૯/૨કૃત્વા પૌર્વાહ્ણિકં કર્મ જગામ સ નૃપોત્તમઃ ॥ ૫૦.૧૯॥

૫૦.૨૦/૧ન ચાશ્વો ન પદાતિશ્ચ ન ગજો ન ચ સારથિઃ ।
૫૦.૨૦/૨એકાકી સ મહાવેલાં પ્રવિવેશ મહીપતિઃ ॥ ૫૦.૨૦॥

૫૦.૨૧/૧તં દદર્શ મહાવૃક્ષં તેજસ્વન્તં મહાદ્રુમમ્ ।
૫૦.૨૧/૨મહાતિગમહારોહં પુણ્યં વિપુલમેવ ચ ॥ ૫૦.૨૧॥

૫૦.૨૨/૧મહોત્સેધં મહાકાયં પ્રસુપ્તં ચ જલાન્તિકે ।
૫૦.૨૨/૨સાન્દ્રમાઞ્જિષ્ઠવર્ણાભં નામજાતિવિવર્જિતમ્ ॥ ૫૦.૨૨॥

૫૦.૨૩/૧નરનાથસ્તદા વિપ્રા દ્રુમં દૃષ્ટ્વા મુદાન્વિતઃ ।
૫૦.૨૩/૨પરશુના શાતયામાસ નિશિતેન દૃઢેન ચ ॥ ૫૦.૨૩॥

૫૦.૨૪/૧દ્વૈધીકર્તુમનાસ્તત્ર બભૂવેન્દ્રસખઃ સ ચ ।
૫૦.૨૪/૨નિરીક્ષ્યમાણે કાષ્ઠે તુ બભૂવાદ્ભુતદર્શનમ્ ॥ ૫૦.૨૪॥

૫૦.૨૫/૧વિશ્વકર્મા ચ વિષ્ણુશ્ચ વિપ્રરૂપધરાવુભૌ ।
૫૦.૨૫/૨આજગ્મતુર્મહાભાગૌ તદા તુલ્યાગ્રજન્મનૌ ॥ ૫૦.૨૫॥

૫૦.૨૬/૧જ્વલમાનૌ સ્વતેજોભિર્દિવ્યસ્રગનુલેપનૌ ।
૫૦.૨૬/૨અથ તૌ તં સમાગમ્ય નૃપમિન્દ્રસખં તદા ॥ ૫૦.૨૬॥

૫૦.૨૭/૧તાવૂચતુર્મહારાજ કિમત્ર ત્વં કરિષ્યસિ ।
૫૦.૨૭/૨કિમર્થં ચ મહાબાહો શાતિતશ્ચ વનસ્પતિઃ ॥ ૫૦.૨૭॥

૫૦.૨૮/૧અસહાયો મહાદુર્ગે નિર્જને ગહને વને ।
૫૦.૨૮/૨મહાસિન્ધુતટે ચૈવ કથં વૈ શાતિતો દ્રુમઃ ॥ ૫૦.૨૮॥

૫૦.૨૯/૧બ્રહ્મોવાચ । તયોઃ શ્રુત્વા વચો વિપ્રાઃ સ તુ રાજા મુદાન્વિતઃ ।
૫૦.૨૯/૨બભાષે વચનં તાભ્યાં મૃદુલં મધુરં તથા ॥ ૫૦.૨૯॥

૫૦.૩૦/૧દૃષ્ટ્વા તૌ બ્રાહ્મણૌ તત્ર ચન્દ્રસૂર્યાવિવાગતૌ ।
૫૦.૩૦/૨નમસ્કૃત્ય જગન્નાથાવવાઙ્મુખમવસ્થિતઃ ॥ ૫૦.૩૦॥

૫૦.૩૧/૧રાજોવાચ । દેવદેવમનાદ્યન્તમનન્તં જગતાં પતિમ્ ।
૫૦.૩૧/૨આરાધયિતું પ્રતિમાં કરોમીતિ મતિર્મમ ॥ ૫૦.૩૧॥

૫૦.૩૨/૧અહં સ દેવદેવેન પરમેણ મહાત્મના ।
૫૦.૩૨/૨સ્વપ્નાન્તે ચ સમુદ્દિષ્ટો ભવદ્ભ્યાં શ્રાવિતં મયા ॥ ૫૦.૩૨॥

૫૦.૩૩/૧બ્રહ્મોવાચ । રાજ્ઞસ્તુ વચનં શ્રુત્વા દેવેન્દ્રપ્રતિમસ્ય ચ ।
૫૦.૩૩/૨પ્રહસ્ય તસ્મૈ વિશ્વેશસ્તુષ્ટો વચનમબ્રવીત્ ॥ ૫૦.૩૩॥

૫૦.૩૪/૧વિષ્ણુરુવાચ । સાધુ સાધુ મહીપાલ યદ્ એતન્ મતમુત્તમમ્ ।
૫૦.૩૪/૨સંસારસાગરે ઘોરે કદલીદલસંનિભે ॥ ૫૦.૩૪॥

૫૦.૩૫/૧નિઃસારે દુઃખબહુલે કામક્રોધસમાકુલે ।
૫૦.૩૫/૨ઇન્દ્રિયાવર્તકલિલે દુસ્તરે રોમહર્ષણે ॥ ૫૦.૩૫॥

૫૦.૩૬/૧નાનાવ્યાધિશતાવર્તે જલબુદ્બુદસંનિભે ।
૫૦.૩૬/૨યતસ્તે મતિરુત્પન્ના વિષ્ણોરારાધનાય વૈ ॥ ૫૦.૩૬॥

૫૦.૩૭/૧ધન્યસ્ત્વં નૃપશાર્દૂલ ગુણૈઃ સર્વૈરલંકૃતઃ ।
૫૦.૩૭/૨સપ્રજા પૃથિવી ધન્યા સશૈલવનકાનના ॥ ૫૦.૩૭॥

૫૦.૩૮/૧સપુરગ્રામનગરા ચતુર્વર્ણૈરલંકૃતા ।
૫૦.૩૮/૨યત્ર ત્વં નૃપશાર્દૂલ પ્રજાઃ પાલયિતા પ્રભુઃ ॥ ૫૦.૩૮॥

૫૦.૩૯/૧એહ્યેહિ સુમહાભાગ દ્રુમેઽસ્મિન્ સુખશીતલે ।
૫૦.૩૯/૨આવાભ્યાં સહ તિષ્ઠ ત્વં કથાભિર્ધર્મસંશ્રિતઃ ॥ ૫૦.૩૯॥

૫૦.૪૦/૧અયં મમ સહાયસ્તુ આગતઃ શિલ્પિનાં વરઃ ।
૫૦.૪૦/૨વિશ્વકર્મસમઃ સાક્ષાન્ નિપુણઃ સર્વકર્મસુ ।
૫૦.૪૦/૩મયોદ્દિષ્ટાં તુ પ્રતિમાં કરોત્યેષ તટં ત્યજ ॥ ૫૦.૪૦॥

૫૦.૪૧/૧બ્રહ્મોવાચ । શ્રુત્વૈવં વચનં તસ્ય તદા રાજા દ્વિજન્મનઃ ।
૫૦.૪૧/૨સાગરસ્ય તટં ત્યક્ત્વા ગત્વા તસ્ય સમીપતઃ ॥ ૫૦.૪૧॥

૫૦.૪૨/૧તસ્થૌ સ નૃપતિશ્રેષ્ઠો વૃક્ષચ્છાયે સુશીતલે ।
૫૦.૪૨/૨તતસ્તસ્મૈ સ વિશ્વાત્મા દદાવાજ્ઞાં દ્વિજાકૃતિઃ ॥ ૫૦.૪૨॥

૫૦.૪૩/૧શિલ્પિમુખ્યાય વિપ્રેન્દ્રાઃ કુરુષ્વ પ્રતિમા ઇતિ ।
૫૦.૪૩/૨કૃષ્ણરૂપં પરં શાન્તં પદ્મપત્રાયતેક્ષણમ્ ॥ ૫૦.૪૩॥

૫૦.૪૪/૧શ્રીવત્સકૌસ્તુભધરં શઙ્ખચક્રગદાધરમ્ ।
૫૦.૪૪/૨ગૌરાઙ્ગં ક્ષીરવર્ણાભં દ્વિતીયં સ્વસ્તિકાઙ્કિતમ્ ॥ ૫૦.૪૪॥

૫૦.૪૫/૧લાઙ્ગલાસ્ત્રધરં દેવમનન્તાખ્યં મહાબલમ્ ।
૫૦.૪૫/૨દેવદાનવગન્ધર્વ+ ।યક્ષવિદ્યાધરોરગૈઃ ॥ ૫૦.૪૫॥

૫૦.૪૬/૧ન વિજ્ઞાતો હિ તસ્યાન્તસ્તેનાનન્ત ઇતિ સ્મૃતઃ ।
૫૦.૪૬/૨ભગિનીં વાસુદેવસ્ય રુક્મવર્ણાં સુશોભનામ્ ॥ ૫૦.૪૬॥

૫૦.૪૭/૧તૃતીયાં વૈ સુભદ્રાં ચ સર્વલક્ષણલક્ષિતામ્ ॥ ૫૦.૪૭॥

૫૦.૪૮/૧બ્રહ્મોવાચ । શ્રુત્વૈતદ્ વચનં તસ્ય વિશ્વકર્મા સુકર્મકૃત્ ।
૫૦.૪૮/૨તત્ક્ષણાત્ કારયામાસ પ્રતિમાઃ શુભલક્ષણાઃ ॥ ૫૦.૪૮॥

૫૦.૪૯/૧પ્રથમં શુક્લવર્ણાભં શારદેન્દુસમપ્રભમ્ ।
૫૦.૪૯/૨આરક્તાક્ષં મહાકાયં સ્ફટાવિકટમસ્તકમ્ ॥ ૫૦.૪૯॥

૫૦.૫૦/૧નીલામ્બરધરં ચોગ્રં બલં બલમદોદ્ધતમ્ ।
૫૦.૫૦/૨કુણ્ડલૈકધરં દિવ્યં ગદામુશલધારિણમ્ ॥ ૫૦.૫૦॥

૫૦.૫૧/૧દ્વિતીયં પુણ્ડરીકાક્ષં નીલજીમૂતસંનિભમ્ ।
૫૦.૫૧/૨અતસીપુષ્પસંકાશં પદ્મપત્રાયતેક્ષણમ્ ॥ ૫૦.૫૧॥

૫૦.૫૨/૧પીતવાસસમત્યુગ્રં શુભં શ્રીવત્સલક્ષણમ્ ।
૫૦.૫૨/૨ચક્રપૂર્ણકરં દિવ્યં સર્વપાપહરં હરિમ્ ॥ ૫૦.૫૨॥

૫૦.૫૩/૧તૃતીયાં સ્વર્ણવર્ણાભાં પદ્મપત્રાયતેક્ષણામ્ ।

૫૦.૫૩/૨વિચિત્રવસ્ત્રસંછન્નાં હારકેયૂરભૂષિતામ્ ॥ ૫૦.૫૩॥

૫૦.૫૪/૧વિચિત્રાભરણોપેતાં રત્નહારાવલમ્બિતામ્ ।
૫૦.૫૪/૨પીનોન્નતકુચાં રમ્યાં વિશ્વકર્મા વિનિર્મમે ॥ ૫૦.૫૪॥

૫૦.૫૫/૧સ તુ રાજાદ્ભુતં દૃષ્ટ્વા ક્ષણેનૈકેન નિર્મિતાઃ ।
૫૦.૫૫/૨દિવ્યવસ્ત્રયુગચ્છન્ના નાનારત્નૈરલંકૃતાઃ ॥ ૫૦.૫૫॥

૫૦.૫૬/૧સર્વલક્ષણસમ્પન્નાઃ પ્રતિમાઃ સુમનોહરાઃ ।
૫૦.૫૬/૨વિસ્મયં પરમં ગત્વા ઇદં વચનમબ્રવીત્ ॥ ૫૦.૫૬॥

૫૦.૫૭/૧ઇન્દ્રદ્યુમ્ન ઉવાચ । કિં દેવૌ સમનુપ્રાપ્તૌ દ્વિજરૂપધરાવુભૌ ।
૫૦.૫૭/૨ઉભૌ ચાદ્ભુતકર્માણૌ દેવવૃત્તાવમાનુષૌ ॥ ૫૦.૫૭॥

૫૦.૫૮/૧દેવૌ વા માનુષૌ વાપિ યક્ષવિદ્યાધરૌ યુવામ્ ।
૫૦.૫૮/૨કિં નુ બ્રહ્મહૃષીકેશૌ કિં વસૂ કિમુતાશ્વિનૌ ॥ ૫૦.૫૮॥

૫૦.૫૯/૧ન વેદ્મિ સત્યસદ્ભાવૌ માયારૂપેણ સંસ્થિતૌ ।
૫૦.૫૯/૨યુવાં ગતોઽસ્મિ શરણમાત્મા તુ મે પ્રકાશ્યતામ્ ॥ ૫૦.૫૯॥

૫૧.૧/૧શ્રીભગવાન્ ઉવાચ । નાહં દેવો ન યક્ષો વા ન દૈત્યો ન ચ દેવરાટ્ ।
૫૧.૧/૨ન બ્રહ્મા ન ચ રુદ્રોઽહં વિદ્ધિ માં પુરુષોત્તમમ્ ॥ ૫૧.૧॥

૫૧.૨/૧અર્તિહા સર્વલોકાનામનન્તબલપૌરુષઃ ।
૫૧.૨/૨આરાધનીયો ભૂતાનામન્તો યસ્ય ન વિદ્યતે ॥ ૫૧.૨॥

૫૧.૩/૧પઠ્યતે સર્વશાસ્ત્રેષુ વેદાન્તેષુ નિગદ્યતે ।
૫૧.૩/૨યમાહુર્જ્ઞાનગમ્યેતિ વાસુદેવેતિ યોગિનઃ ॥ ૫૧.૩॥

૫૧.૪/૧અહમેવ સ્વયં બ્રહ્મા અહં વિષ્ણુઃ શિવોઽપ્યહમ્ ।
૫૧.૪/૨ઇન્દ્રોઽહં દેવરાજશ્ચ જગત્સંયમનો યમઃ ॥ ૫૧.૪॥

૫૧.૫/૧પૃથિવ્યાદીનિ ભૂતાનિ ત્રેતાગ્નિર્હુતભુઙ્ નૃપ ।
૫૧.૫/૨વરુણોઽપાં પતિશ્ચાહં ધરિત્રી ચ મહીધરઃ ॥ ૫૧.૫॥

૫૧.૬/૧યત્ કિંચિદ્ વાઙ્મયં લોકે જગત્ સ્થાવરજઙ્ગમમ્ ।
૫૧.૬/૨ચરાચરં ચ યદ્ વિશ્વં મદન્યન્ નાસ્તિ કિંચન ॥ ૫૧.૬॥

૫૧.૭/૧પ્રીતોઽહં તે નૃપશ્રેષ્ઠ વરં વરય સુવ્રત ।
૫૧.૭/૨યદ્ ઇષ્ટં તત્ પ્રયચ્છામિ હૃદિ યત્ તે વ્યવસ્થિતમ્ ॥ ૫૧.૭॥

૫૧.૮/૧મદ્દર્શનમપુણ્યાનાં સ્વપ્નાન્તેઽપિ ન જાયતે ।
૫૧.૮/૨ત્વં પુનર્દૃઢભક્તિત્વાત્ પ્રત્યક્ષં દૃષ્ટવાન્ અસિ ॥ ૫૧.૮॥

૫૧.૯/૧બ્રહ્મોવાચ । શ્રુત્વૈવં વાસુદેવસ્ય વચનં તસ્ય ભો દ્વિજાઃ ।
૫૧.૯/૨રોમાઞ્ચિતતનુર્ભૂત્વા ઇદં સ્તોત્રં જગૌ નૃપઃ ॥ ૫૧.૯॥

૫૧.૧૦/૧રાજોવાચ । શ્રિયઃ કાન્ત નમસ્તેઽસ્તુ શ્રીપતે પીતવાસસે ।
૫૧.૧૦/૨શ્રીદ શ્રીશ શ્રીનિવાસ નમસ્તે શ્રીનિકેતન ॥ ૫૧.૧૦॥

૫૧.૧૧/૧આદ્યં પુરુષમીશાનં સર્વેશં સર્વતોમુખમ્ ।
૫૧.૧૧/૨નિષ્કલં પરમં દેવં પ્રણતોઽસ્મિ સનાતનમ્ ॥ ૫૧.૧૧॥

૫૧.૧૨/૧શબ્દાતીતં ગુણાતીતં ભાવાભાવવિવર્જિતમ્ ।
૫૧.૧૨/૨નિર્લેપં નિર્ગુણં સૂક્ષ્મં સર્વજ્ઞં સર્વભાવનમ્ ॥ ૫૧.૧૨॥

૫૧.૧૩/૧પ્રાવૃણ્મેઘપ્રતીકાશં ગોબ્રાહ્મણહિતે રતમ્ ।
૫૧.૧૩/૨સર્વેષામેવ ગોપ્તારં વ્યાપિનં સર્વભાવિનમ્ ॥ ૫૧.૧૩॥

૫૧.૧૪/૧શઙ્ખચક્રધરં દેવં ગદામુશલધારિણમ્ ।
૫૧.૧૪/૨નમસ્યે વરદં દેવં નીલોત્પલદલચ્છવિમ્ ॥ ૫૧.૧૪॥

૫૧.૧૫/૧નાગપર્યઙ્કશયનં ક્ષીરોદાર્ણવશાયિનમ્ ।
૫૧.૧૫/૨નમસ્યેઽહં હૃષીકેશં સર્વપાપહરં હરિમ્ ॥ ૫૧.૧૫॥

૫૧.૧૬/૧પુનસ્ત્વાં દેવદેવેશં નમસ્યે વરદં વિભુમ્ ।
૫૧.૧૬/૨સર્વલોકેશ્વરં વિષ્ણું મોક્ષકારણમવ્યયમ્ ॥ ૫૧.૧૬॥

૫૧.૧૭/૧બ્રહ્મોવાચ । એવં સ્તુત્વા તુ તં દેવં પ્રણિપત્ય કૃતાઞ્જલિઃ ।
૫૧.૧૭/૨ઉવાચ પ્રણતો ભૂત્વા નિપત્ય ધરણીતલે ॥ ૫૧.૧૭॥

૫૧.૧૮/૧રાજોવાચ । પ્રીતોઽસિ યદિ મે નાથ વૃણોમિ વરમુત્તમમ્ ।
૫૧.૧૮/૨દેવાસુરાઃ સગન્ધર્વા યક્ષરક્ષોમહોરગાઃ ॥ ૫૧.૧૮॥

૫૧.૧૯/૧સિદ્ધવિદ્યાધરાઃ સાધ્યાઃ કિંનરા ગુહ્યકાસ્તથા ।
૫૧.૧૯/૨ઋષયો યે મહાભાગા નાનાશાસ્ત્રવિશારદાઃ ॥ ૫૧.૧૯॥

૫૧.૨૦/૧પરિવ્રાડ્યોગયુક્તાશ્ચ વેદતત્ત્વાર્થચિન્તકાઃ ।
૫૧.૨૦/૨મોક્ષમાર્ગવિદો યેઽન્યે ધ્યાયન્તિ પરમં પદમ્ ॥ ૫૧.૨૦॥

૫૧.૨૧/૧નિર્ગુણં નિર્મલં શાન્તં યત્ પશ્યન્તિ મનીષિનઃ ।
૫૧.૨૧/૨તત્ પદં ગન્તુમિચ્છામિ ત્વત્પ્રસાદાત્ સુદુર્લભમ્ ॥ ૫૧.૨૧॥

૫૧.૨૨/૧શ્રીભગવાન્ ઉવાચ । સર્વં ભવતુ ભદ્રં તે યથેષ્ટં સર્વમાપ્નુહિ ।
૫૧.૨૨/૨ભવિષ્યતિ યથાકામં મત્પ્રસાદાન્ ન સંશયઃ ॥ ૫૧.૨૨॥

૫૧.૨૩/૧દશ વર્ષસહસ્રાણિ તથા નવ શતાનિ ચ ।
૫૧.૨૩/૨અવિચ્છિન્નં મહારાજ્યં કુરુ ત્વં નૃપસત્તમ ॥ ૫૧.૨૩॥

૫૧.૨૪/૧પ્રયાસ્યસિ પદં દિવ્યં દુર્લભં યત્ સુરાસુરૈઃ ।
૫૧.૨૪/૨પૂર્ણમનોરથં શાન્તં ગુહ્યમવ્યક્તમવ્યયમ્ ॥ ૫૧.૨૪॥

૫૧.૨૫/૧પરાત્ પરતરં સૂક્ષ્મં નિર્લેપં નિષ્કલં ધ્રુવમ્ ।
૫૧.૨૫/૨ચિન્તાશોકવિનિર્મુક્તં ક્રિયાકારણવર્જિતમ્ ॥ ૫૧.૨૫॥

૫૧.૨૬/૧તદ્ અહં દર્શયિષ્યામિ જ્ઞેયાખ્યં પરમં પદમ્ ।
૫૧.૨૬/૨યં પ્રાપ્ય પરમાનન્દં પ્રાપ્સ્યસિ પરમાં ગતિમ્ ॥ ૫૧.૨૬॥

૫૧.૨૭/૧કીર્તિશ્ચ તવ રાજેન્દ્ર ભવત્યત્ર મહીતલે ।
૫૧.૨૭/૨યાવદ્ ઘના નભો યાવદ્ યાવચ્ચન્દ્રાર્કતારકમ્ ॥ ૫૧.૨૭॥

૫૧.૨૮/૧યાવત્ સમુદ્રાઃ સપ્તૈવ યાવન્ મેર્વાદિપર્વતાઃ ।
૫૧.૨૮/૨તિષ્ઠન્તિ દિવિ દેવાશ્ચ તાવત્ સર્વત્ર ચાવ્યયા ॥ ૫૧.૨૮॥

૫૧.૨૯/૧ઇન્દ્રદ્યુમ્નસરો નામ તીર્થં યજ્ઞાઙ્ગસમ્ભવમ્ ।
૫૧.૨૯/૨યત્ર સ્નાત્વા સકૃલ્લોકઃ શક્રલોકમવાપ્નુયાત્ ॥ ૫૧.૨૯॥

૫૧.૩૦/૧દાપયિષ્યતિ યઃ પિણ્ડાંસ્તટેઽસ્મિન્ સરસઃ શુભે ।
૫૧.૩૦/૨કુલૈકવિંશમુદ્ધૃત્ય શક્રલોકં ગમિષ્યતિ ॥ ૫૧.૩૦॥

૫૧.૩૧/૧પૂજ્યમાનોઽપ્સરોભિશ્ચ ગન્ધર્વૈર્ગીતનિસ્વનૈઃ ।
૫૧.૩૧/૨વિમાનેન વસેત્ તત્ર યાવદ્ ઇન્દ્રાશ્ચતુર્દશ ॥ ૫૧.૩૧॥

૫૧.૩૨/૧સરસો દક્ષિણે ભાગે નૈરૃત્યાં તુ સમાશ્રિતે ।
૫૧.૩૨/૨ન્યગ્રોધસ્તિષ્ઠતે તત્ર તત્સમીપે તુ મણ્ડપઃ ॥ ૫૧.૩૨॥

૫૧.૩૩/૧કેતકીવનસંછન્નો નાનાપાદપસંકુલઃ ।
૫૧.૩૩/૨નારિકેલૈરસંખ્યેયૈશ્ચમ્પકૈર્બકુલાવૃતૈઃ ॥ ૫૧.૩૩॥

૫૧.૩૪/૧અશોકૈઃ કર્ણિકારૈશ્ચ પુંનાગૈર્નાગકેસરૈઃ ।
૫૧.૩૪/૨પાટલામ્રાતસરલૈશ્ચન્દનૈર્દેવદારુભિઃ ॥ ૫૧.૩૪॥

૫૧.૩૫/૧ન્યગ્રોધાશ્વત્થખદિરૈઃ પારિજાતૈઃ સહાર્જુનૈઃ ।

૫૧.૩૫/૨હિન્તાલૈશ્ચૈવ તાલૈશ્ચ શિંશપૈર્બદરૈસ્તથા ॥ ૫૧.૩૫॥

૫૧.૩૬/૧કરઞ્જૈર્લકુચૈઃ પ્લક્ષૈઃ પનસૈર્બિલ્વધાતુકૈઃ ।
૫૧.૩૬/૨અન્યૈર્બહુવિધૈર્વૃક્ષૈઃ શોભિતઃ સમલંકૃતઃ ॥ ૫૧.૩૬॥

૫૧.૩૭/૧આષાઢસ્ય સિતે પક્ષે પઞ્ચમ્યાં પિતૃદૈવતે ।
૫૧.૩૭/૨ઋક્ષે નેષ્યન્તિ નસ્તત્ર નીત્વા સપ્ત દિનાનિ વૈ ॥ ૫૧.૩૭॥

૫૧.૩૮/૧મણ્ડપે સ્થાપયિષ્યન્તિ સુવેશ્યાભિઃ સુશોભનૈઃ ।
૫૧.૩૮/૨ક્રીડાવિશેષબહુલૈર્નૃત્યગીતમનોહરૈઃ ॥ ૫૧.૩૮॥

૫૧.૩૯/૧ચામરૈઃ સ્વર્ણદણ્ડૈશ્ચ વ્યજનૈ રત્નભૂષણૈઃ ।
૫૧.૩૯/૨વીજયન્તસ્તથાસ્મભ્યં સ્થાપયિષ્યન્તિ મઙ્ગલાઃ ॥ ૫૧.૩૯॥

૫૧.૪૦/૧બ્રહ્મચારી યતિશ્ચૈવ સ્નાતકાશ્ચ દ્વિજોત્તમાઃ ।
૫૧.૪૦/૨વાનપ્રસ્થા ગૃહસ્થાશ્ચ સિદ્ધાશ્ચાન્યે ચ બ્રાહ્મણાઃ ॥ ૫૧.૪૦॥

૫૧.૪૧/૧નાનાવર્ણપદૈઃ સ્તોત્રૈરૃગ્યજુઃસામનિસ્વનૈઃ ।
૫૧.૪૧/૨કરિષ્યન્તિ સ્તુતિં રાજન્ રામકેશવયોઃ પુનઃ ॥ ૫૧.૪૧॥

૫૧.૪૨/૧તતઃ સ્તુત્વા ચ દૃષ્ટ્વા ચ સમ્પ્રણમ્ય ચ ભક્તિતઃ ।
૫૧.૪૨/૨નરો વર્ષાયુતં દિવ્યં શ્રીમદ્ધરિપુરે વસેત્ ॥ ૫૧.૪૨॥

૫૧.૪૩/૧પૂજ્યમાનોઽપ્સરોભિશ્ચ ગન્ધર્વૈર્ગીતનિસ્વનૈઃ ।
૫૧.૪૩/૨હરેરનુચરસ્તત્ર ક્રીડતે કેશવેન વૈ ॥ ૫૧.૪૩॥

૫૧.૪૪/૧વિમાનેનાર્કવર્ણેન રત્નહારેણ ભ્રાજતા ।
૫૧.૪૪/૨સર્વકામૈર્મહાભોગૈસ્તિષ્ઠતે ભુવનોત્તમે ॥ ૫૧.૪૪॥

૫૧.૪૫/૧તપઃક્ષયાદિહાગત્ય મનુષ્યો બ્રાહ્મણો ભવેત્ ।
૫૧.૪૫/૨કોટીધનપતિઃ શ્રીમાંશ્ચતુર્વેદી ભવેદ્ ધ્રુવમ્ ॥ ૫૧.૪૫॥

૫૧.૪૬/૧બ્રહ્મોવાચ । એવં તસ્મૈ વરં દત્ત્વા કૃત્વા ચ સમયં હરિઃ ।
૫૧.૪૬/૨જગામાદર્શનં વિપ્રાઃ સહિતો વિશ્વકર્મણા ॥ ૫૧.૪૬॥

૫૧.૪૭/૧સ તુ રાજા તદા હૃષ્ટો રોમાઞ્ચિતતનૂરુહઃ ।
૫૧.૪૭/૨કૃતકૃત્યમિવાત્માનં મેને સંદર્શનાદ્ ધરેઃ ॥ ૫૧.૪૭॥

૫૧.૪૮/૧તતઃ કૃષ્ણં ચ રામં ચ સુભદ્રાં ચ વરપ્રદામ્ ।
૫૧.૪૮/૨રથૈર્વિમાનસંકાશૈર્મણિકાઞ્ચનચિત્રિતૈઃ ॥ ૫૧.૪૮॥

૫૧.૪૯/૧સંવાહ્ય તાસ્તદા રાજા મહામઙ્ગલનિઃસ્વનૈઃ ।
૫૧.૪૯/૨આનયામાસ મતિમાન્ સામાત્યઃ સપુરોહિતઃ ॥ ૫૧.૪૯ ॥

૫૧.૫૦/૧નાનાવાદિત્રનિર્ઘોષૈર્નાનાવેદસ્વનૈઃ શુભૈઃ ।
૫૧.૫૦/૨સંસ્થાપ્ય ચ શુભે દેશે પવિત્રે સુમનોહરે ॥ ૫૧.૫૦ ॥

૫૧.૫૧/૧તતઃ શુભતિથૌ કાલે નક્ષત્રે શુભલક્ષણે ।
૫૧.૫૧/૨પ્રતિષ્ઠાં કારયામાસ સુમુહૂર્તે દ્વિજૈઃ સહ ॥ ૫૧.૫૧ ॥

૫૧.૫૨/૧યથોક્તેન વિધાનેન વિધિદૃષ્ટેન કર્મણા ।
૫૧.૫૨/૨આચાર્યાનુમતેનૈવ સર્વં કૃત્વા મહીપતિઃ ॥ ૫૧.૫૨ ॥

૫૧.૫૩/૧આચાર્યાય તદા દત્ત્વા દક્ષિણાં વિધિવત્ પ્રભુઃ ।
૫૧.૫૩/૨ઋત્વિગ્ભ્યશ્ચ વિધાનેન તથાન્યેભ્યો ધનં દદૌ ॥ ૫૧.૫૩ ॥

૫૧.૫૪/૧કૃત્વા પ્રતિષ્ઠાં વિધિવત્ પ્રાસાદે ભવનોત્તમે ।
૫૧.૫૪/૨સ્થાપયામાસ તાન્ સર્વાન્ વિધિદૃષ્ટેન કર્મણા ॥ ૫૧.૫૪ ॥

૫૧.૫૫/૧તતઃ સમ્પૂજ્ય વિધિના નાનાપુષ્પૈઃ સુગન્ધિભિઃ ।
૫૧.૫૫/૨સુવર્ણમણિમુક્તાદ્યૈર્નાનાવસ્ત્રૈઃ સુશોભનૈઃ ॥ ૫૧.૫૫ ॥

૫૧.૫૬/૧રત્નૈશ્ચ વિવિધૈર્દિવ્યૈરાસનૈર્ગ્રામપત્તનૈઃ ।
૫૧.૫૬/૨દદૌ ચાન્યાન્ સ વિષયાન્ પુરાણિ નગરાણિ ચ ॥ ૫૧.૫૬ ॥

૫૧.૫૭/૧એવં બહુવિધં દત્ત્વા રાજ્યં કૃત્વા યથોચિતમ્ ।
૫૧.૫૭/૨ઇષ્ટ્વા ચ વિવિધૈર્યજ્ઞૈર્દત્ત્વા દાનાન્યનેકશઃ ॥ ૫૧.૫૭ ॥

૫૧.૫૮/૧કૃતકૃત્યસ્તતો રાજા ત્યક્તસર્વપરિગ્રહઃ ।
૫૧.૫૮/૨જગામ પરમં સ્થાનં તદ્ વિષ્ણોઃ પરમં પદમ્ ॥ ૫૧.૫૮ ॥

૫૧.૫૯/૧એવં મયા મુનિશ્રેષ્ઠાઃ કથિતો વો નૃપોત્તમઃ ।
૫૧.૫૯/૨ક્ષેત્રસ્ય ચૈવ માહાત્મ્યં કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૫૧.૫૯ ॥

૫૧.૬૦/૧વિષ્ણુરુવાચ । શ્રુત્વૈવં વચનં તસ્ય બ્રહ્મણોઽવ્યક્તજન્મનઃ ।
૫૧.૬૦/૨આશ્ચર્યં મેનિરે વિપ્રાઃ પપ્રચ્છુશ્ચ પુનર્મુદા ॥ ૫૧.૬૦ ॥

૫૧.૬૧/૧મુનય ઊચુઃ । કસ્મિન્ કાલે સુરશ્રેષ્ઠ ગન્તવ્યં પુરુષોત્તમમ્ ।
૫૧.૬૧/૨વિધિના કેન કર્તવ્યં પઞ્ચતીર્થમિતિ પ્રભો ॥ ૫૧.૬૧ ॥

૫૧.૬૨/૧એકૈકસ્ય ચ તીર્થસ્ય સ્નાનદાનસ્ય યત્ ફલમ્ ।
૫૧.૬૨/૨દેવતાપ્રેક્ષણે ચૈવ બ્રૂહિ સર્વં પૃથક્ પૃથક્ ॥ ૫૧.૬૨ ॥

૫૧.૬૩/૧બ્રહ્મોવાચ । નિરાહારઃ કુરુક્ષેત્રે પાદેનૈકેન યસ્તપેત્ ।
૫૧.૬૩/૨જિતેન્દ્રિયો જિતક્રોધઃ સપ્તસંવત્સરાયુતમ્ ॥ ૫૧.૬૩ ॥

૫૧.૬૪/૧દૃષ્ટ્વા સદા જ્યેષ્ઠશુક્લ+ ।દ્વાદશ્યાં પુરુષોત્તમમ્ ।
૫૧.૬૪/૨કૃતોપવાસઃ પ્રાપ્નોતિ તતોઽધિકતરં ફલમ્ ॥ ૫૧.૬૪ ॥

૫૧.૬૫/૧તસ્માજ્જ્યેષ્ઠે મુનિશ્રેષ્ઠાઃ પ્રયત્નેન સુસંયતૈઃ ।
૫૧.૬૫/૨સ્વર્ગલોકેપ્સુવિપ્રાદ્યૈર્દ્રષ્ટવ્યઃ પુરુષોત્તમઃ ॥ ૫૧.૬૫ ॥

૫૧.૬૬/૧પઞ્ચતીર્થં તુ વિધિવત્ કૃત્વા જ્યેષ્ઠે નરોત્તમઃ ।
૫૧.૬૬/૨શુક્લપક્ષસ્ય દ્વાદશ્યાં પશ્યેત્ તં પુરુષોત્તમમ્ ॥ ૫૧.૬૬ ॥

૫૧.૬૭/૧યે પશ્યન્ત્યવ્યયં દેવં દ્વાદશ્યાં પુરુષોત્તમમ્ ।
૫૧.૬૭/૨તે વિષ્ણુલોકમાસાદ્ય ન ચ્યવન્તે કદાચન ॥ ૫૧.૬૭ ॥

૫૧.૬૮/૧તસ્માજ્જ્યેષ્ઠે પ્રયત્નેન ગન્તવ્યં ભો દ્વિજોત્તમાઃ ।
૫૧.૬૮/૨કૃત્વા તસ્મિન્ પઞ્ચતીર્થં દ્રષ્ટવ્યઃ પુરુષોત્તમઃ ॥ ૫૧.૬૮ ॥

૫૧.૬૯/૧સુદૂરસ્થોઽપિ યો ભક્ત્યા કીર્તયેત્ પુરુષોત્તમમ્ ।
૫૧.૬૯/૨અહન્યહનિ શુદ્ધાત્મા સોઽપિ વિષ્ણુપુરં વ્રજેત્ ॥ ૫૧.૬૯ ॥

૫૧.૭૦/૧યાત્રાં કરોતિ કૃષ્ણસ્ય શ્રદ્ધયા યઃ સમાહિતઃ ।
૫૧.૭૦/૨સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકં વ્રજેન્ નરઃ ॥ ૫૧.૭૦ ॥

૫૧.૭૧/૧ચક્રં દૃષ્ટ્વા હરેર્દૂરાત્ પ્રાસાદોપરિ સંસ્થિતમ્ ।
૫૧.૭૧/૨સહસા મુચ્યતે પાપાન્ નરો ભક્ત્યા પ્રણમ્ય તત્ ॥ ૫૧.૭૧ ॥

૫૨.૧/૧બ્રહ્મોવાચ । આસીત્ કલ્પે મુનિશ્રેષ્ઠાઃ સમ્પ્રવૃત્તે મહાક્ષયે ।
૫૨.૧/૨નષ્ટેઽર્કચન્દ્રે પવને નષ્ટે સ્થાવરજઙ્ગમે ॥ ૫૨.૧ ॥

૫૨.૨/૧ઉદિતે પ્રલયાદિત્યે પ્રચણ્ડે ઘનગર્જિતે ।
૫૨.૨/૨વિદ્યુદુત્પાતસંઘાતૈઃ સમ્ભગ્ને તરુપર્વતે ॥ ૫૨.૨ ॥

૫૨.૩/૧લોકે ચ સંહૃતે સર્વે મહદુલ્કાનિબર્હણે ।
૫૨.૩/૨શુષ્કેષુ સર્વતોયેષુ સરઃસુ ચ સરિત્સુ ચ ॥ ૫૨.૩ ॥

૫૨.૪/૧તતઃ સંવર્તકો વહ્નિર્વાયુના સહ ભો દ્વિજાઃ ।
૫૨.૪/૨લોકં તુ પ્રાવિશત્ સર્વમાદિત્યૈરુપશોભિતમ્ ॥ ૫૨.૪ ॥

૫૨.૫/૧પશ્ચાત્ સ પૃથિવીં ભિત્ત્વા પ્રવિશ્ય ચ રસાતલમ્ ।

૫૨.૫/૨દેવદાનવયક્ષાણાં ભયં જનયતે મહત્ ॥ ૫૨.૫॥

૫૨.૬/૧નિર્દહન્ નાગલોકં ચ યચ્ચ કિંચિત્ ક્ષિતાવિહ ।
૫૨.૬/૨અધસ્તાન્ મુનિશાર્દૂલાઃ સર્વં નાશયતે ક્ષણાત્ ॥ ૫૨.૬॥

૫૨.૭/૧તતો યોજનવિંશાનાં સહસ્રાણિ શતાનિ ચ ।
૫૨.૭/૨નિર્દહત્યાશુગો વાયુઃ સ ચ સંવર્તકોઽનલઃ ॥ ૫૨.૭॥

૫૨.૮/૧સદેવાસુરગન્ધર્વં સયક્ષોરગરાક્ષસમ્ ।
૫૨.૮/૨તતો દહતિ સંદીપ્તઃ સર્વમેવ જગત્ પ્રભુઃ ॥ ૫૨.૮॥

૫૨.૯/૧પ્રદીપ્તોઽસૌ મહારૌદ્રઃ કલ્પાગ્નિરિતિ સંશ્રુતઃ ।
૫૨.૯/૨મહાજ્વાલો મહાર્ચિષ્માન્ સમ્પ્રદીપ્તમહાસ્વનઃ ॥ ૫૨.૯॥

૫૨.૧૦/૧સૂર્યકોટિપ્રતીકાશો જ્વલન્ન્ ઇવ સ તેજસા ।
૫૨.૧૦/૨ત્રૈલોક્યં ચાદહત્ તૂર્ણં સસુરાસુરમાનુષમ્ ॥ ૫૨.૧૦॥

૫૨.૧૧/૧એવંવિધે મહાઘોરે મહાપ્રલયદારુણે ।
૫૨.૧૧/૨ઋષિઃ પરમધર્માત્મા ધ્યાનયોગપરોઽભવત્ ॥ ૫૨.૧૧॥

૫૨.૧૨/૧એકઃ સંતિષ્ઠતે વિપ્રા માર્કણ્ડેયેતિ વિશ્રુતઃ ।
૫૨.૧૨/૨મોહપાશૈર્નિબદ્ધોઽસૌ ક્ષુત્તૃષ્ણાકુલિતેન્દ્રિયાઃ ॥ ૫૨.૧૨॥

૫૨.૧૩/૧સ દૃષ્ટ્વા તં મહાવહ્નિં શુષ્કકણ્ઠૌષ્ઠતાલુકઃ ।
૫૨.૧૩/૨તૃષ્ણાર્તઃ પ્રસ્ખલન્ વિપ્રાસ્તદાસૌ ભયવિહ્વલઃ ॥ ૫૨.૧૩॥

૫૨.૧૪/૧બભ્રામ પૃથિવીં સર્વાં કાંદિશીકો વિચેતનઃ ।
૫૨.૧૪/૨ત્રાતારં નાધિગચ્છન્ વૈ ઇતશ્ચેતશ્ચ ધાવતિ ॥ ૫૨.૧૪॥

૫૨.૧૫/૧ન લેભે ચ તદા શર્મ યત્ર વિશ્રામ્યતા દ્વિજાઃ ।
૫૨.૧૫/૨કરોમિ કિં ન જાનામિ યસ્યાહં શરણં વ્રજે ॥ ૫૨.૧૫॥

૫૨.૧૬/૧કથં પશ્યામિ તં દેવં પુરુષેશં સનાતનમ્ ।
૫૨.૧૬/૨ઇતિ સંચિન્તયન્ દેવમેકાગ્રેણ સનાતનમ્ ॥ ૫૨.૧૬॥

૫૨.૧૭/૧પ્રાપ્તવાંસ્તત્ પદં દિવ્યં મહાપ્રલયકારણમ્ ।
૫૨.૧૭/૨પુરુષેશમિતિ ખ્યાતં વટરાજં સનાતનમ્ ॥ ૫૨.૧૭॥

૫૨.૧૮/૧ત્વરાયુક્તો મુનિશ્ચાસૌ ન્યગ્રોધસ્યાન્તિકં યયૌ ।
૫૨.૧૮/૨આસાદ્ય તં મુનિશ્રેષ્ઠાસ્તસ્ય મૂલે સમાવિશત્ ॥ ૫૨.૧૮॥

૫૨.૧૯/૧ન કાલાગ્નિભયં તત્ર ન ચાઙ્ગારપ્રવર્ષણમ્ ।
૫૨.૧૯/૨ન સંવર્તાગમસ્તત્ર ન ચ વજ્રાશનિસ્તથા ॥ ૫૨.૧૯॥

૫૩.૧/૧બ્રહ્મોવાચ । તતો ગજકુલપ્રખ્યાસ્તડિન્માલાવિભૂષિતાઃ ।
૫૩.૧/૨સમુત્તસ્થુર્મહામેઘા નભસ્યદ્ભુતદર્શનાઃ ॥ ૫૩.૧॥

૫૩.૨/૧કેચિન્ નીલોત્પલશ્યામાઃ કેચિત્ કુમુદસંનિભાઃ ।
૫૩.૨/૨કેચિત્ કિઞ્જલ્કસંકાશાઃ કેચિત્ પીતાઃ પયોધરાઃ ॥ ૫૩.૨॥

૫૩.૩/૧કેચિદ્ ધરિતસંકાશાઃ કાકાણ્ડસંનિભાસ્તથા ।
૫૩.૩/૨કેચિત્ કમલપત્ત્રાભાઃ કેચિદ્ ધિઙ્ગુલસંનિભાઃ ॥ ૫૩.૩॥

૫૩.૪/૧કેચિત્ પુરવરાકારાઃ કેચિદ્ ગિરિવરોપમાઃ ।
૫૩.૪/૨કેચિદ્ અઞ્જનસંકાશાઃ કેચિન્ મરકતપ્રભાઃ ॥ ૫૩.૪॥

૫૩.૫/૧વિદ્યુન્માલાપિનદ્ધાઙ્ગાઃ સમુત્તસ્થુર્મહાઘનાઃ ।
૫૩.૫/૨ઘોરરૂપા મહાભાગા ઘોરસ્વનનિનાદિતાઃ ॥ ૫૩.૫॥

૫૩.૬/૧તતો જલધરાઃ સર્વે સમાવૃણ્વન્ નભસ્તલમ્ ।
૫૩.૬/૨તૈરિયં પૃથિવી સર્વા સપર્વતવનાકરા ॥ ૫૩.૬॥

૫૩.૭/૧આપૂરિતા દિશઃ સર્વાઃ સલિલૌઘપરિપ્લુતાઃ ।
૫૩.૭/૨તતસ્તે જલદા ઘોરા વારિણા મુનિસત્તમાઃ ॥ ૫૩.૭॥

૫૩.૮/૧સર્વતઃ પ્લાવયામાસુશ્ચોદિતાઃ પરમેષ્ઠિના ।
૫૩.૮/૨વર્ષમાણા મહાતોયં પૂરયન્તો વસુંધરામ્ ॥ ૫૩.૮॥

૫૩.૯/૧સુઘોરમશિવં રૌદ્રં નાશયન્તિ સ્મ પાવકમ્ ।
૫૩.૯/૨તતો દ્વાદશ વર્ષાણિ પયોદાઃ સમુપપ્લવે ॥ ૫૩.૯॥

૫૩.૧૦/૧ધારાભિઃ પૂરયન્તો વૈ ચોદ્યમાના મહાત્મના ।
૫૩.૧૦/૨તતઃ સમુદ્રાઃ સ્વાં વેલામતિક્રામન્તિ ભો દ્વિજાઃ ॥ ૫૩.૧૦॥

૫૩.૧૧/૧પર્વતાશ્ચ વ્યશીર્યન્ત મહી ચાપ્સુ નિમજ્જતિ ।
૫૩.૧૧/૨સર્વતઃ સુમહાભ્રાન્તાસ્તે પયોદા નભસ્તલમ્ ॥ ૫૩.૧૧॥

૫૩.૧૨/૧સંવેષ્ટયિત્વા નશ્યન્તિ વાયુવેગસમાહતાઃ ।
૫૩.૧૨/૨તતસ્તં મારુતં ઘોરં સ વિષ્ણુર્મુનિસત્તમાઃ ॥ ૫૩.૧૨॥

૫૩.૧૩/૧આદિપદ્માલયો દેવઃ પીત્વા સ્વપિતિ ભો દ્વિજાઃ ।
૫૩.૧૩/૨તસ્મિન્ન્ એકાર્ણવે ઘોરે નષ્ટે સ્થાવરજઙ્ગમે ॥ ૫૩.૧૩॥

૫૩.૧૪/૧નષ્ટે દેવાસુરનરે યક્ષરાક્ષસવર્જિતે ।
૫૩.૧૪/૨તતો મુનિઃ સ વિશ્રાન્તો ધ્યાત્વા ચ પુરુષોત્તમમ્ ॥ ૫૩.૧૪॥

૫૩.૧૫/૧દદર્શ ચક્ષુરુન્મીલ્ય જલપૂર્ણાં વસુંધરામ્ ।
૫૩.૧૫/૨નાપશ્યત્ તં વટં નોર્વીં ન દિગાદિ ન ભાસ્કરમ્ ॥ ૫૩.૧૫॥

૫૩.૧૬/૧ન ચન્દ્રાર્કાગ્નિપવનં ન દેવાસુરપન્નગમ્ ।
૫૩.૧૬/૨તસ્મિન્ન્ એકાર્ણવે ઘોરે તમોભૂતે નિરાશ્રયે ॥ ૫૩.૧૬॥

૫૩.૧૭/૧નિમજ્જન્ સ તદા વિપ્રાઃ સંતર્તુમુપચક્રમે ।
૫૩.૧૭/૨બભ્રામાસૌ મુનિશ્ચાર્ત ઇતશ્ચેતશ્ચ સમ્પ્લવન્ ॥ ૫૩.૧૭॥

૫૩.૧૮/૧નિમમજ્જ તદા વિપ્રાસ્ત્રાતારં નાધિગચ્છતિ ।
૫૩.૧૮/૨એવં તં વિહ્વલં દૃષ્ટ્વા કૃપયા પુરુષોત્તમઃ ।
૫૩.૧૮/૩પ્રોવાચ મુનિશાર્દૂલાસ્તદા ધ્યાનેન તોષિતઃ ॥ ૫૩.૧૮॥

૫૩.૧૯/૧શ્રીભગવાન્ ઉવાચ । વત્સ શ્રાન્તોઽસિ બાલસ્ત્વં ભક્તત્ર મમ સુવ્રત ।
૫૩.૧૯/૨આગચ્છાગચ્છ શીઘ્રં ત્વં માર્કણ્ડેય મમાન્તિકમ્ ॥ ૫૩.૧૯॥

૫૩.૨૦/૧મા ત્વયૈવ ચ ભેતવ્યં સમ્પ્રાપ્તોઽસિ મમાગ્રતઃ ।
૫૩.૨૦/૨માર્કણ્ડેય મુને ધીર બાલસ્ત્વં શ્રમપીડિતઃ ॥ ૫૩.૨૦॥

૫૩.૨૧/૧બ્રહ્મોવાચ । તસ્ય તદ્ વચનં શ્રુત્વા મુનિઃ પરમકોપિતઃ ।
૫૩.૨૧/૨ઉવાચ સ તદા વિપ્રા વિસ્મિતશ્ચાભવન્ મુહુઃ ॥ ૫૩.૨૧॥

૫૩.૨૨/૧માર્કણ્ડેય ઉવાચ । કોઽયં નામ્ના કીર્તયતિ તપઃ પરિભવન્ન્ ઇવ ।
૫૩.૨૨/૨બહુવર્ષસહસ્રાખ્યં ધર્ષયન્ન્ ઇવ મે વપુઃ ॥ ૫૩.૨૨॥

૫૩.૨૩/૧ન હ્યેષ સમુદાચારો દેવેષ્વપિ સમાહિતઃ ।
૫૩.૨૩/૨માં બ્રહ્મા સ ચ દેવેશો દીર્ઘાયુરિતિ ભાષતે ॥ ૫૩.૨૩॥

૫૩.૨૪/૧કસ્તપો ઘોરશિરસો મમાદ્ય ત્યક્તજીવિતઃ ।
૫૩.૨૪/૨માર્કણ્ડેયેતિ ચોક્ત્વા મન્+ ૃત્યું ગન્તુમિહેચ્છતિ ॥ ૫૩.૨૪॥

૫૩.૨૫/૧બ્રહ્મોવાચ । એવમુક્ત્વા તદા વિપ્રાશ્ચિન્તાવિષ્ટોઽભવન્ મુનિઃ ।
૫૩.૨૫/૨કિં સ્વપ્નોઽયં મયા દૃષ્ટઃ કિં વા મોહોઽયમાગતઃ ॥ ૫૩.૨૫॥

૫૩.૨૬/૧ઇત્થં ચિન્તયતસ્તસ્ય ઉત્પન્ના દુઃખહા મતિઃ ।
૫૩.૨૬/૨વ્રજામિ શરણં દેવં ભક્ત્યાહં પુરુષોત્તમમ્ ॥ ૫૩.૨૬॥

૫૩.૨૭/૧સ ગત્વા શરણં દેવં મુનિસ્તદ્ગતમાનસઃ ।
૫૩.૨૭/૨દદર્શ તં વટં ભૂયો વિશાલં સલિલોપરિ ॥ ૫૩.૨૭॥

૫૩.૨૮/૧શાખાયાં તસ્ય સૌવર્ણં વિસ્તીર્ણાયાં મહાદ્ભુતમ્ ।
૫૩.૨૮/૨રુચિરં દિવ્યપર્યઙ્કં રચિતં વિશ્વકર્મણા ॥ ૫૩.૨૮॥

૫૩.૨૯/૧વજ્રવૈદૂર્યરચિતં મણિવિદ્રુમશોભિતમ્ ।
૫૩.૨૯/૨પદ્મરાગાદિભિર્જુષ્ટં રત્નૈરન્યૈરલંકૃતમ્ ॥ ૫૩.૨૯॥

૫૩.૩૦/૧નાનાસ્તરણસંવીતં નાનારત્નોપશોભિતમ્ ।
૫૩.૩૦/૨નાનાશ્ચર્યસમાયુક્તં પ્રભામણ્ડલમણ્ડિતમ્ ॥ ૫૩.૩૦॥

૫૩.૩૧/૧તસ્યોપરિ સ્થિતં દેવં કૃષ્ણં બાલવપુર્ધરમ્ ।
૫૩.૩૧/૨સૂર્યકોટિપ્રતીકાશં દીપ્યમાનં સુવર્ચસમ્ ॥ ૫૩.૩૧॥

૫૩.૩૨/૧ચતુર્ભુજં સુન્દરાઙ્ગં પદ્મપત્રાયતેક્ષણમ્ ।
૫૩.૩૨/૨શ્રીવત્સવક્ષસં દેવં શઙ્ખચક્રગદાધરમ્ ॥ ૫૩.૩૨॥

૫૩.૩૩/૧વનમાલાવૃતોરસ્કં દિવ્યકુણ્ડલધારિણમ્ ।
૫૩.૩૩/૨હારભારાર્પિતગ્રીવં દિવ્યરત્નવિભૂષિતમ્ ॥ ૫૩.૩૩॥

૫૩.૩૪/૧દૃષ્ટ્વા તદા મુનિર્દેવં વિસ્મયોત્ફુલ્લલોચનઃ ।
૫૩.૩૪/૨રોમાઞ્ચિતતનુર્દેવં પ્રણિપત્યેદમબ્રવીત્ ॥ ૫૩.૩૪॥

૫૩.૩૫/૧માર્કણ્ડેય ઉવાચ । અહો ચૈકાર્ણવે ઘોરે વિનષ્ટે સચરાચરે ।
૫૩.૩૫/૨કથમેકો હ્યયં બાલસ્તિષ્ઠત્યત્ર સુનિર્ભયઃ ॥ ૫૩.૩૫॥

૫૩.૩૬/૧બ્રહ્મોવાચ । ભૂતં ભવ્યં ભવિષ્યં ચ જાનન્ન્ અપિ મહામુનિઃ ।
૫૩.૩૬/૨ન બુબોધ તદા દેવં માયયા તસ્ય મોહિતઃ ।
૫૩.૩૬/૩યદા ન બુબુધે ચૈનં તદા ખેદાદ્ ઉવાચ હ ॥ ૫૩.૩૬॥

૫૩.૩૭/૧માર્કણ્ડેય ઉવાચ । વૃથા મે તપસો વીર્યં વૃથા
જ્ઞાનં વૃથા ક્રિયા ।
૫૩.૩૭/૨વૃથા મે જીવિતં દીર્ઘં વૃથા માનુષ્યમેવ ચ ॥ ૫૩.૩૭॥

૫૩.૩૮/૧યોઽહં સુપ્તં ન જાનામિ પર્યઙ્કે દિવ્યબાલકમ્ ॥ ૫૩.૩૮॥

૫૩.૩૯/૧બ્રહ્મોવાચ । એવં સંચિન્તયન્ વિપ્રઃ પ્લવમાનો વિચેતનઃ ।
૫૩.૩૯/૨ત્રાણાર્થં વિહ્વલશ્ચાસૌ નિર્વેદં ગતવાંસ્તદા ॥ ૫૩.૩૯॥

૫૩.૪૦/૧તતો બાલાર્કસંકાશં સ્વમહિમ્ના વ્યવસ્થિતમ્ ।

૫૩.૪૦/૨સર્વતેજોમયં વિપ્રા ન શશાકાભિવીક્ષિતુમ્ ॥ ૫૩.૪૦॥

૫૩.૪૧/૧દૃષ્ટ્વા તં મુનિમાયાન્તં સ બાલઃ પ્રહસન્ન્ ઇવ ।
૫૩.૪૧/૨પ્રોવાચ મુનિશાર્દૂલાસ્તદા મેઘૌઘનિસ્વનઃ ॥ ૫૩.૪૧॥

૫૩.૪૨/૧શ્રીભગવાન્ ઉવાચ । વત્સ જાનામિ શ્રાન્તં ત્વાં ત્રાણાર્થં
મામુપસ્થિતમ્ ।
૫૩.૪૨/૨શરીરં વિશ મે ક્ષિપ્રં વિશ્રામસ્તે મયોદિતઃ ॥ ૫૩.૪૨॥

૫૩.૪૩/૧બ્રહ્મોવાચ । શ્રુત્વા સ વચનં તસ્ય કિંચિન્ નોવાચ મોહિતઃ ।
૫૩.૪૩/૨વિવેશ વદનં તસ્ય વિવૃતં ચાવશો મુનિઃ ॥ ૫૩.૪૩॥

૫૪.૧/૧બ્રહ્મોવાચ । સ પ્રવિશ્યોદરે તસ્ય બાલસ્ય મુનિસત્તમઃ ।
૫૪.૧/૨દદર્શ પૃથિવીં કૃત્સ્નાં નાનાજનપદૈર્વૃતામ્ ॥ ૫૪.૧॥

૫૪.૨/૧લવણેક્ષુસુરાસર્પિર્+ ।દધિદુગ્ધજલોદધીન્ ।
૫૪.૨/૨દદર્શ તાન્ સમુદ્રાંશ્ચ જમ્બુ પ્લક્ષં ચ શાલ્મલમ્ ॥ ૫૪.૨॥

૫૪.૩/૧કુશં ક્રૌઞ્ચં ચ શાકં ચ પુષ્કરં ચ દદર્શ સઃ ।
૫૪.૩/૨ભારતાદીનિ વર્ષાણિ તથા સર્વાંશ્ચ પર્વતાન્ ॥ ૫૪.૩॥

૫૪.૪/૧મેરું ચ સર્વરત્નાઢ્યં અપશ્યત્ કનકાચલમ્ ।
૫૪.૪/૨નાનારત્નાન્વિતૈઃ શ૊ૃઙ્ગૈર્ભૂષિતં બહુકન્દરમ્ ॥ ૫૪.૪॥

૫૪.૫/૧નાનામુનિજનાકીર્ણં નાનાવૃક્ષવનાકુલમ્ ।
૫૪.૫/૨નાનાસત્ત્વસમાયુક્તં નાનાશ્ચર્યસમન્વિતમ્ ॥ ૫૪.૫॥

૫૪.૬/૧વ્યાઘ્રૈઃ સિંહૈર્વરાહૈશ્ચ ચામરૈર્મહિષૈર્ગજૈઃ ।
૫૪.૬/૨મૃગૈઃ શાખામૃગૈશ્ચાન્યૈર્ભૂષિતં સુમનોહરમ્ ॥ ૫૪.૬॥

૫૪.૭/૧શક્રાદ્યૈર્વિવિધૈર્દેવૈઃ સિદ્ધચારણપન્નગૈઃ ।
૫૪.૭/૨મુનિયક્ષાપ્સરોભિશ્ચ વૃતૈશ્ચાન્યૈઃ સુરાલયૈઃ ॥ ૫૪.૭॥

૫૪.૮/૧બ્રહ્મોવાચ । એવં સુમેરું શ્રીમન્તમપશ્યન્ મુનિસત્તમઃ ।
૫૪.૮/૨પર્યટન્ સ તદા વિપ્રસ્તસ્ય બાલસ્ય ચોદરે ॥ ૫૪.૮॥

૫૪.૯/૧હિમવન્તં હેમકૂટં નિષધં ગન્ધમાદનમ્ ।
૫૪.૯/૨શ્વેતં ચ દુર્ધરં નીલં કૈલાસં મન્દરં ગિરિમ્ ॥ ૫૪.૯॥

૫૪.૧૦/૧મહેન્દ્રં મલયં વિન્ધ્યં પારિયાત્રં તથાર્બુદમ્ ।
૫૪.૧૦/૨સહ્યં ચ શુક્તિમન્તં ચ મૈનાકં વક્રપર્વતમ્ ॥ ૫૪.૧૦॥

૫૪.૧૧/૧એતાશ્ચાન્યાશ્ચ બહવો યાવન્તઃ પૃથિવીધરાઃ ।
૫૪.૧૧/૨તતસ્તાંસ્તુ મુનિશ્રેષ્ઠાઃ સોઽપશ્યદ્ રત્નભૂષિતાન્ ॥ ૫૪.૧૧॥

૫૪.૧૨/૧કુરુક્ષેત્રં ચ પાઞ્ચાલાન્ મત્સ્યાન્ મદ્રાન્ સકેકયાન્ ।
૫૪.૧૨/૨બાહ્લીકાન્ શૂરસેનાંશ્ચ કાશ્મીરાંસ્તઙ્ગણાન્ ખસાન્ ॥ ૫૪.૧૨॥

૫૪.૧૩/૧પાર્વતીયાન્ કિરાતાંશ્ચ કર્ણપ્રાવરણાન્ મરૂન્ ।
૫૪.૧૩/૨અન્ત્યજાન્ અન્ત્યજાતીંશ્ચ સોઽપશ્યત્ તસ્ય ચોદરે ॥ ૫૪.૧૩॥

૫૪.૧૪/૧મૃગાઞ્ શાખામૃગાન્ સિંહાન્ વરાહાન્ સૃમરાઞ્ શશાન્ ।
૫૪.૧૪/૨ગજાંશ્ચાન્યાંસ્તથા સત્ત્વાન્ સોઽપશ્યત્ તસ્ય ચોદરે ॥ ૫૪.૧૪॥

૫૪.૧૫/૧પૃથિવ્યાં યાનિ તીર્થાનિ ગ્રામાશ્ચ નગરાણિ ચ ।
૫૪.૧૫/૨કૃષિગોરક્ષવાણિજ્યં ક્રયવિક્રયણં તથા ॥ ૫૪.૧૫॥

૫૪.૧૬/૧શક્રાદીન્ વિબુધાઞ્ શ્રેષ્ઠાંસ્તથાન્યાંશ્ચ દિવૌકસઃ ।
૫૪.૧૬/૨ગન્ધર્વાપ્સરસો યક્ષાન્ ઋષીંશ્ચૈવ સનાતનાન્ ॥ ૫૪.૧૬॥

૫૪.૧૭/૧દૈત્યદાનવસંઘાંશ્ચ નાગાંશ્ચ મુનિસત્તમાઃ ।
૫૪.૧૭/૨સિંહિકાતનયાંશ્ચૈવ યે ચાન્યે સુરશત્રવઃ ॥ ૫૪.૧૭॥

૫૪.૧૮/૧યત્ કિંચિત્ તેન લોકેઽસ્મિન્ દૃષ્ટપૂર્વં ચરાચરમ્ ।
૫૪.૧૮/૨અપશ્યત્ સ તદા સર્વં તસ્ય કુક્ષૌ દ્વિજોત્તમાઃ ॥ ૫૪.૧૮॥

૫૪.૧૯/૧અથવા કિં બહૂક્તેન કીર્તિતેન પુનઃ પુનઃ ।
૫૪.૧૯/૨બ્રહ્માદિસ્તમ્બપર્યન્તં યત્ કિંચિત્ સચરાચરમ્ ॥ ૫૪.૧૯॥

૫૪.૨૦/૧ભૂર્લોકં ચ ભુવર્લોકં સ્વર્લોકં ચ દ્વિજોત્તમાઃ ।
૫૪.૨૦/૨મહર્જનસ્તપઃ સત્યમતલં વિતલં તથા ॥ ૫૪.૨૦॥

૫૪.૨૧/૧પાતાલં સુતલં ચૈવ વિતલં ચ રસાતલમ્ ।
૫૪.૨૧/૨મહાતલં ચ બ્રહ્માણ્ડમપશ્યત્ તસ્ય ચોદરે ॥ ૫૪.૨૧॥

૫૪.૨૨/૧અવ્યાહતા ગતિસ્તસ્ય તદાભૂદ્ દ્વિજસત્તમાઃ ।
૫૪.૨૨/૨પ્રસાદાત્ તસ્ય દેવસ્ય સ્મૃતિલોપશ્ચ નાભવત્ ॥ ૫૪.૨૨॥

૫૪.૨૩/૧ભ્રમમાણસ્તદા કુક્ષૌ કૃત્સ્નં જગદ્ ઇદં દ્વિજાઃ ।
૫૪.૨૩/૨નાન્તં જગામ દેહસ્ય તસ્ય વિષ્ણોઃ કદાચન ॥ ૫૪.૨૩॥

૫૪.૨૪/૧યદાસૌ નાગતશ્ચાન્તં તસ્ય દેહસ્ય ભો દ્વિજાઃ ।

૫૪.૨૪/૨તદા તં વરદં દેવં શરણં ગતવાન્ મુનિઃ ॥ ૫૪.૨૪॥

૫૪.૨૫/૧તતોઽસૌ સહસા વિપ્રા વાયુવેગેન નિઃસૃતઃ ।
૫૪.૨૫/૨મહાત્મનો મુખાત્ તસ્ય વિવૃતાત્ પુરુષસ્ય સઃ ॥ ૫૪.૨૫॥

૫૫.૧/૧બ્રહ્મોવાચ । સ નિષ્ક્રમ્યોદરાત્ તસ્ય બાલસ્ય મુનિસત્તમાઃ ।
૫૫.૧/૨પુનશ્ચૈકાર્ણવામુર્વીમપશ્યજ્જનવર્જિતામ્ ॥ ૫૫.૧॥

૫૫.૨/૧પૂર્વદૃષ્ટં ચ તં દેવં દદર્શ શિશુરૂપિણમ્ ।
૫૫.૨/૨શાખાયાં વટવૃક્ષસ્ય પર્યઙ્કોપરિ સંસ્થિતમ્ ॥ ૫૫.૨॥

૫૫.૩/૧શ્રીવત્સવક્ષસં દેવં પીતવસ્ત્રં ચતુર્ભુજમ્ ।
૫૫.૩/૨જગદ્ આદાય તિષ્ઠન્તં પદ્મપત્રાયતેક્ષણમ્ ॥ ૫૫.૩॥

૫૫.૪/૧સોઽપિ તં મુનિમાયાન્તં પ્લવમાનમચેતનમ્ ।
૫૫.૪/૨દૃષ્ટ્વા મુખાદ્ વિનિષ્ક્રાન્તં પ્રોવાચ પ્રહસન્ન્ ઇવ ॥ ૫૫.૪॥

૫૫.૫/૧શ્રીભગવાન્ ઉવાચ । કચ્ચિત્ ત્વયોષિતં વત્સ વિશ્રાન્તં ચ મમોદરે ।
૫૫.૫/૨ભ્રમમાણશ્ચ કિં તત્ર આશ્ચર્યં દૃષ્ટવાન્ અસિ ॥ ૫૫.૫॥

૫૫.૬/૧ભક્તોઽસિ મે મુનિશ્રેષ્ઠ શ્રાન્તોઽસિ ચ મમાશ્રિતઃ ।
૫૫.૬/૨તેન ત્વામુપકારાય સમ્ભાષે પશ્ય મામિહ ॥ ૫૫.૬॥

૫૫.૭/૧બ્રહ્મોવાચ । શ્રુત્વા સ વચનં તસ્ય સમ્પ્રહૃષ્ટતનૂરુહઃ ।
૫૫.૭/૨દદર્શ તં સુદુષ્પ્રેક્ષં રત્નૈર્દિવ્યૈરલંકૃતમ્ ॥ ૫૫.૭॥

૫૫.૮/૧પ્રસન્ના નિર્મલા દૃષ્ટિર્મુહૂર્તાત્ તસ્ય ભો દ્વિજાઃ ।
૫૫.૮/૨પ્રસાદાત્ તસ્ય દેવસ્ય પ્રાદુર્ભૂતા પુનર્નવા ॥ ૫૫.૮॥

૫૫.૯/૧રક્તાઙ્ગુલિતલૌ પાદૌ તતસ્તસ્ય સુરાર્ચિતૌ ।
૫૫.૯/૨પ્રણમ્ય શિરસા વિપ્રા હર્ષગદ્ગદયા ગિરા ॥ ૫૫.૯॥

૫૫.૧૦/૧કૃતાઞ્જલિસ્તદા હૃષ્ટો વિસ્મિતશ્ચ પુનઃ પુનઃ ।
૫૫.૧૦/૨દૃષ્ટ્વા તં પરમાત્માનં સંસ્તોતુમુપચક્રમે ॥ ૫૫.૧૦॥

૫૫.૧૧/૧માર્કણ્ડેય ઉવાચ । દેવદેવ જગન્નાથ માયાબાલવપુર્ધર ।
૫૫.૧૧/૨ત્રાહિ માં ચારુપદ્માક્ષ દુઃખિતં શરણાગતમ્ ॥ ૫૫.૧૧॥

૫૫.૧૨/૧સંતપ્તોઽસ્મિ સુરશ્રેષ્ઠ સંવર્તાખ્યેન વહ્નિના ।
૫૫.૧૨/૨અઙ્ગારવર્ષભીતં ચ ત્રાહિ માં પુરુષોત્તમ ॥ ૫૫.૧૨॥

૫૫.૧૩/૧શોષિતશ્ચ પ્રચણ્ડેન વાયુના જગદાયુના ।
૫૫.૧૩/૨વિહ્વલોऽહં તથા શ્રાન્તસ્ત્રાહિ માં પુરુષોત્તમ ॥ ૫૫.૧૩॥

૫૫.૧૪/૧તાપિતશ્ચ તશામાત્યૈઃ પ્રલયાવર્તકાદિભિઃ ।
૫૫.૧૪/૨ન શાન્તિમધિગચ્છામિ ત્રાહિ માં પુરુષોત્તમ ॥ ૫૫.૧૪॥

૫૫.૧૫/૧તૃષિતશ્ચ ક્ષુધાવિષ્ટો દુઃખિતશ્ચ જગત્પતે ।
૫૫.૧૫/૨ત્રાતારં નાત્ર પશ્યામિ ત્રાહિ માં પુરુષોત્તમ ॥ ૫૫.૧૫॥

૫૫.૧૬/૧અસ્મિન્ એકાર્ણવે ઘોરે વિનષ્ટે સચરાચરે ।
૫૫.૧૬/૨ન ચાન્તમધિગચ્છામિ ત્રાહિ માં પુરુષોત્તમ ॥ ૫૫.૧૬॥

૫૫.૧૭/૧તવોદરે ચ દેવેશ મયા દૃષ્ટં ચરાચરમ્ ।
૫૫.૧૭/૨વિસ્મિતોऽહં વિષણ્ણશ્ચ ત્રાહિ માં પુરુષોત્તમ ॥ ૫૫.૧૭॥

૫૫.૧૮/૧સંસારેऽસ્મિન્ નિરાલમ્બે પ્રસીદ પુરુષોત્તમ ।
૫૫.૧૮/૨પ્રસીદ વિબુધશ્રેષ્ઠ પ્રસીદ વિબુધપ્રિય ॥ ૫૫.૧૮॥

૫૫.૧૯/૧પ્રસીદ વિબુધાં નાથ પ્રસીદ વિબુધાલય ।
૫૫.૧૯/૨પ્રસીદ સર્વલોકેશ જગત્કારણકારણ ॥ ૫૫.૧૯॥

૫૫.૨૦/૧પ્રસીદ સર્વકૃદ્ દેવ પ્રસીદ મમ ભૂધર ।
૫૫.૨૦/૨પ્રસીદ સલિલાવાસ પ્રસીદ મધુસૂદન ॥ ૫૫.૨૦॥

૫૫.૨૧/૧પ્રસીદ કમલાકાન્ત પ્રસીદ ત્રિદશેશ્વર ।
૫૫.૨૧/૨પ્રસીદ કંસકેશીઘ્ન પ્રસીદારિષ્ટનાશન ॥ ૫૫.૨૧॥

૫૫.૨૨/૧પ્રસીદ કૃષ્ણ દૈત્યઘ્ન પ્રસીદ દનુજાન્તક ।
૫૫.૨૨/૨પ્રસીદ મથુરાવાસ પ્રસીદ યદુનન્દન ॥ ૫૫.૨૨॥

૫૫.૨૩/૧પ્રસીદ શક્રાવરજ પ્રસીદ વરદાવ્યય ।
૫૫.૨૩/૨ત્વં મહી ત્વં જલં દેવ ત્વમગ્નિસ્ત્વં સમીરણઃ ॥ ૫૫.૨૩॥

૫૫.૨૪/૧ત્વં નભસ્ત્વં મનશ્ચૈવ ત્વમહંકાર એવ ચ ।
૫૫.૨૪/૨ત્વં બુદ્ધિઃ પ્રકૃતિશ્ચૈવ સત્ત્વાદ્યાસ્ત્વં જગત્પતે ॥ ૫૫.૨૪॥

૫૫.૨૫/૧પુરુષસ્ત્વં જગદ્વ્યાપી પુરુષાદ્ અપિ ચોત્તમઃ ।
૫૫.૨૫/૨ત્વમિન્દ્રિયાણિ સર્વાણિ શબ્દાદ્યા વિષયાઃ પ્રભો ॥ ૫૫.૨૫॥

૫૫.૨૬/૧ત્વં દિક્પાલાશ્ચ ધર્માશ્ચ વેદા યજ્ઞાઃ સદક્ષિણાઃ ।
૫૫.૨૬/૨ત્વમિન્દ્રસ્ત્વં શિવો દેવસ્ત્વં હવિસ્ત્વં હુતાશનઃ ॥ ૫૫.૨૬॥

પપ.૨૭/૧ત્વં યમઃ પિતૃરાટ્ દેવ ત્વં રક્ષોધિપતિઃ સ્વયમ્ ।
પપ.૨૭/૨વરુણસ્ત્વમપાં નાથ ત્વં વાયુસ્ત્વં ધનેશ્વરઃ ॥ પપ.૨૭॥

પપ.૨૮/૧ત્વમીશાનસ્ત્વમનન્તસ્ત્વં ગણેશશ્ચ ષણ્મુખઃ ।
પપ.૨૮/૨વસવસ્ત્વં તથા રુદ્રાસ્ત્વમાદિત્યાશ્ચ ખેચરાઃ ॥ પપ.૨૮॥

પપ.૨૯/૧દાનવાસ્ત્વં તથા યક્ષાસ્ત્વં દૈત્યાઃ સમરુદ્ગણાઃ ।
પપ.૨૯/૨સિદ્ધાશ્ચાપ્સરસો નાગા ગન્ધર્વાસ્ત્વં સચારણાઃ ॥ પપ.૨૯॥

પપ.૩૦/૧પિતરો વાલખિલ્યાશ્ચ પ્રજાનાં પતયોઽચ્યુત ।
પપ.૩૦/૨મુનયસ્ત્વમ્ ઋષિગણાસ્ત્વમશ્વિનૌ નિશાચરાઃ ॥ પપ.૩૦॥

પપ.૩૧/૧અન્યાશ્ચ જાતયસ્ત્વં હિ યત્ કિંચિજ્જીવસંજ્ઞિતમ્ ।
પપ.૩૧/૨કિં ચાત્ર બહુનોક્તેન બ્રહ્માદિસ્તમ્બગોચરમ્ ॥ પપ.૩૧॥

પપ.૩૨/૧ભૂતં ભવ્યં ભવિષ્યં ચ ત્વં જગત્ સચરાચરમ્ ।
પપ.૩૨/૨યત્ તે રૂપં પરં દેવ કૂટસ્થમચલં ધ્રુવમ્ ॥ પપ.૩૨॥

પપ.૩૩/૧બ્રહ્માદ્યાસ્તન્ ન જાનન્તિ કથમન્યેઽલ્પમેધસઃ ।
પપ.૩૩/૨દેવ શુદ્ધસ્વભાવોઽસિ નિત્યસ્ત્વં પ્રકૃતેઃ પરઃ ॥ પપ.૩૩॥

પપ.૩૪/૧અવ્યક્તઃ શાશ્વતોઽનન્તઃ સર્વવ્યાપી મહેશ્વરઃ ।
પપ.૩૪/૨ત્વમાકાશઃ પરઃ શાન્તો અજસ્ત્વં વિભુરવ્યયઃ ॥ પપ.૩૪॥

પપ.૩૫/૧એવં ત્વાં નિર્ગુણં સ્તોતું કઃ શક્નોતિ નિરઞ્જનમ્ ।
પપ.૩૫/૨સ્તુતોઽસિ યન્ મયા દેવ વિકલેનાલ્પચેતસા ।
પપ.૩૫/૩તત્ સર્વં દેવદેવેશ ક્ષન્તુમર્હસિ ચાવ્યય ॥ પપ.૩૫॥

પ૬.૧/૧બ્રહ્મોવાચ । ઇત્થં સ્તુતસ્તદા તેન માર્કણ્ડેયેન ભો દ્વિજાઃ ।
પ૬.૧/૨પ્રીતઃ પ્રોવાચ ભગવાન્ મેઘગમ્ભીરયા ગિરા ॥ પ૬.૧॥

પ૬.૨/૧શ્રીભગવાન્ ઉવાચ । બ્રૂહિ કામં મુનિશ્રેષ્ઠ યત્ તે મનસિ વર્તતે ।
પ૬.૨/૨દદામિ સર્વં વિપ્રર્ષે મત્તો યદ્ અભિવાઞ્છસિ ॥ પ૬.૨॥

પ૬.૩/૧બ્રહ્મોવાચ । શ્રુત્વા સ વચનં વિપ્રાઃ શિશોસ્તસ્ય મહાત્મનઃ ।
પ૬.૩/૨ઉવાચ પરમપ્રીતો મુનિસ્તદ્ગતમાનસઃ ॥ પ૬.૩॥

પ૬.૪/૧માર્કણ્ડેય ઉવાચ । જ્ઞાતુમિચ્છામિ દેવ ત્વાં માયાં વૈ તવ ચોત્તમામ્ ।
પ૬.૪/૨ત્વત્પ્રસાદાચ્ચ દેવેશ સ્મૃતિર્ન પરિહીયતે ॥ પ૬.૪॥

૫૬.૫/૧દ્રુતમન્તઃ શરીરેણ સતતં પર્યવર્તિતમ્ ।
૫૬.૫/૨ઇચ્છામિ પુણ્ડરીકાક્ષ જ્ઞાતું ત્વામહમવ્યયમ્ ॥ ૫૬.૫॥

૫૬.૬/૧ઇહ ભૂત્વા શિશુઃ સાક્ષાત્ કિં ભવાન્ અવતિષ્ઠતે ।
૫૬.૬/૨પીત્વા જગદ્ ઇદં સર્વમેતદ્ આખ્યાતુમર્હસિ ॥ ૫૬.૬॥

૫૬.૭/૧કિમર્થં ચ જગત્ સર્વં શરીરસ્થં તવાનઘ ।
૫૬.૭/૨કિયન્તં ચ ત્વયા કાલમિહ સ્થેયમરિંદમ ॥ ૫૬.૭॥

૫૬.૮/૧જ્ઞાતુમિચ્છામિ દેવેશ બ્રૂહિ સર્વમશેષતઃ ।
૫૬.૮/૨ત્વત્તઃ કમલપત્રાક્ષ વિસ્તરેણ યથાતથમ્ ।
૫૬.૮/૩મહદ્ એતદ્ અચિન્ત્યં ચ યદ્ અહં દૃષ્ટવાન્ પ્રભો ॥ ૫૬.૮॥

૫૬.૯/૧બ્રહ્મોવાચ । ઇત્યુક્તઃ સ તદા તેન દેવદેવો મહાદ્યુતિઃ ।
૫૬.૯/૨સાન્ત્વયન્ સ તદા વાક્યમુવાચ વદતાં વરઃ ॥ ૫૬.૯॥

૫૬.૧૦/૧શ્રીભગવાન્ ઉવાચ । કામં દેવાશ્ચ માં વિપ્ર નહિ જાનન્તિ તત્ત્વતઃ ।
૫૬.૧૦/૨તવ પ્રીત્યા પ્રવક્ષ્યામિ યથેદં વિસૃજામ્યહમ્ ॥ ૫૬.૧૦॥

૫૬.૧૧/૧પિતૃભક્તોऽસિ વિપ્રર્ષે મામેવ શરણં ગતઃ ।
૫૬.૧૧/૨તતો દૃષ્ટોऽસ્મિ તે સાક્ષાદ્ બ્રહ્મચર્યં ચ તે મહત્ ॥ ૫૬.૧૧॥

૫૬.૧૨/૧આપો નારા ઇતિ પુરા સંજ્ઞાકર્મ કૃતં મયા ।
૫૬.૧૨/૨તેન નારાયણોऽસ્મ્યુક્તો મમ તાસ્ત્વયનં સદા ॥ ૫૬.૧૨॥

૫૬.૧૩/૧અહં નારાયણો નામ પ્રભવઃ શાશ્વતોऽવ્યયઃ ।
૫૬.૧૩/૨વિધાતા સર્વભૂતાનાં સંહર્તા ચ દ્વિજોત્તમ ॥ ૫૬.૧૩॥

૫૬.૧૪/૧અહં વિષ્ણુરહં બ્રહ્મા શક્રશ્ચાપિ સુરાધિપઃ ।
૫૬.૧૪/૨અહં વૈશ્રવણો રાજા યમઃ પ્રેતાધિપસ્તથા ॥ ૫૬.૧૪॥

૫૬.૧૫/૧અહં શિવશ્ચ સોમશ્ચ કશ્યપશ્ચ પ્રજાપતિઃ ।
૫૬.૧૫/૨અહં ધાતા વિધાતા ચ યજ્ઞશ્ચાહં દ્વિજોત્તમ ॥ ૫૬.૧૫॥

૫૬.૧૬/૧અગ્નિરાસ્યં ક્ષિતિઃ પાદૌ ચન્દ્રાદિત્યૌ ચ લોચને ।
૫૬.૧૬/૨દ્યૌર્મૂર્ધા ખં દિશઃ શ્રોત્રે તથાપઃ સ્વેદસમ્ભવાઃ ॥ ૫૬.૧૬॥

૫૬.૧૭/૧સદિશં ચ નભઃ કાયો વાયુર્મનસિ મે સ્થિતઃ ।
૫૬.૧૭/૨મયા ક્રતુશતૈરિષ્ટં બહુભિશ્ચાપ્તદક્ષિણૈઃ ॥ ૫૬.૧૭॥

૫૬.૧૮/૧યજન્તે વેદવિદુષો માં દેવયજને સ્થિતમ્ ।

૫૬.૧૮/૨પૃથિવ્યાં ક્ષત્રિયેન્દ્રાશ્ચ પાર્થિવાઃ સ્વર્ગકાઙ્ક્ષિણઃ ॥ ૫૬.૧૮॥

૫૬.૧૯/૧યજન્તે માં તથા વૈશ્યાઃ સ્વર્ગલોકજિગીષવઃ ।
૫૬.૧૯/૨ચતુઃસમુદ્રપર્યન્તાં મેરુમન્દરભૂષણામ્ ॥ ૫૬.૧૯॥

૫૬.૨૦/૧શેષો ભૂત્વાહમેકો હિ ધારયામિ વસુંધરામ્ ।
૫૬.૨૦/૨વારાહં રૂપમાસ્થાય મમેયં જગતી પુરા ॥ ૫૬.૨૦॥

૫૬.૨૧/૧મજ્જમાના જલે વિપ્ર વીર્યેણાસ્મિ સમુદ્ધૃતા ।
૫૬.૨૧/૨અગ્નિશ્ચ વાડવો વિપ્ર ભૂત્વાહં દ્વિજસત્તમ ॥ ૫૬.૨૧॥

૫૬.૨૨/૧પિબામ્યપઃ સમાવિષ્ટસ્તાશ્ચૈવ વિસૃજામ્યહમ્ ।
૫૬.૨૨/૨બ્રહ્મ વક્ત્રં ભુજૌ ક્ષત્રમૂરૂ મે સંશ્રિતા વિશઃ ॥ ૫૬.૨૨॥

૫૬.૨૩/૧પાદૌ શૂદ્રા ભવન્તીમે વિક્રમેણ ક્રમેણ ચ ।
૫૬.૨૩/૨ઋગ્વેદઃ સામવેદશ્ચ યજુર્વેદસ્ત્વથર્વણઃ ॥ ૫૬.૨૩॥

૫૬.૨૪/૧મત્તઃ પ્રાદુર્ભવન્ત્યેતે મામેવ પ્રવિશન્તિ ચ ।
૫૬.૨૪/૨યતયઃ શાન્તિપરમા યતાત્માનો બુભુત્સવઃ ॥ ૫૬.૨૪॥

૫૬.૨૫/૧કામક્રોધદ્વેષમુક્તા નિઃસઙ્ગા વીતકલ્મષાઃ ।
૫૬.૨૫/૨સત્ત્વસ્થા નિરહંકારા નિત્યમધ્યાત્મકોવિદાઃ ॥ ૫૬.૨૫॥

૫૬.૨૬/૧મામેવ સતતં વિપ્રાશ્ચિન્તયન્ત ઉપાસતે ।
૫૬.૨૬/૨અહં સંવર્તકો જ્યોતિરહં સંવર્તકોઽનલઃ ॥ ૫૬.૨૬॥

૫૬.૨૭/૧અહં સંવર્તકઃ સૂર્યસ્ત્વહં સંવર્તકોઽનિલઃ ।
૫૬.૨૭/૨તારારૂપાણિ દૃશ્યન્તે યાન્યેતાનિ નભસ્તલે ॥ ૫૬.૨૭॥

૫૬.૨૮/૧મમ વૈ રોમકૂપાણિ વિદ્ધિ ત્વં દ્વિજસત્તમ ।
૫૬.૨૮/૨રત્નાકરાઃ સમુદ્રાશ્ચ સર્વ એવ ચતુર્દિશઃ ॥ ૫૬.૨૮॥

૫૬.૨૯/૧વસનં શયનં ચૈવ નિલયં ચૈવ વિદ્ધિ મે ।
૫૬.૨૯/૨કામઃ ક્રોધશ્ચ હર્ષશ્ચ ભયં મોહસ્તથૈવ ચ ॥ ૫૬.૨૯॥

૫૬.૩૦/૧મમૈવ વિદ્ધિ રૂપાણિ સર્વાણ્યેતાનિ સત્તમ ।
૫૬.૩૦/૨પ્રાપ્નુવન્તિ નરા વિપ્ર યત્ કૃત્વા કર્મ શોભનમ્ ॥ ૫૬.૩૦॥

૫૬.૩૧/૧સત્યં દાનં તપશ્ચોગ્રમહિંસાં સર્વજન્તુષુ ।
૫૬.૩૧/૨મદ્વિધાનેન વિહિતા મમ દેહવિચારિણઃ ॥ ૫૬.૩૧॥

૫૬.૩૨/૧મયાભિભૂતવિજ્ઞાનાશ્ચેષ્ટયન્તિ ન કામતઃ ।
૫૬.૩૨/૨સમ્યગ્ વેદમધીયાના યજન્તો વિવિધૈર્મખૈઃ ॥ ૫૬.૩૨ ॥

૫૬.૩૩/૧શાન્તાત્માનો જિતક્રોધાઃ પ્રાપ્નુવન્તિ દ્વિજાતયઃ ।
૫૬.૩૩/૨પ્રાપ્તું શક્યો ન ચૈવાહં નરૈર્દુષ્કૃતકર્મભિઃ ॥ ૫૬.૩૩ ॥

૫૬.૩૪/૧લોભાભિભૂતૈઃ કૃપણૈરનાર્યૈરકૃતાત્મભિઃ ।
૫૬.૩૪/૨તન્ માં મહાફલં વિદ્ધિ નરાણાં ભાવિતાત્મનામ્ ॥ ૫૬.૩૪ ॥

૫૬.૩૫/૧સુદુષ્પ્રાપં વિમૂઢાનાં માં કુયોગનિષેવિણામ્ ।
૫૬.૩૫/૨યદા યદા હિ ધર્મસ્ય ગ્લાનિર્ભવતિ સત્તમ ॥ ૫૬.૩૫ ॥

૫૬.૩૬/૧અભ્યુત્થાનમધર્મસ્ય તદાત્માનં સૃજામ્યહમ્ ।
૫૬.૩૬/૨દૈત્યા હિંસાનુરક્તાશ્ચ અવધ્યાઃ સુરસત્તમૈઃ ॥ ૫૬.૩૬ ॥

૫૬.૩૭/૧રાક્ષસાશ્ચાપિ લોકેઽસ્મિન્ યદોત્પત્સ્યન્તિ દારુણાઃ ।
૫૬.૩૭/૨તદાહં સમ્પ્રસૂયામિ ગૃહેષુ પુણ્યકર્મણામ્ ॥ ૫૬.૩૭ ॥

૫૬.૩૮/૧પ્રવિષ્ટો માનુષં દેહં સર્વં પ્રશમયામ્યહમ્ ।
૫૬.૩૮/૨સૃષ્ટ્વા દેવમનુષ્યાંશ્ચ ગન્ધર્વોરગરાક્ષસાન્ ॥ ૫૬.૩૮ ॥

૫૬.૩૯/૧સ્થાવરાણિ ચ ભૂતાનિ સંહરામ્યાત્મમાયયા ।
૫૬.૩૯/૨કર્મકાલે પુનર્દેહમનુચિન્ત્ય સૃજામ્યહમ્ ॥ ૫૬.૩૯ ॥

૫૬.૪૦/૧આવિશ્ય માનુષં દેહં મર્યાદાબન્ધકારણાત્ ।
૫૬.૪૦/૨શ્વેતઃ કૃતયુગે ધર્મઃ શ્યામસ્ત્રેતાયુગે મમ ॥ ૫૬.૪૦ ॥

૫૬.૪૧/૧રક્તો દ્વાપરમાસાદ્ય કૃષ્ણઃ કલિયુગે તથા ।
૫૬.૪૧/૨ત્રયો ભાગા હ્યધર્મસ્ય તસ્મિન્ કાલે ભવન્તિ ચ ॥ ૫૬.૪૧ ॥

૫૬.૪૨/૧અન્તકાલે ચ સમ્પ્રાપ્તે કાલો ભૂત્વાતિદારુણઃ ।
૫૬.૪૨/૨ત્રૈલોક્યં નાશયામ્યેકઃ સર્વં સ્થાવરજઙ્ગમમ્ ॥ ૫૬.૪૨ ॥

૫૬.૪૩/૧અહં ત્રિધર્મા વિશ્વાત્મા સર્વલોકસુખાવહઃ ।
૫૬.૪૩/૨અભિન્નઃ સર્વગોઽનન્તો હૃષીકેશ ઉરુક્રમઃ ॥ ૫૬.૪૩ ॥

૫૬.૪૪/૧કાલચક્રં નયામ્યેકો બ્રહ્મરૂપં મમૈવ તત્ ।
૫૬.૪૪/૨શમનં સર્વભૂતાનાં સર્વભૂતકૃતોદ્યમમ્ ॥ ૫૬.૪૪ ॥

૫૬.૪૫/૧એવં પ્રણિહિતઃ સમ્યઙ્ મમાત્મા મુનિસત્તમ ।
૫૬.૪૫/૨સર્વભૂતેષુ વિપ્રેન્દ્ર ન ચ માં વેત્તિ કશ્ચન ॥ ૫૬.૪૫ ॥

પ૬.૪૬/૧સર્વલોકે ચ માં ભક્તાઃ પૂજયન્તિ ચ સર્વશઃ ।

પ૬.૪૬/૨યચ્ચ કિંચિત્ ત્વયા પ્રાપ્તં મયિ ક્લેશાત્મકં દ્વિજ ॥ પ૬.૪૬॥

પ૬.૪૭/૧સુખોદયાય તત્ સર્વં શ્રેયસે ચ તવાનઘ ।

પ૬.૪૭/૨યચ્ચ કિંચિત્ ત્વયા લોકે દૃષ્ટં સ્થાવરજઙ્ગમમ્ ॥ પ૬.૪૭॥

પ૬.૪૮/૧વિહિતઃ સર્વ એવાસૌ મયાત્મા ભૂતભાવનઃ ।

પ૬.૪૮/૨અહં નારાયણો નામ શઙ્ખચક્રગદાધરઃ ॥ પ૬.૪૮॥

પ૬.૪૯/૧યાવદ્ યુગાનાં વિપ્રર્ષે સહસ્રં પરિવર્તતે ।

પ૬.૪૯/૨તાવત્ સ્વપિમિ વિશ્વાત્મા સર્વવિશ્વાનિ મોહયન્ ॥ પ૬.૪૯॥

પ૬.પ૦/૧એવં સર્વમહં કાલમિહાસે મુનિસત્તમ ।

પ૬.પ૦/૨અશિશુઃ શિશુરૂપેણ યાવદ્ બ્રહ્મા ન બુધ્યતે ॥ પ૬.પ૦॥

પ૬.પ૧/૧મયા ચ દત્તો વિપ્રેન્દ્ર વરસ્તે બ્રહ્મરૂપિણા ।

પ૬.પ૧/૨અસકૃત્ પરિતુષ્ટેન વિપ્રર્ષિગણપૂજિત ॥ પ૬.પ૧॥

પ૬.પ૨/૧સર્વમેકાર્ણવં કૃત્વા નષ્ટે સ્થાવરજઙ્ગમે ।

પ૬.પ૨/૨નિર્ગતોઽસિ મયાજ્ઞાતસ્તતસ્તે દર્શિતં જગત્ ॥ પ૬.પ૨॥

પ૬.પ૩/૧અભ્યન્તરં શરીરસ્ય પ્રવિષ્ટોઽસિ યદા મમ ।

પ૬.પ૩/૨દૃષ્ટ્વા લોકં સમસ્તં હિ વિસ્મિતો નાવબુધ્યસે ॥ પ૬.પ૩॥

પ૬.પ૪/૧તતોઽસિ વક્ત્રાદ્ વિપ્રર્ષે દ્રુતં નિઃસારિતો મયા ।

પ૬.પ૪/૨આખ્યાતસ્તે મયા ચાત્મા દુર્જ્ઞેયો હિ સુરાસુરૈઃ ॥ પ૬.પ૪॥

પ૬.પપ/૧યાવત્ સ ભગવાન્ બ્રહ્મા ન બુધ્યેત મહાતપાઃ ।

પ૬.પપ/૨તાવત્ ત્વમિહ વિપ્રર્ષે વિશ્રબ્ધશ્ચર વૈ સુખમ્ ॥ પ૬.પપ॥

પ૬.પ૬/૧તતો વિબુદ્ધે તસ્મિંસ્તુ સર્વલોકપિતામહે ।

પ૬.પ૬/૨એકો ભૂતાનિ સ્રક્ષ્યામિ શરીરાણિ દ્વિજોત્તમ ॥ પ૬.પ૬॥

પ૬.પ૭/૧આકાશં પૃથિવીં જ્યોતિર્વાયુઃ સલિલમેવ ચ ।

પ૬.પ૭/૨લોકે યચ્ચ ભવેત્ કિંચિદ્ ઇહ સ્થાવરજઙ્ગમમ્ ॥ પ૬.પ૭॥

પ૬.પ૮/૧બ્રહ્મોવાચ । એવમુક્ત્વા તદા વિપ્રાઃ પુનસ્તં પ્રાહ માધવઃ ।

પ૬.પ૮/૨પૂર્ણે યુગસહસ્રે તુ મેઘગમ્ભીરનિસ્વનઃ ॥ પ૬.પ૮॥

પ૬.પ૯/૧શ્રીભગવાન્ ઉવાચ । મુને બ્રૂહિ યદર્થં માં સ્તુતવાન્ પરમાર્થતઃ ।

૫૬.૫૯/૨વરં વૃણીષ્વ યચ્છ્રેષ્ઠં દદામિ નચિરાદ્ અહમ્ ॥ ૫૬.૫૯॥

૫૬.૬૦/૧આયુષ્માન્ અસિ દેવાનાં મદ્ભક્તોઽસિ દૃઢવ્રતઃ ।
૫૬.૬૦/૨તેન ત્વમસિ વિપ્રેન્દ્ર પુનર્દીર્ઘાયુરાપ્નુહિ ॥ ૫૬.૬૦॥

૫૬.૬૧/૧બ્રહ્મોવાચ । શ્રુત્વા વાણીં શુભાં તસ્ય વિલોક્ય સ તદા પુનઃ ।
૫૬.૬૧/૨મૂર્ધ્ના નિપત્ય સહસા પ્રણમ્ય પુનરબ્રવીત્ ॥ ૫૬.૬૧॥

૫૬.૬૨/૧માર્કણ્ડેય ઉવાચ । દૃષ્ટં પરં હિ દેવેશ તવ રૂપં દ્વિજોત્તમ ।
૫૬.૬૨/૨મોહોઽયં વિગતઃ સત્યં ત્વયિ દૃષ્ટે તુ મે હરે ॥ ૫૬.૬૨॥

૫૬.૬૩/૧એવમેવમહં નાથ ઇચ્છેયં ત્વત્પ્રસાદતઃ ।
૫૬.૬૩/૨લોકાનાં ચ હિતાર્થાય નાનાભાવપ્રશાન્તયે ॥ ૫૬.૬૩॥

૫૬.૬૪/૧શૈવભાગવતાનાં ચ વાદાર્થપ્રતિષેધકમ્ ।
૫૬.૬૪/૨અસ્મિન્ ક્ષેત્રવરે પુણ્યે નિર્મલે પુરુષોત્તમે ॥ ૫૬.૬૪॥

૫૬.૬૫/૧શિવસ્યાયતનં દેવ કરોમિ પરમં મહત્ ।
૫૬.૬૫/૨પ્રતિષ્ઠેય તથા તત્ર તવ સ્થાને ચ શંકરમ્ ॥ ૫૬.૬૫॥

૫૬.૬૬/૧તતો જ્ઞાસ્યન્તિ લોકેઽસ્મિન્ન્ એકમૂર્તી હરીશ્વરૌ ।
૫૬.૬૬/૨પ્રત્યુવાચ જગન્નાથઃ સ પુનસ્તં મહામુનિમ્ ॥ ૫૬.૬૬॥

૫૬.૬૭/૧શ્રીભગવાન્ ઉવાચ । યદ્ એતત્ પરમં દેવં કારણં ભુવનેશ્વરમ્ ।
૫૬.૬૭/૨લિઙ્ગમારાધનાર્થાય નાનાભાવપ્રશાન્તયે ॥ ૫૬.૬૭॥

૫૬.૬૮/૧મમાદિષ્ટેન વિપ્રેન્દ્ર કુરુ શીઘ્રં શિવાલયમ્ ।
૫૬.૬૮/૨તત્પ્રભાવાચ્છિવલોકે તિષ્ઠ ત્વં ચ તથાક્ષયમ્ ॥ ૫૬.૬૮॥

૫૬.૬૯/૧શિવે સંસ્થાપિતે વિપ્ર મમ સંસ્થાપનં ભવેત્ ।
૫૬.૬૯/૨નાવયોરન્તરં કિંચિદ્ એકભાવૌ દ્વિધા કૃતૌ ॥ ૫૬.૬૯॥

૫૬.૭૦/૧યો રુદ્રઃ સ સ્વયં વિષ્ણુર્યો વિષ્ણુઃ સ મહેશ્વરઃ ।
૫૬.૭૦/૨ઉભયોરન્તરં નાસ્તિ પવનાકાશયોરિવ ॥ ૫૬.૭૦॥

૫૬.૭૧/૧મોહિતો નાભિજાનાતિ ય એવ ગરુડધ્વજઃ ।
૫૬.૭૧/૨વૃષધ્વજઃ સ એવેતિ ત્રિપુરઘ્નં ત્રિલોચનમ્ ॥ ૫૬.૭૧॥

૫૬.૭૨/૧તવ નામાઙ્કિતં તસ્માત્ કુરુ વિપ્ર શિવાલયમ્ ।
૫૬.૭૨/૨ઉત્તરે દેવદેવસ્ય કુરુ તીર્થં સુશોભનમ્ ॥ ૫૬.૭૨॥

૫૬.૭૩/૧માર્કણ્ડેયહ્રદો નામ નરલોકેષુ વિશ્રુતઃ ।
૫૬.૭૩/૨ભવિષ્યતિ દ્વિજશ્રેષ્ઠ સર્વપાપપ્રણાશનઃ ॥ ૫૬.૭૩॥

૫૬.૭૪/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા સ તદા દેવસ્તત્રૈવાન્તરધીયત ।
૫૬.૭૪/૨માર્કણ્ડેયં મુનિશ્રેષ્ઠાઃ સર્વવ્યાપી જનાર્દનઃ ॥ ૫૬.૭૪॥

૫૭.૧/૧બ્રહ્મોવાચ । અતઃ પરં પ્રવક્ષ્યામિ પઞ્ચતીર્થવિધિં દ્વિજાઃ ।
૫૭.૧/૨યત્ ફલં સ્નાનદાનેન દેવતાપ્રેક્ષણેન ચ ॥ ૫૭.૧॥

૫૭.૨/૧માર્કણ્ડેયહ્રદં ગત્વા નરશ્ચોદઙ્મુખઃ શુચિઃ ।
૫૭.૨/૨નિમજ્જેત્ તત્ર વારાંસ્ત્રીન્ ઇમં મન્ત્રમુદીરયેત્ ॥ ૫૭.૨॥

૫૭.૩/૧સંસારસાગરે મગ્નં પાપગ્રસ્તમચેતનમ્ ।
૫૭.૩/૨ત્રાહિ માં ભગનેત્રઘ્ન ત્રિપુરારે નમોઽસ્તુ તે ॥ ૫૭.૩॥

૫૭.૪/૧નમઃ શિવાય શાન્તાય સર્વપાપહરાય ચ ।
૫૭.૪/૨સ્નાનં કરોમિ દેવેશ મમ નશ્યતુ પાતકમ્ ॥ ૫૭.૪॥

૫૭.૫/૧નાભિમાત્રે જલે સ્નાત્વા વિધિવદ્ દેવતા ઋષીન્ ।
૫૭.૫/૨તિલોદકેન મતિમાન્ પિતૃંશ્ચાન્યાંશ્ચ તર્પયેત્ ॥ ૫૭.૫॥

૫૭.૬/૧સ્નાત્વા તથૈવ ચાચમ્ય તતો ગચ્છેચ્છિવાલયમ્ ।
૫૭.૬/૨પ્રવિશ્ય દેવતાગારં કૃત્વા તં ત્રિઃ પ્રદક્ષિણમ્ ॥ ૫૭.૬॥

૫૭.૭/૧મૂલમન્ત્રેણ સમ્પૂજ્ય માર્કણ્ડેયસ્ય ચેશ્વરમ્ ।
૫૭.૭/૨અઘોરેણ ચ ભો વિપ્રાઃ પ્રણિપત્ય પ્રસાદયેત્ ॥ ૫૭.૭॥

૫૭.૮/૧ત્રિલોચન નમસ્તેઽસ્તુ નમસ્તે શશિભૂષણ ।
૫૭.૮/૨ત્રાહિ માં ત્વં વિરૂપાક્ષ મહાદેવ નમોઽસ્તુ તે ॥ ૫૭.૮॥

૫૭.૯/૧માર્કણ્ડેયહ્રદે ત્વેવં સ્નાત્વા દૃષ્ટ્વા ચ શંકરમ્ ।
૫૭.૯/૨દશાનામશ્વમેધાનાં ફલં પ્રાપ્નોતિ માનવઃ ॥ ૫૭.૯॥

૫૭.૧૦/૧પાપૈઃ સર્વૈર્વિનિર્મુક્તઃ શિવલોકં સ ગચ્છતિ ।
૫૭.૧૦/૨તત્ર ભુક્ત્વા વરાન્ ભોગાન્ યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૫૭.૧૦॥

૫૭.૧૧/૧ઇહલોકં સમાસાદ્ય ભવેદ્ વિપ્રો બહુશ્રુતઃ ।
૫૭.૧૧/૨શાંકરં યોગમાસાદ્ય તતો મોક્ષમવાપ્નુયાત્ ॥ ૫૭.૧૧॥

૫૭.૧૨/૧કલ્પવૃક્ષં તતો ગત્વા કૃત્વા તં ત્રિઃ પ્રદક્ષિણમ્ ।
૫૭.૧૨/૨પૂજયેત્ પરયા ભક્ત્યા મન્ત્રેણાનેન તં વટમ્ ॥ ૫૭.૧૨॥

૫૭.૧૩/૧ઓં નમો વ્યક્તરૂપાય મહાપ્રલયકારિણે ।
૫૭.૧૩/૨મહદ્રસોપવિષ્ટાય ન્યગ્રોધાય નમોઽસ્તુ તે ॥ ૫૭.૧૩॥

૫૭.૧૪/૧અમરસ્ત્વં સદા કલ્પે હરેશ્ચાયતનં વટ ।
૫૭.૧૪/૨ન્યગ્રોધ હર મે પાપં કલ્પવૃક્ષ નમોઽસ્તુ તે ॥ ૫૭.૧૪॥

૫૭.૧૫/૧ભક્ત્યા પ્રદક્ષિણં કૃત્વા નત્વા કલ્પવટં નરઃ ।
૫૭.૧૫/૨સહસા મુચ્યતે પાપાજ્જીર્ણત્વચ ઇવોરગઃ ॥ ૫૭.૧૫॥

૫૭.૧૬/૧છાયાં તસ્ય સમાક્રમ્ય કલ્પવૃક્ષસ્ય ભો દ્વિજાઃ ।
૫૭.૧૬/૨બ્રહ્મહત્યાં નરો જહ્યાત્ પાપેષ્વન્યેષુ કા કથા ॥ ૫૭.૧૬॥

૫૭.૧૭/૧દૃષ્ટ્વા કૃષ્ણાઙ્ગસમ્ભૂતં બ્રહ્મતેજોમયં પરમ્ ।
૫૭.૧૭/૨ન્યગ્રોધાકૃતિકં વિષ્ણું પ્રણિપત્ય ચ ભો દ્વિજાઃ ॥ ૫૭.૧૭॥

૫૭.૧૮/૧રાજસૂયાશ્વમેધાભ્યાં ફલં પ્રાપ્નોતિ ચાધિકમ્ ।
૫૭.૧૮/૨તથા સ્વવંશમુદ્ધૃત્ય વિષ્ણુલોકં સ ગચ્છતિ ॥ ૫૭.૧૮॥

૫૭.૧૯/૧વૈનતેયં નમસ્કૃત્ય કૃષ્ણસ્ય પુરતઃ સ્થિતમ્ ।
૫૭.૧૯/૨સર્વપાપવિનિર્મુક્તસ્તતો વિષ્ણુપુરં વ્રજેત્ ॥ ૫૭.૧૯॥

૫૭.૨૦/૧દૃષ્ટ્વા વટં વૈનતેયં યઃ પશ્યેત્ પુરુષોત્તમમ્ ।
૫૭.૨૦/૨સંકર્ષણં સુભદ્રાં ચ સ યાતિ પરમાં ગતિમ્ ॥ ૫૭.૨૦॥

૫૭.૨૧/૧પ્રવિશ્યાયતનં વિષ્ણોઃ કૃત્વા તં ત્રિઃ પ્રદક્ષિણમ્ ।
૫૭.૨૧/૨સંકર્ષણં સ્વમન્ત્રેણ ભક્ત્યાપૂજ્ય પ્રસાદયેત્ ॥ ૫૭.૨૧॥

૫૭.૨૨/૧નમસ્તે હલધૃગ્ રામ નમસ્તે મુશલાયુધ ।
૫૭.૨૨/૨નમસ્તે રેવતીકાન્ત નમસ્તે ભક્તવત્સલ ॥ ૫૭.૨૨॥

૫૭.૨૩/૧નમસ્તે બલિનાં શ્રેષ્ઠ નમસ્તે ધરણીધર ।
૫૭.૨૩/૨પ્રલમ્બારે નમસ્તેઽસ્તુ ત્રાહિ માં કૃષ્ણપૂર્વજ ॥ ૫૭.૨૩॥

૫૭.૨૪/૧એવં પ્રસાદ્ય ચાનન્તમજેયં ત્રિદશાર્ચિતમ્ ।
૫૭.૨૪/૨કૈલાસશિખરાકારં ચન્દ્રાત્ કાન્તતરાનનમ્ ॥ ૫૭.૨૪॥

૫૭.૨૫/૧નીલવસ્ત્રધરં દેવં ફણાવિકટમસ્તકમ્ ।
૫૭.૨૫/૨મહાબલં હલધરં કુણ્ડલૈકવિભૂષિતમ્ ॥ ૫૭.૨૫॥

૫૭.૨૬/૧રૌહિણેયં નરો ભક્ત્યા લભેદ્ અભિમતં ફલમ્ ।

૫૭.૨૬/૨સર્વપાપૈર્વિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૫૭.૨૬॥

૫૭.૨૭/૧આભૂતસમ્પ્લવં યાવદ્ ભુક્ત્વા તત્ર સુખં નરઃ ।
૫૭.૨૭/૨પુણ્યક્ષયાદ્ ઇહાગત્ય પ્રવરે યોગિનાં કુલે ॥ ૫૭.૨૭॥

૫૭.૨૮/૧બ્રાહ્મણપ્રવરો ભૂત્વા સર્વશાસ્ત્રાર્થપારગઃ ।
૫૭.૨૮/૨જ્ઞાનં તત્ર સમાસાદ્ય મુક્તિં પ્રાપ્નોતિ દુર્લભામ્ ॥ ૫૭.૨૮॥

૫૭.૨૯/૧એવમભ્યર્ચ્ય હલિનં તતઃ કૃષ્ણં વિચક્ષણઃ ।
૫૭.૨૯/૨દ્વાદશાક્ષરમન્ત્રેણ પૂજયેત્ સુસમાહિતઃ ॥ ૫૭.૨૯॥

૫૭.૩૦/૧દ્વિષટ્કવર્ણમન્ત્રેણ ભક્ત્યા યે પુરુષોત્તમમ્ ।
૫૭.૩૦/૨પૂજયન્તિ સદા ધીરાસ્તે મોક્ષં પ્રાપ્નુવન્તિ વૈ ॥ ૫૭.૩૦॥

૫૭.૩૧/૧ન તાં ગતિં સુરા યાન્તિ યોગિનો નૈવ સોમપાઃ ।
૫૭.૩૧/૨યાં ગતિં યાન્તિ ભો વિપ્રા દ્વાદશાક્ષરતત્પરાઃ ॥ ૫૭.૩૧॥

૫૭.૩૨/૧તસ્માત્ તેનૈવ મન્ત્રેણ ભક્ત્યા કૃષ્ણં જગદ્ગુરુમ્ ।
૫૭.૩૨/૨સમ્પૂજ્ય ગન્ધપુષ્પાદ્યૈઃ પ્રણિપત્ય પ્રસાદયેત્ ॥ ૫૭.૩૨॥

૫૭.૩૩/૧જય કૃષ્ણ જગન્નાથ જય સર્વાઘનાશન ।
૫૭.૩૩/૨જય ચાણૂરકેશિઘ્ન જય કંસનિષૂદન ॥ ૫૭.૩૩॥

૫૭.૩૪/૧જય પદ્મપલાશાક્ષ જય ચક્રગદાધર ।
૫૭.૩૪/૨જય નીલામ્બુદશ્યામ જય સર્વસુખપ્રદ ॥ ૫૭.૩૪॥

૫૭.૩૫/૧જય દેવ જગત્પૂજ્ય જય સંસારનાશન ।
૫૭.૩૫/૨જય લોકપતે નાથ જય વાઞ્છાફલપ્રદ ॥ ૫૭.૩૫॥

૫૭.૩૬/૧સંસારસાગરે ઘોરે નિઃસારે દુઃખફેનિલે ।
૫૭.૩૬/૨ક્રોધગ્રાહાકુલે રૌદ્રે વિષયોદકસમ્પ્લવે ॥ ૫૭.૩૬॥

૫૭.૩૭/૧નાનારોગોર્મિકલિલે મોહાવર્તસુદુસ્તરે ।
૫૭.૩૭/૨નિમગ્નોઽહં સુરશ્રેષ્ઠ ત્રાહિ માં પુરુષોત્તમ ॥ ૫૭.૩૭॥

૫૭.૩૮/૧એવં પ્રસાદ્ય દેવેશં વરદં ભક્તવત્સલમ્ ।
૫૭.૩૮/૨સર્વપાપહરં દેવં સર્વકામફલપ્રદમ્ ॥ ૫૭.૩૮॥

૫૭.૩૯/૧પીનાંસં દ્વિભુજં કૃષ્ણં પદ્મપત્રાયતેક્ષણમ્ ।
૫૭.૩૯/૨મહોરસ્કં મહાબાહું પીતવસ્ત્રં શુભાનનમ્ ॥ ૫૭.૩૯॥

૫૭.૪૦/૧શઙ્ખચક્રગદાપાણિં મુકુટાઙ્ગદભૂષણમ્ ।
૫૭.૪૦/૨સર્વલક્ષણસંયુક્તં વનમાલાવિભૂષિતમ્ ॥ ૫૭.૪૦॥

૫૭.૪૧/૧દૃષ્ટ્વા નરોઽઞ્જલિં કૃત્વા દણ્ડવત્ પ્રણિપત્ય ચ ।
૫૭.૪૧/૨અશ્વમેધસહસ્રાણાં ફલં પ્રાપ્નોતિ વૈ દ્વિજાઃ ॥ ૫૭.૪૧॥

૫૭.૪૨/૧યત્ ફલં સર્વતીર્થેષુ સ્નાને દાને પ્રકીર્તિતમ્ ।
૫૭.૪૨/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૨॥

૫૭.૪૩/૧યત્ ફલં સર્વરત્નાદ્યૈરિષ્ટે બહુસુવર્ણકે ।
૫૭.૪૩/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૩॥

૫૭.૪૪/૧યત્ ફલં સર્વવેદેષુ સર્વયજ્ઞેષુ યત્ ફલમ્ ।
૫૭.૪૪/૨તત્ ફલં સમવાપ્નોતિ નરઃ કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૪॥

૫૭.૪૫/૧યત્ ફલં સર્વદાનેન વ્રતેન નિયમેન ચ ।
૫૭.૪૫/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૫॥

૫૭.૪૬/૧તપોભિર્વિવિધૈરુગ્રૈર્યત્ ફલં સમુદાહૃતમ્ ।
૫૭.૪૬/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૬॥

૫૭.૪૭/૧યત્ ફલં બ્રહ્મચર્યેણ સમ્યક્ ચીર્ણેન તત્કૃતમ્ ।
૫૭.૪૭/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૭॥

૫૭.૪૮/૧યત્ ફલં ચ ગૃહસ્થસ્ય યથોક્તાચારવર્તિનઃ ।
૫૭.૪૮/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૮॥

૫૭.૪૯/૧યત્ ફલં વનવાસેન વાનપ્રસ્થસ્ય કીર્તિતમ્ ।
૫૭.૪૯/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૪૯॥

૫૭.૫૦/૧સંન્યાસેન યથોક્તેન યત્ ફલં સમુદાહૃતમ્ ।
૫૭.૫૦/૨નરસ્તત્ ફલમાપ્નોતિ દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૫૭.૫૦॥

૫૭.૫૧/૧કિં ચાત્ર બહુનોક્તેન માહાત્મ્યે તસ્ય ભો દ્વિજાઃ ।
૫૭.૫૧/૨દૃષ્ટ્વા કૃષ્ણં નરો ભક્ત્યા મોક્ષં પ્રાપ્નોતિ દુર્લભમ્ ॥ ૫૭.૫૧॥

૫૭.૫૨/૧પાપૈર્વિમુક્તઃ શુદ્ધાત્મા કલ્પકોટિસમુદ્ભવૈઃ ।
૫૭.૫૨/૨શ્રિયા પરમયા યુક્તઃ સર્વૈઃ સમુદિતો ગુણૈઃ ॥ ૫૭.૫૨॥

૫૭.૫૩/૧સર્વકામસમૃદ્ધેન વિમાનેન સુવર્ચસા ।
૫૭.૫૩/૨ત્રિસપ્તકુલમુદ્ધૃત્ય નરો વિષ્ણુપુરં વ્રજેત્ ॥ ૫૭.૫૩॥

૫૭.૫૪/૧તત્ર કલ્પશતં યાવદ્ ભુક્ત્વા ભોગાન્ મનોરમાન્ ।
૫૭.૫૪/૨ગન્ધર્વાપ્સરસૈઃ સાર્ધં યથા વિષ્ણુશ્ચતુર્ભુજઃ ॥ ૫૭.૫૪॥

૫૭.૫૫/૧ચ્યુતસ્તસ્માદ્ ઇહાયાતો વિપ્રાણાં પ્રવરે કુલે ।
૫૭.૫૫/૨સર્વજ્ઞઃ સર્વવેદી ચ જાયતે ગતમત્સરઃ ॥ ૫૭.૫૫॥

૫૭.૫૬/૧સ્વધર્મનિરતઃ શાન્તો દાતા ભૂતહિતે રતઃ ।
૫૭.૫૬/૨આસાદ્ય વૈષ્ણવં જ્ઞાનં તતો મુક્તિમવાપ્નુયાત્ ॥ ૫૭.૫૬॥

૫૭.૫૭/૧તતઃ સમ્પૂજ્ય મન્ત્રેણ સુભદ્રાં ભક્તવત્સલામ્ ।
૫૭.૫૭/૨પ્રસાદયેત્ તતો વિપ્રાઃ પ્રણિપત્ય કૃતાઞ્જલિઃ ॥ ૫૭.૫૭॥

૫૭.૫૮/૧નમસ્તે સર્વગે દેવિ નમસ્તે શુભસૌખ્યદે ।
૫૭.૫૮/૨ત્રાહિ માં પદ્મપત્રાક્ષિ કાત્યાયનિ નમોઽસ્તુ તે ॥ ૫૭.૫૮॥

૫૭.૫૯/૧એવં પ્રસાદ્ય તાં દેવીં જગદ્ધાત્રીં જગદ્ધિતામ્ ।
૫૭.૫૯/૨બલદેવસ્ય ભગિનીં સુભદ્રાં વરદાં શિવામ્ ॥ ૫૭.૫૯॥

૫૭.૬૦/૧કામગેન વિમાનેન નરો વિષ્ણુપુરં વ્રજેત્ ।
૫૭.૬૦/૨આભૂતસમ્પ્લવં યાવત્ ક્રીડિત્વા તત્ર દેવવત્ ॥ ૫૭.૬૦॥

૫૭.૬૧/૧ઇહ માનુષતાં પ્રાપ્તો બ્રાહ્મણો વેદવિદ્ ભવેત્ ।
૫૭.૬૧/૨પ્રાપ્ય યોગં હરેસ્તત્ર મોક્ષં ચ લભતે ધ્રુવમ્ ॥ ૫૭.૬૧॥

૫૮.૧/૧બ્રહ્મોવાચ । એવં દૃષ્ટ્વા બલં કૃષ્ણં સુભદ્રાં પ્રણિપત્ય ચ ।
૫૮.૧/૨ધર્મં ચાર્થં ચ કામં ચ મોક્ષં ચ લભતે ધ્રુવમ્ ॥ ૫૮.૧॥

૫૮.૨/૧નિષ્ક્રમ્ય દેવતાગારાત્ કૃતકૃત્યો ભવેન્ નરઃ ।
૫૮.૨/૨પ્રણમ્યાયતનં પશ્ચાદ્ વ્રજેત્ તત્ર સમાહિતઃ ॥ ૫૮.૨॥

૫૮.૩/૧ઇન્દ્રનીલમયો વિષ્ણુર્યત્રાસ્તે વાલુકાવૃતઃ ।
૫૮.૩/૨અન્તર્ધાનગતં નત્વા તતો વિષ્ણુપુરં વ્રજેત્ ॥ ૫૮.૩॥

૫૮.૪/૧સર્વદેવમયો યોઽસૌ હતવાન્ અસુરોત્તમમ્ ।
૫૮.૪/૨સ આસ્તે તત્ર ભો વિપ્રાઃ સિંહાર્ધકૃતવિગ્રહઃ ॥ ૫૮.૪॥

૫૮.૫/૧ભક્ત્યા દૃષ્ટ્વા તુ તં દેવં પ્રણમ્ય નરકેસરીમ્ ।
૫૮.૫/૨મુચ્યતે પાતકૈર્મર્ત્યઃ સમસ્તૈર્નાત્ર સંશયઃ ॥ ૫૮.૫॥

૫૮.૬/૧નરસિંહસ્ય યે ભક્તા ભવન્તિ ભુવિ માનવાઃ ।

૫૮.૬/૨ન તેષાં દુષ્કૃતં કિંચિત્ ફલં સ્યાદ્ યદ્ યદ્ ઈપ્સિતમ્ ॥ ૫૮.૬॥

૫૮.૭/૧તસ્માત્ સર્વપ્રયત્નેન નરસિંહં સમાશ્રયેત્ ।
૫૮.૭/૨ધર્માર્થકામમોક્ષાણાં ફલં યસ્માત્ પ્રયચ્છતિ ॥ ૫૮.૭॥

૫૮.૮/૧મુનય ઊચુઃ । માહાત્મ્યં નરસિંહસ્ય સુખદં ભુવિ દુર્લભમ્ ।
૫૮.૮/૨યથા કથયસે દેવ તેન નો વિસ્મયો મહાન્ ॥ ૫૮.૮॥

૫૮.૯/૧પ્રભાવં તસ્ય દેવસ્ય વિસ્તરેણ જગત્પતે ।
૫૮.૯/૨શ્રોતુમિચ્છામહે બ્રૂહિ પરં કૌતૂહલં હિ નઃ ॥ ૫૮.૯॥

૫૮.૧૦/૧યથા પ્રસીદેદ્ દેવોઽસૌ નરસિંહો મહાબલઃ ।
૫૮.૧૦/૨ભક્તાનામુપકારાય બ્રૂહિ દેવ નમોઽસ્તુ તે ॥ ૫૮.૧૦॥

૫૮.૧૧/૧પ્રસાદાન્ નરસિંહસ્ય યા ભવન્ત્યત્ર સિદ્ધયઃ ।
૫૮.૧૧/૨બ્રૂહિ તાઃ કુરુ ચાસ્માકં પ્રસાદં પ્રપિતામહ ॥ ૫૮.૧૧॥

૫૮.૧૨/૧બ્રહ્મોવાચ । શ઼ૃણુધ્વં તસ્ય ભો વિપ્રાઃ પ્રભાવં ગદતો મમ ।
૫૮.૧૨/૨અજિતસ્યાપ્રમેયસ્ય ભુક્તિમુક્તિપ્રદસ્ય ચ ॥ ૫૮.૧૨॥

૫૮.૧૩/૧કઃ શક્નોતિ ગુણાન્ વક્તું સમસ્તાંસ્તસ્ય ભો દ્વિજાઃ ।
૫૮.૧૩/૨સિંહાર્ધકૃતદેહસ્ય પ્રવક્ષ્યામિ સમાસતઃ ॥ ૫૮.૧૩॥

૫૮.૧૪/૧યાઃ કાશ્ચિત્ સિદ્ધયશ્ચાત્ર શ્રૂયન્તે દૈવમાનુષાઃ ।
૫૮.૧૪/૨પ્રસાદાત્ તસ્ય તાઃ સર્વાઃ સિધ્યન્તિ નાત્ર સંશયઃ ॥ ૫૮.૧૪॥

૫૮.૧૫/૧સ્વર્ગે મર્ત્યે ચ પાતાલે દિક્ષુ તોયે પુરે નગે ।
૫૮.૧૫/૨પ્રસાદાત્ તસ્ય દેવસ્ય ભવત્યવ્યાહતા ગતિઃ ॥ ૫૮.૧૫॥

૫૮.૧૬/૧અસાધ્યં તસ્ય દેવસ્ય નાસ્ત્યત્ર સચરાચરે ।
૫૮.૧૬/૨નરસિંહસ્ય ભો વિપ્રાઃ સદા ભક્તાનુકમ્પિનઃ ॥ ૫૮.૧૬॥

૫૮.૧૭/૧વિધાનં તસ્ય વક્ષ્યામિ ભક્તાનામુપકારકમ્ ।
૫૮.૧૭/૨યેન પ્રસીદેચ્ચૈવાસૌ સિંહાર્ધકૃતવિગ્રહઃ ॥ ૫૮.૧૭॥

૫૮.૧૮/૧શ઼ૃણુધ્વં મુનિશાર્દૂલાઃ કલ્પરાજં સનાતનમ્ ।
૫૮.૧૮/૨નરસિંહસ્ય તત્ત્વં ચ યન્ ન જ્ઞાતં સુરાસુરૈઃ ॥ ૫૮.૧૮॥

૫૮.૧૯/૧શાકયાવકમૂલૈસ્તુ ફલપિણ્યાકસક્તુકૈઃ ।
૫૮.૧૯/૨પયોભક્ષેણ વિપ્રેન્દ્રા વર્તયેત્ સાધકોત્તમઃ ॥ ૫૮.૧૯॥

૫૮.૨૦/૧કોશકૌપીનવાસાશ્ચ ધ્યાનયુક્તો જિતેન્દ્રિયઃ ।
૫૮.૨૦/૨અરણ્યે વિજને દેશે પર્વતે સિન્ધુસંગમે ॥ ૫૮.૨૦॥

૫૮.૨૧/૧ઊષરે સિદ્ધક્ષેત્રે ચ નરસિંહાશ્રમે તથા ।
૫૮.૨૧/૨પ્રતિષ્ઠાપ્ય સ્વયં વાપિ પૂજાં કૃત્વા વિધાનતઃ ॥ ૫૮.૨૧॥

૫૮.૨૨/૧દ્વાદશ્યાં શુક્લપક્ષસ્ય ઉપોષ્ય મુનિપુંગવાઃ ।
૫૮.૨૨/૨જપેલ્લક્ષાણિ વૈ વિંશન્ મનસા સંયતેન્દ્રિયઃ ॥ ૫૮.૨૨॥

૫૮.૨૩/૧ઉપપાતકયુક્તશ્ચ મહાપાતકસંયુતઃ ।
૫૮.૨૩/૨મુક્તો ભવેત્ તતો વિપ્રાઃ સાધકો નાત્ર સંશયઃ ॥ ૫૮.૨૩॥

૫૮.૨૪/૧કૃત્વા પ્રદક્ષિણં તત્ર નરસિંહં પ્રપૂજયેત્ ।
૫૮.૨૪/૨પુણ્યગન્ધાદિભિર્ધૂપૈઃ પ્રણમ્ય શિરસા પ્રભુમ્ ॥ ૫૮.૨૪॥

૫૮.૨૫/૧કર્પૂરચન્દનાક્તાનિ જાતીપુષ્પાણિ મસ્તકે ।
૫૮.૨૫/૨પ્રદદ્યાન્ નરસિંહસ્ય તતઃ સિદ્ધિઃ પ્રજાયતે ॥ ૫૮.૨૫॥

૫૮.૨૬/૧ભગવાન્ સર્વકાર્યેષુ ન ક્વચિત્ પ્રતિહન્યતે ।
૫૮.૨૬/૨તેજઃ સોઢું ન શક્તાઃ સ્યુર્બ્રહ્મરુદ્રાદયઃ સુરાઃ ॥ ૫૮.૨૬॥

૫૮.૨૭/૧કિં પુનર્દાનવા લોકે સિદ્ધગન્ધર્વમાનુષાઃ ।
૫૮.૨૭/૨વિદ્યાધરા યક્ષગણાઃ સકિંનરમહોરગાઃ ॥ ૫૮.૨૭॥

૫૮.૨૮/૧મન્ત્રં યાન્ આસુરાન્ હન્તું જપન્ત્યેકેઽન્યસાધકાઃ ।
૫૮.૨૮/૨તે સર્વે પ્રલયં યાન્તિ દૃષ્ટ્વાદિત્યાગ્નિવર્ચસઃ ॥ ૫૮.૨૮॥

૫૮.૨૯/૧સકૃજ્જપ્તં તુ કવચં રક્ષેત્ સર્વમુપદ્રવમ્ ।
૫૮.૨૯/૨દ્વિર્જપ્તં કવચં દિવ્યં રક્ષતે દેવદાનવાત્ ॥ ૫૮.૨૯॥

૫૮.૩૦/૧ગન્ધર્વાઃ કિંનરા યક્ષા વિદ્યાધરમહોરગાઃ ।
૫૮.૩૦/૨ભૂતાઃ પિશાચા રક્ષાંસિ યે ચાન્યે પરિપન્થિનઃ ॥ ૫૮.૩૦॥

૫૮.૩૧/૧ત્રિર્જપ્તં કવચં દિવ્યમભેદ્યં ચ સુરાસુરૈઃ ।
૫૮.૩૧/૨દ્વાદશાભ્યન્તરે ચૈવ યોજનાનાં દ્વિજોત્તમાઃ ॥ ૫૮.૩૧॥

૫૮.૩૨/૧રક્ષતે ભગવાન્ દેવો નરસિંહો મહાબલઃ ।
૫૮.૩૨/૨તતો ગત્વા બિલદ્વારમુપોષ્ય રજનીત્રયમ્ ॥ ૫૮.૩૨॥

૫૮.૩૩/૧પલાશકાષ્ઠૈઃ પ્રજ્વાલ્ય ભગવન્તં હુતાશનમ્ ।
૫૮.૩૩/૨પલાશસમિધસ્તત્ર જુહુયાત્ ત્રિમધુપ્લુતાઃ ॥ ૫૮.૩૩॥

૫૮.૩૪/૧દ્વે શતે દ્વિજશાર્દૂલા વષટ્કારેણ સાધકઃ ।
૫૮.૩૪/૨તતો વિવરદ્વારં તુ પ્રકટં જાયતે ક્ષણાત્ ॥ ૫૮.૩૪॥

૫૮.૩૫/૧તતો વિશેત્ તુ નિઃશઙ્કું કવચી વિવરં બુધઃ ।
૫૮.૩૫/૨ગચ્છતઃ સંકટં તસ્ય તમોમોહશ્ચ નશ્યતિ ॥ ૫૮.૩૫॥

૫૮.૩૬/૧રાજમાર્ગઃ સુવિસ્તીર્ણો દૃશ્યતે ભ્રમરાજિતઃ ।
૫૮.૩૬/૨નરસિંહં સ્મરંસ્તત્ર પાતાલં વિશતે દ્વિજાઃ ॥ ૫૮.૩૬॥

૫૮.૩૭/૧ગત્વા તત્ર જપેત્ તત્ત્વં નરસિંહાખ્યમવ્યયમ્ ।
૫૮.૩૭/૨તતઃ સ્ત્રીણાં સહસ્રાણિ વીણાવાદનકર્મણામ્ ॥ ૫૮.૩૭॥

૫૮.૩૮/૧નિર્ગચ્છન્તિ પુરો વિપ્રાઃ સ્વાગતં તા વદન્તિ ચ ।
૫૮.૩૮/૨પ્રવેશયન્તિ તા હસ્તે ગૃહીત્વા સાધકેશ્વરમ્ ॥ ૫૮.૩૮॥

૫૮.૩૯/૧તતો રસાયનં દિવ્યં પાયયન્તિ દ્વિજોત્તમાઃ ।
૫૮.૩૯/૨પીતમાત્રે દિવ્યદેહો જાયતે સુમહાબલઃ ॥ ૫૮.૩૯॥

૫૮.૪૦/૧ક્રીડતે સહ કન્યાભિર્યાવદ્ આભૂતસમ્પ્લવમ્ ।
૫૮.૪૦/૨ભિન્નદેહો વાસુદેવે લીયતે નાત્ર સંશયઃ ॥ ૫૮.૪૦॥

૫૮.૪૧/૧યદા ન રોચતે વાસસ્તસ્માન્ નિર્ગચ્છતે પુનઃ ।
૫૮.૪૧/૨પટ્ટં શૂલં ચ ખડ્ગં ચ રોચનાં ચ મણિં તથા ॥ ૫૮.૪૧॥

૫૮.૪૨/૧રસં રસાયનં ચૈવ પાદુકાઞ્જનમેવ ચ ।
૫૮.૪૨/૨કૃષ્ણાજિનં મુનિશ્રેષ્ઠા ગુટિકાં ચ મનોહરામ્ ॥ ૫૮.૪૨॥

૫૮.૪૩/૧કમણ્ડલું ચાક્ષસૂત્રં યષ્ટિં સંજીવનીં તથા ।
૫૮.૪૩/૨સિદ્ધવિદ્યાં ચ શાસ્ત્રાણિ ગૃહીત્વા સાધકેશ્વરઃ ॥ ૫૮.૪૩॥

૫૮.૪૪/૧જ્વલદ્વહ્નિસ્ફુલિઙ્ગોર્મિ+ ।વેષ્ટિતં ત્રિશિખં હૃદિ ।
૫૮.૪૪/૨સકૃન્ ન્યસ્તં દહેત્ સર્વં વૃજિનં જન્મકોટિજમ્ ॥ ૫૮.૪૪॥

૫૮.૪૫/૧વિષે ન્યસ્તં વિષં હન્યાત્ કુષ્ઠં હન્યાત્ તનૌ સ્થિતમ્ ।
૫૮.૪૫/૨સ્વદેહે ભ્રૂણહત્યાદિ કૃત્વા દિવ્યેન શુધ્યતિ ॥ ૫૮.૪૫॥

૫૮.૪૬/૧મહાગ્રહગૃહીતેષુ જ્વલમાનં વિચિન્તયેત્ ।
૫૮.૪૬/૨હૃદન્તે વૈ તતઃ શીઘ્રં નશ્યેયુર્દારુણા ગ્રહાઃ ॥ ૫૮.૪૬॥

૫૮.૪૭/૧બાલાનાં કણ્ઠકે બદ્ધં રક્ષા ભવતિ નિત્યશઃ ।

૫૮.૪૭/૨ગણ્ડપિણ્ડકલૂતાનાં નાશનં કુરુતે ધ્રુવમ્ ॥ ૫૮.૪૭॥

૫૮.૪૮/૧વ્યાધિજાતે સમિદ્ભિશ્ચ ઘૃતક્ષીરેણ હોમયેત્ ।
૫૮.૪૮/૨ત્રિસંધ્યં માસમેકં તુ સર્વરોગાન્ વિનાશયેત્ ॥ ૫૮.૪૮॥

૫૮.૪૯/૧અસાધ્યં તુ ન પશ્યામિ ત્રૈલોક્યે સચરાચરે ।
૫૮.૪૯/૨યાં યાં કામયતે સિદ્ધિં તાં તાં પ્રાપ્નોતિ સ ધ્રુવમ્ ॥ ૫૮.૪૯॥

૫૮.૫૦/૧અષ્ટોત્તરશતં ત્વેકે પૂજયિત્વા મૃગાધિપમ્ ।
૫૮.૫૦/૨મૃત્તિકાઃ સપ્ત વલ્મીકે શ્મશાને ચ ચતુષ્પથે ॥ ૫૮.૫૦॥

૫૮.૫૧/૧રક્તચન્દનસમ્મિશ્રા ગવાં ક્ષીરેણ લોડયેત્ ।
૫૮.૫૧/૨સિંહસ્ય પ્રતિમાં કૃત્વા પ્રમાણેન ષડઙ્ગુલામ્ ॥ ૫૮.૫૧॥

૫૮.૫૨/૧લિમ્પેત્ તથા ભૂર્જપત્રે રોચનયા સમાલિખેત્ ।
૫૮.૫૨/૨નરસિંહસ્ય કણ્ઠે તુ બદ્ધ્વા ચૈવ હિ મન્ત્રવિત્ ॥ ૫૮.૫૨॥

૫૮.૫૩/૧જપેત્ સંખ્યાવિહીનં તુ પૂજયિત્વા જલાશયે ।
૫૮.૫૩/૨યાવત્ સપ્તાહમાત્રં તુ જપેત્ સંયમિતેન્દ્રિયઃ ॥ ૫૮.૫૩॥

૫૮.૫૪/૧જલાકીર્ણા મુહૂર્તેન જાયતે સર્વમેદિની ।
૫૮.૫૪/૨અથવા શુષ્કવૃક્ષાગ્રે નરસિંહં તુ પૂજયેત્ ॥ ૫૮.૫૪॥

૫૮.૫૫/૧જપ્ત્વા ચાષ્ટશતં તત્ત્વં વર્ષન્તં વિનિવારયેત્ ।
૫૮.૫૫/૨તમેવં પિઞ્જકે બદ્ધ્વા ભ્રામયેત્ સાધકોત્તમઃ ॥ ૫૮.૫૫॥

૫૮.૫૬/૧મહાવાતો મુહૂર્તેન આગચ્છેન્ નાત્ર સંશયઃ ।
૫૮.૫૬/૨પુનશ્ચ ધારયેત્ ક્ષિપ્રં સપ્તસપ્તેન વારિણા ॥ ૫૮.૫૬॥

૫૮.૫૭/૧અથ તાં પ્રતિમાં દ્વારિ નિખનેદ્ યસ્ય સાધકઃ ।
૫૮.૫૭/૨ગોત્રોત્સાદો ભવેત્ તસ્ય ઉદ્ધૃતે ચૈવ શાન્તિદઃ ॥ ૫૮.૫૭॥

૫૮.૫૮/૧તસ્માત્ તં મુનિશાર્દૂલા ભક્ત્યા સમ્પૂજયેત્ સદા ।
૫૮.૫૮/૨મૃગરાજં મહાવીર્યં સર્વકામફલપ્રદમ્ ॥ ૫૮.૫૮॥

૫૮.૫૯/૧વિમુક્તઃ સર્વપાપેભ્યો વિષ્ણુલોકં સ ગચ્છતિ ।
૫૮.૫૯/૨બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ સ્ત્રિયઃ શૂદ્રાન્ત્યજાતયઃ ॥ ૫૮.૫૯॥

૫૮.૬૦/૧સમ્પૂજ્ય તં સુરશ્રેષ્ઠં ભક્ત્યા સિંહવપુર્ધરમ્ ।
૫૮.૬૦/૨મુચ્યન્તે ચાશુભૈર્દુઃખૈર્જન્મકોટિસમુદ્ભવૈઃ ॥ ૫૮.૬૦॥

૫૮.૬૧/૧સમ્પૂજ્ય તં સુરશ્રેષ્ઠં પ્રાપ્નુવન્ત્યભિવાઞ્છિતમ્ ।
૫૮.૬૧/૨દેવત્વમમરેશત્વં ગન્ધર્વત્વં ચ ભો દ્વિજાઃ ॥ ૫૮.૬૧॥

૫૮.૬૨/૧યક્ષવિદ્યાધરત્વં ચ તથાન્યચ્ચાભિવાઞ્છિતમ્ ।
૫૮.૬૨/૨દૃષ્ટ્વા સ્તુત્વા નમસ્કૃત્વા સમ્પૂજ્ય નરકેસરીમ્ ॥ ૫૮.૬૨॥

૫૮.૬૩/૧પ્રાપ્નુવન્તિ નરા રાજ્યં સ્વર્ગં મોક્ષં ચ દુર્લભમ્ ।
૫૮.૬૩/૨નરસિંહં નરો દૃષ્ટ્વા લભેદ્ અભિમતં ફલમ્ ॥ ૫૮.૬૩॥

૫૮.૬૪/૧નિર્મુક્તઃ સર્વપાપેભ્યો વિષ્ણુલોકં સ ગચ્છતિ ।
૫૮.૬૪/૨સકૃદ્ દૃષ્ટ્વા તુ તં દેવં ભક્ત્યા સિંહવપુર્ધરમ્ ॥ ૫૮.૬૪॥

૫૮.૬૫/૧મુચ્યતે ચાશુભૈર્દુઃખૈર્જન્મકોટિસમુદ્ભવૈઃ ।
૫૮.૬૫/૨સંગ્રામે સંકટે દુર્ગે ચોરવ્યાઘ્રાદિપીડિતે ॥ ૫૮.૬૫॥

૫૮.૬૬/૧કાન્તારે પ્રાણસંદેહે વિષવહ્નિજલેષુ ચ ।
૫૮.૬૬/૨રાજાદિભ્યઃ સમુદ્રેભ્યો ગ્રહરોગાદિપીડિતે ॥ ૫૮.૬૬॥

૫૮.૬૭/૧સ્મૃત્વા તં પુરુષઃ સર્વૈ રાજગ્રામૈર્વિમુચ્યતે ।
૫૮.૬૭/૨સૂર્યોદયે યથા નાશં તમોઽભ્યેતિ મહત્તરમ્ ॥ ૫૮.૬૭॥

૫૮.૬૮/૧તથા સંદર્શને તસ્ય વિનાશં યાન્ત્યુપદ્રવાઃ ।
૫૮.૬૮/૨ગુટિકાઞ્જનપાતાલ+ ।પાદુકે ચ રસાયનમ્ ॥ ૫૮.૬૮॥

૫૮.૬૯/૧નરસિંહે પ્રસન્ને તુ પ્રાપ્નોત્યન્યાંશ્ચ વાઞ્છિતાન્ ।
૫૮.૬૯/૨યાન્ યાન્ કામાન્ અભિધ્યાયન્ ભજતે નરકેસરીમ્ ॥ ૫૮.૬૯॥

૫૮.૭૦/૧તાંસ્તાન્ કામાન્ અવાપ્નોતિ નરો નાસ્ત્યત્ર સંશયઃ ।
૫૮.૭૦/૨દૃષ્ટ્વા તં દેવદેવેશં ભક્ત્યાપૂજ્ય પ્રણમ્ય ચ ॥ ૫૮.૭૦॥

૫૮.૭૧/૧દશાનામશ્વમેધાનાં ફલં દશગુણં લભેત્ ।
૫૮.૭૧/૨પાપૈઃ સર્વૈર્વિનિર્મુક્તો ગુણૈઃ સર્વૈરલંકૃતઃ ॥ ૫૮.૭૧॥

૫૮.૭૨/૧સર્વકામસમૃદ્ધાત્મા જરામરણવર્જિતઃ ।
૫૮.૭૨/૨સૌવર્ણેન વિમાનેન કિઙ્કિણીજાલમાલિના ॥ ૫૮.૭૨॥

૫૮.૭૩/૧સર્વકામસમૃદ્ધેન કામગેન સુવર્ચસા ।
૫૮.૭૩/૨તરુણાદિત્યવર્ણેન મુક્તાહારાવલમ્બિના ॥ ૫૮.૭૩॥

૫૮.૭૪/૧દિવ્યસ્ત્રીશતયુક્તેન દિવ્યગન્ધર્વનાદિના ।
૫૮.૭૪/૨કુલૈકવિંશમુદ્ધૃત્ય દેવવન્ મુદિતઃ સુખી ॥ ૫૮.૭૪॥

૫૮.૭૫/૧સ્તૂયમાનોઽપ્સરોભિશ્ચ વિષ્ણુલોકં વ્રજેન્ નરઃ ।
૫૮.૭૫/૨ભુક્ત્વા તત્ર વરાન્ ભોગાન્ વિષ્ણુલોકે દ્વિજોત્તમાઃ ॥ ૫૮.૭૫ ॥

૫૮.૭૬/૧ગન્ધર્વૈરપ્સરૈર્યુક્તઃ કૃત્વા રૂપં ચતુર્ભુજમ્ ।
૫૮.૭૬/૨મનોહ્લાદકરં સૌખ્યં યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૫૮.૭૬ ॥

૫૮.૭૭/૧પુણ્યક્ષયાદ્ ઇહાયાતઃ પ્રવરે યોગિનાં કુલે ।
૫૮.૭૭/૨ચતુર્વેદી ભવેદ્ વિપ્રો વેદવેદાઙ્ગપારગઃ ।
૫૮.૭૭/૩વૈષ્ણવં યોગમાસ્થાય તતો મોક્ષમવાપ્નુયાત્ ॥ ૫૮.૭૭ ॥

૫૯.૧/૧બ્રહ્મોવાચ । અનન્તાખ્યં વાસુદેવં દૃષ્ટ્વા ભક્ત્યા પ્રણમ્ય ચ ।
૫૯.૧/૨સર્વપાપવિનિર્મુક્તો નરો યાતિ પરં પદમ્ ॥ ૫૯.૧ ॥

૫૯.૨/૧મયા ચારાધિતશ્ચાસૌ શક્રેણ તદનન્તરમ્ ।
૫૯.૨/૨વિભીષણેન રામેણ કસ્તં નારાધયેત્ પુમાન્ ॥ ૫૯.૨ ॥

૫૯.૩/૧શ્વેતગઙ્ગાં નરઃ સ્નાત્વા યઃ પશ્યેચ્છ્વેતમાધવમ્ ।
૫૯.૩/૨મત્સ્યાખ્યં માધવં ચૈવ શ્વેતદ્વીપં સ ગચ્છતિ ॥ ૫૯.૩ ॥

૫૯.૪/૧મુનય ઊચુઃ । શ્વેતમાધવમાહાત્મ્યં વક્તુમર્હસ્યશેષતઃ ।
૫૯.૪/૨વિસ્તરેણ જગન્નાથ પ્રતિમાં તસ્ય વૈ હરેઃ ॥ ૫૯.૪ ॥

૫૯.૫/૧તસ્મિન્ ક્ષેત્રવરે પુણ્યે વિખ્યાતે જગતીતલે ।
૫૯.૫/૨શ્વેતાખ્યં માધવં દેવં કસ્તં સ્થાપિતવાન્ પુરા ॥ ૫૯.૫ ॥

૫૯.૬/૧બ્રહ્મોવાચ । અભૂત્ કૃતયુગે વિપ્રાઃ શ્વેતો નામ નૃપો બલી ।
૫૯.૬/૨મતિમાન્ ધર્મવિચ્છૂરઃ સત્યસંધો દૃઢવ્રતઃ ॥ ૫૯.૬ ॥

૫૯.૭/૧યસ્ય રાજ્યે તુ વર્ષાણાં સહસ્રં દશ માનવાઃ ।
૫૯.૭/૨ભવન્ત્યાયુષ્મન્તો લોકા બાલસ્તસ્મિન્ ન સીદતિ ॥ ૫૯.૭ ॥

૫૯.૮/૧વર્તમાને તદા રાજ્યે કિંચિત્ કાલે ગતે દ્વિજાઃ ।
૫૯.૮/૨કપાલગૌતમો નામ ઋષિઃ પરમધાર્મિકઃ ॥ ૫૯.૮ ॥

૫૯.૯/૧સુતોઽસ્યાજાતદન્તશ્ચ મૃતઃ કાલવશાદ્ દ્વિજાઃ ।
૫૯.૯/૨તમાદાય ઋષિર્ધીમાન્ નૃપસ્યાન્તિકમાનયત્ ॥ ૫૯.૯ ॥

૫૯.૧૦/૧દૃષ્ટ્વૈવં નૃપતિઃ સુપ્તં કુમારં ગતચેતસમ્ ।
૫૯.૧૦/૨પ્રતિજ્ઞામકરોદ્ વિપ્રા જીવનાર્થં શિશોસ્તદા ॥ ૫૯.૧૦ ॥

૫૯.૧૧/૧રાજોવાચ । યાવદ્ બાલમહં ત્વેનં યમસ્ય સદને ગતમ્ ।
૫૯.૧૧/૨નાનયે સપ્તરાત્રેણ ચિતાં દીપ્તાં સમારુહે ॥ ૫૯.૧૧॥

૫૯.૧૨/૧બ્રહ્મોવાચ । એવમુક્ત્વાસિતૈઃ પદ્મૈઃ શતૈર્દશશતાદિકૈઃ ।
૫૯.૧૨/૨સમ્પૂજ્ય ચ મહાદેવં રાજા વિદ્યાં પુનર્જપેત્ ॥ ૫૯.૧૨॥

૫૯.૧૩/૧અતિભક્તિં તુ સંચિન્ત્ય નૃપસ્ય જગદીશ્વરઃ ।
૫૯.૧૩/૨સાંનિધ્યમગમત્ તુષ્ટોऽસ્મીત્યુવાચ સહોમયા ॥ ૫૯.૧૩॥

૫૯.૧૪/૧શ્રુત્વૈવં ગિરમીશસ્ય વિલોક્ય સહસા હરમ્ ।
૫૯.૧૪/૨ભસ્મદિગ્ધં વિરૂપાક્ષં શરત્કુન્દેન્દુવર્ચસમ્ ॥ ૫૯.૧૪॥

૫૯.૧૫/૧શાર્દૂલચર્મવસનં શશાઙ્કાઙ્કિતમૂર્ધજમ્ ।
૫૯.૧૫/૨મહીં નિપત્ય સહસા પ્રણમ્ય સ તદાબ્રવીત્ ॥ ૫૯.૧૫॥

૫૯.૧૬/૧શ્વેત ઉવાચ । કારુણ્યં યદિ મે દૃષ્ટ્વા પ્રસન્નોऽસિ પ્રભો યદિ ।
૫૯.૧૬/૨કાલસ્ય વશમાપન્નો બાલકો દ્વિજપુત્રકઃ ॥ ૫૯.૧૬॥

૫૯.૧૭/૧જીવત્વેષ પુનર્બાલ ઇત્યેવં વ્રતમાહિતમ્ ।
૫૯.૧૭/૨અકસ્માચ્ચ મૃતં બાલં નિયમ્ય ભગવન્ સ્વયમ્ ।
૫૯.૧૭/૩યથોક્તાયુષ્યસંયુક્તં ક્ષેમં કુરુ મહેશ્વર ॥ ૫૯.૧૭॥

૫૯.૧૮/૧બ્રહ્મોવાચ । શ્વેતસ્યૈતદ્ વચઃ શ્રુત્વા મુદં પ્રાપ હરસ્તદા ।
૫૯.૧૮/૨કાલમાજ્ઞાપયામાસ સર્વભૂતભયંકરમ્ ॥ ૫૯.૧૮॥

૫૯.૧૯/૧નિયમ્ય કાલં દુર્ધર્ષં યમસ્યાજ્ઞાકરં દ્વિજાઃ ।
૫૯.૧૯/૨બાલં સંજીવયામાસ મૃત્યોર્મુખગતં પુનઃ ॥ ૫૯.૧૯॥

૫૯.૨૦/૧કૃત્વા ક્ષેમં જગત્ સર્વં મુનેઃ પુત્રં સ તં દ્વિજાઃ ।
૫૯.૨૦/૨દેવ્યા સહોમયા દેવસ્તત્રૈવાન્તરધીયત ॥ ૫૯.૨૦॥

૫૯.૨૧/૧એવં સંજીવયામાસ મુનેઃ પુત્રં નૃપોત્તમઃ ॥ ૫૯.૨૧॥

૫૯.૨૨/૧મુનય ઊચુઃ । દેવદેવ જગન્નાથ ત્રૈલોક્યપ્રભવાવ્યય ।
૫૯.૨૨/૨બ્રૂહિ નઃ પરમં તથ્યં શ્વેતાખ્યસ્ય ચ સામ્પ્રતમ્ ॥ ૫૯.૨૨॥

૫૯.૨૩/૧બ્રહ્મોવાચ । શૃણુધ્વં મુનિશાર્દૂલાઃ સર્વસત્ત્વહિતાવહમ્ ।
૫૯.૨૩/૨પ્રવક્ષ્યામિ યથાતથ્યં યત્ પૃચ્છથ મમાનઘાઃ ॥ ૫૯.૨૩॥

૫૯.૨૪/૧માધવસ્ય ચ માહાત્મ્યં સર્વપાપપ્રણાશનમ્ ।
૫૯.૨૪/૨યચ્છ્રુત્વાભિમતાન્ કામાન્ ધ્રુવં પ્રાપ્નોતિ માનવઃ ॥ ૫૯.૨૪॥

૫૯.૨૫/૧શ્રુતવાન્ ઋષિભિઃ પૂર્વં માધવાખ્યસ્ય ભો દ્વિજાઃ ।
૫૯.૨૫/૨શ‍ૃણુધ્વં તાં કથાં દિવ્યાં ભયશોકાર્તિનાશિનીમ્ ॥ ૫૯.૨૫॥

૫૯.૨૬/૧સ કૃત્વા રાજ્યમેકાગ્ર્યં વર્ષાણાં ચ સહસ્રશઃ ।
૫૯.૨૬/૨વિચાર્ય લૌકિકાન્ ધર્માન્ વૈદિકાન્ નિયમાંસ્તથા ॥ ૫૯.૨૬॥

૫૯.૨૭/૧કેશવારાધને વિપ્રા નિશ્ચિતં વ્રતમાસ્થિતઃ ।
૫૯.૨૭/૨સ ગત્વા પરમં ક્ષેત્રં સાગરં દક્ષિણાશ્રયમ્ ॥ ૫૯.૨૭॥

૫૯.૨૮/૧તટે તસ્મિઞ્ શુભે રમ્યે દેશે કૃષ્ણસ્ય ચાન્તિકે ।
૫૯.૨૮/૨શ્વેતોઽથ કારયામાસ પ્રાસાદં શુભલક્ષણમ્ ॥ ૫૯.૨૮॥

૫૯.૨૯/૧ધન્વન્તરશતં ચૈકં દેવદેવસ્ય દક્ષિણે ।
૫૯.૨૯/૨તતઃ શ્વેતેન વિપ્રેન્દ્રાઃ શ્વેતશૈલમયેન ચ ॥ ૫૯.૨૯॥

૫૯.૩૦/૧કૃતઃ સ ભગવાઞ્ શ્વેતો માધવશ્ચન્દ્રસંનિભઃ ।
૫૯.૩૦/૨પ્રતિષ્ઠાં વિધિવચ્ચક્રે યથોદ્દિષ્ટાં સ્વયં તુ સઃ ॥ ૫૯.૩૦॥

૫૯.૩૧/૧દત્ત્વા દાનં દ્વિજાતિભ્યો દીનાનાથતપસ્વિનામ્ ।
૫૯.૩૧/૨અથાનન્તરતો રાજા માધવસ્ય ચ સંનિધૌ ॥ ૫૯.૩૧॥

૫૯.૩૨/૧મહીં નિપત્ય સહસા ઓંકારં દ્વાદશાક્ષરમ્ ।
૫૯.૩૨/૨જપન્ સ મૌનમાસ્થાય માસમેકં સમાધિના ॥ ૫૯.૩૨॥

૫૯.૩૩/૧નિરાહારો મહાભાગઃ સમ્યગ્ વિષ્ણુપદે સ્થિતઃ ।
૫૯.૩૩/૨જપાન્તે સ તુ દેવેશં સંસ્તોતુમુપચક્રમે ॥ ૫૯.૩૩॥

૫૯.૩૪/૧શ્વેત ઉવાચ । ઓં નમો વાસુદેવાય નમઃ સંકર્ષણાય ચ ।
૫૯.૩૪/૨પ્રદ્યુમ્નાયાનિરુદ્ધાય નમો નારાયણાય ચ ॥ ૫૯.૩૪॥

૫૯.૩૫/૧નમોઽસ્તુ બહુરૂપાય વિશ્વરૂપાય વેધસે ।
૫૯.૩૫/૨નિર્ગુણાયાપ્રતર્ક્યાય શુચયે શુક્લકર્મણે ॥ ૫૯.૩૫॥

૫૯.૩૬/૧ઓં નમઃ પદ્મનાભાય પદ્મગર્ભોદ્ભવાય ચ ।
૫૯.૩૬/૨નમોઽસ્તુ પદ્મવર્ણાય પદ્મહસ્તાય તે નમઃ ॥ ૫૯.૩૬॥

૫૯.૩૭/૧ઓં નમઃ પુષ્કરાક્ષાય સહસ્રાક્ષાય મીઢુષે ।
૫૯.૩૭/૨નમઃ સહસ્રપાદાય સહસ્રભુજમન્યવે ॥ ૫૯.૩૭॥

૫૯.૩૮/૧ઓં નમોઽસ્તુ વરાહાય વરદાય સુમેધસે ।

૫૯.૩૮/૨વરિષ્ઠાય વરેણ્યાય શરણ્યાયાચ્યુતાય ચ ॥ ૫૯.૩૮॥

૫૯.૩૯/૧ઓં નમો બાલરૂપાય બાલપદ્મપ્રભાય ચ ।
૫૯.૩૯/૨બાલાર્કસોમનેત્રાય મુઞ્જકેશાય ધીમતે ॥ ૫૯.૩૯॥

૫૯.૪૦/૧કેશવાય નમો નિત્યં નમો નારાયણાય ચ ।
૫૯.૪૦/૨માધવાય વરિષ્ઠાય ગોવિન્દાય નમો નમઃ ॥ ૫૯.૪૦॥

૫૯.૪૧/૧ઓં નમો વિષ્ણવે નિત્યં દેવાય વસુરેતસે ।
૫૯.૪૧/૨મધુસૂદનાય નમઃ શુદ્ધાયાંશુધરાય ચ ॥ ૫૯.૪૧॥

૫૯.૪૨/૧નમો અનન્તાય સૂક્ષ્માય નમઃ શ્રીવત્સધારિણે ।
૫૯.૪૨/૨ત્રિવિક્રમાય ચ નમો દિવ્યપીતામ્બરાય ચ ॥ ૫૯.૪૨॥

૫૯.૪૩/૧સૃષ્ટિકર્ત્રે નમસ્તુભ્યં ગોપ્ત્રે ધાત્રે નમો નમઃ ।
૫૯.૪૩/૨નમોઽસ્તુ ગુણભૂતાય નિર્ગુણાય નમો નમઃ ॥ ૫૯.૪૩॥

૫૯.૪૪/૧નમો વામનરૂપાય નમો વામનકર્મણે ।
૫૯.૪૪/૨નમો વામનનેત્રાય નમો વામનવાહિને ॥ ૫૯.૪૪॥

૫૯.૪૫/૧નમો રમ્યાય પૂજ્યાય નમોઽસ્ત્વવ્યક્તરૂપિણે ।
૫૯.૪૫/૨અપ્રતર્ક્યાય શુદ્ધાય નમો ભયહરાય ચ ॥ ૫૯.૪૫॥

૫૯.૪૬/૧સંસારાર્ણવપોતાય પ્રશાન્તાય સ્વરૂપિણે ।
૫૯.૪૬/૨શિવાય સૌમ્યરૂપાય રુદ્રાયોત્તારણાય ચ ॥ ૫૯.૪૬॥

૫૯.૪૭/૧ભવભઙ્ગકૃતે ચૈવ ભવભોગપ્રદાય ચ ।
૫૯.૪૭/૨ભવસંઘાતરૂપાય ભવસૃષ્ટિકૃતે નમઃ ॥ ૫૯.૪૭॥

૫૯.૪૮/૧ઓં નમો દિવ્યરૂપાય સોમાગ્નિશ્વસિતાય ચ ।
૫૯.૪૮/૨સોમસૂર્યાંશુકેશાય ગોબ્રાહ્મણહિતાય ચ ॥ ૫૯.૪૮॥

૫૯.૪૯/૧ઓં નમ ઋક્સ્વરૂપાય પદક્રમસ્વરૂપિણે ।
૫૯.૪૯/૨ઋક્સ્તુતાય નમસ્તુભ્યં નમ ઋક્સાધનાય ચ ॥ ૫૯.૪૯॥

૫૯.૫૦/૧ઓં નમો યજુષાં ધાત્રે યજૂરૂપધરાય ચ ।
૫૯.૫૦/૨યજુર્યાજ્યાય જુષ્ટાય યજુષાં પતયે નમઃ ॥ ૫૯.૫૦॥

૫૯.૫૧/૧ઓં નમઃ શ્રીપતે દેવ શ્રીધરાય વરાય ચ ।
૫૯.૫૧/૨શ્રિયઃ કાન્તાય દાન્તાય યોગિચિન્ત્યાય યોગિને ॥ ૫૯.૫૧॥

૫૯.૫૨/૧ઓં નમઃ સામરૂપાય સામધ્વનિવરાય ચ ।
૫૯.૫૨/૨ઓં નમઃ સામસૌમ્યાય સામયોગવિદે નમઃ ॥ ૫૯.૫૨ ॥

૫૯.૫૩/૧સામ્ને ચ સામગીતાય ઓં નમઃ સામધારિણે ।
૫૯.૫૩/૨સામયજ્ઞવિદે ચૈવ નમઃ સામકરાય ચ ॥ ૫૯.૫૩ ॥

૫૯.૫૪/૧નમસ્ત્વથર્વશિરસે નમોઽથર્વસ્વરૂપિણે ।
૫૯.૫૪/૨નમોઽસ્ત્વથર્વપાદાય નમોઽથર્વકરાય ચ ॥ ૫૯.૫૪ ॥

૫૯.૫૫/૧ઓં નમો વજ્રશીર્ષાય મધુકૈટભઘાતિને ।
૫૯.૫૫/૨મહોદધિજલસ્થાય વેદાહરણકારિણે ॥ ૫૯.૫૫ ॥

૫૯.૫૬/૧નમો દીપ્તસ્વરૂપાય હૃષીકેશાય વૈ નમઃ ।
૫૯.૫૬/૨નમો ભગવતે તુભ્યં વાસુદેવાય તે નમઃ ॥ ૫૯.૫૬ ॥

૫૯.૫૭/૧નારાયણ નમસ્તુભ્યં નમો લોકહિતાય ચ ।
૫૯.૫૭/૨ઓં નમો મોહનાશાય ભવભઙ્ગકરાય ચ ॥ ૫૯.૫૭ ॥

૫૯.૫૮/૧ગતિપ્રદાય ચ નમો નમો બન્ધહરાય ચ ।
૫૯.૫૮/૨ત્રૈલોક્યતેજસાં કર્ત્રે નમસ્તેજઃસ્વરૂપિણે ॥ ૫૯.૫૮ ॥

૫૯.૫૯/૧યોગીશ્વરાય શુદ્ધાય રામાયોત્તરણાય ચ ।
૫૯.૫૯/૨સુખાય સુખનેત્રાય નમઃ સુકૃતધારિણે ॥ ૫૯.૫૯ ॥

૫૯.૬૦/૧વાસુદેવાય વન્દ્યાય વામદેવાય વૈ નમઃ ।
૫૯.૬૦/૨દેહિનાં દેહકર્ત્રે ચ ભેદભઙ્ગકરાય ચ ॥ ૫૯.૬૦ ॥

૫૯.૬૧/૧દેવૈર્વન્દિતદેહાય નમસ્તે દિવ્યમૌલિને ।
૫૯.૬૧/૨નમો વાસનિવાસાય વાસવ્યવહરાય ચ ॥ ૫૯.૬૧ ॥

૫૯.૬૨/૧ઓં નમો વસુકર્ત્રે ચ વસુવાસપ્રદાય ચ ।
૫૯.૬૨/૨નમો યજ્ઞસ્વરૂપાય યજ્ઞેશાય ચ યોગિને ॥ ૫૯.૬૨ ॥

૫૯.૬૩/૧યતિયોગકરેશાય નમો યજ્ઞાઙ્ગધારિણે ।
૫૯.૬૩/૨સંકર્ષણાય ચ નમઃ પ્રલમ્બમથનાય ચ ॥ ૫૯.૬૩ ॥

૫૯.૬૪/૧મેઘઘોષસ્વનોત્તીર્ણ+ ।વેગલાઙ્ગલધારિણે ।
૫૯.૬૪/૨નમોઽસ્તુ જ્ઞાનિનાં જ્ઞાન નારાયણપરાયણ ॥ ૫૯.૬૪ ॥

૫૯.૬૫/૧ન મેઽસ્તિ ત્વામ્ ઋતે બન્ધુર્નરકોત્તારણે પ્રભો ।
૫૯.૬૫/૨અતસ્ત્વાં સર્વભાવેન પ્રણતો નતવત્સલ ॥ ૫૯.૬૫ ॥

૫૯.૬૬/૧મલં યત્ કાયજં વાપિ માનસં ચૈવ કેશવ ।
૫૯.૬૬/૨ન તસ્યાન્યોઽસ્તિ દેવેશ ક્ષાલકસ્ત્વામ્ ઋતેઽચ્યુત ॥ ૫૯.૬૬॥

૫૯.૬૭/૧સંસર્ગાણિ સમસ્તાનિ વિહાય ત્વામુપસ્થિતઃ ।
૫૯.૬૭/૨સઙ્ગો મેઽસ્તુ ત્વયા સાર્ધમાત્મલાભાય કેશવ ॥ ૫૯.૬૭॥

૫૯.૬૮/૧કષ્ટમાપત્ સુદુષ્પારં સંસારં વેદ્મિ કેશવ ।
૫૯.૬૮/૨તાપત્રયપરિક્લિષ્ટસ્તેન ત્વાં શરણં ગતઃ ॥ ૫૯.૬૮॥

૫૯.૬૯/૧એષણાભિર્જગત્ સર્વં મોહિતં માયયા તવ ।
૫૯.૬૯/૨આકર્ષિતં ચ લોભાદ્યૈરતસ્ત્વામહમાશ્રિતઃ ॥ ૫૯.૬૯॥

૫૯.૭૦/૧નાસ્તિ કિંચિત્ સુખં વિષ્ણો સંસારસ્થસ્ય દેહિનઃ ।
૫૯.૭૦/૨યથા યથા હિ યજ્ઞેશ ત્વયિ ચેતઃ પ્રવર્તતે ॥ ૫૯.૭૦॥

૫૯.૭૧/૧તથા ફલવિહીનં તુ સુખમાત્યન્તિકં લભેત્ ।
૫૯.૭૧/૨નષ્ટો વિવેકશૂન્યોઽસ્મિ દૃશ્યતે જગદ્ આતુરમ્ ॥ ૫૯.૭૧॥

૫૯.૭૨/૧ગોવિન્દ ત્રાહિ સંસારાન્ મામુદ્ધર્તું ત્વમર્હસિ ।
૫૯.૭૨/૨મગ્નસ્ય મોહસલિલે નિરુત્તારે ભવાર્ણવે ।
૫૯.૭૨/૩ઉદ્ધર્તા પુણ્ડરીકાક્ષ ત્વામ્ ઋતેઽન્યો ન વિદ્યતે ॥ ૫૯.૭૨॥

૫૯.૭૩/૧બ્રહ્મોવાચ । ઇત્થં સ્તુતસ્તતસ્તેન રાજ્ઞા શ્વેતેન ભો દ્વિજાઃ ।
૫૯.૭૩/૨તસ્મિન્ ક્ષેત્રવરે દિવ્યે વિખ્યાતે પુરુષોત્તમે ॥ ૫૯.૭૩॥

૫૯.૭૪/૧ભક્તિં તસ્ય તુ સંચિન્ત્ય દેવદેવો જગદ્ગુરુઃ ।
૫૯.૭૪/૨આજગામ નૃપસ્યાગ્રે સર્વૈર્દેવૈર્વૃતો હરિઃ ॥ ૫૯.૭૪॥

૫૯.૭૫/૧નીલજીમૂતસંકાશઃ પદ્મપત્રાયતેક્ષણઃ ।
૫૯.૭૫/૨દધત્ સુદર્શનં ધીમાન્ કરાગ્રે દીપ્તમણ્ડલમ્ ॥ ૫૯.૭૫॥

૫૯.૭૬/૧ક્ષીરોદજલસંકાશો વિમલશ્ચન્દ્રસંનિભઃ ।
૫૯.૭૬/૨રરાજ વામહસ્તેઽસ્ય પાઞ્ચજન્યો મહાદ્યુતિઃ ॥ ૫૯.૭૬॥

૫૯.૭૭/૧પક્ષિરાજધ્વજઃ શ્રીમાન્ ગદાશાર્ઙ્ગાસિધૃક્ પ્રભુઃ ।
૫૯.૭૭/૨ઉવાચ સાધુ ભો રાજન્ યસ્ય તે મતિરુત્તમા ।
૫૯.૭૭/૩યદ્ ઇષ્ટં વર ભદ્રં તે પ્રસન્નોઽસ્મિ તવાનઘ ॥ ૫૯.૭૭॥

૫૯.૭૮/૧બ્રહ્મોવાચ । શ્રુત્વૈવં દેવદેવસ્ય વાક્યં તત્ પરમામૃતમ્ ।

૫૯.૭૮/૨પ્રણમ્ય શિરસોવાચ શ્વેતસ્તદ્ગતમાનસઃ ॥ ૫૯.૭૮॥

૫૯.૭૯/૧શ્વેત ઉવાચ । યદ્યહં ભગવન્ ભક્તઃ પ્રયચ્છ વરમુત્તમમ્ ।
૫૯.૭૯/૨આબ્રહ્મભવનાદ્ ઊર્ધ્વં વૈષ્ણવં પદમવ્યયમ્ ॥ ૫૯.૭૯॥

૫૯.૮૦/૧વિમલં વિરજં શુદ્ધં સંસારાસઙ્ગવર્જિતમ્ ।
૫૯.૮૦/૨તત્ પદં ગન્તુમિચ્છામિ ત્વત્પ્રસાદાજ્જગત્પતે ॥ ૫૯.૮૦॥

૫૯.૮૧/૧શ્રીભગવાન્ ઉવાચ । યત્ પદં વિબુધાઃ સર્વે મુનયઃ સિદ્ધયોગિનઃ ।
૫૯.૮૧/૨નાભિગચ્છન્તિ યદ્ રમ્યં પરં પદમનામયમ્ ॥ ૫૯.૮૧॥

૫૯.૮૨/૧યાસ્યસિ પરમં સ્થાનં રાજ્યામૃતમુપાસ્ય ચ ।
૫૯.૮૨/૨સર્વાંલ્લોકાન્ અતિક્રમ્ય મમ લોકં ગમિષ્યસિ ॥ ૫૯.૮૨॥

૫૯.૮૩/૧કીર્તિસ્તવાત્ર રાજેન્દ્ર ત્રીંલ્લોકાંશ્ચ ગમિષ્યતિ ।
૫૯.૮૩/૨સાંનિધ્યં મમ ચૈવાત્ર સર્વદૈવ ભવિષ્યતિ ॥ ૫૯.૮૩॥

૫૯.૮૪/૧શ્વેતગઙ્ગેતિ ગાસ્યન્તિ સર્વે તે દેવદાનવાઃ ।
૫૯.૮૪/૨કુશાગ્રેણાપિ રાજેન્દ્ર શ્વેતગાઙ્ગેયમમ્બુ ચ ॥ ૫૯.૮૪॥

૫૯.૮૫/૧સ્પૃષ્ટ્વા સ્વર્ગં ગમિષ્યન્તિ મદ્ભક્તા યે સમાહિતાઃ ।
૫૯.૮૫/૨યસ્ત્વિમાં પ્રતિમાં ગચ્છેન્ માધવાખ્યાં શશિપ્રભામ્ ॥ ૫૯.૮૫॥

૫૯.૮૬/૧શઙ્ખગોક્ષીરસંકાશામશેષાઘવિનાશિનીમ્ ।
૫૯.૮૬/૨તાં પ્રણમ્ય સકૃદ્ ભક્ત્યા પુણ્ડરીકનિભેક્ષણામ્ ॥ ૫૯.૮૬॥

૫૯.૮૭/૧વિહાય સર્વલોકાન્ વૈ મમ લોકે મહીયતે ।
૫૯.૮૭/૨મન્વન્તરાણિ તત્રૈવ દેવકન્યાભિરાવૃતઃ ॥ ૫૯.૮૭॥

૫૯.૮૮/૧ગીયમાનશ્ચ મધુરં સિદ્ધગન્ધર્વસેવિતઃ ।
૫૯.૮૮/૨ભુનક્તિ વિપુલાન્ ભોગાન્ યથેષ્ટં મામકૈઃ સહ ॥ ૫૯.૮૮॥

૫૯.૮૯/૧ચ્યુતસ્તસ્માદ્ ઇહાગત્ય મનુષ્યો બ્રાહ્મણો ભવેત્ ।
૫૯.૮૯/૨વેદવેદાઙ્ગવિચ્છ્રીમાન્ ભોગવાંશ્ચિરજીવિતઃ ॥ ૫૯.૮૯॥

૫૯.૯૦/૧ગજાશ્વરથયાનાઢ્યો ધનધાન્યાવૃતઃ શુચિઃ ।
૫૯.૯૦/૨રૂપવાન્ બહુભાગ્યશ્ચ પુત્રપૌત્રસમન્વિતઃ ॥ ૫૯.૯૦॥

૫૯.૯૧/૧પુરુષોત્તમં પુનઃ પ્રાપ્ય વટમૂલેઽથ સાગરે ।
૫૯.૯૧/૨ત્યક્ત્વા દેહં હરિં સ્મૃત્વા તતઃ શાન્તપદં વ્રજેત્ ॥ ૫૯.૯૧॥

૬૦.૧/૧બ્રહ્મોવાચ । શ્વેતમાધવમાલોક્ય સમીપે મત્સ્યમાધવમ્ ।
૬૦.૧/૨એકાર્ણવજલે પૂર્વં રોહિતં રૂપમાસ્થિતમ્ ॥ ૬૦.૧॥

૬૦.૨/૧વેદાનાં હરણાર્થાય રસાતલતલે સ્થિતમ્ ।
૬૦.૨/૨ચિન્તયિત્વા ક્ષિતિં સમ્યક્ તસ્મિન્ સ્થાને પ્રતિષ્ઠિતમ્ ॥ ૬૦.૨॥

૬૦.૩/૧આદ્યાવતરણં રૂપં માધવં મત્સ્યરૂપિણમ્ ।
૬૦.૩/૨પ્રણમ્ય પ્રણતો ભૂત્વા સર્વદુઃખાદ્ વિમુચ્યતે ॥ ૬૦.૩॥

૬૦.૪/૧પ્રયાતિ પરમં સ્થાનં યત્ર દેવો હરિઃ સ્વયમ્ ।
૬૦.૪/૨કાલે પુનરિહાયાતો રાજા સ્યાત્ પૃથિવીતલે ॥ ૬૦.૪॥

૬૦.૫/૧વત્સમાધવમાસાદ્ય દુરાધર્ષો ભવેન્ નરઃ ।
૬૦.૫/૨દાતા ભોક્તા ભવેદ્ યજ્વા વૈષ્ણવઃ સત્યસંગરઃ ॥ ૬૦.૫॥

૬૦.૬/૧યોગં પ્રાપ્ય હરેઃ પશ્ચાત્ તતો મોક્ષમવાપ્નુયાત્ ।
૬૦.૬/૨મત્સ્યમાધવમાહાત્મ્યં મયા સમ્પરિકીર્તિતમ્ ।
૬૦.૬/૩યં દૃષ્ટ્વા મુનિશાર્દૂલાઃ સર્વાન્ કામાન્ અવાપ્નુયાત્ ॥ ૬૦.૬॥

૬૦.૭/૧મુનય ઊચુઃ । ભગવઞ્ શ્રોતુમિચ્છામો માર્જનં વરુણાલયે ।
૬૦.૭/૨ક્રિયતે સ્નાનદાનાદિ તસ્યાશેષફલં વદ ॥ ૬૦.૭॥

૬૦.૮/૧બ્રહ્મોવાચ । શ઼ૃણુધ્વં મુનિશાર્દૂલા માર્જનસ્ય યથાવિધિ ।
૬૦.૮/૨ભક્ત્યા તુ તન્મના ભૂત્વા સમ્પ્રાપ્ય પુણ્યમુત્તમમ્ ॥ ૬૦.૮॥

૬૦.૯/૧માર્કણ્ડેયહ્રદે સ્નાનં પૂર્વકાલે પ્રશસ્યતે ।
૬૦.૯/૨ચતુર્દશ્યાં વિશેષેણ સર્વપાપપ્રણાશનમ્ ॥ ૬૦.૯॥

૬૦.૧૦/૧તદ્વત્ સ્નાનં સમુદ્રસ્ય સર્વકાલં પ્રશસ્યતે ।
૬૦.૧૦/૨પૌર્ણમાસ્યાં વિશેષેણ હયમેધફલં લભેત્ ॥ ૬૦.૧૦॥

૬૦.૧૧/૧માર્કણ્ડેયં વટં કૃષ્ણં રૌહિણેયં મહોદધિમ્ ।
૬૦.૧૧/૨ઇન્દ્રદ્યુમ્નસરશ્ચૈવ પઞ્ચતીર્થીવિધિઃ સ્મૃતઃ ॥ ૬૦.૧૧॥

૬૦.૧૨/૧પૂર્ણિમા જ્યેષ્ઠમાસસ્ય જ્યેષ્ઠા ઋક્ષં યદા ભવેત્ ।
૬૦.૧૨/૨તદા ગચ્છેદ્ વિશેષેણ તીર્થરાજં પરં શુભમ્ ॥ ૬૦.૧૨॥

૬૦.૧૩/૧કાયવાઙ્માનસૈઃ શુદ્ધસ્તદ્ભાવો નાન્યમાનસઃ ।
૬૦.૧૩/૨સર્વદ્વંદ્વવિનિર્મુક્તો વીતરાગો વિમત્સરઃ ॥ ૬૦.૧૩॥

૬૦.૧૪/૧કલ્પવૃક્ષવટં રમ્યં તત્ર સ્નાત્વા જનાર્દનમ્ ।

૬૦.૧૪/૨પ્રદક્ષિણં પ્રકુર્વીત ત્રિવારં સુસમાહિતઃ ॥ ૬૦.૧૪॥

૬૦.૧૫/૧યં દૃષ્ટ્વા મુચ્યતે પાપાત્ સપ્તજન્મસમુદ્ભવાત્ ।
૬૦.૧૫/૨પુણ્યં ચાપ્નોતિ વિપુલં ગતિમિષ્ટાં ચ ભો દ્વિજાઃ ॥ ૬૦.૧૫॥

૬૦.૧૬/૧તસ્ય નામાનિ વક્ષ્યામિ પ્રમાણં ચ યુગે યુગે ।
૬૦.૧૬/૨યથાસંખ્યં ચ ભો વિપ્રાઃ કૃતાદિષુ યથાક્રમમ્ ॥ ૬૦.૧૬॥

૬૦.૧૭/૧વટં વટેશ્વરં કૃષ્ણં પુરાણપુરુષં દ્વિજાઃ ।
૬૦.૧૭/૨વટસ્યૈતાનિ નામાનિ કીર્તિતાનિ કૃતાદિષુ ॥ ૬૦.૧૭॥

૬૦.૧૮/૧યોજનં પાદહીનં ચ યોજનાર્ધં તદર્ધકમ્ ।
૬૦.૧૮/૨પ્રમાણં કલ્પવૃક્ષસ્ય કૃતાદૌ પરિકીર્તિતમ્ ॥ ૬૦.૧૮॥

૬૦.૧૯/૧યથોક્તેન તુ મન્ત્રેણ નમસ્કૃત્વા તુ તં વટમ્ ।
૬૦.૧૯/૨દક્ષિણાભિમુખો ગચ્છેદ્ ધન્વન્તરશતત્રયમ્ ॥ ૬૦.૧૯॥

૬૦.૨૦/૧યત્રાસૌ દૃશ્યતે વિષ્ણુઃ સ્વર્ગદ્વારં મનોરમમ્ ।
૬૦.૨૦/૨સાગરામ્ભઃસમાકૃષ્ટં કાષ્ઠં સર્વગુણાન્વિતમ્ ॥ ૬૦.૨૦॥

૬૦.૨૧/૧પ્રણિપત્ય તતસ્તં ભોઃ પરિપૂજ્ય તતઃ પુનઃ ।
૬૦.૨૧/૨મુચ્યતે સર્વરોગાદ્યૈસ્તથા પાપૈર્ગ્રહાદિભિઃ ॥ ૬૦.૨૧॥

૬૦.૨૨/૧ઉગ્રસેનં પુરા દૃષ્ટ્વા સ્વર્ગદ્વારેણ સાગરમ્ ।
૬૦.૨૨/૨ગત્વાચમ્ય શુચિસ્તત્ર ધ્યાત્વા નારાયણં પરમ્ ॥ ૬૦.૨૨॥

૬૦.૨૩/૧ન્યસેદ્ અષ્ટાક્ષરં મન્ત્રં પશ્ચાદ્ ધસ્તશરીરયોઃ ।
૬૦.૨૩/૨ઓં નમો નારાયણાયેતિ યં વદન્તિ મનીષિણઃ ॥ ૬૦.૨૩॥

૬૦.૨૪/૧કિં કાર્યં બહુભિર્મન્ત્રૈર્મનોવિભ્રમકારકૈઃ ।
૬૦.૨૪/૨ઓં નમો નારાયણાયેતિ મન્ત્રઃ સર્વાર્થસાધકઃ ॥ ૬૦.૨૪॥

૬૦.૨૫/૧આપો નરસ્ય સૂનુત્વાન્ નારા ઇતીહ કીર્તિતાઃ ।
૬૦.૨૫/૨વિષ્ણોસ્તાસ્ત્વયનં પૂર્વં તેન નારાયણઃ સ્મૃતઃ ॥ ૬૦.૨૫॥

૬૦.૨૬/૧નારાયણપરા વેદા નારાયણપરા દ્વિજાઃ ।
૬૦.૨૬/૨નારાયણપરા યજ્ઞા નારાયણપરાઃ ક્રિયાઃ ॥ ૬૦.૨૬॥

૬૦.૨૭/૧નારાયણપરા પૃથ્વી નારાયણપરં જલમ્ ।
૬૦.૨૭/૨નારાયણપરો વહ્નિર્નારાયણપરં નભઃ ॥ ૬૦.૨૭॥

૬૦.૨૮/૧નારાયણપરો વાયુર્નારાયણપરં મનઃ ।
૬૦.૨૮/૨અહંકારશ્ચ બુદ્ધિશ્ચ ઉભે નારાયણાત્મકે ॥ ૬૦.૨૮॥

૬૦.૨૯/૧ભૂતં ભવ્યં ભવિષ્યં ચ યત્ કિંચિજ્જીવસંજ્ઞિતમ્ ।
૬૦.૨૯/૨સ્થૂલં સૂક્ષ્મં પરં ચૈવ સર્વં નારાયણાત્મકમ્ ॥ ૬૦.૨૯॥

૬૦.૩૦/૧શબ્દાદ્યા વિષયાઃ સર્વે શ્રોત્રાદીનીન્દ્રિયાણિ ચ ।
૬૦.૩૦/૨પ્રકૃતિઃ પુરુષશ્ચૈવ સર્વે નારાયણાત્મકાઃ ॥ ૬૦.૩૦॥

૬૦.૩૧/૧જલે સ્થલે ચ પાતાલે સ્વર્ગલોકેઽમ્બરે નગે ।
૬૦.૩૧/૨અવષ્ટભ્ય ઇદં સર્વમાસ્તે નારાયણઃ પ્રભુઃ ॥ ૬૦.૩૧॥

૬૦.૩૨/૧કિં ચાત્ર બહુનોક્તેન જગદ્ એતચ્ચરાચરમ્ ।
૬૦.૩૨/૨બ્રહ્માદિસ્તમ્બપર્યન્તં સર્વં નારાયણાત્મકમ્ ॥ ૬૦.૩૨॥

૬૦.૩૩/૧નારાયણાત્ પરં કિંચિન્ નેહ પશ્યામિ ભો દ્વિજાઃ ।
૬૦.૩૩/૨તેન વ્યાપ્તમિદં સર્વં દૃશ્યાદૃશ્યં ચરાચરમ્ ॥ ૬૦.૩૩॥

૬૦.૩૪/૧આપો હ્યાયતનં વિષ્ણોઃ સ ચ એવામ્ભસાં પતિઃ ।
૬૦.૩૪/૨તસ્માદ્ અપ્સુ સ્મરેન્ નિત્યં નારાયણમઘાપહમ્ ॥ ૬૦.૩૪॥

૬૦.૩૫/૧સ્નાનકાલે વિશેષેણ ચોપસ્થાય જલે શુચિઃ ।
૬૦.૩૫/૨સ્મરેન્ નારાયણં ધ્યાયેદ્ ધસ્તે કાયે ચ વિન્યસેત્ ॥ ૬૦.૩૫॥

૬૦.૩૬/૧ઓંકારં ચ નકારં ચ અઙ્ગુષ્ઠે હસ્તયોર્ન્યસેત્ ।
૬૦.૩૬/૨શેષૈર્હસ્તતલં યાવત્ તર્જન્યાદિષુ વિન્યસેત્ ॥ ૬૦.૩૬॥

૬૦.૩૭/૧ઓંકારં વામપાદે તુ નકારં દક્ષિણે ન્યસેત્ ।
૬૦.૩૭/૨મોકારં વામકટ્યાં તુ નાકારં દક્ષિણે ન્યસેત્ ॥ ૬૦.૩૭॥

૬૦.૩૮/૧રાકારં નાભિદેશે તુ યકારં વામબાહુકે ।
૬૦.૩૮/૨ણાકારં દક્ષિણે ન્યસ્ય યકારં મૂર્ધ્નિ વિન્યસેત્ ॥ ૬૦.૩૮॥

૬૦.૩૯/૧અધશ્ચોર્ધ્વં ચ હૃદયે પાર્શ્વતઃ પૃષ્ઠતોઽગ્રતઃ ।
૬૦.૩૯/૨ધ્યાત્વા નારાયણં પશ્ચાદ્ આરભેત્ કવચં બુધઃ ॥ ૬૦.૩૯॥

૬૦.૪૦/૧પૂર્વે માં પાતુ ગોવિન્દો દક્ષિણે મધુસૂદનઃ ।
૬૦.૪૦/૨પશ્ચિમે શ્રીધરો દેવઃ કેશવસ્તુ તથોત્તરે ॥ ૬૦.૪૦॥

૬૦.૪૧/૧પાતુ વિષ્ણુસ્તથાગ્નેયે નૈરૃતે માધવોઽવ્યયઃ ।
૬૦.૪૧/૨વાયવ્યે તુ હૃષીકેશસ્તથેશાને ચ વામનઃ ॥ ૬૦.૪૧॥

૬૦.૪૨/૧ભૂતલે પાતુ વારાહસ્તથોર્ધ્વં ચ ત્રિવિક્રમઃ ।
૬૦.૪૨/૨કૃત્વૈવં કવચં પશ્ચાદ્ આત્માનં ચિન્તયેત્ તતઃ ॥ ૬૦.૪૨॥

૬૦.૪૩/૧અહં નારાયણો દેવઃ શઙ્ખચક્રગદાધરઃ ।
૬૦.૪૩/૨એવં ધ્યાત્વા તદાત્માનમિમં મન્ત્રમુદીરયેત્ ॥ ૬૦.૪૩॥

૬૦.૪૪/૧ત્વમગ્નિર્દ્વિપદાં નાથ રેતોધાઃ કામદીપનઃ ।
૬૦.૪૪/૨પ્રધાનઃ સર્વભૂતાનાં જીવાનાં પ્રભુરવ્યયઃ ॥ ૬૦.૪૪॥

૬૦.૪૫/૧અમૃતસ્યારણિસ્ત્વં હિ દેવયોનિરપાં પતે ।
૬૦.૪૫/૨વૃજિનં હર મે સર્વં તીર્થરાજ નમોઽસ્તુ તે ॥ ૬૦.૪૫॥

૬૦.૪૬/૧એવમુચ્ચાર્ય વિધિવત્ તતઃ સ્નાનં સમાચરેત્ ।
૬૦.૪૬/૨અન્યથા ભો દ્વિજશ્રેષ્ઠાઃ સ્નાનં તત્ર ન શસ્યતે ॥ ૬૦.૪૬॥

૬૦.૪૭/૧કૃત્વા તુ વૈદિકૈર્મન્ત્રૈરભિષેકં ચ માર્જનમ્ ।
૬૦.૪૭/૨અન્તર્જલે જપેત્ પશ્ચાત્ ત્રિરાવૃત્ત્યાઘમર્ષણમ્ ॥ ૬૦.૪૭॥

૬૦.૪૮/૧હયમેધો યથા વિપ્રાઃ સર્વપાપહરઃ ક્રતુઃ ।
૬૦.૪૮/૨તથાઘમર્ષણં ચાત્ર સૂક્તં સર્વાઘનાશનમ્ ॥ ૬૦.૪૮॥

૬૦.૪૯/૧ઉત્તીર્ય વાસસી ધૌતે નિર્મલે પરિધાય વૈ ।
૬૦.૪૯/૨પ્રાણાન્ આયમ્ય ચાચમ્ય સંધ્યાં ચોપાસ્ય ભાસ્કરમ્ ॥ ૬૦.૪૯॥

૬૦.૫૦/૧ઉપતિષ્ઠેત્ તતશ્ચોર્ધ્વં ક્ષિપ્ત્વા પુષ્પજલાઞ્જલિમ્ ।
૬૦.૫૦/૨ઉપસ્થાયોર્ધ્વબાહુશ્ચ તલ્લિઙ્ગૈર્ભાસ્કરં તતઃ ॥ ૬૦.૫૦॥

૬૦.૫૧/૧ગાયત્રીં પાવનીં દેવીં જપેદ્ અષ્ટોત્તરં શતમ્ ।
૬૦.૫૧/૨અન્યાંશ્ચ સૌરમન્ત્રાંશ્ચ જપ્ત્વા તિષ્ઠન્ સમાહિતઃ ॥ ૬૦.૫૧॥

૬૦.૫૨/૧કૃત્વા પ્રદક્ષિણં સૂર્યં નમસ્કૃત્યોપવિશ્ય ચ ।
૬૦.૫૨/૨સ્વાધ્યાયં પ્રાઙ્મુખઃ કૃત્વા તર્પયેદ્ દૈવતાન્યૃષીન્ ॥ ૬૦.૫૨॥

૬૦.૫૩/૧મનુષ્યાંશ્ચ પિતૃંશ્ચાન્યાન્ નામગોત્રેણ મન્ત્રવિત્ ।
૬૦.૫૩/૨તોયેન તિલમિશ્રેણ વિધિવત્ સુસમાહિતઃ ॥ ૬૦.૫૩॥

૬૦.૫૪/૧તર્પણં દેવતાનાં ચ પૂર્વં કૃત્વા સમાહિતઃ ।
૬૦.૫૪/૨અધિકારી ભવેત્ પશ્ચાત્ પિતૃણાં તર્પણે દ્વિજઃ ॥ ૬૦.૫૪॥

૬૦.૫૫/૧શ્રાદ્ધે હવનકાલે ચ પાણિનૈકેન નિર્વપેત્ ।

૬૦.૫૫/૨તર્પણે તૂભયં કુર્યાદ્ એષ એવ વિધિઃ સદા ॥ ૬૦.૫૫॥

૬૦.૫૬/૧અન્વારબ્ધેન સવ્યેન પાણિના દક્ષિણેન તુ ।
૬૦.૫૬/૨તૃપ્યતામિતિ સિઞ્ચેત્ તુ નામગોત્રેણ વાગ્યતઃ ॥ ૬૦.૫૬॥

૬૦.૫૭/૧કાયસ્થૈર્યસ્તિલૈર્મોહાત્ કરોતિ પિતૃતર્પણમ્ ।
૬૦.૫૭/૨તર્પિતાસ્તેન પિતરસ્ત્વઙ્માંસરુધિરાસ્થિભિઃ ॥ ૬૦.૫૭॥

૬૦.૫૮/૧અઙ્ગસ્થૈર્ન તિલૈઃ કુર્યાદ્ દેવતાપિતૃતર્પણમ્ ।
૬૦.૫૮/૨રુધિરં તદ્ ભવેત્ તોયં પ્રદાતા કિલ્બિષી ભવેત્ ॥ ૬૦.૫૮॥

૬૦.૫૯/૧ભૂમ્યાં યદ્ દીયતે તોયં દાતા ચૈવ જલે સ્થિતઃ ।
૬૦.૫૯/૨વૃથા તન્ મુનિશાર્દૂલા નોપતિષ્ઠતિ કસ્યચિત્ ॥ ૬૦.૫૯॥

૬૦.૬૦/૧સ્થલે સ્થિત્વા જલે યસ્તુ પ્રયચ્છેદ્ ઉદકં નરઃ ।
૬૦.૬૦/૨પિતૃણાં નોપતિષ્ઠેત સલિલં તન્ નિરર્થકમ્ ॥ ૬૦.૬૦॥

૬૦.૬૧/૧ઉદકે નોદકં કુર્યાત્ પિતૃભ્યશ્ચ કદાચન ।
૬૦.૬૧/૨ઉત્તીર્ય તુ શુચૌ દેશે કુર્યાદ્ ઉદકતર્પણમ્ ॥ ૬૦.૬૧॥

૬૦.૬૨/૧નોદકેષુ ન પાત્રેષુ ન ક્રુદ્ધો નૈકપાણિના ।
૬૦.૬૨/૨નોપતિષ્ઠતિ તત્ તોયં યદ્ ભૂમ્યાં ન પ્રદીયતે ॥ ૬૦.૬૨॥

૬૦.૬૩/૧પિતૃણામક્ષયં સ્થાનં મહી દત્તા મયા દ્વિજાઃ ।
૬૦.૬૩/૨તસ્માત્ તત્રૈવ દાતવ્યં પિતૃણાં પ્રીતિમિચ્છતા ॥ ૬૦.૬૩॥

૬૦.૬૪/૧ભૂમિપૃષ્ઠે સમુત્પન્ના ભૂમ્યાં ચૈવ ચ સંસ્થિતાઃ ।
૬૦.૬૪/૨ભૂમ્યાં ચૈવ લયં યાતા ભૂમૌ દદ્યાત્ તતો જલમ્ ॥ ૬૦.૬૪॥

૬૦.૬૫/૧આસ્તીર્ય ચ કુશાન્ સાગ્રાંસ્તાન્ આવાહ્ય સ્વમન્ત્રતઃ ।
૬૦.૬૫/૨પ્રાચીનાગ્રેષુ વૈ દેવાન્ યામ્યાગ્રેષુ તથા પિતૄન્ ॥ ૬૦.૬૫॥

૬૧.૧/૧બ્રહ્મોવાચ । દેવાન્ પિતૄંસ્તથા ચાન્યાન્ સંતર્પ્યાચમ્ય વાગ્યતઃ ।
૬૧.૧/૨હસ્તમાત્રં ચતુષ્કોણં ચતુર્દ્વારં સુશોભનમ્ ॥ ૬૧.૧॥

૬૧.૨/૧પુરં વિલિખ્ય ભો વિપ્રાસ્તીરે તસ્ય મહોદધેઃ ।
૬૧.૨/૨મધ્યે તત્ર લિખેત્ પદ્મમષ્ટપત્રં સકર્ણિકમ્ ॥ ૬૧.૨॥

૬૧.૩/૧એવં મણ્ડલમાલિખ્ય પૂજયેત્ તત્ર ભો દ્વિજાઃ ।
૬૧.૩/૨અષ્ટાક્ષરવિધાનેન નારાયણમજં વિભુમ્ ॥ ૬૧.૩॥

૬૧.૪/૧અતઃ પરં પ્રવક્ષ્યામિ કાયશોધનમુત્તમમ્ ।
૬૧.૪/૨અકારં હૃદયે ધ્યાત્વા ચક્રરેખાસમન્વિતમ્ ॥ ૬૧.૪॥

૬૧.૫/૧જ્વલન્તં ત્રિશિખં ચૈવ દહન્તં પાપનાશનમ્ ।
૬૧.૫/૨ચન્દ્રમણ્ડલમધ્યસ્થં રાકારં મૂર્ધ્નિ ચિન્તયેત્ ॥ ૬૧.૫॥

૬૧.૬/૧શુક્લવર્ણં પ્રવર્ષન્તમમૃતં પ્લાવયન્ મહીમ્ ।
૬૧.૬/૨એવં નિર્ધૂતપાપસ્તુ દિવ્યદેહસ્તતો ભવેત્ ॥ ૬૧.૬॥

૬૧.૭/૧અષ્ટાક્ષરં તતો મન્ત્રં ન્યસેદ્ એવાત્મનો બુધઃ ।
૬૧.૭/૨વામપાદં સમારભ્ય ક્રમશશ્ચૈવ વિન્યસેત્ ॥ ૬૧.૭॥

૬૧.૮/૧પઞ્ચાઙ્ગં વૈષ્ણવં ચૈવ ચતુર્વ્યૂહં તથૈવ ચ ।
૬૧.૮/૨કરશુદ્ધિં પ્રકુર્વીત મૂલમન્ત્રેણ સાધકઃ ॥ ૬૧.૮॥

૬૧.૯/૧એકૈકં ચૈવ વર્ણં તુ અઙ્ગુલીષુ પૃથક્ પૃથક્ ।
૬૧.૯/૨ઓંકારં પૃથિવીં શુક્લાં વામપાદે તુ વિન્યસેત્ ॥ ૬૧.૯॥

૬૧.૧૦/૧નકારઃ શામ્ભવઃ શ્યામો દક્ષિણે તુ વ્યવસ્થિતઃ ।
૬૧.૧૦/૨મોકારં કાલમેવાહુર્વામકટ્યાં નિધાપયેત્ ॥ ૬૧.૧૦॥

૬૧.૧૧/૧નાકારઃ સર્વબીજં તુ દક્ષિણસ્યાં વ્યવસ્થિતઃ ।
૬૧.૧૧/૨રાકારસ્તેજ ઇત્યાહુર્નાભિદેશે વ્યવસ્થિતઃ ॥ ૬૧.૧૧॥

૬૧.૧૨/૧વાયવ્યોऽયં યકારસ્તુ વામસ્કન્ધે સમાશ્રિતઃ ।
૬૧.૧૨/૨ણાકારઃ સર્વગો જ્ઞેયો દક્ષિણાંસે વ્યવસ્થિતઃ ।
૬૧.૧૨/૩યકારોऽયં શિરસ્થશ્ચ યત્ર લોકાઃ પ્રતિષ્ઠિતાઃ ॥ ૬૧.૧૨॥

૬૧.૧૩/૧ઓં વિષ્ણવે નમઃ શિરઃ ઓં જ્વલનાય નમઃ શિખા ।
૬૧.૧૩/૨ઓં વિષ્ણવે નમઃ કવચમોં વિષ્ણવે નમઃ સ્ફુરણં દિશોબન્ધાય ।
૬૧.૧૩/૩ઓં હુમ્ફડસ્ત્રમોં શિરસિ શુક્લો વાસુદેવ ઇતિ ।
૬૧.૧૩/૪ઓં આં લલાટે રક્તઃ સંકર્ષણો ગરુત્માન્ વહ્નિસ્તેજ આદિત્ય ઇતિ ।
૬૧.૧૩/૫ઓં આં ગ્રીવાયાં પીતઃ પ્રદ્યુમ્નો વાયુમેઘ ઇતિ ।
૬૧.૧૩/૬ઓં આં હૃદયે કૃષ્ણોऽનિરુદ્ધઃ સર્વશક્તિસમન્વિત ઇતિ ।
૬૧.૧૩/૭એવં ચતુર્વ્યૂહમાત્માનં કૃત્વા તતઃ કર્મ સમાચરેત્ ॥ ૬૧.૧૩॥

૬૧.૧૪/૧મમાગ્રેऽવસ્થિતો વિષ્ણુઃ પૃષ્ઠતશ્ચાપિ કેશવઃ ।
૬૧.૧૪/૨ગોવિન્દો દક્ષિણે પાર્શ્વે વામે તુ મધુસૂદનઃ ॥ ૬૧.૧૪॥

૬૧.૧૫/૧ઉપરિષ્ટાત્ તુ વૈકુણ્ઠો વારાહઃ પૃથિવીતલે ।
૬૧.૧૫/૨અવાન્તરદિશો યાસ્તુ તાસુ સર્વાસુ માધવઃ ॥ ૬૧.૧૫॥

૬૧.૧૬/૧ગચ્છતસ્તિષ્ઠતો વાપિ જાગ્રતઃ સ્વપતોઽપિ વા ।
૬૧.૧૬/૨નરસિંહકૃતા ગુપ્તિર્વાસુદેવમયો હ્યહમ્ ॥ ૬૧.૧૬॥

૬૧.૧૭/૧એવં વિષ્ણુમયો ભૂત્વા તતઃ કર્મ સમારભેત્ ।
૬૧.૧૭/૨યથા દેહે તથા દેવે સર્વતત્ત્વાનિ યોજયેત્ ॥ ૬૧.૧૭॥

૬૧.૧૮/૧તતશ્ચૈવ પ્રકુર્વીત પ્રોક્ષણં પ્રણવેન તુ ।
૬૧.૧૮/૨ફટ્કારાન્તં સમુદ્દિષ્ટં સર્વવિઘ્નહરં શુભમ્ ॥ ૬૧.૧૮॥

૬૧.૧૯/૧તત્રાર્કચન્દ્રવહ્નીનાં મણ્ડલાનિ વિચિન્તયેત્ ।
૬૧.૧૯/૨પદ્મમધ્યે ન્યસેદ્ વિષ્ણું પવનસ્યામ્બરસ્ય ચ ॥ ૬૧.૧૯॥

૬૧.૨૦/૧તતો વિચિન્ત્ય હૃદય ઓંકારં જ્યોતીરૂપિણમ્ ।
૬૧.૨૦/૨કર્ણિકાયાં સમાસીનં જ્યોતીરૂપં સનાતનમ્ ॥ ૬૧.૨૦॥

૬૧.૨૧/૧અષ્ટાક્ષરં તતો મન્ત્રં વિન્યસેચ્ચ યથાક્રમમ્ ।
૬૧.૨૧/૨તેન વ્યસ્તસમસ્તેન પૂજનં પરમં સ્મૃતમ્ ॥ ૬૧.૨૧॥

૬૧.૨૨/૧દ્વાદશાક્ષરમન્ત્રેણ યજેદ્ દેવં સનાતનમ્ ।
૬૧.૨૨/૨તતોઽવધાર્ય હૃદયે કર્ણિકાયાં બહિર્ન્યસેત્ ॥ ૬૧.૨૨॥

૬૧.૨૩/૧ચતુર્ભુજં મહાસત્ત્વં સૂર્યકોટિસમપ્રભમ્ ।
૬૧.૨૩/૨ચિન્તયિત્વા મહાયોગં જ્યોતીરૂપં સનાતનમ્ ।
૬૧.૨૩/૩તતશ્ચાવાહયેન્ મન્ત્રં ક્રમેણાચિન્ત્ય માનસે ॥ ૬૧.૨૩॥

૬૧.૨૪/૧આવાહનમન્ત્રઃ । મીનરૂપો વરાહશ્ચ નરસિંહોઽથ વામનઃ ।
૬૧.૨૪/૨આયાતુ દેવો વરદો મમ નારાયણોઽગ્રતઃ ।
૬૧.૨૪/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૨૪॥

૬૧.૨૫/૧સ્થાપનમન્ત્રઃ । કર્ણિકાયાં સુપીઠેઽત્ર પદ્મકલ્પિતમાસનમ્ ।
૬૧.૨૫/૨સર્વસત્ત્વહિતાર્થાય તિષ્ઠ ત્વં મધુસૂદન ।
૬૧.૨૫/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૨૫॥

૬૧.૨૬/૧અર્ઘમન્ત્રઃ । ઓં ત્રૈલોક્યપતીનાં પતયે દેવદેવાય
હૃષીકેશાય વિષ્ણવે નમઃ ।
૬૧.૨૬/૨ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૨૬॥

૬૧.૨૭/૧પાદ્યમન્ત્રઃ । ઓં પાદ્યં પાદયોર્દેવ પદ્મનાભ સનાતન ।

૬૧.૨૭/૨વિષ્ણો કમલપત્રાક્ષ ગૃહાણ મધુસૂદન ।

૬૧.૨૭/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૨૭ ॥

૬૧.૨૮/૧મધુપર્કમન્ત્રઃ । મધુપર્કં મહાદેવ બ્રહ્માદ્યૈઃ કલ્પિતં તવ ।

૬૧.૨૮/૨મયા નિવેદિતં ભક્ત્યા ગૃહાણ પુરુષોત્તમ ।

૬૧.૨૮/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૨૮ ॥

૬૧.૨૯/૧આચમનીયમન્ત્રઃ । મન્દાકિન્યાઃ સિતં વારિ સર્વપાપહરં શિવમ્ ।

૬૧.૨૯/૨ગૃહાણાચમનીયં ત્વં મયા ભક્ત્યા નિવેદિતમ્ ।

૬૧.૨૯/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૨૯ ॥

૬૧.૩૦/૧સ્નાનમન્ત્રઃ । ત્વમાપઃ પૃથિવી ચૈવ જ્યોતિસ્ત્વં વાયુરેવ ચ ।

૬૧.૩૦/૨લોકેશ વૃત્તિમાત્રેણ વારિણા સ્નાપયામ્યહમ્ ।

૬૧.૩૦/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૦ ॥

૬૧.૩૧/૧વસ્ત્રમન્ત્રઃ । દેવતત્ત્વસમાયુક્ત યજ્ઞવર્ણસમન્વિત ।

૬૧.૩૧/૨સ્વર્ણવર્ણપ્રભે દેવ વાસસી તવ કેશવ ।

૬૧.૩૧/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૧ ॥

૬૧.૩૨/૧વિલેપનમન્ત્રઃ । શરીરં તે ન જાનામિ ચેષ્ટાં ચૈવ ચ કેશવ ।

૬૧.૩૨/૨મયા નિવેદિતો ગન્ધઃ પ્રતિગૃહ્ય વિલિપ્યતામ્ ।

૬૧.૩૨/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૨ ॥

૬૧.૩૩/૧ઉપવીતમન્ત્રઃ । ઋગ્યજુઃસામમન્ત્રેણ ત્રિવૃતં પદ્મયોનિના ।

૬૧.૩૩/૨સાવિત્રીગ્રન્થિસંયુક્તમુપવીતં તવાર્પયે ।

૬૧.૩૩/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૩ ॥

૬૧.૩૪/૧અલંકારમન્ત્રઃ । દિવ્યરત્નસમાયુક્ત વહ્નિભાનુસમપ્રભ ।

૬૧.૩૪/૨ગાત્રાણિ તવ શોભન્તુ સાલંકારાણિ માધવ ।

૬૧.૩૪/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૪ ॥

૬૧.૩૫/૧ઓં નમ ઇતિ પ્રત્યક્ષરં સમસ્તેન મૂલમન્ત્રેણ વા પૂજયેત્ ॥ ૬૧.૩૫ ॥

૬૧.૩૬/૧ધૂપમન્ત્રઃ । વનસ્પતિરસો દિવ્યો ગન્ધાઢ્યઃ સુરભિશ્ચ તે ।

૬૧.૩૬/૨મયા નિવેદિતો ભક્ત્યા ધૂપોઽયં પ્રતિગૃહ્યતામ્ ।

૬૧.૩૬/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૬ ॥

૬૧.૩૭/૧દીપમન્ત્રઃ । સૂર્યચન્દ્રસમો જ્યોતિર્વિદ્યુદગ્ન્યોસ્તથૈવ ચ ।

૬૧.૩૭/૨ત્વમેવ જ્યોતિષાં દેવ દીપોઽયં પ્રતિગૃહ્યતામ્ ।
૬૧.૩૭/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૭॥

૬૧.૩૮/૧નૈવેદ્યમન્ત્રઃ । અન્નં ચતુર્વિધં ચૈવ રસૈઃ ષડ્ભિઃ સમન્વિતમ્ ।
૬૧.૩૮/૨મયા નિવેદિતં ભક્ત્યા નૈવેદ્યં તવ કેશવ ।
૬૧.૩૮/૩ઓં નમો નારાયણાય નમઃ ॥ ૬૧.૩૮॥

૬૧.૩૯/૧પૂર્વે દલે વાસુદેવં યામ્યે સંકર્ષણં ન્યસેત્ ।
૬૧.૩૯/૨પ્રદ્યુમ્નં પશ્ચિમે કુર્યાદ્ અનિરુદ્ધં તથોત્તરે ॥ ૬૧.૩૯॥

૬૧.૪૦/૧વારાહં ચ તથાગ્નેયે નરસિંહં ચ નૈરૃતે ।
૬૧.૪૦/૨વાયવ્યે માધવં ચૈવ તથૈશાને ત્રિવિક્રમમ્ ॥ ૬૧.૪૦॥

૬૧.૪૧/૧તથાષ્ટાક્ષરદેવસ્ય ગરુડં પુરતો ન્યસેત્ ।
૬૧.૪૧/૨વામપાર્શ્વે તથા ચક્રં શઙ્ખં દક્ષિણતો ન્યસેત્ ॥ ૬૧.૪૧॥

૬૧.૪૨/૧તથા મહાગદાં ચૈવ ન્યસેદ્ દેવસ્ય દક્ષિણે ।
૬૧.૪૨/૨તતઃ શાર્ઙ્ગં ધનુર્વિદ્વાન્ ન્યસેદ્ દેવસ્ય વામતઃ ॥ ૬૧.૪૨॥

૬૧.૪૩/૧દક્ષિણેનેષુધી દિવ્યે ખડ્ગં વામે ચ વિન્યસેત્ ।
૬૧.૪૩/૨શ્રિયં દક્ષિણતઃ સ્થાપ્ય પુષ્ટિમુત્તરતો ન્યસેત્ ॥ ૬૧.૪૩॥

૬૧.૪૪/૧વનમાલાં ચ પુરતસ્તતઃ શ્રીવત્સકૌસ્તુભૌ ।
૬૧.૪૪/૨વિન્યસેદ્ ધૃદયાદીનિ પૂર્વાદિષુ ચતુર્દિશમ્ ॥ ૬૧.૪૪॥

૬૧.૪૫/૧તતોઽસ્ત્રં દેવદેવસ્ય કોણે ચૈવ તુ વિન્યસેત્ ।
૬૧.૪૫/૨ઇન્દ્રમગ્નિં યમં ચૈવ નૈરૃતં વરુણં તથા ॥ ૬૧.૪૫॥

૬૧.૪૬/૧વાયું ધનદમીશાનમનન્તં બ્રહ્મણા સહ ।
૬૧.૪૬/૨પૂજયેત્ તાન્ત્રિકૈર્મન્ત્રૈરધશ્ચોર્ધ્વં તથૈવ ચ ॥ ૬૧.૪૬॥

૬૧.૪૭/૧એવં સમ્પૂજ્ય દેવેશં મણ્ડલસ્થં જનાર્દનમ્ ।
૬૧.૪૭/૨લભેદ્ અભિમતાન્ કામાન્ નરો નાસ્ત્યત્ર સંશયઃ ॥ ૬૧.૪૭॥

૬૧.૪૮/૧અનેનૈવ વિધાનેન મણ્ડલસ્થં જનાર્દનમ્ ।
૬૧.૪૮/૨પૂજિતં યઃ સમ્પશ્યેત સ વિશેદ્ વિષ્ણુમવ્યયમ્ ॥ ૬૧.૪૮॥

૬૧.૪૯/૧સકૃદ્ અપ્યર્ચિતો યેન વિધિનાનેન કેશવઃ ।
૬૧.૪૯/૨જન્મમૃત્યુજરાં તીર્ત્વા સ વિષ્ણોઃ પદમાપ્નુયાત્ ॥ ૬૧.૪૯॥

૬૧.૫૦/૧યઃ સ્મરેત્ સતતં ભક્ત્યા નારાયણમતન્દ્રિતઃ ।

૬૧.૫૦/૨અન્વહં તસ્ય વાસાય શ્વેતદ્વીપઃ પ્રકલ્પિતઃ ॥ ૬૧.૫૦॥

૬૧.૫૧/૧ઓંકારાદિસમાયુક્તં નમઃકારાન્તદીપિતમ્ ।
૬૧.૫૧/૨તન્નામ સર્વતત્ત્વાનાં મન્ત્ર ઇત્યભિધીયતે ॥ ૬૧.૫૧॥

૬૧.૫૨/૧અનેનૈવ વિધાનેન ગન્ધપુષ્પં નિવેદયેત્ ।
૬૧.૫૨/૨એકૈકસ્ય પ્રકુર્વીત યથોદ્દિષ્ટં ક્રમેણ તુ ॥ ૬૧.૫૨॥

૬૧.૫૩/૧મુદ્રાસ્તતો નિબધ્નીયાદ્ યથોક્તક્રમચોદિતાઃ ।
૬૧.૫૩/૨જપં ચૈવ પ્રકુર્વીત મૂલમન્ત્રેણ મન્ત્રવિત્ ॥ ૬૧.૫૩॥

૬૧.૫૪/૧અષ્ટાવિંશતિમષ્ટૌ વા શતમષ્ટોત્તરં તથા ।
૬૧.૫૪/૨કામેષુ ચ યથાપ્રોક્તં યથાશક્તિ સમાહિતઃ ॥ ૬૧.૫૪॥

૬૧.૫૫/૧પદ્મં શઙ્ખશ્ચ શ્રીવત્સો ગદા ગરુડ એવ ચ ।
૬૧.૫૫/૨ચક્રં ખડ્ગશ્ચ શાર્ઙ્ગં ચ અષ્ટૌ મુદ્રાઃ પ્રકીર્તિતાઃ ॥ ૬૧.૫૫॥

૬૧.૫૬/૧વિસર્જનમન્ત્રઃ । ગચ્છ ગચ્છ પરં સ્થાનં પુરાણપુરુષોત્તમ ।
૬૧.૫૬/૨યત્ર બ્રહ્માદયો દેવા વિન્દન્તિ પરમં પદમ્ ।
૬૧.૫૬/૩।૬૧.૫૬।
૬૧.૫૭/૧અર્ચનં યે ન જાનન્તિ હરેર્મન્ત્રૈર્યથોદિતમ્ ।
૬૧.૫૭/૨તે તત્ર મૂલમન્ત્રેણ પૂજયન્ત્વચ્યુતં સદા ॥ ૬૧.૫૭॥

૬૨.૧/૧બ્રહ્મોવાચ । એવં સમ્પૂજ્ય વિધિવદ્ ભક્ત્યા તં પુરુષોત્તમમ્ ।
૬૨.૧/૨પ્રણમ્ય શિરસા પશ્ચાત્ સાગરં ચ પ્રસાદયેત્ ॥ ૬૨.૧॥

૬૨.૨/૧પ્રાણસ્ત્વં સર્વભૂતાનાં યોનિશ્ચ સરિતાં પતે ।
૬૨.૨/૨તીર્થરાજ નમસ્તેઽસ્તુ ત્રાહિ મામચ્યુતપ્રિય ॥ ૬૨.૨॥

૬૨.૩/૧સ્નાત્વૈવં સાગરે સમ્યક્ તસ્મિન્ ક્ષેત્રવરે દ્વિજાઃ ।
૬૨.૩/૨તીરે ચાભ્યર્ચ્ય વિધિવન્ નારાયણમનામયમ્ ॥ ૬૨.૩॥

૬૨.૪/૧રામં કૃષ્ણં સુભદ્રાં ચ પ્રણિપત્ય ચ સાગરમ્ ।
૬૨.૪/૨શતાનામશ્વમેધાનાં ફલં પ્રાપ્નોતિ માનવઃ ॥ ૬૨.૪॥

૬૨.૫/૧સર્વપાપવિનિર્મુક્તઃ સર્વદુઃખવિવર્જિતઃ ।
૬૨.૫/૨વૃન્દારક ઇવ શ્રીમાન્ રૂપયૌવનગર્વિતઃ ॥ ૬૨.૫॥

૬૨.૬/૧વિમાનેનાર્કવર્ણેન દિવ્યગન્ધર્વનાદિના ।
૬૨.૬/૨કુલૈકવિંશમુદ્ધૃત્ય વિષ્ણુલોકં સ ગચ્છતિ ॥ ૬૨.૬॥

૬૨.૭/૧ભુક્ત્વા તત્ર વરાન્ ભોગાન્ ક્રીડિત્વા ચાપ્સરૈઃ સહ ।
૬૨.૭/૨મન્વન્તરશતં સાગ્રં જરામૃત્યુવિવર્જિતઃ ॥ ૬૨.૭॥

૬૨.૮/૧પુણ્યક્ષયાદ્ ઇહાયાતઃ કુલે સર્વગુણાન્વિતે ।
૬૨.૮/૨રૂપવાન્ સુભગઃ શ્રીમાન્ સત્યવાદી જિતેન્દ્રિયઃ ॥ ૬૨.૮॥

૬૨.૯/૧વેદશાસ્ત્રાર્થવિદ્ વિપ્રો ભવેદ્ યજ્વા તુ વૈષ્ણવઃ ।
૬૨.૯/૨યોગં ચ વૈષ્ણવં પ્રાપ્ય તતો મોક્ષમવાપ્નુયાત્ ॥ ૬૨.૯॥

૬૨.૧૦/૧ગ્રહોપરાગે સંક્રાન્ત્યામયને વિષુવે તથા ।
૬૨.૧૦/૨યુગાદિષુ ષડશીત્યાં વ્યતીપાતે દિનક્ષયે ॥ ૬૨.૧૦॥

૬૨.૧૧/૧આષાઢ્યાં ચૈવ કાર્ત્તિક્યાં માઘ્યાં વાન્યે શુભે તિથૌ ।
૬૨.૧૧/૨યે તત્ર દાનં વિપ્રેભ્યઃ પ્રયચ્છન્તિ સુમેધસઃ ॥ ૬૨.૧૧॥

૬૨.૧૨/૧ફલં સહસ્રગુણિતમન્યતીર્થાલ્લભન્તિ તે ।
૬૨.૧૨/૨પિતૃણાં યે પ્રયચ્છન્તિ પિણ્ડં તત્ર વિધાનતઃ ॥ ૬૨.૧૨॥

૬૨.૧૩/૧અક્ષયાં પિતરસ્તેષાં તૃપ્તિં સમ્પ્રાપ્નુવન્તિ વૈ ।
૬૨.૧૩/૨એવં સ્નાનફલં સમ્યક્ સાગરસ્ય મયોદિતમ્ ॥ ૬૨.૧૩॥

૬૨.૧૪/૧દાનસ્ય ચ ફલં વિપ્રાઃ પિણ્ડદાનસ્ય ચૈવ હિ ।
૬૨.૧૪/૨ધર્માર્થમોક્ષફલદમાયુષ્કીર્તિયશસ્કરમ્ ॥ ૬૨.૧૪॥

૬૨.૧૫/૧ભુક્તિમુક્તિફલં નૃણાં ધન્યં દુઃસ્વપ્નનાશનમ્ ।
૬૨.૧૫/૨સર્વપાપહરં પુણ્યં સર્વકામફલપ્રદમ્ ॥ ૬૨.૧૫॥

૬૨.૧૬/૧નાસ્તિકાય ન વક્તવ્યં પુરાણં ચ દ્વિજોત્તમાઃ ।
૬૨.૧૬/૨તાવદ્ ગર્જન્તિ તીર્થાનિ માહાત્મ્યૈઃ સ્વૈઃ પૃથક્ પૃથક્ ॥ ૬૨.૧૬॥

૬૨.૧૭/૧યાવન્ ન તીર્થરાજસ્ય માહાત્મ્યં વર્ણ્યતે દ્વિજાઃ ।
૬૨.૧૭/૨પુષ્કરાદીનિ તીર્થાનિ પ્રયચ્છન્તિ સ્વકં ફલમ્ ॥ ૬૨.૧૭॥

૬૨.૧૮/૧તીર્થરાજસ્તુ સ પુનઃ સર્વતીર્થફલપ્રદઃ ।
૬૨.૧૮/૨ભૂતલે યાનિ તીર્થાનિ સરિતશ્ચ સરાંસિ ચ ॥ ૬૨.૧૮॥

૬૨.૧૯/૧વિશન્તિ સાગરે તાનિ તેનાસૌ શ્રેષ્ઠતાં ગતઃ ।
૬૨.૧૯/૨રાજા સમસ્તતીર્થાનાં સાગરઃ સરિતાં પતિઃ ॥ ૬૨.૧૯॥

૬૨.૨૦/૧તસ્માત્ સમસ્તતીર્થેભ્યઃ શ્રેષ્ઠોઽસૌ સર્વકામદઃ ।
૬૨.૨૦/૨તમો નાશં યથાભ્યેતિ ભાસ્કરેઽભ્યુદિતે દ્વિજાઃ ॥ ૬૨.૨૦॥

૬૨.૨૧/૧સ્નાનેન તીર્થરાજસ્ય તથા પાપસ્ય સંક્ષયઃ ।
૬૨.૨૧/૨તીર્થરાજસમં તીર્થં ન ભૂતં ન ભવિષ્યતિ ॥ ૬૨.૨૧॥

૬૨.૨૨/૧અધિષ્ઠાનં યદા યત્ર પ્રભોર્નારાયણસ્ય વૈ ।
૬૨.૨૨/૨કઃ શક્નોતિ ગુણાન્ વક્તું તીર્થરાજસ્ય ભો દ્વિજાઃ ॥ ૬૨.૨૨॥

૬૨.૨૩/૧કોટ્યો નવનવત્યસ્તુ યત્ર તીર્થાનિ સન્તિ વૈ ।
૬૨.૨૩/૨તસ્માત્ સ્નાનં ચ દાનં ચ હોમં જપ્યં સુરાર્ચનમ્ ।
૬૨.૨૩/૩યત્ કિંચિત્ ક્રિયતે તત્ર ચાક્ષયં ક્રિયતે દ્વિજાઃ ॥ ૬૨.૨૩॥

૬૩.૧/૧બ્રહ્મોવાચ । તતો ગચ્છેદ્ દ્વિજશ્રેષ્ઠાસ્તીર્થં યજ્ઞાઙ્ગસમ્ભવમ્ ।
૬૩.૧/૨ઇન્દ્રદ્યુમ્નસરો નામ યત્રાસ્તે પાવનં શુભમ્ ॥ ૬૩.૧॥

૬૩.૨/૧ગત્વા તત્ર શુચિર્ધીમાન્ આચમ્ય મનસા હરિમ્ ।
૬૩.૨/૨ધ્યાત્વોપસ્થાય ચ જલમિમં મન્ત્રમુદીરયેત્ ॥ ૬૩.૨॥

૬૩.૩/૧અશ્વમેધાઙ્ગસમ્ભૂત તીર્થ સર્વાઘનાશન ।
૬૩.૩/૨સ્નાનં ત્વયિ કરોમ્યદ્ય પાપં હર નમોऽસ્તુ તે ॥ ૬૩.૩॥

૬૩.૪/૧એવમુચ્ચાર્ય વિધિવત્ સ્નાત્વા દેવાન્ ઋષીન્ પિતૄન્ ।
૬૩.૪/૨તિલોદકેન ચાન્યાંશ્ચ સંતર્પ્યાચમ્ય વાગ્યતઃ ॥ ૬૩.૪॥

૬૩.૫/૧દત્ત્વા પિતૃણાં પિણ્ડાંશ્ચ સમ્પૂજ્ય પુરુષોત્તમમ્ ।
૬૩.૫/૨દશાશ્વમેધિકં સમ્યક્ ફલં પ્રાપ્નોતિ માનવઃ ॥ ૬૩.૫॥

૬૩.૬/૧સપ્તાવરાન્ સપ્ત પરાન્ વંશાન્ ઉદ્ધૃત્ય દેવવત્ ।
૬૩.૬/૨કામગેન વિમાનેન વિષ્ણુલોકં સ ગચ્છતિ ॥ ૬૩.૬॥

૬૩.૭/૧ભુક્ત્વા તત્ર સુખાન્ ભોગાન્ યાવચ્ચન્દ્રાર્કતારકમ્ ।
૬૩.૭/૨ચ્યુતસ્તસ્માદ્ ઇહાયાતો મોક્ષં ચ લભતે ધ્રુવમ્ ॥ ૬૩.૭॥

૬૩.૮/૧એવં કૃત્વા પઞ્ચતીર્થીમેકાદશ્યામુપોષિતઃ ।
૬૩.૮/૨જ્યેષ્ઠશુક્લપઞ્ચદશ્યાં યઃ પશ્યેત્ પુરુષોત્તમમ્ ॥ ૬૩.૮॥

૬૩.૯/૧સ પૂર્વોક્તં ફલં પ્રાપ્ય ક્રીડિત્વા વાચ્યુતાલયે ।
૬૩.૯/૨પ્રયાતિ પરમં સ્થાનં યસ્માન્ નાવર્તતે પુનઃ ॥ ૬૩.૯॥

૬૩.૧૦/૧મુનય ઊચુઃ । માસાન્ અન્યાન્ પરિત્યજ્ય માઘાદીન્ પ્રપિતામહ ।
૬૩.૧૦/૨પ્રશંસસિ કથં જ્યેષ્ઠં બ્રૂહિ તત્કારણં પ્રભો ॥ ૬૩.૧૦॥

૬૩.૧૧/૧બ્રહ્મોવાચ । શ ृ ણુધ્વં મુનિશાર્દૂલાઃ પ્રવક્ષ્યામિ સમાસતઃ ।
૬૩.૧૧/૨જ્યેષ્ઠં માસં યથા તેભ્યઃ પ્રશંસામિ પુનઃ પુનઃ ॥ ૬૩.૧૧॥

૬૩.૧૨/૧પૃથિવ્યાં યાનિ તીર્થાનિ સરિતશ્ચ સરાંસિ ચ ।
૬૩.૧૨/૨પુષ્કરિણ્યસ્તડાગાનિ વાપ્યઃ કૂપાસ્તથા હ્રદાઃ ॥ ૬૩.૧૨॥

૬૩.૧૩/૧નાનાનદ્યઃ સમુદ્રાશ્ચ સપ્તાહં પુરુષોત્તમે ।
૬૩.૧૩/૨જ્યેષ્ઠશુક્લદશમ્યાદિ પ્રત્યક્ષં યાન્તિ સર્વદા ॥ ૬૩.૧૩॥

૬૩.૧૪/૧સ્નાનદાનાદિકં તસ્માદ્ દેવતાપ્રેક્ષણં દ્વિજાઃ ।
૬૩.૧૪/૨યત્ કિંચિત્ ક્રિયતે તત્ર તસ્મિન્ કાલેઽક્ષયં ભવેત્ ॥ ૬૩.૧૪॥

૬૩.૧૫/૧શુક્લપક્ષસ્ય દશમી જ્યેષ્ઠે માસિ દ્વિજોત્તમાઃ ।
૬૩.૧૫/૨હરતે દશ પાપાનિ તસ્માદ્ દશહરા સ્મૃતા ॥ ૬૩.૧૫॥

૬૩.૧૬/૧યસ્તસ્યાં હલિનં કૃષ્ણં પશ્યેદ્ ભદ્રાં સુસંયતઃ ।
૬૩.૧૬/૨સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકં વ્રજેન્ નરઃ ॥ ૬૩.૧૬॥

૬૩.૧૭/૧ઉત્તરે દક્ષિણે વિપ્રાસ્ત્વયને પુરુષોત્તમમ્ ।
૬૩.૧૭/૨દૃષ્ટ્વા રામં સુભદ્રાં ચ વિષ્ણુલોકં વ્રજેન્ નરઃ ॥ ૬૩.૧૭॥

૬૩.૧૮/૧નરો દોલાગતં દૃષ્ટ્વા ગોવિન્દં પુરુષોત્તમમ્ ।
૬૩.૧૮/૨ફાલ્ગુન્યાં પ્રયતો ભૂત્વા ગોવિન્દસ્ય પુરં વ્રજેત્ ॥ ૬૩.૧૮॥

૬૩.૧૯/૧વિષુવદ્દિવસે પ્રાપ્તે પઞ્ચતીર્થી વિધાનતઃ ।
૬૩.૧૯/૨કૃત્વા સંકર્ષણં કૃષ્ણં દૃષ્ટ્વા ભદ્રાં ચ
ભો દ્વિજાઃ ॥ ૬૩.૧૯॥

૬૩.૨૦/૧નરઃ સમસ્તયજ્ઞાનાં ફલં પ્રાપ્નોતિ દુર્લભમ્ ।
૬૩.૨૦/૨વિમુક્તઃ સર્વપાપેભ્યો વિષ્ણુલોકં ચ ગચ્છતિ ॥ ૬૩.૨૦॥

૬૩.૨૧/૧યઃ પશ્યતિ તૃતીયાયાં કૃષ્ણં ચન્દનરૂષિતમ્ ।
૬૩.૨૧/૨વૈશાખસ્યાસિતે પક્ષે સ યાત્યચ્યુતમન્દિરમ્ ॥ ૬૩.૨૧॥

૬૩.૨૨/૧જ્યૈષ્ઠ્યાં જ્યેષ્ઠર્ક્ષયુક્તાયાં યઃ પશ્યેત્ પુરુષોત્તમમ્ ।
૬૩.૨૨/૨કુલૈકવિંશમુદ્ધૃત્ય વિષ્ણુલોકં સ ગચ્છતિ ॥ ૬૩.૨૨॥

૬૪.૧/૧બ્રહ્મોવાચ । યદા ભવેન્ મહાજ્યૈષ્ઠી રાશિનક્ષત્રયોગતઃ ।
૬૪.૧/૨પ્રયત્નેન તદા મર્ત્યૈર્ગન્તવ્યં પુરુષોત્તમમ્ ॥ ૬૪.૧॥

૬૪.૨/૧કૃષ્ણં દૃષ્ટ્વા મહાજ્યૈષ્ઠ્યાં રામં ભદ્રાં ચ ભો દ્વિજાઃ ।

૬૪.૨/૨નરો દ્વાદશયાત્રાયાઃ ફલં પ્રાપ્નોતિ ચાધિકમ્ ॥ ૬૪.૨॥

૬૪.૩/૧પ્રયાગે ચ કુરુક્ષેત્રે નૈમિષે પુષ્કરે ગયે ।
૬૪.૩/૨ગઙ્ગાદ્વારે કુશાવર્તે ગઙ્ગાસાગરસંગમે ॥ ૬૪.૩॥

૬૪.૪/૧કોકામુખે શૂકરે ચ મથુરાયાં મરુસ્થલે ।
૬૪.૪/૨શાલગ્રામે વાયુતીર્થે મન્દરે સિન્ધુસાગરે ॥ ૬૪.૪॥

૬૪.૫/૧પિણ્ડારકે ચિત્રકૂટે પ્રભાસે કનખલે દ્વિજાઃ ।
૬૪.૫/૨શઙ્ખોદ્ધારે દ્વારકાયાં તથા બદરિકાશ્રમે ॥ ૬૪.૫॥

૬૪.૬/૧લોહકુણ્ડે ચાશ્વતીર્થે સર્વપાપપ્રમોચને ।
૬૪.૬/૨કામાલયે કોટિતીર્થે તથા ચામરકણ્ટકે ॥ ૬૪.૬॥

૬૪.૭/૧લોહાર્ગલે જમ્બુમાર્ગે સોમતીર્થે પૃથૂદકે ।
૬૪.૭/૨ઉત્પલાવર્તકે ચૈવ પૃથુતુઙ્ગે સુકુબ્જકે ॥ ૬૪.૭॥

૬૪.૮/૧એકામ્રકે ચ કેદારે કાશ્યાં ચ વિરજે દ્વિજાઃ ।
૬૪.૮/૨કાલઞ્જરે ચ ગોકર્ણે શ્રીશૈલે ગન્ધમાદને ॥ ૬૪.૮॥

૬૪.૯/૧મહેન્દ્રે મલયે વિન્ધ્યે પારિયાત્રે હિમાલયે ।
૬૪.૯/૨સહ્યે ચ શુક્તિમન્તે ચ ગોમન્તે ચાર્બુદે તથા ॥ ૬૪.૯॥

૬૪.૧૦/૧ગઙ્ગાયાં સર્વતીર્થેષુ યામુનેષુ ચ ભો દ્વિજાઃ ।
૬૪.૧૦/૨સારસ્વતેષુ ગોમત્યાં બ્રહ્મપુત્રેષુ સપ્તસુ ॥ ૬૪.૧૦॥

૬૪.૧૧/૧ગોદાવરી ભીમરથી તુઙ્ગભદ્રા ચ નર્મદા ।
૬૪.૧૧/૨તાપી પયોઉષ્ણી કાવેરી શિપ્રા ચર્મણ્વતી દ્વિજાઃ ॥ ૬૪.૧૧॥

૬૪.૧૨/૧વિતસ્તા ચન્દ્રભાગા ચ શતદ્રુર્બાહુદા તથા ।
૬૪.૧૨/૨ઋષિકુલ્યા કુમારી ચ વિપાશા ચ દૃષદ્વતી ॥ ૬૪.૧૨॥

૬૪.૧૩/૧શરયૂર્નાકગઙ્ગા ચ ગણ્ડકી ચ મહાનદી ।
૬૪.૧૩/૨કૌશિકી કરતોયા ચ ત્રિસ્રોતા મધુવાહિની ॥ ૬૪.૧૩॥

૬૪.૧૪/૧મહાનદી વૈતરણી યાશ્ચાન્યા નાનુકીર્તિતાઃ ।
૬૪.૧૪/૨અથવા કિં બહૂક્તેન ભાષિતેન દ્વિજોત્તમાઃ ॥ ૬૪.૧૪॥

૬૪.૧૫/૧પૃથિવ્યાં સર્વતીર્થેષુ સર્વેષ્વાયતનેષુ ચ ।
૬૪.૧૫/૨સાગરેષુ ચ શૈલેષુ નદીષુ ચ સરઃસુ ચ ॥ ૬૪.૧૫॥

૬૪.૧૬/૧યત્ ફલં સ્નાનદાનેન રાહુગ્રસ્તે દિવાકરે ।
૬૪.૧૬/૨તત્ ફલં કૃષ્ણમાલોક્ય મહાજ્યૈષ્ઠ્યાં લભેન્ નરઃ ॥ ૬૪.૧૬॥

૬૪.૧૭/૧તસ્માત્ સર્વપ્રયત્નેન ગન્તવ્યં પુરુષોત્તમે ।
૬૪.૧૭/૨મહાજ્યૈષ્ઠ્યાં મુનિશ્રેષ્ઠા સર્વકામફલેપ્સુભિઃ ॥ ૬૪.૧૭॥

૬૪.૧૮/૧દૃષ્ટ્વા રામં મહાજ્યેષ્ઠં કૃષ્ણં સુભદ્રયા સહ ।
૬૪.૧૮/૨વિષ્ણુલોકં નરો યાતિ સમુદ્ધૃત્ય સમં કુલમ્ ॥ ૬૪.૧૮॥

૬૪.૧૯/૧ભુક્ત્વા તત્ર વરાન્ ભોગાન્ યાવદ્ આભૂતસમ્પ્લવમ્ ।
૬૪.૧૯/૨પુણ્યક્ષયાદ્ ઇહાગત્ય ચતુર્વેદી દ્વિજો ભવેત્ ॥ ૬૪.૧૯॥

૬૪.૨૦/૧સ્વધર્મનિરતઃ શાન્તઃ કૃષ્ણભક્તો જિતેન્દ્રિયઃ ।
૬૪.૨૦/૨વૈષ્ણવં યોગમાસ્થાય તતો મોક્ષમવાપ્નુયાત્ ॥ ૬૪.૨૦॥

૬૫.૧/૧મુનય ઊચુઃ । કસ્મિન્ કાલે ભવેત્ સ્નાનં કૃષ્ણસ્ય કમલોદ્ભવ ।
૬૫.૧/૨વિધિના કેન તદ્ બ્રૂહિ તતો વિધિવિદાં વર ॥ ૬૫.૧॥

૬૫.૨/૧બ્રહ્મોવાચ । શ ૃણુધ્વં મુનયઃ સ્નાનં કૃષ્ણસ્ય વદતો મમ ।
૬૫.૨/૨રામસ્ય ચ સુભદ્રાયાઃ પુણ્યં સર્વાઘનાશનમ્ ॥ ૬૫.૨॥

૬૫.૩/૧માસિ જ્યેષ્ઠે ચ સમ્પ્રાપ્તે નક્ષત્રે ચન્દ્રદૈવતે ।
૬૫.૩/૨પૌર્ણમાસ્યાં તદા સ્નાનં સર્વકાલં હરેર્દ્વિજાઃ ॥ ૬૫.૩॥

૬૫.૪/૧સર્વતીર્થમયઃ કૂપસ્તત્રાસ્તે નિર્મલઃ શુચિઃ ।
૬૫.૪/૨તદા ભોગવતી તત્ર પ્રત્યક્ષા ભવતિ દ્વિજાઃ ॥ ૬૫.૪॥

૬૫.૫/૧તસ્માજ્જ્યૈષ્ઠ્યાં સમુદ્ધૃત્ય હૈમાઢ્યૈઃ કલશૈર્જલમ્ ।
૬૫.૫/૨કૃષ્ણરામાભિષેકાર્થં સુભદ્રાયાશ્ચ ભો દ્વિજાઃ ॥ ૬૫.૫॥

૬૫.૬/૧કૃત્વા સુશોભનં મઞ્ચં પતાકાભિરલંકૃતમ્ ।
૬૫.૬/૨સુદૃઢં સુખસંચારં વસ્ત્રૈઃ પુષ્પૈરલંકૃતમ્ ॥ ૬૫.૬॥

૬૫.૭/૧વિસ્તીર્ણં ધૂપિતં ધૂપૈઃ સ્નાનાર્થં રામકૃષ્ણયોઃ ।
૬૫.૭/૨સિતવસ્ત્રપરિચ્છન્નં મુક્તાહારાવલમ્બિતમ્ ॥ ૬૫.૭॥

૬૫.૮/૧તત્ર નાનાવિધૈર્વાદ્યૈઃ કૃષ્ણં નીલામ્બરં દ્વિજાઃ ।
૬૫.૮/૨મધ્યે સુભદ્રાં ચાસ્થાપ્ય જયમઙ્ગલનિસ્વનૈઃ ॥ ૬૫.૮॥

૬૫.૯/૧બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈશ્ચાન્યૈશ્ચ જાતિભિઃ ।
૬૫.૯/૨અનેકશતસાહસ્રૈર્વૃતં સ્ત્રીપુરુષૈર્દ્વિજાઃ ॥ ૬૫.૯॥

૬૫.૧૦/૧ગૃહસ્થાઃ સ્નાતકાશ્ચૈવ યતયો બ્રહ્મચારિણઃ ।
૬૫.૧૦/૨સ્નાપયન્તિ તદા કૃષ્ણં મઞ્ચસ્થં સહલાયુધમ્ ॥ ૬૫.૧૦ ॥

૬૫.૧૧/૧તથા સમસ્તતીર્થાનિ પૂર્વોક્તાનિ દ્વિજોત્તમાઃ ।
૬૫.૧૧/૨સ્વોદકૈઃ પુષ્પમિશ્રૈશ્ચ સ્નાપયન્તિ પૃથક્ પૃથક્ ॥ ૬૫.૧૧ ॥

૬૫.૧૨/૧પશ્ચાત્ પટહશઙ્ખાદ્યૈર્ભેરીમુરજનિસ્વનૈઃ ।
૬૫.૧૨/૨કાહલૈસ્તાલશબ્દૈશ્ચ મૃદઙ્ગૈર્ઝર્ઝરૈસ્તથા ॥ ૬૫.૧૨ ॥

૬૫.૧૩/૧અન્યૈશ્ચ વિવિધૈર્વાદ્યૈર્ઘણ્ટાસ્વનવિભૂષિતૈઃ ।
૬૫.૧૩/૨સ્ત્રીણાં મઙ્ગલશબ્દૈશ્ચ સ્તુતિશબ્દૈર્મનોહરૈઃ ॥ ૬૫.૧૩ ॥

૬૫.૧૪/૧જયશબ્દૈસ્તથા સ્તોત્રૈર્વીણાવેણુનિનાદિતૈઃ ।
૬૫.૧૪/૨શ્રૂયતે સુમહાઞ્ શબ્દઃ સાગરસ્યેવ ગર્જતઃ ॥ ૬૫.૧૪ ॥

૬૫.૧૫/૧મુનીનાં વેદશબ્દેન મન્ત્રશબ્દૈસ્તથાપરૈઃ ।
૬૫.૧૫/૨નાનાસ્તોત્રરવૈઃ પુણ્યૈઃ સામશબ્દોપબૃંહિતૈઃ ॥ ૬૫.૧૫ ॥

૬૫.૧૬/૧યતિભિઃ સ્નાતકૈશ્ચૈવ ગૃહસ્થૈર્બ્રહ્મચારિભિઃ ।
૬૫.૧૬/૨સ્નાનકાલે સુરશ્રેષ્ઠ સ્તુવન્તિ પરયા મુદા ॥ ૬૫.૧૬ ॥

૬૫.૧૭/૧શ્યામૈર્વેશ્યાજનૈશ્ચૈવ કુચભારાવનામિભિઃ ।
૬૫.૧૭/૨પીતરક્તામ્બરાભિશ્ચ માલ્યદામાવનામિભિઃ ॥ ૬૫.૧૭ ॥

૬૫.૧૮/૧સરત્નકુણ્ડલૈર્દિવ્યૈઃ સુવર્ણસ્તબકાન્વિતૈઃ ।
૬૫.૧૮/૨ચામરૈ રત્નદણ્ડૈશ્ચ વીજ્યેતે રામકેશવૌ ॥ ૬૫.૧૮ ॥

૬૫.૧૯/૧યક્ષવિદ્યાધરૈઃ સિદ્ધૈઃ કિંનરૈશ્ચાપ્સરોગણૈઃ ।
૬૫.૧૯/૨પરિવાર્યામ્બરગતૈર્દેવગન્ધર્વચારણૈઃ ॥ ૬૫.૧૯ ॥

૬૫.૨૦/૧આદિત્યા વસવો રુદ્રાઃ સાધ્યા વિશ્વે મરુદ્ગણાઃ ।
૬૫.૨૦/૨લોકપાલાસ્તથા ચાન્યે સ્તુવન્તિ પુરુષોત્તમમ્ ॥ ૬૫.૨૦ ॥

૬૫.૨૧/૧નમસ્તે દેવદેવેશ પુરાણ પુરુષોત્તમ ।
૬૫.૨૧/૨સર્ગસ્થિત્યન્તકૃદ્ દેવ લોકનાથ જગત્પતે ॥ ૬૫.૨૧ ॥

૬૫.૨૨/૧ત્રૈલોક્યધારિણં દેવં બ્રહ્મણ્યં મોક્ષકારણમ્ ।
૬૫.૨૨/૨તં નમસ્યામહે ભક્ત્યા સર્વકામફલપ્રદમ્ ॥ ૬૫.૨૨ ॥

૬૫.૨૩/૧સ્તુત્વૈવં વિબુધાઃ કૃષ્ણં રામં ચૈવ મહાબલમ્ ।

૬૫.૨૩/૨સુભદ્રાં ચ મુનિશ્રેષ્ઠાસ્તદાકાશે વ્યવસ્થિતાઃ ॥ ૬૫.૨૩ ॥

૬૫.૨૪/૧ગાયન્તિ દેવગન્ધર્વા નૃત્યન્ત્યપ્સરસસ્તથા ।
૬૫.૨૪/૨દેવતૂર્યાણ્યવાદ્યન્ત વાતા વાન્તિ સુશીતલાઃ ॥ ૬૫.૨૪ ॥

૬૫.૨૫/૧પુષ્પમિશ્રં તદા મેઘા વર્ષન્ત્યાકાશગોચરાઃ ।
૬૫.૨૫/૨જયશબ્દં ચ કુર્વન્તિ મુનયઃ સિદ્ધચારણાઃ ॥ ૬૫.૨૫ ॥

૬૫.૨૬/૧શક્રાદ્યા વિબુધાઃ સર્વ ઋષયઃ પિતરસ્તથા ।
૬૫.૨૬/૨પ્રજાનાં પતયો નાગા યે ચાન્યે સ્વર્ગવાસિનઃ ॥ ૬૫.૨૬ ॥

૬૫.૨૭/૧તતો મઙ્ગલસમ્ભારૈર્વિધિમન્ત્રપુરસ્કૃતમ્ ।
૬૫.૨૭/૨આભિષેચનિકં દ્રવ્યં ગૃહીત્વા દેવતાગણાઃ ॥ ૬૫.૨૭ ॥

૬૫.૨૮/૧ઇન્દ્રો વિષ્ણુર્મહાવીર્યઃ સૂર્યાચન્દ્રમસૌ તથા ।
૬૫.૨૮/૨ધાતા ચૈવ વિધાતા ચ તથા ચૈવાનિલાનલૌ ॥ ૬૫.૨૮ ॥

૬૫.૨૯/૧પૂષા ભગોઽર્યમા ત્વષ્ટા અંશુનૈવ વિવસ્વતા ।
૬૫.૨૯/૨પત્નીભ્યાં સહિતો ધીમાન્ મિત્રેણ વરુણેન ચ ॥ ૬૫.૨૯ ॥

૬૫.૩૦/૧રુદ્રૈર્વસુભિરાદિત્યૈરશ્વિભ્યાં ચ વૃતઃ પ્રભુઃ ।
૬૫.૩૦/૨વિશ્વૈર્દેવૈર્મરુદ્ભિશ્ચ સાધ્યૈશ્ચ પિતૃભિઃ સહ ॥ ૬૫.૩૦ ॥

૬૫.૩૧/૧ગન્ધર્વૈરપ્સરોભિશ્ચ યક્ષરાક્ષસપન્નગૈઃ ।
૬૫.૩૧/૨દેવર્ષિભિરસંખ્યેયૈસ્તથા બ્રહ્મર્ષિભિર્વરૈઃ ॥ ૬૫.૩૧ ॥

૬૫.૩૨/૧વૈખાનસૈર્વાલખિલ્યૈર્વાય્વાહારૈર્મરીચિપૈઃ ।
૬૫.૩૨/૨ભૃગુભિશ્ચાઙ્ગિરોભિશ્ચ સર્વવિદ્યાસુનિષ્ઠિતૈઃ ॥ ૬૫.૩૨ ॥

૬૫.૩૩/૧સર્વવિદ્યાધરૈઃ પુણ્યૈર્યોગસિદ્ધિભિરાવૃતઃ ।
૬૫.૩૩/૨પિતામહઃ પુલસ્ત્યશ્ચ પુલહશ્ચ મહાતપાઃ ॥ ૬૫.૩૩ ॥

૬૫.૩૪/૧અઙ્ગિરાઃ કશ્યપોઽત્રિશ્ચ મરીચિર્ભૃગુરેવ ચ ।
૬૫.૩૪/૨ક્રતુર્હરઃ પ્રચેતાશ્ચ મનુર્દક્ષસ્તથૈવ ચ ॥ ૬૫.૩૪ ॥

૬૫.૩૫/૧ઋતવશ્ચ ગ્રહાશ્ચૈવ જ્યોતીંષિ ચ દ્વિજોત્તમાઃ ।
૬૫.૩૫/૨મૂર્તિમત્યશ્ચ સરિતો દેવાશ્ચૈવ સનાતનાઃ ॥ ૬૫.૩૫ ॥

૬૫.૩૬/૧સમુદ્રાશ્ચ હ્રદાશ્ચૈવ તીર્થાનિ વિવિધાનિ ચ ।
૬૫.૩૬/૨પૃથિવી દ્યૌર્દિશશ્ચૈવ પાદપાશ્ચ દ્વિજોત્તમાઃ ॥ ૬૫.૩૬ ॥

૬૫.૩૭/૧અદિતિર્દેવમાતા ચ હ્રીઃ શ્રીઃ સ્વાહા સરસ્વતી ।
૬૫.૩૭/૨ઉમા શચી સિનીવાલી તથા ચાનુમતિઃ કુહૂઃ ॥ ૬૫.૩૭ ॥

૬૫.૩૮/૧રાકા ચ ધિષણા ચૈવ પત્ન્યશ્ચાન્યા દિવૌકસામ્ ।
૬૫.૩૮/૨હિમવાંશ્ચૈવ વિન્ધ્યશ્ચ મેરુશ્ચાનેકશ‌ૃઙ્ગવાન્ ॥ ૬૫.૩૮ ॥

૬૫.૩૯/૧ઐરાવતઃ સાનુચરઃ કલાકાષ્ઠાસ્તથૈવ ચ ।
૬૫.૩૯/૨માસાર્ધં માસર્તવસ્તથા રાત્ર્યહની સમાઃ ॥ ૬૫.૩૯ ॥

૬૫.૪૦/૧ઉચ્ચૈઃશ્રવા હયશ્રેષ્ઠો નાગરાજશ્ચ વામનઃ ।
૬૫.૪૦/૨અરુણો ગરુડશ્ચૈવ વૃક્ષાશ્ચૌષધિભિઃ સહ ॥ ૬૫.૪૦ ॥

૬૫.૪૧/૧ધર્મશ્ચ ભગવાન્ દેવઃ સમાજગ્મુર્હિ સંગતાઃ ।
૬૫.૪૧/૨કાલો યમશ્ચ મૃત્યુશ્ચ યમસ્યાનુચરાશ્ચ યે ॥ ૬૫.૪૧ ॥

૬૫.૪૨/૧બહુલત્વાચ્ચ નોક્તા યે વિવિધા દેવતાગણાઃ ।
૬૫.૪૨/૨તે દેવસ્યાભિષેકાર્થં સમાયાન્તિ તતસ્તતઃ ॥ ૬૫.૪૨ ॥

૬૫.૪૩/૧ગૃહીત્વા તે તદા વિપ્રાઃ સર્વે દેવા દિવૌકસઃ ।
૬૫.૪૩/૨આભિષેચનિકં દ્રવ્યં મઙ્ગલાનિ ચ સર્વશઃ ॥ ૬૫.૪૩ ॥

૬૫.૪૪/૧દિવ્યસમ્ભારસંયુક્તૈઃ કલશૈઃ કાઞ્ચનૈર્દ્વિજાઃ ।
૬૫.૪૪/૨સારસ્વતીભિઃ પુણ્યાભિર્દિવ્યતોયાભિરેવ ચ ॥ ૬૫.૪૪ ॥

૬૫.૪૫/૧તોયેનાકાશગઙ્ગાયાઃ કૃષ્ણં રામેણ સંગતમ્ ।
૬૫.૪૫/૨સપુષ્પૈઃ કાઞ્ચનૈઃ કુમ્ભૈઃ સ્નાપયન્ત્યવનિસ્થિતાઃ ॥ ૬૫.૪૫ ॥

૬૫.૪૬/૧સંચરન્તિ વિમાનાનિ દેવાનામમ્બરે તથા ।
૬૫.૪૬/૨ઉચ્ચાવચાનિ દિવ્યાનિ કામગાનિ સ્થિરાણિ ચ ॥ ૬૫.૪૬ ॥

૬૫.૪૭/૧દિવ્યરત્નવિચિત્રાણિ સેવિતાન્યપ્સરોગણૈઃ ।
૬૫.૪૭/૨ગીતૈર્વાદ્યૈઃ પતાકાભિઃ શોભિતાનિ સમન્તતઃ ॥ ૬૫.૪૭ ॥

૬૫.૪૮/૧એવં તદા મુનિશ્રેષ્ઠાઃ કૃષ્ણં રામેણ સંગતમ્ ।
૬૫.૪૮/૨સ્નાપયિત્વા સુભદ્રાં ચ સંસ્તુવન્તિ મુદાન્વિતાઃ ॥ ૬૫.૪૮ ॥

૬૫.૪૯/૧જય જય લોકપાલ ભક્તરક્ષક જય જય પ્રણતવત્સલ
જય જય ભૂતચરણ જય જયાદિદેવ બહુકારણ જય જય વાસુદેવ
જય જયાસુરસંહરણ જય જય દિવ્યમીન જય જય ત્રિદશવર જય
જય જલધિશયન ।

૬૫.૪૯/૨જય જય યોગિવર જય જય સૂર્યનેત્ર જય જય દેવરાજ
જય જય કૈટભારે જય જય વેદવર જય જય કૂર્મરૂપ જય જય
યજ્ઞવર જય જય કમલનાભ જય જય શૈલચર ।
૬૫.૪૯/૩જય જય યોગશાયિઞ્ જય જય વેગધર જય જય
વિશ્વમૂર્તે જય જય ચક્રધર જય જય ભૂતનાથ જય જય
ધરણીધર જય જય શેષશાયિઞ્ જય જય પીતવાસો જય જય
સોમકાન્ત ।
૬૫.૪૯/૪જય જય યોગવાસ જય જય દહનવક્ત્ર જય જય
ધર્મવાસ જય જય ગુણનિધાન જય જય શ્રીનિવાસ જય જય
ગરુડગમન જય જય સુખનિવાસ જય જય ધર્મકેતો જય જય
મહીનિવાસ ।
૬૫.૪૯/૫જય જય ગહનચરિત્ર જય જય યોગિગમ્ય જય જય
મખનિવાસ જય જય વેદવેદ્ય જય શાન્તિકર જય જય યોગિચિન્ત્ય
જય જય પુષ્ટિકર જય જય જ્ઞાનમૂર્તે જય જય કમલાકર ।
૬૫.૪૯/૬જય જય ભાવવેદ્ય જય જય મુક્તિકર જય જય વિમલદેહ
જય જય સત્ત્વનિલય જય જય ગુણસમૃદ્ધ જય જય યજ્ઞકર
જય જય ગુણવિહીન જય જય મોક્ષકર જય જય ભૂશરણ્ય ।
૬૫.૪૯/૭જય જય કાન્તિયુત જય જય લોકશરણ જય જય
લક્ષ્મીયુત જય જય પઙ્કજાક્ષ જય જય સૃષ્ટિકર જય જય
યોગયુત જય જયાતસીકુસુમશ્યામદેહ જય જય સમુદ્રાવિષ્ટદેહ જય
જય લક્ષ્મીપઙ્કજષટ્ચરણ ।
૬૫.૪૯/૮જય જય ભક્તવશ જય જય લોકકાન્ત જય જય
પરમશાન્ત જય જય પરમસાર જય જય ચક્રધર જય જય
ભોગિયુત જય જય નીલામ્બર જય જય શાન્તિકર જય જય મોક્ષકર
જય જય કલુષહર ॥ ૬૫.૪૯॥

૬૫.૫૦/૧જય કૃષ્ણ જગન્નાથ જય સંકર્ષણાનુજ ।
૬૫.૫૦/૨જય પદ્મપલાશાક્ષ જય વાઞ્છાફલપ્રદ ॥ ૬૫.૫૦॥

૬૫.૫૧/૧જય માલાવૃતોરસ્ક જય ચક્રગદાધર ।
૬૫.૫૧/૨જય પદ્માલયાકાન્ત જય વિષ્ણો નમોઽસ્તુ તે ॥ ૬૫.૫૧॥

૬૫.૫૩/૧બ્રહ્મોવાચ । એવં સ્તુત્વા તદા દેવાઃ શક્રાદ્યા હૃષ્ટમાનસાઃ ।
૬૫.૫૩/૨સિદ્ધચારણસંઘાશ્ચ યે ચાન્યે સ્વર્ગવાસિનઃ મુનયો

વાલખિલ્યાશ્ચ કૃષ્ણં રામેણ સંગતમ્ ।
૬૫.૫૩/૩સુભદ્રાં ચ મુનિશ્રેષ્ઠાઃ પ્રણિપત્યામ્બરે સ્થિતાઃ ॥ ૬૫.૫૩॥

૬૫.૫૪/૧દૃષ્ટ્વા સ્તુત્વા નમસ્કૃત્વા તદા તે ત્રિદિવૌકસઃ ।
૬૫.૫૪/૨કૃષ્ણં રામં સુભદ્રાં ચ યાન્તિ સ્વં સ્વં નિવેશનમ્ ॥ ૬૫.૫૪॥

૬૫.૫૫/૧સંચરન્તિ વિમાનાનિ દેવાનામમ્બરે તદા ।
૬૫.૫૫/૨ઉચ્ચાવચાનિ દિવ્યાનિ કામગાનિ સ્થિરાણિ ચ ॥ ૬૫.૫૫॥

૬૫.૫૬/૧દિવ્યરત્નવિચિત્રાણિ સેવિતાન્યપ્સરોગણૈઃ ।
૬૫.૫૬/૨ગીતૈર્વાદ્યૈઃ પતાકાભિઃ શોભિતાનિ સમન્તતઃ ॥ ૬૫.૫૬॥

૬૫.૫૭/૧તસ્મિન્ કાલે તુ યે મર્ત્યાઃ પશ્યન્તિ પુરુષોત્તમમ્ ।
૬૫.૫૭/૨બલભદ્રં સુભદ્રાં ચ તે યાન્તિ પદમવ્યયમ્ ॥ ૬૫.૫૭॥

૬૫.૫૮/૧સુભદ્રારામસહિતં મઞ્ચસ્થં પુરુષોત્તમમ્ ।
૬૫.૫૮/૨દૃષ્ટ્વા નિરામયં સ્થાનં યાન્તિ નાસ્ત્યત્ર સંશયઃ ॥ ૬૫.૫૮॥

૬૫.૫૯/૧કપિલાશતદાનેન યત્ ફલં પુષ્કરે સ્મૃતમ્ ।
૬૫.૫૯/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં સહલાયુધમ્ ।
૬૫.૫૯/૩સુભદ્રાં ચ મુનિશ્રેષ્ઠાઃ પ્રાપ્નોતિ શુભકૃન્ નરઃ ॥ ૬૫.૫૯॥

૬૫.૬૦/૧કન્યાશતપ્રદાનેન યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૬૦/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૦॥

૬૫.૬૧/૧સુવર્ણશતનિષ્કાણાં દાનેન યત્ ફલં સ્મૃતમ્ ।
૬૫.૬૧/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૧॥

૬૫.૬૨/૧ગોસહસ્રપ્રદાનેન યત્ ફલં પરિકીર્તિતમ્ ।
૬૫.૬૨/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૨॥

૬૫.૬૩/૧ભૂમિદાનેન વિધિવદ્ યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૬૩/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૩॥

૬૫.૬૪/૧યત્ ફલં ચાન્નદાનેન અર્ઘાતિથ્યેન કીર્તિતમ્ ।
૬૫.૬૪/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૪॥

૬૫.૬૫/૧વૃષોત્સર્ગેણ વિધિવદ્ યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૬૫/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૫॥

૬૫.૬૬/૧યત્ ફલં તોયદાનેન ગ્રીષ્મે વાન્યત્ર કીર્તિતમ્ ।

૬૫.૬૬/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૬॥

૬૫.૬૭/૧તિલધેનુપ્રદાનેન યત્ ફલં સમ્પ્રકીર્તિતમ્ ।
૬૫.૬૭/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૭॥

૬૫.૬૮/૧ગજાશ્વરથદાનેન યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૬૮/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૮॥

૬૫.૬૯/૧સુવર્ણશ‍ૃઙ્ગીદાનેન યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૬૯/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૬૯॥

૬૫.૭૦/૧જલધેનુપ્રદાનેન યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૭૦/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૭૦॥

૬૫.૭૧/૧દાનેન ઘૃતધેન્વાશ્ચ ફલં યત્ સમુદાહૃતમ્ ।
૬૫.૭૧/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૭૧॥

૬૫.૭૨/૧ચાન્દ્રાયણેન ચીર્ણેન યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૭૨/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૭૨॥

૬૫.૭૩/૧માસોપવાસૈર્વિધિવદ્ યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૭૩/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં લભતે નરઃ ॥ ૬૫.૭૩॥

૬૫.૭૪/૧અથ કિં બહુનોક્તેન ભાષિતેન પુનઃ પુનઃ ।
૬૫.૭૪/૨તસ્ય દેવસ્ય માહાત્મ્યં મઞ્ચસ્થસ્ય દ્વિજોત્તમાઃ ॥ ૬૫.૭૪॥

૬૫.૭૫/૧યત્ ફલં સર્વતીર્થેષુ વ્રતૈર્દાનૈશ્ચ કીર્તિતમ્ ।
૬૫.૭૫/૨તત્ ફલં કૃષ્ણમાલોક્ય મઞ્ચસ્થં સહલાયુધમ્ ॥ ૬૫.૭૫॥

૬૫.૭૬/૧સુભદ્રાં ચ મુનિશ્રેષ્ઠાઃ પ્રાપ્નોતિ શુભકૃન્ નરઃ ।
૬૫.૭૬/૨તસ્માન્ નરોઽથવા નારી પશ્યેત્ તં પુરુષોત્તમમ્ ॥ ૬૫.૭૬॥

૬૫.૭૭/૧તતઃ સમસ્તતીર્થાનાં લભેત્ સ્નાનાદિકં ફલમ્ ।
૬૫.૭૭/૨સ્નાનશેષેણ કૃષ્ણસ્ય તોયેનાત્માભિષિચ્યતે ॥ ૬૫.૭૭॥

૬૫.૭૮/૧વન્ધ્યા મૃતપ્રજા યા તુ દુર્ભગા ગ્રહપીડિતા ।
૬૫.૭૮/૨રાક્ષસાદ્યૈર્ગૃહીતા વા તથા રોગૈશ્ચ સંહતાઃ ॥ ૬૫.૭૮॥

૬૫.૭૯/૧સદ્યસ્તાઃ સ્નાનશેષેણ ઉદકેનાભિષેચિતાઃ ।
૬૫.૭૯/૨પ્રાપ્નુવન્તીપ્સિતાન્ કામાન્ યાન્ યાન્ વાઞ્છન્તિ ચેપ્સિતાન્ ॥ ૬૫.૭૯॥

૬૫.૮૦/૧પુત્રાર્થિની લભેત્ પુત્રાન્ સૌભાગ્યં ચ સુખાર્થિની ।
૬૫.૮૦/૨રોગાર્તા મુચ્યતે રોગાદ્ ધનં ચ ધનકાઙ્ક્ષિણી ॥ ૬૫.૮૦ ॥

૬૫.૮૧/૧પુણ્યાનિ યાનિ તોયાનિ તિષ્ઠન્તિ ધરણીતલે ।
૬૫.૮૧/૨તાનિ સ્નાનાવશેષસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૬૫.૮૧ ॥

૬૫.૮૨/૧તસ્માત્ સ્નાનાવશેષં યત્ કૃષ્ણસ્ય સલિલં દ્વિજાઃ ।
૬૫.૮૨/૨તેનાભિષિઞ્ચેદ્ ગાત્રાણિ સર્વકામપ્રદં હિ તત્ ॥ ૬૫.૮૨ ॥

૬૫.૮૩/૧સ્નાતં પશ્યન્તિ યે કૃષ્ણં વ્રજન્તં દક્ષિણામુખમ્ ।
૬૫.૮૩/૨બ્રહ્મહત્યાદિભિઃ પાપૈર્મુચ્યન્તે તે ન સંશયઃ ॥ ૬૫.૮૩ ॥

૬૫.૮૪/૧શાસ્ત્રેષુ યત્ ફલં પ્રોક્તં પૃથિવ્-યસ્ત્રિપ્રદક્ષિણૈઃ ।
૬૫.૮૪/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં વ્રજન્તં દક્ષિણામુખમ્ ॥ ૬૫.૮૪ ॥

૬૫.૮૫/૧તીર્થયાત્રાફલં યત્ તુ પૃથિવ્યાં સમુદાહૃતમ્ ।
૬૫.૮૫/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૮૫ ॥

૬૫.૮૬/૧બદર્યાં યત્ ફલં પ્રોક્તં દૃષ્ટ્વા નારાયણં નરમ્ ।
૬૫.૮૬/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૮૬ ॥

૬૫.૮૭/૧ગઙ્ગાદ્વારે કુરુક્ષેત્રે સ્નાનદાનેન યત્ ફલમ્ ।
૬૫.૮૭/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૮૭ ॥

૬૫.૮૮/૧પ્રયાગે ચ મહામાઘ્યાં યત્ ફલં સમુદાહૃતમ્ ।
૬૫.૮૮/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૮૮ ॥

૬૫.૮૯/૧શાલગ્રામે મહાચૈત્ર્યાં સ્નાનદાનેન યત્ ફલમ્ ।
૬૫.૮૯/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૮૯ ॥

૬૫.૯૦/૧મહાભિધાનકાર્ત્તિક્યાં પુષ્કરે યત્ ફલં સ્મૃતમ્ ।
૬૫.૯૦/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૯૦ ॥

૬૫.૯૧/૧યત્ ફલં સ્નાનદાનેન ગઙ્ગાસાગરસંગમે ।
૬૫.૯૧/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૯૧ ॥

૬૫.૯૨/૧ગ્રસ્તે સૂર્યે કુરુક્ષેત્રે સ્નાનદાનેન યત્ ફલમ્ ।
૬૫.૯૨/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૯૨ ॥

૬૫.૯૩/૧ગઙ્ગાયાં સર્વતીર્થેષુ યામુનેષુ ચ ભો દ્વિજાઃ ।
૬૫.૯૩/૨સારસ્વતેષુ તીર્થેષુ તથાન્યેષુ સરઃસુ ચ ॥ ૬૫.૯૩ ॥

૬૫.૯૪/૧યત્ ફલં સ્નાનદાનેન વિધિવત્ સમુદાહૃતમ્ ।
૬૫.૯૪/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૯૪॥

૬૫.૯૫/૧પુષ્કરે ચાથ તીર્થેષુ ગયે ચામરકણ્ટકે ।
૬૫.૯૫/૨નૈમિષાદિષુ તીર્થેષુ ક્ષેત્રેષ્વાયતનેષુ ચ ॥ ૬૫.૯૫॥

૬૫.૯૬/૧યત્ ફલં સ્નાનદાનેન રાહુગ્રસ્તે દિવાકરે ।
૬૫.૯૬/૨દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં દક્ષિણામુખમ્ ॥ ૬૫.૯૬॥

૬૫.૯૭/૧અથ કિં પુનરુક્તેન ભાષિતેન પુનઃ પુનઃ ।
૬૫.૯૭/૨યત્ કિંચિત્ કથિતં ચાત્ર ફલં પુણ્યસ્ય કર્મણઃ ॥ ૬૫.૯૭॥

૬૫.૯૮/૧વેદશાસ્ત્રે પુરાણે ચ ભારતે ચ દ્વિજોત્તમાઃ ।
૬૫.૯૮/૨ધર્મશાસ્ત્રેષુ સર્વેષુ તથાન્યત્ર મનીષિભિઃ ॥ ૬૫.૯૮॥

૬૫.૯૯/૧દૃષ્ટ્વા નરો લભેત્ કૃષ્ણં તત્ ફલં સહલાયુધમ્ ।
૬૫.૯૯/૨સકલં ભદ્રયા સાર્ધં વ્રજન્તં દક્ષિણામુખમ્ ॥ ૬૫.૯૯॥

૬૬.૧/૧બ્રહ્મોવાચ । ગુડિવામણ્ડપં યાન્તં યે પશ્યન્તિ રથે સ્થિતમ્ ।
૬૬.૧/૨કૃષ્ણં બલં સુભદ્રાં ચ તે યાન્તિ ભવનં હરેઃ ॥ ૬૬.૧॥

૬૬.૨/૧યે પશ્યન્તિ તદા કૃષ્ણં સપ્તાહં મણ્ડપે સ્થિતમ્ ।
૬૬.૨/૨હલિનં ચ સુભદ્રાં ચ વિષ્ણુલોકં વ્રજન્તિ તે ॥ ૬૬.૨॥

૬૬.૩/૧મુનય ઊચુઃ । કેન સા નિર્મિતા યાત્રા દક્ષિણસ્યાં જગત્પતે ।
૬૬.૩/૨યાત્રાફલં ચ કિં તત્ર પ્રાપ્યતે બ્રૂહિ માનવૈઃ ॥ ૬૬.૩॥

૬૬.૪/૧કિમર્થં સરસસ્તીરે રાજ્ઞસ્તસ્ય જગત્પતે ।
૬૬.૪/૨પવિત્રે વિજને દેશે ગત્વા તત્ર ચ મણ્ડપે ॥ ૬૬.૪॥

૬૬.૫/૧કૃષ્ણઃ સંકર્ષણશ્ચૈવ સુભદ્રા ચ રથેન તે ।
૬૬.૫/૨સ્વસ્થાનં સમ્પરિત્યજ્ય સપ્તરાત્રં વસન્તિ વૈ ॥ ૬૬.૫॥

૬૬.૬/૧બ્રહ્મોવાચ । ઇન્દ્રદ્યુમ્નેન ભો વિપ્રાઃ પુરા વૈ પ્રાર્થિતો હરિઃ ।
૬૬.૬/૨સપ્તાહં સરસસ્તીરે મમ યાત્રા ભવત્વિતિ ॥ ૬૬.૬॥

૬૬.૭/૧ગુડિવા નામ દેવેશ ભુક્તિમુક્તિફલપ્રદા ।
૬૬.૭/૨તસ્મૈ કિલ વરં ચાસૌ દદૌ સ પુરુષોત્તમઃ ॥ ૬૬.૭॥

૬૬.૮/૧શ્રીભગવાન્ ઉવાચ । સપ્તાહં સરસસ્તીરે તવ રાજન્ ભવિષ્યતિ ।

૬૬.૮/૨ગુડિવા નામ યાત્રા મે સર્વકામફલપ્રદા ॥ ૬૬.૮॥

૬૬.૯/૧યે માં તત્રાર્ચયિષ્યન્તિ શ્રદ્ધયા મણ્ડપે સ્થિતમ્ ।
૬૬.૯/૨સંકર્ષણં સુભદ્રાં ચ વિધિવત્ સુસમાહિતાઃ ॥ ૬૬.૯॥

૬૬.૧૦/૧બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ સ્ત્રિયઃ શૂદ્રાશ્ચ વૈ નૃપ ।
૬૬.૧૦/૨પુષ્પૈર્ગન્ધૈસ્તથા ધૂપૈર્દીપૈર્નૈવેદ્યકૈર્વરૈઃ ॥ ૬૬.૧૦॥

૬૬.૧૧/૧ઉપહારૈર્બહુવિધૈઃ પ્રણિપાતૈઃ પ્રદક્ષિણૈઃ ।
૬૬.૧૧/૨જયશબ્દૈસ્તથા સ્તોત્રૈર્ગીતૈર્વાદ્યૈર્મનોહરૈઃ ॥ ૬૬.૧૧॥

૬૬.૧૨/૧ન તેષાં દુર્લભં કિંચિત્ ફલં યસ્ય યદ્ ઈપ્સિતમ્ ।
૬૬.૧૨/૨ભવિષ્યતિ નૃપશ્રેષ્ઠ મત્પ્રસાદાદ્ અસંશયમ્ ॥ ૬૬.૧૨॥

૬૬.૧૩/૧બ્રહ્મોવાચ । એવમુક્ત્વા તુ તં દેવસ્તત્રૈવાન્તરધીયત ।
૬૬.૧૩/૨સ તુ રાજવરઃ શ્રીમાન્ કૃતકૃત્યોઽભવત્ તદા ॥ ૬૬.૧૩॥

૬૬.૧૪/૧તસ્માત્ સર્વપ્રયત્નેન ગુડિવાયાં દ્વિજોત્તમાઃ ।
૬૬.૧૪/૨સર્વકામપ્રદં દેવં પશ્યેત્ તં પુરુષોત્તમમ્ ॥ ૬૬.૧૪॥

૬૬.૧૫/૧અપુત્રો લભતે પુત્રાન્ નિર્ધનો લભતે ધનમ્ ।
૬૬.૧૫/૨રોગાચ્ચ મુચ્યતે રોગી કન્યા પ્રાપ્નોતિ સત્પતિમ્ ॥ ૬૬.૧૫॥

૬૬.૧૬/૧આયુઃ કીર્તિં યશો મેધાં બલં વિદ્યાં ધૃતિં પશૂન્ ।
૬૬.૧૬/૨નરઃ સંતતિમાપ્નોતિ રૂપયૌવનસમ્પદમ્ ॥ ૬૬.૧૬॥

૬૬.૧૭/૧યાન્ યાન્ સમીહતે ભોગાન્ દૃષ્ટ્વા તં પુરુષોત્તમમ્ ।
૬૬.૧૭/૨નરો વાપ્યથવા નારી તાંસ્તાન્ પ્રાપ્નોત્યસંશયમ્ ॥ ૬૬.૧૭॥

૬૬.૧૮/૧યાત્રાં કૃત્વા ગુડિવાખ્યાં વિધિવત્ સુસમાહિતઃ ।
૬૬.૧૮/૨આષાઢસ્ય સિતે પક્ષે નરો યોષિદ્ અથાપિ વા ॥ ૬૬.૧૮॥

૬૬.૧૯/૧દૃષ્ટ્વા કૃષ્ણં ચ રામં ચ સુભદ્રાં ચ દ્વિજોત્તમાઃ ।
૬૬.૧૯/૨દશપઞ્ચાશ્વમેધાનાં ફલં પ્રાપ્નોતિ ચાધિકમ્ ॥ ૬૬.૧૯॥

૬૬.૨૦/૧સપ્તાવરાન્ સપ્ત પરાન્ વંશાન્ ઉદ્ધૃત્ય ચાત્મનઃ ।
૬૬.૨૦/૨કામગેન વિમાનેન સર્વરત્નૈરલંકૃતઃ ॥ ૬૬.૨૦॥

૬૬.૨૧/૧ગન્ધર્વૈરપ્સરોભિશ્ચ સેવ્યમાનો યથોત્તરૈઃ ।
૬૬.૨૧/૨રૂપવાન્ સુભગઃ શૂરો નરો વિષ્ણુપુરં વ્રજેત્ ॥ ૬૬.૨૧॥

૬૬.૨૨/૧તત્ર ભુક્ત્વા વરાન્ ભોગાન્ યાવદ્ આભૂતસમ્પ્લવમ્ ।
૬૬.૨૨/૨સર્વકામસમૃદ્ધાત્મા જરામરણવર્જિતઃ ॥ ૬૬.૨૨॥

૬૬.૨૩/૧પુણ્યક્ષયાદ્ ઇહાગત્ય ચતુર્વેદી દ્વિજો ભવેત્ ।
૬૬.૨૩/૨વૈષ્ણવં યોગમાસ્થાય તતો મોક્ષમવાપ્નુયાત્ ॥ ૬૬.૨૩॥

૬૭.૧/૧મુનય ઊચુઃ । એકૈકસ્યાસ્તુ યાત્રાયાઃ ફલં બ્રૂહિ પૃથક્ પૃથક્ ।
૬૭.૧/૨યત્ પ્રાપ્નોતિ નરઃ કૃત્વા નારી વા તત્ર સંયતા ॥ ૬૭.૧॥

૬૭.૨/૧બ્રહ્મોવાચ । પ્રતિયાત્રાફલં વિપ્રાઃ શ્ૃણુધ્વં ગદતો મમ ।
૬૭.૨/૨યત્ પ્રાપ્નોતિ નરઃ કૃત્વા તસ્મિન્ ક્ષેત્રે સુસંયતઃ ॥ ૬૭.૨॥

૬૭.૩/૧ગુડિવાયાં તથોત્થાને ફાલ્ગુન્યાં વિષુવે તથા ।
૬૭.૩/૨યાત્રાં કૃત્વા વિધાનેન દૃષ્ટ્વા કૃષ્ણં પ્રણમ્ય ચ ॥ ૬૭.૩॥

૬૭.૪/૧સંકર્ષણં સુભદ્રાં ચ લભેત્ સર્વત્ર વૈ ફલમ્ ।
૬૭.૪/૨નરો ગચ્છેદ્ વિષ્ણુલોકે યાવદ્ ઇન્દ્રાશ્ચતુર્દશ ॥ ૬૭.૪॥

૬૭.૫/૧યાવદ્ યાત્રાં જ્યેષ્ઠમાસે કરોતિ વિધિવન્ નરઃ ।
૬૭.૫/૨તાવત્ કલ્પં વિષ્ણુલોકે સુખં ભુઙ્ક્તે ન સંશયઃ ॥ ૬૭.૫॥

૬૭.૬/૧તસ્મિન્ ક્ષેત્રવરે પુણ્યે રમ્યે શ્રીપુરુષોત્તમે ।
૬૭.૬/૨ભુક્તિમુક્તિપ્રદે નૃણાં સર્વસત્ત્વસુખાવહે ॥ ૬૭.૬॥

૬૭.૭/૧જ્યેષ્ઠે યાત્રાં નરઃ કૃત્વા નારી વા સંયતેન્દ્રિયઃ ।
૬૭.૭/૨યથોક્તેન વિધાનેન દશ દ્વે ચ સમાહિતઃ ॥ ૬૭.૭॥

૬૭.૮/૧પ્રતિષ્ઠાં કુરુતે યસ્તુ શાઠ્યદમ્ભવિવર્જિતઃ ।
૬૭.૮/૨સ ભુક્ત્વા વિવિધાન્ ભોગાન્ મોક્ષં ચાન્તે લભેદ્ ધ્રુવમ્ ॥ ૬૭.૮॥

૬૭.૯/૧મુનય ઊચુઃ । શ્રોતુમિચ્છામહે દેવ પ્રતિષ્ઠાં વદતસ્તવ ।
૬૭.૯/૨વિધાનં ચાર્ચનં દાનં ફલં તત્ર જગત્પતેઃ ॥ ૬૭.૯॥

૬૭.૧૦/૧બ્રહ્મોવાચ । શ્ૃણુધ્વં મુનિશાર્દૂલાઃ પ્રતિષ્ઠાં વિધિચોદિતામ્ ।
૬૭.૧૦/૨યાં કૃત્વા તુ નરો ભક્ત્યા નારી વા લભતે ફલમ્ ॥ ૬૭.૧૦॥

૬૭.૧૧/૧યાત્રા દ્વાદશ સમ્પૂર્ણા યદા સ્યાત્ તુ દ્વિજોત્તમાઃ ।
૬૭.૧૧/૨તદા કુર્વીત વિધિવત્ પ્રતિષ્ઠાં પાપનાશિનીમ્ ॥ ૬૭.૧૧॥

૬૭.૧૨/૧જ્યેષ્ઠે માસિ સિતે પક્ષે ત્વેકાદશ્યાં સમાહિતઃ ।
૬૭.૧૨/૨ગત્વા જલાશયં પુણ્યમાચમ્ય પ્રયતઃ શુચિઃ ॥ ૬૭.૧૨॥

૬૭.૧૩/૧આવાહ્ય સર્વતીર્થાનિ ધ્યાત્વા નારાયણં તથા ।
૬૭.૧૩/૨તતઃ સ્નાનં પ્રકુર્વીત વિધિવત્ સુસમાહિતઃ ॥ ૬૭.૧૩॥

૬૭.૧૪/૧યસ્ય યો વિધિરુદ્દિષ્ટ ઋષિભિઃ સ્નાનકર્મણિ ।
૬૭.૧૪/૨તેનૈવ તુ વિધાનેન સ્નાનં તસ્ય વિધીયતે ॥ ૬૭.૧૪॥

૬૭.૧૫/૧સ્નાત્વા સમ્યગ્ વિધાનેન તતો દેવાન્ ઋષીન્ પિતૃન્ ।
૬૭.૧૫/૨સંતર્પયેત્ તથાન્યાંશ્ચ નામગોત્રવિધાનવિત્ ॥ ૬૭.૧૫॥

૬૭.૧૬/૧ઉત્તીર્ય વાસસી ધૌતે નિર્મલે પરિધાય વૈ ।
૬૭.૧૬/૨ઉપસ્પૃશ્ય વિધાનેન ભાસ્કરાભિમુખસ્તતઃ ॥ ૬૭.૧૬॥

૬૭.૧૭/૧ગાયત્રીં પાવનીં દેવીં મનસા વેદમાતરમ્ ।
૬૭.૧૭/૨સર્વપાપહરાં પુણ્યાં જપેદ્ અષ્ટોત્તરં શતમ્ ॥ ૬૭.૧૭॥

૬૭.૧૮/૧પુણ્યાંશ્ચ સૌરમન્ત્રાંશ્ચ શ્રદ્ધયા સુસમાહિતઃ ।
૬૭.૧૮/૨ત્રિઃ પ્રદક્ષિણમાવૃત્ય ભાસ્કરં પ્રણમેત્ તતઃ ॥ ૬૭.૧૮॥

૬૭.૧૯/૧વેદોક્તં ત્રિષુ વર્ણેષુ સ્નાનં જાપ્યમુદાહૃતમ્ ।
૬૭.૧૯/૨સ્ત્રીશૂદ્રયોઃ સ્નાનજાપ્યં વેદોક્તવિધિવર્જિતમ્ ॥ ૬૭.૧૯॥

૬૭.૨૦/૧તતો ગચ્છેદ્ ગૃહં મૌની પૂજયેત્ પુરુષોત્તમમ્ ।
૬૭.૨૦/૨પ્રક્ષાલ્ય હસ્તૌ પાદૌ ચ ઉપસ્પૃશ્ય યથાવિધિ ॥ ૬૭.૨૦॥

૬૭.૨૧/૧ઘૃતેન સ્નાપયેદ્ દેવં ક્ષીરેણ તદનન્તરમ્ ।
૬૭.૨૧/૨મધુગન્ધોદકેનૈવ તીર્થચન્દનવારિણા ॥ ૬૭.૨૧॥

૬૭.૨૨/૧તતો વસ્ત્રયુગં શ્રેષ્ઠં ભક્ત્યા તં પરિધાપયેત્ ।
૬૭.૨૨/૨ચન્દનાગરુકર્પૂરૈઃ કુઙ્કુમેન વિલેપયેત્ ॥ ૬૭.૨૨॥

૬૭.૨૩/૧પૂજયેત્ પરયા ભક્ત્યા પદ્મૈશ્ચ પુરુષોત્તમમ્ ।
૬૭.૨૩/૨અન્યૈશ્ચ વૈષ્ણવૈઃ પુષ્પૈરર્ચયેન્ મલ્લિકાદિભિઃ ॥ ૬૭.૨૩॥

૬૭.૨૪/૧સમ્પૂજ્યૈવં જગન્નાથં ભુક્તિમુક્તિપ્રદં હરિમ્ ।
૬૭.૨૪/૨ધૂપં ચાગુરુસંયુક્તં દહેદ્ દેવસ્ય ચાગ્રતઃ ॥ ૬૭.૨૪॥

૬૭.૨૫/૧ગુગ્ગુલં ચ મુનિશ્રેષ્ઠા દહેદ્ ગન્ધસમન્વિતમ્ ।
૬૭.૨૫/૨દીપં પ્રજ્વાલયેદ્ ભક્ત્યા યથાશક્ત્યા ઘૃતેન વૈ ॥ ૬૭.૨૫॥

૬૭.૨૬/૧અન્યાંશ્ચ દીપકાન્ દદ્યાદ્ દ્વાદશૈવ સમાહિતઃ ।

૬૭.૨૬/૨ઘૃતેન ચ મુનિશ્રેષ્ઠાસ્તિલતૈલેન વા પુનઃ ॥ ૬૭.૨૬॥

૬૭.૨૭/૧નૈવેદ્યે પાયસાપૂપ+ ।શષ્કુલીવટકં તથા ।
૬૭.૨૭/૨મોદકં ફાણિતં વાલ્પં ફલાનિ ચ નિવેદયેત્ ॥ ૬૭.૨૭॥

૬૭.૨૮/૧એવં પઞ્ચોપચારેણ સમ્પૂજ્ય પુરુષોત્તમમ્ ।
૬૭.૨૮/૨નમઃ પુરુષોત્તમાયેતિ જપેદ્ અષ્ટોત્તરં શતમ્ ॥ ૬૭.૨૮॥

૬૭.૨૯/૧તતઃ પ્રસાદયેદ્ દેવં ભક્ત્યા તં પુરુષોત્તમમ્ ।
૬૭.૨૯/૨નમસ્તે સર્વલોકેશ ભક્તાનામભયપ્રદ ॥ ૬૭.૨૯॥

૬૭.૩૦/૧સંસારસાગરે મગ્નં ત્રાહિ માં પુરુષોત્તમ ।
૬૭.૩૦/૨યાસ્તે મયા કૃતા યાત્રા દ્વાદશૈવ જગત્પતે ॥ ૬૭.૩૦॥

૬૭.૩૧/૧પ્રસાદાત્ તવ ગોવિન્દ સમ્પૂર્ણાસ્તા ભવન્તુ મે ।
૬૭.૩૧/૨એવં પ્રસાદ્ય તં દેવં દણ્ડવત્ પ્રણિપત્ય ચ ॥ ૬૭.૩૧॥

૬૭.૩૨/૧તતોઽર્ચયેદ્ ગુરું ભક્ત્યા પુષ્પવસ્ત્રાનુલેપનૈઃ ।
૬૭.૩૨/૨નાનયોરન્તરં યસ્માદ્ વિદ્યતે મુનિસત્તમાઃ ॥ ૬૭.૩૨॥

૬૭.૩૩/૧દેવસ્યોપરિ કુર્વીત શ્રદ્ધયા સુસમાહિતઃ ।
૬૭.૩૩/૨નાનાપુષ્પૈર્મુનિશ્રેષ્ઠા વિચિત્રં પુષ્પમણ્ડપમ્ ॥ ૬૭.૩૩॥

૬૭.૩૪/૧કૃત્વાવધારણં પશ્ચાજ્જાગરં કારયેન્ નિશિ ।
૬૭.૩૪/૨કથાં ચ વાસુદેવસ્ય ગીતિકાં ચાપિ કારયેત્ ॥ ૬૭.૩૪॥

૬૭.૩૫/૧ધ્યાયન્ પઠન્ સ્તુવન્ દેવં પ્રણયેદ્ રજનીં બુધઃ ।
૬૭.૩૫/૨તતઃ પ્રભાતે વિમલે દ્વાદશ્યાં દ્વાદશૈવ તુ ॥ ૬૭.૩૫॥

૬૭.૩૬/૧નિમન્ત્રયેદ્ વ્રતસ્નાતાન્ બ્રાહ્મણાન્ વેદપારગાન્ ।
૬૭.૩૬/૨ઇતિહાસપુરાણજ્ઞાગ્ શ્રોત્રિયાન્ સંયતેન્દ્રિયાન્ ॥ ૬૭.૩૬॥

૬૭.૩૭/૧સ્નાત્વા સમ્યગ્ વિધાનેન ધૌતવાસા જિતેન્દ્રિયઃ ।
૬૭.૩૭/૨સ્નાપયેત્ પૂર્વવત્ તત્ર પૂજયેત્ પુરુષોત્તમમ્ ॥ ૬૭.૩૭॥

૬૭.૩૮/૧ગન્ધૈઃ પુષ્પૈરુપહારૈર્નૈવેદ્યૈર્દીપકૈસ્તથા ।
૬૭.૩૮/૨ઉપચારૈર્બહુવિધૈઃ પ્રણિપાતૈઃ પ્રદક્ષિણૈઃ ॥ ૬૭.૩૮॥

૬૭.૩૯/૧જાપ્યૈઃ સ્તુતિનમસ્કારૈર્ગીતવાદ્યૈર્મનોહરૈઃ ।
૬૭.૩૯/૨સમ્પૂજ્યૈવં જગન્નાથં બ્રાહ્મણાન્ પૂજયેત્ તતઃ ॥ ૬૭.૩૯॥

૬૭.૪૦/૧દ્વાદશૈવ તુ ગાસ્તેભ્યો દત્ત્વા કનકમેવ ચ ।
૬૭.૪૦/૨છત્રોપાનદ્યુગં ચૈવ શ્રદ્ધાભક્તિસમન્વિતઃ ॥ ૬૭.૪૦ ॥

૬૭.૪૧/૧ભક્ત્યા તુ સધનં તેભ્યો દદ્યાદ્ વસ્ત્રાદિકં દ્વિજાઃ ।
૬૭.૪૧/૨સદ્ભાવેન તુ ગોવિન્દસ્તોષ્યતે પૂજિતો યતઃ ॥ ૬૭.૪૧ ॥

૬૭.૪૨/૧આચાર્યાય તતો દદ્યાદ્ ગોવસ્ત્રં કનકં તથા ।
૬૭.૪૨/૨છત્રોપાનદ્યુગં ચાન્યત્ કાંસ્યપાત્રં ચ ભક્તિતઃ ॥ ૬૭.૪૨ ॥

૬૭.૪૩/૧તતસ્તાન્ ભોજયેદ્ વિપ્રાન્ ભોજ્યં પાયસપૂર્વકમ્ ।
૬૭.૪૩/૨પક્વાન્નં ભક્ષ્યભોજ્યં ચ ગુડસર્પિઃસમન્વિતમ્ ॥ ૬૭.૪૩ ॥

૬૭.૪૪/૧તતસ્તાન્ અન્નતૃપ્તાંશ્ચ બ્રાહ્મણાન્ સ્વસ્થમાનસાન્ ।
૬૭.૪૪/૨દ્વાદશૈવોદકુમ્ભાંશ્ચ દદ્યાત્ તેભ્યઃ સમોદકાન્ ॥ ૬૭.૪૪ ॥

૬૭.૪૫/૧દક્ષિણાં ચ યથાશક્ત્યા દદ્યાત્ તેભ્યો વિમત્સરઃ ।
૬૭.૪૫/૨કુમ્ભં ચ દક્ષિણાં ચૈવ આચાર્યાય નિવેદયેત્ ॥ ૬૭.૪૫ ॥

૬૭.૪૬/૧એવં સમ્પૂજ્ય તાન્ વિપ્રાન્ ગુરું જ્ઞાનપ્રદાયકમ્ ।
૬૭.૪૬/૨પૂજયેત્ પરયા ભક્ત્યા વિષ્ણુતુલ્યં દ્વિજોત્તમાઃ ॥ ૬૭.૪૬ ॥

૬૭.૪૭/૧સુવર્ણવસ્ત્રગોધાન્યૈર્દ્રવ્યૈશ્ચાન્યૈર્વરૈર્બુધઃ ।
૬૭.૪૭/૨સમ્પૂજ્ય તં નમસ્કૃત્ય ઇમં મન્ત્રમુદીરયેત્ ॥ ૬૭.૪૭ ॥

૬૭.૪૮/૧સર્વવ્યાપી જગન્નાથઃ શઙ્ખચક્રગદાધરઃ ।
૬૭.૪૮/૨અનાદિનિધનો દેવઃ પ્રીયતાં પુરુષોત્તમઃ ॥ ૬૭.૪૮ ॥

૬૭.૪૯/૧ઇત્યુચ્ચાર્ય તતો વિપ્રાંસ્ત્રિઃ કૃત્વા ચ પ્રદક્ષિણામ્ ।
૬૭.૪૯/૨પ્રણમ્ય શિરસા ભક્ત્યા આચાર્યં તુ વિસર્જયેત્ ॥ ૬૭.૪૯ ॥

૬૭.૫૦/૧તતસ્તાન્ બ્રાહ્મણાન્ ભક્ત્યા ચાસીમાન્તમનુવ્રજેત્ ।
૬૭.૫૦/૨અનુવ્રજ્ય તુ તાન્ સર્વાન્ નમસ્કૃત્ય નિવર્તયેત્ ॥ ૬૭.૫૦ ॥

૬૭.૫૧/૧બાન્ધવૈઃ સ્વજનૈર્યુક્તસ્તતો ભુઞ્જીત વાગ્યતઃ ।
૬૭.૫૧/૨અન્યૈશ્ચોપાસકૈર્દીનૈર્ભિક્ષુકૈશ્ચાન્નકાઙ્ક્ષિભિઃ ॥ ૬૭.૫૧ ॥

૬૭.૫૨/૧એવં કૃત્વા નરઃ સમ્યઙ્ નારી વા લભતે ફલમ્ ।
૬૭.૫૨/૨અશ્વમેધસહસ્રાણાં રાજસૂયશતસ્ય ચ ॥ ૬૭.૫૨ ॥

૬૭.૫૩/૧અતીતં શતમાદાય પુરુષાણાં નરોત્તમાઃ ।
૬૭.૫૩/૨ભવિષ્યં ચ શતં વિપ્રાઃ સ્વર્ગત્યા દિવ્યરૂપધૃક્ ॥ ૬૭.૫૩ ॥

૬૭.૫૪/૧સર્વલક્ષણસમ્પન્નઃ સર્વાલંકારભૂષિતઃ ।
૬૭.૫૪/૨સર્વકામસમૃદ્ધાત્મા દેવવદ્ વિગતજ્વરઃ ॥ ૬૭.૫૪॥

૬૭.૫૫/૧રૂપયૌવનસમ્પન્નો ગુણૈઃ સર્વૈરલંકૃતઃ ।
૬૭.૫૫/૨સ્તૂયમાનોઽપ્સરોભિશ્ચ ગન્ધર્વૈઃ સમલંકૃતઃ ॥ ૬૭.૫૫॥

૬૭.૫૬/૧વિમાનેનાર્કવર્ણેન કામગેન સ્થિરેણ ચ ।
૬૭.૫૬/૨પતાકાધ્વજયુક્તેન સર્વરત્નૈરલંકૃતઃ ॥ ૬૭.૫૬॥

૬૭.૫૭/૧ઉદ્યોતયન્ દિશઃ સર્વા આકાશે વિગતક્લમઃ ।
૬૭.૫૭/૨યુવા મહાબલો ધીમાન્ વિષ્ણુલોકં સ ગચ્છતિ ॥ ૬૭.૫૭॥

૬૭.૫૮/૧તત્ર કલ્પશતં યાવદ્ ભુઙ્ક્તે ભોગાન્ યથેપ્સિતાન્ ।
૬૭.૫૮/૨સિદ્ધાપ્સરોભિર્ગન્ધર્વૈઃ સુરવિદ્યાધરોરગૈઃ ॥ ૬૭.૫૮॥

૬૭.૫૯/૧સ્તૂયમાનો મુનિવરૈસ્તિષ્ઠતે વિગતજ્વરઃ ।
૬૭.૫૯/૨યથા દેવો જગન્નાથઃ શઙ્ખચક્રગદાધરઃ ॥ ૬૭.૫૯॥

૬૭.૬૦/૧તથાસૌ મુદિતો વિપ્રાઃ કૃત્વા રૂપં ચતુર્ભુજમ્ ।
૬૭.૬૦/૨ભુક્ત્વા તત્ર વરાન્ ભોગાન્ ક્રીડાં કૃત્વા સુરૈઃ સહ ॥ ૬૭.૬૦॥

૬૭.૬૧/૧તદન્તે બ્રહ્મસદનમાયાતિ સર્વકામદમ્ ।
૬૭.૬૧/૨સિદ્ધવિદ્યાધરૈશ્ચાપિ શોભિતં સુરકિંનરૈઃ ॥ ૬૭.૬૧॥

૬૭.૬૨/૧કાલં નવતિકલ્પં તુ તત્ર ભુક્ત્વા સુખં નરઃ ।
૬૭.૬૨/૨તસ્માદ્ આયાતિ વિપ્રેન્દ્રાઃ સર્વકામફલપ્રદમ્ ॥ ૬૭.૬૨॥

૬૭.૬૩/૧રુદ્રલોકં સુરગણૈઃ સેવિતં સુખમોક્ષદમ્ ।
૬૭.૬૩/૨અનેકશતસાહસ્રૈર્વિમાનૈઃ સમલંકૃતમ્ ॥ ૬૭.૬૩॥

૬૭.૬૪/૧સિદ્ધવિદ્યાધરૈર્યક્ષૈર્ભૂષિતં દૈત્યદાનવૈઃ ।
૬૭.૬૪/૨અશીતિકલ્પકાલં તુ તત્ર ભુક્ત્વા સુખં નરઃ ॥ ૬૭.૬૪॥

૬૭.૬૫/૧તદન્તે યાતિ ગોલોકં સર્વભોગસમન્વિતમ્ ।
૬૭.૬૫/૨સુરસિદ્ધાપ્સરોભિશ્ચ શોભિતં સુમનોહરમ્ ॥ ૬૭.૬૫॥

૬૭.૬૬/૧તત્ર સપ્તતિકલ્પાંસ્તુ ભુક્ત્વા ભોગમનુત્તમમ્ ।
૬૭.૬૬/૨દુર્લભં ત્રિષુ લોકેષુ સ્વસ્થચિત્તો યથામરઃ ॥ ૬૭.૬૬॥

૬૭.૬૭/૧તસ્માદ્ આગચ્છતે લોકં પ્રાજાપત્યમનુત્તમમ્ ।

૬૭.૬૭/૨ગન્ધર્વાપ્સરસૈઃ સિદ્ધૈર્મુનિવિદ્યાધરૈર્વૃતઃ ॥ ૬૭.૬૭॥

૬૭.૬૮/૧ષષ્ટિકલ્પાન્ સુખં તત્ર ભુક્ત્વા નાનાવિધં મુદા ।
૬૭.૬૮/૨તદન્તે શક્રભવનં નાનાશ્ચર્યસમન્વિતમ્ ॥ ૬૭.૬૮॥

૬૭.૬૯/૧ગન્ધર્વૈઃ કિંનરૈઃ સિદ્ધૈઃ સુરવિદ્યાધરોરગૈઃ ।
૬૭.૬૯/૨ગુહ્યકાપ્સરસૈઃ સાધ્યૈર્વૃતૈશ્ચાન્યૈઃ સુરોત્તમૈઃ ॥ ૬૭.૬૯॥

૬૭.૭૦/૧આગત્ય તત્ર પઞ્ચાશત્ કલ્પાન્ ભુક્ત્વા સુખં નરઃ ।
૬૭.૭૦/૨સુરલોકં તતો ગત્વા વિમાનૈઃ સમલંકૃતઃ ॥ ૬૭.૭૦॥

૬૭.૭૧/૧ચત્વારિંશત્ તુ કલ્પાંસ્તુ ભુક્ત્વા ભોગાન્ સુદુર્લભાન્ ।
૬૭.૭૧/૨આગચ્છતે તતો લોકં નક્ષત્રાખ્યં સુદુર્લભમ્ ॥ ૬૭.૭૧॥

૬૭.૭૨/૧તતો ભોગાન્ વરાન્ ભુઙ્ક્તે ત્રિંશત્ કલ્પાન્ યથેપ્સિતાન્ ।
૬૭.૭૨/૨તસ્માદ્ આગચ્છતે લોકં શશાङ્કસ્ય દ્વિજોત્તમાઃ ॥ ૬૭.૭૨॥

૬૭.૭૩/૧યત્રાસૌ તિષ્ઠતે સોમઃ સર્વૈર્દેવૈરલંકૃતઃ ।
૬૭.૭૩/૨તત્ર વિંશતિકલ્પાંસ્તુ ભુક્ત્વા ભોગં સુદુર્લભમ્ ॥ ૬૭.૭૩॥

૬૭.૭૪/૧આદિત્યસ્ય તતો લોકમાયાતિ સુરપૂજિતમ્ ।
૬૭.૭૪/૨નાનાશ્ચર્યમયં પુણ્યં ગન્ધર્વાપ્સરઃસેવિતમ્ ॥ ૬૭.૭૪॥

૬૭.૭૫/૧તત્ર ભુક્ત્વા શુભાન્ ભોગાન્ દશ કલ્પાન્ દ્વિજોત્તમાઃ ।
૬૭.૭૫/૨તસ્માદ્ આયાતિ ભુવનં ગન્ધર્વાણાં સુદુર્લભમ્ ॥ ૬૭.૭૫॥

૬૭.૭૬/૧તત્ર ભોગાન્ સમસ્તાંશ્ચ કલ્પમેકં યથાસુખમ્ ।
૬૭.૭૬/૨ભુક્ત્વા ચાયાતિ મેદિન્યાં રાજા ભવતિ ધાર્મિકઃ ॥ ૬૭.૭૬॥

૬૭.૭૭/૧ચક્રવર્તી મહાવીર્યો ગુણૈઃ સર્વૈરલંકૃતઃ ।
૬૭.૭૭/૨કૃત્વા રાજ્યં સ્વધર્મેણ યજ્ઞૈરિષ્ટ્વા સુદક્ષિણૈઃ ॥ ૬૭.૭૭॥

૬૭.૭૮/૧તદન્તે યોગિનાં લોકં ગત્વા મોક્ષપ્રદં શિવમ્ ।
૬૭.૭૮/૨તત્ર ભુક્ત્વા વરાન્ ભોગાન્ યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૬૭.૭૮॥

૬૭.૭૯/૧તસ્માદ્ આગચ્છતે ચાત્ર જાયતે યોગિનાં કુલે ।
૬૭.૭૯/૨પ્રવરે વૈષ્ણવે વિપ્રા દુર્લભે સાધુસમ્મતે ॥ ૬૭.૭૯॥

૬૭.૮૦/૧ચતુર્વેદી વિપ્રવરો યજ્ઞૈરિષ્ટ્વાપ્તદક્ષિણૈઃ ।
૬૭.૮૦/૨વૈષ્ણવં યોગમાસ્થાય તતો મોક્ષમવાપ્નુયાત્ ॥ ૬૭.૮૦॥

૬૭.૮૧/૧એવં યાત્રાફલં વિપ્રા મયા સમ્યગ્ ઉદાહૃતમ્ ।
૬૭.૮૧/૨ભુક્તિમુક્તિપ્રદં નૃણાં કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૬૭.૮૧॥

૬૮.૧/૧મુનય ઊચુઃ । શ્રોતુમિચ્છામહે દેવ વિષ્ણુલોકમનામયમ્ ।
૬૮.૧/૨લોકાનન્દકરં કાન્તં સર્વાશ્ચર્યસમન્વિતમ્ ॥ ૬૮.૧॥

૬૮.૨/૧પ્રમાણં તસ્ય લોકસ્ય ભોગં કાન્તિં બલં પ્રભો ।
૬૮.૨/૨કર્મણા કેન ગચ્છન્તિ તત્ર ધર્મપરાયણાઃ ॥ ૬૮.૨॥

૬૮.૩/૧દર્શનાત્ સ્પર્શનાદ્ વાપિ તીર્થસ્નાનાદિનાપિ વા ।
૬૮.૩/૨વિસ્તરાદ્ બ્રૂહિ તત્ત્વેન પરં કૌતૂહલં હિ નઃ ॥ ૬૮.૩॥

૬૮.૪/૧બ્રહ્મોવાચ । શ ૃણુધ્વં મુનયઃ સર્વે યત્ પરં પરમં પદમ્ ।
૬૮.૪/૨ભક્તાનામીહિતં ધન્યં પુણ્યં સંસારનાશનમ્ ॥ ૬૮.૪॥

૬૮.૫/૧પ્રવરં સર્વલોકાનાં વિષ્ણ્વાખ્યં વદતો મમ ।
૬૮.૫/૨સર્વાશ્ચર્યમયં પુણ્યં સ્થાનં ત્રૈલોક્યપૂજિતમ્ ॥ ૬૮.૫॥

૬૮.૬/૧અશોકૈઃ પારિજાતૈશ્ચ મન્દારૈશ્ચમ્પકદ્રુમૈઃ ।
૬૮.૬/૨માલતીમલ્લિકાકુન્દૈર્બકુલૈર્નાગકેસરૈઃ ॥ ૬૮.૬॥

૬૮.૭/૧પુંનાગૈરતિમુક્તૈશ્ચ પ્રિયઙ્ગુતગરાર્જુનૈઃ ।
૬૮.૭/૨પાટલાચૂતખદિરૈઃ કર્ણિકારવનોજ્જ્વલૈઃ ॥ ૬૮.૭॥

૬૮.૮/૧નારઙ્ગૈઃ પનસૈર્લોધ્રૈર્નિમ્બદાડિમસર્જકૈઃ ।
૬૮.૮/૨દ્રાક્ષાલકુચખર્જૂરૈર્મધુકેન્દ્રફલૈર્દ્રુમૈઃ ॥ ૬૮.૮॥

૬૮.૯/૧કપિત્થૈર્નારિકેરૈશ્ચ તાલૈઃ શ્રીફલસમ્ભવૈઃ ।
૬૮.૯/૨કલ્પવૃક્ષૈરસંખ્યૈશ્ચ વન્યૈરન્યૈઃ સુશોભનૈઃ ॥ ૬૮.૯॥

૬૮.૧૦/૧સરલૈશ્ચન્દનૈર્નીપૈર્દેવદારુશુભાઞ્જનૈઃ ।
૬૮.૧૦/૨જાતીલવઙ્ગકઙ્કોલૈઃ કર્પૂરામોદવાસિભિઃ ॥ ૬૮.૧૦॥

૬૮.૧૧/૧તામ્બૂલપત્રનિચયૈસ્તથા પૂગીફલદ્રુમૈઃ ।
૬૮.૧૧/૨અન્યૈશ્ચ વિવિધૈર્વૃક્ષૈઃ સર્વર્તુફલશોભિતૈઃ ॥ ૬૮.૧૧॥

૬૮.૧૨/૧પુષ્પૈર્નાનાવિધૈશ્ચૈવ લતાગુચ્છસમુદ્ભવૈઃ ।
૬૮.૧૨/૨નાનાજલાશયૈઃ પુણ્યૈર્નાનાપક્ષિરુતૈર્વરૈઃ ॥ ૬૮.૧૨॥

૬૮.૧૩/૧દીર્ઘિકાશતસંઘાતૈસ્તોયપૂર્ણૈર્મનોહરૈઃ ।
૬૮.૧૩/૨કુમુદૈઃ શતપત્રૈશ્ચ પુષ્પૈઃ કોકનદૈર્વરૈઃ ॥ ૬૮.૧૩॥

૬૮.૧૪/૧રક્તનીલોત્પલૈઃ કાન્તૈઃ કહ્લારૈશ્ચ સુગન્ધિભિઃ ।
૬૮.૧૪/૨અન્યૈશ્ચ જલજૈઃ પુષ્પૈર્નાનાવર્ણૈઃ સુશોભનૈઃ ॥ ૬૮.૧૪॥

૬૮.૧૫/૧હંસકારણ્ડવાકીર્ણૈશ્ચક્રવાકોપશોભિતૈઃ ।
૬૮.૧૫/૨કોયષ્ટિકૈશ્ચ દાત્યૂહૈઃ કારણ્ડવરવાકુલૈઃ ॥ ૬૮.૧૫॥

૬૮.૧૬/૧ચાતકૈઃ પ્રિયપુત્રૈશ્ચ જીવંજીવકજાતિભિઃ ।
૬૮.૧૬/૨અન્યૈર્દિવ્યૈર્જલચરૈર્વિહારમધુરસ્વનૈઃ ॥ ૬૮.૧૬॥

૬૮.૧૭/૧એવં નાનાવિધૈર્દિવ્યૈર્નાનાશ્ચર્યસમન્વિતૈઃ ।
૬૮.૧૭/૨વૃક્ષૈર્જલાશયૈઃ પુણ્યૈર્ભૂષિતં સુમનોહરૈઃ ॥ ૬૮.૧૭॥

૬૮.૧૮/૧તત્ર દિવ્યૈર્વિમાનૈશ્ચ નાનારત્નવિભૂષિતૈઃ ।
૬૮.૧૮/૨કામગૈઃ કાઞ્ચનૈઃ શુભ્રૈર્દિવ્યગન્ધર્વનાદિતૈઃ ॥ ૬૮.૧૮॥

૬૮.૧૯/૧તરુણાદિત્યસંકાશૈરપ્સરોભિરલંકૃતૈઃ ।
૬૮.૧૯/૨હેમશય્યાસનયુતૈર્નાનાભોગસમન્વિતૈઃ ॥ ૬૮.૧૯॥

૬૮.૨૦/૧ખેચરૈઃ સપતાકૈશ્ચ મુક્તાહારાવલમ્બિભિઃ ।
૬૮.૨૦/૨નાનાવર્ણૈરસંખ્યાતૈર્જાતરૂપપરિચ્છદૈઃ ॥ ૬૮.૨૦॥

૬૮.૨૧/૧નાનાકુસુમગન્ધાઢ્યૈશ્ચન્દનાગુરુભૂષિતૈઃ ।
૬૮.૨૧/૨સુખપ્રચારબહુલૈર્નાનાવાદિત્રનિઃસ્વનૈઃ ॥ ૬૮.૨૧॥

૬૮.૨૨/૧મનોમારુતતુલ્યૈશ્ચ કિઙ્કિણીસ્તબકાકુલૈઃ ।
૬૮.૨૨/૨વિહરન્તિ પુરે તસ્મિન્ વૈષ્ણવે લોકપૂજિતે ॥ ૬૮.૨૨॥

૬૮.૨૩/૧નાનાઙ્ગનાભિઃ સતતં ગન્ધર્વાપ્સરસાદિભિઃ ।
૬૮.૨૩/૨ચન્દ્રાનનાભિઃ કાન્તાભિર્યોષિદ્ભિઃ સુમનોહરૈઃ ॥ ૬૮.૨૩॥

૬૮.૨૪/૧પીનોન્નતકુચાગ્રાભિઃ સુમધ્યાભિઃ સમન્તતઃ ।
૬૮.૨૪/૨શ્યામાવદાતવર્ણાભિર્મત્તમાતઙ્ગગામિભિઃ ॥ ૬૮.૨૪॥

૬૮.૨૫/૧પરિવાર્ય નરશ્રેષ્ઠં વીજયન્તિ સ્મ તાઃ સ્ત્રિયઃ ।
૬૮.૨૫/૨ચામરૈ રુક્મદણ્ડૈશ્ચ નાનારત્નવિભૂષિતૈઃ ॥ ૬૮.૨૫॥

૬૮.૨૬/૧ગીતનૃત્યૈસ્તથા વાદ્યૈર્મોદમાનૈર્મદાલસૈઃ ।
૬૮.૨૬/૨યક્ષવિદ્યાધરૈઃ સિદ્ધૈર્ગન્ધર્વૈરપ્સરોગણૈઃ ॥ ૬૮.૨૬॥

૬૮.૨૭/૧સુરસંઘૈશ્ચ ઋષિભિઃ શુશુભે ભુવનોત્તમમ્ ।

૬૮.૨૭/૨તત્ર પ્રાપ્ય મહાભોગાન્ પ્રાપ્નુવન્તિ મનીષિણઃ ॥ ૬૮.૨૭॥

૬૮.૨૮/૧વટરાજસમીપે તુ દક્ષિણસ્યોદધેસ્તટે ।
૬૮.૨૮/૨દૃષ્ટો યૈર્ભગવાન્ કૃષ્ણઃ પુષ્કરાક્ષો જગત્પતિઃ ॥ ૬૮.૨૮॥

૬૮.૨૯/૧ક્રીડન્ત્યપ્સરસૈઃ સાર્ધં યાવદ્ દ્યૌશ્ચન્દ્રતારકમ્ ।
૬૮.૨૯/૨પ્રતપ્તહેમસંકાશા જરામરણવર્જિતાઃ ॥ ૬૮.૨૯॥

૬૮.૩૦/૧સર્વદુઃખવિહીનાશ્ચ તૃષ્ણાગ્લાનિવિવર્જિતાઃ ।
૬૮.૩૦/૨ચતુર્ભુજા મહાવીર્યા વનમાલાવિભૂષિતાઃ ॥ ૬૮.૩૦॥

૬૮.૩૧/૧શ્રીવત્સલાઞ્છનૈર્યુક્તાઃ શઙ્ખચક્રગદાધરાઃ ।
૬૮.૩૧/૨કેચિન્ નીલોત્પલશ્યામાઃ કેચિત્ કાઞ્ચનસંનિભાઃ ॥ ૬૮.૩૧॥

૬૮.૩૨/૧કેચિન્ મરકતપ્રખ્યાઃ કેચિદ્ વૈદૂર્યસંનિભાઃ ।
૬૮.૩૨/૨શ્યામવર્ણાઃ કુણ્ડલિનસ્તથાન્યે વજ્રસંનિભાઃ ॥ ૬૮.૩૨॥

૬૮.૩૩/૧ન તાદૃક્ સર્વદેવાનાં ભાન્તિ લોકા દ્વિજોત્તમાઃ ।
૬૮.૩૩/૨યાદૃગ્ ભાતિ હરેર્લોકઃ સર્વાશ્ચર્યસમન્વિતઃ ॥ ૬૮.૩૩॥

૬૮.૩૪/૧ન તત્ર પુનરાવૃત્તિર્ગમનાજ્જાયતે દ્વિજાઃ ।
૬૮.૩૪/૨પ્રભાવાત્ તસ્ય દેવસ્ય યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૬૮.૩૪॥

૬૮.૩૫/૧વિચરન્તિ પુરે દિવ્યે રૂપયૌવનગર્વિતાઃ ।
૬૮.૩૫/૨કૃષ્ણં રામં સુભદ્રાં ચ પશ્યન્તિ પુરુષોત્તમે ॥ ૬૮.૩૫॥

૬૮.૩૬/૧પ્રતપ્તહેમસંકાશં તરુણાદિત્યસંનિભમ્ ।
૬૮.૩૬/૨પુરમધ્યે હરેર્ભાતિ મન્દિરં રત્નભૂષિતમ્ ॥ ૬૮.૩૬॥

૬૮.૩૭/૧અનેકશતસાહસ્રૈઃ પતાકૈઃ સમલંકૃતમ્ ।
૬૮.૩૭/૨યોજનાયુતવિસ્તીર્ણં હેમપ્રાકારવેષ્ટિતમ્ ॥ ૬૮.૩૭॥

૬૮.૩૮/૧નાનાવર્ણૈર્ધ્વજૈશ્ચિત્રૈઃ કલ્પિતૈઃ સુમનોહરૈઃ ।
૬૮.૩૮/૨વિભાતિ શારદો યદ્વન્ નક્ષત્રૈઃ સહ ચન્દ્રમાઃ ॥ ૬૮.૩૮॥

૬૮.૩૯/૧ચતુર્દ્વારં સુવિસ્તીર્ણં કઞ્ચુકિભિઃ સુરક્ષિતમ્ ।
૬૮.૩૯/૨પુરસપ્તકસંયુક્તં મહોત્સેકં મનોહરમ્ ॥ ૬૮.૩૯॥

૬૮.૪૦/૧પ્રથમં કાઞ્ચનં તત્ર દ્વિતીયં મરકતૈર્યુતમ્ ।
૬૮.૪૦/૨ઇન્દ્રનીલં તૃતીયં તુ મહાનીલં તતઃ પરમ્ ॥ ૬૮.૪૦॥

૬૮.૪૧/૧પુરં તુ પઞ્ચમં દીપ્તં પદ્મરાગમયં પુરમ્ ।
૬૮.૪૧/૨ષષ્ઠં વજ્રમયં વિપ્રા વૈદૂર્યં સપ્તમં પુરમ્ ॥ ૬૮.૪૧॥

૬૮.૪૨/૧નાનારત્નમયૈર્હેમ+ ।પ્રવાલાઙ્કુરભૂષિતૈઃ ।
૬૮.૪૨/૨સ્તમ્ભૈરદ્ભુતસંકાશૈર્ભાતિ તદ્ ભવનં મહત્ ॥ ૬૮.૪૨॥

૬૮.૪૩/૧દૃશ્યન્તે તત્ર સિદ્ધાશ્ચ ભાસયન્તિ દિશો દશ ।
૬૮.૪૩/૨પૌર્ણમાસ્યાં સનક્ષત્રો યથા ભાતિ નિશાકરઃ ॥ ૬૮.૪૩॥

૬૮.૪૪/૧આરૂઢસ્તત્ર ભગવાન્ સલક્ષ્મીકો જનાર્દનઃ ।
૬૮.૪૪/૨પીતામ્બરધરઃ શ્યામઃ શ્રીવત્સલક્ષ્મસંયુતઃ ॥ ૬૮.૪૪॥

૬૮.૪૫/૧જ્વલત્ સુદર્શનં ચક્રં ઘોરં સર્વાસ્ત્રનાયકમ્ ।
૬૮.૪૫/૨દધાર દક્ષિણે હસ્તે સર્વતેજોમયં હરિઃ ॥ ૬૮.૪૫॥

૬૮.૪૬/૧કુન્દેન્દુરજતપ્રખ્યં હારગોક્ષીરસંનિભમ્ ।
૬૮.૪૬/૨આદાય તં મુનિશ્રેષ્ઠાઃ સવ્યહસ્તેન કેશવઃ ॥ ૬૮.૪૬॥

૬૮.૪૭/૧યસ્ય શબ્દેન સકલં સંક્ષોભં જાયતે જગત્ ।
૬૮.૪૭/૨વિશ્રુતં પાઞ્ચજન્યેતિ સહસ્રાવર્તભૂષિતમ્ ॥ ૬૮.૪૭॥

૬૮.૪૮/૧દુષ્કૃતાન્તકરીં રૌદ્રાં દૈત્યદાનવનાશિનીમ્ ।
૬૮.૪૮/૨જ્વલદ્વહ્નિશિખાકારાં દુઃસહાં ત્રિદશૈરપિ ॥ ૬૮.૪૮॥

૬૮.૪૯/૧કૌમોદકીં ગદાં ચાસૌ ધૃતવાન્ દક્ષિણે કરે ।
૬૮.૪૯/૨વામે વિસ્ફુરતિ હ્યસ્ય શાર્ઙ્ગં સૂર્યસમપ્રભમ્ ॥ ૬૮.૪૯॥

૬૮.૫૦/૧શરૈરાદિત્યસંકાશૈર્જ્વાલામાલાકુલૈર્વરૈઃ ।
૬૮.૫૦/૨યોઽસૌ સંહરતે દેવસ્ત્રૈલોક્યં સચરાચરમ્ ॥ ૬૮.૫૦॥

૬૮.૫૧/૧સર્વાનન્દકરઃ શ્રીમાન્ સર્વશાસ્ત્રવિશારદઃ ।
૬૮.૫૧/૨સર્વલોકગુરુર્દેવઃ સર્વૈર્દેવૈર્નમસ્કૃતઃ ॥ ૬૮.૫૧॥

૬૮.૫૨/૧સહસ્રમૂર્ધા દેવેશઃ સહસ્રચરણેક્ષણઃ ।
૬૮.૫૨/૨સહસ્રાખ્યઃ સહસ્રાઙ્ગઃ સહસ્રભુજવાન્ પ્રભુઃ ॥ ૬૮.૫૨॥

૬૮.૫૩/૧સિંહાસનગતો દેવઃ પદ્મપત્રાયતેક્ષણઃ ।
૬૮.૫૩/૨વિદ્યુદ્વિસ્પષ્ટસંકાશો જગન્નાથો જગદ્ગુરુઃ ॥ ૬૮.૫૩॥

૬૮.૫૪/૧પરીતઃ સુરસિદ્ધૈશ્ચ ગન્ધર્વાપ્સરસાં ગણૈઃ ।
૬૮.૫૪/૨યક્ષવિદ્યાધરૈર્નાગૈર્મુનિસિદ્ધૈઃ સચારણૈઃ ॥ ૬૮.૫૪॥

૬૮.૫૫/૧સુપર્ણૈર્દાનવૈર્દૈત્યૈ રાક્ષસૈર્ગુહ્યકિંનરૈઃ ।
૬૮.૫૫/૨અન્યૈર્દેવગણૈર્દિવ્યૈઃ સ્તૂયમાનો વિરાજતે ॥ ૬૮.૫૫॥

૬૮.૫૬/૧તત્રસ્થા સતતં કીર્તિઃ પ્રજ્ઞા મેધા સરસ્વતી ।
૬૮.૫૬/૨બુદ્ધિર્મતિસ્તથા ક્ષાન્તિઃ સિદ્ધિમૂર્તિસ્તથા દ્યુતિઃ ॥ ૬૮.૫૬॥

૬૮.૫૭/૧ગાયત્રી ચૈવ સાવિત્રી મઙ્ગલા સર્વમઙ્ગલા ।
૬૮.૫૭/૨પ્રભા મતિસ્તથા કાન્તિસ્તત્ર નારાયણી સ્થિતા ॥ ૬૮.૫૭॥

૬૮.૫૮/૧શ્રદ્ધા ચ કૌશિકી દેવી વિદ્યુત્ સૌદામિની તથા ।
૬૮.૫૮/૨નિદ્રા રાત્રિસ્તથા માયા તથાન્યામરયોષિતઃ ॥ ૬૮.૫૮॥

૬૮.૫૯/૧વાસુદેવસ્ય સર્વાસ્તા ભવને સમ્પ્રતિષ્ઠિતાઃ ।
૬૮.૫૯/૨અથ કિં બહુનોક્તેન સર્વં તત્ર પ્રતિષ્ઠિતમ્ ॥ ૬૮.૫૯॥

૬૮.૬૦/૧ઘૃતાચી મેનકા રમ્ભા સહજન્યા તિલોત્તમા ।
૬૮.૬૦/૨ઉર્વશી ચૈવ નિમ્લોચા તથાન્યા વામના પરા ॥ ૬૮.૬૦॥

૬૮.૬૧/૧મન્દોદરી ચ સુભગા વિશ્વાચી વિપુલાનના ।
૬૮.૬૧/૨ભદ્રાઙ્ગી ચિત્રસેના ચ પ્રમ્લોચા સુમનોહરા ॥ ૬૮.૬૧॥

૬૮.૬૨/૧મુનિસમ્મોહિની રામા ચન્દ્રમધ્યા શુભાનના ।
૬૮.૬૨/૨સુકેશી નીલકેશા ચ તથા મન્મથદીપિની ॥ ૬૮.૬૨॥

૬૮.૬૩/૧અલમ્બુષા મિશ્રકેશી તથાન્યા મુઞ્જિકસ્થલા ।
૬૮.૬૩/૨ક્રતુસ્થલા વરાઙ્ગી ચ પૂર્વચિત્તિસ્તથા પરા ॥ ૬૮.૬૩॥

૬૮.૬૪/૧પરાવતી મહારૂપા શશિલેખા શુભાનના ।
૬૮.૬૪/૨હંસલીલાનુગામિન્યો મત્તવારણગામિની ॥ ૬૮.૬૪॥

૬૮.૬૫/૧બિમ્બૌષ્ઠી નવગર્ભા ચ વિખ્યાતાઃ સુરયોષિતઃ ।
૬૮.૬૫/૨એતાશ્ચાન્યા અપ્સરસો રૂપયૌવનગર્વિતાઃ ॥ ૬૮.૬૫॥

૬૮.૬૬/૧સુમધ્યાશ્ચારુવદનાઃ સર્વાલંકારભૂષિતાઃ ।
૬૮.૬૬/૨ગીતમાધુર્યસંયુક્તાઃ સર્વલક્ષણસંયુતાઃ ॥ ૬૮.૬૬॥

૬૮.૬૭/૧ગીતવાદ્યે ચ કુશલાઃ સુરગન્ધર્વયોષિતઃ ।
૬૮.૬૭/૨નૃત્યન્ત્યનુદિનં તત્ર યત્રાસૌ પુરુષોત્તમઃ ॥ ૬૮.૬૭॥

૬૮.૬૮/૧ન તત્ર રોગો નો ગ્લાનિર્ન મૃત્યુર્ન હિમાતપૌ ।

૬૮.૬૮/૨ન ક્ષુત્ પિપાસા ન જરા ન વૈરૂપ્યં ન ચાસુખમ્ ॥ ૬૮.૬૮॥

૬૮.૬૯/૧પરમાનન્દજનનં સર્વકામફલપ્રદમ્ ।
૬૮.૬૯/૨વિષ્ણુલોકાત્ પરં લોકં નાત્ર પશ્યામિ ભો દ્વિજાઃ ॥ ૬૮.૬૯॥

૬૮.૭૦/૧યે લોકાઃ સ્વર્ગલોકે તુ શ્રૂયન્તે પુણ્યકર્મણામ્ ।
૬૮.૭૦/૨વિષ્ણુલોકસ્ય તે વિપ્રાઃ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૬૮.૭૦॥

૬૮.૭૧/૧એવં હરેઃ પુરસ્થાનં સર્વભોગગુણાન્વિતમ્ ।
૬૮.૭૧/૨સર્વસૌખ્યકરં પુણ્યં સર્વાશ્ચર્યમયં દ્વિજાઃ ॥ ૬૮.૭૧॥

૬૮.૭૨/૧ન તત્ર નાસ્તિકા યાન્તિ પુરુષા વિષયાત્મકાઃ ।
૬૮.૭૨/૨ન કૃતઘ્ના ન પિશુના નો સ્તેના નાજિતેન્દ્રિયાઃ ॥ ૬૮.૭૨॥

૬૮.૭૩/૧યેઽર્ચયન્તિ સદા ભક્ત્યા વાસુદેવં જગદ્ગુરુમ્ ।
૬૮.૭૩/૨તે તત્ર વૈષ્ણવા યાન્તિ વિષ્ણુલોકં ન સંશયઃ ॥ ૬૮.૭૩॥

૬૮.૭૪/૧દક્ષિણસ્યોદધેસ્તીરે ક્ષેત્રે પરમદુર્લભે ।
૬૮.૭૪/૨દૃષ્ટ્વા કૃષ્ણં ચ રામં ચ સુભદ્રાં ચ દ્વિજોત્તમાઃ ॥ ૬૮.૭૪॥

૬૮.૭૫/૧કલ્પવૃક્ષસમીપે તુ યે ત્યજન્તિ કલેવરમ્ ।
૬૮.૭૫/૨તે તત્ર મનુજા યાન્તિ મૃતા યે પુરુષોત્તમે ॥ ૬૮.૭૫॥

૬૮.૭૬/૧વટસાગરયોર્મધ્યે યઃ સ્મરેત્ પુરુષોત્તમમ્ ।
૬૮.૭૬/૨તેઽપિ તત્ર નરા યાન્તિ યે મૃતાઃ પુરુષોત્તમે ॥ ૬૮.૭૬॥

૬૮.૭૭/૧તેઽપિ તત્ર પરં સ્થાનં યાન્તિ નાસ્ત્યત્ર સંશયઃ ।
૬૮.૭૭/૨એવં મયા મુનિશ્રેષ્ઠા વિષ્ણુલોકઃ સનાતનઃ ।
૬૮.૭૭/૩સર્વાનન્દકરઃ પ્રોક્તો ભુક્તિમુક્તિફલપ્રદઃ ॥ ૬૮.૭૭॥

૬૯.૧/૧મુનય ઊચુઃ । બહ્વાશ્ચર્યસ્ત્વયા પ્રોક્તો વિષ્ણુલોકો જગત્પતે ।
૬૯.૧/૨નિત્યાનન્દકરઃ શ્રીમાન્ ભુક્તિમુક્તિફલપ્રદઃ ॥ ૬૯.૧॥

૬૯.૨/૧ક્ષેત્રં ચ દુર્લભં લોકે કીર્તિતં પુરુષોત્તમમ્ ।
૬૯.૨/૨ત્યક્ત્વા યત્ર નરો દેહં યાતિ સાલોક્યતાં હરેઃ ॥ ૬૯.૨॥

૬૯.૩/૧સમ્યક્ ક્ષેત્રસ્ય માહાત્મ્યં ત્વયા સમ્યક્ પ્રકીર્તિતમ્ ।
૬૯.૩/૨યત્ર સ્વદેહસંત્યાગાદ્ વિષ્ણુલોકં વ્રજેન્ નરઃ ॥ ૬૯.૩॥

૬૯.૪/૧અહો મોક્ષસ્ય માર્ગોઽયં દેહત્યાગસ્ત્વયોદિતઃ ।
૬૯.૪/૨નરાણામુપકારાય પુરુષાખ્યે ન સંશયઃ ॥ ૬૯.૪॥

૬૯.૫/૧અનાયાસેન દેવેશ દેહં ત્યક્ત્વા નરોત્તમાઃ ।
૬૯.૫/૨તસ્મિન્ ક્ષેત્રે પરં વિષ્ણોઃ પદં યાન્તિ નિરામયમ્ ॥ ૬૯.૫॥

૬૯.૬/૧શ્રુત્વા ક્ષેત્રસ્ય માહાત્મ્યં વિસ્મયો નો મહાન્ અભૂત્ ।
૬૯.૬/૨પ્રયાગપુષ્કરાદીનિ ક્ષેત્રાણ્યાયતનાનિ ચ ॥ ૬૯.૬॥

૬૯.૭/૧પૃથિવ્યાં સર્વતીર્થાનિ સરિતશ્ચ સરાંસિ ચ ।
૬૯.૭/૨ન તથા તાનિ સર્વાણિ પ્રશંસસિ સુરોત્તમ ॥ ૬૯.૭॥

૬૯.૮/૧યથા પ્રશંસસિ ક્ષેત્રં પુરુષાખ્યં પુનઃ પુનઃ ।
૬૯.૮/૨જ્ઞાતોઽસ્માભિરભિપ્રાયસ્તવેદાનીં પિતામહ ॥ ૬૯.૮॥

૬૯.૯/૧યેન પ્રશંસસિ ક્ષેત્રં મુક્તિદં પુરુષોત્તમમ્ ।
૬૯.૯/૨પુરુષાખ્યસમં નૂનં ક્ષેત્રં નાસ્તિ મહીતલે ।
૬૯.૯/૩તેન ત્વં વિબુધશ્રેષ્ઠ પ્રશંસસિ પુનઃ પુનઃ ॥ ૬૯.૯॥

૬૯.૧૦/૧બ્રહ્મોવાચ । સત્યં સત્યં મુનિશ્રેષ્ઠા ભવદ્ભિઃ સમુદાહૃતમ્ ।
૬૯.૧૦/૨પુરુષાખ્યસમં ક્ષેત્રં નાસ્ત્યત્ર પૃથિવીતલે ॥ ૬૯.૧૦॥

૬૯.૧૧/૧સન્તિ યાનિ તુ તીર્થાનિ પુણ્યાન્યાયતનાનિ ચ ।
૬૯.૧૧/૨તાનિ શ્રીપુરુષાખ્યસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૬૯.૧૧॥

૬૯.૧૨/૧યથા સર્વેશ્વરો વિષ્ણુઃ સર્વલોકોત્તમોત્તમઃ ।
૬૯.૧૨/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૨॥

૬૯.૧૩/૧આદિત્યાનાં યથા વિષ્ણુઃ શ્રેષ્ઠત્વે સમુદાહૃતઃ ।
૬૯.૧૩/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૩॥

૬૯.૧૪/૧નક્ષત્રાણાં યથા સોમઃ સરસાં સાગરો યથા ।
૬૯.૧૪/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૪॥

૬૯.૧૫/૧વસૂનાં પાવકો યદ્વદ્ રુદ્રાણાં શંકરો યથા ।
૬૯.૧૫/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૫॥

૬૯.૧૬/૧વર્ણાનાં બ્રાહ્મણો યદ્વદ્ વૈનતેયશ્ચ પક્ષિણામ્ ।
૬૯.૧૬/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૬॥

૬૯.૧૭/૧શિખરિણાં યથા મેરુઃ પર્વતાનાં હિમાલયઃ ।
૬૯.૧૭/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૭॥

૬૯.૧૮/૧પ્રમદાનાં યથા લક્ષ્મીઃ સરિતાં જાહ્નવી યથા ।

૬૯.૧૮/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૮॥

૬૯.૧૯/૧ઐરાવતો ગજેન્દ્રાણાં મહર્ષીણાં ભૃગુર્યથા ।

૬૯.૧૯/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૧૯॥

૬૯.૨૦/૧સેનાનીનાં યથા સ્કન્દઃ સિદ્ધાનાં કપિલો યથા ।

૬૯.૨૦/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૦॥

૬૯.૨૧/૧ઉચ્ચૈઃશ્રવા યથાશ્વાનાં કવીનામુશના કવિઃ ।

૬૯.૨૧/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૧॥

૬૯.૨૨/૧મુનીનાં ચ યથા વ્યાસઃ કુબેરો યક્ષરક્ષસામ્ ।

૬૯.૨૨/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૨॥

૬૯.૨૩/૧ઇન્દ્રિયાણાં મનો યદ્વદ્ ભૂતાનામવની યથા ।

૬૯.૨૩/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૩॥

૬૯.૨૪/૧અશ્વત્થઃ સર્વવૃક્ષાણાં પવનઃ પ્લવતાં યથા ।

૬૯.૨૪/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૪॥

૬૯.૨૫/૧ભૂષણાનાં તુ સર્વેષાં યથા ચૂડામણિર્દ્વિજાઃ ।

૬૯.૨૫/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૫॥

૬૯.૨૬/૧ગન્ધર્વાણાં ચિત્રરથઃ શસ્ત્રાણાં કુલિશો યથા ।

૬૯.૨૬/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૬॥

૬૯.૨૭/૧અકારઃ સર્વવર્ણાનાં ગાયત્રી છન્દસાં યથા ।

૬૯.૨૭/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૭॥

૬૯.૨૮/૧સર્વાઙ્ગેભ્યો યથા શ્રેષ્ઠમુત્તમાઙ્ગં દ્વિજોત્તમાઃ ।

૬૯.૨૮/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૨૮॥

૬૯.૨૯/૧અરુન્ધતી યથા સ્ત્રીણાં સતીનાં શ્રેષ્ઠતાં ગતા ।

૬૯.૨૯/૨તથા સમસ્તતીર્થાનાં શ્રેષ્ઠં તત્ પુરુષોત્તમમ્ ॥ ૬૯.૨૯॥

૬૯.૩૦/૧યથા સમસ્તવિદ્યાનાં મોક્ષવિદ્યા પરા સ્મૃતા ।

૬૯.૩૦/૨તથા સમસ્તતીર્થાનાં શ્રેષ્ઠં તત્ પુરુષોત્તમમ્ ॥ ૬૯.૩૦॥

૬૯.૩૧/૧મનુષ્યાણાં યથા રાજા ધેનૂનામપિ કામધુક્ ।

૬૯.૩૧/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૧॥

૬૯.૩૨/૧સુવર્ણં સર્વરત્નાનાં સર્પાણાં વાસુકિર્યથા ।
૬૯.૩૨/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૨॥

૬૯.૩૩/૧પ્રહ્લાદઃ સર્વદૈત્યાનાં રામઃ શસ્ત્રભૃતાં યથા ।
૬૯.૩૩/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૩॥

૬૯.૩૪/૧ઝષાણાં મકરો યદ્વન્ મૃગાણાં મૃગરાડ્ યથા ।
૬૯.૩૪/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૪॥

૬૯.૩૫/૧સમુદ્રાણાં યથા શ્રેષ્ઠઃ ક્ષીરોદઃ સરિતાં પતિઃ ।
૬૯.૩૫/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૫॥

૬૯.૩૬/૧વરુણો યાદસાં યદ્વદ્ યમઃ સંયમિનાં યથા ।
૬૯.૩૬/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૬॥

૬૯.૩૭/૧દેવર્ષીણાં યથા શ્રેષ્ઠો નારદો મુનિસત્તમાઃ ।
૬૯.૩૭/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૭॥

૬૯.૩૮/૧ધાતૂનાં કાઞ્ચનં યદ્વત્ પવિત્રાણાં ચ દક્ષિણા ।
૬૯.૩૮/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૮॥

૬૯.૩૯/૧પ્રજાપતિર્યથા દક્ષ ઋષીણાં કશ્યપો યથા ।
૬૯.૩૯/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૩૯॥

૬૯.૪૦/૧ગ્રહાણાં ભાસ્કરો યદ્વન્ મન્ત્રાણાં પ્રણવો યથા ।
૬૯.૪૦/૨તથા સમસ્તતીર્થાનાં વરિષ્ઠં પુરુષોત્તમમ્ ॥ ૬૯.૪૦॥

૬૯.૪૧/૧અશ્વમેધસ્તુ યજ્ઞાનાં યથા શ્રેષ્ઠઃ પ્રકીર્તિતઃ ।
૬૯.૪૧/૨તથા સમસ્તતીર્થાનાં ક્ષેત્રં ચ તદ્ દ્વિજોત્તમાઃ ॥ ૬૯.૪૧॥

૬૯.૪૨/૧ઓષધીનાં યથા ધાન્યં તૃણેષુ તૃણરાડ્ યથા ।
૬૯.૪૨/૨તથા સમસ્તતીર્થાનામુત્તમં પુરુષોત્તમમ્ ॥ ૬૯.૪૨॥

૬૯.૪૩/૧યથા સમસ્તતીર્થાનાં ધર્મઃ સંસારતારકઃ ।
૬૯.૪૩/૨તથા સમસ્તતીર્થાનાં શ્રેષ્ઠં તત્ પુરુષોત્તમમ્ ॥ ૬૯.૪૩॥

૭૦.૧/૧બ્રહ્મોવાચ । સર્વેષાં ચૈવ તીર્થાનાં ક્ષેત્રાણાં ચ દ્વિજોત્તમાઃ ।
૭૦.૧/૨જપહોમવ્રતાનાં ચ તપોદાનફલાનિ ચ ॥ ૭૦.૧॥

૭૦.૨/૧ન તત્ પશ્યામિ ભો વિપ્રા યત્ તેન સદૃશં ભુવિ ।

૭૦.૨/૨કિં ચાત્ર બહુનોક્તેન ભાષિતેન પુનઃ પુનઃ ॥ ૭૦.૨॥

૭૦.૩/૧સત્યં સત્યં પુનઃ સત્યં ક્ષેત્રં તત્ પરમં મહત્ ।
૭૦.૩/૨પુરુષાખ્યં સકૃદ્ દૃષ્ટ્વા સાગરામ્ભઃસમાપ્લુતમ્ ॥ ૭૦.૩॥

૭૦.૪/૧બ્રહ્મવિદ્યાં સકૃજ્જ્ઞાત્વા ગર્ભવાસો ન વિદ્યતે ।
૭૦.૪/૨હરેઃ સંનિહિતે સ્થાન ઉત્તમે પુરુષોત્તમે ॥ ૭૦.૪॥

૭૦.૫/૧સંવત્સરમુપાસીત માસમાત્રમથાપિ વા ।
૭૦.૫/૨તેન જપ્તં હુતં તેન તેન તપ્તં તપો મહત્ ॥ ૭૦.૫॥

૭૦.૬/૧સ યાતિ પરમં સ્થાનં યત્ર યોગેશ્વરો હરિઃ ।
૭૦.૬/૨ભુક્ત્વા ભોગાન્ વિચિત્રાંશ્ચ દેવયોષિત્સમન્વિતઃ ॥ ૭૦.૬॥

૭૦.૭/૧કલ્પાન્તે પુનરાગત્ય મર્ત્યલોકે નરોત્તમઃ ।
૭૦.૭/૨જાયતે યોગિનાં વિપ્રા જ્ઞાનજ્ઞેયોદ્યતો ગૃહે ॥ ૭૦.૭॥

૭૦.૮/૧સમ્પ્રાપ્ય વૈષ્ણવં યોગં હરેઃ સ્વચ્છન્દતાં વ્રજેત્ ।
૭૦.૮/૨કલ્પવૃક્ષસ્ય રામસ્ય કૃષ્ણસ્ય ભદ્રયા સહ ॥ ૭૦.૮॥

૭૦.૯/૧માર્કણ્ડેયેન્દ્રદ્યુમ્નસ્ય માહાત્મ્યં માધવસ્ય ચ ।
૭૦.૯/૨સ્વર્ગદ્વારસ્ય માહાત્મ્યં સાગરસ્ય વિધિઃ ક્રમાત્ ॥ ૭૦.૯॥

૭૦.૧૦/૧માર્જનસ્ય યથાકાલે ભાગીરથ્યાઃ સમાગમમ્ ।
૭૦.૧૦/૨સર્વમેતન્ મયા ખ્યાતં યત્ પરં શ્રોતુમિચ્છથ ॥ ૭૦.૧૦॥

૭૦.૧૧/૧ઇન્દ્રદ્યુમ્નસ્ય માહાત્મ્યમેતચ્ચ કથિતં મયા ।
૭૦.૧૧/૨સર્વાશ્ચર્યં સમાખ્યાતં રહસ્યં પુરુષોત્તમમ્ ।
૭૦.૧૧/૩પુરાણં પરમં ગુહ્યં ધન્યં સંસારમોચનમ્ ॥ ૭૦.૧૧॥

૭૦.૧૨/૧મુનય ઊચુઃ । નહિ નસ્તૃપ્તિરસ્તીહ શ ૃણ્વતાં તીર્થવિસ્તરમ્ ।
૭૦.૧૨/૨પુનરેવ પરં ગુહ્યં વક્તુમર્હસ્યશેષતઃ ।
૭૦.૧૨/૩પરં તીર્થસ્ય માહાત્મ્યં સર્વતીર્થોત્તમોત્તમમ્ ॥ ૭૦.૧૨॥

૭૦.૧૩/૧બ્રહ્મોવાચ । ઇમમેવ પુરા પ્રશ્નં પૃષ્ટોઽસ્મિ દ્વિજસત્તમાઃ ।
૭૦.૧૩/૨નારદેન પ્રયત્નેન તદા તં પ્રોક્તવાન્ અહમ્ ॥ ૭૦.૧૩॥

૭૦.૧૪/૧નારદ ઉવાચ । તપસો યજ્ઞદાનાનાં તીર્થાનાં પાવનં સ્મૃતમ્ ।
૭૦.૧૪/૨સર્વં શ્રુતં મયા ત્વત્તો જગદ્યોને જગત્પતે ॥ ૭૦.૧૪॥

૭૦.૧૫/૧કિયન્તિ સન્તિ તીર્થાનિ સ્વર્ગમર્ત્યરસાતલે ।

૭૦.૧૫/૨સર્વેષામેવ તીર્થાનાં સર્વદા કિં વિશિષ્યતે ॥ ૭૦.૧૫॥

૭૦.૧૬/૧બ્રહ્મોવાચ । ચતુર્વિધાનિ તીર્થાનિ સ્વર્ગે મર્ત્યે રસાતલે ।
૭૦.૧૬/૨દૈવાનિ મુનિશાર્દૂલ આસુરાણ્યાર્ષાણિ ચ ॥ ૭૦.૧૬॥

૭૦.૧૭/૧માનુષાણિ ત્રિલોકેષુ વિખ્યાતાનિ સુરાદિભિઃ ।
૭૦.૧૭/૨માનુષેભ્યશ્ચ તીર્થેભ્ય આર્ષં તીર્થમનુત્તમમ્ ॥ ૭૦.૧૭॥

૭૦.૧૮/૧આર્ષેભ્યશ્ચૈવ તીર્થેભ્ય આસુરં બહુપુણ્યદમ્ ।
૭૦.૧૮/૨આસુરેભ્યસ્તથા પુણ્યં દૈવં તત્ સાર્વકામિકમ્ ॥ ૭૦.૧૮॥

૭૦.૧૯/૧બ્રહ્મવિષ્ણુશિવૈશ્ચૈવ નિર્મિતં દૈવમુચ્યતે ।
૭૦.૧૯/૨ત્રિભ્યો યદ્ એકં જાયેત તસ્માન્ નાતઃ પરં વિદુઃ ॥ ૭૦.૧૯॥

૭૦.૨૦/૧ત્રયાણામપિ લોકાનાં તીર્થં મેધ્યમુદાહૃતમ્ ।
૭૦.૨૦/૨તત્રાપિ જામ્બવં દ્વીપં તીર્થં બહુગુણોદયમ્ ॥ ૭૦.૨૦॥

૭૦.૨૧/૧જામ્બવે ભારતં વર્ષં તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ।
૭૦.૨૧/૨કર્મભૂમિર્યતઃ પુત્ર તસ્માત્ તીર્થં તદ્ ઉચ્યતે ॥ ૭૦.૨૧॥

૭૦.૨૨/૧તત્રૈવ યાનિ તીર્થાનિ યાન્યુક્તાનિ મયા તવ ।
૭૦.૨૨/૨હિમવદ્વિન્ધ્યયોર્મધ્યે ષણ્નદ્યો દેવસમ્ભવાઃ ॥ ૭૦.૨૨॥

૭૦.૨૩/૧તથૈવ દેવજા બ્રહ્મન્ દક્ષિણાર્ણવવિન્ધ્યયોઃ ।
૭૦.૨૩/૨એતા દ્વાદશ નદ્યસ્તુ પ્રાધાન્યેન પ્રકીર્તિતાઃ ॥ ૭૦.૨૩॥

૭૦.૨૪/૧અભિસમ્પૂજિતં યસ્માદ્ ભારતં બહુપુણ્યદમ્ ।
૭૦.૨૪/૨કર્મભૂમિરતો દેવૈર્વર્ષં તસ્માત્ પ્રકીર્તિતમ્ ॥ ૭૦.૨૪॥

૭૦.૨૫/૧આર્ષાણિ ચૈવ તીર્થાનિ દેવજાનિ ક્વચિત્ ક્વચિત્ ।
૭૦.૨૫/૨આસુરૈરાવૃતાન્યાસંસ્તદ્ એવાસુરમુચ્યતે ॥ ૭૦.૨૫॥

૭૦.૨૬/૧દૈવેષ્વેવ પ્રદેશેષુ તપસ્તપ્ત્વા મહર્ષયઃ ।
૭૦.૨૬/૨દૈવપ્રભાવાત્ તપસ આર્ષાણ્યપિ ચ તાન્યપિ ॥ ૭૦.૨૬॥

૭૦.૨૭/૧આત્મનઃ શ્રેયસે મુક્ત્યૈ પૂજાયૈ ભૂતયેઽથવા ।
૭૦.૨૭/૨આત્મનઃ ફલભૂત્યર્થં યશસોઽવાપ્તયે પુનઃ ॥ ૭૦.૨૭॥

૭૦.૨૮/૧માનુષૈઃ કારિતાન્યાહુર્માનુષાણીતિ નારદ ।
૭૦.૨૮/૨એવં ચતુર્વિધો ભેદસ્તીર્થાનાં મુનિસત્તમ ॥ ૭૦.૨૮॥

૭૦.૨૯/૧ભેદં ન કશ્ચિજ્જાનાતિ શ્રોતું યુક્તોઽસિ નારદ ।
૭૦.૨૯/૨બહવઃ પણ્ડિતમ્મન્યાઃ શ‍ૃણ્વન્તિ કથયન્તિ ચ ।
૭૦.૨૯/૩સુકૃતી કોઽપિ જાનાતિ વક્તું શ્રોતું નિજૈર્ગુણૈઃ ॥ ૭૦.૨૯॥

૭૦.૩૦/૧નારદ ઉવાચ । તેષાં સ્વરૂપં ભેદં ચ શ્રોતુમિચ્છામિ તત્ત્વતઃ ।
૭૦.૩૦/૨યચ્છ્રુત્વા સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૭૦.૩૦॥

૭૦.૩૧/૧બ્રહ્મન્ કૃતયુગાદૌ તુ ઉપાયોઽન્યો ન વિદ્યતે ।
૭૦.૩૧/૨તીર્થસેવાં વિના સ્વલ્પ+ ।આયાસેનાભીષ્ટદાયિનીમ્ ॥ ૭૦.૩૧॥

૭૦.૩૨/૧ન ત્વયા સદૃશો ધાતર્વક્તા જ્ઞાતાથવા ક્વચિત્ ।
૭૦.૩૨/૨ત્વં નાભિકમલે વિષ્ણોઃ સંજાતોઽખિલપૂર્વજઃ ॥ ૭૦.૩૨॥

૭૦.૩૩/૧બ્રહ્મોવાચ । ગોદાવરી ભીમરથી તુઙ્ગભદ્રા ચ વેણિકા ।
૭૦.૩૩/૨તાપી પયોઉષ્ણી વિન્ધ્યસ્ય દક્ષિણે તુ પ્રકીર્તિતાઃ ॥ ૭૦.૩૩॥

૭૦.૩૪/૧ભાગીરથી નર્મદા તુ યમુના ચ સરસ્વતી ।
૭૦.૩૪/૨વિશોકા ચ વિતસ્તા ચ હિમવત્પર્વતાશ્રિતાઃ ॥ ૭૦.૩૪॥

૭૦.૩૫/૧એતા નદ્યઃ પુણ્યતમા દેવતીર્થાન્યુદાહૃતાઃ ।
૭૦.૩૫/૨ગયઃ કોલ્લાસુરો વૃત્રસ્ત્રિપુરો હ્યન્ધકસ્તથા ॥ ૭૦.૩૫॥

૭૦.૩૬/૧હયમૂર્ધા ચ લવણો નમુચિઃ શ‍ૃઙ્ગકસ્તથા ।
૭૦.૩૬/૨યમઃ પાતાલકેતુશ્ચ મયઃ પુષ્કર એવ ચ ॥ ૭૦.૩૬॥

૭૦.૩૭/૧એતૈરાવૃતતીર્થાનિ આસુરાણિ શુભાનિ ચ ।
૭૦.૩૭/૨પ્રભાસો ભાર્ગવોઽગસ્તિર્નરનારાયણૌ તથા ॥ ૭૦.૩૭॥

૭૦.૩૮/૧વસિષ્ઠશ્ચ ભરદ્વાજો ગોતમઃ કશ્યપો મનુઃ ।
૭૦.૩૮/૨ઇત્યાદિમુનિજુષ્ટાનિ ઋષિતીર્થાનિ નારદ ॥ ૭૦.૩૮॥

૭૦.૩૯/૧અમ્બરીષો હરિશ્ચન્દ્રો માન્ધાતા મનુરેવ ચ ।
૭૦.૩૯/૨કુરુઃ કનખલશ્ચૈવ ભદ્રાશ્વઃ સગરસ્તથા ॥ ૭૦.૩૯॥

૭૦.૪૦/૧અશ્વયૂપો નાચિકેતા વૃષાકપિરરિંદમઃ ।
૭૦.૪૦/૨ઇત્યાદિમાનુષૈર્વિપ્ર નિર્મિતાનિ શુભાનિ ચ ॥ ૭૦.૪૦॥

૭૦.૪૧/૧યશસઃ ફલભૂત્યર્થં નિર્મિતાનીહ નારદ ।
૭૦.૪૧/૨સ્વતોઉદ્ભૂતાનિ દૈવાનિ યત્ર ક્વાપિ જગત્ત્રયે ।
૭૦.૪૧/૩પુણ્યતીર્થાનિ તાન્યાહુસ્તીર્થભેદો મયોદિતઃ ॥ ૭૦.૪૧॥

૭૧.૧/૧નારદ ઉવાચ । ત્રિદૈવત્યં તુ યત્ તીર્થં સર્વેભ્યો હ્યુક્તમુત્તમમ્ ।
૭૧.૧/૨તસ્ય સ્વરૂપભેદં ચ વિસ્તરેણ બ્રવીતુ મે ॥ ૭૧.૧॥

૭૧.૨/૧બ્રહ્મોવાચ । તાવદ્ અન્યાનિ તીર્થાનિ તાવત્ તાઃ પુણ્યભૂમયઃ ।
૭૧.૨/૨તાવદ્ યજ્ઞાદયો યાવત્ ત્રિદૈવત્યં ન દૃશ્યતે ॥ ૭૧.૨॥

૭૧.૩/૧ગઙ્ગેયં સરિતાં શ્રેષ્ઠા સર્વકામપ્રદાયિની ।
૭૧.૩/૨ત્રિદૈવત્યા મુનિશ્રેષ્ઠ તદુત્પત્તિમતઃ શ‍ૃણુ ॥ ૭૧.૩॥

૭૧.૪/૧વર્ષાણામયુતાત્ પૂર્વં દેવકાર્ય ઉપસ્થિતે ।
૭૧.૪/૨તારકો બલવાન્ આસીન્ મદ્વરાદ્ અતિગર્વિતઃ ॥ ૭૧.૪॥

૭૧.૫/૧દેવાનાં પરમૈશ્વર્યં હૃતં તેન બલીયસા ।
૭૧.૫/૨તતસ્તે શરણં જગ્મુર્દેવાઃ સેન્દ્રપુરોગમાઃ ॥ ૭૧.૫॥

૭૧.૬/૧ક્ષીરોદશાયિનં દેવં જગતાં પ્રપિતામહમ્ ।
૭૧.૬/૨કૃતાઞ્જલિપુટા દેવા વિષ્ણુમૂચુરનન્યગાઃ ॥ ૭૧.૬॥

૭૧.૭/૧દેવા ઊચુઃ । ત્વં ત્રાતા જગતાં નાથ દેવાનાં કીર્તિવર્ધન ।
૭૧.૭/૨સર્વેશ્વર જગદ્યોને ત્રયીમૂર્તે નમોઽસ્તુ તે ॥ ૭૧.૭॥

૭૧.૮/૧લોકસ્રષ્ટાસુરાન્ હન્તા ત્વમેવ જગતાં પતિઃ ।
૭૧.૮/૨સ્થિત્યુત્પત્તિવિનાશાનાં કારણં ત્વં જગન્મય ॥ ૭૧.૮॥

૭૧.૯/૧ત્રાતા ન કોપ્યસ્તિ જગત્ત્રયેઽપિ ।
૭૧.૯/૨શરીરિણાં સર્વવિપદ્ગતાનામ્ ।
૭૧.૯/૩ત્વયા વિના વારિજપત્ત્રનેત્ર ।
૭૧.૯/૪તાપત્રયાણાં શરણં ન ચાન્યત્ ॥ ૭૧.૯॥

૭૧.૧૦/૧પિતા ચ માતા જગતોઽખિલસ્ય ।
૭૧.૧૦/૨ત્વમેવ સેવાસુલભોઽસિ વિષ્ણો ।
૭૧.૧૦/૩પ્રસીદ પાહીશ મહાભયેભ્યો ।
<71।10/4>ઽસ્મદાર્તિહન્તા વદ કસ્ત્વદન્યઃ ॥ ૭૧.૧૦॥

૭૧.૧૧/૧આદિકર્તા વરાહસ્ત્વં મત્સ્યઃ કૂર્મસ્તથૈવ ચ ।
૭૧.૧૧/૨ઇત્યાદિરૂપભેદૈર્નો રક્ષસે ભય આગતે ॥ ૭૧.૧૧॥

૭૧.૧૨/૧હૃતસ્વામ્યાન્ સુરગણાન્ હૃતદારાન્ ગતાપદઃ ।
૭૧.૧૨/૨કસ્માન્ ન રક્ષસે દેવ અનન્યશરણાન્ હરે ॥ ૭૧.૧૨॥

૭૧.૧૩/૧બ્રહ્મોવાચ । તતઃ પ્રોવાચ ભગવાન્ શેષશાયી જગત્પતિઃ ।
૭૧.૧૩/૨કસ્માચ્ચ ભયમાપન્નં તદ્ બ્રુવન્તુ ગતજ્વરાઃ ।
૭૧.૧૩/૩તતઃ શ્રિયઃ પતિં પ્રાહુસ્તં તારકવધં પ્રતિ ॥ ૭૧.૧૩ ॥

૭૧.૧૪/૧દેવા ઊચુઃ । તારકાદ્ ભયમાપન્નં ભીષણં રોમહર્ષણમ્ ।
૭૧.૧૪/૨ન યુદ્ધૈસ્તપસા શાપૈર્હન્તું નૈવ ક્ષમા વયમ્ ॥ ૭૧.૧૪ ॥

૭૧.૧૫/૧અર્વાગ્દશાહાદ્ યો બાલસ્તસ્માન્ મૃત્યુમવાપ્સ્યતિ ।
૭૧.૧૫/૨તસ્માદ્ દેવ ન ચાન્યેભ્યસ્તત્ર નીતિર્વિધીયતામ્ ॥ ૭૧.૧૫ ॥

૭૧.૧૬/૧બ્રહ્મોવાચ । પુનર્નારાયણઃ પ્રાહ નાહં બલોત્કટઃ સુરાઃ ।
૭૧.૧૬/૨ન મત્તો મદપત્યાચ્ચ ન દેવેભ્યો વધો ભવેત્ ॥ ૭૧.૧૬ ॥

૭૧.૧૭/૧ઈશ્વરાદ્ યદિ જાયેત અપત્યં બહુશક્તિકમ્ ।
૭૧.૧૭/૨તસ્માદ્ વધમવાપ્નોતિ તારકો લોકદારુણઃ ॥ ૭૧.૧૭ ॥

૭૧.૧૮/૧તદ્ ગચ્છામઃ સુરાઃ સર્વે યતિતુમ્ ઋષિભિઃ સહ ।
૭૧.૧૮/૨ભાર્યાર્થં પ્રથમો યત્નઃ કર્તવ્યઃ પ્રભવિષ્ણુભિઃ ॥ ૭૧.૧૮ ॥

૭૧.૧૯/૧તથેત્યુક્ત્વા સુરગણા જગ્મુસ્તે ચ નગોત્તમમ્ ।
૭૧.૧૯/૨હિમવન્તં રત્નમયં મેનાં ચ હિમવત્પ્રિયામ્ ॥ ૭૧.૧૯ ॥

૭૧.૨૦/૧ઇદમૂચુઃ સર્વ એવ સભાર્યં તુહિનં ગિરિમ્ ॥ ૭૧.૨૦ ॥

૭૧.૨૧/૧દેવા ઊચુઃ । દાક્ષાયણી લોકમાતા યા શક્તિઃ સંસ્થિતા ગિરૌ ।
૭૧.૨૧/૨બુદ્ધિઃ પ્રજ્ઞા ધૃતિર્મેધા લજ્જા પુષ્ટિઃ સરસ્વતી ॥ ૭૧.૨૧ ॥

૭૧.૨૨/૧એવં ત્વનેકધા લોકે યા સ્થિતા લોકપાવની ।
૭૧.૨૨/૨દેવાનાં કાર્યસિદ્ધ્યર્થં યુવયોર્ગર્ભમાવિશત્ ॥ ૭૧.૨૨ ॥

૭૧.૨૩/૧સમુત્પન્ના જગન્માતા શમ્ભોઃ પત્ની ભવિષ્યતિ ।
૭૧.૨૩/૨અસ્માકં ભવતાં ચાપિ પાલની ચ ભવિષ્યતિ ॥ ૭૧.૨૩ ॥

૭૧.૨૪/૧બ્રહ્મોવાચ । હિમવાન્ અપિ તદ્ વાક્યં સુરાણામભિનન્દ્ય ચ ।
૭૧.૨૪/૨મેના ચાપિ મહોત્સાહા અસ્ત્વિત્યેવં વચોઽબ્રવીત્ ॥ ૭૧.૨૪ ॥

૭૧.૨૫/૧તદોત્પન્ના જગદ્ધાત્રી ગૌરી હિમવતો ગૃહે ।
૭૧.૨૫/૨શિવધ્યાનરતા નિત્યં તન્નિષ્ઠા તન્મનોગતા ॥ ૭૧.૨૫ ॥

૭૧.૨૬/૧તાં વૈ પ્રોચુઃ સુરગણા ઈશાર્થે તપ આવિશ ।
૭૧.૨૬/૨તથા હિમવતઃ પૃષ્ઠે ગૌરી તેપે તપો મહત્ ॥ ૭૧.૨૬ ॥

૭૧.૨૭/૧પુનઃ સમ્મન્ત્રયામાસુરીશો ધ્યાયતિ તાં શિવામ્ ।
૭૧.૨૭/૨આત્માનં વા તથાન્યદ્ વા ન જાનીમઃ કથં ભવઃ ॥ ૭૧.૨૭॥

૭૧.૨૮/૧મેનકાયાઃ સુતાયાં તુ ચિત્તં દધ્યાત્ સુરેશ્વરઃ ।
૭૧.૨૮/૨તત્ર નીતિર્વિધાતવ્યા તતઃ શ્રૈષ્ઠ્યમવાપ્સ્યથ ।
૭૧.૨૮/૩તતઃ પ્રાહ મહાબુદ્ધિર્વાચસ્પતિરુદારધીઃ ॥ ૭૧.૨૮॥

૭૧.૨૯/૧બૃહસ્પતિરુવાચ । યસ્ત્વયં મદનો ધીમાન્ કન્દર્પઃ પુષ્પચાપધૃક્ ।
૭૧.૨૯/૨સ વિધ્યતુ શિવં શાન્તં બાણૈઃ પુષ્પમયૈઃ શુભૈઃ ॥ ૭૧.૨૯॥

૭૧.૩૦/૧તેન વિદ્ધસ્ત્રિનેત્રોઽપિ ઈશાયાં બુદ્ધિમાદધેત્ ।
૭૧.૩૦/૨પરિણેષ્યત્યસૌ નૂનં તદા તાં ગિરિજાં હરઃ ॥ ૭૧.૩૦॥

૭૧.૩૧/૧જયિનઃ પઞ્ચબાણસ્ય ન બાણાઃ ક્વાપિ કુણ્ઠિતાઃ ।
૭૧.૩૧/૨તથોઢાયાં જગદ્ધાત્ર્યાં શમ્ભોઃ પુત્રો ભવિષ્યતિ ॥ ૭૧.૩૧॥

૭૧.૩૨/૧જાતઃ પુત્રસ્ત્રિનેત્રસ્ય તારકં સ હનિષ્યતિ ।
૭૧.૩૨/૨વસન્તં ચ સહાયાર્થં શોભિષ્ઠં કુસુમાકરમ્ ॥ ૭૧.૩૨॥

૭૧.૩૩/૧આહ્લાદનં ચ મનસા કામાયૈનં પ્રયચ્છથ ॥ ૭૧.૩૩॥

૭૧.૩૪/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સુરગણા મદનં કુસુમાકરમ્ ।
૭૧.૩૪/૨પ્રેષયામાસુરવ્યગ્રાઃ શિવાન્તિકમરિંદમાઃ ॥ ૭૧.૩૪॥

૭૧.૩૫/૧સ જગામ ત્વરા કામો ધૃતચાપો સમાધવઃ ।
૭૧.૩૫/૨રત્યા ચ સહિતઃ કામઃ કર્તું કર્મ સુદુષ્કરમ્ ॥ ૭૧.૩૫॥

૭૧.૩૬/૧ગૃહીત્વા સશરં ચાપમિદં તસ્ય મનોઽભવત્ ।
૭૧.૩૬/૨મયા વેધ્યસ્ત્વવેધ્યો વૈ શમ્ભુર્લોકગુરુઃ પ્રભુઃ ॥ ૭૧.૩૬॥

૭૧.૩૭/૧ત્રૈલોક્યજયિનો બાણાઃ શમ્ભૌ મે કિં દૃઢા ન વા ।
૭૧.૩૭/૨તેનાસૌ ચાગ્નિનેત્રેણ ભસ્મશેષસ્તદા કૃતઃ ॥ ૭૧.૩૭॥

૭૧.૩૮/૧તદ્ એવ કર્મ સુદૃઢમીક્ષિતું સુરસત્તમાઃ ।
૭૧.૩૮/૨આજગ્મુસ્તત્ર યદ્ વૃત્તં શૃણુ વિસ્મયકારકમ્ ॥ ૭૧.૩૮॥

૭૧.૩૯/૧શમ્ભું દૃષ્ટ્વા સુરગણા યાવત્ પશ્યન્તિ મન્મથમ્ ।
૭૧.૩૯/૨તાવચ્ચ ભસ્મસાદ્ભૂતં કામં દૃષ્ટ્વા ભયાતુરાઃ ।
૭૧.૩૯/૩તુષ્ટુવુસ્ત્રિદશેશાનં કૃતાઞ્જલિપુટાઃ સુરાઃ ॥ ૭૧.૩૯॥

૭૧.૪૦/૧દેવા ઊચુઃ । તારકાદ્ ભયમાપન્નં કુરુ પત્નીં ગિરેઃ સુતામ્ ॥ ૭૧.૪૦॥

૭૧.૪૧/૧બ્રહ્મોવાચ । વિદ્ધચિત્તો હરોઽપ્યાશુ મેને વાક્યં સુરોદિતમ્ ।
૭૧.૪૧/૨અરુન્ધતીં વસિષ્ઠં ચ માં તુ ચક્રધરં તથા ॥ ૭૧.૪૧॥

૭૧.૪૨/૧પ્રેષયામાસુરમરા વિવાહાય પરસ્પરમ્ ।
૭૧.૪૨/૨સમ્બન્ધોઽપિ તથાપ્યાસીદ્ ધિમવલ્લોકનાથયોઃ ॥ ૭૧.૪૨॥

૭૨.૧/૧બ્રહ્મોવાચ । હિમવત્પર્વતે શ્રેષ્ઠે નાનારત્નવિચિત્રિતે ।
૭૨.૧/૨નાનાવૃક્ષલતાકીર્ણે નાનાદ્વિજનિષેવિતે ॥ ૭૨.૧॥

૭૨.૨/૧નદીનદસરઃકૂપ+ ।તડાગાદિભિરાવૃતે ।
૭૨.૨/૨દેવગન્ધર્વયક્ષાદિ+ ।સિદ્ધચારણસેવિતે ॥ ૭૨.૨॥

૭૨.૩/૧શુભમારુતસમ્પન્ને હર્ષોત્કર્ષૈકકારણે ।
૭૨.૩/૨મેરુમન્દરકૈલાસ+ ઁમૈનાકાદિનગૈર્વૃતે ॥ ૭૨.૩॥

૭૨.૪/૧વસિષ્ઠાગસ્ત્યપૌલસ્ત્ય+ ।લોમશાદિભિરાવૃતે ।
૭૨.૪/૨મહોત્સવે વર્તમાને વિવાહઃ સમજાયત ॥ ૭૨.૪॥

૭૨.૫/૧તત્ર વેદી રત્નમયી શોભિતા સ્વર્ણભૂષિતા ।
૭૨.૫/૨વજ્રમાણિક્યવૈદૂર્ય+ ।તન્મયસ્તમ્ભશોભિતા ॥ ૭૨.૫॥

૭૨.૬/૧જયાલક્ષ્મીશુભાક્ષાન્તિ+ ।કીર્તિપુષ્ટ્યાદિસંવૃતા ।
૭૨.૬/૨મેરુમન્દરકૈલાસ+ ।રૈવતૈઃ પરિશોભિતૈઃ ॥ ૭૨.૬॥

૭૨.૭/૧પૂજિતો લોકનાથેન વિષ્ણુના પ્રભવિષ્ણુના ।
૭૨.૭/૨મૈનાકઃ પર્વતશ્રેષ્ઠો રેજેઽતીવ હિરણ્મયઃ ॥ ૭૨.૭॥

૭૨.૮/૧ઋષયો લોકપાલાશ્ચ આદિત્યાઃ સમરુદ્ગણાઃ ।
૭૨.૮/૨વિવાહે વેદિકાં ચક્રુર્દેવદેવસ્ય શૂલિનઃ ॥ ૭૨.૮॥

૭૨.૯/૧વિશ્વકર્મા સ્વયં ત્વષ્ટા વેદીં ચક્રે સતોરણામ્ ।
૭૨.૯/૨સુરભી નન્દિની નન્દા સુનન્દા કામદોહિની ॥ ૭૨.૯॥

૭૨.૧૦/૧આભિસ્તુ શોભિતેશાન્યા વિવાહઃ સમજાયત ।
૭૨.૧૦/૨સમુદ્રાઃ સરિતો નાગા ઓષધ્યો લોકમાતરઃ ॥ ૭૨.૧૦॥

૭૨.૧૧/૧સવનસ્પતિબીજાશ્ચ સર્વે તત્ર સમાયયુઃ ।
૭૨.૧૧/૨ભુવઃ કર્મ ઇલા ચક્રે ઓષધ્યસ્ત્વન્નકર્મ ચ ॥ ૭૨.૧૧॥

૭૨.૧૨/૧વરુણઃ પાનકર્માણિ દાનકર્મ ધનાધિપઃ ।
૭૨.૧૨/૨અગ્નિશ્ચકાર તત્રાન્નં યચ્ચેષ્ટં લોકનાથયોઃ ॥ ૭૨.૧૨॥

૭૨.૧૩/૧તત્ર તત્ર પૃથક્ પૂજાં ચક્રે વિષ્ણુઃ સનાતનઃ ।
૭૨.૧૩/૨વેદાશ્ચ સરહસ્યા વૈ ગાયન્તિ ચ હસન્તિ ॥ ૭૨.૧૩॥

૭૨.૧૪/૧નૃત્યન્ત્યપ્સરસઃ સર્વા જગુર્ગન્ધર્વકિંનરાઃ ।
૭૨.૧૪/૨લાજાધૃક્ ચાપિ મૈનાકો બભૂવ મુનિસત્તમ ॥ ૭૨.૧૪॥

૭૨.૧૫/૧પુણ્યાહવાચનં વૃત્તમન્તર્વેશ્મનિ નારદ ।
૭૨.૧૫/૨વેદિકાયામુપાવિષ્ટૌ દમ્પતી સુરસત્તમૌ ॥ ૭૨.૧૫॥

૭૨.૧૬/૧પ્રતિષ્ઠાપ્યાગ્નિં વિધિવદ્ અશ્માનં ચાપિ પુત્રક ।
૭૨.૧૬/૨હુત્વા લાજાંશ્ચ વિધિવત્ પ્રદક્ષિણમથાકરોત્ ॥ ૭૨.૧૬॥

૭૨.૧૭/૧અશ્મનઃ સ્પર્શહેતોશ્ચ દેવ્યઙ્ગુષ્ઠં કરેઽસ્પૃશત્ ।
૭૨.૧૭/૨વિષ્ણુના પ્રેરિતઃ શમ્ભુર્દક્ષિણસ્ય પદસ્ય ચ ॥ ૭૨.૧૭॥

૭૨.૧૮/૧તામદર્શમહં તત્ર હોમં કુર્વન્ હરાન્તિકે ।
૭૨.૧૮/૨દૃષ્ટેઽઙ્ગુષ્ઠે દુષ્ટબુદ્ધ્યા વીર્યં સુસ્રાવ મે તદા ॥ ૭૨.૧૮॥

૭૨.૧૯/૧લજ્જયા કલુષીભૂતઃ સ્કન્નં વીર્યમચૂર્ણયમ્ ।
૭૨.૧૯/૨મદ્વીર્યાચ્ચૂર્ણિતાત્ સૂક્ષ્માદ્ વાલખિલ્યાસ્તુ જજ્ઞિરે ॥ ૭૨.૧૯॥

૭૨.૨૦/૧તતો મહાન્ અભૂત્ તત્ર હાહાકારઃ સુરોદિતઃ ।
૭૨.૨૦/૨લજ્જયા પરિભૂતોઽહં નિર્ગતસ્તુ તદાસનાત્ ॥ ૭૨.૨૦॥

૭૨.૨૧/૧પશ્યત્સુ દેવસંઘેષુ તૂષ્ણીમ્ભૂતેષુ નારદ ।
૭૨.૨૧/૨ગચ્છન્તં માં મહાદેવો દૃષ્ટ્વા નન્દિનમબ્રવીત્ ॥ ૭૨.૨૧॥

૭૨.૨૨/૧શિવ ઉવાચ । બ્રહ્માણમાહ્વયસ્વેહ ગતપાપં કરોમ્યહમ્ ।
૭૨.૨૨/૨કૃતાપરાધેઽપિ જને સન્તઃ સકૃપમાનસાઃ ।
૭૨.૨૨/૩મોહયન્ત્યપિ વિદ્વાંસં વિષયાણામિયં સ્થિતિઃ ॥ ૭૨.૨૨॥

૭૨.૨૩/૧બ્રહ્મોવાચ । એવમુક્ત્વા સ ભગવાન્ ઉમયા સહિતઃ શિવઃ ।
૭૨.૨૩/૨મમાનુકમ્પયા ચૈવ લોકાનાં હિતકામ્યયા ॥ ૭૨.૨૩॥

૭૨.૨૪/૧એતચ્ચકાર લોકેશઃ શ઼ૃણુ નારદ યત્નતઃ ।
૭૨.૨૪/૨પાપિનાં પાપમોક્ષાય ભૂમિરાપો ભવિષ્યતિ ॥ ૭૨.૨૪॥

૭૨.૨૫/૧તયોશ્ચ સારસર્વસ્વમાહરિષ્યામિ પાવનમ્ ।

૭૨.૨૫/૨એવં નિશ્ચિત્ય ભગવાંસ્તયોઃ સારં સમાહરત્ ॥ ૭૨.૨૫॥

૭૨.૨૬/૧ભૂમિં કમણ્ડલું કૃત્વા તત્રાપઃ સંનિવેશ્ય ચ ।
૭૨.૨૬/૨પાવમાન્યાદિભિઃ સૂક્તૈરભિમન્ત્ર્ય ચ યત્નતઃ ॥ ૭૨.૨૬॥

૭૨.૨૭/૧ત્રિજગત્પાવનીં શક્તિં તત્ર સસ્માર પાપહા ।
૭૨.૨૭/૨મામુવાચ સ લોકેશો ગૃહાણેમં કમણ્ડલુમ્ ॥ ૭૨.૨૭॥

૭૨.૨૮/૧આપો વૈ માતરો દેવ્યો ભૂમિર્માતા તથાપરા ।
૭૨.૨૮/૨સ્થિત્યુત્પત્તિવિનાશાનાં હેતુત્વમુભયોઃ સ્થિતમ્ ॥ ૭૨.૨૮॥

૭૨.૨૯/૧અત્ર પ્રતિષ્ઠિતો ધર્મો હ્યત્ર યજ્ઞઃ સનાતનઃ ।
૭૨.૨૯/૨અત્ર ભુક્તિશ્ચ મુક્તિશ્ચ સ્થાવરં જઙ્ગમં તથા ॥ ૭૨.૨૯॥

૭૨.૩૦/૧સ્મરણાન્ માનસં પાપં વચનાદ્ વાચિકં તથા ।
૭૨.૩૦/૨સ્નાનપાનાભિષેકાચ્ચ પ્રણશ્યત્યપિ કાયિકમ્ ॥ ૭૨.૩૦॥

૭૨.૩૧/૧એતદ્ એવામૃતં લોકે નૈતસ્માત્ પાવનં પરમ્ ।
૭૨.૩૧/૨મયાભિમન્ત્રિતં બ્રહ્મન્ ગૃહાણેમં કમણ્ડલુમ્ ॥ ૭૨.૩૧॥

૭૨.૩૨/૧અત્રત્યં વારિ યઃ કશ્ચિત્ સ્મરેદ્ અપિ પઠેદ્ અપિ ।
૭૨.૩૨/૨સ સર્વકામાન્ આપ્નોતિ ગૃહાણેમં કમણ્ડલુમ્ ॥ ૭૨.૩૨॥

૭૨.૩૩/૧ભૂતેભ્યશ્ચાપિ પઞ્ચભ્ય આપો ભૂતં મહોદિતમ્ ।
૭૨.૩૩/૨તાસામુત્કૃષ્ટમેતસ્માદ્ ગૃહાણેમં કમણ્ડલુમ્ ॥ ૭૨.૩૩॥

૭૨.૩૪/૧અત્ર યદ્ વારિ શોભિષ્ઠં પુણ્યં પાવનમેવ ચ ।
૭૨.૩૪/૨સ્પૃષ્ટ્વા સ્મૃત્વા ચ દૃષ્ટ્વા ચ બ્રહ્મન્ પાપાદ્ વિમોક્ષ્યસે ॥ ૭૨.૩૪॥

૭૨.૩૫/૧એવમુક્ત્વા મહાદેવઃ પ્રાદાન્ મમ કમણ્ડલુમ્ ।
૭૨.૩૫/૨તતઃ સુરગણાઃ સર્વે ભક્ત્યા પ્રોચુઃ સુરેશ્વરમ્ ।
૭૨.૩૫/૩આહ્લાદશ્ચ મહાંસ્તત્ર જયશબ્દો વ્યવર્તત ॥ ૭૨.૩૫॥

૭૨.૩૮/૧દેવોત્સવે માતુરજઃ પદાગ્રમ્ ।
૭૨.૩૮/૨સમીક્ષ્ય પાપાત્ પતિતત્વમાપ ।
૭૨.૩૮/૩પ્રાદાત્ કૃપાલુઃ સ્મરણાત્ પવિત્રામ્ ।
૭૨.૩૮/૪ગઙ્ગાં પિતા પુણ્યકમણ્ડલુસ્થામ્ ॥ ૭૨.૩૮॥

૭૩.૧/૧નારદ ઉવાચ । કમણ્ડલુસ્થિતા દેવી તવ પુણ્યવિવર્ધિની ।
૭૩.૧/૨યથા મર્ત્યં ગતા નાથ તન્ મે વિસ્તરતો વદ ॥ ૭૩.૧॥

૭૩.૨/૧બ્રહ્મોવાચ । બલિર્નામ મહાદૈત્યો દેવારિરપરાજિતઃ ।
૭૩.૨/૨ધર્મેણ યશસા ચૈવ પ્રજાસંરક્ષણેન ચ ॥ ૭૩.૨॥

૭૩.૩/૧ગુરુભક્ત્યા ચ સત્યેન વીર્યેણ ચ બલેન ચ ।
૭૩.૩/૨ત્યાગેન ક્ષમયા ચૈવ ત્રૈલોક્યે નોપમીયતે ॥ ૭૩.૩॥

૭૩.૪/૧તસ્યર્દ્ધિમુન્નતાં દૃષ્ટ્વા દેવાશ્ચિન્તાપરાયણાઃ ।
૭૩.૪/૨મિથઃ સમૂચુરમરા જેષ્યામો વૈ કથં બલિમ્ ॥ ૭૩.૪॥

૭૩.૫/૧તસ્મિઞ્ શાસતિ રાજ્યં તુ ત્રૈલોક્યં હતકણ્ટકમ્ ।
૭૩.૫/૨નારયો વ્યાધયો વાપિ નાધયો વા કથંચન ॥ ૭૩.૫॥

૭૩.૬/૧અનાવૃષ્ટિરધર્મો વા નાસ્તિશબ્દો ન દુર્જનઃ ।
૭૩.૬/૨સ્વપ્નેઽપિ નૈવ દૃશ્યેત બલૌ રાજ્યં પ્રશાસતિ ॥ ૭૩.૬॥

૭૩.૭/૧તસ્યોન્નતિશરૈર્ભગ્નાઃ કીર્તિખડ્ગદ્વિધાકૃતાઃ ।
૭૩.૭/૨તસ્યાજ્ઞાશક્તિભિન્નાઙ્ગા દેવાઃ શર્મ ન લેભિરે ॥ ૭૩.૭॥

૭૩.૮/૧તતઃ સમ્મન્ત્રયામાસુઃ કૃત્વા માત્સર્યમગ્રતઃ ।
૭૩.૮/૨તદ્યશોગ્નિપ્રદીપ્તાઙ્ગા વિષ્ણું જગ્મુઃ સુવિહ્વલાઃ ॥ ૭૩.૮॥

૭૩.૯/૧દેવા ઊચુઃ । આર્તાઃ સ્મ ગતસત્ત્વાઃ સ્મ શઙ્ખચક્રગદાધર ।
૭૩.૯/૨અસ્મદર્થે ભવાન્ નિત્યમાયુધાનિ બિભર્તિ ચ ॥ ૭૩.૯॥

૭૩.૧૦/૧ત્વયિ નાથે જગન્નાથ અસ્માકં દુઃખમીદૃશમ્ ।
૭૩.૧૦/૨ત્વાં તુ પ્રણમતી વાણી કથં દૈત્યં નમસ્યતિ ॥ ૭૩.૧૦॥

૭૩.૧૧/૧મનસા કર્મણા વાચા ત્વામેવ શરણં ગતાઃ ।
૭૩.૧૧/૨ત્વદઙ્ઘ્રિશરણાઃ સન્તઃ કથં દૈત્યં નમેમહિ ॥ ૭૩.૧૧॥

૭૩.૧૨/૧યજામસ્ત્વાં મહાયજ્ઞૈર્વદામો વાગ્ભિરચ્યુત ।
૭૩.૧૨/૨ત્વદેકશરણાઃ સન્તઃ કથં દૈત્યં નમેમહિ ॥ ૭૩.૧૨॥

૭૩.૧૩/૧ત્વદ્વીર્યમાશ્રિતા નિત્યં દેવાઃ સેન્દ્રપુરોગમાઃ ।
૭૩.૧૩/૨ત્વયા દત્તં પદં પ્રાપ્ય કથં દૈત્યં નમેમહિ ॥ ૭૩.૧૩॥

૭૩.૧૪/૧સ્રષ્ટા ત્વં બ્રહ્મમૂર્ત્યા તુ વિષ્ણુર્ભૂત્વા તુ રક્ષસિ ।
૭૩.૧૪/૨સંહર્તા રુદ્રશક્ત્યા ત્વં કથં દૈત્યં નમેમહિ ॥ ૭૩.૧૪॥

૭૩.૧૫/૧ઐશ્વર્યં કારણં લોકે વિનૈશ્વર્યં તુ કિં ફલમ્ ।
૭૩.૧૫/૨હતૈશ્વર્યાઃ સુરેશાન કથં દૈત્યં નમેમહિ ॥ ૭૩.૧૫॥

૭૩.૧૬/૧અનાદિસ્ત્વં જગદ્ધાતરનન્તસ્ત્વં જગદ્ગુરુઃ ।
૭૩.૧૬/૨અન્તવન્તમમું શત્રું કથં દૈત્યં નમેમહિ ॥ ૭૩.૧૬॥

૭૩.૧૭/૧તવૈશ્વર્યેણ પુષ્ટાઙ્ગા જિત્વા ત્રૈલોક્યમોજસા ।
૭૩.૧૭/૨સ્થિરાઃ સ્યામઃ સુરેશાન કથં દૈત્યં નમેમહિ ॥ ૭૩.૧૭॥

૭૩.૧૮/૧બ્રહ્મોવાચ । ઇત્યેતદ્ એવ વચનં શ્રુત્વા દૈતેયસૂદનઃ ।
૭૩.૧૮/૨ઉવાચ સર્વાન્ અમરાન્ દેવાનાં કાર્યસિદ્ધયે ॥ ૭૩.૧૮॥

૭૩.૧૯/૧શ્રીભગવાન્ ઉવાચ । મદ્ભક્તોઽસૌ બલિર્દૈત્યો
હ્યવધ્યોઽસૌ સુરાસુરૈઃ ।
૭૩.૧૯/૨યથા ભવન્તો મત્પોષ્યાસ્તથા પોષ્યો બલિર્મમ ॥ ૭૩.૧૯॥

૭૩.૨૦/૧વિના તુ સંગરં દેવા હત્વા રાજ્યં ત્રિવિષ્ટપે ।
૭૩.૨૦/૨બલિં નિબધ્ય મન્ત્રોક્ત્યા રાજ્યં વઃ પ્રદદામ્યહમ્ ॥ ૭૩.૨૦॥

૭૩.૨૧/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સુરગણાઃ સંજગ્મુર્દિવમેવ હિ ।
૭૩.૨૧/૨ભગવાન્ અપિ દેવેશો હ્યદિત્યા ગર્ભમાવિશત્ ॥ ૭૩.૨૧॥

૭૩.૨૨/૧તસ્મિન્ન્ ઉત્પદ્યમાને તુ ઉત્સવાશ્ચ બભૂવિરે ।
૭૩.૨૨/૨જાતોઽસૌ વામનો બ્રહ્મન્ યજ્ઞેશો યજ્ઞપૂરુષઃ ॥ ૭૩.૨૨॥

૭૩.૨૩/૧એતસ્મિન્ન્ અન્તરે બ્રહ્મન્ હયમેધાય દીક્ષિતઃ ।
૭૩.૨૩/૨બલિર્બલવતાં શ્રેષ્ઠ ઋષિમુખ્યૈઃ સમાહિતઃ ॥ ૭૩.૨૩॥

૭૩.૨૪/૧પુરોધસા ચ શુક્રેણ વેદવેદાઙ્ગવેદિના ।
૭૩.૨૪/૨મખે તસ્મિન્ વર્તમાને યજમાને બલૌ તથા ॥ ૭૩.૨૪॥

૭૩.૨૫/૧આર્ત્વિજ્ય ઋષિમુખ્યે તુ શુક્રે તત્ર પુરોધસિ ।
૭૩.૨૫/૨હવિર્ભાગાર્થમાસન્ન+ ।દેવગન્ધર્વપન્નગે ॥ ૭૩.૨૫॥

૭૩.૨૬/૧દીયતાં ભુજ્યતાં પૂજા ક્રિયતાં ચ પૃથક્ પૃથક્ ।
૭૩.૨૬/૨પરિપૂર્ણં પુનઃ પૂર્ણમેવં વાક્યે પ્રવર્તતિ ॥ ૭૩.૨૬॥

૭૩.૨૭/૧શનૈસ્તદ્દેશમભ્યાગાદ્ વામનઃ સામગાયનઃ ।
૭૩.૨૭/૨યજ્ઞવાટમનુપ્રાપ્તો વામનશ્ચિત્રકુણ્ડલઃ ॥ ૭૩.૨૭॥

૭૩.૨૮/૧પ્રશંસમાનસ્તં યજ્ઞં વામનં પ્રેક્ષ્ય ભાર્ગવઃ ।
૭૩.૨૮/૨બ્રહ્મરૂપધરં દેવં વામનં દૈત્યસૂદનમ્ ॥ ૭૩.૨૮॥

૭૩.૨૯/૧દાતારં યજ્ઞતપસાં ફલં હન્તારં રક્ષસામ્ ।
૭૩.૨૯/૨જ્ઞાત્વા ત્વરન્ન્ અથોવાચ રાજાનં ભૂરિતેજસમ્ ॥ ૭૩.૨૯ ॥

૭૩.૩૦/૧જેતારં ક્ષત્રધર્મેણ દાતારં ભક્તિતો ધનમ્ ।
૭૩.૩૦/૨બલિં બલવતાં શ્રેષ્ઠં સભાર્યં દીક્ષિતં મખે ॥ ૭૩.૩૦ ॥

૭૩.૩૧/૧ધ્યાયન્તં યજ્ઞપુરુષમુત્સૃજન્તં હવિઃ પૃથક્ ।
૭૩.૩૧/૨તમાહ ભૃગુશાર્દૂલઃ શુક્રઃ પરમબુદ્ધિમાન્ ॥ ૭૩.૩૧ ॥

૭૩.૩૨/૧શુક્ર ઉવાચ । યોઽસૌ તવ મખં પ્રાપ્તો બ્રાહ્મણો વામનાકૃતિઃ ।
૭૩.૩૨/૨નાસૌ વિપ્રો બલે સત્યં યજ્ઞેશો યજ્ઞવાહનઃ ॥ ૭૩.૩૨ ॥

૭૩.૩૩/૧શિશુસ્ત્વાં યાચિતું પ્રાપ્તો નૂનં દેવહિતાય હિ ।
૭૩.૩૩/૨મયા ચ સહ સમ્મન્ત્ર્ય પશ્ચાદ્ દેયં ત્વયા પ્રભો ॥ ૭૩.૩૩ ॥

૭૩.૩૪/૧બ્રહ્મોવાચ । બલિસ્તુ ભાર્ગવં પ્રાહ પુરોધસમરિંદમઃ ॥ ૭૩.૩૪ ॥

૭૩.૩૫/૧બલિરુવાચ । ધન્યોઽહં મમ યજ્ઞેશો ગૃહમાયાતિ મૂર્તિમાન્ ।
૭૩.૩૫/૨આગત્ય યાચતે કિંચિત્ કિં મન્ત્ર્યમવશિષ્યતે ॥ ૭૩.૩૫ ॥

૭૩.૩૬/૧બ્રહ્મોવાચ । એવમુક્ત્વા સભાર્યોઽસૌ શુક્રેણ ચ પુરોધસા ।
૭૩.૩૬/૨જગામ યત્ર વિપ્રેન્દ્રો વામનોઽદિતિનન્દનઃ ॥ ૭૩.૩૬ ॥

૭૩.૩૭/૧કૃતાઞ્જલિપુટો ભૂત્વા કેનાર્થિત્વં તદ્ ઉચ્યતામ્ ।
૭૩.૩૭/૨વામનોઽપિ તદા પ્રાહ પદત્રયમિતાં ભુવમ્ ॥ ૭૩.૩૭ ॥

૭૩.૩૮/૧દેહિ રાજેન્દ્ર નાન્યેન કાર્યમસ્તિ ધનેન કિમ્ ।
૭૩.૩૮/૨તથેત્યુક્ત્વા તુ કલશાન્ નાનારત્નવિભૂષિતાત્ ॥ ૭૩.૩૮ ॥

૭૩.૩૯/૧વારિધારાં પુરસ્કૃત્ય વામનાય ભુવં દદૌ ।
૭૩.૩૯/૨પશ્યત્સુ ઋષિમુખ્યેષુ શુક્રે ચૈવ પુરોધસિ ॥ ૭૩.૩૯ ॥

૭૩.૪૦/૧પશ્યત્સુ લોકનાથેષુ વામનાય ભુવં દદૌ ।
૭૩.૪૦/૨પશ્યત્સુ દૈત્યસંઘેષુ જયશબ્દે પ્રવર્તતિ ॥ ૭૩.૪૦ ॥

૭૩.૪૧/૧શનૈસ્તુ વામનઃ પ્રાહ સ્વસ્તિ રાજન્ સુખી ભવ ।
૭૩.૪૧/૨દેહિ મે સમ્મિતાં ભૂમિં ત્રિપદામાશુ ગમ્યતે ॥ ૭૩.૪૧ ॥

૭૩.૪૨/૧તથેત્યુવાચ દૈત્યેશો યાવત્ પશ્યતિ વામનમ્ ।
૭૩.૪૨/૨યજ્ઞેશો યજ્ઞપુરુષશ્ચન્દ્રાદિત્યૌ સ્તનાન્તરે ॥ ૭૩.૪૨ ॥

૭૩.૪૩/૧યથા સ્યાતાં સુરા મૂર્ધ્નિ વવૃધે વિક્રમાકૃતિઃ ।
૭૩.૪૩/૨અનન્તશ્ચાચ્યુતો દેવો વિક્રાન્તો વિક્રમાકૃતિઃ ।
૭૩.૪૩/૩તં દૃષ્ટ્વા દૈત્યરાટ્ પ્રાહ સભાર્યો વિનયાન્વિતઃ ॥ ૭૩.૪૩॥

૭૩.૪૪/૧બલિરુવાચ । ક્રમસ્વ વિષ્ણો લોકેશ યાવચ્છક્ત્યા જગન્મય ।
૭૩.૪૪/૨જિતં મયા સુરેશાન સર્વભાવેન વિશ્વકૃત્ ॥ ૭૩.૪૪॥

૭૩.૪૫/૧બ્રહ્મોવાચ । તદ્વાક્યસમકાલં તુ વિષ્ણુઃ પ્રાહ મહાક્રતુઃ ॥ ૭૩.૪૫॥

૭૩.૪૬/૧વિષ્ણુરુવાચ । દૈત્યેશ્વર મહાબાહો ક્રમિષ્યે પશ્ય
દૈત્યરાટ્ ॥ ૭૩.૪૬॥

૭૩.૪૭/૧બ્રહ્મોવાચ । એવં વદન્તં સ પ્રાહ ક્રમ વિષ્ણો પુનઃ પુનઃ ॥ ૭૩.૪૭॥

૭૩.૪૮/૧બ્રહ્મોવાચ । કૂર્મપૃષ્ઠે પદં ન્યસ્ય બલિયજ્ઞે પદં ન્યસત્ ।
૭૩.૪૮/૨દ્વિતીયં તુ પદં પ્રાપ બ્રહ્મલોકં સનાતનમ્ ॥ ૭૩.૪૮॥

૭૩.૪૯/૧તૃતીયસ્ય પદસ્યાત્ર સ્થાનં નાસ્ત્યસુરેશ્વર ।
૭૩.૪૯/૨ક્વ ક્રમિષ્યે ભુવં દેહિ બલિં તં હરિરબ્રવીત્ ।
૭૩.૪૯/૩વિહસ્ય બલિરપ્યાહ સભાર્યઃ સ કૃતાઞ્જલિઃ ॥ ૭૩.૪૯॥

૭૩.૫૦/૧બલિરુવાચ । ત્વયા સૃષ્ટં જગત્ સર્વં ન સ્રષ્ટાહં સુરેશ્વર ।
૭૩.૫૦/૨ત્વદ્દોષાદ્ અલ્પમભવત્ કિં કરોમિ જગન્મય ॥ ૭૩.૫૦॥

૭૩.૫૧/૧તથાપિ નાનૃતપૂર્વં કદાચિદ્ વચ્મિ કેશવ ।
૭૩.૫૧/૨સત્યવાક્યં ચ માં કુર્વન્ મત્પૃષ્ઠે હિ પદં ન્યસ ॥ ૭૩.૫૧॥

૭૩.૫૨/૧બ્રહ્મોવાચ । તતઃ પ્રસન્નો ભગવાંસ્ત્રયીમૂર્તિઃ સુરાર્ચિતઃ ॥ ૭૩.૫૨॥

૭૩.૫૩/૧ભગવાન્ ઉવાચ । વરં વૃણીષ્વ ભદ્રં તે ભક્ત્યા
પ્રીતોઽસ્મિ દૈત્યરાટ્ ॥ ૭૩.૫૩॥

૭૩.૫૪/૧બ્રહ્મોવાચ । સ તુ પ્રાહ જગન્નાથં ન યાચે ત્વાં ત્રિવિક્રમમ્ ।
૭૩.૫૪/૨સ તુ પ્રાદાત્ સ્વયં વિષ્ણુઃ પ્રીતઃ સન્ મનસેપ્સિતમ્ ॥ ૭૩.૫૪॥

૭૩.૫૫/૧રસાતલપતિત્વં ચ ભાવિ ચેન્દ્રપદં પુનઃ ।
૭૩.૫૫/૨આત્માધિપત્યં ચ હરિરવિનાશિ યશો વિભુઃ ॥ ૭૩.૫૫॥

૭૩.૫૬/૧એવં દત્ત્વા બલેઃ સર્વં સસુતં ભાર્યયાન્વિતમ્ ।
૭૩.૫૬/૨રસાતલે હરિઃ સ્થાપ્ય બલિં ત્વમરવૈરિણમ્ ॥ ૭૩.૫૬॥

૭૩.૫૭/૧શતક્રતોસ્તથા પ્રાદાત્ સુરરાજ્યં યથાભવમ્ ।
૭૩.૫૭/૨એતસ્મિન્ન્ અન્તરે તત્ર પદં પ્રાગાત્ સુરાર્ચિતમ્ ॥ ૭૩.૫૭॥

૭૩.૫૮/૧દ્વિતીયં તત્ પદં વિષ્ણોઃ પિતુર્મમ મહામતે ।
૭૩.૫૮/૨યત્ પદં સમનુપ્રાપ્તં ગૃહં દૃષ્ટ્વાપ્યચિન્તયમ્ ॥ ૭૩.૫૮॥

૭૩.૫૯/૧કિં કૃત્યં યચ્છુભં મે સ્યાત્ પદે વિષ્ણોઃ સમાગતે ।
૭૩.૫૯/૨સર્વસ્વં ચ સમાલોક્ય શ્રેષ્ઠો મે સ્યાત્ કમણ્ડલુઃ ॥ ૭૩.૫૯॥

૭૩.૬૦/૧તદ્ વારિ યત્ પુણ્યતમં દત્તં ચ ત્રિપુરારિણા ।
૭૩.૬૦/૨વરં વરેણ્યં વરદં વરં શાન્તિકરં પરમ્ ॥ ૭૩.૬૦॥

૭૩.૬૧/૧શુભં ચ શુભદં નિત્યં ભુક્તિમુક્તિપ્રદાયકમ્ ।
૭૩.૬૧/૨માતૃસ્વરૂપં લોકાનામમૃતં ભેષજં શુચિ ॥ ૭૩.૬૧॥

૭૩.૬૨/૧પવિત્રં પાવનં પૂજ્યં જ્યેષ્ઠં શ્રેષ્ઠં ગુણાન્વિતમ્ ।
૭૩.૬૨/૨સ્મરણાદ્ એવ લોકાનાં પાવનં કિં નુ દર્શનાત્ ॥ ૭૩.૬૨॥

૭૩.૬૩/૧તાદૃગ્ વારિ શુચિર્ભૂત્વા કલ્પયેઽર્ઘાય મે પિતુઃ ।
૭૩.૬૩/૨ઇતિ સંચિન્ત્ય તદ્ વારિ ગૃહીત્વાર્ઘાય કલ્પિતમ્ ॥ ૭૩.૬૩॥

૭૩.૬૪/૧વિષ્ણોઃ પાદે તુ પતિતમર્ઘવારિ સુમન્ત્રિતમ્ ।
૭૩.૬૪/૨તદ્ વારિ પતિતં મેરૌ ચતુર્ધા વ્યગમદ્ ભુવમ્ ॥ ૭૩.૬૪॥

૭૩.૬૫/૧પૂર્વે તુ દક્ષિણે ચૈવ પશ્ચિમે ચોત્તરે તથા ।
૭૩.૬૫/૨દક્ષિણે યત્ તુ પતિતં જટાભિઃ શંકરો મુને ॥ ૭૩.૬૫॥

૭૩.૬૬/૧જગ્રાહ પશ્ચિમે યત્ તુ પુનઃ પ્રાયાત્ કમણ્ડલુમ્ ।
૭૩.૬૬/૨ઉત્તરે પતિતં યત્ તુ વિષ્ણુર્જગ્રાહ તજ્જલમ્ ॥ ૭૩.૬૬॥

૭૩.૬૭/૧પૂર્વસ્મિન્ન્ ઋષયો દેવા પિતરો લોકપાલકાઃ ।
૭૩.૬૭/૨જગૃહુઃ શુભદં વારિ તસ્માચ્છ્રેષ્ઠં તદ્ ઉચ્યતે ॥ ૭૩.૬૭॥

૭૩.૬૮/૧યા દક્ષિણાં દિશં પ્રાપ્તા આપો વૈ લોકમાતરઃ ।
૭૩.૬૮/૨વિષ્ણુપાદપ્રસૂતાસ્તા બ્રહ્મણ્યા લોકમાતરઃ ॥ ૭૩.૬૮॥

૭૩.૬૯/૧મહેશ્વરજટાસંસ્થાઃ પર્વજાતશુભોદયાઃ ।
૭૩.૬૯/૨તાસાં પ્રભાવસ્મરણાત્ સર્વકામાન્ અવાપ્નુયાત્ ॥ ૭૩.૬૯॥

૭૪.૧/૧નારદ ઉવાચ । કમણ્ડલુસ્થિતા દેવી મહેશ્વરજટાગતા ।
૭૪.૧/૨શ્રુતા દેવ યથા મર્ત્યમાગતા તદ્ બ્રવીતુ મે ॥ ૭૪.૧॥

૭૪.૨/૧બ્રહ્મોવાચ । મહેશ્વરજટાસ્થા યા આપો દેવ્યો મહામતે ।
૭૪.૨/૨તાસાં ચ દ્વિવિધો ભેદ આહર્તુર્દ્વયકારણાત્ ॥ ૭૪.૨॥

૭૪.૩/૧એકાંશો બ્રાહ્મણેનાત્ર વ્રતદાનસમાધિના ।
૭૪.૩/૨ગોતમેન શિવં પૂજ્ય આહૃતો લોકવિશ્રુતઃ ॥ ૭૪.૩॥

૭૪.૪/૧અપરસ્તુ મહાપ્રાજ્ઞ ક્ષત્રિયેણ બલીયસા ।
૭૪.૪/૨આરાધ્ય શંકરં દેવં તપોભિર્નિયમૈસ્તથા ॥ ૭૪.૪॥

૭૪.૫/૧ભગીરથેન ભૂપેન આહૃતોઽંશો અપરસ્તથા ।
૭૪.૫/૨એવં દ્વૈરૂપ્યમભવદ્ ગઙ્ગાયા મુનિસત્તમ ॥ ૭૪.૫॥

૭૪.૬/૧નારદ ઉવાચ । મહેશ્વરજટાસ્થા યા હેતુના કેન ગૌતમઃ ।
૭૪.૬/૨આહર્તા ક્ષત્રિયેણાપિ આહૃતા કેન તદ્ વદ ॥ ૭૪.૬॥

૭૪.૭/૧બ્રહ્મોવાચ । યથાનીતા પુરા વત્સ બ્રાહ્મણેનેતરેણ વા ।
૭૪.૭/૨તત્ સર્વં વિસ્તરેણાહં વદિષ્યે પ્રીતયે તવ ॥ ૭૪.૭॥

૭૪.૮/૧યસ્મિન્ કાલે સુરેશસ્ય ઉમા પત્ન્યભવત્ પ્રિયા ।
૭૪.૮/૨તસ્મિન્ન્ એવાભવદ્ ગઙ્ગા પ્રિયા શમ્ભોર્મહામતે ॥ ૭૪.૮॥

૭૪.૯/૧મમ દોષાપનોદાય ચિન્તયાનઃ શિવસ્તદા ।
૭૪.૯/૨ઉમયા સહિતઃ શ્રીમાન્ દેવીં પ્રેક્ષ્ય વિશેષતઃ ॥ ૭૪.૯॥

૭૪.૧૦/૧૨સવૃત્તૌ સ્થિતો યસ્માન્ નિર્મમે રસમુત્તમમ્ ।
૭૪.૧૦/૨૨સિકત્વાત્ પ્રિયત્વાચ્ચ સ્ત્રૈણત્વાત્ પાવનત્વતઃ ॥ ૭૪.૧૦॥

૭૪.૧૨/૧સર્વાભ્યો હ્યધિકપ્રીતિર્ગઙ્ગાભૂદ્ દ્વિજસત્તમ ।
૭૪.૧૨/૨સૈવોદ્ભૂતા જટામાર્ગાત્ કસ્મિંશ્ચિત્ કારણાન્તરે ।
૭૪.૧૨/૩સ તુ સંગોપયામાસ ગઙ્ગાં શમ્ભુર્જટાગતામ્ ॥ ૭૪.૧૨॥

૭૪.૧૩/૧શિરસા ચ ધૃતાં જ્ઞાત્વા ન શશાક ઉમા તદા ।
૭૪.૧૩/૨સોઢું બ્રહ્મગ્ જટાજૂટે સ્થિતાં દૃષ્ટ્વા પુનઃ પુનઃ ॥ ૭૪.૧૩॥

૭૪.૧૪/૧અમર્ષેણ ભવં ગોરી પ્રેરયસ્વેત્યભાષત ।
૭૪.૧૪/૨નૈવાસૌ પ્રૈરયચ્છમ્ભૂ રસિકો રસમુત્તમમ્ ॥ ૭૪.૧૪॥

૭૪.૧૫/૧જટાસ્વેવ તદા દેવીં ગોપાયન્તં વિમૃશ્ય સા ।
૭૪.૧૫/૨વિનાયકં જયાં સ્કન્દં રહો વચનમબ્રવીત્ ॥ ૭૪.૧૫॥

૭૪.૧૬/૧નૈવાયં ત્રિદશેશાનો ગઙ્ગાં ત્યજતિ કામુકઃ ।
૭૪.૧૬/૨સાપિ પ્રિયા શિવસ્યાદ્ય કથં ત્યજતિ તાં પ્રિયામ્ ॥ ૭૪.૧૬॥

૭૪.૧૭/૧એવં વિમૃશ્ય બહુશો ગૌરી ચાહ વિનાયકમ્ ॥ ૭૪.૧૭॥

૭૪.૧૮/૧પાર્વત્યુવાચ । ન દેવૈર્નાસુરૈર્યક્ષૈર્ન સિદ્ધૈર્ભવતાપિ ચ ।
૭૪.૧૮/૨ન રાજભિરથાન્યૈર્વા ન ગઙ્ગાં ત્યજતિ પ્રભુઃ ॥ ૭૪.૧૮॥

૭૪.૧૯/૧પુનસ્તપ્સ્યામિ વા ગત્વા હિમવન્તં નગોત્તમમ્ ।
૭૪.૧૯/૨અથવા બ્રાહ્મણૈઃ પુણ્યૈસ્તપોભિર્હતકલ્મષૈઃ ॥ ૭૪.૧૯॥

૭૪.૨૦/૧તૈર્વા જટાસ્થિતા ગઙ્ગા પ્રાર્થિતા ભુવમાપ્નુયાત્ ॥ ૭૪.૨૦॥

૭૪.૨૧/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા માતૃવાક્યં માતરં પ્રાહ વિઘ્નરાટ્ ।
૭૪.૨૧/૨ભ્રાત્રા સ્કન્દેન જયયા સમ્મન્ત્ર્યેહ ચ યુજ્યતે ॥ ૭૪.૨૧॥

૭૪.૨૨/૧તત્ કુર્મો મસ્તકાદ્ ગઙ્ગાં યથા ત્યજતિ મે પિતા ।
૭૪.૨૨/૨એતસ્મિન્ન્ અન્તરે બ્રહ્મન્ન્ અનાવૃષ્ટિરજાયત ॥ ૭૪.૨૨॥

૭૪.૨૩/૧દ્વિર્દ્વાદશ સમા મર્ત્યે સર્વપ્રાણિભયાવહા ।
૭૪.૨૩/૨તતો વિનષ્ટમભવજ્જગત્ સ્થાવરજઙ્ગમમ્ ॥ ૭૪.૨૩॥

૭૪.૨૪/૧વિના તુ ગૌતમં પુણ્યમાશ્રમં સર્વકામદમ્ ।
૭૪.૨૪/૨સ્રષ્ટુકામઃ પુરા પુત્ર સ્થાવરં જઙ્ગમં તથા ॥ ૭૪.૨૪॥

૭૪.૨૫/૧કૃતો યજ્ઞો મયા પૂર્વં સ દેવયજનો ગિરિઃ ।
૭૪.૨૫/૨મન્નામા તત્ર વિખ્યાતસ્તતો બ્રહ્મગિરિઃ સદા ॥ ૭૪.૨૫॥

૭૪.૨૬/૧તમાશ્રિત્ય નગશ્રેષ્ઠં સર્વદાસ્તે સ ગૌતમઃ ।
૭૪.૨૬/૨તસ્યાશ્રમે મહાપુણ્યે શ્રેષ્ઠે બ્રહ્મગિરૌ શુભે ॥ ૭૪.૨૬॥

૭૪.૨૭/૧આધયો વ્યાધયો વાપિ દુર્ભિક્ષં વાપ્યવર્ષણમ્ ।
૭૪.૨૭/૨ભયશોકૌ ચ દારિદ્ર્યં ન શ્રૂયન્તે કદાચન ॥ ૭૪.૨૭॥

૭૪.૨૮/૧તદાશ્રમં વિનાન્યત્ર હવ્યં વા કવ્યમેવ ચ ।
૭૪.૨૮/૨નાસ્તિ પુત્ર તથા દાતા હોતા યષ્ટા તથૈવ ચ ॥ ૭૪.૨૮॥

૭૪.૨૯/૧યદૈવ ગૌતમો વિપ્રો દદાતિ ચ જુહોતિ ચ ।
૭૪.૨૯/૨તદૈવાપ્યયનં સ્વર્ગે સુરાણામપિ નાન્યતઃ ॥ ૭૪.૨૯॥

૭૪.૩૦/૧દેવલોકેઽપિ મર્ત્યે વા શ્રૂયતે ગૌતમો મુનિઃ ।

૭૪.૩૦/૨હોતા દાતા ચ ભોક્તા ચ સ એવેતિ જના વિદુઃ ॥ ૭૪.૩૦॥

૭૪.૩૧/૧તચ્છ્રુત્વા મુનયઃ સર્વે નાનાશ્રમનિવાસિનઃ ।
૭૪.૩૧/૨ગૌતમાશ્રમમાપૃચ્છન્ન્ આગચ્છન્તસ્તપોધનાઃ ॥ ૭૪.૩૧॥

૭૪.૩૨/૧તેષાં મુનીનાં સર્વેષામાગતાનાં સ ગૌતમઃ ।
૭૪.૩૨/૨શિષ્યવત્ પુત્રવદ્ ભક્ત્યા પિતૃવત્ પોષકોઽભવત્ ॥ ૭૪.૩૨॥

૭૪.૩૩/૧યસ્ય યથેપ્સિતં કામં યથાયોગ્યં યથાક્રમમ્ ।
૭૪.૩૩/૨યથાનુરૂપં સર્વેષાં શુશ્રૂષામકરોન્ મુનિઃ ॥ ૭૪.૩૩॥

૭૪.૩૪/૧આજ્ઞયા ગૌતમસ્યાસન્ન્ ઓષધ્યો લોકમાતરઃ ।
૭૪.૩૪/૨આરાધિતાઃ પુનસ્તેન બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૭૪.૩૪॥

૭૪.૩૫/૧જાયન્તે ચ તદૌષધ્યો લૂયન્તે ચ તદૈવ હિ ।
૭૪.૩૫/૨સમ્પત્સ્યન્તે તદોપ્યન્તે ગૌતમસ્ય તપોબલાત્ ॥ ૭૪.૩૫॥

૭૪.૩૬/૧સર્વાઃ સમૃદ્ધયસ્તસ્ય સંસિધ્યન્તે મનોગતાઃ ।
૭૪.૩૬/૨પ્રત્યહં વક્તિ વિનયાદ્ ગૌતમસ્ત્વાગતાન્ મુનીન્ ॥ ૭૪.૩૬॥

૭૪.૩૭/૧પુત્રવચ્છિષ્યવચ્ચૈવ પ્રેષ્યવત્ કરવાણિ કિમ્ ।
૭૪.૩૭/૨પિતૃવત્ પોષયામાસ સંવત્સરગણાન્ બહૂન્ ॥ ૭૪.૩૭॥

૭૪.૩૮/૧એવં વસત્સુ મુનિષુ ત્રૈલોક્યે ખ્યાતિરાશ્રયાત્ ।
૭૪.૩૮/૨તતો વિનાયકઃ પ્રાહ માતરં ભ્રાતરં જયામ્ ॥ ૭૪.૩૮॥

૭૪.૩૯/૧વિનાયક ઉવાચ । દેવાનાં સદને માતર્ગીયતે ગૌતમો દ્વિજઃ ।
૭૪.૩૯/૨યન્ ન સાધ્યં સુરગણૈર્ગૌતમઃ કૃતવાન્ ઇતિ ॥ ૭૪.૩૯॥

૭૪.૪૦/૧એવં શ્રુતં મયા દેવિ બ્રાહ્મણસ્ય તપોબલમ્ ।
૭૪.૪૦/૨સ વિપ્રશ્ચાલયેદ્ એનાં માતર્ગઙ્ગાં જટાગતામ્ ॥ ૭૪.૪૦॥

૭૪.૪૧/૧તપસા વાન્યતો વાપિ પૂજયિત્વા ત્રિલોચનમ્ ।
૭૪.૪૧/૨સ એવ ચ્યાવયેદ્ એનાં જટાસ્થાં મે પિતૃપ્રિયામ્ ॥ ૭૪.૪૧॥

૭૪.૪૨/૧તત્ર નીતિર્વિધાતવ્યા તાં વિપ્રો યાચયેદ્ યથા ।
૭૪.૪૨/૨તત્પ્રભાવાત્ સરિચ્છ્રેષ્ઠા શિરસોઽવતરત્યપિ ॥ ૭૪.૪૨॥

૭૪.૪૩/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા માતરં ભ્રાત્રા જયયા સહ વિઘ્નરાટ્ ।
૭૪.૪૩/૨જગામ ગૌતમો યત્ર બ્રહ્મસૂત્રધરઃ કૃશઃ ॥ ૭૪.૪૩॥

૭૪.૪૪/૧વસન્ કતિપયાહઃસુ ગૌતમાશ્રમમણ્ડલે ।
૭૪.૪૪/૨ઉવાચ બ્રાહ્મણાન્ સર્વાંસ્તત્ર તત્ર ચ વિઘ્નરાટ્ ॥ ૭૪.૪૪॥

૭૪.૪૫/૧ગચ્છામઃ સ્વમધિષ્ઠાનમાશ્રમાણિ શુચીનિ ચ ।
૭૪.૪૫/૨પુષ્ટાઃ સ્મ ગૌતમાન્નેન પૃચ્છામો ગૌતમં મુનિમ્ ॥ ૭૪.૪૫॥

૭૪.૪૬/૧ઇતિ સમ્મન્ત્ર્ય પૃચ્છન્તિ મુનયો મુનિસત્તમાઃ ।
૭૪.૪૬/૨સ તાન્ નિવારયામાસ સ્નેહબુદ્ધ્યા મુનીન્ પૃથક્ ॥ ૭૪.૪૬॥

૭૪.૪૭/૧ગૌતમ ઉવાચ । કૃતાઞ્જલિઃ સવિનયમાસધ્વમિહ ચૈવ હિ ।
૭૪.૪૭/૨યુષ્મચ્ચરણશુશ્રૂષાં કરોમિ મુનિપુંગવાઃ ॥ ૭૪.૪૭॥

૭૪.૪૮/૧શુશ્રૂષૌ પુત્રવન્ નિત્યં મયિ તિષ્ઠતિ નોચિતમ્ ।
૭૪.૪૮/૨ભવતાં ભૂમિદેવાનામાશ્રમાન્તરસેવનમ્ ॥ ૭૪.૪૮॥

૭૪.૪૯/૧ઇદમેવાશ્રમં પુણ્યં સર્વેષામિતિ મે મતિઃ ।
૭૪.૪૯/૨અલમન્યેન મુનય આશ્રમેણ ગતેન વા ॥ ૭૪.૪૯॥

૭૪.૫૦/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા મુનેર્વાક્યં વિઘ્નકૃત્યમનુસ્મરન્ ।
૭૪.૫૦/૨ઉવાચ પ્રાઞ્જલિર્ભૂત્વા બ્રાહ્મણાન્ સ ગણાધિપઃ ॥ ૭૪.૫૦॥

૭૪.૫૧/૧ગણાધિપ ઉવાચ । અન્નક્રીતા વયં કિં નો નિવારયત ગૌતમઃ ।
૭૪.૫૧/૨સામ્ના નૈવ વયં શક્તા ગન્તું સ્વં સ્વં નિવેશનમ્ ॥ ૭૪.૫૧॥

૭૪.૫૨/૧નાયમર્હતિ દણ્ડં વા ઉપકારી દ્વિજોત્તમઃ ।
૭૪.૫૨/૨તસ્માદ્ બુદ્ધ્યા વ્યવસ્યામિ તત્ સર્વૈરનુમન્યતામ્ ॥ ૭૪.૫૨॥

૭૪.૫૩/૧બ્રહ્મોવાચ । તતઃ સર્વે દ્વિજશ્રેષ્ઠાઃ ક્રિયતામિત્યનુબ્રુવન્ ।
૭૪.૫૩/૨એતસ્ય તૂપકારાય લોકાનાં હિતકામ્યયા ॥ ૭૪.૫૩॥

૭૪.૫૪/૧બ્રાહ્મણાનાં ચ સર્વેષાં શ્રેયો યત્ સ્યાત્ તથા કુરુ ।
૭૪.૫૪/૨બ્રાહ્મણાનાં વચઃ શ્રુત્વા મેને વાક્યં ગણાધિપઃ ॥ ૭૪.૫૪॥

૭૪.૫૫/૧વિનાયક ઉવાચ । ક્રિયતે ગુણરૂપં યદ્ ગૌતમસ્ય વિશેષતઃ ॥ ૭૪.૫૫॥

૭૪.૫૬/૧બ્રહ્મોવાચ । અનુમાન્ય દ્વિજાન્ સર્વાન્ પુનઃ પુનરુદારધીઃ ।
૭૪.૫૬/૨સ્વયં ચ બ્રાહ્મણો ભૂત્વા પ્રણમ્ય બ્રાહ્મણાન્ પુનઃ ।
૭૪.૫૬/૩માતુર્મતે સ્થિતો વિદ્વાઞ્ જયાં પ્રાહ ગણેશ્વરઃ ॥ ૭૪.૫૬॥

૭૪.૫૭/૧વિનાયક ઉવાચ । યથા નાન્યો વિજાનીતે તથા કુરુ શુભાનને ।
૭૪.૫૭/૨ગોરૂપધારિણી ગચ્છ ગૌતમો યત્ર તિષ્ઠતિ ॥ ૭૪.૫૭॥

૭૪.૫૮/૧શાલીન્ ખાદ વિનાશ્યાથ વિકારં કુરુ ભામિનિ ।
૭૪.૫૮/૨કૃતે પ્રહારે હુંકારે પ્રેક્ષિતે ચાપિ કિંચન ।
૭૪.૫૮/૩પત દીનં સ્વનં કૃત્વા ન મ્રિયસ્વ ન જીવ ચ ॥ ૭૪.૫૮॥

૭૪.૫૯/૧બ્રહ્મોવાચ । તથા ચકાર વિજયા વિઘ્નેશ્વરમતે સ્થિતા ।
૭૪.૫૯/૨યત્રાસીદ્ ગૌતમો વિપ્રો જયા ગોરૂપધારિણી ॥ ૭૪.૫૯॥

૭૪.૬૦/૧જગામ શાલીન્ ખાદન્તી તાં દદર્શ સ ગૌતમઃ ।
૭૪.૬૦/૨ગાં દૃષ્ટ્વા વિકૃતાં વિપ્રસ્તાં તૃણેન ન્યવારયત્ ॥ ૭૪.૬૦॥

૭૪.૬૧/૧નિવાર્યમાણા સા તેન સ્વનં કૃત્વા પપાત ગૌઃ ।
૭૪.૬૧/૨તસ્યાં તુ પતિતાયાં ચ હાહાકારો મહાન્ અભૂત્ ॥ ૭૪.૬૧॥

૭૪.૬૨/૧સ્વનં શ્રુત્વા ચ દૃષ્ટ્વા ચ ગૌતમસ્ય વિચેષ્ટિતમ્ ।
૭૪.૬૨/૨વ્યથિતા બ્રાહ્મણાઃ પ્રાહુર્વિઘ્નરાજપુરસ્કૃતાઃ ॥ ૭૪.૬૨॥

૭૪.૬૩/૧બ્રાહ્મણા ઊચુઃ । ઇતો ગચ્છામહે સર્વે ન સ્થાતવ્યં તવાશ્રમે ।
૭૪.૬૩/૨પુત્રવત્ પોષિતાઃ સર્વે પૃષ્ટોઽસિ મુનિપુંગવ ॥ ૭૪.૬૩॥

૭૪.૬૪/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા મુનિર્વાક્યં વિપ્રાણાં ગચ્છતાં તદા ।
૭૪.૬૪/૨વજ્રાહત ઇવાસીત્ સ વિપ્રાણાં પુરતોઽપતત્ ॥ ૭૪.૬૪॥

૭૪.૬૫/૧તમૂચુર્બ્રાહ્મણાઃ સર્વે પશ્યેમાં પતિતાં ભુવિ ।
૭૪.૬૫/૨રુદ્રાણાં માતરં દેવીં જગતાં પાવનીં પ્રિયામ્ ॥ ૭૪.૬૫॥

૭૪.૬૬/૧તીર્થદેવસ્વરૂપિણ્યામસ્યાં ગવિ વિધેર્બલાત્ ।
૭૪.૬૬/૨પતિતાયાં મુનિશ્રેષ્ઠ ગન્તવ્યમવશિષ્યતે ॥ ૭૪.૬૬॥

૭૪.૬૭/૧ચીર્ણં વ્રતં ક્ષયં યાતિ યથા વાસસ્ત્વદાશ્રમે ।
૭૪.૬૭/૨વયં નાન્યધના બ્રહ્મન્ કેવલં તુ તપોધનાઃ ॥ ૭૪.૬૭॥

૭૪.૬૮/૧બ્રહ્મોવાચ । વિપ્રાણાં પુરતઃ સ્થિત્વા વિનીતઃ પ્રાહ ગૌતમઃ ॥ ૭૪.૬૮॥

૭૪.૬૯/૧ગૌતમ ઉવાચ । ભવન્ત એવ શરણં પૂતં માં કર્તુમર્હથ ॥ ૭૪.૬૯॥

૭૪.૭૦/૧બ્રહ્મોવાચ । તતઃ પ્રોવાચ ભગવાન્ વિઘ્નરાડ્
બ્રાહ્મણૈર્વૃતઃ ॥ ૭૪.૭૦॥

૭૪.૭૧/૧વિઘ્નરાજ ઉવાચ । નૈવેયં મ્રિયતે તત્ર નૈવ જીવતિ તત્ર કિમ્ ।
૭૪.૭૧/૨વદામોઽસ્મિન્ સુસંદિગ્ધે નિષ્કૃતિં ગતિમેવ વા ॥ ૭૪.૭૧॥

૭૪.૭૨/૧ગૌતમ ઉવાચ । કથમુત્થાસ્યતીયં ગૌરથ ચાસ્મિંશ્ચ નિષ્કૃતિમ્ ।
૭૪.૭૨/૨વક્તુમર્હથ તત્ સર્વં કરિષ્યેઽહમસંશયમ્ ॥ ૭૪.૭૨॥

૭૪.૭૩/૧બ્રાહ્મણા ઊચુઃ । સર્વેષાં ચ મતેનાયં વદિષ્યતિ ચ બુદ્ધિમાન્ ।
૭૪.૭૩/૨એતદ્ વાક્યમથાસ્માકં પ્રમાણં તવ ગૌતમ ॥ ૭૪.૭૩॥

૭૪.૭૪/૧બ્રહ્મોવાચ । બ્રાહ્મણૈઃ પ્રેર્યમાણોઽસૌ ગૌતમેન બલીયસા ।
૭૪.૭૪/૨વિઘ્નકૃદ્ બ્રહ્મવપુષા પ્રાહ સર્વાન્ ઇદં વચઃ ॥ ૭૪.૭૪॥

૭૪.૭૫/૧વિઘ્નરાજ ઉવાચ । સર્વેષાં ચ મતેનાહં વદિષ્યામિ યથાર્થવત્ ।
૭૪.૭૫/૨અનુમન્યન્તુ મુનયો મદ્વાક્યં ગૌતમોઽપિ ચ ॥ ૭૪.૭૫॥

૭૪.૭૬/૧મહેશ્વરજટાજૂટે બ્રહ્મણોઽવ્યક્તજન્મનઃ ।
૭૪.૭૬/૨કમણ્ડલુસ્થિતં વારિ તિષ્ઠતીતિ હિ શુશ્રુમ ॥ ૭૪.૭૬॥

૭૪.૭૭/૧તદ્ આનયસ્વ તરસા તપસા નિયમેન ચ ।
૭૪.૭૭/૨તેનાભિષિઞ્ચ ગામેતાં ભગવન્ ભુવમાશ્રિતામ્ ।
૭૪.૭૭/૩તતો વત્સ્યામહે સર્વે પૂર્વવત્ તવ વેશ્મનિ ॥ ૭૪.૭૭॥

૭૪.૭૮/૧બ્રહ્મોવાચ । ઇત્યુક્તવતિ વિપ્રેન્દ્રે બ્રાહ્મણાનાં ચ સંસદિ ।
૭૪.૭૮/૨તત્રાપતત્ પુષ્પવૃષ્ટિર્જયશબ્દો વ્યવર્ધત ।
૭૪.૭૮/૩તતઃ કૃતાઞ્જલિર્નમ્રો ગૌતમો વાક્યમબ્રવીત્ ॥ ૭૪.૭૮॥

૭૪.૭૯/૧ગૌતમ ઉવાચ । તપસાગ્નિપ્રસાદેન દેવબ્રહ્મપ્રસાદતઃ ।
૭૪.૭૯/૨ભવતાં ચ પ્રસાદેન મત્સંકલ્પોઽનુસિધ્યતામ્ ॥ ૭૪.૭૯॥

૭૪.૮૦/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ તં વિપ્રા આપૃચ્છન્ મુનિપુંગવમ્ ।
૭૪.૮૦/૨સ્વાનિ સ્થાનાનિ તે જગ્મુઃ સમૃદ્ધાન્યન્નવારિભિઃ ॥ ૭૪.૮૦॥

૭૪.૮૧/૧યાતેષુ તેષુ વિપ્રેષુ ભ્રાત્રા સહ ગણેશ્વરઃ ।
૭૪.૮૧/૨જયયા સહ સુપ્રીતઃ કૃતકૃત્યો ન્યવર્તત ॥ ૭૪.૮૧॥

૭૪.૮૨/૧ગતેષુ બ્રહ્મવૃન્દેષુ ગણેશે ચ ગતે તથા ।
૭૪.૮૨/૨ગૌતમોઽપિ મુનિશ્રેષ્ઠસ્તપસા હતકલ્મષઃ ॥ ૭૪.૮૨॥

૭૪.૮૩/૧ધ્યાયંસ્તદર્થં સ મુનિઃ કિમિદં મમ સંસ્થિતમ્ ।
૭૪.૮૩/૨ઇત્યેવં બહુશો ધ્યાયઞ્ જ્ઞાનેન જ્ઞાતવાન્ દ્વિજ ॥ ૭૪.૮૩॥

૭૪.૮૪/૧નિશ્ચિત્ય દેવકાર્યાર્થમાત્મનઃ કિલ્બિષાં ગતિમ્ ।

૭૪.૮૪/૨લોકાનામુપકારં ચ શમ્ભોઃ પ્રીણનમેવ ચ ॥ ૭૪.૮૪॥

૭૪.૮૫/૧ઉમાયાઃ પ્રીણનં ચાપિ ગઙ્ગાનયનમેવ ચ ।
૭૪.૮૫/૨સર્વં શ્રેયસ્કરં મન્યે મયિ નૈવ ચ કિલ્બિષમ્ ॥ ૭૪.૮૫॥

૭૪.૮૬/૧ઇત્યેવં મનસા ધ્યાયન્ સુપ્રીતોઽભૂદ્ દ્વિજોત્તમઃ ।
૭૪.૮૬/૨આરાધ્ય જગતામીશં ત્રિનેત્રં વૃષભધ્વજમ્ ॥ ૭૪.૮૬॥

૭૪.૮૭/૧આનયિષ્યે સરિચ્છ્રેષ્ઠાં પ્રીતાઽસ્તુ ગિરિજા મમ ।
૭૪.૮૭/૨સપત્ની જગદમ્બાયા મહેશ્વરજટાસ્થિતા ॥ ૭૪.૮૭॥

૭૪.૮૮/૧એવં હિ સંકલ્પ્ય મુનિપ્રવીરઃ ।
૭૪.૮૮/૨સ ગૌતમો બ્રહ્મગિરેર્જગામ ।
૭૪.૮૮/૩કૈલાસમાધિષ્ઠિતમુગ્રધન્વના ।
૭૪.૮૮/૪સુરાર્ચિતં પ્રિયયા બ્રહ્મવૃન્દૈઃ ॥ ૭૪.૮૮॥

૭૫.૧/૧નારદ ઉવાચ । કૈલાસશિખરં ગત્વા ગૌતમો ભગવાન્ ઋષિઃ ।
૭૫.૧/૨કિં ચકાર તપો વાપિ કાં ચક્રે સ્તુતિમુત્તમામ્ ॥ ૭૫.૧॥

૭૫.૨/૧બ્રહ્મોવાચ । ગિરિં ગત્વા તતો વત્સ વાચં સંયમ્ય ગૌતમઃ ।
૭૫.૨/૨આસ્તીર્ય સ કુશાન્ પ્રાજ્ઞઃ કૈલાસે પર્વતોત્તમે ॥ ૭૫.૨॥

૭૫.૩/૧ઉપવિશ્ય શુચિર્ભૂત્વા સ્તોત્રં ચેદં તતો જગૌ ।
૭૫.૩/૨અપતત્ પુષ્પવૃષ્ટિશ્ચ સ્તૂયમાને મહેશ્વરે ॥ ૭૫.૩॥

૭૫.૪/૧ગૌતમ ઉવાચ । ભોગાર્થિનાં ભોગમભીપ્સિતં ચ ।
૭૫.૪/૨દાતું મહાન્ત્યષ્ટવપૂંષિ ધત્તે ।
૭૫.૪/૩સોમો જનાનાં ગુણવન્તિ નિત્યમ્ ।
૭૫.૪/૪દેવં મહાદેવમિતિ સ્તુવન્તિ ॥ ૭૫.૪॥

૭૫.૫/૧કર્તું સ્વકીયૈર્વિષયૈઃ સુખાનિ ।
૭૫.૫/૨ભર્તું સમસ્તં સચરાચરં ચ ।
૭૫.૫/૩સમ્પત્તયે હ્યસ્ય વિવૃદ્ધયે ચ ।
૭૫.૫/૪મહીમયં રૂપમિતીશ્વરસ્ય ॥ ૭૫.૫॥

૭૫.૬/૧સૃષ્ટેઃ સ્થિતેઃ સંહરણાય ભૂમેર્।
૭૫.૬/૨આધારમાધાતુમપાં સ્વરૂપમ્ ।
૭૫.૬/૩ભેજે શિવઃ શાન્તતનુર્જનાનામ્ ।
૭૫.૬/૪સુખાય ધર્માય જગત્ પ્રતિષ્ઠિતમ્ ॥ ૭૫.૬॥

૭૫.૭/૧કાલવ્યવસ્થામમૃતસ્રવં ચ ।
૭૫.૭/૨જીવસ્થિતિં સૃષ્ટિમથો વિનાશનમ્ ।
૭૫.૭/૩મુદં પ્રજાનાં સુખમુન્નતિં ચ ।
૭૫.૭/૪ચક્રેઽર્કચન્દ્રાગ્નિમયં શરીરમ્ ॥ ૭૫.૭॥

૭૫.૮/૧વૃદ્ધિં ગતિં શક્તિમથાક્ષરાણિ ।
૭૫.૮/૨જીવવ્યવસ્થાં મુદમપ્યનેકામ્ ।
૭૫.૮/૩સ્રષ્ટું કૃતં વાયુરિતીશરૂપમ્ ।
૭૫.૮/૪ત્વં વેત્સિ નૂનં ભગવન્ ભવન્તમ્ ॥ ૭૫.૮॥

૭૫.૯/૧ભેદૈર્વિના નૈવ કૃતિર્ન ધર્મો ।
૭૫.૯/૨નાત્મીયમન્યન્ ન દિશોઽન્તરિક્ષમ્ ।
૭૫.૯/૩દ્યાવાપૃથિવ્યૌ ન ચ ભુક્તિમુક્તી ।
૭૫.૯/૪તસ્માદ્ ઇદં વ્યોમવપુસ્તવેશ ॥ ૭૫.૯॥

૭૫.૧૦/૧ધર્મં વ્યવસ્થાપયિતું વ્યવસ્ય ।
૭૫.૧૦/૨ઋક્સામશાસ્ત્રાણિ યજુશ્ચ શાખાઃ ।
૭૫.૧૦/૩લોકે ચ ગાથાઃ સ્મૃતયઃ પુરાણમ્ ।
૭૫.૧૦/૪ઇત્યાદિશબ્દાત્મકતામુપૈતિ ॥ ૭૫.૧૦॥

૭૫.૧૧/૧યષ્ટા ક્રતુર્યાન્યપિ સાધનાનિ ।
૭૫.૧૧/૨ઋત્વિક્પ્રદેશં ફલદેશકાલાઃ ।
૭૫.૧૧/૩ત્વમેવ શમ્ભો પરમાર્થતત્ત્વમ્ ।
૭૫.૧૧/૪વદન્તિ યજ્ઞાઙ્ગમયં વપુસ્તે ॥ ૭૫.૧૧॥

૭૫.૧૨/૧કર્તા પ્રદાતા પ્રતિભૂઃ પ્રદાનમ્ ।
૭૫.૧૨/૨સર્વજ્ઞસાક્ષી પુરુષઃ પરશ્ચ ।
૭૫.૧૨/૩પ્રત્યાત્મભૂતઃ પરમાર્થરૂપસ્- ।
૭૫.૧૨/૪ત્વમેવ સર્વં કિમુ વાગ્વિલાસૈઃ ॥ ૭૫.૧૨॥

૭૫.૧૩/૧ન વેદશાસ્ત્રૈર્ગુરુભિઃ પ્રદિષ્ટો ।
૭૫.૧૩/૨ન નાસિ બુદ્ધ્યાદિભિરપ્રધૃષ્યઃ ।
૭૫.૧૩/૩અજોઽપ્રમેયઃ શિવશબ્દવાચ્યસ્- ।
૭૫.૧૩/૪ત્વમસ્તિ સત્યં ભગવન્ નમસ્તે ॥ ૭૫.૧૩॥

૭૫.૧૪/૧આત્મૈકતાં સ્વપ્રકૃતિં કદાચિદ્ ।

૭૫.૧૪/૨ઐક્ષચ્છિવઃ સમ્પદ્ ઇયં મમેતિ ।
૭૫.૧૪/૩પૃથક્ તદૈવાભવદ્ અપ્રતર્ક્ય+ ।
૭૫.૧૪/૪અચિન્ત્યપ્રભાવો બહુવિશ્વમૂર્તિઃ ॥ ૭૫.૧૪॥

૭૫.૧૫/૧ભાવેઽભિવૃદ્ધા ચ ભવે ભવે ચ ।
૭૫.૧૫/૨સ્વકારણં કારણમાસ્થિતા ચ ।
૭૫.૧૫/૩નિત્યા શિવા સર્વસુલક્ષણા વા ।
૭૫.૧૫/૪વિલક્ષણા વિશ્વકરસ્ય શક્તિઃ ॥ ૭૫.૧૫॥

૭૫.૧૬/૧ઉત્પાદનં સંસ્થિતિરન્નવૃદ્ધિ+ ।
૭૫.૧૬/૨લયાઃ સતાં યત્ર સનાતનાસ્તે ।
૭૫.૧૬/૩એકૈવ મૂર્તિર્ન સમસ્તિ કિંચિદ્ ।
૭૫.૧૬/૪અસાધ્યમસ્યા દયિતા હરસ્ય ॥ ૭૫.૧૬॥

૭૫.૧૭/૧યદર્થમન્નાનિ ધનાનિ જીવા ।
૭૫.૧૭/૨યચ્છન્તિ કુર્વન્તિ તપાંસિ ધર્માન્ ।
૭૫.૧૭/૩સાપીયમમ્બા જગતો જનિત્રી ।
૭૫.૧૭/૪પ્રિયા તુ સોમસ્ય મહાસુકીર્તિઃ ॥ ૭૫.૧૭॥

૭૫.૧૮/૧યદ્ ઈક્ષિતં કાઙ્ક્ષતિ વાસવોઽપિ ।
૭૫.૧૮/૨યન્નામતો મઙ્ગલમાપ્નુયાચ્ચ ।
૭૫.૧૮/૩યા વ્યાપ્ય વિશ્વં વિમલીકરોતિ ।
૭૫.૧૮/૪સોમા સદા સોમસમાનરૂપા ॥ ૭૫.૧૮॥

૭૫.૧૯/૧બ્રહ્માદિજીવસ્ય ચરાચરસ્ય ।
૭૫.૧૯/૨બુદ્ધ્યક્ષિચૈતન્યમનઃસુખાનિ ।
૭૫.૧૯/૩યસ્યાઃ પ્રસાદાત્ ફલવન્તિ નિત્યમ્ ।
૭૫.૧૯/૪વાગીશ્વરી લોકગુરોઃ સુરમ્યા ॥ ૭૫.૧૯॥

૭૫.૨૦/૧ચતુર્મુખસ્યાપિ મનો મલીનમ્ ।
૭૫.૨૦/૨કિમન્યજન્તોરિતિ ચિન્ત્ય માતા ।
૭૫.૨૦/૩ગઙ્ગાવતારં વિવિધૈરુપાયૈઃ ।
૭૫.૨૦/૪સર્વં જગત્ પાવયિતું ચકાર ॥ ૭૫.૨૦॥

૭૫.૨૧/૧શ્રુતીઃ સમાલક્ષ્ય હરપ્રભુત્વમ્ ।
૭૫.૨૧/૨વિશ્વસ્ય લોકઃ સકલૈઃ પ્રમાણૈઃ ।
૭૫.૨૧/૩કૃત્વા ચ ધર્માન્ બુભુજે ચ ભોગાન્ ।

૭૫.૨૧/૪વિભૂતિરેષા તુ સદાશિવસ્ય ॥ ૭૫.૨૧॥

૭૫.૨૨/૧કાર્યક્રિયાકારકસાધનાનામ્ ।
૭૫.૨૨/૨વેદોદિતાનામથ લૌકિકાનામ્ ।
૭૫.૨૨/૩યત્ સાધ્યમુત્કૃષ્ટતમં પ્રિયં ચ ।
૭૫.૨૨/૪પ્રોક્તા ચ સા સિદ્ધિરનાદિકર્તુઃ ॥ ૭૫.૨૨॥

૭૫.૨૩/૧ધ્યાત્વા વરં બ્રહ્મ પરં પ્રધાનમ્ ।
૭૫.૨૩/૨યત્ સારભૂતં યદ્ ઉપાસિતવ્યમ્ ।
૭૫.૨૩/૩યત્ પ્રાપ્ય મુક્તા ન પુનર્ભવન્તિ ।
૭૫.૨૩/૪સદ્યોગિનો મુક્તિરુમાપતિઃ સઃ ॥ ૭૫.૨૩॥

૭૫.૨૪/૧યથા યથા શમ્ભુરમેયમાયા+ ।
૭૫.૨૪/૨રૂપાણિ ધત્તે જગતો હિતાય ।
૭૫.૨૪/૩તદ્યોગયોગ્યાનિ તથૈવ ધત્સે ।
૭૫.૨૪/૪પતિવ્રતાત્વં ત્વયિ માતરેવમ્ ॥ ૭૫.૨૪॥

૭૫.૨૫/૧બ્રહ્મોવાચ । ઇત્યેવં સ્તુવતસ્તસ્ય પુરસ્તાદ્ વૃષભધ્વજઃ ।
૭૫.૨૫/૨ઉમયા સહિતઃ શ્રીમાન્ ગણેશાદિગણૈર્વૃતઃ ॥ ૭૫.૨૫॥

૭૫.૨૬/૧સાક્ષાદ્ આગત્ય તં શમ્ભુઃ પ્રસન્નો વાક્યમબ્રવીત્ ॥ ૭૫.૨૬॥

૭૫.૨૭/૧શિવ ઉવાચ । કિં તે ગૌતમ દાસ્યામિ ભક્તિસ્તોત્રવ્રતૈઃ શુભૈઃ ।
૭૫.૨૭/૨પરિતુષ્ટોઽસ્મિ યાચસ્વ દેવાનામપિ દુષ્કરમ્ ॥ ૭૫.૨૭॥

૭૫.૨૮/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા જગન્મૂર્તેર્વાક્યં વાક્યવિશારદઃ ।
૭૫.૨૮/૨હર્ષબાષ્પપરીતાઙ્ગો ગૌતમઃ પર્યચિન્તયત્ ॥ ૭૫.૨૮॥

૭૫.૨૯/૧અહો દૈવમહો ધર્મો હ્યહો વૈ વિપ્રપૂજનમ્ ।
૭૫.૨૯/૨અહો લોકગતિશ્ચિત્રા અહો ધાતર્નમોઽસ્તુ તે ॥ ૭૫.૨૯॥

૭૫.૩૦/૧ગૌતમ ઉવાચ । જટાસ્થિતાં શુભાં ગઙ્ગાં દેહિ મે ત્રિદશાર્ચિત ।
૭૫.૩૦/૨યદિ તુષ્ટોઽસિ દેવેશ ત્રયીધામ નમોઽસ્તુ તે ॥ ૭૫.૩૦॥

૭૫.૩૧/૧ઈશ્વર ઉવાચ । ત્રયાણામુપકારાર્થં લોકાનાં યાચિતં ત્વયા ।
૭૫.૩૧/૨આત્મનસ્તૂપકારાય તદ્ યાચસ્વાકુતોભયઃ ॥ ૭૫.૩૧॥

૭૫.૩૨/૧ગૌતમ ઉવાચ । સ્તોત્રેણાનેન યે ભક્તાસ્ત્વાં ચ દેવીં સ્તુવન્તિ વૈ ।
૭૫.૩૨/૨સર્વકામસમૃદ્ધાઃ સ્યુરેતદ્ ધિ વરયામ્યહમ્ ॥ ૭૫.૩૨॥

૭૫.૩૩/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ દેવેશઃ પરિતુષ્ટોઽબ્રવીદ્ વચઃ ।
૭૫.૩૩/૨અન્યાન્ અપિ વરાન્ મત્તો યાચસ્વ વિગતજ્વરઃ ॥ ૭૫.૩૩॥

૭૫.૩૪/૧એવમુક્તસ્તુ હર્ષેણ ગૌતમઃ પ્રાહ શંકરમ્ ॥ ૭૫.૩૪॥

૭૫.૩૫/૧ગૌતમ ઉવાચ । ઇમાં દેવીં જટાસંસ્થાં પાવનીં લોકપાવનીમ્ ।
૭૫.૩૫/૨તવ પ્રિયાં જગન્નાથ ઉત્સૃજ બ્રહ્મણો ગિરૌ ॥ ૭૫.૩૫॥

૭૫.૩૬/૧સર્વાસાં તીર્થભૂતા તુ યાવદ્ ગચ્છતિ સાગરમ્ ।
૭૫.૩૬/૨બ્રહ્મહત્યાદિપાપાનિ મનોવાક્કાયિકાનિ ચ ॥ ૭૫.૩૬॥

૭૫.૩૭/૧સ્નાનમાત્રેણ સર્વાણિ વિલયં યાન્તુ શંકર ।
૭૫.૩૭/૨ચન્દ્રસૂર્યોપરાગે ચ અયને વિષુવે તથા ॥ ૭૫.૩૭॥

૭૫.૩૮/૧સંક્રાન્તૌ વૈધૃતૌ પુણ્ય+ ।તીર્થેષ્વન્યેષુ યત્ ફલમ્ ।
૭૫.૩૮/૨અસ્યાસ્તુ સ્મરણાદ્ એવ તત્ પુણ્યં જાયતાં હર ॥ ૭૫.૩૮॥

૭૫.૩૯/૧શ્લાઘ્યં કૃતે તપઃ પ્રોક્તં ત્રેતાયાં યજ્ઞકર્મ ચ ।
૭૫.૩૯/૨દ્વાપરે યજ્ઞદાને ચ દાનમેવ કલૌ યુગે ॥ ૭૫.૩૯॥

૭૫.૪૦/૧યુગધર્માશ્ચ યે સર્વે દેશધર્માસ્તથૈવ ચ ।
૭૫.૪૦/૨દેશકાલાદિસંયોગે યો ધર્મો યત્ર શસ્યતે ॥ ૭૫.૪૦॥

૭૫.૪૧/૧યદ્ અન્યત્ર કૃતં પુણ્યં સ્નાનદાનાદિસંયમૈઃ ।
૭૫.૪૧/૨અસ્યાસ્તુ સ્મરણાદ્ એવ તત્ પુણ્યં જાયતાં હર ॥ ૭૫.૪૧॥

૭૫.૪૨/૧યત્ર યત્ર ત્વિયં યાતિ યાવત્ સાગરગામિની ।
૭૫.૪૨/૨તત્ર તત્ર ત્વયા ભાવ્યમેષ ચાસ્તુ વરો વરઃ ॥ ૭૫.૪૨॥

૭૫.૪૩/૧યોજનાનાં તૂપરિ તુ દશ યાવચ્ચ સંખ્યયા ।
૭૫.૪૩/૨તદન્તરપ્રવિષ્ટાનાં મહાપાતકિનામપિ ॥ ૭૫.૪૩॥

૭૫.૪૪/૧તત્ પિતૃણાં ચ તેષાં ચ સ્નાનાયાગચ્છતાં શિવ ।
૭૫.૪૪/૨સ્નાને ચાપ્યન્તરે મૃત્યોર્મુક્તિભાજો ભવન્તુ વૈ ॥ ૭૫.૪૪॥

૭૫.૪૫/૧એકતઃ સર્વતીર્થાનિ સ્વર્ગમર્ત્યરસાતલે ।
૭૫.૪૫/૨એષા તેભ્યો વિશિષ્ટા તુ અલં શમ્ભો નમોઽસ્તુ તે ॥ ૭૫.૪૫॥

૭૫.૪૬/૧બ્રહ્મોવાચ । તદ્ ગૌતમવચઃ શ્રુત્વા તથાસ્ત્વિત્યબ્રવીચ્છિવઃ ।
૭૫.૪૬/૨અસ્યાઃ પરતરં તીર્થં ન ભૂતં ન ભવિષ્યતિ ॥ ૭૫.૪૬॥

૭૫.૪૭/૧સત્યં સત્યં પુનઃ સત્યં વેદે ચ પરિનિષ્ઠિતમ્ ।
૭૫.૪૭/૨સર્વેષાં ગૌતમી પુણ્યા ઇત્યુક્ત્વાન્તરધીયત ॥ ૭૫.૪૭॥

૭૫.૪૮/૧તતો ગતે ભગવતિ લોકપૂજિતે ।
૭૫.૪૮/૨તદાજ્ઞયા પૂર્ણબલઃ સ ગૌતમઃ ।
૭૫.૪૮/૩જટાં સમાદાય સરિદ્વરાં તામ્ ।
૭૫.૪૮/૪સુરૈર્વૃતો બ્રહ્મગિરિં વિવેશ ॥ ૭૫.૪૮॥

૭૫.૪૯/૧તતસ્તુ ગૌતમે પ્રાપ્તે જટામાદાય નારદ ।
૭૫.૪૯/૨પુષ્પવૃષ્ટિરભૂત્ તત્ર સમાજગ્મુઃ સુરેશ્વરાઃ ॥ ૭૫.૪૯॥

૭૫.૫૦/૧ઋષયશ્ચ મહાભાગા બ્રાહ્મણાઃ ક્ષત્રિયાસ્તથા ।
૭૫.૫૦/૨જયશબ્દેન તં વિપ્રં પૂજયન્તો મુદાન્વિતાઃ ॥ ૭૫.૫૦॥

૭૬.૧/૧નારદ ઉવાચ । મહેશ્વરજટાજુટાદ્ ગઙ્ગામાદાય ગૌતમઃ ।
૭૬.૧/૨આગત્ય બ્રહ્મણઃ પુણ્યે તતઃ કિમકરોદ્ ગિરૌ ॥ ૭૬.૧॥

૭૬.૨/૧બ્રહ્મોવાચ । આદાય ગૌતમો ગઙ્ગાં શુચિઃ પ્રયતમાનસઃ ।
૭૬.૨/૨પૂજિતો દેવગન્ધર્વૈસ્તથા ગિરિનિવાસિભિઃ ॥ ૭૬.૨॥

૭૬.૩/૧ગિરેર્મૂર્ધ્નિ જટાં સ્થાપ્ય સ્મરન્ દેવં ત્રિલોચનમ્ ।
૭૬.૩/૨ઉવાચ પ્રાઞ્જલિર્ભૂત્વા ગઙ્ગાં સ દ્વિજસત્તમઃ ॥ ૭૬.૩॥

૭૬.૪/૧ગૌતમ ઉવાચ । ત્રિલોચનજટોદ્ભૂતે સર્વકામપ્રદાયિનિ ।
૭૬.૪/૨ક્ષમસ્વ માતઃ શાન્તાસિ સુખં યાહિ હિતં કુરુ ॥ ૭૬.૪॥

૭૬.૫/૧બ્રહ્મોવાચ । એવમુક્તા ગૌતમેન ગઙ્ગા પ્રોવાચ ગૌતમમ્ ।
૭૬.૫/૨દિવ્યરૂપધરા દેવી દિવ્યસ્રગનુલેપના ॥ ૭૬.૫॥

૭૬.૬/૧ગઙ્ગોવાચ । ગચ્છેયં દેવસદનમથવાપિ કમણ્ડલુમ્ ।
૭૬.૬/૨રસાતલં વા ગચ્છેયં જાતસ્ત્વં સત્યવાગ્ અસિ ॥ ૭૬.૬॥

૭૬.૭/૧ગૌતમ ઉવાચ । ત્રયાણામુપકારાર્થં લોકાનાં યાચિતા મયા ।
૭૬.૭/૨શમ્ભુના ચ તથા દત્તા દેવિ તન્ નાન્યથા ભવેત્ ॥ ૭૬.૭॥

૭૬.૮/૧બ્રહ્મોવાચ । તદ્ ગૌતમવચઃ શ્રુત્વા ગઙ્ગા મેને દ્વિજેરિતમ્ ।
૭૬.૮/૨ત્રેધાત્માનં વિભજ્યાથ સ્વર્ગમર્ત્યરસાતલે ॥ ૭૬.૮॥

૭૬.૯/૧સ્વર્ગે ચતુર્ધા વ્યગમત્ સપ્તધા મર્ત્યમણ્ડલે ।
૭૬.૯/૨રસાતલે ચતુર્ધૈવ સૈવં પઞ્ચદશાકૃતિઃ ॥ ૭૬.૯॥

૭૬.૧૦/૧સર્વત્ર સર્વભૂતૈવ સર્વપાપવિનાશિની ।
૭૬.૧૦/૨સર્વકામપ્રદા નિત્યં સૈવ વેદે પ્રગીયતે ॥ ૭૬.૧૦॥

૭૬.૧૧/૧મર્ત્યા મર્ત્યગતામેવ પશ્યન્તિ ન તલં ગતામ્ ।
૭૬.૧૧/૨નૈવ સ્વર્ગગતાં મર્ત્યાઃ પશ્યન્ત્યજ્ઞાનબુદ્ધયઃ ॥ ૭૬.૧૧॥

૭૬.૧૨/૧યાવત્ સાગરગા દેવી તાવદ્ દેવમયી સ્મૃતા ।
૭૬.૧૨/૨ઉત્સૃષ્ટા ગૌતમેનૈવ પ્રાયાત્ પૂર્વાર્ણવં પ્રતિ ॥ ૭૬.૧૨॥

૭૬.૧૩/૧તતો દેવર્ષિભિર્જુષ્ટાં માતરં જગતઃ શુભામ્ ।
૭૬.૧૩/૨ગૌતમો મુનિશાર્દૂલઃ પ્રદક્ષિણમથાકરોત્ ॥ ૭૬.૧૩॥

૭૬.૧૪/૧ત્રિલોચનં સુરેશાનં પ્રથમં પૂજ્ય ગૌતમઃ ।
૭૬.૧૪/૨ઉભયોસ્તીરયોઃ સ્નાનં કરોમીતિ દધે મતિમ્ ॥ ૭૬.૧૪॥

૭૬.૧૫/૧સ્મૃતમાત્રસ્તદા તત્ર *આવિરાસીત્ કરુણાર્ણવઃ ।
૭૬.૧૫/૨તત્ર સ્નાનં કથં સિધ્યેદ્ ઇત્યેવં શર્વમબ્રવીત્ ॥ ૭૬.૧૫॥

૭૬.૧૬/૧કૃતાઞ્જલિપુટો ભૂત્વા ભક્તિનમ્રસ્ત્રિલોચનમ્ ॥ ૭૬.૧૬॥

૭૬.૧૭/૧ગૌતમ ઉવાચ । દેવદેવ મહેશાન તીર્થસ્નાનવિધિં મમ ।
૭૬.૧૭/૨બ્રૂહિ સમ્યઙ્ મહેશાન લોકાનાં હિતકામ્યયા ॥ ૭૬.૧૭॥

૭૬.૧૮/૧શિવ ઉવાચ । મહર્ષે શ‍ૃણુ સર્વં ચ વિધિં ગોદાવરીભવમ્ ।
૭૬.૧૮/૨પૂર્વં નાન્દીમુખં કૃત્વા દેહશુદ્ધિં વિધાય ચ ॥ ૭૬.૧૮॥

૭૬.૧૯/૧બ્રાહ્મણાન્ ભોજયિત્વા ચ તેષામાજ્ઞાં પ્રગૃહ્ય ચ ।
૭૬.૧૯/૨બ્રહ્મચર્યેણ ગચ્છન્તિ પતિતાલાપવર્જિતાઃ ॥ ૭૬.૧૯॥

૭૬.૨૦/૧યસ્ય હસ્તૌ ચ પાદૌ ચ મનશ્ચૈવ સુસંયતમ્ ।
૭૬.૨૦/૨વિદ્યા તપશ્ચ કીર્તિશ્ચ સ તીર્થફલમશ્નુતે ॥ ૭૬.૨૦॥

૭૬.૨૧/૧ભાવદુષ્ટિં પરિત્યજ્ય સ્વધર્મપરિનિષ્ઠિતઃ ।
૭૬.૨૧/૨શ્રાન્તસંવાહનં કુર્વન્ દદ્યાદ્ અન્નં યથોચિતમ્ ॥ ૭૬.૨૧॥

૭૬.૨૨/૧અકિંચનેભ્યઃ સાધુભ્યો દદ્યાદ્ વસ્ત્રાણિ કમ્બલાન્ ।
૭૬.૨૨/૨શ‍ૃણ્વન્ હરિકથાં દિવ્યાં તથા ગઙ્ગાસમુદ્ભવામ્ ।
૭૬.૨૨/૩અનેન વિધિના ગચ્છન્ સમ્યક્ તીર્થફલં લભેત્ ॥ ૭૬.૨૨॥

૭૭.૧/૧બ્રહ્મોવાચ । ત્ર્યમ્બકશ્ચ ઇતિ પ્રાહ ગૌતમં મુનિભિર્વૃતમ્ ॥ ૭૭.૧॥

૭૭.૨/૧શિવ ઉવાચ । દ્વિહસ્તમાત્રે તીર્થાનિ સમ્ભવિષ્યન્તિ ગૌતમ ।
૭૭.૨/૨સર્વત્રાહં સંનિહિતઃ સર્વકામપ્રદસ્તથા ॥ ૭૭.૨॥

૭૭.૩/૧બ્રહ્મોવાચ । ગઙ્ગાદ્વારે પ્રયાગે ચ તથા સાગરસંગમે ।
૭૭.૩/૨એતેષુ પુણ્યદા પુંસાં મુક્તિદા સા ભગીરથી ॥ ૭૭.૩॥

૭૭.૪/૧નર્મદા તુ સરિચ્છ્રેષ્ઠા પર્વતેऽમરકણ્ટકે ।
૭૭.૪/૨યમુના સંગતા તત્ર પ્રભાસે તુ સરસ્વતી ॥ ૭૭.૪॥

૭૭.૫/૧કૃષ્ણા ભીમરથી ચૈવ તુઙ્ગભદ્રા તુ નારદ ।
૭૭.૫/૨તિસૃણાં સંગમો યત્ર તત્ તીર્થં મુક્તિદં નૃણામ્ ॥ ૭૭.૫॥

૭૭.૬/૧પયોઉષ્ણી સંગતા યત્ર તત્રત્યા તચ્ચ મુક્તિદમ્ ।
૭૭.૬/૨ઇયં તુ ગૌતમી વત્સ યત્ર ક્વાપિ મમાજ્ઞયા ॥ ૭૭.૬॥

૭૭.૭/૧સર્વેષાં સર્વદા નૃણાં સ્નાનાન્ મુક્તિં પ્રદાસ્યતિ ।
૭૭.૭/૨કિંચિત્કાલે પુણ્યતમં કિંચિત્તીર્થં સુરાગમે ॥ ૭૭.૭॥

૭૭.૮/૧સર્વેષાં સર્વદા તીર્થં ગૌતમી નાત્ર સંશયઃ ।
૭૭.૮/૨તિસ્રઃ કોટ્યોऽર્ધકોટી ચ યોજનાનાં શતદ્વયે ॥ ૭૭.૮॥

૭૭.૯/૧તીર્થાનિ મુનિશાર્દૂલ સમ્ભવિષ્યન્તિ ગૌતમ ।
૭૭.૯/૨ઇયં માહેશ્વરી ગઙ્ગા ગૌતમી વૈષ્ણવીતિ ચ ॥ ૭૭.૯॥

૭૭.૧૦/૧બ્રાહ્મી ગોદાવરી નન્દા સુનન્દા કામદાયિની ।
૭૭.૧૦/૨બ્રહ્મતેજઃસમાનીતા સર્વપાપપ્રણાશની ॥ ૭૭.૧૦॥

૭૭.૧૧/૧સ્મરણાદ્ એવ પાપૌઘ+ અન્ત્રી મમ સદા પ્રિયા ।
૭૭.૧૧/૨પઞ્ચાનામપિ ભૂતાનામાપઃ શ્રેષ્ઠત્વમાગતાઃ ॥ ૭૭.૧૧॥

૭૭.૧૨/૧તત્રાપિ તીર્થભૂતાસ્તુ તસ્માદ્ આપઃ પરાઃ સ્મૃતાઃ ।
૭૭.૧૨/૨તાસાં ભાગીરથી શ્રેષ્ઠા તાભ્યોऽપિ ગૌતમી તથા ॥ ૭૭.૧૨॥

૭૭.૧૩/૧આનીતા સજટા ગઙ્ગા અસ્યા નાન્યચ્છુભાવહમ્ ।
૭૭.૧૩/૨સ્વર્ગે ભુવિ તલે વાપિ તીર્થં સર્વાર્થદં મુને ॥ ૭૭.૧૩॥

૭૭.૧૪/૧બ્રહ્મોવાચ । ઇત્યેતત્ કથિતં પુત્ર ગૌતમાય મહાત્મને ।
૭૭.૧૪/૨સાક્ષાદ્ ધરેણ તુષ્ટેન મયા તવ નિવેદિતમ્ ॥ ૭૭.૧૪॥

૭૭.૧૫/૧એવં સા ગૌતમી ગઙ્ગા સર્વેભ્યોऽપ્યધિકા મતા ।
૭૭.૧૫/૨તત્સ્વરૂપં ચ કથિતં કુતોऽન્યા શ્રવણસ્પૃહા ॥ ૭૭.૧૫॥

૭૮.૧/૧નારદ ઉવાચ । દ્વિવિધા સૈવ ગદિતા એકાપિ સુરસત્તમ ।
૭૮.૧/૨એકો ભેદસ્તુ કથિતો બ્રાહ્મણેનાહૃતો યતઃ ॥ ૭૮.૧॥

૭૮.૨/૧ક્ષત્રિયેણાપરોऽપ્યંશો જટાસ્વેવ વ્યવસ્થિતઃ ।
૭૮.૨/૨ભવસ્ય દેવદેવસ્ય આહૃતસ્તદ્ વદસ્વ મે ॥ ૭૮.૨॥

૭૮.૩/૧બ્રહ્મોવાચ । વૈવસ્વતાન્વયે જાત ઇક્ષ્વાકુકુલસમ્ભવઃ ।
૭૮.૩/૨પુરા વૈ સગરો નામ રાજાસીદ્ અતિધાર્મિકઃ ॥ ૭૮.૩॥

૭૮.૪/૧યજ્વા દાનપરો નિત્યં ધર્માચારવિચારવાન્ ।
૭૮.૪/૨તસ્ય ભાર્યાદ્વયં ચાસીત્ પતિભક્તિપરાયણમ્ ॥ ૭૮.૪॥

૭૮.૫/૧તસ્ય વૈ સંતતિર્નાભૂદ્ ઇતિ ચિન્તાપરોऽભવત્ ।
૭૮.૫/૨વસિષ્ઠં ગૃહમાહૂય સમ્પૂજ્ય વિધિવત્ તતઃ ॥ ૭૮.૫॥

૭૮.૬/૧ઉવાચ વચનં રાજા સંતતેઃ કારણં પ્રતિ ।
૭૮.૬/૨ઇતિ તદ્વચનં શ્રુત્વા ધ્યાત્વા રાજાનમબ્રવીત્ ॥ ૭૮.૬॥

૭૮.૭/૧વસિષ્ઠ ઉવાચ । સપત્નીકઃ સદા રાજન્ન્ ઋષિપૂજાપરો ભવ ॥ ૭૮.૭॥

૭૮.૮/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા સ મુનિર્વિપ્ર યથાસ્થાનં જગામ હ ।
૭૮.૮/૨એકદા તસ્ય રાજર્ષેર્ગૃહમાગાત્ તપોનિધિઃ ॥ ૭૮.૮॥

૭૮.૯/૧તસ્યર્ષેઃ પૂજનં ચક્રે સ સંતુષ્ટોऽબ્રવીદ્ વચમ્ ।
૭૮.૯/૨વરં બ્રૂહિ મહાભાગેત્યુક્તે પુત્રાન્ સ ચાવૃણોત્ ॥ ૭૮.૯॥

૭૮.૧૦/૧સ મુનિઃ પ્રાહ રાજાનમેકસ્યાં વંશધારકઃ ।
૭૮.૧૦/૨પુત્રો ભૂયાત્ તથાન્યસ્યાં ષષ્ટિસાહસ્રકં સુતાઃ ॥ ૭૮.૧૦॥

૭૮.૧૧/૧વરં દત્ત્વા મુનૌ યાતે પુત્રા જાતાઃ સહસ્રશઃ ।
૭૮.૧૧/૨સ યજ્ઞાન્ સુબહૂંશ્ચક્રે હયમેધાન્ સુદક્ષિણાન્ ॥ ૭૮.૧૧॥

૭૮.૧૨/૧એકસ્મિન્ હયમેધે વૈ દીક્ષિતો વિધિવન્ નૃપઃ ।
૭૮.૧૨/૨પુત્રાન્ ન્યયોજયદ્ રાજા સસૈન્યાન્ હયરક્ષણે ॥ ૭૮.૧૨॥

૭૮.૧૩/૧ક્વચિદ્ અન્તરમાસાદ્ય હયં જહ્રે શતક્રતુઃ ।
૭૮.૧૩/૨માર્ગમાણાશ્ચ તે પુત્રા નૈવાપશ્યન્ હયં તદા ॥ ૭૮.૧૩॥

૭૮.૧૪/૧સહસ્રાણાં તથા ષષ્ટિર્નાનાયુદ્ધવિશારદાઃ ।
૭૮.૧૪/૨તેષુ પશ્યત્સુ રક્ષાંસિ પુત્રેષુ સગરસ્ય હિ ॥ ૭૮.૧૪॥

૭૮.૧૫/૧પ્રોક્ષિતં તદ્ ધયં નીત્વા તે રસાતલમાગમન્ ।
૭૮.૧૫/૨રાક્ષસાન્ માયયા યુક્તાન્ નૈવાપશ્યન્ત સાગરાઃ ॥ ૭૮.૧૫ ॥

૭૮.૧૬/૧ન દૃષ્ટ્વા તે હયં પુત્રાઃ સગરસ્ય બલીયસઃ ।
૭૮.૧૬/૨ઇતશ્ચેતશ્ચરન્તસ્તે નૈવાપશ્યન્ હયં તદા ॥ ૭૮.૧૬ ॥

૭૮.૧૭/૧દેવલોકં તદા જગ્મુઃ પર્વતાંશ્ચ સરાંસિ ચ ।
૭૮.૧૭/૨વનાનિ ચ વિચિન્વન્તો નૈવાપશ્યન્ હયં તદા ॥ ૭૮.૧૭ ॥

૭૮.૧૮/૧કૃતસ્વસ્ત્યયનો રાજા ઋત્વિગ્ભિઃ કૃતમઙ્ગલઃ ।
૭૮.૧૮/૨અદૃષ્ટ્વા તુ પશું રમ્યં રાજા ચિન્તામુપેયિવાન્ ॥ ૭૮.૧૮ ॥

૭૮.૧૯/૧અટન્તઃ સાગરાઃ સર્વે દેવલોકમુપાગમન્ ।
૭૮.૧૯/૨હયં તમનુચિન્વન્તસ્તત્રાપિ ન હયોઽભવત્ ॥ ૭૮.૧૯ ॥

૭૮.૨૦/૧તતો મહીં સમાજગ્મુઃ પર્વતાંશ્ચ વનાનિ ચ ।
૭૮.૨૦/૨તત્રાપિ ચ હયં નૈવ દૃષ્ટવન્તો નૃપાત્મજાઃ ॥ ૭૮.૨૦ ॥

૭૮.૨૧/૧એતસ્મિન્ન્ અન્તરે તત્ર દૈવી વાગ્ અભવત્ તદા ।
૭૮.૨૧/૨રસાતલે હયો બદ્ધ આસ્તે નાન્યત્ર સાગરાઃ ॥ ૭૮.૨૧ ॥

૭૮.૨૨/૧ઇતિ શ્રુત્વા તતો વાક્યં ગન્તુકામા રસાતલમ્ ।
૭૮.૨૨/૨અખનન્ પૃથિવીં સર્વાં પરિતઃ સાગરાસ્તતઃ ॥ ૭૮.૨૨ ॥

૭૮.૨૩/૧તે ક્ષુધાર્તા મૃદં શુષ્કાં ભક્ષયન્તસ્ત્વહર્નિશમ્ ।
૭૮.૨૩/૨ન્યખનંશ્ચાપિ જગ્મુશ્ચ સત્વરાસ્તે રસાતલમ્ ॥ ૭૮.૨૩ ॥

૭૮.૨૪/૧તાન્ આગતાન્ ભૂપસુતાન્ સાગરાન્ બલિનઃ કૃતીન્ ।
૭૮.૨૪/૨શ્રુત્વા રક્ષાંસિ સંત્રસ્તા વ્યગમન્ કપિલાન્તિકમ્ ॥ ૭૮.૨૪ ॥

૭૮.૨૫/૧કપિલોઽપિ મહાપ્રાજ્ઞસ્તત્ર શેતે રસાતલે ।
૭૮.૨૫/૨પુરા ચ સાધિતં તેન દેવાનાં કાર્યમુત્તમમ્ ॥ ૭૮.૨૫ ॥

૭૮.૨૬/૧વિનિદ્રેણ તતઃ શ્રાન્તઃ સિદ્ધે કાર્યે સુરાન્ પ્રતિ ।
૭૮.૨૬/૨અબ્રવીત્ કપિલઃ શ્રીમાન્ નિદ્રાસ્થાનં પ્રયચ્છથ ॥ ૭૮.૨૬ ॥

૭૮.૨૭/૧રસાતલં દદુસ્તસ્મૈ પુનરાહ સુરાન્ મુનિઃ ।
૭૮.૨૭/૨યો મામુત્થાપયેન્ મન્દો ભસ્મી ભૂયાચ્ચ સત્વરમ્ ॥ ૭૮.૨૭ ॥

૭૮.૨૮/૧તતઃ શયે તલગતો નો ચેન્ ન સ્વપ્ન એવ હિ ।

૭૮.૨૮/૨તથેત્યુક્તઃ સુરગણૈસ્તત્ર શેતે રસાતલે ॥ ૭૮.૨૮॥

૭૮.૨૯/૧તસ્ય પ્રભાવં તે જ્ઞાત્વા રાક્ષસા માયયા યુતાઃ ।
૭૮.૨૯/૨સાગરાણાં ચ સર્વેષાં વધોપાયં પ્રચક્રિરે ॥ ૭૮.૨૯॥

૭૮.૩૦/૧વિના યુદ્ધેન તે ભીતા રાક્ષસાઃ સત્વરાસ્તદા ।
૭૮.૩૦/૨આગત્ય યત્ર સ મુનિઃ કપિલઃ કોપનો મહાન્ ॥ ૭૮.૩૦॥

૭૮.૩૧/૧શિરોદેશે હયં તે વૈ બદ્ધ્વાથ ત્વરયાન્વિતાઃ ।
૭૮.૩૧/૨દૂરે સ્થિત્વા મૌનિનશ્ચ પ્રેક્ષન્તઃ કિં ભવેદ્ ઇતિ ॥ ૭૮.૩૧॥

૭૮.૩૨/૧તતસ્તુ સાગરાઃ સર્વે નિર્વિશન્તો રસાતલમ્ ।
૭૮.૩૨/૨દદૃશુસ્તે હયં બદ્ધં શયાનં પુરુષં તથા ॥ ૭૮.૩૨॥

૭૮.૩૩/૧તં મેનિરે ચ હર્તારં ક્રતુહન્તારમેવ ચ ।
૭૮.૩૩/૨એનં હત્વા મહાપાપં નયામોઽશ્વં નૃપાન્તિકમ્ ॥ ૭૮.૩૩॥

૭૮.૩૪/૧કેચિદ્ ઊચુઃ પશું બદ્ધં નયામોઽનેન કિં ફલમ્ ।
૭૮.૩૪/૨તદાહુરપરે શૂરા રાજાનઃ શાસકા વયમ્ ॥ ૭૮.૩૪॥

૭૮.૩૫/૧ઉત્થાપ્યૈનં મહાપાપં હન્મઃ ક્ષાત્રેણ વર્ચસા ।
૭૮.૩૫/૨તે તં જઘ્નુર્મુનિં પાદૈર્બ્રુવન્તો નિષ્ઠુરાણિ ચ ॥ ૭૮.૩૫॥

૭૮.૩૬/૧તતઃ કોપેન મહતા કપિલો મુનિસત્તમઃ ।
૭૮.૩૬/૨સાગરાન્ ઈક્ષયામાસ તાન્ કોપાદ્ ભસ્મસાત્ કરોત્ ॥ ૭૮.૩૬॥

૭૮.૩૭/૧જજ્વલુસ્તે તતસ્તત્ર સાગરાઃ સર્વ એવ હિ ।
૭૮.૩૭/૨તત્ તુ સર્વં ન જાનાતિ દીક્ષિતઃ સગરો નૃપઃ ॥ ૭૮.૩૭॥

૭૮.૩૮/૧નારદઃ કથયામાસ સગરાય મહાત્મને ।
૭૮.૩૮/૨કપિલસ્ય તુ સંસ્થાનં હયસ્યાપિ તુ સંસ્થિતિમ્ ॥ ૭૮.૩૮॥

૭૮.૩૯/૧રાક્ષસાનાં તુ વિકૃતિં સાગરાણાં ચ નાશનમ્ ।
૭૮.૩૯/૨તતશ્ચિન્તાપરો રાજા કર્તવ્યં નાવબુધ્યત ॥ ૭૮.૩૯॥

૭૮.૪૦/૧અપરોઽપિ સુતશ્ચાસીદ્ અસમઞ્જા ઇતિ શ્રુતઃ ।
૭૮.૪૦/૨સ તુ બાલાંસ્તથા પૌરાન્ મૌર્ખ્યાત્ ક્ષિપતિ ચામ્ભસિ ॥ ૭૮.૪૦॥

૭૮.૪૧/૧સગરોઽપ્યથ વિજ્ઞપ્તઃ પૌરૈઃ સમ્મિલિતૈસ્તદા ।
૭૮.૪૧/૨દુર્નયં તસ્ય તં જ્ઞાત્વા તતઃ ક્રુદ્ધોઽબ્રવીન્ નૃપઃ ॥ ૭૮.૪૧॥

૭૮.૪૨/૧સ્વાન્ અમાત્યાંસ્તદા રાજા દેશત્યાગં કરોત્વયમ્ ।
૭૮.૪૨/૨અસમઞ્જાઃ ક્ષત્રધર્મ+ ।ત્યાગી વૈ બાલઘાતકઃ ॥ ૭૮.૪૨॥

૭૮.૪૩/૧સગરસ્ય તુ તદ્ વાક્યં શ્રુત્વામાત્યાસ્ત્વરાન્વિતાઃ ।
૭૮.૪૩/૨તત્યજુર્નૃપતેઃ પુત્રમસમઞ્જા ગતો વનમ્ ॥ ૭૮.૪૩॥

૭૮.૪૪/૧સાગરા બ્રહ્મશાપેન નષ્ટાઃ સર્વે રસાતલે ।
૭૮.૪૪/૨એકોऽપિ ચ વનં પ્રાપ્ત ઇદાનીં કા ગતિર્મમ ॥ ૭૮.૪૪॥

૭૮.૪૫/૧અંશુમાન્ ઇતિ વિખ્યાતઃ પુત્રસ્તસ્યાસમઞ્જસઃ ।
૭૮.૪૫/૨આનાય્ય બાલકં રાજા કાર્યં તસ્મૈ ન્યવેદયત્ ॥ ૭૮.૪૫॥

૭૮.૪૬/૧કપિલં ચ સમારાધ્ય અંશુમાન્ અપિ બાલકઃ ।
૭૮.૪૬/૨સગરાય હયં પ્રાદાત્ તતઃ પૂર્ણોऽભવત્ ક્રતુઃ ॥ ૭૮.૪૬॥

૭૮.૪૭/૧તસ્યાપિ પુત્રસ્તેજસ્વી દિલીપ ઇતિ ધાર્મિકઃ ।
૭૮.૪૭/૨તસ્યાપિ પુત્રો મતિમાન્ ભગીરથ ઇતિ શ્રુતઃ ॥ ૭૮.૪૭॥

૭૮.૪૮/૧પિતામહાનાં સર્વેષાં ગતિં શ્રુત્વા સુદુઃખિતઃ ।
૭૮.૪૮/૨સગરં નૃપશાર્દૂલં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૭૮.૪૮॥

૭૮.૪૯/૧સાગરાણાં તુ સર્વેષાં નિષ્કૃતિસ્તુ કથં ભવેત્ ।
૭૮.૪૯/૨ભગીરથં નૃપઃ પ્રાહ કપિલો વેત્તિ પુત્રક ॥ ૭૮.૪૯॥

૭૮.૫૦/૧તસ્ય તદ્ વચનં શ્રુત્વા બાલઃ પ્રાયાદ્ રસાતલમ્ ।
૭૮.૫૦/૨કપિલં ચ નમસ્કૃત્વા સર્વં તસ્મૈ ન્યવેદયત્ ॥ ૭૮.૫૦॥

૭૮.૫૧/૧સ મુનિસ્તુ ચિરં ધ્યાત્વા તપસારાધ્ય શંકરમ્ ।
૭૮.૫૧/૨જટાજલેન સ્વપિતૄન્ આપ્લાવ્ય નૃપસત્તમ ॥ ૭૮.૫૧॥

૭૮.૫૨/૧તતઃ કૃતાર્થો ભવિતા ત્વં ચ તે પિતરસ્તથા ।
૭૮.૫૨/૨તથા કરોમીતિ મુનિં પ્રણમ્ય પુનરબ્રવીત્ ॥ ૭૮.૫૨॥

૭૮.૫૩/૧ક્વ ગચ્છેऽહં મુનિશ્રેષ્ઠ કર્તવ્યં ચાપિ તદ્ વદ ॥ ૭૮.૫૩॥

૭૮.૫૪/૧કપિલ ઉવાચ । કૈલાસં તં નરશ્રેષ્ઠ ગત્વા સ્તુહિ મહેશ્વરમ્ ।
૭૮.૫૪/૨તપઃ કુરુ યથાશક્તિ તતશ્ચેપ્સિતમાપ્સ્યસિ ॥ ૭૮.૫૪॥

૭૮.૫૫/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા સ મુનેર્વાક્યં મુનિં નત્વા ત્વગાન્ નગમ્ ।
૭૮.૫૫/૨કૈલાસં સ શુચિર્ભૂત્વા બાલો બાલક્રિયાન્વિતઃ ।
૭૮.૫૫/૩તપસે નિશ્ચયં કૃત્વા ઉવાચ સ ભગીરથઃ ॥ ૭૮.૫૫॥

૭૮.૫૬/૧ભગીરથ ઉવાચ । બાલોઽહં બાલબુદ્ધિશ્ચ બાલચન્દ્રધર પ્રભો ।
૭૮.૫૬/૨નાહં કિમપિ જાનામિ તતઃ પ્રીતો ભવ પ્રભો ॥ ૭૮.૫૬॥

૭૮.૫૭/૧વાગ્ભિર્મનોભિઃ કૃતિભિઃ કદાચિન્ ।
૭૮.૫૭/૨મમોપકુર્વન્તિ હિતે રતા યે ।
૭૮.૫૭/૩તેભ્યો હિતાર્થં ત્વિહ ચામરેશ ।
૭૮.૫૭/૪સોમં નમસ્યામિ સુરાદિપૂજ્યમ્ ॥ ૭૮.૫૭॥

૭૮.૫૮/૧ઉત્પાદિતો યૈરભિવર્ધિતશ્ચ ।
૭૮.૫૮/૨સમાનગોત્રશ્ચ સમાનધર્મા ।
૭૮.૫૮/૩તેષામભીષ્ટાનિ શિવઃ કરોતુ ।
૭૮.૫૮/૪બાલેન્દુમૌલિં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૭૮.૫૮॥

૭૮.૫૯/૧બ્રહ્મોવાચ । એવં તુ બ્રુવતસ્તસ્ય પુરસ્તાદ્ અભવચ્છિવઃ ।
૭૮.૫૯/૨વરેણ ચ્છન્દયાનો વૈ ભગીરથમુવાચ હ ॥ ૭૮.૫૯॥

૭૮.૬૦/૧શિવ ઉવાચ । યન્ ન સાધ્યં સુરગણૈર્દેયં તત્ તે મયા ધ્રુવમ્ ।
૭૮.૬૦/૨વદસ્વ નિર્ભયો ભૂત્વા ભગીરથ મહામતે ॥ ૭૮.૬૦॥

૭૮.૬૧/૧બ્રહ્મોવાચ । ભગીરથઃ પ્રણમ્યેશં હૃષ્ટઃ પ્રોવાચ
શંકરમ્ ॥ ૭૮.૬૧॥

૭૮.૬૨/૧ભગીરથ ઉવાચ । જટાસ્થિતાં પિતૄણાં મે પાવનાય સરિદ્વરામ્ ।
૭૮.૬૨/૨તામેવ દેહિ દેવેશ સર્વમાપ્તં તતો ભવેત્ ॥ ૭૮.૬૨॥

૭૮.૬૩/૧બ્રહ્મોવાચ । મહેશોઽપિ વિહસ્યાથ ભગીરથમુવાચ હ ॥ ૭૮.૬૩॥

૭૮.૬૪/૧શિવ ઉવાચ । દત્તા મયેયં તે પુત્ર પુનસ્તાં સ્તુહિ સુવ્રત ॥ ૭૮.૬૪॥

૭૮.૬૫/૧બ્રહ્મોવાચ । તદ્ દેવવચનં શ્રુત્વા તદર્થં તુ તપો મહત્ ।
૭૮.૬૫/૨સ્તુતિં ચકાર ગઙ્ગાયા ભક્ત્યા પ્રયતમાનસઃ ॥ ૭૮.૬૫॥

૭૮.૬૬/૧તસ્યા અપિ પ્રસાદં ચ પ્રાપ્ય બાલોઽપ્યબાલવત્ ।
૭૮.૬૬/૨ગઙ્ગાં મહેશ્વરાત્ પ્રાપ્તામાદાયાગાદ્ રસાતલમ્ ॥ ૭૮.૬૬॥

૭૮.૬૭/૧ન્યવેદયત્ સ મુનયે કપિલાય મહાત્મને ।
૭૮.૬૭/૨યથોદિતપ્રકારેણ ગઙ્ગાં સંસ્થાપ્ય યત્નતઃ ॥ ૭૮.૬૭॥

૭૮.૬૮/૧પ્રદક્ષિણમથાવર્ત્ય કૃતાઞ્જલિપુટોઽબ્રવીત્ ॥ ૭૮.૬૮॥

૭૮.૬૯/૧ભગીરથ ઉવાચ । દેવિ મે પિતરઃ શાપાત્ કપિલસ્ય મહામુનેઃ ।
૭૮.૬૯/૨પ્રાપ્તાસ્તે વિગતિં માતસ્તસ્માત્ તાન્ પાતુમર્હસિ ॥ ૭૮.૬૯॥

૭૮.૭૦/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સુરનદી સર્વેષામુપકારિકા ।
૭૮.૭૦/૨લોકાનામુપકારાર્થં પિતૄણાં પાવનાય ચ ॥ ૭૮.૭૦॥

૭૮.૭૧/૧અગસ્ત્યપીતસ્યામ્ભોધેઃ પૂરણાય વિશેષતઃ ।
૭૮.૭૧/૨સ્મરણાદ્ એવ પાપાનાં નાશાય સુરનિમ્નગા ॥ ૭૮.૭૧॥

૭૮.૭૨/૧ભગીરથોદિતં ચક્રે રસાતલતલે સ્થિતાન્ ।
૭૮.૭૨/૨ભસ્મીભૂતાન્ નૃપસુતાન્ સાગરાંશ્ચ વિશેષતઃ ॥ ૭૮.૭૨॥

૭૮.૭૩/૧વિનિર્દગ્ધાન્ અથાપ્લાવ્ય ખાતપૂરમથાકરોત્ ।
૭૮.૭૩/૨તતો મેરું સમાપ્લાવ્ય સ્થિતાં બાલોઽબ્રવીન્ નૃપઃ ॥ ૭૮.૭૩॥

૭૮.૭૪/૧કર્મભૂમૌ ત્વયા ભાવ્યં તથેત્યાગાદ્ ધિમાલયમ્ ।
૭૮.૭૪/૨હિમવત્પર્વતાત્ પુણ્યાદ્ ભારતં વર્ષમભ્યગાત્ ॥ ૭૮.૭૪॥

૭૮.૭૫/૧તન્મધ્યતઃ પુણ્યનદી પ્રાયાત્ પૂર્વાર્ણવં પ્રતિ ।
૭૮.૭૫/૨એવમેષાપિ તે પ્રોક્તા ગઙ્ગા ક્ષાત્રા મહામુને ॥ ૭૮.૭૫॥

૭૮.૭૬/૧માહેશ્વરી વૈષ્ણવી ચ સૈવ બ્રાહ્મી ચ પાવની ।
૭૮.૭૬/૨ભાગીરથી દેવનદી હિમવચ્છિખરાશ્રયા ॥ ૭૮.૭૬॥

૭૮.૭૭/૧મહેશ્વરજટાવારિ એવં દ્વૈવિધ્યમાગતમ્ ।
૭૮.૭૭/૨વિન્ધ્યસ્ય દક્ષિણે ગઙ્ગા ગૌતમી સા નિગદ્યતે ।
૭૮.૭૭/૩ઉત્તરે સાપિ વિન્ધ્યસ્ય ભાગીરથ્યભિધીયતે ॥ ૭૮.૭૭॥

૭૯.૧/૧નારદ ઉવાચ । ન મનસ્તૃપ્તિમાધત્તે કથાઃ શૃણ્વત્ ત્વયેરિતાઃ ।
૭૯.૧/૨પૃથક્ તીર્થફલં શ્રોતું પ્રવૃત્તં મમ માનસમ્ ॥ ૭૯.૧॥

૭૯.૨/૧ક્રમશો બ્રાહ્મણાનીતાં ગઙ્ગાં મે પ્રથમં વદ ।
૭૯.૨/૨પૃથક્ તીર્થફલં પુણ્યં સેતિહાસં યથાક્રમમ્ ॥ ૭૯.૨॥

૭૯.૩/૧બ્રહ્મોવાચ । તીર્થાનાં ચ પૃથગ્ ભાવં ફલં માહાત્મ્યમેવ ચ ।
૭૯.૩/૨સર્વં વક્તું ન શક્નોમિ ન ચ ત્વં શ્રવણે ક્ષમઃ ॥ ૭૯.૩॥

૭૯.૪/૧તથાપિ કિંચિદ્ વક્ષ્યામિ શૃણુ નારદ યત્નતઃ ।
૭૯.૪/૨યાન્યુક્તાનિ ચ તીર્થાનિ શ્રુતિવાક્યાનિ યાનિ ચ ॥ ૭૯.૪॥

૭૯.૫/૧તાનિ વક્ષ્યામિ સંક્ષેપાન્ નમસ્કૃત્વા ત્રિલોચનમ્ ।

૭૯.૫/૨યત્રાસૌ ભગવાન્ આસીત્ પ્રત્યક્ષસ્ત્ર્યમ્બકો મુને ॥ ૭૯.૫॥

૭૯.૬/૧ત્ર્યમ્બકં નામ તત્ તીર્થં ભુક્તિમુક્તિપ્રદાયકમ્ ।
૭૯.૬/૨વારાહમપરં તીર્થં ત્રિષુ લોકેષુ વિશ્રુતમ્ ॥ ૭૯.૬॥

૭૯.૭/૧તસ્ય રૂપં પ્રવક્ષ્યામિ નામ વિષ્ણોર્યથાભવત્ ।
૭૯.૭/૨પુરા દેવાન્ પરાભૂય યજ્ઞમાદાય રાક્ષસઃ ॥ ૭૯.૭॥

૭૯.૮/૧રસાતલમનુપ્રાપ્તઃ સિન્ધુસેન ઇતિ શ્રુતઃ ।
૭૯.૮/૨યજ્ઞે તલમનુપ્રાપ્તે નિર્યજ્ઞા હ્યભવન્ મહી ॥ ૭૯.૮॥

૭૯.૯/૧નાયં લોકોઽસ્તિ ન પરો યજ્ઞે નષ્ટ ઇતીત્વરાઃ ।
૭૯.૯/૨સુરાસ્તમેવ વિવિશૂ રસાતલમનુદ્વિષમ્ ॥ ૭૯.૯॥

૭૯.૧૦/૧નાશક્નુવંસ્તુ તં જેતું દેવા ઇન્દ્રપુરોગમાઃ ।
૭૯.૧૦/૨વિષ્ણું પુરાણપુરુષં ગત્વા તસ્મૈ ન્યવેદયન્ ॥ ૭૯.૧૦॥

૭૯.૧૧/૧રાક્ષસસ્ય તુ તત્ કર્મ યજ્ઞભ્રંશમશેષતઃ ।
૭૯.૧૧/૨તતઃ પ્રોવાચ ભગવાન્ વારાહં વપુરાસ્થિતઃ ॥ ૭૯.૧૧॥

૭૯.૧૨/૧શઙ્ખચક્રગદાપાણિર્ગત્વા ચૈવ રસાતલમ્ ।
૭૯.૧૨/૨આનયિષ્યે મખં પુણ્યં હત્વા રાક્ષસપુંગવાન્ ॥ ૭૯.૧૨॥

૭૯.૧૩/૧સ્વઃ પ્રયાન્તુ સુરાઃ સર્વે વ્યેતુ વો માનસો જ્વરઃ ।
૭૯.૧૩/૨યેન ગઙ્ગા તલં પ્રાપ્તા પથા તેનૈવ ચક્રધૃક્ ॥ ૭૯.૧૩॥

૭૯.૧૪/૧જગામ તરસા પુત્ર ભુવં ભિત્ત્વા રસાતલમ્ ।
૭૯.૧૪/૨સ વરાહવપુઃ શ્રીમાન્ રસાતલનિવાસિનઃ ॥ ૭૯.૧૪॥

૭૯.૧૫/૧રાક્ષસાન્ દાનવાન્ હત્વા મુખે ધૃત્વા મહાધ્વરમ્ ।
૭૯.૧૫/૨વારાહરૂપી ભગવાન્ મખમાદાય યજ્ઞભુક્ ॥ ૭૯.૧૫॥

૭૯.૧૬/૧યેન પ્રાપ તલં વિષ્ણુઃ પથા તેનૈવ શત્રુજિત્ ।
૭૯.૧૬/૨મુખે ન્યસ્ય મહાયજ્ઞં નિશ્ચક્રામ રસાતલાત્ ॥ ૭૯.૧૬॥

૭૯.૧૭/૧તત્ર બ્રહ્મગિરૌ દેવાઃ પ્રતીક્ષાં ચક્રિરે હરેઃ ।
૭૯.૧૭/૨પથસ્તસ્માદ્ વિનિઃસૃત્ય ગઙ્ગાસ્રવણમભ્યગાત્ ॥ ૭૯.૧૭॥

૭૯.૧૮/૧પ્રાક્ષાલયચ્ચ સ્વાઙ્ગાનિ અસૃગ્લિપ્તાનિ નારદ ।
૭૯.૧૮/૨ગઙ્ગામ્ભસા તત્ર કુણ્ડં વારાહમભવત્ તતઃ ॥ ૭૯.૧૮॥

૭૯.૧૯/૧મુખે ન્યસ્તં મહાયજ્ઞં દેવાનાં પુરતો હરિઃ ।
૭૯.૧૯/૨દત્તવાંસ્ત્રિદશશ્રેષ્ઠો મુખાદ્ યજ્ઞોऽભ્યજાયત ॥ ૭૯.૧૯॥

૭૯.૨૦/૧તતઃ પ્રભૃતિ યજ્ઞાઙ્ગં પ્રધાનં સ્રુવ ઉચ્યતે ।
૭૯.૨૦/૨વારાહરૂપમભવદ્ એવં વૈ કારણાન્તરાત્ ॥ ૭૯.૨૦॥

૭૯.૨૧/૧તસ્માત્ પુણ્યતમં તીર્થં વારાહં સર્વકામદમ્ ।
૭૯.૨૧/૨તત્ર સ્નાનં ચ દાનં ચ સર્વક્રતુફલપ્રદમ્ ॥ ૭૯.૨૧॥

૭૯.૨૨/૧તત્ર સ્થિતોऽપિ યઃ કશ્ચિત્ પિતૄન્ સ્મરતિ પુણ્યકૃત્ ।
૭૯.૨૨/૨વિમુક્તાઃ સર્વપાપેભ્યઃ પિતરઃ સ્વર્ગમાપ્નુયુઃ ॥ ૭૯.૨૨॥

૮૦.૧/૧બ્રહ્મોવાચ । કુશાવર્તસ્ય માહાત્મ્યમહં વક્તું ન તે ક્ષમઃ ।
૮૦.૧/૨તસ્ય સ્મરણમાત્રેણ કૃતકૃત્યો ભવેન્ નરઃ ॥ ૮૦.૧॥

૮૦.૨/૧કુશાવર્તમિતિ ખ્યાતં નરાણાં સર્વકામદમ્ ।
૮૦.૨/૨કુશેનાવર્તિતં યત્ર ગૌતમેન મહાત્મના ॥ ૮૦.૨॥

૮૦.૩/૧કુશેનાવર્તયિત્વા તુ આનયામાસ તાં મુનિઃ ।
૮૦.૩/૨તત્ર સ્નાનં ચ દાનં ચ પિતૃણાં તૃપ્તિદાયકમ્ ॥ ૮૦.૩॥

૮૦.૪/૧નીલગઙ્ગા સરિચ્છ્રેષ્ઠા નિઃસૃતા નીલપર્વતાત્ ।
૮૦.૪/૨તત્ર સ્નાનાદિ યત્ કિંચિત્ કરોતિ પ્રયતો નરઃ ॥ ૮૦.૪॥

૮૦.૫/૧સર્વં તદ્ અક્ષયં વિદ્યાત્ પિતૃણાં તૃપ્તિદાયકમ્ ।
૮૦.૫/૨વિશ્રુતં ત્રિષુ લોકેષુ કપોતં તીર્થમુત્તમમ્ ॥ ૮૦.૫॥

૮૦.૬/૧તસ્ય રૂપં ચ વક્ષ્યામિ મુને શ◌ૃણુ મહાફલમ્ ।
૮૦.૬/૨તત્ર બ્રહ્મગિરૌ કશ્ચિદ્ વ્યાધઃ પરમદારુણઃ ॥ ૮૦.૬॥

૮૦.૭/૧હિનસ્તિ બ્રાહ્મણાન્ સાધૂન્ યતીન્ ગોપક્ષિણો મૃગાન્ ।
૮૦.૭/૨એવમ્ભૂતઃ સ પાપાત્મા ક્રોધનોऽનૃતભાષણઃ ॥ ૮૦.૭॥

૮૦.૮/૧ભીષણાકૃતિરત્યુગ્રો નીલાક્ષો હ્રસ્વબાહુકઃ ।
૮૦.૮/૨દન્તુરો નષ્ટનાસાક્ષો હ્રસ્વપાત્ પૃથુકુક્ષિકઃ ॥ ૮૦.૮॥

૮૦.૯/૧હ્રસ્વોદરો હ્રસ્વભુજો વિકૃતો ગર્દભસ્વનઃ ।
૮૦.૯/૨પાશહસ્તઃ પાપચિત્તઃ પાપિષ્ઠઃ સધનુઃ સદા ॥ ૮૦.૯॥

૮૦.૧૦/૧તસ્ય ભાર્યા તથાભૂતા અપત્યાન્યપિ નારદ ।
૮૦.૧૦/૨તયા તુ પ્રેર્યમાણોऽસૌ વિવેશ ગહનં વનમ્ ॥ ૮૦.૧૦॥

૮૦.૧૧/૧સ જઘાન મૃગાન્ પાપઃ પક્ષિણો બહુરૂપિણઃ ।
૮૦.૧૧/૨પઞ્જરે પ્રાક્ષિપત્ કાંશ્ચિજ્જીવમાનાંસ્તથેતરાન્ ॥ ૮૦.૧૧ ॥

૮૦.૧૨/૧ક્ષુધયા પરિતપ્તાઙ્ગો વિહ્વલસ્તૃષયા તથા ।
૮૦.૧૨/૨ભ્રાન્તદેશો બહુતરં ન્યવર્તત ગૃહં પ્રતિ ॥ ૮૦.૧૨ ॥

૮૦.૧૩/૧તતોઽપરાહ્ણે સમ્પ્રાપ્તે નિવૃત્તે મધુમાધવે ।
૮૦.૧૩/૨ક્ષણાત્ તડિદ્ ગર્જિતં ચ સાભ્રં ચૈવાભવત્ તદા ॥ ૮૦.૧૩ ॥

૮૦.૧૪/૧વવૌ વાયુઃ સાશ્મવર્ષો વારિધારાતિભીષણઃ ।
૮૦.૧૪/૨સ ગચ્છંલ્લુબ્ધકઃ શ્રાન્તઃ પન્થાનં નાવબુધ્યત ॥ ૮૦.૧૪ ॥

૮૦.૧૫/૧જલં સ્થલં ગર્તમથો પન્થાનમથવા દિશઃ ।
૮૦.૧૫/૨ન બુબોધ તદા પાપઃ શ્રાન્તઃ શરણમપ્યથ ॥ ૮૦.૧૫ ॥

૮૦.૧૬/૧ક્વ ગચ્છામિ ક્વ તિષ્ઠેયં કિં કરોમીત્યચિન્તયત્ ।
૮૦.૧૬/૨સર્વેષાં પ્રાણિનાં પ્રાણાન્ આહર્તાહં યથાન્તકઃ ॥ ૮૦.૧૬ ॥

૮૦.૧૭/૧મમાપ્યન્તકરં ભૂતં સમ્પ્રાપ્તં ચાશ્મવર્ષણમ્ ।
૮૦.૧૭/૨ત્રાતારં નૈવ પશ્યામિ શિલાં વા વૃક્ષમન્તિકે ॥ ૮૦.૧૭ ॥

૮૦.૧૮/૧એવં બહુવિધં વ્યાધો વિચિન્ત્યાપશ્યદ્ અન્તિકે ।
૮૦.૧૮/૨વને વનસ્પતિમિવ નક્ષત્રાણાં યથાત્રિજમ્ ॥ ૮૦.૧૮ ॥

૮૦.૧૯/૧મૃગાણાં ચ યથા સિંહમાશ્રમાણાં ગૃહાધિપમ્ ।
૮૦.૧૯/૨ઇન્દ્રિયાણાં મન ઇવ ત્રાતારં પ્રાણિનાં નગમ્ ॥ ૮૦.૧૯ ॥

૮૦.૨૦/૧શ્રેષ્ઠં વિટપિનં શુભ્રં શાખાપલ્લવમણ્ડિતમ્ ।
૮૦.૨૦/૨તમાશ્રિત્યોપવિષ્ટોઽભૂત્ ક્લિન્નવાસા સ લુબ્ધકઃ ॥ ૮૦.૨૦ ॥

૮૦.૨૧/૧સ્મરન્ ભાર્યામપત્યાનિ જીવેયુરથવા ન વા ।
૮૦.૨૧/૨એતસ્મિન્ન્ અન્તરે તત્ર ચાસ્તં પ્રાપ્તો દિવાકરઃ ॥ ૮૦.૨૧ ॥

૮૦.૨૨/૧તમેવ નગમાશ્રિત્ય કપોતો ભાર્યયા સહ ।
૮૦.૨૨/૨પુત્રપૌત્રૈઃ પરિવૃતો હ્યાસ્તે તત્ર નગોત્તમે ॥ ૮૦.૨૨ ॥

૮૦.૨૩/૧સુખેન નિર્ભયો ભૂત્વા સુતૃપ્તઃ પ્રીત એવ ચ ।
૮૦.૨૩/૨બહવો વત્સરા યાતા વસતસ્તસ્ય પક્ષિણઃ ॥ ૮૦.૨૩ ॥

૮૦.૨૪/૧પતિવ્રતા તસ્ય ભાર્યા સુપ્રીતા તેન ચૈવ હિ ।

૮૦.૨૪/૨કોટરે તન્નગે શ્રેષ્ઠે જલવાય્વગ્નિવર્જિતે ॥ ૮૦.૨૪॥

૮૦.૨૫/૧ભાર્યાપુત્રૈઃ પરિવૃતઃ સર્વદાસ્તે કપોતકઃ ।
૮૦.૨૫/૨તસ્મિન્ દિને દૈવવશાત્ કપોતશ્ચ કપોતકી ॥ ૮૦.૨૫॥

૮૦.૨૬/૧ભક્ષ્યાર્થં તુ ઉભૌ યાતૌ કપોતો નગમભ્યગાત્ ।
૮૦.૨૬/૨સાપિ દૈવવશાત્ પુત્ર પઞ્જરસ્થૈવ વર્તતે ॥ ૮૦.૨૬॥

૮૦.૨૭/૧ગૃહીતા લુબ્ધકેનાથ જીવમાનેવ વર્તતે ।
૮૦.૨૭/૨કપોતકોઽપ્યપત્યાનિ માતૃહીનાન્યુદીક્ષ્ય ચ ॥ ૮૦.૨૭॥

૮૦.૨૮/૧વર્ષં ચ ભીષણં પ્રાપ્તમસ્તં યાતો દિવાકરઃ ।
૮૦.૨૮/૨સ્વકોટરં તયા હીનમાલોક્ય વિલલાપ સઃ ॥ ૮૦.૨૮॥

૮૦.૨૯/૧તાં બદ્ધાં પઞ્જરસ્થાં વા ન બુબોધ કપોતરાટ્ ।
૮૦.૨૯/૨અન્વારેભે કપોતો વૈ પ્રિયાયા ગુણકીર્તનમ્ ॥ ૮૦.૨૯॥

૮૦.૩૦/૧નાદ્યાપ્યાયાતિ કલ્યાણી મમ હર્ષવિવર્ધિની ।
૮૦.૩૦/૨મમ ધર્મસ્ય જનની મમ દેહસ્ય ચેશ્વરી ॥ ૮૦.૩૦॥

૮૦.૩૧/૧ધર્માર્થકામમોક્ષાણાં સૈવ નિત્યં સહાયિની ।
૮૦.૩૧/૨તુષ્ટે હસન્તી રુષ્ટે ચ મમ દુઃખપ્રમાર્જની ॥ ૮૦.૩૧॥

૮૦.૩૨/૧સખી મન્ત્રેષુ સા નિત્યં મમ વાક્યરતા સદા ।
૮૦.૩૨/૨નાદ્યાપ્યાયાતિ કલ્યાણી સમ્પ્રયાતેઽપિ ભાસ્કરે ॥ ૮૦.૩૨॥

૮૦.૩૩/૧ન જાનાતિ વ્રતં મન્ત્રં દૈવં ધર્માર્થમેવ ચ ।
૮૦.૩૩/૨પતિવ્રતા પતિપ્રાણા પતિમન્ત્રા પતિપ્રિયા ॥ ૮૦.૩૩॥

૮૦.૩૪/૧નાદ્યાપ્યાયાતિ કલ્યાણી કિં કરોમિ ક્વ યામિ વા ।
૮૦.૩૪/૨કિં મે ગૃહં કાનનં ચ તયા હીનં હિ દૃશ્યતે ॥ ૮૦.૩૪॥

૮૦.૩૫/૧તયા યુક્તં શ્રિયા યુક્તં ભીષણં વાપિ શોભનમ્ ।
૮૦.૩૫/૨નાદ્યાપ્યાયાતિ મે કાન્તા યયા ગૃહમુદીરિતમ્ ॥ ૮૦.૩૫॥

૮૦.૩૬/૧વિનાનયા ન જીવિષ્યે ત્યજે વાપિ પ્રિયાં તનુમ્ ।
૮૦.૩૬/૨કિં કુર્વન્તુ ત્વપત્યાનિ લુપ્તધર્મસ્ત્વહં પુનઃ ॥ ૮૦.૩૬॥

૮૦.૩૭/૧એવં વિલપતસ્તસ્ય ભર્તુર્વાક્યં નિશમ્ય સા ।
૮૦.૩૭/૨પઞ્જરસ્થૈવ સા વાક્યં ભર્તારમિદમબ્રવીત્ ॥ ૮૦.૩૭॥

૮૦.૩૮/૧કપોતક્યુવાચ । અત્રાહમસ્મિ બદ્ધૈવ વિવશાસ્મિ ખગોત્તમ ।
૮૦.૩૮/૨આનીતાહં લુબ્ધકેન બદ્ધ્વા પાશૈર્મહામતે ॥ ૮૦.૩૮॥

૮૦.૩૯/૧ધન્યાસ્મ્યનુગૃહીતાસ્મિ પતિર્વક્તિ ગુણાન્ મમ ।
૮૦.૩૯/૨સતો વાપ્યસતો વાપિ કૃતાર્થાહં ન સંશયઃ ॥ ૮૦.૩૯॥

૮૦.૪૦/૧તુષ્ટે ભર્તરિ નારીણાં તુષ્ટાઃ સ્યુઃ સર્વદેવતાઃ ।
૮૦.૪૦/૨વિપર્યયે તુ નારીણામવશ્યં નાશમાપ્નુયાત્ ॥ ૮૦.૪૦॥

૮૦.૪૧/૧ત્વં દૈવં ત્વં પ્રભુર્મહ્યં ત્વં સુહૃત્ ત્વં પરાયણમ્ ।
૮૦.૪૧/૨ત્વં વ્રતં ત્વં પરં બ્રહ્મ સ્વર્ગો મોક્ષસ્ત્વમેવ ચ ॥ ૮૦.૪૧॥

૮૦.૪૩/૧મા ચિન્તાં કુરુ કલ્યાણ ધર્મે બુદ્ધિં સ્થિરાં કુરુ ।
૮૦.૪૩/૨ત્વત્પ્રસાદાચ્ચ ભુક્તા હિ ભોગાશ્ચ વિવિધા મયા ।
૮૦.૪૩/૩અલં ખેદેન મજ્જેન ધર્મે બુદ્ધિં કુરુ સ્થિરામ્ ॥ ૮૦.૪૩॥

૮૦.૪૪/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા પ્રિયાવાક્યમુત્તતાર નગોત્તમાત્ ।
૮૦.૪૪/૨યત્ર સા પઞ્જરસ્થા તુ કપોતી વર્તતે ત્વરમ્ ॥ ૮૦.૪૪॥

૮૦.૪૫/૧તામાગત્ય પ્રિયાં દૃષ્ટ્વા મૃતવચ્ચાપિ લુબ્ધકમ્ ।
૮૦.૪૫/૨મોચયામીતિ તામાહ નિશ્ચેષ્ટો લુબ્ધકોઽધુના ॥ ૮૦.૪૫॥

૮૦.૪૬/૧મા મુઞ્ચસ્વ મહાભાગ જ્ઞાત્વા સમ્બન્ધમસ્થિરમ્ ।
૮૦.૪૬/૨લુબ્ધાનાં ખેચરા હ્યન્નં જીવો જીવસ્ય ચાશનમ્ ॥ ૮૦.૪૬॥

૮૦.૪૭/૧નાપરાધં સ્મરામ્યસ્ય ધર્મબુદ્ધિં સ્થિરાં કુરુ ।
૮૦.૪૭/૨ગુરુરગ્નિર્દ્વિજાતીનાં વર્ણાનાં બ્રાહ્મણો ગુરુઃ ॥ ૮૦.૪૭॥

૮૦.૪૮/૧પતિરેવ ગુરુઃ સ્ત્રીણાં સર્વસ્યાભ્યાગતો ગુરુઃ ।
૮૦.૪૮/૨અભ્યાગતમનુપ્રાપ્તં વચનૈસ્તોષયન્તિ યે ॥ ૮૦.૪૮॥

૮૦.૪૯/૧તેષાં વાગીશ્વરી દેવી તૃપ્તા ભવતિ નિશ્ચિતમ્ ।
૮૦.૪૯/૨તસ્યાન્નસ્ય પ્રદાનેન શક્રસ્તૃપ્તિમવાપ્નુયાત્ ॥ ૮૦.૪૯॥

૮૦.૫૦/૧પિતરઃ પાદશૌચેન અન્નાદ્યેન પ્રજાપતિઃ ।
૮૦.૫૦/૨તસ્યોપચારાદ્ વૈ લક્ષ્મીર્વિષ્ણુના પ્રીતિમાપ્નુયાત્ ॥ ૮૦.૫૦॥

૮૦.૫૧/૧શયને સર્વદેવાસ્તુ તસ્માત્ પૂજ્યતમોઽતિથિઃ ।
૮૦.૫૧/૨અભ્યાગતમનુશ્રાન્તં સૂર્યોઢં ગૃહમાગતમ્ ।
૮૦.૫૧/૩તં વિદ્યાદ્ દેવરૂપેણ સર્વક્રતુફલો હ્યસૌ ॥ ૮૦.૫૧॥

૮૦.૫૨/૧અભ્યાગતં શ્રાન્તમનુવ્રજન્તિ ।
૮૦.૫૨/૨દેવાશ્ચ સર્વે પિતરોઽગ્નયશ્ચ ।
૮૦.૫૨/૩તસ્મિન્ હિ તૃપ્તે મુદમાપ્નુવન્તિ ।
૮૦.૫૨/૪ગતે નિરાશેઽપિ ચ તે નિરાશાઃ ॥ ૮૦.૫૨॥

૮૦.૫૩/૧તસ્માત્ સર્વાત્મના કાન્ત દુઃખં ત્યક્ત્વા શમં વ્રજ ।
૮૦.૫૩/૨કૃત્વા તિષ્ઠ શુભાં બુદ્ધિં ધર્મકૃત્યં સમાચર ॥ ૮૦.૫૩॥

૮૦.૫૪/૧ઉપકારોઽપકારશ્ચ પ્રવરાવિતિ સમ્મતૌ ।
૮૦.૫૪/૨ઉપકારિષુ સર્વોઽપિ કરોત્યુપકૃતિં પુનઃ ॥ ૮૦.૫૪॥

૮૦.૫૫/૧અપકારિષુ યઃ સાધુઃ પુણ્યભાક્ સ ઉદાહૃતઃ ॥ ૮૦.૫૫॥

૮૦.૫૬/૧કપોત ઉવાચ । આવયોરનુરૂપં ચ ત્વયોક્તં સાધુ મન્યસે ।
૮૦.૫૬/૨કિંતુ વક્તવ્યમપ્યસ્તિ તચ્છૃણુષ્વ વરાનને ॥ ૮૦.૫૬॥

૮૦.૫૭/૧સહસ્રં ભરતે કશ્ચિચ્છતમન્યો દશાપરઃ ।
૮૦.૫૭/૨આત્માનં ચ સુખેનાન્યો વયં કષ્ટોદરમ્ભરાઃ ॥ ૮૦.૫૭॥

૮૦.૫૮/૧ગર્તધાન્યધનાઃ કેચિત્ કુશૂલધનિનોઽપરે ।
૮૦.૫૮/૨ઘટક્ષિપ્તધનાઃ કેચિચ્ચઞ્ચુક્ષિપ્તધના વયમ્ ॥ ૮૦.૫૮॥

૮૦.૫૯/૧પૂજયામિ કથં શ્રાન્તમભ્યાગતમિમં શુભે ॥ ૮૦.૫૯॥

૮૦.૬૦/૧કપોત્યુવાચ । અગ્નિરાપઃ શુભા વાણી તૃણકાષ્ઠાદિકં ચ યત્ ।
૮૦.૬૦/૨એતદ્ અપ્યર્થિને દેયં શીતાર્તો લુબ્ધકસ્ત્વયમ્ ॥ ૮૦.૬૦॥

૮૦.૬૧/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા પ્રિયાવાક્યં વૃક્ષમારુહ્ય પક્ષિરાટ્ ।
૮૦.૬૧/૨આલોકયામાસ તદા વહ્નિં દૂરં દદર્શ હ ॥ ૮૦.૬૧॥

૮૦.૬૨/૧સ તુ ગત્વા વહ્નિદેશં ચઞ્ચુનોલ્મુકમાહરત્ ।
૮૦.૬૨/૨પુરોઽગ્નિં જ્વાલયામાસ લુબ્ધકસ્ય કપોતકઃ ॥ ૮૦.૬૨॥

૮૦.૬૩/૧શુષ્કકાષ્ઠાનિ પર્ણાનિ તૃણાનિ ચ પુનઃ પુનઃ ।
૮૦.૬૩/૨અગ્નૌ નિક્ષેપયામાસ નિશીથે સ કપોતરાટ્ ॥ ૮૦.૬૩॥

૮૦.૬૪/૧તમગ્નિં જ્વલિતં દૃષ્ટ્વા લુબ્ધકઃ શીતદુઃખિતઃ ।
૮૦.૬૪/૨અવશાનિ સ્વકાઙ્ગાનિ પ્રતાપ્ય સુખમાપ્તવાન્ ॥ ૮૦.૬૪॥

૮૦.૬૫/૧ક્ષુધાગ્નિના દહ્યમાનં વ્યાધં દૃષ્ટ્વા કપોતકી ।
૮૦.૬૫/૨મા મુઞ્ચસ્વ મહાભાગ ઇતિ ભર્તારમબ્રવીત્ ॥ ૮૦.૬૫॥

૮૦.૬૬/૧સ્વશરીરેણ દુઃખાર્તં લુબ્ધકં પ્રીણયામિ તમ્ ।
૮૦.૬૬/૨ઇષ્ટાતિથીનાં યે લોકાસ્તાંસ્ત્વં પ્રાપ્નુહિ સુવ્રત ॥ ૮૦.૬૬॥

૮૦.૬૭/૧કપોત ઉવાચ । મયિ તિષ્ઠતિ નૈવાયં તવ ધર્મો વિધીયતે ।
૮૦.૬૭/૨ઇષ્ટાતિથિર્ભવામીહ અનુજાનીહિ માં શુભે ॥ ૮૦.૬૭॥

૮૦.૬૮/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વાગ્નિં ત્રિરાવર્ત્ય સ્મરન્ દેવં ચતુર્ભુજમ્ ।
૮૦.૬૮/૨વિશ્વાત્મકં મહાવિષ્ણું શરણ્યં ભક્તવત્સલમ્ ॥ ૮૦.૬૮॥

૮૦.૬૯/૧યથાસુખં જુષસ્વેતિ વદન્ન્ અગ્નિં તથાવિશત્ ।
૮૦.૬૯/૨તં દૃષ્ટ્વાગ્નૌ ક્ષિપ્તજીવં લુબ્ધકો વાક્યમબ્રવીત્ ॥ ૮૦.૬૯॥

૮૦.૭૦/૧લુબ્ધક ઉવાચ । અહો માનુષદેહસ્ય ધિગ્ જીવિતમિદં મમ ।
૮૦.૭૦/૨યદ્ ઇદં પક્ષિરાજેન મદર્થે સાહસં કૃતમ્ ॥ ૮૦.૭૦॥

૮૦.૭૧/૧બ્રહ્મોવાચ । એવં બ્રુવન્તં તં લુબ્ધં પક્ષિણી
વાક્યમબ્રવીત્ ॥ ૮૦.૭૧॥

૮૦.૭૨/૧કપોતક્યુવાચ । માં ત્વં મુઞ્ચ મહાભાગ દૂરં યાત્યેષ
મે પતિઃ ॥ ૮૦.૭૨॥

૮૦.૭૩/૧બ્રહ્મોવાચ । તસ્યાસ્તદ્ વચનં શ્રુત્વા પઞ્જરસ્થાં કપોતકીમ્ ।
૮૦.૭૩/૨લુબ્ધકો મોચયામાસ તરસા ભીતવત્ તદા ॥ ૮૦.૭૩॥

૮૦.૭૪/૧સાપિ પ્રદક્ષિણં કૃત્વા પતિમગ્નિં તદા જગૌ ॥ ૮૦.૭૪॥

૮૦.૭૫/૧કપોત્યુવાચ । સ્ત્રીણામયં પરો ધર્મો યદ્ ભર્તુરનુવેશનમ્ ।
૮૦.૭૫/૨વેદે ચ વિહિતો માર્ગઃ સર્વલોકેષુ પૂજિતઃ ॥ ૮૦.૭૫॥

૮૦.૭૬/૧વ્યાલગ્રાહી યથા વ્યાલં બિલાદ્ ઉદ્ધરતે બલાત્ ।
૮૦.૭૬/૨એવં ત્વનુગતા નારી સહ ભર્ત્રા દિવં વ્રજેત્ ॥ ૮૦.૭૬॥

૮૦.૭૭/૧તિસ્રઃ કોટ્યોઽર્ધકોટી ચ યાનિ રોમાણિ માનુષે ।
૮૦.૭૭/૨તાવત્કાલં વસેત્ સ્વર્ગે ભર્તારં યાનુગચ્છતિ ॥ ૮૦.૭૭॥

૮૦.૭૮/૧નમસ્કૃત્વા ભુવં દેવાન્ ગઙ્ગાં ચાપિ વનસ્પતીન્ ।
૮૦.૭૮/૨આશ્વાસ્ય તાન્યપત્યાનિ લુબ્ધકં વાક્યમબ્રવીત્ ॥ ૮૦.૭૮॥

૮૦.૭૯/૧કપોત્યુવાચ । ત્વત્પ્રસાદાન્ મહાભાગ ઉપપન્નં મમેદૃશમ્ ।
૮૦.૭૯/૨અપત્યાનાં ક્ષમસ્વેહ ભર્ત્રા યામિ ત્રિવિષ્ટપમ્ ॥ ૮૦.૭૯॥

૮૦.૮૦/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા પક્ષિણી સાધ્વી પ્રવિવેશ હુતાશનમ્ ।
૮૦.૮૦/૨પ્રવિષ્ટાયાં હુતવહે જયશબ્દો ન્યવર્તત ॥ ૮૦.૮૦॥

૮૦.૮૧/૧ગગને સૂર્યસંકાશં વિમાનમતિશોભનમ્ ।
૮૦.૮૧/૨તદારૂઢૌ સુરનિભૌ દમ્પતી દદૃશે તતઃ ॥ ૮૦.૮૧॥

૮૦.૮૨/૧હર્ષેણ પ્રોચતુરુભૌ લુબ્ધકં વિસ્મયાન્વિતમ્ ॥ ૮૦.૮૨॥

૮૦.૮૩/૧દમ્પતી ઊચતુઃ । ગચ્છાવસ્ત્રિદશસ્થાનમાપૃષ્ટોઽસિ મહામતે ।
૮૦.૮૩/૨આવયોઃ સ્વર્ગસોપાનમતિથિસ્ત્વં નમોઽસ્તુ તે ॥ ૮૦.૮૩॥

૮૦.૮૪/૧બ્રહ્મોવાચ । વિમાનવરમારૂઢૌ તૌ દૃષ્ટ્વા લુબ્ધકોઽપિ સઃ ।
૮૦.૮૪/૨સધનુઃ પઞ્જરં ત્યક્ત્વા કૃતાઞ્જલિરભાષત ॥ ૮૦.૮૪॥

૮૦.૮૫/૧લુબ્ધક ઉવાચ । ન ત્યક્તવ્યો મહાભાગૌ દેયં કિંચિદ્ અજાનતે ।
૮૦.૮૫/૨અહમત્રાતિથિર્માન્યો નિષ્કૃતિં વક્તુમર્હથઃ ॥ ૮૦.૮૫॥

૮૦.૮૬/૧દમ્પતી ઊચતુઃ । ગૌતમીં ગચ્છ ભદ્રં તે તસ્યાઃ પાપં નિવેદય ।
૮૦.૮૬/૨તત્રૈવાપ્લવનાત્ પક્ષં સર્વપાપૈર્વિમોક્ષ્યસે ॥ ૮૦.૮૬॥

૮૦.૮૭/૧મુક્તપાપઃ પુનસ્તત્ર ગઙ્ગાયામવગાહને ।
૮૦.૮૭/૨અશ્વમેધફલં પુણ્યં પ્રાપ્ય પુણ્યો ભવિષ્યસિ ॥ ૮૦.૮૭॥

૮૦.૮૮/૧સરિદ્વરાયાં ગૌતમ્યાં બ્રહ્મવિષ્ણ્વીશસમ્ભુવિ ।
૮૦.૮૮/૨પુનરાપ્લવનાદ્ એવ ત્યક્ત્વા દેહં મલીમસમ્ ॥ ૮૦.૮૮॥

૮૦.૮૯/૧વિમાનવરમારૂઢઃ સ્વર્ગં ગન્તાસ્યસંશયમ્ ॥ ૮૦.૮૯॥

૮૦.૯૦/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા વચનં તાભ્યાં તથા ચક્રે સ લુબ્ધકઃ ।
૮૦.૯૦/૨વિમાનવરમારૂઢો દિવ્યરૂપધરોઽભવત્ ॥ ૮૦.૯૦॥

૮૦.૯૧/૧દિવ્યમાલ્યામ્બરધરઃ પૂજ્યમાનોઽપ્સરોગણૈઃ ।
૮૦.૯૧/૨કપોતશ્ચ કપોતી ચ તૃતીયો લુબ્ધકસ્તથા ।
૮૦.૯૧/૩ગઙ્ગાયાશ્ચ પ્રભાવેણ સર્વે વૈ દિવમાક્રમન્ ॥ ૮૦.૯૧॥

૮૦.૯૨/૧તતઃ પ્રભૃતિ તત્ તીર્થં કાપોતમિતિ વિશ્રુતમ્ ।
૮૦.૯૨/૨તત્ર સ્નાનં ચ દાનં ચ પિતૃપૂજનમેવ ચ ॥ ૮૦.૯૨॥

૮૦.૯૩/૧જપયજ્ઞાદિકં કર્મ તદ્ આનન્ત્યાય કલ્પતે ॥ ૮૦.૯૩॥

૮૧.૧/૧બ્રહ્મોવાચ । કાર્ત્તિકેયં પરં તીર્થં કૌમારમિતિ વિશ્રુતમ્ ।
૮૧.૧/૨યન્નામશ્રવણાદ્ એવ કુલવાન્ રૂપવાન્ ભવેત્ ॥ ૮૧.૧॥

૮૧.૨/૧નિહતે તારકે દૈત્યે સ્વસ્થે જાતે ત્રિવિષ્ટપે ।
૮૧.૨/૨કાર્ત્તિકેયં સુતં જ્યેષ્ઠં પ્રીત્યા પ્રોવાચ પાર્વતી ॥ ૮૧.૨॥

૮૧.૩/૧યથાસુખં ભુઙ્ક્ષ્વ ભોગાંસ્ત્રૈલોક્યે મનસઃ પ્રિયાન્ ।
૮૧.૩/૨મમાજ્ઞયા પ્રીતમનાઃ પિતુશ્ચૈવ પ્રસાદતઃ ॥ ૮૧.૩॥

૮૧.૪/૧એવમુક્તઃ સ વૈ માત્રા વિશાખો દેવતાસ્ત્રિયઃ ।
૮૧.૪/૨યથાસુખં બલાદ્ રેમે દેવપત્ન્યોઽપિ રેમિરે ॥ ૮૧.૪॥

૮૧.૫/૧તતઃ સમ્ભુજ્યમાનાસુ દેવપત્નીષુ નારદ ।
૮૧.૫/૨નાશક્નુવન્ વારયિતું કાર્ત્તિકેયં દિવૌકસઃ ॥ ૮૧.૫॥

૮૧.૬/૧તતો નિવેદયામાસુઃ પાર્વત્યૈ પુત્રકર્મ તત્ ।
૮૧.૬/૨અસકૃદ્ વાર્યમાણોઽપિ માત્રા દેવૈઃ સ શક્તિધૃક્ ॥ ૮૧.૬॥

૮૧.૭/૧નૈવાસાવકરોદ્ વાક્યં સ્ત્રીષ્વાસક્તસ્તુ ષણ્મુખઃ ।
૮૧.૭/૨અભિશાપભયાદ્ ભીતા પાર્વતી પર્યચિન્તયત્ ॥ ૮૧.૭॥

૮૧.૮/૧પુત્રસ્નેહાત્ તથૈવેશા દેવાનાં કાર્યસિદ્ધયે ।
૮૧.૮/૨દેવપત્ન્યશ્ચિરં રક્ષ્યા ઇતિ મત્વા પુનઃ પુનઃ ॥ ૮૧.૮॥

૮૧.૯/૧યસ્યાં તુ રમતે સ્કન્દઃ પાર્વતી ત્વપિ તાદૃશી ।
૮૧.૯/૨તદ્રૂપમાત્મનઃ કૃત્વા વર્તયામાસ પાર્વતી ॥ ૮૧.૯॥

૮૧.૧૦/૧ઇન્દ્રસ્ય વરુણસ્યાપિ ભાર્યામાહૂય ષણ્મુખઃ ।
૮૧.૧૦/૨યાવત્ પશ્યતિ તસ્યાં તુ માતૃરૂપમપશ્યત ॥ ૮૧.૧૦॥

૮૧.૧૧/૧તામપાસ્ય નમસ્યાથ પુનરન્યામથાહ્વયત્ ।
૮૧.૧૧/૨તસ્યાં તુ માતૃરૂપં સ પ્રેક્ષ્ય લજ્જામુપેયિવાન્ ॥ ૮૧.૧૧॥

૮૧.૧૨/૧એવં બહ્વીષુ તદ્ રૂપં દૃષ્ટ્વા માતૃમયં જગત્ ।
૮૧.૧૨/૨ઇતિ સંચિન્ત્ય ગાઙ્ગેયો વૈરાગ્યમગમત્ તદા ॥ ૮૧.૧૨॥

૮૧.૧૩/૧સ તુ માતૃકૃતં જ્ઞાત્વા પ્રવૃત્તસ્ય નિવર્તનમ્ ।
૮૧.૧૩/૨નિવાર્યશ્ચેદ્ અહં ભોગાત્ કિંતુ પૂર્વં પ્રવર્તિતઃ ॥ ૮૧.૧૩॥

૮૧.૧૪/૧તસ્માન્ માતૃકૃતં સર્વં મમ હાસ્યાસ્પદં ત્વિતિ ।
૮૧.૧૪/૨લજ્જયા પરયા યુક્તો ગૌતમીમગમત્ તદા ॥ ૮૧.૧૪॥

૮૧.૧૫/૧ઇયં ચ માતૃરૂપા મે શ઼્ૃણોતુ મમ ભાષિતમ્ ।
૮૧.૧૫/૨ઇતઃ સ્ત્રીનામધેયં યન્ મમ માતૃસમં મતમ્ ॥ ૮૧.૧૫॥

૮૧.૧૬/૧એવં જ્ઞાત્વા લોકનાથઃ પાર્વત્યા સહ શંકરઃ ।
૮૧.૧૬/૨પુત્રં નિવારયામાસ વૃત્તમિત્યબ્રવીદ્ ગુરુઃ ॥ ૮૧.૧૬॥

૮૧.૧૭/૧તતઃ સુરપતિઃ પ્રીતઃ કિં દદામીતિ ચિન્તયન્ ।
૮૧.૧૭/૨કૃતાઞ્જલિપુટઃ સ્કન્દઃ પિતરં પુનરબ્રવીત્ ॥ ૮૧.૧૭॥

૮૧.૧૮/૧સ્કન્દ ઉવાચ । સેનાપતિઃ સુરપતિસ્તવ પુત્રોઽહમિત્યપિ ।
૮૧.૧૮/૨અલમેતેન દેવેશ કિં વરૈઃ સુરપૂજિત ॥ ૮૧.૧૮॥

૮૧.૧૯/૧અથવા દાતુકામોઽસિ લોકાનાં હિતકામ્યયા ।
૮૧.૧૯/૨યાચેઽહં નાત્મના દેવ તદ્ અનુજ્ઞાતુમર્હસિ ॥ ૮૧.૧૯॥

૮૧.૨૦/૧મહાપાતકિનઃ કેચિદ્ ગુરુદારાભિગામિનઃ ।
૮૧.૨૦/૨અત્રાપ્લવનમાત્રેણ ધૌતપાપા ભવન્તુ તે ॥ ૮૧.૨૦॥

૮૧.૨૧/૧આપ્નુવન્તૂત્તમાં જાતિં તિર્યઞ્ચોઽપિ સુરેશ્વર ।
૮૧.૨૧/૨કુરૂપો રૂપસમ્પત્તિમત્ર સ્નાનાદ્ અવાપ્નુયાત્ ॥ ૮૧.૨૧॥

૮૧.૨૨/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ તં શમ્ભુઃ પ્રત્યનન્દત્ સુતેરિતમ્ ।
૮૧.૨૨/૨તતઃ પ્રભૃતિ તત્ તીર્થં કાર્ત્તિકેયમિતિ શ્રુતમ્ ।
૮૧.૨૨/૩તત્ર સ્નાનં ચ દાનં ચ સર્વક્રતુફલપ્રદમ્ ॥ ૮૧.૨૨॥

૮૨.૧/૧બ્રહ્મોવાચ । યત્ ખ્યાતં કૃત્તિકાતીર્થં કાર્ત્તિકેયાદ્ અનન્તરમ્ ।
૮૨.૧/૨તસ્ય શ્રવણમાત્રેણ સોમપાનફલં લભેત્ ॥ ૮૨.૧॥

૮૨.૨/૧પુરા તારકનાશાય ભવરેતોઽપિબત્ કવિઃ ।
૮૨.૨/૨રેતોગર્ભં કવિં દૃષ્ટ્વા ઋષિપત્ન્યોઽસ્પૃહન્ મુને ॥ ૮૨.૨॥

૮૨.૩/૧સપ્તર્ષીણામ્ ઋતુસ્નાતાં વર્જયિત્વા ત્વરુન્ધતીમ્ ।
૮૨.૩/૨તાસુ ગર્ભઃ સમભવત્ ષટ્સુ સ્ત્રીષુ તદાગ્નિતઃ ॥ ૮૨.૩॥

૮૨.૪/૧તપ્યમાનાસ્તુ શોભિષ્ઠા ઋતુસ્નાતાસ્તુ તા મુને ।
૮૨.૪/૨કિં કુર્મઃ ક્વ નુ ગચ્છામઃ કિં કૃત્વા સુકૃતં ભવેત્ ॥ ૮૨.૪॥

૮૨.૫/૧ઇત્યુક્ત્વા તા મિથો ગઙ્ગાં વ્યગ્રા ગત્વા વ્યપીડયન્ ।
૮૨.૫/૨તાભ્યસ્તે નિઃસૃતા ગર્ભાઃ ફેનરૂપાસ્તદામ્ભસિ ॥ ૮૨.૫॥

૮૨.૬/૧અમ્ભસા ત્વેકતાં પ્રાપ્તા વાયુના સર્વ એવ હિ ।
૮૨.૬/૨એકરૂપસ્તદા તાભ્યઃ ષણ્મુખઃ સમજાયત ॥ ૮૨.૬॥

૮૨.૭/૧સ્રાવયિત્વા તુ તાન્ ગર્ભાન્ ઋષિપત્ન્યો ગૃહાન્ યયુઃ ।
૮૨.૭/૨તાસાં વિકૃતરૂપાણિ દૃષ્ટ્વા તે ઋષયોઽબ્રુવન્ ॥ ૮૨.૭॥

૮૨.૮/૧ગમ્યતાં ગમ્યતાં શીઘ્રં સ્વૈરી વૃત્તિર્ન યુજ્યતે ।
૮૨.૮/૨સ્ત્રીણામિતિ તતો વત્સ નિરસ્તાઃ પતિભિસ્તુ તાઃ ॥ ૮૨.૮॥

૮૨.૯/૧તતો દુઃખં સમાવિષ્ટાસ્ત્યક્તાઃ સ્વપતિભિશ્ચ ષટ્ ।
૮૨.૯/૨તા દૃષ્ટ્વા નારદઃ પ્રાહ કાર્ત્તિકેયો હરોદ્ભવઃ ॥ ૮૨.૯॥

૮૨.૧૦/૧ગાઙ્ગેયોઽગ્નિભવશ્ચેતિ વિખ્યાતસ્તારકાન્તકઃ ।
૮૨.૧૦/૨તં યાન્તુ ન ચિરાદ્ એવ પ્રીતો ભોગં પ્રદાસ્યતિ ॥ ૮૨.૧૦॥

૮૨.૧૧/૧દેવર્ષેર્વચનાદ્ એવ સમભ્યેત્ય ચ ષણ્મુખમ્ ।
૮૨.૧૧/૨કૃત્તિકાઃ સ્વયમેવૈતદ્ યથાવૃત્તં ન્યવેદયત્ ॥ ૮૨.૧૧॥

૮૨.૧૨/૧તાભ્યો વાક્યં કૃત્તિકાભ્યઃ કાર્ત્તિકેયોઽનુમન્ય ચ ।
૮૨.૧૨/૨ગૌતમીં યાન્તુ સર્વાશ્ચ સ્નાત્વાપૂજ્ય મહેશ્વરમ્ ॥ ૮૨.૧૨॥

૮૨.૧૩/૧એષ્યામિ ચાહં તત્રૈવ યાસ્યામિ સુરમન્દિરમ્ ।
૮૨.૧૩/૨તથેત્યુક્ત્વા કૃત્તિકાશ્ચ સ્નાત્વા ગઙ્ગાં ચ ગૌતમીમ્ ॥ ૮૨.૧૩॥

૮૨.૧૪/૧દેવેશ્વરં ચ સમ્પૂજ્ય કાર્ત્તિકેયાનુશાસનાત્ ।
૮૨.૧૪/૨દેવેશ્વરપ્રસાદેન પ્રયયુઃ સુરમન્દિરમ્ ॥ ૮૨.૧૪॥

૮૨.૧૫/૧તતઃ પ્રભૃતિ તત્ તીર્થં કૃત્તિકાતીર્થમુચ્યતે ।
૮૨.૧૫/૨કાર્ત્તિક્યાં કૃત્તિકાયોગે તત્ર યઃ સ્નાનમાચરેત્ ॥ ૮૨.૧૫॥

૮૨.૧૬/૧સર્વક્રતુફલં પ્રાપ્ય રાજા ભવતિ ધાર્મિકઃ ।
૮૨.૧૬/૨તત્તીર્થસ્મરણં વાપિ યઃ કરોતિ શ્ૃણોતિ ચ ।
૮૨.૧૬/૩સર્વપાપવિનિર્મુક્તો દીર્ઘમાયુરવાપ્નુયાત્ ॥ ૮૨.૧૬॥

૮૩.૧/૧બ્રહ્મોવાચ । દશાશ્વમેધિકં તીર્થં તચ્છૃણુષ્વ મહામુને ।
૮૩.૧/૨યસ્ય શ્રવણમાત્રેણ હયમેધફલં લભેત્ ॥ ૮૩.૧॥

૮૩.૨/૧વિશ્વકર્મસુતઃ શ્રીમાન્ વિશ્વરૂપો મહાબલઃ ।
૮૩.૨/૨તસ્યાપિ પ્રથમઃ પુત્રસ્તત્પુત્રો ભૌવનો વિભુઃ ॥ ૮૩.૨॥

૮૩.૩/૧પુરોધાઃ કશ્યપસ્તસ્ય સર્વજ્ઞાનવિશારદઃ ।

૮૩.૩/૨તમપૃચ્છન્ મહાબાહુર્ભૌવનઃ સાર્વભૌવનઃ ॥ ૮૩.૩॥

૮૩.૪/૧યક્ષ્યેઽહં હયમેધૈશ્ચ યુગપદ્ દશભિર્મુને ।
૮૩.૪/૨ઇત્યપૃચ્છદ્ ગુરું વિપ્રં ક્વ યક્ષ્યામિ સુરાન્ ઇતિ ॥ ૮૩.૪॥

૮૩.૫/૧સોઽવદદ્ દેવયજનં તત્ર તત્ર નૃપોત્તમ ।
૮૩.૫/૨યત્ર યત્ર દ્વિજશ્રેષ્ઠાઃ પ્રાવર્તન્ત મહાક્રતૂન્ ॥ ૮૩.૫॥

૮૩.૬/૧તત્રાભવન્ન્ ઋષિગણા આર્ત્વિજ્યે મખમણ્ડલે ।
૮૩.૬/૨યુગપદ્ દશમેધાનિ પ્રવૃત્તાનિ પુરોધસા ॥ ૮૩.૬॥

૮૩.૭/૧પૂર્ણતાં નાયયુસ્તાનિ દૃષ્ટ્વા ચિન્તાપરો નૃપઃ ।
૮૩.૭/૨વિહાય દેવયજનં પુનરન્યત્ર તાન્ ક્રતૂન્ ॥ ૮૩.૭॥

૮૩.૮/૧ઉપાક્રામત્ તથા તત્ર વિઘ્નદોષાસ્તમાયયુઃ ।
૮૩.૮/૨દૃષ્ટ્વાપૂર્ણાંસ્તતો યજ્ઞાન્ રાજા ગુરુમભાષત ॥ ૮૩.૮॥

૮૩.૯/૧રાજોવાચ । દેશદોષાત્ કાલદોષાન્ મમ દોષાત્ તવાપિ વા ।
૮૩.૯/૨પૂર્ણતાં નાપ્નુવન્તિ સ્મ દશમેધાનિ વાજિનઃ ॥ ૮૩.૯॥

૮૩.૧૦/૧બ્રહ્મોવાચ । તતશ્ચ દુઃખિતો રાજા કશ્યપેન પુરોધસા ।
૮૩.૧૦/૨ગીષ્પતેર્ભ્રાતરં જ્યેષ્ઠં ગત્વા સંવર્તમૂચતુઃ ॥ ૮૩.૧૦॥

૮૩.૧૧/૧કશ્યપભૌવનાવૂચતુઃ । ભગવન્ યુગપત્ કાર્યાણ્યશ્વમેધાનિ માનદ ।
૮૩.૧૧/૨દશ સમ્પૂર્ણતાં યાન્તિ તં દેશં તં ગુરું વદ ॥ ૮૩.૧૧॥

૮૩.૧૨/૧બ્રહ્મોવાચ । તતો ધ્યાત્વા ઋષિશ્રેષ્ઠઃ સંવર્તો ભૌવનં તદા ।
૮૩.૧૨/૨અબ્રવીદ્ ગચ્છ બ્રહ્માણં ગુરું દેશં વદિષ્યતિ ॥ ૮૩.૧૨॥

૮૩.૧૩/૧ભૌવનોઽપિ મહાપ્રાજ્ઞઃ કશ્યપેન મહાત્મના ।
૮૩.૧૩/૨આગત્ય મામબ્રવીચ્ચ ગુરું દેશાદિકં ચ યત્ ॥ ૮૩.૧૩॥

૮૩.૧૪/૧તતોઽહમબ્રવં પુત્ર ભૌવનં કશ્યપં તથા ।
૮૩.૧૪/૨ગૌતમીં ગચ્છ રાજેન્દ્ર સ દેશઃ ક્રતુપુણ્યવાન્ ॥ ૮૩.૧૪॥

૮૩.૧૫/૧અયમેવ ગુરુઃ શ્રેષ્ઠઃ કશ્યપો વેદપારગઃ ।
૮૩.૧૫/૨ગુરોરસ્ય પ્રસાદેન ગૌતમ્યાશ્ચ પ્રસાદતઃ ॥ ૮૩.૧૫॥

૮૩.૧૬/૧એકેન હયમેધેન તત્ર સ્નાનેન વા પુનઃ ।
૮૩.૧૬/૨સેત્સ્યન્તિ તત્ર યજ્ઞાશ્ચ દશમેધાનિ વાજિનઃ ॥ ૮૩.૧૬॥

૮૩.૧૭/૧તચ્છ્રુત્વા ભૌવનો રાજા ગૌતમીતીરમભ્યગાત્ ।
૮૩.૧૭/૨કશ્યપેન સહાયેન હયમેધાય દીક્ષિતઃ ॥ ૮૩.૧૭ ॥

૮૩.૧૮/૧તતઃ પ્રવૃત્તે યજ્ઞેશે હયમેધે મહાક્રતૌ ।
૮૩.૧૮/૨સમ્પૂર્ણે તુ તદા રાજા પૃથિવીં દાતુમુદ્યતઃ ॥ ૮૩.૧૮ ॥

૮૩.૧૯/૧તતોઽન્તરિક્ષે વાગ્ ઉચ્ચૈરુવાચ નૃપસત્તમમ્ ।
૮૩.૧૯/૨પૂજયિત્વા સ્થિતં વિપ્રાન્ ઋત્વિજોઽથ સદસ્પતીન્ ॥ ૮૩.૧૯ ॥

૮૩.૨૦/૧આકાશવાગ્ ઉવાચ । પુરોધસે કશ્યપાય સશૈલવનકાનનામ્ ।
૮૩.૨૦/૨પૃથિવીં દાતુકામેન દત્તં સર્વં ત્વયા નૃપ ॥ ૮૩.૨૦ ॥

૮૩.૨૧/૧ભૂમિદાનસ્પૃહાં ત્યક્ત્વા અન્નં દેહિ મહાફલમ્ ।
૮૩.૨૧/૨નાન્નદાનસમં પુણ્યં ત્રિષુ લોકેષુ વિદ્યતે ॥ ૮૩.૨૧ ॥

૮૩.૨૨/૧વિશેષતસ્તુ ગઙ્ગાયાઃ શ્રદ્ધયા પુલિને મુને ।
૮૩.૨૨/૨ત્વયા તુ હયમેધોઽયં કૃતઃ સબહુદક્ષિણઃ ।
૮૩.૨૨/૩કૃતકૃત્યોઽસિ ભદ્રં તે નાત્ર કાર્યા વિચારણા ॥ ૮૩.૨૨ ॥

૮૩.૨૩/૧બ્રહ્મોવાચ । તથાપિ દાતુકામં તં મહી પ્રોવાચ ભૌવનમ્ ॥ ૮૩.૨૩ ॥

૮૩.૨૪/૧પૃથિવ્યુવાચ । વિશ્વકર્મજ સાર્વભૌમ મા માં દેહિ પુનઃ પુનઃ ।
૮૩.૨૪/૨નિમજ્જેઽહં સલિલસ્ય મધ્યે તસ્માન્ ન દીયતામ્ ॥ ૮૩.૨૪ ॥

૮૩.૨૫/૧બ્રહ્મોવાચ । તતશ્ચ ભૌવનો ભીતઃ કિં દેયમિતિ ચાબ્રવીત્ ।
૮૩.૨૫/૨પુનશ્ચોવાચ સા પૃથ્વી ભૌવનં બ્રાહ્મણૈર્વૃતમ્ ॥ ૮૩.૨૫ ॥

૮૩.૨૬/૧ભૂમ્યુવાચ । તિલા ગાવો ધનં ધાન્યં યત્ કિંચિદ્ ગૌતમીતટે ।
૮૩.૨૬/૨સર્વં તદ્ અક્ષયં દાનં કિં માં ભૌવન દાસ્યસિ ॥ ૮૩.૨૬ ॥

૮૩.૨૭/૧ગઙ્ગાતીરં સમાશ્રિત્ય ગ્રાસમેકં દદાતિ યઃ ।
૮૩.૨૭/૨તેનાહં સકલા દત્તા કિં માં ભૌવન દાસ્યસિ ॥ ૮૩.૨૭ ॥

૮૩.૨૮/૧બ્રહ્મોવાચ । તદ્ ભુવો વચનં શ્રુત્વા ભૌવનઃ સાર્વભૌવનઃ ।
૮૩.૨૮/૨તથેતિ મત્વા વિપ્રેભ્યો હ્યન્નં પ્રાદાત્ સુવિસ્તરમ્ ॥ ૮૩.૨૮ ॥

૮૩.૨૯/૧તતઃ પ્રભૃતિ તત્ તીર્થં દશાશ્વમેધિકં વિદુઃ ।
૮૩.૨૯/૨દશાનામશ્વમેધાનાં ફલં સ્નાનાદ્ અવાપ્યતે ॥ ૮૩.૨૯ ॥

૮૪.૧/૧બ્રહ્મોવાચ । પૈશાચં તીર્થમપરં પૂજિતં બ્રહ્મવાદિભિઃ ।
૮૪.૧/૨તસ્ય સ્વરૂપં વક્ષ્યામિ ગૌતમ્યા દક્ષિણે તટે ॥ ૮૪.૧ ॥

૮૪.૨/૧ગિરિર્બ્રહ્મગિરેઃ પાર્શ્વે અઞ્જનો નામ નારદ ।
૮૪.૨/૨તસ્મિઞ્ શૈલે મુનિવર શાપભ્રષ્ટા વરાપ્સરા ॥ ૮૪.૨॥

૮૪.૩/૧અઞ્જના નામ તત્રાસીદ્ ઉત્તમાઙ્ગેન વાનરી ।
૮૪.૩/૨કેસરી નામ તદ્ભર્તા અદ્રિકેતિ તથાપરા ॥ ૮૪.૩॥

૮૪.૪/૧સાપિ કેસરિણો ભાર્યા શાપભ્રષ્ટા વરાપ્સરા ।
૮૪.૪/૨ઉત્તમાઙ્ગેન માર્જારી સાપ્યાસ્તેઽઞ્જનપર્વતે ॥ ૮૪.૪॥

૮૪.૫/૧દક્ષિણાર્ણવમભ્યાગાત્ કેસરી લોકવિશ્રુતઃ ।
૮૪.૫/૨એતસ્મિન્ન્ અન્તરેઽગસ્ત્યોઽઞ્જનં પર્વતમભ્યગાત્ ॥ ૮૪.૫॥

૮૪.૬/૧અઞ્જના ચાદ્રિકા ચૈવ અગસ્ત્યમ્ ઋષિસત્તમમ્ ।
૮૪.૬/૨પૂજયામાસતુરુભે યથાન્યાયં યથાસુખમ્ ॥ ૮૪.૬॥

૮૪.૭/૧તતઃ પ્રસન્નો ભગવાન્ આહોભે વ્રિયતાં વરઃ ।
૮૪.૭/૨તે આહતુરુભેઽગસ્ત્યં પુત્રૌ દેહિ મુનીશ્વર ॥ ૮૪.૭॥

૮૪.૮/૧સર્વેભ્યો બલિનૌ શ્રેષ્ઠૌ સર્વલોકોપકારકૌ ।
૮૪.૮/૨તથેત્યુક્ત્વા મુનિશ્રેષ્ઠો જગામાશાં સ દક્ષિણામ્ ॥ ૮૪.૮॥

૮૪.૯/૧તતઃ કદાચિત્ તે કાલે અઞ્જના ચાદ્રિકા તથા ।
૮૪.૯/૨ગીતં નૃત્યં ચ હાસ્યં ચ કુર્વત્યૌ ગિરિમૂર્ધનિ ॥ ૮૪.૯॥

૮૪.૧૦/૧વાયુશ્ચ નિરૃતિશ્ચાપિ તે દૃષ્ટ્વા સસ્મિતૌ સુરૌ ।
૮૪.૧૦/૨કામાક્રાન્તધિયૌ ચોભૌ તદા સત્વરમીયતુઃ ॥ ૮૪.૧૦॥

૮૪.૧૧/૧ભાર્યે ભવેતામુભયોરાવાં દેવૌ વરપ્રદૌ ।
૮૪.૧૧/૨તે અપ્યૂચતુરસ્ત્વેતદ્ રેમાતે ગિરિમૂર્ધનિ ॥ ૮૪.૧૧॥

૮૪.૧૨/૧અઞ્જનાયાં તથા વાયોર્હનુમાન્ સમજાયત ।
૮૪.૧૨/૨અદ્રિકાયાં ચ નિરૃતેરદ્રિર્નામ પિશાચરાટ્ ॥ ૮૪.૧૨॥

૮૪.૧૩/૧પુનસ્તે આહતુરુભે પુત્રૌ જાતૌ મુનેર્વરાત્ ।
૮૪.૧૩/૨આવયોર્વિકૃતં રૂપમુત્તમાઙ્ગેન દૂષિતમ્ ॥ ૮૪.૧૩॥

૮૪.૧૪/૧શાપાચ્છચીપતેસ્તત્ર યુવામાજ્ઞાતુમર્હથઃ ।
૮૪.૧૪/૨તતઃ પ્રોવાચ ભગવાન્ વાયુશ્ચ નિરૃતિસ્તથા ॥ ૮૪.૧૪॥

૮૪.૧૫/૧ગૌતમ્યાં સ્નાનદાનાભ્યાં શાપમોક્ષો ભવિષ્યતિ ।

૮૪.૧૫/૨ઇત્યુક્ત્વા તાવુભૌ પ્રીતૌ તત્રૈવાન્તરધીયતામ્ ॥ ૮૪.૧૫॥

૮૪.૧૬/૧તતોઽઞ્જનાં સમાદાય અદ્રિઃ પૈશાચમૂર્તિમાન્ ।
૮૪.૧૬/૨ભ્રાતુર્હનુમતઃ પ્રીત્યૈ સ્નાપયામાસ માતરમ્ ॥ ૮૪.૧૬॥

૮૪.૧૭/૧તથૈવ હનુમાન્ ગઙ્ગામાદાયાદ્રિમતિત્વરન્ ।
૮૪.૧૭/૨માર્જારરૂપિણીં નીત્વા ગૌતમ્યાસ્તીરમાપ્તવાન્ ॥ ૮૪.૧૭॥

૮૪.૧૮/૧તતઃ પ્રભૃતિ તત્ તીર્થં પૈશાચં ચાઞ્જનં તથા ।
૮૪.૧૮/૨બ્રહ્મણો ગિરિમાસાદ્ય સર્વકામપ્રદં શુભમ્ ॥ ૮૪.૧૮॥

૮૪.૧૯/૧યોજનાનાં ત્રિપઞ્ચાશન્ માર્જારં પૂર્વતો ભવેત્ ।
૮૪.૧૯/૨માર્જારસંજ્ઞિતાત્ તસ્માદ્ ધનૂમન્તં વૃષાકપિમ્ ॥ ૮૪.૧૯॥

૮૪.૨૦/૧ફેનાસંગમમાખ્યાતં સર્વકામપ્રદં શુભમ્ ।
૮૪.૨૦/૨તસ્ય સ્વરૂપં વ્યુષ્ટિશ્ચ તત્રૈવ પ્રોચ્યતે શુભા ॥ ૮૪.૨૦॥

૮૫.૧/૧બ્રહ્મોવાચ । ક્ષુધાતીર્થમિતિ ખ્યાતં શ ૃણુ નારદ તન્મનાઃ ।
૮૫.૧/૨કથ્યમાનં મહાપુણ્યં સર્વકામપ્રદં નૃણામ્ ॥ ૮૫.૧॥

૮૫.૨/૧ઋષિરાસીત્ પુરા કણ્વસ્તપસ્વી વેદવિત્તમઃ ।
૮૫.૨/૨પરિભ્રમન્ આશ્રમાણિ ક્ષુધયા પરિપીડિતઃ ॥ ૮૫.૨॥

૮૫.૩/૧ગૌતમસ્યાશ્રમં પુણ્યં સમૃદ્ધં ચાન્નવારિણા ।
૮૫.૩/૨આત્માનં ચ ક્ષુધાયુક્તં સમૃદ્ધં ચાપિ ગૌતમમ્ ॥ ૮૫.૩॥

૮૫.૪/૧વીક્ષ્ય કણ્વોઽથ વૈષમ્યં વૈરાગ્યમગમત્ તદા ।
૮૫.૪/૨ગૌતમોઽપિ દ્વિજશ્રેષ્ઠો હ્યહં તપસિ નિષ્ઠિતઃ ॥ ૮૫.૪॥

૮૫.૫/૧સમેન યાચ્ઞાયુક્તા સ્યાત્ તસ્માદ્ ગૌતમવેશ્મનિ ।
૮૫.૫/૨ન ભોક્ષ્યેઽહં ક્ષુધાર્તોઽપિ પીડિતેઽપિ કલેવરે ॥ ૮૫.૫॥

૮૫.૬/૧ગચ્છેયં ગૌતમીં ગઙ્ગામર્જયેયં ચ સમ્પદમ્ ।
૮૫.૬/૨ઇતિ નિશ્ચિત્ય મેધાવી ગત્વા ગઙ્ગાં ચ પાવનીમ્ ॥ ૮૫.૬॥

૮૫.૭/૧સ્નાત્વા શુચિર્યતમના ઉપવિશ્ય કુશાસને ।
૮૫.૭/૨તુષ્ટાવ ગૌતમીં ગઙ્ગાં ક્ષુધાં ચ પરમાપદમ્ ॥ ૮૫.૭॥

૮૫.૮/૧કણ્વ ઉવાચ । નમોઽસ્તુ ગઙ્ગે પરમાર્તિહારિણિ ।
૮૫.૮/૨નમઃ ક્ષુધે સર્વજનાર્તિકારિણિ ।
૮૫.૮/૩નમો મહેશાનજટોદ્ભવે શુભે ।

૮૫.૮/૪નમો મહામૃત્યુમુખાદ્ વિનિસૃતે ॥ ૮૫.૮॥

૮૫.૯/૧પુણ્યાત્મનાં શાન્તરૂપે ક્રોધરૂપે દુરાત્મનામ્ ।
૮૫.૯/૨સરિદ્રૂપેણ સર્વેષાં તાપપાપાપહારિણિ ॥ ૮૫.૯॥

૮૫.૧૦/૧ક્ષુધારૂપેણ સર્વેષાં તાપપાપપ્રદે નમઃ ।
૮૫.૧૦/૨નમઃ શ્રેયસ્કરિ દેવિ નમઃ પાપપ્રતર્દિનિ ।
૮૫.૧૦/૩નમઃ શાન્તિકરિ દેવિ નમો દારિદ્ર્યનાશિનિ ॥ ૮૫.૧૦॥

૮૫.૧૧/૧બ્રહ્મોવાચ । ઇત્યેવં સ્તુવતસ્તસ્ય પુરસ્તાદ્ અભવદ્ દ્વયમ્ ।
૮૫.૧૧/૨એકં ગાઙ્ગં મનોહારિ હ્યપરં ભીષણાકૃતિ ।
૮૫.૧૧/૩પુનઃ કૃતાઞ્જલિર્ભૂત્વા નમસ્કૃત્વા દ્વિજોત્તમઃ ॥ ૮૫.૧૧॥

૮૫.૧૨/૧કણ્વ ઉવાચ । સર્વમઙ્ગલમાઙ્ગલ્યે બ્રાહ્મિ માહેશ્વરિ શુભે ।
૮૫.૧૨/૨વૈષ્ણવિ ત્ર્યમ્બકે દેવિ ગોદાવરિ નમોઽસ્તુ તે ॥ ૮૫.૧૨॥

૮૫.૧૩/૧ત્ર્યમ્બકસ્ય જટોદ્ભૂતે ગૌતમસ્યાઘનાશિનિ ।
૮૫.૧૩/૨સપ્તધા સાગરં યાન્તિ ગોદાવરિ નમોઽસ્તુ તે ॥ ૮૫.૧૩॥

૮૫.૧૪/૧સર્વપાપકૃતાં પાપે ધર્મકામાર્થનાશિનિ ।
૮૫.૧૪/૨દુઃખલોભમયિ દેવિ ક્ષુધે તુભ્યં નમો નમઃ ॥ ૮૫.૧૪॥

૮૫.૧૫/૧બ્રહ્મોવાચ । તત્ કણ્વવચનં શ્રુત્વા સુપ્રીતે આહતુર્દ્વિજમ્ ॥ ૮૫.૧૫॥

૮૫.૧૬/૧ગઙ્ગાક્ષુધે ઊચતુઃ । અભીષ્ટં વદ કલ્યાણ વરાન્ વરય
સુવ્રત ॥ ૮૫.૧૬॥

૮૫.૧૭/૧બ્રહ્મોવાચ । પ્રોવાચ પ્રણતો ગઙ્ગાં કણ્વઃ ક્ષુધાં
યથાક્રમમ્ ॥ ૮૫.૧૭॥

૮૫.૧૮/૧કણ્વ ઉવાચ । દેહિ દેવિ મનોજ્ઞાનિ કામાનિ વિભવં મમ ।
૮૫.૧૮/૨આયુર્વિત્તં ચ ભુક્તિં ચ મુક્તિં ગઙ્ગે પ્રયચ્છ મે ॥ ૮૫.૧૮॥

૮૫.૧૯/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા ગૌતમીં ગઙ્ગાં ક્ષુધાં ચાહ
દ્વિજોત્તમઃ ॥ ૮૫.૧૯॥

૮૫.૨૦/૧કણ્વ ઉવાચ । મયિ મદ્વંશજે ચાપિ ક્ષુધે તૃષ્ણે દરિદ્રિણિ ।
૮૫.૨૦/૨યાહિ પાપતરે રૂક્ષે ન ભૂયાસ્ત્વં કદાચન ॥ ૮૫.૨૦॥

૮૫.૨૧/૧અનેન સ્તવેન યે વૈ ત્વાં સ્તુવન્તિ ક્ષુધાતુરાઃ ।
૮૫.૨૧/૨તેષાં દારિદ્ર્યદુઃખાનિ ન ભવેયુર્વરોઽપરઃ ॥ ૮૫.૨૧॥

૮૫.૨૨/૧અસ્મિંસ્તીર્થે મહાપુણ્યે સ્નાનદાનજપાદિકમ્ ।
૮૫.૨૨/૨યે કુર્વન્તિ નરા ભક્ત્યા લક્ષ્મીભાજો ભવન્તુ તે ॥ ૮૫.૨૨॥

૮૫.૨૩/૧યસ્ત્વિદં પઠતે સ્તોત્રં તીર્થે વા યદિ વા ગૃહે ।
૮૫.૨૩/૨તસ્ય દારિદ્ર્યદુઃખેભ્યો ન ભયં સ્યાદ્ વરોઽપરઃ ॥ ૮૫.૨૩॥

૮૫.૨૫/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ ચોક્ત્વા તે કણ્વં યાતે સ્વમાલયમ્ ।
૮૫.૨૫/૨તતઃ પ્રભૃતિ તત્ તીર્થં કાણ્વં ગાઙ્ગં ક્ષુધાભિધમ્ ।
૮૫.૨૫/૩સર્વપાપહરં વત્સ પિતૃણાં પ્રીતિવર્ધનમ્ ॥ ૮૫.૨૫॥

૮૬.૧/૧બ્રહ્મોવાચ । અસ્તિ બ્રહ્મન્ મહાતીર્થં ચક્રતીર્થમિતિ શ્રુતમ્ ।
૮૬.૧/૨તત્ર સ્નાનાન્ નરો ભક્ત્યા હરેર્લોકમવાપ્નુયાત્ ॥ ૮૬.૧॥

૮૬.૨/૧એકાદશ્યાં તુ શુક્લાયામુપોષ્ય પૃથિવીપતે ।
૮૬.૨/૨ગણિકાસંગમે સ્નાત્વા પ્રાપ્નુયાદ્ અક્ષયં પદમ્ ॥ ૮૬.૨॥

૮૬.૩/૧પુરા તત્ર યથા વૃત્તં તન્ મે નિગદતઃ શ◌ૃણુ ।
૮૬.૩/૨આસીદ્ વિશ્વધરો નામ વૈશ્યો બહુધનાન્વિતઃ ॥ ૮૬.૩॥

૮૬.૪/૧ઉત્તરે વયસિ શ્રેષ્ઠસ્તસ્ય પુત્રોઽભવદ્ ઋષે ।
૮૬.૪/૨ગુણવાન્ રૂપસમ્પન્નો વિલાસી શુભદર્શનઃ ॥ ૮૬.૪॥

૮૬.૫/૧પ્રાણેભ્યોઽપિ પ્રિયઃ પુત્રઃ કાલે પઞ્ચત્વમાગતઃ ।
૮૬.૫/૨તથા દૃષ્ટ્વા તુ તં પુત્રં દમ્પતી દુઃખપીડિતૌ ॥ ૮૬.૫॥

૮૬.૬/૧કુર્વાતે સ્મ તદા તેન સહૈવ મરણે મતિમ્ ।
૮૬.૬/૨હા પુત્ર હન્ત કાલેન પાપેન સુદુરાત્મના ॥ ૮૬.૬॥

૮૬.૭/૧યૌવને વર્તમાનોઽપિ નીતોઽસિ ગુણસાગર ।
૮૬.૭/૨આવયોશ્ચ તથૈવ ત્વં પ્રાણેભ્યોઽપિ સુદુર્લભઃ ॥ ૮૬.૭॥

૮૬.૮/૧ઇત્થં તુ રુદિતં શ્રુત્વા દમ્પત્યોઃ કરુણં યમઃ ।
૮૬.૮/૨ત્યક્ત્વા નિજપુરં તૂર્ણં કૃપયાવિષ્ટમાનસઃ ॥ ૮૬.૮॥

૮૬.૯/૧ગોદાવર્યાઃ શુભે તીરે સ્થિતો ધ્યાયઞ્ જનાર્દનમ્ ।
૮૬.૯/૨અપિ સ્વલ્પેન કાલેન પ્રજા વૃદ્ધાઃ સમન્તતઃ ॥ ૮૬.૯॥

૮૬.૧૦/૧ઇયત ઇતિ મે પૃથ્વી કથ્યતાં કેન પૂરિતા ।
૮૬.૧૦/૨ન કશ્ચિન્ મ્રિયતે જન્તુર્ભારાક્રાન્તા વસુંધરા ॥ ૮૬.૧૦॥

૮૬.૧૧/૧તતો દેવી ગતા તૂર્ણં વસુધા મુનિસત્તમ ।
૮૬.૧૧/૨યત્રાસ્તિ સુરસંયુક્તઃ શક્રઃ પરપુરંજયઃ ।
૮૬.૧૧/૩દૃષ્ટ્વા વસુંધરામિન્દ્રઃ પ્રણિપત્યેદમબ્રવીત્ ॥ ૮૬.૧૧॥

૮૬.૧૨/૧ઇન્દ્ર ઉવાચ । કિમાગમનકાર્યં ત ઇતિ મે પૃથ્વિ કથ્યતામ્ ॥ ૮૬.૧૨॥

૮૬.૧૩/૧ધરોવાચ । ભારેણ ગુરુણા શક્ર પીડિતાહં વિના વધમ્ ।
૮૬.૧૩/૨કારણં પ્રષ્ટુમાયાતા કિમિદં કથ્યતાં મમ ॥ ૮૬.૧૩॥

૮૬.૧૪/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા મહીવાક્યમિન્દ્રો વચનમબ્રવીત્ ॥ ૮૬.૧૪॥

૮૬.૧૫/૧ઇન્દ્ર ઉવાચ । કારણં યદિ નામ સ્યાત્ તદાનીં જ્ઞાયતે મયા ।
૮૬.૧૫/૨સુરાણાં હિ પતિર્યસ્માદ્ અહં સર્વાસુ મેદિનિ ॥ ૮૬.૧૫॥

૮૬.૧૬/૧બ્રહ્મોવાચ । અથ પૃથ્વી તદા વાક્યં શ્રુત્વા ચાહ શચીપતિમ્ ।
૮૬.૧૬/૨યમ આદિશ્યતાં તર્હિ યથા સંહરતે પ્રજાઃ ॥ ૮૬.૧૬॥

૮૬.૧૭/૧ઇતિ શ્રુત્વા વચો મહ્યા આદિષ્ટાઃ સિદ્ધકિંનરાઃ ।
૮૬.૧૭/૨યમસ્યાનયને શીઘ્રં મહેન્દ્રેણ મહામુને ॥ ૮૬.૧૭॥

૮૬.૧૮/૧તતસ્તે સત્વરં યાતાઃ સર્વે વૈવસ્વતં પુરમ્ ।
૮૬.૧૮/૨નૈવાપશ્યન્ યમં તત્ર તે સિદ્ધાઃ સહ કિંનરૈઃ ।
૮૬.૧૮/૩તથાગત્ય પુનર્વેગાદ્ વાર્ત્તા શક્રે નિવેદિતા ॥ ૮૬.૧૮॥

૮૬.૧૯/૧સિદ્ધકિંનરા ઊચુઃ । યમો યમપુરે નાથ અસ્માભિર્નાવલોકિતઃ ।
૮૬.૧૯/૨મહતાપિ સુયત્નેન વીક્ષ્યમાણઃ સમન્તતઃ ॥ ૮૬.૧૯॥

૮૬.૨૦/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા વચસ્તેષાં પૃષ્ટઃ શક્રેણ વૈ તદા ।
૮૬.૨૦/૨સવિતા સ પિતા તસ્ય યમઃ કુત્રાસ્ત ઇત્યથ ॥ ૮૬.૨૦॥

૮૬.૨૧/૧સૂર્ય ઉવાચ । શક્ર ગોદાવરીતીરે કૃતાન્તો વર્તતેઽધુના ।
૮૬.૨૧/૨ચરંસ્તત્ર તપસ્તીવ્રં ન જાને કિં નુ કારણમ્ ॥ ૮૬.૨૧॥

૮૬.૨૨/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા વચો ભાનોઃ શક્રઃ
શઙ્કામુપાવિશત્ ॥ ૮૬.૨૨॥

૮૬.૨૩/૧શક્ર ઉવાચ । અહો કષ્ટં મહાકષ્ટં નષ્ટા મે સુરનાથતા ।
૮૬.૨૩/૨ગોદાવર્યાં તપઃ કુર્યાદ્ યમો વૈ દુષ્ટચેષ્ટિતઃ ।
૮૬.૨૩/૩જિઘૃક્ષુર્મત્પદં નૂનં દેવા ઇતિ મતિર્મમ ॥ ૮૬.૨૩॥

૮૬.૨૪/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા સહસેન્દ્રેણ આહૂતશ્ચાપ્સરોગણઃ ॥ ૮૬.૨૪॥

૮૬.૨૫/૧ઇન્દ્ર ઉવાચ । કા ભવતીષુ કાલસ્ય સ્થિતસ્ય તપસિ દ્વિષઃ ।
૮૬.૨૫/૨તપઃપ્રણાશને શક્તા ઇતિ મે શીઘ્રમુચ્યતામ્ ॥ ૮૬.૨૫ ॥

૮૬.૨૬/૧બ્રહ્મોવાચ । ઇતિ શક્રવચઃ શ્રુત્વા નોચે કાપિ મહામુને ।
૮૬.૨૬/૨અથ શક્રઃ પ્રકોપેણ પ્રત્યુવાચાપ્સરોગણમ્ ॥ ૮૬.૨૬ ॥

૮૬.૨૭/૧ઇન્દ્ર ઉવાચ । ઉત્તરં નાબ્રવીત્ કિંચિદ્ યામસ્તર્હિ વયં સ્વયમ્ ।
૮૬.૨૭/૨સજ્જા ભવન્તુ વિબુધાઃ સૈન્યૈરાયાન્તુ મા ચિરમ્ ।
૮૬.૨૭/૩ઘાતયામો વયં શત્રું તપસા સ્વર્ગકામુકમ્ ॥ ૮૬.૨૭ ॥

૮૬.૨૮/૧બ્રહ્મોવાચ । ઇત્યુક્તે સતિ દેવાનાં સેના પ્રાદુર્બભૂવ હ ।
૮૬.૨૮/૨ઇતીન્દ્રહૃદયં જ્ઞાત્વા હરિણા લોકધારિણા ॥ ૮૬.૨૮ ॥

૮૬.૨૯/૧પ્રેષિતં ચક્રિણા ચક્રં રક્ષણાય યમસ્ય હિ ।
૮૬.૨૯/૨ચક્રં યત્રાભવત્ તત્ર ચક્રતીર્થમનુત્તમમ્ ॥ ૮૬.૨૯ ॥

૮૬.૩૦/૧અથેન્દ્રં મેનકા પ્રાહ શઙ્કિતેતિ વચસ્તદા ॥ ૮૬.૩૦ ॥

૮૬.૩૧/૧મેનકોવાચ । કાલાવલોકને નાલં કાચિદ્ અસ્તિ સુરેશ્વર ।
૮૬.૩૧/૨મરણં ચ વરં દેવ ભવતો ન યમાત્ પુનઃ ॥ ૮૬.૩૧ ॥

૮૬.૩૨/૧રૂપયૌવનમત્તેયં ગણિકાયાચનં પ્રભો ।
૮૬.૩૨/૨પ્રેષણં તત્ પ્રયચ્છૈષા સ્વામિત્વં મન્યતે ત્વયા ॥ ૮૬.૩૨ ॥

૮૬.૩૩/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા વચસ્તસ્યાઃ શક્રઃ સુરવરેશ્વરઃ ।
૮૬.૩૩/૨આદિદેશાબલાં ક્ષામાં સત્કૃત્ય ગણિકાં તથા ॥ ૮૬.૩૩ ॥

૮૬.૩૪/૧શક્ર ઉવાચ । ગણિકે ગચ્છ મે કાર્યં કુરુ સુન્દરિ મા ચિરમ્ ।
૮૬.૩૪/૨કૃતકૃત્યાગતા ભૂયો વલ્લભા મે યથા શચી ॥ ૮૬.૩૪ ॥

૮૬.૩૫/૧બ્રહ્મોવાચ । ઇત્યાકર્ણ્ય વચઃ શક્રાદ્ ઉત્પત્ય ગણિકા દિશઃ ।
૮૬.૩૫/૨ક્ષણેન યમસાંનિધ્યમાયાતા ચારુરૂપિણી ॥ ૮૬.૩૫ ॥

૮૬.૩૬/૧યમાન્તિકમનુપ્રાપ્તા દ્યોતયન્તી દિશો દશ ।
૮૬.૩૬/૨સલીલં લલિતં બાલા જગૌ હિન્દોલકઙ્કુલમ્ ॥ ૮૬.૩૬ ॥

૮૬.૩૭/૧તતશ્ચચાલ કાલસ્ય મનો લોલં ચલાચલમ્ ।
૮૬.૩૭/૨અથોન્મીલ્ય યમો નેત્રે કામપાવકપૂરિતે ॥ ૮૬.૩૭ ॥

૮૬.૩૮/૧તસ્યાં વ્યાપારયામાસ શ્રેયઃશત્રૌ મહામુને ।

૮૬.૩૮/૨તતો વિલીય સા સદ્યઃ સરિત્ત્વમગમત્ તદા ॥ ૮૬.૩૮॥

૮૬.૩૯/૧ગૌતમ્યાં તુ સમાગમ્ય ગણિકાગણકિંકરૈઃ ।
૮૬.૩૯/૨ગીયમાના ગતા સ્વર્ગે તસ્ય તીર્થપ્રભાવતઃ ॥ ૮૬.૩૯॥

૮૬.૪૦/૧ગચ્છન્તીં ગણિકાં દૃષ્ટ્વા વિમાનસ્થાં દિવં પ્રતિ ।
૮૬.૪૦/૨વિસ્મયં પરમં પ્રાપ્તઃ કાલસ્તરલલોચનઃ ।
૮૬.૪૦/૩અથાદિત્યેન ચાગત્ય એવમુક્તો યમસ્તદા ॥ ૮૬.૪૦॥

૮૬.૪૧/૧સૂર્ય ઉવાચ । કુરુ પુત્ર નિજં કર્મ પ્રજાનાં ત્વં પરિક્ષયમ્ ।
૮૬.૪૧/૨પશ્ય વાતં સદા વાન્તં સૃજન્તં વેધસં પ્રજાઃ ।
૮૬.૪૧/૩પર્યટન્તં ત્રિલોકીં માં વહન્તીં વસુધાં પ્રજાઃ ॥ ૮૬.૪૧॥

૮૬.૪૨/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા યમો વાક્યં પિતુર્વચનમબ્રવીત્ ॥ ૮૬.૪૨॥

૮૬.૪૩/૧યમ ઉવાચ । એતન્ ન ગર્હિતં કર્મ કુર્યામહમિદં ધ્રુવમ્ ।
૮૬.૪૩/૨કર્મણ્યસ્મિન્ મહાક્રૂરે સમાદેષ્ટું ન વાર્હસિ ॥ ૮૬.૪૩॥

૮૬.૪૪/૧ઇતિ શ્રુત્વા ચ તદ્ વાક્યં ભાનુર્વચનમબ્રવીત્ ।
૮૬.૪૪/૨કિં નામ ગર્હિતં કર્મ તવ કર્તુમલં યમ ॥ ૮૬.૪૪॥

૮૬.૪૫/૧કિં ન દૃષ્ટા ત્વયા યાન્તી ગણિકા ગણકિંકરૈઃ ।
૮૬.૪૫/૨ગીયમાના દિવં સદ્યો ગૌતમીતોયમાપ્લુતા ॥ ૮૬.૪૫॥

૮૬.૪૬/૧ત્વયા ચાત્ર તપસ્તીવ્રં કૃતં પુત્ર સુદુષ્કરમ્ ।
૮૬.૪૬/૨નૈવાન્તં તસ્ય પશ્યામિ તસ્માદ્ ગચ્છ નિજં પુરમ્ ॥ ૮૬.૪૬॥

૮૬.૪૭/૧ઇત્યુક્ત્વા ભગવાન્ ભાનુસ્તત્ર સ્નાત્વા ગતો દિવમ્ ।
૮૬.૪૭/૨યમોઽપિ સંગમે સ્નાત્વા તતો નિજપુરં યયૌ ॥ ૮૬.૪૭॥

૮૬.૪૮/૧ભૂતહાપિ તતઃ શઙ્કાં તત્યાજ ચ મહામુને ।
૮૬.૪૮/૨તથા દૃષ્ટ્વા યમં યાન્તં ચક્રે ચક્રં પ્રયાણકમ્ ॥ ૮૬.૪૮॥

૮૬.૪૯/૧ભગવાન્ યત્ર ગોવિન્દો વનમાલાવિભૂષિતઃ ।
૮૬.૪૯/૨ઇતિ યઃ શ‍ૃણુયાન્ મર્ત્યઃ પઠેદ્ વાપિ સમાહિતઃ ॥ ૮૬.૪૯॥

૮૬.૫૦/૧આપદસ્તસ્ય નશ્યન્તિ દીર્ઘમાયુરવાપ્નુયાત્ ॥ ૮૬.૫૦॥

૮૭.૧/૧બ્રહ્મોવાચ । અહલ્યાસંગમં ચેહ તીર્થં ત્રૈલોક્યપાવનમ્ ।
૮૭.૧/૨શ‍ૃણુ સમ્યઙ્ મુનિશ્રેષ્ઠ તત્ર વૃત્તમિદં યથા ॥ ૮૭.૧॥

૮૭.૨/૧કૌતુકેનાતિમહતા મયા પૂર્વં મુનીશ્વર ।
૮૭.૨/૨સૃષ્ટા કન્યા બહુવિધા રૂપવત્યો ગુણાન્વિતાઃ ॥ ૮૭.૨॥

૮૭.૩/૧તાસામેકાં શ્રેષ્ઠતમાં નિર્મમે શુભલક્ષણામ્ ।
૮૭.૩/૨તાં બાલાં ચારુસર્વાઙ્ગીં દૃષ્ટ્વા રૂપગુણાન્વિતામ્ ॥ ૮૭.૩॥

૮૭.૪/૧કો વાસ્યાઃ પોષણે શક્ત ઇતિ મે બુદ્ધિરાવિશત્ ।
૮૭.૪/૨ન દૈત્યાનાં સુરાણાં ચ ન મુનીનાં તથૈવ ચ ॥ ૮૭.૪॥

૮૭.૫/૧નાસ્ત્યસ્યાઃ પોષણે શક્તિરિતિ મે બુદ્ધિરન્વભૂત્ ।
૮૭.૫/૨ગુણજ્યેષ્ઠાય વિપ્રાય તપોયુક્તાય ધીમતે ॥ ૮૭.૫॥

૮૭.૬/૧સર્વલક્ષણયુક્તાય વેદવેદાઙ્ગવેદિને ।
૮૭.૬/૨ગૌતમાય મહાપ્રાજ્ઞામદદાં પોષણાય તામ્ ॥ ૮૭.૬॥

૮૭.૭/૧પાલયસ્વ મુનિશ્રેષ્ઠ યાવદ્ આપ્સ્યતિ યૌવનમ્ ।
૮૭.૭/૨યૌવનસ્થાં પુનઃ સાધ્વીમાનયેથા મમાન્તિકમ્ ॥ ૮૭.૭॥

૮૭.૮/૧એવમુક્ત્વા ગૌતમાય પ્રાદાં કન્યાં સુમધ્યમામ્ ।
૮૭.૮/૨તામાદાય મુનિશ્રેષ્ઠ તપસા હતકલ્મષઃ ॥ ૮૭.૮॥

૮૭.૯/૧તાં પોષયિત્વા વિધિવદ્ અલંકૃત્ય મમાન્તિકમ્ ।
૮૭.૯/૨નિર્વિકારો મુનિશ્રેષ્ઠો હ્યહલ્યામાનયત્ તદા ॥ ૮૭.૯॥

૮૭.૧૦/૧તાં દૃષ્ટ્વા વિબુધાઃ સર્વે શક્રાગ્નિવરુણાદયઃ ।
૮૭.૧૦/૨મમ દેયા સુરેશાન ઇત્યૂચુસ્તે પૃથક્ પૃથક્ ॥ ૮૭.૧૦॥

૮૭.૧૧/૧તથૈવ મુનયઃ સાધ્યા દાનવા યક્ષરાક્ષસાઃ ।
૮૭.૧૧/૨તાન્ સર્વાન્ આગતાન્ દૃષ્ટ્વા કન્યાર્થમથ સંગતાન્ ॥ ૮૭.૧૧॥

૮૭.૧૨/૧ઇન્દ્રસ્ય તુ વિશેષેણ મહાંશ્ચાભૂત્ તદા ગ્રહઃ ।
૮૭.૧૨/૨ગૌતમસ્ય તુ માહાત્મ્યં ગામ્ભીર્યં ધૈર્યમેવ ચ ॥ ૮૭.૧૨॥

૮૭.૧૩/૧સ્મૃત્વા સુવિસ્મિતો ભૂત્વા મમૈવમભવત્ સુધીઃ ।
૮૭.૧૩/૨દેયેયં ગૌતમાયૈવ નાન્યયોગ્યા શુભાનના ॥ ૮૭.૧૩॥

૮૭.૧૪/૧તસ્મૈ એવ તુ તાં દાસ્યે તથાપ્યેવમચિન્તયમ્ ।
૮૭.૧૪/૨સર્વેષાં ચ મતિર્ધૈર્યં મથિતં બાલયાનયા ॥ ૮૭.૧૪॥

૮૭.૧૫/૧અહલ્યેતિ સુરૈઃ પ્રોક્તં મયા ચ ઋષિભિસ્તદા ।
૮૭.૧૫/૨દેવાન્ ઋષીંસ્તદા વીક્ષ્ય મયા તત્રોક્તમુચ્ચકૈઃ ॥ ૮૭.૧૫॥

૮૭.૧૬/૧તસ્મૈ સા દીયતે સુભ્રૂર્યઃ પૃથિવ્યાઃ પ્રદક્ષિણામ્ ।
૮૭.૧૬/૨કૃત્વોપતિષ્ઠતે પૂર્વં ન ચાન્યસ્મૈ પુનઃ પુનઃ ॥ ૮૭.૧૬॥

૮૭.૧૭/૧તતઃ સર્વે સુરગણાઃ શ્રુત્વા વાક્યં મયેરિતમ્ ।
૮૭.૧૭/૨અહલ્યાર્થં સુરા જગ્મુઃ પૃથિવ્યાશ્ચ પ્રદક્ષિણે ॥ ૮૭.૧૭॥

૮૭.૧૮/૧ગતેષુ સુરસંઘેષુ ગૌતમોઽપિ મુનીશ્વર ।
૮૭.૧૮/૨પ્રયત્નમકરોત્ કિંચિદ્ અહલ્યાર્થમિમં તથા ॥ ૮૭.૧૮॥

૮૭.૧૯/૧એતસ્મિન્ન્ અન્તરે બ્રહ્મન્ સુરભિઃ સર્વકામધુક્ ।
૮૭.૧૯/૨અર્ધપ્રસૂતા હ્યભવત્ તાં દદર્શ સ ગૌતમઃ ॥ ૮૭.૧૯॥

૮૭.૨૦/૧તસ્યાઃ પ્રદક્ષિણં ચક્રે ઇયમુર્વીતિ સંસ્મરન્ ।
૮૭.૨૦/૨લિઙ્ગસ્ય ચ સુરેશસ્ય પ્રદક્ષિણમથાકરોત્ ॥ ૮૭.૨૦॥

૮૭.૨૧/૧તયોઃ પ્રદક્ષિણં કૃત્વા ગૌતમો મુનિસત્તમઃ ।
૮૭.૨૧/૨સર્વેષાં ચૈવ દેવાનામેકં ચાપિ પ્રદક્ષિણમ્ ॥ ૮૭.૨૧॥

૮૭.૨૨/૧નૈવાભવદ્ ભુવો ગન્તુઃ સંજાતં દ્વિતયં મમ ।
૮૭.૨૨/૨એવં નિશ્ચિત્ય સ મુનિર્મમાન્તિકમથાભ્યગાત્ ॥ ૮૭.૨૨॥

૮૭.૨૩/૧નમસ્કૃત્વાબ્રવીદ્ વાક્યં ગૌતમો માં મહામતિઃ ।
૮૭.૨૩/૨કમલાસન વિશ્વાત્મન્ નમસ્તેઽસ્તુ પુનઃ પુનઃ ॥ ૮૭.૨૩॥

૮૭.૨૪/૧પ્રદક્ષિણીકૃતા બ્રહ્મન્ મયેયં વસુધાખિલા ।
૮૭.૨૪/૨યદ્ અત્ર યુક્તં દેવેશ જાનીતે તદ્ ભવાન્ સ્વયમ્ ॥ ૮૭.૨૪॥

૮૭.૨૫/૧મયા તુ ધ્યાનયોગેન જ્ઞાત્વા ગૌતમમબ્રવમ્ ।
૮૭.૨૫/૨તવૈવ દીયતે સુભ્રૂઃ પ્રદક્ષિણમિદં કૃતમ્ ॥ ૮૭.૨૫॥

૮૭.૨૬/૧ધર્મં જાનીહિ વિપ્રર્ષે દુર્જ્ઞેયં નિગમૈરપિ ।
૮૭.૨૬/૨અર્ધપ્રસૂતા સુરભિઃ સપ્તદ્વીપવતી મહી ॥ ૮૭.૨૬॥

૮૭.૨૭/૧કૃતા પ્રદક્ષિણા તસ્યાઃ પૃથિવ્યાઃ સા કૃતા ભવેત્ ।
૮૭.૨૭/૨લિઙ્ગં પ્રદક્ષિણીકૃત્ય તદ્ એવ ફલમાપ્નુયાત્ ॥ ૮૭.૨૭॥

૮૭.૨૮/૧તસ્માત્ સર્વપ્રયત્નેન મુને ગૌતમ સુવ્રત ।
૮૭.૨૮/૨તુષ્ટોઽહં તવ ધૈર્યેણ જ્ઞાનેન તપસા તથા ॥ ૮૭.૨૮॥

૮૭.૨૯/૧દત્તેયમ્ ઋષિશાર્દૂલ કન્યા લોકવરા મયા ।

૮૭.૨૯/૨ઇત્યુક્ત્વાહં ગૌતમાય અહલ્યામદદાં મુને ॥ ૮૭.૨૯ ॥

૮૭.૩૦/૧જાતે વિવાહે તે દેવાઃ કૃત્વેલાયાઃ પ્રદક્ષિણમ્ ।
૮૭.૩૦/૨શનૈઃ શનૈરથાગત્ય દદૃશુઃ સર્વ એવ તે ॥ ૮૭.૩૦ ॥

૮૭.૩૧/૧તં ગૌતમમહલ્યાં ચ દામ્પત્યં પ્રીતિવર્ધનમ્ ।
૮૭.૩૧/૨તે ચાગત્યાથ પશ્યન્તો વિસ્મિતાશ્ચાભવન્ સુરાઃ ॥ ૮૭.૩૧ ॥

૮૭.૩૨/૧અતિક્રાન્તે વિવાહે તુ સુરાઃ સર્વે દિવં યયુઃ ।
૮૭.૩૨/૨સમત્સરઃ શચીભર્તા તામીક્ષ્ય ચ દિવં યયૌ ॥ ૮૭.૩૨ ॥

૮૭.૩૩/૧તતઃ પ્રીતમનાસ્તસ્મૈ ગૌતમાય મહાત્મને ।
૮૭.૩૩/૨પ્રાદાં બ્રહ્મગિરિં પુણ્યં સર્વકામપ્રદં શુભમ્ ॥ ૮૭.૩૩ ॥

૮૭.૩૪/૧અહલ્યાયાં મુનિશ્રેષ્ઠો રેમે તત્ર સ ગૌતમઃ ।
૮૭.૩૪/૨ગૌતમસ્ય કથાં પુણ્યાં શ્રુત્વા શક્રસ્ત્રિવિષ્ટપે ॥ ૮૭.૩૪ ॥

૮૭.૩૫/૧તમાશ્રમં તં ચ મુનિં તસ્ય ભાર્યામનિન્દિતામ્ ।
૮૭.૩૫/૨ભૂત્વા બ્રાહ્મણવેષેણ દ્રષ્ટુમાગાચ્છતક્રતુઃ ॥ ૮૭.૩૫ ॥

૮૭.૩૬/૧સ દૃષ્ટ્વા ભવનં તસ્ય ભાર્યાં ચ વિભવં તથા ।
૮૭.૩૬/૨પાપીયસીં મતિં કૃત્વા અહલ્યાં સમુદૈક્ષત ॥ ૮૭.૩૬ ॥

૮૭.૩૭/૧નાત્માનં ન પરં દેશં કાલં શાપાદ્ ઋષેર્ભયમ્ ।
૮૭.૩૭/૨ન બુબોધ તદા વત્સ કામાકૃષ્ટઃ શતક્રતુઃ ॥ ૮૭.૩૭ ॥

૮૭.૩૮/૧તદ્ધ્યાનપરમો નિત્યં સુરરાજ્યેન ગર્વિતઃ ।
૮૭.૩૮/૨સંતપ્તાઙ્ગઃ કથં કુર્યાં પ્રવેશો મે કથં ભવેત્ ॥ ૮૭.૩૮ ॥

૮૭.૩૯/૧એવં વસન્ વિપ્રરૂપો નાન્તરં ત્વધ્યગચ્છત ।
૮૭.૩૯/૨સ કદાચિન્ મહાપ્રાજ્ઞઃ કૃત્વા પૌર્વાહ્નિકીં ક્રિયામ્ ॥ ૮૭.૩૯ ॥

૮૭.૪૦/૧સહિતો ગૌતમઃ શિષ્યૈર્નિર્ગતશ્ચાશ્રમાદ્ બહિઃ ।
૮૭.૪૦/૨આશ્રમં ગૌતમીં વિપ્રાન્ ધાન્યાનિ વિવિધાનિ ચ ॥ ૮૭.૪૦ ॥

૮૭.૪૧/૧દ્રષ્ટું ગતો મુનિવર ઇન્દ્રસ્તં સમુદૈક્ષત ।
૮૭.૪૧/૨ઇદમન્તરમિત્યુક્ત્વા ચક્રે કાર્યં મનઃપ્રિયમ્ ॥ ૮૭.૪૧ ॥

૮૭.૪૨/૧રૂપં કૃત્વા ગૌતમસ્ય પ્રિયેપ્સુઃ સ શતક્રતુઃ ।
૮૭.૪૨/૨તાં દૃષ્ટ્વા ચારુસર્વાઙ્ગીમહલ્યાં વાક્યમબ્રવીત્ ॥ ૮૭.૪૨ ॥

૮૭.૪૩/૧ઇન્દ્ર ઉવાચ । આકૃષ્ટોઽહં તવ ગુણૈ રૂપં સ્મૃત્વા સ્ખલત્પદઃ ।
૮૭.૪૩/૨ઇતિ બ્રુવન્ હસન્ હસ્તમાદાયાન્તઃ સમાવિશત્ ॥ ૮૭.૪૩॥

૮૭.૪૪/૧ન બુબોધ ત્વહલ્યા તં જારં મેને તુ ગૌતમમ્ ।
૮૭.૪૪/૨રમમાણા યથાસૌખ્યં પ્રાગાચ્છિષ્યૈઃ સ ગૌતમઃ ॥ ૮૭.૪૪॥

૮૭.૪૫/૧આગચ્છન્તં નિત્યમેવ અહલ્યા પ્રિયવાદિની ।
૮૭.૪૫/૨પ્રતિયાતિ પ્રિયં વક્તિ તોષયન્તી ચ તં ગુણૈઃ ॥ ૮૭.૪૫॥

૮૭.૪૬/૧તામદૃષ્ટ્વા મહાપ્રાજ્ઞો મેને તન્ મહદ્ અદ્ભુતમ્ ।
૮૭.૪૬/૨દ્વારસ્થિતં મુનિશ્રેષ્ઠં સર્વે પશ્યન્તિ નારદ ॥ ૮૭.૪૬॥

૮૭.૪૭/૧અગ્નિહોત્રસ્ય શાલાયા રક્ષિણો ગૃહકર્મિણઃ ।
૮૭.૪૭/૨ઊચુર્મુનિવરં ભીતા ગૌતમં વિસ્મયાન્વિતાઃ ॥ ૮૭.૪૭॥

૮૭.૪૮/૧રક્ષિણ ઊચુઃ । ભગવન્ કિમિદં ચિત્રં બહિરન્તશ્ચ દૃશ્યસે ।
૮૭.૪૮/૨પ્રિયયાન્તઃ પ્રવિષ્ટોઽસિ તથૈવ ચ બહિર્ભવાન્ ।
૮૭.૪૮/૩અહો તપઃપ્રભાવોઽયં નાનારૂપધરો ભવાન્ ॥ ૮૭.૪૮॥

૮૭.૫૦/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા વિસ્મિતસ્ત્વન્તઃ પ્રવિષ્ટઃ કો નુ તિષ્ઠતિ ।
૮૭.૫૦/૨પ્રિયે અહલ્યે ભવતિ કિં માં ન પ્રતિભાષસે ।
૮૭.૫૦/૩ઇત્યૃષેર્વચનં શ્રુત્વા અહલ્યા જારમબ્રવીત્ ॥ ૮૭.૫૦॥

૮૭.૫૧/૧અહલ્યોવાચ । કો ભવાન્ મુનિરૂપેણ પાપં ત્વં કૃતવાન્ અસિ ।
૮૭.૫૧/૨ઇતિ બ્રુવતી શયનાદ્ ઉત્થિતા સત્વરં ભયાત્ ॥ ૮૭.૫૧॥

૮૭.૫૨/૧સ ચાપિ પાપકૃચ્છક્રો બિડાલોઽભૂન્ મુનેર્ભયાત્ ।
૮૭.૫૨/૨ત્રસ્તાં ચ વિકૃતાં દૃષ્ટ્વા સ્વપ્રિયાં દૂષિતાં તદા ॥ ૮૭.૫૨॥

૮૭.૫૩/૧ઉવાચ સ મુનિઃ કોપાત્ કિમિદં સાહસં કૃતમ્ ।
૮૭.૫૩/૨ઇતિ બ્રુવન્તં ભર્તારં સાપિ નોવાચ લજ્જિતા ॥ ૮૭.૫૩॥

૮૭.૫૪/૧અન્વેષયંસ્તુ તં જારં બિડાલં દદૃશે મુનિઃ ।
૮૭.૫૪/૨કો ભવાન્ ઇતિ તં પ્રાહ ભસ્મીકુર્યાં મૃષાવદન્ ॥ ૮૭.૫૪॥

૮૭.૫૫/૧ઇન્દ્ર ઉવાચ । કૃતાઞ્જલિપુટો ભૂત્વા ચૈવમાહ શચીપતિઃ ।
૮૭.૫૫/૨શચીભર્તા પુરાં ભેત્તા તપોધન પુરુષ્ટુતઃ ॥ ૮૭.૫૫॥

૮૭.૫૬/૧મમેદં પાપમાપન્નં સત્યમુક્તં મયાનઘ ।
૮૭.૫૬/૨મહદ્ભિર્ગર્હિતં કર્મ કૃતવાન્ અસ્મ્યહં મુને ॥ ૮૭.૫૬॥

૮૭.૫૭/૧સ્મરસાયકનિર્ભિન્ન+ ઋદયાઃ કિં ન કુર્વતે ।
૮૭.૫૭/૨બ્રહ્મન્ મયિ મહાપાપે ક્ષમસ્વ કરુણાનિધે ॥ ૮૭.૫૭॥

૮૭.૫૮/૧સન્તઃ કૃતાપરાધેઽપિ ન રૌક્ષ્યં જાતુ કુર્વતે ।
૮૭.૫૮/૨નિશમ્ય તદ્ વચો વિપ્રો હરિમાહ રુષાન્વિતઃ ॥ ૮૭.૫૮॥

૮૭.૫૯/૧ગૌતમ ઉવાચ । ભગભક્ત્યા કૃતં પાપં સહસ્રભગવાન્ ભવ ।
૮૭.૫૯/૨તામપ્યાહ મુનિઃ કોપાત્ ત્વં ચ શુષ્કનદી ભવ ॥ ૮૭.૫૯॥

૮૭.૬૦/૧તતઃ પ્રસાદયામાસ કથયન્તી તદાકૃતિમ્ ॥ ૮૭.૬૦॥

૮૭.૬૧/૧અહલ્યોવાચ । મનસાપ્યન્યપુરુષં પાપિષ્ઠાઃ કામયન્તિ યાઃ ।
૮૭.૬૧/૨અક્ષયાન્ યાન્તિ નરકાંસ્તાસાં સર્વેઽપિ પૂર્વજાઃ ॥ ૮૭.૬૧॥

૮૭.૬૨/૧ભૂત્વા પ્રસન્નો ભગવન્ન્ અવધારય મદ્વચઃ ।
૮૭.૬૨/૨તવ રૂપેણ ચાગત્ય મામગાત્ સાક્ષિણસ્ત્વિમે ॥ ૮૭.૬૨॥

૮૭.૬૩/૧તથેતિ રક્ષિણઃ પ્રોચુરહલ્યા સત્યવાદિની ।
૮૭.૬૩/૨ધ્યાનેનાપિ મુનિર્જ્ઞાત્વા શાન્તઃ પ્રાહ પતિવ્રતામ્ ॥ ૮૭.૬૩॥

૮૭.૬૪/૧ગૌતમ ઉવાચ । યદા તુ સંગતા ભદ્રે ગૌતમ્યા સરિદીશયા ।
૮૭.૬૪/૨નદી ભૂત્વા પુના રૂપં પ્રાપ્સ્યસે પ્રિયકૃન્ મમ ॥ ૮૭.૬૪॥

૮૭.૬૫/૧ઇત્યૃષેર્વચનં શ્રુત્વા તથા ચક્રે પતિવ્રતા ।
૮૭.૬૫/૨તયા તુ સંગતા દેવ્યા અહલ્યા ગૌતમપ્રિયા ॥ ૮૭.૬૫॥

૮૭.૬૬/૧પુનસ્તદ્ રૂપમભવદ્ યન્ મયા નિર્મિતં પુરા ।
૮૭.૬૬/૨તતઃ કૃતાઞ્જલિપુટઃ સુરરાટ્ પ્રાહ ગૌતમમ્ ॥ ૮૭.૬૬॥

૮૭.૬૭/૧ઇન્દ્ર ઉવાચ । માં પાહિ મુનિશાર્દૂલ પાપિષ્ઠં ગૃહમાગતમ્ ।
૮૭.૬૭/૨પાદયોઃ પતિતં દૃષ્ટ્વા કૃપયા પ્રાહ ગૌતમઃ ॥ ૮૭.૬૭॥

૮૭.૬૮/૧ગૌતમ ઉવાચ । ગૌતમીં ગચ્છ ભદ્રં તે સ્નાનં કુરુ પુરંદર ।
૮૭.૬૮/૨ક્ષણાન્ નિર્ધૂતપાપસ્ત્વં સહસ્રાક્ષો ભવિષ્યસિ ॥ ૮૭.૬૮॥

૮૭.૬૯/૧ઉભયં વિસ્મયકરં દૃષ્ટવાન્ અસ્મિ નારદ ।
૮૭.૬૯/૨અહલ્યાયાઃ પુનર્ભાવં શચીભર્તા સહસ્રદૃક્ ॥ ૮૭.૬૯॥

૮૭.૭૦/૧તતઃ પ્રભૃતિ તત્ તીર્થમહલ્યાસંગમં શુભમ્ ।
૮૭.૭૦/૨ઇન્દ્રતીર્થમિતિ ખ્યાતં સર્વકામપ્રદં નૃણામ્ ॥ ૮૭.૭૦॥

૮૮.૧/૧બ્રહ્મોવાચ । તસ્માદ્ અપ્યપરં તીર્થં જનસ્થાનમિતિ શ્રુતમ્ ।
૮૮.૧/૨ચતુર્યોજનવિસ્તીર્ણં સ્મરણાન્ મુક્તિદં નૃણામ્ ॥ ૮૮.૧॥

૮૮.૨/૧વૈવસ્વતાન્વયે જાતો રાજાભૂજ્જનકઃ પુરા ।
૮૮.૨/૨સોઽપામ્પતેસ્તુ તનુજામુપયેમે ગુણાર્ણવામ્ ॥ ૮૮.૨॥

૮૮.૩/૧ધર્માર્થકામમોક્ષાણાં જનકાં જનકો નૃપઃ ।
૮૮.૩/૨અનુરૂપગુણત્વાચ્ચ તસ્ય ભાર્યા ગુણાર્ણવા ॥ ૮૮.૩॥

૮૮.૪/૧યાજ્ઞવલ્ક્યશ્ચ વિપ્રેન્દ્રસ્તસ્ય રાજ્ઞઃ પુરોહિતઃ ।
૮૮.૪/૨તમપૃચ્છન્ નૃપશ્રેષ્ઠો યાજ્ઞવલ્ક્યં પુરોહિતમ્ ॥ ૮૮.૪॥

૮૮.૫/૧જનક ઉવાચ । ભુક્તિમુક્તી ઉભે શ્રેષ્ઠે નિર્ણીતે મુનિસત્તમૈઃ ।
૮૮.૫/૨દાસીદાસેભતુરગ+ ।રથાદ્યૈર્ભુક્તિરુત્તમા ॥ ૮૮.૫॥

૮૮.૬/૧કિંત્વન્તવિરસા ભુક્તિર્મુક્તિરેકા નિરત્યયા ।
૮૮.૬/૨ભુક્તેર્મુક્તિઃ શ્રેષ્ઠતમા ભુક્ત્યા મુક્તિં કથં વ્રજેત્ ॥ ૮૮.૬॥

૮૮.૭/૧સર્વસઙ્ગપરિત્યાગાન્ મુક્તિપ્રાપ્તિઃ સુદુઃખતઃ ।
૮૮.૭/૨તદ્ બ્રૂહિ દ્વિજશાર્દૂલ સુખાન્ મુક્તિઃ કથં ભવેત્ ॥ ૮૮.૭॥

૮૮.૮/૧યાજ્ઞવલ્ક્ય ઉવાચ । અપામ્પતિસ્તવ ગુરુઃ શ્વશુરઃ પ્રિયકૃત્ તથા ।
૮૮.૮/૨તં ગત્વા પૃચ્છ નૃપતે ઉપદેક્ષ્યતિ તે હિતમ્ ॥ ૮૮.૮॥

૮૮.૯/૧યાજ્ઞવલ્ક્યશ્ચ જનકો રાજાનં વરુણં તદા ।
૮૮.૯/૨ગત્વા ચોચતુરવ્યગ્રૌ મુક્તિમાર્ગં યથાક્રમમ્ ॥ ૮૮.૯॥

૮૮.૧૦/૧વરુણ ઉવાચ । દ્વિધા તુ સંસ્થિતા મુક્તિઃ કર્મદ્વારેઽપ્યકર્મણિ ।
૮૮.૧૦/૨વેદે ચ નિશ્ચિતો માર્ગઃ કર્મ જ્યાયો હ્યકર્મણઃ ॥ ૮૮.૧૦॥

૮૮.૧૧/૧સર્વં ચ કર્મણા બદ્ધં પુરુષાર્થચતુષ્ટયમ્ ।
૮૮.૧૧/૨અકર્મણૈવાપ્યત ઇતિ મુક્તિમાર્ગો મૃષોચ્યતે ॥ ૮૮.૧૧॥

૮૮.૧૨/૧કર્મણા સર્વધાન્યાનિ સેત્સ્યન્તિ નૃપસત્તમ ।
૮૮.૧૨/૨તસ્માત્ સર્વાત્મના કર્મ કર્તવ્યં વૈદિકં નૃભિઃ ॥ ૮૮.૧૨॥

૮૮.૧૩/૧તેન ભુક્તિં ચ મુક્તિં ચ પ્રાપ્નુવન્તીહ માનવાઃ ।
૮૮.૧૩/૨અકર્મણઃ કર્મ પુણ્યં કર્મ ચાપ્યાશ્રમેષુ ચ ॥ ૮૮.૧૩॥

૮૮.૧૪/૧જાત્યાશ્રિતં ચ રાજેન્દ્ર તત્રાપિ શ◌ૃણુ ધર્મવિત્ ।
૮૮.૧૪/૨આશ્રમાણિ ચ ચત્વારિ કર્મદ્વારાણિ માનદ ॥ ૮૮.૧૪॥

૮૮.૧૫/૧ચતુર્ણામાશ્રમાણાં ચ ગાર્હસ્થ્યં પુણ્યદં સ્મૃતમ્ ।
૮૮.૧૫/૨તસ્માદ્ ભુક્તિશ્ચ મુક્તિશ્ચ ભવતીતિ મતિર્મમ ॥ ૮૮.૧૫॥

૮૮.૧૬/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા તુ જનકો યાજ્ઞવલ્ક્યશ્ચ બુદ્ધિમાન્ ।
૮૮.૧૬/૨વરુણં પૂજયિત્વા તુ પુનર્વચનમૂચતુઃ ॥ ૮૮.૧૬॥

૮૮.૧૭/૧કો દેશઃ કિં ચ તીર્થં સ્યાદ્ ભુક્તિમુક્તિપ્રદાયકમ્ ।
૮૮.૧૭/૨તદ્ વદસ્વ સુરશ્રેષ્ઠ સર્વજ્ઞોઽસિ નમોઽસ્તુ તે ॥ ૮૮.૧૭॥

૮૮.૧૮/૧વરુણ ઉવાચ । પૃથિવ્યાં ભારતં વર્ષં દણ્ડકં તત્ર પુણ્યદમ્ ।
૮૮.૧૮/૨તસ્મિન્ ક્ષેત્રે કૃતં કર્મ ભુક્તિમુક્તિપ્રદં નૃણામ્ ॥ ૮૮.૧૮॥

૮૮.૧૯/૧તીર્થાનાં ગૌતમી ગઙ્ગા શ્રેષ્ઠા મુક્તિપ્રદા નૃણામ્ ।
૮૮.૧૯/૨તત્ર યજ્ઞેન દાનેન ભોગાન્ મુક્તિમવાપ્સ્યતિ ॥ ૮૮.૧૯॥

૮૮.૨૦/૧બ્રહ્મોવાચ । યાજ્ઞવલ્ક્યશ્ચ જનકો વાચં શ્રુત્વા હ્યપામ્પતેઃ ।
૮૮.૨૦/૨વરુણેન હ્યનુજ્ઞાતૌ સ્વપુરીં જગ્મતુસ્તદા ॥ ૮૮.૨૦॥

૮૮.૨૧/૧અશ્વમેધાદિકં કર્મ ચકાર જનકો નૃપઃ ।
૮૮.૨૧/૨યાજયામાસ વિપ્રેન્દ્રો યાજ્ઞવલ્ક્યશ્ચ તં નૃપમ્ ॥ ૮૮.૨૧॥

૮૮.૨૨/૧ગઙ્ગાતીરં સમાશ્રિત્ય યજ્ઞાન્ મુક્તિમવાપ રાટ્ ।
૮૮.૨૨/૨તથા જનકરાજાનો બહવસ્તત્ર કર્મણા ॥ ૮૮.૨૨॥

૮૮.૨૩/૧મુક્તિં પ્રાપુર્મહાભાગા ગૌતમ્યાશ્ચ પ્રસાદતઃ ।
૮૮.૨૩/૨તતઃ પ્રભૃતિ તત્ તીર્થં જનસ્થાનેતિ વિશ્રુતમ્ ॥ ૮૮.૨૩॥

૮૮.૨૪/૧જનકાનાં યજ્ઞસદો જનસ્થાનં પ્રકીર્તિતમ્ ।
૮૮.૨૪/૨ચતુર્યોજનવિસ્તીર્ણં સ્મરણાત્ સર્વપાપનુત્ ॥ ૮૮.૨૪॥

૮૮.૨૫/૧તત્ર સ્નાનેન દાનેન પિતૃણાં તર્પણેન તુ ।
૮૮.૨૫/૨તીર્થસ્ય સ્મરણાદ્ વાપિ ગમનાદ્ ભક્તિસેવનાત્ ॥ ૮૮.૨૫॥

૮૮.૨૬/૧સર્વાન્ કામાન્ અવાપ્નોતિ મુક્તિં ચ સમવાપ્નુયાત્ ॥ ૮૮.૨૬॥

૮૯.૧/૧બ્રહ્મોવાચ । અરુણા વરુણા ચૈવ નદ્યૌ પુણ્યતરે શુભે ।
૮૯.૧/૨તયોશ્ચ સંગમઃ પુણ્યો ગઙ્ગાયાં મુનિસત્તમ ॥ ૮૯.૧॥

૮૯.૨/૧તદુત્પત્તિં શૃણુષ્વેહ સર્વપાપવિનાશિનીમ્ ।
૮૯.૨/૨કશ્યપસ્ય સુતો જ્યેષ્ઠ આદિત્યો લોકવિશ્રુતઃ ॥ ૮૯.૨॥

૮૯.૩/૧ત્રૈલોક્યચક્ષુસ્તીક્ષ્ણાંશુઃ સપ્તાશ્વો લોકપૂજિતઃ ।
૮૯.૩/૨તસ્ય પત્ની ઉષા ખ્યાતા ત્વાષ્ટ્રી ત્રૈલોક્યસુન્દરી ॥ ૮૯.૩॥

૮૯.૪/૧ભર્તુઃ પ્રતાપતીવ્રત્વમસહન્તી સુમધ્યમા ।
૮૯.૪/૨ચિન્તયામાસ કિં કૃત્યં મમ સ્યાદ્ ઇતિ ભામિની ॥ ૮૯.૪॥

૮૯.૫/૧તસ્યાઃ પુત્રૌ મહારાજ્ઞૌ મનુર્વૈવસ્વતો યમઃ ।
૮૯.૫/૨યમુના ચ નદી પુણ્યા શ ૃણુ વિસ્મયકારણમ્ ॥ ૮૯.૫॥

૮૯.૬/૧સાકરોદ્ આત્મનશ્છાયામાત્મરૂપેણ યત્નતઃ ।
૮૯.૬/૨તામબ્રવીત્ તતશ્ચોષા ત્વં ચ મત્સદૃશી ભવ ॥ ૮૯.૬॥

૮૯.૭/૧ભર્તારં ત્વમપત્યાનિ પાલયસ્વ મમાજ્ઞયા ।
૮૯.૭/૨યાવદ્ આગમનં મે સ્યાત્ પત્યુસ્તાવત્ પ્રિયા ભવ ॥ ૮૯.૭॥

૮૯.૮/૧નાખ્યાતવ્યં ત્વયા ક્વાપિ અપત્યાનાં તથા પ્રિયે ।
૮૯.૮/૨તથેત્યાહ ચ સા છાયા નિર્જગામ ગૃહાદ્ ઉષા ॥ ૮૯.૮॥

૮૯.૯/૧ઇત્યુક્ત્વા સા જગામાશુ શાન્તં રૂપમભીપ્સતી ।
૮૯.૯/૨સા ગત્વોષા ગૃહં ત્વષ્ટુઃ પિત્રે સર્વં ન્યવેદયત્ ।
૮૯.૯/૩ત્વષ્ટાપિ ચકિતઃ પ્રાહ તાં સુતાં સુતવત્સલઃ ॥ ૮૯.૯॥

૮૯.૧૦/૧ત્વષ્ટોવાચ । નૈતદ્ યુક્તં ભર્તૃમત્યા યત્ સ્વૈરેણ પ્રવર્તનમ્ ।
૮૯.૧૦/૨અપત્યાનાં કથં વૃત્તિર્ભર્તુર્વા સવિતુસ્તવ ।
૮૯.૧૦/૩બિભેમિ ભદ્રે શિષ્ટોઽહં ભર્તુર્ગેહં પુનર્વ્રજ ॥ ૮૯.૧૦॥

૮૯.૧૧/૧બ્રહ્મોવાચ । એવમુક્તા તુ પિત્રા સા નેત્યુક્ત્વા વૈ પુનઃ પુનઃ ।
૮૯.૧૧/૨ઉત્તરં ચ કુરોર્દેશં જગામ તપસે ત્વરા ॥ ૮૯.૧૧॥

૮૯.૧૨/૧તત્ર તેપે તપસ્તીવ્રં વડવારૂપધારિણી ।
૮૯.૧૨/૨દુષ્પ્રેક્ષં તં સ્વકં કાન્તં ધ્યાયન્તી નિશ્ચલા ઉષા ॥ ૮૯.૧૨॥

૮૯.૧૩/૧એતસ્મિન્ન્ અન્તરે તાત છાયા ચોષાસ્વરૂપિણી ।
૮૯.૧૩/૨પત્યૌ સા વર્તયામાસ અપત્યાન્યથ જજ્ઞિરે ॥ ૮૯.૧૩॥

૮૯.૧૪/૧સાવર્ણિશ્ચ શનિશ્ચૈવ વિષ્ટિર્યા દુષ્ટકન્યકા ।
૮૯.૧૪/૨સા છાયા વર્તયામાસ વૈષમ્યેણૈવ નિત્યશઃ ॥ ૮૯.૧૪॥

૮૯.૧૫/૧સ્વેષ્વપત્યેષુ ચોષાયા યમસ્તત્ર ચુકોપ હ ।

૮૯.૧૫/૨વૈષમ્યેણાથ વર્તન્તીં છાયાં તાં માતરં તદા ॥ ૮૯.૧૫॥

૮૯.૧૬/૧તાડયામાસ પાદેન દક્ષિણાશાપતિર્યમઃ ।
૮૯.૧૬/૨પુત્રદૌર્જન્યસંક્ષોભાચ્છાયા વૈવસ્વતં યમમ્ ॥ ૮૯.૧૬॥

૮૯.૧૭/૧શશાપ પાપ તે પાદો વિશીર્યતુ મમાજ્ઞયા ।
૮૯.૧૭/૨વિશીર્ણચરણો દુઃખાદ્ રુદન્ પિતરમભ્યગાત્ ।
૮૯.૧૭/૩સવિત્રે તં તુ વૃત્તાન્તં ન્યવેદયદ્ અશેષતઃ ॥ ૮૯.૧૭॥

૮૯.૧૮/૧યમ ઉવાચ । નેયં માતા સુરશ્રેષ્ઠ યયા શપ્તોઽહમીદૃશઃ ।
૮૯.૧૮/૨અપત્યેષુ વિરુદ્ધેષુ જનની નૈવ કુપ્યતે ॥ ૮૯.૧૮॥

૮૯.૧૯/૧યદ્ બાલ્યાદ્ અબ્રવં કિંચિદ્ અથવા દુષ્કૃતં કૃતમ્ ।
૮૯.૧૯/૨નૈવ કુપ્યતિ સા માતા તસ્માન્ નેયં મમામ્બિકા ॥ ૮૯.૧૯॥

૮૯.૨૦/૧યદ્ અપત્યકૃતં કિંચિત્ સાધ્વસાધુ યથા તથા ।
૮૯.૨૦/૨માત્યસ્યાં સર્વમપ્યેતત્ તસ્માન્ માતેતિ ગીયતે ॥ ૮૯.૨૦॥

૮૯.૨૧/૧પ્રધક્ષ્યન્તીવ માં તાત નિત્યં પશ્યતિ ચક્ષુષા ।
૮૯.૨૧/૨વક્ત્યગ્નિકાલસદૃશા વાચા નેયં મદમ્બિકા ॥ ૮૯.૨૧॥

૮૯.૨૨/૧બ્રહ્મોવાચ । તત્ પુત્રવચનં શ્રુત્વા સવિતાચિન્તયત્ તતઃ ।
૮૯.૨૨/૨ઇયં છાયા નાસ્ય માતા ઉષા માતા તુ સાન્યતઃ ॥ ૮૯.૨૨॥

૮૯.૨૩/૧મમ શાન્તિમભીપ્સન્તી દેશેઽન્યસ્મિંસ્તપોરતા ।
૮૯.૨૩/૨ઉત્તરે ચ કુરૌ ત્વાષ્ટ્રી વડવારૂપધારિણી ॥ ૮૯.૨૩॥

૮૯.૨૪/૧તત્રાસ્તે સા ઇતિ જ્ઞાત્વા જગામેશો દિવાકરઃ ।
૮૯.૨૪/૨યત્ર સા વર્તતે કાન્તા અશ્વરૂપઃ સ્વયં તદા ॥ ૮૯.૨૪॥

૮૯.૨૫/૧તાં દૃષ્ટ્વા વડવારૂપાં પર્યધાવદ્ ધયાકૃતિઃ ।
૮૯.૨૫/૨કામાતુરં હયં દૃષ્ટ્વા શ્રુત્વા વૈ હેષિતસ્વનમ્ ॥ ૮૯.૨૫॥

૮૯.૨૬/૧ઉષા પતિવ્રતોપેતા પતિધ્યાનપરાયણા ।
૮૯.૨૬/૨હયધર્ષણસમ્ભીતા કો ન્વયં ચેત્યજાનતી ॥ ૮૯.૨૬॥

૮૯.૨૭/૧અપલાયત્ પતૌ પ્રાપ્તે દક્ષિણાભિમુખી ત્વરા ।
૮૯.૨૭/૨કો નુ મે રક્ષકોઽત્ર સ્યાદ્ ઋષયો વાથવા સુરાઃ ॥ ૮૯.૨૭॥

૮૯.૨૮/૧ધાવન્તીં તાં પ્રિયામશ્વામશ્વરૂપધરઃ સ્વયમ્ ।
૮૯.૨૮/૨પર્યધાવદ્ યતો યાતિ ઉષા ભાનુસ્તતસ્તતઃ ॥ ૮૯.૨૮॥

૮૯.૨૯/૧સ્મરગ્રહવશે જાતઃ કો દુશ્ચેષ્ટં ન ચેષ્ટતે ।
૮૯.૨૯/૨ભાગીરથીં નદીશ્ચાન્યા વનાન્યુપવનાનિ ચ ॥ ૮૯.૨૯॥

૮૯.૩૦/૧નર્મદાં ચાથ વિન્ધ્યં ચ દક્ષિણાભિમુખાવુભૌ ।
૮૯.૩૦/૨અતિક્રમ્ય ભયોદ્વિગ્ના ત્વાષ્ટ્રયભ્યગાચ્ચ ગૌતમીમ્ ॥ ૮૯.૩૦॥

૮૯.૩૧/૧ત્રાતારઃ સન્તિ મુનયો જનસ્થાન ઇતિ શ્રુતમ્ ।
૮૯.૩૧/૨ઋષીણામાશ્રમં સાશ્વા પ્રવિષ્ટા ગૌતમીં તથા ॥ ૮૯.૩૧॥

૮૯.૩૨/૧અનુપ્રાપ્તસ્તથા ચાશ્વો ભાનુસ્તદ્રૂપવાંસ્તતઃ ।
૮૯.૩૨/૨અશ્વં નિવારયામાસુર્જનસ્થા મુનિદારકાઃ ।
૮૯.૩૨/૩તતઃ કોપાદ્ ઋષીંસ્તાંશ્ચ શશાપોષાપતિઃ પ્રભુઃ ॥ ૮૯.૩૨॥

૮૯.૩૩/૧ભાનુરુવાચ । નિવારયથ માં યસ્માદ્ વટા યૂયં ભવિષ્યથ ॥ ૮૯.૩૩॥

૮૯.૩૪/૧બ્રહ્મોવાચ । જ્ઞાનદૃષ્ટ્યા તુ મુનયો મેનિરેઽશ્વમુષાપતિમ્ ।
૮૯.૩૪/૨સ્તુવન્તો દેવદેવેશં ભાનું તં મુનયો મુદા ॥ ૮૯.૩૪॥

૮૯.૩૫/૧સ્તૂયમાનો મુનિગણૈરશ્વાં ભાનુરથાગમત્ ।
૮૯.૩૫/૨વડવાયા મુખે લગ્નં મુખં ચાશ્વસ્વરૂપિણમ્ ॥ ૮૯.૩૫॥

૮૯.૩૬/૧જ્ઞાત્વા ત્વાષ્ટ્રી ચ ભર્તારં મુખાદ્ વીર્યં પ્રસુસ્રુવે ।
૮૯.૩૬/૨તયોર્વીર્યેણ ગઙ્ગાયામશ્વિનૌ સમજાયતામ્ ॥ ૮૯.૩૬॥

૮૯.૩૭/૧તત્રાગચ્છન્ સુરગણાઃ સિદ્ધાશ્ચ મુનયસ્તથા ।
૮૯.૩૭/૨નદ્યો ગાવસ્તથૌષધ્યો દેવા જ્યોતિર્ગણાસ્તથા ॥ ૮૯.૩૭॥

૮૯.૩૮/૧સમાશ્વશ્ચ રથઃ પુણ્યો હ્યરુણો ભાનુસારથિઃ ।
૮૯.૩૮/૨યમો મનુશ્ચ વરુણઃ શનિર્વૈવસ્વતસ્તથા ॥ ૮૯.૩૮॥

૮૯.૩૯/૧યમુના ચ નદી પુણ્યા તાપી ચૈવ મહાનદી ।
૮૯.૩૯/૨તત્તદ્રૂપં સમાસ્થાય નદ્યસ્તા વિસ્મયાન્ મુને ॥ ૮૯.૩૯॥

૮૯.૪૦/૧દ્રષ્ટું તે વિસ્મયાવિષ્ટા આજગ્મુઃ શ્વશુરસ્તથા ।
૮૯.૪૦/૨અભિપ્રાયં વિદિત્વા તુ શ્વશુરં ભાનુરબ્રવીત્ ॥ ૮૯.૪૦॥

૮૯.૪૧/૧ભાનુરુવાચ । ઉષાયાઃ પ્રીતયે ત્વષ્ટઃ કુર્વત્યાસ્તપ ઉત્તમમ્ ।
૮૯.૪૧/૨યન્ત્રારૂઢં ચ માં કૃત્વા છિન્ધિ તેજાંસ્યનેકશઃ ।
૮૯.૪૧/૩યાવત્ સૌખ્યં ભવેદ્ અસ્યાસ્તાવચ્છિન્ધિ પ્રજાપતે ॥ ૮૯.૪૧॥

૮૯.૪૨/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા તતસ્ત્વષ્ટા સોમનાથસ્ય સંનિધૌ ।
૮૯.૪૨/૨તેજસાં છેદનં ચક્રે પ્રભાસં તુ તતો વિદુઃ ॥ ૮૯.૪૨॥

૮૯.૪૩/૧ભર્ત્રા ચ સંગતા યત્ર ગૌતમ્યામશ્વરૂપિણી ।
૮૯.૪૩/૨અશ્વિનોર્યત્ર ચોત્પત્તિરશ્વતીર્થં તદ્ ઉચ્યતે ॥ ૮૯.૪૩॥

૮૯.૪૪/૧ભાનુતીર્થં તદ્ આખ્યાતં તથા પઞ્ચવટાશ્રમઃ ।
૮૯.૪૪/૨તાપી ચ યમુના ચૈવ પિતરં દ્રષ્ટુમાગતે ॥ ૮૯.૪૪॥

૮૯.૪૫/૧અરુણાવરુણાનદ્યોર્ગઙ્ગાયાં સંગમઃ શુભઃ ।
૮૯.૪૫/૨દેવાનાં તત્ર તીર્થાનામાગતાનાં પૃથક્ પૃથક્ ॥ ૮૯.૪૫॥

૮૯.૪૬/૧નવ ત્રીણિ સહસ્રાણિ તીર્થાનિ ગુણવન્તિ ચ ।
૮૯.૪૬/૨તત્ર સ્નાનં ચ દાનં ચ સર્વમક્ષયપુણ્યદમ્ ॥ ૮૯.૪૬॥

૮૯.૪૭/૧સ્મરણાત્ પઠનાદ્ વાપિ શ્રવણાદ્ અપિ નારદ ।
૮૯.૪૭/૨સર્વપાપવિનિર્મુક્તો ધર્મવાન્ સ સુખી ભવેત્ ॥ ૮૯.૪૭॥

૯૦.૧/૧બ્રહ્મોવાચ । ગારુડં નામ યત્ તીર્થં સર્વવિઘ્નપ્રશાન્તિદમ્ ।
૯૦.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ શ‌ૃણુ નારદ યત્નતઃ ॥ ૯૦.૧॥

૯૦.૨/૧મણિનાગ ઇતિ ત્વાસીચ્છેષપુત્રો મહાબલઃ ।
૯૦.૨/૨ગરુડસ્ય ભયાદ્ ભક્ત્યા તોષયામાસ શંકરમ્ ॥ ૯૦.૨॥

૯૦.૩/૧તતઃ પ્રસન્નો ભગવાન્ પરમેષ્ઠી મહેશ્વરઃ ।
૯૦.૩/૨તમુવાચ મહાનાગં વરં વરય પન્નગ ॥ ૯૦.૩॥

૯૦.૪/૧નાગઃ પ્રાહ પ્રભો મહ્યં દેહિ મે ગરુડાભયમ્ ।
૯૦.૪/૨તથેત્યાહ ચ તં શમ્ભુર્ગરુડાદ્ અભયં ભવેત્ ॥ ૯૦.૪॥

૯૦.૫/૧નિર્ગતો નિર્ભયો નાગો ગરુડાદ્ અરુણાનુજાત્ ।
૯૦.૫/૨ક્ષીરોદશાયી યત્રાસ્તે ક્ષીરાર્ણવસમીપતઃ ॥ ૯૦.૫॥

૯૦.૬/૧ઇતશ્ચેતશ્ચ ચરતિ નાગોઽસૌ સુખશીતલે ।
૯૦.૬/૨ગરુડોઽપિ ચ યત્રાસ્તે તં દેશમપિ યાત્યસૌ ॥ ૯૦.૬॥

૯૦.૭/૧ગરુડઃ પન્નગં દૃષ્ટ્વા ચરન્તં નિર્ભયેન તુ ।
૯૦.૭/૨તં ગૃહીત્વા મહાનાગં પ્રાક્ષિપત્ સ્વસ્ય વેશ્મનિ ॥ ૯૦.૭॥

૯૦.૮/૧તં બદ્ધ્વા ગારુડૈઃ પાશૈર્ગરુડો નાગસત્તમમ્ ।
૯૦.૮/૨એતસ્મિન્ન્ અન્તરે નન્દી પ્રોવાચેશં જગત્પ્રભુમ્ ॥ ૯૦.૮॥

૯૦.૯/૧નન્દિકેશ્વર ઉવાચ । નૂનં નાગો ન ચાયાતિ ભક્ષિતો બદ્ધ એવ વા ।
૯૦.૯/૨ગરુડેન સુરેશાન જીવન્ નાગો ન સંવ્રજેત્ ॥ ૯૦.૯ ॥

૯૦.૧૦/૧બ્રહ્મોવાચ । નન્દિનો વચનં શ્રુત્વા જ્ઞાત્વા
શમ્ભુરથાબ્રવીત્ ॥ ૯૦.૧૦ ॥

૯૦.૧૧/૧શિવ ઉવાચ । ગરુડસ્ય ગૃહે નાગો બદ્ધસ્તિષ્ઠતિ સત્વરમ્ ।
૯૦.૧૧/૨ગત્વા તં જગતામીશં વિષ્ણું સ્તુહિ જનાર્દનમ્ ॥ ૯૦.૧૧ ॥

૯૦.૧૨/૧બદ્ધં નાગં કાશ્યપેન મદ્વાક્યાદ્ આનય સ્વયમ્ ।
૯૦.૧૨/૨તત્ પ્રભોર્વચનં શ્રુત્વા નન્દી ગત્વા શ્રિયઃ પતિમ્ ॥ ૯૦.૧૨ ॥

૯૦.૧૩/૧વ્યજ્ઞાપયત્ સ્વયં વાક્યં વિષ્ણું લોકપરાયણમ્ ।
૯૦.૧૩/૨નારાયણઃ પ્રીતમના ગરુડં વાક્યમબ્રવીત્ ॥ ૯૦.૧૩ ॥

૯૦.૧૪/૧વિષ્ણુરુવાચ । વિનતાત્મજ મે વાક્યાન્ નન્દિને દેહિ પન્નગમ્ ।
૯૦.૧૪/૨કમ્પમાનસ્તદ્ આકર્ણ્ય નેત્યુવાચ વિહંગમઃ ।
૯૦.૧૪/૩વિષ્ણુમપ્યબ્રવીત્ કોપાત્ સુપર્ણો નન્દિનોઽન્તિકે ॥ ૯૦.૧૪ ॥

૯૦.૧૫/૧ગરુડ ઉવાચ । યદ્ યત્ પ્રિયતમં કિંચિદ્ ભૃત્યેભ્યઃ
પ્રભવિષ્ણવઃ ।
૯૦.૧૫/૨દાસ્યન્ત્યન્યે ભવાન્ નૈવ મયાનીતં હરિષ્યતિ ॥ ૯૦.૧૫ ॥

૯૦.૧૬/૧પશ્ય દેવં ત્રિનયનં નાગં મોક્ષ્યતિ નન્દિના ।
૯૦.૧૬/૨મયોપપાદિતં નાગં ત્વં તુ દાસ્યસિ નન્દિને ॥ ૯૦.૧૬ ॥

૯૦.૧૭/૧ત્વાં વહામિ સદા સ્વામિન્ મમ દેયં સદા ત્વયા ।
૯૦.૧૭/૨મયોપપાદિતં નાગં વક્તું દેહીતિ નોચિતમ્ ॥ ૯૦.૧૭ ॥

૯૦.૧૮/૧સતાં પ્રભૂણાં નેયં સ્યાદ્ વૃત્તિઃ સદ્વૃત્તિકારિણામ્ ।
૯૦.૧૮/૨સન્તો દાસ્યન્તિ ભૃત્યેભ્યો મદુપાત્તહરો ભવાન્ ॥ ૯૦.૧૮ ॥

૯૦.૧૯/૧દૈત્યાગ્ જયસિ સંગ્રામે મદ્બલેનૈવ કેશવ ।
૯૦.૧૯/૨અહં મહાબલીત્યેવં મુધૈવ શ્લાઘતે ભવાન્ ॥ ૯૦.૧૯ ॥

૯૦.૨૦/૧બ્રહ્મોવાચ । ગરુડસ્યેતિ તદ્ વાક્યં શ્રુત્વા ચક્રગદાધરઃ ।
૯૦.૨૦/૨વિહસ્ય નન્દિનઃ પાર્શ્વે પશ્યદ્ભિર્લોકપાલકૈઃ ॥ ૯૦.૨૦ ॥

૯૦.૨૧/૧ઇદમાહ મહાબુદ્ધિર્માં સમુહ્ય કૃશો ભવાન્ ।

૯૦.૨૧/૨ત્વદ્બલાદ્ અસુરાન્ સર્વાન્ જેષ્યેઽહં ખગસત્તમ ॥ ૯૦.૨૧॥

૯૦.૨૨/૧ઇત્યુક્ત્વા શ્રીપતિર્બ્રહ્મન્ શાન્તકોપોઽબ્રવીદ્ ઇદમ્ ।
૯૦.૨૨/૨વહાઙ્ગુલિં કરસ્યાશુ કનિષ્ઠાં નન્દિનોઽન્તિકે ॥ ૯૦.૨૨॥

૯૦.૨૩/૧ગરુડસ્ય તતો મૂર્ધ્નિ ન્યસ્યેદં પુનરબ્રવીત્ ।
૯૦.૨૩/૨સત્યં માં વહસે નિત્યં પશ્ય ધર્મં વિહંગમ ॥ ૯૦.૨૩॥

૯૦.૨૪/૧ન્યસ્તાયાં ચ તતોઽઙ્ગુલ્યાં શિરઃ કુક્ષૌ સમાવિશત્ ।
૯૦.૨૪/૨કુક્ષિશ્ચ ચરણસ્યાન્તઃ પ્રાવિશચ્ચૂર્ણિતોઽભવત્ ।
૯૦.૨૪/૩તતઃ કૃતાઞ્જલિર્દીનો વ્યથિતો લજ્જયાન્વિતઃ ॥ ૯૦.૨૪॥

૯૦.૨૫/૧ગરુડ ઉવાચ । ત્રાહિ ત્રાહિ જગન્નાથ ભૃત્યં મામપરાધિનમ્ ।
૯૦.૨૫/૨ત્વં પ્રભુઃ સર્વલોકાનાં ધર્તા ધાર્યસ્ત્વમેવ ચ ॥ ૯૦.૨૫॥

૯૦.૨૬/૧અપરાધસહસ્રાણિ ક્ષમન્તે પ્રભવિષ્ણવઃ ।
૯૦.૨૬/૨કૃતાપરાધેઽપિ જને મહતી યસ્ય વૈ કૃપા ॥ ૯૦.૨૬॥

૯૦.૨૭/૧વદન્તિ મુનયઃ સર્વે ત્વામેવ કરુણાકરમ્ ।
૯૦.૨૭/૨રક્ષસ્વાર્તં જગન્માતર્મામમ્બુજનિવાસિનિ ।
૯૦.૨૭/૩કમલે બાલકં દીનમાર્તં તનયવત્સલે ॥ ૯૦.૨૭॥

૯૦.૨૮/૧બ્રહ્મોવાચ । તતઃ કૃપાન્વિતા દેવી શ્રીરપ્યાહ જનાર્દનમ્ ॥ ૯૦.૨૮॥

૯૦.૨૯/૧કમલોવાચ । રક્ષ નાથ સ્વકં ભૃત્યં ગરુડં વિપદં ગતમ્ ।
૯૦.૨૯/૨જનાર્દન ઉવાચેદં નન્દિનં શમ્ભુવાહનમ્ ॥ ૯૦.૨૯॥

૯૦.૩૦/૧વિષ્ણુરુવાચ । નય નાગં સગરુડં શમ્ભોરન્તિકમેવ ચ ।
૯૦.૩૦/૨તત્પ્રસાદાચ્ચ ગરુડો મહેશ્વરનિરીક્ષિતઃ ।
૯૦.૩૦/૩આત્મીયં ચ પુના રૂપં ગરુડઃ સમવાપ્સ્યતિ ॥ ૯૦.૩૦॥

૯૦.૩૧/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા ચ વૃષભો નાગેન ગરુડેન ચ ।
૯૦.૩૧/૨શનૈઃ સ શંકરં ગત્વા સર્વં તસ્મૈ ન્યવેદયત્ ।
૯૦.૩૧/૩શંકરોઽપિ ગરુત્મન્તં પ્રોવાચ શશિશેખરઃ ॥ ૯૦.૩૧॥

૯૦.૩૨/૧શિવ ઉવાચ । યાહિ ગઙ્ગાં મહાબાહો ગૌતમીં લોકપાવનીમ્ ।
૯૦.૩૨/૨સર્વકામપ્રદાં શાન્તાં તામાપ્લુત્ય પુનર્વપુઃ ॥ ૯૦.૩૨॥

૯૦.૩૩/૧પ્રાપ્સ્યસે સર્વકામાંશ્ચ શતધાથ સહસ્રધા ।
૯૦.૩૩/૨સર્વપાપોપતપ્તા યે દુર્દૈવોન્મૂલિતોદ્યમાઃ ।

૯૦.૩૩/૩પ્રાણિનોઽભીષ્ટદા તેષાં શરણં ખગ ગૌતમી ॥ ૯૦.૩૩॥

૯૦.૩૪/૧બ્રહ્મોવાચ । તદ્વાક્યં પ્રણતો ભૂત્વા શ્રુત્વા તુ ગરુડોઽભ્યગાત્ ।
૯૦.૩૪/૨ગઙ્ગામાપ્લુત્ય ગરુડઃ શિવં વિષ્ણું નનામ સઃ ॥ ૯૦.૩૪॥

૯૦.૩૫/૧તતઃ સ્વર્ણમયઃ પક્ષી વજ્રદેહો મહાબલઃ ।
૯૦.૩૫/૨વેગી ભવન્ મુનિશ્રેષ્ઠ પુનર્વિષ્ણુમિયાત્ સુધીઃ ॥ ૯૦.૩૫॥

૯૦.૩૬/૧તતઃ પ્રભૃતિ તત્ તીર્થં ગારુડં સર્વકામદમ્ ।
૯૦.૩૬/૨તત્ર સ્નાનાદિ યત્ કિંચિત્ કરોતિ પ્રયતો નરઃ ।
૯૦.૩૬/૩સર્વં તદ્ અક્ષયં વત્સ શિવવિષ્ણુપ્રિયાવહમ્ ॥ ૯૦.૩૬॥

૯૧.૧/૧બ્રહ્મોવાચ । તતો ગોવર્ધનં તીર્થં સર્વપાપપ્રણાશનમ્ ।
૯૧.૧/૨પિતૃણાં પુણ્યજનનં સ્મરણાદ્ અપિ પાપનુત્ ॥ ૯૧.૧॥

૯૧.૨/૧તસ્ય પ્રભાવ એષ સ્યાન્ મયા દૃષ્ટસ્તુ નારદ ।
૯૧.૨/૨બ્રાહ્મણઃ કર્ષકઃ કશ્ચિજ્જાબાલિરિતિ વિશ્રુતઃ ॥ ૯૧.૨॥

૯૧.૩/૧ન વિમુઞ્ચત્યનડ્વાહૌ મધ્યં યાતેઽપિ ભાસ્કરે ।
૯૧.૩/૨પ્રતોદેન પ્રતુદતિ પૃષ્ઠતોઽપિ ચ પાર્શ્વયોઃ ॥ ૯૧.૩॥

૯૧.૪/૧તૌ ગાવાવશ્રુપૂર્ણાક્ષૌ દૃષ્ટ્વા ગૌઃ કામદોહિની ।
૯૧.૪/૨સુરભિર્જગતાં માતા નન્દિને સર્વમબ્રવીત્ ॥ ૯૧.૪॥

૯૧.૫/૧સ ચાપિ વ્યથિતો ભૂત્વા શમ્ભવે તન્ ન્યવેદયત્ ।
૯૧.૫/૨શમ્ભુશ્ચ વૃષભં પ્રાહ સર્વં સિધ્યતુ તે વચઃ ॥ ૯૧.૫॥

૯૧.૬/૧શિવાજ્ઞાસહિતો નન્દી ગોજાતં સર્વમાહરત્ ।
૯૧.૬/૨નષ્ટેષુ ગોષુ સર્વેષુ સ્વર્ગે મર્ત્યે તતસ્ત્વરા ॥ ૯૧.૬॥

૯૧.૭/૧મામવોચન્ સુરગણા વિના ગોભિર્ન જીવ્યતે ।
૯૧.૭/૨તાન્ અવોચં સુરાન્ સર્વાન્ શંકરં યાત યાચત ॥ ૯૧.૭॥

૯૧.૮/૧તથૈવેશં તુ તે સર્વે સ્તુત્વા કાર્યં ન્યવેદયન્ ।
૯૧.૮/૨ઈશોઽપિ વિબુધાન્ આહ જાનાતિ વૃષભો મમ ॥ ૯૧.૮॥

૯૧.૯/૧તે વૃષં પ્રોચુરમરા દેહિ ગા ઉપકારિણઃ ।
૯૧.૯/૨વૃષોઽપિ વિબુધાન્ આહ ગોસવઃ ક્રિયતાં ક્રતુઃ ॥ ૯૧.૯॥

૯૧.૧૦/૧તતઃ પ્રાપ્સ્યથ ગાઃ સર્વા યા દિવ્યા યાશ્ચ માનુષાઃ ।
૯૧.૧૦/૨તતઃ પ્રવર્તતે યજ્ઞો ગોસવો દેવનિર્મિતઃ ॥ ૯૧.૧૦॥

૯૧.૧૧/૧ગૌતમ્યાશ્ચ શુભે પાર્શ્વે ગાવો વવૃધિરે તતઃ ।
૯૧.૧૧/૨ગોવર્ધનં તુ તત્ તીર્થં દેવાનાં પ્રીતિવર્ધનમ્ ॥ ૯૧.૧૧॥

૯૧.૧૨/૧તત્ર સ્નાનં મુનિશ્રેષ્ઠ ગોસહસ્રફલપ્રદમ્ ।
૯૧.૧૨/૨કિંચિદ્ દાનાદિના યત્ સ્યાત્ ફલં તત્ તુ ન વિદ્મહે ॥ ૯૧.૧૨॥

૯૨.૧/૧બ્રહ્મોવાચ । પાપપ્રણાશનં નામ તીર્થં પાપભયાપહમ્ ।
૯૨.૧/૨નામધેયં પ્રવક્ષ્યામિ શૃણુ નારદ યત્નતઃ ॥ ૯૨.૧॥

૯૨.૨/૧ધૃતવ્રત ઇતિ ખ્યાતો બ્રાહ્મણો લોકવિશ્રુતઃ ।
૯૨.૨/૨તસ્ય ભાર્યા મહી નામ તરુણી લોકસુન્દરી ॥ ૯૨.૨॥

૯૨.૩/૧તસ્ય પુત્રઃ સૂર્યનિભઃ સનાજ્જાત ઇતિ શ્રુતઃ ।
૯૨.૩/૨ધૃતવ્રતં તથાકર્ષન્ મૃત્યુઃ કાલેરિતો મુને ॥ ૯૨.૩॥

૯૨.૪/૧તતઃ સા બાલવિધવા બાલપુત્રા સુરૂપિણી ।
૯૨.૪/૨ત્રાતારં નૈવ પશ્યન્તી ગાલવાશ્રમમભ્યગાત્ ॥ ૯૨.૪॥

૯૨.૫/૧તસ્મૈ પુત્રં નિવેદ્યાથ સ્વૈરિણી પાપમોહિતા ।
૯૨.૫/૨સા બભ્રામ બહૂન્ દેશાન્ પુંસ્કામા કામચારિણી ॥ ૯૨.૫॥

૯૨.૬/૧તત્પુત્રો ગાલવગૃહે વેદવેદાઙ્ગપારગઃ ।
૯૨.૬/૨જાતોઽપિ માતૃદોષેણ વેશ્યેરિતમતિસ્ત્વભૂત્ ॥ ૯૨.૬॥

૯૨.૭/૧જનસ્થાનમિતિ ખ્યાતં નાનાજાતિસમાવૃતમ્ ।
૯૨.૭/૨તત્રાસૌ પણ્યવેષેણ અધ્યાસ્તે ચ મહી તથા ॥ ૯૨.૭॥

૯૨.૮/૧તત્સુતોઽપિ બહૂન્ દેશાન્ પરિબભ્રામ કામુકઃ ।
૯૨.૮/૨સોઽપિ કાલવશાત્ તત્ર જનસ્થાનેઽવસત્ તદા ॥ ૯૨.૮॥

૯૨.૯/૧સ્ત્રિયમાકાઙ્ક્ષતે વેશ્યાં ધૃતવ્રતસુતો દ્વિજઃ ।
૯૨.૯/૨મહી ચાપિ ધનં દાતૄન્ પુરુષાન્ સમપેક્ષતે ॥ ૯૨.૯॥

૯૨.૧૦/૧મેને ન પુત્રમાત્મીયં સ ચાપિ ન તુ માતરમ્ ।
૯૨.૧૦/૨તયોઃ સમાગમશ્ચાસીદ્ વિધિના માતૃપુત્રયોઃ ॥ ૯૨.૧૦॥

૯૨.૧૧/૧એવં બહુતિથે કાલે પુત્રે માતરિ ગચ્છતિ ।
૯૨.૧૧/૨તયોઃ પરસ્પરં જ્ઞાનં નૈવાસીન્ માતૃપુત્રયોઃ ॥ ૯૨.૧૧॥

૯૨.૧૨/૧એવં પ્રવર્તમાનસ્ય પિતૃધર્મેણ સન્મતિઃ ।

૯૨.૧૨/૨આસીત્ તસ્યાપ્યસદ્વૃત્તેઃ શ઼ૃણુ નારદ ચિત્રવત્ ॥ ૯૨.૧૨॥

૯૨.૧૩/૧સ્વૈરસ્થિત્યા વર્તમાનો નેદં સ પરિહાતવાન્ ।
૯૨.૧૩/૨બ્રાહ્મીં સંધ્યામનુષ્ઠાય તદ્ ઊર્ધ્વં તુ ધનાર્જનમ્ ॥ ૯૨.૧૩॥

૯૨.૧૪/૧વિદ્યાબલેન વિત્તાનિ બહૂન્યાજર્ય દદાત્યસૌ ।
૯૨.૧૪/૨તથા સ પ્રાતરુત્થાય ગઙ્ગાં ગત્વા યથાવિધિ ॥ ૯૨.૧૪॥

૯૨.૧૫/૧શૌચાદિ સ્નાનસંધ્યાદિ સર્વં કાર્યં યથાક્રમમ્ ।
૯૨.૧૫/૨કૃત્વા તુ બ્રાહ્મણાન્ નત્વા તતોઽભ્યેતિ સ્વકર્મસુ ॥ ૯૨.૧૫॥

૯૨.૧૬/૧પ્રાતઃકાલે ગૌતમીં તુ યદા યાતિ વિરૂપવાન્ ।
૯૨.૧૬/૨કુષ્ઠસર્વાઙ્ગશિથિલઃ પૂયશોણિતનિઃસ્રવઃ ॥ ૯૨.૧૬॥

૯૨.૧૭/૧સ્નાત્વા તુ ગૌતમીં ગઙ્ગાં યદા યાતિ સુરૂપધૃક્ ।
૯૨.૧૭/૨શાન્તઃ સૂર્યાગ્નિસદૃશો મૂર્તિમાન્ ઇવ ભાસ્કરઃ ॥ ૯૨.૧૭॥

૯૨.૧૮/૧એતદ્ રૂપદ્વયં સ્વસ્ય નૈવ પશ્યતિ સ દ્વિજઃ ।
૯૨.૧૮/૨ગાલવો યત્ર ભગવાંસ્તપોજ્ઞાનપરાયણઃ ॥ ૯૨.૧૮॥

૯૨.૧૯/૧આશ્રિત્ય ગૌતમીં દેવીં આસ્તે ચ મુનિભિર્વૃતઃ ।
૯૨.૧૯/૨બ્રાહ્મણોઽપિ ચ તત્રૈવ નિત્યં તીર્થં સમેત્ય ચ ॥ ૯૨.૧૯॥

૯૨.૨૦/૧ગાલવં ચ નમસ્યાથ તતો યાતિ સ્વમન્દિરમ્ ।
૯૨.૨૦/૨ગઙ્ગાયાઃ સેવનાત્ પૂર્વં સનાજ્જાતસ્ય યદ્ વપુઃ ॥ ૯૨.૨૦॥

૯૨.૨૧/૧સ્નાનસંધ્યોત્તરે કાલે પુનર્યદ્ અપિ તદ્ દ્વિજે ।
૯૨.૨૧/૨ઉભયં તસ્ય તદ્ રૂપં ગાલવો નિત્યમેવ ચ ॥ ૯૨.૨૧॥

૯૨.૨૨/૧દૃષ્ટ્વા સવિસ્મયો મેને કિંચિદ્ અસ્ત્યત્ર કારણમ્ ।
૯૨.૨૨/૨એવં સવિસ્મયો ભૂત્વા ગાલવઃ પ્રાહ તં દ્વિજમ્ ॥ ૯૨.૨૨॥

૯૨.૨૩/૧ગચ્છન્તં તુ નમસ્યાથ સનાજ્જાતં ગુરુર્ગૃહમ્ ।
૯૨.૨૩/૨આહૂય યત્નતો ધીમાન્ કૃપયા વિસ્મયેન ચ ॥ ૯૨.૨૩॥

૯૨.૨૪/૧ગાલવ ઉવાચ । કો ભવાન્ ક્વ ચ ગન્તાસિ કિં કરોષિ ક્વ ભોક્ષ્યસિ ।
૯૨.૨૪/૨કિંનામા ત્વં ક્વ શય્યા તે કા તે ભાર્યા વદસ્વ મે ॥ ૯૨.૨૪॥

૯૨.૨૫/૧બ્રહ્મોવાચ । ગાલવસ્ય વચઃ શ્રુત્વા બ્રાહ્મણોઽપ્યાહ તં
મુનિમ્ ॥ ૯૨.૨૫॥

૯૨.૨૬/૧બ્રાહ્મણ ઉવાચ । શ્વઃ કથ્યતે મયા સર્વં જ્ઞાત્વા કાર્યવિનિર્ણયમ્ ॥ ૯૨.૨૬॥

૯૨.૨૭/૧બ્રહ્મોવાચ । એવમુક્ત્વા ગાલવં તં સનાજ્જાતો ગૃહં યયૌ ।
૯૨.૨૭/૨ભુક્ત્વા રાત્રૌ તયા સમ્યક્ શય્યામાસાદ્ય બન્ધકીમ્ ।
૯૨.૨૭/૩ઉવાચ ચકિતઃ સ્મૃત્વા ગાલવસ્ય તુ યદ્ વચઃ ॥ ૯૨.૨૭॥

૯૨.૨૮/૧બ્રાહ્મણ ઉવાચ । ત્વં તુ સર્વગુણોપેતા બન્ધક્યપિ પતિવ્રતા ।
૯૨.૨૮/૨આવયોઃ સદૃશી પ્રીતિર્યાવજ્જીવં પ્રવર્તતામ્ ॥ ૯૨.૨૮॥

૯૨.૨૯/૧તથાપિ કિંચિત્ પૃચ્છામિ કિંનામ્ની ત્વં ક્વ વા કુલમ્ ।
૯૨.૨૯/૨કિં નુ સ્થાનં ક્વ વા બન્ધુર્મમ સર્વં નિવેદ્યતામ્ ॥ ૯૨.૨૯॥

૯૨.૩૦/૧બન્ધક્યુવાચ । ધૃતવ્રત ઇતિ ખ્યાતો બ્રાહ્મણો દીક્ષિતઃ શુચિઃ ।
૯૨.૩૦/૨તસ્ય ભાર્યા મહી ચાહં મત્પુત્રો ગાલવાશ્રમે ॥ ૯૨.૩૦॥

૯૨.૩૧/૧ઉત્સૃષ્ટો મતિમાન્ બાલઃ સનાજ્જાત ઇતિ શ્રુતઃ ।
૯૨.૩૧/૨અહં તુ પૂર્વદોષેણ ત્યક્ત્વા ધર્મં કુલાગતમ્ ।
૯૨.૩૧/૩સ્વૈરિણી ત્વિહ વર્તેઽહં વિદ્ધિ માં બ્રાહ્મણીં દ્વિજ ॥ ૯૨.૩૧॥

૯૨.૩૨/૧બ્રહ્મોવાચ । તસ્યાસ્તદ્ વચનં શ્રુત્વા મર્મવિદ્ધ ઇવાભવત્ ।
૯૨.૩૨/૨પપાત સહસા ભૂમૌ વેશ્યા તં વાક્યમબ્રવીત્ ॥ ૯૨.૩૨॥

૯૨.૩૩/૧વેશ્યોવાચ । કિં તુ જાતં દ્વિજશ્રેષ્ઠ ક્વ ચ પ્રીતિર્ગતા તવ ।
૯૨.૩૩/૨કિં તુ વાક્યં મયા ચોક્તં તવ ચિત્તવિરોધકૃત્ ॥ ૯૨.૩૩॥

૯૨.૩૪/૧આત્માનમાત્મનાશ્વાસ્ય બ્રાહ્મણો વાક્યમબ્રવીત્ ॥ ૯૨.૩૪॥

૯૨.૩૫/૧બ્રાહ્મણ ઉવાચ । ધૃતવ્રતઃ પિતા વિપ્રસ્તત્પુત્રોઽહં સનાદ્યતઃ ।
૯૨.૩૫/૨માતા મહી મમ ઇયં મમ દૈવાદ્ ઉપાગતા ॥ ૯૨.૩૫॥

૯૨.૩૬/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા તસ્ય વાક્યં સાપ્યભૂદ્ અતિદુઃખિતા ।
૯૨.૩૬/૨તયોસ્તુ શોચતોઃ પશ્ચાત્ પ્રભાતે વિમલે રવૌ ।
૯૨.૩૬/૩ગાલવં મુનિશાર્દૂલં ગત્વા વિપ્રો ન્યવેદયત્ ॥ ૯૨.૩૬॥

૯૨.૩૭/૧બ્રાહ્મણ ઉવાચ । ધૃતવ્રતસુતો બ્રહ્મંસ્ત્વયા પૂર્વં તુ પાલિતઃ ।
૯૨.૩૭/૨ઉપનીતસ્ત્વયા ચૈવ મહી માતા મમ પ્રભો ॥ ૯૨.૩૭॥

૯૨.૩૮/૧કિં કરોમિ ચ કિં કૃત્વા નિષ્કૃતિર્મમ વૈ ભવેત્ ॥ ૯૨.૩૮॥

૯૨.૩૯/૧બ્રહ્મોવાચ । તદ્ વિપ્રવચનં શ્રુત્વા ગાલવઃ પ્રાહ મા શુચઃ ।

૯૨.૩૯/૨તવેદં દ્વિવિધં રૂપં નિત્યં પશ્યામ્યપૂર્વવત્ ॥ ૯૨.૩૯॥

૯૨.૪૦/૧તતઃ પૃષ્ટોઽસિ વૃત્તાન્તં શ્રુતં જ્ઞાતં મયા યથા ।
૯૨.૪૦/૨યત્ કૃત્યં તવ તત્ સર્વં ગઙ્ગાયાં પ્રત્યગાત્ ક્ષયમ્ ॥ ૯૨.૪૦॥

૯૨.૪૧/૧અસ્ય તીર્થસ્ય માહાત્મ્યાદ્ અસ્યા દેવ્યાઃ પ્રસાદતઃ ।
૯૨.૪૧/૨પૂતોઽસિ પ્રત્યહં વત્સ નાત્ર કાર્યા વિચારણા ॥ ૯૨.૪૧॥

૯૨.૪૨/૧પ્રભાતે તવ રૂપાણિ સપાપાનિ ત્વહર્નિશમ્ ।
૯૨.૪૨/૨પશ્યેઽહં પુનરપ્યેવ રૂપં તવ ગુણોત્તમમ્ ॥ ૯૨.૪૨॥

૯૨.૪૩/૧આગચ્છન્તં ત્વાગોયુક્તં ગચ્છન્તં ત્વામનાગસમ્ ।
૯૨.૪૩/૨પશ્યામિ નિત્યં તસ્માત્ ત્વં પૂતો દેવ્યા કૃતોઽધુના ॥ ૯૨.૪૩॥

૯૨.૪૪/૧તસ્માન્ ન કાર્યં તે કિંચિદ્ અવશિષ્ટં ભવિષ્યતિ ।
૯૨.૪૪/૨ઇયં ચ માતા તે વિપ્ર જ્ઞાતા યા ચૈવ બન્ધકી ॥ ૯૨.૪૪॥

૯૨.૪૫/૧પશ્ચાત્તાપં ગતાત્યન્તં નિવૃત્તા ત્વથ પાતકાત્ ।
૯૨.૪૫/૨ભૂતાનાં વિષયે પ્રીતિર્વત્સ સ્વાભાવિકી યતઃ ॥ ૯૨.૪૫॥

૯૨.૪૬/૧સત્સઙ્ગતો મહાપુણ્યાન્ નિવૃત્તિર્દૈવતો ભવેત્ ।
૯૨.૪૬/૨અત્યર્થમનુતપ્તેયં પ્રાગાચરિતપુણ્યતઃ ॥ ૯૨.૪૬॥

૯૨.૪૭/૧સ્નાનં કૃત્વા ચાત્ર તીર્થે તતઃ પૂતા ભવિષ્યતિ ।
૯૨.૪૭/૨તથા તૌ ચક્રતુરુભૌ માતાપુત્રૌ ચ નારદ ॥ ૯૨.૪૭॥

૯૨.૪૮/૧સ્નાનાદ્ બભૂવતુરુભૌ ગતપાપાવસંશયમ્ ।
૯૨.૪૮/૨તતઃ પ્રભૃતિ તત્ તીર્થં ધૌતપાપં પ્રચક્ષતે ॥ ૯૨.૪૮॥

૯૨.૪૯/૧પાપપ્રણાશનં નામ ગાલવં ચેતિ વિશ્રુતમ્ ।
૯૨.૪૯/૨મહાપાતકમલ્પં વા તથા યચ્ચોપપાતકમ્ ।
૯૨.૪૯/૩તત્ સર્વં નાશયેદ્ એતદ્ ધૌતપાપં સુપુણ્યદમ્ ॥ ૯૨.૪૯॥

૯૩.૧/૧બ્રહ્મોવાચ । યત્ર દાશરથી રામઃ સીતયા સહિતો દ્વિજ ।
૯૩.૧/૨પિતૃન્ સંતર્પયામાસ પિતૃતીર્થં તતો વિદુઃ ॥ ૯૩.૧॥

૯૩.૨/૧તત્ર સ્નાનં ચ દાનં ચ પિતૃણાં તર્પણં તથા ।
૯૩.૨/૨સર્વમક્ષયતામેતિ નાત્ર કાર્યા વિચારણા ॥ ૯૩.૨॥

૯૩.૩/૧યત્ર દાશરથી રામો વિશ્વામિત્રં મહામુનિમ્ ।
૯૩.૩/૨પૂજયામાસ રાજેન્દ્રો મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૯૩.૩॥

૯૩.૪/૧વિશ્વામિત્રં તુ તત્ તીર્થમ્ ઋષિજુષ્ટં સુપુણ્યદમ્ ।
૯૩.૪/૨તત્સ્વરૂપં ચ વક્ષ્યામિ પઠિતં વેદવાદિભિઃ ॥ ૯૩.૪॥

૯૩.૫/૧અનાવૃષ્ટિરભૂત્ પૂર્વં પ્રજાનામતિભીષણા ।
૯૩.૫/૨વિશ્વામિત્રો મહાપ્રાજ્ઞઃ સશિષ્યો ગૌતમીમગાત્ ॥ ૯૩.૫॥

૯૩.૬/૧શિષ્યાન્ પુત્રાંશ્ચ જાયાં ચ કૃશાન્ દૃષ્ટ્વા ક્ષુધાતુરાન્ ।
૯૩.૬/૨વ્યથિતઃ કૌશિકઃ શ્રીમાઞ્ શિષ્યાન્ ઇદમુવાચ હ ॥ ૯૩.૬॥

૯૩.૭/૧વિશ્વામિત્ર ઉવાચ । યથા કથંચિદ્ યત્ કિંચિદ્ યત્ર
ક્વાપિ યથા તથા ।
૯૩.૭/૨આનીયતાં કિંતુ ભક્ષ્યં ભોજ્યં વા મા વિલમ્બ્યતામ્ ।
૯૩.૭/૩ઇદાનીમેવ ગન્તવ્યમાનેતવ્યં ક્ષણેન તુ ॥ ૯૩.૭॥

૯૩.૮/૧બ્રહ્મોવાચ । ઋષેસ્તદ્ વચનાચ્છિષ્યાઃ ક્ષુધિતાસ્ત્વરયા યયુઃ ।
૯૩.૮/૨અટમાના ઇતશ્ચેતો મૃતં દદૃશિરે શુનમ્ ॥ ૯૩.૮॥

૯૩.૯/૧તમાદાય ત્વરાયુક્તા આચાર્યાય ન્યવેદયન્ ।
૯૩.૯/૨સોઽપિ તં ભદ્રમિત્યુક્ત્વા પ્રતિજગ્રાહ પાણિના ॥ ૯૩.૯॥

૯૩.૧૦/૧વિશસધ્વં શ્વમાંસં ચ ક્ષાલયધ્વં ચ વારિણા ।
૯૩.૧૦/૨પચધ્વં મન્ત્રવચ્ચાપિ હુત્વાગ્નૌ તુ યથાવિધિ ॥ ૯૩.૧૦॥

૯૩.૧૧/૧દેવાન્ ઋષીન્ પિતૃન્ અન્યાંસ્તર્પયિત્વાતિથીન્ ગુરૂન્ ।
૯૩.૧૧/૨સર્વે ભોક્ષ્યામહે શેષમિત્યુવાચ સ કૌશિકઃ ॥ ૯૩.૧૧॥

૯૩.૧૨/૧વિશ્વામિત્રવચઃ શ્રુત્વા શિષ્યાશ્ચક્રુસ્તથૈવ તત્ ।
૯૩.૧૨/૨પચ્યમાને શ્વમાંસે તુ દેવદૂતોઽગ્નિરભ્યગાત્ ।
૯૩.૧૨/૩દેવાનાં સદને સર્વં દેવેભ્યસ્તન્ ન્યવેદયત્ ॥ ૯૩.૧૨॥

૯૩.૧૩/૧અગ્નિરુવાચ । દેવૈઃ શ્વમાંસં ભોક્તવ્યમાપન્નમ્
ઋષિકલ્પિતમ્ ॥ ૯૩.૧૩॥

૯૩.૧૪/૧બ્રહ્મોવાચ । અગ્નેસ્તદ્વચનાદ્ ઇન્દ્રઃ શ્યેનો ભૂત્વા વિહાયસિ ।
૯૩.૧૪/૨સ્થાલીમથાહરત્ પૂર્ણાં માંસેન પિહિતાં તદા ॥ ૯૩.૧૪॥

૯૩.૧૫/૧તત્ કર્મ દૃષ્ટ્વા શિષ્યાસ્તે ઋષેઃ શ્યેનં ન્યવેદયન્ ।
૯૩.૧૫/૨હૃતા સ્થાલી મુનિશ્રેષ્ઠ શ્યેનેનાકૃતબુદ્ધિના ॥ ૯૩.૧૫॥

૯૩.૧૬/૧તતશ્ચુકોપ ભગવાઞ્ શમ્બુકામસ્તદા હરિમ્ ।
૯૩.૧૬/૨તતો જ્ઞાત્વા સુરપતિઃ સ્થાલીં ચક્રે મધુપ્લુતામ્ ॥ ૯૩.૧૬॥

૯૩.૧૭/૧પુનર્નિવેશયામાસ ઉલ્કાસ્વેવ ખગો હરિઃ ।
૯૩.૧૭/૨મધુના તુ સમાયુક્તાં વિશ્વામિત્રશ્ચુકોપ હ ।
૯૩.૧૭/૩સ્થાલીં વીક્ષ્ય તતઃ કોપાદ્ ઇદમાહ સ કૌશિકઃ ॥ ૯૩.૧૭॥

૯૩.૧૮/૧વિશ્વામિત્ર ઉવાચ । શ્વમાંસમેવ નો દેહિ ત્વં હરામૃતમુત્તમમ્ ।
૯૩.૧૮/૨નો ચેત્ ત્વાં ભસ્મસાત્ કુર્યામિન્દ્રો ભીતસ્તદાબ્રવીત્ ॥ ૯૩.૧૮॥

૯૩.૧૯/૧ઇન્દ્ર ઉવાચ । મધુ હુત્વા યથાન્યાયં પિબ પુત્રૈઃ સમન્વિતઃ ।
૯૩.૧૯/૨કિમનેન શ્વમાંસેન અમેધ્યેન મહામુને ॥ ૯૩.૧૯॥

૯૩.૨૦/૧બ્રહ્મોવાચ । વિશ્વામિત્રોઽપિ નેત્યાહ ભુક્તેનૈકેન કિં ફલમ્ ।
૯૩.૨૦/૨પ્રજાઃ સર્વાશ્ચ સીદન્તિ કિં તેન મધુના હરે ॥ ૯૩.૨૦॥

૯૩.૨૧/૧સર્વેષામમૃતં ચેત્ સ્યાદ્ ભોક્ષ્યેઽહમમૃતં શુચિ ।
૯૩.૨૧/૨અથવા દેવપિતરો ભોક્ષ્યન્તીદં શ્વમાંસકમ્ ॥ ૯૩.૨૧॥

૯૩.૨૨/૧પશ્ચાદ્ અહં તચ્ચ માંસં ભોક્ષ્યે નાનૃતમસ્તિ મે ।
૯૩.૨૨/૨તતો ભીતઃ સહસ્રાક્ષો મેઘાન્ આહૂય તત્ક્ષણાત્ ॥ ૯૩.૨૨॥

૯૩.૨૩/૧વવર્ષ ચામૃતં વારિ હ્યમૃતેનાર્પિતાઃ પ્રજાઃ ।
૯૩.૨૩/૨પશ્ચાત્ તદ્ અમૃતં પુણ્યં હરિદત્તં યથાવિધિ ॥ ૯૩.૨૩॥

૯૩.૨૪/૧તર્પયિત્વા સુરાન્ આદૌ તર્પયિત્વા જગત્ત્રયમ્ ।
૯૩.૨૪/૨વિપ્રઃ સમ્ભુક્તવાઞ્ શિષ્યૈર્વિશ્વામિત્રઃ સ્વભાર્યયા ॥ ૯૩.૨૪॥

૯૩.૨૫/૧તતઃ પ્રભૃતિ તત્ તીર્થમાખ્યાતં ચાતિપુણ્યદમ્ ।
૯૩.૨૫/૨યત્રાગતઃ સુરપતિર્લોકાનામમૃતાર્પણમ્ ॥ ૯૩.૨૫॥

૯૩.૨૬/૧સંજાતં માંસવર્જં તુ તત્ તીર્થં પુણ્યદં નૃણામ્ ।
૯૩.૨૬/૨તત્ર સ્નાનં ચ દાનં ચ સર્વક્રતુફલપ્રદમ્ ॥ ૯૩.૨૬॥

૯૩.૨૭/૧તતઃ પ્રભૃતિ તત્ તીર્થં વિશ્વામિત્રમિતિ સ્મૃતમ્ ।
૯૩.૨૭/૨મધુતીર્થમથૈન્દ્રં ચ શ્યેનં પર્જન્યમેવ ચ ॥ ૯૩.૨૭॥

૯૪.૧/૧બ્રહ્મોવાચ । શ્વેતતીર્થમિતિ ખ્યાતં ત્રૈલોક્યે વિશ્રુતં શુભમ્ ।
૯૪.૧/૨તસ્ય શ્રવણમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૯૪.૧॥

૯૪.૨/૧શ્વેતો નામ પુરા વિપ્રો ગૌતમસ્ય પ્રિયઃ સખા ।

૯૪.૨/૨આતિથ્યપૂજાનિરતો ગૌતમીતીરમાશ્રિતઃ ॥ ૯૪.૨॥

૯૪.૩/૧મનસા કર્મણા વાચા શિવભક્તિપરાયણઃ ।
૯૪.૩/૨ધ્યાયન્તં તં દ્વિજશ્રેષ્ઠં પૂજયન્તં સદા શિવમ્ ॥ ૯૪.૩॥

૯૪.૪/૧પૂર્ણાયુષં દ્વિજવરં શિવભક્તિપરાયણમ્ ।
૯૪.૪/૨નેતું દૂતાઃ સમાજગ્મુર્દક્ષિણાશાપતેસ્તદા ॥ ૯૪.૪॥

૯૪.૫/૧નાશક્નુવન્ ગૃહં તસ્ય પ્રવેષ્ટુમપિ નારદ ।
૯૪.૫/૨તદા કાલે વ્યતિક્રાન્તે ચિત્રકો મૃત્યુમબ્રવીત્ ॥ ૯૪.૫॥

૯૪.૬/૧ચિત્રક ઉવાચ । કિં નાયાતિ ક્ષીણજીવો મૃત્યો શ્વેતઃ કથં ત્વિતિ ।
૯૪.૬/૨નાદ્યાપ્યાયાન્તિ દૂતાસ્તે મૃત્યોર્નૈવોચિતં તુ તે ॥ ૯૪.૬॥

૯૪.૭/૧બ્રહ્મોવાચ । તતશ્ચ કુપિતો મૃત્યુઃ પ્રાયાચ્છ્વેતગૃહં સ્વયમ્ ।
૯૪.૭/૨બહિઃસ્થિતાંસ્તદા પશ્યન્ મૃત્યુર્દૂતાન્ ભયાર્દિતાન્ ।
૯૪.૭/૩પ્રોવાચ કિમિદં દૂતા મૃત્યુમૂચુશ્ચ દૂતકાઃ ॥ ૯૪.૭॥

૯૪.૮/૧દૂતા ઊચુઃ । શિવેન રક્ષિતં શ્વેતં વયં નો વીક્ષિતું ક્ષમાઃ ।
૯૪.૮/૨યેષાં પ્રસન્નો ગિરિશસ્તેષાં કા નામ ભીતયઃ ॥ ૯૪.૮॥

૯૪.૯/૧બ્રહ્મોવાચ । પાશપાણિસ્તદા મૃત્યુઃ પ્રાવિશદ્ યત્ર સ દ્વિજઃ ।
૯૪.૯/૨નાસૌ વિપ્રો વિજાનાતિ મૃત્યું વા યમકિંકરાન્ ॥ ૯૪.૯॥

૯૪.૧૦/૧શિવં પૂજયતે ભક્ત્યા શ્વેતસ્ય તુ સમીપતઃ ।
૯૪.૧૦/૨મૃત્યું પાશધરં દૃષ્ટ્વા દણ્ડી પ્રોવાચ વિસ્મિતઃ ॥ ૯૪.૧૦॥

૯૪.૧૧/૧દણ્ડ્યુવાચ । કિમત્ર વીક્ષસે મૃત્યો દણ્ડિનં મૃત્યુરબ્રવીત્ ॥ ૯૪.૧૧॥

૯૪.૧૨/૧મૃત્યુરુવાચ । શ્વેતં નેતુમિહાયાતસ્તસ્માદ્ વીક્ષે
દ્વિજોત્તમમ્ ॥ ૯૪.૧૨॥

૯૪.૧૩/૧બ્રહ્મોવાચ । ત્વં ગચ્છેત્યબ્રવીદ્ દણ્ડી મૃત્યુઃ પાશાન્ અથાક્ષિપત્ ।
૯૪.૧૩/૨શ્વેતાય મુનિશાર્દૂલ તતો દણ્ડી ચુકોપ હ ॥ ૯૪.૧૩॥

૯૪.૧૪/૧શિવદત્તેન દણ્ડેન દણ્ડી મૃત્યુમતાડયત્ ।
૯૪.૧૪/૨તતઃ પાશધરો મૃત્યુઃ પપાત ધરણીતલે ॥ ૯૪.૧૪॥

૯૪.૧૫/૧તતસ્તે સત્વરં દૂતા હતં મૃત્યુમવેક્ષ્ય ચ ।
૯૪.૧૫/૨યમાય સર્વમવદન્ વધં મૃત્યોસ્તુ દણ્ડિના ॥ ૯૪.૧૫॥

૯૪.૧૬/૧તતશ્ચ કુપિતો ધર્મો યમો મહિષવાહનઃ ।
૯૪.૧૬/૨ચિત્રગુપ્તં બહુબલં યમદણ્ડં ચ રક્ષકમ્ ॥ ૯૪.૧૬॥

૯૪.૧૭/૧મહિષં ભૂતવેતાલાન્ આધિવ્યાધીંસ્તથૈવ ચ ।
૯૪.૧૭/૨અક્ષિરોગાન્ કુક્ષિરોગાન્ કર્ણશૂલં તથૈવ ચ ॥ ૯૪.૧૭॥

૯૪.૧૮/૧જ્વરં ચ ત્રિવિધં પાપં નરકાણિ પૃથક્ પૃથક્ ।
૯૪.૧૮/૨ત્વરન્તામિતિ તાન્ ઉક્ત્વા જગામ ત્વરિતો યમઃ ॥ ૯૪.૧૮॥

૯૪.૧૯/૧એતૈરન્યૈઃ પરિવૃતો યત્ર શ્વેતો દ્વિજોત્તમઃ ।
૯૪.૧૯/૨તમાયાન્તં યમં દૃષ્ટ્વા નન્દી પ્રોવાચ સાયુધઃ ॥ ૯૪.૧૯॥

૯૪.૨૦/૧વિનાયકં તથા સ્કન્દં ભૂતનાથં તુ દણ્ડિનમ્ ।
૯૪.૨૦/૨તત્ર તદ્ યુદ્ધમભવત્ સર્વલોકભયાવહમ્ ॥ ૯૪.૨૦॥

૯૪.૨૧/૧કાર્ત્તિકેયઃ સ્વયં શક્ત્યા બિભેદ યમકિંકરાન્ ।
૯૪.૨૧/૨દક્ષિણાશાપતિં ચાપિ નિજઘાન બલાન્વિતમ્ ॥ ૯૪.૨૧॥

૯૪.૨૨/૧હતાવશિષ્ટા યામ્યાસ્તે આદિત્યાય ન્યવેદયન્ ।
૯૪.૨૨/૨આદિત્યોઽપિ સુરૈઃ સાર્ધં શ્રુત્વા તન્ મહદ્ અદ્ભુતમ્ ॥ ૯૪.૨૨॥

૯૪.૨૩/૧લોકપાલૈરનુવૃતો મમાન્તિકમુપાગમત્ ।
૯૪.૨૩/૨અહં વિષ્ણુશ્ચ ભગવાન્ ઇન્દ્રોઽગ્નિર્વરુણસ્તથા ॥ ૯૪.૨૩॥

૯૪.૨૪/૧ચન્દ્રાદિત્યાવશ્વિનૌ ચ લોકપાલા મરુદ્ગણાઃ ।
૯૪.૨૪/૨એતે ચાન્યે ચ બહવો વયં યાતા યમાન્તિકમ્ ॥ ૯૪.૨૪॥

૯૪.૨૫/૧મૃત આસ્તે દક્ષિણેશો ગઙ્ગાતીરે બલાન્વિતઃ ।
૯૪.૨૫/૨સમુદ્રાશ્ચ નદા નાગા નાનાભૂતાન્યનેકશઃ ॥ ૯૪.૨૫॥

૯૪.૨૬/૧તત્રાજગ્મુઃ સુરેશાનં દ્રષ્ટું વૈવસ્વતં યમમ્ ।
૯૪.૨૬/૨તં દૃષ્ટ્વા હતસૈન્યં ચ યમં દેવા ભયાર્દિતાઃ ।
૯૪.૨૬/૩કૃતાઞ્જલિપુટાઃ શમ્ભુમૂચુઃ સર્વે પુનઃ પુનઃ ॥ ૯૪.૨૬॥

૯૪.૨૭/૧દેવા ઊચુઃ । ભક્તિપ્રિયત્વં તે નિત્યં દુષ્ટહન્તૃત્વમેવ ચ ।
૯૪.૨૭/૨આદિકર્તર્નમસ્તુભ્યં નીલકણ્ઠ નમોઽસ્તુ તે ।
૯૪.૨૭/૩બ્રહ્મપ્રિય નમસ્તેઽસ્તુ દેવપ્રિય નમોઽસ્તુ તે ॥ ૯૪.૨૭॥

૯૪.૨૮/૧શ્વેતં દ્વિજં ભક્તમનાયુષં તે ।
૯૪.૨૮/૨નેતું યમાદિઃ સકલોઽસમર્થઃ ।

૯૪.૨૮/૩સંતોષમામાઃ પરમં સમીક્ષ્ય ।
૯૪.૨૮/૪ભક્તપ્રિયત્વં ત્વયિ નાથ સત્યમ્ ॥ ૯૪.૨૮॥

૯૪.૨૯/૧યે ત્વાં પ્રપન્નાઃ શરણં કૃપાલુમ્ ।
૯૪.૨૯/૨નાલં કૃતાન્તોઽપ્યનુવીક્ષિતું તાન્ ।
૯૪.૨૯/૩એવં વિદિત્વા શિવ એવ સર્વે ।
૯૪.૨૯/૪ત્વામેવ ભક્ત્યા પરયા ભજન્તે ॥ ૯૪.૨૯॥

૯૪.૩૦/૧ત્વમેવ જગતાં નાથ કિં ન સ્મરસિ શંકર ।
૯૪.૩૦/૨ત્વાં વિના કઃ સમર્થોઽત્ર વ્યવસ્થાં કર્તુમીશ્વરઃ ॥ ૯૪.૩૦॥

૯૪.૩૧/૧બ્રહ્મોવાચ । એવં તુ સ્તુવતાં તેષાં પુરસ્તાદ્ અભવચ્છિવઃ ।
૯૪.૩૧/૨કિં દદામીતિ તાન્ આહ ઇદમૂચુઃ સુરા અપિ ॥ ૯૪.૩૧॥

૯૪.૩૨/૧દેવા ઊચુઃ । અયં વૈવસ્વતો ધર્મો નિયન્તા સર્વદેહિનામ્ ।
૯૪.૩૨/૨ધર્માધર્મવ્યવસ્થાયાં સ્થાપિતો લોકપાલકઃ ॥ ૯૪.૩૨॥

૯૪.૩૩/૧નાયં વધમવાપ્નોતિ નાપરાધી ન પાપકૃત્ ।
૯૪.૩૩/૨વિના તેન જગદ્ધાતુર્નૈવ કિંચિદ્ ભવિષ્યતિ ॥ ૯૪.૩૩॥

૯૪.૩૪/૧તસ્માજ્જીવય દેવેશ યમં સબલવાહનમ્ ।
૯૪.૩૪/૨પ્રાર્થના સફલા નાથ મહત્સુ ન વૃથા ભવેત્ ॥ ૯૪.૩૪॥

૯૪.૩૫/૧બ્રહ્મોવાચ । તતઃ પ્રોવાચ ભગવાઞ્ જીવયેયમસંશયમ્ ।
૯૪.૩૫/૨યમં યદિ વચો મેઽદ્ય અનુમન્યન્તિ દેવતાઃ ॥ ૯૪.૩૫॥

૯૪.૩૬/૧તતઃ પ્રોચુઃ સુરાઃ સર્વે કુર્મો વાક્યં ત્વયોદિતમ્ ।
૯૪.૩૬/૨હરિબ્રહ્માદિસહિતં વશે યસ્યાખિલં જગત્ ॥ ૯૪.૩૬॥

૯૪.૩૭/૧તતઃ પ્રોવાચ ભગવાન્ અમરાન્ સમુપાગતાન્ ।
૯૪.૩૭/૨મદ્ભક્તો ન મૃતિં યાતુ નેત્યૂચુરમરાઃ પુનઃ ॥ ૯૪.૩૭॥

૯૪.૩૮/૧અમરાઃ સ્યુસ્તતો દેવ સર્વલોકાશ્ચરાચરાઃ ।
૯૪.૩૮/૨અમર્ત્યમર્ત્યભેદોઽયં ન સ્યાદ્ દેવ જગન્મય ॥ ૯૪.૩૮॥

૯૪.૩૯/૧પુનરપ્યાહ તાઞ્ શમ્ભુઃ શૃણ્વન્તુ મમ ભાષિતમ્ ।
૯૪.૩૯/૨મદ્ભક્તાનાં વૈષ્ણવાનાં ગૌતમીમનુસેવતામ્ ॥ ૯૪.૩૯॥

૯૪.૪૦/૧વયં તુ સ્વામિનો નિત્યં ન મૃત્યુઃ સ્વામ્યમર્હતિ ।
૯૪.૪૦/૨વાર્ત્તાપ્યેષાં ન કર્તવ્યા યમેન તુ કદાચન ॥ ૯૪.૪૦॥

૯૪.૪૧/૧આધિવ્યાધ્યાદિભિર્જાતુ કાર્યો નાભિભવઃ ક્વચિત્ ।
૯૪.૪૧/૨યે શિવં શરણં યાતાસ્તે મુક્તાસ્તત્ક્ષણાદ્ અપિ ॥ ૯૪.૪૧॥

૯૪.૪૨/૧સાનુગસ્ય યમસ્યાતો નમસ્યાઃ સર્વ એવ તે ।
૯૪.૪૨/૨તથેત્યૂચુઃ સુરગણા દેવદેવં શિવં પ્રતિ ॥ ૯૪.૪૨॥

૯૪.૪૩/૧તતશ્ચ ભગવાન્ નાથો નન્દિનં પ્રાહ વાહનમ્ ॥ ૯૪.૪૩॥

૯૪.૪૪/૧શિવ ઉવાચ । ગૌતમ્યા ઉદકેન ત્વમભિષિઞ્ચ મૃતં યમમ્ ॥ ૯૪.૪૪॥

૯૪.૪૫/૧બ્રહ્મોવાચ । તતો યમાદયઃ સર્વે અભિષિક્તાસ્તુ નન્દિના ।
૯૪.૪૫/૨ઉત્થિતાશ્ચ સજીવાસ્તે દક્ષિણાશાં તતો ગતાઃ ॥ ૯૪.૪૫॥

૯૪.૪૬/૧ઉત્તરે ગૌતમીતીરે વિષ્ણ્વાદ્યાઃ સર્વદૈવતાઃ ।
૯૪.૪૬/૨સ્થિતા આસન્ પૂજયન્તો દેવદેવં મહેશ્વરમ્ ॥ ૯૪.૪૬॥

૯૪.૪૭/૧તત્રાસન્ અયુતાન્યષ્ટ સહસ્રાણિ ચતુર્દશ ।
૯૪.૪૭/૨તથા ષટ્ ચ સહસ્રાણિ પુનઃ ષટ્ ચ તથૈવ ચ ॥ ૯૪.૪૭॥

૯૪.૪૮/૧ષડ્ દક્ષિણે તથા તીરે તીર્થાનામયુતત્રયમ્ ।
૯૪.૪૮/૨પુણ્યમાખ્યાનમેતદ્ ધિ શ્વેતતીર્થસ્ય નારદ ॥ ૯૪.૪૮॥

૯૪.૪૯/૧યત્રાસૌ પતિતો મૃત્યુર્મૃત્યુતીર્થં તદ્ ઉચ્યતે ।
૯૪.૪૯/૨તસ્ય શ્રવણમાત્રેણ સહસ્રં જીવતે સમાઃ ॥ ૯૪.૪૯॥

૯૪.૫૦/૧તત્ર સ્નાનં ચ દાનં ચ સર્વપાપપ્રણાશનમ્ ।
૯૪.૫૦/૨શ્રવણં પઠનં ચાપિ સ્મરણં ચ મલક્ષયમ્ ।
૯૪.૫૦/૩કરોતિ સર્વલોકાનાં ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૯૪.૫૦॥

૯૫.૧/૧બ્રહ્મોવાચ । શુક્રતીર્થમિતિ ખ્યાતં સર્વસિદ્ધિકરં નૃણામ્ ।
૯૫.૧/૨સર્વપાપપ્રશમનં સર્વવ્યાધિવિનાશનમ્ ॥ ૯૫.૧॥

૯૫.૨/૧અઙ્ગિરાશ્ચ ભૃગુશ્ચૈવ ઋષી પરમધાર્મિકૌ ।
૯૫.૨/૨તયોઃ પુત્રૌ મહાપ્રાજ્ઞૌ રૂપબુદ્ધિવિલાસિનૌ ॥ ૯૫.૨॥

૯૫.૩/૧જીવઃ કવિરિતિ ખ્યાતૌ માતાપિત્રોર્વશે રતૌ ।
૯૫.૩/૨ઉપનીતૌ સુતૌ દૃષ્ટ્વા પિતરાવૂચતુર્મિથઃ ॥ ૯૫.૩॥

૯૫.૪/૧ઋષી ઊચતુઃ । આવયોરેક એવાસ્તુ શાસ્તા નિત્યં ચ પુત્રયોઃ ।
૯૫.૪/૨તસ્માદ્ એકઃ શાસિતા સ્યાત્ તિષ્ઠત્વેકો યથાસુખમ્ ॥ ૯૫.૪॥

૯૫.૫/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા તતઃ શીઘ્રમઙ્ગિરાઃ પ્રાહ ભાર્ગવમ્ ।
૯૫.૫/૨અધ્યાપયિષ્યે સદૃશં સુખં તિષ્ઠતુ ભાર્ગવઃ ॥ ૯૫.૫॥

૯૫.૬/૧એતચ્છ્રુત્વા ચાઙ્ગિરસો વાક્યં ભૃગુકુલોદ્વહઃ ।
૯૫.૬/૨તથેતિ મત્વાઙ્ગિરસે શુક્રં તસ્મૈ ન્યવેદયત્ ॥ ૯૫.૬॥

૯૫.૭/૧ઉભાવપિ સુતૌ નિત્યમધ્યાપયતિ વૈ પૃથક્ ।
૯૫.૭/૨વૈષમ્યબુદ્ધ્યા તૌ બાલૌ ચિરાચ્છુક્રોઽબ્રવીદ્ ઇદમ્ ॥ ૯૫.૭॥

૯૫.૮/૧શુક્ર ઉવાચ । વૈષમ્યેણ ગુરો માં ત્વમધ્યાપયસિ નિત્યશઃ ।
૯૫.૮/૨ગુરૂણાં નેદમુચિતં વૈષમ્યં પુત્રશિષ્યયોઃ ॥ ૯૫.૮॥

૯૫.૯/૧વૈષમ્યેણ ચ વર્તન્તે મૂઢાઃ શિષ્યેષુ દેશિકાઃ ।
૯૫.૯/૨નૈષા વિષમબુદ્ધીનાં સંખ્યા પાપસ્ય વિદ્યતે ॥ ૯૫.૯॥

૯૫.૧૦/૧આચાર્ય સમ્યગ્ જ્ઞાતોઽસિ નમસ્યેઽહં પુનઃ પુનઃ ।
૯૫.૧૦/૨ગચ્છેયં ગુરુમન્યં વૈ મામનુજ્ઞાતુમર્હસિ ॥ ૯૫.૧૦॥

૯૫.૧૧/૧ગચ્છેયં પિતરં બ્રહ્મન્ યદ્યસૌ વિષમો ભવેત્ ।
૯૫.૧૧/૨તતો વાન્યત્ર ગચ્છામિ સ્વામિન્ પૃષ્ટોઽસિ ગમ્યતે ॥ ૯૫.૧૧॥

૯૫.૧૨/૧બ્રહ્મોવાચ । ગુરું બૃહસ્પતિં દૃષ્ટ્વા અનુજ્ઞાતસ્ત્વગાત્ તતઃ ।
૯૫.૧૨/૨અવાપ્તવિદ્યઃ પિતરં ગચ્છેયં ચેત્યચિન્તયત્ ॥ ૯૫.૧૨॥

૯૫.૧૩/૧તસ્માત્ કમનુપૃચ્છેયમુત્કૃષ્ટઃ કો ગુરુર્ભવેત્ ।
૯૫.૧૩/૨ઇતિ સ્મરન્ મહાપ્રાજ્ઞમપૃચ્છદ્ વૃદ્ધગૌતમમ્ ॥ ૯૫.૧૩॥

૯૫.૧૪/૧શુક્ર ઉવાચ । કો ગુરુઃ સ્યાન્ મુનિશ્રેષ્ઠ મમ બ્રૂહિ ગુરુર્ભવેત્ ।
૯૫.૧૪/૨ત્રયાણામપિ લોકાનાં યો ગુરુસ્તં વ્રજામ્યહમ્ ॥ ૯૫.૧૪॥

૯૫.૧૫/૧બ્રહ્મોવાચ । સ પ્રાહ જગતામીશં શમ્ભું દેવં જગદ્ગુરુમ્ ।
૯૫.૧૫/૨ક્વારાધયામિ ગિરિશમિત્યુક્તઃ પ્રાહ ગૌતમઃ ॥ ૯૫.૧૫॥

૯૫.૧૬/૧ગૌતમ ઉવાચ । ગૌતમ્યાં તુ શુચિર્ભૂત્વા સ્તોત્રૈસ્તોષય શંકરમ્ ।
૯૫.૧૬/૨તતસ્તુષ્ટો જગન્નાથઃ સ તે વિદ્યાં પ્રદાસ્યતિ ॥ ૯૫.૧૬॥

૯૫.૧૭/૧બ્રહ્મોવાચ । ગૌતમસ્ય તુ તદ્વાક્યાત્ પ્રાગાદ્ ગઙ્ગાં સ ભાર્ગવઃ ।
૯૫.૧૭/૨સ્નાત્વા ભૂત્વા શુચિઃ સમ્યક્ સ્તુતિં ચક્રે સ બાલકઃ ॥ ૯૫.૧૭॥

૯૫.૧૮/૧શુક્ર ઉવાચ । બાલોઽહં બાલબુદ્ધિશ્ચ બાલચન્દ્રધર પ્રભો ।
૯૫.૧૮/૨નાહં જાનામિ તે કિંચિત્ સ્તુતિં કર્તું નમોઽસ્તુ તે ॥ ૯૫.૧૮॥

૯૫.૧૯/૧પરિત્યક્તસ્ય ગુરુણા ન મમાસ્તિ સુહૃત્ સખા ।
૯૫.૧૯/૨ત્વં પ્રભુઃ સર્વભાવેન જગન્નાથ નમોઽસ્તુ તે ॥ ૯૫.૧૯॥

૯૫.૨૦/૧ગુરુર્ગુરુમતાં દેવ મહતાં ચ મહાન્ અસિ ।
૯૫.૨૦/૨અહમલ્પતરો બાલો જગન્મય નમોઽસ્તુ તે ॥ ૯૫.૨૦॥

૯૫.૨૧/૧વિદ્યાર્થં હિ સુરેશાન નાહં વેદ્મિ ભવદ્ગતિમ્ ।
૯૫.૨૧/૨માં ત્વં ચ કૃપયા પશ્ય લોકસાક્ષિન્ નમોઽસ્તુ તે ॥ ૯૫.૨૧॥

૯૫.૨૨/૧બ્રહ્મોવાચ । એવં તુ સ્તુવતસ્તસ્ય પ્રસન્નોઽભૂત્ સુરેશ્વરઃ ॥ ૯૫.૨૨॥

૯૫.૨૩/૧શિવ ઉવાચ । કામં વરય ભદ્રં તે યચ્ચાપિ
સુરદુર્લભમ્ ॥ ૯૫.૨૩॥

૯૫.૨૪/૧બ્રહ્મોવાચ । કવિરપ્યાહ દેવેશં કૃતાઞ્જલિરુદારધીઃ ॥ ૯૫.૨૪॥

૯૫.૨૫/૧શુક્ર ઉવાચ । બ્રહ્માદિભિશ્ચ ઋષિભિર્યા વિદ્યા નૈવ ગોચરા ।
૯૫.૨૫/૨તાં વિદ્યાં નાથ યાચિષ્યે ત્વં ગુરુર્મમ દૈવતમ્ ॥ ૯૫.૨૫॥

૯૫.૨૬/૧બ્રહ્મોવાચ । મૃતસંજીવિનીં વિદ્યામજ્ઞાતાં ત્રિદશૈરપિ ।
૯૫.૨૬/૨તાં દત્તવાન્ સુરશ્રેષ્ઠસ્તસ્મૈ શુક્રાય યાચતે ॥ ૯૫.૨૬॥

૯૫.૨૭/૧ઇતરા લૌકિકી વિદ્યા વૈદિકી ચાન્યગોચરા ।
૯૫.૨૭/૨કિં પુનઃ શંકરે તુષ્ટે વિચાર્યમવશિષ્યતે ॥ ૯૫.૨૭॥

૯૫.૨૮/૧સ તુ લબ્ધ્વા મહાવિદ્યાં પ્રાયાત્ સ્વપિતરં ગુરુમ્ ।
૯૫.૨૮/૨દૈત્યાનાં ચ ગુરુશ્ચાસીદ્ વિદ્યયા પૂજિતઃ કવિઃ ॥ ૯૫.૨૮॥

૯૫.૨૯/૧તતઃ કદાચિત્ તાં વિદ્યાં કસ્મિંશ્ચિત્ કારણાન્તરે ।
૯૫.૨૯/૨કચો બૃહસ્પતિસુતો વિદ્યાં પ્રાપ્તઃ કવેસ્તુ તામ્ ॥ ૯૫.૨૯॥

૯૫.૩૦/૧કચાદ્ બૃહસ્પતિશ્ચાપિ તતો દેવાઃ પૃથક્ પૃથક્ ।
૯૫.૩૦/૨અવાપુર્મહતીં વિદ્યાં યામાહુર્મૃતજીવિનીમ્ ॥ ૯૫.૩૦॥

૯૫.૩૧/૧યત્ર સા કવિના પ્રાપ્તા વિદ્યાપૂજ્ય મહેશ્વરમ્ ।
૯૫.૩૧/૨ગૌતમ્યા ઉત્તરે પારે શુક્રતીર્થં તદ્ ઉચ્યતે ॥ ૯૫.૩૧॥

૯૫.૩૨/૧મૃતસંજીવિનીતીર્થમાયુરારોગ્યવર્ધનમ્ ।
૯૫.૩૨/૨સ્નાનં દાનં ચ યત્ કિંચિત્ સર્વમક્ષયપુણ્યદમ્ ॥ ૯૫.૩૨॥

૯૬.૧/૧બ્રહ્મોવાચ । ઇન્દ્રતીર્થમિતિ ખ્યાતં બ્રહ્મહત્યાવિનાશનમ્ ।
૯૬.૧/૨સ્મરણાદ્ અપિ પાપૌઘ+ ।ક્લેશસંઘવિનાશનમ્ ॥ ૯૬.૧॥

૯૬.૨/૧પુરા વૃત્રવધે વૃત્તે બ્રહ્મહત્યા તુ નારદ ।
૯૬.૨/૨શચીપતિં ચાનુગતા તાં દૃષ્ટ્વા ભીતવદ્ ધરિઃ ॥ ૯૬.૨॥

૯૬.૩/૧ઇન્દ્રસ્તતો વૃત્રહન્તા ઇતશ્ચેતશ્ચ ધાવતિ ।
૯૬.૩/૨યત્ર યત્ર ત્વસૌ યાતિ હત્યા સાપીન્દ્રગામિની ॥ ૯૬.૩॥

૯૬.૪/૧સ મહત્ સર આવિશ્ય પદ્મનાલમુપાગમત્ ।
૯૬.૪/૨તત્રાસૌ તન્તુવદ્ ભૂત્વા વાસં ચક્રે શચીપતિઃ ॥ ૯૬.૪॥

૯૬.૫/૧સરસ્તીરેઽપિ હત્યાસીદ્ દિવ્યં વર્ષસહસ્રકમ્ ।
૯૬.૫/૨એતસ્મિન્ન્ અન્તરે દેવા નિરિન્દ્રા હ્યભવન્ મુને ॥ ૯૬.૫॥

૯૬.૬/૧મન્ત્રયામાસુરવ્યગ્રાઃ કથમિન્દ્રો ભવેદ્ ઇતિ ।
૯૬.૬/૨તત્રાહમવદં દેવાન્ હત્યાસ્થાનં પ્રકલ્પ્ય ચ ॥ ૯૬.૬॥

૯૬.૭/૧ઇન્દ્રસ્ય પાવનાર્થાય ગૌતમ્યામભિષિચ્યતામ્ ।
૯૬.૭/૨યત્રાભિષિક્તઃ પૂતાત્મા પુનરિન્દ્રો ભવિષ્યતિ ॥ ૯૬.૭॥

૯૬.૮/૧તથા તે નિશ્ચયં કૃત્વા ગૌતમીં શીઘ્રમાગમન્ ।
૯૬.૮/૨તત્ર સ્નાતં સુરપતિં દેવાશ્ચ ઋષયસ્તથા ॥ ૯૬.૮॥

૯૬.૯/૧અભિષેક્તુકામાસ્તે સર્વે શચીકાન્તં ચ તસ્થિરે ।
૯૬.૯/૨અભિષિચ્યમાનમિન્દ્રં તં પ્રકોપાદ્ ગૌતમોઽબ્રવીત્ ॥ ૯૬.૯॥

૯૬.૧૦/૧ગૌતમ ઉવાચ । અભિષેક્ષ્યન્તિ પાપિષ્ઠં મહેન્દ્રં ગુરુતલ્પગમ્ ।
૯૬.૧૦/૨તાન્ સર્વાન્ ભસ્મસાત્ કુર્યાં શીઘ્રં યાન્ત્વસુરારયઃ ॥ ૯૬.૧૦॥

૯૬.૧૧/૧બ્રહ્મોવાચ । તદ્ ઋષેર્વચનં શ્રુત્વા પરિહૃત્ય ચ ગૌતમીમ્ ।
૯૬.૧૧/૨નર્મદામગમન્ સર્વ ઇન્દ્રમાદાય સત્વરાઃ ॥ ૯૬.૧૧॥

૯૬.૧૨/૧ઉત્તરે નર્મદાતીરે અભિષેકાય તસ્થિરે ।
૯૬.૧૨/૨અભિષેક્ષ્યમાણમિન્દ્રં તં માણ્ડવ્યો ભગવાન્ ઋષિઃ ॥ ૯૬.૧૨॥

૯૬.૧૩/૧અબ્રવીદ્ ભસ્મસાત્ કુર્યાં યદિ સ્યાદ્ અભિષેચનમ્ ।
૯૬.૧૩/૨પૂજયામાસુરમરા માણ્ડવ્યં યુક્તિભિઃ સ્તવૈઃ ॥ ૯૬.૧૩॥

૯૬.૧૪/૧દેવા ઊચુઃ । અયમિન્દ્રઃ સહસ્રાક્ષો યસ્મિન્ દેશેઽભિષિચ્યતે ।
૯૬.૧૪/૨તત્રાતિદારુણં વિઘ્નં મુને સમુપજાયતે ॥ ૯૬.૧૪॥

૯૬.૧૫/૧તચ્છાન્તિં કુરુ કલ્યાણ પ્રસીદ વરદો ભવ ।
૯૬.૧૫/૨મલનિર્યાતનં યસ્મિન્ કુર્મસ્તસ્મિન્ વરાન્ બહૂન્ ॥ ૯૬.૧૫ ॥

૯૬.૧૬/૧દેશે દાસ્યામહે સર્વે તદ્ અનુજ્ઞાતુમર્હસિ ।
૯૬.૧૬/૨યસ્મિન્ દેશે સુરેન્દ્રસ્ય અભિષેકો ભવિષ્યતિ ॥ ૯૬.૧૬ ॥

૯૬.૧૭/૧સ સર્વકામદઃ પુંસાં ધાન્યવૃક્ષફલૈર્યુતઃ ।
૯૬.૧૭/૨નાનાવૃષ્ટિર્ન દુર્ભિક્ષં ભવેદ્ અત્ર કદાચન ॥ ૯૬.૧૭ ॥

૯૬.૧૮/૧બ્રહ્મોવાચ । મેને તતો મુનિશ્રેષ્ઠો માણ્ડવ્યો લોકપૂજિતઃ ।
૯૬.૧૮/૨અભિષેકઃ કૃતસ્તત્ર મલનિર્યાતનં તથા ॥ ૯૬.૧૮ ॥

૯૬.૧૯/૧દેવૈસ્તદોક્તો મુનિભિઃ સ દેશો માલવસ્તતઃ ।
૯૬.૧૯/૨અભિષિક્તે સુરપતૌ જાતે ચ વિમલે તદા ॥ ૯૬.૧૯ ॥

૯૬.૨૦/૧આનીય ગૌતમીં ગઙ્ગાં તં પુણ્યાયાભિષેચિરે ।
૯૬.૨૦/૨સુરાશ્ચ ઋષયશ્ચૈવ અહં વિષ્ણુસ્તથૈવ ચ ॥ ૯૬.૨૦ ॥

૯૬.૨૧/૧વસિષ્ઠો ગૌતમશ્ચાપિ અગસ્ત્યોઽત્રિશ્ચ કશ્યપઃ ।
૯૬.૨૧/૨એતે ચાન્યે ચ ઋષયો દેવા યક્ષાઃ સપન્નગાઃ ॥ ૯૬.૨૧ ॥

૯૬.૨૨/૧સ્નાનં તત્પુણ્યતોયેન અકુર્વન્ન્ અભિષેચનમ્ ।
૯૬.૨૨/૨મયા પુનઃ શચીભર્તા કમણ્ડલુભવેન ચ ॥ ૯૬.૨૨ ॥

૯૬.૨૩/૧વારિણાપ્યભિષિક્તશ્ચ તત્ર પુણ્યાભવન્ નદી ।
૯૬.૨૩/૨સિક્તા ચેતિ ચ તત્રાસીત્ તે ગઙ્ગાયાં ચ સંગતે ॥ ૯૬.૨૩ ॥

૯૬.૨૪/૧સંગમૌ તત્ર વિખ્યાતૌ સર્વદા મુનિસેવિતૌ ।
૯૬.૨૪/૨તતઃ પ્રભૃતિ તત્ તીર્થં પુણ્યાસંગમમુચ્યતે ॥ ૯૬.૨૪ ॥

૯૬.૨૫/૧સિક્તાયાઃ સંગમે પુણ્યમૈન્દ્રં તદ્ અભિધીયતે ।
૯૬.૨૫/૨તત્ર સપ્ત સહસ્રાણિ તીર્થાન્યાસઞ્ શુભાનિ ચ ॥ ૯૬.૨૫ ॥

૯૬.૨૬/૧તેષુ સ્નાનં ચ દાનં ચ વિશેષેણ તુ સંગમે ।
૯૬.૨૬/૨સર્વં તદ્ અક્ષયં વિદ્યાન્ નાત્ર કાર્યા વિચારણા ॥ ૯૬.૨૬ ॥

૯૬.૨૭/૧યદ્ એતત્ પુણ્યમાખ્યાનં યઃ પઠેચ્ચ શ઼ૃણોતિ વા ।
૯૬.૨૭/૨સર્વપાપૈઃ સ મુચ્યેત મનોવાક્કાયકર્મજૈઃ ॥ ૯૬.૨૭ ॥

૯૭.૧/૧બ્રહ્મોવાચ । પૌલસ્ત્યં તીર્થમાખ્યાતં સર્વસિદ્ધિપ્રદં નૃણામ્ ।

૯૭.૧/૨પ્રભાવં તસ્ય વક્ષ્યામિ ભ્રષ્ટરાજ્યપ્રદાયકમ્ ॥ ૯૭.૧॥

૯૭.૨/૧ઉત્તરાશાપતિઃ પૂર્વમ્ ઋદ્ધિસિદ્ધિસમન્વિતઃ ।
૯૭.૨/૨પુરા લઙ્કાપતિશ્ચાસીજ્જ્યેષ્ઠો વિશ્રવસઃ સુતઃ ॥ ૯૭.૨॥

૯૭.૩/૧તસ્યૈતે ભ્રાતરશ્ચાસન્ બલવન્તોઽમિતપ્રભાઃ ।
૯૭.૩/૨સાપત્ના રાવણશ્ચૈવ કુમ્ભકર્ણો વિભીષણઃ ॥ ૯૭.૩॥

૯૭.૪/૧તેઽપિ વિશ્રવસઃ પુત્રા રાક્ષસ્યાં રાક્ષસાસ્તુ તે ।
૯૭.૪/૨મદ્દત્તેન વિમાનેન ધનદો ભ્રાતૃભિઃ સહ ॥ ૯૭.૪॥

૯૭.૫/૧મમાન્તિકં ભક્તિયુક્તો નિત્યમેતિ તુ યાતિ ચ ।
૯૭.૫/૨રાવણસ્ય તુ યા માતા કુપિતા સાબ્રવીત્ સુતાન્ ॥ ૯૭.૫॥

૯૭.૬/૧રાવણમાતોવાચ । મરિષ્યે ન ચ જીવિષ્યે પુત્રા વૈરૂપ્યકારણાત્ ।
૯૭.૬/૨દેવાશ્ચ દાનવાશ્ચાસન્ સાપત્ના ભ્રાતરો મિથઃ ॥ ૯૭.૬॥

૯૭.૭/૧અન્યોન્યવધમીપ્સન્તે જયૈશ્વર્યવશાનુગાઃ ।
૯૭.૭/૨તદ્ભવન્તો ન પુરુષા ન શક્તા ન જયૈષિણઃ ।
૯૭.૭/૩સાપત્ન્યં યોઽનુમન્યતે તસ્ય જીવો નિરર્થકઃ ॥ ૯૭.૭॥

૯૭.૮/૧બ્રહ્મોવાચ । તન્ માતૃવચનં શ્રુત્વા ભ્રાતરસ્તે ત્રયો મુને ।
૯૭.૮/૨જગ્મુસ્તે તપસેઽરણ્યં કૃતવન્તસ્તપો મહત્ ॥ ૯૭.૮॥

૯૭.૯/૧મત્તો વરાન્ અવાપુશ્ચ ત્રય એતે ચ રાક્ષસાઃ ।
૯૭.૯/૨માતુલેન મરીચેન તથા માતામહેન તુ ॥ ૯૭.૯॥

૯૭.૧૦/૧તન્માતૃવચનાચ્ચાપિ તતો લઙ્કામયાચત ।
૯૭.૧૦/૨રક્ષોભાવાન્ માતૃદોષાદ્ ભ્રાત્રોર્વૈરમભૂન્ મહત્ ॥ ૯૭.૧૦॥

૯૭.૧૧/૧તતસ્તદ્ અભવદ્ યુદ્ધં દેવદાનવયોરિવ ।
૯૭.૧૧/૨યુદ્ધે જિત્વાગ્રજં શાન્તં ધનદં ભ્રાતરં તથા ॥ ૯૭.૧૧॥

૯૭.૧૨/૧પુષ્પકં ચ પુરીં લઙ્કાં સર્વં ચૈવ વ્યપાહરત્ ।
૯૭.૧૨/૨રાવણો ઘોષયામાસ ત્રૈલોક્યે સચરાચરે ॥ ૯૭.૧૨॥

૯૭.૧૩/૧યો દદ્યાદ્ આશ્રયં ભ્રાતુઃ સ ચ વધ્યો ભવેન્ મમ ।
૯૭.૧૩/૨ભ્રાત્રા નિરસ્તો વૈશ્રવણો નૈવ પ્રાપાશ્રયં ક્વચિત્ ।
૯૭.૧૩/૩પિતામહં પુલસ્ત્યં તં ગત્વા નત્વાબ્રવીદ્ વચઃ ॥ ૯૭.૧૩॥

૯૭.૧૪/૧ધનદ ઉવાચ । ભ્રાત્રા નિરસ્તો દુષ્ટેન કિં કરોમિ વદસ્વ મે ।

૯૭.૧૪/૨આશ્રયઃ શરણં યત્ સ્યાદ્ દૈવં વા તીર્થમેવ ચ ॥ ૯૭.૧૪॥

૯૭.૧૫/૧બ્રહ્મોવાચ । તત્ પૌત્રવચનં શ્રુત્વા પુલસ્ત્યો
વાક્યમબ્રવીત્ ॥ ૯૭.૧૫॥

૯૭.૧૬/૧પુલસ્ત્ય ઉવાચ । ગૌતમીં ગચ્છ પુત્ર ત્વં સ્તુહિ દેવં મહેશ્વરમ્ ।
૯૭.૧૬/૨તત્ર નાસ્ય પ્રવેશઃ સ્યાદ્ ગઙ્ગાયા જલમધ્યતઃ ॥ ૯૭.૧૬॥

૯૭.૧૭/૧સિદ્ધિં પ્રાપ્સ્યસિ કલ્યાણીં તથા કુરુ મયા સહ ॥ ૯૭.૧૭॥

૯૭.૧૮/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા જગામાસૌ સભાર્યો ધનદસ્તથા ।
૯૭.૧૮/૨પિત્રા માત્રા ચ વૃદ્ધેન પુલસ્ત્યેન ધનેશ્વરઃ ॥ ૯૭.૧૮॥

૯૭.૧૯/૧ગત્વા તુ ગૌતમીં ગઙ્ગાં શુચિઃ સ્નાત્વા યતવ્રતઃ ।
૯૭.૧૯/૨તુષ્ટાવ દેવદેવેશં ભુક્તિમુક્તિપ્રદં શિવમ્ ॥ ૯૭.૧૯॥

૯૭.૨૦/૧ધનદ ઉવાચ । સ્વામી ત્વમેવાસ્ય ચરાચરસ્ય ।
૯૭.૨૦/૨વિશ્વસ્ય શમ્ભો ન પરોઽસ્તિ કશ્ચિત્ ।
૯૭.૨૦/૩ત્વામપ્યવજ્ઞાય યદીહ મોહાત્ ।
૯૭.૨૦/૪પ્રગલ્ભતે કોઽપિ સ શોચ્ય એવ ॥ ૯૭.૨૦॥

૯૭.૨૧/૧ત્વમષ્ટમૂર્ત્યા સકલં બિભર્ષિ ।
૯૭.૨૧/૨ત્વદાજ્ઞયા વર્તત એવ સર્વમ્ ।
૯૭.૨૧/૩તથાપિ વેદેતિ બુધો ભવન્તમ્ ।
૯૭.૨૧/૪ન જાત્વવિદ્વાન્ મહિમા પુરાતનમ્ ॥ ૯૭.૨૧॥

૯૭.૨૨/૧મલપ્રસૂતં યદ્ અવોચદ્ અમ્બા ।
૯૭.૨૨/૨હાસ્યાત્ સુતોઽયં તવ દેવ શૂરઃ ।
૯૭.૨૨/૩ત્વત્પ્રેક્ષિતાદ્ યઃ સ ચ વિઘ્નરાજો ।
૯૭.૨૨/૪જજ્ઞે ત્વહો ચેષ્ટિતમીશદૃષ્ટેઃ ॥ ૯૭.૨૨॥

૯૭.૨૩/૧અશ્રુપ્લુતાઙ્ગી ગિરિજા સમીક્ષ્ય ।
૯૭.૨૩/૨વિયુક્તદામ્પત્યમિતીશમૂચે ।
૯૭.૨૩/૩મનોભવોઽભૂન્ મદનો રતિશ્ચ ।
૯૭.૨૩/૪સૌભાગ્યપૂર્વત્વમવાપ સોમાત્ ॥ ૯૭.૨૩॥

૯૭.૨૪/૧બ્રહ્મોવાચ । ઇત્યાદિ સ્તુવતસ્તસ્ય પુરતોઽભૂત્ ત્રિલોચનઃ ।
૯૭.૨૪/૨વરેણ ચ્છન્દયામાસ હર્ષાન્ નોવાચ કિંચન ॥ ૯૭.૨૪॥

૯૭.૨૫/૧તૂષ્ણીમ્ભૂતે તુ ધનદે પુલસ્ત્યે ચ મહેશ્વરે ।
૯૭.૨૫/૨પુનઃ પુનર્વરસ્વેતિ શિવે વાદિનિ હર્ષિતે ॥ ૯૭.૨૫॥

૯૭.૨૬/૧એતસ્મિન્ન્ અન્તરે તત્ર વાગ્ ઉવાચાશરીરિણી ।
૯૭.૨૬/૨પ્રાપ્તવ્યં ધનપાલત્વં વદન્તીદં મહેશ્વરમ્ ॥ ૯૭.૨૬॥

૯૭.૨૭/૧પુલસ્ત્યસ્ય તુ યચ્ચિત્તં પિતુર્વૈશ્રવણસ્ય તુ ।
૯૭.૨૭/૨વિદિત્વેવ તદા વાણી શુભમર્થમુદીરયત્ ॥ ૯૭.૨૭॥

૯૭.૨૮/૧ભૂતવદ્ ભવિતવ્યં સ્યાદ્ દાસ્યમાનં તુ દત્તવત્ ।
૯૭.૨૮/૨પ્રાપ્તવ્યં પ્રાપ્તવત્ તત્ર દૈવી વાગ્ અભવચ્છુભા ॥ ૯૭.૨૮॥

૯૭.૨૯/૧પ્રભૂતશત્રુઃ પરિભૂતદુઃખઃ ।
૯૭.૨૯/૨સમ્પૂજ્ય સોમેશ્વરમાપ લિઙ્ગમ્ ।
૯૭.૨૯/૩દિગીશ્વરત્વં દ્રવિણપ્રભુત્વમ્ ।
૯૭.૨૯/૪અપારદાતૃત્વકલત્રપુત્રાન્ ॥ ૯૭.૨૯॥

૯૭.૩૦/૧તાં વાચં ધનદઃ શ્રુત્વા દેવદેવં ત્રિશૂલિનમ્ ।
૯૭.૩૦/૨એવં ભવતુ નામેતિ ધનદો વાક્યમબ્રવીત્ ॥ ૯૭.૩૦॥

૯૭.૩૧/૧તથૈવાસ્ત્વિતિ દેવેશો દૈવીં વાચમમન્યત ।
૯૭.૩૧/૨પુલસ્ત્યં ચ વરૈઃ પુણ્યૈસ્તથા વિશ્રવસં મુનિમ્ ॥ ૯૭.૩૧॥

૯૭.૩૨/૧ધનપાલં ચ દેવેશો હ્યભિનન્દ્ય યયૌ શિવઃ ।
૯૭.૩૨/૨તતઃ પ્રભૃતિ તત્ તીર્થં પૌલસ્ત્યં ધનદં વિદુઃ ॥ ૯૭.૩૨॥

૯૭.૩૩/૧તથા વૈશ્રવસં પુણ્યં સર્વકામપ્રદં શુભમ્ ।
૯૭.૩૩/૨તેષુ સ્નાનાદિ યત્ કિંચિત્ તત્ સર્વં બહુપુણ્યદમ્ ॥ ૯૭.૩૩॥

૯૮.૧/૧બ્રહ્મોવાચ । અગ્નિતીર્થમિતિ ખ્યાતં સર્વક્રતુફલપ્રદમ્ ।
૯૮.૧/૨સર્વવિઘ્નોપશમનં તત્તીર્થસ્ય ફલં શ ૃણુ ॥ ૯૮.૧॥

૯૮.૨/૧જાતવેદા ઇતિ ખ્યાતો અગ્નેર્ભ્રાતા સ હવ્યવાટ્ ।
૯૮.૨/૨હવ્યં વહન્તં દેવાનાં ગૌતમ્યાસ્તીર એવ તુ ॥ ૯૮.૨॥

૯૮.૩/૧ઋષીણાં સત્રસદને અગ્નેર્ભ્રાતરમુત્તમમ્ ।
૯૮.૩/૨ભ્રાતુઃ પ્રિયં તથા દક્ષં મધુર્દિતિસુતો બલી ॥ ૯૮.૩॥

૯૮.૪/૧જઘાન ઋષિમુખ્યેષુ પશ્યત્સુ ચ સુરેષ્વપિ ।
૯૮.૪/૨હવ્યં દેવા નૈવ ચાપુર્મૃતે વૈ જાતવેદસિ ॥ ૯૮.૪॥

૯૮.૫/૧મૃતે ભ્રાતરિ સ ત્વગ્નિઃ પ્રિયે વૈ જાતવેદસિ ।
૯૮.૫/૨કોપેન મહતાવિષ્ટો ગાઙ્ગમમ્ભઃ સમાવિશત્ ॥ ૯૮.૫॥

૯૮.૬/૧ગઙ્ગામ્ભસિ સમાવિષ્ટે હ્યગ્નૌ દેવાશ્ચ માનુષાઃ ।
૯૮.૬/૨જીવમુત્સર્જયામાસુરગ્નિજીવા યતો મતાઃ ॥ ૯૮.૬॥

૯૮.૭/૧યત્રાગ્નિર્જલમાવિષ્ટસ્તં દેશં સર્વ એવ તે ।
૯૮.૭/૨આજગ્મુર્વિબુધાઃ સર્વ ઋષયઃ પિતરસ્તથા ॥ ૯૮.૭॥

૯૮.૮/૧વિનાગ્નિના ન જીવામઃ સ્તુવન્તોઽગ્નિં વિશેષતઃ ।
૯૮.૮/૨અગ્નિં જલગતં દૃષ્ટ્વા પ્રિયં ચોચુર્દિવૌકસઃ ॥ ૯૮.૮॥

૯૮.૯/૧દેવા ઊચુઃ । દેવાઞ્ જીવય હવ્યેન કવ્યેન ચ પિતૃંસ્તથા ।
૯૮.૯/૨માનુષાન્ અન્નપાકેન બીજાનાં ક્લેદનેન ચ ॥ ૯૮.૯॥

૯૮.૧૦/૧બ્રહ્મોવાચ । અગ્નિરપ્યાહ તાન્ દેવાઞ્ શક્તો યો મે ગતોઽનુજઃ ।
૯૮.૧૦/૨ક્રિયમાણે ભવત્કાર્યે યા ગતિર્જાતવેદસઃ ॥ ૯૮.૧૦॥

૯૮.૧૧/૧સા વાપિ સ્યાન્ મમ સુરા નોત્સહે કાર્યસાધને ।
૯૮.૧૧/૨કાર્યં તુ સર્વતસ્તસ્ય ભવતાં જાતવેદસઃ ॥ ૯૮.૧૧॥

૯૮.૧૨/૧ઇમાં સ્થિતિમનુપ્રાપ્તો ન જાને મે કથં ભવેત્ ।
૯૮.૧૨/૨ઇહ ચામુત્ર ચ વ્યાપ્તૌ શક્તિરપ્યત્ર નો ભવેત્ ॥ ૯૮.૧૨॥

૯૮.૧૩/૧અથાપિ ક્રિયમાણે વૈ કાર્યે સૈવ ગતિર્મમ ।
૯૮.૧૩/૨દેવાસ્તમૂચુર્ભાવેન સર્વેણ ઋષયસ્તથા ॥ ૯૮.૧૩॥

૯૮.૧૪/૧આયુઃ કર્મણિ ચ પ્રીતિર્વ્યાપ્તૌ શક્તિશ્ચ દીયતે ।
૯૮.૧૪/૨પ્રયાજાન્ અનુયાજાંશ્ચ દાસ્યામો હવ્યવાહન ॥ ૯૮.૧૪॥

૯૮.૧૫/૧દેવાનાં ત્વં મુખં શ્રેષ્ઠમાહુત્યઃ પ્રથમાસ્તવ ।
૯૮.૧૫/૨ત્વયા દત્તં તુ યદ્ દ્રવ્યં ભોક્ષ્યામઃ સુરસત્તમ ॥ ૯૮.૧૫॥

૯૮.૧૬/૧બ્રહ્મોવાચ । તતસ્તુષ્ટોઽભવદ્ વહ્નિર્દેવવાક્યાદ્ યથાક્રમમ્ ।
૯૮.૧૬/૨ઇહ ચામુત્ર ચ વ્યાપ્તૌ હવ્યે વા લૌકિકે તથા ॥ ૯૮.૧૬॥

૯૮.૧૭/૧સર્વત્ર વહ્નિરભયઃ સમર્થોઽભૂત્ સુરાજ્ઞયા ।
૯૮.૧૭/૨જાતવેદા બૃહદ્ભાનુઃ સપ્તાર્ચિર્નીલલોહિતઃ ॥ ૯૮.૧૭॥

૯૮.૧૮/૧જલગર્ભઃ શમીગર્ભો યજ્ઞગર્ભઃ સ ઉચ્યતે ।
૯૮.૧૮/૨જલાદ્ આકૃષ્ય વિબુધા અભિષિચ્ય વિભાવસુમ્ ॥ ૯૮.૧૮॥

૯૮.૧૯/૧ઉભયત્ર પદે વાસઃ સર્વગોઽગ્નિસ્તતોઽભવત્ ।
૯૮.૧૯/૨યથાગતં સુરા જગ્મુર્વહ્નિતીર્થં તદ્ ઉચ્યતે ॥ ૯૮.૧૯॥

૯૮.૨૦/૧તત્ર સપ્ત શતાન્યાસંસ્તીર્થાનિ ગુણવન્તિ ચ ।
૯૮.૨૦/૨તેષુ સ્નાનં ચ દાનં ચ યઃ કરોતિ જિતાત્મવાન્ ॥ ૯૮.૨૦॥

૯૮.૨૧/૦અશ્વમેધફલં સાગ્રં પ્રાપ્નોત્યવિકલં શુભમ્ ।
૯૮.૨૨/૦દેવતીર્થં ચ તત્રૈવ આગ્નેયં જાતવેદસમ્ ॥ ૨૧.૨॥

૯૮.૨૨/૧અગ્નિપ્રતિષ્ઠિતં લિઙ્ગં તત્રાસ્તેઽનેકવર્ણવત્ ।
૯૮.૨૨/૨તદ્દેવદર્શનાદ્ એવ સર્વક્રતુફલં લભેત્ ॥ ૯૮.૨૨॥

૯૯.૧/૧બ્રહ્મોવાચ । ઋણપ્રમોચનં નામ તીર્થં વેદવિદો વિદુઃ ।
૯૯.૧/૨તસ્ય સ્વરૂપં વક્ષ્યામિ શ ृણુ નારદ તન્મનાઃ ॥ ૯૯.૧॥

૯૯.૨/૧આસીત્ પૃથુશ્રવા નામ પ્રિયઃ કક્ષીવતઃ સુતઃ ।
૯૯.૨/૨ન દારસંગ્રહં લેભે વૈરાગ્યાન્ નાગ્નિપૂજનમ્ ॥ ૯૯.૨॥

૯૯.૩/૧કનીયાંસ્તુ સમર્થોઽપિ પરિવિત્તિભયાન્ મુને ।
૯૯.૩/૨નાકરોદ્ દારકર્માદિ નૈવાગ્નીનામુપાસનમ્ ॥ ૯૯.૩॥

૯૯.૪/૧તતઃ પ્રોચુઃ પિતૃગણાઃ પુત્રં કક્ષીવતઃ શુભમ્ ।
૯૯.૪/૨જ્યેષ્ઠં ચૈવ કનિષ્ઠં ચ પૃથક્ પૃથગ્ ઇદં વચઃ ॥ ૯૯.૪॥

૯૯.૫/૧પિતર ઊચુઃ । ઋણત્રયાપનોદાય ક્રિયતાં દારસંગ્રહઃ ॥ ૯૯.૫॥

૯૯.૬/૧બ્રહ્મોવાચ । નેત્યુવાચ તતો જ્યેષ્ઠઃ કિમ્ ઋણં કેન યુજ્યતે ।
૯૯.૬/૨કનીયાંસ્તુ પિતૄન્ પ્રાહ ન યોગ્યો દારસંગ્રહઃ ॥ ૯૯.૬॥

૯૯.૭/૧જ્યેષ્ઠે સતિ મહાપ્રાજ્ઞઃ પરિવિત્તિભયાદ્ ઇતિ ।
૯૯.૭/૨તાવુભૌ પુનરપ્યેવમૂચુસ્તે વૈ પિતામહાઃ ॥ ૯૯.૭॥

૯૯.૮/૧પિતર ઊચુઃ । યાતામુભૌ ગૌતમીં તુ પુણ્યાં કક્ષીવતઃ સુતૌ ।
૯૯.૮/૨કુરુતાં ગૌતમીસ્નાનં સર્વાભીષ્ટપ્રદાયકમ્ ॥ ૯૯.૮॥

૯૯.૯/૧ગચ્છતાં ગૌતમીં ગઙ્ગાં લોકત્રિતયપાવનીમ્ ।
૯૯.૯/૨સ્નાનં ચ તર્પણં તસ્યાં કુરુતાં શ્રદ્ધયાન્વિતૌ ॥ ૯૯.૯॥

૯૯.૧૦/૧દૃષ્ટાવનામિતા ધ્યાતા ગૌતમી સર્વકામદા ।
૯૯.૧૦/૨ન દેશકાલજાત્યાદિ+ ़ઇયમોઽત્રાવગાહને ।

૯૯.૧૦/૩જ્યેષ્ઠોઽનૃણસ્તતો ભૂયાત્ પરિવિત્તિર્ન ચેતરઃ ॥ ૯૯.૧૦॥

૯૯.૧૧/૧બ્રહ્મોવાચ । તતઃ પૃથુશ્રવા જ્યેષ્ઠઃ કૃત્વા સ્નાનં સતર્પણમ્ ।
૯૯.૧૧/૨ત્રયાણામપિ લોકાનાં કાક્ષીવતોઽનૃણોઽભવત્ ॥ ૯૯.૧૧॥

૯૯.૧૨/૧તતઃ પ્રભૃતિ તત્ તીર્થમ્ ઋણમોચનમુચ્યતે ।
૯૯.૧૨/૨શ્રૌતસ્માર્તર્ણેભ્યશ્ચ ઇતરેભ્યશ્ચ નારદ ।
૯૯.૧૨/૩તત્ર સ્નાનેન દાનેન ઋણી મુક્તઃ સુખી ભવેત્ ॥ ૯૯.૧૨॥

૧૦૦.૧/૧બ્રહ્મોવાચ । સુપર્ણાસંગમં નામ કાદ્રવાસંગમં તથા ।
૧૦૦.૧/૨મહેશ્વરો યત્ર દેવો ગઙ્ગાપુલિનમાશ્રિતઃ ॥ ૧૦૦.૧॥

૧૦૦.૨/૧અગ્નિકુણ્ડં ચ તત્રૈવ રૌદ્રં વૈષ્ણવમેવ ચ ।
૧૦૦.૨/૨સૌરં સૌમ્યં તથા બ્રાહ્મં કૌમારં વારુણં તથા ॥ ૧૦૦.૨॥

૧૦૦.૩/૧અપ્સરા ચ નદી યત્ર સંગતા ગઙ્ગયા તથા ।
૧૦૦.૩/૨તત્તીર્થસ્મરણાદ્ એવ કૃતકૃત્યો ભવેન્ નરઃ ॥ ૧૦૦.૩॥

૧૦૦.૪/૧સર્વપાપપ્રશમનં શ‍ૃણુ યત્નેન નારદ ।
૧૦૦.૪/૨ઇન્દ્રેણ હિંસિતાઃ પૂર્વં વાલખિલ્યા મહર્ષયઃ ।
૧૦૦.૪/૩દત્તાર્ધતપસઃ સર્વે પ્રોચુસ્તે કાશ્યપં મુનિમ્ ॥ ૧૦૦.૪॥

૧૦૦.૫/૧વાલખિલ્યા ઊચુઃ । પુત્રમુત્પાદયાનેન ઇન્દ્રદર્પહરં શુભમ્ ।
૧૦૦.૫/૨તપસોઽર્ધં તુ દાસ્યામસ્તથેત્યાહ મુનિસ્તુ તાન્ ॥ ૧૦૦.૫॥

૧૦૦.૬/૧સુપર્ણાયાં તતો ગર્ભમાદધે સ પ્રજાપતિઃ ।
૧૦૦.૬/૨કદ્રૂવાં ચૈવ શનૈર્બ્રહ્મન્ સર્પાણાં સર્પમાતરિ ॥ ૧૦૦.૬॥

૧૦૦.૭/૧તે ગર્ભિણ્યાવુભે આહ ગન્તુકામઃ પ્રજાપતિઃ ।
૧૦૦.૭/૨અપરાધો ન ચ ક્વાપિ કાર્યો ગમનમેવ ચ ॥ ૧૦૦.૭॥

૧૦૦.૮/૧અન્યત્ર ગમનાચ્છાપો ભવિષ્યતિ ન સંશયઃ ॥ ૧૦૦.૮॥

૧૦૦.૯/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા સ યયૌ પત્ન્યૌ ગતે ભર્તરિ તે ઉભે ।
૧૦૦.૯/૨તદૈવ જગ્મતુઃ સત્રમ્ ઋષીણાં ભાવિતાત્મનામ્ ॥ ૧૦૦.૯॥

૧૦૦.૧૦/૧બ્રહ્મવૃન્દસમાકીર્ણં ગઙ્ગાતીરસમાશ્રિતમ્ ।
૧૦૦.૧૦/૨ઉન્મત્તે તે ઉભે નિત્યં વયઃસમ્પત્તિગર્વિતે ॥ ૧૦૦.૧૦॥

૧૦૦.૧૧/૧નિવાર્યમાણે બહુશો મુનિભિસ્તત્ત્વદર્શિભિઃ ।
૧૦૦.૧૧/૨વિકુર્વત્યૌ તત્ર સત્રે સમાનિ ચ હવીંષિ ચ ॥ ૧૦૦.૧૧॥

૧૦૦.૧૨/૧યોષિતાં દુર્વિલસિતં કઃ સંવરિતુમીશ્વરઃ ।
૧૦૦.૧૨/૨તે દૃષ્ટ્વા ચુક્ષુભુર્વિપ્રા અપમાર્ગરતે ઉભે ॥ ૧૦૦.૧૨॥

૧૦૦.૧૩/૧અપમાર્ગસ્થિતે યસ્માદ્ આપગે હિ ભવિષ્યથઃ ।
૧૦૦.૧૩/૨સુપર્ણા ચૈવ કદ્રૂશ્ચ નદ્યૌ તે સમ્બભૂવતુઃ ॥ ૧૦૦.૧૩॥

૧૦૦.૧૪/૧સ કદાચિદ્ ગૃહં પ્રાયાત્ કશ્યપોઽથ પ્રજાપતિઃ ।
૧૦૦.૧૪/૨ઋષિભ્યસ્તત્ર વૃત્તાન્તં શાપં તાભ્યાં સવિસ્તરમ્ ॥ ૧૦૦.૧૪॥

૧૦૦.૧૫/૧શ્રુત્વા તુ વિસ્મયાવિષ્ટઃ કિં કરોમીત્યચિન્તયત્ ।
૧૦૦.૧૫/૨ઋષિભ્યઃ કથયામાસ વાલખિલ્યા ઇતિ શ્રુતાઃ ॥ ૧૦૦.૧૫॥

૧૦૦.૧૬/૧ત ઊચુઃ કશ્યપં વિપ્રં ગત્વા ગઙ્ગાં તુ ગૌતમીમ્ ।
૧૦૦.૧૬/૨તત્ર સ્તુહિ મહેશાનં પુનર્ભાર્યે ભવિષ્યતઃ ॥ ૧૦૦.૧૬॥

૧૦૦.૧૭/૧બ્રહ્મહત્યાભયાદ્ એવ યત્ર દેવો મહેશ્વરઃ ।
૧૦૦.૧૭/૨ગઙ્ગામધ્યે સદા હ્યાસ્તે મધ્યમેશ્વરસંજ્ઞયા ॥ ૧૦૦.૧૭॥

૧૦૦.૧૮/૧તથેત્યુક્ત્વા કશ્યપોઽપિ સ્નાત્વા ગઙ્ગાં જિતવ્રતઃ ।
૧૦૦.૧૮/૨તુષ્ટાવ સ્તવનૈઃ પુણ્યૈર્દેવદેવં મહેશ્વરમ્ ॥ ૧૦૦.૧૮॥

૧૦૦.૧૯/૧કશ્યપ ઉવાચ । લોકત્રયૈકાધિપતેર્ન યસ્ય ।
૧૦૦.૧૯/૨કુત્રાપિ વસ્તુન્યભિમાનલેશઃ ।
૧૦૦.૧૯/૩સ સિદ્ધનાથોઽખિલવિશ્વકર્તા ।
૧૦૦.૧૯/૪ભર્તા શિવાયા ભવતુ પ્રસન્નઃ ॥ ૧૦૦.૧૯॥

૧૦૦.૨૦/૧તાપત્રયોષ્ણદ્યુતિતાપિતાનામ્ ।
૧૦૦.૨૦/૨ઇતસ્તતો વૈ પરિધાવતાં ચ ।
૧૦૦.૨૦/૩શરીરિણાં સ્થાવરજઙ્ગમાનામ્ ।
૧૦૦.૨૦/૪ત્વમેવ દુઃખવ્યપનોદદક્ષઃ ॥ ૧૦૦.૨૦॥

૧૦૦.૨૧/૧સત્ત્વાદિયોગસ્ત્રિવિધોઽપિ યસ્ય ।
૧૦૦.૨૧/૨શક્રાદિભિર્વક્તુમશક્ય એવ ।
૧૦૦.૨૧/૩વિચિત્રવૃત્તિં પરિચિન્ત્ય સોમમ્ ।
૧૦૦.૨૧/૪સુખી સદા દાનપરો વરેણ્યઃ ॥ ૧૦૦.૨૧॥

૧૦૦.૨૨/૧બ્રહ્મોવાચ । ઇત્યાદિસ્તુતિભિર્દેવઃ સ્તુતો ગૌરીપતિઃ શિવઃ ।
૧૦૦.૨૨/૨પ્રસન્નો હ્યદદાચ્છમ્ભુઃ કશ્યપાય વરાન્ બહૂન્ ॥ ૧૦૦.૨૨॥

૧૦૦.૨૩/૧ભાર્યાર્થિનં તુ તં પ્રાહ સ્યાતાં ભાર્યે ઉભે તુ તે ।
૧૦૦.૨૩/૨નદીસ્વરૂપે પત્ન્યૌ યે ગઙ્ગાં પ્રાપ્ય સરિદ્વરામ્ ॥ ૧૦૦.૨૩॥

૧૦૦.૨૪/૧તત્સંગમનમાત્રેણ તાભ્યાં ભૂયાત્ સ્વકં વપુઃ ।
૧૦૦.૨૪/૨તે ગર્ભિણ્યૌ પુનર્જાતે ગઙ્ગાયાશ્ચ પ્રસાદતઃ ॥ ૧૦૦.૨૪॥

૧૦૦.૨૫/૧તતઃ પ્રજાપતિઃ પ્રીતો ભાર્યે પ્રાપ્ય મહામનાઃ ।
૧૦૦.૨૫/૨આહ્વયામાસ તાન્ વિપ્રાન્ ગૌતમીતીરમાશ્રિતાન્ ॥ ૧૦૦.૨૫॥

૧૦૦.૨૬/૧સીમન્તોન્નયનં ચક્રે તાભ્યાં પ્રીતઃ પ્રજાપતિઃ ।
૧૦૦.૨૬/૨બ્રાહ્મણાન્ પૂજયામાસ વિધિદૃષ્ટેન કર્મણા ॥ ૧૦૦.૨૬॥

૧૦૦.૨૭/૧ભુક્તવત્સ્વથ વિપ્રેષુ કશ્યપસ્યાથ મન્દિરે ।
૧૦૦.૨૭/૨ભર્તૃસમીપોપવિષ્ટા કદ્રૂર્વિપ્રાન્ નિરીક્ષ્ય ચ ॥ ૧૦૦.૨૭॥

૧૦૦.૨૮/૧તતઃ કદ્રૂરૃષીન્ અક્ષ્ણા પ્રાહસત્ તે ચ ચુક્ષુભુઃ ।
૧૦૦.૨૮/૨યેનાક્ષ્ણા હસિતા પાપે ભજ્યતાં તેઽક્ષિ પાપવત્ ॥ ૧૦૦.૨૮॥

૧૦૦.૨૯/૧કાણાભવત્ તતઃ કદ્રૂઃ સર્પમાતેતિ યોચ્યતે ।
૧૦૦.૨૯/૨તતઃ પ્રસાદયામાસ કશ્યપો ભગવાન્ ઋષીન્ ॥ ૧૦૦.૨૯॥

૧૦૦.૩૦/૧તતઃ પ્રસન્નાસ્તે પ્રોચુર્ગૌતમી સરિતાં વરા ।
૧૦૦.૩૦/૨અપરાધસહસ્રેભ્યો રક્ષિષ્યતિ ચ સેવનાત્ ॥ ૧૦૦.૩૦॥

૧૦૦.૩૧/૧ભાર્યાન્વિતસ્તથા ચક્રે કશ્યપો મુનિસત્તમઃ ।
૧૦૦.૩૧/૨તતઃ પ્રભૃતિ તત્ તીર્થમુભયોઃ સંગમં વિદુઃ ।
૧૦૦.૩૧/૩સર્વપાપપ્રશમનં સર્વક્રતુફલપ્રદમ્ ॥ ૧૦૦.૩૧॥

૧૦૧.૧/૧બ્રહ્મોવાચ । પુરૂરવસમાખ્યાતં તીર્થં વેદવિદો વિદુઃ ।
૧૦૧.૧/૨સ્મરણાદ્ એવ પાપાનાં નાશનં કિં તુ દર્શનાત્ ॥ ૧૦૧.૧॥

૧૦૧.૨/૧પુરૂરવા બ્રહ્મસદઃ પ્રાપ્ય તત્ર સરસ્વતીમ્ ।
૧૦૧.૨/૨યદૃચ્છયા દેવનદીં હસન્તીં બ્રહ્મણોઽન્તિકે ।
૧૦૧.૨/૩તાં દૃષ્ટ્વા રૂપસમ્પન્નામુર્વશીં પ્રાહ ભૂપતિઃ ॥ ૧૦૧.૨॥

૧૦૧.૩/૧રાજોવાચ । કેયં રૂપવતી સાધ્વી સ્થિતેયં બ્રહ્મણોઽન્તિકે ।
૧૦૧.૩/૨સર્વાસામુત્તમા યોષિદ્ દીપયન્તી સભામિમામ્ ॥ ૧૦૧.૩॥

૧૦૧.૪/૧બ્રહ્મોવાચ । ઉર્વશી પ્રાહ રાજાનમિયં દેવનદી શુભા ।

૧૦૧.૪/૨સરસ્વતી બ્રહ્મસુતા નિત્યમેતિ ચ યાતિ ચ ।
૧૦૧.૪/૩તચ્છ્રુત્વા વિસ્મિતો રાજા આનયેમાં મમાન્તિકમ્ ॥ ૧૦૧.૪॥

૧૦૧.૫/૧બ્રહ્મોવાચ । ઉર્વશી પુનરપ્યાહ રાજાનં ભૂરિદક્ષિણમ્ ॥ ૧૦૧.૫॥

૧૦૧.૬/૧ઉર્વશ્યુવાચ । આનીયતે મહારાજ તસ્યાઃ સર્વં નિવેદ્ય ચ ॥ ૧૦૧.૬॥

૧૦૧.૭/૧બ્રહ્મોવાચ । તતસ્તાં પ્રાહિણોત્ તત્ર રાજા પ્રીત્યા તદોર્વશીમ્ ।
૧૦૧.૭/૨સા ગત્વા રાજવચનં ન્યવેદયદ્ અથોર્વશી ॥ ૧૦૧.૭॥

૧૦૧.૮/૧સરસ્વત્યપિ તન્ મેને ઉર્વશ્યા યન્ નિવેદિતમ્ ।
૧૦૧.૮/૨સા તથેતિ પ્રતિજ્ઞાય પ્રાયાદ્ યત્ર પુરૂરવાઃ ॥ ૧૦૧.૮॥

૧૦૧.૯/૧સરસ્વત્યાસ્તતસ્તીરે સ રેમે બહુલાઃ સમાઃ ।
૧૦૧.૯/૨સરસ્વાન્ અભવત્ પુત્રો યસ્ય પુત્રો બૃહદ્રથઃ ॥ ૧૦૧.૯॥

૧૦૧.૧૦/૧તાં ગચ્છન્તીં નૃપગૃહં નિત્યમેવ સરસ્વતીમ્ ।
૧૦૧.૧૦/૨સરસ્વન્તં તતો લક્ષ્મ જ્ઞાત્વાન્યેષુ તથા કૃતમ્ ॥ ૧૦૧.૧૦॥

૧૦૧.૧૧/૧તસ્યૈ દદાવહં શાપં ભૂયા ઇતિ મહાનદી ।
૧૦૧.૧૧/૨મચ્છાપભીતા વાગીશા પ્રાગાદ્ દેવીં ચ ગૌતમીમ્ ॥ ૧૦૧.૧૧॥

૧૦૧.૧૨/૧કમણ્ડલુભવાં પૂતાં માતરં લોકપાવનીમ્ ।
૧૦૧.૧૨/૨તાપત્રયોપશમનીમૈહિકામુષ્મિકપ્રદામ્ ॥ ૧૦૧.૧૨॥

૧૦૧.૧૩/૧સા ગત્વા ગૌતમીં દેવીં પ્રાહ મચ્છાપમાદિતઃ ।
૧૦૧.૧૩/૨ગઙ્ગાપિ મામુવાચેદં વિશાપાં કર્તુમર્હસિ ॥ ૧૦૧.૧૩॥

૧૦૧.૧૪/૧ન યુક્તં યત્ સરસ્વત્યાઃ શાપં ત્વં દત્તવાન્ અસિ ।
૧૦૧.૧૪/૨સ્ત્રીણામેષ સ્વભાવો વૈ પુંસ્કામા યોષિતો યતઃ ॥ ૧૦૧.૧૪॥

૧૦૧.૧૫/૧સ્વભાવચપલા બ્રહ્મન્ યોષિતઃ સકલા અપિ ।
૧૦૧.૧૫/૨ત્વં કથં તુ ન જાનીષે જગત્સ્રષ્ટામ્બુજાસન ॥ ૧૦૧.૧૫॥

૧૦૧.૧૬/૧વિડમ્બયતિ કં વા ન કામો વાપિ સ્વભાવતઃ ।
૧૦૧.૧૬/૨તતો વિશાપમવદં દૃશ્યાપિ સ્યાત્ સરસ્વતી ॥ ૧૦૧.૧૬॥

૧૦૧.૧૭/૧તસ્માચ્છાપાન્ નદી મર્ત્યે દૃશ્યાદૃશ્યા સરસ્વતી ।
૧૦૧.૧૭/૨યત્રૈષા સંગતા દેવી ગઙ્ગાયાં શાપવિહ્વલા ॥ ૧૦૧.૧૭॥

૧૦૧.૧૮/૧તત્ર પ્રાયાન્ નૃપવરો ધાર્મિકઃ સ પુરૂરવાઃ ।

૧૦૧.૧૮/૨તપસ્તપ્ત્વા સમારાધ્ય દેવં સિદ્ધેશ્વરં હરમ્ ॥ ૧૦૧.૧૮॥

૧૦૧.૧૯/૧સર્વાન્ કામાન્ અથાવાપ ગઙ્ગાયાશ્ચ પ્રસાદતઃ ।
૧૦૧.૧૯/૨તતઃ પ્રભૃતિ તત્ તીર્થં પુરૂરવસમુચ્યતે ॥ ૧૦૧.૧૯॥

૧૦૧.૨૦/૧સરસ્વતીસંગમં ચ બ્રહ્મતીર્થં તદ્ ઉચ્યતે ।
૧૦૧.૨૦/૨સિદ્ધેશ્વરો યત્ર દેવઃ સર્વકામપ્રદં તુ તત્ ॥ ૧૦૧.૨૦॥

૧૦૨.૧/૧બ્રહ્મોવાચ । સાવિત્રી ચૈવ ગાયત્રી શ્રદ્ધા મેધા સરસ્વતી ।
૧૦૨.૧/૨એતાનિ પઞ્ચ તીર્થાનિ પુણ્યાનિ મુનયો વિદુઃ ॥ ૧૦૨.૧॥

૧૦૨.૨/૧તત્ર સ્નાત્વા તુ પીત્વા તુ મુચ્યતે સર્વકલ્મષાત્ ।
૧૦૨.૨/૨સાવિત્રી ચૈવ ગાયત્રી શ્રદ્ધા મેધા સરસ્વતી ॥ ૧૦૨.૨॥

૧૦૨.૩/૧એતા મમ સુતા જ્યેષ્ઠા ધર્મસંસ્થાનહેતવઃ ।
૧૦૨.૩/૨સર્વાસામુત્તમાં કાંચિન્ નિર્મમે લોકસુન્દરીમ્ ॥ ૧૦૨.૩॥

૧૦૨.૪/૧તાં દૃષ્ટ્વા વિકૃતા બુદ્ધિર્મમાસીન્ મુનિસત્તમ ।
૧૦૨.૪/૨ગૃહ્યમાણા મયા બાલા સા માં દૃષ્ટ્વા પલાયિતા ॥ ૧૦૨.૪॥

૧૦૨.૫/૧મૃગીભૂતા તુ સા બાલા મૃગોઽહમભવં તદા ।
૧૦૨.૫/૨મૃગવ્યાધોઽભવચ્છમ્ભુર્ધર્મસંરક્ષણાય ચ ॥ ૧૦૨.૫॥

૧૦૨.૬/૧તા મદ્ભીતાઃ પઞ્ચ સુતા ગઙ્ગામીયુર્મહાનદીમ્ ।
૧૦૨.૬/૨તતો મહેશ્વરઃ પ્રાયાદ્ ધર્મસંરક્ષણાય સઃ ॥ ૧૦૨.૬॥

૧૦૨.૭/૧ધનુર્ગૃહીત્વા સશરમીશોઽપિ મૃગરૂપિણમ્ ।
૧૦૨.૭/૨મામુવાચ વધિષ્યે ત્વાં મૃગવ્યાધસ્તદા હરઃ ॥ ૧૦૨.૭॥

૧૦૨.૮/૧તત્કર્મણો નિવૃત્તોઽહં પ્રાદાં કન્યાં વિવસ્વતે ।
૧૦૨.૮/૨સાવિત્ર્યાદ્યાઃ પઞ્ચ સુતા નદીરૂપેણ સંગતાઃ ॥ ૧૦૨.૮॥

૧૦૨.૯/૧તા આગતાઃ પુનશ્ચાપિ સ્વર્ગં લોકં મમાન્તિકમ્ ।
૧૦૨.૯/૨યત્ર તાઃ સંગતા દેવ્યા પઞ્ચ તીર્થાનિ નારદ ॥ ૧૦૨.૯॥

૧૦૨.૧૦/૧સંગતાનિ ચ પુણ્યાનિ પઞ્ચ નદ્યઃ સરસ્વતી ।
૧૦૨.૧૦/૨તેષુ સ્નાનં તથા દાનં યત્ કિંચિત્ કુરુતે નરઃ ॥ ૧૦૨.૧૦॥

૧૦૨.૧૧/૧સર્વકામપ્રદં તત્ સ્યાન્ નૈષ્કર્મ્યાન્ મુક્તિદં સ્મૃતમ્ ।
૧૦૨.૧૧/૨તત્રાભવન્ મૃગવ્યાધં તીર્થં સર્વાર્થદં નૃણામ્ ।
૧૦૨.૧૧/૩સ્વર્ગમોક્ષફલં ચાન્યદ્ બ્રહ્મતીર્થફલં સ્મૃતમ્ ॥ ૧૦૨.૧૧॥

૧૦૩.૧/૧બ્રહ્મોવાચ । શમીતીર્થમિતિ ખ્યાતં સર્વપાપોપશાન્તિદમ્ ।
૧૦૩.૧/૨તસ્યાખ્યાનં પ્રવક્ષ્યામિ શ્ૃણુ યત્નેન નારદ ॥ ૧૦૩.૧॥

૧૦૩.૨/૧આસીત્ પ્રિયવ્રતો નામ ક્ષત્રિયો જયતાં વરઃ ।
૧૦૩.૨/૨ગૌતમ્યા દક્ષિણે તીરે દીક્ષાં ચક્રે પુરોધસા ॥ ૧૦૩.૨॥

૧૦૩.૩/૧હયમેધ ઉપક્રાન્તે ઋત્વિગ્ભિરૃષિભિર્વૃતે ।
૧૦૩.૩/૨તસ્ય રાજ્ઞો મહાબાહોર્વસિષ્ઠસ્તુ પુરોહિતઃ ॥ ૧૦૩.૩॥

૧૦૩.૪/૧તદ્યજ્ઞવાટમગમદ્ દાનવોઽથ હિરણ્યકઃ ।
૧૦૩.૪/૨તં દાનવમભિપ્રેક્ષ્ય દેવાસ્ત્વિન્દ્રપુરોગમાઃ ॥ ૧૦૩.૪॥

૧૦૩.૫/૧ભીતાઃ કેચિદ્ દિવં જગ્મુર્હવ્યવાટ્ શમિમાવિશત્ ।
૧૦૩.૫/૨અશ્વત્થં વિષ્ણુરગમદ્ ભાનુરર્કં વટં શિવઃ ॥ ૧૦૩.૫॥

૧૦૩.૬/૧સોમઃ પલાશમગમદ્ ગઙ્ગામ્ભો હવ્યવાહનઃ ।
૧૦૩.૬/૨અશ્વિનૌ તુ હયં ગૃહ્ય વાયસોઽભૂદ્ યમઃ સ્વયમ્ ॥ ૧૦૩.૬॥

૧૦૩.૭/૧એતસ્મિન્ન્ અન્તરે તત્ર વસિષ્ઠો ભગવાન્ ઋષિઃ ।
૧૦૩.૭/૨યષ્ટિમાદાય દૈતેયાન્ ન્યવારયદ્ અથાજ્ઞયા ॥ ૧૦૩.૭॥

૧૦૩.૮/૧તતઃ પ્રવૃત્તઃ પુનરેવ યજ્ઞો ।
૧૦૩.૮/૨દૈત્યો ગતઃ સ્વેન બલેન યુક્તઃ ।
૧૦૩.૮/૩ઇમાનિ તીર્થાનિ તતઃ શુભાનિ ।
૧૦૩.૮/૪દશાશ્વમેધસ્ય ફલાનિ દદ્યુઃ ॥ ૧૦૩.૮॥

૧૦૩.૯/૧પ્રથમં તુ શમીતીર્થં દ્વિતીયં વૈષ્ણવં વિદુઃ ।
૧૦૩.૯/૨આર્કં શૈવં ચ સૌમ્યં ચ વાસિષ્ઠં સર્વકામદમ્ ॥ ૧૦૩.૯॥

૧૦૩.૧૦/૧દેવાશ્ચ ઋષયઃ સર્વે નિવૃત્તે મખવિસ્તરે ।
૧૦૩.૧૦/૨તુષ્ટાઃ પ્રોચુર્વસિષ્ઠં તં યજમાનં પ્રિયવ્રતમ્ ॥ ૧૦૩.૧૦॥

૧૦૩.૧૧/૧તાંશ્ચ વૃક્ષાંસ્તાં ચ ગઙ્ગાં મુદા યુક્તાઃ પુનઃ પુનઃ ।
૧૦૩.૧૧/૨હયમેધસ્ય નિષ્પત્ત્યૈ એતે યાતા ઇતસ્તતઃ ॥ ૧૦૩.૧૧॥

૧૦૩.૧૨/૧હયમેધફલં દદ્યુસ્તીર્થાનીત્યવદન્ સુરાઃ ।
૧૦૩.૧૨/૨તસ્માત્ સ્નાનેન દાનેન તેષુ તીર્થેષુ નારદ ।
૧૦૩.૧૨/૩હયમેધફલં પુણ્યં પ્રાપ્નોતિ ન મૃષા વચઃ ॥ ૧૦૩.૧૨॥

૧૦૪.૧/૧બ્રહ્મોવાચ । વિશ્વામિત્રં હરિશ્ચન્દ્રં શુનઃશેપં ચ રોહિતમ્ ।
૧૦૪.૧/૨વારુણં બ્રાહ્મમાગ્નેયમૈન્દ્રમૈન્દવમૈશ્વરમ્ ॥ ૧૦૪.૧॥

૧૦૪.૨/૧મૈત્રં ચ વૈષ્ણવં ચૈવ યામ્યમાશ્વિનમૌશનમ્ ।
૧૦૪.૨/૨એતેષાં પુણ્યતીર્થાનાં નામધેયં શ‍ૃણુષ્વ મે ॥ ૧૦૪.૨॥

૧૦૪.૩/૧હરિશ્ચન્દ્ર ઇતિ ત્વાસીદ્ ઇક્ષ્વાકુપ્રભવો નૃપઃ ।
૧૦૪.૩/૨તસ્ય ગૃહે મુની પ્રાપ્તૌ નારદઃ પર્વતસ્તથા ।
૧૦૪.૩/૩કૃત્વાતિથ્યં તયોઃ સમ્યગ્ *ઘરિશ્ચન્દ્રોઽબ્રવીદ્ ઋષી ॥ ૧૦૪.૩॥

૧૦૪.૪/૧હરિશ્ચન્દ્ર ઉવાચ । પુત્રાર્થં ક્લિશ્યતે લોકઃ કિં
પુત્રેણ ભવિષ્યતિ ।
૧૦૪.૪/૨જ્ઞાની વાપ્યથવાજ્ઞાની ઉત્તમો મધ્યમોઽથવા ।
૧૦૪.૪/૩એતં મે સંશયં નિત્યં બ્રૂતામ્ ઋષિવરાવુભૌ ॥ ૧૦૪.૪॥

૧૦૪.૫/૧બ્રહ્મોવાચ । તાવૂચતુર્હરિશ્ચન્દ્રં પર્વતો નારદસ્તથા ॥ ૧૦૪.૫॥

૧૦૪.૬/૧નારદપર્વતાવૂચતુઃ । એકધા દશધા રાજઞ્ શતધા ચ સહસ્રધા ।
૧૦૪.૬/૨ઉત્તરં વિદ્યતે સમ્યક્ તથાપ્યેતદ્ ઉદીર્યતે ॥ ૧૦૪.૬॥

૧૦૪.૭/૧નાપુત્રસ્ય પરો લોકો વિદ્યતે નૃપસત્તમ ।
૧૦૪.૭/૨જાતે પુત્રે પિતા સ્નાનં યઃ કરોતિ જનાધિપ ॥ ૧૦૪.૭॥

૧૦૪.૮/૧દશાનામશ્વમેધાનામભિષેકફલં લભેત્ ।
૧૦૪.૮/૨આત્મપ્રતિષ્ઠા પુત્રાત્ સ્યાજ્જાયતે ચામરોત્તમઃ ॥ ૧૦૪.૮॥

૧૦૪.૯/૧અમૃતેનામરા દેવાઃ પુત્રેણ બ્રાહ્મણાદયઃ ।
૧૦૪.૯/૨ત્રિઋણાન્ મોચયેત્ પુત્રઃ પિતરં ચ પિતામહાન્ ॥ ૧૦૪.૯॥

૧૦૪.૧૦/૧કિં તુ મૂલં કિમુ જલં કિં તુ શ્મશ્રૂણિ કિં તપઃ ।
૧૦૪.૧૦/૨વિના પુત્રેણ રાજેન્દ્ર સ્વર્ગો મુક્તિઃ સુતાત્ સ્મૃતાઃ ॥ ૧૦૪.૧૦॥

૧૦૪.૧૧/૧પુત્ર એવ પરો લોકો ધર્મઃ કામોઽર્થ એવ ચ ।
૧૦૪.૧૧/૨પુત્રો મુક્તિઃ પરં જ્યોતિસ્તારકઃ સર્વદેહિનામ્ ॥ ૧૦૪.૧૧॥

૧૦૪.૧૨/૧વિના પુત્રેણ રાજેન્દ્ર સ્વર્ગમોક્ષૌ સુદુર્લભૌ ।
૧૦૪.૧૨/૨પુત્ર એવ પરો લોકે ધર્મકામાર્થસિદ્ધયે ॥ ૧૦૪.૧૨॥

૧૦૪.૧૩/૧વિના પુત્રેણ યદ્ દત્તં વિના પુત્રેણ યદ્ ધુતમ્ ।
૧૦૪.૧૩/૨વિના પુત્રેણ યજ્જન્મ વ્યર્થં તદ્ અવભાતિ મે ॥ ૧૦૪.૧૩॥

૧૦૪.૧૪/૧તસ્માત્ પુત્રસમં કિંચિત્ કામ્યં નાસ્તિ જગત્ત્રયે ।
૧૦૪.૧૪/૨તચ્છ્રુત્વા વિસ્મયવાંસ્તાવુવાચ નૃપઃ પુનઃ ॥ ૧૦૪.૧૪॥

૧૦૪.૧૫/૧હરિશ્ચન્દ્ર ઉવાચ । કથં મે સ્યાત્ સુતો બ્રૂતાં યત્ર
ક્વાપિ યથાતથમ્ ।
૧૦૪.૧૫/૨યેન કેનાપ્યુપાયેન કૃત્વા કિંચિત્ તુ પૌરુષમ્ ।
૧૦૪.૧૫/૩મન્ત્રેણ યાગદાનાભ્યામુત્પાદ્યોઽસૌ સુતો મયા ॥ ૧૦૪.૧૫॥

૧૦૪.૧૬/૧બ્રહ્મોવાચ । તાવૂચતુર્નૃપશ્રેષ્ઠં હરિશ્ચન્દ્રં સુતાર્થિનમ્ ।
૧૦૪.૧૬/૨ધ્યાત્વા ક્ષણં તથા સમ્યગ્ ગૌતમીં યાહિ માનદ ॥ ૧૦૪.૧૬॥

૧૦૪.૧૭/૧તત્રાપામ્પતિરુત્કૃષ્ટં દદાતિ મનસીપ્સિતમ્ ।
૧૦૪.૧૭/૨વરુણઃ સર્વદાતા વૈ મુનિભિઃ પરિકીર્તિતઃ ॥ ૧૦૪.૧૭॥

૧૦૪.૧૮/૧સ તુ પ્રીતઃ શનૈઃ કાલે તવ પુત્રં પ્રદાસ્યતિ ।
૧૦૪.૧૮/૨એતચ્છ્રુત્વા નૃપશ્રેષ્ઠો મુનિવાક્યં તથાકરોત્ ॥ ૧૦૪.૧૮॥

૧૦૪.૧૯/૧તોષયામાસ વરુણં ગૌતમીતીરમાશ્રિતઃ ।
૧૦૪.૧૯/૨તતશ્ચ તુષ્ટો વરુણો હરિશ્ચન્દ્રમુવાચ હ ॥ ૧૦૪.૧૯॥

૧૦૪.૨૦/૧વરુણ ઉવાચ । પુત્રં દાસ્યામિ તે રાજંલ્લોકત્રયવિભૂષણમ્ ।
૧૦૪.૨૦/૨યદિ યક્ષ્યસિ તેનૈવ તવ પુત્રો ભવેદ્ ધ્રુવમ્ ॥ ૧૦૪.૨૦॥

૧૦૪.૨૧/૧બ્રહ્મોવાચ । હરિશ્ચન્દ્રોઽપિ વરુણં યક્ષ્યે તેનેત્યવોચત ।
૧૦૪.૨૧/૨તતો ગત્વા હરિશ્ચન્દ્રશ્ચરું કૃત્વા તુ વારુણમ્ ॥ ૧૦૪.૨૧॥

૧૦૪.૨૨/૧ભાર્યાયૈ નૃપતિઃ પ્રાદાત્ તતો જાતઃ સુતો નૃપાત્ ।
૧૦૪.૨૨/૨જાતે પુત્રે અપામીશઃ પ્રોવાચ વદતાં વરઃ ॥ ૧૦૪.૨૨॥

૧૦૪.૨૩/૧વરુણ ઉવાચ । અદ્યૈવ પુત્રો યષ્ટવ્યઃ સ્મરસે વચનં
પુરા ॥ ૧૦૪.૨૩॥

૧૦૪.૨૪/૧બ્રહ્મોવાચ । હરિશ્ચન્દ્રોઽપિ વરુણં પ્રોવાચેદં
ક્રમાગતમ્ ॥ ૧૦૪.૨૪॥

૧૦૪.૨૫/૧હરિશ્ચન્દ્ર ઉવાચ । નિર્દશો મેધ્યતાં યાતિ
પશુર્યક્ષ્યે તતો હ્યહમ્ ॥ ૧૦૪.૨૫॥

૧૦૪.૨૬/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા વચનં રાજ્ઞો વરુણોઽગાત્ સ્વમાલયમ્ ।
૧૦૪.૨૬/૨નિર્દશે પુનરભ્યેત્ય યજસ્વેત્યાહ તં નૃપમ્ ॥ ૧૦૪.૨૬॥

૧૦૪.૨૭/૧રાજાપિ વરુણં પ્રાહ નિર્દન્તો નિષ્ફલઃ પશુઃ ।
૧૦૪.૨૭/૨પશોર્દન્તેષુ જાતેષુ એહિ ગચ્છાધુનાપ્પતે ॥ ૧૦૪.૨૭॥

૧૦૪.૨૮/૧તચ્છ્રુત્વા રાજવચનં પુનઃ પ્રાયાદ્ અપામ્પતિઃ ।
૧૦૪.૨૮/૨જાતેષુ ચૈવ દન્તેષુ સપ્તવર્ષેષુ નારદ ॥ ૧૦૪.૨૮॥

૧૦૪.૨૯/૧પુનરપ્યાહ રાજાનં યજસ્વેતિ તતોઽબ્રવીત્ ।
૧૦૪.૨૯/૨રાજાપિ વરુણં પ્રાહ પત્સ્યન્તીમે અપામ્પતે ॥ ૧૦૪.૨૯॥

૧૦૪.૩૦/૧સમ્પત્સ્યન્તિ તથા ચાન્યે તતો યક્ષ્યે વ્રજાધુના ।
૧૦૪.૩૦/૨પુનઃ પ્રાયાત્ સ વરુણઃ પુનર્દન્તેષુ નારદ ।
૧૦૪.૩૦/૩યજસ્વેતિ નૃપં પ્રાહ રાજા પ્રાહ ત્વપામ્પતિમ્ ॥ ૧૦૪.૩૦॥

૧૦૪.૩૧/૧રાજોવાચ । યદા તુ ક્ષત્રિયો યજ્ઞે પશુર્ભવતિ વારિપ ।
૧૦૪.૩૧/૨ધનુર્વેદં યદા વેત્તિ તદા સ્યાત્ પશુરુત્તમઃ ॥ ૧૦૪.૩૧॥

૧૦૪.૩૨/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા રાજવચનં વરુણોઽગાત્ સ્વમાલયમ્ ।
૧૦૪.૩૨/૨યદાસ્ત્રેષુ ચ શસ્ત્રેષુ સમર્થોઽભૂત્ સ રોહિતઃ ॥ ૧૦૪.૩૨॥

૧૦૪.૩૩/૧સર્વવેદેષુ શાસ્ત્રેષુ વેત્તાભૂત્ સ ત્વરિંદમઃ ।
૧૦૪.૩૩/૨યુવરાજ્યમનુપ્રાપ્તે રોહિતે ષોડશાબ્દિકે ॥ ૧૦૪.૩૩॥

૧૦૪.૩૪/૧પ્રીતિમાન્ અગમત્ તત્ર યત્ર રાજા સરોહિતઃ ।
૧૦૪.૩૪/૨આગત્ય વરુણઃ પ્રાહ યજસ્વાદ્ય સુતં સ્વકમ્ ॥ ૧૦૪.૩૪॥

૧૦૪.૩૫/૧ઓમિત્યુક્ત્વા નૃપવર ઋત્વિજઃ પ્રાહ ભૂપતિઃ ।
૧૦૪.૩૫/૨રોહિતં ચ સુતં જ્યેષ્ઠં શ઼ૃણ્વતો વરુણસ્ય ચ ॥ ૧૦૪.૩૫॥

૧૦૪.૩૬/૧હરિશ્ચન્દ્ર ઉવાચ । એહિ પુત્ર મહાવીર યક્ષ્યે ત્વાં
વરુણાય હિ ॥ ૧૦૪.૩૬॥

૧૦૪.૩૭/૧બ્રહ્મોવાચ । કિમેતદ્ ઇત્યથોવાચ રોહિતઃ પિતરં પ્રતિ ।
૧૦૪.૩૭/૨પિતાપિ તદ્ યથાવૃત્તમાચચક્ષે સવિસ્તરમ્ ।
૧૦૪.૩૭/૩રોહિતઃ પિતરં પ્રાહ શ઼ૃણ્વતો વરુણસ્ય ચ ॥ ૧૦૪.૩૭॥

૧૦૪.૩૮/૧રોહિત ઉવાચ । અહં પૂર્વં મહારાજ ઋત્વિગ્ભિઃ સપુરોહિતઃ ।
૧૦૪.૩૮/૨વિષ્ણવે લોકનાથાય યક્ષ્યેઽહં ત્વરિતં શુચિઃ ।
૧૦૪.૩૮/૩પશુના વરુણેનાથ તદ્ અનુજ્ઞાતુમર્હસિ ॥ ૧૦૪.૩૮॥

૧૦૪.૩૯/૧બ્રહ્મોવાચ । રોહિતસ્ય તુ તદ્ વાક્યં શ્રુત્વા વારીશ્વરસ્તદા ।

૧૦૪.૩૯/૨કોપેન મહતાવિષ્ટો જલોદરમથાકરોત્ ॥ ૧૦૪.૩૯॥

૧૦૪.૪૦/૧હરિશ્ચન્દ્રસ્ય નૃપતે રોહિતઃ સ વનં યયૌ ।
૧૦૪.૪૦/૨ગૃહીત્વા સ ધનુર્દિવ્યં રથારૂઢો ગતવ્યથઃ ॥ ૧૦૪.૪૦॥

૧૦૪.૪૧/૧યત્ર ચારાધ્ય વરુણં હરિશ્ચન્દ્રો જનેશ્વરઃ ।
૧૦૪.૪૧/૨ગઙ્ગાયાં પ્રાપ્તવાન્ પુત્રં તત્રાગાત્ સોઽપિ રોહિતઃ ॥ ૧૦૪.૪૧॥

૧૦૪.૪૨/૧વ્યતીતાન્યથ વર્ષાણિ પઞ્ચ ષષ્ઠે પ્રવર્તતિ ।
૧૦૪.૪૨/૨તત્ર સ્થિત્વા નૃપસુતઃ શુશ્રાવ નૃપતે રુજમ્ ॥ ૧૦૪.૪૨॥

૧૦૪.૪૩/૧મયા પુત્રેણ જાતેન પિતુર્વૈ ક્લેશકારિણા ।
૧૦૪.૪૩/૨કિં ફલં કિં નુ કૃત્યં સ્યાદ્ ઇત્યેવં પર્યચિન્તયત્ ॥ ૧૦૪.૪૩॥

૧૦૪.૪૪/૧તસ્યાસ્તીરે ઋષીન્ પુણ્યાન્ અપશ્યન્ નૃપતેઃ સુતઃ ।
૧૦૪.૪૪/૨ગઙ્ગાતીરે વર્તમાનમપશ્યદ્ ઋષિસત્તમમ્ ॥ ૧૦૪.૪૪॥

૧૦૪.૪૫/૧અજીગર્તમિતિ ખ્યાતમ્ ઋષેસ્તુ વયસઃ સુતમ્ ।
૧૦૪.૪૫/૨ત્રિભિઃ પુત્રૈરનુવૃતં ભાર્યયા ક્ષીણવૃત્તિકમ્ ।
૧૦૪.૪૫/૩તં દૃષ્ટ્વા નૃપતેઃ પુત્રો નમસ્યેદં વચોઽબ્રવીત્ ॥ ૧૦૪.૪૫॥

૧૦૪.૪૬/૧રોહિત ઉવાચ । ક્ષીણવૃત્તિઃ કૃશઃ કસ્માદ્ દુર્મના
ઇવ લક્ષ્યસે ॥ ૧૦૪.૪૬॥

૧૦૪.૪૭/૧બ્રહ્મોવાચ । અજીગર્તોઽપિ ચોવાચ રોહિતં નૃપતેઃ સુતમ્ ॥ ૧૦૪.૪૭॥

૧૦૪.૪૮/૧અજીગર્ત ઉવાચ । વર્તનં નાસ્તિ દેહસ્ય ભોક્તારો બહવશ્ચ મે ।
૧૦૪.૪૮/૨વિનાન્નેન મરિષ્યામો બ્રૂહિ કિં કરવામહે ॥ ૧૦૪.૪૮॥

૧૦૪.૪૯/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા પુનરપ્યાહ નૃપપુત્ર ઋષિં
તદા ॥ ૧૦૪.૪૯॥

૧૦૪.૫૦/૧રોહિત ઉવાચ । તવ કિં વર્તતે ચિત્તે તદ્ બ્રૂહિ વદતાં
વર ॥ ૧૦૪.૫૦॥

૧૦૪.૫૧/૧અજીગર્ત ઉવાચ । હિરણ્યં રજતં ગાવો ધાન્યં વસ્ત્રાદિકં ન મે ।
૧૦૪.૫૧/૨વિદ્યતે નૃપશાર્દૂલ વર્તનં નાસ્તિ મે તતઃ ॥ ૧૦૪.૫૧॥

૧૦૪.૫૨/૧સુતા મે સન્તિ ભાર્યા ચ અહં વૈ પઞ્ચમસ્તથા ।
૧૦૪.૫૨/૨નૈતેષાં કતમસ્યાપિ ક્રેતાન્નેન નૃપોત્તમ ॥ ૧૦૪.૫૨॥

૧૦૪.૫૩/૧રોહિત ઉવાચ । કિં ક્રીણાસિ મહાબુદ્ધેઽજીગર્ત સત્યમેવ મે ।
૧૦૪.૫૩/૨વદ નાન્યચ્ચ વક્તવ્યં વિપ્રા વૈ સત્યવાદિનઃ ॥ ૧૦૪.૫૩॥

૧૦૪.૫૪/૧અજીગર્ત ઉવાચ । ત્રયાણામપિ પુત્રાણામેકં વા માં તથૈવ ચ ।
૧૦૪.૫૪/૨ભાર્યાં વાપિ ગૃહાણેમાં ક્રીત્વા જીવામહે વયમ્ ॥ ૧૦૪.૫૪॥

૧૦૪.૫૫/૧રોહિત ઉવાચ । કિં ભાર્યયા મહાબુદ્ધે કિં ત્વયા વૃદ્ધરૂપિણા ।
૧૦૪.૫૫/૨યુવાનં દેહિ પુત્રં મે પુત્રાણાં યં ત્વમિચ્છસિ ॥ ૧૦૪.૫૫॥

૧૦૪.૫૬/૧અજીગર્ત ઉવાચ । જ્યેષ્ઠપુત્રં શુનઃપુચ્છં નાહં ક્રીણામિ રોહિત ।
૧૦૪.૫૬/૨માતા કનીયસં ચાપિ ન ક્રીણાતિ તતોઽનયોઃ ।
૧૦૪.૫૬/૩મધ્યમં તુ શુનઃશેપં ક્રીણામિ વદ તદ્ધનમ્ ॥ ૧૦૪.૫૬॥

૧૦૪.૫૭/૧રોહિત ઉવાચ । વરુણાય પશુઃ કલ્પ્યઃ પુરુષો ગુણવત્તરઃ ।
૧૦૪.૫૭/૨યદિ ક્રીણાસિ મૂલ્યં ત્વં વદ સત્યં મહામુને ॥ ૧૦૪.૫૭॥

૧૦૪.૫૮/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા ત્વજીગર્તઃ પુત્રમૂલ્યમકલ્પયત્ ।
૧૦૪.૫૮/૨ગવાં સહસ્રં ધાન્યાનાં નિષ્કાનાં ચાપિ વાસસામ્ ।
૧૦૪.૫૮/૩રાજપુત્ર વરં દેહિ દાસ્યામિ સ્વસુતં તવ ॥ ૧૦૪.૫૮॥

૧૦૪.૫૯/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા રોહિતોઽપિ પ્રાદાત્ સવસનં ધનમ્ ।
૧૦૪.૫૯/૨દત્ત્વા જગામ પિતરમ્ ઋષિપુત્રેણ રોહિતઃ ।
૧૦૪.૫૯/૩પિત્રે નિવેદયામાસ ક્રયક્રીતમ્ ઋષેઃ સુતમ્ ॥ ૧૦૪.૫૯॥

૧૦૪.૬૦/૧રોહિત ઉવાચ । વરુણાય યજસ્વ ત્વં પશુના ત્વમરુગ્ ભવ ॥ ૧૦૪.૬૦॥

૧૦૪.૬૧/૧બ્રહ્મોવાચ । તથોવાચ હરિશ્ચન્દ્રઃ પુત્રવાક્યાદ્ અનન્તરમ્ ॥ ૧૦૪.૬૧॥

૧૦૪.૬૨/૧હરિશ્ચન્દ્ર ઉવાચ । બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા રાજ્ઞા
પાલ્યા ઇતિ શ્રુતિઃ ।
૧૦૪.૬૨/૨વિશેષતસ્તુ વર્ણાનાં ગુરવો હિ દ્વિજોત્તમાઃ ॥ ૧૦૪.૬૨॥

૧૦૪.૬૩/૧વિષ્ણોરપિ હિ યે પૂજ્યા માદૃશાઃ કુત એવ હિ ।
૧૦૪.૬૩/૨અવજ્ઞયાપિ યેષાં સ્યાન્ નૃપાણાં સ્વકુલક્ષયઃ ॥ ૧૦૪.૬૩॥

૧૦૪.૬૪/૧તાન્ પશૂન્ કૃત્વા કૃપણં કથં રક્ષિતુમુત્સહે ।
૧૦૪.૬૪/૨અહં ચ બ્રાહ્મણં કુર્યાં પશું નૈતદ્ ધિ યુજ્યતે ॥ ૧૦૪.૬૪॥

૧૦૪.૬૫/૧વરં હિ જાતુ મરણં ન કથંચિદ્ દ્વિજં પશુમ્ ।
૧૦૪.૬૫/૨કરોમિ તસ્માત્ પુત્ર ત્વં બ્રાહ્મણેન સુખં વ્રજ ॥ ૧૦૪.૬૫॥

૧૦૪.૬૬/૧બ્રહ્મોવાચ । એતસ્મિન્ન્ અન્તરે તત્ર વાગ્ ઉવાચાશરીરિણી ॥ ૧૦૪.૬૬॥

૧૦૪.૬૭/૧આકાશવાગ્ ઉવાચ । ગૌતમીં ગચ્છ રાજેન્દ્ર ઋત્વિગ્ભિઃ સપુરોહિતઃ ।
૧૦૪.૬૭/૨પશુના વિપ્રપુત્રેણ રોહિતેન સુતેન ચ ॥ ૧૦૪.૬૭॥

૧૦૪.૬૮/૧ત્વયા કાર્યઃ ક્રતુશ્ચૈવ શુનઃશેપવધં વિના ।
૧૦૪.૬૮/૨ક્રતુઃ પૂર્ણો ભવેત્ તત્ર તસ્માદ્ યાહિ મહામતે ॥ ૧૦૪.૬૮॥

૧૦૪.૬૯/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા વચનં શીઘ્રં ગઙ્ગામગાન્ નૃપોત્તમઃ ।
૧૦૪.૬૯/૨વિશ્વામિત્રેણ ઋષિણા વસિષ્ઠેન પુરોધસા ॥ ૧૦૪.૬૯॥

૧૦૪.૭૦/૧વામદેવેન ઋષિણા તથાન્યૈર્મુનિભિઃ સહ ।
૧૦૪.૭૦/૨પ્રાપ્ય ગઙ્ગાં ગૌતમીં તાં નરમેધાય દીક્ષિતઃ ॥ ૧૦૪.૭૦॥

૧૦૪.૭૧/૧વેદિમણ્ડપકુણ્ડાદિ યૂપપશ્વાદિ ચાકરોત્ ।
૧૦૪.૭૧/૨કૃત્વા સર્વં યથાન્યાયં તસ્મિન્ યજ્ઞે પ્રવર્તિતે ॥ ૧૦૪.૭૧॥

૧૦૪.૭૨/૧શુનઃશેપં પશું યૂપે નિબધ્યાથ સમન્ત્રકમ્ ।
૧૦૪.૭૨/૨વારિભિઃ પ્રોક્ષિતં દૃષ્ટ્વા વિશ્વામિત્રોઽબ્રવીદ્ ઇદમ્ ॥ ૧૦૪.૭૨॥

૧૦૪.૭૩/૧વિશ્વામિત્ર ઉવાચ । દેવાન્ ઋષીન્ હરિશ્ચન્દ્રં રોહિતં
ચ વિશેષતઃ ।
૧૦૪.૭૩/૨અનુજાનન્ત્વિમં સર્વે શુનઃશેપં દ્વિજોત્તમમ્ ॥ ૧૦૪.૭૩॥

૧૦૪.૭૪/૧યેભ્યસ્ત્વયં હવિર્દેયો દેવેભ્યોઽયં પૃથક્ પૃથક્ ।
૧૦૪.૭૪/૨અનુજાનન્તુ તે સર્વે શુનઃશેપં વિશેષતઃ ॥ ૧૦૪.૭૪॥

૧૦૪.૭૫/૧વસાભિર્લોમભિસ્ત્વગ્ભિર્માંસૈઃ સન્મન્ત્રિતૈર્મખે ।
૧૦૪.૭૫/૨અગ્નૌ હોષ્યઃ પશુશ્ચાયં શુનઃશેપો દ્વિજોત્તમઃ ॥ ૧૦૪.૭૫॥

૧૦૪.૭૬/૧ઉપાસિતાઃ સ્યુર્વિપ્રેન્દ્રાસ્તે સર્વે ત્વનુમન્ય મામ્ ।
૧૦૪.૭૬/૨ગૌતમીં યાન્તુ વિપ્રેન્દ્રાઃ સ્નાત્વા દેવાન્ પૃથક્ પૃથક્ ॥ ૧૦૪.૭૬॥

૧૦૪.૭૭/૧મન્ત્રૈઃ સ્તોત્રૈઃ સ્તુવન્તસ્તે મુદં યાન્તુ શિવે રતાઃ ।
૧૦૪.૭૭/૨એનં રક્ષન્તુ મુનયો દેવાશ્ચ હવિષો ભુજઃ ॥ ૧૦૪.૭૭॥

૧૦૪.૭૮/૧બ્રહ્મોવાચ । તથેત્યૂચુશ્ચ મુનયો મેને ચ નૃપસત્તમઃ ।
૧૦૪.૭૮/૨તતો ગત્વા શુનઃશેપો ગઙ્ગાં ત્રૈલોક્યપાવનીમ્ ॥ ૧૦૪.૭૮॥

૧૦૪.૭૯/૧સ્નાત્વા તુષ્ટાવ તાન્ દેવાન્ યે તત્ર હવિષો ભુજઃ ।
૧૦૪.૭૯/૨તતસ્તુષ્ટાઃ સુરગણાઃ શુનઃશેપં ચ તે મુને ।

૧૦૪.૭૯/૩અવદન્ત સુરાઃ સર્વે વિશ્વામિત્રસ્ય શ઼ૃણ્વતઃ ॥ ૧૦૪.૭૯॥

૧૦૪.૮૦/૧સુરા ઊચુઃ । ક્રતુઃ પૂર્ણો ભવત્વેષ શુનઃશેપવધં વિના ॥ ૧૦૪.૮૦॥

૧૦૪.૮૧/૧બ્રહ્મોવાચ । વિશેષેણાથ વરુણશ્ચાવદન્ નૃપસત્તમમ્ ।
૧૦૪.૮૧/૨તતઃ પૂર્ણોઽભવદ્ રાજ્ઞો નૃમેધો લોકવિશ્રુતઃ ॥ ૧૦૪.૮૧॥

૧૦૪.૮૨/૧દેવાનાં ચ પ્રસાદેન મુનીનાં ચ પ્રસાદતઃ ।
૧૦૪.૮૨/૨તીર્થસ્ય તુ પ્રસાદેન રાજ્ઞઃ પૂર્ણોઽભવત્ ક્રતુઃ ॥ ૧૦૪.૮૨॥

૧૦૪.૮૩/૧વિશ્વામિત્રઃ શુનઃશેપં પૂજયામાસ સંસદિ ।
૧૦૪.૮૩/૨અકરોદ્ આત્મનઃ પુત્રં પૂજયિત્વા સુરાન્તિકે ॥ ૧૦૪.૮૩॥

૧૦૪.૮૪/૧જ્યેષ્ઠં ચકાર પુત્રાણામાત્મનઃ સ તુ કૌશિકઃ ।
૧૦૪.૮૪/૨ન મેનિરે યે ચ પુત્રા વિશ્વામિત્રસ્ય ધીમતઃ ॥ ૧૦૪.૮૪॥

૧૦૪.૮૫/૧શુનઃશેપસ્ય ચ જ્યૈષ્ઠ્યં તાઞ્ શશાપ સ કૌશિકઃ ।
૧૦૪.૮૫/૨જ્યૈષ્ઠ્યં યે મેનિરે પુત્રાઃ પૂજયામાસ તાન્ સુતાન્ ॥ ૧૦૪.૮૫॥

૧૦૪.૮૬/૧વરેણ મુનિશાર્દૂલસ્તદ્ એતત્ કથિતં મયા ।
૧૦૪.૮૬/૨એતત્ સર્વં યત્ર જાતં ગૌતમ્યા દક્ષિણે તટે ॥ ૧૦૪.૮૬॥

૧૦૪.૮૭/૧તત્ર તીર્થાનિ પુણ્યાનિ વિખ્યાતાનિ સુરાદિભિઃ ।
૧૦૪.૮૭/૨બહૂનિ તેષાં નામાનિ મત્તઃ શ઼ૃણુ મહામતે ॥ ૧૦૪.૮૭॥

૧૦૪.૮૮/૧હરિશ્ચન્દ્રં શુનઃશેપં વિશ્વામિત્રં સરોહિતમ્ ।
૧૦૪.૮૮/૨ઇત્યાદ્યષ્ટ સહસ્રાણિ તીર્થાન્યથ ચતુર્દશ ॥ ૧૦૪.૮૮॥

૧૦૪.૮૯/૧તેષુ સ્નાનં ચ દાનં ચ નરમેધફલપ્રદમ્ ।
૧૦૪.૮૯/૨આખ્યાતં ચાસ્ય માહાત્મ્યં તીર્થસ્ય મુનિસત્તમ ॥ ૧૦૪.૮૯॥

૧૦૪.૯૦/૧યઃ પઠેત્ પાઠયેદ્ વાપિ શ઼ૃણુયાદ્ વાપિ ભક્તિતઃ ।
૧૦૪.૯૦/૨અપુત્રઃ પુત્રમાપ્નોતિ યચ્ચાન્યન્ મનસઃ પ્રિયમ્ ॥ ૧૦૪.૯૦॥

૧૦૫.૧/૧બ્રહ્મોવાચ । સોમતીર્થમિતિ ખ્યાતં પિતૃણાં પ્રીતિવર્ધનમ્ ।
૧૦૫.૧/૨તત્ર વૃત્તં મહાપુણ્યં શ઼ૃણુ યત્નેન નારદ ॥ ૧૦૫.૧॥

૧૦૫.૨/૧સોમો રાજામૃતમયો ગન્ધર્વાણાં પુરાભવત્ ।
૧૦૫.૨/૨ન દેવાનાં તદા દેવા મામભ્યેત્યેદમબ્રુવન્ ॥ ૧૦૫.૨॥

૧૦૫.૩/૧દેવા ઊચુઃ । ગન્ધર્વૈરાહૃતઃ સોમો દેવાનાં પ્રાણદઃ પુરા ।

૧૦૫.૩/૨તમધ્યાયન્ સુરગણા ઋષયસ્ત્વતિદુઃખિતાઃ ।
૧૦૫.૩/૩યથા સ્યાત્ સોમો હ્યસ્માકં તથા નીતિર્વિધીયતામ્ ॥ ૧૦૫.૩॥

૧૦૫.૪/૧બ્રહ્મોવાચ । તત્ર વાગ્ વિબુધાન્ આહ ગન્ધર્વાઃ સ્ત્રીષુ કામુકાઃ ।
૧૦૫.૪/૨તેભ્યો દત્ત્વાથ માં દેવાઃ સોમમાહર્તુમર્હથ ॥ ૧૦૫.૪॥

૧૦૫.૫/૧વાચં પ્રત્યૂચુરમરાસ્ત્વાં દાતું ન ક્ષમા વયમ્ ।
૧૦૫.૫/૨વિના તેનાપિ ન સ્થાતું શક્યં નૈવ ત્વયા વિના ॥ ૧૦૫.૫॥

૧૦૫.૬/૧પુનર્વાગ્ અબ્રવીદ્ દેવાન્ પુનરેષ્યામ્યહં ત્વિહ ।
૧૦૫.૬/૨અત્ર બુદ્ધિર્વિધાતવ્યા ક્રિયતાં ક્રતુરુત્તમઃ ॥ ૧૦૫.૬॥

૧૦૫.૭/૧ગૌતમ્યા દક્ષિણે તીરે ભવેદ્ દેવાગમો યદિ ।
૧૦૫.૭/૨મખં તુ વિષયં કૃત્વા આયાન્તુ સુરસત્તમાઃ ॥ ૧૦૫.૭॥

૧૦૫.૮/૧ગન્ધર્વાઃ સ્ત્રીપ્રિયા નિત્યં પણધ્વં તં મયા સહ ।
૧૦૫.૮/૨તથેત્યુક્ત્વા સુરગણાઃ સરસ્વત્યા વચઃસ્થિતાઃ ॥ ૧૦૫.૮॥

૧૦૫.૯/૧દેવદૂતૈઃ પૃથગ્ દેવાન્ યક્ષાન્ ગન્ધર્વપન્નગાન્ ।
૧૦૫.૯/૨આહ્વાનં ચક્રિરે તત્ર પુણ્યે દેવગિરૌ તદા ॥ ૧૦૫.૯॥

૧૦૫.૧૦/૧તતો દેવગિરિર્નામ પર્વતસ્યાભવન્ મુને ।
૧૦૫.૧૦/૨તત્રાગમન્ સુરગણા ગન્ધર્વા યક્ષકિંનરાઃ ॥ ૧૦૫.૧૦॥

૧૦૫.૧૧/૧દેવાઃ સિદ્ધાશ્ચ ઋષયસ્તથાષ્ટૌ દેવયોનયઃ ।
૧૦૫.૧૧/૨ઋષિભિર્ગૌતમીતીરે ક્રિયમાણે મહાધ્વરે ॥ ૧૦૫.૧૧॥

૧૦૫.૧૨/૧તત્ર દેવૈઃ પરિવૃતઃ સહસ્રાક્ષોઽભ્યભાષત ॥ ૧૦૫.૧૨॥

૧૦૫.૧૩/૧ઇન્દ્ર ઉવાચ । ગન્ધર્વાન્ અથ સમ્પૂજ્ય સરસ્વત્યાઃ સમીપતઃ ।
૧૦૫.૧૩/૨સરસ્વત્યા પણધ્વં નો યુષ્માકમમૃતાત્મના ॥ ૧૦૫.૧૩॥

૧૦૫.૧૪/૧બ્રહ્મોવાચ । તચ્છક્રવચનાત્ તે વૈ ગન્ધર્વાઃ સ્ત્રીષુ કામુકાઃ ।
૧૦૫.૧૪/૨સોમં દત્ત્વા સુરેભ્યસ્તુ જગૃહુસ્તાં સરસ્વતીમ્ ॥ ૧૦૫.૧૪॥

૧૦૫.૧૫/૧સોમોઽભવચ્ચામરાણાં ગન્ધર્વાણાં સરસ્વતી ।
૧૦૫.૧૫/૨અવસત્ તત્ર વાગીશા તથાપિ ચ સુરાન્તિકે ॥ ૧૦૫.૧૫॥

૧૦૫.૧૬/૧આયાતિ ચ રહો નિત્યમુપાંશુ ક્રિયતામિતિ ।
૧૦૫.૧૬/૨અત એવ હિ સોમસ્ય ક્રયો ભવતિ નારદ ॥ ૧૦૫.૧૬॥

૧૦૫.૧૭/૧ઉપાંશુના વર્તિતવ્યં સોમક્રયણ એવ હિ ।
૧૦૫.૧૭/૨તતોઽભવદ્ દેવતાનાં સોમશ્ચાપિ સરસ્વતી ॥ ૧૦૫.૧૭॥

૧૦૫.૧૮/૧ગન્ધર્વાણાં નૈવ સોમો નૈવાસીચ્ચ સરસ્વતી ।
૧૦૫.૧૮/૨તત્રાગમન્ સર્વ એવ સોમાર્થં ગૌતમીતટમ્ ॥ ૧૦૫.૧૮॥

૧૦૫.૧૯/૧ગાવો દેવાઃ પર્વતા યક્ષરક્ષાઃ ।
૧૦૫.૧૯/૨સિદ્ધાઃ સાધ્યા મુનયો ગુહ્યકાશ્ચ ।
૧૦૫.૧૯/૩ગન્ધર્વાસ્તે મરુતઃ પન્નગાશ્ચ ।
૧૦૫.૧૯/૪સર્વૌષધ્યો માતરો લોકપાલાઃ ।
૧૦૫.૧૯/૫રુદ્રાદિત્યા વસવશ્ચાશ્વિનૌ ચ ।
૧૦૫.૧૯/૬યેઽન્યે દેવા યજ્ઞભાગસ્ય યોગ્યાઃ ॥ ૧૦૫.૧૯॥

૧૦૫.૨૦/૧પઞ્ચવિંશતિનદ્યસ્તુ ગઙ્ગાયાં સંગતા મુને ।
૧૦૫.૨૦/૨પૂર્ણાહુતિર્યત્ર દત્તા પૂર્ણાખ્યાનં તદ્ ઉચ્યતે ॥ ૧૦૫.૨૦॥

૧૦૫.૨૧/૧ગૌતમ્યાં સંગતા યાસ્તુ સર્વાશ્ચાપિ યથોદિતાઃ ।
૧૦૫.૨૧/૨તન્નામધેયતીર્થાનિ સંક્ષેપાચ્છૃણુ નારદ ॥ ૧૦૫.૨૧॥

૧૦૫.૨૨/૧સોમતીર્થં ચ ગાન્ધર્વં દેવતીર્થમતઃ પરમ્ ।
૧૦૫.૨૨/૨પૂર્ણાતીર્થં તતઃ શાલં શ્રીપર્ણાસંગમં તથા ॥ ૧૦૫.૨૨॥

૧૦૫.૨૩/૧સ્વાગતાસંગમં પુણ્યં કુસુમાયાશ્ચ સંગમમ્ ।
૧૦૫.૨૩/૨પુષ્ટિસંગમમાખ્યાતં કર્ણિકાસંગમં શુભમ્ ॥ ૧૦૫.૨૩॥

૧૦૫.૨૪/૧વૈણવીસંગમશ્ચૈવ કૃશરાસંગમસ્તથા ।
૧૦૫.૨૪/૨વાસવીસંગમશ્ચૈવ શિવશર્યા તથા શિખી ॥ ૧૦૫.૨૪॥

૧૦૫.૨૫/૧કુસુમ્ભિકા ઉપારથ્યા શાન્તિજા દેવજા તદા ।
૧૦૫.૨૫/૨અજો વૃદ્ધઃ સુરો ભદ્રો ગૌતમ્યા સહ સંગતાઃ ॥ ૧૦૫.૨૫॥

૧૦૫.૨૬/૧એતે ચાન્યે ચ બહવો નદીનદસહાયગાઃ ।
૧૦૫.૨૬/૨પૃથિવ્યાં યાનિ તીર્થાનિ હ્યગમન્ દેવપર્વતે ॥ ૧૦૫.૨૬॥

૧૦૫.૨૭/૧સોમાર્થં વૈ તથા ચાન્યેઽપ્યાગમન્ મખમણ્ડપમ્ ।
૧૦૫.૨૭/૨તાનિ તીર્થાનિ ગઙ્ગાયાં સંગતાનિ યથાક્રમમ્ ॥ ૧૦૫.૨૭॥

૧૦૫.૨૮/૧નદીરૂપેણ કાન્યેવ નદરૂપેણ કાનિચિત્ ।
૧૦૫.૨૮/૨સરોરૂપેણ કાન્યત્ર સ્તવરૂપેણ કાનિચિત્ ॥ ૧૦૫.૨૮॥

૧૦૫.૨૯/૧તાન્યેવ સર્વતીર્થાનિ વિખ્યાતાનિ પૃથક્ પૃથક્ ।
૧૦૫.૨૯/૨તેષુ સ્નાનં જપો હોમઃ પિતૃતર્પણમેવ ચ ॥ ૧૦૫.૨૯॥

૧૦૫.૩૦/૧સર્વકામપ્રદં પુંસાં ભુક્તિદં મુક્તિભાજનમ્ ।
૧૦૫.૩૦/૨એતેષાં પઠનં ચાપિ સ્મરણં વા કરોતિ યઃ ।
૧૦૫.૩૦/૩સર્વપાપવિનિર્મુક્તો યાતિ વિષ્ણુપુરં જનઃ ॥ ૧૦૫.૩૦॥

૧૦૬.૧/૧બ્રહ્મોવાચ । પ્રવરાસંગમો નામ શ્રેષ્ઠા ચૈવ મહાનદી ।
૧૦૬.૧/૨યત્ર સિદ્ધેશ્વરો દેવઃ સર્વલોકોપકારકૃત્ ॥ ૧૦૬.૧॥

૧૦૬.૨/૧દેવાનાં દાનવાનાં ચ સંગમોઽભૂત્ સુદારુણઃ ।
૧૦૬.૨/૨તેષાં પરસ્પરં વાપિ પ્રીતિશ્ચાભૂન્ મહામુને ॥ ૧૦૬.૨॥

૧૦૬.૩/૧તેઽપ્યેવં મન્ત્રયામાસુર્દેવા વૈ દાનવા મિથઃ ।
૧૦૬.૩/૨મેરુપર્વતમાસાદ્ય પરસ્પરહિતૈષિણઃ ॥ ૧૦૬.૩॥

૧૦૬.૪/૧દેવદૈત્યા ઊચુઃ । અમૃતેનામરત્વં સ્યાદ્ ઉત્પાદ્યામૃતમુત્તમમ્ ।
૧૦૬.૪/૨પિબામઃ સર્વ એવૈતે ભવામશ્ચામરા વયમ્ ॥ ૧૦૬.૪॥

૧૦૬.૫/૧એકીભૂત્વા વયં લોકાન્ પાલયામઃ સુખાનિ ચ ।
૧૦૬.૫/૨પ્રાપ્સ્યામઃ સંગરં હિત્વા સંગરો દુઃખકારણમ્ ॥ ૧૦૬.૫॥

૧૦૬.૬/૧પ્રીત્યા ચૈવાર્જિતાન્ અર્થાન્ ભોક્ષ્યામો ગતમત્સરાઃ ।
૧૦૬.૬/૨યતઃ સ્નેહેન વૃત્તિર્યા સાસ્માકં સુખદા સદા ॥ ૧૦૬.૬॥

૧૦૬.૭/૧વૈપરીત્યં તુ યદ્ વૃત્તં ન સ્મર્તવ્યં કદાચન ।
૧૦૬.૭/૨ન ચ ત્રૈલોક્યરાજ્યેઽપિ કૈવલ્યે વા સુખં મનાક્ ।
૧૦૬.૭/૩તદ્ ઊર્ધ્વમપિ વા યત્ તુ નિર્વૈરત્વાદ્ અવાપ્યતે ॥ ૧૦૬.૭॥

૧૦૬.૮/૧બ્રહ્મોવાચ । એવં પરસ્પરં પ્રીતાઃ સન્તો દેવાશ્ચ દાનવાઃ ।
૧૦૬.૮/૨એકીભૂતાશ્ચ સુપ્રીતા વિમથ્ય વરુણાલયમ્ ॥ ૧૦૬.૮॥

૧૦૬.૯/૧મન્થાનં મન્દરં કૃત્વા રજ્જું કૃત્વા તુ વાસુકિમ્ ।
૧૦૬.૯/૨દેવાશ્ચ દાનવાઃ સર્વે મમન્થુર્વરુણાલયમ્ ॥ ૧૦૬.૯॥

૧૦૬.૧૦/૧ઉત્પન્નં ચ તતઃ પુણ્યમમૃતં સુરવલ્લભમ્ ।
૧૦૬.૧૦/૨નિષ્પન્ને ચામૃતે પુણ્યે તે ચ પ્રોચુઃ પરસ્પરમ્ ॥ ૧૦૬.૧૦॥

૧૦૬.૧૧/૧યામઃ સ્વં સ્વમધિષ્ઠાનં કૃતકાર્યાઃ શ્રમં ગતાઃ ।
૧૦૬.૧૧/૨સર્વે સમં ચ સર્વેભ્યો યથાયોગ્યં વિભજ્યતામ્ ॥ ૧૦૬.૧૧॥

૧૦૬.૧૨/૧યદા સર્વાગમો યત્ર યસ્મિંલ્લગ્ને શુભાવહે ।
૧૦૬.૧૨/૨વિભજ્યતામિદં પુણ્યમમૃતં સુરસત્તમાઃ ॥ ૧૦૬.૧૨ ॥

૧૦૬.૧૩/૧ઇત્યુક્ત્વા તે યયુઃ સર્વે દૈત્યદાનવરાક્ષસાઃ ।
૧૦૬.૧૩/૨ગતેષુ દૈત્યસંઘેષુ દેવાઃ સર્વેઽન્વમન્ત્રયન્ ॥ ૧૦૬.૧૩ ॥

૧૦૬.૧૪/૧દેવા ઊચુઃ । ગતાસ્તે રિપવોઽસ્માકં દૈવયોગાદ્ અરિંદમાઃ ।
૧૦૬.૧૪/૨રિપૂણામમૃતં નૈવ દેયં ભવતિ સર્વથા ॥ ૧૦૬.૧૪ ॥

૧૦૬.૧૫/૧બ્રહ્મોવાચ । બૃહસ્પતિસ્તથેત્યાહ પુનરાહ સુરાન્ ઇદમ્ ॥ ૧૦૬.૧૫ ॥

૧૦૬.૧૬/૧બૃહસ્પતિરુવાચ । ન જાનન્તિ યથા પાપા પિબધ્વં ચ તથામૃતમ્ ।
૧૦૬.૧૬/૨અયમેવોચિતો મન્ત્રો યચ્છત્રૂણાં પરાભવઃ ॥ ૧૦૬.૧૬ ॥

૧૦૬.૧૭/૧દ્વેષ્યાઃ સર્વાત્મના દ્વેષ્યા ઇતિ નીતિવિદો વિદુઃ ।
૧૦૬.૧૭/૨ન વિશ્વાસ્યા ન ચાખ્યેયા નૈવ મન્ત્ર્યાશ્ચ શત્રવઃ ॥ ૧૦૬.૧૭ ॥

૧૦૬.૧૮/૧તેભ્યો ન દેયમમૃતં ભવેયુરમરાસ્તતઃ ।
૧૦૬.૧૮/૨અમરેષુ ચ જાતેષુ તેષુ દૈત્યેષુ શત્રુષુ ।
૧૦૬.૧૮/૩તાઞ્ જેતું નૈવ શક્ષ્યામો ન દેયમમૃતં તતઃ ॥ ૧૦૬.૧૮ ॥

૧૦૬.૧૯/૧બ્રહ્મોવાચ । ઇતિ સમ્મન્ત્ર્ય તે દેવા વાચસ્પતિમથાબ્રુવન્ ॥ ૧૦૬.૧૯ ॥

૧૦૬.૨૦/૧દેવા ઊચુઃ । ક્વ યામઃ કુત્ર મન્ત્રઃ સ્યાત્ ક્વ પિબામઃ ક્વ સંસ્થિતિઃ ।
૧૦૬.૨૦/૨કુર્મસ્તદ્ એવ પ્રથમં વદ વાચસ્પતે તથા ॥ ૧૦૬.૨૦ ॥

૧૦૬.૨૧/૧બૃહસ્પતિરુવાચ । યાન્તુ બ્રહ્માણમમરાઃ પૃચ્છન્ત્વત્ર ગતિં પરામ્ ।
૧૦૬.૨૧/૨સ તુ જ્ઞાતા ચ વક્તા ચ દાતા ચૈવ પિતામહઃ ॥ ૧૦૬.૨૧ ॥

૧૦૬.૨૨/૧બ્રહ્મોવાચ । બૃહસ્પતેર્વચઃ શ્રુત્વા મદન્તિકમથાગમન્ ।
૧૦૬.૨૨/૨નમસ્ય માં સુરાઃ સર્વે યદ્ વૃત્તં તન્ ન્યવેદયન્ ॥ ૧૦૬.૨૨ ॥

૧૦૬.૨૩/૧તદ્ દેવવચનાત્ પુત્ર તૈઃ સુરૈરગમં હરિમ્ ।
૧૦૬.૨૩/૨વિષ્ણવે કથિતં સર્વં શમ્ભવે વિષહારિણે ॥ ૧૦૬.૨૩ ॥

૧૦૬.૨૪/૧અહં વિષ્ણુશ્ચ શમ્ભુશ્ચ દેવગન્ધર્વકિંનરૈઃ ।
૧૦૬.૨૪/૨મેરુકન્દરમાગત્ય ન જાનન્તિ યથાસુરાઃ ॥ ૧૦૬.૨૪ ॥

૧૦૬.૨૫/૧રક્ષકં ચ હરિં કૃત્વા સોમપાનાય તસ્થિરે ।
૧૦૬.૨૫/૨આદિત્યસ્તત્ર વિજ્ઞાતા સોમભોજ્યાન્ અથેતરાન્ ॥ ૧૦૬.૨૫ ॥

૧૦૬.૨૬/૧સોમો દાતામૃતં ભાગં ચક્રધૃગ્ રક્ષકસ્તથા ।
૧૦૬.૨૬/૨નૈવ જાનન્તિ તદ્ દૈત્યા દનુજા રાક્ષસાસ્તથા ॥ ૧૦૬.૨૬॥

૧૦૬.૨૭/૧વિના રાહું મહાપ્રાજ્ઞં સૈંહિકેયં ચ સોમપમ્ ।
૧૦૬.૨૭/૨કામરૂપધરો રાહુર્મરુતાં મધ્યમાવિશત્ ॥ ૧૦૬.૨૭॥

૧૦૬.૨૮/૧મરુદ્રૂપં સમાસ્થાય પાનપાત્રધરસ્તથા ।
૧૦૬.૨૮/૨જ્ઞાત્વા દિવાકરો દૈત્યં તં સોમાય ન્યવેદયત્ ॥ ૧૦૬.૨૮॥

૧૦૬.૨૯/૧તદા તદ્ અમૃતં તસ્મૈ દૈત્યાયાદૈત્યરૂપિણે ।
૧૦૬.૨૯/૨દત્ત્વા સોમં તદા સોમો વિષ્ણવે તન્ ન્યવેદયત્ ॥ ૧૦૬.૨૯॥

૧૦૬.૩૦/૧વિષ્ણુઃ પીતામૃતં દૈત્યં ચક્રેણોદ્યમ્ય તચ્છિરઃ ।
૧૦૬.૩૦/૨ચિચ્છેદ તરસા વત્સ તચ્છિરસ્ત્વમરં ત્વભૂત્ ॥ ૧૦૬.૩૦॥

૧૦૬.૩૧/૧શિરોમાત્રવિહીનં યદ્ દેહં તદ્ અપતદ્ ભુવિ ।
૧૦૬.૩૧/૨દેહં તદ્ અમૃતસ્પૃષ્ટં પતિતં દક્ષિણે તટે ॥ ૧૦૬.૩૧॥

૧૦૬.૩૨/૧ગૌતમ્યા મુનિશાર્દૂલ કમ્પયદ્ વસુધાતલમ્ ।
૧૦૬.૩૨/૨દેહં ચાપ્યમરં પુત્ર તદ્ અદ્ભુતમિવાભવત્ ॥ ૧૦૬.૩૨॥

૧૦૬.૩૩/૧દેહં ચ શિરસોઽપેક્ષિ શિરો દેહમપેક્ષતે ।
૧૦૬.૩૩/૨ઉભયં ચામરં જાતં દૈત્યશ્ચાયં મહાબલઃ ॥ ૧૦૬.૩૩॥

૧૦૬.૩૪/૧શિરઃ કાયે સમાવિષ્ટં સર્વાન્ ભક્ષયતે સુરાન્ ।
૧૦૬.૩૪/૨તસ્માદ્ દેહમિદં પૂર્વં નાશયામો મહીગતમ્ ।
૧૦૬.૩૪/૩તતસ્તે શંકરં પ્રાહુર્દેવાઃ સર્વે સસમ્ભ્રમાઃ ॥ ૧૦૬.૩૪॥

૧૦૬.૩૫/૧દેવા ઊચુઃ । મહીગતં દૈત્યદેહં નાશયસ્વ સુરોત્તમ ।
૧૦૬.૩૫/૨ત્વં દેવ કરુણાસિન્ધુઃ શરણાગતરક્ષકઃ ॥ ૧૦૬.૩૫॥

૧૦૬.૩૬/૧શિરસા નૈવ યુજ્યેત દૈત્યદેહં તથા કુરુ ॥ ૧૦૬.૩૬॥

૧૦૬.૩૭/૧બ્રહ્મોવાચ । પ્રેષયામાસ ચેશોઽપિ શ્રેષ્ઠાં શક્તિં તદાત્મનઃ ।
૧૦૬.૩૭/૨માતૃભિઃ સહિતાં દેવીં માતરં લોકપાલિનીમ્ ॥ ૧૦૬.૩૭॥

૧૦૬.૩૮/૧ઈશાયુધધરા દેવી ઈશશક્તિસમન્વિતા ।
૧૦૬.૩૮/૨મહીગતં યત્ર દેહં તત્રાગાદ્ ભક્ષ્યકાઙ્ક્ષિણી ॥ ૧૦૬.૩૮॥

૧૦૬.૩૯/૧શિરોમાત્રં સુરાઃ સર્વે મેરૌ તત્રૈવ સાન્ત્વયન્ ।
૧૦૬.૩૯/૨દેહો દેવ્યા પુનસ્તત્ર યુયુધે બહવઃ સમાઃ ॥ ૧૦૬.૩૯॥

૧૦૬.૪૦/૧રાહુસ્તત્ર સુરાન્ આહ ભિત્ત્વા દેહં પુરા મમ ।
૧૦૬.૪૦/૨અત્રાસ્તે રસમુત્કૃષ્ટં તદ્ આકૃષ્ય શરીરતઃ ॥ ૧૦૬.૪૦॥

૧૦૬.૪૧/૧પૃથક્ભૂતે રસે દેહં પ્રવરેઽમૃતમુત્તમમ્ ।
૧૦૬.૪૧/૨ભસ્મીભૂયાત્ ક્ષણેનૈવ તસ્માત્ કુર્વન્તુ તત્ પુરા ॥ ૧૦૬.૪૧॥

૧૦૬.૪૨/૧બ્રહ્મોવાચ । એતદ્ રાહુવચઃ શ્રુત્વા પ્રીતાઃ સર્વેઽસુરારયઃ ।
૧૦૬.૪૨/૨અભ્યષિઞ્ચન્ ગ્રહાણાં ત્વં ગ્રહો ભૂયા મુદાન્વિતઃ ॥ ૧૦૬.૪૨॥

૧૦૬.૪૩/૧તદ્દેવવચનાચ્છક્તિરીશ્વરી યા નિગદ્યતે ।
૧૦૬.૪૩/૨દેહં ભિત્ત્વા દૈત્યપતેઃ સુરશક્તિસમન્વિતા ॥ ૧૦૬.૪૩॥

૧૦૬.૪૪/૧આકૃષ્ય શીઘ્રમુત્કૃષ્ટં પ્રવરં ચામૃતં બહિઃ ।
૧૦૬.૪૪/૨સ્થાપયિત્વા તુ તદ્ દેહં ભક્ષયામાસ ચામ્બિકા ॥ ૧૦૬.૪૪॥

૧૦૬.૪૫/૧કાલરાત્રિર્ભદ્રકાલી પ્રોચ્યતે યા મહાબલા ।
૧૦૬.૪૫/૨સ્થાપિતં રસમુત્કૃષ્ટં રસાનાં પ્રવરં રસમ્ ॥ ૧૦૬.૪૫॥

૧૦૬.૪૬/૧વ્યસ્રવત્ સ્થાપિતં તત્ તુ પ્રવરા સાભવન્ નદી ।
૧૦૬.૪૬/૨આકૃષ્ટમમૃતં ચૈવ સ્થાપિતં સાપ્યભક્ષયત્ ॥ ૧૦૬.૪૬॥

૧૦૬.૪૭/૧તતઃ શ્રેષ્ઠા નદી જાતા પ્રવરા ચામૃતા શુભા ।
૧૦૬.૪૭/૨રાહુદેહસમુદ્ભૂતા રુદ્રશક્તિસમન્વિતા ॥ ૧૦૬.૪૭॥

૧૦૬.૪૮/૧નદીનાં પ્રવરા રમ્યા ચામૃતા પ્રેરિતા તહા ।
૧૦૬.૪૮/૨તત્ર પઞ્ચ સહસ્રાણિ તીર્થાનિ ગુણવન્તિ ચ ॥ ૧૦૬.૪૮॥

૧૦૬.૪૯/૧તત્ર શમ્ભુઃ સ્વયં તસ્થૌ સર્વદા સુરપૂજિતઃ ।
૧૦૬.૪૯/૨તસ્યૈ તુષ્ટાઃ સુરાઃ સર્વે દેવ્યૈ નદ્યૈ પૃથક્ પૃથક્ ॥ ૧૦૬.૪૯॥

૧૦૬.૫૦/૧વરાન્ દદુર્મુદા યુક્તા યથા પૂજામવાપ્સ્યતિ ।
૧૦૬.૫૦/૨શમ્ભુઃ સુરપતિર્લોકે તથા પૂજામવાપ્સ્યસિ ॥ ૧૦૬.૫૦॥

૧૦૬.૫૧/૧નિવાસં કુરુ દેવિ ત્વં લોકાનાં હિતકામ્યયા ।
૧૦૬.૫૧/૨સદા તિષ્ઠ રસેશાનિ સર્વેષાં સર્વસિદ્ધિદા ॥ ૧૦૬.૫૧॥

૧૦૬.૫૨/૧સ્તવનાત્ કીર્તનાદ્ ધ્યાનાત્ સર્વકામપ્રદાયિની ।
૧૦૬.૫૨/૨ત્વાં નમસ્યન્તિ યે ભક્ત્યા કિંચિદ્ આપેક્ષ્ય સર્વદા ॥ ૧૦૬.૫૨॥

૧૦૬.૫૩/૧તેષાં સર્વાણિ કાર્યાણિ ભવેયુર્દેવતાજ્ઞયા ।

૧૦૬.૫૩/૨શિવશક્ત્યોર્યતસ્તસ્મિન્ નિવાસોઽભૂત્ સનાતનઃ ॥ ૧૦૬.૫૩॥

૧૦૬.૫૪/૧અતો વદન્તિ મુનયો નિવાસપુરમિત્યદઃ ।
૧૦૬.૫૪/૨પ્રવરાયાઃ પુરા દેવાઃ સુપ્રીતાસ્તે વરાન્ દદુઃ ॥ ૧૦૬.૫૪॥

૧૦૬.૫૫/૧ગઙ્ગાયાઃ સંગમો યસ્તે વિખ્યાતઃ સુરવલ્લભઃ ।
૧૦૬.૫૫/૨તત્રાપ્લુતાનાં સર્વેષાં ભુક્તિર્વા મુક્તિરેવ ચ ॥ ૧૦૬.૫૫॥

૧૦૬.૫૬/૧યદ્ વાપિ મનસઃ કામ્યં દેવાનામપિ દુર્લભમ્ ।
૧૦૬.૫૬/૨સ્યાત્ તેષાં સર્વમેવેહ એવં દત્ત્વા સુરા યયુઃ ॥ ૧૦૬.૫૬॥

૧૦૬.૫૭/૧તતઃ પ્રભૃતિ તત્ તીર્થં પ્રવરાસંગમં વિદુઃ ।
૧૦૬.૫૭/૨પ્રેરિતા દેવદેવેન શક્તિર્યા પ્રેરિતા તુ સા ॥ ૧૦૬.૫૭॥

૧૦૬.૫૮/૧અમૃતા સૈવ વિખ્યાતા પ્રવરૈવં મહાનદી ॥ ૧૦૬.૫૮॥

૧૦૭.૧/૧બ્રહ્મોવાચ । વૃદ્ધાસંગમમાખ્યાતં યત્ર વૃદ્ધેશ્વરઃ શિવઃ ।
૧૦૭.૧/૨તસ્યાખ્યાનં પ્રવક્ષ્યામિ શ ૃણુ પાપપ્રણાશનમ્ ॥ ૧૦૭.૧॥

૧૦૭.૨/૧ગૌતમો વૃદ્ધ ઇત્યુક્તો મુનિરાસીન્ મહાતપાઃ ।
૧૦૭.૨/૨યદા પુરાભવદ્ બાલો ગૌતમસ્ય સુતો દ્વિજઃ ॥ ૧૦૭.૨॥

૧૦૭.૩/૧અનાસઃ સ પુરોત્પન્નસ્તસ્માદ્ વિકૃતરૂપધૃક્ ।
૧૦૭.૩/૨સ વૈરાગ્યાજ્જગામાથ દેશં તીર્થમિતસ્તતઃ ॥ ૧૦૭.૩॥

૧૦૭.૪/૧ઉપાધ્યાયેન નૈવાસીલ્લજ્જિતસ્ય સમાગમઃ ।
૧૦૭.૪/૨શિષ્યૈરન્યૈઃ સહાધ્યાયો લજ્જિતસ્ય ચ નાભવત્ ॥ ૧૦૭.૪॥

૧૦૭.૫/૧ઉપનીતઃ કથંચિચ્ચ પિત્રા વૈ ગૌતમેન સઃ ।
૧૦૭.૫/૨એતાવતા ગૌતમોઽપિ વ્યગમચ્ચરિતું બહિઃ ॥ ૧૦૭.૫॥

૧૦૭.૬/૧એવં બહુતિથે કાલે બ્રહ્મમાત્રા ધૃતે દ્વિજે ।
૧૦૭.૬/૨નૈવ ચાધ્યયનં તસ્ય સંજાતં ગૌતમસ્ય હિ ॥ ૧૦૭.૬॥

૧૦૭.૭/૧નૈવ શાસ્ત્રસ્ય ચાભ્યાસો ગૌતમસ્યાભવત્ તદા ।
૧૦૭.૭/૨અગ્નિકાર્યં તતશ્ચક્રે નિત્યમેવ યતવ્રતઃ ॥ ૧૦૭.૭॥

૧૦૭.૮/૧ગાયત્ર્યભ્યાસમાત્રેણ બ્રાહ્મણો નામધારકઃ ।
૧૦૭.૮/૨અગ્ન્યુપાસનમાત્રં ચ ગાયત્ર્યભ્યસનં તથા ॥ ૧૦૭.૮॥

૧૦૭.૯/૧એતાવતા બ્રાહ્મણત્વં ગૌતમસ્યાભવન્ મુને ।

૧૦૭.૯/૨ઉપાસતોઽગ્નિં વિધિવદ્ ગાયત્રીં ચ મહાત્મનઃ ॥ ૧૦૭.૯॥

૧૦૭.૧૦/૧તસ્યાયુર્વવૃધે પુત્ર ગૌતમસ્ય ચિરાયુષઃ ।
૧૦૭.૧૦/૨ન દારસંગ્રહં લેભે નૈવ દાતાસ્તિ કન્યકામ્ ॥ ૧૦૭.૧૦॥

૧૦૭.૧૧/૧તથા ચરંસ્તીર્થદેશે વનેષુ વિવિધેષુ ચ ।
૧૦૭.૧૧/૨આશ્રમેષુ ચ પુણ્યેષુ અટન્ન્ આસ્તે સ ગૌતમઃ ॥ ૧૦૭.૧૧॥

૧૦૭.૧૨/૧એવં ભ્રમઞ્ શીતગિરિમાશ્રિત્યાસ્તે સ ગૌતમઃ ।
૧૦૭.૧૨/૨તત્રાપશ્યદ્ ગુહાં રમ્યાં વલ્લીવિટપમાલિનીમ્ ॥ ૧૦૭.૧૨॥

૧૦૭.૧૩/૧તત્રોપવિશ્ય વિપ્રેન્દ્રો વસ્તું સમકરોન્ મતિમ્ ।
૧૦૭.૧૩/૨ચિન્તયંસ્તુ પ્રવિષ્ટોઽસાવપશ્યત્ સ્ત્રિયમુત્તમામ્ ॥ ૧૦૭.૧૩॥

૧૦૭.૧૪/૧શિથિલાઙ્ગીમથ કૃશાં વૃદ્ધાં ચ તપસિ સ્થિતામ્ ।
૧૦૭.૧૪/૨બ્રહ્મચર્યેણ વર્તન્તીં વિરાગાં રહસિ સ્થિતામ્ ॥ ૧૦૭.૧૪॥

૧૦૭.૧૫/૧સ તાં દૃષ્ટ્વા મુનિશ્રેષ્ઠો નમસ્કારાય તસ્થિવાન્ ।
૧૦૭.૧૫/૨નમસ્યન્તં મુનિશ્રેષ્ઠં તં ગૌતમમવારયત્ ॥ ૧૦૭.૧૫॥

૧૦૭.૧૬/૧વૃદ્ધોવાચ । ગુરુસ્ત્વં ભવિતા મહ્યં ન માં વન્દિતુમર્હસિ ।
૧૦૭.૧૬/૨આયુર્વિદ્યા ધનં કીર્તિર્ધર્મઃ સ્વર્ગાદિકં ચ યત્ ।
૧૦૭.૧૬/૩તસ્ય નશ્યતિ વૈ સર્વં યં નમસ્યતિ વૈ ગુરુઃ ॥ ૧૦૭.૧૬॥

૧૦૭.૧૭/૧બ્રહ્મોવાચ । કૃતાઞ્જલિપુટસ્તાં વૈ ગૌતમઃ પ્રાહ
વિસ્મિતઃ ॥ ૧૦૭.૧૭॥

૧૦૭.૧૮/૧ગૌતમ ઉવાચ । તપસ્વિની ત્વં વૃદ્ધા ચ ગુણજ્યેષ્ઠા ચ ભામિની ।
૧૦૭.૧૮/૨અલ્પવિદ્યસ્ત્વલ્પવયા અહં તવ ગુરુઃ કથમ્ ॥ ૧૦૭.૧૮॥

૧૦૭.૧૯/૧વૃદ્ધોવાચ । આર્ષ્ટિષેણપ્રિયપુત્ર ઋતધ્વજ ઇતિ શ્રુતઃ ।
૧૦૭.૧૯/૨ગુણવાન્ મતિમાઞ્ શૂરઃ ક્ષત્રધર્મપરાયણઃ ॥ ૧૦૭.૧૯॥

૧૦૭.૨૦/૧સ કદાચિદ્ વનં પ્રાયાન્ મૃગયાકૃષ્ટચેતનઃ ।
૧૦૭.૨૦/૨વિશ્રામમકરોદ્ અસ્યાં ગુહાયાં સ ઋતધ્વજઃ ॥ ૧૦૭.૨૦॥

૧૦૭.૨૧/૧યુવા સ મતિમાન્ દક્ષો બલેન મહતા વૃતઃ ।
૧૦૭.૨૧/૨તં વિશ્રાન્તં નૃપવરમપ્સરા દદૃશે તતઃ ॥ ૧૦૭.૨૧॥

૧૦૭.૨૨/૧ગન્ધર્વરાજસ્ય સુતા સુશ્યામા ઇતિ વિશ્રુતા ।
૧૦૭.૨૨/૨તાં દૃષ્ટ્વા ચકમે રાજા રાજાનં ચકમે ચ સા ॥ ૧૦૭.૨૨॥

૧૦૭.૨૩/૧ઇતિ ક્રીડા સમભવત્ તયા રાજ્ઞો મહામતે ।
૧૦૭.૨૩/૨નિવૃત્તકામો રાજેન્દ્રસ્તામાપૃચ્છ્યાગમદ્ ગૃહમ્ ॥ ૧૦૭.૨૩॥

૧૦૭.૨૪/૧ઉત્પન્નાહં તતસ્તસ્યાં સુશ્યામાયાં મહામતે ।
૧૦૭.૨૪/૨ગચ્છન્તી માં તદા માતા ઇદમાહ તપોધન ॥ ૧૦૭.૨૪॥

૧૦૭.૨૫/૧સુશ્યામોવાચ । યસ્ત્વસ્યાં પ્રવિશેદ્ ભદ્રે સ તે ભર્તા
ભવિષ્યતિ ॥ ૧૦૭.૨૫॥

૧૦૭.૨૬/૧વૃદ્ધોવાચ । ઇત્યુક્ત્વા સા જગમાથ માતા મમ મહામતે ।
૧૦૭.૨૬/૨તસ્માદ્ અત્ર પ્રવિષ્ટસ્ત્વં પુમાન્ નાન્યઃ કદાચન ॥ ૧૦૭.૨૬॥

૧૦૭.૨૭/૧સહસ્રાણિ તથાશીતિં કૃત્વા રાજ્યં પિતા મમ ।
૧૦૭.૨૭/૨અત્રૈવ ચ તપસ્તપ્ત્વા તતઃ સ્વર્ગમુપેયિવાન્ ॥ ૧૦૭.૨૭॥

૧૦૭.૨૮/૧સ્વર્ગં યાતેઽપિ પિતરિ સહસ્રાણિ તથા દશ ।
૧૦૭.૨૮/૨વર્ષાણિ મુનિશાર્દૂલ રાજ્યં કૃત્વા તથા પરઃ ॥ ૧૦૭.૨૮॥

૧૦૭.૨૯/૧સ્વર્ગે યાતો મમ ભ્રાતા અહમત્રૈવ સંસ્થિતા ।
૧૦૭.૨૯/૨અહં બ્રહ્મન્ નાન્યવૃત્તા ન માતા ન પિતા મમ ॥ ૧૦૭.૨૯॥

૧૦૭.૩૦/૧અહમાત્મેશ્વરી બ્રહ્મન્ નિવિષ્ટા ક્ષત્રકન્યકા ।
૧૦૭.૩૦/૨તસ્માદ્ ભજસ્વ માં બ્રહ્મન્ વ્રતસ્થાં પુરુષાર્થિનીમ્ ॥ ૧૦૭.૩૦॥

૧૦૭.૩૧/૧ગૌતમ ઉવાચ । સહસ્રાયુરહં ભદ્રે મત્તસ્ત્વં વયસાધિકા ।
૧૦૭.૩૧/૨અહં બાલસ્ત્વં તુ વૃદ્ધા નૈવાયં ઘટતે મિથઃ ॥ ૧૦૭.૩૧॥

૧૦૭.૩૨/૧વૃદ્ધોવાચ । ત્વં ભર્તા મે પુરા દિષ્ટો નાન્યો ભર્તા મતો મમ ।
૧૦૭.૩૨/૨ધાત્રા દત્તસ્તતસ્ત્વં માં ન નિરાકર્તુમર્હસિ ॥ ૧૦૭.૩૨॥

૧૦૭.૩૩/૧અથવા નેચ્છસિ માં ત્વમપ્રદુષ્ટામનુવ્રતામ્ ।
૧૦૭.૩૩/૨તતસ્ત્યક્ષ્યામિ જીવં મે ઇદાનીં તવ પશ્યતઃ ॥ ૧૦૭.૩૩॥

૧૦૭.૩૪/૧અપેક્ષિતાપ્રાપ્તિતો હિ દેહિનાં મરણં વરમ્ ।
૧૦૭.૩૪/૨અનુરક્તજનત્યાગે પાતકાન્તો ન વિદ્યતે ॥ ૧૦૭.૩૪॥

૧૦૭.૩૫/૧બ્રહ્મોવાચ । વૃદ્ધાયાસ્તદ્ વચઃ શ્રુત્વા ગૌતમો
વાક્યમબ્રવીત્ ॥ ૧૦૭.૩૫॥

૧૦૭.૩૬/૧ગૌતમ ઉવાચ । અહં તપોવિરહિતો વિદ્યાહીનો હ્યકિંચનઃ ।

૧૦૭.૩૬/૨નાહં વરો હિ યોગ્યસ્તે કુરૂપો ભોગવર્જિતઃ ॥ ૧૦૭.૩૬॥

૧૦૭.૩૭/૧અનાસોઽહં કિં કરોમિ અતપોવિદ્ય એવ ચ ।
૧૦૭.૩૭/૨તસ્માત્ સુરૂપં સુવિદ્યામાપાદ્ય પ્રથમં શુભે ।
૧૦૭.૩૭/૩પશ્ચાત્ તે વચનં કાર્યં તતો વૃદ્ધાબ્રવીદ્ દ્વિજમ્ ॥ ૧૦૭.૩૭॥

૧૦૭.૩૮/૧વૃદ્ધોવાચ । મયા સરસ્વતી દેવી તોષિતા તપસા દ્વિજ ।
૧૦૭.૩૮/૨તથૈવાપો રૂપવત્યો રૂપદાતાગ્નિરેવ ચ ॥ ૧૦૭.૩૮॥

૧૦૭.૩૯/૧તસ્માદ્ વાગીશ્વરી દેવી સા તે વિદ્યાં પ્રદાસ્યતિ ।
૧૦૭.૩૯/૨અગ્નિશ્ચ રૂપવાન્ દેવસ્તવ રૂપં પ્રદાસ્યતિ ॥ ૧૦૭.૩૯॥

૧૦૭.૪૦/૧બ્રહ્મોવાચ । એવમુક્ત્વા ગૌતમં તં વૃદ્ધોવાચ વિભાવસુમ્ ।
૧૦૭.૪૦/૨પ્રાર્થયિત્વા સુવિદ્યં તં સુરૂપં ચાકરોન્ મુનિમ્ ॥ ૧૦૭.૪૦॥

૧૦૭.૪૧/૧તતઃ સુવિદ્યઃ સુભગઃ સુકાન્તો ।
૧૦૭.૪૧/૨વૃદ્ધાં સ પત્નીમકરોત્ પ્રીતિયુક્તઃ ।
૧૦૭.૪૧/૩તયા સ રેમે બહુલા મનોજ્ઞયા ।
૧૦૭.૪૧/૪સમાઃ સુખં પ્રીતમના ગુહાયામ્ ॥ ૧૦૭.૪૧॥

૧૦૭.૪૨/૧કદાચિત્ તત્ર વસતોર્દમ્પત્યોર્મુદતોર્ગિરૌ ।
૧૦૭.૪૨/૨ગુહાયાં મુનિશાર્દૂલ આજગ્મુર્મુનયોઽમલાઃ ॥ ૧૦૭.૪૨॥

૧૦૭.૪૩/૧વસિષ્ઠવામદેવાદ્યા યે ચાન્યે ચ મહર્ષયઃ ।
૧૦૭.૪૩/૨ભ્રમન્તઃ પુણ્યતીર્થાનિ પ્રાપ્નુવંસ્તસ્ય તાં ગુહામ્ ॥ ૧૦૭.૪૩॥

૧૦૭.૪૪/૧આગતાંસ્તાન્ ઋષીઞ્ જ્ઞાત્વા ગૌતમઃ સહ ભાર્યયા ।
૧૦૭.૪૪/૨સત્કારમકરોત્ તેષાં જહસુસ્તં ચ કેચન ॥ ૧૦૭.૪૪॥

૧૦૭.૪૫/૧યે બાલા યૌવનોન્મત્તા વયસા યે ચ મધ્યમાઃ ।
૧૦૭.૪૫/૨વૃદ્ધાં ચ ગૌતમં પ્રેક્ષ્ય જહસુસ્તત્ર કેચન ॥ ૧૦૭.૪૫॥

૧૦૭.૪૬/૧ઋષય ઊચુઃ । પુત્રોઽયં તવ પૌત્રો વા વૃદ્ધે કો ગૌતમોઽભવત્ ।
૧૦૭.૪૬/૨સત્યં વદસ્વ કલ્યાણિ ઇત્યેવં જહસુર્દ્વિજાઃ ॥ ૧૦૭.૪૬॥

૧૦૭.૪૭/૧વિષં વૃદ્ધસ્ય યુવતી વૃદ્ધાયા અમૃતં યુવા ।
૧૦૭.૪૭/૨ઇષ્ટાનિષ્ટસમાયોગો દૃષ્ટોઽસ્માભિરહો ચિરાત્ ॥ ૧૦૭.૪૭॥

૧૦૭.૪૮/૧બ્રહ્મોવાચ । ઇત્યેવમૂચિરે કેચિદ્ દમ્પત્યોઃ શ઼ૃણ્વતોસ્તદા ।
૧૦૭.૪૮/૨એવમુક્ત્વા કૃતાતિથ્યા યયુઃ સર્વે મહર્ષયઃ ॥ ૧૦૭.૪૮॥

૧૦૭.૪૯/૧ઋષીણાં વચનં શ્રુત્વા ઉભાવપિ સુદુઃખિતૌ ।
૧૦૭.૪૯/૨લજ્જિતૌ ચ મહાપ્રાજ્ઞૌ ગૌતમો ભાર્યયા સહ ।
૧૦૭.૪૯/૩પપ્રચ્છ મુનિશાર્દૂલમગસ્ત્યમ્ ઋષિસત્તમમ્ ॥ ૧૦૭.૪૯ ॥

૧૦૭.૫૦/૧ગૌતમ ઉવાચ । કો દેશઃ કિમુ તીર્થં વા યત્ર શ્રેયઃ સમાપ્યતે ।
૧૦૭.૫૦/૨શીઘ્રમેવ મહાપ્રાજ્ઞ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧૦૭.૫૦ ॥

૧૦૭.૫૧/૧અગસ્ત્ય ઉવાચ । વદદ્ભિર્મુનિભિર્બ્રહ્મન્ મયા શ્રુતમિદં વચઃ ।
૧૦૭.૫૧/૨સર્વે કામાસ્તત્ર પૂર્ણા ગૌતમ્યાં નાત્ર સંશયઃ ॥ ૧૦૭.૫૧ ॥

૧૦૭.૫૨/૧તસ્માદ્ ગચ્છ મહાબુદ્ધે ગૌતમીં પાપનાશિનીમ્ ।
૧૦૭.૫૨/૨અહં ત્વામનુયાસ્યામિ યથેચ્છસિ તથા કુરુ ॥ ૧૦૭.૫૨ ॥

૧૦૭.૫૩/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વાગસ્ત્યવાક્યં વૃદ્ધયા ગૌતમોઽભ્યગાત્ ।
૧૦૭.૫૩/૨તત્ર તેપે તપસ્તીવ્રં પત્ન્યા સ ભગવાન્ ઋષિઃ ॥ ૧૦૭.૫૩ ॥

૧૦૭.૫૪/૧સ્તુતિં ચકાર દેવસ્ય શમ્ભોર્વિષ્ણોસ્તથૈવ ચ ।
૧૦૭.૫૪/૨ગઙ્ગાં ચ તોષયામાસ ભાર્યાર્થં ભગવાન્ ઋષિઃ ॥ ૧૦૭.૫૪ ॥

૧૦૭.૫૫/૧ગૌતમ ઉવાચ । ખિન્નાત્મનામત્ર ભવે ત્વમેવ શરણં શિવઃ ।
૧૦૭.૫૫/૨મરુભૂમાવધ્વગાનાં વિટપીવ પ્રિયાયુતઃ ॥ ૧૦૭.૫૫ ॥

૧૦૭.૫૬/૧ઉચ્ચાવચાનાં ભૂતાનાં સર્વથા પાપનોદનઃ ।
૧૦૭.૫૬/૨સસ્યાનાં ઘનવત્ કૃષ્ણ ત્વમવગ્રહશોષિણામ્ ॥ ૧૦૭.૫૬ ॥

૧૦૭.૫૭/૧વૈકુણ્ઠદુર્ગનિઃશ્રેણિસ્ત્વં પીયૂષતરંગિણી ।
૧૦૭.૫૭/૨અધોગતાનાં તપ્તાનાં શરણં ભવ ગૌતમિ ॥ ૧૦૭.૫૭ ॥

૧૦૭.૫૮/૧બ્રહ્મોવાચ । તતસ્તુષ્ટાવદદ્ વાક્યં ગૌતમં વૃદ્ધયા યુતમ્ ।
૧૦૭.૫૮/૨શરણાગતદીનાર્તં શરણ્યા ગૌતમી મુદા ॥ ૧૦૭.૫૮ ॥

૧૦૭.૫૯/૧ગૌતમ્યુવાચ । અભિષિઞ્ચસ્વ ભાર્યાં ત્વં મજ્જલૈર્મન્ત્રસંયુતૈઃ ।
૧૦૭.૫૯/૨કલશૈરુપચારૈશ્ચ તતઃ પત્ની તવ પ્રિયા ॥ ૧૦૭.૫૯ ॥

૧૦૭.૬૦/૧સુરૂપા ચારુસર્વાઙ્ગી સુભગા ચારુલોચના ।
૧૦૭.૬૦/૨સર્વલક્ષણસમ્પૂર્ણા રમ્યરૂપમવાપ્સ્યતિ ॥ ૧૦૭.૬૦ ॥

૧૦૭.૬૧/૧રૂપવત્યા પુનસ્ત્વં વૈ ભાર્યયા ચાભિષેચિતઃ ।
૧૦૭.૬૧/૨સર્વલક્ષણસમ્પૂર્ણઃ કાન્તં રૂપમવાપ્સ્યસિ ॥ ૧૦૭.૬૧ ॥

૧૦૭.૬૨/૧બ્રહ્મોવાચ । તથેતિ ગાઙ્ગવચનાદ્ યથોક્તં તૌ ચ ચક્રતુઃ ।

૧૦૭.૬૨/૨સુરૂપતામુભૌ પ્રાપ્તૌ ગૌતમ્યાશ્ચ પ્રસાદતઃ ॥ ૧૦૭.૬૨॥

૧૦૭.૬૩/૧અભિષેકોદકં યચ્ચ સા નદી સમજાયત ।
૧૦૭.૬૩/૨તસ્યા નામ્ના તુ વિખ્યાતા વૃદ્ધાયા મુનિસત્તમ ॥ ૧૦૭.૬૩॥

૧૦૭.૬૪/૧વૃદ્ધા નદીતિ વિખ્યાતા ગૌતમોઽપિ તથોચ્યતે ।
૧૦૭.૬૪/૨વૃદ્ધગૌતમ ઇત્યુક્ત ઋષિભિઃ સમવાસિભિઃ ।
૧૦૭.૬૪/૩વૃદ્ધા તુ ગૌતમીં પ્રાહ ગઙ્ગાં પ્રત્યક્ષરૂપિણીમ્ ॥ ૧૦૭.૬૪॥

૧૦૭.૬૫/૧વૃદ્ધોવાચ । મન્નામ્નીયં નદી દેવિ વૃદ્ધા ચેત્યભિધીયતામ્ ।
૧૦૭.૬૫/૨ત્વયા ચ સંગમસ્તસ્યાસ્તસ્યાસ્તીર્થમનુત્તમમ્ ॥ ૧૦૭.૬૫॥

૧૦૭.૬૬/૧રૂપસૌભાગ્યસમ્પત્તિ+ ।પુત્રપૌત્રપ્રવર્ધનમ્ ।
૧૦૭.૬૬/૨આયુરારોગ્યકલ્યાણં જયપ્રીતિવિવર્ધનમ્ ।
૧૦૭.૬૬/૩સ્નાનદાનાદિહોમૈશ્ચ પિતૃણાં પાવનં પરમ્ ॥ ૧૦૭.૬૬॥

૧૦૭.૬૭/૧બ્રહ્મોવાચ । અસ્ત્વિત્યાહ ચ તાં ગઙ્ગા સુવૃદ્ધાં ગૌતમપ્રિયામ્ ।
૧૦૭.૬૭/૨ગૌતમસ્થાપિતં લિઙ્ગં વૃદ્ધાનામ્નૈવ કીર્તિતમ્ ॥ ૧૦૭.૬૭॥

૧૦૭.૬૮/૧તત્રૈવ ચ મુદં પ્રાપ્તો વૃદ્ધયા મુનિસત્તમઃ ।
૧૦૭.૬૮/૨તત્ર સ્નાનં ચ દાનં ચ સર્વાભીષ્ટપ્રદાયકમ્ ॥ ૧૦૭.૬૮॥

૧૦૭.૬૯/૧તતઃ પ્રભૃતિ તત્ તીર્થં વૃદ્ધાસંગમમુચ્યતે ॥ ૧૦૭.૬૯॥

૧૦૮.૧/૧બ્રહ્મોવાચ । ઇલાતીર્થમિતિ ખ્યાતં સર્વસિદ્ધિકરં નૃણામ્ ।
૧૦૮.૧/૨બ્રહ્મહત્યાદિપાપાનાં પાવનં સર્વકામદમ્ ॥ ૧૦૮.૧॥

૧૦૮.૨/૧વૈવસ્વતાન્વયે જાત ઇલો નામ જનેશ્વરઃ ।
૧૦૮.૨/૨મહત્યા સેનયા સાર્ધં જગામ મૃગયાવનમ્ ॥ ૧૦૮.૨॥

૧૦૮.૩/૧પરિબભ્રામ ગહનં બહુવ્યાલસમાકુલમ્ ।
૧૦૮.૩/૨નાનાકારદ્વિજયુતં વિટપૈઃ પરિશોભિતમ્ ॥ ૧૦૮.૩॥

૧૦૮.૪/૧વનેચરં નૃપશ્રેષ્ઠો મૃગયાગતમાનસઃ ।
૧૦૮.૪/૨તત્રૈવ મતિમાધત્ત ઇલોઽમાત્યાન્ અથાબ્રવીત્ ॥ ૧૦૮.૪॥

૧૦૮.૫/૧ઇલ ઉવાચ । ગચ્છન્તુ નગરં સર્વે મમ પુત્રેણ પાલિતમ્ ।
૧૦૮.૫/૨દેશં કોશં બલં રાજ્યં પાલયન્તુ પુનશ્ચ તમ્ ॥ ૧૦૮.૫॥

૧૦૮.૬/૧વસિષ્ઠોઽપિ તથા યાતુ આદાયાગ્નીન્ પિતેવ નઃ ।
૧૦૮.૬/૨પત્નીભિઃ સહિતો ધીમાન્ અરણ્યેઽહં વસામ્યથ ॥ ૧૦૮.૬॥

૧૦૮.૭/૧અરણ્યભોગભુગ્ભિશ્ચ વાજિવારણમાનુષૈઃ ।
૧૦૮.૭/૨મૃગયાશીલિભિઃ કૈશ્ચિદ્ યાન્તુ સર્વ ઇતઃ પુરીમ્ ॥ ૧૦૮.૭ ॥

૧૦૮.૮/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા યયુસ્તેઽપિ સ્વયં પ્રાયાચ્છનૈર્ગિરિમ્ ।
૧૦૮.૮/૨હિમવન્તં રત્નમયં વસંસ્તત્ર ઇલો નૃપઃ ॥ ૧૦૮.૮ ॥

૧૦૮.૯/૧દદર્શ કન્દરં તત્ર નાનારત્નવિચિત્રિતમ્ ।
૧૦૮.૯/૨તત્ર યક્ષેશ્વરઃ કશ્ચિત્ સમન્યુરિતિ વિશ્રુતઃ ॥ ૧૦૮.૯ ॥

૧૦૮.૧૦/૧તસ્ય ભાર્યા સમાનામ્ની ભર્તૃવ્રતપરાયણા ।
૧૦૮.૧૦/૨તસ્મિન્ વસત્યસૌ યક્ષો રમણીયે નગોત્તમે ॥ ૧૦૮.૧૦ ॥

૧૦૮.૧૧/૧મૃગરૂપેણ વ્યચરદ્ ભાર્યયા સ મહામતિઃ ।
૧૦૮.૧૧/૨સ્વેચ્છયા સ્વવને યક્ષઃ ક્રીડતે નૃત્યગીતકૈઃ ॥ ૧૦૮.૧૧ ॥

૧૦૮.૧૨/૧ઇત્થં સ યક્ષો જાનાતિ મૃગરૂપધરોઽપિ ચ ।
૧૦૮.૧૨/૨ઇલસ્તુ તં ન જાનાતિ કન્દરં યક્ષપાલિતમ્ ॥ ૧૦૮.૧૨ ॥

૧૦૮.૧૩/૧યક્ષસ્ય ગેહં વિપુલં નાનારત્નવિચિત્રિતમ્ ।
૧૦૮.૧૩/૨તત્રોપવિષ્ટો નૃપતિર્મહત્યા સેનયા વૃતઃ ॥ ૧૦૮.૧૩ ॥

૧૦૮.૧૪/૧વાસં ચક્રે સ તત્રૈવ ગેહે યક્ષસ્ય ધીમતઃ ।
૧૦૮.૧૪/૨સ યક્ષોઽધર્મકોપેન ભાર્યયા મૃગરૂપધૃક્ ॥ ૧૦૮.૧૪ ॥

૧૦૮.૧૫/૧ઇલં જેતું ન શક્નોમિ યાચિતો ન દદાતિ ચ ।
૧૦૮.૧૫/૨હૃતં ગેહં મમાનેન કિં કરોમીત્યચિન્તયત્ ॥ ૧૦૮.૧૫ ॥

૧૦૮.૧૬/૧યુધિ મત્તં કથં હન્યાં ચેતિ સ્થિત્વા સ યક્ષરાટ્ ।
૧૦૮.૧૬/૨આત્મીયાન્ પ્રેષયામાસ યક્ષાઞ્ શૂરાન્ ધનુર્ધરાન્ ॥ ૧૦૮.૧૬ ॥

૧૦૮.૧૭/૧યક્ષ ઉવાચ । યુદ્ધે જિત્વા ચ રાજાનમિલમુદ્ધતદન્તિનમ્ ।
૧૦૮.૧૭/૨ગૃહાદ્ યથાન્યતો યાતિ મમ તત્ કર્તુમર્હથ ॥ ૧૦૮.૧૭ ॥

૧૦૮.૧૮/૧બ્રહ્મોવાચ । યક્ષેશ્વરસ્ય તદ્ વાક્યાદ્ યક્ષાસ્તે યુદ્ધદુર્મદાઃ ।
૧૦૮.૧૮/૨ઇલં ગત્વાબ્રુવન્ સર્વે નિર્ગચ્છાસ્માદ્ ગુહાલયાત્ ॥ ૧૦૮.૧૮ ॥

૧૦૮.૧૯/૧ન ચેદ્ યુદ્ધાત્ પરિભ્રષ્ટઃ પલાય્ય ક્વ ગમિષ્યસિ ।
૧૦૮.૧૯/૨તદ્ યક્ષવચનાત્ કોપાદ્ યુદ્ધં ચક્રે સ રાજરાટ્ ॥ ૧૦૮.૧૯ ॥

૧૦૮.૨૦/૧જિત્વા યક્ષાન્ બહુવિધાન્ ઉવાસ દશ શર્વરીઃ ।

૧૦૮.૨૦/૨યક્ષેશ્વરો મૃગો ભૂત્વા ભાર્યયાપિ વને વસન્ ॥ ૧૦૮.૨૦॥

૧૦૮.૨૧/૧હૃતગેહો વનં પ્રાપ્તો હૃતભૃત્યઃ સ યક્ષિણીમ્ ।
૧૦૮.૨૧/૨પ્રાહ ચિન્તાપરો ભૂત્વા મૃગીરૂપધરાં પ્રિયામ્ ॥ ૧૦૮.૨૧॥

૧૦૮.૨૨/૧યક્ષ ઉવાચ । રાજાઽયં દુર્મનાઃ કાન્તે વ્યસનાસક્તમાનસઃ ।
૧૦૮.૨૨/૨કથમાયાતિ વિપદં તત્રોપાયો વિચિન્ત્યતામ્ ॥ ૧૦૮.૨૨॥

૧૦૮.૨૩/૧પાપર્દ્ધિવ્યસનાન્તાનિ રાજ્યાન્યખિલભૂભુજામ્ ।
૧૦૮.૨૩/૨પ્રાપયોમાવનં સુભ્રૂર્મૃગી ભૂત્વા મનોહરા ॥ ૧૦૮.૨૩॥

૧૦૮.૨૪/૧પ્રવિશેત્ તત્ર રાજાયં સ્ત્રી ભવિષ્યત્યસંશયમ્ ।
૧૦૮.૨૪/૨કરણીયં ત્વયા ભદ્રે ન ચૈતદ્ યુજ્યતે મમ ।
૧૦૮.૨૪/૩અહં તુ પુરુષો યેન ત્વં પુનઃ સ્ત્રી ચ યક્ષિણી ॥ ૧૦૮.૨૪॥

૧૦૮.૨૫/૧યક્ષિણ્યુવાચ । કથં ત્વયા ન ગન્તવ્યમુમાવનમનુત્તમમ્ ।
૧૦૮.૨૫/૨ગતેઽપિ ત્વયિ કો દોષસ્તન્ મે કથય તત્ત્વતઃ ॥ ૧૦૮.૨૫॥

૧૦૮.૨૬/૧યક્ષ ઉવાચ । હિમવત્પર્વતશ્રેષ્ઠ ઉમયા સહિતઃ શિવઃ ।
૧૦૮.૨૬/૨દેવૈર્ગણૈરનુવૃતો વિચચાર યથાસુખમ્ ।
૧૦૮.૨૬/૩પાર્વતી શંકરં પ્રાહ કદાચિદ્ રહસિ સ્થિતમ્ ॥ ૧૦૮.૨૬॥

૧૦૮.૨૭/૧પાર્વત્યુવાચ । સ્ત્રીણામેષ સ્વભાવોઽસ્તિ રતં ગોપાયિતં ભવેત્ ।
૧૦૮.૨૭/૨તસ્માન્ મે નિયતં દેશમાજ્ઞયા રક્ષિતં તવ ॥ ૧૦૮.૨૭॥

૧૦૮.૨૮/૧દેહિ મે ત્રિદશેશાન ઉમાવનમિતિ શ્રુતમ્ ।
૧૦૮.૨૮/૨વિના ત્વયા ગણેશેન કાર્ત્તિકેયેન નન્દિના ॥ ૧૦૮.૨૮॥

૧૦૮.૨૯/૧યસ્ત્વત્ર પ્રવિશેન્ નાથ સ્ત્રીત્વં તસ્ય ભવેદ્ ઇતિ ॥ ૧૦૮.૨૯॥

૧૦૮.૩૦/૧યક્ષ ઉવાચ । ઇત્યાજ્ઞોમાવને દત્તા પ્રસન્નેનેન્દુમૌલિના ।
૧૦૮.૩૦/૨કિં કરોમિ પુમાન્ કાન્તે ત્વયા પ્રણયનાર્દિતઃ ।
૧૦૮.૩૦/૩તસ્માન્ મયા ન ગન્તવ્યમુમાયા વનમુત્તમમ્ ॥ ૧૦૮.૩૦॥

૧૦૮.૩૧/૧બ્રહ્મોવાચ । તદ્ ભર્તૃવચનં શ્રુત્વા યક્ષિણી કામરૂપિણી ।
૧૦૮.૩૧/૨મૃગી ભૂત્વા વિશાલાક્ષી ઇલસ્ય પુરતોઽભવત્ ॥ ૧૦૮.૩૧॥

૧૦૮.૩૨/૧યક્ષસ્તુ સંસ્થિતસ્તત્ર દદર્શૈલો મૃગીં તદા ।
૧૦૮.૩૨/૨મૃગયાસક્તચિત્તો વૈ મૃગીં દૃષ્ટ્વા વિશેષતઃ ॥ ૧૦૮.૩૨॥

૧૦૮.૩૩/૧એક એવ હયારૂઢો નિર્યયૌ તાં મૃગીમનુ ।

૧૦૮.૩૩/૨સાકર્ષત શનૈસ્તં તુ રાજાનં મૃગયાકુલમ્ ॥ ૧૦૮.૩૩ ॥

૧૦૮.૩૪/૧શનૈર્જગામ સા તત્ર યદ્ ઉમાવનમુચ્યતે ।
૧૦૮.૩૪/૨અદૃશ્યા તુ મૃગી તસ્મૈ દર્શયન્તી ક્વચિત્ ક્વચિત્ ॥ ૧૦૮.૩૪ ॥

૧૦૮.૩૫/૧તિષ્ઠન્તી ચૈવ ગચ્છન્તી ધાવન્તી ચ વિભીતવત્ ।
૧૦૮.૩૫/૨હરિણી ચપલાક્ષી સા તમાકર્ષદ્ ઉમાવનમ્ ॥ ૧૦૮.૩૫ ॥

૧૦૮.૩૬/૧અનુપ્રાપ્તો હયારૂઢસ્તત્ પ્રાપ સ ઉમાવનમ્ ।
૧૦૮.૩૬/૨ઉમાવનં પ્રવિષ્ટં તં જ્ઞાત્વા સા યક્ષિણી તદા ॥ ૧૦૮.૩૬ ॥

૧૦૮.૩૭/૧મૃગીરૂપં પરિત્યજ્ય યક્ષિણી કામરૂપિણી ।
૧૦૮.૩૭/૨દિવ્યરૂપં સમાસ્થાય ચાશોકતરુસંનિધૌ ॥ ૧૦૮.૩૭ ॥

૧૦૮.૩૮/૧તચ્છાખાલમ્બિતકરા દિવ્યગન્ધાનુલેપના ।
૧૦૮.૩૮/૨દિવ્યરૂપધરા તન્વી કૃતકાર્યા સમા તદા ॥ ૧૦૮.૩૮ ॥

૧૦૮.૩૯/૧હસન્તી નૃપતિં પ્રેક્ષ્ય શ્રાન્તં હયગતં તદા ।
૧૦૮.૩૯/૨મૃગીમાલોકયન્તં તં ચપલાક્ષમિલં તદા ॥ ૧૦૮.૩૯ ॥

૧૦૮.૪૦/૧ભર્તૃવાક્યમશેષેણ સ્મરન્તી પ્રાહ ભૂમિપમ્ ॥ ૧૦૮.૪૦ ॥

૧૦૮.૪૧/૧સમોવાચ । હયારૂઢાબલા તન્વિ ક્વ એકૈવ તુ ગચ્છસિ ।
૧૦૮.૪૧/૨પુરુષસ્ય ચ વેષેણ ઇલે કમનુયાસ્યસિ ॥ ૧૦૮.૪૧ ॥

૧૦૮.૪૨/૧બ્રહ્મોવાચ । ઇલેતિ વચનં શ્રુત્વા રાજાસૌ ક્રોધમૂર્છિતઃ ।
૧૦૮.૪૨/૨યક્ષિણીં ભર્ત્સયિત્વાસૌ તામપૃચ્છન્ મૃગીં પુનઃ ॥ ૧૦૮.૪૨ ॥

૧૦૮.૪૩/૧તથાપિ યક્ષિણી પ્રાહ ઇલે કિમનુવીક્ષસે ।
૧૦૮.૪૩/૨ઇલેતિ વચનં શ્રુત્વા ધૃતચાપો હયસ્થિતઃ ॥ ૧૦૮.૪૩ ॥

૧૦૮.૪૪/૧કુપિતો દર્શયામાસ ત્રૈલોક્યવિજયી ધનુઃ ।
૧૦૮.૪૪/૨પુનઃ સા પ્રાહ નૃપતિં મહાત્માનમિલે સ્વયમ્ ॥ ૧૦૮.૪૪ ॥

૧૦૮.૪૫/૧પ્રેક્ષસ્વ પશ્ચાન્ માં બ્રૂહિ અસત્યાં સત્યવાદિનીમ્ ।
૧૦૮.૪૫/૨તદા ચાલોકયદ્ રાજા સ્તનૌ તુઙ્ગૌ ભુજાન્તરે ॥ ૧૦૮.૪૫ ॥

૧૦૮.૪૬/૧કિમિદં મમ સંજાતમિત્યેવં ચકિતોઽભવત્ ॥ ૧૦૮.૪૬ ॥

૧૦૮.૪૭/૧ઇલોવાચ । કિમિદં મમ સંજાતં જાનીતે ભવતી સ્ફુટમ્ ।
૧૦૮.૪૭/૨વદ સર્વં યથાતથ્યં ત્વં કા વા વદ સુવ્રતે ॥ ૧૦૮.૪૭ ॥

૧૦૮.૪૮/૧યક્ષિણ્યુવાચ । હિમવત્કન્દરશ્રેષ્ઠે સમન્ચુર્વસતે પતિઃ ।
૧૦૮.૪૮/૨યક્ષાણામધિપઃ શ્રીમાંસ્તદ્ભાર્યાહં તુ યક્ષિણી ॥ ૧૦૮.૪૮॥

૧૦૮.૪૯/૧યત્કન્દરે ભવાન્ રાજા તૂપવિષ્ટઃ સુશીતલે ।
૧૦૮.૪૯/૨યસ્ય યક્ષા હતા મોહાત્ ત્વયા હિ સંગરં વિના ॥ ૧૦૮.૪૯॥

૧૦૮.૫૦/૧તતોઽહં નિર્ગમાર્થં તે મૃગી ભૂત્વા ઉમાવનમ્ ।
૧૦૮.૫૦/૨પ્રવિષ્ટા ત્વં પ્રવિષ્ટોઽસિ પુરા પ્રાહ મહેશ્વરઃ ॥ ૧૦૮.૫૦॥

૧૦૮.૫૧/૧યસ્ત્વત્ર પ્રવિશેન્ મન્દઃ પુમાન્ સ્ત્રીત્વમવાપ્સ્યતિ ।
૧૦૮.૫૧/૨તસ્માત્ સ્ત્રીત્વમવાપ્તોઽસિ ન ત્વં દુઃખિતુમર્હસિ ।
૧૦૮.૫૧/૩પ્રૌઢોઽપિ કોઽત્ર જાનાતિ વિચિત્રભવિતવ્યતામ્ ॥ ૧૦૮.૫૧॥

૧૦૮.૫૨/૧બ્રહ્મોવાચ । યક્ષિણીવચનં શ્રુત્વા હયારૂઢસ્તદાપતત્ ।
૧૦૮.૫૨/૨તમાશ્વાસ્ય પુનઃ સૈવ યક્ષિણી વાક્યમબ્રવીત્ ॥ ૧૦૮.૫૨॥

૧૦૮.૫૩/૧યક્ષિણ્યુવાચ । સ્ત્રીત્વં જાતં જાતમેવ ન પુંસ્ત્વં કર્તુમર્હસિ ।
૧૦૮.૫૩/૨ગૃહાણ વિદ્યાં સ્ત્રીયોગ્યાં નૃત્યં ગીતમલંકૃતિમ્ ।
૧૦૮.૫૩/૩સ્ત્રીલાલિત્યં સ્ત્રીવિલાસં સ્ત્રીકૃત્યં સર્વમેવ તત્ ॥ ૧૦૮.૫૩॥

૧૦૮.૫૪/૧બ્રહ્મોવાચ । ઇલા સર્વમથાવાપ્ય યક્ષિણીં વાક્યમબ્રવીત્ ॥ ૧૦૮.૫૪॥

૧૦૮.૫૫/૧ઇલોવાચ । કો વા ભર્તા કિં તુ કૃત્યં પુનઃ પુંસ્ત્વં કથં ભવેત્ ।
૧૦૮.૫૫/૨એતદ્ વદસ્વ કલ્યાણી દુઃખાર્તાયા વિશેષતઃ ।
૧૦૮.૫૫/૩આર્તાનામાર્તિશમનાચ્છ્રેયો નાભ્યધિકં ક્વચિત્ ॥ ૧૦૮.૫૫॥

૧૦૮.૫૬/૧યક્ષિણ્યુવાચ । બુધઃ સોમસુતો નામ વનાદ્ અસ્માચ્ચ પૂર્વતઃ ।
૧૦૮.૫૬/૨આશ્રમસ્તસ્ય સુભગે પિતરં નિત્યમેષ્યતિ ॥ ૧૦૮.૫૬॥

૧૦૮.૫૭/૧અનેનૈવ પથા સોમં પિતરં સ બુધો ગ્રહઃ ।
૧૦૮.૫૭/૨દ્રષ્ટું યાતિ તતો નિત્યં નમસ્કર્તું તથૈવ ચ ॥ ૧૦૮.૫૭॥

૧૦૮.૫૮/૧યદા યાતિ બુધઃ શાન્તસ્તદાત્માનં ચ દર્શય ।
૧૦૮.૫૮/૨તં દૃષ્ટ્વા ત્વં તુ સુભગે સર્વકામાન્ અવાપ્સ્યસિ ॥ ૧૦૮.૫૮॥

૧૦૮.૫૯/૧બ્રહ્મોવાચ । તામાશ્વાસ્ય તતઃ સુભ્રૂર્યક્ષિણ્યન્તરધીયત ।
૧૦૮.૫૯/૨યક્ષિણી સા તમાચષ્ટ યક્ષોઽપિ સુખમાપ્તવાન્ ॥ ૧૦૮.૫૯॥

૧૦૮.૬૦/૧ઇલસૈન્યં ચ તત્રાસીત્ તદ્ ગતં ચ યથાસુખમ્ ।
૧૦૮.૬૦/૨ઉમાવનસ્થિતા ચેલા ગાયન્તી નૃત્યતી પુનઃ ॥ ૧૦૮.૬૦॥

૧૦૮.૬૧/૧સ્ત્રીભાવમનુચેષ્ટન્તી સ્મરન્તી કર્મણો ગતિમ્ ।
૧૦૮.૬૧/૨કદાચિત્ ક્રિયમાણે તુ ઇલયા નૃત્યકર્મણિ ॥ ૧૦૮.૬૧॥

૧૦૮.૬૨/૧તામપશ્યદ્ બુધો ધીમાન્ પિતરં ગન્તુમુદ્યતઃ ।
૧૦૮.૬૨/૨ઇલાં દૃષ્ટ્વા ગતિં ત્યક્ત્વા તામાગત્યાબ્રવીદ્ બુધઃ ॥ ૧૦૮.૬૨॥

૧૦૮.૬૩/૧બુધ ઉવાચ । ભાર્યા ભવ મમ સ્વસ્થા સર્વાભ્યસ્ત્વં
પ્રિયા ભવ ॥ ૧૦૮.૬૩॥

૧૦૮.૬૪/૧બ્રહ્મોવાચ । બુધવાક્યમિલા ભક્ત્યા ત્વભિનન્દ્ય તથાકરોત્ ।
૧૦૮.૬૪/૨સ્મૃત્વા ચ યક્ષિણીવાક્યં તતસ્તુષ્ટાભવન્ મુને ॥ ૧૦૮.૬૪॥

૧૦૮.૬૫/૧બુધો રેમે તયા પ્રીત્યા નીત્વા સ્વસ્થાનમુત્તમમ્ ।
૧૦૮.૬૫/૨સા ચાપિ સર્વભાવેન તોષયામાસ તં પતિમ્ ।
૧૦૮.૬૫/૩તતો બહુતિથે કાલે બુધસ્તુષ્ટોઽવદત્ પ્રિયામ્ ॥ ૧૦૮.૬૫॥

૧૦૮.૬૬/૧બુધ ઉવાચ । કિં તે દેયં મયા ભદ્રે પ્રિયં યન્ મનસિ
સ્થિતમ્ ॥ ૧૦૮.૬૬॥

૧૦૮.૬૭/૧બ્રહ્મોવાચ । તદ્વાક્યસમકાલં તુ પુત્રં દેહીત્યભાષત ।
૧૦૮.૬૭/૨ઇલા બુધં સોમસુતં પ્રીતિમન્તં પ્રિયં તથા ॥ ૧૦૮.૬૭॥

૧૦૮.૬૮/૧બુધ ઉવાચ । અમોઘમેતન્ મદ્વીર્યં તથા પ્રીતિસમુદ્ભવમ્ ।
૧૦૮.૬૮/૨પુત્રસ્તે ભવિતા તસ્માત્ ક્ષત્રિયો લોકવિશ્રુતઃ ॥ ૧૦૮.૬૮॥

૧૦૮.૬૯/૧સોમવંશકરઃ શ્રીમાન્ આદિત્ય ઇવ તેજસા ।
૧૦૮.૬૯/૨બુદ્ધ્યા બૃહસ્પતિસમઃ ક્ષમયા પૃથિવીસમઃ ॥ ૧૦૮.૬૯॥

૧૦૮.૭૦/૧વીર્યેણાજૌ હરિરિવ કોપેન હુતભુગ્ યથા ॥ ૧૦૮.૭૦॥

૧૦૮.૭૧/૧બ્રહ્મોવાચ । તસ્મિન્ન્ ઉત્પદ્યમાને તુ બુધપુત્રે મહાત્મનિ ।
૧૦૮.૭૧/૨જયશબ્દશ્ચ સર્વત્ર ત્વાસીચ્ચ સુરવેશ્મનિ ॥ ૧૦૮.૭૧॥

૧૦૮.૭૨/૧બુધપુત્રે સમુત્પન્ને તત્રાજગ્મુઃ સુરેશ્વરાઃ ।
૧૦૮.૭૨/૨અહમપ્યાગમં તત્ર મુદા યુક્તો મહામતે ॥ ૧૦૮.૭૨॥

૧૦૮.૭૩/૧જાતમાત્રઃ સુતો રાવમકરોત્ સ પૃથુસ્વરમ્ ।
૧૦૮.૭૩/૨તેન સર્વેઽપ્યવોચન્ વૈ સંગતા ઋષયઃ સુરાઃ ॥ ૧૦૮.૭૩॥

૧૦૮.૭૪/૧યસ્માત્ પુરુ રવોઽસ્યેતિ તસ્માદ્ એષ પુરૂરવાઃ ।
૧૦૮.૭૪/૨સ્યાદ્ ઇત્યેવં નામ ચક્રુઃ સર્વે સંતુષ્ટમાનસાઃ ॥ ૧૦૮.૭૪॥

૧૦૮.૭૫/૧બુધોઽપ્યધ્યાપયામાસ ક્ષાત્રવિદ્યાં સુતં શુભામ્ ।
૧૦૮.૭૫/૨ધનુર્વેદં સપ્રયોગં બુધઃ પ્રાદાત્ તદાત્મજે ॥ ૧૦૮.૭૫॥

૧૦૮.૭૬/૧સ શીઘ્રં વૃદ્ધિમગમચ્છુક્લપક્ષે યથા શશી ।
૧૦૮.૭૬/૨સ માતરં દુઃખયુતાં સમીક્ષ્યેલાં મહામતિઃ ।
૧૦૮.૭૬/૩નમસ્યાથ વિનીતાત્મા ઇલામૈલોઽબ્રવીદ્ ઇદમ્ ॥ ૧૦૮.૭૬॥

૧૦૮.૭૭/૧ઐલ ઉવાચ । બુધો માતર્મમ પિતા તવ ભર્તા પ્રિયસ્તથા ।
૧૦૮.૭૭/૨અહં ચ પુત્રઃ કર્મણ્યઃ કસ્માત્ તે માનસો જ્વરઃ ॥ ૧૦૮.૭૭॥

૧૦૮.૭૮/૧ઇલોવાચ । સત્યં પુત્ર બુધો ભર્તા ત્વં ચ પુત્રો ગુણાકરઃ ।
૧૦૮.૭૮/૨ભર્તૃપુત્રકૃતા ચિન્તા ન મમાસ્તિ કદાચન ॥ ૧૦૮.૭૮॥

૧૦૮.૭૯/૧તથાપિ પૂર્વજં કિંચિદ્ દુઃખં સ્મૃત્વા પુનઃ પુનઃ ।
૧૦૮.૭૯/૨ચિન્તયેયં મહાબુદ્ધે તતો માતરમબ્રવીત્ ॥ ૧૦૮.૭૯॥

૧૦૮.૮૦/૧ઐલ ઉવાચ । નિવેદયસ્વ મે માતસ્તદ્ એવ પ્રથમં મમ ॥ ૧૦૮.૮૦॥

૧૦૮.૮૧/૧બ્રહ્મોવાચ । ઇલા ચૈનમુવાચેદં રહોવાચ્યં કથં વદે ।
૧૦૮.૮૧/૨તથાપિ પુત્ર તે વચ્મિ પિત્રોઃ પુત્રો યતો ગતિઃ ।
૧૦૮.૮૧/૩મગ્નાનાં દુઃખપાથોબ્ધૌ પુત્રઃ પ્રવહણં પરમ્ ॥ ૧૦૮.૮૧॥

૧૦૮.૮૨/૧બ્રહ્મોવાચ । તન્ માતૃવચનં શ્રુત્વા વિનીતઃ પ્રાહ માતરમ્ ।
૧૦૮.૮૨/૨પાદયોઃ પતિતશ્ચાપિ વદ માતર્યથા તથા ॥ ૧૦૮.૮૨॥

૧૦૮.૮૩/૧બ્રહ્મોવાચ । સા પુરૂરવસં પ્રાહ ઇક્ષ્વાકૂણાં તથા કુલમ્ ।
૧૦૮.૮૩/૨તત્રોત્પત્તિં સ્વસ્ય નામ રાજ્યપ્રાપ્તિં પ્રિયાન્ સુતાન્ ॥ ૧૦૮.૮૩॥

૧૦૮.૮૪/૧પુરોધસં વસિષ્ઠં ચ પ્રિયાં ભાર્યાં સ્વકં પદમ્ ।
૧૦૮.૮૪/૨વનનિર્યાણમેવાથ અમાત્યાનાં પુરોધસઃ ॥ ૧૦૮.૮૪॥

૧૦૮.૮૫/૧પ્રેષણં ચ નગર્યાં તાં મૃગયાસક્તિમેવ ચ ।
૧૦૮.૮૫/૨હિમવત્કન્દરગતિં યક્ષેશ્વરગૃહે ગતિમ્ ॥ ૧૦૮.૮૫॥

૧૦૮.૮૬/૧ઉમાવનપ્રવેશં ચ સ્ત્રીત્વપ્રાપ્તિમશેષતઃ ।
૧૦૮.૮૬/૨મહેશ્વરાજ્ઞયા તત્ર ચાપ્રવેશં નરસ્ય તુ ॥ ૧૦૮.૮૬॥

૧૦૮.૮૭/૧યક્ષિણીવાક્યમપ્યસ્ય વરદાનં તથૈવ ચ ।
૧૦૮.૮૭/૨બુધપ્રાપ્તિં તથા પ્રીતિં પુત્રોત્પત્ત્યાદ્યશેષતઃ ॥ ૧૦૮.૮૭॥

૧૦૮.૮૮/૧કથયામાસ તત્ સર્વં શ્રુત્વા માતરમબ્રવીત્ ।
૧૦૮.૮૮/૨પુરૂરવાઃ કિં કરોમિ કિં કૃત્વા સુકૃતં ભવેત્ ॥ ૧૦૮.૮૮॥

૧૦૮.૮૯/૧એતાવતા તે તૃપ્તિશ્ચેદ્ અલમેતેન ચામ્બિકે ।
૧૦૮.૮૯/૨યદ્ અપ્યન્યન્ મનોવર્તિ તદ્ અપ્યાજ્ઞાપયસ્વ મે ॥ ૧૦૮.૮૯॥

૧૦૮.૯૦/૧ઇલોવાચ । ઇચ્છેયં પુંસ્ત્વમુત્કૃષ્ટમિચ્છેયં રાજ્યમુત્તમમ્ ।
૧૦૮.૯૦/૨અભિષેકં ચ પુત્રાણાં તવ ચાપિ વિશેષતઃ ॥ ૧૦૮.૯૦॥

૧૦૮.૯૧/૧દાનં દાતું ચ યષ્ટું ચ મુક્તિમાર્ગસ્ય વીક્ષણમ્ ।
૧૦૮.૯૧/૨સર્વં ચ કર્તુમિચ્છામિ તવ પુત્ર પ્રસાદતઃ ॥ ૧૦૮.૯૧॥

૧૦૮.૯૨/૧પુત્ર ઉવાચ । ઉપાયં ત્વા તુ પૃચ્છામિ યેન પુંસ્ત્વમવાપ્સ્યસિ ।
૧૦૮.૯૨/૨તપસો વાન્યતો વાપિ વદસ્વ મમ તત્ત્વતઃ ॥ ૧૦૮.૯૨॥

૧૦૮.૯૩/૧ઇલોવાચ । બુધં ત્વં પિતરં પૃચ્છ ગત્વા પુત્ર યથાર્થવત્ ।
૧૦૮.૯૩/૨સ તુ સર્વં તુ જાનાતિ ઉપદેક્ષ્યતિ તે હિતમ્ ॥ ૧૦૮.૯૩॥

૧૦૮.૯૪/૧બ્રહ્મોવાચ । તન્માતૃવચનાદ્ ઐલો ગત્વા પિતરમઞ્જસા ।
૧૦૮.૯૪/૨ઉવાચ પ્રણતો ભૂત્વા માતુઃ કૃત્યં તથાત્મનઃ ॥ ૧૦૮.૯૪॥

૧૦૮.૯૫/૧બુધ ઉવાચ । ઇલં જાને મહાપ્રાજ્ઞ ઇલાં જાતાં પુનસ્તથા ।
૧૦૮.૯૫/૨ઉમાવનપ્રવેશં ચ શમ્ભોરાજ્ઞાં તથૈવ ચ ॥ ૧૦૮.૯૫॥

૧૦૮.૯૬/૧તસ્માચ્છમ્ભુપ્રસાદેન ઉમાયાશ્ચ પ્રસાદતઃ ।
૧૦૮.૯૬/૨વિશાપો ભવિતા પુત્ર તાવારાધ્ય ન ચાન્યથા ॥ ૧૦૮.૯૬॥

૧૦૮.૯૭/૧પુરૂરવા ઉવાચ । પશ્યેયં તં કથં દેવં કથં
વા માતરં શિવામ્ ।
૧૦૮.૯૭/૨તીર્થાદ્ વા તપસો વાપિ તત્ પિતઃ પ્રથમં વદ ॥ ૧૦૮.૯૭॥

૧૦૮.૯૮/૧બુધ ઉવાચ । ગૌતમીં ગચ્છ પુત્ર ત્વં તત્રાસ્તે સર્વદા શિવઃ ।
૧૦૮.૯૮/૨ઉમયા સહિતઃ શ્રીમાઞ્ શાપહન્તા વરપ્રદઃ ॥ ૧૦૮.૯૮॥

૧૦૮.૯૯/૧બ્રહ્મોવાચ । પુરૂરવાઃ પિતુર્વાક્યં શ્રુત્વા તુ મુદિતોऽભવત્ ।
૧૦૮.૯૯/૨ગૌતમીં તપસે ધીમાન્ ગઙ્ગાં ત્રૈલોક્યપાવનીમ્ ॥ ૧૦૮.૯૯॥

૧૦૮.૧૦૦/૧પુંસ્ત્વમિચ્છંસ્તથા માતુર્જગામ તપસે ત્વરન્ ।
૧૦૮.૧૦૦/૨હિમવન્તં ગિરિં નત્વા માતરં પિતરં ગુરુમ્ ॥ ૧૦૮.૧૦૦॥

૧૦૮.૧૦૧/૧ગચ્છન્તમન્વગાત્ પુત્રમિલા સોમસુતસ્તથા ।

૧૦૮.૧૦૧/૨તે સર્વે ગૌતમીં પ્રાપ્તા હિમવત્પર્વતોત્તમાત્ ॥ ૧૦૮.૧૦૧॥

૧૦૮.૧૦૨/૧તત્ર સ્નાત્વા તપઃ કિંચિત્ કૃત્વા ચક્રુઃ સ્તુતિં પરામ્ ।
૧૦૮.૧૦૨/૨ભવસ્ય દેવદેવસ્ય સ્તુતિક્રમમિમં શ‍ૃણુ ॥ ૧૦૮.૧૦૨॥

૧૦૮.૧૦૩/૧બુધસ્તુષ્ટાવ પ્રથમમિલા ચ તદનન્તરમ્ ।
૧૦૮.૧૦૩/૨તતઃ પુરૂરવાઃ પુત્રો ગૌરીં દેવીં ચ શંકરમ્ ॥ ૧૦૮.૧૦૩॥

૧૦૮.૧૦૪/૧બુધ ઉવાચ । યૌ કુઙ્કુમેન સ્વશરીરજેન ।
૧૦૮.૧૦૪/૨સ્વભાવહેમપ્રતિમૌ સરૂપૌ ।
૧૦૮.૧૦૪/૩યાવર્ચિતૌ સ્કન્દગણેશ્વરાભ્યામ્ ।
૧૦૮.૧૦૪/૪તૌ મે શરણ્યૌ શરણં ભવેતામ્ ॥ ૧૦૮.૧૦૪॥

૧૦૮.૧૦૫/૧ઇલોવાચ । સંસારતાપત્રયદાવદગ્ધાઃ ।
૧૦૮.૧૦૫/૨શરીરિણો યૌ પરિચિન્તયન્તઃ ।
૧૦૮.૧૦૫/૩સદ્યઃ પરાં નિર્વૃતિમાપ્નુવન્તિ ।
૧૦૮.૧૦૫/૪તૌ શંકરૌ મે શરણં ભવેતામ્ ॥ ૧૦૮.૧૦૫॥

૧૦૮.૧૦૬/૧આર્તા હ્યહં પીડિતમાનસા તે ।
૧૦૮.૧૦૬/૨ક્લેશાદિગોપ્તા ન પરોઽસ્તિ કશ્ચિત્ ।
૧૦૮.૧૦૬/૩દેવ ત્વદીયૌ ચરણૌ સુપુણ્યૌ ।
૧૦૮.૧૦૬/૪તૌ મે શરણ્યૌ શરણં ભવેતામ્ ॥ ૧૦૮.૧૦૬॥

૧૦૮.૧૦૭/૧પુરૂરવા ઉવાચ । યયોઃ સકાશાદ્ ઇદમભ્યુદૈતિ ।
૧૦૮.૧૦૭/૨પ્રયાતિ ચાન્તે લયમેવ સર્વમ્ ।
૧૦૮.૧૦૭/૩જગચ્છરણ્યૌ જગદાત્મકૌ તુ ।
૧૦૮.૧૦૭/૪ગૌરીહરૌ મે શરણં ભવેતામ્ ॥ ૧૦૮.૧૦૭॥

૧૦૮.૧૦૮/૧યૌ દેવવૃન્દેષુ મહોત્સવે તુ ।
૧૦૮.૧૦૮/૨પાદૌ ગૃહાણેશ ગિરીશપુત્ર્યાઃ ।
૧૦૮.૧૦૮/૩પ્રોક્તં ધૃતૌ પ્રીતિવશાચ્છિવેન ।
૧૦૮.૧૦૮/૪તૌ મે શરણ્યૌ શરણં ભવેતામ્ ॥ ૧૦૮.૧૦૮॥

૧૦૮.૧૦૯/૧શ્રીદેવ્યુવાચ । કિમભીષ્ટં પ્રદાસ્યામિ યુષ્મભ્યં તદ્ વદન્તુ મે ।
૧૦૮.૧૦૯/૨કૃતકૃત્યાઃ સ્થ ભદ્રં વો દેવાનામપિ દુષ્કરમ્ ॥ ૧૦૮.૧૦૯॥

૧૦૮.૧૧૦/૧પુરૂરવા ઉવાચ । ઇલો રાજા તવાજ્ઞાત્વા વનં પ્રાવિશદ્ અમ્બિકે ।
૧૦૮.૧૧૦/૨તત્ ક્ષમસ્વ સુરેશાનિ પુંસ્ત્વં દાતું ત્વમર્હસિ ॥ ૧૦૮.૧૧૦॥

૧૦૮.૧૧૧/૧બ્રહ્મોવાચ । તથેત્યુવાચ તાન્ સર્વાન્ ભવસ્ય તુ મતે સ્થિતા ।
૧૦૮.૧૧૧/૨તતઃ સ ભગવાન્ આહ દેવીવાક્યરતઃ સદા ॥ ૧૦૮.૧૧૧॥

૧૦૮.૧૧૨/૧શિવ ઉવાચ । અત્રાભિષેકમાત્રેણ પુંસ્ત્વં પ્રાપ્નોત્વયં
નૃપઃ ॥ ૧૦૮.૧૧૨॥

૧૦૮.૧૧૩/૧બ્રહ્મોવાચ । સ્નાતાયા બુધભાર્યાયાઃ શરીરાદ્ વારિ સુસ્રુવે ।
૧૦૮.૧૧૩/૨નૃત્યં ગીતં ચ લાવણ્યં યક્ષિણ્યા યદ્ ઉપાર્જિતમ્ ॥ ૧૦૮.૧૧૩॥

૧૦૮.૧૧૪/૧તત્ સર્વં વારિધારાભિર્ગઙ્ગામ્ભસિ સમાવિશત્ ।
૧૦૮.૧૧૪/૨નૃત્યા ગીતા ચ સૌભાગ્યા ઇમા નદ્યો બભૂવિરે ॥ ૧૦૮.૧૧૪॥

૧૦૮.૧૧૫/૧તાશ્ચાપિ સંગતા ગઙ્ગાં તે પુણ્યાઃ સંગમાસ્ત્રયઃ ।
૧૦૮.૧૧૫/૨તેષુ સ્નાનં ચ દાનં ચ સુરરાજ્યફલપ્રદમ્ ॥ ૧૦૮.૧૧૫॥

૧૦૮.૧૧૬/૧ઇલા પુંસ્ત્વમવાપ્યાથ ગૌરીશમ્ભોઃ પ્રસાદતઃ ।
૧૦૮.૧૧૬/૨મહાભ્યુદયસિદ્ધ્યર્થં વાજિમેધમથાકરોત્ ॥ ૧૦૮.૧૧૬॥

૧૦૮.૧૧૭/૧પુરોધસં વસિષ્ઠં ચ ભાર્યાં પુત્રાંસ્તથૈવ ચ ।
૧૦૮.૧૧૭/૨અમાત્યાંશ્ચ બલં કોશમાનીય સ નૃપોત્તમઃ ॥ ૧૦૮.૧૧૭॥

૧૦૮.૧૧૮/૧ચતુરઙ્ગં બલં રાજ્યં દણ્ડકેઽસ્થાપયત્ તદા ।
૧૦૮.૧૧૮/૨ઇલસ્ય નામ્ના વિખ્યાતં તત્ર તત્ પુરમુચ્યતે ॥ ૧૦૮.૧૧૮॥

૧૦૮.૧૧૯/૧પૂર્વજાતાન્ અથો પુત્રાન્ સૂર્યવંશક્રમાગતે ।
૧૦૮.૧૧૯/૨રાજ્યેઽભિષિચ્ય પશ્ચાત્ તમૈલં સ્નેહાદ્ અસિઞ્ચયત્ ॥ ૧૦૮.૧૧૯॥

૧૦૮.૧૨૦/૧સોમવંશકરઃ શ્રીમાન્ અયં રાજા ભવેદ્ ઇતિ ।
૧૦૮.૧૨૦/૨સર્વેભ્યો મતિમાનેભ્યો જ્યેષ્ઠઃ શ્રેષ્ઠોઽભવન્ મુને ॥ ૧૦૮.૧૨૦॥

૧૦૮.૧૨૧/૧યત્ર ચ ક્રતવો વૃત્તા ઇલસ્ય નૃપતેઃ શુભાઃ ।
૧૦૮.૧૨૧/૨યત્ર પુંસ્ત્વમવાપ્યાથ યત્ર પુત્રાઃ સમાગતાઃ ॥ ૧૦૮.૧૨૧॥

૧૦૮.૧૨૨/૧યક્ષિણીદત્તનૃત્યાદિ+ ।ગીતસૌભાગ્યમઙ્ગલાઃ ।
૧૦૮.૧૨૨/૨નદ્યો ભૂત્વા યત્ર ગઙ્ગાં સંગતાસ્તાનિ નારદ ॥ ૧૦૮.૧૨૨॥

૧૦૮.૧૨૩/૧તીર્થાનિ શુભદાન્યાસન્ સહસ્રાણ્યથ ષોડશ ।
૧૦૮.૧૨૩/૨ઉભયોસ્તીરયોસ્તાત તત્ર શમ્ભુરિલેશ્વરઃ ।
૧૦૮.૧૨૩/૩તેષુ સ્નાનં ચ દાનં ચ સર્વક્રતુફલપ્રદમ્ ॥ ૧૦૮.૧૨૩॥

૧૦૯.૧/૧બ્રહ્મોવાચ । ચક્રતીર્થમિતિ ખ્યાતં બ્રહ્મહત્યાદિનાશનમ્ ।

૧૦૯.૧/૨યત્ર ચક્રેશ્વરો દેવશ્ચક્રમાપ યતો હરિઃ ॥ ૧૦૯.૧॥

૧૦૯.૨/૧યત્ર વિષ્ણુઃ સ્વયં સ્થિત્વા ચક્રાર્થં શંકરં પ્રભુઃ ।
૧૦૯.૨/૨પૂજયામાસ તત્ તીર્થં ચક્રતીર્થમુદાહૃતમ્ ॥ ૧૦૯.૨॥

૧૦૯.૩/૧યસ્ય શ્રવણમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ।
૧૦૯.૩/૨દક્ષક્રતૌ પ્રવૃત્તે તુ દેવાનાં ચ સમાગમે ॥ ૧૦૯.૩॥

૧૦૯.૪/૧દક્ષેણ દૂષિતે દેવે શિવે શર્વે મહેશ્વરે ।
૧૦૯.૪/૨અનાહ્વાને સુરેશસ્ય દક્ષચિત્તે મલીમસે ॥ ૧૦૯.૪॥

૧૦૯.૫/૧દાક્ષાયણ્યા શ્રુતે વાક્યે અનાહ્વાનસ્ય કારણે ।
૧૦૯.૫/૨અહલ્યાયાં ચોક્તવત્યાં કુપિતાભૂત્ સુરેશ્વરી ॥ ૧૦૯.૫॥

૧૦૯.૬/૧પિતરં નાશયે પાપં ક્ષમેયં ન કથંચન ।
૧૦૯.૬/૨શ ૃણ્વતી દોષવાક્યાનિ પિત્રા ચોક્તાનિ ભર્તરિ ॥ ૧૦૯.૬॥

૧૦૯.૭/૧પત્યુઃ શ ૃણ્વન્તિ યા નિન્દાં તાસાં પાપાવધિઃ કુતઃ ।
૧૦૯.૭/૨યાદૃશસ્તાદૃશો વાપિ પતિઃ સ્ત્રીણાં પરા ગતિઃ ॥ ૧૦૯.૭॥

૧૦૯.૮/૧કિં પુનઃ સકલાધીશો મહાદેવો જગદ્ગુરુઃ ।
૧૦૯.૮/૨શ્રુતં તન્નિન્દનં તર્હિ ધારયામિ ન દેહકમ્ ॥ ૧૦૯.૮॥

૧૦૯.૯/૧તસ્માત્ ત્યક્ષ્ય ઇમં દેહમિત્યુક્ત્વા સા મહાસતી ।
૧૦૯.૯/૨કોપેન મહતાવિષ્ટા પ્રજજ્વાલ સુરેશ્વરી ॥ ૧૦૯.૯॥

૧૦૯.૧૦/૧શિવૈકચેતના દેહં બલાદ્ યોગાચ્ચ તત્યજે ।
૧૦૯.૧૦/૨મહેશ્વરોઽપિ સકલં વૃત્તમાકર્ણ્ય નારદાત્ ॥ ૧૦૯.૧૦॥

૧૦૯.૧૧/૧દૃષ્ટ્વા ચુકોપ પપ્રચ્છ જયાં ચ વિજયાં તથા ।
૧૦૯.૧૧/૨તે ઊચતુરુભે દેવં દક્ષક્રતુવિનાશનમ્ ॥ ૧૦૯.૧૧॥

૧૦૯.૧૨/૧દાક્ષાયણ્યા ઇતિ શ્રુત્વા મખં પ્રાયાન્ મહેશ્વરઃ ।
૧૦૯.૧૨/૨ભીમૈર્ગણૈઃ પરિવૃતો ભૂતનાથૈઃ સમં યયૌ ॥ ૧૦૯.૧૨॥

૧૦૯.૧૩/૧મખસ્તૈર્વેષ્ટિતઃ સર્વો દેવબ્રહ્મપુરસ્કૃતઃ ।
૧૦૯.૧૩/૨દક્ષેણ યજમાનેન શુદ્ધભાવેન રક્ષિતઃ ॥ ૧૦૯.૧૩॥

૧૦૯.૧૪/૧વસિષ્ઠાદિભિરત્યુગ્રૈર્મુનિભિઃ પરિવારિતઃ ।
૧૦૯.૧૪/૨ઇન્દ્રાદિત્યાદ્યૈર્વસુભિઃ સર્વતઃપરિપાલિતઃ ॥ ૧૦૯.૧૪॥

૧૦૯.૧૫/૧ઋગ્યજુઃસામવેદૈશ્ચ સ્વાહાશબ્દૈરલંકૃતઃ ।
૧૦૯.૧૫/૨શ્રદ્ધા પુષ્ટિસ્તથા તુષ્ટિઃ શાન્તિર્લજ્જા સરસ્વતી ॥ ૧૦૯.૧૫॥

૧૦૯.૧૬/૧ભૂમિર્દ્યૌઃ શર્વરી ક્ષાન્તિરુષા આશા જયા મતિઃ ।
૧૦૯.૧૬/૨એતાભિશ્ચ તથાન્યાભિઃ સર્વતઃ સમલંકૃતઃ ॥ ૧૦૯.૧૬॥

૧૦૯.૧૭/૧ત્વષ્ટ્રા મહાત્મના ચાપિ કારિતો વિશ્વકર્મણા ।
૧૦૯.૧૭/૨સુરભિર્નન્દિની ધેનુઃ કામધુક્ કામદોહિની ॥ ૧૦૯.૧૭॥

૧૦૯.૧૮/૧એતાભિઃ કામવર્ષાભિઃ સર્વકામસમૃદ્ધિમાન્ ।
૧૦૯.૧૮/૨કલ્પવૃક્ષઃ પારિજાતો લતાઃ કલ્પલતાદિકાઃ ॥ ૧૦૯.૧૮॥

૧૦૯.૧૯/૧યદ્ યદ્ ઇષ્ટતમં કિંચિત્ તત્ર તસ્મિન્ મખે સ્થિતમ્ ।
૧૦૯.૧૯/૨સ્વયં મઘવતા પૂષ્ણા હરિણા પરિરક્ષિતઃ ॥ ૧૦૯.૧૯॥

૧૦૯.૨૦/૧દીયતાં ભુજ્યતાં વાપિ ક્રિયતાં સ્થીયતાં સુખમ્ ।
૧૦૯.૨૦/૨એતૈશ્ચ સર્વતો વાક્યૈર્દક્ષસ્ય પૂજિતં મખમ્ ॥ ૧૦૯.૨૦॥

૧૦૯.૨૧/૧આદૌ તુ વીરભદ્રોઽસૌ ભદ્રકાલ્યા યુતો યયૌ ।
૧૦૯.૨૧/૨શોકકોપપરીતાત્મા પશ્ચાચ્છૂલપિનાકધૃક્ ॥ ૧૦૯.૨૧॥

૧૦૯.૨૨/૧અભ્યાયયૌ મહાદેવો મહાભૂતૈરલંકૃતઃ ।
૧૦૯.૨૨/૨તાનિ ભૂતાનિ પરિતો મખે વેષ્ટ્ય મહેશ્વરમ્ ॥ ૧૦૯.૨૨॥

૧૦૯.૨૩/૧ક્રતું વિધ્વંસયામાસુસ્તત્ર ક્ષોભો મહાન્ અભૂત્ ।
૧૦૯.૨૩/૨પલાયન્ત તતઃ કેચિત્ કેચિદ્ ગત્વા તતઃ શિવમ્ ॥ ૧૦૯.૨૩॥

૧૦૯.૨૪/૧કેચિત્ સ્તુવન્તિ દેવેશં કેચિત્ કુપ્યન્તિ શંકરમ્ ।
૧૦૯.૨૪/૨એવં વિધ્વંસિતં યજ્ઞં દૃષ્ટ્વા પૂષા સમભ્યગાત્ ॥ ૧૦૯.૨૪॥

૧૦૯.૨૫/૧પૂષ્ણો દન્તાન્ અથોત્પાટ્ય ઇન્દ્રં વ્યદ્રાવયત્ ક્ષણાત્ ।
૧૦૯.૨૫/૨ભગસ્ય ચક્ષુષી વિપ્ર વીરભદ્રો વ્યપાટયત્ ॥ ૧૦૯.૨૫॥

૧૦૯.૨૬/૧દિવાકરં પુનર્દોર્ભ્યાં પરિભ્રામ્ય સમાક્ષિપત્ ।
૧૦૯.૨૬/૨તતઃ સુરગણાઃ સર્વે વિષ્ણું તે શરણં યયુઃ ॥ ૧૦૯.૨૬॥

૧૦૯.૨૭/૧દેવા ઊચુઃ । ત્રાહિ ત્રાહિ ગદાપાણે ભૂતનાથકૃતાદ્ ભયાત્ ।
૧૦૯.૨૭/૨મહેશ્વરગણઃ કશ્ચિત્ પ્રમથાનાં તુ નાયકઃ ।
૧૦૯.૨૭/૩તેન દગ્ધો મખઃ સર્વો વૈષ્ણવઃ પશ્યતો હરેઃ ॥ ૧૦૯.૨૭॥

૧૦૯.૨૮/૧બ્રહ્મોવાચ । હરિણા ચક્રમુત્સૃષ્ટં ભૂતનાથવધં પ્રતિ ।

૧૦૯.૨૮/૨ભૂતનાથોઽપિ તચ્ચક્રમાપતચ્ચ તદાગ્રસત્ ॥ ૧૦૯.૨૮॥

૧૦૯.૨૯/૧ગ્રસ્તે ચક્રે તતો વિષ્ણોર્લોકપાલા ભયાદ્ યયુઃ ।
૧૦૯.૨૯/૨તથા સ્થિતાન્ અવેક્ષ્યાથ દક્ષો યજ્ઞં સુરાન્ અપિ ।
૧૦૯.૨૯/૩તુષ્ટાવ શંકરં દેવં દક્ષો ભક્ત્યા પ્રજાપતિઃ ॥ ૧૦૯.૨૯॥

૧૦૯.૩૦/૧દક્ષ ઉવાચ । જય શંકર સોમેશ જય સર્વજ્ઞ શમ્ભવે ।
૧૦૯.૩૦/૨જય કલ્યાણભૃચ્છમ્ભો જય કાલાત્મને નમઃ ॥ ૧૦૯.૩૦॥

૧૦૯.૩૧/૧આદિકર્તર્નમસ્તેઽસ્તુ નીલકણ્ઠ નમોઽસ્તુ તે ।
૧૦૯.૩૧/૨બ્રહ્મપ્રિય નમસ્તેઽસ્તુ બ્રહ્મરૂપ નમોઽસ્તુ તે ॥ ૧૦૯.૩૧॥

૧૦૯.૩૨/૧ત્રિમૂર્તયે નમો દેવ ત્રિધામ પરમેશ્વર ।
૧૦૯.૩૨/૨સર્વમૂર્તે નમસ્તેઽસ્તુ ત્રૈલોક્યાધાર કામદ ॥ ૧૦૯.૩૨॥

૧૦૯.૩૩/૧નમો વેદાન્તવેદ્યાય નમસ્તે પરમાત્મને ।
૧૦૯.૩૩/૨યજ્ઞરૂપ નમસ્તેઽસ્તુ યજ્ઞધામ નમોઽસ્તુ તે ॥ ૧૦૯.૩૩॥

૧૦૯.૩૪/૧યજ્ઞદાન નમસ્તેઽસ્તુ હવ્યવાહ નમોઽસ્તુ તે ।
૧૦૯.૩૪/૨યજ્ઞહર્ત્રે નમસ્તેઽસ્તુ ફલદાય નમોઽસ્તુ તે ॥ ૧૦૯.૩૪॥

૧૦૯.૩૫/૧ત્રાહિ ત્રાહિ જગન્નાથ શરણાગતવત્સલ ।
૧૦૯.૩૫/૨ભક્તાનામપ્યભક્તાનાં ત્વમેવ શરણં પ્રભો ॥ ૧૦૯.૩૫॥

૧૦૯.૩૬/૧બ્રહ્મોવાચ । એવં તુ સ્તુવતસ્તસ્ય પ્રસન્નોઽભૂન્ મહેશ્વરઃ ।
૧૦૯.૩૬/૨કિં દદામીતિ તં પ્રાહ ક્રતુઃ પૂર્ણોઽસ્તુ મે પ્રભો ॥ ૧૦૯.૩૬॥

૧૦૯.૩૭/૧તથેત્યુવાચ ભગવાન્ દેવદેવો મહેશ્વરઃ ।
૧૦૯.૩૭/૨શંકરઃ સર્વભૂતાત્મા કરુણાવરુણાલયઃ ॥ ૧૦૯.૩૭॥

૧૦૯.૩૮/૧ક્રતું કૃત્વા તતઃ પૂર્ણં તસ્ય દક્ષસ્ય વૈ મુને ।
૧૦૯.૩૮/૨એવમુક્ત્વા સ ભગવાન્ ભૂતૈરન્તરધીયત ॥ ૧૦૯.૩૮॥

૧૦૯.૩૯/૧યથાગતં સુરા જગ્મુઃ સ્વમેવ સદનં પ્રતિ ।
૧૦૯.૩૯/૨તતઃ કદાચિદ્ દેવાનાં દૈત્યાનાં વિગ્રહો મહાન્ ॥ ૧૦૯.૩૯॥

૧૦૯.૪૦/૧બભૂવ તત્ર દૈત્યેભ્યો ભીતા દેવાઃ શ્રિયઃ પતિમ્ ।
૧૦૯.૪૦/૨તુષ્ટુવુઃ સર્વભાવેન વચોભિસ્તં જનાર્દનમ્ ॥ ૧૦૯.૪૦॥

૧૦૯.૪૧/૧દેવા ઊચુઃ । શક્રાદયોઽપિ ત્રિદશાઃ કટાક્ષમ્ ।
૧૦૯.૪૧/૨અવેક્ષ્ય યસ્યાસ્તપ આચરન્તિ ।

૧૦૯.૪૧/૩સા ચાપિ યત્પાદરતા ચ લક્ષ્મીસ્- ।
૧૦૯.૪૧/૪તં બ્રહ્મભૂતં શરણં પ્રપદ્યે ॥ ૧૦૯.૪૧॥

૧૦૯.૪૨/૧યસ્માત્ ત્રિલોક્યાં ન પરઃ સમાનો ।
૧૦૯.૪૨/૨ન ચાધિકસ્તાર્ક્ષ્યરથાન્ નૃસિંહાત્ ।
૧૦૯.૪૨/૩સ દેવદેવોઽવતુ નઃ સમસ્તાન્ ।
૧૦૯.૪૨/૪મહાભયેભ્યઃ કૃપયા પ્રપન્નાન્ ॥ ૧૦૯.૪૨॥

૧૦૯.૪૩/૧બ્રહ્મોવાચ । તતઃ પ્રસન્નો ભગવાઞ્ શઙ્ખચક્રગદાધરઃ ।
૧૦૯.૪૩/૨કિમર્થમાગતાઃ સર્વે તત્કર્તાસ્મીત્યુવાચ તાન્ ॥ ૧૦૯.૪૩॥

૧૦૯.૪૪/૧દેવા ઊચુઃ । ભયં ચ તીવ્રં દૈત્યેભ્યો દેવાનાં મધુસૂદન ।
૧૦૯.૪૪/૨તતસ્ત્રાણાય દેવાનાં મતિં કુરુ જનાર્દન ॥ ૧૦૯.૪૪॥

૧૦૯.૪૬/૧બ્રહ્મોવાચ । તાન્ આગતાન્ હરિઃ પ્રાહ ગ્રસ્તં ચક્રં હરેણ મે ।
૧૦૯.૪૬/૨કિં કરોમિ ગતં ચક્રં ભવન્તશ્ચાર્તિમાગતાઃ ।
૧૦૯.૪૬/૩યાન્તુ સર્વે દેવગણા રક્ષા વઃ ક્રિયતે મયા ॥ ૧૦૯.૪૬॥

૧૦૯.૪૭/૧બ્રહ્મોવાચ । તતો ગતેષુ દેવેષુ વિષ્ણુશ્ચક્રાર્થમુદ્યતઃ ।
૧૦૯.૪૭/૨ગોદાવરીં તતો ગત્વા શમ્ભોઃ પૂજાં પ્રચક્રમે ॥ ૧૦૯.૪૭॥

૧૦૯.૪૮/૧સુવર્ણકમલૈર્દિવ્યૈઃ સુગન્ધૈર્દશભિઃ શતૈઃ ।
૧૦૯.૪૮/૨ભક્તિતો નિત્યવત્ પૂજાં ચક્રે વિષ્ણુરુમાપતેઃ ॥ ૧૦૯.૪૮॥

૧૦૯.૪૯/૧એવં સમ્પૂજ્યમાને તુ તયોસ્તત્ત્વમિદં શ◌ૃણુ ।
૧૦૯.૪૯/૨કમલાનાં સહસ્રે તુ યદેકં નૈવ પૂર્યતે ॥ ૧૦૯.૪૯॥

૧૦૯.૫૦/૧તદાસુરારિઃ સ્વં નેત્રમુત્પાટ્યાર્ઘ્યમકલ્પયત્ ।
૧૦૯.૫૦/૨અર્ઘ્યપાત્રં કરે ગૃહ્ય સહસ્રકમલાન્વિતમ્ ।
૧૦૯.૫૦/૩ધ્યાત્વા શમ્ભું દદાવર્ઘ્યમનન્યશરણો હરિઃ ॥ ૧૦૯.૫૦॥

૧૦૯.૫૧/૧વિષ્ણુરુવાચ । ત્વમેવ દેવ જાનીષે ભાવમન્તર્ગતં નૃણામ્ ।
૧૦૯.૫૧/૨ત્વમેવ શરણોઽધીશોઽત્ર કા ભવેદ્ વિચારણા ॥ ૧૦૯.૫૧॥

૧૦૯.૫૨/૧બ્રહ્મોવાચ । વદન્ન્ ઉદશ્રુનયનો નિલિલ્યેઽસાવિતીશ્વરે ।
૧૦૯.૫૨/૨ભવાનીસહિતઃ શમ્ભુઃ પુરસ્તાદ્ અભવત્ તદા ॥ ૧૦૯.૫૨॥

૧૦૯.૫૩/૧ગાઢમાલિઙ્ગ્ય વિવિધૈર્વરૈરાપૂરયદ્ ધરિમ્ ।
૧૦૯.૫૩/૨તદ્ એવ ચક્રમભવન્ નેત્રં ચાપિ યથા પુરા ॥ ૧૦૯.૫૩॥

૧૦૯.૫૪/૧તતઃ સુરગણાઃ સર્વે તુષ્ટુવુર્હરિશંકરૌ ।
૧૦૯.૫૪/૨ગઙ્ગાં ચાપિ સરિચ્છ્રેષ્ઠાં દેવં ચ વૃષભધ્વજમ્ ॥ ૧૦૯.૫૪॥

૧૦૯.૫૫/૧તતઃ પ્રભૃતિ તત્ તીર્થં ચક્રતીર્થમિતિ સ્મૃતમ્ ।
૧૦૯.૫૫/૨યસ્યાનુશ્રવણેનૈવ મુચ્યતે સર્વકિલ્બિષૈઃ ॥ ૧૦૯.૫૫॥

૧૦૯.૫૬/૧તત્ર સ્નાનં ચ દાનં ચ યઃ કુર્યાત્ પિતૃતર્પણમ્ ।
૧૦૯.૫૬/૨સર્વપાપવિનિર્મુક્તઃ પિતૃભિઃ સ્વર્ગભાગ્ ભવેત્ ।
૧૦૯.૫૬/૩તત્ તુ ચક્રાઙ્કિતં તીર્થમદ્યાપિ પરિદૃશ્યતે ॥ ૧૦૯.૫૬॥

૧૧૦.૧/૧બ્રહ્મોવાચ । પિપ્પલં તીર્થમાખ્યાતં ચક્રતીર્થાદ્ અનન્તરમ્ ।
૧૧૦.૧/૨યત્ર ચક્રેશ્વરો દેવશ્ચક્રમાપ યતો હરિઃ ॥ ૧૧૦.૧॥

૧૧૦.૨/૧યત્ર વિષ્ણુઃ સ્વયં સ્થિત્વા ચક્રાર્થં શંકરં વિભુમ્ ।
૧૧૦.૨/૨પૂજયામાસ તત્ તીર્થં ચક્રતીર્થમુદાહૃતમ્ ॥ ૧૧૦.૨॥

૧૧૦.૩/૧યત્ર પ્રીતોઽભવદ્ વિષ્ણોઃ શમ્ભુસ્તત્ પિપ્પલં વિદુઃ ।
૧૧૦.૩/૨મહિમાનં યસ્ય વક્તું ન ક્ષમોઽપ્યહિનાયકઃ ॥ ૧૧૦.૩॥

૧૧૦.૪/૧ચક્રેશ્વરો પિપ્પલેશો નામધેયસ્ય કારણમ્ ।
૧૧૦.૪/૨શ઼ૃણુ નારદ તદ્ ભક્ત્યા સાક્ષાદ્ વેદોદિતં મયા ॥ ૧૧૦.૪॥

૧૧૦.૫/૧દધીચિરિતિ વિખ્યાતો મુનિરાસીદ્ ગુણાન્વિતઃ ।
૧૧૦.૫/૨તસ્ય ભાર્યા મહાપ્રાજ્ઞા કુલીના ચ પતિવ્રતા ॥ ૧૧૦.૫॥

૧૧૦.૬/૧લોપામુદ્રેતિ યા ખ્યાતા સ્વસા તસ્યા ગભસ્તિની ।
૧૧૦.૬/૨ઇતિ નામ્ના ચ વિખ્યાતા વડવેતિ પ્રકીર્તિતા ॥ ૧૧૦.૬॥

૧૧૦.૭/૧દધીચેઃ સા પ્રિયા નિત્યં તપસ્તેપે તયા મહત્ ।
૧૧૦.૭/૨દધીચિરગ્નિમાન્ નિત્યં ગૃહધર્મપરાયણઃ ॥ ૧૧૦.૭॥

૧૧૦.૮/૧ભાગીરથીં સમાશ્રિત્ય દેવાતિથિપરાયણઃ ।
૧૧૦.૮/૨સ્વકલત્રરતઃ શાન્તઃ કુમ્ભયોનિરિવાપરઃ ॥ ૧૧૦.૮॥

૧૧૦.૯/૧તસ્ય પ્રભાવાત્ તં દેશં નારયો દૈત્યદાનવાઃ ।
૧૧૦.૯/૨આજગ્મુર્મુનિશાર્દૂલ યત્રાગસ્ત્યસ્ય ચાશ્રમઃ ॥ ૧૧૦.૯॥

૧૧૦.૧૦/૧તત્ર દેવાઃ સમાજગ્મૂ રુદ્રાદિત્યાસ્તથાશ્વિનૌ ।
૧૧૦.૧૦/૨ઇન્દ્રો વિષ્ણુર્યમોઽગ્નિશ્ચ જિત્વા દૈત્યાન્ ઉપાગતાન્ ॥ ૧૧૦.૧૦॥

૧૧૦.૧૧/૧જયેન જાતસંહર્ષાઃ સ્તુતાશ્ચૈવ મરુદ્ગણૈઃ ।

૧૧૦.૧૧/૨દધીચિં મુનિશાર્દૂલં દૃષ્ટ્વા નેમુઃ સુરેશ્વરાઃ ॥ ૧૧૦.૧૧॥

૧૧૦.૧૨/૧દધીચિર્જાતસંહર્ષઃ સુરાન્ પૂજ્ય પૃથક્ પૃથક્ ।
૧૧૦.૧૨/૨ગૃહકૃત્યં તતશ્ચક્રે સુરેભ્યો ભાર્યયા સહ ॥ ૧૧૦.૧૨॥

૧૧૦.૧૩/૧પૃષ્ટાશ્ચ કુશલં તેન કથાશ્ચક્રુઃ સુરા અપિ ।
૧૧૦.૧૩/૨દધીચિમબ્રુવન્ દેવા ભાર્યયા સુખિતં પુનઃ ॥ ૧૧૦.૧૩॥

૧૧૦.૧૪/૧આસીનં હૃષ્ટમનસ ઋષિં નત્વા પુનઃ પુનઃ ॥ ૧૧૦.૧૪॥

૧૧૦.૧૫/૧દેવા ઊચુઃ । કિમદ્ય દુર્લભં લોકે ઋષેઽસ્માકં ભવિષ્યતિ ।
૧૧૦.૧૫/૨ત્વાદૃશઃ સકૃપો યેષુ મુનિર્ભૂકલ્પપાદપઃ ॥ ૧૧૦.૧૫॥

૧૧૦.૧૬/૧એતદ્ એવ ફલં પુંસાં જીવતાં મુનિસત્તમ ।
૧૧૦.૧૬/૨તીર્થાપ્લુતિર્ભૂતદયા દર્શનં ચ ભવાદૃશામ્ ॥ ૧૧૦.૧૬॥

૧૧૦.૧૭/૧યત્ સ્નેહાદ્ ઉચ્યતેઽસ્માભિરવધારય તન્ મુને ।
૧૧૦.૧૭/૨જિત્વા દૈત્યાન્ ઇહ પ્રાપ્તા હત્વા રાક્ષસપુંગવાન્ ॥ ૧૧૦.૧૭॥

૧૧૦.૧૮/૧વયં ચ સુખિનો બ્રહ્મંસ્ત્વયિ દૃષ્ટે વિશેષતઃ ।
૧૧૦.૧૮/૨નાયુધૈઃ ફલમસ્માકં વોઢું નૈવ ક્ષમા વયમ્ ॥ ૧૧૦.૧૮॥

૧૧૦.૧૯/૧સ્થાપ્યદેશં ન પશ્યામ આયુધાનાં મુનીશ્વર ।
૧૧૦.૧૯/૨સ્વર્ગે સુરદ્વિષો જ્ઞાત્વા સ્થાપિતાનિ હરન્તિ ચ ॥ ૧૧૦.૧૯॥

૧૧૦.૨૦/૧નયેયુરાયુધાનીતિ તથૈવ ચ રસાતલે ।
૧૧૦.૨૦/૨તસ્માત્ તવાશ્રમે પુણ્યે સ્થાપ્યન્તેઽસ્ત્રાણિ માનદ ॥ ૧૧૦.૨૦॥

૧૧૦.૨૧/૧નૈવાત્ર કિંચિદ્ ભયમસ્તિ વિપ્ર ।
૧૧૦.૨૧/૨ન દાનવેભ્યો રાક્ષસેભ્યશ્ચ ઘોરમ્ ।
૧૧૦.૨૧/૩ત્વદાજ્ઞયા રક્ષિતપુણ્યદેશો ।
૧૧૦.૨૧/૪ન વિદ્યતે તપસા તે સમાનઃ ॥ ૧૧૦.૨૧॥

૧૧૦.૨૨/૧જિતારયો બ્રહ્મવિદાં વરિષ્ઠમ્ ।
૧૧૦.૨૨/૨વયં ચ પૂર્વં નિહતા દૈત્યસંઘાઃ ।
૧૧૦.૨૨/૩અસ્ત્રૈરલં ભારભૂતૈઃ કૃતાર્થૈઃ ।
૧૧૦.૨૨/૪સ્થાપ્યં સ્થાનં તે સમીપે મુનીશ ॥ ૧૧૦.૨૨॥

૧૧૦.૨૩/૧દિવ્યાન્ ભોગાન્ કામિનીભિઃ સમેતાન્ ।
૧૧૦.૨૩/૨દેવોદ્યાને નન્દને સમ્ભજામઃ ।

૧૧૦.૨૩/૩તતો યામઃ કૃતકાર્યાઃ સહેન્દ્રાઃ ।
૧૧૦.૨૩/૪સ્વં સ્વં સ્થાનં ચાયુધાનાં ચ રક્ષા ॥ ૧૧૦.૨૩॥

૧૧૦.૨૪/૧ત્વયા કૃતા જાયતાં તત્ પ્રશાધિ ।
૧૧૦.૨૪/૨સમર્થસ્ત્વં રક્ષણે ધારણે ચ ॥ ૧૧૦.૨૪॥

૧૧૦.૨૫/૧બ્રહ્મોવાચ । તદ્વાક્યમાકર્ણ્ય દધીચિરેવમ્ ।
૧૧૦.૨૫/૨વાક્યં જગૌ વિબુધાન્ એવમસ્તુ ।
૧૧૦.૨૫/૩નિવાર્યમાણઃ પ્રિયશીલયા સ્ત્રિયા ।
૧૧૦.૨૫/૪કિં દેવકાર્યેણ વિરુદ્ધકારિણા ॥ ૧૧૦.૨૫॥

૧૧૦.૨૬/૧યે જ્ઞાતશાસ્ત્રાઃ પરમાર્થનિષ્ઠાઃ ।
૧૧૦.૨૬/૨સંસારચેષ્ટાસુ ગતાનુરાગાઃ ।
૧૧૦.૨૬/૩તેષાં પરાર્થવ્યસનેન કિં મુને ।
૧૧૦.૨૬/૪યેનાત્ર વામુત્ર સુખં ન કિંચિત્ ॥ ૧૧૦.૨૬॥

૧૧૦.૨૭/૧દેવદ્વિષો દ્વેષમનુપ્રયાન્તિ ।
૧૧૦.૨૭/૨દત્તે સ્થાને વિપ્રવર્ય શ◌ૃણુષ્વ ।
૧૧૦.૨૭/૩નષ્ટે હૃતે ચાયુધાનાં મુનીશ ।
૧૧૦.૨૭/૪કુપ્યન્તિ દેવા રિપવસ્તે ભવન્તિ ॥ ૧૧૦.૨૭॥

૧૧૦.૨૮/૧તસ્માન્ નેદં વેદવિદાં વરિષ્ઠ ।
૧૧૦.૨૮/૨યુક્તં દ્રવ્યે પરકીયે મમત્વમ્ ।
૧૧૦.૨૮/૩તાવચ્ચ મૈત્રી દ્રવ્યભાવશ્ચ તાવન્ ।
૧૧૦.૨૮/૪નષ્ટે હૃતે રિપવસ્તે ભવન્તિ ॥ ૧૧૦.૨૮॥

૧૧૦.૨૯/૧ચેદ્ અસ્તિ શક્તિર્દ્રવ્યદાને તતસ્તે ।
૧૧૦.૨૯/૨દાતવ્યમેવાર્થિને કિં વિચાર્યમ્ ।
૧૧૦.૨૯/૩નો ચેત્ સન્તઃ પરકાર્યાણિ કુર્યુર્।
૧૧૦.૨૯/૪વાગ્ભિર્મનોભિઃ કૃતિભિસ્તથૈવ ॥ ૧૧૦.૨૯॥

૧૧૦.૩૦/૧પરસ્વસંધારણમેતદ્ એવ ।
૧૧૦.૩૦/૨સદ્ભિર્નિરસ્તં ત્યજ કાન્ત સદ્યઃ ॥ ૧૧૦.૩૦॥

૧૧૦.૩૧/૧બ્રહ્મોવાચ । એવં પ્રિયાયા વચનં સ વિપ્રો ।
૧૧૦.૩૧/૨નિશમ્ય ભાર્યામિદમાહ સુભ્રૂમ્ ॥ ૧૧૦.૩૧॥

૧૧૦.૩૨/૧દધીચિરુવાચ । પુરા સુરાણામનુમાન્ય ભદ્રે ।

૧૧૦.૩૨/૨નેતીતિ વાણી ન સુખં મમૈતિ ॥ ૧૧૦.૩૨॥

૧૧૦.૩૩/૧બ્રહ્મોવાચ । શ્રુત્વેરિતં પત્યુરિતિ પ્રિયાયામ્ ।
૧૧૦.૩૩/૨દૈવં વિનાન્યન્ ન નૃણાં સમર્થમ્ ।
૧૧૦.૩૩/૩તૂષ્ણીં સ્થિતાયાં સુરસત્તમાસ્તે ।
૧૧૦.૩૩/૪સંસ્થાપ્ય ચાસ્ત્રાણ્યતિદીપ્તિમન્તિ ॥ ૧૧૦.૩૩॥

૧૧૦.૩૪/૧નત્વા મુનીન્દ્રં યયુરેવ લોકાન્ ।
૧૧૦.૩૪/૨દૈત્યદ્વિષો ન્યસ્તશસ્ત્રાઃ કૃતાર્થાઃ ।
૧૧૦.૩૪/૩ગતેષુ દેવેષુ મુનિપ્રવર્યો ।
૧૧૦.૩૪/૪હૃષ્ટોઽવસદ્ ભાર્યયા ધર્મયુક્તઃ ॥ ૧૧૦.૩૪॥

૧૧૦.૩૫/૧ગતે ચ કાલે હ્યતિવિપ્રયુક્તે ।
૧૧૦.૩૫/૨દૈવે વર્ષે સંખ્યયા વૈ સહસ્રે ।
૧૧૦.૩૫/૩ન તે સુરા આયુધાનાં મુનીશ ।
૧૧૦.૩૫/૪વાચં મનશ્ચાપિ તથૈવ ચક્રુઃ ॥ ૧૧૦.૩૫॥

૧૧૦.૩૬/૧દધીચિરપ્યાહ ગભસ્તિમોજસા ।
૧૧૦.૩૬/૨દેવારયો માં દ્વિષતીહ ભદ્રે ।
૧૧૦.૩૬/૩ન તે સુરા નેતુકામા ભવન્તિ ।
૧૧૦.૩૬/૪સંસ્થાપિતાન્યત્ર વદસ્વ યુક્તમ્ ॥ ૧૧૦.૩૬॥

૧૧૦.૩૭/૧સા ચાહ કાન્તં વિનયાદ્ ઉક્તમેવ ।
૧૧૦.૩૭/૨ત્વં જાનીષે નાથ યદ્ અત્ર યુક્તમ્ ।
૧૧૦.૩૭/૩દૈત્યા હરિષ્યન્તિ મહાપ્રવૃદ્ધાસ્- ।
૧૧૦.૩૭/૪તપોયુક્તા બલિનઃ સ્વાયુધાનિ ॥ ૧૧૦.૩૭॥

૧૧૦.૩૮/૧તદસ્ત્રરક્ષાર્થમિદં સ ચક્રે ।
૧૧૦.૩૮/૨મન્ત્રૈસ્તુ સંક્ષાલ્ય જલૈશ્ચ પુણ્યૈઃ ।
૧૧૦.૩૮/૩તદ્ વારિ સર્વાસ્ત્રમયં સુપુણ્યમ્ ।
૧૧૦.૩૮/૪તેજોયુક્તં તચ્ચ પપૌ દધીચિઃ ॥ ૧૧૦.૩૮॥

૧૧૦.૩૯/૧નિર્વીર્યરૂપાણિ તદાયુધાનિ ।
૧૧૦.૩૯/૨ક્ષયં જગ્મુઃ ક્રમશઃ કાલયોગાત્ ।
૧૧૦.૩૯/૩સુરાઃ સમાગત્ય દધીચિમૂચુર્ ।
૧૧૦.૩૯/૪મહાભયં હ્યાગતં શાત્રવં નઃ ॥ ૧૧૦.૩૯॥

૧૧૦.૪૦/૧દદસ્વ ચાસ્ત્રાણિ મુનિપ્રવીર ।
૧૧૦.૪૦/૨યાનિ ત્વદન્તે નિહિતાનિ દેવૈઃ ।
૧૧૦.૪૦/૩દધીચિરપ્યાહ સુરારિભીત્યા ।
૧૧૦.૪૦/૪અનાગત્યા ભવતાં ચાચિરેણ ॥ ૧૧૦.૪૦॥

૧૧૦.૪૧/૧અસ્ત્રાણિ પીતાનિ શરીરસંસ્થાન્ય્।
૧૧૦.૪૧/૨ઉક્તાનિ યુક્તં મમ તદ્ વદન્તુ ।
૧૧૦.૪૧/૩શ્રુત્વા તદુક્તં વચનં તુ દેવાઃ ।
૧૧૦.૪૧/૪પ્રોચુસ્તમિત્થં વિનયાવનમ્રાઃ ॥ ૧૧૦.૪૧॥

૧૧૦.૪૨/૧અસ્ત્રાણિ દેહીતિ ચ વક્તુમેતચ્ ।
૧૧૦.૪૨/૨છક્યં ન વાન્યત્ પ્રતિવક્તું મુનીન્દ્ર ।
૧૧૦.૪૨/૩વિના ચ તૈઃ પરિભૂયેમ નિત્યમ્ ।
૧૧૦.૪૨/૪પુષ્ટારયઃ ક્વ પ્રયામો મુનીશ ॥ ૧૧૦.૪૨॥

૧૧૦.૪૩/૧ન મર્ત્યલોકે ન તલે ન નાકે ।
૧૧૦.૪૩/૨વાસઃ સુરાણાં ભવિતાદ્ય તાત ।
૧૧૦.૪૩/૩ત્વં વિપ્રવર્યસ્તપસા ચૈવ યુક્તો ।
૧૧૦.૪૩/૪નાન્યદ્ વક્તું યુજ્યતે તે પુરસ્તાત્ ॥ ૧૧૦.૪૩॥

૧૧૦.૪૪/૧વિપ્રસ્તદોવાચ મદસ્થિસંસ્થાન્ય્।
૧૧૦.૪૪/૨અસ્ત્રાણિ ગૃહ્ણન્તુ ન સંશયોઽત્ર ।
૧૧૦.૪૪/૩દેવાસ્તમપ્યાહુરનેન કિં નો હ્ય્।
૧૧૦.૪૪/૪અસ્ત્રૈર્હીનાઃ સ્ત્રીત્વમાપ્તાઃ સુરેન્દ્રાઃ ॥ ૧૧૦.૪૪॥

૧૧૦.૪૫/૧પુનસ્તદા ચાહ મુનિપ્રવીરસ્- ।
૧૧૦.૪૫/૨ત્યક્ષ્યે જીવાન્ દૈહિકાન્ યોગયુક્તઃ ।
૧૧૦.૪૫/૩અસ્ત્રાણિ કુર્વન્તુ મદસ્થિભૂતાન્ય્।
૧૧૦.૪૫/૪અનુત્તમાન્યુત્તમરૂપવન્તિ ॥ ૧૧૦.૪૫॥

૧૧૦.૪૬/૧કુરુષ્વ ચેત્યાહુરદીનસત્ત્વમ્ ।
૧૧૦.૪૬/૨દધીચિમિત્યુત્તરમગ્નિકલ્પમ્ ।
૧૧૦.૪૬/૩તદા તુ તસ્ય પ્રિયમીરયન્તી ।
૧૧૦.૪૬/૪ન સાંનિધ્યે પ્રાતિથેયી મુનીશ ॥ ૧૧૦.૪૬॥

૧૧૦.૪૭/૧તે ચાપિ દેવાસ્તામદૃષ્ટ્વૈવ શીઘ્રમ્ ।
૧૧૦.૪૭/૨તસ્યા ભીતા વિપ્રમૂચુઃ કુરુષ્વ ।

૧૧૦.૪૭/૩તત્યાજ જીવાન્ દુસ્ત્યજાન્ પ્રીતિયુક્તો ।
૧૧૦.૪૭/૪યથાસુખં દેહમિમં જુષધ્વમ્ ॥ ૧૧૦.૪૭॥

૧૧૦.૪૮/૧મદસ્થિભિઃ પ્રીતિમન્તો ભવન્તુ ।
૧૧૦.૪૮/૨સુરાઃ સર્વે કિં તુ દેહેન કાર્યમ્ ॥ ૧૧૦.૪૮॥

૧૧૦.૪૯/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વાસૌ બદ્ધપદ્માસનસ્થો ।
૧૧૦.૪૯/૨નાસાગ્રદત્તાક્ષિપ્રકાશપ્રસન્નઃ ।
૧૧૦.૪૯/૩વાયું સવહ્નિં મધ્યમોદ્ઘાટયોગાન્ ।
૧૧૦.૪૯/૪નીત્વા શનૈર્દહરાકાશગર્ભમ્ ॥ ૧૧૦.૪૯॥

૧૧૦.૫૦/૧યદ્ અપ્રમેયં પરમં પદં યદ્ ।
૧૧૦.૫૦/૨યદ્ બ્રહ્મરૂપં યદ્ ઉપાસિતવ્યમ્ ।
૧૧૦.૫૦/૩તત્રૈવ વિન્યસ્ય ધિયં મહાત્મા ।
૧૧૦.૫૦/૪સાયુજ્યતાં બ્રહ્મણોऽસૌ જગામ ॥ ૧૧૦.૫૦॥

૧૧૦.૫૧/૧નિર્જીવતાં પ્રાપ્તમભીક્ષ્ય દેવાઃ ।
૧૧૦.૫૧/૨કલેવરં તસ્ય સુરાશ્ચ સમ્યક્ ।
૧૧૦.૫૧/૩ત્વષ્ટારમપ્યૂચુરતિત્વરન્તઃ ।
૧૧૦.૫૧/૪કુરુષ્વ ચાસ્ત્રાણિ બહૂનિ સદ્યઃ ॥ ૧૧૦.૫૧॥

૧૧૦.૫૨/૧સ ચાપિ તાન્ આહ કથં નુ કાર્યમ્ ।
૧૧૦.૫૨/૨કલેવરં બ્રાહ્મણસ્યેહ દેવાઃ ।
૧૧૦.૫૨/૩બિભેમિ કર્તું દારુણં ચાક્ષમોऽહમ્ ।
૧૧૦.૫૨/૪વિદારિતાન્યાયુધાન્યુત્તમાનિ ॥ ૧૧૦.૫૨॥

૧૧૦.૫૩/૧તદસ્થિભૂતાનિ કરોમિ સદ્યસ્- ।
૧૧૦.૫૩/૨તતો દેવા ગાઃ સમૂચુસ્ત્વરન્તઃ ॥ ૧૧૦.૫૩॥

૧૧૦.૫૪/૧દેવા ઊચુઃ । વજ્રં મુખં વઃ ક્રિયતે હિતાર્થમ્ ।
૧૧૦.૫૪/૨ગાવો દેવૈરાયુધાર્થં ક્ષણેન ।
૧૧૦.૫૪/૩દધીચિદેહં તુ વિદાર્ય યૂયમ્ ।
૧૧૦.૫૪/૪અસ્થીનિ શુદ્ધાનિ પ્રયચ્છતાદ્ય ॥ ૧૧૦.૫૪॥

૧૧૦.૫૫/૧બ્રહ્મોવાચ । તા દેવવાક્યાચ્ચ તથૈવ ચક્રુઃ ।
૧૧૦.૫૫/૨સંલિહ્ય ચાસ્થીનિ દદુઃ સુરાણામ્ ।
૧૧૦.૫૫/૩સુરાસ્ત્વરા જગ્મુરદીનસત્ત્વાઃ ।

૧૧૦.૫૫/૪સ્વમાલયં ચાપિ તથૈવ ગાવઃ ॥ ૧૧૦.૫૫॥

૧૧૦.૫૬/૧કૃત્વા તથાસ્ત્રાણિ ચ દેવતાનામ્ ।
૧૧૦.૫૬/૨ત્વષ્ટા જગામાથ સુરાજ્ઞયા તદા ।
૧૧૦.૫૬/૩તતશ્ચિરાચ્છીલવતી સુભદ્રા ।
૧૧૦.૫૬/૪ભર્તુઃ પ્રિયા બાલગર્ભા ત્વરન્તી ॥ ૧૧૦.૫૬॥

૧૧૦.૫૭/૧કરે ગૃહીત્વા કલશં વારિપૂર્ણમ્ ।
૧૧૦.૫૭/૨ઉમાં નત્વા ફલપુષ્પૈઃ સમેત્ય ।
૧૧૦.૫૭/૩અગ્નિં ચ ભર્તારમથાશ્રમં ચ ।
૧૧૦.૫૭/૪સંદ્રષ્ટુકામા હ્યાજગામાથ શીઘ્રમ્ ॥ ૧૧૦.૫૭॥

૧૧૦.૫૮/૧આગચ્છન્તીં તાં પ્રાતિથેયીં તદાનીમ્ ।
૧૧૦.૫૮/૨નિવારયામાસ તદોલ્કપાતઃ ।
૧૧૦.૫૮/૩સા સમ્ભ્રમાદ્ આગતા ચાશ્રમં સ્વમ્ ।
૧૧૦.૫૮/૪નૈવાપશ્યત્ તત્ર ભર્તારમગ્રે ॥ ૧૧૦.૫૮॥

૧૧૦.૫૯/૧ક્વ વા ગતશ્ચેતિ સવિસ્મયા સા ।
૧૧૦.૫૯/૨પપ્રચ્છ ચાગ્નિં પ્રાતિથેયી તદાનીમ્ ।
૧૧૦.૫૯/૩અગ્નિસ્તદોવાચ સવિસ્તરં તામ્ ।
૧૧૦.૫૯/૪દેવાગમં યાચનં વૈ શરીરે ॥ ૧૧૦.૫૯॥

૧૧૦.૬૦/૧અસ્થ્નામુપાદાનમથ પ્રયાણમ્ ।
૧૧૦.૬૦/૨શ્રુત્વા સર્વં દુઃખિતા સા બભૂવ ।
૧૧૦.૬૦/૩દુઃખોદ્વેગાત્ સા પપાતાથ પૃથ્વ્યામ્ ।
૧૧૦.૬૦/૪મન્દં મન્દં વહ્નિનાશ્વાસિતા ચ ॥ ૧૧૦.૬૦॥

૧૧૦.૬૧/૧પ્રાતિથેય્યુવાચ । શાપેऽમરાણાં તુ નાહં સમર્થા ।
૧૧૦.૬૧/૨અગ્નિં પ્રાપ્સ્યે કિં નુ કાર્યં ભવેન્ મે ॥ ૧૧૦.૬૧॥

૧૧૦.૬૨/૧બ્રહ્મોવાચ । કોપં ચ દુઃખં ચ નિયમ્ય સાધ્વી ।
૧૧૦.૬૨/૨તદાવાદીદ્ ધર્મયુક્તં ચ ભર્તુઃ ॥ ૧૧૦.૬૨॥

૧૧૦.૬૩/૧પ્રાતિથેય્યુવાચ । ઉત્પદ્યતે યત્ તુ વિનાશિ સર્વમ્ ।
૧૧૦.૬૩/૨ન શોચ્યમસ્તીતિ મનુષ્યલોકે ।
૧૧૦.૬૩/૩ગોવિપ્રદેવાર્થમિહ ત્યજન્તિ ।
૧૧૦.૬૩/૪પ્રાણાન્ પ્રિયાન્ પુણ્યભાજો મનુષ્યાઃ ॥ ૧૧૦.૬૩॥

૧૧૦.૬૪/૧સંસારચક્રે પરિવર્તમાને ।
૧૧૦.૬૪/૨દેહં સમર્થં ધર્મયુક્તં ત્વવાપ્ય ।
૧૧૦.૬૪/૩પ્રિયાન્ પ્રાણાન્ દેવવિપ્રાર્થહેતોસ્- ।
૧૧૦.૬૪/૪તે વૈ ધન્યાઃ પ્રાણિનો યે ત્યજન્તિ ॥ ૧૧૦.૬૪॥

૧૧૦.૬૫/૧પ્રાણાઃ સર્વેઽસ્યાપિ દેહાન્વિતસ્ય ।
૧૧૦.૬૫/૨યાતારો વૈ નાત્ર સંદેહલેશઃ ।
૧૧૦.૬૫/૩એવં જ્ઞાત્વા વિપ્રગોદેવદીનાદ્યુ+ ।
૧૧૦.૬૫/૪અર્થં ચૈનાન્ ઉત્સૃજન્તીશ્વરાસ્તે ॥ ૧૧૦.૬૫॥

૧૧૦.૬૬/૧નિવાર્યમાણોઽપિ મયા પ્રપન્નયા ।
૧૧૦.૬૬/૨ચકાર દેવાસ્ત્રપરિગ્રહં સઃ ।
૧૧૦.૬૬/૩મનોગતં વેત્ત્યથવા વિધાતુઃ ।
૧૧૦.૬૬/૪કો મર્ત્યલોકાતિગચેષ્ટિતસ્ય ॥ ૧૧૦.૬૬॥

૧૧૦.૬૭/૧બ્રહ્મોવાચ । ઇત્યેવમુક્ત્વાપૂજ્ય ચાગ્નીન્ યથાવદ્ ।
૧૧૦.૬૭/૨ભર્તુસ્ત્વચા લોમભિઃ સા વિવેશ ।
૧૧૦.૬૭/૩ગર્ભસ્થિતં બાલકં પ્રાતિથેયી ।
૧૧૦.૬૭/૪કુક્ષિં વિદાર્યાથ કરે ગૃહીત્વા ॥ ૧૧૦.૬૭॥

૧૧૦.૬૮/૧નત્વા ચ ગઙ્ગાં ભુવમાશ્રમં ચ ।
૧૧૦.૬૮/૨વનસ્પતીન્ ઓષધીરાશ્રમસ્થાન્ ॥ ૧૧૦.૬૮॥

૧૧૦.૬૯/૧પ્રાતિથેય્યુવાચ । પિત્રા હીનો બન્ધુભિર્ગોત્રજૈશ્ચ ।
૧૧૦.૬૯/૨માત્રા હીનો બાલકઃ સર્વ એવ ।
૧૧૦.૬૯/૩રક્ષન્તુ સર્વેઽપિ ચ ભૂતસંઘાસ્- ।
૧૧૦.૬૯/૪તથૌષધ્યો બાલકં લોકપાલાઃ ॥ ૧૧૦.૬૯॥

૧૧૦.૭૦/૧યે બાલકં માતૃપિતૃપ્રહીણમ્ ।
૧૧૦.૭૦/૨સનિર્વિશેષં સ્વતનુપ્રરૂઢૈઃ ।
૧૧૦.૭૦/૩પશ્યન્તિ રક્ષન્તિ ત એવ નૂનમ્ ।
૧૧૦.૭૦/૪બ્રહ્માદિકાનામપિ વન્દનીયાઃ ॥ ૧૧૦.૭૦॥

૧૧૦.૭૧/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા ચાત્યજદ્ બાલં ભર્તૃચિત્તપરાયણા ।
૧૧૦.૭૧/૨પિપ્પલાનાં સમીપે તુ ન્યસ્ય બાલં નમસ્ય ચ ॥ ૧૧૦.૭૧॥

૧૧૦.૭૨/૧અગ્નિં પ્રદક્ષિણીકૃત્ય યજ્ઞપાત્રસમન્વિતા ।

૧૧૦.૭૨/૨વિવેશાગ્નિં પ્રાતિથેયી ભર્ત્રા સહ દિવં યયૌ ॥ ૧૧૦.૭૨॥

૧૧૦.૭૩/૧રુરુદુશ્ચાશ્રમસ્થા યે વૃક્ષાશ્ચ વનવાસિનઃ ।
૧૧૦.૭૩/૨પુત્રવત્ પોષિતા યેન ઋષિણા ચ દધીચિના ॥ ૧૧૦.૭૩॥

૧૧૦.૭૪/૧વિના તેન ન જીવામસ્તયા માત્રા વિના તથા ।
૧૧૦.૭૪/૨મૃગાશ્ચ પક્ષિણઃ સર્વે વૃક્ષાઃ પ્રોચુઃ પરસ્પરમ્ ॥ ૧૧૦.૭૪॥

૧૧૦.૭૫/૧વૃક્ષા ઊચુઃ । સ્વર્ગમાસેદુષોઃ પિત્રોસ્તદપત્યેષ્વકૃત્રિમમ્ ।
૧૧૦.૭૫/૨યે કુર્વન્ત્યનિશં સ્નેહં ત એવ કૃતિનો નરાઃ ॥ ૧૧૦.૭૫॥

૧૧૦.૭૬/૧દધીચિઃ પ્રાતિથેયી વા વીક્ષતેઽસ્માન્ યથા પુરા ।
૧૧૦.૭૬/૨તથા પિતા ન માતા વા ધિગ્ અસ્માન્ પાપિનો વયમ્ ॥ ૧૧૦.૭૬॥

૧૧૦.૭૭/૧અસ્માકમપિ સર્વેષામતઃ પ્રભૃતિ નિશ્ચિતમ્ ।
૧૧૦.૭૭/૨બાલો દધીચિઃ પ્રાતિથેયી બાલો ધર્મઃ સનાતનઃ ॥ ૧૧૦.૭૭॥

૧૧૦.૭૮/૧બ્રહ્મોવાચ । એવમુક્ત્વા તદૌષધ્યો વનસ્પતિસમન્વિતાઃ ।
૧૧૦.૭૮/૨સોમં રાજાનમભ્યેત્ય યાચિરેઽમૃતમુત્તમમ્ ॥ ૧૧૦.૭૮॥

૧૧૦.૭૯/૧સ ચાપિ દત્તવાંસ્તેભ્યઃ સોમોઽમૃતમનુત્તમમ્ ।
૧૧૦.૭૯/૨દદુર્બાલાય તે ચાપિ અમૃતં સુરવલ્લભમ્ ॥ ૧૧૦.૭૯॥

૧૧૦.૮૦/૧સ તેન તૃપ્તો વવૃધે શુક્લપક્ષે યથા શશી ।
૧૧૦.૮૦/૨પિપ્પલૈઃ પાલિતો યસ્માત્ પિપ્પલાદઃ સ બાલકઃ ।
૧૧૦.૮૦/૩પ્રવૃદ્ધઃ પિપ્પલાન્ એવમુવાચ ત્વતિવિસ્મિતઃ ॥ ૧૧૦.૮૦॥

૧૧૦.૮૧/૧પિપ્પલાદ ઉવાચ । માનુષેભ્યો માનુષાસ્તુ જાયન્તે પક્ષિભિઃ ખગાઃ ।
૧૧૦.૮૧/૨બીજેભ્યો વીરુધો લોકે વૈષમ્યં નૈવ દૃશ્યતે ।
૧૧૦.૮૧/૩વાર્ક્ષસ્ત્વહં કથં જાતો હસ્તપાદાદિજીવવાન્ ॥ ૧૧૦.૮૧॥

૧૧૦.૮૨/૧બ્રહ્મોવાચ । વૃક્ષાસ્તદ્વચનં શ્રુત્વા સર્વમૂચુર્યથાક્રમમ્ ।
૧૧૦.૮૨/૨દધીચેર્મરણં સાધ્વ્યાસ્તથા ચાગ્નિપ્રવેશનમ્ ॥ ૧૧૦.૮૨॥

૧૧૦.૮૩/૧અસ્થ્નાં સંહરણં દેવૈરેતત્ સર્વં સવિસ્તરમ્ ।
૧૧૦.૮૩/૨શ્રુત્વા દુઃખસમાવિષ્ટો નિપપાત તદા ભુવિ ॥ ૧૧૦.૮૩॥

૧૧૦.૮૪/૧આશ્વાસિતઃ પુનર્વૃક્ષૈર્વાક્યૈર્ધર્માર્થસંહિતૈઃ ।
૧૧૦.૮૪/૨આશ્વસ્તઃ સ પુનઃ પ્રાહ તદૌષધિવનસ્પતીન્ ॥ ૧૧૦.૮૪॥

૧૧૦.૮૫/૧પિપ્પલાદ ઉવાચ । પિતૃહન્તૄન્ હનિષ્યેઽહં નાન્યથા

જીવિતું ક્ષમઃ ।
૧૧૦.૮૫/૨પિતુર્મિત્રાણિ શત્રૂંશ્ચ તથા પુત્રોઽનુવર્તતે ॥ ૧૧૦.૮૫॥

૧૧૦.૮૬/૧સ એવ પુત્રો યોઽન્યસ્તુ પુત્રરૂપો રિપુઃ સ્મૃતઃ ।
૧૧૦.૮૬/૨વદન્તિ પિતૃમિત્રાણિ તારયન્ત્યહિતાન્ અપિ ॥ ૧૧૦.૮૬॥

૧૧૦.૮૭/૧બ્રહ્મોવાચ । વૃક્ષાસ્તં બાલમાદાય સોમાન્તિકમથાયયુઃ ।
૧૧૦.૮૭/૨બાલવાક્યં તુ તે વૃક્ષાઃ સોમાયાથ ન્યવેદયન્ ।
૧૧૦.૮૭/૩શ્રુત્વા સોમોઽપિ તં બાલં પિપ્પલાદમભાષત ॥ ૧૧૦.૮૭॥

૧૧૦.૮૮/૧સોમ ઉવાચ । ગૃહાણ વિદ્યાં વિધિવત્ સમગ્રામ્ ।
૧૧૦.૮૮/૨તપઃસમૃદ્ધિં ચ શુભાં ચ વાચમ્ ।
૧૧૦.૮૮/૩શૌર્યં ચ રૂપં ચ બલં ચ બુદ્ધિમ્ ।
૧૧૦.૮૮/૪સમ્પ્રાપ્સ્યસે પુત્ર મદાજ્ઞયા ત્વમ્ ॥ ૧૧૦.૮૮॥

૧૧૦.૮૯/૧બ્રહ્મોવાચ । પિપ્પલાદસ્તમપ્યાહ ઓષધીશં વિનીતવત્ ॥ ૧૧૦.૮૯॥

૧૧૦.૯૦/૧પિપ્પલાદ ઉવાચ । સર્વમેતદ્ વૃથા મન્યે પિતૃહન્તૃવિનિષ્કૃતિમ્ ।
૧૧૦.૯૦/૨ન કરોમ્યત્ર યાવચ્ચ તસ્માત્ તત્ પ્રથમં વદ ॥ ૧૧૦.૯૦॥

૧૧૦.૯૧/૧યસ્મિન્ દેશે યત્ર કાલે યસ્મિન્ દેવે ચ મન્ત્રકે ।
૧૧૦.૯૧/૨યત્ર તીર્થે ચ સિધ્યેત મત્સંકલ્પઃ સુરોત્તમ ॥ ૧૧૦.૯૧॥

૧૧૦.૯૨/૧બ્રહ્મોવાચ । ચન્દ્રઃ પ્રાહ ચિરં ધ્યાત્વા ભુક્તિર્વા મુક્તિરેવ વા ।
૧૧૦.૯૨/૨સર્વં મહેશ્વરાદ્ દેવાજ્જાયતે નાત્ર સંશયઃ ॥ ૧૧૦.૯૨॥

૧૧૦.૯૩/૧સ સોમં પુનરપ્યાહ કથં દ્રક્ષ્યે મહેશ્વરમ્ ।
૧૧૦.૯૩/૨બાલોઽહં બાલબુદ્ધિશ્ચ ન સામર્થ્યં તપસ્તથા ॥ ૧૧૦.૯૩॥

૧૧૦.૯૪/૧ચન્દ્ર ઉવાચ । ગૌતમીં ગચ્છ ભદ્ર ત્વં સ્તુહિ
ચક્રેશ્વરં હરમ્ ।
૧૧૦.૯૪/૨પ્રસન્નસ્તુ તવેશાનો હ્યલ્પાયાસેન વત્સક ॥ ૧૧૦.૯૪॥

૧૧૦.૯૫/૧પ્રીતો ભવેન્ મહાદેવઃ સાક્ષાત્ કારુણિકઃ શિવઃ ।
૧૧૦.૯૫/૨આસ્તે સાક્ષાત્કૃતઃ શમ્ભુર્વિષ્ણુના પ્રભવિષ્ણુના ॥ ૧૧૦.૯૫॥

૧૧૦.૯૬/૧વરં ચ દત્તવાન્ વિષ્ણોશ્ચક્રં ચ ત્રિદશાર્ચિતમ્ ।
૧૧૦.૯૬/૨ગચ્છ તત્ર મહાબુદ્ધે દણ્ડકે ગૌતમીં નદીમ્ ॥ ૧૧૦.૯૬॥

૧૧૦.૯૭/૧ચક્રેશ્વરં નામ તીર્થં જાનન્ત્યોષધયસ્તુ તત્ ।

૧૧૦.૯૭/૨તં ગત્વા સ્તુહિ દેવેશં સર્વભાવેન શંકરમ્ ।
૧૧૦.૯૭/૩સ તે પ્રીતમનાસ્તાત સર્વાન્ કામાન્ પ્રદાસ્યતિ ॥ ૧૧૦.૯૭॥

૧૧૦.૯૮/૧બ્રહ્મોવાચ । તદ્ રાજવચનાદ્ બ્રહ્મન્ પિપ્પલાદો મહામુનિઃ ।
૧૧૦.૯૮/૨આજગામ જગન્નાથો યત્ર રુદ્રઃ સ ચક્રદઃ ॥ ૧૧૦.૯૮॥

૧૧૦.૯૯/૧તં બાલં કૃપયાવિષ્ટાઃ પિપ્પલાઃ સ્વાશ્રમાન્ યયુઃ ।
૧૧૦.૯૯/૨ગોદાવર્યાં તતઃ સ્નાત્વા નત્વા ત્રિભુવનેશ્વરમ્ ।
૧૧૦.૯૯/૩તુષ્ટાવ સર્વભાવેન પિપ્પલાદઃ શિવં શુચિઃ ॥ ૧૧૦.૯૯॥

૧૧૦.૧૦૦/૧પિપ્પલાદ ઉવાચ । સર્વાણિ કર્માણિ વિહાય ધીરાસ્-
૧૧૦.૧૦૦/૨ત્યક્તૈષણા નિર્જિતચિત્તવાતાઃ ।
૧૧૦.૧૦૦/૩યં યાન્તિ મુક્ત્યૈ શરણં પ્રયત્નાત્ ।
૧૧૦.૧૦૦/૪તમાદિદેવં પ્રણમામિ શમ્ભુમ્ ॥ ૧૧૦.૧૦૦॥

૧૧૦.૧૦૧/૧યઃ સર્વસાક્ષી સકલાન્તરાત્મા ।
૧૧૦.૧૦૧/૨સર્વેશ્વરઃ સર્વકલાનિધાનમ્ ।
૧૧૦.૧૦૧/૩વિજ્ઞાય મચ્ચિત્તગતં સમસ્તમ્ ।
૧૧૦.૧૦૧/૪સ મે સ્મરારિઃ કરુણાં કરોતુ ॥ ૧૧૦.૧૦૧॥

૧૧૦.૧૦૨/૧દિગીશ્વરાગ્ જિત્ય સુરાર્ચિતસ્ય ।
૧૧૦.૧૦૨/૨કૈલાસમાન્દોલયતઃ પુરારેઃ ।
૧૧૦.૧૦૨/૩અઙ્ગુષ્ઠકૃત્યૈવ રસાતલાદ્ અધો+ ।
૧૧૦.૧૦૨/૪ગતસ્ય તસ્યૈવ દશાનનસ્ય ॥ ૧૧૦.૧૦૨॥

૧૧૦.૧૦૩/૧આલૂનકાયસ્ય ગિરં નિશમ્ય ।
૧૧૦.૧૦૩/૨વિહસ્ય દેવ્યા સહ દત્તમિષ્ટમ્ ।
૧૧૦.૧૦૩/૩તસ્મૈ પ્રસન્નઃ કુપિતોઽપિ તદ્વદ્ ।
૧૧૦.૧૦૩/૪અયુક્તદાતાસિ મહેશ્વર ત્વમ્ ॥ ૧૧૦.૧૦૩॥

૧૧૦.૧૦૪/૧સૌત્રામણીમ્ ઋદ્ધિમધઃ સ ચક્રે ।
૧૧૦.૧૦૪/૨યોઽર્ચાં હરૌ નિત્યમતીવ કૃત્વા ।
૧૧૦.૧૦૪/૩બાણઃ પ્રશસ્યઃ કૃતવાન્ ઉચ્ચપૂજામ્ ।
૧૧૦.૧૦૪/૪રમ્યાં મનોજ્ઞાં શશિખણ્ડમૌલેઃ ॥ ૧૧૦.૧૦૪॥

૧૧૦.૧૦૫/૧જિત્વા રિપૂન્ દેવગણાન્ પ્રપૂજ્ય ।
૧૧૦.૧૦૫/૨ગુરું નમસ્કર્તુમગાદ્ વિશાખઃ ।

૧૧૦.૧૦૫/૩ચુકોપ દૃષ્ટ્વા ગણનાથમૂઢમ્ ।
૧૧૦.૧૦૫/૪અઙ્કે તમારોપ્ય જહાસ સોમઃ ॥ ૧૧૦.૧૦૫॥

૧૧૦.૧૦૬/૧ઈશાઙ્કરૂઢોઽપિ શિશુસ્વભાવાન્ ।
૧૧૦.૧૦૬/૨ન માતુરઙ્કં પ્રમુમોચ બાલઃ ।
૧૧૦.૧૦૬/૩ક્રુદ્ધં સુતં બોધિતુમપ્યશક્તસ્- ।
૧૧૦.૧૦૬/૪તતોઽર્ધનારિત્વમવાપ સોમઃ ॥ ૧૧૦.૧૦૬॥

૧૧૦.૧૦૭/૧બ્રહ્મોવાચ । તતઃ સ્વયમ્ભૂઃ સુપ્રીતઃ પિપ્પલાદમભાષત ॥ ૧૧૦.૧૦૭॥

૧૧૦.૧૦૮/૧શિવ ઉવાચ । વરં વરય ભદ્રં તે પિપ્પલાદ
યથેપ્સિતમ્ ॥ ૧૧૦.૧૦૮॥

૧૧૦.૧૦૯/૧પિપ્પલાદ ઉવાચ । હતો દેવૈર્મહાદેવ પિતા મમ મહાયશાઃ ।
૧૧૦.૧૦૯/૨અદામ્ભિકઃ સત્યવાદી તથા માતા પતિવ્રતા ॥ ૧૧૦.૧૦૯॥

૧૧૦.૧૧૦/૧દેવેભ્યશ્ચ તયોર્નાશં શ્રુત્વા નાથ સવિસ્તરમ્ ।
૧૧૦.૧૧૦/૨દુઃખકોપસમાવિષ્ટો નાહં જીવિતુમુત્સહે ॥ ૧૧૦.૧૧૦॥

૧૧૦.૧૧૧/૧તસ્માન્ મે દેહિ સામર્થ્યં નાશયેયં સુરાન્ યથા ।
૧૧૦.૧૧૧/૨અવધ્યસેવ્યસ્ત્રૈલોક્યે ત્વમેવ શશિશેખર ॥ ૧૧૦.૧૧૧॥

૧૧૦.૧૧૨/૧ઈશ્વર ઉવાચ । તૃતીયં નયનં દ્રષ્ટું યદિ શક્નોષિ મેઽનઘ ।
૧૧૦.૧૧૨/૨તતઃ સમર્થો ભવિતા દેવાંશ્છેદયિતું ભવાન્ ॥ ૧૧૦.૧૧૨॥

૧૧૦.૧૧૩/૧બ્રહ્મોવાચ । તતો દ્રષ્ટું મનશ્ચક્રે તૃતીયં લોચનં વિભોઃ ।
૧૧૦.૧૧૩/૨ન શશાક તદોવાચ ન શક્તોઽસ્મીતિ શંકરમ્ ॥ ૧૧૦.૧૧૩॥

૧૧૦.૧૧૪/૧ઈશ્વર ઉવાચ । કિંચિત્ કુરુ તપો બાલ યદા દ્રક્ષ્યસિ લોચનમ્ ।
૧૧૦.૧૧૪/૨તૃતીયં ત્વં તદાભીષ્ટં પ્રાપ્સ્યસે નાત્ર સંશયઃ ॥ ૧૧૦.૧૧૪॥

૧૧૦.૧૧૫/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વેશાનવાક્યં તપસે કૃતનિશ્ચયઃ ।
૧૧૦.૧૧૫/૨દધીચિસૂનુર્ધર્માત્મા તત્રૈવ બહુલાઃ સમાઃ ॥ ૧૧૦.૧૧૫॥

૧૧૦.૧૧૬/૧શિવધ્યાનૈકનિરતો બાલોઽપિ બલવાન્ ઇવ ।
૧૧૦.૧૧૬/૨પ્રત્યહં પ્રાતરુત્થાય સ્નાત્વા નત્વા ગુરૂન્ ક્રમાત્ ॥ ૧૧૦.૧૧૬॥

૧૧૦.૧૧૭/૧સુખાસીનો મનઃ કૃત્વા સુષુમ્નાયામનન્યધીઃ ।
૧૧૦.૧૧૭/૨હસ્તસ્વસ્તિકમારોપ્ય નાભૌ વિસ્મૃતસંસૃતિઃ ॥ ૧૧૦.૧૧૭॥

૧૧૦.૧૧૮/૧સ્થાનાત્ સ્થાનાન્તરોત્કર્ષાન્ વિદધ્યૌ શામ્ભવં મહઃ ।

૧૧૦.૧૧૮/૨દદર્શ ચક્ષુર્દેવસ્ય તૃતીયં પિપ્પલાશનઃ ।
૧૧૦.૧૧૮/૩કૃતાઞ્જલિપુટો ભૂત્વા વિનીત ઇદમબ્રવીત્ ॥ ૧૧૦.૧૧૮॥

૧૧૦.૧૧૯/૧પિપ્પલાદ ઉવાચ । શમ્ભુના દેવદેવેન વરો દત્તઃ પુરા મમ ।
૧૧૦.૧૧૯/૨તાર્તીયચક્ષુષો જ્યોતિર્યદા પશ્યસિ તત્ક્ષણાત્ ॥ ૧૧૦.૧૧૯॥

૧૧૦.૧૨૦/૧સર્વં તે પ્રાર્થિતં સિધ્યેદ્ ઇત્યાહ ત્રિદશેશ્વરઃ ।
૧૧૦.૧૨૦/૨તસ્માદ્ રિપુવિનાશાય હેતુભૂતાં પ્રયચ્છ મે ॥ ૧૧૦.૧૨૦॥

૧૧૦.૧૨૧/૧તદૈવ પિપ્પલાઃ પ્રોચુર્વડવાપિ મહાદ્યુતે ।
૧૧૦.૧૨૧/૨માતા તવ પ્રાતિથેયી વદન્ત્યેવં દિવં ગતા ॥ ૧૧૦.૧૨૧॥

૧૧૦.૧૨૨/૧પરાભિદ્રોહનિરતા વિસ્મૃતાત્મહિતા નરાઃ ।
૧૧૦.૧૨૨/૨ઇતસ્તતો ભ્રાન્તચિત્તાઃ પતન્તિ નરકાવટે ॥ ૧૧૦.૧૨૨॥

૧૧૦.૧૨૩/૧તન્ માતૃવચનં શ્રુત્વા કુપિતઃ પિપ્પલાશનઃ ।
૧૧૦.૧૨૩/૨અભિમાને જ્વલત્યન્તઃ સાધુવાદો નિરર્થકઃ ॥ ૧૧૦.૧૨૩॥

૧૧૦.૧૨૪/૧દેહિ દેહીતિ તં પ્રાહ કૃત્યા નેત્રવિનિર્ગતા ।
૧૧૦.૧૨૪/૨વડવેતિ સ્મરન્ વિપ્રઃ કૃત્યાપિ વડવાકૃતિઃ ॥ ૧૧૦.૧૨૪॥

૧૧૦.૧૨૫/૧સર્વસત્ત્વવિનાશાય પ્રભૂતાનલગર્ભિણી ।
૧૧૦.૧૨૫/૨ગભસ્તિની બાલગર્ભા યા માતા પિપ્પલાશિનઃ ॥ ૧૧૦.૧૨૫॥

૧૧૦.૧૨૬/૧તદ્ધ્યાનયોગાત્ તુ જાતા કૃત્યા સાનલગર્ભિણી ।
૧૧૦.૧૨૬/૨ઉત્પન્ના સા મહારૌદ્રા મૃત્યુજિહ્વેવ ભીષણા ॥ ૧૧૦.૧૨૬॥

૧૧૦.૧૨૭/૧અવોચત્ પિપ્પલાદં તં કિં કૃત્યં મે વદસ્વ તત્ ।
૧૧૦.૧૨૭/૨પિપ્પલાદોઽપિ તાં પ્રાહ દેવાન્ ખાદ રિપૂન્ મમ ॥ ૧૧૦.૧૨૭॥

૧૧૦.૧૨૮/૧જગ્રાહ સા તથેત્યુક્ત્વા પિપ્પલાદં પુરસ્થિતમ્ ।
૧૧૦.૧૨૮/૨સ પ્રાહ કિમિદં કૃત્યે સા ચાપ્યાહ ત્વયોદિતમ્ ॥ ૧૧૦.૧૨૮॥

૧૧૦.૧૨૯/૧દેવૈશ્ચ નિર્મિતં દેહં તતો ભીતઃ શિવં યયૌ ।
૧૧૦.૧૨૯/૨તુષ્ટાવ દેવં સ મુનિઃ કૃત્યાં પ્રાહ તદા શિવઃ ॥ ૧૧૦.૧૨૯॥

૧૧૦.૧૩૦/૧શિવ ઉવાચ । યોજનાન્તઃસ્થિતાઞ્ જીવાન્ ન ગૃહાણ મદાજ્ઞયા ।
૧૧૦.૧૩૦/૨તસ્માદ્ યાહિ તતો દૂરં કૃત્યે કૃત્યં તતઃ કુરુ ॥ ૧૧૦.૧૩૦॥

૧૧૦.૧૩૧/૧બ્રહ્મોવાચ । તીર્થાત્ તુ પિપ્પલાત્ પૂર્વં યાવદ્ યોજનસંખ્યયા ।
૧૧૦.૧૩૧/૨પ્રાતિષ્ઠદ્ વડવારૂપા કૃત્યા સા ઋષિનિર્મિતા ॥ ૧૧૦.૧૩૧॥

૧૧૦.૧૩૨/૧તસ્યાં જાતો મહાન્ અગ્નિર્લોકસંહરણક્ષમઃ ।
૧૧૦.૧૩૨/૨તં દૃષ્ટ્વા વિબુધાઃ સર્વે ત્રસ્તાઃ શમ્ભુમુપાગમન્ ॥ ૧૧૦.૧૩૨॥

૧૧૦.૧૩૩/૧ચક્રેશ્વરં પિપ્પલેશં પિપ્પલાદેન તોષિતમ્ ।
૧૧૦.૧૩૩/૨સ્તુવન્તો ભીતમનસઃ શમ્ભુમૂચુર્દિવૌકસઃ ॥ ૧૧૦.૧૩૩॥

૧૧૦.૧૩૪/૧દેવા ઊચુઃ । રક્ષસ્વ શમ્ભો કૃત્યાસ્માન્ બાધતે તદ્ભવાનલઃ ।
૧૧૦.૧૩૪/૨શરણં ભવ સર્વેશ ભીતાનામભયપ્રદ ॥ ૧૧૦.૧૩૪॥

૧૧૦.૧૩૫/૧સર્વતઃ પરિભૂતાનામાર્તાનાં શ્રાન્તચેતસામ્ ।
૧૧૦.૧૩૫/૨સર્વેષામેવ જન્તૂનાં ત્વમેવ શરણં શિવ ॥ ૧૧૦.૧૩૫॥

૧૧૦.૧૩૬/૧ઋષિણાભ્યર્થિતા કૃત્યા ત્વચ્ચક્ષુર્વહ્નિનિર્ગતા ।
૧૧૦.૧૩૬/૨સા જિઘાંસતિ લોકાંસ્ત્રીંસ્ત્વં નસ્ત્રાતા ન ચેતરઃ ॥ ૧૧૦.૧૩૬॥

૧૧૦.૧૩૭/૧બ્રહ્મોવાચ । તાન્ અબ્રવીજ્જગન્નાથો યોજનાન્તર્નિવાસિનઃ ।
૧૧૦.૧૩૭/૨ન બાધતે ત્વસૌ કૃત્યા તસ્માદ્ યૂયમહર્નિશમ્ ।
૧૧૦.૧૩૭/૩ઇહૈવાસધ્વમમરાસ્તસ્યા વો ન ભયં ભવેત્ ॥ ૧૧૦.૧૩૭॥

૧૧૦.૧૩૮/૧બ્રહ્મોવાચ । પુનરૂચુઃ સુરેશાનં ત્વયા દત્તં ત્રિવિષ્ટપમ્ ।
૧૧૦.૧૩૮/૨તત્ ત્યક્ત્વાત્ર કથં નાથ વત્સ્યામસ્ત્રિદશાર્ચિત ॥ ૧૧૦.૧૩૮॥

૧૧૦.૧૪૦/૧બ્રહ્મોવાચ । દેવાનાં વચનં શ્રુત્વા શિવો
વાક્યમથાબ્રવીત્ ॥ ૧૧૦.૧૪૦॥

૧૧૦.૧૪૧/૧શિવ ઉવાચ । દેવોઽસૌ વિશ્વતશ્ચક્ષુર્યો દેવો વિશ્વતોમુખઃ ।
૧૧૦.૧૪૧/૨યો રશ્મિભિસ્તુ ધમતે નિત્યં યો જનકો મતઃ ॥ ૧૧૦.૧૪૧॥

૧૧૦.૧૪૨/૧સ સૂર્ય એક એવાત્ર સાક્ષાદ્ રૂપેણ સર્વદા ।
૧૧૦.૧૪૨/૨સ્થિતિં કરોતુ તન્મૂર્તૌ ભવિષ્યન્ત્યખિલાઃ સ્થિતાઃ ॥ ૧૧૦.૧૪૨॥

૧૧૦.૧૪૩/૧બ્રહ્મોવાચ । તથેતિ શમ્ભુવચનાત્ પારિજાતતરોસ્તદા ।
૧૧૦.૧૪૩/૨દેવા દિવાકરં ચક્રુસ્ત્વષ્ટા ભાસ્કરમબ્રવીત્ ॥ ૧૧૦.૧૪૩॥

૧૧૦.૧૪૪/૧ત્વષ્ટોવાચ । ઇહૈવાસ્સ્વ જગત્સ્વામિન્ રક્ષેમાન્ વિબુધાન્ સ્વયમ્ ।
૧૧૦.૧૪૪/૨સ્વાંશૈશ્ચ વયમપ્યત્ર તિષ્ઠામઃ શમ્ભુસંનિધૌ ॥ ૧૧૦.૧૪૪॥

૧૧૦.૧૪૫/૧ચક્રેશ્વરસ્ય પરિતો યાવદ્ યોજનસંખ્યયા ।
૧૧૦.૧૪૫/૨ગઙ્ગાયા ઉભયં તીરમાસાદ્યાસન્ સુરોત્તમાઃ ॥ ૧૧૦.૧૪૫॥

૧૧૦.૧૪૬/૧અઙ્ગુલ્યર્ધાર્ધમાત્રં તુ ગઙ્ગાતીરં સમાશ્રિતાઃ ।
૧૧૦.૧૪૬/૨તિસ્રઃ કોટ્યસ્તથા પઞ્ચ શતાનિ મુનિસત્તમ ।
૧૧૦.૧૪૬/૩તીર્થાનાં તત્ર વ્યુષ્ટિં ચ કઃ શ ૃણોતિ બ્રવીતિ વા ॥ ૧૧૦.૧૪૬॥

૧૧૦.૧૪૭/૧બ્રહ્મોવાચ । તતઃ સુરગણાઃ સર્વે વિનીતાઃ શિવમબ્રુવન્ ॥ ૧૧૦.૧૪૭॥

૧૧૦.૧૪૮/૧દેવા ઊચુઃ । પિપ્પલાદં સુરેશાન શમં નય જગન્મય ॥ ૧૧૦.૧૪૮॥

૧૧૦.૧૪૯/૧બ્રહ્મોવાચ । ઓમિત્યુક્ત્વા જગન્નાથઃ પિપ્પલાદમવોચત ॥ ૧૧૦.૧૪૯॥

૧૧૦.૧૫૦/૧શિવ ઉવાચ । નાશિતેષ્વપિ દેવેષુ પિતા તે નાગમિષ્યતિ ।
૧૧૦.૧૫૦/૨દત્તાઃ પિત્રા તવ પ્રાણા દેવાનાં કાર્યસિદ્ધયે ॥ ૧૧૦.૧૫૦॥

૧૧૦.૧૫૧/૧દીનાર્તકરુણાબન્ધુઃ કો હિ તાદૃગ્ભવે ભવેત્ ।
૧૧૦.૧૫૧/૨તથા યાતા દિવં તાત તવ માતા પતિવ્રતા ॥ ૧૧૦.૧૫૧॥

૧૧૦.૧૫૨/૧સમા કાપ્યત્ર મતયા લોપામુદ્રાપ્યરુન્ધતી ।
૧૧૦.૧૫૨/૨યદ્ અસ્થિભિઃ સુરાઃ સર્વે જયિનઃ સુખિનઃ સદા ॥ ૧૧૦.૧૫૨॥

૧૧૦.૧૫૩/૧તેનાવાપ્તં યશઃ સ્ફીતં તવ માત્રાક્ષયં કૃતમ્ ।
૧૧૦.૧૫૩/૨ત્વયા પુત્રેણ સર્વત્ર નાતઃ પરતરં કૃતમ્ ॥ ૧૧૦.૧૫૩॥

૧૧૦.૧૫૪/૧ત્વત્પ્રતાપભયાત્ સ્વર્ગાચ્ચ્યુતાંસ્ત્વં પાતુમર્હસિ ।
૧૧૦.૧૫૪/૨કાંદિશીકાંસ્તવ ભયાદ્ અમરાંસ્ત્રાતુમર્હસિ ।
૧૧૦.૧૫૪/૩નાર્તત્રાણાદ્ અભ્યધિકં સુકૃતં ક્વાપિ વિદ્યતે ॥ ૧૧૦.૧૫૪॥

૧૧૦.૧૫૫/૧યાવદ્ યશઃ સ્ફુરતિ ચારુ મનુષ્યલોકે ।
૧૧૦.૧૫૫/૨અહાનિ તાવન્તિ દિવં ગતસ્ય ।
૧૧૦.૧૫૫/૩દિને દિને વર્ષસંખ્યા પરસ્મિંલ્ ।
૧૧૦.૧૫૫/૪લોકે વાસો જાયતે નિર્વિકારઃ ॥ ૧૧૦.૧૫૫॥

૧૧૦.૧૫૬/૧મૃતાસ્ત એવાત્ર યશો ન યેષામ્ ।
૧૧૦.૧૫૬/૨અન્ધાસ્ત એવ શ્રુતવર્જિતા યે ।
૧૧૦.૧૫૬/૩યે દાનશીલા ન નપુંસકાસ્તે ।
૧૧૦.૧૫૬/૪યે ધર્મશીલા ન ત એવ શોચ્યાઃ ॥ ૧૧૦.૧૫૬॥

૧૧૦.૧૫૭/૧બ્રહ્મોવાચ । ભાષિતં દેવદેવસ્ય શ્રુત્વા શાન્તોઽભવન્ મુનિઃ ।
૧૧૦.૧૫૭/૨કૃતાઞ્જલિપુટો ભૂત્વા નત્વા નાથમથાબ્રવીત્ ॥ ૧૧૦.૧૫૭॥

૧૧૦.૧૫૮/૧પિપ્પલાદ ઉવાચ । વાગ્ભિર્મનોભિઃ કૃતિભિઃ કદાચિન્ ।

૧૧૦.૧૫૮/૨મમોપકુર્વન્તિ હિતે રતા યે ।
૧૧૦.૧૫૮/૩તેભ્યો હિતાર્થં ત્વિહ ચાપરેષામ્ ।
૧૧૦.૧૫૮/૪સોમં નમસ્યામિ સુરાદિપૂજ્યમ્ ॥ ૧૧૦.૧૫૮॥

૧૧૦.૧૫૯/૧સંરક્ષિતો યૈરભિવર્ધિતશ્ચ ।
૧૧૦.૧૫૯/૨સમાનગોત્રશ્ચ સમાનધર્મા ।
૧૧૦.૧૫૯/૩તેષામભીષ્ટાનિ શિવઃ કરોતુ ।
૧૧૦.૧૫૯/૪બાલેન્દુમૌલિં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૧૧૦.૧૫૯॥

૧૧૦.૧૬૦/૧યૈરહં વર્ધિતો નિત્યં માતૃવત્ પિતૃવત્ પ્રભો ।
૧૧૦.૧૬૦/૨તન્નામ્ના જાયતાં તીર્થં દેવદેવ જગત્ત્રયે ॥ ૧૧૦.૧૬૦॥

૧૧૦.૧૬૧/૧યશસ્તુ તેષાં ભવિતા તેભ્યોઽહમનૃણસ્તતઃ ।
૧૧૦.૧૬૧/૨યાનિ ક્ષેત્રાણિ દેવાનાં યાનિ તીર્થાનિ ભૂતલે ॥ ૧૧૦.૧૬૧॥

૧૧૦.૧૬૨/૧તેભ્યો યદ્ ઇદમધિકમનુમન્યન્તુ દેવતાઃ ।
૧૧૦.૧૬૨/૨તતઃ ક્ષમેઽહં દેવાનામપરાધં નિરઞ્જનઃ ॥ ૧૧૦.૧૬૨॥

૧૧૦.૧૬૩/૧બ્રહ્મોવાચ । તતઃ સમક્ષં સુરસાક્ષરાં ગિરમ્ ।
૧૧૦.૧૬૩/૨સહસ્રચક્ષુઃપ્રમુખાંસ્તથાગ્રતઃ ।
૧૧૦.૧૬૩/૩ઉવાચ દેવા અપિ મેનિરે વચો ।
૧૧૦.૧૬૩/૪દધીચિપુત્રોદિતમાદરેણ ॥ ૧૧૦.૧૬૩॥

૧૧૦.૧૬૪/૧બાલસ્ય બુદ્ધિં વિનયં ચ વિદ્યામ્ ।
૧૧૦.૧૬૪/૨શૌર્યં બલં સાહસં સત્યવાચમ્ ।
૧૧૦.૧૬૪/૩પિત્રોર્ભક્તિં ભાવશુદ્ધિં વિદિત્વા ।
૧૧૦.૧૬૪/૪તદાવાદીચ્છંકરઃ પિપ્પલાદમ્ ॥ ૧૧૦.૧૬૪॥

૧૧૦.૧૬૫/૧શંકર ઉવાચ । વત્સ યદ્ વૈ પ્રિયં કામં યચ્ચાપિ સુરવલ્લભમ્ ।
૧૧૦.૧૬૫/૨પ્રાપ્સ્યસે વદ કલ્યાણં નાન્યથા ત્વં મનઃ કૃથાઃ ॥ ૧૧૦.૧૬૫॥

૧૧૦.૧૬૬/૧પિપ્પલાદ ઉવાચ । યે ગઙ્ગાયામાપ્લુતા ધર્મનિષ્ઠાઃ ।
૧૧૦.૧૬૬/૨સમ્પશ્યન્તિ ત્વત્પદાબ્જં મહેશ ।
૧૧૦.૧૬૬/૩સર્વાન્ કામાન્ આપ્નુવન્તુ પ્રસહ્ય ।
૧૧૦.૧૬૬/૪દેહાન્તે તે પદમાયાન્તુ શૈવમ્ ॥ ૧૧૦.૧૬૬॥

૧૧૦.૧૬૭/૧તાતઃ પ્રાપ્તસ્ત્વત્પદં ચામ્બિકા મે ।
૧૧૦.૧૬૭/૨નાથ પ્રાપ્તા પિપ્પલશ્ચામરાશ્ચ ।

૧૧૦.૧૬૭/૩સુખં પ્રાપ્તા નાથનાથં વિલોક્ય ।
૧૧૦.૧૬૭/૪ત્વાં પશ્યેયુસ્ત્વત્પદં તે પ્રયાન્તુ ॥ ૧૧૦.૧૬૭॥

૧૧૦.૧૬૮/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા પિપ્પલાદં દેવદેવો મહેશ્વરઃ ।
૧૧૦.૧૬૮/૨અભિનન્દ્ય ચ તં દેવૈઃ સાર્ધં વાક્યમથાબ્રવીત્ ॥ ૧૧૦.૧૬૮॥

૧૧૦.૧૬૯/૧દેવા અપિ મુદા યુક્તા નિર્ભયાસ્તત્કૃતાદ્ ભયાત્ ।
૧૧૦.૧૬૯/૨ઇદમૂચુઃ સર્વ એવ દાધીચં શિવસંનિધૌ ॥ ૧૧૦.૧૬૯॥

૧૧૦.૧૭૦/૧દેવા ઊચુઃ । સુરાણાં યદ્ અભીષ્ટં ચ ત્વયા કૃતમસંશયમ્ ।
૧૧૦.૧૭૦/૨પાલિતા દેવદેવસ્ય આજ્ઞા ત્રૈલોક્યમણ્ડની ॥ ૧૧૦.૧૭૦॥

૧૧૦.૧૭૧/૧યાચિતં ચ ત્વયા પૂર્વં પરાર્થં નાત્મને દ્વિજ ।
૧૧૦.૧૭૧/૨તસ્માદ્ અન્યતમં બ્રૂહિ કિંચિદ્ દાસ્યામહે વયમ્ ॥ ૧૧૦.૧૭૧॥

૧૧૦.૧૭૨/૧બ્રહ્મોવાચ । પુનઃ પુનસ્તદ્ એવોચુઃ સુરસંઘા દ્વિજોત્તમમ્ ।
૧૧૦.૧૭૨/૨કૃતાઞ્જલિપુટઃ પૂર્વં નત્વા શમ્ભુસુરાન્ ઇદમ્ ।
૧૧૦.૧૭૨/૩ઉવાચ પિપ્પલાદશ્ચ ઉમાં નત્વા ચ પિપ્પલાન્ ॥ ૧૧૦.૧૭૨॥

૧૧૦.૧૭૩/૧પિપ્પલાદ ઉવાચ । પિતરૌ દ્રષ્ટુકામોઽસ્મિ સદા મે શબ્દગોચરૌ ।
૧૧૦.૧૭૩/૨તે ધન્યાઃ પ્રાણિનો લોકે માતાપિત્રોર્વશે સ્થિતાઃ ॥ ૧૧૦.૧૭૩॥

૧૧૦.૧૭૪/૧શુશ્રૂષણપરા નિત્યં તત્પાદાજ્ઞાપ્રતીક્ષકાઃ ।
૧૧૦.૧૭૪/૨ઇન્દ્રિયાણિ શરીરં ચ કુલં શક્તિં ધિયં વપુઃ ॥ ૧૧૦.૧૭૪॥

૧૧૦.૧૭૫/૧પરિલભ્ય તયોઃ કૃત્યે કૃતકૃત્યો ભવેત્ સ્વયમ્ ।
૧૧૦.૧૭૫/૨પશૂનાં પક્ષિણાં ચાપિ સુલભં માતૃદર્શનમ્ ॥ ૧૧૦.૧૭૫॥

૧૧૦.૧૭૬/૧દુર્લભં મમ તચ્ચાપિ પૃચ્છે પાપફલં નુ કિમ્ ।
૧૧૦.૧૭૬/૨દુર્લભં ચ તથા ચેત્ સ્યાત્ સર્વેષાં યસ્ય કસ્યચિત્ ॥ ૧૧૦.૧૭૬॥

૧૧૦.૧૭૭/૧નોપપદ્યેત સુલભં મત્તો નાન્યોઽસ્તિ પાપકૃત્ ।
૧૧૦.૧૭૭/૨તયોર્દર્શનમાત્રં ચ યદિ પ્રાપ્સ્યે સુરોત્તમાઃ ॥ ૧૧૦.૧૭૭॥

૧૧૦.૧૭૮/૧મનોવાક્કાયકર્મભ્યઃ ફલં પ્રાપ્તં ભવિષ્યતિ ।
૧૧૦.૧૭૮/૨પિતરૌ યે ન પશ્યન્તિ સમુત્પન્ના ન સંસૃતૌ ।
૧૧૦.૧૭૮/૩તેષાં મહાપાતકાનાં કઃ સંખ્યાં કર્તુમીશ્વરઃ ॥ ૧૧૦.૧૭૮॥

૧૧૦.૧૭૯/૧બ્રહ્મોવાચ । તદ્ ઋષેર્વચનં શ્રુત્વા મિથઃ સમ્મન્ત્ર્ય તે સુરાઃ ।
૧૧૦.૧૭૯/૨વિમાનવરમારૂઢૌ પિતરૌ દમ્પતી શુભૌ ॥ ૧૧૦.૧૭૯॥

૧૧૦.૧૮૦/૧તવ સંદર્શનાકાઙ્ક્ષૌ દ્રક્ષ્યસે વાદ્ય નિશ્ચિતમ્ ।
૧૧૦.૧૮૦/૨વિષાદં લોભમોહૌ ચ ત્યક્ત્વા ચિત્તં શમં નય ॥ ૧૧૦.૧૮૦॥

૧૧૦.૧૮૧/૧પશ્ય પશ્યેતિ તં પ્રાહુર્દધીચં સુરસત્તમાઃ ।
૧૧૦.૧૮૧/૨વિમાનવરમારૂઢૌ સ્વર્ગિણૌ સ્વર્ણભૂષણૌ ॥ ૧૧૦.૧૮૧॥

૧૧૦.૧૮૨/૧તવ સંદર્શનાકાઙ્ક્ષૌ પિતરૌ દમ્પતી શુભૌ ।
૧૧૦.૧૮૨/૨વીજ્યમાનૌ સુરસ્ત્રીભિઃ સ્તૂયમાનૌ ચ કિંનરૈઃ ॥ ૧૧૦.૧૮૨॥

૧૧૦.૧૮૩/૧દૃષ્ટ્વા સ માતાપિતરૌ નનામ શિવસંનિધૌ ।
૧૧૦.૧૮૩/૨હર્ષબાષ્પાશ્રુનયનૌ સ કથંચિદ્ ઉવાચ તૌ ॥ ૧૧૦.૧૮૩॥

૧૧૦.૧૮૪/૧પુત્ર ઉવાચ । તારયન્ત્યેવ પિતરાવન્યે પુત્રાઃ કુલોદ્વહાઃ ।
૧૧૦.૧૮૪/૨અહં તુ માતુરુદરે કેવલં ભેદકારણમ્ ।
૧૧૦.૧૮૪/૩એવમ્ભૂતોઽપિ તૌ મોહાત્ પશ્યેયમતિદુર્મતિઃ ॥ ૧૧૦.૧૮૪॥

૧૧૦.૧૮૫/૧બ્રહ્મોવાચ । તાવાલોક્ય તતો દુઃખાદ્ વક્તું નૈવ શશાક સઃ ।
૧૧૦.૧૮૫/૨દેવાશ્ચ માતાપિતરૌ પિપ્પલાદમથાબ્રુવન્ ॥ ૧૧૦.૧૮૫॥

૧૧૦.૧૮૬/૧ધન્યસ્ત્વં પુત્ર લોકેષુ યસ્ય કીર્તિર્ગતા દિવમ્ ।
૧૧૦.૧૮૬/૨સાક્ષાત્કૃતસ્ત્વયા ત્ર્યક્ષો દેવાશ્ચાશ્વાસિતાસ્ત્વયા ।
૧૧૦.૧૮૬/૩ત્વયા પુત્રેણ સલ્લોકા ન ક્ષીયન્તે કદાચન ॥ ૧૧૦.૧૮૬॥

૧૧૦.૧૮૭/૧બ્રહ્મોવાચ । પુષ્પવૃષ્ટિસ્તદા સ્વર્ગાત્ પપાત તસ્ય મૂર્ધનિ ।
૧૧૦.૧૮૭/૨જયશબ્દઃ સુરૈરુક્તઃ પ્રાદુર્ભૂતો મહામુને ॥ ૧૧૦.૧૮૭॥

૧૧૦.૧૮૮/૧આશિષં તુ સુતે દત્ત્વા દધીચિઃ સહ ભાર્યયા ।
૧૧૦.૧૮૮/૨શમ્ભું ગઙ્ગાં સુરાન્ નત્વા પુત્રં વાક્યમથાબ્રવીત્ ॥ ૧૧૦.૧૮૮॥

૧૧૦.૧૮૯/૧દધીચિરુવાચ । પ્રાપ્ય ભાર્યાં શિવે ભક્તિં કુરુ
ગઙ્ગાં ચ સેવય ।
૧૧૦.૧૮૯/૨પુત્રાન્ ઉત્પાદ્ય વિધિવદ્ યજ્ઞાન્ ઇષ્ટ્વા સદક્ષિણાન્ ।
૧૧૦.૧૮૯/૩કૃતકૃત્યસ્તતો વત્સ આક્રમસ્વ ચિરં દિવમ્ ॥ ૧૧૦.૧૮૯॥

૧૧૦.૧૯૦/૧બ્રહ્મોવાચ । કરોમ્યેવમિતિ પ્રાહ દધીચિં પિપ્પલાશનઃ ।
૧૧૦.૧૯૦/૨દધીચિઃ પુત્રમાશ્વાસ્ય ભાર્યયા ચ પુનઃ પુનઃ ॥ ૧૧૦.૧૯૦॥

૧૧૦.૧૯૧/૧અનુજ્ઞાતઃ સુરગણૈઃ પુનઃ સ દિવમાક્રમત્ ।
૧૧૦.૧૯૧/૨દેવા અપ્યૂચિરે સર્વે પિપ્પલાદં સસમ્ભ્રમાઃ ॥ ૧૧૦.૧૯૧॥

૧૧૦.૧૯૨/૧દેવા ઊચુઃ । કૃત્યાં શમય ભદ્રં તે તદ્ ઉત્પન્નં
મહાનલમ્ ॥ ૧૧૦.૧૯૨॥

૧૧૦.૧૯૩/૧બ્રહ્મોવાચ । પિપ્પલાદસ્તુ તાન્ આહ ન શક્તોઽહં નિવારણે ।
૧૧૦.૧૯૩/૨અસત્યં નૈવ વક્તાહં યૂયં કૃત્યાં તુ બ્રૂત તામ્ ॥ ૧૧૦.૧૯૩॥

૧૧૦.૧૯૪/૧માં દૃષ્ટ્વા સા મહારૌદ્રા વિપરીતં કરિષ્યતિ ।
૧૧૦.૧૯૪/૨તામેવ ગત્વા વિબુધાઃ પ્રોચુસ્તે શાન્તિકારણમ્ ॥ ૧૧૦.૧૯૪॥

૧૧૦.૧૯૫/૧અનલં ચ યથાપ્રીતિ તે ઉભે નેત્યવોચતામ્ ।
૧૧૦.૧૯૫/૨સર્વેષાં ભક્ષણાયૈવ સૃષ્ટા ચાહં દ્વિજન્મના ॥ ૧૧૦.૧૯૫॥

૧૧૦.૧૯૬/૧તથા ચ મત્પ્રસૂતોઽગ્નિરન્યથા તત્ કથં ભવેત્ ।
૧૧૦.૧૯૬/૨મહાભૂતાનિ પઞ્ચાપિ સ્થાવરં જઙ્ગમં તથા ॥ ૧૧૦.૧૯૬॥

૧૧૦.૧૯૭/૧સર્વમસ્મન્મુખે વિદ્યાદ્ વક્તવ્યં નાવશિષ્યતે ।
૧૧૦.૧૯૭/૨મયા સમ્મન્ત્ર્ય તે દેવાઃ પુનરૂચુરુભાવપિ ॥ ૧૧૦.૧૯૭॥

૧૧૦.૧૯૮/૧ભક્ષયેતામુભૌ સર્વં યથાનુક્રમતસ્તથા ।
૧૧૦.૧૯૮/૨વડવાપિ સુરાન્ એવમુવાચ શ◌ૃણુ નારદ ॥ ૧૧૦.૧૯૮॥

૧૧૦.૧૯૯/૧વડવોવાચ । ભવતામિચ્છયા સર્વં ભક્ષ્યં મે
સુરસત્તમાઃ ॥ ૧૧૦.૧૯૯॥

૧૧૦.૨૦૦/૧બ્રહ્મોવાચ । વડવા સા નદી જાતા ગઙ્ગયા સંગતા મુને ।
૧૧૦.૨૦૦/૨તદ્ભવસ્તુ મહાન્ અગ્નિર્ય આસીદ્ અતિભીષણઃ ।
૧૧૦.૨૦૦/૩તમાહુરમરા વહ્નિં ભૂતાનામાદિતો વિદુઃ ॥ ૧૧૦.૨૦૦॥

૧૧૦.૨૦૧/૧સુરા ઊચુઃ । આપો જ્યેષ્ઠતમા જ્ઞેયાસ્તથૈવ પ્રથમં ભવાન્ ।
૧૧૦.૨૦૧/૨તત્રાપ્યપામ્પતિં જ્યેષ્ઠં સમુદ્રમશનં કુરુ ।
૧૧૦.૨૦૧/૩યથૈવ તુ વયં બ્રૂમો ગચ્છ ભુઙ્ક્ષ્વ યથાસુખમ્ ॥ ૧૧૦.૨૦૧॥

૧૧૦.૨૦૨/૧બ્રહ્મોવાચ । અનલસ્ત્વમરાન્ આહ આપસ્તત્ર કથં ત્વહમ્ ।
૧૧૦.૨૦૨/૨વ્રજેયં યદિ માં તત્ર પ્રાપયન્ત્યુદકં મહત્ ॥ ૧૧૦.૨૦૨॥

૧૧૦.૨૦૩/૧ભવન્ત એવ તેઽપ્યાહુઃ કથં તેઽગ્ને ગતિર્ભવેત્ ।
૧૧૦.૨૦૩/૨અગ્નિરપ્યાહ તાન્ દેવાન્ કન્યા માં ગુણશાલિની ॥ ૧૧૦.૨૦૩॥

૧૧૦.૨૦૪/૧હિરણ્યકલશે સ્થાપ્ય નયેદ્ યત્ર ગતિર્મમ ।
૧૧૦.૨૦૪/૨તસ્ય તદ્ વચનં શ્રુત્વા કન્યામૂચુઃ સરસ્વતીમ્ ॥ ૧૧૦.૨૦૪॥

૧૧૦.૨૦૫/૧દેવા ઊચુઃ । નયૈનમનલં શીઘ્રં શિરસા વરુણાલયમ્ ॥ ૧૧૦.૨૦૫॥

૧૧૦.૨૦૬/૧બ્રહ્મોવાચ । સરસ્વતી સુરાન્ આહ નૈકા શક્તા ચ ધારણે ।
૧૧૦.૨૦૬/૨યુક્તા ચતસૃભિઃ શીઘ્રં વહેયં વરુણાલયમ્ ॥ ૧૧૦.૨૦૬॥

૧૧૦.૨૦૭/૧સરસ્વત્યા વચઃ શ્રુત્વા ગઙ્ગાં ચ યમુનાં તથા ।
૧૧૦.૨૦૭/૨નર્મદાં તપતીં ચૈવ સુરાઃ પ્રોચુઃ પૃથક્ પૃથક્ ॥ ૧૧૦.૨૦૭॥

૧૧૦.૨૦૮/૧તાભિઃ સમન્વિતોવાહ હિરણ્યકલશેઽનલમ્ ।
૧૧૦.૨૦૮/૨સંસ્થાપ્ય શિરસાધાર્ય તા જગ્મુર્વરુણાલયમ્ ॥ ૧૧૦.૨૦૮॥

૧૧૦.૨૦૯/૧સંસ્થાપ્ય યત્ર દેવેશઃ સોમનાથો જગત્પતિઃ ।
૧૧૦.૨૦૯/૨અધ્યાસ્તે વિબુધૈઃ સાર્ધં પ્રભાસે શશિભૂષણઃ ॥ ૧૧૦.૨૦૯॥

૧૧૦.૨૧૦/૧પ્રાપયામાસુરનલં પઞ્ચનદ્યઃ સરસ્વતી ।
૧૧૦.૨૧૦/૨અધ્યાસ્તે ચ મહાન્ અગ્નિઃ પિબન્ વારિ શનૈઃ શનૈઃ ॥ ૧૧૦.૨૧૦॥

૧૧૦.૨૧૧/૧તતઃ સુરગણાઃ સર્વે શિવમૂચુઃ સુરોત્તમમ્ ॥ ૧૧૦.૨૧૧॥

૧૧૦.૨૧૨/૧દેવા ઊચુઃ । અસ્થ્નાં ચ પાવનં બ્રૂહિ અસ્માકં ચ
ગવાં તથા ॥ ૧૧૦.૨૧૨॥

૧૧૦.૨૧૩/૧બ્રહ્મોવાચ । શિવઃ પ્રાહ તદા સર્વાન્ ગઙ્ગામાપ્લુત્ય યત્નતઃ ।
૧૧૦.૨૧૩/૨દેવાશ્ચ ગાવસ્તત્પાપાન્ મુચ્યન્તે નાત્ર સંશયઃ ॥ ૧૧૦.૨૧૩॥

૧૧૦.૨૧૪/૧પ્રક્ષાલિતાનિ ચાસ્થીનિ ઋષિદેહભવાન્યથ ।
૧૧૦.૨૧૪/૨તાનિ પ્રક્ષાલનાદ્ એવ તત્ર પ્રાપ્તાનિ પૂતતામ્ ॥ ૧૧૦.૨૧૪॥

૧૧૦.૨૧૫/૧યત્ર દેવા મુક્તપાપાસ્તત્ તીર્થં પાપનાશનમ્ ।
૧૧૦.૨૧૫/૨તત્ર સ્નાનં ચ દાનં ચ બ્રહ્મહત્યાવિનાશનમ્ ॥ ૧૧૦.૨૧૫॥

૧૧૦.૨૧૬/૧ગવાં ચ પાવનં યત્ર ગોતીર્થં તદ્ ઉદાહૃતમ્ ।
૧૧૦.૨૧૬/૨તત્ર સ્નાનાન્ મહાબુદ્ધિર્ગોમેધફલમાપ્નુયાત્ ॥ ૧૧૦.૨૧૬॥

૧૧૦.૨૧૭/૧યત્ર તદ્બ્રાહ્મણાસ્થીનિ આસન્ પુણ્યાનિ નારદ ।
૧૧૦.૨૧૭/૨પિતૃતીર્થં તુ વૈ જ્ઞેયં પિતૃણાં પ્રીતિવર્ધનમ્ ॥ ૧૧૦.૨૧૭॥

૧૧૦.૨૧૮/૧ભસ્માસ્થિનખરોમાણિ પ્રાણિનો યસ્ય કસ્યચિત્ ।
૧૧૦.૨૧૮/૨તત્ર તીર્થે સંક્રમેરન્ યાવચ્ચન્દ્રાર્કતારકમ્ ॥ ૧૧૦.૨૧૮॥

૧૧૦.૨૧૯/૧સ્વર્ગે વાસો ભવેત્ તસ્ય અપિ દુષ્કૃતકર્મણઃ ।

૧૧૦.૨૧૯/૨તથા ચક્રેશ્વરાત્ તીર્થાત્ ત્રીણિ તીર્થાનિ નારદ ।
૧૧૦.૨૧૯/૩તતઃ પૂતાઃ સુરગણા ગાવઃ શમ્ભુમથાબ્રુવન્ ॥ ૧૧૦.૨૧૯॥

૧૧૦.૨૨૦/૧ગોસુરા ઊચુઃ । યામઃ સ્વં સ્વમધિષ્ઠાનમત્ર સૂર્યઃ પ્રતિષ્ઠિતઃ ।
૧૧૦.૨૨૦/૨અસ્મિન્ સ્થિતે દિનકરે સુરાઃ સર્વે પ્રતિષ્ઠિતાઃ ॥ ૧૧૦.૨૨૦॥

૧૧૦.૨૨૧/૧ભવેયુર્જગતામીશ તદ્ અનુજ્ઞાતુમર્હસિ ।
૧૧૦.૨૨૧/૨સૂર્યો હ્યાત્માસ્ય જગતસ્તસ્થુષશ્ચ સનાતનઃ ॥ ૧૧૦.૨૨૧॥

૧૧૦.૨૨૨/૧દિવાકરો દેવમયસ્તત્રાસ્માભિઃ પ્રતિષ્ઠિતઃ ।
૧૧૦.૨૨૨/૨યત્ર ગઙ્ગા જગદ્ધાત્રી યત્ર વૈ ત્ર્યમ્બકઃ સ્વયમ્ ।
૧૧૦.૨૨૨/૩સુરવાસં પ્રતિષ્ઠાનં ભવેદ્ યત્ર ચ ત્ર્યમ્બકમ્ ॥ ૧૧૦.૨૨૨॥

૧૧૦.૨૨૩/૧બ્રહ્મોવાચ । આપૃચ્છ્ય પિપ્પલાદં તં સુરાઃ સ્વં સદનં યયુઃ ।
૧૧૦.૨૨૩/૨પિપ્પલાઃ કાલપર્યાયે સ્વર્ગં જગ્મુરથાક્ષયમ્ ॥ ૧૧૦.૨૨૩॥

૧૧૦.૨૨૪/૧પાદપાનાં પદં વિપ્રઃ પિપ્પલાદઃ પ્રતાપવાન્ ।
૧૧૦.૨૨૪/૨ક્ષેત્રાધિપત્યે સંસ્થાપ્ય પૂજયામાસ શંકરમ્ ॥ ૧૧૦.૨૨૪॥

૧૧૦.૨૨૫/૧દધીચિસૂનુર્મુનિરુગ્રતેજા ।
૧૧૦.૨૨૫/૨અવાપ્ય ભાર્યાં ગૌતમસ્યાત્મજાં ચ ।
૧૧૦.૨૨૫/૩પુત્રાન્ અથાવાપ્ય શ્રિયં યશશ્ચ ।
૧૧૦.૨૨૫/૪સુહૃજ્જનૈઃ સ્વર્ગમવાપ ધીરઃ ॥ ૧૧૦.૨૨૫॥

૧૧૦.૨૨૬/૧તતઃ પ્રભૃતિ તત્ તીર્થં પિપ્પલેશ્વરમુચ્યતે ।
૧૧૦.૨૨૬/૨સર્વક્રતુફલં પુણ્યં સ્મરણાદ્ અઘનાશનમ્ ॥ ૧૧૦.૨૨૬॥

૧૧૦.૨૨૭/૧કિં પુનઃ સ્નાનદાનાભ્યામાદિત્યસ્ય તુ દર્શનાત્ ।
૧૧૦.૨૨૭/૨ચક્રેશ્વરઃ પિપ્પલેશો દેવદેવસ્ય નામની ॥ ૧૧૦.૨૨૭॥

૧૧૦.૨૨૮/૧સરહસ્યં વિદિત્વા તુ સર્વકામાન્ અવાપ્નુયાત્ ।
૧૧૦.૨૨૮/૨સૂર્યસ્ય ચ પ્રતિષ્ઠાનાત્ સુરવાસે પ્રતિષ્ઠિતે ।
૧૧૦.૨૨૮/૩પ્રતિષ્ઠાનં તુ તત્ ક્ષેત્રં સુરાણામપિ વલ્લભમ્ ॥ ૧૧૦.૨૨૮॥

૧૧૦.૨૨૯/૧ઇતીદમાખ્યાનમતીવ પુણ્યમ્ ।
૧૧૦.૨૨૯/૨પઠેત વા યઃ શ‍ૃણુયાત્ સ્મરેદ્ વા ।
૧૧૦.૨૨૯/૩સ દીર્ઘજીવી ધનવાન્ ધર્મયુક્તશ્ ।
૧૧૦.૨૨૯/૪ચાન્તે સ્મરઞ્ શમ્ભુમુપૈતિ નિત્યમ્ ॥ ૧૧૦.૨૨૯॥

૧૧૧.૧/૧બ્રહ્મોવાચ । નાગતીર્થમિતિ ખ્યાતં સર્વકામપ્રદં શુભમ્ ।
૧૧૧.૧/૨યત્ર નાગેશ્વરો દેવઃ શ્ૃણુ તસ્યાપિ વિસ્તરમ્ ॥ ૧૧૧.૧॥

૧૧૧.૨/૧પ્રતિષ્ઠાનપુરે રાજા શૂરસેન ઇતિ શ્રુતઃ ।
૧૧૧.૨/૨સોમવંશભવઃ શ્રીમાન્ મતિમાન્ ગુણસાગરઃ ॥ ૧૧૧.૨॥

૧૧૧.૩/૧પુત્રાર્થં સ મહાયત્નમકરોત્ પ્રિયયા સહ ।
૧૧૧.૩/૨તસ્ય પુત્રશ્ચિરાદ્ આસીત્ સર્પો વૈ ભીષણાકૃતિઃ ॥ ૧૧૧.૩॥

૧૧૧.૪/૧પુત્રં તં ગોપયામાસ શૂરસેનો મહીપતિઃ ।
૧૧૧.૪/૨રાજ્ઞઃ પુત્રઃ સર્પ ઇતિ ન કશ્ચિદ્ વિન્દતે જનઃ ॥ ૧૧૧.૪॥

૧૧૧.૫/૧અન્તર્વર્તી પરો વાપિ માતરં પિતરં વિના ।
૧૧૧.૫/૨ધાત્રેય્યપિ ન જાનાતિ નામાત્યો ન પુરોહિતઃ ॥ ૧૧૧.૫॥

૧૧૧.૬/૧તં દૃષ્ટ્વા ભીષણં સર્પં સભાર્યો નૃપસત્તમઃ ।
૧૧૧.૬/૨સંતાપં નિત્યમાપ્નોતિ સર્પાદ્ વરમપુત્રતા ॥ ૧૧૧.૬॥

૧૧૧.૭/૧એતદ્ અસ્તિ મહાસર્પો વક્તિ નિત્યં મનુષ્યવત્ ।
૧૧૧.૭/૨સ સર્પઃ પિતરં પ્રાહ કુરુ ચૂડામપિ ક્રિયામ્ ॥ ૧૧૧.૭॥

૧૧૧.૮/૧તથોપનયનં ચાપિ વેદાધ્યયનમેવ ચ ।
૧૧૧.૮/૨યાવદ્ વેદં ન ચાધીતે તાવચ્છૂદ્રસમો દ્વિજઃ ॥ ૧૧૧.૮॥

૧૧૧.૯/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા પુત્રવચઃ શૂરસેનોઽતિદુઃખિતઃ ।
૧૧૧.૯/૨બ્રાહ્મણં કંચનાનીય સંસ્કારાદિ તદાકરોત્ ।
૧૧૧.૯/૩અધીતવેદઃ સર્પોઽપિ પિતરં ચાબ્રવીદ્ ઇદમ્ ॥ ૧૧૧.૯॥

૧૧૧.૧૦/૧સર્પ ઉવાચ । વિવાહં કુરુ મે રાજન્ સ્ત્રીકામોઽહં નૃપોત્તમ ।
૧૧૧.૧૦/૨અન્યથાપિ ચ કૃત્યં તે ન સિધ્યેદ્ ઇતિ મે મતિઃ ॥ ૧૧૧.૧૦॥

૧૧૧.૧૧/૧જનયિત્વાત્મજાન્ વેદ+ ।વિધિનાખિલસંસ્કૃતીઃ ।
૧૧૧.૧૧/૨ન કુર્યાદ્ યઃ પિતા તસ્ય નરકાન્ નાસ્તિ નિષ્કૃતિઃ ॥ ૧૧૧.૧૧॥

૧૧૧.૧૨/૧બ્રહ્મોવાચ । વિસ્મિતઃ સ પિતા પ્રાહ સુતં તમુરગાકૃતિમ્ ॥ ૧૧૧.૧૨॥

૧૧૧.૧૩/૧શૂરસેન ઉવાચ । યસ્ય શબ્દાદ્ અપિ ત્રાસં યાન્તિ શૂરાશ્ચ પૂરુષાઃ ।
૧૧૧.૧૩/૨તસ્મૈ કન્યાં તુ કો દદ્યાદ્ વદ પુત્ર કરોમિ કિમ્ ॥ ૧૧૧.૧૩॥

૧૧૧.૧૪/૧બ્રહ્મોવાચ । તત્ પિતુર્વચનં શ્રુત્વા સર્પઃ પ્રાહ
વિચક્ષણઃ ॥ ૧૧૧.૧૪॥

૧૧૧.૧૫/૧સર્પ ઉવાચ । વિવાહા બહવો રાજન્ રાજ્ઞાં સન્તિ જનેશ્વર ।
૧૧૧.૧૫/૨પ્રસહ્યાહરણં ચાપિ શસ્ત્રૈર્વૈવાહ એવ ચ ॥ ૧૧૧.૧૫॥

૧૧૧.૧૬/૧જાતે વિવાહે પુત્રસ્ય પિતાસૌ કૃતકૃદ્ ભવેત્ ।
૧૧૧.૧૬/૨નો ચેદ્ અત્રૈવ ગઙ્ગાયાં મરિષ્યે નાત્ર સંશયઃ ॥ ૧૧૧.૧૬॥

૧૧૧.૧૭/૧બ્રહ્મોવાચ । તત્ પુત્રનિશ્ચયં જ્ઞાત્વા અપુત્રો નૃપસત્તમઃ ।
૧૧૧.૧૭/૨વિવાહાર્થમમાત્યાંસ્તાન્ આહૂયેદં વચોઽબ્રવીત્ ॥ ૧૧૧.૧૭॥

૧૧૧.૧૮/૧શૂરસેન ઉવાચ । નાગેશ્વરો મમ સુતો યુવરાજો ગુણાકરઃ ।
૧૧૧.૧૮/૨ગુણવાન્ મતિમાઞ્ શૂરો દુર્જયઃ શત્રુતાપનઃ ॥ ૧૧૧.૧૮॥

૧૧૧.૧૯/૧રથે નાગે સ ધનુષિ પૃથિવ્યાં નોપમીયતે ।
૧૧૧.૧૯/૨વિવાહસ્તસ્ય કર્તવ્યો હ્યહં વૃદ્ધસ્તથૈવ ચ ॥ ૧૧૧.૧૯॥

૧૧૧.૨૦/૧રાજ્યભારં સુતે ન્યસ્ય નિશ્ચિન્તોઽહં ભવામ્યતઃ ।
૧૧૧.૨૦/૨ન દારસંગ્રહો યાવત્ તાવત્ પુત્રો મમ પ્રિયઃ ॥ ૧૧૧.૨૦॥

૧૧૧.૨૧/૧બાલભાવં નો જહાતિ તસ્માત્ સર્વેઽનુમન્ય ચ ।
૧૧૧.૨૧/૨વિવાહાયાથ કુર્વન્તુ યત્નં મમ હિતે રતાઃ ॥ ૧૧૧.૨૧॥

૧૧૧.૨૨/૧ન મે કાચિત્ તદા ચિન્તા કૃતોદ્વાહો યદાત્મજઃ ।
૧૧૧.૨૨/૨સુતે ન્યસ્તભરા યાન્તિ કૃતિનસ્તપસે વનમ્ ॥ ૧૧૧.૨૨॥

૧૧૧.૨૩/૧બ્રહ્મોવાચ । અમાત્યા રાજવચનં શ્રુત્વા સર્વે વિનીતવત્ ।
૧૧૧.૨૩/૨ઊચુઃ પ્રાઞ્જલયો હર્ષાદ્ રાજાનં ભૂરિતેજસમ્ ॥ ૧૧૧.૨૩॥

૧૧૧.૨૪/૧અમાત્યા ઊચુઃ । તવ પુત્રો ગુણજ્યેષ્ઠસ્ત્વં ચ સર્વત્ર વિશ્રુતઃ ।
૧૧૧.૨૪/૨વિવાહે તવ પુત્રસ્ય કિં મન્ત્ર્યં કિં તુ ચિન્ત્યતે ॥ ૧૧૧.૨૪॥

૧૧૧.૨૫/૧બ્રહ્મોવાચ । અમાત્યેષુ તથોક્તેષુ ગમ્ભીરો નૃપસત્તમઃ ।
૧૧૧.૨૫/૨પુત્રં સર્પં ત્વમાત્યાનાં ન ચાખ્યાતિ ન તે વિદુઃ ॥ ૧૧૧.૨૫॥

૧૧૧.૨૬/૧રાજા પુનસ્તાન્ ઉવાચ કા સ્યાત્ કન્યા ગુણાધિકા ।
૧૧૧.૨૬/૨મહાવંશભવઃ શ્રીમાન્ કો રાજા સ્યાદ્ ગુણાશ્રયઃ ॥ ૧૧૧.૨૬॥

૧૧૧.૨૭/૧સમ્બન્ધયોગ્યઃ શૂરશ્ચ યત્સમ્બન્ધઃ પ્રશસ્યતે ।
૧૧૧.૨૭/૨તદ્ રાજવચનં શ્રુત્વા અમાત્યાનાં મહામતિઃ ॥ ૧૧૧.૨૭॥

૧૧૧.૨૮/૧કુલીનઃ સાધુરત્યન્તં રાજકાર્યહિતે રતઃ ।

૧૧૧.૨૮/૨રાજ્ઞો મતિં વિદિત્વા તુ ઇઙ્ગિતજ્ઞોઽબ્રવીદ્ ઇદમ્ ॥ ૧૧૧.૨૮॥

૧૧૧.૨૯/૧અમાત્ય ઉવાચ । પૂર્વદેશે મહારાજ વિજયો નામ ભૂપતિઃ ।
૧૧૧.૨૯/૨વાજિવારણરત્નાનાં યસ્ય સંખ્યા ન વિદ્યતે ॥ ૧૧૧.૨૯॥

૧૧૧.૩૦/૧અષ્ટૌ પુત્રા મહેષ્વાસા મહારાજસ્ય ધીમતઃ ।
૧૧૧.૩૦/૨તેષાં સ્વસા ભોગવતી સાક્ષાલ્લક્ષ્મીરિવાપરા ।
૧૧૧.૩૦/૩તવ પુત્રસ્ય યોગ્યા સા ભાર્યા રાજન્ મયોદિતા ॥ ૧૧૧.૩૦॥

૧૧૧.૩૧/૧બ્રહ્મોવાચ । વૃદ્ધામાત્યવચઃ શ્રુત્વા રાજા તં
પ્રત્યભાષત ॥ ૧૧૧.૩૧॥

૧૧૧.૩૨/૧રાજોવાચ । સુતા તસ્ય કથં મેઽસ્ય સુતસ્ય સ્યાદ્ વદસ્વ
તત્ ॥ ૧૧૧.૩૨॥

૧૧૧.૩૩/૧વૃદ્ધામાત્ય ઉવાચ । લક્ષિતોઽસિ મહારાજ યત્ તે મનસિ વર્તતે ।
૧૧૧.૩૩/૨યચ્છૂરસેન કૃત્યં સ્યાદ્ અનુજાનીહિ માં તતઃ ॥ ૧૧૧.૩૩॥

૧૧૧.૩૪/૧બ્રહ્મોવાચ । વૃદ્ધામાત્યવચઃ શ્રુત્વા ભૂષણાચ્છાદનોક્તિભિઃ ।
૧૧૧.૩૪/૨સમ્પૂજ્ય પ્રેષયામાસ મહત્યા સેનયા સહ ॥ ૧૧૧.૩૪॥

૧૧૧.૩૫/૧સ પૂર્વદેશમાગત્ય મહારાજં સમેત્ય ચ ।
૧૧૧.૩૫/૨સમ્પૂજ્ય વિવિધૈર્વાક્યૈરુપાયૈર્નીતિસમ્ભવૈઃ ॥ ૧૧૧.૩૫॥

૧૧૧.૩૬/૧મહારાજસુતાયાશ્ચ ભોગવત્યા મહામતિઃ ।
૧૧૧.૩૬/૨શૂરસેનસ્ય નૃપતેઃ સૂનોર્નાગસ્ય ધીમતઃ ॥ ૧૧૧.૩૬॥

૧૧૧.૩૭/૧વિવાહાયાકરોત્ સંધિં મિથ્યામિથ્યાવચોઉક્તિભિઃ ।
૧૧૧.૩૭/૨પૂજયામાસ નૃપતિં ભૂષણાચ્છાદનાદિભિઃ ॥ ૧૧૧.૩૭॥

૧૧૧.૩૮/૧અવાપ્ય પૂજાં નૃપતિર્દદામીત્યવદત્ તદા ।
૧૧૧.૩૮/૨તત આગત્ય રાજ્ઞેઽસૌ વૃદ્ધામાત્યો મહામતિઃ ॥ ૧૧૧.૩૮॥

૧૧૧.૩૯/૧શૂરસેનાય તદ્ વૃત્તં વૈવાહિકમવેદયત્ ।
૧૧૧.૩૯/૨તતો બહુતિથે કાલે વૃદ્ધામાત્યો મહામતિઃ ॥ ૧૧૧.૩૯॥

૧૧૧.૪૦/૧પુનર્બલેન મહતા વસ્ત્રાલંકારભૂષિતઃ ।
૧૧૧.૪૦/૨જગામ તરસા સર્વૈરન્યૈશ્ચ સચિવૈર્વૃતઃ ॥ ૧૧૧.૪૦॥

૧૧૧.૪૧/૧વિવાહાય મહામાત્યો મહારાજાય બુદ્ધિમાન્ ।
૧૧૧.૪૧/૨સર્વં પ્રોવાચ વૃદ્ધોઽસાવમાત્યઃ સચિવૈર્વૃતઃ ॥ ૧૧૧.૪૧॥

૧૧૧.૪૨/૧વૃદ્ધામાત્ય ઉવાચ । અત્રાગન્તું ન ચાયાતિ શૂરસેનસ્ય ભૂપતેઃ ।
૧૧૧.૪૨/૨પુત્રો નાગ ઇતિ ખ્યાતો બુદ્ધિમાન્ ગુણસાગરઃ ॥ ૧૧૧.૪૨॥

૧૧૧.૪૩/૧ક્ષત્રિયાણાં વિવાહાશ્ચ ભવેયુર્બહુધા નૃપ ।
૧૧૧.૪૩/૨તસ્માચ્છસ્ત્રૈરલંકારૈર્વિવાહઃ સ્યાન્ મહામતે ॥ ૧૧૧.૪૩॥

૧૧૧.૪૪/૧ક્ષત્રિયા બ્રાહ્મણાશ્ચૈવ સત્યાં વાચં વદન્તિ હિ ।
૧૧૧.૪૪/૨તસ્માચ્છસ્ત્રૈરલંકારૈર્વિવાહસ્ત્વનુમન્યતામ્ ॥ ૧૧૧.૪૪॥

૧૧૧.૪૫/૧બ્રહ્મોવાચ । વૃદ્ધામાત્યવચઃ શ્રુત્વા વિજયો રાજસત્તમઃ ।
૧૧૧.૪૫/૨મેને વાક્યં તથા સત્યમમાત્યં ભૂપતિં તદા ॥ ૧૧૧.૪૫॥

૧૧૧.૪૬/૧વિવાહમકરોદ્ રાજા ભોગવત્યાઃ સવિસ્તરમ્ ।
૧૧૧.૪૬/૨શસ્ત્રેણ ચ યથાશાસ્ત્રં પ્રેષયામાસ તાં પુનઃ ॥ ૧૧૧.૪૬॥

૧૧૧.૪૭/૧સ્વાન્ અમાત્યાંસ્તથા ગાશ્ચ હિરણ્યતુરગાદિકમ્ ।
૧૧૧.૪૭/૨બહુ દત્ત્વાથ વિજયો હર્ષેણ મહતા યુતઃ ॥ ૧૧૧.૪૭॥

૧૧૧.૪૮/૧તામાદાયાથ સચિવા વૃદ્ધામાત્યપુરોગમાઃ ।
૧૧૧.૪૮/૨પ્રતિષ્ઠાનમથાભ્યેત્ય શૂરસેનાય તાં સ્નુષામ્ ॥ ૧૧૧.૪૮॥

૧૧૧.૪૯/૧ન્યવેદયંસ્તથોચુસ્તે વિજયસ્ય વચો બહુ ।
૧૧૧.૪૯/૨ભૂષણાનિ વિચિત્રાણિ દાસ્યો વસ્ત્રાદિકં ચ યત્ ॥ ૧૧૧.૪૯॥

૧૧૧.૫૦/૧નિવેદ્ય શૂરસેનાય કૃતકૃત્યા બભૂવિરે ।
૧૧૧.૫૦/૨વિજયસ્ય તુ યેઽમાત્યા ભોગવત્યા સહાગતાઃ ॥ ૧૧૧.૫૦॥

૧૧૧.૫૧/૧તાન્ પૂજયિત્વા રાજાસૌ બહુમાનપુરઃસરમ્ ।
૧૧૧.૫૧/૨વિજયાય યથા પ્રીતિસ્તથા કૃત્વા વ્યસર્જયત્ ॥ ૧૧૧.૫૧॥

૧૧૧.૫૨/૧વિજયસ્ય સુતા બાલા રૂપયૌવનશાલિની ।
૧૧૧.૫૨/૨શ્વશ્રૂશ્વશુરયોર્નિત્યં શુશ્રૂષન્તી સુમધ્યમા ॥ ૧૧૧.૫૨॥

૧૧૧.૫૩/૧ભોગવત્યાશ્ચ યો ભર્તા મહાસર્પોઽતિભીષણઃ ।
૧૧૧.૫૩/૨એકાન્તદેશે વિજને ગૃહે રત્નસુશોભિતે ॥ ૧૧૧.૫૩॥

૧૧૧.૫૪/૧સુગન્ધકુસુમાકીર્ણે તત્રાસ્તે સુખશીતલે ।
૧૧૧.૫૪/૨સ સર્પો માતરં પ્રાહ પિતરં ચ પુનઃ પુનઃ ॥ ૧૧૧.૫૪॥

૧૧૧.૫૫/૧મમ ભાર્યા રાજપુત્રી કિં માં નૈવોપસર્પતિ ।

૧૧૧.૫૫/૨તત્ પુત્રવચનં શ્રુત્વા સર્પમાતેદમબ્રવીત્ ॥ ૧૧૧.૫૫॥

૧૧૧.૫૬/૧રાજપત્ન્યુવાચ । ધાત્રિકે ગચ્છ સુભગે શીઘ્રં ભોગવતીં વદ ।
૧૧૧.૫૬/૨તવ ભર્તા સર્પ ઇતિ તતઃ સા કિં વદિષ્યતિ ॥ ૧૧૧.૫૬॥

૧૧૧.૫૭/૧બ્રહ્મોવાચ । ધાત્રિકા ચ તથેત્યુક્ત્વા ગત્વા ભોગવતીં તદા ।
૧૧૧.૫૭/૨રહોગતા ઉવાચેદં વિનીતવદ્ અપૂર્વવત્ ॥ ૧૧૧.૫૭॥

૧૧૧.૫૮/૧ધાત્રિકોવાચ । જાનેऽહં સુભગે ભદ્રે ભર્તારં તવ દૈવતમ્ ।
૧૧૧.૫૮/૨ન ચાખ્યેયં ત્વયા ક્વાપિ સર્પો ન પુરુષો ધ્રુવમ્ ॥ ૧૧૧.૫૮॥

૧૧૧.૫૯/૧બ્રહ્મોવાચ । તસ્યાસ્તદ્ વચનં શ્રુત્વા ભોગવત્યબ્રવીદ્ ઇદમ્ ॥ ૧૧૧.૫૯॥

૧૧૧.૬૦/૧ભોગવત્યુવાચ । માનુષીણાં મનુષ્યો હિ ભર્તા સામાન્યતો ભવેત્ ।
૧૧૧.૬૦/૨કિં પુનર્દેવજાતિસ્તુ ભર્તા પુણ્યેન લભ્યતે ॥ ૧૧૧.૬૦॥

૧૧૧.૬૧/૧બ્રહ્મોવાચ । ભોગવત્યાસ્તુ તદ્ વાક્યં સા ચ સર્વં
ન્યવેદયત્ ।
૧૧૧.૬૧/૨સર્પાય સર્પમાત્રે ચ રાજ્ઞે ચૈવ યથાક્રમમ્ ॥ ૧૧૧.૬૧॥

૧૧૧.૬૨/૧રુરોદ રાજા તદ્વાક્યાત્ સ્મૃત્વા તાં કર્મણો ગતિમ્ ।
૧૧૧.૬૨/૨ભોગવત્યપિ તાં પ્રાહ ઉક્તપૂર્વાં પુનઃ સખીમ્ ॥ ૧૧૧.૬૨॥

૧૧૧.૬૩/૧ભોગવત્યુવાચ । કાન્તં દર્શય ભદ્રં તે વૃથા
યાતિ વયો મમ ॥ ૧૧૧.૬૩॥

૧૧૧.૬૪/૧બ્રહ્મોવાચ । તતઃ સા દર્શયામાસ સર્પં તમતિભીષણમ્ ।
૧૧૧.૬૪/૨સુગન્ધકુસુમાકીર્ણે શયને સા રહોગતા ॥ ૧૧૧.૬૪॥

૧૧૧.૬૫/૧તં દૃષ્ટ્વા ભીષણં સર્પં ભર્તારં રત્નભૂષિતમ્ ।
૧૧૧.૬૫/૨કૃતાઞ્જલિપુટા વાક્યમવદત્ કાન્તમઞ્જસા ॥ ૧૧૧.૬૫॥

૧૧૧.૬૬/૧ભોગવત્યુવાચ । ધન્યાસ્મ્યનુગૃહીતાસ્મિ યસ્યા મે દૈવતં
પતિઃ ॥ ૧૧૧.૬૬॥

૧૧૧.૬૭/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા શયને સ્થિત્વા તં સર્પં સર્પભાવનૈઃ ।
૧૧૧.૬૭/૨ખેલયામાસ તન્વઙ્ગી ગીતૈશ્ચૈવાઙ્ગસંગમૈઃ ॥ ૧૧૧.૬૭॥

૧૧૧.૬૮/૧સુગન્ધકુસુમૈઃ પાનૈસ્તોષયામાસ તં પતિમ્ ।
૧૧૧.૬૮/૨તસ્યાશ્ચૈવ પ્રસાદેન સર્પસ્યાભૂત્ સ્મૃતિર્મુને ।
૧૧૧.૬૮/૩સ્મૃત્વા સર્વં દૈવકૃતં રાત્રૌ સર્પોऽબ્રવીત્ પ્રિયામ્ ॥ ૧૧૧.૬૮॥

૧૧૧.૬૯/૧સર્પ ઉવાચ । રાજકન્યાપિ માં દૃષ્ટ્વા ન ભીતાસિ કથં પ્રિયે ।
૧૧૧.૬૯/૨સોવાચ દૈવવિહિતં કોऽતિક્રમિતુમીશ્વરઃ ।
૧૧૧.૬૯/૩પતિરેવ ગતિઃ સ્ત્રીણાં સર્વદૈવ વિશેષતઃ ॥ ૧૧૧.૬૯॥

૧૧૧.૭૦/૧બ્રહ્મોવાચ । શ્રુત્વેતિ હૃષ્ટસ્તામાહ નાગઃ પ્રહસિતાનનઃ ॥ ૧૧૧.૭૦॥

૧૧૧.૭૧/૧સર્પ ઉવાચ । તુષ્ટોऽસ્મિ તવ ભક્ત્યાહં કિં દદામિ તવેપ્સિતમ્ ।
૧૧૧.૭૧/૨તવ પ્રસાદાચ્ચાર્વઙ્ગિ સર્વસ્મૃતિરભૂદ્ ઇયમ્ ॥ ૧૧૧.૭૧॥

૧૧૧.૭૨/૧શપ્તોऽહં દેવદેવેન કુપિતેન પિનાકિના ।
૧૧૧.૭૨/૨મહેશ્વરકરે નાગઃ શેષપુત્રો મહાબલઃ ॥ ૧૧૧.૭૨॥

૧૧૧.૭૩/૧સોऽહં પતિસ્ત્વં ચ ભાર્યા નામ્ના ભોગવતી પુરા ।
૧૧૧.૭૩/૨ઉમાવાક્યાજ્જહાસોચ્ચૈઃ શમ્ભુઃ પ્રીતો રહોગતઃ ॥ ૧૧૧.૭૩॥

૧૧૧.૭૪/૧મમાપિ ચાગતં ભદ્રે હાસ્યં તદ્દેવસંનિધૌ ।
૧૧૧.૭૪/૨તતસ્તુ કુપિતઃ શમ્ભુઃ પ્રાદાચ્છાપં મમેદૃશમ્ ॥ ૧૧૧.૭૪॥

૧૧૧.૭૫/૧શિવ ઉવાચ । મનુષ્યયોનૌ ત્વં સર્પો ભવિતા જ્ઞાનવાન્
ઇતિ ॥ ૧૧૧.૭૫॥

૧૧૧.૭૬/૧સર્પ ઉવાચ । તતઃ પ્રસાદિતઃ શમ્ભુસ્ત્વયા ભદ્રે મયા સહ ।
૧૧૧.૭૬/૨તતશ્ચોક્તં તેન ભદ્રે ગૌતમ્યાં મમ પૂજનમ્ ॥ ૧૧૧.૭૬॥

૧૧૧.૭૭/૧કુર્વતો જ્ઞાનમાધાસ્યે યદા સર્પાકૃતેસ્તવ ।
૧૧૧.૭૭/૨તદા વિશાપો ભવિતા ભોગવત્યાઃ પ્રસાદતઃ ॥ ૧૧૧.૭૭॥

૧૧૧.૭૮/૧તસ્માદ્ ઇદં મમાપન્નં તવ ચાપિ શુભાનને ।
૧૧૧.૭૮/૨તસ્માન્ નીત્વા ગૌતમીં માં પૂજાં કુરુ મયા સહ ॥ ૧૧૧.૭૮॥

૧૧૧.૭૯/૧તતો વિશાપો ભવિતા આવાં યાવઃ શિવં પુનઃ ।
૧૧૧.૭૯/૨સર્વેષાં સર્વદાર્તાનાં શિવ એવ પરા ગતિઃ ॥ ૧૧૧.૭૯॥

૧૧૧.૮૦/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા ભર્તૃવચનં સા ભર્ત્રા ગૌતમીં યયૌ ।
૧૧૧.૮૦/૨તતઃ સ્નાત્વા તુ ગૌતમ્યાં પૂજાં ચક્રે શિવસ્ય તુ ॥ ૧૧૧.૮૦॥

૧૧૧.૮૧/૧તતઃ પ્રસન્નો ભગવાન્ દિવ્યરૂપં દદૌ મુને ।
૧૧૧.૮૧/૨આપૃચ્છ્ય પિતરૌ સર્પો ભાર્યયા ગન્તુમુદ્યતઃ ।
૧૧૧.૮૧/૩શિવલોકં તતો જ્ઞાત્વા પિતા પ્રાહ મહામતિઃ ॥ ૧૧૧.૮૧॥

૧૧૧.૮૨/૧પિતોવાચ । યુવરાજ્યધરો જ્યેષ્ઠઃ પુત્ર એકો ભવાન્ ઇતિ ।
૧૧૧.૮૨/૨તસ્માદ્ રાજ્યમશેષેણ કૃત્વોત્પાદ્ય સુતાન્ બહૂન્ ।
૧૧૧.૮૨/૩યાતે મયિ પરં ધામ તતો યાહિ શિવં પુરમ્ ॥ ૧૧૧.૮૨॥

૧૧૧.૮૩/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા પિતૃવચસ્તથેત્યાહ સ નાગરાટ્ ।
૧૧૧.૮૩/૨કામરૂપમવાપ્યાથ ભાર્યયા સહ સુવ્રતઃ ॥ ૧૧૧.૮૩॥

૧૧૧.૮૪/૧પિત્રા માત્રા તથા પુત્રૈ રાજ્યં કૃત્વા સુવિસ્તરમ્ ।
૧૧૧.૮૪/૨યાતે પિતરિ સ્વર્લોકં પુત્રાન્ સ્થાપ્ય સ્વકે પદે ॥ ૧૧૧.૮૪॥

૧૧૧.૮૫/૧ભાર્યામાત્યાદિસહિતસ્તતઃ શિવપુરં યયૌ ।
૧૧૧.૮૫/૨તતઃ પ્રભૃતિ તત્ તીર્થં નાગતીર્થમિતિ શ્રુતમ્ ॥ ૧૧૧.૮૫॥

૧૧૧.૮૬/૧યત્ર નાગેશ્વરો દેવો ભોગવત્યા પ્રતિષ્ઠિતઃ ।
૧૧૧.૮૬/૨તત્ર સ્નાનં ચ દાનં ચ સર્વક્રતુફલપ્રદમ્ ॥ ૧૧૧.૮૬॥

૧૧૨.૧/૧બ્રહ્મોવાચ । માતૃતીર્થમિતિ ખ્યાતં સર્વસિદ્ધિકરં નૃણામ્ ।
૧૧૨.૧/૨આધિભિર્મુચ્યતે જન્તુસ્તત્તીર્થસ્મરણાદ્ અપિ ॥ ૧૧૨.૧॥

૧૧૨.૨/૧દેવાનામસુરાણાં ચ સંગરોઽભૂત્ સુદારુણઃ ।
૧૧૨.૨/૨નાશક્નુવંસ્તદા જેતું દેવા દાનવસંગરમ્ ॥ ૧૧૨.૨॥

૧૧૨.૩/૧તદાહમગમં દેવૈસ્તિષ્ઠન્તં શૂલપાણિનમ્ ।
૧૧૨.૩/૨અસ્તવં વિવિધૈર્વાક્યૈઃ કૃતાઞ્જલિપુટઃ શનૈઃ ॥ ૧૧૨.૩॥

૧૧૨.૪/૧સમ્મન્ત્ર્ય દેવૈરસુરૈશ્ચ સર્વૈર્।
૧૧૨.૪/૨યદાહૃતં સમ્મથિતું સમુદ્રમ્ ।
૧૧૨.૪/૩યત્ કાલકૂટં સમભૂન્ મહેશ ।
૧૧૨.૪/૪તત્ ત્વાં વિના કો ગ્રસિતું સમર્થઃ ॥ ૧૧૨.૪॥

૧૧૨.૫/૧પુષ્પપ્રહારેણ જગત્ત્રયં યઃ ।
૧૧૨.૫/૨સ્વાધીનમાપાદયિતું સમર્થઃ ।
૧૧૨.૫/૩મારો હરેઽપ્યન્યસુરાદિવન્દ્યો ।
૧૧૨.૫/૪વિતાયમાનો વિલયં પ્રયાતઃ ॥ ૧૧૨.૫॥

૧૧૨.૬/૧વિમથ્ય વારીશમનઙ્ગશત્રો ।
૧૧૨.૬/૨યદ્ ઉત્તમં તત્ તુ દિવૌકસેભ્યઃ ।
૧૧૨.૬/૩દત્ત્વા વિષં સંહરન્ નીલકણ્ઠ ।
૧૧૨.૬/૪કો વા ધર્તું ત્વામ્ ઋતે વૈ સમર્થઃ ॥ ૧૧૨.૬॥

૧૧૨.૭/૧તતશ્ચ તુષ્ટો ભગવાન્ આદિકર્તા ત્રિલોચનઃ ॥ ૧૧૨.૭॥

૧૧૨.૮/૧શિવ ઉવાચ । દાસ્યેઽહં યદ્ અભીષ્ટં વો બ્રુવન્તુ
સુરસત્તમાઃ ॥ ૧૧૨.૮॥

૧૧૨.૯/૧દેવા ઊચુઃ । દાનવેભ્યો ભયં ઘોરં તત્રૈહિ વૃષભધ્વજ ।
૧૧૨.૯/૨જહિ શત્રૂન્ સુરાન્ પાહિ નાથવન્તસ્ત્વયા પ્રભો ॥ ૧૧૨.૯॥

૧૧૨.૧૦/૧નિષ્કારણઃ સુહૃચ્છમ્ભો નાભવિષ્યદ્ ભવાન્ યદિ ।
૧૧૨.૧૦/૨તદાકરિષ્યન્ કિમિવ દુઃખાર્તાઃ સર્વદેહિનઃ ॥ ૧૧૨.૧૦॥

૧૧૨.૧૧/૧બ્રહ્મોવાચ । ઇત્યુક્તસ્તત્ક્ષણાત્ પ્રાયાદ્ યત્ર તે દેવશત્રવઃ ।
૧૧૨.૧૧/૨તત્ર તદ્ યુદ્ધમભવચ્છંકરેણ સુરદ્વિષામ્ ॥ ૧૧૨.૧૧॥

૧૧૨.૧૨/૧તતસ્ત્રિલોચનઃ શ્રાન્તસ્તમોરૂપધરઃ શિવઃ ।
૧૧૨.૧૨/૨લલાટાદ્ વ્યપતંસ્તસ્ય યુધ્યતઃ સ્વેદબિન્દવઃ ॥ ૧૧૨.૧૨॥

૧૧૨.૧૩/૧સ સંહરન્ દૈત્યગણાંસ્તામસીં મૂર્તિમાશ્રિતઃ ।
૧૧૨.૧૩/૨તાં મૂર્તિમસુરા દૃષ્ટ્વા મેરુપૃષ્ઠાદ્ ભુવં યયુઃ ॥ ૧૧૨.૧૩॥

૧૧૨.૧૪/૧સ સંહરન્ સર્વદૈત્યાંસ્તદાગચ્છદ્ ભુવં હરઃ ।
૧૧૨.૧૪/૨ઇતશ્ચેતશ્ચ ભીતાસ્તેઽધાવન્ સર્વાં મહીમિમામ્ ॥ ૧૧૨.૧૪॥

૧૧૨.૧૫/૧તથૈવ કોપાદ્ રુદ્રોઽપિ શત્રૂંસ્તાન્ અનુધાવતિ ।
૧૧૨.૧૫/૨તથૈવ યુધ્યતઃ શમ્ભોઃ પતિતાઃ સ્વેદબિન્દવઃ ॥ ૧૧૨.૧૫॥

૧૧૨.૧૬/૧યત્ર યત્ર ભુવં પ્રાપ્તો બિન્દુર્માહેશ્વરો મુને ।
૧૧૨.૧૬/૨તત્ર તત્ર શિવાકારા માતરો જજ્ઞિરે તતઃ ॥ ૧૧૨.૧૬॥

૧૧૨.૧૭/૧પ્રોચુર્મહેશ્વરં સર્વાઃ ખાદામસ્ત્વસુરાન્ ઇતિ ।
૧૧૨.૧૭/૨તતઃ પ્રોવાચ ભગવાન્ સર્વૈઃ સુરગણૈર્વૃતઃ ॥ ૧૧૨.૧૭॥

૧૧૨.૧૮/૧શિવ ઉવાચ । સ્વર્ગાદ્ ભુવમનુપ્રાપ્તા રાક્ષસાસ્તે રસાતલમ્ ।
૧૧૨.૧૮/૨અનુપ્રાપ્તાસ્તતઃ સર્વાઃ શ઼ૃણ્વન્તુ મમ ભાષિતમ્ ॥ ૧૧૨.૧૮॥

૧૧૨.૧૯/૧યત્ર યત્ર દ્વિષો યાન્તિ તત્ર ગચ્છન્તુ માતરઃ ।
૧૧૨.૧૯/૨રસાતલમનુપ્રાપ્તા ઇદાનીં મદ્ભયાદ્ દ્વિષઃ ।
૧૧૨.૧૯/૩ભવત્યોઽપ્યનુગચ્છન્તુ રસાતલમનુ દ્વિષઃ ॥ ૧૧૨.૧૯॥

૧૧૨.૨૦/૧બ્રહ્મોવાચ । તાશ્ચ જગ્મુર્ભુવં ભિત્ત્વા યત્ર તે દૈત્યદાનવાઃ ।

૧૧૨.૨૦/૨તાન્ હત્વા માતરઃ સર્વાન્ દેવારીન્ અતિભીષણાન્ ॥ ૧૧૨.૨૦॥

૧૧૨.૨૧/૧પુનર્દેવાન્ ઉપાજગ્મુઃ પથા તેનૈવ માતરઃ ।
૧૧૨.૨૧/૨ગતાશ્ચ માતરો યાવદ્ યાવચ્ચ પુનરાગતાઃ ॥ ૧૧૨.૨૧॥

૧૧૨.૨૨/૧તાવદ્ દેવાઃ સ્થિતા આસન્ ગૌતમીતીરમાશ્રિતાઃ ।
૧૧૨.૨૨/૨પ્રસ્થાનાત્ તત્ર માતૃણાં સુરાણાં ચ પ્રતિષ્ઠિતેઃ ॥ ૧૧૨.૨૨॥

૧૧૨.૨૩/૧પ્રતિષ્ઠાનં તુ તત્ ક્ષેત્રં પુણ્યં વિજયવર્ધનમ્ ।
૧૧૨.૨૩/૨માતૃણાં યત્ર ચોત્પત્તિર્માતૃતીર્થં પૃથક્ પૃથક્ ॥ ૧૧૨.૨૩॥

૧૧૨.૨૪/૧તત્ર તત્ર બિલાન્યાસન્ રસાતલગતાનિ ચ ।
૧૧૨.૨૪/૨સુરાસ્તાભ્યો વરાન્ પ્રોચુર્લોકે પૂજાં યથા શિવઃ ॥ ૧૧૨.૨૪॥

૧૧૨.૨૫/૧પ્રાપ્નોતિ તદ્વન્ માતૃભ્યઃ પૂજા ભવતુ સર્વદા ।
૧૧૨.૨૫/૨ઇત્યુક્ત્વાન્તર્દધુર્દેવા આસંસ્તત્રૈવ માતરઃ ॥ ૧૧૨.૨૫॥

૧૧૨.૨૬/૧યત્ર યત્ર સ્થિતા દેવ્યો માતૃતીર્થં તતો વિદુઃ ।
૧૧૨.૨૬/૨સુરાણામપિ સેવ્યાનિ કિં પુનર્માનુષાદિભિઃ ॥ ૧૧૨.૨૬॥

૧૧૨.૨૭/૧તેષુ સ્નાનમથો દાનં પિતૃણાં ચૈવ તર્પણમ્ ।
૧૧૨.૨૭/૨સર્વં તદ્ અક્ષયં જ્ઞેયં શિવસ્ય વચનં યથા ॥ ૧૧૨.૨૭॥

૧૧૨.૨૮/૧યસ્ત્વિદં શૃણુયાન્ નિત્યં સ્મરેદ્ અપિ પઠેત્ તથા ।
૧૧૨.૨૮/૨આખ્યાનં માતૃતીર્થાનામાયુષ્માન્ સ સુખી ભવેત્ ॥ ૧૧૨.૨૮॥

૧૧૩.૧/૧બ્રહ્મોવાચ । ઇદમપ્યપરં તીર્થં દેવાનામપિ દુર્લભમ્ ।
૧૧૩.૧/૨બ્રહ્મતીર્થમિતિ ખ્યાતં ભુક્તિમુક્તિપ્રદં નૃણામ્ ॥ ૧૧૩.૧॥

૧૧૩.૨/૧સ્થિતેષુ દેવસૈન્યેષુ પ્રવિષ્ટેષુ રસાતલમ્ ।
૧૧૩.૨/૨દૈત્યેષુ ચ મુનિશ્રેષ્ઠ તથા માતૃષુ તાન્ અનુ ॥ ૧૧૩.૨॥

૧૧૩.૩/૧મદીયં પઞ્ચમં વક્ત્રં ગર્દભાકૃતિ ભીષણમ્ ।
૧૧૩.૩/૨તદ્ વક્ત્રં દેવસૈન્યેષુ મયિ તિષ્ઠત્યુવાચ હ ॥ ૧૧૩.૩॥

૧૧૩.૪/૧હે દૈત્યાઃ કિં પલાયન્તે ન ભયં વોઽસ્તુ સત્વરમ્ ।
૧૧૩.૪/૨આગચ્છન્તુ સુરાન્ સર્વાન્ ભક્ષયિષ્યે ક્ષણાદ્ ઇતિ ॥ ૧૧૩.૪॥

૧૧૩.૫/૧નિવારયન્તં મામેવં ભક્ષણાયોદ્યતં તથા ।
૧૧૩.૫/૨તં દૃષ્ટ્વા વિબુધાઃ સર્વે વિત્રસ્તા વિષ્ણુમબ્રુવન્ ॥ ૧૧૩.૫॥

૧૧૩.૬/૧ત્રાહિ વિષ્ણો જગન્નાથ બ્રહ્મણોઽસ્ય મુખં લુન ।
૧૧૩.૬/૨ચક્રધૃગ્ વિબુધાન્ આહ *ચ્છેદ્મિ ચક્રેણ વૈ શિરઃ ॥ ૧૧૩.૬॥

૧૧૩.૭/૧કિં તુ તચ્છિન્નમેવેદં સંહરેત્ સચરાચરમ્ ।
૧૧૩.૭/૨મન્ત્રં બ્રૂમોઽત્ર વિબુધાઃ શ્રૂયતાં સર્વમેવ હિ ॥ ૧૧૩.૭॥

૧૧૩.૮/૧ત્રિનેત્રઃ કશિરશ્છેત્તા સ ચ ધત્તે ન સંશયઃ ।
૧૧૩.૮/૨મયા ચ શમ્ભુઃ સર્વૈશ્ચ સ્તુતઃ પ્રોક્તસ્તથૈવ ચ ॥ ૧૧૩.૮॥

૧૧૩.૯/૧યાગઃ ક્ષણી દૃષ્ટફલેઽસમર્થઃ ।
૧૧૩.૯/૨સ નૈવ કર્તુઃ ફલતીતિ મત્વા ।
૧૧૩.૯/૩ફલસ્ય દાને પ્રતિભૂર્જટીતિ ।
૧૧૩.૯/૪નિશ્ચિત્ય લોકઃ પ્રતિકર્મ યાતઃ ॥ ૧૧૩.૯॥

૧૧૩.૧૦/૧તતઃ સુરેશઃ સંતુષ્ટો દેવાનાં કાર્યસિદ્ધયે ।
૧૧૩.૧૦/૨લોકાનામુપકારાર્થં તથેત્યાહ સુરાન્ પ્રતિ ॥ ૧૧૩.૧૦॥

૧૧૩.૧૧/૧તદ્વક્ત્રં પાપરૂપં યદ્ ભીષણં લોમહર્ષણમ્ ।
૧૧૩.૧૧/૨નિકૃત્ય નખશસ્ત્રૈશ્ચ ક્વ સ્થાપ્યં ચેત્યથાબ્રવીત્ ॥ ૧૧૩.૧૧॥

૧૧૩.૧૨/૧તત્રેલા વિબુધાન્ આહ નાહં વોઢું શિરઃ ક્ષમા ।
૧૧૩.૧૨/૨રસાતલમથો યાસ્યે ઉદધિશ્ચાપ્યથાબ્રવીત્ ॥ ૧૧૩.૧૨॥

૧૧૩.૧૩/૧શોષં યાસ્યે ક્ષણાદ્ એવ પુનશ્ચોચુઃ શિવં સુરાઃ ।
૧૧૩.૧૩/૨ત્વયૈવૈતદ્ બ્રહ્મશિરો ધાર્યં લોકાનુકમ્પયા ॥ ૧૧૩.૧૩॥

૧૧૩.૧૪/૧અચ્છેદે જગતાં નાશશ્છેદે દોષશ્ચ તાદૃશઃ ।
૧૧૩.૧૪/૨એવં વિમૃશ્ય સોમેશો દધાર કશિરસ્તદા ॥ ૧૧૩.૧૪॥

૧૧૩.૧૫/૧તદ્ દૃષ્ટ્વા દુષ્કરં કર્મ ગૌતમીં પ્રાપ્ય પાવનીમ્ ।
૧૧૩.૧૫/૨અસ્તુવગ્ જગતામીશં પ્રણયાદ્ ભક્તિતઃ સુરાઃ ॥ ૧૧૩.૧૫॥

૧૧૩.૧૬/૧દેવેષ્વમિત્રં કશિરોઽતિભીમમ્ ।
૧૧૩.૧૬/૨તાન્ ભક્ષણાયોપગતં નિકૃત્ય ।
૧૧૩.૧૬/૩નખાગ્રસૂચ્યા શકલેન્દુમૌલિસ્- ।
૧૧૩.૧૬/૪ત્યાગેઽપિ દોષાત્ કૃપયાનુધત્તે ॥ ૧૧૩.૧૬॥

૧૧૩.૧૭/૧તત્ર તે વિબુધાઃ સર્વે સ્થિતા યે બ્રહ્મણોઽન્તિકે ।
૧૧૩.૧૭/૨તુષ્ટુવુર્વિબુધેશાનં કર્મ દૃષ્ટ્વાતિદૈવતમ્ ॥ ૧૧૩.૧૭॥

૧૧૩.૧૮/૧તતઃ પ્રભૃતિ તત્ તીર્થં બ્રહ્મતીર્થમિતિ શ્રુતમ્ ।
૧૧૩.૧૮/૨અદ્યાપિ બ્રહ્મણો રૂપં ચતુર્મુખમવસ્થિતમ્ ॥ ૧૧૩.૧૮॥

૧૧૩.૧૯/૧શિરોમાત્રં તુ યઃ પશ્યેત્ સ ગચ્છેદ્ બ્રહ્મણઃ પદમ્ ।
૧૧૩.૧૯/૨યત્ર સ્થિત્વા સ્વયં રુદ્રો લૂનવાન્ બ્રહ્મણઃ શિરઃ ॥ ૧૧૩.૧૯॥

૧૧૩.૨૦/૧રુદ્રતીર્થં તદ્ એવ સ્યાત્ તત્ર સાક્ષાદ્ દિવાકરઃ ।
૧૧૩.૨૦/૨દેવાનાં ચ સ્વરૂપેણ સ્થિતો યસ્માત્ તદ્ ઉત્તમમ્ ॥ ૧૧૩.૨૦॥

૧૧૩.૨૧/૧સૌર્યં તીર્થં તદ્ આખ્યાતં સર્વક્રતુફલપ્રદમ્ ।
૧૧૩.૨૧/૨તત્ર સ્નાત્વા રવિં દૃષ્ટ્વા પુનર્જન્મ ન વિદ્યતે ॥ ૧૧૩.૨૧॥

૧૧૩.૨૨/૧મહાદેવેન યચ્છિન્નં બ્રહ્મણઃ પઞ્ચમં શિરઃ ।
૧૧૩.૨૨/૨ક્ષેત્રેઽવિમુક્તે સંસ્થાપ્ય દેવતાનાં હિતં કૃતમ્ ॥ ૧૧૩.૨૨॥

૧૧૩.૨૩/૧બ્રહ્મતીર્થે શિરોમાત્રં યો દૃષ્ટ્વા ગૌતમીતટે ।
૧૧૩.૨૩/૨ક્ષેત્રેઽવિમુક્તે તસ્યૈવ સ્થાપિતં યોઽનુપશ્યતિ ।
૧૧૩.૨૩/૩કપાલં બ્રહ્મણઃ પુણ્યં બ્રહ્મહા પૂતતાં વ્રજેત્ ॥ ૧૧૩.૨૩॥

૧૧૪.૧/૧બ્રહ્મોવાચ । અવિઘ્નં તીર્થમાખ્યાતં સર્વવિઘ્નવિનાશનમ્ ।
૧૧૪.૧/૨તત્રાપિ વૃત્તમાખ્યાસ્યે શ‍ૃણુ નારદ ભક્તિતઃ ॥ ૧૧૪.૧॥

૧૧૪.૨/૧દેવસત્ત્રે પ્રવૃત્તે તુ ગૌતમ્યાશ્ચોત્તરે તટે ।
૧૧૪.૨/૨સમાપ્તિર્નૈવ સત્ત્રસ્ય સંજાતા વિઘ્નદોષતઃ ॥ ૧૧૪.૨॥

૧૧૪.૩/૧તતઃ સુરગણાઃ સર્વે મામવોચન્ હરિં તદા ।
૧૧૪.૩/૨તતો ધ્યાનગતોઽહં તાન્ અવોચં વીક્ષ્ય કારણમ્ ॥ ૧૧૪.૩॥

૧૧૪.૪/૧વિનાયકકૃતૈર્વિઘ્નૈર્નૈતત્ સત્ત્રં સમાપ્યતે ।
૧૧૪.૪/૨તસ્માત્ સ્તુવન્તુ તે સર્વે આદિદેવં વિનાયકમ્ ॥ ૧૧૪.૪॥

૧૧૪.૫/૧તથેત્યુક્ત્વા સુરગણાઃ સ્નાત્વા તે ગૌતમીતટે ।
૧૧૪.૫/૨અસ્તુવન્ ભક્તિતો દેવા આદિદેવં ગણેશ્વરમ્ ॥ ૧૧૪.૫॥

૧૧૪.૬/૧દેવા ઊચુઃ । યઃ સર્વકાર્યેષુ સદા સુરાણામ્ ।
૧૧૪.૬/૨અપીશવિષ્ણ્વમ્બુજસમ્ભવાનામ્ ।
૧૧૪.૬/૩પૂજ્યો નમસ્યઃ પરિચિન્તનીયસ્- ।
૧૧૪.૬/૪તં વિઘ્નરાજં શરણં વ્રજામઃ ॥ ૧૧૪.૬॥

૧૧૪.૭/૧ન વિઘ્નરાજેન સમોઽસ્તિ કશ્ચિદ્ ।

૧૧૪.૭/૨દેવો મનોવાઞ્છિતસમ્પ્રદાતા ।
૧૧૪.૭/૩નિશ્ચિત્ય ચૈતત્ ત્રિપુરાન્તકોઽપિ ।
૧૧૪.૭/૪તં પૂજયામાસ વધે પુરાણામ્ ॥ ૧૧૪.૭॥

૧૧૪.૮/૧કરોતુ સોઽસ્માકમવિઘ્નમસ્મિન્ ।
૧૧૪.૮/૨મહાક્રતૌ સત્વરમામ્બિકેયઃ ।
૧૧૪.૮/૩ધ્યાતેન યેનાખિલદેહભાજામ્ ।
૧૧૪.૮/૪પૂર્ણા ભવિષ્યન્તિ મનોભિલાષાઃ ॥ ૧૧૪.૮॥

૧૧૪.૯/૧મહોત્સવોઽભૂદ્ અખિલસ્ય દેવ્યા ।
૧૧૪.૯/૨જાતઃ સુતશ્ચિન્તિતમાત્ર એવ ।
૧૧૪.૯/૩અતોઽવદન્ સુરસંઘાઃ કૃતાર્થાઃ ।
૧૧૪.૯/૪સદ્યોજાતં વિઘ્નરાજં નમન્તઃ ॥ ૧૧૪.૯॥

૧૧૪.૧૦/૧યો માતુરુત્સઙ્ગગતોઽથ માત્રા ।
૧૧૪.૧૦/૨નિવાર્યમાણોઽપિ બલાચ્ચ ચન્દ્રમ્ ।
૧૧૪.૧૦/૩સંગોપયામાસ પિતુર્જટાસુ ।
૧૧૪.૧૦/૪ગણાધિનાથસ્ય વિનોદ એષઃ ॥ ૧૧૪.૧૦॥

૧૧૪.૧૧/૧પપૌ સ્તનં માતુરથાપિ તૃપ્તો ।
૧૧૪.૧૧/૨યો ભ્રાતૃમાત્સર્યકષાયબુદ્ધિઃ ।
૧૧૪.૧૧/૩લમ્બોદરસ્ત્વં ભવ વિઘ્નરાજો ।
૧૧૪.૧૧/૪લમ્બોદરં નામ ચકાર શમ્ભુઃ ॥ ૧૧૪.૧૧॥

૧૧૪.૧૨/૧સંવેષ્ટિતો દેવગણૈર્મહેશઃ ।
૧૧૪.૧૨/૨પ્રવર્તતાં નૃત્યમિતીત્યુવાચ ।
૧૧૪.૧૨/૩સંતોષિતો નૂપુરરાવમાત્રાદ્ ।
૧૧૪.૧૨/૪ગણેશ્વરત્વેઽભિષિષેચ પુત્રમ્ ॥ ૧૧૪.૧૨॥

૧૧૪.૧૩/૧યો વિઘ્નપાશં ચ કરેણ બિભ્રત્ ।
૧૧૪.૧૩/૨સ્કન્ધે કુઠારં ચ તથા પરેણ ।
૧૧૪.૧૩/૩અપૂજિતો વિઘ્નમથોઽપિ માતુઃ ।
૧૧૪.૧૩/૪કરોતિ કો વિઘ્નપતેઃ સમોઽન્યઃ ॥ ૧૧૪.૧૩॥

૧૧૪.૧૪/૧ધર્માર્થકામાદિષુ પૂર્વપૂજ્યો ।
૧૧૪.૧૪/૨દેવાસુરૈઃ પૂજ્યત એવ નિત્યમ્ ।
૧૧૪.૧૪/૩યસ્યાર્ચનં નૈવ વિનાશમસ્તિ ।

૧૧૪.૧૪/૪તં પૂર્વપૂજ્યં પ્રથમં નમામિ ॥ ૧૧૪.૧૪॥

૧૧૪.૧૫/૧યસ્યાર્ચનાત્ પ્રાર્થનયાનુરૂપામ્ ।
૧૧૪.૧૫/૨દૃષ્ટ્વા તુ સર્વસ્ય ફલસ્ય સિદ્ધિમ્ ।
૧૧૪.૧૫/૩સ્વતન્ત્રસામર્થ્યકૃતાતિગર્વમ્ ।
૧૧૪.૧૫/૪ભ્રાતૃપ્રિયં ત્વાખુરથં તમીડે ॥ ૧૧૪.૧૫॥

૧૧૪.૧૬/૧યો માતરં સરસૈર્નૃત્યગીતૈસ્- ।
૧૧૪.૧૬/૨તથાભિલાષૈરખિલૈર્વિનોદૈઃ ।
૧૧૪.૧૬/૩સંતોષયામાસ તદાતિતુષ્ટમ્ ।
૧૧૪.૧૬/૪તં શ્રીગણેશં શરણં પ્રપદ્યે ॥ ૧૧૪.૧૬॥

૧૧૪.૧૭/૧સુરોપકારૈરસુરૈશ્ચ યુદ્ધૈઃ ।
૧૧૪.૧૭/૨સ્તોત્રૈર્નમસ્કારપરૈશ્ચ મન્ત્રૈઃ ।
૧૧૪.૧૭/૩પિતૃપ્રસાદેન સદા સમૃદ્ધમ્ ।
૧૧૪.૧૭/૪તં શ્રીગણેશં શરણં પ્રપદ્યે ॥ ૧૧૪.૧૭॥

૧૧૪.૧૮/૧જયે પુરાણામકરોત્ પ્રતીપમ્ ।
૧૧૪.૧૮/૨પિત્રાપિ હર્ષાત્ પ્રતિપૂજિતો યઃ ।
૧૧૪.૧૮/૩નિર્વિઘ્નતાં ચાપિ પુનશ્ચકાર ।
૧૧૪.૧૮/૪તસ્મૈ ગણેશાય નમસ્કરોમિ ॥ ૧૧૪.૧૮॥

૧૧૪.૧૯/૧બ્રહ્મોવાચ । ઇતિ સ્તુતઃ સુરગણૈર્વિઘ્નેશઃ પ્રાહ તાન્ પુનઃ ॥ ૧૧૪.૧૯॥

૧૧૪.૨૦/૧ગણેશ ઉવાચ । ઇતો નિર્વિઘ્નતા સત્રે મત્તઃ સ્યાદ્
અસુરારિણઃ ॥ ૧૧૪.૨૦॥

૧૧૪.૨૧/૧બ્રહ્મોવાચ । દેવસત્રે નિવૃત્તે તુ ગણેશઃ પ્રાહ તાન્
સુરાન્ ॥ ૧૧૪.૨૧॥

૧૧૪.૨૨/૧ગણેશ ઉવાચ । સ્તોત્રેણાનેન યે ભક્ત્યા માં સ્તોષ્યન્તિ યતવ્રતાઃ ।
૧૧૪.૨૨/૨તેષાં દારિદ્ર્યદુઃખાનિ ન ભવેયુઃ કદાચન ॥ ૧૧૪.૨૨॥

૧૧૪.૨૩/૧અત્ર યે ભક્તિતઃ સ્નાનં દાનં કુર્યુરતન્દ્રિતાઃ ।
૧૧૪.૨૩/૨તેષાં સર્વાણિ કાર્યાણિ ભવેયુરિતિ મન્યતામ્ ॥ ૧૧૪.૨૩॥

૧૧૪.૨૪/૧બ્રહ્મોવાચ । તદ્વાક્યસમકાલં તુ તથેત્યૂચુઃ સુરા અપિ ।
૧૧૪.૨૪/૨નિવૃત્તે તુ મખે તસ્મિન્ સુરા જગ્મુઃ સ્વમાલયમ્ ॥ ૧૧૪.૨૪॥

૧૧૪.૨૫/૧તતઃ પ્રભૃતિ તત્ તીર્થમવિઘ્નમિતિ ગદ્યતે ।
૧૧૪.૨૫/૨સર્વકામપ્રદં પુંસાં સર્વવિઘ્નવિનાશનમ્ ॥ ૧૧૪.૨૫॥

૧૧૫.૧/૧બ્રહ્મોવાચ । શેષતીર્થમિતિ ખ્યાતં સર્વકામપ્રદાયકમ્ ।
૧૧૫.૧/૨તસ્ય રૂપં પ્રવક્ષ્યામિ યન્ મયા પરિભાષિતમ્ ॥ ૧૧૫.૧॥

૧૧૫.૨/૧શેષો નામ મહાનાગો રસાતલપતિઃ પ્રભુઃ ।
૧૧૫.૨/૨સર્વનાગૈઃ પરિવૃતો રસાતલમથાભ્યગાત્ ॥ ૧૧૫.૨॥

૧૧૫.૩/૧રાક્ષસા દૈત્યદનુજાઃ પ્રવિષ્ટા યે રસાતલમ્ ।
૧૧૫.૩/૨તૈર્નિરસ્તો ભોગિપતિર્મામુવાચાથ વિહ્વલઃ ॥ ૧૧૫.૩॥

૧૧૫.૪/૧શેષ ઉવાચ । રસાતલં ત્વયા દત્તં રાક્ષસાનાં મમાપિ ચ ।
૧૧૫.૪/૨તે મે સ્થાનં ન દાસ્યન્તિ તસ્માત્ ત્વાં શરણં ગતઃ ॥ ૧૧૫.૪॥

૧૧૫.૫/૧તતોઽહમબ્રવં નાગં ગૌતમીં યાહિ પન્નગ ।
૧૧૫.૫/૨તત્ર સ્તુત્વા મહાદેવં લપ્સ્યસે ત્વં મનોરથમ્ ॥ ૧૧૫.૫॥

૧૧૫.૬/૧નાન્યોઽસ્તિ લોકત્રિતયે મનોરથસમર્પકઃ ।
૧૧૫.૬/૨મદ્વાક્યપ્રેરિતો નાગો ગઙ્ગામાપ્લુત્ય યત્નતઃ ।
૧૧૫.૬/૩કૃતાઞ્જલિપુટો ભૂત્વા તુષ્ટાવ ત્રિદશેશ્વરમ્ ॥ ૧૧૫.૬॥

૧૧૫.૭/૧શેષ ઉવાચ । નમસ્ત્રૈલોક્યનાથાય દક્ષયજ્ઞવિભેદિને ।
૧૧૫.૭/૨આદિકર્ત્રે નમસ્તુભ્યં નમસ્ત્રૈલોક્યરૂપિણે ॥ ૧૧૫.૭॥

૧૧૫.૮/૧નમઃ સહસ્રશિરસે નમઃ સંહારકારિણે ।
૧૧૫.૮/૨સોમસૂર્યાગ્નિરૂપાય જલરૂપાય તે નમઃ ॥ ૧૧૫.૮॥

૧૧૫.૯/૧સર્વદા સર્વરૂપાય કાલરૂપાય તે નમઃ ।
૧૧૫.૯/૨પાહિ શંકર સર્વેશ પાહિ સોમેશ સર્વગ ।
૧૧૫.૯/૩જગન્નાથ નમસ્તુભ્યં દેહિ મે મનસેપ્સિતમ્ ॥ ૧૧૫.૯॥

૧૧૫.૧૦/૧બ્રહ્મોવાચ । તતો મહેશ્વરઃ પ્રીતઃ પ્રાદાન્ નાગેપ્સિતાન્ વરાન્ ।
૧૧૫.૧૦/૨વિનાશાય સુરારીણાં દૈત્યદાનવરક્ષસામ્ ॥ ૧૧૫.૧૦॥

૧૧૫.૧૧/૧શેષાય પ્રદદૌ શૂલં જહ્યનેનારિપુંગવાન્ ।
૧૧૫.૧૧/૨તતઃ પ્રોક્તઃ શિવેનાસૌ શેષઃ શૂલેન ભોગિભિઃ ॥ ૧૧૫.૧૧॥

૧૧૫.૧૨/૧રસાતલમથો ગત્વા નિજઘાન રિપૂન્ રણે ।
૧૧૫.૧૨/૨નિહત્ય નાગઃ શૂલેન દૈત્યદાનવરાક્ષસાન્ ॥ ૧૧૫.૧૨॥

૧૧૫.૧૩/૧ન્યવર્તત પુનર્દેવો યત્ર શેષેશ્વરો હરઃ ।
૧૧૫.૧૩/૨પથા યેન સમાયાતો દેવં દ્રષ્ટું સ નાગરાટ્ ॥ ૧૧૫.૧૩ ॥

૧૧૫.૧૪/૧રસાતલાદ્ યત્ર દેવો બિલં તત્ર વ્યજાયત ।
૧૧૫.૧૪/૨તસ્માદ્ બિલતલાદ્ યાતં ગાઙ્ગં વાર્યતિપુણ્યદમ્ ॥ ૧૧૫.૧૪ ॥

૧૧૫.૧૫/૧તદ્ વારિ ગઙ્ગામગમદ્ ગઙ્ગાયાઃ સંગમસ્તતઃ ।
૧૧૫.૧૫/૨દેવસ્ય પુરતશ્ચાપિ કુણ્ડં તત્ર સુવિસ્તરમ્ ॥ ૧૧૫.૧૫ ॥

૧૧૫.૧૬/૧નાગસ્તત્રાકરોદ્ ધોમં યત્ર ચાગ્નિઃ સદા સ્થિતઃ ।
૧૧૫.૧૬/૨સોષ્ણં તદ્ અભવદ્ વારિ ગઙ્ગાયાસ્તત્ર સંગમઃ ॥ ૧૧૫.૧૬ ॥

૧૧૫.૧૭/૧દેવદેવં સમારાધ્ય નાગઃ પ્રીતો મહાયશાઃ ।
૧૧૫.૧૭/૨રસાતલં તતોઽભીષ્ટં શિવાત્ પ્રાપ્ય તલં યયૌ ॥ ૧૧૫.૧૭ ॥

૧૧૫.૧૮/૧તતઃ પ્રભૃતિ તત્ તીર્થં નાગતીર્થમુદાહૃતમ્ ।
૧૧૫.૧૮/૨સર્વકામપ્રદં પુણ્યં રોગદારિદ્ર્યનાશનમ્ ॥ ૧૧૫.૧૮ ॥

૧૧૫.૧૯/૧આયુર્લક્ષ્મીકરં પુણ્યં સ્નાનદાનાચ્ચ મુક્તિદમ્ ।
૧૧૫.૧૯/૨શ઼ૃણુયાદ્ વા પઠેદ્ ભક્ત્યા યો વાપિ સ્મરતે તુ તત્ ॥ ૧૧૫.૧૯ ॥

૧૧૫.૨૦/૧તીર્થં શેષેશ્વરો યત્ર યત્ર શક્તિપ્રદઃ શિવઃ ।
૧૧૫.૨૦/૨એકવિંશતિતીર્થાનામુભયોસ્તત્ર તીરયોઃ ।
૧૧૫.૨૦/૩શતાનિ મુનિશાર્દૂલ સર્વસમ્પત્પ્રદાયિનામ્ ॥ ૧૧૫.૨૦ ॥

૧૧૬.૧/૧બ્રહ્મોવાચ । મહાનલમિતિ ખ્યાતં વડવાનલમુચ્યતે ।
૧૧૬.૧/૨મહાનલો યત્ર દેવો વડવા યત્ર સા નદી ॥ ૧૧૬.૧ ॥

૧૧૬.૨/૧તત્ તીર્થં પુત્ર વક્ષ્યામિ મૃત્યુદોષજરાપહમ્ ।
૧૧૬.૨/૨પુરાસન્ નૈમિષારણ્યે ઋષયઃ સત્રકારિણઃ ॥ ૧૧૬.૨ ॥

૧૧૬.૩/૧શમિતારં ચ ઋષયો મૃત્યું ચક્રુસ્તપસ્વિનઃ ।
૧૧૬.૩/૨વર્તમાને સત્રયાગે મૃત્યૌ શમિતરિ સ્થિતે ॥ ૧૧૬.૩ ॥

૧૧૬.૪/૧ન મમાર તદા કશ્ચિદ્ ઉભયં સ્થાસ્નુ જઙ્ગમમ્ ।
૧૧૬.૪/૨વિના પશૂન્ મુનિશ્રેષ્ઠ મર્ત્યં ચામર્ત્યતાં ગતમ્ ॥ ૧૧૬.૪ ॥

૧૧૬.૫/૧તતસ્ત્રિવિષ્ટપે શૂન્યે મર્ત્યે ચૈવાતિસમ્ભૃતે ।
૧૧૬.૫/૨મૃત્યુનોપેક્ષિતે દેવા રાક્ષસાન્ ઊચિરે તદા ॥ ૧૧૬.૫ ॥

૧૧૬.૬/૧દેવા ઊચુઃ । ગચ્છધ્વમ્ ઋષિસત્રં તન્ નાશયધ્વં મહાધ્વરમ્ ।

૧૧૬.૬/૨બ્રહ્મોવાચ । ઇતિ દેવવચઃ શ્રુત્વા પ્રોચુસ્તે રાક્ષસાઃ સુરાન્ ॥ ૧૧૬.૬॥

૧૧૬.૭/૧અસુરા ઊચુઃ । વિધ્વંસયામસ્તં યજ્ઞમસ્માકં કિં ફલં તતઃ ।
૧૧૬.૭/૨પ્રવર્તતે વિના હેતું ન કોઽપિ ક્વાપિ જાતુચિત્ ॥ ૧૧૬.૭॥

૧૧૬.૮/૧બ્રહ્મોવાચ । દેવા અપ્યસુરાન્ ઊચુર્યજ્ઞાર્ધં ભવતામપિ ।
૧૧૬.૮/૨ભવેદ્ એવ તતો યાન્તુ ઋષીણાં સત્રમુત્તમમ્ ॥ ૧૧૬.૮॥

૧૧૬.૯/૧તે શ્રુત્વા ત્વરિતાઃ સર્વે યત્ર યજ્ઞઃ પ્રવર્તતે ।
૧૧૬.૯/૨જગ્મુસ્તત્ર વિનાશાય દેવવાક્યાદ્ વિશેષતઃ ॥ ૧૧૬.૯॥

૧૧૬.૧૦/૧તજ્જ્ઞાત્વા ઋષયો મૃત્યુમાહુઃ કિં કુર્મહે વયમ્ ।
૧૧૬.૧૦/૨આગતા દેવવચનાદ્ રાક્ષસા યજ્ઞનાશિનઃ ॥ ૧૧૬.૧૦॥

૧૧૬.૧૧/૧મૃત્યુના સહ સમ્મન્ત્ર્ય નૈમિષારણ્યવાસિનઃ ।
૧૧૬.૧૧/૨સર્વે ત્યક્ત્વા સ્વાશ્રમં તં શમિત્રા સહ નારદ ॥ ૧૧૬.૧૧॥

૧૧૬.૧૨/૧અગ્નિમાત્રમુપાદાય ત્યક્ત્વા પાત્રાદિકં તુ યત્ ।
૧૧૬.૧૨/૨ક્રતુનિષ્પત્તયે જગ્મુર્ગૌતમીં પ્રતિ સત્વરાઃ ॥ ૧૧૬.૧૨॥

૧૧૬.૧૩/૧તત્ર સ્નાત્વા મહેશાનં રક્ષણાયોપતસ્થિરે ।
૧૧૬.૧૩/૨કૃતાઞ્જલિપુટાસ્તે તુ તુષ્ટુવુસ્ત્રિદશેશ્વરમ્ ॥ ૧૧૬.૧૩॥

૧૧૬.૧૪/૧ઋષય ઊચુઃ । યો લીલયા વિશ્વમિદં ચકાર ।
૧૧૬.૧૪/૨ધાતા વિધાતા ભુવનત્રયસ્ય ।
૧૧૬.૧૪/૩યો વિશ્વરૂપઃ સદસત્પરો યઃ ।
૧૧૬.૧૪/૪સોમેશ્વરં તં શરણં વ્રજામઃ ॥ ૧૧૬.૧૪॥

૧૧૬.૧૫/૧મૃત્યુરુવાચ । ઇચ્છામાત્રેણ યઃ સર્વં હન્તિ પાતિ કરોતિ ચ ।
૧૧૬.૧૫/૨તમહં ત્રિદશેશાનં શરણં યામિ શંકરમ્ ॥ ૧૧૬.૧૫॥

૧૧૬.૧૬/૧મહાનલં મહાકાયં મહાનાગવિભૂષણમ્ ।
૧૧૬.૧૬/૨મહામૂર્તિધરં દેવં શરણં યામિ શંકરમ્ ॥ ૧૧૬.૧૬॥

૧૧૬.૧૭/૧બ્રહ્મોવાચ । તતઃ પ્રોવાચ ભગવાન્ મૃત્યો કા પ્રીતિરસ્તુ
તે ॥ ૧૧૬.૧૭॥

૧૧૬.૧૮/૧મૃત્યુરુવાચ । રાક્ષસેભ્યો ભયં ઘોરમાપન્નં ત્રિદશેશ્વર ।
૧૧૬.૧૮/૨યજ્ઞમસ્માંશ્ચ રક્ષસ્વ યાવત્ સત્રં સમાપ્યતે ॥ ૧૧૬.૧૮॥

૧૧૬.૧૯/૧બ્રહ્મોવાચ । તથા ચકાર ભગવાંસ્ત્રિનેત્રો વૃષભધ્વજઃ ।

૧૧૬.૧૯/૨શમિત્રા મૃત્યુના સત્રમ્ ઋષીણાં પૂર્ણતાં યયૌ ॥ ૧૧૬.૧૯॥

૧૧૬.૨૦/૧હવિષાં ભાગધેયાય આજગ્મુરમરાઃ ક્રમાત્ ।
૧૧૬.૨૦/૨તાન્ અવોચન્ મુનિગણાઃ સંક્ષુબ્ધા મૃત્યુના સહ ॥ ૧૧૬.૨૦॥

૧૧૬.૨૧/૧ઋષય ઊચુઃ । અસ્મન્મખવિનાશાય રાક્ષસાઃ પ્રેષિતા યતઃ ।
૧૧૬.૨૧/૨તસ્માદ્ ભવદ્ભ્યઃ પાપિષ્ઠા રાક્ષસાઃ સન્તુ શત્રવઃ ॥ ૧૧૬.૨૧॥

૧૧૬.૨૨/૧બ્રહ્મોવાચ । તતઃ પ્રભૃતિ દેવાનાં રાક્ષસા વૈરિણોऽભવન્ ।
૧૧૬.૨૨/૨કૃત્યાં ચ વડવાં તત્ર દેવાશ્ચ ઋષયોऽમલાઃ ॥ ૧૧૬.૨૨॥

૧૧૬.૨૩/૧મૃત્યોર્ભાર્યા ભવ ત્વં તામિત્યુક્ત્વા તેऽભ્યષેચયન્ ।
૧૧૬.૨૩/૨અભિષેકોદકં યત્ તુ સા નદી વડવાભવત્ ॥ ૧૧૬.૨૩॥

૧૧૬.૨૪/૧મૃત્યુના સ્થાપિતં લિઙ્ગં મહાનલમિતિ શ્રુતમ્ ।
૧૧૬.૨૪/૨તતઃ પ્રભૃતિ તત્ તીર્થં વડવાસંગમં વિદુઃ ॥ ૧૧૬.૨૪॥

૧૧૬.૨૫/૧મહાનલો યત્ર દેવસ્તત્ તીર્થં ભુક્તિમુક્તિદમ્ ।
૧૧૬.૨૫/૨સહસ્રં તત્ર તીર્થાનાં સર્વાભીષ્ટપ્રદાયિનામ્ ।
૧૧૬.૨૫/૩ઉભયોસ્તીરયોસ્તત્ર સ્મરણાદ્ અઘઘાતિનામ્ ॥ ૧૧૬.૨૫॥

૧૧૭.૧/૧બ્રહ્મોવાચ । આત્મતીર્થમિતિ ખ્યાતં ભુક્તિમુક્તિપ્રદં નૃણામ્ ।
૧૧૭.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ યત્ર જ્ઞાનેશ્વરઃ શિવઃ ॥ ૧૧૭.૧॥

૧૧૭.૨/૧દત્ત ઇત્યપિ વિખ્યાતઃ સોऽત્રિપુત્રો હરપ્રિયઃ ।
૧૧૭.૨/૨દુર્વાસસઃ પ્રિયો ભ્રાતા સર્વજ્ઞાનવિશારદઃ ।
૧૧૭.૨/૩સ ગત્વા પિતરં પ્રાહ વિનયેન પ્રણમ્ય ચ ॥ ૧૧૭.૨॥

૧૧૭.૩/૧દત્ત ઉવાચ । બ્રહ્મજ્ઞાનં કથં મે સ્યાત્ કં પૃચ્છામિ
ક્વ યામિ ચ ॥ ૧૧૭.૩॥

૧૧૭.૪/૧બ્રહ્મોવાચ । તચ્છ્રુત્વાત્રિઃ પુત્રવાક્યં ધ્યાત્વા
વચનમબ્રવીત્ ॥ ૧૧૭.૪॥

૧૧૭.૫/૧અત્રિરુવાચ । ગૌતમીં પુત્ર ગચ્છ ત્વં તત્ર સ્તુહિ મહેશ્વરમ્ ।
૧૧૭.૫/૨સ તુ પ્રીતો યદૈવ સ્યાત્ તદા જ્ઞાનમવાપ્સ્યસિ ॥ ૧૧૭.૫॥

૧૧૭.૬/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા તદાત્રેયો ગઙ્ગાં ગત્વા શુચિર્યતઃ ।
૧૧૭.૬/૨કૃતાઞ્જલિપુટો ભૂત્વા ભક્ત્યા તુષ્ટાવ શંકરમ્ ॥ ૧૧૭.૬॥

૧૧૭.૭/૧દત્ત ઉવાચ । સંસારકૂપે પતિતોऽસ્મિ દૈવાન્ ।

૧૧૭.૭/૨મોહેન ગુપ્તો ભવદુઃખપઙ્કે ।
૧૧૭.૭/૩અજ્ઞાનનામ્ના તમસાવૃતોઽહમ્ ।
૧૧૭.૭/૪પરં ન વિન્દામિ સુરાધિનાથ ॥ ૧૧૭.૭॥

૧૧૭.૮/૧ભિન્નસ્ત્રિશૂલેન બલીયસાહમ્ ।
૧૧૭.૮/૨પાપેન ચિન્તાક્ષુરપાટિતશ્ચ ।
૧૧૭.૮/૩તપ્તોઽસ્મિ પઞ્ચેન્દ્રિયતીવ્રતાપૈઃ ।
૧૧૭.૮/૪શ્રાન્તોઽસ્મિ સંતારય સોમનાથ ॥ ૧૧૭.૮॥

૧૧૭.૯/૧બદ્ધોઽસ્મિ દારિદ્યમયૈશ્ચ બન્ધૈર્।
૧૧૭.૯/૨હતોઽસ્મિ રોગાનલતીવ્રતાપૈઃ ।
૧૧૭.૯/૩ક્રાન્તોઽસ્મ્યહં મૃત્યુભુજંગમેન ।
૧૧૭.૯/૪ભીતો ભૃશં કિં કરવાણિ શમ્ભો ॥ ૧૧૭.૯॥

૧૧૭.૧૦/૧ભવાભવાભ્યામતિપીડિતોઽહમ્ ।
૧૧૭.૧૦/૨તૃષ્ણાક્ષુધાભ્યાં ચ રજસ્તમોભ્યામ્ ।
૧૧૭.૧૦/૩ઈદૃક્ષયા જરયા ચાભિભૂતઃ ।
૧૧૭.૧૦/૪પશ્યાવસ્થાં કૃપયા મેઽદ્ય નાથ ॥ ૧૧૭.૧૦॥

૧૧૭.૧૧/૧કામેન કોપેન ચ મત્સરેણ ।
૧૧૭.૧૧/૨દમ્ભેન દર્પાદિભિરપ્યનેકૈઃ ।
૧૧૭.૧૧/૩એકૈકશઃ કષ્ટગતોઽસ્મિ વિદ્ધસ્- ।
૧૧૭.૧૧/૪ત્વં નાથવદ્ વારય નાથ શત્રૂન્ ॥ ૧૧૭.૧૧॥

૧૧૭.૧૨/૧કસ્યાપિ કશ્ચિત્ પતિતસ્ય પુંસો ।
૧૧૭.૧૨/૨દુઃખપ્રણોદી ભવતીતિ સત્યમ્ ।
૧૧૭.૧૨/૩વિના ભવન્તં મમ સોમનાથ ।
૧૧૭.૧૨/૪કુત્રાપિ કારુણ્યવચોઽપિ નાસ્તિ ॥ ૧૧૭.૧૨॥

૧૧૭.૧૩/૧તાવત્ સ કોપો ભયમોહદુઃખાન્ય્।
૧૧૭.૧૩/૨અજ્ઞાનદારિદ્યરુજસ્તથૈવ ।
૧૧૭.૧૩/૩કામાદયો મૃત્યુરપીહ યાવન્ ।
૧૧૭.૧૩/૪નમઃ શિવાયેતિ ન વચ્મિ વાક્યમ્ ॥ ૧૧૭.૧૩॥

૧૧૭.૧૪/૧ન મેઽસ્તિ ધર્મો ન ચ મેઽસ્તિ ભક્તિર્।
૧૧૭.૧૪/૨નાહં વિવેકી કરુણા કુતો મે ।
૧૧૭.૧૪/૩દાતાસિ તેનાશુ શરણ્ય ચિત્તે ।

૧૧૭.૧૪/૪નિધેહિ સોમેતિ પદં મદીયે ॥ ૧૧૭.૧૪॥

૧૧૭.૧૫/૧યાચે ન ચાહં સુરભૂપતિત્વમ્ ।
૧૧૭.૧૫/૨હૃત્પદ્મમધ્યે મમ સોમનાથ ।
૧૧૭.૧૫/૩શ્રીસોમપાદામ્બુજસંનિધાનમ્ ।
૧૧૭.૧૫/૪યાચે વિચાર્યૈવ ચ તત્ કુરુષ્વ ॥ ૧૧૭.૧૫॥

૧૧૭.૧૬/૧યથા તવાહં વિદિતોऽસ્મિ પાપસ્- ।
૧૧૭.૧૬/૨તથાપિ વિજ્ઞાપનમાશ્ૃણુષ્વ ।
૧૧૭.૧૬/૩સંશ્રૂયતે યત્ર વચઃ શિવેતિ ।
૧૧૭.૧૬/૪તત્ર સ્થિતિઃ સ્યાન્ મમ સોમનાથ ॥ ૧૧૭.૧૬॥

૧૧૭.૧૭/૧ગૌરીપતે શંકર સોમનાથ ।
૧૧૭.૧૭/૨વિશ્વેશ કારુણ્યનિધેऽખિલાત્મન્ ।
૧૧૭.૧૭/૩સંસ્તૂયતે યત્ર સદેતિ તત્ર ।
૧૧૭.૧૭/૪કેષામપિ સ્યાત્ કૃતિનાં નિવાસઃ ॥ ૧૧૭.૧૭॥

૧૧૭.૧૮/૧બ્રહ્મોવાચ । ઇત્યાત્રેયસ્તુતિં શ્રુત્વા તુતોષ ભગવાન્ હરઃ ।
૧૧૭.૧૮/૨વરદોऽસ્મીતિ તં પ્રાહ યોગિનં વિશ્વકૃદ્ ભવઃ ॥ ૧૧૭.૧૮॥

૧૧૭.૧૯/૧આત્રેય ઉવાચ । આત્મજ્ઞાનં ચ મુક્તિં ચ ભુક્તિં ચ વિપુલાં ત્વયિ ।
૧૧૭.૧૯/૨તીર્થસ્યાપિ ચ માહાત્મ્યં વરોऽયં ત્રિદશાર્ચિત ॥ ૧૧૭.૧૯॥

૧૧૭.૨૦/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ તં શમ્ભુરુક્ત્વા ચાન્તરધીયત ।
૧૧૭.૨૦/૨તતઃ પ્રભૃતિ તત્ તીર્થમાત્મતીર્થં વિદુર્બુધાઃ ।
૧૧૭.૨૦/૩તત્ર સ્નાનેન દાનેન મુક્તિઃ સ્યાદ્ ઇહ નારદ ॥ ૧૧૭.૨૦॥

૧૧૮.૧/૧બ્રહ્મોવાચ । અશ્વત્થતીર્થમાખ્યાતં પિપ્પલં ચ તતઃ પરમ્ ।
૧૧૮.૧/૨ઉત્તરે મન્દતીર્થં તુ તત્ર વ્યુષ્ટિમિતઃ શ્ૃણુ ॥ ૧૧૮.૧॥

૧૧૮.૨/૧પુરા ત્વગસ્ત્યો ભગવાન્ દક્ષિણાશાપતિઃ પ્રભુઃ ।
૧૧૮.૨/૨દેવૈસ્તુ પ્રેરિતઃ પૂર્વં વિન્ધ્યસ્ય પ્રાર્થનં પ્રતિ ॥ ૧૧૮.૨॥

૧૧૮.૩/૧સ શનૈર્વિન્ધ્યમભ્યાગાત્ સહસ્રમુનિભિર્વૃતઃ ।
૧૧૮.૩/૨તમાગત્ય નગશ્રેષ્ઠં બહુવૃક્ષસમાકુલમ્ ॥ ૧૧૮.૩॥

૧૧૮.૪/૧સ્પર્ધિનં મેરુભાનુભ્યાં વિન્ધ્યં શ્ૃઙ્ગશતૈર્વૃતમ્ ।
૧૧૮.૪/૨અત્યુન્નતં નગં ધીરો લોપામુદ્રાપતિર્મુનિઃ ॥ ૧૧૮.૪॥

૧૧૮.૫/૧કૃતાતિથ્યો દ્વિજૈઃ સાર્ધં પ્રશસ્ય ચ નગં પુનઃ ।
૧૧૮.૫/૨ઇદમાહ મુનિશ્રેષ્ઠો દેવકાર્યાર્થસિદ્ધયે ॥ ૧૧૮.૫॥

૧૧૮.૬/૧અગસ્ત્ય ઉવાચ । અહં યામિ નગશ્રેષ્ઠ મુનિભિસ્તત્ત્વદર્શિભિઃ ।
૧૧૮.૬/૨તીર્થયાત્રાં કરોમીતિ દક્ષિણાશાં વ્રજામ્યહમ્ ॥ ૧૧૮.૬॥

૧૧૮.૭/૧દેહિ માર્ગં નગપતે આતિથ્યં દેહિ યાચતે ।
૧૧૮.૭/૨યાવદ્ આગમનં મે સ્યાત્ સ્થાતવ્યં તાવદ્ એવ હિ ॥ ૧૧૮.૭॥

૧૧૮.૮/૧નાન્યથા ભવિતવ્યં તે તથેત્યાહ નગોત્તમઃ ।
૧૧૮.૮/૨આક્રામન્ દક્ષિણામાશાં તૈર્વૃતો મુનિભિર્મુનિઃ ॥ ૧૧૮.૮॥

૧૧૮.૯/૧શનૈઃ સ ગૌતમીમાગાત્ સત્રયાગાય દીક્ષિતઃ ।
૧૧૮.૯/૨યાવત્ સંવત્સરં સત્રમકરોદ્ ઋષિભિર્વૃતઃ ॥ ૧૧૮.૯॥

૧૧૮.૧૦/૧કૈટભસ્ય સુતૌ પાપૌ રાક્ષસૌ ધર્મકણ્ટકૌ ।
૧૧૮.૧૦/૨અશ્વત્થઃ પિપ્પલશ્ચેતિ વિખ્યાતૌ ત્રિદશાલયે ॥ ૧૧૮.૧૦॥

૧૧૮.૧૧/૧અશ્વત્થોઽશ્વત્થરૂપેણ પિપ્પલો બ્રહ્મરૂપધૃક્ ।
૧૧૮.૧૧/૨તાવુભાવન્તરં પ્રેપ્સૂ યજ્ઞવિધ્વંસનાય તુ ॥ ૧૧૮.૧૧॥

૧૧૮.૧૨/૧કુરુતાં કાઙ્ક્ષિતં રૂપં દાનવૌ પાપચેતસૌ ।
૧૧૮.૧૨/૨અશ્વત્થો વૃક્ષરૂપેણ પિપ્પલો બ્રાહ્મણાકૃતિઃ ॥ ૧૧૮.૧૨॥

૧૧૮.૧૩/૧ઉભૌ તૌ બ્રાહ્મણાન્ નિત્યં પીડયેતાં તપોધન ।
૧૧૮.૧૩/૨આલભન્તે ચ યેઽશ્વત્થં તાંસ્તાન્ અશ્નાત્યસૌ તરુઃ ॥ ૧૧૮.૧૩॥

૧૧૮.૧૪/૧પિપ્પલઃ સામગો ભૂત્વા શિષ્યાન્ અશ્નાતિ રાક્ષસઃ ।
૧૧૮.૧૪/૨તસ્માદ્ અદ્યાપિ વિપ્રેષુ સામગોઽતીવ નિષ્કૃપઃ ॥ ૧૧૮.૧૪॥

૧૧૮.૧૫/૧ક્ષીયમાણાન્ દ્વિજાન્ દૃષ્ટ્વા મુનયો રાક્ષસાવિમૌ ।
૧૧૮.૧૫/૨ઇતિ બુદ્ધ્વા મહાપ્રાજ્ઞા દક્ષિણં તીરમાશ્રિતમ્ ॥ ૧૧૮.૧૫॥

૧૧૮.૧૬/૧સૌરિં શનૈશ્ચરં મન્દં તપસ્યન્તં ધૃતવ્રતમ્ ।
૧૧૮.૧૬/૨ગત્વા મુનિગણાઃ સર્વે રક્ષઃકર્મ ન્યવેદયન્ ॥ ૧૧૮.૧૬॥

૧૧૮.૧૭/૧સૌરિર્મુનિગણાન્ આહ પૂર્ણે તપસિ મે દ્વિજાઃ ।
૧૧૮.૧૭/૨રાક્ષસૌ હન્મ્યપૂર્ણે તુ તપસ્યક્ષમ એવ હિ ॥ ૧૧૮.૧૭॥

૧૧૮.૧૮/૧પુનઃ પ્રોચુર્મુનિગણા દાસ્યામસ્તે તપો મહત્ ।
૧૧૮.૧૮/૨ઇત્યુક્તો બ્રાહ્મણૈઃ સૌરિઃ કૃતમિત્યાહ તાન્ અપિ ॥ ૧૧૮.૧૮॥

૧૧૮.૧૯/૧સૌરિર્બ્રાહ્મણવેષેણ પ્રાયાદ્ અશ્વત્થરૂપિણમ્ ।
૧૧૮.૧૯/૨રાક્ષસં બ્રાહ્મણો ભૂત્વા પ્રદક્ષિણમથાકરોત્ ॥ ૧૧૮.૧૯ ॥

૧૧૮.૨૦/૧પ્રદક્ષિણં તુ કુર્વાણં મેને બ્રાહ્મણમેવ તમ્ ।
૧૧૮.૨૦/૨નિત્યવદ્ રાક્ષસઃ પાપો ભક્ષયામાસ માયયા ॥ ૧૧૮.૨૦ ॥

૧૧૮.૨૧/૧તસ્ય કાયં સમાવિશ્ય ચક્ષુષાન્ત્રાણ્યપશ્યત ।
૧૧૮.૨૧/૨દૃષ્ટઃ સ રાક્ષસઃ પાપો મન્દેન રવિસૂનુના ॥ ૧૧૮.૨૧ ॥

૧૧૮.૨૨/૧ભસ્મીભૂતઃ ક્ષણેનૈવ ગિરિર્વજ્રહતો યથા ।
૧૧૮.૨૨/૨અશ્વત્થં ભસ્મસાત્ કૃત્વા અન્યં બ્રાહ્મણરૂપિણમ્ ॥ ૧૧૮.૨૨ ॥

૧૧૮.૨૩/૧રાક્ષસં પાપનિલયમેક એવ તમભ્યગાત્ ।
૧૧૮.૨૩/૨અધીયાનો વિપ્ર ઇવ શિષ્યરૂપો વિનીતવત્ ॥ ૧૧૮.૨૩ ॥

૧૧૮.૨૪/૧પિપ્પલઃ પૂર્વવચ્ચાપિ ભક્ષયામાસ ભાનુજમ્ ।
૧૧૮.૨૪/૨સ ભક્ષિતઃ પૂર્વવચ્ચ કુક્ષાવન્ત્રાણ્યવૈક્ષત ॥ ૧૧૮.૨૪ ॥

૧૧૮.૨૫/૧તેનાલોકિતમાત્રોઽસૌ રાક્ષસો ભસ્મસાદ્ અભૂત્ ।
૧૧૮.૨૫/૨ઉભૌ હત્વા ભાનુસુતઃ કિં કૃત્યં મે વદન્ત્વથ ॥ ૧૧૮.૨૫ ॥

૧૧૮.૨૬/૧મુનયો જાતસંહર્ષાઃ સર્વ એવ તપસ્વિનઃ ।
૧૧૮.૨૬/૨તતઃ પ્રસન્ના હ્યભવન્ ઋષયોઽગસ્ત્યપૂર્વકાઃ ॥ ૧૧૮.૨૬ ॥

૧૧૮.૨૭/૧વરાન્ દદુર્યથાકામં સૌરયે મન્દગામિને ।
૧૧૮.૨૭/૨સ પ્રીતો બ્રાહ્મણાન્ આહ શનિઃ સૂર્યસુતો બલી ॥ ૧૧૮.૨૭ ॥

૧૧૮.૨૮/૧સૌરિરુવાચ । મદ્વારે નિયતા યે ચ કુર્વન્ત્યશ્વત્થલમ્ભનમ્ ।
૧૧૮.૨૮/૨તેષાં સર્વાણિ કાર્યાણિ સ્યુઃ પીડા મદ્ભવા ન ચ ॥ ૧૧૮.૨૮ ॥

૧૧૮.૨૯/૧તીર્થે ચાશ્વત્થસંજ્ઞે વૈ સ્નાનં કુર્વન્તિ યે નરાઃ ।
૧૧૮.૨૯/૨તેષાં સર્વાણિ કાર્યાણિ ભવેયુરપરો વરઃ ॥ ૧૧૮.૨૯ ॥

૧૧૮.૩૦/૧મન્દવારે તુ યેઽશ્વત્થં પ્રાતરુત્થાય માનવાઃ ।
૧૧૮.૩૦/૨આલભન્તે ચ તેષાં વૈ ગ્રહપીડા વ્યપોહતુ ॥ ૧૧૮.૩૦ ॥

૧૧૮.૩૧/૧બ્રહ્મોવાચ । તતઃ પ્રભૃતિ તત્ તીર્થમશ્વત્થં પિપ્પલં વિદુઃ ।
૧૧૮.૩૧/૨તીર્થં શનૈશ્ચરં તત્ર તત્રાગસ્ત્યં ચ સાત્રિકમ્ ॥ ૧૧૮.૩૧ ॥

૧૧૮.૩૨/૧યાજ્ઞિકં ચાપિ તત્ તીર્થં સામગં તીર્થમેવ ચ ।

૧૧૮.૩૨/૨ઇત્યાદ્યષ્ટોત્તરાણ્યાસન્ સહસ્રાણ્યથ ષોડશ ।
૧૧૮.૩૨/૩તેષુ સ્નાનં ચ દાનં ચ સત્રયાગફલપ્રદમ્ ॥ ૧૧૮.૩૨॥

૧૧૯.૧/૧બ્રહ્મોવાચ । સોમતીર્થમિતિ ખ્યાતં તદ્ અપ્યુક્તં મહાત્મભિઃ ।
૧૧૯.૧/૨તત્ર સ્નાનેન દાનેન સોમપાનફલં લભેત્ ॥ ૧૧૯.૧॥

૧૧૯.૨/૧જગતાં માતરઃ પૂર્વમોષધ્યો જીવસમ્મતાઃ ।
૧૧૯.૨/૨મમાપિ માતરો દેવ્યઃ પૂર્વાસાં પૂર્વવત્તરાઃ ॥ ૧૧૯.૨॥

૧૧૯.૩/૧આસુ પ્રતિષ્ઠિતો ધર્મઃ સ્વાધ્યાયો યજ્ઞકર્મ ચ ।
૧૧૯.૩/૨આભિરેવ ધૃતં સર્વં ત્રૈલોક્યં સચરાચરમ્ ॥ ૧૧૯.૩॥

૧૧૯.૪/૧અશેષરોગોપશમો ભવત્યાભિરસંશયમ્ ।
૧૧૯.૪/૨અન્નમેતાભિરેવ સ્યાદ્ અશેષપ્રાણરક્ષણમ્ ।
૧૧૯.૪/૩અત્રૌષધ્યો જગદ્વન્દ્યા મામૂચુરનહંકૃતાઃ ॥ ૧૧૯.૪॥

૧૧૯.૫/૧ઓષધ્ય ઊચુઃ । અસ્માકં ત્વં પતિં દેહિ રાજાનં સુરસત્તમ ॥ ૧૧૯.૫॥

૧૧૯.૬/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા વચનં તાસાં મયોક્તા ઓષધીરિદમ્ ।
૧૧૯.૬/૨પતિં પ્રાપ્સ્યથ સર્વાશ્ચ રાજાનં પ્રીતિવર્ધનમ્ ॥ ૧૧૯.૬॥

૧૧૯.૭/૧રાજાનમિતિ તચ્છ્રુત્વા તા મામૂચુઃ પુનર્મુને ।
૧૧૯.૭/૨ગન્તવ્યં ક્વ પુનશ્ચોક્તા ગૌતમીં યાન્તુ માતરઃ ॥ ૧૧૯.૭॥

૧૧૯.૮/૧તુષ્ટાયામથ તસ્યાં વો રાજા સ્યાલ્લોકપૂજિતઃ ।
૧૧૯.૮/૨તાશ્ચ ગત્વા મુનિશ્રેષ્ઠ તુષ્ટુવુર્ગૌતમીં નદીમ્ ॥ ૧૧૯.૮॥

૧૧૯.૯/૧ઓષધ્ય ઊચુઃ । કિં વાકરિષ્યન્ ભવવર્તિનો જના ।
૧૧૯.૯/૨નાનાઘસંઘાભિભવાચ્ચ દુઃખિતાઃ ।
૧૧૯.૯/૩ન ચાગમિષ્યદ્ ભવતી ભુવં ચેત્ ।
૧૧૯.૯/૪પુણ્યોદકે ગૌતમિ શમ્ભુકાન્તે ॥ ૧૧૯.૯॥

૧૧૯.૧૦/૧કો વેત્તિ ભાગ્યં નરદેહભાજામ્ ।
૧૧૯.૧૦/૨મહીગતાનાં સરિતામધીશે ।
૧૧૯.૧૦/૩એષાં મહાપાતકસંઘહન્ત્રી ।
૧૧૯.૧૦/૪ત્વમમ્બ ગઙ્ગે સુલભા સદૈવ ॥ ૧૧૯.૧૦॥

૧૧૯.૧૧/૧ન તે વિભૂતિં નનુ વેત્તિ કોઽપિ ।
૧૧૯.૧૧/૨ત્રૈલોક્યવન્દ્યે જગદમ્બ ગઙ્ગે ।

૧૧૯.૧૧/૩ગૌરીસમાલિઙ્ગિતવિગ્રહોઽપિ ।
૧૧૯.૧૧/૪ધત્તે સ્મરારિઃ શિરસાપિ યત્ ત્વામ્ ॥ ૧૧૯.૧૧॥

૧૧૯.૧૨/૧નમોઽસ્તુ તે માતરભીષ્ટદાયિનિ ।
૧૧૯.૧૨/૨નમોઽસ્તુ તે બ્રહ્મમયેઽઘનાશિનિ ।
૧૧૯.૧૨/૩નમોઽસ્તુ તે વિષ્ણુપદાબ્જનિઃસૃતે ।
૧૧૯.૧૨/૪નમોઽસ્તુ તે શમ્ભુજટાવિનિઃસૃતે ॥ ૧૧૯.૧૨॥

૧૧૯.૧૩/૧બ્રહ્મોવાચ । ઇત્યેવં સ્તુવતામીશા કિં દદામીત્યવોચત ॥ ૧૧૯.૧૩॥

૧૧૯.૧૪/૧ઓષધ્ય ઊચુઃ । પતિં દેહિ જગન્માતા રાજાનમતિતેજસમ્ ॥ ૧૧૯.૧૪॥

૧૧૯.૧૫/૧બ્રહ્મોવાચ । તદોવાચ નદી ગઙ્ગા ઓષધીસ્તા ઇદં વચઃ ॥ ૧૧૯.૧૫॥

૧૧૯.૧૬/૧ગઙ્ગોવાચ । અહં ચામૃતરૂપાસ્મિ ઓષધ્યો માતરોઽમૃતાઃ ।
૧૧૯.૧૬/૨તાદૃશં ચામૃતાત્માનં પતિં સોમં દદામિ વઃ ॥ ૧૧૯.૧૬॥

૧૧૯.૧૭/૧બ્રહ્મોવાચ । દેવાશ્ચ ઋષયો વાક્યં મેનિરે સોમ એવ ચ ।
૧૧૯.૧૭/૨ઓષધ્યશ્ચાપિ તદ્ વાક્યં તતો જગ્મુઃ સ્વમાલયમ્ ॥ ૧૧૯.૧૭॥

૧૧૯.૧૮/૧યત્ર ચાપુર્મહૌષધ્યો રાજાનમમૃતાત્મકમ્ ।
૧૧૯.૧૮/૨સોમં સમસ્તસંતાપ+ ।પાપસંઘનિવારકમ્ ॥ ૧૧૯.૧૮॥

૧૧૯.૧૯/૧સોમતીર્થં તુ તત્ ખ્યાતં સોમપાનફલપ્રદમ્ ।
૧૧૯.૧૯/૨તત્ર સ્નાનેન દાનેન પિતરઃ સ્વર્ગમાપ્નુયુઃ ॥ ૧૧૯.૧૯॥

૧૧૯.૨૦/૧ય ઇદં શ ૃણુયાન્ નિત્યં પઠેદ્ વા ભક્તિતઃ સ્મરેત્ ।
૧૧૯.૨૦/૨દીર્ઘમાયુરવાપ્નોતિ સ પુત્રી ધનવાન્ ભવેત્ ॥ ૧૧૯.૨૦॥

૧૨૦.૧/૧બ્રહ્મોવાચ । ધાન્યતીર્થમિતિ ખ્યાતં સર્વકામપ્રદં નૃણામ્ ।
૧૨૦.૧/૨સુભિક્ષં ક્ષેમદં પુંસાં સર્વાપદ્વિનિવારણમ્ ॥ ૧૨૦.૧॥

૧૨૦.૨/૧ઓષધ્યઃ સોમરાજાનં પતિં પ્રાપ્ય મુદાન્વિતાઃ ।
૧૨૦.૨/૨ઊચુઃ સર્વસ્ય લોકસ્ય ગઙ્ગાયાશ્ચેપ્સિતં વચઃ ॥ ૧૨૦.૨॥

૧૨૦.૩/૧ઓષધ્ય ઊચુઃ । વૈદિકી પુણ્યગાથાસ્તિ યાં વૈ વેદવિદો વિદુઃ ।
૧૨૦.૩/૨ભૂમિં સસ્યવતીં કશ્ચિન્ માતરં માતૃસમ્મિતામ્ ॥ ૧૨૦.૩॥

૧૨૦.૪/૧ગઙ્ગાસમીપે યો દદ્યાત્ સર્વકામાન્ અવાપ્નુયાત્ ।
૧૨૦.૪/૨ભૂમિં સસ્યવતીં ગાશ્ચ ઓષધીશ્ચ મુદાન્વિતઃ ॥ ૧૨૦.૪॥

૧૨૦.૫/૧વિષ્ણુબ્રહ્મેશરૂપાય યો દદ્યાદ્ ભક્તિમાન્ નરઃ ।
૧૨૦.૫/૨સર્વં તદ્ અક્ષયં વિદ્યાત્ સર્વકામાન્ અવાપ્નુયાત્ ॥ ૧૨૦.૫॥

૧૨૦.૬/૧ઓષધ્યઃ સોમરાજન્યાઃ સોમશ્ચાપ્યોષધીપતિઃ ।
૧૨૦.૬/૨ઇતિ જ્ઞાત્વા બ્રહ્મવિદ ઓષધીર્યઃ પ્રદાસ્યતિ ॥ ૧૨૦.૬॥

૧૨૦.૭/૧સર્વાન્ કામાન્ અવાપ્નોતિ બ્રહ્મલોકે મહીયતે ।
૧૨૦.૭/૨તા એવ સોમરાજન્યાઃ પ્રીતાઃ પ્રોચુઃ પુનઃ પુનઃ ॥ ૧૨૦.૭॥

૧૨૦.૮/૧ઓષધ્ય ઊચુઃ । યોઽસ્માન્ દદાતિ ગઙ્ગાયાં તં રાજન્ પારયામસિ ।
૧૨૦.૮/૨ત્વમુત્તમશ્ચૌષધીશ ત્વદધીનં ચરાચરમ્ ॥ ૧૨૦.૮॥

૧૨૦.૯/૧ઓષધયઃ સંવદન્તે સોમેન સહ રાજ્ઞા ।
૧૨૦.૯/૨યોઽસ્માન્ દદાતિ વિપ્રેભ્યસ્તં રાજન્ પારયામસિ ॥ ૧૨૦.૯॥

૧૨૦.૧૦/૧વયં ચ બ્રહ્મરૂપિણ્યઃ પ્રાણરૂપિણ્ય એવ ચ ।
૧૨૦.૧૦/૨યોઽસ્માન્ દદાતિ વિપ્રેભ્યસ્તં રાજન્ પારયામસિ ॥ ૧૨૦.૧૦॥

૧૨૦.૧૧/૧અસ્માન્ દદાતિ યો નિત્યં બ્રાહ્મણેભ્યો જિતવ્રતઃ ।
૧૨૦.૧૧/૨ઉપાસ્તિરસ્તિ સાસ્માકં તં રાજન્ પારયામસિ ॥ ૧૨૦.૧૧॥

૧૨૦.૧૨/૧સ્થાવરં જઙ્ગમં કિંચિદ્ અસ્માભિર્વ્યાપૃતં જગત્ ।
૧૨૦.૧૨/૨યોઽસ્માન્ દદાતિ વિપ્રેભ્યસ્તં રાજન્ પારયામસિ ॥ ૧૨૦.૧૨॥

૧૨૦.૧૩/૧હવ્યં કવ્યં યદ્ અમૃતં યત્ કિંચિદ્ ઉપભુજ્યતે ।
૧૨૦.૧૩/૨તદ્વરીયશ્ચ યો દદ્યાત્ તં રાજન્ પારયામસિ ॥ ૧૨૦.૧૩॥

૧૨૦.૧૪/૧ઇત્યેતાં વૈદિકીં ગાથાં યઃ શૃણોતિ સ્મરેત વા ।
૧૨૦.૧૪/૨પઠતે ભક્તિમાપન્નસ્તં રાજન્ પારયામસિ ॥ ૧૨૦.૧૪॥

૧૨૦.૧૫/૧બ્રહ્મોવાચ । યત્રૈષા પઠિતા ગાથા સોમેન સહ રાજ્ઞા ।
૧૨૦.૧૫/૨ગઙ્ગાતીરે ચૌષધીભિર્ધાન્યતીર્થં તદ્ ઉચ્યતે ॥ ૧૨૦.૧૫॥

૧૨૦.૧૬/૧તતઃ પ્રભૃતિ તત્ તીર્થમૌષધ્યં સૌમ્યમેવ ચ ।
૧૨૦.૧૬/૨અમૃતં વેદગાથં ચ માતૃતીર્થં તથૈવ ચ ॥ ૧૨૦.૧૬॥

૧૨૦.૧૭/૧એષુ સ્નાનં જપો હોમો દાનં ચ પિતૃતર્પણમ્ ।
૧૨૦.૧૭/૨અન્નદાનં તુ યઃ કુર્યાત્ તદ્ આનન્ત્યાય કલ્પતે ॥ ૧૨૦.૧૭॥

૧૨૦.૧૮/૧ષટ્શતાધિકસાહસ્રં તીર્થાનાં તીરયોર્દ્વયોઃ ।
૧૨૦.૧૮/૨સર્વપાપનિહન્તૄણાં સર્વસમ્પદ્વિવર્ધનમ્ ॥ ૧૨૦.૧૮॥

૧૨૧.૧/૧બ્રહ્મોવાચ । વિદર્ભાસંગમં પુણ્યં રેવતીસંગમં તથા ।
૧૨૧.૧/૨તત્ર યદ્ વૃત્તમાખ્યાસ્યે યત્ પુરાણવિદો વિદુઃ ॥ ૧૨૧.૧॥

૧૨૧.૨/૧ભરદ્વાજ ઇતિ ખ્યાત ઋષિરાસીત્ તપોધિકઃ ।
૧૨૧.૨/૨તસ્ય સ્વસા રેવતીતિ કુરૂપા વિકૃતસ્વરા ॥ ૧૨૧.૨॥

૧૨૧.૩/૧તાં દૃષ્ટ્વા વિકૃતાં ભ્રાતા ભરદ્વાજઃ પ્રતાપવાન્ ।
૧૨૧.૩/૨ચિન્તયા પરયા યુક્તો ગઙ્ગાયા દક્ષિણે તટે ॥ ૧૨૧.૩॥

૧૨૧.૪/૧કસ્મૈ દદ્યામિમાં કન્યાં સ્વસારં ભીષણાકૃતિમ્ ।
૧૨૧.૪/૨ન કશ્ચિત્ પ્રતિગૃહ્ણાતિ દાતવ્યા ચ સ્વસા તથા ॥ ૧૨૧.૪॥

૧૨૧.૫/૧અહો ભૂયાન્ ન કસ્યાપિ કન્યા દુઃખૈકકારણમ્ ।
૧૨૧.૫/૨મરણં જીવતોઽપ્યસ્ય પ્રાણિનસ્તુ પદે પદે ॥ ૧૨૧.૫॥

૧૨૧.૬/૧એવં વિમૃશતસ્તસ્ય સ્વાશ્રમે ચાતિશોભને ।
૧૨૧.૬/૨દ્રષ્ટું મુનિવરઃ પ્રાયાદ્ ભરદ્વાજં યતવ્રતમ્ ॥ ૧૨૧.૬॥

૧૨૧.૭/૧દ્વ્યષ્ટવર્ષઃ શુભવપુઃ શાન્તો દાન્તો ગુણાકરઃ ।
૧૨૧.૭/૨નામ્ના કઠ ઇતિ ખ્યાતો ભરદ્વાજં નનામ સઃ ॥ ૧૨૧.૭॥

૧૨૧.૮/૧વિધિવત્ પૂજ્ય તં વિપ્રં ભરદ્વાજઃ કઠં તદા ।
૧૨૧.૮/૨તસ્યાગમનકાર્યં ચ પપ્રચ્છ પુરતઃ સ્થિતઃ ॥ ૧૨૧.૮॥

૧૨૧.૯/૧કઠોઽપ્યાહ ભરદ્વાજં વિદ્યાર્થ્યહમુપાગતઃ ।
૧૨૧.૯/૨તથા ચ દર્શનાકાઙ્ક્ષી યદ્ યુક્તં તદ્ વિધીયતામ્ ॥ ૧૨૧.૯॥

૧૨૧.૧૦/૧ભરદ્વાજઃ કઠં પ્રાહ અધીષ્વ યદ્ અભીપ્સિતમ્ ।
૧૨૧.૧૦/૨પુરાણં સ્મૃતયો વેદા ધર્મસ્થાનાન્યનેકશઃ ॥ ૧૨૧.૧૦॥

૧૨૧.૧૧/૧સર્વં વેદ્મિ મહાપ્રાજ્ઞ રુચિરં વદ મા ચિરમ્ ।
૧૨૧.૧૧/૨કુલીનો ધર્મનિરતો ગુરુશુશ્રૂષણે રતઃ ।
૧૨૧.૧૧/૩અભિમાની શ્રુતધરઃ શિષ્યઃ પુણ્યૈરવાપ્યતે ॥ ૧૨૧.૧૧॥

૧૨૧.૧૨/૧કઠ ઉવાચ । અધ્યાપયસ્વ ભો બ્રહ્મન્ શિષ્યં માં વીતકલ્મષમ્ ।
૧૨૧.૧૨/૨શુશ્રૂષણરતં ભક્તં કુલીનં સત્યવાદિનમ્ ॥ ૧૨૧.૧૨॥

૧૨૧.૧૩/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા ભરદ્વાજઃ પ્રાદાદ્ વિદ્યામશેષતઃ ।
૧૨૧.૧૩/૨પ્રાપ્તવિદ્યઃ કઠઃ પ્રીતો ભરદ્વાજમથાબ્રવીત્ ॥ ૧૨૧.૧૩॥

૧૨૧.૧૪/૧કઠ ઉવાચ । ઇચ્છેયં દક્ષિણાં દાતું ગુરો તવ મનઃપ્રિયામ્ ।
૧૨૧.૧૪/૨વદસ્વ દુર્લભં વાપિ ગુરો તુભ્યં નમોઽસ્તુ તે ॥ ૧૨૧.૧૪॥

૧૨૧.૧૫/૧વિદ્યાં પ્રાપ્યાપિ યે મોહાત્ સ્વગુરોઃ પારિતોષિકમ્ ।
૧૨૧.૧૫/૨ન પ્રયચ્છન્તિ નિરયં તે યાન્ત્યાચન્દ્રતારકમ્ ॥ ૧૨૧.૧૫॥

૧૨૧.૧૬/૧ભરદ્વાજ ઉવાચ । ગૃહાણ કન્યાં વિધિવદ્ ભાર્યાં કુરુ મમ સ્વસામ્ ।
૧૨૧.૧૬/૨અસ્યાં પ્રીત્યા વર્તિતવ્યં યાચેયં દક્ષિણામિમામ્ ॥ ૧૨૧.૧૬॥

૧૨૧.૧૭/૧કઠ ઉવાચ । ભ્રાતૃવત્ પુત્રવચ્ચાપિ શિષ્યઃ સ્યાત્ તુ ગુરોઃ સદા ।
૧૨૧.૧૭/૨ગુરુશ્ચ પિતૃવચ્ચ સ્યાત્ સમ્બન્ધોઽત્ર કથં ભવેત્ ॥ ૧૨૧.૧૭॥

૧૨૧.૧૮/૧ભરદ્વાજ ઉવાચ । મદ્વાક્યં કુરુ સત્યં ત્વં મમાજ્ઞા તવ દક્ષિણા ।
૧૨૧.૧૮/૨સર્વં સ્મૃત્વા કઠાદ્ય ત્વં રેવતીં ભર તન્મનાઃ ॥ ૧૨૧.૧૮॥

૧૨૧.૧૯/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા ગુરોર્વાક્યાત્ કઠો જગ્રાહ પાણિના ।
૧૨૧.૧૯/૨રેવતીં વિધિવદ્ દત્તાં તાં સમીક્ષ્ય કઠસ્ત્વથ ॥ ૧૨૧.૧૯॥

૧૨૧.૨૦/૧તત્રૈવ પૂજયામાસ દેવેશં શંકરં તદા ।
૧૨૧.૨૦/૨રેવત્યા રૂપસમ્પત્ત્યૈ શિવપ્રીત્યૈ ચ રેવતી ॥ ૧૨૧.૨૦॥

૧૨૧.૨૧/૧સુરૂપા ચારુસર્વાઙ્ગી ન રૂપેણોપમીયતે ।
૧૨૧.૨૧/૨અભિષેકોદકં તત્ર રેવત્યા યદ્ વિનિઃસૃતમ્ ॥ ૧૨૧.૨૧॥

૧૨૧.૨૨/૧સાભવત્ તત્ર ગઙ્ગાયાં તસ્માત્ તન્નામતો નદી ।
૧૨૧.૨૨/૨રેવતીતિ સમાખ્યાતા રૂપસૌભાગ્યદાયિની ॥ ૧૨૧.૨૨॥

૧૨૧.૨૩/૧પુનર્દર્ભૈશ્ચ વિવિધૈરભિષેકં ચકાર સઃ ।
૧૨૧.૨૩/૨પુણ્યરૂપત્વસંસિદ્ધ્યૈ વિદર્ભા તદ્ અભૂન્ નદી ॥ ૧૨૧.૨૩॥

૧૨૧.૨૪/૧શ્રદ્ધયા સંગમે સ્નાત્વા રેવતીગઙ્ગયોર્નરઃ ।
૧૨૧.૨૪/૨સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકે મહીયતે ॥ ૧૨૧.૨૪॥

૧૨૧.૨૫/૧તથા વિદર્ભાગૌતમ્યોઃ સંગમે શ્રદ્ધયા મુને ।
૧૨૧.૨૫/૨સ્નાનં કરોત્યસૌ યાતિ ભુક્તિં મુક્તિં ચ તત્ક્ષણાત્ ॥ ૧૨૧.૨૫॥

૧૨૧.૨૬/૧ઉભયોસ્તીરયોસ્તત્ર તીર્થાનાં શતમુત્તમમ્ ।
૧૨૧.૨૬/૨સર્વપાપક્ષયકરં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૨૧.૨૬॥

૧૨૨.૧/૧બ્રહ્મોવાચ । પૂર્ણતીર્થમિતિ ખ્યાતં ગઙ્ગાયા ઉત્તરે તટે ।
૧૨૨.૧/૨તત્ર સ્નાત્વા નરોઽજ્ઞાનાત્ તથાપિ શુભમાપ્નુયાત્ ॥ ૧૨૨.૧॥

૧૨૨.૨/૧પૂર્ણતીર્થસ્ય માહાત્મ્યં વર્ણ્યતે કેન જન્તુના ।
૧૨૨.૨/૨સ્વયં સંસ્થીયતે યત્ર ચક્રિણા ચ પિનાકિના ॥ ૧૨૨.૨॥

૧૨૨.૩/૧પુરા ધન્વન્તરિર્નામ કલ્પાદાવાયુષઃ સુતઃ ।
૧૨૨.૩/૨ઇષ્ટ્વા બહુવિધૈર્યજ્ઞૈરશ્વમેધપુરઃસરૈઃ ॥ ૧૨૨.૩॥

૧૨૨.૪/૧દત્ત્વા દાનાન્યનેકાનિ ભુક્ત્વા ભોગાંશ્ચ પુષ્કલાન્ ।
૧૨૨.૪/૨વિજ્ઞાય ભોગવૈષમ્યં પરં વૈરાગ્યમાશ્રિતઃ ॥ ૧૨૨.૪॥

૧૨૨.૫/૧ગિરિશૃઙ્ગેઽમ્બુધેઃ પારે તથા ગઙ્ગાનદીતટે ।
૧૨૨.૫/૨શિવવિષ્ણ્વોર્ગૃહે વાપિ વિશેષાત્ પુણ્યસંગમે ॥ ૧૨૨.૫॥

૧૨૨.૬/૧તપ્તં હુતં ચ જપ્તં ચ સર્વમક્ષયતાં વ્રજેત્ ।
૧૨૨.૬/૨ધન્વન્તરિરિતિ જ્ઞાત્વા તત્ર તેપે તપો મહત્ ॥ ૧૨૨.૬॥

૧૨૨.૭/૧જ્ઞાનવૈરાગ્યસમ્પન્નો ભીમેશચરણાશ્રયઃ ।
૧૨૨.૭/૨તપશ્ચકાર વિપુલં ગઙ્ગાસાગરસંગમે ॥ ૧૨૨.૭॥

૧૨૨.૮/૧પુરા ચ નિકૃતો રાજ્ઞા રણં હિત્વા મહાસુરઃ ।
૧૨૨.૮/૨સહસ્રમેકં વર્ષાણાં સમુદ્રં પ્રાવિશદ્ ભયાત્ ॥ ૧૨૨.૮॥

૧૨૨.૯/૧ધન્વન્તરૌ વનં પ્રાપ્તે રાજ્યં પ્રાપ્તે તુ તત્સુતે ।
૧૨૨.૯/૨વિરાગં ચ ગતે રાજ્ઞિ તતઃ પ્રાયાદ્ અથાર્ણવાત્ ॥ ૧૨૨.૯॥

૧૨૨.૧૦/૧તપસ્યન્તં તમો નામ બલવાન્ અસુરો મુને ।
૧૨૨.૧૦/૨ગઙ્ગાતીરં સમાશ્રિત્ય રાજા ધન્વન્તરિર્યતઃ ॥ ૧૨૨.૧૦॥

૧૨૨.૧૧/૧જપહોમરતો નિત્યં બ્રહ્મજ્ઞાનપરાયણઃ ।
૧૨૨.૧૧/૨તં રિપું નાશયામીતિ તમઃ પ્રાયાદ્ અથાર્ણવાત્ ॥ ૧૨૨.૧૧॥

૧૨૨.૧૨/૧નાશિતો બહુશોઽનેન રાજ્ઞા બલવતા ત્વહમ્ ।
૧૨૨.૧૨/૨તં રિપું નાશયામીતિ તમઃ પ્રાયાદ્ અથાર્ણવાત્ ॥ ૧૨૨.૧૨॥

૧૨૨.૧૩/૧માયયા પ્રમદારૂપં કૃત્વા રાજાનમભ્યગાત્ ।
૧૨૨.૧૩/૨નૃત્યગીતવતી સુભ્રૂર્હસન્તી ચારુદર્શના ॥ ૧૨૨.૧૩॥

૧૨૨.૧૪/૧તાં દૃષ્ટ્વા ચારુસર્વાઙ્ગીં બહુકાલં નયાન્વિતામ્ ।
૧૨૨.૧૪/૨શાન્તામનુવ્રતાં ભક્તાં કૃપયા ચાબ્રવીન્ નૃપઃ ॥ ૧૨૨.૧૪॥

૧૨૨.૧૫/૧નૃપ ઉવાચ । કાસિ ત્વં કસ્ય હેતોર્વા વર્તસે ગહને વને ।

૧૨૨.૧૫/૨કં દૃષ્ટ્વા હર્ષસીવ ત્વં વદ કલ્યાણિ પૃચ્છતે ॥ ૧૨૨.૧૫॥

૧૨૨.૧૬/૧બ્રહ્મોવાચ । પ્રમદા ચાપિ તદ્વાક્યં શ્રુત્વા રાજાનમબ્રવીત્ ॥ ૧૨૨.૧૬॥

૧૨૨.૧૭/૧પ્રમદોવાચ । ત્વયિ તિષ્ઠતિ કો લોકે હેતુર્હર્ષસ્ય મે ભવેત્ ।
૧૨૨.૧૭/૨અહમિન્દ્રસ્ય યા લક્ષ્મીસ્ત્વાં દૃષ્ટ્વા કામસમ્ભૃતમ્ ॥ ૧૨૨.૧૭॥

૧૨૨.૧૮/૧હર્ષાચ્ચરામિ પુરતો રાજંસ્તવ પુનઃ પુનઃ ।
૧૨૨.૧૮/૨અગણ્યપુણ્યવિરહાદ્ અહં સર્વસ્ય દુર્લભા ॥ ૧૨૨.૧૮॥

૧૨૨.૧૯/૧બ્રહ્મોવાચ । એતદ્ વચો નિશમ્યાશુ તપસ્ત્યક્ત્વા સુદુષ્કરમ્ ।
૧૨૨.૧૯/૨તામેવ મનસા ધ્યાયંસ્તન્નિષ્ઠસ્તત્પરાયણઃ ॥ ૧૨૨.૧૯॥

૧૨૨.૨૦/૧તદેકશરણો રાજા બભૂવ સ યદા તમઃ ।
૧૨૨.૨૦/૨અન્તર્ધાનં ગતો બ્રહ્મન્ નાશયિત્વા તપો બૃહત્ ॥ ૧૨૨.૨૦॥

૧૨૨.૨૧/૧એતસ્મિન્ન્ અન્તરેઽહં વૈ વરાન્ દાતું સમભ્યગામ્ ।
૧૨૨.૨૧/૨તં દૃષ્ટ્વા વિહ્વલીભૂતં તપોભ્રષ્ટં યથા મૃતમ્ ॥ ૧૨૨.૨૧॥

૧૨૨.૨૨/૧તમાશ્વાસ્યાથ વિવિધૈર્હેતુભિર્નૃપસત્તમમ્ ।
૧૨૨.૨૨/૨તવ શત્રુસ્તમો નામ કૃત્વા તાં તપસશ્ચ્યુતિમ્ ॥ ૧૨૨.૨૨॥

૧૨૨.૨૩/૧ચરિતાર્થો ગતો રાજન્ ન ત્વં શોચિતુમર્હસિ ।
૧૨૨.૨૩/૨આનન્દયન્તિ પ્રમદાસ્તાપયન્તિ ચ માનવમ્ ॥ ૧૨૨.૨૩॥

૧૨૨.૨૪/૧સર્વા એવ વિશેષેણ કિમુ માયામયી તુ સા ।
૧૨૨.૨૪/૨તતઃ કૃતાઞ્જલી રાજા મામાહ વિગતભ્રમઃ ॥ ૧૨૨.૨૪॥

૧૨૨.૨૫/૧રાજોવાચ । કિં કરોમિ કથં બ્રહ્મંસ્તપસઃ પારમાપ્નુયામ્ ॥ ૧૨૨.૨૫॥

૧૨૨.૨૬/૧બ્રહ્મોવાચ । તતસ્તસ્યોત્તરં પ્રાદાં દેવદેવં જનાર્દનમ્ ।
૧૨૨.૨૬/૨સ્તુહિ સર્વપ્રયત્નેન તતઃ સિદ્ધિમવાપ્સ્યસિ ॥ ૧૨૨.૨૬॥

૧૨૨.૨૭/૧સ હ્યશેષજગત્સ્રષ્ટા વેદવેદ્યઃ પુરાતનઃ ।
૧૨૨.૨૭/૨સર્વાર્થસિદ્ધિદઃ પુંસાં નાન્યોઽસ્તિ ભુવનત્રયે ॥ ૧૨૨.૨૭॥

૧૨૨.૨૮/૧સ જગામ નગશ્રેષ્ઠં હિમવન્તં નૃપોત્તમઃ ।
૧૨૨.૨૮/૨કૃતાઞ્જલિપુટો ભૂત્વા વિષ્ણું તુષ્ટાવ ભક્તિતઃ ॥ ૧૨૨.૨૮॥

૧૨૨.૨૯/૧ધન્વન્તરિરુવાચ । જય વિષ્ણો જયાચિન્ત્ય જય જિષ્ણો જયાચ્યુત ।
૧૨૨.૨૯/૨જય ગોપાલ લક્ષ્મીશ જય કૃષ્ણ જગન્મય ॥ ૧૨૨.૨૯॥

૧૨૨.૩૦/૧જય ભૂતપતે નાથ જય પન્નગશાયિને ।

૧૨૨.૩૦/૨જય સર્વગ ગોવિન્દ જય વિશ્વકૃતે નમઃ ॥ ૧૨૨.૩૦॥

૧૨૨.૩૧/૧જય વિશ્વભુજે દેવ જય વિશ્વધૃતે નમઃ ।

૧૨૨.૩૧/૨જયેશ સદસત્ ત્વં વૈ જય માધવ ધર્મિણે ॥ ૧૨૨.૩૧॥

૧૨૨.૩૨/૧જય કામદ કામ ત્વં જય રામ ગુણાર્ણવ ।

૧૨૨.૩૨/૨જય પુષ્ટિદ પુષ્ટીશ જય કલ્યાણદાયિને ॥ ૧૨૨.૩૨॥

૧૨૨.૩૩/૧જય ભૂતપ ભૂતેશ જય માનવિધાયિને ।

૧૨૨.૩૩/૨જય કર્મદ કર્મ ત્વં જય પીતામ્બરચ્છદ ॥ ૧૨૨.૩૩॥

૧૨૨.૩૪/૧જય સર્વેશ સર્વસ્ત્વં જય મઙ્ગલરૂપિણે ।

૧૨૨.૩૪/૨જય સત્ત્વાધિનાથાય જય વેદવિદે નમઃ ॥ ૧૨૨.૩૪॥

૧૨૨.૩૫/૧જય જન્મદ જન્મિસ્થ પરમાત્મન્ નમોઽસ્તુ તે ।

૧૨૨.૩૫/૨જય મુક્તિદ મુક્તિસ્ત્વં જય ભુક્તિદ કેશવ ॥ ૧૨૨.૩૫॥

૧૨૨.૩૬/૧જય લોકદ લોકેશ જય પાપવિનાશન ।

૧૨૨.૩૬/૨જય વત્સલ ભક્તાનાં જય ચક્રધૃતે નમઃ ॥ ૧૨૨.૩૬॥

૧૨૨.૩૭/૧જય માનદ માનસ્ત્વં જય લોકનમસ્કૃત ।

૧૨૨.૩૭/૨જય ધર્મદ ધર્મસ્ત્વં જય સંસારપારગ ॥ ૧૨૨.૩૭॥

૧૨૨.૩૮/૧જય અન્નદ અન્નં ત્વં જય વાચસ્પતે નમઃ ।

૧૨૨.૩૮/૨જય શક્તિદ શક્તિસ્ત્વં જય જૈત્રવરપ્રદ ॥ ૧૨૨.૩૮॥

૧૨૨.૩૯/૧જય યજ્ઞદ યજ્ઞસ્ત્વં જય પદ્મદલેક્ષણ ।

૧૨૨.૩૯/૨જય દાનદ દાનં ત્વં જય કૈટભસૂદન ॥ ૧૨૨.૩૯॥

૧૨૨.૪૦/૧જય કીર્તિદ કીર્તિસ્ત્વં જય મૂર્તિદ મૂર્તિધૃક્ ।

૧૨૨.૪૦/૨જય સૌખ્યદ સૌખ્યાત્મઞ્ જય પાવનપાવન ॥ ૧૨૨.૪૦॥

૧૨૨.૪૧/૧જય શાન્તિદ શાન્તિસ્ત્વં જય શંકરસમ્ભવ ।

૧૨૨.૪૧/૨જય પાનદ પાનસ્ત્વં જય જ્યોતિઃસ્વરૂપિણે ॥ ૧૨૨.૪૧॥

૧૨૨.૪૨/૧જય વામન વિત્તેશ જય ધૂમપતાકિને ।

૧૨૨.૪૨/૨જય સર્વસ્ય જગતો દાતૃમૂર્તે નમોઽસ્તુ તે ॥ ૧૨૨.૪૨॥

૧૨૨.૪૩/૧ત્વમેવ લોકત્રયવર્તિજીવ+ ।

૧૨૨.૪૩/૨નિકાયસંક્લેશવિનાશદક્ષ ।

૧૨૨.૪૩/૩શ્રીપુણ્ડરીકાક્ષ કૃપાનિધે ત્વમ્ ।
૧૨૨.૪૩/૪નિધેહિ પાણિં મમ મૂર્ધ્નિ વિષ્ણો ॥ ૧૨૨.૪૩॥

૧૨૨.૪૪/૧બ્રહ્મોવાચ । એવં સ્તુવન્તં ભગવાઞ્ શઙ્ખચક્રગદાધરઃ ।
૧૨૨.૪૪/૨વરેણ ચ્છન્દયામાસ સર્વકામસમૃદ્ધિદઃ ॥ ૧૨૨.૪૪॥

૧૨૨.૪૫/૧ધન્વન્તરિઃ પ્રીતમના વરદાનેન ચક્રિણઃ ।
૧૨૨.૪૫/૨વરદાનાય દેવેશં ગોવિન્દં સંસ્થિતં પુરઃ ॥ ૧૨૨.૪૫॥

૧૨૨.૪૬/૧તમાહ નૃપતિઃ પ્રહ્વઃ સુરરાજ્યં મમેપ્સિતમ્ ।
૧૨૨.૪૬/૨તચ્ચ દત્તં ત્વયા વિષ્ણો પ્રાપ્તોઽસ્મિ કૃતકૃત્યતામ્ ॥ ૧૨૨.૪૬॥

૧૨૨.૪૭/૧સ્તુતઃ સમ્પૂજિતો વિષ્ણુસ્તત્રૈવાન્તરધીયત ।
૧૨૨.૪૭/૨તથૈવ ત્રિદશેશત્વમવાપ નૃપતિઃ ક્રમાત્ ॥ ૧૨૨.૪૭॥

૧૨૨.૪૮/૧પ્રાગર્જિતાનેકકર્મ+ ।પરિપાકવશાત્ તતઃ ।
૧૨૨.૪૮/૨ત્રિઃકૃત્વો નાશમગમત્ સહસ્રાક્ષઃ સ્વકાત્ પદાત્ ॥ ૧૨૨.૪૮॥

૧૨૨.૪૯/૧નહુષાદ્ વૃત્રહત્યાયાઃ સિન્ધુસેનવધાત્ તતઃ ।
૧૨૨.૪૯/૨અહલ્યાયાં ચ ગમનાદ્ યેન કેન ચ હેતુના ॥ ૧૨૨.૪૯॥

૧૨૨.૫૦/૧સ્મારં સ્મારં તત્ તદ્ ઇન્દ્રશ્ચિન્તાસંતાપદુર્મનાઃ ।
૧૨૨.૫૦/૨તતઃ સુરપતિઃ પ્રાહ વાચસ્પતિમિદં વચઃ ॥ ૧૨૨.૫૦॥

૧૨૨.૫૧/૧ઇન્દ્ર ઉવાચ । હેતુના કેન વાગીશ ભ્રષ્ટરાજ્યો ભવામ્યહમ્ ।
૧૨૨.૫૧/૨મધ્યે મધ્યે પદભ્રંશાદ્ વરં નિઃશ્રીકતા નૃણામ્ ॥ ૧૨૨.૫૧॥

૧૨૨.૫૨/૧ગહનાં કર્મણાં જીવ+ ।ગતિં કો વેત્તિ તત્ત્વતઃ ।
૧૨૨.૫૨/૨રહસ્યં સર્વભાવાનાં જ્ઞાતું નાન્યઃ પ્રગલ્ભતે ॥ ૧૨૨.૫૨॥

૧૨૨.૫૩/૧બ્રહ્મોવાચ । બૃહસ્પતિર્હરિં પ્રાહ બ્રહ્માણં પૃચ્છ ગચ્છ તમ્ ।
૧૨૨.૫૩/૨સ તુ જાનાતિ યદ્ ભૂતં ભવિષ્યચ્ચાપિ વર્તનમ્ ॥ ૧૨૨.૫૩॥

૧૨૨.૫૪/૧સ તુ વક્ષ્યતિ યેનેદં જાતં તચ્ચ મહામતે ।
૧૨૨.૫૪/૨તાવાગત્ય મહાપ્રાજ્ઞૌ નમસ્કૃત્ય મમાન્તિકમ્ ।
૧૨૨.૫૪/૩કૃતાઞ્જલિપુટૌ ભૂત્વા મામૂચતુરિદં વચઃ ॥ ૧૨૨.૫૪॥

૧૨૨.૫૫/૧ઇન્દ્રબૃહસ્પતી ઊચતુઃ । ભગવન્ કેન દોષેણ શચીભર્તા ઉદારધીઃ ।
૧૨૨.૫૫/૨રાજ્યાત્ પ્રભ્રશ્યતે નાથ સંશયં છેત્તુમર્હસિ ॥ ૧૨૨.૫૫॥

૧૨૨.૫૬/૧બ્રહ્મોવાચ । તદાહમબ્રવં બ્રહ્મંશ્ચિરં ધ્યાત્વા બૃહસ્પતિમ્ ।

૧૨૨.૫૬/૨ખણ્ડધર્માખ્યદોષેણ તેન રાજ્યપદાચ્ચ્યુતઃ ॥ ૧૨૨.૫૬॥

૧૨૨.૫૭/૧દેશકાલાદિદોષેણ શ્રદ્ધામન્ત્રવિપર્યયાત્ ।
૧૨૨.૫૭/૨યથાવદ્દક્ષિણાદાનાદ્ અસદ્દ્રવ્યપ્રદાનતઃ ॥ ૧૨૨.૫૭॥

૧૨૨.૫૮/૧દેવભૂદેવતાવજ્ઞા+ ।પાતકાચ્ચ વિશેષતઃ ।
૧૨૨.૫૮/૨યત્ ખણ્ડત્વં સ્વધર્મસ્ય દેહિનામુપજાયતે ॥ ૧૨૨.૫૮॥

૧૨૨.૫૯/૧તેનાતિમાનસસ્તાપઃ પદહાનિશ્ચ દુસ્ત્યજા ।
૧૨૨.૫૯/૨કૃતોઽપિ ધર્મોઽનિષ્ટાય જાયતે ક્ષુબ્ધચેતસા ॥ ૧૨૨.૫૯॥

૧૨૨.૬૦/૧કાર્યસ્ય ન ભવેત્ સિદ્ધ્યૈ તસ્માદ્ અવ્યાકુલાય ચ ।
૧૨૨.૬૦/૨અસમ્પૂર્ણે સ્વધર્મે હિ કિમનિષ્ટં ન જાયતે ॥ ૧૨૨.૬૦॥

૧૨૨.૬૧/૧તાભ્યાં યત્ પૂર્વવૃત્તાન્તં તદ્ અપ્યુક્તં મયાનઘ ।
૧૨૨.૬૧/૨આયુષસ્તુ સુતઃ શ્રીમાન્ ધન્વન્તરિરુદારધીઃ ॥ ૧૨૨.૬૧॥

૧૨૨.૬૨/૧તમસા ચ કૃતં વિઘ્નં વિષ્ણુના તચ્ચ નાશિતમ્ ।
૧૨૨.૬૨/૨પૂર્વજન્મસુ વૃત્તાન્તમિત્યાદિ પરિકીર્તિતમ્ ॥ ૧૨૨.૬૨॥

૧૨૨.૬૩/૧તચ્છ્રુત્વા વિસ્મિતૌ ચોભૌ મામેવ પુનરૂચતુઃ ॥ ૧૨૨.૬૩॥

૧૨૨.૬૪/૧ઇન્દ્રબૃહસ્પતી ઊચતુઃ । તદ્દોષપ્રતિબન્ધસ્તુ કેન
સ્યાત્ સુરસત્તમ ॥ ૧૨૨.૬૪॥

૧૨૨.૬૫/૧બ્રહ્મોવાચ । પુનર્ધ્યાત્વા તાવવદં શ્રૂયતાં દોષકારકમ્ ।
૧૨૨.૬૫/૨કારણં સર્વસિદ્ધીનાં દુઃખસંસારતારણમ્ ॥ ૧૨૨.૬૫॥

૧૨૨.૬૬/૧શરણં તત્પ્રચિત્તાનાં નિર્વાણં જીવતામપિ ।
૧૨૨.૬૬/૨ગત્વા તુ ગૌતમીં દેવીં સ્તૂયેતાં હરિશંકરૌ ॥ ૧૨૨.૬૬॥

૧૨૨.૬૭/૧નોપાયોઽન્યોઽસ્તિ સંશુદ્ધ્યૈ તૌ તાં હિત્વા જગત્રયે ।
૧૨૨.૬૭/૨તદૈવ જગ્મતુરુભૌ ગૌતમીં મુનિસત્તમ ।
૧૨૨.૬૭/૩સ્નાતૌ કૃતક્ષણૌ ચોભૌ દેવૌ તુષ્ટુવતુર્મુદા ॥ ૧૨૨.૬૭॥

૧૨૨.૬૮/૧ઇન્દ્ર ઉવાચ । નમો મત્સ્યાય કૂર્માય વરાહાય નમો નમઃ ।
૧૨૨.૬૮/૨નરસિંહાય દેવાય વામનાય નમો નમઃ ॥ ૧૨૨.૬૮॥

૧૨૨.૬૯/૧નમોઽસ્તુ હયરૂપાય ત્રિવિક્રમ નમોઽસ્તુ તે ।
૧૨૨.૬૯/૨નમોઽસ્તુ બુદ્ધરૂપાય રામરૂપાય કલ્કિને ॥ ૧૨૨.૬૯॥

૧૨૨.૭૦/૧અનન્તાયાચ્યુતાયેશ જામદગ્ન્યાય તે નમઃ ।
૧૨૨.૭૦/૨વરુણેન્દ્રસ્વરૂપાય યમરૂપાય તે નમઃ ॥ ૧૨૨.૭૦॥

૧૨૨.૭૧/૧પરમેશાય દેવાય નમસ્ત્રૈલોક્યરૂપિણે ।
૧૨૨.૭૧/૨બિભ્રત્સરસ્વતીં વક્ત્રે સર્વજ્ઞોઽસિ નમોઽસ્તુ તે ॥ ૧૨૨.૭૧॥

૧૨૨.૭૨/૧લક્ષ્મીવાન્ અસ્યતો લક્ષ્મીં બિભ્રદ્ વક્ષસિ ચાનઘ ।
૧૨૨.૭૨/૨બહુબાહૂરુપાદસ્ત્વં બહુકર્ણાક્ષિશીર્ષકઃ ।
૧૨૨.૭૨/૩ત્વામેવ સુખિનં પ્રાપ્ય બહવઃ સુખિનોઽભવન્ ॥ ૧૨૨.૭૨॥

૧૨૨.૭૩/૧તાવન્ નિઃશ્રીકતા પુંસાં માલિન્યં દૈન્યમેવ વા ।
૧૨૨.૭૩/૨યાવન્ ન યાન્તિ શરણં હરે ત્વાં કરુણાર્ણવમ્ ॥ ૧૨૨.૭૩॥

૧૨૨.૭૪/૧બૃહસ્પતિરુવાચ । સૂક્ષ્મં પરં જોતિરનન્તરૂપમ્ ।
૧૨૨.૭૪/૨ઓંકારમાત્રં પ્રકૃતેઃ પરં યત્ ।
૧૨૨.૭૪/૩ચિદ્રૂપમાનન્દમયં સમસ્તમ્ ।
૧૨૨.૭૪/૪એવં વદન્તીશ મુમુક્ષવસ્ત્વામ્ ॥ ૧૨૨.૭૪॥

૧૨૨.૭૫/૧આરાધયન્ત્યત્ર ભવન્તમીશમ્ ।
૧૨૨.૭૫/૨મહામખૈઃ પઞ્ચભિરપ્યકામાઃ ।
૧૨૨.૭૫/૩સંસારસિન્ધોઃ પરમાપ્તકામા ।
૧૨૨.૭૫/૪વિશન્તિ દિવ્યં ભુવનં વપુસ્તે ॥ ૧૨૨.૭૫॥

૧૨૨.૭૬/૧સર્વેષુ સત્ત્વેષુ સમત્વબુદ્ધ્યા ।
૧૨૨.૭૬/૨સંવીક્ષ્ય ષટ્સૂર્મિષુ શાન્તભાવાઃ ।
૧૨૨.૭૬/૩જ્ઞાનેન તે કર્મફલાનિ હિત્વા ।
૧૨૨.૭૬/૪ધ્યાનેન તે ત્વાં પ્રવિશન્તિ શમ્ભો ॥ ૧૨૨.૭૬॥

૧૨૨.૭૭/૧ન જાતિધર્માણિ ન વેદશાસ્ત્રમ્ ।
૧૨૨.૭૭/૨ન ધ્યાનયોગો ન સમાધિધર્મઃ ।
૧૨૨.૭૭/૩રુદ્રં શિવં શંકરં શાન્તિચિત્તમ્ ।
૧૨૨.૭૭/૪ભક્ત્યા દેવં સોમમહં નમસ્યે ॥ ૧૨૨.૭૭॥

૧૨૨.૭૮/૧મૂર્ખોઽપિ શમ્ભો તવ પાદભક્ત્યા ।
૧૨૨.૭૮/૨સમાપ્નુયાન્ મુક્તિમયીં તનું તે ।
૧૨૨.૭૮/૩જ્ઞાનેષુ યજ્ઞેષુ તપઃસુ ચૈવ ।
૧૨૨.૭૮/૪ધ્યાનેષુ હોમેષુ મહાફલેષુ ॥ ૧૨૨.૭૮॥

૧૨૨.૭૯/૧સમ્પન્નમેતત્ ફલમુત્તમં યત્ ।
૧૨૨.૭૯/૨સોમેશ્વરે ભક્તિરહર્નિશં યત્ ।
૧૨૨.૭૯/૩સર્વસ્ય જીવસ્ય સદા પ્રિયસ્ય ।
૧૨૨.૭૯/૪ફલસ્ય દૃષ્ટસ્ય તથા શ્રુતસ્ય ॥ ૧૨૨.૭૯॥

૧૨૨.૮૦/૧સ્વર્ગસ્ય મોક્ષસ્ય જગન્નિવાસ ।
૧૨૨.૮૦/૨સોપાનપઙ્ક્તિસ્તવ ભક્તિરેષા ।
૧૨૨.૮૦/૩ત્વત્પાદસમ્પ્રાપ્તિફલાપ્તયે તુ ।
૧૨૨.૮૦/૪સોપાનપઙ્ક્તિં ન વદન્તિ ધીરાઃ ॥ ૧૨૨.૮૦॥

૧૨૨.૮૧/૧તસ્માદ્ દયાલો મમ ભક્તિરસ્તુ ।
૧૨૨.૮૧/૨નૈવાસ્ત્યુપાયસ્તવ રૂપસેવા ।
૧૨૨.૮૧/૩આત્મીયમાલોક્ય મહત્ત્વમીશ ।
૧૨૨.૮૧/૪પાપેષુ ચાસ્માસુ કુરુ પ્રસાદમ્ ॥ ૧૨૨.૮૧॥

૧૨૨.૮૨/૧સ્થૂલં ચ સૂક્ષ્મં ત્વમનાદિ નિત્યમ્ ।
૧૨૨.૮૨/૨પિતા ચ માતા યદ્ અસચ્ચ સચ્ચ ।
૧૨૨.૮૨/૩એવં સ્તુતો યઃ શ્રુતિભિઃ પુરાણૈર્।
૧૨૨.૮૨/૪નમામિ સોમેશ્વરમીશિતારમ્ ॥ ૧૨૨.૮૨॥

૧૨૨.૮૩/૧બ્રહ્મોવાચ । તતઃ પ્રીતૌ હરિહરાવૂચતુસ્ત્રિદશેશ્વરૌ ॥ ૧૨૨.૮૩॥

૧૨૨.૮૪/૧હરિહરાવૂચતુઃ । વ્રિયતાં યન્ મનોભીષ્ટં યદ્ વરં
ચાતિદુર્લભમ્ ॥ ૧૨૨.૮૪॥

૧૨૨.૮૫/૧બ્રહ્મોવાચ । ઇન્દ્રઃ પ્રાહ સુરેશાનં મદ્રાજ્યં તુ પુનઃ પુનઃ ।
૧૨૨.૮૫/૨જાયતે ભ્રશ્યતે ચૈવ તત્ પાપમુપશામ્યતામ્ ॥ ૧૨૨.૮૫॥

૧૨૨.૮૬/૧યથા સ્થિરોઽહં રાજ્યે સ્યાં સર્વં સ્યાન્ નિશ્ચલં મમ ।
૧૨૨.૮૬/૨સુપ્રીતૌ યદિ દેવેશૌ સર્વં સ્યાન્ નિશ્ચલં સદા ॥ ૧૨૨.૮૬॥

૧૨૨.૮૭/૧તથેતિ હરિવાક્યં તાવભિનન્દ્યેદમૂચતુઃ ।
૧૨૨.૮૭/૨પરં પ્રસાદમાપન્નૌ તાવાલોક્ય સ્મિતાનનૌ ॥ ૧૨૨.૮૭॥

૧૨૨.૮૮/૧નિરપાયનિરાધાર+ ઇર્વિકારસ્વરૂપિણૌ ।
૧૨૨.૮૮/૨શરણ્યૌ સર્વલોકાનાં ભુક્તિમુક્તિપ્રદાવુભૌ ॥ ૧૨૨.૮૮॥

૧૨૨.૮૯/૧હરિહરાવૂચતુઃ । ત્રિદૈવત્યં મહાતીર્થં ગૌતમી વાઞ્છિતપ્રદા ।
૧૨૨.૮૯/૨તસ્યામનેન મન્ત્રેણ કુરુતાં સ્નાનમાદરાત્ ॥ ૧૨૨.૮૯॥

૧૨૨.૯૦/૧અભિષેકં મહેન્દ્રસ્ય મઙ્ગલાય બૃહસ્પતિઃ ।
૧૨૨.૯૦/૨કરોતુ સંસ્મરન્ન્ આવાં સમ્પદાં સ્થૈર્યસિદ્ધયે ॥ ૧૨૨.૯૦॥

૧૨૨.૯૧/૧ઇહ જન્મનિ પૂર્વસ્મિન્ યત્ કિંચિત્ સુકૃતં કૃતમ્ ।
૧૨૨.૯૧/૨તત્ સર્વં પૂર્ણતામેતુ ગોદાવરિ નમોઽસ્તુ તે ॥ ૧૨૨.૯૧॥

૧૨૨.૯૨/૧એવં સ્મૃત્વા તુ યઃ કશ્ચિદ્ ગૌતમ્યાં સ્નાનમાચરેત્ ।
૧૨૨.૯૨/૨આવાભ્યાં તુ પ્રસાદેન ધર્મઃ સમ્પૂર્ણતામિયાત્ ।
૧૨૨.૯૨/૩પૂર્વજન્મકૃતાદ્ દોષાત્ સ મુક્તઃ પુણ્યવાન્ ભવેત્ ॥ ૧૨૨.૯૨॥

૧૨૨.૯૩/૧બ્રહ્મોવાચ । તથેતિ ચક્રતુઃ પ્રીતૌ સુરેન્દ્રધિષણૌ તતઃ ।
૧૨૨.૯૩/૨મહાભિષેકમિન્દ્રસ્ય ચકાર ધુસદાં ગુરુઃ ॥ ૧૨૨.૯૩॥

૧૨૨.૯૪/૧તેનાભૂદ્ યા નદી પુણ્યા મઙ્ગલેત્યુદિતા તુ સા ।
૧૨૨.૯૪/૨તયા ચ સંગમઃ પુણ્યો ગઙ્ગાયાઃ શુભદસ્ત્વસૌ ॥ ૧૨૨.૯૪॥

૧૨૨.૯૫/૧ઇન્દ્રેણ સંસ્તુતો વિષ્ણુઃ પ્રત્યક્ષોઽભૂજ્જગન્મયઃ ।
૧૨૨.૯૫/૨ત્રિલોકસમ્મિતાં શક્રો ભૂમિં લેભે જગત્પતેઃ ॥ ૧૨૨.૯૫॥

૧૨૨.૯૬/૧તન્નામ્ના ચાપિ વિખ્યાતો ગોવિન્દ ઇતિ તત્ર ચ ।
૧૨૨.૯૬/૨ત્રિલોકસમ્મિતા લબ્ધા તેન ગૌર્વજ્રધારિણા ॥ ૧૨૨.૯૬॥

૧૨૨.૯૭/૧દત્તા ચ હરિણા તત્ર ગોવિન્દસ્તદ્ અભૂદ્ ધરિઃ ।
૧૨૨.૯૭/૨ત્રૈલોક્યરાજ્યં યત્ પ્રાપ્તં હરિણા ચ હરેર્મુને ॥ ૧૨૨.૯૭॥

૧૨૨.૯૮/૧નિશ્ચલં યેન સંજાતં દેવદેવાન્ મહેશ્વરાત્ ।
૧૨૨.૯૮/૨બૃહસ્પતિર્દેવગુરુર્યત્રાસ્તૌષીન્ મહેશ્વરમ્ ॥ ૧૨૨.૯૮॥

૧૨૨.૯૯/૧રાજ્યસ્ય સ્થિરભાવાય દેવેન્દ્રસ્ય મહાત્મનઃ ।
૧૨૨.૯૯/૨સિદ્ધેશ્વરસ્તત્ર દેવો લિઙ્ગં તુ ત્રિદશાર્ચિતમ્ ॥ ૧૨૨.૯૯॥

૧૨૨.૧૦૦/૧તતઃ પ્રભૃતિ તત્ તીર્થં ગોવિન્દમિતિ વિશ્રુતમ્ ।
૧૨૨.૧૦૦/૨મઙ્ગલાસંગમં ચૈવ પૂર્ણતીર્થં તતઃ પરમ્ ॥ ૧૨૨.૧૦૦॥

૧૨૨.૧૦૧/૧ઇન્દ્રતીર્થમિતિ ખ્યાતં બાર્હસ્પત્યં ચ વિશ્રુતમ્ ।
૧૨૨.૧૦૧/૨યત્ર સિદ્ધેશ્વરો દેવો વિષ્ણુર્ગોવિન્દ એવ ચ ॥ ૧૨૨.૧૦૧॥

૧૨૨.૧૦૨/૧તેષુ સ્નાનં ચ દાનં ચ યત્ કિંચિત્ સુકૃતાર્જનમ્ ।
૧૨૨.૧૦૨/૨સર્વં તદ્ અક્ષયં વિદ્યાત્ પિતૃણામતિવલ્લભમ્ ॥ ૧૨૨.૧૦૨॥

૧૨૨.૧૦૩/૧શ્ૃણોતિ યશ્ચાપિ પઠેદ્ યશ્ચ સ્મરતિ નિત્યશઃ ।
૧૨૨.૧૦૩/૨તસ્ય તીર્થસ્ય માહાત્મ્યં ભ્રષ્ટરાજ્યપ્રદાયકમ્ ॥ ૧૨૨.૧૦૩॥

૧૨૨.૧૦૪/૧સપ્તત્રિંશત્ સહસ્રાણિ તીર્થાનાં તીરયોર્દ્વયોઃ ।
૧૨૨.૧૦૪/૨ઉભયોર્મુનિશાર્દૂલ સર્વસિદ્ધિપ્રદાયિનામ્ ॥ ૧૨૨.૧૦૪॥

૧૨૨.૧૦૫/૧ન પૂર્ણતીર્થસદૃશં તીર્થમસ્તિ મહાફલમ્ ।
૧૨૨.૧૦૫/૨નિષ્ફલં તસ્ય જન્માદિ યો ન સેવેત તન્ નરઃ ॥ ૧૨૨.૧૦૫॥

૧૨૩.૧/૧બ્રહ્મોવાચ । રામતીર્થમિતિ ખ્યાતં ભ્રૂણહત્યાવિનાશનમ્ ।
૧૨૩.૧/૨તસ્ય શ્રવણમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૨૩.૧॥

૧૨૩.૨/૧ઇક્ષ્વાકુવંશપ્રભવઃ ક્ષત્રિયો લોકવિશ્રુતઃ ।
૧૨૩.૨/૨બલવાન્ મતિમાઞ્ શૂરો યથા શક્રઃ પુરંદરઃ ॥ ૧૨૩.૨॥

૧૨૩.૩/૧પિતૃપૈતામહં રાજ્યં કુર્વન્ન્ આસ્તે યથા બલિઃ ।
૧૨૩.૩/૨તસ્ય તિસ્રો મહિષ્યઃ સ્યૂ રાજ્ઞો દશરથસ્ય હિ ॥ ૧૨૩.૩॥

૧૨૩.૪/૧કૌશલ્યા ચ સુમિત્રા ચ કૈકેયી ચ મહામતે ।
૧૨૩.૪/૨એતાઃ કુલીનાઃ સુભગા રૂપલક્ષણસંયુતાઃ ॥ ૧૨૩.૪॥

૧૨૩.૫/૧તસ્મિન્ રાજનિ રાજ્યે તુ સ્થિતેઽયોધ્યાપતૌ મુને ।
૧૨૩.૫/૨વસિષ્ઠે બ્રહ્મવિચ્છ્રેષ્ઠે પુરોધસિ વિશેષતઃ ॥ ૧૨૩.૫॥

૧૨૩.૬/૧ન ચ વ્યાધિર્ન દુર્ભિક્ષં ન ચાવૃષ્ટિર્ન ચાધયઃ ।
૧૨૩.૬/૨બ્રહ્મક્ષત્રવિશાં નિત્યં શૂદ્રાણાં ચ વિશેષતઃ ॥ ૧૨૩.૬॥

૧૨૩.૭/૧આશ્રમાણાં તુ સર્વેષામાનન્દોઽભૂત્ પૃથક્ પૃથક્ ।
૧૨૩.૭/૨તસ્મિઞ્ શાસતિ રાજેન્દ્ર ઇક્ષ્વાકૂણાં કુલોદ્વહે ॥ ૧૨૩.૭॥

૧૨૩.૮/૧દેવાનાં દાનવાનાં તુ રાજ્યાર્થે વિગ્રહોઽભવત્ ।
૧૨૩.૮/૨ક્વાપિ તત્ર જયં પ્રાપુર્દેવાઃ ક્વાપિ તથેતરે ॥ ૧૨૩.૮॥

૧૨૩.૯/૧એવં પ્રવર્તમાને તુ ત્રૈલોક્યમતિપીડિતમ્ ।
૧૨૩.૯/૨અભૂન્ નારદ તત્રાહમવદં દૈત્યદાનવાન્ ॥ ૧૨૩.૯॥

૧૨૩.૧૦/૧દેવાંશ્ચાપિ વિશેષેણ ન કૃતં તૈર્મદીરિતમ્ ।
૧૨૩.૧૦/૨પુનશ્ચ સંગરસ્તેષાં બભૂવ સુમહાન્ મિથઃ ॥ ૧૨૩.૧૦॥

૧૨૩.૧૧/૧વિષ્ણું ગત્વા સુરાઃ પ્રોચુસ્તથેશાનં જગન્મયમ્ ।
૧૨૩.૧૧/૨તાવૂચતુરુભૌ દેવાન્ અસુરાન્ દૈત્યદાનવાન્ ॥ ૧૨૩.૧૧॥

૧૨૩.૧૨/૧તપસા બલિનો યાન્તુ પુનઃ કુર્વન્તુ સંગરમ્ ।
૧૨૩.૧૨/૨તથેત્યાહુર્યયુઃ સર્વે તપસે નિયતવ્રતાઃ ॥ ૧૨૩.૧૨॥

૧૨૩.૧૩/૧યયુસ્તુ રાક્ષસાન્ દેવાઃ પુનસ્તે મત્સરાન્વિતાઃ ।
૧૨૩.૧૩/૨દેવાનાં દાનવાનાં ચ સંગરોઽભૂત્ સુદારુણઃ ॥ ૧૨૩.૧૩॥

૧૨૩.૧૪/૧ન તત્ર દેવા જેતારો નૈવ દૈત્યાશ્ચ દાનવાઃ ।
૧૨૩.૧૪/૨સંયુગે વર્તમાને તુ વાગ્ ઉવાચાશરીરિણી ॥ ૧૨૩.૧૪॥

૧૨૩.૧૫/૧આકાશવાગ્ ઉવાચ । યેષાં દશરથો રાજા તે જેતારો ન
ચેતરે ॥ ૧૨૩.૧૫॥

૧૨૩.૧૬/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા જયાયોભૌ જગ્મતુર્દેવદાનવૌ ।
૧૨૩.૧૬/૨તત્ર વાયુસ્ત્વરન્ પ્રાપ્તો રાજાનમવદત્ તદા ॥ ૧૨૩.૧૬॥

૧૨૩.૧૭/૧વાયુરુવાચ । આગન્તવ્યં ત્વયા રાજન્ દેવદાનવસંગરે ।
૧૨૩.૧૭/૨યત્ર રાજા દશરથો જયસ્તત્રેતિ વિશ્રુતમ્ ॥ ૧૨૩.૧૭॥

૧૨૩.૧૮/૧તસ્માત્ ત્વં દેવપક્ષે સ્યા ભવેયુર્જયિનઃ સુરાઃ ॥ ૧૨૩.૧૮॥

૧૨૩.૧૯/૧બ્રહ્મોવાચ । તદ્ વાયુવચનં શ્રુત્વા રાજા દશરથો નૃપઃ ।
૧૨૩.૧૯/૨આગમ્યતે મયા સત્યં ગચ્છ વાયો યથાસુખમ્ ॥ ૧૨૩.૧૯॥

૧૨૩.૨૦/૧ગતે વાયૌ તદા દૈત્યા આજગ્મુર્ભૂપતિં પ્રતિ ।
૧૨૩.૨૦/૨તેઽપ્યૂચુર્ભગવન્ અસ્મત્+ ।સાહાય્યં કર્તુમર્હસિ ॥ ૧૨૩.૨૦॥

૧૨૩.૨૧/૧રાજન્ દશરથ શ્રીમન્ વિજયસ્ત્વયિ સંસ્થિતઃ ।
૧૨૩.૨૧/૨તસ્માત્ ત્વં વૈ દૈત્યપતેઃ સાહાય્યં કર્તુમર્હસિ ॥ ૧૨૩.૨૧॥

૧૨૩.૨૨/૧તતઃ પ્રોવાચ નૃપતિર્વાયુના પ્રાર્થિતઃ પુરા ।
૧૨૩.૨૨/૨પ્રતિજ્ઞાતં મયા તચ્ચ યાન્તુ દૈત્યાશ્ચ દાનવાઃ ॥ ૧૨૩.૨૨॥

૧૨૩.૨૩/૧સ તુ રાજા તથા ચક્રે ગત્વા ચૈવ ત્રિવિષ્ટપમ્ ।
૧૨૩.૨૩/૨યુદ્ધં ચક્રે તથા દૈત્યૈર્દાનવૈઃ સહ રાક્ષસૈઃ ॥ ૧૨૩.૨૩॥

૧૨૩.૨૪/૧પશ્યત્સુ દેવસંઘેષુ નમુચેર્ભ્રાતરસ્તદા ।
૧૨૩.૨૪/૨વિવિધુર્નિશિતૈર્બાણૈરથાક્ષં નૃપતેસ્તથા ॥ ૧૨૩.૨૪॥

૧૨૩.૨૫/૧ભિન્નાક્ષં તં રથં રાજા ન જાનાતિ સ સમ્ભ્રમાત્ ।
૧૨૩.૨૫/૨રાજાન્તિકે સ્થિતા સુભ્રૂઃ કૈકેય્યાજ્ઞાયિ નારદ ॥ ૧૨૩.૨૫॥

૧૨૩.૨૬/૧ન જ્ઞાપિતં તયા રાજ્ઞે સ્વયમાલોક્ય સુવ્રતા ।
૧૨૩.૨૬/૨ભગ્નમક્ષં સમાલક્ષ્ય ચક્રે હસ્તં તદા સ્વકમ્ ॥ ૧૨૩.૨૬॥

૧૨૩.૨૭/૧અક્ષવન્ મુનિશાર્દૂલ તદ્ એતન્ મહદ્ અદ્ભુતમ્ ।
૧૨૩.૨૭/૨રથેન રથિનાં શ્રેષ્ઠસ્તયા દત્તકરેણ ચ ॥ ૧૨૩.૨૭॥

૧૨૩.૨૮/૧જિતવાન્ દૈત્યદનુજાન્ દેવૈઃ પ્રાપ્ય વરાન્ બહૂન્ ।
૧૨૩.૨૮/૨તતો દેવૈરનુજ્ઞાતસ્ત્વયોધ્યાં પુનરભ્યગાત્ ॥ ૧૨૩.૨૮॥

૧૨૩.૨૯/૧સ તુ મધ્યે મહારાજો માર્ગે વીક્ષ્ય તદા પ્રિયામ્ ।
૧૨૩.૨૯/૨કૈકેય્યાઃ કર્મ તદ્ દૃષ્ટ્વા વિસ્મયં પરમં ગતઃ ॥ ૧૨૩.૨૯॥

૧૨૩.૩૦/૧તતસ્તસ્યૈ વરાન્ પ્રાદાત્ ત્રીંસ્તુ નારદ સા અપિ ।
૧૨૩.૩૦/૨અનુમાન્ય નૃપપ્રોક્તં કૈકેયી વાક્યમબ્રવીત્ ॥ ૧૨૩.૩૦॥

૧૨૩.૩૧/૧કૈકેય્યુવાચ । ત્વયિ તિષ્ઠન્તુ રાજેન્દ્ર ત્વયા દત્તા વરા
અમી ॥ ૧૨૩.૩૧॥

૧૨૩.૩૨/૧બ્રહ્મોવાચ । વિભૂષણાનિ રાજેન્દ્રો દત્ત્વા સ પ્રિયયા સહ ।
૧૨૩.૩૨/૨રથેન વિજયી રાજા યયૌ સ્વનગરં સુખી ॥ ૧૨૩.૩૨॥

૧૨૩.૩૩/૧યોષિતાં કિમદેયં હિ પ્રિયાણામુચિતાગમે ।
૧૨૩.૩૩/૨સ કદાચિદ્ દશરથો મૃગયાશીલિભિર્વૃતઃ ॥ ૧૨૩.૩૩॥

૧૨૩.૩૪/૧અટન્ન્ અરણ્યે શર્વર્યાં વારિબન્ધમથાકરોત્ ।
૧૨૩.૩૪/૨સમ્યવ્યસનહીનેન ભવિતવ્યં તુ ભૂભુજા ॥ ૧૨૩.૩૪॥

૧૨૩.૩૫/૧ઇતિ જાનન્ન્ અપિ ચ તચ્ચકાર તુ વિધેર્વશાત્ ।
૧૨૩.૩૫/૨ગર્તં પ્રવિશ્ય પાનાર્થમાગતાન્ નિશિતૈઃ શરૈઃ ॥ ૧૨૩.૩૫॥

૧૨૩.૩૬/૧મૃગાન્ હન્તિ મહાબાહુઃ શ◌ૃણુ કાલવિપર્યયમ્ ।
૧૨૩.૩૬/૨ગર્તં પ્રવિષ્ટે નૃપતૌ તસ્મિન્ન્ એવ નગોત્તમે ॥ ૧૨૩.૩૬॥

૧૨૩.૩૭/૧વૃદ્ધો વૈશ્રવણો નામ ન શ◌ૃણોતિ ન પશ્યતિ ।
૧૨૩.૩૭/૨તસ્ય ભાર્યા તથાભૂતા તાવબ્રૂતાં તદા સુતમ્ ॥ ૧૨૩.૩૭॥

૧૨૩.૩૮/૧માતાપિતરાવૂચતુઃ । આવાં તૃષાર્તૌ રાત્રિશ્ચ કૃષ્ણા
ચાપિ પ્રવર્તતે ।
૧૨૩.૩૮/૨વૃદ્ધાનાં જીવિતં કૃત્સ્નં બાલસ્ત્વમસિ પુત્રક ॥ ૧૨૩.૩૮॥

૧૨૩.૩૯/૧અન્ધાનાં બધિરાણાં ચ વૃદ્ધાનાં ધિક્ ચ જીવિતમ્ ।
૧૨૩.૩૯/૨જરાજર્જરદેહાનાં ધિગ્ ધિક્ પુત્રક જીવિતમ્ ॥ ૧૨૩.૩૯॥

૧૨૩.૪૦/૧તાવત્ પુમ્ભિર્જીવિતવ્યં યાવલ્લક્ષ્મીર્દૃઢં વપુઃ ।
૧૨૩.૪૦/૨યાવદ્ આજ્ઞાપ્રતિહતા તીર્થાદાવન્યથા મૃતિઃ ॥ ૧૨૩.૪૦॥

૧૨૩.૪૧/૧બ્રહ્મોવાચ । ઇત્યેતદ્ વચનં શ્રુત્વા વૃદ્ધયોર્ગુરુવત્સલઃ ।
૧૨૩.૪૧/૨પુત્રઃ પ્રોવાચ તદ્ દુઃખં ગિરા મધુરયા હરન્ ॥ ૧૨૩.૪૧॥

૧૨૩.૪૨/૧પુત્ર ઉવાચ । મયિ જીવતિ કિં નામ યુવયોર્દુઃખમીદૃશમ્ ।
૧૨૩.૪૨/૨ન હરત્યાત્મજઃ પિત્રોર્યશ્ચરિત્રૈર્મનોરુજમ્ ॥ ૧૨૩.૪૨॥

૧૨૩.૪૩/૧તેન કિં તનુજેનેહ કુલોદ્વેગવિધાયિના ॥ ૧૨૩.૪૩॥

૧૨૩.૪૪/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા પિતરૌ નત્વા તાવાશ્વાસ્ય મહામનાઃ ।
૧૨૩.૪૪/૨તરુસ્કન્ધે સમારોપ્ય વૃદ્ધૌ ચ પિતરૌ તદા ॥ ૧૨૩.૪૪॥

૧૨૩.૪૫/૧હસ્તે ગૃહીત્વા કલશં જગામ ઋષિપુત્રકઃ ।
૧૨૩.૪૫/૨સ ઋષિર્ન તુ રાજાનં જાનાતિ નૃપતિર્દ્વિજમ્ ॥ ૧૨૩.૪૫॥

૧૨૩.૪૬/૧ઉભૌ સરભસૌ તત્ર દ્વિજો વારિ સમાવિશત્ ।
૧૨૩.૪૬/૨સત્વરં કલશે ન્યુબ્જે વારિ ગૃહ્ણન્તમાશુગૈઃ ॥ ૧૨૩.૪૬॥

૧૨૩.૪૭/૧દ્વિજં રાજા દ્વિપં મત્વા વિવ્યાધ નિશિતૈઃ શરૈઃ ।
૧૨૩.૪૭/૨વનદ્વિપોઽપિ ભૂપાનામવધ્યસ્તદ્ વિદન્ન્ અપિ ॥ ૧૨૩.૪૭॥

૧૨૩.૪૮/૧વિવ્યાધ તં નૃપઃ કુર્યાન્ ન કિં કિં વિધિવઞ્ચિતઃ ।
૧૨૩.૪૮/૨સ વિદ્ધો મર્મદેશે તુ દુઃખિતો વાક્યમબ્રવીત્ ॥ ૧૨૩.૪૮॥

૧૨૩.૪૯/૧દ્વિજ ઉવાચ । કેનેદં દુઃખદં કર્મ કૃતં સદ્બ્રાહ્મણસ્ય મે ।
૧૨૩.૪૯/૨મૈત્રો બ્રાહ્મણ ઇત્યુક્તો નાપરાધોઽસ્તિ કશ્ચન ॥ ૧૨૩.૪૯॥

૧૨૩.૫૦/૧બ્રહ્મોવાચ । તદ્ એતદ્ વચનં શ્રુત્વા મુનેરાર્તસ્ય ભૂપતિઃ ।
૧૨૩.૫૦/૨નિશ્ચેષ્ટશ્ચ નિરુત્સાહો શનૈસ્તં દેશમભ્યગાત્ ॥ ૧૨૩.૫૦॥

૧૨૩.૫૧/૧તં તુ દૃષ્ટ્વા દ્વિજવરં જ્વલન્તમિવ તેજસા ।
૧૨૩.૫૧/૨અસાવપ્યભવત્ તત્ર સશલ્ય ઇવ મૂર્ચ્છિતઃ ॥ ૧૨૩.૫૧॥

૧૨૩.૫૨/૧આત્માનમાત્મના કૃત્વા સ્થિરં રાજાબ્રવીદ્ ઇદમ્ ॥ ૧૨૩.૫૨॥

૧૨૩.૫૩/૧રાજોવાચ । કો ભવાન્ દ્વિજશાર્દૂલ કિમર્થમિહ ચાગતઃ ।

૧૨૩.૫૩/૨વદ પાપકૃતે મહ્યં વદ મે નિષ્કૃતિં પરામ્ ॥ ૧૨૩.૫૩॥

૧૨૩.૫૪/૧બ્રહ્મહા વર્ણિભિઃ કિંતુ શ્વપચૈરપિ જાતુચિત્ ।
૧૨૩.૫૪/૨ન સ્પ્રષ્ટવ્યો મહાબુદ્ધે દ્રષ્ટવ્યો ન કદાચન ॥ ૧૨૩.૫૪॥

૧૨૩.૫૫/૧બ્રહ્મોવાચ । તદ્ રાજવચનં શ્રુત્વા મુનિપુત્રોઽબ્રવીદ્
વચઃ ॥ ૧૨૩.૫૫॥

૧૨૩.૫૬/૧મુનિપુત્ર ઉવાચ । ઉત્ક્રમિષ્યન્તિ મે પ્રાણા અતો વક્ષ્યામિ કિંચન ।
૧૨૩.૫૬/૨સ્વચ્છન્દવૃત્તિતાજ્ઞાને વિદ્ધિ પાકં ચ કર્મણામ્ ॥ ૧૨૩.૫૬॥

૧૨૩.૫૭/૧આત્માર્થં તુ ન શોચામિ વૃદ્ધૌ તુ પિતરૌ મમ ।
૧૨૩.૫૭/૨તયોઃ શુશ્રૂષકઃ કઃ સ્યાદ્ અન્ધયોરેકપુત્રયોઃ ॥ ૧૨૩.૫૭॥

૧૨૩.૫૮/૧વિના મયા મહારણ્યે કથં તૌ જીવયિષ્યતઃ ।
૧૨૩.૫૮/૨મમાભાગ્યમહો કીદૃક્ પિતૃશુશ્રૂષણે ક્ષતિઃ ॥ ૧૨૩.૫૮॥

૧૨૩.૫૯/૧જાતા મેઽદ્ય વિના પ્રાણૈર્હા વિધે કિં કૃતં ત્વયા ।
૧૨૩.૫૯/૨તથાપિ ગચ્છ તત્ર ત્વં ગૃહીતકલશસ્ત્વરન્ ॥ ૧૨૩.૫૯॥

૧૨૩.૬૦/૧તાભ્યાં દેહ્યુદપાનં ત્વં યથા તૌ ન મરિષ્યતઃ ॥ ૧૨૩.૬૦॥

૧૨૩.૬૧/૧બ્રહ્મોવાચ । ઇત્યેવં બ્રુવતસ્તસ્ય ગતાઃ પ્રાણા મહાવને ।
૧૨૩.૬૧/૨વિસૃજ્ય સશરં ચાપમાદાય કલશં નૃપઃ ॥ ૧૨૩.૬૧॥

૧૨૩.૬૨/૧તત્રાગાત્ સ તુ વેગેન યત્ર વૃદ્ધૌ મહાવને ।
૧૨૩.૬૨/૨વૃદ્ધૌ ચાપિ તદા રાત્રૌ તાવન્યોન્યં સમૂચતુઃ ॥ ૧૨૩.૬૨॥

૧૨૩.૬૩/૧વૃદ્ધાવૂચતુઃ । ઉદ્વિગ્નઃ કુપિતો વા સ્યાદ્ અથવા ભક્ષિતઃ કથમ્ ।
૧૨૩.૬૩/૨ન પ્રાપ્તશ્ચાવયોર્યષ્ટિઃ કિં કુર્મઃ કા ગતિર્ભવેત્ ॥ ૧૨૩.૬૩॥

૧૨૩.૬૪/૧ન કોઽપિ તાદૃશઃ પુત્રો વિદ્યતે સચરાચરે ।
૧૨૩.૬૪/૨યઃ પિત્રોરન્યથા વાક્યં ન કરોત્યપિ નિન્દિતઃ ॥ ૧૨૩.૬૪॥

૧૨૩.૬૫/૧વજ્રાદ્ અપિ કઠોરં વા જીવિતં તમપશ્યતોઃ ।
૧૨૩.૬૫/૨શીઘ્રં ન યાન્તિ યત્ પ્રાણાસ્તદેકાયત્તજીવયોઃ ॥ ૧૨૩.૬૫॥

૧૨૩.૬૬/૧બ્રહ્મોવાચ । એવં બહુવિધા વાચો વૃદ્ધયોર્વદતોર્વને ।
૧૨૩.૬૬/૨તદા દશરથો રાજા શનૈસ્તં દેશમભ્યગાત્ ॥ ૧૨૩.૬૬॥

૧૨૩.૬૭/૧પાદસંચારશબ્દેન મેનાતે સુતમાગતમ્ ॥ ૧૨૩.૬૭॥

૧૨૩.૬૮/૧વૃદ્ધાવૂચતુઃ । કુતો વત્સ ચિરાત્ પ્રાપ્તસ્ત્વં દૃષ્ટિસ્ત્વં પરાયણમ્ ।
૧૨૩.૬૮/૨ન બ્રૂષે કિંતુ રુષ્ટોઽસિ વૃદ્ધયોરન્ધયોઃ સુતઃ ॥ ૧૨૩.૬૮॥

૧૨૩.૬૯/૧બ્રહ્મોવાચ । સશલ્ય ઇવ દુઃખાર્તઃ શોચન્ દુષ્કૃતમાત્મનઃ ।
૧૨૩.૬૯/૨સ ભીત ઇવ રાજેન્દ્રસ્તાવુવાચાથ નારદ ॥ ૧૨૩.૬૯॥

૧૨૩.૭૦/૧ઉદપાનં ચ કુરુતાં તચ્છ્રુત્વા નૃપભાષિતમ્ ।
૧૨૩.૭૦/૨નાયં વક્તા સુતોઽસ્માકં કો ભવાંસ્તત્ પુરા વદ ॥ ૧૨૩.૭૦॥

૧૨૩.૭૧/૧પશ્ચાત્ પિબાવઃ પાનીયં તતો રાજાબ્રવીચ્ચ તૌ ॥ ૧૨૩.૭૧॥

૧૨૩.૭૨/૧રાજોવાચ । તત્ર તિષ્ઠતિ વાં પુત્રો યત્ર વારિસમાશ્રયઃ ॥ ૧૨૩.૭૨॥

૧૨૩.૭૩/૧બ્રહ્મોવાચ । તચ્છ્રુત્વોચતુરાર્તૌ તૌ સત્યં બ્રૂહિ ન ચાન્યથા ।
૧૨૩.૭૩/૨આચચક્ષે તતો રાજા સર્વમેવ યથાતથમ્ ॥ ૧૨૩.૭૩॥

૧૨૩.૭૪/૧તતસ્તુ પતિતૌ વૃદ્ધૌ તત્રાવાં નય મા સ્પૃશ ।
૧૨૩.૭૪/૨બ્રહ્મઘ્નસ્પર્શનં પાપં ન કદાચિદ્ વિનશ્યતિ ॥ ૧૨૩.૭૪॥

૧૨૩.૭૫/૧નિન્યે વૈ શ્રવણં વૃદ્ધં સભાર્યં નૃપસત્તમઃ ।
૧૨૩.૭૫/૨યત્રાસૌ પતિતઃ પુત્રસ્તં સ્પૃષ્ટ્વા તૌ વિલેપતુઃ ॥ ૧૨૩.૭૫॥

૧૨૩.૭૬/૧વૃદ્ધાવૂચતુઃ । યથા પુત્રવિયોગેન મૃત્યુર્નૌ વિહિતસ્તથા ।
૧૨૩.૭૬/૨ત્વં ચાપિ પાપ પુત્રસ્ય વિયોગાન્ મૃત્યુમાપ્સ્યસિ ॥ ૧૨૩.૭૬॥

૧૨૩.૭૭/૧બ્રહ્મોવાચ । એવં તુ જલ્પતોર્બ્રહ્મન્ ગતાઃ પ્રાણાસ્તતો નૃપઃ ।
૧૨૩.૭૭/૨અગ્નિના યોજયામાસ વૃદ્ધૌ ચ ઋષિપુત્રકમ્ ॥ ૧૨૩.૭૭॥

૧૨૩.૭૮/૧તતો જગામ નગરં દુઃખિતો નૃપતિર્મુને ।
૧૨૩.૭૮/૨વસિષ્ઠાય ચ તત્ સર્વં ન્યવેદયદ્ અશેષતઃ ॥ ૧૨૩.૭૮॥

૧૨૩.૭૯/૧નૃપાણાં સૂર્યવંશ્યાનાં વસિષ્ઠો હિ પરા ગતિઃ ।
૧૨૩.૭૯/૨વસિષ્ઠોઽપિ દ્વિજશ્રેષ્ઠૈઃ સમ્મન્ત્ર્યાહ ચ નિષ્કૃતિમ્ ॥ ૧૨૩.૭૯॥

૧૨૩.૮૦/૧વસિષ્ઠ ઉવાચ । ગાલવં વામદેવં ચ જાબાલિમથ કશ્યપમ્ ।
૧૨૩.૮૦/૨એતાન્ અન્યાન્ સમાહૂય હયમેધાય યત્નતઃ ॥ ૧૨૩.૮૦॥

૧૨૩.૮૧/૧યજસ્વ હયમેધૈશ્ચ બહુભિર્બહુદક્ષિણૈઃ ॥ ૧૨૩.૮૧॥

૧૨૩.૮૨/૧બ્રહ્મોવાચ । અકરોદ્ ધયમેધાંશ્ચ રાજા દશરથો દ્વિજૈઃ ।
૧૨૩.૮૨/૨એતસ્મિન્ન્ અન્તરે તત્ર વાગ્ ઉવાચાશરીરિણી ॥ ૧૨૩.૮૨॥

૧૨૩.૮૩/૧આકાશવાણ્યુવાચ । પૂતં શરીરમભવદ્ રાજ્ઞો દશરથસ્ય હિ ।
૧૨૩.૮૩/૨વ્યવહાર્યશ્ચ ભવિતા ભવિષ્યન્તિ તથા સુતાઃ ।
૧૨૩.૮૩/૩જ્યેષ્ઠપુત્રપ્રસાદેન રાજાપાપો ભવિષ્યતિ ॥ ૧૨૩.૮૩ ॥

૧૨૩.૮૪/૧બ્રહ્મોવાચ । તતો બહુતિથે કાલે ઋષ્યશ઼ૃઙ્ગાન્ મુનીશ્વરાત્ ।
૧૨૩.૮૪/૨દેવાનાં કાર્યસિદ્ધ્યર્થં સુતા આસન્ સુરોપમાઃ ॥ ૧૨૩.૮૪ ॥

૧૨૩.૮૫/૧કૌશલ્યાયાં તથા રામઃ સુમિત્રાયાં ચ લક્ષ્મણઃ ।
૧૨૩.૮૫/૨શત્રુઘ્નશ્ચાપિ કૈકેય્યાં ભરતો મતિમત્તરઃ ॥ ૧૨૩.૮૫ ॥

૧૨૩.૮૬/૧તે સર્વે મતિમન્તશ્ચ પ્રિયા રાજ્ઞો વશે સ્થિતાઃ ।
૧૨૩.૮૬/૨તં રાજાનમ્ ઋષિઃ પ્રાપ્ય વિશ્વામિત્રઃ પ્રજાપતિઃ ॥ ૧૨૩.૮૬ ॥

૧૨૩.૮૭/૧રામં ચ લક્ષ્મણં ચાપિ અયાચત મહામતે ।
૧૨૩.૮૭/૨યજ્ઞસંરક્ષણાર્થાય જ્ઞાતતન્મહિમા મુનિઃ ॥ ૧૨૩.૮૭ ॥

૧૨૩.૮૮/૧ચિરપ્રાપ્તસુતો વૃદ્ધો રાજા નૈવેત્યભાષત ॥ ૧૨૩.૮૮ ॥

૧૨૩.૮૯/૧રાજોવાચ । મહતા દૈવયોગેન કથંચિદ્ વાર્ધકે મુને ।
૧૨૩.૮૯/૨જાતાવાનન્દસંદોહ+ ।દાયકૌ મમ બાલકૌ ॥ ૧૨૩.૮૯ ॥

૧૨૩.૯૦/૧સશરીરમિદં રાજ્યં દાસ્યે નૈવ સુતાવિમૌ ॥ ૧૨૩.૯૦ ॥

૧૨૩.૯૧/૧બ્રહ્મોવાચ । વસિષ્ઠેન તદા પ્રોક્તો રાજા દશરથસ્ત્વિતિ ॥ ૧૨૩.૯૧ ॥

૧૨૩.૯૨/૧વસિષ્ઠ ઉવાચ । રઘવઃ પ્રાર્થનાભઙ્ગં ન રાજન્
ક્વાપિ શિક્ષિતાઃ ॥ ૧૨૩.૯૨ ॥

૧૨૩.૯૩/૧બ્રહ્મોવાચ । રામં ચ લક્ષ્મણં ચૈવ કથંચિદ્
અવદન્ નૃપઃ ॥ ૧૨૩.૯૩ ॥

૧૨૩.૯૪/૧રાજોવાચ । વિશ્વામિત્રસ્ય બ્રહ્મર્ષેઃ કુરુતાં યજ્ઞરક્ષણમ્ ॥ ૧૨૩.૯૪ ॥

૧૨૩.૯૫/૧બ્રહ્મોવાચ । વદન્ન્ ઇતિ સુતૌ સોષ્ણં નિશ્વસન્ ગ્લપિતાધરઃ ।
૧૨૩.૯૫/૨પુત્રૌ સમર્પયામાસ વિશ્વામિત્રસ્ય શાસ્ત્રકૃત્ ॥ ૧૨૩.૯૫ ॥

૧૨૩.૯૬/૧તથેત્યુક્ત્વા દશરથં નમસ્ય ચ પુનઃ પુનઃ ।
૧૨૩.૯૬/૨જગ્મતૂ રક્ષણાર્થાય વિશ્વામિત્રેણ તૌ મુદા ॥ ૧૨૩.૯૬ ॥

૧૨૩.૯૭/૧તતઃ પ્રહૃષ્ટઃ સ મુનિર્મુદા પ્રાદાત્ તદોભયોઃ ।
૧૨૩.૯૭/૨માહેશ્વરીં મહાવિદ્યાં ધનુર્વિદ્યાપુરઃસરામ્ ॥ ૧૨૩.૯૭ ॥

૧૨૩.૯૮/૧શાસ્ત્રીમાસ્ત્રીં લૌકિકીં ચ રથવિદ્યાં ગજોદ્ભવામ્ ।
૧૨૩.૯૮/૨અશ્વવિદ્યાં ગદાવિદ્યાં મન્ત્રાહ્વાનવિસર્જને ॥ ૧૨૩.૯૮॥

૧૨૩.૯૯/૧સર્વવિદ્યામથાવાપ્ય ઉભૌ તૌ રામલક્ષ્મણૌ ।
૧૨૩.૯૯/૨વનૌકસાં હિતાર્થાય જઘ્નતુસ્તાટકાં વને ॥ ૧૨૩.૯૯॥

૧૨૩.૧૦૦/૧અહલ્યાં શાપનિર્મુક્તાં પાદસ્પર્શાચ્ચ ચક્રતુઃ ।
૧૨૩.૧૦૦/૨યજ્ઞવિધ્વંસનાયાતાઞ્ જઘ્નતુસ્તત્ર રાક્ષસાન્ ॥ ૧૨૩.૧૦૦॥

૧૨૩.૧૦૧/૧કૃતવિદ્યૌ ધનુષ્પાણી ચક્રતુર્યજ્ઞરક્ષણમ્ ।
૧૨૩.૧૦૧/૨તતો મહામખે વૃત્તે વિશ્વામિત્રો મુનીશ્વરઃ ॥ ૧૨૩.૧૦૧॥

૧૨૩.૧૦૨/૧પુત્રાભ્યાં સહિતો રાજ્ઞો જનકં દ્રષ્ટુમભ્યગાત્ ।
૧૨૩.૧૦૨/૨ચિત્રામદર્શયત્ તત્ર રાજમધ્યે નૃપાત્મજઃ ॥ ૧૨૩.૧૦૨॥

૧૨૩.૧૦૩/૧રામઃ સૌમિત્રિસહિતો ધનુર્વિદ્યાં ગુરોર્મતામ્ ।
૧૨૩.૧૦૩/૨તત્પ્રીતો જનકઃ પ્રાદાત્ સીતાં લક્ષ્મીમયોનિજામ્ ॥ ૧૨૩.૧૦૩॥

૧૨૩.૧૦૪/૧તથૈવ લક્ષ્મણસ્યાપિ ભરતસ્યાનુજસ્ય ચ ।
૧૨૩.૧૦૪/૨શત્રુઘ્નભરતાદીનાં વસિષ્ઠાદિમતે સ્થિતઃ ॥ ૧૨૩.૧૦૪॥

૧૨૩.૧૦૫/૧રાજા દશરથઃ શ્રીમાન્ વિવાહમકરોન્ મુને ।
૧૨૩.૧૦૫/૨તતો બહુતિથે કાલે રાજ્યં તસ્ય પ્રયચ્છતિ ॥ ૧૨૩.૧૦૫॥

૧૨૩.૧૦૬/૧નૃપતૌ સર્વલોકાનામનુમત્યા ગુરોરપિ ।
૧૨૩.૧૦૬/૨મન્થરાત્મકદુર્દૈવ+ ।પ્રેરિતા મત્સરાકુલા ॥ ૧૨૩.૧૦૬॥

૧૨૩.૧૦૭/૧કૈકેયી વિઘ્નમાતસ્થે વનપ્રવ્રાજનં તથા ।
૧૨૩.૧૦૭/૨ભરતસ્ય ચ તદ્ રાજ્યં રાજા નૈવ ચ દત્તવાન્ ॥ ૧૨૩.૧૦૭॥

૧૨૩.૧૦૮/૧પિતરં સત્યવાક્યં તં કુર્વન્ રામો મહાવનમ્ ।
૧૨૩.૧૦૮/૨વિવેશ સીતયા સાર્ધં તથા સૌમિત્રિણા સહ ॥ ૧૨૩.૧૦૮॥

૧૨૩.૧૦૯/૧સતાં ચ માનસં શુદ્ધં સ વિવેશ સ્વકૈર્ગુણૈઃ ।
૧૨૩.૧૦૯/૨તસ્મિન્ વિનિર્ગતે રામે વનવાસાય દીક્ષિતે ॥ ૧૨૩.૧૦૯॥

૧૨૩.૧૧૦/૧સમં લક્ષ્મણસીતાભ્યાં રાજ્યતૃષ્ણાવિવર્જિતે ।
૧૨૩.૧૧૦/૨તં રામં ચાપિ સૌમિત્રિં સીતાં ચ ગુણશાલિનીમ્ ॥ ૧૨૩.૧૧૦॥

૧૨૩.૧૧૧/૧દુઃખેન મહતાવિષ્ટો બ્રહ્મશાપં ચ સંસ્મરન્ ।
૧૨૩.૧૧૧/૨તદા દશરથો રાજા પ્રાણાંસ્તત્યાજ દુઃખિતઃ ॥ ૧૨૩.૧૧૧॥

૧૨૩.૧૧૨/૧કૃતકર્મવિપાકેન રાજા નીતો યમાનુગૈઃ ।
૧૨૩.૧૧૨/૨તસ્મૈ રાજ્ઞે મહાપ્રાજ્ઞ યાવત્ સ્થાવરજઙ્ગમે ॥ ૧૨૩.૧૧૨॥

૧૨૩.૧૧૩/૧યમસદ્મન્યનેકાનિ તામિસ્રાદીનિ નારદ ।
૧૨૩.૧૧૩/૨નરકાણ્યથ ઘોરાણિ ભીષણાનિ બહૂનિ ચ ॥ ૧૨૩.૧૧૩॥

૧૨૩.૧૧૪/૧તત્ર ક્ષિપ્તસ્તદા રાજા નરકેષુ પૃથક્ પૃથક્ ।
૧૨૩.૧૧૪/૨પચ્યતે છિદ્યતે રાજા પિષ્યતે ચૂર્ણ્યતે તથા ॥ ૧૨૩.૧૧૪॥

૧૨૩.૧૧૫/૧શોષ્યતે દશ્યતે ભૂયો દહ્યતે ચ નિમજ્જ્યતે ।
૧૨૩.૧૧૫/૨એવમાદિષુ ઘોરેષુ નરકેષુ સ પચ્યતે ॥ ૧૨૩.૧૧૫॥

૧૨૩.૧૧૬/૧રામોઽપિ ગચ્છન્ અધ્વાનં ચિત્રકૂટમથાગમત્ ।
૧૨૩.૧૧૬/૨તત્રૈવ ત્રીણિ વર્ષાણિ વ્યતીતાનિ મહામતે ॥ ૧૨૩.૧૧૬॥

૧૨૩.૧૧૭/૧પુનઃ સ દક્ષિણામાશામાક્રામદ્ દણ્ડકં વનમ્ ।
૧૨૩.૧૧૭/૨વિખ્યાતં ત્રિષુ લોકેષુ દેશાનાં તદ્ ધિ પુણ્યદમ્ ॥ ૧૨૩.૧૧૭॥

૧૨૩.૧૧૮/૧પ્રાવિશત્ તન્ મહારણ્યં ભીષણં દૈત્યસેવિતમ્ ।
૧૨૩.૧૧૮/૨તદ્ભયાદ્ ઋષિભિસ્ત્યક્તં હત્વા દૈત્યાંસ્તુ રાક્ષસાન્ ॥ ૧૨૩.૧૧૮॥

૧૨૩.૧૧૯/૧વિચરન્ દણ્ડકારણ્યે ઋષિસેવ્યમથાકરોત્ ।
૧૨૩.૧૧૯/૨તત્રેદં વૃત્તમાખ્યાસ્યે શૢણુ નારદ યત્નતઃ ॥ ૧૨૩.૧૧૯॥

૧૨૩.૧૨૦/૧તાવચ્છનૈસ્ત્વગાદ્ રામો યાવદ્ યોજનપઞ્ચકમ્ ।
૧૨૩.૧૨૦/૨ગૌતમીં સમનુપ્રાપ્તો રાજાપિ નરકે સ્થિતઃ ॥ ૧૨૩.૧૨૦॥

૧૨૩.૧૨૧/૧યમઃ સ્વકિંકરાન્ આહ રામો દશરથાત્મજઃ ।
૧૨૩.૧૨૧/૨ગૌતમીમભિતો યાતિ પિતરં તસ્ય ધીમતઃ ॥ ૧૨૩.૧૨૧॥

૧૨૩.૧૨૨/૧આકર્ષન્ત્વથ રાજાનં નરકાન્ નાત્ર સંશયઃ ।
૧૨૩.૧૨૨/૨ઉત્તીર્ય ગૌતમીં યાતિ યાવદ્ યોજનપઞ્ચકમ્ ॥ ૧૨૩.૧૨૨॥

૧૨૩.૧૨૩/૧રામસ્તાવત્ તસ્ય પિતા નરકે નૈવ પચ્યતામ્ ।
૧૨૩.૧૨૩/૨યદ્ એતન્ મદ્વચઃ પુણ્યં ન કુર્યુર્યદિ દૂતકાઃ ॥ ૧૨૩.૧૨૩॥

૧૨૩.૧૨૪/૧તતશ્ચ નરકે ઘોરે યૂયં સર્વે નિમજ્જથ ।
૧૨૩.૧૨૪/૨યા કાપ્યુક્તા પરા શક્તિઃ શિવસ્ય સમવાયિની ॥ ૧૨૩.૧૨૪॥

૧૨૩.૧૨૫/૧તામેવ ગૌતમીં સન્તો વદન્ત્યમ્ભઃસ્વરૂપિણીમ્ ।

૧૨૩.૧૨૫/૨હરિબ્રહ્મમહેશાનાં માન્યા વન્દ્યા ચ સૈવ યત્ ॥ ૧૨૩.૧૨૫॥

૧૨૩.૧૨૬/૧નિસ્તીર્યતે ન કેનાપિ તદ્ અતિક્રમજં ત્વઘમ્ ।
૧૨૩.૧૨૬/૨પાપિનોऽપ્યાત્મજઃ કશ્ચિદ્ યશ્ચ ગઙ્ગામનુસ્મરેત્ ॥ ૧૨૩.૧૨૬॥

૧૨૩.૧૨૭/૧સોऽનેકદુર્ગનિરયાન્ નિર્ગતો મુક્તતાં વ્રજેત્ ।
૧૨૩.૧૨૭/૨કિં પુનસ્તાદૃશઃ પુત્રો ગૌતમીનિકટે સ્થિતઃ ॥ ૧૨૩.૧૨૭॥

૧૨૩.૧૨૮/૧યસ્યાસૌ નરકે પક્તું ન કૈરપિ હિ શક્યતે ।
૧૨૩.૧૨૮/૨દક્ષિણાશાપતેર્વાક્યં નિશમ્ય યમકિંકરાઃ ॥ ૧૨૩.૧૨૮॥

૧૨૩.૧૨૯/૧નરકે પચ્યમાનં તમયોધ્યાધિપતિં નૃપમ્ ।
૧૨૩.૧૨૯/૨ઉત્તાર્ય ઘોરનરકાદ્ વચનં ચેદમબ્રુવન્ ॥ ૧૨૩.૧૨૯॥

૧૨૩.૧૩૦/૧યમકિંકરા ઊચુઃ । ધન્યોऽસિ નૃપશાર્દૂલ યસ્ય પુત્રઃ સ તાદૃશઃ ।
૧૨૩.૧૩૦/૨ઇહ ચામુત્ર વિશ્રાન્તિઃ સુપુત્રઃ કેન લભ્યતે ॥ ૧૨૩.૧૩૦॥

૧૨૩.૧૩૧/૧બ્રહ્મોવાચ । સ વિશ્રાન્તઃ શનૈ રાજા કિંકરાન્
વાક્યમબ્રવીત્ ॥ ૧૨૩.૧૩૧॥

૧૨૩.૧૩૨/૧રાજોવાચ । નરકેષ્વથ ઘોરેષુ પચ્યમાનઃ પુનઃ પુનઃ ।
૧૨૩.૧૩૨/૨કથં ત્વાકર્ષિતઃ શીઘ્રં તન્ મે વક્તુમિહાર્હથ ॥ ૧૨૩.૧૩૨॥

૧૨૩.૧૩૩/૧બ્રહ્મોવાચ । તત્ર કશ્ચિચ્છાન્તમના રાજાનમિદમબ્રવીત્ ॥ ૧૨૩.૧૩૩॥

૧૨૩.૧૩૪/૧યમદૂત ઉવાચ । વેદશાસ્ત્રપુરાણાદાવેતદ્ ગોપ્યં પ્રયત્નતઃ ।
૧૨૩.૧૩૪/૨પ્રકાશ્યતે તદ્ અપિ તે સામર્થ્યં પુત્રતીર્થયોઃ ॥ ૧૨૩.૧૩૪॥

૧૨૩.૧૩૫/૧રામસ્તવ સુતઃ શ્રીમાન્ ગૌતમીતીરમાગતઃ ।
૧૨૩.૧૩૫/૨તસ્માત્ ત્વં નરકાદ્ ઘોરાદ્ આકૃષ્ટોऽસિ નરોત્તમ ॥ ૧૨૩.૧૩૫॥

૧૨૩.૧૩૬/૧યદિ ત્વાં તત્ર ગૌતમ્યાં સ્મરેદ્ રામઃ સલક્ષ્મણઃ ।
૧૨૩.૧૩૬/૨સ્નાનં કૃત્વાથ પિણ્ડાદિ તે દદ્યાત્ સ નૃપોત્તમ ।
૧૨૩.૧૩૬/૩તતસ્ત્વં સર્વપાપેભ્યો મુક્તો યાસિ ત્રિવિષ્ટપમ્ ॥ ૧૨૩.૧૩૬॥

૧૨૩.૧૩૭/૧રાજોવાચ । તત્ર ગત્વા ભવદ્વાક્યમાખ્યાસ્યે સ્વસુતૌ પ્રતિ ।
૧૨૩.૧૩૭/૨ભવન્ત એવ શરણમનુજ્ઞાં દાતુમર્હથ ॥ ૧૨૩.૧૩૭॥

૧૨૩.૧૩૮/૧બ્રહ્મોવાચ । તદ્ રાજવચનં શ્રુત્વા કૃપયા યમકિંકરાઃ ।
૧૨૩.૧૩૮/૨આજ્ઞાં ચ પ્રદદુસ્તસ્મૈ રાજા પ્રાગાત્ સુતૌ પ્રતિ ॥ ૧૨૩.૧૩૮॥

૧૨૩.૧૩૯/૧ભીષણં યાતનાદેહમાપન્નો નિઃશ્વસન્ મુહુઃ ।
૧૨૩.૧૩૯/૨નિરીક્ષ્ય સ્વં લજ્જમાનઃ કૃતં કર્મ ચ સંસ્મરન્ ॥ ૧૨૩.૧૩૯ ॥

૧૨૩.૧૪૦/૧સ્વેચ્છયા વિહરન્ ગઙ્ગામાસસાદ ચ રાઘવઃ ।
૧૨૩.૧૪૦/૨ગૌતમ્યાસ્તટમાશ્રિત્ય રામો લક્ષ્મણ એવ ચ ॥ ૧૨૩.૧૪૦ ॥

૧૨૩.૧૪૧/૧સીતયા સહ વૈદેહ્યા સસ્નૌ ચૈવ યથાવિધિ ।
૧૨૩.૧૪૧/૨નૈવ તત્રાભવદ્ ભોજ્યં ભક્ષ્યં વા ગૌતમીતટે ॥ ૧૨૩.૧૪૧ ॥

૧૨૩.૧૪૨/૧તદ્દિને તત્ર વસતાં ગૌતમીતીરવાસિનામ્ ।
૧૨૩.૧૪૨/૨તદ્ દૃષ્ટ્વા દુઃખિતો ભ્રાતા લક્ષ્મણો રામમબ્રવીત્ ॥ ૧૨૩.૧૪૨ ॥

૧૨૩.૧૪૩/૧લક્ષ્મણ ઉવાચ । પુત્રૌ દશરથસ્યાવાં તવાપિ બલમીદૃશમ્ ।
૧૨૩.૧૪૩/૨નાસ્તિ ભોજ્યમથાસ્માકં ગઙ્ગાતીરનિવાસિનામ્ ॥ ૧૨૩.૧૪૩ ॥

૧૨૩.૧૪૪/૧રામ ઉવાચ । ભ્રાતર્યદ્ વિહિતં કર્મ નૈવ તચ્ચાન્યથા ભવેત્ ।
૧૨૩.૧૪૪/૨પૃથિવ્યામન્નપૂર્ણાયાં વયમન્નાભિલાષિણઃ ॥ ૧૨૩.૧૪૪ ॥

૧૨૩.૧૪૫/૧સૌમિત્રે નૂનમસ્માભિર્ન બ્રાહ્મણમુખે હુતમ્ ।
૧૨૩.૧૪૫/૨અવજ્ઞયા મહીદેવાંસ્તર્પયન્ત્યર્ચયન્તિ ન ॥ ૧૨૩.૧૪૫ ॥

૧૨૩.૧૪૬/૧તે યે લક્ષ્મણ જાયન્તે સર્વદૈવ બુભુક્ષિતાઃ ।
૧૨૩.૧૪૬/૨સ્નાત્વા દેવાન્ અથાભ્યર્ચ્ય હોતવ્યશ્ચ હુતાશનઃ ।
૧૨૩.૧૪૬/૩તતઃ સ્વસમયે દેવો વિધાસ્યત્યશનં તુ નૌ ॥ ૧૨૩.૧૪૬ ॥

૧૨૩.૧૪૭/૧બ્રહ્મોવાચ । ભ્રાત્રોઃ સંજલ્પતોરેવં પશ્યતોઃ કર્મણો ગતિમ્ ।
૧૨૩.૧૪૭/૨શનૈર્દશરથો રાજા તં દેશમુપજગ્મિવાન્ ॥ ૧૨૩.૧૪૭ ॥

૧૨૩.૧૪૮/૧તં દૃષ્ટ્વા લક્ષ્મણઃ શીઘ્રં તિષ્ઠ તિષ્ઠેતિ ચાબ્રવીત્ ।
૧૨૩.૧૪૮/૨ધનુરાકૃષ્ય કોપેન રક્ષસ્ત્વં દાનવોઽથવા ॥ ૧૨૩.૧૪૮ ॥

૧૨૩.૧૪૯/૧આસન્નં ચ પુનર્દૃષ્ટ્વા યાહિ યાહ્યત્ર પુણ્યભાક્ ।
૧૨૩.૧૪૯/૨રામો દાશરથી રાજા ધર્મભાક્ પશ્ય વર્તતે ॥ ૧૨૩.૧૪૯ ॥

૧૨૩.૧૫૦/૧ગુરુભક્તઃ સત્યસંધો દેવબ્રાહ્મણસેવકઃ ।
૧૨૩.૧૫૦/૨ત્રૈલોક્યરક્ષાદક્ષોઽસૌ વર્તતે યત્ર રાઘવઃ ॥ ૧૨૩.૧૫૦ ॥

૧૨૩.૧૫૧/૧ન તત્ર ત્વાદૃશામસ્તિ પ્રવેશઃ પાપકર્મણામ્ ।
૧૨૩.૧૫૧/૨યદિ પ્રવિશસે પાપ તતો વધમવાપ્સ્યસિ ॥ ૧૨૩.૧૫૧ ॥

૧૨૩.૧૫૨/૧તત્ પુત્રવચનં શ્રુત્વા શનૈરાહૂય વાચયા ।

૧૨૩.૧૫૨/૨ઉવાચાધોમુખો ભૂત્વા સ્નુષાં પુત્રૌ કૃતાઞ્જલિઃ ।
૧૨૩.૧૫૨/૩મુહુરન્તર્વિનિધ્યાયન્ ગતિં દુષ્કૃતકર્મણઃ ॥ ૧૨૩.૧૫૨॥

૧૨૩.૧૫૩/૧રાજોવાચ । અહં દશરથો રાજા પુત્રૌ મે શ ૃણુતં વચઃ ।
૧૨૩.૧૫૩/૨તિસૃભિર્બ્રહ્મહત્યાભિર્વૃતોઽહં દુઃખમાગતઃ ।
૧૨૩.૧૫૩/૩છિન્નં પશ્યત મે દેહં નરકેષુ ચ પાતિતમ્ ॥ ૧૨૩.૧૫૩॥

૧૨૩.૧૫૪/૧બ્રહ્મોવાચ । તતઃ કૃતાઞ્જલી રામઃ સીતયા લક્ષ્મણેન ચ ।
૧૨૩.૧૫૪/૨ભૂમૌ પ્રણેમુસ્તે સર્વે વચનં ચૈતદ્ અબ્રુવન્ ॥ ૧૨૩.૧૫૪॥

૧૨૩.૧૫૫/૧સીતારામલક્ષ્મણા ઊચુઃ । કસ્યેદં કર્મણસ્તાત ફલં
નૃપતિસત્તમ ॥ ૧૨૩.૧૫૫॥

૧૨૩.૧૫૬/૧બ્રહ્મોવાચ । સ ચ પ્રાહ યથાવૃત્તં બ્રહ્મહત્યાત્રયં
તથા ॥ ૧૨૩.૧૫૬॥

૧૨૩.૧૫૭/૧રાજોવાચ । નિષ્કૃતિર્બ્રહ્મહન્તૃણાં પુત્રૌ ક્વાપિ ન
વિદ્યતે ॥ ૧૨૩.૧૫૭॥

૧૨૩.૧૫૮/૧બ્રહ્મોવાચ । તતો દુઃખેન મહતા *આવૃતાઃ સર્વે ભુવં ગતાઃ ।
૧૨૩.૧૫૮/૨રાજાનં વનવાસં ચ માતરં પિતરં તથા ॥ ૧૨૩.૧૫૮॥

૧૨૩.૧૫૯/૧દુઃખાગમં કર્મગતિં નરકે પાતનં તથા ।
૧૨૩.૧૫૯/૨એવમાદ્યથ સંસ્મૃત્ય મુમોહ નૃપતેઃ સુતઃ ।
૧૨૩.૧૫૯/૩વિસંજ્ઞં નૃપતિં દૃષ્ટ્વા સીતા વાક્યમથાબ્રવીત્ ॥ ૧૨૩.૧૫૯॥

૧૨૩.૧૬૦/૧સીતોવાચ । ન શોચન્તિ મહાત્માનસ્ત્વાદૃશા વ્યસનાગમે ।
૧૨૩.૧૬૦/૨ચિન્તયન્તિ પ્રતીકારં દૈવ્યમપ્યથ માનુષમ્ ॥ ૧૨૩.૧૬૦॥

૧૨૩.૧૬૧/૧શોચદ્ભિર્યુગસાહસ્રં વિપત્તિર્નૈવ તીર્યતે ।
૧૨૩.૧૬૧/૨વ્યામોહમાપ્નુવન્તીહ ન કદાચિદ્ વિચક્ષણાઃ ॥ ૧૨૩.૧૬૧॥

૧૨૩.૧૬૨/૧કિમનેનાત્ર દુઃખેન નિષ્ફલેન જનેશ્વર ।
૧૨૩.૧૬૨/૨દેહિ હત્યાં પ્રથમતો યા જાતા હ્યતિભીષણા ॥ ૧૨૩.૧૬૨॥

૧૨૩.૧૬૩/૧પિતૃભક્તઃ પુણ્યશીલો વેદવેદાઙ્ગપારગઃ ।
૧૨૩.૧૬૩/૨અનાગા યો હતો વિપ્રસ્તત્પાપસ્યાત્ર નિષ્કૃતિમ્ ॥ ૧૨૩.૧૬૩॥

૧૨૩.૧૬૪/૧આચરામિ યથાશાસ્ત્રં મા શોકં કુરુતં યુવામ્ ।
૧૨૩.૧૬૪/૨દ્વિતીયાં લક્ષ્મણો હત્યાં ગૃહ્ણાતુ ત્વપરાં ભવાન્ ॥ ૧૨૩.૧૬૪॥

૧૨૩.૧૬૫/૧બ્રહ્મોવાચ । એતદ્ ધર્મયુતં વાક્યં સીતયા ભાષિતં દૃઢમ્ ।
૧૨૩.૧૬૫/૨તથેતિ ચાહતુરુભૌ તતો દશરથોઽબ્રવીત્ ॥ ૧૨૩.૧૬૫॥

૧૨૩.૧૬૬/૧દશરથ ઉવાચ । ત્વં હિ બ્રહ્મવિદઃ કન્યા જનકસ્ય ત્વયોનિજા ।
૧૨૩.૧૬૬/૨ભાર્યા રામસ્ય કિં ચિત્રં યદ્ યુક્તમનુભાષસે ॥ ૧૨૩.૧૬૬॥

૧૨૩.૧૬૭/૧ન કોઽપિ ભવતાં કિંતુ શ્રમઃ સ્વલ્પોઽપિ વિદ્યતે ।
૧૨૩.૧૬૭/૨ગૌતમ્યાં સ્નાનદાનેન પિણ્ડનિર્વપણેન ચ ॥ ૧૨૩.૧૬૭॥

૧૨૩.૧૬૮/૧તિસૃભિર્બ્રહ્મહત્યાભિર્મુક્તો યામિ ત્રિવિષ્ટપમ્ ।
૧૨૩.૧૬૮/૨ત્વયા જનકસમ્ભૂતે સ્વકુલોચિતમીરિતમ્ ॥ ૧૨૩.૧૬૮॥

૧૨૩.૧૬૯/૧પ્રાપયન્તિ પરં પારં ભવાબ્ધેઃ કુલયોષિતઃ ।
૧૨૩.૧૬૯/૨ગોદાવર્યાઃ પ્રસાદેન કિં નામાસ્ત્યત્ર દુર્લભમ્ ॥ ૧૨૩.૧૬૯॥

૧૨૩.૧૭૦/૧બ્રહ્મોવાચ । તથેતિ ક્રિયમાણે તુ પિણ્ડદાનાય શત્રુહા ।
૧૨૩.૧૭૦/૨નૈવાપશ્યદ્ ભક્ષ્યભોજ્યં તતો લક્ષ્મણમબ્રવીત્ ॥ ૧૨૩.૧૭૦॥

૧૨૩.૧૭૧/૧લક્ષ્મણઃ પ્રાહ વિનયાદ્ ઇઙ્ગુદ્યાશ્ચ ફલાનિ ચ ।
૧૨૩.૧૭૧/૨સન્તિ તેષાં ચ પિણ્યાકમાનીતં તત્ક્ષણાદ્ ઇવ ॥ ૧૨૩.૧૭૧॥

૧૨૩.૧૭૨/૧પિણ્યાકેનાથ ગઙ્ગાયાં પિણ્ડં દાતું તથા પિતુઃ ।
૧૨૩.૧૭૨/૨મનઃ કુર્વંસ્તતો રામો મન્દોઽભૂદ્ દુઃખિતસ્તદા ॥ ૧૨૩.૧૭૨॥

૧૨૩.૧૭૩/૧દૈવી વાગ્ અભવત્ તત્ર દુઃખં ત્યજ નૃપાત્મજ ।
૧૨૩.૧૭૩/૨રાજ્યભ્રષ્ટો વનં પ્રાપ્તઃ કિં વૈ નિષ્કિંચનો ભવાન્ ॥ ૧૨૩.૧૭૩॥

૧૨૩.૧૭૪/૧અશઠો ધર્મનિરતો ન શોચિતુમિહાર્હસિ ।
૧૨૩.૧૭૪/૨વિત્તશાઠ્યેન યો ધર્મં કરોતિ સ તુ પાતકી ॥ ૧૨૩.૧૭૪॥

૧૨૩.૧૭૫/૧શ્રૂયતે સર્વશાસ્ત્રેષુ યદ્ રામ શ઼ૃણુ યત્નતઃ ।
૧૨૩.૧૭૫/૨યદન્નઃ પુરુષો રાજંસ્તદન્નાસ્તસ્ય દેવતાઃ ॥ ૧૨૩.૧૭૫॥

૧૨૩.૧૭૬/૧પિણ્ડે નિપતિતે ભૂમૌ નાપશ્યત્ પિતરં તદા ।
૧૨૩.૧૭૬/૨શવં ચ પતિતં યત્ર શવતીર્થમનુત્તમમ્ ॥ ૧૨૩.૧૭૬॥

૧૨૩.૧૭૭/૧મહાપાતકસંઘાત+ ।વિઘાતકૃદ્ અનુસ્મૃતિઃ ।
૧૨૩.૧૭૭/૨તત્રાગચ્છંલ્લોકપાલા રુદ્રાદિત્યાસ્તથાશ્વિનૌ ॥ ૧૨૩.૧૭૭॥

૧૨૩.૧૭૮/૧સ્વં સ્વં વિમાનમારૂઢાસ્તેષાં મધ્યેઽતિદીપ્તિમાન્ ।
૧૨૩.૧૭૮/૨વિમાનવરમારૂઢઃ સ્તૂયમાનશ્ચ કિંનરૈઃ ॥ ૧૨૩.૧૭૮॥

૧૨૩.૧૭૯/૧આદિત્યસદૃશાકારસ્તેષાં મધ્યે બભૌ પિતા ।
૧૨૩.૧૭૯/૨તમદૃષ્ટ્વા સ્વપિતરં દેવાન્ દૃષ્ટ્વા વિમાનિનઃ ॥ ૧૨૩.૧૭૯॥

૧૨૩.૧૮૦/૧કૃતાઞ્જલિપુટો રામઃ પિતા મે ક્વેત્યભાષત ।
૧૨૩.૧૮૦/૨ઇતિ દિવ્યાભવદ્ વાણી રામં સમ્બોધ્ય સીતયા ॥ ૧૨૩.૧૮૦॥

૧૨૩.૧૮૧/૧તિસૃભિર્બ્રહ્મહત્યાભિર્મુક્તો દશરથો નૃપઃ ।
૧૨૩.૧૮૧/૨વૃતં પશ્ય સુરૈસ્તાત દેવા અપ્યૂચિરે ચ તમ્ ॥ ૧૨૩.૧૮૧॥

૧૨૩.૧૮૨/૧દેવા ઊચુઃ । ધન્યોઽસિ કૃતકૃત્યોઽસિ રામ સ્વર્ગં ગતઃ પિતા ।
૧૨૩.૧૮૨/૨નાનાનિરયસંઘાતાત્ પૂર્વજાન્ ઉદ્ધરેત્ તુ યઃ ॥ ૧૨૩.૧૮૨॥

૧૨૩.૧૮૩/૧સ ધન્યોઽલંકૃતં તેન કૃતિના ભુવનત્રયમ્ ।
૧૨૩.૧૮૩/૨એનં પશ્ય મહાબાહો મુક્તપાપં રવિપ્રભમ્ ॥ ૧૨૩.૧૮૩॥

૧૨૩.૧૮૪/૧સર્વસમ્પત્તિયુક્તોઽપિ પાપી દગ્ધદ્રુમોપમઃ ।
૧૨૩.૧૮૪/૨નિષ્કિંચનોઽપિ સુકૃતી દૃશ્યતે ચન્દ્રમૌલિવત્ ॥ ૧૨૩.૧૮૪॥

૧૨૩.૧૮૫/૧બ્રહ્મોવાચ । દૃષ્ટ્વાબ્રવીત્ સુતં રાજા
આશીર્ભિરભિનન્દ્ય ચ ॥ ૧૨૩.૧૮૫॥

૧૨૩.૧૮૬/૧રાજોવાચ । કૃતકૃત્યોઽસિ ભદ્રં તે તારિતોઽહં ત્વયાનઘ ।
૧૨૩.૧૮૬/૨ધન્યઃ સ પુત્રો લોકેઽસ્મિન્ પિતૃણાં યસ્તુ તારકઃ ॥ ૧૨૩.૧૮૬॥

૧૨૩.૧૮૭/૧બ્રહ્મોવાચ । તતઃ સુરગણાઃ પ્રોચુર્દેવાનાં કાર્યસિદ્ધયે ।
૧૨૩.૧૮૭/૨રામં ચ પુરુષશ્રેષ્ઠં ગચ્છ તાત યથાસુખમ્ ।
૧૨૩.૧૮૭/૩તતસ્તદ્વચનં શ્રુત્વા રામસ્તાન્ અબ્રવીત્ સુરાન્ ॥ ૧૨૩.૧૮૭॥

૧૨૩.૧૮૮/૧રામ ઉવાચ । ગુરૌ પિતરિ મે દેવાઃ કિં કૃત્યમવશિષ્યતે ॥ ૧૨૩.૧૮૮॥

૧૨૩.૧૮૯/૧દેવા ઊચુઃ । નદી ન ગઙ્ગયા તુલ્યા ન ત્વયા સદૃશઃ સુતઃ ।
૧૨૩.૧૮૯/૨ન શિવેન સમો દેવો ન તારેણ સમો મનુઃ ॥ ૧૨૩.૧૮૯॥

૧૨૩.૧૯૦/૧ત્વયા રામ ગુરૂણાં ચ કાર્યં સર્વમનુષ્ઠિતમ્ ।
૧૨૩.૧૯૦/૨તારિતાઃ પિતરો રામ ત્વયા પુત્રેણ માનદ ।
૧૨૩.૧૯૦/૩ગચ્છન્તુ સર્વે સ્વસ્થાનં ત્વં ચ ગચ્છ યથાસુખમ્ ॥ ૧૨૩.૧૯૦॥

૧૨૩.૧૯૧/૧બ્રહ્મોવાચ । તદ્ દેવવચનાદ્ ધૃષ્ટઃ સીતયા લક્ષ્મણાગ્રજઃ ।
૧૨૩.૧૯૧/૨તદ્ દૃષ્ટ્વા ગઙ્ગામાહાત્મ્યં વિસ્મિતો વાક્યમબ્રવીત્ ॥ ૧૨૩.૧૯૧॥

૧૨૩.૧૯૨/૧રામ ઉવાચ । અહો ગઙ્ગાપ્રભાવોઽયં ત્રૈલોક્યે નોપમીયતે ।
૧૨૩.૧૯૨/૨વયં ધન્યા યતો ગઙ્ગા દૃષ્ટાસ્માભિસ્ત્રિપાવની ॥ ૧૨૩.૧૯૨॥

૧૨૩.૧૯૩/૧બ્રહ્મોવાચ । હર્ષેણ મહતા યુક્તો દેવં સ્થાપ્ય મહેશ્વરમ્ ।
૧૨૩.૧૯૩/૨તં ષોડશભિરીશાનમુપચારૈઃ પ્રયત્નતઃ ॥ ૧૨૩.૧૯૩॥

૧૨૩.૧૯૪/૧સમ્પૂજ્યાવરણૈર્યુક્તં ષટ્ત્રિંશત્કલમીશ્વરમ્ ।
૧૨૩.૧૯૪/૨કૃતાઞ્જલિપુટો ભૂત્વા રામસ્તુષ્ટાવ શંકરમ્ ॥ ૧૨૩.૧૯૪॥

૧૨૩.૧૯૫/૧રામ ઉવાચ । નમામિ શમ્ભું પુરુષં પુરાણમ્ ।
૧૨૩.૧૯૫/૨નમામિ સર્વજ્ઞમપારભાવમ્ ।
૧૨૩.૧૯૫/૩નમામિ રુદ્રં પ્રભુમક્ષયં તમ્ ।
૧૨૩.૧૯૫/૪નમામિ શર્વં શિરસા નમામિ ॥ ૧૨૩.૧૯૫॥

૧૨૩.૧૯૬/૧નમામિ દેવં પરમવ્યયં તમ્ ।
૧૨૩.૧૯૬/૨ઉમાપતિં લોકગુરું નમામિ ।
૧૨૩.૧૯૬/૩નમામિ દારિદ્ર્યવિદારણં તમ્ ।
૧૨૩.૧૯૬/૪નમામિ રોગાપહરં નમામિ ॥ ૧૨૩.૧૯૬॥

૧૨૩.૧૯૭/૧નમામિ કલ્યાણમચિન્ત્યરૂપમ્ ।
૧૨૩.૧૯૭/૨નમામિ વિશ્વોદ્ભવબીજરૂપમ્ ।
૧૨૩.૧૯૭/૩નમામિ વિશ્વસ્થિતિકારણં તમ્ ।
૧૨૩.૧૯૭/૪નમામિ સંહારકરં નમામિ ॥ ૧૨૩.૧૯૭॥

૧૨૩.૧૯૮/૧નમામિ ગૌરીપ્રિયમવ્યયં તમ્ ।
૧૨૩.૧૯૮/૨નમામિ નિત્યં ક્ષરમક્ષરં તમ્ ।
૧૨૩.૧૯૮/૩નમામિ ચિદ્રૂપમમેયભાવમ્ ।
૧૨૩.૧૯૮/૪ત્રિલોચનં તં શિરસા નમામિ ॥ ૧૨૩.૧૯૮॥

૧૨૩.૧૯૯/૧નમામિ કારુણ્યકરં ભવસ્ય ।
૧૨૩.૧૯૯/૨ભયંકરં વાપિ સદા નમામિ ।
૧૨૩.૧૯૯/૩નમામિ દાતારમભીપ્સિતાનામ્ ।
૧૨૩.૧૯૯/૪નમામિ સોમેશમુમેશમાદૌ ॥ ૧૨૩.૧૯૯॥

૧૨૩.૨૦૦/૧નમામિ વેદત્રયલોચનં તમ્ ।
૧૨૩.૨૦૦/૨નમામિ મૂર્તિત્રયવર્જિતં તમ્ ।
૧૨૩.૨૦૦/૩નમામિ પુણ્યં સદસદ્વ્યતીતમ્ ।

૧૨૩.૨૦૦/૪નમામિ તં પાપહરં નમામિ ॥ ૧૨૩.૨૦૦॥

૧૨૩.૨૦૧/૧નમામિ વિશ્વસ્ય હિતે રતં તમ્ ।
૧૨૩.૨૦૧/૨નમામિ રૂપાણિ બહૂનિ ધત્તે ।
૧૨૩.૨૦૧/૩યો વિશ્વગોપ્તા સદસત્પ્રણેતા ।
૧૨૩.૨૦૧/૪નમામિ તં વિશ્વપતિં નમામિ ॥ ૧૨૩.૨૦૧॥

૧૨૩.૨૦૨/૧યજ્ઞેશ્વરં સમ્પ્રતિ હવ્યકવ્યમ્ ।
૧૨૩.૨૦૨/૨તથા ગતિં લોકસદાશિવો યઃ ।
૧૨૩.૨૦૨/૩આરાધિતો યશ્ચ દદાતિ સર્વમ્ ।
૧૨૩.૨૦૨/૪નમામિ દાનપ્રિયમિષ્ટદેવમ્ ॥ ૧૨૩.૨૦૨॥

૧૨૩.૨૦૩/૧નમામિ સોમેશ્વરમસ્વતન્ત્રમ્ ।
૧૨૩.૨૦૩/૨ઉમાપતિં તં વિજયં નમામિ ।
૧૨૩.૨૦૩/૩નમામિ વિઘ્નેશ્વરનન્દિનાથમ્ ।
૧૨૩.૨૦૩/૪પુત્રપ્રિયં તં શિરસા નમામિ ॥ ૧૨૩.૨૦૩॥

૧૨૩.૨૦૪/૧નમામિ દેવં ભવદુઃખશોક+ ।
૧૨૩.૨૦૪/૨વિનાશનં ચન્દ્રધરં નમામિ ।
૧૨૩.૨૦૪/૩નમામિ ગઙ્ગાધરમીશમીડ્યમ્ ।
૧૨૩.૨૦૪/૪ઉમાધવં દેવવરં નમામિ ॥ ૧૨૩.૨૦૪॥

૧૨૩.૨૦૫/૧નમામ્યજાદીશપુરંદરાદિ+ ।
૧૨૩.૨૦૫/૨સુરાસુરૈરર્ચિતપાદપદ્મમ્ ।
૧૨૩.૨૦૫/૩નમામિ દેવીમુખવાદનાનામ્ ।
૧૨૩.૨૦૫/૪ઈક્ષાર્થમક્ષિત્રિતયં ય ઐચ્છત્ ॥ ૧૨૩.૨૦૫॥

૧૨૩.૨૦૬/૧પઞ્ચામૃતૈર્ગન્ધસુધૂપદીપૈર્ ।
૧૨૩.૨૦૬/૨વિચિત્રપુષ્પૈર્વિવિધૈશ્ચ મન્ત્રૈઃ ।
૧૨૩.૨૦૬/૩અન્નપ્રકારૈઃ સકલોપચારૈઃ ।
૧૨૩.૨૦૬/૪સમ્પૂજિતં સોમમહં નમામિ ॥ ૧૨૩.૨૦૬॥

૧૨૩.૨૦૭/૧બ્રહ્મોવાચ । તતઃ સ ભગવાન્ આહ રામં શમ્ભુઃ સલક્ષ્મણમ્ ।
૧૨૩.૨૦૭/૨વરાન્ વૃણીષ્વ ભદ્રં તે રામઃ પ્રાહ વૃષધ્વજમ્ ॥ ૧૨૩.૨૦૭॥

૧૨૩.૨૦૮/૧રામ ઉવાચ । સ્તોત્રેણાનેન યે ભક્ત્યા તોષ્યન્તિ ત્વાં સુરોત્તમ ।
૧૨૩.૨૦૮/૨તેષાં સર્વાણિ કાર્યાણિ સિદ્ધિં યાન્તુ મહેશ્વર ॥ ૧૨૩.૨૦૮॥

૧૨૩.૨૦૯/૧યેષાં ચ પિતરઃ શમ્ભો પતિતા નરકાર્ણવે ।
૧૨૩.૨૦૯/૨તેષાં પિણ્ડાદિદાનેન પૂતા યાન્તુ ત્રિવિષ્ટપમ્ ॥ ૧૨૩.૨૦૯॥

૧૨૩.૨૧૦/૧જન્મપ્રભૃતિ પાપાનિ મનોવાક્કાયિકં ત્વઘમ્ ।
૧૨૩.૨૧૦/૨અત્ર તુ સ્નાનમાત્રેણ તત્ સદ્યો નાશમાપ્નુયાત્ ॥ ૧૨૩.૨૧૦॥

૧૨૩.૨૧૧/૧અત્ર યે ભક્તિતઃ શમ્ભો દદત્યર્થિભ્ય અણ્વપિ ।
૧૨૩.૨૧૧/૨સર્વં તદ્ અક્ષયં શમ્ભો દાતૃણાં ફલકૃદ્ ભવેત્ ॥ ૧૨૩.૨૧૧॥

૧૨૩.૨૧૨/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ તં રામં શંકરો હૃષિતોઽબ્રવીત્ ।
૧૨૩.૨૧૨/૨ગતે તસ્મિન્ સુરશ્રેષ્ઠે રામોઽપ્યનુચરૈઃ સહ ॥ ૧૨૩.૨૧૨॥

૧૨૩.૨૧૩/૧ગૌતમી યત્ર ચોત્પન્ના શનૈસ્તં દેશમભ્યગાત્ ।
૧૨૩.૨૧૩/૨તતઃ પ્રભૃતિ તત્ તીર્થં રામતીર્થમુદાહૃતમ્ ॥ ૧૨૩.૨૧૩॥

૧૨૩.૨૧૪/૧દયાલોરપતત્ તત્ર લક્ષ્મણસ્ય કરાચ્છરઃ ।
૧૨૩.૨૧૪/૨તદ્ બાણતીર્થમભવત્ સર્વાપદ્વિનિવારણમ્ ॥ ૧૨૩.૨૧૪॥

૧૨૩.૨૧૫/૧યત્ર સૌમિત્રિણા સ્નાનં શંકરસ્યાર્ચનં કૃતમ્ ।
૧૨૩.૨૧૫/૨તત્ તીર્થં લક્ષ્મણં જાતં તથા સીતાસમુદ્ભવમ્ ॥ ૧૨૩.૨૧૫॥

૧૨૩.૨૧૬/૧નાનાવિધાશેષપાપ+ ।સંઘનિર્મૂલનક્ષમમ્ ।
૧૨૩.૨૧૬/૨યદ્ અઙ્ઘ્રિસંગાદ્ અભવદ્ ગઙ્ગા ત્રૈલોક્યપાવની ॥ ૧૨૩.૨૧૬॥

૧૨૩.૨૧૭/૧સ યત્ર સ્નાનમકરોત્ તદ્ વૈશિષ્ટ્યં કિમુચ્યતે ।
૧૨૩.૨૧૭/૨તદ્ રામતીર્થસદૃશં તીર્થં ક્વાપિ ન વિદ્યતે ॥ ૧૨૩.૨૧૭॥

૧૨૪.૧/૧બ્રહ્મોવાચ । પુત્રતીર્થમિતિ ખ્યાતં પુણ્યતીર્થં તદ્ ઉચ્યતે ।
૧૨૪.૧/૨સર્વાન્ કામાન્ અવાપ્નોતિ યન્મહિમ્નઃ શ્રુતેરપિ ॥ ૧૨૪.૧॥

૧૨૪.૨/૧તસ્ય સ્વરૂપં વક્ષ્યામિ શ‌ૃણુ યત્નેન નારદ ।
૧૨૪.૨/૨દિતેઃ પુત્રાશ્ચ દનુજાઃ પરિક્ષીણા યદાભવન્ ।
૧૨૪.૨/૩અદિતેસ્તુ સુતા જ્યેષ્ઠાઃ સર્વભાવેન નારદ ॥ ૧૨૪.૨॥

૧૨૪.૩/૧તદા દિતિઃ પુત્રવિયોગદુઃખાત્ ।
૧૨૪.૩/૨સંસ્પર્ધમાના દનુમાજગામ ॥ ૧૨૪.૩॥

૧૨૪.૪/૧દિતિરુવાચ । ક્ષીણાઃ સુતા આવયોરેવ ભદ્રે ।
૧૨૪.૪/૨કિં કુર્મહે કર્મ લોકે ગરીયઃ ।
૧૨૪.૪/૩પશ્યાદિતેર્વંશમભિન્નમુત્તમમ્ ।

૧૨૪.૪/૪સૌરાજ્યયુક્તં યશસા જયશ્રિયા ॥ ૧૨૪.૪॥

૧૨૪.૫/૧જિતારિમભ્યુન્નતકીર્તિધર્મમ્ ।
૧૨૪.૫/૨મચ્ચિત્તસંહર્ષવિનાશદક્ષમ્ ।
૧૨૪.૫/૩સમાનભર્તૃત્વસમાનધર્મે ।
૧૨૪.૫/૪સમાનગોત્રેઽપિ સમાનરૂપે ॥ ૧૨૪.૫॥

૧૨૪.૬/૧ન જીવયેયં શ્રિયમુન્નતિં ચ ।
૧૨૪.૬/૨જીર્ણાસ્મિ દૃષ્ટ્વા ત્વદિતિપ્રસૂતાન્ ।
૧૨૪.૬/૩કામપ્યવસ્થામનુયામિ દુઃસ્થા ।
<124।6/4>ઽદિતેર્વિલોક્યાથ પરાં સમૃદ્ધિમ્ ।
૧૨૪.૬/૫દાવપ્રવેશોઽપિ સુખાય નૂનમ્ ।
૧૨૪.૬/૬સ્વપ્નેઽપ્યવેક્ષ્યા ન સપત્નલક્ષ્મીઃ ॥ ૧૨૪.૬॥

૧૨૪.૭/૧બ્રહ્મોવાચ । એવં બ્રુવાણામતિદીનવક્ત્રામ્ ।
૧૨૪.૭/૨વિનિશ્વસન્તીં પરમેષ્ઠિપુત્રઃ ।
૧૨૪.૭/૩કૃતાભિપૂજો વિગતશ્રમસ્તામ્ ।
૧૨૪.૭/૪સ સાન્ત્વયન્ આહ મનોભિરામામ્ ॥ ૧૨૪.૭॥

૧૨૪.૮/૧પરમેષ્ઠિપુત્ર ઉવાચ । ખેદો ન કાર્યઃ સમભીપ્સિતં યત્ ।
૧૨૪.૮/૨તત્ પ્રાપ્યતે પુણ્યત એવ ભદ્રે ।
૧૨૪.૮/૩તત્સાધનં વેત્તિ મહાનુભાવઃ ।
૧૨૪.૮/૪પ્રજાપતિસ્તે સ તુ વક્ષ્યતીતિ ॥ ૧૨૪.૮॥

૧૨૪.૯/૧સાધ્યેતત્ સર્વભાવેન પ્રશ્રયાવનતા સતી ॥ ૧૨૪.૯॥

૧૨૪.૧૦/૧બ્રહ્મોવાચ । એવં બ્રુવાણાં ચ દિતિં દનુઃ પ્રોવાચ નારદ ॥ ૧૨૪.૧૦॥

૧૨૪.૧૧/૧દનુરુવાચ । ભર્તારં કશ્યપં ભદ્રે તોષયસ્વ નિજૈર્ગુણૈઃ ।
૧૨૪.૧૧/૨તુષ્ટો યદિ ભવેદ્ ભર્તા તતઃ કામાન્ અવાપ્સ્યસિ ॥ ૧૨૪.૧૧॥

૧૨૪.૧૨/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સર્વભાવૈસ્તોષયામાસ કશ્યપમ્ ।
૧૨૪.૧૨/૨દિતિં પ્રોવાચ ભગવાન્ કશ્યપોઽથ પ્રજાપતિઃ ॥ ૧૨૪.૧૨॥

૧૨૪.૧૩/૧કશ્યપ ઉવાચ । કિં દદામિ વદાભીષ્ટં દિતે વરય સુવ્રતે ॥ ૧૨૪.૧૩॥

૧૨૪.૧૪/૧બ્રહ્મોવાચ । દિતિરપ્યાહ ભર્તારં પુત્રં બહુગુણાન્વિતમ્ ।
૧૨૪.૧૪/૨જેતારં સર્વલોકાનાં સર્વલોકનમસ્કૃતમ્ ॥ ૧૨૪.૧૪॥

૧૨૪.૧૫/૧યેન જાતેન લોકેऽસ્મિન્ ભવેયં વીરપુત્રિણી ।
૧૨૪.૧૫/૨તં વરેયં સુરપિતરિત્યાહ વિનયાન્વિતા ॥ ૧૨૪.૧૫॥

૧૨૪.૧૬/૧કશ્યપ ઉવાચ । ઉપદેક્ષ્યે વ્રતં શ્રેષ્ઠં દ્વાદશાબ્દફલપ્રદમ્ ।
૧૨૪.૧૬/૨તત આગત્ય તે ગર્ભમાધાસ્યે યન્ મનોગતમ્ ।
૧૨૪.૧૬/૩નિષ્પાપતાયાં જાતાયાં સિધ્યન્તિ હિ મનોરથાઃ ॥ ૧૨૪.૧૬॥

૧૨૪.૧૭/૧બ્રહ્મોવાચ । ભર્તૃવાક્યાદ્ દિતિઃ પ્રીતા તં નમસ્યાયતેક્ષણા ।
૧૨૪.૧૭/૨ઉપદિષ્ટં વ્રતં ચક્રે ભર્ત્રાદિષ્ટં યથાવિધિ ॥ ૧૨૪.૧૭॥

૧૨૪.૧૮/૧તીર્થસેવાપાત્રદાન+ ।વ્રતચર્યાદિવર્જિતાઃ ।
૧૨૪.૧૮/૨કથમાસાદયિષ્યન્તિ પ્રાણિનોऽત્ર મનોરથાન્ ॥ ૧૨૪.૧૮॥

૧૨૪.૧૯/૧તતશ્ચીર્ણે વ્રતે તસ્યાં દિત્યાં ગર્ભમધારયત્ ।
૧૨૪.૧૯/૨પુનઃ કાન્તામથોવાચ કશ્યપસ્તાં દિતિં રહઃ ॥ ૧૨૪.૧૯॥

૧૨૪.૨૦/૧કશ્યપ ઉવાચ । ન પ્રાપ્નુવન્તિ યત્કામાન્ મુનયોऽપિ તપસ્સ્થિતાઃ ।
૧૨૪.૨૦/૨યથાવિહિતકર્માઙ્ગ+ ऽવજ્ઞાયા તચ્છુચિસ્મિતે ॥ ૧૨૪.૨૦॥

૧૨૪.૨૧/૧નિન્દિતં ચ ન કર્તવ્યં સંધ્યયોરુભયોરપિ ।
૧૨૪.૨૧/૨ન સ્વપ્તવ્યં ન ગન્તવ્યં મુક્તકેશી ચ નો ભવ ॥ ૧૨૪.૨૧॥

૧૨૪.૨૨/૧ભોક્તવ્યં સુભગે નૈવ ક્ષુતં વા જૃમ્ભણં તથા ।
૧૨૪.૨૨/૨સંધ્યાકાલે ન કર્તવ્યં ભૂતસંઘસમાકુલે ॥ ૧૨૪.૨૨॥

૧૨૪.૨૩/૧સાન્તર્ધાનં સદા કાર્યં હસિતં તુ વિશેષતઃ ।
૧૨૪.૨૩/૨ગૃહાન્તદેશે સંધ્યાસુ ન સ્થાતવ્યં કદાચન ॥ ૧૨૪.૨૩॥

૧૨૪.૨૪/૧મુશલોલૂખલાદીનિ શૂર્પપીઠપિધાનકમ્ ।
૧૨૪.૨૪/૨નૈવાતિક્રમણીયાનિ દિવા રાત્રૌ સદા પ્રિયે ॥ ૧૨૪.૨૪॥

૧૨૪.૨૫/૧ઉદક્શીર્ષં તુ શયનં ન સંધ્યાસુ વિશેષતઃ ।
૧૨૪.૨૫/૨વક્તવ્યં નાનૃતં કિંચિન્ નાન્યગેહાટનં તથા ॥ ૧૨૪.૨૫॥

૧૨૪.૨૬/૧કાન્તાદ્ અન્યો ન વીક્ષ્યસ્તુ પ્રયત્નેન નરઃ ક્વચિત્ ।
૧૨૪.૨૬/૨ઇત્યાદિનિયમૈર્યુક્તા યદિ ત્વમનુવર્તસે ।
૧૨૪.૨૬/૩તતસ્તે ભવિતા પુત્રસ્ત્રૈલોક્યૈશ્વર્યભાજનમ્ ॥ ૧૨૪.૨૬॥

૧૨૪.૨૭/૧બ્રહ્મોવાચ । તથેતિ પ્રતિજજ્ઞે સા ભર્તારં લોકપૂજિતમ્ ।
૧૨૪.૨૭/૨ગતશ્ચ કશ્યપો બ્રહ્મન્ન્ ઇતશ્ચેતઃ સુરાન્ પ્રતિ ॥ ૧૨૪.૨૭॥

૧૨૪.૨૮/૧દિતેર્ગર્ભોઽપિ વવૃધે બલવાન્ પુણ્યસમ્ભવઃ ।
૧૨૪.૨૮/૨એતત્ સર્વં મયો દૈત્યો માયયા વેત્તિ તત્ત્વતઃ ॥ ૧૨૪.૨૮॥

૧૨૪.૨૯/૧ઇન્દ્રસ્ય સખ્યમભવન્ મયેન પ્રીતિપૂર્વકમ્ ।
૧૨૪.૨૯/૨મયો ગત્વા રહઃ પ્રાહ ઇન્દ્રં સ વિનયાન્વિતઃ ॥ ૧૨૪.૨૯॥

૧૨૪.૩૦/૧દિતેર્દનોરભિપ્રાયં વ્રતં ગર્ભસ્ય વર્ધનમ્ ।
૧૨૪.૩૦/૨તસ્ય વીર્યં ચ વિવિધં પ્રીત્યેન્દ્રાય ન્યવેદયત્ ॥ ૧૨૪.૩૦॥

૧૨૪.૩૧/૧વિશ્વાસૈકગૃહં મિત્રમપાયત્રાસવર્જિતમ્ ।
૧૨૪.૩૧/૨અર્જિતં સુકૃતં નાના+ ।વિધં ચેત્ તદ્ અવાપ્યતે ॥ ૧૨૪.૩૧॥

૧૨૪.૩૨/૧નારદ ઉવાચ । નમુચેશ્ચ પ્રિયો ભ્રાતા મયો દૈત્યો મહાબલઃ ।
૧૨૪.૩૨/૨ભ્રાતૃહન્ત્રા કથં મૈત્ર્યં મયસ્યાસીત્ સુરેશ્વર ॥ ૧૨૪.૩૨॥

૧૨૪.૩૩/૧બ્રહ્મોવાચ । દૈત્યાનામધિપશ્ચાસીદ્ બલવાન્ નમુચિઃ પુરા ।
૧૨૪.૩૩/૨ઇન્દ્રેણ વૈરમભવદ્ ભીષણં લોમહર્ષણમ્ ॥ ૧૨૪.૩૩॥

૧૨૪.૩૪/૧યુદ્ધં હિત્વા કદાચિદ્ ભો ગચ્છન્તં તુ શતક્રતુમ્ ।
૧૨૪.૩૪/૨દૃષ્ટ્વા દૈત્યપતિઃ શૂરો નમુચિઃ પૃષ્ઠતોઽન્વગાત્ ॥ ૧૨૪.૩૪॥

૧૨૪.૩૫/૧તમાયાન્તમભિપ્રેક્ષ્ય શચીભર્તા ભયાતુરઃ ।
૧૨૪.૩૫/૨ઐરાવતં ગજં ત્યક્ત્વા ઇન્દ્રઃ ફેનમથાવિશત્ ॥ ૧૨૪.૩૫॥

૧૨૪.૩૬/૧સ વજ્રપાણિસ્તરસા ફેનેનૈવાહનદ્ રિપુમ્ ।
૧૨૪.૩૬/૨નમુચિર્નાશમગમત્ તસ્ય ભ્રાતા મયોઽનુજઃ ॥ ૧૨૪.૩૬॥

૧૨૪.૩૭/૧ભ્રાતૃહન્તૃવિનાશાય તપસ્તેપે મયો મહત્ ।
૧૨૪.૩૭/૨માયાં ચ વિવિધામાપ દેવાનામતિભીષણામ્ ॥ ૧૨૪.૩૭॥

૧૨૪.૩૮/૧વરાંશ્ચાવાપ્ય તપસા વિષ્ણોર્લોકપરાયણાત્ ।
૧૨૪.૩૮/૨દાનશૌણ્ડઃ પ્રિયાલાપી તદાભવદ્ અસૌ મયઃ ॥ ૧૨૪.૩૮॥

૧૨૪.૩૯/૧અગ્નીંશ્ચ બ્રાહ્મણાન્ પૂજ્ય જેતુમિન્દ્રં કૃતક્ષણઃ ।
૧૨૪.૩૯/૨દાતારં ચ તદાર્થિભ્યઃ સ્તૂયમાનં ચ બન્દિભિઃ ॥ ૧૨૪.૩૯॥

૧૨૪.૪૦/૧વિદિત્વા મઘવા વાયોર્મયં માયાવિનં રિપુમ્ ।
૧૨૪.૪૦/૨ઉપક્રાન્તં સુયુદ્ધાય વિપ્રો ભૂત્વા તમભ્યગાત્ ।
૧૨૪.૪૦/૩શચીભર્તા મયં દૈત્યં પ્રોવાચેદં પુનઃ પુનઃ ॥ ૧૨૪.૪૦॥

૧૨૪.૪૧/૧ઇન્દ્ર ઉવાચ । દેહિ દૈત્યપતે મહ્યમર્થિનેઽપેક્ષિતં વરમ્ ।

૧૨૪.૪૧/૨ત્વાં શ્રુત્વા દાતૃતિલકમાગતોऽહં દ્વિજોત્તમઃ ॥ ૧૨૪.૪૧॥

૧૨૪.૪૨/૧બ્રહ્મોવાચ । મયોऽપિ બ્રાહ્મણં મત્વાऽવદદ્ દત્તં મયા તવ ।
૧૨૪.૪૨/૨વિચારયન્તિ કૃતિનો બહ્વલ્પં વા પુરોऽર્થિનિ ॥ ૧૨૪.૪૨॥

૧૨૪.૪૩/૧ઇત્યુક્તે તુ હરિઃ પ્રાહ સખ્યમિચ્છે હ્યહં ત્વયા ।
૧૨૪.૪૩/૨ઇન્દ્રં મયઃ પુનઃ પ્રાહ કિમનેન દ્વિજોત્તમ ॥ ૧૨૪.૪૩॥

૧૨૪.૪૪/૧ન ત્વયા મમ વૈરં ભોઃ સ્વસ્તીત્યાહ હરિર્મયમ્ ।
૧૨૪.૪૪/૨તત્ત્વં વદેતિ સ હરિર્દૈત્યેનોક્તઃ સ્વકં વપુઃ ॥ ૧૨૪.૪૪॥

૧૨૪.૪૫/૧દર્શયામાસ દૈત્યાય સહસ્રાક્ષં યદ્ ઉચ્યતે ।
૧૨૪.૪૫/૨તતઃ સવિસ્મયો દૈત્યો મયો હરિમુવાચ હ ॥ ૧૨૪.૪૫॥

૧૨૪.૪૬/૧મય ઉવાચ । કિમિદં વજ્રપાણિસ્ત્વં તવાયોગ્યા કૃતિઃ સખે ॥ ૧૨૪.૪૬॥

૧૨૪.૪૭/૧બ્રહ્મોવાચ । પરિષ્વજ્ય વિહસ્યાથ વૃત્તમિત્યબ્રવીદ્ ધરિઃ ।
૧૨૪.૪૭/૨કેનાપિ સાધયન્ત્યત્ર પણ્ડિતાશ્ચ સમીહિતમ્ ॥ ૧૨૪.૪૭॥

૧૨૪.૪૮/૧તતઃ પ્રભૃતિ શક્રસ્ય મયેન મહતી હ્યભૂત્ ।
૧૨૪.૪૮/૨સુપ્રીતિર્મુનિશાર્દૂલ મયો હરિહિતઃ સદા ॥ ૧૨૪.૪૮॥

૧૨૪.૪૯/૧ઇન્દ્રસ્ય ભવનં ગત્વા તસ્મૈ સર્વં ન્યવેદયત્ ।
૧૨૪.૪૯/૨કિં મે કૃત્યમિતિ પ્રાહ મયં માયાવિનં હરિઃ ॥ ૧૨૪.૪૯॥

૧૨૪.૫૦/૧હરયે ચ મયો માયાં પ્રાદાત્ પ્રીત્યા તથા હરિઃ ।
૧૨૪.૫૦/૨પ્રાપ્તઃ સમ્પ્રીતિમાન્ આહ કિં કૃત્યં મય તદ્ વદ ॥ ૧૨૪.૫૦॥

૧૨૪.૫૧/૧મય ઉવાચ । અગસ્ત્યસ્યાશ્રમં ગચ્છ તત્રાસ્તે ગર્ભિણી દિતિઃ ।
૧૨૪.૫૧/૨તસ્યાઃ શુશ્રૂષણં કુર્વન્ન્ આસ્સ્વ તત્ર કિયન્તિ ચ ॥ ૧૨૪.૫૧॥

૧૨૪.૫૨/૧અહાનિ મઘવંસ્તસ્યા ગર્ભમાવિશ્ય વજ્રધૃક્ ।
૧૨૪.૫૨/૨વર્ધમાનં ચ તં છિન્ધિ યાવદ્ વશ્યોऽથવા મૃતિમ્ ।
૧૨૪.૫૨/૩પ્રાપ્નોતિ તાવદ્ વજ્રેણ તતો ન ભવિતા રિપુઃ ॥ ૧૨૪.૫૨॥

૧૨૪.૫૩/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા મયં પૂજ્ય મઘવાન્ એક એવ હિ ।
૧૨૪.૫૩/૨વિનીતવત્ તદા પ્રાયાદ્ દિતિં માતરમઞ્જસા ।
૧૨૪.૫૩/૩શુશ્રૂષમાણસ્તાં દેવીં શક્રો દૈતેયમાતરમ્ ।
૧૨૪.૫૩/૪સા ન જાનાતિ તચ્ચિત્તં શક્રસ્ય દ્વિષતો દિતિઃ ॥ ૧૨૪.૫૩॥

૧૨૪.૫૪/૧ગર્ભે સ્થિતં તુ યદ્ ભૂતં દેવેન્દ્રસ્ય વિચેષ્ટિતમ્ ।

૧૨૪.૫૪/૨અમોઘં તન્ મુનેસ્તેજઃ કશ્યપસ્ય દુરાસદમ્ ॥ ૧૨૪.૫૪॥

૧૨૪.૫૫/૧તતઃ પ્રગૃહ્ય કુલિશં સહસ્રાક્ષઃ પુરંદરઃ ।
૧૨૪.૫૫/૨અન્તઃપ્રવેશકામોઽસૌ બહુકાલં સમાવસન્ ॥ ૧૨૪.૫૫॥

૧૨૪.૫૬/૧સંધ્યોદક્ષીર્ષનિદ્રાં તામવેક્ષ્ય કુલિશાયુધઃ ।
૧૨૪.૫૬/૨ઇદમન્તરમિત્યુક્ત્વા દિત્યાઃ કુક્ષિં સમાવિશત્ ॥ ૧૨૪.૫૬॥

૧૨૪.૫૭/૧અન્તર્વર્તિ ચ યદ્ ભૂતમિન્દ્રં દૃષ્ટ્વા ધૃતાયુધમ્ ।
૧૨૪.૫૭/૨હન્તુકામં તદોવાચ પુનઃ પુનરભીતવત્ ॥ ૧૨૪.૫૭॥

૧૨૪.૫૮/૧ગર્ભસ્થ ઉવાચ । કિં માં ન રક્ષસે વજ્રિન્ ભ્રાતરં
ત્વં જિઘાંસસિ ।
૧૨૪.૫૮/૨નારણે મારણાદ્ અન્યત્ પાતકં વિદ્યતે મહત્ ॥ ૧૨૪.૫૮॥

૧૨૪.૫૯/૧ઋતે યુદ્ધાન્ મહાબાહો શક્ર યુધ્યસ્વ નિર્ગતે ।
૧૨૪.૫૯/૨મયિ તસ્માન્ નૈતદ્ એવં તવ યુક્તં ભવિષ્યતિ ॥ ૧૨૪.૫૯॥

૧૨૪.૬૦/૧શતક્રતુઃ સહસ્રાક્ષઃ શચીભર્તા પુરંદરઃ ।
૧૨૪.૬૦/૨વજ્રપાણિઃ સુરેન્દ્રસ્ત્વં તે ન યુક્તં ભવેત્ પ્રભો ॥ ૧૨૪.૬૦॥

૧૨૪.૬૧/૧અથવા યુદ્ધકામસ્ત્વં મમ નિષ્ક્રમણં યથા ।
૧૨૪.૬૧/૨તથા કુરુ મહાબાહો માર્ગાદ્ અસ્માદ્ અપાસર ॥ ૧૨૪.૬૧॥

૧૨૪.૬૨/૧કુમાર્ગે ન પ્રવર્તન્તે મહાન્તોઽપિ વિપદ્ગતાઃ ।
૧૨૪.૬૨/૨અવિદ્યશ્ચાપ્યશસ્ત્રશ્ચ નૈવ ચાયુધસંગ્રહઃ ॥ ૧૨૪.૬૨॥

૧૨૪.૬૩/૧ત્વં વિદ્યાવાન્ વજ્રપાણે માં નિઘ્નન્ કિં ન લજ્જસે ।
૧૨૪.૬૩/૨કુર્વન્તિ ગર્હિતં કર્મ ન કુલીનાઃ કદાચન ॥ ૧૨૪.૬૩॥

૧૨૪.૬૪/૧હત્વા વા કિં તુ જાયેત યશો વા પુણ્યમેવ વા ।
૧૨૪.૬૪/૨વધ્યન્તે ભ્રાતરઃ કામાદ્ ગર્ભસ્થાઃ કિં નુ પૌરુષમ્ ॥ ૧૨૪.૬૪॥

૧૨૪.૬૫/૧યદિ વા યુદ્ધભક્તિસ્તે મયિ ભ્રાતરસંશયમ્ ।
૧૨૪.૬૫/૨તતો મુષ્ટિં પુરસ્કૃત્ય વજ્રિણેઽસૌ વ્યવસ્થિતઃ ॥ ૧૨૪.૬૫॥

૧૨૪.૬૬/૧બાલઘાતી બ્રહ્મઘાતી તથા વિશ્વાસઘાતકઃ ।
૧૨૪.૬૬/૨એવમ્ભૂતં ફલં શક્ર કસ્માન્ માં હન્તુમુદ્યતઃ ॥ ૧૨૪.૬૬॥

૧૨૪.૬૭/૧યસ્યાજ્ઞયા સર્વમિદં વર્તતે સચરાચરમ્ ।
૧૨૪.૬૭/૨સ હન્તા બાલકં માં વૈ કિં યશઃ કિં તુ પૌરુષમ્ ॥ ૧૨૪.૬૭॥

૧૨૪.૬૮/૧બ્રહ્મોવાચ । એવં બ્રુવન્તં તં ગર્ભં ચિચ્છેદ કુલિશેન સઃ ।
૧૨૪.૬૮/૨ક્રોધાન્ધાનાં લોભિનાં ચ ન ઘૃણા ક્વાપિ વિદ્યતે ॥ ૧૨૪.૬૮॥

૧૨૪.૬૯/૧ન મમાર તતો દુઃખાદ્ આહુસ્તે ભ્રાતરો વયમ્ ।
૧૨૪.૬૯/૨પુનશ્ચિચ્છેદ તાન્ ખણ્ડાન્ મા વધીરિતિ ચાબ્રુવન્ ॥ ૧૨૪.૬૯॥

૧૨૪.૭૦/૧વિશ્વસ્તાન્ માતૃગર્ભસ્થાન્ નિજભ્રાતૄન્ શતક્રતો ।
૧૨૪.૭૦/૨દ્વેષવિધ્વસ્તબુદ્ધીનાં ન ચિત્તે કરુણાકણઃ ॥ ૧૨૪.૭૦॥

૧૨૪.૭૧/૧એવં તુ ખણ્ડિતં ખણ્ડં હસ્તપાદાદિજીવવત્ ।
૧૨૪.૭૧/૨નિર્વિકારં તતો દૃષ્ટ્વા સપ્તસપ્ત સુવિસ્મિતઃ ॥ ૧૨૪.૭૧॥

૧૨૪.૭૨/૧એકવદ્ બહુરૂપાણિ ગર્ભસ્થાનિ શુભાનિ ચ ।
૧૨૪.૭૨/૨રુદન્તિ બહુરૂપાણિ મા રુતેત્યબ્રવીદ્ ધરિઃ ॥ ૧૨૪.૭૨॥

૧૨૪.૭૩/૧તતસ્તે મરુતો જાતા બલવન્તો મહૌજસઃ ।
૧૨૪.૭૩/૨ગર્ભસ્થા એવ તેઽન્યોન્યમૂચુઃ શક્રં ગતભ્રમાઃ ॥ ૧૨૪.૭૩॥

૧૨૪.૭૪/૧અગસ્ત્યં મુનિશાર્દૂલં માતા યસ્યાશ્રમે સ્થિતા ।
૧૨૪.૭૪/૨અસ્મત્પિતા તવ ભ્રાતા સખ્યં તે બહુ મન્યતે ॥ ૧૨૪.૭૪॥

૧૨૪.૭૫/૧અસ્માન્ ઉપરિ સસ્નેહં મનસ્તે વિદ્મહે મુને ।
૧૨૪.૭૫/૨ન યત્ કરોતિ શ્વપચઃ પ્રવૃત્તસ્તત્ર વજ્રધૃક્ ॥ ૧૨૪.૭૫॥

૧૨૪.૭૬/૧ઇત્યેતદ્ વચનં શ્રુત્વા અગસ્ત્યોઽગાત્ સસમ્ભ્રમઃ ।
૧૨૪.૭૬/૨દિતિં સમ્બોધયામાસ વ્યથિતાં ગર્ભવેદનાત્ ॥ ૧૨૪.૭૬॥

૧૨૪.૭૭/૧તત્રાગસ્ત્યઃ શચીકાન્તમશપત્ કુપિતો ભૃશમ્ ॥ ૧૨૪.૭૭॥

૧૨૪.૭૮/૧અગસ્ત્ય ઉવાચ । સંગ્રામે રિપવઃ પૃષ્ઠં પશ્યેયુસ્તે સદા હરે ।
૧૨૪.૭૮/૨જીવતામેવ મરણમેતદ્ એવ હિ માનિનામ્ ।
૧૨૪.૭૮/૩પૃષ્ઠં પલાયમાનાનાં યત્ પશ્યન્ત્યહિતા રણે ॥ ૧૨૪.૭૮॥

૧૨૪.૭૯/૧બ્રહ્મોવાચ । સાપિ તં ગર્ભસંસ્થં ચ શશાપેન્દ્રં
રુષા દિતિઃ ॥ ૧૨૪.૭૯॥

૧૨૪.૮૦/૧દિતિરુવાચ । ન પૌરુષં કૃતં તસ્માચ્છાપોઽયં ભવિતા તવ ।
૧૨૪.૮૦/૨સ્ત્રીભિઃ પરિભવં પ્રાપ્ય રાજ્યાત્ પ્રભ્રશ્યસે હરે ॥ ૧૨૪.૮૦॥

૧૨૪.૮૧/૧બ્રહ્મોવાચ । એતસ્મિન્ન્ અન્તરે તત્ર કશ્યપો વૈ પ્રજાપતિઃ ।

૧૨૪.૮૧/૨પ્રાયાચ્ચ વ્યથિતોઽગસ્ત્યાચ્છ્રુત્વા શક્રવિચેષ્ટિતમ્ ।
૧૨૪.૮૧/૩ગર્ભાન્તરગતઃ શક્રઃ પિતરં પ્રાહ ભીતવત્ ॥ ૧૨૪.૮૧॥

૧૨૪.૮૨/૧શક્ર ઉવાચ । અગસ્ત્યાચ્ચ દિતેશ્ચૈવ બિભેમિ ક્રમિતું
બહિઃ ॥ ૧૨૪.૮૨॥

૧૨૪.૮૩/૧બ્રહ્મોવાચ । એતસ્મિન્ન્ અન્તરે પ્રાપ્ય કશ્યપોઽપિ પ્રજાપતિઃ ।
૧૨૪.૮૩/૨પુત્રકર્મ ચ તદ્ દૃષ્ટ્વા ગર્ભાન્તઃસ્થિતિમેવ ચ ।
૧૨૪.૮૩/૩દિતિશાપમગસ્ત્યસ્ય શ્રુત્વાસૌ દુઃખિતોઽભવત્ ॥ ૧૨૪.૮૩॥

૧૨૪.૮૪/૧કશ્યપ ઉવાચ । નિર્ગચ્છ શક્ર પુત્રૈતત્ પાપં કિં કૃતવાન્ અસિ ।
૧૨૪.૮૪/૨ન નિર્મલકુલોત્પન્ના મનઃ કુર્વન્તિ પાતકે ॥ ૧૨૪.૮૪॥

૧૨૪.૮૫/૧બ્રહ્મોવાચ । સ નિર્ગતો વજ્રપાણિઃ સવ્રીડોઽધોમુખોઽબ્રવીત્ ।
૧૨૪.૮૫/૨તન્મૂર્તિરેવ વદતિ સદસચ્ચેષ્ટિતં નૃણામ્ ॥ ૧૨૪.૮૫॥

૧૨૪.૮૬/૧શક્ર ઉવાચ । યદ્ ઉક્તમત્ર શ્રેયઃ સ્યાત્
તત્કર્તાહમસંશયમ્ ॥ ૧૨૪.૮૬॥

૧૨૪.૮૭/૧બ્રહ્મોવાચ । તતો મમાન્તિકં પ્રાયાલ્લોકપાલૈઃ સ કશ્યપઃ ।
૧૨૪.૮૭/૨સર્વં વૃત્તમથોવાચ પુનઃ પપ્રચ્છ માં સુરૈઃ ॥ ૧૨૪.૮૭॥

૧૨૪.૮૮/૧દિતિગર્ભસ્ય વૈ શાન્તિં સહસ્રાક્ષવિશાપતામ્ ।
૧૨૪.૮૮/૨ગર્ભસ્થાનાં ચ સર્વેષામિન્દ્રેણ સહ મિત્રતામ્ ॥ ૧૨૪.૮૮॥

૧૨૪.૮૯/૧તેષામારોગ્યતાં ચાપિ શચીભર્તુરદોષતામ્ ।
૧૨૪.૮૯/૨અગસ્ત્યદત્તશાપસ્ય વિશાપત્વમપિ ક્રમાત્ ॥ ૧૨૪.૮૯॥

૧૨૪.૯૦/૧તતોઽહમબ્રવં વાક્યં કશ્યપં વિનયાન્વિતમ્ ।
૧૨૪.૯૦/૨પ્રજાપતે કશ્યપ ત્વં વસુભિર્લોકપાલકૈઃ ॥ ૧૨૪.૯૦॥

૧૨૪.૯૧/૧ઇન્દ્રેણ સહિતઃ શીઘ્રં ગૌતમીં યાહિ માનદ ।
૧૨૪.૯૧/૨તત્ર સ્નાત્વા મહેશાનં સ્તુહિ સર્વૈઃ સમન્વિતઃ ॥ ૧૨૪.૯૧॥

૧૨૪.૯૨/૧તતઃ શિવપ્રસાદેન સર્વં શ્રેયો ભવેદ્ ઇતિ ।
૧૨૪.૯૨/૨તથેત્યુક્ત્વા જગામાસૌ કશ્યપો ગૌતમીં તદા ॥ ૧૨૪.૯૨॥

૧૨૪.૯૩/૧સ્નાત્વા તુષ્ટાવ દેવેશમેભિરેવ પદક્રમૈઃ ।
૧૨૪.૯૩/૨સર્વદુઃખાપનોદાય દ્વયમેવ પ્રકીર્તિતમ્ ।
૧૨૪.૯૩/૩ગૌતમી વા પુણ્યનદી શિવો વા કરુણાકરઃ ॥ ૧૨૪.૯૩॥

૧૨૪.૯૪/૧કશ્યપ ઉવાચ । પાહિ શંકર દેવેશ પાહિ લોકનમસ્કૃત ।
૧૨૪.૯૪/૨પાહિ પાવન વાગીશ પાહિ પન્નગભૂષણ ॥ ૧૨૪.૯૪॥

૧૨૪.૯૫/૧પાહિ ધર્મ વૃષારૂઢ પાહિ વેદત્રયેક્ષણ ।
૧૨૪.૯૫/૨પાહિ ગોધર લક્ષ્મીશ પાહિ શર્વ ગજામ્બર ॥ ૧૨૪.૯૫॥

૧૨૪.૯૬/૧પાહિ ત્રિપુરહન્ નાથ પાહિ સોમાર્ધભૂષણ ।
૧૨૪.૯૬/૨પાહિ યજ્ઞેશ સોમેશ પાહ્યભીષ્ટપ્રદાયક ॥ ૧૨૪.૯૬॥

૧૨૪.૯૭/૧પાહિ કારુણ્યનિલય પાહિ મઙ્ગલદાયક ।
૧૨૪.૯૭/૨પાહિ પ્રભવ સર્વસ્ય પાહિ પાલક વાસવ ॥ ૧૨૪.૯૭॥

૧૨૪.૯૮/૧પાહિ ભાસ્કર વિત્તેશ પાહિ બ્રહ્મનમસ્કૃત ।
૧૨૪.૯૮/૨પાહિ વિશ્વેશ સિદ્ધેશ પાહિ પૂર્ણ નમોઽસ્તુ તે ॥ ૧૨૪.૯૮॥

૧૨૪.૯૯/૧ઘોરસંસારકાન્તાર+ ।સંચારોદ્વિગ્નચેતસામ્ ।
૧૨૪.૯૯/૨શરીરિણાં કૃપાસિન્ધો ત્વમેવ શરણં શિવ ॥ ૧૨૪.૯૯॥

૧૨૪.૧૦૦/૧બ્રહ્મોવાચ । એવં સંસ્તુવતસ્તસ્ય પુરતોઽભૂદ્ વૃષધ્વજઃ ।
૧૨૪.૧૦૦/૨વરેણ ચ્છન્દયામાસ કશ્યપં તં પ્રજાપતિમ્ ॥ ૧૨૪.૧૦૦॥

૧૨૪.૧૦૧/૧કશ્યપોઽપિ શિવં પ્રાહ વિનીતવદ્ ઇદં વચઃ ।
૧૨૪.૧૦૧/૨સ પ્રાહ વિસ્તરેણાથ ઇન્દ્રસ્ય તુ વિચેષ્ટિતમ્ ॥ ૧૨૪.૧૦૧॥

૧૨૪.૧૦૨/૧શાપં નાશં ચ પુત્રાણાં પરસ્પરમમિત્રતામ્ ।
૧૨૪.૧૦૨/૨પાપપ્રાપ્તિં તુ શક્રસ્ય શાપપ્રાપ્તિં તથૈવ ચ ।
૧૨૪.૧૦૨/૩તતો વૃષાકપિઃ પ્રાહ દિતિં ચાગસ્ત્યમેવ ચ ॥ ૧૨૪.૧૦૨॥

૧૨૪.૧૦૩/૧શિવ ઉવાચ । મરુતો યે ભવત્પુત્રાઃ પઞ્ચાશચ્ચૈકવર્જિતાઃ ।
૧૨૪.૧૦૩/૨સર્વે ભવેયુઃ સુભગા ભવેયુર્યજ્ઞભાગિનઃ ॥ ૧૨૪.૧૦૩॥

૧૨૪.૧૦૪/૧ઇન્દ્રેણ સહિતા નિત્યં વર્તયેયુર્મુદાન્વિતાઃ ॥ ૧૨૪.૧૦૪॥

૧૨૪.૧૦૫/૧ઇન્દ્રસ્ય તુ હવિર્ભાગો યત્ર યત્ર મખે ભવેત્ ।
૧૨૪.૧૦૫/૨આદૌ તુ મરુતસ્તત્ર ભવેયુર્નાત્ર સંશયઃ ॥ ૧૨૪.૧૦૫॥

૧૨૪.૧૦૬/૧મરુદ્ભિઃ સહિતં શક્રં ન જયેયુઃ કદાચન ।
૧૨૪.૧૦૬/૨જેતા ભવેત્ સર્વદૈવ સુખં તિષ્ઠ પ્રજાપતે ॥ ૧૨૪.૧૦૬॥

૧૨૪.૧૦૭/૧અદ્યપ્રભૃતિ યે કુર્યુરનયાદ્ ભ્રાતૃઘાતનમ્ ।
૧૨૪.૧૦૭/૨વંશચ્છેદો વિપત્તિશ્ચ નિત્યં તેષાં ભવિષ્યતિ ॥ ૧૨૪.૧૦૭॥

૧૨૪.૧૦૮/૧બ્રહ્મોવાચ । અગસ્ત્યમ્ ઋષિશાર્દૂલં શમ્ભુરપ્યાહ
યત્નતઃ ॥ ૧૨૪.૧૦૮॥

૧૨૪.૧૦૯/૧શમ્ભુરુવાચ । ન કુર્યાસ્ત્વં ચ કોપં ચ શચીભર્તરિ વૈ મુને ।
૧૨૪.૧૦૯/૨શમં વ્રજ મહાપ્રાજ્ઞ મરુતસ્ત્વમરા ભવન્ ॥ ૧૨૪.૧૦૯॥

૧૨૪.૧૧૦/૧બ્રહ્મોવાચ । દિતિં ચાપિ શિવઃ પ્રાહ પ્રસન્નો
વૃષભધ્વજઃ ॥ ૧૨૪.૧૧૦॥

૧૨૪.૧૧૧/૧શિવ ઉવાચ । એકો ભૂયાન્ મમ સુતસ્ત્રૈલોક્યૈશ્વર્યમણ્ડિતઃ ।
૧૨૪.૧૧૧/૨ઇત્યેવં ચિન્તયન્તી ત્વં તપસે નિયતાભવઃ ॥ ૧૨૪.૧૧૧॥

૧૨૪.૧૧૨/૧તદ્ એતત્ સફલં તેઽદ્ય પુત્રા બહુગુણાઃ શુભાઃ ।
૧૨૪.૧૧૨/૨અભવન્ બલિનઃ શૂરાસ્તસ્માજ્જહિ મનોરુજમ્ ।
૧૨૪.૧૧૨/૩અન્યાન્ અપિ વરાન્ સુભ્રૂર્યાચસ્વ ગતસમ્ભ્રમા ॥ ૧૨૪.૧૧૨॥

૧૨૪.૧૧૩/૧બ્રહ્મોવાચ । તદ્ એતદ્ વચનં શ્રુત્વા દેવદેવસ્ય સા દિતિઃ ।
૧૨૪.૧૧૩/૨કૃતાઞ્જલિપુટા નત્વા શમ્ભું વાક્યમથાબ્રવીત્ ॥ ૧૨૪.૧૧૩॥

૧૨૪.૧૧૪/૧દિતિરુવાચ । લોકે યદ્ એતત્ પરમં યત્ પિત્રોઃ પુત્રદર્શનમ્ ।
૧૨૪.૧૧૪/૨વિશેષેણ તુ તન્ માતુઃ પ્રિયં સ્યાત્ સુરપૂજિત ॥ ૧૨૪.૧૧૪॥

૧૨૪.૧૧૫/૧તત્રાપિ રૂપસમ્પત્તિ+ ।શૌર્યવિક્રમવાન્ ભવેત્ ।
૧૨૪.૧૧૫/૨એકોઽપિ તનયઃ કિંતુ બહવશ્ચેત્ કિમુચ્યતે ॥ ૧૨૪.૧૧૫॥

૧૨૪.૧૧૬/૧મત્પુત્રાસ્તે પ્રભાવાચ્ચ જેતારો બલિનો ધ્રુવમ્ ।
૧૨૪.૧૧૬/૨ઇન્દ્રસ્ય ભ્રાતરઃ સત્યં પુત્રાશ્ચૈવ પ્રજાપતેઃ ॥ ૧૨૪.૧૧૬॥

૧૨૪.૧૧૭/૧અગસ્ત્યસ્ય પ્રસાદાચ્ચ ગઙ્ગાયાશ્ચ પ્રસાદતઃ ।
૧૨૪.૧૧૭/૨યત્ર દેવ પ્રસાદસ્તે તચ્છુભં કોઽત્ર સંશયઃ ॥ ૧૨૪.૧૧૭॥

૧૨૪.૧૧૮/૧કૃતાર્થાહં તથાપિ ત્વાં ભક્ત્યા વિજ્ઞાપયામ્યહમ્ ।
૧૨૪.૧૧૮/૨શૃણુષ્વ દેવ વચનં કુરુષ્વ ચ જગદ્ધિતમ્ ॥ ૧૨૪.૧૧૮॥

૧૨૪.૧૧૯/૧બ્રહ્મોવાચ । વદેત્યુક્તા જગદ્ધાત્રા દિતિર્નમ્રાબ્રવીદ્ ઇદમ્ ॥ ૧૨૪.૧૧૯॥

૧૨૪.૧૨૦/૧દિતિરુવાચ । સંતતિપ્રાપણં લોકે દુર્લભં સુરવન્દિત ।
૧૨૪.૧૨૦/૨વિશેષેણ પ્રિયં માતુઃ પુત્રશ્ચેત્ કિં નુ વર્ણ્યતે ॥ ૧૨૪.૧૨૦॥

૧૨૪.૧૨૧/૧સ ચાપિ ગુણવાઞ્ શ્રીમાન્ આયુષ્માન્ યદિ જાયતે ।

૧૨૪.૧૨૧/૨કિં તુ સ્વર્ગેણ દેવેશ પારમેષ્ઠ્યપદેન વા ॥ ૧૨૪.૧૨૧॥

૧૨૪.૧૨૨/૧સર્વેષામપિ ભૂતાનામિહામુત્ર ફલૈષિણામ્ ।
૧૨૪.૧૨૨/૨ગુણવત્પુત્રસમ્પ્રાપ્તિરભીષ્ટા સર્વદૈવ ચ ।
૧૨૪.૧૨૨/૩તસ્માદ્ આપ્લવનાદ્ અત્ર ક્રિયતાં સમનુગ્રહઃ ॥ ૧૨૪.૧૨૨॥

૧૨૪.૧૨૩/૧શંકર ઉવાચ । મહાપાપફલં ચેદં યદ્ એતદ્ અનપત્યતા ।
૧૨૪.૧૨૩/૨સ્ત્રિયા વા પુરુષસ્યાપિ વન્ધ્યત્વં યદિ જાયતે ॥ ૧૨૪.૧૨૩॥

૧૨૪.૧૨૪/૧તદ્ અત્ર સ્નાનમાત્રેણ તદ્દોષો નાશમાપ્નુયાત્ ।
૧૨૪.૧૨૪/૨સ્નાત્વા તત્ર ફલં દદ્યાત્ સ્તોત્રમેતચ્ચ યઃ પઠેત્ ॥ ૧૨૪.૧૨૪॥

૧૨૪.૧૨૫/૧સ તુ પુત્રમવાપ્નોતિ ત્રિમાસસ્નાનદાનતઃ ।
૧૨૪.૧૨૫/૨અપુત્રિણી ત્વત્ર સ્નાનં કૃત્વા પુત્રમવાપ્નુયાત્ ॥ ૧૨૪.૧૨૫॥

૧૨૪.૧૨૬/૧ઋતુસ્નાતા તુ યા કાચિત્ તત્ર સ્નાતા સુતાંલ્લભેત્ ।
૧૨૪.૧૨૬/૨ત્રિમાસાભ્યન્તરં યા તુ ગુર્વિણી ભક્તિતસ્ત્વિહ ॥ ૧૨૪.૧૨૬॥

૧૨૪.૧૨૭/૧ફલૈઃ સ્નાત્વા તુ માં પશ્યેત્ સ્તોત્રેણ સ્તૌતિ માં તથા ।
૧૨૪.૧૨૭/૨તસ્યાઃ શક્રસમઃ પુત્રો જાયતે નાત્ર સંશયઃ ॥ ૧૨૪.૧૨૭॥

૧૨૪.૧૨૮/૧પિતૃદોષૈશ્ચ યે પુત્રં ન લભન્તે દિતે શ઼ૃણુ ।
૧૨૪.૧૨૮/૨ધનાપહારદોષૈશ્ચ તત્રૈષા નિષ્કૃતિઃ પરા ॥ ૧૨૪.૧૨૮॥

૧૨૪.૧૨૯/૧તત્રૈષાં પિણ્ડદાનેન પિતૃણાં પ્રીણનેન ચ ।
૧૨૪.૧૨૯/૨કિંચિત્ સુવર્ણદાનેન તતઃ પુત્રો ભવેદ્ ધ્રુવમ્ ॥ ૧૨૪.૧૨૯॥

૧૨૪.૧૩૦/૧યે ન્યાસાદ્યપહર્તારો રત્નાપહ્નવકારકાઃ ।
૧૨૪.૧૩૦/૨શ્રાદ્ધકર્મવિહીનાશ્ચ તેષાં વંશો ન વર્ધતે ॥ ૧૨૪.૧૩૦॥

૧૨૪.૧૩૧/૧દોષિણાં તુ પરેતાનાં ગતિરેષા ભવેદ્ ઇતિ ।
૧૨૪.૧૩૧/૨સંતતિર્જાયતાં શ્લાઘ્યા જીવતાં તીર્થસેવનાત્ ॥ ૧૨૪.૧૩૧॥

૧૨૪.૧૩૨/૧સંગમે દિતિગઙ્ગાયાઃ સ્નાત્વા સિદ્ધેશ્વરં પ્રભુમ્ ।
૧૨૪.૧૩૨/૨અનાદ્યપારમજરં ચિત્સદાનન્દવિગ્રહમ્ ॥ ૧૨૪.૧૩૨॥

૧૨૪.૧૩૩/૧દેવર્ષિસિદ્ધગન્ધર્વ+ ।યોગીશ્વરનિષેવિતમ્ ।
૧૨૪.૧૩૩/૨લિઙ્ગાત્મકં મહાદેવં જ્યોતિર્મયમનામયમ્ ॥ ૧૨૪.૧૩૩॥

૧૨૪.૧૩૪/૧પૂજયિત્વોપચારૈશ્ચ નિત્યં ભક્ત્યા યતવ્રતઃ ।
૧૨૪.૧૩૪/૨સ્તોત્રેણાનેન યઃ સ્તૌતિ ચતુર્દશ્યષ્ટમીષુ ચ ॥ ૧૨૪.૧૩૪॥

૧૨૪.૧૩૫/૧યથાશક્ત્યા સ્વર્ણદાનં બ્રાહ્મણાનાં ચ ભોજનમ્ ।
૧૨૪.૧૩૫/૨યઃ કરોત્યત્ર ગઙ્ગાયાં સ પુત્રશતમાપ્નુયાત્ ॥ ૧૨૪.૧૩૫॥

૧૨૪.૧૩૬/૧સમ્પ્રાપ્ય સકલાન્ કામાન્ અન્તે શિવપુરં વ્રજેત્ ।
૧૨૪.૧૩૬/૨સ્તોત્રેણાનેન યઃ કશ્ચિદ્ યત્ર ક્વાપિ સ્તવીતિ મામ્ ।
૧૨૪.૧૩૬/૩ષણ્માસાત્ પુત્રમાપ્નોતિ અપિ વન્ધ્યાપ્યશઙ્કિતમ્ ॥ ૧૨૪.૧૩૬॥

૧૨૪.૧૩૭/૧બ્રહ્મોવાચ । તતઃ પ્રભૃતિ તત્ તીર્થં પુત્રતીર્થમુદાહૃતમ્ ।
૧૨૪.૧૩૭/૨તત્ર તુ સ્નાનદાનાદ્યૈઃ સર્વકામાન્ અવાપ્નુયાત્ ॥ ૧૨૪.૧૩૭॥

૧૨૪.૧૩૮/૧મરુદ્ભિઃ સહ મૈત્ર્યેણ મિત્રતીર્થં તદ્ ઉચ્યતે ।
૧૨૪.૧૩૮/૨નિષ્પાપત્વેન ચેન્દ્રસ્ય શક્રતીર્થં તદ્ ઉચ્યતે ॥ ૧૨૪.૧૩૮॥

૧૨૪.૧૩૯/૧ઐન્દ્રીં શ્રિયં યત્ર લેભે તત્ તીર્થં કમલાભિધમ્ ।
૧૨૪.૧૩૯/૨એતાનિ સર્વતીર્થાનિ સર્વાભીષ્ટપ્રદાનિ હિ ॥ ૧૨૪.૧૩૯॥

૧૨૪.૧૪૦/૧સર્વં ભવિષ્યતીત્યુક્ત્વા શિવશ્ચાન્તરધીયત ।
૧૨૪.૧૪૦/૨કૃતકૃત્યાશ્ચ તે જગ્મુઃ સર્વ એવ યથાગતમ્ ।
૧૨૪.૧૪૦/૩તીર્થાનાં પુણ્યદં તત્ર લક્ષમેકં પ્રકીર્તિતમ્ ॥ ૧૨૪.૧૪૦॥

૧૨૫.૧/૧બ્રહ્મોવાચ । યમતીર્થમિતિ ખ્યાતં પિતૃણાં પ્રીતિવર્ધનમ્ ।
૧૨૫.૧/૨દૃષ્ટાદૃષ્ટેષ્ટદં સર્વ+ ।દેવર્ષિગણસેવિતમ્ ॥ ૧૨૫.૧॥

૧૨૫.૨/૧તસ્ય પ્રભાવં વક્ષ્યામિ સર્વપાપપ્રણાશનમ્ ।
૧૨૫.૨/૨અનુહ્રાદ ઇતિ ખ્યાતઃ કપોતો બલવાન્ અભૂત્ ॥ ૧૨૫.૨॥

૧૨૫.૩/૧તસ્ય ભાર્યા હેતિનામ્ની પક્ષિણી કામરૂપિણી ।
૧૨૫.૩/૨મૃત્યોઃ પૌત્રો હ્યનુહ્રાદો દૌહિત્રી હેતિરેવ ચ ॥ ૧૨૫.૩॥

૧૨૫.૪/૧કાલેનાથ તયોઃ પુત્રાઃ પૌત્રાશ્ચૈવ બભૂવિરે ।
૧૨૫.૪/૨તસ્ય શત્રુશ્ચ બલવાન્ ઉલૂકો નામ પક્ષિરાટ્ ॥ ૧૨૫.૪॥

૧૨૫.૫/૧તસ્ય પુત્રાશ્ચ પૌત્રાશ્ચ આગ્નેયાસ્તે બલોત્કટાઃ ।
૧૨૫.૫/૨તયોશ્ચ વૈરમભવદ્ બહુકાલં દ્વિજન્મનોઃ ॥ ૧૨૫.૫॥

૧૨૫.૬/૧ગઙ્ગાયા ઉત્તરે તીરે કપોતસ્યાશ્રમોઽભવત્ ।
૧૨૫.૬/૨તસ્યાશ્ચ દક્ષિણે કૂલ ઉલૂકો નામ પક્ષિરાટ્ ॥ ૧૨૫.૬॥

૧૨૫.૭/૧વાસં ચક્રે તત્ર પુત્રૈઃ પૌત્રૈશ્ચ દ્વિજસત્તમ ।

૧૨૫.૭/૨તયોશ્ચ યુદ્ધમભવદ્ બહુકાલં વિરુદ્ધયોઃ ॥ ૧૨૫.૭॥

૧૨૫.૮/૧પુત્રૈઃ પૌત્રૈશ્ચ વૃતયોર્બલિનોર્બલિભિઃ સહ ।
૧૨૫.૮/૨ઉલૂકો વા કપોતો વા નૈવાપ્નોતિ જયાજયૌ ॥ ૧૨૫.૮॥

૧૨૫.૯/૧કપોતો યમમારાધ્ય મૃત્યું પૈતામહં તથા ।
૧૨૫.૯/૨યામ્યમસ્ત્રમવાપ્યાથ સર્વેભ્યોઽપ્યધિકોઽભવત્ ॥ ૧૨૫.૯॥

૧૨૫.૧૦/૧તથોલૂકોઽગ્નિમારાધ્ય બલવાન્ અભવદ્ ભૃશમ્ ।
૧૨૫.૧૦/૨વરૈરુન્મત્તયોર્યુદ્ધમભવચ્ચાતિભીષણમ્ ॥ ૧૨૫.૧૦॥

૧૨૫.૧૧/૧તત્રાગ્નેયમુલૂકોઽપિ કપોતાયાસ્ત્રમાક્ષિપત્ ।
૧૨૫.૧૧/૨કપોતોઽપ્યથ પાશાન્ વૈ યામ્યાન્ આક્ષિપ્ય શત્રવે ॥ ૧૨૫.૧૧॥

૧૨૫.૧૨/૧ઉલૂકાયાથ દણ્ડં ચ મૃત્યુપાશાન્ અવાસૃજત્ ।
૧૨૫.૧૨/૨પુનસ્તદ્ અભવદ્ યુદ્ધં પુરાડિબકયોર્યથા ॥ ૧૨૫.૧૨॥

૧૨૫.૧૩/૧હેતિઃ કપોતકી દૃષ્ટ્વા જ્વલનં પ્રાપ્તમન્તિકે ।
૧૨૫.૧૩/૨પતિવ્રતા મહાયુદ્ધે ભર્તુઃ સા દુઃખવિહ્વલા ॥ ૧૨૫.૧૩॥

૧૨૫.૧૪/૧અગ્નિના વેષ્ટ્યમાનાંશ્ચ પુત્રાન્ દૃષ્ટ્વા વિશેષતઃ ।
૧૨૫.૧૪/૨સા ગત્વા જ્વલનં હેતિસ્તુષ્ટાવ વિવિધોક્તિભિઃ ॥ ૧૨૫.૧૪॥

૧૨૫.૧૫/૧હેતિરુવાચ । રૂપં ન દાનં ન પરોક્ષમસ્તિ ।
૧૨૫.૧૫/૨યસ્યાત્મભૂતં ચ પદાર્થજાતમ્ ।
૧૨૫.૧૫/૩અશ્નન્તિ હવ્યાનિ ચ યેન દેવાઃ ।
૧૨૫.૧૫/૪સ્વાહાપતિં યજ્ઞભુજં નમસ્યે ॥ ૧૨૫.૧૫॥

૧૨૫.૧૬/૧મુખભૂતં ચ દેવાનાં દેવાનાં હવ્યવાહનમ્ ।
૧૨૫.૧૬/૨હોતારં ચાપિ દેવાનાં દેવાનાં દૂતમેવ ચ ॥ ૧૨૫.૧૬॥

૧૨૫.૧૭/૧તં દેવં શરણં યામિ આદિદેવં વિભાવસુમ્ ।
૧૨૫.૧૭/૨અન્તઃ સ્થિતઃ પ્રાણરૂપો બહિશ્ચાન્નપ્રદો હિ યઃ ।
૧૨૫.૧૭/૩યો યજ્ઞસાધનં યામિ શરણં તં ધનંજયમ્ ॥ ૧૨૫.૧૭॥

૧૨૫.૧૮/૧અગ્નિરુવાચ । અમોઘમેતદ્ અસ્ત્રં મે ન્યસ્તં યુદ્ધે કપોતકિ ।
૧૨૫.૧૮/૨યત્ર વિશ્રમયેદ્ અસ્ત્રં તન્ મે બ્રૂહિ પતિવ્રતે ॥ ૧૨૫.૧૮॥

૧૨૫.૧૯/૧કપોત્યુવાચ । મયિ વિશ્રમ્યતામસ્ત્રં ન પુત્રે ન ચ ભર્તરિ ।
૧૨૫.૧૯/૨સત્યવાગ્ ભવ હવ્યેશ જાતવેદો નમોઽસ્તુ તે ॥ ૧૨૫.૧૯॥

૧૨૫.૨૦/૧જાતવેદા ઉવાચ । તુષ્ટોઽસ્મિ તવ વાક્યેન ભર્તૃભક્ત્યા પતિવ્રતે ।
૧૨૫.૨૦/૨તવાપિ ભર્તૃપુત્રાણાં હેતિ ક્ષેમં દદામ્યહમ્ ॥ ૧૨૫.૨૦॥

૧૨૫.૨૧/૧આગ્નેયમેતદ્ અસ્ત્રં મે ન ભર્તારં સુતાન્ અપિ ।
૧૨૫.૨૧/૨ન ત્વાં દહેત્ તતો યાહિ સુખેન ત્વં કપોતકિ ॥ ૧૨૫.૨૧॥

૧૨૫.૨૨/૧બ્રહ્મોવાચ । એતસ્મિન્ન્ અન્તરે તત્ર ઉલૂકી દદૃશે પતિમ્ ।
૧૨૫.૨૨/૨વેષ્ટ્યમાનં યામ્યપાશૈર્યમદણ્ડેન તાડિતમ્ ।
૧૨૫.૨૨/૩ઉલૂકી દુઃખિતા ભૂત્વા યમં પ્રાયાદ્ ભયાતુરા ॥ ૧૨૫.૨૨॥

૧૨૫.૨૩/૧ઉલૂક્યુવાચ । ત્વદ્ભીતા અનુદ્રવન્તે જનાસ્- ।
૧૨૫.૨૩/૨ત્વદ્ભીતા બ્રહ્મચર્યં ચરન્તિ ।
૧૨૫.૨૩/૩ત્વદ્ભીતાઃ સાધુ ચરન્તિ ધીરાસ્- ।
૧૨૫.૨૩/૪ત્વદ્ભીતાઃ કર્મનિષ્ઠા ભવન્તિ ॥ ૧૨૫.૨૩॥

૧૨૫.૨૪/૧ત્વદ્ભીતા અનાશકમાચરન્તિ ।
૧૨૫.૨૪/૨ગ્રામાદ્ અરણ્યમભિ યચ્ચરન્તિ ।
૧૨૫.૨૪/૩ત્વદ્ભીતાઃ સૌમ્યતામાશ્રયન્તે ।
૧૨૫.૨૪/૪ત્વદ્ભીતાઃ સોમપાનં ભજન્તે ।
૧૨૫.૨૪/૫ત્વદ્ભીતાશ્ચાન્નગોદાનનિષ્ઠાસ્- ।
૧૨૫.૨૪/૬ત્વદ્ભીતા બ્રહ્મવાદં વદન્તિ ॥ ૧૨૫.૨૪॥

૧૨૫.૨૫/૧બ્રહ્મોવાચ । એવં બ્રુવત્યાં તસ્યાં તામાહ દક્ષિણદિક્પતિઃ ॥ ૧૨૫.૨૫॥

૧૨૫.૨૬/૧યમ ઉવાચ । વરં વરય ભદ્રં તે દાસ્યેઽહં મનસઃ
પ્રિયમ્ ॥ ૧૨૫.૨૬॥

૧૨૫.૨૭/૧બ્રહ્મોવાચ । યમસ્યેતિ વચઃ શ્રુત્વા સા તમાહ પતિવ્રતા ॥ ૧૨૫.૨૭॥

૧૨૫.૨૮/૧ઉલૂક્યુવાચ । ભર્તા મે વેષ્ટિતઃ પાશૈર્દણ્ડેનાભિહતસ્તવ ।
૧૨૫.૨૮/૨તસ્માદ્ રક્ષ સુરશ્રેષ્ઠ પુત્રાન્ ભર્તારમેવ ચ ॥ ૧૨૫.૨૮॥

૧૨૫.૨૯/૧બ્રહ્મોવાચ । તદ્વાક્યાત્ કૃપયા યુક્તો યમઃ પ્રાહ પુનઃ
પુનઃ ॥ ૧૨૫.૨૯॥

૧૨૫.૩૦/૧યમ ઉવાચ । પાશાનાં ચાપિ દણ્ડસ્ય સ્થાનં વદ
શુભાનને ॥ ૧૨૫.૩૦॥

૧૨૫.૩૧/૧બ્રહ્મોવાચ । સા પ્રોવાચ યમં દેવં મયિ પાશાસ્ત્વયેરિતાઃ ।

૧૨૫.૩૧/૨આવિશન્તુ જગન્નાથ દણ્ડો મય્યેવ સંવિશેત્ ।
૧૨૫.૩૧/૩તતઃ પ્રોવાચ ભગવાન્ યમસ્તાં કૃપયા પુનઃ ॥ ૧૨૫.૩૧॥

૧૨૫.૩૨/૧યમ ઉવાચ । તવ ભર્તા ચ પુત્રાશ્ચ સર્વે જીવન્તુ
વિજ્વરાઃ ॥ ૧૨૫.૩૨॥

૧૨૫.૩૩/૧બ્રહ્મોવાચ । ન્યવારયદ્ યમઃ પાશાન્ આગ્નેયાસ્ત્રં તુ હવ્યવાટ્ ।
૧૨૫.૩૩/૨કપોતોલૂકયોશ્ચાપિ પ્રીતિં વૈ ચક્રતુઃ સુરૌ ।
૧૨૫.૩૩/૩આહતુશ્ચ દ્વિજન્માનૌ વ્રિયતાં વર ઈપ્સિતઃ ॥ ૧૨૫.૩૩॥

૧૨૫.૩૪/૧પક્ષિણાવૂચતુઃ । ભવતોર્દર્શનં લબ્ધં વૈરવ્યાજેન દુષ્કરમ્ ।
૧૨૫.૩૪/૨વયં ચ પક્ષિણઃ પાપાઃ કિં વરેણ સુરોત્તમૌ ॥ ૧૨૫.૩૪॥

૧૨૫.૩૫/૧અથ દેયો વરોઽસ્માકં ભવદ્ભ્યાં પ્રીતિપૂર્વકમ્ ।
૧૨૫.૩૫/૨નાત્માર્થમનુયાચાવો દીયમાનં વરં શુભમ્ ॥ ૧૨૫.૩૫॥

૧૨૫.૩૬/૧આત્માર્થં યસ્તુ યાચેત સ શોચ્યો હિ સુરેશ્વરૌ ।
૧૨૫.૩૬/૨જીવિતં સફલં તસ્ય યઃ પરાર્થોદ્યતઃ સદા ॥ ૧૨૫.૩૬॥

૧૨૫.૩૭/૧અગ્નિરાપો રવિઃ પૃથ્વી ધાન્યાનિ વિવિધાનિ ચ ।
૧૨૫.૩૭/૨પરાર્થં વર્તનં તેષાં સતાં ચાપિ વિશેષતઃ ॥ ૧૨૫.૩૭॥

૧૨૫.૩૮/૧બ્રહ્માદયોઽપિ હિ યતો યુજ્યન્તે મૃત્યુના સહ ।
૧૨૫.૩૮/૨એવં જ્ઞાત્વા તુ દેવેશૌ વૃથા સ્વાર્થપરિશ્રમઃ ॥ ૧૨૫.૩૮॥

૧૨૫.૩૯/૧જન્મના સહ યત્ પુંસાં વિહિતં પરમેષ્ઠિના ।
૧૨૫.૩૯/૨કદાચિન્ નાન્યથા તદ્ વૈ વૃથા ક્લિશ્યન્તિ જન્તવઃ ॥ ૧૨૫.૩૯॥

૧૨૫.૪૦/૧તસ્માદ્ યાચાવહે કિંચિદ્ ધિતાય જગતાં શુભમ્ ।
૧૨૫.૪૦/૨ગુણદાયિ તુ સર્વેષાં તદ્ યુવામનુમન્યતામ્ ॥ ૧૨૫.૪૦॥

૧૨૫.૪૧/૧બ્રહ્મોવાચ । તાવાહતુરુભૌ દેવૌ પક્ષિણૌ લોકવિશ્રુતૌ ।
૧૨૫.૪૧/૨ધર્મસ્ય યશસોઽવાપ્ત્યૈ લોકાનાં હિતકામ્યયા ॥ ૧૨૫.૪૧॥

૧૨૫.૪૨/૧પક્ષિણાવૂચતુઃ । આવાભ્યામાશ્રમૌ તીર્થે ગઙ્ગાયા ઉભયે તટે ।
૧૨૫.૪૨/૨ભવેતાં જગતાં નાથાવેષ એવ પરો વરઃ ॥ ૧૨૫.૪૨॥

૧૨૫.૪૩/૧સ્નાનં દાનં જપો હોમઃ પિતૃણાં ચાપિ પૂજનમ્ ।
૧૨૫.૪૩/૨સુકૃતી દુષ્કૃતી વાપિ યઃ કરોતિ યથા તથા ।
૧૨૫.૪૩/૩સર્વં તદ્ અક્ષયં પુણ્યં સ્યાદ્ ઇત્યેષ પરો વરઃ ॥ ૧૨૫.૪૩॥

૧૨૫.૪૪/૧દેવાવૂચતુઃ । એવમસ્તુ તથા ચાન્યત્ સુપ્રીતૌ તુ બ્રવાવહૈ ॥ ૧૨૫.૪૪॥

૧૨૫.૪૫/૧યમ ઉવાચ । ઉત્તરે ગૌતમીતીરે યમસ્તોત્રં પઠન્તિ યે ।
૧૨૫.૪૫/૨તેષાં સપ્તસુ વંશેષુ નાકાલે મૃત્યુમાપ્નુયાત્ ॥ ૧૨૫.૪૫॥

૧૨૫.૪૬/૧પુરુષો ભાજનં ચ સ્યાત્ સર્વદા સર્વસમ્પદામ્ ।
૧૨૫.૪૬/૨યસ્ત્વિદં પઠતે નિત્યં મૃત્યુસ્તોત્રં જિતાત્મવાન્ ॥ ૧૨૫.૪૬॥

૧૨૫.૪૭/૧અષ્ટાશીતિસહસ્રૈશ્ચ વ્યાધિભિર્ન સ બાધ્યતે ।
૧૨૫.૪૭/૨અસ્મિંસ્તીર્થે દ્વિજશ્રેષ્ઠૌ ત્રિમાસાદ્ ગુર્વિણી સતી ॥ ૧૨૫.૪૭॥

૧૨૫.૪૮/૧અર્વાગ્વન્ધ્યા ચ ષણ્માસાત્ સપ્તાહં સ્નાનમાચરેત્ ।
૧૨૫.૪૮/૨વીરસૂઃ સા ભવેન્ નારી શતાયુઃ સ સુતો ભવેત્ ॥ ૧૨૫.૪૮॥

૧૨૫.૪૯/૧લક્ષ્મીવાન્ મતિમાઞ્ શૂરઃ પુત્રપૌત્રવિવર્ધનઃ ।
૧૨૫.૪૯/૨તત્ર પિણ્ડાદિદાનેન પિતરો મુક્તિમાપ્નુયુઃ ।
૧૨૫.૪૯/૩મનોવાક્કાયજાત્ પાપાત્ સ્નાનાન્ મુક્તો ભવેન્ નરઃ ॥ ૧૨૫.૪૯॥

૧૨૫.૫૦/૧બ્રહ્મોવાચ । યમવાક્યાદ્ અનુ તથા હવ્યવાડ્ આહ પક્ષિણૌ ॥ ૧૨૫.૫૦॥

૧૨૫.૫૧/૧અગ્નિરુવાચ । મત્સ્તોત્રં દક્ષિણે તીરે યે પઠન્તિ યતવ્રતાઃ ।
૧૨૫.૫૧/૨તેષામારોગ્યમૈશ્વર્યં લક્ષ્મીં રૂપં દદામ્યહમ્ ॥ ૧૨૫.૫૧॥

૧૨૫.૫૨/૧ઇદં સ્તોત્રં તુ યઃ કશ્ચિદ્ યત્ર ક્વાપિ પઠેન્ નરઃ ।
૧૨૫.૫૨/૨નૈવાગ્નિતો ભયં તસ્ય લિખિતેઽપિ ગૃહે સ્થિતે ॥ ૧૨૫.૫૨॥

૧૨૫.૫૩/૧સ્નાનં દાનં ચ યઃ કુર્યાદ્ અગ્નિતીર્થે શુચિર્નરઃ ।
૧૨૫.૫૩/૨અગ્નિષ્ટોમફલં તસ્ય ભવેદ્ એવ ન સંશયઃ ॥ ૧૨૫.૫૩॥

૧૨૫.૫૪/૧બ્રહ્મોવાચ । તતઃ પ્રભૃતિ તત્ તીર્થં યામ્યમાગ્નેયમેવ ચ ।
૧૨૫.૫૪/૨કપોતં ચ તથોલૂકં હેત્યુલૂકં વિદુર્બુધાઃ ॥ ૧૨૫.૫૪॥

૧૨૫.૫૫/૧તત્ર ત્રીણિ સહસ્રાણિ તાવન્ત્યેવ શતાનિ ચ ।
૧૨૫.૫૫/૨પુનર્નવતિતીર્થાનિ પ્રત્યેકં મુક્તિભાજનમ્ ॥ ૧૨૫.૫૫॥

૧૨૫.૫૬/૧તેષુ સ્નાનેન દાનેન પ્રેતીભૂતાશ્ચ યે નરાઃ ।
૧૨૫.૫૬/૨પૂતાસ્તે પુત્રવિત્તાઢ્યા આક્રમેયુર્દિવં શુભાઃ ॥ ૧૨૫.૫૬॥

૧૨૬.૧/૧બ્રહ્મોવાચ । તપસ્તીર્થમિતિ ખ્યાતં તપોવૃદ્ધિકરં મહત્ ।
૧૨૬.૧/૨સર્વકામપ્રદં પુણ્યં પિતૄણાં પ્રીતિવર્ધનમ્ ॥ ૧૨૬.૧॥

૧૨૬.૨/૧તસ્મિંસ્તીર્થે તુ યદ્ વૃત્તં શ઼ૃણુ પાપપ્રણાશનમ્ ।
૧૨૬.૨/૨અપામગ્નેશ્ચ સંવાદમ્ ઋષીણાં ચ પરસ્પરમ્ ॥ ૧૨૬.૨॥

૧૨૬.૩/૧અપો જ્યેષ્ઠતમાઃ કેચિન્ મેનિરેઽગ્નિં તથાપરે ।
૧૨૬.૩/૨એવં બ્રુવન્તો મુનયઃ સંવાદં ચાગ્નિવારિણોઃ ॥ ૧૨૬.૩॥

૧૨૬.૪/૧વિનાગ્નિં જીવનં ક્વ સ્યાજ્જીવભૂતો યતોઽનલઃ ।
૧૨૬.૪/૨આત્મભૂતો હવ્યભૂતશ્ચાગ્નિના જાયતેઽખિલમ્ ॥ ૧૨૬.૪॥

૧૨૬.૫/૧અગ્નિના ધ્રિયતે લોકો હ્યગ્નિર્જ્યોતિર્મયં જગત્ ।
૧૨૬.૫/૨તસ્માદ્ અગ્નેઃ પરં નાસ્તિ પાવનં દૈવતં મહત્ ॥ ૧૨૬.૫॥

૧૨૬.૬/૧અન્તર્જ્યોતિઃ સ એવોક્તઃ પરં જ્યોતિઃ સ એવ હિ ।
૧૨૬.૬/૨વિનાગ્નિના કિંચિદ્ અસ્તિ યસ્ય ધામ જગત્ત્રયમ્ ॥ ૧૨૬.૬॥

૧૨૬.૭/૧તસ્માદ્ અગ્નેઃ પરં નાસ્તિ ભૂતાનાં જ્યૈષ્ઠ્યભાજનમ્ ।
૧૨૬.૭/૨યોષિત્ક્ષેત્રેઽર્પિતં બીજં પુરુષેણ યથા તથા ॥ ૧૨૬.૭॥

૧૨૬.૮/૧તસ્ય દેહાદિકા શક્તિઃ કૃશાનોરેવ નાન્યથા ।
૧૨૬.૮/૨દેવાનાં હિ મુખં વહ્નિસ્તસ્માન્ નાતઃ પરં વિદુઃ ॥ ૧૨૬.૮॥

૧૨૬.૯/૧અપરે તુ હ્યપાં જ્યૈષ્ઠ્યં મેનિરે વેદવાદિનઃ ।
૧૨૬.૯/૨અદ્ભિઃ સમ્પત્સ્યતે હ્યન્નં શુચિરદ્ભિઃ પ્રજાયતે ॥ ૧૨૬.૯॥

૧૨૬.૧૦/૧અદ્ભિરેવ ધૃતં સર્વમાપો વૈ માતરઃ સ્મૃતાઃ ।
૧૨૬.૧૦/૨ત્રૈલોક્યજીવનં વારિ વદન્તીતિ પુરાવિદઃ ॥ ૧૨૬.૧૦॥

૧૨૬.૧૧/૧ઉત્પન્નમમૃતં હ્યદ્ભ્યસ્તાભ્યશ્ચૌષધિસમ્ભવઃ ।
૧૨૬.૧૧/૨અગ્નિર્જ્યેષ્ઠ ઇતિ પ્રાહુરાપો જ્યેષ્ઠતમાઃ પરે ॥ ૧૨૬.૧૧॥

૧૨૬.૧૨/૧એવં મીમાંસમાનાસ્તે ઋષયો વેદવાદિનઃ ।
૧૨૬.૧૨/૨વિરુદ્ધવાદિનો માં ચ સમભ્યેત્યેદમબ્રુવન્ ॥ ૧૨૬.૧૨॥

૧૨૬.૧૩/૧ઋષય ઊચુઃ । અગ્નેરપાં વદ જ્યૈષ્ઠ્યં ત્રૈલોક્યસ્ય
ભવાન્ પ્રભુઃ ॥ ૧૨૬.૧૩॥

૧૨૬.૧૪/૧બ્રહ્મોવાચ । અહમપ્યબ્રવં પ્રાપ્તાન્ ઋષીન્ સર્વાન્ યતવ્રતાન્ ।
૧૨૬.૧૪/૨ઉભૌ પૂજ્યતમૌ લોક ઉભાભ્યાં જાયતે જગત્ ॥ ૧૨૬.૧૪॥

૧૨૬.૧૫/૧ઉભાભ્યાં જાયતે હવ્યં કવ્યં ચામૃતમેવ ચ ।
૧૨૬.૧૫/૨ઉભાભ્યાં જીવનં લોકે શરીરસ્ય ચ ધારણમ્ ॥ ૧૨૬.૧૫॥

૧૨૬.૧૬/૧નાનયોશ્ચ વિશેષોઽસ્તિ તતો જ્યૈષ્ઠ્યં સમં મતમ્ ।
૧૨૬.૧૬/૨તતો મદ્વચનાજ્જ્યૈષ્ઠ્યમુભયોર્નૈવ કસ્યચિત્ ॥ ૧૨૬.૧૬॥

૧૨૬.૧૭/૧જ્યૈષ્ઠ્યમન્યતરસ્યેતિ મેનિરે ઋષિસત્તમાઃ ।
૧૨૬.૧૭/૨ન તૃપ્તા મમ વાક્યેન જગ્મુર્વાયું તપસ્વિનઃ ॥ ૧૨૬.૧૭॥

૧૨૬.૧૮/૧મુનય ઊચુઃ । કસ્ય જ્યૈષ્ઠ્યં ભવાન્ પ્રાણો વાયો સત્યં
ત્વયિ સ્થિતમ્ ॥ ૧૨૬.૧૮॥

૧૨૬.૧૯/૧બ્રહ્મોવાચ । વાયુરાહાનલો જ્યેષ્ઠઃ સર્વમગ્નૌ પ્રતિષ્ઠિતમ્ ।
૧૨૬.૧૯/૨નેત્યુક્ત્વાન્યોન્યમ્ ઋષયો જગ્મુસ્તેઽપિ વસુંધરામ્ ॥ ૧૨૬.૧૯॥

૧૨૬.૨૦/૧મુનય ઊચુઃ । સત્યં ભૂમે વદ જ્યૈષ્ઠ્યમાધારાસિ ચરાચરે ॥ ૧૨૬.૨૦॥

૧૨૬.૨૧/૧બ્રહ્મોવાચ । ભૂમિરપ્યાહ વિનયાદ્ આગતાંસ્તાન્ ઋષીન્ ઇદમ્ ॥ ૧૨૬.૨૧॥

૧૨૬.૨૨/૧ભૂમિરુવાચ । મમાપ્યાધારભૂતાઃ સ્યુરાપો દેવ્યઃ સનાતનાઃ ।
૧૨૬.૨૨/૨અદ્ભ્યસ્તુ જાયતે સર્વં જ્યૈષ્ઠ્યમપ્સુ પ્રતિષ્ઠિતમ્ ॥ ૧૨૬.૨૨॥

૧૨૬.૨૩/૧બ્રહ્મોવાચ । નેત્યુક્ત્વાન્યોન્યમ્ ઋષયો જગ્મુઃ ક્ષીરોદશાયિનમ્ ।
૧૨૬.૨૩/૨તુષ્ટુવુર્વિવિધૈઃ સ્તોત્રૈઃ શઙ્ખચક્રગદાધરમ્ ॥ ૧૨૬.૨૩॥

૧૨૬.૨૪/૧ઋષય ઊચુઃ । યો વેદ સર્વં ભુવનં ભવિષ્યદ્ ।
૧૨૬.૨૪/૨યજ્જાયમાનં ચ ગુહાનિવિષ્ટમ્ ।
૧૨૬.૨૪/૩લોકત્રયં ચિત્રવિચિત્રરૂપમ્ ।
૧૨૬.૨૪/૪અન્તે સમસ્તં ચ યમાવિવેશ ॥ ૧૨૬.૨૪॥

૧૨૬.૨૫/૧યદ્ અક્ષરં શાશ્વતમપ્રમેયમ્ ।
૧૨૬.૨૫/૨યં વેદવેદ્યમ્ ઋષયો વદન્તિ ।
૧૨૬.૨૫/૩યમાશ્રિતાઃ સ્વેપ્સિતમાપ્નુવન્તિ ।
૧૨૬.૨૫/૪તદ્ વસ્તુ સત્યં શરણં વ્રજામઃ ॥ ૧૨૬.૨૫॥

૧૨૬.૨૬/૧ભૂતં મહાભૂતજગત્પ્રધાનમ્ ।
૧૨૬.૨૬/૨ન વિન્દતે યોગિનો વિષ્ણુરૂપમ્ ।
૧૨૬.૨૬/૩તદ્ વક્તુમેતે ઋષયોઽત્ર યાતાઃ ।
૧૨૬.૨૬/૪સત્યં વદસ્વેહ જગન્નિવાસ ॥ ૧૨૬.૨૬॥

૧૨૬.૨૭/૧ત્વમન્તરાત્માખિલદેહભાજામ્ ।

૧૨૬.૨૭/૨ત્વમેવ સર્વં ત્વયિ સર્વમીશ ।
૧૨૬.૨૭/૩તથાપિ જાનન્તિ ન કેઅપિ કુત્રાપિ ।
૧૨૬.૨૭/૪અહો ભવન્તં પ્રકૃતિપ્રભાવાત્ ।
૧૨૬.૨૭/૫અન્તર્બહિઃ સર્વત એવ સન્તમ્ ।
૧૨૬.૨૭/૬વિશ્વાત્મના સમ્પરિવર્તમાનમ્ ॥ ૧૨૬.૨૭ ॥

૧૨૬.૨૮/૧બ્રહ્મોવાચ । તતઃ પ્રાહ જગદ્ધાત્રી દૈવી વાગ્ અશરીરિણી ॥ ૧૨૬.૨૮ ॥

૧૨૬.૨૯/૧દૈવી વાગ્ ઉવાચ । ઉભાવારાધ્ય તપસા ભક્ત્યા ચ નિયમેન ચ ।
૧૨૬.૨૯/૨યસ્ય સ્યાત્ પ્રથમં સિદ્ધિસ્તદ્ ભૂતં જ્યેષ્ઠમુચ્યતે ॥ ૧૨૬.૨૯ ॥

૧૨૬.૩૦/૧બ્રહ્મોવાચ । તથેત્યતથા યયુઃ સર્વે ઋષયો લોકપૂજિતાઃ ।
૧૨૬.૩૦/૨શ્રાન્તાઃ ખિન્નાન્તરાત્માનઃ પરં વૈરાગ્યમાશ્રિતાઃ ॥ ૧૨૬.૩૦ ॥

૧૨૬.૩૧/૧સર્વલોકૈકજનનીં ભુવનત્રયપાવનીમ્ ।
૧૨૬.૩૧/૨ગૌતમીમગમન્ સર્વે તપસ્તમું યતવ્રતાઃ ॥ ૧૨૬.૩૧ ॥

૧૨૬.૩૨/૧અબ્દૈવતં તથાગ્નિં ચ પૂજનાયોદ્યતાસ્તદા ।
૧૨૬.૩૨/૨અગ્નેશ્ચ પૂજકા યે ચ અપાં વૈ પૂજને સ્થિતાઃ ।
૧૨૬.૩૨/૩તત્ર વાગ્ અબ્રવીદ્ દૈવી વેદમાતા સરસ્વતી ॥ ૧૨૬.૩૨ ॥

૧૨૬.૩૩/૧દૈવી વાગ્ ઉવાચ । અગ્નેરાપસ્તથા યોનિરદ્ભિઃ શૌચમવાપ્યતે ।
૧૨૬.૩૩/૨અગ્નેશ્ચ પૂજકા યે ચ વિનાદ્ભિઃ પૂજનં કથમ્ ॥ ૧૨૬.૩૩ ॥

૧૨૬.૩૪/૧અપ્સુ જાતાસુ સર્વત્ર કર્મણ્યધિકૃતો ભવેત્ ।
૧૨૬.૩૪/૨તાવત્ કર્મણ્યનર્હોઽયમશુચિર્મલિનો નરઃ ॥ ૧૨૬.૩૪ ॥

૧૨૬.૩૫/૧ન મગ્નઃ શ્રદ્ધયા યાવદ્ અપ્સુ શીતાસુ વેદવિત્ ।
૧૨૬.૩૫/૨તસ્માદ્ આપો વરિષ્ઠાઃ સ્યુર્માતૃભૂતા યતઃ સ્મૃતાઃ ।
૧૨૬.૩૫/૩તસ્માજ્જ્યૈષ્ઠ્યમપામેવ જનન્યોઽગ્નેર્વિશેષતઃ ॥ ૧૨૬.૩૫ ॥

૧૨૬.૩૬/૧બ્રહ્મોવાચ । એતદ્ વચઃ શુશ્રુવુસ્તે ઋષયો વેદવાદિનઃ ।
૧૨૬.૩૬/૨નિશ્ચયં ચ તતશ્ચક્રુર્ભવેજ્જ્યૈષ્ઠ્યમપામિતિ ॥ ૧૨૬.૩૬ ॥

૧૨૬.૩૭/૧યત્ર તીર્થે વૃત્તમિદમ્ ઋષિસત્રે ચ નારદ ।
૧૨૬.૩૭/૨તપસ્તીર્થં તુ તત્ પ્રોક્તં સત્રતીર્થં તદ્ ઉચ્યતે ॥ ૧૨૬.૩૭ ॥

૧૨૬.૩૮/૧અગ્નિતીર્થં ચ તત્ પ્રોક્તં તથા સારસ્વતં વિદુઃ ।
૧૨૬.૩૮/૨તેષુ સ્નાનં ચ દાનં ચ સર્વકામપ્રદં શુભમ્ ॥ ૧૨૬.૩૮ ॥

૧૨૬.૩૯/૧ચતુર્દશ શતાન્યત્ર તીર્થાનાં પુણ્યદાયિનામ્ ।
૧૨૬.૩૯/૨તેષુ સ્નાનં ચ દાનં ચ સ્વર્ગમોક્ષપ્રદાયકમ્ ॥ ૧૨૬.૩૯ ॥

૧૨૬.૪૦/૧કૃતં સંદેહહરણમ્ ઋષીણાં યત્ર ભાષયા ।
૧૨૬.૪૦/૨સરસ્વત્યભવત્ તત્ર ગઙ્ગયા સંગતા નદી ।
૧૨૬.૪૦/૩માહાત્મ્યં તસ્ય કો વક્તું સંગમસ્ય ક્ષમો નરઃ ॥ ૧૨૬.૪૦ ॥

૧૨૭.૧/૧બ્રહ્મોવાચ । દેવતીર્થમિતિ ખ્યાતં ગઙ્ગાયા ઉત્તરે તટે ।
૧૨૭.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ સર્વપાપપ્રણાશનમ્ ॥ ૧૨૭.૧ ॥

૧૨૭.૨/૧આર્ષ્ટિષેણ ઇતિ ખ્યાતો રાજા સર્વગુણાન્વિતઃ ।
૧૨૭.૨/૨તસ્ય ભાર્યા જયા નામ સાક્ષાલ્લક્ષ્મીરિવાપરા ॥ ૧૨૭.૨ ॥

૧૨૭.૩/૧તસ્ય પુત્રો ભરો નામ મતિમાન્ પિતૃવત્સલઃ ।
૧૨૭.૩/૨ધનુર્વેદે ચ વેદે ચ નિષ્ણાતો દક્ષ એવ ચ ॥ ૧૨૭.૩ ॥

૧૨૭.૪/૧તસ્ય ભાર્યા રૂપવતી સુપ્રભેત્યભિવિશ્રુતા ।
૧૨૭.૪/૨આર્ષ્ટિષેણસ્તતો રાજા પુત્રે રાજ્યં નિવેશ્ય સઃ ॥ ૧૨૭.૪ ॥

૧૨૭.૫/૧પુરોધસા ચ મુખ્યેન દીક્ષાં ચક્રે નરેશ્વરઃ ।
૧૨૭.૫/૨સરસ્વત્યાસ્તતસ્તીરે હયમેધાય યત્નવાન્ ॥ ૧૨૭.૫ ॥

૧૨૭.૬/૧ઋત્વિગ્ભિરૃષિમુખ્યૈશ્ચ વેદશાસ્ત્રપરાયણૈઃ ।
૧૨૭.૬/૨દીક્ષિતં તં નૃપશ્રેષ્ઠં બ્રાહ્મણાગ્નિસમીપતઃ ॥ ૧૨૭.૬ ॥

૧૨૭.૭/૧મિથુર્દાનવરાટ્ શૂરઃ પાપબુદ્ધિઃ પ્રતાપવાન્ ।
૧૨૭.૭/૨મખં વિધ્વસ્ય નૃપતિં સભાર્યં સપુરોહિતમ્ ॥ ૧૨૭.૭ ॥

૧૨૭.૮/૧આદાય વેગાત્ સ પ્રાગાદ્ રસાતલતલં મુને ।
૧૨૭.૮/૨નીતે તસ્મિન્ નૃપવરે યજ્ઞે નષ્ટે તતોઽમરાઃ ॥ ૧૨૭.૮ ॥

૧૨૭.૯/૧ઋત્વિજશ્ચ યયુઃ સર્વે સ્વં સ્વં સ્થાનં મખાત્ તતઃ ।
૧૨૭.૯/૨પુરોહિતસુતો રાજ્ઞો દેવાપિરિતિ વિશ્રુતઃ ॥ ૧૨૭.૯ ॥

૧૨૭.૧૦/૧બાલસ્તાં માતરં દૃષ્ટ્વા આત્મનઃ પિતરં ન ચ ।
૧૨૭.૧૦/૨દૃષ્ટ્વા સવિસ્મયો ભૂત્વા દુઃખિતોઽતીવ ચાભવત્ ॥ ૧૨૭.૧૦ ॥

૧૨૭.૧૧/૧સ માતરં તુ પપ્રચ્છ પિતા મે ક્વ ગતોઽમ્બિકે ।
૧૨૭.૧૧/૨પિતૃહીનો ન જીવેયં માતઃ સત્યં વદસ્વ મે ॥ ૧૨૭.૧૧ ॥

૧૨૭.૧૨/૧ધિગ્ ધિક્ પિતૃવિહીનાનાં જીવિતં પાપકર્મણામ્ ।

૧૨૭.૧૨/૨ન વક્ષિ યદિ મે માતર્જલમગ્નિમથાવિશે ॥ ૧૨૭.૧૨॥

૧૨૭.૧૩/૧પુત્રં પ્રોવાચ સા માતા રાજ્ઞો ભાર્યા પુરોધસઃ ।
૧૨૭.૧૩/૨દાનવેન તલં નીતો રાજ્ઞા સહ પિતા તવ ॥ ૧૨૭.૧૩॥

૧૨૭.૧૪/૧દેવાપિરુવાચ । ક્વ નીતઃ કેન વા નીતઃ કથં નીતઃ ક્વ કર્મણિ ।
૧૨૭.૧૪/૨કેષુ પશ્યત્સુ કિં સ્થાનં દાનવસ્ય વદસ્વ મે ॥ ૧૨૭.૧૪॥

૧૨૭.૧૫/૧માતોવાચ । દીક્ષિતં યજ્ઞસદસિ સભાર્યં સપુરોધસમ્ ।
૧૨૭.૧૫/૨રાજાનં તં મિથુર્દૈત્યો નીતવાન્ સ રસાતલમ્ ।
૧૨૭.૧૫/૩પશ્યત્સુ દેવસંઘેષુ વહ્નિબ્રાહ્મણસંનિધૌ ॥ ૧૨૭.૧૫॥

૧૨૭.૧૬/૧બ્રહ્મોવાચ । તન્ માતૃવચનં શ્રુત્વા દેવાપિઃ કૃત્યમસ્મરત્ ।
૧૨૭.૧૬/૨દેવાન્ પશ્યેઽથવાગ્નિં વા ઋત્વિજો વાસુરાંસ્તથા ॥ ૧૨૭.૧૬॥

૧૨૭.૧૭/૧એતેષ્વેવ પિતાન્વેષ્યો નાન્યત્રેતિ મતિર્મમ ।
૧૨૭.૧૭/૨ઇતિ નિશ્ચિત્ય દેવાપિર્ભરં પ્રાહ નૃપાત્મજમ્ ॥ ૧૨૭.૧૭॥

૧૨૭.૧૮/૧દેવાપિરુવાચ । તપસા બ્રહ્મચર્યેણ વ્રતેન નિયમેન ચ ।
૧૨૭.૧૮/૨આનેતવ્યા મયા સર્વે નીતા યે ચ રસાતલમ્ ॥ ૧૨૭.૧૮॥

૧૨૭.૧૯/૧જાતે પરાભવે ઘોરે યો ન કુર્યાત્ પ્રતિક્રિયામ્ ।
૧૨૭.૧૯/૨નરાધમેન કિં તેન જીવતા વા મૃતેન વા ॥ ૧૨૭.૧૯॥

૧૨૭.૨૦/૧ત્વં પ્રશાધિ મહીં કૃત્સ્નામાર્ષ્ટિષેણઃ પિતા યથા ।
૧૨૭.૨૦/૨માતા મમ ત્વયા પાલ્યા રાજન્ યાવન્ મમાગતિઃ ।
૧૨૭.૨૦/૩ભવેચ્ચ કૃતકાર્યસ્ય અનુજાનીહિ માં ભર ॥ ૧૨૭.૨૦॥

૧૨૭.૨૧/૧બ્રહ્મોવાચ । ભરેણોક્તઃ સ દેવાપિઃ સર્વં નિશ્ચિત્ય
યત્નતઃ ॥ ૧૨૭.૨૧॥

૧૨૭.૨૨/૧ભર ઉવાચ । સિદ્ધિં કુરુ સુખં યાહિ મા ચિન્તામલ્પિકાં
ભજ ॥ ૧૨૭.૨૨॥

૧૨૭.૨૩/૧બ્રહ્મોવાચ । તતો દેવાપિરમર+ ।રાજાઙ્ઘ્રિધ્યાનતત્પરઃ ।
૧૨૭.૨૩/૨ઋત્વિજોઽન્વેષ્ય યત્નેન નત્વા તાન્ ઋત્વિજઃ પૃથક્ ।
૧૨૭.૨૩/૩કૃતાઞ્જલિપુટો બાલો દેવાપિર્વાક્યમબ્રવીત્ ॥ ૧૨૭.૨૩॥

૧૨૭.૨૪/૧દેવાપિરુવાચ । ભવદ્ભિશ્ચ મખો રક્ષ્યો યજમાનશ્ચ દીક્ષિતઃ ।
૧૨૭.૨૪/૨પુરોધાશ્ચ તથા રક્ષ્યઃ પત્ની યા દીક્ષિતસ્ય તુ ॥ ૧૨૭.૨૪॥

૧૨૭.૨૫/૧ભવત્સુ તત્ર પશ્યત્સુ યજ્ઞં વિધ્વસ્ય દૈત્યરાટ્ ।
૧૨૭.૨૫/૨રાજાદયસ્તેન નીતાસ્તન્ ન યુક્તતમં ભવેત્ ॥ ૧૨૭.૨૫॥

૧૨૭.૨૬/૧અથાપ્યેતદ્ અહં મન્યે ભવન્તસ્તાન્ અરોગિણઃ ।
૧૨૭.૨૬/૨દાતુમર્હન્તિ તાન્ સર્વાન્ અન્યથા શાપમર્હથ ॥ ૧૨૭.૨૬॥

૧૨૭.૨૭/૧ઋત્વિજ ઊચુઃ । મખેઽગ્નિઃ પ્રથમં પૂજ્યો હ્યગ્નિરેવાત્ર દૈવતમ્ ।
૧૨૭.૨૭/૨તસ્માદ્ વયં ન જાનીમો હ્યગ્નીનાં પરિચારકાઃ ॥ ૧૨૭.૨૭॥

૧૨૭.૨૮/૧સ એવ દાતા ભોક્તા ચ હર્તા કર્તા ચ હવ્યવાટ્ ॥ ૧૨૭.૨૮॥

૧૨૭.૨૯/૧બ્રહ્મોવાચ । ઋત્વિજઃ પૃષ્ઠતઃ કૃત્વા દેવાપિર્જાતવેદસમ્ ।
૧૨૭.૨૯/૨પૂજયિત્વા યથાન્યાયમગ્નયે તન્ ન્યવેદયત્ ॥ ૧૨૭.૨૯॥

૧૨૭.૩૦/૧અગ્નિરુવાચ । યથર્ત્વિજસ્તથા ચાહં દેવાનાં પરિચારકઃ ।
૧૨૭.૩૦/૨હવ્યં વહામિ દેવાનાં ભોક્તારો રક્ષકાશ્ચ તે ॥ ૧૨૭.૩૦॥

૧૨૭.૩૧/૧દેવાપિરુવાચ । દેવાન્ આહૂય યત્નેન હવિર્ભાગાન્ પૃથક્ પૃથક્ ।
૧૨૭.૩૧/૨દાસ્યેઽહમેષ દોષો મે તસ્માદ્ યાહિ સુરાન્ પ્રતિ ॥ ૧૨૭.૩૧॥

૧૨૭.૩૨/૧બ્રહ્મોવાચ । દેવાપિઃ સ સુરાન્ પ્રાપ્ય નત્વા તેભ્યઃ પૃથક્ પૃથક્ ।
૧૨૭.૩૨/૨ઋત્વિગ્વાક્યં ચાગ્નિવાક્યં શાપં ચાપિ ન્યવેદયત્ ॥ ૧૨૭.૩૨॥

૧૨૭.૩૩/૧દેવા ઊચુઃ । આહૂતા વૈદિકૈર્મન્ત્રૈરૃત્વિગ્ભિશ્ચ યથાક્રમમ્ ।
૧૨૭.૩૩/૨ભોક્ષ્યામહે હવિર્ભાગાન્ ન સ્વતન્ત્રા દ્વિજોત્તમ ॥ ૧૨૭.૩૩॥

૧૨૭.૩૪/૧તસ્માદ્ વેદાનુગા નિત્યં વયં વેદેન ચોદિતાઃ ।
૧૨૭.૩૪/૨પરતન્ત્રાસ્તતો વિપ્ર વેદેભ્યસ્તન્ નિવેદય ॥ ૧૨૭.૩૪॥

૧૨૭.૩૫/૧બ્રહ્મોવાચ । સ દેવાપિઃ શુચિર્ભૂત્વા વેદાન્ આહૂય યત્નતઃ ।
૧૨૭.૩૫/૨ધ્યાનેન તપસા યુક્તો વેદાશ્ચાપિ પુરોઽભવન્ ॥ ૧૨૭.૩૫॥

૧૨૭.૩૬/૧વેદાન્ ઉવાચ દેવાપિર્નમસ્ય તુ પુનઃ પુનઃ ।
૧૨૭.૩૬/૨ઋત્વિગ્વાક્યં ચાગ્નિવાક્યં દેવવાક્યં ન્યવેદયત્ ॥ ૧૨૭.૩૬॥

૧૨૭.૩૭/૧વેદા ઊચુઃ । પરતન્ત્રા વયં તાત ઈશ્વરસ્ય વશાનુગાઃ ।
૧૨૭.૩૭/૨અશેષજગદાધારો નિરાધારો નિરઞ્જનઃ ॥ ૧૨૭.૩૭॥

૧૨૭.૩૮/૧સર્વશક્ત્યૈકસદનં નિધાનં સર્વસમ્પદામ્ ।
૧૨૭.૩૮/૨સ તુ કર્તા મહાદેવઃ સંહર્તા સ મહેશ્વરઃ ॥ ૧૨૭.૩૮॥

૧૨૭.૩૯/૧વયં શબ્દમયા બ્રહ્મન્ વદામો વિપ્ર એવ ચ ।
૧૨૭.૩૯/૨અસ્માકમેતત્ કૃત્યં સ્યાદ્ વદામો યત્ તુ પૃચ્છસિ ॥ ૧૨૭.૩૯ ॥

૧૨૭.૪૦/૧કેન નીતાસ્તસ્ય નામ તત્પુરં તદ્બલં તથા ।
૧૨૭.૪૦/૨ભક્ષિતાઃ કિં તુ નો નષ્ટા એતજ્જાનીમહે વયમ્ ॥ ૧૨૭.૪૦ ॥

૧૨૭.૪૧/૧યથા ચ તવ સામર્થ્યં યમારાધ્ય ચ યત્ર ચ ।
૧૨૭.૪૧/૨સ્યાદ્ ઇત્યેતચ્ચ જાનીમો યથા પ્રાપ્સ્યસિ તાન્ પુરઃ ॥ ૧૨૭.૪૧ ॥

૧૨૭.૪૨/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વાવદદ્ વેદાન્ વિચાર્ય સુચિરં હૃદિ ॥ ૧૨૭.૪૨ ॥

૧૨૭.૪૩/૧દેવાપિરુવાચ । વેદા વદન્ત્વેતદ્ એવ સર્વમેવ યથાર્થતઃ ।
૧૨૭.૪૩/૨સર્વાન્ પ્રાપ્સ્યે તલં નીતાન્ અલં તેભ્યો નમોઽસ્તુ વઃ ॥ ૧૨૭.૪૩ ॥

૧૨૭.૪૪/૧વેદા ઊચુઃ । ગૌતમીં ગચ્છ દેવાપે તત્ર સ્તુહિ મહેશ્વરમ્ ।
૧૨૭.૪૪/૨સુપ્રસન્નસ્તવાભીષ્ટં દાસ્યત્યેવ કૃપાકરઃ ॥ ૧૨૭.૪૪ ॥

૧૨૭.૪૫/૧ભવેદ્ દેવઃ શિવઃ પ્રીતઃ સ્તુતઃ સત્યં મહામતે ।
૧૨૭.૪૫/૨આર્ષ્ટિષેણશ્ચ નૃપતિસ્તસ્ય જાયા જયા સતી ॥ ૧૨૭.૪૫ ॥

૧૨૭.૪૬/૧પિતા તવાપ્યુપમન્યુસ્તલે તિષ્ઠન્ત્યરોગિણઃ ।
૧૨૭.૪૬/૨વરદાનાન્ મહેશસ્ય મિથું હત્વા ચ રાક્ષસમ્ ।
૧૨૭.૪૬/૩યશઃ પ્રાપ્સ્યસિ ધર્મં ચ એતચ્છક્યં ન ચેતરત્ ॥ ૧૨૭.૪૬ ॥

૧૨૭.૪૭/૧બ્રહ્મોવાચ । તદ્ વેદવચનાદ્ બાલો દેવાપિર્ગૌતમીં ગતઃ ।
૧૨૭.૪૭/૨સ્નાત્વા કૃતક્ષણો વિપ્રસ્તુષ્ટાવ ચ મહેશ્વરમ્ ॥ ૧૨૭.૪૭ ॥

૧૨૭.૪૮/૧દેવાપિરુવાચ । બાલોઽહં દેવદેવેશ ગુરૂણાં ત્વં ગુરુર્મમ ।
૧૨૭.૪૮/૨ન મે શક્તિસ્ત્વત્સ્તવને તુભ્યં શમ્ભો નમોઽસ્તુ તે ॥ ૧૨૭.૪૮ ॥

૧૨૭.૪૯/૧ન ત્વાં જાનન્તિ નિગમા ન દેવા મુનયો ન ચ ।
૧૨૭.૪૯/૨ન બ્રહ્મા નાપિ વૈકુણ્ઠો યોઽસિ સોઽસિ નમોઽસ્તુ તે ॥ ૧૨૭.૪૯ ॥

૧૨૭.૫૦/૧યેઽનાથા યે ચ કૃપણા યે દરિદ્રાશ્ચ રોગિણઃ ।
૧૨૭.૫૦/૨પાપાત્માનો યે ચ લોકે તાંસ્ત્વં પાસિ મહેશ્વર ॥ ૧૨૭.૫૦ ॥

૧૨૭.૫૧/૧તપસા નિયમૈર્મન્ત્રૈઃ પૂજિતાસ્ત્રિદિવૌકસઃ ।
૧૨૭.૫૧/૨ત્વયા દત્તં ફલં તેભ્યો દાસ્યન્તિ જગતાં પતે ॥ ૧૨૭.૫૧ ॥

૧૨૭.૫૨/૧યાચિતારશ્ચ દાતારસ્તેભ્યો યદ્ યન્ મનીષિતમ્ ।
૧૨૭.૫૨/૨ભવતીતિ ન ચિત્રં સ્યાત્ ત્વં વિપર્યયકારકઃ ॥ ૧૨૭.૫૨ ॥

૧૨૭.૫૩/૧યેऽજ્ઞાનિનો યે ચ પાપા યે મગ્ના નરકાર્ણવે ।
૧૨૭.૫૩/૨શિવેતિ વચનાન્ નાથ તાન્ પાસિ ત્વં જગદ્ગુરો ॥ ૧૨૭.૫૩॥

૧૨૭.૫૪/૧બ્રહ્મોવાચ । એવં તુ સ્તુવતસ્તસ્ય પુરઃ પ્રાહ ત્રિલોચનઃ ॥ ૧૨૭.૫૪॥

૧૨૭.૫૫/૧શિવ ઉવાચ । વરં બ્રૂહ્યથ દેવાપે અલં દૈન્યેન બાલક ॥ ૧૨૭.૫૫॥

૧૨૭.૫૬/૧દેવાપિરુવાચ । રાજાનં રાજપત્નીં ચ પિતરં ચ ગુરું મમ ।
૧૨૭.૫૬/૨પ્રાપ્તુમિચ્છે જગન્નાથ નિધનં ચ રિપોર્મમ ॥ ૧૨૭.૫૬॥

૧૨૭.૫૭/૧બ્રહ્મોવાચ । દેવાપિવચનં શ્રુત્વા તથેત્યાહાખિલેશ્વરઃ ।
૧૨૭.૫૭/૨દેવાપેઃ સર્વમભવદ્ આજ્ઞયા શંકરસ્ય તત્ ॥ ૧૨૭.૫૭॥

૧૨૭.૫૮/૧પુનરપ્યાહ તં શમ્ભુર્દેવાપિકરુણાકરઃ ।
૧૨૭.૫૮/૨નન્દિનં પ્રેષયામાસ શમ્ભુઃ શૂલેન નારદ ॥ ૧૨૭.૫૮॥

૧૨૭.૫૯/૧રસાતલં મિથું નન્દી હત્વા ચાસુરપુંગવાન્ ।
૧૨૭.૫૯/૨તત્પિત્રાદીન્ સમાનીય તસ્મૈ તાન્ સ ન્યવેદયત્ ॥ ૧૨૭.૫૯॥

૧૨૭.૬૦/૧હયમેધશ્ચ તત્રાસીદ્ આર્ષ્ટિષેણસ્ય ધીમતઃ ।
૧૨૭.૬૦/૨અગ્નિશ્ચ ઋત્વિજો દેવા વેદાશ્ચ ઋષયોऽબ્રુવન્ ॥ ૧૨૭.૬૦॥

૧૨૭.૬૧/૧અગ્ન્યાદય ઊચુઃ । યત્ર સાક્ષાદ્ અભૂચ્છમ્ભુર્દેવાપે ભક્તવત્સલઃ ।
૧૨૭.૬૧/૨દેવદેવો જગન્નાથો દેવતીર્થમભૂચ્ચ તત્ ॥ ૧૨૭.૬૧॥

૧૨૭.૬૨/૧સર્વપાપક્ષયકરં સર્વસિદ્ધિપ્રદં નૃણામ્ ।
૧૨૭.૬૨/૨પુણ્યદં તીર્થમેતત્ સ્યાત્ તવ કીર્તિશ્ચ શાશ્વતી ॥ ૧૨૭.૬૨॥

૧૨૭.૬૩/૧બ્રહ્મોવાચ । અશ્વમેધે નિવૃત્તે તુ સુરાસ્તેભ્યો વરાન્ દદુઃ ।
૧૨૭.૬૩/૨સ્નાત્વા કૃતાર્થા ગઙ્ગાયાં તતસ્તે દિવમાક્રમન્ ॥ ૧૨૭.૬૩॥

૧૨૭.૬૪/૧તતઃ પ્રભૃતિ તત્રાસંસ્તીર્થાનિ દશ પઞ્ચ ચ ।
૧૨૭.૬૪/૨સહસ્રાણિ શતાન્યષ્ટાવુભયોરપિ તીરયોઃ ।
૧૨૭.૬૪/૩તેષુ સ્નાનં ચ દાનં ચ હ્યતીવ ફલદં વિદુઃ ॥ ૧૨૭.૬૪॥

૧૨૮.૧/૧બ્રહ્મોવાચ । તપોવનમિતિ ખ્યાતં નન્દિનીસંગમં તથા ।
૧૨૮.૧/૨સિદ્ધેશ્વરં તત્ર તીર્થં ગૌતમ્યા દક્ષિણે તટે ॥ ૧૨૮.૧॥

૧૨૮.૨/૧શાર્દૂલં ચેતિ વિખ્યાતં તેષાં વૃત્તમિદં શ઼ૃણુ ।
૧૨૮.૨/૨યસ્યાકર્ણનમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૨૮.૨॥

૧૨૮.૩/૧અગ્નિર્હોતા પુરા ત્વાસીદ્ દેવાનાં હવ્યવાહનઃ ।
૧૨૮.૩/૨ભાર્યાં પ્રાપ્તો દક્ષસુતાં સ્વાહાનામ્નીં સુરૂપિણીમ્ ॥ ૧૨૮.૩ ॥

૧૨૮.૪/૧સાનપત્યા પુરા ચાસીત્ પુત્રાર્થં તપ આવિશત્ ।
૧૨૮.૪/૨તપશ્ચરન્તીં વિપુલં તોષયન્તીં હુતાશનમ્ ।
૧૨૮.૪/૩સ ભર્તા હુતભુક્ પ્રાહ ભાર્યાં સ્વાહામનિન્દિતામ્ ॥ ૧૨૮.૪ ॥

૧૨૮.૫/૧અગ્નિરુવાચ । અપત્યાનિ ભવિષ્યન્તિ મા તપઃ કુરુ શોભને ॥ ૧૨૮.૫ ॥

૧૨૮.૬/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા ભર્તૃવાક્યં નિવૃત્તા તપસોઽભવત્ ।
૧૨૮.૬/૨સ્ત્રીણામભીષ્ટદં નાન્યદ્ ભર્તૃવાક્યં વિના ક્વચિત્ ॥ ૧૨૮.૬ ॥

૧૨૮.૭/૧તતઃ કતિપયે કાલે તારકાદ્ ભય આગતે ।
૧૨૮.૭/૨અનુત્પન્ને કાર્ત્તિકેયે ચિરકાલરહોગતે ॥ ૧૨૮.૭ ॥

૧૨૮.૮/૧મહેશ્વરે ભવાન્યા ચ ત્રસ્તા દેવાઃ સમાગતાઃ ।
૧૨૮.૮/૨દેવાનાં કાર્યસિદ્ધ્યર્થમગ્નિં પ્રોચુર્દિવૌકસઃ ॥ ૧૨૮.૮ ॥

૧૨૮.૯/૧દેવા ઊચુઃ । દેવ ગચ્છ મહાભાગ શમ્ભું ત્રૈલોક્યપૂજિતમ્ ।
૧૨૮.૯/૨તારકાદ્ ભયમુત્પન્નં શમ્ભવે ત્વં નિવેદય ॥ ૧૨૮.૯ ॥

૧૨૮.૧૦/૧અગ્નિરુવાચ । ન ગન્તવ્યં તત્ર દેશે દમ્પત્યોઃ સ્થિતયો રહઃ ।
૧૨૮.૧૦/૨સામાન્યમાત્રતો ન્યાયઃ કિં પુનઃ શૂલપાણિનિ ॥ ૧૨૮.૧૦ ॥

૧૨૮.૧૧/૧એકાન્તસ્થિતયોઃ સ્વૈરં જલ્પતોર્યઃ સરાગયોઃ ।
૧૨૮.૧૧/૨દમ્પત્યોઃ શ◌ૃણુયાદ્ વાક્યં નિરયાત્ તસ્ય નોદ્ધૃતિઃ ॥ ૧૨૮.૧૧ ॥

૧૨૮.૧૨/૧સ સ્વામ્યખિલલોકાનાં મહાકાલસ્ત્રિશૂલવાન્ ।
૧૨૮.૧૨/૨નિરીક્ષણીયઃ કેન સ્યાદ્ ભવાન્યા રહસિ સ્થિતઃ ॥ ૧૨૮.૧૨ ॥

૧૨૮.૧૩/૧દેવા ઊચુઃ । મહાભયે ચાનુગતે ન્યાયઃ કોઽન્વત્ર વર્ણ્યતે ।
૧૨૮.૧૩/૨તારકાદ્ ભય ઉત્પન્ને ગચ્છ ત્વં તારકો ભવાન્ ॥ ૧૨૮.૧૩ ॥

૧૨૮.૧૪/૧મહાભયાબ્ધૌ સાધૂનાં યત્ પરાર્થાય જીવિતમ્ ।
૧૨૮.૧૪/૨રૂપેણાન્યેન વા ગચ્છ વાચં વદ યથા તથા ॥ ૧૨૮.૧૪ ॥

૧૨૮.૧૫/૧વિશ્રાવ્ય દેવવચનં શમ્ભુમાગચ્છ સત્વરઃ ।
૧૨૮.૧૫/૨તતો દાસ્યામહે પૂજામુભયોર્લોકયોઃ કવે ॥ ૧૨૮.૧૫ ॥

૧૨૮.૧૬/૧બ્રહ્મોવાચ । શુકો ભૂત્વા જગામાશુ દેવવાક્યાદ્ ધુતાશનઃ ।

૧૨૮.૧૬/૨યત્રાસીજ્જગતાં નાથો રમમાણસ્તદોમયા ॥ ૧૨૮.૧૬॥

૧૨૮.૧૭/૧સ ભીતવદ્ અથ પ્રાયાચ્છુકો ભૂત્વા તદાનલઃ ।
૧૨૮.૧૭/૨નાશકદ્ દ્વારદેશે તુ પ્રવેષ્ટું હવ્યવાહનઃ ॥ ૧૨૮.૧૭॥

૧૨૮.૧૮/૧તતો ગવાક્ષદેશે તુ તસ્થૌ ધુન્વન્ અધોમુખઃ ।
૧૨૮.૧૮/૨તં દૃષ્ટ્વા પ્રહસઞ્ શમ્ભુરુમાં પ્રાહ રહોગતઃ ॥ ૧૨૮.૧૮॥

૧૨૮.૧૯/૧શમ્ભુરુવાચ । પશ્ય દેવિ શુકં પ્રામં દેવવાક્યાદ્
ધુતાશનમ્ ॥ ૧૨૮.૧૯॥

૧૨૮.૨૦/૧બ્રહ્મોવાચ । લજ્જિતા ચાવદદ્ દેવમલં દેવેતિ પાર્વતી ।
૧૨૮.૨૦/૨પુરશ્ચરન્તં દેવેશો હ્યગ્નિં તં દ્વિજરૂપિણમ્ ॥ ૧૨૮.૨૦॥

૧૨૮.૨૧/૧આહૂય બહુશશ્ચાપિ જ્ઞાતોઽસ્યગ્નેઽત્ર મા વદ ।
૧૨૮.૨૧/૨વિદારયસ્વ સ્વમુખં ગૃહાણેદં નયસ્વ તત્ ॥ ૧૨૮.૨૧॥

૧૨૮.૨૨/૧ઇત્યુક્ત્વા તસ્ય ચાસ્યેઽગ્ને રેતઃ સ પ્રાક્ષિપદ્ બહુ ।
૧૨૮.૨૨/૨રેતોગર્ભસ્તદા ચાગ્નિર્ગન્તું નૈવ ચ શક્તવાન્ ॥ ૧૨૮.૨૨॥

૧૨૮.૨૩/૧સુરનદ્યાસ્તતસ્તીરં શ્રાન્તોઽગ્નિરુપતસ્થિવાન્ ।
૧૨૮.૨૩/૨કૃત્તિકાસુ ચ તદ્ રેતઃ પ્રક્ષેપાત્ કાર્ત્તિકોઽભવત્ ॥ ૧૨૮.૨૩॥

૧૨૮.૨૪/૧અવશિષ્ટં ચ યત્ કિંચિદ્ અગ્નેર્દેહે ચ શામ્ભવમ્ ।
૧૨૮.૨૪/૨તદ્ એવ રેતો વહ્નિસ્તુ સ્વભાર્યાયાં દ્વિધાક્ષિપત્ ॥ ૧૨૮.૨૪॥

૧૨૮.૨૫/૧સ્વાહાયાં પ્રિયભૂતાયાં પુત્રાર્થિન્યાં વિશેષતઃ ।
૧૨૮.૨૫/૨પુરા સાશ્વાસિતા તેન સંતતિસ્તે ભવિષ્યતિ ॥ ૧૨૮.૨૫॥

૧૨૮.૨૬/૧તદ્ વહ્નિનાથ સંસ્મૃત્ય તત્ ક્ષિપ્તં શામ્ભવં મહઃ ।
૧૨૮.૨૬/૨તદ્ અગ્ને રેતસસ્તસ્યાં જજ્ઞે મિથુનમુત્તમમ્ ॥ ૧૨૮.૨૬॥

૧૨૮.૨૭/૧સુવર્ણશ્ચ સુવર્ણા ચ રૂપેણાપ્રતિમં ભુવિ ।
૧૨૮.૨૭/૨અગ્નેઃ પ્રીતિકરં નિત્યં લોકાનાં પ્રીતિવર્ધનમ્ ॥ ૧૨૮.૨૭॥

૧૨૮.૨૮/૧અગ્નિઃ પ્રીત્યા સુવર્ણાં તાં પ્રાદાદ્ ધર્માય ધીમતે ।
૧૨૮.૨૮/૨સુવર્ણસ્યાથ પુત્રસ્ય સંકલ્પામકરોત્ પ્રિયામ્ ।
૧૨૮.૨૮/૩એવં પુત્રસ્ય પુત્ર્યાશ્ચ વિવાહમકરોત્ કવિઃ ॥ ૧૨૮.૨૮॥

૧૨૮.૨૯/૧અન્યોન્યરેતોવ્યતિષઙ્ગદોષાદ્ ।
૧૨૮.૨૯/૨અગ્નેરપત્યમુભયં તથૈવ ।

૧૨૮.૨૯/૩પુત્રઃ સુવર્ણો બહુરૂપરૂપી ।
૧૨૮.૨૯/૪રૂપાણિ કૃત્વા સુરસત્તમાનામ્ ॥ ૧૨૮.૨૯॥

૧૨૮.૩૦/૧ઇન્દ્રસ્ય વાયોર્ધનદસ્ય ભાર્યામ્ ।
૧૨૮.૩૦/૨જલેશ્વરસ્યાપિ મુનીશ્વરાણામ્ ।
૧૨૮.૩૦/૩ભાર્યાસ્તુ ગચ્છત્યનિશં સુવર્ણો ।
૧૨૮.૩૦/૪યસ્યાઃ પ્રિયં યચ્ચ વપુઃ સ કૃત્વા ॥ ૧૨૮.૩૦॥

૧૨૮.૩૧/૧યાતિ ક્વચિચ્ચાપિ કવેસ્તનૂજસ્- ।
૧૨૮.૩૧/૨તદ્ભર્તૃરૂપં ચ પતિવ્રતાસુ ।
૧૨૮.૩૧/૩કૃત્વાનિશં તાભિરુદારભાવઃ ।
૧૨૮.૩૧/૪કુર્વન્ કૃતાર્થં મદનં સ રેમે ॥ ૧૨૮.૩૧॥

૧૨૮.૩૨/૧કૃત્વા ગતા ક્વાપિ ચૈવં સુવર્ણા ।
૧૨૮.૩૨/૨ધર્મસ્ય ભાર્યાપિ સુવર્ણનામ્ની ।
૧૨૮.૩૨/૩સ્વાહાસુતા સ્વૈરિણી સા બભૂવ ।
૧૨૮.૩૨/૪યસ્યાપિ યસ્યાપિ મનોગતા યા ॥ ૧૨૮.૩૨॥

૧૨૮.૩૩/૧ભાર્યાસ્વરૂપા સૈવ ભૂત્વા સુવર્ણા ।
૧૨૮.૩૩/૨રેમે પતીન્ માનુષાન્ આસુરાંશ્ચ ।
૧૨૮.૩૩/૩દેવાન્ ઋષીન્ પિતૃરૂપાંસ્તથાન્યાન્ ।
૧૨૮.૩૩/૪રૂપૌદાર્યસ્થૈર્યગામ્ભીર્યયુક્તાન્ ॥ ૧૨૮.૩૩॥

૧૨૮.૩૪/૧યાભિપ્રેતા યસ્ય દેવસ્ય ભાર્યા ।
૧૨૮.૩૪/૨તદ્રૂપા સા રમતે તેન સાર્ધમ્ ।
૧૨૮.૩૪/૩નાનાભેદૈઃ કરણૈશ્ચાપ્યનેકૈર્ ।
૧૨૮.૩૪/૪આકર્ષન્તી તન્મનઃ કામસિદ્ધિમ્ ॥ ૧૨૮.૩૪॥

૧૨૮.૩૫/૧એવં સુવર્ણસ્ય નિરીક્ષ્ય ચેષ્ટામ્ ।
૧૨૮.૩૫/૨અગ્નેઃ સૂનોઃ પુત્રિકાયાસ્તથાગ્નેઃ ।
૧૨૮.૩૫/૩સર્વે ચ શેપુઃ કુપિતાસ્તદાગ્નેઃ ।
૧૨૮.૩૫/૪પુત્રં ચ પુત્રીં ચ સુરાસુરાસ્તે ॥ ૧૨૮.૩૫॥

૧૨૮.૩૬/૧સુરાસુરા ઊચુઃ । કૃતં યદ્ એતદ્ વ્યભિચારરૂપમ્ ।
૧૨૮.૩૬/૨યચ્છદ્મના વર્તનં પાપરૂપમ્ ।
૧૨૮.૩૬/૩તસ્માત્ સુતસ્તે વ્યભિચારવાંશ્ચ ।
૧૨૮.૩૬/૪સર્વત્ર ગામી જાયતાં હવ્યવાહ ॥ ૧૨૮.૩૬॥

૧૨૮.૩૭/૧તથા સુવર્ણાપિ ન ચૈકનિષ્ઠા ।
૧૨૮.૩૭/૨ભૂયાદ્ અગ્ને નૈકતૃપ્તા બહૂંશ્ચ ।
૧૨૮.૩૭/૩નાનાજાતીન્ નિન્દિતાન્ દેહભાજો ।
૧૨૮.૩૭/૪ભજિત્રી સ્યાદ્ એષ દોષશ્ચ પુત્ર્યાઃ ॥ ૧૨૮.૩૭ ॥

૧૨૮.૩૮/૧બ્રહ્મોવાચ । ઇત્યેતચ્છાપવચનં શ્રુત્વાગ્નિરતિભીતવત્ ।
૧૨૮.૩૮/૨મામભ્યેત્ય તદોવાચ નિષ્કૃતિં વદ પુત્રયોઃ ॥ ૧૨૮.૩૮ ॥

૧૨૮.૩૯/૧તદાહમબ્રવં વહ્ને ગૌતમીં ગચ્છ શંકરમ્ ।
૧૨૮.૩૯/૨સ્તુત્વા તત્ર મહાબાહો નિવેદય જગત્પતેઃ ॥ ૧૨૮.૩૯ ॥

૧૨૮.૪૦/૧માહેશ્વરેણ વીર્યેણ તવ દેહસ્થિતેન ચ ।
૧૨૮.૪૦/૨એવંવિધં ત્વપત્યં તે જાતં વહ્ને તતો ભવાન્ ॥ ૧૨૮.૪૦ ॥

૧૨૮.૪૧/૧નિવેદયસ્વ દેવાય દેવાનાં શાપમીદૃશમ્ ।
૧૨૮.૪૧/૨સ્વાપત્યરક્ષણાયાસૌ શમ્ભુઃ શ્રેયઃ કરિષ્યતિ ॥ ૧૨૮.૪૧ ॥

૧૨૮.૪૨/૧સ્તુહિ દેવં ચ દેવીં ચ ભક્ત્યા પ્રીતો ભવેચ્છિવઃ ।
૧૨૮.૪૨/૨તતસ્ત્વપત્યવિષયે પ્રિયાન્ કામાન્ અવાપ્સ્યસિ ॥ ૧૨૮.૪૨ ॥

૧૨૮.૪૩/૧તતો મદ્વચનાદ્ અગ્નિર્ગઙ્ગાં ગત્વા મહેશ્વરમ્ ।
૧૨૮.૪૩/૨તુષ્ટાવ નિયતો વાક્યૈઃ સ્તુતિભિર્વેદસમ્મિતૈઃ ॥ ૧૨૮.૪૩ ॥

૧૨૮.૪૪/૧અગ્નિરુવાચ । વિશ્વસ્ય જગતો ધાતા વિશ્વમૂર્તિર્નિરઞ્જનઃ ।
૧૨૮.૪૪/૨આદિકર્તા સ્વયમ્ભૂશ્ચ તં નમામિ જગત્પતિમ્ ॥ ૧૨૮.૪૪ ॥

૧૨૮.૪૫/૧યોઽગ્નિર્ભૂત્વા સંહરતિ સ્રષ્ટા વૈ જલરૂપતઃ ।
૧૨૮.૪૫/૨સૂર્યરૂપેણ યઃ પાતિ તં નમામિ ચ ત્ર્યમ્બકમ્ ॥ ૧૨૮.૪૫ ॥

૧૨૮.૪૬/૧બ્રહ્મોવાચ । તતઃ પ્રસન્નો ભગવાન્ અનન્તઃ શમ્ભુરવ્યયઃ ।
૧૨૮.૪૬/૨વરેણ ચ્છન્દયામાસ પાવકં સુરપૂજિતમ્ ॥ ૧૨૮.૪૬ ॥

૧૨૮.૪૭/૧સ વિનીતઃ શિવં પ્રાહ તવ વીર્યં મયિ સ્થિતમ્ ।
૧૨૮.૪૭/૨તેન જાતઃ સુતો રમ્યઃ સુવર્ણો લોકવિશ્રુતઃ ॥ ૧૨૮.૪૭ ॥

૧૨૮.૪૮/૧તથા સુવર્ણા પુત્રી ચ તસ્માદ્ એવ જગત્પ્રભો ।
૧૨૮.૪૮/૨અન્યોન્યવીર્યસઙ્ગાચ્ચ તદ્દોષાદ્ ઉભયં ત્વિદમ્ ॥ ૧૨૮.૪૮ ॥

૧૨૮.૪૯/૧વ્યભિચારાત્ સદોષં ચ અપત્યમભવચ્છિવ ।

૧૨૮.૪૯/૨શાપં દદુઃ સુરાઃ સર્વે તયોઃ શાન્તિં કુરુ પ્રભો ॥ ૧૨૮.૪૯॥

૧૨૮.૫૦/૧તદગ્નિવચનાચ્છમ્ભુઃ પ્રોવાચેદં શુભોદયમ્ ॥ ૧૨૮.૫૦॥

૧૨૮.૫૧/૧શમ્ભુરુવાચ । મદ્વીર્યાદ્ અભવત્ ત્વત્તઃ સુવર્ણો ભૂરિવિક્રમઃ ।
૧૨૮.૫૧/૨સમગ્રા ઋદ્ધયઃ સર્વાઃ સુવર્ણેઽસ્મિન્ સમાહિતાઃ ॥ ૧૨૮.૫૧॥

૧૨૮.૫૨/૧ભવિષ્યન્તિ ન સંદેહો વહ્ને શ઼્ણુ વચો મમ ।
૧૨૮.૫૨/૨ત્રયાણામપિ લોકાનાં પાવનઃ સ ભવિષ્યતિ ॥ ૧૨૮.૫૨॥

૧૨૮.૫૩/૧સ એવ ચામૃતં લોકે સ એવ સુરવલ્લભઃ ।
૧૨૮.૫૩/૨સ એવ ભુક્તિમુક્તી ચ સ એવ મખદક્ષિણા ॥ ૧૨૮.૫૩॥

૧૨૮.૫૪/૧સ એવ રૂપં સર્વસ્ય ગુરૂણામપ્યસૌ ગુરુઃ ।
૧૨૮.૫૪/૨વીર્યં શ્રેષ્ઠતમં વિદ્યાદ્ વીર્યં મત્તો યદ્ ઉત્તમમ્ ॥ ૧૨૮.૫૪॥

૧૨૮.૫૫/૧વિશેષતસ્ત્વયિ ક્ષિપ્તં તસ્ય કા સ્યાદ્ વિચારણા ।
૧૨૮.૫૫/૨હીનં તેન વિના સર્વં સમ્પૂર્ણાસ્તેન સમ્પદઃ ॥ ૧૨૮.૫૫॥

૧૨૮.૫૬/૧જીવન્તોઽપિ મૃતાઃ સર્વે સુવર્ણેન વિના નરાઃ ।
૧૨૮.૫૬/૨નિર્ગુણોઽપિ ધની માન્યઃ સગુણોઽપ્યધનો નહિ ॥ ૧૨૮.૫૬॥

૧૨૮.૫૭/૧તસ્માન્ નાતઃ પરં કિંચિત્ સુવર્ણાદ્ ધિ ભવિષ્યતિ ।
૧૨૮.૫૭/૨તથા ચૈષા સુવર્ણાપિ સ્યાદ્ ઉત્કૃષ્ટાપિ ચઞ્ચલા ॥ ૧૨૮.૫૭॥

૧૨૮.૫૮/૧અનયા વીક્ષિતં સર્વં ન્યૂનં પૂર્ણં ભવિષ્યતિ ।
૧૨૮.૫૮/૨તપસા જપહોમૈશ્ચ યેયં પ્રાપ્યા જગત્ત્રયે ॥ ૧૨૮.૫૮॥

૧૨૮.૫૯/૧તસ્યાઃ પ્રભાવં પ્રાશસ્ત્યમગ્રે કિંચિચ્ચ કીર્ત્યતે ।
૧૨૮.૫૯/૨સર્વત્ર યા તુ સંતિષ્ઠેદ્ આયાતુ વિચરિષ્યતિ ॥ ૧૨૮.૫૯॥

૧૨૮.૬૦/૧સુવર્ણા કમલા સાક્ષાત્ પવિત્રા ચ ભવિષ્યતિ ।
૧૨૮.૬૦/૨અદ્ય પ્રભૃત્યાત્મજયોસ્તથા સ્વૈરં વિચેષ્ટતોઃ ॥ ૧૨૮.૬૦॥

૧૨૮.૬૧/૧તથાપિ ચૈતયોઃ પુણ્યં ન ભૂતં ન ભવિષ્યતિ ॥ ૧૨૮.૬૧॥

૧૨૮.૬૨/૧બ્રહ્મોવાચ । એવમુક્ત્વા તતઃ શમ્ભુઃ સાક્ષાત્ તત્રાભવચ્છિવઃ ।
૧૨૮.૬૨/૨લિઙ્ગરૂપેણ સર્વેષાં લોકાનાં હિતકામ્યયા ॥ ૧૨૮.૬૨॥

૧૨૮.૬૩/૧વરાન્ પ્રાપ્ય સુતાભ્યાં સ અગ્નિસ્તુષ્ટોઽભવત્ તતઃ ।
૧૨૮.૬૩/૨સ્વભર્ત્રા ચ સુવર્ણા સા ધર્મેણાગ્નિસુતા મુદા ॥ ૧૨૮.૬૩॥

૧૨૮.૬૪/૧વર્તયામાસ પુત્રોઽપિ વહ્નેઃ સંકલ્પયા મુદા ।
૧૨૮.૬૪/૨એતસ્મિન્ન્ અન્તરે સ્વર્ણામગ્નેર્દુહિતરં મુને ॥ ૧૨૮.૬૪॥

૧૨૮.૬૫/૧પરિભૂય ચ ધર્મં તં શાર્દૂલો દાનવેશ્વરઃ ।
૧૨૮.૬૫/૨અહરદ્ ભાગ્યસૌભાગ્ય+ ।વિલાસવસતિં છલાત્ ॥ ૧૨૮.૬૫॥

૧૨૮.૬૬/૧નીતા રસાતલં તેન સુવર્ણા લોકવિશ્રુતા ।
૧૨૮.૬૬/૨જામાતાગ્નેઃ સ ધર્મશ્ચ અગ્નિશ્ચૈવ સ હવ્યવાટ્ ॥ ૧૨૮.૬૬॥

૧૨૮.૬૭/૧વિષ્ણવે લોકનાથાય સ્તુત્વા ચૈવ પુનઃ પુનઃ ।
૧૨૮.૬૭/૨કાર્યવિજ્ઞાપનં ચોભૌ ચક્રતુઃ પ્રભવિષ્ણવે ॥ ૧૨૮.૬૭॥

૧૨૮.૬૮/૧તતશ્ચક્રેણ ચિચ્છેદ શાર્દૂલસ્ય શિરો હરિઃ ।
૧૨૮.૬૮/૨સાનીતા વિષ્ણુના દેવી સુવર્ણા લોકસુન્દરી ॥ ૧૨૮.૬૮॥

૧૨૮.૬૯/૧મહેશ્વરસુતા ચૈવ અગ્નેશ્ચૈવ તથા પ્રિયા ।
૧૨૮.૬૯/૨મહેશ્વરાય તાં વિષ્ણુર્દર્શયામાસ નારદ ॥ ૧૨૮.૬૯॥

૧૨૮.૭૦/૧પ્રીતોઽભવન્ મહેશોઽપિ સસ્વજે તાં પુનઃ પુનઃ ।
૧૨૮.૭૦/૨ચક્રં પ્રક્ષાલિતં યત્ર શાર્દૂલચ્છેદિ દીપ્તિમત્ ॥ ૧૨૮.૭૦॥

૧૨૮.૭૧/૧ચક્રતીર્થં તુ વિખ્યાતં શાર્દૂલં ચેતિ તદ્ વિદુઃ ।
૧૨૮.૭૧/૨યત્ર નીતા સુવર્ણા સા વિષ્ણુના શંકરાન્તિકમ્ ॥ ૧૨૮.૭૧॥

૧૨૮.૭૨/૧તત્ તીર્થં શાંકરં જ્ઞેયં વૈષ્ણવં સિદ્ધમેવ તુ ।
૧૨૮.૭૨/૨યત્રાનન્દમનુપ્રાપ્તો હ્યગ્નિર્ધર્મશ્ચ શાશ્વતઃ ॥ ૧૨૮.૭૨॥

૧૨૮.૭૩/૧આનન્દાશ્રૂણિ ન્યપતન્ યત્રાગ્નેર્મુનિસત્તમ ।
૧૨૮.૭૩/૨આનન્દેતિ નદી જાતા તથા વૈ નન્દિનીતિ ચ ॥ ૧૨૮.૭૩॥

૧૨૮.૭૪/૧તસ્યાશ્ચ સંગમઃ પુણ્યો ગઙ્ગાયાં તત્ર વૈ શિવઃ ।
૧૨૮.૭૪/૨તત્રૈવ સંગમે સાક્ષાત્ સુવર્ણાદ્યાપિ સંસ્થિતા ॥ ૧૨૮.૭૪॥

૧૨૮.૭૫/૧દાક્ષાયણી સૈવ શિવા આગ્નેયી ચેતિ વિશ્રુતા ।
૧૨૮.૭૫/૨અમ્બિકા જગદાધારા શિવા કાત્યાયનીશ્વરી ॥ ૧૨૮.૭૫॥

૧૨૮.૭૬/૧ભક્તાભીષ્ટપ્રદા નિત્યમલંકૃત્યોભયં તટમ્ ।
૧૨૮.૭૬/૨તપસ્તેપે યત્ર ચાગ્નિસ્તત્ તીર્થં તુ તપોવનમ્ ॥ ૧૨૮.૭૬॥

૧૨૮.૭૭/૧એવમાદીનિ તીર્થાનિ તીરયોરુભયોર્મુને ।
૧૨૮.૭૭/૨તેષુ સ્નાનં ચ દાનં ચ સર્વકામપ્રદં શુભમ્ ॥ ૧૨૮.૭૭॥

૧૨૮.૭૮/૧ઉત્તરે ચૈવ પારે ચ સહસ્રાણિ ચતુર્દશ ।

૧૨૮.૭૮/૨દક્ષિણે ચ તથા પારે સહસ્રાણ્યથ ષોડશ ॥ ૧૨૮.૭૮॥

૧૨૮.૭૯/૧તત્ર તત્ર ચ તીર્થાનિ સાભિજ્ઞાનાનિ સન્તિ વૈ ।

૧૨૮.૭૯/૨નામાનિ ચ પૃથક્ સન્તિ સંક્ષેપાત્ તન્ મયોચ્યતે ॥ ૧૨૮.૭૯॥

૧૨૮.૮૦/૧એતાનિ યશ્ચ શૃણુયાદ્ યશ્ચ વા પઠતિ સ્મરેત્ ।

૧૨૮.૮૦/૨સર્વેષુ તત્ર કામ્યેષુ પરિપૂર્ણો ભવેન્ નરઃ ॥ ૧૨૮.૮૦॥

૧૨૮.૮૧/૧એતદ્ વૃત્તં તુ યો જ્ઞાત્વા તત્ર સ્નાનાદિકં ચરેત્ ।

૧૨૮.૮૧/૨લક્ષ્મીવાઞ્ જાયતે નિત્યં ધર્મવાંશ્ચ વિશેષતઃ ॥ ૧૨૮.૮૧॥

૧૨૮.૮૨/૧અબ્જકાત્ પશ્ચિમે તીર્થં તચ્છાર્દૂલમુદાહૃતમ્ ।

૧૨૮.૮૨/૨વારાણસ્યાદિતીર્થેભ્યઃ સર્વેભ્યો હ્યધિકં ભવેત્ ॥ ૧૨૮.૮૨॥

૧૨૮.૮૩/૧તત્ર સ્નાત્વા પિતૄન્ દેવાન્ વન્દતે તર્પયત્યપિ ।

૧૨૮.૮૩/૨સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકે મહીયતે ॥ ૧૨૮.૮૩॥

૧૨૮.૮૪/૧તપોવનાચ્ચ શાર્દૂલાન્ મધ્યે તીર્થાન્યશેષતઃ ।

૧૨૮.૮૪/૨તસ્યૈકૈકસ્ય માહાત્મ્યં ન કેનાપ્યત્ર વર્ણ્યતે ॥ ૧૨૮.૮૪॥

૧૨૯.૧/૧બ્રહ્મોવાચ । ઇન્દ્રતીર્થમિતિ ખ્યાતં તત્રૈવ ચ વૃષાકપમ્ ।

૧૨૯.૧/૨ફેનાયાઃ સંગમો યત્ર હનૂમતં તથૈવ ચ ॥ ૧૨૯.૧॥

૧૨૯.૨/૧અબ્જકં ચાપિ યત્ પ્રોક્તં યત્ર દેવસ્ત્રિવિક્રમઃ ।

૧૨૯.૨/૨તત્ર સ્નાનં ચ દાનં ચ પુનરાવૃત્તિદુર્લભમ્ ॥ ૧૨૯.૨॥

૧૨૯.૩/૧તત્ર વૃત્તાન્યથાખ્યાસ્યે ગઙ્ગાયા દક્ષિણે તટે ।

૧૨૯.૩/૨ઇન્દ્રેશ્વરં ચોત્તરે ચ શૃણુ ભક્ત્યા યતવ્રતઃ ॥ ૧૨૯.૩॥

૧૨૯.૪/૧નમુચિર્બલવાન્ આસીદ્ ઇન્દ્રશત્રુર્મદોત્કટઃ ।

૧૨૯.૪/૨તસ્યેન્દ્રેણાભવદ્ યુદ્ધં ફેનેનેન્દ્રોઽહરચ્છિરઃ ॥ ૧૨૯.૪॥

૧૨૯.૫/૧અપાં ચ નમુચેઃ શત્રોસ્તત્ફેનવજ્રરૂપધૃક્ ।

૧૨૯.૫/૨શિરશ્છિત્ત્વા તચ્ચ ફેનં ગઙ્ગાયા દક્ષિણે તટે ॥ ૧૨૯.૫॥

૧૨૯.૬/૧ન્યપતદ્ ભૂમિં ભિત્ત્વા તુ રસાતલમથાવિશત્ ।

૧૨૯.૬/૨રસાતલભવં ગાઙ્ગં વારિ યદ્ વિશ્વપાવનમ્ ॥ ૧૨૯.૬॥

૧૨૯.૭/૧વજ્રાદિષ્ટેન માર્ગેણ વ્યગમદ્ ભૂમિમણ્ડલમ્ ।

૧૨૯.૭/૨તજ્જલં ફેનનામ્ના તુ નદી ફેનેતિ ગદ્યતે ॥ ૧૨૯.૭॥

૧૨૯.૮/૧તસ્યાસ્તુ સંગમઃ પુણ્યો ગઙ્ગયા લોકવિશ્રુતઃ ।
૧૨૯.૮/૨સર્વપાપક્ષયકરો ગઙ્ગાયમુનયોરિવ ॥ ૧૨૯.૮॥

૧૨૯.૯/૧હનૂમદુપમાતા વૈ યત્રાપ્લવનમાત્રતઃ ।
૧૨૯.૯/૨માર્જારત્વાદ્ અભૂન્ મુક્તા વિષ્ણુગઙ્ગાપ્રસાદતઃ ॥ ૧૨૯.૯॥

૧૨૯.૧૦/૧માર્જારં ચેતિ તત્ તીર્થં પુરા પ્રોક્તં મયા તવ ।
૧૨૯.૧૦/૨હનૂમતં ચ તત્ પ્રોક્તં તત્રાખ્યાનં પુરોદિતમ્ ॥ ૧૨૯.૧૦॥

૧૨૯.૧૧/૧વૃષાકપં ચાબ્જકં ચ તત્રેદં પ્રયતઃ શ‍ૃણુ ।
૧૨૯.૧૧/૨હિરણ્ય ઇતિ વિખ્યાતો દૈત્યાનાં પૂર્વજો બલી ॥ ૧૨૯.૧૧॥

૧૨૯.૧૨/૧તપસ્તપ્ત્વા સુરૈઃ સર્વૈરજેયોઽભૂત્ સુદારુણઃ ।
૧૨૯.૧૨/૨તસ્યાપિ બલવાન્ પુત્રો દેવાનાં દુર્જયઃ સદા ॥ ૧૨૯.૧૨॥

૧૨૯.૧૩/૧મહાશનિરિતિ ખ્યાતસ્તસ્ય ભાર્યા પરાજિતા ।
૧૨૯.૧૩/૨તેનેન્દ્રસ્યાભવદ્ યુદ્ધં બહુકાલં નિરન્તરમ્ ॥ ૧૨૯.૧૩॥

૧૨૯.૧૪/૧મહાશનિર્મહાવીર્યઃ સતતં રણમૂર્ધનિ ।
૧૨૯.૧૪/૨જિત્વા નાગેન સહિતં શક્રં પિત્રે ન્યવેદયત્ ॥ ૧૨૯.૧૪॥

૧૨૯.૧૫/૧બદ્ધ્વા હસ્તિસમાયુક્તં સ્વસારં વીક્ષ્ય તાં તદા ।
૧૨૯.૧૫/૨વિહાય ક્રૂરતાં દૈત્યો હિરણ્યાય ન્યવેદયત્ ॥ ૧૨૯.૧૫॥

૧૨૯.૧૬/૧મહાશનિપિતા દૈત્યઃ પૂર્વેષાં પૂર્વવત્તરઃ ।
૧૨૯.૧૬/૨શચીકાન્તં તલે સ્થાપ્ય તસ્ય રક્ષામથાકરોત્ ॥ ૧૨૯.૧૬॥

૧૨૯.૧૭/૧મહાશનિર્હરિં જિત્વા જેતું વરુણમભ્યગાત્ ।
૧૨૯.૧૭/૨વરુણોઽપિ મહાબુદ્ધિઃ પ્રાદાત્ કન્યાં મહાશનેઃ ॥ ૧૨૯.૧૭॥

૧૨૯.૧૮/૧ઉદધિં સ્વાલયં પ્રાદાદ્ વરુણસ્તુ મહાશનેઃ ।
૧૨૯.૧૮/૨તયોશ્ચ સખ્યમભવદ્ વરુણસ્ય મહાશનેઃ ॥ ૧૨૯.૧૮॥

૧૨૯.૧૯/૧વારુણી ચાપિ યા કન્યા સા પ્રિયાભૂન્ મહાશનેઃ ।
૧૨૯.૧૯/૨વીર્યેણ યશસા ચાપિ શૌર્યેણ ચ બલેન ચ ॥ ૧૨૯.૧૯॥

૧૨૯.૨૦/૧મહાશનિર્મહાદૈત્યસ્ત્રૈલોક્યે નોપમીયતે ।
૧૨૯.૨૦/૨નિરિન્દ્રત્વં ગતે લોકે દેવાઃ સર્વે ન્યમન્ત્રયન્ ॥ ૧૨૯.૨૦॥

૧૨૯.૨૧/૧દેવા ઊચુઃ । વિષ્ણુરેવેન્દ્રદાતા સ્યાદ્ દૈત્યહન્તા સ એવ ચ ।
૧૨૯.૨૧/૨મન્ત્રદૃગ્ વા સ એવ સ્યાદ્ ઇન્દ્રં ચાન્યં કરિષ્યતિ ॥ ૧૨૯.૨૧॥

૧૨૯.૨૨/૧બ્રહ્મોવાચ । એવં સમ્મન્ત્ર્ય તે દેવા વિષ્ણોર્મન્ત્રં ન્યવેદયન્ ।
૧૨૯.૨૨/૨મમાવધ્યો મહાદૈત્યો મહાશનિરિતિ બ્રુવન્ ॥ ૧૨૯.૨૨॥

૧૨૯.૨૩/૧પ્રાયાદ્ વારીશ્વરં વિષ્ણુઃ શ્વશુરં વરુણં તદા ।
૧૨૯.૨૩/૨કેશવો વરુણં ગત્વા પ્રાહેન્દ્રસ્ય પરાભવમ્ ॥ ૧૨૯.૨૩॥

૧૨૯.૨૪/૧તથા ત્વયૈતત્ કર્તવ્યં યથાયાતિ પુરંદરઃ ।
૧૨૯.૨૪/૨તદ્વિષ્ણુવચનાચ્છીઘ્રં યયૌ જલપતિર્મુને ॥ ૧૨૯.૨૪॥

૧૨૯.૨૫/૧સુતાપતિં હિરણ્યસુતં વિક્રાન્તં તં મહાશનિમ્ ।
૧૨૯.૨૫/૨અતિસમ્માનિતસ્તેન જામાત્રા વરુણઃ પ્રભુઃ ॥ ૧૨૯.૨૫॥

૧૨૯.૨૬/૧પપ્રચ્છાગમનં દૈત્યો વિનયાચ્છ્વશુરં તદા ।
૧૨૯.૨૬/૨વરુણઃ પ્રાહ તં દૈત્યં યદ્ આગમનકારણમ્ ॥ ૧૨૯.૨૬॥

૧૨૯.૨૭/૧વરુણ ઉવાચ । ઇન્દ્રં દેહિ મહાબાહો યસ્ત્વયા નિર્જિતઃ પુરા ।
૧૨૯.૨૭/૨બદ્ધં રસાતલસ્થં તં દેવાનામધિપં સખે ॥ ૧૨૯.૨૭॥

૧૨૯.૨૮/૧અસ્માકં સર્વદા માન્યં દેહિ ત્વં મમ શત્રુહન્ ।
૧૨૯.૨૮/૨બદ્ધ્વા વિમોક્ષણં શત્રોર્મહતે યશસે સતામ્ ॥ ૧૨૯.૨૮॥

૧૨૯.૨૯/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા કથંચિત્ સ દૈત્યેશો વરુણાય તમ્ ।
૧૨૯.૨૯/૨પ્રાદાદ્ ઇન્દ્રં શચીકાન્તં વારણેન સમન્વિતમ્ ॥ ૧૨૯.૨૯॥

૧૨૯.૩૦/૧સ દૈત્યમધ્યેઽતિવિરાજમાનો ।
૧૨૯.૩૦/૨હરિં તદોવાચ જલેશસંનિધૌ ।
૧૨૯.૩૦/૩સમ્પૂજ્ય ચૈવાથ મહોપચારૈર્।
૧૨૯.૩૦/૪મહાશનિર્મઘવન્તં બભાષે ॥ ૧૨૯.૩૦॥

૧૨૯.૩૧/૧મહાશનિરુવાચ । કેન ત્વમિન્દ્રોઽદ્ય કૃતોઽસિ કેન ।
૧૨૯.૩૧/૨વીર્યં તવેદૃગ્ બહુ ભાષસે ચ ।
૧૨૯.૩૧/૩ત્વં સંગરે શત્રુભિર્બાધ્યસે ચ ।
૧૨૯.૩૧/૪તથાપિ ચેન્દ્રો ભવસીતિ ચિત્રમ્ ॥ ૧૨૯.૩૧॥

૧૨૯.૩૨/૧અથાપિ બદ્ધા પુરુષેણ કાચિત્ ।
૧૨૯.૩૨/૨તસ્યાઃ પતિસ્તાં મોચયતીતિ યુક્તમ્ ।

૧૨૯.૩૨/૩સ્ત્રિયોઽસ્વતન્ત્રાઃ પુરુષપ્રધાનાસ્- ।
૧૨૯.૩૨/૪ત્વં વૈ પુમાન્ ભવિતા શક્ર સાધો ॥ ૧૨૯.૩૨॥

૧૨૯.૩૩/૧બદ્ધો મયા સંગરે વાહનેન ।
૧૨૯.૩૩/૨ક્વાપ્યસ્ત્રં તે વજ્રમુદ્દામશક્તિ ।
૧૨૯.૩૩/૩ચિન્તારત્નં નન્દનં યોષિતસ્તા ।
૧૨૯.૩૩/૪યશો બલં દેવરાજોપભોગ્યમ્ ।
૧૨૯.૩૩/૫સર્વં હિ ત્વા કિં તુ મુક્તો જલેશાદ્ ।
૧૨૯.૩૩/૬આકાઙ્ક્ષસે જીવિતં ધિક્ તવેદમ્ ॥ ૧૨૯.૩૩॥

૧૨૯.૩૪/૧તજ્જીવનં યત્ તુ યશોનિધાનમ્ ।
૧૨૯.૩૪/૨સ એવ મૃત્યુર્યશસો યદ્ વિરોધિ ।
૧૨૯.૩૪/૩એવં જાનઞ્ શક્ર કથં જલેશાન્ ।
૧૨૯.૩૪/૪મુક્તિં પ્રાપ્તો નૈવ લજ્જાં ભજેથાઃ ॥ ૧૨૯.૩૪॥

૧૨૯.૩૫/૧ત્રિવિષ્ટપસ્થઃ પરિવેષ્ટિતઃ સન્ ।
૧૨૯.૩૫/૨સર્વૈઃ સુરૈઃ કાન્તયા વીજ્યમાનઃ ।
૧૨૯.૩૫/૩સંસ્તૂયમાનશ્ચ તથાપ્સરોભિર્।
૧૨૯.૩૫/૪નૂનં લજ્જા તે બિભેતીતિ મન્યે ॥ ૧૨૯.૩૫॥

૧૨૯.૩૬/૧ત્વં વૃત્રહા નમુચેશ્ચાપિ હન્તા ।
૧૨૯.૩૬/૨પુરાં ભેત્તા ગોત્રભિદ્ વજ્રબાહુઃ ।
૧૨૯.૩૬/૩એવં સુરાસ્ત્વાં પરિપૂજયન્તીત્ય્।
૧૨૯.૩૬/૪અતો જિષ્ણો સર્વમેતત્ ત્યજસ્વ ॥ ૧૨૯.૩૬॥

૧૨૯.૩૭/૧વિકારમાપ્યાપ્યહિતોદ્ભવં યે ।
૧૨૯.૩૭/૨જીવન્તિ લોકાન્ અનુસંવિશન્તિ ।
૧૨૯.૩૭/૩ભવાદૃશાં દુશ્ચ્યવનાબ્જજન્મા ।
૧૨૯.૩૭/૪કથં ન હૃદ્ભેદમવાપ કર્તા ॥ ૧૨૯.૩૭॥

૧૨૯.૩૮/૧બ્રહ્મોવાચ । એવમુક્ત્વા તુ દૈત્યેશો વરુણાય મહાત્મને ।
૧૨૯.૩૮/૨પ્રાદાદ્ ઇન્દ્રં પુનશ્ચેદં વચનં તદ્ અભાષત ॥ ૧૨૯.૩૮॥

૧૨૯.૩૯/૧મહાશનિરુવાચ । અદ્ય પ્રભૃત્યસૌ શિષ્ય ઇન્દ્રઃ સ્યાદ્ વરુણો ગુરુઃ ।
૧૨૯.૩૯/૨શ્વશુરો મમ યેન ત્વં મુક્તિમાપ્તોઽસિ વાસવ ॥ ૧૨૯.૩૯॥

૧૨૯.૪૦/૧તથા ત્વં ભૃત્યભાવેન વર્તેથા વરુણં પ્રતિ ।

૧૨૯.૪૦/૨નો ચેદ્ બદ્ધ્વા પુનસ્ત્વાં વૈ ક્ષેપ્સ્યે ચૈવ રસાતલમ્ ॥ ૧૨૯.૪૦॥

૧૨૯.૪૧/૧બ્રહ્મોવાચ । એવં નિર્ભર્ત્સ્ય તં શક્રં હસંશ્ચાપિ પુનઃ પુનઃ ।
૧૨૯.૪૧/૨અબ્રવીદ્ ગચ્છ ગચ્છેતિ વરુણં ચાનુમન્ય તુ ॥ ૧૨૯.૪૧॥

૧૨૯.૪૨/૧સ તુ પ્રાપ્તઃ સ્વનિલયં લજ્જયા કલુષીકૃતઃ ।
૧૨૯.૪૨/૨પૌલોમ્યાં પ્રાહ તત્ સર્વં યત્ તચ્છત્રુપરાભવમ્ ॥ ૧૨૯.૪૨॥

૧૨૯.૪૩/૧ઇન્દ્ર ઉવાચ । એવમુક્તઃ કૃતશ્ચૈવ શત્રુણાહં વરાનને ।
૧૨૯.૪૩/૨નિર્વાપયામિ યેન સ્વમાત્માનં સુભગે વદ ॥ ૧૨૯.૪૩॥

૧૨૯.૪૪/૧ઇન્દ્રાણ્યુવાચ । દાનવાનામથોદ્ભૂતિં શક્ર માયાં પરાભવમ્ ।
૧૨૯.૪૪/૨વરદાનં તથા મૃત્યું જાનેઽહં બલસૂદન ॥ ૧૨૯.૪૪॥

૧૨૯.૪૫/૧તસ્માદ્ યસ્માત્ તસ્ય મૃત્યુરથવાપિ પરાભવઃ ।
૧૨૯.૪૫/૨જાયેત શ ृણુ તત્ સર્વં વક્ષ્યેઽહં પ્રીતયે તવ ॥ ૧૨૯.૪૫॥

૧૨૯.૪૬/૧હિરણ્યસ્ય સુતો વીરઃ પિતૃવ્યસ્ય સુતો બલી ।
૧૨૯.૪૬/૨તસ્માન્ મમ સ્યાત્ સ ભ્રાતા વરદાનાચ્ચ દર્પિતઃ ॥ ૧૨૯.૪૬॥

૧૨૯.૪૭/૧બ્રહ્માણં તોષયામાસ તપસા નિયમેન ચ ।
૧૨૯.૪૭/૨ઈદૃશં બલમાપન્નં તપસા કિં ન સિધ્યતિ ॥ ૧૨૯.૪૭॥

૧૨૯.૪૮/૧તસ્માત્ ત્વયા ચિત્તરાગો વિસ્મયો વા કથંચન ।
૧૨૯.૪૮/૨ન કાર્યઃ શ ृણુ તત્રેદં કાર્યં યત્ તુ ક્રમાગતમ્ ॥ ૧૨૯.૪૮॥

૧૨૯.૪૯/૧બ્રહ્મોવાચ । એવમુક્ત્વા તુ પૌલોમી પ્રાહેન્દ્રં વિનયાન્વિતા ॥ ૧૨૯.૪૯॥

૧૨૯.૫૦/૧ઇન્દ્રાણ્યુવાચ । નાસાધ્યમસ્તિ તપસો નાસાધ્યં યજ્ઞકર્મણઃ ।
૧૨૯.૫૦/૨નાસાધ્યં લોકનાથસ્ય વિષ્ણોર્ભક્ત્યા હરસ્ય ચ ॥ ૧૨૯.૫૦॥

૧૨૯.૫૧/૧પુનશ્ચેદં મયા કાન્ત શ્રુતમસ્ત્યતિશોભનમ્ ।
૧૨૯.૫૧/૨સ્ત્રીણાં સ્વભાવં જાનન્તિ સ્ત્રિય એવ સુરાધિપ ॥ ૧૨૯.૫૧॥

૧૨૯.૫૨/૧તસ્માદ્ ભૂમેસ્તથા ચાપાં નાસાધ્યં વિદ્યતે પ્રભો ।
૧૨૯.૫૨/૨તપો વા યજ્ઞકર્માદિ તાભ્યામેવ યતો ભવેત્ ॥ ૧૨૯.૫૨॥

૧૨૯.૫૩/૧તત્રાપિ તીર્થભૂતા તુ યા ભૂમિસ્તાં વ્રજેદ્ ભવાન્ ।
૧૨૯.૫૩/૨તત્ર વિષ્ણું શિવં પૂજ્ય સર્વાન્ કામાન્ અવાપ્સ્યસિ ॥ ૧૨૯.૫૩॥

૧૨૯.૫૪/૧શ્રુતમસ્તિ પુનશ્ચેદં સ્ત્રિયો યાશ્ચ પતિવ્રતાઃ ।

૧૨૯.૫૪/૨તા એવ સર્વં જાનન્તિ ધૃતં તાભિશ્ચરાચરમ્ ॥ ૧૨૯.૫૪॥

૧૨૯.૫૫/૧પૃથિવ્યાં સારભૂતં સ્યાત્ તન્મધ્યે દણ્ડકં વનમ્ ।
૧૨૯.૫૫/૨તત્ર ગઙ્ગા જગદ્ધાત્રી તત્રેશં પૂજય પ્રભો ॥ ૧૨૯.૫૫॥

૧૨૯.૫૬/૧વિષ્ણું વા જગતામીશં દીનાર્તાર્તિહરં વિભુમ્ ।
૧૨૯.૫૬/૨અનાથાનામિહ નૃણાં મજ્જતાં દુઃખસાગરે ॥ ૧૨૯.૫૬॥

૧૨૯.૫૭/૧હરો હરિર્વા ગઙ્ગા વા ક્વાપ્યન્યચ્છરણં નહિ ।
૧૨૯.૫૭/૨તસ્માત્ સર્વપ્રયત્નેન તોષયૈતાન્ સમાહિતઃ ॥ ૧૨૯.૫૭॥

૧૨૯.૫૮/૧ભક્ત્યા સ્તોત્રૈશ્ચ તપસા કુરુ ચૈવ મયા સહ ।
૧૨૯.૫૮/૨તતઃ પ્રાપ્સ્યસિ કલ્યાણમીશવિષ્ણુપ્રસાદજમ્ ॥ ૧૨૯.૫૮॥

૧૨૯.૫૯/૧અજ્ઞાત્વૈકગુણં કર્મ ફલં દાસ્યતિ કર્મિણઃ ।
૧૨૯.૫૯/૨જ્ઞાત્વા શતગુણં તત્ સ્યાદ્ ભાર્યયા ચ તદ્ અક્ષયમ્ ॥ ૧૨૯.૫૯॥

૧૨૯.૬૦/૧પુંસઃ સર્વેષુ કાર્યેષુ ભાર્યૈવેહ સહાયિની ।
૧૨૯.૬૦/૨સ્વલ્પાનામપિ કાર્યાણાં નહિ સિદ્ધિસ્તયા વિના ॥ ૧૨૯.૬૦॥

૧૨૯.૬૧/૧એકેન યત્ કૃતં કર્મ તસ્માદ્ અર્ધફલં ભવેત્ ।
૧૨૯.૬૧/૨જાયયા તુ કૃતં નાથ પુષ્કલં પુરુષો લભેત્ ॥ ૧૨૯.૬૧॥

૧૨૯.૬૨/૧તસ્માદ્ એતત્ સુવિદિતમર્ધો જાયા ઇતિ શ્રુતેઃ ।
૧૨૯.૬૨/૨શ્રૂયતે દણ્ડકારણ્યે સરિચ્છ્રેષ્ઠાસ્તિ ગૌતમી ॥ ૧૨૯.૬૨॥

૧૨૯.૬૩/૧અશેષાઘપ્રશમની સર્વાભીષ્ટપ્રદાયિની ।
૧૨૯.૬૩/૨તસ્માદ્ ગચ્છ મયા તત્ર કુરુ પુણ્યં મહાફલમ્ ॥ ૧૨૯.૬૩॥

૧૨૯.૬૪/૧તતઃ શત્રૂન્ નિહત્યાજૌ મહત્ સુખમવાપ્સ્યસિ ॥ ૧૨૯.૬૪॥

૧૨૯.૬૫/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સ ગુરુણા ભાર્યયા ચ શતક્રતુઃ ।
૧૨૯.૬૫/૨યયૌ ગઙ્ગાં જગદ્ધાત્રીં ગૌતમીં ચેતિ વિશ્રુતામ્ ॥ ૧૨૯.૬૫॥

૧૨૯.૬૬/૧દણ્ડકારણ્યમધ્યસ્થાં યયૌ સ પ્રીતિમાન્ હરિઃ ।
૧૨૯.૬૬/૨તપઃ કર્તું મનશ્ચક્રે દેવદેવાય શમ્ભવે ॥ ૧૨૯.૬૬॥

૧૨૯.૬૭/૧ગઙ્ગાં નત્વા તુ પ્રથમં સ્નાત્વા ચ સ કૃતાઞ્જલિઃ ।
૧૨૯.૬૭/૨શિવૈકશરણો ભૂત્વા સ્તોત્રં ચેદં તતોઽબ્રવીત્ ॥ ૧૨૯.૬૭॥

૧૨૯.૬૮/૧ઇન્દ્ર ઉવાચ । સ્વમાયયા યો હ્યખિલં ચરાચરમ્ ।

૧૨૯.૬૮/૨સૃજત્યવત્યત્તિ ન સજ્જતેऽસ્મિન્ ।
૧૨૯.૬૮/૩એકઃ સ્વતન્ત્રોऽદ્વયચિત્ સુખાત્મકઃ ।
૧૨૯.૬૮/૪સ નઃ પ્રસન્નોऽસ્તુ પિનાકપાણિઃ ॥ ૧૨૯.૬૮॥

૧૨૯.૬૯/૧ન યસ્ય તત્ત્વં સનકાદયોऽપિ ।
૧૨૯.૬૯/૨જાનન્તિ વેદાન્તરહસ્યવિજ્ઞાઃ ।
૧૨૯.૬૯/૩સ પાર્વતીશઃ સકલાભિલાષ+ ।
૧૨૯.૬૯/૪દાતા પ્રસન્નોऽસ્તુ મમાન્ધકારિઃ ॥ ૧૨૯.૬૯॥

૧૨૯.૭૦/૧સૃષ્ટ્વા સ્વયમ્ભૂર્ભગવાન્ વિરિઞ્ચિમ્ ।
૧૨૯.૭૦/૨ભયંકરં ચાસ્ય શિરોऽન્વપશ્યત્ ।
૧૨૯.૭૦/૩છિત્ત્વા નખાગ્રૈર્નખસક્તમેતચ્ ।
૧૨૯.૭૦/૪ચિક્ષેપ તસ્માદ્ અભવત્ ત્રિવર્ગઃ ॥ ૧૨૯.૭૦॥

૧૨૯.૭૧/૧પાપં દરિદ્રં ત્વથ લોભયાચ્ઞે ।
૧૨૯.૭૧/૨મોહો વિપચ્ચેતિ તતોऽપ્યનન્તમ્ ।
૧૨૯.૭૧/૩જાતપ્રભાવં ભવદુઃખરૂપમ્ ।
૧૨૯.૭૧/૪બભૂવ તૈર્વ્યાપ્તમિદં સમસ્તમ્ ॥ ૧૨૯.૭૧॥

૧૨૯.૭૨/૧અવેક્ષ્ય સર્વં ચકિતઃ સુરેશો ।
૧૨૯.૭૨/૨દેવીમવોચજ્જગદ્ અસ્તમેતિ ।
૧૨૯.૭૨/૩ત્વં પાહિ લોકેશ્વરિ લોકમાતર્।
૧૨૯.૭૨/૪ઉમે શરણ્યે સુભગે સુભદ્રે ॥ ૧૨૯.૭૨॥

૧૨૯.૭૩/૧જગત્પ્રતિષ્ઠે વરદે જય ત્વમ્ ।
૧૨૯.૭૩/૨ભુક્તિઃ સમાધિઃ પરમા ચ મુક્તિઃ ।
૧૨૯.૭૩/૩સ્વાહા સ્વધા સ્વસ્તિરનાદિસિદ્ધિર્।
૧૨૯.૭૩/૪ગીર્બુદ્ધિરાસીરજરામરે ત્વમ્ ॥ ૧૨૯.૭૩॥

૧૨૯.૭૪/૧વિદ્યાદિરૂપેણ જગત્ત્રયે ત્વમ્ ।
૧૨૯.૭૪/૨રક્ષાં કરોષ્યેવ મદાજ્ઞયા ચ ।
૧૨૯.૭૪/૩ત્વયૈવ સૃષ્ટં ભુવનત્રયં સ્યાદ્ ।
૧૨૯.૭૪/૪યતઃ પ્રકૃત્યૈવ તથૈવ ચિત્રમ્ ॥ ૧૨૯.૭૪॥

૧૨૯.૭૫/૧ઇત્યેવમુક્તા દયિતા હરેણ ।
૧૨૯.૭૫/૨સંશ્લેષસંલાપપરા બભૂવ ।
૧૨૯.૭૫/૩શ્રાન્તા ભવસ્યાર્ધતનૌ સુલગ્ના ।

૧૨૯.૭૫/૪ચિક્ષેપ ચ સ્વેદજલં કરાગ્રૈઃ ॥ ૧૨૯.૭૫॥

૧૨૯.૭૬/૧તસ્માદ્ બભૂવ પ્રથમં સ ધર્મો ।
૧૨૯.૭૬/૨લક્ષ્મીરથો દાનમથો સુવૃષ્ટિઃ ।
૧૨૯.૭૬/૩સત્ત્વં સુસમ્પન્નધરં સરાંસિ ।
૧૨૯.૭૬/૪ધાન્યાનિ પુષ્પાણિ ફલાનિ ચૈવ ॥ ૧૨૯.૭૬॥

૧૨૯.૭૭/૧સૌભાગ્યવસ્તૂનિ વપુઃ સુવેષઃ ।
૧૨૯.૭૭/૨શ઼્ૃઙ્ગારભાજીનિ મહૌષધાનિ ।
૧૨૯.૭૭/૩નૃત્યાનિ ગીતાન્યમૃતં પુરાણમ્ ।
૧૨૯.૭૭/૪શ્રુતિસ્મૃતી નીતિરથાન્નપાને ॥ ૧૨૯.૭૭॥

૧૨૯.૭૮/૧શસ્ત્રાણિ શાસ્ત્રાણિ ગૃહોપયોગ્યાન્ય્।
૧૨૯.૭૮/૨અસ્ત્રાણિ તીર્થાનિ ચ કાનનાનિ ।
૧૨૯.૭૮/૩ઇષ્ટાનિ પૂર્તાનિ ચ મઙ્ગલાનિ ।
૧૨૯.૭૮/૪યાનાનિ શુભ્રાભરણાસનાનિ ॥ ૧૨૯.૭૮॥

૧૨૯.૭૯/૧ભવાઙ્ગસંસર્ગસુસમ્પ્રહાસ+ ।
૧૨૯.૭૯/૨સુસ્વેદસંલાપરહઃપ્રકારૈઃ ।
૧૨૯.૭૯/૩તથૈવ જાતં સચરાચરં ચ ।
૧૨૯.૭૯/૪અપાપકં દેવિ તતશ્ચ જાતમ્ ॥ ૧૨૯.૭૯॥

૧૨૯.૮૦/૧સુખં પ્રભૂતં ચ શુભં ચ નિત્યમ્ ।
૧૨૯.૮૦/૨વિરાજિ ચૈતત્ તવ દેવિ ભાવાત્ ।
૧૨૯.૮૦/૩તસ્માત્ તુ માં રક્ષ જગજ્જનિત્રિ ।
૧૨૯.૮૦/૪ભીતં ભયેભ્યો જગતાં પ્રધાને ॥ ૧૨૯.૮૦॥

૧૨૯.૮૧/૧એકે તર્કૈર્વિમુહ્યન્તિ લીયન્તે તત્ર ચાપરે ।
૧૨૯.૮૧/૨શિવશક્ત્યોસ્તદાદ્વૈતં સુન્દરં નૌમિ વિગ્રહમ્ ॥ ૧૨૯.૮૧॥

૧૨૯.૮૨/૧બ્રહ્મોવાચ । એવં તુ સ્તુવતસ્તસ્ય પુરસ્તાદ્ અભવચ્છિવઃ ॥ ૧૨૯.૮૨॥

૧૨૯.૮૩/૧શિવ ઉવાચ । કિમભીષ્ટં વરયસે હરે વદ પરાયણમ્ ॥ ૧૨૯.૮૩॥

૧૨૯.૮૪/૧ઇન્દ્ર ઉવાચ । બલવાન્ મે રિપુશ્ચાસીદ્ દર્શનૈશ્ચ શનિર્યથા ।
૧૨૯.૮૪/૨તેન બદ્ધસ્તલં નીતઃ પરિભૂતસ્ત્વનેકધા ॥ ૧૨૯.૮૪॥

૧૨૯.૮૫/૧વાક્સાયકૈસ્તથા વિદ્ધસ્તદ્વધાય ત્વિયં કૃતિઃ ।
૧૨૯.૮૫/૨તદર્થં જગતામીશ યેન જેષ્યે રિપું પ્રભો ॥ ૧૨૯.૮૫॥

૧૨૯.૮૬/૧તદ્ એવ દેહિ વીર્યં મે યચ્ચાન્યદ્ રિપુનાશનમ્ ।
૧૨૯.૮૬/૨જાતઃ પરાભવો યસ્માત્ તદ્વિનાશે કૃતે સતિ ।
૧૨૯.૮૬/૩પુનર્જાતમહં મન્યે વરં કીર્તિર્જયશ્રિયોઃ ॥ ૧૨૯.૮૬॥

૧૨૯.૮૭/૧બ્રહ્મોવાચ । સ શિવઃ શક્રમાહેદં ન મયૈકેન તે રિપુઃ ।
૧૨૯.૮૭/૨વધમાપ્નોતિ તસ્માત્ ત્વં વિષ્ણુમપ્યવ્યયં હરિમ્ ॥ ૧૨૯.૮૭॥

૧૨૯.૮૮/૧આરાધયસ્વ પૌલોમ્યા સહ દેવં જનાર્દનમ્ ।
૧૨૯.૮૮/૨લોકત્રયૈકશરણં નારાયણમનન્યધીઃ ॥ ૧૨૯.૮૮॥

૧૨૯.૮૯/૧તતઃ પ્રાપ્સ્યસિ તસ્માચ્ચ મત્તશ્ચાપિ પ્રિયં હરે ।
૧૨૯.૮૯/૨પુનશ્ચોવાચ ભગવાન્ આદિકર્તા મહેશ્વરઃ ॥ ૧૨૯.૮૯॥

૧૨૯.૯૦/૧મન્ત્રાભ્યાસસ્તપો વાપિ યોગાભ્યસનમેવ ચ ।
૧૨૯.૯૦/૨સંગમે યત્ર કુત્રાપિ સિદ્ધિદં મુનયો વિદુઃ ॥ ૧૨૯.૯૦॥

૧૨૯.૯૧/૧કિં પુનઃ સંગમે વિપ્ર ગૌતમીસિન્ધુફેનયોઃ ।
૧૨૯.૯૧/૨ગિરીણાં ગહ્વરે યદ્ વા સરિતામથ સંગમે ॥ ૧૨૯.૯૧॥

૧૨૯.૯૨/૧વિપ્રો ધિયૈવ ભવતિ મુકુન્દાઙ્ઘ્રિનિવિષ્ટયા ।
૧૨૯.૯૨/૨ગઙ્ગાયા દક્ષિણે તીર આપસ્તમ્બો મુનીશ્વરઃ ॥ ૧૨૯.૯૨॥

૧૨૯.૯૩/૧આસ્તે તસ્યાપ્યહં તોષમગમં બલસૂદન ।
૧૨૯.૯૩/૨તેન ત્વં ભાર્યયા ચૈવ તોષયસ્વ ગદાધરમ્ ॥ ૧૨૯.૯૩॥

૧૨૯.૯૪/૧બ્રહ્મોવાચ । આપસ્તમ્બેન સહિતો ગઙ્ગાયા દક્ષિણે તટે ।
૧૨૯.૯૪/૨તુષ્ટાવ દેવં પ્રયતઃ સ્નાત્વા પુણ્યેઽથ સંગમે ॥ ૧૨૯.૯૪॥

૧૨૯.૯૫/૧ફેનાયાશ્ચૈવ ગઙ્ગાયાસ્તત્ર દેવં જનાર્દનમ્ ।
૧૨૯.૯૫/૨વૈદિકૈર્વિવિધૈર્મન્ત્રૈસ્તપસાતોષયત્ તદા ॥ ૧૨૯.૯૫॥

૧૨૯.૯૬/૧તતસ્તુષ્ટોઽભવદ્ વિષ્ણુઃ કિં દેયં ચેત્યભાષત ।
૧૨૯.૯૬/૨દેહિ મે શત્રુહન્તારમિત્યાહ ભગવાન્ હરિઃ ॥ ૧૨૯.૯૬॥

૧૨૯.૯૭/૧દત્તમિત્યેવ જાનીહિ તમુવાચ જનાર્દનઃ ।
૧૨૯.૯૭/૨તત્રાભવચ્છિવસ્યૈવ ગઙ્ગાવિષ્ણ્વોઃ પ્રસાદતઃ ॥ ૧૨૯.૯૭॥

૧૨૯.૯૮/૧અમ્ભસા પુરુષો જાતઃ શિવવિષ્ણુસ્વરૂપધૃક્ ।
૧૨૯.૯૮/૨ચક્રપાણિઃ શૂલધરઃ સ ગત્વા તુ રસાતલમ્ ॥ ૧૨૯.૯૮॥

૧૨૯.૯૯/૧નિજઘાન તદા દૈત્યમિન્દ્રશત્રું મહાશનિમ્ ।
૧૨૯.૯૯/૨સખાભવત્ સ ચેન્દ્રસ્ય અબ્જકઃ સ વૃષાકપિઃ ॥ ૧૨૯.૯૯॥

૧૨૯.૧૦૦/૧દિવિસ્થોઽપિ સદા ચેન્દ્રસ્તમન્વેતિ વૃષાકપિમ્ ।
૧૨૯.૧૦૦/૨કુપિતા પ્રણયેનાભૂદ્ અન્યાસક્તં વિલોક્ય તમ્ ।
૧૨૯.૧૦૦/૩શચીં તાં સાન્ત્વયન્ આહ શતમન્યુર્હસન્ ઇદમ્ ॥ ૧૨૯.૧૦૦॥

૧૨૯.૧૦૧/૧ઇન્દ્ર ઉવાચ । નાહમિન્દ્રાણિ શરણમ્ ઋતે સખ્યુર્વૃષાકપેઃ ।
૧૨૯.૧૦૧/૨વારિ વાપિ હવિર્યસ્ય અગ્નેઃ પ્રિયકરં સદા ॥ ૧૨૯.૧૦૧॥

૧૨૯.૧૦૨/૧નાહમન્યત્ર ગન્તાસ્મિ પ્રિયે ચાઙ્ગેન તે શપે ।
૧૨૯.૧૦૨/૨તસ્માન્ નાર્હસિ માં વક્તું શઙ્કયાન્યત્ર ભામિનિ ॥ ૧૨૯.૧૦૨॥

૧૨૯.૧૦૩/૧પતિવ્રતા પ્રિયા મે ત્વં ધર્મે મન્ત્રે સહાયિની ।
૧૨૯.૧૦૩/૨સાપત્યા ચ કુલીના ચ ત્વત્તોઽન્યા કા પ્રિયા મમ ॥ ૧૨૯.૧૦૩॥

૧૨૯.૧૦૪/૧તસ્માત્ તવોપદેશેન ગઙ્ગાં પ્રાપ્ય મહાનદીમ્ ।
૧૨૯.૧૦૪/૨પ્રસાદાદ્ દેવદેવસ્ય વિષ્ણોર્વૈ ચક્રપાણિનઃ ॥ ૧૨૯.૧૦૪॥

૧૨૯.૧૦૫/૧તથા શિવસ્ય દેવસ્ય પ્રસાદાચ્ચ વૃષાકપેઃ ।
૧૨૯.૧૦૫/૨જલોદ્ભવાચ્ચ મે મિત્રાદ્ અબ્જકાલ્લોકવિશ્રુતાત્ ॥ ૧૨૯.૧૦૫॥

૧૨૯.૧૦૬/૧ઉત્તીર્ણદુઃખઃ સુભગે ઇત ઇન્દ્રોઽહમચ્યુતઃ ।
૧૨૯.૧૦૬/૨કિં ન સાધ્યં યત્ર ભાર્યા ભર્તૃચિત્તાનુગામિની ॥ ૧૨૯.૧૦૬॥

૧૨૯.૧૦૭/૧દુષ્કરા તત્ર નો મુક્તિઃ કિંત્વર્થાદિત્રયં શુભે ।
૧૨૯.૧૦૭/૨જાયૈવ પરમં મિત્રં લોકદ્વયહિતૈષિણી ॥ ૧૨૯.૧૦૭॥

૧૨૯.૧૦૮/૧સા ચેત્ કુલીના પ્રિયભાષિણી ચ ।
૧૨૯.૧૦૮/૨પતિવ્રતા રૂપવતી ગુણાઢ્યા ।
૧૨૯.૧૦૮/૩સમ્પત્સુ ચાપત્સુ સમાનરૂપા ।
૧૨૯.૧૦૮/૪તયા હ્યસાધ્યં કિમિહ ત્રિલોક્યામ્ ॥ ૧૨૯.૧૦૮॥

૧૨૯.૧૦૯/૧તસ્માત્ તવ ધિયા કાન્તે મમેદં શુભમાગતમ્ ।
૧૨૯.૧૦૯/૨ઇતસ્તવોદિતં ચૈવ કર્તવ્યં નાન્યદ્ અસ્તિ મે ॥ ૧૨૯.૧૦૯॥

૧૨૯.૧૧૦/૧પરલોકે ચ ધર્મે ચ સત્પુત્રસદૃશં ન ચ ।
૧૨૯.૧૧૦/૨આર્તસ્ય પુરુષસ્યેહ ભાર્યાવદ્ ભેષજં નહિ ॥ ૧૨૯.૧૧૦॥

૧૨૯.૧૧૧/૧નિઃશ્રેયસપદપ્રાપ્ત્યૈ તથા પાપસ્ય મુક્તયે ।

૧૨૯.૧૧૧/૨ગઙ્ગયા સદૃશં નાસ્તિ શ઼ૃણુ ચાન્યદ્ વરાનને ॥ ૧૨૯.૧૧૧॥

૧૨૯.૧૧૨/૧ધર્માર્થકામમોક્ષાણાં પ્રાપ્તયે પાપમુક્તયે ।
૧૨૯.૧૧૨/૨શિવવિષ્ણ્વોરનન્યત્વ+ ।જ્ઞાનાન્ નાસ્ત્યત્ર મુક્તયે ॥ ૧૨૯.૧૧૨॥

૧૨૯.૧૧૩/૧તસ્માત્ તવ ધિયા સાધ્વિ સર્વમેતન્ મનોગતમ્ ।
૧૨૯.૧૧૩/૨અવાપ્તં ચ શિવાદ્ વિષ્ણોર્ગઙ્ગાયાશ્ચ પ્રસાદતઃ ॥ ૧૨૯.૧૧૩॥

૧૨૯.૧૧૪/૧ઇન્દ્રત્વં મે સ્થિરં ચેતો મન્યે મિત્રબલાત્ પુનઃ ।
૧૨૯.૧૧૪/૨વૃષાકપિર્મમ સખા યો જાતસ્ત્વપ્સુ ભામિનિ ॥ ૧૨૯.૧૧૪॥

૧૨૯.૧૧૫/૧ત્વં ચ પ્રિયસખી નિત્યં નાન્યત્ પ્રિયતરં મમ ।
૧૨૯.૧૧૫/૨તીર્થાનાં ગૌતમી ગઙ્ગા દેવાનાં હરિશંકરૌ ॥ ૧૨૯.૧૧૫॥

૧૨૯.૧૧૬/૧તસ્માદ્ એભ્યઃ પ્રસાદેન સર્વં ચેપ્સિતમાપ્તવાન્ ।
૧૨૯.૧૧૬/૨મમ પ્રીતિકરં ચેદં તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ॥ ૧૨૯.૧૧૬॥

૧૨૯.૧૧૭/૧તસ્માદ્ એતદ્ ધિ યાચિષ્યે દેવાન્ સર્વાન્ અનુક્રમાત્ ।
૧૨૯.૧૧૭/૨અનુમન્યન્તુ ઋષયો ગઙ્ગા ચ હરિશંકરૌ ॥ ૧૨૯.૧૧૭॥

૧૨૯.૧૧૮/૧ઇન્દ્રેશ્વરે ચાબ્જકે ચ ઉભયોસ્તીરયોઃ સુરાઃ ।
૧૨૯.૧૧૮/૨એકત્ર શંકરો દેવો હ્યપરત્ર જનાર્દનઃ ॥ ૧૨૯.૧૧૮॥

૧૨૯.૧૧૯/૧પાવયન્ દણ્ડકારણ્યં સાક્ષાદ્ વિષ્ણુસ્ત્રિવિક્રમઃ ।
૧૨૯.૧૧૯/૨અન્તરે યાનિ તીર્થાનિ સર્વપુણ્યપ્રદાનિ ચ ॥ ૧૨૯.૧૧૯॥

૧૨૯.૧૨૦/૧અત્ર તુ સ્નાનમાત્રેણ સર્વે તે મુક્તિમાપ્નુયુઃ ।
૧૨૯.૧૨૦/૨પાપિષ્ઠાઃ પાપતો મુક્તિમાપ્નુયુર્યે ચ ધર્મિણઃ ॥ ૧૨૯.૧૨૦॥

૧૨૯.૧૨૧/૧તેષાં તુ પરમા મુક્તિઃ પિતૃભિઃ પઞ્ચપઞ્ચભિઃ ।
૧૨૯.૧૨૧/૨અત્ર કિંચિચ્ચ યે દદ્યુરર્થિભ્યસ્તિલમાત્રકમ્ ॥ ૧૨૯.૧૨૧॥

૧૨૯.૧૨૨/૧દાતૃભ્યો હ્યક્ષયં તત્ સ્યાત્ કામદં મોક્ષદં તથા ।
૧૨૯.૧૨૨/૨ધન્યં યશસ્યમાયુષ્યમારોગ્યં પુણ્યવર્ધનમ્ ॥ ૧૨૯.૧૨૨॥

૧૨૯.૧૨૩/૧આખ્યાનં વિષ્ણુશમ્ભ્વોશ્ચ જ્ઞાત્વા સ્નાનાચ્ચ મુક્તિદમ્ ।
૧૨૯.૧૨૩/૨અસ્ય તીર્થસ્ય માહાત્મ્યં યે શ઼ૃણ્વન્તિ પઠન્તિ ચ ॥ ૧૨૯.૧૨૩॥

૧૨૯.૧૨૪/૧પુણ્યભાજો ભવેયુસ્તે તેભ્યોઽત્રૈવ સ્મૃતિર્ભવેત્ ।
૧૨૯.૧૨૪/૨શિવવિષ્ણ્વોરશેષાઘ+ ।સંઘવિચ્છેદકારિણી ।
૧૨૯.૧૨૪/૩યાં પ્રાર્થયન્તિ મુનયો વિજિતેન્દ્રિયમાનસાઃ ॥ ૧૨૯.૧૨૪॥

૧૨૯.૧૨૫/૧બ્રહ્મોવાચ । ભવિષ્યત્યેવમેવેતિ તં દેવા ઋષયોઽબ્રુવન્ ।
૧૨૯.૧૨૫/૨ગૌતમ્યા ઉત્તરે પારે તીર્થાનાં મોક્ષદાયિનામ્ ॥ ૧૨૯.૧૨૫॥

૧૨૯.૧૨૬/૧દેવર્ષિસિદ્ધસેવ્યાનાં સહસ્રાણ્યથ સપ્ત વૈ ।
૧૨૯.૧૨૬/૨તથૈવ દક્ષિણે તીરે તીર્થાન્યેકાદશૈવ તુ ॥ ૧૨૯.૧૨૬॥

૧૨૯.૧૨૭/૧અબ્જકં હૃદયં પ્રોક્તં ગોદાવર્યા મુનીશ્વરૈઃ ।
૧૨૯.૧૨૭/૨વિશ્રામસ્થાનમીશસ્ય વિષ્ણોર્બ્રહ્મણ એવ ચ ॥ ૧૨૯.૧૨૭॥

૧૩૦.૧/૧બ્રહ્મોવાચ । આપસ્તમ્બમિતિ ખ્યાતં તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ।
૧૩૦.૧/૨સ્મરણાદ્ અપ્યશેષાઘ+ ।સંઘવિધ્વંસનક્ષમમ્ ॥ ૧૩૦.૧॥

૧૩૦.૨/૧આપસ્તમ્બો મહાપ્રાજ્ઞો મુનિરાસીન્ મહાયશાઃ ।
૧૩૦.૨/૨તસ્ય ભાર્યાક્ષસૂત્રેતિ પતિધર્મપરાયણા ॥ ૧૩૦.૨॥

૧૩૦.૩/૧તસ્ય પુત્રો મહાપ્રાજ્ઞઃ કર્કિનામાથ તત્ત્વવિત્ ।
૧૩૦.૩/૨તસ્યાશ્રમમનુપ્રાપ્તો હ્યગસ્ત્યો મુનિસત્તમઃ ॥ ૧૩૦.૩॥

૧૩૦.૪/૧તમગસ્ત્યં પૂજયિત્વા આપસ્તમ્બો મુનીશ્વરઃ ।
૧૩૦.૪/૨શિષ્યૈરનુગતો ધીમાંસ્તં પ્રષ્ટુમુપચક્રમે ॥ ૧૩૦.૪॥

૧૩૦.૫/૧આપસ્તમ્બ ઉવાચ । ત્રયાણાં કો નુ પૂજ્યઃ સ્યાદ્ દેવાનાં મુનિસત્તમ ।
૧૩૦.૫/૨ભુક્તિર્મુક્તિશ્ચ કસ્માદ્ વા સ્યાદ્ અનાદિશ્ચ કો ભવેત્ ॥ ૧૩૦.૫॥

૧૩૦.૬/૧અનન્તશ્ચાપિ કો વિપ્ર દેવાનામપિ દૈવતમ્ ।
૧૩૦.૬/૨યજ્ઞૈઃ ક ઇજ્યતે દેવઃ કો વેદેષ્વનુગીયતે ।
૧૩૦.૬/૩એતં મે સંશયં છેત્તું વદાગસ્ત્ય મહામુને ॥ ૧૩૦.૬॥

૧૩૦.૭/૧અગસ્ત્ય ઉવાચ । ધર્માર્થકામમોક્ષાણાં પ્રમાણં શબ્દ ઉચ્યતે ।
૧૩૦.૭/૨તત્રાપિ વૈદિકઃ શબ્દઃ પ્રમાણં પરમં મતઃ ॥ ૧૩૦.૭॥

૧૩૦.૮/૧વેદેન ગીયતે યસ્તુ પુરુષઃ સ પરાત્ પરઃ ।
૧૩૦.૮/૨મૃતોઽપરઃ સ વિજ્ઞેયો હ્યમૃતઃ પર ઉચ્યતે ॥ ૧૩૦.૮॥

૧૩૦.૯/૧યોઽમૂર્તઃ સ પરો જ્ઞેયો હ્યપરો મૂર્ત ઉચ્યતે ।
૧૩૦.૯/૨ગુણાભિવ્યાપ્તિભેદેન મૂર્તોઽસૌ ત્રિવિધો ભવેત્ ॥ ૧૩૦.૯॥

૧૩૦.૧૦/૧બ્રહ્મા વિષ્ણુઃ શિવશ્ચેતિ એક એવ ત્રિધોચ્યતે ।
૧૩૦.૧૦/૨ત્રયાણામપિ દેવાનાં વેદ્યમેકં પરં હિ તત્ ॥ ૧૩૦.૧૦॥

૧૩૦.૧૧/૧એકસ્ય બહુધા વ્યાપ્તિર્ગુણકર્મવિભેદતઃ ।
૧૩૦.૧૧/૨લોકાનામુપકારાર્થમાકૃતિત્રિતયં ભવેત્ ॥ ૧૩૦.૧૧॥

૧૩૦.૧૨/૧યસ્તત્ત્વં વેત્તિ પરમં સ ચ વિદ્વાન્ ન ચેતરઃ ।
૧૩૦.૧૨/૨તત્ર યો ભેદમાચષ્ટે લિઙ્ગભેદી સ ઉચ્યતે ॥ ૧૩૦.૧૨॥

૧૩૦.૧૩/૧પ્રાયશ્ચિત્તં ન તસ્યાસ્તિ યશ્ચૈષાં વ્યાહરેદ્ ભિદમ્ ।
૧૩૦.૧૩/૨ત્રયાણામપિ દેવાનાં મૂર્તિભેદઃ પૃથક્ પૃથક્ ॥ ૧૩૦.૧૩॥

૧૩૦.૧૪/૧વેદાઃ પ્રમાણં સર્વત્ર સાકારેષુ પૃથક્ પૃથક્ ।
૧૩૦.૧૪/૨નિરાકારં ચ યત્ ત્વેકં તત્ તેભ્યઃ પરમં મતમ્ ॥ ૧૩૦.૧૪॥

૧૩૦.૧૫/૧આપસ્તમ્બ ઉવાચ । નાનેન નિર્ણયઃ કશ્ચિન્ મયાત્ર વિદિતો ભવેત્ ।
૧૩૦.૧૫/૨તત્રાપ્યત્ર રહસ્યં યત્ તદ્ વિમૃશ્યાશુ કીર્ત્યતામ્ ।
૧૩૦.૧૫/૩નિઃસંશયં નિર્વિકલ્પં ભાજનં સર્વસમ્પદામ્ ॥ ૧૩૦.૧૫॥

૧૩૦.૧૬/૧બ્રહ્મોવાચ । એતદ્ આકર્ણ્ય ભગવાન્ અગસ્ત્યો વાક્યમબ્રવીત્ ॥ ૧૩૦.૧૬॥

૧૩૦.૧૭/૧અગસ્ત્ય ઉવાચ । યદ્યપ્યેષાં ન ભેદોઽસ્તિ દેવાનાં તુ પરસ્પરમ્ ।
૧૩૦.૧૭/૨તથાપિ સર્વસિદ્ધિઃ સ્યાચ્છિવાદ્ એવ સુખાત્મનઃ ॥ ૧૩૦.૧૭॥

૧૩૦.૧૮/૧પ્રપઞ્ચસ્ય નિમિત્તં યત્ તજ્જ્યોતિશ્ચ પરં શિવઃ ।
૧૩૦.૧૮/૨તમેવ સાધય હરં ભક્ત્યા પરમયા મુને ।
૧૩૦.૧૮/૩ગૌતમ્યાં સકલાઘૌઘ+ ।સંહર્તા દણ્ડકે વને ॥ ૧૩૦.૧૮॥

૧૩૦.૧૯/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા મુનેર્વાક્યં પરાં પ્રીતિમુપાગતઃ ।
૧૩૦.૧૯/૨ભુક્તિદો મુક્તિદઃ પુંસાં સાકારોઽથ નિરાકૃતિઃ ॥ ૧૩૦.૧૯॥

૧૩૦.૨૦/૧સૃષ્ટ્યાકારસ્તતઃ શક્તઃ પાલનાકાર એવ ચ ।
૧૩૦.૨૦/૨દાતા ચ હન્તિ સર્વં યો યસ્માદ્ એતત્ સમાપ્યતે ॥ ૧૩૦.૨૦॥

૧૩૦.૨૧/૧અગસ્ત્ય ઉવાચ । બ્રહ્માકૃતિઃ કર્તૃરૂપા વૈષ્ણવી પાલની તથા ।
૧૩૦.૨૧/૨રુદ્રાકૃતિર્નિહન્ત્રી સા સર્વવેદેષુ પઠ્યતે ॥ ૧૩૦.૨૧॥

૧૩૦.૨૨/૧બ્રહ્મોવાચ । આપસ્તમ્બસ્તદા ગઙ્ગાં ગત્વા સ્નાત્વા યતવ્રતઃ ।
૧૩૦.૨૨/૨તુષ્ટાવ શંકરં દેવં સ્તોત્રેણાનેન નારદ ॥ ૧૩૦.૨૨॥

૧૩૦.૨૩/૧આપસ્તમ્બ ઉવાચ । કાષ્ઠેષુ વહ્નિઃ કુસુમેષુ ગન્ધો ।
૧૩૦.૨૩/૨બીજેષુ વૃક્ષાદિ દૃષત્સુ હેમ ।
૧૩૦.૨૩/૩ભૂતેષુ સર્વેષુ તથાસ્તિ યો વૈ ।

૧૩૦.૨૩/૪તં સોમનાથં શરણં વ્રજામિ ॥ ૧૩૦.૨૩॥

૧૩૦.૨૪/૧યો લીલયા વિશ્વમિદં ચકાર ।
૧૩૦.૨૪/૨ધાતા વિધાતા ભુવનત્રયસ્ય ।
૧૩૦.૨૪/૩યો વિશ્વરૂપઃ સદસત્પરો યઃ ।
૧૩૦.૨૪/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૨૪॥

૧૩૦.૨૫/૧યં સ્મૃત્ય દારિદ્ર્યમહાભિશાપ+ ।
૧૩૦.૨૫/૨રોગાદિભિર્ન સ્પૃશ્યતે શરીરી ।
૧૩૦.૨૫/૩યમાશ્રિતાશ્ચેપ્સિતમાપ્નુવન્તિ ।
૧૩૦.૨૫/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૨૫॥

૧૩૦.૨૬/૧યેન ત્રયીધર્મમવેક્ષ્ય પૂર્વમ્ ।
૧૩૦.૨૬/૨બ્રહ્માદયસ્તત્ર સમીહિતાશ્ચ ।
૧૩૦.૨૬/૩એવં દ્વિધા યેન કૃતં શરીરમ્ ।
૧૩૦.૨૬/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૨૬॥

૧૩૦.૨૭/૧યસ્મૈ નમો ગચ્છતિ મન્ત્રપૂતમ્ ।
૧૩૦.૨૭/૨હુતં હવિર્યા ચ કૃતા ચ પૂજા ।
૧૩૦.૨૭/૩દત્તં હવિર્યેન સુરા ભજન્તે ।
૧૩૦.૨૭/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૨૭॥

૧૩૦.૨૮/૧યસ્માત્ પરં નાન્યદ્ અસ્તિ પ્રશસ્તમ્ ।
૧૩૦.૨૮/૨યસ્માત્ પરં નૈવ સુસૂક્ષ્મમન્યત્ ।
૧૩૦.૨૮/૩યસ્માત્ પરં નો મહતાં મહચ્ચ ।
૧૩૦.૨૮/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૨૮॥

૧૩૦.૨૯/૧યસ્યાજ્ઞયા વિશ્વમિદં વિચિત્રમ્ ।
૧૩૦.૨૯/૨અચિન્ત્યરૂપં વિવિધં મહચ્ચ ।
૧૩૦.૨૯/૩એકક્રિયં યદ્વદ્ અનુપ્રયાતિ ।
૧૩૦.૨૯/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૨૯॥

૧૩૦.૩૦/૧યસ્મિન્ વિભૂતિઃ સકલાધિપત્યમ્ ।
૧૩૦.૩૦/૨કર્તૃત્વદાતૃત્વમહત્ત્વમેવ ।
૧૩૦.૩૦/૩પ્રીતિર્યશઃ સૌખ્યમનાદિધર્મઃ ।
૧૩૦.૩૦/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૩૦॥

૧૩૦.૩૧/૧નિત્યં શરણ્યઃ સકલસ્ય પૂજ્યો ।
૧૩૦.૩૧/૨નિત્યં પ્રિયો યઃ શરણાગતસ્ય ।
૧૩૦.૩૧/૩નિત્યં શિવો યઃ સકલસ્ય રૂપમ્ ।
૧૩૦.૩૧/૪સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૧૩૦.૩૧॥

૧૩૦.૩૨/૧બ્રહ્મોવાચ । તતઃ પ્રસન્નો ભગવાન્ આહ નારદ તં મુનિમ્ ।
૧૩૦.૩૨/૨આત્માર્થં ચ પરાર્થં ચ આપસ્તમ્બોઽબ્રવીચ્છિવમ્ ॥ ૧૩૦.૩૨॥

૧૩૦.૩૩/૧સર્વાન્ કામાન્ આપ્નુયુસ્તે યે સ્નાત્વા દેવમીશ્વરમ્ ।
૧૩૦.૩૩/૨પશ્યેયુર્જગતામીશમસ્ત્વિત્યાહ શિવો મુનિમ્ ॥ ૧૩૦.૩૩॥

૧૩૦.૩૪/૧તતઃ પ્રભૃતિ તત્ તીર્થમાપસ્તમ્બમુદાહૃતમ્ ।
૧૩૦.૩૪/૨અનાદ્યવિદ્યાતિમિર+ ।વ્રાતનિર્મૂલનક્ષમમ્ ॥ ૧૩૦.૩૪॥

૧૩૧.૧/૧બ્રહ્મોવાચ । યમતીર્થમિતિ ખ્યાતં પિતૃણાં પ્રીતિવર્ધનમ્ ।
૧૩૧.૧/૨અશેષપાપશમનં તત્ર વૃત્તમિદં શ્ૃણુ ॥ ૧૩૧.૧॥

૧૩૧.૨/૧તત્રાખ્યાનમિદં ત્વાસીદ્ ઇતિહાસં પુરાતનમ્ ।
૧૩૧.૨/૨સરમેતિ પ્રસિદ્ધાસ્તિ નામ્ના દેવશુની મુને ॥ ૧૩૧.૨॥

૧૩૧.૩/૧તસ્યાઃ પુત્રૌ મહાશ્રેષ્ઠૌ શ્વાનૌ નિત્યં જનાન્ અનુ ।
૧૩૧.૩/૨ગામિનૌ પવનાહારૌ ચતુરક્ષૌ યમપ્રિયૌ ॥ ૧૩૧.૩॥

૧૩૧.૪/૧ગા રક્ષતિ સ્મ દેવાનાં યજ્ઞાર્થં કલ્પિતાન્ પશૂન્ ।
૧૩૧.૪/૨રક્ષન્તીમનુજગ્મુસ્તે રાક્ષસા દૈત્યદાનવાઃ ॥ ૧૩૧.૪॥

૧૩૧.૫/૧રક્ષન્તીં તાં મહાપ્રાજ્ઞાઃ શ્વાનયોર્માતરં શુનીમ્ ।
૧૩૧.૫/૨પ્રલોભયિત્વા વિવિધૈર્વાક્યૈર્દાનૈશ્ચ યત્નતઃ ॥ ૧૩૧.૫॥

૧૩૧.૬/૧હૃતા ગા રાક્ષસૈઃ પાપૈઃ પશ્વર્થે કલ્પિતાઃ શુભાઃ ।
૧૩૧.૬/૨તત આગત્ય સા દેવાન્ ઇદમાહ ક્રમાચ્છુની ॥ ૧૩૧.૬॥

૧૩૧.૭/૧સરમોવાચ । માં બદ્ધ્વા રાક્ષસૈઃ પાશૈસ્તાડયિત્વા પ્રહારકૈઃ ।
૧૩૧.૭/૨નીતા ગા યજ્ઞસિદ્ધ્યર્થં કલ્પિતાઃ પશવઃ સુરાઃ ॥ ૧૩૧.૭॥

૧૩૧.૮/૧બ્રહ્મોવાચ । તસ્યા વાચં નિશમ્યાશુ સુરાન્ પ્રાહ બૃહસ્પતિઃ ॥ ૧૩૧.૮॥

૧૩૧.૯/૧બૃહસ્પતિરુવાચ । ઇયં વિકૃતરૂપાસ્તે અસ્યાઃ પાપં ચ લક્ષયે ।
૧૩૧.૯/૨અસ્યા મતેન તા ગાવો નીતા નાન્યેન હેતુના ।
૧૩૧.૯/૩પાપેયં સુકૃતીવેતિ લક્ષ્યતે દેહચેષ્ટિતૈઃ ॥ ૧૩૧.૯॥

૧૩૧.૧૦/૧બ્રહ્મોવાચ । તદ્ ગુરોર્વચનાચ્છક્રઃ પદા તાં પ્રાહરચ્છુનીમ્ ।
૧૩૧.૧૦/૨પદાઘાતાત્ તદા તસ્યા મુખાત્ ક્ષીરં પ્રસુસ્રુવે ॥ ૧૩૧.૧૦॥

૧૩૧.૧૧/૧પુનઃ પ્રાહ શચીભર્તા ક્ષીરં પીતં ત્વયા શુનિ ।
૧૩૧.૧૧/૨રાક્ષસૈશ્ચ તદા દત્તં તસ્માન્ નીતાસ્તુ ગા મમ ॥ ૧૩૧.૧૧॥

૧૩૧.૧૨/૧સરમોવાચ । નાપરાધોઽસ્તિ મે નાથ ન ચાન્યસ્યાપિ કસ્યચિત્ ।
૧૩૧.૧૨/૨નાપરાધો ન ચોપેક્ષા મમાસ્તિ ત્રિદશેશ્વર ।
૧૩૧.૧૨/૩તસ્માદ્ રુષ્ટોઽસિ કિં નાથ રિપવો બલિનસ્તુ તે ॥ ૧૩૧.૧૨॥

૧૩૧.૧૩/૧બ્રહ્મોવાચ । તતો ધ્યાત્વા દેવગુરુર્જ્ઞાત્વા તસ્યા વિચેષ્ટિતમ્ ।
૧૩૧.૧૩/૨સત્યં શક્ર ત્વિયં દુષ્ટા રિપૂણાં પક્ષકારિણી ॥ ૧૩૧.૧૩॥

૧૩૧.૧૪/૧તતઃ શશાપ તાં શક્રઃ પાપિષ્ઠે ત્વં શુની ભવ ।
૧૩૧.૧૪/૨મર્ત્યલોકે પાપભૂતા અજ્ઞાનાત્ પાપકારિણી ॥ ૧૩૧.૧૪॥

૧૩૧.૧૫/૧તદેન્દ્રસ્ય તુ શાપેન માનુષે સા વ્યજાયત ।
૧૩૧.૧૫/૨યથા શપ્તા મઘવતા પાપાત્ સા હ્યતિભીષણા ॥ ૧૩૧.૧૫॥

૧૩૧.૧૬/૧ગાવો યા રાક્ષસૈર્નીતાસ્તાસામાનયનાય ચ ।
૧૩૧.૧૬/૨યત્નં કુર્વન્ સુરપતિર્વિષ્ણવે તન્ ન્યવેદયત્ ॥ ૧૩૧.૧૬॥

૧૩૧.૧૭/૧વિષ્ણુર્દૈત્યાંશ્ચ દનુજાન્ ગોહર્તૄંશ્ચૈવ રાક્ષસાન્ ।
૧૩૧.૧૭/૨હન્તું પ્રયત્નમકરોજ્જગૃહે ચ મહદ્ ધનુઃ ॥ ૧૩૧.૧૭॥

૧૩૧.૧૮/૧શાર્ઙ્ગ યલ્લોકવિખ્યાતં દૈત્યનાશનમેવ ચ ।
૧૩૧.૧૮/૨જિતારિઃ પૂજિતો દેવૈઃ સ્વયં સ્થિત્વા જનાર્દનઃ ॥ ૧૩૧.૧૮॥

૧૩૧.૧૯/૧યત્ર વૈ દણ્ડકારણ્યે શાર્ઙ્ગપાણિર્જગત્પ્રભુઃ ।
૧૩૧.૧૯/૨તત્રસ્થાન્ દૈત્યદનુજાન્ રાક્ષસાંશ્ચ બલીયસઃ ॥ ૧૩૧.૧૯॥

૧૩૧.૨૦/૧પુનર્જઘ્ને સ વૈ વિષ્ણુર્ગા યૈર્નીતાશ્ચ રાક્ષસૈઃ ।
૧૩૧.૨૦/૨તત્ર વૈ દણ્ડકારણ્યે શાર્ઙ્ગપાણિરિતિ શ્રુતઃ ॥ ૧૩૧.૨૦॥

૧૩૧.૨૧/૧યુધ્યમાનસ્તતો વિષ્ણુર્દિતિજૈ રાક્ષસૈઃ સહ ।
૧૩૧.૨૧/૨તે જગ્મુર્દક્ષિણામાશાં વિષ્ણોસ્ત્રાસાન્ મહામુને ॥ ૧૩૧.૨૧॥

૧૩૧.૨૨/૧અન્વગચ્છત્ તતો વિષ્ણુસ્તાન્ એવ પરમેશ્વરઃ ।
૧૩૧.૨૨/૨ગરુત્મતા તાન્ અવાપ્ય શાર્ઙ્ગમુક્તૈર્મનોજવૈઃ ॥ ૧૩૧.૨૨॥

૧૩૧.૨૩/૧બાણૈસ્તાન્ વ્યાહનદ્ વિષ્ણુર્ગઙ્ગાયા ઉત્તરે તટે ।

૧૩૧.૨૩/૨દેવારયઃ ક્ષયં નીતા વિષ્ણુના પ્રભવિષ્ણુના ॥ ૧૩૧.૨૩ ॥

૧૩૧.૨૪/૧શાર્ઙ્ગમુક્તૈર્મહાવેગૈઃ સુસ્વનૈશ્ચ સુમન્ત્રિતૈઃ ।
૧૩૧.૨૪/૨ક્ષયં પ્રાપ્તા વિષ્ણુબાણૈસ્તતસ્તે દેવશત્રવઃ ॥ ૧૩૧.૨૪ ॥

૧૩૧.૨૫/૧ગાવો લબ્ધા યત્ર દેવૈર્બાણતીર્થં તદ્ ઉચ્યતે ।
૧૩૧.૨૫/૨વૈષ્ણવં લોકવિદિતં ગોતીર્થં ચેતિ વિશ્રુતમ્ ॥ ૧૩૧.૨૫ ॥

૧૩૧.૨૬/૧પશ્ચર્થે કલ્પિતા ગાવો ગઙ્ગાયા દક્ષિણે તટે ।
૧૩૧.૨૬/૨પ્રદ્રુતાસ્તે સુરાઃ સર્વે ગઙ્ગાયાં સંન્યવેશયન્ ॥ ૧૩૧.૨૬ ॥

૧૩૧.૨૭/૧તન્મધ્યે કારયામાસુર્દ્વીપં ચૈવાશ્રયં ગવામ્ ।
૧૩૧.૨૭/૨તૈર્ગોભિસ્તત્ર ગઙ્ગાયાં સુરયજ્ઞો વ્યજાયત ॥ ૧૩૧.૨૭ ॥

૧૩૧.૨૮/૧યજ્ઞતીર્થં તુ તત્ પ્રોક્તં ગોદ્વીપં ગાઙ્ગમધ્યતઃ ।
૧૩૧.૨૮/૨દેવાનાં યજનં તચ્ચ સર્વકામપ્રદં શુભમ્ ॥ ૧૩૧.૨૮ ॥

૧૩૧.૨૯/૧સ્વયં મૂર્તિમતી ભૂત્વા ગઙ્ગાશક્તિર્મહાદ્યુતે ।
૧૩૧.૨૯/૨અસારાપારસંસાર+ ।સાગરોત્તરણે તરિઃ ॥ ૧૩૧.૨૯ ॥

૧૩૧.૩૦/૧વિશ્વેશ્વરી યોગમાયા સદ્ભક્તાભયદાયિની ।
૧૩૧.૩૦/૨ગોરક્ષં તુ તતસ્તીર્થં ગઙ્ગાયા દક્ષિણે તટે ॥ ૧૩૧.૩૦ ॥

૧૩૧.૩૧/૧તૌ શ્વાનૌ સરમાપુત્રૌ ચતુરક્ષૌ યમપ્રિયૌ ।
૧૩૧.૩૧/૨માતુઃ શાપં ચાપરાધં સર્વં ચાપિ સવિસ્તરમ્ ॥ ૧૩૧.૩૧ ॥

૧૩૧.૩૨/૧નિવેદ્ય તુ યથાન્યાયં કાર્યં ચાપિ સુખપ્રદમ્ ।
૧૩૧.૩૨/૨વિશાપકરણં ચાપિ પપ્રચ્છતુરુભૌ યમમ્ ॥ ૧૩૧.૩૨ ॥

૧૩૧.૩૩/૧સ તાભ્યાં સહિતઃ સૌરિઃ પિત્રે સૂર્યાય ચાબ્રવીત્ ।
૧૩૧.૩૩/૨શ્રુત્વા સૂર્યઃ સુતં પ્રાહ ગઙ્ગાયાં સુરસત્તમ ॥ ૧૩૧.૩૩ ॥

૧૩૧.૩૪/૧લોકત્રયૈકપાવન્યાં ગૌતમ્યાં દણ્ડકે વને ।
૧૩૧.૩૪/૨શ્રદ્ધયા પરયા વત્સ સુસ્નાતઃ સુસમાહિતઃ ॥ ૧૩૧.૩૪ ॥

૧૩૧.૩૫/૧બ્રહ્માણં ચૈવ વિષ્ણું ચ મામીશં ચ યથાક્રમમ્ ।
૧૩૧.૩૫/૨સ્તુહિ ત્વં સર્વભાવેન ભૃત્યૌ પ્રીતિમવાપ્સ્યતઃ ॥ ૧૩૧.૩૫ ॥

૧૩૧.૩૬/૧તત્ પિતુર્વચનં શ્રુત્વા યમઃ પ્રીતમનાસ્તદા ।
૧૩૧.૩૬/૨તયોશ્ચ પ્રીતયે પ્રાયાદ્ દેવતર્પણયોર્યમઃ ॥ ૧૩૧.૩૬ ॥

૧૩૧.૩૭/૧ગૌતમ્યામઘહારિણ્યાં સુસમાહિતમાનસઃ ।
૧૩૧.૩૭/૨તથૈવ તોષયામાસ ગઙ્ગાયાં સુરસત્તમાન્ ॥ ૧૩૧.૩૭॥

૧૩૧.૩૮/૧શ્વભ્યાં ચ સહિતઃ શ્રીમાન્ દક્ષિણાશાપતિઃ પ્રભુઃ ।
૧૩૧.૩૮/૨બ્રહ્માણં તોષયામાસ ભાનું વૈ દક્ષિણે તટે ॥ ૧૩૧.૩૮॥

૧૩૧.૩૯/૧ઈશાનમુત્તરે વિષ્ણું સ્વયં ધર્મઃ પ્રતાપવાન્ ।
૧૩૧.૩૯/૨દત્તવન્તો વરં શ્રેષ્ઠં સરમાયા વિશાપકમ્ ।
૧૩૧.૩૯/૩વરાન્ અયાચત બહૂંલ્લોકાનામુપકારકાન્ ॥ ૧૩૧.૩૯॥

૧૩૧.૪૦/૧યમ ઉવાચ । એષુ સ્નાનં તુ યે કુર્યુર્બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
૧૩૧.૪૦/૨આત્માર્થં ચ પરાર્થં ચ તે કામાન્ આપ્નુયુઃ શુભાન્ ॥ ૧૩૧.૪૦॥

૧૩૧.૪૧/૧બાણતીર્થે તુ યે સ્નાત્વા શાર્ઙ્ગપાણિં સ્મરન્તિ વૈ ।
૧૩૧.૪૧/૨તેભ્યો દારિદ્ર્યદુઃખાનિ ન ભવેયુર્યુગે યુગે ॥ ૧૩૧.૪૧॥

૧૩૧.૪૨/૧ગોતીર્થે બ્રહ્મતીર્થે વા યસ્તુ સ્નાત્વા યતવ્રતઃ ।
૧૩૧.૪૨/૨બ્રહ્માણં તં નમસ્યાથ દ્વીપસ્યાપિ પ્રદક્ષિણમ્ ॥ ૧૩૧.૪૨॥

૧૩૧.૪૩/૧યઃ કુર્યાત્ તેન પૃથિવી સપ્તદ્વીપા વસુંધરા ।
૧૩૧.૪૩/૨પ્રદક્ષિણીકૃતા તત્ર કિંચિદ્ દત્ત્વા વસુ દ્વિજમ્ ॥ ૧૩૧.૪૩॥

૧૩૧.૪૪/૧તદ્ દેવયજનં પ્રાપ્ય કિંચિદ્ ધુત્વા હુતાશને ।
૧૩૧.૪૪/૨અશ્વમેધાદિયજ્ઞાનાં ફલં પ્રાપ્નોતિ પુષ્કલમ્ ॥ ૧૩૧.૪૪॥

૧૩૧.૪૫/૧યઃ સકૃત્ તત્ર પઠતિ ગાયત્રીં વેદમાતરમ્ ।
૧૩૧.૪૫/૨અધીતાસ્તેન વેદા વૈ નિષ્કામો મુક્તિભાજનમ્ ॥ ૧૩૧.૪૫॥

૧૩૧.૪૬/૧સ્નાત્વા તુ દક્ષિણે કૂલે શક્તિં દેવીં તુ ભક્તિતઃ ।
૧૩૧.૪૬/૨પૂજયિત્વા યથાન્યાયં સર્વાન્ કામાન્ અવાપ્નુયાત્ ॥ ૧૩૧.૪૬॥

૧૩૧.૪૭/૧બ્રહ્મવિષ્ણુમહેશાનાં શક્તિર્માતા ત્રયીમયી ।
૧૩૧.૪૭/૨સર્વાન્ કામાન્ અવાપ્નોતિ પુત્રવાન્ ધનવાન્ ભવેત્ ॥ ૧૩૧.૪૭॥

૧૩૧.૪૮/૧આદિત્યં ભક્તિતો યસ્તુ દક્ષિણે નિયતો નરઃ ।
૧૩૧.૪૮/૨સ્નાત્વા પશ્યેત તેનેષ્ટા યજ્ઞા વિવિધદક્ષિણાઃ ॥ ૧૩૧.૪૮॥

૧૩૧.૪૯/૧કૂલે યશ્ચોત્તરે ચૈવ ગઙ્ગાયા દૈત્યસૂદનમ્ ।
૧૩૧.૪૯/૨સ્નાત્વા પશ્યેત તં નત્વા તસ્ય વિષ્ણોઃ પરં પદમ્ ॥ ૧૩૧.૪૯॥

૧૩૧.૫૦/૧યમેશ્વરં તતો યસ્તુ યમતીર્થે તુ પૂજિતમ્ ।

૧૩૧.૫૦/૨સ્નાતઃ પશ્યતિ યુક્તાત્મા સ કરોત્યચિરેણ હિ ॥ ૧૩૧.૫૦॥

૧૩૧.૫૧/૧પિતૃણામક્ષયં પુણ્યં ફલદં કીર્તિવર્ધનમ્ ।
૧૩૧.૫૧/૨તત્ર સ્નાનેન દાનેન જપેન સ્તવનેન ચ ।
૧૩૧.૫૧/૩અપિ દુષ્કૃતકર્માણઃ પિતરો મોક્ષમાપ્નુયુઃ ॥ ૧૩૧.૫૧॥

૧૩૧.૫૨/૧બ્રહ્મોવાચ । ઇત્યાદ્યષ્ટ સહસ્રાણિ તીર્થાનિ ત્રીણિ નારદ ।
૧૩૧.૫૨/૨તેષુ સ્નાનં ચ દાનં ચ સર્વમક્ષયપુણ્યદમ્ ॥ ૧૩૧.૫૨॥

૧૩૧.૫૩/૧એતેષાં સ્મરણં પુણ્યં નાનાજન્માઘનાશનમ્ ।
૧૩૧.૫૩/૨શ્રવણાત્ પિતૃભિઃ સાર્ધં પઠનાત્ સ્વકુલૈઃ સહ ॥ ૧૩૧.૫૩॥

૧૩૧.૫૪/૧તેષામપ્યતિપાપાનિ નાશં યાન્તિ મમાજ્ઞયા ।
૧૩૧.૫૪/૨તત્ર સ્નાનાદિ યઃ કૃત્વા કિંચિદ્ દત્ત્વા યતાત્મવાન્ ॥ ૧૩૧.૫૪॥

૧૩૧.૫૫/૧પિતૃણાં પિણ્ડદાનાદિ કૃત્વા નત્વા સુરાન્ ઇમાન્ ।
૧૩૧.૫૫/૨ધનં ધાન્યં યશો વીર્યમાયુરારોગ્યસમ્પદઃ ॥ ૧૩૧.૫૫॥

૧૩૧.૫૬/૧પુત્રાન્ પૌત્રાન્ પ્રિયાં ભાર્યાં લબ્ધ્વા ચાન્યન્ મનીષિતમ્ ।
૧૩૧.૫૬/૨અવિયુક્તઃ પ્રીતમના બન્ધુભિશ્ચાતિમાનિતઃ ॥ ૧૩૧.૫૬॥

૧૩૧.૫૭/૧નરકસ્થાન્ અપિ પિતૄંસ્તારયિત્વા કુલાનિ ચ ।
૧૩૧.૫૭/૨પાવયિત્વા પ્રિયૈર્યુક્તો હ્યન્તે વિષ્ણું શિવં સ્મરેત્ ।
૧૩૧.૫૭/૩તતો મુક્તિપદં ગચ્છેદ્ દેવાનાં વચનં યથા ॥ ૧૩૧.૫૭॥

૧૩૨.૧/૧બ્રહ્મોવાચ । યક્ષિણીસંગમં નામ તીર્થં સર્વફલપ્રદમ્ ।
૧૩૨.૧/૨તત્ર સ્નાનેન દાનેન સર્વાન્ કામાન્ અવાપ્નુયાત્ ॥ ૧૩૨.૧॥

૧૩૨.૨/૧યત્ર યક્ષેશ્વરો દેવો દર્શનાદ્ ભુક્તિમુક્તિદઃ ।
૧૩૨.૨/૨તત્ર ચ સ્નાનમાત્રેણ સત્ત્રયાગફલં લભેત્ ॥ ૧૩૨.૨॥

૧૩૨.૩/૧વિશ્વાવસોઃ સ્વસા નામ્ના પિપ્પલા ગુરુહાસિની ।
૧૩૨.૩/૨ઋષીણાં સત્ત્રમગમદ્ ગૌતમીતીરવર્તિનામ્ ॥ ૧૩૨.૩॥

૧૩૨.૪/૧દૃષ્ટ્વા તત્ર ઋષીન્ ક્ષામાન્ સા જહાસાતિગર્વિતા ।
૧૩૨.૪/૨યા ગત્વાશ્રાવય વૌષડ્ અસ્તુ શ્રૌષડ્ ઇતિ સ્થિરમ્ ॥ ૧૩૨.૪॥

૧૩૨.૫/૧વિસ્વરેણ બ્રુવતી તાં તે શેપુઃ સ્રાવિણી ભવ ।
૧૩૨.૫/૨તતો નદ્યભવત્ તત્ર યક્ષિણીતિ સુવિશ્રુતા ॥ ૧૩૨.૫॥

૧૩૨.૬/૧તતો વિશ્વાવસુઃ પૂજ્ય ઋષીન્ દેવં ત્રિલોચનમ્ ।

૧૩૨.૬/૨સંગમ્ય ચૈવ ગૌતમ્યા તાં વિશાપામથાકરોત્ ॥ ૧૩૨.૬॥

૧૩૨.૭/૧તતઃ પ્રભૃતિ તત્ તીર્થં યક્ષિણીસંગમં સ્મૃતમ્ ।
૧૩૨.૭/૨તત્ર સ્નાનાદિદાનેન સર્વાન્ કામાન્ અવાપ્નુયાત્ ॥ ૧૩૨.૭॥

૧૩૨.૮/૧વિશ્વાવસોઃ પ્રસન્નોઽભૂદ્ યત્ર શમ્ભુઃ શિવાન્વિતઃ ।
૧૩૨.૮/૨શૈવં તત્ પરમં તીર્થં દુર્ગાતીર્થં ચ વિશ્રુતમ્ ॥ ૧૩૨.૮॥

૧૩૨.૯/૧સર્વપાપૌઘહરણં સર્વદુર્ગતિનાશનમ્ ।
૧૩૨.૯/૨સર્વેષાં તીર્થમુખ્યાનાં તદ્ ધિ સારં મહામુને ।
૧૩૨.૯/૩તીર્થં મુનિવરૈઃ ખ્યાતં સર્વસિદ્ધિપ્રદં નૃણામ્ ॥ ૧૩૨.૯॥

૧૩૩.૧/૧બ્રહ્મોવાચ । શુક્લતીર્થમિતિ ખ્યાતં સર્વસિદ્ધિકરં નૃણામ્ ।
૧૩૩.૧/૨યસ્ય સ્મરણમાત્રેણ સર્વકામાન્ અવાપ્નુયાત્ ॥ ૧૩૩.૧॥

૧૩૩.૨/૧ભરદ્વાજ ઇતિ ખ્યાતો મુનિઃ પરમધાર્મિકઃ ।
૧૩૩.૨/૨તસ્ય પૈઠીનસી નામ ભાર્યા સુકલભૂષણા ॥ ૧૩૩.૨॥

૧૩૩.૩/૧ગૌતમીતીરમધ્યાસ્તે પતિવ્રતપરાયણા ।
૧૩૩.૩/૨અગ્નીષોમીયમૈન્દ્રાગ્નં પુરોડાશમકલ્પયત્ ॥ ૧૩૩.૩॥

૧૩૩.૪/૧પુરોડાશે શ્રપ્યમાણે ધૂમાત્ કશ્ચિદ્ અજાયત ।
૧૩૩.૪/૨પુરોડાશં ભક્ષયિત્વા લોકત્રિતયભીષણઃ ॥ ૧૩૩.૪॥

૧૩૩.૫/૧યજ્ઞં મે હ્યત્ર કો હંસિ કોપાત્ ત્વમિતિ તં મુનિઃ ।
૧૩૩.૫/૨પ્રોવાચ સત્વરં ક્રુદ્ધો ભરદ્વાજો દ્વિજોત્તમઃ ।
૧૩૩.૫/૩તદ્ ઋષેર્વચનં શ્રુત્વા રાક્ષસઃ પ્રત્યુવાચ તમ્ ॥ ૧૩૩.૫॥

૧૩૩.૬/૧રાક્ષસ ઉવાચ । હવ્યઘ્ન ઇતિ વિખ્યાતં ભરદ્વાજ નિબોધ મામ્ ।
૧૩૩.૬/૨સંધ્યાસુતોઽહં જ્યેષ્ઠશ્ચ સુતઃ પ્રાચીનબર્હિષઃ ॥ ૧૩૩.૬॥

૧૩૩.૭/૧બ્રહ્મણા મે વરો દત્તો યજ્ઞાન્ ખાદ યથાસુખમ્ ।
૧૩૩.૭/૨મમાનુજઃ કલિશ્ચાપિ બલવાન્ અતિભીષણઃ ॥ ૧૩૩.૭॥

૧૩૩.૮/૧અહં કૃષ્ણઃ પિતા કૃષ્ણો માતા કૃષ્ણા તથાનુજઃ ।
૧૩૩.૮/૨અહં મખં હનિષ્યામિ યૂપં છેદ્મિ કૃતાન્તકઃ ॥ ૧૩૩.૮॥

૧૩૩.૯/૧ભરદ્વાજ ઉવાચ । રક્ષ્યતાં મે ત્વયા યજ્ઞઃ પ્રિયો ધર્મઃ સનાતનઃ ।
૧૩૩.૯/૨જાને ત્વાં યજ્ઞહન્તારં સદ્વિજં રક્ષ મે ક્રતુમ્ ॥ ૧૩૩.૯॥

૧૩૩.૧૦/૧યજ્ઞઘ્ન ઉવાચ । ભરદ્વાજ નિબોધેદં વાક્યં મમ સમાસતઃ ।

૧૩૩.૧૦/૨બ્રહ્મણાહં પુરા શપ્તો દેવદાનવસંનિધૌ ॥ ૧૩૩.૧૦॥

૧૩૩.૧૧/૧તતઃ પ્રસાદિતો દેવો મયા લોકપિતામહઃ ।
૧૩૩.૧૧/૨અમૃતૈઃ પ્રોક્ષયિષ્યન્તિ યદા ત્વાં મુનિસત્તમાઃ ॥ ૧૩૩.૧૧॥

૧૩૩.૧૨/૧તદા વિશાપો ભવિતા હવ્યઘ્ન ત્વં ન ચાન્યથા ।
૧૩૩.૧૨/૨એવં કરિષ્યસિ યદા તતઃ સર્વં ભવિષ્યતિ ॥ ૧૩૩.૧૨॥

૧૩૩.૧૩/૧બ્રહ્મોવાચ । ભરદ્વાજઃ પુનઃ પ્રાહ સખા મેઽસિ મહામતે ।
૧૩૩.૧૩/૨મખસંરક્ષણં યેન સ્યાન્ મે વદ કરોમિ તત્ ॥ ૧૩૩.૧૩॥

૧૩૩.૧૪/૧સમ્ભૂય દેવા દૈતેયા મમન્થુઃ ક્ષીરસાગરમ્ ।
૧૩૩.૧૪/૨અલભન્તામૃતં કષ્ટાત્ તદ્ અસ્મત્સુલભં કથમ્ ॥ ૧૩૩.૧૪॥

૧૩૩.૧૫/૧પ્રીત્યા યદિ પ્રસન્નોઽસિ સુલભં યદ્ વદસ્વ તત્ ।
૧૩૩.૧૫/૨તદ્ ઋષેર્વચનં શ્રુત્વા રક્ષઃ પ્રાહ તદા મુદા ॥ ૧૩૩.૧૫॥

૧૩૩.૧૬/૧રક્ષ ઉવાચ । અમૃતં ગૌતમીવારિ અમૃતં સ્વર્ણમુચ્યતે ।
૧૩૩.૧૬/૨અમૃતં ગોભવં ચાજ્યમમૃતં સોમ એવ ચ ॥ ૧૩૩.૧૬॥

૧૩૩.૧૭/૧એતૈર્મામભિષિઞ્ચસ્વ અથવૈતૈસ્તથા ત્રિભિઃ ।
૧૩૩.૧૭/૨ગઙ્ગાયા વારિણાજ્યેન હિરણ્યેન તથૈવ ચ ।
૧૩૩.૧૭/૩સર્વેભ્યોઽપ્યધિકં દિવ્યમમૃતં ગૌતમીજલમ્ ॥ ૧૩૩.૧૭॥

૧૩૩.૧૮/૧બ્રહ્મોવાચ । એતદ્ આકર્ણ્ય સ ઋષિઃ પરં સંતોષમાગતઃ ।
૧૩૩.૧૮/૨પાણાવાદાય ગઙ્ગાયાઃ સલિલામૃતમાદરાત્ ॥ ૧૩૩.૧૮॥

૧૩૩.૧૯/૧તેનાકરોદ્ ઋષી રક્ષો હ્યભિષિક્તં તદા મખે ।
૧૩૩.૧૯/૨પુનશ્ચ યૂપે ચ પશાવૃત્વિક્ષુ મખમણ્ડલે ॥ ૧૩૩.૧૯॥

૧૩૩.૨૦/૧સર્વમેવાભવચ્છુક્લમભિષેકાન્ મહાત્મનઃ ।
૧૩૩.૨૦/૨તદ્ રક્ષોઽપિ તદા શુક્લો ભૂત્વોત્પન્નો મહાબલઃ ॥ ૧૩૩.૨૦॥

૧૩૩.૨૧/૧યઃ પુરા કૃષ્ણરૂપોઽભૂત્ સ તુ શુક્લોઽભવત્ ક્ષણાત્ ।
૧૩૩.૨૧/૨યજ્ઞં સર્વં સમાપ્યાથ ભરદ્વાજઃ પ્રતાપવાન્ ॥ ૧૩૩.૨૧॥

૧૩૩.૨૨/૧ઋત્વિજોઽપિ વિસૃજ્યાથ યૂપં ગઙ્ગોદકેઽક્ષિપત્ ।
૧૩૩.૨૨/૨ગઙ્ગામધ્યે તદ્ ધિ યૂપમદ્યાપ્યાસ્તે મહામતે ॥ ૧૩૩.૨૨॥

૧૩૩.૨૩/૧અભિષિક્તં ચામૃતેન અભિજ્ઞાનં તુ તન્ મહત્ ।
૧૩૩.૨૩/૨તત્ર તીર્થે પુના રક્ષો ભરદ્વાજમુવાચ હ ॥ ૧૩૩.૨૩॥

૧૩૩.૨૪/૧રક્ષ ઉવાચ । અહં યામિ ભરદ્વાજ કૃતઃ શુક્લસ્ત્વયા પુનઃ ।
૧૩૩.૨૪/૨તસ્માત્ તવાત્ર તીર્થે યે સ્નાનદાનાદિપૂજનમ્ ॥ ૧૩૩.૨૪॥

૧૩૩.૨૫/૧કુર્યુસ્તેષામભીષ્ટાનિ ભવેયુર્યત્ ફલં મખે ।
૧૩૩.૨૫/૨સ્મરણાદ્ અપિ પાપાનિ નાશં યાન્તુ સદા મુને ॥ ૧૩૩.૨૫॥

૧૩૩.૨૬/૧તતઃ પ્રભૃતિ તત્ તીર્થં શુક્લતીર્થમિતિ સ્મૃતમ્ ।
૧૩૩.૨૬/૨ગૌતમ્યાં દણ્ડકારણ્યે સ્વર્ગદ્વારમપાવૃતમ્ ॥ ૧૩૩.૨૬॥

૧૩૩.૨૭/૧ઉભયોસ્તીરયોઃ સપ્ત સહસ્રાણ્યપરાણિ ચ ।
૧૩૩.૨૭/૨તીર્થાનાં મુનિશાર્દૂલ સર્વસિદ્ધિપ્રદાયિનામ્ ॥ ૧૩૩.૨૭॥

૧૩૪.૧/૧બ્રહ્મોવાચ । ચક્રતીર્થમિતિ ખ્યાતં સ્મરણાત્ પાપનાશનમ્ ।
૧૩૪.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ શ ૃણુ યત્નેન નારદ ॥ ૧૩૪.૧॥

૧૩૪.૨/૧ઋષયઃ સપ્ત વિખ્યાતા વસિષ્ઠપ્રમુખા મુને ।
૧૩૪.૨/૨ગૌતમ્યાસ્તીરમાશ્રિત્ય સત્રયજ્ઞમુપાસતે ॥ ૧૩૪.૨॥

૧૩૪.૩/૧તત્ર વિઘ્ન ઉપક્રાન્તે રક્ષોભિરતિભીષણે ।
૧૩૪.૩/૨મામભ્યેત્યાથ મુનયો રક્ષઃકૃત્યં ન્યવેદયન્ ॥ ૧૩૪.૩॥

૧૩૪.૪/૧તદાહં પ્રમદારૂપં માયયાસૃજ્ય નારદ ।
૧૩૪.૪/૨યસ્યાશ્ચ દર્શનાદ્ એવ નાશં યાન્ત્યથ રાક્ષસાઃ ॥ ૧૩૪.૪॥

૧૩૪.૫/૧એવમુક્ત્વા તુ તાં પ્રાદામ્ ઋષિભ્યઃ પ્રમદાં મુને ।
૧૩૪.૫/૨મદ્વાક્યાદ્ ઋષયો માયામાદાય પુનરાગમન્ ॥ ૧૩૪.૫॥

૧૩૪.૬/૧અજૈકા યા સમાખ્યાતા કૃષ્ણલોહિતરૂપિણી ।
૧૩૪.૬/૨મુક્તકેશીત્યભિધયા સાસ્તેઽદ્યાપિ સ્વરૂપિણી ॥ ૧૩૪.૬॥

૧૩૪.૭/૧લોકત્રિતયસમ્મોહ+ ।દાયિની કામરૂપિણી ।
૧૩૪.૭/૨તદ્બલાત્ સ્વસ્થમનસઃ સર્વે ચ મુનિપુંગવઃ ॥ ૧૩૪.૭॥

૧૩૪.૮/૧ગૌતમીં સરિતાં શ્રેષ્ઠાં પુનર્યજ્ઞાય દીક્ષિતાઃ ।
૧૩૪.૮/૨પુનસ્તન્મખનાશાય રાક્ષસાઃ સમુપાગમન્ ॥ ૧૩૪.૮॥

૧૩૪.૯/૧યક્ષવાટાન્તિકે માયાં દૃષ્ટ્વા રાક્ષસપુંગવાઃ ।
૧૩૪.૯/૨તતો નૃત્યન્તિ ગાયન્તિ હસન્તિ ચ રુદન્તિ ચ ॥ ૧૩૪.૯॥

૧૩૪.૧૦/૧માહેશ્વરી મહામાયા પ્રભાવેણાતિદર્પિતા ।

૧૩૪.૧૦/૨તેષાં મધ્યે દૈત્યપતિઃ શમ્બરો નામ વીર્યવાન્ ॥ ૧૩૪.૧૦॥

૧૩૪.૧૧/૧માયારૂપાં તુ પ્રમદાં ભક્ષયામાસ નારદ ।
૧૩૪.૧૧/૨તદ્ અદ્ભુતમતીવાસીત્ તન્માયાબલદર્શિનામ્ ॥ ૧૩૪.૧૧॥

૧૩૪.૧૨/૧મખે વિધ્વંસ્યમાને તુ તે વિષ્ણું શરણં યયુઃ ।
૧૩૪.૧૨/૨પ્રાદાદ્ વિષ્ણુશ્ચક્રમથો મુનીનાં રક્ષણાય તુ ॥ ૧૩૪.૧૨॥

૧૩૪.૧૩/૧ચક્રં તદ્ રાક્ષસાન્ આજૌ દૈત્યાંશ્ચ દનુજાંસ્તથા ।
૧૩૪.૧૩/૨ચિચ્છેદ તદ્ભયાદ્ એવ મૃતા રાક્ષસપુંગવાઃ ॥ ૧૩૪.૧૩॥

૧૩૪.૧૪/૧ઋષિભિસ્તન્ મહાસત્રં સમ્પૂર્ણમભવત્ તદા ।
૧૩૪.૧૪/૨વિષ્ણોઃ પ્રક્ષાલિતં ચક્રં ગઙ્ગામ્ભોભિઃ સુદર્શનમ્ ॥ ૧૩૪.૧૪॥

૧૩૪.૧૫/૧તતઃ પ્રભૃતિ તત્ તીર્થં ચક્રતીર્થમુદાહૃતમ્ ।
૧૩૪.૧૫/૨તત્ર સ્નાનેન દાનેન સત્રયાગફલં લભેત્ ॥ ૧૩૪.૧૫॥

૧૩૪.૧૬/૧તત્ર પઞ્ચ શતાન્યાસંસ્તીર્થાનાં પાપહારિણામ્ ।
૧૩૪.૧૬/૨તેષુ સ્નાનં તથા દાનં પ્રત્યેકં મુક્તિદાયકમ્ ॥ ૧૩૪.૧૬॥

૧૩૫.૧/૧બ્રહ્મોવાચ । વાણીસંગમમાખ્યાતં યત્ર વાગીશ્વરો હરઃ ।
૧૩૫.૧/૨તત્ તીર્થં સર્વપાપાનાં મોચનં સર્વકામદમ્ ॥ ૧૩૫.૧॥

૧૩૫.૨/૧તત્ર સ્નાનેન દાનેન બ્રહ્મહત્યાદિનાશનમ્ ।
૧૩૫.૨/૨બ્રહ્મવિષ્ણ્વોશ્ચ સંવાદે મહત્ત્વે ચ પરસ્પરમ્ ॥ ૧૩૫.૨॥

૧૩૫.૩/૧તયોર્મધ્યે મહાદેવો જ્યોતિર્મૂર્તિરભૂત્ કિલ ।
૧૩૫.૩/૨તત્રૈવ વાગ્ ઉવાચેદં દૈવી પુત્ર તયોઃ શુભા ॥ ૧૩૫.૩॥

૧૩૫.૪/૧અહમસ્મિ મહાંસ્તત્ર અહમસ્મીતિ વૈ મિથઃ ।
૧૩૫.૪/૨દૈવી વાક્ તાવુભૌ પ્રાહ યસ્ત્વસ્યાન્તં તુ પશ્યતિ ॥ ૧૩૫.૪॥

૧૩૫.૫/૧સ તુ જ્યેષ્ઠો ભવેત્ તસ્માન્ મા વાદં કર્તુમર્હથઃ ।
૧૩૫.૫/૨તદ્વાક્યાદ્ વિષ્ણુરગમદ્ અધોઽહં ચોર્ધ્વમેવ ચ ॥ ૧૩૫.૫॥

૧૩૫.૬/૧તતો વિષ્ણુઃ શીઘ્રમેત્ય જ્યોતિઃપાર્શ્વ ઉપાવિશત્ ।
૧૩૫.૬/૨અપ્રાપ્યાન્તમહં પ્રાયાં દૂરાદ્ દૂરતરં મુને ॥ ૧૩૫.૬॥

૧૩૫.૭/૧તતઃ શ્રાન્તો નિવૃત્તોઽહં દ્રષ્ટુમીશં તુ તં પ્રભુમ્ ।
૧૩૫.૭/૨તદૈવં મમ ધીરાસીદ્ દૃષ્ટશ્ચાન્તો મયા ભૃશમ્ ॥ ૧૩૫.૭॥

૧૩૫.૮/૧અસ્ય દેવસ્ય તદ્ વિષ્ણોર્મમ જ્યૈષ્ઠ્યં સ્ફુટં ભવેત્ ।
૧૩૫.૮/૨પુનશ્ચાપિ મમ ત્વેવં મતિરાસીન્ મહામતે ॥ ૧૩૫.૮॥

૧૩૫.૯/૧સત્યૈર્વક્ત્રૈઃ કથં વક્ષ્યે પીડિતોઽપ્યનૃતં વચઃ ।
૧૩૫.૯/૨નાનાવિધેષુ પાપેષુ નાનૃતાત્ પાતકં પરમ્ ॥ ૧૩૫.૯॥

૧૩૫.૧૦/૧સત્યૈર્વક્ત્રૈરસત્યાં વા વાચં વક્ષ્યે કથં ત્વિતિ ।
૧૩૫.૧૦/૨તતોઽહં પઞ્ચમં વક્ત્રં ગર્દભાકૃતિભીષણમ્ ॥ ૧૩૫.૧૦॥

૧૩૫.૧૧/૧કૃત્વા તેનાનૃતં વક્ષ્ય ઇતિ ધ્યાત્વા ચિરં તદા ।
૧૩૫.૧૧/૨અબ્રવં તં હરિં તત્ર આસીનં જગતાં પ્રભુમ્ ॥ ૧૩૫.૧૧॥

૧૩૫.૧૨/૧અસ્ય ચાન્તો મયા દૃષ્ટસ્તેન જ્યૈષ્ઠ્યં જનાર્દન ।
૧૩૫.૧૨/૨મમેતિ વદતઃ પાર્શ્વે ઉભૌ તૌ હરિશંકરૌ ॥ ૧૩૫.૧૨॥

૧૩૫.૧૩/૧એકરૂપત્વમાપન્નૌ સૂર્યાચન્દ્રમસાવિવ ।
૧૩૫.૧૩/૨તૌ દૃષ્ટ્વા વિસ્મિતો ભીતશ્ચાસ્તવં તાવુભાવપિ ।
૧૩૫.૧૩/૩તતઃ ક્રુદ્ધૌ જગન્નાથૌ વાચં તામિદમૂચતુઃ ॥ ૧૩૫.૧૩॥

૧૩૫.૧૪/૧હરિહરાવૂચતુઃ । દુષ્ટે ત્વં નિમ્નગા ભૂયા નાનૃતાદ્
અસ્તિ પાતકમ્ ॥ ૧૩૫.૧૪॥

૧૩૫.૧૫/૧બ્રહ્મોવાચ । તતઃ સા વિહ્વલા ભૂત્વા નદીભાવમુપાગતા ।
૧૩૫.૧૫/૨તદ્ દૃષ્ટ્વા વિસ્મિતો ભીતસ્તામબ્રવમહં તદા ॥ ૧૩૫.૧૫॥

૧૩૫.૧૬/૧યસ્માદ્ અસત્યમુક્તાસિ બ્રહ્મવાચિ સ્થિતા સતી ।
૧૩૫.૧૬/૨તસ્માદ્ અદૃશ્યા ત્વં ભૂયાઃ પાપરૂપાસ્યસંશયમ્ ॥ ૧૩૫.૧૬॥

૧૩૫.૧૭/૧એતચ્છાપં વિદિત્વા તુ તૌ દેવૌ પ્રણતા તદા ।
૧૩૫.૧૭/૨વિશાપત્વં પ્રાર્થયન્તી તુષ્ટાવ ચ પુનઃ પુનઃ ॥ ૧૩૫.૧૭॥

૧૩૫.૧૮/૧તતસ્તુષ્ટૌ દેવદેવૌ પ્રાર્થિતૌ ત્રિદશાર્ચિતૌ ।
૧૩૫.૧૮/૨પ્રીત્યા હરિહરાવેવં વાચં વાચમથોચતુઃ ॥ ૧૩૫.૧૮॥

૧૩૫.૧૯/૧હરિહરાવૂચતુઃ । ગઙ્ગયા સંગતા ભદ્રે યદા ત્વં લોકપાવની ।
૧૩૫.૧૯/૨તદા પુનર્વપુસ્તે સ્યાત્ પવિત્રં હિ સુશોભને ॥ ૧૩૫.૧૯॥

૧૩૫.૨૦/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સાપિ દેવી ગઙ્ગયા સંગતાભવત્ ।
૧૩૫.૨૦/૨ભાગીરથી ગૌતમી ચ તતશ્ચાપિ સ્વકં વપુઃ ॥ ૧૩૫.૨૦॥

૧૩૫.૨૧/૧દેવી સા વ્યગમદ્ બ્રહ્મન્ દેવાનામપિ દુર્લભમ્ ।

૧૩૫.૨૧/૨ગૌતમ્યાં સૈવ વિખ્યાતા નામ્ના વાણીતિ પુણ્યદા ॥ ૧૩૫.૨૧॥

૧૩૫.૨૨/૧ભાગીરથ્યાં સૈવ દેવી સરસ્વત્યભિધીયતે ।
૧૩૫.૨૨/૨ઉભયત્રાપિ વિખ્યાતઃ સંગમો લોકપૂજિતઃ ॥ ૧૩૫.૨૨॥

૧૩૫.૨૩/૧સરસ્વતીસંગમશ્ચ વાણીસંગમ એવ ચ ।
૧૩૫.૨૩/૨ગૌતમ્યા સંગતા દેવી વાણી વાચા સરસ્વતી ॥ ૧૩૫.૨૩॥

૧૩૫.૨૪/૧સર્વત્ર પૂજિતં તીર્થં તત્ર વાચા શિવં પ્રભુમ્ ।
૧૩૫.૨૪/૨દેવેશ્વરં પૂજયિત્વા વિશાપમગમદ્ યતઃ ॥ ૧૩૫.૨૪॥

૧૩૫.૨૫/૧બ્રહ્મા વિધૂય વાગ્દૌષ્ટ્યં સ્વં ચ ધામાગમત્ પુનઃ ।
૧૩૫.૨૫/૨તસ્માત્ તત્ર શુચિર્ભૂત્વા સ્નાત્વા તત્ર ચ સંગમે ॥ ૧૩૫.૨૫॥

૧૩૫.૨૬/૧વાગીશ્વરં તતો દૃષ્ટ્વા તાવતા મુક્તિમાપ્નુયાત્ ।
૧૩૫.૨૬/૨દાનહોમાદિકં કિંચિદ્ ઉપવાસાદિકાં ક્રિયામ્ ॥ ૧૩૫.૨૬॥

૧૩૫.૨૭/૧યઃ કુર્યાત્ સંગમે પુણ્યે સંસારે ન ભવેત્ પુનઃ ।
૧૩૫.૨૭/૨એકોનવિંશતિશતં તીર્થાનાં તીરયોર્દ્વયોઃ ।
૧૩૫.૨૭/૩નાનાજન્માર્જિતાશેષ+ ।પાપક્ષયવિધાયિનામ્ ॥ ૧૩૫.૨૭॥

૧૩૬.૧/૧બ્રહ્મોવાચ । વિષ્ણુતીર્થમિતિ ખ્યાતં તત્ર વૃત્તમિદં શ઼ૃણુ ।
૧૩૬.૧/૨મૌદ્ગલ્ય ઇતિ વિખ્યાતો મુદ્ગલસ્ય સુતો ઋષિઃ ॥ ૧૩૬.૧॥

૧૩૬.૨/૧તસ્ય ભાર્યા તુ જાબાલા નામ્ના ખ્યાતા સુપુત્રિણી ।
૧૩૬.૨/૨પિતા ઋષિસ્તથા વૃદ્ધો મુદ્ગલો લોકવિશ્રુતઃ ॥ ૧૩૬.૨॥

૧૩૬.૩/૧તસ્ય ભાર્યા તથા ખ્યાતા નામ્ના ભાગીરથી શુભા ।
૧૩૬.૩/૨સ મૌદ્ગલ્યઃ પ્રાતરેવ ગઙ્ગાં સ્નાતિ યતવ્રતઃ ॥ ૧૩૬.૩॥

૧૩૬.૪/૧નિત્યમેવ ત્વિદં કર્મ તસ્યાસીન્ મુનિસત્તમ ।
૧૩૬.૪/૨ગઙ્ગાતીરે કુશૈર્મૃદ્ભિઃ શમીપુષ્પૈરહર્નિશમ્ ॥ ૧૩૬.૪॥

૧૩૬.૫/૧ગુરૂદિતેન માર્ગેણ સ્વમાનસસરોરુહે ।
૧૩૬.૫/૨આવાહનં નિત્યમેવ વિષ્ણોશ્ચક્રે સ મૌદ્ગલિઃ ॥ ૧૩૬.૫॥

૧૩૬.૬/૧તેનાહૂતસ્ત્વરન્ એતિ લક્ષ્મીભર્તા જગત્પતિઃ ।
૧૩૬.૬/૨વૈનતેયમથારુહ્ય શઙ્ખચક્રગદાધરઃ ॥ ૧૩૬.૬॥

૧૩૬.૭/૧પૂજિતસ્તેન ઋષિણા સ મૌદ્ગલ્યેન યત્નતઃ ।
૧૩૬.૭/૨પ્રબ્રૂતે ચ કથાશ્ચિત્રા મૌદ્ગલ્યાય જગત્પ્રભુઃ ॥ ૧૩૬.૭॥

૧૩૬.૮/૧તતોઽપરાહ્ણસમયે વિષ્ણુઃ પ્રાહ સ મૌદ્ગલિમ્ ।
૧૩૬.૮/૨યાહિ વત્સ સ્વભવનં શ્રાન્તોઽસીતિ પુનઃ પુનઃ ॥ ૧૩૬.૮॥

૧૩૬.૯/૧એવમુક્તઃ સ દેવેન વિષ્ણુના યાતિ સ દ્વિજઃ ।
૧૩૬.૯/૨જગત્પ્રભુસ્તતો યાતિ દેવૈર્યુક્તઃ સ્વમન્દિરમ્ ॥ ૧૩૬.૯॥

૧૩૬.૧૦/૧મૌદ્ગલ્યોઽપિ તથાભ્યેત્ય કિંચિદ્ આદાય નિત્યશઃ ।
૧૩૬.૧૦/૨સ્વમેવ ભવનં વિદ્વાન્ ભાર્યાયૈ સ્વાર્જિતં ધનમ્ ॥ ૧૩૬.૧૦॥

૧૩૬.૧૧/૧દદાતિ સ મહાવિષ્ણુ+ ેહરણાબ્જપરાયણઃ ।
૧૩૬.૧૧/૨મૌદ્ગલ્યસ્ય પ્રિયા સાપિ પતિવ્રતપરાયણા ॥ ૧૩૬.૧૧॥

૧૩૬.૧૨/૧શાકં મૂલં ફલં વાપિ ભર્ત્રાનીતં તુ યત્નતઃ ।
૧૩૬.૧૨/૨સુસંસ્કૃત્યાપ્યતિથીનાં બાલાનાં ભર્તુરેવ ચ ॥ ૧૩૬.૧૨॥

૧૩૬.૧૩/૧દત્ત્વા તુ ભોજનં તેભ્યઃ પશ્ચાદ્ ભુઙ્ક્તે યતવ્રતા ।
૧૩૬.૧૩/૨ભુક્તવત્સ્વથ સર્વેષુ રાત્રૌ નિત્યં સ મૌદ્ગલિઃ ॥ ૧૩૬.૧૩॥

૧૩૬.૧૪/૧વિષ્ણોઃ શ્રુતાઃ કથાશ્ચિત્રાસ્તેભ્યો વક્ત્યથ હર્ષિતઃ ।
૧૩૬.૧૪/૨એવં બહુતિથે કાલે વ્યતીતે ચાતિવિસ્મિતા ।
૧૩૬.૧૪/૩મૌદ્ગલ્યસ્ય રહો ભાર્યા ભર્તારં વાક્યમબ્રવીત્ ॥ ૧૩૬.૧૪॥

૧૩૬.૧૫/૧જાબાલોવાચ । યદિ તે વિષ્ણુરભ્યેતિ સમીપં ત્રિદશાર્ચિતઃ ।
૧૩૬.૧૫/૨તથાપિ કષ્ટમસ્માકં કસ્માદ્ ઇતિ જગત્પ્રભુમ્ ॥ ૧૩૬.૧૫॥

૧૩૬.૧૬/૧તત્ પૃચ્છ ત્વં મહાપ્રાજ્ઞ યદાસૌ વિષ્ણુરેતિ ચ ।
૧૩૬.૧૬/૨યસ્મિંશ્ચ સ્મૃતમાત્રે તુ જરાજન્મરુજો મૃતિઃ ।
૧૩૬.૧૬/૩નાશં યાન્તિ કુતો દૃષ્ટે તસ્માત્ પૃચ્છ જગત્પતિમ્ ॥ ૧૩૬.૧૬॥

૧૩૬.૧૭/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા પ્રિયાવાક્યાન્ મૌદ્ગલ્યો નિત્યવદ્ ધરિમ્ ।
૧૩૬.૧૭/૨પૂજયિત્વા વિનીતશ્ચ પપ્રચ્છ સ કૃતાઞ્જલિઃ ॥ ૧૩૬.૧૭॥

૧૩૬.૧૮/૧મૌદ્ગલ્ય ઉવાચ । ત્વયિ સ્મૃતે જગન્નાથ શોકદારિદ્ર્યદુષ્કૃતમ્ ।
૧૩૬.૧૮/૨નાશં યાતિ વિપત્તિર્મે ત્વયિ દૃષ્ટે કથં સ્થિતા ॥ ૧૩૬.૧૮॥

૧૩૬.૧૯/૧શ્રીવિષ્ણુરુવાચ । સ્વકૃતં ભુજ્યતે ભૂતૈઃ સર્વૈઃ સર્વત્ર સર્વદા ।
૧૩૬.૧૯/૨ન કોઽપિ કસ્યચિત્ કિંચિત્ કરોત્યત્ર હિતાહિતે ॥ ૧૩૬.૧૯॥

૧૩૬.૨૦/૧યાદૃશં ચોપ્યતે બીજં ફલં ભવતિ તાદૃશમ્ ।

૧૩૬.૨૦/૨૨સાલઃ સ્યાન્ ન નિમ્બસ્ય બીજાજ્જાત્વપિ કુત્રચિત્ ॥ ૧૩૬.૨૦॥

૧૩૬.૨૧/૧ન કૃતા ગૌતમીસેવા નાર્ચિતૌ હરિશંકરૌ ।
૧૩૬.૨૧/૨ન દત્તં યૈશ્ચ વિપ્રેભ્યસ્તે કથં ભાજનં શ્રિયઃ ॥ ૧૩૬.૨૧॥

૧૩૬.૨૨/૧ત્વયા ન દત્તં કિંચિચ્ચ બ્રાહ્મણેભ્યો મમાપિ ચ ।
૧૩૬.૨૨/૨યદ્ દીયતે તદ્ એવેહ પરસ્મિંશ્ચોપતિષ્ઠતિ ॥ ૧૩૬.૨૨॥

૧૩૬.૨૩/૧મૃદ્ભિર્વાર્ભિઃ કુશૈર્મન્ત્રૈઃ શુચિકર્મ સદૈવ યત્ ।
૧૩૬.૨૩/૨કરોતિ તસ્માત્ પૂતાત્મા શરીરસ્ય ચ શોષણાત્ ॥ ૧૩૬.૨૩॥

૧૩૬.૨૪/૧વિના દાનેન ન ક્વાપિ ભોગાવાપ્તિર્નૃણાં ભવેત્ ।
૧૩૬.૨૪/૨સત્કર્માચરણાચ્છુદ્ધો વિરક્તઃ સ્યાત્ તતો નરઃ ॥ ૧૩૬.૨૪॥

૧૩૬.૨૫/૧તતોઽપ્રતિહતજ્ઞાનો જીવન્મુક્તસ્તતો ભવેત્ ।
૧૩૬.૨૫/૨સર્વેષાં સુલભા મુક્તિર્મદ્ભક્ત્યા ચેહ પૂર્તતઃ ॥ ૧૩૬.૨૫॥

૧૩૬.૨૬/૧ભુક્તિર્દાનાદિના સર્વ+ ।ભૂતદુઃખનિબર્હણાત્ ।
૧૩૬.૨૬/૨અથવા લપ્સ્યસે મુક્તિં ભક્ત્યા ભુક્તિં ન લપ્સ્યસે ॥ ૧૩૬.૨૬॥

૧૩૬.૨૭/૧મૌદ્ગલ્ય ઉવાચ । ભક્ત્યા મુક્તિઃ કથં ભૂયાદ્ ભુક્તેર્મુક્તિઃ સુદુર્લભા ।
૧૩૬.૨૭/૨જાતા ચેદ્ દેહિનાં મુક્તિઃ કિમન્યેન પ્રયોજનમ્ ॥ ૧૩૬.૨૭॥

૧૩૬.૨૮/૧ભક્ત્યા મુક્તિઃ સર્વપૂજ્યા તામિચ્છેયં જગન્મય ॥ ૧૩૬.૨૮॥

૧૩૬.૨૯/૧વિષ્ણુરુવાચ । એતદ્ એવાન્તરં બ્રહ્મન્ દીયતે મામનુસ્મરન્ ।
૧૩૬.૨૯/૨બ્રાહ્મણાયાથવાર્થિભ્યસ્તદ્ એવાક્ષયતાં વ્રજેત્ ॥ ૧૩૬.૨૯॥

૧૩૬.૩૦/૧મામધ્યાત્વાથ યદ્ દદ્યાત્ તત્ તન્માત્રફલપ્રદમ્ ।
૧૩૬.૩૦/૨તત્ પુનર્દત્તમેવેહ ન ભોગાયાત્ર કલ્પતે ॥ ૧૩૬.૩૦॥

૧૩૬.૩૧/૧તસ્માદ્ દેહિ મહાબુદ્ધે ભોજ્યં કિંચિન્ મમ ધ્રુવમ્ ।
૧૩૬.૩૧/૨અથવા વિપ્રમુખ્યાય ગૌતમીતીરમાશ્રિતઃ ॥ ૧૩૬.૩૧॥

૧૩૬.૩૨/૧બ્રહ્મોવાચ । મૌદ્ગલ્યઃ પ્રાહ તં વિષ્ણું દેયં મમ ન વિદ્યતે ।
૧૩૬.૩૨/૨નાન્યત્ કિંચન દેહાદિ યત્ તત્ ત્વયિ સમર્પિતમ્ ॥ ૧૩૬.૩૨॥

૧૩૬.૩૩/૧તતો વિષ્ણુર્ગરુત્મન્તં પ્રાહ શીઘ્રં જગત્પતિઃ ।
૧૩૬.૩૩/૨ઇહાનયસ્વ કણિશં મમાયં ચાર્પયિષ્યતિ ॥ ૧૩૬.૩૩॥

૧૩૬.૩૪/૧તતો યોગ્યાન્ અયં ભોગાન્ પ્રાપ્સ્યતે મનસઃ પ્રિયાન્ ।

૧૩૬.૩૪/૨આકર્ણ્ય સ્વામિનાદિષ્ટં તથા ચક્રે સ પક્ષિરાટ્ ॥ ૧૩૬.૩૪॥

૧૩૬.૩૫/૧વિષ્ણુહસ્તે કણાન્ પ્રાદાત્ સ મૌદ્ગલ્યો યતવ્રતઃ ।
૧૩૬.૩૫/૨એતસ્મિન્ન્ અન્તરે વિષ્ણુર્વિશ્વકર્માણમબ્રવીત્ ॥ ૧૩૬.૩૫॥

૧૩૬.૩૬/૧વિષ્ણુરુવાચ । યાવચ્ચાસ્ય કુલે સપ્ત પુરુષાસ્તાવદ્ એવ તુ ।
૧૩૬.૩૬/૨ભવિતારો મહાબુદ્ધે તાવત્ કામા મનીષિતાઃ ।
૧૩૬.૩૬/૩ગાવો હિરણ્યં ધાન્યાનિ વસ્ત્રાણ્યાભરણાનિ ચ ॥ ૧૩૬.૩૬॥

૧૩૬.૩૭/૧બ્રહ્મોવાચ । યચ્ચ કિંચિન્ મનઃપ્રીત્યૈ લોકે ભવતિ ભૂષણમ્ ।
૧૩૬.૩૭/૨તત્ સર્વમાપ મૌદ્ગલ્યો વિષ્ણુગઙ્ગાપ્રભાવતઃ ॥ ૧૩૬.૩૭॥

૧૩૬.૩૮/૧ગૃહં ગચ્છેતિ મૌદ્ગલ્યો વિષ્ણુનોક્તસ્તતો યયૌ ।
૧૩૬.૩૮/૨આશ્રમે સ્વસ્ય સર્વર્દ્ધિં દૃષ્ટ્વા ઋષિરભાષત ॥ ૧૩૬.૩૮॥

૧૩૬.૩૯/૧ઋષિરુવાચ । અહો દાનપ્રભાવોઽયમહો વિષ્ણોરનુસ્મૃતિઃ ।
૧૩૬.૩૯/૨અહો ગઙ્ગાપ્રભાવશ્ચ કૈર્વિચાર્યો મહાન્ અયમ્ ॥ ૧૩૬.૩૯॥

૧૩૬.૪૦/૧બ્રહ્મોવાચ । મૌદ્ગલ્યો ભાર્યયા સાર્ધં પુત્રૈઃ પૌત્રૈશ્ચ બન્ધુભિઃ ।
૧૩૬.૪૦/૨પિતૃભ્યાં બુભુજે ભોગાન્ ભુક્તિં મુક્તિમવાપ ચ ॥ ૧૩૬.૪૦॥

૧૩૬.૪૧/૧તતઃ પ્રભૃતિ તત્ તીર્થં મૌદ્ગલ્યં વૈષ્ણવં તથા ।
૧૩૬.૪૧/૨તત્ર સ્નાનં ચ દાનં ચ ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૧૩૬.૪૧॥

૧૩૬.૪૨/૧તત્ર શ્રુતિઃ સ્મૃતિર્વાપિ તીર્થસ્ય સ્યાત્ કથંચન ।
૧૩૬.૪૨/૨તસ્ય વિષ્ણુર્ભવેત્ પ્રીતઃ પાપૈર્મુક્તઃ સુખી ભવેત્ ॥ ૧૩૬.૪૨॥

૧૩૬.૪૩/૧એકાદશ સહસ્રાણિ તીર્થાનાં તીરયોર્દ્વયોઃ ।
૧૩૬.૪૩/૨સર્વાર્થદાયિનાં તત્ર સ્નાનદાનજપાદિભિઃ ॥ ૧૩૬.૪૩॥

૧૩૭.૧/૧બ્રહ્મોવાચ । લક્ષ્મીતીર્થમિતિ ખ્યાતં સાક્ષાલ્લક્ષ્મીવિવર્ધનમ્ ।
૧૩૭.૧/૨અલક્ષ્મીનાશનં પુણ્યમાખ્યાનં શ઼ૃણુ નારદ ॥ ૧૩૭.૧॥

૧૩૭.૨/૧સંવાદશ્ચ પુરા ત્વાસીલ્લક્ષ્મ્યાઃ પુત્ર દરિદ્રયા ।
૧૩૭.૨/૨પરસ્પરવિરોધિન્યાવુભે વિશ્વં સમીયતુઃ ॥ ૧૩૭.૨॥

૧૩૭.૩/૧તાભ્યામવ્યાપૃતં વસ્તુ તન્ નાસ્તિ ભુવનત્રયે ।
૧૩૭.૩/૨મમ જ્યૈષ્ઠ્યં મમ જ્યૈષ્ઠ્યમિત્યૂચતુરુભે મિથઃ ।
૧૩૭.૩/૩અહં પૂર્વં સમુદ્ભૂતા ઇત્યાહ શ્રિયમોજસા ॥ ૧૩૭.૩॥

૧૩૭.૪/૧શ્રીલક્ષ્મીરુવાચ । કુલં શીલં જીવિતં વા દેહિનામહમેવ તુ ।

૧૩૭.૪/૨મયા વિના દેહભાજો જીવન્તોઽપિ મૃતા ઇવ ॥ ૧૩૭.૪॥

૧૩૭.૫/૧બ્રહ્મોવાચ । દરિદ્રયા ચ સા પ્રોક્તા સર્વેભ્યો હ્યધિકા હ્યહમ્ ।
૧૩૭.૫/૨મુક્તિર્મદાશ્રિતા નિત્યં દરિદ્રૈવં વચોઽબ્રવીત્ ॥ ૧૩૭.૫॥

૧૩૭.૬/૧કામઃ ક્રોધશ્ચ લોભશ્ચ મદો માત્સર્યમેવ ચ ।
૧૩૭.૬/૨યત્રાહમસ્મિ તત્રૈતે ન તિષ્ઠન્તિ કદાચન ॥ ૧૩૭.૬॥

૧૩૭.૭/૧ન ભયોદ્ભૂતિરુન્માદ ઈર્ષ્યા ઉદ્ધતવૃત્તિતા ।
૧૩૭.૭/૨યત્રાહમસ્મિ તત્રૈતે ન તિષ્ઠન્તિ કદાચન ॥ ૧૩૭.૭॥

૧૩૭.૮/૧દરિદ્રાયા વચઃ શ્રુત્વા લક્ષ્મીસ્તાં પ્રત્યભાષત ॥ ૧૩૭.૮॥

૧૩૭.૯/૧લક્ષ્મીરુવાચ । અલંકૃતો મયા જન્તુઃ સર્વો ભવતિ પૂજિતઃ ।
૧૩૭.૯/૨નિર્ધનઃ શિવતુલ્યોઽપિ સર્વૈરપ્યભિભૂયતે ॥ ૧૩૭.૯॥

૧૩૭.૧૦/૧દેહીતિ વચનદ્વારા દેહસ્થાઃ પઞ્ચ દેવતાઃ ।
૧૩૭.૧૦/૨સદ્યો નિર્ગત્ય ગચ્છન્તિ ધીશ્રીહ્રીશાન્તિકીર્તયઃ ॥ ૧૩૭.૧૦॥

૧૩૭.૧૧/૧તાવદ્ ગુણા ગુરુત્વં ચ યાવન્ નાર્થયતે પરમ્ ।
૧૩૭.૧૧/૨અર્થી ચેત્ પુરુષો જાતઃ ક્વ ગુણાઃ ક્વ ચ ગૌરવમ્ ॥ ૧૩૭.૧૧॥

૧૩૭.૧૨/૧તાવત્ સર્વોત્તમો જન્તુસ્તાવત્ સર્વગુણાલયઃ ।
૧૩૭.૧૨/૨નમસ્યઃ સર્વલોકાનાં યાવન્ નાર્થયતે પરમ્ ॥ ૧૩૭.૧૨॥

૧૩૭.૧૩/૧કષ્ટમેતન્ મહાપાપં નિર્ધનત્વં શરીરિણામ્ ।
૧૩૭.૧૩/૨ન માનયતિ નો વક્તિ ન સ્પૃશત્યધનં જનઃ ॥ ૧૩૭.૧૩॥

૧૩૭.૧૪/૧અહમેવ તતઃ શ્રેષ્ઠા દરિદ્રે શ ૃણુ મે વચઃ ॥ ૧૩૭.૧૪॥

૧૩૭.૧૫/૧બ્રહ્મોવાચ । તલ્લક્ષ્મીવચનં શ્રુત્વા દરિદ્રા વાક્યમબ્રવીત્ ॥ ૧૩૭.૧૫॥

૧૩૭.૧૬/૧દરિદ્રોવાચ । વક્તું ન લક્ષ્મીર્જ્યેષ્ઠાહમિતિ વૈ લજ્જસે મુહુઃ ।
૧૩૭.૧૬/૨પાપેષુ રમસે નિત્યં વિહાય પુરુષોત્તમમ્ ॥ ૧૩૭.૧૬॥

૧૩૭.૧૭/૧વિશ્વસ્તવઞ્ચકા નિત્યં ભવતી શ્લાઘસે કથમ્ ।
૧૩૭.૧૭/૨સુખં ન તાદૃક્ ત્વત્પ્રાપ્તૌ પશ્ચાત્તાપો યથા ગુરુઃ ॥ ૧૩૭.૧૭॥

૧૩૭.૧૮/૧ન તથા જાયતે પુંસાં સુરયા દારુણો મદઃ ।
૧૩૭.૧૮/૨ત્વત્સંનિધાનમાત્રેણ યથા વૈ વિદુષામપિ ॥ ૧૩૭.૧૮॥

૧૩૭.૧૯/૧સદૈવ રમસે લક્ષ્મીઃ પ્રાયસ્ત્વં પાપકારિષુ ।

૧૩૭.૧૯/૨અહં વસામિ યોગ્યેષુ ધર્મશીલેષુ સર્વદા ॥ ૧૩૭.૧૯॥

૧૩૭.૨૦/૧શિવવિષ્ણ્વનુરક્તેષુ કૃતજ્ઞેષુ મહત્સુ ચ ।
૧૩૭.૨૦/૨સદાચારેષુ શાન્તેષુ ગુરુસેવોદ્યતેષુ ચ ॥ ૧૩૭.૨૦॥

૧૩૭.૨૧/૧સત્સુ વિદ્વત્સુ શૂરેષુ કૃતબુદ્ધિષુ સાધુષુ ।
૧૩૭.૨૧/૨નિવસામિ સદા લક્ષ્મીસ્તસ્માજ્જ્યૈષ્ઠ્યં મયિ સ્થિતમ્ ॥ ૧૩૭.૨૧॥

૧૩૭.૨૨/૧બ્રાહ્મણેષુ શુચિષ્મત્સુ વ્રતચારિષુ ભિક્ષુષુ ।
૧૩૭.૨૨/૨નિર્ભયેષુ વસિષ્યામિ લક્ષ્મીસ્ત્વં શ઼ૃણુ તે સ્થિતિમ્ ॥ ૧૩૭.૨૨॥

૧૩૭.૨૩/૧રાજવર્તિષુ પાપેષુ નિષ્ઠુરેષુ ખલેષુ ચ ।
૧૩૭.૨૩/૨પિશુનેષુ ચ લુબ્ધેષુ વિકૃતેષુ શઠેષુ ચ ॥ ૧૩૭.૨૩॥

૧૩૭.૨૪/૧અનાર્યેષુ કૃતઘ્નેષુ ધર્મઘાતિષુ સર્વદા ।
૧૩૭.૨૪/૨મિત્રદ્રોહિષ્વનિષ્ટેષુ ભગ્નચિત્તેષુ વર્તસે ॥ ૧૩૭.૨૪॥

૧૩૭.૨૫/૧બ્રહ્મોવાચ । એવં વિવદમાને તે જગ્મતુર્મામુભે અપિ ।
૧૩૭.૨૫/૨તયોર્વાક્યમુપશ્રુત્ય મયોક્તે તે ઉભે અપિ ॥ ૧૩૭.૨૫॥

૧૩૭.૨૬/૧મત્તઃ પૂર્વતરા પૃથ્વી આપઃ પૂર્વતરાસ્તતઃ ।
૧૩૭.૨૬/૨સ્ત્રીણાં વિવાદં તા એવ સ્ત્રિયો જાનન્તિ નેતરે ॥ ૧૩૭.૨૬॥

૧૩૭.૨૭/૧વિશેષતઃ પુનસ્તાભ્યઃ કમણ્ડલુભવાશ્ચ યાઃ ।
૧૩૭.૨૭/૨તત્રાપિ ગૌતમી દેવી નિશ્ચયં કથયિષ્યતિ ॥ ૧૩૭.૨૭॥

૧૩૭.૨૮/૧સૈવ સર્વાર્તિસંહર્ત્રી સૈવ સંદેહકર્તરી ।
૧૩૭.૨૮/૨તે મદ્વાક્યાદ્ ભુવં ગત્વા ભૂમ્યા ચ સહિતે અપિ ॥ ૧૩૭.૨૮॥

૧૩૭.૨૯/૧અદ્ભિશ્ચ સહિતાઃ સર્વા ગૌતમીં યયુરાપગામ્ ।
૧૩૭.૨૯/૨ભૂમિરાપસ્તયોર્વાક્યં ગૌતમ્યૈ ક્રમશઃ સ્ફુટમ્ ॥ ૧૩૭.૨૯॥

૧૩૭.૩૦/૧સર્વં નિવેદયામાસુર્યથાવૃત્તં પ્રણમ્ય તામ્ ।
૧૩૭.૩૦/૨દરિદ્રાયાશ્ચ લક્ષ્મ્યાશ્ચ વાક્યં મધ્યસ્થવત્ તદા ॥ ૧૩૭.૩૦॥

૧૩૭.૩૧/૧શ઼ૃણ્વત્સુ લોકપાલેષુ શ઼ૃણ્વત્યાં ભુવિ નારદ ।
૧૩૭.૩૧/૨શ઼ૃણ્વતીષ્વપ્સુ સા ગઙ્ગા દરિદ્રાં વાક્યમબ્રવીત્ ।
૧૩૭.૩૧/૩સમ્પ્રશસ્ય તથા લક્ષ્મીં ગૌતમી વાક્યમબ્રવીત્ ॥ ૧૩૭.૩૧॥

૧૩૭.૩૨/૧ગૌતમ્યુવાચ । બ્રહ્મશ્રીશ્ચ તપઃશ્રીશ્ચ યજ્ઞશ્રીઃ કીર્તિસંજ્ઞિતા ।
૧૩૭.૩૨/૨ધનશ્રીશ્ચ યશશ્રીશ્ચ વિદ્યા પ્રજ્ઞા સરસ્વતી ॥ ૧૩૭.૩૨॥

૧૩૭.૩૩/૧ભુક્તિશ્રીશ્ચાથ મુક્તિશ્ચ સ્મૃતિર્લજ્જા ધૃતિઃ ક્ષમા ।
૧૩૭.૩૩/૨સિદ્ધિસ્તુષ્ટિસ્તથા પુષ્ટિઃ શાન્તિરાપસ્તથા મહી ॥ ૧૩૭.૩૩॥

૧૩૭.૩૪/૧અહંશક્તિરથૌષધ્યઃ શ્રુતિઃ શુદ્ધિર્વિભાવરી ।
૧૩૭.૩૪/૨દ્યૌર્જ્યોત્સ્ના આશિષઃ સ્વસ્તિર્વ્યાપ્તિર્માયા ઉષા શિવા ॥ ૧૩૭.૩૪॥

૧૩૭.૩૫/૧યત્ કિંચિદ્ વિદ્યતે લોકે લક્ષ્મ્યા વ્યાપ્તં ચરાચરમ્ ।
૧૩૭.૩૫/૨બ્રાહ્મણેષ્વથ ધીરેષુ ક્ષમાવત્સ્વથ સાધુષુ ॥ ૧૩૭.૩૫॥

૧૩૭.૩૬/૧વિદ્યાયુક્તેષુ ચાન્યેષુ ભુક્તિમુક્ત્યનુસારિષુ ।
૧૩૭.૩૬/૨યદ્ યદ્ રમ્યં સુન્દરં વા તત્ તલ્લક્ષ્મીવિજૃમ્ભિતમ્ ॥ ૧૩૭.૩૬॥

૧૩૭.૩૭/૧કિમત્ર બહુનોક્તેન સર્વં લક્ષ્મીમયં જગત્ ।
૧૩૭.૩૭/૨યસ્મિન્ કસ્મિંશ્ચ યત્ કિંચિદ્ ઉત્કૃષ્ટં પરિદૃશ્યતે ॥ ૧૩૭.૩૭॥

૧૩૭.૩૮/૧લક્ષ્મીમયં તુ તત્ સર્વં તયા હીનં ન કિંચન ।
૧૩૭.૩૮/૨અત્રેમાં સુન્દરીં દેવીં સ્પર્ધયન્તી ન લજ્જસે ॥ ૧૩૭.૩૮॥

૧૩૭.૩૯/૧ગચ્છ ગચ્છેતિ તાં ગઙ્ગા દરિદ્રાં વાક્યમબ્રવીત્ ।
૧૩૭.૩૯/૨તતઃ પ્રભૃતિ ગઙ્ગામ્ભો દરિદ્રાવૈરકાર્યભૂત્ ॥ ૧૩૭.૩૯॥

૧૩૭.૪૦/૧તાવદ્ દરિદ્રાભિભવો ગઙ્ગા યાવન્ ન સેવ્યતે ।
૧૩૭.૪૦/૨તતઃ પ્રભૃતિ તત્ તીર્થમલક્ષ્મીનાશનં શુભમ્ ॥ ૧૩૭.૪૦॥

૧૩૭.૪૧/૧તત્ર સ્નાનેન દાનેન લક્ષ્મીવાન્ પુણ્યવાન્ ભવેત્ ।
૧૩૭.૪૧/૨તીર્થાનાં ષટ્ સહસ્રાણિ તસ્મિંસ્તીર્થે મહામતે ।
૧૩૭.૪૧/૩દેવર્ષિમુનિજુષ્ટાનાં સર્વસિદ્ધિપ્રદાયિનામ્ ॥ ૧૩૭.૪૧॥

૧૩૮.૧/૧બ્રહ્મોવાચ । ભાનુતીર્થમિતિ ખ્યાતં સર્વસિદ્ધિકરં નૃણામ્ ।
૧૩૮.૧/૨તત્રેદં વૃત્તમાખ્યાસ્યે મહાપાતકનાશનમ્ ॥ ૧૩૮.૧॥

૧૩૮.૨/૧શર્યાતિરિતિ વિખ્યાતો રાજા પરમધાર્મિકઃ ।
૧૩૮.૨/૨તસ્ય ભાર્યા સ્થવિષ્ઠેતિ રૂપેણાપ્રતિમા ભુવિ ॥ ૧૩૮.૨॥

૧૩૮.૩/૧મધુચ્છન્દા ઇતિ ખ્યાતો વૈશ્વામિત્રો દ્વિજોત્તમઃ ।
૧૩૮.૩/૨પુરોધાસ્તસ્ય નૃપતેર્બ્રહ્મર્ષિઃ શમિનાં પ્રભુઃ ॥ ૧૩૮.૩॥

૧૩૮.૪/૧દિશો વિજેતું સ જગામ રાજા ।
૧૩૮.૪/૨પુરોધસા તેન નૃપપ્રવીરઃ ।

૧૩૮.૪/૩પુરોધસં પ્રાહ મહાનુભાવમ્ ।
૧૩૮.૪/૪જિત્વા દિશશ્ચાધ્વનિ સંનિવિષ્ટઃ ॥ ૧૩૮.૪॥

૧૩૮.૫/૧પપ્રચ્છેદં કેન ખેદં ગતોऽસિ ।
૧૩૮.૫/૨હેતું વદસ્વેતિ મહાનુભાવ ।
૧૩૮.૫/૩ત્વમેવ રાજ્યે મમ સર્વમાન્યઃ ।
૧૩૮.૫/૪સમસ્તવિદ્યાનિરવદ્યબોધઃ ॥ ૧૩૮.૫॥

૧૩૮.૬/૧વિધૂતપાપઃ પરિતાપશૂન્યઃ ।
૧૩૮.૬/૨કિમન્યચેતા ઇવ લક્ષ્યસે ત્વમ્ ।
૧૩૮.૬/૩જિતેયમુર્વી વિજિતા નરેન્દ્રા ।
૧૩૮.૬/૪હર્ષસ્ય હેતૌ મહતીહ જાતે ॥ ૧૩૮.૬॥

૧૩૮.૭/૧કિં ત્વં કૃશો મે વદ સત્યમેવ ।
૧૩૮.૭/૨દ્વિજાતિવર્યાતિમહાનુભાવ ।
૧૩૮.૭/૩સમ્બોધ્ય શર્યાતિમુવાચ વિપ્રશ્ ।
૧૩૮.૭/૪છન્દોમધુઃ પ્રેમમયીં પ્રિયોક્તિમ્ ॥ ૧૩૮.૭॥

૧૩૮.૮/૧મધુચ્છન્દા ઉવાચ । શ ૃણુ ભૂપાલ મદ્વાક્યં ભાર્યયા યદ્ ઉદીરિતમ્ ।
૧૩૮.૮/૨સ્થિતે યામે વયં યામો યામિની ચાર્ધગામિની ॥ ૧૩૮.૮॥

૧૩૮.૯/૧સ્વામિની ચાસ્ય દેહસ્ય કામિની માં પ્રતીક્ષતે ।
૧૩૮.૯/૨સ્મૃત્વા તત્ કામિનીવાક્યં શોષં યાતિ કલેવરમ્ ।
૧૩૮.૯/૩વિકારે સ્મરસંજાતે જીવાતુર્નલિનાનના ॥ ૧૩૮.૯॥

૧૩૮.૧૦/૧બ્રહ્મોવાચ । વિહસ્ય ચાબ્રવીદ્ રાજા પુરોધસમરિંદમઃ ॥ ૧૩૮.૧૦॥

૧૩૮.૧૧/૧રાજોવાચ । ત્વં ગુરુર્મમ મિત્રં ચ કિમાત્માનં વિડમ્બસે ।
૧૩૮.૧૧/૨કિમનેન મહાપ્રાજ્ઞ મમ વાક્યેન માનદ ।
૧૩૮.૧૧/૩ક્ષણવિધ્વંસિનિ સુખે કા નામાસ્થા મહાત્મનામ્ ॥ ૧૩૮.૧૧॥

૧૩૮.૧૨/૧બ્રહ્મોવાચ । એતદ્ આકર્ણ્ય મતિમાન્ મધુચ્છન્દા વચોऽબ્રવીત્ ॥ ૧૩૮.૧૨॥

૧૩૮.૧૩/૧મધુચ્છન્દા ઉવાચ । યત્રાનુકૂલ્યં દમ્પત્યોસ્ત્રિવર્ગસ્તત્ર વર્ધતે ।
૧૩૮.૧૩/૨ન ચેદં દૂષણં રાજન્ ભૂષણં ચાતિમન્યતામ્ ॥ ૧૩૮.૧૩॥

૧૩૮.૧૪/૧બ્રહ્મોવાચ । આજગામ સ્વકં દેશં મહત્યા સેનયા વૃતઃ ।
૧૩૮.૧૪/૨પરીક્ષાર્થં ચ તત્પ્રેમ પુર્યાં વાર્ત્તામદીદિશત્ ॥ ૧૩૮.૧૪॥

૧૩૮.૧૫/૧દિશો વિજેતું શર્યાતૌ યાતે રાક્ષસપુંગવઃ ।
૧૩૮.૧૫/૨હત્વા રસાતલં યાતો રાજાનં સપુરોધસમ્ ॥ ૧૩૮.૧૫॥

૧૩૮.૧૬/૧રાજ્ઞો ભાર્યા નિશ્ચયાય પ્રવૃત્તા મુનિસત્તમ ।
૧૩૮.૧૬/૨વાર્તાં શ્રુત્વા દૂતમુખાન્ મધુચ્છન્દઃપ્રિયા પુનઃ ॥ ૧૩૮.૧૬॥

૧૩૮.૧૭/૧તદૈવાભૂદ્ ગતપ્રાણા તદ્ વિચિત્રમિવાભવત્ ।
૧૩૮.૧૭/૨તસ્યા વૃત્તં તુ તે દૃષ્ટ્વા દૂતા રાજ્ઞે ન્યવેદયન્ ॥ ૧૩૮.૧૭॥

૧૩૮.૧૮/૧યત્ કૃતં રાજપત્નીભિઃ પ્રિયયા ચ પુરોધસઃ ।
૧૩૮.૧૮/૨વિસ્મિતો દુઃખિતો રાજા પુનર્દૂતાન્ અભાષત ॥ ૧૩૮.૧૮॥

૧૩૮.૧૯/૧રાજોવાચ । શીઘ્રં ગચ્છન્તુ હે દૂતા બ્રાહ્મણ્યા યત્ કલેવરમ્ ।
૧૩૮.૧૯/૨રક્ષન્તુ વાર્તાં કુરુત રાજાગન્તા પુરોધસા ॥ ૧૩૮.૧૯॥

૧૩૮.૨૦/૧બ્રહ્મોવાચ । ઇતિ ચિન્તાતુરે રાજ્ઞિ વાગ્ ઉવાચાશરીરિણી ॥ ૧૩૮.૨૦॥

૧૩૮.૨૧/૧આકાશવાગ્ ઉવાચ । વિધાસ્યત્યખિલં ગઙ્ગા રાજંસ્તવ સમીહિતમ્ ।
૧૩૮.૨૧/૨સર્વાભિષઙ્ગશમની પાવની ભુવિ ગૌતમી ॥ ૧૩૮.૨૧॥

૧૩૮.૨૨/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા સ શર્યાતિર્ગૌતમીતટમાશ્રિતઃ ।
૧૩૮.૨૨/૨બ્રાહ્મણેભ્યો ધનં દત્ત્વા તર્પયિત્વા પિતૄન્ દ્વિજાન્ ॥ ૧૩૮.૨૨॥

૧૩૮.૨૩/૧પુરોહિતં દ્વિજશ્રેષ્ઠં પ્રેષયિત્વા ધનાન્વિતમ્ ।
૧૩૮.૨૩/૨અન્યત્ર તીર્થે સાર્થેષુ દાનં દેહિ પ્રયત્નતઃ ॥ ૧૩૮.૨૩॥

૧૩૮.૨૪/૧એતત્ સર્વં ન જાનાતિ રાજ્ઞઃ કૃત્યં પુરોહિતઃ ।
૧૩૮.૨૪/૨ગતે તસ્મિન્ ગુરૌ રાજા વૈશ્વામિત્રે મહાત્મનિ ॥ ૧૩૮.૨૪॥

૧૩૮.૨૫/૧સર્વં બલં પ્રેષયિત્વા ગઙ્ગાતીરેઽગ્નિમાવિશત્ ।
૧૩૮.૨૫/૨ઇત્યુક્ત્વા સ તુ રાજેન્દ્રો ગઙ્ગાં ભાનું સુરાન્ અપિ ॥ ૧૩૮.૨૫॥

૧૩૮.૨૬/૧યદિ દત્તં યદિ હુતં યદિ ત્રાતા પ્રજા મયા ।
૧૩૮.૨૬/૨તેન સત્યેન સા સાધ્વી મમાયુષ્યેણ જીવતુ ॥ ૧૩૮.૨૬॥

૧૩૮.૨૭/૧ઇત્યુક્ત્વાગ્નૌ પ્રવિષ્ટે તુ શર્યાતૌ નૃપસત્તમે ।
૧૩૮.૨૭/૨તદૈવ જીવિતા ભાર્યા રાજ્ઞસ્તસ્ય પુરોધસઃ ॥ ૧૩૮.૨૭॥

૧૩૮.૨૮/૧અગ્નિપ્રવિષ્ટં રાજાનં શ્રુત્વા વિસ્મયકારણમ્ ।
૧૩૮.૨૮/૨પતિવ્રતાં તથા ભાર્યાં મૃતાં જીવાન્વિતાં પુનઃ ॥ ૧૩૮.૨૮॥

૧૩૮.૨૯/૧તદર્થં ચાપિ રાજાનં ત્યક્તાત્માનં વિશેષતઃ ।
૧૩૮.૨૯/૨આત્મનશ્ચ પુનઃ કૃત્યમસ્મરન્ નૃપતેર્ગુરુઃ ॥ ૧૩૮.૨૯॥

૧૩૮.૩૦/૧અહમપ્યગ્નિમાવેક્ષ્ય ઉત યાસ્યે પ્રિયાન્તિકમ્ ।
૧૩૮.૩૦/૨અથવેહ તપસ્તપ્સ્યે તતો નિશ્ચયવાન્ દ્વિજઃ ॥ ૧૩૮.૩૦॥

૧૩૮.૩૧/૧એતદ્ એવાત્મનઃ કૃત્યં મન્યે સુકૃતમેવ ચ ।
૧૩૮.૩૧/૨જીવયામિ ચ રાજાનં તતો યામિ પ્રિયાં પુનઃ ॥ ૧૩૮.૩૧॥

૧૩૮.૩૨/૧એતદ્ એવ શુભં મે સ્યાત્ તતસ્તુષ્ટાવ ભાસ્કરમ્ ।
૧૩૮.૩૨/૨ન હ્યન્યઃ કોઽપિ દેવોઽસ્તિ સર્વાભીષ્ટપ્રદો રવેઃ ॥ ૧૩૮.૩૨॥

૧૩૮.૩૩/૧મધુચ્છન્દા ઉવાચ । નમોઽસ્તુ તસ્મૈ સૂર્યાય મુક્તયેઽમિતતેજસે ।
૧૩૮.૩૩/૨છન્દોમયાય દેવાય ઓંકારાર્થાય તે નમઃ ॥ ૧૩૮.૩૩॥

૧૩૮.૩૪/૧વિરૂપાય સુરૂપાય ત્રિગુણાય ત્રિમૂર્તયે ।
૧૩૮.૩૪/૨સ્થિત્યુત્પત્તિવિનાશાનાં હેતવે પ્રભવિષ્ણવે ॥ ૧૩૮.૩૪॥

૧૩૮.૩૫/૧બ્રહ્મોવાચ । તતઃ પ્રસન્નઃ સૂર્યોઽભૂદ્ વરયસ્વેત્યભાષત ॥ ૧૩૮.૩૫॥

૧૩૮.૩૬/૧મધુચ્છન્દા ઉવાચ । રાજાનં દેહિ દેવેશ ભાર્યાં ચ પ્રિયવાદિનીમ્ ।
૧૩૮.૩૬/૨આત્મનશ્ચ શુભાન્ પુત્રાન્ રાજ્ઞશ્ચૈવ શુભાન્ વરાન્ ॥ ૧૩૮.૩૬॥

૧૩૮.૩૭/૧બ્રહ્મોવાચ । તતઃ પ્રાદાજ્જગન્નાથઃ શર્યાતિં રત્નભૂષિતમ્ ।
૧૩૮.૩૭/૨તાં ચ ભાર્યાં વરાન્ અન્યાન્ સર્વં ક્ષેમમયં તથા ॥ ૧૩૮.૩૭॥

૧૩૮.૩૮/૧તતો યાતઃ પ્રિયાવિષ્ટઃ પ્રીતેન ચ પુરોધસા ।
૧૩૮.૩૮/૨યયૌ સુખી સ્વકં દેશં તત્ તુ તીર્થં શુભં સ્મૃતમ્ ॥ ૧૩૮.૩૮॥

૧૩૮.૩૯/૧તત્ર ત્રીણિ સહસ્રાણિ તીર્થાનિ ગુણવન્તિ ચ ।
૧૩૮.૩૯/૨તતઃ પ્રભૃતિ તત્ તીર્થં ભાનુતીર્થમુદાહૃતમ્ ॥ ૧૩૮.૩૯॥

૧૩૮.૪૦/૧મૃતસંજીવનં ચૈવ શાર્યાતં ચેતિ વિશ્રુતમ્ ।
૧૩૮.૪૦/૨માધુચ્છન્દસમાખ્યાતં સ્મરણાત્ પાપનુન્ મુને ॥ ૧૩૮.૪૦॥

૧૩૮.૪૧/૧તેષુ સ્નાનં ચ દાનં ચ સર્વક્રતુફલપ્રદમ્ ।
૧૩૮.૪૧/૨મૃતસંજીવનં તત્ સ્યાદ્ આયુરારોગ્યવર્ધનમ્ ॥ ૧૩૮.૪૧॥

૧૩૯.૧/૧બ્રહ્મોવાચ । ખડ્ગતીર્થમિતિ ખ્યાતં ગૌતમ્યા ઉત્તરે તટે ।
૧૩૯.૧/૨તત્ર સ્નાનેન દાનેન મુક્તિભાગી ભવેન્ નરઃ ॥ ૧૩૯.૧॥

૧૩૯.૨/૧તત્ર વૃત્તં પ્રવક્ષ્યામિ શ ृणु નારદ યત્નતઃ ।
૧૩૯.૨/૨પૈલૂષ ઇતિ વિખ્યાતઃ કવષસ્ય સુતો દ્વિજઃ ॥ ૧૩૯.૨॥

૧૩૯.૩/૧કુટુમ્બભારાત્ પરિતો હ્યર્થાર્થી પરિધાવતિ ।
૧૩૯.૩/૨ન કિમપ્યાસસાદાસૌ તતો વૈરાગ્યમાસ્થિતઃ ॥ ૧૩૯.૩॥

૧૩૯.૪/૧અત્યન્તવિમુખે દૈવે વ્યર્થીભૂતે તુ પૌરુષે ।
૧૩૯.૪/૨ન વૈરાગ્યાદ્ અન્યદ્ અસ્તિ પણ્ડિતસ્યાવલમ્બનમ્ ॥ ૧૩૯.૪॥

૧૩૯.૫/૧ઇતિ સંચિન્તયામાસ તદાસૌ નિઃશ્વસન્ મુહુઃ ।
૧૩૯.૫/૨ક્રમાગતં ધનં નાસ્તિ પોષ્યાશ્ચ બહવો મમ ॥ ૧૩૯.૫॥

૧૩૯.૬/૧માની ચાત્મા ન કષ્ટાર્હો હા ધિગ્ દુર્દૈવચેષ્ટિતમ્ ।
૧૩૯.૬/૨સ કદાચિદ્ વૃત્તિયુતો વૃત્તિભિઃ પરિવર્તયન્ ॥ ૧૩૯.૬॥

૧૩૯.૭/૧ન લેભે તદ્ ધનં વૃત્તેર્વિરાગમગમત્ તદા ।
૧૩૯.૭/૨સેવા નિષિદ્ધા યા કાચિદ્ ગહના દુષ્કરં તપઃ ॥ ૧૩૯.૭॥

૧૩૯.૮/૧બલાદ્ આકર્ષતીયં માં તૃષ્ણા સર્વત્ર દુષ્કૃતે ।
૧૩૯.૮/૨ત્વયાપકૃતમજ્ઞાનાત્ તસ્માત્ તૃષ્ણે નમોઽસ્તુ તે ॥ ૧૩૯.૮॥

૧૩૯.૯/૧એવં વિચિન્ત્ય મેધાવી તૃષ્ણાછેદાય કિં ભવેત્ ।
૧૩૯.૯/૨ઇત્યાલોચ્ય સ પૈલૂષઃ પિતરં વાક્યમબ્રવીત્ ॥ ૧૩૯.૯॥

૧૩૯.૧૦/૧પૈલૂષ ઉવાચ । જ્ઞાનાસિના ક્રોધલોભૌ સંસૃતિં ચાતિદુસ્તરામ્ ।
૧૩૯.૧૦/૨છેત્સ્યામીમાં કેન હે તાત તમુપાયં વદ પ્રભો ॥ ૧૩૯.૧૦॥

૧૩૯.૧૧/૧કવષ ઉવાચ । ઈશ્વરાજ્જ્ઞાનમન્વિચ્છેદ્ ઇત્યેષા વૈદિકી શ્રુતિઃ ।
૧૩૯.૧૧/૨તસ્માદ્ આરાધયેશાનં તતો જ્ઞાનમવાપ્સ્યસિ ॥ ૧૩૯.૧૧॥

૧૩૯.૧૨/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સ પૈલૂષો જ્ઞાનાયેશ્વરમાર્ચયત્ ।
૧૩૯.૧૨/૨તતસ્તુષ્ટો મહેશાનો જ્ઞાનં પ્રાદાદ્ દ્વિજાતયે ।
૧૩૯.૧૨/૩પ્રાપ્તજ્ઞાનો મહાબુદ્ધિર્ગાથાઃ પ્રોવાચ મુક્તિદાઃ ॥ ૧૩૯.૧૨॥

૧૩૯.૧૩/૧પૈલૂષ ઉવાચ । ક્રોધસ્તુ પ્રથમં શત્રુર્નિષ્ફલો દેહનાશનઃ ।
૧૩૯.૧૩/૨જ્ઞાનખડ્ગેન તં છિત્ત્વા પરમં સુખમાપ્નુયાત્ ॥ ૧૩૯.૧૩॥

૧૩૯.૧૪/૧તૃષ્ણા બહુવિધા માયા બન્ધની પાપકારિણી ।
૧૩૯.૧૪/૨છિત્ત્વૈતાં જ્ઞાનખડ્ગેન સુખં તિષ્ઠતિ માનવઃ ॥ ૧૩૯.૧૪॥

૧૩૯.૧૫/૧સઙ્ગસ્તુ પરમોઽધર્મો દેવાદીનામિતિ શ્રુતિઃ ।

૧૩૯.૧૫/૨અસઙ્ગસ્યાત્મનો હ્યસ્ય સઙ્ગોઽયં પરમો રિપુઃ ॥ ૧૩૯.૧૫॥

૧૩૯.૧૬/૧છિત્ત્વૈનં જ્ઞાનખડ્ગેન શિવૈકત્વમવાપ્નુયાત્ ।
૧૩૯.૧૬/૨સંશયઃ પરમો નાશો ધર્માર્થાનાં વિનાશકૃત્ ॥ ૧૩૯.૧૬॥

૧૩૯.૧૭/૧છિત્ત્વૈનં સંશયં જન્તુઃ પરમેપ્સિતમાપ્નુયાત્ ।
૧૩૯.૧૭/૨પિશાચીવ વિશત્યાશા નિર્દહત્યખિલં સુખમ્ ।
૧૩૯.૧૭/૩પૂર્ણાહન્તાસિના છિત્ત્વા જીવન્ મુક્તિમવાપ્નુયાત્ ॥ ૧૩૯.૧૭॥

૧૩૯.૧૮/૧બ્રહ્મોવાચ । તતો જ્ઞાનમવાપ્યાસૌ ગઙ્ગાતીરં સમાશ્રિતઃ ।
૧૩૯.૧૮/૨જ્ઞાનખડ્ગેન નિર્મોહસ્તતો મુક્તિમવાપ સઃ ॥ ૧૩૯.૧૮॥

૧૩૯.૧૯/૧તતઃ પ્રભૃતિ તત્ તીર્થં ખડ્ગતીર્થમિતિ સ્મૃતમ્ ।
૧૩૯.૧૯/૨જ્ઞાનતીર્થં ચ કવષં પૈલૂષં સર્વકામદમ્ ॥ ૧૩૯.૧૯॥

૧૩૯.૨૦/૧ઇત્યાદિષટ્સહસ્રાણિ તીર્થાન્યાહુર્મહર્ષયઃ ।
૧૩૯.૨૦/૨અશેષપાપતાપૌઘ+ અરાણીષ્ટપ્રદાનિ ચ ॥ ૧૩૯.૨૦॥

૧૪૦.૧/૧બ્રહ્મોવાચ । આત્રેયમિતિ વિખ્યાતમન્વિન્દ્રં તીર્થમુત્તમમ્ ।
૧૪૦.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ ભ્રષ્ટરાજ્યપ્રદાયકમ્ ॥ ૧૪૦.૧॥

૧૪૦.૨/૧ગૌતમ્યા ઉત્તરે તીર આત્રેયો ભગવાન્ ઋષિઃ ।
૧૪૦.૨/૨અન્વારેભેઽથ સત્રાણિ ઋત્વિગ્ભિર્મુનિભિર્વૃતઃ ॥ ૧૪૦.૨॥

૧૪૦.૩/૧તસ્ય હોતાભવત્ ત્વગ્નિર્હવ્યવાહન એવ ચ ।
૧૪૦.૩/૨એવં સત્રે તુ સમ્પૂર્ણ ઇષ્ટિં માહેશ્વરીં પુનઃ ॥ ૧૪૦.૩॥

૧૪૦.૪/૧કૃત્વૈશ્વર્યમગાદ્ વિપ્રઃ સર્વત્ર ગતિમેવ ચ ।
૧૪૦.૪/૨ઇન્દ્રસ્ય ભવનં રમ્યં સ્વર્ગલોકં રસાતલમ્ ॥ ૧૪૦.૪॥

૧૪૦.૫/૧સ્વેચ્છયા યાતિ વિપ્રેન્દ્રઃ પ્રભાવાત્ તપસઃ શુભાત્ ।
૧૪૦.૫/૨સ કદાચિદ્ દિવં ગત્વા ઇન્દ્રલોકમગાત્ પુનઃ ॥ ૧૪૦.૫॥

૧૪૦.૬/૧તત્રાપશ્યત્ સહસ્રાક્ષં સુરૈઃ પરિવૃતં શુભૈઃ ।
૧૪૦.૬/૨સ્તૂયમાનં સિદ્ધસાધ્યૈઃ પ્રેક્ષન્તં નૃત્યમુત્તમમ્ ।
૧૪૦.૬/૩શ ૃણ્વાનં મધુરં ગીતમપ્સરોભિશ્ચ વીજિતમ્ ॥ ૧૪૦.૬॥

૧૪૦.૭/૧ઉપોપવિષ્ટૈઃ સુરનાયકૈસ્તૈઃ ।
૧૪૦.૭/૨સમ્પૂજ્યમાનં મહદાસનસ્થમ્ ।
૧૪૦.૭/૩જયન્તમઙ્કે વિનિધાય સૂનુમ્ ।

૧૪૦.૭/૪શચ્યા યુતં પ્રાપ્સરતિં મહિષ્ઠમ્ ॥ ૧૪૦.૭॥

૧૪૦.૮/૧સતાં શરણ્યં વરદં મહેન્દ્રમ્ ।
૧૪૦.૮/૨સમીક્ષ્ય વિપ્રાધિપતિર્મહાત્મા ।
૧૪૦.૮/૩વિમોહિતોઽસૌ મુનિરિન્દ્રલક્ષ્મ્યા ।
૧૪૦.૮/૪સમીહયામાસ તદ્ ઇન્દ્રરાજ્યમ્ ॥ ૧૪૦.૮॥

૧૪૦.૯/૧સમ્પૂજિતો દેવગણૈર્યથાવત્ ।
૧૪૦.૯/૨સ્વમાશ્રમં વૈ પુનરાજગામ ।
૧૪૦.૯/૩સમીક્ષ્ય તાં શક્રપુરીં સુરમ્યામ્ ।
૧૪૦.૯/૪રત્નૈર્યુતાં પુણ્યગુણૈઃ સુપૂર્ણામ્ ॥ ૧૪૦.૯॥

૧૪૦.૧૦/૧સ્વમાશ્રમં નિષ્પ્રભહેમવર્જ્યમ્ ।
૧૪૦.૧૦/૨સમીક્ષ્ય વિપ્રો વિરમં જગામ ।
૧૪૦.૧૦/૩સમીહમાનઃ સુરરાજ્યમાશુ ।
૧૪૦.૧૦/૪પ્રિયાં તદોવાચ મહાત્રિપુત્રઃ ॥ ૧૪૦.૧૦॥

૧૪૦.૧૧/૧આત્રેય ઉવાચ । ભોક્તું ન શક્તોઽસ્મિ ફલાનિ મૂલાન્ય્।
૧૪૦.૧૧/૨અનુત્તમાન્યપ્યતિસંસ્કૃતાનિ ।
૧૪૦.૧૧/૩સ્મૃત્વામૃતં પુણ્યતમં ચ તત્ર ।
૧૪૦.૧૧/૪ભક્ષ્યં ચ ભોજ્યં ચ વરાસનાનિ ।
૧૪૦.૧૧/૫સ્તુતિં ચ દાનં ચ સભાં શુભાં ચ ।
૧૪૦.૧૧/૬અસ્ત્રં ચ વાસાંસિ પુરીં વનાનિ ॥ ૧૪૦.૧૧॥

૧૪૦.૧૨/૧બ્રહ્મોવાચ । તતો મહાત્મા તપસઃ પ્રભાવાત્ ।
૧૪૦.૧૨/૨ત્વષ્ટારમાહૂય વચો બભાષે ॥ ૧૪૦.૧૨॥

૧૪૦.૧૩/૧આત્રેય ઉવાચ । ઇચ્છેયમિન્દ્રત્વમહં મહાત્મન્ ।
૧૪૦.૧૩/૨કુરુષ્વ શીઘ્રં પદમૈન્દ્રમત્ર ।
૧૪૦.૧૩/૩બ્રૂષેઽન્યથા ચેન્ મદુદીરિતં ત્વમ્ ।
૧૪૦.૧૩/૪ભસ્મીકરોમ્યેવ ન સંશયોઽત્ર ॥ ૧૪૦.૧૩॥

૧૪૦.૧૪/૧બ્રહ્મોવાચ । તદત્રિવાક્યાત્ ત્વરિતઃ પ્રજાનામ્ ।
૧૪૦.૧૪/૨સ્રષ્ટા વિભુર્વિશ્વકર્મા તદૈવ ।
૧૪૦.૧૪/૩ચકાર મેરું ચ પુરીં સુરાણામ્ ।
૧૪૦.૧૪/૪કલ્પદ્રુમાન્ કલ્પલતાં ચ ધેનુમ્ ॥ ૧૪૦.૧૪॥

૧૪૦.૧૫/૧ચકાર વજ્રાદિવિભૂષિતાનિ ।
૧૪૦.૧૫/૨ગૃહાણિ શુભ્રાણ્યતિચિત્રિતાનિ ।
૧૪૦.૧૫/૩ચકાર સર્વાવયવાનવદ્યામ્ ।
૧૪૦.૧૫/૪શચીં સ્મરસ્યેવ વિહારશાલામ્ ॥ ૧૪૦.૧૫॥

૧૪૦.૧૬/૧સભાં સુધર્માણમહો ક્ષણેન ।
૧૪૦.૧૬/૨તથા ચકારાપ્સરસો મનોજ્ઞાઃ ।
૧૪૦.૧૬/૩ચકાર ચોચ્ચૈઃશ્રવસં ગજં ચ ।
૧૪૦.૧૬/૪વજ્રાદિ ચાસ્ત્રાણિ સુરાન્ અશેષાન્ ॥ ૧૪૦.૧૬॥

૧૪૦.૧૭/૧નિવાર્યમાણઃ પ્રિયયાત્રિપુત્રઃ ।
૧૪૦.૧૭/૨શચીસમામાત્મવધૂં ચકાર ।
૧૪૦.૧૭/૩તદાત્રિપુત્રોઽત્રિમુખૈઃ સમેતો ।
૧૪૦.૧૭/૪વજ્રાદિરૂપં ચ ચકાર ચાસ્ત્રમ્ ॥ ૧૪૦.૧૭॥

૧૪૦.૧૮/૧નૃત્યાદિ ગીતાદિ ચ સર્વમેવ ।
૧૪૦.૧૮/૨ચકાર શક્રસ્ય પુરે ચ દૃષ્ટમ્ ।
૧૪૦.૧૮/૩તત્ સર્વમાસાદ્ય તદા મુનીન્દ્રઃ ।
૧૪૦.૧૮/૪પ્રહૃષ્ટચેતાઃ સુતરાં બભૂવ ॥ ૧૪૦.૧૮॥

૧૪૦.૧૯/૧આપાતરમ્યેષ્વપિ કસ્ય નામ ।
૧૪૦.૧૯/૨ભવત્યપેક્ષા નહિ ગોચરેષુ ।
૧૪૦.૧૯/૩શ્રુત્વા ચ દૈત્યા દનુજાઃ સમેતા ।
૧૪૦.૧૯/૪રક્ષાંસિ કોપેન યુતાનિ સદ્યઃ ॥ ૧૪૦.૧૯॥

૧૪૦.૨૦/૧સ્વર્ગં પરિત્યજ્ય કુતો હરિર્ભુવમ્ ।
૧૪૦.૨૦/૨સમાગતો ન્વેષ મિથઃ સુખાય ।
૧૪૦.૨૦/૩તસ્માદ્ વયં યામ ઇતો નુ યોદ્ધુમ્ ।
૧૪૦.૨૦/૪વૃત્રસ્ય હન્તારમદીર્ઘસત્ત્રમ્ ॥ ૧૪૦.૨૦॥

૧૪૦.૨૧/૧તતઃ સમાગત્ય તદાત્રિપુત્રમ્ ।
૧૪૦.૨૧/૨સંવેષ્ટયામાસુરથાસુરાસ્તે ।
૧૪૦.૨૧/૩સંવેષ્ટયિત્વા પુરમત્રિપુત્ર+ ।
૧૪૦.૨૧/૪કૃતં તથા ચેન્દ્રપુરાભિધાનમ્ ।
૧૪૦.૨૧/૫તૈર્વધ્યમાનઃ શસ્ત્રપાતૈર્મહદ્ભિસ્- ।
૧૪૦.૨૧/૬તતો ભીતો વાક્યમિદં જગાદ ॥ ૧૪૦.૨૧॥

૧૪૦.૨૨/૧આત્રેય ઉવાચ । યો જાત એવ પ્રથમો મનસ્વાન્ ।
૧૪૦.૨૨/૨દેવો દેવાન્ ક્રતુના પર્યભૂષત્ ।
૧૪૦.૨૨/૩યસ્ય શુષ્માદ્ રોદસી અભ્યસેતામ્ ।
૧૪૦.૨૨/૪નૃમ્ણસ્ય મહ્ના સ જનાસ ઇન્દ્રઃ ॥ ૧૪૦.૨૨॥

૧૪૦.૨૩/૧બ્રહ્મોવાચ । ઇત્યાદિસૂક્તેન રિપૂન્ ઉવાચ ।
૧૪૦.૨૩/૨હરિં ચ તુષ્ટાવ તદાત્રિપુત્રઃ ॥ ૧૪૦.૨૩॥

૧૪૦.૨૪/૧આત્રેય ઉવાચ । નાહં હરિર્નૈવ શચી મદીયા ।
૧૪૦.૨૪/૨નેયં પુરી નૈવ વનં તદ્ ઐન્દ્રમ્ ।
૧૪૦.૨૪/૩સ એવ ચેન્દ્રો વૃત્રહન્તા સ વજ્રી ।
૧૪૦.૨૪/૪સહસ્રાક્ષો ગોત્રભિદ્ વજ્રબાહુઃ ॥ ૧૪૦.૨૪॥

૧૪૦.૨૫/૧અહં તુ વિપ્રો વેદવિદ્ બ્રહ્મવૃન્દૈઃ ।
૧૪૦.૨૫/૨સમાવિષ્ટો ગૌતમીતીરસંસ્થઃ ।
૧૪૦.૨૫/૩યત્રાયત્યાં નાદ્ય વા સૌખ્યહેતુસ્- ।
૧૪૦.૨૫/૪તચ્ચાકાર્ષં કર્મ દુર્દૈવયોગાત્ ॥ ૧૪૦.૨૫॥

૧૪૦.૨૬/૧અસુરા ઊચુઃ । સંહરસ્વેદમાત્રેય યદ્ ઇન્દ્રસ્ય વિડમ્બનમ્ ।
૧૪૦.૨૬/૨ક્ષેમસ્તે ભવિતા સત્યં નાન્યથા મુનિસત્તમ ॥ ૧૪૦.૨૬॥

૧૪૦.૨૭/૧બ્રહ્મોવાચ । તદાત્રેયોઽબ્રવીદ્ વાક્યં યથા વક્ષ્યન્તિ મામિહ ।
૧૪૦.૨૭/૨કરોમ્યેવ મહાભાગાઃ સત્યેનાગ્નિં સમાલભે ॥ ૧૪૦.૨૭॥

૧૪૦.૨૮/૧એવમુક્ત્વા સ દૈતેયાંસ્ત્વષ્ટારં પુનરબ્રવીત્ ॥ ૧૪૦.૨૮॥

૧૪૦.૨૯/૧આત્રેય ઉવાચ । યત્ કૃતં ત્વત્ર મત્પ્રીત્યૈ ઐન્દ્રં
ત્વષ્ટઃ પદં ત્વયા ।
૧૪૦.૨૯/૨સંહરસ્વ પુનઃ શીઘ્રં રક્ષ માં બ્રાહ્મણં મુનિમ્ ॥ ૧૪૦.૨૯॥

૧૪૦.૩૦/૧પુનર્દેહિ પદં મહ્યમાશ્રમં મૃગપક્ષિણઃ ।
૧૪૦.૩૦/૨વૃક્ષાંશ્ચ વારિ યત્રાસીન્ ન મે દિવ્યૈઃ પ્રયોજનમ્ ।
૧૪૦.૩૦/૩સર્વમક્રમમાયાતં ન સુખાય મનીષિણામ્ ॥ ૧૪૦.૩૦॥

૧૪૦.૩૧/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા પ્રજાનાથસ્ત્વષ્ટા સંહૃતવાંસ્તદા ।
૧૪૦.૩૧/૨દૈત્યાશ્ચ જગ્મુઃ સ્વસ્થાનં કૃત્વા દેશમકણ્ટકમ્ ॥ ૧૪૦.૩૧॥

૧૪૦.૩૨/૧ત્વષ્ટા ચાપિ યયૌ સ્થાનં સ્વકં સમ્પ્રહસન્ન્ ઇવ ।
૧૪૦.૩૨/૨આત્રેયોઽપિ તદા શિષ્યૈઃ સંવૃતઃ સહ ભાર્યયા ॥ ૧૪૦.૩૨॥

૧૪૦.૩૩/૧ગૌતમીતીરમાશ્રિત્ય તપોનિષ્ઠોઽખિલૈર્વૃતઃ ।
૧૪૦.૩૩/૨વર્તમાને મહાયજ્ઞે લજ્જિતો વાક્યમબ્રવીત્ ॥ ૧૪૦.૩૩॥

૧૪૦.૩૪/૧આત્રેય ઉવાચ । અહો મોહસ્ય મહિમા મમાપિ ભ્રાન્તચિત્તતા ।
૧૪૦.૩૪/૨કિં મહેન્દ્રપદં લબ્ધં કિં મયાત્ર પુરા કૃતમ્ ॥ ૧૪૦.૩૪॥

૧૪૦.૩૫/૧બ્રહ્મોવાચ । એવં વદન્તમાત્રેયં લજ્જિતં પ્રાબ્રુવન્ સુરાઃ ॥ ૧૪૦.૩૫॥

૧૪૦.૩૬/૧સુરા ઊચુઃ । લજ્જાં જહિ મહાબાહો ભવિતા ખ્યાતિરુત્તમા ।
૧૪૦.૩૬/૨આત્રેયતીર્થે યે સ્નાનં પ્રાણિનઃ કુર્યુરઞ્જસા ॥ ૧૪૦.૩૬॥

૧૪૦.૩૭/૧ઇન્દ્રાસ્તે ભવિતારો વૈ સ્મરણાત્ સુખભાગિનઃ ।
૧૪૦.૩૭/૨તત્ર પઞ્ચ સહસ્રાણિ તીર્થાન્યાહુર્મનીષિણઃ ॥ ૧૪૦.૩૭॥

૧૪૦.૩૮/૧અન્વિન્દ્રાત્રેયદૈતેય+ ંઆમભિઃ કીર્તિતાનિ ચ ।
૧૪૦.૩૮/૨તેષુ સ્નાનં ચ દાનં ચ સર્વમક્ષયપુણ્યદમ્ ॥ ૧૪૦.૩૮॥

૧૪૦.૩૯/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા વિબુધા યાતાઃ સંતુષ્ટશ્ચાભવન્
મુનિઃ ॥ ૧૪૦.૩૯॥

૧૪૧.૧/૧બ્રહ્મોવાચ । કપિલાસંગમં નામ તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ।
૧૪૧.૧/૨તત્ર નારદ વક્ષ્યામિ કથાં પુણ્યામનુત્તમામ્ ॥ ૧૪૧.૧॥

૧૪૧.૨/૧કપિલો નામ તત્ત્વજ્ઞો મુનિરાસીન્ મહાયશાઃ ।
૧૪૧.૨/૨ક્રૂરશ્ચાપિ પ્રસન્નશ્ચ તપોવ્રતપરાયણઃ ॥ ૧૪૧.૨॥

૧૪૧.૩/૧તપસ્યન્તં મુનિશ્રેષ્ઠં ગૌતમીતીરમાશ્રિતમ્ ।
૧૪૧.૩/૨તમાગત્ય મહાત્માનં વામદેવાદયોઽબ્રુવન્ ॥ ૧૪૧.૩॥

૧૪૧.૪/૧હત્વા વેનં બ્રહ્મશાપૈર્નષ્ટધર્મે ત્વરાજકે ।
૧૪૧.૪/૨કપિલં સિદ્ધમાચાર્યમૂચુર્મુનિગણાસ્તદા ॥ ૧૪૧.૪॥

૧૪૧.૫/૧મુનિગણા ઊચુઃ । ગતે વેદે ગતે ધર્મે કિં કર્તવ્યં મુનીશ્વર ॥ ૧૪૧.૫॥

૧૪૧.૬/૧બ્રહ્મોવાચ । તતોઽબ્રવીન્ મુનિર્ધ્યાત્વા કપિલસ્ત્વાગતાન્ મુનીન્ ॥ ૧૪૧.૬॥

૧૪૧.૭/૧કપિલ ઉવાચ । વેનસ્યોરુર્વિમથ્યોઽભૂત્ તતઃ કશ્ચિદ્
ભવિષ્યતિ ॥ ૧૪૧.૭॥

૧૪૧.૮/૧બ્રહ્મોવાચ । તથૈવ ચક્રુર્મુનયો વેનસ્યોરું વિમથ્ય વૈ ।

૧૪૧.૮/૨તત્રોત્પન્નો મહાપાપઃ કૃષ્ણો રૌદ્રપરાક્રમઃ ॥ ૧૪૧.૮॥

૧૪૧.૯/૧તં દૃષ્ટ્વા મુનયો ભીતા નિષીદસ્વેતિ ચાબ્રુવન્ ।
૧૪૧.૯/૨નિષાદઃ સોઽભવત્ તસ્માન્ નિષાદાશ્ચાભવંસ્તતઃ ॥ ૧૪૧.૯॥

૧૪૧.૧૦/૧વેનબાહું મમન્થુસ્તે દક્ષિણં ધર્મસંહિતમ્ ।
૧૪૧.૧૦/૨તતઃ પૃથુસ્વરશ્ચૈવ સર્વલક્ષણલક્ષિતઃ ॥ ૧૪૧.૧૦॥

૧૪૧.૧૧/૧રાજાભવત્ પૃથુઃ શ્રીમાન્ બ્રહ્મસામર્થ્યસંયુતઃ ।
૧૪૧.૧૧/૨તમાગત્ય સુરાઃ સર્વે અભિનન્દ્ય વરાગ્ શુભાન્ ॥ ૧૪૧.૧૧॥

૧૪૧.૧૨/૧તસ્મૈ દદુસ્તથાસ્ત્રાણિ મન્ત્રાણિ ગુણવન્તિ ચ ।
૧૪૧.૧૨/૨તતોઽબ્રુવન્ મુનિગણાસ્તં પૃથું કપિલેન ચ ॥ ૧૪૧.૧૨॥

૧૪૧.૧૩/૧મુનય ઊચુઃ । આહારં દેહિ જીવેભ્યો ભુવા ગ્રસ્તૌષધીરપિ ॥ ૧૪૧.૧૩॥

૧૪૧.૧૪/૧બ્રહ્મોવાચ । તતઃ સ ધનુરાદાય ભુવમાહ નૃપોત્તમઃ ॥ ૧૪૧.૧૪॥

૧૪૧.૧૫/૧પૃથુરુવાચ । ઓષધીર્દેહિ યા ગ્રસ્તાઃ પ્રજાનાં હિતકામ્યયા ॥ ૧૪૧.૧૫॥

૧૪૧.૧૬/૧બ્રહ્મોવાચ । તમુવાચ મહી ભીતા પૃથું તં
પૃથુલોચનમ્ ॥ ૧૪૧.૧૬॥

૧૪૧.૧૭/૧મહ્યુવાચ । મયિ જીર્ણા મહૌષધ્યઃ કથં દાતુમહં ક્ષમા ॥ ૧૪૧.૧૭॥

૧૪૧.૧૮/૧બ્રહ્મોવાચ । તતઃ સકોપો નૃપતિસ્તામાહ પૃથિવીં પુનઃ ॥ ૧૪૧.૧૮॥

૧૪૧.૧૯/૧પૃથુરુવાચ । નો ચેદ્ દદાસ્યદ્ય ત્વાં વૈ હત્વા દાસ્યે
મહૌષધીઃ ॥ ૧૪૧.૧૯॥

૧૪૧.૨૦/૧ભૂમિરુવાચ । કથં હંસિ સ્ત્રિયં રાજગ્ જ્ઞાની ભૂત્વા નૃપોત્તમ ।
૧૪૧.૨૦/૨વિના મયા કથં ચેમાઃ પ્રજાઃ સંધારયિષ્યસિ ॥ ૧૪૧.૨૦॥

૧૪૧.૨૧/૧પૃથુરુવાચ । યત્રોપકારોઽનેકાનામેકનાશે ભવિષ્યતિ ।
૧૪૧.૨૧/૨ન દોષસ્તત્ર પૃથિવિ તપસા ધારયે પ્રજાઃ ॥ ૧૪૧.૨૧॥

૧૪૧.૨૨/૧ન દોષમત્ર પશ્યામિ નાચક્ષેઽનર્થકં વચઃ ।
૧૪૧.૨૨/૨યસ્મિન્ નિપાતિતે સૌખ્યં બહૂનામુપજાયતે ।
૧૪૧.૨૨/૩મુનયસ્તદ્વધં પ્રાહુરશ્વમેધશતાધિકમ્ ॥ ૧૪૧.૨૨॥

૧૪૧.૨૩/૧બ્રહ્મોવાચ । તતો દેવાશ્ચ ઋષયઃ સાન્ત્વયિત્વા નૃપોત્તમમ્ ।
૧૪૧.૨૩/૨મહીં ચ માતરં દેવીમૂચુઃ સુરગણાસ્તદા ॥ ૧૪૧.૨૩॥

૧૪૧.૨૪/૧દેવા ઊચુઃ । ભૂમે ગોરૂપિણી ભૂત્વા પયોરૂપા મહૌષધીઃ ।
૧૪૧.૨૪/૨દેહિ ત્વં પૃથવે રાજ્ઞે તતઃ પ્રીતો ભવેન્ નૃપઃ ।
૧૪૧.૨૪/૩પ્રજાસંરક્ષણં ચ સ્યાત્ તતઃ ક્ષેમં ભવિષ્યતિ ॥ ૧૪૧.૨૪॥

૧૪૧.૨૫/૧બ્રહ્મોવાચ । તતો ગોરૂપમાસ્થાય ભૂમ્યાસીત્ કપિલાન્તિકે ।
૧૪૧.૨૫/૨દુદોહ ચ મહૌષધ્યો રાજા વેનકરોદ્ભવઃ ॥ ૧૪૧.૨૫॥

૧૪૧.૨૬/૧યત્ર દેવાઃ સગન્ધર્વા ઋષયઃ કપિલો મુનિઃ ।
૧૪૧.૨૬/૨મહીં ગોરૂપમાપન્નાં નર્મદાયાં મહામુને ॥ ૧૪૧.૨૬॥

૧૪૧.૨૭/૧સરસ્વત્યાં ભાગીરથ્યાં ગોદાવર્યાં વિશેષતઃ ।
૧૪૧.૨૭/૨મહાનદીષુ સર્વાસુ દુદુહેઽસૌ પયો મહત્ ॥ ૧૪૧.૨૭॥

૧૪૧.૨૮/૧સા દુહ્યમાના પૃથુના પુણ્યતોયાભવન્ નદી ।
૧૪૧.૨૮/૨ગૌતમ્યા સંગતા ચાભૂત્ તદ્ અદ્ભુતમિવાભવત્ ॥ ૧૪૧.૨૮॥

૧૪૧.૨૯/૧તતઃ પ્રભૃતિ તત્ તીર્થં કપિલાસંગમં વિદુઃ ।
૧૪૧.૨૯/૨તત્રાષ્ટાશીતિઃ પૂજ્યાનિ સહસ્રાણિ મહામતે ॥ ૧૪૧.૨૯॥

૧૪૧.૩૦/૧તીર્થાન્યાહુર્મુનિગણાઃ સ્મરણાદ્ અપિ નારદ ।
૧૪૧.૩૦/૨પાવનાનિ જગત્યસ્મિંસ્તાનિ સર્વાણ્યનુક્રમાત્ ॥ ૧૪૧.૩૦॥

૧૪૨.૧/૧બ્રહ્મોવાચ । દેવસ્થાનમિતિ ખ્યાતં તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ।
૧૪૨.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ શૃણુ યત્નેન નારદ ॥ ૧૪૨.૧॥

૧૪૨.૨/૧પુરા કૃતયુગસ્યાદૌ દેવદાનવસંગરે ।
૧૪૨.૨/૨પ્રવૃત્તે વા સિંહિકેતિ વિખ્યાતા દૈત્યસુન્દરી ॥ ૧૪૨.૨॥

૧૪૨.૩/૧તસ્યાઃ પુત્રો મહાદૈત્યો રાહુર્નામ મહાબલઃ ।
૧૪૨.૩/૨અમૃતે તુ સમુત્પન્ને સૈંહિકેયે ચ ભેદિતે ॥ ૧૪૨.૩॥

૧૪૨.૪/૧તસ્ય પુત્રો મહાદૈત્યો મેઘહાસ ઇતિ શ્રુતઃ ।
૧૪૨.૪/૨પિતરં ઘાતિતં શ્રુત્વા તપસ્તેપેઽતિદુઃખિતઃ ॥ ૧૪૨.૪॥

૧૪૨.૫/૧તપસ્યન્તં રાહુસુતં ગૌતમીતીરમાશ્રિતમ્ ।
૧૪૨.૫/૨દેવાશ્ચ ઋષયઃ સર્વે તમૂચુરતિભીતવત્ ॥ ૧૪૨.૫॥

૧૪૨.૬/૧દેવર્ષય ઊચુઃ । તપો જહિ મહાબાહો યત્ તે મનસિ સંસ્થિતમ્ ।
૧૪૨.૬/૨સર્વં ભવતુ નામેદં શિવગઙ્ગાપ્રસાદતઃ ।
૧૪૨.૬/૩શિવગઙ્ગાપ્રસાદેન કિં નામાસ્ત્યત્ર દુર્લભમ્ ॥ ૧૪૨.૬॥

૧૪૨.૭/૧મેઘહાસ ઉવાચ । પરિભૂતઃ પિતા પૂજ્યો યુષ્માભિર્મમ દૈવતમ્ ।
૧૪૨.૭/૨તસ્યાપિ મમ ચાત્યન્તં પ્રીતિશ્ચ ક્રિયતે યદિ ॥ ૧૪૨.૭॥

૧૪૨.૮/૧ભવદ્ભિસ્તપસોઽસ્માચ્ચ અહં વૈરાન્ નિવર્તયે ।
૧૪૨.૮/૨વૈરનિર્યાતનં કાર્યં પુત્રેણ પિતુરાદરાત્ ।
૧૪૨.૮/૩પ્રાર્થયન્તે ભવન્તશ્ચેત્ પૂર્ણાસ્તન્ મે મનોરથાઃ ॥ ૧૪૨.૮॥

૧૪૨.૯/૧બ્રહ્મોવાચ । તતઃ સુરગણાઃ સર્વે રાહું ચક્રુર્ગ્રહાનુગમ્ ।
૧૪૨.૯/૨તં ચાપિ મેઘહાસં તે ચક્રૂ રાક્ષસપુંગવમ્ ॥ ૧૪૨.૯॥

૧૪૨.૧૦/૧તતોઽભવદ્ રાહુસુતો નૈરૃતાધિપતિઃ પ્રભુઃ ।
૧૪૨.૧૦/૨પુનશ્ચાહ સુરાન્ દૈત્યો મમ ખ્યાતિર્યથા ભવેત્ ॥ ૧૪૨.૧૦॥

૧૪૨.૧૧/૧તીર્થસ્યાસ્ય પ્રભાવશ્ચ દાતવ્ય ઇતિ મે મતિઃ ।
૧૪૨.૧૧/૨તથેત્યુક્ત્વા દદુર્દેવાઃ સર્વમેવ મનોગતમ્ ॥ ૧૪૨.૧૧॥

૧૪૨.૧૨/૧દૈત્યેશ્વરસ્ય દેવર્ષે તન્નામ્ના તીર્થમુચ્યતે ।
૧૪૨.૧૨/૨દેવા યતોઽભવન્ સર્વે તત્ર સ્થાને મહામતે ॥ ૧૪૨.૧૨॥

૧૪૨.૧૩/૧દેવસ્થાનં તુ તત્ તીર્થં દેવાનામપિ દુર્લભમ્ ।
૧૪૨.૧૩/૨યત્ર દેવેશ્વરો દેવો દેવતીર્થં તતઃ સ્મૃતમ્ ॥ ૧૪૨.૧૩॥

૧૪૨.૧૪/૧તત્રાષ્ટાદશ તીર્થાનિ દૈત્યપૂજ્યાનિ નારદ ।
૧૪૨.૧૪/૨તેષુ સ્નાનં ચ દાનં ચ મહાપાતકનાશનમ્ ॥ ૧૪૨.૧૪॥

૧૪૩.૧/૧બ્રહ્મોવાચ । સિદ્ધતીર્થમિતિ ખ્યાતં યત્ર સિદ્ધેશ્વરો હરઃ ।
૧૪૩.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ સર્વસિદ્ધિકરં નૃણામ્ ॥ ૧૪૩.૧॥

૧૪૩.૨/૧પુલસ્ત્યવંશસમ્ભૂતો રાવણો લોકરાવણઃ ।
૧૪૩.૨/૨દિશો વિજિત્ય સર્વાશ્ચ સોમલોકમજીગમત્ ॥ ૧૪૩.૨॥

૧૪૩.૩/૧સોમેન સહ યોત્સ્યન્તં દશાસ્યમહમબ્રવમ્ ।
૧૪૩.૩/૨મન્ત્રં દાસ્યે નિવર્તસ્વ સોમયુદ્ધાદ્ દશાનન ॥ ૧૪૩.૩॥

૧૪૩.૪/૧ઇત્યુક્ત્વાષ્ટોત્તરં મન્ત્રં શતનામભિરન્વિતમ્ ।
૧૪૩.૪/૨શિવસ્ય રાક્ષસેન્દ્રાય પ્રાદાં નારદ શાન્તયે ॥ ૧૪૩.૪॥

૧૪૩.૫/૧નિઃશ્રીકાણાં વિપન્નાનાં નાનાક્લેશજુષાં નૃણામ્ ।
૧૪૩.૫/૨શરણં શિવ એવાત્ર સંસારેઽન્યો ન કશ્ચન ॥ ૧૪૩.૫॥

૧૪૩.૬/૧તતો નિવૃત્તઃ સ હ મન્ત્રિયુક્તસ્- ।

૧૪૩.૬/૨તત્ સોમલોકાજ્જયમાપ્ય રક્ષઃ ।
૧૪૩.૬/૩સ પુષ્પકારૂઢગતિઃ સગર્વો ।
૧૪૩.૬/૪લોકાન્ પુનઃ પ્રાપ જવાદ્ દશાસ્યઃ ॥ ૧૪૩.૬॥

૧૪૩.૭/૧સ પ્રેક્ષમાણો દેવમન્તરિક્ષમ્ ।
૧૪૩.૭/૨ભુવં ચ નાગાંશ્ચ ગજાંશ્ચ વિપ્રાન્ ।
૧૪૩.૭/૩આલોકયામાસ નગં મહાન્તમ્ ।
૧૪૩.૭/૪કૈલાસમાવાસ ઉમાપતેર્યઃ ॥ ૧૪૩.૭॥

૧૪૩.૮/૧દૃષ્ટ્વા સ્મયોત્ફુલ્લદૃગ્ અદ્રિરાજમ્ ।
૧૪૩.૮/૨સ મન્ત્રિણૌ રાવણ ઇત્યુવાચ ॥ ૧૪૩.૮॥

૧૪૩.૯/૧રાવણ ઉવાચ । કો વા ગિરાવત્ર વસેન્ મહાત્મા ।
૧૪૩.૯/૨ગિરિં નયામ્યેનમથાધિ ભૂમેઃ ।
૧૪૩.૯/૩લઙ્કાગતોઽયં ગિરિરાશુ શોભામ્ ।
૧૪૩.૯/૪લઙ્કાપિ સત્યં શ્રિયમાતનોતિ ॥ ૧૪૩.૯॥

૧૪૩.૧૦/૧બ્રહ્મોવાચ । ઇત્થં વચો રાક્ષસમન્ત્રિણૌ તૌ ।
૧૪૩.૧૦/૨નિશમ્ય રક્ષોધિપતેશ્ચ ભાવમ્ ।
૧૪૩.૧૦/૩ન યુક્તમિત્યૂચતુરિષ્ટબુદ્ધ્યા ।
૧૪૩.૧૦/૪નિશાચરસ્તદ્વચનં ન મેને ॥ ૧૪૩.૧૦॥

૧૪૩.૧૧/૧સંસ્થાપ્ય તત્ પુષ્પકમાશુ રક્ષઃ ।
૧૪૩.૧૧/૨પુપ્લાવ કૈલાસગિરેશ્ચ મૂલે ।
૧૪૩.૧૧/૩હિન્દોલયામાસ ગિરિં દશાસ્યો ।
૧૪૩.૧૧/૪જ્ઞાત્વા ભવઃ કૃત્યમિદં ચકાર ॥ ૧૪૩.૧૧॥

૧૪૩.૧૨/૧જિત્વા દિગીશાંશ્ચ સગર્વિતસ્ય ।
૧૪૩.૧૨/૨કૈલાસમાન્દોલયતઃ સુરારેઃ ।
૧૪૩.૧૨/૩અઙ્ગુષ્ઠકૃત્યૈવ રસાતલાદિ+ ।
૧૪૩.૧૨/૪લોકાંશ્ચ યાતસ્ય દશાનનસ્ય ॥ ૧૪૩.૧૨॥

૧૪૩.૧૩/૧આલૂનકાયસ્ય ગિરં નિશમ્ય ।
૧૪૩.૧૩/૨વિહસ્ય દેવ્યા સહ દત્તમિષ્ટમ્ ।
૧૪૩.૧૩/૩તસ્મૈ પ્રસન્નઃ કુપિતોઽપિ શમ્ભુર્ ।
૧૪૩.૧૩/૪અયુક્તદાતેતિ ન સંશયોઽત્ર ॥ ૧૪૩.૧૩॥

૧૪૩.૧૪/૧તતોઽયમાવાપ્ય વરાન્ સુવીરો ।
૧૪૩.૧૪/૨ભવપ્રસાદાત્ કુસુમં જગામ ।
૧૪૩.૧૪/૩ગચ્છન્ સ લઙ્કાં ભવપૂજનાય ।
૧૪૩.૧૪/૪ગઙ્ગામગાચ્છમ્ભુજટાપ્રસૂતામ્ ॥ ૧૪૩.૧૪॥

૧૪૩.૧૫/૧સમ્પૂજયિત્વા વિવિધૈશ્ચ મન્ત્રૈર્।
૧૪૩.૧૫/૨ગઙ્ગાજલૈઃ શમ્ભુમદીનસત્ત્વઃ ।
૧૪૩.૧૫/૩અસિં સ લેભે શશિખણ્ડભૂષાત્ ।
૧૪૩.૧૫/૪સિદ્ધિં ચ સર્વર્દ્ધિમભીપ્સિતાં ચ ॥ ૧૪૩.૧૫॥

૧૪૩.૧૬/૧મદ્દત્તમન્ત્રં શશિરક્ષણાય ।
૧૪૩.૧૬/૨સ સાધયામાસ ભવં પ્રપૂજ્ય ।
૧૪૩.૧૬/૩સિદ્ધે તુ મન્ત્રે પુનરેવ લઙ્કામ્ ।
૧૪૩.૧૬/૪અયાત્ સ રક્ષોધિપતિઃ સ તુષ્ટઃ ॥ ૧૪૩.૧૬॥

૧૪૩.૧૭/૧તતઃ પ્રભૃત્યેતદ્ અતિપ્રભાવમ્ ।
૧૪૩.૧૭/૨તીર્થં મહાસિદ્ધિદમિષ્ટદં ચ ।
૧૪૩.૧૭/૩સમસ્તપાપૌઘવિનાશનં ચ ।
૧૪૩.૧૭/૪સિદ્ધૈરશેષૈઃ પરિસેવિતં ચ ॥ ૧૪૩.૧૭॥

૧૪૪.૧/૧બ્રહ્મોવાચ । પરુષ્ણીસંગમં ચેતિ તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ।
૧૪૪.૧/૨તસ્ય સ્વરૂપં વક્ષ્યામિ શૃણુ પાપવિનાશનમ્ ॥ ૧૪૪.૧॥

૧૪૪.૨/૧અત્રિરારાધયામાસ બ્રહ્મવિષ્ણુમહેશ્વરાન્ ।
૧૪૪.૨/૨તેષુ તુષ્ટેષુ સ પ્રાહ પુત્રા યૂયં ભવિષ્યથ ॥ ૧૪૪.૨॥

૧૪૪.૩/૧તથા ચૈકા રૂપવતી કન્યા મમ ભવેત્ સુરાઃ ।
૧૪૪.૩/૨તથા પુત્રત્વમાપુસ્તે બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૧૪૪.૩॥

૧૪૪.૪/૧કન્યાં ચ જનયામાસ શુભાત્રેયીતિ નામતઃ ।
૧૪૪.૪/૨દત્તઃ સોમોઽથ દુર્વાસાઃ પુત્રાસ્તસ્ય મહાત્મનઃ ॥ ૧૪૪.૪॥

૧૪૪.૫/૧અગ્નેરઙ્ગિરસો જાતો હ્યઙ્ગારૈરઙ્ગિરા યતઃ ।
૧૪૪.૫/૨તસ્માદ્ અઙ્ગિરસે પ્રાદાદ્ આત્રેયીમતિરોચિષમ્ ॥ ૧૪૪.૫॥

૧૪૪.૬/૧અગ્નેઃ પ્રભાવાત્ પરુષમાત્રેયીં સર્વદાવદત્ ।
૧૪૪.૬/૨આત્રેય્યપિ ચ શુશ્રૂષાં કુર્વતી સર્વદાભવત્ ॥ ૧૪૪.૬॥

૧૪૪.૭/૧તસ્યામાઙ્ગિરસા જાતા મહાબલપરાક્રમાઃ ।

૧૪૪.૭/૨અઙ્ગિરાઃ પરુષં વાદીદ્ આત્રેયીં નિત્યમેવ ચ ॥ ૧૪૪.૭॥

૧૪૪.૮/૧પુત્રાસ્ત્વાઙ્ગિરસા નિત્યં પિતરં શમયન્તિ તે ।
૧૪૪.૮/૨સા કદાચિદ્ ભર્તૃવાક્યાદ્ ઉદ્વિગ્ના પરુષાક્ષરાત્ ।
૧૪૪.૮/૩કૃતાઞ્જલિપુટા દીના પ્રાબ્રવીચ્છ્વશુરં ગુરુમ્ ॥ ૧૪૪.૮॥

૧૪૪.૯/૧આત્રેય્યુવાચ । અત્રિજાહં હવ્યવાહ ભાર્યા તવ સુતસ્ય વૈ ।
૧૪૪.૯/૨શુશ્રૂષણપરા નિત્યં પુત્રાણાં ભર્તુરેવ ચ ॥ ૧૪૪.૯॥

૧૪૪.૧૦/૧પતિર્માં પરુષં વક્તિ વૃથૈવોદ્વીક્ષતે રુષા ।
૧૪૪.૧૦/૨પ્રશાધિ માં સુરજ્યેષ્ઠ ભર્તારં મમ દૈવતમ્ ॥ ૧૪૪.૧૦॥

૧૪૪.૧૧/૧જ્વલન ઉવાચ । અઙ્ગારેભ્યઃ સમુદ્ભૂતો ભર્તા તે હ્યઙ્ગિરા ઋષિઃ ।
૧૪૪.૧૧/૨યથા શાન્તો ભવેદ્ ભદ્રે તથા નીતિર્વિધીયતામ્ ॥ ૧૪૪.૧૧॥

૧૪૪.૧૨/૧આગ્નેયોઽગ્નિં સમાયાતો તવ ભર્તા વરાનને ।
૧૪૪.૧૨/૨તદા ત્વં જલરૂપેણ પ્લાવયેથા મદાજ્ઞયા ॥ ૧૪૪.૧૨॥

૧૪૪.૧૩/૧આત્રેય્યુવાચ । સહેયં પરુષં વાક્યં મા ભર્તાગ્નિં સમાવિશેત્ ।
૧૪૪.૧૩/૨ભર્તરિ પ્રતિકૂલાનાં યોષિતાં જીવનેન કિમ્ ॥ ૧૪૪.૧૩॥

૧૪૪.૧૪/૧ઇચ્છેયં શાન્તિવાક્યાનિ ભર્તારં લભતે તથા ॥ ૧૪૪.૧૪॥

૧૪૪.૧૫/૧જ્વલન ઉવાચ । અગ્નિસ્ત્વપ્સુ શરીરેષુ સ્થાવરે જઙ્ગમે તથા ।
૧૪૪.૧૫/૨તવ ભર્તુરહં ધામ નિત્યં ચ જનકો મતઃ ॥ ૧૪૪.૧૫॥

૧૪૪.૧૬/૧યોઽહં સોઽહમિતિ જ્ઞાત્વા ન ચિન્તાં કર્તુમર્હસિ ।
૧૪૪.૧૬/૨કિં ચાપો માતરો દેવ્યો હ્યગ્નિઃ શ્વશુર ઇત્યપિ ।
૧૪૪.૧૬/૩ઇતિ બુદ્ધ્યા વિનિશ્ચિત્ય મા વિષણ્ણા ભવ સ્નુષે ॥ ૧૪૪.૧૬॥

૧૪૪.૧૭/૧સ્નુષોવાચ । આપો જનન્ય ઇતિ યદ્ બભાષે ।
૧૪૪.૧૭/૨અગ્નેરહં તવ પુત્રસ્ય ભાર્યા ।
૧૪૪.૧૭/૩કથં ભૂત્વા જનની ચાપિ ભાર્યા ।
૧૪૪.૧૭/૪વિરુદ્ધમેતજ્જલરૂપેણ નાથ ॥ ૧૪૪.૧૭॥

૧૪૪.૧૮/૧જ્વલન ઉવાચ । આદૌ તુ પત્ની ભરણાત્ તુ ભાર્યા ।
૧૪૪.૧૮/૨જનેસ્તુ જાયા સ્વગુણૈઃ કલત્રમ્ ।
૧૪૪.૧૮/૩ઇત્યાદિરૂપાણિ બિભર્ષિ ભદ્રે ।
૧૪૪.૧૮/૪કુરુષ્વ વાક્યં મદુદીરિતં યત્ ॥ ૧૪૪.૧૮॥

૧૪૪.૧૯/૧યોऽસ્યાં પ્રજાતઃ સ તુ પુત્ર એવ ।
૧૪૪.૧૯/૨સા તસ્ય માતૈવ ન સંશયોऽત્ર ।
૧૪૪.૧૯/૩તસ્માદ્ વદન્તિ શ્રુતિતત્ત્વવિજ્ઞાઃ ।
૧૪૪.૧૯/૪સા નૈવ યોષિત્ તનયેऽભિજાતે ॥ ૧૪૪.૧૯॥

૧૪૪.૨૦/૧બ્રહ્મોવાચ । શ્વશુરસ્ય તુ તદ્ વાક્યં શ્રુત્વાત્રેયી તદૈવ તત્ ।
૧૪૪.૨૦/૨આગ્નેયં રૂપમાપન્નમમ્ભસાપ્લાવયત્ પતિમ્ ॥ ૧૪૪.૨૦॥

૧૪૪.૨૧/૧ઉભૌ તૌ દમ્પતી બ્રહ્મન્ સંગતૌ ગાઙ્ગવારિણા ।
૧૪૪.૨૧/૨શાન્તરૂપધરૌ ચોભૌ દમ્પતી સમ્બભૂવતુઃ ॥ ૧૪૪.૨૧॥

૧૪૪.૨૨/૧લક્ષ્મ્યા યુક્તો યથા વિષ્ણુરુમયા શંકરો યથા ।
૧૪૪.૨૨/૨રોહિણ્યા ચ યથા ચન્દ્રસ્તથાભૂન્ મિથુનં તદા ॥ ૧૪૪.૨૨॥

૧૪૪.૨૩/૧ભર્તારં પ્લાવયન્તી સા દધારામ્બુમયં વપુઃ ।
૧૪૪.૨૩/૨પરુષ્ણી ચેતિ વિખ્યાતા ગઙ્ગયા સંગતા નદી ॥ ૧૪૪.૨૩॥

૧૪૪.૨૪/૧ગોશતાર્પણજં પુણ્યં પરુષ્ણીસ્નાનતો ભવેત્ ।
૧૪૪.૨૪/૨તત્ર ચાઙ્ગિરસાશ્ચક્રુર્યજ્ઞાંશ્ચ બહુદક્ષિણાન્ ॥ ૧૪૪.૨૪॥

૧૪૪.૨૫/૧તત્ર ત્રીણિ સહસ્રાણિ તીર્થાન્યાહુઃ પુરાણગાઃ ।
૧૪૪.૨૫/૨ઉભયોસ્તીરયોસ્તાત પૃથગ્ યાગફલં વિદુઃ ॥ ૧૪૪.૨૫॥

૧૪૪.૨૬/૧તેષુ સ્નાનં ચ દાનં ચ વાજપેયાધિકં મતમ્ ।
૧૪૪.૨૬/૨વિશેષતસ્તુ ગઙ્ગાયાઃ પરુષ્ણ્યા સહ સંગમે ॥ ૧૪૪.૨૬॥

૧૪૪.૨૭/૧સ્નાનદાનાદિભિઃ પુણ્યં યત્ તદ્ વક્તું ન શક્યતે ॥ ૧૪૪.૨૭॥

૧૪૫.૧/૧બ્રહ્મોવાચ । માર્કણ્ડેયં નામ તીર્થં સર્વપાપવિમોચનમ્ ।
૧૪૫.૧/૨સર્વક્રતુફલં પુણ્યમઘૌઘવિનિવારણમ્ ॥ ૧૪૫.૧॥

૧૪૫.૨/૧તસ્ય પ્રભાવં વક્ષ્યામિ શૃણુ નારદ યત્નતઃ ।
૧૪૫.૨/૨માર્કણ્ડેયો ભરદ્વાજો વસિષ્ઠોऽત્રિશ્ચ ગૌતમઃ ॥ ૧૪૫.૨॥

૧૪૫.૩/૧યાજ્ઞવલ્ક્યશ્ચ જાબાલિર્મુનયોऽન્યેऽપિ નારદ ।
૧૪૫.૩/૨એતે શાસ્ત્રપ્રણેતારો વેદવેદાઙ્ગપારગાઃ ॥ ૧૪૫.૩॥

૧૪૫.૪/૧પુરાણન્યાયમીમાંસા+ ।કથાસુ પરિનિષ્ઠિતાઃ ।
૧૪૫.૪/૨મિથઃ સમૂચુર્વિદ્વાંસો મુક્તિં પ્રતિ યથામતિ ॥ ૧૪૫.૪॥

૧૪૫.૫/૧કેચિજ્જ્ઞાનં પ્રશંસન્તિ કેચિત્ કર્મ તથોભયમ્ ।

૧૪૫.૫/૨એવં વિવદમાનાસ્તે મામૂચુરુભયં મતમ્ ॥ ૧૪૫.૫॥

૧૪૫.૬/૧મદીયં તુ મતં જ્ઞાત્વા યયુશ્ચક્રગદાધરમ્ ।
૧૪૫.૬/૨તસ્ય ચાપિ મતં જ્ઞાત્વા ઋષયસ્તે મહૌજસઃ ॥ ૧૪૫.૬॥

૧૪૫.૭/૧પુનર્વિવદમાનાસ્તે શંકરં પ્રષ્ટુમુદ્યતાઃ ।
૧૪૫.૭/૨ગઙ્ગાયાં ચ ભવં પૂજ્ય તમેવાર્થં શશંસિરે ॥ ૧૪૫.૭॥

૧૪૫.૮/૧કર્મણસ્તુ પ્રધાનત્વમુવાચ ત્રિપુરાન્તકઃ ।
૧૪૫.૮/૨ક્રિયારૂપં ચ તજ્જ્ઞાનં ક્રિયા સૈવ તદ્ ઉચ્યતે ॥ ૧૪૫.૮॥

૧૪૫.૯/૧તસ્માત્ સર્વાણિ ભૂતાનિ કર્મણા સિદ્ધિમાપ્નુયુઃ ।
૧૪૫.૯/૨કર્મૈવ વિશ્વતોવ્યાપિ તદૃતે નાસ્તિ કિંચન ॥ ૧૪૫.૯॥

૧૪૫.૧૦/૧વિદ્યાભ્યાસો યજ્ઞકૃતિર્યોગાભ્યાસઃ શિવાર્ચનમ્ ।
૧૪૫.૧૦/૨સર્વં કર્મૈવ નાકર્મી પ્રાણી ક્વાપ્યત્ર વિદ્યતે ॥ ૧૪૫.૧૦॥

૧૪૫.૧૧/૧કર્મૈવ કારણં તસ્માદ્ અન્યદ્ ઉન્મત્તચેષ્ટિતમ્ ।
૧૪૫.૧૧/૨ઋષીણાં યત્ર સંવાદો યત્ર દેવો મહેશ્વરઃ ॥ ૧૪૫.૧૧॥

૧૪૫.૧૨/૧ચકાર નિર્ણયં સર્વં કર્મણાવાપ્યતે નૃભિઃ ।
૧૪૫.૧૨/૨માર્કણ્ડં મુખ્યતઃ કૃત્વા તતો માર્કણ્ડમુચ્યતે ॥ ૧૪૫.૧૨॥

૧૪૫.૧૩/૧તીર્થમ્ ઋષિગણાકીર્ણં ગઙ્ગાયા ઉત્તરે તટે ।
૧૪૫.૧૩/૨પિતૃણાં પાવનં પુણ્યં સ્મરણાદ્ અપિ સર્વદા ॥ ૧૪૫.૧૩॥

૧૪૫.૧૪/૧તત્રાષ્ટૌ નવતિસ્તાત તીર્થાન્યાહ જગન્મયઃ ।
૧૪૫.૧૪/૨વેદેન ચાપિ તત્ પ્રોક્તમ્ ઋષયો મેનિરે ચ તત્ ॥ ૧૪૫.૧૪॥

૧૪૬.૧/૧બ્રહ્મોવાચ । યાયાતમપરં તીર્થં યત્ર કાલઞ્જરઃ શિવઃ ।
૧૪૬.૧/૨સર્વપાપપ્રશમનં તદ્વૃત્તમુચ્યતે મયા ॥ ૧૪૬.૧॥

૧૪૬.૨/૧યયાતિર્નાહુષો રાજા સાક્ષાદ્ ઇન્દ્ર ઇવાપરઃ ।
૧૪૬.૨/૨તસ્ય ભાર્યાદ્વયં ચાસીત્ કુલલક્ષણભૂષિતમ્ ॥ ૧૪૬.૨॥

૧૪૬.૩/૧જ્યેષ્ઠા તુ દેવયાનીતિ નામ્ના શુક્રસુતા શુભા ।
૧૪૬.૩/૨શર્મિષ્ઠેતિ દ્વિતીયા સા સુતા સ્યાદ્ વૃષપર્વણઃ ॥ ૧૪૬.૩॥

૧૪૬.૪/૧બ્રાહ્મણ્યપિ મહાપ્રાજ્ઞા દેવયાની સુમધ્યમા ।
૧૪૬.૪/૨યયાતેરભવદ્ ભાર્યા સા તુ શુક્રપ્રસાદતઃ ॥ ૧૪૬.૪॥

૧૪૬.૫/૧શર્મિષ્ઠા ચાપિ તસ્યૈવ ભાર્યા યા વૃષપર્વજા ।
૧૪૬.૫/૨દેવયાની શુક્રસુતા દ્વૌ પુત્રૌ સમજીજનત્ ॥ ૧૪૬.૫॥

૧૪૬.૬/૧યદું ચ તુર્વસું ચૈવ દેવપુત્રસમાવુભૌ ।
૧૪૬.૬/૨શર્મિષ્ઠા ચ નૃપાલ્લેભે ત્રીન્ પુત્રાન્ દેવસંનિભાન્ ॥ ૧૪૬.૬॥

૧૪૬.૭/૧દ્રુહ્યું ચાનું ચ પૂરું ચ યયાતેર્નૃપસત્તમાત્ ।
૧૪૬.૭/૨દેવયાન્યાઃ સુતૌ બ્રહ્મન્ સદૃશૌ શુક્રરૂપતઃ ॥ ૧૪૬.૭॥

૧૪૬.૮/૧શર્મિષ્ઠાયાસ્તુ તનયાઃ શક્રાગ્નિવરુણપ્રભાઃ ।
૧૪૬.૮/૨દેવયાની કદાચિત્ તુ પિતરં પ્રાહ દુઃખિતા ॥ ૧૪૬.૮॥

૧૪૬.૯/૧દેવયાન્યુવાચ । મમ ત્વપત્યદ્વિતયમભાગ્યાયા ભૃગૂદ્વહ ।
૧૪૬.૯/૨મમ દાસ્યાઃ સભાગ્યાયા અપત્યત્રિતયં પિતઃ ॥ ૧૪૬.૯॥

૧૪૬.૧૦/૧તદ્ એતદ્ અનુમૃશ્યાયં દુઃખમત્યન્તમાગતા ।
૧૪૬.૧૦/૨મરિષ્યે દાનવગુરો યયાતિકૃતવિપ્રિયાત્ ।
૧૪૬.૧૦/૩માનભઙ્ગાદ્ વરં તાત મરણં હિ મનસ્વિનામ્ ॥ ૧૪૬.૧૦॥

૧૪૬.૧૧/૧બ્રહ્મોવાચ । તદ્ એતત્ પુત્રિકાવાક્યં શ્રુત્વા શુક્રઃ પ્રતાપવાન્ ।
૧૪૬.૧૧/૨કુપિતોઽભ્યાયયૌ શીઘ્રં યયાતિમિદમબ્રવીત્ ॥ ૧૪૬.૧૧॥

૧૪૬.૧૨/૧શુક્ર ઉવાચ । યદ્ ઇદં વિપ્રિયં મે ત્વં સુતાયાઃ કૃતવાન્ અસિ ।
૧૪૬.૧૨/૨રૂપોન્મત્તેન રાજેન્દ્ર તસ્માદ્ વૃદ્ધો ભવિષ્યસિ ॥ ૧૪૬.૧૨॥

૧૪૬.૧૩/૧ન ચ ભોક્તું ન ચ ત્યક્તું શક્નોતિ વિષયાતુરઃ ।
૧૪૬.૧૩/૨સ્પૃહયન્ મનસૈવાસ્તે નિઃશ્વાસોચ્છ્વાસનષ્ટધીઃ ॥ ૧૪૬.૧૩॥

૧૪૬.૧૪/૧વૃદ્ધત્વમેવ મરણં જીવતામપિ દેહિનામ્ ।
૧૪૬.૧૪/૨તસ્માચ્છીઘ્રં પ્રયાહિ ત્વં જરાં ભૂપાતિદુર્ધરામ્ ॥ ૧૪૬.૧૪॥

૧૪૬.૧૫/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા યયાતિસ્તુ શાપં શુક્રસ્ય ધીમતઃ ।
૧૪૬.૧૫/૨કૃતાઞ્જલિપુટો રાજા યયાતિઃ શુક્રમબ્રવીત્ ॥ ૧૪૬.૧૫॥

૧૪૬.૧૬/૧યયાતિરુવાચ । નાપરાધ્યે ન સંકુપ્યે નૈવાધર્મં પ્રવર્તયે ।
૧૪૬.૧૬/૨અધર્મકારિણઃ પાપાઃ શાસ્યા એવ મહાત્મનામ્ ॥ ૧૪૬.૧૬॥

૧૪૬.૧૭/૧ધર્મમેવ ચરન્તં વૈ કથં માં શપ્તવાન્ અસિ ।
૧૪૬.૧૭/૨દેવયાની દ્વિજશ્રેષ્ઠ વૃથા માં વક્તિ કિંચન ॥ ૧૪૬.૧૭॥

૧૪૬.૧૮/૧તસ્માન્ ન મમ વિપ્રેન્દ્ર શાપં દાતું ત્વમર્હસિ ।

૧૪૬.૧૮/૨વિદ્વાંસોઽપિ હિ નિર્દોષે યદિ કુપ્યન્તિ મોહિતાઃ ।
૧૪૬.૧૮/૩તદા ન દોષો મૂર્ખાણાં દ્વેષાગ્નિપ્લુષ્ટચેતસામ્ ॥ ૧૪૬.૧૮॥

૧૪૬.૧૯/૧બ્રહ્મોવાચ । યયાતિવાક્યાચ્છુક્રોઽપિ સસ્માર સુતયા કૃતમ્ ।
૧૪૬.૧૯/૨અસકૃદ્ વિપ્રિયં તસ્ય દિવા રાત્રૌ પ્રચણ્ડયા ॥ ૧૪૬.૧૯॥

૧૪૬.૨૦/૧ગતકોપોઽહમિત્યુક્ત્વા કાવ્યો રાજાનમબ્રવીત્ ॥ ૧૪૬.૨૦॥

૧૪૬.૨૧/૧શુક્ર ઉવાચ । જ્ઞાતં મયાનયાકારિ વિપ્રિયં ન વદેઽનૃતમ્ ।
૧૪૬.૨૧/૨શાપસ્યેમં કરિષ્યામિ શ◌ૃણુષ્વાનુગ્રહં નૃપ ॥ ૧૪૬.૨૧॥

૧૪૬.૨૨/૧યસ્મૈ પુત્રાય સંદાતું જરામિચ્છસિ માનદ ।
૧૪૬.૨૨/૨તસ્ય સા યાત્વિયં રાજઞ્ જરા પુત્રાય મદ્વરાત્ ॥ ૧૪૬.૨૨॥

૧૪૬.૨૩/૧બ્રહ્મોવાચ । પુનર્યયાતિઃ શ્વશુરં શુક્રં પ્રાહ વિનીતવત્ ॥ ૧૪૬.૨૩॥

૧૪૬.૨૪/૧યયાતિરુવાચ । યો ગૃહ્ણાતિ મયા દત્તાં જરાં ભક્તિસમન્વિતઃ ।
૧૪૬.૨૪/૨સ રાજા સ્યાદ્ દૈત્યગુરો તદ્ એતદ્ અનુમન્યતામ્ ॥ ૧૪૬.૨૪॥

૧૪૬.૨૫/૧યો મદ્વાક્યં નાભિનન્દેત્ સુતો દૈત્યગુરો દૃઢમ્ ।
૧૪૬.૨૫/૨તં શપેયમનુજ્ઞાત્ર દાતવ્યૈવ ત્વયા ગુરો ॥ ૧૪૬.૨૫॥

૧૪૬.૨૬/૧બ્રહ્મોવાચ । એવમસ્ત્વિતિ રાજાનમુવાચ ભૃગુનન્દનઃ ।
૧૪૬.૨૬/૨તતો યયાતિઃ સ્વં પુત્રમાહૂયેદં વચોઽબ્રવીત્ ॥ ૧૪૬.૨૬॥

૧૪૬.૨૭/૧યયાતિરુવાચ । યદો ગૃહાણ મે શાપાજ્જરાં જાતાં સુતો ભવાન્ ।
૧૪૬.૨૭/૨જ્યેષ્ઠઃ સર્વાર્થવિત્ પ્રૌઢઃ પુત્રાણાં ધુરિ સંસ્થિતઃ ।
૧૪૬.૨૭/૩પુત્રી તેનૈવ જનકો યસ્તદાજ્ઞાવશે સ્થિતઃ ॥ ૧૪૬.૨૭॥

૧૪૬.૨૮/૧બ્રહ્મોવાચ । નેત્યુવાચ યદુસ્તાતં યયાતિં ભૂરિદક્ષિણમ્ ।
૧૪૬.૨૮/૨યયાતિશ્ચ યદું શપ્ત્વા તુર્વસું કામમબ્રવીત્ ॥ ૧૪૬.૨૮॥

૧૪૬.૨૯/૧નાગૃહ્ણાત્ તુર્વસુશ્ચાપિ પિત્રા દત્તાં જરાં તદા ।
૧૪૬.૨૯/૨તં શપ્ત્વા ચાબ્રવીદ્ દ્રુહ્યું ગૃહાણેમાં જરાં મમ ॥ ૧૪૬.૨૯॥

૧૪૬.૩૦/૧દ્રુહ્યુશ્ચ નૈચ્છત્ તાં દત્તાં જરાં રૂપવિનાશિનીમ્ ।
૧૪૬.૩૦/૨અનુમપ્યબ્રવીદ્ રાજા ગૃહાણેમાં જરાં મમ ॥ ૧૪૬.૩૦॥

૧૪૬.૩૧/૧અનુર્નેતિ તદોવાચ શપ્ત્વા તં પૂરુમબ્રવીત્ ।
૧૪૬.૩૧/૨અભિનન્દ્ય તદા પૂરુર્જરાં તાં જગૃહે પિતુઃ ॥ ૧૪૬.૩૧॥

૧૪૬.૩૨/૧સહસ્રમેકં વર્ષાણાં યાવત્ પ્રીતોઽભવત્ પિતા ।
૧૪૬.૩૨/૨યૌવને યાનિ ભોગ્યાનિ વસ્તૂનિ વિવિધાનિ ચ ॥ ૧૪૬.૩૨ ॥

૧૪૬.૩૩/૧પુત્રયૌવનસંતુષ્ટો યયાતિર્બુભુજે સુખમ્ ।
૧૪૬.૩૩/૨તતસ્તૃપ્તોઽભવદ્ રાજા સર્વભોગેષુ નાહુષઃ ।
૧૪૬.૩૩/૩તતો હર્ષાત્ સમાહૂય પૂરું પુત્રમથાબ્રવીત્ ॥ ૧૪૬.૩૩ ॥

૧૪૬.૩૪/૧યયાતિરુવાચ । તૃપ્તોઽસ્મિ સર્વભોગેષુ યૌવનેન તવાનઘ ।
૧૪૬.૩૪/૨ગૃહાણ યૌવનં પુત્ર જરાં મે દેહિ કશ્મલામ્ ॥ ૧૪૬.૩૪ ॥

૧૪૬.૩૫/૧બ્રહ્મોવાચ । નેત્યુવાચ તદા પૂરુર્જરયા ક્ષીયતે મયા ।
૧૪૬.૩૫/૨વિકારાસ્તાત ભાવાનાં દુર્નિવારાઃ શરીરિણામ્ ॥ ૧૪૬.૩૫ ॥

૧૪૬.૩૬/૧બલાત્ કાલાગતા સહ્યા જરાપ્યખિલદેહિભિઃ ।
૧૪૬.૩૬/૨સા ચેદ્ ગુરૂપકારાય ગૃહીતા ત્યજ્યતે કથમ્ ॥ ૧૪૬.૩૬ ॥

૧૪૬.૩૭/૧સ્વીકૃતત્યાગપાપાદ્ ધિ દેહિનાં મરણં વરમ્ ।
૧૪૬.૩૭/૨અથવા તુ જરાં રાજંસ્તપસા નાશયામ્યહમ્ ॥ ૧૪૬.૩૭ ॥

૧૪૬.૩૮/૧બ્રહ્મોવાચ । એવમુક્ત્વા તુ પિતરં યયૌ ગઙ્ગામનુત્તમામ્ ।
૧૪૬.૩૮/૨ગૌતમ્યા દક્ષિણે પારે તતસ્તેપે તપો મહત્ ॥ ૧૪૬.૩૮ ॥

૧૪૬.૩૯/૧તતઃ પ્રીતોઽભવદ્ દેવઃ કાલેન મહતા શિવઃ ।
૧૪૬.૩૯/૨લોકાતીતમહોદાર+ ।ગુણસન્મણિભૂષિતમ્ ।
૧૪૬.૩૯/૩કિં દદામીતિ તં પ્રાહ પૂરું સ સુરસત્તમઃ ॥ ૧૪૬.૩૯ ॥

૧૪૬.૪૦/૧પૂરુરુવાચ । શાપપ્રાપ્તાં જરાં નાથ પિતુર્મમ સુરાધિપ ।
૧૪૬.૪૦/૨તાં નાશયસ્વ દેવેશ પિતૃશપ્તાંશ્ચ કોપતઃ ।
૧૪૬.૪૦/૩મદ્ભ્રાતૄઞ્ શાપતો મુક્તાન્ કુરુષ્વ સુરપૂજિત ॥ ૧૪૬.૪૦ ॥

૧૪૬.૪૧/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા જગન્નાથઃ શાપાજ્જાતાં જરાં તથા ।
૧૪૬.૪૧/૨અનાશયજ્જગન્નાથો ભ્રાતૃંશ્ચક્રે વિશાપિનઃ ॥ ૧૪૬.૪૧ ॥

૧૪૬.૪૨/૧તતઃ પ્રભૃતિ તત્ તીર્થં જરારોગવિનાશનમ્ ।
૧૪૬.૪૨/૨અકાલજજરાદીનાં સ્મરણાદ્ અપિ નાશનમ્ ॥ ૧૪૬.૪૨ ॥

૧૪૬.૪૩/૧તન્નામ્ના ચાપિ વિખ્યાતં કાલઞ્જરમુદાહૃતમ્ ।
૧૪૬.૪૩/૨યાયાતં નાહુષં પૌરં શૌક્રં શાર્મિષ્ઠમેવ ચ ॥ ૧૪૬.૪૩ ॥

૧૪૬.૪૪/૧એવમાદીનિ તીર્થાનિ તત્રાષ્ટોત્તરમેવ ચ ।

૧૪૬.૪૪/૨શતં વિધાન્ મહાબુદ્ધે સર્વસિદ્ધિકરં તથા ॥ ૧૪૬.૪૪॥

૧૪૬.૪૫/૧તેષુ સ્નાનં ચ દાનં ચ શ્રવણં પઠનં તથા ।
૧૪૬.૪૫/૨સર્વપાપપ્રશમનં ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૧૪૬.૪૫॥

૧૪૭.૧/૧બ્રહ્મોવાચ । અપ્સરોયુગમાખ્યાતમપ્સરાસંગમં તતઃ ।
૧૪૭.૧/૨તીરે ચ દક્ષિણે પુણ્યં સ્મરણાત્ સુભગો ભવેત્ ॥ ૧૪૭.૧॥

૧૪૭.૨/૧મુક્તો ભવત્યસંદેહં તત્ર સ્નાનાદિના નરઃ ।
૧૪૭.૨/૨સ્ત્રી સતી સંગમે તસ્મિન્ન્ ઋતુસ્નાતા ચ નારદ ॥ ૧૪૭.૨॥

૧૪૭.૩/૧વન્ધ્યાપિ જનયેત્ પુત્રં ત્રિમાસાત્ પતિના સહ ।
૧૪૭.૩/૨સ્નાનદાનેન વર્તન્તી નાન્યથા મદ્વચો ભવેત્ ॥ ૧૪૭.૩॥

૧૪૭.૪/૧અપ્સરોયુગમાખ્યાતં તીર્થં યેન ચ હેતુના ।
૧૪૭.૪/૨તત્રેદં કારણં વક્ષ્યે શ◌ૃણુ નારદ યત્નતઃ ॥ ૧૪૭.૪॥

૧૪૭.૫/૧સ્પર્ધાસીન્ મહતી બ્રહ્મન્ વિશ્વામિત્રવસિષ્ઠયોઃ ।
૧૪૭.૫/૨તપસ્યન્તં ગાધિસુતં બ્રાહ્મણ્યાર્થે યતવ્રતમ્ ॥ ૧૪૭.૫॥

૧૪૭.૬/૧ગઙ્ગાદ્વારે સમાસીનં પ્રેરિતેન્દ્રેણ મેનકા ।
૧૪૭.૬/૨તં ગત્વા તપસો ભ્રષ્ટં કુરુ ભદ્રે મમાજ્ઞયા ॥ ૧૪૭.૬॥

૧૪૭.૭/૧તદોક્તેન્દ્રેણ સા મેના વિશ્વામિત્રં તપશ્ચ્યુતમ્ ।
૧૪૭.૭/૨કૃત્વા કન્યાં તથા દત્ત્વા જગામેન્દ્રપુરં પુનઃ ॥ ૧૪૭.૭॥

૧૪૭.૮/૧તસ્યાં ગતાયાં સસ્માર ગાધિપુત્રોઽખિલં કૃતમ્ ।
૧૪૭.૮/૨તં તુ દેશં પરિત્યજ્ય તીર્થં તુ સુરવલ્લભમ્ ॥ ૧૪૭.૮॥

૧૪૭.૯/૧જગામ દક્ષિણાં ગઙ્ગાં યત્ર કાલઞ્જરો હરઃ ।
૧૪૭.૯/૨તપસ્યન્તં તદોવાચ પુનરિન્દ્રઃ સહસ્રદૃક્ ॥ ૧૪૭.૯॥

૧૪૭.૧૦/૧ઉર્વશીં ચ તતો મેનાં રમ્ભાં ચાપિ તિલોત્તમામ્ ।
૧૪૭.૧૦/૨નૈવેત્યૂચુર્ભયત્રસ્તાઃ પુનરાહ શચીપતિઃ ॥ ૧૪૭.૧૦॥

૧૪૭.૧૧/૧ગમ્ભીરાં ચાતિગમ્ભીરામુભે યે ગર્વિતે તદા ।
૧૪૭.૧૧/૨તે ઊચતુરુભે દેવં સહસ્રાક્ષં પુરંદરમ્ ॥ ૧૪૭.૧૧॥

૧૪૭.૧૨/૧ગમ્ભીરાતિગમ્ભીરે ઊચતુઃ । આવાં ગત્વા તપસ્યન્તં
ગાધિપુત્રં મહાદ્યુતિમ્ ।
૧૪૭.૧૨/૨વ્યાવયાવો નૃત્યગીતૈ રૂપયૌવનસમ્પદા ॥ ૧૪૭.૧૨॥

૧૪૭.૧૩/૧યાસામપાઙ્ગે હસિતે વાચિ વિભ્રમસમ્પદિ ।
૧૪૭.૧૩/૨નિત્યં વસતિ પઞ્ચેષુસ્તાભિઃ કોઽત્ર ન જીયતે ॥ ૧૪૭.૧૩ ॥

૧૪૭.૧૪/૧બ્રહ્મોવાચ । તથેત્યુક્તે સહસ્રાક્ષે તે આગત્ય મહાનદીમ્ ।
૧૪૭.૧૪/૨દદૃશાતે તપસ્યન્તં વિશ્વામિત્રં મહામુનિમ્ ॥ ૧૪૭.૧૪ ॥

૧૪૭.૧૫/૧મૃત્યોરપિ દુરાધર્ષં ભૂમિસ્થમિવ ધૂર્જટિમ્ ।
૧૪૭.૧૫/૨સહસ્રમેકં વર્ષાણામીક્ષિતું ન ચ શક્નુતઃ ॥ ૧૪૭.૧૫ ॥

૧૪૭.૧૬/૧દૂરે સ્થિતે નૃત્યગીત+ ૅહાટુકારરતે તદા ।
૧૪૭.૧૬/૨વિલોક્ય મુનિશાર્દૂલસ્તતઃ કોપાકુલોઽભવત્ ॥ ૧૪૭.૧૬ ॥

૧૪૭.૧૭/૧પ્રતીપાચરણં દૃષ્ટ્વા ક્રોધઃ કસ્ય ન જાયતે ।
૧૪૭.૧૭/૨નિસ્પૃહોઽપિ મહાબાહુસ્તમિન્દ્રં પ્રહસન્ન્ ઇવ ॥ ૧૪૭.૧૭ ॥

૧૪૭.૧૮/૧આભ્યાં મુક્તઃ સહસ્રાક્ષો હ્યપ્સરોભ્યાં બ્રુવન્ન્ ઇવ ।
૧૪૭.૧૮/૨શશાપ તે સ ગાધેયો દ્રવરૂપે ભવિષ્યથઃ ॥ ૧૪૭.૧૮ ॥

૧૪૭.૧૯/૧દ્રવિતું માં સમાયાતે યતસ્ત્વિહ તતો લઘુ ।
૧૪૭.૧૯/૨તતઃ પ્રસાદિતસ્તાભ્યાં શાપમોક્ષં ચકાર સઃ ॥ ૧૪૭.૧૯ ॥

૧૪૭.૨૦/૧ભવેતાં દિવ્યરૂપે વાં ગઙ્ગયા સંગતે યદા ।
૧૪૭.૨૦/૨તચ્છાપાત્ તે નદીરૂપે તત્ક્ષણાત્ સમ્બભૂવતુઃ ॥ ૧૪૭.૨૦ ॥

૧૪૭.૨૧/૧અપ્સરોયુગમાખ્યાતં નદીદ્વયમતોઽભવત્ ।
૧૪૭.૨૧/૨તાભ્યાં પરસ્પરં ચાપિ તાભ્યાં ગઙ્ગાસુસંગમઃ ॥ ૧૪૭.૨૧ ॥

૧૪૭.૨૨/૧સર્વલોકેષુ વિખ્યાતો ભુક્તિમુક્તિપ્રદઃ શિવઃ ।
૧૪૭.૨૨/૨તત્રાસ્તે દૃષ્ટ એવાસૌ સર્વસિદ્ધિપ્રદાયકઃ ॥ ૧૪૭.૨૨ ॥

૧૪૭.૨૩/૧તત્ર સ્નાત્વા તુ તં દૃષ્ટ્વા મુચ્યતે સર્વબન્ધનાત્ ॥ ૧૪૭.૨૩ ॥

૧૪૮.૧/૧બ્રહ્મોવાચ । કોટિતીર્થમિતિ ખ્યાતં ગઙ્ગાયા દક્ષિણે તટે ।
૧૪૮.૧/૨યસ્યાનુસ્મરણાદ્ એવ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૪૮.૧ ॥

૧૪૮.૨/૧યત્ર કોટીશ્વરો દેવઃ સર્વં કોટિગુણં ભવેત્ ।
૧૪૮.૨/૨કોટિદ્વયં તત્ર પૂર્ણં તીર્થાનાં શુભદાયિનામ્ ॥ ૧૪૮.૨ ॥

૧૪૮.3/૧તત્ર વ્યુષ્ટિં પ્રવક્ષ્યામિ શ઼ૃણુ નારદ તન્મનાઃ ।
૧૪૮.3/૨કણ્વસ્ય તુ સુતો જ્યેષ્ઠો બાહ્લીક ઇતિ વિશ્રુતઃ ॥ ૧૪૮.3 ॥

૧૪૮.૪/૧કાણ્વશ્ચેતિ જનૈઃ ખ્યાતો વેદવેદાઙ્ગપારગઃ ।
૧૪૮.૪/૨ઇષ્ટીઃ પાર્વાયણાનીર્યાઃ સભાર્યો વેદપારગઃ ॥ ૧૪૮.૪॥

૧૪૮.૫/૧કુર્વન્ન્ આસ્તે સ ગૌતમ્યાસ્તીરસ્થો લોકપૂજિતઃ ।
૧૪૮.૫/૨પ્રાતઃકાલે સભાર્યોઽસૌ જુહ્વદ્ અગ્નૌ સમાહિતઃ ॥ ૧૪૮.૫॥

૧૪૮.૬/૧સર્વદાસ્તે કદાચિત્ તુ હવનાય સમુદ્યતઃ ।
૧૪૮.૬/૨એકાહુતિં સ હુત્વા તુ સમિદ્ધે હવ્યવાહને ॥ ૧૪૮.૬॥

૧૪૮.૭/૧આહુત્યન્તરદાનાય હવિર્દ્રવ્યં કરેઽગ્રહીત્ ।
૧૪૮.૭/૨એતસ્મિન્ન્ અન્તરે વહ્નિરુપશાન્તોઽભવત્ તદા ॥ ૧૪૮.૭॥

૧૪૮.૮/૧તતશ્ચિન્તાપરઃ કાણ્વઃ કર્તવ્યં કિં ભવેદ્ ઇતિ ।
૧૪૮.૮/૨અન્તર્વિચારયામાસ વિષાદં પરમં ગતઃ ॥ ૧૪૮.૮॥

૧૪૮.૯/૧આહુત્યોશ્ચ દ્વયોર્મધ્ય ઉપશાન્તો હુતાશનઃ ।
૧૪૮.૯/૨અગ્ન્યન્તરમુપાદેયં વૈદિકં લૌકિકં તથા ॥ ૧૪૮.૯॥

૧૪૮.૧૦/૧ક્વ હોષ્યં સ્યાદ્ દ્વિતીયં તુ આહુત્યન્તરમેવ ચ ।
૧૪૮.૧૦/૨એવં મીમાંસમાને તુ દૈવી વાગ્ અબ્રવીત્ તદા ॥ ૧૪૮.૧૦॥

૧૪૮.૧૧/૧અગ્ન્યન્તરં નૈવ તેઽત્ર ઉપાદેયં ભવિષ્યતિ ।
૧૪૮.૧૧/૨યાનિ તત્ર ભવિષ્યન્તિ શકલાનિ સમીપતઃ ॥ ૧૪૮.૧૧॥

૧૪૮.૧૨/૧અર્ધદગ્ધેષુ કાષ્ઠેષુ વિપ્રરાજ પ્રહૂયતામ્ ।
૧૪૮.૧૨/૨નેત્યુવાચ તદા કાણ્વઃ સૈવ વાગ્ અબ્રવીત્ પુનઃ ॥ ૧૪૮.૧૨॥

૧૪૮.૧૩/૧અગ્નેઃ પુત્રો હિરણ્યસ્તુ પિતા પુત્રઃ સ એવ તુ ।
૧૪૮.૧૩/૨પુત્રે દત્તં પ્રિયાયૈવ પિતુઃ પ્રીત્યૈ ભવિષ્યતિ ॥ ૧૪૮.૧૩॥

૧૪૮.૧૪/૧પિત્રે દેયં સુતે દદ્યાત્ કોટિપ્રીતિગુણં ભવેત્ ।
૧૪૮.૧૪/૨દૈવી વાગ્ અબ્રવીદ્ એવં તતઃ સર્વે મહર્ષયઃ ॥ ૧૪૮.૧૪॥

૧૪૮.૧૫/૧નિશ્ચિત્ય ધર્મસર્વસ્વં તથા ચક્રુર્યથોદિતમ્ ।
૧૪૮.૧૫/૨એતજ્જ્ઞાત્વા જગત્યત્ર પુત્રે દત્તં પિતુર્ભવેત્ ॥ ૧૪૮.૧૫॥

૧૪૮.૧૬/૧અપત્યાદ્યુપકારેણ પિત્રોઃ પ્રીતિર્યથા ભવેત્ ।
૧૪૮.૧૬/૨તથા નાન્યેન કેનાપિ જગત્યેતદ્ ધિ વિશ્રુતમ્ ॥ ૧૪૮.૧૬॥

૧૪૮.૧૭/૧સુપ્રસિદ્ધં જગત્યેતત્ સર્વલોકેષુ પૂજિતમ્ ।

૧૪૮.૧૭/૨તસ્મિન્ દત્તે ભવેત્ પુણ્યં સર્વં કોટિગુણં સુત ॥ ૧૪૮.૧૭ ॥

૧૪૮.૧૮/૧મનોગ્લાનિનિવૃત્તિશ્ચ જાયતે ચ મહત્ સુખમ્ ।
૧૪૮.૧૮/૨પુનરપ્યાહ સા વાણી કાણ્વેડસ્મિંસ્તીર્થ ઉત્તમે ॥ ૧૪૮.૧૮ ॥

૧૪૮.૧૯/૧અભવત્ તન્ મહત્ તીર્થં કાણ્વ પુણ્યપ્રભાવતઃ ।
૧૪૮.૧૯/૨લોકત્રયાશ્રયાશેષ+ ।તીર્થેભ્યોડપિ મહાફલમ્ ॥ ૧૪૮.૧૯ ॥

૧૪૮.૨૦/૧સ્નાનદાનાદિકં કિંચિદ્ ભક્ત્યા કુર્વન્ સમાહિતઃ ।
૧૪૮.૨૦/૨ફલં પ્રાપ્સ્યસ્યશેષેણ સર્વં કોટિગુણં મુને ॥ ૧૪૮.૨૦ ॥

૧૪૮.૨૧/૧યત્ કિંચિત્ ક્રિયતે ચાત્ર સ્નાનદાનાદિકં નરૈઃ ।
૧૪૮.૨૧/૨સર્વં કોટિગુણં વિદ્યાત્ કોટિતીર્થં તતો વિદુઃ ॥ ૧૪૮.૨૧ ॥

૧૪૮.૨૨/૧યત્રૈતદ્ વૃત્તમાગ્નેયં કાણ્વં પૌત્રં હિરણ્યકમ્ ।
૧૪૮.૨૨/૨વાણીસંજ્ઞં કોટિતીર્થં કોટિતીર્થફલં યતઃ ॥ ૧૪૮.૨૨ ॥

૧૪૮.૨૩/૧કોટિતીર્થસ્ય માહાત્મ્યમત્ર વક્તું ન શક્યતે ।
૧૪૮.૨૩/૨વાચસ્પતિપ્રભૃતિભિરથવાન્યૈઃ સુરૈરપિ ॥ ૧૪૮.૨૩ ॥

૧૪૮.૨૪/૧યત્રાનુષ્ઠીયમાનં હિ સર્વં કર્મ યથા તથા ।
૧૪૮.૨૪/૨ગોદાવર્યાઃ પ્રસાદેન સર્વં કોટિગુણં ભવેત્ ॥ ૧૪૮.૨૪ ॥

૧૪૮.૨૫/૧કોટિતીર્થે દ્વિજાગ્ર્યાય ગામેકાં યઃ પ્રયચ્છતિ ।
૧૪૮.૨૫/૨તસ્ય તીર્થસ્ય માહાત્મ્યાદ્ ગોકોટિફલમશ્નુતે ॥ ૧૪૮.૨૫ ॥

૧૪૮.૨૬/૧તસ્મિંસ્તીર્થે શુચિર્ભૂત્વા ભૂમિદાનં કરોતિ યઃ ।
૧૪૮.૨૬/૨શ્રદ્ધાયુક્તેન મનસા સ્યાત્ તત્કોટિગુણોત્તરમ્ ॥ ૧૪૮.૨૬ ॥

૧૪૮.૨૭/૧સર્વત્ર ગૌતમીતીરે પિતૃણાં દાનમુત્તમમ્ ।
૧૪૮.૨૭/૨વિશેષતઃ કોટિતીર્થે તદ્ અનન્તફલપ્રદમ્ ।
૧૪૮.૨૭/૩અત્રૈકન્યૂનપઞ્ચાશત્ તીર્થાનિ મુનયો વિદુઃ ॥ ૧૪૮.૨૭ ॥

૧૪૯.૧/૧બ્રહ્મોવાચ । નારસિંહમિતિ ખ્યાતં ગઙ્ગાયા ઉત્તરે તટે ।
૧૪૯.૧/૨તસ્યાનુભાવં વક્ષ્યામિ સર્વરક્ષાવિધાયકમ્ ॥ ૧૪૯.૧ ॥

૧૪૯.૨/૧હિરણ્યકશિપુઃ પૂર્વમભવદ્ બલિનાં વરઃ ।
૧૪૯.૨/૨તપસા વિક્રમેણાપિ દેવાનામપરાજિતઃ ॥ ૧૪૯.૨ ॥

૧૪૯.૩/૧હરિભક્તાત્મજદ્વેષ+ ।કલુષીકૃતમાનસઃ ।
૧૪૯.૩/૨આવિર્ભૂય સભાસ્તમ્ભાદ્ વિશ્વાત્મત્વં પ્રદર્શયન્ ॥ ૧૪૯.૩ ॥

૧૪૯.૪/૧તં હત્વા નરસિંહસ્તત્+ ।સૈન્યમદ્રાવયત્ તદા ।
૧૪૯.૪/૨સર્વાન્ હત્વા મહાદૈત્યાન્ ક્રમેણાજૌ મહામૃગઃ ॥ ૧૪૯.૪॥

૧૪૯.૫/૧૨સાતલસ્થાઞ્ શત્રૂંશ્ચ જિત્વા સ્વર્લોકમીયિવાન્ ।
૧૪૯.૫/૨તત્ર જિત્વા ભુવં ગત્વા દૈત્યાન્ હત્વા નગસ્થિતાન્ ॥ ૧૪૯.૫॥

૧૪૯.૬/૧સમુદ્રસ્થાન્ નદીસંસ્થાન્ ગ્રામસ્થાન્ વનવાસિનઃ ।
૧૪૯.૬/૨નાનારૂપધરાન્ દૈત્યાન્ નિજઘાન મૃગાકૃતિઃ ॥ ૧૪૯.૬॥

૧૪૯.૭/૧આકાશગાન્ વાયુસંસ્થાઞ્ જ્યોતિર્લોકમુપાગતાન્ ।
૧૪૯.૭/૨વજ્રપાતાધિકનખઃ સમુદ્ધૂતમહાસટઃ ॥ ૧૪૯.૭॥

૧૪૯.૮/૧દૈત્યગર્ભસ્રાવિગર્જી નિર્જિતાશેષરાક્ષસઃ ।
૧૪૯.૮/૨મહાનાદૈર્વીક્ષિતૈશ્ચ પ્રલયાનલસંનિભૈઃ ॥ ૧૪૯.૮॥

૧૪૯.૯/૧ચપેટૈરઙ્ગવિક્ષેપૈરસુરાન્ પર્યચૂર્ણયત્ ।
૧૪૯.૯/૨એવં હત્વા બહુવિધાન્ ગૌતમીમગમદ્ ધરિઃ ॥ ૧૪૯.૯॥

૧૪૯.૧૦/૧સ્વપદામ્બુજસમ્ભૂતાં મનોનયનનન્દિનીમ્ ।
૧૪૯.૧૦/૨તત્રામ્બર્ય ઇતિ ખ્યાતો દણ્ડકાધિપતે રિપુઃ ॥ ૧૪૯.૧૦॥

૧૪૯.૧૧/૧દેવાનાં દુર્જયો યોદ્ધા બલેન મહતાવૃતઃ ।
૧૪૯.૧૧/૨તેનાભવન્ મહારૌદ્રં ભીષણં લોમહર્ષણમ્ ॥ ૧૪૯.૧૧॥

૧૪૯.૧૨/૧શસ્ત્રાસ્ત્રવર્ષણં યુદ્ધં હરિણા દૈત્યસૂનુના ।
૧૪૯.૧૨/૨નિજઘાન હરિઃ શ્રીમાંસ્તં રિપું હ્યુત્તરે તટે ॥ ૧૪૯.૧૨॥

૧૪૯.૧૩/૧ગઙ્ગાયાં નારસિંહં તુ તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ।
૧૪૯.૧૩/૨સ્નાનદાનાદિકં તત્ર સર્વપાપગ્રહાર્દનમ્ ॥ ૧૪૯.૧૩॥

૧૪૯.૧૪/૧સર્વરક્ષાકરં નિત્યં જરામરણવારણમ્ ।
૧૪૯.૧૪/૨યથા સુરાણાં સર્વેષાં ન કોઽપિ હરિણા સમઃ ॥ ૧૪૯.૧૪॥

૧૪૯.૧૫/૧તીર્થાનામપ્યશેષાણાં તથા તત્ તીર્થમુત્તમમ્ ।
૧૪૯.૧૫/૨તત્ર તીર્થે નરઃ સ્નાત્વા કુર્યાન્ નૃહરિપૂજનમ્ ॥ ૧૪૯.૧૫॥

૧૪૯.૧૬/૧સ્વર્ગે મર્ત્યે તલે વાપિ તસ્ય કિંચિન્ ન દુર્લભમ્ ।
૧૪૯.૧૬/૨ઇત્યાદ્યષ્ટૌ મુને તત્ર મહાતીર્થાનિ નારદ ॥ ૧૪૯.૧૬॥

૧૪૯.૧૭/૧પૃથક્ પૃથક્ તીર્થકોટિ+ ।ફલમાહુર્મનીષિણઃ ।

૧૪૯.૧૭/૨અશ્રદ્ધયાપિ યન્નામ્નિ સ્મૃતે સર્વાઘસંક્ષયઃ ॥ ૧૪૯.૧૭॥

૧૪૯.૧૮/૧ભવેત્ સાક્ષાન્ નૃસિંહોઽસૌ સર્વદા યત્ર સંસ્થિતઃ ।
૧૪૯.૧૮/૨તત્ તીર્થસેવાસંજાતં ફલં કૈરિહ વર્ણ્યતે ॥ ૧૪૯.૧૮॥

૧૪૯.૧૯/૧યથા ન દેવો નૃહરેરધિકઃ ક્વાપિ વર્તતે ।
૧૪૯.૧૯/૨તથા નૃસિંહતીર્થેન સમં તીર્થં ન કુત્રચિત્ ॥ ૧૪૯.૧૯॥

૧૫૦.૧/૧બ્રહ્મોવાચ । પૈશાચં તીર્થમાખ્યાતં ગઙ્ગાયા ઉત્તરે તટે ।
૧૫૦.૧/૨પિશાચત્વાત્ પુરા વિપ્રો મુક્તિમાપ મહામતે ॥ ૧૫૦.૧॥

૧૫૦.૨/૧સુયવસ્યાત્મજો લોકે જીગર્તિરિતિ વિશ્રુતઃ ।
૧૫૦.૨/૨કુટુમ્બભારદુઃખાર્તો દુર્ભિક્ષેણ તુ પીડિતઃ ॥ ૧૫૦.૨॥

૧૫૦.૩/૧મધ્યમં તુ શુનઃશેપં પુત્રં બ્રહ્મવિદાં વરમ્ ।
૧૫૦.૩/૨વિક્રીતવાન્ ક્ષત્રિયાય વધાય બહુલૈર્ધનૈઃ ॥ ૧૫૦.૩॥

૧૫૦.૪/૧કિં નામાપદ્ગતઃ પાપં નાચરત્યપિ પણ્ડિતઃ ।
૧૫૦.૪/૨શમિતૃત્વે ધનં ચાપિ જગૃહે બહુલં મુનિઃ ॥ ૧૫૦.૪॥

૧૫૦.૫/૧વિદારણાર્થં ચ ધનં જગૃહે બ્રાહ્મણાધમઃ ।
૧૫૦.૫/૨તતોઽપ્રતિસમાધેય+ ંઅહારોગનિપીડિતઃ ॥ ૧૫૦.૫॥

૧૫૦.૬/૧સ મૃતઃ કાલપર્યાયે નરકેષ્વથ પાતિતઃ ।
૧૫૦.૬/૨ભોગાદ્ ઋતે ન ક્ષયોઽસ્તિ પ્રાક્તનાનામિહાંહસામ્ ॥ ૧૫૦.૬॥

૧૫૦.૭/૧કિંકરૈર્યમવાક્યેન બહુયોન્યન્તરં ગતઃ ।
૧૫૦.૭/૨તતઃ પિશાચો હ્યભવદ્ દારુણો દારુણાકૃતિઃ ॥ ૧૫૦.૭॥

૧૫૦.૮/૧શુષ્કકાષ્ઠેષ્વથારણ્યે નિર્જલે નિર્જને તથા ।
૧૫૦.૮/૨ગ્રીષ્મે ગ્રીષ્મદવવ્યાપ્તે ક્ષિપ્યતે યમકિંકરૈઃ ॥ ૧૫૦.૮॥

૧૫૦.૯/૧કન્યાપુત્રમહીવાજિ+ ।ગવાં વિક્રયકારિણઃ ।
૧૫૦.૯/૨નરકાન્ ન નિવર્તન્તે યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૧૫૦.૯॥

૧૫૦.૧૦/૧સ્વકૃતાઘવિપાકેન દારુણૈર્યમકિંકરૈઃ ।
૧૫૦.૧૦/૨સંઘાતે પચ્યમાનોઽસૌ રુરોદોચ્ચૈઃ કૃતં સ્મરન્ ॥ ૧૫૦.૧૦॥

૧૫૦.૧૧/૧પથિ ગચ્છન્ કદાચિત્ સ જીગર્તેર્મધ્યમઃ સુતઃ ।
૧૫૦.૧૧/૨શુશ્રાવ રુદતો વાણીં પિશાચસ્ય મુહુર્મુહુઃ ॥ ૧૫૦.૧૧॥

૧૫૦.૧૨/૧પુત્રક્રેતુર્બ્રહ્મહન્તુર્જીગર્તેસ્તુ પિતુસ્તદા ।
૧૫૦.૧૨/૨પાપિનઃ પુત્રવિક્રેતુર્બ્રહ્મહન્તુઃ પિતુશ્ચ તામ્ ॥ ૧૫૦.૧૨॥

૧૫૦.૧૩/૧શુનઃશેપસ્તદોવાચ કો ભવાન્ અતિદુઃખિતઃ ।
૧૫૦.૧૩/૨જીગર્તિરબ્રવીદ્ દુઃખાચ્છુનઃશેપપિતા હ્યહમ્ ॥ ૧૫૦.૧૩॥

૧૫૦.૧૪/૧પાપીયસીં ક્રિયાં કૃત્વા યોનિં પ્રાપ્તોઽસ્મિ દારુણામ્ ।
૧૫૦.૧૪/૨નરકેષ્વથ પક્વશ્ચ પુનઃ પ્રાપ્તોઽન્તરાલકમ્ ।
૧૫૦.૧૪/૩યે યે દુષ્કૃતકર્માણસ્તેષાં તેષામિયં ગતિઃ ॥ ૧૫૦.૧૪॥

૧૫૦.૧૫/૧જીગર્તિપુત્રસ્તમુવાચ દુઃખાત્ ।
૧૫૦.૧૫/૨સોઽહં સુતસ્તે મમ દોષેણ તાત ।
૧૫૦.૧૫/૩વિક્રીત્વા માં નરકાન્ એવમાપ્તસ્- ।
૧૫૦.૧૫/૪તતઃ કરિષ્યે સ્વર્ગતં ત્વામિદાનીમ્ ॥ ૧૫૦.૧૫॥

૧૫૦.૧૬/૧એવં પ્રતિજ્ઞાય સ ગાધિપુત્ર+ ।
૧૫૦.૧૬/૨પુત્રત્વમાપ્તોઽથ મુનિપ્રવીરઃ ।
૧૫૦.૧૬/૩ગઙ્ગામભિધ્યાય પિતુશ્ચ લોકાન્ ।
૧૫૦.૧૬/૪અનુત્તમાન્ ઈહમાનો જગામ ॥ ૧૫૦.૧૬॥

૧૫૦.૧૭/૧અશેષદુઃખાનલધૂપિતાનામ્ ।
૧૫૦.૧૭/૨નિમજ્જતાં મોહમહાસમુદ્રે ।
૧૫૦.૧૭/૩શરીરિણાં નાન્યદ્ અહો ત્રિલોક્યામ્ ।
૧૫૦.૧૭/૪આલમ્બનં વિષ્ણુપદીં વિહાય ॥ ૧૫૦.૧૭॥

૧૫૦.૧૮/૧એવં વિનિશ્ચિત્ય મુનિર્મહાત્મા ।
૧૫૦.૧૮/૨સમુદ્દિધીર્ષુઃ પિતરં સ દુર્ગતેઃ ।
૧૫૦.૧૮/૩શુચિસ્તતો ગૌતમીમાશુ ગત્વા ।
૧૫૦.૧૮/૪તત્ર સ્નાત્વા સંસ્મરઞ્ છમ્ભુવિષ્ણૂ ॥ ૧૫૦.૧૮॥

૧૫૦.૧૯/૧દદૌ જલં પ્રેતરૂપાય પિત્રે ।
૧૫૦.૧૯/૨પિશાચરૂપાય સુદુઃખિતાય ।
૧૫૦.૧૯/૩તદ્દાનમાત્રેણ તદૈવ પૂતો ।
૧૫૦.૧૯/૪જીગર્તિરાવાપ વપુઃ સુપુણ્યમ્ ॥ ૧૫૦.૧૯॥

૧૫૦.૨૦/૧વિમાનયુક્તઃ સુરસંઘજુષ્ટમ્ ।
૧૫૦.૨૦/૨વિષ્ણોઃ પદં પ્રાપ સુતપ્રભાવાત્ ।

૧૫૦.૨૦/૩ગઙ્ગાપ્રભાવાચ્ચ હરેશ્ચ શમ્ભોર્।
૧૫૦.૨૦/૪વિધાતુરર્કાયુતતુલ્યતેજાઃ ॥ ૧૫૦.૨૦॥

૧૫૦.૨૧/૧તતઃ પ્રભૃત્યેતદ્ અતિપ્રસિદ્ધમ્ ।
૧૫૦.૨૧/૨પૈશાચનાશં ચ મહાગદં ચ ।
૧૫૦.૨૧/૩મહાન્તિ પાપાનિ ચ નાશમાશુ ।
૧૫૦.૨૧/૪પ્રયાન્તિ યસ્ય સ્મરણેન પુંસામ્ ॥ ૧૫૦.૨૧॥

૧૫૦.૨૨/૧તીર્થસ્ય ચેદં ગદિતં તવાદ્ય ।
૧૫૦.૨૨/૨માહાત્મ્યમેતત્ ત્રિશતાનિ યત્ર ।
૧૫૦.૨૨/૩તીર્થાન્યથાન્યાનિ ભવન્તિ ભુક્તિ+ ।
૧૫૦.૨૨/૪મુક્તિપ્રદાયીનિ કિમન્યદ્ અત્ર ॥ ૧૫૦.૨૨॥

૧૫૦.૨૩/૧સર્વસિદ્ધિદમાખ્યાતમિત્યાદ્યત્ર શતત્રયમ્ ।
૧૫૦.૨૩/૨તીર્થાનાં મુનિજુષ્ટાનાં સ્મરણાદ્ અપ્યભીષ્ટદમ્ ॥ ૧૫૦.૨૩॥

૧૫૧.૧/૧બ્રહ્મોવાચ । નિમ્નભેદમિતિ ખ્યાતં સર્વપાપપ્રણાશનમ્ ।
૧૫૧.૧/૨ગઙ્ગાયા ઉત્તરે પારે તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ॥ ૧૫૧.૧॥

૧૫૧.૨/૧યસ્ય સંસ્મરણેનાપિ સર્વપાપક્ષયો ભવેત્ ।
૧૫૧.૨/૨વેદદ્વીપશ્ચ તત્રૈવ દર્શનાદ્ વેદવિદ્ ભવેત્ ॥ ૧૫૧.૨॥

૧૫૧.૩/૧ઉર્વશીં ચકમે રાજા ઐલઃ પરમધાર્મિકઃ ।
૧૫૧.૩/૨કો ન મોહમુપાયાતિ વિલોક્ય મદિરેક્ષણામ્ ॥ ૧૫૧.૩॥

૧૫૧.૪/૧સા પ્રાયાદ્ યત્ર રાજાસૌ ઘૃતં સ્તોકં સમશ્નુતે ।
૧૫૧.૪/૨આનગ્નદર્શનાત્ કૃત્વા તસ્યાઃ કાલાવધિં નૃપઃ ॥ ૧૫૧.૪॥

૧૫૧.૫/૧તાં સ્વીચકાર લલનાં યૂનાં રમ્યાં નવાં નવામ્ ।
૧૫૧.૫/૨સુમાયાં શયને તસ્યાં સમુત્તસ્થૌ પુરૂરવાઃ ॥ ૧૫૧.૫॥

૧૫૧.૬/૧વિલોક્ય તં વિવસનં તદૈવાસૌ વિનિર્ગતા ।
૧૫૧.૬/૨વિદ્યુચ્ચઞ્ચલચિત્તાનાં ક્વ સ્થૈર્યં નનુ યોષિતામ્ ॥ ૧૫૧.૬॥

૧૫૧.૭/૧ઈક્ષાં ચક્રે સ શર્વર્યાં વિવસ્ત્રો વિસ્મિતો મહાન્ ।
૧૫૧.૭/૨એતસ્મિન્ન્ અન્તરે રાજા યુદ્ધાયાગાદ્ રિપૂન્ પ્રતિ ॥ ૧૫૧.૭॥

૧૫૧.૮/૧તાઞ્ જિત્વા પુનરપ્યાગાદ્ દેવલોકં સુપૂજિતમ્ ।
૧૫૧.૮/૨સ ચાગત્ય મહારાજો વસિષ્ઠાચ્ચ પુરોધસઃ ॥ ૧૫૧.૮॥

૧૫૧.૯/૧ઉર્વશ્યા ગમનં શ્રુત્વા તતો દુઃખસમન્વિતઃ ।
૧૫૧.૯/૨ન જુહોતિ ન ચાશ્નાતિ ન શ઼ૃણોતિ ન પશ્યતિ ॥ ૧૫૧.૯॥

૧૫૧.૧૦/૧એતસ્મિન્ન્ અન્તરે તત્ર મૃતાવસ્થં નૃપોત્તમમ્ ।
૧૫૧.૧૦/૨બોધયામાસ વાક્યૈશ્ચ હેતુભૂતૈઃ પુરોહિતઃ ॥ ૧૫૧.૧૦॥

૧૫૧.૧૧/૧વસિષ્ઠ ઉવાચ । સા મૃતાદ્ય મહારાજ મા વ્યથસ્વ મહામતે ।
૧૫૧.૧૧/૨એવં સ્થિતં તુ મા ત્વાં વૈ અશિવાઃ સ્પૃશ્યુરાશુગાઃ ॥ ૧૫૧.૧૧॥

૧૫૧.૧૨/૧ન વૈ સ્ત્રૈણાનિ જાનીષે હૃદયાનિ મહામતે ।
૧૫૧.૧૨/૨શાલાવૃકાણાં યાદૃંશિ તસ્માત્ ત્વં ભૂપ મા શુચઃ ॥ ૧૫૧.૧૨॥

૧૫૧.૧૩/૧કો નામ લોકે રાજેન્દ્ર કામિનીભિર્ન વઞ્ચિતઃ ।
૧૫૧.૧૩/૨વઞ્ચકત્વં નૃશંસત્વં ચઞ્ચલત્વં કુશીલતા ॥ ૧૫૧.૧૩॥

૧૫૧.૧૪/૧ઇતિ સ્વાભાવિકં યાસાં તાઃ કથં સુખહેતવઃ ।
૧૫૧.૧૪/૨કાલેન કો ન નિહતઃ કોઽર્થી ગૌરવમાગતઃ ॥ ૧૫૧.૧૪॥

૧૫૧.૧૫/૧શ્રિયા ન ભ્રામિતઃ કો વા યોષિદ્ભિઃ કો ન ખણ્ડિતઃ ।
૧૫૧.૧૫/૨સ્વપ્નમાયોપમા રાજન્ મદવિપ્લુતચેતસઃ ॥ ૧૫૧.૧૫॥

૧૫૧.૧૬/૧સુખાય યોષિતઃ કસ્ય જ્ઞાત્વૈતદ્ વિજ્વરો ભવ ।
૧૫૧.૧૬/૨વિહાય શંકરં વિષ્ણું ગૌતમીં વા મહામતે ।
૧૫૧.૧૬/૩દુઃખિનાં શરણં નાન્યદ્ વિદ્યતે ભુવનત્રયે ॥ ૧૫૧.૧૬॥

૧૫૧.૧૭/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા તતો રાજા દુઃખં સંહૃત્ય યત્નતઃ ।
૧૫૧.૧૭/૨ગૌતમ્યા મધ્યસંસ્થોઽસાવૈલઃ પરમધાર્મિકઃ ॥ ૧૫૧.૧૭॥

૧૫૧.૧૮/૧તત્ર ચારાધયામાસ શિવં દેવં જનાર્દનમ્ ।
૧૫૧.૧૮/૨બ્રહ્માણં ભાસ્કરં ગઙ્ગાં દેવાન્ અન્યાંશ્ચ યત્નતઃ ॥ ૧૫૧.૧૮॥

૧૫૧.૧૯/૧યો વિપન્નો ન તીર્થાનિ દેવતાશ્ચ ન સેવતે ।
૧૫૧.૧૯/૨સ કાલવશગો જન્તુઃ કાં દશામનુયાસ્યતિ ॥ ૧૫૧.૧૯॥

૧૫૧.૨૦/૧તદીશ્વરૈકશરણો ગૌતમીસેવનોત્સુકઃ ।
૧૫૧.૨૦/૨પરાં શ્રદ્ધામુપગતઃ સંસારાસ્થાપરાઙ્મુખઃ ॥ ૧૫૧.૨૦॥

૧૫૧.૨૧/૧ઈજે યજ્ઞાંશ્ચ બહુલાન્ ઋત્વિગ્ભિર્બહુદક્ષિણાન્ ।
૧૫૧.૨૧/૨વેદદ્વીપોઽભવત્ તેન યજ્ઞદ્વીપઃ સ ઉચ્યતે ॥ ૧૫૧.૨૧॥

૧૫૧.૨૨/૧પૌર્ણમાસ્યાં તુ શર્વર્યાં તત્રાયાતિ સદોર્વશી ।

૧૫૧.૨૨/૨તસ્ય દીપસ્ય યઃ કુર્યાત્ પ્રદક્ષિણમથો નરઃ ॥ ૧૫૧.૨૨॥

૧૫૧.૨૩/૧પ્રદક્ષિણીકૃતા તેન પૃથિવી સાગરામ્બરા ।
૧૫૧.૨૩/૨વેદાનાં સ્મરણં તત્ર યજ્ઞાનાં સ્મરણં તથા ॥ ૧૫૧.૨૩॥

૧૫૧.૨૪/૧સુકૃતી તત્ર યઃ કુર્યાદ્ વેદયજ્ઞફલં લભેત્ ।
૧૫૧.૨૪/૨ઐલતીર્થં તુ તજ્જ્ઞેયં તદ્ એવ ચ પુરૂરવમ્ ॥ ૧૫૧.૨૪॥

૧૫૧.૨૫/૧વાસિષ્ઠં ચાપિ તત્ તુ સ્યાન્ નિમ્નભેદં તદ્ ઉચ્યતે ।
૧૫૧.૨૫/૨ઐલે રાજ્ઞિ ન કિંચિત્ સ્યાન્ નિમ્નં સર્વેષુ કર્મસુ ॥ ૧૫૧.૨૫॥

૧૫૧.૨૬/૧યદ્ એતન્ નિમ્નમુર્વશ્યાં સર્વભાવેન વર્તનમ્ ।
૧૫૧.૨૬/૨તચ્ચાપિ ભેદિતં નિમ્નં વસિષ્ઠેન ચ ગઙ્ગયા ॥ ૧૫૧.૨૬॥

૧૫૧.૨૭/૧નિમ્નભેદમભૂત્ તેન દૃષ્ટાદૃષ્ટેષ્ટસિદ્ધિદમ્ ।
૧૫૧.૨૭/૨તત્ર સપ્ત શતાન્યાહુસ્તીર્થાનિ ગુણવન્તિ ચ ॥ ૧૫૧.૨૭॥

૧૫૧.૨૮/૧તેષુ સ્નાનં ચ દાનં ચ સર્વક્રતુફલપ્રદમ્ ।
૧૫૧.૨૮/૨સ્નાનં કૃત્વા નિમ્નભેદે યઃ પશ્યતિ સુરાન્ ઇમાન્ ॥ ૧૫૧.૨૮॥

૧૫૧.૨૯/૧ઇહ ચામુત્ર વા નિમ્નં ન કિંચિત્ તસ્ય વિદ્યતે ।
૧૫૧.૨૯/૨સર્વોન્નતિમવાપ્યાસૌ મોદતે દિવિ શક્રવત્ ॥ ૧૫૧.૨૯॥

૧૫૨.૧/૧બ્રહ્મોવાચ । નન્દીતટમિતિ ખ્યાતં તીર્થં વેદવિદો વિદુઃ ।
૧૫૨.૧/૨તસ્ય પ્રભાવં વક્ષ્યામિ શ ૃણુ યત્નેન નારદ ॥ ૧૫૨.૧॥

૧૫૨.૨/૧અત્રિપુત્રો મહાતેજાશ્ચન્દ્રમા ઇતિ વિશ્રુતઃ ।
૧૫૨.૨/૨સર્વાન્ વેદાંશ્ચ વિધિવદ્ ધનુર્વેદં યથાવિધિ ॥ ૧૫૨.૨॥

૧૫૨.૩/૧અધીત્ય જીવાત્ સર્વાશ્ચ વિદ્યાશ્ચાન્યા મહામતે ।
૧૫૨.૩/૨ગુરુપૂજાં કરોમીતિ જીવમાહ સ ચન્દ્રમાઃ ।
૧૫૨.૩/૩બૃહસ્પતિસ્તદા પ્રાહ ચન્દ્રં શિષ્યં મુદાન્વિતઃ ॥ ૧૫૨.૩॥

૧૫૨.૪/૧બૃહસ્પતિરુવાચ । મમ પ્રિયા તુ જાનીતે તારા રતિસમપ્રભા ॥ ૧૫૨.૪॥

૧૫૨.૫/૧બ્રહ્મોવાચ । પ્રષ્ટું તાં ચ તદા પ્રાયાદ્ અન્તર્વેશ્મ સ ચન્દ્રમાઃ ।
૧૫૨.૫/૨તારાં તારામુખીં દૃષ્ટ્વા જગૃહે તાં કરેણ સઃ ॥ ૧૫૨.૫॥

૧૫૨.૬/૧સ્વવેશ્મ પ્રતિ તાં લોભાદ્ બલાદ્ આકર્ષયત્ તદા ।
૧૫૨.૬/૨તાવદ્ ધૈર્યનિધિર્જ્ઞાની મતિમાન્ વિજિતેન્દ્રિયઃ ॥ ૧૫૨.૬॥

૧૫૨.૭/૧યાવન્ ન કામિનીનેત્ર+ ।વાગુરાભિર્નિબધ્યતે ।
૧૫૨.૭/૨વિશેષતો રહઃસંસ્થાં કામિનીમાયતેક્ષણામ્ ॥ ૧૫૨.૭॥

૧૫૨.૮/૧વિલોક્ય ન મનો યાતિ કસ્ય કામેષુ વશ્યતામ્ ।
૧૫૨.૮/૨અત એવાન્યપુરુષ+ ।દર્શનં ન કદાચન ॥ ૧૫૨.૮॥

૧૫૨.૯/૧કુલવધ્વા રહઃ કાર્યં ભીતયા શીલવિપ્લુતેઃ ।
૧૫૨.૯/૨વિજ્ઞાય તત્ પરિજનાત્ સહસોત્થાય નિર્ગતઃ ॥ ૧૫૨.૯॥

૧૫૨.૧૦/૧દૃષ્ટ્વા તદ્ દુષ્કૃતં કર્મ બૃહસ્પતિરુદારધીઃ ।
૧૫૨.૧૦/૨શશાપ કોપાચ્ચાક્ષિપ્ય વાગ્ભિર્વિપ્રિયકારિભિઃ ॥ ૧૫૨.૧૦॥

૧૫૨.૧૧/૧પરાભિભૂતામાલોક્ય કાન્તાં કઃ સોઢુમીશ્વરઃ ।
૧૫૨.૧૧/૨યુયુધે તેન જીવોઽપિ દેવશ્ચન્દ્રમસા રુષા ॥ ૧૫૨.૧૧॥

૧૫૨.૧૨/૧ન શાપૈર્હન્યતે ચન્દ્રો નાયુધૈઃ સુરમન્ત્રિતૈઃ ।
૧૫૨.૧૨/૨બૃહસ્પતિપ્રણીતૈશ્ચ ન મન્ત્રૈર્હન્યતે શશી ॥ ૧૫૨.૧૨॥

૧૫૨.૧૩/૧તદા ચન્દ્રસ્તુ તાં તારાં નીત્વા સંસ્થાપ્ય મન્દિરે ।
૧૫૨.૧૩/૨બુભુજે બહુવર્ષાણિ રોહિણીં ચાકુતોભયઃ ॥ ૧૫૨.૧૩॥

૧૫૨.૧૪/૧ન જીયેત તદા દેવૈર્ન કોપૈઃ શાપમન્ત્રકૈઃ ।
૧૫૨.૧૪/૨ન રાજભિર્ન ઋષિભિર્ન સામ્ના ભેદદણ્ડનૈઃ ॥ ૧૫૨.૧૪॥

૧૫૨.૧૫/૧યદા ભાર્યાં ન લેભેઽસૌ ગુરુઃ સર્વપ્રયત્નતઃ ।
૧૫૨.૧૫/૨સર્વોપાયક્ષયે જીવસ્તદા નીતિમથાસ્મરત્ ॥ ૧૫૨.૧૫॥

૧૫૨.૧૬/૧અપમાનં પુરસ્કૃત્ય માનં કૃત્વા તુ પૃષ્ઠતઃ ।
૧૫૨.૧૬/૨સ્વાર્થમુદ્ધરતે પ્રાજ્ઞઃ સ્વાર્થભ્રંશો હિ મૂર્ખતા ॥ ૧૫૨.૧૬॥

૧૫૨.૧૭/૧સાધ્યં કેનાપ્યુપાયેન જાનદ્ભિઃ પુરુષૈઃ ફલમ્ ।
૧૫૨.૧૭/૨વૃથાભિમાનિનઃ શીઘ્રં વિપદ્યન્તે વિમોહિતાઃ ॥ ૧૫૨.૧૭॥

૧૫૨.૧૮/૧એવં નિશ્ચિત્ય મેધાવી શુક્રં ગત્વા ન્યવેદયત્ ।
૧૫૨.૧૮/૨તમાગતં કવિર્જ્ઞાત્વા સમ્માનેનાભ્યનન્દયત્ ॥ ૧૫૨.૧૮॥

૧૫૨.૧૯/૧ઉપવિષ્ટં સુવિશ્રાન્તં પૂજિતં ચ યથાવિધિ ।
૧૫૨.૧૯/૨પર્યપૃચ્છદ્ દૈત્યગુરુસ્તદાગમનકારણમ્ ॥ ૧૫૨.૧૯॥

૧૫૨.૨૦/૧ગૃહાગતસ્ય વિમુખાઃ શત્રવોઽપ્યુત્તમા નહિ ।
૧૫૨.૨૦/૨તસ્મૈ સ વિસ્તરેણાહ ભાર્યાહરણમાદિતઃ ॥ ૧૫૨.૨૦॥

૧૫૨.૨૧/૧બૃહસ્પતેસ્તદા વાક્યં શ્રુત્વા કોપાન્વિતઃ કવિઃ ।
૧૫૨.૨૧/૨અપરાધં તુ ચન્દ્રસ્ય મેને શિષ્યસ્ય નારદ ।
૧૫૨.૨૧/૩અતિક્રમમિમં શ્રુત્વા કોપાત્ કવિરથાબ્રવીત્ ॥ ૧૫૨.૨૧ ॥

૧૫૨.૨૨/૧શુક્ર ઉવાચ । તદા ભોક્ષ્યે તદા પાસ્યે તદા સ્વપ્સ્યે તદા વદે ।
૧૫૨.૨૨/૨યદાનયે પ્રિયાં ભ્રાતસ્તવ ભાર્યાં પરાર્દિતામ્ ॥ ૧૫૨.૨૨ ॥

૧૫૨.૨૩/૧તામાનીય ભવં પૂજ્ય ચન્દ્રં શપ્ત્વા ગુરુદ્રુહમ્ ।
૧૫૨.૨૩/૨પશ્ચાદ્ ભોક્ષ્યે મહાબાહો શ ૃણુ વાચં ગ્રહેશ્વર ॥ ૧૫૨.૨૩ ॥

૧૫૨.૨૪/૧બ્રહ્મોવાચ । એવમુક્ત્વા સ જીવેન દૈત્યાચાર્યો જગામ હ ।
૧૫૨.૨૪/૨શિવમારાધ્ય યત્નેન પરં સામર્થ્યમાપ્તવાન્ ॥ ૧૫૨.૨૪ ॥

૧૫૨.૨૫/૧વરાન્ અવાપ્ય વિવિધાઞ્ શંકરાદ્ ભાવપૂજિતાત્ ।
૧૫૨.૨૫/૨શિવપ્રસાદાત્ કિં નામ દેહિનામિહ દુર્લભમ્ ॥ ૧૫૨.૨૫ ॥

૧૫૨.૨૬/૧જગામ શુક્રો જીવેન તારયા યત્ર ચન્દ્રમાઃ ।
૧૫૨.૨૬/૨વર્તતે તં શશાપોચ્ચૈઃ શ ૃણુ ત્વં ચન્દ્ર મે વચઃ ॥ ૧૫૨.૨૬ ॥

૧૫૨.૨૭/૧યસ્માત્ પાપતરં કર્મ ત્વયા પાપ મદાત્ કૃતમ્ ।
૧૫૨.૨૭/૨કુષ્ઠી ભૂયાસ્તતશ્ચન્દ્રં શશાપૈવં રુષા કવિઃ ॥ ૧૫૨.૨૭ ॥

૧૫૨.૨૮/૧કવિશાપપ્રદગ્ધોઽભૂત્ તદૈવ મૃગલાઞ્છનઃ ।
૧૫૨.૨૮/૨પ્રાપુઃ ક્ષયં ન કે નામ ગુરુસ્વામિસખિદ્રુહઃ ॥ ૧૫૨.૨૮ ॥

૧૫૨.૨૯/૧તત્યાજ તાં સ ચન્દ્રોઽપિ તાં તારાં જગૃહે કવિઃ ।
૧૫૨.૨૯/૨શુક્રોઽપિ દેવાન્ આહૂય ઋષીન્ પિતૃગણાંસ્તથા ॥ ૧૫૨.૨૯ ॥

૧૫૨.૩૦/૧નદીર્નદાંશ્ચ વિવિધાન્ ઓષધીશ્ચ પતિવ્રતાઃ ।
૧૫૨.૩૦/૨તતઃ સમ્પ્રષ્ટુમારેભે તારાવૃત્તવિનિશ્ચયમ્ ॥ ૧૫૨.૩૦ ॥

૧૫૨.૩૧/૧તતઃ શ્રુતિઃ સુરાન્ આહ ગૌતમ્યાં ભક્તિતસ્ત્વિયમ્ ।
૧૫૨.૩૧/૨સ્નાનં કરોતુ જીવેન તારા પૂતા ભવિષ્યતિ ॥ ૧૫૨.૩૧ ॥

૧૫૨.૩૨/૧રહસ્યમેતત્ પરમં ન કથ્યં યસ્ય કસ્યચિત્ ।
૧૫૨.૩૨/૨સર્વાસ્વપિ દશાસ્વેહ શરણં ગૌતમી નૃણામ્ ॥ ૧૫૨.૩૨ ॥

૧૫૨.૩૩/૧તથાકરોચ્ચૈવ તારા ભર્ત્રા સ્નાનં યથાવિધિ ।
૧૫૨.૩૩/૨પુષ્પવૃષ્ટિરભૂત્ તત્ર જયશબ્દો વ્યવર્તત ॥ ૧૫૨.૩૩ ॥

૧૫૨.૩૪/૧પુનર્વૈ દેવા અદદુઃ પુનર્મનુષ્યા ઉત ।
૧૫૨.૩૪/૨રાજાનઃ સત્યં કૃણ્વાના બ્રહ્મજાયાં પુનર્દદુઃ ॥ ૧૫૨.૩૪॥

૧૫૨.૩૫/૧પુનર્દત્ત્વા બ્રહ્મજાયાં કૃતાં દેવૈરકલ્મષામ્ ।
૧૫૨.૩૫/૨સર્વં ક્ષેમમભૂત્ તત્ર તસ્માત્ તીર્થં મહામુને ॥ ૧૫૨.૩૫॥

૧૫૨.૩૬/૧પુનર્દત્ત્વા બ્રહ્મજાયાં કૃતાં દેવૈરકલ્મષામ્ ।
૧૫૨.૩૬/૨સર્વં ક્ષેમમભૂત્ તત્ર તસ્માત્ તીર્થં મહામુને ।
૧૫૨.૩૬/૩તદ્ અભૂત્ સકલાઘૌઘ+ ।ધ્વંસનં સર્વકામદમ્ ।
૧૫૨.૩૬/૪આનન્દં ક્ષેમમભવત્ સુરાણામસુરારિણામ્ ॥ ૧૫૨.૩૬॥

૧૫૨.૩૭/૧બૃહસ્પતેશ્ચ શુક્રસ્ય તારાયાશ્ચ વિશેષતઃ ।
૧૫૨.૩૭/૨પરમાનન્દમાપન્નો ગુરુર્ગઙ્ગામભાષત ॥ ૧૫૨.૩૭॥

૧૫૨.૩૮/૧ગુરુરુવાચ । ત્વં ગૌતમિ સદા પૂજ્યા સર્વેષામપિ મુક્તિદા ।
૧૫૨.૩૮/૨વિશેષતસ્તુ સિંહસ્થે મયિ ત્રૈલોક્યપાવની ॥ ૧૫૨.૩૮॥

૧૫૨.૩૯/૧ભવિષ્યસિ સરિચ્છ્રેષ્ઠે સર્વતીર્થૈઃ સમન્વિતા ।
૧૫૨.૩૯/૨યાનિ કાનિ ચ તીર્થાનિ સ્વર્ગમૃત્યુરસાતલે ।
૧૫૨.૩૯/૩ત્વાં સ્નાતું તાનિ યાસ્યન્તિ મયિ સિંહસ્થિતેઽમ્બિકે ॥ ૧૫૨.૩૯॥

૧૫૨.૪૦/૧બ્રહ્મોવાચ । ધન્યં યશસ્યમાયુષ્યમારોગ્યશ્રીવિવર્ધનમ્ ।
૧૫૨.૪૦/૨સૌભાગ્યૈશ્વર્યજનનં તીર્થમાનન્દનામકમ્ ॥ ૧૫૨.૪૦॥

૧૫૨.૪૧/૧તત્ર પઞ્ચ સહસ્રાણિ તીર્થાન્યાહ સ ગૌતમઃ ।
૧૫૨.૪૧/૨સ્મરણાત્ પઠનાદ્ વાપિ ઇષ્ટૈઃ સંયુજ્યતે સદા ॥ ૧૫૨.૪૧॥

૧૫૨.૪૨/૧શિવસ્યાત્ર નિવિષ્ટસ્ય નન્દી ગઙ્ગાતટેઽનિશમ્ ।
૧૫૨.૪૨/૨સાક્ષાચ્ચરત્યસૌ ધર્મસ્તસ્માન્ નન્દીતટં સ્મૃતમ્ ।
૧૫૨.૪૨/૩આનન્દમપિ તત્ તીર્થં સર્વાનન્દવિવર્ધનાત્ ॥ ૧૫૨.૪૨॥

૧૫૩.૧/૧બ્રહ્મોવાચ । ભાવતીર્થમિતિ પ્રોક્તં યત્ર સાક્ષાદ્ ભવઃ સ્થિતઃ ।
૧૫૩.૧/૨અશેષજગદન્તસ્થો ભૂતાત્મા સચ્ચિદાકૃતિઃ ॥ ૧૫૩.૧॥

૧૫૩.૨/૧તત્રેમાં શ્ૃણુ વક્ષ્યામિ કથાં પુણ્યતમાં શુભામ્ ।
૧૫૩.૨/૨સૂર્યવંશકરઃ શ્રીમાન્ ક્ષત્રિયાણાં ધુરંધરઃ ॥ ૧૫૩.૨॥

૧૫૩.૩/૧પ્રાચીનબર્હિરાખ્યાતઃ સર્વધર્મેષુ પારગઃ ।
૧૫૩.૩/૨તિસ્રઃ કોટ્યોઽર્ધકોટિશ્ચ વર્ષાણાં રાજ્ય આસ્થિતઃ ॥ ૧૫૩.૩॥

૧૫૩.૪/૧તસ્યેદૃશં વ્રતં ચાસીદ્ યદ્ અહં યૌવનચ્યુતઃ ।
૧૫૩.૪/૨ભવેયં પ્રિયયા વાપિ પુત્રૈર્વા પ્રિયવસ્તુભિઃ ॥ ૧૫૩.૪॥

૧૫૩.૫/૧વિયુજ્યેયં તતો રાજ્યં ત્યક્ષ્યેઽહં નાત્ર સંશયઃ ।
૧૫૩.૫/૨વિવેકિનાં કુલીનાનામિદમેવોચિતં નૃણામ્ ॥ ૧૫૩.૫॥

૧૫૩.૬/૧સ્થીયતે વિજને ક્વાપિ વિરક્તૈર્વિભવક્ષયે ।
૧૫૩.૬/૨તસ્મિન્ પ્રશાસતિ મહીં ન વિયોગઃ પ્રિયૈઃ ક્વચિત્ ॥ ૧૫૩.૬॥

૧૫૩.૭/૧નાધિવ્યાધી ન દુર્ભિક્ષં ન બન્ધુકલહો નૃણામ્ ।
૧૫૩.૭/૨તસ્મિઞ્ શાસતિ રાજ્યં તુ ન ચ કશ્ચિદ્ વિયુજ્યતે ॥ ૧૫૩.૭॥

૧૫૩.૮/૧તતઃ પુત્રાર્થમકરોદ્ યજ્ઞં રાજા મહામતિઃ ।
૧૫૩.૮/૨તતઃ પ્રસન્નો ભગવાન્ વરં પ્રાદાદ્ યથેપ્સિતમ્ ॥ ૧૫૩.૮॥

૧૫૩.૯/૧ગૌતમીતીરસંસ્થાય રાજ્ઞે દેવો મહેશ્વરઃ ।
૧૫૩.૯/૨પુત્રં દેહીતિ રાજા વૈ ભવં પ્રાહ સ ભાર્યયા ॥ ૧૫૩.૯॥

૧૫૩.૧૦/૧ભવઃ પ્રાહ નૃપં પ્રીત્યા પશ્ય નેત્રં તૃતીયકમ્ ।
૧૫૩.૧૦/૨તતઃ પશ્યતિ રાજેન્દ્રે ભવસ્યાક્ષિ તુ માનદ ॥ ૧૫૩.૧૦॥

૧૫૩.૧૧/૧ચક્ષુર્દીપ્ત્યાભવત્ પુત્રો મહિમા નામ વિશ્રુતઃ ।
૧૫૩.૧૧/૨યેનાકારિ સ્તુતિઃ પુણ્યા મહિમ્ન ઇતિ વિશ્રુતા ॥ ૧૫૩.૧૧॥

૧૫૩.૧૨/૧કિમલભ્યં ભગવતિ પ્રસન્ને ત્રિપુરાન્તકે ।
૧૫૩.૧૨/૨યં નિત્યમનુવર્તન્તે હરિબ્રહ્માદયઃ સુરાઃ ॥ ૧૫૩.૧૨॥

૧૫૩.૧૩/૧પ્રાપ્તપુત્રશ્ચ નૃપતિસ્તીર્થશ્રૈષ્ઠ્યમયાચત ।
૧૫૩.૧૩/૨મહાપાપમહારોગ+ ંઅહાવ્યસનિનાં નૃણામ્ ॥ ૧૫૩.૧૩॥

૧૫૩.૧૪/૧નાનાવિપદ્ગણાર્તાનાં સર્વાભિમતલબ્ધયે ।
૧૫૩.૧૪/૨પ્રાદાજ્જ્યૈષ્ઠ્યં ભવશ્ચાપિ ભાવતીર્થં તદ્ ઉચ્યતે ॥ ૧૫૩.૧૪॥

૧૫૩.૧૫/૧તત્ર સ્નાનેન દાનેન સર્વાન્ કામાન્ અવાપ્નુયાત્ ।
૧૫૩.૧૫/૨ભવપ્રસાદાદ્ અભવત્ સુતઃ પ્રાચીનબર્હિષઃ ॥ ૧૫૩.૧૫॥

૧૫૩.૧૬/૧મહિમા ગૌતમીતીરે ભાવતીર્થં તદ્ ઉચ્યતે ।
૧૫૩.૧૬/૨તત્ર સપ્તતિ તીર્થાનિ પુણ્યાન્યખિલદાનિ ચ ॥ ૧૫૩.૧૬॥

૧૫૪.૧/૧બ્રહ્મોવાચ । સહસ્રકુણ્ડમાખ્યાતં તીર્થં વેદવિદો વિદુઃ ।
૧૫૪.૧/૨યસ્ય સ્મરણમાત્રેણ સુખી સમ્પદ્યતે નરઃ ॥ ૧૫૪.૧॥

૧૫૪.૨/૧પુરા દાશરથી રામઃ સેતું બદ્ધ્વા મહાર્ણવે ।
૧૫૪.૨/૨લઙ્કાં દગ્ધ્વા રિપૂન્ હત્વા રાવણાદીન્ રણે શરૈઃ ॥ ૧૫૪.૨॥

૧૫૪.૩/૧વૈદેહીં ચ સમાસાદ્ય રામો વચનમબ્રવીત્ ।
૧૫૪.૩/૨પશ્યત્સુ લોકપાલેષુ તસ્યાચાર્યે પુરઃ સ્થિતે ॥ ૧૫૪.૩॥

૧૫૪.૪/૧અગ્નૌ શુદ્ધિગતાં સીતાં રામો લક્ષ્મણસંનિધૌ ।
૧૫૪.૪/૨એહિ વૈદેહિ શુદ્ધાસિ અઙ્કમારોઢુમર્હસિ ॥ ૧૫૪.૪॥

૧૫૪.૫/૧નેત્યુવાચ તદા શ્રીમાન્ અઙ્ગદો હનુમાંસ્તથા ।
૧૫૪.૫/૨અયોધ્યાયાં તુ વૈદેહિ સાર્ધં યામઃ સુહૃજ્જનૈઃ ॥ ૧૫૪.૫॥

૧૫૪.૬/૧તત્ર શુદ્ધિમવાપ્યાથ પુનર્ભ્રાતૃષુ માતૃષુ ।
૧૫૪.૬/૨લૌકિકેષ્વપિ પશ્યત્સુ તતઃ શુદ્ધા નૃપાત્મજા ॥ ૧૫૪.૬॥

૧૫૪.૭/૧અયોધ્યાયાં સુપુણ્યેઽહ્નિ અઙ્કમારોઢુમર્હસિ ।
૧૫૪.૭/૨અસ્યાશ્ચરિત્રવિષયે સંદેહઃ કસ્ય જાયતે ॥ ૧૫૪.૭॥

૧૫૪.૮/૧લોકાપવાદસ્તદ્ અપિ નિરસ્યઃ સ્વજનેષુ હિ ।
૧૫૪.૮/૨તયોર્વાક્યમનાદૃત્ય લક્ષ્મણઃ સવિભીષણઃ ॥ ૧૫૪.૮॥

૧૫૪.૯/૧રામશ્ચ જામ્બવાંશ્ચૈવ તામાહ્વયન્ નૃપાત્મજામ્ ।
૧૫૪.૯/૨સ્વસ્તીત્યુક્ત્વા દેવતાભી રાજ્ઞોઽઙ્કં ચારુરોહ સા ॥ ૧૫૪.૯॥

૧૫૪.૧૦/૧મુદિતાસ્તે યયુઃ શીઘ્રં પુષ્પકેણ વિરાજતા ।
૧૫૪.૧૦/૨અયોધ્યાં નગરીં પ્રાપ્ય તથા રાજ્યં સ્વકં તુ યત્ ॥ ૧૫૪.૧૦॥

૧૫૪.૧૧/૧મુદિતાસ્તેઽભવન્ સર્વે સદા રામાનુવર્તિનઃ ।
૧૫૪.૧૧/૨તતઃ કતિપયાહેષુ અનાર્યેભ્યો વિરૂપિકામ્ ॥ ૧૫૪.૧૧॥

૧૫૪.૧૨/૧વાચં શ્રુત્વા સ તત્યાજ ગુર્વિણીં તામયોનિજામ્ ।
૧૫૪.૧૨/૨મિથ્યાપવાદમપિ હિ ન સહન્તે કુલોન્નતાઃ ॥ ૧૫૪.૧૨॥

૧૫૪.૧૩/૧વાલ્મીકેર્મુનિમુખ્યસ્ય આશ્રમસ્ય સમીપતઃ ।
૧૫૪.૧૩/૨તત્યાજ લક્ષ્મણઃ સીતામદુષ્ટાં રુદતીં રુદન્ ॥ ૧૫૪.૧૩॥

૧૫૪.૧૪/૧નોલ્લઙ્ઘ્યાજ્ઞા ગુરૂણામિત્યસૌ તદ્ અકરોદ્ ભિયા ।
૧૫૪.૧૪/૨તતઃ કતિપયાહેષુ વ્યતીતેષુ નૃપાત્મજઃ ॥ ૧૫૪.૧૪॥

૧૫૪.૧૫/૧રામઃ સૌમિત્રિણા સાર્ધં હયમેધાય દીક્ષિતઃ ।

૧૫૪.૧૫/૨તત્રૈવાજગ્મતુરુભૌ રામપુત્રૌ યશસ્વિનૌ ॥ ૧૫૪.૧૫॥

૧૫૪.૧૬/૧લવઃ કુશશ્ચ વિખ્યાતૌ નારદાવિવ ગાયકૌ ।
૧૫૪.૧૬/૨રામાયણં સમગ્રં તદ્ ગન્ધર્વાવિવ સુસ્વરૌ ॥ ૧૫૪.૧૬॥

૧૫૪.૧૭/૧રામસ્ય ચરિતં સર્વં ગાયમાનૌ સમીયતુઃ ।
૧૫૪.૧૭/૨યજ્ઞવાટં રાજસુતૌ હેતુભિર્લક્ષિતૌ તદા ॥ ૧૫૪.૧૭॥

૧૫૪.૧૮/૧રામપુત્રાવુભૌ શૂરૌ વૈદેહ્યાસ્તનયાવિતિ ।
૧૫૪.૧૮/૨તાવાનીય તતઃ પુત્રાવભિષિચ્ય યથાક્રમમ્ ॥ ૧૫૪.૧૮॥

૧૫૪.૧૯/૧અઙ્કારૂઢૌ તતઃ કૃત્વા સસ્વજે તૌ પુનઃ પુનઃ ।
૧૫૪.૧૯/૨સંસારદુઃખખિન્નાનામગતીનાં શરીરિણામ્ ॥ ૧૫૪.૧૯॥

૧૫૪.૨૦/૧પુત્રાલિઙ્ગનમેવાત્ર પરં વિશ્રાન્તિકારણમ્ ।
૧૫૪.૨૦/૨મુહુરાલિઙ્ગ્ય તૌ પુત્રૌ મુહુઃ સ્વજતિ ચુમ્બતિ ॥ ૧૫૪.૨૦॥

૧૫૪.૨૧/૧કિમપ્યન્તર્ધ્યાયતિ ચ નિઃશ્વસત્યપિ વૈ મુહુઃ ।
૧૫૪.૨૧/૨એતસ્મિન્ન્ અન્તરે પ્રાપ્તા રાક્ષસા લઙ્કવાસિનઃ ॥ ૧૫૪.૨૧॥

૧૫૪.૨૨/૧સુગ્રીવો હનુમાંશ્ચૈવ અઙ્ગદો જામ્બવાંસ્તથા ।
૧૫૪.૨૨/૨અન્યે ચ વાનરાઃ સર્વે વિભીષણપુરઃસરાઃ ॥ ૧૫૪.૨૨॥

૧૫૪.૨૩/૧તે ચાગત્ય નૃપં પ્રાપ્તાઃ સિંહાસનમુપસ્થિતમ્ ।
૧૫૪.૨૩/૨સીતામદૃષ્ટ્વા હનુમાન્ અઙ્ગદઃ કનકાઙ્ગદઃ ॥ ૧૫૪.૨૩॥

૧૫૪.૨૪/૧ક્વ ગતાયોનિજા માતા એકો રામોઽત્ર દૃશ્યતે ।
૧૫૪.૨૪/૨રામેણ સા પરિત્યક્તા ઇત્યૂચુર્દ્વારપાલકાઃ ॥ ૧૫૪.૨૪॥

૧૫૪.૨૫/૧પશ્યત્સુ લોકપાલેષુ આર્યે તત્ર પ્રવાદિનિ ।
૧૫૪.૨૫/૨અગ્નૌ શુદ્ધિગતાં સીતાં કિં તુ રાજા નિરઙ્કુશઃ ॥ ૧૫૪.૨૫॥

૧૫૪.૨૬/૧ઉત્પન્નૈર્લૌકિકૈર્વાક્યૈ રામસ્ત્યજતિ તાં પ્રિયામ્ ।
૧૫૪.૨૬/૨મરિષ્યાવ ઇતિ હ્યુક્ત્વા ગૌતમીં પુનરીયતુઃ ॥ ૧૫૪.૨૬॥

૧૫૪.૨૭/૧રામસ્તૌ પૃષ્ઠતોઽભ્યેત્ય અયોધ્યાવાસિભિઃ સહ ।
૧૫૪.૨૭/૨આગત્ય ગૌતમીં તત્રઽકુર્વંસ્તે પરમં તપઃ ॥ ૧૫૪.૨૭॥

૧૫૪.૨૮/૧સ્મારં સ્મારં નિશ્વસન્તસ્તાં સીતાં લોકમાતરમ્ ।
૧૫૪.૨૮/૨સંસારાસ્થાવિરહિતા ગૌતમીસેવનોત્સુકાઃ ॥ ૧૫૪.૨૮॥

૧૫૪.૨૯/૧લોકત્રયપતિઃ સાક્ષાદ્ રામોઽનુજસમન્વિતઃ ।
૧૫૪.૨૯/૨પ્રાપ્તઃ સ્નાત્વા ચ ગૌતમ્યાં શિવારાધનતત્પરઃ ॥ ૧૫૪.૨૯॥

૧૫૪.૩૦/૧પરિતાપં જહૌ સર્વં સહસ્રપરિવારિતઃ ।
૧૫૪.૩૦/૨યત્ર ચાસીત્ સ વૃત્તાન્તઃ સહસ્રકુણ્ડમુચ્યતે ॥ ૧૫૪.૩૦॥

૧૫૪.૩૧/૧દશાપરાણિ તીર્થાનિ તત્ર સર્વાર્થદાનિ ચ ।
૧૫૪.૩૧/૨તત્ર સ્નાનં ચ દાનં ચ સહસ્રફલદાયકમ્ ॥ ૧૫૪.૩૧॥

૧૫૪.૩૨/૧યત્ર શ્રીગૌતમીતીરે વસિષ્ઠાદિમુનીશ્વરૈઃ ।
૧૫૪.૩૨/૨સર્વાપત્તારકં હોમમકારયદ્ અઘાન્તકમ્ ॥ ૧૫૪.૩૨॥

૧૫૪.૩૩/૧સહસ્રસંખ્યાયુક્તેષુ કુણ્ડેષુ વસુધારયા ।
૧૫૪.૩૩/૨સર્વાન્ અપેક્ષિતાન્ કામાન્ અવાપાસૌ મહાતપાઃ ॥ ૧૫૪.૩૩॥

૧૫૪.૩૪/૧ગૌતમ્યાઃ સરિદમ્બાયાઃ પ્રસાદાદ્ રાક્ષસાન્તકઃ ।
૧૫૪.૩૪/૨સહસ્રકુણ્ડાભિધં તદ્ અભૂત્ તીર્થં મહાફલમ્ ॥ ૧૫૪.૩૪॥

૧૫૫.૧/૧બ્રહ્મોવાચ । કપિલતીર્થમાખ્યાતં તદ્ એવાઙ્ગિરસં સ્મૃતમ્ ।
૧૫૫.૧/૨તદ્ એવાદિત્યમાખ્યાતં સૈંહિકેયં તદ્ ઉચ્યતે ॥ ૧૫૫.૧॥

૧૫૫.૨/૧ગૌતમ્યા દક્ષિણે પારે આદિત્યાન્ મુનિસત્તમ ।
૧૫૫.૨/૨અયાજયન્ન્ અઙ્ગિરસો દક્ષિણાં તે ભુવં દદુઃ ॥ ૧૫૫.૨॥

૧૫૫.૩/૧અઙ્ગિરોભ્યસ્તદાદિત્યાસ્તપસેઽઙ્ગિરસો યયુઃ ।
૧૫૫.૩/૨સા ભૂમિઃ સૈંહિકી ભૂત્વા જનાન્ સર્વાન્ અભક્ષયત્ ॥ ૧૫૫.૩॥

૧૫૫.૪/૧તત્રસુસ્તે જનાઃ સર્વે અઙ્ગિરોભ્યો ન્યવેદયન્ ।
૧૫૫.૪/૨વિભીતા જ્ઞાનતો જ્ઞાત્વા ભુવં તાં સૈંહિકીમિતિ ॥ ૧૫૫.૪॥

૧૫૫.૫/૧આદિત્યાન્ અનુગત્વાથ વાચમઙ્ગિરસોઽબ્રુવન્ ।
૧૫૫.૫/૨ભુવં ગૃહ્ણન્તુ યા દત્તા નેત્યાદિત્યાસ્તદાબ્રુવન્ ॥ ૧૫૫.૫॥

૧૫૫.૬/૧નિવૃત્તાં દક્ષિણાં નૈવ પ્રતિગૃહ્ણન્તિ સૂરયઃ ।
૧૫૫.૬/૨સ્વદત્તાં પરદત્તાં વા યો હરેત વસુંધરામ્ ॥ ૧૫૫.૬॥

૧૫૫.૭/૧ષષ્ટિર્વર્ષસહસ્રાણિ વિષ્ઠાયાં જાયતે કૃમિઃ ।
૧૫૫.૭/૨ભૂમેઃ સ્વપરદત્તાયા હરણાન્ નાધિકં ક્વચિત્ ॥ ૧૫૫.૭॥

૧૫૫.૮/૧પાપમસ્તિ મહારૌદ્રં ન સ્વીકુર્મઃ પુનસ્તુ તામ્ ।
૧૫૫.૮/૨એવં યદા સ્વદત્તાયા હરણે કિં તદા ભવેત્ ॥ ૧૫૫.૮॥

૧૫૫.૯/૧તથાપિ ક્રયરૂપેણ ગૃહ્ણીમો દક્ષિણાં ભુવમ્ ।
૧૫૫.૯/૨તથેત્યુક્તે તુ તે દેવાઃ કપિલાં શુભલક્ષણામ્ ॥ ૧૫૫.૯॥

૧૫૫.૧૦/૧ગઙ્ગાયા દક્ષિણે પારે ભુવઃ સ્થાને તુ તાં દદુઃ ।
૧૫૫.૧૦/૨ભુક્તિમુક્તિપ્રદઃ સાક્ષાદ્ વિષ્ણુસ્તિષ્ઠતિ મૂર્તિમાન્ ॥ ૧૫૫.૧૦॥

૧૫૫.૧૧/૧કપિલાસંગમં તચ્ચ સર્વાઘૌઘવિનાશનમ્ ।
૧૫૫.૧૧/૨તત્રાભવદ્ દાનતોયાદ્ આપગા કપિલાભિધા ॥ ૧૫૫.૧૧॥

૧૫૫.૧૨/૧સસ્યવત્યા અપિ ભુવો દાનાદ્ ગોદાનમુત્તમમ્ ।
૧૫૫.૧૨/૨લોકરક્ષાં ચકારાસૌ કૃત્વા વિનિમયં મુનિઃ ॥ ૧૫૫.૧૨॥

૧૫૫.૧૩/૧યત્ર તીર્થે ચ તદ્ વૃત્તં ગોતીર્થં તદ્ ઉદાહૃતમ્ ।
૧૫૫.૧૩/૨પુણ્યદં તત્ર તીર્થાનાં શતમુક્તં મનીષિભિઃ ॥ ૧૫૫.૧૩॥

૧૫૫.૧૪/૧તત્ર સ્નાનેન દાનેન ભૂમિદાનફલં લભેત્ ।
૧૫૫.૧૪/૨સંગતા ગઙ્ગયા તચ્ચ કપિલાસંગમં વિદુઃ ॥ ૧૫૫.૧૪॥

૧૫૬.૧/૧બ્રહ્મોવાચ । શઙ્ખહ્રદં નામ તીર્થં યત્ર શઙ્ખગદાધરઃ ।
૧૫૬.૧/૨તત્ર સ્નાત્વા ચ તં દૃષ્ટ્વા મુચ્યતે ભવબન્ધનાત્ ॥ ૧૫૬.૧॥

૧૫૬.૨/૧તત્રેદં વૃત્તમાખ્યાસ્યે ભુક્તિમુક્તિપ્રદાયકમ્ ।
૧૫૬.૨/૨પુરા કૃતયુગસ્યાદૌ બ્રહ્મણઃ સામગાયિનઃ ॥ ૧૫૬.૨॥

૧૫૬.૩/૧બ્રહ્માણ્ડાગારસમ્ભૂતા રાક્ષસા બહુરૂપિણઃ ।
૧૫૬.૩/૨બ્રહ્માણં ખાદિતું પ્રાપ્તા બલોન્મત્તા ધૃતાયુધાઃ ॥ ૧૫૬.૩॥

૧૫૬.૪/૧તદાહમબ્રવં વિષ્ણું રક્ષણાય જગદ્ગુરુમ્ ।
૧૫૬.૪/૨સ વિષ્ણુસ્તાનિ રક્ષાંસિ હન્તું ચક્રેણ ચોદ્યતઃ ॥ ૧૫૬.૪॥

૧૫૬.૫/૧છિત્ત્વા ચક્રેણ રક્ષાંસિ શઙ્ખમાપૂરયત્ તદા ।
૧૫૬.૫/૨નિષ્કણ્ટકં તલં કૃત્વા સ્વર્ગં નિર્વૈરમેવ ચ ॥ ૧૫૬.૫॥

૧૫૬.૬/૧તતો હર્ષપ્રકર્ષેણ શઙ્ખમાપૂરયદ્ ધરિઃ ।
૧૫૬.૬/૨તતો રક્ષાંસિ સર્વાણિ હ્યનીનશુરશેષતઃ ॥ ૧૫૬.૬॥

૧૫૬.૭/૧યત્રૈતદ્ વૃત્તમખિલં વિષ્ણુશઙ્ખપ્રભાવતઃ ।
૧૫૬.૭/૨શઙ્ખતીર્થં તુ તત્ પ્રોક્તં સર્વક્ષેમકરં નૃણામ્ ॥ ૧૫૬.૭॥

૧૫૬.૮/૧સર્વાભીષ્ટપ્રદં પુણ્યં સ્મરણાન્ મઙ્ગલપ્રદમ્ ।

૧૫૬.૮/૨આયુરારોગ્યજનનં લક્ષ્મીપુત્રપ્રવર્ધનમ્ ॥ ૧૫૬.૮॥

૧૫૬.૯/૧સ્મરણાત્ પઠનાદ્ વાપિ સર્વકામાન્ અવાપ્નુયાત્ ।
૧૫૬.૯/૨તીર્થાનામયુતં તત્ર સર્વપાપનુદં મુને ॥ ૧૫૬.૯॥

૧૫૬.૧૦/૧તીર્થાન્યયુતસંખ્યાનિ સર્વપાપહરાણિ ચ ।
૧૫૬.૧૦/૨યેષાં પ્રભાવં જાનાતિ વક્તું દેવો મહેશ્વરઃ ॥ ૧૫૬.૧૦॥

૧૫૬.૧૧/૧પાપક્ષયપ્રતિનિધિર્નૈતેભ્યોઽસ્ત્યપરઃ ક્વચિત્ ॥ ૧૫૬.૧૧॥

૧૫૭.૧/૧બ્રહ્મોવાચ । કિષ્કિન્ધાતીર્થમાખ્યાતં સર્વકામપ્રદં નૃણામ્ ।
૧૫૭.૧/૨સર્વપાપપ્રશમનં યત્ર સંનિહિતો ભવઃ ॥ ૧૫૭.૧॥

૧૫૭.૨/૧તસ્ય સ્વરૂપં વક્ષ્યામિ યત્નેન શ ૃણુ નારદ ।
૧૫૭.૨/૨પુરા દાશરથી રામો રાવણં લોકરાવણમ્ ॥ ૧૫૭.૨॥

૧૫૭.૩/૧કિષ્કિન્ધાવાસિભિઃ સાર્ધં જઘાન રણમૂર્ધનિ ।
૧૫૭.૩/૨સપુત્રં સબલં હત્વા સીતામાદાય શત્રુહા ॥ ૧૫૭.૩॥

૧૫૭.૪/૧ભ્રાત્રા સૌમિત્રિણા સાર્ધં વાનરૈશ્ચ મહાબલૈઃ ।
૧૫૭.૪/૨વિભીષણેન બલિના દેવૈઃ પ્રત્યાગતો નૃપઃ ॥ ૧૫૭.૪॥

૧૫૭.૫/૧કૃતસ્વસ્ત્યયનઃ શ્રીમાન્ પુષ્પકેણ વિરાજિતઃ ।
૧૫૭.૫/૨યદ્ આસીદ્ ધનરાજસ્ય કામગેનાશુગામિના ॥ ૧૫૭.૫॥

૧૫૭.૬/૧અયોધ્યામગમન્ સર્વે ગચ્છન્ ગઙ્ગામપશ્યત ।
૧૫૭.૬/૨રામો વિરામઃ શત્રૂણાં શરણ્યઃ શરણાર્થિનામ્ ॥ ૧૫૭.૬॥

૧૫૭.૭/૧ગૌતમીં તુ જગત્પુણ્યાં સર્વકામપ્રદાયિનીમ્ ।
૧૫૭.૭/૨મનોનયનસંતાપ+ ઇવારણપરાયણામ્ ॥ ૧૫૭.૭॥

૧૫૭.૮/૧તાં દૃષ્ટ્વા નૃપતિઃ શ્રીમાન્ ગઙ્ગાતીરમથાવિશત્ ।
૧૫૭.૮/૨તાં દૃષ્ટ્વા પ્રાહ નૃપતિર્હર્ષગદ્ગદયા ગિરા ।
૧૫૭.૮/૩હરીન્ સર્વાન્ અથામન્ત્ર્ય હનુમત્પ્રમુખાન્ મુને ॥ ૧૫૭.૮॥

૧૫૭.૯/૧રામ ઉવાચ । અસ્યાઃ પ્રભાવાદ્ ધરયો યોઽસૌ મમ પિતા પ્રભુઃ ।
૧૫૭.૯/૨સર્વપાપવિનિર્મુક્તસ્તતો યાતસ્ત્રિવિષ્ટપમ્ ॥ ૧૫૭.૯॥

૧૫૭.૧૦/૧઼ઇયં જનિત્રી સકલસ્ય જન્તોર્।
૧૫૭.૧૦/૨ભુક્તિપ્રદા મુક્તિમથાપિ દદ્યાત્ ।
૧૫૭.૧૦/૩પાપાનિ હન્યાદ્ અપિ દારુણાનિ ।

૧૫૭.૧૦/૪કાન્યાનયાસ્ત્યત્ર નદી સમાના ॥ ૧૫૭.૧૦॥

૧૫૭.૧૧/૧હતાનિ શશ્વદ્ દુરિતાનિ ચૈવ ।
૧૫૭.૧૧/૨અસ્યાઃ પ્રભાવાદ્ અરયઃ સખાયઃ ।
૧૫૭.૧૧/૩વિભીષણો મૈત્રમુપૈતિ નિત્યમ્ ।
૧૫૭.૧૧/૪સીતા ચ લબ્ધા હનુમાંશ્ચ બન્ધુઃ ॥ ૧૫૭.૧૧॥

૧૫૭.૧૨/૧લઙ્કા ચ ભગ્ના સગણં હિ રક્ષો ।
૧૫૭.૧૨/૨હતં હિ યસ્યાઃ પરિસેવનેન ।
૧૫૭.૧૨/૩યાં ગૌતમો દેવવરં પ્રપૂજ્ય ।
૧૫૭.૧૨/૪શિવં શરણ્યં સજટામવાપ ॥ ૧૫૭.૧૨॥

૧૫૭.૧૩/૧સેયં જનિત્રી સકલેપ્સિતાનામ્ ।
૧૫૭.૧૩/૨અમઙ્ગલાનામપિ સંનિહન્ત્રી ।
૧૫૭.૧૩/૩જગત્પવિત્રીકરણૈકદક્ષા ।
૧૫૭.૧૩/૪દૃષ્ટાદ્ય સાક્ષાત્ સરિતાં સવિત્રી ॥ ૧૫૭.૧૩॥

૧૫૭.૧૪/૧કાયેન વાચા મનસા સદૈનામ્ ।
૧૫૭.૧૪/૨વ્રજામિ ગઙ્ગાં શરણં શરણ્યામ્ ॥ ૧૫૭.૧૪॥

૧૫૭.૧૫/૧બ્રહ્મોવાચ । એતત્ સમાકર્ણ્ય વચો નૃપસ્ય ।
૧૫૭.૧૫/૨તત્રાપ્લવન્ હરયઃ સર્વ એવ ।
૧૫૭.૧૫/૩પૂજાં ચક્રુર્વિધિવત્ તે પૃથક્ ચ ।
૧૫૭.૧૫/૪પુષ્પૈરનેકૈઃ સર્વલોકોપહારૈઃ ॥ ૧૫૭.૧૫॥

૧૫૭.૧૬/૧સમ્પૂજ્ય શર્વં નૃપતિર્યથાવત્ ।
૧૫૭.૧૬/૨સ્તુત્વા વાક્યૈઃ સર્વભાવોપયુક્તૈઃ ।
૧૫૭.૧૬/૩તે વાનરા મુદિતાઃ સર્વ એવ ।
૧૫૭.૧૬/૪નૃત્યં ચ ગીતં ચ તથૈવ ચક્રુઃ ॥ ૧૫૭.૧૬॥

૧૫૭.૧૭/૧સુખોષિતસ્તાં રજનીં મહાત્મા ।
૧૫૭.૧૭/૨પ્રિયાનુયુક્તઃ સંવૃતઃ પ્રેમવદ્ભિઃ ।
૧૫૭.૧૭/૩દુઃખં જહૌ સર્વમમિત્રસમ્ભવમ્ ।
૧૫૭.૧૭/૪કિં નાપ્યતે ગૌતમીસેવનેન ॥ ૧૫૭.૧૭॥

૧૫૭.૧૮/૧સવિસ્મયઃ પશ્યતિ ભૃત્યવર્ગમ્ ।
૧૫૭.૧૮/૨ગોદાવરીં સ્તૌતિ ચ સમ્પ્રહૃષ્ટઃ ।

૧૫૭.૧૮/૩સમ્માનયન્ ભૃત્યગણં સમગ્રમ્ ।
૧૫૭.૧૮/૪અવાપ રામઃ કમપિ પ્રમોદમ્ ।
૧૫૭.૧૮/૫પુનઃ પ્રભાતે વિમલે તુ સૂર્યે ।
૧૫૭.૧૮/૬વિભીષણો દાશરથિં બભાષે ॥ ૧૫૭.૧૮॥

૧૫૭.૧૯/૧વિભીષણ ઉવાચ । નાદ્યાપિ તૃપ્માસ્તુ ભવામ તીર્થે ।
૧૫૭.૧૯/૨કંચિચ્ચ કાલં નિવસામ ચાત્ર ।
૧૫૭.૧૯/૩વત્સ્યામ ચાત્રૈવ પરાશ્વતસ્રો ।
૧૫૭.૧૯/૪રાત્રીરથો યામ વૃતાસ્ત્વયોધ્યામ્ ॥ ૧૫૭.૧૯॥

૧૫૭.૨૦/૧બ્રહ્મોવાચ । તસ્યાથ વાક્યં હરયોઽનુમેનિરે ।
૧૫૭.૨૦/૨તથૈવ રાત્રીરપરાશ્ચતસ્રઃ ।
૧૫૭.૨૦/૩સમ્પૂજ્ય દેવં સકલેશ્વરં તમ્ ।
૧૫૭.૨૦/૪ભ્રાતૃપ્રિયં તીર્થમથો જગામ ॥ ૧૫૭.૨૦॥

૧૫૭.૨૧/૧સિદ્ધેશ્વરં નામ જગત્પ્રસિદ્ધમ્ ।
૧૫૭.૨૧/૨યસ્ય પ્રભાવાત્ પ્રબલો દશાસ્યઃ ।
૧૫૭.૨૧/૩એવં તુ પઞ્ચાહમથોષિરે તે ।
૧૫૭.૨૧/૪સ્વં સ્વં પ્રતિષ્ઠાપિતલિઙ્ગમર્ચ્ય ॥ ૧૫૭.૨૧॥

૧૫૭.૨૨/૧શુશ્રૂષણં તત્ર કરોતિ વાયોઃ ।
૧૫૭.૨૨/૨સુતોઽનુગામી હનુમાન્ નૃપસ્ય ।
૧૫૭.૨૨/૩ગચ્છન્ નૃપેન્દ્રો હનુમન્તમાહ ।
૧૫૭.૨૨/૪લિઙ્ગાનિ સર્વાણિ વિસર્જયસ્વ ॥ ૧૫૭.૨૨॥

૧૫૭.૨૩/૧મત્સ્થાપિતાન્યુત્તમમન્ત્રવિદ્ભિસ્- ।
૧૫૭.૨૩/૨તથેતરૈઃ શંકરકિંકરૈશ્ચ ।
૧૫૭.૨૩/૩નોદ્વાસ્ય પૂજાં પરશંકરેણ ।
૧૫૭.૨૩/૪બાહ્યં સમાયોજ્યમહો ભવસ્ય ॥ ૧૫૭.૨૩॥

૧૫૭.૨૪/૧તિષ્ઠન્તિ સુસ્થાસ્તદનાદરેણ ।
૧૫૭.૨૪/૨તે ખડ્ગપત્રાદિષુ સમ્ભવન્તિ ।
૧૫૭.૨૪/૩યેઽશ્રદ્દધાનાઃ શિવલિઙ્ગપૂજામ્ ।
૧૫૭.૨૪/૪વિધાય કૃત્યં ન સમાચરન્તિ ॥ ૧૫૭.૨૪॥

૧૫૭.૨૫/૧યથોચિતં તે યમકિંકરૈર્હિ ।
૧૫૭.૨૫/૨પચ્યન્ત એવાખિલદુર્ગતીષુ ।

૧૫૭.૨૫/૩રામાજ્ઞયા વાયુસુતો જગામ ।
૧૫૭.૨૫/૪દોર્ભ્યાં ન ચોત્પાટયિતું શશાક ॥ ૧૫૭.૨૫॥

૧૫૭.૨૬/૧તતઃ સ્વપુચ્છેન ગ્રહીતુકામઃ ।
૧૫૭.૨૬/૨સંવેષ્ટ્ય લિઙ્ગં તુ વિસૃષ્ટકામઃ ।
૧૫૭.૨૬/૩નૈવાશકત્ તન્ મહદ્ અદ્ભુતં સ્યાત્ ।
૧૫૭.૨૬/૪કપીશ્વરાણાં નૃપતેસ્તથૈવ ॥ ૧૫૭.૨૬॥

૧૫૭.૨૭/૧કશ્ચાલયેલ્લબ્ધમહાનુભાવમ્ ।
૧૫૭.૨૭/૨મહેશલિઙ્ગં પુરુષો મનસ્વી ।
૧૫૭.૨૭/૩તન્ નિશ્ચલં પ્રેક્ષ્ય મહાનુભાવો ।
૧૫૭.૨૭/૪નૃપપ્રવીરઃ સહસા જગામ ॥ ૧૫૭.૨૭॥

૧૫૭.૨૮/૧વિપ્રાન્ અથામન્ત્ર્ય વિધાય પૂજામ્ ।
૧૫૭.૨૮/૨પ્રદક્ષિણીકૃત્ય ચ રામચન્દ્રઃ ।
૧૫૭.૨૮/૩શુદ્ધાતિશુદ્ધેન હૃદાખિલૈસ્તૈર્।
૧૫૭.૨૮/૪લિઙ્ગાનિ સર્વાણિ નનામ રામઃ ॥ ૧૫૭.૨૮॥

૧૫૭.૨૯/૧કિષ્કિન્ધવાસિપ્રવરૈરશેષૈઃ ।
૧૫૭.૨૯/૨સંસેવિતં તીર્થમતો બભૂવ ।
૧૫૭.૨૯/૩અત્રાપ્લવાદ્ એવ મહાન્તિ પાપાન્ય્।
૧૫૭.૨૯/૪અપિ ક્ષયં યાન્તિ ન સંશયોઽત્ર ॥ ૧૫૭.૨૯॥

૧૫૭.૩૦/૧પુનશ્ચ ગઙ્ગાં પ્રણનામ ભક્ત્યા ।
૧૫૭.૩૦/૨પ્રસીદ માતર્મમ ગૌતમીતિ ।
૧૫૭.૩૦/૩જલ્પન્ મુહુર્વિસ્મિતચિત્તવૃત્તિર્।
૧૫૭.૩૦/૪વિલોકયન્ પ્રણમન્ ગૌતમીં તામ્ ॥ ૧૫૭.૩૦॥

૧૫૭.૩૧/૧તતઃ પ્રભૃત્યેતદ્ અતીવ પુણ્યમ્ ।
૧૫૭.૩૧/૨કિષ્કિન્ધતીર્થં વિબુધા વદન્તિ ।
૧૫૭.૩૧/૩પઠેત્ સ્મરેદ્ વાપિ શ◌ૃણોતિ ભક્ત્યા ।
૧૫૭.૩૧/૪પાપાપહં કિં પુનઃ સ્નાનદાનૈઃ ॥ ૧૫૭.૩૧॥

૧૫૮.૧/૧બ્રહ્મોવાચ । વ્યાસતીર્થમિતિ ખ્યાતં પ્રાચેતસમતઃ પરમ્ ।
૧૫૮.૧/૨નાતઃ પરતરં કિંચિત્ પાવનં સર્વસિદ્ધિદમ્ ॥ ૧૫૮.૧॥

૧૫૮.૨/૧દશ મે માનસાઃ પુત્રાઃ સ્રષ્ટારો જગતામપિ ।

૧૫૮.૨/૨અન્તં જિજ્ઞાસવસ્તે વૈ પૃથિવ્યા જગ્મુરોજસા ॥ ૧૫૮.૨॥

૧૫૮.૩/૧પુનઃ સૃષ્ટાઃ પુનસ્તેઽપિ યાતાસ્તાન્ સમવેક્ષિતુમ્ ।
૧૫૮.૩/૨નૈવ તેઽપિ સમાયાતા યે ગતાસ્તે ગતા ગતાઃ ॥ ૧૫૮.૩॥

૧૫૮.૪/૧તદોત્પન્ના મહાપ્રાજ્ઞા દિવ્યા આઙ્ગિરસો મુને ।
૧૫૮.૪/૨વેદવેદાઙ્ગતત્ત્વજ્ઞાઃ સર્વશાસ્ત્રવિશારદાઃ ॥ ૧૫૮.૪॥

૧૫૮.૫/૧તેઽનુજ્ઞાતા અઙ્ગિરસા ગુરું નત્વા તપોધનાઃ ।
૧૫૮.૫/૨તપસે નિશ્ચિતાઃ સર્વે નૈવ પૃષ્ટ્વા તુ માતરમ્ ॥ ૧૫૮.૫॥

૧૫૮.૬/૧સર્વેભ્યો હ્યધિકા માતા ગુરુભ્યો ગૌરવેણ હિ ।
૧૫૮.૬/૨તદા નારદ કોપેન સા શશાપ તદાત્મજાન્ ॥ ૧૫૮.૬॥

૧૫૮.૭/૧માતોવાચ । મામનાદૃત્ય યે પુત્રાઃ પ્રવૃત્તાશ્ચરિતું તપઃ ।
૧૫૮.૭/૨સર્વૈરપિ પ્રકારૈસ્તન્ ન તેષાં સિદ્ધિમેષ્યતિ ॥ ૧૫૮.૭॥

૧૫૮.૮/૧બ્રહ્મોવાચ । નાનાદેશાંશ્ચ ચિન્વાનાસ્તપઃસિદ્ધિં ન યાન્તિ ચ ।
૧૫૮.૮/૨વિઘ્નમન્વેતિ તાન્ સર્વાન્ ઇતશ્ચેતશ્ચ ધાવતઃ ॥ ૧૫૮.૮॥

૧૫૮.૯/૧ક્વાપિ તદ્ રાક્ષસૈર્વિઘ્નં ક્વાપિ તન્ માનુષૈરભૂત્ ।
૧૫૮.૯/૨પ્રમદાભિઃ ક્વચિચ્ચાપિ ક્વાપિ તદ્દેહદોષતઃ ॥ ૧૫૮.૯॥

૧૫૮.૧૦/૧એવં તુ ભ્રમમાણાસ્તે યયુઃ સર્વે તપોનિધિમ્ ।
૧૫૮.૧૦/૨અગસ્ત્યં તપતાં શ્રેષ્ઠં કુમ્ભયોનિં જગદ્ગુરુમ્ ॥ ૧૫૮.૧૦॥

૧૫૮.૧૧/૧નમસ્કૃત્વા હ્યાઙ્ગિરસા હ્યગ્નિવંશસમુદ્ભવાઃ ।
૧૫૮.૧૧/૨દક્ષિણાશાપતિં શાન્તં વિનીતાઃ પ્રષ્ટુમુદ્યતાઃ ॥ ૧૫૮.૧૧॥

૧૫૮.૧૨/૧આઙ્ગિરસા ઊચુઃ । ભગવન્ કેન દોષેણ તપોઽસ્માકં ન સિધ્યતિ ।
૧૫૮.૧૨/૨નાનાવિધૈરપ્યુપાયૈઃ કુર્વતાં ચ પુનઃ પુનઃ ॥ ૧૫૮.૧૨॥

૧૫૮.૧૩/૧કિં કુર્મઃ કઃ પ્રકારોઽત્ર તપસ્યેવ ભવામ કિમ્ ।
૧૫૮.૧૩/૨ઉપાયં બ્રૂહિ વિપ્રેન્દ્ર જ્યેષ્ઠોઽસિ તપસા ધ્રુવમ્ ॥ ૧૫૮.૧૩॥

૧૫૮.૧૪/૧જ્ઞાતાસિ જ્ઞાનિનાં બ્રહ્મન્ વક્તાસિ વદતાં વરઃ ।
૧૫૮.૧૪/૨શાન્તોઽસિ યમિનાં નિત્યં દયાવાન્ પ્રિયકૃત્ તથા ॥ ૧૫૮.૧૪॥

૧૫૮.૧૫/૧અક્રોધનશ્ચ ન દ્વેષ્ટા તસ્માદ્ બ્રૂહિ વિવક્ષિતમ્ ।
૧૫૮.૧૫/૨સાહંકારા દયાહીના ગુરુસેવાવિવર્જિતાઃ ।
૧૫૮.૧૫/૩અસત્યવાદિનઃ ક્રૂરા ન તે તત્ત્વં વિજાનતે ॥ ૧૫૮.૧૫॥

૧૫૮.૧૬/૧બ્રહ્મોવાચ । અગસ્ત્યઃ પ્રાહ તાન્ સર્વાન્ ક્ષણં ધ્યાત્વા શનૈઃ શનૈઃ ॥ ૧૫૮.૧૬॥

૧૫૮.૧૭/૧અગસ્ત્ય ઉવાચ । શાન્તાત્માનો ભવન્તો વૈ સ્રષ્ટારો બ્રહ્મણા કૃતાઃ ।
૧૫૮.૧૭/૨ન પર્યાપ્તં તપશ્ચાભૂત્ સ્મરધ્વં સ્મયકારણમ્ ॥ ૧૫૮.૧૭॥

૧૫૮.૧૮/૧બ્રહ્મણા નિર્મિતાઃ પૂર્વં યે ગતાઃ સુખમેધતે ।
૧૫૮.૧૮/૨યે ગતાઃ પુનરન્વેષ્ટું તે ચ ત્વાઙ્ગિરસોઽભવન્ ॥ ૧૫૮.૧૮॥

૧૫૮.૧૯/૧તે યૂયં ચ પુનઃ કાલે યાતા યાતાઃ શનૈઃ શનૈઃ ।
૧૫૮.૧૯/૨પ્રજાપતેરપ્યધિકા ભવિતારો ન સંશયઃ ॥ ૧૫૮.૧૯॥

૧૫૮.૨૦/૧ઇતો યાન્તુ તપસ્તપ્તું ગઙ્ગાં ત્રૈલોક્યપાવનીમ્ ।
૧૫૮.૨૦/૨નોપાયોઽન્યોઽસ્તિ સંસારે વિના ગઙ્ગાં શિવપ્રિયામ્ ॥ ૧૫૮.૨૦॥

૧૫૮.૨૧/૧તત્રાશ્રમે પુણ્યદેશે જ્ઞાનદં પૂજયિષ્યથ ।
૧૫૮.૨૧/૨સ ચ્છેદયિષ્યત્યખિલં સંશયં વો મહામતિઃ ।
૧૫૮.૨૧/૩ન સિદ્ધિઃ ક્વાપિ કેષાંચિદ્ વિના સદ્ગુરુણા યતઃ ॥ ૧૫૮.૨૧॥

૧૫૮.૨૨/૧બ્રહ્મોવાચ । તે તમૂચુર્મુનિવરં જ્ઞાનદઃ કોઽભિધીયતે ।
૧૫૮.૨૨/૨બ્રહ્મા વિષ્ણુર્મહેશો વા આદિત્યો વાપિ ચન્દ્રમાઃ ॥ ૧૫૮.૨૨॥

૧૫૮.૨૩/૧અગ્નિશ્ચ વરુણઃ કઃ સ્યાજ્જ્ઞાનદો મુનિસત્તમ ।
૧૫૮.૨૩/૨અગસ્ત્યઃ પુનરપ્યાહ જ્ઞાનદઃ શ્રૂયતામયમ્ ॥ ૧૫૮.૨૩॥

૧૫૮.૨૪/૧યા આપઃ સોઽગ્નિરિત્યુક્તો યોઽગ્નિઃ સૂર્યઃ સ ઉચ્યતે ।
૧૫૮.૨૪/૨યશ્ચ સૂર્યઃ સ વૈ વિષ્ણુર્યશ્ચ વિષ્ણુઃ સ ભાસ્કરઃ ॥ ૧૫૮.૨૪॥

૧૫૮.૨૫/૧યશ્ચ બ્રહ્મા સ વૈ રુદ્રો યો રુદ્રઃ સર્વમેવ તત્ ।
૧૫૮.૨૫/૨યસ્ય સર્વં તુ તજ્જ્ઞાનં જ્ઞાનદઃ સોઽત્ર કીર્ત્યતે ॥ ૧૫૮.૨૫॥

૧૫૮.૨૬/૧દેશિકપ્રેરકવ્યાખ્યા+ ।કૃદુપાધ્યાયદેહદાઃ ।
૧૫૮.૨૬/૨ગુરવઃ સન્તિ બહવસ્તેષાં જ્ઞાનપ્રદો મહાન્ ॥ ૧૫૮.૨૬॥

૧૫૮.૨૭/૧તદ્ એવ જ્ઞાનમત્રોક્તં યેન ભેદો વિહન્યતે ।
૧૫૮.૨૭/૨એક એવાદ્વયઃ શમ્ભુરિન્દ્રમિત્રાગ્નિનામભિઃ ।
૧૫૮.૨૭/૩વદન્તિ બહુધા વિપ્રા ભ્રાન્તોપકૃતિહેતવે ॥ ૧૫૮.૨૭॥

૧૫૮.૨૮/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા મુનેર્વાક્યં ગાથા ગાયન્ત એવ તે ।

૧૫૮.૨૮/૨જગ્મુઃ પઞ્ચોત્તરાં ગઙ્ગાં પઞ્ચ જગ્મુશ્ચ દક્ષિણામ્ ॥ ૧૫૮.૨૮॥

૧૫૮.૨૯/૧અગસ્ત્યેનોદિતાન્ દેવાન્ પૂજયન્તો યથાવિધિ ।
૧૫૮.૨૯/૨આસનેષુ વિશેષેણ હ્યાસીનાસ્તત્ત્વચિન્તકાઃ ॥ ૧૫૮.૨૯॥

૧૫૮.૩૦/૧તેષાં સર્વે સુરગણાઃ પ્રીતિમન્તોઽભવન્ મુને ।
૧૫૮.૩૦/૨સ્રષ્ટૃત્વં તુ યુગાદૌ યત્ કલ્પિતં વિશ્વયોનિના ॥ ૧૫૮.૩૦॥

૧૫૮.૩૧/૧અધર્માણાં નિવૃત્ત્યર્થં વેદાનાં સ્થાપનાય ચ ।
૧૫૮.૩૧/૨લોકાનામુપકારાર્થં ધર્મકામાર્થસિદ્ધયે ॥ ૧૫૮.૩૧॥

૧૫૮.૩૨/૧પુરાણસ્મૃતિવેદાર્થ+ ।ધર્મશાસ્ત્રાર્થનિશ્ચયે ।
૧૫૮.૩૨/૨સ્રષ્ટૃત્વં જગતામિષ્ટં તાદૃગ્રૂપા ભવિષ્યથ ॥ ૧૫૮.૩૨॥

૧૫૮.૩૩/૧પ્રજાપતિત્વં તેષાં વૈ ભવિષ્યતિ શનૈઃ ક્રમાત્ ।
૧૫૮.૩૩/૨યદા હ્યધર્મો ભવિતા વેદાનાં ચ પરાભવઃ ॥ ૧૫૮.૩૩॥

૧૫૮.૩૪/૧વેદાનાં વ્યસનં તેભ્યો ભાવિવ્યાસાસ્તતસ્તુ તે ।
૧૫૮.૩૪/૨યદા યદા તુ ધર્મસ્ય ગ્લાનિર્વેદસ્ય દૃશ્યતે ॥ ૧૫૮.૩૪॥

૧૫૮.૩૫/૧તદા તદા તુ તે વ્યાસા ભવિષ્યન્ત્યુપકારિણઃ ।
૧૫૮.૩૫/૨તેષાં યત્ તપસઃ સ્થાનં ગઙ્ગાયાસ્તીરમુત્તમમ્ ॥ ૧૫૮.૩૫॥

૧૫૮.૩૬/૧તત્ર તત્ર શિવો વિષ્ણુરહમાદિત્ય એવ ચ ।
૧૫૮.૩૬/૨અગ્નિરાપઃ સર્વમિતિ તત્ર સંનિહિતં સદા ॥ ૧૫૮.૩૬॥

૧૫૮.૩૭/૧નૈતેભ્યઃ પાવનં કિંચિન્ નૈતેભ્યસ્ત્વધિકં ક્વચિત્ ।
૧૫૮.૩૭/૨તત્તદાકારતાં પ્રાપ્તં પરં બ્રહ્મૈવ કેવલમ્ ॥ ૧૫૮.૩૭॥

૧૫૮.૩૮/૧સર્વાત્મકઃ શિવો વ્યાપી સર્વભાવસ્વરૂપધૃક્ ।
૧૫૮.૩૮/૨વિશેષતસ્તત્ર તીર્થે સર્વપ્રાણ્યનુકમ્પયા ॥ ૧૫૮.૩૮॥

૧૫૮.૩૯/૧સર્વૈર્દેવૈરનુવૃતસ્તદનુગ્રહકારકઃ ।
૧૫૮.૩૯/૨ધર્મવ્યાસાસ્તુ તે જ્ઞેયા વેદવ્યાસાસ્તથૈવ ચ ॥ ૧૫૮.૩૯॥

૧૫૮.૪૦/૧તેષાં તીર્થં તેન નામ્ના વ્યપદિષ્ટં જગત્ત્રયે ।
૧૫૮.૪૦/૨પાપપઙ્કક્ષાલનામ્ભો મોહધ્વાન્તમદાપહમ્ ।
૧૫૮.૪૦/૩સર્વસિદ્ધિપ્રદં પુંસાં વ્યાસતીર્થમનુત્તમમ્ ॥ ૧૫૮.૪૦॥

૧૫૯.૧/૧બ્રહ્મોવાચ । વઞ્જરાસંગમં નામ તીર્થં ત્રૈલોક્યવિશ્રુતમ્ ।
૧૫૯.૧/૨ઋષિભિઃ સેવિતં નિત્યં સિદ્ધૈ રાજર્ષિભિસ્તથા ॥ ૧૫૯.૧॥

૧૫૯.૨/૧દાસત્વમગમત્ પૂર્વં નાગાનાં ગરુડઃ ખગઃ ।
૧૫૯.૨/૨માતૃદાસ્યાત્ તદા દુઃખ+ ।પરિસંતપ્તમાનસઃ ।
૧૫૯.૨/૩કદાચિચ્ચિન્તયામાસ રહઃ સ્થિત્વા વિનિશ્વસન્ ॥ ૧૫૯.૨॥

૧૫૯.૩/૧ગરુડ ઉવાચ । ત એવ ધન્યા લોકેઽસ્મિન્ કૃતપુણ્યાસ્ત એવ હિ ।
૧૫૯.૩/૨નાન્યસેવા કૃતા યૈસ્તુ ન યેષાં વ્યસનાગમઃ ॥ ૧૫૯.૩॥

૧૫૯.૪/૧સુખં તિષ્ઠન્તિ ગાયન્તિ સ્વપન્તિ ચ હસન્તિ ચ ।
૧૫૯.૪/૨સ્વદેહપ્રભવો ધન્યા ધિગ્ ધિગ્ અન્યવશે સ્થિતાન્ ॥ ૧૫૯.૪॥

૧૫૯.૫/૧બ્રહ્મોવાચ । ઇતિ ચિન્તાસમાવિષ્ટો જનનીમેત્ય દુઃખિતઃ ।
૧૫૯.૫/૨પર્યપૃચ્છદ્ અમેયાત્મા વૈનતેયોઽથ માતરમ્ ॥ ૧૫૯.૫॥

૧૫૯.૬/૧ગરુડ ઉવાચ । કસ્યાપરાધાન્ માતસ્ત્વં પિતુર્વા મમ વાન્યતઃ ।
૧૫૯.૬/૨દાસીત્વમાપ્તા વદ તત્+ ।કારણં મમ પૃચ્છતઃ ॥ ૧૫૯.૬॥

૧૫૯.૭/૧બ્રહ્મોવાચ । સાબ્રવીત્ પુત્રમાત્મીયમરુણસ્યાનુજં પ્રિયમ્ ॥ ૧૫૯.૭॥

૧૫૯.૮/૧વિનતોવાચ । નૈવ કસ્યાપરાધોઽસ્તિ સ્વાપરાધો મયોદિતઃ ।
૧૫૯.૮/૨યસ્યા વાક્યં વિપર્યેતિ સા દાસી સ્યાન્ મયોદિતમ્ ॥ ૧૫૯.૮॥

૧૫૯.૯/૧કદ્રૂશ્ચાપિ તથૈવાહં સા મયા સંયુતા યયૌ ।
૧૫૯.૯/૨કદ્રવા મમાભવદ્ વાદશ્છદ્મનાહં તયા જિતા ॥ ૧૫૯.૯॥

૧૫૯.૧૦/૧વિધિર્હિ બલવાંસ્તાત કાં કાં ચેષ્ટાં ન ચેષ્ટતે ।
૧૫૯.૧૦/૨એવં દાસીત્વમગમં કદ્રવાઃ કશ્યપનન્દન ।
૧૫૯.૧૦/૩યદા દાસી તુ જાતાહં દાસોઽભૂસ્ત્વં દ્વિજન્મજ ॥ ૧૫૯.૧૦॥

૧૫૯.૧૧/૧બ્રહ્મોવાચ । તૂષ્ણીં તદા બભૂવાસૌ ગરુડોઽતીવ દુઃખિતઃ ।
૧૫૯.૧૧/૨ન કિંચિદ્ ઊચે જનનીં ચિન્તયન્ ભવિતવ્યતામ્ ॥ ૧૫૯.૧૧॥

૧૫૯.૧૨/૧કદ્રૂઃ કદાચિત્ સા પ્રાહ પુત્રાણાં હિતમિચ્છતી ।
૧૫૯.૧૨/૨આત્મનો ભૂતિમિચ્છન્તી વિનતાં ખગમાતરમ્ ॥ ૧૫૯.૧૨॥

૧૫૯.૧૩/૧કદ્રૂરુવાચ । પુત્રઃ સૂર્યં નમસ્કર્તું તવ યાત્યનિવારિતઃ ।
૧૫૯.૧૩/૨અહો લોકત્રયેઽપ્યસ્મિન્ ધન્યાસિ બત દાસ્યપિ ॥ ૧૫૯.૧૩॥

૧૫૯.૧૪/૧બ્રહ્મોવાચ । સ્વદુઃખં ગૂહમાના સા કદ્રૂં પ્રાહ સુવિસ્મિતા ॥ ૧૫૯.૧૪॥

૧૫૯.૧૫/૧વિનતોવાચ । તવ પુત્રાસ્તુ કિમિતિ રવિં દ્રષ્ટું ન

યાન્તિ ચ ॥ ૧૫૯.૧૫॥

૧૫૯.૧૬/૧કદ્રૂરુવાચ । પુત્રાન્ મદીયાન્ સુભગે નય નાગાલયં પ્રતિ ।
૧૫૯.૧૬/૨સમુદ્રસ્ય સમીપે તુ તદ્ આસ્તે શીતલં સરઃ ॥ ૧૫૯.૧૬॥

૧૫૯.૧૭/૧બ્રહ્મોવાચ । સુપર્ણસ્ત્વવહન્ નાગાન્ કદ્રૂં ચ વિનતા તથા ।
૧૫૯.૧૭/૨તતઃ પ્રોવાચ મુદિતા વૈનતેયસ્ય માતરમ્ ॥ ૧૫૯.૧૭॥

૧૫૯.૧૮/૧સુરાણાં નેતુ નિલયં ગરુડો મત્સુતાન્ ઇતિ ।
૧૫૯.૧૮/૨પુનઃ પ્રાહ સર્પમાતા ગરુડં વિનયાન્વિતમ્ ॥ ૧૫૯.૧૮॥

૧૫૯.૧૯/૧સર્પમાતોવાચ । પુત્રા મે દ્રષ્ટુમિચ્છન્તિ હંસં ત્રિજગતાં ગુરુમ્ ।
૧૫૯.૧૯/૨નમસ્કૃત્વા તતઃ સૂર્યમેષ્યન્તિ નિલયં મમ ।
૧૫૯.૧૯/૩હણ્ડે ત્વં નય પુત્રાન્ મે સૂર્યમણ્ડલમન્વહમ્ ॥ ૧૫૯.૧૯॥

૧૫૯.૨૦/૧બ્રહ્મોવાચ । સા વેપમાના વિનતા દીના કદ્રૂમભાષત ॥ ૧૫૯.૨૦॥

૧૫૯.૨૧/૧વિનતોવાચ । નાહં ક્ષમા સર્પમાતઃ પુત્રો મે નેષ્યતે સુતાન્ ।
૧૫૯.૨૧/૨દૃષ્ટ્વા દિનકરં દેવં પુનરેવ પ્રયાન્તુ તે ॥ ૧૫૯.૨૧॥

૧૫૯.૨૨/૧બ્રહ્મોવાચ । વિનતા સ્વસુતં પ્રાહ વિહગાનામધીશ્વરમ્ ।
૧૫૯.૨૨/૨નમસ્કર્તુમથેચ્છન્તિ નાગાઃ સ્વામિત્વમાગતાઃ ॥ ૧૫૯.૨૨॥

૧૫૯.૨૩/૧ભાસ્વન્તમિત્યુવાચેયં માં સર્પજનની હઠાત્ ।
૧૫૯.૨૩/૨તથેત્યુક્ત્વા સ ગરુડો મામારોહન્તુ પન્નગાઃ ॥ ૧૫૯.૨૩॥

૧૫૯.૨૪/૧તદારૂઢં સર્પસૈન્યં ગરુડં વિહગાધિપમ્ ।
૧૫૯.૨૪/૨શનૈઃ શનૈરુપગમદ્ યત્ર દેવો દિવાકરઃ ।
૧૫૯.૨૪/૩તે દહ્યમાનાસ્તીક્ષ્ણેન ભાનુતાપેન વિવ્યથુઃ ॥ ૧૫૯.૨૪॥

૧૫૯.૨૫/૧સર્પા ઊચુઃ । નિવર્તસ્વ મહાપ્રાજ્ઞ પતંગાય નમો નમઃ ।
૧૫૯.૨૫/૨અલં સૂર્યસ્ય સદનં દગ્ધાઃ સૂર્યસ્ય તેજસા ।
૧૫૯.૨૫/૩યામસ્ત્વયા વા ગરુડ વિહાય ત્વામથાપિ વા ॥ ૧૫૯.૨૫॥

૧૫૯.૨૬/૧બ્રહ્મોવાચ । એવં નાગૈરુચ્યમાન આદિત્યં દર્શયામિ વઃ ।
૧૫૯.૨૬/૨ઇત્યુક્ત્વા ગગનં શીઘ્રં જગામાદિત્યસમ્મુખઃ ॥ ૧૫૯.૨૬॥

૧૫૯.૨૭/૧દગ્ધભોગા નિપેતુસ્તે દ્વીપં તં વીરણં પ્રતિ ।
૧૫૯.૨૭/૨બહવઃ શતસાહસ્રાઃ પીડિતા દગ્ધવિગ્રહાઃ ॥ ૧૫૯.૨૭॥

૧૫૯.૨૮/૧પુત્રાણામાર્તસંનાદં પતિતાનાં મહીતલે ।

૧૫૯.૨૮/૨આશ્વાસિતું સમાયાતા તાન્ સા કદ્રૂઃ સુવિહ્વલા ॥ ૧૫૯.૨૮॥

૧૫૯.૨૯/૧ઉવાચ વિનતાં કદ્રૂસ્તવ પુત્રોऽતિદુષ્કૃતમ્ ।
૧૫૯.૨૯/૨કૃતવાન્ અતિદુર્મેધા યેષાં શાન્તિર્ન વિદ્યતે ॥ ૧૫૯.૨૯॥

૧૫૯.૩૦/૧નાન્યથા કર્તુમાયાતિ સ્વામિવાક્યં ફણીશ્વરઃ ।
૧૫૯.૩૦/૨સ કાશ્યપો બૃહત્તેજા યદ્યત્ર સ્યાદ્ અનામયમ્ ॥ ૧૫૯.૩૦॥

૧૫૯.૩૧/૧ભવેચ્ચૈવં કથં શાન્તિઃ પુત્રાણાં મમ ભામિનિ ।
૧૫૯.૩૧/૨કદ્રવાસ્તદ્ વચનં શ્રુત્વા વિનતા હ્યતિભીતવત્ ॥ ૧૫૯.૩૧॥

૧૫૯.૩૨/૧પુત્રમાહ મહાત્માનં ગરુડં વિહગાધિપમ્ ॥ ૧૫૯.૩૨॥

૧૫૯.૩૩/૧વિનતોવાચ । નેદં યુક્તતરં પુત્ર ભૂષણં વિનયેન હિ ।
૧૫૯.૩૩/૨વર્તિતું યુક્તમિત્યુક્તં વૈપરીત્યં ન યુજ્યતે ॥ ૧૫૯.૩૩॥

૧૫૯.૩૪/૧નામિત્રેષ્વપિ કર્તવ્યં સદ્ભિર્જિહ્મં કદાચન ।
૧૫૯.૩૪/૨શ્રોત્રિયે ચાન્ત્યજે વાપિ સમં ચન્દ્રઃ પ્રકાશતે ॥ ૧૫૯.૩૪॥

૧૫૯.૩૫/૧કુર્વન્ત્યનિષ્ટં કપટૈસ્ત એવ મમ પુત્રક ।
૧૫૯.૩૫/૨પ્રસહ્ય કર્તું યે સાક્ષાદ્ અશક્તાઃ પુરુષાધમાઃ ॥ ૧૫૯.૩૫॥

૧૫૯.૩૬/૧બ્રહ્મોવાચ । વિનતા ચ તતઃ પ્રાહ કદ્રૂં તાં સર્પમાતરમ્ ॥ ૧૫૯.૩૬॥

૧૫૯.૩૭/૧વિનતોવાચ । કિં કૃત્વા શાન્તિરભ્યેતિ પુત્રાણાં તે કરોમિ તત્ ।
૧૫૯.૩૭/૨જરયા તુ ગૃહીતાસ્તે વદ શાન્તિં કરોમિ તત્ ॥ ૧૫૯.૩૭॥

૧૫૯.૩૮/૧બ્રહ્મોવાચ । કદ્રૂરપ્યાહ વિનતાં રસાતલગતં પયઃ ।
૧૫૯.૩૮/૨તેનાભિષેચિતાનાં મે પુત્રાણાં શાન્તિરેષ્યતિ ॥ ૧૫૯.૩૮॥

૧૫૯.૩૯/૧કદ્રવાસ્તદ્ વચનં શ્રુત્વા રસાતલગતં પયઃ ।
૧૫૯.૩૯/૨ક્ષણેનૈવ સમાનીય નાગાંસ્તાન્ અભ્યષેચયત્ ।
૧૫૯.૩૯/૩તતઃ પ્રોવાચ ગરુડો મઘવાનં શતક્રતુમ્ ॥ ૧૫૯.૩૯॥

૧૫૯.૪૦/૧ગરુડ ઉવાચ । મેઘાશ્ચાપ્યત્ર વર્ષન્તુ
ત્રૈલોક્યસ્યોપકારિણઃ ॥ ૧૫૯.૪૦॥

૧૫૯.૪૧/૧બ્રહ્મોવાચ । તથા વવર્ષ પર્જન્યો નાગાનામભવચ્છિવમ્ ।
૧૫૯.૪૧/૨રસાતલભવં ગાઙ્ગં નાગસંજીવનં પયઃ ॥ ૧૫૯.૪૧॥

૧૫૯.૪૨/૧જરાશોકવિનાશાર્થમાનીતં ગરુડેન યત્ ।

૧૫૯.૪૨/૨યત્રાભિષેચિતા નાગાસ્તન્ નાગાલયમુચ્યતે ॥ ૧૫૯.૪૨॥

૧૫૯.૪૩/૧ગરુડેન યતો વારિ આનીતં તદ્ રસાતલાત્ ।
૧૫૯.૪૩/૨તદ્ ગાઙ્ગં વારિ સર્વેષાં સર્વપાપપ્રણાશનમ્ ॥ ૧૫૯.૪૩॥

૧૫૯.૪૪/૧જરાયા વારણં યસ્માન્ નાગાનામભવચ્છિવમ્ ।
૧૫૯.૪૪/૨રસાતલભવં ગાઙ્ગં નાગસંજીવનં યતઃ ॥ ૧૫૯.૪૪॥

૧૫૯.૪૫/૧જરાશોકવિનાશાર્થં ગઙ્ગાયા દક્ષિણે તટે ।
૧૫૯.૪૫/૨સાક્ષાદ્ અમૃતસંવાહા વઞ્જરા સાભવન્ નદી ॥ ૧૫૯.૪૫॥

૧૫૯.૪૬/૧જરાદારિદ્ર્યસંતાપ+ આરિણી ક્લેશવારિણી ।
૧૫૯.૪૬/૨રસાતલભવા ગઙ્ગા મર્ત્યલોકભવા તુ યા ॥ ૧૫૯.૪૬॥

૧૫૯.૪૭/૧તયોશ્ચ સંગમો યઃ સ્યાત્ કિં પુનસ્તત્ર વર્ણ્યતે ।
૧૫૯.૪૭/૨યસ્યાનુસ્મરણાદ્ એવ નાશં યાન્ત્યઘસંચયાઃ ॥ ૧૫૯.૪૭॥

૧૫૯.૪૮/૧તત્ર ચ સ્નાનદાનાનાં ફલં કો વક્તુમીશ્વરઃ ।
૧૫૯.૪૮/૨સપાદં તત્ર તીર્થાનાં લક્ષમાહુર્મનીષિણઃ ॥ ૧૫૯.૪૮॥

૧૫૯.૪૯/૧સર્વસમ્પત્તિદાતૄણાં સર્વપાપૌઘહારિણામ્ ।
૧૫૯.૪૯/૨વઞ્જરાસંગમસમં તીર્થં ક્વાપિ ન વિદ્યતે ।
૧૫૯.૪૯/૩યદનુસ્મરણેનાપિ વિપદ્યન્તે વિપત્તયઃ ॥ ૧૫૯.૪૯॥

૧૬૦.૧/૧બ્રહ્મોવાચ । દેવાગમં નામ તીર્થં સર્વકામપ્રદં શિવમ્ ।
૧૬૦.૧/૨ભુક્તિમુક્તિપ્રદં નૃણાં પિતૄણાં તૃપ્તિકારકમ્ ॥ ૧૬૦.૧॥

૧૬૦.૨/૧તત્ર વૃત્તં સમાખ્યાસ્યે તવ યત્નેન નારદ ।
૧૬૦.૨/૨દેવાનામસુરાણાં ચ સ્પર્ધાભૂદ્ ધનહેતવે ॥ ૧૬૦.૨॥

૧૬૦.૩/૧સ્વર્ગઃ સુરાણામભવદ્ અસુરાણામિલાભવત્ ।
૧૬૦.૩/૨કર્મભૂમિમવષ્ટભ્ય અસુરાઃ સર્વતોઽભવન્ ॥ ૧૬૦.૩॥

૧૬૦.૪/૧દેવાનાં યજ્ઞભાગાંશ્ચ દાતૄન્ ઘ્નન્ત્યસુરાસ્તતઃ ।
૧૬૦.૪/૨તતઃ સુરગણાઃ સર્વે યજ્ઞભાગૈર્વિના કૃતાઃ ॥ ૧૬૦.૪॥

૧૬૦.૫/૧વ્યથિતા મામુપાજગ્મુઃ કિં કૃત્યમિતિ ચાબ્રુવન્ ।
૧૬૦.૫/૨મયા ચોક્તાઃ સુરગણા યુદ્ધે જિત્વાસુરાન્ બલાત્ ॥ ૧૬૦.૫॥

૧૬૦.૬/૧ભુવં પ્રાપ્સ્યથ કર્માણિ હવીંષિ ચ યશાંસિ ચ ।
૧૬૦.૬/૨તથેત્યુક્ત્વા ગતા દેવા ભૂમિં તે સમરાર્થિનઃ ॥ ૧૬૦.૬॥

૧૬૦.૭/૧દૈત્યાશ્ચ દાનવાશ્ચૈવ રાક્ષસા બલદર્પિતાઃ ।
૧૬૦.૭/૨એકીભૂત્વા યયુસ્તેઽપિ જયિનો યુદ્ધકાઙ્ક્ષિણઃ ॥ ૧૬૦.૭॥

૧૬૦.૮/૧અહિર્વૃત્રો બલિસ્ત્વાષ્ટ્રિર્નમુચિઃ શમ્બરો મયઃ ।
૧૬૦.૮/૨એતે ચાન્યે ચ બહવો યોદ્ધારો બલદર્પિતાઃ ॥ ૧૬૦.૮॥

૧૬૦.૯/૧અગ્નિરિન્દ્રોઽથ વરુણસ્ત્વષ્ટા પૂષા તથાશ્વિનૌ ।
૧૬૦.૯/૨મરુતો લોકપાલાશ્ચ નાનાયુદ્ધવિશારદાઃ ॥ ૧૬૦.૯॥

૧૬૦.૧૦/૧તે દાનવાઃ સર્વ એવ યામ્યાં વૈ દિશિ સંગરે ।
૧૬૦.૧૦/૨અકુર્વન્ત મહાયત્નં દક્ષિણાર્ણવસંસ્થિતાઃ ॥ ૧૬૦.૧૦॥

૧૬૦.૧૧/૧ત્રિકૂટઃ પર્વતશ્રેષ્ઠો રાક્ષસાનાં પુરાભવત્ ।
૧૬૦.૧૧/૨તદ્બલેન યયુઃ સર્વે તૈઃ સાર્ધં દક્ષિણાર્ણવમ્ ॥ ૧૬૦.૧૧॥

૧૬૦.૧૨/૧સર્વેષાં મેલનં યત્ર પર્વતો મલયસ્તુ સઃ ।
૧૬૦.૧૨/૨મલયસ્યાપિ દેશોઽસૌ દેવારીણામભૂત્ તદા ॥ ૧૬૦.૧૨॥

૧૬૦.૧૩/૧દેવાનાં ગૌતમીતીરે તત્ર સંનિહિતઃ શિવઃ ।
૧૬૦.૧૩/૨ઇતિ તેષાં સમાયોગો દેવાનામભવત્ કિલ ॥ ૧૬૦.૧૩॥

૧૬૦.૧૪/૧દેવાઃ સ્વરથમારૂઢાસ્તત્ર તત્ર સમાગમન્ ।
૧૬૦.૧૪/૨ગૌતમ્યાઃ સરિદમ્બાયાઃ પુલિને વિમલાશયાઃ ॥ ૧૬૦.૧૪॥

૧૬૦.૧૫/૧પ્રસન્નાભીષ્ટદા યા સ્યાત્ પિતૃણામખિલસ્ય તુ ।
૧૬૦.૧૫/૨તતો દેવગણાઃ સર્વે સ્તુત્વા દેવં મહેશ્વરમ્ ।
૧૬૦.૧૫/૩અભયં ચિન્તયામાસુસ્તે સર્વેઽથ પરસ્પરમ્ ॥ ૧૬૦.૧૫॥

૧૬૦.૧૬/૧દેવા ઊચુઃ । અત્રાપ્યુપાયઃ કોઽસ્માકં નિર્જિતાનાં પરૈર્હઠાત્ ।
૧૬૦.૧૬/૨એકમેવાત્ર નઃ શ્રેયો વિજયો વાથવા મૃતિઃ ।
૧૬૦.૧૬/૩સપત્નૈરભિભૂતાનાં જીવિતં ધિઙ્ મનસ્વિનામ્ ॥ ૧૬૦.૧૬॥

૧૬૦.૧૭/૧બ્રહ્મોવાચ । એતસ્મિન્ અન્તરે પુત્ર વાગ્ ઉવાચાશરીરિણી ॥ ૧૬૦.૧૭॥

૧૬૦.૧૮/૧આકાશવાગ્ ઉવાચ । ક્લેશેનાલં સુરગણા ગૌતમીમાશુ ગચ્છત ।
૧૬૦.૧૮/૨ભક્ત્યા હરિહરૌ તત્ર સમારાધયતેશ્વરૌ ॥ ૧૬૦.૧૮॥

૧૬૦.૧૯/૧ગોદાવર્યાસ્તયોશ્ચૈવ પ્રસાદાત્ કિં તુ દુષ્કરમ્ ॥ ૧૬૦.૧૯॥

૧૬૦.૨૦/૧બ્રહ્મોવાચ । પ્રસન્નાભ્યાં હરીશાભ્યાં દેવા જયમભીપ્સિતમ્ ।

૧૬૦.૨૦/૨અવાપ્ય સર્વતો જગ્મુઃ પાલયન્તો દિવૌકસઃ ॥ ૧૬૦.૨૦॥

૧૬૦.૨૧/૧યત્ર દેવાગમો જાતસ્તત્ તીર્થં તેન વિશ્રુતમ્ ।
૧૬૦.૨૧/૨દેવાગમં પ્રશંસન્તિ મુનયસ્તત્ત્વદર્શિનઃ ॥ ૧૬૦.૨૧॥

૧૬૦.૨૨/૧તત્રાશીતિસહસ્રાણિ શિવલિઙ્ગાનિ નારદ ।
૧૬૦.૨૨/૨દેવાગમઃ પર્વતોઽસૌ પ્રિય ઇત્યપિ કથ્યતે ।
૧૬૦.૨૨/૩તતઃ પ્રભૃતિ તત્ તીર્થં દેવપ્રિયમતો વિદુઃ ॥ ૧૬૦.૨૨॥

૧૬૧.૧/૧બ્રહ્મોવાચ । કુશતર્પણમાખ્યાતં પ્રણીતાસંગમં તથા ।
૧૬૧.૧/૨તીર્થં સર્વેષુ લોકેષુ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧૬૧.૧॥

૧૬૧.૨/૧તસ્ય સ્વરૂપં વક્ષ્યામિ શ઼ૃણુ પાપહરં શુભમ્ ।
૧૬૧.૨/૨વિન્ધ્યસ્ય દક્ષિણે પાર્શ્વે સહ્યો નામ મહાગિરિઃ ॥ ૧૬૧.૨॥

૧૬૧.૩/૧યદઙ્ઘ્રિભ્યોઽભવન્ નદ્યો ગોદાભીમરથીમુખાઃ ।
૧૬૧.૩/૨યત્રાભવત્ તદ્ વિરજમેકવીરા ચ યત્ર સા ॥ ૧૬૧.૩॥

૧૬૧.૪/૧ન તસ્ય મહિમા કૈશ્ચિદ્ અપિ શક્યોઽનુવર્ણિતુમ્ ।
૧૬૧.૪/૨તસ્મિન્ ગિરૌ પુણ્યદેશે શ઼ૃણુ નારદ યત્નતઃ ॥ ૧૬૧.૪॥

૧૬૧.૫/૧ગુહ્યાદ્ ગુહ્યતરં વક્ષ્યે સાક્ષાદ્ વેદોદિતં શુભમ્ ।
૧૬૧.૫/૨યન્ ન જાનન્તિ મુનયો દેવાશ્ચ પિતરોઽસુરાઃ ॥ ૧૬૧.૫॥

૧૬૧.૬/૧તદ્ અહં પ્રીતયે વક્ષ્યે શ્રવણાત્ સર્વકામદમ્ ।
૧૬૧.૬/૨પરઃ સ પુરુષો જ્ઞેયો હ્યવ્યક્તોઽક્ષર એવ તુ ॥ ૧૬૧.૬॥

૧૬૧.૭/૧અપરશ્ચ ક્ષરસ્તસ્માત્ પ્રકૃત્યન્વિત એવ ચ ।
૧૬૧.૭/૨નિરાકારાત્ સાવયવઃ પુરુષઃ સમજાયત ॥ ૧૬૧.૭॥

૧૬૧.૮/૧તસ્માદ્ આપઃ સમુદ્ભૂતા અદ્ભ્યશ્ચ પુરુષસ્તથા ।
૧૬૧.૮/૨તાભ્યામબ્જં સમુદ્ભૂતં તત્રાહમભવં મુને ॥ ૧૬૧.૮॥

૧૬૧.૯/૧પૃથિવી વાયુરાકાશ આપો જ્યોતિસ્તથૈવ ચ ।
૧૬૧.૯/૨એતે મત્તઃ પૂર્વતરા એકદૈવાભવન્ મુને ॥ ૧૬૧.૯॥

૧૬૧.૧૦/૧એતાન્ એવ પ્રપશ્યામિ નાન્યત્ સ્થાવરજઙ્ગમમ્ ।
૧૬૧.૧૦/૨નૈવ વેદાસ્તદા ચાસન્ નાહં દ્રષ્ટાસ્મિ કિંચન ॥ ૧૬૧.૧૦॥

૧૬૧.૧૧/૧યસ્માદ્ અહં સમુદ્ભૂતો ન પશ્યેયં તમપ્યથ ।
૧૬૧.૧૧/૨તૂષ્ણીં સ્થિતે મયિ તદા અશ્રૌષં વાચમુત્તમામ્ ॥ ૧૬૧.૧૧॥

૧૬૧.૧૨/૧આકાશવાગ્ ઉવાચ । બ્રહ્મન્ કુરુ જગત્સૃષ્ટિં સ્થાવરસ્ય
ચરસ્ય ચ ॥ ૧૬૧.૧૨॥

૧૬૧.૧૩/૧બ્રહ્મોવાચ । તતોઽહમબ્રવં વાચં પરુષાં તત્ર નારદ ।
૧૬૧.૧૩/૨કથં સ્રક્ષ્યે ક્વ વા સ્રક્ષ્યે કેન સ્રક્ષ્ય ઇદં જગત્ ॥ ૧૬૧.૧૩॥

૧૬૧.૧૪/૧સૈવ વાગ્ અબ્રવીદ્ દૈવી પ્રકૃતિર્યાભિધીયતે ।
૧૬૧.૧૪/૨વિષ્ણુના પ્રેરિતા માતા જગદીશા જગન્મયી ॥ ૧૬૧.૧૪॥

૧૬૧.૧૫/૧આકાશવાગ્ ઉવાચ । યજ્ઞં કુરુ તતઃ શક્તિસ્તે ભવિત્રી ન સંશયઃ ।
૧૬૧.૧૫/૨યજ્ઞો વૈ વિષ્ણુરિત્યેષા શ્રુતિર્બ્રહ્મન્ સનાતની ॥ ૧૬૧.૧૫॥

૧૬૧.૧૬/૧કિં યજ્વનામસાધ્યં સ્યાદ્ ઇહ લોકે પરત્ર ચ ॥ ૧૬૧.૧૬॥

૧૬૧.૧૭/૧બ્રહ્મોવાચ । પુનસ્તામબ્રવં દેવીં ક્વ વા કેનેતિ તદ્ વદ ।
૧૬૧.૧૭/૨યજ્ઞઃ કાર્યો મહાભાગે તતઃ સોવાચ માં પ્રતિ ॥ ૧૬૧.૧૭॥

૧૬૧.૧૮/૧આકાશવાગ્ ઉવાચ । ઓંકારભૂતા યા દેવી માતૃકલ્પા જગન્મયી ।
૧૬૧.૧૮/૨કર્મભૂમૌ યજસ્વેહ યજ્ઞેશં યજ્ઞપૂરુષમ્ ॥ ૧૬૧.૧૮॥

૧૬૧.૧૯/૧સ એવ સાધનં તે સ્યાત્ તેન તં યજ સુવ્રત ।
૧૬૧.૧૯/૨યજ્ઞઃ સ્વાહા સ્વધા મન્ત્રા બ્રાહ્મણા હવિરાદિકમ્ ॥ ૧૬૧.૧૯॥

૧૬૧.૨૦/૧હરિરેવાખિલં તેન સર્વં વિષ્ણોરવાપ્યતે ॥ ૧૬૧.૨૦॥

૧૬૧.૨૧/૧બ્રહ્મોવાચ । પુનસ્તામબ્રવં દેવીં કર્મભૂઃ ક્વ વિધીયતે ।
૧૬૧.૨૧/૨તદા નારદ નૈવાસીદ્ ભાગીરથ્યથ નર્મદા ॥ ૧૬૧.૨૧॥

૧૬૧.૨૨/૧યમુના નૈવ તાપી સા સરસ્વત્યથ ગૌતમી ।
૧૬૧.૨૨/૨સમુદ્રો વા નદઃ કશ્ચિન્ ન સરઃ સરિતોઽમલાઃ ।
૧૬૧.૨૨/૩સા શક્તિઃ પુનરપ્યેવં મામુવાચ પુનઃ પુનઃ ॥ ૧૬૧.૨૨॥

૧૬૧.૨૩/૧દૈવી વાગ્ ઉવાચ । સુમેરોર્દક્ષિણે પાર્શ્વે તથા હિમવતો ગિરેઃ ।
૧૬૧.૨૩/૨દક્ષિણે ચાપિ વિન્ધ્યસ્ય સહ્યાચ્ચૈવાથ દક્ષિણે ।
૧૬૧.૨૩/૩સર્વસ્ય સર્વકાલે તુ કર્મભૂમિઃ શુભોદયા ॥ ૧૬૧.૨૩॥

૧૬૧.૨૪/૧બ્રહ્મોવાચ । તત્ તુ વાક્યમથો શ્રુત્વા ત્યક્ત્વા મેરું મહાગિરિમ્ ।
૧૬૧.૨૪/૨તં પ્રદેશમથાગત્ય સ્થાતવ્યં ક્વેત્યચિન્તયમ્ ।
૧૬૧.૨૪/૩તતો મામબ્રવીત્ સૈવ વિષ્ણોર્વાણ્યશરીરિણી ॥ ૧૬૧.૨૪॥

૧૬૧.૨૫/૧આકાશવાગ્ ઉવાચ । ઇતો ગચ્છ ઇતસ્તિષ્ઠ તથોપવિશ ચાત્ર હિ ।
૧૬૧.૨૫/૨સંકલ્પં કુરુ યજ્ઞસ્ય સ તે યજ્ઞઃ સમાપ્યતે ॥ ૧૬૧.૨૫॥

૧૬૧.૨૬/૧કૃતે ચૈવાથ સંકલ્પે યજ્ઞાર્થે સુરસત્તમ ।
૧૬૧.૨૬/૨યદ્ વદન્ત્યખિલા વેદા વિધે તત્ તત્ સમાચર ॥ ૧૬૧.૨૬॥

૧૬૧.૨૭/૧બ્રહ્મોવાચ । ઇતિહાસપુરાણાનિ યદ્ અન્યચ્છબ્દગોચરમ્ ।
૧૬૧.૨૭/૨સ્વતો મુખે મમ પ્રાયાદ્ અભૂચ્ચ સ્મૃતિગોચરમ્ ॥ ૧૬૧.૨૭॥

૧૬૧.૨૮/૧વેદાર્થશ્ચ મયા સર્વો જ્ઞાતોઽસૌ તત્ક્ષણેન ચ ।
૧૬૧.૨૮/૨તતઃ પુરુષસૂક્તં તદ્ અસ્મરં લોકવિશ્રુતમ્ ॥ ૧૬૧.૨૮॥

૧૬૧.૨૯/૧યજ્ઞોપકરણં સર્વં તદ્ ઉક્તં ચ ત્વકલ્પયમ્ ।
૧૬૧.૨૯/૨તદુક્તેન પ્રકારેણ યજ્ઞપાત્રાણ્યકલ્પયમ્ ॥ ૧૬૧.૨૯॥

૧૬૧.૩૦/૧અહં સ્થિત્વા યત્ર દેશે શુચિર્ભૂત્વા યતાત્મવાન્ ।
૧૬૧.૩૦/૨દીક્ષિતો વિપ્રદેશોઽસૌ મન્નામ્ના તુ પ્રકીર્તિતઃ ॥ ૧૬૧.૩૦॥

૧૬૧.૩૧/૧મદ્દેવયજનં પુણ્યં નામ્ના બ્રહ્મગિરિઃ સ્મૃતઃ ।
૧૬૧.૩૧/૨ચતુરશીતિપર્યન્તં યોજનાનિ મહામુને ॥ ૧૬૧.૩૧॥

૧૬૧.૩૨/૧મદ્દેવયજનં પુણ્યં પૂર્વતો બ્રહ્મણો ગિરેઃ ।
૧૬૧.૩૨/૨તત્ર મધ્યે વેદિકા સ્યાદ્ ગાર્હપત્યોઽસ્ય દક્ષિણે ॥ ૧૬૧.૩૨॥

૧૬૧.૩૩/૧તત્ર ચાહવનીયસ્ય એવમગ્નીંસ્ત્વકલ્પયમ્ ।
૧૬૧.૩૩/૨વિના પત્ન્યા ન સિધ્યેત યજ્ઞઃ શ્રુતિનિદર્શનાત્ ॥ ૧૬૧.૩૩॥

૧૬૧.૩૪/૧શરીરમાત્મનોઽહં વૈ દ્વેધા ચાકરવં મુને ।
૧૬૧.૩૪/૨પૂર્વાર્ધેન તતઃ પત્ની મમાભૂદ્ યજ્ઞસિદ્ધયે ॥ ૧૬૧.૩૪॥

૧૬૧.૩૫/૧ઉત્તરેણ ત્વહં તદ્વદ્ અર્ધો જાયા ઇતિ શ્રુતેઃ ।
૧૬૧.૩૫/૨કાલં વસન્તમુત્કૃષ્ટમાજ્યરૂપેણ નારદ ॥ ૧૬૧.૩૫॥

૧૬૧.૩૬/૧અકલ્પયં તથા ચેધ્મં ગ્રીષ્મં ચાપિ શરદ્ ધવિઃ ।
૧૬૧.૩૬/૨ઋતું ચ પ્રાવૃષં પુત્ર તદા બર્હિરકલ્પયમ્ ॥ ૧૬૧.૩૬॥

૧૬૧.૩૭/૧છન્દાંસિ સપ્ત વૈ તત્ર તદા પરિધયોઽભવન્ ।
૧૬૧.૩૭/૨કલાકાષ્ઠાનિમેષા હિ સમિત્પાત્રકુશાઃ સ્મૃતાઃ ॥ ૧૬૧.૩૭॥

૧૬૧.૩૮/૧યોઽનાદિશ્ચ ત્વનન્તશ્ચ સ્વયં કાલોઽભવત્ તદા ।
૧૬૧.૩૮/૨યૂપરૂપેણ દેવર્ષે યોક્ત્રં ચ પશુબન્ધનમ્ ॥ ૧૬૧.૩૮॥

૧૬૧.૩૯/૧સત્ત્વાદિત્રિગુણાઃ પાશા નૈવ તત્રાભવત્ પશુઃ ।
૧૬૧.૩૯/૨તતોઽહમબ્રવં વાચં વૈષ્ણવીમશરીરિણીમ્ ॥ ૧૬૧.૩૯ ॥

૧૬૧.૪૦/૧વિનૈવ પશુના નાયં યજ્ઞઃ પરિસમાપ્યતે ।
૧૬૧.૪૦/૨તતો મામવદદ્ દેવી સૈવ નિત્યાશરીરિણી ॥ ૧૬૧.૪૦ ॥

૧૬૧.૪૧/૧આકાશવાગ્ ઉવાચ । પૌરુષેણાથ સૂક્તેન સ્તુહિ તં પુરુષં પરમ્ ॥ ૧૬૧.૪૧ ॥

૧૬૧.૪૨/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સ્તૂયમાને દેવદેવે જનાર્દને ।
૧૬૧.૪૨/૨મમ ચોત્પાદકે ભક્ત્યા સૂક્તેન પુરુષસ્ય હિ ॥ ૧૬૧.૪૨ ॥

૧૬૧.૪૩/૧સા ચ મામબ્રવીદ્ દેવી બ્રહ્મન્ માં ત્વં પશું કુરુ ।
૧૬૧.૪૩/૨તદા વિજ્ઞાય પુરુષં જનકં મમ ચાવ્યયમ્ ॥ ૧૬૧.૪૩ ॥

૧૬૧.૪૪/૧કાલયૂપસ્ય પાર્શ્વે તં ગુણપાશૈર્નિવેશિતમ્ ।
૧૬૧.૪૪/૨બર્હિસ્થિતમહં પ્રૌક્ષં પુરુષં જાતમગ્રતઃ ॥ ૧૬૧.૪૪ ॥

૧૬૧.૪૫/૧એતસ્મિન્ન્ અન્તરે તત્ર તસ્માત્ સર્વમભૂદ્ ઇદમ્ ।
૧૬૧.૪૫/૨બ્રાહ્મણાસ્તુ મુખાત્ તસ્યઽભવન્ બાહ્વોશ્ચ ક્ષત્રિયાઃ ॥ ૧૬૧.૪૫ ॥

૧૬૧.૪૬/૧મુખાદ્ ઇન્દ્રસ્તથાગ્નિશ્ચ શ્વસનઃ પ્રાણતોઽભવત્ ।
૧૬૧.૪૬/૨દિશઃ શ્રોત્રાત્ તથા શીર્ષ્ણઃ સર્વઃ સ્વર્ગોઽભવત્ તદા ॥ ૧૬૧.૪૬ ॥

૧૬૧.૪૭/૧મનસશ્ચન્દ્રમા જાતઃ સૂર્યોઽભૂચ્ચક્ષુષસ્તથા ।
૧૬૧.૪૭/૨અન્તરિક્ષં તથા નાભેરૂરુભ્યાં વિશ એવ ચ ॥ ૧૬૧.૪૭ ॥

૧૬૧.૪૮/૧પદ્ભ્યાં શૂદ્રશ્ચ સંજાતસ્તથા ભૂમિરજાયત ।
૧૬૧.૪૮/૨ઋષયો રોમકૂપેભ્ય ઓષધ્યઃ કેશતોઽભવન્ ॥ ૧૬૧.૪૮ ॥

૧૬૧.૪૯/૧ગ્રામ્યારણ્યાશ્ચ પશવો નખેભ્યઃ સર્વતોઽભવન્ ।
૧૬૧.૪૯/૨કૃમિકીટપતંગાદિ પાયૂપસ્થાદ્ અજાયત ॥ ૧૬૧.૪૯ ॥

૧૬૧.૫૦/૧સ્થાવરં જઙ્ગમં કિંચિદ્ દૃશ્યાદૃશ્યં ચ કિંચન ।
૧૬૧.૫૦/૨તસ્માત્ સર્વમભૂદ્ દેવા મત્તશ્ચાપ્યભવન્ પુનઃ ।
૧૬૧.૫૦/૩એતસ્મિન્ન્ અન્તરે સૈવ વિષ્ણોર્વાગ્ અબ્રવીચ્ચ મામ્ ॥ ૧૬૧.૫૦ ॥

૧૬૧.૫૧/૧આકાશવાગ્ ઉવાચ । સર્વં સમ્પૂર્ણમભવત્ સૃષ્ટિર્જાતા તથેપ્સિતા ।
૧૬૧.૫૧/૨ઇદાનીં જુહુધિ હ્યગ્નૌ પાત્રાણિ ચ સમાનિ ચ ॥ ૧૬૧.૫૧ ॥

૧૬૧.૫૨/૧વિસર્જય તથા યૂપં પ્રણીતાં ચ કુશાંસ્તથા ।
૧૬૧.૫૨/૨ઋત્વિગ્રૂપં યજ્ઞરૂપમુદ્દેશ્યં ધ્યેયમેવ ચ ॥ ૧૬૧.૫૨॥

૧૬૧.૫૩/૧સ્રુવં ચ પુરુષં પાશાન્ સર્વં બ્રહ્મન્ વિસર્જય ॥ ૧૬૧.૫૩॥

૧૬૧.૫૪/૧બ્રહ્મોવાચ । તદ્વાક્યસમકાલં તુ ક્રમશો યજ્ઞયોનિષુ ।
૧૬૧.૫૪/૨ગાર્હપત્યે દક્ષિણાગ્નૌ તથા ચૈવ મહામુને ॥ ૧૬૧.૫૪॥

૧૬૧.૫૫/૧પૂર્વસ્મિન્ન્ અપિ ચૈવાગ્નૌ ક્રમશો જુહ્વતસ્તદા ।
૧૬૧.૫૫/૨તત્ર તત્ર જગદ્યોનિમનુસંધાય પૂરુષમ્ ॥ ૧૬૧.૫૫॥

૧૬૧.૫૬/૧મન્ત્રપૂતં શુચિઃ સમ્યગ્ યજ્ઞદેવો જગન્મયઃ ।
૧૬૧.૫૬/૨લોકનાથો વિશ્વકર્તા કુણ્ડાનાં તત્ર સંનિધૌ ॥ ૧૬૧.૫૬॥

૧૬૧.૫૭/૧શુક્લરૂપધરો વિષ્ણુર્ભવેદ્ આહવનીયકે ।
૧૬૧.૫૭/૨શ્યામો વિષ્ણુર્દક્ષિણાગ્નેઃ પીતો ગૃહપતેઃ કવેઃ ॥ ૧૬૧.૫૭॥

૧૬૧.૫૮/૧સર્વકાલં તેષુ વિષ્ણુરતો દેશેષુ સંસ્થિતઃ ।
૧૬૧.૫૮/૨ન તેન રહિતં કિંચિદ્ વિષ્ણુના વિશ્વયોનિના ॥ ૧૬૧.૫૮॥

૧૬૧.૫૯/૧પ્રણીતાયાઃ પ્રણયનં મન્ત્રૈશ્ચાકરવં તતઃ ।
૧૬૧.૫૯/૨પ્રણીતોદકમપ્યેતત્ પ્રણીતેતિ નદી શુભા ॥ ૧૬૧.૫૯॥

૧૬૧.૬૦/૧વ્યસર્જયં પ્રણીતાં તાં માર્જયિત્વા કુશૈરથ ।
૧૬૧.૬૦/૨માર્જને ક્રિયમાણે તુ પ્રણીતોદકબિન્દવઃ ॥ ૧૬૧.૬૦॥

૧૬૧.૬૧/૧પતિતાસ્તત્ર તીર્થાનિ જાતાનિ ગુણવન્તિ ચ ।
૧૬૧.૬૧/૨સંજાતા મુનિશાર્દૂલ સ્નાનાત્ ક્રતુફલપ્રદા ॥ ૧૬૧.૬૧॥

૧૬૧.૬૨/૧યાલંકૃતા સર્વકાલં દેવદેવેન શાર્ઙ્ગિણા ।
૧૬૧.૬૨/૨સોપાનપઙ્ક્તિઃ સર્વેષાં વૈકુણ્ઠારોહણાય સા ॥ ૧૬૧.૬૨॥

૧૬૧.૬૩/૧સમ્માર્જિતાઃ કુશા યત્ર પતિતા ભૂતલે શુભે ।
૧૬૧.૬૩/૨કુશતર્પણમાખ્યાતં બહુપુણ્યફલપ્રદમ્ ॥ ૧૬૧.૬૩॥

૧૬૧.૬૪/૧કુશૈશ્ચ તર્પિતાઃ સર્વે કુશતર્પણમુચ્યતે ।
૧૬૧.૬૪/૨પશ્ચાચ્ચ સંગતા તત્ર ગૌતમી કારણાન્તરાત્ ॥ ૧૬૧.૬૪॥

૧૬૧.૬૫/૧પ્રણીતાયાં મહાબુદ્ધે પ્રણીતાસંગમોઽભવત્ ।
૧૬૧.૬૫/૨કુશતર્પણદેશે તુ તત્ તીર્થં કુશતર્પણમ્ ॥ ૧૬૧.૬૫॥

૧૬૧.૬૬/૧તત્રૈવ કલ્પિતો યૂપો મયા વિન્ધ્યસ્ય ચોત્તરે ।
૧૬૧.૬૬/૨વિસૃષ્ટો લોકપૂજ્યોऽસૌ વિષ્ણોરાસીત્ સમાશ્રયઃ ॥ ૧૬૧.૬૬॥

૧૬૧.૬૭/૧અક્ષયશ્ચાભવચ્છ્રીમાન્ અક્ષયોऽસૌ વટોऽભવત્ ।
૧૬૧.૬૭/૨નિત્યશ્ચ કાલરૂપોऽસૌ સ્મરણાત્ ક્રતુપુણ્યદઃ ॥ ૧૬૧.૬૭॥

૧૬૧.૬૮/૧મદ્દેવયજનં ચેદં દણ્ડકારણ્યમુચ્યતે ।
૧૬૧.૬૮/૨સમ્પૂર્ણે તુ ક્રતૌ વિષ્ણુર્મયા ભક્ત્યા પ્રસાદિતઃ ॥ ૧૬૧.૬૮॥

૧૬૧.૬૯/૧યો વિરાડ્ ઉચ્યતે વેદે યસ્માન્ મૂર્તમજાયત ।
૧૬૧.૬૯/૨યસ્માચ્ચ મમ ચોત્પત્તિર્યસ્યેદં વિકૃતં જગત્ ॥ ૧૬૧.૬૯॥

૧૬૧.૭૦/૧તમહં દેવદેવેશમભિવન્દ્ય વ્યસર્જયમ્ ।
૧૬૧.૭૦/૨યોજનાનિ ચતુર્વિંશન્ મદ્દેવયજનં શુભમ્ ॥ ૧૬૧.૭૦॥

૧૬૧.૭૧/૧તસ્માદ્ અદ્યાપિ કુણ્ડાનિ સન્તિ ચ ત્રીણિ નારદ ।
૧૬૧.૭૧/૨યજ્ઞેશ્વરસ્વરૂપાણિ વિષ્ણોર્વૈ ચક્રપાણિનઃ ॥ ૧૬૧.૭૧॥

૧૬૧.૭૨/૧તતઃ પ્રભૃતિ ચાખ્યાતં મદ્દેવયજનં ચ તત્ ।
૧૬૧.૭૨/૨તત્રસ્થઃ કૃમિકીટાદિઃ સોऽપ્યન્તે મુક્તિભાજનમ્ ॥ ૧૬૧.૭૨॥

૧૬૧.૭૩/૧ધર્મબીજં મુક્તિબીજં દણ્ડકારણ્યમુચ્યતે ।
૧૬૧.૭૩/૨વિશેષાદ્ ગૌતમીશ્લિષ્ટો દેશઃ પુણ્યતમોऽભવત્ ॥ ૧૬૧.૭૩॥

૧૬૧.૭૪/૧પ્રણીતાસંગમે ચાપિ કુશતર્પણ એવ વા ।
૧૬૧.૭૪/૨સ્નાનદાનાદિ યઃ કુર્યાત્ સ ગચ્છેત્ પરમં પદમ્ ॥ ૧૬૧.૭૪॥

૧૬૧.૭૫/૧સ્મરણં પઠનં વાપિ શ્રવણં ચાપિ ભક્તિતઃ ।
૧૬૧.૭૫/૨સર્વકામપ્રદં પુંસાં ભુક્તિમુક્તિપ્રદં વિદુઃ ॥ ૧૬૧.૭૫॥

૧૬૧.૭૬/૧ઉભયોસ્તીરયોસ્તત્ર તીર્થાન્યાહુર્મનીષિણઃ ।
૧૬૧.૭૬/૨ષડશીતિસહસ્રાણિ તેષુ પુણ્યં પુરોદિતમ્ ॥ ૧૬૧.૭૬॥

૧૬૧.૭૭/૧વારાણસ્યા અપિ મુને કુશતર્પણમુત્તમમ્ ।
૧૬૧.૭૭/૨નાનેન સદૃશં તીર્થં વિદ્યતે સચરાચરે ॥ ૧૬૧.૭૭॥

૧૬૧.૭૮/૧બ્રહ્મહત્યાદિપાપાનાં સ્મરણાદ્ અપિ નાશનમ્ ।
૧૬૧.૭૮/૨તીર્થમેતન્ મુને પ્રોક્તં સ્વર્ગદ્વારં મહીતલે ॥ ૧૬૧.૭૮॥

૧૬૨.૧/૧બ્રહ્મોવાચ । મન્યુતીર્થમિતિ ખ્યાતં સર્વપાપપ્રણાશનમ્ ।
૧૬૨.૧/૨સર્વકામપ્રદં નૃણાં સ્મરણાદ્ અઘનાશનમ્ ॥ ૧૬૨.૧॥

૧૬૨.૨/૧તસ્ય પ્રભાવં વક્ષ્યામિ શ્ૃણુષ્વાવહિતો મુને ।
૧૬૨.૨/૨દેવાનાં દાનવાનાં ચ સંગરોઽભૂન્ મિથઃ પુરા ॥ ૧૬૨.૨॥

૧૬૨.૩/૧તત્રાજયન્ નૈવ સુરા દાનવા જયિનોઽભવન્ ।
૧૬૨.૩/૨પરાઙ્મુખાઃ સુરગણાઃ સંગરાદ્ ગતચેતસઃ ॥ ૧૬૨.૩॥

૧૬૨.૪/૧મામભ્યેત્ય સમૂચુસ્તે દેહિ નોઽભયકારણમ્ ।
૧૬૨.૪/૨તાન્ અહં પ્રત્યવોચં વૈ ગઙ્ગાં ગચ્છત સર્વશઃ ॥ ૧૬૨.૪॥

૧૬૨.૫/૧તત્ર વૈ ગૌતમીતીરે સ્તુત્વા દેવં મહેશ્વરમ્ ।
૧૬૨.૫/૨અનપાયનિરાયાસ+ ।સહજાનન્દસુન્દરમ્ ॥ ૧૬૨.૫॥

૧૬૨.૬/૧લપ્સ્યતે સર્વવિબુધા જયહેતુર્મહેશ્વરાત્ ।
૧૬૨.૬/૨તથેત્યુક્ત્વા સુરગણાઃ સ્તુવન્તિ સ્મ મહેશ્વરમ્ ॥ ૧૬૨.૬॥

૧૬૨.૭/૧તપોઽતપ્યન્ત કેચિદ્ વૈ નનૃતુશ્ચ તથાપરે ।
૧૬૨.૭/૨અસ્નાપયંશ્ચ કેચિચ્ચઽપૂજયંશ્ચ તથાપરે ॥ ૧૬૨.૭॥

૧૬૨.૮/૧તતઃ પ્રસન્નો ભગવાઞ્ શૂલપાણિર્મહેશ્વરઃ ।
૧૬૨.૮/૨દેવાન્ અથાબ્રવીત્ તુષ્ટો વ્રિયતાં યદ્ અભીપ્સિતમ્ ॥ ૧૬૨.૮॥

૧૬૨.૯/૧દેવા ઊચુઃ સુરપતિં વિજયાય દદસ્વ નઃ ।
૧૬૨.૯/૨પુરુષં પરમશ્લાઘ્યં રણેષુ પુરતઃ સ્થિતમ્ ॥ ૧૬૨.૯॥

૧૬૨.૧૦/૧યદ્બાહુબલમાશ્રિત્ય ભવામઃ સુખિનો વયમ્ ।
૧૬૨.૧૦/૨તથેત્યુવાચ ભગવાન્ દેવાન્ પ્રતિ મહેશ્વરઃ ॥ ૧૬૨.૧૦॥

૧૬૨.૧૧/૧આત્મનસ્તેજસા કશ્ચિન્ નિર્મિતઃ પરમેષ્ઠિના ।
૧૬૨.૧૧/૨મન્યુનામાનમત્યુગ્રં દેવસૈન્યપુરોગમમ્ ॥ ૧૬૨.૧૧॥

૧૬૨.૧૨/૧તં નત્વા ત્રિદશાઃ સર્વે શિવં નત્વા સ્વમાલયમ્ ।
૧૬૨.૧૨/૨મન્યુના સહ ચાભ્યેત્ય પુનર્યુદ્ધાય તસ્થિરે ॥ ૧૬૨.૧૨॥

૧૬૨.૧૩/૧યુદ્ધે સ્થિત્વા તુ દનુજૈર્દૈતેયૈશ્ચ મહાબલૈઃ ।
૧૬૨.૧૩/૨વિબુધા જાતસંનદ્ધા મન્યુમૂચુઃ પુરઃ સ્થિતાઃ ॥ ૧૬૨.૧૩॥

૧૬૨.૧૪/૧દેવા ઊચુઃ । સામર્થ્યં તવ પશ્યામઃ પશ્ચાદ્ યોત્સ્યામહે પરૈઃ ।
૧૬૨.૧૪/૨તસ્માદ્ દર્શય ચાત્માનં મન્યોઽસ્માકં યુયુત્સતામ્ ॥ ૧૬૨.૧૪॥

૧૬૨.૧૫/૧બ્રહ્મોવાચ । તદ્ દેવવચનં શ્રુત્વા મન્યુરાહ સ્મયન્ન્ ઇવ ॥ ૧૬૨.૧૫॥

૧૬૨.૧૬/૧મન્યુરુવાચ । જનિતા મમ દેવેશઃ સર્વજ્ઞઃ સર્વદૃક્ પ્રભુઃ ।
૧૬૨.૧૬/૨યઃ સર્વં વેત્તિ સર્વેષાં ધામનામ મનઃસ્થિતમ્ ॥ ૧૬૨.૧૬॥

૧૬૨.૧૭/૧નૈવ કશ્ચિચ્ચ તં વેત્તિ યઃ સર્વં વેત્તિ સર્વદા ।
૧૬૨.૧૭/૨અમૂર્તં મૂર્તમપ્યેતદ્ વેત્તિ કર્તા જગન્મયઃ ॥ ૧૬૨.૧૭॥

૧૬૨.૧૮/૧પરોઽસૌ ભગવાન્ સાક્ષાત્ તથા દિવ્યન્તરિક્ષગઃ ।
૧૬૨.૧૮/૨કસ્તસ્ય રૂપં યો વેદ કસ્ય કર્તા જગન્મયઃ ॥ ૧૬૨.૧૮॥

૧૬૨.૧૯/૧એવંવિધાદ્ અહં જાતો માં કથં વેત્તુમર્હથ ।
૧૬૨.૧૯/૨અથવા દ્રષ્ટુકામા વૈ ભવન્તો માનુપશ્યત ॥ ૧૬૨.૧૯॥

૧૬૨.૨૦/૧બ્રહ્મોવાચ । ઇત્યુક્ત્વા દર્શયામાસ મન્યૂ રૂપં સ્વકં મહત્ ।
૧૬૨.૨૦/૨તાર્તીયચક્ષુષોદ્ભૂતં ભવસ્ય પરમેષ્ઠિનઃ ॥ ૧૬૨.૨૦॥

૧૬૨.૨૧/૧તેજસા સમ્ભૃતં રૂપં યતઃ સર્વં તદ્ ઉચ્યતે ।
૧૬૨.૨૧/૨પૌરુષં પુરુષેષ્વેવ અહંકારશ્ચ જન્તુષુ ॥ ૧૬૨.૨૧॥

૧૬૨.૨૨/૧ક્રોધઃ સર્વસ્ય યો ભીમ ઉપસંહારકૃદ્ ભવેત્ ।
૧૬૨.૨૨/૨તં શંકરપ્રતિનિધિં જ્વલન્તં નિજતેજસા ॥ ૧૬૨.૨૨॥

૧૬૨.૨૩/૧સર્વાયુધધરં દૃષ્ટ્વા પ્રણેમુઃ સર્વદેવતાઃ ।
૧૬૨.૨૩/૨વિત્રેસુર્દૈત્યદનુજાઃ કૃતાઞ્જલિપુટાઃ સુરાઃ ॥ ૧૬૨.૨૩॥

૧૬૨.૨૪/૧ભૂત્વા મન્યુમથોચુસ્તે ત્વં સેનાનીઃ પ્રભો ભવ ।
૧૬૨.૨૪/૨ત્વયા દત્તમિદં રાજ્યં મન્યો ભોક્ષ્યામહે વયમ્ ॥ ૧૬૨.૨૪॥

૧૬૨.૨૫/૧તસ્માત્ સર્વેષુ કાર્યેષુ જેતા ત્વં જયવર્ધનઃ ।
૧૬૨.૨૫/૨ત્વમિન્દ્રસ્ત્વં ચ વરુણો લોકપાલાસ્ત્વમેવ ચ ॥ ૧૬૨.૨૫॥

૧૬૨.૨૬/૧અસ્માસુ સર્વદેવેષુ પ્રવિશ ત્વં જયાય વૈ ।
૧૬૨.૨૬/૨મન્યુઃ પ્રોવાચ તાન્ સર્વાન્ વિના મત્તો ન કિંચન ॥ ૧૬૨.૨૬॥

૧૬૨.૨૭/૧સર્વેષ્વન્તઃ પ્રવિષ્ટોઽહં ન માં જાનાતિ કશ્ચન ।
૧૬૨.૨૭/૨સ એવ ભગવાન્ મન્યુસ્તતો જાતઃ પૃથક્ પૃથક્ ॥ ૧૬૨.૨૭॥

૧૬૨.૨૮/૧સ એવ રુદ્રરૂપી સ્યાદ્ રુદ્રો મન્યુઃ શિવોઽભવત્ ।
૧૬૨.૨૮/૨સ્થાવરં જઙ્ગમં ચૈવ સર્વં વ્યાપ્તં હિ મન્યુના ॥ ૧૬૨.૨૮॥

૧૬૨.૨૯/૧તમવાપ્ય સુરાઃ સર્વે જયમાપુશ્ચ સંગરે ।

૧૬૨.૨૯/૨જયો મન્યુશ્ચ શૌર્યં ચ ઈશતેજઃસમુદ્ભવમ્ ॥ ૧૬૨.૨૯॥

૧૬૨.૩૦/૧મન્યુના જયમાપ્યાથ કૃત્વા દૈત્યૈશ્ચ સંગમમ્ ।
૧૬૨.૩૦/૨યથાગતં યયુઃ સર્વે મન્યુના પરિરક્ષિતાઃ ॥ ૧૬૨.૩૦॥

૧૬૨.૩૧/૧યત્ર વૈ ગૌતમીતીરે શિવમારાધ્ય તે સુરાઃ ।
૧૬૨.૩૧/૨મન્યુમાપુર્જયં ચૈવ મન્યુતીર્થં તદ્ ઉચ્યતે ॥ ૧૬૨.૩૧॥

૧૬૨.૩૨/૧ઉત્પત્તિં ચ તથા મન્યોર્યો નરઃ પ્રયતઃ સ્મરેત્ ।
૧૬૨.૩૨/૨વિજયો જાયતે તસ્ય ન કૈશ્ચિત્ પરિભૂયતે ॥ ૧૬૨.૩૨॥

૧૬૨.૩૩/૧ન મન્યુતીર્થસદૃશં પાવનં હિ મહામુને ।
૧૬૨.૩૩/૨યત્ર સાક્ષાન્ મન્યુરૂપી સર્વદા શંકરઃ સ્થિતઃ ।
૧૬૨.૩૩/૩તત્ર સ્નાનં ચ દાનં ચ સ્મરણં સર્વકામદમ્ ॥ ૧૬૨.૩૩॥

૧૬૩.૧/૧બ્રહ્મોવાચ । સારસ્વતં નામ તીર્થં સર્વકામપ્રદં શુભમ્ ।
૧૬૩.૧/૨ભુક્તિમુક્તિપ્રદં નૃણાં સર્વપાપપ્રણાશનમ્ ॥ ૧૬૩.૧॥

૧૬૩.૨/૧સર્વરોગપ્રશમનં સર્વસિદ્ધિપ્રદાયકમ્ ।
૧૬૩.૨/૨તત્રેમં શ ૃણુ વૃત્તાન્તં વિસ્તરેણાથ નારદ ॥ ૧૬૩.૨॥

૧૬૩.૩/૧પુષ્પોત્કટાત્ પૂર્વભાગે પર્વતો લોકવિશ્રુતઃ ।
૧૬૩.૩/૨શુભ્રો નામ ગિરિશ્રેષ્ઠો ગૌતમ્યા દક્ષિણે તટે ॥ ૧૬૩.૩॥

૧૬૩.૪/૧શાકલ્ય ઇતિ વિખ્યાતો મુનિઃ પરમનૈષ્ઠિકઃ ।
૧૬૩.૪/૨તસ્મિગ્ શુભ્રે પુણ્યગિરૌ તપસ્તેપે હ્યનુત્તમમ્ ॥ ૧૬૩.૪॥

૧૬૩.૫/૧તપસ્યન્તં દ્વિજશ્રેષ્ઠં ગૌતમીતીરમાશ્રિતમ્ ।
૧૬૩.૫/૨સર્વે ભૂતગણા નિત્યં પ્રણમન્તિ સ્તુવન્તિ તમ્ ॥ ૧૬૩.૫॥

૧૬૩.૬/૧અગ્નિશુશ્રૂષણપરં વેદાધ્યયનતત્પરમ્ ।
૧૬૩.૬/૨ઋષિગન્ધર્વસુમનઃ+ ।સેવિતે તત્ર પર્વતે ॥ ૧૬૩.૬॥

૧૬૩.૭/૧તસ્મિન્ ગિરૌ મહાપુણ્યે દેવદ્વિજભયંકરઃ ।
૧૬૩.૭/૨યજ્ઞદ્વેષી બ્રહ્મહન્તા પરશુર્નામ રાક્ષસઃ ॥ ૧૬૩.૭॥

૧૬૩.૮/૧કામરૂપી વિચરતિ નાનારૂપધરો વને ।
૧૬૩.૮/૨ક્ષણં ચ બ્રહ્મરૂપેણ કદાચિદ્ વ્યાઘ્રરૂપધૃક્ ॥ ૧૬૩.૮॥

૧૬૩.૯/૧કદાચિદ્ દેવરૂપેણ કદાચિત્ પશુરૂપધૃક્ ।
૧૬૩.૯/૨કદાચિત્ પ્રમદારૂપઃ કદાચિન્ મૃગરૂપતઃ ॥ ૧૬૩.૯॥

૧૬૩.૧૦/૧કદાચિદ્ બાલરૂપેણ એવં ચરતિ પાપકૃત્ ।
૧૬૩.૧૦/૨યત્રાસ્તે બ્રાહ્મણો વિદ્વાગ્ શાકલ્યો મુનિસત્તમઃ ॥ ૧૬૩.૧૦ ॥

૧૬૩.૧૧/૧તમાયાતિ મહાપાપી પરશૂ રાક્ષસાધમઃ ।
૧૬૩.૧૧/૨શુચિષ્મન્તં દ્વિજશ્રેષ્ઠં પરશુર્નિત્યમેવ ચ ॥ ૧૬૩.૧૧ ॥

૧૬૩.૧૨/૧નેતું હન્તું પ્રવૃત્તોઽપિ ન શશાક સ પાપકૃત્ ।
૧૬૩.૧૨/૨સ કદાચિદ્ દ્વિજશ્રેષ્ઠો દેવાન્ અભ્યર્ચ્ય યત્નતઃ ॥ ૧૬૩.૧૨ ॥

૧૬૩.૧૩/૧ભોક્તુકામઃ કિલાયાતસ્તત્રાયાત્ પરશુર્મુને ।
૧૬૩.૧૩/૨બ્રહ્મરૂપધરો ભૂત્વા શિથિલઃ પલિતોઽબલી ।
૧૬૩.૧૩/૩કન્યામાદાય કાંચિચ્ચ શાકલ્યં વાક્યમબ્રવીત્ ॥ ૧૬૩.૧૩ ॥

૧૬૩.૧૪/૧પરશુરુવાચ । ભોજનસ્યાર્થિનં વિદ્ધિ માં ચ કન્યામિમાં દ્વિજ ।
૧૬૩.૧૪/૨આતિથ્યકાલે સમ્પ્રાપ્તં કૃતકૃત્યોઽસિ માનદ ॥ ૧૬૩.૧૪ ॥

૧૬૩.૧૫/૧ત એવ ધન્યા લોકેઽસ્મિન્ યેષામતિથયો ગૃહાત્ ।
૧૬૩.૧૫/૨પૂર્ણાભિલાષા નિર્યાન્તિ જીવન્તોઽપિ મૃતાઃ પરે ॥ ૧૬૩.૧૫ ॥

૧૬૩.૧૬/૧ભોજને તૂપવિષ્ટે તુ આત્માર્થં કલ્પિતં તુ યત્ ।
૧૬૩.૧૬/૨અતિથિભ્યસ્તુ યો દદ્યાદ્ દત્તા તેન વસુંધરા ॥ ૧૬૩.૧૬ ॥

૧૬૩.૧૭/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા તુ શાકલ્યો દદામીત્યેવમબ્રવીત્ ।
૧૬૩.૧૭/૨આસને ચોપવેશ્યાથા+ ।જ્ઞાનાત્ તં પરશું દ્વિજમ્ ॥ ૧૬૩.૧૭ ॥

૧૬૩.૧૮/૧યથાન્યાયં પૂજયિત્વા શાકલ્યો ભોજનં દદૌ ।
૧૬૩.૧૮/૨આપોશનં કરે કૃત્વા પરશુર્વાક્યમબ્રવીત્ ॥ ૧૬૩.૧૮ ॥

૧૬૩.૧૯/૧પરશુરુવાચ । દૂરાદ્ અભ્યાગતં શ્રાન્તમનુગચ્છન્તિ દેવતાઃ ।
૧૬૩.૧૯/૨તસ્મિંસ્તૃપ્તે તુ તૃપ્તાઃ સ્યુરતૃપ્તે તુ વિપર્યયઃ ॥ ૧૬૩.૧૯ ॥

૧૬૩.૨૦/૧અતિથિશ્ચાપવાદી ચ દ્વાવેતૌ વિશ્વબાન્ધવૌ ।
૧૬૩.૨૦/૨અપવાદી હરેત્ પાપમતિથિઃ સ્વર્ગસંક્રમઃ ॥ ૧૬૩.૨૦ ॥

૧૬૩.૨૧/૧અભ્યાગતં પથિ શ્રાન્તં સાવજ્ઞં યોઽભિવીક્ષતે ।
૧૬૩.૨૧/૨તત્ક્ષણાદ્ એવ નશ્યન્તિ તસ્ય ધર્મયશઃશ્રિયઃ ॥ ૧૬૩.૨૧ ॥

૧૬૩.૨૨/૧તસ્માદ્ અભ્યાગતઃ શ્રાન્તો યાચેઽહં ત્વાં દ્વિજોત્તમ ।
૧૬૩.૨૨/૨દાસ્યસે યદિ મે કામં તદ્ ભોક્ષ્યેઽહં ન ચાન્યથા ॥ ૧૬૩.૨૨ ॥

૧૬૩.૨૩/૧બ્રહ્મોવાચ । દત્તમિત્યેવ શાકલ્યો ભુઙ્ક્ષ્વેત્યેવાહ રાક્ષસમ્ ।
૧૬૩.૨૩/૨તતઃ પ્રોવાચ પરશુરહં રાક્ષસસત્તમઃ ॥ ૧૬૩.૨૩॥

૧૬૩.૨૪/૧નાહં દ્વિજસ્તવ રિપુર્ન વૃદ્ધઃ પલિતઃ કૃશઃ ।
૧૬૩.૨૪/૨બહૂનિ મે વ્યતીતાનિ વર્ષાણિ ત્વાં પ્રપશ્યતઃ ॥ ૧૬૩.૨૪॥

૧૬૩.૨૫/૧શુષ્યન્તિ મમ ગાત્રાણિ ગ્રીષ્મે સ્વલ્પોદકં યથા ।
૧૬૩.૨૫/૨તસ્માન્ નેષ્યે સાનુગં ત્વાં ભક્ષયિષ્યે દ્વિજોત્તમ ॥ ૧૬૩.૨૫॥

૧૬૩.૨૬/૧બ્રહ્મોવાચ । શ્રુત્વા પરશુવાક્યં તચ્છાકલ્યો વાક્યમબ્રવીત્ ॥ ૧૬૩.૨૬॥

૧૬૩.૨૭/૧શાકલ્ય ઉવાચ । યે મહાકુલસમ્ભૂતા વિજ્ઞાતસકલાગમાઃ ।
૧૬૩.૨૭/૨તત્ પ્રતિશ્રુતમભ્યેતિ ન જાત્વત્ર વિપર્યયમ્ ॥ ૧૬૩.૨૭॥

૧૬૩.૨૮/૧યથોચિતં કુરુ સખે તથાપિ શ૲ૃણુ મે વચઃ ।
૧૬૩.૨૮/૨નિહન્તુમપ્યુદ્યતેષુ વક્તવ્યં હિતમુત્તમૈઃ ॥ ૧૬૩.૨૮॥

૧૬૩.૨૯/૧બ્રાહ્મણોઽહં વજતનુઃ સર્વતો રક્ષકો હરિઃ ।
૧૬૩.૨૯/૨પાદૌ રક્ષતુ મે વિષ્ણુઃ શિરો દેવો જનાર્દનઃ ॥ ૧૬૩.૨૯॥

૧૬૩.૩૦/૧બાહૂ રક્ષતુ વારાહઃ પૃષ્ઠં રક્ષતુ કૂર્મરાટ્ ।
૧૬૩.૩૦/૨હૃદયં રક્ષતાત્ કૃષ્ણો હ્યઙ્ગુલી રક્ષતાન્ મૃગઃ ॥ ૧૬૩.૩૦॥

૧૬૩.૩૧/૧મુખં રક્ષતુ વાગીશો નેત્રે રક્ષતુ પક્ષિગઃ ।
૧૬૩.૩૧/૨શ્રોત્રં રક્ષતુ વિત્તેશઃ સર્વતો રક્ષતાદ્ ભવઃ ।
૧૬૩.૩૧/૩નાનાપત્સ્વેકશરણં દેવો નારાયણઃ સ્વયમ્ ॥ ૧૬૩.૩૧॥

૧૬૩.૩૨/૧બ્રહ્મોવાચ । એવમુક્ત્વા તુ શાકલ્યો નય વા ભક્ષ વા સુખમ્ ।
૧૬૩.૩૨/૨માં રાક્ષસેન્દ્ર પરશો ત્વમિદાનીમતન્દ્રિતઃ ॥ ૧૬૩.૩૨॥

૧૬૩.૩૩/૧રાક્ષસસ્તસ્ય વચનાદ્ ભક્ષણાય સમુદ્યતઃ ।
૧૬૩.૩૩/૨નાસ્ત્યેવ હૃદયે નૂનં પાપિનાં કરુણાકણઃ ॥ ૧૬૩.૩૩॥

૧૬૩.૩૪/૧દંષ્ટ્રાકરાલવદનો ગત્વા તસ્યાન્તિકં તદા ।
૧૬૩.૩૪/૨બ્રાહ્મણં તં નિરીક્ષ્યૈવં પરશુર્વાક્યમબ્રવીત્ ॥ ૧૬૩.૩૪॥

૧૬૩.૩૫/૧પરશુરુવાચ । શઙ્ખચક્રગદાપાણિં ત્વાં પશ્યેઽહં દ્વિજોત્તમ ।
૧૬૩.૩૫/૨સહસ્રપાદશિરસં સહસ્રાક્ષકરં વિભુમ્ ॥ ૧૬૩.૩૫॥

૧૬૩.૩૬/૧સર્વભૂતૈકનિલયં છન્દોરૂપં જગન્મયમ્ ।
૧૬૩.૩૬/૨ત્વામદ્ય વિપ્ર પશ્યામિ નાસ્તિ તે પૂર્વકં વપુઃ ॥ ૧૬૩.૩૬॥

૧૬૩.૩૭/૧તસ્માત્ પ્રસાદયે વિપ્ર ત્વમેવ શરણં ભવ ।

૧૬૩.૩૭/૨જ્ઞાનં દેહિ મહાબુદ્ધે તીર્થં બ્રૂહ્યઘનિષ્કૃતિમ્ ॥ ૧૬૩.૩૭ ॥

૧૬૩.૩૮/૧મહતાં દર્શનં બ્રહ્મઞ્ જાયતે નહિ નિષ્ફલમ્ ।

૧૬૩.૩૮/૨દ્વેષાદ્ અજ્ઞાનતો વાપિ પ્રસઙ્ગાદ્ વા પ્રમાદતઃ ॥ ૧૬૩.૩૮ ॥

૧૬૩.૩૯/૧અયસઃ સ્પર્શસંસ્પર્શો રુક્મત્વાયૈવ જાયતે ॥ ૧૬૩.૩૯ ॥

૧૬૩.૪૦/૧બ્રહ્મોવાચ । એતદ્ વાક્યં સમાકર્ણ્ય રાક્ષસેન સમીરિતમ્ ।

૧૬૩.૪૦/૨શાકલ્યઃ કૃપયા પ્રાહ વરદા સા સરસ્વતી ॥ ૧૬૩.૪૦ ॥

૧૬૩.૪૧/૧તવાચિરાદ્ દૈત્યપતે તતઃ સ્તુહિ જનાર્દનમ્ ।

૧૬૩.૪૧/૨મનોરથફલપ્રાપ્તૌ નાન્યન્ નારાયણસ્તુતેઃ ॥ ૧૬૩.૪૧ ॥

૧૬૩.૪૨/૧કિંચિદ્ અપ્યસ્તિ લોકેઽસ્મિન્ કારણં શ઼ૃણુ રાક્ષસ ।

૧૬૩.૪૨/૨પ્રસન્ના તવ સા દેવી મદ્વાક્યાચ્ચ ભવિષ્યતિ ॥ ૧૬૩.૪૨ ॥

૧૬૩.૪૩/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સ પરશુર્ગઙ્ગાં ત્રૈલોક્યપાવનીમ્ ।

૧૬૩.૪૩/૨સ્નાત્વા શુચિર્યતમના ગઙ્ગામભિમુખઃ સ્થિતઃ ॥ ૧૬૩.૪૩ ॥

૧૬૩.૪૪/૧તત્રાપશ્યદ્ દિવ્યરૂપાં દિવ્યગન્ધાનુલેપનામ્ ।

૧૬૩.૪૪/૨સરસ્વતીં જગદ્ધાત્રીં શાકલ્યવચને સ્થિતામ્ ॥ ૧૬૩.૪૪ ॥

૧૬૩.૪૫/૧જગજ્જાડ્યહરાં વિશ્વ+ ।જનનીં ભુવનેશ્વરીમ્ ।

૧૬૩.૪૫/૨તામુવાચ વિનીતાત્મા પરશુર્ગતકલ્મષઃ ॥ ૧૬૩.૪૫ ॥

૧૬૩.૪૬/૧પરશુરુવાચ । ગુરુઃ શાકલ્ય ઇત્યાહ માકાન્તં સ્તુહિ વિધ્વજમ્ ।

૧૬૩.૪૬/૨તવ પ્રસાદાત્ સા શક્તિર્યથા મે સ્યાત્ તથા કુરુ ॥ ૧૬૩.૪૬ ॥

૧૬૩.૪૭/૧બ્રહ્મોવાચ । તથાસ્ત્વિતિ ચ સા પ્રાહ પરશું શ્રીસરસ્વતી ।

૧૬૩.૪૭/૨સરસ્વત્યાઃ પ્રસાદેન પરશુસ્તં જનાર્દનમ્ ॥ ૧૬૩.૪૭ ॥

૧૬૩.૪૮/૧તુષ્ટાવ વિવિધૈર્વાક્યૈસ્તતસ્તુષ્ટોઽભવદ્ ધરિઃ ।

૧૬૩.૪૮/૨વરં પ્રાદાદ્ રાક્ષસાય કૃપાસિન્ધુર્જનાર્દનઃ ॥ ૧૬૩.૪૮ ॥

૧૬૩.૪૯/૧જનાર્દન ઉવાચ । યદ્ યન્ મનોગતં રક્ષસ્તત્ તત્ સર્વં
ભવિષ્યતિ ॥ ૧૬૩.૪૯ ॥

૧૬૩.૫૦/૧બ્રહ્મોવાચ । શાકલ્યસ્ય પ્રસાદેન ગૌતમ્યાશ્ચ પ્રસાદતઃ ।

૧૬૩.૫૦/૨સરસ્વત્યાઃ પ્રસાદેન નરસિંહપ્રસાદતઃ ॥ ૧૬૩.૫૦ ॥

૧૬૩.૫૧/૧પાપિષ્ઠોઽપિ તદા રક્ષઃ પરશુર્દિવમેયિવાન્ ।
૧૬૩.૫૧/૨સર્વતીર્થાઙ્ઘ્રિપદ્મસ્ય પ્રસાદાચ્છાર્ઙ્ગધન્વનઃ ॥ ૧૬૩.૫૧॥

૧૬૩.૫૨/૧તતઃ પ્રભૃતિ તત્ તીર્થં સારસ્વતમિતિ શ્રુતમ્ ।
૧૬૩.૫૨/૨તત્ર સ્નાનેન દાનેન વિષ્ણુલોકે મહીયતે ॥ ૧૬૩.૫૨॥

૧૬૩.૫૩/૧વાગ્જવૈષ્ણવશાકલ્ય+ ।પરશુપ્રભવાણિ હિ ।
૧૬૩.૫૩/૨બહૂન્યભૂવંસ્તીર્થાનિ તસ્મિન્ વૈ શ્વેતપર્વતે ॥ ૧૬૩.૫૩॥

૧૬૪.૧/૧બ્રહ્મોવાચ । ચિચ્ચિકાતીર્થમિત્યુક્તં સર્વરોગવિનાશનમ્ ।
૧૬૪.૧/૨સર્વચિન્તાપ્રહરણં સર્વશાન્તિકરં નૃણામ્ ॥ ૧૬૪.૧॥

૧૬૪.૨/૧તસ્ય સ્વરૂપં વક્ષ્યામિ શુભ્રે તસ્મિન્ નગોત્તમે ।
૧૬૪.૨/૨ગઙ્ગાયા ઉત્તરે પારે યત્ર દેવો ગદાધરઃ ॥ ૧૬૪.૨॥

૧૬૪.૩/૧ચિચ્ચિકઃ પક્ષિરાટ્ તત્ર ભેરુણ્ડો યોઽભિધીયતે ।
૧૬૪.૩/૨સદા વસતિ તત્રૈવ માંસાશી શ્વેતપર્વતે ॥ ૧૬૪.૩॥

૧૬૪.૪/૧નાનાપુષ્પફલાકીર્ણૈઃ સર્વર્તુકુસુમૈર્નગૈઃ ।
૧૬૪.૪/૨સેવિતે દ્વિજમુખ્યૈશ્ચ ગૌતમ્યા ચોપશોભિતે ॥ ૧૬૪.૪॥

૧૬૪.૫/૧સિદ્ધચારણગન્ધર્વ+ ।કિંનરામરસંકુલે ।
૧૬૪.૫/૨તત્સમીપે નગઃ કશ્ચિદ્ દ્વિપદાં ચ ચતુષ્પદામ્ ॥ ૧૬૪.૫॥

૧૬૪.૬/૧રોગાર્તિક્ષુત્તૃષાચિન્તા+ ંઅરણાનાં ન ભાજનમ્ ।
૧૬૪.૬/૨એવં ગુણાન્વિતે શૈલે નાનામુનિગણાવૃતે ॥ ૧૬૪.૬॥

૧૬૪.૭/૧પૂર્વદેશાધિપઃ કશ્ચિત્ પવમાન ઇતિ શ્રુતઃ ।
૧૬૪.૭/૨ક્ષત્રધર્મરતઃ શ્રીમાન્ દેવબ્રાહ્મણપાલકઃ ॥ ૧૬૪.૭॥

૧૬૪.૮/૧બલેન મહતા યુક્તઃ સપુરોધા વનં યયૌ ।
૧૬૪.૮/૨રેમે સ્ત્રીભિર્મનોજ્ઞાભિર્નૃત્યવાદિત્રજૈઃ સુખૈઃ ॥ ૧૬૪.૮॥

૧૬૪.૯/૧સ ચ એવં ધનુષ્પાણિર્મૃગયાશીલિભિર્વૃતઃ ।
૧૬૪.૯/૨એવં ભ્રમન્ કદાચિત્ સ શ્રાન્તો દ્રુમમુપાગતઃ ॥ ૧૬૪.૯॥

૧૬૪.૧૦/૧ગૌતમીતીરસમ્ભૂતં નાનાપક્ષિગણૈર્વૃતમ્ ।
૧૬૪.૧૦/૨આશ્રમાણાં ગૃહપતિં ધર્મજ્ઞમિવ સેવિતમ્ ॥ ૧૬૪.૧૦॥

૧૬૪.૧૧/૧તમાશ્રિત્ય નગશ્રેષ્ઠં પવમાનો નૃપોત્તમઃ ।

૧૬૪.૧૧/૨સ વિશ્રાન્તો જનવૃત ઈક્ષાં ચક્રે નગોત્તમમ્ ॥ ૧૬૪.૧૧॥

૧૬૪.૧૨/૧તત્રાપશ્યદ્ દ્વિજં સ્થૂલં દ્વિમુખં શોભનાકૃતિમ્ ।
૧૬૪.૧૨/૨ચિન્તાવિષ્ટં તથા શ્રાન્તં તમપૃચ્છન્ નૃપોત્તમઃ ॥ ૧૬૪.૧૨॥

૧૬૪.૧૩/૧રાજોવાચ । કો ભવાન્ દ્વિમુખઃ પક્ષી ચિન્તાવાન્ ઇવ લક્ષ્યસે ।
૧૬૪.૧૩/૨નૈવાત્ર કશ્ચિદ્ દુઃખાર્તઃ કસ્માત્ ત્વં દુઃખમાગતઃ ॥ ૧૬૪.૧૩॥

૧૬૪.૧૪/૧બ્રહ્મોવાચ । તતઃ પ્રોવાચ નૃપતિં પવમાનં શનૈઃ શનૈઃ ।
૧૬૪.૧૪/૨સમાશ્વસ્તમનાઃ પક્ષી ચિચ્ચિકો નિઃશ્વસન્ મુહુઃ ॥ ૧૬૪.૧૪॥

૧૬૪.૧૫/૧ચિચ્ચિક ઉવાચ । મત્તો ભયં ન ચાન્યેષાં મમ વાન્યોપપાદિતમ્ ।
૧૬૪.૧૫/૨નાનાપુષ્પફલાકીર્ણં મુનિભિઃ પરિસેવિતમ્ ॥ ૧૬૪.૧૫॥

૧૬૪.૧૬/૧પશ્યેયં શૂન્યમેવાદ્રિં તતઃ શોચામિ મામહમ્ ।
૧૬૪.૧૬/૨ન લભામિ સુખં કિંચિન્ ન તૃપ્યામિ કદાચન ।
૧૬૪.૧૬/૩નિદ્રાં પ્રાપ્નોમિ ન ક્વાપિ ન વિશ્રાન્તિં ન નિર્વૃતિમ્ ॥ ૧૬૪.૧૬॥

૧૬૪.૧૭/૧બ્રહ્મોવાચ । દ્વિમુખસ્ય દ્વિજસ્યોક્તં શ્રુત્વા રાજાતિવિસ્મિતઃ ॥ ૧૬૪.૧૭॥

૧૬૪.૧૮/૧રાજોવાચ । કો ભવાન્ કિં કૃતં પાપં કસ્માચ્છૂન્યશ્ચ પર્વતઃ ।
૧૬૪.૧૮/૨એકેનાસ્યેન તૃપ્યન્તિ પ્રાણિનોઽત્ર નગોત્તમે ॥ ૧૬૪.૧૮॥

૧૬૪.૧૯/૧કિમુતાસ્યદ્વયેન ત્વં ન તૃપ્તિમુપયાસ્યસિ ।
૧૬૪.૧૯/૨કિં વા તે દુષ્કૃતં પ્રાપ્તમિહ જન્મન્યથો પુરા ॥ ૧૬૪.૧૯॥

૧૬૪.૨૦/૧તત્ સર્વં શંસ મે સત્યં ત્રાસ્યે ત્વાં મહતો ભયાત્ ॥ ૧૬૪.૨૦॥

૧૬૪.૨૧/૧બ્રહ્મોવાચ । રાજાનં તં દ્વિજઃ પ્રાહ નિઃશ્વસન્ન્ અથ
ચિચ્ચિકઃ ॥ ૧૬૪.૨૧॥

૧૬૪.૨૨/૧ચિચ્ચિક ઉવાચ । વક્ષ્યેઽહં ત્વાં પૂર્વવૃત્તં
પવમાન શ઼ૃણુષ્વ તત્ ।
૧૬૪.૨૨/૨અહં દ્વિજાતિપ્રવરો વેદવેદાઙ્ગપારગઃ ॥ ૧૬૪.૨૨॥

૧૬૪.૨૩/૧કુલીનો વિદિતપ્રાજ્ઞઃ કાર્યહન્તા કલિપ્રિયઃ ।
૧૬૪.૨૩/૨વદે પુરસ્તથા પૃષ્ઠે અન્યદ્ અન્યચ્ચ જન્તુષુ ॥ ૧૬૪.૨૩॥

૧૬૪.૨૪/૧પરવૃદ્ધ્યા સદા દુઃખી માયયા વિશ્વવઞ્ચકઃ ।
૧૬૪.૨૪/૨કૃતઘ્નઃ સત્યરહિતઃ પરનિન્દાવિચક્ષણઃ ॥ ૧૬૪.૨૪॥

૧૬૪.૨૫/૧મિત્રસ્વામિગુરુદ્રોહી દમ્ભાચારોઽતિનિર્ઘૃણઃ ।
૧૬૪.૨૫/૨મનસા કર્મણા વાચા તાપયામિ જનાન્ બહૂન્ ॥ ૧૬૪.૨૫ ॥

૧૬૪.૨૬/૧અયમેવ વિનોદો મે સદા યત્ પરહિંસનમ્ ।
૧૬૪.૨૬/૨યુગ્મભેદં ગણોચ્છેદં મર્યાદાભેદનં સદા ॥ ૧૬૪.૨૬ ॥

૧૬૪.૨૭/૧કરોમિ નિર્વિચારોઽહં વિદ્વત્સેવાપરાઙ્મુખઃ ।
૧૬૪.૨૭/૨ન મયા સદૃશઃ કશ્ચિત્ પાતકી ભવનત્રયે ॥ ૧૬૪.૨૭ ॥

૧૬૪.૨૮/૧તેનાહં દ્વિમુખો જાતસ્તાપનાદ્ દુઃખભાગ્યહમ્ ।
૧૬૪.૨૮/૨તસ્માદ્ દુઃખેન સંતપ્તઃ શૂન્યોઽયં પર્વતો મમ ॥ ૧૬૪.૨૮ ॥

૧૬૪.૨૯/૧અન્યચ્ચ શ ृણુ ભૂપાલ વાક્યં ધર્માર્થસંહિતમ્ ।
૧૬૪.૨૯/૨બ્રહ્મહત્યાસમં પાપં તદ્ વિના તદ્ અવાપ્યતે ॥ ૧૬૪.૨૯ ॥

૧૬૪.૩૦/૧ક્ષત્રિયઃ સંગરં ગત્વા અથવાન્યત્ર સંગરાત્ ।
૧૬૪.૩૦/૨પલાયન્તં ન્યસ્તશસ્ત્રં વિશ્વસ્તં ચ પરાઙ્મુખમ્ ॥ ૧૬૪.૩૦ ॥

૧૬૪.૩૧/૧અવિજ્ઞાતં ચોપવિષ્ટં બિભેમીતિ ચ વાદિનમ્ ।
૧૬૪.૩૧/૨તં યદિ ક્ષત્રિયો હન્યાત્ સ તુ સ્યાદ્ બ્રહ્મઘાતકઃ ॥ ૧૬૪.૩૧ ॥

૧૬૪.૩૨/૧અધીતં વિસ્મરતિ યસ્ત્વં કરોતિ તથોત્તમમ્ ।
૧૬૪.૩૨/૨અનાદરં ચ ગુરુષુ તમાહુર્બ્રહ્મઘાતકમ્ ॥ ૧૬૪.૩૨ ॥

૧૬૪.૩૩/૧પ્રત્યક્ષે ચ પ્રિયં વક્તિ પરોક્ષે પરુષાણિ ચ ।
૧૬૪.૩૩/૨અન્યદ્ ધૃદિ વચસ્યન્યત્ કરોત્યન્યત્ સદૈવ યઃ ॥ ૧૬૪.૩૩ ॥

૧૬૪.૩૪/૧ગુરૂણાં શપથં કર્તા દ્વેષ્ટા બ્રાહ્મણનિન્દકઃ ।
૧૬૪.૩૪/૨મિથ્યા વિનીતઃ પાપાત્મા સ તુ સ્યાદ્ બ્રહ્મઘાતકઃ ॥ ૧૬૪.૩૪ ॥

૧૬૪.૩૫/૧દેવં વેદમથાધ્યાત્મં ધર્મબ્રાહ્મણસંગતિમ્ ।
૧૬૪.૩૫/૨એતાન્ નિન્દતિ યો દ્વેષાત્ સ તુ સ્યાદ્ બ્રહ્મઘાતકઃ ॥ ૧૬૪.૩૫ ॥

૧૬૪.૩૬/૧એવં ભૂતોઽપ્યહં રાજન્ દમ્ભાર્થં લજ્જયા તથા ।
૧૬૪.૩૬/૨સદ્વૃત્ત ઇવ વર્તેઽહં તસ્માદ્ રાજન્ દ્વિજોઽભવમ્ ॥ ૧૬૪.૩૬ ॥

૧૬૪.૩૭/૧એવં ભૂતોઽપિ સત્કર્મ કિંચિત્ કર્તાસ્મિ કુત્રચિત્ ।
૧૬૪.૩૭/૨તેનાહં કર્મણા રાજન્ સ્વતઃ સ્મર્તા પુરા કૃતમ્ ॥ ૧૬૪.૩૭ ॥

૧૬૪.૩૮/૧બ્રહ્મોવાચ । તચ્ચિચ્ચિકવચઃ શ્રુત્વા પવમાનઃ સુવિસ્મિતઃ ।
૧૬૪.૩૮/૨કર્મણા કેન તે મુક્તિરિત્યાહ નૃપતિર્દ્વિજમ્ ॥ ૧૬૪.૩૮ ॥

૧૬૪.૩૯/૧ઇતિ તસ્ય વચઃ શ્રુત્વા નૃપતિં પ્રાહ પક્ષિરાટ્ ॥ ૧૬૪.૩૯॥

૧૬૪.૪૦/૧ચિચ્ચિક ઉવાચ । અસ્મિન્ન્ એવ નગશ્રેષ્ઠે ગૌતમ્યા ઉત્તરે તટે ।
૧૬૪.૪૦/૨ગદાધરં નામ તીર્થં તત્ર માં નય સુવ્રત ॥ ૧૬૪.૪૦॥

૧૬૪.૪૧/૧તદ્ ધિ તીર્થં પુણ્યતમં સર્વપાપપ્રણાશનમ્ ।
૧૬૪.૪૧/૨સર્વકામપ્રદં ચેતિ મહદ્ભિર્મુનિભિઃ શ્રુતમ્ ॥ ૧૬૪.૪૧॥

૧૬૪.૪૨/૧ન ગૌતમ્યાસ્તથા વિષ્ણોરપરં ક્લેશનાશનમ્ ।
૧૬૪.૪૨/૨સર્વભાવેન તત્ તીર્થં પશ્યેયમિતિ મે મતિઃ ॥ ૧૬૪.૪૨॥

૧૬૪.૪૩/૧મત્કૃતેન પ્રયત્નેન નૈતચ્છક્યં કદાચન ।
૧૬૪.૪૩/૨કથમાકાઙ્ક્ષિતપ્રાપ્તિર્ભવેદ્ દુષ્કૃતકર્મણામ્ ॥ ૧૬૪.૪૩॥

૧૬૪.૪૪/૧સપ્રયત્નોઽપ્યહં વીર ન પશ્યે તત્ સુદુષ્કરમ્ ।
૧૬૪.૪૪/૨તસ્માત્ તવ પ્રસાદાચ્ચ પશ્યેયં હિ ગદાધરમ્ ॥ ૧૬૪.૪૪॥

૧૬૪.૪૫/૧અવિજ્ઞાપિતદુઃખજ્ઞં કરુણાવરુણાલયમ્ ।
૧૬૪.૪૫/૨યસ્મિન્ દૃષ્ટે ભવક્લેશા ન દૃશ્યન્તે પુનર્નરૈઃ ॥ ૧૬૪.૪૫॥

૧૬૪.૪૬/૧દૃષ્ટ્વૈવ તં દિવં યાસ્યે પ્રસાદાત્ તવ સુવ્રત ॥ ૧૬૪.૪૬॥

૧૬૪.૪૭/૧બ્રહ્મોવાચ । એવમુક્તઃ સ નૃપતિશ્ચિચ્ચિકેન દ્વિજન્મના ।
૧૬૪.૪૭/૨દર્શયામાસ તં દેવં તાં ચ ગઙ્ગાં દ્વિજન્મને ॥ ૧૬૪.૪૭॥

૧૬૪.૪૮/૧તતઃ સ ચિચ્ચિકઃ સ્નાત્વા ગઙ્ગાં ત્રૈલોક્યપાવનીમ્ ॥ ૧૬૪.૪૮॥

૧૬૪.૪૯/૧ચિચ્ચિક ઉવાચ । ગઙ્ગે ગૌતમિ યાવત્ ત્વાં ત્રિજગત્પાવનીં નરઃ ।
૧૬૪.૪૯/૨ન પશ્યત્યુચ્યતે તાવદ્ ઇહામુત્રાપિ પાતકી ॥ ૧૬૪.૪૯॥

૧૬૪.૫૦/૧તસ્માત્ સર્વાગસમપિ મામુદ્ધર સરિદ્વરે ।
૧૬૪.૫૦/૨સંસારે દેહિનામન્યા ન ગતિઃ કાપિ કુત્રચિત્ ।
૧૬૪.૫૦/૩ત્વાં વિના વિષ્ણુચરણ+ ।સરોરુહસમુદ્ભવે ॥ ૧૬૪.૫૦॥

૧૬૪.૫૧/૧બ્રહ્મોવાચ । ઇતિ શ્રદ્ધાવિશુદ્ધાત્મા ગઙ્ગૈકશરણો દ્વિજઃ ।
૧૬૪.૫૧/૨સ્નાનં ચક્રે સ્મરન્ન્ અન્તર્ગઙ્ગે ત્રાયસ્વ મામિતિ ॥ ૧૬૪.૫૧॥

૧૬૪.૫૨/૧ગદાધરં તતો નત્વા પશ્યત્સુ નગવાસિષુ ।
૧૬૪.૫૨/૨પવમાનાભ્યનુજ્ઞાતસ્તદૈવ દિવમાક્રમત્ ॥ ૧૬૪.૫૨॥

૧૬૪.૫૩/૧પવમાનઃ સ્વનગરં પ્રયયૌ સાનુગસ્તતઃ ।
૧૬૪.૫૩/૨તતઃ પ્રભૃતિ તત્ તીર્થં પાવમાનં સચિચ્ચિકમ્ ॥ ૧૬૪.૫૩ ॥

૧૬૪.૫૪/૧ગદાધરં કોટિતીર્થમિતિ વેદવિદો વિદુઃ ।
૧૬૪.૫૪/૨કોટિકોટિગુણં કર્મ કૃતં તત્ર ભવેન્ નૃણામ્ ॥ ૧૬૪.૫૪ ॥

૧૬૫.૧/૧બ્રહ્મોવાચ । ભદ્રતીર્થમિતિ પ્રોક્તં સર્વાનિષ્ટનિવારણમ્ ।
૧૬૫.૧/૨સર્વપાપપ્રશમનં મહાશાન્તિપ્રદાયકમ્ ॥ ૧૬૫.૧ ॥

૧૬૫.૨/૧આદિત્યસ્ય પ્રિયા ભાર્યા ઉષા ત્વાષ્ટ્રી પતિવ્રતા ।
૧૬૫.૨/૨છાયાપિ ભાર્યા સવિતુસ્તસ્યાઃ પુત્રઃ શનૈશ્ચરઃ ॥ ૧૬૫.૨ ॥

૧૬૫.૩/૧તસ્ય સ્વસા વિષ્ટિરિતિ ભીષણા પાપરૂપિણી ।
૧૬૫.૩/૨તાં કન્યાં સવિતા કસ્મૈ દદામીતિ મતિં દધે ॥ ૧૬૫.૩ ॥

૧૬૫.૪/૧યસ્મૈ યસ્મૈ દાતુકામઃ સૂર્યો લોકગુરુઃ પ્રભુઃ ।
૧૬૫.૪/૨તચ્છ્રુત્વા ભીષણા ચેતિ કિં કુર્મો ભાર્યયાનયા ।
૧૬૫.૪/૩એવં તુ વર્તમાને સા પિતરં પ્રાહ દુઃખિતા ॥ ૧૬૫.૪ ॥

૧૬૫.૬/૧વિષ્ટિરુવાચ । બાલામેવ પિતા યસ્તુ દદ્યાત્ કન્યાં સુરૂપિણે ।
૧૬૫.૬/૨સ કૃતાર્થો ભવેલ્લોકે ન ચેદ્ દુષ્કૃતવાન્ પિતા ॥ ૧૬૫.૬ ॥

૧૬૫.૭/૧ચતુર્થાદ્ વત્સરાદ્ ઊર્ધ્વં યાવન્ ન દશમાત્યયઃ ।
૧૬૫.૭/૨તાવદ્ વિવાહઃ કન્યાયાઃ પિત્રા કાર્યઃ પ્રયત્નતઃ ॥ ૧૬૫.૭ ॥

૧૬૫.૮/૧શ્રીમતે વિદુષે યૂને કુલીનાય યશસ્વિને ।
૧૬૫.૮/૨ઉદારાય સનાથાય કન્યા દેયા વરાય વૈ ॥ ૧૬૫.૮ ॥

૧૬૫.૯/૧એતચ્ચેદ્ અન્યથા કુર્યાત્ પિતા સ નિરયી સદા ।
૧૬૫.૯/૨ધર્મસ્ય સાધનં કન્યા વિદુષામપિ ભાસ્કર ॥ ૧૬૫.૯ ॥

૧૬૫.૧૦/૧નરકસ્યેવ મૂર્ખાણાં કામોપહતચેતસામ્ ।
૧૬૫.૧૦/૨એકતઃ પૃથિવી કૃત્સ્ના સશૈલવનકાનના ॥ ૧૬૫.૧૦ ॥

૧૬૫.૧૧/૧સ્વલંકૃતોપાધિહીના સુકન્યા ચૈકતઃ સ્મૃતા ।
૧૬૫.૧૧/૨વિક્રીણીતે યશ્ચ કન્યામશ્વં વા ગાં તિલાન્ અપિ ॥ ૧૬૫.૧૧ ॥

૧૬૫.૧૨/૧ન તસ્ય રૌરવાદિભ્યઃ કદાચિન્ નિષ્કૃતિર્ભવેત્ ।
૧૬૫.૧૨/૨વિવાહાતિક્રમઃ કાર્યો ન કન્યાયાઃ કદાચન ॥ ૧૬૫.૧૨ ॥

૧૬૫.૧૩/૧તસ્મિન્ કૃતે યત્ પિતુઃ સ્યાત્ પાપં તત્ કેન કથ્યતે ।

૧૬૫.૧૩/૨યાવલ્લજ્જાં ન જાનાતિ યાવત્ ક્રીડતિ પાંશુભિઃ ॥ ૧૬૫.૧૩॥

૧૬૫.૧૪/૧તાવત્ કન્યા પ્રદાતવ્યા નો ચેત્ પિત્રોરધોગતિઃ ।
૧૬૫.૧૪/૨પિતુઃ સ્વરૂપં પુત્રઃ સ્યાદ્ યઃ પિતા પુત્ર એવ સઃ ॥ ૧૬૫.૧૪॥

૧૬૫.૧૫/૧આત્મનઃ સુખિતાં લોકે કો ન કુર્યાત્ કરોતિ ચ ।
૧૬૫.૧૫/૨યત્ કન્યાયાં પિતા કુર્યાદ્ દાનં પૂજનમીક્ષણમ્ ॥ ૧૬૫.૧૫॥

૧૬૫.૧૬/૧યત્ કૃતં તત્ કૃતં વિદ્યાત્ તાસુ દત્તં તદ્ અક્ષયમ્ ।
૧૬૫.૧૬/૨યદ્ દત્તં તાસુ કન્યાસુ તદ્ આનન્ત્યાય કલ્પતે ॥ ૧૬૫.૧૬॥

૧૬૫.૧૭/૧પુત્રેષુ ચૈવ પૌત્રેષુ કો ન કુર્યાત્ સુખં રવે ।
૧૬૫.૧૭/૨કરોતિ યઃ કન્યકાનાં સ સમ્પદ્ભાજનં ભવેત્ ॥ ૧૬૫.૧૭॥

૧૬૫.૧૮/૧બ્રહ્મોવાચ । એવં તાં વાદિનીં કન્યાં વિષ્ટિં પ્રોવાચ
ભાસ્કરઃ ॥ ૧૬૫.૧૮॥

૧૬૫.૧૯/૧સૂર્ય ઉવાચ । કિં કરોમિ ન ગૃહ્ણાતિ ત્વાં કશ્ચિદ્ ભીષણાકૃતિમ્ ।
૧૬૫.૧૯/૨કુલં રૂપં વયો વિત્તં વિદ્યાં વૃત્તં સુશીલતામ્ ॥ ૧૬૫.૧૯॥

૧૬૫.૨૦/૧મિથઃ પશ્યન્તિ સમ્બન્ધે વિવાહે સ્ત્રીષુ પુંસુ ચ ।
૧૬૫.૨૦/૨અસ્માસુ સર્વમપ્યસ્તિ વિના તવ ગુણૈઃ શુભે ।
૧૬૫.૨૦/૩કિં કરોમિ ક્વ દાસ્યામિ વૃથા માં ધિક્ કરોષિ કિમ્ ॥ ૧૬૫.૨૦॥

૧૬૫.૨૧/૧બ્રહ્મોવાચ । એવમુક્ત્વા પુનસ્તાં ચ વિષ્ટિં પ્રોવાચ ભાસ્કરઃ ॥ ૧૬૫.૨૧॥

૧૬૫.૨૨/૧સૂર્ય ઉવાચ । યસ્મૈ કસ્મૈ ચ દાતવ્યા ત્વં વૈ યદ્યનુમન્યસે ।
૧૬૫.૨૨/૨દીયસેઽદ્ય મયા વિષ્ટે અનુજાનીહિ માં તતઃ ॥ ૧૬૫.૨૨॥

૧૬૫.૨૩/૧બ્રહ્મોવાચ । પિતરં પ્રાહ સા વિષ્ટિર્ભર્તા પુત્રા ધનં સુખમ્ ।
૧૬૫.૨૩/૨આયૂ રૂપં ચ સમ્પ્રીતિર્જાયતે પ્રાક્તનાનુગમ્ ॥ ૧૬૫.૨૩॥

૧૬૫.૨૪/૧યત્ પુરા વિહિતં કર્મ પ્રાણિના સાધ્વસાધુ વા ।
૧૬૫.૨૪/૨ફલં તદનુરોધેન પ્રાપ્યતેઽપિ ભવાન્તરે ॥ ૧૬૫.૨૪॥

૧૬૫.૨૫/૧સ્વદોષ એવ તત્ પિત્રા પરિહર્તવ્ય આદરાત્ ।
૧૬૫.૨૫/૨તાદૃગ્ એવ ફલં તુ સ્યાદ્ યાદૃગ્ આચરિતં પુરા ॥ ૧૬૫.૨૫॥

૧૬૫.૨૬/૧તસ્માત્ તદ્દાનસમ્બન્ધં સ્વવંશાનુગતં પિતા ।
૧૬૫.૨૬/૨કરોતિ શેષં દૈવેન યદ્ ભાવ્યં તદ્ ભવિષ્યતિ ॥ ૧૬૫.૨૬॥

૧૬૫.૨૭/૧બ્રહ્મોવાચ । તચ્છ્રુત્વા દુહિતુર્વાક્યં ત્વષ્ટુઃ પુત્રાય ભીષણામ્ ।
૧૬૫.૨૭/૨વિશ્વરૂપાય તાં પ્રાદાદ્ વિષ્ટિં લોકભયંકરીમ્ ॥ ૧૬૫.૨૭॥

૧૬૫.૨૮/૧વિશ્વરૂપોઽપિ તદ્વચ્ચ ભીષણો ભીષણાકૃતિઃ ।
૧૬૫.૨૮/૨એવં મિથઃ સંચરતોઃ શીલરૂપસમાનયોઃ ॥ ૧૬૫.૨૮॥

૧૬૫.૨૯/૧પ્રીતિઃ કદાચિદ્ વૈષમ્યં દમ્પત્યોરભવન્ મિથઃ ।
૧૬૫.૨૯/૨ગણ્ડો નામાભવત્ પુત્રો હ્યતિગણ્ડસ્તથૈવ ચ ॥ ૧૬૫.૨૯॥

૧૬૫.૩૦/૧રક્તાક્ષઃ ક્રોધનશ્ચૈવ વ્યયો દુર્મુખ એવ ચ ।
૧૬૫.૩૦/૨તેભ્યઃ કનીયાન્ અભવદ્ ધર્ષણો નામ પુણ્યભાક્ ॥ ૧૬૫.૩૦॥

૧૬૫.૩૧/૧સુતઃ સુશીલઃ સુભગઃ શાન્તઃ શુદ્ધમતિઃ શુચિઃ ।
૧૬૫.૩૧/૨સ કદાચિદ્ યમગૃહં દ્રષ્ટું માતુલમભ્યગાત્ ॥ ૧૬૫.૩૧॥

૧૬૫.૩૨/૧સ દદર્શ બહૂન્ જન્તૂન્ સ્વર્ગસ્થાન્ ઇવ દુઃખિનઃ ।
૧૬૫.૩૨/૨સ માતુલં તુ પપ્રચ્છ નત્વા ધર્મં સનાતનમ્ ॥ ૧૬૫.૩૨॥

૧૬૫.૩૩/૧હર્ષણ ઉવાચ । ક ઇમે સુખિનસ્તાત પચ્યન્તે નરકે ચ કે ॥ ૧૬૫.૩૩॥

૧૬૫.૩૪/૧બ્રહ્મોવાચ । એવં પૃષ્ટો ધર્મરાજઃ સર્વં પ્રાહ યથાર્થવત્ ।
૧૬૫.૩૪/૨તત્કર્મણાં ગતિં સર્વામશેષેણ ન્યવેદયત્ ॥ ૧૬૫.૩૪॥

૧૬૫.૩૫/૧યમ ઉવાચ । વિહિતસ્ય ન કુર્વન્તિ યે કદાચિદ્ અતિક્રમમ્ ।
૧૬૫.૩૫/૨ન તે પશ્યન્તિ નિરયં કદાચિદ્ અપિ માનવાઃ ॥ ૧૬૫.૩૫॥

૧૬૫.૩૬/૧ન માનયન્તિ યે શાસ્ત્રં નાચારં ન બહુશ્રુતાન્ ।
૧૬૫.૩૬/૨વિહિતાતિક્રમં કુર્યુર્યે તે નરકગામિનઃ ॥ ૧૬૫.૩૬॥

૧૬૫.૩૭/૧બ્રહ્મોવાચ । સ તુ શ્રુત્વા ધર્મવાક્યં હર્ષણઃ પુનરબ્રવીત્ ॥ ૧૬૫.૩૭॥

૧૬૫.૩૮/૧હર્ષણ ઉવાચ । પિતા ત્વાષ્ટ્રો ભીષણશ્ચ માતા વિષ્ટિશ્ચ ભીષણા ।
૧૬૫.૩૮/૨ભ્રાતરશ્ચ મહાત્માનો યેન તે શાન્તબુદ્ધયઃ ॥ ૧૬૫.૩૮॥

૧૬૫.૩૯/૧સુરૂપાશ્ચ ભવિષ્યન્તિ નિર્દોષા મઙ્ગલપ્રદાઃ ।
૧૬૫.૩૯/૨તન્ મે કર્મ વદસ્વાદ્ય તત્કર્તાસ્મિ સુરોત્તમ ॥ ૧૬૫.૩૯॥

૧૬૫.૪૦/૧અન્યથા તાન્ ન ગચ્છેયમિત્યુક્તઃ પ્રાહ ધર્મરાટ્ ।
૧૬૫.૪૦/૨હર્ષણં શુદ્ધબુદ્ધિં તં હર્ષણોઽસિ ન સંશયઃ ॥ ૧૬૫.૪૦॥

૧૬૫.૪૧/૧બહવઃ સ્યુઃ સુતાઃ કેચિન્ નૈવ તે કુલતન્તવઃ ।

૧૬૫.૪૧/૨એક એવ સુતઃ કશ્ચિદ્ યેન તદ્ ધ્રિયતે કુલમ્ ॥ ૧૬૫.૪૧॥

૧૬૫.૪૨/૧કુલસ્યાધારભૂતો યો યઃ પિત્રોઃ પ્રિયકારકઃ ।
૧૬૫.૪૨/૨યઃ પૂર્વજાન્ ઉદ્ધરતિ સ પુત્રસ્ત્વિતરો ગદઃ ॥ ૧૬૫.૪૨॥

૧૬૫.૪૩/૧યસ્માત્ ત્વયાનુરૂપં મે પ્રોક્તં માતામહ પ્રિયમ્ ।
૧૬૫.૪૩/૨તસ્માત્ ત્વં ગૌતમીં ગચ્છ સ્નાત્વા નિયતમાનસઃ ॥ ૧૬૫.૪૩॥

૧૬૫.૪૪/૧સ્તુહિ વિષ્ણું જગદ્યોનિં શાન્તં પ્રીતેન ચેતસા ।
૧૬૫.૪૪/૨સ તુ પ્રીતો યદિ ભવેત્ સર્વમિષ્ટં પ્રદાસ્યતિ ॥ ૧૬૫.૪૪॥

૧૬૫.૪૫/૧બ્રહ્મોવાચ । ઇતિ શ્રુત્વા ધર્મવાક્યં હર્ષણો ગૌતમીં યયૌ ।
૧૬૫.૪૫/૨શુચિસ્તુષ્ટાવ દેવેશં હરિં પ્રીતોઽભવદ્ ધરિઃ ॥ ૧૬૫.૪૫॥

૧૬૫.૪૬/૧હર્ષણાય તતઃ પ્રાદાત્ કુલભદ્રં તતસ્તુ સઃ ।
૧૬૫.૪૬/૨સર્વાભદ્રપ્રશમન+ ।પૂર્વકં ભદ્રમસ્તુ તે ॥ ૧૬૫.૪૬॥

૧૬૫.૪૭/૧તદ્ ભદ્રા પ્રોચ્યતે વિષ્ટિઃ પિતા ભદ્રસ્તથા સુતાઃ ।
૧૬૫.૪૭/૨તતઃ પ્રભૃતિ તત્ તીર્થં ભદ્રતીર્થં તદ્ ઉચ્યતે ॥ ૧૬૫.૪૭॥

૧૬૫.૪૮/૧સર્વમઙ્ગલદં પુંસાં તત્ર ભદ્રપતિર્હરિઃ ।
૧૬૫.૪૮/૨તત્તીર્થસેવિનાં પુંસાં સર્વસિદ્ધિપ્રદાયકમ્ ।
૧૬૫.૪૮/૩મઙ્ગલૈકનિધિઃ સાક્ષાદ્ દેવદેવો જનાર્દનઃ ॥ ૧૬૫.૪૮॥

૧૬૬.૧/૧બ્રહ્મોવાચ । પતત્રિતીર્થમાખ્યાતં રોગઘ્નં પાપનાશનમ્ ।
૧૬૬.૧/૨તસ્ય શ્રવણમાત્રેણ કૃતકૃત્યો ભવેન્ નરઃ ॥ ૧૬૬.૧॥

૧૬૬.૨/૧બભૂવતુઃ કશ્યપસ્ય સુતાવરુણાવીશ્વરૌ ।
૧૬૬.૨/૨સમ્પાતિશ્ચ જટાયુશ્ચ સમ્ભવેતાં તદન્વયે ॥ ૧૬૬.૨॥

૧૬૬.૩/૧તાર્ક્ષ્યપ્રજાપતેઃ પુત્રાવરુણો ગરુડસ્તથા ।
૧૬૬.૩/૨તદન્વયે સમ્ભૂતઃ ચ સમ્પાતિઃ પતગોત્તમઃ ॥ ૧૬૬.૩॥

૧૬૬.૪/૧જટાયુરિતિ વિખ્યાતો હ્યપરઃ સોદરોઽનુજઃ ।
૧૬૬.૪/૨અન્યોન્યસ્પર્ધયા યુક્તાવુન્મત્તૌ સ્વબલેન તૌ ॥ ૧૬૬.૪॥

૧૬૬.૫/૧સંજગ્મતુર્દિનકરં નમસ્કર્તું વિહાયસિ ।
૧૬૬.૫/૨યાવત્ સૂર્યસ્ય સામીપ્યં પ્રાપ્તૌ તૌ વિહગોત્તમૌ ॥ ૧૬૬.૫॥

૧૬૬.૬/૧દગ્ધપક્ષાવુભૌ શ્રાન્તૌ પતિતૌ ગિરિમૂર્ધનિ ।
૧૬૬.૬/૨બાન્ધવૌ પતિતૌ દૃષ્ટ્વા નિશ્ચેષ્ટૌ ગતચેતસૌ ॥ ૧૬૬.૬॥

૧૬૬.૭/૧તાવદ્ દુઃખાભિભૂતોઽસાવરુણઃ પ્રાહ ભાસ્કરમ્ ।
૧૬૬.૭/૨તૌ દૃષ્ટ્વા ત્વરુણઃ સૂર્યૂંડમ્ પ્રાહેદં પતિતૌ ભુવિ ।
૧૬૬.૭/૩આશ્વાસયૈતૌ તિગ્માંશો યાવન્ નૈતૌ મરિષ્યતઃ ॥ ૧૬૬.૭ ॥

૧૬૬.૮/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા દિનકરો જીવયામાસ તૌ ખગૌ ।
૧૬૬.૮/૨ગરુડોઽપિ તયોઃ શ્રુત્વા અવસ્થાં સહ વિષ્ણુના ॥ ૧૬૬.૮ ॥

૧૬૬.૯/૧આગત્યાશ્વાસયામાસ સુખં ચક્રે ચ નારદ ।
૧૬૬.૯/૨સર્વ એવ તદા જગ્મુર્ગઙ્ગાં તાપાપનુત્તયે ॥ ૧૬૬.૯ ॥

૧૬૬.૧૦/૧જટાયુશ્ચારુણશ્ચૈવ સમ્પાતિર્ગરુડસ્તથા ।
૧૬૬.૧૦/૨સૂર્યો વિષ્ણુસ્તત્ પ્રયયૌ તત્ તીર્થં બહુપુણ્યદમ્ ॥ ૧૬૬.૧૦ ॥

૧૬૬.૧૧/૧પતત્રિતીર્થમાખ્યાતં વિષઘ્નં સર્વકામદમ્ ।
૧૬૬.૧૧/૨સ્વયં સૂર્યસ્તથા વિષ્ણુઃ સુપર્ણેનારુણેન ચ ॥ ૧૬૬.૧૧ ॥

૧૬૬.૧૨/૧આસતે ગૌતમીતીરે તથૈવ વૃષભધ્વજઃ ।
૧૬૬.૧૨/૨ત્રયાણામપિ દેવાનાં સ્થિતેસ્તત્ તીર્થમુત્તમમ્ ॥ ૧૬૬.૧૨ ॥

૧૬૬.૧૩/૧તત્ર સ્નાત્વા શુચિર્ભૂત્વા નમસ્કુર્યાત્ સુરાન્ ઇમાન્ ।
૧૬૬.૧૩/૨આધિવ્યાધિવિનિર્મુક્તઃ સ પરં સૌખ્યમાપ્નુયાત્ ॥ ૧૬૬.૧૩ ॥

૧૬૭.૧/૧બ્રહ્મોવાચ । વિપ્રતીર્થમિતિ ખ્યાતં તથા નારાયણં વિદુઃ ।
૧૬૭.૧/૨તસ્યાખ્યાનં પ્રવક્ષ્યામિ શ ૃણુ વિસ્મયકારકમ્ ॥ ૧૬૭.૧ ॥

૧૬૭.૨/૧અન્તર્વેદ્યાં દ્વિજઃ કશ્ચિદ્ બ્રાહ્મણો વેદપારગઃ ।
૧૬૭.૨/૨તસ્ય પુત્રા મહાપ્રાજ્ઞા ગુણરૂપદયાન્વિતાઃ ॥ ૧૬૭.૨ ॥

૧૬૭.૩/૧તેષાં કનીયાન્ યો ભ્રાતા શાન્તો ગુણગણૈર્વૃતઃ ।
૧૬૭.૩/૨આસન્દિવ ઇતિ ખ્યાતઃ સર્વજ્ઞાનો મહામતિઃ ॥ ૧૬૭.૩ ॥

૧૬૭.૪/૧વિવાહાય પિતા તસ્મૈ આસન્દિવાય યત્નવાન્ ।
૧૬૭.૪/૨એતસ્મિન્ન્ અન્તરે રાત્રૌ સુપ્તં તં દ્વિજપુત્રકમ્ ॥ ૧૬૭.૪ ॥

૧૬૭.૫/૧અવિષ્ણુસ્મરણં સૌમ્ય+ ।શિરસ્કમસમાહિતમ્ ।
૧૬૭.૫/૨આસન્દિવં ક્રૂરરૂપા રાક્ષસી કામરૂપિણી ॥ ૧૬૭.૫ ॥

૧૬૭.૬/૧તમાદાયાગમચ્છીઘ્રં ગૌતમ્યા દક્ષિણે તટે ।
૧૬૭.૬/૨શ્રીગિરેરુત્તરે પારે બહુબ્રાહ્મણસેવિતમ્ ॥ ૧૬૭.૬ ॥

૧૬૭.૭/૧નગરં ધર્મનિલયં લક્ષ્મ્યા નિલયમેવ ચ ।
૧૬૭.૭/૨તત્ર રાજા બૃહત્કીર્તિઃ સર્વક્ષત્રગુણાન્વિતઃ ॥ ૧૬૭.૭॥

૧૬૭.૮/૧તસ્યામિતક્ષેમસુભિક્ષયુક્તમ્ ।
૧૬૭.૮/૨નિશાવસાને દ્વિજપુત્રયુક્તા ।
૧૬૭.૮/૩સા રાક્ષસી તત્ પુરમાસસાદ ।
૧૬૭.૮/૪મનોજ્ઞરૂપાણિ બિભર્તિ નિત્યમ્ ॥ ૧૬૭.૮॥

૧૬૭.૯/૧સા કામરૂપેણ ચરત્યશેષામ્ ।
૧૬૭.૯/૨મહીમિમાં તેન સમં દ્વિજેન ।
૧૬૭.૯/૩ગોદાવરીદક્ષિણતીરભાગે ।
૧૬૭.૯/૪વૃદ્ધાકૃતિસ્તં દ્વિજમાહ ભીમા ॥ ૧૬૭.૯॥

૧૬૭.૧૦/૧રાક્ષસ્યુવાચ । એષા તુ ગઙ્ગા દ્વિજમુખ્ય સંધ્યા ।
૧૬૭.૧૦/૨ઉપાસ્યતાં વિપ્રવરૈઃ સમેત્ય ।
૧૬૭.૧૦/૩યથોચિતં વિપ્રવરાસ્તુ કાલે ।
૧૬૭.૧૦/૪નોપાસતે યત્નત એવ સંધ્યામ્ ॥ ૧૬૭.૧૦॥

૧૬૭.૧૧/૧નીચાસ્ત એવાભિહિતાઃ સુરેશૈર્।
૧૬૭.૧૧/૨અન્ત્યાવસાયિપ્રવરાસ્ત એતે ।
૧૬૭.૧૧/૩અહં જનિત્રી તવ ચેતિ વાચ્યમ્ ।
૧૬૭.૧૧/૪નો ચેદ્ ઇદાનીં ત્વમુપૈષિ નાશમ્ ॥ ૧૬૭.૧૧॥

૧૬૭.૧૨/૧મદ્વાક્યકર્તાસિ યદિ દ્વિજેન્દ્ર ।
૧૬૭.૧૨/૨સુખં કરિષ્યે તવ યત્ પ્રિયં ચ ।
૧૬૭.૧૨/૩પુનશ્ચ દેશં નિલયં ગુરૂંશ્ચ ।
૧૬૭.૧૨/૪સમ્પ્રાપયિષ્યે નનુ સત્યમેતત્ ॥ ૧૬૭.૧૨॥

૧૬૭.૧૩/૧બ્રહ્મોવાચ । સ પ્રાહ કા ત્વં દ્વિજપુંગવોઽપિ ।
૧૬૭.૧૩/૨સોવાચ તં રાક્ષસી કામરૂપા ।
૧૬૭.૧૩/૩વિશ્વાસયન્તી શપથૈરનેકૈસ્- ।
૧૬૭.૧૩/૪તં ભ્રાન્તચિત્તં મુનિરાજપુત્રમ્ ॥ ૧૬૭.૧૩॥

૧૬૭.૧૪/૧કઙ્કાલિની નામ જગત્પ્રસિદ્ધા ।
૧૬૭.૧૪/૨વિપ્રોઽપિ તામાહ નિવેદિતં યત્ ।
૧૬૭.૧૪/૩તદ્ એવ કર્તાસ્મિ ન સંશયોઽત્ર ।
૧૬૭.૧૪/૪યત્ તત્ પ્રિયં વચ્મિ કરોમિ ચૈવ ॥ ૧૬૭.૧૪॥

૧૬૭.૧૫/૧બ્રહ્મોવાચ । તદ્ વિપ્રવચનં શ્રુત્વા રાક્ષસી કામરૂપિણી ।
૧૬૭.૧૫/૨વૃદ્ધા તથાપિ ચાર્વઙ્ગી દિવ્યાલંકારભૂષણા ॥ ૧૬૭.૧૫॥

૧૬૭.૧૬/૧દ્વિજમાદાય સર્વત્ર મત્સુતોઽયં ગુણાકરઃ ।
૧૬૭.૧૬/૨એવં વદન્તી સર્વત્ર યાતિ વક્તિ કરોતિ ચ ॥ ૧૬૭.૧૬॥

૧૬૭.૧૭/૧તં વિપ્રં રૂપસૌભાગ્ય+ ।વયોવિદ્યાવિભૂષિતમ્ ।
૧૬૭.૧૭/૨તાં ચ વૃદ્ધાં ગુણોપેતામસ્ય માતેતિ મેનિરે ॥ ૧૬૭.૧૭॥

૧૬૭.૧૮/૧તત્ર દ્વિજવરઃ કશ્ચિત્ સ્વાં કન્યાં ભૂષણાન્વિતામ્ ।
૧૬૭.૧૮/૨રાક્ષસીં તાં પુરસ્કૃત્ય પ્રાદાત્ તસ્મૈ દ્વિજાતયે ॥ ૧૬૭.૧૮॥

૧૬૭.૧૯/૧સા કન્યા તં પતિં પ્રાપ્ય કૃતાર્થાસ્મીત્યચિન્તયત્ ।
૧૬૭.૧૯/૨સ દ્વિજોઽપિ ગુણૈર્યુક્તાં પત્નીં દૃષ્ટ્વા સુદુઃખિતઃ ॥ ૧૬૭.૧૯॥

૧૬૭.૨૦/૧દ્વિજ ઉવાચ । મામિયં ભક્ષયેદ્ એવ રાક્ષસી પાપરૂપિણી ।
૧૬૭.૨૦/૨કિં કરોમિ ક્વ ગચ્છામિ કસ્યૈતત્ કથયામિ વા ॥ ૧૬૭.૨૦॥

૧૬૭.૨૧/૧મહત્ સંકટમાપન્નં રક્ષયિષ્યતિ કોઽત્ર મામ્ ।
૧૬૭.૨૧/૨ભાર્યા મમેયં કલ્યાણી ગુણરૂપવયોયુતા ।
૧૬૭.૨૧/૩એનામપ્યશુભાકસ્માદ્ ભક્ષયિષ્યતિ રાક્ષસી ॥ ૧૬૭.૨૧॥

૧૬૭.૨૨/૧બ્રહ્મોવાચ । એતસ્મિન્ન્ અન્તરે તત્ર ભાર્યા સા ગુણશાલિની ।
૧૬૭.૨૨/૨વૃદ્ધાપ્યતિદુરાધર્ષા સા ગતા કુત્રચિત્ તદા ॥ ૧૬૭.૨૨॥

૧૬૭.૨૩/૧પ્રશ્રયાવનતા ભૂત્વા બાલા ચાપિ પતિવ્રતા ।
૧૬૭.૨૩/૨ભર્તારં દુઃખિતં જ્ઞાત્વા પતિં પ્રાહ રહઃ શનૈઃ ॥ ૧૬૭.૨૩॥

૧૬૭.૨૪/૧ભાર્યોવાચ । કસ્માત્ તે દુઃખમાપન્નં સ્વામિંસ્તત્ત્વં
વદસ્વ મે ॥ ૧૬૭.૨૪॥

૧૬૭.૨૫/૧બ્રહ્મોવાચ । શનૈઃ પ્રોવાચ તાં ભાર્યાં યથાવત્ પૂર્વવિસ્તરમ્ ।
૧૬૭.૨૫/૨કિમકથ્યં પ્રિયે મિત્રે કુલીનાયાં ચ યોષિતિ ॥ ૧૬૭.૨૫॥

૧૬૭.૨૬/૧ભર્તૃવાક્યં નિશમ્યેદં પ્રોવાચ વદતાં વરા ॥

૧૬૭.૨૬॥

૧૬૭.૨૭/૧ભાર્યોવાચ । અનાત્મનઃ સર્વતોઽપિ ભયમસ્તિ ગૃહેષ્વપિ ।
૧૬૭.૨૭/૨કુતો ભયં હ્યાત્મવતાં કિં પુનર્ગૌતમીતટે ॥ ૧૬૭.૨૭॥

૧૬૭.૨૮/૧વસતાં વિષ્ણુભક્તાનાં વિરક્તાનાં વિવેકિનામ્ ।
૧૬૭.૨૮/૨અત્ર સ્નાત્વા શુચિર્ભૂત્વા સ્તુહિ દેવમનામયમ્ ॥ ૧૬૭.૨૮॥

૧૬૭.૨૯/૧બ્રહ્મોવાચ । એતદ્ આકર્ણ્ય ગઙ્ગાયાં સ્નાત્વા વિગતકલ્મષઃ ।
૧૬૭.૨૯/૨તુષ્ટાવ ગૌતમીતીરે દ્વિજો નારાયણં તથા ॥ ૧૬૭.૨૯॥

૧૬૭.૩૦/૧દ્વિજ ઉવાચ । ત્વમન્તરાત્મા જગતોઽસ્ય નાથ ।
૧૬૭.૩૦/૨ત્વમેવ કર્તાસ્ય મુકુન્દ હર્તા ।
૧૬૭.૩૦/૩ત્વં પાલકઃ પાલયસે ન દીનમ્ ।
૧૬૭.૩૦/૪અનાથબન્ધો નરસિંહ કસ્માત્ ॥ ૧૬૭.૩૦॥

૧૬૭.૩૧/૧શ્રુત્વૈતત્ પ્રાર્થનં તસ્ય જગચ્છોકનિવારણઃ ।
૧૬૭.૩૧/૨નારાયણોઽપિ તાં પાપાં નિજઘાન સ રાક્ષસીમ્ ॥ ૧૬૭.૩૧॥

૧૬૭.૩૨/૧સુદર્શનેન ચક્રેણ સહસ્રારેણ ભાસ્વતા ।
૧૬૭.૩૨/૨તસ્મૈ પ્રાદાદ્ વરાન્ ઇષ્ટાન્ પ્રાપયચ્ચ ગુરું પ્રભુઃ ॥ ૧૬૭.૩૨॥

૧૬૭.૩૩/૧તતઃ પ્રભૃતિ તત્ તીર્થં વિપ્રં નારાયણં વિદુઃ ।
૧૬૭.૩૩/૨સ્નાનદાનેન પૂજાદ્યૈર્યત્ર સિધ્યતિ વાઞ્છિતમ્ ॥ ૧૬૭.૩૩॥

૧૬૮.૧/૧બ્રહ્મોવાચ । ભાનુતીર્થમિતિ ખ્યાતં ત્વાષ્ટ્રં માહેશ્વરં તથા ।
૧૬૮.૧/૨ઐન્દ્રં યામ્યં તથાગ્નેયં સર્વપાપપ્રણાશનમ્ ॥ ૧૬૮.૧॥

૧૬૮.૨/૧અભિષ્ટુત ઇતિ ખ્યાતો રાજાસીત્ પ્રિયદર્શનઃ ।
૧૬૮.૨/૨હયમેધેન પુણ્યેન યષ્ટુમારબ્ધવાન્ સુરાન્ ॥ ૧૬૮.૨॥

૧૬૮.૩/૧તત્રર્ત્વિજઃ ષોડશ સ્યુર્વસિષ્ઠાત્રિપુરોગમાઃ ।
૧૬૮.૩/૨ક્ષત્રિયે યજમાને તુ યજ્ઞભૂમિઃ કથં ભવેત્ ॥ ૧૬૮.૩॥

૧૬૮.૪/૧બ્રાહ્મણે દીક્ષિતે રાજા ભુવં દાસ્યતિ યજ્ઞિયામ્ ।
૧૬૮.૪/૨ભૂપતૌ દીક્ષિતે દાતા કો ભવેત્ કો નુ યાચતે ॥ ૧૬૮.૪॥

૧૬૮.૫/૧યાચ્ઞેયમખિલાશર્મ+ ।જનની પાપરૂપિણી ।
૧૬૮.૫/૨કેનાપ્યતો ન કાર્યૈવ ક્ષત્રિયેણ વિશેષતઃ ॥ ૧૬૮.૫॥

૧૬૮.૬/૧એવં મીમાંસમાનેષુ બ્રાહ્મણેષુ પરસ્પરમ્ ।
૧૬૮.૬/૨તત્ર પ્રાહ મહાપ્રાજ્ઞો વસિષ્ઠો ધર્મવિત્તમઃ ॥ ૧૬૮.૬॥

૧૬૮.૭/૧વસિષ્ઠ ઉવાચ । રાજ્ઞિ દીક્ષાયમાણે તુ સૂર્યો યાચ્યો ભુવં પ્રતિ ।

૧૬૮.૭/૨દેહિ મે દેવ સવિતર્યજનં દેવતોચિતમ્ ॥ ૧૬૮.૭॥

૧૬૮.૮/૧દૈવં ક્ષત્રમસિ બ્રહ્મન્ ભૂતનાથ નમોऽસ્તુ તે ।
૧૬૮.૮/૨યાચિતઃ સવિતા રાજ્ઞા દેવાનાં યજનં શુભમ્ ॥ ૧૬૮.૮॥

૧૬૮.૯/૧દદાત્યેવ તતો રાજન્ પ્રાર્થયેશં દિવાકરમ્ ॥ ૧૬૮.૯॥

૧૬૮.૧૦/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વાભિષ્ટુતોऽપિ દેવદેવં દિવાકરમ્ ।
૧૬૮.૧૦/૨શ્રદ્ધયા પ્રાર્થયામાસ હરીશાજાત્મકં રવિમ્ ॥ ૧૬૮.૧૦॥

૧૬૮.૧૧/૧રાજોવાચ । દેવાનાં યજનં દેહિ સવિતસ્તે નમોऽસ્તુ તે ॥ ૧૬૮.૧૧॥

૧૬૮.૧૨/૧બ્રહ્મોવાચ । ક્ષત્રં દૈવં યતઃ સૂર્યો દત્તા ભૂર્ભૂપતેસ્તતઃ ।
૧૬૮.૧૨/૨સવિતા દેવદેવેશો દદામીત્યભ્યભાષત ॥ ૧૬૮.૧૨॥

૧૬૮.૧૩/૧એવં કરોતિ યો યજ્ઞં તસ્ય રિષ્ટિર્ન કાચન ।
૧૬૮.૧૩/૨તથા વાજિમખે સત્રે બ્રાહ્મણૈર્વેદપારગૈઃ ॥ ૧૬૮.૧૩॥

૧૬૮.૧૪/૧પ્રારબ્ધેऽભિષ્ટુતા રાજ્ઞા યત્રાગાદ્ ભૂપતિં રવિઃ ।
૧૬૮.૧૪/૨દેવાનાં યજનં દાતું ભાનુતીર્થં તદ્ ઉચ્યતે ॥ ૧૬૮.૧૪॥

૧૬૮.૧૫/૧તં દેવક્રતુમુત્કૃષ્ટં હયમેધં સુરૈર્યુતમ્ ।
૧૬૮.૧૫/૨દૈત્યાશ્ચ દનુજાશ્ચૈવ તથાન્યે યજ્ઞઘાતકાઃ ॥ ૧૬૮.૧૫॥

૧૬૮.૧૬/૧બ્રહ્મવેષધરાઃ સર્વે ગાયન્તઃ સામગા ઇવ ।
૧૬૮.૧૬/૨તેऽપિ તત્ર મહાપ્રાજ્ઞાઃ પ્રાવિશન્ અનિવારિતાઃ ॥ ૧૬૮.૧૬॥

૧૬૮.૧૭/૧ચમસાનિ ચ પાત્રાણિ સોમં ચષાલમેવ ચ ।
૧૬૮.૧૭/૨સોમપાનં હવિસ્ત્યાગમ્ ઋત્વિજો ભૂપતિં તથા ॥ ૧૬૮.૧૭॥

૧૬૮.૧૮/૧નિન્દન્તિ નિક્ષિપન્ત્યન્યે હસન્ત્યન્યે તથાસુરાઃ ।
૧૬૮.૧૮/૨તેષાં ચેષ્ટાં ન જાનન્તિ વિશ્વરૂપં વિના મુને ॥ ૧૬૮.૧૮॥

૧૬૮.૧૯/૧વિશ્વરૂપોऽપિ પિતરં પ્રાહ દૈત્યા ઇમે ઇતિ ।
૧૬૮.૧૯/૨તત્ પુત્રવચનં શ્રુત્વા ત્વષ્ટા પ્રાહ સુરાન્ ઇદમ્ ॥ ૧૬૮.૧૯॥

૧૬૮.૨૦/૧ત્વષ્ટોવાચ । ગૃહીત્વા વારિદર્ભાંશ્ચ પ્રોક્ષયધ્વં સમન્તતઃ ।
૧૬૮.૨૦/૨યે નિન્દન્તિ મખં પુણ્યં ચમસં સોમમેવ ચ ॥ ૧૬૮.૨૦॥

૧૬૮.૨૧/૧મયા ત્વપહતાઃ સર્વ ઇત્યુક્ત્વા પરિષિઞ્ચત ॥ ૧૬૮.૨૧॥

૧૬૮.૨૨/૧બ્રહ્મોવાચ । તથા ચક્રુઃ સુરગણાસ્ત્વષ્ટા ચાપિ તથાકરોત્ ।

૧૬૮.૨૨/૨ભસ્મીભૂતાસ્તતઃ સર્વે કાંદિશીકાસ્તતોઽભવન્ ॥ ૧૬૮.૨૨ ॥

૧૬૮.૨૩/૧હતા મયા મહાપાપા ઇત્યુક્ત્વા વાર્યવાક્ષિપત્ ।
૧૬૮.૨૩/૨તતઃ ક્ષીણાયુષો દૈત્યાઃ પ્રાતિષ્ઠન્ કુપિતાસ્તતઃ ॥ ૧૬૮.૨૩ ॥

૧૬૮.૨૪/૧યત્રૈતત્ પ્રાક્ષિપદ્ વારિ ત્વષ્ટા લોકપ્રજાપતિઃ ।
૧૬૮.૨૪/૨ત્વાષ્ટ્રં તીર્થં તદ્ આખ્યાતં સર્વપાપપ્રણાશનમ્ ॥ ૧૬૮.૨૪ ॥

૧૬૮.૨૫/૧ત્વષ્ટુર્વાક્યાચ્ચ્યુતાન્ દૈત્યાન્ નિજઘાન યમસ્તદા ।
૧૬૮.૨૫/૨કાલદણ્ડેન ચક્રેણ કાલપાશેન મન્યુના ॥ ૧૬૮.૨૫ ॥

૧૬૮.૨૬/૧યત્ર તે નિહતા દૈત્યાસ્તત્ તીર્થં યામ્યમુચ્યતે ।
૧૬૮.૨૬/૨યત્રાભવત્ ક્રતુઃ પૂર્ણો હુત્વાગ્નૌ ચામૃતં બહુ ॥ ૧૬૮.૨૬ ॥

૧૬૮.૨૭/૧ધારાભિઃ શરમાનાભિરખણ્ડાભિર્મહાધ્વરે ।
૧૬૮.૨૭/૨યત્રાભવદ્ ધવ્યવાહસ્તૃપ્તસ્તસ્ય હ્યભિષ્ટુતઃ ॥ ૧૬૮.૨૭ ॥

૧૬૮.૨૮/૧અગ્નિતીર્થં તદ્ આખ્યાતમશ્વમેધફલપ્રદમ્ ।
૧૬૮.૨૮/૨ઇન્દ્રો મરુદ્ભિર્નૃપતિં પ્રાહેદં વચનં શુભમ્ ॥ ૧૬૮.૨૮ ॥

૧૬૮.૨૯/૧ત્વં સંરાડ્ ભવિતા રાજન્ન્ ઉભયોરપિ લોકયોઃ ।
૧૬૮.૨૯/૨સખા મમ પ્રિયો નિત્યં ભવિતા નાત્ર સંશયઃ ॥ ૧૬૮.૨૯ ॥

૧૬૮.૩૦/૧સ કૃતાર્થો મર્ત્યલોક ઇન્દ્રતીર્થે ચ તર્પણમ્ ।
૧૬૮.૩૦/૨કુર્યાત્ પિતૃણાં પ્રીત્યર્થં યમતીર્થે વિશેષતઃ ॥ ૧૬૮.૩૦ ॥

૧૬૮.૩૧/૧માહેશ્વરં તુ તત્ તીર્થં પૂજિતોઽભિષ્ટુતઃ શિવઃ ।
૧૬૮.૩૧/૨ભક્તિયુક્તેન વિપ્રૈશ્ચ સર્વકર્મવિશારદૈઃ ॥ ૧૬૮.૩૧ ॥

૧૬૮.૩૨/૧વૈદિકૈર્લૌકિકૈશ્ચૈવ મન્ત્રૈઃ પૂજ્યં મહેશ્વરમ્ ।
૧૬૮.૩૨/૨નૃત્યૈર્ગીતૈસ્તથા વાદ્યૈરમૃતૈઃ પઞ્ચસમ્ભવૈઃ ॥ ૧૬૮.૩૨ ॥

૧૬૮.૩૩/૧ઉપચારૈશ્ચ બહુભિર્દણ્ડપાતપ્રદક્ષિણૈઃ ।
૧૬૮.૩૩/૨ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈઃ પુષ્પૈર્ગન્ધૈઃ સુગન્ધિભિઃ ॥ ૧૬૮.૩૩ ॥

૧૬૮.૩૪/૧પૂજયામાસ દેવેશં વિષ્ણું શમ્ભું ધિયૈકયા ।
૧૬૮.૩૪/૨તતઃ પ્રસન્નૌ દેવેશૌ વરાન્ દદતુરોજસા ॥ ૧૬૮.૩૪ ॥

૧૬૮.૩૫/૧અભિષ્ટુતે નરેન્દ્રાય ભુક્તિમુક્તી ઉભે અપિ ।
૧૬૮.૩૫/૨માહાત્મ્યમસ્ય તીર્થસ્ય તથા દદતુરુત્તમમ્ ॥ ૧૬૮.૩૫ ॥

૧૬૮.૩૬/૧તતઃપ્રભૃતિ તત્ તીર્થં શૈવં વૈષ્ણવમુચ્યતે ।
૧૬૮.૩૬/૨તત્ર સ્નાનં ચ દાનં ચ સર્વકામપ્રદં વિદુઃ ॥ ૧૬૮.૩૬॥

૧૬૮.૩૭/૧ઇમાનિ સર્વતીર્થાનિ સ્મરેદ્ અપિ પઠેત વા ।
૧૬૮.૩૭/૨વિમુક્તઃ સર્વપાપેભ્યઃ શિવવિષ્ણુપુરં વ્રજેત્ ॥ ૧૬૮.૩૭॥

૧૬૮.૩૮/૧ભાનુતીર્થે વિશેષેણ સ્નાનં સર્વાર્થસિદ્ધિદમ્ ।
૧૬૮.૩૮/૨તત્ર તીર્થે મહાપુણ્યં તીર્થાનાં શતમત્ર હિ ॥ ૧૬૮.૩૮॥

૧૬૯.૧/૧બ્રહ્મોવાચ । ભિલ્લતીર્થમિતિ ખ્યાતં રોગઘ્નં પાપનાશનમ્ ।
૧૬૯.૧/૨મહાદેવપદામ્ભોજ+ ।યુગભક્તિપ્રદાયકમ્ ॥ ૧૬૯.૧॥

૧૬૯.૨/૧તત્રાપ્યેવંવિધાં પુણ્યાં કથાં શ◌ૃણુ મહામતે ।
૧૬૯.૨/૨ગઙ્ગાયા દક્ષિણે તીરે શ્રીગિરેરુત્તરે તટે ॥ ૧૬૯.૨॥

૧૬૯.૩/૧આદિકેશ ઇતિ ખ્યાત ઋષિભિઃ પરિપૂજિતઃ ।
૧૬૯.૩/૨મહાદેવો લિઙ્ગરૂપી સદાસ્તે સર્વકામદઃ ॥ ૧૬૯.૩॥

૧૬૯.૪/૧સિન્ધુદ્વીપ ઇતિ ખ્યાતો મુનિઃ પરમધાર્મિકઃ ।
૧૬૯.૪/૨તસ્ય ભ્રાતા વેદ ઇતિ સ ચાપિ પરમો ઋષિઃ ॥ ૧૬૯.૪॥

૧૬૯.૫/૧તમાદિકેશં વૈ દેવં ત્રિપુરારિં ત્રિલોચનમ્ ।
૧૬૯.૫/૨નિત્યં પૂજયતે ભક્ત્યા પ્રાપ્તે મધ્યંદિને રવૌ ॥ ૧૬૯.૫॥

૧૬૯.૬/૧ભિક્ષાટનાય વેદોऽપિ યાતિ ગ્રામં વિચક્ષણઃ ।
૧૬૯.૬/૨યાતે તસ્મિન્ દ્વિજવરે વ્યાધઃ પરમધાર્મિકઃ ॥ ૧૬૯.૬॥

૧૬૯.૭/૧તસ્મિન્ ગિરિવરે પુણ્યે મૃગયાં યાતિ નિત્યશઃ ।
૧૬૯.૭/૨અટિત્વા વિવિધાન્ દેશાન્ મૃગાન્ હત્વા યથાસુખમ્ ॥ ૧૬૯.૭॥

૧૬૯.૮/૧મુખે ગૃહીત્વા પાનીયમભિષેકાય શૂલિનઃ ।
૧૬૯.૮/૨ન્યસ્ય માંસં ધનુષ્કોટ્યાં શ્રાન્તો વ્યાધઃ શિવં પ્રભુમ્ ॥ ૧૬૯.૮॥

૧૬૯.૯/૧આદિકેશં સમાગત્ય ન્યસ્ય માંસં તતો બહિઃ ।
૧૬૯.૯/૨ગઙ્ગાં ગત્વા મુખે વારિ ગૃહીત્વાગત્ય તં શિવમ્ ॥ ૧૬૯.૯॥

૧૬૯.૧૦/૧યસ્ય કસ્યાપિ પત્રાણિ કરેણાદાય ભક્તિતઃ ।
૧૬૯.૧૦/૨અપરેણ ચ માંસાનિ નૈવેદ્યાર્થં ચ તન્મનાઃ ॥ ૧૬૯.૧૦॥

૧૬૯.૧૧/૧આદિકેશં સમાગત્ય વેદેનાર્ચિતમોજસા ।
૧૬૯.૧૧/૨પાદેનાહત્ય તાં પૂજાં મુખાનીતેન વારિણા ॥ ૧૬૯.૧૧॥

૧૬૯.૧૨/૧સ્નાપયિત્વા શિવં દેવમર્ચયિત્વા તુ પત્રકૈઃ ।
૧૬૯.૧૨/૨કલ્પયિત્વા તુ તન્ માંસં શિવો મે પ્રીયતામિતિ ॥ ૧૬૯.૧૨॥

૧૬૯.૧૩/૧નૈવ કિંચિત્ સ જાનાતિ શિવભક્તિં વિના શુભામ્ ।
૧૬૯.૧૩/૨તતો યાતિ સ્વકં સ્થાનં માંસેન તુ યથાગતમ્ ॥ ૧૬૯.૧૩॥

૧૬૯.૧૪/૧કરોત્યેતાદૃગ્ આગત્ય *આગત્ય પ્રત્યહમેવ સઃ ।
૧૬૯.૧૪/૨તથાપીશસ્તુતોષાસ્ય વિચિત્રા હીશ્વરસ્થિતિઃ ॥ ૧૬૯.૧૪॥

૧૬૯.૧૫/૧યાવન્ નાયાત્યસૌ ભિલ્લઃ શિવસ્તાવન્ ન સૌખ્યભાક્ ।
૧૬૯.૧૫/૨ભક્તાનુકમ્પિતાં શમ્ભોર્માનાતીતાં તુ વેત્તિ કઃ ॥ ૧૬૯.૧૫॥

૧૬૯.૧૬/૧સમ્પૂજયત્યાદિકેશમુમયા પ્રત્યહં શિવમ્ ।
૧૬૯.૧૬/૨એવં બહુતિથે કાલે યાતે વેદશ્ચુકોપ હ ॥ ૧૬૯.૧૬॥

૧૬૯.૧૭/૧પૂજાં મન્ત્રવતીં ચિત્રાં શિવભક્તિસમન્વિતામ્ ।
૧૬૯.૧૭/૨કો નુ વિધ્વંસતે પાપો મત્તઃ સ વધમાપ્નુયાત્ ॥ ૧૬૯.૧૭॥

૧૬૯.૧૮/૧ગુરુદેવદ્વિજસ્વામિ+ ।દ્રોહી વધ્યો મુનેરપિ ।
૧૬૯.૧૮/૨સર્વસ્યાપિ વધાર્હોઽસૌ શિવસ્ય દ્રોહકૃન્ નરઃ ॥ ૧૬૯.૧૮॥

૧૬૯.૧૯/૧એવં નિશ્ચિત્ય મેધાવી વેદઃ સિન્ધોસ્તથાનુજઃ ।
૧૬૯.૧૯/૨કસ્યેયં પાપચેષ્ટા સ્યાત્ પાપિષ્ઠસ્ય દુરાત્મનઃ ॥ ૧૬૯.૧૯॥

૧૬૯.૨૦/૧પુષ્પૈર્વન્યભવૈર્દિવ્યૈઃ કન્દૈર્મૂલફલૈઃ શુભૈઃ ।
૧૬૯.૨૦/૨કૃતાં પૂજાં સ વિધ્વસ્ય હ્યન્યાં પૂજાં કરોતિ યઃ ॥ ૧૬૯.૨૦॥

૧૬૯.૨૧/૧માંસેન તરુપત્રૈશ્ચ સ ચ વધ્યો ભવેન્ મમ ।
૧૬૯.૨૧/૨એવં સંચિન્ત્ય મેધાવી ગોપયિત્વા તનું તદા ॥ ૧૬૯.૨૧॥

૧૬૯.૨૨/૧તં પશ્યેયમહં પાપં પૂજાકર્તારમીશ્વરે ।
૧૬૯.૨૨/૨એતસ્મિન્ન્ અન્તરે પ્રાયાદ્ વ્યાધો દેવં યથા પુરા ॥ ૧૬૯.૨૨॥

૧૬૯.૨૩/૧નિત્યવત્ પૂજયન્તં તમાદિકેશસ્તદાબ્રવીત્ ॥ ૧૬૯.૨૩॥

૧૬૯.૨૪/૧આદિકેશ ઉવાચ । ભો ભો વ્યાધ મહાબુદ્ધે શ્રાન્તોઽસીતિ પુનઃ પુનઃ ।
૧૬૯.૨૪/૨ચિરાય કથમાયાતસ્ત્વાં વિના તાત દુઃખિતઃ ।
૧૬૯.૨૪/૩ન વિન્દામિ સુખં કિંચિત્ સમાશ્વસિહિ પુત્રક ॥ ૧૬૯.૨૪॥

૧૬૯.૨૫/૧બ્રહ્મોવાચ । તમેવંવાદિનં દેવં વેદઃ શ્રુત્વા વિલોક્ય તુ ।

૧૬૯.૨૫/૨ચુકોપ વિસ્મયાવિષ્ટો ન ચ કિંચિદ્ ઉવાચ હ ॥ ૧૬૯.૨૫॥

૧૬૯.૨૬/૧વ્યાધશ્ચ નિત્યવત્ પૂજાં કૃત્વા સ્વભવનં યયૌ ।
૧૬૯.૨૬/૨વેદશ્ચ કુપિતો ભૂત્વા આગત્યેશમુવાચ હ ॥ ૧૬૯.૨૬॥

૧૬૯.૨૭/૧વેદ ઉવાચ । અયં વ્યાધઃ પાપરતઃ ક્રિયાજ્ઞાનવિવર્જિતઃ ।
૧૬૯.૨૭/૨પ્રાણિહિંસારતઃ ક્રૂરો નિર્દયઃ સર્વજન્તુષુ ॥ ૧૬૯.૨૭॥

૧૬૯.૨૮/૧હીનજાતિરકિંચિજ્જ્ઞો ગુરુક્રમવિવર્જિતઃ ।
૧૬૯.૨૮/૨સદાનુચિતકારી ચા+ ઇર્જિતાખિલગોગણઃ ॥ ૧૬૯.૨૮॥

૧૬૯.૨૯/૧તસ્યાત્માનં દર્શિતવાન્ ન માં કિંચન વક્ષ્યસિ ।
૧૬૯.૨૯/૨પૂજાં મન્ત્રવિધાનેન કરોમીશ યતવ્રતઃ ॥ ૧૬૯.૨૯॥

૧૬૯.૩૦/૧ત્વદેકશરણો નિત્યં ભાર્યાપુત્રવિવર્જિતઃ ।
૧૬૯.૩૦/૨વ્યાધો માંસેન દુષ્ટેન પૂજાં તવ કરોત્યસૌ ॥ ૧૬૯.૩૦॥

૧૬૯.૩૧/૧તસ્ય પ્રસન્નો ભગવાન્ ન મમેતિ મહાદ્ભુતમ્ ।
૧૬૯.૩૧/૨શાસ્તિમસ્ય કરિષ્યામિ ભિલ્લસ્ય હ્યપકારિણઃ ॥ ૧૬૯.૩૧॥

૧૬૯.૩૨/૧મૃદોઃ કોઽપિ ભવેત્ પ્રીતઃ કોઽપિ તદ્વદ્ દુરાત્મનઃ ।
૧૬૯.૩૨/૨તસ્માદ્ અહં મૂર્ધ્નિ શિલાં પાતયેયમસંશયમ્ ॥ ૧૬૯.૩૨॥

૧૬૯.૩૩/૧બ્રહ્મોવાચ । ઇત્યુક્તવતિ વૈ વેદે વિહસ્યેશોઽબ્રવીદ્ ઇદમ્ ॥ ૧૬૯.૩૩॥

૧૬૯.૩૪/૧આદિકેશ ઉવાચ । શ્વઃ પ્રતીક્ષસ્વ પશ્ચાન્ મે શિલાં
પાતય મૂર્ધનિ ॥ ૧૬૯.૩૪॥

૧૬૯.૩૫/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા સ વેદોઽપિ શિલાં સંત્યજ્ય બાહુના ।
૧૬૯.૩૫/૨ઉપસંહૃત્ય તં કોપં શ્વઃ કરોમીત્યુવાચ હ ॥ ૧૬૯.૩૫॥

૧૬૯.૩૬/૧તતઃ પ્રાતઃ સમાગત્ય કૃત્વા સ્નાનાદિકર્મ ચ ।
૧૬૯.૩૬/૨વેદોઽપિ નિત્યવત્ પૂજાં કુર્વન્ પશ્યતિ મસ્તકે ॥ ૧૬૯.૩૬॥

૧૬૯.૩૭/૧લિઙ્ગસ્ય સવ્રણાં ભીમાં ધારાં ચ રુધિરપ્લુતામ્ ।
૧૬૯.૩૭/૨વેદઃ સ વિસ્મિતો ભૂત્વા કિમિદં લિઙ્ગમૂર્ધનિ ॥ ૧૬૯.૩૭॥

૧૬૯.૩૮/૧મહોત્પાતો ભવેત્ કસ્ય સૂચયેદ્ ઇત્યચિન્તયત્ ।
૧૬૯.૩૮/૨મૃદ્ભિશ્ચ ગોમયેનાપિ કુશૈસ્તં ગાઙ્ગવારિભિઃ ॥ ૧૬૯.૩૮॥

૧૬૯.૩૯/૧પ્રક્ષાલયિત્વા તાં પૂજાં કૃતવાન્ નિત્યવત્ તદા ।

૧૬૯.૩૯/૨એતસ્મિન્ન્ અન્તરે પ્રાયાદ્ વ્યાધો વિગતકલ્મષઃ ॥ ૧૬૯.૩૯॥

૧૬૯.૪૦/૧મૂર્ધાનં વ્રણસંયુક્તં સરક્તં લિઙ્ગમસ્તકે ।
૧૬૯.૪૦/૨શંકરસ્યાદિકેશસ્ય દદૃશેઽન્તર્ગતસ્તદા ॥ ૧૬૯.૪૦॥

૧૬૯.૪૧/૧દૃષ્ટ્વૈવ કિમિદં ચિત્રમિત્યુક્ત્વા નિશિતૈઃ શરૈઃ ।
૧૬૯.૪૧/૨આત્માનં ભેદયામાસ શતધા ચ સહસ્રધા ॥ ૧૬૯.૪૧॥

૧૬૯.૪૨/૧સ્વામિનો વૈકૃતં દૃષ્ટ્વા કઃ ક્ષમેતોત્તમાશયઃ ।
૧૬૯.૪૨/૨મુહુર્નિનિન્દ ચાત્માનં મયિ જીવત્યભૂદ્ ઇદમ્ ॥ ૧૬૯.૪૨॥

૧૬૯.૪૩/૧કષ્ટમાપતિતં કીદૃગ્ અહો દુર્વિધિવૈશસાત્ ।
૧૬૯.૪૩/૨તત્ કર્મ તસ્ય સંવીક્ષ્ય મહાદેવોઽતિવિસ્મિતઃ ।
૧૬૯.૪૩/૩તતઃ પ્રોવાચ ભગવાન્ વેદં વેદવિદાં વરમ્ ॥ ૧૬૯.૪૩॥

૧૬૯.૪૪/૧આદિકેશ ઉવાચ । પશ્ય વ્યાધં મહાબુદ્ધે ભક્તં ભાવેન સંયુતમ્ ।
૧૬૯.૪૪/૨ત્વં તુ મૃદ્ભિઃ કુશૈર્વાર્ભિર્મૂર્ધાનં સ્પૃષ્ટવાન્ અસિ ॥ ૧૬૯.૪૪॥

૧૬૯.૪૫/૧અનેન સહસા બ્રહ્મન્ મમાત્માપિ નિવેદિતઃ ।
૧૬૯.૪૫/૨ભક્તિઃ પ્રેમાથવા શક્તિર્વિચારો યત્ર વિદ્યતે ।
૧૬૯.૪૫/૩તસ્માદ્ અસ્મૈ વરાન્ દાસ્યે પશ્ચાત્ તુભ્યં દ્વિજોત્તમ ॥ ૧૬૯.૪૫॥

૧૬૯.૪૬/૧બ્રહ્મોવાચ । વરેણ ચ્છન્દયામાસ વ્યાધં દેવો મહેશ્વરઃ ।
૧૬૯.૪૬/૨વ્યાધઃ પ્રોવાચ દેવેશં નિર્માલ્યં તવ યદ્ ભવેત્ ॥ ૧૬૯.૪૬॥

૧૬૯.૪૭/૧તદ્ અસ્માકં ભવેન્ નાથ મન્નામ્ના તીર્થમુચ્યતામ્ ।
૧૬૯.૪૭/૨સર્વક્રતુફલં તીર્થં સ્મરણાદ્ એવ જાયતામ્ ॥ ૧૬૯.૪૭॥

૧૬૯.૪૮/૧બ્રહ્મોવાચ । તથેત્યુવાચ દેવેશસ્તતસ્તત્ તીર્થમુત્તમમ્ ।
૧૬૯.૪૮/૨ભિલ્લતીર્થં સમસ્તાઘ+ ।સંઘવિચ્છેદકારણમ્ ॥ ૧૬૯.૪૮॥

૧૬૯.૪૯/૧શ્રીમહાદેવચરણ+ ંઅહાભક્તિવિધાયકમ્ ।
૧૬૯.૪૯/૨અભવત્ સ્નાનદાનાદ્યૈર્ભુક્તિમુક્તિપ્રદાયકમ્ ।
૧૬૯.૪૯/૩વેદસ્યાપિ વરાન્ પ્રાદાચ્છિવો નાનાવિધાન્ બહૂન્ ॥ ૧૬૯.૪૯॥

૧૭૦.૧/૧બ્રહ્મોવાચ । ચક્ષુસ્તીર્થમિતિ ખ્યાતં રૂપસૌભાગ્યદાયકમ્ ।
૧૭૦.૧/૨યત્ર યોગેશ્વરો દેવો ગૌતમ્યા દક્ષિણે તટે ॥ ૧૭૦.૧॥

૧૭૦.૨/૧પુરં ભૌવનમાખ્યાતં ગિરિમૂર્ધ્ન્યભિધીયતે ।
૧૭૦.૨/૨યત્રાસૌ ભૌવનો રાજા ક્ષત્રધર્મપરાયણઃ ॥ ૧૭૦.૨॥

૧૭૦.૩/૧તસ્મિન્ પુરવરે કશ્ચિદ્ બ્રાહ્મણો વૃદ્ધકૌશિકઃ ।
૧૭૦.૩/૨તત્પુત્રો ગૌતમ ઇતિ ખ્યાતો વેદવિદુત્તમઃ ॥ ૧૭૦.૩॥

૧૭૦.૪/૧તસ્ય માતુર્મનોદોષાદ્ વિપરીતોઽભવદ્ દ્વિજઃ ।
૧૭૦.૪/૨સખા તસ્ય વણિક્ કશ્ચિન્ મણિકુણ્ડલ ઉચ્યતે ॥ ૧૭૦.૪॥

૧૭૦.૫/૧તેન સખ્યં દ્વિજસ્યાસીદ્ વિષમં દ્વિજવૈશ્યયોઃ ।
૧૭૦.૫/૨શ્રીમદ્દરિદ્રયોર્નિત્યં પરસ્પરહિતૈષિણોઃ ॥ ૧૭૦.૫॥

૧૭૦.૬/૧કદાચિદ્ ગૌતમો વૈશ્યં વિત્તેશં મણિકુણ્ડલમ્ ।
૧૭૦.૬/૨પ્રાહેદં વચનં પ્રીત્યા રહઃ સ્થિત્વા પુનઃ પુનઃ ॥ ૧૭૦.૬॥

૧૭૦.૭/૧ગૌતમ ઉવાચ । ગચ્છામો ધનમાદાતું પર્વતાન્ ઉદધીન્ અપિ ।
૧૭૦.૭/૨યૌવનં તદ્ વૃથા જ્ઞેયં વિના સૌખ્યાનુકૂલ્યતઃ ।
૧૭૦.૭/૩ધનં વિના તત્ કથં સ્યાદ્ અહો ધિઙ્ નિર્ધનં નરમ્ ॥ ૧૭૦.૭॥

૧૭૦.૮/૧બ્રહ્મોવાચ । કુણ્ડલો દ્વિજમાહેદં મત્પિત્રોપાર્જિતં ધનમ્ ।
૧૭૦.૮/૨બહ્વસ્તિ કિં ધનેનાદ્ય કરિષ્યે દ્વિજસત્તમ ।
૧૭૦.૮/૩દ્વિજઃ પુનરુવાચેદં મણિકુણ્ડલમોજસા ॥ ૧૭૦.૮॥

૧૭૦.૯/૧ગૌતમ ઉવાચ । ધર્માર્થજ્ઞાનકામાનાં કો નુ તૃપ્તઃ પ્રશસ્યતે ।
૧૭૦.૯/૨ઉત્કર્ષપ્રાપ્તિરેવૈષાં સખે શ્લાઘ્યા શરીરિણામ્ ॥ ૧૭૦.૯॥

૧૭૦.૧૦/૧સ્વેનૈવ વ્યવસાયેન ધન્યા જીવન્તિ જન્તવઃ ।
૧૭૦.૧૦/૨પરદત્તાર્થસંતુષ્ટાઃ કષ્ટજીવિન એવ તે ॥ ૧૭૦.૧૦॥

૧૭૦.૧૧/૧સ પુત્રઃ શસ્યતે લોકે પિતૃભિશ્ચાભિનન્દ્યતે ।
૧૭૦.૧૧/૨યઃ પૈત્ર્યમભિલિપ્સેત ન વાચાપિ તુ કુણ્ડલ ॥ ૧૭૦.૧૧॥

૧૭૦.૧૨/૧સ્વબાહુબલમાશ્રિત્ય યોઽર્થાન્ અર્જયતે સુતઃ ।
૧૭૦.૧૨/૨સ કૃતાર્થો ભવેલ્લોકે પૈત્ર્યં વિત્તં ન તુ સ્પૃશેત્ ॥ ૧૭૦.૧૨॥

૧૭૦.૧૩/૧સ્વયમાર્જ્ય સુતો વિત્તં પિત્રે દાસ્યતિ બન્ધવે ।
૧૭૦.૧૩/૨તં તુ પુત્રં વિજાનીયાદ્ ઇતરો યોનિકીટકઃ ॥ ૧૭૦.૧૩॥

૧૭૦.૧૪/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા તુ તદ્ વાક્યં બ્રાહ્મણસ્યાભિલાષિણઃ ।
૧૭૦.૧૪/૨તથેતિ મત્વા તદ્વાક્યં રત્નાન્યાદાય સત્વરઃ ॥ ૧૭૦.૧૪॥

૧૭૦.૧૫/૧આત્મકીયાનિ વિત્તાનિ ગૌતમાય ન્યવેદયત્ ।
૧૭૦.૧૫/૨ધનેનૈતેન દેશાંશ્ચ પરિભ્રમ્ય યથાસુખમ્ ॥ ૧૭૦.૧૫॥

૧૭૦.૧૬/૧ધનાન્યાદાય વિત્તાનિ પુનરેષ્યામહે ગૃહમ્ ।
૧૭૦.૧૬/૨સત્યમેવ વણિગ્ વક્તિ સ તુ વિપ્રઃ પ્રતારકઃ ॥ ૧૭૦.૧૬॥

૧૭૦.૧૭/૧પાપાત્મા પાપચિત્તં ચ ન બુબોધ વણિગ્ દ્વિજમ્ ।
૧૭૦.૧૭/૨તૌ પરસ્પરમામન્ત્ર્ય માતાપિત્રોરજાનતોઃ ॥ ૧૭૦.૧૭॥

૧૭૦.૧૮/૧દેશાદ્ દેશાન્તરં યાતૌ ધનાર્થં તૌ વણિગ્દ્વિજૌ ।
૧૭૦.૧૮/૨વણિગ્ધસ્તસ્થિતં વિત્તં બ્રાહ્મણો હર્તુમિચ્છતિ ॥ ૧૭૦.૧૮॥

૧૭૦.૧૯/૧બ્રાહ્મણ ઉવાચ । યેન કેનાપ્યુપાયેન તદ્ ધનં હિ સમાહરે ।
૧૭૦.૧૯/૨અહો પૃથિવ્યાં રમ્યાણિ નગરાણિ સહસ્રશઃ ॥ ૧૭૦.૧૯॥

૧૭૦.૨૦/૧ઇષ્ટપ્રદાત્ર્યઃ કામસ્ય દેવતા ઇવ યોષિતઃ ।
૧૭૦.૨૦/૨મનોહરાસ્તત્ર તત્ર સન્તિ કિં ક્રિયતે મયા ॥ ૧૭૦.૨૦॥

૧૭૦.૨૧/૧ધનમાહૃત્ય યત્નેન યોષિદ્ભ્યો યદિ દીયતે ।
૧૭૦.૨૧/૨ભુજ્યન્તે તાસ્તતો નિત્યં સફલં જીવિતં હિ તત્ ॥ ૧૭૦.૨૧॥

૧૭૦.૨૨/૧નૃત્યગીતરતો નિત્યં પણ્યસ્ત્રીભિરલંકૃતઃ ।
૧૭૦.૨૨/૨ભોક્ષ્યે કથં તુ તદ્ વિત્તં વૈશ્યાન્ મદ્ધસ્તમાગતમ્ ॥ ૧૭૦.૨૨॥

૧૭૦.૨૩/૧બ્રહ્મોવાચ । એવં ચિન્તયમાનોઽસૌ ગૌતમઃ પ્રહસન્ન્ ઇવ ।
૧૭૦.૨૩/૨મણિકુણ્ડલમાહેદમધર્માદ્ એવ જન્તવઃ ॥ ૧૭૦.૨૩॥

૧૭૦.૨૪/૧વૃદ્ધિં સુખમભીષ્ટાનિ પ્રાપ્નુવન્તિ ન સંશયઃ ।
૧૭૦.૨૪/૨ધર્મિષ્ઠાઃ પ્રાણિનો લોકે દૃશ્યન્તે દુઃખભાગિનઃ ॥ ૧૭૦.૨૪॥

૧૭૦.૨૫/૧તસ્માદ્ ધર્મેણ કિં તેન દુઃખૈકફલહેતુના ॥ ૧૭૦.૨૫॥

૧૭૦.૨૬/૧બ્રહ્મોવાચ । નેત્યુવાચ તતો વૈશ્યઃ સુખં ધર્મે પ્રતિષ્ઠિતમ્ ।
૧૭૦.૨૬/૨પાપે દુઃખં ભયં શોકો દારિદ્ર્યં ક્લેશ એવ ચ ।
૧૭૦.૨૬/૩યતો ધર્મસ્તતો મુક્તિઃ સ્વધર્મઃ કિં વિનશ્યતિ ॥ ૧૭૦.૨૬॥

૧૭૦.૨૭/૧બ્રાહ્મોવાચ । એવં વિવદતોસ્તત્ર સમ્પરાયસ્તયોરભૂત્ ।
૧૭૦.૨૭/૨યસ્ય પક્ષો ભવેજ્જ્યાયાન્ સ પરાર્થમવાપ્નુયાત્ ॥ ૧૭૦.૨૭॥

૧૭૦.૨૮/૧પૃચ્છાવઃ કસ્ય પ્રાબલ્યં ધર્મિણો વાપ્યધર્મિણઃ ।
૧૭૦.૨૮/૨વેદાત્ તુ લૌકિકં જ્યેષ્ઠં લોકે ધર્માત્ સુખં ભવેત્ ॥ ૧૭૦.૨૮॥

૧૭૦.૨૯/૧એવં વિવદમાનૌ તાવૂચતુઃ સકલાઞ્ જનાન્ ।
૧૭૦.૨૯/૨ધર્મસ્ય વાપ્યધર્મસ્ય પ્રાબલ્યમનયોર્ભુવિ ॥ ૧૭૦.૨૯॥

૧૭૦.૩૦/૧તદ્ વદન્તુ યથાવૃત્તમેવમૂચતુરોજસા ।
૧૭૦.૩૦/૨એવં તત્રોચિરે કેચિદ્ યે ધર્મેણાનુવર્તિનઃ ॥ ૧૭૦.૩૦॥

૧૭૦.૩૧/૧તૈર્દુઃખમનુભૂયતે પાપિષ્ઠાઃ સુખિનો જનાઃ ।
૧૭૦.૩૧/૨સમ્પરાયે ધનં સર્વં જિતં વિપ્રે ન્યવેદયત્ ॥ ૧૭૦.૩૧॥

૧૭૦.૩૨/૧મણિમાન્ ધર્મવિચ્છ્રેષ્ઠઃ પુનર્ધર્મં પ્રશંસતિ ।
૧૭૦.૩૨/૨મણિમન્તં દ્વિજઃ પ્રાહ કિં ધર્મમનુશંસસિ ।
૧૭૦.૩૨/૩બ્રહ્મોવાચ । તથેતિ ચેત્યાહ વૈશ્યો બ્રાહ્મણઃ પુનરબ્રવીત્ ॥ ૧૭૦.૩૨॥

૧૭૦.૩૩/૧બ્રાહ્મણ ઉવાચ । જિતં મયા ધનં વૈશ્ય નિર્લજ્જઃ કિં નુ ભાષસે ।
૧૭૦.૩૩/૨મયૈવ વિજિતો ધર્મો યથેષ્ટચરણાત્મના ॥ ૧૭૦.૩૩॥

૧૭૦.૩૪/૧બ્રહ્મોવાચ । તદ્ બ્રાહ્મણવચઃ શ્રુત્વા વૈશ્યઃ સસ્મિત
ઊચિવાન્ ॥ ૧૭૦.૩૪॥

૧૭૦.૩૫/૧વૈશ્ય ઉવાચ । પુલાકા ઇવ ધાન્યેષુ પુત્તિકા ઇવ પક્ષિષુ ।
૧૭૦.૩૫/૨તથૈવ તાન્ સખે મન્યે યેષાં ધર્મો ન વિદ્યતે ॥ ૧૭૦.૩૫॥

૧૭૦.૩૬/૧ચતુર્ણાં પુરુષાર્થાનાં ધર્મઃ પ્રથમ ઉચ્યતે ।
૧૭૦.૩૬/૨પશ્ચાદ્ અર્થશ્ચ કામશ્ચ સ ધર્મો મયિ તિષ્ઠતિ ।
૧૭૦.૩૬/૩કથં બ્રૂષે દ્વિજશ્રેષ્ઠ મયા વિજિતમિત્યદઃ ॥ ૧૭૦.૩૬॥

૧૭૦.૩૭/૧બ્રહ્મોવાચ । દ્વિજો વૈશ્યં પુનઃ પ્રાહ હસ્તાભ્યાં જાયતાં પણઃ ।
૧૭૦.૩૭/૨તથેતિ મન્યતે વૈશ્યસ્તૌ ગત્વા પુનરૂચતુઃ ॥ ૧૭૦.૩૭॥

૧૭૦.૩૮/૧પૂર્વવલ્લૌકિકાન્ ગત્વા જિતમિત્યબ્રવીદ્ દ્વિજઃ ।
૧૭૦.૩૮/૨કરૌ છિત્ત્વા તતઃ પ્રાહ કથં ધર્મં તુ મન્યસે ।
૧૭૦.૩૮/૩આક્ષિપ્તો બ્રાહ્મણેનૈવં વૈશ્યો વચનમબ્રવીત્ ॥ ૧૭૦.૩૮॥

૧૭૦.૩૯/૧વૈશ્ય ઉવાચ । ધર્મમેવ પરં મન્યે પ્રાણૈઃ કણ્ઠગતૈરપિ ।
૧૭૦.૩૯/૨માતા પિતા સુહૃદ્ બન્ધુર્ધર્મ એવ શરીરિણામ્ ॥ ૧૭૦.૩૯॥

૧૭૦.૪૦/૧બ્રહ્મોવાચ । એવં વિવદમાનૌ તાવર્થવાન્ બ્રાહ્મણોઽભવત્ ।
૧૭૦.૪૦/૨વિમુક્તો વૈશ્યકસ્તત્ર બાહુભ્યાં ચ ધનેન ચ ॥ ૧૭૦.૪૦॥

૧૭૦.૪૧/૧એવં ભ્રમન્તૌ સમ્પ્રાપ્તૌ ગઙ્ગાં યોગેશ્વરં હરિમ્ ।
૧૭૦.૪૧/૨યદૃચ્છયા મુનિશ્રેષ્ઠ મિથસ્તાવૂચતુઃ પુનઃ ॥ ૧૭૦.૪૧॥

૧૭૦.૪૨/૧વૈશ્યો ગઙ્ગાં તુ યોગેશં ધર્મમેવ પ્રશંસતિ ।
૧૭૦.૪૨/૨અતિકોપાદ્ દ્વિજો વૈશ્યમાક્ષિપન્ પુનરબ્રવીત્ ॥ ૧૭૦.૪૨॥

૧૭૦.૪૩/૧બ્રાહ્મણ ઉવાચ । ગતં ધનં કરૌ છિન્નાવવશિષ્ટોઽસુભિર્ભવાન્ ।
૧૭૦.૪૩/૨ત્વમન્યથા યદિ બ્રૂષ આહરિષ્યેઽસિના શિરઃ ॥ ૧૭૦.૪૩॥

૧૭૦.૪૪/૧બ્રહ્મોવાચ । વિહસ્ય પુનરાહેદં વૈશ્યો ગૌતમમઞ્જસા ॥ ૧૭૦.૪૪॥

૧૭૦.૪૫/૧વૈશ્ય ઉવાચ । ધર્મમેવ પરં મન્યે યથેચ્છસિ તથા કુરુ ।
૧૭૦.૪૫/૨બ્રાહ્મણાંશ્ચ ગુરૂન્ દેવાન્ વેદાન્ ધર્મં જનાર્દનમ્ ॥ ૧૭૦.૪૫॥

૧૭૦.૪૬/૧યસ્તુ નિન્દયતે પાપો નાસૌ સ્પૃશ્યોઽથ પાપકૃત્ ।
૧૭૦.૪૬/૨ઉપેક્ષણીયો દુર્વૃત્તઃ પાપાત્મા ધર્મદૂષકઃ ॥ ૧૭૦.૪૬॥

૧૭૦.૪૭/૧બ્રહ્મોવાચ । તતઃ પ્રાહ સ કોપેન ધર્મં યદ્યનુશંસસિ ।
૧૭૦.૪૭/૨આવયોઃ પ્રાણયોરત્ર પણઃ સ્યાદ્ ઇતિ વૈ મુને ॥ ૧૭૦.૪૭॥

૧૭૦.૪૮/૧એવમુક્તે ગૌતમેન તથેત્યાહ વણિક્ તદા ।
૧૭૦.૪૮/૨પુનરપ્યૂચતુરુભૌ લોકાંલ્લોકાસ્તથોચિરે ॥ ૧૭૦.૪૮॥

૧૭૦.૪૯/૧યોગેશ્વરસ્ય પુરતો ગૌતમ્યા દક્ષિણે તટે ।
૧૭૦.૪૯/૨તં નિપાત્ય વિશં વિપ્રશ્ચક્ષુરુત્પાટ્ય ચાબ્રવીત્ ॥ ૧૭૦.૪૯॥

૧૭૦.૫૦/૧વિપ્ર ઉવાચ । ગતોઽસીમાં દશાં વૈશ્ય નિત્યં ધર્મપ્રશંસયા ।
૧૭૦.૫૦/૨ગતં ધનં ગતં ચક્ષુશ્છેદિતૌ કરપલ્લવૌ ।
૧૭૦.૫૦/૩પૃષ્ટોઽસિ મિત્ર ગચ્છામિ મૈવં બ્રૂયાઃ કથાન્તરે ॥ ૧૭૦.૫૦॥

૧૭૦.૫૧/૧બ્રહ્મોવાચ । તસ્મિન્ પ્રયાતે વૈશ્યોઽસૌ ચિન્તયામાસ ચેતસિ ।
૧૭૦.૫૧/૨હા કષ્ટં મે કિમભવદ્ ધર્મૈકમનસો હરે ॥ ૧૭૦.૫૧॥

૧૭૦.૫૨/૧સ કુણ્ડલો વણિક્શ્રેષ્ઠો નિર્ધનો ગતબાહુકઃ ।
૧૭૦.૫૨/૨ગતનેત્રઃ શુચં પ્રાપ્તો ધર્મમેવાનુસંસ્મરન્ ॥ ૧૭૦.૫૨॥

૧૭૦.૫૩/૧એવં બહુવિધાં ચિન્તાં કુર્વન્ન્ આસ્તે મહીતલે ।
૧૭૦.૫૩/૨નિશ્ચેષ્ટોઽથ નિરુત્સાહઃ પતિતઃ શોકસાગરે ॥ ૧૭૦.૫૩॥

૧૭૦.૫૪/૧દિનાવસાને શર્વર્યામુદિતે ચન્દ્રમણ્ડલે ।
૧૭૦.૫૪/૨એકાદશ્યાં શુક્લપક્ષે તત્રાયાતિ વિભીષણઃ ॥ ૧૭૦.૫૪॥

૧૭૦.૫૫/૧સ તુ યોગેશ્વરં દેવં પૂજયિત્વા યથાવિધિ ।
૧૭૦.૫૫/૨સ્નાત્વા તુ ગૌતમીં ગઙ્ગાં સપુત્રો રાક્ષસૈર્વૃતઃ ॥ ૧૭૦.૫૫॥

૧૭૦.૫૬/૧વિભીષણસ્ય હિ સુતો વિભીષણ ઇવાપરઃ ।
૧૭૦.૫૬/૨વૈભીષણિરિતિ ખ્યાતસ્તમપશ્યદ્ ઉવાચ હ ॥ ૧૭૦.૫૬॥

૧૭૦.૫૭/૧વૈશ્યસ્ય વચનં શ્રુત્વા યથાવૃત્તં સ ધર્મવિત્ ।
૧૭૦.૫૭/૨પિત્રે નિવેદયામાસ લઙ્કેશાય મહાત્મને ।
૧૭૦.૫૭/૩સ તુ લઙ્કેશ્વરઃ પ્રાહ પુત્રં પ્રીત્યા ગુણાકરમ્ ॥ ૧૭૦.૫૭॥

૧૭૦.૫૮/૧વિભીષણ ઉવાચ । શ્રીમાન્ રામો મમ ગુરુસ્તસ્ય માન્યઃ સખા મમ ।
૧૭૦.૫૮/૨હનુમાન્ ઇતિ વિખ્યાતસ્તેનાનીતો ગિરિર્મહાન્ ॥ ૧૭૦.૫૮॥

૧૭૦.૫૯/૧પુરા કાર્યાન્તરે પ્રાપ્તે સર્વૌષધ્યાશ્રયોઽચલઃ ।
૧૭૦.૫૯/૨જાતે કાર્યે તમાદાય હિમવન્તમથાગમત્ ॥ ૧૭૦.૫૯॥

૧૭૦.૬૦/૧વિશલ્યકરણી ચેતિ મૃતસંજીવનીતિ ચ ।
૧૭૦.૬૦/૨તદાનીય મહાબુદ્ધી રામાયાક્લિષ્ટકર્મણે ॥ ૧૭૦.૬૦॥

૧૭૦.૬૧/૧નિવેદયિત્વા તત્ સાધ્યં તસ્મિન્ વૃત્તે સમાગતઃ ।
૧૭૦.૬૧/૨પુનર્ગિરિં સમાદાય આગચ્છદ્ દેવપર્વતમ્ ॥ ૧૭૦.૬૧॥

૧૭૦.૬૨/૧તામાનીયાસ્ય હૃદયે નિવેશય હરિં સ્મરન્ ।
૧૭૦.૬૨/૨તતઃ પ્રાપ્સ્યત્યયં સર્વમપેક્ષિતમુદારધીઃ ॥ ૧૭૦.૬૨॥

૧૭૦.૬૩/૧ગચ્છતસ્તસ્ય વેગેન વિશલ્યકરણી પુનઃ ।
૧૭૦.૬૩/૨અપતદ્ ગૌતમીતીરે યત્ર યોગેશ્વરો હરિઃ ॥ ૧૭૦.૬૩॥

૧૭૦.૬૪/૧વૈભીષણિરુવાચ । તામોષધીં મમ પિતર્દર્શયાશુ વિલમ્બ મા ।
૧૭૦.૬૪/૨પરાર્તિશમનાદ્ અન્યચ્છ્રેયો ન ભુવનત્રયે ॥ ૧૭૦.૬૪॥

૧૭૦.૬૫/૧બ્રહ્મોવાચ । વિભીષણસ્તથેત્યુક્ત્વા તાં પુત્રસ્યાપ્યદર્શયત્ ।
૧૭૦.૬૫/૨ઇષે ત્વેત્યસ્ય વૃક્ષસ્ય શાખાં ચિચ્છેદ તત્સુતઃ ।
૧૭૦.૬૫/૩વૈશ્યસ્ય ચાપિ વૈ પ્રીત્યા સન્તઃ પરહિતે રતાઃ ॥ ૧૭૦.૬૫॥

૧૭૦.૬૬/૧વિભીષણ ઉવાચ । યત્રાપતન્ નગે ચાસ્મિન્ સ વૃક્ષસ્તુ પ્રતાપવાન્ ।
૧૭૦.૬૬/૨તસ્ય શાખાં સમાદાય હૃદયેઽસ્ય નિવેશય ।
૧૭૦.૬૬/૩તત્સ્પૃષ્ટમાત્ર એવાસૌ સ્વકં રૂપમવાપ્નુયાત્ ॥ ૧૭૦.૬૬॥

૧૭૦.૬૭/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા પિતુર્વાક્યં વૈભીષણિરુદારધીઃ ।
૧૭૦.૬૭/૨તથા ચકાર વૈ સમ્યક્ કાષ્ઠખણ્ડં ન્યવેશયત્ ॥ ૧૭૦.૬૭॥

૧૭૦.૬૮/૧હૃદયે સ તુ વૈશ્યોऽપિ સચક્ષુઃ સકરોऽભવત્ ।
૧૭૦.૬૮/૨મણિમન્ત્રૌષધીનાં હિ વીર્યં કોऽપિ ન બુધ્યતે ॥ ૧૭૦.૬૮॥

૧૭૦.૬૯/૧તદ્ એવ કાષ્ઠમાદાય ધર્મમેવાનુસંસ્મરન્ ।
૧૭૦.૬૯/૨સ્નાત્વા તુ ગૌતમીં ગઙ્ગાં તથા યોગેશ્વરં હરિમ્ ॥ ૧૭૦.૬૯॥

૧૭૦.૭૦/૧નમસ્કૃત્વા પુનરગાત્ કાષ્ઠખણ્ડેન વૈશ્યકઃ ।
૧૭૦.૭૦/૨પરિભ્રમન્ નૃપપુરં મહાપુરમિતિ શ્રુતમ્ ॥ ૧૭૦.૭૦॥

૧૭૦.૭૧/૧મહારાજ ઇતિ ખ્યાતસ્તત્ર રાજા મહાબલઃ ।
૧૭૦.૭૧/૨તસ્ય નાસ્તિ સુતઃ કશ્ચિત્ પુત્રિકા નષ્ટલોચના ॥ ૧૭૦.૭૧॥

૧૭૦.૭૨/૧સૈવ તસ્ય સુતા પુત્રસ્તસ્યાપિ વ્રતમીદૃશમ્ ।
૧૭૦.૭૨/૨દેવો વા દાનવો વાપિ બ્રાહ્મણઃ ક્ષત્રિયો ભવેત્ ॥ ૧૭૦.૭૨॥

૧૭૦.૭૩/૧વૈશ્યો વા શૂદ્રયોનિર્વા સગુણો નિર્ગુણોऽપિ વા ।
૧૭૦.૭૩/૨તસ્મૈ દેયા ઇયં પુત્રી યો નેત્રે આહરિષ્યતિ ॥ ૧૭૦.૭૩॥

૧૭૦.૭૪/૧રાજ્યેન સહ દેયેયમિતિ રાજા હ્યઘોષયત્ ।
૧૭૦.૭૪/૨અહર્નિશમસૌ વૈશ્યઃ શ્રુત્વા ઘોષમથાબ્રવીત્ ॥ ૧૭૦.૭૪॥

૧૭૦.૭૫/૧વૈશ્ય ઉવાચ । અહં નેત્રે આહરિષ્યે રાજપુત્ર્યા અસંશયમ્ ॥ ૧૭૦.૭૫॥

૧૭૦.૭૬/૧બ્રહ્મોવાચ । તં વૈશ્યં તરસાદાય મહારાજ્ઞે ન્યવેદયત્ ।
૧૭૦.૭૬/૨તત્કાષ્ઠસ્પર્શમાત્રેણ સનેત્રાભૂન્ નૃપાત્મજા ॥ ૧૭૦.૭૬॥

૧૭૦.૭૭/૧તતઃ સવિસ્મયો રાજા કો ભવાન્ ઇતિ ચાબ્રવીત્ ।
૧૭૦.૭૭/૨વૈશ્યો રાજ્ઞે યથાવૃત્તં ન્યવેદયદ્ અશેષતઃ ॥ ૧૭૦.૭૭॥

૧૭૦.૭૮/૧વૈશ્ય ઉવાચ । બ્રાહ્મણાનાં પ્રસાદેન ધર્મસ્ય તપસસ્તથા ।
૧૭૦.૭૮/૨દાનપ્રભાવાદ્ યજ્ઞૈશ્ચ વિવિધૈર્ભૂરિદક્ષિણૈઃ ।
૧૭૦.૭૮/૩દિવ્યૌષધિપ્રભાવેન મમ સામર્થ્યમીદૃશમ્ ॥ ૧૭૦.૭૮॥

૧૭૦.૭૯/૧બ્રહ્મોવાચ । એતદ્ વૈશ્યવચઃ શ્રુત્વા વિસ્મિતોऽભૂન્ મહીપતિઃ ॥ ૧૭૦.૭૯॥

૧૭૦.૮૦/૧રાજોવાચ । અહો મહાનુભાવોऽયં પ્રાયો વૃન્દારકો ભવેત્ ।
૧૭૦.૮૦/૨અન્યથૈતાદૃગ્ અન્યસ્ય સામર્થ્યં દૃશ્યતે કથમ્ ।
૧૭૦.૮૦/૩તસ્માદ્ અસ્મૈ તુ તાં કન્યાં પ્રદાસ્યે રાજ્યપૂર્વિકામ્ ॥ ૧૭૦.૮૦॥

૧૭૦.૮૧/૧બ્રહ્મોવાચ । ઇતિ સંકલ્પ્ય મનસિ કન્યાં રાજ્યં ચ દત્તવાન્ ।
૧૭૦.૮૧/૨વિહારાર્થં ગતઃ સ્વૈરં પરં ખેદમુપાગતઃ ॥ ૧૭૦.૮૧॥

૧૭૦.૮૨/૧ન મિત્રેણ વિના રાજ્યં ન મિત્રેણ વિના સુખમ્ ।
૧૭૦.૮૨/૨તમેવ સતતં વિપ્રં ચિન્તયન્ વૈશ્યનન્દનઃ ॥ ૧૭૦.૮૨॥

૧૭૦.૮૩/૧એતદ્ એવ સુજાતાનાં લક્ષણં ભુવિ દેહિનામ્ ।
૧૭૦.૮૩/૨કૃપાર્દ્રં યન્ મનો નિત્યં તેષામપ્યહિતેષુ હિ ॥ ૧૭૦.૮૩॥

૧૭૦.૮૪/૧મહાનૃપો વનં પ્રાયાત્ સ રાજા મણિકુણ્ડલઃ ।
૧૭૦.૮૪/૨તસ્મિઞ્ શાસતિ રાજ્યં તુ કદાચિદ્ ગૌતમં દ્વિજમ્ ॥ ૧૭૦.૮૪॥

૧૭૦.૮૫/૧હૃતસ્વં ધૂર્તકૈઃ પાપૈરપશ્યન્ મણિકુણ્ડલઃ ।
૧૭૦.૮૫/૨તમાદાય દ્વિજં મિત્રં પૂજયામાસ ધર્મવિત્ ॥ ૧૭૦.૮૫॥

૧૭૦.૮૬/૧ધર્માણાં તુ પ્રભાવં તં તસ્મૈ સર્વં ન્યવેદયત્ ।
૧૭૦.૮૬/૨સ્નાપયામાસ ગઙ્ગાયાં તં સર્વાઘનિવૃત્તયે ॥ ૧૭૦.૮૬॥

૧૭૦.૮૭/૧તેન વિપ્રેણ સર્વૈસ્તૈઃ સ્વકીયૈર્ગોત્રજૈર્વૃતઃ ।
૧૭૦.૮૭/૨વૈશ્યૈઃ સ્વદેશસમ્ભૂતૈર્બ્રાહ્મણસ્ય તુ બાન્ધવૈઃ ॥ ૧૭૦.૮૭॥

૧૭૦.૮૮/૧વૃદ્ધકૌશિકમુખ્યૈશ્ચ તસ્મિન્ યોગેશ્વરાન્તિકે ।
૧૭૦.૮૮/૨યજ્ઞાન્ ઇષ્ટ્વા સુરાન્ પૂજ્ય તતઃ સ્વર્ગમુપેયિવાન્ ॥ ૧૭૦.૮૮॥

૧૭૦.૮૯/૧તતઃ પ્રભૃતિ તત્ તીર્થં મૃતસંજીવનં વિદુઃ ।
૧૭૦.૮૯/૨ચક્ષુસ્તીર્થં સયોગેશં સ્મરણાદ્ અપિ પુણ્યદમ્ ।
૧૭૦.૮૯/૩મનઃપ્રસાદજનનં સર્વદુર્ભાવનાશનમ્ ॥ ૧૭૦.૮૯॥

૧૭૧.૧/૧બ્રહ્મોવાચ । ઉર્વશીતીર્થમાખ્યાતમશ્વમેધફલપ્રદમ્ ।
૧૭૧.૧/૨સ્નાનદાનમહાદેવ+ ।વાસુદેવાર્ચનાદિભિઃ ॥ ૧૭૧.૧॥

૧૭૧.૨/૧મહેશ્વરો યત્ર દેવો યત્ર શાર્ઙ્ગધરો હરિઃ ।
૧૭૧.૨/૨પ્રમતિર્નામ રાજાસીત્ સાર્વભૌમઃ પ્રતાપવાન્ ॥ ૧૭૧.૨॥

૧૭૧.૩/૧રિપૂઞ્ જિત્વા જગામાશુ ઇન્દ્રલોકં સુરૈર્વૃતમ્ ।
૧૭૧.૩/૨તત્રાપશ્યત્ સુરપતિં મરુદ્ભિઃ સહ નારદ ॥ ૧૭૧.૩॥

૧૭૧.૪/૧જહાસેન્દ્રં પાશહસ્તં પ્રમતિઃ ક્ષત્રિયર્ષભઃ ।
૧૭૧.૪/૨તં હસન્તમથાલક્ષ્ય હરિઃ પ્રમતિમબ્રવીત્ ॥ ૧૭૧.૪॥

૧૭૧.૫/૧ઇન્દ્ર ઉવાચ । દેવાલયે મહાબુદ્ધે મરુદ્ભિઃ ક્રીડિતૈરલમ્ ।
૧૭૧.૫/૨દિશો જિત્વા દિવં પ્રાપ્તઃ કુરુ ક્રીડાં મયા સહ ॥ ૧૭૧.૫॥

૧૭૧.૬/૧બ્રહ્મોવાચ । સકષાયં હરિવચો નિશમ્ય પ્રમતિર્નૃપઃ ।
૧૭૧.૬/૨તથેત્યુવાચ દેવેન્દ્રં નિષ્કૃતિં કાં તુ મન્યસે ।
૧૭૧.૬/૩તચ્છ્રુત્વા પ્રમતેર્વાક્યં સુરરાણ્ નૃપમબ્રવીત્ ॥ ૧૭૧.૬ ॥

૧૭૧.૭/૧ઇન્દ્ર ઉવાચ । ઉર્વશ્યેવ પણોઽસ્માકં પ્રાપ્યા યા નિખિલૈર્મખૈઃ ॥ ૧૭૧.૭ ॥

૧૭૧.૮/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વેન્દ્રવચનં પ્રમતિઃ પ્રાહ ગર્વિતઃ ।
૧૭૧.૮/૨ઉર્વશીં નિષ્કૃતિં મન્યે ત્વં રાજન્ કિં નુ મન્યસે ॥ ૧૭૧.૮ ॥

૧૭૧.૯/૧યદ્ બ્રવીષિ સુરેશાન તન્ મન્યેઽહં શતક્રતો ।
૧૭૧.૯/૨પ્રાહેન્દ્રં પ્રમતિસ્તદ્વન્ નિષ્કૃત્યૈ દક્ષિણં કરમ્ ।
૧૭૧.૯/૩સવર્મ સશરં ધર્મ્યં દેહિ દીવ્યામહે વયમ્ ॥ ૧૭૧.૯ ॥

૧૭૧.૧૦/૧બ્રહ્મોવાચ । તાવેવં સંવિદં કૃત્વા દેવનાયોપતસ્થતુઃ ।
૧૭૧.૧૦/૨પ્રમતિર્જિતવાંસ્તત્ર ઉર્વશીં દૈવતસ્ત્રિયમ્ ।
૧૭૧.૧૦/૩તાં જિત્વા પ્રમતિઃ પ્રાહ સંરમ્ભાત્ તં શતક્રતુમ્ ॥ ૧૭૧.૧૦ ॥

૧૭૧.૧૧/૧પ્રમતિરુવાચ । નિષ્કૃત્યૈ પુનરન્યન્ મે પશ્ચાદ્ દીવ્યે
ત્વયા વિભો ॥ ૧૭૧.૧૧ ॥

૧૭૧.૧૨/૧ઇન્દ્ર ઉવાચ । દેવયોગ્યમથો વજ્રં જૈત્રં સરથમુત્તમમ્ ।
૧૭૧.૧૨/૨દીવ્યેઽહં તેન નૃપતે કરેણાપ્યવિચારયન્ ॥ ૧૭૧.૧૨ ॥

૧૭૧.૧૩/૧બ્રહ્મોવાચ । સ ગૃહીત્વા તદા પાશાન્ અન્યાંશ્ચ મણિભૂષિતાન્ ।
૧૭૧.૧૩/૨જિતમિત્યબ્રવીચ્છક્રં પ્રમતિઃ પ્રહસંસ્તદા ॥ ૧૭૧.૧૩ ॥

૧૭૧.૧૪/૧એતસ્મિન્ અન્તરે પ્રાયાદ્ અક્ષજ્ઞસ્તત્ર નારદ ।
૧૭૧.૧૪/૨વિશ્વાવસુરિતિ ખ્યાતો ગન્ધર્વાણાં મહેશ્વરઃ ॥ ૧૭૧.૧૪ ॥

૧૭૧.૧૫/૧વિશ્વાવસુરુવાચ । ગન્ધર્વવિદ્યયા રાજંસ્તયા દીવ્યામહે ત્વયા ।
૧૭૧.૧૫/૨તથેત્યુક્ત્વા સ નૃપતિર્જિતમિત્યબ્રવીત્ તદા ॥ ૧૭૧.૧૫ ॥

૧૭૧.૧૬/૧તૌ જિત્વા નૃપતિર્મૌર્ખ્યાદ્ દેવેન્દ્રં પ્રાહ કશ્મલમ્ ॥ ૧૭૧.૧૬ ॥

૧૭૧.૧૭/૧પ્રમતિરુવાચ । રણે વા દેવને વાપિ ન ત્વં જેતા કથંચન ।
૧૭૧.૧૭/૨મહેન્દ્ર સતતં તસ્માદ્ અસ્મદારાધકો ભવ ।
૧૭૧.૧૭/૩વદ કેન પ્રકારેણ જાતા દેવેન્દ્રતા તવ ॥ ૧૭૧.૧૭ ॥

૧૭૧.૧૮/૧બ્રહ્મોવાચ । તથા પ્રાહોર્વશીં ગર્વાદ્ ગચ્છ કર્મકરી ભવ ।
૧૭૧.૧૮/૨ઉર્વશી પ્રાહ દેવેષુ યથા વર્તે તથા ત્વયિ ।

૧૭૧.૧૮/૩વર્તેય સર્વભાવેન ન માં ધિક્કર્તુમર્હસિ ॥ ૧૭૧.૧૮॥

૧૭૧.૧૯/૧બ્રહ્મોવાચ । તતસ્તાં પ્રમતિઃ પ્રાહ ત્વાદૃશ્યઃ સન્તિ ચારિકાઃ ।
૧૭૧.૧૯/૨ત્વં કિં વિલજ્જસે ભદ્રે ગચ્છ કર્મકરી ભવ ॥ ૧૭૧.૧૯॥

૧૭૧.૨૦/૧એતચ્છ્રુત્વા નૃપેણોક્તં ગન્ધર્વાધિપતિસ્તદા ।
૧૭૧.૨૦/૨ચિત્રસેન ઇતિ ખ્યાતઃ સુતો વિશ્વાવસોર્બલી ॥ ૧૭૧.૨૦॥

૧૭૧.૨૧/૧ચિત્રસેન ઉવાચ । દીવ્યેઽહં વૈ ત્વયા રાજન્ સર્વેણાનેન ભૂપતે ।
૧૭૧.૨૧/૨રાજ્યેન જીવિતેનાપિ મદીયેન તવાપિ ચ ॥ ૧૭૧.૨૧॥

૧૭૧.૨૨/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા પુનરુભૌ ચિત્રસેનનૃપોત્તમૌ ।
૧૭૧.૨૨/૨દીવ્યેતામભિસંરબ્ધૌ ચિત્રસેનોઽજયત્ તદા ॥ ૧૭૧.૨૨॥

૧૭૧.૨૩/૧ગાન્ધર્વૈસ્તં મહાપાશૈર્બબન્ધ નૃપતિં તદા ।
૧૭૧.૨૩/૨ચિત્રસેનોઽજયત્ સર્વમુર્વશીમુખ્યતઃ પણૈઃ ॥ ૧૭૧.૨૩॥

૧૭૧.૨૪/૧રાજ્યં કોશં બલં ચૈવ યદ્ અન્યદ્ વસુ કિંચન ।
૧૭૧.૨૪/૨ચિત્રસેનસ્ય તજ્જાતં યદ્ આસીત્ પ્રમતેર્ધનમ્ ॥ ૧૭૧.૨૪॥

૧૭૧.૨૫/૧તસ્ય પુત્રો બાલ એવ પુરોધસમુવાચ હ ।
૧૭૧.૨૫/૨વૈશ્વામિત્રં મહાપ્રાજ્ઞં મધુચ્છન્દસમોજસા ॥ ૧૭૧.૨૫॥

૧૭૧.૨૬/૧પ્રમતિપુત્ર ઉવાચ । કિં મે પિત્રા કૃતં પાપં ક્વ વા બદ્ધો મહામતિઃ ।
૧૭૧.૨૬/૨કથમેષ્યતિ સ્વં સ્થાનં કથં પાશૈર્વિમોક્ષ્યતે ॥ ૧૭૧.૨૬॥

૧૭૧.૨૭/૧બ્રહ્મોવાચ । સુમતેર્વચનં શ્રુત્વા ધ્યાત્વા સ મુનિસત્તમઃ ।
૧૭૧.૨૭/૨મધુચ્છન્દા જગાદેદં પ્રમતેર્વર્તનં તદા ॥ ૧૭૧.૨૭॥

૧૭૧.૨૮/૧મધુચ્છન્દા ઉવાચ । દેવલોકે તવ પિતા બદ્ધ આસ્તે મહામતે ।
૧૭૧.૨૮/૨કૈતવૈર્બહુદોષૈશ્ચ ભ્રષ્ટરાજ્યો બભૂવ હ ॥ ૧૭૧.૨૮॥

૧૭૧.૨૯/૧યો યાતિ કૈતવસભાં સ ચાપિ ક્લેશભાગ્ ભવેત્ ।
૧૭૧.૨૯/૨દ્યૂતમદ્યામિષાદીનિ વ્યસનાનિ નૃપાત્મજ ॥ ૧૭૧.૨૯॥

૧૭૧.૩૦/૧પાપિનામેવ જાયન્તે સદા પાપાત્મકાનિ હિ ।
૧૭૧.૩૦/૨એકૈકમપ્યનર્થાય પાપાય નરકાય ચ ॥ ૧૭૧.૩૦॥

૧૭૧.૩૧/૧યાનાસનાભિલાપાદ્યૈઃ કૃતૈઃ કૈતવવર્તિભિઃ ।
૧૭૧.૩૧/૨કુલીનાઃ કલુષીભૂતાઃ કિં પુનઃ કિતવો જનઃ ॥ ૧૭૧.૩૧॥

૧૭૧.૩૨/૧કિતવસ્ય તુ યા જાયા તપ્યતે નિત્યમેવ સા ।
૧૭૧.૩૨/૨સ ચાપિ કિતવઃ પાપો યોષિતં વીક્ષ્ય તપ્યતે ॥ ૧૭૧.૩૨॥

૧૭૧.૩૩/૧તાં દૃષ્ટ્વા વિગતાનન્દો નિત્યં વદતિ પાપકૃત્ ।
૧૭૧.૩૩/૨અહો સંસારચક્રેઽસ્મિન્ મયા તુલ્યો ન પાતકી ॥ ૧૭૧.૩૩॥

૧૭૧.૩૪/૧ન કિંચિદ્ અપિ યસ્યાસ્તે લોકે વિષયજં સુખમ્ ।
૧૭૧.૩૪/૨લોકદ્વયેઽપિ ન સુખી કિતવઃ કોઽપિ દૃશ્યતે ॥ ૧૭૧.૩૪॥

૧૭૧.૩૫/૧વિભાતિ ચ તથા નિત્યં લજ્જયા દગ્ધમાનસઃ ।
૧૭૧.૩૫/૨ગતધર્મો નિરાનન્દો ગ્રસ્તગર્વસ્તથાટતિ ॥ ૧૭૧.૩૫॥

૧૭૧.૩૬/૧અકૈતવી ચ યા વૃત્તિઃ સા પ્રશસ્તા દ્વિજન્મનામ્ ।
૧૭૧.૩૬/૨કૃષિગોરક્ષ્યવાણિજ્યમપિ કુર્યાન્ ન કૈતવમ્ ॥ ૧૭૧.૩૬॥

૧૭૧.૩૭/૧યસ્તુ કૈતવવૃત્ત્યા હિ ધનમાહર્તુમિચ્છતિ ।
૧૭૧.૩૭/૨ધર્માર્થકામાભિજનૈઃ સ વિમુચ્યેત પૌરુષાત્ ॥ ૧૭૧.૩૭॥

૧૭૧.૩૮/૧વેદેઽપિ દૂષિતં કર્મ તવ પિત્રા તદાદૃતમ્ ।
૧૭૧.૩૮/૨તસ્માત્ કિં કુર્મહે વત્સ યદ્ ઉક્તં તે વિધીયતે ॥ ૧૭૧.૩૮॥

૧૭૧.૩૯/૧વિધાતૃવિહિતં માર્ગં કો નુ વાત્યેતિ પણ્ડિતઃ ॥ ૧૭૧.૩૯॥

૧૭૧.૪૦/૧બ્રહ્મોવાચ । એતત્ પુરોધસો વાક્યં શ્રુત્વા સુમતિરબ્રવીત્ ॥ ૧૭૧.૪૦॥

૧૭૧.૪૧/૧સુમતિરુવાચ । કિં કૃત્વા પ્રમતિસ્તાતઃ પુના રાજ્યમવાપ્નુયાત્ ॥ ૧૭૧.૪૧॥

૧૭૧.૪૨/૧બ્રહ્મોવાચ । પુનર્ધ્યાત્વા મધુચ્છન્દાઃ સુમતિં ચેદમબ્રવીત્ ॥ ૧૭૧.૪૨॥

૧૭૧.૪૩/૧મધુચ્છન્દા ઉવાચ । ગૌતમીં યાહિ વત્સ ત્વં તત્ર પૂજય શંકરમ્ ।
૧૭૧.૪૩/૨અદિતિં વરુણં વિષ્ણું તતઃ પાશાદ્ વિમોક્ષ્યતે ॥ ૧૭૧.૪૩॥

૧૭૧.૪૪/૧બ્રહ્મોવાચ । તથેત્યુક્ત્વા જગામાશુ ગઙ્ગાં નત્વા જનાર્દનમ્ ।
૧૭૧.૪૪/૨પૂજયામાસ શમ્ભું ચ તપસ્તેપે યતવ્રતઃ ॥ ૧૭૧.૪૪॥

૧૭૧.૪૫/૧સહસ્રમેકં વર્ષાણાં બદ્ધં પિતરમાત્મનઃ ।
૧૭૧.૪૫/૨મોચયામાસ દેવેભ્યઃ પુના રાજ્યમવાપ સઃ ॥ ૧૭૧.૪૫॥

૧૭૧.૪૬/૧શિવેશાભ્યાં મુક્તપાશો રાજ્યં પ્રાપ સુતાત્ સ્વકાત્ ।
૧૭૧.૪૬/૨અવાપ્ય વિદ્યાં ગાન્ધર્વીં પ્રિયશ્ચાસીચ્છતક્રતોઃ ॥ ૧૭૧.૪૬॥

૧૭૧.૪૭/૧શામ્ભવં વૈષ્ણવં ચૈવ ઉર્વશીતીર્થમેવ ચ ।

૧૭૧.૪૭/૨તતઃપ્રભૃતિ તત્ તીર્થં કૈતવં ચેતિ વિશ્રુતમ્ ॥ ૧૭૧.૪૭॥

૧૭૧.૪૮/૧શિવવિષ્ણુસરિન્માતુ+ ।પ્રસાદાદ્ આપ્યતે ન કિમ્ ।
૧૭૧.૪૮/૨તત્ર સ્નાનં ચ દાનં ચ બહુપુણ્યફલપ્રદમ્ ।
૧૭૧.૪૮/૩પાપપાશવિમોક્ષં તુ સર્વદુર્ગતિનાશનમ્ ॥ ૧૭૧.૪૮॥

૧૭૨.૧/૧બ્રહ્મોવાચ । સામુદ્રં તીર્થમાખ્યાતં સર્વતીર્થફલપ્રદમ્ ।
૧૭૨.૧/૨તસ્ય સ્વરૂપં વક્ષ્યામિ શ્ૃણુ નારદ તન્મનાઃ ॥ ૧૭૨.૧॥

૧૭૨.૨/૧વિસૃષ્ટા ગૌતમેનાસૌ ગઙ્ગા પાપપ્રણાશની ।
૧૭૨.૨/૨લોકાનામુપકારાર્થં પ્રાયાત્ પૂર્વાર્ણવં પ્રતિ ॥ ૧૭૨.૨॥

૧૭૨.૩/૧આગચ્છન્તી દેવનદી કમણ્ડલુધૃતા મયા ।
૧૭૨.૩/૨શિરસા ચ ધૃતા દેવી શમ્ભુના પરમાત્મના ॥ ૧૭૨.૩॥

૧૭૨.૪/૧વિષ્ણુપાદાત્ પ્રસૂતાં તાં બ્રાહ્મણેન મહાત્મના ।
૧૭૨.૪/૨આનીતાં મર્ત્યભવનં સ્મરણાદ્ અઘનાશનીમ્ ॥ ૧૭૨.૪॥

૧૭૨.૫/૧ગુરોર્ગુરુતમાં સિન્ધુર્દૃષ્ટ્વા કૃત્યમચિન્તયત્ ।
૧૭૨.૫/૨યા વન્દ્યા જગતામીશા બ્રહ્મેશાદ્યૈર્નમસ્કૃતા ॥ ૧૭૨.૫॥

૧૭૨.૬/૧તામહં પ્રતિગચ્છેયં નો ચેત્ સ્યાદ્ ધર્મદૂષણમ્ ।
૧૭૨.૬/૨આગચ્છન્તં મહાત્માનં યો મોહાન્ નોપતિષ્ઠતે ॥ ૧૭૨.૬॥

૧૭૨.૭/૧ન તસ્ય કોઽપિ ત્રાતાસ્તિ પાપિનો લોકયોર્દ્વયોઃ ।
૧૭૨.૭/૨એવં વિમૃશ્ય રત્નેશો મૂર્તિમાન્ વિનયાન્વિતઃ ।
૧૭૨.૭/૩કૃતાઞ્જલિપુટો ગઙ્ગામાહેદં સરિતામ્પતિઃ ॥ ૧૭૨.૭॥

૧૭૨.૮/૧સિન્ધુરુવાચ । રસાતલગતં વારિ પૃથિવ્યાં યન્ નભસ્તલે ।
૧૭૨.૮/૨તન્ મામેવાત્ર વિશતુ નાહં વક્ષ્યામિ કિંચન ॥ ૧૭૨.૮॥

૧૭૨.૯/૧મયિ રત્નાનિ પીયૂષં પર્વતા રાક્ષસાસુરાઃ ।
૧૭૨.૯/૨એતાન્ અપ્યખિલાન્ અન્યાન્ ભીમાન્ સંધારયામ્યહમ્ ॥ ૧૭૨.૯॥

૧૭૨.૧૦/૧મમાન્તઃ કમલાયુક્તો વિષ્ણુઃ સ્વપિતિ નિત્યદા ।
૧૭૨.૧૦/૨મમાશક્યં ન કિમપિ વિદ્યતે સચરાચરે ॥ ૧૭૨.૧૦॥

૧૭૨.૧૧/૧મહત્યભ્યાગતે કુર્યાત્ પ્રત્યુત્થાનં ન યો મદાત્ ।
૧૭૨.૧૧/૨સ ધર્માદિપરિભ્રષ્ટો નિરયં તુ સમાપ્નુયાત્ ॥ ૧૭૨.૧૧॥

૧૭૨.૧૨/૧ન તાન્ મે બિભ્રતઃ ખેદો વિનાગસ્ત્યપરાભવાત્ ।

૧૭૨.૧૨/૨કિં તુ ત્વં ગૌરવેણૈષામતિરિક્તા તતસ્ત્વહમ્ ॥ ૧૭૨.૧૨॥

૧૭૨.૧૩/૧બ્રવીમિ દેવિ ગઙ્ગે માં ત્વં સામ્યાત્ સંગતા ભવ ।
૧૭૨.૧૩/૨નૈકરૂપામહં શક્તઃ સંગન્તું બહુધા યદિ ॥ ૧૭૨.૧૩॥

૧૭૨.૧૪/૧સઙ્ગમેષ્યસિ દેવિ ત્વં સંગચ્છેऽહં ન ચાન્યથા ।
૧૭૨.૧૪/૨ગઙ્ગે સમેષ્યસિ યદિ બહુધા તદ્ વિચારયે ॥ ૧૭૨.૧૪॥

૧૭૨.૧૫/૧બ્રહ્મોવાચ । તમેવંવાદિનં સિન્ધુમપામીશં તદાબ્રવીત્ ।
૧૭૨.૧૫/૨ગઙ્ગા સા ગૌતમી દેવી કુરુ ચૈતદ્ વચો મમ ॥ ૧૭૨.૧૫॥

૧૭૨.૧૬/૧સપ્તર્ષીણાં ચ યા ભાર્યા અરુન્ધતિપુરોગમાઃ ।
૧૭૨.૧૬/૨ભર્તૃભિઃ સહિતાઃ સર્વા આનય ત્વં તદા ત્વહમ્ ॥ ૧૭૨.૧૬॥

૧૭૨.૧૭/૧અલ્પભૂતા ભવિષ્યામિ તતઃ સ્યાં તવ સંગતા ।
૧૭૨.૧૭/૨તથેત્યુક્ત્વા સપ્તર્ષીણાં ભાર્યાભિરૃષિભિર્વૃતઃ ॥ ૧૭૨.૧૭॥

૧૭૨.૧૮/૧આનયામાસ તાં દેવી સપ્તધા સા વ્યભજ્યત ।
૧૭૨.૧૮/૨સા ચેયં ગૌતમી ગઙ્ગા સપ્તધા સાગરં ગતા ॥ ૧૭૨.૧૮॥

૧૭૨.૧૯/૧સપ્તર્ષીણાં તુ નામ્ના તુ સપ્ત ગઙ્ગાસ્તતોऽભવન્ ।
૧૭૨.૧૯/૨તત્ર સ્નાનં ચ દાનં ચ શ્રવણં પઠનં તથા ॥ ૧૭૨.૧૯॥

૧૭૨.૨૦/૧સ્મરણં ચાપિ યદ્ ભક્ત્યા સર્વકામપ્રદં ભવેત્ ।
૧૭૨.૨૦/૨નાસ્માદ્ અન્યત્ પરં તીર્થં સમુદ્રાદ્ ભુવનત્રયે ।
૧૭૨.૨૦/૩પાપહાનૌ ભુક્તિમુક્તિ+ ।પ્રાપ્તૌ ચ મનસો મુદે ॥ ૧૭૨.૨૦॥

૧૭૩.૧/૧બ્રહ્મોવાચ । ઋષિસત્રમિતિ ખ્યાતમ્ ઋષયઃ સપ્ત નારદ ।
૧૭૩.૧/૨નિષેદુસ્તપસે યત્ર યત્ર ભીમેશ્વરઃ શિવઃ ॥ ૧૭૩.૧॥

૧૭૩.૨/૧તત્રેદં વૃત્તમાખ્યાસ્યે દેવર્ષિપિતૃબૃંહિતમ્ ।
૧૭૩.૨/૨શૃણુ યત્નેન વક્ષ્યામિ સર્વકામપ્રદં શુભમ્ ॥ ૧૭૩.૨॥

૧૭૩.૩/૧સપ્તધા વ્યભજન્ ગઙ્ગામ્ ઋષયઃ સપ્ત નારદ ।
૧૭૩.૩/૨વાસિષ્ઠી દાક્ષિણેયી સ્યાદ્ વૈશ્વામિત્રી તદુત્તરા ॥ ૧૭૩.૩॥

૧૭૩.૪/૧વામદેવ્યપરા જ્ઞેયા ગૌતમી મધ્યતઃ શુભા ।
૧૭૩.૪/૨ભારદ્વાજી સ્મૃતા ચાન્યા આત્રેયી ચેત્યથાપરા ॥ ૧૭૩.૪॥

૧૭૩.૫/૧જામદગ્ની તથા ચાન્યા વ્યપદિષ્ટા તુ સપ્તધા ।
૧૭૩.૫/૨તૈઃ સર્વૈરૃષિભિસ્તત્ર યષ્ટુમિષ્ટૈર્મહાત્મભિઃ ॥ ૧૭૩.૫॥

૧૭૩.૬/૧નિષ્પાદિતં મહાસત્રમ્ ઋષિભિઃ પારદર્શિભિઃ ।
૧૭૩.૬/૨એતસ્મિન્ન્ અન્તરે તત્ર દેવાનાં પ્રબલો રિપુઃ ॥ ૧૭૩.૬॥

૧૭૩.૭/૧વિશ્વરૂપ ઇતિ ખ્યાતો મુનીનાં સત્રમભ્યગાત્ ।
૧૭૩.૭/૨બ્રહ્મચર્યેણ તપસા તાન્ આરાધ્ય યથાવિધિ ।
૧૭૩.૭/૩વિનયેનાથ પપ્રચ્છ ઋષીન્ સર્વાન્ અનુક્રમાત્ ॥ ૧૭૩.૭॥

૧૭૩.૮/૧વિશ્વરૂપ ઉવાચ । ધ્રુવં સર્વે યથાકામં મમ સ્વાસ્થ્યેન હેતુના ।
૧૭૩.૮/૨યથા સ્યાદ્ બલવાન્ પુત્રો દેવાનામપિ દુર્ધરઃ ।
૧૭૩.૮/૩યજ્ઞૈર્વા તપસા વાપિ મુનયો વક્તુમર્હથ ॥ ૧૭૩.૮॥

૧૭૩.૯/૧બ્રહ્મોવાચ । તત્ર પ્રાહ મહાબુદ્ધિર્વિશ્વામિત્રો મહામનાઃ ॥ ૧૭૩.૯॥

૧૭૩.૧૦/૧વિશ્વામિત્ર ઉવાચ । કર્મણા તાત લભ્યન્તે ફલાનિ વિવિધાનિ ચ ।
૧૭૩.૧૦/૨ત્રયાણાં કારણાનાં ચ કર્મ પ્રથમકારણમ્ ॥ ૧૭૩.૧૦॥

૧૭૩.૧૧/૧તતશ્ચ કારણં કર્તા તતશ્ચાન્યત્ પ્રકીર્તિતમ્ ।
૧૭૩.૧૧/૨ઉપાદાનં તથા બીજં ન ચ કર્મ વિદુર્બુધાઃ ॥ ૧૭૩.૧૧॥

૧૭૩.૧૨/૧કર્મણાં કારણત્વં ચ કારણે પુષ્કલે સતિ ।
૧૭૩.૧૨/૨ભાવાભાવૌ ફલે દૃષ્ટૌ તસ્માત્ કર્માશ્રિતં ફલમ્ ॥ ૧૭૩.૧૨॥

૧૭૩.૧૩/૧કર્માપિ દ્વિવિધં જ્ઞેયં ક્રિયમાણં તથા કૃતમ્ ।
૧૭૩.૧૩/૨કર્તવ્યં ક્રિયમાણસ્ય સાધનં યદ્ યદ્ ઉચ્યતે ॥ ૧૭૩.૧૩॥

૧૭૩.૧૪/૧તદ્ભાવાઃ કર્મસિદ્ધૌ ચ ઉભયત્રાપિ કારણમ્ ।
૧૭૩.૧૪/૨યદ્ યદ્ ભાવયતે જન્તુઃ કર્મ કુર્વન્ વિચક્ષણઃ ॥ ૧૭૩.૧૪॥

૧૭૩.૧૫/૧તદ્ભાવનાનુરૂપેણ ફલનિષ્પત્તિરુચ્યતે ।
૧૭૩.૧૫/૨કરોતિ કર્મ વિધિવદ્ વિના ભાવનયા યદિ ॥ ૧૭૩.૧૫॥

૧૭૩.૧૬/૧અન્યથા સ્યાત્ ફલં સર્વં તસ્ય ભાવાનુરૂપતઃ ।
૧૭૩.૧૬/૨તસ્માત્ તપો વ્રતં દાનં જપયજ્ઞાદિકાઃ ક્રિયાઃ ॥ ૧૭૩.૧૬॥

૧૭૩.૧૭/૧કર્મણસ્ત્વનુરૂપેણ ફલં દાસ્યન્તિ ભાવતઃ ।
૧૭૩.૧૭/૨તસ્માદ્ ભાવાનુરૂપેણ કર્મ વૈ દાસ્યતે ફલમ્ ॥ ૧૭૩.૧૭॥

૧૭૩.૧૮/૧ભાવસ્તુ ત્રિવિધો જ્ઞેયઃ સાત્ત્વિકો રાજસસ્તથા ।
૧૭૩.૧૮/૨તામસસ્તુ તથા જ્ઞેયઃ ફલં કર્માનુસારતઃ ॥ ૧૭૩.૧૮॥

૧૭૩.૧૯/૧ભાવનાનુગુણં ચેતિ વિચિત્રા કર્મણાં સ્થિતિઃ ।
૧૭૩.૧૯/૨તસ્માદ્ ઇચ્છાનુસારેણ ભાવં કુર્યાદ્ વિચક્ષણઃ ॥ ૧૭૩.૧૯ ॥

૧૭૩.૨૦/૧પશ્ચાત્ કર્માપિ કર્તવ્યં ફલદાતાપિ તદ્વિધમ્ ।
૧૭૩.૨૦/૨ફલં દદાતિ ફલિનાં ફલે યદિ પ્રવર્તતે ॥ ૧૭૩.૨૦ ॥

૧૭૩.૨૧/૧કર્મકારો ન તત્રાસ્તિ કુર્યાત્ કર્મ સ્વભાવતઃ ।
૧૭૩.૨૧/૨તદ્ એવ ચોપદાનાદિ સત્ત્વાદિગુણભેદતઃ ॥ ૧૭૩.૨૧ ॥

૧૭૩.૨૨/૧ભાવાત્ પ્રારભતે તદ્વદ્ ભાવૈઃ ફલમવાપ્યતે ।
૧૭૩.૨૨/૨ધર્માર્થકામમોક્ષાણાં કર્મ ચૈવ હિ કારણમ્ ॥ ૧૭૩.૨૨ ॥

૧૭૩.૨૩/૧ભાવસ્થિતં ભવેત્ કર્મ મુક્તિદં બન્ધકારણમ્ ।
૧૭૩.૨૩/૨સ્વભાવાનુગુણં કર્મ સ્વસ્યૈવેહ પરત્ર ચ ॥ ૧૭૩.૨૩ ॥

૧૭૩.૨૪/૧ફલાનિ વિવિધાન્યાશુ કરોતિ સમતાનુગમ્ ।
૧૭૩.૨૪/૨એક એવ પદાર્થોઽસૌ ભાવૈર્ભેદઃ પ્રદૃશ્યતે ॥ ૧૭૩.૨૪ ॥

૧૭૩.૨૫/૧ક્રિયતે ભુજ્યતે વાપિ તસ્માદ્ ભાવો વિશિષ્યતે ।
૧૭૩.૨૫/૨યથાભાવં કર્મ કુરુ યથેપ્સિતમવાપ્સ્યસિ ॥ ૧૭૩.૨૫ ॥

૧૭૩.૨૬/૧બ્રહ્મોવાચ । એતચ્છ્રુત્વા ઋષેર્વાક્યં વિશ્વામિત્રસ્ય ધીમતઃ ।
૧૭૩.૨૬/૨તપસ્તપ્ત્વા બહુકાલં તામસં ભાવમાશ્રિતઃ ॥ ૧૭૩.૨૬ ॥

૧૭૩.૨૭/૧વિશ્વરૂપઃ કર્મ ભીમં ચકાર સુરભીષણમ્ ।
૧૭૩.૨૭/૨પશ્યત્સુ ઋષિમુખ્યેષુ વાર્યમાણોઽપિ નિત્યશઃ ॥ ૧૭૩.૨૭ ॥

૧૭૩.૨૮/૧આત્મકોપાનુસારેણ ભીમં કર્મ તથાકરોત્ ।
૧૭૩.૨૮/૨ભીષણે કુણ્ડખાતે તુ ભીષણે જાતવેદસિ ॥ ૧૭૩.૨૮ ॥

૧૭૩.૨૯/૧ભીષણં રૌદ્રપુરુષં ધ્યાત્વાત્માનં ગુહાશયમ્ ।
૧૭૩.૨૯/૨એવં તપન્તમાલક્ષ્ય વાગ્ ઉવાચાશરીરિણી ॥ ૧૭૩.૨૯ ॥

૧૭૩.૩૦/૧જટાજૂટં વિનાત્માનં ન ચ વૃત્રો વ્યજાયત ।
૧૭૩.૩૦/૨વૃથાત્માનં વિશ્વરૂપો જુહુયાજ્જાતવેદસિ ॥ ૧૭૩.૩૦ ॥

૧૭૩.૩૧/૧સ એવેન્દ્રઃ સ વરુણઃ સ ચ સ્યાત્ સર્વમેવ ચ ।
૧૭૩.૩૧/૨ત્યક્ત્વાત્માનં જટામાત્રં હુતવાન્ વૃજિનોદ્ભવઃ ॥ ૧૭૩.૩૧ ॥

૧૭૩.૩૨/૧વૃત્ર ઇત્યુચ્યતે વેદે સ ચાપિ વૃજિનોઽભવત્ ।
૧૭૩.૩૨/૨ભીમસ્ય મહિમાનં કો જાનાતિ જગદીશિતુઃ ॥ ૧૭૩.૩૨ ॥

૧૭૩.૩૩/૧સૃજત્યશેષમપિ યો ન ચ સઙ્ગેન લિપ્યતે ।
૧૭૩.૩૩/૨વિરરામેતિ સંકીર્ત્ય સા વાણ્યેનં મુનીશ્વરાઃ ॥ ૧૭૩.૩૩॥

૧૭૩.૩૪/૧ભીમેશ્વરં નમસ્કૃત્ય જગ્મુઃ સ્વં સ્વમથાશ્રમમ્ ।
૧૭૩.૩૪/૨વિશ્વરૂપો મહાભીમો ભીમકર્મા તથાકૃતિઃ ॥ ૧૭૩.૩૪॥

૧૭૩.૩૫/૧ભીમભાવો ભીમતનું ધ્યાત્વાત્માનં જુહાવ હ ।
૧૭૩.૩૫/૨તસ્માદ્ ભીમેશ્વરો દેવઃ પુરાણે પરિપઠ્યતે ।
૧૭૩.૩૫/૩તત્ર સ્નાનં ચ દાનં ચ મુક્તિદં નાત્ર સંશયઃ ॥ ૧૭૩.૩૫॥

૧૭૩.૩૬/૧ઇતિ પઠતિ શૃણોતિ યશ્ચ ભક્ત્યા ।
૧૭૩.૩૬/૨વિબુધપતિં શિવમત્ર ભીમરૂપમ્ ।
૧૭૩.૩૬/૩જગતિ વિદિતમશેષપાપહારિ+ ।
૧૭૩.૩૬/૪સ્મૃતિપદશરણેન મુક્તિદશ્ચ ॥ ૧૭૩.૩૬॥

૧૭૩.૩૭/૧ગોદાવરી તાવદ્ અશેષપાપ+ ।
૧૭૩.૩૭/૨સમૂહહન્ત્રી પરમાર્થદાત્રી ।
૧૭૩.૩૭/૩સદૈવ સર્વત્ર વિશેષતસ્તુ ।
૧૭૩.૩૭/૪યત્રામ્બુરાશિં સમનુપ્રવિષ્ટા ॥ ૧૭૩.૩૭॥

૧૭૩.૩૮/૧સ્નાત્વા તુ તસ્મિન્ સુકૃતી શરીરી ।
૧૭૩.૩૮/૨ગોદાવરીવારિધિસંગમે યઃ ।
૧૭૩.૩૮/૩ઉદ્ધૃત્ય તીવ્રાન્ નિરયાદ્ અશેષાત્ ।
૧૭૩.૩૮/૪સ પૂર્વજાન્ યાતિ પુરં પુરારેઃ ॥ ૧૭૩.૩૮॥

૧૭૩.૩૯/૧વેદાન્તવેદ્યં યદ્ ઉપાસિતવ્યમ્ ।
૧૭૩.૩૯/૨તદ્ બ્રહ્મ સાક્ષાત્ ખલુ ભીમનાથઃ ।
૧૭૩.૩૯/૩દૃષ્ટે હિ તસ્મિન્ ન પુનર્વિશન્તિ ।
૧૭૩.૩૯/૪શરીરિણઃ સંસ્મૃતિમુગ્રદુઃખામ્ ॥ ૧૭૩.૩૯॥

૧૭૪.૧/૧બ્રહ્મોવાચ । સા સંગતા પૂર્વમપામ્પતિં તમ્ ।
૧૭૪.૧/૨ગઙ્ગા સુરાણામપિ વન્દનીયા ।
૧૭૪.૧/૩દેવૈશ્ચ સર્વૈરનુગમ્યમાના ।
૧૭૪.૧/૪સંસ્તૂયમાના મુનિભિર્મરુદ્ભિઃ ॥ ૧૭૪.૧॥

૧૭૪.૨/૧વસિષ્ઠજાબાલિસયાજ્ઞવલ્ક્ય+ ।

૧૭૪.૨/૨ક્રત્વઙ્ગિરોદક્ષમરીચિવૈષ્ણવાઃ ।
૧૭૪.૨/૩શાતાતપઃ શૌનકદેવરાત+ ।
૧૭૪.૨/૪ભૃગ્વગ્નિવેશ્યાત્રિમરીચિમુખ્યાઃ ॥ ૧૭૪.૨॥

૧૭૪.૩/૧સુધૂતપાપા મનુગૌતમાદયઃ ।
૧૭૪.૩/૨સકૌશિકાસ્તુમ્બરુપર્વતાદ્યાઃ ।
૧૭૪.૩/૩અગસ્ત્યમાર્કણ્ડસપિપ્પલાદ્યાઃ ।
૧૭૪.૩/૪સગાલવા યોગપરાયણાશ્ચ ॥ ૧૭૪.૩॥

૧૭૪.૪/૧સવામદેવાઙ્ગિરસોઽથ ભાર્ગવાઃ ।
૧૭૪.૪/૨સ્મૃતિપ્રવીણાઃ શ્રુતિભિર્મનોજ્ઞાઃ ।
૧૭૪.૪/૩સર્વે પુરાણાર્થવિદો બહુજ્ઞાસ્- ।
૧૭૪.૪/૪તે ગૌતમીં દેવનદીં તુ ગત્વા ॥ ૧૭૪.૪॥

૧૭૪.૫/૧સ્તોષ્યન્તિ મન્ત્રૈઃ શ્રુતિભિઃ પ્રભૂતૈર્ ।
૧૭૪.૫/૨હૃદ્યૈશ્ચ તુષ્ટૈર્મુદિતૈર્મનોભિઃ ।
૧૭૪.૫/૩તાં સંગતાં વીક્ષ્ય શિવો હરિશ્ચ ।
૧૭૪.૫/૪આત્માનમાદર્શયતાં મુનિભ્યઃ ॥ ૧૭૪.૫॥

૧૭૪.૬/૧તથામરાસ્તૌ પિતૃભિશ્ચ દૃષ્ટૌ ।
૧૭૪.૬/૨સ્તુવન્તિ દેવૌ સકલાર્તિહારિણૌ ॥ ૧૭૪.૬॥

૧૭૪.૭/૧આદિત્યા વસવો રુદ્રા મરુતો લોકપાલકાઃ ।
૧૭૪.૭/૨કૃતાઞ્જલિપુટાઃ સર્વે સ્તુવન્તિ હરિશંકરૌ ॥ ૧૭૪.૭॥

૧૭૪.૮/૧સંગમેષુ પ્રસિદ્ધેષુ નિત્યં સપ્તસુ નારદ ।
૧૭૪.૮/૨સમુદ્રસ્ય ચ ગઙ્ગાયા નિત્યં દેવૌ પ્રતિષ્ઠિતૌ ॥ ૧૭૪.૮॥

૧૭૪.૯/૧ગૌતમેશ્વર આખ્યાતો યત્ર દેવો મહેશ્વરઃ ।
૧૭૪.૯/૨નિત્યં સંનિહિતસ્તત્ર માધવો રમયા સહ ॥ ૧૭૪.૯॥

૧૭૪.૧૦/૧બ્રહ્મેશ્વર ઇતિ ખ્યાતો મયૈવ સ્થાપિતઃ શિવઃ ।
૧૭૪.૧૦/૨લોકાનામુપકારાર્થમાત્મનઃ કારણાન્તરે ॥ ૧૭૪.૧૦॥

૧૭૪.૧૧/૧ચક્રપાણિરિતિ ખ્યાતઃ સ્તુતો દેવૈર્મયા સહ ।
૧૭૪.૧૧/૨તત્ર સંનિહિતો વિષ્ણુર્દેવૈઃ સહ મરુદ્ગણૈઃ ॥ ૧૭૪.૧૧॥

૧૭૪.૧૨/૧ઐન્દ્રતીર્થમિતિ ખ્યાતં તદ્ એવ હયમૂર્ધકમ્ ।
૧૭૪.૧૨/૨હયમૂર્ધા તત્ર વિષ્ણુસ્તન્મૂર્ધનિ સુરા અપિ ।

૧૭૪.૧૨/૩સોમતીર્થમિતિ ખ્યાતં યત્ર સોમેશ્વરઃ શિવઃ ॥ ૧૭૪.૧૨॥

૧૭૪.૧૩/૧ઇન્દ્રસ્ય સોમશ્રવસો દેવૈશ્ચ ઋષિભિસ્તથા ।
૧૭૪.૧૩/૨પ્રાર્થિતઃ સોમ એવાદાવિન્દ્રાયેન્દો પરિસ્રવ ॥ ૧૭૪.૧૩॥

૧૭૪.૧૪/૧સપ્ત દિશો નાનાસૂર્યાઃ સપ્ત હોતાર ઋત્વિજઃ ।
૧૭૪.૧૪/૨દેવા આદિત્યા યે સપ્ત તેભિઃ સોમાભિરક્ષ ન ।
૧૭૪.૧૪/૩ઇન્દ્રાયેન્દો પરિસ્રવ ॥ ૧૭૪.૧૪॥

૧૭૪.૧૫/૧યત્ તે રાજઞ્ છૃતં હવિસ્તેન સોમાભિરક્ષ નઃ ।
૧૭૪.૧૫/૨અરાતીવા મા નસ્તારીન્ મો ચ નઃ કિંચનામમદ્ ।
૧૭૪.૧૫/૩ઇન્દ્રાયેન્દો પરિસ્રવ ॥ ૧૭૪.૧૫॥

૧૭૪.૧૬/૧ઋષે મન્ત્રકૃતાં સ્તોમૈઃ કશ્યપોદ્વર્ધયન્ ગિરઃ ।
૧૭૪.૧૬/૨સોમં નમસ્ય રાજાનં યો જજ્ઞે વીરુધાં પતિર્।
૧૭૪.૧૬/૩ઇન્દ્રાયેન્દો પરિસ્રવ ॥ ૧૭૪.૧૬॥

૧૭૪.૧૭/૧કારુરહં તતો ભિષગ્ ઉપલપ્રક્ષિણી નના ।
૧૭૪.૧૭/૨નાનાધિયો વસૂયવોઽનુ ગા ઇવ તસ્થિમ ।
૧૭૪.૧૭/૩ઇન્દ્રાયેન્દો પરિસ્રવ ॥ ૧૭૪.૧૭॥

૧૭૪.૧૮/૧એવમુક્ત્વા ચ ઋષિભિઃ સોમં પ્રાપ્ય ચ વજ્રિણે ।
૧૭૪.૧૮/૨તેભ્યો દત્ત્વા તતો યજ્ઞઃ પૂર્ણો જાતઃ શતક્રતોઃ ॥ ૧૭૪.૧૮॥

૧૭૪.૧૯/૧તત્ સોમતીર્થમાખ્યાતમાગ્નેયં પુરતસ્તુ તત્ ।
૧૭૪.૧૯/૨અગ્નિરિષ્ટ્વા મહાયજ્ઞૈર્મામારાધ્ય મનીષિતમ્ ॥ ૧૭૪.૧૯॥

૧૭૪.૨૦/૧સમ્પ્રાપ્તવાન્ મત્પ્રસાદાદ્ અહં તત્રૈવ નિત્યશઃ ।
૧૭૪.૨૦/૨સ્થિતો લોકોપકારાર્થં તત્ર વિષ્ણુઃ શિવસ્તથા ॥ ૧૭૪.૨૦॥

૧૭૪.૨૧/૧તસ્માદ્ આગ્નેયમાખ્યાતમાદિત્યં તદનન્તરમ્ ।
૧૭૪.૨૧/૨યત્રાદિત્યો વેદમયો નિત્યમેતિ ઉપાસિતુમ્ ॥ ૧૭૪.૨૧॥

૧૭૪.૨૨/૧રૂપાન્તરેણ મધ્યાહ્ને દ્રષ્ટું માં શંકરં હરિમ્ ।
૧૭૪.૨૨/૨નમસ્કાર્યસ્તત્ર સદા મધ્યાહ્ને સકલો જનઃ ॥ ૧૭૪.૨૨॥

૧૭૪.૨૩/૧રૂપેણ કેન સવિતા સમાયાતીત્યનિશ્ચયાત્ ।
૧૭૪.૨૩/૨તસ્માદ્ આદિત્યમાખ્યાતં બાર્હસ્પત્યમનન્તરમ્ ॥ ૧૭૪.૨૩॥

૧૭૪.૨૪/૧બૃહસ્પતિઃ સુરૈઃ પૂજાં તસ્માત્ તીર્થાદ્ અવાપ હ ।

૧૭૪.૨૪/૨ઈજે ચ યજ્ઞાન્ વિવિધાન્ બાર્હસ્પત્યં તતો વિદુઃ ॥ ૧૭૪.૨૪॥

૧૭૪.૨૫/૧તત્તીર્થસ્મરણાદ્ એવ ગ્રહશાન્તિર્ભવિષ્યતિ ।
૧૭૪.૨૫/૨તસ્માદ્ અપ્યપરં તીર્થમિન્દ્રગોપે નગોત્તમે ॥ ૧૭૪.૨૫॥

૧૭૪.૨૬/૧પ્રતિષ્ઠિતં મહાલિઙ્ગં કસ્મિંશ્ચિત્ કારણાન્તરે ।
૧૭૪.૨૬/૨હિમાલયેન તત્ તીર્થમદ્રિતીર્થં તદ્ ઉચ્યતે ॥ ૧૭૪.૨૬॥

૧૭૪.૨૭/૧તત્ર સ્નાનં ચ દાનં ચ સર્વકામપ્રદં શુભમ્ ।
૧૭૪.૨૭/૨એવં સા ગૌતમી ગઙ્ગા બ્રહ્માદ્રેશ્ચ વિનિઃસૃતા ॥ ૧૭૪.૨૭॥

૧૭૪.૨૮/૧યાવત્ સાગરગા દેવી તત્ર તીર્થાનિ કાનિચિત્ ।
૧૭૪.૨૮/૨સંક્ષેપેણ મયોક્તાનિ રહસ્યાનિ શુભાનિ ચ ॥ ૧૭૪.૨૮॥

૧૭૪.૨૯/૧વેદે પુરાણે ઋષિભિઃ પ્રસિધ્દા ।
૧૭૪.૨૯/૨યા ગૌતમી લોકનમસ્કૃતા ચ ।
૧૭૪.૨૯/૩વક્તું કથં તામતિસુપ્રભાવામ્ ।
૧૭૪.૨૯/૪અશેષતો નારદ કસ્ય શક્તિઃ ॥ ૧૭૪.૨૯॥

૧૭૪.૩૦/૧ભક્ત્યા પ્રવૃત્તસ્ય યથાકથંચિન્ ।
૧૭૪.૩૦/૨નૈવાપરાધોઽસ્તિ ન સંશયોઽત્ર ।
૧૭૪.૩૦/૩તસ્માચ્ચ દિઙ્માત્રમતિપ્રયાસાત્ ।
૧૭૪.૩૦/૪સંસૂચિતં લોકહિતાય તસ્યાઃ ॥ ૧૭૪.૩૦॥

૧૭૪.૩૧/૧કસ્તસ્યાઃ પ્રતિતીર્થં તુ પ્રભાવં વક્તુમીશ્વરઃ ।
૧૭૪.૩૧/૨અપિ લક્ષ્મીપતિર્વિષ્ણુરલં સોમેશ્વરઃ શિવઃ ॥ ૧૭૪.૩૧॥

૧૭૪.૩૨/૧ક્વચિત્ કસ્મિંશ્ચ તીર્થાનિ કાલયોગે ભવન્તિ હિ ।
૧૭૪.૩૨/૨ગુણવન્તિ મહાપ્રાજ્ઞ ગૌતમી તુ સદા નૃણામ્ ॥ ૧૭૪.૩૨॥

૧૭૪.૩૩/૧સર્વત્ર સર્વદા પુણ્યા કો ન્વસ્યા ગુણકીર્તનમ્ ।
૧૭૪.૩૩/૨વક્તું શક્તસ્તતસ્તસ્યૈ નમ ઇત્યેવ યુજ્યતે ॥ ૧૭૪.૩૩॥

૧૭૫.૧/૧નારદ ઉવાચ । ત્રિદૈવત્યાં સુરેશાન ગઙ્ગાં બ્રૂષે સુરેશ્વર ।
૧૭૫.૧/૨બ્રાહ્મણેનાહૃતાં પુણ્યાં જગતઃ પાવનીં શુભામ્ ॥ ૧૭૫.૧॥

૧૭૫.૨/૧આદિમધ્યાવસાને ચ ઉભયોસ્તીરયોરપિ ।
૧૭૫.૨/૨યા વ્યાપ્તા વિષ્ણુનેશેન ત્વયા ચ સુરસત્તમ ।
૧૭૫.૨/૩પુનઃ સંક્ષેપતો બ્રૂહિ ન મે તૃપ્તિઃ પ્રજાયતે ॥ ૧૭૫.૨॥

૧૭૫.૩/૧બ્રહ્મોવાચ । કમણ્ડલુસ્થિતા પૂર્વં તતો વિષ્ણુપદાનુગા ।
૧૭૫.૩/૨મહેશ્વરજટાજૂટે સ્થિતા સૈવ નમસ્કૃતા ॥ ૧૭૫.૩॥

૧૭૫.૪/૧બ્રહ્મતેજઃપ્રભાવેણ શિવમારાધ્ય યત્નતઃ ।
૧૭૫.૪/૨તતઃ પ્રાપ્તા ગિરિં પુણ્યં તતઃ પૂર્વાર્ણવં પ્રતિ ॥ ૧૭૫.૪॥

૧૭૫.૫/૧આગત્ય સંગતા દેવી સર્વતીર્થમયી નૃણામ્ ।
૧૭૫.૫/૨ઈપ્સિતાનાં તથા દાત્રી પ્રભાવોઽસ્યા વિશિષ્યતે ॥ ૧૭૫.૫॥

૧૭૫.૬/૧એતસ્યા નાધિકં મન્યે કિંચિત્ તીર્થં જગત્ત્રયે ।
૧૭૫.૬/૨અસ્યાશ્ચૈવ પ્રભાવેણ ભાવ્યં યચ્ચ મનઃસ્થિતમ્ ॥ ૧૭૫.૬॥

૧૭૫.૭/૧અદ્યાપ્યસ્યા હિ માહાત્મ્યં વક્તું કૈશ્ચિન્ ન શક્યતે ।
૧૭૫.૭/૨ભક્તિતો વક્ષ્યતે નિત્યં યા બ્રહ્મ પરમાર્થતઃ ॥ ૧૭૫.૭॥

૧૭૫.૮/૧તસ્યાઃ પરતરં તીર્થં ન સ્યાદ્ ઇતિ મતિર્મમ ।
૧૭૫.૮/૨અન્યતીર્થેન સાધર્મ્યં ન યુજ્યેત કથંચન ॥ ૧૭૫.૮॥

૧૭૫.૯/૧શ્રુત્વા મદ્વાક્યપીયૂષૈર્ગઙ્ગાયા ગુણકીર્તનમ્ ।
૧૭૫.૯/૨સર્વેષાં ન મતિઃ કસ્માત્ તત્રૈવોપરતિં ગતા ।
૧૭૫.૯/૩ઇતિ ભાતિ વિચિત્રં મે મુને ખલુ જગત્ત્રયે ॥ ૧૭૫.૯॥

૧૭૫.૧૦/૧નારદ ઉવાચ । ધર્માર્થકામમોક્ષાણાં ત્વં વેત્તા ચોપદેશકઃ ।
૧૭૫.૧૦/૨છન્દાંસિ સરહસ્યાનિ પુરાણસ્મૃતયોઽપિ ચ ॥ ૧૭૫.૧૦॥

૧૭૫.૧૧/૧ધર્મશાસ્ત્રાણિ યચ્ચાન્યત્ તવ વાક્યે પ્રતિષ્ઠિતમ્ ।
૧૭૫.૧૧/૨તીર્થાનામથ દાનાનાં યજ્ઞાનાં તપસાં તથા ॥ ૧૭૫.૧૧॥

૧૭૫.૧૨/૧દેવતામન્ત્રસેવાનામધિકં કિં વદ પ્રભો ।
૧૭૫.૧૨/૨યદ્ બ્રૂષે ભગવન્ ભક્ત્યા તથા ભાવ્યં ન ચાન્યથા ॥ ૧૭૫.૧૨॥

૧૭૫.૧૩/૧એતં મે સંશયં બ્રહ્મન્ વાક્યાત્ ત્વં છેત્તુમર્હસિ ।
૧૭૫.૧૩/૨ઇષ્ટં મનોગતં શ્રુત્વા તસ્માદ્ વિસ્મયમાગતઃ ॥ ૧૭૫.૧૩॥

૧૭૫.૧૪/૧બ્રહ્મોવાચ । શ ૃણુ નારદ વક્ષ્યામિ રહસ્યં ધર્મમુત્તમમ્ ।
૧૭૫.૧૪/૨ચતુર્વિધાનિ તીર્થાનિ તાવન્ત્યેવ યુગાનિ ચ ॥ ૧૭૫.૧૪॥

૧૭૫.૧૫/૧ગુણાસ્ત્રયશ્ચ પુરુષાસ્ત્રયો દેવાઃ સનાતનાઃ ।
૧૭૫.૧૫/૨વેદાશ્ચ સ્મૃતિભિર્યુક્તાશ્ચત્વારસ્તે પ્રકીર્તિતાઃ ॥ ૧૭૫.૧૫॥

૧૭૫.૧૬/૧પુરુષાર્થાશ્ચ ચત્વારો વાણી ચાપિ ચતુર્વિધા ।

૧૭૫.૧૬/૨ગુણા હ્યપિ તુ ચત્વારઃ સમત્વેનેતિ નારદ ॥ ૧૭૫.૧૬॥

૧૭૫.૧૭/૧સર્વત્ર ધર્મઃ સામાન્યો યતો ધર્મઃ સનાતનઃ ।
૧૭૫.૧૭/૨સાધ્યસાધનભાવેન સ એવ બહુધા મતઃ ॥ ૧૭૫.૧૭॥

૧૭૫.૧૮/૧તસ્યાશ્રયશ્ચ દ્વિવિધો દેશઃ કાલશ્ચ સર્વદા ।
૧૭૫.૧૮/૨કાલાશ્રયશ્ચ યો ધર્મો હીયતે વર્ધતે સદા ॥ ૧૭૫.૧૮॥

૧૭૫.૧૯/૧યુગાનામનુરૂપેણ પાદઃ પાદોઽસ્ય હીયતે ।
૧૭૫.૧૯/૨ધર્મસ્યેતિ મહાપ્રાજ્ઞ દેશાપેક્ષા તથોભયમ્ ॥ ૧૭૫.૧૯॥

૧૭૫.૨૦/૧કાલેન ચાશ્રિતો ધર્મો દેશે નિત્યં પ્રતિષ્ઠિતઃ ।
૧૭૫.૨૦/૨યુગેષુ ક્ષીયમાણેષુ ન દેશેષુ સ હીયતે ॥ ૧૭૫.૨૦॥

૧૭૫.૨૧/૧ઉભયત્ર વિહીને ચ ધર્મસ્ય સ્યાદ્ અભાવતા ।
૧૭૫.૨૧/૨તસ્માદ્ દેશાશ્રિતો ધર્મશ્ચતુષ્પાત્ સુપ્રતિષ્ઠિતઃ ॥ ૧૭૫.૨૧॥

૧૭૫.૨૨/૧સ ચાપિ ધર્મો દેશેષુ તીર્થરૂપેણ તિષ્ઠતિ ।
૧૭૫.૨૨/૨કૃતે દેશં ચ કાલં ચ ધર્મોઽવષ્ટભ્ય તિષ્ઠતિ ॥ ૧૭૫.૨૨॥

૧૭૫.૨૩/૧ત્રેતાયાં પાદહીનેન સ તુ પાદઃ પ્રદેશતઃ ।
૧૭૫.૨૩/૨દ્વાપરે ચાર્ધતઃ કાલે ધર્મો દેશે સમાસ્થિતઃ ॥ ૧૭૫.૨૩॥

૧૭૫.૨૪/૧કલૌ પાદેન ચૈકેન ધર્મશ્ચલતિ સંકટમ્ ।
૧૭૫.૨૪/૨એવંવિધં તુ યો ધર્મં વેત્તિ તસ્ય ન હીયતે ॥ ૧૭૫.૨૪॥

૧૭૫.૨૫/૧યુગાનામનુભાવેન જાતિભેદાશ્ચ સંસ્થિતાઃ ।
૧૭૫.૨૫/૨ગુણેભ્યો ગુણકર્તૃભ્યો વિચિત્રા ધર્મસંસ્થિતિઃ ॥ ૧૭૫.૨૫॥

૧૭૫.૨૬/૧ગુણાનામનુભાવેન ઉદ્ભવાભિભવૌ તથા ।
૧૭૫.૨૬/૨તીર્થાનામપિ વર્ણાનાં વેદાનાં સ્વર્ગમોક્ષયોઃ ॥ ૧૭૫.૨૬॥

૧૭૫.૨૭/૧તાદૃગ્રૂપપ્રવૃત્ત્યા તુ તદ્ એવ ચ વિશિષ્યતે ।
૧૭૫.૨૭/૨કાલોઽભિવ્યઞ્જકઃ પ્રોક્તો દેશોઽભિવ્યઙ્ગ્ય ઉચ્યતે ॥ ૧૭૫.૨૭॥

૧૭૫.૨૮/૧યદા યદા અભિવ્યક્તિં કાલો ધત્તે તદા તદા ।
૧૭૫.૨૮/૨તદ્ એવ વ્યઞ્જનં બ્રહ્મંસ્તસ્માન્ નાસ્ત્યત્ર સંશયઃ ॥ ૧૭૫.૨૮॥

૧૭૫.૨૯/૧યુગાનુરૂપા મૂર્તિઃ સ્યાદ્ દેવાનાં વૈદિકી તથા ।
૧૭૫.૨૯/૨કર્મણામપિ તીર્થાનાં જાતીનામાશ્રમસ્ય તુ ॥ ૧૭૫.૨૯॥

૧૭૫.૩૦/૧ત્રિદૈવત્યં સત્યયુગે તીર્થં લોકેષુ પૂજ્યતે ।
૧૭૫.૩૦/૨દ્વિદૈવત્યં યુગેઽન્યસ્મિન્ દ્વાપરે ચૈકદૈવિકમ્ ॥ ૧૭૫.૩૦॥

૧૭૫.૩૧/૧કલૌ ન કિંચિદ્ વિજ્ઞેયમથાન્યદ્ અપિ તચ્છૃણુ ।
૧૭૫.૩૧/૨દૈવં કૃતયુગે તીર્થં ત્રેતાયામાસુરં વિદુઃ ॥ ૧૭૫.૩૧॥

૧૭૫.૩૨/૧આર્ષં ચ દ્વાપરે પ્રોક્તં કલૌ માનુષમુચ્યતે ।
૧૭૫.૩૨/૨અથાન્યદ્ અપિ વક્ષ્યામિ શ ૃણુ નારદ કારણમ્ ॥ ૧૭૫.૩૨॥

૧૭૫.૩૩/૧ગૌતમ્યાં યત્ ત્વયા પૃષ્ટં તત્ તે વક્ષ્યામિ વિસ્તરાત્ ।
૧૭૫.૩૩/૨યદા ચેયં હરશિરઃ પ્રાપ્તા ગઙ્ગા મહામુને ॥ ૧૭૫.૩૩॥

૧૭૫.૩૪/૧તદા પ્રભૃતિ સા ગઙ્ગા શમ્ભોઃ પ્રિયતરાભવત્ ।
૧૭૫.૩૪/૨તદ્ દેવસ્ય મતં જ્ઞાત્વા ગજવક્ત્રમુવાચ સા ॥ ૧૭૫.૩૪॥

૧૭૫.૩૫/૧ઉમા લોકત્રયેશાના માતા ચ જગતો હિતા ।
૧૭૫.૩૫/૨શાન્તા શ્રુતિરિતિ ખ્યાતા ભુક્તિમુક્તિપ્રદાયિની ॥ ૧૭૫.૩૫॥

૧૭૫.૩૬/૧બ્રહ્મોવાચ । તન્ માતુર્વચનં શ્રુત્વા
ગજવક્ત્રોઽભ્યભાષત ॥ ૧૭૫.૩૬॥

૧૭૫.૩૭/૧ગજવક્ત્ર ઉવાચ । કિં કૃત્યં શાધિ માં
માતસ્તત્કર્તાહમસંશયમ્ ॥ ૧૭૫.૩૭॥

૧૭૫.૩૮/૧બ્રહ્મોવાચ । ઉમા સુતમુવાચેદં મહેશ્વરજટાસ્થિતા ।
૧૭૫.૩૮/૨ત્વયાવતાર્યતાં ગઙ્ગા સત્યમીશપ્રિયા સતી ॥ ૧૭૫.૩૮॥

૧૭૫.૩૯/૧પુનશ્ચેશસ્તત્ર ચિત્રમધ્યાસ્તે સર્વદા સુત ।
૧૭૫.૩૯/૨શિવો યત્ર સુરાસ્તત્ર તત્ર વેદાઃ સનાતનાઃ ॥ ૧૭૫.૩૯॥

૧૭૫.૪૦/૧તત્રૈવ ઋષયઃ સર્વે મનુષ્યાઃ પિતરસ્તથા ।
૧૭૫.૪૦/૨તસ્માન્ નિવર્તયેશાનં દેવદેવં મહેશ્વરમ્ ॥ ૧૭૫.૪૦॥

૧૭૫.૪૧/૧તસ્યા નિવર્તિતે દેવે ગઙ્ગાયાઃ સર્વ એવ હિ ।
૧૭૫.૪૧/૨નિવૃત્તાસ્તે ભવિષ્યન્તિ શ ૃણુ ચેદં વચો મમ ।
૧૭૫.૪૧/૩નિવર્તય તતસ્તસ્યાઃ સર્વભાવેન શંકરમ્ ॥ ૧૭૫.૪૧॥

૧૭૫.૪૨/૧બ્રહ્મોવાચ । માતુસ્તદ્ વચનં શ્રુત્વા પુનરાહ ગણેશ્વરઃ ॥ ૧૭૫.૪૨॥

૧૭૫.૪૩/૧ગણેશ્વર ઉવાચ । નૈવ શક્યઃ શિવો દેવો મયા તસ્યા નિવર્તિતુમ્ ।
૧૭૫.૪૩/૨અનિવૃત્તે શિવે તસ્યા દેવા અપિ નિવર્તિતુમ્ ॥ ૧૭૫.૪૩॥

૧૭૫.૪૪/૧ન શક્યા જગતાં માતરથાન્યચ્ચાપિ કારણમ્ ।
૧૭૫.૪૪/૨ગઙ્ગાવતારિતા પૂર્વં ગૌતમેન મહાત્મના ॥ ૧૭૫.૪૪॥

૧૭૫.૪૫/૧ઋષિણા લોકપૂજ્યેન ત્રૈલોક્યહિતકારિણા ।
૧૭૫.૪૫/૨સામોપાયેન તદ્વાક્યાત્ પૂજ્યેન બ્રહ્મતેજસા ॥ ૧૭૫.૪૫॥

૧૭૫.૪૬/૧આરાધયિત્વા દેવેશં તપોભિઃ સ્તુતિભિર્ભવમ્ ।
૧૭૫.૪૬/૨તુષ્ટેન શંકરેણેદમુક્તોऽસૌ ગૌતમસ્તદા ॥ ૧૭૫.૪૬॥

૧૭૫.૪૭/૧શંકર ઉવાચ । વરાન્ વરય પુણ્યાંશ્ચ પ્રિયાંશ્ચ મનસેપ્સિતાન્ ।
૧૭૫.૪૭/૨યદ્ યદ્ ઇચ્છસિ તત્ સર્વં દાતા તેऽદ્ય મહામતે ॥ ૧૭૫.૪૭॥

૧૭૫.૪૮/૧બ્રહ્મોવાચ । એવમુક્તઃ શિવેનાસૌ ગૌતમો મયિ શ‌ૃણ્વતિ ।
૧૭૫.૪૮/૨ઇદમેવ તદોવાચ સજટાં દેહિ શંકર ।
૧૭૫.૪૮/૩ગઙ્ગાં મે યાચતે પુણ્યાં કિમન્યેન વરેણ મે ॥ ૧૭૫.૪૮॥

૧૭૫.૪૯/૧બ્રહ્મોવાચ । પુનઃ પ્રોવાચ તં શમ્ભુઃ સર્વલોકોપકારકઃ ॥ ૧૭૫.૪૯॥

૧૭૫.૫૦/૧શમ્ભુરુવાચ । ઉક્તં ન ચાત્મનઃ કિંચિત્ તસ્માદ્
યાચસ્વ દુષ્કરમ્ ॥ ૧૭૫.૫૦॥

૧૭૫.૫૧/૧બ્રહ્મોવાચ । ગૌતમોऽદીનસત્ત્વસ્તં ભવમાહ કૃતાઞ્જલિઃ ॥ ૧૭૫.૫૧॥

૧૭૫.૫૨/૧ગૌતમ ઉવાચ । એતદ્ એવ ચ સર્વેષાં દુષ્કરં તવ દર્શનમ્ ।
૧૭૫.૫૨/૨મયા તદ્ અદ્ય સમ્પ્રાપ્તં કૃપયા તવ શંકર ॥ ૧૭૫.૫૨॥

૧૭૫.૫૩/૧સ્મરણાદ્ એવ તે પદ્ભ્યાં કૃતકૃત્યા મનીષિણઃ ।
૧૭૫.૫૩/૨ભવન્તિ કિં પુનઃ સાક્ષાત્ ત્વયિ દૃષ્ટે મહેશ્વરે ॥ ૧૭૫.૫૩॥

૧૭૫.૫૪/૧બ્રહ્મોવાચ । એવમુક્તે ગૌતમેન ભવો હર્ષસમન્વિતઃ ।
૧૭૫.૫૪/૨ત્રયાણામુપકારાર્થં લોકાનાં યાચિતં ત્વયા ॥ ૧૭૫.૫૪॥

૧૭૫.૫૫/૧ન ચાત્મનો મહાબુદ્ધે યાચેત્યાહ શિવો દ્વિજમ્ ।
૧૭૫.૫૫/૨એવં પ્રોક્તઃ પુનર્વિપ્રો ધ્યાત્વા પ્રાહ શિવં તથા ॥ ૧૭૫.૫૫॥

૧૭૫.૫૬/૧વિનીતવદ્ અદીનાત્મા શિવભક્તિસમન્વિતઃ ।
૧૭૫.૫૬/૨સર્વલોકોપકારાય પુનર્યાચિતવાન્ ઇદમ્ ।
૧૭૫.૫૬/૩શ‌ૃણ્વત્સુ લોકપાલેષુ જગાદેદં સ ગૌતમઃ ॥ ૧૭૫.૫૬॥

૧૭૫.૫૭/૧ગૌતમ ઉવાચ । યાવત્ સાગરગા દેવી નિસૃષ્ટા બ્રહ્મણો ગિરેઃ ।

૧૭૫.૫૭/૨સર્વત્ર સર્વદા તસ્યાં સ્થાતવ્યં વૃષભધ્વજ ॥ ૧૭૫.૫૭॥

૧૭૫.૫૮/૧ફલેપ્સૂનાં ફલં દાતા ત્વમેવ જગતઃ પ્રભો ।
૧૭૫.૫૮/૨તીર્થાન્યન્યાનિ દેવેશ ક્વાપિ ક્વાપિ શુભાનિ ચ ॥ ૧૭૫.૫૮॥

૧૭૫.૫૯/૧યત્ર તે સંનિધિર્નિત્યં તદ્ એવ શુભદં વિદુઃ ।
૧૭૫.૫૯/૨યત્ર ગઙ્ગા ત્વયા દત્તા જટામુકુટસંસ્થિતા ।
૧૭૫.૫૯/૩સર્વત્ર તવ સાંનિધ્યાત્ સર્વતીર્થાનિ શંકર ॥ ૧૭૫.૫૯॥

૧૭૫.૬૦/૧બ્રહ્મોવાચ । તદ્ ગૌતમવચઃ શ્રુત્વા
પુનર્હર્ષાચ્છિવોઽબ્રવીત્ ॥ ૧૭૫.૬૦॥

૧૭૫.૬૧/૧શિવ ઉવાચ । યત્ર ક્વાપિ ચ યત્ કિંચિદ્ યો વા ભવતિ ભક્તિતઃ ।
૧૭૫.૬૧/૨યાત્રાં સ્નાનમથો દાનં પિતૃણાં વાપિ તર્પણમ્ ॥ ૧૭૫.૬૧॥

૧૭૫.૬૨/૧શ્રવણં પઠનં વાપિ સ્મરણં વાપિ ગૌતમ ।
૧૭૫.૬૨/૨યઃ કરોતિ નરો ભક્ત્યા ગોદાવર્યા યતવ્રતઃ ॥ ૧૭૫.૬૨॥

૧૭૫.૬૩/૧સપ્તદ્વીપવતી પૃથ્વી સશૈલવનકાનના ।
૧૭૫.૬૩/૨સરત્ના સૌષધી રમ્યા સાર્ણવા ધર્મભૂષિતા ॥ ૧૭૫.૬૩॥

૧૭૫.૬૪/૧દત્ત્વા ભવતિ યો ધર્મઃ સ ભવેદ્ ગૌતમીસ્મૃતેઃ ।
૧૭૫.૬૪/૨એવંવિધા ઇલા વિપ્ર ગોદાનાદ્ યાભિધીયતે ॥ ૧૭૫.૬૪॥

૧૭૫.૬૫/૧ચન્દ્રસૂર્યગ્રહે કાલે મત્સાંનિધ્યે યતવ્રતઃ ।
૧૭૫.૬૫/૨ભૂભૃતે વિષ્ણવે ભક્ત્યા સર્વકાલં કૃતા સુધીઃ ॥ ૧૭૫.૬૫॥

૧૭૫.૬૬/૧ગાઃ સુન્દરાઃ સવત્સાશ્ચ સંગમે લોકવિશ્રુતે ।
૧૭૫.૬૬/૨યો દદાતિ દ્વિજશ્રેષ્ઠ તત્ર યત્ પુણ્યમાપ્નુયાત્ ॥ ૧૭૫.૬૬॥

૧૭૫.૬૭/૧તસ્માદ્ વરં પુણ્યમેતિ સ્નાનદાનાદિના નરઃ ।
૧૭૫.૬૭/૨ગૌતમ્યાં વિશ્વવન્દ્યાયાં મહાનદ્યાં તુ ભક્તિતઃ ॥ ૧૭૫.૬૭॥

૧૭૫.૬૮/૧તસ્માદ્ ગોદાવરી ગઙ્ગા ત્વયા નીતા ભવિષ્યતિ ।
૧૭૫.૬૮/૨સર્વપાપક્ષયકરી સર્વાભીષ્ટપ્રદાયિની ॥ ૧૭૫.૬૮॥

૧૭૫.૬૯/૧ગણેશ્વર ઉવાચ । એતચ્છ્રુતં મયા માતર્વદતો ગૌતમં શિવાત્ ।
૧૭૫.૬૯/૨એતસ્માત્ કારણાચ્છમ્ભુર્ગઙ્ગાયાં નિયતઃ સ્થિતઃ ॥ ૧૭૫.૬૯॥

૧૭૫.૭૦/૧કો નિવર્તયિતું શક્તસ્તમમ્બ કરુણોદધિમ્ ।
૧૭૫.૭૦/૨અથાપિ માતરેતત્ સ્યાન્ માનુષા વિઘ્નપાશકૈઃ ॥ ૧૭૫.૭૦॥

૧૭૫.૭૧/૧વિનિબદ્ધા ન ગચ્છન્તિ ગોદામપ્યન્તિકસ્થિતામ્ ।
૧૭૫.૭૧/૨ન નમન્તિ શિવં દેવં ન સ્મરન્તિ સ્તુવન્તિ ન ॥ ૧૭૫.૭૧॥

૧૭૫.૭૨/૧તથા માતઃ કરિષ્યામિ તવ સંતોષહેતવે ।
૧૭૫.૭૨/૨સંનિરોદ્ધુમથો ક્લેશસ્તવ વાક્યં ક્ષમસ્વ મે ॥ ૧૭૫.૭૨॥

૧૭૫.૭૩/૧બ્રહ્મોવાચ । તતઃ પ્રભૃતિ વિઘ્નેશો માનુષાન્ પ્રતિ કિંચન ।
૧૭૫.૭૩/૨વિઘ્નમાચરતે યસ્તુ તમુપાસ્ય પ્રવર્તતે ॥ ૧૭૫.૭૩॥

૧૭૫.૭૪/૧અથો વિઘ્નમનાદૃત્ય ગૌતમીં યાતિ ભક્તિતઃ ।
૧૭૫.૭૪/૨સ કૃતાર્થો ભવેલ્લોકે ન કૃત્યમવશિષ્યતે ॥ ૧૭૫.૭૪॥

૧૭૫.૭૫/૧વિઘ્નાન્યનેકાનિ ભવન્તિ ગેહાન્ ।
૧૭૫.૭૫/૨નિર્ગન્તુકામસ્ય નરાધમસ્ય ।
૧૭૫.૭૫/૩નિધાય તન્મૂર્ધ્નિ પદં પ્રયાતિ ।
૧૭૫.૭૫/૪ગઙ્ગાં ન કિં તેન ફલં પ્રલબ્ધમ્ ॥ ૧૭૫.૭૫॥

૧૭૫.૭૬/૧અસ્યાઃ પ્રભાવં કો બ્રૂયાદ્ અપિ સાક્ષાત્ સદાશિવઃ ।
૧૭૫.૭૬/૨સંક્ષેપેણ મયા પ્રોક્તમિતિહાસપદાનુગમ્ ॥ ૧૭૫.૭૬॥

૧૭૫.૭૭/૧ધર્માર્થકામમોક્ષાણાં સાધનં યચ્ચરાચરે ।
૧૭૫.૭૭/૨તદ્ અત્ર વિદ્યતે સર્વમિતિહાસે સવિસ્તરે ॥ ૧૭૫.૭૭॥

૧૭૫.૭૮/૧વેદોદિતં શ્રુતિસકલરહસ્યમુક્તમ્ ।
૧૭૫.૭૮/૨સત્કારણં સમભિધાનમિદં સદૈવ ।
૧૭૫.૭૮/૩સમ્યક્ ચ દૃષ્ટં જગતાં હિતાય ।
૧૭૫.૭૮/૪પ્રોક્તં પુરાણં બહુધર્મયુક્તમ્ ॥ ૧૭૫.૭૮॥

૧૭૫.૭૯/૧અસ્ય શ્લોકં પદં વાપિ ભક્તિતઃ શ ૃણુયાત્ પઠેત્ ।
૧૭૫.૭૯/૨ગઙ્ગા ગઙ્ગેતિ વા વાક્યં સ તુ પુણ્યમવાપ્નુયાત્ ॥ ૧૭૫.૭૯॥

૧૭૫.૮૦/૧કલિકલઙ્કવિનાશનદક્ષમિદમ્ ।
૧૭૫.૮૦/૨સકલસિદ્ધિકરં શુભદં શિવમ્ ।
૧૭૫.૮૦/૩જગતિ પૂજ્યમભીષ્ટફલપ્રદમ્ ।
૧૭૫.૮૦/૪ગાઙ્ગમેતદ્ ઉદીરિતમુત્તમમ્ ॥ ૧૭૫.૮૦॥

૧૭૫.૮૧/૧સાધુ ગૌતમ ભદ્રં તે કોઽન્યોઽસ્તિ સદૃશસ્ત્વયા ।
૧૭૫.૮૧/૨ય એનાં ગૌતમીં ગઙ્ગાં દણ્ડકારણ્યમાપ્નુયાત્ ॥ ૧૭૫.૮૧॥

૧૭૫.૮૨/૧ગઙ્ગા ગઙ્ગેતિ યો બ્રૂયાદ્ યોજનાનાં શતૈરપિ ।
૧૭૫.૮૨/૨મુચ્યતે સર્વપાપેભ્યો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧૭૫.૮૨॥

૧૭૫.૮૩/૧તિસ્રઃ કોટ્યોઽર્ધકોટી ચ તીર્થાનિ ભુવનત્રયે ।
૧૭૫.૮૩/૨તાનિ સ્નાતું સમાયાન્તિ ગઙ્ગાયાં સિંહગે ગુરૌ ॥ ૧૭૫.૮૩॥

૧૭૫.૮૪/૧ષષ્ટિર્વર્ષસહસ્રાણિ ભાગીરથ્યવગાહનમ્ ।
૧૭૫.૮૪/૨સકૃદ્ ગોદાવરીસ્નાનં સિંહયુક્તે બૃહસ્પતૌ ॥ ૧૭૫.૮૪॥

૧૭૫.૮૫/૧ઇયં તુ ગૌતમી પુત્ર યત્ર ક્વાપિ મમાજ્ઞયા ।
૧૭૫.૮૫/૨સર્વેષાં સર્વદા નૃણાં સ્નાનાન્ મુક્તિં પ્રદાસ્યતિ ॥ ૧૭૫.૮૫॥

૧૭૫.૮૬/૧અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
૧૭૫.૮૬/૨કૃત્વા યત્ ફલમાપ્નોતિ તદ્ અસ્ય શ્રવણાદ્ ભવેત્ ॥ ૧૭૫.૮૬॥

૧૭૫.૮૭/૧યસ્યૈતત્ તિષ્ઠતિ ગૃહે પુરાણં બ્રહ્મણોદિતમ્ ।
૧૭૫.૮૭/૨ન ભયં વિદ્યતે તસ્ય કલિકાલસ્ય નારદ ॥ ૧૭૫.૮૭॥

૧૭૫.૮૮/૧યસ્ય કસ્યાપિ નાખ્યેયં પુરાણમિદમુત્તમમ્ ।
૧૭૫.૮૮/૨શ્રદ્દધાનાય શાન્તાય વૈષ્ણવાય મહાત્મને ॥ ૧૭૫.૮૮॥

૧૭૫.૮૯/૧ઇદં કીર્ત્યં ભુક્તિમુક્તિ+ ।દાયકં પાપનાશકમ્ ।
૧૭૫.૮૯/૨એતચ્છ્રવણમાત્રેણ કૃતકૃત્યો ભવેન્ નરઃ ॥ ૧૭૫.૮૯॥

૧૭૫.૯૦/૧લિખિત્વા પુસ્તકમિદં બ્રાહ્મણાય પ્રયચ્છતિ ।
૧૭૫.૯૦/૨સર્વપાપવિનિર્મુક્તઃ પુનર્ગર્ભં ન સંવિશેત્ ॥ ૧૭૫.૯૦॥

૧૭૬.૧/૧મુનય ઊચુઃ । નહિ નસ્તૃપ્તિરસ્તીહ શ◌ૃણ્વતાં ભગવત્કથામ્ ।
૧૭૬.૧/૨પુનરેવ પરં ગુહ્યં વક્તુમર્હસ્યશેષતઃ ॥ ૧૭૬.૧॥

૧૭૬.૨/૧અનન્તવાસુદેવસ્ય ન સમ્યગ્ વર્ણિતં ત્વયા ।
૧૭૬.૨/૨શ્રોતુમિચ્છામહે દેવ વિસ્તરેણ વદસ્વ નઃ ॥ ૧૭૬.૨॥

૧૭૬.૩/૧બ્રહ્મોવાચ । પ્રવક્ષ્યામિ મુનિશ્રેષ્ઠાઃ સારાત્ સારતરં પરમ્ ।
૧૭૬.૩/૨અનન્તવાસુદેવસ્ય માહાત્મ્યં ભુવિ દુર્લભમ્ ॥ ૧૭૬.૩॥

૧૭૬.૪/૧આદિકલ્પે પુરા વિપ્રાસ્ત્વહમવ્યક્તજન્મવાન્ ।
૧૭૬.૪/૨વિશ્વકર્માણમાહૂય વચનં પ્રોક્તવાન્ ઇદમ્ ॥ ૧૭૬.૪॥

૧૭૬.૫/૧વરિષ્ઠં દેવશિલ્પીન્દ્રં વિશ્વકર્માગ્રકર્મિણમ્ ।

૧૭૬.૫/૨પ્રતિમાં વાસુદેવસ્ય કુરુ શૈલમયીં ભુવિ ॥ ૧૭૬.૫॥

૧૭૬.૬/૧યાં પ્રેક્ષ્ય વિધિવદ્ ભક્તાઃ સેન્દ્રા વૈ માનુષાદયઃ ।
૧૭૬.૬/૨યેન દાનવરક્ષોભ્યો વિજ્ઞાય સુમહદ્ ભયમ્ ॥ ૧૭૬.૬॥

૧૭૬.૭/૧ત્રિદિવં સમનુપ્રાપ્ય સુમેરુશિખરં ચિરમ્ ।
૧૭૬.૭/૨વાસુદેવં સમારાધ્ય નિરાતઙ્કા વસન્તિ તે ॥ ૧૭૬.૭॥

૧૭૬.૮/૧મમ તદ્ વચનં શ્રુત્વા વિશ્વકર્મા તુ તત્ક્ષણાત્ ।
૧૭૬.૮/૨ચકાર પ્રતિમાં શુદ્ધાં શઙ્ખચક્રગદાધરામ્ ॥ ૧૭૬.૮॥

૧૭૬.૯/૧સર્વલક્ષણસંયુક્તાં પુણ્ડરીકાયતેક્ષણામ્ ।
૧૭૬.૯/૨શ્રીવત્સલક્ષ્મસંયુક્તામત્યુગ્રાં પ્રતિમોત્તમામ્ ॥ ૧૭૬.૯॥

૧૭૬.૧૦/૧વનમાલાવૃતોરસ્કાં મુકુટાઙ્ગદધારિણીમ્ ।
૧૭૬.૧૦/૨પીતવસ્ત્રાં સુપીનાંસાં કુણ્ડલાભ્યામલંકૃતામ્ ॥ ૧૭૬.૧૦॥

૧૭૬.૧૧/૧એવં સા પ્રતિમા દિવ્યા ગુહ્યમન્ત્રૈસ્તદા સ્વયમ્ ।
૧૭૬.૧૧/૨પ્રતિષ્ઠાકાલમાસાદ્ય મયાસૌ નિર્મિતા પુરા ॥ ૧૭૬.૧૧॥

૧૭૬.૧૨/૧તસ્મિન્ કાલે તદા શક્રો દેવરાટ્ ખેચરૈઃ સહ ।
૧૭૬.૧૨/૨જગામ બ્રહ્મસદનમારુહ્ય ગજમુત્તમમ્ ॥ ૧૭૬.૧૨॥

૧૭૬.૧૩/૧પ્રસાદ્ય પ્રતિમાં શક્રઃ સ્નાનદાનૈઃ પુનઃ પુનઃ ।
૧૭૬.૧૩/૨પ્રતિમાં તાં સમારાધ્ય સ્વપુરં પુનરાગમત્ ॥ ૧૭૬.૧૩॥

૧૭૬.૧૪/૧તાં સમારાધ્ય સુચિરં યતવાક્કાયમાનસઃ ।
૧૭૬.૧૪/૨વૃત્રાદ્યાન્ અસુરાન્ ક્રૂરાન્ નમુચિપ્રમુખાન્ સ ચ ॥ ૧૭૬.૧૪॥

૧૭૬.૧૫/૧નિહત્ય દાનવાન્ ભીમાન્ ભુક્તવાન્ ભુવનત્રયમ્ ।
૧૭૬.૧૫/૨દ્વિતીયે ચ યુગે પ્રાપ્તે ત્રેતાયાં રાક્ષસાધિપઃ ॥ ૧૭૬.૧૫॥

૧૭૬.૧૬/૧બભૂવ સુમહાવીર્યો દશગ્રીવઃ પ્રતાપવાન્ ।
૧૭૬.૧૬/૨દશ વર્ષસહસ્રાણિ નિરાહારો જિતેન્દ્રિયઃ ॥ ૧૭૬.૧૬॥

૧૭૬.૧૭/૧ચચાર વ્રતમત્યુગ્રં તપઃ પરમદુશ્ચરમ્ ।
૧૭૬.૧૭/૨તપસા તેન તુષ્ટોઽહં વરં તસ્મૈ પ્રદત્તવાન્ ॥ ૧૭૬.૧૭॥

૧૭૬.૧૮/૧અવધ્યઃ સર્વદેવાનાં સ દૈત્યોરગરક્ષસામ્ ।
૧૭૬.૧૮/૨શાપપ્રહરણૈરુગ્રૈરવધ્યો યમકિંકરૈઃ ॥ ૧૭૬.૧૮॥

૧૭૬.૧૯/૧વરં પ્રાપ્ય તદા રક્ષો યક્ષાન્ સર્વગણાન્ ઇમાન્ ।
૧૭૬.૧૯/૨ધનાધ્યક્ષં વિનિર્જિત્ય શક્રં જેતું સમુદ્યતઃ ॥ ૧૭૬.૧૯ ॥

૧૭૬.૨૦/૧સંગ્રામં સુમહાઘોરં કૃત્વા દેવૈઃ સ રાક્ષસઃ ।
૧૭૬.૨૦/૨દેવરાજં વિનિર્જિત્ય તદા ઇન્દ્રજિતેતિ વૈ ॥ ૧૭૬.૨૦ ॥

૧૭૬.૨૧/૧રાક્ષસસ્તત્સુતો નામ મેઘનાદઃ પ્રલબ્ધવાન્ ।
૧૭૬.૨૧/૨અમરાવતીં તતઃ પ્રાપ્ય દેવરાજગૃહે શુભે ॥ ૧૭૬.૨૧ ॥

૧૭૬.૨૨/૧દદર્શાઞ્જનસંકાશાં રાવણસ્તુ બલાન્વિતઃ ।
૧૭૬.૨૨/૨પ્રતિમાં વાસુદેવસ્ય સર્વલક્ષણસંયુતામ્ ॥ ૧૭૬.૨૨ ॥

૧૭૬.૨૩/૧શ્રીવત્સલક્ષ્મસંયુક્તાં પદ્મપત્રાયતેક્ષણામ્ ।
૧૭૬.૨૩/૨વનમાલાવૃતોરસ્કાં મુકુટાઙ્ગદભૂષિતામ્ ॥ ૧૭૬.૨૩ ॥

૧૭૬.૨૪/૧શઙ્ખચક્રગદાહસ્તાં પીતવસ્ત્રાં ચતુર્ભુજામ્ ।
૧૭૬.૨૪/૨સર્વાભરણસંયુક્તાં સર્વકામફલપ્રદામ્ ॥ ૧૭૬.૨૪ ॥

૧૭૬.૨૫/૧વિહાય રત્નસંઘાંશ્ચ પ્રતિમાં શુભલક્ષણામ્ ।
૧૭૬.૨૫/૨પુષ્પકેણ વિમાનેન લઙ્કાં પ્રાસ્થાપયદ્ દ્રુતમ્ ॥ ૧૭૬.૨૫ ॥

૧૭૬.૨૬/૧પુરાધ્યક્ષઃ સ્થિતઃ શ્રીમાન્ ધર્માત્મા સ વિભીષણઃ ।
૧૭૬.૨૬/૨રાવણસ્યાનુજો મન્ત્રી નારાયણપરાયણઃ ॥ ૧૭૬.૨૬ ॥

૧૭૬.૨૭/૧દૃષ્ટ્વા તાં પ્રતિમાં દિવ્યાં દેવેન્દ્રભવનચ્યુતામ્ ।
૧૭૬.૨૭/૨રોમાઞ્ચિતતનુર્ભૂત્વા વિસ્મયં સમપદ્યત ॥ ૧૭૬.૨૭ ॥

૧૭૬.૨૮/૧પ્રણમ્ય શિરસા દેવં પ્રહૃષ્ટેનાન્તરાત્મના ।
૧૭૬.૨૮/૨અદ્ય મે સફલં જન્મ અદ્ય મે સફલં તપઃ ॥ ૧૭૬.૨૮ ॥

૧૭૬.૨૯/૧ઇત્યુક્ત્વા સ તુ ધર્માત્મા પ્રણિપત્ય મુહુર્મુહુઃ ।
૧૭૬.૨૯/૨જ્યેષ્ઠં ભ્રાતરમાસાદ્ય કૃતાઞ્જલિરભાષત ॥ ૧૭૬.૨૯ ॥

૧૭૬.૩૦/૧રાજન્ પ્રતિમયા ત્વં મે પ્રસાદં કર્તુમર્હસિ ।
૧૭૬.૩૦/૨યામારાધ્ય જગન્નાથ નિસ્તરેયં ભવાર્ણવમ્ ॥ ૧૭૬.૩૦ ॥

૧૭૬.૩૧/૧ભ્રાતુર્વચનમાકર્ણ્ય રાવણસ્તં તદાબ્રવીત્ ।
૧૭૬.૩૧/૨ગૃહાણ પ્રતિમાં વીર ત્વનયા કિં કરોમ્યહમ્ ॥ ૧૭૬.૩૧ ॥

૧૭૬.૩૨/૧સ્વયમ્ભુવં સમારાધ્ય ત્રૈલોક્યં વિજયે ત્વહમ્ ।
૧૭૬.૩૨/૨નાનાશ્ચર્યમયં દેવં સર્વભૂતભવોદ્ભવમ્ ॥ ૧૭૬.૩૨ ॥

૧૭૬.૩૩/૧વિભીષણો મહાબુદ્ધિસ્તદા તાં પ્રતિમાં શુભામ્ ।
૧૭૬.૩૩/૨શતમષ્ટોત્તરં ચાબ્દં સમારાધ્ય જનાર્દનમ્ ॥ ૧૭૬.૩૩ ॥

૧૭૬.૩૪/૧અજરામરણં પ્રાપ્તમણિમાદિગુણૈર્યુતમ્ ।
૧૭૬.૩૪/૨રાજ્યં લઙ્કાધિપત્યં ચ ભોગાન્ ભુઙ્ક્તે યથેપ્સિતાન્ ॥ ૧૭૬.૩૪ ॥

૧૭૬.૩૫/૧મુનય ઊચુઃ । અહો નો વિસ્મયો જાતઃ શ્રુત્વેદં પરમામૃતમ્ ।
૧૭૬.૩૫/૨અનન્તવાસુદેવસ્ય સમ્ભવં ભુવિ દુર્લભમ્ ॥ ૧૭૬.૩૫ ॥

૧૭૬.૩૬/૧શ્રોતુમિચ્છામહે દેવ વિસ્તરેણ યથાતથમ્ ।
૧૭૬.૩૬/૨તસ્ય દેવસ્ય માહાત્મ્યં વક્તુમર્હસ્યશેષતઃ ॥ ૧૭૬.૩૬ ॥

૧૭૬.૩૭/૧બ્રહ્મોવાચ । તદા સ રાક્ષસઃ ક્રૂરો દેવગન્ધર્વકિંનરાન્ ।
૧૭૬.૩૭/૨લોકપાલાન્ સમનુજાન્ મુનિસિદ્ધાંશ્ચ પાપકૃત્ ॥ ૧૭૬.૩૭ ॥

૧૭૬.૩૮/૧વિજિત્ય સમરે સર્વાન્ આજહાર તદઙ્ગનાઃ ।
૧૭૬.૩૮/૨સંસ્થાપ્ય નગરીં લઙ્કાં પુનઃ સીતાર્થમોહિતઃ ॥ ૧૭૬.૩૮ ॥

૧૭૬.૩૯/૧શઙ્કિતો મૃગરૂપેણ સૌવર્ણેન ચ રાવણઃ ।
૧૭૬.૩૯/૨તતઃ ક્રુદ્ધેન રામેણ રણે સૌમિત્રિણા સહ ॥ ૧૭૬.૩૯ ॥

૧૭૬.૪૦/૧રાવણસ્ય વધાર્થાય હત્વા વાલિં મનોજવમ્ ।
૧૭૬.૪૦/૨અભિષિક્તશ્ચ સુગ્રીવો યુવરાજોઽઙ્ગદસ્તથા ॥ ૧૭૬.૪૦ ॥

૧૭૬.૪૧/૧હનુમાન્ નલનીલશ્ચ જામ્બવાન્ પનસસ્તથા ।
૧૭૬.૪૧/૨ગવયશ્ચ ગવાક્ષશ્ચ પાઠીનઃ પરમૌજસઃ ॥ ૧૭૬.૪૧ ॥

૧૭૬.૪૨/૧એતૈશ્ચાન્યૈશ્ચ બહુભિર્વાનરૈઃ સમહાબલૈઃ ।
૧૭૬.૪૨/૨સમાવૃતો મહાઘોરૈ રામો રાજીવલોચનઃ ॥ ૧૭૬.૪૨ ॥

૧૭૬.૪૩/૧ગિરીણાં સર્વસંઘાતૈઃ સેતું બદ્ધ્વા મહોદધૌ ।
૧૭૬.૪૩/૨બલેન મહતા રામઃ સમુત્તીર્ય મહોદધિમ્ ॥ ૧૭૬.૪૩ ॥

૧૭૬.૪૪/૧સંગ્રામમતુલં ચક્રે રક્ષોગણસમન્વિતઃ ।
૧૭૬.૪૪/૨યમહસ્તં પ્રહસ્તં ચ નિકુમ્ભં કુમ્ભમેવ ચ ॥ ૧૭૬.૪૪ ॥

૧૭૬.૪૫/૧નરાન્તકં મહાવીર્યં તથા ચૈવ યમાન્તકમ્ ।
૧૭૬.૪૫/૨માલાઢ્યં માલિકાઢ્યં ચ હત્વા રામસ્તુ વીર્યવાન્ ॥ ૧૭૬.૪૫ ॥

૧૭૬.૪૬/૧પુનરિન્દ્રજિતં હત્વા કુમ્ભકર્ણં સરાવણમ્ ।

૧૭૬.૪૬/૨વૈદેહીં ચાગ્નિનાશોધ્ય દત્ત્વા રાજ્યં વિભીષણે ॥ ૧૭૬.૪૬॥

૧૭૬.૪૭/૧વાસુદેવં સમાદાય યાનં પુષ્પકમારુહત્ ।
૧૭૬.૪૭/૨લીલયા સમનુપ્રાપદ્ અયોધ્યાં પૂર્વપાલિતામ્ ॥ ૧૭૬.૪૭॥

૧૭૬.૪૮/૧કનિષ્ઠં ભરતં સ્નેહાચ્છત્રુઘ્નં ભક્તવત્સલઃ ।
૧૭૬.૪૮/૨અભિષિચ્ય તદા રામઃ સર્વરાજ્યેઽધિરાજવત્ ॥ ૧૭૬.૪૮॥

૧૭૬.૪૯/૧પુરાતનીં સ્વમૂર્તિં ચ સમારાધ્ય તતો હરિઃ ।
૧૭૬.૪૯/૨દશ વર્ષસહસ્રાણિ દશ વર્ષશતાનિ ચ ॥ ૧૭૬.૪૯॥

૧૭૬.૫૦/૧ભુક્ત્વા સાગરપર્યન્તાં મેદિનીં સ તુ રાઘવઃ ।
૧૭૬.૫૦/૨રાજ્યમાસાદ્ય સુગતિં વૈષ્ણવં પદમાવિશત્ ॥ ૧૭૬.૫૦॥

૧૭૬.૫૧/૧તાં ચાપિ પ્રતિમાં રામઃ સમુદ્રેશાય દત્તવાન્ ।
૧૭૬.૫૧/૨ધન્યો રક્ષયિતાસિ ત્વં તોયરત્નસમન્વિતઃ ॥ ૧૭૬.૫૧॥

૧૭૬.૫૨/૧દ્વાપરં યુગમાસાદ્ય યદા દેવો જગત્પતિઃ ।
૧૭૬.૫૨/૨ધરણ્યાશ્ચાનુરોધેન ભાવશૈથિલ્યકારણાત્ ॥ ૧૭૬.૫૨॥

૧૭૬.૫૩/૧અવતીર્ણઃ સ ભગવાન્ વસુદેવકુલે પ્રભુઃ ।
૧૭૬.૫૩/૨કંસાદીનાં વધાર્થાય સંકર્ષણસહાયવાન્ ॥ ૧૭૬.૫૩॥

૧૭૬.૫૪/૧તદા તાં પ્રતિમાં વિપ્રાઃ સર્વવાઞ્છાફલપ્રદામ્ ।
૧૭૬.૫૪/૨સર્વલોકહિતાર્થાય કસ્યચિત્ કારણાન્તરે ॥ ૧૭૬.૫૪॥

૧૭૬.૫૫/૧તસ્મિન્ ક્ષેત્રવરે પુણ્યે દુર્લભે પુરુષોત્તમે ।
૧૭૬.૫૫/૨ઉજ્જહાર સ્વયં તોયાત્ સમુદ્રઃ સરિતાં પતિઃ ॥ ૧૭૬.૫૫॥

૧૭૬.૫૬/૧તદા પ્રભૃતિ તત્રૈવ ક્ષેત્રે મુક્તિપ્રદે દ્વિજાઃ ।
૧૭૬.૫૬/૨આસ્તે સ દેવો દેવાનાં સર્વકામફલપ્રદઃ ॥ ૧૭૬.૫૬॥

૧૭૬.૫૭/૧યે સંશ્રયન્તિ ચાનન્તં ભક્ત્યા સર્વેશ્વરં પ્રભુમ્ ।
૧૭૬.૫૭/૨વાઙ્મનઃકર્મભિર્નિત્યં તે યાન્તિ પરમં પદમ્ ॥ ૧૭૬.૫૭॥

૧૭૬.૫૮/૧દૃષ્ટ્વાનન્તં સકૃદ્ ભક્ત્યા સમ્પૂજ્ય પ્રણિપત્ય ચ ।
૧૭૬.૫૮/૨રાજસૂયાશ્વમેધાભ્યાં ફલં દશગુણં લભેત્ ॥ ૧૭૬.૫૮॥

૧૭૬.૫૯/૧સર્વકામસમૃદ્ધેન કામગેન સુવર્ચસા ।
૧૭૬.૫૯/૨વિમાનેનાર્કવર્ણેન કિઙ્કિણીજાલમાલિના ॥ ૧૭૬.૫૯॥

૧૭૬.૬૦/૧ત્રિઃસપ્તકુલમુદ્ધૃત્ય દિવ્યસ્ત્રીગણસેવિતઃ ।
૧૭૬.૬૦/૨ઉપગીયમાનો ગન્ધર્વૈર્નરો વિષ્ણુપુરં વ્રજેત્ ॥ ૧૭૬.૬૦॥

૧૭૬.૬૧/૧તત્ર ભુક્ત્વા વરાન્ ભોગાન્ જરામરણવર્જિતઃ ।
૧૭૬.૬૧/૨દિવ્યરૂપધરઃ શ્રીમાન્ યાવદ્ આભૂતસમ્પ્લવમ્ ॥ ૧૭૬.૬૧॥

૧૭૬.૬૨/૧પુણ્યક્ષયાદ્ ઇહાયાતશ્ચતુર્વેદી દ્વિજોત્તમઃ ।
૧૭૬.૬૨/૨વૈષ્ણવં યોગમાસ્થાય તતો મોક્ષમવાપ્નુયાત્ ॥ ૧૭૬.૬૨॥

૧૭૬.૬૩/૧એવં મયા ત્વનન્તોऽસૌ કીર્તિતો મુનિસત્તમાઃ ।
૧૭૬.૬૩/૨કઃ શક્નોતિ ગુણાન્ વક્તું તસ્ય વર્ષશતૈરપિ ॥ ૧૭૬.૬૩॥

૧૭૭.૧/૧બ્રહ્મોવાચ । એવં વોऽનન્તમાહાત્મ્યં ક્ષેત્રં ચ પુરુષોત્તમમ્ ।
૧૭૭.૧/૨ભુક્તિમુક્તિપ્રદં નૃણાં મયા પ્રોક્તં સુદુર્લભમ્ ॥ ૧૭૭.૧॥

૧૭૭.૨/૧યત્રાસ્તે પુણ્ડરીકાક્ષઃ શઙ્ખચક્રગદાધરઃ ।
૧૭૭.૨/૨પીતામ્બરધરઃ કૃષ્ણઃ કંસકેશિનિષૂદનઃ ॥ ૧૭૭.૨॥

૧૭૭.૩/૧યે તત્ર કૃષ્ણં પશ્યન્તિ સુરાસુરનમસ્કૃતમ્ ।
૧૭૭.૩/૨સંકર્ષણં સુભદ્રાં ચ ધન્યાસ્તે નાત્ર સંશયઃ ॥ ૧૭૭.૩॥

૧૭૭.૪/૧ત્રૈલોક્યાધિપતિં દેવં સર્વકામફલપ્રદમ્ ।
૧૭૭.૪/૨યે ધ્યાયન્તિ સદા કૃષ્ણં મુક્તાસ્તે નાત્ર સંશયઃ ॥ ૧૭૭.૪॥

૧૭૭.૫/૧કૃષ્ણે રતાઃ કૃષ્ણમનુસ્મરન્તિ ।
૧૭૭.૫/૨રાત્રૌ ચ કૃષ્ણં પુનરુત્થિતા યે ।
૧૭૭.૫/૩તે ભિન્નદેહાઃ પ્રવિશન્તિ કૃષ્ણમ્ ।
૧૭૭.૫/૪હવિર્યથા મન્ત્રહુતં હુતાશમ્ ॥ ૧૭૭.૫॥

૧૭૭.૬/૧તસ્માત્ સદા મુનિશ્રેષ્ઠાઃ કૃષ્ણઃ કમલલોચનઃ ।
૧૭૭.૬/૨તસ્મિન્ ક્ષેત્રે પ્રયત્નેન દ્રષ્ટવ્યો મોક્ષકાઙ્ક્ષિભિઃ ॥ ૧૭૭.૬॥

૧૭૭.૭/૧શયનોત્થાપને કૃષ્ણં યે પશ્યન્તિ મનીષિણઃ ।
૧૭૭.૭/૨હલાયુધં સુભદ્રાં ચ હરેઃ સ્થાનં વ્રજન્તિ તે ॥ ૧૭૭.૭॥

૧૭૭.૮/૧સર્વકાલેऽપિ યે ભક્ત્યા પશ્યન્તિ પુરુષોત્તમમ્ ।
૧૭૭.૮/૨રૌહિણેયં સુભદ્રાં ચ વિષ્ણુલોકં વ્રજન્તિ તે ॥ ૧૭૭.૮॥

૧૭૭.૯/૧આસ્તે યશ્ચતુરો માસાન્ વાર્ષિકાન્ પુરુષોત્તમે ।
૧૭૭.૯/૨પૃથિવ્યાસ્તીર્થયાત્રાયાઃ ફલં પ્રાપ્નોતિ ચાધિકમ્ ॥ ૧૭૭.૯॥

૧૭૭.૧૦/૧યે સર્વકાલં તત્રૈવ નિવસન્તિ મનીષિણઃ ।
૧૭૭.૧૦/૨જિતેન્દ્રિયા જિતક્રોધા લભન્તે તપસઃ ફલમ્ ॥ ૧૭૭.૧૦॥

૧૭૭.૧૧/૧તપસ્તપ્ત્વાન્યતીર્થેષુ વર્ષાણામયુતં નરઃ ।
૧૭૭.૧૧/૨યદ્ આપ્નોતિ તદ્ આપ્નોતિ માસેન પુરુષોત્તમે ॥ ૧૭૭.૧૧॥

૧૭૭.૧૨/૧તપસા બ્રહ્મચર્યેણ સઙ્ગત્યાગેન યત્ ફલમ્ ।
૧૭૭.૧૨/૨તત્ ફલં સતતં તત્ર પ્રાપ્નુવન્તિ મનીષિણઃ ॥ ૧૭૭.૧૨॥

૧૭૭.૧૩/૧સર્વતીર્થેષુ યત્ પુણ્યં સ્નાનદાનેન કીર્તિતમ્ ।
૧૭૭.૧૩/૨તત્ ફલં સતતં તત્ર પ્રાપ્નુવન્તિ મનીષિણઃ ॥ ૧૭૭.૧૩॥

૧૭૭.૧૪/૧સમ્યક્ તીર્થેન યત્ પ્રોક્તં વ્રતેન નિયમેન ચ ।
૧૭૭.૧૪/૨તત્ ફલં લભતે તત્ર પ્રત્યહં પ્રયતઃ શુચિઃ ॥ ૧૭૭.૧૪॥

૧૭૭.૧૫/૧યસ્તુ નાનાવિધૈર્યજ્ઞૈર્યત્ ફલં લભતે નરઃ ।
૧૭૭.૧૫/૨તત્ ફલં લભતે તત્ર પ્રત્યહં સંયતેન્દ્રિયઃ ॥ ૧૭૭.૧૫॥

૧૭૭.૧૬/૧દેહં ત્યજન્તિ પુરુષાસ્તત્ર યે પુરુષોત્તમે ।
૧૭૭.૧૬/૨કલ્પવૃક્ષં સમાસાદ્ય મુક્તાસ્તે નાત્ર સંશયઃ ॥ ૧૭૭.૧૬॥

૧૭૭.૧૭/૧વટસાગરયોર્મધ્યે યે ત્યજન્તિ કલેવરમ્ ।
૧૭૭.૧૭/૨તે દુર્લભં પરં મોક્ષં પ્રાપ્નુવન્તિ ન સંશયઃ ॥ ૧૭૭.૧૭॥

૧૭૭.૧૮/૧અનિચ્છન્ન્ અપિ યસ્તત્ર પ્રાણાંસ્ત્યજતિ માનવઃ ।
૧૭૭.૧૮/૨સોઽપિ દુઃખવિનિર્મુક્તો મુક્તિં પ્રાપ્નોતિ દુર્લભામ્ ॥ ૧૭૭.૧૮॥

૧૭૭.૧૯/૧કૃમિકીટપતંગાદ્યાસ્તિર્યગ્યોનિગતાશ્ચ યે ।
૧૭૭.૧૯/૨તત્ર દેહં પરિત્યજ્ય તે યાન્તિ પરમાં ગતિમ્ ॥ ૧૭૭.૧૯॥

૧૭૭.૨૦/૧ભ્રાન્તિં લોકસ્ય પશ્યધ્વમન્યતીર્થં પ્રતિ દ્વિજાઃ ।
૧૭૭.૨૦/૨પુરુષાખ્યેન યત્ પ્રાપ્તમન્યતીર્થફલાદિકમ્ ॥ ૧૭૭.૨૦॥

૧૭૭.૨૧/૧સકૃત્ પશ્યતિ યો મર્ત્યઃ શ્રદ્ધયા પુરુષોત્તમમ્ ।
૧૭૭.૨૧/૨પુરુષાણાં સહસ્રેષુ સ ભવેદ્ ઉત્તમઃ પુમાન્ ॥ ૧૭૭.૨૧॥

૧૭૭.૨૨/૧પ્રકૃતેઃ સ પરો યસ્માત્ પુરુષાદ્ અપિ ચોત્તમઃ ।
૧૭૭.૨૨/૨તસ્માદ્ વેદે પુરાણે ચ લોકેઽસ્મિન્ પુરુષોત્તમઃ ॥ ૧૭૭.૨૨॥

૧૭૭.૨૩/૧યોઽસૌ પુરાણે વેદાન્તે પરમાત્મેત્યુદાહૃતઃ ।
૧૭૭.૨૩/૨આસ્તે વિશ્વોપકારાય તેનાસૌ પુરુષોત્તમઃ ॥ ૧૭૭.૨૩॥

૧૭૭.૨૪/૧પાથે શ્મશાને ગૃહમણ્ડપે વા ।
૧૭૭.૨૪/૨રથ્યાપ્રદેશેષ્વપિ યત્ર કુત્ર ।
૧૭૭.૨૪/૩ઇચ્છન્ન્ અનિચ્છન્ન્ અપિ તત્ર દેહમ્ ।
૧૭૭.૨૪/૪સંત્યજ્ય મોક્ષં લભતે મનુષ્યઃ ॥ ૧૭૭.૨૪॥

૧૭૭.૨૫/૧તસ્માત્ સર્વપ્રયત્નેન તસ્મિન્ ક્ષેત્રે દ્વિજોત્તમાઃ ।
૧૭૭.૨૫/૨દેહત્યાગો નરૈઃ કાર્યઃ સમ્યઙ્ મોક્ષાભિકાઙ્ક્ષિભિઃ ॥ ૧૭૭.૨૫॥

૧૭૭.૨૬/૧પુરુષાખ્યસ્ય માહાત્મ્યં ન ભૂતં ન ભવિષ્યતિ ।
૧૭૭.૨૬/૨ત્યક્ત્વા યત્ર નરો દેહં મુક્તિં પ્રાપ્નોતિ દુર્લભામ્ ॥ ૧૭૭.૨૬॥

૧૭૭.૨૭/૧ગુણાનામેકદેશોઽયં મયા ક્ષેત્રસ્ય કીર્તિતઃ ।
૧૭૭.૨૭/૨કઃ સમસ્તાન્ ગુણાન્ વક્તું શક્તો વર્ષશતૈરપિ ॥ ૧૭૭.૨૭॥

૧૭૭.૨૮/૧યદિ યૂયં મુનિશ્રેષ્ઠા મોક્ષમિચ્છથ શાશ્વતમ્ ।
૧૭૭.૨૮/૨તસ્મિન્ ક્ષેત્રવરે પુણ્યે નિવસધ્વમતન્દ્રિતાઃ ॥ ૧૭૭.૨૮॥

૧૭૭.૨૯/૧વ્યાસ ઉવાચ । તે તસ્ય વચનં શ્રુત્વા બ્રહ્મણોઽવ્યક્તજન્મનઃ ।
૧૭૭.૨૯/૨નિવાસં ચક્રિરે તત્ર અવાપુઃ પરમં પદમ્ ॥ ૧૭૭.૨૯॥

૧૭૭.૩૦/૧તસ્માદ્ યૂયં પ્રયત્નેન નિવસધ્વં દ્વિજોત્તમાઃ ।
૧૭૭.૩૦/૨પુરુષાખ્યે વરે ક્ષેત્રે યદિ મુક્તિમભીપ્સથ ॥ ૧૭૭.૩૦॥

૧૭૮.૧/૧વ્યાસ ઉવાચ । તસ્મિન્ ક્ષેત્રે મુનિશ્રેષ્ઠાઃ સર્વસત્ત્વસુખાવહે ।
૧૭૮.૧/૨ધર્માર્થકામમોક્ષાણાં ફલદે પુરુષોત્તમે ॥ ૧૭૮.૧॥

૧૭૮.૨/૧કણ્ડુર્નામ મહાતેજા ઋષિઃ પરમધાર્મિકઃ ।
૧૭૮.૨/૨સત્યવાદી શુચિર્દાન્તઃ સર્વભૂતહિતે રતઃ ॥ ૧૭૮.૨॥

૧૭૮.૩/૧જિતેન્દ્રિયો જિતક્રોધો વેદવેદાઙ્ગપારગઃ ।
૧૭૮.૩/૨અવાપ પરમાં સિદ્ધિમારાધ્ય પુરુષોત્તમમ્ ॥ ૧૭૮.૩॥

૧૭૮.૪/૧અન્યેઽપિ તત્ર સંસિદ્ધા મુનયઃ સંશિતવ્રતાઃ ।
૧૭૮.૪/૨સર્વભૂતહિતા દાન્તા જિતક્રોધા વિમત્સરાઃ ॥ ૧૭૮.૪॥

૧૭૮.૫/૧મુનય ઊચુઃ । કોઽસૌ કણ્ડુઃ કથં તત્ર જગામ પરમાં ગતિમ્ ।
૧૭૮.૫/૨શ્રોતુમિચ્છામહે તસ્ય ચરિતં બ્રૂહિ સત્તમ ॥ ૧૭૮.૫॥

૧૭૮.૬/૧વ્યાસ ઉવાચ । શ઼ૃણુધ્વં મુનિશાર્દૂલાઃ કથાં તસ્ય મનોહરામ્ ।

૧૭૮.૬/૨પ્રવક્ષ્યામિ સમાસેન મુનેસ્તસ્ય વિચેષ્ટિતમ્ ॥ ૧૭૮.૬॥

૧૭૮.૭/૧પવિત્રે ગોમતીતીરે વિજને સુમનોહરે ।
૧૭૮.૭/૨કન્દમૂલફલૈઃ પૂર્ણે સમિત્પુષ્પકુશાન્વિતૈઃ ॥ ૧૭૮.૭॥

૧૭૮.૮/૧નાનાદ્રુમલતાકીર્ણે નાનાપુષ્પોપશોભિતે ।
૧૭૮.૮/૨નાનાપક્ષિરુતે રમ્યે નાનામૃગગણાન્વિતે ॥ ૧૭૮.૮॥

૧૭૮.૯/૧તત્રાશ્રમપદં કણ્ડોર્બભૂવ મુનિસત્તમાઃ ।
૧૭૮.૯/૨સર્વર્તુફલપુષ્પાઢ્યં કદલીખણ્ડમણ્ડિતમ્ ॥ ૧૭૮.૯॥

૧૭૮.૧૦/૧તપસ્તેપે મુનિસ્તત્ર સુમહત્ પરમાદ્ભુતમ્ ।
૧૭૮.૧૦/૨વ્રતોપવાસૈર્નિયમૈઃ સ્નાનમૌનસુસંયમૈઃ ॥ ૧૭૮.૧૦॥

૧૭૮.૧૧/૧ગ્રીષ્મે પઞ્ચતપા ભૂત્વા વર્ષાસુ સ્થણ્ડિલેશયઃ ।
૧૭૮.૧૧/૨આર્દ્રવાસાસ્તુ હેમન્તે સ તેપે સુમહત્ તપઃ ॥ ૧૭૮.૧૧॥

૧૭૮.૧૨/૧દૃષ્ટ્વા તુ તપસો વીર્યં મુનેસ્તસ્ય સુવિસ્મિતાઃ ।
૧૭૮.૧૨/૨બભૂવુર્દેવગન્ધર્વાઃ સિદ્ધવિદ્યાધરાસ્તથા ॥ ૧૭૮.૧૨॥

૧૭૮.૧૩/૧ભૂમિં તથાન્તરિક્ષં ચ દિવં ચ મુનિસત્તમાઃ ।
૧૭૮.૧૩/૨કણ્ડુઃ સંતાપયામાસ ત્રૈલોક્યં તપસો બલાત્ ॥ ૧૭૮.૧૩॥

૧૭૮.૧૪/૧અહોઽસ્ય પરમં ધૈર્યમહોઽસ્ય પરમં તપઃ ।
૧૭૮.૧૪/૨ઇત્યબ્રુવંસ્તદા દૃષ્ટ્વા દેવાસ્તં તપસિ સ્થિતમ્ ॥ ૧૭૮.૧૪॥

૧૭૮.૧૫/૧મન્ત્રયામાસુરવ્યગ્રાઃ શક્રેણ સહિતાસ્તદા ।
૧૭૮.૧૫/૨ભયાત્ તસ્ય સમુદ્વિગ્નાસ્તપોવિઘ્નમભીપ્સવઃ ॥ ૧૭૮.૧૫॥

૧૭૮.૧૬/૧જ્ઞાત્વા તેષામભિપ્રાયં શક્રસ્ત્રિભુવનેશ્વરઃ ।
૧૭૮.૧૬/૨પ્રમ્લોચાખ્યાં વરારોહાં રૂપયૌવનગર્વિતામ્ ॥ ૧૭૮.૧૬॥

૧૭૮.૧૭/૧સુમધ્યાં ચારુજઙ્ઘાં તાં પીનશ્રોણિપયોધરામ્ ।
૧૭૮.૧૭/૨સર્વલક્ષણસમ્પન્નાં પ્રોવાચ ફલસૂદનઃ ॥ ૧૭૮.૧૭॥

૧૭૮.૧૮/૧શક્ર ઉવાચ । પ્રમ્લોચે ગચ્છ શીઘ્રં ત્વં યદાસૌ તપ્યતે મુનિઃ ।
૧૭૮.૧૮/૨વિઘ્નાર્થં તસ્ય તપસઃ ક્ષોભયસ્વાંશુ સુપ્રભે ॥ ૧૭૮.૧૮॥

૧૭૮.૧૯/૧પ્રમ્લોચોવાચ । તવ વાક્યં સુરશ્રેષ્ઠ કરોમિ સતતં પ્રભો ।
૧૭૮.૧૯/૨કિંતુ શઙ્કા મમૈવાત્ર જીવિતસ્ય ચ સંશયઃ ॥ ૧૭૮.૧૯॥

૧૭૮.૨૦/૧બિભેમિ તં મુનિવરં બ્રહ્મચર્યવ્રતે સ્થિતમ્ ।
૧૭૮.૨૦/૨અત્યુગ્રં દીપ્તતપસં જ્વલનાર્કસમપ્રભમ્ ॥ ૧૭૮.૨૦॥

૧૭૮.૨૧/૧જ્ઞાત્વા માં સ મુનિઃ ક્રોધાદ્ વિઘ્નાર્થં સમુપાગતામ્ ।
૧૭૮.૨૧/૨કણ્ડુઃ પરમતેજસ્વી શાપં દાસ્યતિ દુઃસહમ્ ॥ ૧૭૮.૨૧॥

૧૭૮.૨૨/૧ઉર્વશી મેનકા રમ્ભા ઘૃતાચી પુઞ્જિકસ્થલા ।
૧૭૮.૨૨/૨વિશ્વાચી સહજન્યા ચ પૂર્વચિત્તિસ્તિલોત્તમા ॥ ૧૭૮.૨૨॥

૧૭૮.૨૩/૧અલમ્બુષા મિશ્રકેશી શશિલેખા ચ વામના ।
૧૭૮.૨૩/૨અન્યાશ્ચાપ્સરસઃ સન્તિ રૂપયૌવનગર્વિતાઃ ॥ ૧૭૮.૨૩॥

૧૭૮.૨૪/૧સુમધ્યાશ્ચારુવદનાઃ પીનોન્નતપયોધરાઃ ।
૧૭૮.૨૪/૨કામપ્રધાનકુશલાસ્તાસ્તત્ર સંનિયોજય ॥ ૧૭૮.૨૪॥

૧૭૮.૨૫/૧બ્રહ્મોવાચ । તસ્યાસ્તદ્ વચનં શ્રુત્વા પુનઃ પ્રાહ શચીપતિઃ ।
૧૭૮.૨૫/૨તિષ્ઠન્તુ નામ ચાન્યાસ્તાસ્ત્વં ચાત્ર કુશલા શુભે ॥ ૧૭૮.૨૫॥

૧૭૮.૨૬/૧કામં વસન્તં વાયું ચ સહાયાર્થે દદામિ તે ।
૧૭૮.૨૬/૨તૈઃ સાર્ધં ગચ્છ સુશ્રોણિ યત્રાસ્તે સ મહામુનિઃ ॥ ૧૭૮.૨૬॥

૧૭૮.૨૭/૧શક્રસ્ય વચનં શ્રુત્વા તદા સા ચારુલોચના ।
૧૭૮.૨૭/૨જગામાકાશમાર્ગેણ તૈઃ સાર્ધં ચાશ્રમં મુનેઃ ॥ ૧૭૮.૨૭॥

૧૭૮.૨૮/૧ગત્વા સા તત્ર રુચિરં દદર્શ વનમુત્તમમ્ ।
૧૭૮.૨૮/૨મુનિં ચ દીપ્તતપસમાશ્રમસ્થમકલ્મષમ્ ॥ ૧૭૮.૨૮॥

૧૭૮.૨૯/૧અપશ્યત્ સા વનં રમ્યં તૈઃ સાર્ધં નન્દનોપમમ્ ।
૧૭૮.૨૯/૨સર્વર્તુવરપુષ્પાઢ્યં શાખામૃગગણાકુલમ્ ॥ ૧૭૮.૨૯॥

૧૭૮.૩૦/૧પુણ્યં પદ્મબલોપેતં સપલ્લવમહાબલમ્ ।
૧૭૮.૩૦/૨શ્રોત્રરમ્યાન્ સુમધુરાઞ્ શબ્દાન્ ખગમુખેરિતાન્ ॥ ૧૭૮.૩૦॥

૧૭૮.૩૧/૧સર્વર્તુફલભારાઢ્યાન્ સર્વર્તુકુસુમોજ્જ્વલાન્ ।
૧૭૮.૩૧/૨અપશ્યત્ પાદપાંશ્ચૈવ વિહંગૈરનુનાદિતાન્ ॥ ૧૭૮.૩૧॥

૧૭૮.૩૨/૧આમ્રાન્ આમ્રાતકાન્ ભવ્યાન્ નારિકેરાન્ સતિન્દુકાન્ ।
૧૭૮.૩૨/૨અથ બિલ્વાંસ્તથા જીવાન્ દાડિમાન્ બીજપૂરકાન્ ॥ ૧૭૮.૩૨॥

૧૭૮.૩૩/૧પનસાંલ્લકુચાન્ નીપાઞ્ શિરીષાન્ સુમનોહરાન્ ।
૧૭૮.૩૩/૨પારાવતાંસ્તથા કોલાન્ અરિમેદામ્લવેતસાન્ ॥ ૧૭૮.૩૩॥

૧૭૮.૩૪/૧ભલ્લાતકાન્ આમલકાઞ્ શતપર્ણાંશ્ચ કિંશુકાન્ ।
૧૭૮.૩૪/૨ઇઙ્ગુદાન્ કરવીરાંશ્ચ હરીતકીવિભીતકાન્ ॥ ૧૭૮.૩૪॥

૧૭૮.૩૫/૧એતાન્ અન્યાંશ્ચ સા વૃક્ષાન્ દદર્શ પૃથુલોચના ।
૧૭૮.૩૫/૨તથૈવાશોકપુંનાગ+ ।કેતકીબકુલાન્ અથ ॥ ૧૭૮.૩૫॥

૧૭૮.૩૬/૧પારિજાતાન્ કોવિદારાન્ મન્દારેન્દીવરાંસ્તથા ।
૧૭૮.૩૬/૨પાટલાઃ પુષ્પિતા રમ્યા દેવદારુદ્રુમાંસ્તથા ॥ ૧૭૮.૩૬॥

૧૭૮.૩૭/૧શાલાંસ્તાલાંસ્તમાલાંશ્ચ નિચુલાંલ્લોમકાંસ્તથા ।
૧૭૮.૩૭/૨અન્યાંશ્ચ પાદપશ્રેષ્ઠાન્ અપશ્યત્ ફલપુષ્પિતાન્ ॥ ૧૭૮.૩૭॥

૧૭૮.૩૮/૧ચકોરૈઃ શતપત્રૈશ્ચ ભૃઙ્ગરાજૈસ્તથા શુકૈઃ ।
૧૭૮.૩૮/૨કોકિલૈઃ કલવિઙ્કૈશ્ચ હારીતૈર્જીવજીવકૈઃ ॥ ૧૭૮.૩૮॥

૧૭૮.૩૯/૧પ્રિયપુત્રૈશ્ચાતકૈશ્ચ તથાન્યૈર્વિવિધૈઃ ખગૈઃ ।
૧૭૮.૩૯/૨શ્રોત્રરમ્યં સુમધુરં કૂજદ્ભિશ્ચાપ્યધિષ્ઠિતમ્ ॥ ૧૭૮.૩૯॥

૧૭૮.૪૦/૧સરાંસિ ચ મનોજ્ઞાનિ પ્રસન્નસલિલાનિ ચ ।
૧૭૮.૪૦/૨કુમુદૈઃ પુણ્ડરીકૈશ્ચ તથા નીલોત્પલૈઃ શુભૈઃ ॥ ૧૭૮.૪૦॥

૧૭૮.૪૧/૧કહ્લારૈઃ કમલૈશ્ચૈવ આચિતાનિ સમન્તતઃ ।
૧૭૮.૪૧/૨કાદમ્બૈશ્ચક્રવાકૈશ્ચ તથૈવ જલકુક્કુટૈઃ ॥ ૧૭૮.૪૧॥

૧૭૮.૪૨/૧કારણ્ડવૈર્બકૈર્હંસૈઃ કૂર્મૈર્મદ્ગુભિરેવ ચ ।
૧૭૮.૪૨/૨એતૈશ્ચાન્યૈશ્ચ કીર્ણાનિ સમન્તાજ્જલચારિભિઃ ॥ ૧૭૮.૪૨॥

૧૭૮.૪૩/૧ક્રમેણૈવ તથા સા તુ વનં બભ્રામ તૈઃ સહ ।
૧૭૮.૪૩/૨એવં દૃષ્ટ્વા વનં રમ્યં તૈઃ સાર્ધં પરમાદ્ભુતમ્ ॥ ૧૭૮.૪૩॥

૧૭૮.૪૪/૧વિસ્મયોત્ફુલ્લનયના સા બભૂવ વરાઙ્ગના ।
૧૭૮.૪૪/૨પ્રોવાચ વાયું કામં ચ વસન્તં ચ દ્વિજોત્તમાઃ ॥ ૧૭૮.૪૪॥

૧૭૮.૪૫/૧પ્રમ્લોચોવાચ । કુરુધ્વં મમ સાહાય્યં યૂયં સર્વે
પૃથક્ પૃથક્ ॥ ૧૭૮.૪૫॥

૧૭૮.૪૬/૧બ્રહ્મોવાચ । એવમુક્ત્વા તદા સા તુ તથેત્યુક્તા સુરૈર્દ્વિજાઃ ।
૧૭૮.૪૬/૨પ્રત્યુવાચાદ્ય યાસ્યામિ યત્રાસૌ સંસ્થિતો મુનિઃ ॥ ૧૭૮.૪૬॥

૧૭૮.૪૭/૧અદ્ય તં દેહયન્તારં પ્રયુક્તેન્દ્રિયવાજિનમ્ ।

૧૭૮.૪૭/૨સ્મરશસ્ત્રગલદ્રશ્મિં કરિષ્યામિ કુસારથિમ્ ॥ ૧૭૮.૪૭॥

૧૭૮.૪૮/૧બ્રહ્મા જનાર્દનો વાપિ યદિ વા નીલલોહિતઃ ।
૧૭૮.૪૮/૨તથાપ્યદ્ય કરિષ્યામિ કામબાણક્ષતાન્તરમ્ ॥ ૧૭૮.૪૮॥

૧૭૮.૪૯/૧ઇત્યુક્ત્વા પ્રયયૌ સાથ યત્રાસૌ તિષ્ઠતે મુનિઃ ।
૧૭૮.૪૯/૨મુનેસ્તપઃપ્રભાવેણ પ્રશાન્તશ્વાપદાશ્રમમ્ ॥ ૧૭૮.૪૯॥

૧૭૮.૫૦/૧સા પુંસ્કોકિલમાધુર્યે નદીતીરે વ્યવસ્થિતા ।
૧૭૮.૫૦/૨સ્તોકમાત્રં સ્થિતા તસ્માદ્ અગાયત વરાપ્સરાઃ ॥ ૧૭૮.૫૦॥

૧૭૮.૫૧/૧તતો વસન્તઃ સહસા બલં સમકરોત્ તદા ।
૧૭૮.૫૧/૨કોકિલારાવમધુરમકાલિકમનોહરમ્ ॥ ૧૭૮.૫૧॥

૧૭૮.૫૨/૧વવૌ ગન્ધવહશ્ચૈવ મલયાદ્રિનિકેતનઃ ।
૧૭૮.૫૨/૨પુષ્પાન્ ઉચ્ચાવચાન્ મેધ્યાન્ પાતયંશ્ચ શનૈઃ શનૈઃ ॥ ૧૭૮.૫૨॥

૧૭૮.૫૩/૧પુષ્પબાણધરશ્ચૈવ ગત્વા તસ્ય સમીપતઃ ।
૧૭૮.૫૩/૨મુનેશ્ચ ક્ષોભયામાસ કામસ્તસ્યાપિ માનસમ્ ॥ ૧૭૮.૫૩॥

૧૭૮.૫૪/૧તતો ગીતધ્વનિં શ્રુત્વા મુનિર્વિસ્મિતમાનસઃ ।
૧૭૮.૫૪/૨જગામ યત્ર સા સુભ્રૂઃ કામબાણપ્રપીડિતઃ ॥ ૧૭૮.૫૪॥

૧૭૮.૫૫/૧દૃષ્ટ્વા તામાહ સંદૃષ્ટો વિસ્મયોત્ફુલ્લલોચનઃ ।
૧૭૮.૫૫/૨ભ્રષ્ટોત્તરીયો વિકલઃ પુલકાઞ્ચિતવિગ્રહઃ ॥ ૧૭૮.૫૫॥

૧૭૮.૫૬/૧ઋષિરુવાચ । કાસિ કસ્યાસિ સુશ્રોણિ સુભગે ચારુહાસિનિ ।
૧૭૮.૫૬/૨મનો હરસિ મે સુભ્રુ બ્રૂહિ સત્યં સુમધ્યમે ॥ ૧૭૮.૫૬॥

૧૭૮.૫૭/૧પ્રમ્લોચોવાચ । તવ કર્મકરા ચાહં પુષ્પાર્થમહમાગતા ।
૧૭૮.૫૭/૨આદેશં દેહિ મે ક્ષિપ્રં કિં કરોમિ તવાજ્ઞયા ॥ ૧૭૮.૫૭॥

૧૭૮.૫૮/૧વ્યાસ ઉવાચ । શ્રુત્વૈવં વચનં તસ્યાસ્ત્યક્ત્વા ધૈર્યં વિમોહિતઃ ।
૧૭૮.૫૮/૨આદાય હસ્તે તાં બાલાં પ્રવિવેશ સ્વમાશ્રમમ્ ॥ ૧૭૮.૫૮॥

૧૭૮.૫૯/૧તતઃ કામશ્ચ વાયુશ્ચ વસન્તશ્ચ દ્વિજોત્તમાઃ ।
૧૭૮.૫૯/૨જગ્મુર્યથાગતં સર્વે કૃતકૃત્યાસ્ત્રિવિષ્ટપમ્ ॥ ૧૭૮.૫૯॥

૧૭૮.૬૦/૧શશંસુશ્ચ હરિં ગત્વા તસ્યાસ્તસ્ય ચ ચેષ્ટિતમ્ ।
૧૭૮.૬૦/૨શ્રુત્વા શક્રસ્તદા દેવાઃ પ્રીતાઃ સુમનસોઽભવન્ ॥ ૧૭૮.૬૦॥

૧૭૮.૬૧/૧સ ચ કણ્ડુસ્તયા સાર્ધં પ્રવિશન્ન્ એવ ચાશ્રમમ્ ।
૧૭૮.૬૧/૨આત્મનઃ પરમં રૂપં ચકાર મદનાકૃતિ ॥ ૧૭૮.૬૧॥

૧૭૮.૬૨/૧રૂપયૌવનસમ્પન્નમતીવ સુમનોહરમ્ ।
૧૭૮.૬૨/૨દિવ્યાલંકારસંયુક્તં ષોડશવત્સરાકૃતિ ॥ ૧૭૮.૬૨॥

૧૭૮.૬૩/૧દિવ્યવસ્ત્રધરં કાન્તં દિવ્યસ્રગ્ગન્ધભૂષિતમ્ ।
૧૭૮.૬૩/૨સર્વોપભોગસમ્પન્નં સહસા તપસો બલાત્ ॥ ૧૭૮.૬૩॥

૧૭૮.૬૪/૧દૃષ્ટ્વા સા તસ્ય તદ્ વીર્યં પરં વિસ્મયમાગતા ।
૧૭૮.૬૪/૨અહોઽસ્ય તપસો વીર્યમિત્યુક્ત્વા મુદિતાભવત્ ॥ ૧૭૮.૬૪॥

૧૭૮.૬૫/૧સ્નાનં સંધ્યાં જપં હોમં સ્વાધ્યાયં દેવતાર્ચનમ્ ।
૧૭૮.૬૫/૨વ્રતોપવાસનિયમં ધ્યાનં ચ મુનિસત્તમાઃ ॥ ૧૭૮.૬૫॥

૧૭૮.૬૬/૧ત્યક્ત્વા સ રેમે મુદિતસ્તયા સાર્ધમહર્નિશમ્ ।
૧૭૮.૬૬/૨મન્મથાવિષ્ટહૃદયો ન બુબોધ તપઃક્ષયમ્ ॥ ૧૭૮.૬૬॥

૧૭૮.૬૭/૧સંધ્યારાત્રિદિવાપક્ષ+ ંઆસર્ત્વયનહાયનમ્ ।
૧૭૮.૬૭/૨ન બુબોધ ગતં કાલં વિષયાસક્તમાનસઃ ॥ ૧૭૮.૬૭॥

૧૭૮.૬૮/૧સા ચ તં કામજૈર્ભાવૈર્વિદગ્ધા રહસિ દ્વિજાઃ ।
૧૭૮.૬૮/૨વરયામાસ સુશ્રોણિઃ પ્રલાપકુશલા તદા ॥ ૧૭૮.૬૮॥

૧૭૮.૬૯/૧એવં કણ્ડુસ્તયા સાર્ધં વર્ષાણામધિકં શતમ્ ।
૧૭૮.૬૯/૨અતિષ્ઠન્ મન્દરદ્રોણ્યાં ગ્રામ્યધર્મરતો મુનિઃ ॥ ૧૭૮.૬૯॥

૧૭૮.૭૦/૧સા તં પ્રાહ મહાભાગં ગન્તુમિચ્છામ્યહં દિવમ્ ।
૧૭૮.૭૦/૨પ્રસાદસુમુખો બ્રહ્મન્ન્ અનુજ્ઞાતું ત્વમર્હસિ ॥ ૧૭૮.૭૦॥

૧૭૮.૭૧/૧તયૈવમુક્તઃ સ મુનિસ્તસ્યામાસક્તમાનસઃ ।
૧૭૮.૭૧/૨દિનાનિ કતિચિદ્ ભદ્રે સ્થીયતામિત્યભાષત ॥ ૧૭૮.૭૧॥

૧૭૮.૭૨/૧એવમુક્તા તતસ્તેન સાગ્રં વર્ષશતં પુનઃ ।
૧૭૮.૭૨/૨બુભુજે વિષયાંસ્તન્વી તેન સાર્ધં મહાત્મના ॥ ૧૭૮.૭૨॥

૧૭૮.૭૩/૧અનુજ્ઞાં દેહિ ભગવન્ વ્રજામિ ત્રિદશાલયમ્ ।
૧૭૮.૭૩/૨ઉક્તસ્તયેતિ સ પુનઃ સ્થીયતામિત્યભાષત ॥ ૧૭૮.૭૩॥

૧૭૮.૭૪/૧પુનર્ગતે વર્ષશતે સાધિકે સા શુભાનના ।
૧૭૮.૭૪/૨યામ્યહં ત્રિદિવં બ્રહ્મન્ પ્રણયસ્મિતશોભનમ્ ॥ ૧૭૮.૭૪॥

૧૭૮.૭૫/૧ઉક્તસ્તયૈવં સ મુનિઃ પુનરાહાયતેક્ષણામ્ ।
૧૭૮.૭૫/૨ઇહાસ્યતાં મયા સુભ્રુ ચિરં કાલં ગમિષ્યસિ ॥ ૧૭૮.૭૫ ॥

૧૭૮.૭૬/૧તચ્છાપભીતા સુશ્રોણી સહ તેનર્ષિણા પુનઃ ।
૧૭૮.૭૬/૨શતદ્વયં કિંચિદ્ ઊનં વર્ષાણાં સમતિષ્ઠત ॥ ૧૭૮.૭૬ ॥

૧૭૮.૭૭/૧ગમનાય મહાભાગો દેવરાજનિવેશનમ્ ।
૧૭૮.૭૭/૨પ્રોક્તઃ પ્રોક્તસ્તયા તન્વ્યા સ્થીયતામિત્યભાષત ॥ ૧૭૮.૭૭ ॥

૧૭૮.૭૮/૧તસ્ય શાપભયાદ્ ભીરુર્દાક્ષિણ્યેન ચ દક્ષિણા ।
૧૭૮.૭૮/૨પ્રોક્તા પ્રણયભઙ્ગાર્તિ+ ।વેદિની ન જહૌ મુનિમ્ ॥ ૧૭૮.૭૮ ॥

૧૭૮.૭૯/૧તયા ચ રમતસ્તસ્ય પરમર્ષેરહર્નિશમ્ ।
૧૭૮.૭૯/૨નવં નવમભૂત્ પ્રેમ મન્મથાસક્તચેતસઃ ॥ ૧૭૮.૭૯ ॥

૧૭૮.૮૦/૧એકદા તુ ત્વરાયુક્તો નિશ્ચક્રામોટજાન્ મુનિઃ ।
૧૭૮.૮૦/૨નિષ્ક્રામન્તં ચ કુત્રેતિ ગમ્યતે પ્રાહ સા શુભા ॥ ૧૭૮.૮૦ ॥

૧૭૮.૮૧/૧ઇત્યુક્તઃ સ તયા પ્રાહ પરિવૃત્તમહઃ શુભે ।
૧૭૮.૮૧/૨સંધ્યોપાસ્તિં કરિષ્યામિ ક્રિયાલોપોઽન્યથા ભવેત્ ॥ ૧૭૮.૮૧ ॥

૧૭૮.૮૨/૧તતઃ પ્રહસ્ય મુદિતા સા તં પ્રાહ મહામુનિમ્ ।
૧૭૮.૮૨/૨કિમદ્ય સર્વધર્મજ્ઞ પરિવૃત્તમહસ્તવ ।
૧૭૮.૮૨/૩ગતમેતન્ ન કુરુતે વિસ્મયં કસ્ય કથ્યતે ॥ ૧૭૮.૮૨ ॥

૧૭૮.૮૩/૧મુનિરુવાચ । પ્રાતસ્ત્વમાગતા ભદ્રે નદીતીરમિદં શુભમ્ ।
૧૭૮.૮૩/૨મયા દૃષ્ટાસિ સુશ્રોણિ પ્રવિષ્ટા ચ મમાશ્રમમ્ ॥ ૧૭૮.૮૩ ॥

૧૭૮.૮૪/૧ઇયં ચ વર્તતે સંધ્યા પરિણામમહો ગતમ્ ।
૧૭૮.૮૪/૨અવહાસઃ કિમર્થોઽયં સદ્ભાવઃ કથ્યતાં મમ ॥ ૧૭૮.૮૪ ॥

૧૭૮.૮૫/૧પ્રમ્લોચોવાચ । પ્રત્યૂષસ્યાગતા બ્રહ્મન્ સત્યમેતન્ ન મે મૃષા ।
૧૭૮.૮૫/૨કિંત્વદ્ય તસ્ય કાલસ્ય ગતાન્યબ્દશતાનિ તે ॥ ૧૭૮.૮૫ ॥

૧૭૮.૮૬/૧તતઃ સસાધ્વસો વિપ્રસ્તાં પપ્રચ્છાયતેક્ષણામ્ ।
૧૭૮.૮૬/૨કથ્યતાં ભીરુ કઃ કાલસ્ત્વયા મે રમતઃ સદા ॥ ૧૭૮.૮૬ ॥

૧૭૮.૮૭/૧પ્રમ્લોચોવાચ । સપ્તોત્તરાણ્યતીતાનિ નવવર્ષશતાનિ ચ ।
૧૭૮.૮૭/૨માસાશ્ચ ષટ્ તથૈવાન્યત્ સમતીતં દિનત્રયમ્ ॥ ૧૭૮.૮૭ ॥

૧૭૮.૮૮/૧ઋષિરુવાચ । સત્યં ભીરુ વદસ્યેતત્ પરિહાસોઽથવા શુભે ।
૧૭૮.૮૮/૨દિનમેકમહં મન્યે ત્વયા સાર્ધમિહોષિતમ્ ॥ ૧૭૮.૮૮॥

૧૭૮.૮૯/૧પ્રમ્લોચોવાચ । વદિષ્યામ્યનૃતં બ્રહ્મન્ કથમત્ર તવાન્તિકે ।
૧૭૮.૮૯/૨વિશેષાદ્ અદ્ય ભવતા પૃષ્ટા માર્ગાનુગામિના ॥ ૧૭૮.૮૯॥

૧૭૮.૯૦/૧વ્યાસ ઉવાચ । નિશમ્ય તદ્ વચસ્તસ્યાઃ સ મુનિર્દ્વિજસત્તમાઃ ।
૧૭૮.૯૦/૨ધિગ્ ધિઙ્ મામિત્યનાચારં વિનિન્દ્યાત્માનમાત્મના ॥ ૧૭૮.૯૦॥

૧૭૮.૯૧/૧મુનિરુવાચ । તપાંસિ મમ નષ્ટાનિ હતં બ્રહ્મવિદાં ધનમ્ ।
૧૭૮.૯૧/૨હૃતો વિવેકઃ કેનાપિ યોષિન્ મોહાય નિર્મિતા ॥ ૧૭૮.૯૧॥

૧૭૮.૯૨/૧ઊર્મિષટ્કાતિગં બ્રહ્મ જ્ઞેયમાત્મજયેન મે ।
૧૭૮.૯૨/૨ગતિરેષા કૃતા યેન ધિક્ તં કામમહાગ્રહમ્ ॥ ૧૭૮.૯૨॥

૧૭૮.૯૩/૧વ્રતાનિ સર્વવેદાશ્ચ કારણાન્યખિલાનિ ચ ।
૧૭૮.૯૩/૨નરકગ્રામમાર્ગેણ કામેનાદ્ય હતાનિ મે ॥ ૧૭૮.૯૩॥

૧૭૮.૯૪/૧વિનિન્દ્યેત્થં સ ધર્મજ્ઞઃ સ્વયમાત્માનમાત્મના ।
૧૭૮.૯૪/૨તામપ્સરસમાસીનામિદં વચનમબ્રવીત્ ।
૧૭૮.૯૪/૩ઋષિરુવાચ । ગચ્છ પાપે યથાકામં યત્ કાર્યં તત્ ત્વયા કૃતમ્ ।
૧૭૮.૯૪/૪દેવરાજસ્ય યત્ ક્ષોભં કુર્વન્ત્યા ભાવચેષ્ટિતૈઃ ॥ ૧૭૮.૯૪॥

૧૭૮.૯૫/૧ન ત્વાં કરોમ્યહં ભસ્મ ક્રોધતીવ્રેણ વહ્નિના ।
૧૭૮.૯૫/૨સતાં સાપ્તપદં મૈત્ર્યમુષિતોઽહં ત્વયા સહ ॥ ૧૭૮.૯૫॥

૧૭૮.૯૬/૧અથવા તવ દોષઃ કઃ કિં વા કુર્યામહં તવ ।
૧૭૮.૯૬/૨મમૈવ દોષો નિતરાં યેનાહમજિતેન્દ્રિયઃ ॥ ૧૭૮.૯૬॥

૧૭૮.૯૭/૧યથા શક્રપ્રિયાર્થિન્યા કૃતો મત્તપસો વ્યયઃ ।
૧૭૮.૯૭/૨ત્વયા દૃષ્ટિમહામોહ+ ઁઅનુનાહં જુગુપ્સિતઃ ॥ ૧૭૮.૯૭॥

૧૭૮.૯૮/૧વ્યાસ ઉવાચ । યાવદ્ ઇત્થં સ વિપ્રર્ષિસ્તાં બ્રવીતિ સુમધ્યમામ્ ।
૧૭૮.૯૮/૨તાવત્ સ્ખલત્સ્વેદજલા સા બભૂવાતિવેપથુઃ ॥ ૧૭૮.૯૮॥

૧૭૮.૯૯/૧પ્રવેપમાનાં સ ચ તાં સ્વિન્નગાત્રલતાં સતીમ્ ।
૧૭૮.૯૯/૨ગચ્છ ગચ્છેતિ સક્રોધમુવાચ મુનિસત્તમઃ ॥ ૧૭૮.૯૯॥

૧૭૮.૧૦૦/૧સા તુ નિર્ભર્ત્સિતા તેન વિનિષ્ક્રમ્ય તદાશ્રમાત્ ।
૧૭૮.૧૦૦/૨આકાશગામિની સ્વેદં મમાર્જ તરુપલ્લવૈઃ ॥ ૧૭૮.૧૦૦॥

૧૭૮.૧૦૧/૧વૃક્ષાદ્ વૃક્ષં યયૌ બાલા ઉદગ્રારુણપલ્લવૈઃ ।
૧૭૮.૧૦૧/૨નિર્મમાર્જ ચ ગાત્રાણિ ગલત્સ્વેદજલાનિ વૈ ॥ ૧૭૮.૧૦૧॥

૧૭૮.૧૦૨/૧ઋષિણા યસ્તદા ગર્ભસ્તસ્યા દેહે સમાહિતઃ ।
૧૭૮.૧૦૨/૨નિર્જગામ સરોમાગ્ચસ્વેદરૂપી તદઙ્ગતઃ ॥ ૧૭૮.૧૦૨॥

૧૭૮.૧૦૩/૧તં વૃક્ષા જગૃહુર્ગર્ભમેકં ચક્રે ચ મારુતઃ ।
૧૭૮.૧૦૩/૨સોમેનાપ્યાયિતો ગોભિઃ સ તદા વવૃદ્ધે શનૈઃ ॥ ૧૭૮.૧૦૩॥

૧૭૮.૧૦૪/૧મારિષા નામ કન્યાભૂદ્ વૃક્ષાણાં ચારુલોચના ।
૧૭૮.૧૦૪/૨પ્રાચેતસાનાં સા ભાર્યા દક્ષસ્ય જનની દ્વિજાઃ ॥ ૧૭૮.૧૦૪॥

૧૭૮.૧૦૫/૧સ ચાપિ ભગવાન્ કણ્ડુઃ ક્ષીણે તપસિ સત્તમઃ ।
૧૭૮.૧૦૫/૨પુરુષોત્તમાખ્યં ભો વિપ્રા વિષ્ણોરાયતનં યયૌ ॥ ૧૭૮.૧૦૫॥

૧૭૮.૧૦૬/૧દદર્શ પરમં ક્ષેત્રં મુક્તિદં ભુવિ દુર્લભમ્ ।
૧૭૮.૧૦૬/૨દક્ષિણસ્યોદધેસ્તીરે સર્વકામફલપ્રદમ્ ॥ ૧૭૮.૧૦૬॥

૧૭૮.૧૦૭/૧સુરમ્યં વાલુકાકીર્ણં કેતકીવનશોભિતમ્ ।
૧૭૮.૧૦૭/૨નાનાદ્રુમલતાકીર્ણં નાનાપક્ષિરુતં શિવમ્ ॥ ૧૭૮.૧૦૭॥

૧૭૮.૧૦૮/૧સર્વત્ર સુખસંચારં સર્વર્તુકુસુમાન્વિતમ્ ।
૧૭૮.૧૦૮/૨સર્વસૌખ્યપ્રદં નૃણાં ધન્યં સર્વગુણાકરમ્ ॥ ૧૭૮.૧૦૮॥

૧૭૮.૧૦૯/૧ભૃગ્વાદ્યૈઃ સેવિતં પૂર્વં મુનિસિદ્ધવરૈસ્તથા ।
૧૭૮.૧૦૯/૨ગન્ધર્વૈઃ કિંનરૈર્યક્ષૈસ્તથાન્યૈર્મોક્ષકાઙ્ક્ષિભિઃ ॥ ૧૭૮.૧૦૯॥

૧૭૮.૧૧૦/૧દદર્શ ચ હરિં તત્ર દેવૈઃ સર્વૈરલંકૃતમ્ ।
૧૭૮.૧૧૦/૨બ્રાહ્મણાદ્યૈસ્તથા વર્ણૈરાશ્રમસ્થૈર્નિષેવિતમ્ ॥ ૧૭૮.૧૧૦॥

૧૭૮.૧૧૧/૧દૃષ્ટ્વૈવ સ તદા ક્ષેત્રં દેવં ચ પુરુષોત્તમમ્ ।
૧૭૮.૧૧૧/૨કૃતકૃત્યમિવાત્માનં મેને સ મુનિસત્તમઃ ॥ ૧૭૮.૧૧૧॥

૧૭૮.૧૧૨/૧તત્રૈકાગ્રમના ભૂત્વા ચકારારાધનં હરેઃ ।
૧૭૮.૧૧૨/૨બ્રહ્મપારમયં કુર્વઞ્ જપમેકાગ્રમાનસઃ ।
૧૭૮.૧૧૨/૩ઊર્ધ્વબાહુર્મહાયોગી સ્થિત્વાસૌ મુનિસત્તમઃ ॥ ૧૭૮.૧૧૨॥

૧૭૮.૧૧૩/૧મુનય ઊચુઃ । બ્રહ્મપારં મુને શ્રોતુમિચ્છામઃ પરમં શુભમ્ ।
૧૭૮.૧૧૩/૨જપતા કણ્ડુના દેવો યેનારાધ્યત કેશવઃ ॥ ૧૭૮.૧૧૩॥

૧૭૮.૧૧૪/૧વ્યાસ ઉવાચ । પારં પરં વિષ્ણુરપારપારઃ ।

૧૭૮.૧૧૪/૨પરઃ પરેભ્યઃ પરમાત્મરૂપઃ ।
૧૭૮.૧૧૪/૩સ બ્રહ્મપારઃ પરપારભૂતઃ ।
૧૭૮.૧૧૪/૪પરઃ પરાણામપિ પારપારઃ ॥ ૧૭૮.૧૧૪॥

૧૭૮.૧૧૫/૧સ કારણં કારણસંશ્રિતોઽપિ ।
૧૭૮.૧૧૫/૨તસ્યાપિ હેતુઃ પરહેતુહેતુઃ ।
૧૭૮.૧૧૫/૩કાર્યોઽપિ ચૈષ સહ કર્મકર્તૃ+ ।
૧૭૮.૧૧૫/૪રૂપૈરનેકૈરવતીહ સર્વમ્ ॥ ૧૭૮.૧૧૫॥

૧૭૮.૧૧૬/૧બ્રહ્મ પ્રભુર્બ્રહ્મ સ સર્વભૂતો ।
૧૭૮.૧૧૬/૨બ્રહ્મ પ્રજાનાં પતિરચ્યુતોઽસૌ ।
૧૭૮.૧૧૬/૩બ્રહ્માવ્યયં નિત્યમજં સ વિષ્ણુર્ ।
૧૭૮.૧૧૬/૪અપક્ષયાદ્યૈરખિલૈરસઙ્ગઃ ॥ ૧૭૮.૧૧૬॥

૧૭૮.૧૧૭/૧બ્રહ્માક્ષરમજં નિત્યં યથાસૌ પુરુષોત્તમઃ ।
૧૭૮.૧૧૭/૨તથા રાગાદયો દોષાઃ પ્રયાન્તુ પ્રશમં મમ ॥ ૧૭૮.૧૧૭॥

૧૭૮.૧૧૮/૧વ્યાસ ઉવાચ । શ્રુત્વા તસ્ય મુનેર્જાપ્યં બ્રહ્મપારં દ્વિજોત્તમાઃ ।
૧૭૮.૧૧૮/૨ભક્તિં ચ પરમાં જ્ઞાત્વા સુદૃઢાં પુરુષોત્તમઃ ॥ ૧૭૮.૧૧૮॥

૧૭૮.૧૧૯/૧પ્રીત્યા સ પરયા દેવસ્તદાસૌ ભક્તવત્સલઃ ।
૧૭૮.૧૧૯/૨ગત્વા તસ્ય સમીપં તુ પ્રોવાચ મધુસૂદનઃ ॥ ૧૭૮.૧૧૯॥

૧૭૮.૧૨૦/૧મેઘગમ્ભીરયા વાચા દિશઃ સંનાદયન્ન્ ઇવ ।
૧૭૮.૧૨૦/૨આરુહ્ય ગરુડં વિપ્રા વિનતાકુલનન્દનમ્ ॥ ૧૭૮.૧૨૦॥

૧૭૮.૧૨૧/૧શ્રીભગવાન્ ઉવાચ । મુને બ્રૂહિ પરં કાર્યં યત્ તે મનસિ વર્તતે ।
૧૭૮.૧૨૧/૨વરદોઽહમનુપ્રાપ્તો વરં વરય સુવ્રત ॥ ૧૭૮.૧૨૧॥

૧૭૮.૧૨૨/૧શ્રુત્વૈવં વચનં તસ્ય દેવદેવસ્ય ચક્રિણઃ ।
૧૭૮.૧૨૨/૨ચક્ષુરુન્મીલ્ય સહસા દદર્શ પુરતો હરિમ્ ॥ ૧૭૮.૧૨૨॥

૧૭૮.૧૨૩/૧અતસીપુષ્પસંકાશં પદ્મપત્રાયતેક્ષણમ્ ।
૧૭૮.૧૨૩/૨શઙ્ખચક્રગદાપાણિં મુકુટાઙ્ગદધારિણમ્ ॥ ૧૭૮.૧૨૩॥

૧૭૮.૧૨૪/૧ચતુર્બાહુમુદારાઙ્ગં પીતવસ્ત્રધરં શુભમ્ ।
૧૭૮.૧૨૪/૨શ્રીવત્સલક્ષ્મસંયુક્તં વનમાલાવિભૂષિતમ્ ॥ ૧૭૮.૧૨૪॥

૧૭૮.૧૨૫/૧સર્વલક્ષણસંયુક્તં સર્વરત્નવિભૂષિતમ્ ।

૧૭૮.૧૨૫/૨દિવ્યચન્દનલિપ્તાઙ્ગં દિવ્યમાલ્યવિભૂષિતમ્ ॥ ૧૭૮.૧૨૫॥

૧૭૮.૧૨૬/૧તતઃ સ વિસ્મયાવિષ્ટો રોમાઞ્ચિતતનૂરુહઃ ।
૧૭૮.૧૨૬/૨દણ્ડવત્ પ્રણિપત્યોર્વ્યાં પ્રણામમકરોત્ તદા ॥ ૧૭૮.૧૨૬॥

૧૭૮.૧૨૭/૧અદ્ય મે સફલં જન્મ અદ્ય મે સફલં તપઃ ।
૧૭૮.૧૨૭/૨ઇત્યુક્ત્વા મુનિશાર્દૂલાસ્તં સ્તોતુમુપચક્રમે ॥ ૧૭૮.૧૨૭॥

૧૭૮.૧૨૮/૧કણ્ડુરુવાચ । નારાયણ હરે કૃષ્ણ શ્રીવત્સાઙ્ક જગત્પતે ।
૧૭૮.૧૨૮/૨જગદ્બીજ જગદ્ધામ જગત્સાક્ષિન્ નમોઽસ્તુ તે ॥ ૧૭૮.૧૨૮॥

૧૭૮.૧૨૯/૧અવ્યક્ત જિષ્ણો પ્રભવ પ્રધાનપુરુષોત્તમ ।
૧૭૮.૧૨૯/૨પુણ્ડરીકાક્ષ ગોવિન્દ લોકનાથ નમોઽસ્તુ તે ॥ ૧૭૮.૧૨૯॥

૧૭૮.૧૩૦/૧હિરણ્યગર્ભ શ્રીનાથ પદ્મનાથ સનાતન ।
૧૭૮.૧૩૦/૨ભૂગર્ભ ધ્રુવ ઈશાન હૃષીકેશ નમોઽસ્તુ તે ॥ ૧૭૮.૧૩૦॥

૧૭૮.૧૩૧/૧અનાદ્યન્તામૃતાજેય જય ત્વં જયતાં વર ।
૧૭૮.૧૩૧/૨અજિતાખણ્ડ શ્રીકૃષ્ણ શ્રીનિવાસ નમોઽસ્તુ તે ॥ ૧૭૮.૧૩૧॥

૧૭૮.૧૩૨/૧પર્જન્યધર્મકર્તા ચ દુષ્પાર દુરધિષ્ઠિત ।
૧૭૮.૧૩૨/૨દુઃખાર્તિનાશન હરે જલશાયિન્ નમોઽસ્તુ તે ॥ ૧૭૮.૧૩૨॥

૧૭૮.૧૩૩/૧ભૂતપાવ્યક્ત ભૂતેશ ભૂતતત્ત્વૈરનાકુલ ।
૧૭૮.૧૩૩/૨ભૂતાધિવાસ ભૂતાત્મન્ ભૂતગર્ભ નમોઽસ્તુ તે ॥ ૧૭૮.૧૩૩॥

૧૭૮.૧૩૪/૧યજ્ઞયજ્વન્ યજ્ઞધર યજ્ઞધાતાભયપ્રદ ।
૧૭૮.૧૩૪/૨યજ્ઞગર્ભ હિરણ્યાઙ્ગ પૃશ્નિગર્ભ નમોઽસ્તુ તે ॥ ૧૭૮.૧૩૪॥

૧૭૮.૧૩૫/૧ક્ષેત્રજ્ઞઃ ક્ષેત્રભૃત્ ક્ષેત્રી ક્ષેત્રહા ક્ષેત્રકૃદ્ વશી ।
૧૭૮.૧૩૫/૨ક્ષેત્રાત્મન્ ક્ષેત્રરહિત ક્ષેત્રસ્રષ્ટ્રે નમોઽસ્તુ તે ॥ ૧૭૮.૧૩૫॥

૧૭૮.૧૩૬/૧ગુણાલય ગુણાવાસ ગુણાશ્રય ગુણાવહ ।
૧૭૮.૧૩૬/૨ગુણભોક્તૃ ગુણારામ ગુણત્યાગિન્ નમોઽસ્તુ તે ॥ ૧૭૮.૧૩૬॥

૧૭૮.૧૩૭/૧ત્વં વિષ્ણુસ્ત્વં હરિશ્ચક્રી ત્વં જિષ્ણુસ્ત્વં જનાર્દનઃ ।
૧૭૮.૧૩૭/૨ત્વં ભૂતસ્ત્વં વષટ્કારસ્ત્વં ભવ્યસ્ત્વં ભવત્પ્રભુઃ ॥ ૧૭૮.૧૩૭॥

૧૭૮.૧૩૮/૧ત્વં ભૂતકૃત્ ત્વમવ્યક્તસ્ત્વં ભવો ભૂતભૃદ્ ભવાન્ ।
૧૭૮.૧૩૮/૨ત્વં ભૂતભાવનો દેવસ્ત્વામાહુરજમીશ્વરમ્ ॥ ૧૭૮.૧૩૮॥

૧૭૮.૧૩૯/૧ત્વમનન્તઃ કૃતજ્ઞસ્ત્વં પ્રકૃતિસ્ત્વં વૃષાકપિઃ ।
૧૭૮.૧૩૯/૨ત્વં રુદ્રસ્ત્વં દુરાધર્ષસ્ત્વમમોઘસ્ત્વમીશ્વરઃ ॥ ૧૭૮.૧૩૯॥

૧૭૮.૧૪૦/૧ત્વં વિશ્વકર્મા જિષ્ણુસ્ત્વં ત્વં શમ્ભુસ્ત્વં વૃષાકૃતિઃ ।
૧૭૮.૧૪૦/૨ત્વં શંકરસ્ત્વમુશના ત્વં સત્યં ત્વં તપો જનઃ ॥ ૧૭૮.૧૪૦॥

૧૭૮.૧૪૧/૧ત્વં વિશ્વજેતા ત્વં શર્મ ત્વં શરણ્યસ્ત્વમક્ષરમ્ ।
૧૭૮.૧૪૧/૨ત્વં શમ્ભુસ્ત્વં સ્વયમ્ભૂશ્ચ ત્વં જ્યેષ્ઠસ્ત્વં
પરાયણઃ ॥ ૧૭૮.૧૪૧॥

૧૭૮.૧૪૨/૧ત્વમાદિત્યસ્ત્વમોંકારસ્ત્વં પ્રાણસ્ત્વં તમિસ્રહા ।
૧૭૮.૧૪૨/૨ત્વં પર્જન્યસ્ત્વં પ્રથિતસ્ત્વં વેધાસ્ત્વં સુરેશ્વરઃ ॥ ૧૭૮.૧૪૨॥

૧૭૮.૧૪૩/૧ત્વમ્ ઋગ્ યજુઃ સામ ચૈવ ત્વમાત્મા સમ્મતો ભવાન્ ।
૧૭૮.૧૪૩/૨ત્વમગ્નિસ્ત્વં ચ પવનસ્ત્વમાપો વસુધા ભવાન્ ॥ ૧૭૮.૧૪૩॥

૧૭૮.૧૪૪/૧ત્વં સ્રષ્ટા ત્વં તથા ભોક્તા હોતા ત્વં ચ હવિઃ ક્રતુઃ ।
૧૭૮.૧૪૪/૨ત્વં પ્રભુસ્ત્વં વિભુઃ શ્રેષ્ઠસ્ત્વં લોકપતિરચ્યુતઃ ॥ ૧૭૮.૧૪૪॥

૧૭૮.૧૪૫/૧ત્વં સર્વદર્શનઃ શ્રીમાંસ્ત્વં સર્વદમનોઽરિહા ।
૧૭૮.૧૪૫/૨ત્વમહસ્ત્વં તથા રાત્રિસ્ત્વામાહુર્વત્સરં બુધાઃ ॥ ૧૭૮.૧૪૫॥

૧૭૮.૧૪૬/૧ત્વં કાલસ્ત્વં કલા કાષ્ઠા ત્વં મુહૂર્તઃ ક્ષણા લવાઃ ।
૧૭૮.૧૪૬/૨ત્વં બાલસ્ત્વં તથા વૃદ્ધસ્ત્વં પુમાન્ સ્ત્રી નપુંસકઃ ॥ ૧૭૮.૧૪૬॥

૧૭૮.૧૪૭/૧ત્વં વિશ્વયોનિસ્ત્વં ચક્ષુસ્ત્વં સ્થાણુસ્ત્વં શુચિશ્રવાઃ ।
૧૭૮.૧૪૭/૨ત્વં શાશ્વતસ્ત્વમજિતસ્ત્વમુપેન્દ્રસ્ત્વમુત્તમઃ ॥ ૧૭૮.૧૪૭॥

૧૭૮.૧૪૮/૧ત્વં સર્વવિશ્વસુખદસ્ત્વં વેદાઙ્ગં ત્વમવ્યયઃ ।
૧૭૮.૧૪૮/૨ત્વં વેદવેદસ્ત્વં ધાતા વિધાતા ત્વં સમાહિતઃ ॥ ૧૭૮.૧૪૮॥

૧૭૮.૧૪૯/૧ત્વં જલનિધિરામૂલં ત્વં ધાતા ત્વં પુનર્વસુઃ ।
૧૭૮.૧૪૯/૨ત્વં વૈદ્યસ્ત્વં ધૃતાત્મા ચ ત્વમતીન્દ્રિયગોચરઃ ॥ ૧૭૮.૧૪૯॥

૧૭૮.૧૫૦/૧ત્વમગ્રણીર્ગ્રામણીસ્ત્વં ત્વં સુપર્ણસ્ત્વમાદિમાન્ ।
૧૭૮.૧૫૦/૨ત્વં સંગ્રહસ્ત્વં સુમહત્ ત્વં ધૃતાત્મા ત્વમચ્યુતઃ ॥ ૧૭૮.૧૫૦॥

૧૭૮.૧૫૧/૧ત્વં યમસ્ત્વં ચ નિયમસ્ત્વં પ્રાંશુસ્ત્વં ચતુર્ભુજઃ ।
૧૭૮.૧૫૧/૨ત્વમેવાન્નાન્તરાત્મા ત્વં પરમાત્મા ત્વમુચ્યતે ॥ ૧૭૮.૧૫૧॥

૧૭૮.૧૫૨/૧ત્વં ગુરુસ્ત્વં ગુરુતમસ્ત્વં વામસ્ત્વં પ્રદક્ષિણઃ ।

૧૭૮.૧૫૨/૨ત્વં પિપ્પલસ્ત્વમગમસ્ત્વં વ્યક્તસ્ત્વં પ્રજાપતિઃ ॥ ૧૭૮.૧૫૨॥

૧૭૮.૧૫૩/૧હિરણ્યનાભસ્ત્વં દેવસ્ત્વં શશી ત્વં પ્રજાપતિઃ ।
૧૭૮.૧૫૩/૨અનિર્દેશ્યવપુસ્ત્વં વૈ ત્વં યમસ્ત્વં સુરારિહા ॥ ૧૭૮.૧૫૩॥

૧૭૮.૧૫૪/૧ત્વં ચ સંકર્ષણો દેવસ્ત્વં કર્તા ત્વં સનાતનઃ ।
૧૭૮.૧૫૪/૨ત્વં વાસુદેવોઽમેયાત્મા ત્વમેવ ગુણવર્જિતઃ ॥ ૧૭૮.૧૫૪॥

૧૭૮.૧૫૫/૧ત્વં જ્યેષ્ઠસ્ત્વં વરિષ્ઠસ્ત્વં ત્વં સહિષ્ણુશ્ચ માધવઃ ।
૧૭૮.૧૫૫/૨સહસ્રશીર્ષા ત્વં દેવસ્ત્વમવ્યક્તઃ સહસ્રદૃક્ ॥ ૧૭૮.૧૫૫॥

૧૭૮.૧૫૬/૧સહસ્રપાદસ્ત્વં દેવસ્ત્વં વિરાટ્ ત્વં સુરપ્રભુઃ ।
૧૭૮.૧૫૬/૨ત્વમેવ તિષ્ઠસે ભૂયો દેવદેવ દશાઙ્ગુલઃ ॥ ૧૭૮.૧૫૬॥

૧૭૮.૧૫૭/૧યદ્ ભૂતં તત્ ત્વમેવોક્તઃ પુરુષઃ શક્ર ઉત્તમઃ ।
૧૭૮.૧૫૭/૨યદ્ ભાવ્યં તત્ ત્વમીશાનસ્ત્વમ્ ઋતસ્ત્વં તથામૃતઃ ॥ ૧૭૮.૧૫૭॥

૧૭૮.૧૫૮/૧ત્વત્તો રોહત્યયં લોકો મહીયાંસ્ત્વમનુત્તમઃ ।
૧૭૮.૧૫૮/૨ત્વં જ્યાયાન્ પુરુષસ્ત્વં ચ ત્વં દેવ દશધા સ્થિતઃ ॥ ૧૭૮.૧૫૮॥

૧૭૮.૧૫૯/૧વિશ્વભૂતશ્ચતુર્ભાગો નવભાગોઽમૃતો દિવિ ।
૧૭૮.૧૫૯/૨નવભાગોઽન્તરિક્ષસ્થઃ પૌરુષેયઃ સનાતનઃ ॥ ૧૭૮.૧૫૯॥

૧૭૮.૧૬૦/૧ભાગદ્વયં ચ ભૂસંસ્થં ચતુર્ભાગોઽપ્યભૂદ્ ઇહ ।
૧૭૮.૧૬૦/૨ત્વત્તો યજ્ઞાઃ સમ્ભવન્તિ જગતો વૃષ્ટિકારણમ્ ॥ ૧૭૮.૧૬૦॥

૧૭૮.૧૬૧/૧ત્વત્તો વિરાટ્ સમુત્પન્નો જગતો હૃદિ યઃ પુમાન્ ।
૧૭૮.૧૬૧/૨સોઽતિરિચ્યત ભૂતેભ્યસ્તેજસા યશસા શ્રિયા ॥ ૧૭૮.૧૬૧॥

૧૭૮.૧૬૨/૧ત્વત્તઃ સુરાણામાહારઃ પૃષદાજ્યમજાયત ।
૧૭૮.૧૬૨/૨ગ્રામ્યારણ્યાશ્ચૌષધયસ્ત્વત્તઃ પશુમૃગાદયઃ ॥ ૧૭૮.૧૬૨॥

૧૭૮.૧૬૩/૧ધ્યેયધ્યાનપરસ્ત્વં ચ કૃતવાન્ અસિ ચૌષધીઃ ।
૧૭૮.૧૬૩/૨ત્વં દેવદેવ સપ્તાસ્ય કાલાખ્યો દીપ્તવિગ્રહઃ ॥ ૧૭૮.૧૬૩॥

૧૭૮.૧૬૪/૧જઙ્ગમાજઙ્ગમં સર્વં જગદ્ એતચ્ચરાચરમ્ ।
૧૭૮.૧૬૪/૨ત્વત્તઃ સર્વમિદં જાતં ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૭૮.૧૬૪॥

૧૭૮.૧૬૫/૧અનિરુદ્ધસ્ત્વં માધવસ્ત્વં પ્રદ્યુમ્નઃ સુરારિહા ।
૧૭૮.૧૬૫/૨દેવ સર્વસુરશ્રેષ્ઠ સર્વલોકપરાયણ ॥ ૧૭૮.૧૬૫॥

૧૭૮.૧૬૬/૧ત્રાહિ મામરવિન્દાક્ષ નારાયણ નમોઽસ્તુ તે ।
૧૭૮.૧૬૬/૨નમસ્તે ભગવન્ વિષ્ણો નમસ્તે પુરુષોત્તમ ॥ ૧૭૮.૧૬૬॥

૧૭૮.૧૬૭/૧નમસ્તે સર્વલોકેશ નમસ્તે કમલાલય ।
૧૭૮.૧૬૭/૨ગુણાલય નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ ગુણાકર ॥ ૧૭૮.૧૬૭॥

૧૭૮.૧૬૮/૧વાસુદેવ નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ સુરોત્તમ ।
૧૭૮.૧૬૮/૨જનાર્દન નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ સનાતન ॥ ૧૭૮.૧૬૮॥

૧૭૮.૧૬૯/૧નમસ્તે યોગિનાં ગમ્ય યોગાવાસ નમોઽસ્તુ તે ।
૧૭૮.૧૬૯/૨ગોપતે શ્રીપતે વિષ્ણો નમસ્તેઽસ્તુ મરુત્પતે ॥ ૧૭૮.૧૬૯॥

૧૭૮.૧૭૦/૧જગત્પતે જગત્સૂતે નમસ્તે જ્ઞાનિનાં પતે ।
૧૭૮.૧૭૦/૨દિવસ્પતે નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ મહીપતે ॥ ૧૭૮.૧૭૦॥

૧૭૮.૧૭૧/૧નમસ્તે મધુહન્ત્રે ચ નમસ્તે પુષ્કરેક્ષણ ।
૧૭૮.૧૭૧/૨કૈટભઘ્ન નમસ્તેઽસ્તુ સુબ્રહ્મણ્ય નમોઽસ્તુ તે ॥ ૧૭૮.૧૭૧॥

૧૭૮.૧૭૨/૧નમોઽસ્તુ તે મહામીન શ્રુતિપૃષ્ઠધરાચ્યુત ।
૧૭૮.૧૭૨/૨સમુદ્રસલિલક્ષોભ પદ્મજાહ્લાદકારિણે ॥ ૧૭૮.૧૭૨॥

૧૭૮.૧૭૩/૧અશ્વશીર્ષ મહાઘોણ મહાપુરુષવિગ્રહ ।
૧૭૮.૧૭૩/૨મધુકૈટભહન્ત્રે ચ નમસ્તે તુરગાનન ॥ ૧૭૮.૧૭૩॥

૧૭૮.૧૭૪/૧મહાકમઠભોગાય પૃથિવ્યુદ્ધરણાય ચ ।
૧૭૮.૧૭૪/૨વિધૃતાદ્રિસ્વરૂપાય મહાકૂર્માય તે નમઃ ॥ ૧૭૮.૧૭૪॥

૧૭૮.૧૭૫/૧નમો મહાવરાહાય પૃથિવ્યુદ્ધારકારિણે ।
૧૭૮.૧૭૫/૨નમશ્ચાદિવરાહાય વિશ્વરૂપાય વેધસે ॥ ૧૭૮.૧૭૫॥

૧૭૮.૧૭૬/૧નમોઽનન્તાય સૂક્ષ્માય મુખ્યાય ચ વરાય ચ ।
૧૭૮.૧૭૬/૨પરમાણુસ્વરૂપાય યોગિગમ્યાય તે નમઃ ॥ ૧૭૮.૧૭૬॥

૧૭૮.૧૭૭/૧તસ્મૈ નમઃ કારણકારણાય ।
૧૭૮.૧૭૭/૨યોગીન્દ્રવૃત્તનિલયાય સુદુર્વિદાય ।
૧૭૮.૧૭૭/૩ક્ષીરાર્ણવાશ્રિતમહાહિસુતલ્પગાય ।
૧૭૮.૧૭૭/૪તુભ્યં નમઃ કનકરત્નસુકુણ્ડલાય ॥ ૧૭૮.૧૭૭॥

૧૭૮.૧૭૮/૧વ્યાસ ઉવાચ । ઇત્થં સ્તુતસ્તદા તેન પ્રીતઃ પ્રોવાચ માધવઃ ।
૧૭૮.૧૭૮/૨ક્ષિપ્રં બ્રૂહિ મુનિશ્રેષ્ઠ મત્તો યદ્ અભિવાઞ્છસિ ॥ ૧૭૮.૧૭૮॥

૧૭૮.૧૭૯/૧કણ્ડુરુવાચ । સંસારેઽસ્મિન્ જગન્નાથ દુસ્તરે લોમહર્ષણે ।
૧૭૮.૧૭૯/૨અનિત્યે દુઃખબહુલે કદલીદલસંનિભે ॥ ૧૭૮.૧૭૯॥

૧૭૮.૧૮૦/૧નિરાશ્રયે નિરાલમ્બે જલબુદ્બુદચઞ્ચલે ।
૧૭૮.૧૮૦/૨સર્વોપદ્રવસંયુક્તે દુસ્તરે ચાતિભૈરવે ॥ ૧૭૮.૧૮૦॥

૧૭૮.૧૮૧/૧ભ્રમામિ સુચિરં કાલં માયયા મોહિતસ્તવ ।
૧૭૮.૧૮૧/૨ન ચાન્તમભિગચ્છામિ વિષયાસક્તમાનસઃ ॥ ૧૭૮.૧૮૧॥

૧૭૮.૧૮૨/૧ત્વામહં ચાદ્ય દેવેશ સંસારભયપીડિતઃ ।
૧૭૮.૧૮૨/૨ગતોઽસ્મિ શરણં કૃષ્ણ મામુદ્ધર ભવાર્ણવાત્ ॥ ૧૭૮.૧૮૨॥

૧૭૮.૧૮૩/૧ગન્તુમિચ્છામિ પરમં પદં યત્ તે સનાતનમ્ ।
૧૭૮.૧૮૩/૨પ્રસાદાત્ તવ દેવેશ પુનરાવૃત્તિદુર્લભમ્ ॥ ૧૭૮.૧૮૩॥

૧૭૮.૧૮૪/૧શ્રીભગવાન્ ઉવાચ । ભક્તોઽસિ મે મુનિશ્રેષ્ઠ મામારાધય નિત્યશઃ ।
૧૭૮.૧૮૪/૨મત્પ્રસાદાદ્ ધ્રુવં મોક્ષં પ્રાપ્યસિ ત્વં સમીહિતમ્ ॥ ૧૭૮.૧૮૪॥

૧૭૮.૧૮૫/૧મદ્ભક્તાઃ ક્ષત્રિયા વૈશ્યાઃ સ્ત્રિયઃ શૂદ્રાન્ત્યજાતિજાઃ ।
૧૭૮.૧૮૫/૨પ્રાપ્નુવન્તિ પરાં સિદ્ધિં કિં પુનસ્ત્વં દ્વિજોત્તમ ॥ ૧૭૮.૧૮૫॥

૧૭૮.૧૮૬/૧શ્વપાકોઽપિ ચ મદ્ભક્તઃ સમ્યક્ શ્રદ્ધાસમન્વિતઃ ।
૧૭૮.૧૮૬/૨પ્રાપ્નોત્યભિમતાં સિદ્ધિમન્યેષાં તત્ર કા કથા ॥ ૧૭૮.૧૮૬॥

૧૭૮.૧૮૭/૧વ્યાસ ઉવાચ । એવમુક્ત્વા તુ તં વિપ્રાઃ સ દેવો ભક્તવત્સલઃ ।
૧૭૮.૧૮૭/૨દુર્વિજ્ઞેયગતિર્વિષ્ણુસ્તત્રૈવાન્તરધીયત ॥ ૧૭૮.૧૮૭॥

૧૭૮.૧૮૮/૧ગતે તસ્મિન્ મુનિશ્રેષ્ઠાઃ કણ્ડુઃ સંહૃષ્ટમાનસઃ ।
૧૭૮.૧૮૮/૨સર્વાન્ કામાન્ પરિત્યજ્ય સ્વસ્થચિત્તો ભવત્ પુનઃ ॥ ૧૭૮.૧૮૮॥

૧૭૮.૧૮૯/૧સર્વેન્દ્રિયાણિ સંયમ્ય નિર્મમો નિરહંકૃતિઃ ।
૧૭૮.૧૮૯/૨એકાગ્રમાનસઃ સમ્યગ્ ધ્યાત્વા તં પુરુષોત્તમમ્ ॥ ૧૭૮.૧૮૯॥

૧૭૮.૧૯૦/૧નિર્લેપં નિર્ગુણં શાન્તં સત્તામાત્રવ્યવસ્થિતમ્ ।
૧૭૮.૧૯૦/૨અવાપ પરમં મોક્ષં સુરાણામપિ દુર્લભમ્ ॥ ૧૭૮.૧૯૦॥

૧૭૮.૧૯૧/૧યઃ પઠેચ્છૃણુયાદ્ વાપિ કથાં કણ્ડોર્મહાત્મનઃ ।
૧૭૮.૧૯૧/૨વિમુક્તઃ સર્વપાપેભ્યઃ સ્વર્ગલોકં સ ગચ્છતિ ॥ ૧૭૮.૧૯૧॥

૧૭૮.૧૯૨/૧એવં મયા મુનિશ્રેષ્ઠાઃ કર્મભૂમિરુદાહૃતા ।
૧૭૮.૧૯૨/૨મોક્ષક્ષેત્રં ચ પરમં દેવં ચ પુરુષોત્તમમ્ ॥ ૧૭૮.૧૯૨॥

૧૭૮.૧૯૩/૧યે પશ્યન્તિ વિભું સ્તુવન્તિ વરદં ધ્યાયન્તિ મુક્તિપ્રદમ્ ।
૧૭૮.૧૯૩/૨ભક્ત્યા શ્રીપુરુષોત્તમાખ્યમજરં સંસારદુઃખાપહમ્ ॥ ૧૭૮.૧૯૩॥

૧૭૮.૧૯૪/૧તે ભુક્ત્વા મનુજેન્દ્રભોગમમલાઃ સ્વર્ગે ચ દિવ્યં સુખમ્ ।
૧૭૮.૧૯૪/૨પશ્ચાદ્ યાન્તિ સમસ્તદોષરહિતાઃ સ્થાનં હરેરવ્યયમ્ ॥ ૧૭૮.૧૯૪॥

૧૭૯.૧/૧લોમહર્ષણ ઉવાચ । વ્યાસસ્ય વચનં શ્રુત્વા મુનયઃ સંયતેન્દ્રિયાઃ ।
૧૭૯.૧/૨પ્રીતા બભૂવુઃ સંહૃષ્ટા વિસ્મિતાશ્ચ પુનઃ પુનઃ ॥ ૧૭૯.૧॥

૧૭૯.૨/૧મુનય ઊચુઃ । અહો ભારતવર્ષસ્ય ત્વયા સંકીર્તિતા ગુણાઃ ।
૧૭૯.૨/૨તદ્વચ્છ્રીપુરુષાખ્યસ્ય ક્ષેત્રસ્ય પુરુષોત્તમ ॥ ૧૭૯.૨॥

૧૭૯.૩/૧વિસ્મયો હિ ન ચૈકસ્ય શ્રુત્વા માહાત્મ્યમુત્તમમ્ ।
૧૭૯.૩/૨પુરુષાખ્યસ્ય ક્ષેત્રસ્ય પ્રીતિશ્ચ વદતાં વર ॥ ૧૭૯.૩॥

૧૭૯.૪/૧ચિરાત્ પ્રભૃતિ ચાસ્માકં સંશયો હૃદિ વર્તતે ।
૧૭૯.૪/૨ત્વદૃતે સંશયસ્યાસ્ય *ચ્છેત્તા નાન્યોઽસ્તિ ભૂતલે ॥ ૧૭૯.૪॥

૧૭૯.૫/૧ઉત્પત્તિં બલદેવસ્ય કૃષ્ણસ્ય ચ મહીતલે ।
૧૭૯.૫/૨ભદ્રાયાશ્ચૈવ કાર્ત્સ્ન્યેન પૃચ્છામસ્ત્વાં મહામુને ॥ ૧૭૯.૫॥

૧૭૯.૬/૧કિમર્થં તૌ સમુત્પન્નૌ કૃષ્ણસંકર્ષણાવુભૌ ।
૧૭૯.૬/૨વસુદેવસુતૌ વીરૌ સ્થિતૌ નન્દગૃહે મુને ॥ ૧૭૯.૬॥

૧૭૯.૭/૧નિઃસારે મૃત્યુલોકેઽસ્મિન્ દુઃખપ્રાયેઽતિચઞ્ચલે ।
૧૭૯.૭/૨જલબુદ્બુદસંકાશે ભૈરવે લોમહર્ષણે ॥ ૧૭૯.૭॥

૧૭૯.૮/૧વિણ્મૂત્રપિચ્છલં કષ્ટં સંકટં દુઃખદાયકમ્ ।
૧૭૯.૮/૨કથં ઘોરતરં તેષાં ગર્ભવાસમરોચત ॥ ૧૭૯.૮॥

૧૭૯.૯/૧યાનિ કર્માણિ ચક્રુસ્તે સમુત્પન્ના મહીતલે ।
૧૭૯.૯/૨વિસ્તરેણ મુને તાનિ બ્રૂહિ નો વદતાં વર ॥ ૧૭૯.૯॥

૧૭૯.૧૦/૧સમગ્રં ચરિતં તેષામદ્ભુતં ચાતિમાનુષમ્ ।
૧૭૯.૧૦/૨કથં સ ભગવાન્ દેવઃ સુરેશઃ સુરસત્તમઃ ॥ ૧૭૯.૧૦॥

૧૭૯.૧૧/૧વસુદેવકુલે ધીમાન્ વાસુદેવત્વમાગતઃ ।
૧૭૯.૧૧/૨અમરૈશ્ચાવૃતં પુણ્યં પુણ્યકૃદ્ભિરલંકૃતમ્ ॥ ૧૭૯.૧૧॥

૧૭૯.૧૨/૧દેવલોકં કિમુત્સૃજ્ય મર્ત્યલોક ઇહાગતઃ ।

૧૭૯.૧૨/૨દેવમાનુષયોર્નેતા દ્યોર્ભુવઃ પ્રભવોઽવ્યયઃ ॥ ૧૭૯.૧૨ ॥

૧૭૯.૧૩/૧કિમર્થં દિવ્યમાત્માનં માનુષેષુ ન્યયોજયત્ ।
૧૭૯.૧૩/૨યશ્ચક્રં વર્તયત્યેકો માનુષાણામનામયમ્ ॥ ૧૭૯.૧૩ ॥

૧૭૯.૧૪/૧સ માનુષ્યે કથં બુદ્ધિં ચક્રે ચક્રગદાધરઃ ।
૧૭૯.૧૪/૨ગોપાયનં યઃ કુરુતે જગતઃ સાર્વભૌતિકમ્ ॥ ૧૭૯.૧૪ ॥

૧૭૯.૧૫/૧સ કથં ગાં ગતો વિષ્ણુર્ગોપત્વમકરોત્ પ્રભુઃ ।
૧૭૯.૧૫/૨મહાભૂતાનિ ભૂતાત્મા યો દધાર ચકાર ચ ॥ ૧૭૯.૧૫ ॥

૧૭૯.૧૬/૧શ્રીગર્ભઃ સ કથં ગર્ભે સ્ત્રિયા ભૂચરયા ધૃતઃ ।
૧૭૯.૧૬/૨યેન લોકાન્ ક્રમૈર્જિત્વા ત્રિભિર્વૈ ત્રિદશેપ્સયા ॥ ૧૭૯.૧૬ ॥

૧૭૯.૧૭/૧સ્થાપિતા જગતો માર્ગાસ્ત્રિવર્ગાશ્ચાભવંસ્ત્રયઃ ।
૧૭૯.૧૭/૨યોઽન્તકાલે જગત્ પીત્વા કૃત્વા તોયમયં વપુઃ ॥ ૧૭૯.૧૭ ॥

૧૭૯.૧૮/૧લોકમેકાર્ણવં ચક્રે દૃશ્યાદૃશ્યેન ચાત્મના ।
૧૭૯.૧૮/૨યઃ પુરાણઃ પુરાણાત્મા વારાહં રૂપમાસ્થિતઃ ॥ ૧૭૯.૧૮ ॥

૧૭૯.૧૯/૧વિષાણાગ્રેણ વસુધામુજ્જહારારિસૂદનઃ ।
૧૭૯.૧૯/૨યઃ પુરા પુરુહૂતાર્થે ત્રૈલોક્યમિદમવ્યયમ્ ॥ ૧૭૯.૧૯ ॥

૧૭૯.૨૦/૧દદૌ જિત્વા વસુમતીં સુરાણાં સુરસત્તમઃ ।
૧૭૯.૨૦/૨યેન સૈંહવપુઃ કૃત્વા દ્વિધા કૃત્વા ચ તત્ પુનઃ ॥ ૧૭૯.૨૦ ॥

૧૭૯.૨૧/૧પૂર્વદૈત્યો મહાવીર્યો હિરણ્યકશિપુર્હતઃ ।
૧૭૯.૨૧/૨યઃ પુરા હ્યનલો ભૂત્વા ઔર્વઃ સંવર્તકો વિભુઃ ॥ ૧૭૯.૨૧ ॥

૧૭૯.૨૨/૧પાતાલસ્થોઽર્ણવરસં પપૌ તોયમયં હરિઃ ।
૧૭૯.૨૨/૨સહસ્રચરણં બ્રહ્મ સહસ્રાંશુસહસ્રદમ્ ॥ ૧૭૯.૨૨ ॥

૧૭૯.૨૩/૧સહસ્રશિરસં દેવં યમાહુર્વૈ યુગે યુગે ।
૧૭૯.૨૩/૨નાભ્યાં પદ્મં સમુદ્ભૂતં યસ્ય પૈતામહં ગૃહમ્ ॥ ૧૭૯.૨૩ ॥

૧૭૯.૨૪/૧એકાર્ણવે નાગલોકે સદ્ધિરણ્મયપઙ્કજમ્ ।
૧૭૯.૨૪/૨યેન તે નિહતા દૈત્યાઃ સંગ્રામે તારકામયે ॥ ૧૭૯.૨૪ ॥

૧૭૯.૨૫/૧યેન દેવમયં કૃત્વા સર્વાયુધધરં વપુઃ ।
૧૭૯.૨૫/૨ગુહાસંસ્થેન ચોત્સિક્તઃ કાલનેમિર્નિપાતિતઃ ॥ ૧૭૯.૨૫ ॥

૧૭૯.૨૬/૧ઉત્તરાન્તે સમુદ્રસ્ય ક્ષીરોદસ્યામૃતોદધૌ ।
૧૭૯.૨૬/૨યઃ શેતે શાશ્વતં યોગમાસ્થાય તિમિરં મહત્ ॥ ૧૭૯.૨૬॥

૧૭૯.૨૭/૧સુરારણી ગર્ભમધત્ત દિવ્યમ્ ।
૧૭૯.૨૭/૨તપઃપ્રકર્ષાદ્ અદિતિઃ પુરાણમ્ ।
૧૭૯.૨૭/૩શક્રં ચ યો દૈત્યગણાવરુદ્ધમ્ ।
૧૭૯.૨૭/૪ગર્ભાવધાનેન કૃતં ચકાર ॥ ૧૭૯.૨૭॥

૧૭૯.૨૮/૧પદાનિ યો યોગમયાનિ કૃત્વા ।
૧૭૯.૨૮/૨ચકાર દૈત્યાન્ સલિલેશયસ્થાન્ ।
૧૭૯.૨૮/૩કૃત્વા ચ દેવાંસ્ત્રિદશેશ્વરાંસ્તુ ।
૧૭૯.૨૮/૪ચક્રે સુરેશં પુરુહૂતમેવ ॥ ૧૭૯.૨૮॥

૧૭૯.૨૯/૧ગાર્હપત્યેન વિધિના અન્વાહાર્યેણ કર્મણા ।
૧૭૯.૨૯/૨અગ્નિમાહવનીયં ચ વેદં દીક્ષાં સમિદ્ ધ્રુવમ્ ॥ ૧૭૯.૨૯॥

૧૭૯.૩૦/૧પ્રોક્ષણીયં સ્રુવં ચૈવ આવભૃથ્યં તથૈવ ચ ।
૧૭૯.૩૦/૨અવાક્પાણિસ્તુ યશ્ચક્રે હવ્યભાગભુજસ્તથા ॥ ૧૭૯.૩૦॥

૧૭૯.૩૧/૧હવ્યાદાંશ્ચ સુરાંશ્ચક્રે કવ્યાદાંશ્ચ પિતૄન્ અથ ।
૧૭૯.૩૧/૨ભોગાર્થે યજ્ઞવિધિનાઽયોજયદ્ યજ્ઞકર્મણિ ॥ ૧૭૯.૩૧॥

૧૭૯.૩૨/૧પાત્રાણિ દક્ષિણાં દીક્ષાં ચરૂંશ્ચોલૂખલાનિ ચ ।
૧૭૯.૩૨/૨યૂપં સમિત્ સ્રુવં સોમં પવિત્રાન્ પરિધીન્ અપિ ॥ ૧૭૯.૩૨॥

૧૭૯.૩૩/૧યજ્ઞિયાનિ ચ દ્રવ્યાણિ ચમસાંશ્ચ તથાપરાન્ ।
૧૭૯.૩૩/૨સદસ્યાન્ યજમાનાંશ્ચ મેધાદીંશ્ચ ક્રતૂત્તમાન્ ॥ ૧૭૯.૩૩॥

૧૭૯.૩૪/૧વિબભાજ પુરા યસ્તુ પારમેષ્ઠ્યેન કર્મણા ।
૧૭૯.૩૪/૨યુગાનુરૂપં યઃ કૃત્વા લોકાન્ અનુપરાક્રમાત્ ॥ ૧૭૯.૩૪॥

૧૭૯.૩૫/૧ક્ષણા નિમેષાઃ કાષ્ઠાશ્ચ કલાસ્ત્રૈકાલ્યમેવ ચ ।
૧૭૯.૩૫/૨મુહૂર્તાસ્તિથયો માસા દિનં સંવત્સરસ્તથા ॥ ૧૭૯.૩૫॥

૧૭૯.૩૬/૧ઋતવઃ કાલયોગાશ્ચ પ્રમાણં ત્રિવિધં ત્રિષુ ।
૧૭૯.૩૬/૨આયુઃક્ષેત્રાણ્યુપચયો લક્ષણં રૂપસૌષ્ઠવમ્ ॥ ૧૭૯.૩૬॥

૧૭૯.૩૭/૧ત્રયો લોકાસ્ત્રયો દેવાસ્ત્રૈવિદ્યં પાવકાસ્ત્રયઃ ।
૧૭૯.૩૭/૨ત્રૈકાલ્યં ત્રીણિ કર્માણિ ત્રયો વર્ણાસ્ત્રયો ગુણાઃ ॥ ૧૭૯.૩૭॥

૧૭૯.૩૮/૧સૃષ્ટા લોકાઃ પુરા સર્વે યેનાનન્તેન કર્મણા ।
૧૭૯.૩૮/૨સર્વભૂતગતઃ સ્રષ્ટા સર્વભૂતગુણાત્મકઃ ॥ ૧૭૯.૩૮॥

૧૭૯.૩૯/૧નૃણામિન્દ્રિયપૂર્વેણ યોગેન રમતે ચ યઃ ।
૧૭૯.૩૯/૨ગતાગતાભ્યાં યોગેન ય એવ વિધિરીશ્વરઃ ॥ ૧૭૯.૩૯॥

૧૭૯.૪૦/૧યો ગતિર્ધર્મયુક્તાનામગતિઃ પાપકર્મણામ્ ।
૧૭૯.૪૦/૨ચાતુર્વર્ણ્યસ્ય પ્રભવશ્ચાતુર્વર્ણ્યસ્ય રક્ષિતા ॥ ૧૭૯.૪૦॥

૧૭૯.૪૧/૧ચાતુર્વિદ્યસ્ય યો વેત્તા ચાતુરાશ્રમ્યસંશ્રયઃ ।
૧૭૯.૪૧/૨દિગન્તરં નભો ભૂમિર્વાયુર્વાપિ વિભાવસુઃ ॥ ૧૭૯.૪૧॥

૧૭૯.૪૨/૧ચન્દ્રસૂર્યમયં જ્યોતિર્યુગેશઃ ક્ષણદાચરઃ ।
૧૭૯.૪૨/૨યઃ પરં શ્રૂયતે જ્યોતિર્યઃ પરં શ્રૂયતે તપઃ ॥ ૧૭૯.૪૨॥

૧૭૯.૪૩/૧યં પરં પ્રાહુરપરં યઃ પરઃ પરમાત્મવાન્ ।
૧૭૯.૪૩/૨આદિત્યાનાં તુ યો દેવો યશ્ચ દૈત્યાન્તકો વિભુઃ ॥ ૧૭૯.૪૩॥

૧૭૯.૪૪/૧યુગાન્તેષ્વન્તકો યશ્ચ યશ્ચ લોકાન્તકાન્તકઃ ।
૧૭૯.૪૪/૨સેતુર્યો લોકસેતૂનાં મેધ્યો યો મેધ્યકર્મણામ્ ॥ ૧૭૯.૪૪॥

૧૭૯.૪૫/૧વેદ્યો યો વેદવિદુષાં પ્રભુર્યઃ પ્રભવાત્મનામ્ ।
૧૭૯.૪૫/૨સોમભૂતશ્ચ સૌમ્યાનામગ્નિભૂતોઽગ્નિવર્ચસામ્ ॥ ૧૭૯.૪૫॥

૧૭૯.૪૬/૧યઃ શક્રાણામીશભૂતસ્તપોભૂતસ્તપસ્વિનામ્ ।
૧૭૯.૪૬/૨વિનયો નયવૃત્તીનાં તેજસ્તેજસ્વિનામપિ ॥ ૧૭૯.૪૬॥

૧૭૯.૪૭/૧વિગ્રહો વિગ્રહાર્હાણાં ગતિર્ગતિમતામપિ ।
૧૭૯.૪૭/૨આકાશપ્રભવો વાયુર્વાયોઃ પ્રાણાદ્ ધુતાશનઃ ॥ ૧૭૯.૪૭॥

૧૭૯.૪૮/૧દિવો હુતાશનઃ પ્રાણઃ પ્રાણોઽગ્નિર્મધુસૂદનઃ ।
૧૭૯.૪૮/૨રસાચ્છોણિતસમ્ભૂતિઃ શોણિતાન્ માંસમુચ્યતે ॥ ૧૭૯.૪૮॥

૧૭૯.૪૯/૧માંસાત્ તુ મેદસો જન્મ મેદસોઽસ્થિ નિરુચ્યતે ।
૧૭૯.૪૯/૨અસ્થ્નો મજ્જા સમભવન્ મજ્જાતઃ શુક્રસમ્ભવઃ ॥ ૧૭૯.૪૯॥

૧૭૯.૫૦/૧શુક્રાદ્ ગર્ભઃ સમભવદ્ રસમૂલેન કર્મણા ।
૧૭૯.૫૦/૨તત્રાપાં પ્રથમો ભાગઃ સ સૌમ્યો રાશિરુચ્યતે ॥ ૧૭૯.૫૦॥

૧૭૯.૫૧/૧ગર્ભોષ્મસમ્ભવો જ્ઞેયો દ્વિતીયો રાશિરુચ્યતે ।
૧૭૯.૫૧/૨શુક્રં સોમાત્મકં વિદ્યાદ્ આર્તવં પાવકાત્મકમ્ ॥ ૧૭૯.૫૧॥

૧૭૯.૫૨/૧ભાવા રસાનુગાશ્ચૈષાં બીજે ચ શશિપાવકૌ ।
૧૭૯.૫૨/૨કફવર્ગે ભવેચ્છુક્રં પિત્તવર્ગે ચ શોણિતમ્ ॥ ૧૭૯.૫૨ ॥

૧૭૯.૫૩/૧કફસ્ય હૃદયં સ્થાનં નાભ્યાં પિત્તં પ્રતિષ્ઠિતમ્ ।
૧૭૯.૫૩/૨દેહસ્ય મધ્યે હૃદયં સ્થાનં તન્ મનસઃ સ્મૃતમ્ ॥ ૧૭૯.૫૩ ॥

૧૭૯.૫૪/૧નાભિકોષ્ઠાન્તરં યત્ તુ તત્ર દેવો હુતાશનઃ ।
૧૭૯.૫૪/૨મનઃ પ્રજાપતિર્જ્ઞેયઃ કફઃ સોમો વિભાવ્યતે ॥ ૧૭૯.૫૪ ॥

૧૭૯.૫૫/૧પિત્તમગ્નિઃ સ્મૃતં ત્વેવમગ્નિસોમાત્મકં જગત્ ।
૧૭૯.૫૫/૨એવં પ્રવર્તિતે ગર્ભે વર્ધિતેઽર્બુદસંનિભે ॥ ૧૭૯.૫૫ ॥

૧૭૯.૫૬/૧વાયુઃ પ્રવેશં સંચક્રે સંગતઃ પરમાત્મનઃ ।
૧૭૯.૫૬/૨સ પઞ્ચધા શરીરસ્થો ભિદ્યતે વર્તતે પુનઃ ॥ ૧૭૯.૫૬ ॥

૧૭૯.૫૭/૧પ્રાણાપાનૌ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
૧૭૯.૫૭/૨પ્રાણોઽસ્ય પરમાત્માનં વર્ધયન્ પરિવર્તતે ॥ ૧૭૯.૫૭ ॥

૧૭૯.૫૮/૧અપાનઃ પશ્ચિમં કાયમુદાનોઽર્ધ્વં શરીરિણઃ ।
૧૭૯.૫૮/૨વ્યાનસ્તુ વ્યાપ્યતે યેન સમાનઃ સંનિવર્તતે ॥ ૧૭૯.૫૮ ॥

૧૭૯.૫૯/૧ભૂતાવાપ્તિસ્તતસ્તસ્ય જાયેતેન્દ્રિયગોચરા ।
૧૭૯.૫૯/૨પૃથિવી વાયુરાકાશમાપો જ્યોતિશ્ચ પઞ્ચમમ્ ॥ ૧૭૯.૫૯ ॥

૧૭૯.૬૦/૧તસ્યેન્દ્રિયનિવિષ્ટાનિ સ્વં સ્વં ભાગં પ્રચક્રિરે ।
૧૭૯.૬૦/૨પાર્થિવં દેહમાહુસ્તુ પ્રાણાત્માનં ચ મારુતમ્ ॥ ૧૭૯.૬૦ ॥

૧૭૯.૬૧/૧છિદ્રાણ્યાકાશયોનીનિ જલાત્ સ્રાવઃ પ્રવર્તતે ।
૧૭૯.૬૧/૨જ્યોતિશ્ચક્ષૂંષિ તેજશ્ચ આત્મા તેષાં મનઃ સ્મૃતમ્ ॥ ૧૭૯.૬૧ ॥

૧૭૯.૬૨/૧ગ્રામાશ્ચ વિષયાશ્ચૈવ યસ્ય વીર્યાત્ પ્રવર્તિતાઃ ।
૧૭૯.૬૨/૨ઇત્યેતાન્ પુરુષઃ સર્વાન્ સૃજંલ્લોકાન્ સનાતનઃ ॥ ૧૭૯.૬૨ ॥

૧૭૯.૬૩/૧નૈધનેઽસ્મિન્ કથં લોકે નરત્વં વિષ્ણુરાગતઃ ।
૧૭૯.૬૩/૨એષ નઃ સંશયો બ્રહ્મન્ એષ નો વિસ્મયો મહાન્ ॥ ૧૭૯.૬૩ ॥

૧૭૯.૬૪/૧કથં ગતિર્ગતિમતામાપન્નો માનુષીં તનુમ્ ।
૧૭૯.૬૪/૨આશ્ચર્યં પરમં વિષ્ણુર્દેવૈર્દૈત્યૈશ્ચ કથ્યતે ॥ ૧૭૯.૬૪ ॥

૧૭૯.૬૫/૧વિષ્ણોરુત્પત્તિમાશ્ચર્યં કથયસ્વ મહામુને ।

૧૭૯.૬૫/૨પ્રખ્યાતબલવીર્યસ્ય વિષ્ણોરમિતતેજસઃ ॥ ૧૭૯.૬૫ ॥

૧૭૯.૬૬/૧કર્મણાશ્ચર્યભૂતસ્ય વિષ્ણોસ્તત્ત્વમિહોચ્યતામ્ ।
૧૭૯.૬૬/૨કથં સ દેવો દેવાનામાર્તિહા પુરુષોત્તમઃ ॥ ૧૭૯.૬૬ ॥

૧૭૯.૬૭/૧સર્વવ્યાપી જગન્નાથઃ સર્વલોકમહેશ્વરઃ ।
૧૭૯.૬૭/૨સર્ગસ્થિત્યન્તકૃદ્ દેવઃ સર્વલોકસુખાવહઃ ॥ ૧૭૯.૬૭ ॥

૧૭૯.૬૮/૧અક્ષયઃ શાશ્વતોऽનન્તઃ ક્ષયવૃદ્ધિવિવર્જિતઃ ।
૧૭૯.૬૮/૨નિર્લેપો નિર્ગુણઃ સૂક્ષ્મો નિર્વિકારો નિરઞ્જનઃ ॥ ૧૭૯.૬૮ ॥

૧૭૯.૬૯/૧સર્વોપાધિવિનિર્મુક્તઃ સત્તામાત્રવ્યવસ્થિતઃ ।
૧૭૯.૬૯/૨અવિકારી વિભુર્નિત્યઃ પરમાત્મા સનાતનઃ ॥ ૧૭૯.૬૯ ॥

૧૭૯.૭૦/૧અચલો નિર્મલો વ્યાપી નિત્યતૃપ્તો નિરાશ્રયઃ ।
૧૭૯.૭૦/૨વિશુદ્ધં શ્રૂયતે યસ્ય હરિત્વં ચ કૃતે યુગે ॥ ૧૭૯.૭૦ ॥

૧૭૯.૭૧/૧વૈકુણ્ઠત્વં ચ દેવેષુ કૃષ્ણત્વં માનુષેષુ ચ ।
૧૭૯.૭૧/૨ઈશ્વરસ્ય હિ તસ્યેમાં ગહનાં કર્મણો ગતિમ્ ॥ ૧૭૯.૭૧ ॥

૧૭૯.૭૨/૧સમતીતાં ભવિષ્યં ચ શ્રોતુમિચ્છા પ્રવર્તતે ।
૧૭૯.૭૨/૨અવ્યક્તો વ્યક્તલિઙ્ગસ્થો ય એષ ભગવાન્ પ્રભુઃ ॥ ૧૭૯.૭૨ ॥

૧૭૯.૭૩/૧નારાયણો હ્યનન્તાત્મા પ્રભવોऽવ્યય એવ ચ ।
૧૭૯.૭૩/૨એષ નારાયણો ભૂત્વા હરિરાસીત્ સનાતનઃ ॥ ૧૭૯.૭૩ ॥

૧૭૯.૭૪/૧બ્રહ્મા શક્રશ્ચ રુદ્રશ્ચ ધર્મઃ શુક્રો બૃહસ્પતિઃ ।
૧૭૯.૭૪/૨પ્રધાનાત્મા પુરા હ્યેષ બ્રહ્માણમસૃજત્ પ્રભુઃ ॥ ૧૭૯.૭૪ ॥

૧૭૯.૭૫/૧સોऽસૃજત્ પૂર્વપુરુષઃ પુરા કલ્પે પ્રજાપતીન્ ।
૧૭૯.૭૫/૨એવં સ ભગવાન્ વિષ્ણુઃ સર્વલોકમહેશ્વરઃ ।
૧૭૯.૭૫/૩કિમર્થં મર્ત્યલોકેऽસ્મિન્ યાતો યદુકુલે હરિઃ ॥ ૧૭૯.૭૫ ॥

૧૮૦.૧/૧વ્યાસ ઉવાચ । નમસ્કૃત્વા સુરેશાય વિષ્ણવે પ્રભવિષ્ણવે ।
૧૮૦.૧/૨પુરુષાય પુરાણાય શાશ્વતાયાવ્યયાય ચ ॥ ૧૮૦.૧ ॥

૧૮૦.૨/૧ચતુર્વ્યૂહાત્મને તસ્મૈ નિર્ગુણાય ગુણાય ચ ।
૧૮૦.૨/૨વરિષ્ઠાય ગરિષ્ઠાય વરેણ્યાયામિતાય ચ ॥ ૧૮૦.૨ ॥

૧૮૦.૩/૧યજ્ઞાઙ્ગાયાખિલાઙ્ગાય દેવાદ્યૈરીપ્સિતાય ચ ।
૧૮૦.૩/૨યસ્માદ્ અણુતરં નાસ્તિ યસ્માન્ નાસ્તિ બૃહત્તરમ્ ॥ ૧૮૦.૩ ॥

૧૮૦.૪/૧યેન વિશ્વમિદં વ્યાપ્તમજેન સચરાચરમ્ ।
૧૮૦.૪/૨આવિર્ભાવતિરોભાવ+ । દૃષ્ટાદૃષ્ટવિલક્ષણમ્ ॥ ૧૮૦.૪ ॥

૧૮૦.૫/૧વદન્તિ યત્ સૃષ્ટમિતિ તથૈવાપ્યુપસંહૃતમ્ ।
૧૮૦.૫/૨બ્રહ્મણે ચાદિદેવાય નમસ્કૃત્ય સમાધિના ॥ ૧૮૦.૫ ॥

૧૮૦.૬/૧અવિકારાય શુદ્ધાય નિત્યાય પરમાત્મને ।
૧૮૦.૬/૨સદૈકરૂપરૂપાય જિષ્ણવે વિષ્ણવે નમઃ ॥ ૧૮૦.૬ ॥

૧૮૦.૭/૧નમો હિરણ્યગર્ભાય હરયે શંકરાય ચ ।
૧૮૦.૭/૨વાસુદેવાય તારાય સર્ગસ્થિત્યન્તકારિણે ॥ ૧૮૦.૭ ॥

૧૮૦.૮/૧એકાનેકસ્વરૂપાય સ્થૂલસૂક્ષ્માત્મને નમઃ ।
૧૮૦.૮/૨અવ્યક્તવ્યક્તભૂતાય વિષ્ણવે મુક્તિહેતવે ॥ ૧૮૦.૮ ॥

૧૮૦.૯/૧સર્ગસ્થિતિવિનાશાનાં જગતો યો જગન્મયઃ ।
૧૮૦.૯/૨મૂલભૂતો નમસ્તસ્મૈ વિષ્ણવે પરમાત્મને ॥ ૧૮૦.૯ ॥

૧૮૦.૧૦/૧આધારભૂતં વિશ્વસ્યાપ્યણીયાંસમણીયસામ્ ।
૧૮૦.૧૦/૨પ્રણમ્ય સર્વભૂતસ્થમચ્યુતં પુરુષોત્તમમ્ ॥ ૧૮૦.૧૦ ॥

૧૮૦.૧૧/૧જ્ઞાનસ્વરૂપમત્યન્તં નિર્મલં પરમાર્થતઃ ।
૧૮૦.૧૧/૨તમેવાર્થસ્વરૂપેણ ભ્રાન્તિદર્શનતઃ સ્થિતમ્ ॥ ૧૮૦.૧૧ ॥

૧૮૦.૧૨/૧વિષ્ણું ગ્રસિષ્ણું વિશ્વસ્ય સ્થિતિસર્ગે તથા પ્રભુમ્ ।
૧૮૦.૧૨/૨અનાદિં જગતામીશમજમક્ષયમવ્યયમ્ ॥ ૧૮૦.૧૨ ॥

૧૮૦.૧૩/૧કથયામિ યથા પૂર્વં યક્ષાદ્યૈર્મુનિસત્તમૈઃ ।
૧૮૦.૧૩/૨પૃષ્ટઃ પ્રોવાચ ભગવાન્ અબ્જયોનિઃ પિતામહઃ ॥ ૧૮૦.૧૩ ॥

૧૮૦.૧૪/૧ઋક્સામાન્યુદ્ગિરન્ વક્ત્રૈર્યઃ પુનાતિ જગત્ત્રયમ્ ।
૧૮૦.૧૪/૨પ્રણિપત્ય તથેશાનમેકાર્ણવવિનિર્ગતમ્ ॥ ૧૮૦.૧૪ ॥

૧૮૦.૧૫/૧યસ્યાસુરગણા યજ્ઞાન્ વિલુમ્પન્તિ ન યાજિનામ્ ।
૧૮૦.૧૫/૨પ્રવક્ષ્યામિ મતં કૃત્સ્નં બ્રહ્મણોઽવ્યક્તજન્મનઃ ॥ ૧૮૦.૧૫ ॥

૧૮૦.૧૬/૧યેન સૃષ્ટિં સમુદ્દિશ્ય ધર્માદ્યાઃ પ્રકટીકૃતાઃ ।
૧૮૦.૧૬/૨આપો નારા ઇતિ પ્રોક્તા મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૧૮૦.૧૬ ॥

૧૮૦.૧૭/૧અયનં તસ્ય તાઃ પૂર્વં તેન નારાયણઃ સ્મૃતઃ ।

૧૮૦.૧૭/૨સ દેવો ભગવાન્ સર્વં વ્યાપ્ય નારાયણો વિભુઃ ॥ ૧૮૦.૧૭ ॥

૧૮૦.૧૮/૧ચતુર્ધા સંસ્થિતો બ્રહ્મા સગુણો નિર્ગુણસ્તથા ।
૧૮૦.૧૮/૨એકા મૂર્તિરનુદ્દેશ્યા શુક્લાં પશ્યન્તિ તાં બુધાઃ ॥ ૧૮૦.૧૮ ॥

૧૮૦.૧૯/૧જ્વાલામાલાવનદ્ધાઙ્ગી નિષ્ઠા સા યોગિનાં પરા ।
૧૮૦.૧૯/૨દૂરસ્થા ચાન્તિકસ્થા ચ વિજ્ઞેયા સા ગુણાતિગા ॥ ૧૮૦.૧૯ ॥

૧૮૦.૨૦/૧વાસુદેવાભિધાનાસૌ નિર્મમત્વેન દૃશ્યતે ।
૧૮૦.૨૦/૨રૂપવર્ણાદયસ્તસ્યા ન ભાવાઃ કલ્પનામયાઃ ॥ ૧૮૦.૨૦ ॥

૧૮૦.૨૧/૧આસ્તે ચ સા સદા શુદ્ધા સુપ્રતિષ્ઠૈકરૂપિણી ।
૧૮૦.૨૧/૨દ્વિતીયા પૃથિવીં મૂર્ધ્ના શેષાખ્યા ધારયત્યધઃ ॥ ૧૮૦.૨૧ ॥

૧૮૦.૨૨/૧તામસી સા સમાખ્યાતા તિર્યક્ત્વં સમુપાગતા ।
૧૮૦.૨૨/૨તૃતીયા કર્મ કુરુતે પ્રજાપાલનતત્પરા ॥ ૧૮૦.૨૨ ॥

૧૮૦.૨૩/૧સત્ત્વોદ્રિક્તા તુ સા જ્ઞેયા ધર્મસંસ્થાનકારિણી ।
૧૮૦.૨૩/૨ચતુર્થી જલમધ્યસ્થા શેતે પન્નગતલ્પગા ॥ ૧૮૦.૨૩ ॥

૧૮૦.૨૪/૧રજસ્તસ્યા ગુણઃ સર્ગં સા કરોતિ સદૈવ હિ ।
૧૮૦.૨૪/૨યા તૃતીયા હરેર્મૂર્તિઃ પ્રજાપાલનતત્પરા ॥ ૧૮૦.૨૪ ॥

૧૮૦.૨૫/૧સા તુ ધર્મવ્યવસ્થાનં કરોતિ નિયતં ભુવિ ।
૧૮૦.૨૫/૨પ્રોદ્ધતાન્ અસુરાન્ હન્તિ ધર્મવ્યુચ્છિત્તિકારિણઃ ॥ ૧૮૦.૨૫ ॥

૧૮૦.૨૬/૧પાતિ દેવાન્ સગન્ધર્વાન્ ધર્મરક્ષાપરાયણાન્ ।
૧૮૦.૨૬/૨યદા યદા ચ ધર્મસ્ય ગ્લાનિઃ સમુપજાયતે ॥ ૧૮૦.૨૬ ॥

૧૮૦.૨૭/૧અભ્યુત્થાનમધર્મસ્ય તદાત્માનં સૃજત્યસૌ ।
૧૮૦.૨૭/૨ભૂત્વા પુરા વરાહેણ તુણ્ડેનાપો નિરસ્ય ચ ॥ ૧૮૦.૨૭ ॥

૧૮૦.૨૮/૧એકયા દંષ્ટ્રયોત્ખાતા નલિનીવ વસુંધરા ।
૧૮૦.૨૮/૨કૃત્વા નૃસિંહરૂપં ચ હિરણ્યકશિપુર્હતઃ ॥ ૧૮૦.૨૮ ॥

૧૮૦.૨૯/૧વિપ્રચિત્તિમુખાશ્ચાન્યે દાનવા વિનિપાતિતાઃ ।
૧૮૦.૨૯/૨વામનં રૂપમાસ્થાય બલિં સંયમ્ય માયયા ॥ ૧૮૦.૨૯ ॥

૧૮૦.૩૦/૧ત્રૈલોક્યં ક્રાન્તવાન્ એવ વિનિર્જિત્ય દિતેઃ સુતાન્ ।
૧૮૦.૩૦/૨ભૃગોર્વંશે સમુત્પન્નો જામદગ્ન્યઃ પ્રતાપવાન્ ॥ ૧૮૦.૩૦ ॥

૧૮૦.૩૧/૧જઘાન ક્ષત્રિયાન્ રામઃ પિતુર્વધમનુસ્મરન્ ।
૧૮૦.૩૧/૨તથાત્રિતનયો ભૂત્વા દત્તાત્રેયઃ પ્રતાપવાન્ ॥ ૧૮૦.૩૧॥

૧૮૦.૩૨/૧યોગમષ્ટાઙ્ગમાચખ્યાવલર્કાય મહાત્મને ।
૧૮૦.૩૨/૨રામો દાશરથિર્ભૂત્વા સ તુ દેવઃ પ્રતાપવાન્ ॥ ૧૮૦.૩૨॥

૧૮૦.૩૩/૧જઘાન રાવણં સંખ્યે ત્રૈલોક્યસ્ય ભયંકરમ્ ।
૧૮૦.૩૩/૨યદા ચૈકાર્ણવે સુપ્તો દેવદેવો જગત્પતિઃ ॥ ૧૮૦.૩૩॥

૧૮૦.૩૪/૧સહસ્રયુગપર્યન્તં નાગપર્યઙ્કગો વિભુઃ ।
૧૮૦.૩૪/૨યોગનિદ્રાં સમાસ્થાય સ્વે મહિમ્નિ વ્યવસ્થિતઃ ॥ ૧૮૦.૩૪॥

૧૮૦.૩૫/૧ત્રૈલોક્યમુદરે કૃત્વા જગત્ સ્થાવરજઙ્ગમમ્ ।
૧૮૦.૩૫/૨જનલોકગતૈઃ સિદ્ધૈઃ સ્તૂયમાનો મહર્ષિભિઃ ॥ ૧૮૦.૩૫॥

૧૮૦.૩૬/૧તસ્ય નાભૌ સમુત્પન્નં પદ્મં દિક્પત્રમણ્ડિતમ્ ।
૧૮૦.૩૬/૨મરુત્કિઞ્જલ્કસંયુક્તં ગૃહં પૈતામહં વરમ્ ॥ ૧૮૦.૩૬॥

૧૮૦.૩૭/૧યત્ર બ્રહ્મા સમુત્પન્નો દેવદેવશ્ચતુર્મુખઃ ।
૧૮૦.૩૭/૨તદા કર્ણમલોદ્ભૂતૌ દાનવૌ મધુકૈટભૌ ॥ ૧૮૦.૩૭॥

૧૮૦.૩૮/૧મહાબલૌ મહાવીર્યૌ બ્રહ્માણં હન્તુમુદ્યતૌ ।
૧૮૦.૩૮/૨જઘાન તૌ દુરાધર્ષૌ ઉત્થાય શયનોદધેઃ ॥ ૧૮૦.૩૮॥

૧૮૦.૩૯/૧એવમાદીંસ્તથૈવાન્યાન્ અસંખ્યાતુમિહોત્સહે ।
૧૮૦.૩૯/૨અવતારો હ્યજસ્યેહ માથુરઃ સામ્પ્રતસ્ત્વયમ્ ॥ ૧૮૦.૩૯॥

૧૮૦.૪૦/૧ઇતિ સા સાત્ત્વિકી મૂર્તિરવતારં કરોતિ ચ ।
૧૮૦.૪૦/૨પ્રદ્યુમ્નેતિ સમાખ્યાતા રક્ષાકર્મણ્યવસ્થિતા ॥ ૧૮૦.૪૦॥

૧૮૦.૪૧/૧દેવત્વેઽથ મનુષ્યત્વે તિર્યગ્યોનૌ ચ સંસ્થિતા ।
૧૮૦.૪૧/૨ગૃહ્ણાતિ તત્સ્વભાવશ્ચ વાસુદેવેચ્છયા સદા ॥ ૧૮૦.૪૧॥

૧૮૦.૪૨/૧દદાત્યભિમતાન્ કામાન્ પૂજિતા સા દ્વિજોત્તમાઃ ।
૧૮૦.૪૨/૨એવં મયા સમાખ્યાતઃ કૃતકૃત્યોઽપિ યઃ પ્રભુઃ ।
૧૮૦.૪૨/૩માનુષત્વં ગતો વિષ્ણુઃ શ્ૃણુધ્વં ચોત્તરં પુનઃ ॥ ૧૮૦.૪૨॥

૧૮૧.૧/૧વ્યાસ ઉવાચ । શ્ૃણુધ્વં મુનિશાર્દૂલાઃ પ્રવક્ષ્યામિ સમાસતઃ ।
૧૮૧.૧/૨અવતારં હરેશ્ચાત્ર ભારાવતરણેચ્છયા ॥ ૧૮૧.૧॥

૧૮૧.૨/૧યદા યદા ત્વધર્મસ્ય વૃદ્ધિર્ભવતિ ભો દ્વિજાઃ ।

૧૮૧.૨/૨ધર્મશ્ચ હ્રાસમભ્યેતિ તદા દેવો જનાર્દનઃ ॥ ૧૮૧.૨॥

૧૮૧.3/૧અવતારં કરોત્યત્ર દ્વિધા કૃત્વાત્મનસ્તનુમ્ ।
૧૮૧.3/૨સાધૂનાં રક્ષણાર્થાય ધર્મસંસ્થાપનાય ચ ॥ ૧૮૧.૩॥

૧૮૧.૪/૧દુષ્ટાનાં નિગ્રહાર્થાય અન્યેષાં ચ સુરદ્વિષામ્ ।
૧૮૧.૪/૨પ્રજાનાં રક્ષણાર્થાય જાયતેઽસૌ યુગે યુગે ॥ ૧૮૧.૪॥

૧૮૧.૫/૧પુરા કિલ મહી વિપ્રા ભૂરિભારાવપીડિતા ।
૧૮૧.૫/૨જગામ ધરણી મેરૌ સમાજે ત્રિદિવૌકસામ્ ॥ ૧૮૧.૫॥

૧૮૧.૬/૧સબ્રહ્મકાન્ સુરાન્ સર્વાન્ પ્રણિપત્યાથ મેદિની ।
૧૮૧.૬/૨કથયામાસ તત્ સર્વં ખેદાત્ કરુણભાષિણી ॥ ૧૮૧.૬॥

૧૮૧.૭/૧ધરણ્યુવાચ । અગ્નિઃ સુવર્ણસ્ય ગુરુર્ગવાં સૂર્યોઽપરો ગુરુઃ ।
૧૮૧.૭/૨મમાપ્યખિલલોકાનાં વન્દ્યો નારાયણો ગુરુઃ ॥ ૧૮૧.૭॥

૧૮૧.૮/૧તત્સામ્પ્રતમિમે દૈત્યાઃ કાલનેમિપુરોગમાઃ ।
૧૮૧.૮/૨મર્ત્યલોકં સમાગમ્ય બાધન્તેઽહર્નિશં પ્રજાઃ ॥ ૧૮૧.૮॥

૧૮૧.૯/૧કાલનેમિર્હતો યોઽસૌ વિષ્ણુના પ્રભવિષ્ણુના ।
૧૮૧.૯/૨ઉગ્રસેનસુતઃ કંસઃ સમ્ભૂતઃ સુમહાસુરઃ ॥ ૧૮૧.૯॥

૧૮૧.૧૦/૧અરિષ્ટો ધેનુકઃ કેશી પ્રલમ્બો નરકસ્તથા ।
૧૮૧.૧૦/૨સુન્દોઽસુરસ્તથાત્યુગ્રો બાણશ્ચાપિ બલેઃ સુતઃ ॥ ૧૮૧.૧૦॥

૧૮૧.૧૧/૧તથાન્યે ચ મહાવીર્યા નૃપાણાં ભવનેષુ યે ।
૧૮૧.૧૧/૨સમુત્પન્ના દુરાત્માનસ્તાન્ ન સંખ્યાતુમુત્સહે ॥ ૧૮૧.૧૧॥

૧૮૧.૧૨/૧અક્ષૌહિણ્યો હિ બહુલા દિવ્યમૂર્તિધૃતાઃ સુરાઃ ।
૧૮૧.૧૨/૨મહાબલાનાં દૃપ્તાનાં દૈત્યેન્દ્રાણાં મમોપરિ ॥ ૧૮૧.૧૨॥

૧૮૧.૧૩/૧તદ્ભૂરિભારપીડાર્તા ન શક્નોમ્યમરેશ્વરાઃ ।
૧૮૧.૧૩/૨વિભર્તુમાત્માનમહમિતિ વિજ્ઞાપયામિ વઃ ॥ ૧૮૧.૧૩॥

૧૮૧.૧૪/૧ક્રિયતાં તન્ મહાભાગા મમ ભારાવતારણમ્ ।
૧૮૧.૧૪/૨યથા રસાતલં નાહં ગચ્છેયમતિવિહ્વલા ॥ ૧૮૧.૧૪॥

૧૮૧.૧૫/૧વ્યાસ ઉવાચ । ઇત્યાકર્ણ્ય ધરાવાક્યમશેષૈસ્ત્રિદશૈસ્તતઃ ।
૧૮૧.૧૫/૨ભુવો ભારાવતારાર્થં બ્રહ્મા પ્રાહ ચ ચોદિતઃ ॥ ૧૮૧.૧૫॥

૧૮૧.૧૬/૧બ્રહ્મોવાચ । યદ્ આહ વસુધા સર્વં સત્યમેતદ્ દિવૌકસઃ ।
૧૮૧.૧૬/૨અહં ભવો ભવન્તશ્ચ સર્વં નારાયણાત્મકમ્ ॥ ૧૮૧.૧૬॥

૧૮૧.૧૭/૧વિભૂતયસ્તુ યાસ્તસ્ય તાસામેવ પરસ્પરમ્ ।
૧૮૧.૧૭/૨આધિક્યં ન્યૂનતા બાધ્ય+ ।બાધકત્વેન વર્તતે ॥ ૧૮૧.૧૭॥

૧૮૧.૧૮/૧તદ્ આગચ્છત ગચ્છામઃ ક્ષીરાબ્ધેસ્તટમુત્તમમ્ ।
૧૮૧.૧૮/૨તત્રારાધ્ય હરિં તસ્મૈ સર્વં વિજ્ઞાપયામ વૈ ॥ ૧૮૧.૧૮॥

૧૮૧.૧૯/૧સર્વદૈવ જગત્યર્થે સ સર્વાત્મા જગન્મયઃ ।
૧૮૧.૧૯/૨સ્વલ્પાંશેનાવતીર્યોર્વ્યાં ધર્મસ્ય કુરુતે સ્થિતિમ્ ॥ ૧૮૧.૧૯॥

૧૮૧.૨૦/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા પ્રયયૌ તત્ર સહ દેવૈઃ પિતામહઃ ।
૧૮૧.૨૦/૨સમાહિતમના ભૂત્વા તુષ્ટાવ ગરુડધ્વજમ્ ॥ ૧૮૧.૨૦॥

૧૮૧.૨૧/૧બ્રહ્મોવાચ । નમો નમસ્તેઽસ્તુ સહસ્રમૂર્તે ।
૧૮૧.૨૧/૨સહસ્રબાહો બહુવક્ત્રપાદ ।
૧૮૧.૨૧/૩નમો નમસ્તે જગતઃ પ્રવૃત્તિ+ ।
૧૮૧.૨૧/૪વિનાશસંસ્થાનપરાપ્રમેય ॥ ૧૮૧.૨૧॥

૧૮૧.૨૨/૧સૂક્ષ્માતિસૂક્ષ્મં ચ બૃહત્પ્રમાણમ્ ।
૧૮૧.૨૨/૨ગરીયસામપ્યતિગૌરવાત્મન્ ।
૧૮૧.૨૨/૩પ્રધાનબુદ્ધીન્દ્રિયવાક્પ્રધાન+ ।
૧૮૧.૨૨/૪મૂલાપરાત્મન્ ભગવન્ પ્રસીદ ॥ ૧૮૧.૨૨॥

૧૮૧.૨૩/૧એષા મહી દેવ મહીપ્રસૂતૈર્।
૧૮૧.૨૩/૨મહાસુરૈઃ પીડિતશૈલબન્ધા ।
૧૮૧.૨૩/૩પરાયણં ત્વાં જગતામુપૈતિ ।
૧૮૧.૨૩/૪ભારાવતારાર્થમપારપારમ્ ॥ ૧૮૧.૨૩॥

૧૮૧.૨૪/૧એતે વયં વૃત્રરિપુસ્તથાયમ્ ।
૧૮૧.૨૪/૨નાસત્યદસ્રૌ વરુણસ્તથૈષઃ ।
૧૮૧.૨૪/૩ઇમે ચ રુદ્રા વસવઃ સસૂર્યાઃ ।
૧૮૧.૨૪/૪સમીરણાગ્નિપ્રમુખાસ્તથાન્યે ॥ ૧૮૧.૨૪॥

૧૮૧.૨૫/૧સુરાઃ સમસ્તાઃ સુરનાથ કાર્યમ્ ।
૧૮૧.૨૫/૨એભિર્મયા યચ્ચ તદ્ ઈશ સર્વમ્ ।
૧૮૧.૨૫/૩આજ્ઞાપયાજ્ઞાં પ્રતિપાલયન્તસ્- ।

૧૮૧.૨૫/૪તવૈવ તિષ્ઠામ સદાસ્તદોષાઃ ॥ ૧૮૧.૨૫ ॥

૧૮૧.૨૬/૧વ્યાસ ઉવાચ । એવં સંસ્તૂયમાનસ્તુ ભગવાન્ પરમેશ્વરઃ ।
૧૮૧.૨૬/૨ઉજ્જહારાત્મનઃ કેશૌ સિતકૃષ્ણૌ દ્વિજોત્તમાઃ ॥ ૧૮૧.૨૬ ॥

૧૮૧.૨૭/૧ઉવાચ ચ સુરાન્ એતૌ મત્કેશૌ વસુધાતલે ।
૧૮૧.૨૭/૨અવતીર્ય ભુવો ભાર+ । ક્લેશહાનિં કરિષ્યતઃ ॥ ૧૮૧.૨૭ ॥

૧૮૧.૨૮/૧સુરાશ્ચ સકલાઃ સ્વાંશૈરવતીર્ય મહીતલે ।
૧૮૧.૨૮/૨કુર્વન્તુ યુદ્ધમુન્મત્તૈઃ પૂર્વોત્પન્નૈર્મહાસુરૈઃ ॥ ૧૮૧.૨૮ ॥

૧૮૧.૨૯/૧તતઃ ક્ષયમશેષાસ્તે દૈતેયા ધરણીતલે ।
૧૮૧.૨૯/૨પ્રયાસ્યન્તિ ન સંદેહો નાનાયુધવિચૂર્ણિતાઃ ॥ ૧૮૧.૨૯ ॥

૧૮૧.૩૦/૧વસુદેવસ્ય યા પત્ની દેવકી દેવતોપમા ।
૧૮૧.૩૦/૨તસ્યા ગર્ભોઽષ્ટમોઽયં તુ મત્કેશો ભવિતા સુરાઃ ॥ ૧૮૧.૩૦ ॥

૧૮૧.૩૧/૧અવતીર્ય ચ તત્રાયં કંસં ઘાતયિતા ભુવિ ।
૧૮૧.૩૧/૨કાલનેમિસમુદ્ભૂતમિત્યુક્ત્વાન્તર્દધે હરિઃ ॥ ૧૮૧.૩૧ ॥

૧૮૧.૩૨/૧અદૃશ્યાય તતસ્તેઽપિ પ્રણિપત્ય મહાત્મને ।
૧૮૧.૩૨/૨મેરુપૃષ્ઠં સુરા જગ્મુરવતેરુશ્ચ ભૂતલે ॥ ૧૮૧.૩૨ ॥

૧૮૧.૩૩/૧કંસાય ચાષ્ટમો ગર્ભો દેવક્યા ધરણીતલે ।
૧૮૧.૩૩/૨ભવિષ્યતીત્યાચચક્ષે ભગવાન્ નારદો મુનિઃ ॥ ૧૮૧.૩૩ ॥

૧૮૧.૩૪/૧કંસોઽપિ તદ્ ઉપશ્રુત્ય નારદાત્ કુપિતસ્તતઃ ।
૧૮૧.૩૪/૨દેવકીં વસુદેવં ચ ગૃહે ગુપ્તાવધારયત્ ॥ ૧૮૧.૩૪ ॥

૧૮૧.૩૫/૧જાતં જાતં ચ કંસાય તેનૈવોક્તં યથા પુરા ।
૧૮૧.૩૫/૨તથૈવ વસુદેવોઽપિ પુત્રમર્પિતવાન્ દ્વિજાઃ ॥ ૧૮૧.૩૫ ॥

૧૮૧.૩૬/૧હિરણ્યકશિપોઃ પુત્રાઃ ષડ્ગર્ભા ઇતિ વિશ્રુતાઃ ।
૧૮૧.૩૬/૨વિષ્ણુપ્રયુક્તા તાન્ નિદ્રા ક્રમાદ્ ગર્ભે ન્યયોજયત્ ॥ ૧૮૧.૩૬ ॥

૧૮૧.૩૭/૧યોગનિદ્રા મહામાયા વૈષ્ણવી મોહિતં યયા ।
૧૮૧.૩૭/૨અવિદ્યયા જગત્ સર્વં તામાહ ભગવાન્ હરિઃ ॥ ૧૮૧.૩૭ ॥

૧૮૧.૩૮/૧વિષ્ણુરુવાચ । ગચ્છ નિદ્રે મમાદેશાત્ પાતાલતલસંશ્રયાન્ ।
૧૮૧.૩૮/૨એકૈકશ્યેન ષડ્ગર્ભાન્ દેવકીજઠરે નય ॥ ૧૮૧.૩૮ ॥

૧૮૧.૩૯/૧હતેષુ તેષુ કંસેન શેષાખ્યોઽંશસ્તતોઽનઘઃ ।
૧૮૧.૩૯/૨અંશાંશેનોદરે તસ્યાઃ સપ્તમઃ સમ્ભવિષ્યતિ ॥ ૧૮૧.૩૯॥

૧૮૧.૪૦/૧ગોકુલે વસુદેવસ્ય ભાર્યા વૈ રોહિણી સ્થિતા ।
૧૮૧.૪૦/૨તસ્યાઃ પ્રસૂતિસમયે ગર્ભો નેયસ્ત્વયોદરમ્ ॥ ૧૮૧.૪૦॥

૧૮૧.૪૧/૧સપ્તમો ભોજરાજસ્ય ભયાદ્ રોધોપરોધતઃ ।
૧૮૧.૪૧/૨દેવક્યાઃ પતિતો ગર્ભ ઇતિ લોકો વદિષ્યતિ ॥ ૧૮૧.૪૧॥

૧૮૧.૪૨/૧ગર્ભસંકર્ષણાત્ સોઽથ લોકે સંકર્ષણેતિ વૈ ।
૧૮૧.૪૨/૨સંજ્ઞામવાપ્સ્યતે વીરઃ શ્વેતાદ્રિશિખરોપમઃ ॥ ૧૮૧.૪૨॥

૧૮૧.૪૩/૧તતોઽહં સમ્ભવિષ્યામિ દેવકીજઠરે શુભે ।
૧૮૧.૪૩/૨ગર્ભે ત્વયા યશોદાયા ગન્તવ્યમવિલમ્બિતમ્ ॥ ૧૮૧.૪૩॥

૧૮૧.૪૪/૧પ્રાવૃટ્કાલે ચ નભસિ કૃષ્ણાષ્ટમ્યામહં નિશિ ।
૧૮૧.૪૪/૨ઉત્પત્સ્યામિ નવમ્યાં ચ પ્રસૂતિં ત્વમવાપ્સ્યસિ ॥ ૧૮૧.૪૪॥

૧૮૧.૪૫/૧યશોદાશયને માં તુ દેવક્યાસ્ત્વામનિન્દિતે ।
૧૮૧.૪૫/૨મચ્છક્તિપ્રેરિતમતિર્વસુદેવો નયિષ્યતિ ॥ ૧૮૧.૪૫॥

૧૮૧.૪૬/૧કંસશ્ચ ત્વામુપાદાય દેવિ શૈલશિલાતલે ।
૧૮૧.૪૬/૨પ્રક્ષેપ્સ્યત્યન્તરિક્ષે ચ ત્વં સ્થાનં સમવાપ્સ્યસિ ॥ ૧૮૧.૪૬॥

૧૮૧.૪૭/૧તતસ્ત્વાં શતધા શક્રઃ પ્રણમ્ય મમ ગૌરવાત્ ।
૧૮૧.૪૭/૨પ્રણિપાતાનતશિરા ભગિનીત્વે ગ્રહીષ્યતિ ॥ ૧૮૧.૪૭॥

૧૮૧.૪૮/૧તતઃ શુમ્ભનિશુમ્ભાદીન્ હત્વા દૈત્યાન્ સહસ્રશઃ ।
૧૮૧.૪૮/૨સ્થાનૈરનેકૈઃ પૃથિવીમશેષાં મણ્ડયિષ્યસિ ॥ ૧૮૧.૪૮॥

૧૮૧.૪૯/૧ત્વં ભૂતિઃ સંનતિઃ કીર્તિઃ કાન્તિર્વૈ પૃથિવી ધૃતિઃ ।
૧૮૧.૪૯/૨લજ્જા પુષ્ટિરુષા યા ચ કાચિદ્ અન્યા ત્વમેવ સા ॥ ૧૮૧.૪૯॥

૧૮૧.૫૦/૧યે ત્વામાર્યેતિ દુર્ગેતિ વેદગર્ભેઽમ્બિકેતિ ચ ।
૧૮૧.૫૦/૨ભદ્રેતિ ભદ્રકાલીતિ ક્ષેમ્યા ક્ષેમંકરીતિ ચ ॥ ૧૮૧.૫૦॥

૧૮૧.૫૧/૧પ્રાતશ્ચૈવાપરાહ્ણે ચ સ્તોષ્યન્ત્યાનમ્રમૂર્તયઃ ।
૧૮૧.૫૧/૨તેષાં હિ વાઞ્છિતં સર્વં મત્પ્રસાદાદ્ ભવિષ્યતિ ॥ ૧૮૧.૫૧॥

૧૮૧.૫૨/૧સુરામાંસોપહારૈસ્તુ ભક્ષ્યભોજ્યૈશ્ચ પૂજિતા ।
૧૮૧.૫૨/૨નૃણામશેષકામાંસ્ત્વં પ્રસન્નાયાં પ્રદાસ્યસિ ॥ ૧૮૧.૫૨॥

૧૮૧.૫૩/૧તે સર્વે સર્વદા ભદ્રા મત્પ્રસાદાદ્ અસંશયમ્ ।
૧૮૧.૫૩/૨અસંદિગ્ધં ભવિષ્યન્તિ ગચ્છ દેવિ યથોદિતમ્ ॥ ૧૮૧.૫૩॥

૧૮૨.૧/૧વ્યાસ ઉવાચ । યથોક્તં સા જગદ્ધાત્રી દેવદેવેન વૈ પુરા ।
૧૮૨.૧/૨ષડ્ગર્ભગર્ભવિન્યાસં ચક્રે ચાન્યસ્ય કર્ષણમ્ ॥ ૧૮૨.૧॥

૧૮૨.૨/૧સપ્તમે રોહિણીં પ્રાપ્તે ગર્ભે ગર્ભે તતો હરિઃ ।
૧૮૨.૨/૨લોકત્રયોપકારાય દેવક્યાઃ પ્રવિવેશ વૈ ॥ ૧૮૨.૨॥

૧૮૨.૩/૧યોગનિદ્રા યશોદાયાસ્તસ્મિન્ન્ એવ તતો દિને ।
૧૮૨.૩/૨સમ્ભૂતા જઠરે તદ્વદ્ યથોક્તં પરમેષ્ઠિના ॥ ૧૮૨.૩॥

૧૮૨.૪/૧તતો ગ્રહગણઃ સમ્યક્ પ્રચચાર દિવિ દ્વિજાઃ ।
૧૮૨.૪/૨વિષ્ણોરંશે મહીં યાત ઋતવોઽપ્યભવગ્ શુભાઃ ॥ ૧૮૨.૪॥

૧૮૨.૫/૧નોત્સેહે દેવકીં દ્રષ્ટું કશ્ચિદ્ અપ્યતિતેજસા ।
૧૮૨.૫/૨જાજ્વલ્યમાનાં તાં દૃષ્ટ્વા મનાંસિ ક્ષોભમાયયુઃ ॥ ૧૮૨.૫॥

૧૮૨.૬/૧અદૃષ્ટાં પુરુષૈઃ સ્ત્રીભિર્દેવકીં દેવતાગણાઃ ।
૧૮૨.૬/૨બિભ્રાણાં વપુષા વિષ્ણું તુષ્ટુવુસ્તામહર્નિશમ્ ॥ ૧૮૨.૬॥

૧૮૨.૭/૧દેવા ઊચુઃ । ત્વં સ્વાહા ત્વં સ્વધા વિદ્યા સુધા ત્વં જ્યોતિરેવ ચ ।
૧૮૨.૭/૨ત્વં સર્વલોકરક્ષાર્થમવતીર્ણા મહીતલે ॥ ૧૮૨.૭॥

૧૮૨.૮/૧પ્રસીદ દેવિ સર્વસ્ય જગતસ્ત્વં શુભં કુરુ ।
૧૮૨.૮/૨પ્રીત્યર્થં ધારયેશાનં ધૃતં યેનાખિલં જગત્ ॥ ૧૮૨.૮॥

૧૮૨.૯/૧વ્યાસ ઉવાચ । એવં સંસ્તૂયમાના સા દેવૈર્દેવમધારયત્ ।
૧૮૨.૯/૨ગર્ભેણ પુણ્ડરીકાક્ષં જગતાં ત્રાણકારણમ્ ॥ ૧૮૨.૯॥

૧૮૨.૧૦/૧તતોઽખિલજગત્પદ્મ+ ।બોધાયાચ્યુતભાનુના ।
૧૮૨.૧૦/૨દેવક્યાઃ પૂર્વસંધ્યાયામાવિર્ભૂતં મહાત્મના ॥ ૧૮૨.૧૦॥

૧૮૨.૧૧/૧મધ્યરાત્રેઽખિલાધારે જાયમાને જનાર્દને ।
૧૮૨.૧૧/૨મન્દં જગર્જુર્જલદાઃ પુષ્પવૃષ્ટિમુચઃ સુરાઃ ॥ ૧૮૨.૧૧॥

૧૮૨.૧૨/૧ફુલ્લેન્દીવરપત્રાભં ચતુર્બાહુમુદીક્ષ્ય તમ્ ।
૧૮૨.૧૨/૨શ્રીવત્સવક્ષસં જાતં તુષ્ટાવાનકદુન્દુભિઃ ॥ ૧૮૨.૧૨॥

૧૮૨.૧૩/૧અભિષ્ટૂય ચ તં વાગ્ભિઃ પ્રસન્નાભિર્મહામતિઃ ।

૧૮૨.૧૩/૨વિજ્ઞાપયામાસ તદા કંસાદ્ ભીતો દ્વિજોત્તમાઃ ॥ ૧૮૨.૧૩॥

૧૮૨.૧૪/૧વસુદેવ ઉવાચ । જ્ઞાતોઽસિ દેવદેવેશ શઙ્ખચક્રગદાધર ।
૧૮૨.૧૪/૨દિવ્યં રૂપમિદં દેવ પ્રસાદેનોપસંહર ॥ ૧૮૨.૧૪॥

૧૮૨.૧૫/૧અદ્યૈવ દેવ કંસોઽયં કુરુતે મમ યાતનામ્ ।
૧૮૨.૧૫/૨અવતીર્ણમિતિ જ્ઞાત્વા ત્વામસ્મિન્ મન્દિરે મમ ॥ ૧૮૨.૧૫॥

૧૮૨.૧૬/૧દેવક્યુવાચ । યોઽનન્તરૂપોઽખિલવિશ્વરૂપો ।
૧૮૨.૧૬/૨ગર્ભેઽપિ લોકાન્ વપુષા બિભર્તિ ।
૧૮૨.૧૬/૩પ્રસીદતામેષ સ દેવદેવઃ ।
૧૮૨.૧૬/૪સ્વમાયયાવિષ્કૃતબાલરૂપઃ ॥ ૧૮૨.૧૬॥

૧૮૨.૧૭/૧ઉપસંહર સર્વાત્મન્ રૂપમેતચ્ચતુર્ભુજમ્ ।
૧૮૨.૧૭/૨જાનાતુ માવતારં તે કંસોઽયં દિતિજાન્તક ॥ ૧૮૨.૧૭॥

૧૮૨.૧૮/૧શ્રીભગવાન્ ઉવાચ । સ્તુતોઽહં યત્ ત્વયા પૂર્વં પુત્રાર્થિન્યા તદ્ અદ્ય તે ।
૧૮૨.૧૮/૨સફલં દેવિ સંજાતં જાતોઽહં યત્ તવોદરાત્ ॥ ૧૮૨.૧૮॥

૧૮૨.૧૯/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા ભગવાંસ્તૂષ્ણીં બભૂવ મુનિસત્તમાઃ ।
૧૮૨.૧૯/૨વસુદેવોઽપિ તં રાત્રાવાદાય પ્રયયૌ બહિઃ ॥ ૧૮૨.૧૯॥

૧૮૨.૨૦/૧મોહિતાશ્ચાભવંસ્તત્ર રક્ષિણો યોગનિદ્રયા ।
૧૮૨.૨૦/૨મથુરાદ્વારપાલાશ્ચ વ્રજત્યાનકદુન્દુભૌ ॥ ૧૮૨.૨૦॥

૧૮૨.૨૧/૧વર્ષતાં જલદાનાં ચ તત્ તોયમુલ્બણં નિશિ ।
૧૮૨.૨૧/૨સંછાદ્ય તં યયૌ શેષઃ ફણૈરાનકદુન્દુભિમ્ ॥ ૧૮૨.૨૧॥

૧૮૨.૨૨/૧યમુનાં ચાતિગમ્ભીરાં નાનાવર્તશતાકુલામ્ ।
૧૮૨.૨૨/૨વસુદેવો વહન્ વિષ્ણું જાનુમાત્રવહાં યયૌ ॥ ૧૮૨.૨૨॥

૧૮૨.૨૩/૧કંસસ્ય કરમાદાય તત્રૈવાભ્યાગતાંસ્તટે ।
૧૮૨.૨૩/૨નન્દાદીન્ ગોપવૃદ્ધાંશ્ચ યમુનાયાં દદર્શ સઃ ॥ ૧૮૨.૨૩॥

૧૮૨.૨૪/૧તસ્મિન્ કાલે યશોદાપિ મોહિતા યોગનિદ્રયા ।
૧૮૨.૨૪/૨તામેવ કન્યાં મુનયઃ પ્રાસૂત મોહિતે જને ॥ ૧૮૨.૨૪॥

૧૮૨.૨૫/૧વસુદેવોઽપિ વિન્યસ્ય બાલમાદાય દારિકામ્ ।
૧૮૨.૨૫/૨યશોદાશયને તૂર્ણમાજગામામિતદ્યુતિઃ ॥ ૧૮૨.૨૫॥

૧૮૨.૨૬/૧દદર્શ ચ વિબુદ્ધ્વા સા યશોદા જાતમાત્મજમ્ ।

૧૮૨.૨૬/૨નીલોત્પલદલશ્યામં તતોऽત્યર્થં મુદં યયૌ ॥ ૧૮૨.૨૬॥

૧૮૨.૨૭/૧આદાય વસુદેવોऽપિ દારિકાં નિજમન્દિરમ્ ।
૧૮૨.૨૭/૨દેવકીશયને ન્યસ્ય યથાપૂર્વમતિષ્ઠત ॥ ૧૮૨.૨૭॥

૧૮૨.૨૮/૧તતો બાલધ્વનિં શ્રુત્વા રક્ષિણઃ સહસોત્થિતાઃ ।
૧૮૨.૨૮/૨કંસમાવેદયામાસુર્દેવકીપ્રસવં દ્વિજાઃ ॥ ૧૮૨.૨૮॥

૧૮૨.૨૯/૧કંસસ્તૂર્ણમુપેત્યૈનાં તતો જગ્રાહ બાલિકામ્ ।
૧૮૨.૨૯/૨મુઞ્ચ મુઞ્ચેતિ દેવક્યા *આસન્નકણ્ઠં નિવારિતઃ ॥ ૧૮૨.૨૯॥

૧૮૨.૩૦/૧ચિક્ષેપ ચ શિલાપૃષ્ઠે સા ક્ષિપ્તા વિયતિ સ્થિતિમ્ ।
૧૮૨.૩૦/૨અવાપ રૂપં ચ મહત્ સાયુધાષ્ટમહાભુજમ્ ।
૧૮૨.૩૦/૩પ્રજહાસ તથૈવોચ્ચૈઃ કંસં ચ રુષિતાબ્રવીત્ ॥ ૧૮૨.૩૦॥

૧૮૨.૩૧/૧યોગમાયોવાચ । કિં મયાક્ષિપ્તયા કંસ જાતો યસ્ત્વાં હનિષ્યતિ ।
૧૮૨.૩૧/૨સર્વસ્વભૂતો દેવાનામાસીન્ મૃત્યુઃ પુરા સ તે ।
૧૮૨.૩૧/૩તદ્ એતત્ સમ્પ્રધાર્યાશુ ક્રિયતાં હિતમાત્મનઃ ॥ ૧૮૨.૩૧॥

૧૮૨.૩૨/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા પ્રયયૌ દેવી દિવ્યસ્રગ્ગન્ધભૂષણા ।
૧૮૨.૩૨/૨પશ્યતો ભોજરાજસ્ય સ્તુતા સિદ્ધૈર્વિહાયસા ॥ ૧૮૨.૩૨॥

૧૮૩.૧/૧વ્યાસ ઉવાચ । કંસસ્ત્વથોદ્વિગ્નમનાઃ પ્રાહ સર્વાન્ મહાસુરાન્ ।
૧૮૩.૧/૨પ્રલમ્બકેશિપ્રમુખાન્ આહૂયાસુરપુંગવાન્ ॥ ૧૮૩.૧॥

૧૮૩.૨/૧કંસ ઉવાચ । હે પ્રલમ્બ મહાબાહો કેશિન્ ધેનુક પૂતને ।
૧૮૩.૨/૨અરિષ્ટાદ્યૈસ્તથા ચાન્યૈઃ શ્રૂયતાં વચનં મમ ॥ ૧૮૩.૨॥

૧૮૩.૩/૧માં હન્તુમમરૈર્યત્નઃ કૃતઃ કિલ દુરાત્મભિઃ ।
૧૮૩.૩/૨મદ્વીર્યતાપિતાન્ વીરાન્ ન ત્વેતાન્ ગણયામ્યહમ્ ॥ ૧૮૩.૩॥

૧૮૩.૪/૧આશ્ચર્યં કન્યયા ચોક્તં જાયતે દૈત્યપુંગવાઃ ।
૧૮૩.૪/૨હાસ્યં મે જાયતે વીરાસ્તેષુ યત્નપરેષ્વપિ ॥ ૧૮૩.૪॥

૧૮૩.૫/૧તથાપિ ખલુ દુષ્ટાનાં તેષામપ્યધિકં મયા ।
૧૮૩.૫/૨અપકારાય દૈત્યેન્દ્રા યતનીયં દુરાત્મનામ્ ॥ ૧૮૩.૫॥

૧૮૩.૬/૧ઉત્પન્નશ્ચાપિ મૃત્યુર્મે ભૂતભવ્યભવત્પ્રભુઃ ।
૧૮૩.૬/૨ઇત્યેતદ્ બાલિકા પ્રાહ દેવકીગર્ભસમ્ભવા ॥ ૧૮૩.૬॥

૧૮૩.૭/૧તસ્માદ્ બાલેષુ પરમો યત્નઃ કાર્યો મહીતલે ।

૧૮૩.૭/૨યત્રોદ્રિક્તં બલં બાલે સ હન્તવ્યઃ પ્રયત્નતઃ ॥ ૧૮૩.૭॥

૧૮૩.૮/૧વ્યાસ ઉવાચ । ઇત્યાજ્ઞાપ્યાસુરાન્ કંસઃ પ્રવિશ્યાત્મગૃહં તતઃ ।
૧૮૩.૮/૨ઉવાચ વસુદેવં ચ દેવકીમવિરોધતઃ ॥ ૧૮૩.૮॥

૧૮૩.૯/૧કંસ ઉવાચ । યુવયોર્ઘાતિતા ગર્ભા વૃથૈવૈતે મયાધુના ।
૧૮૩.૯/૨કોઽપ્યન્ય એવ નાશાય બાલો મમ સમુદ્ગતઃ ॥ ૧૮૩.૯॥

૧૮૩.૧૦/૧તદ્ અલં પરિતાપેન નૂનં યદ્ ભાવિનો હિ તે ।
૧૮૩.૧૦/૨અર્ભકા યુવયોઃ કો વા આયુષોઽન્તે ન હન્યતે ॥ ૧૮૩.૧૦॥

૧૮૩.૧૧/૧વ્યાસ ઉવાચ । ઇત્યાશ્વાસ્ય વિમુચ્યૈવ કંસસ્તૌ પરિતોષ્ય ચ ।
૧૮૩.૧૧/૨અન્તર્ગૃહં દ્વિજશ્રેષ્ઠાઃ પ્રવિવેશ પુનઃ સ્વકમ્ ॥ ૧૮૩.૧૧॥

૧૮૪.૧/૧વ્યાસ ઉવાચ । વિમુક્તો વસુદેવોઽપિ નન્દસ્ય શકટં ગતઃ ।
૧૮૪.૧/૨પ્રહૃષ્ટં દૃષ્ટવાન્ નન્દં પુત્રો જાતો મમેતિ વૈ ॥ ૧૮૪.૧॥

૧૮૪.૨/૧વસુદેવોઽપિ તં પ્રાહ દિષ્ટ્યા દિષ્ટ્યેતિ સાદરમ્ ।
૧૮૪.૨/૨વાર્ધકેઽપિ સમુત્પન્નસ્તનયોઽયં તવાધુના ॥ ૧૮૪.૨॥

૧૮૪.૩/૧દત્તો હિ વાર્ષિકઃ સર્વો ભવદ્ભિર્નૃપતેઃ કરઃ ।
૧૮૪.૩/૨યદર્થમાગતસ્તસ્માન્ નાત્ર સ્થેયં મહાત્મના ॥ ૧૮૪.૩॥

૧૮૪.૪/૧યદર્થમાગતઃ કાર્યં તન્ નિષ્પન્નં કિમાસ્યતે ।
૧૮૪.૪/૨ભવદ્ભિર્ગમ્યતાં નન્દ તચ્છીઘ્રં નિજગોકુલમ્ ॥ ૧૮૪.૪॥

૧૮૪.૫/૧મમાપિ બાલકસ્તત્ર રોહિણીપ્રસવો હિ યઃ ।
૧૮૪.૫/૨સ રક્ષણીયો ભવતા યથાયં તનયો નિજઃ ॥ ૧૮૪.૫॥

૧૮૪.૬/૧વ્યાસ ઉવાચ । ઇત્યુક્તાઃ પ્રયયુર્ગોપા નન્દગોપપુરોગમાઃ ।
૧૮૪.૬/૨શકટારોપિતૈર્ભાણ્ડૈઃ કરં દત્ત્વા મહાબલાઃ ॥ ૧૮૪.૬॥

૧૮૪.૭/૧વસતાં ગોકુલે તેષાં પૂતના બાલઘાતિની ।
૧૮૪.૭/૨સુપ્તં કૃષ્ણમુપાદાય રાત્રૌ ચ પ્રદદૌ સ્તનમ્ ॥ ૧૮૪.૭॥

૧૮૪.૮/૧યસ્મૈ યસ્મૈ સ્તનં રાત્રૌ પૂતના સમ્પ્રયચ્છતિ ।
૧૮૪.૮/૨તસ્ય તસ્ય ક્ષણેનાઙ્ગં બાલકસ્યોપહન્યતે ॥ ૧૮૪.૮॥

૧૮૪.૯/૧કૃષ્ણસ્તસ્યાઃ સ્તનં ગાઢં કરાભ્યામતિપીડિતમ્ ।
૧૮૪.૯/૨ગૃહીત્વા પ્રાણસહિતં પપૌ ક્રોધસમન્વિતઃ ॥ ૧૮૪.૯॥

૧૮૪.૧૦/૧સા વિમુક્તમહારાવા વિચ્છિન્નસ્નાયુબન્ધના ।
૧૮૪.૧૦/૨પપાત પૂતના ભૂમૌ મ્રિયમાણાતિભીષણા ॥ ૧૮૪.૧૦॥

૧૮૪.૧૧/૧તન્નાદશ્રુતિસંત્રાસાદ્ વિબુદ્ધાસ્તે વ્રજૌકસઃ ।
૧૮૪.૧૧/૨દદૃશુઃ પૂતનોત્સઙ્ગે કૃષ્ણં તાં ચ નિપાતિતામ્ ॥ ૧૮૪.૧૧॥

૧૮૪.૧૨/૧આદાય કૃષ્ણં સંત્રસ્તા યશોદા ચ તતો દ્વિજાઃ ।
૧૮૪.૧૨/૨ગોપુચ્છભ્રામણાદ્યૈશ્ચ બાલદોષમપાકરોત્ ॥ ૧૮૪.૧૨॥

૧૮૪.૧૩/૧ગોપુરીષમુપાદાય નન્દગોપોऽપિ મસ્તકે ।
૧૮૪.૧૩/૨કૃષ્ણસ્ય પ્રદદૌ રક્ષાં કુર્વન્ન્ ઇદમુદૈરયત્ ॥ ૧૮૪.૧૩॥

૧૮૪.૧૪/૧નન્દગોપ ઉવાચ । રક્ષતુ ત્વામશેષાણાં ભૂતાનાં પ્રભવો હરિઃ ।
૧૮૪.૧૪/૨યસ્ય નાભિસમુદ્ભૂતાત્ પઙ્કજાદ્ અભવજ્જગત્ ॥ ૧૮૪.૧૪॥

૧૮૪.૧૫/૧યેન દંષ્ટ્રાગ્રવિધૃતા ધારયત્યવની જગત્ ।
૧૮૪.૧૫/૨વરાહરૂપધૃગ્ દેવઃ સ ત્વાં રક્ષતુ કેશવઃ ॥ ૧૮૪.૧૫॥

૧૮૪.૧૬/૧ગુહ્યં સ જઠરં વિષ્ણુર્જઙ્ઘાપાદૌ જનાર્દનઃ ।
૧૮૪.૧૬/૨વામનો રક્ષતુ સદા ભવન્તં યઃ ક્ષણાદ્ અભૂત્ ॥ ૧૮૪.૧૬॥

૧૮૪.૧૭/૧ત્રિવિક્રમક્રમાક્રાન્ત+ ।ત્રૈલોક્યસ્ફુરદાયુધઃ ।
૧૮૪.૧૭/૨શિરસ્તે પાતુ ગોવિન્દઃ કણ્ઠં રક્ષતુ કેશવઃ ॥ ૧૮૪.૧૭॥

૧૮૪.૧૮/૧મુખબાહૂ પ્રબાહૂ ચ મનઃ સર્વેન્દ્રિયાણિ ચ ।
૧૮૪.૧૮/૨રક્ષત્વવ્યાહતૈશ્વર્યસ્તવ નારાયણોऽવ્યયઃ ॥ ૧૮૪.૧૮॥

૧૮૪.૧૯/૧ત્વાં દિક્ષુ પાતુ વૈકુણ્ઠો વિદિક્ષુ મધુસૂદનઃ ।
૧૮૪.૧૯/૨હૃષીકેશોऽમ્બરે ભૂમૌ રક્ષતુ ત્વાં મહીધરઃ ॥ ૧૮૪.૧૯॥

૧૮૪.૨૦/૧વ્યાસ ઉવાચ । એવં કૃતસ્વસ્ત્યયનો નન્દગોપેન બાલકઃ ।
૧૮૪.૨૦/૨શાયિતઃ શકટસ્યાધો બાલપર્યઙ્કિકાતલે ॥ ૧૮૪.૨૦॥

૧૮૪.૨૧/૧તે ચ ગોપા મહદ્ દૃષ્ટ્વા પૂતનાયાઃ કલેવરમ્ ।
૧૮૪.૨૧/૨મૃતાયાઃ પરમં ત્રાસં વિસ્મયં ચ તદા યયુઃ ॥ ૧૮૪.૨૧॥

૧૮૪.૨૨/૧કદાચિચ્છકટસ્યાધઃ શયાનો મધુસૂદનઃ ।
૧૮૪.૨૨/૨ચિક્ષેપ ચરણાવૂર્ધ્વં સ્તનાર્થી પ્રરુરોદ ચ ॥ ૧૮૪.૨૨॥

૧૮૪.૨૩/૧તસ્ય પાદપ્રહારેણ શકટં પરિવર્તિતમ્ ।
૧૮૪.૨૩/૨વિધ્વસ્તભાણ્ડકુમ્ભં તદ્ વિપરીતં પપાત વૈ ॥ ૧૮૪.૨૩॥

૧૮૪.૨૪/૧તતો હાહાકૃતઃ સર્વો ગોપગોપીજનો દ્વિજાઃ ।
૧૮૪.૨૪/૨આજગામ તદા જ્ઞાત્વા બાલમુત્તાનશાયિનમ્ ॥ ૧૮૪.૨૪॥

૧૮૪.૨૫/૧ગોપાઃ કેનેતિ જગદુઃ શકટં પરિવર્તિતમ્ ।
૧૮૪.૨૫/૨તત્રૈવ બાલકાઃ પ્રોચુર્બાલેનાનેન પાતિતમ્ ॥ ૧૮૪.૨૫॥

૧૮૪.૨૬/૧રુદતા દૃષ્ટમસ્માભિઃ પાદવિક્ષેપતાડિતમ્ ।
૧૮૪.૨૬/૨શકટં પરિવૃત્તં વૈ નૈતદ્ અન્યસ્ય ચેષ્ટિતમ્ ॥ ૧૮૪.૨૬॥

૧૮૪.૨૭/૧તતઃ પુનરતીવાસન્ ગોપા વિસ્મિતચેતસઃ ।
૧૮૪.૨૭/૨નન્દગોપોઽપિ જગ્રાહ બાલમત્યન્તવિસ્મિતઃ ॥ ૧૮૪.૨૭॥

૧૮૪.૨૮/૧યશોદા વિસ્મયારૂઢા ભગ્નભાણ્ડકપાલકમ્ ।
૧૮૪.૨૮/૨શકટં ચાર્ચયામાસ દધિપુષ્પફલાક્ષતૈઃ ॥ ૧૮૪.૨૮॥

૧૮૪.૨૯/૧ગર્ગશ્ચ ગોકુલે તત્ર વસુદેવપ્રચોદિતઃ ।
૧૮૪.૨૯/૨પ્રચ્છન્ન એવ ગોપાનાં સંસ્કારમકરોત્ તયોઃ ॥ ૧૮૪.૨૯॥

૧૮૪.૩૦/૧જ્યેષ્ઠં ચ રામમિત્યાહ કૃષ્ણં ચૈવ તથાપરમ્ ।
૧૮૪.૩૦/૨ગર્ગો મતિમતાં શ્રેષ્ઠો નામ કુર્વન્ મહામતિઃ ॥ ૧૮૪.૩૦॥

૧૮૪.૩૧/૧અલ્પેનૈવ હિ કાલેન વિજ્ઞાતૌ તૌ મહાબલૌ ।
૧૮૪.૩૧/૨ધૃષ્ટજાનુકરૌ વિપ્રા બભૂવતુરુભાવપિ ॥ ૧૮૪.૩૧॥

૧૮૪.૩૨/૧કરીષભસ્મદિગ્ધાઙ્ગૌ ભ્રમમાણાવિતસ્તતઃ ।
૧૮૪.૩૨/૨ન નિવારયિતું શક્તા યશોદા તૌ ન રોહિણી ॥ ૧૮૪.૩૨॥

૧૮૪.૩૩/૧ગોવાટમધ્યે ક્રીડન્તૌ વત્સવાટગતૌ પુનઃ ।
૧૮૪.૩૩/૨તદહર્જાતગોવત્સ+ ।પુચ્છાકર્ષણતત્પરૌ ॥ ૧૮૪.૩૩॥

૧૮૪.૩૪/૧યદા યશોદા તૌ બાલાવેકસ્થાનચરાવુભૌ ।
૧૮૪.૩૪/૨શશાક નો વારયિતું ક્રીડન્તાવતિચઞ્ચલૌ ॥ ૧૮૪.૩૪॥

૧૮૪.૩૫/૧દામ્ના બદ્ધ્વા તદા મધ્યે નિબબન્ધ ઉલૂખલે ।
૧૮૪.૩૫/૨કૃષ્ણમક્લિષ્ટકર્માણમાહ ચેદમમર્ષિતા ॥ ૧૮૪.૩૫॥

૧૮૪.૩૬/૧યશોદોવાચ । યદિ શક્તોઽસિ ગચ્છ
ત્વમતિચઞ્ચલચેષ્ટિત ॥ ૧૮૪.૩૬॥

૧૮૪.૩૭/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા ચ નિજં કર્મ સા ચકાર કુટુમ્બિની ।

૧૮૪.૩૭/૨વ્યગ્રાયામથ તસ્યાં સ કર્ષમાણ ઉલૂખલમ્ ॥ ૧૮૪.૩૭॥

૧૮૪.૩૮/૧યમલાર્જુનયોર્મધ્યે જગામ કમલેક્ષણઃ ।
૧૮૪.૩૮/૨કર્ષતા વૃક્ષયોર્મધ્યે તિર્યગ્ એવમુલૂખલમ્ ॥ ૧૮૪.૩૮॥

૧૮૪.૩૯/૧ભગ્નાવુત્તુઙ્ગશાખાગ્રૌ તેન તૌ યમલાર્જુનૌ ।
૧૮૪.૩૯/૨તતઃ કટકટાશબ્દ+ ।સમાકર્ણનકાતરઃ ॥ ૧૮૪.૩૯॥

૧૮૪.૪૦/૧આજગામ વ્રજજનો દદૃશે ચ મહાદ્રુમૌ ।
૧૮૪.૪૦/૨ભગ્નસ્કન્ધૌ નિપાતિતૌ ભગ્નશાખૌ મહીતલે ॥ ૧૮૪.૪૦॥

૧૮૪.૪૧/૧દદર્શ ચાલ્પદન્તાસ્યં સ્મિતહાસં ચ બાલકમ્ ।
૧૮૪.૪૧/૨તયોર્મધ્યગતં બદ્ધં દામ્ના ગાઢં તથોદરે ॥ ૧૮૪.૪૧॥

૧૮૪.૪૨/૧તતશ્ચ દામોદરતાં સ યયૌ દામબન્ધનાત્ ।
૧૮૪.૪૨/૨ગોપવૃદ્ધાસ્તતઃ સર્વે નન્દગોપપુરોગમાઃ ॥ ૧૮૪.૪૨॥

૧૮૪.૪૩/૧મન્ત્રયામાસુરુદ્વિગ્ના મહોત્પાતાતિભીરવઃ ।
૧૮૪.૪૩/૨સ્થાનેનેહ ન નઃ કાર્યં વ્રજામોઽન્યન્ મહાવનમ્ ॥ ૧૮૪.૪૩॥

૧૮૪.૪૪/૧ઉત્પાતા બહવો હ્યત્ર દૃશ્યન્તે નાશહેતવઃ ।
૧૮૪.૪૪/૨પૂતનાયા વિનાશશ્ચ શકટસ્ય વિપર્યયઃ ॥ ૧૮૪.૪૪॥

૧૮૪.૪૫/૧વિના વાતાદિદોષેણ દ્રુમયોઃ પતનં તથા ।
૧૮૪.૪૫/૨વૃન્દાવનમિતઃ સ્થાનાત્ તસ્માદ્ ગચ્છામ મા ચિરમ્ ॥ ૧૮૪.૪૫॥

૧૮૪.૪૬/૧યાવદ્ ભૌમમહોત્પાત+ ।દોષો નાભિભવેદ્ વ્રજમ્ ।
૧૮૪.૪૬/૨ઇતિ કૃત્વા મતિં સર્વે ગમને તે વ્રજૌકસઃ ॥ ૧૮૪.૪૬॥

૧૮૪.૪૭/૧ઊચુઃ સ્વં સ્વં કુલં શીઘ્રં ગમ્યતાં મા વિલમ્બ્યતામ્ ।
૧૮૪.૪૭/૨તતઃ ક્ષણેન પ્રયયુઃ શકટૈર્ગોધનૈસ્તથા ॥ ૧૮૪.૪૭॥

૧૮૪.૪૮/૧યૂથશો વત્સપાલીશ્ચ કાલયન્તો વ્રજૌકસઃ ।
૧૮૪.૪૮/૨સર્વાવયવનિર્ધૂતં ક્ષણમાત્રેણ તત્ તદા ॥ ૧૮૪.૪૮॥

૧૮૪.૪૯/૧કાકકાકીસમાકીર્ણં વ્રજસ્થાનમભૂદ્ દ્વિજાઃ ।
૧૮૪.૪૯/૨વૃન્દાવનં ભગવતા કૃષ્ણેનાક્લિષ્ટકર્મણા ॥ ૧૮૪.૪૯॥

૧૮૪.૫૦/૧શુભેન મનસા ધ્યાતં ગવાં વૃદ્ધિમભીપ્સતા ।
૧૮૪.૫૦/૨તતસ્તત્રાતિરુક્ષેઽપિ ધર્મકાલે દ્વિજોત્તમાઃ ॥ ૧૮૪.૫૦॥

૧૮૪.૫૧/૧પ્રાવૃટ્કાલ ઇવાભૂચ્ચ નવશષ્પં સમન્તતઃ ।
૧૮૪.૫૧/૨સ સમાવાસિતઃ સર્વો વ્રજો વૃન્દાવને તતઃ ॥ ૧૮૪.૫૧॥

૧૮૪.૫૨/૧શકટીવાટપર્યન્ત+ ૈહન્દ્રાર્ધાકારસંસ્થિતિઃ ।
૧૮૪.૫૨/૨વત્સબાલૌ ચ સંવૃત્તૌ રામદામોદરૌ તતઃ ॥ ૧૮૪.૫૨॥

૧૮૪.૫૩/૧તત્ર સ્થિતૌ તૌ ચ ગોષ્ઠે ચેરતુર્બાલલીલયા ।
૧૮૪.૫૩/૨બર્હિપત્રકૃતાપીડૌ વન્યપુષ્પાવતંસકૌ ॥ ૧૮૪.૫૩॥

૧૮૪.૫૪/૧ગોપવેણુકૃતાતોદ્ય+ ।પત્રવાદ્યકૃતસ્વનૌ ।
૧૮૪.૫૪/૨કાકપક્ષધરૌ બાલૌ કુમારાવિવ પાવકૌ ॥ ૧૮૪.૫૪॥

૧૮૪.૫૫/૧હસન્તૌ ચ રમન્તૌ ચ ચેરતુસ્તન્ મહદ્ વનમ્ ।
૧૮૪.૫૫/૨ક્વચિદ્ ધસન્તાવન્યોન્યં ક્રીડમાનૌ તથા પરૈઃ ॥ ૧૮૪.૫૫॥

૧૮૪.૫૬/૧ગોપપુત્રૈઃ સમં વત્સાંશ્ચારયન્તૌ વિચેરતુઃ ।
૧૮૪.૫૬/૨કાલેન ગચ્છતા તૌ તુ સપ્તવર્ષૌ બભૂવતુઃ ॥ ૧૮૪.૫૬॥

૧૮૪.૫૭/૧સર્વસ્ય જગતઃ પાલૌ વત્સપાલૌ મહાવ્રજે ।
૧૮૪.૫૭/૨પ્રાવૃટ્કાલસ્તતોઽતીવ મેઘૌઘસ્થગિતામ્બરઃ ॥ ૧૮૪.૫૭॥

૧૮૪.૫૮/૧બભૂવ વારિધારાભિરૈક્યં કુર્વન્ દિશામિવ ।
૧૮૪.૫૮/૨પ્રરૂઢનવપુષ્પાઢ્યા શક્રગોપવૃતા મહી ॥ ૧૮૪.૫૮॥

૧૮૪.૫૯/૧યથા મારકતે વાસીત્ પદ્મરાગવિભૂષિતા ।
૧૮૪.૫૯/૨ઊહુરુન્માર્ગગામીનિ નિમ્નગામ્ભાંસિ સર્વતઃ ॥ ૧૮૪.૫૯॥

૧૮૪.૬૦/૧મનાંસિ દુર્વિનીતાનાં પ્રાપ્ય લક્ષ્મીં નવામિવ ।
૧૮૪.૬૦/૨વિકાલે ચ યથાકામં વ્રજમેત્ય મહાબલૌ ।
૧૮૪.૬૦/૩ગોપૈઃ સમાનૈઃ સહિતૌ ચિક્રીડાતેઽમરાવિવ ॥ ૧૮૪.૬૦॥

૧૮૫.૧/૧વ્યાસ ઉવાચ । એકદા તુ વિના રામં કૃષ્ણો વૃન્દાવનં યયૌ ।
૧૮૫.૧/૨વિચચાર વૃતો ગોપૈર્વન્યપુષ્પસ્રગુજ્જ્વલઃ ॥ ૧૮૫.૧॥

૧૮૫.૨/૧સ જગામાથ કાલિન્દીં લોલકલ્લોલશાલિનીમ્ ।
૧૮૫.૨/૨તીરસંલગ્નફેનૌઘૈર્હસન્તીમિવ સર્વતઃ ॥ ૧૮૫.૨॥

૧૮૫.૩/૧તસ્યાં ચાતિમહાભીમં વિષાગ્નિકણદૂષિતમ્ ।
૧૮૫.૩/૨હ્રદં કાલીયનાગસ્ય દદર્શાતિવિભીષણમ્ ॥ ૧૮૫.૩॥

૧૮૫.૪/૧વિષાગ્નિના વિસરતા દગ્ધતીરમહાતરુમ્ ।

૧૮૫.૪/૨વાતાહતામ્બુવિક્ષેપ+ ।સ્પર્શદગ્ધવિહંગમમ્ ॥ ૧૮૫.૪॥

૧૮૫.૫/૧તમતીવ મહારૌદ્રં મૃત્યુવક્ત્રમિવાપરમ્ ।
૧૮૫.૫/૨વિલોક્ય ચિન્તયામાસ ભગવાન્ મધુસૂદનઃ ॥ ૧૮૫.૫॥

૧૮૫.૬/૧અસ્મિન્ વસતિ દુષ્ટાત્મા કાલીયોઽસૌ વિષાયુધઃ ।
૧૮૫.૬/૨યો મયા નિર્જિતસ્ત્યક્ત્વા દુષ્ટો નષ્ટઃ પયોનિધૌ ॥ ૧૮૫.૬॥

૧૮૫.૭/૧તેનેયં દૂષિતા સર્વા યમુના સાગરંગમા ।
૧૮૫.૭/૨ન નરૈર્ગોધનૈર્વાપિ તૃષાર્તૈરુપભુજ્યતે ॥ ૧૮૫.૭॥

૧૮૫.૮/૧તદ્ અસ્ય નાગરાજસ્ય કર્તવ્યો નિગ્રહો મયા ।
૧૮૫.૮/૨નિત્યત્રસ્તાઃ સુખં યેન ચરેયુર્વ્રજવાસિનઃ ॥ ૧૮૫.૮॥

૧૮૫.૯/૧એતદર્થં નૃલોકેઽસ્મિન્ન્ અવતારો મયા કૃતઃ ।
૧૮૫.૯/૨યદ્ એષામુત્પથસ્થાનાં કાર્યા શાસ્તિર્દુરાત્મનામ્ ॥ ૧૮૫.૯॥

૧૮૫.૧૦/૧તદ્ એતન્ નાતિદૂરસ્થં કદમ્બમુરુશાખિનમ્ ।
૧૮૫.૧૦/૨અધિરુહ્યોત્પતિષ્યામિ હ્રદેઽસ્મિઞ્ જીવનાશિનઃ ॥ ૧૮૫.૧૦॥

૧૮૫.૧૧/૧વ્યાસ ઉવાચ । ઇત્થં વિચિન્ત્ય બદ્ધ્વા ચ ગાઢં પરિકરં તતઃ ।
૧૮૫.૧૧/૨નિપપાત હ્રદે તત્ર સર્પરાજસ્ય વેગતઃ ॥ ૧૮૫.૧૧॥

૧૮૫.૧૨/૧તેનાપિ પતતા તત્ર ક્ષોભિતઃ સ મહાહ્રદઃ ।
૧૮૫.૧૨/૨અત્યર્થદૂરજાતાંશ્ચ તાંશ્ચાસિઞ્ચન્ મહીરુહાન્ ॥ ૧૮૫.૧૨॥

૧૮૫.૧૩/૧તેઽહિદુષ્ટવિષજ્વાલા+ ।તપ્તામ્બુતપનોક્ષિતાઃ ।
૧૮૫.૧૩/૨જજ્વલુઃ પાદપાઃ સદ્યો જ્વાલાવ્યાપ્તદિગન્તરાઃ ॥ ૧૮૫.૧૩॥

૧૮૫.૧૪/૧આસ્ફોટયામાસ તદા કૃષ્ણો નાગહ્રદં ભુજૈઃ ।
૧૮૫.૧૪/૨તચ્છબ્દશ્રવણાચ્ચાથ નાગરાજોઽભ્યુપાગમત્ ॥ ૧૮૫.૧૪॥

૧૮૫.૧૫/૧આતામ્રનયનઃ કોપાદ્ વિષજ્વાલાકુલૈઃ ફણૈઃ ।
૧૮૫.૧૫/૨વૃતો મહાવિષૈશ્ચાન્યૈરરુણૈરનિલાશનૈઃ ॥ ૧૮૫.૧૫॥

૧૮૫.૧૬/૧નાગપત્ન્યશ્ચ શતશો હારિહારોપશોભિતાઃ ।
૧૮૫.૧૬/૨પ્રકમ્પિતતનૂત્ક્ષેપ+ ૅહલત્કુણ્ડલકાન્તયઃ ॥ ૧૮૫.૧૬॥

૧૮૫.૧૭/૧તતઃ પ્રવેષ્ટિતઃ સર્પૈઃ સ કૃષ્ણો ભોગબન્ધનૈઃ ।
૧૮૫.૧૭/૨દદંશુશ્ચાપિ તે કૃષ્ણં વિષજ્વાલાવિલૈર્મુખૈઃ ॥ ૧૮૫.૧૭॥

૧૮૫.૧૮/૧તં તત્ર પતિતં દૃષ્ટ્વા નાગભોગનિપીડિતમ્ ।
૧૮૫.૧૮/૨ગોપા વ્રજમુપાગત્ય ચુક્રુશુઃ શોકલાલસાઃ ॥ ૧૮૫.૧૮॥

૧૮૫.૧૯/૧ગોપા ઊચુઃ । એષ કૃષ્ણો ગતો મોહ+ ંઅગ્નો વૈ કાલિયે હ્રદે ।
૧૮૫.૧૯/૨ભક્ષ્યતે સર્પરાજેન તદ્ આગચ્છત મા ચિરમ્ ॥ ૧૮૫.૧૯॥

૧૮૫.૨૦/૧વ્યાસ ઉવાચ । એતચ્છ્રુત્વા તતો ગોપા વજ્રપાતોપમં વચઃ ।
૧૮૫.૨૦/૨ગોપ્યશ્ચ ત્વરિતા જગ્મુર્યશોદાપ્રમુખા હ્રદમ્ ॥ ૧૮૫.૨૦॥

૧૮૫.૨૧/૧હા હા ક્વાસાવિતિ જનો ગોપીનામતિવિહ્વલઃ ।
૧૮૫.૨૧/૨યશોદયા સમં ભ્રાન્તો દ્રુતઃ પ્રસ્ખલિતો યયૌ ॥ ૧૮૫.૨૧॥

૧૮૫.૨૨/૧નન્દગોપશ્ચ ગોપાશ્ચ રામશ્ચાદ્ભુતવિક્રમઃ ।
૧૮૫.૨૨/૨ત્વરિતં યમુનાં જગ્મુઃ કૃષ્ણદર્શનલાલસાઃ ॥ ૧૮૫.૨૨॥

૧૮૫.૨૩/૧દદૃશુશ્ચાપિ તે તત્ર સર્પરાજવશંગતમ્ ।
૧૮૫.૨૩/૨નિષ્પ્રયત્નં કૃતં કૃષ્ણં સર્પભોગેન વેષ્ટિતમ્ ॥ ૧૮૫.૨૩॥

૧૮૫.૨૪/૧નન્દગોપશ્ચ નિશ્ચેષ્ટઃ પશ્યન્ પુત્રમુખં ભૃશમ્ ।
૧૮૫.૨૪/૨યશોદા ચ મહાભાગા બભૂવ મુનિસત્તમાઃ ॥ ૧૮૫.૨૪॥

૧૮૫.૨૫/૧ગોપ્યસ્ત્વન્યા રુદત્યશ્ચ દદૃશુઃ શોકકાતરાઃ ।
૧૮૫.૨૫/૨પ્રોચુશ્ચ કેશવં પ્રીત્યા ભયકાતરગદ્ગદમ્ ॥ ૧૮૫.૨૫॥

૧૮૫.૨૬/૧સર્વા યશોદયા સાર્ધં વિશામોઽત્ર મહાહ્રદે ।
૧૮૫.૨૬/૨નાગરાજસ્ય નો ગન્તુમસ્માકં યુજ્યતે વ્રજે ॥ ૧૮૫.૨૬॥

૧૮૫.૨૭/૧દિવસઃ કો વિના સૂર્યં વિના ચન્દ્રેણ કા નિશા ।
૧૮૫.૨૭/૨વિના દુગ્ધેન કા ગાવો વિના કૃષ્ણેન કો વ્રજઃ ।
૧૮૫.૨૭/૩વિનાકૃતા ન યાસ્યામઃ કૃષ્ણેનાનેન ગોકુલમ્ ॥ ૧૮૫.૨૭॥

૧૮૫.૨૮/૧વ્યાસ ઉવાચ । ઇતિ ગોપીવચઃ શ્રુત્વા રૌહિણેયો મહાબલઃ ।
૧૮૫.૨૮/૨ઉવાચ ગોપાન્ વિધુરાન્ વિલોક્ય સ્તિમિતેક્ષણઃ ॥ ૧૮૫.૨૮॥

૧૮૫.૨૯/૧નન્દં ચ દીનમત્યર્થં ન્યસ્તદૃષ્ટિં સુતાનને ।
૧૮૫.૨૯/૨મૂર્છાકુલાં યશોદાં ચ કૃષ્ણમાહાત્મ્યસંજ્ઞયા ॥ ૧૮૫.૨૯॥

૧૮૫.૩૦/૧બલરામ ઉવાચ । કિમયં દેવદેવેશ ભાવોઽયં માનુષસ્ત્વયા ।
૧૮૫.૩૦/૨વ્યજ્યતે સ્વં તમાત્માનં કિમન્યં ત્વં ન વેત્સિ યત્ ॥ ૧૮૫.૩૦॥

૧૮૫.૩૧/૧ત્વમસ્ય જગતો નાભિઃ સુરાણામેવ ચાશ્રયઃ ।

૧૮૫.૩૧/૨કર્તાપહર્તા પાતા ચ ત્રૈલોક્યં ત્વં ત્રયીમયઃ ॥ ૧૮૫.૩૧॥

૧૮૫.૩૨/૧અત્રાવતીર્ણયોઃ કૃષ્ણ ગોપા એવ હિ બાન્ધવાઃ ।
૧૮૫.૩૨/૨ગોપ્યશ્ચ સીદતઃ કસ્માત્ ત્વં બન્ધૂન્ સમુપેક્ષસે ॥ ૧૮૫.૩૨॥

૧૮૫.૩૩/૧દર્શિતો માનુષો ભાવો દર્શિતં બાલચેષ્ટિતમ્ ।
૧૮૫.૩૩/૨તદ્ અયં દમ્યતાં કૃષ્ણ દુરાત્મા દશનાયુધઃ ॥ ૧૮૫.૩૩॥

૧૮૫.૩૪/૧વ્યાસ ઉવાચ । ઇતિ સંસ્મારિતઃ કૃષ્ણઃ સ્મિતભિન્નૌષ્ઠસમ્પુટઃ ।
૧૮૫.૩૪/૨આસ્ફાલ્ય મોચયામાસ સ્વં દેહં ભોગબન્ધનાત્ ॥ ૧૮૫.૩૪॥

૧૮૫.૩૫/૧આનામ્ય ચાપિ હસ્તાભ્યામુભાભ્યાં મધ્યમં ફણમ્ ।
૧૮૫.૩૫/૨આરુહ્ય ભુગ્નશિરસઃ પ્રનનર્તોરુવિક્રમઃ ॥ ૧૮૫.૩૫॥

૧૮૫.૩૬/૧વ્રણાઃ ફણેઽભવંસ્તસ્ય કૃષ્ણસ્યાઙ્ઘ્રિવિકુટ્ટનૈઃ ।
૧૮૫.૩૬/૨યત્રોન્નતિં ચ કુરુતે નનામાસ્ય તતઃ શિરઃ ॥ ૧૮૫.૩૬॥

૧૮૫.૩૭/૧મૂર્છામુપાયયૌ ભ્રાન્ત્યા નાગઃ કૃષ્ણસ્ય કુટ્ટનૈઃ ।
૧૮૫.૩૭/૨દણ્ડપાતનિપાતેન વવામ રુધિરં બહુ ॥ ૧૮૫.૩૭॥

૧૮૫.૩૮/૧તં નિર્ભુગ્નશિરોગ્રીવમાસ્યપ્રસ્રુતશોણિતમ્ ।
૧૮૫.૩૮/૨વિલોક્ય શરણં જગ્મુસ્તત્પત્ન્યો મધુસૂદનમ્ ॥ ૧૮૫.૩૮॥

૧૮૫.૩૯/૧નાગપત્ન્ય ઊચુઃ । જ્ઞાતોઽસિ દેવદેવેશ સર્વેશસ્ત્વમનુત્તમ ।
૧૮૫.૩૯/૨પરં જ્યોતિરચિન્ત્યં યત્ તદંશઃ પરમેશ્વરઃ ॥ ૧૮૫.૩૯॥

૧૮૫.૪૦/૧ન સમર્થાઃ સુર સ્તોતું યમનન્યભવં પ્રભુમ્ ।
૧૮૫.૪૦/૨સ્વરૂપવર્ણનં તસ્ય કથં યોષિત્ કરિષ્યતિ ॥ ૧૮૫.૪૦॥

૧૮૫.૪૧/૧યસ્યાખિલમહીવ્યોમ+ ।જલાગ્નિપવનાત્મકમ્ ।
૧૮૫.૪૧/૨બ્રહ્માણ્ડમલ્પકાંશાંશઃ સ્તોષ્યામસ્તં કથં વયમ્ ॥ ૧૮૫.૪૧॥

૧૮૫.૪૨/૧તતઃ કુરુ જગત્સ્વામિન્ પ્રસાદમવસીદતઃ ।
૧૮૫.૪૨/૨પ્રાણાંસ્ત્યજતિ નાગોઽયં ભર્તૃભિક્ષા પ્રદીયતામ્ ॥ ૧૮૫.૪૨॥

૧૮૫.૪૩/૧વ્યાસ ઉવાચ । ઇત્યુક્તે તાભિરાશ્વાસ્ય ક્લાન્તદેહોઽપિ પન્નગઃ ।
૧૮૫.૪૩/૨પ્રસીદ દેવદેવેતિ પ્રાહ વાક્યં શનૈઃ શનૈઃ ॥ ૧૮૫.૪૩॥

૧૮૫.૪૪/૧કાલીય ઉવાચ । તવાષ્ટગુણમૈશ્વર્યં નાથ સ્વાભાવિકં પરમ્ ।
૧૮૫.૪૪/૨નિરસ્તાતિશયં યસ્ય તસ્ય સ્તોષ્યામિ કિં ન્વહમ્ ॥ ૧૮૫.૪૪॥

૧૮૫.૪૫/૧ત્વં પરસ્ત્વં પરસ્યાદ્યઃ પરં ત્વં તત્પરાત્મકમ્ ।
૧૮૫.૪૫/૨પરસ્માત્ પરમો યસ્ત્વં તસ્ય સ્તોષ્યામિ કિં ન્વહમ્ ॥ ૧૮૫.૪૫ ॥

૧૮૫.૪૬/૧યથાહં ભવતા સૃષ્ટો જાત્યા રૂપેણ ચેશ્વરઃ ।
૧૮૫.૪૬/૨સ્વભાવેન ચ સંયુક્તસ્તથેદં ચેષ્ટિતં મયા ॥ ૧૮૫.૪૬ ॥

૧૮૫.૪૭/૧યદ્યન્યથા પ્રવર્તેય દેવદેવ તતો મયિ ।
૧૮૫.૪૭/૨ન્યાય્યો દણ્ડનિપાતસ્તે તવૈવ વચનં યથા ॥ ૧૮૫.૪૭ ॥

૧૮૫.૪૮/૧તથાપિ યં જગત્સ્વામી દણ્ડં પાતિતવાન્ મયિ ।
૧૮૫.૪૮/૨સ સોઢોઽયં વરો દણ્ડસ્ત્વત્તો નાન્યોઽસ્તુ મે વરઃ ॥ ૧૮૫.૪૮ ॥

૧૮૫.૪૯/૧હતવીર્યો હતવિષો દમિતોઽહં ત્વયાચ્યુત ।
૧૮૫.૪૯/૨જીવિતં દીયતામેકમાજ્ઞાપય કરોમિ કિમ્ ॥ ૧૮૫.૪૯ ॥

૧૮૫.૫૦/૧શ્રીભગવાન્ ઉવાચ । નાત્ર સ્થેયં ત્વયા સર્પ કદાચિદ્ યમુનાજલે ।
૧૮૫.૫૦/૨સભૃત્યપરિવારસ્ત્વં સમુદ્રસલિલં વ્રજ ॥ ૧૮૫.૫૦ ॥

૧૮૫.૫૧/૧મત્પદાનિ ચ તે સર્પ દૃષ્ટ્વા મૂર્ધનિ સાગરે ।
૧૮૫.૫૧/૨ગરુડઃ પન્નગરિપુસ્ત્વયિ ન પ્રહરિષ્યતિ ॥ ૧૮૫.૫૧ ॥

૧૮૫.૫૨/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા સર્પરાજાનં મુમોચ ભગવાન્ હરિઃ ।
૧૮૫.૫૨/૨પ્રણમ્ય સોઽપિ કૃષ્ણાય જગામ પયસાં નિધિમ્ ॥ ૧૮૫.૫૨ ॥

૧૮૫.૫૩/૧પશ્યતાં સર્વભૂતાનાં સભૃત્યાપત્યબન્ધવઃ ।
૧૮૫.૫૩/૨સમસ્તભાર્યાસહિતઃ પરિત્યજ્ય સ્વકં હ્રદમ્ ॥ ૧૮૫.૫૩ ॥

૧૮૫.૫૪/૧ગતે સર્પે પરિષ્વજ્ય મૃતં પુનરિવાગતમ્ ।
૧૮૫.૫૪/૨ગોપા મૂર્ધનિ ગોવિન્દં સિષિચુર્નેત્રજૈર્જલૈઃ ॥ ૧૮૫.૫૪ ॥

૧૮૫.૫૫/૧કૃષ્ણમક્લિષ્ટકર્માણમન્યે વિસ્મિતચેતસઃ ।
૧૮૫.૫૫/૨તુષ્ટુવુર્મુદિતા ગોપા દૃષ્ટ્વા શિવજલાં નદીમ્ ॥ ૧૮૫.૫૫ ॥

૧૮૫.૫૬/૧ગીયમાનોઽથ ગોપીભિશ્ચરિતૈશ્ચારુચેષ્ટિતૈઃ ।
૧૮૫.૫૬/૨સંસ્તૂયમાનો ગોપાલૈઃ કૃષ્ણો વ્રજમુપાગમત્ ॥ ૧૮૫.૫૬ ॥

૧૮૬.૧/૧વ્યાસ ઉવાચ । ગાઃ પાલયન્તૌ ચ પુનઃ સહિતૌ રામકેશવૌ ।
૧૮૬.૧/૨ભ્રમમાણૌ વને તત્ર રમ્યં તાલવનં ગતૌ ॥ ૧૮૬.૧ ॥

૧૮૬.૨/૧તચ્ચ તાલવનં નિત્યં ધેનુકો નામ દાનવઃ ।
૧૮૬.૨/૨નૃગોમાંસકૃતાહારઃ સદાધ્યાસ્તે ખરાકૃતિઃ ॥ ૧૮૬.૨ ॥

૧૮૬.૩/૧તત્ર તાલવનં રમ્યં ફલસમ્પત્સમન્વિતમ્ ।
૧૮૬.૩/૨દૃષ્ટ્વા સ્પૃહાન્વિતા ગોપાઃ ફલાદાનેઽબ્રુવન્ વચઃ ॥ ૧૮૬.૩ ॥

૧૮૬.૪/૧ગોપા ઊચુઃ । હે રામ હે કૃષ્ણ સદા ધેનુકેનૈવ રક્ષ્યતે ।
૧૮૬.૪/૨ભૂપ્રદેશો યતસ્તસ્માત્ ત્યક્તાનીમાનિ સન્તિ વૈ ॥ ૧૮૬.૪ ॥

૧૮૬.૫/૧ફલાનિ પશ્ય તાલાનાં ગન્ધમોદયુતાનિ વૈ ।
૧૮૬.૫/૨વયમેતાન્યભીપ્સામઃ પાત્યન્તાં યદિ રોચતે ॥ ૧૮૬.૫ ॥

૧૮૬.૬/૧ઇતિ ગોપકુમારાણાં શ્રુત્વા સંકર્ષણો વચઃ ।
૧૮૬.૬/૨કૃષ્ણશ્ચ પાતયામાસ ભુવિ તાલફલાનિ વૈ ॥ ૧૮૬.૬ ॥

૧૮૬.૭/૧તાલાનાં પતતાં શબ્દમાકર્ણ્યાસુરરાટ્ તતઃ ।
૧૮૬.૭/૨આજગામ સ દુષ્ટાત્મા કોપાદ્ દૈતેયગર્દભઃ ॥ ૧૮૬.૭ ॥

૧૮૬.૮/૧પદ્ભ્યામુભાભ્યાં સ તદા પશ્ચિમાભ્યાં ચ તં બલી ।
૧૮૬.૮/૨જઘાનોરસિ તાભ્યાં ચ સ ચ તેનાપ્યગૃહ્યત ॥ ૧૮૬.૮ ॥

૧૮૬.૯/૧ગૃહીત્વા ભ્રામણેનૈવ ચામ્બરે ગતજીવિતમ્ ।
૧૮૬.૯/૨તસ્મિન્ એવ પ્રચિક્ષેપ વેગેન તૃણરાજનિ ॥ ૧૮૬.૯ ॥

૧૮૬.૧૦/૧તતઃ ફલાન્યનેકાનિ તાલાગ્રાન્ નિપતન્ ખરઃ ।
૧૮૬.૧૦/૨પૃથિવ્યાં પાતયામાસ મહાવાતોઽમ્બુદાન્ ઇવ ॥ ૧૮૬.૧૦ ॥

૧૮૬.૧૧/૧અન્યાન્ અપ્યસ્ય વૈ જ્ઞાતીન્ આગતાન્ દૈત્યગર્દભાન્ ।
૧૮૬.૧૧/૨કૃષ્ણશ્ચિક્ષેપ તાલાગ્રે બલભદ્રશ્ચ લીલયા ॥ ૧૮૬.૧૧ ॥

૧૮૬.૧૨/૧ક્ષણેનાલંકૃતા પૃથ્વી પક્વૈસ્તાલફલૈસ્તદા ।
૧૮૬.૧૨/૨દૈત્યગર્દભદેહૈશ્ચ મુનયઃ શુશુભેઽધિકમ્ ॥ ૧૮૬.૧૨ ॥

૧૮૬.૧૩/૧તતો ગાવો નિરાબાધાસ્તસ્મિંસ્તાલવને દ્વિજાઃ ।
૧૮૬.૧૩/૨નવશષ્પં સુખં ચેરુર્યત્ર ભુક્તમભૂત્ પુરા ॥ ૧૮૬.૧૩ ॥

૧૮૭.૧/૧વ્યાસ ઉવાચ । તસ્મિન્ રાસભદૈતેયે સાનુજે વિનિપાતિતે ।
૧૮૭.૧/૨સર્વગોપાલગોપીનાં રમ્યં તાલવનં બભૌ ॥ ૧૮૭.૧ ॥

૧૮૭.૨/૧તતસ્તૌ જાતહર્ષૌ તુ વસુદેવસુતાવુભૌ ।
૧૮૭.૨/૨શુશુભાતે મહાત્માનૌ બાલશ◌ૃઙ્ગાવિવર્ષભૌ ॥ ૧૮૭.૨ ॥

૧૮૭.૩/૧ચારયન્તૌ ચ ગા દૂરે વ્યાહરન્તૌ ચ નામભિઃ ।

૧૮૭.૩/૨નિયોગપાશસ્કન્ધૌ તૌ વનમાલાવિભૂષિતૌ ॥ ૧૮૭.૩॥

૧૮૭.૪/૧સુવર્ણાઞ્જનચૂર્ણાભ્યાં તદા તૌ ભૂષિતામ્બરૌ ।
૧૮૭.૪/૨મહેન્દ્રાયુધસંકાશૌ શ્વેતકૃષ્ણાવિવામ્બુદૌ ॥ ૧૮૭.૪॥

૧૮૭.૫/૧ચેરતુર્લોકસિદ્ધાભિઃ ક્રીડાભિરિતરેતરમ્ ।
૧૮૭.૫/૨સમસ્તલોકનાથાનાં નાથભૂતૌ ભુવં ગતૌ ॥ ૧૮૭.૫॥

૧૮૭.૬/૧મનુષ્યધર્માભિરતૌ માનયન્તૌ મનુષ્યતામ્ ।
૧૮૭.૬/૨તજ્જાતિગુણયુક્તાભિઃ ક્રીડાભિશ્ચેરતુર્વનમ્ ॥ ૧૮૭.૬॥

૧૮૭.૭/૧તતસ્ત્વાન્દોલિકાભિશ્ચ નિયુદ્ધૈશ્ચ મહાબલૌ ।
૧૮૭.૭/૨વ્યાયામં ચક્રતુસ્તત્ર ક્ષેપણીયૈસ્તથાશ્મભિઃ ॥ ૧૮૭.૭॥

૧૮૭.૮/૧તલ્લિપ્સુરસુરસ્તત્ર ઉભયો રમમાણયોઃ ।
૧૮૭.૮/૨આજગામ પ્રલમ્બાખ્યો ગોપવેષતિરોહિતઃ ॥ ૧૮૭.૮॥

૧૮૭.૯/૧સોઽવગાહત નિઃશઙ્કં તેષાં મધ્યમમાનુષઃ ।
૧૮૭.૯/૨માનુષં રૂપમાસ્થાય પ્રલમ્બો દાનવોત્તમઃ ॥ ૧૮૭.૯॥

૧૮૭.૧૦/૧તયોશ્છિદ્રાન્તરપ્રેપ્સુરતિશીઘ્રમમન્યત ।
૧૮૭.૧૦/૨કૃષ્ણં તતો રૌહિણેયં હન્તું ચક્રે મનોરથમ્ ॥ ૧૮૭.૧૦॥

૧૮૭.૧૧/૧હરિણા ક્રીડનં નામ બાલક્રીડનકં તતઃ ।
૧૮૭.૧૧/૨પ્રક્રીડિતાસ્તુ તે સર્વે દ્વૌ દ્વૌ યુગપદ્ ઉત્પતન્ ॥ ૧૮૭.૧૧॥

૧૮૭.૧૨/૧શ્રીદામ્ના સહ ગોવિન્દઃ પ્રલમ્બેન તથા બલઃ ।
૧૮૭.૧૨/૨ગોપાલૈરપરૈશ્ચાન્યે ગોપાલાઃ સહ પુપ્લુવુઃ ॥ ૧૮૭.૧૨॥

૧૮૭.૧૩/૧શ્રીદામાનં તતઃ કૃષ્ણઃ પ્રલમ્બં રોહિણીસુતઃ ।
૧૮૭.૧૩/૨જિતવાન્ કૃષ્ણપક્ષીયૈર્ગોપૈરન્યૈઃ પરાજિતાઃ ॥ ૧૮૭.૧૩॥

૧૮૭.૧૪/૧તે વાહયન્તસ્ત્વન્યોન્યં ભાણ્ડીરસ્કન્ધમેત્ય વૈ ।
૧૮૭.૧૪/૨પુનર્નિવૃત્તાસ્તે સર્વે યે યે તત્ર પરાજિતાઃ ॥ ૧૮૭.૧૪॥

૧૮૭.૧૫/૧સંકર્ષણં તુ સ્કન્ધેન શીઘ્રમુત્ક્ષિપ્ય દાનવઃ ।
૧૮૭.૧૫/૨ન તસ્થૌ પ્રજગામૈવ સચન્દ્ર ઇવ વારિદઃ ॥ ૧૮૭.૧૫॥

૧૮૭.૧૬/૧અશક્તો વહને તસ્ય સંરમ્ભાદ્ દાનવોત્તમઃ ।
૧૮૭.૧૬/૨વવૃધે સુમહાકાયઃ પ્રાવૃષીવ બલાહકઃ ॥ ૧૮૭.૧૬॥

૧૮૭.૧૭/૧સંકર્ષણસ્તુ તં દૃષ્ટ્વા દગ્ધશૈલોપમાકૃતિમ્ ।
૧૮૭.૧૭/૨સ્રગ્દામલમ્બાભરણં મુકુટાટોપમસ્તકમ્ ॥ ૧૮૭.૧૭॥

૧૮૭.૧૮/૧રૌદ્રં શકટચક્રાક્ષં પાદન્યાસચલત્ક્ષિતિમ્ ।
૧૮૭.૧૮/૨હ્રિયમાણસ્તતઃ કૃષ્ણમિદં વચનમબ્રવીત્ ॥ ૧૮૭.૧૮॥

૧૮૭.૧૯/૧બલરામ ઉવાચ । કૃષ્ણ કૃષ્ણ હ્રિયે ત્વેષ પર્વતોદગ્રમૂર્તિના ।
૧૮૭.૧૯/૨કેનાપિ પશ્ય દૈત્યેન ગોપાલચ્છદ્મરૂપિણા ॥ ૧૮૭.૧૯॥

૧૮૭.૨૦/૧યદ્ અત્ર સામ્પ્રતં કાર્યં મયા મધુનિષૂદન ।
૧૮૭.૨૦/૨તત્ કથ્યતાં પ્રયાત્યેષ દુરાત્માતિત્વરાન્વિતઃ ॥ ૧૮૭.૨૦॥

૧૮૭.૨૧/૧વ્યાસ ઉવાચ । તમાહ રામં ગોવિન્દઃ સ્મિતભિન્નૌષ્ઠસમ્પુટઃ ।
૧૮૭.૨૧/૨મહાત્મા રૌહિણેયસ્ય બલવીર્યપ્રમાણવિત્ ॥ ૧૮૭.૨૧॥

૧૮૭.૨૨/૧કૃષ્ણ ઉવાચ । કિમયં માનુષો ભાવો વ્યક્તમેવાવલમ્બ્યતે ।
૧૮૭.૨૨/૨સર્વાત્મન્ સર્વગુહ્યાનાં ગુહ્યાદ્ ગુહ્યાત્મના ત્વયા ॥ ૧૮૭.૨૨॥

૧૮૭.૨૩/૧સ્મરાશેષજગદીશ કારણં કારણાગ્રજ ।
૧૮૭.૨૩/૨આત્માનમેકં તદ્વચ્ચ જગત્યેકાર્ણવે ચ યઃ ॥ ૧૮૭.૨૩॥

૧૮૭.૨૪/૧ભવાન્ અહં ચ વિશ્વાત્મન્ન્ એકમેવ હિ કારણમ્ ।
૧૮૭.૨૪/૨જગતોऽસ્ય જગત્યર્થે ભેદેનાવાં વ્યવસ્થિતૌ ॥ ૧૮૭.૨૪॥

૧૮૭.૨૫/૧તત્ સ્મર્યતામમેયાત્મંસ્ત્વયાત્મા જહિ દાનવમ્ ।
૧૮૭.૨૫/૨માનુષ્યમેવમાલમ્બ્ય બન્ધૂનાં ક્રિયતાં હિતમ્ ॥ ૧૮૭.૨૫॥

૧૮૭.૨૬/૧વ્યાસ ઉવાચ । ઇતિ સંસ્મારિતો વિપ્રાઃ કૃષ્ણેન સુમહાત્મના ।
૧૮૭.૨૬/૨વિહસ્ય પીડયામાસ પ્રલમ્બં બલવાન્ બલઃ ॥ ૧૮૭.૨૬॥

૧૮૭.૨૭/૧મુષ્ટિના ચાહન્ મૂર્ધ્નિ કોપસંરક્તલોચનઃ ।
૧૮૭.૨૭/૨તેન ચાસ્ય પ્રહારેણ બહિર્યાતે વિલોચને ॥ ૧૮૭.૨૭॥

૧૮૭.૨૮/૧સ નિષ્કાસિતમસ્તિષ્કો મુખાચ્છોણિતમુદ્વમન્ ।
૧૮૭.૨૮/૨નિપપાત મહીપૃષ્ઠે દૈત્યવર્યો મમાર ચ ॥ ૧૮૭.૨૮॥

૧૮૭.૨૯/૧પ્રલમ્બં નિહતં દૃષ્ટ્વા બલેનાદ્ભુતકર્મણા ।
૧૮૭.૨૯/૨પ્રહૃષ્ટાસ્તુષ્ટુવુર્ગોપાઃ સાધુ સાધ્વિતિ ચાબ્રુવન્ ॥ ૧૮૭.૨૯॥

૧૮૭.૩૦/૧સંસ્તૂયમાનો રામસ્તુ ગોપૈર્દૈત્યે નિપાતિતે ।
૧૮૭.૩૦/૨પ્રલમ્બે સહ કૃષ્ણેન પુનર્ગોકુલમાયયૌ ॥ ૧૮૭.૩૦॥

૧૮૭.૩૧/૧વ્યાસ ઉવાચ । તયોર્વિહરતોરેવં રામકેશવયોર્વ્રજે ।
૧૮૭.૩૧/૨પ્રાવૃડ્વ્યતીતા વિકસત્+ ।સરોજા ચાભવચ્છરત્ ॥ ૧૮૭.૩૧॥

૧૮૭.૩૨/૧વિમલામ્બરનક્ષત્રે કાલે ચાભ્યાગતે વ્રજમ્ ।
૧૮૭.૩૨/૨દદર્શેન્દ્રોત્સવારમ્ભ+ ।પ્રવૃત્તાન્ વ્રજવાસિનઃ ॥ ૧૮૭.૩૨॥

૧૮૭.૩૩/૧કૃષ્ણસ્તાન્ ઉત્સુકાન્ દૃષ્ટ્વા ગોપાન્ ઉત્સવલાલસાન્ ।
૧૮૭.૩૩/૨કૌતૂહલાદ્ ઇદં વાક્યં પ્રાહ વૃદ્ધાન્ મહામતિઃ ॥ ૧૮૭.૩૩॥

૧૮૭.૩૪/૧કૃષ્ણ ઉવાચ । કોઽયં શક્રમહો નામ યેન વો હર્ષ આગતઃ ।
૧૮૭.૩૪/૨પ્રાહ તં નન્દગોપશ્ચ પૃચ્છન્તમતિસાદરમ્ ॥ ૧૮૭.૩૪॥

૧૮૭.૩૫/૧નન્દ ઉવાચ । મેઘાનાં પયસામીશો દેવરાજઃ શતક્રતુઃ ।
૧૮૭.૩૫/૨યેન સંચોદિતા મેઘા વર્ષન્ત્યમ્બુમયં રસમ્ ॥ ૧૮૭.૩૫॥

૧૮૭.૩૬/૧તદ્વૃષ્ટિજનિતં સસ્યં વયમન્યે ચ દેહિનઃ ।
૧૮૭.૩૬/૨વર્તયામોપભુઞ્જાનાસ્તર્પયામશ્ચ દેવતાઃ ॥ ૧૮૭.૩૬॥

૧૮૭.૩૭/૧ક્ષીરવત્ય ઇમા ગાવો વત્સવત્યશ્ચ નિર્વૃતાઃ ।
૧૮૭.૩૭/૨તેન સંવર્ધિતૈઃ સસ્યૈઃ પુષ્ટાસ્તુષ્ટા ભવન્તિ વૈ ॥ ૧૮૭.૩૭॥

૧૮૭.૩૮/૧નાસસ્યા નાનૃણા ભૂમિર્ન બુભુક્ષાર્દિતો જનઃ ।
૧૮૭.૩૮/૨દૃશ્યતે યત્ર દૃશ્યન્તે વૃષ્ટિમન્તો બલાહકાઃ ॥ ૧૮૭.૩૮॥

૧૮૭.૩૯/૧ભૌમમેતત્ પયો ગોભિર્ધત્તે સૂર્યસ્ય વારિદઃ ।
૧૮૭.૩૯/૨પર્જન્યઃ સર્વલોકસ્ય ભવાય ભુવિ વર્ષતિ ॥ ૧૮૭.૩૯॥

૧૮૭.૪૦/૧તસ્માત્ પ્રાવૃષિ રાજાનઃ શક્રં સર્વે મુદાન્વિતાઃ ।
૧૮૭.૪૦/૨મહે સુરેશમર્ચન્તિ વયમન્યે ચ દેહિનઃ ॥ ૧૮૭.૪૦॥

૧૮૭.૪૧/૧વ્યાસ ઉવાચ । નન્દગોપસ્ય વચનં શ્રુત્વેત્થં શક્રપૂજને ।
૧૮૭.૪૧/૨કોપાય ત્રિદશેન્દ્રસ્ય પ્રાહ દામોદરસ્તદા ॥ ૧૮૭.૪૧॥

૧૮૭.૪૨/૧કૃષ્ણ ઉવાચ । ન વયં કૃષિકર્તારો વણિજ્યાજીવિનો ન ચ ।
૧૮૭.૪૨/૨ગાવોઽસ્મદ્દૈવતં તાત વયં વનચરા યતઃ ॥ ૧૮૭.૪૨॥

૧૮૭.૪૩/૧આન્વીક્ષિકી ત્રયી વાર્ત્તા દણ્ડનીતિસ્તથાપરા ।
૧૮૭.૪૩/૨વિદ્યાચતુષ્ટયં ત્વેતદ્ વાર્ત્તામત્ર શ્ૃણુષ્વ મે ॥ ૧૮૭.૪૩॥

૧૮૭.૪૪/૧કૃષિર્વણિજ્યા તદ્વચ્ચ તૃતીયં પશુપાલનમ્ ।

૧૮૭.૪૪/૨વિદ્યા હ્યેતા મહાભાગા વાર્ત્તા વૃત્તિત્રયાશ્રયા ॥ ૧૮૭.૪૪॥

૧૮૭.૪૫/૧કર્ષકાણાં કૃષિર્વૃત્તિઃ પણ્યં તુ પણજીવિનામ્ ।
૧૮૭.૪૫/૨અસ્માકં ગાઃ પરા વૃત્તિર્વાર્ત્તા ભેદૈરિયં ત્રિભિઃ ॥ ૧૮૭.૪૫॥

૧૮૭.૪૬/૧વિદ્યયા યો યયા યુક્તસ્તસ્ય સા દૈવતં મહત્ ।
૧૮૭.૪૬/૨સૈવ પૂજ્યાર્ચનીયા ચ સૈવ તસ્યોપકારિકા ॥ ૧૮૭.૪૬॥

૧૮૭.૪૭/૧યોઽન્યસ્યાઃ ફલમશ્નન્ વૈ પૂજયત્યપરાં નરઃ ।
૧૮૭.૪૭/૨ઇહ ચ પ્રેત્ય ચૈવાસૌ તાત નાપ્નોતિ શોભનમ્ ॥ ૧૮૭.૪૭॥

૧૮૭.૪૮/૧પૂજ્યન્તાં પ્રથિતાઃ સીમાઃ સીમાન્તં ચ પુનર્વનમ્ ।
૧૮૭.૪૮/૨વનાન્તા ગિરયઃ સર્વે સા ચાસ્માકં પરા ગતિઃ ॥ ૧૮૭.૪૮॥

૧૮૭.૪૯/૧ગિરિયજ્ઞસ્ત્વયં તસ્માદ્ ગોયજ્ઞશ્ચ પ્રવર્ત્યતામ્ ।
૧૮૭.૪૯/૨કિમસ્માકં મહેન્દ્રેણ ગાવઃ શૈલાશ્ચ દેવતાઃ ॥ ૧૮૭.૪૯॥

૧૮૭.૫૦/૧મન્ત્રયજ્ઞપરા વિપ્રાઃ સીરયજ્ઞાશ્ચ કર્ષકાઃ ।
૧૮૭.૫૦/૨ગિરિગોયજ્ઞશીલાશ્ચ વયમદ્રિવનાશ્રયાઃ ॥ ૧૮૭.૫૦॥

૧૮૭.૫૧/૧તસ્માદ્ ગોવર્ધનઃ શૈલો ભવદ્ભિર્વિવિધાર્હણૈઃ ।
૧૮૭.૫૧/૨અર્ચ્યતાં પૂજ્યતાં મેધ્યં પશું હત્વા વિધાનતઃ ॥ ૧૮૭.૫૧॥

૧૮૭.૫૨/૧સર્વઘોષસ્ય સંદોહા ગૃહ્યન્તાં મા વિચાર્યતામ્ ।
૧૮૭.૫૨/૨ભોજ્યન્તાં તેન વૈ વિપ્રાસ્તથાન્યે ચાપિ વાઞ્છકાઃ ॥ ૧૮૭.૫૨॥

૧૮૭.૫૩/૧તમર્ચિતં કૃતે હોમે ભોજિતેષુ દ્વિજાતિષુ ।
૧૮૭.૫૩/૨શરત્પુષ્પકૃતાપીડાઃ પરિગચ્છન્તુ ગોગણાઃ ॥ ૧૮૭.૫૩॥

૧૮૭.૫૪/૧એતન્ મમ મતં ગોપાઃ સમ્પ્રીત્યા ક્રિયતે યદિ ।
૧૮૭.૫૪/૨તતઃ કૃતા ભવેત્ પ્રીતિર્ગવામદ્રેસ્તથા મમ ॥ ૧૮૭.૫૪॥

૧૮૭.૫૫/૧વ્યાસ ઉવાચ । ઇતિ તસ્ય વચઃ શ્રુત્વા નન્દાદ્યાસ્તે વ્રજૌકસઃ ।
૧૮૭.૫૫/૨પ્રીત્યુત્ફુલ્લમુખા વિપ્રાઃ સાધુ સાધ્વિત્યથાબ્રુવન્ ॥ ૧૮૭.૫૫॥

૧૮૭.૫૬/૧શોભનં તે મતં વત્સ યદ્ એતદ્ ભવતોદિતમ્ ।
૧૮૭.૫૬/૨તત્ કરિષ્યામ્યહં સર્વં ગિરિયજ્ઞઃ પ્રવર્ત્યતામ્ ॥ ૧૮૭.૫૬॥

૧૮૭.૫૭/૧તથા ચ કૃતવન્તસ્તે ગિરિયજ્ઞં વ્રજૌકસઃ ।
૧૮૭.૫૭/૨દધિપાયસમાંસાદ્યૈર્દદુઃ શૈલબલિં તતઃ ॥ ૧૮૭.૫૭॥

૧૮૭.૫૮/૧દ્વિજાંશ્ચ ભોજયામાસુઃ શતશોઽથ સહસ્રશઃ ।
૧૮૭.૫૮/૨ગાવઃ શૈલં તતશ્ચક્રુરર્ચિતાસ્તં પ્રદક્ષિણમ્ ॥ ૧૮૭.૫૮॥

૧૮૭.૫૯/૧વૃષભાશ્ચાભિનર્દન્તઃ સતોયા જલદા ઇવ ।
૧૮૭.૫૯/૨ગિરિમૂર્ધનિ ગોવિન્દઃ શૈલોઽહમિતિ મૂર્તિમાન્ ॥ ૧૮૭.૫૯॥

૧૮૭.૬૦/૧બુભુજેઽન્નં બહુવિધં ગોપવર્યાહૃતં દ્વિજાઃ ।
૧૮૭.૬૦/૨કૃષ્ણસ્તેનૈવ રૂપેણ ગોપૈઃ સહ ગિરેઃ શિરઃ ॥ ૧૮૭.૬૦॥

૧૮૭.૬૧/૧અધિરુહ્યાર્ચયામાસ દ્વિતીયામાત્મનસ્તનુમ્ ।
૧૮૭.૬૧/૨અન્તર્ધાનં ગતે તસ્મિન્ ગોપા લબ્ધ્વા તતો વરાન્ ।
૧૮૭.૬૧/૩કૃત્વા ગિરિમહં ગોષ્ઠં નિજમભ્યાયયુઃ પુનઃ ॥ ૧૮૭.૬૧॥

૧૮૮.૧/૧વ્યાસ ઉવાચ । મહે પ્રતિહતે શક્રો ભૃશં કોપસમન્વિતઃ ।
૧૮૮.૧/૨સંવર્તકં નામ ગણં તોયદાનામથાબ્રવીત્ ॥ ૧૮૮.૧॥

૧૮૮.૨/૧ઇન્દ્ર ઉવાચ । ભો ભો મેઘા નિશમ્યૈતદ્ વદતો વચનં મમ ।
૧૮૮.૨/૨આજ્ઞાનન્તરમેવાશુ ક્રિયતામવિચારિતમ્ ॥ ૧૮૮.૨॥

૧૮૮.૩/૧નન્દગોપઃ સુદુર્બુદ્ધિર્ગોપૈરન્યૈઃ સહાયવાન્ ।
૧૮૮.૩/૨કૃષ્ણાશ્રયબલાધ્માતો મહભઙ્ગમચીકરત્ ॥ ૧૮૮.૩॥

૧૮૮.૪/૧આજીવો યઃ પરં તેષાં ગોપત્વસ્ય ચ કારણમ્ ।
૧૮૮.૪/૨તા ગાવો વૃષ્ટિપાતેન પીડ્યન્તાં વચનાન્ મમ ॥ ૧૮૮.૪॥

૧૮૮.૫/૧અહમપ્યદ્રિશ◌ૃઙ્ગાભં તુઙ્ગમારુહ્ય વારણમ્ ।
૧૮૮.૫/૨સાહાય્યં વઃ કરિષ્યામિ વાયૂનાં સંગમેન ચ ॥ ૧૮૮.૫॥

૧૮૮.૬/૧વ્યાસ ઉવાચ । ઇત્યાજ્ઞપ્તાઃ સુરેન્દ્રેણ મુમુચુસ્તે બલાહકાઃ ।
૧૮૮.૬/૨વાતવર્ષં મહાભીમમભાવાય ગવાં દ્વિજાઃ ॥ ૧૮૮.૬॥

૧૮૮.૭/૧તતઃ ક્ષણેન ધરણી કકુભોઽમ્બરમેવ ચ ।
૧૮૮.૭/૨એકં ધારામહાસાર+ ।પૂરણેનાભવદ્ દ્વિજાઃ ॥ ૧૮૮.૭॥

૧૮૮.૮/૧ગાવસ્તુ તેન પતતા વર્ષવાતેન વેગિના ।
૧૮૮.૮/૨ધુતાઃ પ્રાણાઞ્ જહુઃ સર્વાસ્તિર્યઙ્મુખશિરોધરાઃ ॥ ૧૮૮.૮॥

૧૮૮.૯/૧ક્રોડેન વત્સાન્ આક્રમ્ય તસ્થુરન્યા દ્વિજોત્તમાઃ ।
૧૮૮.૯/૨ગાવો વિવત્સાશ્ચ કૃતા વારિપૂરેણ ચાપરાઃ ॥ ૧૮૮.૯॥

૧૮૮.૧૦/૧વત્સાશ્ચ દીનવદનાઃ પવનાકમ્પિકંધરાઃ ।

૧૮૮.૧૦/૨ત્રાહિ ત્રાહીત્યલ્પશબ્દાઃ કૃષ્ણમૂચુરિવાર્તકાઃ ॥ ૧૮૮.૧૦॥

૧૮૮.૧૧/૧તતસ્તદ્ ગોકુલં સર્વં ગોગોપીગોપસંકુલમ્ ।
૧૮૮.૧૧/૨અતીવાર્તં હરિર્દૃષ્ટ્વા ત્રાણાયાચિન્તયત્ તદા ॥ ૧૮૮.૧૧॥

૧૮૮.૧૨/૧એતત્ કૃતં મહેન્દ્રેણ મહભઙ્ગવિરોધિના ।
૧૮૮.૧૨/૨તદ્ એતદ્ અખિલં ગોષ્ઠં ત્રાતવ્યમધુના મયા ॥ ૧૮૮.૧૨॥

૧૮૮.૧૩/૧ઇમમદ્રિમહં વીર્યાદ્ ઉત્પાટ્યોરુશિલાતલમ્ ।
૧૮૮.૧૩/૨ધારયિષ્યામિ ગોષ્ઠસ્ય પૃથુચ્છત્રમિવોપરિ ॥ ૧૮૮.૧૩॥

૧૮૮.૧૪/૧વ્યાસ ઉવાચ । ઇતિ કૃત્વા મતિં કૃષ્ણો ગોવર્ધનમહીધરમ્ ।
૧૮૮.૧૪/૨ઉત્પાટ્યૈકકરેણૈવ ધારયામાસ લીલયા ॥ ૧૮૮.૧૪॥

૧૮૮.૧૫/૧ગોપાંશ્ચાહ જગન્નાથઃ સમુત્પાટિતભૂધરઃ ।
૧૮૮.૧૫/૨વિશધ્વમત્ર સહિતાઃ કૃતં વર્ષનિવારણમ્ ॥ ૧૮૮.૧૫॥

૧૮૮.૧૬/૧સુનિર્વાતેષુ દેશેષુ યથાયોગ્યમિહાસ્યતામ્ ।
૧૮૮.૧૬/૨પ્રવિશ્ય નાત્ર ભેતવ્યં ગિરિપાતસ્ય નિર્ભયૈઃ ॥ ૧૮૮.૧૬॥

૧૮૮.૧૭/૧ઇત્યુક્તાસ્તેન તે ગોપા વિવિશુર્ગોધનૈઃ સહ ।
૧૮૮.૧૭/૨શકટારોપિતૈર્ભાણ્ડૈર્ગોપ્યશ્ચાસારપીડિતાઃ ॥ ૧૮૮.૧૭॥

૧૮૮.૧૮/૧કૃષ્ણોઽપિ તં દધારૈવં શૈલમત્યન્તનિશ્ચલમ્ ।
૧૮૮.૧૮/૨વ્રજૈકોવાસિભિર્હર્ષ+ ।વિસ્મિતાક્ષૈર્નિરીક્ષિતઃ ॥ ૧૮૮.૧૮॥

૧૮૮.૧૯/૧ગોપગોપીજનૈર્હૃષ્ટૈઃ પ્રીતિવિસ્તારિતેક્ષણૈઃ ।
૧૮૮.૧૯/૨સંસ્તૂયમાનચરિતઃ કૃષ્ણઃ શૈલમધારયત્ ॥ ૧૮૮.૧૯॥

૧૮૮.૨૦/૧સપ્તરાત્રં મહામેઘા વવર્ષુર્નન્દગોકુલે ।
૧૮૮.૨૦/૨ઇન્દ્રેણ ચોદિતા મેઘા ગોપાનાં નાશકારિણા ॥ ૧૮૮.૨૦॥

૧૮૮.૨૧/૧તતો ધૃતે મહાશૈલે પરિત્રાતે ચ ગોકુલે ।
૧૮૮.૨૧/૨મિથ્યાપ્રતિજ્ઞો બલભિદ્ વારયામાસ તાન્ ઘનાન્ ॥ ૧૮૮.૨૧॥

૧૮૮.૨૨/૧વ્યભ્રે નભસિ દેવેન્દ્રે વિતથે શક્રમન્ત્રિતે ।
૧૮૮.૨૨/૨નિષ્ક્રમ્ય ગોકુલં હૃષ્ટઃ સ્વસ્થાનં પુનરાગમત્ ॥ ૧૮૮.૨૨॥

૧૮૮.૨૩/૧મુમોચ કૃષ્ણોઽપિ તદા ગોવર્ધનમહાગિરિમ્ ।
૧૮૮.૨૩/૨સ્વસ્થાને વિસ્મિતમુખૈર્દૃષ્ટસ્તૈર્વ્રજવાસિભિઃ ॥ ૧૮૮.૨૩॥

૧૮૮.૨૪/૧વ્યાસ ઉવાચ । ધૃતે ગોવર્ધને શૈલે પરિત્રાતે ચ ગોકુલે ।
૧૮૮.૨૪/૨રોચયામાસ કૃષ્ણસ્ય દર્શનં પાકશાસનઃ ॥ ૧૮૮.૨૪॥

૧૮૮.૨૫/૧સોઽધિરુહ્ય મહાનાગમૈરાવતમમિત્રજિત્ ।
૧૮૮.૨૫/૨ગોવર્ધનગિરૌ કૃષ્ણં દદર્શ ત્રિદશાધિપઃ ॥ ૧૮૮.૨૫॥

૧૮૮.૨૬/૧ચારયન્તં મહાવીર્યં ગાશ્ચ ગોપવપુર્ધરમ્ ।
૧૮૮.૨૬/૨કૃત્સ્નસ્ય જગતો ગોપં વૃતં ગોપકુમારકૈઃ ॥ ૧૮૮.૨૬॥

૧૮૮.૨૭/૧ગરુડં ચ દદર્શોચ્ચૈરન્તર્ધાનગતં દ્વિજાઃ ।
૧૮૮.૨૭/૨કૃતચ્છાયં હરેર્મૂર્ધ્નિ પક્ષાભ્યાં પક્ષિપુંગવમ્ ॥ ૧૮૮.૨૭॥

૧૮૮.૨૮/૧અવરુહ્ય સ નાગેન્દ્રાદ્ એકાન્તે મધુસૂદનમ્ ।
૧૮૮.૨૮/૨શક્રઃ સસ્મિતમાહેદં પ્રીતિવિસ્ફારિતેક્ષણઃ ॥ ૧૮૮.૨૮॥

૧૮૮.૨૯/૧ઇન્દ્ર ઉવાચ । કૃષ્ણ કૃષ્ણ શ ૃણુષ્વેદં યદર્થમહમાગતઃ ।
૧૮૮.૨૯/૨ત્વત્સમીપં મહાબાહો નૈતચ્ચિન્ત્યં ત્વયાન્યથા ॥ ૧૮૮.૨૯॥

૧૮૮.૩૦/૧ભારાવતરણાર્થાય પૃથિવ્યાઃ પૃથિવીતલમ્ ।
૧૮૮.૩૦/૨અવતીર્ણોઽખિલાધારસ્ત્વમેવ પરમેશ્વર ॥ ૧૮૮.૩૦॥

૧૮૮.૩૧/૧મહભઙ્ગવિરુદ્ધેન મયા ગોકુલનાશકાઃ ।
૧૮૮.૩૧/૨સમાદિષ્ટા મહામેઘાસ્તૈશ્ચૈતત્ કદનં કૃતમ્ ॥ ૧૮૮.૩૧॥

૧૮૮.૩૨/૧ત્રાતાસ્તાપાત્ ત્વયા ગાવઃ સમુત્પાટ્ય મહાગિરિમ્ ।
૧૮૮.૩૨/૨તેનાહં તોષિતો વીર કર્મણાત્યદ્ભુતેન તે ॥ ૧૮૮.૩૨॥

૧૮૮.૩૩/૧સાધિતં કૃષ્ણ દેવાનામદ્ય મન્યે પ્રયોજનમ્ ।
૧૮૮.૩૩/૨ત્વયાયમદ્રિપ્રવરઃ કરેણૈકેન ચોદ્ધૃતઃ ॥ ૧૮૮.૩૩॥

૧૮૮.૩૪/૧ગોભિશ્ચ નોદિતઃ કૃષ્ણ ત્વત્સમીપમિહાગતઃ ।
૧૮૮.૩૪/૨ત્વયા ત્રાતાભિરત્યર્થં યુષ્મત્કારણકારણાત્ ॥ ૧૮૮.૩૪॥

૧૮૮.૩૫/૧સ ત્વાં કૃષ્ણાભિષેક્ષ્યામિ ગવાં વાક્યપ્રચોદિતઃ ।
૧૮૮.૩૫/૨ઉપેન્દ્રત્વે ગવામિન્દ્રો ગોવિન્દસ્ત્વં ભવિષ્યસિ ॥ ૧૮૮.૩૫॥

૧૮૮.૩૬/૧અથોપવાહ્યાદ્ આદાય ઘણ્ટામૈરાવતાદ્ ગજાત્ ।
૧૮૮.૩૬/૨અભિષેકં તયા ચક્રે પવિત્રજલપૂર્ણયા ॥ ૧૮૮.૩૬॥

૧૮૮.૩૭/૧ક્રિયમાણેઽભિષેકે તુ ગાવઃ કૃષ્ણસ્ય તત્ક્ષણાત્ ।
૧૮૮.૩૭/૨પ્રસ્રવોદ્ભૂતદુગ્ધાર્દ્રાં સદ્યશ્ચક્રુર્વસુંધરામ્ ॥ ૧૮૮.૩૭॥

૧૮૮.૩૮/૧અભિષિચ્ય ગવાં વાક્યાદ્ દેવેન્દ્રો વૈ જનાર્દનમ્ ।
૧૮૮.૩૮/૨પ્રીત્યા સપ્રશ્રયં કૃષ્ણં પુનરાહ શચીપતિઃ ॥ ૧૮૮.૩૮॥

૧૮૮.૩૯/૧ઇન્દ્ર ઉવાચ । ગવામેતત્ કૃતં વાક્યાત્ તથાન્યદ્ અપિ મે શ઼ૃણુ ।
૧૮૮.૩૯/૨યદ્ બ્રવીમિ મહાભાગ ભારાવતરણેચ્છયા ॥ ૧૮૮.૩૯॥

૧૮૮.૪૦/૧મમાંશઃ પુરુષવ્યાઘ્રઃ પૃથિવ્યાં પૃથિવીધર ।
૧૮૮.૪૦/૨અવતીર્ણોઽર્જુનો નામ સ રક્ષ્યો ભવતા સદા ॥ ૧૮૮.૪૦॥

૧૮૮.૪૧/૧ભારાવતરણે સખ્યં સ તે વીરઃ કરિષ્યતિ ।
૧૮૮.૪૧/૨સ રક્ષણીયો ભવતા યથાત્મા મધુસૂદન ॥ ૧૮૮.૪૧॥

૧૮૮.૪૨/૧શ્રીભગવાન્ ઉવાચ । જાનામિ ભારતે વંશે જાતં પાર્થં તવાંશતઃ ।
૧૮૮.૪૨/૨તમહં પાલયિષ્યામિ યાવદ્ અસ્મિ મહીતલે ॥ ૧૮૮.૪૨॥

૧૮૮.૪૩/૧યાવન્ મહીતલે શક્ર સ્થાસ્યામ્યહમરિંદમ ।
૧૮૮.૪૩/૨ન તાવદ્ અર્જુનં કશ્ચિદ્ દેવેન્દ્ર યુધિ જેષ્યતિ ॥ ૧૮૮.૪૩॥

૧૮૮.૪૪/૧કંસો નામ મહાબાહુર્દૈત્યોઽરિષ્ટસ્તથા પરઃ ।
૧૮૮.૪૪/૨કેશી કુવલયાપીડો નરકાદ્યાસ્તથાપરે ॥ ૧૮૮.૪૪॥

૧૮૮.૪૫/૧હતેષુ તેષુ દેવેન્દ્ર ભવિષ્યતિ મહાહવઃ ।
૧૮૮.૪૫/૨તત્ર વિદ્ધિ સહસ્રાક્ષ ભારાવતરણં કૃતમ્ ॥ ૧૮૮.૪૫॥

૧૮૮.૪૬/૧સ ત્વં ગચ્છ ન સંતાપં પુત્રાર્થે કર્તુમર્હસિ ।
૧૮૮.૪૬/૨નાર્જુનસ્ય રિપુઃ કશ્ચિન્ મમાગ્રે પ્રભવિષ્યતિ ॥ ૧૮૮.૪૬॥

૧૮૮.૪૭/૧અર્જુનાર્થે ત્વહં સર્વાન્ યુધિષ્ઠિરપુરોગમાન્ ।
૧૮૮.૪૭/૨નિવૃત્તે ભારતે યુદ્ધે કુન્ત્યૈ દાસ્યામિ વિક્ષતાન્ ॥ ૧૮૮.૪૭॥

૧૮૮.૪૮/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ સમ્પરિષ્વજ્ય દેવરાજો જનાર્દનમ્ ।
૧૮૮.૪૮/૨આરુહ્યૈરાવતં નાગં પુનરેવ દિવં યયૌ ॥ ૧૮૮.૪૮॥

૧૮૮.૪૯/૧કૃષ્ણોઽપિ સહિતો ગોભિર્ગોપાલૈશ્ચ પુનર્વ્રજમ્ ।
૧૮૮.૪૯/૨આજગામાથ ગોપીનાં દૃષ્ટપૂતેન વર્ત્મના ॥ ૧૮૮.૪૯॥

૧૮૯.૧/૧વ્યાસ ઉવાચ । ગતે શક્રે તુ ગોપાલાઃ કૃષ્ણમક્લિષ્ટકારિણમ્ ।
૧૮૯.૧/૨ઊચુઃ પ્રીત્યા ધૃતં દૃષ્ટ્વા તેન ગોવર્ધનાચલમ્ ॥ ૧૮૯.૧॥

૧૮૯.૨/૧ગોપા ઊચુઃ । વયમસ્માન્ મહાભાગ ભવતા મહતો ભયાત્ ।

૧૮૯.૨/૨ગાવશ્ચ ભવતા ત્રાતા ગિરિધારણકર્મણા ॥ ૧૮૯.૨॥

૧૮૯.૩/૧બાલક્રીડેયમતુલા ગોપાલત્વં જુગુપ્સિતમ્ ।
૧૮૯.૩/૨દિવ્યં ચ કર્મ ભવતઃ કિમેતત્ તાત કથ્યતામ્ ॥ ૧૮૯.૩॥

૧૮૯.૪/૧કાલિયો દમિતસ્તોયે પ્રલમ્બો વિનિપાતિતઃ ।
૧૮૯.૪/૨ધૃતો ગોવર્ધનશ્ચાયં શઙ્કિતાનિ મનાંસિ નઃ ॥ ૧૮૯.૪॥

૧૮૯.૫/૧સત્યં સત્યં હરેઃ પાદૌ શ્રયામોઽમિતવિક્રમ ।
૧૮૯.૫/૨યથા ત્વદ્વીર્યમાલોક્ય ન ત્વાં મન્યામહે નરમ્ ॥ ૧૮૯.૫॥

૧૮૯.૬/૧દેવો વા દાનવો વા ત્વં યક્ષો ગન્ધર્વ એવ વા ।
૧૮૯.૬/૨કિં ચાસ્માકં વિચારેણ બાન્ધવોઽસ્તિ નમોઽસ્તુ તે ॥ ૧૮૯.૬॥

૧૮૯.૭/૧પ્રીતિઃ સસ્ત્રીકુમારસ્ય વ્રજસ્ય તવ કેશવ ।
૧૮૯.૭/૨કર્મ ચેદમશક્યં યત્ સમસ્તૈસ્ત્રિદશૈરપિ ॥ ૧૮૯.૭॥

૧૮૯.૮/૧બાલત્વં ચાતિવીર્યં ચ જન્મ ચાસ્માસ્વશોભનમ્ ।
૧૮૯.૮/૨ચિન્ત્યમાનમમેયાત્મઞ્ શઙ્કાં કૃષ્ણ પ્રયચ્છતિ ॥ ૧૮૯.૮॥

૧૮૯.૯/૧વ્યાસ ઉવાચ । ક્ષણં ભૂત્વા ત્વસૌ તૂષ્ણીં કિંચિત્ પ્રણયકોપવાન્ ।
૧૮૯.૯/૨ઇત્યેવમુક્તસ્તૈર્ગોપૈરાહ કૃષ્ણો દ્વિજોત્તમાઃ ॥ ૧૮૯.૯॥

૧૮૯.૧૦/૧શ્રીકૃષ્ણ ઉવાચ । મત્સમ્બન્ધેન વો ગોપા યદિ લજ્જા ન જાયતે ।
૧૮૯.૧૦/૨શ્લાઘ્યો વાહં તતઃ કિં વો વિચારેણ પ્રયોજનમ્ ॥ ૧૮૯.૧૦॥

૧૮૯.૧૧/૧યદિ વોઽસ્તિ મયિ પ્રીતિઃ શ્લાઘ્યોઽહં ભવતાં યદિ ।
૧૮૯.૧૧/૨તદ્ અર્ઘા બન્ધુસદૃશી બાન્ધવાઃ ક્રિયતાં મયિ ॥ ૧૮૯.૧૧॥

૧૮૯.૧૨/૧નાહં દેવો ન ગન્ધર્વો ન યક્ષો ન ચ દાનવઃ ।
૧૮૯.૧૨/૨અહં વો બાન્ધવો જાતો નાતશ્ચિન્ત્યમતોઽન્યથા ॥ ૧૮૯.૧૨॥

૧૮૯.૧૩/૧વ્યાસ ઉવાચ । ઇતિ શ્રુત્વા હરેર્વાક્યં બદ્ધમૌનાસ્તતો બલમ્ ।
૧૮૯.૧૩/૨યયુર્ગોપા મહાભાગાસ્તસ્મિન્ પ્રણયકોપિનિ ॥ ૧૮૯.૧૩॥

૧૮૯.૧૪/૧કૃષ્ણસ્તુ વિમલં વ્યોમ શરચ્ચન્દ્રસ્ય ચન્દ્રિકામ્ ।
૧૮૯.૧૪/૨તથા કુમુદિનીં ફુલ્લામામોદિતદિગન્તરામ્ ॥ ૧૮૯.૧૪॥

૧૮૯.૧૫/૧વનરાજીં તથા કૂજદ્+ ।ભૃઙ્ગમાલામનોરમામ્ ।
૧૮૯.૧૫/૨વિલોક્ય સહ ગોપીભિર્મનશ્ચક્રે રતિં પ્રતિ ॥ ૧૮૯.૧૫॥

૧૮૯.૧૬/૧સહ રામેણ મધુરમતીવ વનિતાપ્રિયમ્ ।
૧૮૯.૧૬/૨જગૌ કમલપાદોઽસૌ નામ તત્ર કૃતવ્રતઃ ॥ ૧૮૯.૧૬॥

૧૮૯.૧૭/૧રમ્યં ગીતધ્વનિં શ્રુત્વા સંત્યજ્યાવસથાંસ્તદા ।
૧૮૯.૧૭/૨આજગ્મુસ્ત્વરિતા ગોપ્યો યત્રાસ્તે મધુસૂદનઃ ॥ ૧૮૯.૧૭॥

૧૮૯.૧૮/૧શનૈઃ શનૈર્જગૌ ગોપી કાચિત્ તસ્ય પદાનુગા ।
૧૮૯.૧૮/૨દત્તાવધાના કાચિચ્ચ તમેવ મનસાસ્મરત્ ॥ ૧૮૯.૧૮॥

૧૮૯.૧૯/૧કાચિત્ કૃષ્ણેતિ કૃષ્ણેતિ ચોક્ત્વા લજ્જામુપાયયૌ ।
૧૮૯.૧૯/૨યયૌ ચ કાચિત્ પ્રેમાન્ધા તત્પાર્શ્વમવિલજ્જિતા ॥ ૧૮૯.૧૯॥

૧૮૯.૨૦/૧કાચિદ્ આવસથસ્યાન્તઃ સ્થિત્વા દૃષ્ટ્વા બહિર્ગુરુમ્ ।
૧૮૯.૨૦/૨તન્મયત્વેન ગોવિન્દં દધ્યૌ મીલિતલોચના ॥ ૧૮૯.૨૦॥

૧૮૯.૨૧/૧ગોપીપરિવૃતો રાત્રિં શરચ્ચન્દ્રમનોરમામ્ ।
૧૮૯.૨૧/૨માનયામાસ ગોવિન્દો રાસારમ્ભરસોત્સુકઃ ॥ ૧૮૯.૨૧॥

૧૮૯.૨૨/૧ગોપ્યશ્ચ વૃન્દશઃ કૃષ્ણ+ ૅહેષ્ટાભ્યાયત્તમૂર્તયઃ ।
૧૮૯.૨૨/૨અન્યદેશગતે કૃષ્ણે ચેરુર્વૃન્દાવનાન્તરમ્ ॥ ૧૮૯.૨૨॥

૧૮૯.૨૩/૧બભ્રમુસ્તાસ્તતો ગોપ્યઃ કૃષ્ણદર્શનલાલસાઃ ।
૧૮૯.૨૩/૨કૃષ્ણસ્ય ચરણં રાત્રૌ દૃષ્ટ્વા વૃન્દાવને દ્વિજાઃ ॥ ૧૮૯.૨૩॥

૧૮૯.૨૪/૧એવં નાનાપ્રકારાસુ કૃષ્ણચેષ્ટાસુ તાસુ ચ ।
૧૮૯.૨૪/૨ગોપ્યો વ્યગ્રાઃ સમં ચેરૂ રમ્યં વૃન્દાવનં વનમ્ ॥ ૧૮૯.૨૪॥

૧૮૯.૨૫/૧નિવૃત્તાસ્તાસ્તતો ગોપ્યો નિરાશાઃ કૃષ્ણદર્શને ।
૧૮૯.૨૫/૨યમુનાતીરમાગમ્ય જગુસ્તચ્ચરિતં દ્વિજાઃ ॥ ૧૮૯.૨૫॥

૧૮૯.૨૬/૧તતો દદૃશુરાયાન્તં વિકાશિમુખપઙ્કજમ્ ।
૧૮૯.૨૬/૨ગોપ્યસ્ત્રૈલોક્યગોપ્તારં કૃષ્ણમક્લિષ્ટકારિણમ્ ॥ ૧૮૯.૨૬॥

૧૮૯.૨૭/૧કાચિદ્ આલોક્ય ગોવિન્દમાયાન્તમતિહર્ષિતા ।
૧૮૯.૨૭/૨કૃષ્ણ કૃષ્ણેતિ કૃષ્ણેતિ પ્રાહોત્ફુલ્લવિલોચના ॥ ૧૮૯.૨૭॥

૧૮૯.૨૮/૧કાચિદ્ ભ્રૂભઙ્ગુરં કૃત્વા લલાટફલકં હરિમ્ ।
૧૮૯.૨૮/૨વિલોક્ય નેત્રભૃઙ્ગાભ્યાં પપૌ તન્મુખપઙ્કજમ્ ॥ ૧૮૯.૨૮॥

૧૮૯.૨૯/૧કાચિદ્ આલોક્ય ગોવિન્દં નિમીલિતવિલોચના ।
૧૮૯.૨૯/૨તસ્યૈવ રૂપં ધ્યાયન્તી યોગારૂઢેવ સા બભૌ ॥ ૧૮૯.૨૯॥

૧૮૯.૩૦/૧તતઃ કાંચિત્ પ્રિયાલાપૈઃ કાંચિદ્ ભ્રૂભઙ્ગવીક્ષિતૈઃ ।
૧૮૯.૩૦/૨નિન્યેઽનુનયમન્યાશ્ચ કરસ્પર્શેન માધવઃ ॥ ૧૮૯.૩૦ ॥

૧૮૯.૩૧/૧તાભિઃ પ્રસન્નચિત્તાભિર્ગોપીભિઃ સહ સાદરમ્ ।
૧૮૯.૩૧/૨રરામ રાસગોષ્ઠીભિરુદારચરિતો હરિઃ ॥ ૧૮૯.૩૧ ॥

૧૮૯.૩૨/૧રાસમણ્ડલબદ્ધોઽપિ કૃષ્ણપાર્શ્વમનૂદ્ગતા ।
૧૮૯.૩૨/૨ગોપીજનો ન ચૈવાભૂદ્ એકસ્થાનસ્થિરાત્મના ॥ ૧૮૯.૩૨ ॥

૧૮૯.૩૩/૧હસ્તે પ્રગૃહ્ય ચૈકૈકાં ગોપિકાં રાસમણ્ડલમ્ ।
૧૮૯.૩૩/૨ચકાર ચ કરસ્પર્શ+ ંઇમીલિતદૃશં હરિઃ ॥ ૧૮૯.૩૩ ॥

૧૮૯.૩૪/૧તતઃ પ્રવવૃતે રમ્યા ચલદ્વલયનિસ્વનૈઃ ।
૧૮૯.૩૪/૨અનુયાતશરત્કાવ્ય+ ।ગેયગીતિરનુક્રમામ્ ॥ ૧૮૯.૩૪ ॥

૧૮૯.૩૫/૧કૃષ્ણઃ શરચ્ચન્દ્રમસં કૌમુદીકુમુદાકરમ્ ।
૧૮૯.૩૫/૨જગૌ ગોપીજનસ્ત્વેકં કૃષ્ણનામ પુનઃ પુનઃ ॥ ૧૮૯.૩૫ ॥

૧૮૯.૩૬/૧પરિવૃત્તા શ્રમેણૈકા ચલદ્વલયતાપિની ।
૧૮૯.૩૬/૨દદૌ બાહુલતાં સ્કન્ધે ગોપી મધુવિઘાતિનઃ ॥ ૧૮૯.૩૬ ॥

૧૮૯.૩૭/૧કાચિત્ પ્રવિલસદ્બાહુઃ પરિરભ્ય ચુચુમ્બ તમ્ ।
૧૮૯.૩૭/૨ગોપી ગીતસ્તુતિવ્યાજ+ ંઇપુણા મધુસૂદનમ્ ॥ ૧૮૯.૩૭ ॥

૧૮૯.૩૮/૧ગોપીકપોલસંશ્લેષમભિપદ્ય હરેર્ભુજૌ ।
૧૮૯.૩૮/૨પુલકોદ્ગમશસ્યાય સ્વેદામ્બુઘનતાં ગતૌ ॥ ૧૮૯.૩૮ ॥

૧૮૯.૩૯/૧રાસગેયં જગૌ કૃષ્ણો યાવત્ તારતરધ્વનિઃ ।
૧૮૯.૩૯/૨સાધુ કૃષ્ણેતિ કૃષ્ણેતિ તાવત્ તા દ્વિગુણં જગુઃ ॥ ૧૮૯.૩૯ ॥

૧૮૯.૪૦/૧ગતેઽનુગમનં ચક્રુર્વલને સમ્મુખં યયુઃ ।
૧૮૯.૪૦/૨પ્રતિલોમાનુલોમેન ભેજુર્ગોપાઙ્ગના હરિમ્ ॥ ૧૮૯.૪૦ ॥

૧૮૯.૪૧/૧સ તદા સહ ગોપીભી રરામ મધુસૂદનઃ ।
૧૮૯.૪૧/૨સ વર્ષકોટિપ્રતિમઃ ક્ષણસ્તેન વિનાભવત્ ॥ ૧૮૯.૪૧ ॥

૧૮૯.૪૨/૧તા વાર્યમાણાઃ પિતૃભિઃ પતિભિર્ભ્રાતૃભિસ્તથા ।
૧૮૯.૪૨/૨કૃષ્ણં ગોપાઙ્ગના રાત્રૌ રમયન્તિ રતિપ્રિયાઃ ॥ ૧૮૯.૪૨ ॥

૧૮૯.૪૩/૧સોઽપિ કૈશોરકવયા માનયન્ મધુસૂદનઃ ।

૧૮૯.૪૩/૨રેમે તાભિરમેયાત્મા ક્ષપાસુ ક્ષપિતાહિતઃ ॥ ૧૮૯.૪૩॥

૧૮૯.૪૪/૧તદ્ભર્તૃષુ તથા તાસુ સર્વભૂતેષુ ચેશ્વરઃ ।
૧૮૯.૪૪/૨આત્મસ્વરૂપરૂપોऽસૌ વ્યાપ્ય સર્વમવસ્થિતઃ ॥ ૧૮૯.૪૪॥

૧૮૯.૪૫/૧યથા સમસ્તભૂતેષુ નભોऽગ્નિઃ પૃથિવી જલમ્ ।
૧૮૯.૪૫/૨વાયુશ્ચાત્મા તથૈવાસૌ વ્યાપ્ય સર્વમવસ્થિતઃ ॥ ૧૮૯.૪૫॥

૧૮૯.૪૬/૧વ્યાસ ઉવાચ । પ્રદોષાર્ધે કદાચિત્ તુ રાસાસક્તે જનાર્દને ।
૧૮૯.૪૬/૨ત્રાસયન્ સમદો ગોષ્ઠાન્ અરિષ્ટઃ સમુપાગતઃ ॥ ૧૮૯.૪૬॥

૧૮૯.૪૭/૧સતોયતોયદાકારસ્તીક્ષ્ણશૃઙ્ગોऽર્કલોચનઃ ।
૧૮૯.૪૭/૨ખુરાગ્રપાતૈરત્યર્થં દારયન્ ધરણીતલમ્ ॥ ૧૮૯.૪૭॥

૧૮૯.૪૮/૧લેલિહાનઃ સનિષ્પેષં જિહ્વયૌષ્ઠૌ પુનઃ પુનઃ ।
૧૮૯.૪૮/૨સંરમ્ભાક્ષિપ્તલાઙ્ગૂલઃ કઠિનસ્કન્ધબન્ધનઃ ॥ ૧૮૯.૪૮॥

૧૮૯.૪૯/૧ઉદગ્રકકુદાભોગઃ પ્રમાણાદ્ દુરતિક્રમઃ ।
૧૮૯.૪૯/૨વિણ્મૂત્રાલિપ્તપૃષ્ઠાઙ્ગો ગવામુદ્વેગકારકઃ ॥ ૧૮૯.૪૯॥

૧૮૯.૫૦/૧પ્રલમ્બકણ્ઠોऽભિમુખસ્તરુઘાતાઙ્કિતાનનઃ ।
૧૮૯.૫૦/૨પાતયન્ સ ગવાં ગર્ભાન્ દૈત્યો વૃષભરૂપધૃક્ ॥ ૧૮૯.૫૦॥

૧૮૯.૫૧/૧સૂદયંસ્તરસા સર્વાન્ વનાન્ચટતિ યઃ સદા ।
૧૮૯.૫૧/૨તતસ્તમતિઘોરાક્ષમવેક્ષ્યાતિભયાતુરાઃ ॥ ૧૮૯.૫૧॥

૧૮૯.૫૨/૧ગોપા ગોપસ્ત્રિયશ્ચૈવ કૃષ્ણ કૃષ્ણેતિ ચુક્રુશુઃ ।
૧૮૯.૫૨/૨સિંહનાદં તતશ્ચક્રે તલશબ્દં ચ કેશવઃ ॥ ૧૮૯.૫૨॥

૧૮૯.૫૩/૧તચ્છબ્દશ્રવણાચ્ચાસૌ દામોદરમુખં યયૌ ।
૧૮૯.૫૩/૨અગ્રન્યસ્તવિષાણાગ્રઃ કૃષ્ણકુક્ષિકૃતેક્ષણઃ ॥ ૧૮૯.૫૩॥

૧૮૯.૫૪/૧અભ્યધાવત દુષ્ટાત્મા દૈત્યો વૃષભરૂપધૃક્ ।
૧૮૯.૫૪/૨આયાન્તં દૈત્યવૃષભં દૃષ્ટ્વા કૃષ્ણો મહાબલમ્ ॥ ૧૮૯.૫૪॥

૧૮૯.૫૫/૧ન ચચાલ તતઃ સ્થાનાદ્ અવજ્ઞાસ્મિતલીલયા ।
૧૮૯.૫૫/૨આસન્નં ચૈવ જગ્રાહ ગ્રાહવન્ મધુસૂદનઃ ॥ ૧૮૯.૫૫॥

૧૮૯.૫૬/૧જઘાન જાનુના કુક્ષૌ વિષાણગ્રહણાચલમ્ ।
૧૮૯.૫૬/૨તસ્ય દર્પબલં હત્વા ગૃહીતસ્ય વિષાણયોઃ ॥ ૧૮૯.૫૬॥

૧૮૯.૫૭/૧આપીડયદ્ અરિષ્ટસ્ય કણ્ઠં ક્લિન્નમિવામ્બરમ્ ।
૧૮૯.૫૭/૨ઉત્પાટ્ય શ઼ૃઙ્ગમેકં ચ તેનૈવાતાડયત્ તતઃ ॥ ૧૮૯.૫૭॥

૧૮૯.૫૮/૧મમાર સ મહાદૈત્યો મુખાચ્છોણિતમુદ્વમન્ ।
૧૮૯.૫૮/૨તુષ્ટુવુર્નિહતે તસ્મિન્ ગોપા દૈત્યે જનાર્દનમ્ ।
૧૮૯.૫૮/૩જમ્ભે હતે સહસ્રાક્ષં પુરા દેવગણા યથા ॥ ૧૮૯.૫૮॥

૧૯૦.૧/૧વ્યાસ ઉવાચ । કકુદ્મિનિ હતેઽરિષ્ટે ધેનુકે ચ નિપાતિતે ।
૧૯૦.૧/૨પ્રલમ્બે નિધનં નીતે ધૃતે ગોવર્ધનાચલે ॥ ૧૯૦.૧॥

૧૯૦.૨/૧દમિતે કાલિયે નાગે ભગ્ને તુઙ્ગદ્રુમદ્વયે ।
૧૯૦.૨/૨હતાયાં પૂતનાયાં ચ શકટે પરિવર્તિતે ॥ ૧૯૦.૨॥

૧૯૦.૩/૧કંસાય નારદઃ પ્રાહ યથાવૃત્તમનુક્રમાત્ ।
૧૯૦.૩/૨યશોદાદેવકીગર્ભ+ ।પરિવર્તાદ્યશેષતઃ ॥ ૧૯૦.૩॥

૧૯૦.૪/૧શ્રુત્વા તત્ સકલં કંસો નારદાદ્ દેવદર્શનાત્ ।
૧૯૦.૪/૨વસુદેવં પ્રતિ તદા કોપં ચક્રે સ દુર્મતિઃ ॥ ૧૯૦.૪॥

૧૯૦.૫/૧સોઽતિકોપાદ્ ઉપાલભ્ય સર્વયાદવસંસદિ ।
૧૯૦.૫/૨જગર્હે યાદવાંશ્ચાપિ કાર્યં ચૈતદ્ અચિન્તયત્ ॥ ૧૯૦.૫॥

૧૯૦.૬/૧યાવન્ ન બલમારૂઢૌ બલકૃષ્ણૌ સુબાલકૌ ।
૧૯૦.૬/૨તાવદ્ એવ મયા વધ્યાવસાધ્યૌ રૂઢયૌવનૌ ॥ ૧૯૦.૬॥

૧૯૦.૭/૧ચાણૂરોઽત્ર મહાવીર્યો મુષ્ટિકશ્ચ મહાબલઃ ।
૧૯૦.૭/૨એતાભ્યાં મલ્લયુદ્ધે તૌ ઘાતયિષ્યામિ દુર્મદૌ ॥ ૧૯૦.૭॥

૧૯૦.૮/૧ધનુર્મહમહાયાગ+ ।વ્યાજેનાનીય તૌ વ્રજાત્ ।
૧૯૦.૮/૨તથા તથા કરિષ્યામિ યાસ્યતઃ સંક્ષયં યથા ॥ ૧૯૦.૮॥

૧૯૦.૯/૧વ્યાસ ઉવાચ । ઇત્યાલોચ્ય સ દુષ્ટાત્મા કંસો રામજનાર્દનૌ ।
૧૯૦.૯/૨હન્તું કૃતમતિર્વીરમક્રૂરં વાક્યમબ્રવીત્ ॥ ૧૯૦.૯॥

૧૯૦.૧૦/૧કંસ ઉવાચ । ભો ભો દાનપતે વાક્યં ક્રિયતાં પ્રીતયે મમ ।
૧૯૦.૧૦/૨ઇતઃ સ્યન્દનમારુહ્ય ગમ્યતાં નન્દગોકુલમ્ ॥ ૧૯૦.૧૦॥

૧૯૦.૧૧/૧વસુદેવસુતૌ તત્ર વિષ્ણોરંશસમુદ્ભવૌ ।
૧૯૦.૧૧/૨નાશાય કિલ સમ્ભૂતૌ મમ દુષ્ટૌ પ્રવર્ધતઃ ॥ ૧૯૦.૧૧॥

૧૯૦.૧૨/૧ધનુર્મહમહાયાગશ્ચતુર્દશ્યાં ભવિષ્યતિ ।

૧૯૦.૧૨/૨આનેયૌ ભવતા તૌ તુ મલ્લયુદ્ધાય તત્ર વૈ ॥ ૧૯૦.૧૨॥

૧૯૦.૧૩/૧ચાણૂરમુષ્ટિકૌ મલ્લૌ નિયુદ્ધકુશલૌ મમ ।
૧૯૦.૧૩/૨તાભ્યાં સહાનયોર્યુદ્ધં સર્વલોકોઽત્ર પશ્યતુ ॥ ૧૯૦.૧૩॥

૧૯૦.૧૪/૧નાગઃ કુવલયાપીડો મહામાત્રપ્રચોદિતઃ ।
૧૯૦.૧૪/૨સ તૌ નિહંસ્યતે પાપૌ વસુદેવાત્મજૌ શિશૂ ॥ ૧૯૦.૧૪॥

૧૯૦.૧૫/૧તૌ હત્વા વસુદેવં ચ નન્દગોપં ચ દુર્મતિમ્ ।
૧૯૦.૧૫/૨હનિષ્યે પિતરં ચૈવ ઉગ્રસેનં ચ દુર્મતિમ્ ॥ ૧૯૦.૧૫॥

૧૯૦.૧૬/૧તતઃ સમસ્તગોપાનાં ગોધનાન્યખિલાન્યહમ્ ।
૧૯૦.૧૬/૨વિત્તં ચાપહરિષ્યામિ દુષ્ટાનાં મદ્વધૈષિણામ્ ॥ ૧૯૦.૧૬॥

૧૯૦.૧૭/૧ત્વામ્ ઋતે યાદવાશ્ચેમે દુષ્ટા દાનપતે મમ ।
૧૯૦.૧૭/૨એતેષાં ચ વધાયાહં પ્રયતિષ્યામ્યનુક્રમાત્ ॥ ૧૯૦.૧૭॥

૧૯૦.૧૮/૧તતો નિષ્કણ્ટકં સર્વં રાજ્યમેતદ્ અયાદવમ્ ।
૧૯૦.૧૮/૨પ્રસાધિષ્યે ત્વયા તસ્માન્ મત્પ્રીત્યા વીર ગમ્યતામ્ ॥ ૧૯૦.૧૮॥

૧૯૦.૧૯/૧યથા ચ માહિષં સર્પિર્દધિ ચાપ્યુપહાર્યં વૈ ।
૧૯૦.૧૯/૨ગોપાઃ સમાનયન્ત્યાશુ ત્વયા વાચ્યાસ્તથા તથા ॥ ૧૯૦.૧૯॥

૧૯૦.૨૦/૧વ્યાસ ઉવાચ । ઇત્યાજ્ઞપ્તસ્તદાક્રૂરો મહાભાગવતો દ્વિજાઃ ।
૧૯૦.૨૦/૨પ્રીતિમાન્ અભવત્ કૃષ્ણં શ્વો દ્રક્ષ્યામીતિ સત્વરઃ ॥ ૧૯૦.૨૦॥

૧૯૦.૨૧/૧તથેત્યુક્ત્વા તુ રાજાનં રથમારુહ્ય સત્વરઃ ।
૧૯૦.૨૧/૨નિશ્ચક્રામ તદા પુર્યા મથુરાયા મધુપ્રિયઃ ॥ ૧૯૦.૨૧॥

૧૯૦.૨૨/૧વ્યાસ ઉવાચ । કેશી ચાપિ બલોદગ્રઃ કંસદૂતઃ પ્રચોદિતઃ ।
૧૯૦.૨૨/૨કૃષ્ણસ્ય નિધનાકાઙ્ક્ષી વૃન્દાવનમુપાગમત્ ॥ ૧૯૦.૨૨॥

૧૯૦.૨૩/૧સ ખુરક્ષતભૂપૃષ્ઠઃ સટાક્ષેપધુતામ્બુદઃ ।
૧૯૦.૨૩/૨પુનર્વિક્રાન્તચન્દ્રાર્ક+ ંઆર્ગો ગોપાન્તમાગમત્ ॥ ૧૯૦.૨૩॥

૧૯૦.૨૪/૧તસ્ય હ્રેષિતશબ્દેન ગોપાલા દૈત્યવાજિનઃ ।
૧૯૦.૨૪/૨ગોપ્યશ્ચ ભયસંવિગ્ના ગોવિન્દં શરણં યયુઃ ॥ ૧૯૦.૨૪॥

૧૯૦.૨૫/૧ત્રાહિ ત્રાહીતિ ગોવિન્દસ્તેષાં શ્રુત્વા તુ તદ્વચઃ ।
૧૯૦.૨૫/૨સતોયજલદધ્વાન+ ।ગમ્ભીરમિદમુક્તવાન્ ॥ ૧૯૦.૨૫॥

૧૯૦.૨૬/૧ગોવિન્દ ઉવાચ । અલં ત્રાસેન ગોપાલાઃ કેશિનઃ કિં ભયાતુરૈઃ ।
૧૯૦.૨૬/૨ભવદ્ભિર્ગોપજાતીયૈર્વીરવીર્યં વિલોપ્યતે ॥ ૧૯૦.૨૬॥

૧૯૦.૨૭/૧કિમનેનાલ્પસારેણ હ્રેષિતારોપકારિણા ।
૧૯૦.૨૭/૨દૈતેયબલવાહ્યેન વલ્ગતા દુષ્ટવાજિના ॥ ૧૯૦.૨૭॥

૧૯૦.૨૮/૧એહ્યેહિ દુષ્ટ કૃષ્ણોઽહં પૂષ્ણસ્ત્વિવ પિનાકધૃક્ ।
૧૯૦.૨૮/૨પાતયિષ્યામિ દશનાન્ વદનાદ્ અખિલાંસ્તવ ॥ ૧૯૦.૨૮॥

૧૯૦.૨૯/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા સ તુ ગોવિન્દઃ કેશિનઃ સમ્મુખં યયૌ ।
૧૯૦.૨૯/૨વિવૃતાસ્યશ્ચ સોઽપ્યેનં દૈતેયશ્ચ ઉપાદ્રવત્ ॥ ૧૯૦.૨૯॥

૧૯૦.૩૦/૧બાહુમાભોગિનં કૃત્વા મુખે તસ્ય જનાર્દનઃ ।
૧૯૦.૩૦/૨પ્રવેશયામાસ તદા કેશિનો દુષ્ટવાજિનઃ ॥ ૧૯૦.૩૦॥

૧૯૦.૩૧/૧કેશિનો વદનં તેન વિશતા કૃષ્ણબાહુના ।
૧૯૦.૩૧/૨શાતિતા દશનાસ્તસ્ય સિતાભ્રાવયવા ઇવ ॥ ૧૯૦.૩૧॥

૧૯૦.૩૨/૧કૃષ્ણસ્ય વવૃધે બાહુઃ કેશિદેહગતો દ્વિજાઃ ।
૧૯૦.૩૨/૨વિનાશાય યથા વ્યાધિરાસમ્ભૂતૈરુપેક્ષિતઃ ॥ ૧૯૦.૩૨॥

૧૯૦.૩૩/૧વિપાટિતૌષ્ઠો બહુલં સફેનં રુધિરં વમન્ ।
૧૯૦.૩૩/૨સૃક્કણી વિવૃતે ચક્રે વિશ્લિષ્ટે મુક્તબન્ધને ॥ ૧૯૦.૩૩॥

૧૯૦.૩૪/૧જગામ ધરણીં પાદૈઃ શકૃન્મૂત્રં સમુત્સૃજન્ ।
૧૯૦.૩૪/૨સ્વેદાર્દ્રગાત્રઃ શ્રાન્તશ્ચ નિર્યત્નઃ સોઽભવત્ તતઃ ॥ ૧૯૦.૩૪॥

૧૯૦.૩૫/૧વ્યાદિતાસ્યો મહારૌદ્રઃ સોઽસુરઃ કૃષ્ણબાહુના ।
૧૯૦.૩૫/૨નિપપાત દ્વિધાભૂતો વૈદ્યુતેન યથા દ્રુમઃ ॥ ૧૯૦.૩૫॥

૧૯૦.૩૬/૧દ્વિપાદપૃષ્ઠપુચ્છાર્ધ+ ।શ્રવણૈકાક્ષનાસિકે ।
૧૯૦.૩૬/૨કેશિનસ્તે દ્વિધા ભૂતે શકલે ચ વિરેજતુઃ ॥ ૧૯૦.૩૬॥

૧૯૦.૩૭/૧હત્વા તુ કેશિનં કૃષ્ણો મુદિતૈર્ગોપકૈર્વૃતઃ ।
૧૯૦.૩૭/૨અનાયસ્તતનુઃ સ્વસ્થો હસંસ્તત્રૈવ સંસ્થિતઃ ॥ ૧૯૦.૩૭॥

૧૯૦.૩૮/૧તતો ગોપાશ્ચ ગોપ્યશ્ચ હતે કેશિનિ વિસ્મિતાઃ ।
૧૯૦.૩૮/૨તુષ્ટુવુઃ પુણ્ડરીકાક્ષમનુરાગમનોરમમ્ ॥ ૧૯૦.૩૮॥

૧૯૦.૩૯/૧આયયૌ ત્વરિતો વિપ્રો નારદો જલદસ્થિતઃ ।
૧૯૦.૩૯/૨કેશિનં નિહતં દૃષ્ટ્વા હર્ષનિર્ભરમાનસઃ ॥ ૧૯૦.૩૯॥

૧૯૦.૪૦/૧નારદ ઉવાચ । સાધુ સાધુ જગન્નાથ લીલયૈવ યદ્ અચ્યુત ।
૧૯૦.૪૦/૨નિહતોઽયં ત્વયા કેશી ક્લેશદસ્ત્રિદિવૌકસામ્ ॥ ૧૯૦.૪૦ ॥

૧૯૦.૪૧/૧સુકર્માણ્યવતારે તુ કૃતાનિ મધુસૂદન ।
૧૯૦.૪૧/૨યાનિ વૈ વિસ્મિતં ચેતસ્તોષમેતેન મે ગતમ્ ॥ ૧૯૦.૪૧ ॥

૧૯૦.૪૨/૧તુરગસ્યાસ્ય શક્રોઽપિ કૃષ્ણ દેવાશ્ચ બિભ્યતિ ।
૧૯૦.૪૨/૨ધુતકેસરજાલસ્ય હ્રેષતોઽભ્રાવલોકિનઃ ॥ ૧૯૦.૪૨ ॥

૧૯૦.૪૩/૧યસ્માત્ ત્વયૈષ દુષ્ટાત્મા હતઃ કેશી જનાર્દન ।
૧૯૦.૪૩/૨તસ્માત્ કેશવનામ્ના ત્વં લોકે ગેયો ભવિષ્યસિ ॥ ૧૯૦.૪૩ ॥

૧૯૦.૪૪/૧સ્વસ્ત્યસ્તુ તે ગમિષ્યામિ કંસયુદ્ધેઽધુના પુનઃ ।
૧૯૦.૪૪/૨પરશ્વોઽહં સમેષ્યામિ ત્વયા કેશિનિષૂદન ॥ ૧૯૦.૪૪ ॥

૧૯૦.૪૫/૧ઉગ્રસેનસુતે કંસે સાનુગે વિનિપાતિતે ।
૧૯૦.૪૫/૨ભારાવતારકર્તા ત્વં પૃથિવ્યા ધરણીધર ॥ ૧૯૦.૪૫ ॥

૧૯૦.૪૬/૧તત્રાનેકપ્રકારેણ યુદ્ધાનિ પૃથિવીક્ષિતામ્ ।
૧૯૦.૪૬/૨દ્રષ્ટવ્યાનિ મયા યુષ્મત્+ ।પ્રણીતાનિ જનાર્દન ॥ ૧૯૦.૪૬ ॥

૧૯૦.૪૭/૧સોઽહં યાસ્યામિ ગોવિન્દ દેવકાર્યં મહત્ કૃતમ્ ।
૧૯૦.૪૭/૨ત્વયા સભાજિતશ્ચાહં સ્વસ્તિ તેઽસ્તુ વ્રજામ્યહમ્ ॥ ૧૯૦.૪૭ ॥

૧૯૦.૪૮/૧વ્યાસ ઉવાચ । નારદે તુ ગતે કૃષ્ણઃ સહ ગોપૈરવિસ્મિતઃ ।
૧૯૦.૪૮/૨વિવેશ ગોકુલં ગોપી+ ંએત્રપાનૈકભાજનમ્ ॥ ૧૯૦.૪૮ ॥

૧૯૧.૧/૧વ્યાસ ઉવાચ । અક્રૂરોઽપિ વિનિષ્ક્રમ્ય સ્યન્દનેનાશુગામિના ।
૧૯૧.૧/૨કૃષ્ણસંદર્શનાસક્તઃ પ્રયયૌ નન્દગોકુલે ॥ ૧૯૧.૧ ॥

૧૯૧.૨/૧ચિન્તયામાસ ચાક્રૂરો નાસ્તિ ધન્યતરો મયા ।
૧૯૧.૨/૨યોઽહમંશાવતીર્ણસ્ય મુખં દ્રક્ષ્યામિ ચક્રિણઃ ॥ ૧૯૧.૨ ॥

૧૯૧.૩/૧અદ્ય મે સફલં જન્મ સુપ્રભાતા ચ મે નિશા ।
૧૯૧.૩/૨યદ્ ઉન્નિદ્રાબ્જપત્રાક્ષં વિષ્ણોર્દ્રક્ષ્યામ્યહમ્ મુખમ્ ॥ ૧૯૧.૩ ॥

૧૯૧.૪/૧પાપં હરતિ યત્ પુંસાં સ્મૃતં સંકલ્પનામયમ્ ।
૧૯૧.૪/૨તત્ પુણ્ડરીકનયનં વિષ્ણોર્દ્રક્ષ્યામ્યહં મુખમ્ ॥ ૧૯૧.૪ ॥

૧૯૧.૫/૧નિર્જગ્મુશ્ચ યતો વેદા વેદાઙ્ગાન્યખિલાનિ ચ ।

૧૯૧.૫/૨દ્રક્ષ્યામિ યત્ પરં ધામ દેવાનાં ભગવન્મુખમ્ ॥ ૧૯૧.૫॥

૧૯૧.૬/૧યજ્ઞેષુ યજ્ઞપુરુષઃ પુરુષૈઃ પુરુષોત્તમઃ ।
૧૯૧.૬/૨ઇજ્યતે યોઽખિલાધારસ્તં દ્રક્ષ્યામિ જગત્પતિમ્ ॥ ૧૯૧.૬॥

૧૯૧.૭/૧ઇષ્ટ્વા યમિન્દ્રો યજ્ઞાનાં શતેનામરરાજતામ્ ।
૧૯૧.૭/૨અવાપ તમનન્તાદિમહં દ્રક્ષ્યામિ કેશવમ્ ॥ ૧૯૧.૭॥

૧૯૧.૮/૧ન બ્રહ્મા નેન્દ્રરુદ્રાશ્વિ+ ।વસ્વાદિત્યમરુદ્ગણાઃ ।
૧૯૧.૮/૨યસ્ય સ્વરૂપં જાનન્તિ સ્પૃશત્યદ્ય સ મે હરિઃ ॥ ૧૯૧.૮॥

૧૯૧.૯/૧સર્વાત્મા સર્વગઃ સર્વઃ સર્વભૂતેષુ સંસ્થિતઃ ।
૧૯૧.૯/૨યો ભવત્યવ્યયો વ્યાપી સ વીક્ષ્યતે મયાદ્ય હ ॥ ૧૯૧.૯॥

૧૯૧.૧૦/૧મત્સ્યકૂર્મવરાહાદ્યૈઃ સિંહરૂપાદિભિઃ સ્થિતમ્ ।
૧૯૧.૧૦/૨ચકાર યોગતો યોગં સ મામાલાપયિષ્યતિ ॥ ૧૯૧.૧૦॥

૧૯૧.૧૧/૧સામ્પ્રતં ચ જગત્સ્વામી કાર્યજાતે વ્રજે સ્થિતિમ્ ।
૧૯૧.૧૧/૨કર્તું મનુષ્યતાં પ્રાપ્તઃ સ્વેચ્છાદેહધૃગ્ અવ્યયઃ ॥ ૧૯૧.૧૧॥

૧૯૧.૧૨/૧યોઽનન્તઃ પૃથિવીં ધત્તે શિખરસ્થિતિસંસ્થિતામ્ ।
૧૯૧.૧૨/૨સોઽવતીર્ણો જગત્યર્થે મામક્રૂરેતિ વક્ષ્યતિ ॥ ૧૯૧.૧૨॥

૧૯૧.૧૩/૧પિતૃબન્ધુસુહૃદ્ભ્રાતૃ+ ◌ાતૃબન્ધુમયીમિમામ્ ।
૧૯૧.૧૩/૨યન્માયાં નાલમુદ્ધર્તું જગત્ તસ્મૈ નમો નમઃ ॥ ૧૯૧.૧૩॥

૧૯૧.૧૪/૧તરન્ત્યવિદ્યાં વિતતાં હૃદિ યસ્મિન્ નિવેશિતે ।
૧૯૧.૧૪/૨યોગમાયામિમાં મર્ત્યાસ્તસ્મૈ વિદ્યાત્મને નમઃ ॥ ૧૯૧.૧૪॥

૧૯૧.૧૫/૧યજ્વભિર્યજ્ઞપુરુષો વાસુદેવશ્ચ શાશ્વતૈઃ ।
૧૯૧.૧૫/૨વેદાન્તવેદિભિર્વિષ્ણુઃ પ્રોચ્યતે યો નતોઽસ્મિ તમ્ ॥ ૧૯૧.૧૫॥

૧૯૧.૧૬/૧તથા યત્ર જગદ્ ધામ્નિ ધાર્યતે ચ પ્રતિષ્ઠિતમ્ ।
૧૯૧.૧૬/૨સદસત્ત્વં સ સત્ત્વેન મય્યસૌ યાતુ સૌમ્યતામ્ ॥ ૧૯૧.૧૬॥

૧૯૧.૧૭/૧સ્મૃતે સકલકલ્યાણ+ ।ભાજનં યત્ર જાયતે ।
૧૯૧.૧૭/૨પુરુષપ્રવરં નિત્યં વ્રજામિ શરણં હરિમ્ ॥ ૧૯૧.૧૭॥

૧૯૧.૧૮/૧વ્યાસ ઉવાચ । ઇત્થં સ ચિન્તયન્ વિષ્ણું ભક્તિનમ્રાત્મમાનસઃ ।
૧૯૧.૧૮/૨અક્રૂરો ગોકુલં પ્રાપ્તઃ કિંચિત્ સૂર્યે વિરાજતિ ॥ ૧૯૧.૧૮॥

૧૯૧.૧૯/૧સ દદર્શ તદા તત્ર કૃષ્ણમાદોહને ગવામ્ ।
૧૯૧.૧૯/૨વત્સમધ્યગતં ફુલ્લ+ ઈલોત્પલદલચ્છવિમ્ ॥ ૧૯૧.૧૯॥

૧૯૧.૨૦/૧પ્રફુલ્લપદ્મપત્રાક્ષં શ્રીવત્સાઙ્કિતવક્ષસમ્ ।
૧૯૧.૨૦/૨પ્રલમ્બબાહુમાયામ+ ।તુઙ્ગોરસ્થલમુન્નસમ્ ॥ ૧૯૧.૨૦॥

૧૯૧.૨૧/૧સવિલાસસ્મિતાધારં બિભ્રાણં મુખપઙ્કજમ્ ।
૧૯૧.૨૧/૨તુઙ્ગરક્તનખં પદ્ભ્યાં ધરણ્યાં સુપ્રતિષ્ઠિતમ્ ॥ ૧૯૧.૨૧॥

૧૯૧.૨૨/૧બિભ્રાણં વાસસી પીતે વન્યપુષ્પવિભૂષિતમ્ ।
૧૯૧.૨૨/૨સાન્દ્રનીલલતાહસ્તં સિતામ્ભોજાવતંસકમ્ ॥ ૧૯૧.૨૨॥

૧૯૧.૨૩/૧હંસેન્દુકુન્દધવલં નીલામ્બરધરં દ્વિજાઃ ।
૧૯૧.૨૩/૨તસ્યાનુ બલભદ્રં ચ દદર્શ યદુનન્દનમ્ ॥ ૧૯૧.૨૩॥

૧૯૧.૨૪/૧પ્રાંશુમુત્તુઙ્ગબાહું ચ વિકાશિમુખપઙ્કજમ્ ।
૧૯૧.૨૪/૨મેઘમાલાપરિવૃતં કૈલાસાદ્રિમિવાપરમ્ ॥ ૧૯૧.૨૪॥

૧૯૧.૨૫/૧તૌ દૃષ્ટ્વા વિકસદ્વક્ત્ર+ ।સરોજઃ સ મહામતિઃ ।
૧૯૧.૨૫/૨પુલકાઞ્ચિતસર્વાઙ્ગસ્તદાક્રૂરોઽભવદ્ દ્વિજાઃ ॥ ૧૯૧.૨૫॥

૧૯૧.૨૬/૧ય એતત્ પરમં ધામ એતત્ તત્ પરમં પદમ્ ।
૧૯૧.૨૬/૨અભવદ્ વાસુદેવોઽસૌ દ્વિધા યોઽયં વ્યવસ્થિતઃ ॥ ૧૯૧.૨૬॥

૧૯૧.૨૭/૧સાફલ્યમક્ષ્ણોર્યુગપન્ મમાસ્તુ ।
૧૯૧.૨૭/૨દૃષ્ટે જગદ્ધાતરિ હાસમુચ્ચૈઃ ।
૧૯૧.૨૭/૩અપ્યઙ્ગમેતદ્ ભગવત્પ્રસાદાદ્ ।
૧૯૧.૨૭/૪દત્તાઙ્ગસઙ્ગે ફલવર્ત્મ તત્ સ્યાત્ ॥ ૧૯૧.૨૭॥

૧૯૧.૨૮/૧અદ્યૈવ સ્પૃષ્ટ્વા મમ હસ્તપદ્મમ્ ।
૧૯૧.૨૮/૨કરિષ્યતિ શ્રીમદનન્તમૂર્તિઃ ।
૧૯૧.૨૮/૩યસ્યાઙ્ગુલિસ્પર્શહતાખિલાઘૈર્।
૧૯૧.૨૮/૪અવાપ્યતે સિદ્ધિરનુત્તમા નરૈઃ ॥ ૧૯૧.૨૮॥

૧૯૧.૨૯/૧તથાશ્વિરુદ્રેન્દ્રવસુપ્રણીતા ।
૧૯૧.૨૯/૨દેવાઃ પ્રયચ્છન્તિ વરં પ્રહૃષ્ટાઃ ।
૧૯૧.૨૯/૩ચક્રં ધ્નતા દૈત્યપતેર્હૃતાનિ ।
૧૯૧.૨૯/૪દૈત્યાઙ્ગનાનાં નયનાન્તરાણિ ॥ ૧૯૧.૨૯॥

૧૯૧.૩૦/૧યત્રામ્બુ વિન્યસ્ય બલિર્મનોભ્યામ્ ।
૧૯૧.૩૦/૨અવાપ ભોગાન્ વસુધાતલસ્થઃ ।
૧૯૧.૩૦/૩તથામરેશસ્ત્રિદશાધિપત્યમ્ ।
૧૯૧.૩૦/૪મન્વન્તરં પૂર્ણમવાપ શક્રઃ ॥ ૧૯૧.૩૦॥

૧૯૧.૩૧/૧અથેશ માં કંસપરિગ્રહેણ ।
૧૯૧.૩૧/૨દોષાસ્પદીભૂતમદોષયુક્તમ્ ।
૧૯૧.૩૧/૩કર્તા ન માનોપહિતં ધિગ્ અસ્તુ ।
૧૯૧.૩૧/૪યસ્માન્ મનઃ સાધુબહિષ્કૃતો યઃ ॥ ૧૯૧.૩૧॥

૧૯૧.૩૨/૧જ્ઞાનાત્મકસ્યાખિલસત્ત્વરાશેર્ ।
૧૯૧.૩૨/૨વ્યાવૃત્તદોષસ્ય સદાસ્ફુટસ્ય ।
૧૯૧.૩૨/૩કિં વા જગત્યત્ર સમસ્તપુંસામ્ ।
૧૯૧.૩૨/૪અજ્ઞાતમસ્યાસ્તિ હૃદિ સ્થિતસ્ય ॥ ૧૯૧.૩૨॥

૧૯૧.૩૩/૧તસ્માદ્ અહં ભક્તિવિનમ્રગાત્રો ।
૧૯૧.૩૩/૨વ્રજામિ વિશ્વેશ્વરમીશ્વરાણામ્ ।
૧૯૧.૩૩/૩અંશાવતારં પુરુષોત્તમસ્ય ।
૧૯૧.૩૩/૪અનાદિમધ્યાન્તમજસ્ય વિષ્ણોઃ ॥ ૧૯૧.૩૩॥

૧૯૨.૧/૧વ્યાસ ઉવાચ । ચિન્તયન્ન્ ઇતિ ગોવિન્દમુપગમ્ય સ યાદવઃ ।
૧૯૨.૧/૨અક્રૂરોઽસ્મીતિ ચરણૌ નનામ શિરસા હરેઃ ॥ ૧૯૨.૧॥

૧૯૨.૨/૧સોઽપ્યેનં ધ્વજવજ્રાબ્જ+ ।કૃતચિહ્નેન પાણિના ।
૧૯૨.૨/૨સંસ્પૃશ્યાકૃષ્ય ચ પ્રીત્યા સુગાઢં પરિષસ્વજે ॥ ૧૯૨.૨॥

૧૯૨.૩/૧કૃતસંવદનૌ તેન યથાવદ્ બલકેશવૌ ।
૧૯૨.૩/૨તતઃ પ્રવિષ્ટૌ સહસા તમાદાયાત્મમન્દિરમ્ ॥ ૧૯૨.૩॥

૧૯૨.૪/૧સહ તાભ્યાં તદાક્રૂરઃ કૃતસંવન્દનાદિકઃ ।
૧૯૨.૪/૨ભુક્તભોજ્યો યથાન્યાયમાચચક્ષે તતસ્તયોઃ ॥ ૧૯૨.૪॥

૧૯૨.૫/૧યથા નિર્ભર્ત્સિતસ્તેન કંસેનાનકદુન્દુભિઃ ।
૧૯૨.૫/૨યથા ચ દેવકી દેવી દાનવેન દુરાત્મના ॥ ૧૯૨.૫॥

૧૯૨.૬/૧ઉગ્રસેને યથા કંસઃ સ દુરાત્મા ચ વર્તતે ।
૧૯૨.૬/૨યં ચૈવાર્થં સમુદ્દિશ્ય કંસેન સ વિસર્જિતઃ ॥ ૧૯૨.૬॥

૧૯૨.૭/૧તત્ સર્વં વિસ્તરાચ્છ્રુત્વા ભગવાન્ કેશિસૂદનઃ ।

૧૯૨.૭/૨ઉવાચાખિલમેતત્ તુ જ્ઞાતં દાનપતે મયા ॥ ૧૯૨.૭॥

૧૯૨.૮/૧કરિષ્યે ચ મહાભાગ યદ્ અત્રૌપાયિકં મતમ્ ।
૧૯૨.૮/૨વિચિન્ત્યં નાન્યથૈતત્ તે વિદ્ધિ કંસં હતં મયા ॥ ૧૯૨.૮॥

૧૯૨.૯/૧અહં રામશ્ચ મથુરાં શ્વો યાસ્યાવઃ સમં ત્વયા ।
૧૯૨.૯/૨ગોપવૃદ્ધાશ્ચ યાસ્યન્તિ આદાયોપાયનં બહુ ॥ ૧૯૨.૯॥

૧૯૨.૧૦/૧નિશેયં નીયતાં વીર ન ચિન્તાં કર્તુમર્હસિ ।
૧૯૨.૧૦/૨ત્રિરાત્રાભ્યન્તરે કંસં હનિષ્યામિ સહાનુગમ્ ॥ ૧૯૨.૧૦॥

૧૯૨.૧૧/૧વ્યાસ ઉવાચ । સમાદિશ્ય તતો ગોપાન્ અક્રૂરોઽપિ સકેશવઃ ।
૧૯૨.૧૧/૨સુષ્વાપ બલભદ્રશ્ચ નન્દગોપગૃહે ગતઃ ॥ ૧૯૨.૧૧॥

૧૯૨.૧૨/૧તતઃ પ્રભાતે વિમલે રામકૃષ્ણૌ મહાબલૌ ।
૧૯૨.૧૨/૨અક્રૂરેણ સમં ગન્તુમુદ્યતૌ મથુરાં પુરીમ્ ॥ ૧૯૨.૧૨॥

૧૯૨.૧૩/૧દૃષ્ટ્વા ગોપીજનઃ સાસ્રઃ શ્લથદ્વલયબાહુકઃ ।
૧૯૨.૧૩/૨નિશ્વસંશ્ચાતિદુઃખાર્તઃ પ્રાહ ચેદં પરસ્પરમ્ ॥ ૧૯૨.૧૩॥

૧૯૨.૧૪/૧મથુરાં પ્રાપ્ય ગોવિન્દઃ કથં ગોકુલમેષ્યતિ ।
૧૯૨.૧૪/૨નાગરસ્ત્રીકલાલાપ+ ંઅધુ શ્રોત્રેણ પાસ્યતિ ॥ ૧૯૨.૧૪॥

૧૯૨.૧૫/૧વિલાસિવાક્યજાતેષુ નાગરીણાં કૃતાસ્પદમ્ ।
૧૯૨.૧૫/૨ચિત્તમસ્ય કથં ગ્રામ્ય+ ।ગોપગોપીષુ યાસ્યતિ ॥ ૧૯૨.૧૫॥

૧૯૨.૧૬/૧સારં સમસ્તગોષ્ઠસ્ય વિધિના હરતા હરિમ્ ।
૧૯૨.૧૬/૨પ્રહૃતં ગોપયોષિત્સુ નિર્ઘૃણેન દુરાત્મના ॥ ૧૯૨.૧૬॥

૧૯૨.૧૭/૧ભાવગર્ભસ્મિતં વાક્યં વિલાસલલિતા ગતિઃ ।
૧૯૨.૧૭/૨નાગરીણામતીવૈતત્ કટાક્ષેક્ષિતમેવ તુ ॥ ૧૯૨.૧૭॥

૧૯૨.૧૮/૧ગ્રામ્યો હરિરયં તાસાં વિલાસનિગડૈર્યતઃ ।
૧૯૨.૧૮/૨ભવતીનાં પુનઃ પાર્શ્વં કયા યુક્ત્યા સમેષ્યતિ ॥ ૧૯૨.૧૮॥

૧૯૨.૧૯/૧એષો હિ રથમારુહ્ય મથુરાં યાતિ કેશવઃ ।
૧૯૨.૧૯/૨અક્રૂરક્રૂરકેણાપિ હતાશેન પ્રતારિતઃ ॥ ૧૯૨.૧૯॥

૧૯૨.૨૦/૧કિં ન વેત્તિ નૃશંસોઽયમનુરાગપરં જનમ્ ।
૧૯૨.૨૦/૨યેનેમમક્ષરાહ્લાદં નયત્યન્યત્ર નો હરિમ્ ॥ ૧૯૨.૨૦॥

૧૯૨.૨૧/૧એષ રામેણ સહિતઃ પ્રયાત્યત્યન્તનિર્ઘૃણઃ ।
૧૯૨.૨૧/૨રથમારુહ્ય ગોવિન્દસ્ત્વર્યતામસ્ય વારણે ॥ ૧૯૨.૨૧॥

૧૯૨.૨૨/૧ગુરૂણામગ્રતો વક્તું કિં બ્રવીષિ ન નઃ ક્ષમમ્ ।
૧૯૨.૨૨/૨ગુરવઃ કિં કરિષ્યન્તિ દગ્ધાનાં વિરહાગ્નિના ॥ ૧૯૨.૨૨॥

૧૯૨.૨૩/૧નન્દગોપમુખા ગોપા ગન્તુમેતે સમુદ્યતાઃ ।
૧૯૨.૨૩/૨નોદ્યમં કુરુતે કશ્ચિદ્ ગોવિન્દવિનિવર્તને ॥ ૧૯૨.૨૩॥

૧૯૨.૨૪/૧સુપ્રભાતાદ્ય રજની મથુરાવાસિયોષિતામ્ ।
૧૯૨.૨૪/૨યાસામચ્યુતવક્ત્રાબ્જે યાતિ નેત્રાલિભોગ્યતામ્ ॥ ૧૯૨.૨૪॥

૧૯૨.૨૫/૧ધન્યાસ્તે પથિ યે કૃષ્ણમિતો યાન્તમવારિતાઃ ।
૧૯૨.૨૫/૨ઉદ્વહિષ્યન્તિ પશ્યન્તઃ સ્વદેહં પુલકાઞ્ચિતમ્ ॥ ૧૯૨.૨૫॥

૧૯૨.૨૬/૧મથુરાનગરીપૌર+ ંઅયનાનાં મહોત્સવઃ ।
૧૯૨.૨૬/૨ગોવિન્દવદનાલોકાદ્ અતીવાદ્ય ભવિષ્યતિ ॥ ૧૯૨.૨૬॥

૧૯૨.૨૭/૧કો નુ સ્વપ્નઃ સભાગ્યાભિર્દૃષ્ટસ્તાભિરધોક્ષજમ્ ।
૧૯૨.૨૭/૨વિસ્તારિકાન્તનયના યા દ્રક્ષ્યન્ત્યનિવારિતમ્ ॥ ૧૯૨.૨૭॥

૧૯૨.૨૮/૧અહો ગોપીજનસ્યાસ્ય દર્શયિત્વા મહાનિધિમ્ ।
૧૯૨.૨૮/૨ઉદ્ધૃતાન્યદ્ય નેત્રાણિ વિધાત્રાકરુણાત્મના ॥ ૧૯૨.૨૮॥

૧૯૨.૨૯/૧અનુરાગેણ શૈથિલ્યમસ્માસુ વ્રજતો હરેઃ ।
૧૯૨.૨૯/૨શૈથિલ્યમુપયાન્ત્યાશુ કરેષુ વલયાન્યપિ ॥ ૧૯૨.૨૯॥

૧૯૨.૩૦/૧અક્રૂરઃ ક્રૂરહૃદયઃ શીઘ્રં પ્રેરયતે હયાન્ ।
૧૯૨.૩૦/૨એવમાર્તાસુ યોષિત્સુ ઘૃણા કસ્ય ન જાયતે ॥ ૧૯૨.૩૦॥

૧૯૨.૩૧/૧હે હે કૃષ્ણ રથસ્યોચ્ચૈશ્ચક્રરેણુર્નિરીક્ષ્યતામ્ ।
૧૯૨.૩૧/૨દૂરીકૃતો હરિર્યેન સોઽપિ રેણુર્ન લક્ષ્યતે ॥ ૧૯૨.૩૧॥

૧૯૨.૩૨/૧ઇત્યેવમતિહાર્દેન ગોપીજનનિરીક્ષિતઃ ।
૧૯૨.૩૨/૨તત્યાજ વ્રજભૂભાગં સહ રામેણ કેશવઃ ॥ ૧૯૨.૩૨॥

૧૯૨.૩૩/૧ગચ્છન્તો જવનાશ્વેન રથેન યમુનાતટમ્ ।
૧૯૨.૩૩/૨પ્રાપ્તા મધ્યાહ્નસમયે રામાક્રૂરજનાર્દનાઃ ॥ ૧૯૨.૩૩॥

૧૯૨.૩૪/૧અથાહ કૃષ્ણમક્રૂરો ભવદ્ભ્યાં તાવદ્ આસ્યતામ્ ।
૧૯૨.૩૪/૨યાવત્ કરોમિ કાલિન્દ્યામાહ્નિકાર્હણમમ્ભસિ ॥ ૧૯૨.૩૪॥

૧૯૨.૩૫/૧તથેત્યુક્તે તતઃ સ્નાતઃ સ્વાચાન્તઃ સ મહામતિઃ ।
૧૯૨.૩૫/૨દધ્યૌ બ્રહ્મ પરં વિપ્રાઃ પ્રવિશ્ય યમુનાજલે ॥ ૧૯૨.૩૫॥

૧૯૨.૩૬/૧ફણાસહસ્રમાલાઢ્યં બલભદ્રં દદર્શ સઃ ।
૧૯૨.૩૬/૨કુન્દામલાઙ્ગમુન્નિદ્ર+ ।પદ્મપત્રાયતેક્ષણમ્ ॥ ૧૯૨.૩૬॥

૧૯૨.૩૭/૧વૃતં વાસુકિડિમ્ભૌઘૈર્મહદ્ભિઃ પવનાશિભિઃ ।
૧૯૨.૩૭/૨સંસ્તૂયમાનમુદ્ગન્ધિ+ ।વનમાલાવિભૂષિતમ્ ॥ ૧૯૨.૩૭॥

૧૯૨.૩૮/૧દધાનમસિતે વસ્ત્રે ચારુરૂપાવતંસકમ્ ।
૧૯૨.૩૮/૨ચારુકુણ્ડલિનં મત્તમન્તર્જલતલે સ્થિતમ્ ॥ ૧૯૨.૩૮॥

૧૯૨.૩૯/૧તસ્યોત્સઙ્ગે ઘનશ્યામમાતામ્રાયતલોચનમ્ ।
૧૯૨.૩૯/૨ચતુર્બાહુમુદારાઙ્ગં ચક્રાદ્યાયુધભૂષણમ્ ॥ ૧૯૨.૩૯॥

૧૯૨.૪૦/૧પીતે વસાનં વસને ચિત્રમાલ્યવિભૂષિતમ્ ।
૧૯૨.૪૦/૨શક્રચાપતડિન્માલા+ ।વિચિત્રમિવ તોયદમ્ ॥ ૧૯૨.૪૦॥

૧૯૨.૪૧/૧શ્રીવત્સવક્ષસં ચારુ+ ।કેયૂરમુકુટોજ્જ્વલમ્ ।
૧૯૨.૪૧/૨દદર્શ કૃષ્ણમક્લિષ્ટં પુણ્ડરીકાવતંસકમ્ ॥ ૧૯૨.૪૧॥

૧૯૨.૪૨/૧સનન્દનાદ્યૈર્મુનિભિઃ સિદ્ધયોગૈરકલ્મષૈઃ ।
૧૯૨.૪૨/૨સંચિન્ત્યમાનં મનસા નાસાગ્રન્યસ્તલોચનૈઃ ॥ ૧૯૨.૪૨॥

૧૯૨.૪૩/૧બલકૃષ્ણૌ તદાક્રૂરઃ પ્રત્યભિજ્ઞાય વિસ્મિતઃ ।
૧૯૨.૪૩/૨અચિન્તયદ્ અથો શીઘ્રં કથમત્રાગતાવિતિ ॥ ૧૯૨.૪૩॥

૧૯૨.૪૪/૧વિવક્ષોઃ સ્તમ્ભયામાસ વાચં તસ્ય જનાર્દનઃ ।
૧૯૨.૪૪/૨તતો નિષ્ક્રમ્ય સલિલાદ્ રથમભ્યાગતઃ પુનઃ ॥ ૧૯૨.૪૪॥

૧૯૨.૪૫/૧દદર્શ તત્ર ચૈવોભૌ રથસ્યોપરિ સંસ્થિતૌ ।
૧૯૨.૪૫/૨રામકૃષ્ણૌ યથા પૂર્વં મનુષ્યવપુષાન્વિતૌ ॥ ૧૯૨.૪૫॥

૧૯૨.૪૬/૧નિમગ્નશ્ચ પુનસ્તોયે દદૃશે સ તથૈવ તૌ ।
૧૯૨.૪૬/૨સંસ્તૂયમાનૌ ગન્ધર્વૈર્મુનિસિદ્ધમહોરગૈઃ ॥ ૧૯૨.૪૬॥

૧૯૨.૪૭/૧તતો વિજ્ઞાતસદ્ભાવઃ સ તુ દાનપતિસ્તદા ।
૧૯૨.૪૭/૨તુષ્ટાવ સર્વવિજ્ઞાન+ ંઅયમચ્યુતમીશ્વરમ્ ॥ ૧૯૨.૪૭॥

૧૯૨.૪૮/૧અક્રૂર ઉવાચ । તન્માત્રરૂપિણેઽચિન્ત્ય+ ંઅહિમ્ને પરમાત્મને ।

૧૯૨.૪૮/૨વ્યાપિને નૈકરૂપૈક+ ।સ્વરૂપાય નમો નમઃ ॥ ૧૯૨.૪૮॥

૧૯૨.૪૯/૧શબ્દરૂપાય તેઽચિન્ત્ય+ અવિર્ભૂતાય તે નમઃ ।
૧૯૨.૪૯/૨નમો વિજ્ઞાનરૂપાય પરાય પ્રકૃતેઃ પ્રભો ॥ ૧૯૨.૪૯॥

૧૯૨.૫૦/૧ભૂતાત્મા ચેન્દ્રિયાત્મા ચ પ્રધાનાત્મા તથા ભવાન્ ।
૧૯૨.૫૦/૨આત્મા ચ પરમાત્મા ચ ત્વમેકઃ પઞ્ચધા સ્થિતઃ ॥ ૧૯૨.૫૦॥

૧૯૨.૫૧/૧પ્રસીદ સર્વધર્માત્મન્ ક્ષરાક્ષર મહેશ્વર ।
૧૯૨.૫૧/૨બ્રહ્મવિષ્ણુશિવાદ્યાભિઃ કલ્પનાભિરુદીરિતઃ ॥ ૧૯૨.૫૧॥

૧૯૨.૫૨/૧અનાખ્યેયસ્વરૂપાત્મન્ન્ અનાખ્યેયપ્રયોજન ।
૧૯૨.૫૨/૨અનાખ્યેયાભિધાન ત્વાં નતોઽસ્મિ પરમેશ્વરમ્ ॥ ૧૯૨.૫૨॥

૧૯૨.૫૩/૧ન યત્ર નાથ વિદ્યન્તે નામજાત્યાદિકલ્પનાઃ ।
૧૯૨.૫૩/૨તદ્ બ્રહ્મ પરમં નિત્યમવિકારિ ભવાન્ અજઃ ॥ ૧૯૨.૫૩॥

૧૯૨.૫૪/૧ન કલ્પનામ્ ઋતેઽર્થસ્ય સર્વસ્યાધિગમો યતઃ ।
૧૯૨.૫૪/૨તતઃ કૃષ્ણાચ્યુતાનન્ત વિષ્ણુસંજ્ઞાભિરીડ્યસે ॥ ૧૯૨.૫૪॥

૧૯૨.૫૫/૧સર્વાત્મંસ્ત્વમજ વિકલ્પનાભિરેતૈર્।
૧૯૨.૫૫/૨દેવાસ્ત્વં જગદ્ અખિલં ત્વમેવ વિશ્વમ્ ।
૧૯૨.૫૫/૩વિશ્વાત્મંસ્ત્વમતિવિકારભેદહીનઃ ।
૧૯૨.૫૫/૪સર્વસ્મિન્ નહિ ભવતોઽસ્તિ કિંચિદ્ અન્યત્ ॥ ૧૯૨.૫૫॥

૧૯૨.૫૬/૧ત્વં બ્રહ્મા પશુપતિરર્યમા વિધાતા ।
૧૯૨.૫૬/૨ત્વં ધાતા ત્રિદશપતિઃ સમીરણોઽગ્નિઃ ।
૧૯૨.૫૬/૩તોયેશો ધનપતિરન્તકસ્ત્વમેકો ।
૧૯૨.૫૬/૪ભિન્નાત્મા જગદ્ અપિ પાસિ શક્તિભેદૈઃ ॥ ૧૯૨.૫૬॥

૧૯૨.૫૭/૧વિશ્વં ભવાન્ સૃજતિ હન્તિ ગભસ્તિરૂપો ।
૧૯૨.૫૭/૨વિશ્વં ચ તે ગુણમયોઽયમજ પ્રપઞ્ચઃ ।
૧૯૨.૫૭/૩રૂપં પરં સદિતિવાચકમક્ષરં યજ્ ।
૧૯૨.૫૭/૪જ્ઞાનાત્મને સદસતે પ્રણતોઽસ્મિ તસ્મૈ ॥ ૧૯૨.૫૭॥

૧૯૨.૫૮/૧ઓં નમો વાસુદેવાય નમઃ સંકર્ષણાય ચ ।
૧૯૨.૫૮/૨પ્રદ્યુમ્નાય નમસ્તુભ્યમનિરુદ્ધાય તે નમઃ ॥ ૧૯૨.૫૮॥

૧૯૨.૫૯/૧વ્યાસ ઉવાચ । એવમન્તર્જલે કૃષ્ણમભિષ્ટૂય સ યાદવઃ ।

૧૯૨.૫૯/૨અર્ઘયામાસ સર્વેશં ધૂપપુષ્પૈર્મનોમયૈઃ ॥ ૧૯૨.૫૯ ॥

૧૯૨.૬૦/૧પરિત્યજ્યાન્યવિષયં મનસ્તત્ર નિવેશ્ય સઃ ।
૧૯૨.૬૦/૨બ્રહ્મભૂતે ચિરં સ્થિત્વા વિરરામ સમાધિતઃ ॥ ૧૯૨.૬૦ ॥

૧૯૨.૬૧/૧કૃતકૃત્યમિવાત્માનં મન્યમાનો દ્વિજોત્તમાઃ ।
૧૯૨.૬૧/૨આજગામ રથં ભૂયો નિર્ગમ્ય યમુનામ્ભસઃ ॥ ૧૯૨.૬૧ ॥

૧૯૨.૬૨/૧રામકૃષ્ણૌ દદર્શાથ યથાપૂર્વમવસ્થિતૌ ।
૧૯૨.૬૨/૨વિસ્મિતાક્ષં તદાક્રૂરં તં ચ કૃષ્ણોઽભ્યભાષત ॥ ૧૯૨.૬૨ ॥

૧૯૨.૬૩/૧શ્રીકૃષ્ણ ઉવાચ । કિં ત્વયા દૃષ્ટમાશ્ચર્યમક્રૂર યમુનાજલે ।
૧૯૨.૬૩/૨વિસ્મયોત્ફુલ્લનયનો ભવાન્ સંલક્ષ્યતે યતઃ ॥ ૧૯૨.૬૩ ॥

૧૯૨.૬૪/૧અક્રૂર ઉવાચ । અન્તર્જલે યદ્ આશ્ચર્યં દૃષ્ટં તત્ર મયાચ્યુત ।
૧૯૨.૬૪/૨તદ્ અત્રૈવ હિ પશ્યામિ મૂર્તિમત્ પુરતઃ સ્થિતમ્ ॥ ૧૯૨.૬૪ ॥

૧૯૨.૬૫/૧જગદ્ એતન્ મહાશ્ચર્ય+ ।રૂપં યસ્ય મહાત્મનઃ ।
૧૯૨.૬૫/૨તેનાશ્ચર્યપરેણાહં ભવતા કૃષ્ણ સંગતઃ ॥ ૧૯૨.૬૫ ॥

૧૯૨.૬૬/૧તત્ કિમેતેન મથુરાં પ્રયામો મધુસૂદન ।
૧૯૨.૬૬/૨બિભેમિ કંસાદ્ ધિગ્ જન્મ પરપિણ્ડોપજીવિનઃ ॥ ૧૯૨.૬૬ ॥

૧૯૨.૬૭/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા ચોદયામાસ તાન્ હયાન્ વાતરંહસઃ ।
૧૯૨.૬૭/૨સમ્પ્રાપ્તશ્ચાપિ સાયાહ્ને સોઽક્રૂરો મથુરાં પુરીમ્ ।
૧૯૨.૬૭/૩વિલોક્ય મથુરાં કૃષ્ણં રામં ચાહ સ યાદવઃ ॥ ૧૯૨.૬૭ ॥

૧૯૨.૬૮/૧અક્રૂર ઉવાચ । પદ્ભ્યાં યાતં મહાવીર્યૌ રથેનૈકો વિશામ્યહમ્ ।
૧૯૨.૬૮/૨ગન્તવ્યં વસુદેવસ્ય નો ભવદ્ભ્યાં તથા ગૃહે ।
૧૯૨.૬૮/૩યુવયોર્હિ કૃતે વૃદ્ધઃ કંસેન સ નિરસ્યતે ॥ ૧૯૨.૬૮ ॥

૧૯૨.૬૯/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા પ્રવિવેશાસાવક્રૂરો મથુરાં પુરીમ્ ।
૧૯૨.૬૯/૨પ્રવિષ્ટૌ રામકૃષ્ણૌ ચ રાજમાર્ગમુપાગતૌ ॥ ૧૯૨.૬૯ ॥

૧૯૨.૭૦/૧સ્ત્રીભિર્નરૈશ્ચ સાનન્દ+ ।લોચનૈરભિવિક્ષિતૌ ।
૧૯૨.૭૦/૨જગ્મતુર્લીલયા વીરૌ પ્રાપ્તૌ બાલગજાવિવ ॥ ૧૯૨.૭૦ ॥

૧૯૨.૭૧/૧ભ્રમમાણૌ તુ તૌ દૃષ્ટ્વા રજકં રઙ્ગકારકમ્ ।
૧૯૨.૭૧/૨અયાચેતાં સ્વરૂપાણિ વાસાંસિ રુચિરાણિ તૌ ॥ ૧૯૨.૭૧ ॥

૧૯૨.૭૨/૧કંસસ્ય રજકઃ સોઽથ પ્રસાદારૂઢવિસ્મયઃ ।

૧૯૨.૭૨/૨બહૂન્યાક્ષેપવાક્યાનિ પ્રાહોચ્ચૈ રામકેશવૌ ॥ ૧૯૨.૭૨॥

૧૯૨.૭૩/૧તતસ્તલપ્રહારેણ કૃષ્ણસ્તસ્ય દુરાત્મનઃ ।
૧૯૨.૭૩/૨પાતયામાસ કોપેન રજકસ્ય શિરો ભુવિ ॥ ૧૯૨.૭૩॥

૧૯૨.૭૪/૧હત્વાદાય ચ વસ્ત્રાણિ પીતનીલામ્બરૌ તતઃ ।
૧૯૨.૭૪/૨કૃષ્ણરામૌ મુદાયુક્તૌ માલાકારગૃહં ગતૌ ॥ ૧૯૨.૭૪॥

૧૯૨.૭૫/૧વિકાસિનેત્રયુગલો માલાકારોઽતિવિસ્મિતઃ ।
૧૯૨.૭૫/૨એતૌ કસ્ય કુતો યાતૌ મનસાચિન્તયત્ તતઃ ॥ ૧૯૨.૭૫॥

૧૯૨.૭૬/૧પીતનીલામ્બરધરૌ દૃષ્ટ્વાતિસુમનોહરૌ ।
૧૯૨.૭૬/૨સ તર્કયામાસ તદા ભુવં દેવાવુપાગતૌ ॥ ૧૯૨.૭૬॥

૧૯૨.૭૭/૧વિકાશિમુખપદ્માભ્યાં તાભ્યાં પુષ્પાણિ યાચિતઃ ।
૧૯૨.૭૭/૨ભુવં વિષ્ટભ્ય હસ્તાભ્યાં પસ્પર્શ શિરસા મહીમ્ ॥ ૧૯૨.૭૭॥

૧૯૨.૭૮/૧પ્રસાદસુમુખૌ નાથૌ મમ ગેહમુપાગતૌ ।
૧૯૨.૭૮/૨ધન્યોઽહમર્ચયિષ્યામીત્યાહ તૌ માલ્યજીવિકઃ ॥ ૧૯૨.૭૮॥

૧૯૨.૭૯/૧તતઃ પ્રહૃષ્ટવદનસ્તયોઃ પુષ્પાણિ કામતઃ ।
૧૯૨.૭૯/૨ચારૂણ્યેતાનિ ચૈતાનિ પ્રદદૌ સ વિલોભયન્ ॥ ૧૯૨.૭૯॥

૧૯૨.૮૦/૧પુનઃ પુનઃ પ્રણમ્યાસૌ માલાકારોત્તમો દદૌ ।
૧૯૨.૮૦/૨પુષ્પાણિ તાભ્યાં ચારૂણિ ગન્ધવન્ત્યમલાનિ ચ ॥ ૧૯૨.૮૦॥

૧૯૨.૮૧/૧માલાકારાય કૃષ્ણોઽપિ પ્રસન્નઃ પ્રદદૌ વરમ્ ।
૧૯૨.૮૧/૨શ્રીસ્ત્વાં મત્સંશ્રયા ભદ્ર ન કદાચિત્ ત્યજિષ્યતિ ॥ ૧૯૨.૮૧॥

૧૯૨.૮૨/૧બલહાનિર્ન તે સૌમ્ય ધનહાનિરથાપિ વા ।
૧૯૨.૮૨/૨યાવદ્ ધરણિસૂર્યૌ ચ સંતતિઃ પુત્રપૌત્રિકી ॥ ૧૯૨.૮૨॥

૧૯૨.૮૩/૧ભુક્ત્વા ચ વિપુલાન્ ભોગાંસ્ત્વમન્તે મત્પ્રસાદતઃ ।
૧૯૨.૮૩/૨મમાનુસ્મરણં પ્રાપ્ય દિવ્યલોકમવાપ્સ્યસિ ॥ ૧૯૨.૮૩॥

૧૯૨.૮૪/૧ધર્મે મનશ્ચ તે ભદ્ર સર્વકાલં ભવિષ્યતિ ।
૧૯૨.૮૪/૨યુષ્મત્સંતતિજાતાનાં દીર્ઘમાયુર્ભવિષ્યતિ ॥ ૧૯૨.૮૪॥

૧૯૨.૮૫/૧નોપસર્ગાદિકં દોષં યુષ્મત્સંતતિસમ્ભવઃ ।
૧૯૨.૮૫/૨અવાપ્સ્યતિ મહાભાગ યાવત્ સૂર્યો ભવિષ્યતિ ॥ ૧૯૨.૮૫॥

૧૯૨.૮૬/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા તદ્ગૃહાત્ કૃષ્ણો બલદેવસહાયવાન્ ।
૧૯૨.૮૬/૨નિર્જગામ મુનિશ્રેષ્ઠા માલાકારેણ પૂજિતઃ ॥ ૧૯૨.૮૬॥

૧૯૩.૧/૧વ્યાસ ઉવાચ । રાજમાર્ગે તતઃ કૃષ્ણઃ સાનુલેપનભાજનામ્ ।
૧૯૩.૧/૨દદર્શ કુબ્જામાયાન્તીં નવયૌવનગોચરામ્ ॥ ૧૯૩.૧॥

૧૯૩.૨/૧તામાહ લલિતં કૃષ્ણઃ કસ્યેદમનુલેપનમ્ ।
૧૯૩.૨/૨ભવત્યા નીયતે સત્યં વદેન્દીવરલોચને ॥ ૧૯૩.૨॥

૧૯૩.૩/૧સકામેનૈવ સા પ્રોક્તા સાનુરાગા હરિં પ્રતિ ।
૧૯૩.૩/૨પ્રાહ સા લલિતં કુબ્જા દદર્શ ચ બલાત્ તતઃ ॥ ૧૯૩.૩॥

૧૯૩.૪/૧કુબ્જોવાચ । કાન્ત કસ્માન્ ન જાનાસિ કંસેનાપિ નિયોજિતા ।
૧૯૩.૪/૨નૈકવક્રેતિ વિખ્યાતામનુલેપનકર્મણિ ॥ ૧૯૩.૪॥

૧૯૩.૫/૧નાન્યપિષ્ટં હિ કંસસ્ય પ્રીતયે હ્યનુલેપનમ્ ।
૧૯૩.૫/૨ભવત્યહમતીવાસ્ય પ્રસાદધનભાજનમ્ ॥ ૧૯૩.૫॥

૧૯૩.૬/૧શ્રીકૃષ્ણ ઉવાચ । સુગન્ધમેતદ્ રાજાર્હં રુચિરં રુચિરાનને ।
૧૯૩.૬/૨આવયોર્ગાત્રસદૃશં દીયતામનુલેપનમ્ ॥ ૧૯૩.૬॥

૧૯૩.૭/૧વ્યાસ ઉવાચ । શ્રુત્વા તમાહ સા કૃષ્ણં ગૃહ્યતામિતિ સાદરમ્ ।
૧૯૩.૭/૨અનુલેપં ચ પ્રદદૌ ગાત્રયોગ્યમથોભયોઃ ॥ ૧૯૩.૭॥

૧૯૩.૮/૧ભક્તિચ્છેદાનુલિપ્તાઙ્ગૌ તતસ્તૌ પુરુષર્ષભૌ ।
૧૯૩.૮/૨સેન્દ્રચાપૌ વિરાજન્તૌ સિતકૃષ્ણાવિવામ્બુદૌ ॥ ૧૯૩.૮॥

૧૯૩.૯/૧તતસ્તાં ચિબુકે શૌરિરુલ્લાપનવિધાનવિત્ ।
૧૯૩.૯/૨ઉલ્લાપ્ય તોલયામાસ દ્વ્યઙ્ગુલેનાગ્રપાણિના ॥ ૧૯૩.૯॥

૧૯૩.૧૦/૧ચકર્ષ પદ્ભ્યાં ચ તદા ઋજુત્વં કેશવોऽનયત્ ।
૧૯૩.૧૦/૨તતઃ સા ઋજુતાં પ્રાપ્તા યોષિતામભવદ્ વરા ॥ ૧૯૩.૧૦॥

૧૯૩.૧૧/૧વિલાસલલિતં પ્રાહ પ્રેમગર્ભભરાલસમ્ ।
૧૯૩.૧૧/૨વસ્ત્રે પ્રગૃહ્ય ગોવિન્દં વ્રજ ગેહં મમેતિ વૈ ॥ ૧૯૩.૧૧॥

૧૯૩.૧૨/૧આયાસ્યે ભવતીગેહમિતિ તાં પ્રાહ કેશવઃ ।
૧૯૩.૧૨/૨વિસસર્જ જહાસોચ્ચૈ રામસ્યાલોક્ય ચાનનમ્ ॥ ૧૯૩.૧૨॥

૧૯૩.૧૩/૧ભક્તિચ્છેદાનુલિપ્તાઙ્ગૌ નીલપીતામ્બરાવુભૌ ।
૧૯૩.૧૩/૨ધનુઃશાલાં તતો યાતૌ ચિત્રમાલ્યોપશોભિતૌ ॥ ૧૯૩.૧૩॥

૧૯૩.૧૪/૧અધ્યાસ્ય ચ ધનૂરત્નં તાભ્યાં પૃષ્ટૈસ્તુ રક્ષિભિઃ ।
૧૯૩.૧૪/૨આખ્યાતં સહસા કૃષ્ણો ગૃહીત્વાપૂરયદ્ ધનુઃ ॥ ૧૯૩.૧૪॥

૧૯૩.૧૫/૧તતઃ પૂરયતા તેન ભજ્યમાનં બલાદ્ ધનુઃ ।
૧૯૩.૧૫/૨ચકારાતિમહાશબ્દં મથુરા તેન પૂરિતા ॥ ૧૯૩.૧૫॥

૧૯૩.૧૬/૧અનુયુક્તૌ તતસ્તૌ ચ ભગ્ને ધનુષિ રક્ષિભિઃ ।
૧૯૩.૧૬/૨રક્ષિસૈન્યં નિકૃત્યોભૌ નિષ્ક્રાન્તૌ કાર્મુકાલયાત્ ॥ ૧૯૩.૧૬॥

૧૯૩.૧૭/૧અક્રૂરાગમવૃત્તાન્તમુપલભ્ય તથા ધનુઃ ।
૧૯૩.૧૭/૨ભગ્નં શ્રુત્વાથ કંસોઽપિ પ્રાહ ચાણૂરમુષ્ટિકૌ ॥ ૧૯૩.૧૭॥

૧૯૩.૧૮/૧કંસ ઉવાચ । ગોપાલદારકૌ પ્રાપ્તૌ ભવદ્ભ્યાં તૌ મમાગ્રતઃ ।
૧૯૩.૧૮/૨મલ્લયુદ્ધેન હન્તવ્યૌ મમ પ્રાણહરૌ હિ તૌ ॥ ૧૯૩.૧૮॥

૧૯૩.૧૯/૧નિયુદ્ધે તદ્વિનાશેન ભવદ્ભ્યાં તોષિતો હ્યહમ્ ।
૧૯૩.૧૯/૨દાસ્યામ્યભિમતાન્ કામાન્ નાન્યથૈતન્ મહાબલૌ ॥ ૧૯૩.૧૯॥

૧૯૩.૨૦/૧ન્યાયતોઽન્યાયતો વાપિ ભવદ્ભ્યાં તૌ મમાહિતૌ ।
૧૯૩.૨૦/૨હન્તવ્યૌ તદ્વધાદ્ રાજ્યં સામાન્યં વો ભવિષ્યતિ ॥ ૧૯૩.૨૦॥

૧૯૩.૨૧/૧વ્યાસ ઉવાચ । ઇત્યાદિશ્ય સ તૌ મલ્લૌ તતશ્ચાહૂય હસ્તિપમ્ ।
૧૯૩.૨૧/૨પ્રોવાચોચ્ચૈસ્ત્વયા મત્તઃ સમાજદ્વારિ કુઞ્જરઃ ॥ ૧૯૩.૨૧॥

૧૯૩.૨૨/૧સ્થાપ્યઃ કુવલયાપીડસ્તેન તૌ ગોપદારકૌ ।
૧૯૩.૨૨/૨ઘાતનીયૌ નિયુદ્ધાય રઙ્ગદ્વારમુપાગતૌ ॥ ૧૯૩.૨૨॥

૧૯૩.૨૩/૧તમાજ્ઞાપ્યાથ દૃષ્ટ્વા ચ મઞ્ચાન્ સર્વાન્ ઉપાહૃતાન્ ।
૧૯૩.૨૩/૨આસન્નમરણઃ કંસઃ સૂર્યોદયમુદૈક્ષત ॥ ૧૯૩.૨૩॥

૧૯૩.૨૪/૧તતઃ સમસ્તમઞ્ચેષુ નાગરઃ સ તદા જનઃ ।
૧૯૩.૨૪/૨રાજમઞ્ચેષુ ચારૂઢાઃ સહ ભૃત્યૈર્મહીભૃતઃ ॥ ૧૯૩.૨૪॥

૧૯૩.૨૫/૧મલ્લપ્રાશ્નિકવર્ગશ્ચ રઙ્ગમધ્યે સમીપગઃ ।
૧૯૩.૨૫/૨કૃતઃ કંસેન કંસોઽપિ તુઙ્ગમઞ્ચે વ્યવસ્થિતઃ ॥ ૧૯૩.૨૫॥

૧૯૩.૨૬/૧અન્તઃપુરાણાં મઞ્ચાશ્ચ યથાન્યે પરિકલ્પિતાઃ ।
૧૯૩.૨૬/૨અન્યે ચ વારમુખ્યાનામન્યે નગરયોષિતામ્ ॥ ૧૯૩.૨૬॥

૧૯૩.૨૭/૧નન્દગોપાદયો ગોપા મઞ્ચેષ્વન્યેષ્વવસ્થિતાઃ ।

૧૯૩.૨૭/૨અક્રૂરવસુદેવૌ ચ મઞ્ચપ્રાન્તે વ્યવસ્થિતૌ ॥ ૧૯૩.૨૭ ॥

૧૯૩.૨૮/૧નગરીયોષિતાં મધ્યે દેવકી પુત્રગર્ધિની ।
૧૯૩.૨૮/૨અન્તકાલેઽપિ પુત્રસ્ય દ્રક્ષ્યામીતિ મુખં સ્થિતા ॥ ૧૯૩.૨૮ ॥

૧૯૩.૨૯/૧વાદ્યમાનેષુ તૂર્યેષુ ચાણૂરે ચાતિવલ્ગતિ ।
૧૯૩.૨૯/૨હાહાકારપરે લોક આસ્ફોટયતિ મુષ્ટિકે ॥ ૧૯૩.૨૯ ॥

૧૯૩.૩૦/૧હત્વા કુવલયાપીડં હસ્ત્યારોહપ્રચોદિતમ્ ।
૧૯૩.૩૦/૨મદાસૃગનુલિપ્તાઙ્ગૌ ગજદન્તવરાયુધૌ ॥ ૧૯૩.૩૦ ॥

૧૯૩.૩૧/૧મૃગમધ્યે યથા સિંહૌ ગર્વલીલાવલોકિનૌ ।
૧૯૩.૩૧/૨પ્રવિષ્ટૌ સુમહારઙ્ગં બલદેવજનાર્દનૌ ॥ ૧૯૩.૩૧ ॥

૧૯૩.૩૨/૧હાહાકારો મહાઞ્ જજ્ઞે સર્વરઙ્ગેષ્વનન્તરમ્ ।
૧૯૩.૩૨/૨કૃષ્ણોઽયં બલભદ્રોઽયમિતિ લોકસ્ય વિસ્મયાત્ ॥ ૧૯૩.૩૨ ॥

૧૯૩.૩૩/૧સોઽયં યેન હતા ઘોરા પૂતના સા નિશાચરી ।
૧૯૩.૩૩/૨પ્રક્ષિપ્તં શકટં યેન ભગ્નૌ ચ યમલાર્જુનૌ ॥ ૧૯૩.૩૩ ॥

૧૯૩.૩૪/૧સોઽયં યઃ કાલિયં નાગં નનર્તારુહ્ય બાલકઃ ।
૧૯૩.૩૪/૨ધૃતો ગોવર્ધનો યેન સપ્તરાત્રં મહાગિરિઃ ॥ ૧૯૩.૩૪ ॥

૧૯૩.૩૫/૧અરિષ્ટો ધેનુકઃ કેશી લીલયૈવ મહાત્મના ।
૧૯૩.૩૫/૨હતો યેન ચ દુર્વૃત્તો દૃશ્યતે સોઽયમચ્યુતઃ ॥ ૧૯૩.૩૫ ॥

૧૯૩.૩૬/૧અયં ચાસ્ય મહાબાહુર્બલદેવોઽગ્રજોઽગ્રતઃ ।
૧૯૩.૩૬/૨પ્રયાતિ લીલયા યોષિન્+ ંઅનોનયનનન્દનઃ ॥ ૧૯૩.૩૬ ॥

૧૯૩.૩૭/૧અયં સ કથ્યતે પ્રાજ્ઞૈઃ પુરાણાર્થાવલોકિભિઃ ।
૧૯૩.૩૭/૨ગોપાલો યાદવં વંશં મગ્નમભ્યુદ્ધરિષ્યતિ ॥ ૧૯૩.૩૭ ॥

૧૯૩.૩૮/૧અયં સ સર્વભૂતસ્ય વિષ્ણોરખિલજન્મનઃ ।
૧૯૩.૩૮/૨અવતીર્ણો મહીમંશો નૂનં ભારહરો ભુવઃ ॥ ૧૯૩.૩૮ ॥

૧૯૩.૩૯/૧ઇત્યેવં વર્ણિતે પૌરૈ રામે કૃષ્ણે ચ તત્ક્ષણાત્ ।
૧૯૩.૩૯/૨ઉરસ્તતાપ દેવક્યાઃ સ્નેહસ્નુતપયોધરમ્ ॥ ૧૯૩.૩૯ ॥

૧૯૩.૪૦/૧મહોત્સવમિવાલોક્ય પુત્રાવેવ વિલોકયન્ ।
૧૯૩.૪૦/૨યુવેવ વસુદેવોઽભૂદ્ વિહાયાભ્યાગતાં જરામ્ ॥ ૧૯૩.૪૦ ॥

૧૯૩.૪૧/૧વિસ્તારિતાક્ષિયુગલા રાજાન્તઃપુરયોષિતઃ ।
૧૯૩.૪૧/૨નાગરસ્ત્રીસમૂહશ્ચ દ્રષ્ટું ન વિરરામ તૌ ॥ ૧૯૩.૪૧॥

૧૯૩.૪૨/૧સ્ત્રિય ઊચુઃ । સખ્યઃ પશ્યત કૃષ્ણસ્ય મુખમપ્યમ્બુજેક્ષણમ્ ।
૧૯૩.૪૨/૨ગજયુદ્ધકૃતાયાસ+ ।સ્વેદામ્બુકણિકાઞ્ચિતમ્ ॥ ૧૯૩.૪૨॥

૧૯૩.૪૩/૧વિકાસીવ સરોમ્ભોજમવશ્યાયજલોક્ષિતમ્ ।
૧૯૩.૪૩/૨પરિભૂતાક્ષરં જન્મ સફલં ક્રિયતાં દૃશઃ ॥ ૧૯૩.૪૩॥

૧૯૩.૪૪/૧શ્રીવત્સાઙ્કં જગદ્ધામ બાલસ્યૈતદ્ વિલોક્યતામ્ ।
૧૯૩.૪૪/૨વિપક્ષક્ષપણં વક્ષો ભુજયુગ્મં ચ ભામિનિ ॥ ૧૯૩.૪૪॥

૧૯૩.૪૫/૧વલ્ગતા મુષ્ટિકેનૈવ ચાણૂરેણ તથા પરૈઃ ।
૧૯૩.૪૫/૨ક્રિયતે બલભદ્રસ્ય હાસ્યમીષદ્ વિલોક્યતામ્ ॥ ૧૯૩.૪૫॥

૧૯૩.૪૬/૧સખ્યઃ પશ્યત ચાણૂરં નિયુદ્ધાર્થમયં હરિઃ ।
૧૯૩.૪૬/૨સમુપૈતિ ન સન્ત્યત્ર કિં વૃદ્ધા યુક્તકારિણઃ ॥ ૧૯૩.૪૬॥

૧૯૩.૪૭/૧ક્વ યૌવનોન્મુખીભૂતઃ સુકુમારતનુર્હરિઃ ।
૧૯૩.૪૭/૨ક્વ વજ્રકઠિનાભોગ+ ।શરીરોઽયં મહાસુરઃ ॥ ૧૯૩.૪૭॥

૧૯૩.૪૮/૧ઇમૌ સુલલિતૌ રઙ્ગે વર્તેતે નવયૌવનૌ ।
૧૯૩.૪૮/૨દૈતેયમલ્લાશ્ચાણૂર+ ।પ્રમુખાસ્ત્વતિદારુણાઃ ॥ ૧૯૩.૪૮॥

૧૯૩.૪૯/૧નિયુદ્ધપ્રાશ્નિકાનાં તુ મહાન્ એષ વ્યતિક્રમઃ ।
૧૯૩.૪૯/૨યદ્ બાલબલિનોર્યુદ્ધં મધ્યસ્થૈઃ સમુપેક્ષ્યતે ॥ ૧૯૩.૪૯॥

૧૯૩.૫૦/૧વ્યાસ ઉવાચ । ઇત્થં પુરસ્ત્રીલોકસ્ય વદતશ્ચાલયન્ ભુવમ્ ।
૧૯૩.૫૦/૨વવર્ષ હર્ષોત્કર્ષં ચ જનસ્ય ભગવાન્ હરિઃ ॥ ૧૯૩.૫૦॥

૧૯૩.૫૧/૧બલભદ્રોઽપિ ચાસ્ફોટ્ય વવલ્ગ લલિતં યદા ।
૧૯૩.૫૧/૨પદે પદે તદા ભૂમિર્ન શીર્ણા યત્ તદ્ અદ્ભુતમ્ ॥ ૧૯૩.૫૧॥

૧૯૩.૫૨/૧ચાણૂરેણ તતઃ કૃષ્ણો યુયુધેઽમિતવિક્રમઃ ।
૧૯૩.૫૨/૨નિયુદ્ધકુશલો દૈત્યો બલદેવેન મુષ્ટિકઃ ॥ ૧૯૩.૫૨॥

૧૯૩.૫૩/૧સંનિપાતાવધૂતૈશ્ચ ચાણૂરેણ સમં હરિઃ ।
૧૯૩.૫૩/૨ક્ષેપણૈર્મુષ્ટિભિશ્ચૈવ કીલાવજ્રનિપાતનૈઃ ॥ ૧૯૩.૫૩॥

૧૯૩.૫૪/૧પાદોદ્ભૂતૈઃ પ્રમૃષ્ટાભિસ્તયોર્યુદ્ધમભૂન્ મહત્ ।
૧૯૩.૫૪/૨અશસ્ત્રમતિઘોરં તત્ તયોર્યુદ્ધં સુદારુણમ્ ॥ ૧૯૩.૫૪॥

૧૯૩.૫૫/૧સ્વબલપ્રાણનિષ્પાદ્યં સમાજોત્સવસંનિધૌ ।
૧૯૩.૫૫/૨યાવદ્ યાવચ્ચ ચાણૂરો યુયુધે હરિણા સહ ॥ ૧૯૩.૫૫ ॥

૧૯૩.૫૬/૧પ્રાણહાનિમવાપાગ્ર્યાં તાવત્ તાવન્ ન બાન્ધવમ્ ।
૧૯૩.૫૬/૨કૃષ્ણોઽપિ યુયુધે તેન લીલયૈવ જગન્મયઃ ॥ ૧૯૩.૫૬ ॥

૧૯૩.૫૭/૧ખેદાચ્ચાલયતા કોપાન્ નિજશેષકરે કરમ્ ।
૧૯૩.૫૭/૨બલક્ષયં વિવૃદ્ધિં ચ દૃષ્ટ્વા ચાણૂરકૃષ્ણયોઃ ॥ ૧૯૩.૫૭ ॥

૧૯૩.૫૮/૧વારયામાસ તૂર્યાણિ કંસઃ કોપપરાયણઃ ।
૧૯૩.૫૮/૨મૃદઙ્ગાદિષુ વાદ્યેષુ પ્રતિષિદ્ધેષુ તત્ક્ષણાત્ ॥ ૧૯૩.૫૮ ॥

૧૯૩.૫૯/૧ખસંગતાન્યવાદ્યન્ત દૈવતૂર્યાણ્યનેકશઃ ।
૧૯૩.૫૯/૨જય ગોવિન્દ ચાણૂરં જહિ કેશવ દાનવમ્ ॥ ૧૯૩.૫૯ ॥

૧૯૩.૬૦/૧ઇત્યન્તર્ધિગતા દેવાસ્તુષ્ટુવુસ્તે પ્રહર્ષિતાઃ ।
૧૯૩.૬૦/૨ચાણૂરેણ ચિરં કાલં ક્રીડિત્વા મધુસૂદનઃ ॥ ૧૯૩.૬૦ ॥

૧૯૩.૬૧/૧ઉત્પાટ્ય ભ્રામયામાસ તદ્વધાય કૃતોદ્યમઃ ।
૧૯૩.૬૧/૨ભ્રામયિત્વા શતગુણં દૈત્યમલ્લમમિત્રજિત્ ॥ ૧૯૩.૬૧ ॥

૧૯૩.૬૨/૧ભૂમાવાસ્ફોટયામાસ ગગને ગતજીવિતમ્ ।
૧૯૩.૬૨/૨ભૂમાવાસ્ફોટિતસ્તેન ચાણૂરઃ શતધા ભવન્ ॥ ૧૯૩.૬૨ ॥

૧૯૩.૬૩/૧રક્તસ્રાવમહાપઙ્કાં ચકાર સ તદા ભુવમ્ ।
૧૯૩.૬૩/૨બલદેવસ્તુ તત્કાલં મુષ્ટિકેન મહાબલઃ ॥ ૧૯૩.૬૩ ॥

૧૯૩.૬૪/૧યુયુધે દૈત્યમલ્લેન ચાણૂરેણ યથા હરિઃ ।
૧૯૩.૬૪/૨સોઽપ્યેનં મુષ્ટિના મૂર્ધ્નિ વક્ષસ્યાહત્ય જાનુના ॥ ૧૯૩.૬૪ ॥

૧૯૩.૬૫/૧પાતયિત્વા ધરાપૃષ્ઠે નિષ્પિપેષ ગતાયુષમ્ ।
૧૯૩.૬૫/૨કૃષ્ણસ્તોશલકં ભૂયો મલ્લરાજં મહાબલમ્ ॥ ૧૯૩.૬૫ ॥

૧૯૩.૬૬/૧વામમુષ્ટિપ્રહારેણ પાતયામાસ ભૂતલે ।
૧૯૩.૬૬/૨ચાણૂરે નિહતે મલ્લે મુષ્ટિકે ચ નિપાતિતે ॥ ૧૯૩.૬૬ ॥

૧૯૩.૬૭/૧નીતે ક્ષયં તોશલકે સર્વે મલ્લાઃ પ્રદુદ્રુવુઃ ।
૧૯૩.૬૭/૨વવલ્ગતુસ્તદા રઙ્ગે કૃષ્ણસંકર્ષણાવુભૌ ॥ ૧૯૩.૬૭ ॥

૧૯૩.૬૮/૧સમાનવયસો ગોપાન્ બલાદ્ આકૃષ્ય હર્ષિતૌ ।

૧૯૩.૬૮/૨કંસોઽપિ કોપરક્તાક્ષઃ પ્રાહોચ્ચૈર્વ્યાયતાન્ નરાન્ ॥ ૧૯૩.૬૮॥

૧૯૩.૬૯/૧ગોપાવેતૌ સમાજૌઘાન્ નિષ્ક્રમ્યેતાં બલાદ્ ઇતઃ ।
૧૯૩.૬૯/૨નન્દોઽપિ ગૃહ્યતાં પાપો નિગડૈરાશુ બધ્યતામ્ ॥ ૧૯૩.૬૯॥

૧૯૩.૭૦/૧અવૃદ્ધાર્હેણ દણ્ડેન વસુદેવોઽપિ વધ્યતામ્ ।
૧૯૩.૭૦/૨વલ્ગન્તિ ગોપાઃ કૃષ્ણેન યે ચેમે સહિતાઃ પુનઃ ॥ ૧૯૩.૭૦॥

૧૯૩.૭૧/૧ગાવો હ્રિયન્તામેષાં ચ યચ્ચાસ્તિ વસુ કિંચન ।
૧૯૩.૭૧/૨એવમાજ્ઞાપયન્તં તં પ્રહસ્ય મધુસૂદનઃ ॥ ૧૯૩.૭૧॥

૧૯૩.૭૨/૧ઉત્પત્યારુહ્ય તન્મઞ્ચં કંસં જગ્રાહ વેગિતઃ ।
૧૯૩.૭૨/૨કેશેષ્વાકૃષ્ય વિગલત્+ ।કિરીટમવનીતલે ॥ ૧૯૩.૭૨॥

૧૯૩.૭૩/૧સ કંસં પાતયામાસ તસ્યોપરિ પપાત ચ ।
૧૯૩.૭૩/૨નિઃશેષજગદાધાર+ ।ગુરુણા પતતોપરિ ॥ ૧૯૩.૭૩॥

૧૯૩.૭૪/૧કૃષ્ણેન ત્યાજિતઃ પ્રાણાન્ ઉગ્રસેનાત્મજો નૃપઃ ।
૧૯૩.૭૪/૨મૃતસ્ય કેશેષુ તદા ગૃહીત્વા મધુસૂદનઃ ॥ ૧૯૩.૭૪॥

૧૯૩.૭૫/૧ચકર્ષ દેહં કંસસ્ય રઙ્ગમધ્યે મહાબલઃ ।
૧૯૩.૭૫/૨ગૌરવેણાતિમહતા પરિપાતેન કૃષ્યતા ॥ ૧૯૩.૭૫॥

૧૯૩.૭૬/૧કૃતા કંસસ્ય દેહેન વેગિતેન મહાત્મના ।
૧૯૩.૭૬/૨કંસે ગૃહીતે કૃષ્ણેન તદ્ભ્રાતાભ્યાગતો રુષા ॥ ૧૯૩.૭૬॥

૧૯૩.૭૭/૧સુનામા બલભદ્રેણ લીલયૈવ નિપાતિતઃ ।
૧૯૩.૭૭/૨તતો હાહાકૃતં સર્વમાસીત્ તદ્ રઙ્ગમણ્ડલમ્ ॥ ૧૯૩.૭૭॥

૧૯૩.૭૮/૧અવજ્ઞયા હતં દૃષ્ટ્વા કૃષ્ણેન મથુરેશ્વરમ્ ।
૧૯૩.૭૮/૨કૃષ્ણોઽપિ વસુદેવસ્ય પાદૌ જગ્રાહ સત્વરમ્ ॥ ૧૯૩.૭૮॥

૧૯૩.૭૯/૧દેવક્યાશ્ચ મહાબાહુર્બલદેવસહાયવાન્ ।
૧૯૩.૭૯/૨ઉત્થાપ્ય વસુદેવસ્તુ દેવકી ચ જનાર્દનમ્ ।
૧૯૩.૭૯/૩સ્મૃતજન્મોક્તવચનૌ તાવેવ પ્રણતૌ સ્થિતૌ ॥ ૧૯૩.૭૯॥

૧૯૩.૮૦/૧વસુદેવ ઉવાચ । પ્રસીદ દેવદેવેશ દેવાનાં પ્રવર પ્રભો ।
૧૯૩.૮૦/૨તથાવયોઃ પ્રસાદેન કૃતાભ્યુદ્ધાર કેશવ ॥ ૧૯૩.૮૦॥

૧૯૩.૮૧/૧આરાધિતો યદ્ ભગવાન્ અવતીર્ણો ગૃહે મમ ।
૧૯૩.૮૧/૨દુર્વૃત્તનિધનાર્થાય તેન નઃ પાવિતં કુલમ્ ॥ ૧૯૩.૮૧॥

૧૯૩.૮૨/૧ત્વમન્તઃ સર્વભૂતાનાં સર્વભૂતેષ્વવસ્થિતઃ ।
૧૯૩.૮૨/૨વર્તતે ચ સમસ્તાત્મંસ્ત્વત્તો ભૂતભવિષ્યતી ॥ ૧૯૩.૮૨॥

૧૯૩.૮૩/૧યજ્ઞૈ ત્વમિજ્યસેઽચિન્ત્ય સર્વદેવમયાચ્યુત ।
૧૯૩.૮૩/૨ત્વમેવ યજ્ઞો યજ્વા ચ યજ્ઞાનાં પરમેશ્વર ॥ ૧૯૩.૮૩॥

૧૯૩.૮૪/૧સાપહ્નવં મમ મનો યદ્ એતત્ ત્વયિ જાયતે ।
૧૯૩.૮૪/૨દેવક્યાશ્ચાત્મજ પ્રીત્યા તદ્ અત્યન્તવિડમ્બના ॥ ૧૯૩.૮૪॥

૧૯૩.૮૫/૧ત્વં કર્તા સર્વભૂતાનામનાદિનિધનો ભવાન્ ।
૧૯૩.૮૫/૨ક્વ ચ મે માનુષસ્યૈષા જિહ્વા પુત્રેતિ વક્ષ્યતિ ॥ ૧૯૩.૮૫॥

૧૯૩.૮૬/૧જગદ્ એતજ્જગન્નાથ સમ્ભૂતમખિલં યતઃ ।
૧૯૩.૮૬/૨કયા યુક્ત્યા વિના માયાં સોઽસ્મત્તઃ સમ્ભવિષ્યતિ ॥ ૧૯૩.૮૬॥

૧૯૩.૮૭/૧યસ્મિન્ પ્રતિષ્ઠિતં સર્વં જગત્ સ્થાવરજઙ્ગમમ્ ।
૧૯૩.૮૭/૨સ કોષ્ઠોત્સઙ્ગશયનો મનુષ્યાજ્જાયતે કથમ્ ॥ ૧૯૩.૮૭॥

૧૯૩.૮૮/૧સ ત્વં પ્રસીદ પરમેશ્વર પાહિ વિશ્વમ્ ।
૧૯૩.૮૮/૨અંશાવતારકરણૈર્ન મમાસિ પુત્રઃ ।
૧૯૩.૮૮/૩આબ્રહ્મપાદપમયં જગદ્ ઈશ સર્વમ્ ।
૧૯૩.૮૮/૪ચિત્તે વિમોહયસિ કિં પરમેશ્વરાત્મન્ ॥ ૧૯૩.૮૮॥

૧૯૩.૮૯/૧માયાવિમોહિતદૃશા તનયો મમેતિ ।
૧૯૩.૮૯/૨કંસાદ્ ભયં કૃતવતા તુ મયાતિતીવ્રમ્ ।
૧૯૩.૮૯/૩નીતોઽસિ ગોકુલમરાતિભયાકુલસ્ય ।
૧૯૩.૮૯/૪વૃદ્ધિં ગતોઽસિ મમ ચૈવ ગવામધીશ ॥ ૧૯૩.૮૯॥

૧૯૩.૯૦/૧કર્માણિ રુદ્રમરુદશ્વિશતક્રતૂનામ્ ।
૧૯૩.૯૦/૨સાધ્યાનિ યાનિ ન ભવન્તિ નિરીક્ષિતાનિ ।
૧૯૩.૯૦/૩ત્વં વિષ્ણુરીશજગતામુપકારહેતોઃ ।
૧૯૩.૯૦/૪પ્રાપ્તોઽસિ નઃ પરિગતઃ પરમો વિમોહઃ ॥ ૧૯૩.૯૦॥

૧૯૪.૧/૧વ્યાસ ઉવાચ । તૌ સમુત્પન્નવિજ્ઞાનૌ ભગવત્કર્મદર્શનાત્ ।
૧૯૪.૧/૨દેવકીવસુદેવૌ તુ દૃષ્ટ્વા માયાં પુનર્હરિઃ ॥ ૧૯૪.૧॥

૧૯૪.૨/૧મોહાય યદુચક્રસ્ય વિતતાન સ વૈષ્ણવીમ્ ।
૧૯૪.૨/૨ઉવાચ ચામ્બ ભોસ્તાત ચિરાદ્ ઉત્કણ્ઠિતેન તુ ॥ ૧૯૪.૨॥

૧૯૪.૩/૧ભવન્તૌ કંસભીતેન દૃષ્ટૌ સંકર્ષણેન ચ ।
૧૯૪.૩/૨કુર્વતાં યાતિ યઃ કાલો માતાપિત્રોરપૂજનમ્ ॥ ૧૯૪.૩ ॥

૧૯૪.૪/૧સ વૃથા ક્લેશકારી વૈ સાધૂનામુપજાયતે ।
૧૯૪.૪/૨ગુરુદેવદ્વિજાતીનાં માતાપિત્રોશ્ચ પૂજનમ્ ॥ ૧૯૪.૪ ॥

૧૯૪.૫/૧કુર્વતઃ સફલં જન્મ દેહિનસ્તાત જાયતે ।
૧૯૪.૫/૨તત્ ક્ષન્તવ્યમિદં સર્વમતિક્રમકૃતં પિતઃ ।
૧૯૪.૫/૩કંસવીર્યપ્રતાપાભ્યામાવયોઃ પરવશ્યયોઃ ॥ ૧૯૪.૫ ॥

૧૯૪.૬/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વાથ પ્રણમ્યોભૌ યદુવૃદ્ધાન્ અનુક્રમાત્ ।
૧૯૪.૬/૨પાદાનતિભિઃ સસ્નેહં ચક્રતુઃ પૌરમાનસમ્ ॥ ૧૯૪.૬ ॥

૧૯૪.૭/૧કંસપત્ન્યસ્તતઃ કંસં પરિવાર્ય હતં ભુવિ ।
૧૯૪.૭/૨વિલેપુર્માતરશ્ચાસ્ય શોકદુઃખપરિપ્લુતાઃ ॥ ૧૯૪.૭ ॥

૧૯૪.૮/૧બહુપ્રકારમસ્વસ્થાઃ પશ્ચાત્તાપાતુરા હરિઃ ।
૧૯૪.૮/૨તાઃ સમાશ્વાસયામાસ સ્વયમસ્રાવિલેક્ષણઃ ॥ ૧૯૪.૮ ॥

૧૯૪.૯/૧ઉગ્રસેનં તતો બન્ધાન્ મુમોચ મધુસૂદનઃ ।
૧૯૪.૯/૨અભ્યષિઞ્ચત્ તથૈવૈનં નિજરાજ્યે હતાત્મજમ્ ॥ ૧૯૪.૯ ॥

૧૯૪.૧૦/૧રાજ્યેઽભિષિક્તઃ કૃષ્ણેન યદુસિંહઃ સુતસ્ય સઃ ।
૧૯૪.૧૦/૨ચકાર પ્રેતકાર્યાણિ યે ચાન્યે તત્ર ઘાતિતાઃ ॥ ૧૯૪.૧૦ ॥

૧૯૪.૧૧/૧કૃતોર્ધ્વદૈહિકં ચૈનં સિંહાસનગતં હરિઃ ।
૧૯૪.૧૧/૨ઉવાચાજ્ઞાપય વિભો યત્ કાર્યમવિશઙ્કયા ॥ ૧૯૪.૧૧ ॥

૧૯૪.૧૨/૧યયાતિશાપાદ્ વંશોઽયમરાજ્યાર્હોઽપિ સામ્પ્રતમ્ ।
૧૯૪.૧૨/૨મયિ ભૃત્યે સ્થિતે દેવાન્ આજ્ઞાપયતુ કિં નૃપૈઃ ॥ ૧૯૪.૧૨ ॥

૧૯૪.૧૩/૧ઇત્યુક્ત્વા ચોગ્રસેનં તુ વાયું પ્રતિ જગાદ હ ।
૧૯૪.૧૩/૨નૃવાચા ચૈવ ભગવાન્ કેશવઃ કાર્યમાનુષઃ ॥ ૧૯૪.૧૩ ॥

૧૯૪.૧૪/૧શ્રીકૃષ્ણ ઉવાચ । ગચ્છેન્દ્રં બ્રૂહિ વાયો ત્વમલં ગર્વેણ વાસવ ।
૧૯૪.૧૪/૨દીયતામુગ્રસેનાય સુધર્મા ભવતા સભા ॥ ૧૯૪.૧૪ ॥

૧૯૪.૧૫/૧કૃષ્ણો બ્રવીતિ રાજાર્હમેતદ્ રત્નમનુત્તમમ્ ।
૧૯૪.૧૫/૨સુધર્માખ્યા સભા યુક્તમસ્યાં યદુભિરાસિતુમ્ ॥ ૧૯૪.૧૫ ॥

૧૯૪.૧૬/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ પવનો ગત્વા સર્વમાહ શચીપતિમ્ ।
૧૯૪.૧૬/૨દદૌ સોઽપિ સુધર્માખ્યાં સભાં વાયોઃ પુરંદરઃ ॥ ૧૯૪.૧૬॥

૧૯૪.૧૭/૧વાયુના ચાહૃતાં દિવ્યાં તે સભાં યદુપુંગવાઃ ।
૧૯૪.૧૭/૨બુભુજુઃ સર્વરત્નાઢ્યાં ગોવિન્દભુજસંશ્રયાઃ ॥ ૧૯૪.૧૭॥

૧૯૪.૧૮/૧વિદિતાખિલવિજ્ઞાનૌ સર્વજ્ઞાનમયાવપિ ।
૧૯૪.૧૮/૨શિષ્યાચાર્યક્રમં વીરૌ ખ્યાપયન્તૌ યદૂત્તમૌ ॥ ૧૯૪.૧૮॥

૧૯૪.૧૯/૧તતઃ સાંદીપનિં કાશ્યમવન્તિપુરવાસિનમ્ ।
૧૯૪.૧૯/૨અસ્ત્રાર્થં જગ્મતુર્વીરૌ બલદેવજનાર્દનૌ ॥ ૧૯૪.૧૯॥

૧૯૪.૨૦/૧તસ્ય શિષ્યત્વમભ્યેત્ય ગુરુવૃત્તિપરૌ હિ તૌ ।
૧૯૪.૨૦/૨દર્શયાં ચક્રતુર્વીરાવાચારમખિલે જને ॥ ૧૯૪.૨૦॥

૧૯૪.૨૧/૧સરહસ્યં ધનુર્વેદં સસંગ્રહમધીયતામ્ ।
૧૯૪.૨૧/૨અહોરાત્રૈશ્ચતુઃષષ્ટ્યા તદ્ અદ્ભુતમભૂદ્ દ્વિજાઃ ॥ ૧૯૪.૨૧॥

૧૯૪.૨૨/૧સાંદીપનિરસમ્ભાવ્યં તયોઃ કર્માતિમાનુષમ્ ।
૧૯૪.૨૨/૨વિચિન્ત્ય તૌ તદા મેને પ્રાપ્તૌ ચન્દ્રદિવાકરૌ ॥ ૧૯૪.૨૨॥

૧૯૪.૨૩/૧અસ્ત્રગ્રામમશેષં ચ પ્રોક્તમાત્રમવાપ્ય તૌ ।
૧૯૪.૨૩/૨ઊચતુર્વ્રિયતાં યા તે દાતવ્યા ગુરુદક્ષિણા ॥ ૧૯૪.૨૩॥

૧૯૪.૨૪/૧સોઽપ્યતીન્દ્રિયમાલોક્ય તયોઃ કર્મ મહામતિઃ ।
૧૯૪.૨૪/૨અયાચત મૃતં પુત્રં પ્રભાસે લવણાર્ણવે ॥ ૧૯૪.૨૪॥

૧૯૪.૨૫/૧ગૃહીતાસ્ત્રૌ તતસ્તૌ તુ ગત્વા તં લવણોદધિમ્ ।
૧૯૪.૨૫/૨ઊચુતુશ્ચ ગુરોઃ પુત્રો દીયતામિતિ સાગરમ્ ॥ ૧૯૪.૨૫॥

૧૯૪.૨૬/૧કૃતાઞ્જલિપુટશ્ચાબ્ધિસ્તાવથ દ્વિજસત્તમાઃ ।
૧૯૪.૨૬/૨ઉવાચ ન મયા પુત્રો હૃતઃ સાંદીપનેરિતિ ॥ ૧૯૪.૨૬॥

૧૯૪.૨૭/૧દૈત્યઃ પઞ્ચજનો નામ શઙ્ખરૂપઃ સ બાલકમ્ ।
૧૯૪.૨૭/૨જગ્રાહ સોઽસ્તિ સલિલે મમૈવાસુરસૂદન ॥ ૧૯૪.૨૭॥

૧૯૪.૨૮/૧ઇત્યુક્તોઽન્તર્જલં ગત્વા હત્વા પઞ્ચજનં તથા ।
૧૯૪.૨૮/૨કૃષ્ણો જગ્રાહ તસ્યાસ્થિ+ ।પ્રભવં શઙ્ખમુત્તમમ્ ॥ ૧૯૪.૨૮॥

૧૯૪.૨૯/૧યસ્ય નાદેન દૈત્યાનાં બલહાનિઃ પ્રજાયતે ।
૧૯૪.૨૯/૨દેવાનાં વર્ધતે તેજો યાત્યધર્મશ્ચ સંક્ષયમ્ ॥ ૧૯૪.૨૯॥

૧૯૪.૩૦/૧તં પાઞ્ચજન્યમાપૂર્ય ગત્વા યમપુરીં હરિઃ ।
૧૯૪.૩૦/૨બલદેવશ્ચ બલવાઞ્ જિત્વા વૈવસ્વતં યમમ્ ॥ ૧૯૪.૩૦ ॥

૧૯૪.૩૧/૧તં બાલં યાતનાસંસ્થં યથાપૂર્વશરીરિણમ્ ।
૧૯૪.૩૧/૨પિત્રે પ્રદત્તવાન્ કૃષ્ણો બલશ્ચ બલિનાં વરઃ ॥ ૧૯૪.૩૧ ॥

૧૯૪.૩૨/૧મથુરાં ચ પુનઃ પ્રાપ્તાવુગ્રસેનેન પાલિતામ્ ।
૧૯૪.૩૨/૨પ્રહૃષ્ટપુરુષસ્ત્રીકાવુભૌ રામજનાર્દનૌ ॥ ૧૯૪.૩૨ ॥

૧૯૫.૧/૧વ્યાસ ઉવાચ । જરાસંધસુતે કંસ ઉપયેમે મહાબલઃ ।
૧૯૫.૧/૨અસ્તિઃ પ્રાપ્તિશ્ચ ભો વિપ્રાસ્તયોર્ભર્તૃહણં હરિમ્ ॥ ૧૯૫.૧ ॥

૧૯૫.૨/૧મહાબલપરીવારો માગધાધિપતિર્બલી ।
૧૯૫.૨/૨હન્તુમભ્યાયયૌ કોપાજ્જરાસંધઃ સયાદવમ્ ॥ ૧૯૫.૨ ॥

૧૯૫.૩/૧ઉપેત્ય મથુરાં સોઽથ રુરોધ મગધેશ્વરઃ ।
૧૯૫.૩/૨અક્ષૌહિણીભિઃ સૈન્યસ્ય ત્રયોવિંશતિભિર્વૃતઃ ॥ ૧૯૫.૩ ॥

૧૯૫.૪/૧નિષ્ક્રમ્યાલ્પપરીવારાવુભૌ રામજનાર્દનૌ ।
૧૯૫.૪/૨યુયુધાતે સમં તસ્ય બલિનૌ બલિસૈનિકૈઃ ॥ ૧૯૫.૪ ॥

૧૯૫.૫/૧તતો બલશ્ચ કૃષ્ણશ્ચ મતિં ચક્રે મહાબલઃ ।
૧૯૫.૫/૨આયુધાનાં પુરાણાનામાદાને મુનિસત્તમાઃ ॥ ૧૯૫.૫ ॥

૧૯૫.૬/૧અનન્તરં ચક્રશાર્ઙ્ગ તૂણૌ ચાપ્યક્ષયૌ શરૈઃ ।
૧૯૫.૬/૨આકાશાદ્ આગતૌ વીરૌ તદા કૌમોદકી ગદા ॥ ૧૯૫.૬ ॥

૧૯૫.૭/૧હલં ચ બલભદ્રસ્ય ગગનાદ્ આગમત્ કરમ્ ।
૧૯૫.૭/૨બલસ્યાભિમતં વિપ્રાઃ સુનન્દં મુશલં તથા ॥ ૧૯૫.૭ ॥

૧૯૫.૮/૧તતો યુદ્ધે પરાજિત્ય સ્વસૈન્યં મગધાધિપમ્ ।
૧૯૫.૮/૨પુરીં વિવિશતુર્વીરાવુભૌ રામજનાર્દનૌ ॥ ૧૯૫.૮ ॥

૧૯૫.૯/૧જિતે તસ્મિન્ સુદુર્વૃત્તે જરાસંધે દ્વિજોત્તમાઃ ।
૧૯૫.૯/૨જીવમાને ગતે તત્ર કૃષ્ણો મેને ન તં જિતમ્ ॥ ૧૯૫.૯ ॥

૧૯૫.૧૦/૧પુનરપ્યાજગામાથ જરાસંધો બલાન્વિતઃ ।
૧૯૫.૧૦/૨જિતશ્ચ રામકૃષ્ણાભ્યામપકૃત્ય દ્વિજોત્તમાઃ ॥ ૧૯૫.૧૦ ॥

૧૯૫.૧૧/૧દશ ચાષ્ટૌ ચ સંગ્રામાન્ એવમત્યન્તદુર્મદઃ ।

૧૯૫.૧૧/૨યદુભિર્માગધો રાજા ચક્રે કૃષ્ણપુરોગમૈઃ ॥ ૧૯૫.૧૧॥

૧૯૫.૧૨/૧સર્વેષ્વેવ ચ યુદ્ધેષુ યદુભિઃ સ પરાજિતઃ ।
૧૯૫.૧૨/૨અપક્રાન્તો જરાસંધઃ સ્વલ્પસૈન્યૈર્બલાધિકઃ ॥ ૧૯૫.૧૨॥

૧૯૫.૧૩/૧તદ્ બલં યાદવાનાં વૈ રક્ષિતં યદ્ અનેકશઃ ।
૧૯૫.૧૩/૨તત્ તુ સંનિધિમાહાત્મ્યં વિષ્ણોરંશસ્ય ચક્રિણઃ ॥ ૧૯૫.૧૩॥

૧૯૫.૧૪/૧મનુષ્યધર્મશીલસ્ય લીલા સા જગતઃ પતેઃ ।
૧૯૫.૧૪/૨અસ્ત્રાણ્યનેકરૂપાણિ યદ્ અરાતિષુ મુઞ્ચતિ ॥ ૧૯૫.૧૪॥

૧૯૫.૧૫/૧મનસૈવ જગત્સૃષ્ટિ+ ।સંહારં તુ કરોતિ યઃ ।
૧૯૫.૧૫/૨તસ્યારિપક્ષક્ષપણે કિયાન્ ઉદ્યમવિસ્તરઃ ॥ ૧૯૫.૧૫॥

૧૯૫.૧૬/૧તથાપિ ચ મનુષ્યાણાં ધર્મસ્તદનુવર્તનમ્ ।
૧૯૫.૧૬/૨કુર્વન્ બલવતા સંધિં હીનૈર્યુદ્ધં કરોત્યસૌ ॥ ૧૯૫.૧૬॥

૧૯૫.૧૭/૧સામ ચોપપ્રદાનં ચ તથા ભેદં ચ દર્શયન્ ।
૧૯૫.૧૭/૨કરોતિ દણ્ડપાતં ચ ક્વચિદ્ એવ પલાયનમ્ ॥ ૧૯૫.૧૭॥

૧૯૫.૧૮/૧મનુષ્યદેહિનાં ચેષ્ટામિત્યેવમનુવર્તતે ।
૧૯૫.૧૮/૨લીલા જગત્પતેસ્તસ્ય *ચ્છન્દતઃ સમ્પ્રવર્તતે ॥ ૧૯૫.૧૮॥

૧૯૬.૧/૧વ્યાસ ઉવાચ । ગાર્ગ્યં ગોષ્ઠે દ્વિજો શ્યાલઃ ષણ્ઢ ઇત્યુક્તવાન્ દ્વિજાઃ ।
૧૯૬.૧/૨યદૂનાં સંનિધૌ સર્વે જહસુર્યાદવાસ્તદા ॥ ૧૯૬.૧॥

૧૯૬.૨/૧તતઃ કોપસમાવિષ્ટો દક્ષિણાપથમેત્ય સઃ ।
૧૯૬.૨/૨સુતમિચ્છંસ્તપસ્તેપે યદુચક્રભયાવહમ્ ॥ ૧૯૬.૨॥

૧૯૬.3/૧આરાધયન્ મહાદેવં સોઽયશ્ચૂર્ણમભક્ષયત્ ।
૧૯૬.3/૨દદૌ વરં ચ તુષ્ટોઽસૌ વર્ષે દ્વાદશકે હરઃ ॥ ૧૯૬.3॥

૧૯૬.૪/૧સમ્ભાવયામાસ સ તં યવનેશો હ્યનાત્મજમ્ ।
૧૯૬.૪/૨તદ્યોષિત્સંગમાચ્ચાસ્ય પુત્રોઽભૂદ્ અલિસપ્રભઃ ॥ ૧૯૬.૪॥

૧૯૬.૫/૧તં કાલયવનં નામ રાજ્યે સ્વે યવનેશ્વરઃ ।
૧૯૬.૫/૨અભિષિચ્ય વનં યાતો વજ્રાગ્રકઠિનોરસમ્ ॥ ૧૯૬.૫॥

૧૯૬.૬/૧સ તુ વીર્યમદોન્મત્તઃ પૃથિવ્યાં બલિનો નૃપાન્ ।
૧૯૬.૬/૨પપ્રચ્છ નારદશ્ચાસ્મૈ કથયામાસ યાદવાન્ ॥ ૧૯૬.૬॥

૧૯૬.૭/૧મ્લેચ્છકોટિસહસ્રાણાં સહસ્રૈઃ સોઽપિ સંવૃતઃ ।
૧૯૬.૭/૨ગજાશ્વરથસમ્પન્નૈશ્ચકાર પરમોદ્યમમ્ ॥ ૧૯૬.૭ ॥

૧૯૬.૮/૧પ્રયયૌ ચાતવચ્છિન્નૈઃ પ્રયાણૈઃ સ દિને દિને ।
૧૯૬.૮/૨યાદવાન્ પ્રતિ સામર્ષો મુનયો મથુરાં પુરીમ્ ॥ ૧૯૬.૮ ॥

૧૯૬.૯/૧કૃષ્ણોઽપિ ચિન્તયામાસ ક્ષપિતં યાદવં બલમ્ ।
૧૯૬.૯/૨યવનેન સમાલોક્ય માગધઃ સમ્પ્રયાસ્યતિ ॥ ૧૯૬.૯ ॥

૧૯૬.૧૦/૧માગધસ્ય બલં ક્ષીણં સ કાલયવનો બલી ।
૧૯૬.૧૦/૨હન્તા તદ્ ઇદમાયાતં યદૂનાં વ્યસનં દ્વિધા ॥ ૧૯૬.૧૦ ॥

૧૯૬.૧૧/૧તસ્માદ્ દુર્ગં કરિષ્યામિ યદૂનામતિદુર્જયમ્ ।
૧૯૬.૧૧/૨સ્ત્રિયોઽપિ યત્ર યુધ્યેયુઃ કિં પુનર્વૃષ્ણિયાદવાઃ ॥ ૧૯૬.૧૧ ॥

૧૯૬.૧૨/૧મયિ મત્તે પ્રમત્તે વા સુપ્તે પ્રવસિતેઽપિ વા ।
૧૯૬.૧૨/૨યાદવાભિભવં દુષ્ટા મા કુર્વન્ વૈરિણોઽધિકમ્ ॥ ૧૯૬.૧૨ ॥

૧૯૬.૧૩/૧ઇતિ સંચિન્ત્ય ગોવિન્દો યોજનાનિ મહોદધિમ્ ।
૧૯૬.૧૩/૨યયાચે દ્વાદશ પુરીં દ્વારકાં તત્ર નિર્મમે ॥ ૧૯૬.૧૩ ॥

૧૯૬.૧૪/૧મહોદ્યાનાં મહાવપ્રાં તડાગશતશોભિતામ્ ।
૧૯૬.૧૪/૨પ્રાકારશતસમ્બાધામિન્દ્રસ્યેવામરાવતીમ્ ॥ ૧૯૬.૧૪ ॥

૧૯૬.૧૫/૧મથુરાવાસિનં લોકં તત્રાનીય જનાર્દનઃ ।
૧૯૬.૧૫/૨આસન્ને કાલયવને મથુરાં ચ સ્વયં યયૌ ॥ ૧૯૬.૧૫ ॥

૧૯૬.૧૬/૧બહિરાવાસિતે સૈન્યે મથુરાયા નિરાયુધઃ ।
૧૯૬.૧૬/૨નિર્જગામ સ ગોવિન્દો દદર્શ યવનશ્ચ તમ્ ॥ ૧૯૬.૧૬ ॥

૧૯૬.૧૭/૧સ જ્ઞાત્વા વાસુદેવં તં બાહુપ્રહરણો નૃપઃ ।
૧૯૬.૧૭/૨અનુયાતો મહાયોગિ+ ૅહેતોભિઃ પ્રાપ્યતે ન યઃ ॥ ૧૯૬.૧૭ ॥

૧૯૬.૧૮/૧તેનાનુયાતઃ કૃષ્ણોઽપિ પ્રવિવેશ મહાગુહામ્ ।
૧૯૬.૧૮/૨યત્ર શેતે મહાવીર્યો મુચુકુન્દો નરેશ્વરઃ ॥ ૧૯૬.૧૮ ॥

૧૯૬.૧૯/૧સોઽપિ પ્રવિષ્ટો યવનો દૃષ્ટ્વા શય્યાગતં નરમ્ ।
૧૯૬.૧૯/૨પાદેન તાડયામાસ કૃષ્ણં મત્વા સ દુર્મતિઃ ॥ ૧૯૬.૧૯ ॥

૧૯૬.૨૦/૧દૃષ્ટમાત્રશ્ચ તેનાસૌ જજ્વાલ યવનોઽગ્નિના ।
૧૯૬.૨૦/૨તત્ક્રોધજેન મુનયો ભસ્મીભૂતશ્ચ તત્ક્ષણાત્ ॥ ૧૯૬.૨૦ ॥

૧૯૬.૨૧/૧સ હિ દેવાસુરે યુદ્ધે ગત્વા જિત્વા મહાસુરાન્ ।
૧૯૬.૨૧/૨નિદ્રાર્તઃ સુમહાકાલં નિદ્રાં વવ્રે વરં સુરાન્ ॥ ૧૯૬.૨૧॥

૧૯૬.૨૨/૧પ્રોક્તશ્ચ દેવૈઃ સંસુપ્તં યસ્ત્વામુત્થાપયિષ્યતિ ।
૧૯૬.૨૨/૨દેહજેનાગ્નિના સદ્યઃ સ તુ ભસ્મીભવિષ્યતિ ॥ ૧૯૬.૨૨॥

૧૯૬.૨૩/૧એવં દગ્ધ્વા સ તં પાપં દૃષ્ટ્વા ચ મધુસૂદનમ્ ।
૧૯૬.૨૩/૨કસ્ત્વમિત્યાહ સોઽપ્યાહ જાતોઽહં શશિનઃ કુલે ॥ ૧૯૬.૨૩॥

૧૯૬.૨૪/૧વસુદેવસ્ય તનયો યદુવંશસમુદ્ભવઃ ।
૧૯૬.૨૪/૨મુચુકુન્દોઽપિ તચ્છ્રુત્વા વૃદ્ધગાર્ગ્યવચઃ સ્મરન્ ॥ ૧૯૬.૨૪॥

૧૯૬.૨૫/૧સંસ્મૃત્ય પ્રણિપત્યૈનં સર્વં સર્વેશ્વરં હરિમ્ ।
૧૯૬.૨૫/૨પ્રાહ જ્ઞાતો ભવાન્ વિષ્ણોરંશસ્ત્વં પરમેશ્વરઃ ॥ ૧૯૬.૨૫॥

૧૯૬.૨૬/૧પુરા ગાર્ગ્યેણ કથિતમષ્ટાવિંશતિમે યુગે ।
૧૯૬.૨૬/૨દ્વાપરાન્તે હરેર્જન્મ યદુવંશે ભવિષ્યતિ ॥ ૧૯૬.૨૬॥

૧૯૬.૨૭/૧સ ત્વં પ્રાપ્તો ન સંદેહો મર્ત્યાનામુપકારકૃત્ ।
૧૯૬.૨૭/૨તથા હિ સુમહત્ તેજો નાલં સોઢુમહં તવ ॥ ૧૯૬.૨૭॥

૧૯૬.૨૮/૧તથા હિ સુમહામ્ભોદ+ ।ધ્વનિધીરતરં તતઃ ।
૧૯૬.૨૮/૨વાક્યં તમિતિ હોવાચ યુષ્મત્પાદસુલાલિતમ્ ॥ ૧૯૬.૨૮॥

૧૯૬.૨૯/૧દેવાસુરે મહાયુદ્ધે દૈત્યાશ્ચ સુમહાભટાઃ ।
૧૯૬.૨૯/૨ન શેકુસ્તે મહત્ તેજસ્તત્ તેજો ન સહામ્યહમ્ ॥ ૧૯૬.૨૯॥

૧૯૬.૩૦/૧સંસારપતિતસ્યૈકો જન્તોસ્ત્વં શરણં પરમ્ ।
૧૯૬.૩૦/૨સમ્પ્રસીદ પ્રપન્નાર્તિ+ અર્તા હર મમાશુભમ્ ॥ ૧૯૬.૩૦॥

૧૯૬.૩૧/૧ત્વં પયોનિધયઃ શૈલાઃ સરિતશ્ચ વનાનિ ચ ।
૧૯૬.૩૧/૨મેદિની ગગનં વાયુરાપોઽગ્નિસ્ત્વં તથા પુમાન્ ॥ ૧૯૬.૩૧॥

૧૯૬.૩૨/૧પુંસઃ પરતરં સર્વં વ્યાપ્ય જન્મ વિકલ્પવત્ ।
૧૯૬.૩૨/૨શબ્દાદિહીનમજરં વૃદ્ધિક્ષયવિવર્જિતમ્ ॥ ૧૯૬.૩૨॥

૧૯૬.૩૩/૧ત્વત્તોઽમરાસ્તુ પિતરો યક્ષગન્ધર્વરાક્ષસાઃ ।
૧૯૬.૩૩/૨સિદ્ધાશ્ચાપ્સરસસ્ત્વત્તો મનુષ્યાઃ પશવઃ ખગાઃ ॥ ૧૯૬.૩૩॥

૧૯૬.૩૪/૧સરીસૃપા મૃગાઃ સર્વે ત્વત્તશ્ચૈવ મહીરુહાઃ ।

૧૯૬.૩૪/૨યચ્ચ ભૂતં ભવિષ્યદ્ વા કિંચિદ્ અત્ર ચરાચરે ॥ ૧૯૬.૩૪॥

૧૯૬.૩૫/૧અમૂર્તં મૂર્તમથવા સ્થૂલં સૂક્ષ્મતરં તથા ।
૧૯૬.૩૫/૨તત્ સર્વં ત્વં જગત્કર્તર્નાસ્તિ કિંચિત્ ત્વયા વિના ॥ ૧૯૬.૩૫॥

૧૯૬.૩૬/૧મયા સંસારચક્રેઽસ્મિન્ ભ્રમતા ભગવન્ સદા ।
૧૯૬.૩૬/૨તાપત્રયાભિભૂતેન ન પ્રાપ્તા નિર્વૃતિઃ ક્વચિત્ ॥ ૧૯૬.૩૬॥

૧૯૬.૩૭/૧દુઃખાન્યેવ સુખાનીતિ મૃગતૃષ્ણાજલાશયઃ ।
૧૯૬.૩૭/૨મયા નાથ ગૃહીતાનિ તાનિ તાપાય મેઽભવન્ ॥ ૧૯૬.૩૭॥

૧૯૬.૩૮/૧રાજ્યમુર્વી બલં કોશો મિત્રપક્ષસ્તથાત્મજાઃ ।
૧૯૬.૩૮/૨ભાર્યા ભૃત્યજના યે ચ શબ્દાદ્યા વિષયાઃ પ્રભો ॥ ૧૯૬.૩૮॥

૧૯૬.૩૯/૧સુખબુદ્ધ્યા મયા સર્વં ગૃહીતમિદમવ્યય ।
૧૯૬.૩૯/૨પરિણામે ચ દેવેશ તાપાત્મકમભૂન્ મમ ॥ ૧૯૬.૩૯॥

૧૯૬.૪૦/૧દેવલોકગતિં પ્રાપ્તો નાથ દેવગણોઽપિ હિ ।
૧૯૬.૪૦/૨મત્તઃ સાહાય્યકામોઽભૂચ્છાશ્વતી કુત્ર નિર્વૃતિઃ ॥ ૧૯૬.૪૦॥

૧૯૬.૪૧/૧ત્વામનારાધ્ય જગતાં સર્વેષાં પ્રભવાસ્પદમ્ ।
૧૯૬.૪૧/૨શાશ્વતી પ્રાપ્યતે કેન પરમેશ્વર નિર્વૃતિઃ ॥ ૧૯૬.૪૧॥

૧૯૬.૪૨/૧ત્વન્માયામૂઢમનસો જન્મમૃત્યુજરાદિકાન્ ।
૧૯૬.૪૨/૨અવાપ્ય પાપાન્ પશ્યન્તિ પ્રેતરાજાનમન્તરા ॥ ૧૯૬.૪૨॥

૧૯૬.૪૩/૧તતઃ પાશશતૈર્બદ્ધા નરકેષ્વતિદારુણમ્ ।
૧૯૬.૪૩/૨પ્રાપ્નુવન્તિ મહદ્ દુઃખં વિશ્વરૂપમિદં તવ ॥ ૧૯૬.૪૩॥

૧૯૬.૪૪/૧અહમત્યન્તવિષયી મોહિતસ્તવ માયયા ।
૧૯૬.૪૪/૨મમત્વાગાધગર્તાન્તે ભ્રમામિ પરમેશ્વર ॥ ૧૯૬.૪૪॥

૧૯૬.૪૫/૧સોઽહં ત્વાં શરણમપારમીશમીડ્યમ્ ।
૧૯૬.૪૫/૨સમ્પ્રાપ્તઃ પરમપદં યતો ન કિંચિત્ ।
૧૯૬.૪૫/૩સંસારશ્રમપરિતાપતપ્તચેતા ।
૧૯૬.૪૫/૪નિર્વિણ્ણે પરિણતધામ્નિ સાભિલાષઃ ॥ ૧૯૬.૪૫॥

૧૯૭.૧/૧વ્યાસ ઉવાચ । ઇત્થં સ્તુતસ્તદા તેન મુચુકુન્દેન ધીમતા ।
૧૯૭.૧/૨પ્રાહેશઃ સર્વભૂતાનામનાદિનિધનો હરિઃ ॥ ૧૯૭.૧॥

૧૯૭.૨/૧શ્રીકૃષ્ણ ઉવાચ । યથાભિવાઞ્છિતાંલ્લોકાન્ દિવ્યાન્ ગચ્છ નરેશ્વર ।

૧૯૭.૨/૨અવ્યાહતપરૈશ્વર્યો મત્પ્રસાદોપબૃંહિતઃ ॥ ૧૯૭.૨॥

૧૯૭.૩/૧ભુક્ત્વા દિવ્યાન્ મહાભોગાન્ ભવિષ્યસિ મહાકુલે ।
૧૯૭.૩/૨જાતિસ્મરો મત્પ્રસાદાત્ તતો મોક્ષમવાપ્સ્યસિ ॥ ૧૯૭.૩॥

૧૯૭.૪/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ પ્રણિપત્યેશં જગતામચ્યુતં નૃપઃ ।
૧૯૭.૪/૨ગુહામુખાદ્ વિનિષ્ક્રાન્તો દદૃશે સોऽલ્પકાન્ નરાન્ ॥ ૧૯૭.૪॥

૧૯૭.૫/૧તતઃ કલિયુગં જ્ઞાત્વા પ્રાપ્તં તપ્તું તતો નૃપઃ ।
૧૯૭.૫/૨નરનારાયણસ્થાનં પ્રયયૌ ગન્ધમાદનમ્ ॥ ૧૯૭.૫॥

૧૯૭.૬/૧કૃષ્ણોऽપિ ઘાતયિત્વારિમુપાયેન હિ તદ્બલમ્ ।
૧૯૭.૬/૨જગ્રાહ મથુરામેત્ય હસ્ત્યશ્વસ્યન્દનોજ્જ્વલમ્ ॥ ૧૯૭.૬॥

૧૯૭.૭/૧આનીય ચોગ્રસેનાય દ્વારવત્યાં ન્યવેદયત્ ।
૧૯૭.૭/૨પરાભિભવનિઃશઙ્કં બભૂવ ચ યદોઃ કુલમ્ ॥ ૧૯૭.૭॥

૧૯૭.૮/૧બલદેવોऽપિ વિપ્રેન્દ્રાઃ પ્રશાન્તાખિલવિગ્રહઃ ।
૧૯૭.૮/૨જ્ઞાતિદર્શનસોત્કણ્ઠઃ પ્રયયૌ નન્દગોકુલમ્ ॥ ૧૯૭.૮॥

૧૯૭.૯/૧તતો ગોપાશ્ચ ગોપ્યશ્ચ યથાપૂર્વમમિત્રજિત્ ।
૧૯૭.૯/૨તથૈવાભ્યવદત્ પ્રેમ્ણા બહુમાનપુરઃસરમ્ ॥ ૧૯૭.૯॥

૧૯૭.૧૦/૧કૈશ્ચાપિ સમ્પરિષ્વક્તઃ કાંશ્ચિત્ સ પરિષસ્વજે ।
૧૯૭.૧૦/૨હાસં ચક્રે સમં કૈશ્ચિદ્ ગોપગોપીજનૈસ્તથા ॥ ૧૯૭.૧૦॥

૧૯૭.૧૧/૧પ્રિયાણ્યનેકાન્યવદન્ ગોપાસ્તત્ર હલાયુધમ્ ।
૧૯૭.૧૧/૨ગોપ્યશ્ચ પ્રેમમુદિતાઃ પ્રોચુઃ સેર્ષ્યમથાપરાઃ ॥ ૧૯૭.૧૧॥

૧૯૭.૧૨/૧ગોપ્યઃ પપ્રચ્છુરપરા નાગરીજનવલ્લભઃ ।
૧૯૭.૧૨/૨કચ્ચિદ્ આસ્તે સુખં કૃષ્ણશ્ચલત્પ્રેમરસાકુલઃ ॥ ૧૯૭.૧૨॥

૧૯૭.૧૩/૧અસ્મચ્ચેષ્ટોપહસનં ન કચ્ચિત્ પુરયોષિતામ્ ।
૧૯૭.૧૩/૨સૌભાગ્યમાનમધિકં કરોતિ ક્ષણસૌહૃદઃ ॥ ૧૯૭.૧૩॥

૧૯૭.૧૪/૧કચ્ચિત્ સ્મરતિ નઃ કૃષ્ણો ગીતાનુગમનં કૃતમ્ ।
૧૯૭.૧૪/૨અપ્યસૌ માતરં દ્રષ્ટું સકૃદ્ અપ્યાગમિષ્યતિ ॥ ૧૯૭.૧૪॥

૧૯૭.૧૫/૧અથવા કિં તદાલાપૈઃ ક્રિયન્તામપરાઃ કથાઃ ।
૧૯૭.૧૫/૨યદ્ અસ્માભિર્વિના તેન વિનાસ્માકં ભવિષ્યતિ ॥ ૧૯૭.૧૫॥

૧૯૭.૧૬/૧પિતા માતા તથા ભ્રાતા ભર્તા બન્ધુજનશ્ચ કઃ ।
૧૯૭.૧૬/૨ન ત્યક્તસ્તત્કૃતેઽસ્માભિરકૃતજ્ઞસ્તતો હિ સઃ ॥ ૧૯૭.૧૬॥

૧૯૭.૧૭/૧તથાપિ કચ્ચિદ્ આત્મીયમિહાગમનસંશ્રયમ્ ।
૧૯૭.૧૭/૨કરોતિ કૃષ્ણો વક્તવ્યં ભવતા વચનામૃતમ્ ॥ ૧૯૭.૧૭॥

૧૯૭.૧૮/૧દામોદરોઽસૌ ગોવિન્દઃ પુરસ્ત્રીસક્તમાનસઃ ।
૧૯૭.૧૮/૨અપેતપ્રીતિરસ્માસુ દુર્દર્શઃ પ્રતિભાતિ નઃ ॥ ૧૯૭.૧૮॥

૧૯૭.૧૯/૧વ્યાસ ઉવાચ । આમન્ત્રિતઃ સ કૃષ્ણેતિ પુનર્દામોદરેતિ ચ ।
૧૯૭.૧૯/૨જહસુઃ સુસ્વરં ગોપ્યો હરિણા કૃષ્ટચેતસઃ ॥ ૧૯૭.૧૯॥

૧૯૭.૨૦/૧સંદેશૈઃ સૌમ્યમધુરૈઃ પ્રેમગર્ભૈરગર્વિતૈઃ ।
૧૯૭.૨૦/૨રામેણાશ્વાસિતા ગોપ્યઃ કૃષ્ણસ્યાતિમધુસ્વરૈઃ ॥ ૧૯૭.૨૦॥

૧૯૭.૨૧/૧ગોપૈશ્ચ પૂર્વવદ્ રામઃ પરિહાસમનોહરૈઃ ।
૧૯૭.૨૧/૨કથાશ્ચકાર પ્રેમ્ણા ચ સહ તૈર્વ્રજભૂમિષુ ॥ ૧૯૭.૨૧॥

૧૯૮.૧/૧વ્યાસ ઉવાચ । વને વિહરતસ્તસ્ય સહ ગોપૈર્મહાત્મનઃ ।
૧૯૮.૧/૨માનુષચ્છદ્મરૂપસ્ય શેષસ્ય ધરણીભૃતઃ ॥ ૧૯૮.૧॥

૧૯૮.૨/૧નિષ્પાદિતોરુકાર્યસ્ય કાર્યેણૈવાવતારિણઃ ।
૧૯૮.૨/૨ઉપભોગાર્થમત્યર્થં વરુણઃ પ્રાહ વારુણીમ્ ॥ ૧૯૮.૨॥

૧૯૮.૩/૧વરુણ ઉવાચ । અભીષ્ટાં સર્વદા હ્યસ્ય મદિરે ત્વં મહૌજસઃ ।
૧૯૮.૩/૨અનન્તસ્યોપભોગાય તસ્ય ગચ્છ મુદે શુભે ॥ ૧૯૮.૩॥

૧૯૮.૪/૧વ્યાસ ઉવાચ । ઇત્યુક્તા વારુણી તેન સંનિધાનમથાકરોત્ ।
૧૯૮.૪/૨વૃન્દાવનતટોત્પન્ન+ ।કદમ્બતરુકોટરે ॥ ૧૯૮.૪॥

૧૯૮.૫/૧વિચરન્ બલદેવોઽપિ મદિરાગન્ધમુદ્ધતમ્ ।
૧૯૮.૫/૨આઘ્રાય મદિરાહર્ષમવાપાથ પુરાતનમ્ ॥ ૧૯૮.૫॥

૧૯૮.૬/૧તતઃ કદમ્બાત્ સહસા મદ્યધારાં સ લાઙ્ગલી ।
૧૯૮.૬/૨પતન્તીં વીક્ષ્ય મુનયઃ પ્રયયૌ પરમાં મુદમ્ ॥ ૧૯૮.૬॥

૧૯૮.૭/૧પપૌ ચ ગોપગોપીભિઃ સમવેતો મુદાન્વિતઃ ।
૧૯૮.૭/૨ઉપગીયમાનો લલિતં ગીતવાદ્યવિશારદૈઃ ॥ ૧૯૮.૭॥

૧૯૮.૮/૧શ્રમતોઽત્યન્તઘર્મામ્ભઃ+ ।કણિકામૌક્તિકોજ્જ્વલઃ ।
૧૯૮.૮/૨આગચ્છ યમુને સ્નાતુમિચ્છામીત્યાહ વિહ્વલઃ ॥ ૧૯૮.૮॥

૧૯૮.૯/૧તસ્ય વાચં નદી સા તુ મત્તોક્તામવમન્ય વૈ ।
૧૯૮.૯/૨નાજગામ તતઃ ક્રુદ્ધો હલં જગ્રાહ લાઙ્ગલી ॥ ૧૯૮.૯॥

૧૯૮.૧૦/૧ગૃહીત્વા તાં તટેનૈવ ચકર્ષ મદવિહ્વલઃ ।
૧૯૮.૧૦/૨પાપે નાયાસિ નાયાસિ ગમ્યતામિચ્છયાન્યતઃ ॥ ૧૯૮.૧૦॥

૧૯૮.૧૧/૧સા કૃષ્ટા તેન સહસા માર્ગં સંત્યજ્ય નિમ્નગા ।
૧૯૮.૧૧/૨યત્રાસ્તે બલદેવોऽસૌ પ્લાવયામાસ તદ્ વનમ્ ॥ ૧૯૮.૧૧॥

૧૯૮.૧૨/૧શરીરિણી તથોપેત્ય ત્રાસવિહ્વલલોચના ।
૧૯૮.૧૨/૨પ્રસીદેત્યબ્રવીદ્ રામં મુઞ્ચ માં મુશલાયુધ ॥ ૧૯૮.૧૨॥

૧૯૮.૧૩/૧સોऽબ્રવીદ્ અવજાનાસિ મમ શૌર્યબલં યદિ ।
૧૯૮.૧૩/૨સોऽહં ત્વાં હલપાતેન નયિષ્યામિ સહસ્રધા ॥ ૧૯૮.૧૩॥

૧૯૮.૧૪/૧વ્યાસ ઉવાચ । ઇત્યુક્તયાતિસંત્રસ્તસ્તયા નદ્યા પ્રસાદિતઃ ।
૧૯૮.૧૪/૨ભૂભાગે પ્લાવિતે તત્ર મુમોચ યમુનાં બલઃ ॥ ૧૯૮.૧૪॥

૧૯૮.૧૫/૧તતઃ સ્નાતસ્ય વૈ કાન્તિરાજગામ મહાવને ।
૧૯૮.૧૫/૨અવતંસોત્પલં ચારુ ગૃહીત્વૈકં ચ કુણ્ડલમ્ ॥ ૧૯૮.૧૫॥

૧૯૮.૧૬/૧વરુણપ્રહિતાં ચાસ્મૈ માલામમ્લાનપઙ્કજામ્ ।
૧૯૮.૧૬/૨સમુદ્રાર્હે તથા વસ્ત્રે નીલે લક્ષ્મીરયચ્છત ॥ ૧૯૮.૧૬॥

૧૯૮.૧૭/૧કૃતાવતંસઃ સ તદા ચારુકુણ્ડલભૂષિતઃ ।
૧૯૮.૧૭/૨નીલામ્બરધરઃ સ્રગ્વી શુશુભે કાન્તિસંયુતઃ ॥ ૧૯૮.૧૭॥

૧૯૮.૧૮/૧ઇત્થં વિભૂષિતો રેમે તત્ર રામસ્તદા વ્રજે ।
૧૯૮.૧૮/૨માસદ્વયેન યાતશ્ચ પુનઃ સ મથુરાં પુરીમ્ ॥ ૧૯૮.૧૮॥

૧૯૮.૧૯/૧રેવતીં ચૈવ તનયાં રૈવતસ્ય મહીપતેઃ ।
૧૯૮.૧૯/૨ઉપયેમે બલસ્તસ્યાં જજ્ઞાતે નિશઠોલ્મુકૌ ॥ ૧૯૮.૧૯॥

૧૯૯.૧/૧વ્યાસ ઉવાચ । ભીષ્મકઃ કુણ્ડિને રાજા વિદર્ભવિષયેऽભવત્ ।
૧૯૯.૧/૨રુક્મિણી તસ્ય દુહિતા રુક્મી ચૈવ સુતો દ્વિજાઃ ॥ ૧૯૯.૧॥

૧૯૯.૨/૧રુક્મિણીં ચકમે કૃષ્ણઃ સા ચ તં ચારુહાસિની ।
૧૯૯.૨/૨ન દદૌ યાચતે ચૈનાં રુક્મી દ્વેષેણ ચક્રિણે ॥ ૧૯૯.૨॥

૧૯૯.૩/૧દદૌ સ શિશુપાલાય જરાસંધપ્રચોદિતઃ ।

૧૯૯.૩/૨ભીષ્મકો રુક્મિણા સાર્ધં રુક્મિણીમુરુવિક્રમઃ ॥ ૧૯૯.૩॥

૧૯૯.૪/૧વિવાહાર્થં તતઃ સર્વે જરાસંધમુખા નૃપાઃ ।
૧૯૯.૪/૨ભીષ્મકસ્ય પુરં જગ્મુઃ શિશુપાલશ્ચ કુણ્ડિનમ્ ॥ ૧૯૯.૪॥

૧૯૯.૫/૧કૃષ્ણોઽપિ બલભદ્રાદ્યૈર્યદુભિઃ પરિવારિતઃ ।
૧૯૯.૫/૨પ્રયયૌ કુણ્ડિનં દ્રષ્ટું વિવાહં ચૈદ્યભૂપતેઃ ॥ ૧૯૯.૫॥

૧૯૯.૬/૧શ્વોભાવિનિ વિવાહે તુ તાં કન્યાં હૃતવાન્ હરિઃ ।
૧૯૯.૬/૨વિપક્ષભાવમાસાદ્ય રામાદ્યેષ્વેવ બન્ધુષુ ॥ ૧૯૯.૬॥

૧૯૯.૭/૧તતશ્ચ પૌણ્ડ્રકઃ શ્રીમાન્ દન્તવક્ત્રો વિદૂરથઃ ।
૧૯૯.૭/૨શિશુપાલો જરાસંધઃ શાલ્વાદ્યાશ્ચ મહીભૃતઃ ॥ ૧૯૯.૭॥

૧૯૯.૮/૧કુપિતાસ્તે હરિં હન્તું ચક્રુરુદ્યોગમુત્તમમ્ ।
૧૯૯.૮/૨નિર્જિતાશ્ચ સમાગમ્ય રામાદ્યૈર્યદુપુંગવૈઃ ॥ ૧૯૯.૮॥

૧૯૯.૯/૧કુણ્ડિનં ન પ્રવેક્ષ્યામિ અહત્વા યુધિ કેશવમ્ ।
૧૯૯.૯/૨કૃત્વા પ્રતિજ્ઞાં રુક્મી ચ હન્તું કૃષ્ણમભિદ્રુતઃ ॥ ૧૯૯.૯॥

૧૯૯.૧૦/૧હત્વા બલં સ નાગાશ્વ+ ।પત્તિસ્યન્દનસંકુલમ્ ।
૧૯૯.૧૦/૨નિર્જિતઃ પાતિતશ્ચોર્વ્યાં લીલયૈવ સ ચક્રિણા ॥ ૧૯૯.૧૦॥

૧૯૯.૧૧/૧નિર્જિત્ય રુક્મિણં સમ્યગ્ ઉપયેમે સ રુક્મિણીમ્ ।
૧૯૯.૧૧/૨રાક્ષસેન વિધાનેન સમ્પ્રાપ્તો મધુસૂદનઃ ॥ ૧૯૯.૧૧॥

૧૯૯.૧૨/૧તસ્યાં જજ્ઞે ચ પ્રદ્યુમ્નો મદનાંશઃ સ વીર્યવાન્ ।
૧૯૯.૧૨/૨જહાર શમ્બરો યં વૈ યો જઘાન ચ શમ્બરમ્ ॥ ૧૯૯.૧૨॥

૨૦૦.૧/૧મુનય ઊચુઃ । શમ્બરેણ હૃતો વીરઃ પ્રદ્યુમ્નઃ સ કથં પુનઃ ।
૨૦૦.૧/૨શમ્બરશ્ચ મહાવીર્યઃ પ્રદ્યુમ્નેન કથં હતઃ ॥ ૨૦૦.૧॥

૨૦૦.૨/૧વ્યાસ ઉવાચ । ષષ્ઠેઽહ્નિ જાતમાત્રે તુ પ્રદ્યુમ્નં સૂતિકાગૃહાત્ ।
૨૦૦.૨/૨મમૈષ હન્તેતિ દ્વિજા હૃતવાન્ કાલશમ્બરઃ ॥ ૨૦૦.૨॥

૨૦૦.૩/૧નીત્વા ચિક્ષેપ ચૈવૈનં ગ્રાહોઽગ્રે લવણાર્ણવે ।
૨૦૦.૩/૨કલ્લોલજનિતાવર્તે સુઘોરે મકરાલયે ॥ ૨૦૦.૩॥

૨૦૦.૪/૧પતિતં ચૈવ તત્રૈકો મત્સ્યો જગ્રાહ બાલકમ્ ।
૨૦૦.૪/૨ન મમાર ચ તસ્યાપિ જઠરાનલદીપિતઃ ॥ ૨૦૦.૪॥

૨૦૦.૫/૧મત્સ્યબન્ધૈશ્ચ મત્સ્યોઽસૌ મત્સ્યૈરન્યૈઃ સહ દ્વિજાઃ ।
૨૦૦.૫/૨ઘાતિતોઽસુરવર્યાય શમ્બરાય નિવેદિતઃ ॥ ૨૦૦.૫॥

૨૦૦.૬/૧તસ્ય માયાવતી નામ પત્ની સર્વગૃહેશ્વરી ।
૨૦૦.૬/૨કારયામાસ સૂદાનામાધિપત્યમનિન્દિતા ॥ ૨૦૦.૬॥

૨૦૦.૭/૧દારિતે મત્સ્યજઠરે દદૃશે સાતિશોભનમ્ ।
૨૦૦.૭/૨કુમારં મન્મથતરોર્દગ્ધસ્ય પ્રથમાઙ્કુરમ્ ॥ ૨૦૦.૭॥

૨૦૦.૮/૧કોઽયં કથમયં મત્સ્ય+ ।જઠરે સમુપાગતઃ ।
૨૦૦.૮/૨ઇત્યેવં કૌતુકાવિષ્ટાં તાં તન્વીં પ્રાહ નારદઃ ॥ ૨૦૦.૮॥

૨૦૦.૯/૧નારદ ઉવાચ । અયં સમસ્તજગતાં સૃષ્ટિસંહારકારિણા ।
૨૦૦.૯/૨શમ્બરેણ હૃતઃ કૃષ્ણ+ ।તનયઃ સૂતિકાગૃહાત્ ॥ ૨૦૦.૯॥

૨૦૦.૧૦/૧ક્ષિપ્તઃ સમુદ્રે મત્સ્યેન નિગીર્ણસ્તે વશં ગતઃ ।
૨૦૦.૧૦/૨નરરત્નમિદં સુભ્રુ વિશ્રબ્ધા પરિપાલય ॥ ૨૦૦.૧૦॥

૨૦૦.૧૧/૧વ્યાસ ઉવાચ । નારદેનૈવમુક્તા સા પાલયામાસ તં શિશુમ્ ।
૨૦૦.૧૧/૨બાલ્યાદ્ એવાતિરાગેણ રૂપાતિશયમોહિતા ॥ ૨૦૦.૧૧॥

૨૦૦.૧૨/૧સ યદા યૌવનાભોગ+ ।ભૂષિતોઽભૂદ્ દ્વિજોત્તમાઃ ।
૨૦૦.૧૨/૨સાભિલાષા તદા સા તુ બભૂવ ગજગામિની ॥ ૨૦૦.૧૨॥

૨૦૦.૧૩/૧માયાવતી દદૌ ચાસ્મૈ માયા સર્વા મહાત્મને ।
૨૦૦.૧૩/૨પ્રદ્યુમ્નાયાત્મભૂતાય તન્ન્યસ્તહૃદયેક્ષણા ।
૨૦૦.૧૩/૩પ્રસજ્જન્તીં તુ તામાહ સ કાર્ષ્ણિઃ કમલલોચનઃ ॥ ૨૦૦.૧૩॥

૨૦૦.૧૪/૧પ્રદ્યુમ્ન ઉવાચ । માતૃભાવં વિહાયૈવ કિમર્થં
વર્તસેઽન્યથા ॥ ૨૦૦.૧૪॥

૨૦૦.૧૫/૧વ્યાસ ઉવાચ । સા ચાસ્મૈ કથયામાસ ન પુત્રસ્ત્વં મમેતિ વૈ ।
૨૦૦.૧૫/૨તનયં ત્વામયં વિષ્ણોર્હૃતવાન્ કાલશમ્બરઃ ॥ ૨૦૦.૧૫॥

૨૦૦.૧૬/૧ક્ષિપ્તઃ સમુદ્રે મત્સ્યસ્ય સમ્પ્રાપ્તો જઠરાન્ મયા ।
૨૦૦.૧૬/૨સા તુ રોદિતિ તે માતા કાન્તાદ્યાપ્યતિવત્સલા ॥ ૨૦૦.૧૬॥

૨૦૦.૧૭/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ શમ્બરં યુદ્ધે પ્રદ્યુમ્નઃ સ સમાહ્વયત્ ।
૨૦૦.૧૭/૨ક્રોધાકુલીકૃતમના યુયુધે ચ મહાબલઃ ॥ ૨૦૦.૧૭॥

૨૦૦.૧૮/૧હત્વા સૈન્યમશેષં તુ તસ્ય દૈત્યસ્ય માધવિઃ ।

૨૦૦.૧૮/૨સપ્ત માયા વ્યતિક્રમ્ય માયાં સંયુયુજેऽષ્ટમીમ્ ॥ ૨૦૦.૧૮॥

૨૦૦.૧૯/૧તયા જઘાન તં દૈત્યં માયયા કાલશમ્બરમ્ ।
૨૦૦.૧૯/૨ઉત્પત્ય ચ તયા સાર્ધમાજગામ પિતુઃ પુરમ્ ॥ ૨૦૦.૧૯॥

૨૦૦.૨૦/૧અન્તઃપુરે ચ પતિતં માયાવત્યા સમન્વિતમ્ ।
૨૦૦.૨૦/૨તં દૃષ્ટ્વા હૃષ્ટસંકલ્પા બભૂવુઃ કૃષ્ણયોષિતઃ ।
૨૦૦.૨૦/૩રુક્મિણી ચાબ્રવીત્ પ્રેમ્ણા *આસક્તદૃષ્ટિરનિન્દિતા ॥ ૨૦૦.૨૦॥

૨૦૦.૨૧/૧રુક્મિણ્યુવાચ । ધન્યાયાઃ ખલ્વયં પુત્રો વર્તતે નવયૌવને ।
૨૦૦.૨૧/૨અસ્મિન્ વયસિ પુત્રો મે પ્રદ્યુમ્નો યદિ જીવતિ ॥ ૨૦૦.૨૧॥

૨૦૦.૨૨/૧સભાગ્યા જનની વત્સ ત્વયા કાપિ વિભૂષિતા ।
૨૦૦.૨૨/૨અથવા યાદૃશઃ સ્નેહો મમ યાદૃગ્ વપુશ્ચ તે ।
૨૦૦.૨૨/૩હરેરપત્યં સુવ્યક્તં ભવાન્ વત્સ ભવિષ્યતિ ॥ ૨૦૦.૨૨॥

૨૦૦.૨૩/૧વ્યાસ ઉવાચ । એતસ્મિન્ન્ અન્તરે પ્રાપ્તઃ સહ કૃષ્ણેન નારદઃ ।
૨૦૦.૨૩/૨અન્તઃપુરવરાં દેવીં રુક્મિણીં પ્રાહ હર્ષિતઃ ॥ ૨૦૦.૨૩॥

૨૦૦.૨૪/૧શ્રીકૃષ્ણ ઉવાચ । એષ તે તનયઃ સુભ્રુ હત્વા શમ્બરમાગતઃ ।
૨૦૦.૨૪/૨હૃતો યેનાભવત્ પૂર્વં પુત્રસ્તે સૂતિકાગૃહાત્ ॥ ૨૦૦.૨૪॥

૨૦૦.૨૫/૧ઇયં માયાવતી ભાર્યા તનયસ્યાસ્ય તે સતી ।
૨૦૦.૨૫/૨શમ્બરસ્ય ન ભાર્યેયં શ્રૂયતામત્ર કારણમ્ ॥ ૨૦૦.૨૫॥

૨૦૦.૨૬/૧મન્મથે તુ ગતે નાશં તદુદ્ભવપરાયણા ।
૨૦૦.૨૬/૨શમ્બરં મોહયામાસ માયારૂપેણ રુક્મિણિ ॥ ૨૦૦.૨૬॥

૨૦૦.૨૭/૧વિવાહાદ્યુપભોગેષુ રૂપં માયામયં શુભમ્ ।
૨૦૦.૨૭/૨દર્શયામાસ દૈત્યસ્ય તસ્યેયં મદિરેક્ષણા ॥ ૨૦૦.૨૭॥

૨૦૦.૨૮/૧કામોऽવતીર્ણઃ પુત્રસ્તે તસ્યેયં દયિતા રતિઃ ।
૨૦૦.૨૮/૨વિશઙ્કા નાત્ર કર્તવ્યા સ્નુષેયં તવ શોભના ॥ ૨૦૦.૨૮॥

૨૦૦.૨૯/૧વ્યાસ ઉવાચ । તતો હર્ષસમાવિષ્ટૌ રુક્મિણીકેશવૌ તદા ।
૨૦૦.૨૯/૨નગરી ચ સમસ્તા સા સાધુ સાધ્વિત્યભાષત ॥ ૨૦૦.૨૯॥

૨૦૦.૩૦/૧ચિરં નષ્ટેન પુત્રેણ સંગતાં પ્રેક્ષ્ય રુક્મિણીમ્ ।
૨૦૦.૩૦/૨અવાપ વિસ્મયં સર્વો દ્વારવત્યાં જનસ્તદા ॥ ૨૦૦.૩૦॥

૨૦૧.૧/૧વ્યાસ ઉવાચ । ચારુદેષ્ણં સુદેષ્ણં ચ ચારુદેહં ચ શોભનમ્ ।

૨૦૧.૧/૨સુષેણં ચારુગુપ્તં ચ ભદ્રચારું તથાપરમ્ ॥ ૨૦૧.૧॥

૨૦૧.૨/૧ચારુવિન્દં સુચારું ચ ચારું ચ બલિનાં વરમ્ ।

૨૦૧.૨/૨રુક્મિણ્યજનયત્ પુત્રાન્ કન્યાં ચારુમતીં તથા ॥ ૨૦૧.૨॥

૨૦૧.૩/૧અન્યાશ્ચ ભાર્યાઃ કૃષ્ણસ્ય બભૂવુઃ સપ્ત શોભનાઃ ।

૨૦૧.૩/૨કાલિન્દી મિત્રવિન્દા ચ સત્યા નાગ્નજિતી તથા ॥ ૨૦૧.૩॥

૨૦૧.૪/૧દેવી જામ્બવતી ચાપિ સદા તુષ્ટા તુ રોહિણી ।

૨૦૧.૪/૨મદ્રરાજસુતા ચાન્યા સુશીલા શીલમણ્ડલા ॥ ૨૦૧.૪॥

૨૦૧.૫/૧સાત્રાજિતી સત્યભામા લક્ષ્મણા ચારુહાસિની ।

૨૦૧.૫/૨ષોડશાત્ર સહસ્રાણિ સ્ત્રીણામન્યાનિ ચક્રિણઃ ॥ ૨૦૧.૫॥

૨૦૧.૬/૧પ્રદ્યુમ્નોઽપિ મહાવીર્યો રુક્મિણસ્તનયાં શુભામ્ ।

૨૦૧.૬/૨સ્વયંવરસ્થાં જગ્રાહ સાપિ તં તનયં હરેઃ ॥ ૨૦૧.૬॥

૨૦૧.૭/૧તસ્યામસ્યાભવત્ પુત્રો મહાબલપરાક્રમઃ ।

૨૦૧.૭/૨અનિરુદ્ધો રણે રુદ્ધો વીર્યોદધિરરિંદમઃ ॥ ૨૦૧.૭॥

૨૦૧.૮/૧તસ્યાપિ રુક્મિણઃ પૌત્રીં વરયામાસ કેશવઃ ।

૨૦૧.૮/૨દૌહિત્રાય દદૌ રુક્મી સ્પર્ધયન્ અપિ શૌરિણા ॥ ૨૦૧.૮॥

૨૦૧.૯/૧તસ્યા વિવાહે રામાદ્યા યાદવા હરિણા સહ ।

૨૦૧.૯/૨રુક્મિણો નગરં જગ્મુર્નામ્ના ભોજકટં દ્વિજાઃ ॥ ૨૦૧.૯॥

૨૦૧.૧૦/૧વિવાહે તત્ર નિર્વૃત્તે પ્રાદ્યુમ્નેઃ સુમહાત્મનઃ ।

૨૦૧.૧૦/૨કલિઙ્ગરાજપ્રમુખા રુક્મિણં વાક્યમબ્રુવન્ ॥ ૨૦૧.૧૦॥

૨૦૧.૧૧/૧કલિઙ્ગાદય ઊચુઃ । અનક્ષજ્ઞો હલી દ્યૂતે તથાસ્ય વ્યસનં મહત્ ।

૨૦૧.૧૧/૨તન્ નયામો બલં તસ્માદ્ દ્યૂતેનૈવ મહાદ્યુતે ॥ ૨૦૧.૧૧॥

૨૦૧.૧૨/૧વ્યાસ ઉવાચ । તથેતિ તાન્ આહ નૃપાન્ રુક્મી બલસમન્વિતઃ ।

૨૦૧.૧૨/૨સભાયાં સહ રામેણ ચક્રે દ્યૂતં ચ વૈ તદા ॥ ૨૦૧.૧૨॥

૨૦૧.૧૩/૧સહસ્રમેકં નિષ્કાણાં રુક્મિણા વિજિતો બલઃ ।

૨૦૧.૧૩/૨દ્વિતીયે દિવસે ચાન્યત્ સહસ્રં રુક્મિણા જિતઃ ॥ ૨૦૧.૧૩॥

૨૦૧.૧૪/૧તતો દશ સહસ્રાણિ નિષ્કાણાં પણમાદદે ।

૨૦૧.૧૪/૨બલભદ્રપ્રપન્નાનિ રુક્મી દ્યૂતવિદાં વરઃ ॥ ૨૦૧.૧૪॥

૨૦૧.૧૫/૧તતો જહાસાથ બલં કલિઙ્ગાધિપતિર્દ્વિજાઃ ।
૨૦૧.૧૫/૨દન્તાન્ વિદર્શયન્ મૂઢો રુક્મી ચાહ મદોદ્ધતઃ ॥ ૨૦૧.૧૫॥

૨૦૧.૧૬/૧રુક્મ્યુવાચ । અવિદ્યોઽયં મહાદ્યૂતે બલભદ્રઃ પરાજિતઃ ।
૨૦૧.૧૬/૨મૃષૈવાક્ષાવલેપત્વાદ્ યોઽયં મેનેઽક્ષકોવિદમ્ ॥ ૨૦૧.૧૬॥

૨૦૧.૧૭/૧દૃષ્ટ્વા કલિઙ્ગરાજં તુ પ્રકાશદશનાનનમ્ ।
૨૦૧.૧૭/૨રુક્મિણં ચાપિ દુર્વાક્યં કોપં ચક્રે હલાયુધઃ ॥ ૨૦૧.૧૭॥

૨૦૧.૧૮/૧વ્યાસ ઉવાચ । તતઃ કોપપરીતાત્મા નિષ્કકોટિં હલાયુધઃ ।
૨૦૧.૧૮/૨ગ્લહં જગ્રાહ રુક્મી ચ તતસ્ત્વક્ષાન્ અપાતયત્ ॥ ૨૦૧.૧૮॥

૨૦૧.૧૯/૧અજયદ્ બલદેવોઽથ પ્રાહોચ્ચૈસ્તં જિતં મયા ।
૨૦૧.૧૯/૨મમેતિ રુક્મી પ્રાહોચ્ચૈરલીકોક્તૈરલં બલમ્ ॥ ૨૦૧.૧૯॥

૨૦૧.૨૦/૧ત્વયોક્તોઽયં ગ્લહઃ સત્યં ન મમૈષોઽનુમોદિતઃ ।
૨૦૧.૨૦/૨એવં ત્વયા ચેદ્ વિજિતં ન મયા વિજિતં કથમ્ ॥ ૨૦૧.૨૦॥

૨૦૧.૨૧/૧તતોઽન્તરિક્ષે વાગ્ ઉચ્ચૈઃ પ્રાહ ગમ્ભીરનાદિની ।
૨૦૧.૨૧/૨બલદેવસ્ય તં કોપં વર્ધયન્તી મહાત્મનઃ ॥ ૨૦૧.૨૧॥

૨૦૧.૨૨/૧આકાશવાગ્ ઉવાચ । જિતં તુ બલદેવેન રુક્મિણા ભાષિતં મૃષા ।
૨૦૧.૨૨/૨અનુક્ત્વા વચનં કિંચિત્ કૃતં ભવતિ કર્મણા ॥ ૨૦૧.૨૨॥

૨૦૧.૨૩/૧વ્યાસ ઉવાચ । તતો બલઃ સમુત્થાય ક્રોધસંરક્તલોચનઃ ।
૨૦૧.૨૩/૨જઘાનાષ્ટાપદેનૈવ રુક્મિણં સ મહાબલઃ ॥ ૨૦૧.૨૩॥

૨૦૧.૨૪/૧કલિઙ્ગરાજં ચાદાય વિસ્ફુરન્તં બલાદ્ બલઃ ।
૨૦૧.૨૪/૨બભઞ્જ દન્તાન્ કુપિતો યૈઃ પ્રકાશં જહાસ સઃ ॥ ૨૦૧.૨૪॥

૨૦૧.૨૫/૧આકૃષ્ય ચ મહાસ્તમ્ભં જાતરૂપમયં બલઃ ।
૨૦૧.૨૫/૨જઘાન યે તત્પક્ષાસ્તાન્ ભૂભૃતઃ કુપિતો બલઃ ॥ ૨૦૧.૨૫॥

૨૦૧.૨૬/૧તતો હાહાકૃતં સર્વં પલાયનપરં દ્વિજાઃ ।
૨૦૧.૨૬/૨તદ્ રાજમણ્ડલં સર્વં બભૂવ કુપિતે બલે ॥ ૨૦૧.૨૬॥

૨૦૧.૨૭/૧બલેન નિહતં શ્રુત્વા રુક્મિણં મધુસૂદનઃ ।
૨૦૧.૨૭/૨નોવાચ વચનં કિંચિદ્ રુક્મિણીબલયોર્ભયાત્ ॥ ૨૦૧.૨૭॥

૨૦૧.૨૮/૧તતોઽનિરુદ્ધમાદાય કૃતોદ્વાહં દ્વિજોત્તમાઃ ।
૨૦૧.૨૮/૨દ્વારકામાજગામાથ યદુચક્રં સકેશવમ્ ॥ ૨૦૧.૨૮॥

૨૦૨.૧/૧વ્યાસ ઉવાચ । દ્વારવત્યાં તતઃ શૌરિં શક્રસ્ત્રિભુવનેશ્વરઃ ।

૨૦૨.૧/૨આજગામાથ મુનયો મત્તૈરાવતપૃષ્ઠગઃ ॥ ૨૦૨.૧॥

૨૦૨.૨/૧પ્રવિશ્ય દ્વારકાં સોઽથ સમીપે ચ હરેસ્તદા ।

૨૦૨.૨/૨કથયામાસ દૈત્યસ્ય નરકસ્ય વિચેષ્ટિતમ્ ॥ ૨૦૨.૨॥

૨૦૨.૩/૧ઇન્દ્ર ઉવાચ । ત્વયા નાથેન દેવાનાં મનુષ્યત્વેઽપિ તિષ્ઠતા ।

૨૦૨.૩/૨પ્રશમં સર્વદુઃખાનિ નીતાનિ મધુસૂદન ॥ ૨૦૨.૩॥

૨૦૨.૪/૧તપસ્વિજનરક્ષાયૈ સોઽરિષ્ટો ધેનુકસ્તથા ।

૨૦૨.૪/૨પ્રલમ્બાદ્યાસ્તથા કેશી તે સર્વે નિહતાસ્ત્વયા ॥ ૨૦૨.૪॥

૨૦૨.૫/૧કંસઃ કુવલયાપીડઃ પૂતના બાલઘાતિની ।

૨૦૨.૫/૨નાશં નીતાસ્ત્વયા સર્વે યેઽન્યે જગદુપદ્રવાઃ ॥ ૨૦૨.૫॥

૨૦૨.૬/૧યુષ્મદ્દોર્દણ્ડસમ્બુદ્ધિ+ ।પરિત્રાતે જગત્ત્રયે ।

૨૦૨.૬/૨યજ્ઞે યજ્ઞહવિઃ પ્રાશ્ય તૃપ્તિં યાન્તિ દિવૌકસઃ ॥ ૨૦૨.૬॥

૨૦૨.૭/૧સોઽહં સામ્પ્રતમાયાતો યન્નિમિત્તં જનાર્દન ।

૨૦૨.૭/૨તચ્છ્રુત્વા તત્પ્રતીકાર+ ।પ્રયત્નં કર્તુમર્હસિ ॥ ૨૦૨.૭॥

૨૦૨.૮/૧ભૌમોઽયં નરકો નામ પ્રાગ્જ્યોતિષપુરેશ્વરઃ ।

૨૦૨.૮/૨કરોતિ સર્વભૂતાનામપઘાતમરિંદમ ॥ ૨૦૨.૮॥

૨૦૨.૯/૧દેવસિદ્ધસુરાદીનાં નૃપાણાં ચ જનાર્દન ।

૨૦૨.૯/૨હત્વા તુ સોઽસુરઃ કન્યા રુરોધ નિજમન્દિરે ॥ ૨૦૨.૯॥

૨૦૨.૧૦/૧છત્રં યત્ સલિલસ્રાવિ તજ્જહાર પ્રચેતસઃ ।

૨૦૨.૧૦/૨મન્દરસ્ય તથા શૃઙ્ગં હૃતવાન્ મણિપર્વતમ્ ॥ ૨૦૨.૧૦॥

૨૦૨.૧૧/૧અમૃતસ્રાવિણી દિવ્યે માતુર્મેઽમૃતકુણ્ડલે ।

૨૦૨.૧૧/૨જહાર સોઽસુરોઽદિત્યા વાઞ્છત્યૈરાવતં દ્વિપમ્ ॥ ૨૦૨.૧૧॥

૨૦૨.૧૨/૧દુર્નીતમેતદ્ ગોવિન્દ મયા તસ્ય તવોદિતમ્ ।

૨૦૨.૧૨/૨યદ્ અત્ર પ્રતિકર્તવ્યં તત્ સ્વયં પરિમૃશ્યતામ્ ॥ ૨૦૨.૧૨॥

૨૦૨.૧૩/૧વ્યાસ ઉવાચ । ઇતિ શ્રુત્વા સ્મિતં કૃત્વા ભગવાન્ દેવકીસુતઃ ।

૨૦૨.૧૩/૨ગૃહીત્વા વાસવં હસ્તે સમુત્તસ્થૌ વરાસનાત્ ॥ ૨૦૨.૧૩॥

૨૦૨.૧૪/૧સંચિન્તિતમુપારુહ્ય ગરુડં ગગનેચરમ્ ।

૨૦૨.૧૪/૨સત્યભામાં સમારોપ્ય યયૌ પ્રાગ્જ્યોતિષં પુરમ્ ॥ ૨૦૨.૧૪॥

૨૦૨.૧૫/૧આરુહ્યૈરાવતં નાગં શક્રોઽપિ ત્રિદશાલયમ્ ।
૨૦૨.૧૫/૨તતો જગામ સુમનાઃ પશ્યતાં દ્વારકૌકસામ્ ॥ ૨૦૨.૧૫॥

૨૦૨.૧૬/૧પ્રાગ્જ્યોતિષપુરસ્યાસ્ય સમન્તાચ્છતયોજનમ્ ।
૨૦૨.૧૬/૨આચિતં ભૈરવૈઃ પાશૈઃ પરસૈન્યનિવારણે ॥ ૨૦૨.૧૬॥

૨૦૨.૧૭/૧તાંશ્ચિચ્છેદ હરિઃ પાશાન્ ક્ષિપ્ત્વા ચક્રં સુદર્શનમ્ ।
૨૦૨.૧૭/૨તતો મુરઃ સમુત્તસ્થૌ તં જઘાન ચ કેશવઃ ॥ ૨૦૨.૧૭॥

૨૦૨.૧૮/૧મુરોસ્તુ તનયાન્ સપ્ત સહસ્રાસ્તાંસ્તતો હરિઃ ।
૨૦૨.૧૮/૨ચક્રધારાગ્નિનિર્દગ્ધાંશ્ચકાર શલભાન્ ઇવ ॥ ૨૦૨.૧૮॥

૨૦૨.૧૯/૧હત્વા મુરં હયગ્રીવં તથા પઞ્ચજનં દ્વિજાઃ ।
૨૦૨.૧૯/૨પ્રાગ્જ્યોતિષપુરં ધીમાંસ્ત્વરાવાન્ સમુપાદ્રવત્ ॥ ૨૦૨.૧૯॥

૨૦૨.૨૦/૧નરકેનાસ્ય તત્રાભૂન્ મહાસૈન્યેન સંયુગઃ ।
૨૦૨.૨૦/૨કૃષ્ણસ્ય યત્ર ગોવિન્દો જઘ્ને દૈત્યાન્ સહસ્રશઃ ॥ ૨૦૨.૨૦॥

૨૦૨.૨૧/૧શસ્ત્રાસ્ત્રવર્ષં મુઞ્ચન્તં સ ભૌમં નરકં બલી ।
૨૦૨.૨૧/૨ક્ષિપ્ત્વા ચક્રં દ્વિધા ચક્રે ચક્રી દૈતેયચક્રહા ॥ ૨૦૨.૨૧॥

૨૦૨.૨૨/૧હતે તુ નરકે ભૂમિર્ગૃહીત્વાદિતિકુણ્ડલે ।
૨૦૨.૨૨/૨ઉપતસ્થે જગન્નાથં વાક્યં ચેદમથાબ્રવીત્ ॥ ૨૦૨.૨૨॥

૨૦૨.૨૩/૧ધરણ્યુવાચ । યદાહમુદ્ધૃતા નાથ ત્વયા શૂકરમૂર્તિના ।
૨૦૨.૨૩/૨ત્વત્સંસ્પર્શભવઃ પુત્રસ્તદાયં મય્યજાયત ॥ ૨૦૨.૨૩॥

૨૦૨.૨૪/૧સોઽયં ત્વયૈવ દત્તો મે ત્વયૈવ વિનિપાતિતઃ ।
૨૦૨.૨૪/૨ગૃહાણ કુણ્ડલે ચેમે પાલયાસ્ય ચ સંતતિમ્ ॥ ૨૦૨.૨૪॥

૨૦૨.૨૫/૧ભારાવતરણાર્થાય મમૈવ ભગવાન્ ઇમમ્ ।
૨૦૨.૨૫/૨અંશેન લોકમાયાતઃ પ્રસાદસુમુખ પ્રભો ॥ ૨૦૨.૨૫॥

૨૦૨.૨૬/૧ત્વં કર્તા ચ વિકર્તા ચ સંહર્તા પ્રભવોઽવ્યયઃ ।
૨૦૨.૨૬/૨જગત્સ્વરૂપો યશ્ચ ત્વં સ્તૂયસેઽચ્યુત કિં મયા ॥ ૨૦૨.૨૬॥

૨૦૨.૨૭/૧વ્યાપી વ્યાપ્યઃ ક્રિયા કર્તા કાર્યં ચ ભગવાન્ સદા ।
૨૦૨.૨૭/૨સર્વભૂતાત્મભૂતાત્મા સ્તૂયસેઽચ્યુત કિં મયા ॥ ૨૦૨.૨૭॥

૨૦૨.૨૮/૧પરમાત્મા ત્વમાત્મા ચ ભૂતાત્મા ચાવ્યયો ભવાન્ ।
૨૦૨.૨૮/૨યદા તદા સ્તુતિર્નાસ્તિ કિમર્થં તે પ્રવર્તતામ્ ॥ ૨૦૨.૨૮॥

૨૦૨.૨૯/૧પ્રસીદ સર્વભૂતાત્મન્ નરકેન કૃતં ચ યત્ ।
૨૦૨.૨૯/૨તત્ ક્ષમ્યતામદોષાય મત્સુતઃ સ નિપાતિતઃ ॥ ૨૦૨.૨૯॥

૨૦૨.૩૦/૧વ્યાસ ઉવાચ । તથેતિ ચોક્ત્વા ધરણીં ભગવાન્ ભૂતભાવનઃ ।
૨૦૨.૩૦/૨રત્નાનિ નરકાવાસાજ્જગ્રાહ મુનિસત્તમાઃ ॥ ૨૦૨.૩૦॥

૨૦૨.૩૧/૧કન્યાપુરે સ કન્યાનાં ષોડશાતુલવિક્રમઃ ।
૨૦૨.૩૧/૨શતાધિકાનિ દદૃશે સહસ્રાણિ દ્વિજોત્તમાઃ ॥ ૨૦૨.૩૧॥

૨૦૨.૩૨/૧ચતુર્દંષ્ટ્રાન્ ગજાંશ્ચોગ્રાન્ ષટ્ સહસ્રાણિ દૃષ્ટવાન્ ।
૨૦૨.૩૨/૨કામ્બોજાનાં તથાશ્વાનાં નિયુતાન્યેકવિંશતિમ્ ॥ ૨૦૨.૩૨॥

૨૦૨.૩૩/૧કન્યાસ્તાશ્ચ તથા નાગાંસ્તાન્ અશ્વાન્ દ્વારકાં પુરીમ્ ।
૨૦૨.૩૩/૨પ્રાપયામાસ ગોવિન્દઃ સદ્યો નરકકિંકરૈઃ ॥ ૨૦૨.૩૩॥

૨૦૨.૩૪/૧દદૃશે વારુણં છત્રં તથૈવ મણિપર્વતમ્ ।
૨૦૨.૩૪/૨આરોપયામાસ હરિર્ગરુડે પતગેશ્વરે ॥ ૨૦૨.૩૪॥

૨૦૨.૩૫/૧આરુહ્ય ચ સ્વયં કૃષ્ણઃ સત્યભામાસહાયવાન્ ।
૨૦૨.૩૫/૨અદિત્યાઃ કુણ્ડલે દાતું જગામ ત્રિદશાલયમ્ ॥ ૨૦૨.૩૫॥

૨૦૩.૧/૧વ્યાસ ઉવાચ । ગરુડો વારુણં છત્રં તથૈવ મણિપર્વતમ્ ।
૨૦૩.૧/૨સભાર્યં ચ હૃષીકેશં લીલયૈવ વહન્ યયૌ ॥ ૨૦૩.૧॥

૨૦૩.૨/૧તતઃ શઙ્ખમુપાધ્માય સ્વર્ગદ્વારં ગતો હરિઃ ।
૨૦૩.૨/૨ઉપતસ્થુસ્તતો દેવાઃ સાર્ઘપાત્રા જનાર્દનમ્ ॥ ૨૦૩.૨॥

૨૦૩.૩/૧સ દેવૈરર્ચિતઃ કૃષ્ણો દેવમાતુર્નિવેશનમ્ ।
૨૦૩.૩/૨સિતાભ્રશિખરાકારં પ્રવિશ્ય દદૃશેઽદિતિમ્ ॥ ૨૦૩.૩॥

૨૦૩.૪/૧સ તાં પ્રણમ્ય શક્રેણ સહિતઃ કુણ્ડલોત્તમે ।
૨૦૩.૪/૨દદૌ નરકનાશં ચ શશંસાસ્યૈ જનાર્દનઃ ॥ ૨૦૩.૪॥

૨૦૩.૫/૧તતઃ પ્રીતા જગન્માતા ધાતારં જગતાં હરિમ્ ।
૨૦૩.૫/૨તુષ્ટાવાદિતિરવ્યગ્રં કૃત્વા તત્પ્રવણં મનઃ ॥ ૨૦૩.૫॥

૨૦૩.૬/૧અદિતિરુવાચ । નમસ્તે પુણ્ડરીકાક્ષ ભક્તાનામભયંકર ।
૨૦૩.૬/૨સનાતનાત્મન્ ભૂતાત્મન્ સર્વાત્મન્ ભૂતભાવન ॥ ૨૦૩.૬॥

૨૦૩.૭/૧પ્રણેતર્મનસો બુદ્ધેરિન્દ્રિયાણાં ગુણાત્મક ।
૨૦૩.૭/૨સિતદીર્ઘાદિનિઃશેષ+ ।કલ્પનાપરિવર્જિત ॥ ૨૦૩.૭॥

૨૦૩.૮/૧જન્માદિભિરસંસ્પૃષ્ટ+ ।સ્વપ્નાદિવારિવર્જિતઃ ।
૨૦૩.૮/૨સંધ્યા રાત્રિરહર્ભૂમિર્ગગનં વાયુરમ્બુ ચ ॥ ૨૦૩.૮॥

૨૦૩.૯/૧હુતાશનો મનો બુદ્ધિર્ભૂતાદિસ્ત્વં તથાચ્યુત ।
૨૦૩.૯/૨સૃષ્ટિસ્થિતિવિનાશાનાં કર્તા કર્તૃપતિર્ભવાન્ ॥ ૨૦૩.૯॥

૨૦૩.૧૦/૧બ્રહ્મવિષ્ણુશિવાખ્યાભિરાત્મમૂર્તિભિરીશ્વરઃ ।
૨૦૩.૧૦/૨માયાભિરેતદ્ વ્યાપ્તં તે જગત્ સ્થાવરજઙ્ગમમ્ ॥ ૨૦૩.૧૦॥

૨૦૩.૧૧/૧અનાત્મન્યાત્મવિજ્ઞાનં સા તે માયા જનાર્દન ।
૨૦૩.૧૧/૨અહં મમેતિ ભાવોઽત્ર યયા સમુપજાયતે ॥ ૨૦૩.૧૧॥

૨૦૩.૧૨/૧સંસારમધ્યે માયાયાસ્તવૈતન્ નાથ ચેષ્ટિતમ્ ।
૨૦૩.૧૨/૨યૈઃ સ્વધર્મપરૈર્નાથ નરૈરારાધિતો ભવાન્ ॥ ૨૦૩.૧૨॥

૨૦૩.૧૩/૧તે તરન્ત્યખિલામેતાં માયામાત્મવિમુક્તયે ।
૨૦૩.૧૩/૨બ્રહ્માદ્યાઃ સકલા દેવા મનુષ્યાઃ પશવસ્તથા ॥ ૨૦૩.૧૩॥

૨૦૩.૧૪/૧વિષ્ણુમાયામહાવર્તે મોહાન્ધતમસાવૃતાઃ ।
૨૦૩.૧૪/૨આરાધ્ય ત્વામભીપ્સન્તે કામાન્ આત્મભવક્ષયે ॥ ૨૦૩.૧૪॥

૨૦૩.૧૫/૧પદે તે પુરુષા બદ્ધા માયયા ભગવંસ્તવ ।
૨૦૩.૧૫/૨મયા ત્વં પુત્રકામિન્યા વૈરિપક્ષક્ષયાય ચ ॥ ૨૦૩.૧૫॥

૨૦૩.૧૬/૧આરાધિતો ન મોક્ષાય માયાવિલસિતં હિ તત્ ।
૨૦૩.૧૬/૨કૌપીનાચ્છાદનપ્રાયા વાઞ્છા કલ્પદ્રુમાદ્ અપિ ॥ ૨૦૩.૧૬॥

૨૦૩.૧૭/૧જાયતે યદ્ અપુણ્યાનાં સોઽપરાધઃ સ્વદોષજઃ ।
૨૦૩.૧૭/૨તત્ પ્રસીદાખિલજગન્+ ંઆયામોહકરાવ્યય ॥ ૨૦૩.૧૭॥

૨૦૩.૧૮/૧અજ્ઞાનં જ્ઞાનસદ્ભાવ ભૂતભૂતેશ નાશય ।
૨૦૩.૧૮/૨નમસ્તે ચક્રહસ્તાય શાર્ઙ્ગહસ્તાય તે નમઃ ॥ ૨૦૩.૧૮॥

૨૦૩.૧૯/૧ગદાહસ્તાય તે વિષ્ણો શઙ્ખહસ્તાય તે નમઃ ।
૨૦૩.૧૯/૨એતત્ પશ્યામિ તે રૂપં સ્થૂલચિહ્નોપશોભિતમ્ ।
૨૦૩.૧૯/૩ન જાનામિ પરં યત્ તે પ્રસીદ પરમેશ્વર ॥ ૨૦૩.૧૯॥

૨૦૩.૨૦/૧વ્યાસ ઉવાચ । અદિત્યૈવં સ્તુતો વિષ્ણુઃ પ્રહસ્યાહ સુરારણિમ્ ॥ ૨૦૩.૨૦॥

૨૦૩.૨૧/૧શ્રીકૃષ્ણ ઉવાચ । માતા દેવિ ત્વમસ્માકં પ્રસીદ વરદા ભવ ॥ ૨૦૩.૨૧॥

૨૦૩.૨૨/૧અદિતિરુવાચ । એવમસ્તુ યથેચ્છા તે ત્વમશેષસુરાસુરૈઃ ।
૨૦૩.૨૨/૨અજેયઃ પુરુષવ્યાઘ્ર મર્ત્યલોકે ભવિષ્યસિ ॥ ૨૦૩.૨૨॥

૨૦૩.૨૩/૧વ્યાસ ઉવાચ । તતોઽનન્તરમેવાસ્ય શક્રાણીસહિતાં દિતિમ્ ।
૨૦૩.૨૩/૨સત્યભામા પ્રણમ્યાહ પ્રસીદેતિ પુનઃ પુનઃ ॥ ૨૦૩.૨૩॥

૨૦૩.૨૪/૧અદિતિરુવાચ । મત્પ્રસાદાન્ ન તે સુભ્રુ જરા વૈરૂપ્યમેવ ચ ।
૨૦૩.૨૪/૨ભવિષ્યત્યનવદ્યાઙ્ગિ સર્વકામા ભવિષ્યસિ ॥ ૨૦૩.૨૪॥

૨૦૩.૨૫/૧વ્યાસ ઉવાચ । અદિત્યા તુ કૃતાનુજ્ઞો દેવરાજો જનાર્દનમ્ ।
૨૦૩.૨૫/૨યથાવત્ પૂજયામાસ બહુમાનપુરઃસરમ્ ॥ ૨૦૩.૨૫॥

૨૦૩.૨૬/૧તતો દદર્શ કૃષ્ણોઽપિ સત્યભામાસહાયવાન્ ।
૨૦૩.૨૬/૨દેવોદ્યાનાનિ સર્વાણિ નન્દનાદીનિ સત્તમાઃ ॥ ૨૦૩.૨૬॥

૨૦૩.૨૭/૧દદર્શ ચ સુગન્ધાઢ્યં મઞ્જરીપુઞ્જધારિણમ્ ।
૨૦૩.૨૭/૨શૈત્યાહ્લાદકરં દિવ્યં તામ્રપલ્લવશોભિતમ્ ॥ ૨૦૩.૨૭॥

૨૦૩.૨૮/૧મથ્યમાનેઽમૃતે જાતં જાતરૂપસમપ્રભમ્ ।
૨૦૩.૨૮/૨પારિજાતં જગન્નાથઃ કેશવઃ કેશિસૂદનઃ ।
૨૦૩.૨૮/૩તં દૃષ્ટ્વા પ્રાહ ગોવિન્દં સત્યભામા દ્વિજોત્તમાઃ ॥ ૨૦૩.૨૮॥

૨૦૩.૨૯/૧સત્યભામોવાચ । કસ્માન્ ન દ્વારકામેષ નીયતે કૃષ્ણ પાદપઃ ।
૨૦૩.૨૯/૨યદિ તે તદ્ વચઃ સત્યં સત્યાત્યર્થં પ્રિયેતિ મે ॥ ૨૦૩.૨૯॥

૨૦૩.૩૦/૧મદ્ગૃહે નિષ્કુટાર્થાય તદ્ અયં નીયતાં તરુઃ ।
૨૦૩.૩૦/૨ન મે જામ્બવતી તાદૃગ્ અભીષ્ટા ન ચ રુક્મિણી ॥ ૨૦૩.૩૦॥

૨૦૩.૩૧/૧સત્યે યથા ત્વમિત્યુક્તં ત્વયા કૃષ્ણાસકૃત્ પ્રિયમ્ ।
૨૦૩.૩૧/૨સત્યં તદ્ યદિ ગોવિન્દ નોપચારકૃતં વચઃ ॥ ૨૦૩.૩૧॥

૨૦૩.૩૨/૧તદ્ અસ્તુ પારિજાતોઽયં મમ ગેહવિભૂષણમ્ ।
૨૦૩.૩૨/૨બિભ્રતી પારિજાતસ્ય કેશપાશેન મઞ્જરીમ્ ।
૨૦૩.૩૨/૩સપત્નીનામહં મધ્યે શોભેયમિતિ કામયે ॥ ૨૦૩.૩૨॥

૨૦૩.૩૩/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ સ પ્રહસ્યૈનં પારિજાતં ગરુત્મતિ ।
૨૦૩.૩૩/૨આરોપયામાસ હરિસ્તમૂચુર્વનરક્ષિણઃ ॥ ૨૦૩.૩૩॥

૨૦૩.૩૪/૧વનપાલા ઊચુઃ । ભોઃ શચી દેવરાજસ્ય મહિષી તત્પરિગ્રહમ્ ।
૨૦૩.૩૪/૨પારિજાતં ન ગોવિન્દ હર્તુમર્હસિ પાદપમ્ ॥ ૨૦૩.૩૪॥

૨૦૩.૩૫/૧શચીવિભૂષણાર્થાય દેવૈરમૃતમન્થને ।
૨૦૩.૩૫/૨ઉત્પાદિતોઽયં ન ક્ષેમી ગૃહીત્વૈનં ગમિષ્યસિ ॥ ૨૦૩.૩૫॥

૨૦૩.૩૬/૧મૌઢ્યાત્ પ્રાર્થયસે ક્ષેમી ગૃહીત્વૈનં ચ કો વ્રજેત્ ।
૨૦૩.૩૬/૨અવશ્યમસ્ય દેવેન્દ્રો વિકૃતિં કૃષ્ણ યાસ્યતિ ॥ ૨૦૩.૩૬॥

૨૦૩.૩૭/૧વજ્રોદ્યતકરં શક્રમનુયાસ્યન્તિ ચામરાઃ ।
૨૦૩.૩૭/૨તદ્ અલં સકલૈર્દેવૈર્વિગ્રહેણ તવાચ્યુત ।
૨૦૩.૩૭/૩વિપાકકટુ યત્ કર્મ ન તચ્છંસન્તિ પણ્ડિતાઃ ॥ ૨૦૩.૩૭॥

૨૦૩.૩૮/૧વ્યાસ ઉવાચ । ઇત્યુક્તે તૈરુવાચૈતાન્ સત્યભામાતિકોપિની ॥ ૨૦૩.૩૮॥

૨૦૩.૩૯/૧સત્યભામોવાચ । કા શચી પારિજાતસ્ય કો વા શક્રઃ સુરાધિપઃ ।
૨૦૩.૩૯/૨સામાન્યઃ સર્વલોકાનાં યદ્યેષોઽમૃતમન્થને ॥ ૨૦૩.૩૯॥

૨૦૩.૪૦/૧સમુત્પન્નઃ પુરા કસ્માદ્ એકો ગૃહ્ણાતિ વાસવઃ ।
૨૦૩.૪૦/૨યથા સુરા યથા ચેન્દુર્યથા શ્રીર્વનરક્ષિણઃ ॥ ૨૦૩.૪૦॥

૨૦૩.૪૧/૧સામાન્યઃ સર્વલોકસ્ય પારિજાતસ્તથા દ્રુમઃ ।
૨૦૩.૪૧/૨ભર્તૃબાહુમહાગર્વાદ્ રુણદ્ધ્યેનમથો શચી ॥ ૨૦૩.૪૧॥

૨૦૩.૪૨/૧તત્ કથ્યતાં દ્રુતં ગત્વા પૌલોમ્યા વચનં મમ ।
૨૦૩.૪૨/૨સત્યભામા વદત્યેવં ભર્તૃગર્વોદ્ધતાક્ષરમ્ ॥ ૨૦૩.૪૨॥

૨૦૩.૪૩/૧યદિ ત્વં દયિતા ભર્તુર્યદિ તસ્ય પ્રિયા હ્યસિ ।
૨૦૩.૪૩/૨મદ્ભર્તુર્હરતો વૃક્ષં તત્ કારય નિવારણમ્ ॥ ૨૦૩.૪૩॥

૨૦૩.૪૪/૧જાનામિ તે પતિં શક્રં જાનામિ ત્રિદશેશ્વરમ્ ।
૨૦૩.૪૪/૨પારિજાતં તથાપ્યેનં માનુષી હારયામિ તે ॥ ૨૦૩.૪૪॥

૨૦૩.૪૫/૧વ્યાસ ઉવાચ । ઇત્યુક્તા રક્ષિણો ગત્વા પ્રોચ્ચૈઃ પ્રોચુર્યથોદિતમ્ ।
૨૦૩.૪૫/૨શચી ચોત્સાહયામાસ ત્રિદશાધિપતિં પતિમ્ ॥ ૨૦૩.૪૫॥

૨૦૩.૪૬/૧તતઃ સમસ્તદેવાનાં સૈન્યૈઃ પરિવૃતો હરિમ્ ।
૨૦૩.૪૬/૨પ્રવૃત્તઃ પારિજાતાર્થમિન્દ્રો યોધયિતું દ્વિજાઃ ॥ ૨૦૩.૪૬॥

૨૦૩.૪૭/૧તતઃ પરિઘનિસ્ત્રિંશ+ ।ગદાશૂલધરાયુધાઃ ।

૨૦૩.૪૭/૨બભૂવુસ્ત્રિદશાઃ સજ્જાઃ શક્રે વજ્રકરે સ્થિતે ॥ ૨૦૩.૪૭॥

૨૦૩.૪૮/૧તતો નિરીક્ષ્ય ગોવિન્દો નાગરાજોપરિ સ્થિતમ્ ।

૨૦૩.૪૮/૨શક્રં દેવપરીવારં યુદ્ધાય સમુપસ્થિતમ્ ॥ ૨૦૩.૪૮॥

૨૦૩.૪૯/૧ચકાર શઙ્ખનિર્ઘોષં દિશઃ શબ્દેન પૂરયન્ ।

૨૦૩.૪૯/૨મુમોચ ચ શરવ્રાતં સહસ્રાયુતસમ્મિતમ્ ॥ ૨૦૩.૪૯॥

૨૦૩.૫૦/૧તતો દિશો નભશ્ચૈવ દૃષ્ટ્વા શરશતાચિતમ્ ।

૨૦૩.૫૦/૨મુમુચુસ્ત્રિદશાઃ સર્વે શસ્ત્રાણ્યસ્ત્રાણ્યનેકશઃ ॥ ૨૦૩.૫૦॥

૨૦૩.૫૧/૧એકૈકમસ્ત્રં શસ્ત્રં ચ દેવૈર્મુક્તં સહસ્રધા ।

૨૦૩.૫૧/૨ચિચ્છેદ લીલયૈવેશો જગતાં મધુસૂદનઃ ॥ ૨૦૩.૫૧॥

૨૦૩.૫૨/૧પાશં સલિલરાજસ્ય સમાકૃષ્યોરગાશનઃ ।

૨૦૩.૫૨/૨ચચાલ ખણ્ડશઃ કૃત્વા બાલપન્નગદેહવત્ ॥ ૨૦૩.૫૨॥

૨૦૩.૫૩/૧યમેન પ્રહિતં દણ્ડં ગદાપ્રક્ષેપખણ્ડિતમ્ ।

૨૦૩.૫૩/૨પૃથિવ્યાં પાતયામાસ ભગવાન્ દેવકીસુતઃ ॥ ૨૦૩.૫૩॥

૨૦૩.૫૪/૧શિબિકાં ચ ધનેશસ્ય ચક્રેણ તિલશો વિભુઃ ।

૨૦૩.૫૪/૨ચકાર શૌરિરર્કેન્દૂ દૃષ્ટિપાતહતૌજસૌ ॥ ૨૦૩.૫૪॥

૨૦૩.૫૫/૧નીતોઽગ્નિઃ શતશો બાણૈર્દ્રાવિતા વસવો દિશઃ ।

૨૦૩.૫૫/૨ચક્રવિચ્છિન્નશૂલાગ્રા રુદ્રા ભુવિ નિપાતિતાઃ ॥ ૨૦૩.૫૫॥

૨૦૩.૫૬/૧સાધ્યા વિશ્વે ચ મરુતો ગન્ધર્વાશ્ચૈવ સાયકૈઃ ।

૨૦૩.૫૬/૨શાર્ઙ્ગિણા પ્રેરિતાઃ સર્વે વ્યોમ્નિ શાલ્મલિતૂલવત્ ॥ ૨૦૩.૫૬॥

૨૦૩.૫૭/૧ગરુડશ્ચાપિ વક્ત્રેણ પક્ષાભ્યાં ચ નખાઙ્કુરૈઃ ।

૨૦૩.૫૭/૨ભક્ષયન્ અહનદ્ દેવાન્ દાનવાંશ્ચ સદા ખગઃ ॥ ૨૦૩.૫૭॥

૨૦૩.૫૮/૧તતઃ શરસહસ્રેણ દેવેન્દ્રમધુસૂદનૌ ।

૨૦૩.૫૮/૨પરસ્પરં વવર્ષાતે ધારાભિરિવ તોયદૌ ॥ ૨૦૩.૫૮॥

૨૦૩.૫૯/૧ઐરાવતેન ગરુડો યુયુધે તત્ર સંકુલે ।

૨૦૩.૫૯/૨દેવૈઃ સમેતૈર્યુયુધે શક્રેણ ચ જનાર્દનઃ ॥ ૨૦૩.૫૯॥

૨૦૩.૬૦/૧છિન્નેષુ શીર્યમાણેષુ શસ્ત્રેષ્વસ્ત્રેષુ સત્વરમ્ ।

૨૦૩.૬૦/૨જગ્રાહ વાસવો વજ્રં કૃષ્ણશ્ચક્રં સુદર્શનમ્ ॥ ૨૦૩.૬૦॥

૨૦૩.૬૧/૧તતો હાહાકૃતં સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
૨૦૩.૬૧/૨વજ્રચક્રધરૌ દૃષ્ટ્વા દેવરાજજનાર્દનૌ ॥ ૨૦૩.૬૧ ॥

૨૦૩.૬૨/૧ક્ષિપ્તં વજ્રમથેન્દ્રેણ જગ્રાહ ભગવાન્ હરિઃ ।
૨૦૩.૬૨/૨ન મુમોચ તદા ચક્રં તિષ્ઠ તિષ્ઠેતિ ચાબ્રવીત્ ॥ ૨૦૩.૬૨ ॥

૨૦૩.૬૩/૧પ્રનષ્ટવજ્રં દેવેન્દ્રં ગરુડક્ષતવાહનમ્ ।
૨૦૩.૬૩/૨સત્યભામાબ્રવીદ્ વાક્યં પલાયનપરાયણમ્ ॥ ૨૦૩.૬૩ ॥

૨૦૩.૬૪/૧સત્યભામોવાચ । ત્રૈલોક્યેશ્વર નો યુક્તં શચીભર્તુઃ પલાયનમ્ ।
૨૦૩.૬૪/૨પારિજાતસ્રગાભોગાત્ ત્વામુપસ્થાસ્યતે શચી ॥ ૨૦૩.૬૪ ॥

૨૦૩.૬૫/૧કીદૃશં દેવ રાજ્યં તે પારિજાતસ્રગુજ્જ્વલામ્ ।
૨૦૩.૬૫/૨અપશ્યતો યથાપૂર્વં પ્રણયાભ્યાગતાં શચીમ્ ॥ ૨૦૩.૬૫ ॥

૨૦૩.૬૬/૧અલં શક્ર પ્રયાસેન ન વ્રીડાં યાતુમર્હસિ ।
૨૦૩.૬૬/૨નીયતાં પારિજાતોઽયં દેવાઃ સન્તુ ગતવ્યથાઃ ॥ ૨૦૩.૬૬ ॥

૨૦૩.૬૭/૧પતિગર્વાવલેપેન બહુમાનપુરઃસરમ્ ।
૨૦૩.૬૭/૨ન દદર્શ ગૃહાયાતામુપચારેણ માં શચી ॥ ૨૦૩.૬૭ ॥

૨૦૩.૬૮/૧સ્ત્રીત્વાદ્ અગુરુચિત્તાહં સ્વભર્તુઃ શ્લાઘનાપરા ।
૨૦૩.૬૮/૨તતઃ કૃતવતી શક્ર ભવતા સહ વિગ્રહમ્ ॥ ૨૦૩.૬૮ ॥

૨૦૩.૬૯/૧તદ્ અલં પારિજાતેન પરસ્વેન હૃતેન વા ।
૨૦૩.૬૯/૨રૂપેણ યશસા ચૈવ ભવેત્ સ્ત્રી કા ન ગર્વિતા ॥ ૨૦૩.૬૯ ॥

૨૦૩.૭૦/૧વ્યાસ ઉવાચ । ઇત્યુક્તે વૈ નિવવૃતે દેવરાજસ્તયા દ્વિજાઃ ।
૨૦૩.૭૦/૨પ્રાહ ચૈનામલં ચણ્ડિ સખિ ખેદાતિવિસ્તરૈઃ ॥ ૨૦૩.૭૦ ॥

૨૦૩.૭૧/૧ન ચાપિ સર્ગસંહાર+ ।સ્થિતિકર્તાખિલસ્ય યઃ ।
૨૦૩.૭૧/૨જિતસ્ય તેન મે વ્રીડા જાયતે વિશ્વરૂપિણા ॥ ૨૦૩.૭૧ ॥

૨૦૩.૭૨/૧યસ્મિઞ્ જગત્ સકલમેતદ્ અનાદિમધ્યે ।
૨૦૩.૭૨/૨યસ્માદ્ યતશ્ચ ન ભવિષ્યતિ સર્વભૂતાત્ ।
૨૦૩.૭૨/૩તેનોદ્ભવપ્રલયપાલનકારણેન ।
૨૦૩.૭૨/૪વ્રીડા કથં ભવતિ દેવિ નિરાકૃતસ્ય ॥ ૨૦૩.૭૨ ॥

૨૦૩.૭૩/૧સકલભુવનમૂર્તિરલ્પા સુસૂક્ષ્મા ।
૨૦૩.૭૩/૨વિદિતસકલવેદૈર્જ્ઞાયતે યસ્ય નાન્યૈઃ ।

૨૦૩.૭૩/૩તમજમકૃતમીશં શાશ્વતં સ્વેચ્છયૈનમ્ ।
૨૦૩.૭૩/૪જગદુપકૃતિમાદ્યં કો વિજેતું સમર્થઃ ॥ ૨૦૩.૭૩ ॥

૨૦૪.૧/૧વ્યાસ ઉવાચ । સંસ્તુતો ભગવાન્ ઇત્થં દેવરાજેન કેશવઃ ।
૨૦૪.૧/૨પ્રહસ્ય ભાવગમ્ભીરમુવાચેદં દ્વિજોત્તમાઃ ॥ ૨૦૪.૧ ॥

૨૦૪.૨/૧શ્રીભગવાન્ ઉવાચ । દેવરાજો ભવાન્ ઇન્દ્રો વયં મર્ત્યા જગત્પતે ।
૨૦૪.૨/૨ક્ષન્તવ્યં ભવતૈવૈતદ્ અપરાધકૃતં મમ ॥ ૨૦૪.૨ ॥

૨૦૪.૩/૧પારિજાતતરુશ્ચાયં નીયતામુચિતાસ્પદમ્ ।
૨૦૪.૩/૨ગૃહીતોઽયં મયા શક્ર સત્યાવચનકારણાત્ ॥ ૨૦૪.૩ ॥

૨૦૪.૪/૧વજ્રં ચેદં ગૃહાણ ત્વં યષ્ટવ્યં પ્રહિતં ત્વયા ।
૨૦૪.૪/૨તવૈવૈતત્ પ્રહરણં શક્ર વૈરિવિદારણમ્ ॥ ૨૦૪.૪ ॥

૨૦૪.૫/૧શક્ર ઉવાચ । વિમોહયસિ મામીશ મર્ત્યોઽહમિતિ કિં વદન્ ।
૨૦૪.૫/૨જાનીમસ્ત્વાં ભગવતોઽનન્તસૌખ્યવિદો વયમ્ ॥ ૨૦૪.૫ ॥

૨૦૪.૬/૧યોઽસિ સોઽસિ જગન્નાથ પ્રવૃત્તૌ નાથ સંસ્થિતઃ ।
૨૦૪.૬/૨જગતઃ શલ્યનિષ્કર્ષં કરોષ્યસુરસૂદન ॥ ૨૦૪.૬ ॥

૨૦૪.૭/૧નીયતાં પારિજાતોઽયં કૃષ્ણ દ્વારવતીં પુરીમ્ ।
૨૦૪.૭/૨મર્ત્યલોકે ત્વયા મુક્તે નાયં સંસ્થાસ્યતે ભુવિ ॥ ૨૦૪.૭ ॥

૨૦૪.૮/૧વ્યાસ ઉવાચ । તથેત્યુક્ત્વા તુ દેવેન્દ્રમાજગામ ભુવં હરિઃ ।
૨૦૪.૮/૨પ્રયુક્તૈઃ સિદ્ધગન્ધર્વૈઃ સ્તૂયમાનસ્ત્વથર્ષિભિઃ ॥ ૨૦૪.૮ ॥

૨૦૪.૯/૧જગામ કૃષ્ણઃ સહસા ગૃહીત્વા પાદપોત્તમમ્ ।
૨૦૪.૯/૨તતઃ શઙ્ખમુપાધ્માય દ્વારકોપરિ સંસ્થિતઃ ॥ ૨૦૪.૯ ॥

૨૦૪.૧૦/૧હર્ષમુત્પાદયામાસ દ્વારકાવાસિનાં દ્વિજાઃ ।
૨૦૪.૧૦/૨અવતીર્યાથ ગરુડાત્ સત્યભામાસહાયવાન્ ॥ ૨૦૪.૧૦ ॥

૨૦૪.૧૧/૧નિષ્કુટે સ્થાપયામાસ પારિજાતં મહાતરુમ્ ।
૨૦૪.૧૧/૨યમભ્યેત્ય જનઃ સર્વો જાતિં સ્મરતિ પૌર્વિકીમ્ ॥ ૨૦૪.૧૧ ॥

૨૦૪.૧૨/૧વાસ્યતે યસ્ય પુષ્પાણાં ગન્ધેનોર્વી ત્રિયોજનમ્ ।
૨૦૪.૧૨/૨તતસ્તે યાદવાઃ સર્વે દેવગન્ધાન્ અમાનુષાન્ ॥ ૨૦૪.૧૨ ॥

૨૦૪.૧૩/૧દદૃશુઃ પાદપે તસ્મિન્ કુર્વતો મુખદર્શનમ્ ।
૨૦૪.૧૩/૨કિંકરૈઃ સમુપાનીતં હસ્ત્યશ્વાદિ તતો ધનમ્ ॥ ૨૦૪.૧૩ ॥

૨૦૪.૧૪/૧સ્ત્રિયશ્ચ કૃષ્ણો જગ્રાહ નરકસ્ય પરિગ્રહાત્ ।
૨૦૪.૧૪/૨તતઃ કાલે શુભે પ્રાપ્ત ઉપયેમે જનાર્દનઃ ॥ ૨૦૪.૧૪॥

૨૦૪.૧૫/૧તાઃ કન્યા નરકાવાસાત્ સર્વતો યાઃ સમાહૃતાઃ ।
૨૦૪.૧૫/૨એકસ્મિન્ન્ એવ ગોવિન્દઃ કાલેનાસાં દ્વિજોત્તમાઃ ॥ ૨૦૪.૧૫॥

૨૦૪.૧૬/૧જગ્રાહ વિધિવત્ પાણીન્ પૃથગ્દેહે સ્વધર્મતઃ ।
૨૦૪.૧૬/૨ષોડશ સ્ત્રીસહસ્રાણિ શતમેકં તથાધિકમ્ ॥ ૨૦૪.૧૬॥

૨૦૪.૧૭/૧તાવન્તિ ચક્રે રૂપાણિ ભગવાન્ મધુસૂદનઃ ।
૨૦૪.૧૭/૨એકૈકશશ્ચ તાઃ કન્યા મેનિરે મધુસૂદનમ્ ॥ ૨૦૪.૧૭॥

૨૦૪.૧૮/૧મમૈવ પાણિગ્રહણં ગોવિન્દઃ કૃતવાન્ ઇતિ ।
૨૦૪.૧૮/૨નિશાસુ જગતઃ સ્રષ્ટા તાસાં ગેહેષુ કેશવઃ ।
૨૦૪.૧૮/૩ઉવાસ વિપ્રાઃ સર્વાસાં વિશ્વરૂપધરો હરિઃ ॥ ૨૦૪.૧૮॥

૨૦૫.૧/૧વ્યાસ ઉવાચ । પ્રદ્યુમ્નાદ્યા હરેઃ પુત્રા રુક્મિણ્યાં કથિતા દ્વિજાઃ ।
૨૦૫.૧/૨ભાન્વાદિકાંશ્ચ વૈ પુત્રાન્ સત્યભામા વ્યજાયત ॥ ૨૦૫.૧॥

૨૦૫.૨/૧દીપ્તિમન્તઃ પ્રપક્ષાદ્યા રોહિણ્યાસ્તનયા હરેઃ ।
૨૦૫.૨/૨બભૂવુર્જામ્બવત્યાશ્ચ સામ્બાદ્યા બાહુશાલિનઃ ॥ ૨૦૫.૨॥

૨૦૫.૩/૧તનયા ભદ્રવિન્દાદ્યા નાગ્નજિત્યાં મહાબલાઃ ।
૨૦૫.૩/૨સંગ્રામજિત્પ્રધાનાસ્તુ શૈબ્યાયાં ચાભવન્ સુતાઃ ॥ ૨૦૫.૩॥

૨૦૫.૪/૧વૃકાદ્યાસ્તુ સુતા માદ્રી ગાત્રવત્પ્રમુખાન્ સુતાન્ ।
૨૦૫.૪/૨અવાપ લક્ષ્મણા પુત્રાન્ કાલિન્દ્યાશ્ચ શ્રુતાદયઃ ॥ ૨૦૫.૪॥

૨૦૫.૫/૧અન્યાસાં ચૈવ ભાર્યાણાં સમુત્પન્નાનિ ચક્રિણઃ ।
૨૦૫.૫/૨અષ્ટાયુતાનિ પુત્રાણાં સહસ્રાણિ શતં તથા ॥ ૨૦૫.૫॥

૨૦૫.૬/૧પ્રદ્યુમ્નઃ પ્રમુખસ્તેષાં રુક્મિણ્યાસ્તુ સુતસ્તતઃ ।
૨૦૫.૬/૨પ્રદ્યુમ્નાદ્ અનિરુદ્ધોઽભૂદ્ વજ્રસ્તસ્માદ્ અજાયત ॥ ૨૦૫.૬॥

૨૦૫.૭/૧અનિરુદ્ધો રણે રુદ્ધો બલેઃ પૌત્રીં મહાબલઃ ।
૨૦૫.૭/૨બાણસ્ય તનયામૂષામુપયેમે દ્વિજોત્તમાઃ ॥ ૨૦૫.૭॥

૨૦૫.૮/૧યત્ર યુદ્ધમભૂદ્ ઘોરં હરિશંકરયોર્મહત્ ।
૨૦૫.૮/૨છિન્નં સહસ્રં બાહૂનાં યત્ર બાણસ્ય ચક્રિણા ॥ ૨૦૫.૮॥

૨૦૫.૯/૧મુનય ઊચુઃ । કથં યુદ્ધમભૂદ્ બ્રહ્મન્ ઉષાર્થે હરકૃષ્ણયોઃ ।
૨૦૫.૯/૨કથં ક્ષયં ચ બાણસ્ય બાહૂનાં કૃતવાન્ હરિઃ ॥ ૨૦૫.૯॥

૨૦૫.૧૦/૧એતત્ સર્વં મહાભાગ વક્તુમર્હસિ નોઽખિલમ્ ।
૨૦૫.૧૦/૨મહત્ કૌતૂહલં જાતં શ્રોતુમેતાં કથાં શુભામ્ ॥ ૨૦૫.૧૦॥

૨૦૫.૧૧/૧વ્યાસ ઉવાચ । ઉષા બાણસુતા વિપ્રાઃ પાર્વતીં શમ્ભુના સહ ।
૨૦૫.૧૧/૨ક્રીડન્તીમુપલક્ષ્યોચ્ચૈઃ સ્પૃહાં ચક્રે તદા સ્વયમ્ ।
૨૦૫.૧૧/૩તતઃ સકલચિત્તજ્ઞા ગૌરી તામાહ ભામિનીમ્ ॥ ૨૦૫.૧૧॥

૨૦૫.૧૨/૧ગૌર્યુવાચ । અલમિત્યનુતાપેન ભર્ત્રા ત્વમપિ રંસ્યસે ॥ ૨૦૫.૧૨॥

૨૦૫.૧૩/૧વ્યાસ ઉવાચ । ઇત્યુક્તા સા તદા ચક્રે કદેતિ મતિમાત્મનઃ ।
૨૦૫.૧૩/૨કો વા ભર્તા મમેત્યેનાં પુનરપ્યાહ પાર્વતી ॥ ૨૦૫.૧૩॥

૨૦૫.૧૪/૧પાર્વત્યુવાચ । વૈશાખે શુક્લદ્વાદશ્યાં સ્વપ્ને યોઽભિભવં તવ ।
૨૦૫.૧૪/૨કરિષ્યતિ સ તે ભર્તા રાજપુત્રિ ભવિષ્યતિ ॥ ૨૦૫.૧૪॥

૨૦૫.૧૫/૧વ્યાસ ઉવાચ । તસ્યાં તિથૌ પુમાન્ સ્વપ્ને યથા દેવ્યા ઉદીરિતઃ ।
૨૦૫.૧૫/૨તથૈવાભિભવં ચક્રે રાગં ચક્રે ચ તત્ર સા ।
૨૦૫.૧૫/૩તતઃ પ્રબુદ્ધા પુરુષમપશ્યન્તી તમુત્સુકા ॥ ૨૦૫.૧૫॥

૨૦૫.૧૬/૧ઉષોવાચ । ક્વ ગતોઽસીતિ નિર્લજ્જા દ્વિજાશ્ચોક્તવતી સખીમ્ ।
૨૦૫.૧૬/૨બાણસ્ય મન્ત્રી કુમ્ભાણ્ડશ્ચિત્રલેખા તુ તત્સુતા ॥ ૨૦૫.૧૬॥

૨૦૫.૧૭/૧તસ્યાઃ સખ્યભવત્ સા ચ પ્રાહ કોઽયં ત્વયોચ્યતે ।
૨૦૫.૧૭/૨યદા લજ્જાકુલા નાસ્ય કથયામાસ સા સખી ॥ ૨૦૫.૧૭॥

૨૦૫.૧૮/૧તદા વિશ્વાસમાનીય સર્વમેવાન્વવેદયત્ ।
૨૦૫.૧૮/૨વિદિતાયાં તુ તામાહ પુનરૂષા યથોદિતમ્ ।
૨૦૫.૧૮/૩દેવ્યા તથૈવ તત્પ્રાપ્તૌ યોઽભ્યુપાયઃ કુરુષ્વ તમ્ ॥ ૨૦૫.૧૮॥

૨૦૫.૧૯/૧વ્યાસ ઉવાચ । તતઃ પટે સુરાન્ દૈત્યાન્ ગન્ધર્વાંશ્ચ પ્રધાનતઃ ।
૨૦૫.૧૯/૨મનુષ્યાંશ્ચાભિલિખ્યાસૌ ચિત્રલેખાપ્યદર્શયત્ ॥ ૨૦૫.૧૯॥

૨૦૫.૨૦/૧અપાસ્ય સા તુ ગન્ધર્વાંસ્તથોરગસુરાસુરાન્ ।
૨૦૫.૨૦/૨મનુષ્યેષુ દદૌ દૃષ્ટિં તેષ્વપ્યન્ધકવૃષ્ણિષુ ॥ ૨૦૫.૨૦॥

૨૦૫.૨૧/૧કૃષ્ણરામૌ વિલોક્યાસીત્ સુભ્રૂર્લજ્જાજાયતેક્ષણા ।
૨૦૫.૨૧/૨પ્રદ્યુમ્નદર્શને વ્રીડા+ ।દૃષ્ટિં નિન્યે તતો દ્વિજાઃ ॥ ૨૦૫.૨૧॥

૨૦૫.૨૨/૧દૃષ્ટ્વાનિરુદ્ધં ચ તતો લજ્જા ક્વાપિ નિરાકૃતા ।
૨૦૫.૨૨/૨સોઽયં સોઽયં મમેત્યુક્તે તયા સા યોગગામિની ।
૨૦૫.૨૨/૩યયૌ દ્વારવતીમૂષાં સમાશ્વાસ્ય તતઃ સખી ॥ ૨૦૫.૨૨॥

૨૦૬.૧/૧વ્યાસ ઉવાચ । બાણોઽપિ પ્રણિપત્યાગ્રે તતશ્ચાહ ત્રિલોચનમ્ ॥ ૨૦૬.૧॥

૨૦૬.૨/૧બાણ ઉવાચ । દેવ બાહુસહસ્રેણ નિર્વિણ્ણોઽહં વિનાહવમ્ ।
૨૦૬.૨/૨કચ્ચિન્ મમૈષાં બાહૂનાં સાફલ્યકરણો રણઃ ।
૨૦૬.૨/૩ભવિષ્યતિ વિના યુદ્ધં ભારાય મમ કિં ભુજૈઃ ॥ ૨૦૬.૨॥

૨૦૬.૩/૧શંકર ઉવાચ । મયૂરધ્વજભઙ્ગસ્તે યદા બાણ ભવિષ્યતિ ।
૨૦૬.૩/૨પિશિતાશિજનાનન્દં પ્રાપ્સ્યસિ ત્વં તદા રણમ્ ॥ ૨૦૬.૩॥

૨૦૬.૪/૧વ્યાસ ઉવાચ । તતઃ પ્રણમ્ય મુદિતઃ શમ્ભુમભ્યાગતો ગૃહાત્ ।
૨૦૬.૪/૨ભગ્નં ધ્વજમથાલોક્ય હૃષ્ટો હર્ષં પરં યયૌ ॥ ૨૦૬.૪॥

૨૦૬.૫/૧એતસ્મિન્ન્ એવ કાલે તુ યોગવિદ્યાબલેન તમ્ ।
૨૦૬.૫/૨અનિરુદ્ધમથાનિન્યે ચિત્રલેખા વરા સખી ॥ ૨૦૬.૫॥

૨૦૬.૬/૧કન્યાન્તઃપુરમધ્યે તં રમમાણં સહોષયા ।
૨૦૬.૬/૨વિજ્ઞાય રક્ષિણો ગત્વા શશંસુર્દૈત્યભૂપતેઃ ॥ ૨૦૬.૬॥

૨૦૬.૭/૧વ્યાદિષ્ટં કિંકરાણાં તુ સૈન્યં તેન મહાત્મના ।
૨૦૬.૭/૨જઘાન પરિઘં લૌહમાદાય પરવીરહા ॥ ૨૦૬.૭॥

૨૦૬.૮/૧હતેષુ તેષુ બાણોઽપિ રથસ્થસ્તદ્વધોદ્યતઃ ।
૨૦૬.૮/૨યુધ્યમાનો યથાશક્તિ યદા વીરેણ નિર્જિતઃ ॥ ૨૦૬.૮॥

૨૦૬.૯/૧માયયા યુયુધે તેન સ તદા મન્ત્રચોદિતઃ ।
૨૦૬.૯/૨તતશ્ચ પન્નગાસ્ત્રેણ બબન્ધ યદુનન્દનમ્ ॥ ૨૦૬.૯॥

૨૦૬.૧૦/૧દ્વારવત્યાં ક્વ યાતોઽસાવનિરુદ્ધેતિ જલ્પતામ્ ।
૨૦૬.૧૦/૨યદૂનામાચચક્ષે તં બદ્ધં બાણેન નારદઃ ॥ ૨૦૬.૧૦॥

૨૦૬.૧૧/૧તં શોણિતપુરે શ્રુત્વા નીતં વિદ્યાવિદગ્ધયા ।
૨૦૬.૧૧/૨યોષિતા પ્રત્યયં જગ્મુર્યાદવા નામ વૈરિતિ ॥ ૨૦૬.૧૧॥

૨૦૬.૧૨/૧તતો ગરુડમારુહ્ય સ્મૃતમાત્રાગતં હરિઃ ।
૨૦૬.૧૨/૨બલપ્રદ્યુમ્નસહિતો બાણસ્ય પ્રયયૌ પુરમ્ ॥ ૨૦૬.૧૨॥

૨૦૬.૧૩/૧પુરીપ્રવેશે પ્રમથૈર્યુદ્ધમાસીન્ મહાબલૈઃ ।

૨૦૬.૧૩/૨યયૌ બાણપુરાભ્યાશં નીત્વા તાન્ સંક્ષયં હરિઃ ॥ ૨૦૬.૧૩ ॥

૨૦૬.૧૪/૧તતસ્ત્રિપાદસ્ત્રિશિરા જ્વરો માહેશ્વરો મહાન્ ।
૨૦૬.૧૪/૨બાણરક્ષાર્થમત્યર્થં યુયુધે શાર્ઙ્ગધન્વના ॥ ૨૦૬.૧૪ ॥

૨૦૬.૧૫/૧તદ્ભસ્મસ્પર્શસમ્ભૂત+ ।તાપં કૃષ્ણાઙ્ગસંગમાત્ ।
૨૦૬.૧૫/૨અવાપ બલદેવોઽપિ સમં સમ્મીલિતેક્ષણઃ ॥ ૨૦૬.૧૫ ॥

૨૦૬.૧૬/૧તતઃ સંયુધ્યમાનસ્તુ સહ દેવેન શાર્ઙ્ગિણા ।
૨૦૬.૧૬/૨વૈષ્ણવેન જ્વરેણાશુ કૃષ્ણદેહાન્ નિરાકૃતઃ ॥ ૨૦૬.૧૬ ॥

૨૦૬.૧૭/૧નારાયણભુજાઘાત+ ।પરિપીડનવિહ્વલમ્ ।
૨૦૬.૧૭/૨તં વીક્ષ્ય ક્ષમ્યતામસ્યેત્યાહ દેવઃ પિતામહઃ ॥ ૨૦૬.૧૭ ॥

૨૦૬.૧૮/૧તતશ્ચ ક્ષાન્તમેવેતિ પ્રોચ્ય તં વૈષ્ણવં જ્વરમ્ ।
૨૦૬.૧૮/૨આત્મન્યેવ લયં નિન્યે ભગવાન્ મધુસૂદનઃ ॥ ૨૦૬.૧૮ ॥

૨૦૬.૧૯/૧મમ ત્વયા સમં યુદ્ધં યે સ્મરિષ્યન્તિ માનવાઃ ।
૨૦૬.૧૯/૨વિજ્વરાસ્તે ભવિષ્યન્તીત્યુક્ત્વા ચૈનં યયૌ હરિઃ ॥ ૨૦૬.૧૯ ॥

૨૦૬.૨૦/૧તતોઽગ્નીન્ ભગવાન્ પઞ્ચ જિત્વા નીત્વા ક્ષયં તથા ।
૨૦૬.૨૦/૨દાનવાનાં બલં વિષ્ણુશ્ચૂર્ણયામાસ લીલયા ॥ ૨૦૬.૨૦ ॥

૨૦૬.૨૧/૧તતઃ સમસ્તસૈન્યેન દૈતેયાનાં બલેઃ સુતઃ ।
૨૦૬.૨૧/૨યુયુધે શંકરશ્ચૈવ કાર્ત્તિકેયશ્ચ શૌરિણા ॥ ૨૦૬.૨૧ ॥

૨૦૬.૨૨/૧હરિશંકરયોર્યુદ્ધમતીવાસીત્ સુદારુણમ્ ।
૨૦૬.૨૨/૨ચુક્ષુભુઃ સકલા લોકાઃ શસ્ત્રાસ્ત્રૈર્બહુધાર્દિતાઃ ॥ ૨૦૬.૨૨ ॥

૨૦૬.૨૩/૧પ્રલયોઽયમશેષસ્ય જગતો નૂનમાગતઃ ।
૨૦૬.૨૩/૨મેનિરે ત્રિદશા યત્ર વર્તમાને મહાહવે ॥ ૨૦૬.૨૩ ॥

૨૦૬.૨૪/૧જૃમ્ભણાસ્ત્રેણ ગોવિન્દો જૃમ્ભયામાસ શંકરમ્ ।
૨૦૬.૨૪/૨તતઃ પ્રણેશુર્દૈતેયાઃ પ્રમથાશ્ચ સમન્તતઃ ॥ ૨૦૬.૨૪ ॥

૨૦૬.૨૫/૧જૃમ્ભાભિભૂતશ્ચ હરો રથોપસ્થમુપાવિશત્ ।
૨૦૬.૨૫/૨ન શશાક તદા યોદ્ધું કૃષ્ણેનાક્લિષ્ટકર્મણા ॥ ૨૦૬.૨૫ ॥

૨૦૬.૨૬/૧ગરુડક્ષતબાહુશ્ચ પ્રદ્યુમ્નાસ્ત્રેણ પીડિતઃ ।
૨૦૬.૨૬/૨કૃષ્ણહુંકારનિર્ધૂત+ ।શક્તિશ્ચાપયયૌ ગુહઃ ॥ ૨૦૬.૨૬ ॥

૨૦૬.૨૭/૧જૃમ્ભિતે શંકરે નષ્ટે દૈત્યસૈન્યે ગુહે જિતે ।
૨૦૬.૨૭/૨નીતે પ્રમથસૈન્યે ચ સંક્ષયં શાર્ઙ્ગધન્વના ॥ ૨૦૬.૨૭॥

૨૦૬.૨૮/૧નન્દીશસંગૃહીતાશ્વમધિરૂઢો મહારથમ્ ।
૨૦૬.૨૮/૨બાણસ્તત્રાયયૌ યોદ્ધું કૃષ્ણકાર્ષ્ણિબલૈઃ સહ ॥ ૨૦૬.૨૮॥

૨૦૬.૨૯/૧બલભદ્રો મહાવીર્યો બાણસૈન્યમનેકધા ।
૨૦૬.૨૯/૨વિવ્યાધ બાણૈઃ પ્રદ્યુમ્નો ધર્મતશ્ચાપલાયતઃ ॥ ૨૦૬.૨૯॥

૨૦૬.૩૦/૧આકૃષ્ય લાઙ્ગલાગ્રેણ મુશલેન ચ પોથિતમ્ ।
૨૦૬.૩૦/૨બલં બલેન દદૃશે બાણો બાણૈશ્ચ ચક્રિણઃ ॥ ૨૦૬.૩૦॥

૨૦૬.૩૧/૧તતઃ કૃષ્ણસ્ય બાણેન યુદ્ધમાસીત્ સમાસતઃ ।
૨૦૬.૩૧/૨પરસ્પરં તુ સંદીપ્તાન્ કાયત્રાણવિભેદિનઃ ॥ ૨૦૬.૩૧॥

૨૦૬.૩૨/૧કૃષ્ણશ્ચિચ્છેદ બાણાંસ્તાન્ બાણેન પ્રહિતાગ્ શરૈઃ ।
૨૦૬.૩૨/૨બિભેદ કેશવં બાણો બાણં વિવ્યાધ ચક્રધૃક્ ॥ ૨૦૬.૩૨॥

૨૦૬.૩૩/૧મુમુચાતે તથાસ્ત્રાણિ બાણકૃષ્ણૌ જિગીષયા ।
૨૦૬.૩૩/૨પરસ્પરક્ષતિપરૌ પરિઘાંશ્ચ તતો દ્વિજાઃ ॥ ૨૦૬.૩૩॥

૨૦૬.૩૪/૧છિદ્યમાનેષ્વશેષેષુ શસ્ત્રેષ્વસ્ત્રે ચ સીદતિ ।
૨૦૬.૩૪/૨પ્રાચુર્યેણ હરિર્બાણં હન્તું ચક્રે તતો મનઃ ॥ ૨૦૬.૩૪॥

૨૦૬.૩૫/૧તતોઽર્કશતસમ્ભૂત+ ।તેજસા સદૃશદ્યુતિ ।
૨૦૬.૩૫/૨જગ્રાહ દૈત્યચક્રારિર્હરિશ્ચક્રં સુદર્શનમ્ ॥ ૨૦૬.૩૫॥

૨૦૬.૩૬/૧મુઞ્ચતો બાણનાશાય તચ્ચક્રં મધુવિદ્વિષઃ ।
૨૦૬.૩૬/૨નગ્ના દૈતેયવિદ્યાભૂત્ કોટરી પુરતો હરેઃ ॥ ૨૦૬.૩૬॥

૨૦૬.૩૭/૧તામગ્રતો હરિર્દૃષ્ટ્વા મીલિતાક્ષઃ સુદર્શનમ્ ।
૨૦૬.૩૭/૨મુમોચ બાણમુદ્દિશ્ય છેત્તું બાહુવનં રિપોઃ ॥ ૨૦૬.૩૭॥

૨૦૬.૩૮/૧ક્રમેણાસ્ય તુ બાહૂનાં બાણસ્યાચ્યુતચોદિતમ્ ।
૨૦૬.૩૮/૨છેદં ચક્રેઽસુરસ્યાશુ શસ્ત્રાસ્ત્રક્ષેપણાદ્ દ્રુતમ્ ॥ ૨૦૬.૩૮॥

૨૦૬.૩૯/૧છિન્ને બાહુવને તત્ તુ કરસ્થં મધુસૂદનઃ ।
૨૦૬.૩૯/૨મુમુક્ષુર્બાણનાશાય વિજ્ઞાતસ્ત્રિપુરદ્વિષા ॥ ૨૦૬.૩૯॥

૨૦૬.૪૦/૧સ ઉત્પત્યાહ ગોવિન્દં સામપૂર્વમુમાપતિઃ ।
૨૦૬.૪૦/૨વિલોક્ય બાણં દોર્દણ્ડ+ ઁહ્છેદાસૃક્સ્રાવવર્ષિણમ્ ॥ ૨૦૬.૪૦॥

૨૦૬.૪૧/૧રુદ્ર ઉવાચ । કૃષ્ણ કૃષ્ણ જગન્નાથ જાને ત્વાં પુરુષોત્તમમ્ ।
૨૦૬.૪૧/૨પરેશં પરમાત્માનમનાદિનિધનં પરમ્ ॥ ૨૦૬.૪૧॥

૨૦૬.૪૨/૧દેવતિર્યઙ્મનુષ્યેષુ શરીરગ્રહણાત્મિકા ।
૨૦૬.૪૨/૨લીલેયં તવ ચેષ્ટા હિ દૈત્યાનાં વધલક્ષણા ॥ ૨૦૬.૪૨॥

૨૦૬.૪૩/૧તત્ પ્રસીદાભયં દત્તં બાણસ્યાસ્ય મયા પ્રભો ।
૨૦૬.૪૩/૨તત્ ત્વયા નાનૃતં કાર્યં યન્ મયા વ્યાહૃતં વચઃ ॥ ૨૦૬.૪૩॥

૨૦૬.૪૪/૧અસ્મત્સંશ્રયવૃદ્ધોઽયં નાપરાધસ્તવાવ્યય ।
૨૦૬.૪૪/૨મયા દત્તવરો દૈત્યસ્તતસ્ત્વાં ક્ષમયામ્યહમ્ ॥ ૨૦૬.૪૪॥

૨૦૬.૪૫/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ પ્રાહ ગોવિન્દઃ શૂલપાણિમુમાપતિમ્ ।
૨૦૬.૪૫/૨પ્રસન્નવદનો ભૂત્વા ગતામર્ષોઽસુરં પ્રતિ ॥ ૨૦૬.૪૫॥

૨૦૬.૪૬/૧શ્રીભગવાન્ ઉવાચ । યુષ્મદ્દત્તવરો બાણો જીવતાદ્ એષ શંકર ।
૨૦૬.૪૬/૨ત્વદ્વાક્યગૌરવાદ્ એતન્ મયા ચક્રં નિવર્તિતમ્ ॥ ૨૦૬.૪૬॥

૨૦૬.૪૭/૧ત્વયા યદ્ અભયં દત્તં તદ્ દત્તમભયં મયા ।
૨૦૬.૪૭/૨મત્તોઽવિભિન્નમાત્માનં દ્રષ્ટુમર્હસિ શંકર ॥ ૨૦૬.૪૭॥

૨૦૬.૪૮/૧યોઽહં સ ત્વં જગચ્ચેદં સદેવાસુરમાનુષમ્ ।
૨૦૬.૪૮/૨અવિદ્યામોહિતાત્માનઃ પુરુષા ભિન્નદર્શિનઃ ॥ ૨૦૬.૪૮॥

૨૦૬.૪૯/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા પ્રયયૌ કૃષ્ણઃ પ્રાદ્યુમ્નિર્યત્ર તિષ્ઠતિ ।
૨૦૬.૪૯/૨તદ્બન્ધફણિનો નેશુર્ગરુડાનિલશોષિતાઃ ॥ ૨૦૬.૪૯॥

૨૦૬.૫૦/૧તતોઽનિરુદ્ધમારોપ્ય સપત્નીકં ગરુત્મતિ ।
૨૦૬.૫૦/૨આજગ્મુર્દ્વારકાં રામ+ ।કાર્ષ્ણિદામોદરાઃ પુરીમ્ ॥ ૨૦૬.૫૦॥

૨૦૭.૧/૧મુનય ઊચુઃ । ચક્રે કર્મ મહચ્છૌરિર્બિભ્રદ્ યો માનુષીં તનુમ્ ।
૨૦૭.૧/૨જિગાય શક્રં શર્વં ચ સર્વદેવાંશ્ચ લીલયા ॥ ૨૦૭.૧॥

૨૦૭.૨/૧યચ્ચાન્યદ્ અકરોત્ કર્મ દિવ્યચેષ્ટાવિઘાતકૃત્ ।
૨૦૭.૨/૨કથ્યતાં તન્ મુનિશ્રેષ્ઠ પરં કૌતૂહલં હિ નઃ ॥ ૨૦૭.૨॥

૨૦૭.૩/૧વ્યાસ ઉવાચ । ગદતો મે મુનિશ્રેષ્ઠાઃ શ્રૂયતામિદમાદરાત્ ।
૨૦૭.૩/૨નરાવતારે કૃષ્ણેન દગ્ધા વારાણસી યથા ॥ ૨૦૭.૩॥

૨૦૭.૪/૧પૌણ્ડ્રકો વાસુદેવશ્ચ વાસુદેવોઽભવદ્ ભુવિ ।

૨૦૭.૪/૨અવતીર્ણસ્ત્વમિત્યુક્તો જનૈરજ્ઞાનમોહિતૈઃ ॥ ૨૦૭.૪॥

૨૦૭.૫/૧સ મેને વાસુદેવોઽહમવતીર્ણો મહીતલે ।
૨૦૭.૫/૨નષ્ટસ્મૃતિસ્તતઃ સર્વં વિષ્ણુચિહ્નમચીકરત્ ।
૨૦૭.૫/૩દૂતં ચ પ્રેષયામાસ સ કૃષ્ણાય દ્વિજોત્તમાઃ ॥ ૨૦૭.૫॥

૨૦૭.૬/૧દૂત ઉવાચ । ત્યક્ત્વા ચક્રાદિકં ચિહ્નં મદીયં નામ માત્મનઃ ।
૨૦૭.૬/૨વાસુદેવાત્મકં મૂઢ મુક્ત્વા સર્વમશેષતઃ ॥ ૨૦૭.૬॥

૨૦૭.૭/૧આત્મનો જીવિતાર્થં ચ તથા મે પ્રણતિં વ્રજ ॥ ૨૦૭.૭॥

૨૦૭.૮/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ સ પ્રહસ્યૈવ દૂતં પ્રાહ જનાર્દનઃ ॥ ૨૦૭.૮॥

૨૦૭.૯/૧શ્રીભગવાન્ ઉવાચ । નિજચિહ્નમહં ચક્રં સમુત્સ્રક્ષ્યે ત્વયીતિ વૈ ।
૨૦૭.૯/૨વાચ્યશ્ચ પૌણ્ડ્રકો ગત્વા ત્વયા દૂત વચો મમ ॥ ૨૦૭.૯॥

૨૦૭.૧૦/૧જ્ઞાતસ્ત્વદ્વાક્યસદ્ભાવો યત્ કાર્યં તદ્ વિધીયતામ્ ।
૨૦૭.૧૦/૨ગૃહીતચિહ્ન એવાહમાગમિષ્યામિ તે પુરમ્ ॥ ૨૦૭.૧૦॥

૨૦૭.૧૧/૧ઉત્સ્રક્ષ્યામિ ચ તે ચક્રં નિજચિહ્નમસંશયમ્ ।
૨૦૭.૧૧/૨આજ્ઞાપૂર્વં ચ યદ્ ઇદમાગચ્છેતિ ત્વયોદિતમ્ ॥ ૨૦૭.૧૧॥

૨૦૭.૧૨/૧સમ્પાદયિષ્યે શ્વસ્તુભ્યં તદ્ અપ્યેષોઽવિલમ્બિતમ્ ।
૨૦૭.૧૨/૨શરણં તે સમભ્યેત્ય કર્તાસ્મિ નૃપતે તથા ।
૨૦૭.૧૨/૩યથા ત્વત્તો ભયં ભૂયો નૈવ કિંચિદ્ ભવિષ્યતિ ॥ ૨૦૭.૧૨॥

૨૦૭.૧૩/૧વ્યાસ ઉવાચ । ઇત્યુક્તેઽપગતે દૂતે સંસ્મૃત્યાભ્યાગતં હરિઃ ।
૨૦૭.૧૩/૨ગરુત્મન્તં સમારુહ્ય ત્વરિતં તત્પુરં યયૌ ॥ ૨૦૭.૧૩॥

૨૦૭.૧૪/૧તસ્યાપિ કેશવોદ્યોગં શ્રુત્વા કાશિપતિસ્તદા ।
૨૦૭.૧૪/૨સર્વસૈન્યપરીવાર+ ।પાર્ષ્ણિગ્રાહમુપાયયૌ ॥ ૨૦૭.૧૪॥

૨૦૭.૧૫/૧તતો બલેન મહતા કાશિરાજબલેન ચ ।
૨૦૭.૧૫/૨પૌણ્ડ્રકો વાસુદેવોઽસૌ કેશવાભિમુખં યયૌ ॥ ૨૦૭.૧૫॥

૨૦૭.૧૬/૧તં દદર્શ હરિર્દૂરાદ્ ઉદારસ્યન્દને સ્થિતમ્ ।
૨૦૭.૧૬/૨ચક્રશઙ્ખગદાપાણિં પાણિના વિધૃતામ્બુજમ્ ॥ ૨૦૭.૧૬॥

૨૦૭.૧૭/૧સ્રગ્ધરં ધૃતશાર્ઙ્ગં ચ સુપર્ણરચનાધ્વજમ્ ।
૨૦૭.૧૭/૨વક્ષસ્થલકૃતં ચાસ્ય શ્રીવત્સં દદૃશે હરિઃ ॥ ૨૦૭.૧૭॥

૨૦૭.૧૮/૧કિરીટકુણ્ડલધરં પીતવાસઃસમન્વિતમ્ ।
૨૦૭.૧૮/૨દૃષ્ટ્વા તં ભાવગમ્ભીરં જહાસ મધુસૂદનઃ ॥ ૨૦૭.૧૮॥

૨૦૭.૧૯/૧યુયુધે ચ બલેનાસ્ય હસ્ત્યશ્વબલિના દ્વિજાઃ ।
૨૦૭.૧૯/૨નિસ્ત્રિંશર્ષ્ટિગદાશૂલ+ ।શક્તિકાર્મુકશાલિના ॥ ૨૦૭.૧૯॥

૨૦૭.૨૦/૧ક્ષણેન શાર્ઙ્ગનિર્મુક્તૈઃ શરૈરગ્નિવિદારણૈઃ ।
૨૦૭.૨૦/૨ગદાચક્રાતિપાતૈશ્ચ સૂદયામાસ તદ્બલમ્ ॥ ૨૦૭.૨૦॥

૨૦૭.૨૧/૧કાશિરાજબલં ચૈવ ક્ષયં નીત્વા જનાર્દનઃ ।
૨૦૭.૨૧/૨ઉવાચ પૌણ્ડ્રકં મૂઢમાત્મચિહ્નોપલક્ષણમ્ ॥ ૨૦૭.૨૧॥

૨૦૭.૨૨/૧શ્રીભગવાન્ ઉવાચ । પૌણ્ડ્રકોક્તં ત્વયા યત્ તદ્ દૂતવક્ત્રેણ માં પ્રતિ ।
૨૦૭.૨૨/૨સમુત્સૃજેતિ ચિહ્નાનિ તત્ તે સમ્પાદયામ્યહમ્ ॥ ૨૦૭.૨૨॥

૨૦૭.૨૩/૧ચક્રમેતત્ સમુત્સૃષ્ટં ગદેયં તે વિસર્જિતા ।
૨૦૭.૨૩/૨ગરુત્માન્ એષ નિર્દિષ્ટઃ સમારોહતુ તે ધ્વજમ્ ॥ ૨૦૭.૨૩॥

૨૦૭.૨૪/૧ઇત્યુચ્ચાર્ય વિમુક્તેન ચક્રેણાસૌ વિદારિતઃ ।
૨૦૭.૨૪/૨પોથિતો ગદયા ભગ્નો ગરુત્માંશ્ચ ગરુત્મતા ॥ ૨૦૭.૨૪॥

૨૦૭.૨૫/૧તતો હાહાકૃતે લોકે કાશીનામધિપસ્તદા ।
૨૦૭.૨૫/૨યુયુધે વાસુદેવેન મિત્રસ્યાપચિતૌ સ્થિતઃ ॥ ૨૦૭.૨૫॥

૨૦૭.૨૬/૧તતઃ શાર્ઙ્ગવિનિર્મુક્તૈશ્છિત્ત્વા તસ્ય શરૈઃ શિરઃ ।
૨૦૭.૨૬/૨કાશિપુર્યાં સ ચિક્ષેપ કુર્વંલ્લોકસ્ય વિસ્મયમ્ ॥ ૨૦૭.૨૬॥

૨૦૭.૨૭/૧હત્વા તુ પૌણ્ડ્રકં શૌરિઃ કાશિરાજં ચ સાનુગમ્ ।
૨૦૭.૨૭/૨રેમે દ્વારવતીં પ્રાપ્તોઽમરઃ સ્વર્ગગતો યથા ॥ ૨૦૭.૨૭॥

૨૦૭.૨૮/૧તચ્છિરઃ પતિતં તત્ર દૃષ્ટ્વા કાશિપતેઃ પુરે ।
૨૦૭.૨૮/૨જનઃ કિમેતદ્ ઇત્યાહ કેનેત્યત્યન્તવિસ્મિતઃ ॥ ૨૦૭.૨૮॥

૨૦૭.૨૯/૧જ્ઞાત્વા તં વાસુદેવેન હતં તસ્ય સુતસ્તતઃ ।
૨૦૭.૨૯/૨પુરોહિતેન સહિતસ્તોષયામાસ શંકરમ્ ॥ ૨૦૭.૨૯॥

૨૦૭.૩૦/૧અવિમુક્તે મહાક્ષેત્રે તોષિતસ્તેન શંકરઃ ।
૨૦૭.૩૦/૨વરં વૃણીષ્વેતિ તદા તં પ્રોવાચ નૃપાત્મજમ્ ॥ ૨૦૭.૩૦॥

૨૦૭.૩૧/૧સ વવ્રે ભગવન્ કૃત્યા પિતુર્હન્તુર્વધાય મે ।
૨૦૭.૩૧/૨સમુત્તિષ્ઠતુ કૃષ્ણસ્ય ત્વત્પ્રસાદાન્ મહેશ્વર ॥ ૨૦૭.૩૧॥

૨૦૭.૩૨/૧વ્યાસ ઉવાચ । એવં ભવિષ્યતીત્યુક્તે દક્ષિણાગ્નેરનન્તરમ્ ।
૨૦૭.૩૨/૨મહાકૃત્યા સમુત્તસ્થૌ તસ્યૈવાગ્નિનિવેશનાત્ ॥ ૨૦૭.૩૨॥

૨૦૭.૩૩/૧તતો જ્વાલાકરાલાસ્યા જ્વલત્કેશકલાપિકા ।
૨૦૭.૩૩/૨કૃષ્ણ કૃષ્ણેતિ કુપિતા કૃત્વા દ્વારવતીં યયૌ ॥ ૨૦૭.૩૩॥

૨૦૭.૩૪/૧તામવેક્ષ્ય જનઃ સર્વો રૌદ્રાં વિકૃતલોચનામ્ ।
૨૦૭.૩૪/૨યયૌ શરણ્યં જગતાં શરણં મધુસૂદનમ્ ॥ ૨૦૭.૩૪॥

૨૦૭.૩૫/૧જના ઊચુઃ । કાશિરાજસુતેનેયમારાધ્ય વૃષભધ્વજમ્ ।
૨૦૭.૩૫/૨ઉત્પાદિતા મહાકૃત્યા વધાય તવ ચક્રિણઃ ।
૨૦૭.૩૫/૩જહિ કૃત્યામિમામુગ્રાં વહ્નિજ્વાલાજટાકુલામ્ ॥ ૨૦૭.૩૫॥

૨૦૭.૩૬/૧વ્યાસ ઉવાચ । ચક્રમુત્સૃષ્ટમક્ષેષુ ક્રીડાસક્તેન લીલયા ।
૨૦૭.૩૬/૨તદ્ અગ્નિમાલાજટિલં જ્વાલોદ્ગારાતિભીષણમ્ ॥ ૨૦૭.૩૬॥

૨૦૭.૩૭/૧કૃત્યામનુજગામાશુ વિષ્ણુચક્રં સુદર્શનમ્ ।
૨૦૭.૩૭/૨તતઃ સા ચક્રવિધ્વસ્તા કૃત્યા માહેશ્વરી તદા ॥ ૨૦૭.૩૭॥

૨૦૭.૩૮/૧જગામ વેગિની વેગાત્ તદ્ અપ્યનુજગામ તામ્ ।
૨૦૭.૩૮/૨કૃત્યા વારાણસીમેવ પ્રવિવેશ ત્વરાન્વિતા ॥ ૨૦૭.૩૮॥

૨૦૭.૩૯/૧વિષ્ણુચક્રપ્રતિહત+ ।પ્રભાવા મુનિસત્તમાઃ ।
૨૦૭.૩૯/૨તતઃ કાશિબલં ભૂરિ પ્રમથાનાં તથા બલમ્ ॥ ૨૦૭.૩૯॥

૨૦૭.૪૦/૧સમસ્તશસ્ત્રાસ્ત્રયુતં ચક્રસ્યાભિમુખં યયૌ ।
૨૦૭.૪૦/૨શસ્ત્રાસ્ત્રમોક્ષબહુલં દગ્ધ્વા તદ્ બલમોજસા ॥ ૨૦૭.૪૦॥

૨૦૭.૪૧/૧કૃત્વાક્ષેમામશેષાં તાં પુરીં વારાણસીં યયૌ ।
૨૦૭.૪૧/૨પ્રભૂતભૃત્યપૌરાં તાં સાશ્વમાતઙ્ગમાનવામ્ ॥ ૨૦૭.૪૧॥

૨૦૭.૪૨/૧અશેષદુર્ગકોષ્ઠાં તાં દુર્નિરીક્ષ્યાં સુરૈરપિ ।
૨૦૭.૪૨/૨જ્વાલાપરિવૃતાશેષ+ ।ગૃહપ્રાકારતોરણામ્ ॥ ૨૦૭.૪૨॥

૨૦૭.૪૩/૧દદાહ તાં પુરીં ચક્રં સકલામેવ સત્વરમ્ ।
૨૦૭.૪૩/૨અક્ષીણામર્ષમત્યલ્પ+ ।સાધ્યસાધનનિસ્પૃહમ્ ।
૨૦૭.૪૩/૩તચ્ચક્રં પ્રસ્ફુરદ્દીપ્તિ વિષ્ણોરભ્યાયયૌ કરમ્ ॥ ૨૦૭.૪૩॥

૨૦૮.૧/૧મુનય ઊચુઃ । શ્રોતુમિચ્છામહે ભૂયો બલભદ્રસ્ય ધીમતઃ ।

૨૦૮.૧/૨મુને પરાક્રમં શૌર્યં તન્ નો વ્યાખ્યાતુમર્હસિ ॥ ૨૦૮.૧॥

૨૦૮.૨/૧યમુનાકર્ષણાદીનિ શ્રુતાન્યસ્માભિરત્ર વૈ ।
૨૦૮.૨/૨તત્ કથ્યતાં મહાભાગ યદ્ અન્યત્ કૃતવાન્ બલઃ ॥ ૨૦૮.૨॥

૨૦૮.૩/૧વ્યાસ ઉવાચ । શૃણુધ્વં મુનયઃ કર્મ યદ્ રામેણાભવત્ કૃતમ્ ।
૨૦૮.૩/૨અનન્તેનાપ્રમેયેન શેષેણ ધરણીભૃતા ॥ ૨૦૮.૩॥

૨૦૮.૪/૧દુર્યોધનસ્ય તનયાં સ્વયંવરકૃતેક્ષણામ્ ।
૨૦૮.૪/૨બલાદ્ આદત્તવાન્ વીરઃ સામ્બો જામ્બવતીસુતઃ ॥ ૨૦૮.૪॥

૨૦૮.૫/૧તતઃ ક્રુદ્ધા મહાવીર્યાઃ કર્ણદુર્યોધનાદયઃ ।
૨૦૮.૫/૨ભીષ્મદ્રોણાદયશ્ચૈવ બબન્ધુર્યુધિ નિર્જિતમ્ ॥ ૨૦૮.૫॥

૨૦૮.૬/૧તચ્છ્રુત્વા યાદવાઃ સર્વે ક્રોધં દુર્યોધનાદિષુ ।
૨૦૮.૬/૨મુનયઃ પ્રતિચક્રુશ્ચ તાન્ વિહન્તું મહોદ્યમમ્ ॥ ૨૦૮.૬॥

૨૦૮.૭/૧તાન્ નિવાર્ય બલઃ પ્રાહ મદલોલાકુલાક્ષરમ્ ।
૨૦૮.૭/૨મોક્ષ્યન્તિ તે મદ્વચનાદ્ યાસ્યામ્યેકો હિ કૌરવાન્ ॥ ૨૦૮.૭॥

૨૦૮.૮/૧બલદેવસ્તતો ગત્વા નગરં નાગસાહ્વયમ્ ।
૨૦૮.૮/૨બાહ્યોપવનમધ્યેઽભૂન્ ન વિવેશ ચ તત્ પુરમ્ ॥ ૨૦૮.૮॥

૨૦૮.૯/૧બલમાગતમાજ્ઞાય તદા દુર્યોધનાદયઃ ।
૨૦૮.૯/૨ગામર્ઘ્યમુદકં ચૈવ રામાય પ્રત્યવેદયન્ ।
૨૦૮.૯/૩ગૃહીત્વા વિધિવત્ સર્વં તતસ્તાન્ આહ કૌરવાન્ ॥ ૨૦૮.૯॥

૨૦૮.૧૦/૧બલદેવ ઉવાચ । આજ્ઞાપયત્યુગ્રસેનઃ સામ્બમાશુ વિમુઞ્ચત ॥ ૨૦૮.૧૦॥

૨૦૮.૧૧/૧વ્યાસ ઉવાચ । તતસ્તદ્વચનં શ્રુત્વા ભીષ્મદ્રોણાદયો દ્વિજાઃ ।
૨૦૮.૧૧/૨કર્ણદુર્યોધનાદ્યાશ્ચ ચુક્રુધુર્દ્વિજસત્તમાઃ ॥ ૨૦૮.૧૧॥

૨૦૮.૧૨/૧ઊચુશ્ચ કુપિતાઃ સર્વે બાહ્લિકાદ્યાશ્ચ ભૂમિપાઃ ।
૨૦૮.૧૨/૨અરાજાર્હં યદોર્વંશમવેક્ષ્ય મુશલાયુધમ્ ॥ ૨૦૮.૧૨॥

૨૦૮.૧૩/૧કૌરવા ઊચુઃ । ભો ભોઃ કિમેતદ્ ભવતા બલભદ્રેરિતં વચઃ ।
૨૦૮.૧૩/૨આજ્ઞાં કુરુકુલોત્થાનાં યાદવઃ કઃ પ્રદાસ્યતિ ॥ ૨૦૮.૧૩॥

૨૦૮.૧૪/૧ઉગ્રસેનોઽપિ યદ્યાજ્ઞાં કૌરવાણાં પ્રદાસ્યતિ ।
૨૦૮.૧૪/૨તદ્ અલં પાણ્ડુરૈશ્છત્રૈર્નૃપયોગ્યૈરલંકૃતૈઃ ॥ ૨૦૮.૧૪॥

૨૦૮.૧૫/૧તદ્ ગચ્છ બલભદ્ર ત્વં સામ્બમન્યાયચેષ્ટિતમ્ ।
૨૦૮.૧૫/૨વિમોક્ષ્યામો ન ભવતો નોગ્રસેનસ્ય શાસનાત્ ॥ ૨૦૮.૧૫॥

૨૦૮.૧૬/૧પ્રણતિર્યા કૃતાસ્માકં માન્યાનાં કુકુરાન્ધકૈઃ ।
૨૦૮.૧૬/૨ન નામ સા કૃતા કેયમાજ્ઞા સ્વામિનિ ભૃત્યતઃ ॥ ૨૦૮.૧૬॥

૨૦૮.૧૭/૧ગર્વમારોપિતા યૂયં સમાનાસનભોજનૈઃ ।
૨૦૮.૧૭/૨કો દોષો ભવતાં નીતિર્યત્ પ્રીણાત્યનપેક્ષિતા ॥ ૨૦૮.૧૭॥

૨૦૮.૧૮/૧અસ્માભિરર્ઘ્યો ભવતા યોઽયં બલ નિવેદિતઃ ।
૨૦૮.૧૮/૨પ્રેમ્ણૈવ ન તદ્ અસ્માકં કુલાદ્ યુષ્મત્કુલોચિતમ્ ॥ ૨૦૮.૧૮॥

૨૦૮.૧૯/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા કુરવઃ સર્વે નામુઞ્ચન્ત હરેઃ સુતમ્ ।
૨૦૮.૧૯/૨કૃતૈકનિશ્ચયાઃ સર્વે વિવિશુર્ગજસાહ્વયમ્ ॥ ૨૦૮.૧૯॥

૨૦૮.૨૦/૧મત્તઃ કોપેન ચાઘૂર્ણ તતોઽધિક્ષેપજન્મના ।
૨૦૮.૨૦/૨ઉત્થાય પાષ્ર્ણ્યા વસુધાં જઘાન સ હલાયુધઃ ॥ ૨૦૮.૨૦॥

૨૦૮.૨૧/૧તતો વિદારિતા પૃથ્વી પાર્ષ્ણિઘાતાન્ મહાત્મનઃ ।
૨૦૮.૨૧/૨આસ્ફોટયામાસ તદા દિશઃ શબ્દેન પૂરયન્ ।
૨૦૮.૨૧/૩ઉવાચ ચાતિતામ્રાક્ષો ભ્રુકુટીકુટિલાનનઃ ॥ ૨૦૮.૨૧॥

૨૦૮.૨૨/૧બલદેવ ઉવાચ । અહો મહાવલેપોઽયમસારાણાં દુરાત્મનામ્ ।
૨૦૮.૨૨/૨કૌરવાણામાધિપત્યમસ્માકં કિલ કાલજમ્ ॥ ૨૦૮.૨૨॥

૨૦૮.૨૩/૧ઉગ્રસેનસ્ય યે નાજ્ઞાં મન્યન્તે ચાપ્યલઙ્ઘનામ્ ।
૨૦૮.૨૩/૨આજ્ઞાં પ્રતીચ્છેદ્ ધર્મેણ સહ દેવૈઃ શચીપતિઃ ॥ ૨૦૮.૨૩॥

૨૦૮.૨૪/૧સદાધ્યાસ્તે સુધર્માં તામુગ્રસેનઃ શચીપતેઃ ।
૨૦૮.૨૪/૨ધિઙ્ મનુષ્યશતોચ્છિષ્ટે તુષ્ટિરેષાં નૃપાસને ॥ ૨૦૮.૨૪॥

૨૦૮.૨૫/૧પારિજાતતરોઃ પુષ્પ+ ંઅઞ્જરીર્વનિતાજનઃ ।
૨૦૮.૨૫/૨બિભર્તિ યસ્ય ભૃત્યાનાં સોઽપ્યેષાં ન મહીપતિઃ ॥ ૨૦૮.૨૫॥

૨૦૮.૨૬/૧સમસ્તભૂભુજાં નાથ ઉગ્રસેનઃ સ તિષ્ઠતુ ।
૨૦૮.૨૬/૨અદ્ય નિષ્કૌરવામુર્વીં કૃત્વા યાસ્યામિ તાં પુરીમ્ ॥ ૨૦૮.૨૬॥

૨૦૮.૨૭/૧કર્ણં દુર્યોધનં દ્રોણમદ્ય ભીષ્મં સબાહ્લિકમ્ ।
૨૦૮.૨૭/૨દુઃશાસનાદીન્ ભૂરિં ચ ભૂરિશ્રવસમેવ ચ ॥ ૨૦૮.૨૭॥

૨૦૮.૨૮/૧સોમદત્તં શલં ભીમમર્જુનં સયુધિષ્ઠિરમ્ ।

૨૦૮.૨૮/૨યમજૌ કૌરવાંશ્ચાન્યાન્ હન્યાં સાશ્વરથદ્વિપાન્ ॥ ૨૦૮.૨૮॥

૨૦૮.૨૯/૧વીરમાદાય તં સામ્બં સપત્નીકં તતઃ પુરીમ્ ।
૨૦૮.૨૯/૨દ્વારકામુગ્રસેનાદીન્ ગત્વા દ્રક્ષ્યામિ બાન્ધવાન્ ॥ ૨૦૮.૨૯॥

૨૦૮.૩૦/૧અથવા કૌરવાદીનાં સમસ્તૈઃ કુરુભિઃ સહ ।
૨૦૮.૩૦/૨ભારાવતરણે શીઘ્રં દેવરાજેન ચોદિતઃ ॥ ૨૦૮.૩૦॥

૨૦૮.૩૧/૧ભાગીરથ્યાં ક્ષિપામ્યાશુ નગરં નાગસાહ્વયમ્ ॥ ૨૦૮.૩૧॥

૨૦૮.૩૨/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા ક્રોધરક્તાક્ષસ્તાલાઙ્કોઽધોમુખં હલમ્ ।
૨૦૮.૩૨/૨પ્રાકારવપ્રે વિન્યસ્ય ચકર્ષ મુશલાયુધઃ ॥ ૨૦૮.૩૨॥

૨૦૮.૩૩/૧આઘૂર્ણિતં તત્ સહસા તતો વૈ હસ્તિનાપુરમ્ ।
૨૦૮.૩૩/૨દૃષ્ટ્વા સંક્ષુબ્ધહૃદયાશ્ચુક્રુશુઃ સર્વકૌરવાઃ ॥ ૨૦૮.૩૩॥

૨૦૮.૩૪/૧કૌરવા ઊચુઃ । રામ રામ મહાબાહો ક્ષમ્યતાં ક્ષમ્યતાં ત્વયા ।
૨૦૮.૩૪/૨ઉપસંહ્રિયતાં કોપઃ પ્રસીદ મુશલાયુધ ॥ ૨૦૮.૩૪॥

૨૦૮.૩૫/૧એષ સામ્બઃ સપત્નીકસ્તવ નિર્યાતિતો બલ ।
૨૦૮.૩૫/૨અવિજ્ઞાતપ્રભાવાણાં ક્ષમ્યતામપરાધિનામ્ ॥ ૨૦૮.૩૫॥

૨૦૮.૩૬/૧વ્યાસ ઉવાચ । તતો નિર્યાતયામાસુઃ સામ્બં પત્ન્યા સમન્વિતમ્ ।
૨૦૮.૩૬/૨નિષ્ક્રમ્ય સ્વપુરીં તૂર્ણં કૌરવા મુનિસત્તમાઃ ॥ ૨૦૮.૩૬॥

૨૦૮.૩૭/૧ભીષ્મદ્રોણકૃપાદીનાં પ્રણમ્ય વદતાં પ્રિયમ્ ।
૨૦૮.૩૭/૨ક્ષાન્તમેવ મયેત્યાહ બલો બલવતાં વરઃ ॥ ૨૦૮.૩૭॥

૨૦૮.૩૮/૧અદ્યાપ્યાઘૂર્ણિતાકારં લક્ષ્યતે તત્ પુરં દ્વિજાઃ ।
૨૦૮.૩૮/૨એષ પ્રભાવો રામસ્ય બલશૌર્યવતો દ્વિજાઃ ॥ ૨૦૮.૩૮॥

૨૦૮.૩૯/૧તતસ્તુ કૌરવાઃ સામ્બં સમ્પૂજ્ય હલિના સહ ।
૨૦૮.૩૯/૨પ્રેષયામાસુરુદ્વાહ+ ।ધનભાર્યાસમન્વિતમ્ ॥ ૨૦૮.૩૯॥

૨૦૯.૧/૧વ્યાસ ઉવાચ । શ◌ૃણુધ્વં મુનયઃ સર્વે બલસ્ય બલશાલિનઃ ।
૨૦૯.૧/૨કૃતં યદ્ અન્યદ્ એવાભૂત્ તદ્ અપિ શ્રૂયતાં દ્વિજાઃ ॥ ૨૦૯.૧॥

૨૦૯.૨/૧નરકસ્યાસુરેન્દ્રસ્ય દેવપક્ષવિરોધિનઃ ।
૨૦૯.૨/૨સખાભવન્ મહાવીર્યો દ્વિવિદો નામ વાનરઃ ॥ ૨૦૯.૨॥

૨૦૯.૩/૧વૈરાનુબન્ધં બલવાન્ સ ચકાર સુરાન્ પ્રતિ ॥ ૨૦૯.૩॥

૨૦૯.૪/૧દ્વિવિદ ઉવાચ । નરકં હતવાન્ કૃષ્ણો બલદર્પસમન્વિતમ્ ।

૨૦૯.૪/૨કરિષ્યે સર્વદેવાનાં તસ્માદ્ એષ પ્રતિક્રિયામ્ ॥ ૨૦૯.૪॥

૨૦૯.૫/૧વ્યાસ ઉવાચ । યજ્ઞવિધ્વંસનં કુર્વન્ મર્ત્યલોકક્ષયં તથા ।

૨૦૯.૫/૨તતો વિધ્વંસયામાસ યજ્ઞાન્ અજ્ઞાનમોહિતઃ ॥ ૨૦૯.૫॥

૨૦૯.૬/૧બિભેદ સાધુમર્યાદાં ક્ષયં ચક્રે ચ દેહિનામ્ ।

૨૦૯.૬/૨દદાહ ચપલો દેશં પુરગ્રામાન્તરાણિ ચ ॥ ૨૦૯.૬॥

૨૦૯.૭/૧ક્વચિચ્ચ પર્વતક્ષેપાદ્ ગ્રામાદીન્ સમચૂર્ણયત્ ।

૨૦૯.૭/૨શૈલાન્ ઉત્પાટ્ય તોયેષુ મુમોચામ્બુનિધૌ તથા ॥ ૨૦૯.૭॥

૨૦૯.૮/૧પુનશ્ચાર્ણવમધ્યસ્થઃ ક્ષોભયામાસ સાગરમ્ ।

૨૦૯.૮/૨તેનાતિક્ષોભિતશ્ચાબ્ધિરુદ્વેલો જાયતે દ્વિજાઃ ॥ ૨૦૯.૮॥

૨૦૯.૯/૧પ્લાવયંસ્તીરજાન્ ગ્રામાન્ પુરાદીન્ અતિવેગવાન્ ।

૨૦૯.૯/૨કામરૂપં મહારૂપં કૃત્વા સસ્યાન્યનેકશઃ ॥ ૨૦૯.૯॥

૨૦૯.૧૦/૧લુઠન્ ભ્રમણસમ્મર્દૈઃ સંચૂર્ણયતિ વાનરઃ ।

૨૦૯.૧૦/૨તેન વિપ્રકૃતં સર્વં જગદ્ એતદ્ દુરાત્મના ॥ ૨૦૯.૧૦॥

૨૦૯.૧૧/૧નિઃસ્વાધ્યાયવષટ્કારં દ્વિજાશ્ચાસીત્ સુદુઃખિતમ્ ।

૨૦૯.૧૧/૨કદાચિદ્ રૈવતોદ્યાને પપૌ પાનં હલાયુધઃ ॥ ૨૦૯.૧૧॥

૨૦૯.૧૨/૧રેવતી ચ મહાભાગા તથૈવાન્યા વરસ્ત્રિયઃ ।

૨૦૯.૧૨/૨ઉદ્ગીયમાનો વિલસલ્+ ।લલનામૌલિમધ્યગઃ ॥ ૨૦૯.૧૨॥

૨૦૯.૧૩/૧રેમે યદુવરશ્રેષ્ઠઃ કુબેર ઇવ મન્દરે ।

૨૦૯.૧૩/૨તતઃ સ વાનરોઽભ્યેત્ય ગૃહીત્વા સીરિણો હલમ્ ॥ ૨૦૯.૧૩॥

૨૦૯.૧૪/૧મુશલં ચ ચકારાસ્ય સમ્મુખઃ સ વિડમ્બનામ્ ।

૨૦૯.૧૪/૨તથૈવ યોષિતાં તાસાં જહાસાભિમુખં કપિઃ ॥ ૨૦૯.૧૪॥

૨૦૯.૧૫/૧પાનપૂર્ણાંશ્ચ કરકાંશ્ચિક્ષેપાહત્ય વૈ તદા ।

૨૦૯.૧૫/૨તતઃ કોપપરીતાત્મા ભર્ત્સયામાસ તં બલમ્ ॥ ૨૦૯.૧૫॥

૨૦૯.૧૬/૧તથાપિ તમવજ્ઞાય ચક્રે કિલકિલાધ્વનિમ્ ।

૨૦૯.૧૬/૨તતઃ સમુત્થાય બલો જગૃહે મુશલં રુષા ॥ ૨૦૯.૧૬॥

૨૦૯.૧૭/૧સોઽપિ શૈલશિલાં ભીમાં જગ્રાહ પ્લવગોત્તમઃ ।

૨૦૯.૧૭/૨ચિક્ષેપ ચ સ તાં ક્ષિપ્તાં મુશલેન સહસ્રધા ॥ ૨૦૯.૧૭॥

૨૦૯.૧૮/૧બિભેદ યાદવશ્રેષ્ઠઃ સા પપાત મહીતલે ।
૨૦૯.૧૮/૨અપતન્ મુશલં ચાસૌ સમુલ્લઙ્ઘ્ય પ્લવંગમઃ ॥ ૨૦૯.૧૮॥

૨૦૯.૧૯/૧વેગેનાયમ્ય રોષેણ બલેનોરસ્યતાડયત્ ।
૨૦૯.૧૯/૨તતો બલેન કોપેન મુષ્ટિના મૂર્ધ્નિ તાડિતઃ ॥ ૨૦૯.૧૯॥

૨૦૯.૨૦/૧પપાત રુધિરોદ્ગારી દ્વિવિદઃ ક્ષીણજીવિતઃ ।
૨૦૯.૨૦/૨પતતા તચ્છરીરેણ ગિરેઃ શ઼ૃઙ્ગમશીર્યત ॥ ૨૦૯.૨૦॥

૨૦૯.૨૧/૧મુનયઃ શતધા વજ્રિ+ ।વજ્રેણેવ હિ તાડિતમ્ ।
૨૦૯.૨૧/૨પુષ્પવૃષ્ટિં તતો દેવા રામસ્યોપરિ ચિક્ષિપુઃ ॥ ૨૦૯.૨૧॥

૨૦૯.૨૨/૧પ્રશશંસુસ્તદાભ્યેત્ય સાધ્વેતત્ તે મહત્ કૃતમ્ ।
૨૦૯.૨૨/૨અનેન દુષ્ટકપિના દૈત્યપક્ષોપકારિણા ।
૨૦૯.૨૨/૩જગન્ નિરાકૃતં વીર દિષ્ટ્યા સ ક્ષયમાગતઃ ॥ ૨૦૯.૨૨॥

૨૦૯.૨૩/૧વ્યાસ ઉવાચ । એવંવિધાન્યનેકાનિ બલદેવસ્ય ધીમતઃ ।
૨૦૯.૨૩/૨કર્માણ્યપરિમેયાનિ શેષસ્ય ધરણીભૃતઃ ॥ ૨૦૯.૨૩॥

૨૧૦.૧/૧વ્યાસ ઉવાચ । એવં દૈત્યવધં કૃષ્ણો બલદેવસહાયવાન્ ।
૨૧૦.૧/૨ચક્રે દુષ્ટક્ષિતીશાનાં તથૈવ જગતઃ કૃતે ॥ ૨૧૦.૧॥

૨૧૦.૨/૧ક્ષિતેશ્ચ ભારં ભગવાન્ ફાલ્ગુનેન સમં વિભુઃ ।
૨૧૦.૨/૨અવતારયામાસ હરિઃ સમસ્તાક્ષૌહિણીવધાત્ ॥ ૨૧૦.૨॥

૨૧૦.૩/૧કૃત્વા ભારાવતરણં ભુવો હત્વાખિલાન્ નૃપાન્ ।
૨૧૦.૩/૨શાપવ્યાજેન વિપ્રાણામુપસંહૃતવાન્ કુલમ્ ॥ ૨૧૦.૩॥

૨૧૦.૪/૧ઉત્સૃજ્ય દ્વારકાં કૃષ્ણસ્ત્યક્ત્વા માનુષ્યમાત્મભૂઃ ।
૨૧૦.૪/૨સ્વાંશો વિષ્ણુમયં સ્થાનં પ્રવિવેશ પુનર્નિજમ્ ॥ ૨૧૦.૪॥

૨૧૦.૫/૧મુનય ઊચુઃ । સ વિપ્રશાપવ્યાજેન સંજહ્રે સ્વકુલં કથમ્ ।
૨૧૦.૫/૨કથં ચ માનુષં દેહમુત્સસર્જ જનાર્દનઃ ॥ ૨૧૦.૫॥

૨૧૦.૬/૧વ્યાસ ઉવાચ । વિશ્વામિત્રસ્તથા કણ્વો નારદશ્ચ મહામુનિઃ ।
૨૧૦.૬/૨પિણ્ડારકે મહાતીર્થે દૃષ્ટા યદુકુમારકૈઃ ॥ ૨૧૦.૬॥

૨૧૦.૭/૧તતસ્તે યૌવનોન્મત્તા ભાવિકાર્યપ્રચોદિતાઃ ।
૨૧૦.૭/૨સામ્બં જામ્બવતીપુત્રં ભૂષયિત્વા સ્ત્રિયં યથા ।

૨૧૦.૭/૩પ્રસૃતાસ્તાન્ મુનીન્ ઊચુઃ પ્રણિપાતપુરઃસરમ્ ॥ ૨૧૦.૭॥

૨૧૦.૮/૧કુમારા ઊચુઃ । ઇયં સ્ત્રી પુત્રકામા તુ પ્રભો કિં જનયિષ્યતિ ॥ ૨૧૦.૮॥

૨૧૦.૯/૧વ્યાસ ઉવાચ । દિવ્યજ્ઞાનોપપન્નાસ્તે વિપ્રલબ્ધા કુમારકૈઃ ।
૨૧૦.૯/૨શાપં દદુસ્તદા વિપ્રાસ્તેષાં નાશાય સુવ્રતાઃ ॥ ૨૧૦.૯॥

૨૧૦.૧૦/૧મુનયઃ કુપિતાઃ પ્રોચુર્મુશલં જનયિષ્યતિ ।
૨૧૦.૧૦/૨યેનાખિલકુલોત્સાદો યાદવાનાં ભવિષ્યતિ ॥ ૨૧૦.૧૦॥

૨૧૦.૧૧/૧ઇત્યુક્તાસ્તૈઃ કુમારાસ્ત આચચક્ષુર્યથાતથમ્ ।
૨૧૦.૧૧/૨ઉગ્રસેનાય મુશલં જજ્ઞે સામ્બસ્ય ચોદરાત્ ॥ ૨૧૦.૧૧॥

૨૧૦.૧૨/૧તદ્ ઉગ્રસેનો મુશલમયશ્ચૂર્ણમકારયત્ ।
૨૧૦.૧૨/૨જજ્ઞે તચ્ચૈરકા ચૂર્ણં પ્રક્ષિપ્તં વૈ મહોદધૌ ॥ ૨૧૦.૧૨॥

૨૧૦.૧૩/૧મુસલસ્યાથ લૌહસ્ય ચૂર્ણિતસ્યાન્ધકૈર્દ્વિજાઃ ।
૨૧૦.૧૩/૨ખણ્ડં ચૂર્ણયિતું શેકુર્નૈવ તે તોમરાકૃતિ ॥ ૨૧૦.૧૩॥

૨૧૦.૧૪/૧તદ્ અપ્યમ્બુનિધૌ ક્ષિપ્તં મત્સ્યો જગ્રાહ જાલિભિઃ ।
૨૧૦.૧૪/૨ઘાતિતસ્યોદરાત્ તસ્ય લુબ્ધો જગ્રાહ તજ્જરા ॥ ૨૧૦.૧૪॥

૨૧૦.૧૫/૧વિજ્ઞાતપરમાર્થોઽપિ ભગવાન્ મધુસૂદનઃ ।
૨૧૦.૧૫/૨નૈચ્છત્ તદ્ અન્યથા કર્તું વિધિના યત્ સમાહૃતમ્ ॥ ૨૧૦.૧૫॥

૨૧૦.૧૬/૧દેવૈશ્ચ પ્રહિતો દૂતઃ પ્રણિપત્યાહ કેશવમ્ ।
૨૧૦.૧૬/૨રહસ્યેવમહં દૂતઃ પ્રહિતો ભગવન્ સુરૈઃ ॥ ૨૧૦.૧૬॥

૨૧૦.૧૭/૧વસ્વશ્વિમરુદાદિત્ય+ ।રુદ્રસાધ્યાદિભિઃ સહ ।
૨૧૦.૧૭/૨વિજ્ઞાપયતિ વઃ શક્રસ્તદ્ ઇદં શ્રૂયતાં પ્રભો ॥ ૨૧૦.૧૭॥

૨૧૦.૧૮/૧દેવા ઊચુઃ । ભારાવતરણાર્થાય વર્ષાણામધિકં શતમ્ ।
૨૧૦.૧૮/૨ભગવાન્ અવતીર્ણોઽત્ર ત્રિદશૈઃ સમ્પ્રસાદિતઃ ॥ ૨૧૦.૧૮॥

૨૧૦.૧૯/૧દુર્વૃત્તા નિહતા દૈત્યા ભુવો ભારોઽવતારિતઃ ।
૨૧૦.૧૯/૨ત્વયા સનાથાસ્ત્રિદશા વ્રજન્તુ ત્રિદિવેશતામ્ ॥ ૨૧૦.૧૯॥

૨૧૦.૨૦/૧તદ્ અતીતં જગન્નાથ વર્ષાણામધિકં શતમ્ ।
૨૧૦.૨૦/૨ઇદાનીં ગમ્યતાં સ્વર્ગો ભવતા યદિ રોચતે ॥ ૨૧૦.૨૦॥

૨૧૦.૨૧/૧દેવૈર્વિજ્ઞાપિતો દેવોઽપ્યથાત્રૈવ રતિસ્તવ ।

૨૧૦.૨૧/૨તત્ સ્થીયતાં યથાકાલમાખ્યેયમનુજીવિભિઃ ॥ ૨૧૦.૨૧॥

૨૧૦.૨૨/૧શ્રીભગવાન્ ઉવાચ । યત્ ત્વમાત્થાખિલં દૂત વેદ્મિ ચૈતદ્ અહં પુનઃ ।
૨૧૦.૨૨/૨પ્રારબ્ધ એવ હિ મયા યાદવાનામપિ ક્ષયઃ ॥ ૨૧૦.૨૨॥

૨૧૦.૨૩/૧ભુવો નામાતિભારોઽયં યાદવૈરનિબર્હિતૈઃ ।
૨૧૦.૨૩/૨અવતારં કરોમ્યસ્ય સપ્તરાત્રેણ સત્વરઃ ॥ ૨૧૦.૨૩॥

૨૧૦.૨૪/૧યથાગૃહીતં ચામ્ભોધૌ હૃત્વાહં દ્વારકાં પુનઃ ।
૨૧૦.૨૪/૨યાદવાન્ ઉપસંહૃત્ય યાસ્યામિ ત્રિદશાલયમ્ ॥ ૨૧૦.૨૪॥

૨૧૦.૨૫/૧મનુષ્યદેહમુત્સૃજ્ય સંકર્ષણસહાયવાન્ ।
૨૧૦.૨૫/૨પ્રાપ્ત એવાસ્મિ મન્તવ્યો દેવેન્દ્રેણ તથા સુરૈઃ ॥ ૨૧૦.૨૫॥

૨૧૦.૨૬/૧જરાસંધાદયો યેઽન્યે નિહતા ભારહેતવઃ ।
૨૧૦.૨૬/૨ક્ષિતેસ્તેભ્યઃ સ ભારો હિ યદૂનાં સમધીયત ॥ ૨૧૦.૨૬॥

૨૧૦.૨૭/૧તદ્ એતત્ સુમહાભારમવતાર્ય ક્ષિતેરહમ્ ।
૨૧૦.૨૭/૨યાસ્યામ્યમરલોકસ્ય પાલનાય બ્રવીહિ તાન્ ॥ ૨૧૦.૨૭॥

૨૧૦.૨૮/૧વ્યાસ ઉવાચ । ઇત્યુક્તો વાસુદેવેન દેવદૂતઃ પ્રણમ્ય તમ્ ।
૨૧૦.૨૮/૨દ્વિજાઃ સ દિવ્યયા ગત્યા દેવરાજાન્તિકં યયૌ ॥ ૨૧૦.૨૮॥

૨૧૦.૨૯/૧ભગવાન્ અપ્યથોત્પાતાન્ દિવ્યાન્ ભૌમાન્તરિક્ષગાન્ ।
૨૧૦.૨૯/૨દદર્શ દ્વારકાપુર્યાં વિનાશાય દિવાનિશમ્ ॥ ૨૧૦.૨૯॥

૨૧૦.૩૦/૧તાન્ દૃષ્ટ્વા યાદવાન્ આહ પશ્યધ્વમતિદારુણાન્ ।
૨૧૦.૩૦/૨મહોત્પાતાઞ્ શમાયૈષાં પ્રભાસં યામ મા ચિરમ્ ॥ ૨૧૦.૩૦॥

૨૧૦.૩૧/૧વ્યાસ ઉવાચ । મહાભાગવતઃ પ્રાહ પ્રણિપત્યોદ્ધવો હરિમ્ ॥ ૨૧૦.૩૧॥

૨૧૦.૩૨/૧ઉદ્ધવ ઉવાચ । ભગવન્ યન્ મયા કાર્યં તદ્ આજ્ઞાપય સામ્પ્રતમ્ ।
૨૧૦.૩૨/૨મન્યે કુલમિદં સર્વં ભગવાન્ સંહરિષ્યતિ ।
૨૧૦.૩૨/૩નાશાયાસ્ય નિમિત્તાનિ કુલસ્યાચ્યુત લક્ષયે ॥ ૨૧૦.૩૨॥

૨૧૦.૩૩/૧શ્રીભગવાન્ ઉવાચ । ગચ્છ ત્વં દિવ્યયા ગત્યા મત્પ્રસાદસમુત્થયા ।
૨૧૦.૩૩/૨બદરીમાશ્રમં પુણ્યં ગન્ધમાદનપર્વતે ॥ ૨૧૦.૩૩॥

૨૧૦.૩૪/૧નરનારાયણસ્થાને પવિત્રિતમહીતલે ।
૨૧૦.૩૪/૨મન્મના મત્પ્રસાદેન તત્ર સિદ્ધિમવાપ્સ્યસિ ॥ ૨૧૦.૩૪॥

૨૧૦.૩૫/૧અહં સ્વર્ગં ગમિષ્યામિ ઉપસંહૃત્ય વૈ કુલમ્ ।
૨૧૦.૩૫/૨દ્વારકાં ચ મયા ત્યક્તાં સમુદ્રઃ પ્લાવયિષ્યતિ ॥ ૨૧૦.૩૫॥

૨૧૦.૩૬/૧વ્યાસ ઉવાચ । ઇત્યુક્તઃ પ્રણિપત્યૈનં જગામ સ તદોદ્ધવઃ ।
૨૧૦.૩૬/૨નરનારાયણસ્થાનં કેશવેનાનુમોદિતઃ ॥ ૨૧૦.૩૬॥

૨૧૦.૩૭/૧તતસ્તે યાદવાઃ સર્વે રથાન્ આરુહ્ય શીઘ્રગાન્ ।
૨૧૦.૩૭/૨પ્રભાસં પ્રયયુઃ સાર્ધં કૃષ્ણરામાદિભિર્દ્વિજાઃ ॥ ૨૧૦.૩૭॥

૨૧૦.૩૮/૧પ્રાપ્ય પ્રભાસં પ્રયતા પ્રીતાસ્તે કુક્કુરાન્ધકાઃ ।
૨૧૦.૩૮/૨ચક્રુસ્તત્ર સુરાપાનં વાસુદેવાનુમોદિતાઃ ॥ ૨૧૦.૩૮॥

૨૧૦.૩૯/૧પિબતાં તત્ર વૈ તેષાં સંઘર્ષેણ પરસ્પરમ્ ।
૨૧૦.૩૯/૨યાદવાનાં તતો જજ્ઞે કલહાગ્નિઃ ક્ષયાવહઃ ॥ ૨૧૦.૩૯॥

૨૧૦.૪૦/૧જઘ્નુઃ પરસ્પરં તે તુ શસ્ત્રૈર્દૈવબલાત્ કૃતાઃ ।
૨૧૦.૪૦/૨ક્ષીણશસ્ત્રાસ્તુ જગૃહુઃ પ્રત્યાસન્નામથૈરકામ્ ॥ ૨૧૦.૪૦॥

૨૧૦.૪૧/૧એરકા તુ ગૃહીતા તૈર્વજ્રભૂતેવ લક્ષ્યતે ।
૨૧૦.૪૧/૨તયા પરસ્પરં જઘ્નુઃ સમ્પ્રહારૈઃ સુદારુણૈઃ ॥ ૨૧૦.૪૧॥

૨૧૦.૪૨/૧પ્રદ્યુમ્નસામ્બપ્રમુખાઃ કૃતવર્માથ સાત્યકિઃ ।
૨૧૦.૪૨/૨અનિરુદ્ધાદયશ્ચાન્યે પૃથુર્વિપૃથુરેવ ચ ॥ ૨૧૦.૪૨॥

૨૧૦.૪૩/૧ચારુવર્મા સુચારુશ્ચ તથાક્રૂરાદયો દ્વિજાઃ ।
૨૧૦.૪૩/૨એરકારૂપિભિર્વજ્રૈસ્તે નિજઘ્નુઃ પરસ્પરમ્ ॥ ૨૧૦.૪૩॥

૨૧૦.૪૪/૧નિવારયામાસ હરિર્યાદવાસ્તે ચ કેશવમ્ ।
૨૧૦.૪૪/૨સહાયં મેનિરે પ્રાપ્તં તે નિજઘ્નુઃ પરસ્પરમ્ ॥ ૨૧૦.૪૪॥

૨૧૦.૪૫/૧કૃષ્ણોઽપિ કુપિતસ્તેષામેરકામુષ્ટિમાદદે ।
૨૧૦.૪૫/૨વધાય તેષાં મુશલં મુષ્ટિલોહમભૂત્ તદા ॥ ૨૧૦.૪૫॥

૨૧૦.૪૬/૧જઘાન તેન નિઃશેષાન્ આતતાયી સ યાદવાન્ ।
૨૧૦.૪૬/૨જઘ્નુશ્ચ સહસાભ્યેત્ય તથાન્યે તુ પરસ્પરમ્ ॥ ૨૧૦.૪૬॥

૨૧૦.૪૭/૧તતશ્ચાર્ણવમધ્યેન જૈત્રોઽસૌ ચક્રિણો રથઃ ।
૨૧૦.૪૭/૨પશ્યતો દારુકસ્યાશુ હૃતોઽશ્વૈર્દ્વિજસત્તમાઃ ॥ ૨૧૦.૪૭॥

૨૧૦.૪૮/૧ચક્રં ગદા તથા શાર્ઙ્ગં તૂણૌ શઙ્ખોઽસિરેવ ચ ।
૨૧૦.૪૮/૨પ્રદક્ષિણં તતઃ કૃત્વા જગ્મુરાદિત્યવર્ત્મના ॥ ૨૧૦.૪૮॥

૨૧૦.૪૯/૧ક્ષણમાત્રેણ વૈ તત્ર યાદવાનામભૂત્ ક્ષયઃ ।
૨૧૦.૪૯/૨ઋતે કૃષ્ણં મહાબાહું દારુકં ચ દ્વિજોત્તમાઃ ॥ ૨૧૦.૪૯ ॥

૨૧૦.૫૦/૧ચઙ્ક્રમ્યમાણૌ તૌ રામં વૃક્ષમૂલકૃતાસનમ્ ।
૨૧૦.૫૦/૨દદૃશાતે મુખાચ્ચાસ્ય નિષ્ક્રામન્તં મહોરગમ્ ॥ ૨૧૦.૫૦ ॥

૨૧૦.૫૧/૧નિષ્ક્રમ્ય સ મુખાત્ તસ્ય મહાભોગો ભુજંગમઃ ।
૨૧૦.૫૧/૨પ્રયાતશ્ચાર્ણવં સિદ્ધૈઃ પૂજ્યમાનસ્તથોરગૈઃ ॥ ૨૧૦.૫૧ ॥

૨૧૦.૫૨/૧તમર્ઘ્યમાદાય તદા જલધિઃ સમ્મુખં યયૌ ।
૨૧૦.૫૨/૨પ્રવિવેશ ચ તત્તોયં પૂજિતઃ પન્નગોત્તમૈઃ ।
૨૧૦.૫૨/૩દૃષ્ટ્વા બલસ્ય નિર્યાણં દારુકં પ્રાહ કેશવઃ ॥ ૨૧૦.૫૨ ॥

૨૧૦.૫૩/૧શ્રીભગવાન્ ઉવાચ । ઇદં સર્વં ત્વમાચક્ષ્વ વસુદેવોગ્રસેનયોઃ ।
૨૧૦.૫૩/૨નિર્યાણં બલદેવસ્ય યાદવાનાં તથા ક્ષયમ્ ॥ ૨૧૦.૫૩ ॥

૨૧૦.૫૪/૧યોગે સ્થિત્વાહમપ્યેતત્ પરિત્યજ્ય કલેવરમ્ ।
૨૧૦.૫૪/૨વાચ્યશ્ચ દ્વારકાવાસી જનઃ સર્વસ્તથાહુકઃ ॥ ૨૧૦.૫૪ ॥

૨૧૦.૫૫/૧યથેમાં નગરીં સર્વાં સમુદ્રઃ પ્લાવયિષ્યતિ ।
૨૧૦.૫૫/૨તસ્માદ્ રથૈઃ સુસજ્જૈસ્તુ પ્રતીક્ષ્યો હ્યર્જુનાગમઃ ॥ ૨૧૦.૫૫ ॥

૨૧૦.૫૬/૧ન સ્થેયં દ્વારકામધ્યે નિષ્ક્રાન્તે તત્ર પાણ્ડવે ।
૨૧૦.૫૬/૨તેનૈવ સહ ગન્તવ્યં યત્ર યાતિ સ કૌરવઃ ॥ ૨૧૦.૫૬ ॥

૨૧૦.૫૭/૧ગત્વા ચ બ્રૂહિ કૌન્તેયમર્જુનં વચનં મમ ।
૨૧૦.૫૭/૨પાલનીયસ્ત્વયા શક્ત્યા જનોઽયં મત્પરિગ્રહઃ ॥ ૨૧૦.૫૭ ॥

૨૧૦.૫૮/૧ઇત્યર્જુનેન સહિતો દ્વારવત્યાં ભવાગ્ જનમ્ ।
૨૧૦.૫૮/૨ગૃહીત્વા યાતુ વજ્રશ્ચ યદુરાજો ભવિષ્યતિ ॥ ૨૧૦.૫૮ ॥

૨૧૧.૧/૧વ્યાસ ઉવાચ । ઇત્યુક્તો દારુકઃ કૃષ્ણં પ્રણિપત્ય પુનઃ પુનઃ ।
૨૧૧.૧/૨પ્રદક્ષિણં ચ બહુશઃ કૃત્વા પ્રાયાદ્ યથોદિતમ્ ॥ ૨૧૧.૧ ॥

૨૧૧.૨/૧સ ચ ગત્વા તથા ચક્રે દ્વારકાયાં તથાર્જુનમ્ ।
૨૧૧.૨/૨આનિનાય મહાબુદ્ધિં વજ્રં ચક્રે તથા નૃપમ્ ॥ ૨૧૧.૨ ॥

૨૧૧.૩/૧ભગવાન્ અપિ ગોવિન્દો વાસુદેવાત્મકં પરમ્ ।
૨૧૧.૩/૨બ્રહ્માત્મનિ સમારોપ્ય સર્વભૂતેષ્વધારયત્ ॥ ૨૧૧.૩ ॥

૨૧૧.૪/૧સ માનયન્ દ્વિજવચો દુર્વાસા યદ્ ઉવાચ હ ।
૨૧૧.૪/૨યોગયુક્તોઽભવત્ પાદં કૃત્વા જાનુનિ સત્તમાઃ ॥ ૨૧૧.૪॥

૨૧૧.૫/૧સમ્પ્રાપ્તો વૈ જરા નામ તદા તત્ર સ લુબ્ધકઃ ।
૨૧૧.૫/૨મુશલશેષલોહસ્ય સાયકં ધારયન્ પરમ્ ॥ ૨૧૧.૫॥

૨૧૧.૬/૧સ તત્પાદં મૃગાકારં સમવેક્ષ્ય વ્યવસ્થિતઃ ।
૨૧૧.૬/૨તતો વિવ્યાધ તેનૈવ તોમરેણ દ્વિજોત્તમાઃ ॥ ૨૧૧.૬॥

૨૧૧.૭/૧ગતશ્ચ દદૃશે તત્ર ચતુર્બાહુધરં નરમ્ ।
૨૧૧.૭/૨પ્રણિપત્યાહ ચૈવૈનં પ્રસીદેતિ પુનઃ પુનઃ ॥ ૨૧૧.૭॥

૨૧૧.૮/૧અજાનતા કૃતમિદં મયા હરિણશઙ્કયા ।
૨૧૧.૮/૨ક્ષમ્યતામાત્મપાપેન દગ્ધં મા દગ્ધુમર્હસિ ॥ ૨૧૧.૮॥

૨૧૧.૯/૧વ્યાસ ઉવાચ । તતસ્તં ભગવાન્ આહ નાસ્તિ તે ભયમણ્વપિ ।
૨૧૧.૯/૨ગચ્છ ત્વં મત્પ્રસાદેન લુબ્ધ સ્વર્ગેશ્વરાસ્પદમ્ ॥ ૨૧૧.૯॥

૨૧૧.૧૦/૧વ્યાસ ઉવાચ । વિમાનમાગતં સદ્યસ્તદ્વાક્યસમનન્તરમ્ ।
૨૧૧.૧૦/૨આરુહ્ય પ્રયયૌ સ્વર્ગં લુબ્ધકસ્તત્પ્રસાદતઃ ॥ ૨૧૧.૧૦॥

૨૧૧.૧૧/૧ગતે તસ્મિન્ સ ભગવાન્ સંયોજ્યાત્માનમાત્મનિ ।
૨૧૧.૧૧/૨બ્રહ્મભૂતેઽવ્યયેઽચિન્ત્યે વાસુદેવમયેઽમલે ॥ ૨૧૧.૧૧॥

૨૧૧.૧૨/૧અજન્મન્યજરેઽનાશિન્યપ્રમેયેઽખિલાત્મનિ ।
૨૧૧.૧૨/૨ત્યક્ત્વા સ માનુષં દેહમવાપ ત્રિવિધાં ગતિમ્ ॥ ૨૧૧.૧૨॥

૨૧૨.૧/૧વ્યાસ ઉવાચ । અર્જુનોઽપિ તદાન્વિષ્ય કૃષ્ણરામકલેવરે ।
૨૧૨.૧/૨સંસ્કારં લમ્ભયામાસ તથાન્યેષામનુક્રમાત્ ॥ ૨૧૨.૧॥

૨૧૨.૨/૧અષ્ટૌ મહિષ્યઃ કથિતા રુક્મિણીપ્રમુખાસ્તુ યાઃ ।
૨૧૨.૨/૨ઉપગૃહ્ય હરેર્દેહં વિવિશુસ્તા હુતાશનમ્ ॥ ૨૧૨.૨॥

૨૧૨.૩/૧રેવતી ચૈવ રામસ્ય દેહમાશ્લિષ્ય સત્તમાઃ ।
૨૧૨.૩/૨વિવેશ જ્વલિતં વહ્નિં તત્સઙ્ગાહ્લાદશીતલમ્ ॥ ૨૧૨.૩॥

૨૧૨.૪/૧ઉગ્રસેનસ્તુ તચ્છ્રુત્વા તથૈવાનકદુન્દુભિઃ ।
૨૧૨.૪/૨દેવકી રોહિણી ચૈવ વિવિશુર્જાતવેદસમ્ ॥ ૨૧૨.૪॥

૨૧૨.૫/૧તતોઽર્જુનઃ પ્રેતકાર્યં કૃત્વા તેષાં યથાવિધિ ।
૨૧૨.૫/૨નિશ્ચક્રામ જનં સર્વં ગૃહીત્વા વજ્રમેવ ચ ॥ ૨૧૨.૫॥

૨૧૨.૬/૧દ્વારવત્યા વિનિષ્ક્રાન્તાઃ કૃષ્ણપત્ન્યઃ સહસ્રશઃ ।
૨૧૨.૬/૨વજ્રં જનં ચ કૌન્તેયઃ પાલયઞ્ શનકૈર્યયૌ ॥ ૨૧૨.૬॥

૨૧૨.૭/૧સભા સુધર્મા કૃષ્ણેન મર્ત્યલોકે સમાહૃતા ।
૨૧૨.૭/૨સ્વર્ગં જગામ ભો વિપ્રાઃ પારિજાતશ્ચ પાદપઃ ॥ ૨૧૨.૭॥

૨૧૨.૮/૧યસ્મિન્ દિને હરિર્યાતો દિવં સંત્યજ્ય મેદિનીમ્ ।
૨૧૨.૮/૨તસ્મિન્ દિનેઽવતીર્ણોઽયં કાલકાયઃ કલિઃ કિલ ॥ ૨૧૨.૮॥

૨૧૨.૯/૧પ્લાવયામાસ તાં શૂન્યાં દ્વારકાં ચ મહોદધિઃ ।
૨૧૨.૯/૨યદુશ્રેષ્ઠગૃહં ત્વેકં નાપ્લાવયત સાગરઃ ॥ ૨૧૨.૯॥

૨૧૨.૧૦/૧નાતિક્રામતિ ભો વિપ્રાસ્તદ્ અદ્યાપિ મહોદધિઃ ।
૨૧૨.૧૦/૨નિત્યં સંનિહિતસ્તત્ર ભગવાન્ કેશવો યતઃ ॥ ૨૧૨.૧૦॥

૨૧૨.૧૧/૧તદ્ અતીવ મહાપુણ્યં સર્વપાતકનાશનમ્ ।
૨૧૨.૧૧/૨વિષ્ણુક્રીડાન્વિતં સ્થાનં દૃષ્ટ્વા પાપાત્ પ્રમુચ્યતે ॥ ૨૧૨.૧૧॥

૨૧૨.૧૨/૧પાર્થઃ પઞ્ચનદે દેશે બહુધાન્યધનાન્વિતે ।
૨૧૨.૧૨/૨ચકાર વાસં સર્વસ્ય જનસ્ય મુનિસત્તમાઃ ॥ ૨૧૨.૧૨॥

૨૧૨.૧૩/૧તતો લોભઃ સમભવત્ પાર્થેનૈકેન ધન્વિના ।
૨૧૨.૧૩/૨દૃષ્ટ્વા સ્ત્રિયો નીયમાના દસ્યૂનાં નિહતેશ્વરાઃ ॥ ૨૧૨.૧૩॥

૨૧૨.૧૪/૧તતસ્તે પાપકર્માણો લોભોપહતચેતસઃ ।
૨૧૨.૧૪/૨આભીરા મન્ત્રયામાસુઃ સમેત્યાત્યન્તદુર્મદાઃ ॥ ૨૧૨.૧૪॥

૨૧૨.૧૫/૧આભીરા ઊચુઃ । અયમેકોઽર્જુનો ધન્વી સ્ત્રીજનં નિહતેશ્વરમ્ ।
૨૧૨.૧૫/૨નયત્યસ્માન્ અતિક્રમ્ય ધિગ્ એતત્ ક્રિયતાં બલમ્ ॥ ૨૧૨.૧૫॥

૨૧૨.૧૬/૧હત્વા ગર્વસમારૂઢો ભીષ્મદ્રોણજયદ્રથાન્ ।
૨૧૨.૧૬/૨કર્ણાદીંશ્ચ ન જાનાતિ બલં ગ્રામનિવાસિનામ્ ॥ ૨૧૨.૧૬॥

૨૧૨.૧૭/૧બલજ્યેષ્ઠાન્ નરાન્ અન્યાન્ ગ્રામ્યાંશ્ચૈવ વિશેષતઃ ।
૨૧૨.૧૭/૨સર્વાન્ એવાવજાનાતિ કિં વો બહુભિરુત્તરૈઃ ॥ ૨૧૨.૧૭॥

૨૧૨.૧૮/૧વ્યાસ ઉવાચ । તતો યષ્ટિપ્રહરણા દસ્યવો લોષ્ટહારિણઃ ।
૨૧૨.૧૮/૨સહસ્રશોઽભ્યધાવન્ત તં જનં નિહતેશ્વરમ્ ।
૨૧૨.૧૮/૩તતો નિવૃત્તઃ કૌન્તેયઃ પ્રાહાભીરાન્ હસન્ન્ ઇવ ॥ ૨૧૨.૧૮॥

૨૧૨.૧૯/૧અર્જુન ઉવાચ । નિવર્તધ્વમધર્મજ્ઞા યદીતો ન મુમૂર્ષવઃ ॥ ૨૧૨.૧૯॥

૨૧૨.૨૦/૧વ્યાસ ઉવાચ । અવજ્ઞાય વચસ્તસ્ય જગૃહુસ્તે તદા ધનમ્ ।
૨૧૨.૨૦/૨સ્ત્રીજનં ચાપિ કૌન્તેયાદ્ વિષ્વક્સેનપરિગ્રહમ્ ॥ ૨૧૨.૨૦॥

૨૧૨.૨૧/૧તતોઽર્જુનો ધનુર્દિવ્યં ગાણ્ડીવમજરં યુધિ ।
૨૧૨.૨૧/૨આરોપયિતુમારેભે ન શશાક સ વીર્યવાન્ ॥ ૨૧૨.૨૧॥

૨૧૨.૨૨/૧ચકાર સજ્જં કૃચ્છ્રાત્ તુ તદ્ અભૂચ્છિથિલં પુનઃ ।
૨૧૨.૨૨/૨ન સસ્માર તથાસ્ત્રાણિ ચિન્તયન્ન્ અપિ પાણ્ડવઃ ॥ ૨૧૨.૨૨॥

૨૧૨.૨૩/૧શરાન્ મુમોચ ચૈતેષુ પાર્થઃ શેષાન્ સ હર્ષિતઃ ।
૨૧૨.૨૩/૨ન ભેદં તે પરં ચક્રુરસ્તા ગાણ્ડીવધન્વના ॥ ૨૧૨.૨૩॥

૨૧૨.૨૪/૧વહ્નિના ચાક્ષયા દત્તાઃ શરાસ્તેઽપિ ક્ષયં યયુઃ ।
૨૧૨.૨૪/૨યુધ્યતઃ સહ ગોપાલૈરર્જુનસ્યાભવત્ ક્ષયઃ ॥ ૨૧૨.૨૪॥

૨૧૨.૨૫/૧અચિન્તયત્ તુ કૌન્તેયઃ કૃષ્ણસ્યૈવ હિ તદ્ બલમ્ ।
૨૧૨.૨૫/૨યન્ મયા શરસંઘાતૈઃ સબલા ભૂભૃતો જિતાઃ ॥ ૨૧૨.૨૫॥

૨૧૨.૨૬/૧મિષતઃ પાણ્ડુપુત્રસ્ય તતસ્તાઃ પ્રમદોત્તમાઃ ।
૨૧૨.૨૬/૨અપાકૃષ્યન્ત ચાભીરૈઃ કામાચ્ચાન્યાઃ પ્રવવ્રજુઃ ॥ ૨૧૨.૨૬॥

૨૧૨.૨૭/૧તતઃ શરેષુ ક્ષીણેષુ ધનુષ્કોટ્યા ધનંજયઃ ।
૨૧૨.૨૭/૨જઘાન દસ્યૂંસ્તે ચાસ્ય પ્રહારાઞ્ જહસુર્દ્વિજાઃ ॥ ૨૧૨.૨૭॥

૨૧૨.૨૮/૧પશ્યતસ્ત્વેવ પાર્થસ્ય વૃષ્ણ્યન્ધકવરસ્ત્રિયઃ ।
૨૧૨.૨૮/૨જગ્મુરાદાય તે મ્લેચ્છાઃ સમન્તાન્ મુનિસત્તમાઃ ॥ ૨૧૨.૨૮॥

૨૧૨.૨૯/૧તતઃ સ દુઃખિતો જિષ્ણુઃ કષ્ટં કષ્ટમિતિ બ્રુવન્ ।
૨૧૨.૨૯/૨અહો ભગવતા તેન મુક્તોઽસ્મીતિ રુરોદ વૈ ॥ ૨૧૨.૨૯॥

૨૧૨.૩૦/૧અર્જુન ઉવાચ । તદ્ ધનુસ્તાનિ ચાસ્ત્રાણિ સ રથસ્તે ચ વાજિનઃ ।
૨૧૨.૩૦/૨સર્વમેકપદે નષ્ટં દાનમશ્રોત્રિયે યથા ॥ ૨૧૨.૩૦॥

૨૧૨.૩૧/૧અહો ચાતિ બલં દૈવં વિના તેન મહાત્મના ।
૨૧૨.૩૧/૨યદ્ અસામર્થ્યયુક્તોઽહં નીચૈર્નીતઃ પરાભવમ્ ॥ ૨૧૨.૩૧॥

૨૧૨.૩૨/૧તૌ બાહૂ સ ચ મે મુષ્ટિઃ સ્થાનં તત્ સોઽસ્મિ ચાર્જુનઃ ।
૨૧૨.૩૨/૨પુણ્યેનેવ વિના તેન ગતં સર્વમસારતામ્ ॥ ૨૧૨.૩૨॥

૨૧૨.૩૩/૧મમાર્જુનત્વં ભીમસ્ય ભીમત્વં તત્કૃતં ધ્રુવમ્ ।
૨૧૨.૩૩/૨વિના તેન યદ્ આભીરૈર્જિતોઽહં કથમન્યથા ॥ ૨૧૨.૩૩॥

૨૧૨.૩૪/૧વ્યાસ ઉવાચ । ઇત્થં વદન્ યયૌ જિષ્ણુરિન્દ્રપ્રસ્થં પુરોત્તમમ્ ।
૨૧૨.૩૪/૨ચકાર તત્ર રાજાનં વજ્રં યાદવનન્દનમ્ ॥ ૨૧૨.૩૪॥

૨૧૨.૩૫/૧સ દદર્શ તતો વ્યાસં ફાલ્ગુનઃ કાનનાશ્રયમ્ ।
૨૧૨.૩૫/૨તમુપેત્ય મહાભાગં વિનયેનાભ્યવાદયત્ ॥ ૨૧૨.૩૫॥

૨૧૨.૩૬/૧તં વન્દમાનં ચરણાવવલોક્ય સુનિશ્ચિતમ્ ।
૨૧૨.૩૬/૨ઉવાચ પાર્થં વિચ્છાયઃ કથમત્યન્તમીદૃશઃ ॥ ૨૧૨.૩૬॥

૨૧૨.૩૭/૧અજારજોનુગમનં બ્રહ્મહત્યાથવા કૃતા ।
૨૧૨.૩૭/૨જયાશાભઙ્ગદુઃખી વા ભ્રષ્ટચ્છાયોઽસિ સામ્પ્રતમ્ ॥ ૨૧૨.૩૭॥

૨૧૨.૩૮/૧સાંતાનિકાદયો વા તે યાચમાના નિરાકૃતાઃ ।
૨૧૨.૩૮/૨અગમ્યસ્ત્રીરતિર્વાપિ તેનાસિ વિગતપ્રભઃ ॥ ૨૧૨.૩૮॥

૨૧૨.૩૯/૧ભુઙ્ક્તે પ્રદાય વિપ્રેભ્યો મિષ્ટમેકમથો ભવાન્ ।
૨૧૨.૩૯/૨કિં વા કૃપણવિત્તાનિ હૃતાનિ ભવતાર્જુન ॥ ૨૧૨.૩૯॥

૨૧૨.૪૦/૧કચ્ચિન્ ન સૂર્યવાતસ્ય ગોચરત્વં ગતોઽર્જુન ।
૨૧૨.૪૦/૨દુષ્ટચક્ષુર્હતો વાપિ નિઃશ્રીકઃ કથમન્યથા ॥ ૨૧૨.૪૦॥

૨૧૨.૪૧/૧સ્પૃષ્ટો નખામ્ભસા વાપિ ઘટામ્ભઃપ્રોક્ષિતોઽપિ વા ।
૨૧૨.૪૧/૨તેનાતીવાસિ વિચ્છાયો ન્યૂનૈર્વા યુધિ નિર્જિતઃ ॥ ૨૧૨.૪૧॥

૨૧૨.૪૨/૧વ્યાસ ઉવાચ । તતઃ પાર્થો વિનિઃશ્વસ્ય શ્રૂયતાં ભગવન્ન્ ઇતિ ।
૨૧૨.૪૨/૨પ્રોક્તો યથાવદ્ આચષ્ટ વિપ્રા આત્મપરાભવમ્ ॥ ૨૧૨.૪૨॥

૨૧૨.૪૩/૧અર્જુન ઉવાચ । યદ્ બલં યચ્ચ નસ્તેજો યદ્ વીર્યં યત્ પરાક્રમઃ ।
૨૧૨.૪૩/૨યા શ્રીશ્છાયા ચ નઃ સોઽસ્માન્ પરિત્યજ્ય હરિર્ગતઃ ॥ ૨૧૨.૪૩॥

૨૧૨.૪૪/૧ઇતરેણેવ મહતા સ્મિતપૂર્વાભિભાષિણા ।
૨૧૨.૪૪/૨હીના વયં મુને તેન જાતાસ્તૃણમયા ઇવ ॥ ૨૧૨.૪૪॥

૨૧૨.૪૫/૧અસ્ત્રાણાં સાયકાનાં ચ ગાણ્ડીવસ્ય તથા મમ ।
૨૧૨.૪૫/૨સારતા યાભવન્ મૂર્તા સ ગતઃ પુરુષોત્તમઃ ॥ ૨૧૨.૪૫॥

૨૧૨.૪૬/૧યસ્યાવલોકનાદ્ અસ્માઞ્ શ્રીર્જયઃ સમ્પદ્ ઉન્નતિઃ ।
૨૧૨.૪૬/૨ન તત્યાજ સ ગોવિન્દસ્ત્યક્ત્વાસ્માન્ ભગવાન્ ગતઃ ॥ ૨૧૨.૪૬॥

૨૧૨.૪૭/૧ભીષ્મદ્રોણાઙ્ગરાજાદ્યાસ્તથા દુર્યોધનાદયઃ ।
૨૧૨.૪૭/૨યત્પ્રભાવેન નિર્દગ્ધાઃ સ કૃષ્ણસ્ત્યક્તવાન્ ભુવમ્ ॥ ૨૧૨.૪૭॥

૨૧૨.૪૮/૧નિર્યૌવના હતશ્રીકા ભ્રષ્ટચ્છાયેવ મે મહી ।
૨૧૨.૪૮/૨વિભાતિ તાત નૈકોઽહં વિરહે તસ્ય ચક્રિણઃ ॥ ૨૧૨.૪૮॥

૨૧૨.૪૯/૧યસ્યાનુભાવાદ્ ભીષ્માદ્યૈર્મય્યગ્નૌ શલભાયિતમ્ ।
૨૧૨.૪૯/૨વિના તેનાદ્ય કૃષ્ણેન ગોપાલૈરસ્મિ નિર્જિતઃ ॥ ૨૧૨.૪૯॥

૨૧૨.૫૦/૧ગાણ્ડીવં ત્રિષુ લોકેષુ ખ્યાતં યદ્ અનુભાવતઃ ।
૨૧૨.૫૦/૨મમ તેન વિનાભીરૈર્લગુડૈસ્તુ તિરસ્કૃતમ્ ॥ ૨૧૨.૫૦॥

૨૧૨.૫૧/૧સ્ત્રીસહસ્રાણ્યનેકાનિ હ્યનાથાનિ મહામુને ।
૨૧૨.૫૧/૨યતતો મમ નીતાનિ દસ્યુભિર્લગુડાયુધૈઃ ॥ ૨૧૨.૫૧॥

૨૧૨.૫૨/૧આનીયમાનમાભીરૈઃ સર્વં કૃષ્ણાવરોધનમ્ ।
૨૧૨.૫૨/૨હૃતં યષ્ટિપ્રહરણૈઃ પરિભૂય બલં મમ ॥ ૨૧૨.૫૨॥

૨૧૨.૫૩/૧નિઃશ્રીકતા ન મે ચિત્રં યજ્જીવામિ તદ્ અદ્ભુતમ્ ।
૨૧૨.૫૩/૨નીચાવમાનપઙ્કાઙ્કી નિર્લજ્જોઽસ્મિ પિતામહ ॥ ૨૧૨.૫૩॥

૨૧૨.૫૪/૧વ્યાસ ઉવાચ । શ્રુત્વાહં તસ્ય તદ્ વાક્યમબ્રવં દ્વિજસત્તમાઃ ।
૨૧૨.૫૪/૨દુઃખિતસ્ય ચ દીનસ્ય પાણ્ડવસ્ય મહાત્મનઃ ॥ ૨૧૨.૫૪॥

૨૧૨.૫૫/૧અલં તે વ્રીડયા પાર્થ ન ત્વં શોચિતુમર્હસિ ।
૨૧૨.૫૫/૨અવેહિ સર્વભૂતેષુ કાલસ્ય ગતિરીદૃશી ॥ ૨૧૨.૫૫॥

૨૧૨.૫૬/૧કાલો ભવાય ભૂતાનામભવાય ચ પાણ્ડવ ।
૨૧૨.૫૬/૨કાલમૂલમિદં જ્ઞાત્વા કુરુ સ્થૈર્યમતોઽર્જુન ॥ ૨૧૨.૫૬॥

૨૧૨.૫૭/૧નદ્યઃ સમુદ્રા ગિરયઃ સકલા ચ વસુંધરા ।
૨૧૨.૫૭/૨દેવા મનુષ્યાઃ પશવસ્તરવશ્ચ સરીસૃપાઃ ॥ ૨૧૨.૫૭॥

૨૧૨.૫૮/૧સૃષ્ટાઃ કાલેન કાલેન પુનર્યાસ્યન્તિ સંક્ષયમ્ ।
૨૧૨.૫૮/૨કાલાત્મકમિદં સર્વં જ્ઞાત્વા શમમવાપ્નુહિ ॥ ૨૧૨.૫૮॥

૨૧૨.૫૯/૧યથાત્થ કૃષ્ણમાહાત્મ્યં તત્ તથૈવ ધનંજય ।
૨૧૨.૫૯/૨ભારાવતારકાર્યાર્થમવતીર્ણઃ સ મેદિનીમ્ ॥ ૨૧૨.૫૯॥

૨૧૨.૬૦/૧ભારાક્રાન્તા ધરા યાતા દેવાનાં સંનિધૌ પુરા ।

૨૧૨.૬૦/૨તદર્થમવતીર્ણોઽસૌ કામરૂપી જનાર્દનઃ ॥ ૨૧૨.૬૦॥

૨૧૨.૬૧/૧તચ્ચ નિષ્પાદિતં કાર્યમશેષા ભૂભૃતો હતાઃ ।
૨૧૨.૬૧/૨વૃષ્ણ્યન્ધકકુલં સર્વં તથા પાર્થોપસંહૃતમ્ ॥ ૨૧૨.૬૧॥

૨૧૨.૬૨/૧ન કિંચિદ્ અન્યત્ કર્તવ્યમસ્ય ભૂમિતલેઽર્જુન ।
૨૧૨.૬૨/૨તતો ગતઃ સ ભગવાન્ કૃતકૃત્યો યથેચ્છયા ॥ ૨૧૨.૬૨॥

૨૧૨.૬૩/૧સૃષ્ટિં સર્ગે કરોત્યેષ દેવદેવઃ સ્થિતિં સ્થિતૌ ।
૨૧૨.૬૩/૨અન્તે તાપસમર્થોઽયં સામ્પ્રતં વૈ યથા કૃતમ્ ॥ ૨૧૨.૬૩॥

૨૧૨.૬૪/૧તસ્માત્ પાર્થ ન સંતાપસ્ત્વયા કાર્યઃ પરાભવાત્ ।
૨૧૨.૬૪/૨ભવન્તિ ભવકાલેષુ પુરુષાણાં પરાક્રમાઃ ॥ ૨૧૨.૬૪॥

૨૧૨.૬૫/૧યતસ્ત્વયૈકેન હતા ભીષ્મદ્રોણાદયો નૃપાઃ ।
૨૧૨.૬૫/૨તેષામર્જુન કાલોત્થઃ કિં ન્યૂનાભિભવો ન સઃ ॥ ૨૧૨.૬૫॥

૨૧૨.૬૬/૧વિષ્ણોસ્તસ્યાનુભાવેન યથા તેષાં પરાભવઃ ।
૨૧૨.૬૬/૨ત્વત્તસ્તથૈવ ભવતો દસ્યુભ્યોઽન્તે તદુદ્ભવઃ ॥ ૨૧૨.૬૬॥

૨૧૨.૬૭/૧સ દેવોઽન્યશરીરાણિ સમાવિશ્ય જગત્સ્થિતિમ્ ।
૨૧૨.૬૭/૨કરોતિ સર્વભૂતાનાં નાશં ચાન્તે જગત્પતિઃ ॥ ૨૧૨.૬૭॥

૨૧૨.૬૮/૧ભવોદ્ભવે ચ કૌન્તેય સહાયસ્તે જનાર્દનઃ ।
૨૧૨.૬૮/૨ભવાન્તે ત્વદ્વિપક્ષાસ્તે કેશવેનાવલોકિતાઃ ॥ ૨૧૨.૬૮॥

૨૧૨.૬૯/૧કઃ શ્રદ્દધ્યાત્ સગાઙ્ગેયાન્ હન્યાસ્ત્વં સર્વકૌરવાન્ ।
૨૧૨.૬૯/૨આભીરેભ્યશ્ચ ભવતઃ કઃ શ્રદ્દધ્યાત્ પરાભવમ્ ॥ ૨૧૨.૬૯॥

૨૧૨.૭૦/૧પાર્થૈતત્ સર્વભૂતેષુ હરેર્લીલાવિચેષ્ટિતમ્ ।
૨૧૨.૭૦/૨ત્વયા યત્ કૌરવા ધ્વસ્તા યદ્ આભીરૈર્ભવાઞ્ જિતઃ ॥ ૨૧૨.૭૦॥

૨૧૨.૭૧/૧ગૃહીતા દસ્યુભિર્યચ્ચ રક્ષિતા ભવતા સ્ત્રિયઃ ।
૨૧૨.૭૧/૨તદ્ અપ્યહં યથાવૃત્તં કથયામિ તવાર્જુન ॥ ૨૧૨.૭૧॥

૨૧૨.૭૨/૧અષ્ટાવક્રઃ પુરા વિપ્ર ઉદવાસરતોઽભવત્ ।
૨૧૨.૭૨/૨બહૂન્ વર્ષગણાન્ પાર્થ ગૃણન્ બ્રહ્મ સનાતનમ્ ॥ ૨૧૨.૭૨॥

૨૧૨.૭૩/૧જિતેષ્વસુરસંઘેષુ મેરુપૃષ્ઠે મહોત્સવઃ ।
૨૧૨.૭૩/૨બભૂવ તત્ર ગચ્છન્ત્યો દદૃશુસ્તં સુરસ્ત્રિયઃ ॥ ૨૧૨.૭૩॥

૨૧૨.૭૪/૧રમ્ભાતિલોત્તમાદ્યાશ્ચ શતશોઽથ સહસ્રશઃ ।
૨૧૨.૭૪/૨તુષ્ટુવુસ્તં મહાત્માનં પ્રશશંસુશ્ચ પાણ્ડવ ॥ ૨૧૨.૭૪॥

૨૧૨.૭૫/૧આકણ્ઠમગ્નં સલિલે જટાભારધરં મુનિમ્ ।
૨૧૨.૭૫/૨વિનયાવનતાશ્ચૈવ પ્રણેમુઃ સ્તોત્રતત્પરાઃ ॥ ૨૧૨.૭૫॥

૨૧૨.૭૬/૧યથા યથા પ્રસન્નોઽભૂત્ તુષ્ટુવુસ્તં તથા તથા ।
૨૧૨.૭૬/૨સર્વાસ્તાઃ કૌરવશ્રેષ્ઠ વરિષ્ઠં તં દ્વિજન્મનામ્ ॥ ૨૧૨.૭૬॥

૨૧૨.૭૭/૧અષ્ટાવક્ર ઉવાચ । પ્રસન્નોઽહં મહાભાગા ભવતીનાં યદ્ ઇષ્યતે ।
૨૧૨.૭૭/૨મત્તસ્તદ્ વ્રિયતાં સર્વં પ્રદાસ્યામ્યપિ દુર્લભમ્ ॥ ૨૧૨.૭૭॥

૨૧૨.૭૮/૧વ્યાસ ઉવાચ । રમ્ભાતિલોત્તમાદ્યાશ્ચ દિવ્યાશ્ચાપ્સરસોઽબ્રુવન્ ॥ ૨૧૨.૭૮॥

૨૧૨.૭૯/૧અપ્સરસ ઊચુઃ । પ્રસન્ને ત્વય્યસમ્પ્રાપ્તં કિમસ્માકમિતિ દ્વિજાઃ ॥ ૨૧૨.૭૯॥

૨૧૨.૮૦/૧ઇતરાસ્ત્વબ્રુવન્ વિપ્ર પ્રસન્નો ભગવન્ યદિ ।
૨૧૨.૮૦/૨તદ્ ઇચ્છામઃ પતિં પ્રાપ્તું વિપ્રેન્દ્ર પુરુષોત્તમમ્ ॥ ૨૧૨.૮૦॥

૨૧૨.૮૧/૧વ્યાસ ઉવાચ । એવં ભવિષ્યતીત્યુક્ત્વા ઉત્તતાર જલાન્ મુનિઃ ।
૨૧૨.૮૧/૨તમુત્તીર્ણં ચ દદૃશુર્વિરૂપં વક્રમષ્ટધા ॥ ૨૧૨.૮૧॥

૨૧૨.૮૨/૧તં દૃષ્ટ્વા ગૂહમાનાનાં યાસાં હાસઃ સ્ફુટોઽભવત્ ।
૨૧૨.૮૨/૨તાઃ શશાપ મુનિઃ કોપમવાપ્ય કુરુનન્દન ॥ ૨૧૨.૮૨॥

૨૧૨.૮૩/૧અષ્ટાવક્ર ઉવાચ । યસ્માદ્ વિરૂપરૂપં માં મત્વા હાસાવમાનના ।
૨૧૨.૮૩/૨ભવતીભિઃ કૃતા તસ્માદ્ એષ શાપં દદામિ વઃ ॥ ૨૧૨.૮૩॥

૨૧૨.૮૪/૧મત્પ્રસાદેન ભર્તારં લબ્ધ્વા તુ પુરુષોત્તમમ્ ।
૨૧૨.૮૪/૨મચ્છાપોપહતાઃ સર્વા દસ્યુહસ્તં ગમિષ્યથ ॥ ૨૧૨.૮૪॥

૨૧૨.૮૫/૧વ્યાસ ઉવાચ । ઇત્યુદીરિતમાકર્ણ્ય મુનિસ્તાભિઃ પ્રસાદિતઃ ।
૨૧૨.૮૫/૨પુનઃ સુરેન્દ્રલોકં વૈ પ્રાહ ભૂયો ગમિષ્યથ ॥ ૨૧૨.૮૫॥

૨૧૨.૮૬/૧એવં તસ્ય મુનેઃ શાપાદ્ અષ્ટાવક્રસ્ય કેશવમ્ ।
૨૧૨.૮૬/૨ભર્તારં પ્રાપ્ય તાઃ પ્રાપ્તા દસ્યુહસ્તં વરાઙ્ગનાઃ ॥ ૨૧૨.૮૬॥

૨૧૨.૮૭/૧તત્ ત્વયા નાત્ર કર્તવ્યઃ શોકોઽલ્પોઽપિ હિ પાણ્ડવ ।
૨૧૨.૮૭/૨તેનૈવાખિલનાથેન સર્વં તદ્ ઉપસંહૃતમ્ ॥ ૨૧૨.૮૭॥

૨૧૨.૮૮/૧ભવતાં ચોપસંહારમાસન્નં તેન કુર્વતા ।

૨૧૨.૮૮/૨બલં તેજસ્તથા વીર્યં માહાત્મ્યં ચોપસંહૃતમ્ ॥ ૨૧૨.૮૮॥

૨૧૨.૮૯/૧જાતસ્ય નિયતો મૃત્યુઃ પતનં ચ તથોન્નતેઃ ।
૨૧૨.૮૯/૨વિપ્રયોગાવસાનં તુ સંયોગઃ સંચયઃ ક્ષયઃ ॥ ૨૧૨.૮૯॥

૨૧૨.૯૦/૧વિજ્ઞાય ન બુધાઃ શોકં ન હર્ષમુપયાન્તિ યે ।
૨૧૨.૯૦/૨તેષામેવેતરે ચેષ્ટાં શિક્ષન્તઃ સન્તિ તાદૃશાઃ ॥ ૨૧૨.૯૦॥

૨૧૨.૯૧/૧તસ્માત્ ત્વયા નરશ્રેષ્ઠ જ્ઞાત્વૈતદ્ ભ્રાતૃભિઃ સહ ।
૨૧૨.૯૧/૨પરિત્યજ્યાખિલં રાજ્યં ગન્તવ્યં તપસે વનમ્ ॥ ૨૧૨.૯૧॥

૨૧૨.૯૨/૧તદ્ ગચ્છ ધર્મરાજાય નિવેદ્યૈતદ્ વચો મમ ।
૨૧૨.૯૨/૨પરશ્વો ભ્રાતૃભિઃ સાર્ધં ગતિં વીર યથા કુરુ ॥ ૨૧૨.૯૨॥

૨૧૨.૯૩/૧વ્યાસ ઉવાચ । ઇત્યુક્તો ધર્મરાજં તુ સમભ્યેત્ય તથોક્તવાન્ ।
૨૧૨.૯૩/૨દૃષ્ટં ચૈવાનુભૂતં વા કથિતં તદ્ અશેષતઃ ॥ ૨૧૨.૯૩॥

૨૧૨.૯૪/૧વ્યાસવાક્યં ચ તે સર્વે શ્રુત્વાર્જુનસમીરિતમ્ ।
૨૧૨.૯૪/૨રાજ્યે પરીક્ષિતં કૃત્વા યયુઃ પાણ્ડુસુતા વનમ્ ॥ ૨૧૨.૯૪॥

૨૧૨.૯૫/૧ઇત્યેવં વો મુનિશ્રેષ્ઠા વિસ્તરેણ મયોદિતમ્ ।
૨૧૨.૯૫/૨જાતસ્ય ચ યદોર્વંશે વાસુદેવસ્ય ચેષ્ટિતમ્ ॥ ૨૧૨.૯૫॥

૨૧૩.૧/૧મુનય ઊચુઃ । અહો કૃષ્ણસ્ય માહાત્મ્યમદ્ભુતં ચાતિમાનુષમ્ ।
૨૧૩.૧/૨રામસ્ય ચ મુનિશ્રેષ્ઠ ત્વયોક્તં ભુવિ દુર્લભમ્ ॥ ૨૧૩.૧॥

૨૧૩.૨/૧ન તૃપ્તિમધિગચ્છામઃ શ઼ૃણ્વન્તો ભગવત્કથામ્ ।
૨૧૩.૨/૨તસ્માદ્ બ્રૂહિ મહાભાગ ભૂયો દેવસ્ય ચેષ્ટિતમ્ ॥ ૨૧૩.૨॥

૨૧૩.૩/૧પ્રાદુર્ભાવઃ પુરાણેષુ વિષ્ણોરમિતતેજસઃ ।
૨૧૩.૩/૨સતાં કથયતામેવ વરાહ ઇતિ નઃ શ્રુતમ્ ॥ ૨૧૩.૩॥

૨૧૩.૪/૧ન જાનીમોऽસ્ય ચરિતં ન વિધિં ન ચ વિસ્તરમ્ ।
૨૧૩.૪/૨ન કર્મગુણસદ્ભાવં ન હેતુત્વમનીષિતમ્ ॥ ૨૧૩.૪॥

૨૧૩.૫/૧કિમાત્મકો વરાહોऽસૌ કા મૂર્તિઃ કા ચ દેવતા ।
૨૧૩.૫/૨કિમાચારપ્રભાવો વા કિં વા તેન તદા કૃતમ્ ॥ ૨૧૩.૫॥

૨૧૩.૬/૧યજ્ઞાર્થે સમવેતાનાં મિષતાં ચ દ્વિજન્મનામ્ ।
૨૧૩.૬/૨મહાવરાહચરિતં સર્વલોકસુખાવહમ્ ॥ ૨૧૩.૬॥

૨૧૩.૭/૧યથા નારાયણો બ્રહ્મન્ વારાહં રૂપમાસ્થિતઃ ।
૨૧૩.૭/૨દંષ્ટ્રયા ગાં સમુદ્રસ્થામુજ્જહારારિમર્દનઃ ॥ ૨૧૩.૭॥

૨૧૩.૮/૧વિસ્તરેણૈવ કર્માણિ સર્વાણિ રિપુઘાતિનઃ ।
૨૧૩.૮/૨શ્રોતું નો વર્તતે બુદ્ધિર્હરેઃ કૃષ્ણસ્ય ધીમતઃ ॥ ૨૧૩.૮॥

૨૧૩.૯/૧કર્મણામાનુપૂર્વ્યા ચ પ્રાદુર્ભાવાશ્ચ યે વિભો ।
૨૧૩.૯/૨યા વાસ્ય પ્રકૃતિર્બ્રહ્મંસ્તાશ્ચાખ્યાતું ત્વમર્હસિ ॥ ૨૧૩.૯॥

૨૧૩.૧૦/૧વ્યાસ ઉવાચ । પ્રશ્નભારો મહાન્ એષ ભવદ્ભિઃ સમુદાહૃતઃ ।
૨૧૩.૧૦/૨યથાશક્ત્યા તુ વક્ષ્યામિ શ્રૂયતાં વૈષ્ણવં યશઃ ॥ ૨૧૩.૧૦॥

૨૧૩.૧૧/૧વિષ્ણોઃ પ્રભાવશ્રવણે દિષ્ટ્યા વો મતિરુત્થિતા ।
૨૧૩.૧૧/૨તસ્માદ્ વિષ્ણોઃ સમસ્તા વૈ શ◌ૃણુધ્વં યાઃ પ્રવૃત્તયઃ ॥ ૨૧૩.૧૧॥

૨૧૩.૧૨/૧સહસ્રાસ્યં સહસ્રાક્ષં સહસ્રચરણં ચ યમ્ ।
૨૧૩.૧૨/૨સહસ્રશિરસં દેવં સહસ્રકરમવ્યયમ્ ॥ ૨૧૩.૧૨॥

૨૧૩.૧૩/૧સહસ્રજિહ્વં ભાસ્વન્તં સહસ્રમુકુટં પ્રભુમ્ ।
૨૧૩.૧૩/૨સહસ્રદં સહસ્રાદિં સહસ્રભુજમવ્યયમ્ ॥ ૨૧૩.૧૩॥

૨૧૩.૧૪/૧હવનં સવનં ચૈવ હોતારં હવ્યમેવ ચ ।
૨૧૩.૧૪/૨પાત્રાણિ ચ પવિત્રાણિ વેદિં દીક્ષાં સમિત્ સ્રુવમ્ ॥ ૨૧૩.૧૪॥

૨૧૩.૧૫/૧સ્રુક્સોમસૂર્યમુશલં પ્રોક્ષણીં દક્ષિણાયનમ્ ।
૨૧૩.૧૫/૨અધ્વર્યું સામગં વિપ્રં સદસ્યં સદનં સદઃ ॥ ૨૧૩.૧૫॥

૨૧૩.૧૬/૧યૂપં ચક્રં ધ્રુવાં દર્વીં ચરૂંશ્ચોલૂખલાનિ ચ ।
૨૧૩.૧૬/૨પ્રાગ્વંશં યજ્ઞભૂમિં ચ હોતારં ચ પરં ચ યત્ ॥ ૨૧૩.૧૬॥

૨૧૩.૧૭/૧હ્રસ્વાણ્યતિપ્રમાણાનિ સ્થાવરાણિ ચરાણિ ચ ।
૨૧૩.૧૭/૨પ્રાયશ્ચિત્તાનિ વાર્ઘ્યં ચ સ્થણ્ડિલાનિ કુશાસ્તથા ॥ ૨૧૩.૧૭॥

૨૧૩.૧૮/૧મન્ત્રયજ્ઞવહં વહ્નિં ભાગં ભાગવહં ચ યત્ ।
૨૧૩.૧૮/૨અગ્રાસિનં સોમભુજં હુતાર્ચિષમુદાયુધમ્ ॥ ૨૧૩.૧૮॥

૨૧૩.૧૯/૧આહુર્વેદવિદો વિપ્રા યં યજ્ઞે શાશ્વતં પ્રભુમ્ ।
૨૧૩.૧૯/૨તસ્ય વિષ્ણોઃ સુરેશસ્ય શ્રીવત્સાઙ્કસ્ય ધીમતઃ ॥ ૨૧૩.૧૯॥

૨૧૩.૨૦/૧પ્રાદુર્ભાવસહસ્રાણિ સમતીતાન્યનેકશઃ ।
૨૧૩.૨૦/૨ભૂયશ્ચૈવ ભવિષ્યન્તિ હ્યેવમાહ પિતામહઃ ॥ ૨૧૩.૨૦॥

૨૧૩.૨૧/૧યત્ પૃચ્છધ્વં મહાભાગા દિવ્યાં પુણ્યામિમાં કથામ્ ।
૨૧૩.૨૧/૨પ્રાદુર્ભાવાશ્રિતાં વિષ્ણોઃ સર્વપાપહરાં શિવામ્ ॥ ૨૧૩.૨૧॥

૨૧૩.૨૨/૧શ‌ૃણુધ્વં તાં મહાભાગાસ્તદ્ગતેનાન્તરાત્મના ।
૨૧૩.૨૨/૨પ્રવક્ષ્યામ્યાનુપૂર્વ્યેણ યત્ પૃચ્છધ્વં મમાનઘાઃ ॥ ૨૧૩.૨૨॥

૨૧૩.૨૩/૧વાસુદેવસ્ય માહાત્મ્યં ચરિતં ચ મહામતેઃ ।
૨૧૩.૨૩/૨હિતાર્થં સુરમર્ત્યાનાં લોકાનાં પ્રભવાય ચ ॥ ૨૧૩.૨૩॥

૨૧૩.૨૪/૧બહુશઃ સર્વભૂતાત્મા પ્રાદુર્ભવતિ વીર્યવાન્ ।
૨૧૩.૨૪/૨પ્રાદુર્ભાવાંશ્ચ વક્ષ્યામિ પુણ્યાન્ દિવ્યાન્ ગુણાન્વિતાન્ ॥ ૨૧૩.૨૪॥

૨૧૩.૨૫/૧સુપ્તો યુગસહસ્રં યઃ પ્રાદુર્ભવતિ કાર્યતઃ ।
૨૧૩.૨૫/૨પૂર્ણે યુગસહસ્રેઽથ દેવદેવો જગત્પતિઃ ॥ ૨૧૩.૨૫॥

૨૧૩.૨૬/૧બ્રહ્મા ચ કપિલશ્ચૈવ ત્ર્યમ્બકસ્ત્રિદશાસ્તથા ।
૨૧૩.૨૬/૨દેવાઃ સપ્તર્ષયશ્ચૈવ નાગાશ્ચાપ્સરસસ્તથા ॥ ૨૧૩.૨૬॥

૨૧૩.૨૭/૧સનત્કુમારશ્ચ મહાનુભાવો ।
૨૧૩.૨૭/૨મનુર્મહાત્મા ભગવાન્ પ્રજાકરઃ ।
૨૧૩.૨૭/૩પુરાણદેવોઽથ પુરાણિ ચક્રે ।
૨૧૩.૨૭/૪પ્રદીપ્તવૈશ્વાનરતુલ્યતેજાઃ ॥ ૨૧૩.૨૭॥

૨૧૩.૨૮/૧યોઽસૌ ચાર્ણવમધ્યસ્થો નષ્ટે સ્થાવરજઙ્ગમે ।
૨૧૩.૨૮/૨નષ્ટે દેવાસુરનરે પ્રનષ્ટોરગરાક્ષસે ॥ ૨૧૩.૨૮॥

૨૧૩.૨૯/૧યોદ્ધુકામૌ દુરાધર્ષૌ તાવુભૌ મધુકૈટભૌ ।
૨૧૩.૨૯/૨હતૌ ભગવતા તેન તયોર્દત્ત્વામિતં વરમ્ ॥ ૨૧૩.૨૯॥

૨૧૩.૩૦/૧પુરા કમલનાભસ્ય સ્વપતઃ સાગરામ્ભસિ ।
૨૧૩.૩૦/૨પુષ્કરે તત્ર સમ્ભૂતા દેવાઃ સર્ષિગણાસ્તથા ॥ ૨૧૩.૩૦॥

૨૧૩.૩૧/૧એષ પૌષ્કરકો નામ પ્રાદુર્ભાવો મહાત્મનઃ ।
૨૧૩.૩૧/૨પુરાણં કથ્યતે યત્ર દેવશ્રુતિસમાહિતમ્ ॥ ૨૧૩.૩૧॥

૨૧૩.૩૨/૧વારાહસ્તુ શ્રુતિમુખઃ પ્રાદુર્ભાવો મહાત્મનઃ ।
૨૧૩.૩૨/૨યત્ર વિષ્ણુઃ સુરશ્રેષ્ઠો વારાહં રૂપમાસ્થિતઃ ॥ ૨૧૩.૩૨॥

૨૧૩.૩૩/૧વેદપાદો યૂપદંષ્ટ્રઃ ક્રતુદન્તશ્ચિતીમુખઃ ।

૨૧૩.૩૩/૨અગ્નિજિહ્વો દર્ભરોમા બ્રહ્મશીર્ષો મહાતપાઃ ॥ ૨૧૩.૩૩ ॥

૨૧૩.૩૪/૧અહોરાત્રેક્ષણો દિવ્યો વેદાઙ્ગઃ શ્રુતિભૂષણઃ ।
૨૧૩.૩૪/૨આજ્યનાસઃ સ્રુવતુણ્ડઃ સામઘોષસ્વરો મહાન્ ॥ ૨૧૩.૩૪ ॥

૨૧૩.૩૫/૧સત્યધર્મમયઃ શ્રીમાન્ ક્રમવિક્રમસત્કૃતઃ ।
૨૧૩.૩૫/૨પ્રાયશ્ચિત્તનખો ઘોરઃ પશુજાનુર્મુખાકૃતિઃ ॥ ૨૧૩.૩૫ ॥

૨૧૩.૩૬/૧ઉદ્ગતાન્ત્રો હોમલિઙ્ગો બીજૌષધિમહાફલઃ ।
૨૧૩.૩૬/૨વાદ્યન્તરાત્મા મન્ત્રસ્ફિગ્ વિકૃતઃ સોમશોણિતઃ ॥ ૨૧૩.૩૬ ॥

૨૧૩.૩૭/૧વેદિસ્કન્ધો હવિર્ગન્ધો હવ્યકવ્યાતિવેગવાન્ ।
૨૧૩.૩૭/૨પ્રાગ્વંશકાયો દ્યુતિમાન્ નાનાદીક્ષાભિરન્વિતઃ ॥ ૨૧૩.૩૭ ॥

૨૧૩.૩૮/૧દક્ષિણાહૃદયો યોગી મહાસત્ત્રમયો મહાન્ ।
૨૧૩.૩૮/૨ઉપાકર્માષ્ટરુચકઃ પ્રવર્ગ્યાવર્તભૂષણઃ ॥ ૨૧૩.૩૮ ॥

૨૧૩.૩૯/૧નાનાચ્છન્દોગતિપથો ગુહ્યોપનિષદાસનઃ ।
૨૧૩.૩૯/૨છાયાપત્નીસહાયોઽસૌ મણિશૃઙ્ગ ઇવોત્થિતઃ ॥ ૨૧૩.૩૯ ॥

૨૧૩.૪૦/૧મહીં સાગરપર્યન્તાં સશૈલવનકાનનામ્ ।
૨૧૩.૪૦/૨એકાર્ણવજલભ્રષ્ટામેકાર્ણવગતઃ પ્રભુઃ ॥ ૨૧૩.૪૦ ॥

૨૧૩.૪૧/૧દંષ્ટ્રયા યઃ સમુદ્ધૃત્ય લોકાનાં હિતકામ્યયા ।
૨૧૩.૪૧/૨સહસ્રશીર્ષો લોકાદિશ્ચકાર જગતીં પુનઃ ॥ ૨૧૩.૪૧ ॥

૨૧૩.૪૨/૧એવં યજ્ઞવરાહેણ ભૂત્વા ભૂતહિતાર્થિના ।
૨૧૩.૪૨/૨ઉદ્ધૃતા પૃથિવી દેવી સાગરામ્બુધરા પુરા ॥ ૨૧૩.૪૨ ॥

૨૧૩.૪૩/૧વારાહ એષ કથિતો નારસિંહસ્તતો દ્વિજાઃ ।
૨૧૩.૪૩/૨યત્ર ભૂત્વા મૃગેન્દ્રેણ હિરણ્યકશિપુર્હતઃ ॥ ૨૧૩.૪૩ ॥

૨૧૩.૪૪/૧પુરા કૃતયુગે નામ સુરારિર્બલદર્પિતઃ ।
૨૧૩.૪૪/૨દૈત્યાનામાદિપુરુષશ્ચકાર સુમહત્ તપઃ ॥ ૨૧૩.૪૪ ॥

૨૧૩.૪૫/૧દશ વર્ષસહસ્રાણિ શતાનિ દશ પઞ્ચ ચ ।
૨૧૩.૪૫/૨જપોપવાસનિરતસ્તસ્થૌ મૌનવ્રતસ્થિતઃ ॥ ૨૧૩.૪૫ ॥

૨૧૩.૪૬/૧તતઃ શમદમાભ્યાં ચ બ્રહ્મચર્યેણ ચૈવ હિ ।
૨૧૩.૪૬/૨પ્રીતોઽભવત્ તતસ્તસ્ય તપસા નિયમેન ચ ॥ ૨૧૩.૪૬ ॥

૨૧૩.૪૭/૧તં વૈ સ્વયમ્ભૂર્ભગવાન્ સ્વયમાગમ્ય ભો દ્વિજાઃ ।
૨૧૩.૪૭/૨વિમાનેનાર્કવર્ણેન હંસયુક્તેન ભાસ્વતા ॥ ૨૧૩.૪૭॥

૨૧૩.૪૮/૧આદિત્યૈર્વસુભિઃ સાર્ધં મરુદ્ભિર્દૈવતૈસ્તથા ।
૨૧૩.૪૮/૨રુદ્રૈર્વિશ્વસહાયૈશ્ચ યક્ષરાક્ષસકિંનરૈઃ ॥ ૨૧૩.૪૮॥

૨૧૩.૪૯/૧દિશાભિઃ પ્રદિશાભિશ્ચ નદીભિઃ સાગરૈસ્તથા ।
૨૧૩.૪૯/૨નક્ષત્રૈશ્ચ મુહૂર્તૈશ્ચ ખેચરૈશ્ચ મહાગ્રહૈઃ ॥ ૨૧૩.૪૯॥

૨૧૩.૫૦/૧દેવર્ષિભિસ્તપોવૃદ્ધૈઃ સિદ્ધૈર્વિદ્વદ્ભિરેવ ચ ।
૨૧૩.૫૦/૨રાજર્ષિભિઃ પુણ્યતમૈર્ગન્ધર્વૈરપ્સરોગણૈઃ ॥ ૨૧૩.૫૦॥

૨૧૩.૫૧/૧ચરાચરગુરુઃ શ્રીમાન્ વૃતઃ સર્વૈઃ સુરૈસ્તથા ।
૨૧૩.૫૧/૨બ્રહ્મા બ્રહ્મવિદાં શ્રેષ્ઠો દૈત્યં વચનમબ્રવીત્ ॥ ૨૧૩.૫૧॥

૨૧૩.૫૨/૧બ્રહ્મોવાચ । પ્રીતોઽસ્મિ તવ ભક્તસ્ય તપસાનેન સુવ્રત ।
૨૧૩.૫૨/૨વરં વરય ભદ્રં તે યથેષ્ટં કામમાપ્નુહિ ॥ ૨૧૩.૫૨॥

૨૧૩.૫૩/૧હિરણ્યકશિપુરુવાચ । ન દેવાસુરગન્ધર્વા ન યક્ષોરગરાક્ષસાઃ ।
૨૧૩.૫૩/૨ઋષયો વાથ માં શાપૈઃ ક્રુદ્ધા લોકપિતામહ ॥ ૨૧૩.૫૩॥

૨૧૩.૫૪/૧શપેયુસ્તપસા યુક્તા વર એષ વૃતો મયા ।
૨૧૩.૫૪/૨ન શસ્ત્રેણ ન વાસ્ત્રેણ ગિરિણા પાદપેન વા ॥ ૨૧૩.૫૪॥

૨૧૩.૫૫/૧ન શુષ્કેણ ન ચાર્દ્રેણ ન ચૈવોર્ધ્વં ન ચાપ્યધઃ ।
૨૧૩.૫૫/૨પાણિપ્રહારેણૈકેન સભૃત્યબલવાહનમ્ ॥ ૨૧૩.૫૫॥

૨૧૩.૫૬/૧યો માં નાશયિતું શક્તઃ સ મે મૃત્યુર્ભવિષ્યતિ ।
૨૧૩.૫૬/૨ભવેયમહમેવાર્કઃ સોમો વાયુર્હુતાશનઃ ॥ ૨૧૩.૫૬॥

૨૧૩.૫૭/૧સલિલં ચાન્તરિક્ષં ચ આકાશં ચૈવ સર્વશઃ ।
૨૧૩.૫૭/૨અહં ક્રોધશ્ચ કામશ્ચ વરુણો વાસવો યમઃ ।
૨૧૩.૫૭/૩ધનદશ્ચ ધનાધ્યક્ષો યક્ષઃ કિમ્પુરુષાધિપઃ ॥ ૨૧૩.૫૭॥

૨૧૩.૫૮/૧બ્રહ્મોવાચ । એતે દિવ્યા વરાસ્તાત મયા દત્તાસ્તવાદ્ભુતાઃ ।
૨૧૩.૫૮/૨સર્વાન્ કામાન્ ઇમાંસ્તાત પ્રાપ્સ્યસિ ત્વં ન સંશયઃ ॥ ૨૧૩.૫૮॥

૨૧૩.૫૯/૧વ્યાસ ઉવાચ । એવમુક્ત્વા તુ ભગવાઞ્ જગામાશુ પિતામહઃ ।
૨૧૩.૫૯/૨વૈરાજં બ્રહ્મસદનં બ્રહ્મર્ષિગણસેવિતમ્ ॥ ૨૧૩.૫૯॥

૨૧૩.૬૦/૧તતો દેવાશ્ચ નાગાશ્ચ ગન્ધર્વા મુનયસ્તથા ।

૨૧૩.૬૦/૨વરપ્રદાનં શ્રુત્વૈવ પિતામહમુપસ્થિતાઃ ॥ ૨૧૩.૬૦॥

૨૧૩.૬૧/૧દેવા ઊચુઃ । વરેણાનેન ભગવન્ બાધિષ્યતિ સ નોઽસુરઃ ।
૨૧૩.૬૧/૨તત્ પ્રસીદાશુ ભગવન્ વધોઽપ્યસ્ય વિચિન્ત્યતામ્ ॥ ૨૧૩.૬૧॥

૨૧૩.૬૨/૧ભગવન્ સર્વભૂતાનાં સ્વયમ્ભૂરાદિકૃત્ પ્રભુઃ ।
૨૧૩.૬૨/૨સ્રષ્ટા ચ હવ્યકવ્યાનામવ્યક્તં પ્રકૃતિર્ધ્રુવમ્ ॥ ૨૧૩.૬૨॥

૨૧૩.૬૩/૧વ્યાસ ઉવાચ । તતો લોકહિતં વાક્યં શ્રુત્વા દેવઃ પ્રજાપતિઃ ।
૨૧૩.૬૩/૨પ્રોવાચ ભગવાન્ વાક્યં સર્વદેવગણાંસ્તથા ॥ ૨૧૩.૬૩॥

૨૧૩.૬૪/૧બ્રહ્મોવાચ । અવશ્યં ત્રિદશાસ્તેન પ્રાપ્તવ્યં તપસઃ ફલમ્ ।
૨૧૩.૬૪/૨તપસોઽન્તે ચ ભગવાન્ વધં વિષ્ણુઃ કરિષ્યતિ ॥ ૨૧૩.૬૪॥

૨૧૩.૬૫/૧વ્યાસ ઉવાચ । એતચ્છ્રુત્વા સુરાઃ સર્વે વાક્યં પઙ્કજજન્મનઃ ।
૨૧૩.૬૫/૨સ્વાનિ સ્થાનાનિ દિવ્યાનિ જગ્મુસ્તે વૈ મુદાન્વિતાઃ ॥ ૨૧૩.૬૫॥

૨૧૩.૬૬/૧લબ્ધમાત્રે વરે ચાપિ સર્વાઃ સોઽબાધત પ્રજાઃ ।
૨૧૩.૬૬/૨હિરણ્યકશિપુર્દૈત્યો વરદાનેન દર્પિતઃ ॥ ૨૧૩.૬૬॥

૨૧૩.૬૭/૧આશ્રમેષુ મહાભાગાન્ મુનીન્ વૈ સંશિતવ્રતાન્ ।
૨૧૩.૬૭/૨સત્યધર્મરતાન્ દાન્તાંસ્તદા ધર્ષિતવાંસ્તથા ॥ ૨૧૩.૬૭॥

૨૧૩.૬૮/૧ત્રિદિવસ્થાંસ્તથા દેવાન્ પરાજિત્ય મહાબલઃ ।
૨૧૩.૬૮/૨ત્રૈલોક્યં વશમાનીય સ્વર્ગે વસતિ સોઽસુરઃ ॥ ૨૧૩.૬૮॥

૨૧૩.૬૯/૧યદા વરમદોન્મત્તો વિચરન્ દાનવો ભુવિ ।
૨૧૩.૬૯/૨યજ્ઞીયાન્ અકરોદ્ દૈત્યાન્ અયજ્ઞીયાશ્ચ દેવતાઃ ॥ ૨૧૩.૬૯॥

૨૧૩.૭૦/૧આદિત્યા વસવઃ સાધ્યા વિશ્વે ચ મરુતસ્તથા ।
૨૧૩.૭૦/૨શરણ્યં શરણં વિષ્ણુમુપતસ્થુર્મહાબલમ્ ॥ ૨૧૩.૭૦॥

૨૧૩.૭૧/૧દેવબ્રહ્મમયં યજ્ઞં બ્રહ્મદેવં સનાતનમ્ ।
૨૧૩.૭૧/૨ભૂતં ભવ્યં ભવિષ્યં ચ પ્રભું લોકનમસ્કૃતમ્ ।
૨૧૩.૭૧/૩નારાયણં વિભું દેવં શરણ્યં શરણં ગતાઃ ॥ ૨૧૩.૭૧॥

૨૧૩.૭૨/૧દેવા ઊચુઃ । ત્રાયસ્વ નોઽદ્ય દેવેશ હિરણ્યકશિપોર્ભયાત્ ।
૨૧૩.૭૨/૨ત્વં હિ નઃ પરમો દેવસ્ત્વં હિ નઃ પરમો ગુરુઃ ॥ ૨૧૩.૭૨॥

૨૧૩.૭૩/૧ત્વં હિ નઃ પરમો ધાતા બ્રહ્માદીનાં સુરોત્તમ ।
૨૧૩.૭૩/૨ઉત્ફુલ્લામલપત્રાક્ષ શત્રુપક્ષક્ષયંકર ।

૨૧૩.૭૩/૩ક્ષયાય દિતિવંશસ્ય શરણં ત્વં ભવસ્વ નઃ ॥ ૨૧૩.૭૩॥

૨૧૩.૭૪/૧વાસુદેવ ઉવાચ । ભયં ત્યજધ્વમમરા અભયં વો દદામ્યહમ્ ।
૨૧૩.૭૪/૨તથૈવ ત્રિદિવં દેવાઃ પ્રતિલપ્સ્યથ મા ચિરમ્ ॥ ૨૧૩.૭૪॥

૨૧૩.૭૫/૧એષોઽહં સગણં દૈત્યં વરદાનેન દર્પિતમ્ ।
૨૧૩.૭૫/૨અવધ્યમમરેન્દ્રાણાં દાનવેન્દ્રં નિહન્મિ તમ્ ॥ ૨૧૩.૭૫॥

૨૧૩.૭૬/૧વ્યાસ ઉવાચ । એવમુક્ત્વા તુ ભગવાન્ વિસૃજ્ય ત્રિદશેશ્વરાન્ ।
૨૧૩.૭૬/૨હિરણ્યકશિપોઃ સ્થાનમાજગામ મહાબલઃ ॥ ૨૧૩.૭૬॥

૨૧૩.૭૭/૧નરસ્યાર્ધતનું કૃત્વા સિંહસ્યાર્ધતનું પ્રભુઃ ।
૨૧૩.૭૭/૨નારસિંહેન વપુષા પાણિં સંસ્પૃશ્ય પાણિના ॥ ૨૧૩.૭૭॥

૨૧૩.૭૮/૧ઘનજીમૂતસંકાશો ઘનજીમૂતનિસ્વનઃ ।
૨૧૩.૭૮/૨ઘનજીમૂતદીપ્તૌજા જીમૂત ઇવ વેગવાન્ ॥ ૨૧૩.૭૮॥

૨૧૩.૭૯/૧દૈત્યં સોઽતિબલં દૃષ્ટ્વા દૃપ્તશાર્દૂલવિક્રમઃ ।
૨૧૩.૭૯/૨દૃપ્તૈર્દૈત્યગણૈર્ગુપ્તં હતવાન્ એકપાણિના ॥ ૨૧૩.૭૯॥

૨૧૩.૮૦/૧નૃસિંહ એષ કથિતો ભૂયોઽયં વામનઃ પરઃ ।
૨૧૩.૮૦/૨યત્ર વામનમાસ્થાય રૂપં દૈત્યવિનાશનમ્ ॥ ૨૧૩.૮૦॥

૨૧૩.૮૧/૧બલેર્બલવતો યજ્ઞે બલિના વિષ્ણુના પુરા ।
૨૧૩.૮૧/૨વિક્રમૈસ્ત્રિભિરક્ષોભ્યાઃ ક્ષોભિતાસ્તે મહાસુરાઃ ॥ ૨૧૩.૮૧॥

૨૧૩.૮૨/૧વિપ્રચિત્તિઃ શિવઃ શઙ્કુરયઃશઙ્કુસ્તથૈવ ચ ।
૨૧૩.૮૨/૨અયઃશિરા અશ્વશિરા હયગ્રીવશ્ચ વીર્યવાન્ ॥ ૨૧૩.૮૨॥

૨૧૩.૮૩/૧વેગવાન્ કેતુમાન્ ઉગ્રઃ સોગ્રવ્યગ્રો મહાસુરઃ ।
૨૧૩.૮૩/૨પુષ્કરઃ પુષ્કલશ્ચૈવ શાશ્વોઽશ્વપતિરેવ ચ ॥ ૨૧૩.૮૩॥

૨૧૩.૮૪/૧પ્રહ્લાદોઽશ્વપતિઃ કુમ્ભઃ સંહ્રાદો ગમનપ્રિયઃ ।
૨૧૩.૮૪/૨અનુહ્રાદો હરિહયો વારાહઃ સંહરોઽનુજઃ ॥ ૨૧૩.૮૪॥

૨૧૩.૮૫/૧શરભઃ શલભશ્ચૈવ કુપથઃ ક્રોધનઃ ક્રથઃ ।
૨૧૩.૮૫/૨બૃહત્કીર્તિર્મહાજિહ્વઃ શઙ્કુકર્ણો મહાસ્વનઃ ॥ ૨૧૩.૮૫॥

૨૧૩.૮૬/૧દીપ્તજિહ્વોઽર્કનયનો મૃગપાદો મૃગપ્રિયઃ ।
૨૧૩.૮૬/૨વાયુર્ગરિષ્ઠો નમુચિઃ સમ્બરો વિસ્કરો મહાન્ ॥ ૨૧૩.૮૬॥

૨૧૩.૮૭/૧ચન્દ્રહન્તા ક્રોધહન્તા ક્રોધવર્ધન એવ ચ ।
૨૧૩.૮૭/૨કાલકઃ કાલકોપશ્ચ વૃત્રઃ ક્રોધો વિરોચનઃ ॥ ૨૧૩.૮૭॥

૨૧૩.૮૮/૧ગરિષ્ઠશ્ચ વરિષ્ઠશ્ચ પ્રલમ્બનરકાવુભૌ ।
૨૧૩.૮૮/૨ઇન્દ્રતાપનવાતાપી કેતુમાન્ બલદર્પિતઃ ॥ ૨૧૩.૮૮॥

૨૧૩.૮૯/૧અસિલોમા પુલોમા ચ બાષ્કલઃ પ્રમદો મદઃ ।
૨૧૩.૮૯/૨સ્વમિશ્રઃ કાલવદનઃ કરાલઃ કેશિરેવ ચ ॥ ૨૧૩.૮૯॥

૨૧૩.૯૦/૧એકાક્ષશ્ચન્દ્રમા રાહુઃ સંહ્રાદઃ સમ્બરઃ સ્વનઃ ।
૨૧૩.૯૦/૨શતઘ્નીચક્રહસ્તાશ્ચ તથા મુશલપાણયઃ ॥ ૨૧૩.૯૦॥

૨૧૩.૯૧/૧અશ્મયન્ત્રાયુધોપેતા ભિન્દિપાલાયુધાસ્તથા ।
૨૧૩.૯૧/૨શૂલોલૂખલહસ્તાશ્ચ પરશ્વધધરાસ્તથા ॥ ૨૧૩.૯૧॥

૨૧૩.૯૨/૧પાશમુદ્ગરહસ્તાશ્ચ તથા પરિઘપાણયઃ ।
૨૧૩.૯૨/૨મહાશિલાપ્રહરણાઃ શૂલહસ્તાશ્ચ દાનવાઃ ॥ ૨૧૩.૯૨॥

૨૧૩.૯૩/૧નાનાપ્રહરણા ઘોરા નાનાવેશા મહાબલાઃ ।
૨૧૩.૯૩/૨કૂર્મકુક્કુટવક્ત્રાશ્ચ શશોલૂકમુખાસ્તથા ॥ ૨૧૩.૯૩॥

૨૧૩.૯૪/૧ખરોષ્ટ્રવદનાશ્ચૈવ વરાહવદનાસ્તથા ।
૨૧૩.૯૪/૨માર્જારશિખિવક્ત્રાશ્ચ મહાવક્ત્રાસ્તથા પરે ॥ ૨૧૩.૯૪॥

૨૧૩.૯૫/૧નક્રમેષાનનાઃ શૂરા ગોજાવિમહિષાનનાઃ ।
૨૧૩.૯૫/૨ગોધાશલ્લકિવક્ત્રાશ્ચ ક્રોષ્ટુવક્ત્રાશ્ચ દાનવાઃ ॥ ૨૧૩.૯૫॥

૨૧૩.૯૬/૧આખુદર્દુરવક્ત્રાશ્ચ ઘોરા વૃકમુખાસ્તથા ।
૨૧૩.૯૬/૨ભીમા મકરવક્ત્રાશ્ચ ક્રૌઞ્ચવક્ત્રાશ્ચ દાનવાઃ ॥ ૨૧૩.૯૬॥

૨૧૩.૯૭/૧અશ્વાનનાઃ ખરમુખા મયૂરવદનાસ્તથા ।
૨૧૩.૯૭/૨ગજેન્દ્રચર્મવસનાસ્તથા કૃષ્ણાજિનામ્બરાઃ ॥ ૨૧૩.૯૭॥

૨૧૩.૯૮/૧ચીરસંવૃતગાત્રાશ્ચ તથા નીલકવાસસઃ ।
૨૧૩.૯૮/૨ઉષ્ણીષિણો મુકુટિનસ્તથા કુણ્ડલિનોઽસુરાઃ ॥ ૨૧૩.૯૮॥

૨૧૩.૯૯/૧કિરીટિનો લમ્બશિખાઃ કમ્બુગ્રીવાઃ સુવર્ચસઃ ।
૨૧૩.૯૯/૨નાનાવેશધરા દૈત્યા નાનામાલ્યાનુલેપનાઃ ॥ ૨૧૩.૯૯॥

૨૧૩.૧૦૦/૧સ્વાન્યાયુધાનિ સંગૃહ્ય પ્રદીપ્તાનિ ચ તેજસા ।
૨૧૩.૧૦૦/૨ક્રમમાણં હૃષીકેશમુપાવર્તન્ત સર્વશઃ ॥ ૨૧૩.૧૦૦॥

૨૧૩.૧૦૧/૧પ્રમથ્ય સર્વાન્ દૈતેયાન્ પાદહસ્તતલૈર્વિભુઃ ।
૨૧૩.૧૦૧/૨રૂપં કૃત્વા મહાભીમં જહારાશુ સ મેદિનીમ્ ॥ ૨૧૩.૧૦૧॥

૨૧૩.૧૦૨/૧તસ્ય વિક્રમતો ભૂમિં ચન્દ્રાદિત્યૌ સ્તનાન્તરે ।
૨૧૩.૧૦૨/૨નભઃ પ્રક્રમમાણસ્ય નાભ્યાં કિલ તથા સ્થિતૌ ॥ ૨૧૩.૧૦૨॥

૨૧૩.૧૦૩/૧પરમાક્રમમાણસ્ય જાનુદેશે વ્યવસ્થિતૌ ।
૨૧૩.૧૦૩/૨વિષ્ણોરમિતવીર્યસ્ય વદન્ત્યેવં દ્વિજાતયઃ ॥ ૨૧૩.૧૦૩॥

૨૧૩.૧૦૪/૧હૃત્વા સ મેદિનીં કૃત્સ્નાં હત્વા ચાસુરપુંગવાન્ ।
૨૧૩.૧૦૪/૨દદૌ શક્રાય વસુધાં વિષ્ણુર્બલવતાં વરઃ ॥ ૨૧૩.૧૦૪॥

૨૧૩.૧૦૫/૧એષ વો વામનો નામ પ્રાદુર્ભાવો મહાત્મનઃ ।
૨૧૩.૧૦૫/૨વેદવિદ્‌ભિર્દ્વિજૈરેતત્ કથ્યતે વૈષ્ણવં યશઃ ॥ ૨૧૩.૧૦૫॥

૨૧૩.૧૦૬/૧ભૂયો ભૂતાત્મનો વિષ્ણોઃ પ્રાદુર્ભાવો મહાત્મનઃ ।
૨૧૩.૧૦૬/૨દત્તાત્રેય ઇતિ ખ્યાતઃ ક્ષમયા પરયા યુતઃ ॥ ૨૧૩.૧૦૬॥

૨૧૩.૧૦૭/૧તેન નષ્ટેષુ વેદેષુ પ્રક્રિયાસુ મખેષુ ચ ।
૨૧૩.૧૦૭/૨ચાતુર્વર્ણ્યે ચ સંકીર્ણે ધર્મે શિથિલતાં ગતે ॥ ૨૧૩.૧૦૭॥

૨૧૩.૧૦૮/૧અતિવર્ધતિ ચાધર્મે સત્યે નષ્ટેઽનૃતે સ્થિતે ।
૨૧૩.૧૦૮/૨પ્રજાસુ શીર્યમાણાસુ ધર્મે ચાકુલતાં ગતે ॥ ૨૧૩.૧૦૮॥

૨૧૩.૧૦૯/૧સયજ્ઞાઃ સક્રિયા વેદાઃ પ્રત્યાનીતા હિ તેન વૈ ।
૨૧૩.૧૦૯/૨ચાતુર્વર્ણ્યમસંકીર્ણં કૃતં તેન મહાત્મના ॥ ૨૧૩.૧૦૯॥

૨૧૩.૧૧૦/૧તેન હૈહયરાજસ્ય કાર્તવીર્યસ્ય ધીમતઃ ।
૨૧૩.૧૧૦/૨વરદેન વરો દત્તો દત્તાત્રેયેણ ધીમતા ॥ ૨૧૩.૧૧૦॥

૨૧૩.૧૧૧/૧એતદ્ બાહુદ્વયં યત્ તે તત્ તે મમ કૃતે નૃપ ।
૨૧૩.૧૧૧/૨શતાનિ દશ બાહૂનાં ભવિષ્યન્તિ ન સંશયઃ ॥ ૨૧૩.૧૧૧॥

૨૧૩.૧૧૨/૧પાલયિષ્યસિ કૃત્સ્નાં ચ વસુધાં વસુધેશ્વર ।
૨૧૩.૧૧૨/૨દુર્નિરીક્ષ્યોઽરિવૃન્દાનાં યુદ્ધસ્થશ્ચ ભવિષ્યસિ ॥ ૨૧૩.૧૧૨॥

૨૧૩.૧૧૩/૧એષ વો વૈષ્ણવઃ શ્રીમાન્ પ્રાદુર્ભાવોઽદ્‌ભુતઃ શુભઃ ।
૨૧૩.૧૧૩/૨ભૂયશ્ચ જામદગ્ન્યોઽયં પ્રાદુર્ભાવો મહાત્મનઃ ॥ ૨૧૩.૧૧૩॥

૨૧૩.૧૧૪/૧યત્ર બાહુસહસ્રેણ દ્વિષતાં દુર્જયં રણે ।

૨૧૩.૧૧૪/૨રામોऽર્જુનમનીકસ્થં જઘાન નૃપતિં પ્રભુઃ ॥ ૨૧૩.૧૧૪॥

૨૧૩.૧૧૫/૧રથસ્થં પાર્થિવં રામઃ પાતયિત્વાર્જુનં ભુવિ ।
૨૧૩.૧૧૫/૨ધર્ષયિત્વાર્જુનં રામઃ ક્રોશમાનં ચ મેઘવત્ ॥ ૨૧૩.૧૧૫॥

૨૧૩.૧૧૬/૧કૃત્સ્નં બાહુસહસ્રં ચ ચિચ્છેદ ભૃગુનન્દનઃ ।
૨૧૩.૧૧૬/૨પરશ્વધેન દીપ્તેન જ્ઞાતિભિઃ સહિતસ્ય વૈ ॥ ૨૧૩.૧૧૬॥

૨૧૩.૧૧૭/૧કીર્ણા ક્ષત્રિયકોટીભિર્મેરુમન્દરભૂષણા ।
૨૧૩.૧૧૭/૨ત્રિઃ સપ્તકૃત્વઃ પૃથિવી તેન નિઃક્ષત્રિયા કૃતા ॥ ૨૧૩.૧૧૭॥

૨૧૩.૧૧૮/૧કૃત્વા નિઃક્ષત્રિયાં ચૈનાં ભાર્ગવઃ સુમહાયશાઃ ।
૨૧૩.૧૧૮/૨સર્વપાપવિનાશાય વાજિમેધેન ચેષ્ટવાન્ ॥ ૨૧૩.૧૧૮॥

૨૧૩.૧૧૯/૧યસ્મિન્ યજ્ઞે મહાદાને દક્ષિણાં ભૃગુનન્દનઃ ।
૨૧૩.૧૧૯/૨મારીચાય દદૌ પ્રીતઃ કશ્યપાય વસુંધરામ્ ॥ ૨૧૩.૧૧૯॥

૨૧૩.૧૨૦/૧વારણાંસ્તુરગાગ્ શુભ્રાન્ રથાંશ્ચ રથિનાં વરઃ ।
૨૧૩.૧૨૦/૨હિરણ્યમક્ષયં ધેનુર્ગજેન્દ્રાંશ્ચ મહીપતિઃ ॥ ૨૧૩.૧૨૦॥

૨૧૩.૧૨૧/૧દદૌ તસ્મિન્ મહાયજ્ઞે વાજિમેધે મહાયશાઃ ।
૨૧૩.૧૨૧/૨અદ્યાપિ ચ હિતાર્થાય લોકાનાં ભૃગુનન્દનઃ ॥ ૨૧૩.૧૨૧॥

૨૧૩.૧૨૨/૧ચરમાણસ્તપો ઘોરં જામદગ્ન્યઃ પુનઃ પ્રભુઃ ।
૨૧૩.૧૨૨/૨આસ્તે વૈ દેવવચ્છ્રીમાન્ મહેન્દ્રે પર્વતોત્તમે ॥ ૨૧૩.૧૨૨॥

૨૧૩.૧૨૩/૧એષ વિષ્ણોઃ સુરેશસ્ય શાશ્વતસ્યાવ્યયસ્ય ચ ।
૨૧૩.૧૨૩/૨જામદગ્ન્ય ઇતિ ખ્યાતઃ પ્રાદુર્ભાવો મહાત્મનઃ ॥ ૨૧૩.૧૨૩॥

૨૧૩.૧૨૪/૧ચતુર્વિંશે યુગે વાપિ વિશ્વામિત્રપુરઃસરઃ ।
૨૧૩.૧૨૪/૨જજ્ઞે દશરથસ્યાથ પુત્રઃ પદ્માયતેક્ષણઃ ॥ ૨૧૩.૧૨૪॥

૨૧૩.૧૨૫/૧કૃત્વાત્માનં મહાબાહુશ્ચતુર્ધા પ્રભુરીશ્વરઃ ।
૨૧૩.૧૨૫/૨લોકે રામ ઇતિ ખ્યાતસ્તેજસા ભાસ્કરોપમઃ ॥ ૨૧૩.૧૨૫॥

૨૧૩.૧૨૬/૧પ્રસાદનાર્થં લોકસ્ય રક્ષસાં નિગ્રહાય ચ ।
૨૧૩.૧૨૬/૨ધર્મસ્ય ચ વિવૃદ્ધ્યર્થં જજ્ઞે તત્ર મહાયશાઃ ॥ ૨૧૩.૧૨૬॥

૨૧૩.૧૨૭/૧તમપ્યાહુર્મનુષ્યેન્દ્રં સર્વભૂતહિતે રતમ્ ।
૨૧૩.૧૨૭/૨યઃ સમાઃ સર્વધર્મજ્ઞશ્ચતુર્દશ વનેऽવસત્ ॥ ૨૧૩.૧૨૭॥

૨૧૩.૧૨૮/૧લક્ષ્મણાનુચરો રામઃ સર્વભૂતહિતે રતઃ ।

૨૧૩.૧૨૮/૨ચતુર્દશ વને તપ્ત્વા તપો વર્ષાણિ રાઘવઃ ॥ ૨૧૩.૧૨૮॥

૨૧૩.૧૨૯/૧રૂપિણી તસ્ય પાર્શ્વસ્થા સીતેતિ પ્રથિતા જને ।

૨૧૩.૧૨૯/૨પૂર્વોદિતા તુ યા લક્ષ્મીર્ભર્તારમનુગચ્છતિ ॥ ૨૧૩.૧૨૯॥

૨૧૩.૧૩૦/૧જનસ્થાને વસન્ કાર્યં ત્રિદશાનાં ચકાર સઃ ।

૨૧૩.૧૩૦/૨તસ્યાપકારિણં ક્રૂરં પૌલસ્ત્યં મનુજર્ષભઃ ॥ ૨૧૩.૧૩૦॥

૨૧૩.૧૩૧/૧સીતાયાઃ પદમન્વિચ્છન્ નિજઘાન મહાયશાઃ ।

૨૧૩.૧૩૧/૨દેવાસુરગણાનાં ચ યક્ષરાક્ષસભોગિનામ્ ॥ ૨૧૩.૧૩૧॥

૨૧૩.૧૩૨/૧યત્રાવધ્યં રાક્ષસેન્દ્રં રાવણં યુધિ દુર્જયમ્ ।

૨૧૩.૧૩૨/૨યુક્તં રાક્ષસકોટીભિર્નીલાઞ્જનચયોપમમ્ ॥ ૨૧૩.૧૩૨॥

૨૧૩.૧૩૩/૧ત્રૈલોક્યદ્રાવણં ક્રૂરં રાવણં રાક્ષસેશ્વરમ્ ।

૨૧૩.૧૩૩/૨દુર્જયં દુર્ધરં દૃપ્તં શાર્દૂલસમવિક્રમમ્ ॥ ૨૧૩.૧૩૩॥

૨૧૩.૧૩૪/૧દુર્નિરીક્ષ્યં સુરગણૈર્વરદાનેન દર્પિતમ્ ।

૨૧૩.૧૩૪/૨જઘાન સચિવૈઃ સાર્ધં સસૈન્યં રાવણં યુધિ ॥ ૨૧૩.૧૩૪॥

૨૧૩.૧૩૫/૧મહાભ્રગણસંકાશં મહાકાયં મહાબલમ્ ।

૨૧૩.૧૩૫/૨રાવણં નિજઘાનાશુ રામો ભૂતપતિઃ પુરા ॥ ૨૧૩.૧૩૫॥

૨૧૩.૧૩૬/૧સુગ્રીવસ્ય કૃતે યેન વાનરેન્દ્રો મહાબલઃ ।

૨૧૩.૧૩૬/૨વાલી વિનિહતઃ સંખ્યે સુગ્રીવશ્ચાભિષેચિતઃ ॥ ૨૧૩.૧૩૬॥

૨૧૩.૧૩૭/૧મધોશ્ચ તનયો દૃપ્તો લવણો નામ દાનવઃ ।

૨૧૩.૧૩૭/૨હતો મધુવને વીરો વરમત્તો મહાસુરઃ ॥ ૨૧૩.૧૩૭॥

૨૧૩.૧૩૮/૧યજ્ઞવિઘ્નકરૌ યેન મુનીનાં ભાવિતાત્મનામ્ ।

૨૧૩.૧૩૮/૨મારીચશ્ચ સુબાહુશ્ચ બલેન બલિનાં વરૌ ॥ ૨૧૩.૧૩૮॥

૨૧૩.૧૩૯/૧નિહતૌ ચ નિરાશૌ ચ કૃતૌ તેન મહાત્મના ।

૨૧૩.૧૩૯/૨સમરે યુદ્ધશૌણ્ડેન તથાન્યે ચાપિ રાક્ષસાઃ ॥ ૨૧૩.૧૩૯॥

૨૧૩.૧૪૦/૧વિરાધશ્ચ કબન્ધશ્ચ રાક્ષસૌ ભીમવિક્રમૌ ।

૨૧૩.૧૪૦/૨જઘાન પુરુષવ્યાઘ્રો ગન્ધર્વૌ શાપમોહિતૌ ॥ ૨૧૩.૧૪૦॥

૨૧૩.૧૪૧/૧હુતાશનાર્કાંશુતડિદ્ગુણાભૈઃ ।

૨૧૩.૧૪૧/૨પ્રતપ્તજામ્બૂનદચિત્રપુઙ્ખૈઃ ।

૨૧૩.૧૪૧/૩મહેન્દ્રવજ્રાશનિતુલ્યસારૈ ।
૨૧૩.૧૪૧/૪રિપૂન્ સ રામઃ સમરે નિજઘ્ને ॥ ૨૧૩.૧૪૧॥

૨૧૩.૧૪૨/૧તસ્મૈ દત્તાનિ શસ્ત્રાણિ વિશ્વામિત્રેણ ધીમતા ।
૨૧૩.૧૪૨/૨વધાર્થં દેવશત્રૂણાં દુર્ધર્ષાણાં સુરૈરપિ ॥ ૨૧૩.૧૪૨॥

૨૧૩.૧૪૩/૧વર્તમાને મખે યેન જનકસ્ય મહાત્મનઃ ।
૨૧૩.૧૪૩/૨ભગ્નં માહેશ્વરં ચાપં ક્રીડતા લીલયા પુરા ॥ ૨૧૩.૧૪૩॥

૨૧૩.૧૪૪/૧એતાનિ કૃત્વા કર્માણિ રામો ધર્મભૃતાં વરઃ ।
૨૧૩.૧૪૪/૨દશાશ્વમેધાઞ્ જારૂથ્યાન્ આજહાર નિરર્ગલાન્ ॥ ૨૧૩.૧૪૪॥

૨૧૩.૧૪૫/૧નાશ્રૂયન્તાશુભા વાચો નાકુલં મારુતો વવૌ ।
૨૧૩.૧૪૫/૨ન વિત્તહરણં ચાસીદ્ રામે રાજ્યં પ્રશાસતિ ॥ ૨૧૩.૧૪૫॥

૨૧૩.૧૪૬/૧પરિદેવન્તિ વિધવા નાનર્થાશ્ચ કદાચન ।
૨૧૩.૧૪૬/૨સર્વમાસીચ્છુભં તત્ર રામે રાજ્યં પ્રશાસતિ ॥ ૨૧૩.૧૪૬॥

૨૧૩.૧૪૭/૧ન પ્રાણિનાં ભયં ચાસીજ્જલાગ્ન્યનિલઘાતજમ્ ।
૨૧૩.૧૪૭/૨ન ચાપિ વૃદ્ધા બાલાનાં પ્રેતકાર્યાણિ ચક્રિરે ॥ ૨૧૩.૧૪૭॥

૨૧૩.૧૪૮/૧બ્રહ્મચર્યપરં ક્ષત્રં વિશસ્તુ ક્ષત્રિયે રતાઃ ।
૨૧૩.૧૪૮/૨શૂદ્રાશ્ચૈવ હિ વર્ણાંસ્ત્રીઞ્ શુશ્રૂષન્ત્યનહંકૃતાઃ ॥ ૨૧૩.૧૪૮॥

૨૧૩.૧૪૯/૧નાર્યો નાત્યચરન્ ભર્તૄન્ ભાર્યાં નાત્યચરત્ પતિઃ ।
૨૧૩.૧૪૯/૨સર્વમાસીજ્જગદ્ દાન્તં નિર્દસ્યુરભવન્ મહી ॥ ૨૧૩.૧૪૯॥

૨૧૩.૧૫૦/૧રામ એકોઽભવદ્ ભર્તા રામઃ પાલયિતાભવત્ ।
૨૧૩.૧૫૦/૨આસન્ વર્ષસહસ્રાણિ તથા પુત્રસહસ્રિણઃ ॥ ૨૧૩.૧૫૦॥

૨૧૩.૧૫૧/૧અરોગાઃ પ્રાણિનશ્ચાસન્ રામે રાજ્યં પ્રશાસતિ ।
૨૧૩.૧૫૧/૨દેવતાનામ્ ઋષીણાં ચ મનુષ્યાણાં ચ સર્વશઃ ॥ ૨૧૩.૧૫૧॥

૨૧૩.૧૫૨/૧પૃથિવ્યાં સમવાયોઽભૂદ્ રામે રાજ્યં પ્રશાસતિ ।
૨૧૩.૧૫૨/૨ગાથામપ્યત્ર ગાયન્તિ યે પુરાણવિદો જનાઃ ॥ ૨૧૩.૧૫૨॥

૨૧૩.૧૫૩/૧રામે નિબદ્ધતત્ત્વાર્થા માહાત્મ્યં તસ્ય ધીમતઃ ।
૨૧૩.૧૫૩/૨શ્યામો યુવા લોહિતાક્ષો દીપ્તાસ્યો મિતભાષિતઃ ॥ ૨૧૩.૧૫૩॥

૨૧૩.૧૫૪/૧આજાનુબાહુઃ સુમુખઃ સિંહસ્કન્ધો મહાભુજઃ ।
૨૧૩.૧૫૪/૨દશ વર્ષસહસ્રાણિ રામો રાજ્યમકારયત્ ॥ ૨૧૩.૧૫૪॥

૨૧૩.૧૫૫/૧ઋક્સામયજુષાં ઘોષો જ્યાઘોષશ્ચ મહાત્મનઃ ।
૨૧૩.૧૫૫/૨અવ્યુચ્છિન્નોऽભવદ્ રાષ્ટ્રે દીયતાં ભુજ્યતામિતિ ॥ ૨૧૩.૧૫૫॥

૨૧૩.૧૫૬/૧સત્ત્વવાન્ ગુણસમ્પન્નો દીપ્યમાનઃ સ્વતેજસા ।
૨૧૩.૧૫૬/૨અતિ ચન્દ્રં ચ સૂર્યં ચ રામો દાશરથિર્બભૌ ॥ ૨૧૩.૧૫૬॥

૨૧૩.૧૫૭/૧ઈજે ક્રતુશતૈઃ પુણ્યૈઃ સમાપ્તવરદક્ષિણૈઃ ।
૨૧૩.૧૫૭/૨હિત્વાયોધ્યાં દિવં યાતો રાઘવો હિ મહાબલઃ ॥ ૨૧૩.૧૫૭॥

૨૧૩.૧૫૮/૧એવમેવ મહાબાહુરિક્ષ્વાકુકુલનન્દનઃ ।
૨૧૩.૧૫૮/૨રાવણં સગણં હત્વા દિવમાચક્રમે વિભુઃ ॥ ૨૧૩.૧૫૮॥

૨૧૩.૧૫૯/૧અપરઃ કેશવસ્યાયં પ્રાદુર્ભાવો મહાત્મનઃ ।
૨૧૩.૧૫૯/૨વિખ્યાતો માથુરે કલ્પે સર્વલોકહિતાય વૈ ॥ ૨૧૩.૧૫૯॥

૨૧૩.૧૬૦/૧યત્ર શાલ્વં ચ ચૈદ્યં ચ કંસં દ્વિવિદમેવ ચ ।
૨૧૩.૧૬૦/૨અરિષ્ટં વૃષભં કેશિં પૂતનાં દૈત્યદારિકામ્ ॥ ૨૧૩.૧૬૦॥

૨૧૩.૧૬૧/૧નાગં કુવલયાપીડં ચાણૂરં મુષ્ટિકં તથા ।
૨૧૩.૧૬૧/૨દૈત્યાન્ માનુષદેહેન સૂદયામાસ વીર્યવાન્ ॥ ૨૧૩.૧૬૧॥

૨૧૩.૧૬૨/૧છિન્નં બાહુસહસ્રં ચ બાણસ્યાદ્ભુતકર્મણઃ ।
૨૧૩.૧૬૨/૨નરકશ્ચ હતઃ સંખ્યે યવનશ્ચ મહાબલઃ ॥ ૨૧૩.૧૬૨॥

૨૧૩.૧૬૩/૧હૃતાનિ ચ મહીપાનાં સર્વરત્નાનિ તેજસા ।
૨૧૩.૧૬૩/૨દુરાચારાશ્ચ નિહિતાઃ પાર્થિવા યે મહીતલે ॥ ૨૧૩.૧૬૩॥

૨૧૩.૧૬૪/૧એષ લોકહિતાર્થાય પ્રાદુર્ભાવો મહાત્મનઃ ।
૨૧૩.૧૬૪/૨કલ્કી વિષ્ણુયશા નામ શમ્ભલગ્રામસમ્ભવઃ ॥ ૨૧૩.૧૬૪॥

૨૧૩.૧૬૫/૧સર્વલોકહિતાર્થાય ભૂયો દેવો મહાયશાઃ ।
૨૧૩.૧૬૫/૨એતે ચાન્યે ચ બહવો દિવ્યા દેવગણૈર્વૃતાઃ ॥ ૨૧૩.૧૬૫॥

૨૧૩.૧૬૬/૧પ્રાદુર્ભાવાઃ પુરાણેષુ ગીયન્તે બ્રહ્મવાદિભિઃ ।
૨૧૩.૧૬૬/૨યત્ર દેવા વિમુહ્યન્તિ પ્રાદુર્ભાવાનુકીર્તને ॥ ૨૧૩.૧૬૬॥

૨૧૩.૧૬૭/૧પુરાણં વર્તતે યત્ર વેદશ્રુતિસમાહિતમ્ ।
૨૧૩.૧૬૭/૨એતદ્ ઉદ્દેશમાત્રેણ પ્રાદુર્ભાવાનુકીર્તનમ્ ॥ ૨૧૩.૧૬૭॥

૨૧૩.૧૬૮/૧કીર્તિતં કીર્તનીયસ્ય સર્વલોકગુરોર્વિભોઃ ।

૨૧૩.૧૬૮/૨પ્રીયન્તે પિતરસ્તસ્ય પ્રાદુર્ભાવાનુકીર્તનાત્ ॥ ૨૧૩.૧૬૮॥

૨૧૩.૧૬૯/૧વિષ્ણોરમિતવીર્યસ્ય યઃ શ‍ૃણોતિ કૃતાઞ્જલિઃ ॥ ૨૧૩.૧૬૯॥

૨૧૩.૧૭૦/૧એતાશ્ચ યોગેશ્વરયોગમાયાઃ ।
૨૧૩.૧૭૦/૨શ્રુત્વા નરો મુચ્યતિ સર્વપાપૈઃ ।
૨૧૩.૧૭૦/૩ઋદ્ધિં સમૃદ્ધિં વિપુલાંશ્ચ ભોગાન્ ।
૨૧૩.૧૭૦/૪પ્રાપ્નોતિ શીઘ્રં ભગવત્પ્રસાદાત્ ॥ ૨૧૩.૧૭૦॥

૨૧૩.૧૭૧/૧એવં મયા મુનિશ્રેષ્ઠા વિષ્ણોરમિતતેજસઃ ।
૨૧૩.૧૭૧/૨સર્વપાપહરાઃ પુણ્યાઃ પ્રાદુર્ભાવાઃ પ્રકીર્તિતાઃ ॥ ૨૧૩.૧૭૧॥

૨૧૪.૧/૧મુનય ઊચુઃ । ન તૃપ્તિમધિગચ્છામઃ પુણ્યધર્મામૃતસ્ય ચ ।
૨૧૪.૧/૨મુને ત્વન્મુખગીતસ્ય તથા કૌતૂહલં હિ નઃ ॥ ૨૧૪.૧॥

૨૧૪.૨/૧ઉત્પત્તિં પ્રલયં ચૈવ ભૂતાનાં કર્મણો ગતિમ્ ।
૨૧૪.૨/૨વેત્સિ સર્વં મુને તેન પૃચ્છામસ્ત્વાં મહામતિમ્ ॥ ૨૧૪.૨॥

૨૧૪.૩/૧શ્રૂયતે યમલોકસ્ય માર્ગઃ પરમદુર્ગમઃ ।
૨૧૪.૩/૨દુઃખક્લેશકરઃ શશ્વત્ સર્વભૂતભયાવહઃ ॥ ૨૧૪.૩॥

૨૧૪.૪/૧કથં તેન નરા યાન્તિ માર્ગેણ યમસાદનમ્ ।
૨૧૪.૪/૨પ્રમાણં ચૈવ માર્ગસ્ય બ્રૂહિ નો વદતાં વર ॥ ૨૧૪.૪॥

૨૧૪.૫/૧મુને પૃચ્છામ સર્વજ્ઞ બ્રૂહિ સર્વમશેષતઃ ।
૨૧૪.૫/૨કથં નરકદુઃખાનિ નાપ્નુવન્તિ નરાન્ મુને ॥ ૨૧૪.૫॥

૨૧૪.૬/૧કેનોપાયેન દાનેન ધર્મેણ નિયમેન ચ ।
૨૧૪.૬/૨માનુષસ્ય ચ યામ્યસ્ય લોકસ્ય કિયદ્ અન્તરમ્ ॥ ૨૧૪.૬॥

૨૧૪.૭/૧કથં ચ સ્વર્ગતિં યાન્તિ નરકં કેન કર્મણા ।
૨૧૪.૭/૨સ્વર્ગસ્થાનાનિ કિયન્તિ કિયન્તિ નરકાણિ ચ ॥ ૨૧૪.૭॥

૨૧૪.૮/૧કથં સુકૃતિનો યાન્તિ કથં દુષ્કૃતકારિણઃ ।
૨૧૪.૮/૨કિં રૂપં કિં પ્રમાણં વા કો વર્ણસ્તૂભયોરપિ ।
૨૧૪.૮/૩જીવસ્ય નીયમાનસ્ય યમલોકં બ્રવીહિ નઃ ॥ ૨૧૪.૮॥

૨૧૪.૯/૧વ્યાસ ઉવાચ । શ‍ૃણુધ્વં મુનિશાર્દૂલા વદતો મમ સુવ્રતાઃ ।
૨૧૪.૯/૨સંસારચક્રમજરં સ્થિતિર્યસ્ય ન વિદ્યતે ॥ ૨૧૪.૯॥

૨૧૪.૧૦/૧સોऽહં વદામિ વઃ સર્વં યમમાર્ગસ્ય નિર્ણયમ્ ।

૨૧૪.૧૦/૨ઉત્ક્રાન્તિકાલાદ્ આરભ્ય યથા નાન્યો વદિષ્યતિ ॥ ૨૧૪.૧૦॥

૨૧૪.૧૧/૧સ્વરૂપં ચૈવ માર્ગસ્ય યન્ માં પૃચ્છથ સત્તમાઃ ।
૨૧૪.૧૧/૨યમલોકસ્ય ચાધ્વાનમન્તરં માનુષસ્ય ચ ॥ ૨૧૪.૧૧॥

૨૧૪.૧૨/૧યોજનાનાં સહસ્રાણિ ષડશીતિસ્તદ્ અન્તરમ્ ।
૨૧૪.૧૨/૨તપ્તતામ્રમિવાતપ્તં તદ્ અધ્વાનમુદાહૃતમ્ ॥ ૨૧૪.૧૨॥

૨૧૪.૧૩/૧તદ્ અવશ્યં હિ ગન્તવ્યં પ્રાણિભિર્જીવસંજ્ઞકૈઃ ।
૨૧૪.૧૩/૨પુણ્યાન્ પુણ્યકૃતો યાન્તિ પાપાન્ પાપકૃતોઽધમાઃ ॥ ૨૧૪.૧૩॥

૨૧૪.૧૪/૧દ્વાવિંશતિશ્ચ નરકા યમસ્ય વિષયે સ્થિતાઃ ।
૨૧૪.૧૪/૨યેષુ દુષ્કૃતકર્માણો વિપચ્યન્તે પૃથક્ પૃથક્ ॥ ૨૧૪.૧૪॥

૨૧૪.૧૫/૧નરકો રૌરવો રૌદ્રઃ શૂકરસ્તાલ એવ ચ ।
૨૧૪.૧૫/૨કુમ્ભીપાકો મહાઘોરઃ શાલ્મલોઽથ વિમોહનઃ ॥ ૨૧૪.૧૫॥

૨૧૪.૧૬/૧કીટાદઃ કૃમિભક્ષશ્ચ નાલાભક્ષો ભ્રમસ્તથા ।
૨૧૪.૧૬/૨નદ્યઃ પૂયવહાશ્ચાન્યા રુધિરામ્ભસ્તથૈવ ચ ॥ ૨૧૪.૧૬॥

૨૧૪.૧૭/૧અગ્નિજ્વાલો મહાઘોરઃ સંદંશઃ શુનભોજનઃ ।
૨૧૪.૧૭/૨ઘોરા વૈતરણી ચૈવ અસિપત્રવનં તથા ॥ ૨૧૪.૧૭॥

૨૧૪.૧૮/૧ન તત્ર વૃક્ષચ્છાયા વા ન તડાગાઃ સરાંસિ ચ ।
૨૧૪.૧૮/૨ન વાપ્યો દીર્ઘિકા વાપિ ન કૂપો ન પ્રપા સભા ॥ ૨૧૪.૧૮॥

૨૧૪.૧૯/૧ન મણ્ડપો નાયતનં ન નદ્યો ન ચ પર્વતાઃ ।
૨૧૪.૧૯/૨ન કિંચિદ્ આશ્રમસ્થાનં વિદ્યતે તત્ર વર્ત્મનિ ॥ ૨૧૪.૧૯॥

૨૧૪.૨૦/૧યત્ર વિશ્રમતે શ્રાન્તઃ પુરુષો અતીવકર્ષિતઃ ।
૨૧૪.૨૦/૨અવશ્યમેવ ગન્તવ્યઃ સ સર્વૈસ્તુ મહાપથઃ ॥ ૨૧૪.૨૦॥

૨૧૪.૨૧/૧પ્રાપ્તે કાલે તુ સંત્યજ્ય સુહૃદ્બન્ધુધનાદિકમ્ ।
૨૧૪.૨૧/૨જરાયુજાણ્ડજાશ્ચૈવ સ્વેદજાશ્ચોદ્ભિજાસ્તથા ॥ ૨૧૪.૨૧॥

૨૧૪.૨૨/૧જઙ્ગમાજઙ્ગમાશ્ચૈવ ગમિષ્યન્તિ મહાપથમ્ ।
૨૧૪.૨૨/૨દેવાસુરમનુષ્યૈશ્ચ વૈવસ્વતવશાનુગૈઃ ॥ ૨૧૪.૨૨॥

૨૧૪.૨૩/૧સ્ત્રીપુંનપુંસકૈશ્ચૈવ પૃથિવ્યાં જીવસંજ્ઞિતૈઃ ।
૨૧૪.૨૩/૨પૂર્વાહ્ણે ચાપરાહ્ણે વા મધ્યાહ્ને વા તથા પુનઃ ॥ ૨૧૪.૨૩॥

૨૧૪.૨૪/૧સંધ્યાકાલેऽર્ધરાત્રે વા પ્રત્યૂષે વાપ્યુપસ્થિતે ।
૨૧૪.૨૪/૨વૃદ્ધૈર્વા મધ્યમૈર્વાપિ યૌવનસ્થૈસ્તથૈવ ચ ॥ ૨૧૪.૨૪॥

૨૧૪.૨૫/૧ગર્ભવાસેऽથ બાલ્યે વા ગન્તવ્યઃ સ મહાપથઃ ।
૨૧૪.૨૫/૨પ્રવાસસ્થૈર્ગૃહસ્થૈર્વા પર્વતસ્થૈઃ સ્થલેऽપિ વા ॥ ૨૧૪.૨૫॥

૨૧૪.૨૬/૧ક્ષેત્રસ્થૈર્વા જલસ્થૈર્વા ગૃહમધ્યગતૈસ્તથા ।
૨૧૪.૨૬/૨આસીનૈશ્ચાસ્થિતૈર્વાપિ શયનીયગતૈસ્તથા ॥ ૨૧૪.૨૬॥

૨૧૪.૨૭/૧જાગ્રદ્ભિર્વા પ્રસુપ્તૈર્વા ગન્તવ્યઃ સ મહાપથઃ ।
૨૧૪.૨૭/૨ઇહાનુભૂય નિર્દિષ્ટમાયુર્જન્તુઃ સ્વયં તદા ॥ ૨૧૪.૨૭॥

૨૧૪.૨૮/૧તસ્યાન્તે ચ સ્વયં પ્રાણૈરનિચ્છન્ન્ અપિ મુચ્યતે ।
૨૧૪.૨૮/૨જલમગ્નિર્વિષં શસ્ત્રં ક્ષુદ્ વ્યાધિઃ પતનં ગિરેઃ ॥ ૨૧૪.૨૮॥

૨૧૪.૨૯/૧નિમિત્તં કિંચિદ્ આસાદ્ય દેહી પ્રાણૈર્વિમુચ્યતે ।
૨૧૪.૨૯/૨વિહાય સુમહત્ કૃત્સ્નં શરીરં પાઞ્ચભૌતિકમ્ ॥ ૨૧૪.૨૯॥

૨૧૪.૩૦/૧અન્યચ્છરીરમાદત્તે યાતનીયં સ્વકર્મજમ્ ।
૨૧૪.૩૦/૨દૃઢં શરીરમાપ્નોતિ સુખદુઃખોપભુક્તયે ॥ ૨૧૪.૩૦॥

૨૧૪.૩૧/૧તેન ભુઙ્ક્તે સ કૃચ્છ્રાણિ પાપકર્તા નરો ભૃશમ્ ।
૨૧૪.૩૧/૨સુખાનિ ધાર્મિકો હૃષ્ટ ઇહ નીતો યમક્ષયે ॥ ૨૧૪.૩૧॥

૨૧૪.૩૨/૧ઊષ્મા પ્રકુપિતઃ કાયે તીવ્રવાયુસમીરિતઃ ।
૨૧૪.૩૨/૨ભિનત્તિ મર્મસ્થાનાનિ દીપ્યમાનો નિરન્ધનઃ ॥ ૨૧૪.૩૨॥

૨૧૪.૩૩/૧ઉદાનો નામ પવનસ્તતશ્ચોર્ધ્વં પ્રવર્તતે ।
૨૧૪.૩૩/૨ભુજ્યતામમ્બુભક્ષ્યાણામધોગતિનિરોધકૃત્ ॥ ૨૧૪.૩૩॥

૨૧૪.૩૪/૧તતો યેનામ્બુદાનાનિ કૃતાન્યન્નરસાસ્તથા ।
૨૧૪.૩૪/૨દત્તાઃ સ તસ્યામાહ્લાદમાપદિ પ્રતિપદ્યતે ॥ ૨૧૪.૩૪॥

૨૧૪.૩૫/૧અન્નાનિ યેન દત્તાનિ શ્રદ્ધાપૂતેન ચેતસા ।
૨૧૪.૩૫/૨સોऽપિ તૃપ્તિમવાપ્નોતિ વિનાપ્યન્નેન વૈ તદા ॥ ૨૧૪.૩૫॥

૨૧૪.૩૬/૧યેનાનૃતાનિ નોક્તાનિ પ્રીતિભેદઃ કૃતો ન ચ ।
૨૧૪.૩૬/૨આસ્તિકઃ શ્રદ્દધાનશ્ચ સુખમૃત્યું સ ગચ્છતિ ॥ ૨૧૪.૩૬॥

૨૧૪.૩૭/૧દેવબ્રાહ્મણપૂજાયાં નિરતાશ્ચાનસૂયકાઃ ।
૨૧૪.૩૭/૨શુક્લા વદાન્યા હ્રીમન્તસ્તે નરાઃ સુખમૃત્યવઃ ॥ ૨૧૪.૩૭॥

૨૧૪.૩૮/૧યઃ કામાન્ નાપિ સંરમ્ભાન્ ન દ્વેષાદ્ ધર્મમુત્સૃજેત્ ।
૨૧૪.૩૮/૨યથોક્તકારી સૌમ્યશ્ચ સ સુખં મૃત્યુમ્ ઋચ્છતિ ॥ ૨૧૪.૩૮॥

૨૧૪.૩૯/૧વારિદાસ્તૃષિતાનાં યે ક્ષુધિતાન્નપ્રદાયિનઃ ।
૨૧૪.૩૯/૨પ્રાપ્નુવન્તિ નરાઃ કાલે મૃત્યું સુખસમન્વિતમ્ ॥ ૨૧૪.૩૯॥

૨૧૪.૪૦/૧શીતં જયન્તિ ધનદાસ્તાપં ચન્દનદાયિનઃ ।
૨૧૪.૪૦/૨પ્રાણઘ્નીં વેદનાં કષ્ટાં યે ચાન્યોદ્વેગધારિણઃ ॥ ૨૧૪.૪૦॥

૨૧૪.૪૧/૧મોહં જ્ઞાનપ્રદાતારસ્તથા દીપપ્રદાસ્તમઃ ।
૨૧૪.૪૧/૨કૂટસાક્ષી મૃષાવાદી યો ગુરુર્નાનુશાસ્તિ વૈ ॥ ૨૧૪.૪૧॥

૨૧૪.૪૨/૧તે મોહમૃત્યવઃ સર્વે તથા યે વેદનિન્દકાઃ ।
૨૧૪.૪૨/૨વિભીષણાઃ પૂતિગન્ધાઃ કૂટમુદ્ગરપાણયઃ ॥ ૨૧૪.૪૨॥

૨૧૪.૪૩/૧આગચ્છન્તિ દુરાત્માનો યમસ્ય પુરુષાસ્તથા ।
૨૧૪.૪૩/૨પ્રાપ્તેષુ દૃક્પથં તેષુ જાયતે તસ્ય વેપથુઃ ॥ ૨૧૪.૪૩॥

૨૧૪.૪૪/૧ક્રન્દત્યવિરતઃ સોઽથ ભ્રાતૃમાતૃપિતૃંસ્તથા ।
૨૧૪.૪૪/૨સા તુ વાગ્ અસ્ફુટા વિપ્રા એકવર્ણા વિભાવ્યતે ॥ ૨૧૪.૪૪॥

૨૧૪.૪૫/૧દૃષ્ટિર્વિભ્રામ્યતે ત્રાસાત્ કાસાવૃષ્ટ્યત્યથાનનમ્ ।
૨૧૪.૪૫/૨તતઃ સ વેદનાવિષ્ટં તચ્છરીરં વિમુઞ્ચતિ ॥ ૨૧૪.૪૫॥

૨૧૪.૪૬/૧વાય્વગ્રસારી તદ્રૂપ+ ।દેહમન્યત્ પ્રપદ્યતે ।
૨૧૪.૪૬/૨તત્કર્મયાતનાર્થં ચ ન માતૃપિતૃસમ્ભવમ્ ॥ ૨૧૪.૪૬॥

૨૧૪.૪૭/૧તત્પ્રમાણવયોવસ્થા+ ।સંસ્થાનૈઃ પ્રાપ્યતે વ્યથા ।
૨૧૪.૪૭/૨તતો દૂતો યમસ્યાથ પાશૈર્બધ્નાતિ દારુણૈઃ ॥ ૨૧૪.૪૭॥

૨૧૪.૪૮/૧જન્તોઃ સમ્પ્રાપ્તકાલસ્ય વેદનાર્તસ્ય વૈ ભૃશમ્ ।
૨૧૪.૪૮/૨ભૂતૈઃ સંત્યક્તદેહસ્ય કણ્ઠપ્રાપ્તાનિલસ્ય ચ ॥ ૨૧૪.૪૮॥

૨૧૪.૪૯/૧શરીરાચ્ચ્યાવિતો જીવો રોરવીતિ તથોલ્બણમ્ ।
૨૧૪.૪૯/૨નિર્ગતો વાયુભૂતસ્તુ ષાટ્કૌશિકકલેવરે ॥ ૨૧૪.૪૯॥

૨૧૪.૫૦/૧માતૃભિઃ પિતૃભિશ્ચૈવ ભ્રાતૃભિર્માતુલૈસ્તથા ।
૨૧૪.૫૦/૨દારૈઃ પુત્રૈર્વયસ્યૈશ્ચ ગુરુભિસ્ત્યજ્યતે ભુવિ ॥ ૨૧૪.૫૦॥

૨૧૪.૫૧/૧દૃશ્યમાનશ્ચ તૈર્દીનૈરશ્રુપૂર્ણેક્ષણૈર્ભૃશમ્ ।

૨૧૪.૫૧/૨સ્વશરીરં સમુત્સૃજ્ય વાયુભૂતસ્તુ ગચ્છતિ ॥ ૨૧૪.૫૧॥

૨૧૪.૫૨/૧અન્ધકારમપારં ચ મહાઘોરં તમોવૃતમ્ ।
૨૧૪.૫૨/૨સુખદુઃખપ્રદાતારં દુર્ગમં પાપકર્મણામ્ ॥ ૨૧૪.૫૨॥

૨૧૪.૫૩/૧દુઃસહં ચ દુરન્તં ચ દુર્નિરીક્ષં દુરાસદમ્ ।
૨૧૪.૫૩/૨દુરાપમતિદુર્ગં ચ પાપિષ્ઠાનાં સદાહિતમ્ ॥ ૨૧૪.૫૩॥

૨૧૪.૫૪/૧કૃષ્યમાણાશ્ચ તૈર્ભૂતૈર્યામ્યૈઃ પાશૈસ્તુ સંયતાઃ ।
૨૧૪.૫૪/૨મુદ્ગરૈસ્તાડ્યમાનાશ્ચ નીયન્તે તં મહાપથમ્ ॥ ૨૧૪.૫૪॥

૨૧૪.૫૫/૧ક્ષીણાયુષં સમાલોક્ય પ્રાણિનં ચાયુષક્ષયે ।
૨૧૪.૫૫/૨નિનીષવઃ સમાયાન્તિ યમદૂતા ભયંકરાઃ ॥ ૨૧૪.૫૫॥

૨૧૪.૫૬/૧આરૂઢા યાનકાલે તુ ઋક્ષવ્યાઘ્રખરેષુ ચ ।
૨૧૪.૫૬/૨ઉષ્ટ્રેષુ વાનરેષ્વન્યે વૃશ્ચિકેષુ વૃકેષુ ચ ॥ ૨૧૪.૫૬॥

૨૧૪.૫૭/૧ઉલૂકસર્પમાર્જારં તથાન્યે ગૃધ્રવાહનાઃ ।
૨૧૪.૫૭/૨શ્યેનશ ૃગાલમારૂઢાઃ સરઘાકઙ્કવાહનાઃ ॥ ૨૧૪.૫૭॥

૨૧૪.૫૮/૧વરાહપશુવેતાલ+ ંઅહિષાસ્યાસ્તથા પરે ।
૨૧૪.૫૮/૨નાનારૂપધરા ઘોરાઃ સર્વપ્રાણિભયંકરાઃ ॥ ૨૧૪.૫૮॥

૨૧૪.૫૯/૧દીર્ઘમુષ્કાઃ કરાલાસ્યા વક્રનાસાસ્ત્રિલોચનાઃ ।
૨૧૪.૫૯/૨મહાહનુકપોલાસ્યાઃ પ્રલમ્બદશનચ્છદાઃ ॥ ૨૧૪.૫૯॥

૨૧૪.૬૦/૧નિર્ગતૈર્વિકૃતાકારૈર્દશનૈરઙ્કુરોપમૈઃ ।
૨૧૪.૬૦/૨માંસશોણિતદિગ્ધાઙ્ગા દંષ્ટ્રાભિર્ભૃશમુલ્બણૈઃ ॥ ૨૧૪.૬૦॥

૨૧૪.૬૧/૧મુખૈઃ પાતાલસદૃશૈર્જ્વલજ્જિહ્વૈર્ભયંકરૈઃ ।
૨૧૪.૬૧/૨નેત્રૈઃ સુવિકૃતાકારૈર્જ્વલત્પિઙ્ગલચઞ્ચલૈઃ ॥ ૨૧૪.૬૧॥

૨૧૪.૬૨/૧માર્જારોલૂકખદ્યોત+ ।શક્રગોપવદ્ ઉદ્ધતૈઃ ।
૨૧૪.૬૨/૨કેકરૈઃ સંકુલૈસ્સ્તબ્ધૈર્લોચનૈઃ પાવકોપમૈઃ ॥ ૨૧૪.૬૨॥

૨૧૪.૬૩/૧ભૃશમાભરણૈર્ભીમૈરાબદ્ધૈર્ભુજગોપમૈઃ ।
૨૧૪.૬૩/૨શોણાસરલગાત્રૈશ્ચ મુણ્ડમાલાવિભૂષિતૈઃ ॥ ૨૧૪.૬૩॥

૨૧૪.૬૪/૧કણ્ઠસ્થકૃષ્ણસર્પૈશ્ચ ફૂત્કારરવભીષણૈઃ ।
૨૧૪.૬૪/૨વહ્નિજ્વાલોપમૈઃ કેશૈઃ સ્તબ્ધરુક્ષૈર્ભયંકરૈઃ ॥ ૨૧૪.૬૪॥

૨૧૪.૬૫/૧બભ્રુપિઙ્ગલલોલૈશ્ચ કદ્રુશ્મશ્રુભિરાવૃતાઃ ।
૨૧૪.૬૫/૨ભુજદણ્ડૈર્મહાઘોરૈઃ પ્રલમ્બૈઃ પરિઘોપમૈઃ ॥ ૨૧૪.૬૫ ॥

૨૧૪.૬૬/૧કેચિદ્ દ્વિબાહવસ્તત્ર તથાન્યે ચ ચતુર્ભુજાઃ ।
૨૧૪.૬૬/૨દ્વિરષ્ટબાહવશ્ચાન્યે દશવિંશભુજાસ્તથા ॥ ૨૧૪.૬૬ ॥

૨૧૪.૬૭/૧અસંખ્યાતભુજાશ્ચાન્યે કેચિદ્ બાહુસહસ્રિણઃ ।
૨૧૪.૬૭/૨આયુધૈર્વિકૃતાકારૈઃ પ્રજ્વલદ્ભિર્ભયાનકૈઃ ॥ ૨૧૪.૬૭ ॥

૨૧૪.૬૮/૧શક્તિતોમરચક્રાદ્યૈઃ સુદીપ્તૈર્વિવિધાયુધૈઃ ।
૨૧૪.૬૮/૨પાશશૃઙ્ખલદણ્ડૈશ્ચ ભીષયન્તો મહાબલાઃ ॥ ૨૧૪.૬૮ ॥

૨૧૪.૬૯/૧આગચ્છન્તિ મહારૌદ્રા મર્ત્યાનામાયુષઃ ક્ષયે ।
૨૧૪.૬૯/૨ગ્રહીતું પ્રાણિનઃ સર્વે યમસ્યાજ્ઞાકરાસ્તથા ॥ ૨૧૪.૬૯ ॥

૨૧૪.૭૦/૧યત્ તચ્છરીરમાદત્તે યાતનીયં સ્વકર્મજમ્ ।
૨૧૪.૭૦/૨તદ્ અસ્ય નીયતે જન્તોર્યમસ્ય સદનં પ્રતિ ॥ ૨૧૪.૭૦ ॥

૨૧૪.૭૧/૧બદ્ધ્વા તત્ કાલપાશૈશ્ચ નિગડૈર્વજ્રશૃઙ્ખલૈઃ ।
૨૧૪.૭૧/૨તાડયિત્વા ભૃશં ક્રુદ્ધૈર્નીયતે યમકિંકરૈઃ ॥ ૨૧૪.૭૧ ॥

૨૧૪.૭૨/૧પ્રસ્ખલન્તં રુદન્તં ચ આક્રોશન્તં મુહુર્મુહુઃ ।
૨૧૪.૭૨/૨હા તાત માતઃ પુત્રેતિ વદન્તં કર્મદૂષિતમ્ ॥ ૨૧૪.૭૨ ॥

૨૧૪.૭૩/૧આહત્ય નિશિતૈઃ શૂલૈર્મુદ્ગરૈર્નિશિતૈર્ઘનૈઃ ।
૨૧૪.૭૩/૨ખડ્ગશક્તિપ્રહારૈશ્ચ વજ્રદણ્ડૈઃ સુદારુણૈઃ ॥ ૨૧૪.૭૩ ॥

૨૧૪.૭૪/૧ભર્ત્સ્યમાનો મહારાવૈર્વજ્રશક્તિસમન્વિતૈઃ ।
૨૧૪.૭૪/૨એકૈકશો ભૃશં ક્રુદ્ધૈસ્તાડયદ્ભિઃ સમન્તતઃ ॥ ૨૧૪.૭૪ ॥

૨૧૪.૭૫/૧સ મુહ્યમાનો દુઃખાર્તઃ પ્રતપંશ્ચ ઇતસ્તતઃ ।
૨૧૪.૭૫/૨આકૃષ્ય નીયતે જન્તુરધ્વાનં સુભયંકરૈઃ ॥ ૨૧૪.૭૫ ॥

૨૧૪.૭૬/૧કુશકણ્ટકવલ્મીક+ ।શઙ્કુપાષાણશર્કરે ।
૨૧૪.૭૬/૨તથા પ્રદીપ્તજ્વલને ક્ષારવજ્રશતોત્કટે ॥ ૨૧૪.૭૬ ॥

૨૧૪.૭૭/૧પ્રદીપ્તાદિત્યતપ્તેન દહ્યમાનસ્તદંશુભિઃ ।
૨૧૪.૭૭/૨કૃષ્યતે યમદૂતૈશ્ચ શિવાસંનાદભીષણૈઃ ॥ ૨૧૪.૭૭ ॥

૨૧૪.૭૮/૧વિકૃષ્યમાણસ્તૈર્ઘોરૈર્ભક્ષ્યમાણઃ શિવાશતૈઃ ।
૨૧૪.૭૮/૨પ્રયાતિ દારુણે માર્ગે પાપકર્મા યમાલયમ્ ॥ ૨૧૪.૭૮ ॥

૨૧૪.૭૯/૧ક્વચિદ્ ભીતૈઃ ક્વચિત્ ત્રસ્તૈઃ પ્રસ્ખલદ્ભિઃ ક્વચિત્ ક્વચિત્ ।
૨૧૪.૭૯/૨દુઃખેનાક્રન્દમાનૈશ્ચ ગન્તવ્યઃ સ મહાપથઃ ॥ ૨૧૪.૭૯॥

૨૧૪.૮૦/૧નિર્ભર્ત્સ્યમાનૈરુદ્વિગ્નૈર્વિદ્રુતૈર્ભયવિહ્વલૈઃ ।
૨૧૪.૮૦/૨કમ્પમાનશરીરૈસ્તુ ગન્તવ્યં જીવસંજ્ઞકૈઃ ॥ ૨૧૪.૮૦॥

૨૧૪.૮૧/૧કણ્ટકાકીર્ણમાર્ગેણ સંતપ્તસિકતેન ચ ।
૨૧૪.૮૧/૨દહ્યમાનૈસ્તુ ગન્તવ્યં નરૈર્દાનવિવર્જિતૈઃ ॥ ૨૧૪.૮૧॥

૨૧૪.૮૨/૧મેદઃશોણિતદુર્ગન્ધૈર્બસ્તગાત્રૈશ્ચ પૂગશઃ ।
૨૧૪.૮૨/૨દગ્ધસ્ફુટત્વચાકીર્ણૈર્ગન્તવ્યં જીવઘાતકૈઃ ॥ ૨૧૪.૮૨॥

૨૧૪.૮૩/૧કૂજદ્ભિઃ ક્રન્દમાનૈશ્ચ વિક્રોશદ્ભિશ્ચ વિસ્વરમ્ ।
૨૧૪.૮૩/૨વેદનાર્તૈશ્ચ સદ્ભિશ્ચ ગન્તવ્યં જીવઘાતકૈઃ ॥ ૨૧૪.૮૩॥

૨૧૪.૮૪/૧શક્તિભિર્ભિન્દિપાલૈશ્ચ ખડ્ગતોમરસાયકૈઃ ।
૨૧૪.૮૪/૨ભિદ્યદ્ભિસ્તીક્ષ્ણશૂલાગ્રૈર્ગન્તવ્યં જીવઘાતકૈઃ ॥ ૨૧૪.૮૪॥

૨૧૪.૮૫/૧શ્વાનૈર્વ્યાઘ્રૈર્વૃકૈઃ કઙ્કૈર્ભક્ષ્યમાણૈશ્ચ પાપિભિઃ ॥ ૨૧૪.૮૫॥

૨૧૪.૮૬/૧કૃન્તદ્ભિઃ ક્રકચાઘાતૈર્ગન્તવ્યં માંસખાદિભિઃ ।
૨૧૪.૮૬/૨મહિષર્ષભશ◌ૃઙ્ગાગ્રૈર્ભિદ્યમાનૈઃ સમન્તતઃ ॥ ૨૧૪.૮૬॥

૨૧૪.૮૭/૧ઉલ્લિખદ્ભિઃ શૂકરૈશ્ચ ગન્તવ્યં માંસખાદકૈઃ ।
૨૧૪.૮૭/૨સૂચીભ્રમરકાકોલ+ ◌ંઅક્ષિકાભિશ્ચ સંઘશઃ ॥ ૨૧૪.૮૭॥

૨૧૪.૮૮/૧ભુજ્યમાનૈશ્ચ ગન્તવ્યં પાપિષ્ઠૈર્મધુઘાતકૈઃ ।
૨૧૪.૮૮/૨વિશ્વસ્તં સ્વામિનં મિત્રં સ્ત્રિયં વા યસ્તુ ઘાતયેત્ ॥ ૨૧૪.૮૮॥

૨૧૪.૮૯/૧શસ્ત્રૈર્નિકૃત્યમાનૈશ્ચ ગન્તવ્યં ચાતુરૈર્નરૈઃ ।
૨૧૪.૮૯/૨ઘાતયન્તિ ચ યે જન્તૂંસ્તાડયન્તિ નિરાગસઃ ॥ ૨૧૪.૮૯॥

૨૧૪.૯૦/૧રાક્ષસૈર્ભક્ષ્યમાણાસ્તે યાન્તિ યામ્યપથં નરાઃ ।
૨૧૪.૯૦/૨યે હરન્તિ પરસ્ત્રીણાં વરપ્રાવરણાનિ ચ ॥ ૨૧૪.૯૦॥

૨૧૪.૯૧/૧તે યાન્તિ વિદ્રુતા નગ્નાઃ પ્રેતીભૂતા યમાલયમ્ ।
૨૧૪.૯૧/૨વાસો ધાન્યં હિરણ્યં વા ગૃહક્ષેત્રમથાપિ વા ॥ ૨૧૪.૯૧॥

૨૧૪.૯૨/૧યે હરન્તિ દુરાત્માનઃ પાપિષ્ઠાઃ પાપકર્મિણઃ ।
૨૧૪.૯૨/૨પાષાણૈર્લગુડૈર્દણ્ડૈસ્તાડ્યમાનૈસ્તુ જર્જરૈઃ ॥ ૨૧૪.૯૨॥

૨૧૪.૯૩/૧વહદ્ભિઃ શોણિતં ભૂરિ ગન્તવ્યં તુ યમાલયમ્ ।

૨૧૪.૯૩/૨બ્રહ્મસ્વં યે હરન્તીહ નરા નરકનિર્ભયાઃ ॥ ૨૧૪.૯૩ ॥

૨૧૪.૯૪/૧તાડયન્તિ તથા વિપ્રાન્ આક્રોશન્તિ નરાધમાઃ ।

૨૧૪.૯૪/૨શુષ્કકાષ્ઠનિબદ્ધાસ્તે છિન્નકર્ણાક્ષિનાસિકાઃ ॥ ૨૧૪.૯૪ ॥

૨૧૪.૯૫/૧પૂયશોણિતદિગ્ધાસ્તે કાલગૃધ્રૈશ્ચ જમ્બુકૈઃ ।

૨૧૪.૯૫/૨કિંકરૈર્ભીષણૈશ્ચણ્ડૈસ્તાડ્યમાનાશ્ચ દારુણૈઃ ॥ ૨૧૪.૯૫ ॥

૨૧૪.૯૬/૧વિક્રોશમાના ગચ્છન્તિ પાપિનસ્તે યમાલયમ્ ।

૨૧૪.૯૬/૨એવં પરમદુર્ધર્ષમધ્વાનં જ્વલનપ્રભમ્ ॥ ૨૧૪.૯૬ ॥

૨૧૪.૯૭/૧રૌરવં દુર્ગવિષમં નિર્દિષ્ટં માનુષસ્ય ચ ।

૨૧૪.૯૭/૨પ્રતપ્તતામ્રવર્ણાભં વહ્નિજ્વાલાસ્ફુલિઙ્ગવત્ ॥ ૨૧૪.૯૭ ॥

૨૧૪.૯૮/૧કુરણ્ટકણ્ટકાકીર્ણં પૃથુવિકટતાડનૈઃ ।

૨૧૪.૯૮/૨શક્તિવજ્રૈશ્ચ સંકીર્ણમુજ્જ્વલં તીવ્રકણ્ટકમ્ ॥ ૨૧૪.૯૮ ॥

૨૧૪.૯૯/૧અઙ્ગારવાલુકામિશ્રં વહ્નિકીટકદુર્ગમમ્ ।

૨૧૪.૯૯/૨જ્વાલામાલાકુલં રૌદ્રં સૂર્યરશ્મિપ્રતાપિતમ્ ॥ ૨૧૪.૯૯ ॥

૨૧૪.૧૦૦/૧અધ્વાનં નીયતે દેહી કૃષ્યમાણઃ સુનિષ્ઠુરૈઃ ।

૨૧૪.૧૦૦/૨યદૈવ ક્રન્દતે જન્તુર્દુઃખાર્તઃ પતિતઃ ક્વચિત્ ॥ ૨૧૪.૧૦૦ ॥

૨૧૪.૧૦૧/૧તદૈવાહન્યતે સર્વૈરાયુધૈર્યમકિંકરૈઃ ।

૨૧૪.૧૦૧/૨એવં સંતાડ્યમાનશ્ચ લુબ્ધઃ પાપેષુ યોઽનયઃ ॥ ૨૧૪.૧૦૧ ॥

૨૧૪.૧૦૨/૧અવશો નીયતે જન્તુર્દુર્ધરૈર્યમકિંકરૈઃ ।

૨૧૪.૧૦૨/૨સર્વૈરેવ હિ ગન્તવ્યમધ્વાનં તત્ સુદુર્ગમમ્ ॥ ૨૧૪.૧૦૨ ॥

૨૧૪.૧૦૩/૧નીયતે વિવિધૈર્ઘોરૈર્યમદૂતૈરવજ્ઞયા ।

૨૧૪.૧૦૩/૨નીત્વા સુદારુણં માર્ગં પ્રાણિનં યમકિંકરૈઃ ॥ ૨૧૪.૧૦૩ ॥

૨૧૪.૧૦૪/૧પ્રવેશ્યતે પુરીં ઘોરાં તામ્રાયસમયીં દ્વિજાઃ ।

૨૧૪.૧૦૪/૨સા પુરી વિપુલાકારા લક્ષયોજનમાયતા ॥ ૨૧૪.૧૦૪ ॥

૨૧૪.૧૦૫/૧ચતુરસ્રા વિનિર્દિષ્ટા ચતુર્દ્વારવતી શુભા ।

૨૧૪.૧૦૫/૨પ્રાકારાઃ કાઞ્ચનાસ્તસ્યા યોજનાયુતમુચ્છ્રિતાઃ ॥ ૨૧૪.૧૦૫ ॥

૨૧૪.૧૦૬/૧ઇન્દ્રનીલમહાનીલ+ ।પદ્મરાગોપશોભિતા ।

૨૧૪.૧૦૬/૨સા પુરી વિવિધૈઃ સંઘૈર્ઘોરા ઘોરૈઃ સમાકુલા ॥ ૨૧૪.૧૦૬॥

૨૧૪.૧૦૭/૧દેવદાનવગન્ધર્વૈર્યક્ષરાક્ષસપન્નગૈઃ ।
૨૧૪.૧૦૭/૨પૂર્વદ્વારં શુભં તસ્યાઃ પતાકાશતશોભિતમ્ ॥ ૨૧૪.૧૦૭॥

૨૧૪.૧૦૮/૧વજ્રેન્દ્રનીલવૈદૂર્ય+ ંઉક્તાફલવિભૂષિતમ્ ।
૨૧૪.૧૦૮/૨ગીતનૃત્યૈઃ સમાકીર્ણં ગન્ધર્વાપ્સરસાં ગણૈઃ ॥ ૨૧૪.૧૦૮॥

૨૧૪.૧૦૯/૧પ્રવેશસ્તેન દેવાનામ્ ઋષીણાં યોગિનાં તથા ।
૨૧૪.૧૦૯/૨ગન્ધર્વસિદ્ધયક્ષાણાં વિદ્યાધરવિસર્પિણામ્ ॥ ૨૧૪.૧૦૯॥

૨૧૪.૧૧૦/૧ઉત્તરં નગરદ્વારં ઘણ્ટાચામરભૂષિતમ્ ।
૨૧૪.૧૧૦/૨છત્રચામરવિન્યાસં નાનારત્નૈરલંકૃતમ્ ॥ ૨૧૪.૧૧૦॥

૨૧૪.૧૧૧/૧વીણારેણુરવૈ રમ્યૈર્ગીતમઙ્ગલનાદિતૈઃ ।
૨૧૪.૧૧૧/૨ઋગ્યજુઃસામનિર્ઘોષૈર્મુનિવૃન્દસમાકુલમ્ ॥ ૨૧૪.૧૧૧॥

૨૧૪.૧૧૨/૧વિશન્તિ યેન ધર્મજ્ઞાઃ સત્યવ્રતપરાયણાઃ ।
૨૧૪.૧૧૨/૨ગ્રીષ્મે વારિપ્રદા યે ચ શીતે ચાગ્નિપ્રદા નરાઃ ॥ ૨૧૪.૧૧૨॥

૨૧૪.૧૧૩/૧શ્રાન્તસંવાહકા યે ચ પ્રિયવાદરતાશ્ચ યે ।
૨૧૪.૧૧૩/૨યે ચ દાનરતાઃ શૂરા માતાપિતૃપરાશ્ચ યે ॥ ૨૧૪.૧૧૩॥

૨૧૪.૧૧૪/૧દ્વિજશુશ્રૂષણે યુક્તા નિત્યં યેઽતિથિપૂજકાઃ ।
૨૧૪.૧૧૪/૨પશ્ચિમં તુ મહાદ્વારં પુર્યા રત્નૈર્વિભૂષિતમ્ ॥ ૨૧૪.૧૧૪॥

૨૧૪.૧૧૫/૧વિચિત્રમણિસોપાનં તોમરૈઃ સમલંકૃતમ્ ।
૨૧૪.૧૧૫/૨ભેરીમૃદઙ્ગસંનાદૈઃ શઙ્ખકાહલનાદિતમ્ ॥ ૨૧૪.૧૧૫॥

૨૧૪.૧૧૬/૧સિદ્ધવૃન્દૈઃ સદા હૃષ્ટૈર્મઙ્ગલૈઃ પ્રણિનાદિતમ્ ।
૨૧૪.૧૧૬/૨પ્રવેશસ્તેન હૃષ્ટાનાં શિવભક્તિમતાં નૃણામ્ ॥ ૨૧૪.૧૧૬॥

૨૧૪.૧૧૭/૧સર્વતીર્થપ્લુતા યે ચ પઞ્ચાગ્નેર્યે ચ સેવકાઃ ।
૨૧૪.૧૧૭/૨પ્રસ્થાને યે મૃતા વીરા મૃતાઃ કાલઞ્જરે ગિરૌ ॥ ૨૧૪.૧૧૭॥

૨૧૪.૧૧૮/૧અગ્નૌ વિપન્ના યે વીરાઃ સાધિતં યૈરનાશકમ્ ।
૨૧૪.૧૧૮/૨યે સ્વામિમિત્રલોકાર્થે ગોગ્રહે સંકુલે હતાઃ ॥ ૨૧૪.૧૧૮॥

૨૧૪.૧૧૯/૧તે વિશન્તિ નરાઃ શૂરાઃ પશ્ચિમેન તપોધનાઃ ।
૨૧૪.૧૧૯/૨પુર્યાં તસ્યા મહાઘોરં સર્વસત્ત્વભયંકરમ્ ॥ ૨૧૪.૧૧૯॥

૨૧૪.૧૨૦/૧હાહાકારસમાક્રુષ્ટં દક્ષિણં દ્વારમીદૃશમ્ ।
૨૧૪.૧૨૦/૨અન્ધકારસમાયુક્તં તીક્ષ્ણશ઼ૃઙ્ગૈઃ સમન્વિતમ્ ॥ ૨૧૪.૧૨૦॥

૨૧૪.૧૨૧/૧કણ્ટકૈર્વૃશ્ચિકૈઃ સર્પૈર્વજ્રકીટૈઃ સુદુર્ગમૈઃ ।
૨૧૪.૧૨૧/૨વિલુમ્પદ્ભિર્વૃકૈર્વ્યાઘ્રૈરૃક્ષૈઃ સિંહૈઃ સજમ્બુકૈઃ ॥ ૨૧૪.૧૨૧॥

૨૧૪.૧૨૨/૧શ્વાનમાર્જારગૃધ્રૈશ્ચ સજ્વાલકવલૈર્મુખૈઃ ।
૨૧૪.૧૨૨/૨પ્રવેશસ્તેન વૈ નિત્યં સર્વેષામપકારિણામ્ ॥ ૨૧૪.૧૨૨॥

૨૧૪.૧૨૩/૧યે ઘાતયન્તિ વિપ્રાન્ ગા બાલં વૃદ્ધં તથાતુરમ્ ।
૨૧૪.૧૨૩/૨શરણાગતં વિશ્વસ્તં સ્ત્રિયં મિત્રં નિરાયુધમ્ ॥ ૨૧૪.૧૨૩॥

૨૧૪.૧૨૪/૧યેઽગમ્યાગામિનો મૂઢાઃ પરદ્રવ્યાપહારિણઃ ।
૨૧૪.૧૨૪/૨નિક્ષેપસ્યાપહર્તારો વિષવહ્નિપ્રદાશ્ચ યે ॥ ૨૧૪.૧૨૪॥

૨૧૪.૧૨૫/૧પરભૂમિં ગૃહં શય્યાં વસ્ત્રાલંકારહારિણઃ ।
૨૧૪.૧૨૫/૨પરરન્ધ્રેષુ યે ક્રૂરા યે સદાનૃતવાદિનઃ ॥ ૨૧૪.૧૨૫॥

૨૧૪.૧૨૬/૧ગ્રામરાષ્ટ્રપુરસ્થાને મહાદુઃખપ્રદા હિ યે ।
૨૧૪.૧૨૬/૨કૂટસાક્ષિપ્રદાતારઃ કન્યાવિક્રયકારકાઃ ॥ ૨૧૪.૧૨૬॥

૨૧૪.૧૨૭/૧અભક્ષ્યભક્ષણરતા યે ગચ્છન્તિ સુતાં સ્નુષામ્ ।
૨૧૪.૧૨૭/૨માતરં પિતરં ચૈવ યે વદન્તિ ચ પૌરુષમ્ ॥ ૨૧૪.૧૨૭॥

૨૧૪.૧૨૮/૧અન્યે યે ચૈવ નિર્દિષ્ટા મહાપાતકકારિણઃ ।
૨૧૪.૧૨૮/૨દક્ષિણેન તુ તે સર્વે દ્વારેણ પ્રવિશન્તિ વૈ ॥ ૨૧૪.૧૨૮॥

૨૧૪.૧૨૯/૦મુનય ઊચુઃ । ન તૃપ્તિમધિગચ્છામઃ પુણ્યધર્મામૃતસ્ય ચ ।
૨૧૪.૧૩૦/૦મુને ત્વન્મુખગીતસ્ય તથા કૌતૂહલં હિ નઃ ॥ ૨૧૪.૧॥

૨૧૪.૧૩૧/૦ઉત્પત્તિં પ્રલયં ચૈવ ભૂતાનાં કર્મણો ગતિમ્ ।
૨૧૪.૧૩૨/૦વેત્સિ સર્વં મુને તેન પૃચ્છામસ્ત્વાં મહામતિમ્ ॥ ૨૧૪.૨॥

૨૧૪.૧૩૩/૦શ્રૂયતે યમલોકસ્ય માર્ગઃ પરમદુર્ગમઃ ।
૨૧૪.૧૩૪/૦દુઃખક્લેશકરઃ શશ્વત્ સર્વભૂતભયાવહઃ ॥ ૨૧૪.૩॥

૨૧૪.૧૩૫/૦કથં તેન નરા યાન્તિ માર્ગેણ યમસાદનમ્ ।
૨૧૪.૧૩૬/૦પ્રમાણં ચૈવ માર્ગસ્ય બ્રૂહિ નો વદતાં વર ॥ ૨૧૪.૪॥

૨૧૪.૧૩૭/૦મુને પૃચ્છામ સર્વજ્ઞ બ્રૂહિ સર્વમશેષતઃ ।
૨૧૪.૧૩૮/૦કથં નરકદુઃખાનિ નાપ્નુવન્તિ નરાન્ મુને ॥ ૨૧૪.૫॥

૨૧૪.૧૩૯/૦કેનોપાયેન દાનેન ધર્મેણ નિયમેન ચ ।
૨૧૪.૧૪૦/૦માનુષસ્ય ચ યામ્યસ્ય લોકસ્ય કિયદ્ અન્તરમ્ ॥ ૨૧૪.૬॥

૨૧૪.૧૪૧/૦કથં ચ સ્વર્ગતિં યાન્તિ નરકં કેન કર્મણા ।
૨૧૪.૧૪૨/૦સ્વર્ગસ્થાનાનિ કિયન્તિ કિયન્તિ નરકાણિ ચ ॥ ૨૧૪.૭॥

૨૧૪.૧૪૩/૦કથં સુકૃતિનો યાન્તિ કથં દુષ્કૃતકારિણઃ ।
૨૧૪.૧૪૪/૦કિં રૂપં કિં પ્રમાણં વા કો વર્ણસ્તૂભયોરપિ ।
૨૧૪.૧૪૫/૦જીવસ્ય નીયમાનસ્ય યમલોકં બ્રવીહિ નઃ ॥ ૨૧૪.૮॥

૨૧૪.૧૪૬/૦વ્યાસ ઉવાચ । શ‍ૃણુધ્વં મુનિશાર્દૂલા વદતો મમ સુવ્રતાઃ ।
૨૧૪.૧૪૭/૦સંસારચક્રમજરં સ્થિતિર્યસ્ય ન વિદ્યતે ॥ ૨૧૪.૯॥

૨૧૪.૧૪૮/૦સોઽહં વદામિ વઃ સર્વં યમમાર્ગસ્ય નિર્ણયમ્ ।
૨૧૪.૧૪૯/૦ઉત્ક્રાન્તિકાલાદ્ આરભ્ય યથા નાન્યો વદિષ્યતિ ॥ ૨૧૪.૧૦॥

૨૧૪.૧૫૦/૦સ્વરૂપં ચૈવ માર્ગસ્ય યન્ માં પૃચ્છથ સત્તમાઃ ।
૨૧૪.૧૫૧/૦યમલોકસ્ય ચાધ્વાનમન્તરં માનુષસ્ય ચ ॥ ૨૧૪.૧૧॥

૨૧૪.૧૫૨/૦યોજનાનાં સહસ્રાણિ ષડશીતિસ્તદ્ અન્તરમ્ ।
૨૧૪.૧૫૩/૦તપ્તતામ્રમિવાતપ્તં તદ્ અધ્વાનમુદાહૃતમ્ ॥ ૨૧૪.૧૨॥

૨૧૪.૧૫૪/૦તદ્ અવશ્યં હિ ગન્તવ્યં પ્રાણિભિર્જીવસંજ્ઞકૈઃ ।
૨૧૪.૧૫૫/૦પુણ્યાન્ પુણ્યકૃતો યાન્તિ પાપાન્ પાપકૃતોઽધમાઃ ॥ ૨૧૪.૧૩॥

૨૧૪.૧૫૬/૦દ્વાવિંશતિશ્ચ નરકા યમસ્ય વિષયે સ્થિતાઃ ।
૨૧૪.૧૫૭/૦યેષુ દુષ્કૃતકર્માણો વિપચ્યન્તે પૃથક્ પૃથક્ ॥ ૨૧૪.૧૪॥

૨૧૪.૧૫૮/૦નરકો રૌરવો રૌદ્રઃ શૂકરસ્તાલ એવ ચ ।
૨૧૪.૧૫૯/૦કુમ્ભીપાકો મહાઘોરઃ શાલ્મલોઽથ વિમોહનઃ ॥ ૨૧૪.૧૫॥

૨૧૪.૧૬૦/૦કીટાદઃ કૃમિભક્ષશ્ચ નાલાભક્ષો ભ્રમસ્તથા ।
૨૧૪.૧૬૧/૦નદ્યઃ પૂયવહાશ્ચાન્યા રુધિરામ્ભસ્તથૈવ ચ ॥ ૨૧૪.૧૬॥

૨૧૪.૧૬૨/૦અગ્નિજ્વાલો મહાઘોરઃ સંદંશઃ શુનભોજનઃ ।
૨૧૪.૧૬૩/૦ઘોરા વૈતરણી ચૈવ અસિપત્રવનં તથા ॥ ૨૧૪.૧૭॥

૨૧૪.૧૬૪/૦ન તત્ર વૃક્ષચ્છાયા વા ન તડાગાઃ સરાંસિ ચ ।
૨૧૪.૧૬૫/૦ન વાપ્યો દીર્ઘિકા વાપિ ન કૂપો ન પ્રપા સભા ॥ ૨૧૪.૧૮॥

૨૧૪.૧૬૬/૦ન મણ્ડપો નાયતનં ન નદ્યો ન ચ પર્વતાઃ ।
૨૧૪.૧૬૭/૦ન કિંચિદ્ આશ્રમસ્થાનં વિદ્યતે તત્ર વર્ત્મનિ ॥ ૨૧૪.૧૯ ॥

૨૧૪.૧૬૮/૦યત્ર વિશ્રમતે શ્રાન્તઃ પુરુષો અતીવકર્ષિતઃ ।
૨૧૪.૧૬૯/૦અવશ્યમેવ ગન્તવ્યઃ સ સર્વૈસ્તુ મહાપથઃ ॥ ૨૧૪.૨૦ ॥

૨૧૪.૧૭૦/૦પ્રાપ્તે કાલે તુ સંત્યજ્ય સુહૃદ્બન્ધુધનાદિકમ્ ।
૨૧૪.૧૭૧/૦જરાયુજાણ્ડજાશ્ચૈવ સ્વેદજાશ્ચોદ્ભિજાસ્તથા ॥ ૨૧૪.૨૧ ॥

૨૧૪.૧૭૨/૦જઙ્ગમાજઙ્ગમાશ્ચૈવ ગમિષ્યન્તિ મહાપથમ્ ।
૨૧૪.૧૭૩/૦દેવાસુરમનુષ્યૈશ્ચ વૈવસ્વતવશાનુગૈઃ ॥ ૨૧૪.૨૨ ॥

૨૧૪.૧૭૪/૦સ્ત્રીપુંનપુંસકૈશ્ચૈવ પૃથિવ્યાં જીવસંજ્ઞિતૈઃ ।
૨૧૪.૧૭૫/૦પૂર્વાહ્ને ચાપરાહ્ને વા મધ્યાહ્ને વા તથા પુનઃ ॥ ૨૧૪.૨૩ ॥

૨૧૪.૧૭૬/૦સંધ્યાકાલેऽર્ધરાત્રે વા પ્રત્યૂષે વાપ્યુપસ્થિતે ।
૨૧૪.૧૭૭/૦વૃદ્ધૈર્વા મધ્યમૈર્વાપિ યૌવનસ્થૈસ્તથૈવ ચ ॥ ૨૧૪.૨૪ ॥

૨૧૪.૧૭૮/૦ગર્ભવાસેऽથ બાલ્યે વા ગન્તવ્યઃ સ મહાપથઃ ।
૨૧૪.૧૭૯/૦પ્રવાસસ્થૈર્ગૃહસ્થૈર્વા પર્વતસ્થૈઃ સ્થલેऽપિ વા ॥ ૨૧૪.૨૫ ॥

૨૧૪.૧૮૦/૦ક્ષેત્રસ્થૈર્વા જલસ્થૈર્વા ગૃહમધ્યગતૈસ્તથા ।
૨૧૪.૧૮૧/૦આસીનૈશ્ચાસ્થિતૈર્વાપિ શયનીયગતૈસ્તથા ॥ ૨૧૪.૨૬ ॥

૨૧૪.૧૮૨/૦જાગ્રદ્ભિર્વા પ્રસુપ્તૈર્વા ગન્તવ્યઃ સ મહાપથઃ ।
૨૧૪.૧૮૩/૦ઇહાનુભૂય નિર્દિષ્ટમાયુર્જન્તુઃ સ્વયં તદા ॥ ૨૧૪.૨૭ ॥

૨૧૪.૧૮૪/૦તસ્યાન્તે ચ સ્વયં પ્રાણૈરનિચ્છન્ન્ અપિ મુચ્યતે ।
૨૧૪.૧૮૫/૦જલમગ્નિર્વિષં શસ્ત્રં ક્ષુદ્ વ્યાધિઃ પતનં ગિરેઃ ॥ ૨૧૪.૨૮ ॥

૨૧૪.૧૮૬/૦નિમિત્તં કિંચિદ્ આસાદ્ય દેહી પ્રાણૈર્વિમુચ્યતે ।
૨૧૪.૧૮૭/૦વિહાય સુમહત્ કૃત્સ્નં શરીરં પાઞ્ચભૌતિકમ્ ॥ ૨૧૪.૨૯ ॥

૨૧૪.૧૮૮/૦અન્યચ્છરીરમાદત્તે યાતનીયં સ્વકર્મજમ્ ।
૨૧૪.૧૮૯/૦દૃઢં શરીરમાપ્નોતિ સુખદુઃખોપભુક્તયે ॥ ૨૧૪.૩૦ ॥

૨૧૪.૧૯૦/૦તેન ભુઙ્ક્તે સ કૃચ્છ્રાણિ પાપકર્તા નરો ભૃશમ્ ।
૨૧૪.૧૯૧/૦સુખાનિ ધાર્મિકો હૃષ્ટ ઇહ નીતો યમક્ષયે ॥ ૨૧૪.૩૧ ॥

૨૧૪.૧૯૨/૦ઊષ્મા પ્રકુપિતઃ કાયે તીવ્રવાયુસમીરિતઃ ।
૨૧૪.૧૯૩/૦ભિનત્તિ મર્મસ્થાનાનિ દીપ્યમાનો નિરન્ધનઃ ॥ ૨૧૪.૩૨ ॥

૨૧૪.૧૯૪/૦ઉદાનો નામ પવનસ્તતશ્ચોર્ધ્વં પ્રવર્તતે ।
૨૧૪.૧૯૫/૦ભુજ્યતામમ્બુભક્ષ્યાણામધોગતિનિરોધકૃત્ ॥ ૨૧૪.૩૩ ॥

૨૧૪.૧૯૬/૦તતો યેનામ્બુદાનાનિ કૃતાન્યન્નરસાસ્તથા ।
૨૧૪.૧૯૭/૦દત્તાઃ સ તસ્યામાહ્લાદમાપદિ પ્રતિપદ્યતે ॥ ૨૧૪.૩૪ ॥

૨૧૪.૧૯૮/૦અન્નાનિ યેન દત્તાનિ શ્રદ્ધાપૂતેન ચેતસા ।
૨૧૪.૧૯૯/૦સોઽપિ તૃપ્તિમવાપ્નોતિ વિનાપ્યન્નેન વૈ તદા ॥ ૨૧૪.૩૫ ॥

૨૧૪.૨૦૦/૦યેનાનૃતાનિ નોક્તાનિ પ્રીતિભેદઃ કૃતો ન ચ ।
૨૧૪.૨૦૧/૦આસ્તિકઃ શ્રદ્દધાનશ્ચ સુખમૃત્યું સ ગચ્છતિ ॥ ૨૧૪.૩૬ ॥

૨૧૪.૨૦૨/૦દેવબ્રાહ્મણપૂજાયાં નિરતાશ્ચાનસૂયકાઃ ।
૨૧૪.૨૦૩/૦શુક્લા વદાન્યા હ્રીમન્તસ્તે નરાઃ સુખમૃત્યવઃ ॥ ૨૧૪.૩૭ ॥

૨૧૪.૨૦૪/૦યઃ કામાન્ નાપિ સંરમ્ભાન્ ન દ્વેષાદ્ ધર્મમુત્સૃજેત્ ।
૨૧૪.૨૦૫/૦યથોક્તકારી સૌમ્યશ્ચ સ સુખં મૃત્યુમ્ ઋચ્છતિ ॥ ૨૧૪.૩૮ ॥

૨૧૪.૨૦૬/૦વારિદાસ્તૃષિતાનાં યે ક્ષુધિતાન્નપ્રદાયિનઃ ।
૨૧૪.૨૦૭/૦પ્રાપ્નુવન્તિ નરાઃ કાલે મૃત્યું સુખસમન્વિતમ્ ॥ ૨૧૪.૩૯ ॥

૨૧૪.૨૦૮/૦શીતં જયન્તિ ધનદાસ્તાપં ચન્દનદાયિનઃ ।
૨૧૪.૨૦૯/૦પ્રાણઘ્નીં વેદનાં કષ્ટાં યે ચાન્યોદ્વેગધારિણઃ ॥ ૨૧૪.૪૦ ॥

૨૧૪.૨૧૦/૦મોહં જ્ઞાનપ્રદાતારસ્તથા દીપપ્રદાસ્તમઃ ।
૨૧૪.૨૧૧/૦કૂટસાક્ષી મૃષાવાદી યો ગુરુર્નાનુશાસ્તિ વૈ ॥ ૨૧૪.૪૧ ॥

૨૧૪.૨૧૨/૦તે મોહમૃત્યવઃ સર્વે તથા યે વેદનિન્દકાઃ ।
૨૧૪.૨૧૩/૦વિભીષણાઃ પૂતિગન્ધાઃ કૂટમુદ્ગરપાણયઃ ॥ ૨૧૪.૪૨ ॥

૨૧૪.૨૧૪/૦આગચ્છન્તિ દુરાત્માનો યમસ્ય પુરુષાસ્તથા ।
૨૧૪.૨૧૫/૦પ્રાપ્તેષુ દૃક્પથં તેષુ જાયતે તસ્ય વેપથુઃ ॥ ૨૧૪.૪૩ ॥

૨૧૪.૨૧૬/૦ક્રન્દત્યવિરતઃ સોઽથ ભ્રાતૃમાતૃપિતૃંસ્તથા ।
૨૧૪.૨૧૭/૦સા તુ વાગ્ અસ્ફુટા વિપ્રા એકવર્ણા વિભાવ્યતે ॥ ૨૧૪.૪૪ ॥

૨૧૪.૨૧૮/૦દૃષ્ટિર્વિભ્રામ્યતે ત્રાસાત્ કાસાવૃષ્ટ્યત્યથાનનમ્ ।
૨૧૪.૨૧૯/૦તતઃ સ વેદનાવિષ્ટં તચ્છરીરં વિમુઞ્ચતિ ॥ ૨૧૪.૪૫ ॥

૨૧૪.૨૨૦/૦વાય્વગ્રસારી તદ્રૂપ+ ।દેહમન્યત્ પ્રપદ્યતે ।

૨૧૪.૨૨૧/૦તત્કર્મયાતનાર્થે ચ ન માતૃપિતૃસમ્ભવમ્ ॥ ૨૧૪.૪૬॥

૨૧૪.૨૨૨/૦તત્પ્રમાણવયોવસ્થા+ ।સંસ્થાનૈઃ પ્રાપ્યતે વ્યથા ।
૨૧૪.૨૨૩/૦તતો દૂતો યમસ્યાથ પાશૈર્બધ્નાતિ દારુણૈઃ ॥ ૨૧૪.૪૭॥

૨૧૪.૨૨૪/૦જન્તોઃ સમ્પ્રાપ્તકાલસ્ય વેદનાર્તસ્ય વૈ ભૃશમ્ ।
૨૧૪.૨૨૫/૦ભૂતૈઃ સંત્યક્તદેહસ્ય કણ્ઠપ્રાપ્તાનિલસ્ય ચ ॥ ૨૧૪.૪૮॥

૨૧૪.૨૨૬/૦શરીરાચ્ચ્યાવિતો જીવો રોરવીતિ તથોલ્બણમ્ ।
૨૧૪.૨૨૭/૦નિર્ગતો વાયુભૂતસ્તુ ષાટ્કૌશિકકલેવરે ॥ ૨૧૪.૪૯॥

૨૧૪.૨૨૮/૦માતૃભિઃ પિતૃભિશ્ચૈવ ભ્રાતૃભિર્માતુલૈસ્તથા ।
૨૧૪.૨૨૯/૦દારૈઃ પુત્રૈર્વયસ્યૈશ્ચ ગુરુભિસ્ત્યજ્યતે ભુવિ ॥ ૨૧૪.૫૦॥

૨૧૪.૨૩૦/૦દૃશ્યમાનશ્ચ તૈર્દીનૈરશ્રુપૂર્ણેક્ષણૈર્ભૃશમ્ ।
૨૧૪.૨૩૧/૦સ્વશરીરં સમુત્સૃજ્ય વાયુભૂતસ્તુ ગચ્છતિ ॥ ૨૧૪.૫૧॥

૨૧૪.૨૩૨/૦અન્ધકારમપારં ચ મહાઘોરં તમોવૃતમ્ ।
૨૧૪.૨૩૩/૦સુખદુઃખપ્રદાતારં દુર્ગમં પાપકર્મણામ્ ॥ ૨૧૪.૫૨॥

૨૧૪.૨૩૪/૦દુઃસહં ચ દુરન્તં ચ દુર્નિરીક્ષં દુરાસદમ્ ।
૨૧૪.૨૩૫/૦દુરાપમતિદુર્ગં ચ પાપિષ્ઠાનાં સદાહિતમ્ ॥ ૨૧૪.૫૩॥

૨૧૪.૨૩૬/૦કૃષ્યમાણાશ્ચ તૈર્ભૂતૈર્યામ્યૈઃ પાશૈસ્તુ સંયતાઃ ।
૨૧૪.૨૩૭/૦મુદ્ગરૈસ્તાડ્યમાનાશ્ચ નીયન્તે તં મહાપથમ્ ॥ ૨૧૪.૫૪॥

૨૧૪.૨૩૮/૦ક્ષીણાયુષં સમાલોક્ય પ્રાણિનં ચાયુષક્ષયે ।
૨૧૪.૨૩૯/૦નિનીષવઃ સમાયાન્તિ યમદૂતા ભયંકરાઃ ॥ ૨૧૪.૫૫॥

૨૧૪.૨૪૦/૦આરૂઢા યાનકાલે તુ ઋક્ષવ્યાઘ્રખરેષુ ચ ।
૨૧૪.૨૪૧/૦ઉષ્ટ્રેષુ વાનરેષ્વન્યે વૃશ્ચિકેષુ વૃકેષુ ચ ॥ ૨૧૪.૫૬॥

૨૧૪.૨૪૨/૦ઉલૂકસર્પમાર્જારં તથાન્યે ગૃધ્રવાહનાઃ ।
૨૧૪.૨૪૩/૦શ્યેનશ્ૃગાલમારૂઢાઃ સરઘાકઙ્કવાહનાઃ ॥ ૨૧૪.૫૭॥

૨૧૪.૨૪૪/૦વરાહપશુવેતાલ+ ંઅહિષાસ્યાસ્તથા પરે ।
૨૧૪.૨૪૫/૦નાનારૂપધરા ઘોરાઃ સર્વપ્રાણિભયંકરાઃ ॥ ૨૧૪.૫૮॥

૨૧૪.૨૪૬/૦દીર્ઘમુષ્કાઃ કરાલાસ્યા વક્રનાસાસ્ત્રિલોચનાઃ ।
૨૧૪.૨૪૭/૦મહાહનુકપોલાસ્યાઃ પ્રલમ્બદશનચ્છદાઃ ॥ ૨૧૪.૫૯॥

૨૧૪.૨૪૮/૦નિર્ગતૈર્વિકૃતાકારૈર્દશનૈરઙ્કુરોપમૈઃ ।
૨૧૪.૨૪૯/૦માંસશોણિતદિગ્ધાઙ્ગા દંષ્ટ્રાભિર્ભૃશમુલ્બણૈઃ ॥ ૨૧૪.૬૦ ॥

૨૧૪.૨૫૦/૦મુખૈઃ પાતાલસદૃશૈર્જ્વલજ્જિહ્વૈર્ભયંકરૈઃ ।
૨૧૪.૨૫૧/૦નેત્રૈઃ સુવિકૃતાકારૈર્જ્વલત્પિઙ્ગલચઞ્ચલૈઃ ॥ ૨૧૪.૬૧ ॥

૨૧૪.૨૫૨/૦માર્જારોલૂકખદ્યોત+ ।શક્રગોપવદ્ ઉદ્ધતૈઃ ।
૨૧૪.૨૫૩/૦કેકરૈઃ સંકુલૈસ્સ્તબ્ધૈર્લોચનૈઃ પાવકોપમૈઃ ॥ ૨૧૪.૬૨ ॥

૨૧૪.૨૫૪/૦ભૃશમાભરણૈર્ભીમૈરાબદ્ધૈર્ભુજગોપમૈઃ ।
૨૧૪.૨૫૫/૦શોણાસરલગાત્રૈશ્ચ મુણ્ડમાલાવિભૂષિતૈઃ ॥ ૨૧૪.૬૩ ॥

૨૧૪.૨૫૬/૦કણ્ઠસ્થકૃષ્ણસર્પૈશ્ચ ફૂત્કારરવભીષણૈઃ ।
૨૧૪.૨૫૭/૦વહ્નિજ્વાલોપમૈઃ કેશૈઃ સ્તબ્ધરુક્ષૈર્ભયંકરૈઃ ॥ ૨૧૪.૬૪ ॥

૨૧૪.૨૫૮/૦બભ્રુપિઙ્ગલલોલૈશ્ચ કદ્રુશ્મશ્રુભિરાવૃતાઃ ।
૨૧૪.૨૫૯/૦ભુજદણ્ડૈર્મહાઘોરૈઃ પ્રલમ્બૈઃ પરિઘોપમૈઃ ॥ ૨૧૪.૬૫ ॥

૨૧૪.૨૬૦/૦કેચિદ્ દ્વિબાહવસ્તત્ર તથાન્યે ચ ચતુર્ભુજાઃ ।
૨૧૪.૨૬૧/૦દ્વિરષ્ટબાહવશ્ચાન્યે દશવિંશભુજાસ્તથા ॥ ૨૧૪.૬૬ ॥

૨૧૪.૨૬૨/૦અસંખ્યાતભુજાશ્ચાન્યે કેચિદ્ બાહુસહસ્રિણઃ ।
૨૧૪.૨૬૩/૦આયુધૈર્વિકૃતાકારૈઃ પ્રજ્વલદ્ભિર્ભયાનકૈઃ ॥ ૨૧૪.૬૭ ॥

૨૧૪.૨૬૪/૦શક્તિતોમરચક્રાદ્યૈઃ સુદીપ્તૈર્વિવિધાયુધૈઃ ।
૨૧૪.૨૬૫/૦પાશશ‍ૃઙ્ખલદણ્ડૈશ્ચ ભીષયન્તો મહાબલાઃ ॥ ૨૧૪.૬૮ ॥

૨૧૪.૨૬૬/૦આગચ્છન્તિ મહારૌદ્રા મર્ત્યાનામાયુષઃ ક્ષયે ।
૨૧૪.૨૬૭/૦ગ્રહીતું પ્રાણિનઃ સર્વે યમસ્યાજ્ઞાકરાસ્તથા ॥ ૨૧૪.૬૯ ॥

૨૧૪.૨૬૮/૦યત્ તચ્છરીરમાદત્તે યાતનીયં સ્વકર્મજમ્ ।
૨૧૪.૨૬૯/૦તદ્ અસ્ય નીયતે જન્તોર્યમસ્ય સદનં પ્રતિ ॥ ૨૧૪.૭૦ ॥

૨૧૪.૨૭૦/૦બદ્ધ્વા તત્ કાલપાશૈશ્ચ નિગડૈર્વજ્રશ‍ૃઙ્ખલૈઃ ।
૨૧૪.૨૭૧/૦તાડયિત્વા ભૃશં ક્રુદ્ધૈર્નીયતે યમકિંકરૈઃ ॥ ૨૧૪.૭૧ ॥

૨૧૪.૨૭૨/૦પ્રસ્ખલન્તં રુદન્તં ચ આક્રોશન્તં મુહુર્મુહુઃ ।
૨૧૪.૨૭૩/૦હા તાત માતઃ પુત્રેતિ વદન્તં કર્મદૂષિતમ્ ॥ ૨૧૪.૭૨ ॥

૨૧૪.૨૭૪/૦આહત્ય નિશિતૈઃ શૂલૈર્મુદ્ગરૈર્નિશિતૈર્ઘનૈઃ ।
૨૧૪.૨૭૫/૦ખડ્ગશક્તિપ્રહારૈશ્ચ વજ્રદણ્ડૈઃ સુદારુણૈઃ ॥ ૨૧૪.૭૩ ॥

૨૧૪.૨૭૬/૦ભર્ત્સ્યમાનો મહારાવૈર્વજ્રશક્તિસમન્વિતૈઃ ।
૨૧૪.૨૭૭/૦એકૈકશો ભૃશં ક્રુદ્ધૈસ્તાડયદ્ભિઃ સમન્તતઃ ॥ ૨૧૪.૭૪॥

૨૧૪.૨૭૮/૦સ મુહ્યમાનો દુઃખાર્તઃ પ્રતપંશ્ચ ઇતસ્તતઃ ।
૨૧૪.૨૭૯/૦આકૃષ્ય નીયતે જન્તુરધ્વાનં સુભયંકરૈઃ ॥ ૨૧૪.૭૫॥

૨૧૪.૨૮૦/૦કુશકણ્ટકવલ્મીક+ ।શઙ્કુપાષાણશર્કરે ।
૨૧૪.૨૮૧/૦તથા પ્રદીપ્તજ્વલને ક્ષારવજ્રશતોત્કટે ॥ ૨૧૪.૭૬॥

૨૧૪.૨૮૨/૦પ્રદીપ્તાદિત્યતપ્તેન દહ્યમાનસ્તદંશુભિઃ ।
૨૧૪.૨૮૩/૦કૃષ્યતે યમદૂતૈશ્ચ શિવાસંનાદભીષણૈઃ ॥ ૨૧૪.૭૭॥

૨૧૪.૨૮૪/૦વિકૃષ્યમાણસ્તૈર્ઘોરૈર્ભક્ષ્યમાણઃ શિવાશતૈઃ ।
૨૧૪.૨૮૫/૦પ્રયાતિ દારુણે માર્ગે પાપકર્મા યમાલયમ્ ॥ ૨૧૪.૭૮॥

૨૧૪.૨૮૬/૦ક્વચિદ્ ભીતૈઃ ક્વચિત્ ત્રસ્તૈઃ પ્રસ્ખલદ્ભિઃ ક્વચિત્ ક્વચિત્ ।
૨૧૪.૨૮૭/૦દુઃખેનાક્રન્દમાનૈશ્ચ ગન્તવ્યઃ સ મહાપથઃ ॥ ૨૧૪.૭૯॥

૨૧૪.૨૮૮/૦નિર્ભર્ત્સ્યમાનૈરુદ્વિગ્નૈર્વિદ્રુતૈર્ભયવિહ્વલૈઃ ।
૨૧૪.૨૮૯/૦કમ્પમાનશરીરૈસ્તુ ગન્તવ્યં જીવસંજ્ઞકૈઃ ॥ ૨૧૪.૮૦॥

૨૧૪.૨૯૦/૦કણ્ટકાકીર્ણમાર્ગેણ સંતપ્તસિકતેન ચ ।
૨૧૪.૨૯૧/૦દહ્યમાનૈસ્તુ ગન્તવ્યં નરૈર્દાનવિવર્જિતૈઃ ॥ ૨૧૪.૮૧॥

૨૧૪.૨૯૨/૦મેદઃશોણિતદુર્ગન્ધૈર્બસ્તગાત્રૈશ્ચ પૂગશઃ ।
૨૧૪.૨૯૩/૦દગ્ધસ્ફુટત્વચાકીર્ણૈર્ગન્તવ્યં જીવઘાતકૈઃ ॥ ૨૧૪.૮૨॥

૨૧૪.૨૯૪/૦કૂજદ્ભિઃ ક્રન્દમાનૈશ્ચ વિક્રોશદ્ભિશ્ચ વિસ્વરમ્ ।
૨૧૪.૨૯૫/૦વેદનાર્તૈશ્ચ સદ્ભિશ્ચ ગન્તવ્યં જીવઘાતકૈઃ ॥ ૨૧૪.૮૩॥

૨૧૪.૨૯૬/૦શક્તિભિર્ભિન્દિપાલૈશ્ચ ખડ્ગતોમરસાયકૈઃ ।
૨૧૪.૨૯૭/૦ભિદ્યદ્ભિસ્તીક્ષ્ણશૂલાગ્રૈર્ગન્તવ્યં જીવઘાતકૈઃ ॥ ૨૧૪.૮૪॥

૨૧૪.૨૯૮/૦શ્વાનૈર્વ્યાઘ્રૈર્વૃકૈઃ કઙ્કૈર્ભક્ષ્યમાણૈશ્ચ પાપિભિઃ ॥ ૨૧૪.૮૫॥

૨૧૪.૨૯૯/૦કૃન્તદ્ભિઃ ક્રકચાઘાતૈર્ગન્તવ્યં માંસખાદિભિઃ ।
૨૧૪.૩૦૦/૦મહિષર્ષભશ ૃડ્ગાગ્રૈર્ભિદ્યમાનૈઃ સમન્તતઃ ॥ ૨૧૪.૮૬॥

૨૧૪.૩૦૧/૦ઉલ્લિખદ્ભિઃ શૂકરૈશ્ચ ગન્તવ્યં માંસખાદકૈઃ ।
૨૧૪.૩૦૨/૦સૂચીભ્રમરકાકોલ+ ંઅક્ષિકાભિશ્ચ સંઘશઃ ॥ ૨૧૪.૮૭॥

૨૧૪.૩૦૩/૦ભુજ્યમાનૈશ્ચ ગન્તવ્યં પાપિષ્ઠૈર્મધુઘાતકૈઃ ।
૨૧૪.૩૦૪/૦વિશ્વસ્તં સ્વામિનં મિત્રં સ્ત્રિયં વા યસ્તુ ઘાતયેત્ ॥ ૨૧૪.૮૮॥

૨૧૪.૩૦૫/૦શસ્ત્રૈર્નિકૃત્યમાનૈશ્ચ ગન્તવ્યં ચાતુરૈર્નરૈઃ ।
૨૧૪.૩૦૬/૦ઘાતયન્તિ ચ યે જન્તૂંસ્તાડયન્તિ નિરાગસઃ ॥ ૨૧૪.૮૯॥

૨૧૪.૩૦૭/૦રાક્ષસૈર્ભક્ષ્યમાણાસ્તે યાન્તિ યામ્યપથં નરાઃ ।
૨૧૪.૩૦૮/૦યે હરન્તિ પરસ્ત્રીણાં વરપ્રાવરણાનિ ચ ॥ ૨૧૪.૯૦॥

૨૧૪.૩૦૯/૦તે યાન્તિ વિદ્રુતા નગ્નાઃ પ્રેતીભૂતા યમાલયમ્ ।
૨૧૪.૩૧૦/૦વાસો ધાન્યં હિરણ્યં વા ગૃહક્ષેત્રમથાપિ વા ॥ ૨૧૪.૯૧॥

૨૧૪.૩૧૧/૦યે હરન્તિ દુરાત્માનઃ પાપિષ્ઠાઃ પાપકર્મિણઃ ।
૨૧૪.૩૧૨/૦પાષાણૈર્લગુડૈર્દણ્ડૈસ્તાડ્યમાનૈસ્તુ જર્જરૈઃ ॥ ૨૧૪.૯૨॥

૨૧૪.૩૧૩/૦વહદ્ભિઃ શોણિતં ભૂરિ ગન્તવ્યં તુ યમાલયમ્ ।
૨૧૪.૩૧૪/૦બ્રહ્મસ્વં યે હરન્તીહ નરા નરકનિર્ભયાઃ ॥ ૨૧૪.૯૩॥

૨૧૪.૩૧૫/૦તાડયન્તિ તથા વિપ્રાન્ આક્રોશન્તિ નરાધમાઃ ।
૨૧૪.૩૧૬/૦શુષ્કકાષ્ઠનિબદ્ધાસ્તે છિન્નકર્ણાક્ષિનાસિકાઃ ॥ ૨૧૪.૯૪॥

૨૧૪.૩૧૭/૦પૂયશોણિતદિગ્ધાસ્તે કાલગૃધ્રૈશ્ચ જમ્બુકૈઃ ।
૨૧૪.૩૧૮/૦કિંકરૈર્ભીષણૈશ્ચણ્ડૈસ્તાડ્યમાનાશ્ચ દારુણૈઃ ॥ ૨૧૪.૯૫॥

૨૧૪.૩૧૯/૦વિક્રોશમાના ગચ્છન્તિ પાપિનસ્તે યમાલયમ્ ।
૨૧૪.૩૨૦/૦એવં પરમદુર્ધર્ષમધ્વાનં જ્વલનપ્રભમ્ ॥ ૨૧૪.૯૬॥

૨૧૪.૩૨૧/૦રૌરવં દુર્ગવિષમં નિર્દિષ્ટં માનુષસ્ય ચ ।
૨૧૪.૩૨૨/૦પ્રતપ્તતામ્રવર્ણાભં વહ્નિજ્વાલાસ્ફુલિઙ્ગવત્ ॥ ૨૧૪.૯૭॥

૨૧૪.૩૨૩/૦કુરણ્ટકણ્ટકાકીર્ણં પૃથુવિકટતાડનૈઃ ।
૨૧૪.૩૨૪/૦શક્તિવજ્રૈશ્ચ સંકીર્ણમુજ્જ્વલં તીવ્રકણ્ટકમ્ ॥ ૨૧૪.૯૮॥

૨૧૪.૩૨૫/૦અઙ્ગારવાલુકામિશ્રં વહ્નિકીટકદુર્ગમમ્ ।
૨૧૪.૩૨૬/૦જ્વાલામાલાકુલં રૌદ્રં સૂર્યરશ્મિપ્રતાપિતમ્ ॥ ૨૧૪.૯૯॥

૨૧૪.૩૨૭/૦અધ્વાનં નીયતે દેહી કૃષ્યમાણઃ સુનિષ્ઠુરૈઃ ।
૨૧૪.૩૨૮/૦યદૈવ ક્રન્દતે જન્તુર્દુઃખાર્તઃ પતિતઃ ક્વચિત્ ॥ ૨૧૪.૧૦૦॥

૨૧૪.૩૨૯/૦તદૈવાહન્યતે સર્વૈરાયુધૈર્યમકિંકરૈઃ ।

૨૧૪.૩૩૦/૦એવં સંતાડ્યમાનશ્ચ લુબ્ધઃ પાપેષુ યોઽનયઃ ॥ ૨૧૪.૧૦૧ ॥

૨૧૪.૩૩૧/૦અવશો નીયતે જન્તુર્દુર્ધરૈર્યમકિંકરૈઃ ।
૨૧૪.૩૩૨/૦સર્વૈરેવ હિ ગન્તવ્યમધ્વાનં તત્ સુદુર્ગમમ્ ॥ ૨૧૪.૧૦૨ ॥

૨૧૪.૩૩૩/૦નીયતે વિવિધૈર્ઘોરૈર્યમદૂતૈરવજ્ઞયા ।
૨૧૪.૩૩૪/૦નીત્વા સુદારુણં માર્ગં પ્રાણિનં યમકિંકરૈઃ ॥ ૨૧૪.૧૦૩ ॥

૨૧૪.૩૩૫/૦પ્રવેશ્યતે પુરીં ઘોરાં તામ્રાયસમયીં દ્વિજાઃ ।
૨૧૪.૩૩૬/૦સા પુરી વિપુલાકારા લક્ષયોજનમાયતા ॥ ૨૧૪.૧૦૪ ॥

૨૧૪.૩૩૭/૦ચતુરસ્રા વિનિર્દિષ્ટા ચતુર્દ્વારવતી શુભા ।
૨૧૪.૩૩૮/૦પ્રાકારાઃ કાઞ્ચનાસ્તસ્યા યોજનાયુતમુચ્છ્રિતાઃ ॥ ૨૧૪.૧૦૫ ॥

૨૧૪.૩૩૯/૦ઇન્દ્રનીલમહાનીલ+ ।પદ્મરાગોપશોભિતા ।
૨૧૪.૩૪૦/૦સા પુરી વિવિધૈઃ સંઘૈર્ઘોરા ઘોરૈઃ સમાકુલા ॥ ૨૧૪.૧૦૬ ॥

૨૧૪.૩૪૧/૦દેવદાનવગન્ધર્વૈર્યક્ષરાક્ષસપન્નગૈઃ ।
૨૧૪.૩૪૨/૦પૂર્વદ્વારં શુભં તસ્યાઃ પતાકાશતશોભિતમ્ ॥ ૨૧૪.૧૦૭ ॥

૨૧૪.૩૪૩/૦વજ્રેન્દ્રનીલવૈદૂર્ય+ ુઉક્તાફલવિભૂષિતમ્ ।
૨૧૪.૩૪૪/૦ગીતનૃત્યૈઃ સમાકીર્ણં ગન્ધર્વાપ્સરસાં ગણૈઃ ॥ ૨૧૪.૧૦૮ ॥

૨૧૪.૩૪૫/૦પ્રવેશસ્તેન દેવાનામ્ ઋષીણાં યોગિનાં તથા ।
૨૧૪.૩૪૬/૦ગન્ધર્વસિદ્ધયક્ષાણાં વિદ્યાધરવિસર્પિણામ્ ॥ ૨૧૪.૧૦૯ ॥

૨૧૪.૩૪૭/૦ઉત્તરં નગરદ્વારં ઘણ્ટાચામરભૂષિતમ્ ।
૨૧૪.૩૪૮/૦છત્રચામરવિન્યાસં નાનારત્નૈરલંકૃતમ્ ॥ ૨૧૪.૧૧૦ ॥

૨૧૪.૩૪૯/૦વીણારેણુરવૈ રમ્યૈર્ગીતમઙ્ગલનાદિતૈઃ ।
૨૧૪.૩૫૦/૦ઋગ્યજુઃસામનિર્ઘોષૈર્મુનિવૃન્દસમાકુલમ્ ॥ ૨૧૪.૧૧૧ ॥

૨૧૪.૩૫૧/૦વિશન્તિ યેન ધર્મજ્ઞાઃ સત્યવ્રતપરાયણાઃ ।
૨૧૪.૩૫૨/૦ગ્રીષ્મે વારિપ્રદા યે ચ શીતે ચાગ્નિપ્રદા નરાઃ ॥ ૨૧૪.૧૧૨ ॥

૨૧૪.૩૫૩/૦શ્રાન્તસંવાહકા યે ચ પ્રિયવાદરતાશ્ચ યે ।
૨૧૪.૩૫૪/૦યે ચ દાનરતાઃ શૂરા માતાપિતૃપરાશ્ચ યે ॥ ૨૧૪.૧૧૩ ॥

૨૧૪.૩૫૫/૦દ્વિજશુશ્રૂષણે યુક્તા નિત્યં યેઽતિથિપૂજકાઃ ।
૨૧૪.૩૫૬/૦પશ્ચિમં તુ મહાદ્વારં પુર્યા રત્નૈર્વિભૂષિતમ્ ॥ ૨૧૪.૧૧૪ ॥

૨૧૪.૩૫૭/૦વિચિત્રમણિસોપાનં તોમરૈઃ સમલંકૃતમ્ ।
૨૧૪.૩૫૮/૦ભેરીમૃદઙ્ગસંનાદૈઃ શઙ્ખકાહલનાદિતમ્ ॥ ૨૧૪.૧૧૫॥

૨૧૪.૩૫૯/૦સિદ્ધવૃન્દૈઃ સદા હૃષ્ટૈર્મઙ્ગલૈઃ પ્રણિનાદિતમ્ ।
૨૧૪.૩૬૦/૦પ્રવેશસ્તેન હૃષ્ટાનાં શિવભક્તિમતાં નૃણામ્ ॥ ૨૧૪.૧૧૬॥

૨૧૪.૩૬૧/૦સર્વતીર્થપ્લુતા યે ચ પઞ્ચાગ્નેર્યે ચ સેવકાઃ ।
૨૧૪.૩૬૨/૦પ્રસ્થાને યે મૃતા વીરા મૃતાઃ કાલઞ્જરે ગિરૌ ॥ ૨૧૪.૧૧૭॥

૨૧૪.૩૬૩/૦અગ્નૌ વિપન્ના યે વીરાઃ સાધિતં યૈરનાશકમ્ ।
૨૧૪.૩૬૪/૦યે સ્વામિમિત્રલોકાર્થે ગોગ્રહે સંકુલે હતાઃ ॥ ૨૧૪.૧૧૮॥

૨૧૪.૩૬૫/૦તે વિશન્તિ નરાઃ શૂરાઃ પશ્ચિમેન તપોધનાઃ ।
૨૧૪.૩૬૬/૦પુર્યાં તસ્યા મહાઘોરં સર્વસત્ત્વભયંકરમ્ ॥ ૨૧૪.૧૧૯॥

૨૧૪.૩૬૭/૦હાહાકારસમાકુષ્ટં દક્ષિણં દ્વારમીદૃશમ્ ।
૨૧૪.૩૬૮/૦અન્ધકારસમાયુક્તં તીક્ષ્ણશ◌ૃઙ્ગૈઃ સમન્વિતમ્ ॥ ૨૧૪.૧૨૦॥

૨૧૪.૩૬૯/૦કણ્ટકૈર્વૃશ્ચિકૈઃ સર્પૈર્વજ્રકીટૈઃ સુદુર્ગમૈઃ ।
૨૧૪.૩૭૦/૦વિલુમ્પદ્ભિર્વૃકૈર્વ્યાઘ્રૈરૃક્ષૈઃ સિંહૈઃ સજમ્બુકૈઃ ॥ ૨૧૪.૧૨૧॥

૨૧૪.૩૭૧/૦શ્વાનમાર્જારગૃધ્રૈશ્ચ સજ્વાલકવલૈર્મુખૈઃ ।
૨૧૪.૩૭૨/૦પ્રવેશસ્તેન વૈ નિત્યં સર્વેષામપકારિણામ્ ॥ ૨૧૪.૧૨૨॥

૨૧૪.૩૭૩/૦યે ઘાતયન્તિ વિપ્રાન્ ગા બાલં વૃદ્ધં તથાતુરમ્ ।
૨૧૪.૩૭૪/૦શરણાગતં વિશ્વસ્તં સ્ત્રિયં મિત્રં નિરાયુધમ્ ॥ ૨૧૪.૧૨૩॥

૨૧૪.૩૭૫/૦યેઽગમ્યાગામિનો મૂઢાઃ પરદ્રવ્યાપહારિણઃ ।
૨૧૪.૩૭૬/૦નિક્ષેપસ્યાપહર્તારો વિષવહ્નિપ્રદાશ્ચ યે ॥ ૨૧૪.૧૨૪॥

૨૧૪.૩૭૭/૦પરભૂમિં ગૃહં શય્યાં વસ્ત્રાલંકારહારિણઃ ।
૨૧૪.૩૭૮/૦પરરન્ધ્રેષુ યે ક્રૂરા યે સદાનૃતવાદિનઃ ॥ ૨૧૪.૧૨૫॥

૨૧૪.૩૭૯/૦ગ્રામરાષ્ટ્રપુરસ્થાને મહાદુઃખપ્રદા હિ યે ।
૨૧૪.૩૮૦/૦કૂટસાક્ષિપ્રદાતારઃ કન્યાવિક્રયકારકાઃ ॥ ૨૧૪.૧૨૬॥

૨૧૪.૩૮૧/૦અભક્ષ્યભક્ષણરતા યે ગચ્છન્તિ સુતાં સ્નુષામ્ ।
૨૧૪.૩૮૨/૦માતરં પિતરં ચૈવ યે વદન્તિ ચ પૌરુષમ્ ॥ ૨૧૪.૧૨૭॥

૨૧૪.૩૮૩/૦અન્યે યે ચૈવ નિર્દિષ્ટા મહાપાતકકારિણઃ ।
૨૧૪.૩૮૪/૦દક્ષિણેન તુ તે સર્વે દ્વારેણ પ્રવિશન્તિ વૈ ॥ ૨૧૪.૧૨૮॥

૨૧૫.૧/૧મુનય ઊચુઃ । કથં દક્ષિણમાર્ગેણ વિશન્તિ પાપિનઃ પુરમ્ ।
૨૧૫.૧/૨શ્રોતુમિચ્છામ તદ્ બ્રૂહિ વિસ્તરેણ તપોધન ॥ ૨૧૫.૧॥

૨૧૫.૨/૧વ્યાસ ઉવાચ । સુઘોરં તન્ મહાઘોરં દ્વારં વક્ષ્યામિ ભીષણમ્ ।
૨૧૫.૨/૨નાનાશ્વાપદસંકીર્ણં શિવાશતનિનાદિતમ્ ॥ ૨૧૫.૨॥

૨૧૫.૩/૧ફેત્કારરવસંયુક્તમગમ્યં લોમહર્ષણમ્ ।
૨૧૫.૩/૨ભૂતપ્રેતપિશાચૈશ્ચ વૃતં ચાન્યૈશ્ચ રાક્ષસૈઃ ॥ ૨૧૫.૩॥

૨૧૫.૪/૧એવં દૃષ્ટ્વા સુદૂરાન્તે દ્વારં દુષ્કૃતકારિણઃ ।
૨૧૫.૪/૨મોહં ગચ્છન્તિ સહસા ત્રાસાદ્ વિપ્રલપન્તિ ચ ॥ ૨૧૫.૪॥

૨૧૫.૫/૧તતસ્તાઞ્ શ ृ ङ्खलैः પાશૈર્બદ્ધ્વા કર્ષન્તિ નિર્ભયાઃ ।
૨૧૫.૫/૨તાડયન્તિ ચ દણ્ડૈશ્ચ ભર્ત્સયન્તિ પુનઃ પુનઃ ॥ ૨૧૫.૫॥

૨૧૫.૬/૧લબ્ધસંજ્ઞાસ્તતસ્તે વૈ રુધિરેણ પરિપ્લુતાઃ ।
૨૧૫.૬/૨વ્રજન્તિ દક્ષિણં દ્વારં પ્રસ્ખલન્તઃ પદે પદે ॥ ૨૧૫.૬॥

૨૧૫.૭/૧તીવ્રકણ્ટકયુક્તેન શર્કરાનિચિતેન ચ ।
૨૧૫.૭/૨ક્ષુરધારાનિભૈસ્તીક્ષ્ણૈઃ પાષાણૈર્નિચિતેન ચ ॥ ૨૧૫.૭॥

૨૧૫.૮/૧ક્વચિત્ પઙ્કેન નિચિતા નિરુત્તારૈશ્ચ ખાતકૈઃ ।
૨૧૫.૮/૨લોહસૂચીનિભૈર્દન્તૈઃ સંછન્નેન ક્વચિત્ ક્વચિત્ ॥ ૨૧૫.૮॥

૨૧૫.૯/૧તટપ્રપાતવિષમૈઃ પર્વતૈર્વૃક્ષસંકુલૈઃ ।
૨૧૫.૯/૨પ્રતપ્તાઙ્ગારયુક્તેન યાન્તિ માર્ગેણ દુઃખિતાઃ ॥ ૨૧૫.૯॥

૨૧૫.૧૦/૧ક્વચિદ્ વિષમગર્તાભિઃ ક્વચિલ્લોષ્ટૈઃ સુપિચ્છલૈઃ ।
૨૧૫.૧૦/૨સુતપ્તવાલુકાભિશ્ચ તથા તીક્ષ્ણૈશ્ચ શઙ્કુભિઃ ॥ ૨૧૫.૧૦॥

૨૧૫.૧૧/૧અયઃશ ृ ङ्गાટકૈસ્તપ્તૈઃ ક્વચિદ્ દાવાગ્નિના યુતમ્ ।
૨૧૫.૧૧/૨ક્વચિત્ તપ્તશિલાભિશ્ચ ક્વચિદ્ વ્યાપ્તં હિમેન ચ ॥ ૨૧૫.૧૧॥

૨૧૫.૧૨/૧ક્વચિદ્ વાલુકયા વ્યાપ્તમાકણ્ઠાન્તઃપ્રવેશયા ।
૨૧૫.૧૨/૨ક્વચિદ્ દુષ્ટામ્બુના વ્યાપ્તં ક્વચિત્ કર્ષાગ્નિના પુનઃ ॥ ૨૧૫.૧૨॥

૨૧૫.૧૩/૧ક્વચિત્ સિંહૈર્વૃકૈર્વ્યાઘ્રૈર્દંશકીટૈશ્ચ દારુણૈઃ ।
૨૧૫.૧૩/૨ક્વચિન્ મહાજલૌકાભિઃ ક્વચિદ્ અજગરૈઃ પુનઃ ॥ ૨૧૫.૧૩॥

૨૧૫.૧૪/૧મક્ષિકાભિશ્ચ રૌદ્રાભિઃ ક્વચિત્ સર્પવિષોલ્બણૈઃ ।

૨૧૫.૧૪/૨ક્વચિદ્ દુષ્ટગજૈશ્ચૈવ બલોન્મત્તૈઃ પ્રમાથિભિઃ ॥ ૨૧૫.૧૪॥

૨૧૫.૧૫/૧પન્થાનમુલ્લિખદ્ભિશ્ચ તીક્ષ્ણશ◌ૃઙ્ગૈર્મહાવૃષૈઃ ।
૨૧૫.૧૫/૨મહાશ◌ૃઙ્ગૈશ્ચ મહિષૈરુષ્ટ્રૈર્મત્તૈશ્ચ ખાદનૈઃ ॥ ૨૧૫.૧૫॥

૨૧૫.૧૬/૧ડાકિનીભિશ્ચ રૌદ્રાભિર્વિકરાલૈશ્ચ રાક્ષસૈઃ ।
૨૧૫.૧૬/૨વ્યાધિભિશ્ચ મહારૌદ્રૈઃ પીડ્યમાના વ્રજન્તિ તે ॥ ૨૧૫.૧૬॥

૨૧૫.૧૭/૧મહાધૂલિવિમિશ્રેણ મહાચણ્ડેન વાયુના ।
૨૧૫.૧૭/૨મહાપાષાણવર્ષેણ હન્યમાના નિરાશ્રયાઃ ॥ ૨૧૫.૧૭॥

૨૧૫.૧૮/૧ક્વચિદ્ વિદ્યુન્નિપાતેન દીર્યમાણા વ્રજન્તિ તે ।
૨૧૫.૧૮/૨મહતા બાણવર્ષેણ ભિદ્યમાનાશ્ચ સર્વશઃ ॥ ૨૧૫.૧૮॥

૨૧૫.૧૯/૧પતદ્ભિર્વજ્રનિર્ઘાતૈરુલ્કાપાતૈઃ સુદારુણૈઃ ।
૨૧૫.૧૯/૨પ્રદીપ્તાઙ્ગારવર્ષેણ દહ્યમાના વિશન્તિ ચ ॥ ૨૧૫.૧૯॥

૨૧૫.૨૦/૧મહતા પાંશુવર્ષેણ પૂર્યમાણા રુદન્તિ ચ ।
૨૧૫.૨૦/૨મેઘારવૈઃ સુઘોરૈશ્ચ વિત્રાસ્યન્તે મુહુર્મુહુઃ ॥ ૨૧૫.૨૦॥

૨૧૫.૨૧/૧નિઃશેષાઃ શરવર્ષેણ ચૂર્ણ્યમાણાશ્ચ સર્વતઃ ।
૨૧૫.૨૧/૨મહાક્ષારામ્બુધારાભિઃ સિચ્યમાના વ્રજન્તિ ચ ॥ ૨૧૫.૨૧॥

૨૧૫.૨૨/૧મહાશીતેન મરુતા રૂક્ષેણ પરુષેણ ચ ।
૨૧૫.૨૨/૨સમન્તાદ્ દીર્યમાણાશ્ચ શુષ્યન્તે સંકુચન્તિ ચ ॥ ૨૧૫.૨૨॥

૨૧૫.૨૩/૧ઇત્થં માર્ગેણ પુરુષાઃ પાથેયરહિતેન ચ ।
૨૧૫.૨૩/૨નિરાલમ્બેન દુર્ગેણ નિર્જલેન સમન્તતઃ ॥ ૨૧૫.૨૩॥

૨૧૫.૨૪/૧અતિશ્રમેણ મહતા નિર્ગતેનાશ્રમાય વૈ ।
૨૧૫.૨૪/૨નીયન્તે દેહિનઃ સર્વે યે મૂઢાઃ પાપકર્મિણઃ ॥ ૨૧૫.૨૪॥

૨૧૫.૨૫/૧યમદૂતૈર્મહાઘોરૈસ્તદાજ્ઞાકારિભિર્બલાત્ ।
૨૧૫.૨૫/૨એકાકિનઃ પરાધીના મિત્રબન્ધુવિવર્જિતાઃ ॥ ૨૧૫.૨૫॥

૨૧૫.૨૬/૧શોચન્તઃ સ્વાનિ કર્માણિ રુદન્તિ ચ મુહુર્મુહુઃ ।
૨૧૫.૨૬/૨પ્રેતીભૂતા નિષિદ્ધાસ્તે શુષ્કકણ્ઠૌષ્ઠતાલુકાઃ ॥ ૨૧૫.૨૬॥

૨૧૫.૨૭/૧કૃશાઙ્ગા ભીતભીતાશ્ચ દહ્યમાનાઃ ક્ષુધાગ્નિના ।
૨૧૫.૨૭/૨બદ્ધાઃ શ◌ૃઙ્ખલયા કેચિત્ કેચિદ્ ઉત્તાનપાદયોઃ ॥ ૨૧૫.૨૭॥

૨૧૫.૨૮/૧આકૃષ્યન્તે શુષ્યમાણા યમદૂતૈર્બલોત્કટૈઃ ।
૨૧૫.૨૮/૨નરા અધોમુખાશ્ચાન્યે કૃષ્યમાણાઃ સુદુઃખિતાઃ ॥ ૨૧૫.૨૮॥

૨૧૫.૨૯/૧અન્નપાનીયરહિતા યાચમાનાઃ પુનઃ પુનઃ ।
૨૧૫.૨૯/૨દેહિ દેહીતિ ભાષન્તઃ સાશ્રુગદ્ગદયા ગિરા ॥ ૨૧૫.૨૯॥

૨૧૫.૩૦/૧કૃતાઞ્જલિપુટા દીનાઃ ક્ષુત્તૃષ્ણાપરિપીડિતાઃ ।
૨૧૫.૩૦/૨ભક્ષ્યાન્ ઉચ્ચાવચાન્ દૃષ્ટ્વા ભોજ્યાન્ પેયાંશ્ચ પુષ્કલાન્ ॥ ૨૧૫.૩૦॥

૨૧૫.૩૧/૧સુગન્ધદ્રવ્યસંયુક્તાન્ યાચમાનાઃ પુનઃ પુનઃ ।
૨૧૫.૩૧/૨દધિક્ષીરઘૃતોન્મિશ્રં દૃષ્ટ્વા શાલ્યોદનં તથા ॥ ૨૧૫.૩૧॥

૨૧૫.૩૨/૧પાનાનિ ચ સુગન્ધીનિ શીતલાન્યુદકાનિ ચ ।
૨૧૫.૩૨/૨તાન્ યાચમાનાંસ્તે યામ્યા ભર્ત્સયન્તસ્તદાબ્રુવન્ ।
૨૧૫.૩૨/૩વચોભિઃ પરુષૈર્ભીમાઃ ક્રોધરક્તાન્તલોચનાઃ ॥ ૨૧૫.૩૨॥

૨૧૫.૩૩/૧યામ્યા ઊચુઃ । ન ભવદ્ભિર્હુતં કાલે ન દત્તં બ્રાહ્મણેષુ ચ ।
૨૧૫.૩૩/૨પ્રસભં દીયમાનં ચ વારિતં ચ દ્વિજાતિષુ ॥ ૨૧૫.૩૩॥

૨૧૫.૩૪/૧તસ્ય પાપસ્ય ચ ફલં ભવતાં સમુપાગતમ્ ।
૨૧૫.૩૪/૨નાગ્નૌ દગ્ધં જલે નષ્ટં ન હૃતં નૃપતસ્કરૈઃ ॥ ૨૧૫.૩૪॥

૨૧૫.૩૫/૧કુતો વા સામ્પ્રતં વિપ્રે યન્ ન દત્તં પુરાધમાઃ ।
૨૧૫.૩૫/૨યૈર્દત્તાનિ તુ દાનાનિ સાધુભિઃ સાત્ત્વિકાનિ તુ ॥ ૨૧૫.૩૫॥

૨૧૫.૩૬/૧તેષામેતે પ્રદૃશ્યન્તે કલ્પિતા હ્યન્નપર્વતાઃ ।
૨૧૫.૩૬/૨ભક્ષ્યભોજ્યાશ્ચ પેયાશ્ચ લેહ્યાશ્ચોષ્યાશ્ચ સંવૃતાઃ ॥ ૨૧૫.૩૬॥

૨૧૫.૩૭/૧ન યૂયમભિલપ્સ્યધ્વે ન દત્તં ચ કથંચન ।
૨૧૫.૩૭/૨યૈસ્તુ દત્તં હુતં ચેષ્ટં બ્રાહ્મણાશ્ચૈવ પૂજિતાઃ ॥ ૨૧૫.૩૭॥

૨૧૫.૩૮/૧તેષામન્નં સમાનીય ઇહ નિક્ષિપ્યતે સદા ।
૨૧૫.૩૮/૨પરસ્વં કથમસ્માભિર્દાતું શક્યેત નારકાઃ ॥ ૨૧૫.૩૮॥

૨૧૫.૩૯/૧વ્યાસ ઉવાચ । કિંકરાણાં વચઃ શ્રુત્વા નિઃસ્પૃહાઃ ક્ષુત્તૃષાર્દિતાઃ ।
૨૧૫.૩૯/૨તતસ્તે દારુણૈશ્ચાસ્ત્રૈઃ પીડ્યન્તે યમકિંકરૈઃ ॥ ૨૧૫.૩૯॥

૨૧૫.૪૦/૧મુદ્ગરૈર્લોહદણ્ડૈશ્ચ શક્તિતોમરપટ્ટિશૈઃ ।
૨૧૫.૪૦/૨પરિઘૈર્ભિન્દિપાલૈશ્ચ ગદાપરશુભિઃ શરૈઃ ॥ ૨૧૫.૪૦॥

૨૧૫.૪૧/૧પૃષ્ઠતો હન્યમાન્યાશ્ચ યમદૂતૈઃ સુનિર્દયૈઃ ।

૨૧૫.૪૧/૨અગ્રતઃ સિંહવ્યાઘ્રાદ્યૈર્ભક્ષ્યન્તે પાપકારિણઃ ॥ ૨૧૫.૪૧॥

૨૧૫.૪૨/૧ન પ્રવેષ્ટું ન નિર્ગન્તું લભન્તે દુઃખિતા ભૃશમ્ ।
૨૧૫.૪૨/૨સ્વકર્મોપહતાઃ પાપાઃ ક્રન્દમાનાઃ સુદારુણાઃ ॥ ૨૧૫.૪૨॥

૨૧૫.૪૩/૧તત્ર સમ્પીડ્ય સુભૃશં પ્રવેશં યમકિંકરૈઃ ।
૨૧૫.૪૩/૨નીયન્તે પાપિનસ્તત્ર યત્ર તિષ્ઠેત્ સ્વયં યમઃ ॥ ૨૧૫.૪૩॥

૨૧૫.૪૪/૧ધર્માત્મા ધર્મકૃદ્ દેવઃ સર્વસંયમનો યમઃ ।
૨૧૫.૪૪/૨એવં પથાતિકષ્ટેન પ્રાપ્તાઃ પ્રેતપુરં નરાઃ ॥ ૨૧૫.૪૪॥

૨૧૫.૪૫/૧પ્રજ્ઞાપિતાસ્તદા દૂતૈર્નિવેશ્યન્તે યમાગ્રતઃ ।
૨૧૫.૪૫/૨તતસ્તે પાપકર્માણસ્તં પશ્યન્તિ ભયાનકમ્ ॥ ૨૧૫.૪૫॥

૨૧૫.૪૬/૧પાપાપવિદ્ધનયના વિપરીતાત્મબુદ્ધયઃ ।
૨૧૫.૪૬/૨દંષ્ટ્રાકરાલવદનં ભ્રુકૂટીકુટિલેક્ષણમ્ ॥ ૨૧૫.૪૬॥

૨૧૫.૪૭/૧ઊર્ધ્વકેશં મહાશ્મશ્રું પ્રસ્ફુરદધરોત્તરમ્ ।
૨૧૫.૪૭/૨અષ્ટાદશભુજં ક્રુદ્ધં નીલાઞ્જનચયોપમમ્ ॥ ૨૧૫.૪૭॥

૨૧૫.૪૮/૧સર્વાયુધોદ્યતકરં તીવ્રદણ્ડેન સંયુતમ્ ।
૨૧૫.૪૮/૨મહામહિષમારૂઢં દીપ્તાગ્નિસમલોચનમ્ ॥ ૨૧૫.૪૮॥

૨૧૫.૪૯/૧રક્તમાલ્યામ્બરધરં મહામેઘમિવોચ્છ્રિતમ્ ।
૨૧૫.૪૯/૨પ્રલયામ્બુદનિર્ઘોષં પિબન્ન્ ઇવ મહોદધિમ્ ॥ ૨૧૫.૪૯॥

૨૧૫.૫૦/૧ગ્રસન્તમિવ ત્રૈલોક્યમુદ્ગિરન્તમિવાનલમ્ ।
૨૧૫.૫૦/૨મૃત્યું ચ તત્સમીપસ્થં કાલાનલસમપ્રભમ્ ॥ ૨૧૫.૫૦॥

૨૧૫.૫૧/૧પ્રલયાનલસંકાશં કૃતાન્તં ચ ભયાનકમ્ ।
૨૧૫.૫૧/૨મારીચોગ્રા મહામારી કાલરાત્રી ચ દારુણા ॥ ૨૧૫.૫૧॥

૨૧૫.૫૨/૧વિવિધા વ્યાધયઃ કષ્ટા નાનારૂપા ભયાવહાઃ ।
૨૧૫.૫૨/૨શક્તિશૂલાઙ્કુશધરાઃ પાશચક્રાસિધારિણઃ ॥ ૨૧૫.૫૨॥

૨૧૫.૫૩/૧વજ્રદણ્ડધરા રૌદ્રાઃ ક્ષુરતૂણધનુર્ધરાઃ ।
૨૧૫.૫૩/૨અસંખ્યાતા મહાવીર્યાઃ ક્રૂરાશ્ચાઞ્જનસપ્રભાઃ ॥ ૨૧૫.૫૩॥

૨૧૫.૫૪/૧સર્વાયુધોદ્યતકરા યમદૂતા ભયાનકાઃ ।
૨૧૫.૫૪/૨અનેન પરિવારેણ મહાઘોરેણ સંવૃતમ્ ॥ ૨૧૫.૫૪॥

૨૧૫.૫૫/૧યમં પશ્યન્તિ પાપિષ્ઠાશ્ચિત્રગુપ્તં વિભીષણમ્ ।
૨૧૫.૫૫/૨નિર્ભર્ત્સયતિ ચાત્યર્થં યમસ્તાન્ પાપકારિણઃ ॥ ૨૧૫.૫૫ ॥

૨૧૫.૫૬/૧ચિત્રગુપ્તસ્તુ ભગવાન્ ધર્મવાક્યૈઃ પ્રબોધયન્ ॥ ૨૧૫.૫૬ ॥

૨૧૫.૫૭/૧ચિત્રગુપ્ત ઉવાચ । ભો ભો દુષ્કૃતકર્માણઃ પરદ્રવ્યાપહારિણઃ ।
૨૧૫.૫૭/૨ગર્વિતા રૂપવીર્યેણ પરદારવિમર્દકાઃ ॥ ૨૧૫.૫૭ ॥

૨૧૫.૫૮/૧યત્ સ્વયં ક્રિયતે કર્મ તત્ સ્વયં ભુજ્યતે પુનઃ ।
૨૧૫.૫૮/૨તત્ કિમાત્મોપઘાતાર્થં ભવદ્ભિર્દુષ્કૃતં કૃતમ્ ॥ ૨૧૫.૫૮ ॥

૨૧૫.૫૯/૧ઇદાનીં કિં નુ શોચધ્વં પીડ્યમાનાઃ સ્વકર્મભિઃ ।
૨૧૫.૫૯/૨ભુઞ્જધ્વં સ્વાનિ દુઃખાનિ નહિ દોષોઽસ્તિ કસ્યચિત્ ॥ ૨૧૫.૫૯ ॥

૨૧૫.૬૦/૧ય એતે પૃથિવીપાલાઃ સમ્પ્રાપ્તા મત્સમીપતઃ ।
૨૧૫.૬૦/૨સ્વકીયૈઃ કર્મભિર્ઘોરૈર્દુષ્પ્રજ્ઞા બલગર્વિતાઃ ॥ ૨૧૫.૬૦ ॥

૨૧૫.૬૧/૧ભો ભો નૃપા દુરાચારાઃ પ્રજાવિધ્વંસકારિણઃ ।
૨૧૫.૬૧/૨અલ્પકાલસ્ય રાજ્યસ્ય કૃતે કિં દુષ્કૃતં કૃતમ્ ॥ ૨૧૫.૬૧ ॥

૨૧૫.૬૨/૧રાજ્યલોભેન મોહેન બલાદ્ અન્યાયતઃ પ્રજાઃ ।
૨૧૫.૬૨/૨યદ્ દણ્ડિતાઃ ફલં તસ્ય ભુઞ્જધ્વમધુના નૃપાઃ ॥ ૨૧૫.૬૨ ॥

૨૧૫.૬૩/૧કુતો રાજ્યં કલત્રં ચ યદર્થમશુભં કૃતમ્ ।
૨૧૫.૬૩/૨તત્ સર્વં સમ્પરિત્યજ્ય યૂયમેકાકિનઃ સ્થિતાઃ ॥ ૨૧૫.૬૩ ॥

૨૧૫.૬૪/૧પશ્યામો ન બલં સર્વં યેન વિધ્વંસિતાઃ પ્રજાઃ ।
૨૧૫.૬૪/૨યમદૂતૈઃ પાટ્યમાના અધુના કીદૃશં ફલમ્ ॥ ૨૧૫.૬૪ ॥

૨૧૫.૬૫/૧વ્યાસ ઉવાચ । એવં બહુવિધૈર્વાક્યૈરુપાલબ્ધા યમેન તે ।
૨૧૫.૬૫/૨શોચન્તઃ સ્વાનિ કર્માણિ તૂષ્ણીં તિષ્ઠન્તિ પાર્થિવાઃ ॥ ૨૧૫.૬૫ ॥

૨૧૫.૬૬/૧ઇતિ કર્મ સમાદિશ્ય નૃપાણાં ધર્મરાટ્ સ્વયમ્ ।
૨૧૫.૬૬/૨તત્પાતકવિશુદ્ધ્યર્થમિદં વચનમબ્રવીત્ ॥ ૨૧૫.૬૬ ॥

૨૧૫.૬૭/૧યમ ઉવાચ । ભો ભોશ્ચણ્ડ મહાચણ્ડ ગૃહીત્વા નૃપતીન્ ઇમાન્ ।
૨૧૫.૬૭/૨વિશોધયધ્વં પાપેભ્યઃ ક્રમેણ નરકાગ્નિષુ ॥ ૨૧૫.૬૭ ॥

૨૧૫.૬૮/૧વ્યાસ ઉવાચ । તતઃ શીઘ્રં સમુત્થાય નૃપાન્ સંગૃહ્ય પાદયોઃ ।
૨૧૫.૬૮/૨ભ્રામયિત્વા તુ વેગેન ક્ષિપ્ત્વા ચોર્ધ્વં પ્રગૃહ્ય ચ ॥ ૨૧૫.૬૮ ॥

૨૧૫.૬૯/૧તત્તત્પાપપ્રમાણેન યમદૂતાઃ શિલાતલે ।
૨૧૫.૬૯/૨આસ્ફોટયન્તિ તરસા વજ્રેણેવ મહાદ્રુમમ્ ॥ ૨૧૫.૬૯ ॥

૨૧૫.૭૦/૧તતસ્તુ રક્તં સ્રોતોભિઃ સ્રવતે જર્જરીકૃતઃ ।
૨૧૫.૭૦/૨નિઃસંજ્ઞઃ સ તદા દેહી નિશ્ચેષ્ટશ્ચ પ્રજાયતે ॥ ૨૧૫.૭૦ ॥

૨૧૫.૭૧/૧તતઃ સ વાયુના સ્પૃષ્ટઃ શનૈરુજ્જીવતે પુનઃ ।
૨૧૫.૭૧/૨તતઃ પાપવિશુદ્ધ્યર્થં ક્ષિપન્તિ નરકાર્ણવે ॥ ૨૧૫.૭૧ ॥

૨૧૫.૭૨/૧અન્યાંશ્ચ તે તદા દૂતાઃ પાપકર્મરતાન્ નરાન્ ।
૨૧૫.૭૨/૨નિવેદયન્તિ વિપ્રેન્દ્રા યમાય ભૃશદુઃખિતાન્ ॥ ૨૧૫.૭૨ ॥

૨૧૫.૭૩/૧યમદૂતા ઊચુઃ । એષ દેવ તવાદેશાદ્ અસ્માભિર્મોહિતો ભૃશમ્ ।
૨૧૫.૭૩/૨આનીતો ધર્મવિમુખઃ સદા પાપરતઃ પરઃ ॥ ૨૧૫.૭૩ ॥

૨૧૫.૭૪/૧એષ લુબ્ધો દુરાચારો મહાપાતકસંયુતઃ ।
૨૧૫.૭૪/૨ઉપપાતકકર્તા ચ સદા હિંસારતો શુચિઃ ॥ ૨૧૫.૭૪ ॥

૨૧૫.૭૫/૧અગમ્યાગામી દુષ્ટાત્મા પરદ્રવ્યાપહારકઃ ।
૨૧૫.૭૫/૨કન્યાક્રયી કૂટસાક્ષી કૃતઘ્નો મિત્રવઞ્ચકઃ ॥ ૨૧૫.૭૫ ॥

૨૧૫.૭૬/૧અનેન મદમત્તેન સદા ધર્મો વિનિન્દિતઃ ।
૨૧૫.૭૬/૨પાપમાચરિતં કર્મ મર્ત્યલોકે દુરાત્મના ॥ ૨૧૫.૭૬ ॥

૨૧૫.૭૭/૧ઇદાનીમસ્ય દેવેશ નિગ્રહાનુગ્રહૌ વદ ।
૨૧૫.૭૭/૨પ્રભુરસ્ય ક્રિયાયોગે વયં વા પરિપન્થિનઃ ॥ ૨૧૫.૭૭ ॥

૨૧૫.૭૮/૧વ્યાસ ઉવાચ । ઇતિ વિજ્ઞાપ્ય દેવેશં ન્યસ્યાગ્રે પાપકારિણમ્ ।
૨૧૫.૭૮/૨નરકાણાં સહસ્રેષુ લક્ષકોટિશતેષુ ચ ॥ ૨૧૫.૭૮ ॥

૨૧૫.૭૯/૧કિંકરાસ્તે તતો યાન્તિ ગ્રહીતુમપરાન્ નરાન્ ।
૨૧૫.૭૯/૨પ્રતિપન્ને કૃતે દોષે યમો વૈ પાપકારિણામ્ ॥ ૨૧૫.૭૯ ॥

૨૧૫.૮૦/૧સમાદિશતિ તાન્ ઘોરાન્ નિગ્રહાય સ્વકિંકરાન્ ।
૨૧૫.૮૦/૨યથા યસ્ય વિનિર્દિષ્ટો વસિષ્ઠાદ્યૈર્વિનિગ્રહઃ ॥ ૨૧૫.૮૦ ॥

૨૧૫.૮૧/૧પાપસ્ય તદ્ ભૃશં ક્રુદ્ધાઃ કુર્વન્તિ યમકિંકરાઃ ।
૨૧૫.૮૧/૨અઙ્કુશૈર્મુદ્ગરૈર્દણ્ડૈઃ ક્રકચૈઃ શક્તિતોમરૈઃ ॥ ૨૧૫.૮૧ ॥

૨૧૫.૮૨/૧ખડ્ગશૂલનિપાતૈશ્ચ ભિદ્યન્તે પાપકારિણઃ ।
૨૧૫.૮૨/૨નરકાણાં સહસ્રેષુ લક્ષકોટિશતેષુ ચ ॥ ૨૧૫.૮૨ ॥

૨૧૫.૮૩/૧સ્વકર્મોપાર્જિતૈર્દોષૈઃ પીડ્યન્તે યમકિંકરૈઃ ।
૨૧૫.૮૩/૨શ઼ૃણુધ્વં નરકાણાં ચ સ્વરૂપં ચ ભયંકરમ્ ॥ ૨૧૫.૮૩ ॥

૨૧૫.૮૪/૧નામાનિ ચ પ્રમાણં ચ યેન યાન્તિ નરાશ્ચ તાન્ ।
૨૧૫.૮૪/૨મહાવાચીતિ વિખ્યાતં નરકં શોણિતપ્લુતમ્ ॥ ૨૧૫.૮૪ ॥

૨૧૫.૮૫/૧વજ્રકણ્ટકસમ્મિશ્રં યોજનાયુતવિસ્તૃતમ્ ।
૨૧૫.૮૫/૨તત્ર સમ્પીડ્યતે મગ્નો ભિદ્યતે વજ્રકણ્ટકે ॥ ૨૧૫.૮૫ ॥

૨૧૫.૮૬/૧વર્ષલક્ષં મહાઘોરં ગોઘાતી નરકે નરઃ ।
૨૧૫.૮૬/૨યોજનાનાં શતં લક્ષં કુમ્ભીપાકં સુદારુણમ્ ॥ ૨૧૫.૮૬ ॥

૨૧૫.૮૭/૧તામ્રકુમ્ભવતી દીપ્તા વાલુકાઙ્ગારસંવૃતા ।
૨૧૫.૮૭/૨બ્રહ્મહા ભૂમિહર્તા ચ નિક્ષેપસ્યાપહારકઃ ॥ ૨૧૫.૮૭ ॥

૨૧૫.૮૮/૧દહ્યન્તે તત્ર સંક્ષિપ્તા યાવદ્ આભૂતસમ્પ્લવમ્ ।
૨૧૫.૮૮/૨રૌરવો વજ્રનારાચૈઃ પ્રજ્વલદ્ભિઃ સમાવૃતઃ ॥ ૨૧૫.૮૮ ॥

૨૧૫.૮૯/૧યોજનાનાં સહસ્રાણિ ષષ્ટિરાયામવિસ્તરૈઃ ।
૨૧૫.૮૯/૨ભિદ્યન્તે તત્ર નારાચૈઃ સજ્વાલૈર્નરકે નરાઃ ॥ ૨૧૫.૮૯ ॥

૨૧૫.૯૦/૧ઇક્ષુવત્ તત્ર પીડ્યન્તે યે નરાઃ કૂટસાક્ષિણઃ ।
૨૧૫.૯૦/૨અયોમયં પ્રજ્વલિતં મઞ્જૂષં નરકં સ્મૃતમ્ ॥ ૨૧૫.૯૦ ॥

૨૧૫.૯૧/૧નિક્ષિપ્તાસ્તત્ર દહ્યન્તે બન્દિગ્રાહકૃતાશ્ચ યે ।
૨૧૫.૯૧/૨અપ્રતિષ્ઠેતિ નરકં પૂયમૂત્રપુરીષકમ્ ॥ ૨૧૫.૯૧ ॥

૨૧૫.૯૨/૧અધોમુખઃ પતેત્ તત્ર બ્રાહ્મણસ્યોપપીડકઃ ।
૨૧૫.૯૨/૨લાક્ષાપ્રજ્વલિતં ઘોરં નરકં તુ વિલેપકમ્ ॥ ૨૧૫.૯૨ ॥

૨૧૫.૯૩/૧નિમગ્નાસ્તત્ર દહ્યન્તે મદ્યપાને દ્વિજોત્તમાઃ ।
૨૧૫.૯૩/૨મહાપ્રભેતિ નરકં દીપ્તશૂલમહોચ્છ્રયમ્ ॥ ૨૧૫.૯૩ ॥

૨૧૫.૯૪/૧તત્ર શૂલેન ભિદ્યન્તે પતિભાર્યોપભેદિનઃ ।
૨૧૫.૯૪/૨નરકં ચ મહાઘોરં જયન્તી ચાયસી શિલા ॥ ૨૧૫.૯૪ ॥

૨૧૫.૯૫/૧તયા ચાક્રમ્યતે પાપઃ પરદારોપસેવકઃ ।
૨૧૫.૯૫/૨નરકં શાલ્મલાખ્યં તુ પ્રદીપ્તદૃઢકણ્ટકમ્ ॥ ૨૧૫.૯૫ ॥

૨૧૫.૯૬/૧તયા લિઙ્ગતિ દુઃખાર્તા નારી બહુનરંગમા ।

૨૧૫.૯૬/૨યે વદન્તિ સદાસત્યં પરમર્માવકર્તનમ્ ॥ ૨૧૫.૯૬॥

૨૧૫.૯૭/૧જિહ્વા ચોચ્છ્રિયતે તેષાં સદસ્યૈર્યમકિંકરૈઃ ।
૨૧૫.૯૭/૨યે તુ રાગૈઃ કટાક્ષૈશ્ચ વીક્ષન્તે પરયોષિતમ્ ॥ ૨૧૫.૯૭॥

૨૧૫.૯૮/૧તેષાં ચક્ષૂંષિ નારાચૈર્વિધ્યન્તે યમકિંકરૈઃ ॥ ૨૧૫.૯૮॥

૨૧૫.૯૯/૧માતરં યેઽપિ ગચ્છન્તિ ભગિનીં દુહિતરં સ્નુષામ્ ।
૨૧૫.૯૯/૨સ્ત્રીબાલવૃદ્ધહન્તારો યાવદ્ ઇન્દ્રાશ્ચતુર્દશ ।
૨૧૫.૯૯/૩જ્વાલામાલાકુલં રૌદ્રં મહારૌરવસંજ્ઞિતમ્ ॥ ૨૧૫.૯૯॥

૨૧૫.૧૦૦/૧નરકં યોજનાનાં ચ સહસ્રાણિ ચતુર્દશ ।
૨૧૫.૧૦૦/૨પુરં ક્ષેત્રં ગૃહં ગ્રામં યો દીપયતિ વહ્નિના ॥ ૨૧૫.૧૦૦॥

૨૧૫.૧૦૧/૧સ તત્ર દહ્યતે મૂઢો યાવત્ કલ્પસ્થિતિર્નરઃ ।
૨૧૫.૧૦૧/૨તામિસ્રમિતિ વિખ્યાતં લક્ષયોજનવિસ્તૃતમ્ ॥ ૨૧૫.૧૦૧॥

૨૧૫.૧૦૨/૧નિપતદ્ભિઃ સદા રૌદ્રઃ ખડ્ગપટ્ટિશમુદ્ગરૈઃ ।
૨૧૫.૧૦૨/૨તત્ર ચૌરા નરાઃ ક્ષિપ્તાસ્તાડ્યન્તે યમકિંકરૈઃ ॥ ૨૧૫.૧૦૨॥

૨૧૫.૧૦૩/૧શૂલશક્તિગદાખડ્ગૈર્યાવત્ કલ્પશતત્રયમ્ ।
૨૧૫.૧૦૩/૨તામિસ્રાદ્ દ્વિગુણં પ્રોક્તં મહાતામિસ્રસંજ્ઞિતમ્ ॥ ૨૧૫.૧૦૩॥

૨૧૫.૧૦૪/૧જલૌકાસર્પસમ્પૂર્ણાં નિરાલોકં સુદુઃખદમ્ ।
૨૧૫.૧૦૪/૨માતૃહા પિતૃહા ચૈવ મિત્રવિસ્રમ્ભઘાતકઃ ॥ ૨૧૫.૧૦૪॥

૨૧૫.૧૦૫/૧તિષ્ઠન્તિ તક્ષ્યમાણાશ્ચ યાવત્ તિષ્ઠતિ મેદિની ।
૨૧૫.૧૦૫/૨અસિપત્રવનં નામ નરકં ભૂરિદુઃખદમ્ ॥ ૨૧૫.૧૦૫॥

૨૧૫.૧૦૬/૧યોજનાયુતવિસ્તારં જ્વલત્ખડ્ગૈઃ સમાકુલમ્ ।
૨૧૫.૧૦૬/૨પાતિતસ્તત્ર તૈઃ ખડ્ગૈઃ શતધા તુ સમાહતઃ ॥ ૨૧૫.૧૦૬॥

૨૧૫.૧૦૭/૧મિત્રઘ્નઃ કૃત્યતે તાવદ્ યાવદ્ આભૂતસમ્પ્લવમ્ ।
૨૧૫.૧૦૭/૨કરમ્ભવાલુકા નામ નરકં યોજનાયુતમ્ ॥ ૨૧૫.૧૦૭॥

૨૧૫.૧૦૮/૧કૂપાકારં વૃતં દીપ્તૈર્વાલુકાઙ્ગારકણ્ટકૈઃ ।
૨૧૫.૧૦૮/૨દહ્યતે ભિદ્યતે વર્ષ+ ।લક્ષાયુતશતત્રયમ્ ॥ ૨૧૫.૧૦૮॥

૨૧૫.૧૦૯/૧યેન દગ્ધો જનો નિત્યં મિથ્યોપાયૈઃ સુદારુણૈઃ ।
૨૧૫.૧૦૯/૨કાકોલં નામ નરકં કૃમિપૂયપરિપ્લુતમ્ ॥ ૨૧૫.૧૦૯॥

૨૧૫.૧૧૦/૧ક્ષિપ્યતે તત્ર દુષ્ટાત્મા એકાકી મિષ્ટભુઙ્ નરઃ ।
૨૧૫.૧૧૦/૨કુડ્મલં નામ નરકં પૂર્ણં વિણ્મૂત્રશોણિતૈઃ ॥ ૨૧૫.૧૧૦॥

૨૧૫.૧૧૧/૧પઞ્ચયજ્ઞક્રિયાહીનાઃ ક્ષિપ્યન્તે તત્ર વૈ નરાઃ ।
૨૧૫.૧૧૧/૨સુદુર્ગન્ધં મહાભીમં માંસશોણિતસંકુલમ્ ॥ ૨૧૫.૧૧૧॥

૨૧૫.૧૧૨/૧અભક્ષ્યાન્ને રતાસ્તેઽત્ર નિપતન્તિ નરાધમાઃ ।
૨૧૫.૧૧૨/૨ક્રિમિકીટસમાકીર્ણં શવપૂર્ણં મહાવટમ્ ॥ ૨૧૫.૧૧૨॥

૨૧૫.૧૧૩/૧અધોમુખઃ પતેત્ તત્ર કન્યાવિક્રયકૃન્ નરઃ ।
૨૧૫.૧૧૩/૨નામ્ના વૈ તિલપાકેતિ નરકં દારુણં સ્મૃતમ્ ॥ ૨૧૫.૧૧૩॥

૨૧૫.૧૧૪/૧તિલવત્ તત્ર પીડ્યન્તે પરપીડારતાશ્ચ યે ।
૨૧૫.૧૧૪/૨નરકં તૈલપાકેતિ જ્વલત્તૈલમહીપ્લવમ્ ॥ ૨૧૫.૧૧૪॥

૨૧૫.૧૧૫/૧પચ્યતે તત્ર મિત્રઘ્નો હન્તા ચ શરણાગતમ્ ।
૨૧૫.૧૧૫/૨નામ્ના વજ્રકપાટેતિ વજ્રશૃઙ્ખલયાન્વિતમ્ ॥ ૨૧૫.૧૧૫॥

૨૧૫.૧૧૬/૧પીડ્યન્તે નિર્દયં તત્ર યૈઃ કૃતઃ ક્ષીરવિક્રયઃ ।
૨૧૫.૧૧૬/૨નિરુચ્છ્વાસ ઇતિ પ્રોક્તં તમોન્ધં વાતવર્જિતમ્ ॥ ૨૧૫.૧૧૬॥

૨૧૫.૧૧૭/૧નિશ્ચેષ્ટં ક્ષિપ્યતે તત્ર વિપ્રદાનનિરોધકૃત્ ।
૨૧૫.૧૧૭/૨અઙ્ગારોપચયં નામ દીપ્તાઙ્ગારસમુજ્જ્વલમ્ ॥ ૨૧૫.૧૧૭॥

૨૧૫.૧૧૮/૧દહ્યતે તત્ર યેનોક્તં દાનં વિપ્રાય નાર્પિતમ્ ।
૨૧૫.૧૧૮/૨મહાપાયીતિ નરકં લક્ષયોજનમાયતમ્ ॥ ૨૧૫.૧૧૮॥

૨૧૫.૧૧૯/૧પાત્યન્તેઽધોમુખાસ્તત્ર યે જલ્પન્તિ સદાનૃતમ્ ।
૨૧૫.૧૧૯/૨મહાજ્વાલેતિ નરકં જ્વાલાભાસ્વરભીષણમ્ ॥ ૨૧૫.૧૧૯॥

૨૧૫.૧૨૦/૧દહ્યતે તત્ર સુચિરં યઃ પાપે બુદ્ધિકૃન્ નરઃ ।
૨૧૫.૧૨૦/૨નરકં ક્રકચાખ્યાતં પીડ્યન્તે તત્ર વૈ નરાઃ ॥ ૨૧૫.૧૨૦॥

૨૧૫.૧૨૧/૧ક્રકચૈર્વજ્રધારોગ્રૈરગમ્યાગમને રતાઃ ।
૨૧૫.૧૨૧/૨નરકં ગુડપાકેતિ જ્વલદ્ગુડહ્રદૈર્વૃતમ્ ॥ ૨૧૫.૧૨૧॥

૨૧૫.૧૨૨/૧નિક્ષિપ્તો દહ્યતે તસ્મિન્ વર્ણસંકરકૃન્ નરઃ ।
૨૧૫.૧૨૨/૨ક્ષુરધારેતિ નરકં તીક્ષ્ણક્ષુરસમાવૃતમ્ ॥ ૨૧૫.૧૨૨॥

૨૧૫.૧૨૩/૧છિદ્યન્તે તત્ર કલ્પાન્તં વિપ્રભૂમિહરા નરાઃ ।
૨૧૫.૧૨૩/૨નરકં ચામ્બરીષાખ્યં પ્રલયાનલદીપિતમ્ ॥ ૨૧૫.૧૨૩॥

૨૧૫.૧૨૪/૧કલ્પકોટિશતં તત્ર દહ્યતે સ્વર્ણહારકઃ ।
૨૧૫.૧૨૪/૨નામ્ના વજ્રકુઠારેતિ નરકં વજ્રસંકુલમ્ ॥ ૨૧૫.૧૨૪॥

૨૧૫.૧૨૫/૧છિદ્યન્તે તત્ર છેત્તારો દ્રુમાણાં પાપકારિણઃ ।
૨૧૫.૧૨૫/૨નરકં પરિતાપાખ્યં પ્રલયાનલદીપિતમ્ ॥ ૨૧૫.૧૨૫॥

૨૧૫.૧૨૬/૧ગરદો મધુહર્તા ચ પચ્યતે તત્ર પાપકૃત્ ।
૨૧૫.૧૨૬/૨નરકં કાલસૂત્રં ચ વજ્રસૂત્રવિનિર્મિતમ્ ॥ ૨૧૫.૧૨૬॥

૨૧૫.૧૨૭/૧ભ્રમન્તસ્તત્ર ચ્છિદ્યન્તે પરસસ્યોપલુણ્ઠકાઃ ।
૨૧૫.૧૨૭/૨નરકં કશ્મલં નામ શ્લેષ્મશિઙ્ઘાણકાવૃતમ્ ॥ ૨૧૫.૧૨૭॥

૨૧૫.૧૨૮/૧તત્ર સંક્ષિપ્યતે કલ્પં સદા માંસરુચિર્નરઃ ।
૨૧૫.૧૨૮/૨નરકં ચોગ્રગન્ધેતિ લાલામૂત્રપુરીષવત્ ॥ ૨૧૫.૧૨૮॥

૨૧૫.૧૨૯/૧ક્ષિપ્યન્તે તત્ર નરકે પિતૃપિણ્ડાપ્રયચ્છકાઃ ।
૨૧૫.૧૨૯/૨નરકં દુર્ધરં નામ જલૌકાવૃશ્ચિકાકુલમ્ ॥ ૨૧૫.૧૨૯॥

૨૧૫.૧૩૦/૧ઉત્કોચભક્ષકસ્તત્ર તિષ્ઠતે વર્ષકાયુતમ્ ।
૨૧૫.૧૩૦/૨યચ્ચ વજ્રમહાપીડા નરકં વજ્રનિર્મિતમ્ ॥ ૨૧૫.૧૩૦॥

૨૧૫.૧૩૧/૧તત્ર પ્રક્ષિપ્ય દહ્યન્તે પીડ્યન્તે યમકિંકરૈઃ ।
૨૧૫.૧૩૧/૨ધનં ધાન્યં હિરણ્યં વા પરકીયં હરન્તિ યે ॥ ૨૧૫.૧૩૧॥

૨૧૫.૧૩૨/૧યમદૂતૈશ્ચ ચૌરાસ્તે છિદ્યન્તે લવશઃ ક્ષુરૈઃ ।
૨૧૫.૧૩૨/૨યે હત્વા પ્રાણિનં મૂઢાઃ ખાદન્તે કાકગૃધ્રવત્ ॥ ૨૧૫.૧૩૨॥

૨૧૫.૧૩૩/૧ભોજ્યન્તે ચ સ્વમાંસં તે કલ્પાન્તં યમકિંકરૈઃ ।
૨૧૫.૧૩૩/૨આસનં શયનં વસ્ત્રં પરકીયં હરન્તિ યે ॥ ૨૧૫.૧૩૩॥

૨૧૫.૧૩૪/૧યમદૂતૈશ્ચ તે મૂઢા ભિદ્યન્તે શક્તિતોમરૈઃ ।
૨૧૫.૧૩૪/૨ફલં પત્રં નૃણાં વાપિ હૃતં યૈસ્તુ કુબુદ્ધિભિઃ ॥ ૨૧૫.૧૩૪॥

૨૧૫.૧૩૫/૧યમદૂતૈશ્ચ તે ક્રુદ્ધૈર્દહ્યન્તે તૃણવહ્નિભિઃ ।
૨૧૫.૧૩૫/૨પરદ્રવ્યે કલત્રે ચ યઃ સદા દુષ્ટધીર્નરઃ ॥ ૨૧૫.૧૩૫॥

૨૧૫.૧૩૬/૧યમદૂતૈર્જ્વલત્ તસ્ય હૃદિ શૂલં નિખન્યતે ।
૨૧૫.૧૩૬/૨કર્મણા મનસા વાચા યે ધર્મવિમુખા નરાઃ ॥ ૨૧૫.૧૩૬॥

૨૧૫.૧૩૭/૧યમલોકે તુ તે ઘોરા લભન્તે પરિયાતનાઃ ।

૨૧૫.૧૩૭/૨એવં શતસહસ્રાણિ લક્ષકોટિશતાનિ ચ ॥ ૨૧૫.૧૩૭॥

૨૧૫.૧૩૮/૧નરકાણિ નરૈસ્તત્ર ભુજ્યન્તે પાપકારિભિઃ ।
૨૧૫.૧૩૮/૨ઇહ કૃત્વા સ્વલ્પમપિ નરઃ કર્માશુભાત્મકમ્ ॥ ૨૧૫.૧૩૮॥

૨૧૫.૧૩૯/૧પ્રાપ્નોતિ નરકે ઘોરે યમલોકેષુ યાતનામ્ ।
૨૧૫.૧૩૯/૨ન શ ૃણ્વન્તિ નરા મૂઢા ધર્મોક્તં સાધુ ભાષિતમ્ ॥ ૨૧૫.૧૩૯॥

૨૧૫.૧૪૦/૧દૃષ્ટં કેનેતિ પ્રત્યક્ષં પ્રત્યુક્ત્યૈવં વદન્તિ તે ।
૨૧૫.૧૪૦/૨દિવા રાત્રૌ પ્રયત્નેન પાપં કુર્વન્તિ યે નરાઃ ॥ ૨૧૫.૧૪૦॥

૨૧૫.૧૪૧/૧નાચરન્તિ હિ તે ધર્મં પ્રમાદેનાપિ મોહિતાઃ ।
૨૧૫.૧૪૧/૨ઇહૈવ ફલભોક્તારઃ પરત્ર વિમુખાશ્ચ યે ॥ ૨૧૫.૧૪૧॥

૨૧૫.૧૪૨/૧તે પતન્તિ સુઘોરેષુ નરકેષુ નરાધમાઃ ।
૨૧૫.૧૪૨/૨દારુણો નરકે વાસઃ સ્વર્ગવાસઃ સુખપ્રદઃ ।
૨૧૫.૧૪૨/૩નરૈઃ સમ્પ્રાપ્યતે તત્ર કર્મ કૃત્વા શુભાશુભમ્ ॥ ૨૧૫.૧૪૨॥

૨૧૬.૧/૧મુનય ઊચુઃ । અહોઽતિદુઃખં ઘોરં ચ યમમાર્ગે ત્વયોદિતમ્ ।
૨૧૬.૧/૨નરકાણિ ચ ઘોરાણિ દ્વારં યામ્યં ચ સત્તમ ॥ ૨૧૬.૧॥

૨૧૬.૨/૧અસ્ત્યુપાયો ન વા બ્રહ્મન્ યમમાર્ગેઽતિભીષણે ।
૨૧૬.૨/૨બ્રૂહિ યેન નરા યાન્તિ સુખેન યમસાદનમ્ ॥ ૨૧૬.૨॥

૨૧૬.૩/૧વ્યાસ ઉવાચ । ઇહ યે ધર્મસંયુક્તાસ્ત્વહિંસાનિરતા નરાઃ ।
૨૧૬.૩/૨ગુરુશુશ્રૂષણે યુક્તા દેવબ્રાહ્મણપૂજકાઃ ॥ ૨૧૬.૩॥

૨૧૬.૪/૧યસ્મિન્ મનુષ્યલોકાસ્તે સભાર્યાઃ સસુતાસ્તથા ।
૨૧૬.૪/૨તમધ્વાનં ચ ગચ્છન્તિ યથા તત્ કથયામિ વઃ ॥ ૨૧૬.૪॥

૨૧૬.૫/૧વિમાનૈર્વિવિધૈર્દિવ્યૈઃ કાઞ્ચનધ્વજશોભિતૈઃ ।
૨૧૬.૫/૨ધર્મરાજપુરં યાન્તિ સેવમાનાપ્સરોગણૈઃ ॥ ૨૧૬.૫॥

૨૧૬.૬/૧બ્રાહ્મણેભ્યસ્તુ દાનાનિ નાનારૂપાણિ ભક્તિતઃ ।
૨૧૬.૬/૨યે પ્રયચ્છન્તિ તે યાન્તિ સુખેનૈવ મહાપથે ॥ ૨૧૬.૬॥

૨૧૬.૭/૧અન્નં યે તુ પ્રયચ્છન્તિ બ્રાહ્મણેભ્યઃ સુસંકૃતમ્ ।
૨૧૬.૭/૨શ્રોત્રિયેભ્યો વિશેષેણ ભક્ત્યા પરમયા યુતાઃ ॥ ૨૧૬.૭॥

૨૧૬.૮/૧તરુણીભિર્વરસ્ત્રીભિઃ સેવ્યમાનાઃ પ્રયત્નતઃ ।
૨૧૬.૮/૨ધર્મરાજપુરં યાન્તિ વિમાનૈરભ્યલંકૃતૈઃ ॥ ૨૧૬.૮॥

૨૧૬.૯/૧યે ચ સત્યં પ્રભાષન્તે બહિરન્તશ્ચ નિર્મલાઃ ।
૨૧૬.૯/૨તેऽપિ યાન્ત્યમરપ્રખ્યા વિમાનૈર્યમમન્દિરમ્ ॥ ૨૧૬.૯॥

૨૧૬.૧૦/૧ગોદાનાનિ પવિત્રાણિ વિષ્ણુમુદ્દિશ્ય સાધુષુ ।
૨૧૬.૧૦/૨યે પ્રયચ્છન્તિ ધર્મજ્ઞાઃ કૃશેષુ કૃશવૃત્તિષુ ॥ ૨૧૬.૧૦॥

૨૧૬.૧૧/૧તે યાન્તિ દિવ્યવર્ણાભૈર્વિમાનૈર્મણિચિત્રિતૈઃ ।
૨૧૬.૧૧/૨ધર્મરાજપુરં શ્રીમાન્ સેવ્યમાનાપ્સરોગણૈઃ ॥ ૨૧૬.૧૧॥

૨૧૬.૧૨/૧ઉપાનદ્યુગલં છત્રં શય્યાસનમથાપિ વા ।
૨૧૬.૧૨/૨યે પ્રયચ્છન્તિ વસ્ત્રાણિ તથૈવાભરણાનિ ચ ॥ ૨૧૬.૧૨॥

૨૧૬.૧૩/૧તે યાન્ત્યશ્વૈ રથૈશ્ચૈવ કુઞ્જરૈશ્ચાપ્યલંકૃતાઃ ।
૨૧૬.૧૩/૨ધર્મરાજપુરં દિવ્યં છત્રૈઃ સૌવર્ણરાજતૈઃ ॥ ૨૧૬.૧૩॥

૨૧૬.૧૪/૧યે ચ ભક્ત્યા પ્રયચ્છન્તિ ગુડપાનકમર્ચિતમ્ ।
૨૧૬.૧૪/૨ઓદનં ચ દ્વિજાગ્ર્યેભ્યો વિશુદ્ધેનાન્તરાત્મના ॥ ૨૧૬.૧૪॥

૨૧૬.૧૫/૧તે યાન્તિ કાઞ્ચનૈર્યાનૈર્વિવિધૈસ્તુ યમાલયમ્ ।
૨૧૬.૧૫/૨વરસ્ત્રીભિર્યથાકામં સેવ્યમાનાઃ પુનઃ પુનઃ ॥ ૨૧૬.૧૫॥

૨૧૬.૧૬/૧યે ચ ક્ષીરં પ્રયચ્છન્તિ ઘૃતં દધિ ગુડં મધુ ।
૨૧૬.૧૬/૨બ્રાહ્મણેભ્યઃ પ્રયત્નેન શુદ્ધ્યોપેતં સુસંસ્કૃતમ્ ॥ ૨૧૬.૧૬॥

૨૧૬.૧૭/૧ચક્રવાકપ્રયુક્તૈશ્ચ વિમાનૈસ્તુ હિરણ્મયૈઃ ।
૨૧૬.૧૭/૨યાન્તિ ગન્ધર્વવાદિત્રૈઃ સેવ્યમાના યમાલયમ્ ॥ ૨૧૬.૧૭॥

૨૧૬.૧૮/૧યે ફલાનિ પ્રયચ્છન્તિ પુષ્પાણિ સુરભીણિ ચ ।
૨૧૬.૧૮/૨હંસયુક્તૈર્વિમાનૈસ્તુ યાન્તિ ધર્મપુરં નરાઃ ॥ ૨૧૬.૧૮॥

૨૧૬.૧૯/૧યે તિલાંસ્તિલધેનું ચ ઘૃતધેનુમથાપિ વા ।
૨૧૬.૧૯/૨શ્રોત્રિયેભ્યઃ પ્રયચ્છન્તિ વિપ્રેભ્યઃ શ્રદ્ધયાન્વિતાઃ ॥ ૨૧૬.૧૯॥

૨૧૬.૨૦/૧સોમમણ્ડલસંકાશૈર્યાનૈસ્તે યાન્તિ નિર્મલૈઃ ।
૨૧૬.૨૦/૨ગન્ધર્વૈરુપગીયન્તે પુરે વૈવસ્વતસ્ય તે ॥ ૨૧૬.૨૦॥

૨૧૬.૨૧/૧યેષાં વાપ્યશ્ચ કૂપાશ્ચ તડાગાનિ સરાંસિ ચ ।
૨૧૬.૨૧/૨દીર્ઘિકાઃ પુષ્કરિણ્યશ્ચ શીતલાશ્ચ જલાશયાઃ ॥ ૨૧૬.૨૧॥

૨૧૬.૨૨/૧યાનૈસ્તે હેમચન્દ્રાભૈર્દિવ્યઘણ્ટાનિનાદિતૈઃ ।

૨૧૬.૨૨/૨વ્યજનૈસ્તાલવૃન્તૈશ્ચ વીજ્યમાના મહાપ્રભાઃ ॥ ૨૧૬.૨૨॥

૨૧૬.૨૩/૧યેષાં દેવકુલાન્યત્ર ચિત્રાણ્યાયતનાનિ ચ ।
૨૧૬.૨૩/૨૨ત્નૈઃ પ્રસ્ફુરમાણાનિ મનોજ્ઞાનિ શુભાનિ ચ ॥ ૨૧૬.૨૩॥

૨૧૬.૨૪/૧તે યાન્તિ લોકપાલૈસ્તુ વિમાનૈર્વાતરંહસૈઃ ।
૨૧૬.૨૪/૨ધર્મરાજપુરં દિવ્યં નાનાજનસમાકુલમ્ ॥ ૨૧૬.૨૪॥

૨૧૬.૨૫/૧પાનીયં યે પ્રયચ્છન્તિ સર્વપ્રાણ્યુપજીવિતમ્ ।
૨૧૬.૨૫/૨તે વિતૃષ્ણાઃ સુખં યાન્તિ વિમાનૈસ્તં મહાપથમ્ ॥ ૨૧૬.૨૫॥

૨૧૬.૨૬/૧કાષ્ઠપાદુકયાનાનિ પીઠકાન્યાસનાનિ ચ ।
૨૧૬.૨૬/૨યૈર્દત્તાનિ દ્વિજાતિભ્યસ્તેઽધ્વાનં યાન્તિ વૈ સુખમ્ ॥ ૨૧૬.૨૬॥

૨૧૬.૨૭/૧સૌવર્ણમણિપીઠેષુ પાદૌ કૃત્વોત્તમેષુ ચ ।
૨૧૬.૨૭/૨તે પ્રયાન્તિ વિમાનૈસ્તુ અપ્સરોગણમણ્ડિતૈઃ ॥ ૨૧૬.૨૭॥

૨૧૬.૨૮/૧આરામાણિ વિચિત્રાણિ પુષ્પાઢ્યાનીહ માનવાઃ ।
૨૧૬.૨૮/૨રોપયન્તિ ફલાઢ્યાનિ નરાણામુપકારિણઃ ॥ ૨૧૬.૨૮॥

૨૧૬.૨૯/૧વૃક્ષચ્છાયાસુ રમ્યાસુ શીતલાસુ સ્વલંકૃતાઃ ।
૨૧૬.૨૯/૨વરસ્ત્રીગીતવાદ્યૈશ્ચ સેવ્યમાના વ્રજન્તિ તે ॥ ૨૧૬.૨૯॥

૨૧૬.૩૦/૧સુવર્ણં રજતં વાપિ વિદ્રુમં મૌક્તિકં તથા ।
૨૧૬.૩૦/૨યે પ્રયચ્છન્તિ તે યાન્તિ વિમાનૈઃ કનકોજ્જ્વલૈઃ ॥ ૨૧૬.૩૦॥

૨૧૬.૩૧/૧ભૂમિદા દીપ્યમાનાશ્ચ સર્વકામૈસ્તુ તર્પિતાઃ ।
૨૧૬.૩૧/૨ઉદિતાદિત્યસંકાશૈર્વિમાનૈર્ભૃશનાદિતૈઃ ॥ ૨૧૬.૩૧॥

૨૧૬.૩૨/૧કન્યાં તુ યે પ્રયચ્છન્તિ બ્રહ્મદેયામલંકૃતામ્ ।
૨૧૬.૩૨/૨દિવ્યકન્યાવૃતા યાન્તિ વિમાનૈસ્તે યમાલયમ્ ॥ ૨૧૬.૩૨॥

૨૧૬.૩૩/૧સુગન્ધાગુરુકર્પૂરાન્ પુષ્પધૂપાન્ દ્વિજોત્તમાઃ ।
૨૧૬.૩૩/૨પ્રયચ્છન્તિ દ્વિજાતિભ્યો ભક્ત્યા પરમયાન્વિતાઃ ॥ ૨૧૬.૩૩॥

૨૧૬.૩૪/૧તે સુગન્ધાઃ સુવેશાશ્ચ સુપ્રભાઃ સુવિભૂષિતાઃ ।
૨૧૬.૩૪/૨યાન્તિ ધર્મપુરં યાનૈર્વિચિત્રૈરભ્યલંકૃતાઃ ॥ ૨૧૬.૩૪॥

૨૧૬.૩૫/૧દીપદા યાન્તિ યાનૈશ્ચ દીપયન્તો દિશો દશ ।
૨૧૬.૩૫/૨આદિત્યસદૃશૈર્યાનૈર્દીપ્યમાના યથાગ્નયઃ ॥ ૨૧૬.૩૫॥

૨૧૬.૩૬/૧ગૃહાવસથદાતારો ગૃહૈઃ કાઞ્ચનમણ્ડિતૈઃ ।
૨૧૬.૩૬/૨વ્રજન્તિ બાલાર્કનિભૈર્ધર્મરાજગૃહં નરાઃ ॥ ૨૧૬.૩૬॥

૨૧૬.૩૭/૧જલભાજનદાતારઃ કુણ્ડિકાકરકપ્રદાઃ ।
૨૧૬.૩૭/૨પૂજમાનાપ્સરોભિશ્ચ યાન્તિ દૃપ્તા મહાગજૈઃ ॥ ૨૧૬.૩૭॥

૨૧૬.૩૮/૧પાદાભ્યઙ્ગં શિરોભ્યઙ્ગં સ્નાનપાનોદકં તથા ।
૨૧૬.૩૮/૨યે પ્રયચ્છન્તિ વિપ્રેભ્યસ્તે યાન્ત્યશ્વૈર્યમાલયમ્ ॥ ૨૧૬.૩૮॥

૨૧૬.૩૯/૧વિશ્રામયન્તિ યે વિપ્રાઞ્ શ્રાન્તાન્ અધ્વનિ કર્શિતાન્ ।
૨૧૬.૩૯/૨ચક્રવાકપ્રયુક્તેન યાન્તિ યાનેન તે સુખમ્ ॥ ૨૧૬.૩૯॥

૨૧૬.૪૦/૧સ્વાગતેન ચ યો વિપ્રં પૂજયેદ્ આસનેન ચ ।
૨૧૬.૪૦/૨સ ગચ્છતિ તમધ્વાનં સુખં પરમનિર્વૃતઃ ॥ ૨૧૬.૪૦॥

૨૧૬.૪૧/૧નમો બ્રહ્મણ્યદેવેતિ યો હરિં ચાભિવાદયેત્ ।
૨૧૬.૪૧/૨ગાં ચ પાપહરેત્યુક્ત્વા સુખં યાન્તિ ચ તત્ પથમ્ ॥ ૨૧૬.૪૧॥

૨૧૬.૪૨/૧અનન્તરાશિનો યે ચ દમ્ભાનૃતવિવર્જિતાઃ ।
૨૧૬.૪૨/૨તેઽપિ સારસયુક્તૈસ્તુ યાન્તિ યાનૈશ્ચ તત્ પથમ્ ॥ ૨૧૬.૪૨॥

૨૧૬.૪૩/૧વર્તન્તે હ્યેકભક્તેન શાઠ્યદમ્ભવિવર્જિતાઃ ।
૨૧૬.૪૩/૨હંસયુક્તૈર્વિમાનૈસ્તુ સુખં યાન્તિ યમાલયમ્ ॥ ૨૧૬.૪૩॥

૨૧૬.૪૪/૧ચતુર્થેનૈકભક્તેન વર્તન્તે યે જિતેન્દ્રિયાઃ ।
૨૧૬.૪૪/૨તે યાન્તિ ધર્મનગરં યાનૈર્બર્હિણયોજિતૈઃ ॥ ૨૧૬.૪૪॥

૨૧૬.૪૫/૧તૃતીયે દિવસે યે તુ ભુઞ્જતે નિયતવ્રતાઃ ।
૨૧૬.૪૫/૨તેઽપિ હસ્તિરથૈર્દિવ્યૈર્યાન્તિ યાનૈશ્ચ તત્ પદમ્ ॥ ૨૧૬.૪૫॥

૨૧૬.૪૬/૧ષષ્ઠેઽન્નભક્ષકો યસ્તુ શૌચનિત્યો જિતેન્દ્રિયઃ ।
૨૧૬.૪૬/૨સ યાતિ કુઞ્જરસ્થસ્તુ શચીપતિરિવ સ્વયમ્ ॥ ૨૧૬.૪૬॥

૨૧૬.૪૭/૧ધર્મરાજપુરં દિવ્યં નાનામણિવિભૂષિતમ્ ।
૨૧૬.૪૭/૨નાનાસ્વરસમાયુક્તં જયશબ્દરવૈર્યુતમ્ ॥ ૨૧૬.૪૭॥

૨૧૬.૪૮/૧પક્ષોપવાસિનો યાન્તિ યાનૈઃ શાર્દૂલયોજિતૈઃ ।
૨૧૬.૪૮/૨પુરં તદ્ ધર્મરાજસ્ય સેવ્યમાનાઃ સુરાસુરૈઃ ॥ ૨૧૬.૪૮॥

૨૧૬.૪૯/૧યે ચ માસોપવાસં તુ કુર્વતે સંયતેન્દ્રિયાઃ ।
૨૧૬.૪૯/૨તેઽપિ સૂર્યપ્રદીપ્તૈસ્તુ યાન્તિ યાનૈર્યમાલયમ્ ॥ ૨૧૬.૪૯॥

૨૧૬.૫૦/૧મહાપ્રસ્થાનમેકાગ્રો યઃ પ્રયાતિ દૃઢવ્રતઃ ।
૨૧૬.૫૦/૨સેવ્યમાનસ્તુ ગન્ધર્વૈર્યાતિ યાનૈર્યમાલયમ્ ॥ ૨૧૬.૫૦॥

૨૧૬.૫૧/૧શરીરં સાધયેદ્ યસ્તુ વૈષ્ણવેનાન્તરાત્મના ।
૨૧૬.૫૧/૨સ રથેનાગ્નિવર્ણેન યાતીહ ત્રિદશાલયમ્ ॥ ૨૧૬.૫૧॥

૨૧૬.૫૨/૧અગ્નિપ્રવેશં યઃ કુર્યાન્ નારાયણપરાયણઃ ।
૨૧૬.૫૨/૨સ યાત્યગ્નિપ્રકાશેન વિમાનેન યમાલયમ્ ॥ ૨૧૬.૫૨॥

૨૧૬.૫૩/૧પ્રાણાંસ્ત્યજતિ યો મર્ત્યઃ સ્મરન્ વિષ્ણું સનાતનમ્ ।
૨૧૬.૫૩/૨યાનેનાર્કપ્રકાશેન યાતિ ધર્મપુરં નરઃ ॥ ૨૧૬.૫૩॥

૨૧૬.૫૪/૧પ્રવિષ્ટોઽન્તર્જલં યસ્તુ પ્રાણાંસ્ત્યજતિ માનવઃ ।
૨૧૬.૫૪/૨સોમમણ્ડલકલ્પેન યાતિ યાનેન વૈ સુખમ્ ॥ ૨૧૬.૫૪॥

૨૧૬.૫૫/૧સ્વશરીરં હિ ગૃધ્રેભ્યો વૈષ્ણવો યઃ પ્રયચ્છતિ ।
૨૧૬.૫૫/૨સ યાતિ રથમુખ્યેન કાઞ્ચનેન યમાલયમ્ ॥ ૨૧૬.૫૫॥

૨૧૬.૫૬/૧સ્ત્રીગ્રહે ગોગ્રહે વાપિ યુદ્ધે મૃત્યુમુપૈતિ યઃ ।
૨૧૬.૫૬/૨સ યાત્યમરકન્યાભિઃ સેવ્યમાનો રવિપ્રભઃ ॥ ૨૧૬.૫૬॥

૨૧૬.૫૭/૧વૈષ્ણવા યે ચ કુર્વન્તિ તીર્થયાત્રાં જિતેન્દ્રિયાઃ ।
૨૧૬.૫૭/૨તત્ પથં યાન્તિ તે ઘોરં સુખયાનૈરલંકૃતાઃ ॥ ૨૧૬.૫૭॥

૨૧૬.૫૮/૧યે યજન્તિ દ્વિજશ્રેષ્ઠાઃ ક્રતુભિર્ભૂરિદક્ષિણૈઃ ।
૨૧૬.૫૮/૨તપ્તહાટકસંકાશૈર્વિમાનૈર્યાન્તિ તે સુખમ્ ॥ ૨૧૬.૫૮॥

૨૧૬.૫૯/૧પરપીડામકુર્વન્તો ભૃત્યાનાં ભરણાદિકમ્ ।
૨૧૬.૫૯/૨કુર્વન્તિ તે સુખં યાન્તિ વિમાનૈઃ કનકોજ્જ્વલૈઃ ॥ ૨૧૬.૫૯॥

૨૧૬.૬૦/૧યે ક્ષાન્તાઃ સર્વભૂતેષુ પ્રાણિનામભયપ્રદાઃ ।
૨૧૬.૬૦/૨ક્રોધમોહવિનિર્મુક્તા નિર્મદાઃ સંયતેન્દ્રિયાઃ ॥ ૨૧૬.૬૦॥

૨૧૬.૬૧/૧પૂર્ણચન્દ્રપ્રકાશેન વિમાનેન મહાપ્રભાઃ ।
૨૧૬.૬૧/૨યાન્તિ વૈવસ્વતપુરં દેવગન્ધર્વસેવિતાઃ ॥ ૨૧૬.૬૧॥

૨૧૬.૬૨/૧એકભાવેન યે વિષ્ણું બ્રહ્માણં ત્ર્યમ્બકં રવિમ્ ।
૨૧૬.૬૨/૨પૂજયન્તિ હિ તે યાન્તિ વિમાનૈર્ભાસ્કરપ્રભૈઃ ॥ ૨૧૬.૬૨॥

૨૧૬.૬૩/૧યે ચ માંસં ન ખાદન્તિ સત્યશૌચસમન્વિતાઃ ।

૨૧૬.૬૩/૨તેઽપિ યાન્તિ સુખેનૈવ ધર્મરાજપુરં નરાઃ ॥ ૨૧૬.૬૩॥

૨૧૬.૬૪/૧માંસાન્ મિષ્ટતરં નાસ્તિ ભક્ષ્યભોજ્યાદિકેષુ ચ ।
૨૧૬.૬૪/૨તસ્માન્ માંસં ન ભુઞ્જીત નાસ્તિ મિષ્ટૈઃ સુખોદયઃ ॥ ૨૧૬.૬૪॥

૨૧૬.૬૫/૧ગોસહસ્રં તુ યો દદ્યાદ્ યસ્તુ માંસં ન ભક્ષયેત્ ।
૨૧૬.૬૫/૨સમાવેતૌ પુરા પ્રાહ બ્રહ્મા વેદવિદાં વરઃ ॥ ૨૧૬.૬૫॥

૨૧૬.૬૬/૧સર્વતીર્થેષુ યત્ પુણ્યં સર્વયજ્ઞેષુ યત્ ફલમ્ ।
૨૧૬.૬૬/૨અમાંસભક્ષણે વિપ્રાસ્તચ્ચ તચ્ચ ચ તત્સમમ્ ॥ ૨૧૬.૬૬॥

૨૧૬.૬૭/૧એવં સુખેન તે યાન્તિ યમલોકં ચ ધાર્મિકાઃ ।
૨૧૬.૬૭/૨દાનવ્રતપરા યાનૈર્યત્ર દેવો રવેઃ સુતઃ ॥ ૨૧૬.૬૭॥

૨૧૬.૬૮/૧દૃષ્ટ્વા તાન્ ધાર્મિકાન્ દેવઃ સ્વયં સમ્માનયેદ્ યમઃ ।
૨૧૬.૬૮/૨સ્વાગતાસનદાનેન પાદ્યાર્ઘ્યેણ પ્રિયેણ તુ ॥ ૨૧૬.૬૮॥

૨૧૬.૬૯/૧ધન્યા યૂયં મહાત્માન આત્મનો હિતકારિણઃ ।
૨૧૬.૬૯/૨યેન દિવ્યસુખાર્થાય ભવદ્ભિઃ સુકૃતં કૃતમ્ ॥ ૨૧૬.૬૯॥

૨૧૬.૭૦/૧ઇદં વિમાનમારુહ્ય દિવ્યસ્ત્રીભોગભૂષિતાઃ ।
૨૧૬.૭૦/૨સ્વર્ગં ગચ્છધ્વમતુલં સર્વકામસમન્વિતમ્ ॥ ૨૧૬.૭૦॥

૨૧૬.૭૧/૧તત્ર ભુક્ત્વા મહાભોગાન્ અન્તે પુણ્યપરિક્ષયાત્ ।
૨૧૬.૭૧/૨યત્ કિંચિદ્ અલ્પમશુભં ફલં તદ્ ઇહ ભોક્ષ્યથ ॥ ૨૧૬.૭૧॥

૨૧૬.૭૨/૧યે તુ તં ધર્મરાજાનં નરાઃ પુણ્યાનુભાવતઃ ।
૨૧૬.૭૨/૨પશ્યન્તિ સૌમ્યમનસં પિતૃભૂતમિવાત્મનઃ ॥ ૨૧૬.૭૨॥

૨૧૬.૭૩/૧તસ્માદ્ ધર્મઃ સેવિતવ્યઃ સદા મુક્તિફલપ્રદઃ ।
૨૧૬.૭૩/૨ધર્માદ્ અર્થસ્તથા કામો મોક્ષશ્ચ પરિકીર્ત્યતે ॥ ૨૧૬.૭૩॥

૨૧૬.૭૪/૧ધર્મો માતા પિતા ભ્રાતા ધર્મો નાથઃ સુહૃત્ તથા ।
૨૧૬.૭૪/૨ધર્મઃ સ્વામી સખા ગોપ્તા તથા ધાતા ચ પોષકઃ ॥ ૨૧૬.૭૪॥

૨૧૬.૭૫/૧ધર્માદ્ અર્થોઽર્થતઃ કામઃ કામાદ્ ભોગઃ સુખાનિ ચ ।
૨૧૬.૭૫/૨ધર્માદ્ ઐશ્વર્યમેકાગ્ર્યં ધર્માત્ સ્વર્ગગતિઃ પરા ॥ ૨૧૬.૭૫॥

૨૧૬.૭૬/૧ધર્મસ્તુ સેવિતો વિપ્રાસ્ત્રાયતે મહતો ભયાત્ ।
૨૧૬.૭૬/૨દેવત્વં ચ દ્વિજત્વં ચ ધર્માત્ પ્રાપ્નોત્યસંશયમ્ ॥ ૨૧૬.૭૬॥

૨૧૬.૭૭/૧યદા ચ ક્ષીયતે પાપં નરાણાં પૂર્વસંચિતમ્ ।
૨૧૬.૭૭/૨તદૈષાં ભજતે બુદ્ધિર્ધર્મં ચાત્ર દ્વિજોત્તમાઃ ॥ ૨૧૬.૭૭॥

૨૧૬.૭૮/૧જન્માન્તરસહસ્રેષુ માનુષ્યં પ્રાપ્ય દુર્લભમ્ ।
૨૧૬.૭૮/૨યો હિ નાચરતે ધર્મં ભવેત્ સ ખલુ વઞ્ચિતઃ ॥ ૨૧૬.૭૮॥

૨૧૬.૭૯/૧કુત્સિતા યે દરિદ્રાશ્ચ વિરૂપા વ્યાધિતાસ્તથા ।
૨૧૬.૭૯/૨પરપ્રેષ્યાશ્ચ મૂર્ખાશ્ચ જ્ઞેયા ધર્મવિવર્જિતાઃ ॥ ૨૧૬.૭૯॥

૨૧૬.૮૦/૧યે હિ દીર્ઘાયુષઃ શૂરાઃ પણ્ડિતા ભોગિનોઽર્થિનઃ ।
૨૧૬.૮૦/૨અરોગા રૂપવન્તશ્ચ તૈસ્તુ ધર્મઃ પુરા કૃતઃ ॥ ૨૧૬.૮૦॥

૨૧૬.૮૧/૧એવં ધર્મરતા વિપ્રા ગચ્છન્તિ ગતિમુત્તમામ્ ।
૨૧૬.૮૧/૨અધર્મં સેવમાનાસ્તુ તિર્યગ્યોનિં વ્રજન્તિ તે ॥ ૨૧૬.૮૧॥

૨૧૬.૮૨/૧યે નરા નરકધ્વંસિ+ ।વાસુદેવમનુવ્રતાઃ ।
૨૧૬.૮૨/૨તે સ્વપ્નેઽપિ ન પશ્યન્તિ યમં વા નરકાણિ વા ॥ ૨૧૬.૮૨॥

૨૧૬.૮૩/૧અનાદિનિધનં દેવં દૈત્યદાનવદારણમ્ ।
૨૧૬.૮૩/૨યે નમન્તિ નરા નિત્યં નહિ પશ્યન્તિ તે યમમ્ ॥ ૨૧૬.૮૩॥

૨૧૬.૮૪/૧કર્મણા મનસા વાચા યેઽચ્યુતં શરણં ગતાઃ ।
૨૧૬.૮૪/૨ન સમર્થો યમસ્તેષાં તે મુક્તિફલભાગિનઃ ॥ ૨૧૬.૮૪॥

૨૧૬.૮૫/૧યે જના જગતાં નાથં નિત્યં નારાયણં દ્વિજાઃ ।
૨૧૬.૮૫/૨નમન્તિ નહિ તે વિષ્ણોઃ સ્થાનાદ્ અન્યત્ર ગામિનઃ ॥ ૨૧૬.૮૫॥

૨૧૬.૮૬/૧ન તે દૂતાન્ ન તન્ માર્ગં ન યમં ન ચ તાં પુરીમ્ ।
૨૧૬.૮૬/૨પ્રણમ્ય વિષ્ણું પશ્યન્તિ નરકાણિ કથંચન ॥ ૨૧૬.૮૬॥

૨૧૬.૮૭/૧કૃત્વાપિ બહુશઃ પાપં નરા મોહસમન્વિતાઃ ।
૨૧૬.૮૭/૨ન યાન્તિ નરકં નત્વા સર્વપાપહરં હરિમ્ ॥ ૨૧૬.૮૭॥

૨૧૬.૮૮/૧શાઠ્યેનાપિ નરા નિત્યં યે સ્મરન્તિ જનાર્દનમ્ ।
૨૧૬.૮૮/૨તેઽપિ યાન્તિ તનું ત્યક્ત્વા વિષ્ણુલોકમનામયમ્ ॥ ૨૧૬.૮૮॥

૨૧૬.૮૯/૧અત્યન્તક્રોધસક્તોઽપિ કદાચિત્ કીર્તયેદ્ ધરિમ્ ।
૨૧૬.૮૯/૨સોઽપિ દોષક્ષયાન્ મુક્તિં લભેચ્ચેદિપતિર્યથા ॥ ૨૧૬.૮૯॥

૨૧૭.૧/૧લોમહર્ષણ ઉવાચ । શ્રુત્વૈવં યમમાર્ગં તે નરકેષુ ચ યાતનામ્ ।
૨૧૭.૧/૨પપ્રચ્છુશ્ચ પુનર્વ્યાસં સંશયં મુનિસત્તમાઃ ॥ ૨૧૭.૧॥

૨૧૭.૨/૧મુનય ઊચુઃ । ભગવન્ સર્વધર્મજ્ઞ સર્વશાસ્ત્રવિશારદ ।
૨૧૭.૨/૨મર્ત્યસ્ય કઃ સહાયો વૈ પિતા માતા સુતો ગુરુઃ ॥ ૨૧૭.૨॥

૨૧૭.૩/૧જ્ઞાતિસમ્બન્ધિવર્ગશ્ચ મિત્રવર્ગસ્તથૈવ ચ ।
૨૧૭.૩/૨ગૃહં શરીરમુત્સૃજ્ય કાષ્ઠલોષ્ટસમં જનાઃ ।
૨૧૭.૩/૩ગચ્છન્ત્યમુત્ર લોકે વૈ કશ્ચ તાન્ અનુગચ્છતિ ॥ ૨૧૭.૩॥

૨૧૭.૪/૧વ્યાસ ઉવાચ । એકઃ પ્રસૂયતે વિપ્રા એક એવ હિ નશ્યતિ ।
૨૧૭.૪/૨એકસ્તરતિ દુર્ગાણિ ગચ્છત્યેકસ્તુ દુર્ગતિમ્ ॥ ૨૧૭.૪॥

૨૧૭.૫/૧અસહાયઃ પિતા માતા તથા ભ્રાતા સુતો ગુરુઃ ।
૨૧૭.૫/૨જ્ઞાતિસમ્બન્ધિવર્ગશ્ચ મિત્રવર્ગસ્તથૈવ ચ ॥ ૨૧૭.૫॥

૨૧૭.૬/૧મૃતં શરીરમુત્સૃજ્ય કાષ્ઠલોષ્ટસમં જનાઃ ।
૨૧૭.૬/૨મુહૂર્તમિવ રોદિત્વા તતો યાન્તિ પરાઙ્મુખાઃ ॥ ૨૧૭.૬॥

૨૧૭.૭/૧તૈસ્તચ્છરીરમુત્સૃષ્ટં ધર્મ એકોઽનુગચ્છતિ ।
૨૧૭.૭/૨તસ્માદ્ ધર્મઃ સહાયશ્ચ સેવિતવ્યઃ સદા નૃભિઃ ॥ ૨૧૭.૭॥

૨૧૭.૮/૧પ્રાણી ધર્મસમાયુક્તો ગચ્છેત્ સ્વર્ગગતિં પરામ્ ।
૨૧૭.૮/૨તથૈવાધર્મસંયુક્તો નરકં ચોપપદ્યતે ॥ ૨૧૭.૮॥

૨૧૭.૯/૧તસ્માત્ પાપાગતૈરર્થૈર્નાનુરજ્યેત પણ્ડિતઃ ।
૨૧૭.૯/૨ધર્મ એકો મનુષ્યાણાં સહાયઃ પરિકીર્તિતઃ ॥ ૨૧૭.૯॥

૨૧૭.૧૦/૧લોભાન્ મોહાદ્ અનુક્રોશાદ્ ભયાદ્ વાથ બહુશ્રુતઃ ।
૨૧૭.૧૦/૨નરઃ કરોત્યકાર્યાણિ પરાર્થે લોભમોહિતઃ ॥ ૨૧૭.૧૦॥

૨૧૭.૧૧/૧ધર્મશ્ચાર્થશ્ચ કામશ્ચ ત્રિતયં જીવતઃ ફલમ્ ।
૨૧૭.૧૧/૨એતત્ ત્રયમવાપ્તવ્યમધર્મપરિવર્જિતમ્ ॥ ૨૧૭.૧૧॥

૨૧૭.૧૨/૧મુનય ઊચુઃ । શ્રુતં ભગવતો વાક્યં ધર્મયુક્તં પરં હિતમ્ ।
૨૧૭.૧૨/૨શરીરનિચયં જ્ઞાતું બુદ્ધિર્નોઽત્ર પ્રજાયતે ॥ ૨૧૭.૧૨॥

૨૧૭.૧૩/૧મૃતં શરીરં હિ નૃણાં સૂક્ષ્મમવ્યક્તતાં ગતમ્ ।
૨૧૭.૧૩/૨અચક્ષુર્વિષયં પ્રાપ્તં કથં ધર્મોઽનુગચ્છતિ ॥ ૨૧૭.૧૩॥

૨૧૭.૧૪/૧વ્યાસ ઉવાચ । પૃથિવી વાયુરાકાશમાપો જ્યોતિર્મનોન્તરમ્ ।
૨૧૭.૧૪/૨બુદ્ધિરાત્મા ચ સહિતા ધર્મં પશ્યન્તિ નિત્યદા ॥ ૨૧૭.૧૪॥

૨૧૭.૧૫/૧પ્રાણિનામિહ સર્વેષાં સાક્ષિભૂતા દિવાનિશમ્ ।
૨૧૭.૧૫/૨એતૈશ્ચ સહ ધર્મો હિ તં જીવમનુગચ્છતિ ॥ ૨૧૭.૧૫॥

૨૧૭.૧૬/૧ત્વગ્ અસ્થિ માંસં શુક્રં ચ શોણિતં ચ દ્વિજોત્તમાઃ ।
૨૧૭.૧૬/૨શરીરં વર્જયન્ત્યેતે જીવિતેન વિવર્જિતમ્ ॥ ૨૧૭.૧૬॥

૨૧૭.૧૭/૧તતો ધર્મસમાયુક્તઃ સ જીવઃ સુખમેધતે ।
૨૧૭.૧૭/૨ઇહલોકે પરે ચૈવ કિં ભૂયઃ કથયામિ વઃ ॥ ૨૧૭.૧૭॥

૨૧૭.૧૮/૧મુનય ઊચુઃ । તદ્ દર્શિતં ભગવતા યથા ધર્મોઽનુગચ્છતિ ।
૨૧૭.૧૮/૨એતત્ તુ જ્ઞાતુમિચ્છામઃ કથં રેતઃ પ્રવર્તતે ॥ ૨૧૭.૧૮॥

૨૧૭.૧૯/૧વ્યાસ ઉવાચ । અન્નમશ્નન્તિ યે દેવાઃ શરીરસ્થા દ્વિજોત્તમાઃ ।
૨૧૭.૧૯/૨પૃથિવી વાયુરાકાશમાપો જ્યોતિર્મનસ્તથા ॥ ૨૧૭.૧૯॥

૨૧૭.૨૦/૧તતસ્તૃપ્તેષુ ભો વિપ્રાસ્તેષુ ભૂતેષુ પઞ્ચસુ ।
૨૧૭.૨૦/૨મનઃષષ્ઠેષુ શુદ્ધાત્મા રેતઃ સમ્પદ્યતે મહત્ ॥ ૨૧૭.૨૦॥

૨૧૭.૨૧/૧તતો ગર્ભઃ સમ્ભવતિ શ્લેષ્મા સ્ત્રીપુંસયોર્દ્વિજાઃ ।
૨૧૭.૨૧/૨એતદ્ વઃ સર્વમાખ્યાતં કિં ભૂયઃ શ્રોતુમિચ્છથ ॥ ૨૧૭.૨૧॥

૨૧૭.૨૨/૧મુનય ઊચુઃ । આખ્યાતં નો ભગવતા ગર્ભઃ સંજાયતે યથા ।
૨૧૭.૨૨/૨યથા જાતસ્તુ પુરુષઃ પ્રપદ્યતે તદ્ ઉચ્યતામ્ ॥ ૨૧૭.૨૨॥

૨૧૭.૨૩/૧વ્યાસ ઉવાચ । આસન્નમાત્રપુરુષસ્તૈર્ભૂતૈરભિભૂયતે ।
૨૧૭.૨૩/૨વિપ્રયુક્તસ્તુ તૈર્ભૂતૈઃ પુનર્યાત્યપરાં ગતિમ્ ॥ ૨૧૭.૨૩॥

૨૧૭.૨૪/૧સ ચ ભૂતસમાયુક્તઃ પ્રાપ્નોતિ જીવમેવ હિ ।
૨૧૭.૨૪/૨તતોઽસ્ય કર્મ પશ્યન્તિ શુભં વા યદિ વાશુભમ્ ।
૨૧૭.૨૪/૩દેવતાઃ પઞ્ચભૂતસ્થાઃ કિં ભૂયઃ શ્રોતુમિચ્છથ ॥ ૨૧૭.૨૪॥

૨૧૭.૨૫/૧મુનય ઊચુઃ । ત્વગ્ અસ્થિ માંસમુત્સૃજ્ય તૈસ્તુ ભૂતૈર્વિવર્જિતઃ ।
૨૧૭.૨૫/૨જીવઃ સ ભગવન્ ક્વસ્થઃ સુખદુઃખે સમશ્નુતે ॥ ૨૧૭.૨૫॥

૨૧૭.૨૬/૧વ્યાસ ઉવાચ । જીવઃ કર્મસમાયુક્તઃ શીઘ્રં રેતઃસમાગતઃ ।
૨૧૭.૨૬/૨સ્ત્રીણાં પુષ્પં સમાસાદ્ય તતઃ કાલેન ભો દ્વિજાઃ ॥ ૨૧૭.૨૬॥

૨૧૭.૨૭/૧યમસ્ય પુરુષૈઃ ક્લેશો યમસ્ય પુરુષૈર્વધઃ ।
૨૧૭.૨૭/૨દુઃખં સંસારચક્રં ચ નરઃ ક્લેશં ચ વિન્દતિ ॥ ૨૧૭.૨૭॥

૨૧૭.૨૮/૧ઇહ લોકે સ તુ પ્રાણી જન્મપ્રભૃતિ ભો દ્વિજાઃ ।

૨૧૭.૨૮/૨સુકૃતં કર્મ વૈ ભુઙ્ક્તે ધર્મસ્ય ફલમાશ્રિતઃ ॥ ૨૧૭.૨૮॥

૨૧૭.૨૯/૧યદિ ધર્મં સમાયુજ્ય જન્મપ્રભૃતિ સેવતે ।
૨૧૭.૨૯/૨તતઃ સ પુરુષો ભૂત્વા સેવતે નિત્યદા સુખમ્ ॥ ૨૧૭.૨૯॥

૨૧૭.૩૦/૧અથાન્તરાન્તરં ધર્મમધર્મમુપસેવતે ।
૨૧૭.૩૦/૨સુખસ્યાનન્તરં દુઃખં સ જીવોઽપ્યધિગચ્છતિ ॥ ૨૧૭.૩૦॥

૨૧૭.૩૧/૧અધર્મેણ સમાયુક્તો યમસ્ય વિષયં ગતઃ ।
૨૧૭.૩૧/૨મહાદુઃખં સમાસાદ્ય તિર્યગ્યોનૌ પ્રજાયતે ॥ ૨૧૭.૩૧॥

૨૧૭.૩૨/૧કર્મણા યેન યેનેહ યસ્યાં યોનૌ પ્રજાયતે ।
૨૧૭.૩૨/૨જીવો મોહસમાયુક્તસ્તન્ મે શ ૃણુત સામ્પ્રતમ્ ॥ ૨૧૭.૩૨॥

૨૧૭.૩૩/૧યદ્ એતદ્ ઉચ્યતે શાસ્ત્રૈઃ સેતિહાસૈશ્ચ છન્દસિ ।
૨૧૭.૩૩/૨યમસ્ય વિષયં ઘોરં મર્ત્યલોકં પ્રવર્તતે ॥ ૨૧૭.૩૩॥

૨૧૭.૩૪/૧ઇહ સ્થાનાનિ પુણ્યાનિ દેવતુલ્યાનિ ભો દ્વિજાઃ ।
૨૧૭.૩૪/૨તિર્યગ્યોન્યતિરિક્તાનિ ગતિમન્તિ ચ સર્વશઃ ॥ ૨૧૭.૩૪॥

૨૧૭.૩૫/૧યમસ્ય ભવને દિવ્યે બ્રહ્મલોકસમે ગુણૈઃ ।
૨૧૭.૩૫/૨કર્મભિર્નિયતૈર્બદ્ધો જન્તુર્દુઃખાન્યુપાશ્નુતે ॥ ૨૧૭.૩૫॥

૨૧૭.૩૬/૧યેન યેન હિ ભાવેન યેન વૈ કર્મણા ગતિમ્ ।
૨૧૭.૩૬/૨પ્રયાતિ પુરુષો ઘોરાં તથા વક્ષ્યામ્યતઃ પરમ્ ॥ ૨૧૭.૩૬॥

૨૧૭.૩૭/૧અધીત્ય ચતુરો વેદાન્ દ્વિજો મોહસમન્વિતઃ ।
૨૧૭.૩૭/૨પતિતાત્ પ્રતિગૃહ્યાથ ખરયોનૌ પ્રજાયતે ॥ ૨૧૭.૩૭॥

૨૧૭.૩૮/૧ખરો જીવતિ વર્ષાણિ દશ પઞ્ચ ચ ભો દ્વિજાઃ ।
૨૧૭.૩૮/૨ખરો મૃતો બલીવર્દઃ સપ્ત વર્ષાણિ જીવતિ ॥ ૨૧૭.૩૮॥

૨૧૭.૩૯/૧બલીવર્દો મૃતશ્ચાપિ જાયતે બ્રહ્મરાક્ષસઃ ।
૨૧૭.૩૯/૨બ્રહ્મરક્ષસ્તુ માસાંસ્ત્રીંસ્તતો જાયેત બ્રાહ્મણઃ ॥ ૨૧૭.૩૯॥

૨૧૭.૪૦/૧પતિતં યાજયિત્વા તુ કૃમિયોનૌ પ્રજાયતે ।
૨૧૭.૪૦/૨તત્ર જીવતિ વર્ષાણિ દશ પઞ્ચ ચ ભો દ્વિજાઃ ॥ ૨૧૭.૪૦॥

૨૧૭.૪૧/૧ક્રિમિભાવાદ્ વિનિર્મુક્તસ્તતો જાયેત ગર્દભઃ ।
૨૧૭.૪૧/૨ગર્દભઃ પઞ્ચ વર્ષાણિ પઞ્ચ વર્ષાણિ શૂકરઃ ॥ ૨૧૭.૪૧॥

૨૧૭.૪૨/૧કુક્કુટઃ પઞ્ચ વર્ષાણિ પઞ્ચ વર્ષાણિ જમ્બુકઃ ।
૨૧૭.૪૨/૨શ્વા વર્ષમેકં ભવતિ તતો જાયેત માનવઃ ॥ ૨૧૭.૪૨॥

૨૧૭.૪૩/૧ઉપાધ્યાયસ્ય યઃ પાપં શિષ્યઃ કુર્યાદ્ અબુદ્ધિમાન્ ।
૨૧૭.૪૩/૨સ જન્માનીહ સંસારે ત્રીન્ આપ્નોતિ ન સંશયઃ ॥ ૨૧૭.૪૩॥

૨૧૭.૪૪/૧પ્રાક્ શ્વા ભવતિ ભો વિપ્રાસ્તતઃ ક્રવ્યાત્ તતઃ ખરઃ ।
૨૧૭.૪૪/૨પ્રેત્ય ચ પરિક્લિષ્ટેષુ પશ્ચાજ્જાયેત બ્રાહ્મણઃ ॥ ૨૧૭.૪૪॥

૨૧૭.૪૫/૧મનસાપિ ગુરોર્ભાર્યાં યઃ શિષ્યો યાતિ પાપકૃત્ ।
૨૧૭.૪૫/૨ઉદગ્રાન્ પ્રૈતિ સંસારાન્ અધર્મેણેહ ચેતસા ॥ ૨૧૭.૪૫॥

૨૧૭.૪૬/૧શ્વયોનૌ તુ સ સમ્ભૂતસ્ત્રીણિ વર્ષાણિ જીવતિ ।
૨૧૭.૪૬/૨તત્રાપિ નિધનં પ્રાપ્તઃ ક્રિમિયોનૌ પ્રજાયતે ॥ ૨૧૭.૪૬॥

૨૧૭.૪૭/૧કૃમિભાવમનુપ્રાપ્તો વર્ષમેકં તુ જીવતિ ।
૨૧૭.૪૭/૨તતસ્તુ નિધનં પ્રાપ્ય બ્રહ્મયોનૌ પ્રજાયતે ॥ ૨૧૭.૪૭॥

૨૧૭.૪૮/૧યદિ પુત્રસમં શિષ્યં ગુરુર્હન્યાદ્ અકારણમ્ ।
૨૧૭.૪૮/૨આત્મનઃ કામકારેણ સોઽપિ હિંસ્રઃ પ્રજાયતે ॥ ૨૧૭.૪૮॥

૨૧૭.૪૯/૧પિતરં માતરં ચૈવ યસ્તુ પુત્રોઽવમન્યતે ।
૨૧૭.૪૯/૨સોઽપિ વિપ્રા મૃતો જન્તુઃ પૂર્વં જાયેત ગર્દભઃ ॥ ૨૧૭.૪૯॥

૨૧૭.૫૦/૧ગર્દભત્વં તુ સમ્પ્રાપ્ય દશ વર્ષાણિ જીવતિ ।
૨૧૭.૫૦/૨સંવત્સરં તુ કુમ્ભીરસ્તતો જાયેત માનવઃ ॥ ૨૧૭.૫૦॥

૨૧૭.૫૧/૧પુત્રસ્ય માતાપિતરૌ યસ્ય રુષ્ટાવુભાવપિ ।
૨૧૭.૫૧/૨ગુર્વપધ્યાનતઃ સોઽપિ મૃતો જાયેત ગર્દભઃ ॥ ૨૧૭.૫૧॥

૨૧૭.૫૨/૧ખરો જીવતિ માસાંશ્ચ દશ ચાપિ ચતુર્દશ ।
૨૧૭.૫૨/૨બિડાલઃ સપ્ત માસાંસ્તુ તતો જાયેત માનવઃ ॥ ૨૧૭.૫૨॥

૨૧૭.૫૩/૧માતાપિતરાવાક્રુશ્ય સારીકઃ સમ્પ્રજાયતે ।
૨૧૭.૫૩/૨તાડયિત્વા તુ તાવેવ જાયતે કચ્છપો દ્વિજાઃ ॥ ૨૧૭.૫૩॥

૨૧૭.૫૪/૧કચ્છપો દશ વર્ષાણિ ત્રીણિ વર્ષાણિ શલ્યકઃ ।
૨૧૭.૫૪/૨વ્યાલો ભૂત્વા તુ ષણ્ માસાંસ્તતો જાયેત માનુષઃ ॥ ૨૧૭.૫૪॥

૨૧૭.૫૫/૧ભર્તૃપિણ્ડમુપાશ્નીનો રાજદ્વિષ્ટાનિ સેવતે ।
૨૧૭.૫૫/૨સોઽપિ મોહસમાપન્નો મૃતો જાયેત વાનરઃ ॥ ૨૧૭.૫૫॥

૨૧૭.૫૬/૧વાનરો દશ વર્ષાણિ સપ્ત વર્ષાણિ મૂષકઃ ।
૨૧૭.૫૬/૨શ્વા ચ ભૂત્વા તુ ષણ્ માસાંસ્તતો જાયેત માનવઃ ॥ ૨૧૭.૫૬ ॥

૨૧૭.૫૭/૧ન્યાસાપહર્તા તુ નરો યમસ્ય વિષયં ગતઃ ।
૨૧૭.૫૭/૨સંસારાણાં શતં ગત્વા કૃમિયોનૌ પ્રજાયતે ॥ ૨૧૭.૫૭ ॥

૨૧૭.૫૮/૧તત્ર જીવતિ વર્ષાણિ દશ પઞ્ચ ચ ભો દ્વિજાઃ ।
૨૧૭.૫૮/૨દુષ્કૃતસ્ય ક્ષયં કૃત્વા તતો જાયેત માનુષઃ ॥ ૨૧૭.૫૮ ॥

૨૧૭.૫૯/૧અસૂયકો નરશ્ચાપિ મૃતો જાયેત શાર્ઙ્ગકઃ ।
૨૧૭.૫૯/૨વિશ્વાસહર્તા ચ નરો મીનો જાયેત દુર્મતિઃ ॥ ૨૧૭.૫૯ ॥

૨૧૭.૬૦/૧ભૂત્વા મીનોઽષ્ટ વર્ષાણિ મૃગો જાયેત ભો દ્વિજાઃ ।
૨૧૭.૬૦/૨મૃગસ્તુ ચતુરો માસાંસ્તતશ્છાગઃ પ્રજાયતે ॥ ૨૧૭.૬૦ ॥

૨૧૭.૬૧/૧છાગસ્તુ નિધનં પ્રાપ્ય પૂર્ણે સંવત્સરે તતઃ ।
૨૧૭.૬૧/૨કીટઃ સંજાયતે જન્તુસ્તતો જાયેત માનુષઃ ॥ ૨૧૭.૬૧ ॥

૨૧૭.૬૨/૧ધાન્યાન્ યવાંસ્તિલાન્ માષાન્ કુલિત્થાન્ સર્ષપાંશ્ચણાન્ ।
૨૧૭.૬૨/૨કલાયાન્ અથ મુદ્ગાંશ્ચ ગોધૂમાન્ અતસીસ્તથા ॥ ૨૧૭.૬૨ ॥

૨૧૭.૬૩/૧સસ્યાન્યન્યાનિ હર્તા ચ મર્ત્યો મોહાદ્ અચેતનઃ ।
૨૧૭.૬૩/૨સંજાયતે મુનિશ્રેષ્ઠા મૂષિકો નિરપત્રપઃ ॥ ૨૧૭.૬૩ ॥

૨૧૭.૬૪/૧તતઃ પ્રેત્ય મુનિશ્રેષ્ઠા મૃતો જાયેત શૂકરઃ ।
૨૧૭.૬૪/૨શૂકરો જાતમાત્રસ્તુ રોગેણ મ્રિયતે પુનઃ ॥ ૨૧૭.૬૪ ॥

૨૧૭.૬૫/૧શ્વા તતો જાયતે મૂકઃ કર્મણા તેન માનવઃ ।
૨૧૭.૬૫/૨ભૂત્વા શ્વા પઞ્ચ વર્ષાણિ તતો જાયેત માનવઃ ॥ ૨૧૭.૬૫ ॥

૨૧૭.૬૬/૧પરદારાભિમર્શં તુ કૃત્વા જાયેત વૈ વૃકઃ ।
૨૧૭.૬૬/૨શ્વા શ ૃગાલસ્તતો ગૃધ્રો વ્યાલઃ કઙ્કો બકસ્તથા ॥ ૨૧૭.૬૬ ॥

૨૧૭.૬૭/૧ભ્રાતુર્ભાર્યાં તુ પાપાત્મા યો ધર્ષયતિ મોહિતઃ ।
૨૧૭.૬૭/૨પુંસ્કોકિલત્વમાપ્નોતિ સોઽપિ સંવત્સરં દ્વિજાઃ ॥ ૨૧૭.૬૭ ॥

૨૧૭.૬૮/૧સખિભાર્યાં ગુરોર્ભાર્યાં રાજભાર્યાં તથૈવ ચ ।
૨૧૭.૬૮/૨પ્રધર્ષયિત્વા કામાત્મા મૃતો જાયેત શૂકરઃ ॥ ૨૧૭.૬૮ ॥

૨૧૭.૬૯/૧શૂકરઃ પઞ્ચ વર્ષાણિ દશ વર્ષાણિ વૈ બકઃ ।

૨૧૭.૬૯/૨પિપીલિકસ્તુ માસાંસ્ત્રીન્ કીટઃ સ્યાન્ માસમેવ ચ ॥ ૨૧૭.૬૯॥

૨૧૭.૭૦/૧એતાન્ આસાદ્ય સંસારાન્ કૃમિયોનૌ પ્રજાયતે ।
૨૧૭.૭૦/૨તત્ર જીવતિ માસાંસ્તુ કૃમિયોનૌ ચતુર્દશ ॥ ૨૧૭.૭૦॥

૨૧૭.૭૧/૧નરોઽધર્મક્ષયં કૃત્વા તતો જાયેત માનુષઃ ।
૨૧૭.૭૧/૨પૂર્વં દત્ત્વા તુ યઃ કન્યાં દ્વિતીયે દાતુમિચ્છતિ ॥ ૨૧૭.૭૧॥

૨૧૭.૭૨/૧સોઽપિ વિપ્રા મૃતો જન્તુઃ ક્રિમિયોનૌ પ્રજાયતે ।
૨૧૭.૭૨/૨તત્ર જીવતિ વર્ષાણિ ત્રયોદશ દ્વિજોત્તમાઃ ॥ ૨૧૭.૭૨॥

૨૧૭.૭૩/૧અધર્મસંક્ષયે મુક્તસ્તતો જાયેત માનુષઃ ।
૨૧૭.૭૩/૨દેવકાર્યમકૃત્વા તુ પિતૃકાર્યમથાપિ વા ॥ ૨૧૭.૭૩॥

૨૧૭.૭૪/૧અનિર્વાપ્ય પિતૄન્ દેવાન્ મૃતો જાયેત વાયસઃ ।
૨૧૭.૭૪/૨વાયસઃ શતવર્ષાણિ તતો જાયેત કુક્કુટઃ ॥ ૨૧૭.૭૪॥

૨૧૭.૭૫/૧જાયતે વ્યાલકશ્ચાપિ માસં તસ્માત્ તુ માનુષઃ ।
૨૧૭.૭૫/૨જ્યેષ્ઠં પિતૃસમં ચાપિ ભ્રાતરં યોઽવમન્યતે ॥ ૨૧૭.૭૫॥

૨૧૭.૭૬/૧સોઽપિ મૃત્યુમુપાગમ્ય ક્રૌઞ્ચયોનૌ પ્રજાયતે ।
૨૧૭.૭૬/૨ક્રૌઞ્ચો જીવતિ વર્ષાણિ દશ જાયેત જીવકઃ ॥ ૨૧૭.૭૬॥

૨૧૭.૭૭/૧તતો નિધનમાપ્નોતિ માનુષત્વમવાપ્નુયાત્ ।
૨૧૭.૭૭/૨વૃષલો બ્રાહ્મણીં ગત્વા કૃમિયોનૌ પ્રજાયતે ॥ ૨૧૭.૭૭॥

૨૧૭.૭૮/૧તતઃ સમ્પ્રાપ્ય નિધનં જાયતે શૂકરઃ પુનઃ ।
૨૧૭.૭૮/૨શૂકરો જાતમાત્રસ્તુ રોગેણ મ્રિયતે દ્વિજાઃ ॥ ૨૧૭.૭૮॥

૨૧૭.૭૯/૧શ્વા ચ વૈ જાયતે મૂઢઃ કર્મણા તેન ભો દ્વિજાઃ ।
૨૧૭.૭૯/૨શ્વા ભૂત્વા કૃતકર્માસૌ જાયતે માનુષસ્તતઃ ॥ ૨૧૭.૭૯॥

૨૧૭.૮૦/૧તત્રાપત્યં સમુત્પાદ્ય મૃતો જાયેત મૂષિકઃ ।
૨૧૭.૮૦/૨કૃતઘ્નસ્તુ મૃતો વિપ્રા યમસ્ય વિષયં ગતઃ ॥ ૨૧૭.૮૦॥

૨૧૭.૮૧/૧યમસ્ય વિષયે ક્રૂરૈર્બદ્ધઃ પ્રાપ્નોતિ વેદનામ્ ।
૨૧૭.૮૧/૨દણ્ડકં મુદ્ગરં શૂલમગ્નિદણ્ડં ચ દારુણમ્ ॥ ૨૧૭.૮૧॥

૨૧૭.૮૨/૧અસિપત્રવનં ઘોરં વાલુકાં કૂટશાલ્મલીમ્ ।
૨૧૭.૮૨/૨એતાશ્ચાન્યાશ્ચ બહવો યમસ્ય વિષયં ગતાઃ ॥ ૨૧૭.૮૨॥

૨૧૭.૮૩/૧યાતનાઃ પ્રાપ્ય ઘોરાસ્તુ તતો યાતિ ચ ભો દ્વિજાઃ ।
૨૧૭.૮૩/૨સંસારચક્રમાસાદ્ય ક્રિમિયોનૌ પ્રજાયતે ॥ ૨૧૭.૮૩॥

૨૧૭.૮૪/૧ક્રિમિર્ભવતિ વર્ષાણિ દશ પઞ્ચ ચ ભો દ્વિજાઃ ।
૨૧૭.૮૪/૨તતો ગર્ભં સમાસાદ્ય તત્રૈવ મ્રિયતે નરઃ ॥ ૨૧૭.૮૪॥

૨૧૭.૮૫/૧તતો ગર્ભશતૈર્જન્તુર્બહુશઃ સમ્પ્રપદ્યતે ।
૨૧૭.૮૫/૨સંસારાન્ સુબહૂન્ ગત્વા તતસ્તિર્યક્ પ્રજાયતે ॥ ૨૧૭.૮૫॥

૨૧૭.૮૬/૧તતો દુઃખમનુપ્રાપ્ય બહુવર્ષગણાનિ વૈ ।
૨૧૭.૮૬/૨સ પુનર્ભવસંયુક્તસ્તતઃ કૂર્મઃ પ્રજાયતે ॥ ૨૧૭.૮૬॥

૨૧૭.૮૭/૧દધિ હૃત્વા બકશ્ચાપિ પ્લવો મત્સ્યાન્ અસંસ્કૃતાન્ ।
૨૧૭.૮૭/૨ચોરયિત્વા તુ દુર્બુદ્ધિર્મધુદંશઃ પ્રજાયતે ॥ ૨૧૭.૮૭॥

૨૧૭.૮૮/૧ફલં વા મૂલકં હૃત્વા પૂપં વાપિ પિપીલિકઃ ।
૨૧૭.૮૮/૨ચોરયિત્વા તુ નિષ્પાવં જાયતે ફલમૂષકઃ ॥ ૨૧૭.૮૮॥

૨૧૭.૮૯/૧પાયસં ચોરયિત્વા તુ તિત્તિરત્વમવાપ્નુયાત્ ।
૨૧૭.૮૯/૨હૃત્વા પિષ્ટમયં પૂપં કુમ્ભોલૂકઃ પ્રજાયતે ॥ ૨૧૭.૮૯॥

૨૧૭.૯૦/૧અપો હૃત્વા તુ દુર્બુદ્ધિર્વાયસો જાયતે નરઃ ।
૨૧૭.૯૦/૨કાંસ્યં હૃત્વા તુ દુર્બુદ્ધિર્હારીતો જાયતે નરઃ ॥ ૨૧૭.૯૦॥

૨૧૭.૯૧/૧રાજતં ભાજનં હૃત્વા કપોતઃ સમ્પ્રજાયતે ।
૨૧૭.૯૧/૨હૃત્વા તુ કાઞ્ચનં ભાણ્ડં કૃમિયોનૌ પ્રજાયતે ॥ ૨૧૭.૯૧॥

૨૧૭.૯૨/૧પત્રોર્ણં ચોરયિત્વા તુ કુરરત્વં નિયચ્છતિ ।
૨૧૭.૯૨/૨કોશકારં તતો હૃત્વા નરો જાયેત નર્તકઃ ॥ ૨૧૭.૯૨॥

૨૧૭.૯૩/૧અંશુકં ચોરયિત્વા તુ શુકો જાયેત માનવઃ ।
૨૧૭.૯૩/૨ચોરયિત્વા દુકૂલં તુ મૃતો હંસઃ પ્રજાયતે ॥ ૨૧૭.૯૩॥

૨૧૭.૯૪/૧ક્રૌઞ્ચઃ કાર્પાસિકં હૃત્વા મૃતો જાયેત માનવઃ ।
૨૧૭.૯૪/૨ચોરયિત્વા નરઃ પટ્ટં ત્વાવિકં ચૈવ ભો દ્વિજાઃ ॥ ૨૧૭.૯૪॥

૨૧૭.૯૫/૧ક્ષૌમં ચ વસ્ત્રમાહૃત્ય શશો જન્તુઃ પ્રજાયતે ।
૨૧૭.૯૫/૨ચૂર્ણં તુ હૃત્વા પુરુષો મૃતો જાયેત બર્હિણઃ ॥ ૨૧૭.૯૫॥

૨૧૭.૯૬/૧હૃત્વા રક્તાનિ વસ્ત્રાણિ જાયતે જીવજીવકઃ ।
૨૧૭.૯૬/૨વર્ણકાદીંસ્તથા ગન્ધાંશ્ચોરયિત્વેહ માનવઃ ॥ ૨૧૭.૯૬॥

૨૧૭.૯૭/૧ચુચ્છુન્દરિત્વમાપ્નોતિ વિપ્રો લોભપરાયણઃ ।
૨૧૭.૯૭/૨તત્ર જીવતિ વર્ષાણિ તતો દશ ચ પઞ્ચ ચ ॥ ૨૧૭.૯૭॥

૨૧૭.૯૮/૧અધર્મસ્ય ક્ષયં કૃત્વા તતો જાયેત માનવઃ ।
૨૧૭.૯૮/૨ચોરયિત્વા પયશ્ચાપિ બલાકા સમ્પ્રજાયતે ॥ ૨૧૭.૯૮॥

૨૧૭.૯૯/૧યસ્તુ ચોરયતે તૈલં નરો મોહસમન્વિતઃ ।
૨૧૭.૯૯/૨સોઽપિ વિપ્રા મૃતો જન્તુસ્તૈલપાયી પ્રજાયતે ॥ ૨૧૭.૯૯॥

૨૧૭.૧૦૦/૧અશસ્ત્રં પુરુષં હત્વા સશસ્ત્રઃ પુરુષાધમઃ ।
૨૧૭.૧૦૦/૨અર્થાર્થં યદિ વા વૈરી મૃતો જાયેત વૈ ખરઃ ॥ ૨૧૭.૧૦૦॥

૨૧૭.૧૦૧/૧ખરો જીવતિ વર્ષે દ્વે તતઃ શસ્ત્રેણ વધ્યતે ।
૨૧૭.૧૦૧/૨સ મૃતો મૃગયોનૌ તુ નિત્યોદ્વિગ્નોઽભિજાયતે ॥ ૨૧૭.૧૦૧॥

૨૧૭.૧૦૨/૧મૃગો વિધ્યેત શસ્ત્રેણ ગતે સંવત્સરે તતઃ ।
૨૧૭.૧૦૨/૨હતો મૃગસ્તતો મીનઃ સોઽપિ જાલેન બધ્યતે ॥ ૨૧૭.૧૦૨॥

૨૧૭.૧૦૩/૧માસે ચતુર્થે સમ્પ્રાપ્તે શ્વાપદઃ સમ્પ્રજાયતે ।
૨૧૭.૧૦૩/૨શ્વાપદો દશ વર્ષાણિ દ્વીપી વર્ષાણિ પઞ્ચ ચ ॥ ૨૧૭.૧૦૩॥

૨૧૭.૧૦૪/૧તતસ્તુ નિધનં પ્રાપ્તઃ કાલપર્યાયચોદિતઃ ।
૨૧૭.૧૦૪/૨અધર્મસ્ય ક્ષયં કૃત્વા માનુષત્વમવાપ્નુયાત્ ॥ ૨૧૭.૧૦૪॥

૨૧૭.૧૦૫/૧વાદ્યં હૃત્વા તુ પુરુષો લોમશઃ સમ્પ્રજાયતે ।
૨૧૭.૧૦૫/૨તથા પિણ્યાકસમ્મિશ્રમન્નં યશ્ચોરયેન્ નરઃ ॥ ૨૧૭.૧૦૫॥

૨૧૭.૧૦૬/૧સ જાયતે બભ્રુસટો દારુણો મૂષિકો નરઃ ।
૨૧૭.૧૦૬/૨દશન્ વૈ માનુષાન્ નિત્યં પાપાત્મા સ દ્વિજોત્તમાઃ ॥ ૨૧૭.૧૦૬॥

૨૧૭.૧૦૭/૧ઘૃતં હૃત્વા તુ દુર્બુદ્ધિઃ કાકો મદ્ગુઃ પ્રજાયતે ।
૨૧૭.૧૦૭/૨મત્સ્યમાંસમથો હૃત્વા કાકો જાયેત માનવઃ ॥ ૨૧૭.૧૦૭॥

૨૧૭.૧૦૮/૧લવણં ચોરયિત્વા તુ ચિરિકાકઃ પ્રજાયતે ।
૨૧૭.૧૦૮/૨વિશ્વાસેન તુ નિક્ષિપ્તં યોઽપનિહ્નોતિ માનવઃ ॥ ૨૧૭.૧૦૮॥

૨૧૭.૧૦૯/૧સ ગતાયુર્નરસ્તેન મત્સ્યયોનૌ પ્રજાયતે ।
૨૧૭.૧૦૯/૨મત્સ્યયોનિમનુપ્રાપ્ય મૃતો જાયેત માનુષઃ ॥ ૨૧૭.૧૦૯॥

૨૧૭.૧૧૦/૧માનુષત્વમનુપ્રાપ્ય ક્ષીણાયુરુપજાયતે ।

૨૧૭.૧૧૦/૨પાપાનિ તુ નરઃ કૃત્વા તિર્યગ્ જાયેત ભો દ્વિજાઃ ॥ ૨૧૭.૧૧૦॥

૨૧૭.૧૧૧/૧ન ચાત્મનઃ પ્રમાણં તુ ધર્મં જાનાતિ કિંચન ।
૨૧૭.૧૧૧/૨યે પાપાનિ નરાઃ કૃત્વા નિરસ્યન્તિ વ્રતૈઃ સદા ॥ ૨૧૭.૧૧૧॥

૨૧૭.૧૧૨/૧સુખદુઃખસમાયુક્તા વ્યાધિમન્તો ભવન્ત્યુત ।
૨૧૭.૧૧૨/૨અસંવીતાઃ પ્રજાયન્તે મ્લેચ્છાશ્ચાપિ ન સંશયઃ ॥ ૨૧૭.૧૧૨॥

૨૧૭.૧૧૩/૧નરાઃ પાપસમાચારા લોભમોહસમન્વિતાઃ ।
૨૧૭.૧૧૩/૨વર્જયન્તિ હિ પાપાનિ જન્મપ્રભૃતિ યે નરાઃ ॥ ૨૧૭.૧૧૩॥

૨૧૭.૧૧૪/૧અરોગા રૂપવન્તશ્ચ ધનિનસ્તે ભવન્ત્યુત ।
૨૧૭.૧૧૪/૨સ્ત્રિયોઽપ્યેતેન કલ્પેન કૃત્વા પાપમવાપ્નુયુઃ ॥ ૨૧૭.૧૧૪॥

૨૧૭.૧૧૫/૧એતેષામેવ પાપાનાં ભાર્યાત્વમુપયાન્તિ તાઃ ।
૨૧૭.૧૧૫/૨પ્રાયેણ હરણે દોષાઃ સર્વ એવ પ્રકીર્તિતાઃ ॥ ૨૧૭.૧૧૫॥

૨૧૭.૧૧૬/૧એતદ્ વૈ લેશમાત્રેણ કથિતં વો દ્વિજર્ષભાઃ ।
૨૧૭.૧૧૬/૨અપરસ્મિન્ કથાયોગે ભૂયઃ શ્રોષ્યથ ભો દ્વિજાઃ ॥ ૨૧૭.૧૧૬॥

૨૧૭.૧૧૭/૧એતન્ મયા મહાભાગા બ્રહ્મણો વદતઃ પુરા ।
૨૧૭.૧૧૭/૨સુરર્ષીણાં શ્રુતં મધ્યે પૃષ્ટં ચાપિ યથા તથા ॥ ૨૧૭.૧૧૭॥

૨૧૭.૧૧૮/૧મયાપિ તુભ્યં કાર્ત્સ્ન્યેન યથાવદ્ અનુવર્ણિતમ્ ।
૨૧૭.૧૧૮/૨એતચ્છ્રુત્વા મુનિશ્રેષ્ઠા ધર્મે કુરુત માનસમ્ ॥ ૨૧૭.૧૧૮॥

૨૧૮.૧/૧મુનય ઊચુઃ । અધર્મસ્ય ગતિર્બ્રહ્મન્ કથિતા નસ્ત્વયાનઘ ।
૨૧૮.૧/૨ધર્મસ્ય ચ ગતિં શ્રોતુમિચ્છામો વદતાં વર ॥ ૨૧૮.૧॥

૨૧૮.૨/૧કૃત્વા પાપાનિ કર્માણિ કથં યાન્ત્યશુભાં ગતિમ્ ।
૨૧૮.૨/૨કર્મણા ચ કૃતેનેહ કેન યાન્તિ શુભાં ગતિમ્ ॥ ૨૧૮.૨॥

૨૧૮.૩/૧વ્યાસ ઉવાચ । કૃત્વા પાપાનિ કર્માણિ ત્વધર્મવશમાગતઃ ।
૨૧૮.૩/૨મનસા વિપરીતેન નિરયં પ્રતિપદ્યતે ॥ ૨૧૮.૩॥

૨૧૮.૪/૧મોહાદ્ અધર્મં યઃ કૃત્વા પુનઃ સમનુતપ્યતે ।
૨૧૮.૪/૨મનઃસમાધિસંયુક્તો ન સ સેવેત દુષ્કૃતમ્ ॥ ૨૧૮.૪॥

૨૧૮.૫/૧યદિ વિપ્રાઃ કથયતે વિપ્રાણાં ધર્મવાદિનામ્ ।
૨૧૮.૫/૨તતોઽધર્મકૃતાત્ ક્ષિપ્રમપરાધાત્ પ્રમુચ્યતે ॥ ૨૧૮.૫॥

૨૧૮.૬/૧યથા યથા નરઃ સમ્યગ્ અધર્મમનુભાષતે ।
૨૧૮.૬/૨સમાહિતેન મનસા વિમુચ્યતિ તથા તથા ॥ ૨૧૮.૬॥

૨૧૮.૭/૧યથા યથા મનસ્તસ્ય દુષ્કૃતં કર્મ ગર્હતે ।
૨૧૮.૭/૨તથા તથા શરીરં તુ તેનાધર્મેણ મુચ્યતે ॥ ૨૧૮.૭॥

૨૧૮.૮/૧ભુજંગ ઇવ નિર્મોકાન્ પૂર્વભુક્તાગ્ જહાતિ તાન્ ।
૨૧૮.૮/૨દત્ત્વા વિપ્રસ્ય દાનાનિ વિવિધાનિ સમાહિતઃ ॥ ૨૧૮.૮॥

૨૧૮.૯/૧મનઃસમાધિસંયુક્તઃ સ્વર્ગતિં પ્રતિપદ્યતે ।
૨૧૮.૯/૨દાનાનિ તુ પ્રવક્ષ્યામિ યાનિ દત્ત્વા દ્વિજોત્તમાઃ ॥ ૨૧૮.૯॥

૨૧૮.૧૦/૧નરઃ કૃત્વાપ્યકાર્યાણિ તતો ધર્મેણ યુજ્યતે ।
૨૧૮.૧૦/૨સર્વેષામેવ દાનાનામન્નં શ્રેષ્ઠમુદાહૃતમ્ ॥ ૨૧૮.૧૦॥

૨૧૮.૧૧/૧સર્વમન્નં પ્રદાતવ્યમ્ ઋજુના ધર્મમિચ્છતા ।
૨૧૮.૧૧/૨પ્રાણા હ્યન્નં મનુષ્યાણાં તસ્માજ્જન્તુઃ પ્રજાયતે ॥ ૨૧૮.૧૧॥

૨૧૮.૧૨/૧અન્ને પ્રતિષ્ઠિતા લોકાસ્તસ્માદ્ અન્નં પ્રશસ્યતે ।
૨૧૮.૧૨/૨અન્નમેવ પ્રશંસન્તિ દેવર્ષિપિતૃમાનવાઃ ॥ ૨૧૮.૧૨॥

૨૧૮.૧૩/૧અન્નસ્ય હિ પ્રદાનેન સ્વર્ગમાપ્નોતિ માનવઃ ।
૨૧૮.૧૩/૨ન્યાયલબ્ધં પ્રદાતવ્યં દ્વિજાતિભ્યોઽન્નમુત્તમમ્ ॥ ૨૧૮.૧૩॥

૨૧૮.૧૪/૧સ્વાધ્યાયસમુપેતેભ્યઃ પ્રહૃષ્ટેનાન્તરાત્મના ।
૨૧૮.૧૪/૨યસ્ય ત્વન્નમુપાશ્નન્તિ બ્રાહ્મણાશ્ચ સકૃદ્ દશ ॥ ૨૧૮.૧૪॥

૨૧૮.૧૫/૧હૃષ્ટેન મનસા દત્તં ન સ તિર્યગ્ગતિર્ભવેત્ ।
૨૧૮.૧૫/૨બ્રાહ્મણાનાં સહસ્રાણિ દશાભોજ્ય દ્વિજોત્તમાઃ ॥ ૨૧૮.૧૫॥

૨૧૮.૧૬/૧નરોઽધર્માત્ પ્રમુચ્યેત પાપેષ્વભિરતઃ સદા ।
૨૧૮.૧૬/૨ભૈક્ષેણાન્નં સમાહૃત્ય વિપ્રો વેદપુરસ્કૃતઃ ॥ ૨૧૮.૧૬॥

૨૧૮.૧૭/૧સ્વાધ્યાયનિરતે વિપ્રે દત્ત્વેહ સુખમેધતે ।
૨૧૮.૧૭/૨અહિંસન્ બ્રાહ્મણસ્વાનિ ન્યાયેન પરિપાલ્ય ચ ॥ ૨૧૮.૧૭॥

૨૧૮.૧૮/૧ક્ષત્રિયસ્તરસા પ્રાપ્તમન્નં યો વૈ પ્રયચ્છતિ ।
૨૧૮.૧૮/૨દ્વિજેભ્યો વેદમુખ્યેભ્યઃ પ્રયતઃ સુસમાહિતઃ ॥ ૨૧૮.૧૮॥

૨૧૮.૧૯/૧તેનાપોહતિ ધર્માત્મા દુષ્કૃતં કર્મ ભો દ્વિજાઃ ।
૨૧૮.૧૯/૨ષડ્ભાગપરિશુદ્ધં ચ કૃષેર્ભાગમુપાર્જિતમ્ ॥ ૨૧૮.૧૯॥

૨૧૮.૨૦/૧વૈશ્યો દદદ્ દ્વિજાતિભ્યઃ પાપેભ્યઃ પરિમુચ્યતે ।
૨૧૮.૨૦/૨અવાપ્ય પ્રાણસંદેહં કાર્કશ્યેન સમાર્જિતમ્ ॥ ૨૧૮.૨૦॥

૨૧૮.૨૧/૧અન્નં દત્ત્વા દ્વિજાતિભ્યઃ શૂદ્રઃ પાપાત્ પ્રમુચ્યતે ।
૨૧૮.૨૧/૨ઔરસેન બલેનાન્નમર્જયિત્વા વિહિંસકઃ ॥ ૨૧૮.૨૧॥

૨૧૮.૨૨/૧યઃ પ્રયચ્છતિ વિપ્રેભ્યો ન સ દુર્ગાણિ સેવતે ।
૨૧૮.૨૨/૨ન્યાયેનાવાપ્તમન્નં તુ નરો હર્ષસમન્વિતઃ ॥ ૨૧૮.૨૨॥

૨૧૮.૨૩/૧દ્વિજેભ્યો વેદવૃદ્ધેભ્યો દત્ત્વા પાપાત્ પ્રમુચ્યતે ।
૨૧૮.૨૩/૨અન્નમૂર્જસ્કરં લોકે દત્ત્વોર્જસ્વી ભવેન્ નરઃ ॥ ૨૧૮.૨૩॥

૨૧૮.૨૪/૧સતાં પન્થાનમાવૃત્ય સર્વપાપૈઃ પ્રમુચ્યતે ।
૨૧૮.૨૪/૨દાનવિદ્ભિઃ કૃતઃ પન્થા યેન યાન્તિ મનીષિણઃ ॥ ૨૧૮.૨૪॥

૨૧૮.૨૫/૧તેષ્વપ્યન્નસ્ય દાતારસ્તેભ્યો ધર્મઃ સનાતનઃ ।
૨૧૮.૨૫/૨સર્વાવસ્થં મનુષ્યેણ ન્યાયેનાન્નમુપાર્જિતમ્ ॥ ૨૧૮.૨૫॥

૨૧૮.૨૬/૧કાર્યાન્ ન્યાયાગતં નિત્યમન્નં હિ પરમા ગતિઃ ।
૨૧૮.૨૬/૨અન્નસ્ય હિ પ્રદાનેન નરો યાતિ પરાં ગતિમ્ ॥ ૨૧૮.૨૬॥

૨૧૮.૨૭/૧સર્વકામસમાયુક્તઃ પ્રેત્ય ચાપ્યશ્નુતે સુખમ્ ।
૨૧૮.૨૭/૨એવં પુણ્યસમાયુક્તો નરઃ પાપૈઃ પ્રમુચ્યતે ॥ ૨૧૮.૨૭॥

૨૧૮.૨૮/૧તસ્માદ્ અન્નં પ્રદાતવ્યમન્યાયપરિવર્જિતમ્ ।
૨૧૮.૨૮/૨યસ્તુ પ્રાણાહુતીપૂર્વમન્નં ભુઙ્ક્તે ગૃહી સદા ॥ ૨૧૮.૨૮॥

૨૧૮.૨૯/૧અવન્ધ્યં દિવસં કુર્યાદ્ અન્નદાનેન માનવઃ ।
૨૧૮.૨૯/૨ભોજયિત્વા શતં નિત્યં નરો વેદવિદાં વરમ્ ॥ ૨૧૮.૨૯॥

૨૧૮.૩૦/૧ન્યાયવિદ્ધર્મવિદુષામિતિહાસવિદાં તથા ।
૨૧૮.૩૦/૨ન યાતિ નરકં ઘોરં સંસારં ન ચ સેવતે ॥ ૨૧૮.૩૦॥

૨૧૮.૩૧/૧સર્વકામસમાયુક્તઃ પ્રેત્ય ચાપ્યશ્નુતે સુખમ્ ।
૨૧૮.૩૧/૨એવં કર્મસમાયુક્તો રમતે વિગતજ્વરઃ ॥ ૨૧૮.૩૧॥

૨૧૮.૩૨/૧રૂપવાન્ કીર્તિમાંશ્ચૈવ ધનવાંશ્ચોપજાયતે ।
૨૧૮.૩૨/૨એતદ્ વઃ સર્વમાખ્યાતમન્નદાનફલં મહત્ ।
૨૧૮.૩૨/૩મૂલમેતત્ તુ ધર્માણાં પ્રદાનાનાં ચ ભો દ્વિજાઃ ॥ ૨૧૮.૩૨॥

૨૧૯.૧/૧મુનય ઊચુઃ । પરલોકગતાનાં તુ સ્વકર્મસ્થાનવાસિનામ્ ।
૨૧૯.૧/૨તેષાં શ્રાદ્ધં કથં જ્ઞેયં પુત્રૈશ્ચાન્યૈશ્ચ બન્ધુભિઃ ॥ ૨૧૯.૧॥

૨૧૯.૨/૧વ્યાસ ઉવાચ । નમસ્કૃત્ય જગન્નાથં વારાહં લોકભાવનમ્ ।
૨૧૯.૨/૨શૃણુધ્વં સમ્પ્રવક્ષ્યામિ શ્રાદ્ધકલ્પં યથોદિતમ્ ॥ ૨૧૯.૨॥

૨૧૯.૩/૧પુરા કોકાજલે મગ્નાન્ પિતૄન્ ઉદ્ધૃતવાન્ વિભુઃ ।
૨૧૯.૩/૨શ્રાદ્ધં કૃત્વા તદા દેવો યથા તત્ર દ્વિજોત્તમાઃ ॥ ૨૧૯.૩॥

૨૧૯.૪/૧મુનય ઊચુઃ । કિમર્થં તે તુ કોકાયાં નિમગ્નાઃ પિતરોઽમ્ભસિ ।
૨૧૯.૪/૨કથં તેનોદ્ધૃતાસ્તે વૈ વારાહેણ દ્વિજોત્તમ ॥ ૨૧૯.૪॥

૨૧૯.૫/૧તસ્મિન્ કોકામુખે તીર્થે ભુક્તિમુક્તિફલપ્રદે ।
૨૧૯.૫/૨શ્રોતુમિચ્છામહે બ્રૂહિ પરં કૌતૂહલં હિ નઃ ॥ ૨૧૯.૫॥

૨૧૯.૬/૧વ્યાસ ઉવાચ । ત્રેતાદ્વાપરયોઃ સંધૌ પિતરો દિવ્યમાનુષાઃ ।
૨૧૯.૬/૨પુરા મેરુગિરેઃ પૃષ્ઠે વિશ્વૈર્દેવૈઃ સહ સ્થિતાઃ ॥ ૨૧૯.૬॥

૨૧૯.૭/૧તેષાં સમુપવિષ્ટાનાં પિતૃણાં સોમસમ્ભવા ।
૨૧૯.૭/૨કન્યા કાન્તિમતી દિવ્યા પુરતઃ પ્રાઞ્જલિઃ સ્થિતા ।
૨૧૯.૭/૩તામૂચુઃ પિતરો દિવ્યા યે તત્રાસન્ સમાગતાઃ ॥ ૨૧૯.૭॥

૨૧૯.૮/૧પિતર ઊચુઃ । કાસિ ભદ્રે પ્રભુઃ કો વા ભવત્યા વક્તુમર્હસિ ॥ ૨૧૯.૮॥

૨૧૯.૯/૧વ્યાસ ઉવાચ । સા પ્રોવાચ પિતૄન્ દેવાન્ કલા ચાન્દ્રમસીતિ હ ।
૨૧૯.૯/૨પ્રભુત્વે ભવતામેવ વરયામિ યદીચ્છથ ॥ ૨૧૯.૯॥

૨૧૯.૧૦/૧ઊર્જા નામાસ્તિ પ્રથમં સ્વધા ચ તદનન્તરમ્ ।
૨૧૯.૧૦/૨ભવદ્ભિશ્ચાદ્યૈવ કૃતં નામ કોકેતિ ભાવિતમ્ ॥ ૨૧૯.૧૦॥

૨૧૯.૧૧/૧તે હિ તસ્યા વચઃ શ્રુત્વા પિતરો દિવ્યમાનુષાઃ ।
૨૧૯.૧૧/૨તસ્યા મુખં નિરીક્ષન્તો ન તૃપ્તિમધિજગ્મિરે ॥ ૨૧૯.૧૧॥

૨૧૯.૧૨/૧વિશ્વેદેવાશ્ચ તાઞ્ જ્ઞાત્વા કન્યામુખનિરીક્ષકાન્ ।
૨૧૯.૧૨/૨યોગચ્યુતાન્ નિરીક્ષ્યૈવ વિહાય ત્રિદિવં ગતાઃ ॥ ૨૧૯.૧૨॥

૨૧૯.૧૩/૧ભગવાન્ અપિ શીતાંશુરૂર્જાં નાપશ્યદ્ આત્મજામ્ ।
૨૧૯.૧૩/૨સમાકુલમના દધ્યૌ ક્વ ગતેતિ મહાયશાઃ ॥ ૨૧૯.૧૩॥

૨૧૯.૧૪/૧સ વિવેદ તદા સોમઃ પ્રાપ્તાં પિતૄંશ્ચ કામતઃ ।
૨૧૯.૧૪/૨તૈશ્ચાવલોકિતાં હાર્દાત્ સ્વીકૃતાં ચ તપોબલાત્ ॥ ૨૧૯.૧૪॥

૨૧૯.૧૫/૧તતઃ ક્રોધપરીતાત્મા પિતૄઞ્ શશધરો દ્વિજાઃ ।
૨૧૯.૧૫/૨શશાપ નિપતિષ્યધ્વં યોગભ્રષ્ટા વિચેતસઃ ॥ ૨૧૯.૧૫॥

૨૧૯.૧૬/૧યસ્માદ્ અદત્તાં મત્કન્યાં કામયધ્વં સુબાલિશાઃ ।
૨૧૯.૧૬/૨યસ્માદ્ ધૃતવતી ચેયં પતીન્ પિતૃમતી સતી ॥ ૨૧૯.૧૬॥

૨૧૯.૧૭/૧સ્વતન્ત્રા ધર્મમુત્સૃજ્ય તસ્માદ્ ભવતુ નિમ્નગા ।
૨૧૯.૧૭/૨કોકેતિ પ્રથિતા લોકે શિશિરાદ્રિસમાશ્રિતા ॥ ૨૧૯.૧૭॥

૨૧૯.૧૮/૧ઇત્થં શપ્તાશ્ચન્દ્રમસા પિતરો દિવ્યમાનુષાઃ ।
૨૧૯.૧૮/૨યોગભ્રષ્ટા નિપતિતા હિમવત્પાદભૂતલે ॥ ૨૧૯.૧૮॥

૨૧૯.૧૯/૧ઊર્જા તત્રૈવ પતિતા ગિરિરાજસ્ય વિસ્તૃતે ।
૨૧૯.૧૯/૨પ્રસ્થે તીર્થં સમાસાદ્ય સપ્તસામુદ્રમુત્તમમ્ ॥ ૨૧૯.૧૯॥

૨૧૯.૨૦/૧કોકા નામ તતો વેગાન્ નદી તીર્થશતાકુલા ।
૨૧૯.૨૦/૨પ્લાવયન્તી ગિરેઃ શ‍ૃઙ્ગં સર્પણાત્ તુ સરિત્ સ્મૃતા ॥ ૨૧૯.૨૦॥

૨૧૯.૨૧/૧અથ તે પિતરો વિપ્રા યોગહીના મહાનદીમ્ ।
૨૧૯.૨૧/૨દદૃશુઃ શીતસલિલાં ન વિદુસ્તાં સુલોચનામ્ ॥ ૨૧૯.૨૧॥

૨૧૯.૨૨/૧તતસ્તુ ગિરિરાડ્ દૃષ્ટ્વા પિતૃંસ્તાંસ્તુ ક્ષુધાર્દિતાન્ ।
૨૧૯.૨૨/૨બદરીમાદિદેશાથ ધેનું ચૈકાં મધુસ્રવામ્ ॥ ૨૧૯.૨૨॥

૨૧૯.૨૩/૧ક્ષીરં મધુ ચ તદ્ દિવ્યં કોકામ્ભો બદરીફલમ્ ।
૨૧૯.૨૩/૨ઇદં ગિરિવરેણૈષાં પોષણાય નિરૂપિતમ્ ॥ ૨૧૯.૨૩॥

૨૧૯.૨૪/૧તયા વૃત્ત્યા તુ વસતાં પિતૃણાં મુનિસત્તમાઃ ।
૨૧૯.૨૪/૨દશ વર્ષસહસ્રાણિ યયુરેકમહો યથા ॥ ૨૧૯.૨૪॥

૨૧૯.૨૫/૧એવં લોકે વિપિતરિ તથૈવ વિગતસ્વધે ।
૨૧૯.૨૫/૨દૈત્યા બભૂવુર્બલિનો યાતુધાનાશ્ચ રાક્ષસાઃ ॥ ૨૧૯.૨૫॥

૨૧૯.૨૬/૧તે તાન્ પિતૃગણાન્ દૈત્યા યાતુધાનાશ્ચ વેગિતાઃ ।
૨૧૯.૨૬/૨વિશ્વૈર્દેવૈર્વિરહિતાન્ સર્વતઃ સમુપાદ્રવન્ ॥ ૨૧૯.૨૬॥

૨૧૯.૨૭/૧દૈતેયાન્ યાતુધાનાંશ્ચ દૃષ્ટ્વૈવાપતતો દ્વિજાઃ ।
૨૧૯.૨૭/૨કોકાતટસ્થામુત્તુઙ્ગાં શિલાં તે જગૃહૂ રુષા ॥ ૨૧૯.૨૭॥

૨૧૯.૨૮/૧ગૃહીતાયાં શિલાયાં તુ કોકા વેગવતી પિતૃન્ ।

૨૧૯.૨૮/૨છાદયામાસ તોયેન પ્લાવયન્તી હિમાચલમ્ ॥ ૨૧૯.૨૮॥

૨૧૯.૨૯/૧પિતૄન્ અન્તર્હિતાન્ દૃષ્ટ્વા દૈતેયા રાક્ષસાસ્તથા ।
૨૧૯.૨૯/૨વિભીતકં સમારુહ્ય નિરાહારાસ્તિરોહિતાઃ ॥ ૨૧૯.૨૯॥

૨૧૯.૩૦/૧સલિલેન વિષીદન્તઃ પિતરઃ ક્ષુદ્ભ્રમાતુરાઃ ।
૨૧૯.૩૦/૨વિષીદમાનમાત્માનં સમીક્ષ્ય સલિલાશયાઃ ।
૨૧૯.૩૦/૩જગ્મુર્જનાર્દનં દેવં પિતરઃ શરણં હરિમ્ ॥ ૨૧૯.૩૦॥

૨૧૯.૩૧/૧પિતર ઊચુઃ । જયસ્વ ગોવિન્દ જગન્નિવાસ ।
૨૧૯.૩૧/૨જયોઽસ્તુ નઃ કેશવ તે પ્રસાદાત્ ।
૨૧૯.૩૧/૩જનાર્દનાસ્માન્ સલિલાન્તરસ્થાન્ ।
૨૧૯.૩૧/૪ઉદ્ધર્તુમર્હસ્યનઘપ્રતાપ ॥ ૨૧૯.૩૧॥

૨૧૯.૩૨/૧નિશાચરૈર્દારુણદર્શનૈઃ પ્રભો ।
૨૧૯.૩૨/૨વરેણ્ય વૈકુણ્ઠ વરાહ વિષ્ણો ।
૨૧૯.૩૨/૩નારાયણાશેષમહેશ્વરેશ ।
૨૧૯.૩૨/૪પ્રયાહિ ભીતાગ્ જય પદ્મનાભ ॥ ૨૧૯.૩૨॥

૨૧૯.૩૩/૧ઉપેન્દ્ર યોગિન્ મધુકૈટભઘ્ન ।
૨૧૯.૩૩/૨વિષ્ણો અનન્તાચ્યુત વાસુદેવ ।
૨૧૯.૩૩/૩શ્રીશાર્ઙ્ગચક્રામ્બુજશઙ્ખપાણે ।
૨૧૯.૩૩/૪રક્ષસ્વ દેવેશ્વર રાક્ષસેભ્યઃ ॥ ૨૧૯.૩૩॥

૨૧૯.૩૪/૧ત્વં પિતા જગતઃ શમ્ભો નાન્યઃ શક્તઃ પ્રબાધિતુમ્ ।
૨૧૯.૩૪/૨નિશાચરગણં ભીમમતસ્ત્વાં શરણં ગતાઃ ॥ ૨૧૯.૩૪॥

૨૧૯.૩૫/૧ત્વન્નામસંકીર્તનતો નિશાચરા ।
૨૧૯.૩૫/૨દ્રવન્તિ ભૂતાન્યપયાન્તિ ચારયઃ ।
૨૧૯.૩૫/૩નાશં તથા સમ્પ્રતિ યાન્તિ વિષ્ણો ।
૨૧૯.૩૫/૪ધર્માદિ સત્યં ભવતીહ મુખ્યમ્ ॥ ૨૧૯.૩૫॥

૨૧૯.૩૬/૧વ્યાસ ઉવાચ । ઇત્થં સ્તુતઃ સ પિતૃભિર્ધરણીધરસ્તુ ।
૨૧૯.૩૬/૨તુષ્ટસ્તદાવિષ્કૃતદિવ્યમૂર્તિઃ ।
૨૧૯.૩૬/૩કોકામુખે પિતૃગણં સલિલે નિમગ્નમ્ ।
૨૧૯.૩૬/૪દેવો દદર્શ શિરસાથ શિલાં વહન્તમ્ ॥ ૨૧૯.૩૬॥

૨૧૯.૩૭/૧તં દૃષ્ટ્વા સલિલે મગ્નં ક્રોડરૂપી જનાર્દનઃ ।

૨૧૯.૩૭/૨ભીતં પિતૃગણં વિષ્ણુરુદ્ધર્તું મતિરાદધે ॥ ૨૧૯.૩૭॥

૨૧૯.૩૮/૧દંષ્ટ્રાગ્રેણ સમાહત્ય શિલાં ચિક્ષેપ શૂકરઃ ।
૨૧૯.૩૮/૨પિતૄન્ આદાય ચ વિભુરુજ્જહાર શિલાતલાત્ ॥ ૨૧૯.૩૮॥

૨૧૯.૩૯/૧વરાહદંષ્ટ્રાસંલગ્નાઃ પિતરઃ કનકોજ્જ્વલાઃ ।
૨૧૯.૩૯/૨કોકામુખે ગતભયાઃ કૃતા દેવેન વિષ્ણુના ॥ ૨૧૯.૩૯॥

૨૧૯.૪૦/૧ઉદ્ધૃત્ય ચ પિતૄન્ દેવો વિષ્ણુતીર્થે તુ શૂકરઃ ।
૨૧૯.૪૦/૨દદૌ સમાહિતસ્તેભ્યો વિષ્ણુર્લોહાર્ગલે જલમ્ ॥ ૨૧૯.૪૦॥

૨૧૯.૪૧/૧તતઃ સ્વરોમસમ્ભૂતાન્ કુશાન્ આદાય કેશવઃ ।
૨૧૯.૪૧/૨સ્વેદોદ્ભવાંસ્તિલાંશ્ચૈવ ચક્રે ચોલ્મુકમુત્તમમ્ ॥ ૨૧૯.૪૧॥

૨૧૯.૪૨/૧જ્યોતિઃ સૂર્યપ્રભં કૃત્વા પાત્રં તીર્થં ચ કામિકમ્ ।
૨૧૯.૪૨/૨સ્થિતઃ કોટિવટસ્યાધો વારિ ગઙ્ગાધરં શુચિ ॥ ૨૧૯.૪૨॥

૨૧૯.૪૩/૧તુઙ્ગકૂટાત્ સમાદાય યજ્ઞીયાન્ ઓષધીરસાન્ ।
૨૧૯.૪૩/૨મધુક્ષીરરસાન્ ગન્ધાન્ પુષ્પધૂપાનુલેપનાન્ ॥ ૨૧૯.૪૩॥

૨૧૯.૪૪/૧આદાય ધેનું સરસો રત્નાન્યાદાય ચાર્ણવાત્ ।
૨૧૯.૪૪/૨દંષ્ટ્રયોલ્લિખ્ય ધરણીમભ્યુક્ષ્ય સલિલેન ચ ॥ ૨૧૯.૪૪॥

૨૧૯.૪૫/૧ઘર્મોદ્ભવેનોપલિપ્ય કુશૈરુલ્લિખ્ય તાં પુનઃ ।
૨૧૯.૪૫/૨પરિણીયોલ્મુકેનૈનામભ્યુક્ષ્ય ચ પુનઃ પુનઃ ॥ ૨૧૯.૪૫॥

૨૧૯.૪૬/૧કુશાન્ આદાય પ્રાગગ્રાંલ્લોમકૂપાન્તરસ્થિતાન્ ।
૨૧૯.૪૬/૨ઋષીન્ આહૂય પપ્રચ્છ કરિષ્યે પિતૃતર્પણમ્ ॥ ૨૧૯.૪૬॥

૨૧૯.૪૭/૧તૈરપ્યુક્તે કુરુષ્વેતિ વિશ્વાન્ દેવાંસ્તતો વિભુઃ ।
૨૧૯.૪૭/૨આહૂય મન્ત્રતસ્તેષાં વિષ્ટરાણિ દદૌ પ્રભુઃ ॥ ૨૧૯.૪૭॥

૨૧૯.૪૮/૧આહૂય મન્ત્રતસ્તેષાં વેદોક્તવિધિના હરિઃ ।
૨૧૯.૪૮/૨અક્ષતૈર્દૈવતારક્ષાં ચક્રે ચક્રગદાધરઃ ॥ ૨૧૯.૪૮॥

૨૧૯.૪૯/૧અક્ષતાસ્તુ યવૌષધ્યઃ સર્વદેવાંશસમ્ભવાઃ ।
૨૧૯.૪૯/૨રક્ષન્તિ સર્વત્ર દિશો રક્ષાર્થં નિર્મિતા હિ તે ॥ ૨૧૯.૪૯॥

૨૧૯.૫૦/૧દેવદાનવદૈત્યેષુ યક્ષરક્ષઃસુ ચૈવ હિ ।
૨૧૯.૫૦/૨નહિ કશ્ચિત્ ક્ષયં તેષાં કર્તું શક્તશ્ચરાચરે ॥ ૨૧૯.૫૦॥

૨૧૯.૫૧/૧ન કેનચિત્ કૃતં યસ્માત્ તસ્માત્ તે હ્યક્ષતાઃ કૃતાઃ ।
૨૧૯.૫૧/૨દેવાનાં તે હિ રક્ષાર્થં નિયુક્તા વિષ્ણુના પુરા ॥ ૨૧૯.૫૧॥

૨૧૯.૫૨/૧કુશગન્ધયવૈઃ પુષ્પૈરર્ઘ્યં કૃત્વા ચ શૂકરઃ ।
૨૧૯.૫૨/૨વિશ્વેભ્યો દેવેભ્ય ઇતિ તતસ્તાન્ પર્યપૃચ્છત ॥ ૨૧૯.૫૨॥

૨૧૯.૫૩/૧પિતૄન્ આવાહયિષ્યામિ યે દિવ્યા યે ચ માનુષાઃ ।
૨૧૯.૫૩/૨આવાહયસ્વેતિ ચ તૈરુક્તસ્ત્વાવાહયેચ્છુચિઃ ॥ ૨૧૯.૫૩॥

૨૧૯.૫૪/૧શ્લિષ્ટમૂલાગ્રદર્ભાંસ્તુ સતિલાન્ વેદ વેદવિત્ ।
૨૧૯.૫૪/૨જાનાવારોપ્ય હસ્તં તુ દદૌ સવ્યેન ચાસનમ્ ॥ ૨૧૯.૫૪॥

૨૧૯.૫૫/૧તથૈવ જાનુસંસ્થેન કરેણૈકેન તાન્ પિતૄન્ ।
૨૧૯.૫૫/૨વારાહઃ પિતૃવિપ્રાણામાયાન્તુ ન ઇતીરયન્ ॥ ૨૧૯.૫૫॥

૨૧૯.૫૬/૧અપહતેત્યુવાચૈવ રક્ષાણં ચાપસવ્યતઃ ।
૨૧૯.૫૬/૨કૃત્વા ચાવાહનં ચક્રે પિતૃણાં નામગોત્રતઃ ॥ ૨૧૯.૫૬॥

૨૧૯.૫૭/૧તત્ પિતરો મનોજરાન્ આગચ્છત ઇતીરયન્ ।
૨૧૯.૫૭/૨સંવત્સરૈરિત્યુદીર્ય તતોઽર્ઘ્યં તેષુ વિન્યસેત્ ॥ ૨૧૯.૫૭॥

૨૧૯.૫૮/૧યાસ્તિષ્ઠન્ત્યમૃતા વાચો યન્ મૈતિ ચ પિતુઃ પિતુઃ ।
૨૧૯.૫૮/૨યન્ મે પિતામહાઇત્યેવં દદાવર્ઘ્યં પિતામહ ॥ ૨૧૯.૫૮॥

૨૧૯.૫૯/૧યન્ મે પ્રપિતામહાઇતિ દદૌ ચ પ્રપિતામહે ।
૨૧૯.૫૯/૨કુશગન્ધતિલોન્મિશ્રં સપુષ્પમપસવ્યતઃ ॥ ૨૧૯.૫૯॥

૨૧૯.૬૦/૧તદ્વન્ માતામહેભ્યસ્તુ વિધિં ચક્રે જનાર્દનઃ ।
૨૧૯.૬૦/૨તાન્ અર્ચ્ય ભૂયો ગન્ધાદ્યૈર્ધૂપં દત્ત્વા તુ ભક્તિતઃ ॥ ૨૧૯.૬૦॥

૨૧૯.૬૧/૧આદિત્યા વસવો રુદ્રા ઇત્યુચ્ચાર્ય જગત્પ્રભુઃ ।
૨૧૯.૬૧/૨તતશ્ચાન્નં સમાદાય સર્પિસ્તિલકુશાકુલમ્ ॥ ૨૧૯.૬૧॥

૨૧૯.૬૨/૧વિધાય પાત્રે તચ્ચૈવ પર્યપૃચ્છત્ તતો મુનીન્ ।
૨૧૯.૬૨/૨અગ્નૌ કરિષ્ય ઇતિ તૈઃ કુરુષ્વેતિ ચ ચોદિતઃ ॥ ૨૧૯.૬૨॥

૨૧૯.૬૩/૧આહુતિત્રિતયં દદ્યાત્ સોમાયાગ્નેર્યમાય ચ ।
૨૧૯.૬૩/૨યે મામકાઇતિ ચ જપેદ્ યજુઃસપ્તકમચ્યુતમ્ ॥ ૨૧૯.૬૩॥

૨૧૯.૬૪/૧હુતાવશિષ્ટં ચ દદૌ નામગોત્રસમન્વિતમ્ ।
૨૧૯.૬૪/૨ત્રિરાહુતિકમેકૈકં પિતરં તુ પ્રતિ દ્વિજાઃ ॥ ૨૧૯.૬૪॥

૨૧૯.૬૫/૧અતોઽવશિષ્ટમન્નાદ્યં પિણ્ડપાત્રે તુ નિક્ષિપેત્ ।
૨૧૯.૬૫/૨તતોઽન્નં સરસં સ્વાદુ દદૌ પાયસપૂર્વકમ્ ॥ ૨૧૯.૬૫॥

૨૧૯.૬૬/૧પ્રત્યગ્રમેકદા સ્વિન્નમપર્યુષિતમુત્તમમ્ ।
૨૧૯.૬૬/૨અલ્પશાકં બહુફલં ષડ્રસમમૃતોપમમ્ ॥ ૨૧૯.૬૬॥

૨૧૯.૬૭/૧યદ્ બ્રાહ્મણેષુ પ્રદદૌ પિણ્ડપાત્રે પિતૃંસ્તથા ।
૨૧૯.૬૭/૨વેદપૂર્વં પિતૃસ્વન્નમાજ્યપ્લુતં મધૂક્ષિતમ્ ॥ ૨૧૯.૬૭॥

૨૧૯.૬૮/૧મન્ત્રિતં પૃથિવીત્યેવં મધુવાતાતૃચં જગૌ ।
૨૧૯.૬૮/૨ભુઞ્જાનેષુ તુ વિપ્રેષુ જપન્ વૈ મન્ત્રપઞ્ચકમ્ ॥ ૨૧૯.૬૮॥

૨૧૯.૬૯/૧યત્ તે પ્રકારમારભ્ય નાધિકં તે તતો જગૌ ।
૨૧૯.૬૯/૨ત્રિમધુ ત્રિસુપર્ણં ચ બૃહદારણ્યકં તથા ॥ ૨૧૯.૬૯॥

૨૧૯.૭૦/૧જજાપ વૈષાં જાપ્યં તુ સૂક્તં સૌરં સપૌરુષમ્ ।
૨૧૯.૭૦/૨ભુક્તવત્સુ ચ વિપ્રેષુ પૃષ્ટ્વા તૃપ્તા સ્થ ઇત્યુત ॥ ૨૧૯.૭૦॥

૨૧૯.૭૧/૧તૃપ્તાઃ સ્મેતિ સકૃત્ તોયં દદૌ મૌનવિમોચનમ્ ।
૨૧૯.૭૧/૨પિણ્ડપાત્રં સમાદાય *ચ્છાયાયૈ પ્રદદૌ તતઃ ॥ ૨૧૯.૭૧॥

૨૧૯.૭૨/૧સા તદ્ અન્નં દ્વિધા કૃત્વા ત્રિધૈકૈકમથાકરોત્ ।
૨૧૯.૭૨/૨વારાહો ભૂમથોલ્લિખ્ય સમાચ્છાદ્ય કુશૈરપિ ॥ ૨૧૯.૭૨॥

૨૧૯.૭૩/૧દક્ષિણાગ્રાન્ કુશાન્ કૃત્વા તેષામુપરિ ચાસનમ્ ।
૨૧૯.૭૩/૨સતિલેષુ સમૂલેષુ કુશેષ્વેવ તુ સંશ્રયઃ ॥ ૨૧૯.૭૩॥

૨૧૯.૭૪/૧ગન્ધપુષ્પાદિકં કૃત્વા તતઃ પિણ્ડં તુ ભક્તિતઃ ।
૨૧૯.૭૪/૨પૃથિવી દધીરિત્યુક્ત્વા તતઃ પિણ્ડં પ્રદત્તવાન્ ॥ ૨૧૯.૭૪॥

૨૧૯.૭૫/૧પિતામહાઃ પ્રપિતામહાસ્તથેતિ ચાન્તરિક્ષતઃ ।
૨૧૯.૭૫/૨માતામહાનામપ્યેવં દદૌ પિણ્ડાન્ સ શૂકરઃ ॥ ૨૧૯.૭૫॥

૨૧૯.૭૬/૧પિણ્ડનિર્વાપણોચ્છિષ્ટમન્નં લેપભુજેષ્વદાત્ ।
૨૧૯.૭૬/૨એતદ્ વઃ પિતરિત્યુક્ત્વા દદૌ વાસાંસિ ભક્તિતઃ ॥ ૨૧૯.૭૬॥

૨૧૯.૭૭/૧દ્વ્યઙ્ગુલજાનિ શુક્લાનિ ધૌતાન્યભિનવાનિ ચ ।
૨૧૯.૭૭/૨ગન્ધપુષ્પાદિકં દત્ત્વા કૃત્વા ચૈષાં પ્રદક્ષિણામ્ ॥ ૨૧૯.૭૭॥

૨૧૯.૭૮/૧આચમ્યાચામયેદ્ વિપ્રાન્ પૈત્રાન્ આદૌ તતઃ સુરાન્ ।

૨૧૯.૭૮/૨તતસ્ત્વભ્યુક્ષ્ય તાં ભૂમિં દત્ત્વાપઃ સુમનોક્ષતાન્ ॥ ૨૧૯.૭૮॥

૨૧૯.૭૯/૧સતિલામ્બુ પિતૃષ્વાદૌ દત્ત્વા દેવેષુ સાક્ષતમ્ ।
૨૧૯.૭૯/૨અક્ષય્યં નસ્ત્વિતિ પિતૄન્ પ્રીયતામિતિ દેવતાઃ ॥ ૨૧૯.૭૯॥

૨૧૯.૮૦/૧પ્રીણયિત્વા પરાવૃત્ય ત્રિર્જપેચ્ચાઘમર્ષણમ્ ।
૨૧૯.૮૦/૨તતો નિવૃત્ય તુ જપેદ્ યન્ મે નામ ઇતીરયન્ ॥ ૨૧૯.૮૦॥

૨૧૯.૮૧/૧ગૃહાન્ નઃ પિતરો દત્ત ધનધાન્યપ્રપૂરિતાન્ ।
૨૧૯.૮૧/૨અર્ઘ્યપાત્રાણિ પિણ્ડાનામન્તરે સ પવિત્રકાન્ ॥ ૨૧૯.૮૧॥

૨૧૯.૮૨/૧નિક્ષિપ્યોર્જં વહન્તીતિ કોકાતોયમથોઽજપત્ ।
૨૧૯.૮૨/૨હિમક્ષીરં મધુતિલાન્ પિતૃણાં તર્પણં દદૌ ॥ ૨૧૯.૮૨॥

૨૧૯.૮૩/૧સ્વસ્તીત્યુક્તે પૈતૃકૈસ્તુ સોરાન્નિ પ્રાવતર્પયન્ ।
૨૧૯.૮૩/૨૨જતં દક્ષિણાં દત્ત્વા વિપ્રાન્ દેવો ગદાધરઃ ॥ ૨૧૯.૮૩॥

૨૧૯.૮૪/૧સંવિભાગં મનુષ્યેભ્યો દદૌ સ્વદ્ ઇતિ ચાબ્રુવન્ ।
૨૧૯.૮૪/૨કશ્ચિત્ સમ્પન્નમિત્યુક્ત્વા પ્રત્યુક્તસ્તૈર્દ્વિજોત્તમાઃ ॥ ૨૧૯.૮૪॥

૨૧૯.૮૫/૧અભિરમ્યતામિત્યુવાચ પ્રોચુસ્તેઽભિરતાઃ સ્મ વૈ ।
૨૧૯.૮૫/૨શિષ્ટમન્નં ચ પપ્રચ્છ તૈરિષ્ટૈઃ સહ ચોદિતઃ ॥ ૨૧૯.૮૫॥

૨૧૯.૮૬/૧પાણાવાદાય તાન્ વિપ્રાન્ કુર્યાદ્ અનુગતસ્તદા ।
૨૧૯.૮૬/૨વાજે વાજે ઇતિ પઠન્ બહિર્વેદિ વિનિર્ગતઃ ॥ ૨૧૯.૮૬॥

૨૧૯.૮૭/૧કોટિતીર્થજલેનાસાવપસવ્યં સમુત્ક્ષિપન્ ।
૨૧૯.૮૭/૨અલગ્રાન્ વિપુલાન્ વાલાન્ પ્રાર્થયામાસ ચાશિષમ્ ॥ ૨૧૯.૮૭॥

૨૧૯.૮૮/૧દાતારો નોઽભિવર્ધન્તાં તૈસ્તથેતિ સમીરિતઃ ।
૨૧૯.૮૮/૨પ્રદક્ષિણમુપાવૃત્ય કૃત્વા પાદાભિવાદનમ્ ॥ ૨૧૯.૮૮॥

૨૧૯.૮૯/૧આસનાનિ દદૌ ચૈષાં છાદયામાસ શૂકરઃ ।
૨૧૯.૮૯/૨વિશ્રામ્યતાં પ્રવિશ્યાથ પિણ્ડં જગ્રાહ મધ્યમમ્ ॥ ૨૧૯.૮૯॥

૨૧૯.૯૦/૧છાયામયી મહી પત્ની તસ્યૈ પિણ્ડમદાત્ પ્રભુઃ ।
૨૧૯.૯૦/૨આધત્ત પિતરો ગર્ભમિત્યુક્ત્વા સાપિ રૂપિણી ॥ ૨૧૯.૯૦॥

૨૧૯.૯૧/૧પિણ્ડં ગૃહીત્વા વિપ્રાણાં ચક્રે પાદાભિવન્દનમ્ ।
૨૧૯.૯૧/૨વિસર્જનં પિતૃણાં સ કર્તુકામશ્ચ શૂકરઃ ॥ ૨૧૯.૯૧॥

૨૧૯.૯૨/૧કોકા ચ પિતરશ્ચૈવ પ્રોચુઃ સ્વાર્થકરં વચઃ ।
૨૧૯.૯૨/૨શપ્તાશ્ચ ભગવન્ પૂર્વં દિવસ્થા હિમભાનુના ॥ ૨૧૯.૯૨ ॥

૨૧૯.૯૩/૧યોગભ્રષ્ટા ભવિષ્યધ્વં સર્વ એવ દિવશ્ચ્યુતાઃ ।
૨૧૯.૯૩/૨તદ્ એવં ભવતા ત્રાતાઃ પ્રવિશન્તો રસાતલમ્ ॥ ૨૧૯.૯૩ ॥

૨૧૯.૯૪/૧યોગભ્રષ્ટાંશ્ચ વિશ્વેશાસ્તત્યજુર્યોગરક્ષિણઃ ।
૨૧૯.૯૪/૨તત્ તે ભૂયોઽભિરક્ષન્તુ વિશ્વે દેવા હિ નઃ સદા ॥ ૨૧૯.૯૪ ॥

૨૧૯.૯૫/૧સ્વર્ગં યાસ્યામશ્ચ વિભો પ્રસાદાત્ તવ શૂકર ।
૨૧૯.૯૫/૨સોમોઽધિદેવોઽસ્માકં ચ ભવત્વચ્યુત યોગધૃક્ ॥ ૨૧૯.૯૫ ॥

૨૧૯.૯૬/૧યોગાધારસ્તથા સોમસ્ત્રાયતે ન કદાચન ।
૨૧૯.૯૬/૨દિવિ ભૂમૌ સદા વાસો ભવત્વસ્માસુ યોગતઃ ॥ ૨૧૯.૯૬ ॥

૨૧૯.૯૭/૧અન્તરિક્ષે ચ કેષાંચિન્ માસં પુષ્ટિસ્તથાસ્તુ નઃ ।
૨૧૯.૯૭/૨ઊર્જા ચેયં હિ નઃ પત્ની સ્વધાનામ્ના તુ વિશ્રુતા ॥ ૨૧૯.૯૭ ॥

૨૧૯.૯૮/૧ભવત્વેષૈવ યોગાઢ્યા યોગમાતા ચ ખેચરી ।
૨૧૯.૯૮/૨ઇત્યેવમુક્તઃ પિતૃભિર્વારાહો ભૂતભાવનઃ ॥ ૨૧૯.૯૮ ॥

૨૧૯.૯૯/૧પ્રોવાચાથ પિતૄન્ વિષ્ણુસ્તાં ચ કોકાં મહાનદીમ્ ।
૨૧૯.૯૯/૨યદ્ ઉક્તં તુ ભવદ્ભિર્મે સર્વમેતદ્ ભવિષ્યતિ ॥ ૨૧૯.૯૯ ॥

૨૧૯.૧૦૦/૧યમોઽધિદેવો ભવતાં સોમઃ સ્વાધ્યાય ઈરિતઃ ।
૨૧૯.૧૦૦/૨અધિયજ્ઞસ્તથૈવાગ્નિર્ભવતાં કલ્પના ત્વિયમ્ ॥ ૨૧૯.૧૦૦ ॥

૨૧૯.૧૦૧/૧અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ સ્થાનં હિ ભવતામિતિ ।
૨૧૯.૧૦૧/૨બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ભવતામધિપૂરુષાઃ ॥ ૨૧૯.૧૦૧ ॥

૨૧૯.૧૦૨/૧આદિત્યા વસવો રુદ્રા ભવતાં મૂર્તયસ્ત્વિમાઃ ।
૨૧૯.૧૦૨/૨યોગિનો યોગદેહાશ્ચ યોગધારાશ્ચ સુવ્રતાઃ ॥ ૨૧૯.૧૦૨ ॥

૨૧૯.૧૦૩/૧કામતો વિચરિષ્યધ્વં ફલદાઃ સર્વજન્તુષુ ।
૨૧૯.૧૦૩/૨સ્વર્ગસ્થાન્ નરકસ્થાંશ્ચ ભૂમિસ્થાંશ્ચ ચરાચરાન્ ॥ ૨૧૯.૧૦૩ ॥

૨૧૯.૧૦૪/૧નિજયોગબલેનૈવ *આપ્યાયયિષ્યધ્વમુત્તમાઃ ।
૨૧૯.૧૦૪/૨ઇયમૂર્જા શશિસુતા કીલાલમધુવિગ્રહા ॥ ૨૧૯.૧૦૪ ॥

૨૧૯.૧૦૫/૧ભવિષ્યતિ મહાભાગા દક્ષસ્ય દુહિતા સ્વધા ।
૨૧૯.૧૦૫/૨તત્રેયં ભવતાં પત્ની ભવિષ્યતિ વરાનના ॥ ૨૧૯.૧૦૫ ॥

૨૧૯.૧૦૬/૧કોકાનદીતિ વિખ્યાતા ગિરિરાજસમાશ્રિતા ।
૨૧૯.૧૦૬/૨તીર્થકોટિમહાપુણ્યા મદ્રૂપપરિપાલિતા ॥ ૨૧૯.૧૦૬॥

૨૧૯.૧૦૭/૧અસ્યામદ્ય પ્રભૃતિ વૈ નિવત્સ્યામ્યઘનાશકૃત્ ।
૨૧૯.૧૦૭/૨વરાહદર્શનં પુણ્યં પૂજનં ભુક્તિમુક્તિદમ્ ॥ ૨૧૯.૧૦૭॥

૨૧૯.૧૦૮/૧કોકાસલિલપાનં ચ મહાપાતકનાશનમ્ ।
૨૧૯.૧૦૮/૨તીર્થેષ્વાપ્લવનં પુણ્યમુપવાસશ્ચ સ્વર્ગદઃ ॥ ૨૧૯.૧૦૮॥

૨૧૯.૧૦૯/૧દાનમક્ષય્યમુદિતં જન્મમૃત્યુજરાપહમ્ ।
૨૧૯.૧૦૯/૨માઘે માસ્યસિતે પક્ષે ભવદ્ભિરુડુપક્ષયે ॥ ૨૧૯.૧૦૯॥

૨૧૯.૧૧૦/૧કોકામુખમુપાગમ્ય સ્થાતવ્યં દિનપઞ્ચકમ્ ।
૨૧૯.૧૧૦/૨તસ્મિન્ કાલે તુ યઃ શ્રાદ્ધં પિતૃણાં નિર્વપિષ્યતિ ॥ ૨૧૯.૧૧૦॥

૨૧૯.૧૧૧/૧પ્રાગુક્તફલભાગી સ ભવિષ્યતિ ન સંશયઃ ।
૨૧૯.૧૧૧/૨એકાદશીં દ્વાદશીં ચ સ્થેયમત્ર મયા સદા ॥ ૨૧૯.૧૧૧॥

૨૧૯.૧૧૨/૧યસ્તત્રોપવસેદ્ ધીમાન્ સ પ્રાગુક્તફલં લભેત્ ।
૨૧૯.૧૧૨/૨તદ્ વ્રજધ્વં મહાભાગાઃ સ્થાનમિષ્ટં યથેષ્ટતઃ ॥ ૨૧૯.૧૧૨॥

૨૧૯.૧૧૩/૧અહમપ્યત્ર વત્સ્યામીત્યુક્ત્વા સોઽન્તરધીયત ।
૨૧૯.૧૧૩/૨ગતે વરાહે પિતરઃ કોકામામન્ત્ર્ય તે યયુઃ ॥ ૨૧૯.૧૧૩॥

૨૧૯.૧૧૪/૧કોકાપિ તીર્થસહિતા સંસ્થિતા ગિરિરાજનિ ।
૨૧૯.૧૧૪/૨છાયા મહીમયી ક્રોડી પિણ્ડપ્રાશનબૃંહિતા ॥ ૨૧૯.૧૧૪॥

૨૧૯.૧૧૫/૧ગર્ભમાદાય સશ્રદ્ધા વારાહસ્યૈવ સુન્દરી ।
૨૧૯.૧૧૫/૨તતોઽસ્યાઃ પ્રાભવત્ પુત્રો ભૌમસ્તુ નરકાસુરઃ ।
૨૧૯.૧૧૫/૩પ્રાગ્જ્યોતિષં ચ નગરમસ્ય દત્તં ચ વિષ્ણુના ॥ ૨૧૯.૧૧૫॥

૨૧૯.૧૧૬/૧એવં મયોક્તં વરદસ્ય વિષ્ણોઃ ।
૨૧૯.૧૧૬/૨કોકામુખે દિવ્યવરાહરૂપમ્ ।
૨૧૯.૧૧૬/૩શ્રુત્વા નરસ્ત્યક્તમલો વિપાપ્મા ।
૨૧૯.૧૧૬/૪દશાશ્વમેધેષ્ટિફલં લભેત ॥ ૨૧૯.૧૧૬॥

૨૨૦.૧/૧મુનય ઊચુઃ । ભૂયઃ પ્રબ્રૂહિ ભગવઞ્ શ્રાદ્ધકલ્પં સુવિસ્તરાત્ ।
૨૨૦.૧/૨કથં ક્વ ચ કદા કેષુ કૈસ્તદ્ બ્રૂહિ તપોધન ॥ ૨૨૦.૧॥

૨૨૦.૨/૧વ્યાસ ઉવાચ । શૃણુધ્વં મુનિશાર્દૂલાઃ શ્રાદ્ધકલ્પં સુવિસ્તરાત્ ।
૨૨૦.૨/૨યથા યત્ર યદા યેષુ યૈર્દ્રવ્યૈસ્તદ્ વદામ્યહમ્ ॥ ૨૨૦.૨॥

૨૨૦.૩/૧બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શ્રાદ્ધં સ્વવરણોદિતમ્ ।
૨૨૦.૩/૨કુલધર્મમનુતિષ્ઠદ્ભિર્દાતવ્યં મન્ત્રપૂર્વકમ્ ॥ ૨૨૦.૩॥

૨૨૦.૪/૧સ્ત્રીભિર્વર્ણાવરૈઃ શૂદ્રૈર્વિપ્રાણામનુશાસનાત્ ।
૨૨૦.૪/૨અમન્ત્રકં વિધિપૂર્વં વહ્નિયાગવિવર્જિતમ્ ॥ ૨૨૦.૪॥

૨૨૦.૫/૧પુષ્કરાદિષુ તીર્થેષુ પુણ્યેષ્વાયતનેષુ ચ ।
૨૨૦.૫/૨શિખરેષુ ગિરીન્દ્રાણાં પુણ્યદેશેષુ ભો દ્વિજાઃ ॥ ૨૨૦.૫॥

૨૨૦.૬/૧સરિત્સુ પુણ્યતોયાસુ નદેષુ ચ સરઃસુ ચ ।
૨૨૦.૬/૨સંગમેષુ નદીનાં ચ સમુદ્રેષુ ચ સપ્તસુ ॥ ૨૨૦.૬॥

૨૨૦.૭/૧સ્વનુલિપ્તેષુ ગેહેષુ સ્વેષ્વનુજ્ઞાપિતેષુ ચ ।
૨૨૦.૭/૨દિવ્યપાદપમૂલેષુ યજ્ઞિયેષુ હ્રદેષુ ચ ॥ ૨૨૦.૭॥

૨૨૦.૮/૧શ્રાદ્ધમેતેષુ દાતવ્યં વર્જ્યમેતેષુ ચોચ્યતે ।
૨૨૦.૮/૨કિરાતેષુ કલિઙ્ગેષુ કોઙ્કણેષુ કૃમિષ્વપિ ॥ ૨૨૦.૮॥

૨૨૦.૯/૧દશાર્ણેષુ કુમાર્યેષુ તઙ્ગણેષુ ક્રથેષ્વપિ ।
૨૨૦.૯/૨સિન્ધોરુત્તરકૂલેષુ નર્મદાયાશ્ચ દક્ષિણે ॥ ૨૨૦.૯॥

૨૨૦.૧૦/૧પૂર્વેષુ કરતોયાયા ન દેયં શ્રાદ્ધમુચ્યતે ।
૨૨૦.૧૦/૨શ્રાદ્ધં દેયમુશન્તીહ માસિ માસ્યુડુપક્ષયે ॥ ૨૨૦.૧૦॥

૨૨૦.૧૧/૧પૌર્ણમાસેષુ શ્રાદ્ધં ચ કર્તવ્યમ્ ઋક્ષગોચરે ।
૨૨૦.૧૧/૨નિત્યશ્રાદ્ધમદૈવં ચ મનુષ્યૈઃ સહ ગીયતે ॥ ૨૨૦.૧૧॥

૨૨૦.૧૨/૧નૈમિત્તિકં સુરૈઃ સાર્ધં નિત્યં નૈમિત્તિકં તથા ।
૨૨૦.૧૨/૨કામ્યાન્યન્યાનિ શ્રાદ્ધાનિ પ્રતિસંવત્સરં દ્વિજૈઃ ॥ ૨૨૦.૧૨॥

૨૨૦.૧૩/૧વૃદ્ધિશ્રાદ્ધં ચ કર્તવ્યં જાતકર્માદિકેષુ ચ ।
૨૨૦.૧૩/૨તત્ર યુગ્માન્ દ્વિજાન્ આહુર્મન્ત્રપૂર્વં તુ વૈ દ્વિજાઃ ॥ ૨૨૦.૧૩॥

૨૨૦.૧૪/૧કન્યાં ગતે સવિતરિ દિનાનિ દશ પઞ્ચ ચ ।
૨૨૦.૧૪/૨પૂર્વેણૈવેહ વિધિના શ્રાદ્ધં તત્ર વિધીયતે ॥ ૨૨૦.૧૪॥

૨૨૦.૧૫/૧પ્રતિપદ્ધનલાભાય દ્વિતીયા દ્વિપદપ્રદા ।
૨૨૦.૧૫/૨પુત્રાર્થિની તૃતીયા તુ ચતુર્થી શત્રુનાશિની ॥ ૨૨૦.૧૫॥

૨૨૦.૧૬/૧શ્રિયં પ્રાપ્નોતિ પઞ્ચમ્યાં ષષ્ઠ્યાં પૂજ્યો ભવેન્ નરઃ ।
૨૨૦.૧૬/૨ગણાધિપત્યં સપ્તમ્યામષ્ટમ્યાં બુદ્ધિમુત્તમામ્ ॥ ૨૨૦.૧૬॥

૨૨૦.૧૭/૧સ્ત્રિયો નવમ્યાં પ્રાપ્નોતિ દશમ્યાં પૂર્ણકામતામ્ ।
૨૨૦.૧૭/૨વેદાંસ્તથાપ્નુયાત્ સર્વાન્ એકાદશ્યાં ક્રિયાપરઃ ॥ ૨૨૦.૧૭॥

૨૨૦.૧૮/૧દ્વાદશ્યાં જયલાભં ચ પ્રાપ્નોતિ પિતૃપૂજકઃ ।
૨૨૦.૧૮/૨પ્રજાવૃદ્ધિં પશું મેધાં સ્વાતન્ત્ર્યં પુષ્ટિમુત્તમામ્ ॥ ૨૨૦.૧૮॥

૨૨૦.૧૯/૧દીર્ઘાયુરથવૈશ્વર્યં કુર્વાણસ્તુ ત્રયોદશીમ્ ।
૨૨૦.૧૯/૨અવાપ્નોતિ ન સંદેહઃ શ્રાદ્ધં શ્રદ્ધાસમન્વિતઃ ॥ ૨૨૦.૧૯॥

૨૨૦.૨૦/૧યથાસમ્ભવિનાન્નેન શ્રાદ્ધં શ્રદ્ધાસમન્વિતઃ ।
૨૨૦.૨૦/૨યુવાનઃ પિતરો યસ્ય મૃતાઃ શસ્ત્રેણ વા હતાઃ ॥ ૨૨૦.૨૦॥

૨૨૦.૨૧/૧તેન કાર્યં ચતુર્દશ્યાં તેષાં તૃપ્તિમભીપ્સતા ।
૨૨૦.૨૧/૨શ્રાદ્ધં કુર્વન્ન્ અમાવાસ્યાં યત્નેન પુરુષઃ શુચિઃ ॥ ૨૨૦.૨૧॥

૨૨૦.૨૨/૧સર્વાન્ કામાન્ અવાપ્નોતિ સ્વર્ગં ચાનન્તમશ્નુતે ।
૨૨૦.૨૨/૨અતઃપરં મુનિશ્રેષ્ઠાઃ શ‍ૃણુધ્વં વદતો મમ ॥ ૨૨૦.૨૨॥

૨૨૦.૨૩/૧પિતૃણાં પ્રીતયે યત્ર યદ્ દેયં પ્રીતિકારિણા ।
૨૨૦.૨૩/૨માસં તૃપ્તિઃ પિતૃણાં તુ હવિષ્યાન્નેન જાયતે ॥ ૨૨૦.૨૩॥

૨૨૦.૨૪/૧માસદ્વયં મત્સ્યમાંસૈસ્તૃપ્તિં યાન્તિ પિતામહાઃ ।
૨૨૦.૨૪/૨ત્રીન્ માસાન્ હારિણં માંસં વિજ્ઞેયં પિતૃતૃપ્તયે ॥ ૨૨૦.૨૪॥

૨૨૦.૨૫/૧પુષ્ણાતિ ચતુરો માસાઞ્ શશસ્ય પિશિતં પિતૃન્ ।
૨૨૦.૨૫/૨શાકુનં પઞ્ચ વૈ માસાન્ ષણ્ માસાઞ્ શૂકરામિષમ્ ॥ ૨૨૦.૨૫॥

૨૨૦.૨૬/૧છાગલં સપ્ત વૈ માસાન્ ઐણેયં ચાષ્ટમાસકાન્ ।
૨૨૦.૨૬/૨કરોતિ તૃપ્તિં નવ વૈ રુરુમાંસં ન સંશયઃ ॥ ૨૨૦.૨૬॥

૨૨૦.૨૭/૧ગવ્યં માંસં પિતૃતૃપ્તિં કરોતિ દશમાસિકીમ્ ।
૨૨૦.૨૭/૨તથૈકાદશ માસાંસ્તુ ઔરભ્રં પિતૃતૃપ્તિદમ્ ॥ ૨૨૦.૨૭॥

૨૨૦.૨૮/૧સંવત્સરં તથા ગવ્યં પયઃ પાયસમેવ ચ ।
૨૨૦.૨૮/૨વાધ્રીનમામિષં લોહં કાલશાકં તથા મધુ ॥ ૨૨૦.૨૮॥

૨૨૦.૨૯/૧રોહિતામિષમન્નં ચ દત્તાન્યાત્મકુલોદ્ભવૈઃ ।

૨૨૦.૨૯/૨અનન્તં વૈ પ્રયચ્છન્તિ તૃપ્તિયોગં સુતાંસ્તથા ॥ ૨૨૦.૨૯॥

૨૨૦.૩૦/૧પિતૃણાં નાત્ર સંદેહો ગયાશ્રાદ્ધં ચ ભો દ્વિજાઃ ।
૨૨૦.૩૦/૨યો દદાતિ ગુડોન્મિશ્રાંસ્તિલાન્ વા શ્રાદ્ધકર્મણિ ॥ ૨૨૦.૩૦॥

૨૨૦.૩૧/૧મધુ વા મધુમિશ્રં વા અક્ષયં સર્વમેવ તત્ ।
૨૨૦.૩૧/૨અપિ નઃ સ કુલે ભૂયાદ્ યો નો દદ્યાજ્જલાઞ્જલિમ્ ॥ ૨૨૦.૩૧॥

૨૨૦.૩૨/૧પાયસં મધુસંયુક્તં વર્ષાસુ ચ મઘાસુ ચ ।
૨૨૦.૩૨/૨એષ્ટવ્યા બહવઃ પુત્રા યદ્યેકોઽપિ ગયાં વ્રજેત્ ॥ ૨૨૦.૩૨॥

૨૨૦.૩૩/૧ગૌરીં વાપ્યુદ્વહેત્ કન્યાં નીલં વા વૃષમુત્સૃજેત્ ।
૨૨૦.૩૩/૨કૃત્તિકાસુ પિતૄન્ અર્ચ્ય સ્વર્ગમાપ્નોતિ માનવઃ ॥ ૨૨૦.૩૩॥

૨૨૦.૩૪/૧અપત્યકામો રોહિણ્યાં સૌમ્યે તેજસ્વિતાં લભેત્ ।
૨૨૦.૩૪/૨શૌર્યમાર્દ્રાસુ ચાપ્નોતિ ક્ષેત્રાણિ ચ પુનર્વસૌ ॥ ૨૨૦.૩૪॥

૨૨૦.૩૫/૧પુષ્યે તુ ધનમક્ષય્યમાશ્લેષે ચાયુરુત્તમમ્ ।
૨૨૦.૩૫/૨મઘાસુ ચ પ્રજાં પુષ્ટિં સૌભાગ્યં ફાલ્ગુનીષુ ચ ॥ ૨૨૦.૩૫॥

૨૨૦.૩૬/૧પ્રધાનશીલો ભવતિ સાપત્યશ્ચોત્તરાસુ ચ ।
૨૨૦.૩૬/૨પ્રયાતિ શ્રેષ્ઠતાં શાસ્ત્રે હસ્તે શ્રાદ્ધપ્રદો નરઃ ॥ ૨૨૦.૩૬॥

૨૨૦.૩૭/૧રૂપં તેજશ્ચ ચિત્રાસુ તથાપત્યમવાપ્નુયાત્ ।
૨૨૦.૩૭/૨વાણિજ્યલાભદા સ્વાતી વિશાખા પુત્રકામદા ॥ ૨૨૦.૩૭॥

૨૨૦.૩૮/૧કુર્વન્તાં ચાનુરાધાસુ તા દદ્યુશ્ચક્રવર્તિતામ્ ।
૨૨૦.૩૮/૨આધિપત્યં ચ જ્યેષ્ઠાસુ મૂલે ચારોગ્યમુત્તમમ્ ॥ ૨૨૦.૩૮॥

૨૨૦.૩૯/૧આષાઢાસુ યશઃપ્રાપ્તિરુત્તરાસુ વિશોકતા ।
૨૨૦.૩૯/૨શ્રવણેન શુભાંલ્લોકાન્ ધનિષ્ઠાસુ ધનં મહત્ ॥ ૨૨૦.૩૯॥

૨૨૦.૪૦/૧વેદવિત્ત્વમભિજિતિ ભિષક્સિદ્ધિં ચ વારુણે ।
૨૨૦.૪૦/૨અજાવિકં પ્રૌષ્ઠપદ્યાં વિન્દેદ્ ગાવસ્તથોત્તરે ॥ ૨૨૦.૪૦॥

૨૨૦.૪૧/૧રેવતીષુ તથા કુપ્યમશ્વિનીષુ તુરંગમાન્ ।
૨૨૦.૪૧/૨શ્રાદ્ધં કુર્વંસ્તથાપ્નોતિ ભરણીષ્વાયુરુત્તમમ્ ॥ ૨૨૦.૪૧॥

૨૨૦.૪૨/૧એવં ફલમવાપ્નોતિ ઋક્ષેષ્વેતેષુ તત્ત્વવિત્ ।
૨૨૦.૪૨/૨તસ્માત્ કામ્યાનિ શ્રાદ્ધાનિ દેયાનિ વિધિવદ્ દ્વિજાઃ ॥ ૨૨૦.૪૨॥

૨૨૦.૪૩/૧કન્યારાશિગતે સૂર્યે ફલમત્યન્તમિચ્છતા ।

૨૨૦.૪૩/૨યાન્ યાન્ કામાન્ અભિધ્યાયન્ કન્યારાશિગતે રવૌ ॥ ૨૨૦.૪૩॥

૨૨૦.૪૪/૧શ્રાદ્ધં કુર્વન્તિ મનુજાસ્તાંસ્તાન્ કામાંલ્લભન્તિ તે ।

૨૨૦.૪૪/૨નાન્દીમુખાનાં કર્તવ્યં કન્યારાશિગતે રવૌ ॥ ૨૨૦.૪૪॥

૨૨૦.૪૫/૧પૌર્ણમાસ્યાં તુ કર્તવ્યં વારાહવચનં યથા ।

૨૨૦.૪૫/૨દિવ્યભૌમાન્તરિક્ષાણિ સ્થાવરાણિ ચરાણિ ચ ॥ ૨૨૦.૪૫॥

૨૨૦.૪૬/૧પિણ્ડમિચ્છન્તિ પિતરઃ કન્યારાશિગતે રવૌ ।

૨૨૦.૪૬/૨કન્યાં ગતે સવિતરિ યાન્યહાનિ તુ ષોડશ ॥ ૨૨૦.૪૬॥

૨૨૦.૪૭/૧ક્રતુભિસ્તાનિ તુલ્યાનિ દેવો નારાયણોઽબ્રવીત્ ।

૨૨૦.૪૭/૨રાજસૂયાશ્વમેધાભ્યાં ય ઇચ્છેદ્ દુર્લભં ફલમ્ ॥ ૨૨૦.૪૭॥

૨૨૦.૪૮/૧અપ્યમ્બુશાકમૂલાદ્યૈઃ પિતૄન્ કન્યાગતેઽર્ચયેત્ ।

૨૨૦.૪૮/૨ઉત્તરાહસ્તનક્ષત્ર+ ।ગતે તીક્ષ્ણાંશુમાલિનિ ॥ ૨૨૦.૪૮॥

૨૨૦.૪૯/૧યોઽર્ચયેત્ સ્વપિતૄન્ ભક્ત્યા તસ્ય વાસસ્ત્રિવિષ્ટપે ।

૨૨૦.૪૯/૨હસ્તર્ક્ષગે દિનકરે પિતૃરાજાનુશાસનાત્ ॥ ૨૨૦.૪૯॥

૨૨૦.૫૦/૧તાવત્ પિતૃપુરી શૂન્યા યાવદ્ વૃશ્ચિકદર્શનમ્ ।

૨૨૦.૫૦/૨વૃશ્ચિકે સમતિક્રાન્તે પિતરો દૈવતૈઃ સહ ॥ ૨૨૦.૫૦॥

૨૨૦.૫૧/૧નિઃશ્વસ્ય પ્રતિગચ્છન્તિ શાપં દત્ત્વા સુદુઃસહમ્ ।

૨૨૦.૫૧/૨અષ્ટકાસુ ચ કર્તવ્યં શ્રાદ્ધં મન્વન્તરાસુ વૈ ॥ ૨૨૦.૫૧॥

૨૨૦.૫૨/૧અન્વષ્ટકાસુ ક્રમશો માતૃપૂર્વં તદ્ ઇષ્યતે ।

૨૨૦.૫૨/૨ગ્રહણે ચ વ્યતીપાતે રવિચન્દ્રસમાગમે ॥ ૨૨૦.૫૨॥

૨૨૦.૫૩/૧જન્મર્ક્ષે ગ્રહપીડાયાં શ્રાદ્ધં પાર્વણમુચ્યતે ।

૨૨૦.૫૩/૨અયનદ્વિતયે શ્રાદ્ધં વિષુવદ્વિતયે તથા ॥ ૨૨૦.૫૩॥

૨૨૦.૫૪/૧સંક્રાન્તિષુ ચ કર્તવ્યં શ્રાદ્ધં વિધિવદ્ ઉત્તમમ્ ।

૨૨૦.૫૪/૨એષુ કાર્યં દ્વિજાઃ શ્રાદ્ધં પિણ્ડનિર્વાપણાદ્ ઋતે ॥ ૨૨૦.૫૪॥

૨૨૦.૫૫/૧વૈશાખસ્ય તૃતીયાયાં નવમ્યાં કાર્ત્તિકસ્ય ચ ।

૨૨૦.૫૫/૨શ્રાદ્ધં કાર્યં તુ શુક્લાયાં સંક્રાન્તિવિધિના નરૈઃ ॥ ૨૨૦.૫૫॥

૨૨૦.૫૬/૧ત્રયોદશ્યાં ભાદ્રપદે માઘે ચન્દ્રક્ષયેઽહનિ ।

૨૨૦.૫૬/૨શ્રાદ્ધં કાર્યં પાયસેન ।

૨૨૦.૫૬/૩દક્ષિણાયનવચ્ચ તત્ ॥ ૨૨૦.૫૬॥

૨૨૦.૫૭/૧યદા ચ શ્રોત્રિયોઽભ્યેતિ ગેહં વેદવિદ્ અગ્નિમાન્ ।
૨૨૦.૫૭/૨તેનૈકેન ચ કર્તવ્યં શ્રાદ્ધં વિધિવદ્ ઉત્તમમ્ ॥ ૨૨૦.૫૭॥

૨૨૦.૫૮/૧શ્રાદ્ધીયદ્રવ્યસમ્પ્રાપ્તિર્યદા સ્યાત્ સાધુસમ્મતા ।
૨૨૦.૫૮/૨પાર્વણેન વિધાનેન શ્રાદ્ધં કાર્યં તથા દ્વિજૈઃ ॥ ૨૨૦.૫૮॥

૨૨૦.૫૯/૧પ્રતિસંવત્સરં કાર્યં માતાપિત્રોર્મૃતેઽહનિ ।
૨૨૦.૫૯/૨પિતૃવ્યસ્યાપ્યપુત્રસ્ય ભ્રાતુર્જ્યેષ્ઠસ્ય ચૈવ હિ ॥ ૨૨૦.૫૯॥

૨૨૦.૬૦/૧પાર્વણં દેવપૂર્વં સ્યાદ્ એકોદ્દિષ્ટં સુરૈર્વિના ।
૨૨૦.૬૦/૨દ્વૌ દૈવે પિતૃકાર્યે ત્રીન્ એકૈકમુભયત્ર વા ॥ ૨૨૦.૬૦॥

૨૨૦.૬૧/૧માતામહાનામપ્યેવં સર્વમૂહેન કીર્તિતમ્ ।
૨૨૦.૬૧/૨પ્રેતીભૂતસ્ય સતતં ભુવિ પિણ્ડં જલં તથા ॥ ૨૨૦.૬૧॥

૨૨૦.૬૨/૧સતિલં સકુશં દદ્યાદ્ બહિર્જલસમીપતઃ ।
૨૨૦.૬૨/૨તૃતીયેઽહ્નિ ચ કર્તવ્યં પ્રેતાસ્થિચયનં દ્વિજૈઃ ॥ ૨૨૦.૬૨॥

૨૨૦.૬૩/૧દશાહે બ્રાહ્મણઃ શુદ્ધો દ્વાદશાહેન ક્ષત્રિયઃ ।
૨૨૦.૬૩/૨વૈશ્યઃ પઞ્ચદશાહેન શૂદ્રો માસેન શુધ્યતિ ॥ ૨૨૦.૬૩॥

૨૨૦.૬૪/૧સૂતકાન્તે ગૃહે શ્રાદ્ધમેકોદ્દિષ્ટં પ્રચક્ષતે ।
૨૨૦.૬૪/૨દ્વાદશેઽહનિ માસે ચ ત્રિપક્ષે ચ તતઃ પરમ્ ॥ ૨૨૦.૬૪॥

૨૨૦.૬૫/૧માસિ માસિ ચ કર્તવ્યં યાવત્ સંવત્સરં દ્વિજાઃ ।
૨૨૦.૬૫/૨તત પરતરં કાર્યં સપિણ્ડીકરણં ક્રમાત્ ॥ ૨૨૦.૬૫॥

૨૨૦.૬૬/૧કૃતે સપિણ્ડીકરણે પાર્વણં પ્રોચ્યતે પુનઃ ।
૨૨૦.૬૬/૨તતઃ પ્રભૃતિ નિર્મુક્તાઃ પ્રેતત્વાત્ પિતૃતાં ગતાઃ ॥ ૨૨૦.૬૬॥

૨૨૦.૬૭/૧અમૂર્તા મૂર્તિમન્તશ્ચ પિતરો દ્વિવિધાઃ સ્મૃતાઃ ।
૨૨૦.૬૭/૨નાન્દીમુખાસ્ત્વમૂર્તાઃ સ્યુર્મૂર્તિમન્તોઽથ પાર્વણાઃ ।
૨૨૦.૬૭/૩એકોદ્દિષ્ટાશિનઃ પ્રેતાઃ પિતૃણાં નિર્ણયસ્ત્રિધા ॥ ૨૨૦.૬૭॥

૨૨૦.૬૮/૧મુનય ઊચુઃ । કથં સપિણ્ડીકરણં કર્તવ્યં દ્વિજસત્તમ ।
૨૨૦.૬૮/૨પ્રેતીભૂતસ્ય વિધિવદ્ બ્રૂહિ નો વદતાં વર ॥ ૨૨૦.૬૮॥

૨૨૦.૬૯/૧વ્યાસ ઉવાચ । સપિણ્ડીકરણં વિપ્રાઃ શ ૃણુધ્વં વદતો મમ ।
૨૨૦.૬૯/૨તચ્ચાપિ દેવરહિતમેકાર્ઘૈકપવિત્રકમ્ ॥ ૨૨૦.૬૯॥

૨૨૦.૭૦/૧નૈવાગ્નૌ કરણં તત્ર તચ્ચાવાહનવર્જિતમ્ ।
૨૨૦.૭૦/૨અપસવ્યં ચ તત્રાપિ ભોજયેદ્ અયુજો દ્વિજાન્ ॥ ૨૨૦.૭૦॥

૨૨૦.૭૧/૧વિશેષસ્તત્ર ચાન્યોઽસ્તિ પ્રતિમાસક્રિયાદિકઃ ।
૨૨૦.૭૧/૨તં કથ્યમાનમેકાગ્રાઃ શ ृણુધ્વં મે દ્વિજોત્તમાઃ ॥ ૨૨૦.૭૧॥

૨૨૦.૭૨/૧તિલગન્ધોદકૈર્યુક્તં તત્ર પાત્રચતુષ્ટયમ્ ।
૨૨૦.૭૨/૨કુર્યાત્ પિતૃણાં ત્રિતયમેકં પ્રેતસ્ય ચ દ્વિજાઃ ॥ ૨૨૦.૭૨॥

૨૨૦.૭૩/૧પાત્રત્રયે પ્રેતપાત્રાદ્ અર્ઘં ચૈવ પ્રસેચયેત્ ।
૨૨૦.૭૩/૨યે સમાના ઇતિ જપન્ પૂર્વવચ્છેષમાચરેત્ ॥ ૨૨૦.૭૩॥

૨૨૦.૭૪/૧સ્ત્રીણામપ્યેવમેવ સ્યાદ્ એકોદ્દિષ્ટમુદાહૃતમ્ ।
૨૨૦.૭૪/૨સપિણ્ડીકરણં તાસાં પુત્રાભાવે ન વિદ્યતે ॥ ૨૨૦.૭૪॥

૨૨૦.૭૫/૧પ્રતિસંવત્સરં કાર્યમેકોદ્દિષ્ટં નરૈઃ સ્ત્રિયાઃ ।
૨૨૦.૭૫/૨મૃતાહનિ ચ તત્ કાર્યં પિતૃણાં વિધિચોદિતમ્ ॥ ૨૨૦.૭૫॥

૨૨૦.૭૬/૧પુત્રાભાવે સપિણ્ડાસ્તુ તદભાવે સહોદરાઃ ।
૨૨૦.૭૬/૨કુર્યુરેતં વિધિં સમ્યક્ પુત્રસ્ય ચ સુતાઃ સુતાઃ ॥ ૨૨૦.૭૬॥

૨૨૦.૭૭/૧કુર્યાન્ માતામહાનાં તુ પુત્રિકાતનયસ્તથા ।
૨૨૦.૭૭/૨દ્વ્યામુષ્યાયણસંજ્ઞાસ્તુ માતામહપિતામહાન્ ॥ ૨૨૦.૭૭॥

૨૨૦.૭૮/૧પૂજયેયુર્યથાન્યાયં શ્રાદ્ધૈર્નૈમિત્તિકૈરપિ ।
૨૨૦.૭૮/૨સર્વાભાવે સ્ત્રિયઃ કુર્યુઃ સ્વભર્તૃણામમન્ત્રકમ્ ॥ ૨૨૦.૭૮॥

૨૨૦.૭૯/૧તદભાવે ચ નૃપતિઃ કારયેત્ ત્વકુટુમ્બિનામ્ ।
૨૨૦.૭૯/૨તજ્જાતીયૈર્નરૈઃ સમ્યગ્ વાહાદ્યાઃ સકલાઃ ક્રિયાઃ ॥ ૨૨૦.૭૯॥

૨૨૦.૮૦/૧સર્વેષામેવ વર્ણાનાં બાન્ધવો નૃપતિર્યતઃ ।
૨૨૦.૮૦/૨એતા વઃ કથિતા વિપ્રા નિત્યા નૈમિત્તિકાસ્તથા ॥ ૨૨૦.૮૦॥

૨૨૦.૮૧/૧વક્ષ્યે શ્રાદ્ધાશ્રયામન્યાં નિત્યનૈમિત્તિકાં ક્રિયામ્ ।
૨૨૦.૮૧/૨દર્શસ્તત્ર નિમિત્તં તુ વિદ્યાદ્ ઇન્દુક્ષયાન્વિતઃ ॥ ૨૨૦.૮૧॥

૨૨૦.૮૨/૧નિત્યસ્તુ નિયતઃ કાલસ્તસ્મિન્ કુર્યાદ્ યથોદિતમ્ ।
૨૨૦.૮૨/૨સપિણ્ડીકરણાદ્ ઊર્ધ્વં પિતુર્યઃ પ્રપિતામહઃ ॥ ૨૨૦.૮૨॥

૨૨૦.૮૩/૧સ તુ લેપભુજં યાતિ પ્રલુપ્તઃ પિતૃપિણ્ડતઃ ।

૨૨૦.૮૩/૨તેષાં હિ યશ્ચતુર્થોઽન્યઃ સ તુ લેપભુજો ભવેત્ ॥ ૨૨૦.૮૩॥

૨૨૦.૮૪/૧સોઽપિ સમ્બન્ધતો હીનમુપભોગં પ્રપદ્યતે ।
૨૨૦.૮૪/૨પિતા પિતામહશ્ચૈવ તથૈવ પ્રપિતામહઃ ॥ ૨૨૦.૮૪॥

૨૨૦.૮૫/૧પિણ્ડસમ્બન્ધિનો હ્યેતે વિજ્ઞેયાઃ પુરુષાસ્ત્રયઃ ।
૨૨૦.૮૫/૨લેપસમ્બન્ધિનશ્ચાન્યે પિતામહપિતામહાત્ ॥ ૨૨૦.૮૫॥

૨૨૦.૮૬/૧પ્રભૃત્યુક્તાસ્ત્રયસ્તેષાં યજમાનશ્ચ સપ્તમઃ ।
૨૨૦.૮૬/૨ઇત્યેષ મુનિભિઃ પ્રોક્તઃ સમ્બન્ધઃ સાપ્તપૌરુષઃ ॥ ૨૨૦.૮૬॥

૨૨૦.૮૭/૧યજમાનાત્ પ્રભૃત્યૂર્ધ્વમનુલેપભુજસ્તથા ।
૨૨૦.૮૭/૨તતોઽન્યે પૂર્વજાઃ સર્વે યે ચાન્યે નરકૌકસઃ ॥ ૨૨૦.૮૭॥

૨૨૦.૮૮/૧યેઽપિ તિર્યક્ત્વમાપન્ના યે ચ ભૂતાદિસંસ્થિતાઃ ।
૨૨૦.૮૮/૨તાન્ સર્વાન્ યજમાનો વૈ શ્રાદ્ધં કુર્વન્ યથાવિધિ ॥ ૨૨૦.૮૮॥

૨૨૦.૮૯/૧સ સમાપ્યાયતે વિપ્રા યેન યેન વદામિ તત્ ।
૨૨૦.૮૯/૨અન્નપ્રકિરણં યત્ તુ મનુષ્યૈઃ ક્રિયતે ભુવિ ॥ ૨૨૦.૮૯॥

૨૨૦.૯૦/૧તેન તૃપ્તિમુપાયાન્તિ યે પિશાચત્વમાગતાઃ ।
૨૨૦.૯૦/૨યદ્ અમ્બુ સ્નાનવસ્ત્રોત્થં ભૂમૌ પતતિ ભો દ્વિજાઃ ॥ ૨૨૦.૯૦॥

૨૨૦.૯૧/૧તેન યે તરુતાં પ્રાપ્તાસ્તેષાં તૃપ્તિઃ પ્રજાયતે ।
૨૨૦.૯૧/૨યાસ્તુ ગન્ધામ્બુકણિકાઃ પતન્તિ ધરણીતલે ॥ ૨૨૦.૯૧॥

૨૨૦.૯૨/૧તાભિરાપ્યાયનં તેષાં દેવત્વં યે કુલે ગતાઃ ।
૨૨૦.૯૨/૨ઉદ્ધૃતેષ્વથ પિણ્ડેષુ યાશ્ચામ્બુકણિકા ભુવિ ॥ ૨૨૦.૯૨॥

૨૨૦.૯૩/૧તાભિરાપ્યાયનં તેષાં યે તિર્યક્ત્વં કુલે ગતાઃ ।
૨૨૦.૯૩/૨યે ચાદન્તાઃ કુલે બાલાઃ ક્રિયાયોગાદ્ બહિષ્કૃતાઃ ॥ ૨૨૦.૯૩॥

૨૨૦.૯૪/૧વિપન્નાસ્ત્વનધિકારાઃ સમ્માર્જિતજલાશિનઃ ।
૨૨૦.૯૪/૨ભુક્ત્વા ચાચામતાં યચ્ચ યજ્જલં ચાઙ્ઘ્રિશૌચજમ્ ॥ ૨૨૦.૯૪॥

૨૨૦.૯૫/૧બ્રાહ્મણાનાં તથૈવાન્યત્ તેન તૃપ્તિં પ્રયાન્તિ વૈ ।
૨૨૦.૯૫/૨એવં યો યજમાનસ્ય યશ્ચ તેષાં દ્વિજન્મનામ્ ॥ ૨૨૦.૯૫॥

૨૨૦.૯૬/૧કશ્ચિજ્જલાન્નવિક્ષેપઃ શુચિરુચ્છિષ્ટ એવ વા ।
૨૨૦.૯૬/૨તેનાન્નેન કુલે તત્ર યે ચ યોન્યન્તરં ગતાઃ ॥ ૨૨૦.૯૬॥

૨૨૦.૯૭/૧પ્રયાન્ત્યાપ્યાયનં વિપ્રાઃ સમ્યક્ શ્રાદ્ધક્રિયાવતામ્ ।
૨૨૦.૯૭/૨અન્યાયોપાર્જિતૈરર્થૈર્યચ્છ્રાદ્ધં ક્રિયતે નરૈઃ ॥ ૨૨૦.૯૭ ॥

૨૨૦.૯૮/૧તૃપ્યન્તે તે ન ચાણ્ડાલ+ ।પુલ્કસાદ્યાસુ યોનિષુ ।
૨૨૦.૯૮/૨એવમાપ્યાયનં વિપ્રા બહૂનામેવ બાન્ધવૈઃ ॥ ૨૨૦.૯૮ ॥

૨૨૦.૯૯/૧શ્રાદ્ધં કુર્વદ્ભિરત્રામ્બુ+ ।વિક્ષેપૈઃ સમ્પ્રજાયતે ।
૨૨૦.૯૯/૨તસ્માચ્છ્રાદ્ધં નરો ભક્ત્યા શાકેનાપિ યથાવિધિ ॥ ૨૨૦.૯૯ ॥

૨૨૦.૧૦૦/૧કુર્વીત કુર્વતઃ શ્રાદ્ધં કુલે કશ્ચિન્ ન સીદતિ ।
૨૨૦.૧૦૦/૨શ્રાદ્ધં દેયં તુ વિપ્રેષુ સંયતેષ્વગ્નિહોત્રિષુ ॥ ૨૨૦.૧૦૦ ॥

૨૨૦.૧૦૧/૧અવદાતેષુ વિદ્વત્સુ શ્રોત્રિયેષુ વિશેષતઃ ।
૨૨૦.૧૦૧/૨ત્રિણાચિકેતસ્ત્રિમધુસ્ત્રિસુપર્ણઃ ષડઙ્ગવિત્ ॥ ૨૨૦.૧૦૧ ॥

૨૨૦.૧૦૨/૧માતાપિતૃપરશ્ચૈવ સ્વસ્રીયઃ સામવેદવિત્ ।
૨૨૦.૧૦૨/૨ઋત્વિક્પુરોહિતાચાર્યમુપાધ્યાયં ચ ભોજયેત્ ॥ ૨૨૦.૧૦૨ ॥

૨૨૦.૧૦૩/૧માતુલઃ શ્વશુરઃ શ્યાલઃ સમ્બન્ધી દ્રોણપાઠકઃ ।
૨૨૦.૧૦૩/૨મણ્ડલબ્રાહ્મણો યસ્તુ પુરાણાર્થવિશારદઃ ॥ ૨૨૦.૧૦૩ ॥

૨૨૦.૧૦૪/૧અકલ્પઃ કલ્પસંતુષ્ટઃ પ્રતિગ્રહવિવર્જિતઃ ।
૨૨૦.૧૦૪/૨એતે શ્રાદ્ધે નિયોક્તવ્યા બ્રાહ્મણાઃ પઙ્ક્તિપાવનાઃ ॥ ૨૨૦.૧૦૪ ॥

૨૨૦.૧૦૫/૧નિમન્ત્રયેત પૂર્વેદ્યુઃ પૂર્વોક્તાન્ દ્વિજસત્તમાન્ ।
૨૨૦.૧૦૫/૨દૈવે નિયોગે પિત્ર્યે ચ તાંસ્તથૈવોપકલ્પયેત્ ॥ ૨૨૦.૧૦૫ ॥

૨૨૦.૧૦૬/૧તૈશ્ચ સંયમિભિર્ભાવ્યં યસ્તુ શ્રાદ્ધં કરિષ્યતિ ।
૨૨૦.૧૦૬/૨શ્રાદ્ધં દત્ત્વા ચ ભુક્ત્વા ચ મૈથુનં યોઽધિગચ્છતિ ॥ ૨૨૦.૧૦૬ ॥

૨૨૦.૧૦૭/૧પિતરસ્તસ્ય વૈ માસં તસ્મિન્ રેતસિ શેરતે ।
૨૨૦.૧૦૭/૨ગત્વા ચ યોષિતં શ્રાદ્ધે યો ભુઙ્ક્તે યસ્તુ ગચ્છતિ ॥ ૨૨૦.૧૦૭ ॥

૨૨૦.૧૦૮/૧રેતોમૂત્રકૃતાહારાસ્તં માસં પિતરસ્તયોઃ ।
૨૨૦.૧૦૮/૨તસ્માત્ ત્વપ્રથમં કાર્યં પ્રાજ્ઞેનોપનિમન્ત્રણમ્ ॥ ૨૨૦.૧૦૮ ॥

૨૨૦.૧૦૯/૧અપ્રાપ્તૌ તદ્દિને વાપિ વર્જ્યા યોષિત્પ્રસઙ્ગિનઃ ।
૨૨૦.૧૦૯/૨ભિક્ષાર્થમાગતાંશ્ચાપિ કાલેન સંયતાન્ યતીન્ ॥ ૨૨૦.૧૦૯ ॥

૨૨૦.૧૧૦/૧ભોજયેત્ પ્રણિપાતાદ્યૈઃ પ્રસાદ્ય યતમાનસઃ ।
૨૨૦.૧૧૦/૨યોગિનશ્ચ તદા શ્રાદ્ધે ભોજનીયા વિપશ્ચિતા ॥ ૨૨૦.૧૧૦ ॥

૨૨૦.૧૧૧/૧યોગાધારા હિ પિતરસ્તસ્માત્ તાન્ પૂજયેત્ સદા ।
૨૨૦.૧૧૧/૨બ્રાહ્મણાનાં સહસ્રાણિ એકો યોગી ભવેદ્ યદિ ॥ ૨૨૦.૧૧૧॥

૨૨૦.૧૧૨/૧યજમાનં ચ ભોક્તૄંશ્ચ નૌરિવામ્ભસિ તારયેત્ ।
૨૨૦.૧૧૨/૨પિતૃગાથા તથૈવાત્ર ગીયતે બ્રહ્મવાદિભિઃ ॥ ૨૨૦.૧૧૨॥

૨૨૦.૧૧૩/૧યા ગીતા પિતૃભિઃ પૂર્વમૈલસ્યાસીન્ મહીપતેઃ ।
૨૨૦.૧૧૩/૨કદા નઃ સંતતાવગ્ર્યઃ કસ્યચિદ્ ભવિતા સુતઃ ॥ ૨૨૦.૧૧૩॥

૨૨૦.૧૧૪/૧યો યોગિભુક્તશેષાન્ નો ભુવિ પિણ્ડાન્ પ્રદાસ્યતિ ।
૨૨૦.૧૧૪/૨ગયાયામથવા પિણ્ડં ખડ્ગમાંસં તથા હવિઃ ॥ ૨૨૦.૧૧૪॥

૨૨૦.૧૧૫/૧કાલશાકં તિલાજ્યં ચ તૃપ્તયે કૃસરં ચ નઃ ।
૨૨૦.૧૧૫/૨વૈશ્વદેવં ચ સૌમ્યં ચ ખડ્ગમાંસં પરં હવિઃ ॥ ૨૨૦.૧૧૫॥

૨૨૦.૧૧૬/૧વિષાણવર્જં શિરસ આ પાદાદ્ આશિષામહે ।
૨૨૦.૧૧૬/૨દદ્યાચ્છ્રાદ્ધં ત્રયોદશ્યાં મઘાસુ ચ યથાવિધિ ॥ ૨૨૦.૧૧૬॥

૨૨૦.૧૧૭/૧મધુસર્પિઃસમાયુક્તં પાયસં દક્ષિણાયને ।
૨૨૦.૧૧૭/૨તસ્માત્ સમ્પૂજયેદ્ ભક્ત્યા સ્વપિતૃન્ વિધિવન્ નરઃ ॥ ૨૨૦.૧૧૭॥

૨૨૦.૧૧૮/૧કામાન્ અભીપ્સન્ સકલાન્ પાપાદ્ આત્મવિમોચનમ્ ।
૨૨૦.૧૧૮/૨વસૂન્ રુદ્રાંસ્તથાદિત્યાન્ નક્ષત્રગ્રહતારકાઃ ॥ ૨૨૦.૧૧૮॥

૨૨૦.૧૧૯/૧પ્રીણયન્તિ મનુષ્યાણાં પિતરઃ શ્રાદ્ધતર્પિતાઃ ।
૨૨૦.૧૧૯/૨આયુઃ પ્રજાં ધનં વિદ્યાં સ્વર્ગં મોક્ષં સુખાનિ ચ ॥ ૨૨૦.૧૧૯॥

૨૨૦.૧૨૦/૧પ્રયચ્છન્તિ તથા રાજ્યં પિતરઃ શ્રાદ્ધતર્પિતાઃ ।
૨૨૦.૧૨૦/૨તથાપરાહ્ણઃ પૂર્વાહ્ણાત્ પિતૃણામતિરિચ્યતે ॥ ૨૨૦.૧૨૦॥

૨૨૦.૧૨૧/૧સમ્પૂજ્ય સ્વાગતેનૈતાન્ સદનેઽભ્યાગતાન્ દ્વિજાન્ ।
૨૨૦.૧૨૧/૨પવિત્રપાણિરાચાન્તાન્ આસનેષૂપવેશયેત્ ॥ ૨૨૦.૧૨૧॥

૨૨૦.૧૨૨/૧શ્રાદ્ધં કૃત્વા વિધાનેન સમ્ભોજ્ય ચ દ્વિજોત્તમાન્ ।
૨૨૦.૧૨૨/૨વિસર્જયેત્ પ્રિયાણ્યુક્ત્વા પ્રણિપત્ય ચ ભક્તિતઃ ॥ ૨૨૦.૧૨૨॥

૨૨૦.૧૨૩/૧આદ્વારમનુગચ્છેચ્ચ આગચ્છેદ્ અનુમોદિતઃ ।
૨૨૦.૧૨૩/૨તતો નિત્યક્રિયાં કુર્યાદ્ ભોજયેચ્ચ તથાતિથીન્ ॥ ૨૨૦.૧૨૩॥

૨૨૦.૧૨૪/૧નિત્યક્રિયાં પિતૃણાં ચ કેચિદ્ ઇચ્છન્તિ સત્તમાઃ ।

૨૨૦.૧૨૪/૨ન પિતૄણાં તથૈવાન્યે શેષં પૂર્વવદ્ આચરેત્ ॥ ૨૨૦.૧૨૪॥

૨૨૦.૧૨૫/૧પૃથક્ત્વેન વદન્ત્યન્યે કેચિત્ પૂર્વં ચ પૂર્વવત્ ।
૨૨૦.૧૨૫/૨તતસ્તદ્ અન્નં ભુઞ્જીત સહ ભૃત્યાદિભિર્નરઃ ॥ ૨૨૦.૧૨૫॥

૨૨૦.૧૨૬/૧એવં કુર્વીત ધર્મજ્ઞઃ શ્રાદ્ધં પિત્ર્યં સમાહિતઃ ।
૨૨૦.૧૨૬/૨યથા ચ વિપ્રમુખ્યાનાં પરિતોષોઽભિજાયતે ॥ ૨૨૦.૧૨૬॥

૨૨૦.૧૨૭/૧ઇદાનીં સમ્પ્રવક્ષ્યામિ વર્જનીયાન્ દ્વિજાધમાન્ ।
૨૨૦.૧૨૭/૨મિત્રધ્રુક્ કુનખી ક્લીબઃ ક્ષયી શુક્લી વણિક્પથઃ ॥ ૨૨૦.૧૨૭॥

૨૨૦.૧૨૮/૧શ્યાવદન્તોઽથ ખલ્વાટઃ કાણોઽન્ધો બધિરો જડઃ ।
૨૨૦.૧૨૮/૨મૂકઃ પઙ્ગુઃ કુણિઃ ષણ્ઢો દુશ્ચર્મા વ્યઙ્ગકેકરૌ ॥ ૨૨૦.૧૨૮॥

૨૨૦.૧૨૯/૧કુષ્ઠી રક્તેક્ષણઃ કુબ્જો વામનો વિકટોઽલસઃ ।
૨૨૦.૧૨૯/૨મિત્રશત્રુર્દુષ્કુલીનઃ પશુપાલો નિરાકૃતિઃ ॥ ૨૨૦.૧૨૯॥

૨૨૦.૧૩૦/૧પરિવિત્તિઃ પરિવેત્તા પરિવેદનિકાસુતઃ ।
૨૨૦.૧૩૦/૨વૃષલીપતિસ્તત્સુતશ્ચ ન ભવેચ્છ્રાદ્ધભુગ્ દ્વિજઃ ॥ ૨૨૦.૧૩૦॥

૨૨૦.૧૩૧/૧વૃષલીપુત્રસંસ્કર્તા અનૂઢો દિધિષૂપતિઃ ।
૨૨૦.૧૩૧/૨ભૃતકાધ્યાપકો યસ્તુ ભૃતકાધ્યાપિતશ્ચ યઃ ॥ ૨૨૦.૧૩૧॥

૨૨૦.૧૩૨/૧સૂતકાન્નોપજીવી ચ મૃગયુઃ સોમવિક્રયી ।
૨૨૦.૧૩૨/૨અભિશસ્તસ્તથા સ્તેનઃ પતિતો વાર્દ્ધુષિઃ શઠઃ ॥ ૨૨૦.૧૩૨॥

૨૨૦.૧૩૩/૧પિશુનો વેદસંત્યાગી દાનાગ્નિત્યાગનિષ્ઠુરઃ ।
૨૨૦.૧૩૩/૨રાજ્ઞઃ પુરોહિતો ભૃત્યો વિદ્યાહીનોઽથ મત્સરી ॥ ૨૨૦.૧૩૩॥

૨૨૦.૧૩૪/૧વૃદ્ધદ્વિડ્ દુર્ધરઃ ક્રૂરો મૂઢો દેવલકસ્તથા ।
૨૨૦.૧૩૪/૨નક્ષત્રસૂચકશ્ચૈવ પર્વકારશ્ચ ગર્હિતઃ ॥ ૨૨૦.૧૩૪॥

૨૨૦.૧૩૫/૧અયાજ્યયાજકઃ ષણ્ઢો ગર્હિતા યે ચ યેઽધમાઃ ।
૨૨૦.૧૩૫/૨ન તે શ્રાદ્ધે નિયોક્તવ્યા દૃષ્ટ્વામી પઙ્ક્તિદૂષકાઃ ॥ ૨૨૦.૧૩૫॥

૨૨૦.૧૩૬/૧અસતાં પ્રગ્રહો યત્ર સતાં ચૈવાવમાનના ।
૨૨૦.૧૩૬/૨દણ્ડો દેવકૃતસ્તત્ર સદ્યઃ પતતિ દારુણઃ ॥ ૨૨૦.૧૩૬॥

૨૨૦.૧૩૭/૧હિત્વાગમં સુવિહિતં બાલિશં યસ્તુ ભોજયેત્ ।
૨૨૦.૧૩૭/૨આદિધર્મં સમુત્સૃજ્ય દાતા તત્ર વિનશ્યતિ ॥ ૨૨૦.૧૩૭॥

૨૨૦.૧૩૮/૧યસ્ત્વાશ્રિતં દ્વિજં ત્યક્ત્વા અન્યમાનીય ભોજયેત્ ।
૨૨૦.૧૩૮/૨તન્નિઃશ્વાસાગ્નિનિર્દગ્ધસ્તત્ર દાતા વિનશ્યતિ ॥ ૨૨૦.૧૩૮॥

૨૨૦.૧૩૯/૧વસ્ત્રાભાવે ક્રિયા નાસ્તિ યજ્ઞા વેદાસ્તપાંસિ ચ ।
૨૨૦.૧૩૯/૨તસ્માદ્ વાસાંસિ દેયાનિ શ્રાદ્ધકાલે વિશેષતઃ ॥ ૨૨૦.૧૩૯॥

૨૨૦.૧૪૦/૧કૌશેયં ક્ષૌમકાર્પાસં દુકૂલમહતં તથા ।
૨૨૦.૧૪૦/૨શ્રાદ્ધે ત્વેતાનિ યો દદ્યાત્ કામાન્ આપ્નોતિ ચોત્તમાન્ ॥ ૨૨૦.૧૪૦॥

૨૨૦.૧૪૧/૧યથા ગોષુ પ્રભૂતાસુ વત્સો વિન્દતિ માતરમ્ ।
૨૨૦.૧૪૧/૨તથાન્નં તત્ર વિપ્રાણાં જન્તુર્યત્રાવતિષ્ઠતે ॥ ૨૨૦.૧૪૧॥

૨૨૦.૧૪૨/૧નામગોત્રં ચ મન્ત્રાંશ્ચ દત્તમન્નં ન યન્તિ તે ।
૨૨૦.૧૪૨/૨અપિ યે નિધનં પ્રાપ્તાસ્તૃપ્તિસ્તાન્ ઉપતિષ્ઠતે ॥ ૨૨૦.૧૪૨॥

૨૨૦.૧૪૩/૧દેવતાભ્યઃ પિતૃભ્યશ્ચ મહાયોગિભ્ય એવ ચ ।
૨૨૦.૧૪૩/૨નમઃ સ્વાહાયૈ સ્વધાયૈ નિત્યમેવ ભવન્ત્વિતિ ॥ ૨૨૦.૧૪૩॥

૨૨૦.૧૪૪/૧આદ્યાવસાને શ્રાદ્ધસ્ય ત્રિરાવૃત્ત્યા જપેત્ તદા ।
૨૨૦.૧૪૪/૨પિણ્ડનિર્વપણે વાપિ જપેદ્ એવં સમાહિતઃ ॥ ૨૨૦.૧૪૪॥

૨૨૦.૧૪૫/૧ક્ષિપ્રમાયાન્તિ પિતરો રાક્ષસાઃ પ્રદ્રવન્તિ ચ ।
૨૨૦.૧૪૫/૨પ્રીયન્તે ત્રિષુ લોકેષુ મન્ત્રોઽયં તારયત્યુત ॥ ૨૨૦.૧૪૫॥

૨૨૦.૧૪૬/૧ક્ષૌમસૂત્રં નવં દદ્યાચ્છાણં કાર્પાસિકં તથા ।
૨૨૦.૧૪૬/૨પત્ત્રોર્ણં પટ્ટસૂત્રં ચ કૌશેયં ચ વિવર્જયેત્ ॥ ૨૨૦.૧૪૬॥

૨૨૦.૧૪૭/૧વર્જયેચ્ચાદશં પ્રાજ્ઞો યદ્યપ્યવ્યાહતં ભવેત્ ।
૨૨૦.૧૪૭/૨ન પ્રીણયન્ત્યથૈતાનિ દાતુશ્ચાપ્યનયો ભવેત્ ॥ ૨૨૦.૧૪૭॥

૨૨૦.૧૪૮/૧ન નિવેદ્યો ભવેત્ પિણ્ડઃ પિતૃણાં યસ્તુ જીવતિ ।
૨૨૦.૧૪૮/૨ઇષ્ટેનાન્નેન ભક્ષ્યેણ ભોજયેત્ તં યથાવિધિ ॥ ૨૨૦.૧૪૮॥

૨૨૦.૧૪૯/૧પિણ્ડમગ્નૌ સદા દદ્યાદ્ ભોગાર્થી સતતં નરઃ ।
૨૨૦.૧૪૯/૨પત્ન્યૈ દદ્યાત્ પ્રજાર્થી ચ મધ્યમં મન્ત્રપૂર્વકમ્ ॥ ૨૨૦.૧૪૯॥

૨૨૦.૧૫૦/૧ઉત્તમાં દ્યુતિમન્વિચ્છન્ પિણ્ડં ગોષુ પ્રયચ્છતિ ।
૨૨૦.૧૫૦/૨પ્રજ્ઞાં ચૈવ યશઃ કીર્તિમપ્સુ ચૈવ નિવેદયેત્ ॥ ૨૨૦.૧૫૦॥

૨૨૦.૧૫૧/૧પ્રાર્થયન્ દીર્ઘમાયુશ્ચ વાયસેભ્યઃ પ્રયચ્છતિ ।
૨૨૦.૧૫૧/૨કુમારશાલામન્વિચ્છન્ કુક્કુટેભ્યઃ પ્રયચ્છતિ ॥ ૨૨૦.૧૫૧॥

૨૨૦.૧૫૨/૧એકે વિપ્રાઃ પુનઃ પ્રાહુઃ પિણ્ડોદ્ધરણમગ્રતઃ ।
૨૨૦.૧૫૨/૨અનુજ્ઞાતસ્તુ વિપ્રૈસ્તૈઃ કામમુદ્ધ્રિયતામિતિ ॥ ૨૨૦.૧૫૨॥

૨૨૦.૧૫૩/૧તસ્માચ્છ્રાદ્ધં તથા કાર્યં યથોક્તમ્ ઋષિભિઃ પુરા ।
૨૨૦.૧૫૩/૨અન્યથા તુ ભવેદ્ દોષઃ પિતૃણાં નોપતિષ્ઠતિ ॥ ૨૨૦.૧૫૩॥

૨૨૦.૧૫૪/૧યવૈર્વ્રીહિતિલૈર્માષૈર્ગોધૂમૈશ્ચણકૈસ્તથા ।
૨૨૦.૧૫૪/૨સંતર્પયેત્ પિતૄન્ મુદ્ગૈઃ શ્યામાકૈઃ સર્ષપદ્રવૈઃ ॥ ૨૨૦.૧૫૪॥

૨૨૦.૧૫૫/૧નીવારૈર્હસ્તિશ્યામાકૈઃ પ્રિયઙ્ગુભિસ્તથાર્ચયેત્ ।
૨૨૦.૧૫૫/૨પ્રસાતિકાં સતૂલિકાં દદ્યાચ્છ્રાદ્ધે વિચક્ષણઃ ॥ ૨૨૦.૧૫૫॥

૨૨૦.૧૫૬/૧આમ્રમામ્રાતકં બિલ્વં દાડિમં બીજપૂરકમ્ ।
૨૨૦.૧૫૬/૨પ્રાચીનામલકં ક્ષીરં નારિકેલં પરૂષકમ્ ॥ ૨૨૦.૧૫૬॥

૨૨૦.૧૫૭/૧નારઙ્ગં ચ સખર્જૂરં દ્રાક્ષાનીલકપિત્થકમ્ ।
૨૨૦.૧૫૭/૨પટોલં ચ પ્રિયાલં ચ કર્કન્ધૂબદરાણિ ચ ॥ ૨૨૦.૧૫૭॥

૨૨૦.૧૫૮/૧વિકઙ્કતં વત્સકં ચ કસ્ત્વારુર્ વારકાન્ અપિ ।
૨૨૦.૧૫૮/૨એતાનિ ફલજાતાનિ શ્રાદ્ધે દેયાનિ યત્નતઃ ॥ ૨૨૦.૧૫૮॥

૨૨૦.૧૫૯/૧ગુડશર્કરમત્સ્યણ્ડી દેયં ફાણિતમૂર્મુરમ્ ।
૨૨૦.૧૫૯/૨ગવ્યં પયો દધિ ઘૃતં તૈલં ચ તિલસમ્ભવમ્ ॥ ૨૨૦.૧૫૯॥

૨૨૦.૧૬૦/૧સૈન્ધવં સાગરોત્થં ચ લવણં સારસં તથા ।
૨૨૦.૧૬૦/૨નિવેદયેચ્છુચીન્ ગન્ધાંશ્ચન્દનાગુરુકુઙ્કુમાન્ ॥ ૨૨૦.૧૬૦॥

૨૨૦.૧૬૧/૧કાલશાકં તન્દુલીયં વાસ્તુકં મૂલકં તથા ।
૨૨૦.૧૬૧/૨શાકમારણ્યકં ચાપિ દદ્યાત્ પુષ્પાણ્યમૂનિ ચ ॥ ૨૨૦.૧૬૧॥

૨૨૦.૧૬૨/૧જાતિચમ્પકલોધ્રાશ્ચ મલ્લિકાબાણબર્બરી ।
૨૨૦.૧૬૨/૨વૃન્તાશોકાટરૂષં ચ તુલસી તિલકં તથા ॥ ૨૨૦.૧૬૨॥

૨૨૦.૧૬૩/૧પાવન્તીં શતપત્રાં ચ ગન્ધશેફાલિકામપિ ।
૨૨૦.૧૬૩/૨કુબ્જકં તગરં ચૈવ મૃગમારણ્યકેતકીમ્ ॥ ૨૨૦.૧૬૩॥

૨૨૦.૧૬૪/૧યૂથિકામતિમુક્તં ચ શ્રાદ્ધયોગ્યાનિ ભો દ્વિજાઃ ।
૨૨૦.૧૬૪/૨કમલં કુમુદં પદ્મં પુણ્ડરીકં ચ યત્નતઃ ॥ ૨૨૦.૧૬૪॥

૨૨૦.૧૬૫/૧ઇન્દીવરં કોકનદં કહ્લારં ચ નિયોજયેત્ ।

૨૨૦.૧૬૫/૨કુષ્ઠં માંસી વાલકં ચ કુક્કુટી જાતિપત્રકમ્ ॥ ૨૨૦.૧૬૫॥

૨૨૦.૧૬૬/૧નલિકોશીરમુસ્તં ચ ગ્રન્થિપર્ણી ચ સુન્દરી ।
૨૨૦.૧૬૬/૨પુનરપ્યેવમાદીનિ ગન્ધયોગ્યાનિ ચક્ષતે ॥ ૨૨૦.૧૬૬॥

૨૨૦.૧૬૭/૧ગુગ્ગુલું ચન્દનં ચૈવ શ્રીવાસમગુરું તથા ।
૨૨૦.૧૬૭/૨ધૂપાનિ પિતૃયોગ્યાનિ ઋષિગુગ્ગુલમેવ ચ ॥ ૨૨૦.૧૬૭॥

૨૨૦.૧૬૮/૧રાજમાષાંશ્ચ ચણકાન્ મસૂરાન્ કોરદૂષકાન્ ।
૨૨૦.૧૬૮/૨વિપ્રુષાન્ મર્કટાંશ્ચૈવ કોદ્રવાંશ્ચૈવ વર્જયેત્ ॥ ૨૨૦.૧૬૮॥

૨૨૦.૧૬૯/૧માહિષં ચામરં માર્ગમાવિકૈકશફોદ્ભવમ્ ।
૨૨૦.૧૬૯/૨સ્ત્રૈણમૌષ્ટ્રમાવિકં ચ દધિ ક્ષીરં ઘૃતં ત્યજેત્ ॥ ૨૨૦.૧૬૯॥

૨૨૦.૧૭૦/૧તાલં વરુણકાકોલૌ બહુપત્રાર્જુનીફલમ્ ।
૨૨૦.૧૭૦/૨જમ્બીરં રક્તબિલ્વં ચ શાલસ્યાપિ ફલં ત્યજેત્ ॥ ૨૨૦.૧૭૦॥

૨૨૦.૧૭૧/૧મત્સ્યસૂકરકૂર્માશ્ચ ગાવો વર્જ્યા વિશેષતઃ ।
૨૨૦.૧૭૧/૨પૂતિકં મૃગનાભિં ચ રોચનાં પદ્મચન્દનમ્ ॥ ૨૨૦.૧૭૧॥

૨૨૦.૧૭૨/૧કાલેયકં તૂગ્રગન્ધં તુરુષ્કં ચાપિ વર્જયેત્ ।
૨૨૦.૧૭૨/૨પાલઙ્કું ચ કુમારીં ચ કિરાતં પિણ્ડમૂલકમ્ ॥ ૨૨૦.૧૭૨॥

૨૨૦.૧૭૩/૧ગૃઞ્જનં ચુક્રિકાં ચુક્રં વરુમાં ચનપત્રિકામ્ ।
૨૨૦.૧૭૩/૨જીવં ચ શતપુષ્પાં ચ નાલિકાં ગન્ધશૂકરમ્ ॥ ૨૨૦.૧૭૩॥

૨૨૦.૧૭૪/૧હલભૃત્યં સર્ષપં ચ પલાણ્ડું લશુનં ત્યજેત્ ।
૨૨૦.૧૭૪/૨માનકન્દં વિષકન્દં વજ્રકન્દં ગદાસ્થિકમ્ ॥ ૨૨૦.૧૭૪॥

૨૨૦.૧૭૫/૧પુરુષાલ્વં સપિણ્ડાલું શ્રાદ્ધકર્મણિ વર્જયેત્ ।
૨૨૦.૧૭૫/૨અલાબું તિક્તપર્ણાં ચ કૂષ્માણ્ડં કટુકત્રયમ્ ॥ ૨૨૦.૧૭૫॥

૨૨૦.૧૭૬/૧વાર્તાકં શિવજાતં ચ લોમશાનિ વટાનિ ચ ।
૨૨૦.૧૭૬/૨કાલીયં રક્તવાણાં ચ બલાકા લકુચં તથા ॥ ૨૨૦.૧૭૬॥

૨૨૦.૧૭૭/૧શ્રાદ્ધકર્મણિ વર્જ્યાનિ વિભીતકફલં તથા ।
૨૨૦.૧૭૭/૨આરનાલં ચ શુક્તં ચ શીર્ણં પર્યુષિતં તથા ॥ ૨૨૦.૧૭૭॥

૨૨૦.૧૭૮/૧નોગ્રગન્ધં ચ દાતવ્યં કોવિદારકશિગ્રુકૌ ।
૨૨૦.૧૭૮/૨અત્યમ્લં પિચ્છિલં સૂક્ષ્મં યાતયામં ચ સત્તમાઃ ॥ ૨૨૦.૧૭૮॥

૨૨૦.૧૭૯/૧ન ચ દેયં ગતરસં મદ્યગન્ધં ચ યદ્ ભવેત્ ।
૨૨૦.૧૭૯/૨હિઙ્ગૂગ્રગન્ધં ફણિશં ભૂનિમ્બં નિમ્બરાજિકે ॥ ૨૨૦.૧૭૯॥

૨૨૦.૧૮૦/૧કુસ્તુમ્બુરું કલિઙ્ગોત્થં વર્જયેદ્ અમ્લવેતસમ્ ।
૨૨૦.૧૮૦/૨દાડિમં માગધીં ચૈવ નાગરાર્દ્રકતિત્તિડીઃ ॥ ૨૨૦.૧૮૦॥

૨૨૦.૧૮૧/૧આમ્રાતકં જીવકં ચ તુમ્બુરું ચ નિયોજયેત્ ।
૨૨૦.૧૮૧/૨પાયસં શાલ્મલીમુદ્ગાન્ મોદકાદીંશ્ચ ભક્તિતઃ ॥ ૨૨૦.૧૮૧॥

૨૨૦.૧૮૨/૧પાનકં ચ રસાલં ચ ગોક્ષીરં ચ નિવેદયેત્ ।
૨૨૦.૧૮૨/૨યાનિ ચાભ્યવહાર્યાણિ સ્વાદુસ્નિગ્ધાનિ ભો દ્વિજાઃ ॥ ૨૨૦.૧૮૨॥

૨૨૦.૧૮૩/૧ઈષદમ્લકટૂન્યેવ દેયાનિ શ્રાદ્ધકર્મણિ ।
૨૨૦.૧૮૩/૨અત્યમ્લં ચાતિલવણમતિરિક્તકટૂનિ ચ ॥ ૨૨૦.૧૮૩॥

૨૨૦.૧૮૪/૧આસુરાણીહ ભોજ્યાનિ તાન્યતો દૂરતસ્ત્યજેત્ ।
૨૨૦.૧૮૪/૨મૃષ્ટસ્નિગ્ધાનિ યાનિ સ્યુરીષત્કટ્વમ્લકાનિ ચ ॥ ૨૨૦.૧૮૪॥

૨૨૦.૧૮૫/૧સ્વાદૂનિ દેવભોજ્યાનિ તાનિ શ્રાદ્ધે નિયોજયેત્ ।
૨૨૦.૧૮૫/૨છાગમાંસં વાર્તિકં ચ તૈત્તિરં શશકામિષમ્ ॥ ૨૨૦.૧૮૫॥

૨૨૦.૧૮૬/૧શિવાલાવકરાજીવ+ ાંસં શ્રાદ્ધે નિયોજયેત્ ।
૨૨૦.૧૮૬/૨વાધ્રીણસં રક્તશિવં લોહં શલ્કસમન્વિતમ્ ॥ ૨૨૦.૧૮૬॥

૨૨૦.૧૮૭/૧સિંહતુણ્ડં ચ ખડ્ગં ચ શ્રાદ્ધે યોજ્યં તથોચ્યતે ।
૨૨૦.૧૮૭/૨યદ્ અપ્યુક્તં હિ મનુના રોહિતં પ્રતિયોજયેત્ ॥ ૨૨૦.૧૮૭॥

૨૨૦.૧૮૮/૧યોક્તવ્યં હવ્યકવ્યેષુ તથા ન વિપ્રયોજયેત્ ।
૨૨૦.૧૮૮/૨એવમુક્તં મયા વિપ્રા વારાહેણાવલોકિતમ્ ॥ ૨૨૦.૧૮૮॥

૨૨૦.૧૮૯/૧મયા નિષિદ્ધં ભુઞ્જાનો રૌરવં નરકં વ્રજેત્ ।
૨૨૦.૧૮૯/૨એતાનિ ચ નિષિદ્ધાનિ વારાહેણ તપોધનાઃ ॥ ૨૨૦.૧૮૯॥

૨૨૦.૧૯૦/૧અભક્ષ્યાણિ દ્વિજાતીનાં ન દેયાનિ પિતૃષ્વપિ ।
૨૨૦.૧૯૦/૨રોહિતં શૂકરં કૂર્મં ગોધાહંસં ચ વર્જયેત્ ॥ ૨૨૦.૧૯૦॥

૨૨૦.૧૯૧/૧ચક્રવાકં ચ મદ્ગું ચ શલ્કહીનાંશ્ચ મત્સ્યકાન્ ।
૨૨૦.૧૯૧/૨કુરરં ચ નિરસ્થિં ચ વાસહાતં ચ કુક્કુટાન્ ॥ ૨૨૦.૧૯૧॥

૨૨૦.૧૯૨/૧કલવિઙ્કમયૂરાંશ્ચ ભારદ્વાજાંશ્ચ શાર્ઙ્ગકાન્ ।
૨૨૦.૧૯૨/૨નકુલોલૂકમાર્જારાંલ્લોપાન્ અન્યાન્ સુદુર્ગ્રહાન્ ॥ ૨૨૦.૧૯૨॥

૨૨૦.૧૯૩/૧ટિટ્ટિભાન્ સાર્ધજમ્બૂકાન્ વ્યાઘ્રર્ક્ષતરક્ષુકાન્ ।
૨૨૦.૧૯૩/૨એતાન્ અન્યાંશ્ચ સંદુષ્ટાન્ યો ભક્ષયતિ દુર્મતિઃ ॥ ૨૨૦.૧૯૩॥

૨૨૦.૧૯૪/૧સ મહાપાપકારી તુ રૌરવં નરકં વ્રજેત્ ।
૨૨૦.૧૯૪/૨પિતૃષ્વેતાંસ્તુ યો દદ્યાત્ પાપાત્મા ગર્હિતામિષાન્ ॥ ૨૨૦.૧૯૪॥

૨૨૦.૧૯૫/૧સ સ્વર્ગસ્થાન્ અપિ પિતૄન્ નરકે પાતયિષ્યતિ ।
૨૨૦.૧૯૫/૨કુસુમ્ભશાકં જમ્બીરં સિગ્રુકં કોવિદારકમ્ ॥ ૨૨૦.૧૯૫॥

૨૨૦.૧૯૬/૧પિણ્યાકં વિપ્રુષં ચૈવ મસૂરં ગૃઞ્જનં શણમ્ ।
૨૨૦.૧૯૬/૨કોદ્રવં કોકિલાક્ષં ચ ચુક્રં કમ્બુકપદ્મકમ્ ॥ ૨૨૦.૧૯૬॥

૨૨૦.૧૯૭/૧ચકોરશ્યેનમાંસં ચ વર્તુલાલાબુતાલિનીમ્ ।
૨૨૦.૧૯૭/૨ફલં તાલતરૂણાં ચ ભુક્ત્વા નરકમ્ ઋચ્છતિ ॥ ૨૨૦.૧૯૭॥

૨૨૦.૧૯૮/૧દત્ત્વા પિતૃષુ તૈઃ સાર્ધં વ્રજેત્ પૂયવહં નરઃ ।
૨૨૦.૧૯૮/૨તસ્માત્ સર્વપ્રયત્નેન નાહરેત્ તુ વિચક્ષણઃ ॥ ૨૨૦.૧૯૮॥

૨૨૦.૧૯૯/૧નિષિદ્ધાનિ વરાહેણ સ્વયં પિત્રર્થમાદરાત્ ।
૨૨૦.૧૯૯/૨વરમેવાત્મમાંસસ્ય ભક્ષણં મુનયઃ કૃતમ્ ॥ ૨૨૦.૧૯૯॥

૨૨૦.૨૦૦/૧ન ત્વેવ હિ નિષિદ્ધાનામાદાનં પુમ્ભિરાદરાત્ ।
૨૨૦.૨૦૦/૨અજ્ઞાનાદ્ વા પ્રમાદાદ્ વા સકૃદ્ એતાનિ ચ દ્વિજાઃ ॥ ૨૨૦.૨૦૦॥

૨૨૦.૨૦૧/૧ભક્ષિતાનિ નિષિદ્ધાનિ પ્રાયશ્ચિત્તં તતશ્ચરેત્ ।
૨૨૦.૨૦૧/૨ફલમૂલદધિક્ષીર+ ।તક્રગોમૂત્રયાવકૈઃ ॥ ૨૨૦.૨૦૧॥

૨૨૦.૨૦૨/૧ભોજ્યાન્નભોજ્યસમ્ભુક્તે પ્રત્યેકં દિનસપ્તકમ્ ।
૨૨૦.૨૦૨/૨એવં નિષિદ્ધાચરણે કૃતે સકૃદ્ અપિ દ્વિજૈઃ ॥ ૨૨૦.૨૦૨॥

૨૨૦.૨૦૩/૧શુદ્ધિં નેયં શરીરં તુ વિષ્ણુભક્તૈર્વિશેષતઃ ।
૨૨૦.૨૦૩/૨નિષિદ્ધં વર્જયેદ્ દ્રવ્યં યથોક્તં ચ દ્વિજોત્તમાઃ ॥ ૨૨૦.૨૦૩॥

૨૨૦.૨૦૪/૧સમાહૃત્ય તતઃ શ્રાદ્ધં કર્તવ્યં નિજશક્તિતઃ ।
૨૨૦.૨૦૪/૨એવં વિધાનતઃ શ્રાદ્ધં કૃત્વા સ્વવિભવોચિતમ્ ।
૨૨૦.૨૦૪/૩આબ્રહ્મસ્તમ્બપર્યન્તં જગત્ પ્રીણાતિ માનવઃ ॥ ૨૨૦.૨૦૪॥

૨૨૦.૨૦૫/૧મુનય ઊચુઃ । પિતા જીવતિ યસ્યાથ મૃતૌ દ્વૌ પિતરૌ પિતુઃ ।
૨૨૦.૨૦૫/૨કથં શ્રાદ્ધં હિ કર્તવ્યમેતદ્ વિસ્તરશો વદ ॥ ૨૨૦.૨૦૫॥

૨૨૦.૨૦૬/૧વ્યાસ ઉવાચ । યસ્મૈ દદ્યાત્ પિતા શ્રાદ્ધં તસ્મૈ દદ્યાત્ સુતઃ સ્વયમ્ ।
૨૨૦.૨૦૬/૨એવં ન હીયતે ધર્મો લૌકિકો વૈદિકસ્તથા ॥ ૨૨૦.૨૦૬॥

૨૨૦.૨૦૭/૧મુનય ઊચુઃ । મૃતઃ પિતા જીવતિ ચ યસ્ય બ્રહ્મન્ પિતામહઃ ।
૨૨૦.૨૦૭/૨સ હિ શ્રાદ્ધં કથં કુર્યાદ્ એતત્ ત્વં વક્તુમર્હસિ ॥ ૨૨૦.૨૦૭॥

૨૨૦.૨૦૮/૧વ્યાસ ઉવાચ । પિતુઃ પિણ્ડં પ્રદદ્યાચ્ચ ભોજયેચ્ચ પિતામહમ્ ।
૨૨૦.૨૦૮/૨પ્રપિતામહસ્ય પિણ્ડં વૈ હ્યયં શાસ્ત્રેષુ નિર્ણયઃ ॥ ૨૨૦.૨૦૮॥

૨૨૦.૨૦૯/૧મૃતેષુ પિણ્ડં દાતવ્યં જીવન્તં ચાપિ ભોજયેત્ ।
૨૨૦.૨૦૯/૨સપિણ્ડીકરણં નાસ્તિ ન ચ પાર્વણમિષ્યતે ॥ ૨૨૦.૨૦૯॥

૨૨૦.૨૧૦/૧આચારમાચરેદ્ યસ્તુ પિતૃમેધાશ્રિતં નરઃ ।
૨૨૦.૨૧૦/૨આયુષા ધનપુત્રૈશ્ચ વર્ધત્યાશુ ન સંશયઃ ॥ ૨૨૦.૨૧૦॥

૨૨૦.૨૧૧/૧પિતૃમેધાધ્યાયમિમં શ્રાદ્ધકાલેષુ યઃ પઠેત્ ।
૨૨૦.૨૧૧/૨તદ્ અન્નમસ્ય પિતરોઽશ્નન્તિ ચ ત્રિયુગં દ્વિજાઃ ॥ ૨૨૦.૨૧૧॥

૨૨૦.૨૧૨/૧એવં મયોક્તઃ પિતૃમેધકલ્પઃ ।
૨૨૦.૨૧૨/૨પાપાપહઃ પુણ્યવિવર્ધનશ્ચ ।
૨૨૦.૨૧૨/૩શ્રોતવ્ય એષ પ્રયતૈર્નરૈશ્ચ ।
૨૨૦.૨૧૨/૪શ્રાદ્ધેષુ ચૈવાપ્યનુકીર્તયેત ॥ ૨૨૦.૨૧૨॥

૨૨૧.૧/૧વ્યાસ ઉવાચ । એવં સમ્યગ્ ગૃહસ્થેન દેવતાઃ પિતરસ્તથા ।
૨૨૧.૧/૨સમ્પૂજ્યા હવ્યકવ્યાભ્યામન્નેનાતિથિબાન્ધવાઃ ॥ ૨૨૧.૧॥

૨૨૧.૨/૧ભૂતાનિ ભૃત્યાઃ સકલાઃ પશુપક્ષિપિપીલિકાઃ ।
૨૨૧.૨/૨ભિક્ષવો યાચમાનાશ્ચ યે ચાન્યે પાન્થકા ગૃહે ॥ ૨૨૧.૨॥

૨૨૧.૩/૧સદાચારરતા વિપ્રાઃ સાધુના ગૃહમેધિના ।
૨૨૧.૩/૨પાપં ભુઙ્ક્તે સમુલ્લઙ્ઘ્ય નિત્યનૈમિત્તિકીઃ ક્રિયાઃ ॥ ૨૨૧.૩॥

૨૨૧.૪/૧મુનય ઊચુઃ । કથિતં ભવતા વિપ્ર નિત્યનૈમિત્તિકં ચ યત્ ।
૨૨૧.૪/૨નિત્યં નૈમિત્તિકં કામ્યં ત્રિવિધં કર્મ પૌરુષમ્ ॥ ૨૨૧.૪॥

૨૨૧.૫/૧સદાચારં મુને શ્રોતુમિચ્છામો વદતસ્તવ ।
૨૨૧.૫/૨યં કુર્વન્ સુખમાપ્નોતિ પરત્રેહ ચ માનવઃ ॥ ૨૨૧.૫॥

૨૨૧.૬/૧વ્યાસ ઉવાચ । ગૃહસ્થેન સદા કાર્યમાચારપરિરક્ષણમ્ ।
૨૨૧.૬/૨ન હ્યાચારવિહીનસ્ય ભદ્રમત્ર પરત્ર વા ॥ ૨૨૧.૬॥

૨૨૧.૭/૧યજ્ઞદાનતપાંસીહ પુરુષસ્ય ન ભૂતયે ।
૨૨૧.૭/૨ભવન્તિ યઃ સદાચારં સમુલ્લઙ્ઘ્ય પ્રવર્તતે ॥ ૨૨૧.૭॥

૨૨૧.૮/૧દુરાચારો હિ પુરુષો નેહાયુર્વિન્દતે મહત્ ।
૨૨૧.૮/૨કાર્યો ધર્મઃ સદાચાર આચારસ્યૈવ લક્ષણમ્ ॥ ૨૨૧.૮॥

૨૨૧.૯/૧તસ્ય સ્વરૂપં વક્ષ્યામિ સદાચારસ્ય ભો દ્વિજાઃ ।
૨૨૧.૯/૨આત્મનૈકમના ભૂત્વા તથૈવ પરિપાલયેત્ ॥ ૨૨૧.૯॥

૨૨૧.૧૦/૧ત્રિવર્ગસાધને યત્નઃ કર્તવ્યો ગૃહમેધિના ।
૨૨૧.૧૦/૨તત્સંસિદ્ધૌ ગૃહસ્થસ્ય સિદ્ધિરત્ર પરત્ર ચ ॥ ૨૨૧.૧૦॥

૨૨૧.૧૧/૧પાદેનાપ્યસ્ય પારત્ર્યં કુર્યાચ્છ્રેયઃ સ્વમાત્મવાન્ ।
૨૨૧.૧૧/૨અર્ધેન ચાત્મભરણં નિત્યનૈમિત્તિકાનિ ચ ॥ ૨૨૧.૧૧॥

૨૨૧.૧૨/૧પાદેનૈવ તથાપ્યસ્ય મૂલભૂતં વિવર્ધયેત્ ।
૨૨૧.૧૨/૨એવમાચરતો વિપ્રા અર્થઃ સાફલ્યમ્ ઋચ્છતિ ॥ ૨૨૧.૧૨॥

૨૨૧.૧૩/૧તદ્વત્ પાપનિષેધાર્થં ધર્મઃ કાર્યો વિપશ્ચિતા ।
૨૨૧.૧૩/૨પરત્રાર્થસ્તથૈવાન્યઃ કાર્યોઽત્રૈવ ફલપ્રદઃ ॥ ૨૨૧.૧૩॥

૨૨૧.૧૪/૧પ્રત્યવાયભયાત્ કામસ્તથાન્યશ્ચાવિરોધવાન્ ।
૨૨૧.૧૪/૨દ્વિધા કામોઽપિ રચિતસ્ત્રિવર્ગાયાવિરોધકૃત્ ॥ ૨૨૧.૧૪॥

૨૨૧.૧૫/૧પરસ્પરાનુબન્ધાંશ્ચ સર્વાન્ એતાન્ વિચિન્તયેત્ ।
૨૨૧.૧૫/૨વિપરીતાનુબન્ધાંશ્ચ બુધ્યધ્વં તાન્ દ્વિજોત્તમાઃ ॥ ૨૨૧.૧૫॥

૨૨૧.૧૬/૧ધર્મો ધર્માનુબન્ધાર્થો ધર્મો નાત્માર્થપીડકઃ ।
૨૨૧.૧૬/૨ઉભાભ્યાં ચ દ્વિધા કામં તેન તૌ ચ દ્વિધા પુનઃ ॥ ૨૨૧.૧૬॥

૨૨૧.૧૭/૧બ્રાહ્મે મુહૂર્તે બુધ્યેત ધર્માર્થાવનુચિન્તયેત્ ।
૨૨૧.૧૭/૨સમુત્થાય તથાચમ્ય પ્રસ્નાતો નિયતઃ શુચિઃ ॥ ૨૨૧.૧૭॥

૨૨૧.૧૮/૧પૂર્વાં સંધ્યાં સનક્ષત્રાં પશ્ચિમાં સદિવાકરામ્ ।
૨૨૧.૧૮/૨ઉપાસીત યથાન્યાયં નૈનાં જહ્યાદ્ અનાપદિ ॥ ૨૨૧.૧૮॥

૨૨૧.૧૯/૧અસત્પ્રલાપમનૃતં વાક્પારુષ્યં ચ વર્જયેત્ ।
૨૨૧.૧૯/૨અસચ્છાસ્ત્રમસદ્વાદમસત્સેવાં ચ વૈ દ્વિજાઃ ॥ ૨૨૧.૧૯॥

૨૨૧.૨૦/૧સાયમ્પ્રાતસ્તથા હોમં કુર્વીત નિયતાત્મવાન્ ।
૨૨૧.૨૦/૨નોદયાસ્તમને ચૈવમુદીક્ષેત વિવસ્વતઃ ॥ ૨૨૧.૨૦॥

૨૨૧.૨૧/૧કેશપ્રસાધનાદર્શ+ ।દન્તધાવનમઞ્જનમ્ ।
૨૨૧.૨૧/૨પૂર્વાહ્ણ એવ કાર્યાણિ દેવતાનાં ચ તર્પણમ્ ॥ ૨૨૧.૨૧॥

૨૨૧.૨૨/૧ગ્રામાવસથતીર્થાનાં ક્ષેત્રાણાં ચૈવ વર્ત્મનિ ।
૨૨૧.૨૨/૨ન વિણ્મૂત્રમનુષ્ઠેયં ન ચ કૃષ્ટે ન ગોવ્રજે ॥ ૨૨૧.૨૨॥

૨૨૧.૨૩/૧નગ્નાં પરસ્ત્રિયં નેક્ષેન્ ન પશ્યેદ્ આત્મનઃ શકૃત્ ।
૨૨૧.૨૩/૨ઉદક્યાદર્શનસ્પર્શમેવં સમ્ભાષણં તથા ॥ ૨૨૧.૨૩॥

૨૨૧.૨૪/૧નાપ્સુ મૂત્રં પુરીષં વા મૈથુનં વા સમાચરેત્ ।
૨૨૧.૨૪/૨નાધિતિષ્ઠેચ્છકૃન્મૂત્રે કેશભસ્મસપાલિકાઃ ॥ ૨૨૧.૨૪॥

૨૨૧.૨૫/૧તુષાઙ્ગારવિશીર્ણાનિ રજ્જુવસ્ત્રાદિકાનિ ચ ।
૨૨૧.૨૫/૨નાધિતિષ્ઠેત્ તથા પ્રાજ્ઞઃ પથિ વસ્ત્રાણિ વા ભુવિ ॥ ૨૨૧.૨૫॥

૨૨૧.૨૬/૧પિતૃદેવમનુષ્યાણાં ભૂતાનાં ચ તથાર્ચનમ્ ।
૨૨૧.૨૬/૨કૃત્વા વિભવતઃ પશ્ચાદ્ ગૃહસ્થો ભોક્તુમર્હતિ ॥ ૨૨૧.૨૬॥

૨૨૧.૨૭/૧પ્રાઙ્મુખોદઙ્મુખો વાપિ સ્વાચાન્તો વાગ્યતઃ શુચિઃ ।
૨૨૧.૨૭/૨ભુઞ્જીત ચાન્નં તચ્ચિત્તો હ્યન્તર્જાનુઃ સદા નરઃ ॥ ૨૨૧.૨૭॥

૨૨૧.૨૮/૧ઉપઘાતમ્ ઋતે દોષાન્ નાન્નસ્યોદીરયેદ્ બુધઃ ।
૨૨૧.૨૮/૨પ્રત્યક્ષલવણં વર્જ્યમન્નમુચ્છિષ્ટમેવ ચ ॥ ૨૨૧.૨૮॥

૨૨૧.૨૯/૧ન ગચ્છન્ ન ચ તિષ્ઠન્ વૈ વિણ્મૂત્રોત્સર્ગમાત્મવાન્ ।
૨૨૧.૨૯/૨કુર્વીત ચૈવમુચ્છિષ્ટં ન કિંચિદ્ અપિ ભક્ષયેત્ ॥ ૨૨૧.૨૯॥

૨૨૧.૩૦/૧ઉચ્છિષ્ટો નાલપેત્ કિંચિત્ સ્વાધ્યાયં ચ વિવર્જયેત્ ।
૨૨૧.૩૦/૨ન પશ્યેચ્ચ રવિં ચેન્દું નક્ષત્રાણિ ચ કામતઃ ॥ ૨૨૧.૩૦॥

૨૨૧.૩૧/૧ભિન્નાસનં ચ શય્યાં ચ ભાજનં ચ વિવર્જયેત્ ।
૨૨૧.૩૧/૨ગુરૂણામાસનં દેયમભ્યુત્થાનાદિસત્કૃતમ્ ॥ ૨૨૧.૩૧॥

૨૨૧.૩૨/૧અનુકૂલં તથાલાપમભિકુર્વીત બુદ્ધિમાન્ ।
૨૨૧.૩૨/૨તત્રાનુગમનં કુર્યાત્ પ્રતિકૂલં ન સંચરેત્ ॥ ૨૨૧.૩૨॥

૨૨૧.૩૩/૧નૈકવસ્ત્રશ્ચ ભુઞ્જીત ન કુર્યાદ્ દેવતાર્ચનમ્ ।
૨૨૧.૩૩/૨નાવાહયેદ્ દ્વિજાન્ અગ્નૌ હોમં કુર્વીત બુદ્ધિમાન્ ॥ ૨૨૧.૩૩॥

૨૨૧.૩૪/૧ન સ્નાયીત નરો નગ્નો ન શયીત કદાચન ।

૨૨૧.૩૪/૨ન પાણિભ્યામુભાભ્યાં તુ કણ્ડૂયેત શિરસ્તથા ॥ ૨૨૧.૩૪॥

૨૨૧.૩૫/૧ન ચાભીક્ષ્ણં શિરઃસ્નાનં કાર્યં નિષ્કારણં બુધૈઃ ।
૨૨૧.૩૫/૨શિરઃસ્નાતશ્ચ તૈલેન નાઙ્ગં કિંચિદ્ ઉપસ્પૃશેત્ ॥ ૨૨૧.૩૫॥

૨૨૧.૩૬/૧અનધ્યાયેષુ સર્વેષુ સ્વાધ્યાયં ચ વિવર્જયેત્ ।
૨૨૧.૩૬/૨બ્રાહ્મણાનલગોસૂર્યાન્ નાવમન્યેત્ કદાચન ॥ ૨૨૧.૩૬॥

૨૨૧.૩૭/૧ઉદઙ્મુખો દિવા રાત્રાવુત્સર્ગં દક્ષિણામુખઃ ।
૨૨૧.૩૭/૨આબાધાસુ યથાકામં કુર્યાન્ મૂત્રપુરીષયોઃ ॥ ૨૨૧.૩૭॥

૨૨૧.૩૮/૧દુષ્કૃતં ન ગુરોર્બ્રૂયાત્ ક્રુદ્ધં ચૈનં પ્રસાદયેત્ ।
૨૨૧.૩૮/૨પરિવાદં ન શ ૃણુયાદ્ અન્યેષામપિ કુર્વતામ્ ॥ ૨૨૧.૩૮॥

૨૨૧.૩૯/૧પન્થા દેયો બ્રાહ્મણાનાં રાજ્ઞો દુઃખાતુરસ્ય ચ ।
૨૨૧.૩૯/૨વિદ્યાધિકસ્ય ગર્ભિણ્યા રોગાર્તસ્ય મહીયતઃ ॥ ૨૨૧.૩૯॥

૨૨૧.૪૦/૧મૂકાન્ધબધિરાણાં ચ મત્તસ્યોન્મત્તકસ્ય ચ ।
૨૨૧.૪૦/૨દેવાલયં ચૈદ્યતરું તથૈવ ચ ચતુષ્પથમ્ ॥ ૨૨૧.૪૦॥

૨૨૧.૪૧/૧વિદ્યાધિકં ગુરું ચૈવ બુધઃ કુર્યાત્ પ્રદક્ષિણમ્ ।
૨૨૧.૪૧/૨ઉપાનદ્વસ્ત્રમાલ્યાદિ ધૃતમન્યૈર્ન ધારયેત્ ॥ ૨૨૧.૪૧॥

૨૨૧.૪૨/૧ચતુર્દશ્યાં તથાષ્ટમ્યાં પઞ્ચદશ્યાં ચ પર્વસુ ।
૨૨૧.૪૨/૨તૈલાભ્યઙ્ગં તથા ભોગં યોષિતશ્ચ વિવર્જયેત્ ॥ ૨૨૧.૪૨॥

૨૨૧.૪૩/૧નોત્ક્ષિપ્તબાહુજઙ્ઘશ્ચ પ્રાજ્ઞસ્તિષ્ઠેત્ કદાચન ।
૨૨૧.૪૩/૨ન ચાપિ વિક્ષિપેત્ પાદૌ પાદં પાદેન નાક્રમેત્ ॥ ૨૨૧.૪૩॥

૨૨૧.૪૪/૧પુંશ્ચલ્યાઃ કૃતકાર્યસ્ય બાલસ્ય પતિતસ્ય ચ ।
૨૨૧.૪૪/૨મર્માભિઘાતમાક્રોશં પૈશુન્યં ચ વિવર્જયેત્ ॥ ૨૨૧.૪૪॥

૨૨૧.૪૫/૧દમ્ભાભિમાનં તૈક્ષ્ણ્યં ચ ન કુર્વીત વિચક્ષણઃ ।
૨૨૧.૪૫/૨મૂર્ખોન્મત્તવ્યસનિનો વિરૂપાન્ અપિ વા તથા ॥ ૨૨૧.૪૫॥

૨૨૧.૪૬/૧ન્યૂનાઙ્ગાંશ્ચાધનાંશ્ચૈવ નોપહાસેન દૂષયેત્ ।
૨૨૧.૪૬/૨પરસ્ય દણ્ડં નોદ્યચ્છેચ્છિક્ષાર્થં શિષ્યપુત્રયોઃ ॥ ૨૨૧.૪૬॥

૨૨૧.૪૭/૧તદ્વન્ નોપવિશેત્ પ્રાજ્ઞઃ પાદેનાકૃષ્ય ચાસનમ્ ।
૨૨૧.૪૭/૨સંયાવં કૃશરં માંસં નાત્માર્થમુપસાધયેત્ ॥ ૨૨૧.૪૭॥

૨૨૧.૪૮/૧સાયં પ્રાતશ્ચ ભોક્તવ્યં કૃત્વા ચાતિથિપૂજનમ્ ।
૨૨૧.૪૮/૨પ્રાઙ્મુખોદઙ્મુખો વાપિ વાગ્યતો દન્તધાવનમ્ ॥ ૨૨૧.૪૮॥

૨૨૧.૪૯/૧કુર્વીત સતતં વિપ્રા વર્જયેદ્ વર્જ્યવીરુધમ્ ।
૨૨૧.૪૯/૨નોદક્શિરાઃ સ્વપેજ્જાતુ ન ચ પ્રત્યક્શિરા નરઃ ॥ ૨૨૧.૪૯॥

૨૨૧.૫૦/૧શિરસ્ત્વાગસ્ત્યામાધાય શયીતાથ પુરંદરીમ્ ।
૨૨૧.૫૦/૨ન તુ ગન્ધવતીષ્વપ્સુ શયીત ન તથોષસિ ॥ ૨૨૧.૫૦॥

૨૨૧.૫૧/૧ઉપરાગે પરં સ્નાનમ્ ઋતે દિનમુદાહૃતમ્ ।
૨૨૧.૫૧/૨અપમૃજ્યાન્ ન વસ્ત્રાન્તૈર્ગાત્રાણ્યમ્બરપાણિભિઃ ॥ ૨૨૧.૫૧॥

૨૨૧.૫૨/૧ન ચાવધૂનયેત્ કેશાન્ વાસસી ન ચ નિર્ધુનેત્ ।
૨૨૧.૫૨/૨અનુલેપનમાદદ્યાન્ નાસ્નાતઃ કર્હિચિદ્ બુધઃ ॥ ૨૨૧.૫૨॥

૨૨૧.૫૩/૧ન ચાપિ રક્તવાસાઃ સ્યાચ્ચિત્રાસિતધરોઽપિ વા ।
૨૨૧.૫૩/૨ન ચ કુર્યાદ્ વિપર્યાસં વાસસોર્નાપિ ભૂષયોઃ ॥ ૨૨૧.૫૩॥

૨૨૧.૫૪/૧વર્જ્યં ચ વિદશં વસ્ત્રમત્યન્તોપહતં ચ યત્ ।
૨૨૧.૫૪/૨કીટકેશાવપન્નં ચ તથા શ્વભિરવેક્ષિતમ્ ॥ ૨૨૧.૫૪॥

૨૨૧.૫૫/૧અવલીઢં શુના ચૈવ સારોદ્ધરણદૂષિતમ્ ।
૨૨૧.૫૫/૨પૃષ્ઠમાંસં વૃથામાંસં વર્જ્યમાંસં ચ વર્જયેત્ ॥ ૨૨૧.૫૫॥

૨૨૧.૫૬/૧ન ભક્ષયેચ્ચ સતતં પ્રત્યક્ષં લવણં નરઃ ।
૨૨૧.૫૬/૨વર્જ્યં ચિરોષિતં વિપ્રાઃ શુષ્કં પર્યુષિતં ચ યત્ ॥ ૨૨૧.૫૬॥

૨૨૧.૫૭/૧પિષ્ટશાકેક્ષુપયસાં વિકારા દ્વિજસત્તમાઃ ।
૨૨૧.૫૭/૨તથા માંસવિકારાશ્ચ નૈવ વર્જ્યાશ્ચિરોષિતાઃ ॥ ૨૨૧.૫૭॥

૨૨૧.૫૮/૧ઉદયાસ્તમને ભાનોઃ શયનં ચ વિવર્જયેત્ ।
૨૨૧.૫૮/૨નાસ્નાતો નૈવ સંવિષ્ટો ન ચૈવાન્યમના નરઃ ॥ ૨૨૧.૫૮॥

૨૨૧.૫૯/૧ન ચૈવ શયને નોર્વ્યામુપવિષ્ટો ન શબ્દકૃત્ ।
૨૨૧.૫૯/૨પ્રેષ્યાણામપ્રદાયાથ ન ભુઞ્જીત કદાચન ॥ ૨૨૧.૫૯॥

૨૨૧.૬૦/૧ભુઞ્જીત પુરુષઃ સ્નાતઃ સાયમ્પ્રાતર્યથાવિધિ ।
૨૨૧.૬૦/૨પરદારા ન ગન્તવ્યાઃ પુરુષેણ વિપશ્ચિતા ॥ ૨૨૧.૬૦॥

૨૨૧.૬૧/૧ઇષ્ટાપૂર્તાયુષાં હન્ત્રી પરદારગતિર્નૃણામ્ ।
૨૨૧.૬૧/૨નહીદૃશમનાયુષ્યં લોકે કિંચન વિદ્યતે ॥ ૨૨૧.૬૧॥

૨૨૧.૬૨/૧યાદૃશં પુરુષસ્યેહ પરદારાભિમર્શનમ્ ।
૨૨૧.૬૨/૨દેવાગ્નિપિતૃકાર્યાણિ તથા ગુર્વભિવાદનમ્ ॥ ૨૨૧.૬૨॥

૨૨૧.૬૩/૧કુર્વીત સમ્યગ્ આચમ્ય તદ્વદ્ અન્નભુજિક્રિયામ્ ।
૨૨૧.૬૩/૨અફેનશબ્દગન્ધાભિરદ્ભિરચ્છાભિરાદરાત્ ॥ ૨૨૧.૬૩॥

૨૨૧.૬૪/૧આચામેચ્ચૈવ તદ્વચ્ચ પ્રાઙ્મુખોદઙ્મુખોઽપિ વા ।
૨૨૧.૬૪/૨અન્તર્જલાદ્ આવસથાદ્ વલ્મીકાન્ મૂષિકાસ્થલાત્ ॥ ૨૨૧.૬૪॥

૨૨૧.૬૫/૧કૃતશૌચાવશિષ્ટાશ્ચ વર્જયેત્ પઞ્ચ વૈ મૃદઃ ।
૨૨૧.૬૫/૨પ્રક્ષાલ્ય હસ્તૌ પાદૌ ચ સમભ્યુક્ષ્ય સમાહિતઃ ॥ ૨૨૧.૬૫॥

૨૨૧.૬૬/૧અન્તર્જાનુસ્તથાચામેત્ ત્રિશ્ચતુર્વાપિ વૈ નરઃ ।
૨૨૧.૬૬/૨પરિમૃજ્ય દ્વિરાવર્ત્ય ખાનિ મૂર્ધાનમેવ ચ ॥ ૨૨૧.૬૬॥

૨૨૧.૬૭/૧સમ્યગ્ આચમ્ય તોયેન ક્રિયાં કુર્વીત વૈ શુચિઃ ।
૨૨૧.૬૭/૨ક્ષુતેઽવલીઢે વાતે ચ તથા નિષ્ઠીવનાદિષુ ॥ ૨૨૧.૬૭॥

૨૨૧.૬૮/૧કુર્યાદ્ આચમનં સ્પર્શે વાસ્પૃષ્ટસ્યાર્કદર્શનમ્ ।
૨૨૧.૬૮/૨કુર્વીતાલમ્ભનં ચાપિ દક્ષિણશ્રવણસ્ય ચ ॥ ૨૨૧.૬૮॥

૨૨૧.૬૯/૧યથાવિભવતો હ્યેતત્ પૂર્વાભાવે તતઃ પરમ્ ।
૨૨૧.૬૯/૨ન વિદ્યમાને પૂર્વોક્ત ઉત્તરપ્રાપ્તિરિષ્યતે ॥ ૨૨૧.૬૯॥

૨૨૧.૭૦/૧ન કુર્યાદ્ દન્તસંઘર્ષં નાત્મનો દેહતાડનમ્ ।
૨૨૧.૭૦/૨સ્વાપેઽધ્વનિ તથા ભુઞ્જન્ સ્વાધ્યાયં ચ વિવર્જયેત્ ॥ ૨૨૧.૭૦॥

૨૨૧.૭૧/૧સંધ્યાયાં મૈથુનં ચાપિ તથા પ્રસ્થાનમેવ ચ ।
૨૨૧.૭૧/૨તથાપરાહ્ણે કુર્વીત શ્રદ્ધયા પિતૃતર્પણમ્ ॥ ૨૨૧.૭૧॥

૨૨૧.૭૨/૧શિરઃસ્નાનં ચ કુર્વીત દૈવં પિત્ર્યમથાપિ ચ ।
૨૨૧.૭૨/૨પ્રાઙ્મુખોદઙ્મુખો વાપિ શ્મશ્રુકર્મ ચ કારયેત્ ॥ ૨૨૧.૭૨॥

૨૨૧.૭૩/૧વ્યઙ્ગિનીં વર્જયેત્ કન્યાં કુલજાં વાપ્યરોગિણીમ્ ।
૨૨૧.૭૩/૨ઉદ્વહેત્ પિતૃમાત્રોશ્ચ સપ્તમીં પઞ્ચમીં તથા ॥ ૨૨૧.૭૩॥

૨૨૧.૭૪/૧રક્ષેદ્ દારાંસ્ત્યજેદ્ ઈર્ષ્યાં તથાહ્નિ સ્વપ્નમૈથુને ।
૨૨૧.૭૪/૨પરોપતાપકં કર્મ જન્તુપીડાં ચ સર્વદા ॥ ૨૨૧.૭૪॥

૨૨૧.૭૫/૧ઉદક્યા સર્વવર્ણાનાં વર્જ્યા રાત્રિચતુષ્ટયમ્ ।

૨૨૧.૭૫/૨સ્ત્રીજન્મપરિહારાર્થં પઞ્ચમીં ચાપિ વર્જયેત્ ॥ ૨૨૧.૭૫ ॥

૨૨૧.૭૬/૧તતઃ ષષ્ઠ્યાં વ્રજેદ્ રાત્ર્યાં જ્યેષ્ઠયુગ્માસુ રાત્રિષુ ।

૨૨૧.૭૬/૨યુગ્માસુ પુત્રા જાયન્તે સ્ત્રિયોऽયુગ્માસુ રાત્રિષુ ॥ ૨૨૧.૭૬ ॥

૨૨૧.૭૭/૧વિધર્મિણો વૈ પર્વાદૌ સંધ્યાકાલેષુ ષણ્ઢકાઃ ।

૨૨૧.૭૭/૨ક્ષુરકર્મણિ રિક્તાં વૈ વર્જયીત વિચક્ષણઃ ॥ ૨૨૧.૭૭ ॥

૨૨૧.૭૮/૧બ્રુવતામવિનીતાનાં ન શ્રોતવ્યં કદાચન ।

૨૨૧.૭૮/૨ન ચોત્કૃષ્ટાસનં દેયમનુત્કૃષ્ટસ્ય ચાદરાત્ ॥ ૨૨૧.૭૮ ॥

૨૨૧.૭૯/૧ક્ષુરકર્મણિ ચાન્તે ચ સ્ત્રીસમ્ભોગે ચ ભો દ્વિજાઃ ।

૨૨૧.૭૯/૨સ્નાયીત ચૈલવાન્ પ્રાજ્ઞઃ કટભૂમિમુપેત્ય ચ ॥ ૨૨૧.૭૯ ॥

૨૨૧.૮૦/૧દેવવેદદ્વિજાતીનાં સાધુસત્યમહાત્મનામ્ ।

૨૨૧.૮૦/૨ગુરોઃ પતિવ્રતાનાં ચ બ્રહ્મયજ્ઞતપસ્વિનામ્ ॥ ૨૨૧.૮૦ ॥

૨૨૧.૮૧/૧પરિવાદં ન કુર્વીત પરિહાસં ચ ભો દ્વિજાઃ ।

૨૨૧.૮૧/૨ધવલામ્બરસંવીતઃ સિતપુષ્પવિભૂષિતઃ ॥ ૨૨૧.૮૧ ॥

૨૨૧.૮૨/૧સદા માઙ્ગલ્યવેષઃ સ્યાન્ ન વામાઙ્ગલ્યવાન્ ભવેત્ ।

૨૨૧.૮૨/૨નોદ્ધતોન્મત્તમૂઢૈશ્ચ નાવિનીતૈશ્ચ પણ્ડિતઃ ॥ ૨૨૧.૮૨ ॥

૨૨૧.૮૩/૧ગચ્છેન્ મૈત્રીમશીલેન ન વયોજાતિદૂષિતૈઃ ।

૨૨૧.૮૩/૨ન ચાતિવ્યયશીલૈશ્ચ પુરુષૈર્નૈવ વૈરિભિઃ ॥ ૨૨૧.૮૩ ॥

૨૨૧.૮૪/૧કાર્યાક્ષમૈર્નિન્દિતૈર્ન ન ચૈવ વિટસઙ્ગિભિઃ ।

૨૨૧.૮૪/૨નિસ્વૈર્ન વાદૈકપરૈર્નરૈશ્ચાન્યૈસ્તથાધમૈઃ ॥ ૨૨૧.૮૪ ॥

૨૨૧.૮૫/૧સુહૃદ્દીક્ષિતભૂપાલ+ ।સ્નાતકશ્વશુરૈઃ સહ ।

૨૨૧.૮૫/૨ઉત્તિષ્ઠેદ્ વિભવાચ્ચૈનાન્ અર્ચયેદ્ ગૃહમાગતાન્ ॥ ૨૨૧.૮૫ ॥

૨૨૧.૮૬/૧યથાવિભવતો વિપ્રાઃ પ્રતિસંવત્સરોષિતાન્ ।

૨૨૧.૮૬/૨સમ્યગ્ ગૃહેऽર્ચનં કૃત્વા યથાસ્થાનમનુક્રમાત્ ॥ ૨૨૧.૮૬ ॥

૨૨૧.૮૭/૧સમ્પૂજયેત્ તથા વહ્નૌ પ્રદદ્યાચ્ચાહુતીઃ ક્રમાત્ ।

૨૨૧.૮૭/૨પ્રથમાં બ્રહ્મણે દદ્યાત્ પ્રજાનાં પતયે તતઃ ॥ ૨૨૧.૮૭ ॥

૨૨૧.૮૮/૧તૃતીયાં ચૈવ ગૃહ્યેભ્યઃ કશ્યપાય તથાપરામ્ ।

૨૨૧.૮૮/૨તતોऽનુમતયે દદ્યાદ્ દદ્યાદ્ બહુબલિં તતઃ ॥ ૨૨૧.૮૮ ॥

૨૨૧.૮૯/૧પૂર્વં ખ્યાતા મયા યા તુ નિત્યક્રમવિધૌ ક્રિયા ।
૨૨૧.૮૯/૨વૈશ્વદેવં તતઃ કુર્યાદ્ વદત શ ृणુત દ્વિજાઃ ॥ ૨૨૧.૮૯॥

૨૨૧.૯૦/૧યથાસ્થાનવિભાગં તુ દેવાન્ ઉદ્દિશ્ય વૈ પૃથક્ ।
૨૨૧.૯૦/૨પર્જન્યાપોધરિત્રીણાં દદ્યાત્ તુ મણિકે ત્રયમ્ ॥ ૨૨૧.૯૦॥

૨૨૧.૯૧/૧વાયવે ચ પ્રતિદિશં દિગ્ભ્યઃ પ્રાચ્યાદિષુ ક્રમાત્ ।
૨૨૧.૯૧/૨બ્રહ્મણે ચાન્તરિક્ષાય સૂર્યાય ચ યથાક્રમાત્ ॥ ૨૨૧.૯૧॥

૨૨૧.૯૨/૧વિશ્વેભ્યશ્ચૈવ દેવેભ્યો વિશ્વભૂતેભ્ય એવ ચ ।
૨૨૧.૯૨/૨ઉષસે ભૂતપતયે દદ્યાદ્ વોત્તરતઃ શુચિઃ ॥ ૨૨૧.૯૨॥

૨૨૧.૯૩/૧સ્વધા ચ નમ ઇત્યુક્ત્વા પિતૃભ્યશ્ચૈવ દક્ષિણે ।
૨૨૧.૯૩/૨કૃત્વાપસવ્યં વાયવ્યાં યક્ષ્મૈતત્ તૈતિ સંવદન્ ॥ ૨૨૧.૯૩॥

૨૨૧.૯૪/૧અન્નાવશેષમિશ્રં વૈ તોયં દદ્યાદ્ યથાવિધિ ।
૨૨૧.૯૪/૨દેવાનાં ચ તતઃ કુર્યાદ્ બ્રાહ્મણાનાં નમસ્ક્રિયામ્ ॥ ૨૨૧.૯૪॥

૨૨૧.૯૫/૧અઙ્ગુષ્ઠોત્તરતો રેખા પાણેર્યા દક્ષિણસ્ય ચ ।
૨૨૧.૯૫/૨એતદ્ બ્રાહ્મમિતિ ખ્યાતં તીર્થમાચમનાય વૈ ॥ ૨૨૧.૯૫॥

૨૨૧.૯૬/૧તર્જન્યઙ્ગુષ્ઠયોરન્તઃ પિત્ર્યં તીર્થમુદાહૃતમ્ ।
૨૨૧.૯૬/૨પિતૃણાં તેન તોયાનિ દદ્યાન્ નાન્દીમુખાદ્ ઋતે ॥ ૨૨૧.૯૬॥

૨૨૧.૯૭/૧અઙ્ગુલ્યગ્રે તથા દૈવં તેન દિવ્યક્રિયાવિધિઃ ।
૨૨૧.૯૭/૨તીર્થં કનિષ્ઠિકામૂલે કાયં તત્ર પ્રજાપતેઃ ॥ ૨૨૧.૯૭॥

૨૨૧.૯૮/૧એવમેભિઃ સદા તીર્થૈર્વિધાનં પિતૃભિઃ સહ ।
૨૨૧.૯૮/૨સદા કાર્યાણિ કુર્વીત નાન્યતીર્થઃ કદાચન ॥ ૨૨૧.૯૮॥

૨૨૧.૯૯/૧બ્રાહ્મેણાચમનં શસ્તં પૈત્ર્યં પિત્ર્યેણ સર્વદા ।
૨૨૧.૯૯/૨દેવતીર્થેન દેવાનાં પ્રાજાપત્યં જિતેન ચ ॥ ૨૨૧.૯૯॥

૨૨૧.૧૦૦/૧નાન્દીમુખાનાં કુર્વીત પ્રાજ્ઞઃ પિણ્ડોદકક્રિયામ્ ।
૨૨૧.૧૦૦/૨પ્રાજાપત્યેન તીર્થેન યચ્ચ કિંચિત્ પ્રજાપતેઃ ॥ ૨૨૧.૧૦૦॥

૨૨૧.૧૦૧/૧યુગપજ્જલમગ્નિં ચ બિભૃયાન્ ન વિચક્ષણઃ ।
૨૨૧.૧૦૧/૨ગુરુદેવપિતૄન્ વિપ્રાન્ ન ચ પાદૌ પ્રસારયેત્ ॥ ૨૨૧.૧૦૧॥

૨૨૧.૧૦૨/૧નાચક્ષીત ધયન્તીં ગાં જલં નાઞ્જલિના પિબેત્ ।
૨૨૧.૧૦૨/૨શૌચકાલેષુ સર્વેષુ ગુરુષ્વલ્પેષુ વા પુનઃ ।

૨૨૧.૧૦૨/૩ન વિલમ્બેત મેધાવી ન મુખેનાનલં ધમેત્ ॥ ૨૨૧.૧૦૨॥

૨૨૧.૧૦૩/૧તત્ર વિપ્રા ન વસ્તવ્યં યત્ર નાસ્તિ ચતુષ્ટયમ્ ।
૨૨૧.૧૦૩/૨ઋણપ્રદાતા વૈદ્યશ્ચ શ્રોત્રિયઃ સજલા નદી ॥ ૨૨૧.૧૦૩॥

૨૨૧.૧૦૪/૧જિતભૃત્યો નૃપો યત્ર બલવાન્ ધર્મતત્પરઃ ।
૨૨૧.૧૦૪/૨તત્ર નિત્યં વસેત્ પ્રાજ્ઞઃ કુતઃ કુનૃપતૌ સુખમ્ ॥ ૨૨૧.૧૦૪॥

૨૨૧.૧૦૫/૧પૌરાઃ સુસંહતા યત્ર સતતં ન્યાયવર્તિનઃ ।
૨૨૧.૧૦૫/૨શાન્તામત્સરિણો લોકાસ્તત્ર વાસઃ સુખોદયઃ ॥ ૨૨૧.૧૦૫॥

૨૨૧.૧૦૬/૧યસ્મિન્ કૃષીવલા રાષ્ટ્રે પ્રાયશો નાતિમાનિનઃ ।
૨૨૧.૧૦૬/૨યત્રૌષધાન્યશેષાણિ વસેત્ તત્ર વિચક્ષણઃ ॥ ૨૨૧.૧૦૬॥

૨૨૧.૧૦૭/૧તત્ર વિપ્રા ન વસ્તવ્યં યત્રૈતત્ ત્રિતયં સદા ।
૨૨૧.૧૦૭/૨જિગીષુઃ પૂર્વવૈરશ્ચ જનશ્ચ સતતોત્સવઃ ॥ ૨૨૧.૧૦૭॥

૨૨૧.૧૦૮/૧વસેન્ નિત્યં સુશીલેષુ સહચારિષુ પણ્ડિતઃ ।
૨૨૧.૧૦૮/૨યત્રાપ્રધૃષ્યો નૃપતિર્યત્ર સસ્યપ્રદા મહી ॥ ૨૨૧.૧૦૮॥

૨૨૧.૧૦૯/૧ઇત્યેતત્ કથિતં વિપ્રા મયા વો હિતકામ્યયા ।
૨૨૧.૧૦૯/૨અતઃપરં પ્રવક્ષ્યામિ ભક્ષ્યભોજ્યવિધિક્રિયામ્ ॥ ૨૨૧.૧૦૯॥

૨૨૧.૧૧૦/૧ભોજ્યમન્નં પર્યુષિતં સ્નેહાક્તં ચિરસમ્ભૃતમ્ ।
૨૨૧.૧૧૦/૨અસ્નેહા અપિ ગોધૂમ+ ।યવગોરસવિક્રિયાઃ ॥ ૨૨૧.૧૧૦॥

૨૨૧.૧૧૧/૧શશકઃ કચ્છપો ગોધા શ્વાવિન્ મત્સ્યોઽથ શલ્યકઃ ।
૨૨૧.૧૧૧/૨ભક્ષ્યાશ્ચૈતે તથા વર્જ્યૌ ગ્રામશૂકરકુક્કુટૌ ॥ ૨૨૧.૧૧૧॥

૨૨૧.૧૧૨/૧પિતૃદેવાદિશેષં ચ શ્રાદ્ધે બ્રાહ્મણકામ્યયા ।
૨૨૧.૧૧૨/૨પ્રોક્ષિતં ચૌષધાર્થં ચ ખાદન્ માંસં ન દુષ્યતિ ॥ ૨૨૧.૧૧૨॥

૨૨૧.૧૧૩/૧શઙ્ખાશ્મસ્વર્ણરૂપ્યાણાં રજ્જૂનામથ વાસસામ્ ।
૨૨૧.૧૧૩/૨શાકમૂલફલાનાં ચ તથા વિદલચર્મણામ્ ॥ ૨૨૧.૧૧૩॥

૨૨૧.૧૧૪/૧મણિવસ્ત્રપ્રવાલાનાં તથા મુક્તાફલસ્ય ચ ।
૨૨૧.૧૧૪/૨પાત્રાણાં ચમસાનાં ચ અમ્બુના શૌચમિષ્યતે ॥ ૨૨૧.૧૧૪॥

૨૨૧.૧૧૫/૧તથાશ્મકાનાં તોયેન અશ્મસંઘર્ષણેન ચ ।
૨૨૧.૧૧૫/૨સસ્નેહાનાં ચ પાત્રાણાં શુદ્ધિરુષ્ણેન વારિણા ॥ ૨૨૧.૧૧૫॥

૨૨૧.૧૧૬/૧શૂર્પાણામજિનાનાં ચ મુશલોલૂખલસ્ય ચ ।
૨૨૧.૧૧૬/૨સંહતાનાં ચ વસ્ત્રાણાં પ્રોક્ષણાત્ સંચયસ્ય ચ ॥ ૨૨૧.૧૧૬॥

૨૨૧.૧૧૭/૧વલ્કલાનામશેષાણામમ્બુમૃચ્છૌચમિષ્યતે ।
૨૨૧.૧૧૭/૨આવિકાનાં સમસ્તાનાં કેશાનાં ચૈવમિષ્યતે ॥ ૨૨૧.૧૧૭॥

૨૨૧.૧૧૮/૧સિદ્ધાર્થકાનાં કલ્કેન તિલકલ્કેન વા પુનઃ ।
૨૨૧.૧૧૮/૨શોધનં ચૈવ ભવતિ ઉપઘાતવતાં સદા ॥ ૨૨૧.૧૧૮॥

૨૨૧.૧૧૯/૧તથા કાર્પાસિકાનાં ચ શુદ્ધિઃ સ્યાજ્જલભસ્મના ।
૨૨૧.૧૧૯/૨દારુદન્તાસ્થિશ‌ૃઙ્ગાણાં તક્ષણાચ્છુદ્ધિરિષ્યતે ॥ ૨૨૧.૧૧૯॥

૨૨૧.૧૨૦/૧પુનઃ પાકેન ભાણ્ડાનાં પાર્થિવાનામમેધ્યતા ।
૨૨૧.૧૨૦/૨શુદ્ધં ભૈક્ષ્યં કારુહસ્તઃ પણ્યં યોષિન્મુખં તથા ॥ ૨૨૧.૧૨૦॥

૨૨૧.૧૨૧/૧રથ્યાગમનવિજ્ઞાનં દાસવર્ગેણ સંસ્કૃતમ્ ।
૨૨૧.૧૨૧/૨પ્રાક્પ્રશસ્તં ચિરાતીતમનેકાન્તરિતં લઘુ ॥ ૨૨૧.૧૨૧॥

૨૨૧.૧૨૨/૧અન્તઃ પ્રભૂતં બાલં ચ વૃદ્ધાન્તરવિચેષ્ટિતમ્ ।
૨૨૧.૧૨૨/૨કર્માન્તાગારશાલાશ્ચ સ્તનદ્ધયં શુચિ સ્ત્રિયાઃ ॥ ૨૨૧.૧૨૨॥

૨૨૧.૧૨૩/૧શુચયશ્ચ તથૈવાપઃ સ્રવન્ત્યો ગન્ધવર્જિતાઃ ।
૨૨૧.૧૨૩/૨ભૂમિર્વિશુધ્યતે કાલાદ્ દાહમાર્જનગોકુલૈઃ ॥ ૨૨૧.૧૨૩॥

૨૨૧.૧૨૪/૧લેપાદ્ ઉલ્લેખનાત્ સેકાદ્ વેશ્મ સમ્માર્જનાદિના ।
૨૨૧.૧૨૪/૨કેશકીટાવપન્ને ચ ગોઘ્રાતે મક્ષિકાન્વિતે ॥ ૨૨૧.૧૨૪॥

૨૨૧.૧૨૫/૧મૃદમ્બુ ભસ્મ ચાપ્યન્ને પ્રક્ષેપ્તવ્યં વિશુદ્ધયે ।
૨૨૧.૧૨૫/૨ઔદુમ્બરાણામમ્લેન વારિણા ત્રપુસીસયોઃ ॥ ૨૨૧.૧૨૫॥

૨૨૧.૧૨૬/૧ભસ્મામ્બુભિશ્ચ કાંસ્યાનાં શુદ્ધિઃ પ્લાવો દ્રવસ્ય ચ ।
૨૨૧.૧૨૬/૨અમેધ્યાક્તસ્ય મૃત્તોયૈર્ગન્ધાપહરણેન ચ ॥ ૨૨૧.૧૨૬॥

૨૨૧.૧૨૭/૧અન્યેષાં ચૈવ દ્રવ્યાણાં વર્ણગન્ધાંશ્ચ હારયેત્ ।
૨૨૧.૧૨૭/૨શુચિ માંસં તુ ચાણ્ડાલ+ ।ક્રવ્યાદૈર્વિનિપાતિતમ્ ॥ ૨૨૧.૧૨૭॥

૨૨૧.૧૨૮/૧રથ્યાગતં ચ તૈલાદિ શુચિ ગોતૃપ્તિદં પયઃ ।
૨૨૧.૧૨૮/૨૨જોઽગ્નિરશ્વગોછાયા રશ્મયઃ પવનો મહી ॥ ૨૨૧.૧૨૮॥

૨૨૧.૧૨૯/૧વિપ્લુષો મક્ષિકાદ્યાશ્ચ દુષ્ટસઙ્ગાદ્ અદોષિણઃ ।
૨૨૧.૧૨૯/૨અજાશ્વં મુખતો મેધ્યં ન ગોર્વત્સસ્ય ચાનનમ્ ॥ ૨૨૧.૧૨૯॥

૨૨૧.૧૩૦/૧માતુઃ પ્રસ્રવણે મેધ્યં શકુનિઃ ફલપાતને ।
૨૨૧.૧૩૦/૨આસનં શયનં યાનં તટૌ નદ્યાસ્તૃણાનિ ચ ॥ ૨૨૧.૧૩૦॥

૨૨૧.૧૩૧/૧સોમસૂર્યાંશુપવનૈઃ શુધ્યન્તે તાનિ પણ્યવત્ ।
૨૨૧.૧૩૧/૨રથ્યાપસર્પણે સ્નાને ક્ષુત્પાનાનાં ચ કર્મસુ ॥ ૨૨૧.૧૩૧॥

૨૨૧.૧૩૨/૧આચામેત યથાન્યાયં વાસસઃ પરિધાપને ।
૨૨૧.૧૩૨/૨સ્પૃષ્ટાનામથ સંસ્પર્શૈર્દ્ભિરથ્યાકર્દમામ્ભસિ ॥ ૨૨૧.૧૩૨॥

૨૨૧.૧૩૩/૧પક્વેષ્ટકચિતાનાં ચ મેધ્યતા વાયુસંશ્રયાત્ ।
૨૨૧.૧૩૩/૨પ્રભૂતોપહતાદ્ અન્નાદ્ અગ્રમુદ્ધૃત્ય સંત્યજેત્ ॥ ૨૨૧.૧૩૩॥

૨૨૧.૧૩૪/૧શેષસ્ય પ્રોક્ષણં કુર્યાદ્ આચમ્યાદ્ભિસ્તથા મૃદા ।
૨૨૧.૧૩૪/૨ઉપવાસસ્ત્રિરાત્રં તુ દુષ્ટભક્તાશિનો ભવેત્ ॥ ૨૨૧.૧૩૪॥

૨૨૧.૧૩૫/૧અજ્ઞાને જ્ઞાનપૂર્વે તુ તદ્દોષોપશમે ન તુ ।
૨૨૧.૧૩૫/૨ઉદક્યાં વાવલગ્નાં ચ સૂતિકાન્ત્યાવસાયિનઃ ॥ ૨૨૧.૧૩૫॥

૨૨૧.૧૩૬/૧સ્પૃષ્ટ્વા સ્નાયીત શૌચાર્થં તથૈવ મૃતહારિણઃ ।
૨૨૧.૧૩૬/૨નારં સ્પૃષ્ટ્વાસ્થિ સસ્નેહં સ્નાત્વા વિપ્રો વિશુધ્યતિ ॥ ૨૨૧.૧૩૬॥

૨૨૧.૧૩૭/૧આચમ્યૈવ તુ નિઃસ્નેહં ગામાલભ્યાર્કમીક્ષ્ય વા ।
૨૨૧.૧૩૭/૨ન લઙ્ઘયેત્ તથૈવાથ ષ્ઠીવનોદ્વર્તનાનિ ચ ॥ ૨૨૧.૧૩૭॥

૨૨૧.૧૩૮/૧ગૃહાદ્ ઉચ્છિષ્ટવિણ્મૂત્રં પાદામ્ભસ્તત્ ક્ષિપેદ્ બહિઃ ।
૨૨૧.૧૩૮/૨પઞ્ચપિણ્ડાન્ અનુદ્ધૃત્ય ન સ્નાયાત્ પરવારિણિ ॥ ૨૨૧.૧૩૮॥

૨૨૧.૧૩૯/૧સ્નાયીત દેવખાતેષુ ગઙ્ગાહ્રદસરિત્સુ ચ ।
૨૨૧.૧૩૯/૨નોદ્યાનાદૌ વિકાલેષુ પ્રાજ્ઞસ્તિષ્ઠેત્ કદાચન ॥ ૨૨૧.૧૩૯॥

૨૨૧.૧૪૦/૧નાલપેજ્જનવિદ્વિષ્ટાન્ વીરહીનાસ્તથા સ્ત્રિયઃ ।
૨૨૧.૧૪૦/૨દેવતાપિતૃસચ્છાસ્ત્ર+ ।યજ્વિસંન્યાસિનિન્દકૈઃ ॥ ૨૨૧.૧૪૦॥

૨૨૧.૧૪૧/૧કૃત્વા તુ સ્પર્શનાલાપં શુધ્યત્યર્કાવલોકનાત્ ।
૨૨૧.૧૪૧/૨અવલોક્ય તથોદક્યાં સંન્યસ્તં પતિતં શવમ્ ॥ ૨૨૧.૧૪૧॥

૨૨૧.૧૪૨/૧વિધર્મિસૂતિકાષણ્ઢ+ ।વિવસ્ત્રાન્ત્યાવસાયિનઃ ।
૨૨૧.૧૪૨/૨મૃતનિર્યાતકાંશ્ચૈવ પરદારરતાશ્ચ યે ॥ ૨૨૧.૧૪૨॥

૨૨૧.૧૪૩/૧એતદ્ એવ હિ કર્તવ્યં પ્રાજ્ઞૈઃ શોધનમાત્મનઃ ।

૨૨૧.૧૪૩/૨અભોજ્યભિક્ષુપાખણ્ડ+ ંઆર્જારખરકુક્કુટાન્ ॥ ૨૨૧.૧૪૩॥

૨૨૧.૧૪૪/૧પતિતાપવિદ્ધચાણ્ડાલ+ ંઋતાહારાંશ્ચ ધર્મવિત્ ।
૨૨૧.૧૪૪/૨સંસ્પૃશ્ય શુધ્યતે સ્નાનાદ્ ઉદક્યાગ્રામશૂકરૌ ॥ ૨૨૧.૧૪૪॥

૨૨૧.૧૪૫/૧તદ્વચ્ચ સૂતિકાશૌચ+ ।દૂષિતૌ પુરુષાવપિ ।
૨૨૧.૧૪૫/૨યસ્ય ચાનુદિનં હાનિર્ગૃહે નિત્યસ્ય કર્મણઃ ॥ ૨૨૧.૧૪૫॥

૨૨૧.૧૪૬/૧યશ્ચ બ્રાહ્મણસંત્યક્તઃ કિલ્બિષાશી નરાધમઃ ।
૨૨૧.૧૪૬/૨નિત્યસ્ય કર્મણો હાનિં ન કુર્વીત કદાચન ॥ ૨૨૧.૧૪૬॥

૨૨૧.૧૪૭/૧તસ્ય ત્વકરણં વક્ષ્યે કેવલં મૃતજન્મસુ ।
૨૨૧.૧૪૭/૨દશાહં બ્રાહ્મણસ્તિષ્ઠેદ્ દાનહોમવિવર્જિતઃ ॥ ૨૨૧.૧૪૭॥

૨૨૧.૧૪૮/૧ક્ષત્રિયો દ્વાદશાહં ચ વૈશ્યો માસાર્ધમેવ ચ ।
૨૨૧.૧૪૮/૨શૂદ્રશ્ચ માસમાસીત નિજકર્મવિવર્જિતઃ ॥ ૨૨૧.૧૪૮॥

૨૨૧.૧૪૯/૧તતઃ પરં નિજં કર્મ કુર્યુઃ સર્વે યથોચિતમ્ ।
૨૨૧.૧૪૯/૨પ્રેતાય સલિલં દેયં બહિર્ગત્વા તુ ગોત્રકૈઃ ॥ ૨૨૧.૧૪૯॥

૨૨૧.૧૫૦/૧પ્રથમેઽહ્નિ ચતુર્થે ચ સપ્તમે નવમે તથા ।
૨૨૧.૧૫૦/૨તસ્યાસ્થિસંચયઃ કાર્યશ્ચતુર્થેઽહનિ ગોત્રકૈઃ ॥ ૨૨૧.૧૫૦॥

૨૨૧.૧૫૧/૧ઊર્ધ્વં સંચયનાત્ તેષામઙ્ગસ્પર્શો વિધીયતે ।
૨૨૧.૧૫૧/૨ગોત્રકૈસ્તુ ક્રિયાઃ સર્વાઃ કાર્યાઃ સંચયનાત્ પરમ્ ॥ ૨૨૧.૧૫૧॥

૨૨૧.૧૫૨/૧સ્પર્શ એવ સપિણ્ડાનાં મૃતાહનિ તથોભયોઃ ।
૨૨૧.૧૫૨/૨અન્વર્થમિચ્છયા શસ્ત્ર+ ।રજ્જુબન્ધનવહ્નિષુ ॥ ૨૨૧.૧૫૨॥

૨૨૧.૧૫૩/૧વિષપ્રતાપાદિમૃતે પ્રાયાનાશકયોરપિ ।
૨૨૧.૧૫૩/૨બાલે દેશાન્તરસ્થે ચ તથા પ્રવ્રજિતે મૃતે ॥ ૨૨૧.૧૫૩॥

૨૨૧.૧૫૪/૧સદ્યઃ શૌચં મનુષ્યાણાં ત્ર્યહમુક્તમશૌચકમ્ ।
૨૨૧.૧૫૪/૨સપિણ્ડાનાં સપિણ્ડસ્તુ મૃતેઽન્યસ્મિન્ મૃતો યદિ ॥ ૨૨૧.૧૫૪॥

૨૨૧.૧૫૫/૧પૂર્વશૌચં સમાખ્યાતં કાર્યાસ્તત્ર દિનક્રિયાઃ ।
૨૨૧.૧૫૫/૨એષ એવ વિધિર્દૃષ્ટો જન્મન્યપિ હિ સૂતકે ॥ ૨૨૧.૧૫૫॥

૨૨૧.૧૫૬/૧સપિણ્ડાનાં સપિણ્ડેષુ યથાવત્ સોદકેષુ ચ ।
૨૨૧.૧૫૬/૨પુત્રે જાતે પિતુઃ સ્નાનં સચૈલસ્ય વિધીયતે ॥ ૨૨૧.૧૫૬॥

૨૨૧.૧૫૭/૧તત્રાપિ યદિ વાન્યસ્મિન્ અનુયાતસ્તતઃ પરમ્ ।
૨૨૧.૧૫૭/૨તત્રાપિ શુદ્ધિરુદિતા પૂર્વજન્મવતો દિનૈઃ ॥ ૨૨૧.૧૫૭॥

૨૨૧.૧૫૮/૧દશદ્વાદશમાસાર્ધ+ ંઆસસંખ્યૈર્દિનૈર્ગતૈઃ ।
૨૨૧.૧૫૮/૨સ્વાઃ સ્વાઃ કર્મક્રિયાઃ કુર્યુઃ સર્વે વર્ણા યથાવિધિ ॥ ૨૨૧.૧૫૮॥

૨૨૧.૧૫૯/૧પ્રેતમુદ્દિશ્ય કર્તવ્યમેકોદ્દિષ્ટમતઃ પરમ્ ।
૨૨૧.૧૫૯/૨દાનાનિ ચૈવ દેયાનિ બ્રાહ્મણેભ્યો મનીષિભિઃ ॥ ૨૨૧.૧૫૯॥

૨૨૧.૧૬૦/૧યદ્ યદ્ ઇષ્ટતમં લોકે યચ્ચાસ્ય દયિતં ગૃહે ।
૨૨૧.૧૬૦/૨તત્ તદ્ ગુણવતે દેયં તદ્ એવાક્ષયમિચ્છતા ॥ ૨૨૧.૧૬૦॥

૨૨૧.૧૬૧/૧પૂર્ણૈસ્તુ દિવસૈઃ સ્પૃષ્ટ્વા સલિલં વાહનાયુધૈઃ ।
૨૨૧.૧૬૧/૨દત્તપ્રેતોદપિણ્ડાશ્ચ સર્વે વર્ણાઃ કૃતક્રિયાઃ ॥ ૨૨૧.૧૬૧॥

૨૨૧.૧૬૨/૧કુર્યુઃ સમગ્રાઃ શુચિનઃ પરત્રેહ ચ ભૂતયે ।
૨૨૧.૧૬૨/૨અધ્યેતવ્યા ત્રયી નિત્યં ભવિતવ્યં વિપશ્ચિતા ॥ ૨૨૧.૧૬૨॥

૨૨૧.૧૬૩/૧ધર્મતો ધનમાહાર્યં યષ્ટવ્યં ચાપિ યત્નતઃ ।
૨૨૧.૧૬૩/૨યેન પ્રકુપિતો નાત્મા જુગુપ્સામેતિ ભો દ્વિજાઃ ॥ ૨૨૧.૧૬૩॥

૨૨૧.૧૬૪/૧તત્ કર્તવ્યમશઙ્કેન યન્ ન ગોપ્યં મહાજનૈઃ ।
૨૨૧.૧૬૪/૨એવમાચરતો વિપ્રાઃ પુરુષસ્ય ગૃહે સતઃ ॥ ૨૨૧.૧૬૪॥

૨૨૧.૧૬૫/૧ધર્માર્થકામં સમ્પ્રાપ્ય પરત્રેહ ચ શોભનમ્ ।
૨૨૧.૧૬૫/૨ઇદં રહસ્યમાયુષ્યં ધન્યં બુદ્ધિવિવર્ધનમ્ ॥ ૨૨૧.૧૬૫॥

૨૨૧.૧૬૬/૧સર્વપાપહરં પુણ્યં શ્રીપુષ્ટ્યારોગ્યદં શિવમ્ ।
૨૨૧.૧૬૬/૨યશઃકીર્તિપ્રદં નૃણાં તેજોબલવિવર્ધનમ્ ॥ ૨૨૧.૧૬૬॥

૨૨૧.૧૬૭/૧અનુષ્ઠેયં સદા પુમ્ભિઃ સ્વર્ગસાધનમુત્તમમ્ ।
૨૨૧.૧૬૭/૨બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈશ્ચ મુનિસત્તમાઃ ॥ ૨૨૧.૧૬૭॥

૨૨૧.૧૬૮/૧જ્ઞાતવ્યં સુપ્રયત્નેન સમ્યક્ શ્રેયોભિકાઙ્ક્ષિભિઃ ।
૨૨૧.૧૬૮/૨જ્ઞાત્વૈવ યઃ સદા કાલમનુષ્ઠાનં કરોતિ વૈ ॥ ૨૨૧.૧૬૮॥

૨૨૧.૧૬૯/૧સર્વપાપવિનિર્મુક્તઃ સ્વર્ગલોકે મહીયતે ।
૨૨૧.૧૬૯/૨સારાત્ સારતરં ચેદમાખ્યાતં દ્વિજસત્તમાઃ ॥ ૨૨૧.૧૬૯॥

૨૨૧.૧૭૦/૧શ્રુતિસ્મૃત્યુદિતં ધર્મં ન દેયં યસ્ય કસ્યચિત્ ।
૨૨૧.૧૭૦/૨ન નાસ્તિકાય દાતવ્યં ન દુષ્ટમતયે દ્વિજાઃ ।

૨૨૧.૧૭૦/૩ન દામ્ભિકાય મૂર્ખાય ન કુતર્કપ્રલાપિને ॥ ૨૨૧.૧૭૦॥

૨૨૨.૧/૧મુનય ઊચુઃ । શ્રોતુમિચ્છામહે બ્રહ્મન્ વર્ણધર્માન્ વિશેષતઃ ।
૨૨૨.૧/૨ચતુરાશ્રમધર્માંશ્ચ દ્વિજવર્ય બ્રવીહિ તાન્ ॥ ૨૨૨.૧॥

૨૨૨.૨/૧વ્યાસ ઉવાચ । બ્રાહ્મણક્ષત્રિયવિશાં શૂદ્રાણાં ચ યથાક્રમમ્ ।
૨૨૨.૨/૨શ‍ૃણુધ્વં સંયતા ભૂત્વા વર્ણધર્માન્ મયોદિતાન્ ॥ ૨૨૨.૨॥

૨૨૨.૩/૧દાનદયાતપોદેવ+ ।યજ્ઞસ્વાધ્યાયતત્પરઃ ।
૨૨૨.૩/૨નિત્યોદકી ભવેદ્ વિપ્રઃ કુર્યાચ્ચાગ્નિપરિગ્રહમ્ ॥ ૨૨૨.૩॥

૨૨૨.૪/૧વૃત્ત્યર્થં યાજયેત્ ત્વન્યાન્ દ્વિજાન્ અધ્યાપયેત્ તથા ।
૨૨૨.૪/૨કુર્યાત્ પ્રતિગ્રહાદાનં યજ્ઞાર્થં જ્ઞાનતો દ્વિજાઃ ॥ ૨૨૨.૪॥

૨૨૨.૫/૧સર્વલોકહિતં કુર્યાન્ નાહિતં કસ્યચિદ્ દ્વિજાઃ ।
૨૨૨.૫/૨મૈત્રી સમસ્તસત્ત્વેષુ બ્રાહ્મણસ્યોત્તમં ધનમ્ ॥ ૨૨૨.૫॥

૨૨૨.૬/૧ગવિ રત્ને ચ પારક્યે સમબુદ્ધિર્ભવેદ્ દ્વિજાઃ ।
૨૨૨.૬/૨ઋતાવભિગમઃ પત્ન્યાં શસ્યતે વાસ્ય ભો દ્વિજાઃ ॥ ૨૨૨.૬॥

૨૨૨.૭/૧દાનાનિ દદ્યાદ્ ઇચ્છાતો દ્વિજેભ્યઃ ક્ષત્રિયોઽપિ હિ ।
૨૨૨.૭/૨યજેચ્ચ વિવિધૈર્યજ્ઞૈરધીયીત ચ ભો દ્વિજાઃ ॥ ૨૨૨.૭॥

૨૨૨.૮/૧શસ્ત્રાજીવો મહીરક્ષા પ્રવરા તસ્ય જીવિકા ।
૨૨૨.૮/૨તસ્યાપિ પ્રથમે કલ્પે પૃથિવીપરિપાલનમ્ ॥ ૨૨૨.૮॥

૨૨૨.૯/૧ધરિત્રીપાલનેનૈવ કૃતકૃત્યા નરાધિપાઃ ।
૨૨૨.૯/૨ભવન્તિ નૃપતે રક્ષા યતો યજ્ઞાદિકર્મણામ્ ॥ ૨૨૨.૯॥

૨૨૨.૧૦/૧દુષ્ટાનાં શાસનાદ્ રાજા શિષ્ટાનાં પરિપાલનાત્ ।
૨૨૨.૧૦/૨પ્રાપ્નોત્યભિમતાંલ્લોકાન્ વર્ણસંસ્થાપકો નૃપઃ ॥ ૨૨૨.૧૦॥

૨૨૨.૧૧/૧પાશુપાલ્યં વણિજ્યાં ચ કૃષિં ચ મુનિસત્તમાઃ ।
૨૨૨.૧૧/૨વૈશ્યાય જીવિકાં બ્રહ્મા દદૌ લોકપિતામહઃ ॥ ૨૨૨.૧૧॥

૨૨૨.૧૨/૧તસ્યાપ્યધ્યયનં યજ્ઞો દાનં ધર્મશ્ચ શસ્યતે ।
૨૨૨.૧૨/૨નિત્યનૈમિત્તિકાદીનામનુષ્ઠાનં ચ કર્મણામ્ ॥ ૨૨૨.૧૨॥

૨૨૨.૧૩/૧દ્વિજાતિસંશ્રયં કર્મ તદર્થં તેન પોષણમ્ ।
૨૨૨.૧૩/૨ક્રયવિક્રયજૈર્વાપિ ધનૈઃ કારુભવૈસ્તુ વા ॥ ૨૨૨.૧૩॥

૨૨૨.૧૪/૧દાનં દદ્યાચ્ચ શૂદ્રોઽપિ પાકયજ્ઞૈર્યજેત ચ ।
૨૨૨.૧૪/૨પિત્ર્યાદિકં ચ વૈ સર્વં શૂદ્રઃ કુર્વીત તેન વૈ ॥ ૨૨૨.૧૪॥

૨૨૨.૧૫/૧ભૃત્યાદિભરણાર્થાય સર્વેષાં ચ પરિગ્રહાઃ ।
૨૨૨.૧૫/૨ઋતુકાલાભિગમનં સ્વદારેષુ દ્વિજોત્તમાઃ ॥ ૨૨૨.૧૫॥

૨૨૨.૧૬/૧દયા સમસ્તભૂતેષુ તિતિક્ષા નાભિમાનિતા ।
૨૨૨.૧૬/૨સત્યં શૌચમનાયાસો મઙ્ગલં પ્રિયવાદિતા ॥ ૨૨૨.૧૬॥

૨૨૨.૧૭/૧મૈત્રી ચૈવાસ્પૃહા તદ્વદ્ અકાર્પણ્યં દ્વિજોત્તમાઃ ।
૨૨૨.૧૭/૨અનસૂયા ચ સામાન્યા વર્ણાનાં કથિતા ગુણાઃ ॥ ૨૨૨.૧૭॥

૨૨૨.૧૮/૧આશ્રમાણાં ચ સર્વેષામેતે સામાન્યલક્ષણાઃ ।
૨૨૨.૧૮/૨ગુણાસ્તથોપધર્માશ્ચ વિપ્રાદીનામિમે દ્વિજાઃ ॥ ૨૨૨.૧૮॥

૨૨૨.૧૯/૧ક્ષાત્રં કર્મ દ્વિજસ્યોક્તં વૈશ્યકર્મ તથાપદિ ।
૨૨૨.૧૯/૨રાજન્યસ્ય ચ વૈશ્યોક્તં શૂદ્રકર્માણિ ચૈતયોઃ ॥ ૨૨૨.૧૯॥

૨૨૨.૨૦/૧સસામર્થ્યે સતિ ત્યાજ્યમુભાભ્યામપિ ચ દ્વિજાઃ ।
૨૨૨.૨૦/૨તદ્ એવાપદિ કર્તવ્યં ન કુર્યાત્ કર્મસંકરમ્ ॥ ૨૨૨.૨૦॥

૨૨૨.૨૧/૧ઇત્યેતે કથિતા વિપ્રા વર્ણધર્મા મયાદ્ય વૈ ।
૨૨૨.૨૧/૨ધર્મમાશ્રમિણાં સમ્યગ્ બ્રુવતોઽપિ નિબોધત ॥ ૨૨૨.૨૧॥

૨૨૨.૨૨/૧બાલઃ કૃતોપનયનો વેદાહરણતત્પરઃ ।
૨૨૨.૨૨/૨ગુરોર્ગેહે વસન્ વિપ્રા બ્રહ્મચારી સમાહિતઃ ॥ ૨૨૨.૨૨॥

૨૨૨.૨૩/૧શૌચાચારરતસ્તત્ર કાર્યં શુશ્રૂષણં ગુરોઃ ।
૨૨૨.૨૩/૨વ્રતાનિ ચરતા ગ્રાહ્યો વેદશ્ચ કૃતબુદ્ધિના ॥ ૨૨૨.૨૩॥

૨૨૨.૨૪/૧ઉભે સંધ્યે રવિં વિપ્રાસ્તથૈવાગ્નિં સમાહિતઃ ।
૨૨૨.૨૪/૨ઉપતિષ્ઠેત્ તથા કુર્યાદ્ ગુરોરપ્યભિવાદનમ્ ॥ ૨૨૨.૨૪॥

૨૨૨.૨૫/૧સ્થિતે તિષ્ઠેદ્ વ્રજેદ્ યાતિ નીચૈરાસીત ચાસિતે ।
૨૨૨.૨૫/૨શિષ્યો ગુરૌ દ્વિજશ્રેષ્ઠાઃ પ્રતિકૂલં ચ સંત્યજેત્ ॥ ૨૨૨.૨૫॥

૨૨૨.૨૬/૧તેનૈવોક્તં પઠેદ્ વેદં નાન્યચિત્તઃ પુરસ્થિતઃ ।
૨૨૨.૨૬/૨અનુજ્ઞાતં ચ ભિક્ષાન્નમશ્નીયાદ્ ગુરુણા તતઃ ॥ ૨૨૨.૨૬॥

૨૨૨.૨૭/૧અવગાહેદ્ અપઃ પૂર્વમાચાર્યેણાવગાહિતાઃ ।
૨૨૨.૨૭/૨સમિજ્જલાદિકં ચાસ્ય કલ્યકલ્યમુપાનયેત્ ॥ ૨૨૨.૨૭॥

૨૨૨.૨૮/૧ગૃહીતગ્રાહ્યવેદશ્ચ તતોઽનુજ્ઞામવાપ્ય વૈ ।
૨૨૨.૨૮/૨ગાર્હસ્થ્યમાવસેત્ પ્રાજ્ઞો નિષ્પન્નગુરુનિષ્કૃતિઃ ॥ ૨૨૨.૨૮॥

૨૨૨.૨૯/૧વિધિનાવાપ્તદારસ્તુ ધનં પ્રાપ્ય સ્વકર્મણા ।
૨૨૨.૨૯/૨ગૃહસ્થકાર્યમખિલં કુર્યાદ્ વિપ્રાઃ સ્વશક્તિતઃ ॥ ૨૨૨.૨૯॥

૨૨૨.૩૦/૧નિર્વાપેણ પિતૄન્ અર્ચ્ય યજ્ઞૈર્દેવાંસ્તથાતિથીન્ ।
૨૨૨.૩૦/૨અન્નૈર્મુનીંશ્ચ સ્વાધ્યાયૈરપત્યેન પ્રજાપતિમ્ ॥ ૨૨૨.૩૦॥

૨૨૨.૩૧/૧બલિકર્મણા ભૂતાનિ વાક્સત્યેનાખિલં જગત્ ।
૨૨૨.૩૧/૨પ્રાપ્નોતિ લોકાન્ પુરુષો નિજકર્મસમાર્જિતાન્ ॥ ૨૨૨.૩૧॥

૨૨૨.૩૨/૧ભિક્ષાભુજશ્ચ યે કેચિત્ પરિવ્રાડ્ બ્રહ્મચારિણઃ ।
૨૨૨.૩૨/૨તેઽપ્યત્ર પ્રતિતિષ્ઠન્તિ ગાર્હસ્થ્યં તેન વૈ પરમ્ ॥ ૨૨૨.૩૨॥

૨૨૨.૩૩/૧વેદાહરણકાર્યેણ તીર્થસ્નાનાય ચ દ્વિજાઃ ।
૨૨૨.૩૩/૨અટન્તિ વસુધાં વિપ્રાઃ પૃથિવીદર્શનાય ચ ॥ ૨૨૨.૩૩॥

૨૨૨.૩૪/૧અનિકેતા હ્યનાહારા યે તુ સાયંગૃહાસ્તુ તે ।
૨૨૨.૩૪/૨તેષાં ગૃહસ્થઃ સતતં પ્રતિષ્ઠા યોનિરુચ્યતે ॥ ૨૨૨.૩૪॥

૨૨૨.૩૫/૧તેષાં સ્વાગતદાનાનિ વક્તવ્યં મધુરં સદા ।
૨૨૨.૩૫/૨ગૃહાગતાનાં દદ્યાચ્ચ શયનાસનભોજનમ્ ॥ ૨૨૨.૩૫॥

૨૨૨.૩૬/૧અતિથિર્યસ્ય ભગ્નાશો ગૃહાત્ પ્રતિનિવર્તતે ।
૨૨૨.૩૬/૨સ દત્ત્વા દુષ્કૃતં તસ્મૈ પુણ્યમાદાય ગચ્છતિ ॥ ૨૨૨.૩૬॥

૨૨૨.૩૭/૧અવજ્ઞાનમહંકારો દમ્ભશ્ચાપિ ગૃહે સતઃ ।
૨૨૨.૩૭/૨પરિવાદોપઘાતૌ ચ પારુષ્યં ચ ન શસ્યતે ॥ ૨૨૨.૩૭॥

૨૨૨.૩૮/૧યશ્ચ સમ્યક્ કરોત્યેવં ગૃહસ્થઃ પરમં વિધિમ્ ।
૨૨૨.૩૮/૨સર્વબન્ધવિનિર્મુક્તો લોકાન્ આપ્નોતિ ચોત્તમાન્ ॥ ૨૨૨.૩૮॥

૨૨૨.૩૯/૧વયઃપરિણતૌ વિપ્રાઃ કૃતકૃત્યો ગૃહાશ્રમી ।
૨૨૨.૩૯/૨પુત્રેષુ ભાર્યાં નિક્ષિપ્ય વનં ગચ્છેત્ સહૈવ વા ॥ ૨૨૨.૩૯॥

૨૨૨.૪૦/૧પર્ણમૂલફલાહારઃ કેશશ્મશ્રુજટાધરઃ ।
૨૨૨.૪૦/૨ભૂમિશાયી ભવેત્ તત્ર મુનિઃ સર્વાતિથિર્દ્વિજાઃ ॥ ૨૨૨.૪૦॥

૨૨૨.૪૧/૧ચર્મકાશકુશૈઃ કુર્યાત્ પરિધાનોત્તરીયકે ।

૨૨૨.૪૧/૨તદ્વત્ ત્રિષવણં સ્નાનં શસ્તમસ્ય દ્વિજોત્તમાઃ ॥ ૨૨૨.૪૧॥

૨૨૨.૪૨/૧દેવતાભ્યર્ચનં હોમઃ સર્વાભ્યાગતપૂજનમ્ ।
૨૨૨.૪૨/૨ભિક્ષા બલિપ્રદાનં તુ શસ્તમસ્ય પ્રશસ્યતે ॥ ૨૨૨.૪૨॥

૨૨૨.૪૩/૧વન્યસ્નેહેન ગાત્રાણામભ્યઙ્ગશ્ચાપિ શસ્યતે ।
૨૨૨.૪૩/૨તપસ્યા તસ્ય વિપ્રેન્દ્રાઃ શીતોષ્ણાદિસહિષ્ણુતા ॥ ૨૨૨.૪૩॥

૨૨૨.૪૪/૧યસ્ત્વેતા નિયતશ્ચર્યા વાનપ્રસ્થશ્ચરેન્ મુનિઃ ।
૨૨૨.૪૪/૨સ દહત્યગ્નિવદ્ દોષાઞ્ જયેલ્લોકાંશ્ચ શાશ્વતાન્ ॥ ૨૨૨.૪૪॥

૨૨૨.૪૫/૧ચતુર્થશ્ચાશ્રમો ભિક્ષોઃ પ્રોચ્યતે યો મનીષિભિઃ ।
૨૨૨.૪૫/૨તસ્ય સ્વરૂપં ગદતો બુધ્યધ્વં મમ સત્તમાઃ ॥ ૨૨૨.૪૫॥

૨૨૨.૪૬/૧પુત્રદ્રવ્યકલત્રેષુ ત્યજેત્ સ્નેહં દ્વિજોત્તમાઃ ।
૨૨૨.૪૬/૨ચતુર્થમાશ્રમસ્થાનં ગચ્છેન્ નિર્ધૂતમત્સરઃ ॥ ૨૨૨.૪૬॥

૨૨૨.૪૭/૧ત્રૈવર્ણિકાંસ્ત્યજેત્ સર્વાન્ આરમ્ભાન્ દ્વિજસત્તમાઃ ।
૨૨૨.૪૭/૨મિત્રાદિષુ સમો મૈત્રઃ સમસ્તેષ્વેવ જન્તુષુ ॥ ૨૨૨.૪૭॥

૨૨૨.૪૮/૧જરાયુજાણ્ડજાદીનાં વાઙ્મનઃકર્મભિઃ ક્વચિત્ ।
૨૨૨.૪૮/૨યુક્તઃ કુર્વીત ન દ્રોહં સર્વસઙ્ગાંશ્ચ વર્જયેત્ ॥ ૨૨૨.૪૮॥

૨૨૨.૪૯/૧એકરાત્રસ્થિતિર્ગ્રામે પઞ્ચરાત્રસ્થિતિઃ પુરે ।
૨૨૨.૪૯/૨તથા પ્રીતિર્ન તિર્યક્ષુ દ્વેષો વા નાસ્ય જાયતે ॥ ૨૨૨.૪૯॥

૨૨૨.૫૦/૧પ્રાણયાત્રાનિમિત્તં ચ વ્યઙ્ગારેઽભુક્તવજ્જને ।
૨૨૨.૫૦/૨કાલે પ્રશસ્તવર્ણાનાં ભિક્ષાર્થી પર્યટેદ્ ગૃહાન્ ॥ ૨૨૨.૫૦॥

૨૨૨.૫૧/૧અલાભે ન વિષાદી સ્યાલ્લાભે નૈવ ચ હર્ષયેત્ ।
૨૨૨.૫૧/૨પ્રાણયાત્રિકમાત્રઃ સ્યાન્ માત્રાસઙ્ગાદ્ વિનિર્ગતઃ ॥ ૨૨૨.૫૧॥

૨૨૨.૫૨/૧અતિપૂજિતલાભાંસ્તુ જુગુપ્સં ચૈવ સર્વતઃ ।
૨૨૨.૫૨/૨અતિપૂજિતલાભૈસ્તુ યતિર્મુક્તોઽપિ બધ્યતે ॥ ૨૨૨.૫૨॥

૨૨૨.૫૩/૧કામઃ ક્રોધસ્તથા દર્પો લોભમોહાદયશ્ચ યે ।
૨૨૨.૫૩/૨તાંસ્તુ દોષાન્ પરિત્યજ્ય પરિવ્રાણ્ નિર્મમો ભવેત્ ॥ ૨૨૨.૫૩॥

૨૨૨.૫૪/૧અભયં સર્વસત્ત્વેભ્યો દત્ત્વા યશ્ચરતે મહીમ્ ।
૨૨૨.૫૪/૨તસ્ય દેહાદ્ વિમુક્તસ્ય ભયં નોત્પદ્યતે ક્વચિત્ ॥ ૨૨૨.૫૪॥

૨૨૨.૫૫/૧કૃત્વાગ્નિહોત્રં સ્વશરીરસંસ્થમ્ ।
૨૨૨.૫૫/૨શારીરમગ્નિં સ્વમુખે જુહોતિ ।
૨૨૨.૫૫/૩વિપ્રસ્તુ ભિક્ષોપગતૈર્હવિર્ભિશ્ ।
૨૨૨.૫૫/૪ચિતાગ્નિના સ વ્રજતિ સ્મ લોકાન્ ॥ ૨૨૨.૫૫॥

૨૨૨.૫૬/૧મોક્ષાશ્રમં યશ્ચરતે યથોક્તમ્ ।
૨૨૨.૫૬/૨શુચિશ્ચ સંકલ્પિતબુદ્ધિયુક્તઃ ।
૨૨૨.૫૬/૩અનિન્ધનં જ્યોતિરિવ પ્રશાન્તમ્ ।
૨૨૨.૫૬/૪સ બ્રહ્મલોકં વ્રજતિ દ્વિજાતિઃ ॥ ૨૨૨.૫૬॥

૨૨૩.૧/૧મુનય ઊચુઃ । સર્વજ્ઞસ્ત્વં મહાભાગ સર્વભૂતહિતે રતઃ ।
૨૨૩.૧/૨ભૂતં ભવ્યં ભવિષ્યં ચ ન તેઽસ્ત્યવિદિતં મુને ॥ ૨૨૩.૧॥

૨૨૩.૨/૧કર્મણા કેન વર્ણાનામધમા જાયતે ગતિઃ ।
૨૨૩.૨/૨ઉત્તમા ચ ભવેત્ કેન બ્રૂહિ તેષાં મહામતે ॥ ૨૨૩.૨॥

૨૨૩.૩/૧શૂદ્રસ્તુ કર્મણા કેન બ્રાહ્મણત્વં ચ ગચ્છતિ ।
૨૨૩.૩/૨શ્રોતુમિચ્છામહે કેન બ્રાહ્મણઃ શૂદ્રતામિયાત્ ॥ ૨૨૩.૩॥

૨૨૩.૪/૧વ્યાસ ઉવાચ । હિમવચ્છિખરે રમ્યે નાનાધાતુવિભૂષિતે ।
૨૨૩.૪/૨નાનાદ્રુમલતાકીર્ણે નાનાશ્ચર્યસમન્વિતે ॥ ૨૨૩.૪॥

૨૨૩.૫/૧તત્ર સ્થિતં મહાદેવં ત્રિપુરઘ્નં ત્રિલોચનમ્ ।
૨૨૩.૫/૨શૈલરાજસુતા દેવી પ્રણિપત્ય સુરેશ્વરમ્ ॥ ૨૨૩.૫॥

૨૨૩.૬/૧ઇમં પ્રશ્નં પુરા વિપ્રા અપૃચ્છચ્ચારુલોચના ।
૨૨૩.૬/૨તદ્ અહં સમ્પ્રવક્ષ્યામિ શ઼ૃણુધ્વં મમ સત્તમાઃ ॥ ૨૨૩.૬॥

૨૨૩.૭/૧ઉમોવાચ । ભગવન્ ભગનેત્રઘ્ન પૂષ્ણો દન્તવિનાશન ।
૨૨૩.૭/૨દક્ષક્રતુહર ત્ર્યક્ષ સંશયો મે મહાન્ અયમ્ ॥ ૨૨૩.૭॥

૨૨૩.૮/૧ચાતુર્વર્ણ્યં ભગવતા પૂર્વં સૃષ્ટં સ્વયમ્ભુવા ।
૨૨૩.૮/૨કેન કર્મવિપાકેન વૈશ્યો ગચ્છતિ શૂદ્રતામ્ ॥ ૨૨૩.૮॥

૨૨૩.૯/૧વૈશ્યો વા ક્ષત્રિયઃ કેન દ્વિજો વા ક્ષત્રિયો ભવેત્ ।
૨૨૩.૯/૨પ્રતિલોમે કથં દેવ શક્યો ધર્મો નિવર્તિતુમ્ ॥ ૨૨૩.૯॥

૨૨૩.૧૦/૧કેન વા કર્મણા વિપ્રઃ શૂદ્રયોનૌ પ્રજાયતે ।
૨૨૩.૧૦/૨ક્ષત્રિયઃ શૂદ્રતામેતિ કેન વા કર્મણા વિભો ॥ ૨૨૩.૧૦॥

૨૨૩.૧૧/૧એતં મે સંશયં દેવ વદ ભૂતપતેઽનઘ ।
૨૨૩.૧૧/૨ત્રયો વર્ણાઃ પ્રકૃત્યેહ કથં બ્રાહ્મણ્યમાપ્નુયુઃ ॥ ૨૨૩.૧૧॥

૨૨૩.૧૨/૧શિવ ઉવાચ । બ્રાહ્મણ્યં દેવિ દુષ્પ્રાપં નિસર્ગાદ્ બ્રાહ્મણઃ શુભે ।
૨૨૩.૧૨/૨ક્ષત્રિયો વૈશ્યશૂદ્રૌ વા નિસર્ગાદ્ ઇતિ મે મતિઃ ॥ ૨૨૩.૧૨॥

૨૨૩.૧૩/૧કર્મણા દુષ્કૃતેનેહ સ્થાનાદ્ ભ્રશ્યતિ સ દ્વિજઃ ।
૨૨૩.૧૩/૨શ્રેષ્ઠં વર્ણમનુપ્રાપ્ય તસ્માદ્ આક્ષિપ્યતે પુનઃ ॥ ૨૨૩.૧૩॥

૨૨૩.૧૪/૧સ્થિતો બ્રાહ્મણધર્મેણ બ્રાહ્મણ્યમુપજીવતિ ।
૨૨૩.૧૪/૨ક્ષત્રિયો વાથ વૈશ્યો વા બ્રહ્મભૂયં સ ગચ્છતિ ॥ ૨૨૩.૧૪॥

૨૨૩.૧૫/૧યશ્ચ વિપ્રત્વમુત્સૃજ્ય ક્ષત્રધર્માન્ નિષેવતે ।
૨૨૩.૧૫/૨બ્રાહ્મણ્યાત્ સ પરિભ્રષ્ટઃ ક્ષત્રયોનૌ પ્રજાયતે ॥ ૨૨૩.૧૫॥

૨૨૩.૧૬/૧વૈશ્યકર્મ ચ યો વિપ્રો લોભમોહવ્યપાશ્રયઃ ।
૨૨૩.૧૬/૨બ્રાહ્મણ્યં દુર્લભં પ્રાપ્ય કરોત્યલ્પમતિઃ સદા ॥ ૨૨૩.૧૬॥

૨૨૩.૧૭/૧સ દ્વિજો વૈશ્યતામેતિ વૈશ્યો વા શૂદ્રતામિયાત્ ।
૨૨૩.૧૭/૨સ્વધર્માત્ પ્રચ્યુતો વિપ્રસ્તતઃ શૂદ્રત્વમાપ્નુયાત્ ॥ ૨૨૩.૧૭॥

૨૨૩.૧૮/૧તત્રાસૌ નિરયં પ્રાપ્તો વર્ણભ્રષ્ટો બહિષ્કૃતઃ ।
૨૨૩.૧૮/૨બ્રહ્મલોકાત્ પરિભ્રષ્ટઃ શૂદ્રયોનૌ પ્રજાયતે ॥ ૨૨૩.૧૮॥

૨૨૩.૧૯/૧ક્ષત્રિયો વા મહાભાગે વૈશ્યો વા ધર્મચારિણિ ।
૨૨૩.૧૯/૨સ્વાનિ કર્માણ્યપાકૃત્ય શૂદ્રકર્મ નિષેવતે ॥ ૨૨૩.૧૯॥

૨૨૩.૨૦/૧સ્વસ્થાનાત્ સ પરિભ્રષ્ટો વર્ણસંકરતાં ગતઃ ।
૨૨૩.૨૦/૨બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ શૂદ્રત્વં યાતિ તાદૃશઃ ॥ ૨૨૩.૨૦॥

૨૨૩.૨૧/૧યસ્તુ શૂદ્રઃ સ્વધર્મેણ જ્ઞાનવિજ્ઞાનવાન્ શુચિઃ ।
૨૨૩.૨૧/૨ધર્મજ્ઞો ધર્મનિરતઃ સ ધર્મફલમશ્નુતે ॥ ૨૨૩.૨૧॥

૨૨૩.૨૨/૧ઇદં ચૈવાપરં દેવિ બ્રહ્મણા સમુદાહૃતમ્ ।
૨૨૩.૨૨/૨અધ્યાત્મં નૈષ્ઠિકી સિદ્ધિર્ધર્મકામૈર્નિષેવ્યતે ॥ ૨૨૩.૨૨॥

૨૨૩.૨૩/૧ઉગ્રાન્નં ગર્હિતં દેવિ ગણાન્નં શ્રાદ્ધસૂતકમ્ ।
૨૨૩.૨૩/૨ઘુષ્ટાન્નં નૈવ ભોક્તવ્યં શૂદ્રાન્નં નૈવ વા ક્વચિત્ ॥ ૨૨૩.૨૩॥

૨૨૩.૨૪/૧શૂદ્રાન્નં ગર્હિતં દેવિ સદા દેવૈર્મહાત્મભિઃ ।
૨૨૩.૨૪/૨પિતામહમુખોત્સૃષ્ટં પ્રમાણમિતિ મે મતિઃ ॥ ૨૨૩.૨૪॥

૨૨૩.૨૫/૧શૂદ્રાન્નેનાવશેષેણ જઠરે મ્રિયતે દ્વિજઃ ।
૨૨૩.૨૫/૨આહિતાગ્નિસ્તથા યજ્વા સ શૂદ્રગતિભાગ્ ભવેત્ ॥ ૨૨૩.૨૫॥

૨૨૩.૨૬/૧તેન શૂદ્રાન્નશેષેણ બ્રહ્મસ્થાનાદ્ અપાકૃતઃ ।
૨૨૩.૨૬/૨બ્રાહ્મણઃ શૂદ્રતામેતિ નાસ્તિ તત્ર વિચારણા ॥ ૨૨૩.૨૬॥

૨૨૩.૨૭/૧યસ્યાન્નેનાવશેષેણ જઠરે મ્રિયતે દ્વિજઃ ।
૨૨૩.૨૭/૨તાં તાં યોનિં વ્રજેદ્ વિપ્રો યસ્યાન્નમુપજીવતિ ॥ ૨૨૩.૨૭॥

૨૨૩.૨૮/૧બ્રાહ્મણત્વં સુખં પ્રાપ્ય દુર્લભં યોઽવમન્યતે ।
૨૨૩.૨૮/૨અભોજ્યાન્નાનિ વાશ્નાતિ સ દ્વિજત્વાત્ પતેત વૈ ॥ ૨૨૩.૨૮॥

૨૨૩.૨૯/૧સુરાપો બ્રહ્મહા સ્તેયી ચૌરો ભગ્નવ્રતોઽશુચિઃ ।
૨૨૩.૨૯/૨સ્વાધ્યાયવર્જિતઃ પાપો લુબ્ધો નૈકૃતિકઃ શઠઃ ॥ ૨૨૩.૨૯॥

૨૨૩.૩૦/૧અવ્રતી વૃષલીભર્તા કુણ્ડાશી સોમવિક્રયી ।
૨૨૩.૩૦/૨વિહીનસેવી વિપ્રો હિ પતતે બ્રહ્મયોનિતઃ ॥ ૨૨૩.૩૦॥

૨૨૩.૩૧/૧ગુરુતલ્પી ગુરુદ્વેષી ગુરુકુત્સારતિશ્ચ યઃ ।
૨૨૩.૩૧/૨બ્રહ્મદ્વિડ્ વાપિ પતતિ બ્રાહ્મણો બ્રહ્મયોનિતઃ ॥ ૨૨૩.૩૧॥

૨૨૩.૩૨/૧એભિસ્તુ કર્મભિર્દેવિ શુભૈરાચરિતૈસ્તથા ।
૨૨૩.૩૨/૨શૂદ્રો બ્રાહ્મણતાં ગચ્છેદ્ વૈશ્યઃ ક્ષત્રિયતાં વ્રજેત્ ॥ ૨૨૩.૩૨॥

૨૨૩.૩૩/૧શૂદ્રઃ કર્માણિ સર્વાણિ યથાન્યાયં યથાવિધિ ।
૨૨૩.૩૩/૨સર્વાતિથ્યમુપાતિષ્ઠઞ્ શેષાન્નકૃતભોજનઃ ॥ ૨૨૩.૩૩॥

૨૨૩.૩૪/૧શુશ્રૂષાં પરિચર્યાં યો જ્યેષ્ઠવર્ણે પ્રયત્નતઃ ।
૨૨૩.૩૪/૨કુર્યાદ્ અવિમનાઃ શ્રેષ્ઠઃ સતતં સત્પથે સ્થિતઃ ॥ ૨૨૩.૩૪॥

૨૨૩.૩૫/૧દેવદ્વિજાતિસત્કર્તા સર્વાતિથ્યકૃતવ્રતઃ ।
૨૨૩.૩૫/૨ઋતુકાલાભિગામી ચ નિયતો નિયતાશનઃ ॥ ૨૨૩.૩૫॥

૨૨૩.૩૬/૧દક્ષઃ શિષ્ટજનાન્વેષી શેષાન્નકૃતભોજનઃ ।
૨૨૩.૩૬/૨વૃથા માંસં ન ભુઞ્જીત શૂદ્રો વૈશ્યત્વમ્ ઋચ્છતિ ॥ ૨૨૩.૩૬॥

૨૨૩.૩૭/૧ઋતવાગ્ અનહંવાદી નિર્દ્વન્દ્વઃ સામકોવિદઃ ।
૨૨૩.૩૭/૨યજતે નિત્યયજ્ઞૈશ્ચ સ્વાધ્યાયપરમઃ શુચિઃ ॥ ૨૨૩.૩૭॥

૨૨૩.૩૮/૧દાન્તો બ્રાહ્મણસત્કર્તા સર્વવર્ણાનસૂયકઃ ।

૨૨૩.૩૮/૨ગૃહસ્થવ્રતમાતિષ્ઠન્ દ્વિકાલકૃતભોજનઃ ॥ ૨૨૩.૩૮॥

૨૨૩.૩૯/૧શેષાશી વિજિતાહારો નિષ્કામો નિરહંવદઃ ।
૨૨૩.૩૯/૨અગ્નિહોત્રમુપાસીનો જુહ્વાનશ્ચ યથાવિધિ ॥ ૨૨૩.૩૯॥

૨૨૩.૪૦/૧સર્વાતિથ્યમુપાતિષ્ઠઞ્ શેષાન્નકૃતભોજનઃ ।
૨૨૩.૪૦/૨ત્રેતાગ્નિમાત્રવિહિતં વૈશ્યો ભવતિ ચ દ્વિજઃ ॥ ૨૨૩.૪૦॥

૨૨૩.૪૧/૧સ વૈશ્યઃ ક્ષત્રિયકુલે શુચિર્મહતિ જાયતે ।
૨૨૩.૪૧/૨સ વૈશ્યઃ ક્ષત્રિયો જાતો જન્મપ્રભૃતિ સંસ્કૃતઃ ॥ ૨૨૩.૪૧॥

૨૨૩.૪૨/૧ઉપનીતો વ્રતપરો દ્વિજો ભવતિ સંસ્કૃતઃ ।
૨૨૩.૪૨/૨દદાતિ યજતે યજ્ઞૈઃ સમૃદ્ધૈરાપ્તદક્ષિણૈઃ ॥ ૨૨૩.૪૨॥

૨૨૩.૪૩/૧અધીત્ય સ્વર્ગમન્વિચ્છંસ્ત્રેતાગ્નિશરણઃ સદા ।
૨૨૩.૪૩/૨આર્દ્રહસ્તપ્રદો નિત્યં પ્રજા ધર્મેણ પાલયન્ ॥ ૨૨૩.૪૩॥

૨૨૩.૪૪/૧સત્યઃ સત્યાનિ કુરુતે નિત્યં યઃ શુદ્ધિદર્શનઃ ।
૨૨૩.૪૪/૨ધર્મદણ્ડેન નિર્દગ્ધો ધર્મકામાર્થસાધકઃ ॥ ૨૨૩.૪૪॥

૨૨૩.૪૫/૧યન્ત્રિતઃ કાર્યકરણૈઃ ષડ્ભાગકૃતલક્ષણઃ ।
૨૨૩.૪૫/૨ગ્રામ્યધર્માન્ ન સેવેત સ્વચ્છન્દેનાર્થકોવિદઃ ॥ ૨૨૩.૪૫॥

૨૨૩.૪૬/૧ઋતુકાલે તુ ધર્માત્મા પત્નીમુપાશ્રયેત્ સદા ।
૨૨૩.૪૬/૨સદોપવાસી નિયતઃ સ્વાધ્યાયનિરતઃ શુચિઃ ॥ ૨૨૩.૪૬॥

૨૨૩.૪૭/૧વહિસ્કાન્તરિતે નિત્યં શયાનોઽસ્તિ સદા ગૃહે ।
૨૨૩.૪૭/૨સર્વાતિથ્યં ત્રિવર્ગસ્ય કુર્વાણઃ સુમનાઃ સદા ॥ ૨૨૩.૪૭॥

૨૨૩.૪૮/૧શૂદ્રાણાં ચાન્નકામાનાં નિત્યં સિદ્ધમિતિ બ્રુવન્ ।
૨૨૩.૪૮/૨સ્વાર્થાદ્ વા યદિ વા કામાન્ ન કિંચિદ્ ઉપલક્ષયેત્ ॥ ૨૨૩.૪૮॥

૨૨૩.૪૯/૧પિતૃદેવાતિથિકૃતે સાધનં કુરુતે ચ યત્ ।
૨૨૩.૪૯/૨સ્વવેશ્મનિ યથાન્યાયમુપાસ્તે ભૈક્ષ્યમેવ ચ ॥ ૨૨૩.૪૯॥

૨૨૩.૫૦/૧દ્વિકાલમગ્નિહોત્રં ચ જુહ્વાનો વૈ યથાવિધિ ।
૨૨૩.૫૦/૨ગોબ્રાહ્મણહિતાર્થાય રણે ચાભિમુખો હતઃ ॥ ૨૨૩.૫૦॥

૨૨૩.૫૧/૧ત્રેતાગ્નિમન્ત્રપૂતેન સમાવિશ્ય દ્વિજો ભવેત્ ।
૨૨૩.૫૧/૨જ્ઞાનવિજ્ઞાનસમ્પન્નઃ સંસ્કૃતો વેદપારગઃ ॥ ૨૨૩.૫૧॥

૨૨૩.૫૨/૧વૈશ્યો ભવતિ ધર્માત્મા ક્ષત્રિયઃ સ્વેન કર્મણા ।
૨૨૩.૫૨/૨એતૈઃ કર્મફલૈર્દેવિ ન્યૂનજાતિકુલોદ્ભવઃ ॥ ૨૨૩.૫૨॥

૨૨૩.૫૩/૧શૂદ્રોઽપ્યાગમસમ્પન્નો દ્વિજો ભવતિ સંસ્કૃતઃ ।
૨૨૩.૫૩/૨બ્રાહ્મણો વાપ્યસદ્વૃત્તઃ સર્વસંકરભોજનઃ ॥ ૨૨૩.૫૩॥

૨૨૩.૫૪/૧સ બ્રાહ્મણ્યં સમુત્સૃજ્ય શૂદ્રો ભવતિ તાદૃશઃ ।
૨૨૩.૫૪/૨કર્મભિઃ શુચિભિર્દેવી શુદ્ધાત્મા વિજિતેન્દ્રિયઃ ॥ ૨૨૩.૫૪॥

૨૨૩.૫૫/૧શૂદ્રોઽપિ દ્વિજવત્ સેવ્ય ઇતિ બ્રહ્માબ્રવીત્ સ્વયમ્ ।
૨૨૩.૫૫/૨સ્વભાવકર્મણા ચૈવ યત્ર શૂદ્રોઽધિતિષ્ઠતિ ॥ ૨૨૩.૫૫॥

૨૨૩.૫૬/૧વિશુદ્ધઃ સ દ્વિજાતિભ્યો વિજ્ઞેય ઇતિ મે મતિઃ ।
૨૨૩.૫૬/૨ન યોનિર્નાપિ સંસ્કારો ન શ્રુતિર્ન ચ સંતતિઃ ॥ ૨૨૩.૫૬॥

૨૨૩.૫૭/૧કારણાનિ દ્વિજત્વસ્ય વૃત્તમેવ તુ કારણમ્ ।
૨૨૩.૫૭/૨સર્વોઽયં બ્રાહ્મણો લોકે વૃત્તેન તુ વિધીયતે ॥ ૨૨૩.૫૭॥

૨૨૩.૫૮/૧વૃત્તે સ્થિતશ્ચ શૂદ્રોઽપિ બ્રાહ્મણત્વં ચ ગચ્છતિ ।
૨૨૩.૫૮/૨બ્રહ્મસ્વભાવઃ સુશ્રોણિ સમઃ સર્વત્ર મે મતઃ ॥ ૨૨૩.૫૮॥

૨૨૩.૫૯/૧નિર્ગુણં નિર્મલં બ્રહ્મ યત્ર તિષ્ઠતિ સ દ્વિજઃ ।
૨૨૩.૫૯/૨એતે યે વિમલા દેવિ સ્થાનભાવનિદર્શકાઃ ॥ ૨૨૩.૫૯॥

૨૨૩.૬૦/૧સ્વયં ચ વરદેનોક્તા બ્રહ્મણા સૃજતા પ્રજાઃ ।
૨૨૩.૬૦/૨બ્રહ્મણો હિ મહત્ ક્ષેત્રં લોકે ચરતિ પાદવત્ ॥ ૨૨૩.૬૦॥

૨૨૩.૬૧/૧યત્ તત્ર બીજં પતતિ સા કૃષિઃ પ્રેત્ય ભાવિની ।
૨૨૩.૬૧/૨સંતુષ્ટેન સદા ભાવ્યં સત્પથાલમ્બિના સદા ॥ ૨૨૩.૬૧॥

૨૨૩.૬૨/૧બ્રાહ્મં હિ માર્ગમાક્રમ્ય વર્તિતવ્યં બુભૂષતા ।
૨૨૩.૬૨/૨સંહિતાધ્યાયિના ભાવ્યં ગૃહે વૈ ગૃહમેધિના ॥ ૨૨૩.૬૨॥

૨૨૩.૬૩/૧નિત્યં સ્વાધ્યાયયુક્તેન ન ચાધ્યયનજીવિના ।
૨૨૩.૬૩/૨એવમ્ભૂતો હિ યો વિપ્રઃ સતતં સત્પથે સ્થિતઃ ॥ ૨૨૩.૬૩॥

૨૨૩.૬૪/૧આહિતાગ્નિરધીયાનો બ્રહ્મભૂયાય કલ્પતે ।
૨૨૩.૬૪/૨બ્રાહ્મણ્યં દેવિ સમ્પ્રાપ્ય રક્ષિતવ્યં યતાત્મના ॥ ૨૨૩.૬૪॥

૨૨૩.૬૫/૧યોનિપ્રતિગ્રહાદાનૈઃ કર્મભિશ્ચ શુચિસ્મિતે ।
૨૨૩.૬૫/૨એતત્ તે ગુહ્યમાખ્યાતં યથા શૂદ્રો ભવેદ્ દ્વિજઃ ।

૨૨૩.૬૫/૩બ્રાહ્મણો વા ચ્યુતો ધર્માદ્ યથા શૂદ્રત્વમાપ્નુયાત્ ॥ ૨૨૩.૬૫॥

૨૨૪.૧/૧ઉમોવાચ । ભગવન્ સર્વભૂતેશ સુરાસુરનમસ્કૃત ।
૨૨૪.૧/૨ધર્માધર્મે નૃણાં દેવ બ્રૂહિ મે સંશયં વિભો ॥ ૨૨૪.૧॥

૨૨૪.૨/૧કર્મણા મનસા વાચા ત્રિવિધૈર્દેહિનઃ સદા ।
૨૨૪.૨/૨બધ્યન્તે બન્ધનૈઃ કૈર્વા મુચ્યન્તે વા કથં વદ ॥ ૨૨૪.૨॥

૨૨૪.૩/૧કેન શીલેન વૈ દેવ કર્મણા કીદૃશેન વા ।
૨૨૪.૩/૨સમાચારૈર્ગુણૈઃ કૈર્વા સ્વર્ગં યાન્તીહ માનવાઃ ॥ ૨૨૪.૩॥

૨૨૪.૪/૧શિવ ઉવાચ । દેવિ ધર્માર્થતત્ત્વજ્ઞે ધર્મનિત્યે ઉમે સદા ।
૨૨૪.૪/૨સર્વપ્રાણિહિતઃ પ્રશ્નઃ શ્રૂયતાં બુદ્ધિવર્ધનઃ ॥ ૨૨૪.૪॥

૨૨૪.૫/૧સત્યધર્મરતાઃ શાન્તાઃ સર્વલિઙ્ગવિવર્જિતાઃ ।
૨૨૪.૫/૨નાધર્મેણ ન ધર્મેણ બધ્યન્તે છિન્નસંશયાઃ ॥ ૨૨૪.૫॥

૨૨૪.૬/૧પ્રલયોત્પત્તિતત્ત્વજ્ઞાઃ સર્વજ્ઞાઃ સર્વદર્શિનઃ ।
૨૨૪.૬/૨વીતરાગા વિમુચ્યન્તે પુરુષાઃ કર્મબન્ધનૈઃ ॥ ૨૨૪.૬॥

૨૨૪.૭/૧કર્મણા મનસા વાચા યે ન હિંસન્તિ કિંચન ।
૨૨૪.૭/૨યે ન મજ્જન્તિ કસ્મિંશ્ચિત્ તે ન બધ્નન્તિ કર્મભિઃ ॥ ૨૨૪.૭॥

૨૨૪.૮/૧પ્રાણાતિપાતાદ્ વિરતાઃ શીલવન્તો દયાન્વિતાઃ ।
૨૨૪.૮/૨તુલ્યદ્વેષ્યપ્રિયા દાન્તા મુચ્યન્તે કર્મબન્ધનૈઃ ॥ ૨૨૪.૮॥

૨૨૪.૯/૧સર્વભૂતદયાવન્તો વિશ્વાસ્યાઃ સર્વજન્તુષુ ।
૨૨૪.૯/૨ત્યક્તહિંસ્રસમાચારાસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૯॥

૨૨૪.૧૦/૧પરસ્વનિર્મમા નિત્યં પરદારવિવર્જિકાઃ ।
૨૨૪.૧૦/૨ધર્મલબ્ધાર્થભોક્તારસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૧૦॥

૨૨૪.૧૧/૧માતૃવત્ સ્વસૃવચ્ચૈવ નિત્યં દુહિતૃવચ્ચ યે ।
૨૨૪.૧૧/૨પરદારેષુ વર્તન્તે તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૧૧॥

૨૨૪.૧૨/૧સ્વદારનિરતા યે ચ ઋતુકાલાભિગામિનઃ ।
૨૨૪.૧૨/૨અગ્રામ્યસુખભોગાશ્ચ તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૧૨॥

૨૨૪.૧૩/૧સ્તૈન્યાન્ નિવૃત્તાઃ સતતં સંતુષ્ટાઃ સ્વધનેન ચ ।
૨૨૪.૧૩/૨સ્વભાગ્યાન્યુપજીવન્તિ તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૧૩॥

૨૨૪.૧૪/૧પરદારેષુ યે નિત્યં ચારિત્રાવૃતલોચનાઃ ।
૨૨૪.૧૪/૨જિતેન્દ્રિયાઃ શીલપરાસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૧૪॥

૨૨૪.૧૫/૧એષ દૈવકૃતો માર્ગઃ સેવિતવ્યઃ સદા નરૈઃ ।
૨૨૪.૧૫/૨અકષાયકૃતશ્ચૈવ માર્ગઃ સેવ્યઃ સદા બુધૈઃ ॥ ૨૨૪.૧૫॥

૨૨૪.૧૬/૧અવૃથાપકૃતશ્ચૈવ માર્ગઃ સેવ્યઃ સદા બુધૈઃ ।
૨૨૪.૧૬/૨દાનકર્મતપોયુક્તઃ શીલશૌચદયાત્મકઃ ।
૨૨૪.૧૬/૩સ્વર્ગમાર્ગમભીપ્સદ્ભિર્ન સેવ્યસ્ત્વત ઉત્તરઃ ॥ ૨૨૪.૧૬॥

૨૨૪.૧૭/૧ઉમોવાચ । વાચા તુ બધ્યતે યેન મુચ્યતે હ્યથવા પુનઃ ।
૨૨૪.૧૭/૨તાનિ કર્માણિ મે દેવ વદ ભૂતપતેઽનઘ ॥ ૨૨૪.૧૭॥

૨૨૪.૧૮/૧શિવ ઉવાચ । આત્મહેતોઃ પરાર્થે વા અધર્માશ્રિતમેવ ચ ।
૨૨૪.૧૮/૨યે મૃષા ન વદન્તીહ તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૧૮॥

૨૨૪.૧૯/૧વૃત્ત્યર્થં ધર્મહેતોર્વા કામકારાત્ તથૈવ ચ ।
૨૨૪.૧૯/૨અનૃતં યે ન ભાષન્તે તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૧૯॥

૨૨૪.૨૦/૧શ્લક્ષ્ણાં વાણીં સ્વચ્છવર્ણાં મધુરાં પાપવર્જિતામ્ ।
૨૨૪.૨૦/૨સ્વગતેનાભિભાષન્તે તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૨૦॥

૨૨૪.૨૧/૧પરુષં યે ન ભાષન્તે કટુકં નિષ્ઠુરં તથા ।
૨૨૪.૨૧/૨ન પૈશુન્યરતાઃ સન્તસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૨૧॥

૨૨૪.૨૨/૧પિશુનં ન પ્રભાષન્તે મિત્રભેદકરં તથા ।
૨૨૪.૨૨/૨પરપીડાકરં ચૈવ તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૨૨॥

૨૨૪.૨૩/૧યે વર્જયન્તિ પરુષં પરદ્રોહં ચ માનવાઃ ।
૨૨૪.૨૩/૨સર્વભૂતસમા દાન્તાસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૨૩॥

૨૨૪.૨૪/૧શઠપ્રલાપાદ્ વિરતા વિરુદ્ધપરિવર્જકાઃ ।
૨૨૪.૨૪/૨સૌમ્યપ્રલાપિનો નિત્યં તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૨૪॥

૨૨૪.૨૫/૧ન કોપાદ્ વ્યાહરન્તે યે વાચં હૃદયદારિણીમ્ ।
૨૨૪.૨૫/૨શાન્તિં વિન્દન્તિ યે ક્રુદ્ધાસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૨૫॥

૨૨૪.૨૬/૧એષ વાણીકૃતો દેવિ ધર્મઃ સેવ્યઃ સદા નરૈઃ ।
૨૨૪.૨૬/૨શુભસત્યગુણૈર્નિત્યં વર્જનીયા મૃષા બુધૈઃ ॥ ૨૨૪.૨૬॥

૨૨૪.૨૭/૧ઉમોવાચ । મનસા બધ્યતે યેન કર્મણા પુરુષઃ સદા ।

૨૨૪.૨૭/૨તન્ મે બ્રૂહિ મહાભાગ દેવદેવ પિનાકધૃક્ ॥ ૨૨૪.૨૭॥

૨૨૪.૨૮/૧મહેશ્વર ઉવાચ । માનસેનેહ ધર્મેણ સંયુક્તાઃ પુરુષાઃ સદા ।
૨૨૪.૨૮/૨સ્વર્ગં ગચ્છન્તિ કલ્યાણિ તન્ મે કીર્તયતઃ શ‍ૃણુ ॥ ૨૨૪.૨૮॥

૨૨૪.૨૯/૧દુષ્પ્રણીતેન મનસા દુષ્પ્રણીતાન્તરાકૃતિઃ ।
૨૨૪.૨૯/૨નરો બધ્યેત યેનેહ શ‍ૃણુ વા તં શુભાનને ॥ ૨૨૪.૨૯॥

૨૨૪.૩૦/૧અરણ્યે વિજને ન્યસ્તં પરસ્વં દૃશ્યતે યદા ।
૨૨૪.૩૦/૨મનસાપિ ન ગૃહ્ણન્તિ તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૦॥

૨૨૪.૩૧/૧તથૈવ પરદારાન્ યે કામવૃત્તા રહોગતાઃ ।
૨૨૪.૩૧/૨મનસાપિ ન હિંસન્તિ તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૧॥

૨૨૪.૩૨/૧શત્રું મિત્રં ચ યે નિત્યં તુલ્યેન મનસા નરાઃ ।
૨૨૪.૩૨/૨ભજન્તિ મૈત્ર્યં સંગમ્ય તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૨॥

૨૨૪.૩૩/૧શ્રુતવન્તો દયાવન્તઃ શુચયઃ સત્યસંગરાઃ ।
૨૨૪.૩૩/૨સ્વૈરર્થૈઃ પરિસંતુષ્ટાસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૩॥

૨૨૪.૩૪/૧અવૈરા યે ત્વનાયાસા મૈત્રચિત્તરતાઃ સદા ।
૨૨૪.૩૪/૨સર્વભૂતદયાવન્તસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૪॥

૨૨૪.૩૫/૧જ્ઞાતવન્તઃ ક્રિયાવન્તઃ ક્ષમાવન્તઃ સુહૃત્પ્રિયાઃ ।
૨૨૪.૩૫/૨ધર્માધર્મવિદો નિત્યં તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૫॥

૨૨૪.૩૬/૧શુભાનામશુભાનાં ચ કર્મણાં ફલસંચયે ।
૨૨૪.૩૬/૨નિરાકાઙ્ક્ષાશ્ચ યે દેવિ તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૬॥

૨૨૪.૩૭/૧પાપોપેતાન્ વર્જયન્તિ દેવદ્વિજપરાઃ સદા ।
૨૨૪.૩૭/૨સમુત્થાનમનુપ્રાપ્તાસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૨૨૪.૩૭॥

૨૨૪.૩૮/૧શુભૈઃ કર્મફલૈર્દેવિ મયૈતે પરિકીર્તિતાઃ ।
૨૨૪.૩૮/૨સ્વર્ગમાર્ગપરા ભૂયઃ કિં ત્વં શ્રોતુમિહેચ્છસિ ॥ ૨૨૪.૩૮॥

૨૨૪.૩૯/૧ઉમોવાચ । મહાન્ મે સંશયઃ કશ્ચિન્ મર્ત્યાન્ પ્રતિ મહેશ્વર ।
૨૨૪.૩૯/૨તસ્માત્ ત્વં નિપુણેનાદ્ય મમ વ્યાખ્યાતુમર્હસિ ॥ ૨૨૪.૩૯॥

૨૨૪.૪૦/૧કેનાયુર્લભતે દીર્ઘં કર્મણા પુરુષઃ પ્રભો ।
૨૨૪.૪૦/૨તપસા વાપિ દેવેશ કેનાયુર્લભતે મહત્ ॥ ૨૨૪.૪૦॥

૨૨૪.૪૧/૧ક્ષીણાયુઃ કેન ભવતિ કર્મણા ભુવિ માનવઃ ।
૨૨૪.૪૧/૨વિપાકં કર્મણાં દેવ વક્તુમર્હસ્યનિન્દિત ॥ ૨૨૪.૪૧॥

૨૨૪.૪૨/૧અપરે ચ મહાભાગ્યા મન્દભાગ્યાસ્તથા પરે ।
૨૨૪.૪૨/૨અકુલીનાઃ કુલીનાશ્ચ સમ્ભવન્તિ તથા પરે ॥ ૨૨૪.૪૨॥

૨૨૪.૪૩/૧દુર્દર્શાઃ કેચિદ્ આભાન્તિ નરાઃ કાષ્ઠમયા ઇવ ।
૨૨૪.૪૩/૨પ્રિયદર્શાસ્તથા ચાન્યે દર્શનાદ્ એવ માનવાઃ ॥ ૨૨૪.૪૩॥

૨૨૪.૪૪/૧દુષ્પ્રજ્ઞાઃ કેચિદ્ આભાન્તિ કેચિદ્ આભાન્તિ પણ્ડિતાઃ ।
૨૨૪.૪૪/૨મહાપ્રજ્ઞાસ્તથા ચાન્યે જ્ઞાનવિજ્ઞાનભાવિનઃ ॥ ૨૨૪.૪૪॥

૨૨૪.૪૫/૧અલ્પવાચાસ્તથા કેચિન્ મહાવાચાસ્તથા પરે ।
૨૨૪.૪૫/૨દૃશ્યન્તે પુરુષા દેવ તતો વ્યાખ્યાતુમર્હસિ ॥ ૨૨૪.૪૫॥

૨૨૪.૪૬/૧શિવ ઉવાચ । હન્ત તેઽહં પ્રવક્ષ્યામિ દેવિ કર્મફલોદયમ્ ।
૨૨૪.૪૬/૨મર્ત્યલોકે નરઃ સર્વો યેન સ્વં ફલમશ્નુતે ॥ ૨૨૪.૪૬॥

૨૨૪.૪૭/૧પ્રાણાતિપાતી યોગીન્દ્રો દણ્ડહસ્તો નરઃ સદા ।
૨૨૪.૪૭/૨નિત્યમુદ્યતશસ્ત્રશ્ચ હન્તિ ભૂતગણાન્ નરઃ ॥ ૨૨૪.૪૭॥

૨૨૪.૪૮/૧નિર્દયઃ સર્વભૂતેભ્યો નિત્યમુદ્વેગકારકઃ ।
૨૨૪.૪૮/૨અપિ કીટપતંગાનામશરણ્યઃ સુનિર્ઘૃણઃ ॥ ૨૨૪.૪૮॥

૨૨૪.૪૯/૧એવમ્ભૂતો નરો દેવિ નિરયં પ્રતિપદ્યતે ।
૨૨૪.૪૯/૨વિપરીતસ્તુ ધર્માત્મા સ્વરૂપેણાભિજાયતે ॥ ૨૨૪.૪૯॥

૨૨૪.૫૦/૧નિરયં યાતિ હિંસાત્મા યાતિ સ્વર્ગમહિંસકઃ ।
૨૨૪.૫૦/૨યાતનાં નિરયે રૌદ્રાં સકૃચ્છ્રાં લભતે નરઃ ॥ ૨૨૪.૫૦॥

૨૨૪.૫૧/૧યઃ કશ્ચિન્ નિરયાત્ તસ્માત્ સમુત્તરતિ કર્હિચિત્ ।
૨૨૪.૫૧/૨માનુષ્યં લભતે વાપિ હીનાયુસ્તત્ર જાયતે ॥ ૨૨૪.૫૧॥

૨૨૪.૫૨/૧પાપેન કર્મણા દેવિ યુક્તો હિંસાદિભિર્યતઃ ।
૨૨૪.૫૨/૨અહિતઃ સર્વભૂતાનાં હીનાયુરુપજાયતે ॥ ૨૨૪.૫૨॥

૨૨૪.૫૩/૧શુભેન કર્મણા દેવિ પ્રાણિઘાતવિવર્જિતઃ ।
૨૨૪.૫૩/૨શુભેન કર્મણા દેવિ પ્રાણિઘાતવિવર્જિતઃ ।
૨૨૪.૫૩/૩નિક્ષિપ્તશસ્ત્રો નિર્દણ્ડો ન હિંસતિ કદાચન ॥ ૨૨૪.૫૩॥

૨૨૪.૫૪/૧ન ઘાતયતિ નો હન્તિ ઘ્નન્તં નૈવાનુમોદતે ।

૨૨૪.૫૪/૨સર્વભૂતેષુ સસ્નેહો યથાત્મનિ તથા પરે ॥ ૨૨૪.૫૪॥

૨૨૪.૫૫/૧ઈદૃશઃ પુરુષો નિત્યં દેવિ દેવત્વમશ્નુતે ।
૨૨૪.૫૫/૨ઉપપન્નાન્ સુખાન્ ભોગાન્ સદાશ્નાતિ મુદા યુતઃ ॥ ૨૨૪.૫૫॥

૨૨૪.૫૬/૧અથ ચેન્ માનુષે લોકે કદાચિદ્ ઉપપદ્યતે ।
૨૨૪.૫૬/૨એષ દીર્ઘાયુષાં માર્ગઃ સુવૃત્તાનાં સુકર્મણામ્ ।
૨૨૪.૫૬/૩પ્રાણિહિંસાવિમોક્ષેણ બ્રહ્મણા સમુદીરિતઃ ॥ ૨૨૪.૫૬॥

૨૨૫.૧/૧ઉમોવાચ । કિંશીલઃ કિંસમાચારઃ પુરુષઃ કૈશ્ચ કર્મભિઃ ।
૨૨૫.૧/૨સ્વર્ગં સમભિપદ્યેત સમ્પ્રદાનેન કેન વા ॥ ૨૨૫.૧॥

૨૨૫.૨/૧મહેશ્વર ઉવાચ । દાતા બ્રાહ્મણસત્કર્તા દીનાર્તકૃપણાદિષુ ।
૨૨૫.૨/૨ભક્ષભોજ્યાન્નપાનાનાં વાસસાં ચ મહામતિઃ ॥ ૨૨૫.૨॥

૨૨૫.૩/૧પ્રતિશ્રયાન્ સભાઃ કુર્યાત્ પ્રપાઃ પુષ્કરિણીસ્તથા ।
૨૨૫.૩/૨નિત્યકાદીનિ કર્માણિ કરોતિ પ્રયતઃ શુચિઃ ॥ ૨૨૫.૩॥

૨૨૫.૪/૧આસનં શયનં યાનં ગૃહં રત્નં ધનં તથા ।
૨૨૫.૪/૨સસ્યજાતાનિ સર્વાણિ સક્ષેત્રાણ્યથ યોષિતઃ ॥ ૨૨૫.૪॥

૨૨૫.૫/૧સુપ્રશાન્તમના નિત્યં યઃ પ્રયચ્છતિ માનવઃ ।
૨૨૫.૫/૨એવમ્ભૂતો નરો દેવિ દેવલોકેઽભિજાયતે ॥ ૨૨૫.૫॥

૨૨૫.૬/૧તત્રોષ્ય સુચિરં કાલં ભુક્ત્વા ભોગાન્ અનુત્તમાન્ ।
૨૨૫.૬/૨સહાપ્સરોભિર્મુદિતો રમિત્વા નન્દનાદિષુ ॥ ૨૨૫.૬॥

૨૨૫.૭/૧તસ્માચ્ચ્યુતો મહેશાનિ માનુષેષૂપજાયતે ।
૨૨૫.૭/૨મહાભાગકુલે દેવિ ધનધાન્યસમાચિતે ॥ ૨૨૫.૭॥

૨૨૫.૮/૧તત્ર કામગુણૈઃ સર્વૈઃ સમુપેતો મુદાન્વિતઃ ।
૨૨૫.૮/૨મહાકાર્યો મહાભોગો ધની ભવતિ માનવઃ ॥ ૨૨૫.૮॥

૨૨૫.૯/૧એતે દેવિ મહાભાગાઃ પ્રાણિનો દાનશાલિનઃ ।
૨૨૫.૯/૨બ્રહ્મણા વૈ પુરા પ્રોક્તાઃ સર્વસ્ય પ્રિયદર્શનાઃ ॥ ૨૨૫.૯॥

૨૨૫.૧૦/૧અપરે માનવા દેવિ પ્રદાનકૃપણા દ્વિજાઃ ।
૨૨૫.૧૦/૨યેઽન્નાનિ ન પ્રયચ્છન્તિ વિદ્યમાનેઽપ્યબુદ્ધયઃ ॥ ૨૨૫.૧૦॥

૨૨૫.૧૧/૧દીનાન્ધકૃપણાન્ દૃષ્ટ્વા ભિક્ષુકાન્ અતિથીન્ અપિ ।
૨૨૫.૧૧/૨યાચ્યમાના નિવર્તન્તે જિહ્વાલોભસમન્વિતાઃ ॥ ૨૨૫.૧૧॥

૨૨૫.૧૨/૧ન ધનાનિ ન વાસાંસિ ન ભોગાન્ ન ચ કાઞ્ચનમ્ ।
૨૨૫.૧૨/૨ન ગાશ્ચ નાન્નવિકૃતિં પ્રયચ્છન્તિ કદાચન ॥ ૨૨૫.૧૨॥

૨૨૫.૧૩/૧અપ્રલુબ્ધાશ્ચ યે લુબ્ધા નાસ્તિકા દાનવર્જિતઃ ।
૨૨૫.૧૩/૨એવમ્ભૂતા નરા દેવિ નિરયં યાન્ત્યબુદ્ધયઃ ॥ ૨૨૫.૧૩॥

૨૨૫.૧૪/૧તે વૈ મનુષ્યતાં યાન્તિ યદા કાલસ્ય પર્યયાત્ ।
૨૨૫.૧૪/૨ધનરિક્તે કુલે જન્મ લભન્તે સ્વલ્પબુદ્ધયઃ ॥ ૨૨૫.૧૪॥

૨૨૫.૧૫/૧ક્ષુત્પિપાસાપરીતાશ્ચ સર્વલોકબહિષ્કૃતાઃ ।
૨૨૫.૧૫/૨નિરાશાઃ સર્વભોગેભ્યો જીવન્ત્યધર્મજીવિકાઃ ॥ ૨૨૫.૧૫॥

૨૨૫.૧૬/૧અલ્પભોગકુલે જાતા અલ્પભોગરતા નરાઃ ।
૨૨૫.૧૬/૨અનેન કર્મણા દેવિ ભવન્ત્યધનિનો નરાઃ ॥ ૨૨૫.૧૬॥

૨૨૫.૧૭/૧અપરે દમ્ભિનો નિત્યં માનિનઃ પરતો રતાઃ ।
૨૨૫.૧૭/૨આસનાર્હસ્ય યે પીઠં ન યચ્છન્ત્યલ્પચેતસઃ ॥ ૨૨૫.૧૭॥

૨૨૫.૧૮/૧માર્ગાર્હસ્ય ચ યે માર્ગં ન પ્રયચ્છન્ત્યબુદ્ધયઃ ।
૨૨૫.૧૮/૨અર્ઘાર્હાન્ ન ચ સંસ્કારૈરર્ચયન્તિ યથાવિધિ ॥ ૨૨૫.૧૮॥

૨૨૫.૧૯/૧પાદ્યમાચમનીયં વા પ્રયચ્છન્ત્યભિબુદ્ધયઃ ।
૨૨૫.૧૯/૨શુભં ચાભિમતં પ્રેમ્ણા ગુરું નાભિવદન્તિ યે ॥ ૨૨૫.૧૯॥

૨૨૫.૨૦/૧અભિમાનપ્રવૃદ્ધેન લોભેન સમમાસ્થિતાઃ ।
૨૨૫.૨૦/૨સમ્માન્યાંશ્ચાવમન્યન્તે વૃદ્ધાન્ પરિભવન્તિ ચ ॥ ૨૨૫.૨૦॥

૨૨૫.૨૧/૧એવંવિધા નરા દેવિ સર્વે નિરયગામિનઃ ।
૨૨૫.૨૧/૨તે ચેદ્ યદિ નરાસ્તસ્માન્ નિરયાદ્ ઉત્તરન્તિ ચ ॥ ૨૨૫.૨૧॥

૨૨૫.૨૨/૧વર્ષપૂગૈસ્તતો જન્મ લભન્તે કુત્સિતે કુલે ।
૨૨૫.૨૨/૨શ્વપાકપુલ્કસાદીનાં કુત્સિતાનામચેતસામ્ ॥ ૨૨૫.૨૨॥

૨૨૫.૨૩/૧કુલેષુ તેઽભિજાયન્તે ગુરુવૃદ્ધોપતાપિનઃ ।
૨૨૫.૨૩/૨ન દમ્ભી ન ચ માની યો દેવતાતિથિપૂજકઃ ॥ ૨૨૫.૨૩॥

૨૨૫.૨૪/૧લોકપૂજ્યો નમસ્કર્તા પ્રસૂતો મધુરં વચઃ ।
૨૨૫.૨૪/૨સર્વકર્મપ્રિયકરઃ સર્વભૂતપ્રિયઃ સદા ॥ ૨૨૫.૨૪॥

૨૨૫.૨૫/૧અદ્વેષી સુમુખઃ શ્લક્ષ્ણઃ સ્નિગ્ધવાણીપ્રદઃ સદા ।

૨૨૫.૨૫/૨સ્વાગતેનૈવ સર્વેષાં ભૂતાનામવિહિંસકઃ ॥ ૨૨૫.૨૫॥

૨૨૫.૨૬/૧યથાર્થં સત્ક્રિયાપૂર્વમર્ચયન્ન્ અવતિષ્ઠતે ।
૨૨૫.૨૬/૨માર્ગાર્હાય દદન્ માર્ગં ગુરુમભ્યર્ચયન્ સદા ॥ ૨૨૫.૨૬॥

૨૨૫.૨૭/૧અતિથિપ્રગ્રહરતસ્તથાભ્યાગતપૂજકઃ ।
૨૨૫.૨૭/૨એવમ્ભૂતો નરો દેવિ સ્વર્ગતિં પ્રતિપદ્યતે ॥ ૨૨૫.૨૭॥

૨૨૫.૨૮/૧તતો માનુષ્યમાસાદ્ય વિશિષ્ટકુલજો ભવેત્ ।
૨૨૫.૨૮/૨તત્રાસૌ વિપુલૈર્ભોગૈઃ સર્વરત્નસમાયુતઃ ॥ ૨૨૫.૨૮॥

૨૨૫.૨૯/૧યથાર્હદાતા ચાર્હેષુ ધર્મચર્યાપરો ભવેત્ ।
૨૨૫.૨૯/૨સમ્મતઃ સર્વભૂતાનાં સર્વલોકનમસ્કૃતઃ ॥ ૨૨૫.૨૯॥

૨૨૫.૩૦/૧સ્વકર્મફલમાપ્નોતિ સ્વયમેવ નરઃ સદા ।
૨૨૫.૩૦/૨એષ ધર્મો મયા પ્રોક્તો વિધાત્રા સ્વયમીરિતઃ ॥ ૨૨૫.૩૦॥

૨૨૫.૩૧/૧યસ્તુ રૌદ્રસમાચારઃ સર્વસત્ત્વભયંકરઃ ।
૨૨૫.૩૧/૨હસ્તાભ્યાં યદિ વા પદ્ભ્યાં રજ્જ્વા દણ્ડેન વા પુનઃ ॥ ૨૨૫.૩૧॥

૨૨૫.૩૨/૧લોષ્ટૈઃ સ્તમ્ભૈરુપાયૈર્વા જન્તૂન્ બાધેત શોભને ।
૨૨૫.૩૨/૨હિંસાર્થં નિષ્કૃતિપ્રજ્ઞઃ પ્રોદ્વેજયતિ ચૈવ હિ ॥ ૨૨૫.૩૨॥

૨૨૫.૩૩/૧ઉપક્રામતિ જન્તૂંશ્ચ ઉદ્વેગજનનઃ સદા ।
૨૨૫.૩૩/૨એવં શીલસમાચારો નિરયં પ્રતિપદ્યતે ॥ ૨૨૫.૩૩॥

૨૨૫.૩૪/૧સ ચેન્ મનુષ્યતાં ગચ્છેદ્ યદિ કાલસ્ય પર્યયાત્ ।
૨૨૫.૩૪/૨બહ્વાબાધાપરિક્લિષ્ટે કુલે જયતિ સોઽધમે ॥ ૨૨૫.૩૪॥

૨૨૫.૩૫/૧લોકદ્વિષ્ટોઽધમઃ પુંસાં સ્વયં કર્મકૃતૈઃ ફલૈઃ ।
૨૨૫.૩૫/૨એષ દેવિ મનુષ્યેષુ બોદ્ધવ્યો જ્ઞાતિબન્ધુષુ ॥ ૨૨૫.૩૫॥

૨૨૫.૩૬/૧અપરઃ સર્વભૂતાનિ દયાવાન્ અનુપશ્યતિ ।
૨૨૫.૩૬/૨મૈત્રી દૃષ્ટિઃ પિતૃસમો નિર્વૈરો નિયતેન્દ્રિયઃ ॥ ૨૨૫.૩૬॥

૨૨૫.૩૭/૧નોદ્વેજયતિ ભૂતાનિ ન ચ હન્તિ દયાપરઃ ।
૨૨૫.૩૭/૨હસ્તપાદૈશ્ચ નિયતૈર્વિશ્વાસ્યઃ સર્વજન્તુષુ ॥ ૨૨૫.૩૭॥

૨૨૫.૩૮/૧ન રજ્જ્વા ન ચ દણ્ડેન ન લોષ્ટૈર્નાયુધેન ચ ।
૨૨૫.૩૮/૨ઉદ્વેજયતિ ભૂતાનિ શુભકર્મા દયાપરઃ ॥ ૨૨૫.૩૮॥

૨૨૫.૩૯/૧એવં શીલસમાચારઃ સ્વર્ગે સમુપજાયતે ।
૨૨૫.૩૯/૨તત્રાસૌ ભવને દિવ્યે મુદા વસતિ દેવવત્ ॥ ૨૨૫.૩૯॥

૨૨૫.૪૦/૧સ ચેત્ સ્વર્ગક્ષયાન્ મર્ત્યો મનુષ્યેષૂપજાયતે ।
૨૨૫.૪૦/૨અલ્પાયાસો નિરાતઙ્કઃ સ જાતઃ સુખમેધતે ॥ ૨૨૫.૪૦॥

૨૨૫.૪૧/૧સુખભાગી નિરાયાસો નિરુદ્વેગઃ સદા નરઃ ।
૨૨૫.૪૧/૨એષ દેવિ સતાં માર્ગો બાધા યત્ર ન વિદ્યતે ॥ ૨૨૫.૪૧॥

૨૨૫.૪૨/૧ઉમોવાચ । ઇમે મનુષ્યા દૃશ્યન્તે ઊહાપોહવિશારદાઃ ।
૨૨૫.૪૨/૨જ્ઞાનવિજ્ઞાનસમ્પન્નાઃ પ્રજ્ઞાવન્તોઽર્થકોવિદાઃ ॥ ૨૨૫.૪૨॥

૨૨૫.૪૩/૧દુષ્પ્રજ્ઞાશ્ચાપરે દેવ જ્ઞાનવિજ્ઞાનવર્જિતાઃ ।
૨૨૫.૪૩/૨કેન કર્મવિપાકેન પ્રજ્ઞાવાન્ પુરુષો ભવેત્ ॥ ૨૨૫.૪૩॥

૨૨૫.૪૪/૧અલ્પપ્રજ્ઞો વિરૂપાક્ષ કથં ભવતિ માનવઃ ।
૨૨૫.૪૪/૨એવં ત્વં સંશયં છિન્ધિ સર્વધર્મભૃતાં વર ॥ ૨૨૫.૪૪॥

૨૨૫.૪૫/૧જાત્યન્ધાશ્ચાપરે દેવ રોગાર્તાશ્ચાપરે તથા ।
૨૨૫.૪૫/૨નરાઃ ક્લીબાશ્ચ દૃશ્યન્તે કારણં બ્રૂહિ તત્ર વૈ ॥ ૨૨૫.૪૫॥

૨૨૫.૪૬/૧મહેશ્વર ઉવાચ । બ્રાહ્મણાન્ વેદવિદુષઃ સિદ્ધાન્ ધર્મવિદસ્તથા ।
૨૨૫.૪૬/૨પરિપૃચ્છન્ત્યહરહઃ કુશલાકુશલં સદા ॥ ૨૨૫.૪૬॥

૨૨૫.૪૭/૧વર્જયન્તોઽશુભં કર્મ સેવમાનાઃ શુભં તથા ।
૨૨૫.૪૭/૨લભન્તે સ્વર્ગતિં નિત્યમિહ લોકે યથાસુખમ્ ॥ ૨૨૫.૪૭॥

૨૨૫.૪૮/૧સ ચેન્ મનુષ્યતાં યાતિ મેધાવી તત્ર જાયતે ।
૨૨૫.૪૮/૨શ્રુતં યજ્ઞાનુગં યસ્ય કલ્યાણમુપજાયતે ॥ ૨૨૫.૪૮॥

૨૨૫.૪૯/૧પરદારેષુ યે ચાપિ ચક્ષુર્દુષ્ટં પ્રયુઞ્જતે ।
૨૨૫.૪૯/૨તેન દુષ્ટસ્વભાવેન જાત્યન્ધાસ્તે ભવન્તિ હિ ॥ ૨૨૫.૪૯॥

૨૨૫.૫૦/૧મનસાપિ પ્રદુષ્ટેન નગ્નાં પશ્યન્તિ યે સ્ત્રિયમ્ ।
૨૨૫.૫૦/૨રોગાર્તાસ્તે ભવન્તીહ નરા દુષ્કૃતકારિણઃ ॥ ૨૨૫.૫૦॥

૨૨૫.૫૧/૧યે તુ મૂઢા દુરાચારા વિયોનૌ મૈથુને રતાઃ ।
૨૨૫.૫૧/૨પુરુષેષુ સુદુષ્પ્રજ્ઞાઃ ક્લીબત્વમુપયાન્તિ તે ॥ ૨૨૫.૫૧॥

૨૨૫.૫૨/૧પશૂંશ્ચ યે વૈ બધ્નન્તિ યે ચૈવ ગુરુતલ્પગાઃ ।
૨૨૫.૫૨/૨પ્રકીર્ણમૈથુના યે ચ ક્લીબા જાયન્તિ વૈ નરાઃ ॥ ૨૨૫.૫૨॥

૨૨૫.૫૩/૧ઉમોવાચ । અવદ્યં કિં તુ વૈ કર્મ નિરવદ્યં તથૈવ ચ ।
૨૨૫.૫૩/૨શ્રેયઃ કુર્વન્ અવાપ્નોતિ માનવો દેવસત્તમ ॥ ૨૨૫.૫૩॥

૨૨૫.૫૪/૧મહેશ્વર ઉવાચ । શ્રેયાંસં માર્ગમન્વિચ્છન્ સદા યઃ
પૃચ્છતિ દ્વિજાન્ ।
૨૨૫.૫૪/૨ધર્માન્વેષી ગુણાકાઙ્ક્ષી સ સ્વર્ગં સમુપાશ્નુતે ॥ ૨૨૫.૫૪॥

૨૨૫.૫૫/૧યદિ માનુષ્યતાં દેવિ કદાચિત્ સંનિયચ્છતિ ।
૨૨૫.૫૫/૨મેધાવી ધારણાયુક્તઃ પ્રાજ્ઞસ્તત્રાપિ જાયતે ॥ ૨૨૫.૫૫॥

૨૨૫.૫૬/૧એષ દેવિ સતાં ધર્મો ગન્તવ્યો ભૂતિકારકઃ ।
૨૨૫.૫૬/૨નૃણાં હિતાર્થાય સદા મયા ચૈવમુદાહૃતઃ ॥ ૨૨૫.૫૬॥

૨૨૫.૫૭/૧ઉમોવાચ । અપરે સ્વલ્પવિજ્ઞાના ધર્મવિદ્વેષિણો નરાઃ ।
૨૨૫.૫૭/૨બ્રાહ્મણાન્ વેદવિદુષો નેચ્છન્તિ પરિસર્પિતુમ્ ॥ ૨૨૫.૫૭॥

૨૨૫.૫૮/૧વ્રતવન્તો નરાઃ કેચિચ્છ્રદ્ધાદમપરાયણાઃ ।
૨૨૫.૫૮/૨અવ્રતા ભ્રષ્ટનિયમાસ્તથાન્યે રાક્ષસોપમાઃ ॥ ૨૨૫.૫૮॥

૨૨૫.૫૯/૧યજ્વાનશ્ચ તથૈવાન્યે નિર્હોમાશ્ચ તથા પરે ।
૨૨૫.૫૯/૨કેન કર્મવિપાકેન ભવન્તીહ વદસ્વ મે ॥ ૨૨૫.૫૯॥

૨૨૫.૬૦/૧મહેશ્વર ઉવાચ । આગમાલોકધર્માણાં મર્યાદાઃ પૂર્વનિર્મિતાઃ ।
૨૨૫.૬૦/૨પ્રમાણેનાનુવર્તન્તે દૃશ્યન્તે હ દૃઢવ્રતાઃ ॥ ૨૨૫.૬૦॥

૨૨૫.૬૧/૧અધર્મં ધર્મમિત્યાહુર્યે ચ મોહવશં ગતાઃ ।
૨૨૫.૬૧/૨અવ્રતા નષ્ટમર્યાદાસ્તે નરા બ્રહ્મરાક્ષસાઃ ॥ ૨૨૫.૬૧॥

૨૨૫.૬૨/૧યે વૈ કાલકૃતોદ્યોગાત્ સમ્ભવન્તીહ માનવાઃ ।
૨૨૫.૬૨/૨નિર્હોમા નિર્વષટ્કારાસ્તે ભવન્તિ નરાધમાઃ ॥ ૨૨૫.૬૨॥

૨૨૫.૬૩/૧એષ દેવિ મયા સર્વ+ ।સંશયચ્છેદનાય તે ।
૨૨૫.૬૩/૨કુશલાકુશલો નૃણાં વ્યાખ્યાતો ધર્મસાગરઃ ॥ ૨૨૫.૬૩॥

૨૨૬.૧/૧વ્યાસ ઉવાચ । શ્રુત્વૈવં સા જગન્માતા ભર્તુર્વચનમાદિતઃ ।
૨૨૬.૧/૨હૃષ્ટા બભૂવ સુપ્રીતા વિસ્મિતા ચ તદા દ્વિજાઃ ॥ ૨૨૬.૧॥

૨૨૬.૨/૧યે તત્રાસન્ મુનિવરાસ્ત્રિપુરારેઃ સમીપતઃ ।
૨૨૬.૨/૨તીર્થયાત્રાપ્રસઙ્ગેન ગતાસ્તસ્મિન્ ગિરૌ દ્વિજાઃ ॥ ૨૨૬.૨॥

૨૨૬.૩/૧તેઽપિ સમ્પૂજ્ય તં દેવં શૂલપાણિં પ્રણમ્ય ચ ।
૨૨૬.૩/૨પપ્રચ્છુઃ સંશયં ચૈવ લોકાનાં હિતકામ્યયા ॥ ૨૨૬.૩॥

૨૨૬.૪/૧મુનય ઊચુઃ । ત્રિલોચન નમસ્તેઽસ્તુ દક્ષક્રતુવિનાશન ।
૨૨૬.૪/૨પૃચ્છામસ્ત્વાં જગન્નાથ સંશયં હૃદિ સંસ્થિતમ્ ॥ ૨૨૬.૪॥

૨૨૬.૫/૧સંસારેઽસ્મિન્ મહાઘોરે ભૈરવે લોમહર્ષણે ।
૨૨૬.૫/૨ભ્રમન્તિ સુચિરં કાલં પુરુષાશ્ચાલ્પમેધસઃ ॥ ૨૨૬.૫॥

૨૨૬.૬/૧યેનોપાયેન મુચ્યન્તે જન્મસંસારબન્ધનાત્ ।
૨૨૬.૬/૨બ્રૂહિ તચ્છ્રોતુમિચ્છામઃ પરં કૌતૂહલં હિ નઃ ॥ ૨૨૬.૬॥

૨૨૬.૭/૧મહેશ્વર ઉવાચ । કર્મપાશનિબદ્ધાનાં નરાણાં દુઃખભાગિનામ્ ।
૨૨૬.૭/૨નાન્યોપાયં પ્રપશ્યામિ વાસુદેવાત્ પરં દ્વિજાઃ ॥ ૨૨૬.૭॥

૨૨૬.૮/૧યે પૂજયન્તિ તં દેવં શઙ્ખચક્રગદાધરમ્ ।
૨૨૬.૮/૨વાઙ્મનઃકર્મભિઃ સમ્યક્ તે યાન્તિ પરમાં ગતિમ્ ॥ ૨૨૬.૮॥

૨૨૬.૯/૧કિં તેષાં જીવિતેનેહ પશુવચ્ચેષ્ટિતેન ચ ।
૨૨૬.૯/૨યેષાં ન પ્રવણં ચિત્તં વાસુદેવે જગન્મયે ॥ ૨૨૬.૯॥

૨૨૬.૧૦/૧ઋષય ઊચુઃ । પિનાકિન્ ભગનેત્રઘ્ન સર્વલોકનમસ્કૃત ।
૨૨૬.૧૦/૨માહાત્મ્યં વાસુદેવસ્ય શ્રોતુમિચ્છામ શંકર ॥ ૨૨૬.૧૦॥

૨૨૬.૧૧/૧મહેશ્વર ઉવાચ । પિતામહાદ્ અપિ વરઃ શાશ્વતઃ પુરુષો હરિઃ ।
૨૨૬.૧૧/૨કૃષ્ણો જામ્બૂનદાભાસો વ્યભ્રે સૂર્ય ઇવોદિતઃ ॥ ૨૨૬.૧૧॥

૨૨૬.૧૨/૧દશબાહુર્મહાતેજા દેવતારિનિષૂદનઃ ।
૨૨૬.૧૨/૨શ્રીવત્સાઙ્કો હૃષીકેશઃ સર્વદૈવતયૂથપઃ ॥ ૨૨૬.૧૨॥

૨૨૬.૧૩/૧બ્રહ્મા તસ્યોદરભવસ્તસ્યાહં ચ શિરોભવઃ ।
૨૨૬.૧૩/૨શિરોરુહેભ્યો જ્યોતીંષિ રોમભ્યશ્ચ સુરાસુરાઃ ॥ ૨૨૬.૧૩॥

૨૨૬.૧૪/૧ઋષયો દેહસમ્ભૂતાસ્તસ્ય લોકાશ્ચ શાશ્વતાઃ ।
૨૨૬.૧૪/૨પિતામહગૃહં સાક્ષાત્ સર્વદેવગૃહં ચ સઃ ॥ ૨૨૬.૧૪॥

૨૨૬.૧૫/૧સોઽસ્યાઃ પૃથિવ્યાઃ કૃત્સ્નાયાઃ સ્રષ્ટા ત્રિભુવનેશ્વરઃ ।
૨૨૬.૧૫/૨સંહર્તા ચૈવ ભૂતાનાં સ્થાવરસ્ય ચરસ્ય ચ ॥ ૨૨૬.૧૫॥

૨૨૬.૧૬/૧સ હિ દેવદેવઃ સાક્ષાદ્ દેવનાથઃ પરંતપઃ ।
૨૨૬.૧૬/૨સર્વજ્ઞઃ સર્વસંસ્રષ્ટા સર્વગઃ સર્વતોમુખઃ ॥ ૨૨૬.૧૬॥

૨૨૬.૧૭/૧ન તસ્માત્ પરમં ભૂતં ત્રિષુ લોકેષુ કિંચન ।

૨૨૬.૧૭/૨સનાતનો મહાભાગો ગોવિન્દ ઇતિ વિશ્રુતઃ ॥ ૨૨૬.૧૭॥

૨૨૬.૧૮/૧સ સર્વાન્ પાર્થિવાન્ સંખ્યે ઘાતયિષ્યતિ માનદઃ ।

૨૨૬.૧૮/૨સુરકાર્યાર્થમુત્પન્નો માનુષ્યં વપુરાસ્થિતઃ ॥ ૨૨૬.૧૮॥

૨૨૬.૧૯/૧નહિ દેવગણાઃ શક્તાસ્ત્રિવિક્રમવિનાકૃતાઃ ।

૨૨૬.૧૯/૨ભુવને દેવકાર્યાણિ કર્તું નાયકવર્જિતઃ ॥ ૨૨૬.૧૯॥

૨૨૬.૨૦/૧નાયકઃ સર્વભૂતાનાં સર્વભૂતનમસ્કૃતઃ ।

૨૨૬.૨૦/૨એતસ્ય દેવનાથસ્ય કાર્યસ્ય ચ પરસ્ય ચ ॥ ૨૨૬.૨૦॥

૨૨૬.૨૧/૧બ્રહ્મભૂતસ્ય સતતં બ્રહ્મર્ષિશરણસ્ય ચ ।

૨૨૬.૨૧/૨બ્રહ્મા વસતિ નાભિસ્થઃ શરીરેઽહં ચ સંસ્થિતઃ ॥ ૨૨૬.૨૧॥

૨૨૬.૨૨/૧સર્વાઃ સુખં સંસ્થિતાશ્ચ શરીરે તસ્ય દેવતાઃ ।

૨૨૬.૨૨/૨સ દેવઃ પુણ્ડરીકાક્ષઃ શ્રીગર્ભઃ શ્રીસહોષિતઃ ॥ ૨૨૬.૨૨॥

૨૨૬.૨૩/૧શાર્ઙ્ગચક્રાયુધઃ ખડ્ગી સર્વનાગરિપુધ્વજઃ ।

૨૨૬.૨૩/૨ઉત્તમેન સુશીલેન શૌચેન ચ દમેન ચ ॥ ૨૨૬.૨૩॥

૨૨૬.૨૪/૧પરાક્રમેણ વીર્યેણ વપુષા દર્શનેન ચ ।

૨૨૬.૨૪/૨આરોહણપ્રમાણેન વીર્યેણાર્જવસમ્પદા ॥ ૨૨૬.૨૪॥

૨૨૬.૨૫/૧આનૃશંસ્યેન રૂપેણ બલેન ચ સમન્વિતઃ ।

૨૨૬.૨૫/૨અસ્ત્રૈઃ સમુદિતઃ સર્વૈર્દિવ્યૈરદ્ભુતદર્શનૈઃ ॥ ૨૨૬.૨૫॥

૨૨૬.૨૬/૧યોગમાયાસહસ્રાક્ષો વિરૂપાક્ષો મહામનાઃ ।

૨૨૬.૨૬/૨વાચા મિત્રજનશ્લાઘી જ્ઞાતિબન્ધુજનપ્રિયઃ ॥ ૨૨૬.૨૬॥

૨૨૬.૨૭/૧ક્ષમાવાંશ્ચાનહંવાદી સ દેવો બ્રહ્મદાયકઃ ।

૨૨૬.૨૭/૨ભયહર્તા ભયાર્તાનાં મિત્રાનન્દવિવર્ધનઃ ॥ ૨૨૬.૨૭॥

૨૨૬.૨૮/૧શરણ્યઃ સર્વભૂતાનાં દીનાનાં પાલને રતઃ ।

૨૨૬.૨૮/૨શ્રુતવાન્ અથ સમ્પન્નઃ સર્વભૂતનમસ્કૃતઃ ॥ ૨૨૬.૨૮॥

૨૨૬.૨૯/૧સમાશ્રિતાનામુપકૃચ્છત્રૂણાં ભયકૃત્ તથા ।

૨૨૬.૨૯/૨નીતિજ્ઞો નીતિસમ્પન્નો બ્રહ્મવાદી જિતેન્દ્રિયઃ ॥ ૨૨૬.૨૯॥

૨૨૬.૩૦/૧ભવાર્થમેવ દેવાનાં બુદ્ધ્યા પરમયા યુતઃ ।

૨૨૬.૩૦/૨પ્રાજાપત્યે શુભે માર્ગે માનવે ધર્મસંસ્કૃતે ॥ ૨૨૬.૩૦॥

૨૨૬.૩૧/૧સમુત્પત્સ્યતિ ગોવિન્દો મનોર્વંશે મહાત્મનઃ ।
૨૨૬.૩૧/૨અંશો નામ મનોઃ પુત્રો હ્યન્તર્ધામા તતઃ પરમ્ ॥ ૨૨૬.૩૧॥

૨૨૬.૩૨/૧અન્તર્ધામ્નો હવિર્ધામા પ્રજાપતિરનિન્દિતઃ ।
૨૨૬.૩૨/૨પ્રાચીનબર્હિર્ભવિતા હવિર્ધામ્નઃ સુતો દ્વિજાઃ ॥ ૨૨૬.૩૨॥

૨૨૬.૩૩/૧તસ્ય પ્રચેતઃપ્રમુખા ભવિષ્યન્તિ દશાત્મજાઃ ।
૨૨૬.૩૩/૨પ્રાચેતસસ્તથા દક્ષો ભવિતેહ પ્રજાપતિઃ ॥ ૨૨૬.૩૩॥

૨૨૬.૩૪/૧દાક્ષાયણ્યસ્તથાદિત્યો મનુરાદિત્યતસ્તતઃ ।
૨૨૬.૩૪/૨મનોશ્ચ વંશજ ઇલા સુદ્યુમ્નશ્ચ ભવિષ્યતિ ॥ ૨૨૬.૩૪॥

૨૨૬.૩૫/૧બુધાત્ પુરૂરવાશ્ચાપિ તસ્માદ્ આયુર્ભવિષ્યતિ ।
૨૨૬.૩૫/૨નહુષો ભવિતા તસ્માદ્ યયાતિસ્તસ્ય ચાત્મજઃ ॥ ૨૨૬.૩૫॥

૨૨૬.૩૬/૧યદુસ્તસ્માન્ મહાસત્ત્વઃ ક્રોષ્ટા તસ્માદ્ ભવિષ્યતિ ।
૨૨૬.૩૬/૨ક્રોષ્ટુશ્ચૈવ મહાન્ પુત્રો વૃજિનીવાન્ ભવિષ્યતિ ॥ ૨૨૬.૩૬॥

૨૨૬.૩૭/૧વૃજિનીવતશ્ચ ભવિતા ઉષઙ્ગુરપરાજિતઃ ।
૨૨૬.૩૭/૨ઉષઙ્ગોર્ભવિતા પુત્રઃ શૂરશ્ચિત્રરથસ્તથા ॥ ૨૨૬.૩૭॥

૨૨૬.૩૮/૧તસ્ય ત્વવરજઃ પુત્રઃ શૂરો નામ ભવિષ્યતિ ।
૨૨૬.૩૮/૨તેષાં વિખ્યાતવીર્યાણાં ચારિત્રગુણશાલિનામ્ ॥ ૨૨૬.૩૮॥

૨૨૬.૩૯/૧યજ્વિનાં ચ વિશુદ્ધાનાં વંશે બ્રાહ્મણસત્તમાઃ ।
૨૨૬.૩૯/૨સ શૂરઃ ક્ષત્રિયશ્રેષ્ઠો મહાવીર્યો મહાયશાઃ ॥ ૨૨૬.૩૯॥

૨૨૬.૪૦/૧સ્વવંશવિસ્તારકરં જનયિષ્યતિ માનદમ્ ।
૨૨૬.૪૦/૨વસુદેવમિતિ ખ્યાતં પુત્રમાનકદુન્દુભિમ્ ॥ ૨૨૬.૪૦॥

૨૨૬.૪૧/૧તસ્ય પુત્રશ્ચતુર્બાહુર્વાસુદેવો ભવિષ્યતિ ।
૨૨૬.૪૧/૨દાતા બ્રાહ્મણસત્કર્તા બ્રહ્મભૂતો દ્વિજપ્રિયઃ ॥ ૨૨૬.૪૧॥

૨૨૬.૪૨/૧રાજ્ઞો બદ્ધાન્ સ સર્વાન્ વૈ મોક્ષયિષ્યતિ યાદવઃ ।
૨૨૬.૪૨/૨જરાસંધં તુ રાજાનં નિર્જિત્ય ગિરિગહ્વરે ॥ ૨૨૬.૪૨॥

૨૨૬.૪૩/૧સર્વપાર્થિવરત્નાઢ્યો ભવિષ્યતિ સ વીર્યવાન્ ।
૨૨૬.૪૩/૨પૃથિવ્યામપ્રતિહતો વીર્યેણાપિ ભવિષ્યતિ ॥ ૨૨૬.૪૩॥

૨૨૬.૪૪/૧વિક્રમેણ ચ સમ્પન્નઃ સર્વપાર્થિવપાર્થિવઃ ।
૨૨૬.૪૪/૨શૂરઃ સંહનનો ભૂતો દ્વારકાયાં વસન્ પ્રભુઃ ॥ ૨૨૬.૪૪॥

૨૨૬.૪૫/૧પાલયિષ્યતિ ગાં દેવીં વિનિર્જિત્ય દુરાશયાન્ ।
૨૨૬.૪૫/૨તં ભવન્તઃ સમાસાદ્ય બ્રાહ્મણૈરર્હણૈર્વરૈઃ ॥ ૨૨૬.૪૫॥

૨૨૬.૪૬/૧અર્ચયન્તુ યથાન્યાયં બ્રહ્માણમિવ શાશ્વતમ્ ।
૨૨૬.૪૬/૨યો હિ માં દ્રષ્ટુમિચ્છેત બ્રહ્માણં ચ પિતામહમ્ ॥ ૨૨૬.૪૬॥

૨૨૬.૪૭/૧દ્રષ્ટવ્યસ્તેન ભગવાન્ વાસુદેવઃ પ્રતાપવાન્ ।
૨૨૬.૪૭/૨દૃષ્ટે તસ્મિન્ન્ અહં દૃષ્ટો ન મેઽત્રાસ્તિ વિચારણા ॥ ૨૨૬.૪૭॥

૨૨૬.૪૮/૧પિતામહો વાસુદેવ ઇતિ વિત્ત તપોધનાઃ ।
૨૨૬.૪૮/૨સ યસ્ય પુણ્ડરીકાક્ષઃ પ્રીતિયુક્તો ભવિષ્યતિ ॥ ૨૨૬.૪૮॥

૨૨૬.૪૯/૧તસ્ય દેવગણઃ પ્રીતો બ્રહ્મપૂર્વો ભવિષ્યતિ ।
૨૨૬.૪૯/૨યસ્તુ તં માનવો લોકે સંશ્રયિષ્યતિ કેશવમ્ ॥ ૨૨૬.૪૯॥

૨૨૬.૫૦/૧તસ્ય કીર્તિર્યશશ્ચૈવ સ્વર્ગશ્ચૈવ ભવિષ્યતિ ।
૨૨૬.૫૦/૨ધર્માણાં દેશિકઃ સાક્ષાદ્ ભવિષ્યતિ સ ધર્મવાન્ ॥ ૨૨૬.૫૦॥

૨૨૬.૫૧/૧ધર્મવિદ્ભિઃ સ દેવેશો નમસ્કાર્યઃ સદાચ્યુતઃ ।
૨૨૬.૫૧/૨ધર્મ એવ સદા હિ સ્યાદ્ અસ્મિન્ન્ અભ્યર્ચિતે વિભૌ ॥ ૨૨૬.૫૧॥

૨૨૬.૫૨/૧સ હિ દેવો મહાતેજાઃ પ્રજાહિતચિકીર્ષયા ।
૨૨૬.૫૨/૨ધર્માર્થં પુરુષવ્યાઘ્ર ઋષિકોટીઃ સસર્જ ચ ॥ ૨૨૬.૫૨॥

૨૨૬.૫૩/૧તાઃ સૃષ્ટાસ્તેન વિધિના પર્વતે ગન્ધમાદને ।
૨૨૬.૫૩/૨સનત્કુમારપ્રમુખાસ્તિષ્ઠન્તિ તપસાન્વિતાઃ ॥ ૨૨૬.૫૩॥

૨૨૬.૫૪/૧તસ્માત્ સ વાગ્મી ધર્મજ્ઞો નમસ્યો દ્વિજપુંગવાઃ ।
૨૨૬.૫૪/૨વન્દિતો હિ સ વન્દેત માનિતો માનયીત ચ ॥ ૨૨૬.૫૪॥

૨૨૬.૫૫/૧દૃષ્ટઃ પશ્યેદ્ અહરહઃ સંશ્રિતઃ પ્રતિસંશ્રયેત્ ।
૨૨૬.૫૫/૨અર્ચિતશ્ચાર્ચયેન્ નિત્યં સ દેવો દ્વિજસત્તમાઃ ॥ ૨૨૬.૫૫॥

૨૨૬.૫૬/૧એવં તસ્યાનવદ્યસ્ય વિષ્ણોર્વૈ પરમં તપઃ ।
૨૨૬.૫૬/૨આદિદેવસ્ય મહતઃ સજ્જનાચરિતં સદા ॥ ૨૨૬.૫૬॥

૨૨૬.૫૭/૧ભુવનેઽભ્યર્ચિતો નિત્યં દેવૈરપિ સનાતનઃ ।
૨૨૬.૫૭/૨અભયેનાનુરૂપેણ પ્રપદ્ય તમનુવ્રતાઃ ॥ ૨૨૬.૫૭॥

૨૨૬.૫૮/૧કર્મણા મનસા વાચા સ નમસ્યો દ્વિજૈઃ સદા ।
૨૨૬.૫૮/૨યત્નવદ્ભિરુપસ્થાય દ્રષ્ટવ્યો દેવકીસુતઃ ॥ ૨૨૬.૫૮॥

૨૨૬.૫૯/૧એષ વૈ વિહિતો માર્ગો મયા વૈ મુનિસત્તમાઃ ।
૨૨૬.૫૯/૨તં દૃષ્ટ્વા સર્વદેવેશં દૃષ્ટાઃ સ્યુઃ સુરસત્તમાઃ ॥ ૨૨૬.૫૯॥

૨૨૬.૬૦/૧મહાવરાહં તં દેવં સર્વલોકપિતામહમ્ ।
૨૨૬.૬૦/૨અહં ચૈવ નમસ્યામિ નિત્યમેવ જગત્પતિમ્ ॥ ૨૨૬.૬૦॥

૨૨૬.૬૧/૧તત્ર ચ ત્રિતયં દૃષ્ટં ભવિષ્યતિ ન સંશયઃ ।
૨૨૬.૬૧/૨સમસ્તા હિ વયં દેવાસ્તસ્ય દેહે વસામહે ॥ ૨૨૬.૬૧॥

૨૨૬.૬૨/૧તસ્યૈવ ચાગ્રજો ભ્રાતા સિતાદ્રિનિચયપ્રભઃ ।
૨૨૬.૬૨/૨હલી બલ ઇતિ ખ્યાતો ભવિષ્યતિ ધરાધરઃ ॥ ૨૨૬.૬૨॥

૨૨૬.૬૩/૧ત્રિશિરાસ્તસ્ય દેવસ્ય દૃષ્ટોઽનન્ત ઇતિ પ્રભોઃ ।
૨૨૬.૬૩/૨સુપર્ણો યસ્ય વીર્યેણ કશ્યપસ્યાત્મજો બલી ॥ ૨૨૬.૬૩॥

૨૨૬.૬૪/૧અન્તં નૈવાશકદ્ દ્રષ્ટું દેવસ્ય પરમાત્મનઃ ।
૨૨૬.૬૪/૨સ ચ શેષો વિચરતે પરયા વૈ મુદા યુતઃ ॥ ૨૨૬.૬૪॥

૨૨૬.૬૫/૧અન્તર્વસતિ ભોગેન પરિરભ્ય વસુંધરામ્ ।
૨૨૬.૬૫/૨ય એષ વિષ્ણુઃ સોઽનન્તો ભગવાન્ વસુધાધરઃ ॥ ૨૨૬.૬૫॥

૨૨૬.૬૬/૧યો રામઃ સ હૃષીકેશોઽચ્યુતઃ સર્વધરાધરઃ ।
૨૨૬.૬૬/૨તાવુભૌ પુરુષવ્યાઘ્રૌ દિવ્યૌ દિવ્યપરાક્રમૌ ॥ ૨૨૬.૬૬॥

૨૨૬.૬૭/૧દ્રષ્ટવ્યૌ માનનીયૌ ચ ચક્રલાઙ્ગલધારિણૌ ।
૨૨૬.૬૭/૨એષ વોઽનુગ્રહઃ પ્રોક્તો મયા પુણ્યસ્તપોધનાઃ ।
૨૨૬.૬૭/૩તદ્ ભવન્તો યદુશ્રેષ્ઠં પૂજયેયુઃ પ્રયત્નતઃ ॥ ૨૨૬.૬૭॥

૨૨૭.૧/૧મુનય ઊચુઃ । અહો કૃષ્ણસ્ય માહાત્મ્યં શ્રુતમસ્માભિરદ્ભુતમ્ ।
૨૨૭.૧/૨સર્વપાપહરં પુણ્યં ધન્યં સંસારનાશનમ્ ॥ ૨૨૭.૧॥

૨૨૭.૨/૧સમ્પૂજ્ય વિધિવદ્ ભક્ત્યા વાસુદેવં મહામુને ।
૨૨૭.૨/૨કાં ગતિં યાન્તિ મનુજા વાસુદેવાર્ચને રતાઃ ॥ ૨૨૭.૨॥

૨૨૭.૩/૧કિં પ્રાપ્નુવન્તિ તે મોક્ષં કિં વા સ્વર્ગં મહામુને ।
૨૨૭.૩/૨અથવા કિં મુનિશ્રેષ્ઠ પ્રાપ્નુવન્ત્યુભયં ફલમ્ ॥ ૨૨૭.૩॥

૨૨૭.૪/૧છેત્તુમર્હસિ સર્વજ્ઞ સંશયં નો હૃદિ સ્થિતમ્ ।
૨૨૭.૪/૨છેત્તા નાન્યોઽસ્તિ લોકેઽસ્મિંસ્ત્વદૃતે મુનિસત્તમ ॥ ૨૨૭.૪॥

૨૨૭.૫/૧વ્યાસ ઉવાચ । સાધુ સાધુ મુનિશ્રેષ્ઠા ભવદ્ભિર્યદ્ ઉદાહૃતમ્ ।
૨૨૭.૫/૨શ ૃણુધ્વમાનુપૂર્વ્યેણ વૈષ્ણવાનાં સુખાવહમ્ ॥ ૨૨૭.૫॥

૨૨૭.૬/૧દીક્ષામાત્રેણ કૃષ્ણસ્ય નરા મોક્ષં વ્રજન્તિ વૈ ।
૨૨૭.૬/૨કિં પુનર્યે સદા ભક્ત્યા પૂજયન્ત્યચ્યુતં દ્વિજાઃ ॥ ૨૨૭.૬॥

૨૨૭.૭/૧ન તેષાં દુર્લભઃ સ્વર્ગો મોક્ષશ્ચ મુનિસત્તમાઃ ।
૨૨૭.૭/૨લભન્તે વૈષ્ણવાઃ કામાન્ યાન્ યાન્ વાઞ્છન્તિ દુર્લભાન્ ॥ ૨૨૭.૭॥

૨૨૭.૮/૧રત્નપર્વતમારુહ્ય નરો રત્નં યથાદદેત્ ।
૨૨૭.૮/૨સ્વેચ્છયા મુનિશાર્દૂલાસ્તથા કૃષ્ણાન્ મનોરથાન્ ॥ ૨૨૭.૮॥

૨૨૭.૯/૧કલ્પવૃક્ષં સમાસાદ્ય ફલાનિ સ્વેચ્છયા યથા ।
૨૨૭.૯/૨ગૃહ્ણાતિ પુરુષો વિપ્રાસ્તથા કૃષ્ણાન્ મનોરથાન્ ॥ ૨૨૭.૯॥

૨૨૭.૧૦/૧શ્રદ્ધયા વિધિવત્ પૂજ્ય વાસુદેવં જગદ્ગુરુમ્ ।
૨૨૭.૧૦/૨ધર્માર્થકામમોક્ષાણાં પ્રાપ્નુવન્તિ નરાઃ ફલમ્ ॥ ૨૨૭.૧૦॥

૨૨૭.૧૧/૧આરાધ્ય તં જગન્નાથં વિશુદ્ધેનાન્તરાત્મના ।
૨૨૭.૧૧/૨પ્રાપ્નુવન્તિ નરાઃ કામાન્ સુરાણામપિ દુર્લભાન્ ॥ ૨૨૭.૧૧॥

૨૨૭.૧૨/૧યેઽર્ચયન્તિ સદા ભક્ત્યા વાસુદેવાખ્યમવ્યયમ્ ।
૨૨૭.૧૨/૨ન તેષાં દુર્લભં કિંચિદ્ વિદ્યતે ભુવનત્રયે ॥ ૨૨૭.૧૨॥

૨૨૭.૧૩/૧ધન્યાસ્તે પુરુષા લોકે યેઽર્ચયન્તિ સદા હરિમ્ ।
૨૨૭.૧૩/૨સર્વપાપહરં દેવં સર્વકામફલપ્રદમ્ ॥ ૨૨૭.૧૩॥

૨૨૭.૧૪/૧બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ સ્ત્રિયઃ શૂદ્રાન્ત્યજાતયઃ ।
૨૨૭.૧૪/૨સમ્પૂજ્ય તં સુરવરં પ્રાપ્નુવન્તિ પરાં ગતિમ્ ॥ ૨૨૭.૧૪॥

૨૨૭.૧૫/૧તસ્માચ્છૃણુધ્વં મુનયો યત્ પૃચ્છત મમાનઘાઃ ।
૨૨૭.૧૫/૨પ્રવક્ષ્યામિ સમાસેન ગતિં તેષાં મહાત્મનામ્ ॥ ૨૨૭.૧૫॥

૨૨૭.૧૬/૧ત્યક્ત્વા માનુષ્યકં દેહં રોગાયતનમધ્રુવમ્ ।
૨૨૭.૧૬/૨જરામરણસંયુક્તં જલબુદ્બુદસંનિભમ્ ॥ ૨૨૭.૧૬॥

૨૨૭.૧૭/૧માંસશોણિતદુર્ગન્ધં વિષ્ઠામૂત્રાદિભિર્યુતમ્ ।
૨૨૭.૧૭/૨અસ્થિસ્થૂણમમેધ્યં ચ સ્નાયુચર્મશિરાન્વિતમ્ ॥ ૨૨૭.૧૭॥

૨૨૭.૧૮/૧કામગેન વિમાનેન દિવ્યગન્ધર્વનાદિના ।
૨૨૭.૧૮/૨તરુણાદિત્યવર્ણેન કિઙ્કિણીજાલમાલિના ॥ ૨૨૭.૧૮॥

૨૨૭.૧૯/૧ઉપગીયમાના ગન્ધર્વૈરપ્સરોભિરલંકૃતાઃ ।
૨૨૭.૧૯/૨વ્રજન્તિ લોકપાલાનાં ભવનં તુ પૃથક્ પૃથક્ ॥ ૨૨૭.૧૯॥

૨૨૭.૨૦/૧મન્વન્તરપ્રમાણં તુ ભુક્ત્વા કાલં પૃથક્ પૃથક્ ।
૨૨૭.૨૦/૨ભુવનાનિ પૃથક્ તેષાં સર્વભોગૈરલંકૃતાઃ ॥ ૨૨૭.૨૦॥

૨૨૭.૨૧/૧તતોઽન્તરિક્ષં લોકં તે યાન્તિ સર્વસુખપ્રદમ્ ।
૨૨૭.૨૧/૨તત્ર ભુક્ત્વા વરાન્ ભોગાન્ દશમન્વન્તરં દ્વિજાઃ ॥ ૨૨૭.૨૧॥

૨૨૭.૨૨/૧તસ્માદ્ ગન્ધર્વલોકં તુ યાન્તિ વૈ વૈષ્ણવા દ્વિજાઃ ।
૨૨૭.૨૨/૨વિંશન્મન્વન્તરં કાલં તત્ર ભુક્ત્વા મનોરમાન્ ॥ ૨૨૭.૨૨॥

૨૨૭.૨૩/૧ભોગાન્ આદિત્યલોકં તુ તસ્માદ્ યાન્તિ સુપૂજિતાઃ ।
૨૨૭.૨૩/૨ત્રિંશન્મન્વન્તરં તત્ર ભોગાન્ ભુક્ત્વાતિદૈવતાન્ ॥ ૨૨૭.૨૩॥

૨૨૭.૨૪/૧તસ્માદ્ વ્રજન્તિ તે વિપ્રાશ્ચન્દ્રલોકં સુખપ્રદમ્ ।
૨૨૭.૨૪/૨મન્વન્તરાણાં તે તત્ર ચત્વારિંશદ્ ગુણાન્વિતમ્ ॥ ૨૨૭.૨૪॥

૨૨૭.૨૫/૧કાલં ભુક્ત્વા શુભાન્ ભોગાઞ્ જરામરણવર્જિતાઃ ।
૨૨૭.૨૫/૨તસ્માન્ નક્ષત્રલોકં તુ વિમાનૈઃ સમલંકૃતમ્ ॥ ૨૨૭.૨૫॥

૨૨૭.૨૬/૧વ્રજન્તિ તે મુનિશ્રેષ્ઠા ગુણૈઃ સર્વૈરલંકૃતાઃ ।
૨૨૭.૨૬/૨મન્વન્તરાણાં પઞ્ચાશદ્ ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ॥ ૨૨૭.૨૬॥

૨૨૭.૨૭/૧તસ્માદ્ વ્રજન્તિ તે વિપ્રા દેવલોકં સુદુર્લભમ્ ।
૨૨૭.૨૭/૨ષષ્ટિમન્વન્તરં યાવત્ તત્ર ભુક્ત્વા સુદુર્લભાન્ ॥ ૨૨૭.૨૭॥

૨૨૭.૨૮/૧ભોગાન્ નાનાવિધાન્ વિપ્રા ઋગ્દ્વ્યષ્ટકસમન્વિતાન્ ।
૨૨૭.૨૮/૨શક્રલોકં પુનસ્તસ્માદ્ ગચ્છન્તિ સુરપૂજિતાઃ ॥ ૨૨૭.૨૮॥

૨૨૭.૨૯/૧મન્વન્તરાણાં તત્રૈવ ભુક્ત્વા કાલં ચ સપ્તતિમ્ ।
૨૨૭.૨૯/૨ભોગાન્ ઉચ્ચાવચાન્ દિવ્યાન્ મનસઃ પ્રીતિવર્ધનાન્ ॥ ૨૨૭.૨૯॥

૨૨૭.૩૦/૧તસ્માદ્ વ્રજન્તિ તે લોકં પ્રાજાપત્યમનુત્તમમ્ ।
૨૨૭.૩૦/૨ભુક્ત્વા તત્રેપ્સિતાન્ ભોગાન્ સર્વકામગુણાન્વિતાન્ ॥ ૨૨૭.૩૦॥

૨૨૭.૩૧/૧મન્વન્તરમશીતિં ચ કાલં સર્વસુખપ્રદમ્ ।

૨૨૭.૩૧/૨તસ્માત્ પૈતામહં લોકં યાન્તિ તે વૈષ્ણવા દ્વિજાઃ ॥ ૨૨૭.૩૧॥

૨૨૭.૩૨/૧મન્વન્તરાણાં નવતિ ક્રીડિત્વા તત્ર વૈ સુખમ્ ।
૨૨૭.૩૨/૨ઇહાગત્ય પુનસ્તસ્માદ્ વિપ્રાણાં પ્રવરે કુલે ॥ ૨૨૭.૩૨॥

૨૨૭.૩૩/૧જાયન્તે યોગિનો વિપ્રા વેદશાસ્ત્રાર્થપારગાઃ ।
૨૨૭.૩૩/૨એવં સર્વેષુ લોકેષુ ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ॥ ૨૨૭.૩૩॥

૨૨૭.૩૪/૧ઇહાગત્ય પુનર્યાન્તિ ઉપર્યુપરિ ચ ક્રમાત્ ।
૨૨૭.૩૪/૨સમ્ભવે સમ્ભવે તે તુ શતવર્ષં દ્વિજોત્તમાઃ ॥ ૨૨૭.૩૪॥

૨૨૭.૩૫/૧ભુક્ત્વા યથેપ્સિતાન્ ભોગાન્ યાન્તિ લોકાન્તરં તતઃ ।
૨૨૭.૩૫/૨દશજન્મ યદા તેષાં ક્રમેણૈવં પ્રપૂર્યતે ॥ ૨૨૭.૩૫॥

૨૨૭.૩૬/૧તદા લોકં હરેર્દિવ્યં બ્રહ્મલોકાદ્ વ્રજન્તિ તે ।
૨૨૭.૩૬/૨ગત્વા તત્રાક્ષયાન્ ભોગાન્ ભુક્ત્વા સર્વગુણાન્વિતાન્ ॥ ૨૨૭.૩૬॥

૨૨૭.૩૭/૧મન્વન્તરશતં યાવજ્જન્મમૃત્યુવિવર્જિતાઃ ।
૨૨૭.૩૭/૨ગચ્છન્તિ ભુવનં પશ્ચાદ્ વારાહસ્ય દ્વિજોત્તમાઃ ॥ ૨૨૭.૩૭॥

૨૨૭.૩૮/૧દિવ્યદેહાઃ કુણ્ડલિનો મહાકાયા મહાબલાઃ ।
૨૨૭.૩૮/૨ક્રીડન્તિ તત્ર વિપ્રેન્દ્રાઃ કૃત્વા રૂપં ચતુર્ભુજમ્ ॥ ૨૨૭.૩૮॥

૨૨૭.૩૯/૧દશ કોટિસહસ્રાણિ વર્ષાણાં દ્વિજસત્તમાઃ ।
૨૨૭.૩૯/૨તિષ્ઠન્તિ શાશ્વતે ભાવે સર્વૈર્દેવૈર્નમસ્કૃતાઃ ॥ ૨૨૭.૩૯॥

૨૨૭.૪૦/૧તતો યાન્તિ તુ તે ધીરા નરસિંહગૃહં દ્વિજાઃ ।
૨૨૭.૪૦/૨ક્રીડન્તે તત્ર મુદિતા વર્ષકોટ્યયુતાનિ ચ ॥ ૨૨૭.૪૦॥

૨૨૭.૪૧/૧તદન્તે વૈષ્ણવં યાન્તિ પુરં સિદ્ધનિષેવિતમ્ ।
૨૨૭.૪૧/૨ક્રીડન્તે તત્ર સૌખ્યેન વર્ષાણામયુતાનિ ચ ॥ ૨૨૭.૪૧॥

૨૨૭.૪૨/૧બ્રહ્મલોકે પુનર્વિપ્રા ગચ્છન્તિ સાધકોત્તમાઃ ।
૨૨૭.૪૨/૨તત્ર સ્થિત્વા ચિરં કાલં વર્ષકોટિશતાન્ બહૂન્ ॥ ૨૨૭.૪૨॥

૨૨૭.૪૩/૧નારાયણપુરં યાન્તિ તતસ્તે સાધકેશ્વરાઃ ।
૨૨૭.૪૩/૨ભુક્ત્વા ભોગાંશ્ચ વિવિધાન્ વર્ષકોટ્યર્બુદાનિ ચ ॥ ૨૨૭.૪૩॥

૨૨૭.૪૪/૧અનિરુદ્ધપુરં પશ્ચાદ્ દિવ્યરૂપા મહાબલાઃ ।
૨૨૭.૪૪/૨ગચ્છન્તિ સાધકવરાઃ સ્તૂયમાનાઃ સુરાસુરૈઃ ॥ ૨૨૭.૪૪॥

૨૨૭.૪૫/૧તત્ર કોટિસહસ્રાણિ વર્ષાણાં ચ ચતુર્દશ ।
૨૨૭.૪૫/૨તિષ્ઠન્તિ વૈષ્ણવાસ્તત્ર જરામરણવર્જિતાઃ ॥ ૨૨૭.૪૫॥

૨૨૭.૪૬/૧પ્રદ્યુમ્નસ્ય પુરં પશ્ચાદ્ ગચ્છન્તિ વિગતજ્વરાઃ ।
૨૨૭.૪૬/૨તત્ર તિષ્ઠન્તિ તે વિપ્રા લક્ષકોટિશતત્રયમ્ ॥ ૨૨૭.૪૬॥

૨૨૭.૪૭/૧સ્વચ્છન્દગામિનો હૃષ્ટા બલશક્તિસમન્વિતાઃ ।
૨૨૭.૪૭/૨ગચ્છન્તિ યોગિનઃ પશ્ચાદ્ યત્ર સંકર્ષણઃ પ્રભુઃ ॥ ૨૨૭.૪૭॥

૨૨૭.૪૮/૧તત્રોષિત્વા ચિરં કાલં ભુક્ત્વા ભોગાન્ સહસ્રશઃ ।
૨૨૭.૪૮/૨વિશન્તિ વાસુદેવૈતિ વિરૂપાખ્યે નિરઞ્જને ॥ ૨૨૭.૪૮॥

૨૨૭.૪૯/૧વિનિર્મુક્તાઃ પરે તત્ત્વે જરામરણવર્જિતે ।
૨૨૭.૪૯/૨તત્ર ગત્વા વિમુક્તાસ્તે ભવેયુર્નાત્ર સંશયઃ ॥ ૨૨૭.૪૯॥

૨૨૭.૫૦/૧એવં ક્રમેણ ભુક્તિં તે પ્રાપ્નુવન્તિ મનીષિણઃ ।
૨૨૭.૫૦/૨મુક્તિં ચ મુનિશાર્દૂલા વાસુદેવાર્ચને રતાઃ ॥ ૨૨૭.૫૦॥

૨૨૮.૧/૧વ્યાસ ઉવાચ । એકાદશ્યામુભે પક્ષે નિરાહારઃ સમાહિતઃ ।
૨૨૮.૧/૨સ્નાત્વા સમ્યગ્ વિધાનેન ધૌતવાસા જિતેન્દ્રિયઃ ॥ ૨૨૮.૧॥

૨૨૮.૨/૧સમ્પૂજ્ય વિધિવદ્ વિષ્ણું શ્રદ્ધયા સુસમાહિતઃ ।
૨૨૮.૨/૨પુષ્પૈર્ગન્ધૈસ્તથા દીપૈર્ધૂપૈર્નૈવેદ્યકૈસ્તથા ॥ ૨૨૮.૨॥

૨૨૮.૩/૧ઉપહારૈર્બહુવિધૈર્જપ્યૈર્હોમપ્રદક્ષિણૈઃ ।
૨૨૮.૩/૨સ્તોત્રૈર્નાનાવિધૈર્દિવ્યૈર્ગીતવાદ્યૈર્મનોહરૈઃ ॥ ૨૨૮.૩॥

૨૨૮.૪/૧દણ્ડવત્પ્રણિપાતૈશ્ચ જયશબ્દૈસ્તથોત્તમૈઃ ।
૨૨૮.૪/૨એવં સમ્પૂજ્ય વિધિવદ્ રાત્રૌ કૃત્વા પ્રજાગરમ્ ॥ ૨૨૮.૪॥

૨૨૮.૫/૧કથાં વા ગીતિકાં વિષ્ણોર્ગાયન્ વિષ્ણુપરાયણઃ ।
૨૨૮.૫/૨યાતિ વિષ્ણોઃ પરં સ્થાનં નરો નાસ્ત્યત્ર સંશયઃ ॥ ૨૨૮.૫॥

૨૨૮.૬/૧મુનય ઊચુઃ । પ્રજાગરે ગીતિકાયાઃ ફલં વિષ્ણોર્મહામુને ।
૨૨૮.૬/૨બ્રૂહિ તચ્છ્રોતુમિચ્છામઃ પરં કૌતૂહલં હિ નઃ ॥ ૨૨૮.૬॥

૨૨૮.૭/૧વ્યાસ ઉવાચ । શ‍ૃણુધ્વં મુનિશાર્દૂલાઃ પ્રવક્ષ્યામ્યનુપૂર્વશઃ ।
૨૨૮.૭/૨ગીતિકાયાઃ ફલં વિષ્ણોર્જાગરે યદ્ ઉદાહૃતમ્ ॥ ૨૨૮.૭॥

૨૨૮.૮/૧અવન્તી નામ નગરી બભૂવ ભુવિ વિશ્રુતા ।
૨૨૮.૮/૨તત્રાસ્તે ભગવાન્ વિષ્ણુઃ શઙ્ખચક્રગદાધરઃ ॥ ૨૨૮.૮॥

૨૨૮.૯/૧તસ્યા નગર્યાઃ પર્યન્તે ચાણ્ડાલો ગીતિકોવિદઃ ।
૨૨૮.૯/૨સદ્વૃત્ત્યોત્પાદિતધનો ભૃત્યાનાં ભરણે રતઃ ॥ ૨૨૮.૯ ॥

૨૨૮.૧૦/૧વિષ્ણુભક્તઃ સ ચાણ્ડાલો માસિ માસિ દૃઢવ્રતઃ ।
૨૨૮.૧૦/૨એકાદશ્યાં સમાગમ્ય સોપવાસોऽથ ગાયતિ ॥ ૨૨૮.૧૦ ॥

૨૨૮.૧૧/૧ગીતિકા વિષ્ણુનામાઙ્કાઃ પ્રાદુર્ભાવસમાશ્રિતાઃ ।
૨૨૮.૧૧/૨ગાન્ધારષડ્જનૈષાદ+ ।સ્વરપઞ્ચમધૈવતૈઃ ॥ ૨૨૮.૧૧ ॥

૨૨૮.૧૨/૧રાત્રિજાગરણે વિષ્ણું ગાથાભિરુપગાયતિ ।
૨૨૮.૧૨/૨પ્રભાતે ચ પ્રણમ્યેશં દ્વાદશ્યાં ગૃહમેત્ય ચ ॥ ૨૨૮.૧૨ ॥

૨૨૮.૧૩/૧જામાતૃભાગિનેયાંશ્ચ ભોજયિત્વા સકન્યકાઃ ।
૨૨૮.૧૩/૨તતઃ સપરિવારસ્તુ પશ્ચાદ્ ભુઙ્ક્તે દ્વિજોત્તમાઃ ॥ ૨૨૮.૧૩ ॥

૨૨૮.૧૪/૧એવં તસ્યાસતસ્તત્ર કુર્વતો વિષ્ણુપ્રીણનમ્ ।
૨૨૮.૧૪/૨ગીતિકાભિર્વિચિત્રાભિર્વયઃ પ્રતિગતં બહુ ॥ ૨૨૮.૧૪ ॥

૨૨૮.૧૫/૧એકદા ચૈત્રમાસે તુ કૃષ્ણૈકાદશિગોચરે ।
૨૨૮.૧૫/૨વિષ્ણુશુશ્રૂષણાર્થાય યયૌ વનમનુત્તમમ્ ॥ ૨૨૮.૧૫ ॥

૨૨૮.૧૬/૧વનજાતાનિ પુષ્પાણિ ગ્રહીતું ભક્તિતત્પરઃ ।
૨૨૮.૧૬/૨ક્ષિપ્રાતટે મહારણ્યે વિભીતકતરોરધઃ ॥ ૨૨૮.૧૬ ॥

૨૨૮.૧૭/૧દૃષ્ટઃ સ રાક્ષસેનાથ ગૃહીતશ્ચાપિ ભક્ષિતુમ્ ।
૨૨૮.૧૭/૨ચાણ્ડાલસ્તમથોવાચ નાદ્ય ભક્ષ્યસ્ત્વયા હ્યહમ્ ॥ ૨૨૮.૧૭ ॥

૨૨૮.૧૮/૧પ્રાતર્ભોક્ષ્યસિ કલ્યાણ સત્યમેષ્યામ્યહં પુનઃ ।
૨૨૮.૧૮/૨અદ્ય કાર્યં મમ મહત્ તસ્માન્ મુઞ્ચસ્વ રાક્ષસ ॥ ૨૨૮.૧૮ ॥

૨૨૮.૧૯/૧શ્વઃ સત્યેન સમેષ્યામિ તતઃ ખાદસિ મામિતિ ।
૨૨૮.૧૯/૨વિષ્ણુશુશ્રૂષણાર્થાય રાત્રિજાગરણં મયા ।
૨૨૮.૧૯/૩કાર્યં ન વ્રતવિઘ્નં મે કર્તુમર્હસિ રાક્ષસ ॥ ૨૨૮.૧૯ ॥

૨૨૮.૨૦/૧વ્યાસ ઉવાચ । તં રાક્ષસઃ પ્રત્યુવાચ દશરાત્રમભોજનમ્ ।
૨૨૮.૨૦/૨મમાભૂદ્ અદ્ય ચ ભવાન્ મયા લબ્ધો મતઙ્ગજ ॥ ૨૨૮.૨૦ ॥

૨૨૮.૨૧/૧ન મોક્ષ્યે ભક્ષયિષ્યામિ ક્ષુધયા પીડિતો ભૃશમ્ ।
૨૨૮.૨૧/૨નિશાચરવચઃ શ્રુત્વા માતઙ્ગસ્તમુવાચ હ ।

૨૨૮.૨૧/૩સાન્ત્વયઞ્ શ્લક્ષ્ણયા વાચા સ સત્યવચનૈર્દૃઢૈઃ ॥ ૨૨૮.૨૧॥

૨૨૮.૨૨/૧માતઙ્ગ ઉવાચ । સત્યમૂલં જગત્ સર્વં બ્રહ્મરાક્ષસ તચ્છૃણુ ।
૨૨૮.૨૨/૨સત્યેનાહં શપિષ્યામિ પુનરાગમનાય ચ ॥ ૨૨૮.૨૨॥

૨૨૮.૨૩/૧આદિત્યશ્ચન્દ્રમા વહ્નિર્વાયુર્ભૂર્દ્યૌર્જલં મનઃ ।
૨૨૮.૨૩/૨અહોરાત્રં યમઃ સંધ્યે દ્વે વિદુર્નરચેષ્ટિતમ્ ॥ ૨૨૮.૨૩॥

૨૨૮.૨૪/૧પરદારેષુ યત્ પાપં યત્ પરદ્રવ્યહારિષુ ।
૨૨૮.૨૪/૨યચ્ચ બ્રહ્મહનઃ પાપં સુરાપે ગુરુતલ્પગે ॥ ૨૨૮.૨૪॥

૨૨૮.૨૫/૧વન્ધ્યાપતેશ્ચ યત્ પાપં યત્ પાપં વૃષલીપતેઃ ।
૨૨૮.૨૫/૨યચ્ચ દેવલકે પાપં મત્સ્યમાંસાશિનશ્ચ યત્ ॥ ૨૨૮.૨૫॥

૨૨૮.૨૬/૧ક્રોડમાંસાશિનો યચ્ચ કૂર્મમાંસાશિનશ્ચ યત્ ।
૨૨૮.૨૬/૨વૃથા માંસાશિનો યચ્ચ પૃષ્ઠમાંસાશિનશ્ચ યત્ ॥ ૨૨૮.૨૬॥

૨૨૮.૨૭/૧કૃતઘ્ને મિત્રઘાતકે યત્ પાપં દિધિષૂપતૌ ।
૨૨૮.૨૭/૨સૂતકસ્ય ચ યત્ પાપં યત્ પાપં ક્રૂરકર્મણઃ ॥ ૨૨૮.૨૭॥

૨૨૮.૨૮/૧કૃપણસ્ય ચ યત્ પાપં યચ્ચ વન્ધ્યાતિથેરપિ ।
૨૨૮.૨૮/૨અમાવાસ્યાષ્ટમી ષષ્ઠી કૃષ્ણશુક્લચતુર્દશી ॥ ૨૨૮.૨૮॥

૨૨૮.૨૯/૧તાસુ યદ્ ગમનાત્ પાપં યદ્ વિપ્રો વ્રજતિ સ્ત્રિયમ્ ।
૨૨૮.૨૯/૨રજસ્વલાં તથા પશ્ચાચ્છ્રાદ્ધં કૃત્વા સ્ત્રિયં વ્રજેત્ ॥ ૨૨૮.૨૯॥

૨૨૮.૩૦/૧સર્વસ્વસ્નાતભોજ્યાનાં યત્ પાપં મલભોજને ।
૨૨૮.૩૦/૨મિત્રભાર્યાં ગચ્છતાં ચ યત્ પાપં પિશુનસ્ય ચ ॥ ૨૨૮.૩૦॥

૨૨૮.૩૧/૧દમ્ભમાયાનુરક્તે ચ યત્ પાપં મધુઘાતિનઃ ।
૨૨૮.૩૧/૨બ્રાહ્મણસ્ય પ્રતિશ્રુત્ય યત્ પાપં તદયચ્છતઃ ॥ ૨૨૮.૩૧॥

૨૨૮.૩૨/૧યચ્ચ કન્યાનૃતે પાપં યચ્ચ ગોશ્વતરાનૃતે ।
૨૨૮.૩૨/૨સ્ત્રીબાલહન્તુર્યત્ પાપં યચ્ચ મિથ્યાભિભાષિણઃ ॥ ૨૨૮.૩૨॥

૨૨૮.૩૩/૧દેવવેદદ્વિજનૃપ+ ।પુત્રમિત્રસતીસ્ત્રિયઃ ।
૨૨૮.૩૩/૨યચ્ચ નિન્દયતાં પાપં ગુરુમિથ્યાપચારતઃ ॥ ૨૨૮.૩૩॥

૨૨૮.૩૪/૧અગ્નિત્યાગિષુ યત્ પાપમગ્નિદાયિષુ યદ્ વને ।
૨૨૮.૩૪/૨ગૃહેષ્ટ્યા પાતકે યચ્ચ યદ્ ગોઘ્ને યદ્ દ્વિજાધમે ॥ ૨૨૮.૩૪॥

૨૨૮.૩૫/૧યત્ પાપં પરિવિત્તે ચ યત્ પાપં પરિવેદિનઃ ।
૨૨૮.૩૫/૨તયોર્દાતૃગ્રહીત્રોશ્ચ યત્ પાપં ભ્રૂણઘાતિનઃ ॥ ૨૨૮.૩૫॥

૨૨૮.૩૬/૧કિં ચાત્ર બહુભિઃ પ્રોક્તૈઃ શપથૈસ્તવ રાક્ષસ ।
૨૨૮.૩૬/૨શ્રૂયતાં શપથં ભીમં દુર્વાચ્યમપિ કથ્યતે ॥ ૨૨૮.૩૬॥

૨૨૮.૩૭/૧સ્વકન્યાજીવિનઃ પાપં ગૂઢસત્યેન સાક્ષિણઃ ।
૨૨૮.૩૭/૨અયાજ્યયાજકે ષણ્ઢે યત્ પાપં શ્રવણેઽધમે ॥ ૨૨૮.૩૭॥

૨૨૮.૩૮/૧પ્રવ્રજ્યાવસિતે યચ્ચ બ્રહ્મચારિણિ કામુકે ।
૨૨૮.૩૮/૨એતૈસ્તુ પાપૈર્લિપ્યેઽહં યદિ નૈષ્યામિ તેઽન્તિકમ્ ॥ ૨૨૮.૩૮॥

૨૨૮.૩૯/૧વ્યાસ ઉવાચ । માતઙ્ગવચનં શ્રુત્વા વિસ્મિતો બ્રહ્મરાક્ષસઃ ।
૨૨૮.૩૯/૨પ્રાહ ગચ્છસ્વ સત્યેન સમયં ચૈવ પાલય ॥ ૨૨૮.૩૯॥

૨૨૮.૪૦/૧ઇત્યુક્તઃ કુણપાશેન શ્વપાકઃ કુસુમાનિ તુ ।
૨૨૮.૪૦/૨સમાદાયાગમચ્ચૈવ વિષ્ણોઃ સ નિલયં ગતઃ ॥ ૨૨૮.૪૦॥

૨૨૮.૪૧/૧તાનિ પ્રાદાદ્ બ્રાહ્મણાય સોઽપિ પ્રક્ષાલ્ય ચામ્ભસા ।
૨૨૮.૪૧/૨વિષ્ણુમભ્યર્ચ્ય નિલયં જગામ સ તપોધનાઃ ॥ ૨૨૮.૪૧॥

૨૨૮.૪૨/૧સોઽપિ માતઙ્ગદાયાદઃ સોપવાસસ્તુ તાં નિશામ્ ।
૨૨૮.૪૨/૨ગાયન્ હિ બાહ્યભૂમિષ્ઠઃ પ્રજાગરમુપાકરોત્ ॥ ૨૨૮.૪૨॥

૨૨૮.૪૩/૧પ્રભાતાયાં તુ શર્વર્યાં સ્નાત્વા દેવં નમસ્ય ચ ।
૨૨૮.૪૩/૨સત્યં સ સમયં કર્તું પ્રતસ્થે યત્ર રાક્ષસઃ ॥ ૨૨૮.૪૩॥

૨૨૮.૪૪/૧તં વ્રજન્તં પથિ નરઃ પ્રાહ ભદ્ર ક્વ ગચ્છસિ ।
૨૨૮.૪૪/૨સ તથાકથયત્ સર્વં સોઽપ્યેનં પુનરબ્રવીત્ ॥ ૨૨૮.૪૪॥

૨૨૮.૪૫/૧ધર્માર્થકામમોક્ષાણાં શરીરં સાધનં યતઃ ।
૨૨૮.૪૫/૨મહતા તુ પ્રયત્નેન શરીરં પાલયેદ્ બુધઃ ॥ ૨૨૮.૪૫॥

૨૨૮.૪૬/૧જીવધર્માર્થસુખમ્ ।
૨૨૮.૪૬/૨નરસ્તથાપ્નોતિ મોક્ષગતિમગ્ર્યામ્ ।
૨૨૮.૪૬/૩જીવન્ કીર્તિમુપૈતિ ચ ।
૨૨૮.૪૬/૪ભવતિ મૃતસ્ય કા કથા લોકે ॥ ૨૨૮.૪૬॥

૨૨૮.૪૭/૧માતઙ્ગસ્તદ્ વચઃ શ્રુત્વા પ્રત્યુવાચાથ હેતુમત્ ॥ ૨૨૮.૪૭॥

૨૨૮.૪૮/૧માતઙ્ગ ઉવાચ । ભદ્ર સત્યં પુરસ્કૃત્ય ગચ્છામિ

શપથાઃ કૃતાઃ ॥ ૨૨૮.૪૮॥

૨૨૮.૪૯/૧વ્યાસ ઉવાચ । તં ભૂયઃ પ્રત્યુવાચાથ કિમેવં મૂઢધીર્ભવાન્ ।
૨૨૮.૪૯/૨કિં ન શ્રુતં ત્વયા સાધો મનુના યદ્ ઉદીરિતમ્ ॥ ૨૨૮.૪૯॥

૨૨૮.૫૦/૧ગોસ્ત્રીદ્વિજાનાં પરિરક્ષણાર્થમ્ ।
૨૨૮.૫૦/૨વિવાહકાલે સુરતપ્રસઙ્ગે ।
૨૨૮.૫૦/૩પ્રાણાત્યયે સર્વધનાપહારે ।
૨૨૮.૫૦/૪પઞ્ચાનૃતાન્યાહુરપાતકાનિ ॥ ૨૨૮.૫૦॥

૨૨૮.૫૧/૧ધર્મવાક્યં ન ચ સ્ત્રીષુ ન વિવાહે તથા રિપૌ ।
૨૨૮.૫૧/૨વઞ્ચને ચાર્થહાનૌ ચ સ્વનાશેઽનૃતકે તથા ।
૨૨૮.૫૧/૩એવં તદ્ વાક્યમાકર્ણ્ય માતઙ્ગઃ પ્રત્યુવાચ હ ॥ ૨૨૮.૫૧॥

૨૨૮.૫૨/૧માતઙ્ગ ઉવાચ । મૈવં વદસ્વ ભદ્રં તે સત્યં લોકેષુ પૂજ્યતે ।
૨૨૮.૫૨/૨સત્યેનાવાપ્યતે સૌખ્યં યત્ કિંચિજ્જગતીગતમ્ ॥ ૨૨૮.૫૨॥

૨૨૮.૫૩/૧સત્યેનાર્કઃ પ્રતપતિ સત્યેનાપો રસાત્મિકાઃ ।
૨૨૮.૫૩/૨જ્વલત્યગ્નિશ્ચ સત્યેન વાતિ સત્યેન મારુતઃ ॥ ૨૨૮.૫૩॥

૨૨૮.૫૪/૧ધર્માર્થકામસમ્પ્રાપ્તિર્મોક્ષપ્રાપ્તિશ્ચ દુર્લભા ।
૨૨૮.૫૪/૨સત્યેન જાયતે પુંસાં તસ્માત્ સત્યં ન સંત્યજેત્ ॥ ૨૨૮.૫૪॥

૨૨૮.૫૫/૧સત્યં બ્રહ્મ પરં લોકે સત્યં યજ્ઞેષુ ચોત્તમમ્ ।
૨૨૮.૫૫/૨સત્યં સ્વર્ગસમાયાતં તસ્માત્ સત્યં ન સંત્યજેત્ ॥ ૨૨૮.૫૫॥

૨૨૮.૫૬/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા સોઽથ માતઙ્ગસ્તં પ્રક્ષિપ્ય નરોત્તમમ્ ।
૨૨૮.૫૬/૨જગામ તત્ર યત્રાસ્તે પ્રાણિહા બ્રહ્મરાક્ષસઃ ॥ ૨૨૮.૫૬॥

૨૨૮.૫૭/૧તમાગતં સમીક્ષ્યાસૌ ચાણ્ડાલં બ્રહ્મરાક્ષસઃ ।
૨૨૮.૫૭/૨વિસ્મયોત્ફુલ્લનયનઃ શિરઃકમ્પં તમબ્રવીત્ ॥ ૨૨૮.૫૭॥

૨૨૮.૫૮/૧બ્રહ્મરાક્ષસ ઉવાચ । સાધુ સાધુ મહાભાગ સત્યવાક્યાનુપાલક ।
૨૨૮.૫૮/૨ન માતઙ્ગમહં મન્યે ભવન્તં સત્યલક્ષણમ્ ॥ ૨૨૮.૫૮॥

૨૨૮.૫૯/૧કર્મણાનેન મન્યે ત્વાં બ્રાહ્મણં શુચિમવ્યયમ્ ।
૨૨૮.૫૯/૨યત્ કિંચિત્ ત્વાં ભદ્રમુખં પ્રવક્ષ્યે ધર્મસંશ્રયમ્ ।
૨૨૮.૫૯/૩કિં તત્ર ભવતા રાત્રૌ કૃતં વિષ્ણુગૃહે વદ ॥ ૨૨૮.૫૯॥

૨૨૮.૬૦/૧વ્યાસ ઉવાચ । તમભ્યુવાચ માતઙ્ગઃ શ◌ૃણુ વિષ્ણુગૃહે મયા ।

૨૨૮.૬૦/૨યત્ કૃતં રજનીભાગે યથાતથ્યં વદામિ તે ॥ ૨૨૮.૬૦॥

૨૨૮.૬૧/૧વિષ્ણોર્દેવકુલસ્યાધઃ સ્થિતેનાનમ્રમૂર્તિના ।
૨૨૮.૬૧/૨પ્રજાગરઃ કૃતો રાત્રૌ ગાયતા વિષ્ણુગીતિકામ્ ॥ ૨૨૮.૬૧॥

૨૨૮.૬૨/૧તં બ્રહ્મરાક્ષસઃ પ્રાહ કિયન્તં કાલમુચ્યતામ્ ।
૨૨૮.૬૨/૨પ્રજાગરો વિષ્ણુગૃહે કૃતં ભક્તિમતા વદ ॥ ૨૨૮.૬૨॥

૨૨૮.૬૩/૧તમભ્યુવાચ પ્રહસન્ વિંશત્યબ્દાનિ રાક્ષસ ।
૨૨૮.૬૩/૨એકાદશ્યાં માસિ માસિ કૃતસ્તત્ર પ્રજાગરઃ ।
૨૨૮.૬૩/૩માતઙ્ગવચનં શ્રુત્વા પ્રોવાચ બ્રહ્મરાક્ષસઃ ॥ ૨૨૮.૬૩॥

૨૨૮.૬૪/૧બ્રહ્મરાક્ષસ ઉવાચ । યદ્ અદ્ય ત્વાં પ્રવક્ષ્યામિ તદ્ ભવાન્ વક્તુમર્હતિ ।
૨૨૮.૬૪/૨એકરાત્રિકૃતં સાધો મમ દેહિ પ્રજાગરમ્ ॥ ૨૨૮.૬૪॥

૨૨૮.૬૫/૧એવં ત્વાં મોક્ષયિષ્યામિ મોક્ષયિષ્યામિ નાન્યથા ।
૨૨૮.૬૫/૨ત્રિઃ સત્યેન મહાભાગ ઇત્યુક્ત્વા વિરરામ હ ॥ ૨૨૮.૬૫॥

૨૨૮.૬૬/૧વ્યાસ ઉવાચ । માતઙ્ગસ્તમુવાચાથ મયાત્મા તે નિશાચર ।
૨૨૮.૬૬/૨નિવેદિતઃ કિમુક્તેન ખાદસ્વ સ્વેચ્છયાપિ મામ્ ॥ ૨૨૮.૬૬॥

૨૨૮.૬૭/૧તમાહ રાક્ષસો ભૂયો યામદ્વયપ્રજાગરમ્ ।
૨૨૮.૬૭/૨સગીતં મે પ્રયચ્છસ્વ કૃપાં કર્તું ત્વમર્હસિ ॥ ૨૨૮.૬૭॥

૨૨૮.૬૮/૧માતઙ્ગો રાક્ષસં પ્રાહ કિમસમ્બદ્ધમુચ્યતે ।
૨૨૮.૬૮/૨ખાદસ્વ સ્વેચ્છયા માં ત્વં ન પ્રદાસ્યે પ્રજાગરમ્ ।
૨૨૮.૬૮/૩માતઙ્ગવચનં શ્રુત્વા પ્રાહ તં બ્રહ્મરાક્ષસઃ ॥ ૨૨૮.૬૮॥

૨૨૮.૬૯/૧બ્રહ્મરાક્ષસ ઉવાચ । કો હિ દુષ્ટમતિર્મન્દો ભવન્તં દ્રષ્ટુમુત્સહેત્ ।
૨૨૮.૬૯/૨ધર્ષયિતું પીડયિતું રક્ષિતં ધર્મકર્મણા ॥ ૨૨૮.૬૯॥

૨૨૮.૭૦/૧દીનસ્ય પાપગ્રસ્તસ્ય વિષયૈર્મોહિતસ્ય ચ ।
૨૨૮.૭૦/૨નરકાર્તસ્ય મૂઢસ્ય સાધવઃ સ્યુર્દયાન્વિતાઃ ॥ ૨૨૮.૭૦॥

૨૨૮.૭૧/૧તન્ મમ ત્વં મહાભાગ કૃપાં કૃત્વા પ્રજાગરમ્ ।
૨૨૮.૭૧/૨યામસ્યૈકસ્ય મે દેહિ ગચ્છ વા નિલયં સ્વકમ્ ॥ ૨૨૮.૭૧॥

૨૨૮.૭૨/૧વ્યાસ ઉવાચ । તં પુનઃ પ્રાહ ચાણ્ડાલો ન યાસ્યામિ નિજં ગૃહમ્ ।
૨૨૮.૭૨/૨ન ચાપિ તવ દાસ્યામિ કથંચિદ્ યામજાગરમ્ ।
૨૨૮.૭૨/૩તં પ્રહસ્યાથ ચાણ્ડાલં પ્રોવાચ બ્રહ્મરાક્ષસઃ ॥ ૨૨૮.૭૨॥

૨૨૮.૭૩/૧બ્રહ્મરાક્ષસ ઉવાચ । રાત્ર્યવસાને યા ગીતા ગીતિકા કૌતુકાશ્રયા ।
૨૨૮.૭૩/૨તસ્યાઃ ફલં પ્રયચ્છસ્વ ત્રાહિ પાપાત્ સમુદ્ધર ॥ ૨૨૮.૭૩ ॥

૨૨૮.૭૪/૧વ્યાસ ઉવાચ । એવમુચ્ચારિતે તેન માતઙ્ગસ્તમુવાચ હ ॥ ૨૨૮.૭૪ ॥

૨૨૮.૭૫/૧માતઙ્ગ ઉવાચ । કિં પૂર્વં ભવતા કર્મ વિકૃતં કૃતમઞ્જસા ।
૨૨૮.૭૫/૨યેન ત્વં દોષજાતેન સમ્ભૂતો બ્રહ્મરાક્ષસઃ ॥ ૨૨૮.૭૫ ॥

૨૨૮.૭૬/૧વ્યાસ ઉવાચ । તસ્ય તદ્ વાક્યમાકર્ણ્ય માતઙ્ગં બ્રહ્મરાક્ષસઃ ।
૨૨૮.૭૬/૨પ્રોવાચ દુઃખસંતપ્તઃ સંસ્મૃત્ય સ્વકૃતં કૃતમ્ ॥ ૨૨૮.૭૬ ॥

૨૨૮.૭૭/૧બ્રહ્મરાક્ષસ ઉવાચ । શ્રૂયતાં યોઽહમાસં વૈ પૂર્વં
યચ્ચ મયા કૃતમ્ ।
૨૨૮.૭૭/૨યસ્મિન્ કૃતે પાપયોનિં ગતવાન્ અસ્મિ રાક્ષસીમ્ ॥ ૨૨૮.૭૭ ॥

૨૨૮.૭૮/૧સોમશર્મ ઇતિ ખ્યાતઃ પૂર્વમાસમહં દ્વિજઃ ।
૨૨૮.૭૮/૨પુત્રોઽધ્યયનશીલસ્ય દેવશર્મસ્ય યજ્વનઃ ॥ ૨૨૮.૭૮ ॥

૨૨૮.૭૯/૧કસ્યચિદ્ યજમાનસ્ય સૂત્રમન્ત્રબહિષ્કૃતઃ ।
૨૨૮.૭૯/૨નૃપસ્ય કર્મસક્તેન યૂપકર્મસુનિષ્ઠિતઃ ॥ ૨૨૮.૭૯ ॥

૨૨૮.૮૦/૧આગ્નીધ્રં ચાકરોદ્ યજ્ઞે લોભમોહપ્રપીડિતઃ ।
૨૨૮.૮૦/૨તસ્મિન્ પરિસમાપ્તે તુ મૌર્ખ્યાદ્ દમ્ભમનુષ્ઠિતઃ ॥ ૨૨૮.૮૦ ॥

૨૨૮.૮૧/૧યષ્ટુમારબ્ધવાન્ અસ્મિ દ્વાદશાહં મહાક્રતુમ્ ।
૨૨૮.૮૧/૨પ્રવર્તમાને તસ્મિંસ્તુ કુક્ષિશૂલોઽભવન્ મમ ॥ ૨૨૮.૮૧ ॥

૨૨૮.૮૨/૧સમ્પૂર્ણે દશરાત્રે તુ ન સમાપ્તે તથા ક્રતૌ ।
૨૨૮.૮૨/૨વિરૂપાક્ષસ્ય દીયન્ત્યામાહુત્યાં રાક્ષસે ક્ષણે ॥ ૨૨૮.૮૨ ॥

૨૨૮.૮૩/૧મૃતોઽહં તેન દોષેણ સમ્ભૂતો બ્રહ્મરાક્ષસઃ ।
૨૨૮.૮૩/૨મૂર્ખેણ મન્ત્રહીનેન સૂત્રસ્વરવિવર્જિતમ્ ॥ ૨૨૮.૮૩ ॥

૨૨૮.૮૪/૧અજાનતા યજ્ઞવિદ્યાં યદ્ ઇષ્ટં યાજિતં ચ યત્ ।
૨૨૮.૮૪/૨તેન કર્મવિપાકેન સમ્ભૂતો બ્રહ્મરાક્ષસઃ ॥ ૨૨૮.૮૪ ॥

૨૨૮.૮૫/૧તન્ માં પાપમહામ્ભોધૌ નિમગ્નં ત્વં સમુદ્ધર ।
૨૨૮.૮૫/૨પ્રજાગરે ગીતિકૈકાં પશ્ચિમાં દાતુમર્હસિ ॥ ૨૨૮.૮૫ ॥

૨૨૮.૮૬/૧વ્યાસ ઉવાચ । તમુવાચાથ ચાણ્ડાલો યદિ પ્રાણિવધાદ્ ભવાન્ ।
૨૨૮.૮૬/૨નિવૃત્તિં કુરુતે દદ્યાં તતઃ પશ્ચિમગીતિકામ્ ॥ ૨૨૮.૮૬ ॥

૨૨૮.૮૭/૧બાઢમિત્યવદત્ સોઽપિ માતઙ્ગોઽપિ દદૌ તદા ।
૨૨૮.૮૭/૨ગીતિકાફલમામન્ત્ર્ય મુહૂર્તાર્ધપ્રજાગરમ્ ॥ ૨૨૮.૮૭॥

૨૨૮.૮૮/૧તસ્મિન્ ગીતિફલે દત્તે માતઙ્ગં બ્રહ્મરાક્ષસઃ ।
૨૨૮.૮૮/૨પ્રણમ્ય પ્રયયૌ હૃષ્ટસ્તીર્થવર્યં પૃથૂદકમ્ ॥ ૨૨૮.૮૮॥

૨૨૮.૮૯/૧તત્રાનશનસંકલ્પં કૃત્વા પ્રાણાન્ જહૌ દ્વિજાઃ ।
૨૨૮.૮૯/૨રાક્ષસત્વાદ્ વિનિર્મુક્તો ગીતિકાફલબૃંહિતઃ ॥ ૨૨૮.૮૯॥

૨૨૮.૯૦/૧પૃથૂદકપ્રભાવાચ્ચ બ્રહ્મલોકં ચ દુર્લભમ્ ।
૨૨૮.૯૦/૨દશ વર્ષસહસ્રાણિ નિરાતઙ્કોઽવસત્ તતઃ ॥ ૨૨૮.૯૦॥

૨૨૮.૯૧/૧તસ્યાન્તે બ્રાહ્મણો જાતો બભૂવ સ્મૃતિમાન્ વશી ।
૨૨૮.૯૧/૨તસ્યાહં ચરિતં ભૂયઃ કથયિષ્યામિ ભો દ્વિજાઃ ॥ ૨૨૮.૯૧॥

૨૨૮.૯૨/૧માતઙ્ગસ્ય કથાશેષં શૃણુધ્વં ગદતો મમ ।
૨૨૮.૯૨/૨રાક્ષસે તુ ગતે ધીમાન્ ગૃહમેત્ય યતાત્મવાન્ ॥ ૨૨૮.૯૨॥

૨૨૮.૯૩/૧તદ્વિપ્રચરિતં સ્મૃત્વા નિર્વિણ્ણઃ શુચિરપ્યસૌ ।
૨૨૮.૯૩/૨પુત્રેષુ ભાર્યાં નિક્ષિપ્ય દદૌ ભૂમ્યાઃ પ્રદક્ષિણામ્ ॥ ૨૨૮.૯૩॥

૨૨૮.૯૪/૧કોકામુખાત્ સમારભ્ય યાવદ્ વૈ સ્કન્દદર્શનમ્ ।
૨૨૮.૯૪/૨દૃષ્ટ્વા સ્કન્દં યયૌ ધારા+ ૅહક્કે ચાપિ પ્રદક્ષિણમ્ ॥ ૨૨૮.૯૪॥

૨૨૮.૯૫/૧તતોઽદ્રિવરમાગમ્ય વિન્ધ્યમુચ્ચશિલોચ્ચયમ્ ।
૨૨૮.૯૫/૨પાપપ્રમોચનં તીર્થમાસસાદ સ તુ દ્વિજાઃ ॥ ૨૨૮.૯૫॥

૨૨૮.૯૬/૧સ્નાનં પાપહરં ચક્રે સ તુ ચાણ્ડાલવંશજઃ ।
૨૨૮.૯૬/૨વિમુક્તપાપઃ સસ્માર પૂર્વજાતીરનેકશઃ ॥ ૨૨૮.૯૬॥

૨૨૮.૯૭/૧સ પૂર્વજન્મન્યભવદ્ ભિક્ષુઃ સંયતવાઙ્મનાઃ ।
૨૨૮.૯૭/૨યતકાયશ્ચ મતિમાન્ વેદવેદાઙ્ગપારગઃ ॥ ૨૨૮.૯૭॥

૨૨૮.૯૮/૧એકદા ગોષુ નગરાદ્ ધ્રિયમાણાસુ તસ્કરૈઃ ।
૨૨૮.૯૮/૨ભિક્ષાવધૂતા રજસા મુક્તા તેનાથ ભિક્ષુણા ॥ ૨૨૮.૯૮॥

૨૨૮.૯૯/૧સ તેનાધર્મદોષેણ ચાણ્ડાલીં યોનિમાગતઃ ।
૨૨૮.૯૯/૨પાપપ્રમોચને સ્નાતઃ સ મૃતો નર્મદાતટે ॥ ૨૨૮.૯૯॥

૨૨૮.૧૦૦/૧મૂર્ખોઽભૂદ્ બ્રાહ્મણવરો વારાણસ્યાં ચ ભો દ્વિજાઃ ।

૨૨૮.૧૦૦/૨તત્રાસ્ય વસતોऽબ્દૈસ્તુ ત્રિંશદ્ભિઃ સિદ્ધપૂરુષઃ ॥ ૨૨૮.૧૦૦॥

૨૨૮.૧૦૧/૧વિરૂપરૂપી બભ્રામ યોગમાલાબલાન્વિતઃ ।
૨૨૮.૧૦૧/૨તં દૃષ્ટ્વા સોપહાસાર્થમભિવાદ્યાભ્યુવાચ હ ॥ ૨૨૮.૧૦૧॥

૨૨૮.૧૦૨/૧કુશલં સિદ્ધપુરુષં કુતસ્ત્વાગમ્યતે ત્વયા ॥ ૨૨૮.૧૦૨॥

૨૨૮.૧૦૩/૧વ્યાસ ઉવાચ । એવં સમ્ભાષિતસ્તેન જ્ઞાતોऽહમિતિ ચિન્ત્ય તુ ।
૨૨૮.૧૦૩/૨પ્રત્યુવાચાથ વન્દ્યસ્તં સ્વર્ગલોકાદ્ ઉપાગતઃ ॥ ૨૨૮.૧૦૩॥

૨૨૮.૧૦૪/૧તં સિદ્ધં પ્રાહ મૂર્ખોऽસૌ કિં ત્વં વેત્સિ ત્રિવિષ્ટપે ।
૨૨૮.૧૦૪/૨નારાયણોરુપ્રભવામુર્વશીમપ્સરોવરામ્ ॥ ૨૨૮.૧૦૪॥

૨૨૮.૧૦૫/૧સિદ્ધસ્તમાહ તાં વેદ્મિ શક્રચામરધારિણીમ્ ।
૨૨૮.૧૦૫/૨સ્વર્ગસ્યાભરણં મુખ્યમુર્વશીં સાધુસમ્ભવામ્ ॥ ૨૨૮.૧૦૫॥

૨૨૮.૧૦૬/૧વિપ્રઃ સિદ્ધમુવાચાથ ઋજુમાર્ગવિવર્જિતઃ ।
૨૨૮.૧૦૬/૨તન્ મિત્ર મત્કૃતે વાર્ત્તામુર્વશ્યા ભવતાદરાત્ ॥ ૨૨૮.૧૦૬॥

૨૨૮.૧૦૭/૧કથનીયા યચ્ચ સા તે બ્રૂયાદ્ આખ્યાસ્યતે ભવાન્ ।
૨૨૮.૧૦૭/૨બાઢમિત્યબ્રવીત્ સિદ્ધઃ સોऽપિ વિપ્રો મુદાન્વિતઃ ॥ ૨૨૮.૧૦૭॥

૨૨૮.૧૦૮/૧બભૂવ સિદ્ધોऽપિ યયૌ મેરુપૃષ્ઠં સુરાલયમ્ ।
૨૨૮.૧૦૮/૨સમેત્ય ચોર્વશીં પ્રાહ યદ્ ઉક્તોऽસૌ દ્વિજેન તુ ॥ ૨૨૮.૧૦૮॥

૨૨૮.૧૦૯/૧સા પ્રાહ તં સિદ્ધવરં નાહં કાશિપતિં દ્વિજમ્ ।
૨૨૮.૧૦૯/૨જાનામિ સત્યમુક્તં તે ન ચેતસિ મમ સ્થિતમ્ ॥ ૨૨૮.૧૦૯॥

૨૨૮.૧૧૦/૧ઇત્યુક્તઃ પ્રયયૌ સોऽપિ કાલેન બહુના પુનઃ ।
૨૨૮.૧૧૦/૨વારાણસીં યયૌ સિદ્ધો દૃષ્ટો મૂર્ખેણ વૈ પુનઃ ॥ ૨૨૮.૧૧૦॥

૨૨૮.૧૧૧/૧દૃષ્ટઃ પૃષ્ટઃ કિલ ભૂયઃ કિમાહોરુભવા તવ ।
૨૨૮.૧૧૧/૨સિદ્ધોऽબ્રવીન્ ન જાનામિ મામુવાચોર્વશી સ્વયમ્ ॥ ૨૨૮.૧૧૧॥

૨૨૮.૧૧૨/૧સિદ્ધવાક્યં તતઃ શ્રુત્વા સ્મિતભિન્નૌષ્ઠસમ્પુટઃ ।
૨૨૮.૧૧૨/૨પુનઃ પ્રાહ કથં વેત્સીત્યેવં વાચ્યા ત્વયોર્વશી ॥ ૨૨૮.૧૧૨॥

૨૨૮.૧૧૩/૧બાઢમેવં કરિષ્યામીત્યુક્ત્વા સિદ્ધો દિવં ગતઃ ।
૨૨૮.૧૧૩/૨દદર્શ શક્રભવનાન્ નિષ્ક્રામન્તીમથોર્વશીમ્ ॥ ૨૨૮.૧૧૩॥

૨૨૮.૧૧૪/૧પ્રોવાચ તાં સિદ્ધવરઃ સા ચ તં સિદ્ધમબ્રવીત્ ।

૨૨૮.૧૧૪/૨નિયમં કંચિદ્ અપિ હિ કરોતુ દ્વિજસત્તમઃ ॥ ૨૨૮.૧૧૪॥

૨૨૮.૧૧૫/૧યેનાહં કર્મણા સિદ્ધ તં જાનામિ ન ચાન્યથા ।
૨૨૮.૧૧૫/૨તદ્ ઉર્વશીવચોઽભ્યેત્ય તસ્મૈ મૂર્ખદ્વિજાય તુ ॥ ૨૨૮.૧૧૫॥

૨૨૮.૧૧૬/૧કથયામાસ સિદ્ધસ્તુ સોઽપીમં નિયમં જગૌ ।
૨૨૮.૧૧૬/૨તવાગ્રે સિદ્ધપુરુષ નિયમોઽયં કૃતો મયા ॥ ૨૨૮.૧૧૬॥

૨૨૮.૧૧૭/૧ન ભોક્ષ્યેઽદ્યપ્રભૃતિ વૈ શકટં સત્યમીરિતમ્ ।
૨૨૮.૧૧૭/૨ઇત્યુક્તઃ પ્રયયૌ સિદ્ધઃ સ્વર્ગે દૃષ્ટ્વોર્વશીમથ ॥ ૨૨૮.૧૧૭॥

૨૨૮.૧૧૮/૧પ્રાહાસૌ શકટં ભોક્ષ્યે નાદ્યપ્રભૃતિ કર્હિચિત્ ।
૨૨૮.૧૧૮/૨તં સિદ્ધમુર્વશી પ્રાહ જ્ઞાતોઽસૌ સામ્પ્રતં મયા ॥ ૨૨૮.૧૧૮॥

૨૨૮.૧૧૯/૧નિયમગ્રહણાદ્ એવ મૂર્ખો મામુપહાસકઃ ।
૨૨૮.૧૧૯/૨ઇત્યુક્ત્વા પ્રયયૌ શીઘ્રં વાસં નારાયણાત્મજા ॥ ૨૨૮.૧૧૯॥

૨૨૮.૧૨૦/૧સિદ્ધોઽપિ વિચચારાસૌ કામચારી મહીતલમ્ ।
૨૨૮.૧૨૦/૨ઉર્વશ્યપિ વરારોહા ગત્વા વારાણસીં પુરીમ્ ॥ ૨૨૮.૧૨૦॥

૨૨૮.૧૨૧/૧મત્સ્યોદરીજલે સ્નાનં ચક્રે દિવ્યવપુર્ધરા ।
૨૨૮.૧૨૧/૨અથાસાવપિ મૂર્ખસ્તુ નદીં મત્સ્યોદરીં મુને ॥ ૨૨૮.૧૨૧॥

૨૨૮.૧૨૨/૧જગામાથ દદર્શાસૌ સ્નાયમાનામથોર્વશીમ્ ।
૨૨૮.૧૨૨/૨તાં દૃષ્ટ્વા વવૃધેઽથાસ્ય મન્મથઃ ક્ષોભકૃદ્
દૃઢમ્ ॥ ૨૨૮.૧૨૨॥

૨૨૮.૧૨૩/૧ચકાર મૂર્ખશ્રેષ્ટાશ્ચ તં વિવેદોર્વશી સ્વયમ્ ।
૨૨૮.૧૨૩/૨તં મૂર્ખં સિદ્ધગદિતં જ્ઞાત્વા સસ્મિતમાહ તમ્ ॥ ૨૨૮.૧૨૩॥

૨૨૮.૧૨૪/૧ઉર્વશ્યુવાચ । કિમિચ્છસિ મહાભાગ મત્તઃ શીઘ્રમિહોચ્યતામ્ ।
૨૨૮.૧૨૪/૨કરિષ્યામિ વચસ્તુભ્યં ત્વં વિશ્રબ્ધં કરિષ્યસિ ॥ ૨૨૮.૧૨૪॥

૨૨૮.૧૨૫/૧મૂર્ખબ્રાહ્મણ ઉવાચ । આત્મપ્રદાનેન મમ પ્રાણાન્ રક્ષ
શુચિસ્મિતે ॥ ૨૨૮.૧૨૫॥

૨૨૮.૧૨૬/૧વ્યાસ ઉવાચ । તં પ્રાહાથોર્વશી વિપ્રં નિયમસ્થાસ્મિ સામ્પ્રતમ્ ।
૨૨૮.૧૨૬/૨ત્વં તિષ્ઠસ્વ ક્ષણમથ પ્રતીક્ષસ્વાગતં મમ ॥ ૨૨૮.૧૨૬॥

૨૨૮.૧૨૭/૧સ્થિતોઽસ્મીત્યબ્રવીદ્ વિપ્રઃ સાપિ સ્વર્ગં જગામ હ ।
૨૨૮.૧૨૭/૨માસમાત્રેણ સાયાતા દદર્શ તં કૃશં દ્વિજમ્ ॥ ૨૨૮.૧૨૭॥

૨૨૮.૧૨૮/૧સ્થિતં માસં નદીતીરે નિરાહારં સુરાઙ્ગના ।
૨૨૮.૧૨૮/૨તં દૃષ્ટ્વા નિશ્ચયયુતં ભૂત્વા વૃદ્ધવપુસ્તતઃ ॥ ૨૨૮.૧૨૮॥

૨૨૮.૧૨૯/૧સા ચકાર નદીતીરે શકટં શર્કરાવૃતમ્ ।
૨૨૮.૧૨૯/૨ઘૃતેન મધુના ચૈવ નદીં મત્સ્યોદરીં ગતા ॥ ૨૨૮.૧૨૯॥

૨૨૮.૧૩૦/૧સ્નાત્વાથ ભૂમૌ વસન્તી શકટં ચ યથાર્થતઃ ।
૨૨૮.૧૩૦/૨તં બ્રાહ્મણં સમાહૂય વાક્યમાહ સુલોચના ॥ ૨૨૮.૧૩૦॥

૨૨૮.૧૩૧/૧ઉર્વશ્યુવાચ । મયા તીવ્રં વ્રતં વિપ્ર ચીર્ણં સૌભાગ્યકારણાત્ ।
૨૨૮.૧૩૧/૨વ્રતાન્તે નિષ્કૃતિં દદ્યાં પ્રતિગૃહ્ણીષ્વ ભો દ્વિજ ॥ ૨૨૮.૧૩૧॥

૨૨૮.૧૩૨/૧વ્યાસ ઉવાચ । સ પ્રાહ કિમિદં લોકે દીયતે શર્કરાવૃતમ્ ।
૨૨૮.૧૩૨/૨ક્ષુત્ક્ષામકણ્ઠઃ પૃચ્છામિ સાધુ ભદ્રે સમીરય ॥ ૨૨૮.૧૩૨॥

૨૨૮.૧૩૩/૧સા પ્રાહ શકટો વિપ્ર શર્કરાપિષ્ટસંયુતઃ ।
૨૨૮.૧૩૩/૨ઇમં ત્વં સમુપાદાય પ્રાણં તર્પય મા ચિરમ્ ॥ ૨૨૮.૧૩૩॥

૨૨૮.૧૩૪/૧સ તચ્છ્રુત્વાથ સંસ્મૃત્ય ક્ષુધયા પીડિતોઽપિ સન્ ।
૨૨૮.૧૩૪/૨પ્રાહ ભદ્રે ન ગૃહ્ણામિ નિયમો હિ કૃતો મયા ॥ ૨૨૮.૧૩૪॥

૨૨૮.૧૩૫/૧પુરતઃ સિદ્ધવર્ગસ્ય ન ભોક્ષ્યે શકટં ત્વિતિ ।
૨૨૮.૧૩૫/૨પરિજ્ઞાનાર્થમુર્વશ્યા દદસ્વાન્યસ્ય કસ્યચિત્ ॥ ૨૨૮.૧૩૫॥

૨૨૮.૧૩૬/૧સાબ્રવીન્ નિયમો ભદ્ર કૃતઃ કાષ્ઠમયે ત્વયા ।
૨૨૮.૧૩૬/૨નાસૌ કાષ્ઠમયો ભુઙ્ક્ષ્વ ક્ષુધયા ચાતિપીડિતઃ ॥ ૨૨૮.૧૩૬॥

૨૨૮.૧૩૭/૧તાં બ્રાહ્મણઃ પ્રત્યુવાચ ન મયા તદ્ વિશેષણમ્ ।
૨૨૮.૧૩૭/૨કૃતં ભદ્રેઽથ નિયમઃ સામાન્યેનૈવ મે કૃતઃ ॥ ૨૨૮.૧૩૭॥

૨૨૮.૧૩૮/૧તં ભૂયઃ પ્રાહ સા તન્વી ન ચેદ્ ભોક્ષ્યસિ બ્રાહ્મણ ।
૨૨૮.૧૩૮/૨ગૃહં ગૃહીત્વા ગચ્છસ્વ કુટુમ્બં તવ ભોક્ષ્યતિ ॥ ૨૨૮.૧૩૮॥

૨૨૮.૧૩૯/૧સ તામુવાચ સુદતિ ન તાવદ્ યામિ મન્દિરમ્ ।
૨૨૮.૧૩૯/૨ઇહાયાતા વરારોહા ત્રૈલોક્યેઽપ્યધિકા ગુણૈઃ ॥ ૨૨૮.૧૩૯॥

૨૨૮.૧૪૦/૧સા મયા મદનાર્તેન પ્રાર્થિતાશ્વાસિતસ્તયા ।
૨૨૮.૧૪૦/૨સ્થીયતાં ક્ષણમિત્યેવં સ્થાસ્યામીતિ મયોદિતમ્ ॥ ૨૨૮.૧૪૦॥

૨૨૮.૧૪૧/૧માસમાત્રં ગતાયાસ્તુ તસ્યા ભદ્રે સ્થિતસ્ય ચ ।

૨૨૮.૧૪૧/૨મમ સત્યાનુરક્તસ્ય સંગમાય ધૃતવ્રતે ॥ ૨૨૮.૧૪૧॥

૨૨૮.૧૪૨/૧તસ્ય સા વચનં શ્રુત્વા કૃત્વા સ્વં રૂપમુત્તમમ્ ।
૨૨૮.૧૪૨/૨વિહસ્ય ભાવગમ્ભીરમુર્વશી પ્રાહ તં દ્વિજમ્ ॥ ૨૨૮.૧૪૨॥

૨૨૮.૧૪૩/૧ઉર્વશ્યુવાચ । સાધુ સત્યં ત્વયા વિપ્ર વ્રતં નિષ્ઠિતચેતસા ।
૨૨૮.૧૪૩/૨નિષ્પાદિતં હઠાદ્ એવ મમ દર્શનમિચ્છતા ॥ ૨૨૮.૧૪૩॥

૨૨૮.૧૪૪/૧અહમેવોર્વશી વિપ્ર ત્વાં જિજ્ઞાસાર્થમાગતા ।
૨૨૮.૧૪૪/૨પરીક્ષિતો નિશ્ચિતવાન્ ભવાન્ સત્યતપા ઋષિઃ ॥ ૨૨૮.૧૪૪॥

૨૨૮.૧૪૫/૧ગચ્છ શૂકરવોદ્દેશં રૂપતીર્થેતિ વિશ્રુતમ્ ।
૨૨૮.૧૪૫/૨સિદ્ધિં યાસ્યસિ વિપ્રેન્દ્ર તતસ્ત્વં મામવાપ્સ્યસિ ॥ ૨૨૮.૧૪૫॥

૨૨૮.૧૪૬/૧વ્યાસ ઉવાચ । ઇત્યુક્ત્વા દિવમુત્પત્ય સા જગામોર્વશી દ્વિજાઃ ।
૨૨૮.૧૪૬/૨સ ચ સત્યતપા વિપ્રો રૂપતીર્થં જગામ હ ॥ ૨૨૮.૧૪૬॥

૨૨૮.૧૪૭/૧તત્ર શાન્તિપરો ભૂત્વા નિયમવ્રતધૃક્ શુચિઃ ।
૨૨૮.૧૪૭/૨દેહોત્સર્ગે જગામાસૌ ગાન્ધર્વં લોકમુત્તમમ્ ॥ ૨૨૮.૧૪૭॥

૨૨૮.૧૪૮/૧તત્ર મન્વન્તરશતં ભોગાન્ ભુક્ત્વા યથાર્થતઃ ।
૨૨૮.૧૪૮/૨બભૂવ સુકુલે રાજા પ્રજારઞ્જનતત્પરઃ ॥ ૨૨૮.૧૪૮॥

૨૨૮.૧૪૯/૧સ યજ્વા વિવિધૈર્યજ્ઞૈઃ સમાપ્તવરદક્ષિણૈઃ ।
૨૨૮.૧૪૯/૨પુત્રેષુ રાજ્યં નિક્ષિપ્ય યયૌ શૌકરવં પુનઃ ॥ ૨૨૮.૧૪૯॥

૨૨૮.૧૫૦/૧રૂપતીર્થે મૃતો ભૂયઃ શક્રલોકમુપાગતઃ ।
૨૨૮.૧૫૦/૨તત્ર મન્વન્તરશતં ભોગાન્ ભુક્ત્વા તતશ્ચ્યુતઃ ॥ ૨૨૮.૧૫૦॥

૨૨૮.૧૫૧/૧પ્રતિષ્ઠાને પુરવરે બુધપુત્રઃ પુરૂરવાઃ ।
૨૨૮.૧૫૧/૨બભૂવ તત્ર ચોર્વશ્યાઃ સંગમાય તપોધનાઃ ॥ ૨૨૮.૧૫૧॥

૨૨૮.૧૫૨/૧એવં પુરા સત્યતપા દ્વિજાતિસ્- ।
૨૨૮.૧૫૨/૨તીર્થે પ્રસિદ્ધે સ હિ રૂપસંજ્ઞે ।
૨૨૮.૧૫૨/૩આરાધ્ય જન્મન્યથ ચાર્ચ્ય વિષ્ણુમ્ ।
૨૨૮.૧૫૨/૪અવાપ્ય ભોગાન્ અથ મુક્તિમેતિ ॥ ૨૨૮.૧૫૨॥

૨૨૯.૧/૧મુનય ઊચુઃ । શ્રુતં ફલં ગીતિકાયા અસ્માભિઃ સુપ્રજાગરે ।
૨૨૯.૧/૨કૃષ્ણસ્ય યેન ચાણ્ડાલો ગતોઽસૌ પરમાં ગતિમ્ ॥ ૨૨૯.૧॥

૨૨૯.૨/૧યથા વિષ્ણૌ ભવેદ્ ભક્તિસ્તન્ નો બ્રૂહિ મહામતે ।

૨૨૯.૨/૨તપસા કર્મણા યેન શ્રોતુમિચ્છામ સામ્પ્રતમ્ ॥ ૨૨૯.૨॥

૨૨૯.૩/૧વ્યાસ ઉવાચ । શૃણુધ્વં મુનિશાર્દૂલાઃ પ્રવક્ષ્યામ્યનુપૂર્વશઃ ।
૨૨૯.૩/૨યથા કૃષ્ણે ભવેદ્ ભક્તિઃ પુરુષસ્ય મહાફલા ॥ ૨૨૯.૩॥

૨૨૯.૪/૧સંસારેઽસ્મિન્ મહાઘોરે સર્વભૂતભયાવહે ।
૨૨૯.૪/૨મહામોહકરે નૃણાં નાનાદુઃખશતાકુલે ॥ ૨૨૯.૪॥

૨૨૯.૫/૧તિર્યગ્યોનિસહસ્રેષુ જાયમાનઃ પુનઃ પુનઃ ।
૨૨૯.૫/૨કથંચિલ્લભતે જન્મ દેહી માનુષ્યકં દ્વિજાઃ ॥ ૨૨૯.૫॥

૨૨૯.૬/૧માનુષત્વેઽપિ વિપ્રત્વં વિપ્રત્વેઽપિ વિવેકિતા ।
૨૨૯.૬/૨વિવેકાદ્ ધર્મબુદ્ધિસ્તુ બુદ્ધ્યા તુ શ્રેયસાં ગ્રહઃ ॥ ૨૨૯.૬॥

૨૨૯.૭/૧યાવત્ પાપક્ષયં પુંસાં ન ભવેજ્જન્મ સંચિતમ્ ।
૨૨૯.૭/૨તાવન્ ન જાયતે ભક્તિર્વાસુદેવે જગન્મયે ॥ ૨૨૯.૭॥

૨૨૯.૮/૧તસ્માદ્ વક્ષ્યામિ ભો વિપ્રા ભક્તિઃ કૃષ્ણે યથા ભવેત્ ।
૨૨૯.૮/૨અન્યદેવેષુ યા ભક્તિઃ પુરુષસ્યેહ જાયતે ॥ ૨૨૯.૮॥

૨૨૯.૯/૧કર્મણા મનસા વાચા તદ્ગતેનાન્તરાત્મના ।
૨૨૯.૯/૨તેન તસ્ય ભવેદ્ ભક્તિર્યજને મુનિસત્તમાઃ ॥ ૨૨૯.૯॥

૨૨૯.૧૦/૧સ કરોતિ તતો વિપ્રા ભક્તિં ચાગ્નેઃ સમાહિતઃ ।
૨૨૯.૧૦/૨તુષ્ટે હુતાશને તસ્ય ભક્તિર્ભવતિ ભાસ્કરે ॥ ૨૨૯.૧૦॥

૨૨૯.૧૧/૧પૂજાં કરોતિ સતતમાદિત્યસ્ય તતો દ્વિજાઃ ।
૨૨૯.૧૧/૨પ્રસન્ને ભાસ્કરે તસ્ય ભક્તિર્ભવતિ શંકરે ॥ ૨૨૯.૧૧॥

૨૨૯.૧૨/૧પૂજાં કરોતિ વિધિવત્ સ તુ શમ્ભોઃ પ્રયત્નતઃ ।
૨૨૯.૧૨/૨તુષ્ટે ત્રિલોચને તસ્ય ભક્તિર્ભવતિ કેશવે ॥ ૨૨૯.૧૨॥

૨૨૯.૧૩/૧સમ્પૂજ્ય તં જગન્નાથં વાસુદેવાખ્યમવ્યયમ્ ।
૨૨૯.૧૩/૨તતો ભુક્તિં ચ મુક્તિં ચ સ પ્રાપ્નોતિ દ્વિજોત્તમાઃ ॥ ૨૨૯.૧૩॥

૨૨૯.૧૪/૧મુનય ઊચુઃ । અવૈષ્ણવા નરા યે તુ દૃશ્યન્તે ચ મહામુને ।
૨૨૯.૧૪/૨કિં તે વિષ્ણું નાર્ચયન્તિ બ્રૂહિ તત્કારણં દ્વિજ ॥ ૨૨૯.૧૪॥

૨૨૯.૧૫/૧વ્યાસ ઉવાચ । દ્વૌ ભૂતસર્ગૌ વિખ્યાતૌ લોકેઽસ્મિન્ મુનિસત્તમાઃ ।
૨૨૯.૧૫/૨આસુરશ્ચ તથા દૈવઃ પુરા સૃષ્ટઃ સ્વયમ્ભુવા ॥ ૨૨૯.૧૫॥

૨૨૯.૧૬/૧દૈવીં પ્રકૃતિમાસાદ્ય પૂજયન્તિ તતોઽચ્યુતમ્ ।
૨૨૯.૧૬/૨આસુરીં યોનિમાપન્ના દૂષયન્તિ નરા હરિમ્ ॥ ૨૨૯.૧૬॥

૨૨૯.૧૭/૧માયયા હતવિજ્ઞાના વિષ્ણોસ્તે તુ નરાધમાઃ ।
૨૨૯.૧૭/૨અપ્રાપ્ય તં હરિં વિપ્રાસ્તતો યાન્ત્યધમાં ગતિમ્ ॥ ૨૨૯.૧૭॥

૨૨૯.૧૮/૧તસ્ય યા ગહ્વરી માયા દુર્વિજ્ઞેયા સુરાસુરૈઃ ।
૨૨૯.૧૮/૨મહામોહકરી નૃણાં દુસ્તરા ચાકૃતાત્મભિઃ ॥ ૨૨૯.૧૮॥

૨૨૯.૧૯/૧મુનય ઊચુઃ । ઇચ્છામસ્તાં મહામાયાં જ્ઞાતું વિષ્ણોઃ સુદુસ્તરામ્ ।
૨૨૯.૧૯/૨વક્તુમર્હસિ ધર્મજ્ઞ પરં કૌતૂહલં હિ નઃ ॥ ૨૨૯.૧૯॥

૨૨૯.૨૦/૧વ્યાસ ઉવાચ । સ્વપ્નેન્દ્રજાલસંકાશા માયા સા લોકકર્ષણી ।
૨૨૯.૨૦/૨કઃ શક્નોતિ હરેર્માયાં જ્ઞાતું તાં કેશવાદ્ ઋતે ॥ ૨૨૯.૨૦॥

૨૨૯.૨૧/૧યા વૃત્તા બ્રાહ્મણસ્યાસીન્ માયાર્થે નારદસ્ય ચ ।
૨૨૯.૨૧/૨વિડમ્બનાં તુ તાં વિપ્રાઃ શ ૃણુધ્વં ગદતો મમ ॥ ૨૨૯.૨૧॥

૨૨૯.૨૨/૧પ્રાગ્ આસીન્ નૃપતિઃ શ્રીમાન્ આગ્નીધ્ર ઇતિ વિશ્રુતઃ ।
૨૨૯.૨૨/૨નગરે કામદમનસ્તસ્યાથ તનયઃ શુચિઃ ॥ ૨૨૯.૨૨॥

૨૨૯.૨૩/૧ધર્મારામઃ ક્ષમાશીલઃ પિતૃશુશ્રૂષણે રતઃ ।
૨૨૯.૨૩/૨પ્રજાનુરઞ્જકો દક્ષઃ શ્રુતિશાસ્ત્રકૃતશ્રમઃ ॥ ૨૨૯.૨૩॥

૨૨૯.૨૪/૧પિતાસ્ય ત્વકરોદ્ યત્નં વિવાહાય ન ચૈચ્છત ।
૨૨૯.૨૪/૨તં પિતા પ્રાહ કિમિતિ નેચ્છસે દારસંગ્રહમ્ ॥ ૨૨૯.૨૪॥

૨૨૯.૨૫/૧સર્વમેતત્ સુખાર્થં હિ વાઞ્છન્તિ મનુજાઃ કિલ ।
૨૨૯.૨૫/૨સુખમૂલા હિ દારાશ્ચ તસ્માત્ તં ત્વં સમાચર ॥ ૨૨૯.૨૫॥

૨૨૯.૨૬/૧સ પિતુર્વચનં શ્રુત્વા તૂષ્ણીમાસ્તે ચ ગૌરવાત્ ।
૨૨૯.૨૬/૨મુહુર્મુહુસ્તં ચ પિતા ચોદયામાસ ભો દ્વિજાઃ ॥ ૨૨૯.૨૬॥

૨૨૯.૨૭/૧અથાસૌ પિતરં પ્રાહ તાત નામાનુરૂપતા ।
૨૨૯.૨૭/૨મયા સમાશ્રિતા વ્યક્તા વૈષ્ણવી પરિપાલિની ॥ ૨૨૯.૨૭॥

૨૨૯.૨૮/૧તં પિતા પ્રાહ સંગમ્ય નૈષ ધર્મોઽસ્તિ પુત્રક ।
૨૨૯.૨૮/૨ન વિધારયિતવ્યા સ્યાત્ પુરુષેણ વિપશ્ચિતા ॥ ૨૨૯.૨૮॥

૨૨૯.૨૯/૧કુરુ મદ્વચનં પુત્ર પ્રભુરસ્મિ પિતા તવ ।
૨૨૯.૨૯/૨મા નિમજ્જ કુલં મહ્યં નરકે સંતતિક્ષયાત્ ॥ ૨૨૯.૨૯॥

૨૨૯.૩૦/૧સ હિ તં પિતુરાદેશં શ્રુત્વા પ્રાહ સુતો વશી ।
૨૨૯.૩૦/૨પ્રીતઃ સંસ્મૃત્ય પૌરાણીં સંસારસ્ય વિચિત્રતામ્ ॥ ૨૨૯.૩૦ ॥

૨૨૯.૩૧/૧પુત્ર ઉવાચ । શ઼ૃણુ તાત વચો મહ્યં તત્ત્વવાક્યં સહેતુકમ્ ।
૨૨૯.૩૧/૨નામાનુરૂપં કર્તવ્યં સત્યં ભવતિ પાર્થિવ ॥ ૨૨૯.૩૧ ॥

૨૨૯.૩૨/૧મયા જન્મસહસ્રાણિ જરામૃત્યુશતાનિ ચ ।
૨૨૯.૩૨/૨પ્રાપ્તાનિ દારસંયોગ+ ।વિયોગાનિ ચ સર્વશઃ ॥ ૨૨૯.૩૨ ॥

૨૨૯.૩૩/૧તૃણગુલ્મલતાવલ્લી+ ।સરીસૃપમૃગદ્વિજાઃ ।
૨૨૯.૩૩/૨પશુસ્ત્રીપુરુષાદ્યાનિ પ્રાપ્તાનિ શતશો મયા ॥ ૨૨૯.૩૩ ॥

૨૨૯.૩૪/૧ગણકિંનરગન્ધર્વ+ ।વિદ્યાધરમહોરગાઃ ।
૨૨૯.૩૪/૨યક્ષગુહ્યકરક્ષાંસિ દાનવાપ્સરસઃ સુરાઃ ॥ ૨૨૯.૩૪ ॥

૨૨૯.૩૫/૧નદીશ્વરસહસ્રં ચ પ્રાપ્તં તાત પુનઃ પુનઃ ।
૨૨૯.૩૫/૨સૃષ્ટસ્તુ બહુશઃ સૃષ્ટૌ સંહારે ચાપિ સંહૃતઃ ॥ ૨૨૯.૩૫ ॥

૨૨૯.૩૬/૧દારસંયોગયુક્તસ્ય તાતેદૃઙ્ મે વિડમ્બના ।
૨૨૯.૩૬/૨ઇતસ્તૃતીયે યદ્ વૃત્તં મમ જન્મનિ તચ્છૃણુ ।
૨૨૯.૩૬/૩કથયામિ સમાસેન તીર્થમાહાત્મ્યસમ્ભવમ્ ॥ ૨૨૯.૩૬ ॥

૨૨૯.૩૭/૧અતીત્ય જન્માનિ બહૂનિ તાત ।
૨૨૯.૩૭/૨નૃદેવગન્ધર્વમહોરગાણામ્ ।
૨૨૯.૩૭/૩વિદ્યાધરાણાં ખગકિંનરાણામ્ ।
૨૨૯.૩૭/૪જાતો હિ વંશે સુતપા મહર્ષિઃ ॥ ૨૨૯.૩૭ ॥

૨૨૯.૩૮/૧તતો મહાભૂદ્ અચલા હિ ભક્તિર્।
૨૨૯.૩૮/૨જનાર્દને લોકપતૌ મધુઘ્ને ।
૨૨૯.૩૮/૩વ્રતોપવાસૈર્વિવિધૈશ્ચ ભક્ત્યા ।
૨૨૯.૩૮/૪સંતોષિતશ્ચક્રગદાસ્ત્રધારી ॥ ૨૨૯.૩૮ ॥

૨૨૯.૩૯/૧તુષ્ટોऽભ્યગાત્ પક્ષિપતિં મહાત્મા ।
૨૨૯.૩૯/૨વિષ્ણુઃ સમારુહ્ય વરપ્રદો મે ।
૨૨૯.૩૯/૩પ્રાહોચ્ચશબ્દં વ્રિયતાં દ્વિજાતે ।
૨૨૯.૩૯/૪વરો હિ યં વાઞ્છસિ તં પ્રદાસ્યે ॥ ૨૨૯.૩૯ ॥

૨૨૯.૪૦/૧તતોऽહમૂચે હરિમીશિતારમ્ ।

૨૨૯.૪૦/૨તુષ્ટોऽસિ ચેત્ કેશવ તદ્ વૃણોમિ ।
૨૨૯.૪૦/૩યા સા ત્વદીયા પરમા હિ માયા ।
૨૨૯.૪૦/૪તાં વેત્તુમિચ્છામિ જનાર્દનોऽહમ્ ॥ ૨૨૯.૪૦॥

૨૨૯.૪૧/૧અથાબ્રવીન્ મે મધુકૈટભારિઃ ।
૨૨૯.૪૧/૨કિં તે તયા બ્રહ્મન્ માયયા વૈ ।
૨૨૯.૪૧/૩ધર્માર્થકામાનિ દદાનિ તુભ્યમ્ ।
૨૨૯.૪૧/૪પુત્રાણિ મુખ્યાનિ નિરામયત્વમ્ ॥ ૨૨૯.૪૧॥

૨૨૯.૪૨/૧તતો મુરારિં પુનરુક્તવાન્ અહમ્ ।
૨૨૯.૪૨/૨ભૂયોऽર્થધર્માર્થજિગીષિતૈવ યત્ ।
૨૨૯.૪૨/૩માયા તવેમામિહ વેત્તુમિચ્છે ।
૨૨૯.૪૨/૪મમાદ્ય તાં દર્શય પુષ્કરાક્ષ ॥ ૨૨૯.૪૨॥

૨૨૯.૪૩/૧તતોऽભ્યુવાચાથ નૃસિંહમુખ્યઃ ।
૨૨૯.૪૩/૨શ્રીશઃ પ્રભુર્વિષ્ણુરિદં વચો મે ।
૨૨૯.૪૩/૩વિષ્ણુરુવાચ । માયાં મદીયાં નહિ વેત્તિ કશ્ચિન્ ।
૨૨૯.૪૩/૪ન ચાપિ વા વેત્સ્યતિ કશ્ચિદ્ એવ ॥ ૨૨૯.૪૩॥

૨૨૯.૪૪/૧પૂર્વં સુરર્ષિર્દ્વિજ નારદાખ્યો ।
૨૨૯.૪૪/૨બ્રહ્માત્મજોऽભૂન્ મમ ભક્તિયુક્તઃ ।
૨૨૯.૪૪/૩તેનાપિ પૂર્વં ભવતા યથૈવ ।
૨૨૯.૪૪/૪સંતોષિતો ભક્તિમતા હિ તદ્વત્ ॥ ૨૨૯.૪૪॥

૨૨૯.૪૫/૧વરં ચ દત્તં ગતવાન્ અહં ચ ।
૨૨૯.૪૫/૨સ ચાપિ વવ્રે વરમેતદ્ એવ ।
૨૨૯.૪૫/૩નિવારિતો મામતિમૂઢભાવાદ્ ।
૨૨૯.૪૫/૪ભવાન્ યથૈવં વૃતવાન્ વરં ચ ॥ ૨૨૯.૪૫॥

૨૨૯.૪૬/૧તતો મયોક્તોऽમ્ભસિ નારદ ત્વમ્ ।
૨૨૯.૪૬/૨માયાં હિ મે વેત્સ્યસિ સંનિમગ્નઃ ।
૨૨૯.૪૬/૩તતો નિમગ્નોऽમ્ભસિ નારદોऽસૌ ।
૨૨૯.૪૬/૪કન્યા બભૌ કાશિપતેઃ સુશીલા ॥ ૨૨૯.૪૬॥

૨૨૯.૪૭/૧તાં યૌવનાઢ્યામથ ચારુધર્મિણે ।
૨૨૯.૪૭/૨વિદર્ભરાજ્ઞસ્તનયાય વૈ દદૌ ।
૨૨૯.૪૭/૩સ્વધર્મણે સોऽપિ તયા સમેતઃ ।

૨૨૯.૪૭/૪સિષેવ કામાન્ અતુલાન્ મહર્ષિઃ ॥ ૨૨૯.૪૭॥

૨૨૯.૪૮/૧સ્વર્ગે ગતેઽસૌ પિતરિ પ્રતાપવાન્ ।
૨૨૯.૪૮/૨રાજ્યં ક્રમાયાતમવાપ્ય હૃષ્ટઃ ।
૨૨૯.૪૮/૩વિદર્ભરાષ્ટ્રં પરિપાલયાનઃ ।
૨૨૯.૪૮/૪પુત્રૈઃ સપૌત્રૈર્બહુભિર્વૃતોઽભૂત્ ॥ ૨૨૯.૪૮॥

૨૨૯.૪૯/૧અથાભવદ્ ભૂમિપતેઃ સુધર્મણઃ ।
૨૨૯.૪૯/૨કાશીશ્વરેણાથ સમં સુયુદ્ધમ્ ।
૨૨૯.૪૯/૩તત્ર ક્ષયં પ્રાપ્ય સપુત્રપૌત્રમ્ ।
૨૨૯.૪૯/૪વિદર્ભરાટ્ કાશિપતિશ્ચ યુદ્ધે ॥ ૨૨૯.૪૯॥

૨૨૯.૫૦/૧તતઃ સુશીલા પિતરં સપુત્રમ્ ।
૨૨૯.૫૦/૨જ્ઞાત્વા પતિં ચાપિ સપુત્રપૌત્રમ્ ।
૨૨૯.૫૦/૩પુરાદ્ વિનિઃસૃત્ય રણાવનિં ગતા ।
૨૨૯.૫૦/૪દૃષ્ટ્વા સુશીલા કદનં મહાન્તમ્ ॥ ૨૨૯.૫૦॥

૨૨૯.૫૧/૧ભર્તુર્બલે તત્ર પિતુર્બલે ચ ।
૨૨૯.૫૧/૨દુઃખાન્વિતા સા સુચિરં વિલપ્ય ।
૨૨૯.૫૧/૩જગામ સા માતરમાર્તરૂપા ।
૨૨૯.૫૧/૪ભ્રાતૄન્ સુતાન્ ભ્રાતૃસુતાન્ સપૌત્રાન્ ॥ ૨૨૯.૫૧॥

૨૨૯.૫૨/૧ભર્તારમેષા પિતરં ચ ગૃહ્ય ।
૨૨૯.૫૨/૨મહાશ્મશાને ચ મહાચિતિં સા ।
૨૨૯.૫૨/૩કૃત્વા હુતાશં પ્રદદૌ સ્વયં ચ ।
૨૨૯.૫૨/૪યદા સમિદ્ધો હુતભુગ્ બભૂવ ॥ ૨૨૯.૫૨॥

૨૨૯.૫૩/૧તદા સુશીલા પ્રવિવેશ વેગાદ્ ।
૨૨૯.૫૩/૨ધા પુત્ર હા પુત્ર ઇતિ બ્રુવાણા ।
૨૨૯.૫૩/૩તદા પુનઃ સા મુનિર્નારદોઽભૂત્ ।
૨૨૯.૫૩/૪સ ચાપિ વહ્નિઃ સ્ફટિકામલાભઃ ॥ ૨૨૯.૫૩॥

૨૨૯.૫૪/૧પૂર્ણં સરોઽભૂદ્ અથ ચોત્તતાર ।
૨૨૯.૫૪/૨તસ્યાગ્રતો દેવવરસ્તુ કેશવઃ ।
૨૨૯.૫૪/૩।
૨૨૯.૫૪/૪પ્રહસ્ય દેવર્ષિમુવાચ નારદમ્ ॥ ૨૨૯.૫૪॥

૨૨૯.૫૫/૧કસ્તે તુ પુત્રો વદ મે મહર્ષે ।
૨૨૯.૫૫/૨મૃતં ચ કં શોચસિ નષ્ટબુદ્ધિઃ ।
૨૨૯.૫૫/૩વ્રીડાન્વિતોઽભૂદ્ અથ નારદોઽસૌ ।
૨૨૯.૫૫/૪તતોઽહમેનં પુનરેવ ચાહ ॥ ૨૨૯.૫૫॥

૨૨૯.૫૬/૧ઇતીદૃશા નારદ કષ્ટરૂપા ।
૨૨૯.૫૬/૨માયા મદીયા કમલાસનાદ્યૈઃ ।
૨૨૯.૫૬/૩શક્યા ન વેત્તું સમહેન્દ્રરુદ્રૈઃ ।
૨૨૯.૫૬/૪કથં ભવાન્ વેત્સ્યતિ દુર્વિભાવ્યામ્ ॥ ૨૨૯.૫૬॥

૨૨૯.૫૭/૧સ વાક્યમાકર્ણ્ય મહામહર્ષિર્।
૨૨૯.૫૭/૨ઉવાચ ભક્તિં મમ દેહિ વિષ્ણો ।
૨૨૯.૫૭/૩પ્રામેઽથ કાલે સ્મરણં તથૈવ ।
૨૨૯.૫૭/૪સદા ચ સંદર્શનમીશ તેઽસ્તુ ॥ ૨૨૯.૫૭॥

૨૨૯.૫૮/૧યત્રાહમાર્તશ્ચિતિમધ્ય રૂઢસ્- ।
૨૨૯.૫૮/૨તત્ તીર્થમસ્ત્વચ્યુતપાપહન્ત્રા ।
૨૨૯.૫૮/૩અધિષ્ઠિતં કેશવ નિત્યમેવ ।
૨૨૯.૫૮/૪ત્વયા સહાસં કમલોદ્ભવેન ॥ ૨૨૯.૫૮॥

૨૨૯.૫૯/૧તતો મયોક્તો દ્વિજ નારદોઽસૌ ।
૨૨૯.૫૯/૨તીર્થં સિતોદે હિ ચિતિસ્તવાસ્તુ ।
૨૨૯.૫૯/૩સ્થાસ્યામ્યહં ચાત્ર સદૈવ વિષ્ણુર્।
૨૨૯.૫૯/૪મહેશ્વરઃ સ્થાસ્યતિ ચોત્તરેણ ॥ ૨૨૯.૫૯॥

૨૨૯.૬૦/૧યદા વિરઞ્ચેર્વદનં ત્રિનેત્રઃ ।
૨૨૯.૬૦/૨સ ચ્છેત્સ્યતેયં ચ મમોગ્રવાચમ્ ।
૨૨૯.૬૦/૩તદા કપાલસ્ય તુ મોચનાય ।
૨૨૯.૬૦/૪સમેષ્યતે તીર્થમિદં ત્વદીયમ્ ॥ ૨૨૯.૬૦॥

૨૨૯.૬૧/૧સ્નાતસ્ય તીર્થે ત્રિપુરાન્તકસ્ય ।
૨૨૯.૬૧/૨પતિષ્યતે ભૂમિતલે કપાલમ્ ।
૨૨૯.૬૧/૩તતસ્તુ તીર્થેતિ કપાલમોચનમ્ ।
૨૨૯.૬૧/૪ખ્યાતં પૃથિવ્યાં ચ ભવિષ્યતે તત્ ॥ ૨૨૯.૬૧॥

૨૨૯.૬૨/૧તદા પ્રભૃત્યમ્બુદવાહનોઽસૌ ।
૨૨૯.૬૨/૨ન મોક્ષ્યતે તીર્થવરં સુપુણ્યમ્ ।

૨૨૯.૬૨/૩ન ચૈવ તસ્મિન્ દ્વિજ સમ્પ્રચક્ષતે ।
૨૨૯.૬૨/૪તત્ ક્ષેત્રમુગ્રં ત્વથ બ્રહ્મવધ્યા ॥ ૨૨૯.૬૨॥

૨૨૯.૬૩/૧યદા ન મોક્ષત્યમરારિહન્તા ।
૨૨૯.૬૩/૨તત્ ક્ષેત્રમુખ્યં મહદ્ આપ્તપુણ્યમ્ ।
૨૨૯.૬૩/૩તદા વિમુક્તેતિ સુરૈ રહસ્યમ્ ।
૨૨૯.૬૩/૪તીર્થં સ્તુતં પુણ્યદમવ્યયાખ્યમ્ ॥ ૨૨૯.૬૩॥

૨૨૯.૬૪/૧કૃત્વા તુ પાપાનિ નરો મહાન્તિ ।
૨૨૯.૬૪/૨તસ્મિન્ પ્રવિષ્ટઃ શુચિરપ્રમાદી ।
૨૨૯.૬૪/૩યદા તુ માં ચિન્તયતે સ શુદ્ધઃ ।
૨૨૯.૬૪/૪પ્રયાતિ મોક્ષં ભગવત્પ્રસાદાત્ ॥ ૨૨૯.૬૪॥

૨૨૯.૬૫/૧ભૂત્વા તસ્મિન્ રુદ્રપિશાચસંજ્ઞો ।
૨૨૯.૬૫/૨યોન્યન્તરે દુઃખમુપાશ્નુતેઽસૌ ।
૨૨૯.૬૫/૩વિમુક્તપાપો બહુવર્ષપૂગૈર્।
૨૨૯.૬૫/૪ઉત્પત્તિમાયાસ્યતિ વિપ્રગેહે ॥ ૨૨૯.૬૫॥

૨૨૯.૬૬/૧શુચિર્યતાત્માસ્ય તતોઽન્તકાલે ।
૨૨૯.૬૬/૨રુદ્રો હિતં તારકમસ્ય કીર્તયેત્ ।
૨૨૯.૬૬/૩ઇત્યેવમુક્ત્વા દ્વિજવર્ય નારદમ્ ।
૨૨૯.૬૬/૪ગતોઽસ્મિ દુગ્ધાર્ણવમાત્મગેહમ્ ॥ ૨૨૯.૬૬॥

૨૨૯.૬૭/૧સ ચાપિ વિપ્રસ્ત્રિદિવં ચચાર ।
૨૨૯.૬૭/૨ગન્ધર્વરાજેન સમર્ચ્યમાનઃ ।
૨૨૯.૬૭/૩એતત્ તવોક્તં નનુ બોધનાય ।
૨૨૯.૬૭/૪માયા મદીયા નહિ શક્યતે સા ॥ ૨૨૯.૬૭॥

૨૨૯.૬૮/૧જ્ઞાતું ભવાન્ ઇચ્છતિ ચેત્ તતોઽદ્ય ।
૨૨૯.૬૮/૨એવં વિશસ્વાપ્સુ ચ વેત્સિ યેન ।
૨૨૯.૬૮/૩એવં દ્વિજાતિર્હરિણા પ્રબોધિતો ।
૨૨૯.૬૮/૪ભાવ્યર્થયોગાન્ નિમમજ્જ તોયે ॥ ૨૨૯.૬૮॥

૨૨૯.૬૯/૧કોકામુખે તાત તતો હિ કન્યા ।
૨૨૯.૬૯/૨ચાણ્ડાલવેશ્મન્યભવદ્ દ્વિજઃ સઃ ।
૨૨૯.૬૯/૩રૂપાન્વિતા શીલગુણોપપન્ના ।
૨૨૯.૬૯/૪અવાપ સા યૌવનમાસસાદ ॥ ૨૨૯.૬૯॥

૨૨૯.૭૦/૧ચાણ્ડાલપુત્રેણ સુબાહુનાપિ ।
૨૨૯.૭૦/૨વિવાહિતા રૂપવિવર્જિતેન ।
૨૨૯.૭૦/૩પતિર્ન તસ્યા હિ મતો બભૂવ ।
૨૨૯.૭૦/૪સા તસ્ય ચૈવાભિમતા બભૂવ ॥ ૨૨૯.૭૦॥

૨૨૯.૭૧/૧પુત્રદ્વયં નેત્રહીનં બભૂવ ।
૨૨૯.૭૧/૨કન્યા ચ પશ્ચાદ્ બધિરા તથાન્યા ।
૨૨૯.૭૧/૩પતિર્દરિદ્રસ્ત્વથ સાપિ મુગ્ધા ।
૨૨૯.૭૧/૪નદીગતા રોદિતિ તત્ર નિત્યમ્ ॥ ૨૨૯.૭૧॥

૨૨૯.૭૨/૧ગતા કદાચિત્ કલશં ગૃહીત્વા ।
૨૨૯.૭૨/૨સાન્તર્જલં સ્નાતુમથ પ્રવિષ્ટા ।
૨૨૯.૭૨/૩યાવદ્ દ્વિજોऽસૌ પુનરેવ તાવજ્ ।
૨૨૯.૭૨/૪જાતઃ ક્રિયાયોગરતઃ સુશીલઃ ॥ ૨૨૯.૭૨॥

૨૨૯.૭૩/૧તસ્યાઃ સ ભર્તાથ ચિરંગતેતિ ।
૨૨૯.૭૩/૨દ્રષ્ટું જગામાથ નદીં સુપુણ્યામ્ ।
૨૨૯.૭૩/૩દદર્શ કુમ્ભં ન ચ તાં તટસ્થામ્ ।
૨૨૯.૭૩/૪તતોऽતિદુઃખાત્ પ્રરુરોદ નાદયન્ ॥ ૨૨૯.૭૩॥

૨૨૯.૭૪/૧તતોऽન્ધયુગ્મં બધિરા ચ કન્યા ।
૨૨૯.૭૪/૨દુઃખાન્વિતાસૌ સમુપાજગામ ।
૨૨૯.૭૪/૩તે વૈ રુદન્તં પિતરં ચ દૃષ્ટ્વા ।
૨૨૯.૭૪/૪દુઃખાન્વિતા વૈ રુરુદુર્ભૃશાર્તાઃ ॥ ૨૨૯.૭૪॥

૨૨૯.૭૫/૧તતઃ સ પપ્રચ્છ નદીતટસ્થાન્ ।
૨૨૯.૭૫/૨દ્વિજાન્ ભવદ્ભિર્યદિ યોષિદ્ એકા ।
૨૨૯.૭૫/૩દૃષ્ટા તુ તોયાર્થમુપાદ્રવન્તી ।
૨૨૯.૭૫/૪આખ્યાત તે પ્રોચુરિમાં પ્રવિષ્ટા ॥ ૨૨૯.૭૫॥

૨૨૯.૭૬/૧નદીં ન ભૂયસ્તુ સમુત્તતાર ।
૨૨૯.૭૬/૨એતાવદ્ એવેહ સમીહિતં નઃ ।
૨૨૯.૭૬/૩સ તદ્વચો ઘોરતરં નિશમ્ય ।
૨૨૯.૭૬/૪રુરોદ શોકાશ્રુપરિપ્લુતાક્ષઃ ॥ ૨૨૯.૭૬॥

૨૨૯.૭૭/૧તં વૈ રુદન્તં સસુતં સકન્યમ્ ।

૨૨૯.૭૭/૨દૃષ્ટ્વાહમાર્તઃ સુતરાં બભૂવ ।
૨૨૯.૭૭/૩આર્તિશ્ચ મેઽભૂદ્ અથ સંસ્મૃતિશ્ચ ।
૨૨૯.૭૭/૪ચાણ્ડાલયોષાહમિતિ ક્ષિતીશ ॥ ૨૨૯.૭૭ ॥

૨૨૯.૭૮/૧તતોઽબ્રવં તં નૃપતે મતઙ્ગમ્ ।
૨૨૯.૭૮/૨કિમર્થમાર્તેન હિ રુધ્યતે ત્વયા ।
૨૨૯.૭૮/૩તસ્યા ન લાભો ભવિતાતિમૌર્ખ્યાદ્ ।
૨૨૯.૭૮/૪આક્રન્દિતેનેહ વૃથા હિ કિં તે ॥ ૨૨૯.૭૮ ॥

૨૨૯.૭૯/૧સ મામુવાચાત્મજયુગ્મમન્ધમ્ ।
૨૨૯.૭૯/૨કન્યા ચૈકા બધિરેયં તથૈવ ।
૨૨૯.૭૯/૩કથં દ્વિજાતે અધુનાર્તમેતમ્ ।
૨૨૯.૭૯/૪આશ્વાસયિષ્યેઽપ્યથ પોષયિષ્યે ॥ ૨૨૯.૭૯ ॥

૨૨૯.૮૦/૧ઇત્યેવમુક્ત્વા સ સુતૈશ્ચ સાર્ધમ્ ।
૨૨૯.૮૦/૨ફૂત્કૃત્ય ફૂત્કૃત્ય ચ રોદિતિ સ્મ ।
૨૨૯.૮૦/૩યથા યથા રોદિતિ સ શ્વપાકસ્- ।
૨૨૯.૮૦/૪તથા તથા મે હ્યભવત્ કૃતાપિ ॥ ૨૨૯.૮૦ ॥

૨૨૯.૮૧/૧તતોઽહમાર્તં તુ નિવાર્ય તં વૈ ।
૨૨૯.૮૧/૨સ્વવંશવૃત્તાન્તમથાચચક્ષે ।
૨૨૯.૮૧/૩તતઃ સ દુઃખાત્ સહ પુત્રકૈઃ ।
૨૨૯.૮૧/૪સંવિવેશ કોકામુખમાર્તરૂપઃ ॥ ૨૨૯.૮૧ ॥

૨૨૯.૮૨/૧પ્રવિષ્ટમાત્રે સલિલે મતઙ્ગસ્- ।
૨૨૯.૮૨/૨તીર્થપ્રભાવાચ્ચ વિમુક્તપાપઃ ।
૨૨૯.૮૨/૩વિમાનમારુહ્ય શશિપ્રકાશમ્ ।
૨૨૯.૮૨/૪યયૌ દિવં તાત મમોપપશ્યતઃ ॥ ૨૨૯.૮૨ ॥

૨૨૯.૮૩/૧તસ્મિન્ પ્રવિષ્ટે સલિલે મૃતે ચ ।
૨૨૯.૮૩/૨મમાર્તિરાસીદ્ અતિમોહકર્ત્રી ।
૨૨૯.૮૩/૩તતોઽતિપુણ્યે નૃપવર્ય કોકા+ ।
૨૨૯.૮૩/૪જલે પ્રવિષ્ટસ્ત્રિદિવં ગતશ્ચ ॥ ૨૨૯.૮૩ ॥

૨૨૯.૮૪/૧ભૂયોઽભવં વૈશ્યકુલે વ્યથાર્તો ।
૨૨૯.૮૪/૨જાતિસ્મરસ્તીર્થવરપ્રસાદાત્ ।
૨૨૯.૮૪/૩તતોઽતિનિર્વિણ્ણમના ગતોઽહમ્ ।

૨૨૯.૮૪/૪કોકામુખં સંયતવાક્યચિત્તઃ ॥ ૨૨૯.૮૪॥

૨૨૯.૮૫/૧વ્રતં સમાસ્થાય કલેવરં સ્વમ્ ।
૨૨૯.૮૫/૨સંશોષયિત્વા દિવમારુરોહ ।
૨૨૯.૮૫/૩તસ્માચ્ચ્યુતસ્ત્વદ્ભવને ચ જાતો ।
૨૨૯.૮૫/૪જાતિસ્મરસ્તાત હરિપ્રસાદાત્ ॥ ૨૨૯.૮૫॥

૨૨૯.૮૬/૧સોઽહં સમારાધ્ય મુરારિદેવમ્ ।
૨૨૯.૮૬/૨કોકામુખે ત્યક્તશુભાશુભેચ્છઃ ।
૨૨૯.૮૬/૩ઇત્યેવમુક્ત્વા પિતરં પ્રણમ્ય ।
૨૨૯.૮૬/૪ગત્વા ચ કોકામુખમગ્રતીર્થમ્ ।
૨૨૯.૮૬/૫વિષ્ણું સમારાધ્ય વરાહરૂપમ્ ।
૨૨૯.૮૬/૬અવાપ સિદ્ધિં મનુજર્ષભોઽસૌ ॥ ૨૨૯.૮૬॥

૨૨૯.૮૭/૧ઇત્થં સ કામદમનઃ સહપુત્રપૌત્રઃ ।
૨૨૯.૮૭/૨કોકામુખે તીર્થવરે સુપુણ્યે ।
૨૨૯.૮૭/૩ત્યક્ત્વા તનું દોષમયીં તતસ્તુ ।
૨૨૯.૮૭/૪ગતો દિવં સૂર્યસમૈર્વિમાનૈઃ ॥ ૨૨૯.૮૭॥

૨૨૯.૮૮/૧એવં મયોક્તા પરમેશ્વરસ્ય ।
૨૨૯.૮૮/૨માયા સુરાણામપિ દુર્વિચિન્ત્યા ।
૨૨૯.૮૮/૩સ્વપ્નેન્દ્રજાલપ્રતિમા મુરારેર્।
૨૨૯.૮૮/૪યયા જગન્ મોહમુપૈતિ વિપ્રાઃ ॥ ૨૨૯.૮૮॥

૨૩૦.૧/૧મુનય ઊચુઃ । અસ્માભિસ્તુ શ્રુતં વ્યાસ યત્ ત્વયા સમુદાહૃતમ્ ।
૨૩૦.૧/૨પ્રાદુર્ભાવાશ્રિતં પુણ્યં માયા વિષ્ણોશ્ચ દુર્વિદા ॥ ૨૩૦.૧॥

૨૩૦.૨/૧શ્રોતુમિચ્છામહે ત્વત્તો યથાવદ્ ઉપસંહૃતિમ્ ।
૨૩૦.૨/૨મહાપ્રલયસંજ્ઞાં ચ કલ્પાન્તે ચ મહામુને ॥ ૨૩૦.૨॥

૨૩૦.૩/૧વ્યાસ ઉવાચ । શ્રૂયતાં ભો મુનિશ્રેષ્ઠા યથાવદ્ અનુસંહૃતિઃ ।
૨૩૦.૩/૨કલ્પાન્તે પ્રાકૃતે ચૈવ પ્રલયે જાયતે યથા ॥ ૨૩૦.૩॥

૨૩૦.૪/૧અહોરાત્રં પિતૃણાં તુ માસોઽબ્દં ત્રિદિવૌકસામ્ ।
૨૩૦.૪/૨ચતુર્યુગસહસ્રે તુ બ્રહ્મણોઽહર્દ્વિજોત્તમાઃ ॥ ૨૩૦.૪॥

૨૩૦.૫/૧કૃતં ત્રેતા દ્વાપરં ચ કલિશ્ચેતિ ચતુર્યુગમ્ ।
૨૩૦.૫/૨દૈવૈર્વર્ષસહસ્રૈસ્તુ તદ્ દ્વાદશાભિરુચ્યતે ॥ ૨૩૦.૫॥

૨૩૦.૬/૧ચતુર્યુગાણ્યશેષાણિ સદૃશાનિ સ્વરૂપતઃ ।
૨૩૦.૬/૨આદ્યં કૃતયુગં પ્રોક્તં મુનયોઽન્ત્યં તથા કલિમ્ ॥ ૨૩૦.૬॥

૨૩૦.૭/૧આદ્યે કૃતયુગે સર્ગો બ્રહ્મણા ક્રિયતે યતઃ ।
૨૩૦.૭/૨ક્રિયતે ચોપસંહારસ્તથાન્તેઽપિ કલૌ યુગે ॥ ૨૩૦.૭॥

૨૩૦.૮/૧મુનય ઊચુઃ । કલેઃ સ્વરૂપં ભગવન્ વિસ્તરાદ્ વક્તુમર્હસિ ।
૨૩૦.૮/૨ધર્મશ્ચતુષ્પાદ્ ભગવાન્ યસ્મિન્ વૈકલ્યમ્ ઋચ્છતિ ॥ ૨૩૦.૮॥

૨૩૦.૯/૧વ્યાસ ઉવાચ । કલિસ્વરૂપં ભો વિપ્રા યત્ પૃચ્છધ્વં મમાનઘાઃ ।
૨૩૦.૯/૨નિબોધધ્વં સમાસેન વર્તતે યન્ મહત્તરમ્ ॥ ૨૩૦.૯॥

૨૩૦.૧૦/૧વર્ણાશ્રમાચારવતી પ્રવૃત્તિર્ન કલૌ નૃણામ્ ।
૨૩૦.૧૦/૨ન સામ+ઋગ્યજુર્વેદ+ ।વિનિષ્પાદનહૈતુકી ॥ ૨૩૦.૧૦॥

૨૩૦.૧૧/૧વિવાહા ન કલૌ ધર્મા ન શિષ્યા ગુરુસંસ્થિતાઃ ।
૨૩૦.૧૧/૨ન પુત્રા ધાર્મિકાશ્ચૈવ ન ચ વહ્નિક્રિયાક્રમઃ ॥ ૨૩૦.૧૧॥

૨૩૦.૧૨/૧યત્ર તત્ર કુલે જાતો બલી સર્વેશ્વરઃ કલૌ ।
૨૩૦.૧૨/૨સર્વેભ્ય એવ વર્ણેભ્યો નરઃ કન્યોપજીવનઃ ॥ ૨૩૦.૧૨॥

૨૩૦.૧૩/૧યેન તેનૈવ યોગેન દ્વિજાતિર્દીક્ષિતઃ કલૌ ।
૨૩૦.૧૩/૨યૈવ સૈવ ચ વિપ્રેન્દ્રાઃ પ્રાયશ્ચિત્તક્રિયા કલૌ ॥ ૨૩૦.૧૩॥

૨૩૦.૧૪/૧સર્વમેવ કલૌ શાસ્ત્રં યસ્ય યદ્ વચનં દ્વિજાઃ ।
૨૩૦.૧૪/૨દેવતાશ્ચ કલૌ સર્વાઃ સર્વઃ સર્વસ્ય ચાશ્રમઃ ॥ ૨૩૦.૧૪॥

૨૩૦.૧૫/૧ઉપવાસસ્તથાયાસો વિત્તોત્સર્ગસ્તથા કલૌ ।
૨૩૦.૧૫/૨ધર્મો યથાભિરુચિતૈરનુષ્ઠાનૈરનુષ્ઠિતઃ ॥ ૨૩૦.૧૫॥

૨૩૦.૧૬/૧વિત્તેન ભવિતા પુંસાં સ્વલ્પેનૈવ મદઃ કલૌ ।
૨૩૦.૧૬/૨સ્ત્રીણાં રૂપમદશ્ચૈવ કેશૈરેવ ભવિષ્યતિ ॥ ૨૩૦.૧૬॥

૨૩૦.૧૭/૧સુવર્ણમણિરત્નાદૌ વસ્ત્રે ચોપક્ષયં ગતે ।
૨૩૦.૧૭/૨કલૌ સ્ત્રિયો ભવિષ્યન્તિ તદા કેશૈરલંકૃતાઃ ॥ ૨૩૦.૧૭॥

૨૩૦.૧૮/૧પરિત્યક્ષ્યન્તિ ભર્તારં વિત્તહીનં તથા સ્ત્રિયઃ ।
૨૩૦.૧૮/૨ભર્તા ભવિષ્યતિ કલૌ વિત્તવાન્ એવ યોષિતામ્ ॥ ૨૩૦.૧૮॥

૨૩૦.૧૯/૧યો યો દદાતિ બહુલં સ સ સ્વામી તદા નૃણામ્ ।
૨૩૦.૧૯/૨સ્વામિત્વહેતુસમ્બન્ધો ભવિતાભિજનસ્તદા ॥ ૨૩૦.૧૯॥

૨૩૦.૨૦/૧ગૃહાન્તા દ્રવ્યસંઘાતા દ્રવ્યાન્તા ચ તથા મતિઃ ।
૨૩૦.૨૦/૨અર્થાશ્ચાર્થોપભોગાન્તા ભવિષ્યન્તિ તદા કલૌ ॥ ૨૩૦.૨૦॥

૨૩૦.૨૧/૧સ્ત્રિયઃ કલૌ ભવિષ્યન્તિ સ્વૈરિણ્યો લલિતસ્પૃહાઃ ।
૨૩૦.૨૧/૨અન્યાયાવાપ્તવિત્તેષુ પુરુષેષુ સ્પૃહાલવઃ ॥ ૨૩૦.૨૧॥

૨૩૦.૨૨/૧અભ્યર્થિતોઽપિ સુહૃદા સ્વાર્થહાનિં તુ માનવઃ ।
૨૩૦.૨૨/૨પણસ્યાર્ધાર્ધમાત્રેઽપિ કરિષ્યતિ તદા દ્વિજાઃ ॥ ૨૩૦.૨૨॥

૨૩૦.૨૩/૧સદા સપૌરુષં ચેતો ભાવિ વિપ્ર તદા કલૌ ।
૨૩૦.૨૩/૨ક્ષીરપ્રદાનસમ્બન્ધિ ભાતિ ગોષુ ચ ગૌરવમ્ ॥ ૨૩૦.૨૩॥

૨૩૦.૨૪/૧અનાવૃષ્ટિભયાત્ પ્રાયઃ પ્રજાઃ ક્ષુદ્ભયકાતરાઃ ।
૨૩૦.૨૪/૨ભવિષ્યન્તિ તદા સર્વા ગગનાસક્તદૃષ્ટયઃ ॥ ૨૩૦.૨૪॥

૨૩૦.૨૫/૧મૂલપર્ણફલાહારાસ્તાપસા ઇવ માનવાઃ ।
૨૩૦.૨૫/૨આત્માનં ઘાતયિષ્યન્તિ તદાવૃષ્ટ્યાભિદુઃખિતાઃ ॥ ૨૩૦.૨૫॥

૨૩૦.૨૬/૧દુર્ભિક્ષમેવ સતતં સદા ક્લેશમનીશ્વરાઃ ।
૨૩૦.૨૬/૨પ્રાપ્સ્યન્તિ વ્યાહતસુખં પ્રમાદાન્ માનવાઃ કલૌ ॥ ૨૩૦.૨૬॥

૨૩૦.૨૭/૧અસ્નાતભોજિનો નાગ્નિ+ ।દેવતાતિથિપૂજનમ્ ।
૨૩૦.૨૭/૨કરિષ્યન્તિ કલૌ પ્રાપ્તે ન ચ પિણ્ડોદકક્રિયામ્ ॥ ૨૩૦.૨૭॥

૨૩૦.૨૮/૧લોલુપા હ્રસ્વદેહાશ્ચ બહ્વન્નાદનતત્પરાઃ ।
૨૩૦.૨૮/૨બહુપ્રજાલ્પભાગ્યાશ્ચ ભવિષ્યન્તિ કલૌ સ્ત્રિયઃ ॥ ૨૩૦.૨૮॥

૨૩૦.૨૯/૧ઉભાભ્યામથ પાણિભ્યાં શિરઃકણ્ડૂયનં સ્ત્રિયઃ ।
૨૩૦.૨૯/૨કુર્વત્યો ગુરુભર્તૃણામાજ્ઞાં ભેત્સ્યન્ત્યનાવૃતાઃ ॥ ૨૩૦.૨૯॥

૨૩૦.૩૦/૧સ્વપોષણપરાઃ ક્ષુદ્રા દેહસંસ્કારવર્જિતાઃ ।
૨૩૦.૩૦/૨પરુષાનૃતભાષિણ્યો ભવિષ્યન્તિ કલૌ સ્ત્રિયઃ ॥ ૨૩૦.૩૦॥

૨૩૦.૩૧/૧દુઃશીલા દુષ્ટશીલેષુ કુર્વત્યઃ સતતં સ્પૃહામ્ ।
૨૩૦.૩૧/૨અસદ્વૃત્તા ભવિષ્યન્તિ પુરુષેષુ કુલાઙ્ગનાઃ ॥ ૨૩૦.૩૧॥

૨૩૦.૩૨/૧વેદાદાનં કરિષ્યન્તિ વડવાશ્ચ તથાવ્રતાઃ ।
૨૩૦.૩૨/૨ગૃહસ્થાશ્ચ ન હોષ્યન્તિ ન દાસ્યન્ત્યુચિતાન્યપિ ॥ ૨૩૦.૩૨॥

૨૩૦.૩૩/૧ભવેયુર્વનવાસા વૈ ગ્રામ્યાહારપરિગ્રહાઃ ।

૨૩૦.૩૩/૨ભિક્ષવશ્ચાપિ પુત્રા હિ સ્નેહસમ્બન્ધયન્ત્રકાઃ ॥ ૨૩૦.૩૩॥

૨૩૦.૩૪/૧અરક્ષિતારો હર્તારઃ શુલ્કવ્યાજેન પાર્થિવાઃ ।
૨૩૦.૩૪/૨હારિણો જનવિત્તાનાં સમ્પ્રાપ્તે ચ કલૌ યુગે ॥ ૨૩૦.૩૪॥

૨૩૦.૩૫/૧યો યોઽશ્વરથનાગાઢ્યઃ સ સ રાજા ભવિષ્યતિ ।
૨૩૦.૩૫/૨યશ્ચ યશ્ચાબલઃ સર્વઃ સ સ ભૃત્યઃ કલૌ યુગે ॥ ૨૩૦.૩૫॥

૨૩૦.૩૬/૧વૈશ્યાઃ કૃષિવણિજ્યાદિ સંત્યજ્ય નિજકર્મ યત્ ।
૨૩૦.૩૬/૨શૂદ્રવૃત્ત્યા ભવિષ્યન્તિ કારુકર્મોપજીવિનઃ ॥ ૨૩૦.૩૬॥

૨૩૦.૩૭/૧ભૈક્ષ્યવ્રતાસ્તથા શૂદ્રાઃ પ્રવ્રજ્યાલિઙ્ગિનોઽધમાઃ ।
૨૩૦.૩૭/૨પાખણ્ડસંશ્રયાં વૃત્તિમાશ્રયિષ્યન્ત્યસંસ્કૃતાઃ ॥ ૨૩૦.૩૭॥

૨૩૦.૩૮/૧દુર્ભિક્ષકરપીડાભિરતીવોપદ્રુતા જનાઃ ।
૨૩૦.૩૮/૨ગોધૂમાન્નયવાન્નાઢ્યાન્ દેશાન્ યાસ્યન્તિ દુઃખિતાઃ ॥ ૨૩૦.૩૮॥

૨૩૦.૩૯/૧વેદમાર્ગે પ્રલીને ચ પાખણ્ડાઢ્યે તતો જને ।
૨૩૦.૩૯/૨અધર્મવૃદ્ધ્યા લોકાનામલ્પમાયુર્ભવિષ્યતિ ॥ ૨૩૦.૩૯॥

૨૩૦.૪૦/૧અશાસ્ત્રવિહિતં ઘોરં તપ્યમાનેષુ વૈ તપઃ ।
૨૩૦.૪૦/૨નરેષુ નૃપદોષેણ બાલમૃત્યુર્ભવિષ્યતિ ॥ ૨૩૦.૪૦॥

૨૩૦.૪૧/૧ભવિત્રી યોષિતાં સૂતિઃ પઞ્ચષટ્સપ્તવાર્ષિકી ।
૨૩૦.૪૧/૨નવાષ્ટદશવર્ષાણાં મનુષ્યાણાં તથા કલૌ ॥ ૨૩૦.૪૧॥

૨૩૦.૪૨/૧પલિતોદ્ગમશ્ચ ભવિતા તદા દ્વાદશવાર્ષિકઃ ।
૨૩૦.૪૨/૨ન જીવિષ્યતિ વૈ કશ્ચિત્ કલૌ વર્ષાણિ વિંશતિમ્ ॥ ૨૩૦.૪૨॥

૨૩૦.૪૩/૧અલ્પપ્રજ્ઞા વૃથાલિઙ્ગા દુષ્ટાન્તઃકરણાઃ કલૌ ।
૨૩૦.૪૩/૨યતસ્તતો વિનશ્યન્તિ કાલેનાલ્પેન માનવાઃ ॥ ૨૩૦.૪૩॥

૨૩૦.૪૪/૧યદા યદા હિ પાખણ્ડ+ ।વૃત્તિરત્રોપલક્ષ્યતે ।
૨૩૦.૪૪/૨તદા તદા કલેર્વૃદ્ધિરનુમેયા વિચક્ષણૈઃ ॥ ૨૩૦.૪૪॥

૨૩૦.૪૫/૧યદા યદા સતાં હાનિર્વેદમાર્ગાનુસારિણામ્ ।
૨૩૦.૪૫/૨તદા તદા કલેર્વૃદ્ધિરનુમેયા વિચક્ષણૈઃ ॥ ૨૩૦.૪૫॥

૨૩૦.૪૬/૧પ્રારમ્ભાશ્ચાવસીદન્તિ યદા ધર્મકૃતાં નૃણામ્ ।
૨૩૦.૪૬/૨તદાનુમેયં પ્રાધાન્યં કલેર્વિપ્રા વિચક્ષણૈઃ ॥ ૨૩૦.૪૬॥

૨૩૦.૪૭/૧યદા યદા ન યજ્ઞાનામીશ્વરઃ પુરુષોત્તમઃ ।
૨૩૦.૪૭/૨ઇજ્યતે પુરુષૈર્યજ્ઞૈસ્તદા જ્ઞેયં કલેર્બલમ્ ॥ ૨૩૦.૪૭॥

૨૩૦.૪૮/૧ન પ્રીતિર્વેદવાદેષુ પાખણ્ડેષુ યદા રતિઃ ।
૨૩૦.૪૮/૨કલેર્વૃદ્ધિસ્તદા પ્રાજ્ઞૈરનુમેયા દ્વિજોત્તમાઃ ॥ ૨૩૦.૪૮॥

૨૩૦.૪૯/૧કલૌ જગત્પતિં વિષ્ણું સર્વસ્રષ્ટારમીશ્વરમ્ ।
૨૩૦.૪૯/૨નાર્ચયિષ્યન્તિ ભો વિપ્રાઃ પાખણ્ડોપહતા નરાઃ ॥ ૨૩૦.૪૯॥

૨૩૦.૫૦/૧કિં દેવૈઃ કિં દ્વિજૈર્વેદૈઃ કિં શૌચેનામ્બુજલ્પના ।
૨૩૦.૫૦/૨ઇત્યેવં પ્રલપિષ્યન્તિ પાખણ્ડોપહતા નરાઃ ॥ ૨૩૦.૫૦॥

૨૩૦.૫૧/૧અલ્પવૃષ્ટિશ્ચ પર્જન્યઃ સ્વલ્પં સસ્યફલં તથા ।
૨૩૦.૫૧/૨ફલં તથાલ્પસારં ચ વિપ્રાઃ પ્રાપ્તે કલૌ યુગે ॥ ૨૩૦.૫૧॥

૨૩૦.૫૨/૧જાનુપ્રાયાણિ વસ્ત્રાણિ શમીપ્રાયા મહીરુહાઃ ।
૨૩૦.૫૨/૨શૂદ્રપ્રાયાસ્તથા વર્ણા ભવિષ્યન્તિ કલૌ યુગે ॥ ૨૩૦.૫૨॥

૨૩૦.૫૩/૧અણુપ્રાયાણિ ધાન્યાનિ આજપ્રાયં તથા પયઃ ।
૨૩૦.૫૩/૨ભવિષ્યતિ કલૌ પ્રાપ્ત ઔશીરં ચાનુલેપનમ્ ॥ ૨૩૦.૫૩॥

૨૩૦.૫૪/૧શ્વશ્રૂશ્વશુરભૂયિષ્ઠા ગુરવશ્ચ નૃણાં કલૌ ।
૨૩૦.૫૪/૨શાલાદ્યાહારિભાર્યાશ્ચ સુહૃદો મુનિસત્તમાઃ ॥ ૨૩૦.૫૪॥

૨૩૦.૫૫/૧કસ્ય માતા પિતા કસ્ય યદા કર્માત્મકઃ પુમાન્ ।
૨૩૦.૫૫/૨ઇતિ ચોદાહરિષ્યન્તિ શ્વશુરાનુગતા નરાઃ ॥ ૨૩૦.૫૫॥

૨૩૦.૫૬/૧વાઙ્મનઃકાયજૈર્દોષૈરભિભૂતાઃ પુનઃ પુનઃ ।
૨૩૦.૫૬/૨નરાઃ પાપાન્યનુદિનં કરિષ્યન્ત્યલ્પમેધસઃ ॥ ૨૩૦.૫૬॥

૨૩૦.૫૭/૧નિઃસત્યાનામશૌચાનાં નિર્હ્રીકાણાં તથા દ્વિજાઃ ।
૨૩૦.૫૭/૨યદ્ યદ્ દુઃખાય તત્ સર્વં કલિકાલે ભવિષ્યતિ ॥ ૨૩૦.૫૭॥

૨૩૦.૫૮/૧નિઃસ્વાધ્યાયવષટ્કારે સ્વધાસ્વાહાવિવર્જિતે ।
૨૩૦.૫૮/૨તદા પ્રવિરલો વિપ્રઃ કશ્ચિલ્લોકે ભવિષ્યતિ ॥ ૨૩૦.૫૮॥

૨૩૦.૫૯/૧તત્રાલ્પેનૈવ કાલેન પુણ્યસ્કન્ધમનુત્તમમ્ ।
૨૩૦.૫૯/૨કરોતિ યઃ કૃતયુગે ક્રિયતે તપસા હિ યઃ ॥ ૨૩૦.૫૯॥

૨૩૦.૬૦/૧મુનય ઊચુઃ । કસ્મિન્ કાલેઽલ્પકો ધર્મો દદાતિ સુમહાફલમ્ ।
૨૩૦.૬૦/૨વક્તુમર્હસ્યશેષેણ શ્રોતું વાઞ્છા પ્રવર્તતે ॥ ૨૩૦.૬૦॥

૨૩૦.૬૧/૧વ્યાસ ઉવાચ । ધન્યે કલૌ ભવેદ્ વિપ્રાસ્ત્વલ્પક્લેશૈર્મહત્ ફલમ્ ।
૨૩૦.૬૧/૨તથા ભવેતાં સ્ત્રીશૂદ્રૌ ધન્યૌ ચાન્યન્ નિબોધત ॥ ૨૩૦.૬૧॥

૨૩૦.૬૨/૧યત્ કૃતે દશભિર્વર્ષૈસ્ત્રેતાયાં હાયનેન તત્ ।
૨૩૦.૬૨/૨દ્વાપરે તચ્ચ માસેન અહોરાત્રેણ તત્ કલૌ ॥ ૨૩૦.૬૨॥

૨૩૦.૬૩/૧તપસો બ્રહ્મચર્યસ્ય જપાદેશ્ચ ફલં દ્વિજાઃ ।
૨૩૦.૬૩/૨પ્રાપ્નોતિ પુરુષસ્તેન કલૌ સાધ્વિતિ ભાષિતુમ્ ॥ ૨૩૦.૬૩॥

૨૩૦.૬૪/૧ધ્યાયન્ કૃતે યજન્ યજ્ઞૈસ્ત્રેતાયાં દ્વાપરેઽર્ચયન્ ।
૨૩૦.૬૪/૨યદ્ આપ્નોતિ તદ્ આપ્નોતિ કલૌ સંકીર્ત્ય કેશવમ્ ॥ ૨૩૦.૬૪॥

૨૩૦.૬૫/૧ધર્મોત્કર્ષમતીવાત્ર પ્રાપ્નોતિ પુરુષઃ કલૌ ।
૨૩૦.૬૫/૨સ્વલ્પાયાસેન ધર્મજ્ઞાસ્તેન તુષ્ટોઽસ્મ્યહં કલૌ ॥ ૨૩૦.૬૫॥

૨૩૦.૬૬/૧વ્રતચર્યાપરૈર્ગ્રાહ્યા વેદાઃ પૂર્વં દ્વિજાતિભિઃ ।
૨૩૦.૬૬/૨તતસ્તુ ધર્મસમ્પ્રાપ્તૈર્યષ્ટવ્યં વિધિવદ્ ધનૈઃ ॥ ૨૩૦.૬૬॥

૨૩૦.૬૭/૧વૃથા કથા વૃથા ભોજ્યં વૃથા સ્વં ચ દ્વિજન્મનામ્ ।
૨૩૦.૬૭/૨પતનાય તથા ભાવ્યં તૈસ્તુ સંયતિભિઃ સહ ॥ ૨૩૦.૬૭॥

૨૩૦.૬૮/૧અસમ્યક્કરણે દોષાસ્તેષાં સર્વેષુ વસ્તુષુ ।
૨૩૦.૬૮/૨ભોજ્યપેયાદિકં ચૈષાં નેચ્છાપ્રાપ્તિકરં દ્વિજાઃ ॥ ૨૩૦.૬૮॥

૨૩૦.૬૯/૧પારતન્ત્ર્યાત્ સમસ્તેષુ તેષાં કાર્યેષુ વૈ તતઃ ।
૨૩૦.૬૯/૨લોકાન્ ક્લેશેન મહતા યજન્તિ વિનયાન્વિતાઃ ॥ ૨૩૦.૬૯॥

૨૩૦.૭૦/૧દ્વિજશુશ્રૂષણેનૈવ પાકયજ્ઞાધિકારવાન્ ।
૨૩૦.૭૦/૨નિજં જયતિ વૈ લોકં શૂદ્રો ધન્યતરસ્તતઃ ॥ ૨૩૦.૭૦॥

૨૩૦.૭૧/૧ભક્ષ્યાભક્ષ્યેષુ નાશાસ્તિ યેષાં પાપેષુ વા યતઃ ।
૨૩૦.૭૧/૨નિયમો મુનિશાર્દૂલાસ્તેનાસૌ સાધ્વિતીરિતમ્ ॥ ૨૩૦.૭૧॥

૨૩૦.૭૨/૧સ્વધર્મસ્યાવિરોધેન નરૈર્લભ્યં ધનં સદા ।
૨૩૦.૭૨/૨પ્રતિપાદનીયં પાત્રેષુ યષ્ટવ્યં ચ યથાવિધિ ॥ ૨૩૦.૭૨॥

૨૩૦.૭૩/૧તસ્યાર્જને મહાન્ ક્લેશઃ પાલનેન દ્વિજોત્તમાઃ ।
૨૩૦.૭૩/૨તથા સદ્વિનિયોગાય વિજ્ઞેયં ગહનં નૃણામ્ ॥ ૨૩૦.૭૩॥

૨૩૦.૭૪/૧એભિરન્યૈસ્તથા ક્લેશૈઃ પુરુષા દ્વિજસત્તમાઃ ।

૨૩૦.૭૪/૨નિજાગ્ જયન્તિ વૈ લોકાન્ પ્રાજાપત્યાદિકાન્ ક્રમાત્ ॥ ૨૩૦.૭૪॥

૨૩૦.૭૫/૧યોષિચ્છુશ્રૂષણાદ્ ભર્તુઃ કર્મણા મનસા ગિરા ।
૨૩૦.૭૫/૨એતદ્ વિષયમાપ્નોતિ તત્સાલોક્યં યતો દ્વિજાઃ ॥ ૨૩૦.૭૫॥

૨૩૦.૭૬/૧નાતિક્લેશેન મહતા તાન્ એવ પુરુષો યથા ।
૨૩૦.૭૬/૨તૃતીયં વ્યાહૃતં તેન મયા સાધ્વિતિ યોષિતઃ ॥ ૨૩૦.૭૬॥

૨૩૦.૭૭/૧એતદ્ વઃ કથિતં વિપ્રા યન્નિમિત્તમિહાગતાઃ ।
૨૩૦.૭૭/૨તત્ પૃચ્છધ્વં યથાકામમહં વક્ષ્યામિ વઃ સ્ફુટમ્ ॥ ૨૩૦.૭૭॥

૨૩૦.૭૮/૧અલ્પેનૈવ પ્રયત્નેન ધર્મઃ સિધ્યતિ વૈ કલૌ ।
૨૩૦.૭૮/૨નરૈરાત્મગુણામ્ભોભિઃ ક્ષાલિતાખિલકિલ્બિષૈઃ ॥ ૨૩૦.૭૮॥

૨૩૦.૭૯/૧શૂદ્રૈશ્ચ દ્વિજશુશ્રૂષા+ ।તત્પરૈર્મુનિસત્તમાઃ ।
૨૩૦.૭૯/૨તથા સ્ત્રીભિરનાયાસાત્ પતિશુશ્રૂષયૈવ હિ ॥ ૨૩૦.૭૯॥

૨૩૦.૮૦/૧તતસ્ત્રિતયમપ્યેતન્ મમ ધન્યતમં મતમ્ ।
૨૩૦.૮૦/૨ધર્મસંરાધને ક્લેશો દ્વિજાતીનાં કૃતાદિષુ ॥ ૨૩૦.૮૦॥

૨૩૦.૮૧/૧તથા સ્વલ્પેન તપસા સિદ્ધિં યાસ્યન્તિ માનવાઃ ।
૨૩૦.૮૧/૨ધન્યા ધર્મં ચરિષ્યન્તિ યુગાન્તે મુનિસત્તમાઃ ॥ ૨૩૦.૮૧॥

૨૩૦.૮૨/૧ભવદ્ભિર્યદ્ અભિપ્રેતં તદ્ એતત્ કથિતં મયા ।
૨૩૦.૮૨/૨અપૃષ્ટેનાપિ ધર્મજ્ઞાઃ કિમન્યત્ ક્રિયતાં દ્વિજાઃ ॥ ૨૩૦.૮૨॥

૨૩૧.૧/૧મુનય ઊચુઃ । આસન્નં વિપ્રકૃષ્ટં વા યદિ કાલં ન વિદ્મહે ।
૨૩૧.૧/૨તતો દ્વાપરવિધ્વંસં યુગાન્તં સ્પૃહયામહે ॥ ૨૩૧.૧॥

૨૩૧.૨/૧પ્રાપ્તા વયં હિ તત્ કાલમનયા ધર્મતૃષ્ણયા ।
૨૩૧.૨/૨આદધ્યામ પરં ધર્મં સુખમલ્પેન કર્મણા ॥ ૨૩૧.૨॥

૨૩૧.૩/૧સંત્રાસોદ્વેગજનનં યુગાન્તં સમુપસ્થિતમ્ ।
૨૩૧.૩/૨પ્રનષ્ટધર્મં ધર્મજ્ઞ નિમિત્તૈર્વક્તુમર્હસિ ॥ ૨૩૧.૩॥

૨૩૧.૪/૧વ્યાસ ઉવાચ । અરક્ષિતારો હર્તારો બલિભાગસ્ય પાર્થિવાઃ ।
૨૩૧.૪/૨યુગાન્તે પ્રભવિષ્યન્તિ સ્વરક્ષણપરાયણાઃ ॥ ૨૩૧.૪॥

૨૩૧.૫/૧અક્ષત્રિયાશ્ચ રાજાનો વિપ્રાઃ શૂદ્રોપજીવિનઃ ।
૨૩૧.૫/૨શૂદ્રાશ્ચ બ્રાહ્મણાચારા ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૫॥

૨૩૧.૬/૧શ્રોત્રિયાઃ કાણ્ડપૃષ્ઠાશ્ચ નિષ્કર્માણિ હવીંષિ ચ ।

૨૩૧.૬/૨એકપઙ્ક્ત્યામશિષ્યન્તિ યુગાન્તે મુનિસત્તમાઃ ॥ ૨૩૧.૬॥

૨૩૧.૭/૧અશિષ્ટવન્તોઽર્થપરા નરા મદ્યામિષપ્રિયાઃ ।

૨૩૧.૭/૨મિત્રભાર્યાં ભજિષ્યન્તિ યુગાન્તે પુરુષાધમાઃ ॥ ૨૩૧.૭॥

૨૩૧.૮/૧રાજવૃત્તિસ્થિતાશ્ચૌરા રાજાનશ્ચૌરશીલિનઃ ।

૨૩૧.૮/૨ભૃત્યા હ્યનિર્દિષ્ટભુજો ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૮॥

૨૩૧.૯/૧ધનાનિ શ્લાઘનીયાનિ સતાં વૃત્તમપૂજિતમ્ ।

૨૩૧.૯/૨અકુત્સના ચ પતિતે ભવિષ્યતિ યુગક્ષયે ॥ ૨૩૧.૯॥

૨૩૧.૧૦/૧પ્રનષ્ટનાસાઃ પુરુષા મુક્તકેશા વિરૂપિણઃ ।

૨૩૧.૧૦/૨ઊનષોડશવર્ષાશ્ચ પ્રસોષ્યન્તિ તથા સ્ત્રિયઃ ॥ ૨૩૧.૧૦॥

૨૩૧.૧૧/૧અટ્ટશૂલા જનપદાઃ શિવશૂલાશ્ચતુષ્પથાઃ ।

૨૩૧.૧૧/૨પ્રમદાઃ કેશશૂલાશ્ચ ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૧૧॥

૨૩૧.૧૨/૧સર્વે બ્રહ્મ વદિષ્યન્તિ દ્વિજા વાજસનેયિકાઃ ।

૨૩૧.૧૨/૨શૂદ્રાભા વાદિનશ્ચૈવ બ્રાહ્મણાશ્ચાન્ત્યવાસિનઃ ॥ ૨૩૧.૧૨॥

૨૩૧.૧૩/૧શુક્લદન્તા જિતાક્ષાશ્ચ મુણ્ડાઃ કાષાયવાસસઃ ।

૨૩૧.૧૩/૨શૂદ્રા ધર્મં વદિષ્યન્તિ શાઠ્યબુદ્ધ્યોપજીવિનઃ ॥ ૨૩૧.૧૩॥

૨૩૧.૧૪/૧શ્વાપદપ્રચુરત્વં ચ ગવાં ચૈવ પરિક્ષયઃ ।

૨૩૧.૧૪/૨સાધૂનાં પરિવૃત્તિશ્ચ વિદ્યાદ્ અન્તગતે યુગે ॥ ૨૩૧.૧૪॥

૨૩૧.૧૫/૧અન્ત્યા મધ્યે નિવત્સ્યન્તિ મધ્યાશ્ચાન્તનિવાસિનઃ ।

૨૩૧.૧૫/૨નિર્હ્રીકાશ્ચ પ્રજાઃ સર્વા નષ્ટાસ્તત્ર યુગક્ષયે ॥ ૨૩૧.૧૫॥

૨૩૧.૧૬/૧તપોયજ્ઞફલાનાં ચ વિક્રેતારો દ્વિજોત્તમાઃ ।

૨૩૧.૧૬/૨ઋતવો વિપરીતાશ્ચ ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૧૬॥

૨૩૧.૧૭/૧તથા દ્વિહાયના દમ્યાઃ કલૌ લાઙ્ગલધારિણઃ ।

૨૩૧.૧૭/૨ચિત્રવર્ષી ચ પર્જન્યો યુગે ક્ષીણે ભવિષ્યતિ ॥ ૨૩૧.૧૭॥

૨૩૧.૧૮/૧સર્વે શૂરકુલે જાતાઃ ક્ષમાનાથા ભવન્તિ હિ ।

૨૩૧.૧૮/૨યથા નિમ્નાઃ પ્રજાઃ સર્વા ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૧૮॥

૨૩૧.૧૯/૧પિતૃદેયાનિ દત્તાનિ ભવિષ્યન્તિ તથા સુતાઃ ।

૨૩૧.૧૯/૨ન ચ ધર્મં ચરિષ્યન્તિ માનવા નિર્ગતે યુગે ॥ ૨૩૧.૧૯॥

૨૩૧.૨૦/૧ઊષરા બહુલા ભૂમિઃ પન્થાનસ્તસ્કરાવૃતાઃ ।
૨૩૧.૨૦/૨સર્વે વાણિકાશ્ચૈવ ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૨૦॥

૨૩૧.૨૧/૧પિતૃદાયાદદત્તાનિ વિભજન્તિ તથા સુતાઃ ।
૨૩૧.૨૧/૨હરણે યત્નવન્તોઽપિ લોભાદિભિર્વિરોધિનઃ ॥ ૨૩૧.૨૧॥

૨૩૧.૨૨/૧સૌકુમાર્યે તથા રૂપે રત્ને ચોપક્ષયં ગતે ।
૨૩૧.૨૨/૨ભવિષ્યન્તિ યુગસ્યાન્તે નાર્યઃ કેશૈરલંકૃતાઃ ॥ ૨૩૧.૨૨॥

૨૩૧.૨૩/૧નિર્વીર્યસ્ય રતિસ્તત્ર ગૃહસ્થસ્ય ભવિષ્યતિ ।
૨૩૧.૨૩/૨યુગાન્તે સમનુપ્રાપ્તે નાન્યા ભાર્યાસમા રતિઃ ॥ ૨૩૧.૨૩॥

૨૩૧.૨૪/૧કુશીલાનાર્યભૂયિષ્ઠા વૃથારૂપસમન્વિતાઃ ।
૨૩૧.૨૪/૨પુરુષાલ્પં બહુસ્ત્રીકં તદ્ યુગાન્તસ્ય લક્ષણમ્ ॥ ૨૩૧.૨૪॥

૨૩૧.૨૫/૧બહુયાચનકો લોકો ન દાસ્યતિ પરસ્પરમ્ ।
૨૩૧.૨૫/૨રાજચૌરાગ્નિદણ્ડાદિ+ ।ક્ષીણઃ ક્ષયમુપૈષ્યતિ ॥ ૨૩૧.૨૫॥

૨૩૧.૨૬/૧અફલાનિ ચ સસ્યાનિ તરુણા વૃદ્ધશીલિનઃ ।
૨૩૧.૨૬/૨અશીલાઃ સુખિનો લોકે ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૨૬॥

૨૩૧.૨૭/૧વર્ષાસુ પરુષા વાતા નીચાઃ શર્કરવર્ષિણઃ ।
૨૩૧.૨૭/૨સંદિગ્ધઃ પરલોકશ્ચ ભવિષ્યતિ યુગક્ષયે ॥ ૨૩૧.૨૭॥

૨૩૧.૨૮/૧વૈશ્યા ઇવ ચ રાજન્યા ધનધાન્યોપજીવિનઃ ।
૨૩૧.૨૮/૨યુગાપક્રમણે પૂર્વં ભવિષ્યન્તિ ન બાન્ધવાઃ ॥ ૨૩૧.૨૮॥

૨૩૧.૨૯/૧અપ્રવૃત્તાઃ પ્રપશ્યન્તિ સમયાઃ શપથાસ્તથા ।
૨૩૧.૨૯/૨ઋણં સવિનયભ્રંશં યુગે ક્ષીણે ભવિષ્યતિ ॥ ૨૩૧.૨૯॥

૨૩૧.૩૦/૧ભવિષ્યત્યફલો હર્ષઃ ક્રોધશ્ચ સફલો નૃણામ્ ।
૨૩૧.૩૦/૨અજાશ્ચાપિ નિરોત્સ્યન્તિ પયસોઽર્થે યુગક્ષયે ॥ ૨૩૧.૩૦॥

૨૩૧.૩૧/૧અશાસ્ત્રવિહિતો યજ્ઞ એવમેવ ભવિષ્યતિ ।
૨૩૧.૩૧/૨અપ્રમાણં કરિષ્યન્તિ નરાઃ પણ્ડિતમાનિનઃ ॥ ૨૩૧.૩૧॥

૨૩૧.૩૨/૧શાસ્ત્રોક્તસ્યાપ્રવક્તારો ભવિષ્યન્તિ ન સંશયઃ ।
૨૩૧.૩૨/૨સર્વઃ સર્વં વિજાનાતિ વૃદ્ધાન્ અનુપસેવ્ય વૈ ॥ ૨૩૧.૩૨॥

૨૩૧.૩૩/૧ન કશ્ચિદ્ અકવિર્નામ યુગાન્તે સમુપસ્થિતે ।

૨૩૧.૩૩/૨નક્ષત્રાણિ વિયોગાનિ ન કર્મસ્થા દ્વિજાતયઃ ॥ ૨૩૧.૩૩॥

૨૩૧.૩૪/૧ચૌરપ્રાયાશ્ચ રાજાનો યુગાન્તે સમુપસ્થિતે ।
૨૩૧.૩૪/૨કુણ્ડીવૃષા નૈકૃતિકાઃ સુરાપા બ્રહ્મવાદિનઃ ॥ ૨૩૧.૩૪॥

૨૩૧.૩૫/૧અશ્વમેધેન યક્ષ્યન્તે યુગાન્તે દ્વિજસત્તમાઃ ।
૨૩૧.૩૫/૨યાજયિષ્યન્ત્યયાજ્યાંસ્તુ તથાભક્ષ્યસ્ય ભક્ષિણઃ ॥ ૨૩૧.૩૫॥

૨૩૧.૩૬/૧બ્રાહ્મણા ધનતૃષ્ણાર્તા યુગાન્તે સમુપસ્થિતે ।
૨૩૧.૩૬/૨ભોઃશબ્દમભિધાસ્યન્તિ ન ચ કશ્ચિત્ પઠિષ્યતિ ॥ ૨૩૧.૩૬॥

૨૩૧.૩૭/૧એકશઙ્ખાસ્તથા નાર્યો ગવેધુકપિનદ્ધકાઃ ।
૨૩૧.૩૭/૨નક્ષત્રાણિ વિવર્ણાનિ વિપરિતા દિશો દશ ॥ ૨૩૧.૩૭॥

૨૩૧.૩૮/૧સંધ્યારાગો વિદગ્ધાઙ્ગો ભવિષ્યતિ યુગક્ષયે ।
૨૩૧.૩૮/૨પ્રેષયન્તિ પિતૃન્ પુત્રા વધૂઃ શ્વશ્રૂઃ સ્વકર્મસુ ॥ ૨૩૧.૩૮॥

૨૩૧.૩૯/૧યુગેષ્વેવં નિવત્સ્યન્તિ પ્રમદાશ્ચ નરાસ્તથા ।
૨૩૧.૩૯/૨અકૃત્વાગ્રાણિ ભોક્ષ્યન્તિ દ્વિજાશ્ચૈવાહુતાગ્નયઃ ॥ ૨૩૧.૩૯॥

૨૩૧.૪૦/૧ભિક્ષાં બલિમદત્ત્વા ચ ભોક્ષ્યન્તિ પુરુષાઃ સ્વયમ્ ।
૨૩૧.૪૦/૨વઞ્ચયિત્વા પતીન્ સુપ્તાન્ ગમિષ્યન્તિ સ્ત્રિયોઽન્યતઃ ॥ ૨૩૧.૪૦॥

૨૩૧.૪૧/૧ન વ્યાધિતાન્ નાપ્યરૂપાન્ નોદ્યતાન્ નાપ્યસૂયકાન્ ।
૨૩૧.૪૧/૨કૃતે ન પ્રતિકર્તા ચ યુગે ક્ષીણે ભવિષ્યતિ ॥ ૨૩૧.૪૧॥

૨૩૧.૪૨/૧મુનય ઊચુઃ । એવં વિલમ્બિતે ધર્મે માનુષાઃ કરપીડિતાઃ ।
૨૩૧.૪૨/૨કુત્ર દેશે નિવત્સ્યન્તિ કિમાહારવિહારિણઃ ॥ ૨૩૧.૪૨॥

૨૩૧.૪૩/૧કિંકર્માણઃ કિમીહન્તઃ કિમ્પ્રમાણાઃ કિમાયુષઃ ।
૨૩૧.૪૩/૨કાં ચ કાષ્ઠાં સમાસાદ્ય પ્રપત્સ્યન્તિ કૃતં યુગમ્ ॥ ૨૩૧.૪૩॥

૨૩૧.૪૪/૧વ્યાસ ઉવાચ । અત ઊર્ધ્વં ચ્યુતે ધર્મે ગુણહીનાઃ પ્રજાસ્તથા ।
૨૩૧.૪૪/૨શીલવ્યસનમાસાદ્ય પ્રાપ્સ્યન્તિ હ્રાસમાયુષઃ ॥ ૨૩૧.૪૪॥

૨૩૧.૪૫/૧આયુર્હાન્યા બલગ્લાનિર્બલગ્લાન્યા વિવર્ણતા ।
૨૩૧.૪૫/૨વૈવર્ણ્યાદ્ વ્યાધિસમ્પીડા નિર્વેદો વ્યાધિપીડનાત્ ॥ ૨૩૧.૪૫॥

૨૩૧.૪૬/૧નિર્વેદાદ્ આત્મસમ્બોધઃ સમ્બોધાદ્ ધર્મશીલતા ।
૨૩૧.૪૬/૨એવં ગત્વા પરાં કાષ્ઠાં પ્રપત્સ્યન્તિ કૃતં યુગમ્ ॥ ૨૩૧.૪૬॥

૨૩૧.૪૭/૧ઉદ્દેશતો ધર્મશીલાઃ કેચિન્ મધ્યસ્થતાં ગતાઃ ।
૨૩૧.૪૭/૨કિંધર્મશીલાઃ કેચિત્ તુ કેચિદ્ અત્ર કુતૂહલાઃ ॥ ૨૩૧.૪૭॥

૨૩૧.૪૮/૧પ્રત્યક્ષમનુમાનં ચ પ્રમાણમિતિ નિશ્ચિતાઃ ।
૨૩૧.૪૮/૨અપ્રમાણં કરિષ્યન્તિ સર્વમિત્યપરે જનાઃ ॥ ૨૩૧.૪૮॥

૨૩૧.૪૯/૧નાસ્તિક્યપરતાશ્ચાપિ કેચિદ્ ધર્મવિલોપકાઃ ।
૨૩૧.૪૯/૨ભવિષ્યન્તિ નરા મૂઢા દ્વિજાઃ પણ્ડિતમાનિનઃ ॥ ૨૩૧.૪૯॥

૨૩૧.૫૦/૧તદાત્વમાત્રશ્રદ્ધેયા શાસ્ત્રજ્ઞાનબહિષ્કૃતાઃ ।
૨૩૧.૫૦/૨દામ્ભિકાસ્તે ભવિષ્યન્તિ નરા જ્ઞાનવિલોપિતાઃ ॥ ૨૩૧.૫૦॥

૨૩૧.૫૧/૧તથા વિલુલિતે ધર્મે જનાઃ શ્રેષ્ઠપુરસ્કૃતાઃ ।
૨૩૧.૫૧/૨શુભાન્ સમાચરિષ્યન્તિ દાનશીલપરાયણાઃ ॥ ૨૩૧.૫૧॥

૨૩૧.૫૨/૧સર્વભક્ષાઃ સ્વયંગુપ્તા નિર્ઘૃણા નિરપત્રપાઃ ।
૨૩૧.૫૨/૨ભવિષ્યન્તિ તદા લોકે તત્ કષાયસ્ય લક્ષણમ્ ॥ ૨૩૧.૫૨॥

૨૩૧.૫૩/૧કષાયોપપ્લવે કાલે જ્ઞાનનિષ્ઠાપ્રણાશને ।
૨૩૧.૫૩/૨સિદ્ધિમલ્પેન કાલેન પ્રાપ્સ્યન્તિ નિરુપસ્કૃતાઃ ॥ ૨૩૧.૫૩॥

૨૩૧.૫૪/૧વિપ્રાણાં શાશ્વતીં વૃત્તિં યદા વર્ણાવરે જનાઃ ।
૨૩૧.૫૪/૨સંશ્રયિષ્યન્તિ ભો વિપ્રાસ્તત્ કષાયસ્ય લક્ષણમ્ ॥ ૨૩૧.૫૪॥

૨૩૧.૫૫/૧મહાયુદ્ધં મહાવર્ષં મહાવાતં મહાતપઃ ।
૨૩૧.૫૫/૨ભવિષ્યતિ યુગે ક્ષીણે તત્ કષાયસ્ય લક્ષણમ્ ॥ ૨૩૧.૫૫॥

૨૩૧.૫૬/૧વિપ્રરૂપેણ યક્ષાંસિ રાજાનઃ કર્ણવેદિનઃ ।
૨૩૧.૫૬/૨પૃથિવીમુપભોક્ષ્યન્તિ યુગાન્તે સમુપસ્થિતે ॥ ૨૩૧.૫૬॥

૨૩૧.૫૭/૧નિઃસ્વાધ્યાયવષટ્કારાઃ કુનેતારોऽભિમાનિનઃ ।
૨૩૧.૫૭/૨ક્રવ્યાદા બ્રહ્મરૂપેણ સર્વભક્ષ્યા વૃથાવ્રતાઃ ॥ ૨૩૧.૫૭॥

૨૩૧.૫૮/૧મૂર્ખાશ્ચાર્થપરા લુબ્ધાઃ ક્ષુદ્રાઃ ક્ષુદ્રપરિચ્છદાઃ ।
૨૩૧.૫૮/૨વ્યવહારોપવૃત્તાશ્ચ ચ્યુતા ધર્માશ્ચ શાશ્વતાત્ ॥ ૨૩૧.૫૮॥

૨૩૧.૫૯/૧હર્તારઃ પરરત્નાનાં પરદારપ્રધર્ષકાઃ ।
૨૩૧.૫૯/૨કામાત્માનો દુરાત્માનઃ સોપધાઃ પ્રિયસાહસાઃ ॥ ૨૩૧.૫૯॥

૨૩૧.૬૦/૧તેષુ પ્રભવમાણેષુ જનેષ્વપિ ચ સર્વશઃ ।
૨૩૧.૬૦/૨અભાવિનો ભવિષ્યન્તિ મુનયો બહુરૂપિણઃ ॥ ૨૩૧.૬૦॥

૨૩૧.૬૧/૧કલૌ યુગે સમુત્પન્નાઃ પ્રધાનપુરુષાશ્ચ યે ।
૨૩૧.૬૧/૨કથાયોગેન તાન્ સર્વાન્ પૂજયિષ્યન્તિ માનવાઃ ॥ ૨૩૧.૬૧॥

૨૩૧.૬૨/૧સસ્યચૌરા ભવિષ્યન્તિ તથા ચૈલાપહારિણઃ ।
૨૩૧.૬૨/૨ભોક્ષ્યભોજ્યહરાશ્ચૈવ કરણ્ડાનાં ચ હારિણઃ ॥ ૨૩૧.૬૨॥

૨૩૧.૬૩/૧ચૌરાશ્ચૌરસ્ય હર્તારો હન્તા હન્તુર્ભવિષ્યતિ ।
૨૩૧.૬૩/૨ચૌરૈશ્ચૌરક્ષયે ચાપિ કૃતે ક્ષેમં ભવિષ્યતિ ॥ ૨૩૧.૬૩॥

૨૩૧.૬૪/૧નિઃસારે ક્ષુભિતે કાલે નિષ્ક્રિયે સંવ્યવસ્થિતે ।
૨૩૧.૬૪/૨નરા વનં શ્રયિષ્યન્તિ કરભારપ્રપીડિતાઃ ॥ ૨૩૧.૬૪॥

૨૩૧.૬૫/૧યજ્ઞકર્મણ્યુપરતે રક્ષાંસિ શ્વાપદાનિ ચ ।
૨૩૧.૬૫/૨કીટમૂષિકસર્પાશ્ચ ધર્ષયિષ્યન્તિ માનવાન્ ॥ ૨૩૧.૬૫॥

૨૩૧.૬૬/૧ક્ષેમં સુભિક્ષમારોગ્યં સામગ્ર્યં ચૈવ બન્ધુષુ ।
૨૩૧.૬૬/૨ઉદ્દેશેષુ નરાઃ શ્રેષ્ઠા ભવિષ્યન્તિ યુગક્ષયે ॥ ૨૩૧.૬૬॥

૨૩૧.૬૭/૧સ્વયમ્પાલાઃ સ્વયં ચૌરાઃ પ્લવસમ્ભારસમ્ભૃતાઃ ।
૨૩૧.૬૭/૨મણ્ડલૈઃ સમ્ભવિષ્યન્તિ દેશે દેશે પૃથક્ પૃથક્ ॥ ૨૩૧.૬૭॥

૨૩૧.૬૮/૧સ્વદેશેભ્યઃ પરિભ્રષ્ટા નિઃસારાઃ સહ બન્ધુભિઃ ।
૨૩૧.૬૮/૨નરાઃ સર્વે ભવિષ્યન્તિ તદા કાલપરિક્ષયાત્ ॥ ૨૩૧.૬૮॥

૨૩૧.૬૯/૧તતઃ સર્વે સમાદાય કુમારાન્ પ્રદ્રુતા ભયાત્ ।
૨૩૧.૬૯/૨કૌશિકીં સંતરિષ્યન્તિ નરાઃ ક્ષુદ્ભયપીડિતાઃ ॥ ૨૩૧.૬૯॥

૨૩૧.૭૦/૧અઙ્ગાન્ વઙ્ગાન્ કલિઙ્ગાંશ્ચ કાશ્મીરાન્ અથ કોશલાન્ ।
૨૩૧.૭૦/૨ઋષિકાન્તગિરિદ્રોણીઃ સંશ્રયિષ્યન્તિ માનવાઃ ॥ ૨૩૧.૭૦॥

૨૩૧.૭૧/૧કૃત્સ્નં ચ હિમવત્પાર્શ્વં કૂલં ચ લવણામ્ભસઃ ।
૨૩૧.૭૧/૨વિવિધં જીર્ણપત્રં ચ વલ્કલાન્યજિનાનિ ચ ॥ ૨૩૧.૭૧॥

૨૩૧.૭૨/૧સ્વયં કૃત્વા નિવત્સ્યન્તિ તસ્મિન્ ભૂતે યુગક્ષયે ।
૨૩૧.૭૨/૨અરણ્યેષુ ચ વત્સ્યન્તિ નરા મ્લેચ્છગણૈઃ સહ ॥ ૨૩૧.૭૨॥

૨૩૧.૭૩/૧નૈવ શૂન્યા નવારણ્યા ભવિષ્યતિ વસુંધરા ।
૨૩૧.૭૩/૨અગોપ્તારશ્ચ ગોપ્તારો ભવિષ્યન્તિ નરાધિપાઃ ॥ ૨૩૧.૭૩॥

૨૩૧.૭૪/૧મૃગૈર્મત્સ્યૈર્વિહંગૈશ્ચ શ્વાપદૈઃ સર્પકીટકૈઃ ।

૨૩૧.૭૪/૨મધુશાકફલૈર્મૂલૈર્વર્તયિષ્યન્તિ માનવાઃ ॥ ૨૩૧.૭૪॥

૨૩૧.૭૫/૧શીર્ણપર્ણફલાહારા વલ્કલાન્યજિનાનિ ચ ।
૨૩૧.૭૫/૨સ્વયં કૃત્વા નિવત્સ્યન્તિ યથા મુનિજનસ્તથા ॥ ૨૩૧.૭૫॥

૨૩૧.૭૬/૧બીજાનામકૃતસ્નેહા આહતાઃ કાષ્ઠશઙ્કુભિઃ ।
૨૩૧.૭૬/૨અજૈડકં ખરોષ્ટ્રં ચ પાલયિષ્યન્તિ નિત્યશઃ ॥ ૨૩૧.૭૬॥

૨૩૧.૭૭/૧નદીસ્રોતાંસિ રોત્સ્યન્તિ તોયાર્થં કૂલમાશ્રિતાઃ ।
૨૩૧.૭૭/૨પક્વાન્નવ્યવહારેણ વિપણન્તઃ પરસ્પરમ્ ॥ ૨૩૧.૭૭॥

૨૩૧.૭૮/૧તનૂરુહૈર્યથાજાતૈઃ સમલાન્તરસમ્ભૃતૈઃ ।
૨૩૧.૭૮/૨બહ્વપત્યાઃ પ્રજાહીનાઃ કુલશીલવિવર્જિતાઃ ॥ ૨૩૧.૭૮॥

૨૩૧.૭૯/૧એવં ભવિષ્યન્તિ તદા નરાશ્ચાધર્મજીવિનઃ ।
૨૩૧.૭૯/૨હીના હીનં તથા ધર્મં પ્રજા સમનુવત્સ્યતિ ॥ ૨૩૧.૭૯॥

૨૩૧.૮૦/૧આયુસ્તત્ર ચ મર્ત્યાનાં પરં ત્રિંશદ્ ભવિષ્યતિ ।
૨૩૧.૮૦/૨દુર્બલા વિષયગ્લાના જરાશોકૈરભિપ્લુતાઃ ॥ ૨૩૧.૮૦॥

૨૩૧.૮૧/૧ભવિષ્યન્તિ તદા તેષાં રોગૈરિન્દ્રિયસંક્ષયઃ ।
૨૩૧.૮૧/૨આયુઃપ્રત્યયસંરોધાદ્ વિષયાદ્ ઉપરંસ્યતે ॥ ૨૩૧.૮૧॥

૨૩૧.૮૨/૧શુશ્રૂષવો ભવિષ્યન્તિ સાધૂનાં દર્શને રતાઃ ।
૨૩૧.૮૨/૨સત્યં ચ પ્રતિપત્સ્યન્તિ વ્યવહારોપસંક્ષયાત્ ॥ ૨૩૧.૮૨॥

૨૩૧.૮૩/૧ભવિષ્યન્તિ ચ કામાનામલાભાદ્ ધર્મશીલિનઃ ।
૨૩૧.૮૩/૨કરિષ્યન્તિ ચ સંસ્કારં સ્વયં ચ ક્ષયપીડિતાઃ ॥ ૨૩૧.૮૩॥

૨૩૧.૮૪/૧એવં શુશ્રૂષવો દાને સત્યે પ્રાણ્યભિરક્ષણે ।
૨૩૧.૮૪/૨તતઃ પાદપ્રવૃત્તે તુ ધર્મે શ્રેયો નિપત્સ્યતે ॥ ૨૩૧.૮૪॥

૨૩૧.૮૫/૧તેષાં લબ્ધાનુમાનાનાં ગુણેષુ પરિવર્તતામ્ ।
૨૩૧.૮૫/૨સ્વાદુ કિં ત્વિતિ વિજ્ઞાય ધર્મ એવ ચ દૃશ્યતે ॥ ૨૩૧.૮૫॥

૨૩૧.૮૬/૧યથા હાનિક્રમં પ્રાપ્તાસ્તથા ઋદ્ધિક્રમં ગતાઃ ।
૨૩૧.૮૬/૨પ્રગૃહીતે તતો ધર્મે પ્રપશ્યન્તિ કૃતં યુગમ્ ॥ ૨૩૧.૮૬॥

૨૩૧.૮૭/૧સાધુવૃત્તિઃ કૃતયુગે કષાયે હાનિરુચ્યતે ।
૨૩૧.૮૭/૨એક એવ તુ કાલોઽયં હીનવર્ણો યથા શશી ॥ ૨૩૧.૮૭॥

૨૩૧.૮૮/૧છન્નશ્ચ તમસા સોમો યથા કલિયુગં તથા ।
૨૩૧.૮૮/૨મુક્તશ્ચ તમસા સોમ એવં કૃતયુગં ચ તત્ ॥ ૨૩૧.૮૮॥

૨૩૧.૮૯/૧અર્થવાદઃ પરં બ્રહ્મ વેદાર્થ ઇતિ તં વિદુઃ ।
૨૩૧.૮૯/૨અવિવિક્તમવિજ્ઞાતં દાયાદ્યમિહ ધાર્યતે ॥ ૨૩૧.૮૯॥

૨૩૧.૯૦/૧ઇષ્ટવાદસ્તપો નામ તપો હિ સ્થવિરીકૃતઃ ।
૨૩૧.૯૦/૨ગુણૈઃ કર્માભિનિર્વૃત્તિર્ગુણાઃ શુધ્યન્તિ કર્મણા ॥ ૨૩૧.૯૦॥

૨૩૧.૯૧/૧આશીસ્તુ પુરુષં દૃષ્ટ્વા દેશકાલાનુવર્તિની ।
૨૩૧.૯૧/૨યુગે યુગે યથાકાલમ્ ઋષિભિઃ સમુદાહૃતા ॥ ૨૩૧.૯૧॥

૨૩૧.૯૨/૧ધર્માર્થકામમોક્ષાણાં દેવાનાં ચ પ્રતિક્રિયા ।
૨૩૧.૯૨/૨આશિષશ્ચ શિવાઃ પુણ્યાસ્તથૈવાયુર્યુગે યુગે ॥ ૨૩૧.૯૨॥

૨૩૧.૯૩/૧તથા યુગાનાં પરિવર્તનાનિ ।
૨૩૧.૯૩/૨ચિરપ્રવૃત્તાનિ વિધિસ્વભાવાત્ ।
૨૩૧.૯૩/૩ક્ષણં ન સંતિષ્ઠતિ જીવલોકઃ ।
૨૩૧.૯૩/૪ક્ષયોદયાભ્યાં પરિવર્તમાનઃ ॥ ૨૩૧.૯૩॥

૨૩૨.૧/૧વ્યાસ ઉવાચ । સર્વેષામેવ ભૂતાનાં ત્રિવિધઃ પ્રતિસંચરઃ ।
૨૩૨.૧/૨નૈમિત્તિકઃ પ્રાકૃતિકસ્તથૈવાત્યન્તિકો મતઃ ॥ ૨૩૨.૧॥

૨૩૨.૨/૧બ્રાહ્મો નૈમિત્તિકસ્તેષાં કલ્પાન્તે પ્રતિસંચરઃ ।
૨૩૨.૨/૨આત્યન્તિકો વૈ મોક્ષશ્ચ પ્રાકૃતો દ્વિપરાર્ધિકઃ ॥ ૨૩૨.૨॥

૨૩૨.૩/૧મુનય ઊચુઃ । પરાર્ધસંખ્યાં ભગવંસ્ત્વમાચક્ષ્વ યથોદિતામ્ ।
૨૩૨.૩/૨દ્વિગુણીકૃતયજ્જ્ઞેયઃ પ્રાકૃતઃ પ્રતિસંચરઃ ॥ ૨૩૨.૩॥

૨૩૨.૪/૧વ્યાસ ઉવાચ । સ્થાનાત્ સ્થાનં દશગુણમેકૈકં ગણ્યતે દ્વિજાઃ ।
૨૩૨.૪/૨તતોઽષ્ટાદશમે ભાગે પરાર્ધમભિધીયતે ॥ ૨૩૨.૪॥

૨૩૨.૫/૧પરાર્ધં દ્વિગુણં યત્ તુ પ્રાકૃતઃ સ લયો દ્વિજાઃ ।
૨૩૨.૫/૨તદાવ્યક્તેઽખિલં વ્યક્તં સહેતૌ લયમેતિ વૈ ॥ ૨૩૨.૫॥

૨૩૨.૬/૧નિમેષો માનુષો યોઽયં માત્રામાત્રપ્રમાણતઃ ।
૨૩૨.૬/૨તૈઃ પઞ્ચદશભિઃ કાષ્ઠા ત્રિંશત્ કાષ્ઠાસ્તથા કલા ॥ ૨૩૨.૬॥

૨૩૨.૭/૧નાડિકા તુ પ્રમાણેન કલા ચ દશ પઞ્ચ ચ ।
૨૩૨.૭/૨ઉન્માનેનામ્ભસઃ સા તુ પલાન્યર્ધત્રયોદશ ॥ ૨૩૨.૭॥

૨૩૨.૮/૧હેમમાષૈઃ કૃતચ્છિદ્રા ચતુર્ભિશ્ચતુરઙ્ગુલૈઃ ।
૨૩૨.૮/૨માગધેન પ્રમાણેન જલપ્રસ્થસ્તુ સ સ્મૃતઃ ॥ ૨૩૨.૮॥

૨૩૨.૯/૧નાડિકાભ્યામથ દ્વાભ્યાં મુહૂર્તો દ્વિજસત્તમાઃ ।
૨૩૨.૯/૨અહોરાત્રં મુહૂર્તાસ્તુ ત્રિંશન્ માસો દિનૈસ્તથા ॥ ૨૩૨.૯॥

૨૩૨.૧૦/૧માસૈર્દ્વાદશભિર્વર્ષમહોરાત્રં તુ તદ્ દિવિ ।
૨૩૨.૧૦/૨ત્રિભિર્વર્ષશતૈર્વર્ષં ષષ્ટ્યા ચૈવાસુરદ્વિષામ્ ॥ ૨૩૨.૧૦॥

૨૩૨.૧૧/૧તૈસ્તુ દ્વાદશસાહસ્રૈશ્ચતુર્યુગમુદાહૃતમ્ ।
૨૩૨.૧૧/૨ચતુર્યુગસહસ્રં તુ કથ્યતે બ્રહ્મણો દિનમ્ ॥ ૨૩૨.૧૧॥

૨૩૨.૧૨/૧સ કલ્પસ્તત્ર મનવશ્ચતુર્દશ દ્વિજોત્તમાઃ ।
૨૩૨.૧૨/૨તદન્તે ચૈવ ભો વિપ્રા બ્રહ્મનૈમિત્તિકો લયઃ ॥ ૨૩૨.૧૨॥

૨૩૨.૧૩/૧તસ્ય સ્વરૂપમત્યુગ્રં દ્વિજેન્દ્રા ગદતો મમ ।
૨૩૨.૧૩/૨શ઼ૃણુધ્વં પ્રાકૃતં ભૂયસ્તતો વક્ષ્યામ્યહં લયમ્ ॥ ૨૩૨.૧૩॥

૨૩૨.૧૪/૧ચતુર્યુગસહસ્રાન્તે ક્ષીણપ્રાયે મહીતલે ।
૨૩૨.૧૪/૨અનાવૃષ્ટિરતીવોગ્રા જાયતે શતવાર્ષિકી ॥ ૨૩૨.૧૪॥

૨૩૨.૧૫/૧તતો યાન્યલ્પસારાણિ તાનિ સત્ત્વાન્યનેકશઃ ।
૨૩૨.૧૫/૨ક્ષયં યાન્તિ મુનિશ્રેષ્ઠાઃ પાર્થિવાન્યતિપીડનાત્ ॥ ૨૩૨.૧૫॥

૨૩૨.૧૬/૧તતઃ સ ભગવાન્ કૃષ્ણો રુદ્રરૂપી તથાવ્યયઃ ।
૨૩૨.૧૬/૨ક્ષયાય યતતે કર્તુમાત્મસ્થાઃ સકલાઃ પ્રજાઃ ॥ ૨૩૨.૧૬॥

૨૩૨.૧૭/૧તતઃ સ ભગવાન્ વિષ્ણુર્ભાનોઃ સપ્તસુ રશ્મિષુ ।
૨૩૨.૧૭/૨સ્થિતઃ પિબત્યશેષાણિ જલાનિ મુનિસત્તમાઃ ॥ ૨૩૨.૧૭॥

૨૩૨.૧૮/૧પીત્વામ્ભાંસિ સમસ્તાનિ પ્રાણિભૂતગતાનિ વૈ ।
૨૩૨.૧૮/૨શોષં નયતિ ભો વિપ્રાઃ સમસ્તં પૃથિવીતલમ્ ॥ ૨૩૨.૧૮॥

૨૩૨.૧૯/૧સમુદ્રાન્ સરિતઃ શૈલાઞ્ શૈલપ્રસ્રવણાનિ ચ ।
૨૩૨.૧૯/૨પાતાલેષુ ચ યત્ તોયં તત્ સર્વં નયતિ ક્ષયમ્ ॥ ૨૩૨.૧૯॥

૨૩૨.૨૦/૧તતસ્તસ્યાપ્યભાવેન તોયાહારોપબૃંહિતાઃ ।
૨૩૨.૨૦/૨સહસ્રરશ્મયઃ સપ્ત જાયન્તે તત્ર ભાસ્કરાઃ ॥ ૨૩૨.૨૦॥

૨૩૨.૨૧/૧અધશ્ચોર્ધ્વં ચ તે દીપ્તાસ્તતઃ સપ્ત દિવાકરાઃ ।
૨૩૨.૨૧/૨દહન્ત્યશેષં ત્રૈલોક્યં સપાતાલતલં દ્વિજાઃ ॥ ૨૩૨.૨૧॥

૨૩૨.૨૨/૧દહ્યમાનં તુ તૈર્દીપ્તૈસ્ત્રૈલોક્યં દીપ્તભાસ્કરૈઃ ।
૨૩૨.૨૨/૨સાદ્રિનગાર્ણવાભોગં નિઃસ્નેહમભિજાયતે ॥ ૨૩૨.૨૨॥

૨૩૨.૨૩/૧તતો નિર્દગ્ધવૃક્ષામ્બુ ત્રૈલોક્યમખિલં દ્વિજાઃ ।
૨૩૨.૨૩/૨ભવત્યેષા ચ વસુધા કૂર્મપૃષ્ઠોપમાકૃતિઃ ॥ ૨૩૨.૨૩॥

૨૩૨.૨૪/૧તતઃ કાલાગ્નિરુદ્રોઽસૌ ભૂતસર્ગહરો હરઃ ।
૨૩૨.૨૪/૨શેષાહિશ્વાસસંતાપાત્ પાતાલાનિ દહત્યધઃ ॥ ૨૩૨.૨૪॥

૨૩૨.૨૫/૧પાતાલાનિ સમસ્તાનિ સ દગ્ધ્વા જ્વલનો મહાન્ ।
૨૩૨.૨૫/૨ભૂમિમભ્યેત્ય સકલં દગ્ધ્વા તુ વસુધાતલમ્ ॥ ૨૩૨.૨૫॥

૨૩૨.૨૬/૧ભુવો લોકં તતઃ સર્વં સ્વર્ગલોકં ચ દારુણઃ ।
૨૩૨.૨૬/૨જ્વાલામાલામહાવર્તસ્તત્રૈવ પરિવર્તતે ॥ ૨૩૨.૨૬॥

૨૩૨.૨૭/૧અમ્બરીષમિવાભાતિ ત્રૈલોક્યમખિલં તદા ।
૨૩૨.૨૭/૨જ્વાલાવર્તપરીવારમુપક્ષીણબલાસ્તતઃ ॥ ૨૩૨.૨૭॥

૨૩૨.૨૮/૧તતસ્તાપપરીતાસ્તુ લોકદ્વયનિવાસિનઃ ।
૨૩૨.૨૮/૨કૃતાવકાશા ગચ્છન્તિ મહર્લોકં દ્વિજાસ્તદા ॥ ૨૩૨.૨૮॥

૨૩૨.૨૯/૧તસ્માદ્ અપિ મહાતાપ+ ।તપ્તા લોકાસ્તતઃ પરમ્ ।
૨૩૨.૨૯/૨ગચ્છન્તિ જનલોકં તે દશાવૃત્ત્યા પરૈષિણઃ ॥ ૨૩૨.૨૯॥

૨૩૨.૩૦/૧તતો દગ્ધ્વા જગત્ સર્વં રુદ્રરૂપી જનાર્દનઃ ।
૨૩૨.૩૦/૨મુખનિઃશ્વાસજાન્ મેઘાન્ કરોતિ મુનિસત્તમાઃ ॥ ૨૩૨.૩૦॥

૨૩૨.૩૧/૧તતો ગજકુલપ્રખ્યાસ્તડિદ્વન્તો નિનાદિનઃ ।
૨૩૨.૩૧/૨ઉત્તિષ્ઠન્તિ તદા વ્યોમ્નિ ઘોરાઃ સંવર્તકા ઘનાઃ ॥ ૨૩૨.૩૧॥

૨૩૨.૩૨/૧કેચિદ્ અઞ્જનસંકાશાઃ કેચિત્ કુમુદસંનિભાઃ ।
૨૩૨.૩૨/૨ધૂમવર્ણા ઘનાઃ કેચિત્ કેચિત્ પીતાઃ પયોધરાઃ ॥ ૨૩૨.૩૨॥

૨૩૨.૩૩/૧કેચિદ્ ધરિદ્રાવર્ણાભા લાક્ષારસનિભાસ્તથા ।
૨૩૨.૩૩/૨કેચિદ્ વૈદૂર્યસંકાશા ઇન્દ્રનીલનિભાસ્તથા ॥ ૨૩૨.૩૩॥

૨૩૨.૩૪/૧શઙ્ખકુન્દનિભાશ્ચાન્યે જાતીકુન્દનિભાસ્તથા ।
૨૩૨.૩૪/૨ઇન્દ્રગોપનિભાઃ કેચિન્ મનઃશિલાનિભાસ્તથા ॥ ૨૩૨.૩૪॥

૨૩૨.૩૫/૧પદ્મપત્રનિભાઃ કેચિદ્ ઉત્તિષ્ઠન્તિ ઘનાઘનાઃ ।

૨૩૨.૩૫/૨કેચિત્ પુરવરાકારાઃ કેચિત્ પર્વતસંનિભાઃ ॥ ૨૩૨.૩૫॥

૨૩૨.૩૬/૧કૂટાગારનિભાશ્ચાન્યે કેચિત્ સ્થલનિભા ઘનાઃ ।
૨૩૨.૩૬/૨મહાકાયા મહારાવા પૂરયન્તિ નભસ્તલમ્ ॥ ૨૩૨.૩૬॥

૨૩૨.૩૭/૧વર્ષન્તસ્તે મહાસારાસ્તમગ્નિમતિભૈરવમ્ ।
૨૩૨.૩૭/૨શમયન્ત્યખિલં વિપ્રાસ્ત્રૈલોક્યાન્તરવિસ્તૃતમ્ ॥ ૨૩૨.૩૭॥

૨૩૨.૩૮/૧નષ્ટે ચાગ્નૌ શતં તેઽપિ વર્ષાણામધિકં ઘનાઃ ।
૨૩૨.૩૮/૨પ્લાવયન્તો જગત્ સર્વં વર્ષન્તિ મુનિસત્તમાઃ ॥ ૨૩૨.૩૮॥

૨૩૨.૩૯/૧ધારાભિરક્ષમાત્રાભિઃ પ્લાવયિત્વાખિલાં ભુવમ્ ।
૨૩૨.૩૯/૨ભુવો લોકં તથૈવોર્ધ્વં પ્લાવયન્તિ દિવં દ્વિજાઃ ॥ ૨૩૨.૩૯॥

૨૩૨.૪૦/૧અન્ધકારીકૃતે લોકે નષ્ટે સ્થાવરજઙ્ગમે ।
૨૩૨.૪૦/૨વર્ષન્તિ તે મહામેઘા વર્ષાણામધિકં શતમ્ ॥ ૨૩૨.૪૦॥

૨૩૩.૧/૧વ્યાસ ઉવાચ । સમર્ષિસ્થાનમાક્રમ્ય સ્થિતેઽમ્ભસિ દ્વિજોત્તમાઃ ।
૨૩૩.૧/૨એકાર્ણવં ભવત્યેતત્ ત્રૈલોક્યમખિલં તતઃ ॥ ૨૩૩.૧॥

૨૩૩.૨/૧અથ નિઃશ્વાસજો વિષ્ણોર્વાયુસ્તાઞ્ જલદાંસ્તતઃ ।
૨૩૩.૨/૨નાશં નયતિ ભો વિપ્રા વર્ષાણામધિકં શતમ્ ॥ ૨૩૩.૨॥

૨૩૩.૩/૧સર્વભૂતમયોઽચિન્ત્યો ભગવાન્ ભૂતભાવનઃ ।
૨૩૩.૩/૨અનાદિરાદિર્વિશ્વસ્ય પીત્વા વાયુમશેષતઃ ॥ ૨૩૩.૩॥

૨૩૩.૪/૧એકાર્ણવે તતસ્તસ્મિઞ્ શેષશય્યાસ્થિતઃ પ્રભુઃ ।
૨૩૩.૪/૨બ્રહ્મરૂપધરઃ શેતે ભગવાન્ આદિકૃદ્ ધરિઃ ॥ ૨૩૩.૪॥

૨૩૩.૫/૧જનલોકગતૈઃ સિદ્ધૈઃ સનકાદ્યૈરભિષ્ટુતઃ ।
૨૩૩.૫/૨બ્રહ્મલોકગતૈશ્ચૈવ ચિન્ત્યમાનો મુમુક્ષુભિઃ ॥ ૨૩૩.૫॥

૨૩૩.૬/૧આત્મમાયામયીં દિવ્યાં યોગનિદ્રાં સમાસ્થિતઃ ।
૨૩૩.૬/૨આત્માનં વાસુદેવાખ્યં ચિન્તયન્ પરમેશ્વરઃ ॥ ૨૩૩.૬॥

૨૩૩.૭/૧એષ નૈમિત્તિકો નામ વિપ્રેન્દ્રાઃ પ્રતિસંચરઃ ।
૨૩૩.૭/૨નિમિત્તં તત્ર યચ્છેતે બ્રહ્મરૂપધરો હરિઃ ॥ ૨૩૩.૭॥

૨૩૩.૮/૧યદા જાગર્તિ સર્વાત્મા સ તદા ચેષ્ટતે જગત્ ।
૨૩૩.૮/૨નિમીલત્યેતદ્ અખિલં માયાશય્યાશયેઽચ્યુતે ॥ ૨૩૩.૮॥

૨૩૩.૯/૧પદ્મયોનેર્દિનં યત્ તુ ચતુર્યુગસહસ્રવત્ ।
૨૩૩.૯/૨એકાર્ણવકૃતે લોકે તાવતી રાત્રિરુચ્યતે ॥ ૨૩૩.૯॥

૨૩૩.૧૦/૧તતઃ પ્રબુદ્ધો રાત્ર્યન્તે પુનઃ સૃષ્ટિં કરોત્યજઃ ।
૨૩૩.૧૦/૨બ્રહ્મસ્વરૂપધૃગ્ વિષ્ણુર્યથા વઃ કથિતં પુરા ॥ ૨૩૩.૧૦॥

૨૩૩.૧૧/૧ઇત્યેષ કલ્પસંહારો અન્તરપ્રલયો દ્વિજાઃ ।
૨૩૩.૧૧/૨નૈમિત્તિકો વઃ કથિતઃ શ◌ૃણુધ્વં પ્રાકૃતં પરમ્ ॥ ૨૩૩.૧૧॥

૨૩૩.૧૨/૧અવૃષ્ટ્યગ્ન્યાદિભિઃ સમ્યક્ કૃતે શય્યાલયે દ્વિજાઃ ।
૨૩૩.૧૨/૨સમસ્તેષ્વેવ લોકેષુ પાતાલેષ્વખિલેષુ ચ ॥ ૨૩૩.૧૨॥

૨૩૩.૧૩/૧મહદાદેર્વિકારસ્ય વિશેષાત્ તત્ર સંક્ષયે ।
૨૩૩.૧૩/૨કૃષ્ણેચ્છાકારિતે તસ્મિન્ પ્રવૃત્તે પ્રતિસંચરે ॥ ૨૩૩.૧૩॥

૨૩૩.૧૪/૧આપો ગ્રસન્તિ વૈ પૂર્વં ભૂમેર્ગન્ધાદિકં ગુણમ્ ।
૨૩૩.૧૪/૨આત્તગન્ધા તતો ભૂમિઃ પ્રલયાય પ્રકલ્પતે ॥ ૨૩૩.૧૪॥

૨૩૩.૧૫/૧પ્રનષ્ટે ગન્ધતન્માત્રે ભવત્યુર્વી જલાત્મિકા ।
૨૩૩.૧૫/૨આપસ્તદા પ્રવૃત્તાસ્તુ વેગવત્યો મહાસ્વનાઃ ॥ ૨૩૩.૧૫॥

૨૩૩.૧૬/૧સર્વમાપૂરયન્તીદં તિષ્ઠન્તિ વિચરન્તિ ચ ।
૨૩૩.૧૬/૨સલિલેનૈવોર્મિમતા લોકાલોકઃ સમન્તતઃ ॥ ૨૩૩.૧૬॥

૨૩૩.૧૭/૧અપામપિ ગુણો યસ્તુ જ્યોતિષા પીયતે તુ સઃ ।
૨૩૩.૧૭/૨નશ્યન્ત્યાપઃ સુતપ્તાશ્ચ રસતન્માત્રસંક્ષયાત્ ॥ ૨૩૩.૧૭॥

૨૩૩.૧૮/૧તતશ્ચાપોઽમૃતરસા જ્યોતિષ્ટ્વં પ્રાપ્નુવન્તિ વૈ ।
૨૩૩.૧૮/૨અગ્ન્યવસ્થે તુ સલિલે તેજસા સર્વતો વૃતે ॥ ૨૩૩.૧૮॥

૨૩૩.૧૯/૧સ ચાગ્નિઃ સર્વતો વ્યાપ્ય આદત્તે તજ્જલં તદા ।
૨૩૩.૧૯/૨સર્વમાપૂર્યતો ચાભિસ્તદા જગદ્ ઇદં શનૈઃ ॥ ૨૩૩.૧૯॥

૨૩૩.૨૦/૧અર્ચિભિઃ સંતતે તસ્મિંસ્તિર્યગ્ ઊર્ધ્વમધસ્તથા ।
૨૩૩.૨૦/૨જ્યોતિષોઽપિ પરં રૂપં વાયુરત્તિ પ્રભાકરમ્ ॥ ૨૩૩.૨૦॥

૨૩૩.૨૧/૧પ્રલીને ચ તતસ્તસ્મિન્ વાયુભૂતેઽખિલાત્મકે ।
૨૩૩.૨૧/૨પ્રનષ્ટે રૂપતન્માત્રે કૃતરૂપો વિભાવસુઃ ॥ ૨૩૩.૨૧॥

૨૩૩.૨૨/૧પ્રશામ્યતિ તદા જ્યોતિર્વાયુર્દોધૂયતે મહાન્ ।
૨૩૩.૨૨/૨નિરાલોકે તદા લોકે વાયુસંસ્થે ચ તેજસિ ॥ ૨૩૩.૨૨॥

૨૩૩.૨૩/૧તતઃ પ્રલયમાસાદ્ય વાયુસમ્ભવમાત્મનઃ ।
૨૩૩.૨૩/૨ઊર્ધ્વં ચ વાયુસ્તિર્યક્ ચ દોધવીતિ દિશો દશ ॥ ૨૩૩.૨૩॥

૨૩૩.૨૪/૧વાયોસ્ત્વપિ ગુણં સ્પર્શમાકાશં ગ્રસતે તતઃ ।
૨૩૩.૨૪/૨પ્રશામ્યતિ તદા વાયુઃ ખં તુ તિષ્ઠત્યનાવૃતમ્ ॥ ૨૩૩.૨૪॥

૨૩૩.૨૫/૧અરૂપમરસસ્પર્શમગન્ધવદ્ અમૂર્તિમત્ ।
૨૩૩.૨૫/૨સર્વમાપૂરયચ્ચૈવ સુમહત્ તત્ પ્રકાશતે ॥ ૨૩૩.૨૫॥

૨૩૩.૨૬/૧પરિમણ્ડલતસ્તત્ તુ આકાશં શબ્દલક્ષણમ્ ।
૨૩૩.૨૬/૨શબ્દમાત્રં તથાકાશં સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૨૩૩.૨૬॥

૨૩૩.૨૭/૧તતઃ શબ્દગુણં તસ્ય ભૂતાદિર્ગ્રસતે પુનઃ ।
૨૩૩.૨૭/૨ભૂતેન્દ્રિયેષુ યુગપદ્ ભૂતાદૌ સંસ્થિતેષુ વૈ ॥ ૨૩૩.૨૭॥

૨૩૩.૨૮/૧અભિમાનાત્મકો હ્યેષ ભૂતાદિસ્તામસઃ સ્મૃતઃ ।
૨૩૩.૨૮/૨ભૂતાદિં ગ્રસતે ચાપિ મહાબુદ્ધિર્વિચક્ષણા ॥ ૨૩૩.૨૮॥

૨૩૩.૨૯/૧ઉર્વી મહાંશ્ચ જગતઃ પ્રાન્તેઽન્તર્બાહ્યતસ્તથા ।
૨૩૩.૨૯/૨એવં સપ્ત મહાબુદ્ધિઃ ક્રમાત્ પ્રકૃતયસ્તથા ॥ ૨૩૩.૨૯॥

૨૩૩.૩૦/૧પ્રત્યાહારૈસ્તુ તાઃ સર્વાઃ પ્રવિશન્તિ પરસ્પરમ્ ।
૨૩૩.૩૦/૨યેનેદમાવૃતં સર્વમણ્ડમપ્સુ પ્રલીયતે ॥ ૨૩૩.૩૦॥

૨૩૩.૩૧/૧સપ્તદ્વીપસમુદ્રાન્તં સપ્તલોકં સપર્વતમ્ ।
૨૩૩.૩૧/૨ઉદકાવરણં હ્યત્ર જ્યોતિષા પીયતે તુ તત્ ॥ ૨૩૩.૩૧॥

૨૩૩.૩૨/૧જ્યોતિર્વાયૌ લયં યાતિ યાત્યાકાશે સમીરણઃ ।
૨૩૩.૩૨/૨આકાશં ચૈવ ભૂતાદિર્ગ્રસતે તં તથા મહાન્ ॥ ૨૩૩.૩૨॥

૨૩૩.૩૩/૧મહાન્તમેભિઃ સહિતં પ્રકૃતિર્ગ્રસતે દ્વિજાઃ ।
૨૩૩.૩૩/૨ગુણસામ્યમનુદ્રિક્તમન્યૂનં ચ દ્વિજોત્તમાઃ ॥ ૨૩૩.૩૩॥

૨૩૩.૩૪/૧પ્રોચ્યતે પ્રકૃતિર્હેતુઃ પ્રધાનં કારણં પરમ્ ।
૨૩૩.૩૪/૨ઇત્યેષા પ્રકૃતિઃ સર્વા વ્યક્તાવ્યક્તસ્વરૂપિણી ॥ ૨૩૩.૩૪॥

૨૩૩.૩૫/૧વ્યક્તસ્વરૂપમવ્યક્તે તસ્યાં વિપ્રાઃ પ્રલીયતે ।
૨૩૩.૩૫/૨એકઃ શુદ્ધોઽક્ષરો નિત્યઃ સર્વવ્યાપી તથા પુનઃ ॥ ૨૩૩.૩૫॥

૨૩૩.૩૬/૧સોઽપ્યંશઃ સર્વભૂતસ્ય દ્વિજેન્દ્રાઃ પરમાત્મનઃ ।

૨૩૩.૩૬/૨નશ્યન્તિ સર્વા યત્રાપિ નામજાત્યાદિકલ્પનાઃ ॥ ૨૩૩.૩૬॥

૨૩૩.૩૭/૧સત્તામાત્રાત્મકે જ્ઞેયે જ્ઞાનાત્મન્યાત્મનઃ પરે ।
૨૩૩.૩૭/૨સ બ્રહ્મ તત્ પરં ધામ પરમાત્મા પરેશ્વરઃ ॥ ૨૩૩.૩૭॥

૨૩૩.૩૮/૧સ વિષ્ણુઃ સર્વમેવેદં યતો નાવર્તતે પુનઃ ।
૨૩૩.૩૮/૨પ્રકૃતિર્યા મયાખ્યાતા વ્યક્તાવ્યક્તસ્વરૂપિણી ॥ ૨૩૩.૩૮॥

૨૩૩.૩૯/૧પુરુષશ્ચાપ્યુભાવેતૌ લીયેતે પરમાત્મનિ ।
૨૩૩.૩૯/૨પરમાત્મા ચ સર્વેષામાધારઃ પરમેશ્વરઃ ॥ ૨૩૩.૩૯॥

૨૩૩.૪૦/૧વિષ્ણુનામ્ના સ વેદેષુ વેદાન્તેષુ ચ ગીયતે ।
૨૩૩.૪૦/૨પ્રવૃત્તં ચ નિવૃત્તં ચ દ્વિવિધં કર્મ વૈદિકમ્ ॥ ૨૩૩.૪૦॥

૨૩૩.૪૧/૧તાભ્યામુભાભ્યાં પુરુષૈર્યજ્ઞમૂર્તિઃ સ ઇજ્યતે ।
૨૩૩.૪૧/૨ઋગ્યજુઃસામભિર્માર્ગૈઃ પ્રવૃત્તૈરિજ્યતે હ્યસૌ ॥ ૨૩૩.૪૧॥

૨૩૩.૪૨/૧યજ્ઞેશ્વરો યજ્ઞપુમાન્ પુરુષૈઃ પુરુષોત્તમઃ ।
૨૩૩.૪૨/૨જ્ઞાનાત્મા જ્ઞાનયોગેન જ્ઞાનમૂર્તિઃ સ ઇજ્યતે ॥ ૨૩૩.૪૨॥

૨૩૩.૪૩/૧નિવૃત્તૈર્યોગમાર્ગૈશ્ચ વિષ્ણુર્મુક્તિફલપ્રદઃ ।
૨૩૩.૪૩/૨હ્રસ્વદીર્ઘપ્લુતૈર્યત્ તુ કિંચિદ્ વસ્ત્વભિધીયતે ॥ ૨૩૩.૪૩॥

૨૩૩.૪૪/૧યચ્ચ વાચામવિષયસ્તત્ સર્વં વિષ્ણુરવ્યયઃ ।
૨૩૩.૪૪/૨વ્યક્તઃ સ એવમવ્યક્તઃ સ એવ પુરુષોઽવ્યયઃ ॥ ૨૩૩.૪૪॥

૨૩૩.૪૫/૧પરમાત્મા ચ વિશ્વાત્મા વિશ્વરૂપધરો હરિઃ ।
૨૩૩.૪૫/૨વ્યક્તાવ્યક્તાત્મિકા તસ્મિન્ પ્રકૃતિઃ સા વિલીયતે ॥ ૨૩૩.૪૫॥

૨૩૩.૪૬/૧પુરુષશ્ચાપિ ભો વિપ્રા યસ્તદ્ અવ્યાકૃતાત્મનિ ।
૨૩૩.૪૬/૨દ્વિપરાર્ધાત્મકઃ કાલઃ કથિતો યો મયા દ્વિજાઃ ॥ ૨૩૩.૪૬॥

૨૩૩.૪૭/૧તદ્ અહસ્તસ્ય વિપ્રેન્દ્રા વિષ્ણોરીશસ્ય કથ્યતે ।
૨૩૩.૪૭/૨વ્યક્તે તુ પ્રકૃતૌ લીને પ્રકૃત્યાં પુરુષે તથા ॥ ૨૩૩.૪૭॥

૨૩૩.૪૮/૧તત્રાસ્થિતે નિશા તસ્ય તત્પ્રમાણા તપોધનાઃ ।
૨૩૩.૪૮/૨નૈવાહસ્તસ્ય ચ નિશા નિત્યસ્ય પરમાત્મનઃ ॥ ૨૩૩.૪૮॥

૨૩૩.૪૯/૧ઉપચારાત્ તથાપ્યેતત્ તસ્યેશસ્ય તુ કથ્યતે ।
૨૩૩.૪૯/૨ઇત્યેષ મુનિશાર્દૂલાઃ કથિતઃ પ્રાકૃતો લયઃ ॥ ૨૩૩.૪૯॥

૨૩૪.૧/૧વ્યાસ ઉવાચ । આધ્યાત્મિકાદિ ભો વિપ્રા જ્ઞાત્વા તાપત્રયં બુધઃ ।
૨૩૪.૧/૨ઉત્પન્નજ્ઞાનવૈરાગ્યઃ પ્રાપ્નોત્યાત્યન્તિકં લયમ્ ॥ ૨૩૪.૧॥

૨૩૪.૨/૧આધ્યાત્મિકોઽપિ દ્વિવિધઃ શારીરો માનસસ્તથા ।
૨૩૪.૨/૨શારીરો બહુભિર્ભેદૈર્ભિદ્યતે શ્રૂયતાં ચ સઃ ॥ ૨૩૪.૨॥

૨૩૪.૩/૧શિરોરોગપ્રતિશ્યાય+ ।જ્વરશૂલભગંદરૈઃ ।
૨૩૪.૩/૨ગુલ્માર્શઃશ્વયથુશ્વાસ+ ॆહ્છર્દ્યાદિભિરનેકધા ॥ ૨૩૪.૩॥

૨૩૪.૪/૧તથાક્ષિરોગાતીસાર+ ।કુષ્ઠાઙ્ગામયસંજ્ઞકૈઃ ।
૨૩૪.૪/૨ભિદ્યતે દેહજસ્તાપો માનસં શ્રોતુમર્હથ ॥ ૨૩૪.૪॥

૨૩૪.૫/૧કામક્રોધભયદ્વેષ+ ।લોભમોહવિષાદજઃ ।
૨૩૪.૫/૨શોકાસૂયાવમાનેર્ષ્યા+ ંઆત્સર્યાભિભવસ્તથા ॥ ૨૩૪.૫॥

૨૩૪.૬/૧માનસોઽપિ દ્વિજશ્રેષ્ઠાસ્તાપો ભવતિ નૈકધા ।
૨૩૪.૬/૨ઇત્યેવમાદિભિર્ભેદૈસ્તાપો હ્યાધ્યાત્મિકઃ સ્મૃતઃ ॥ ૨૩૪.૬॥

૨૩૪.૭/૧મૃગપક્ષિમનુષ્યાદ્યૈઃ પિશાચોરગરાક્ષસૈઃ ।
૨૩૪.૭/૨સરીસૃપાદ્યૈશ્ચ નૃણાં જન્યતે ચાધિભૌતિકઃ ॥ ૨૩૪.૭॥

૨૩૪.૮/૧શીતોષ્ણવાતવર્ષામ્બુ+ ।વૈદ્યુતાદિસમુદ્ભવઃ ।
૨૩૪.૮/૨તાપો દ્વિજવરશ્રેષ્ઠાઃ કથ્યતે ચાધિદૈવિકઃ ॥ ૨૩૪.૮॥

૨૩૪.૯/૧ગર્ભજન્મજરાજ્ઞાન+ ંઋત્યુનારકજં તથા ।
૨૩૪.૯/૨દુઃખં સહસ્રશો ભેદૈર્ભિદ્યતે મુનિસત્તમાઃ ॥ ૨૩૪.૯॥

૨૩૪.૧૦/૧સુકુમારતનુર્ગર્ભે જન્તુર્બહુમલાવૃતે ।
૨૩૪.૧૦/૨ઉલ્બસંવેષ્ટિતો ભગ્ન+ ।પૃષ્ઠગ્રીવાસ્થિસંહતિઃ ॥ ૨૩૪.૧૦॥

૨૩૪.૧૧/૧અત્યમ્લકટુતીક્ષ્ણોષ્ણ+ ।લવણૈર્માતૃભોજનૈઃ ।
૨૩૪.૧૧/૨અતિતાપિભિરત્યર્થં બાધ્યમાનોઽતિવેદનઃ ॥ ૨૩૪.૧૧॥

૨૩૪.૧૨/૧પ્રસારણાકુઞ્ચનાદૌ નાગાનાં પ્રભુરાત્મનઃ ।
૨૩૪.૧૨/૨શકૃન્મૂત્રમહાપઙ્ક+ ।શાયી સર્વત્ર પીડિતઃ ॥ ૨૩૪.૧૨॥

૨૩૪.૧૩/૧નિરુચ્છ્વાસઃ સચૈતન્યઃ સ્મરઞ્ જન્મશતાન્યથ ।
૨૩૪.૧૩/૨આસ્તે ગર્ભેઽતિદુઃખેન નિજકર્મનિબન્ધનઃ ॥ ૨૩૪.૧૩॥

૨૩૪.૧૪/૧જાયમાનઃ પુરીષાસૃઙ્+ ંઊત્રશુક્રાવિલાનનઃ ।
૨૩૪.૧૪/૨પ્રાજાપત્યેન વાતેન પીડ્યમાનાસ્થિબન્ધનઃ ॥ ૨૩૪.૧૪॥

૨૩૪.૧૫/૧અધોમુખસ્તૈઃ ક્રિયતે પ્રબલૈઃ સૂતિમારુતૈઃ ।
૨૩૪.૧૫/૨ક્લેશૈર્નિષ્ક્રાન્તિમાપ્નોતિ જઠરાન્ માતુરાતુરઃ ॥ ૨૩૪.૧૫॥

૨૩૪.૧૬/૧મૂર્છામવાપ્ય મહતીં સંસ્પૃષ્ટો બાહ્યવાયુના ।
૨૩૪.૧૬/૨વિજ્ઞાનભ્રંશમાપ્નોતિ જાતસ્તુ મુનિસત્તમાઃ ॥ ૨૩૪.૧૬॥

૨૩૪.૧૭/૧કણ્ટકૈરિવ તુન્નાઙ્ગઃ ક્રકચૈરિવ દારિતઃ ।
૨૩૪.૧૭/૨પૂતિવ્રણાન્ નિપતિતો ધરણ્યાં ક્રિમિકો યથા ॥ ૨૩૪.૧૭॥

૨૩૪.૧૮/૧કણ્ડૂયનેઽપિ ચાશક્તઃ પરિવર્તેઽપ્યનીશ્વરઃ ।
૨૩૪.૧૮/૨સ્તનપાનાદિકાહારમવાપ્નોતિ પરેચ્છયા ॥ ૨૩૪.૧૮॥

૨૩૪.૧૯/૧અશુચિસ્રસ્તરે સુપ્તઃ કીટદંશાદિભિસ્તથા ।
૨૩૪.૧૯/૨ભક્ષ્યમાણોઽપિ નૈવૈષાં સમર્થો વિનિવારણે ॥ ૨૩૪.૧૯॥

૨૩૪.૨૦/૧જન્મદુઃખાન્યનેકાનિ જન્મનોઽનન્તરાણિ ચ ।
૨૩૪.૨૦/૨બાલભાવે યદાપ્નોતિ આધિભૂતાદિકાનિ ચ ॥ ૨૩૪.૨૦॥

૨૩૪.૨૧/૧અજ્ઞાનતમસા છન્નો મૂઢાન્તઃકરણો નરઃ ।
૨૩૪.૨૧/૨ન જાનાતિ કુતઃ કોઽહં કુત્ર ગન્તા કિમાત્મકઃ ॥ ૨૩૪.૨૧॥

૨૩૪.૨૨/૧કેન બન્ધેન બદ્ધોઽહં કારણં કિમકારણમ્ ।
૨૩૪.૨૨/૨કિં કાર્યં કિમકાર્યં વા કિં વાચ્યં કિં ન ચોચ્યતે ॥ ૨૩૪.૨૨॥

૨૩૪.૨૩/૧કો ધર્મઃ કશ્ચ વાધર્મઃ કસ્મિન્ વર્તેત વૈ કથમ્ ।
૨૩૪.૨૩/૨કિં કર્તવ્યમકર્તવ્યં કિં વા કિં ગુણદોષવત્ ॥ ૨૩૪.૨૩॥

૨૩૪.૨૪/૧એવં પશુસમૈર્મૂઢૈરજ્ઞાનપ્રભવં મહત્ ।
૨૩૪.૨૪/૨અવાપ્યતે નરૈર્દુઃખં શિશ્નોદરપરાયણૈઃ ॥ ૨૩૪.૨૪॥

૨૩૪.૨૫/૧અજ્ઞાનં તામસો ભાવઃ કાર્યારમ્ભપ્રવૃત્તયઃ ।
૨૩૪.૨૫/૨અજ્ઞાનિનાં પ્રવર્તન્તે કર્મલોપસ્તતો દ્વિજાઃ ॥ ૨૩૪.૨૫॥

૨૩૪.૨૬/૧નરકં કર્મણાં લોપાત્ ફલમાહુર્મહર્ષયઃ ।
૨૩૪.૨૬/૨તસ્માદ્ અજ્ઞાનિનાં દુઃખમિહ ચામુત્ર ચોત્તમમ્ ॥ ૨૩૪.૨૬॥

૨૩૪.૨૭/૧જરાજર્જરદેહશ્ચ શિથિલાવયવઃ પુમાન્ ।
૨૩૪.૨૭/૨વિચલચ્છીર્ણદશનો વલિસ્નાયુશિરાવૃતઃ ॥ ૨૩૪.૨૭॥

૨૩૪.૨૮/૧દૂરપ્રનષ્ટનયનો વ્યોમાન્તર્ગતતારકઃ ।

૨૩૪.૨૮/૨નાસાવિવરનિર્યાત+ ।રોમપુઞ્જશ્ચલદ્વપુઃ ॥ ૨૩૪.૨૮॥

૨૩૪.૨૯/૧પ્રકટીભૂતસર્વાસ્થિર્નતપૃષ્ઠાસ્થિસંહતિઃ ।
૨૩૪.૨૯/૨ઉત્સન્નજઠરાગ્નિત્વાદ્ અલ્પાહારોઽલ્પચેષ્ટિતઃ ॥ ૨૩૪.૨૯॥

૨૩૪.૩૦/૧કૃચ્છ્રચઙ્ક્રમણોત્થાન+ ।શયનાસનચેષ્ટિતઃ ।
૨૩૪.૩૦/૨મન્દીભવચ્છ્રોત્રનેત્ર+ ।ગલલ્લાલાવિલાનનઃ ॥ ૨૩૪.૩૦॥

૨૩૪.૩૧/૧અનાયત્તૈઃ સમસ્તૈશ્ચ કરણૈર્મરણોન્મુખઃ ।
૨૩૪.૩૧/૨તત્ક્ષણેઽપ્યનુભૂતાનામસ્મર્તાખિલવસ્તુનામ્ ॥ ૨૩૪.૩૧॥

૨૩૪.૩૨/૧સકૃદ્ ઉચ્ચારિતે વાક્યે સમુદ્ભૂતમહાશ્રમઃ ।
૨૩૪.૩૨/૨શ્વાસકાસામયાયાસ+ ।સમુદ્ભૂતપ્રજાગરઃ ॥ ૨૩૪.૩૨॥

૨૩૪.૩૩/૧અન્યેનોત્થાપ્યતેઽન્યેન તથા સંવેશ્યતે જરી ।
૨૩૪.૩૩/૨ભૃત્યાત્મપુત્રદારાણામપમાનપરાકૃતઃ ॥ ૨૩૪.૩૩॥

૨૩૪.૩૪/૧પ્રક્ષીણાખિલશૌચશ્ચ વિહારાહારસંસ્પૃહઃ ।
૨૩૪.૩૪/૨હાસ્યઃ પરિજનસ્યાપિ નિર્વિણ્ણાશેષબાન્ધવઃ ॥ ૨૩૪.૩૪॥

૨૩૪.૩૫/૧અનુભૂતમિવાન્યસ્મિઞ્ જન્મન્યાત્મવિચેષ્ટિતમ્ ।
૨૩૪.૩૫/૨સંસ્મરન્ યૌવને દીર્ઘં નિશ્વસિત્યતિતાપિતઃ ॥ ૨૩૪.૩૫॥

૨૩૪.૩૬/૧એવમાદીનિ દુઃખાનિ જરાયામનુભૂય ચ ।
૨૩૪.૩૬/૨મરણે યાનિ દુઃખાનિ પ્રાપ્નોતિ શ ૃણુ તાન્યપિ ॥ ૨૩૪.૩૬॥

૨૩૪.૩૭/૧શ્લથગ્રીવાઙ્ઘ્રિહસ્તોઽથ પ્રાપ્તો વેપથુના નરઃ ।
૨૩૪.૩૭/૨મુહુર્ગ્લાનિપરશ્ચાસૌ મુહુર્જ્ઞાનબલાન્વિતઃ ॥ ૨૩૪.૩૭॥

૨૩૪.૩૮/૧હિરણ્યધાન્યતનય+ ।ભાર્યાભૃત્યગૃહાદિષુ ।
૨૩૪.૩૮/૨એતે કથં ભવિષ્યન્તીત્યતીવ મમતાકુલઃ ॥ ૨૩૪.૩૮॥

૨૩૪.૩૯/૧મર્મવિદ્ભિર્મહારોગૈઃ ક્રકચૈરિવ દારુણૈઃ ।
૨૩૪.૩૯/૨શરૈરિવાન્તકસ્યોગ્રૈશ્છિદ્યમાનાસ્થિબન્ધનઃ ॥ ૨૩૪.૩૯॥

૨૩૪.૪૦/૧પરિવર્તમાનતારાક્ષિ હસ્તપાદં મુહુઃ ક્ષિપન્ ।
૨૩૪.૪૦/૨સંશુષ્યમાણતાલ્વોષ્ઠ+ ।કણ્ઠો ઘુરઘુરાયતે ॥ ૨૩૪.૪૦॥

૨૩૪.૪૧/૧નિરુદ્ધકણ્ઠદેશોઽપિ ઉદાનશ્વાસપીડિતઃ ।
૨૩૪.૪૧/૨તાપેન મહતા વ્યાપ્તસ્તૃષા વ્યાપ્તસ્તથા ક્ષુધા ॥ ૨૩૪.૪૧॥

૨૩૪.૪૨/૧ક્લેશાદ્ ઉત્ક્રાન્તિમાપ્નોતિ યામ્યકિંકરપીડિતઃ ।
૨૩૪.૪૨/૨તતશ્ચ યાતનાદેહં ક્લેશેન પ્રતિપદ્યતે ॥ ૨૩૪.૪૨॥

૨૩૪.૪૩/૧એતાન્યન્યાનિ ચોગ્રાણિ દુઃખાનિ મરણે નૃણામ્ ।
૨૩૪.૪૩/૨શ ृણુધ્વં નરકે યાનિ પ્રાપ્યન્તે પુરુષૈર્મૃતૈઃ ॥ ૨૩૪.૪૩॥

૨૩૪.૪૪/૧યામ્યકિંકરપાશાદિ+ ।ગ્રહણં દણ્ડતાડનમ્ ।
૨૩૪.૪૪/૨યમસ્ય દર્શનં ચોગ્રમુગ્રમાર્ગવિલોકનમ્ ॥ ૨૩૪.૪૪॥

૨૩૪.૪૫/૧કરમ્ભવાલુકાવહ્નિ+ ।યન્ત્રશસ્ત્રાદિભીષણે ।
૨૩૪.૪૫/૨પ્રત્યેકં યાતનાયાશ્ચ યાતનાદિ દ્વિજોત્તમાઃ ॥ ૨૩૪.૪૫॥

૨૩૪.૪૬/૧ક્રકચૈઃ પીડ્યમાનાનાં મૃષાયાં ચાપિ ધ્માપ્યતામ્ ।
૨૩૪.૪૬/૨કુઠારૈઃ પાટ્યમાનાનાં ભૂમૌ ચાપિ નિખન્યતામ્ ॥ ૨૩૪.૪૬॥

૨૩૪.૪૭/૧શૂલેષ્વારોપ્યમાણાનાં વ્યાઘ્રવક્ત્રે પ્રવેશ્યતામ્ ।
૨૩૪.૪૭/૨ગૃધ્રૈઃ સમ્ભક્ષ્યમાણાનાં દ્વીપિભિશ્ચોપભુજ્યતામ્ ॥ ૨૩૪.૪૭॥

૨૩૪.૪૮/૧ક્વથ્યતાં તૈલમધ્યે ચ ક્લિદ્યતાં ક્ષારકર્દમે ।
૨૩૪.૪૮/૨ઉચ્ચાન્ નિપાત્યમાનાનાં ક્ષિપ્યતાં ક્ષેપયન્ત્રકૈઃ ॥ ૨૩૪.૪૮॥

૨૩૪.૪૯/૧નરકે યાનિ દુઃખાનિ પાપહેતૂદ્ભવાનિ વૈ ।
૨૩૪.૪૯/૨પ્રાપ્યન્તે નારકૈર્વિપ્રાસ્તેષાં સંખ્યા ન વિદ્યતે ॥ ૨૩૪.૪૯॥

૨૩૪.૫૦/૧ન કેવલં દ્વિજશ્રેષ્ઠા નરકે દુઃખપદ્ધતિઃ ।
૨૩૪.૫૦/૨સ્વર્ગેઽપિ પાતભીતસ્ય ક્ષયિષ્ણોર્નાસ્તિ નિર્વૃતિઃ ॥ ૨૩૪.૫૦॥

૨૩૪.૫૧/૧પુનશ્ચ ગર્ભો ભવતિ જાયતે ચ પુનર્નરઃ ।
૨૩૪.૫૧/૨ગર્ભે વિલીયતે ભૂયો જાયમાનોઽસ્તમેતિ ચ ॥ ૨૩૪.૫૧॥

૨૩૪.૫૨/૧જાતમાત્રશ્ચ મ્રિયતે બાલભાવે ચ યૌવને ।
૨૩૪.૫૨/૨યદ્ યત્ પ્રીતિકરં પુંસાં વસ્તુ વિપ્રાઃ પ્રજાયતે ॥ ૨૩૪.૫૨॥

૨૩૪.૫૩/૧તદ્ એવ દુઃખવૃક્ષસ્ય બીજત્વમુપગચ્છતિ ।
૨૩૪.૫૩/૨કલત્રપુત્રમિત્રાદિ+ ।ગૃહક્ષેત્રધનાદિકૈઃ ॥ ૨૩૪.૫૩॥

૨૩૪.૫૪/૧ક્રિયતે ન તથા ભૂરિ સુખં પુંસાં યથાસુખમ્ ।
૨૩૪.૫૪/૨ઇતિ સંસારદુઃખાર્ક+ ।તાપતાપિતચેતસામ્ ॥ ૨૩૪.૫૪॥

૨૩૪.૫૫/૧વિમુક્તિપાદપચ્છાયામ્ ઋતે કુત્ર સુખં નૃણામ્ ।
૨૩૪.૫૫/૨તદ્ અસ્ય ત્રિવિધસ્યાપિ દુઃખજાતસ્ય પણ્ડિતૈઃ ॥ ૨૩૪.૫૫॥

૨૩૪.૫૬/૧ગર્ભજન્મજરાદ્યેષુ સ્થાનેષુ પ્રભવિષ્યતઃ ।
૨૩૪.૫૬/૨નિરસ્તાતિશયાહ્લાદં સુખભાવૈકલક્ષણમ્ ॥ ૨૩૪.૫૬॥

૨૩૪.૫૭/૧ભેષજં ભગવત્પ્રાપ્તિરેકા ચાત્યન્તિકી મતા ।
૨૩૪.૫૭/૨તસ્માત્ તત્પ્રાપ્તયે યત્નઃ કર્તવ્યઃ પણ્ડિતૈર્નરૈઃ ॥ ૨૩૪.૫૭॥

૨૩૪.૫૮/૧તત્પ્રાપ્તિહેતુર્જ્ઞાનં ચ કર્મ ચોક્તં દ્વિજોત્તમાઃ ।
૨૩૪.૫૮/૨આગમોત્થં વિવેકાચ્ચ દ્વિધા જ્ઞાનં તથોચ્યતે ॥ ૨૩૪.૫૮॥

૨૩૪.૫૯/૧શબ્દબ્રહ્માગમમયં પરં બ્રહ્મ વિવેકજમ્ ।
૨૩૪.૫૯/૨અન્ધં તમ ઇવાજ્ઞાનં દીપવચ્ચેન્દ્રિયોદ્ભવમ્ ॥ ૨૩૪.૫૯॥

૨૩૪.૬૦/૧યથા સૂર્યસ્તથા જ્ઞાનં યદ્ વૈ વિપ્રા વિવેકજમ્ ।
૨૩૪.૬૦/૨મનુરપ્યાહ વેદાર્થં સ્મૃત્વા યન્ મુનિસત્તમાઃ ॥ ૨૩૪.૬૦॥

૨૩૪.૬૧/૧તદ્ એતચ્છ્રૂયતામત્ર સમ્બન્ધે ગદતો મમ ।
૨૩૪.૬૧/૨દ્વે બ્રહ્મણી વેદિતવ્યે શબ્દબ્રહ્મ પરં ચ યત્ ॥ ૨૩૪.૬૧॥

૨૩૪.૬૨/૧શબ્દબ્રહ્મણિ નિષ્ણાતઃ પરં બ્રહ્માધિગચ્છતિ ।
૨૩૪.૬૨/૨દ્વે વિદ્યે વૈ વેદિતવ્યે ઇતિ ચાથર્વણી શ્રુતિઃ ॥ ૨૩૪.૬૨॥

૨૩૪.૬૩/૧પરયા હ્યક્ષરપ્રાપ્તિરૃગ્વેદાદિમયાપરા ।
૨૩૪.૬૩/૨યત્ તદ્ અવ્યક્તમજરમચિન્ત્યમજમવ્યયમ્ ॥ ૨૩૪.૬૩॥

૨૩૪.૬૪/૧અનિર્દેશ્યમરૂપં ચ પાણિપાદાદ્યસંયુતમ્ ।
૨૩૪.૬૪/૨વિત્તં સર્વગતં નિત્યં ભૂતયોનિમકારણમ્ ॥ ૨૩૪.૬૪॥

૨૩૪.૬૫/૧વ્યાપ્યં વ્યાપ્તં યતઃ સર્વં તદ્ વૈ પશ્યન્તિ સૂરયઃ ।
૨૩૪.૬૫/૨તદ્ બ્રહ્મ પરમં ધામ તદ્ ધ્યેયં મોક્ષકાઙ્ક્ષિભિઃ ॥ ૨૩૪.૬૫॥

૨૩૪.૬૬/૧શ્રુતિવાક્યોદિતં સૂક્ષ્મં તદ્ વિષ્ણોઃ પરમં પદમ્ ।
૨૩૪.૬૬/૨ઉત્પત્તિં પ્રલયં ચૈવ ભૂતાનામાગતિં ગતિમ્ ॥ ૨૩૪.૬૬॥

૨૩૪.૬૭/૧વેત્તિ વિદ્યામવિદ્યાં ચ સ વાચ્યો ભગવાન્ ઇતિ ।
૨૩૪.૬૭/૨જ્ઞાનશક્તિબલૈશ્વર્ય+ ।વીર્યતેજાંસ્યશેષતઃ ॥ ૨૩૪.૬૭॥

૨૩૪.૬૮/૧ભગવચ્છબ્દવાચ્યાનિ વિના હેયૈર્ગુણાદિભિઃ ।
૨૩૪.૬૮/૨સર્વાણિ તત્ર ભૂતાનિ નિવસન્તિ પરાત્મનિ ॥ ૨૩૪.૬૮॥

૨૩૪.૬૯/૧ભૂતેષુ ચ સ સર્વાત્મા વાસુદેવસ્તતઃ સ્મૃતઃ ।

૨૩૪.૬૯/૨ઉવાચેદં મહર્ષિભ્યઃ પુરા પૃષ્ટઃ પ્રજાપતિઃ ॥ ૨૩૪.૬૯॥

૨૩૪.૭૦/૧નામવ્યાખ્યામનન્તસ્ય વાસુદેવસ્ય તત્ત્વતઃ ।
૨૩૪.૭૦/૨ભૂતેષુ વસતે યોઽન્તર્વસન્ત્યત્ર ચ તાનિ યત્ ।
૨૩૪.૭૦/૩ધાતા વિધાતા જગતાં વાસુદેવસ્તતઃ પ્રભુઃ ॥ ૨૩૪.૭૦॥

૨૩૪.૭૧/૧સ સર્વભૂતપ્રકૃતિર્ગુણાંશ્ચ ।
૨૩૪.૭૧/૨દોષાંશ્ચ સર્વાન્ સગુણો હ્યતીતઃ ।
૨૩૪.૭૧/૩અતીતસર્વાવરણોઽખિલાત્મા ।
૨૩૪.૭૧/૪તેનાવૃતં યદ્ ભુવનાન્તરાલમ્ ॥ ૨૩૪.૭૧॥

૨૩૪.૭૨/૧સમસ્તકલ્યાણગુણાત્મકો હિ ।
૨૩૪.૭૨/૨સ્વશક્તિલેશાદૃતભૂતસર્ગઃ ।
૨૩૪.૭૨/૩ઇચ્છાગૃહીતાભિમતોરુદેહઃ ।
૨૩૪.૭૨/૪સંસાધિતાશેષજગદ્ધિતોઽસૌ ॥ ૨૩૪.૭૨॥

૨૩૪.૭૩/૧તેજોબલૈશ્વર્યમહાવરોધઃ ।
૨૩૪.૭૩/૨સ્વવીર્યશક્ત્યાદિગુણૈકરાશિઃ ।
૨૩૪.૭૩/૩પરઃ પરાણાં સકલા ન યત્ર ।
૨૩૪.૭૩/૪ક્લેશાદયઃ સન્તિ પરાપરેશે ॥ ૨૩૪.૭૩॥

૨૩૪.૭૪/૧સ ઈશ્વરો વ્યષ્ટિસમષ્ટિરૂપો ।
<234।74/2>ઽવ્યક્તસ્વરૂપઃ પ્રકટસ્વરૂપઃ ।
૨૩૪.૭૪/૩સર્વેશ્વરઃ સર્વદૃક્ સર્વવેત્તા ।
૨૩૪.૭૪/૪સમસ્તશક્તિઃ પરમેશ્વરાખ્યઃ ॥ ૨૩૪.૭૪॥

૨૩૪.૭૫/૧સંજ્ઞાયતે યેન તદ્ અસ્તદોષમ્ ।
૨૩૪.૭૫/૨શુદ્ધં પરં નિર્મલમેકરૂપમ્ ।
૨૩૪.૭૫/૩સંદૃશ્યતે વાપ્યથ ગમ્યતે વા ।
૨૩૪.૭૫/૪તજ્જ્ઞાનમજ્ઞાનમતોઽન્યદ્ ઉક્તમ્ ॥ ૨૩૪.૭૫॥

૨૩૫.૧/૧મુનય ઊચુઃ । ઇદાનીં બ્રૂહિ યોગં ચ દુઃખસંયોગભેષજમ્ ।
૨૩૫.૧/૨યં વિદિત્વાવ્યયં તત્ર યુઞ્જામઃ પુરુષોત્તમમ્ ॥ ૨૩૫.૧॥

૨૩૫.૨/૧શ્રુત્વા સ વચનં તેષાં કૃષ્ણદ્વૈપાયનસ્તદા ।
૨૩૫.૨/૨અબ્રવીત્ પરમપ્રીતો યોગી યોગવિદાં વરઃ ॥ ૨૩૫.૨॥

૨૩૫.૩/૧વ્યાસ ઉવાચ । યોગં વક્ષ્યામિ ભો વિપ્રાઃ શ઼ૃણુધ્વં ભવનાશનમ્ ।

૨૩૫.૩/૨યમભ્યસ્યાપ્નુયાદ્ યોગી મોક્ષં પરમદુર્લભમ્ ॥ ૨૩૫.૩॥

૨૩૫.૪/૧શ્રુત્વાદૌ યોગશાસ્ત્રાણિ ગુરુમારાધ્ય ભક્તિતઃ ।
૨૩૫.૪/૨ઇતિહાસં પુરાણં ચ વેદાંશ્ચૈવ વિચક્ષણઃ ॥ ૨૩૫.૪॥

૨૩૫.૫/૧આહારં યોગદોષાંશ્ચ દેશકાલં ચ બુદ્ધિમાન્ ।
૨૩૫.૫/૨જ્ઞાત્વા સમભ્યસેદ્ યોગં નિર્દ્વંદ્વો નિષ્પરિગ્રહઃ ॥ ૨૩૫.૫॥

૨૩૫.૬/૧ભુઞ્જન્ સક્તું યવાગૂં ચ તક્રમૂલફલં પયઃ ।
૨૩૫.૬/૨યાવકં કણપિણ્યાકમાહારં યોગસાધનમ્ ॥ ૨૩૫.૬॥

૨૩૫.૭/૧ન મનોવિકલે ધ્માતે ન શ્રાન્તે ક્ષુધિતે તથા ।
૨૩૫.૭/૨ન દ્વંદ્વે ન ચ શીતે ચ ન ચોષ્ણે નાનિલાત્મકે ॥ ૨૩૫.૭॥

૨૩૫.૮/૧સશબ્દે ન જલાભ્યાસે જીર્ણગોષ્ઠે ચતુષ્પથે ।
૨૩૫.૮/૨સરીસૃપે શ્મશાને ચ ન નદ્યન્તેઽગ્નિસંનિધૌ ॥ ૨૩૫.૮॥

૨૩૫.૯/૧ન ચૈત્યે ન ચ વલ્મીકે સભયે કૂપસંનિધૌ ।
૨૩૫.૯/૨ન શુષ્કપર્ણનિચયે યોગં યુઞ્જીત કર્હિચિત્ ॥ ૨૩૫.૯॥

૨૩૫.૧૦/૧દેશાન્ એતાન્ અનાદૃત્ય મૂઢત્વાદ્ યો યુનક્તિ વૈ ।
૨૩૫.૧૦/૨પ્રવક્ષ્યે તસ્ય યે દોષા જાયન્તે વિઘ્નકારકાઃ ॥ ૨૩૫.૧૦॥

૨૩૫.૧૧/૧બાધિર્યં જડતા લોપઃ સ્મૃતેર્મૂકત્વમન્ધતા ।
૨૩૫.૧૧/૨જ્વરશ્ચ જાયતે સદ્યસ્તદ્વદ્ અજ્ઞાનસમ્ભવઃ ॥ ૨૩૫.૧૧॥

૨૩૫.૧૨/૧તસ્માત્ સર્વાત્મના કાર્યા રક્ષા યોગવિદા સદા ।
૨૩૫.૧૨/૨ધર્માર્થકામમોક્ષાણાં શરીરં સાધનં યતઃ ॥ ૨૩૫.૧૨॥

૨૩૫.૧૩/૧આશ્રમે વિજને ગુહ્યે નિઃશબ્દે નિર્ભયે નગે ।
૨૩૫.૧૩/૨શૂન્યાગારે શુચૌ રમ્યે ચૈકાન્તે દેવતાલયે ॥ ૨૩૫.૧૩॥

૨૩૫.૧૪/૧રજન્યાઃ પશ્ચિમે યામે પૂર્વે ચ સુસમાહિતઃ ।
૨૩૫.૧૪/૨પૂર્વાહ્ણે મધ્યમે ચાહ્નિ યુક્તાહારો જિતેન્દ્રિયઃ ॥ ૨૩૫.૧૪॥

૨૩૫.૧૫/૧આસીનઃ પ્રાઙ્મુખો રમ્ય આસને સુખનિશ્ચલે ।
૨૩૫.૧૫/૨નાતિનીચે ન ચોચ્છ્રિતે નિઃસ્પૃહઃ સત્યવાક્ શુચિઃ ॥ ૨૩૫.૧૫॥

૨૩૫.૧૬/૧યુક્તનિદ્રો જિતક્રોધઃ સર્વભૂતહિતે રતઃ ।
૨૩૫.૧૬/૨સર્વદ્વંદ્વસહો ધીરઃ સમકાયાઙ્ઘ્રિમસ્તકઃ ॥ ૨૩૫.૧૬॥

૨૩૫.૧૭/૧નાભૌ નિધાય હસ્તૌ દ્વૌ શાન્તઃ પદ્માસને સ્થિતઃ ।
૨૩૫.૧૭/૨સંસ્થાપ્ય દૃષ્ટિં નાસાગ્રે પ્રાણાન્ આયમ્ય વાગ્યતઃ ॥ ૨૩૫.૧૭॥

૨૩૫.૧૮/૧સમાહૃત્યેન્દ્રિયગ્રામં મનસા હૃદયે મુનિઃ ।
૨૩૫.૧૮/૨પ્રણવં દીર્ઘમુદ્ધૃત્ય સંવૃતાસ્યઃ સુનિશ્ચલઃ ॥ ૨૩૫.૧૮॥

૨૩૫.૧૯/૧રજસા તમસો વૃત્તિં સત્ત્વેન રજસસ્તથા ।
૨૩૫.૧૯/૨સંછાદ્ય નિર્મલે શાન્તે સ્થિતઃ સંવૃતલોચનઃ ॥ ૨૩૫.૧૯॥

૨૩૫.૨૦/૧હૃત્પદ્મકોટરે લીનં સર્વવ્યાપિ નિરઞ્જનમ્ ।
૨૩૫.૨૦/૨યુઞ્જીત સતતં યોગી મુક્તિદં પુરુષોત્તમમ્ ॥ ૨૩૫.૨૦॥

૨૩૫.૨૧/૧કરણેન્દ્રિયભૂતાનિ ક્ષેત્રજ્ઞે પ્રથમં ન્યસેત્ ।
૨૩૫.૨૧/૨ક્ષેત્રજ્ઞશ્ચ પરે યોજ્યસ્તતો યુઞ્જતિ યોગવિત્ ॥ ૨૩૫.૨૧॥

૨૩૫.૨૨/૧મનો યસ્યાન્તમભ્યેતિ પરમાત્મનિ ચઞ્ચલમ્ ।
૨૩૫.૨૨/૨સંત્યજ્ય વિષયાંસ્તસ્ય યોગસિદ્ધિઃ પ્રકાશિતા ॥ ૨૩૫.૨૨॥

૨૩૫.૨૩/૧યદા નિર્વિષયં ચિત્તં પરે બ્રહ્મણિ લીયતે ।
૨૩૫.૨૩/૨સમાધૌ યોગયુક્તસ્ય તદાભ્યેતિ પરં પદમ્ ॥ ૨૩૫.૨૩॥

૨૩૫.૨૪/૧અસંસક્તં યદા ચિત્તં યોગિનઃ સર્વકર્મસુ ।
૨૩૫.૨૪/૨ભવત્યાનન્દમાસાદ્ય તદા નિર્વાણમ્ ઋચ્છતિ ॥ ૨૩૫.૨૪॥

૨૩૫.૨૫/૧શુદ્ધં ધામત્રયાતીતં તુર્યાખ્યં પુરુષોત્તમમ્ ।
૨૩૫.૨૫/૨પ્રાપ્ય યોગબલાદ્ યોગી મુચ્યતે નાત્ર સંશયઃ ॥ ૨૩૫.૨૫॥

૨૩૫.૨૬/૧નિઃસ્પૃહઃ સર્વકામેભ્યઃ સર્વત્ર પ્રિયદર્શનઃ ।
૨૩૫.૨૬/૨સર્વત્રાનિત્યબુદ્ધિસ્તુ યોગી મુચ્યેત નાન્યથા ॥ ૨૩૫.૨૬॥

૨૩૫.૨૭/૧ઇન્દ્રિયાણિ ન સેવેત વૈરાગ્યેણ ચ યોગવિત્ ।
૨૩૫.૨૭/૨સદા ચાભ્યાસયોગેન મુચ્યતે નાત્ર સંશયઃ ॥ ૨૩૫.૨૭॥

૨૩૫.૨૮/૧ન ચ પદ્માસનાદ્ યોગો ન નાસાગ્રનિરીક્ષણાત્ ।
૨૩૫.૨૮/૨મનસશ્ચેન્દ્રિયાણાં ચ સંયોગો યોગ ઉચ્યતે ॥ ૨૩૫.૨૮॥

૨૩૫.૨૯/૧એવં મયા મુનિશ્રેષ્ઠા યોગઃ પ્રોક્તો વિમુક્તિદઃ ।
૨૩૫.૨૯/૨સંસારમોક્ષહેતુશ્ચ કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૨૩૫.૨૯॥

૨૩૫.૩૦/૧લોમહર્ષણ ઉવાચ । શ્રુત્વા તે વચનં તસ્ય સાધુ સાધ્વિતિ ચાબ્રુવન્ ।
૨૩૫.૩૦/૨વ્યાસં પ્રશસ્ય સમ્પૂજ્ય પુનઃ પ્રષ્ટું સમુદ્યતાઃ ॥ ૨૩૫.૩૦॥

૨૩૬.૧/૧મુનય ઊચુઃ । તવ વક્ત્રાબ્ધિસમ્ભૂતમમૃતં વાઙ્મયં મુને ।
૨૩૬.૧/૨પિબતાં નો દ્વિજશ્રેષ્ઠ ન તૃપ્તિરિહ દૃશ્યતે ॥ ૨૩૬.૧॥

૨૩૬.૨/૧તસ્માદ્ યોગં મુને બ્રૂહિ વિસ્તરેણ વિમુક્તિદમ્ ।
૨૩૬.૨/૨સાંખ્યં ચ દ્વિપદાં શ્રેષ્ઠ શ્રોતુમિચ્છામહે વયમ્ ॥ ૨૩૬.૨॥

૨૩૬.૩/૧પ્રજ્ઞાવાઞ્ શ્રોત્રિયો યજ્વા ખ્યાતઃ પ્રાજ્ઞોऽનસૂયકઃ ।
૨૩૬.૩/૨સત્યધર્મમતિર્બ્રહ્મન્ કથં બ્રહ્માધિગચ્છતિ ॥ ૨૩૬.૩॥

૨૩૬.૪/૧તપસા બ્રહ્મચર્યેણ સર્વત્યાગેન મેધયા ।
૨૩૬.૪/૨સાંખ્યે વા યદિ વા યોગ એતત્ પૃષ્ટો વદસ્વ નઃ ॥ ૨૩૬.૪॥

૨૩૬.૫/૧મનસશ્ચેન્દ્રિયાણાં ચ યથૈકાગ્ર્યમવાપ્યતે ।
૨૩૬.૫/૨યેનોપાયેન પુરુષસ્તત્ ત્વં વ્યાખ્યાતુમર્હસિ ॥ ૨૩૬.૫॥

૨૩૬.૬/૧વ્યાસ ઉવાચ । નાન્યત્ર જ્ઞાનતપસોર્નાન્યત્રેન્દ્રિયનિગ્રહાત્ ।
૨૩૬.૬/૨નાન્યત્ર સર્વસંત્યાગાત્ સિદ્ધિં વિન્દતિ કશ્ચન ॥ ૨૩૬.૬॥

૨૩૬.૭/૧મહાભૂતાનિ સર્વાણિ પૂર્વસૃષ્ટિઃ સ્વયમ્ભુવઃ ।
૨૩૬.૭/૨ભૂયિષ્ઠં પ્રાણભૃદ્ગ્રામે નિવિષ્ટાનિ શરીરિષુ ॥ ૨૩૬.૭॥

૨૩૬.૮/૧ભૂમેર્દેહો જલાત્ સ્નેહો જ્યોતિષશ્ચક્ષુષી સ્મૃતે ।
૨૩૬.૮/૨પ્રાણાપાનાશ્રયો વાયુઃ કોષ્ઠાऽऽકાશં શરીરિણામ્ ॥ ૨૩૬.૮॥

૨૩૬.૯/૧ક્રાન્તૌ વિષ્ણુર્બલે શક્રઃ કોષ્ઠેऽગ્નિર્ભોક્તુમિચ્છતિ ।
૨૩૬.૯/૨કર્ણયોઃ પ્રદિશઃ શ્રોત્રે જિહ્વાયાં વાક્ સરસ્વતી ॥ ૨૩૬.૯॥

૨૩૬.૧૦/૧કર્ણૌ ત્વક્ ચક્ષુષી જિહ્વા નાસિકા ચૈવ પઞ્ચમી ।
૨૩૬.૧૦/૨દશ તાનીન્દ્રિયોક્તાનિ દ્વારાણ્યાહારસિદ્ધયે ॥ ૨૩૬.૧૦॥

૨૩૬.૧૧/૧શબ્દસ્પર્શૌ તથા રૂપં રસં ગન્ધં ચ પઞ્ચમમ્ ।
૨૩૬.૧૧/૨ઇન્દ્રિયાર્થાન્ પૃથગ્ વિદ્યાદ્ ઇન્દ્રિયેભ્યસ્તુ નિત્યદા ॥ ૨૩૬.૧૧॥

૨૩૬.૧૨/૧ઇન્દ્રિયાણિ મનો યુઙ્ક્તે અવશ્યાન્ ઇવ રાજિનઃ મનશ્ચાપિ
સદા યુઙ્ક્તે ભૂતાત્મા હૃદયાશ્રિતઃ ॥ ૨૩૬.૧૨॥

૨૩૬.૧૩/૧ઇન્દ્રિયાણાં તથૈવૈષાં સર્વેષામીશ્વરં મનઃ ।
૨૩૬.૧૩/૨નિયમે ચ વિસર્ગે ચ ભૂતાત્મા મનસસ્તથા ॥ ૨૩૬.૧૩॥

૨૩૬.૧૪/૧ઇન્દ્રિયાણીન્દ્રિયાર્થાશ્ચ સ્વભાવશ્ચેતના મનઃ ।

૨૩૬.૧૪/૨પ્રાણાપાનૌ ચ જીવશ્ચ નિત્યં દેહેષુ દેહિનામ્ ॥ ૨૩૬.૧૪॥

૨૩૬.૧૫/૧આશ્રયો નાસ્તિ સત્ત્વસ્ય ગુણશબ્દો ન ચેતનાઃ ।
૨૩૬.૧૫/૨સત્ત્વં હિ તેજઃ સૃજતિ ન ગુણાન્ વૈ કથંચન ॥ ૨૩૬.૧૫॥

૨૩૬.૧૬/૧એવં સપ્તદશં દેહં વૃતં ષોડશભિર્ગુણૈઃ ।
૨૩૬.૧૬/૨મનીષી મનસા વિપ્રાઃ પશ્યત્યાત્માનમાત્મનિ ॥ ૨૩૬.૧૬॥

૨૩૬.૧૭/૧ન હ્યયં ચક્ષુષા દૃશ્યો ન ચ સર્વૈરપીન્દ્રિયૈઃ ।
૨૩૬.૧૭/૨મનસા તુ પ્રદીપ્તેન મહાન્ આત્મા પ્રકાશતે ॥ ૨૩૬.૧૭॥

૨૩૬.૧૮/૧અશબ્દસ્પર્શરૂપં તચ્ચારસાગન્ધમવ્યયમ્ ।
૨૩૬.૧૮/૨અશરીરં શરીરે સ્વે નિરીક્ષેત નિરિન્દ્રિયમ્ ॥ ૨૩૬.૧૮॥

૨૩૬.૧૯/૧અવ્યક્તં સર્વદેહેષુ મર્ત્યેષુ પરમાર્ચિતમ્ ।
૨૩૬.૧૯/૨યોऽનુપશ્યતિ સ પ્રેત્ય કલ્પતે બ્રહ્મભૂયતઃ ॥ ૨૩૬.૧૯॥

૨૩૬.૨૦/૧વિદ્યાવિનયસમ્પન્ન+ ।બ્રાહ્મણે ગવિ હસ્તિનિ ।
૨૩૬.૨૦/૨શુનિ ચૈવ શ્વપાકે ચ પણ્ડિતાઃ સમદર્શિનઃ ॥ ૨૩૬.૨૦॥

૨૩૬.૨૧/૧સ હિ સર્વેષુ ભૂતેષુ જઙ્ગમેષુ ધ્રુવેષુ ચ ।
૨૩૬.૨૧/૨વસત્યેકો મહાન્ આત્મા યેન સર્વમિદં તતમ્ ॥ ૨૩૬.૨૧॥

૨૩૬.૨૨/૧સર્વભૂતેષુ ચાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
૨૩૬.૨૨/૨યદા પશ્યતિ ભૂતાત્મા બ્રહ્મ સમ્પદ્યતે તદા ॥ ૨૩૬.૨૨॥

૨૩૬.૨૩/૧યાવાન્ આત્મનિ વેદાત્મા તાવાન્ આત્મા પરાત્મનિ ।
૨૩૬.૨૩/૨ય એવં સતતં વેદ સોऽમૃતત્વાય કલ્પતે ॥ ૨૩૬.૨૩॥

૨૩૬.૨૪/૧સર્વભૂતાત્મભૂતસ્ય સર્વભૂતહિતસ્ય ચ ।
૨૩૬.૨૪/૨દેવાપિ માર્ગે મુહ્યન્તિ અપદસ્ય પદૈષિણઃ ॥ ૨૩૬.૨૪॥

૨૩૬.૨૫/૧શકુન્તાનામિવાકાશે મત્સ્યાનામિવ ચોદકે ।
૨૩૬.૨૫/૨યથા ગતિર્ન દૃશ્યેત તથા જ્ઞાનવિદાં ગતિઃ ॥ ૨૩૬.૨૫॥

૨૩૬.૨૬/૧કાલઃ પચતિ ભૂતાનિ સર્વાણ્યેવાત્મનાત્મનિ ।
૨૩૬.૨૬/૨યસ્મિંસ્તુ પચ્યતે કાલસ્તન્ ન વેદેહ કશ્ચન ॥ ૨૩૬.૨૬॥

૨૩૬.૨૭/૧ન તદ્ ઊર્ધ્વં ન તિર્યક્ ચ નાધો ન ચ પુનઃ પુનઃ ।
૨૩૬.૨૭/૨ન મધ્યે પ્રતિગૃહ્ણીતે નૈવ કિંચિન્ ન કશ્ચન ॥ ૨૩૬.૨૭॥

૨૩૬.૨૮/૧સર્વે તત્સ્થા ઇમે લોકા બાહ્યમેષાં ન કિંચન ।
૨૩૬.૨૮/૨યદ્યપ્યગ્રે સમાગચ્છેદ્ યથા બાણો ગુણચ્યુતઃ ॥ ૨૩૬.૨૮॥

૨૩૬.૨૯/૧નૈવાન્તં કારણસ્યેયાદ્ યદ્યપિ સ્યાન્ મનોજવઃ ।
૨૩૬.૨૯/૨તસ્માત્ સૂક્ષ્મતરં નાસ્તિ નાસ્તિ સ્થૂલતરં તથા ॥ ૨૩૬.૨૯॥

૨૩૬.૩૦/૧સર્વતઃપાણિપાદં તત્ સર્વતોક્ષિશિરોમુખમ્ ।
૨૩૬.૩૦/૨સર્વતઃશ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૨૩૬.૩૦॥

૨૩૬.૩૧/૧તદ્ એવાણોરણુતરં તન્ મહદ્ભ્યો મહત્તરમ્ ।
૨૩૬.૩૧/૨તદ્ અન્તઃ સર્વભૂતાનાં ધ્રુવં તિષ્ઠન્ ન દૃશ્યતે ॥ ૨૩૬.૩૧॥

૨૩૬.૩૨/૧અક્ષરં ચ ક્ષરં ચૈવ દ્વેધા ભાવોઽયમાત્મનઃ ।
૨૩૬.૩૨/૨ક્ષરઃ સર્વેષુ ભૂતેષુ દિવ્યં ત્વમૃતમક્ષરમ્ ॥ ૨૩૬.૩૨॥

૨૩૬.૩૩/૧નવદ્વારં પુરં કૃત્વા હંસો હિ નિયતો વશી ।
૨૩૬.૩૩/૨ઈદૃશઃ સર્વભૂતસ્ય સ્થાવરસ્ય ચરસ્ય ચ ॥ ૨૩૬.૩૩॥

૨૩૬.૩૪/૧હાનેનાભિવિકલ્પાનાં નરાણાં સંચયેન ચ ।
૨૩૬.૩૪/૨શરીરાણામજસ્યાહુર્હંસત્વં પારદર્શિનઃ ॥ ૨૩૬.૩૪॥

૨૩૬.૩૫/૧હંસોક્તં ચ ક્ષરં ચૈવ કૂટસ્થં યત્ તદ્ અક્ષરમ્ ।
૨૩૬.૩૫/૨તદ્ વિદ્વાન્ અક્ષરં પ્રાપ્ય જહાતિ પ્રાણજન્મની ॥ ૨૩૬.૩૫॥

૨૩૬.૩૬/૧વ્યાસ ઉવાચ । ભવતાં પૃચ્છતાં વિપ્રા યથાવદ્ ઇહ તત્ત્વતઃ ।
૨૩૬.૩૬/૨સાંખ્યં જ્ઞાનેન સંયુક્તં યદ્ એતત્ કીર્તિતં મયા ॥ ૨૩૬.૩૬॥

૨૩૬.૩૭/૧યોગકૃત્યં તુ ભો વિપ્રાઃ કીર્તયિષ્યામ્યતઃ પરમ્ ।
૨૩૬.૩૭/૨એકત્વં બુદ્ધિમનસોરિન્દ્રિયાણાં ચ સર્વશઃ ॥ ૨૩૬.૩૭॥

૨૩૬.૩૮/૧આત્મનો વ્યાપિનો જ્ઞાનં જ્ઞાનમેતદ્ અનુત્તમમ્ ।
૨૩૬.૩૮/૨તદ્ એતદ્ ઉપશાન્તેન દાન્તેનાધ્યાત્મશીલિના ॥ ૨૩૬.૩૮॥

૨૩૬.૩૯/૧આત્મારામેણ બુદ્ધેન બોદ્ધવ્યં શુચિકર્મણા ।
૨૩૬.૩૯/૨યોગદોષાન્ સમુચ્છિદ્ય પઞ્ચ યાન્ કવયો વિદુઃ ॥ ૨૩૬.૩૯॥

૨૩૬.૪૦/૧કામં ક્રોધં ચ લોભં ચ ભયં સ્વપ્નં ચ પઞ્ચમમ્ ।
૨૩૬.૪૦/૨ક્રોધં શમેન જયતિ કામં સંકલ્પવર્જનાત્ ॥ ૨૩૬.૪૦॥

૨૩૬.૪૧/૧સત્ત્વસંસેવનાદ્ ધીરો નિદ્રામુચ્છેત્તુમર્હતિ ।
૨૩૬.૪૧/૨ધૃત્યા શિશ્નોદરં રક્ષેત્ પાણિપાદં ચ ચક્ષુષા ॥ ૨૩૬.૪૧॥

૨૩૬.૪૨/૧ચક્ષુઃ શ્રોત્રં ચ મનસા મનો વાચં ચ કર્મણા ।
૨૩૬.૪૨/૨અપ્રમાદાદ્ ભયં જહ્યાદ્ દમ્ભં પ્રાજ્ઞોપસેવનાત્ ॥ ૨૩૬.૪૨ ॥

૨૩૬.૪૩/૧એવમેતાન્ યોગદોષાઞ્ જયેન્ નિત્યમતન્દ્રિતઃ ।
૨૩૬.૪૩/૨અગ્નીંશ્ચ બ્રાહ્મણાંશ્ચાથ દેવતાઃ પ્રણમેત્ સદા ॥ ૨૩૬.૪૩ ॥

૨૩૬.૪૪/૧વર્જયેદ્ ઉદ્ધતાં વાચં હિંસાયુક્તાં મનોનુગામ્ ।
૨૩૬.૪૪/૨બ્રહ્મતેજોમયં શુક્રં યસ્ય સર્વમિદં જગત્ ॥ ૨૩૬.૪૪ ॥

૨૩૬.૪૫/૧એતસ્ય ભૂતભૂતસ્ય દૃષ્ટં સ્થાવરજઙ્ગમમ્ ।
૨૩૬.૪૫/૨ધ્યાનમધ્યયનં દાનં સત્યં હ્રીરાર્જવં ક્ષમા ॥ ૨૩૬.૪૫ ॥

૨૩૬.૪૬/૧શૌચં ચૈવાત્મનઃ શુદ્ધિરિન્દ્રિયાણાં ચ નિગ્રહઃ ।
૨૩૬.૪૬/૨એતૈર્વિવર્ધતે તેજઃ પાપ્માનં ચાપકર્ષતિ ॥ ૨૩૬.૪૬ ॥

૨૩૬.૪૭/૧સમઃ સર્વેષુ ભૂતેષુ લભ્યાલભ્યેન વર્તયન્ ।
૨૩૬.૪૭/૨ધૂતપાપ્મા તુ તેજસ્વી લઘ્વાહારો જિતેન્દ્રિયઃ ॥ ૨૩૬.૪૭ ॥

૨૩૬.૪૮/૧કામક્રોધૌ વશે કૃત્વા નિષેવેદ્ બ્રહ્મણઃ પદમ્ ।
૨૩૬.૪૮/૨મનસશ્ચેન્દ્રિયાણાં ચ કૃત્વૈકાગ્ર્યં સમાહિતઃ ॥ ૨૩૬.૪૮ ॥

૨૩૬.૪૯/૧પૂર્વરાત્રે પરાર્ધે ચ ધારયેન્ મન આત્મનઃ ।
૨૩૬.૪૯/૨જન્તોઃ પઞ્ચેન્દ્રિયસ્યાસ્ય યદ્યેકં ક્લિન્નમિન્દ્રિયમ્ ॥ ૨૩૬.૪૯ ॥

૨૩૬.૫૦/૧તતોઽસ્ય સ્રવતિ પ્રજ્ઞા ગિરેઃ પાદાદ્ ઇવોદકમ્ ।
૨૩૬.૫૦/૨મનસઃ પૂર્વમાદદ્યાત્ કૂર્માણામિવ મત્સ્યહા ॥ ૨૩૬.૫૦ ॥

૨૩૬.૫૧/૧તતઃ શ્રોત્રં તતશ્ચક્ષુર્જિહ્વા ઘ્રાણં ચ યોગવિત્ ।
૨૩૬.૫૧/૨તત એતાનિ સંયમ્ય મનસિ સ્થાપયેદ્ યદિ ॥ ૨૩૬.૫૧ ॥

૨૩૬.૫૨/૧તથૈવાપોહ્ય સંકલ્પાન્ મનો હ્યાત્મનિ ધારયેત્ ।
૨૩૬.૫૨/૨પઞ્ચેન્દ્રિયાણિ મનસિ હૃદિ સંસ્થાપયેદ્ યદિ ॥ ૨૩૬.૫૨ ॥

૨૩૬.૫૩/૧યદૈતાન્યવતિષ્ઠન્તે મનઃષષ્ઠાનિ ચાત્મનિ ।
૨૩૬.૫૩/૨પ્રસીદન્તિ ચ સંસ્થાયાં તદા બ્રહ્મ પ્રકાશતે ॥ ૨૩૬.૫૩ ॥

૨૩૬.૫૪/૧વિધૂમ ઇવ દીપ્તાર્ચિરાદિત્ય ઇવ દીપ્તિમાન્ ।
૨૩૬.૫૪/૨વૈદ્યુતોઽગ્નિરિવાકાશે પશ્યન્ત્યાત્માનમાત્મનિ ॥ ૨૩૬.૫૪ ॥

૨૩૬.૫૫/૧સર્વં તત્ર તુ સર્વત્ર વ્યાપકત્વાચ્ચ દૃશ્યતે ।

૨૩૬.૫૫/૨તં પશ્યન્તિ મહાત્માનો બ્રાહ્મણા યે મનીષિણઃ ॥ ૨૩૬.૫૫॥

૨૩૬.૫૬/૧ધૃતિમન્તો મહાપ્રાજ્ઞાઃ સર્વભૂતહિતે રતાઃ ।
૨૩૬.૫૬/૨એવં પરિમિતં કાલમાચરન્ સંશિતવ્રતઃ ॥ ૨૩૬.૫૬॥

૨૩૬.૫૭/૧આસીનો હિ રહસ્યેકો ગચ્છેદ્ અક્ષરસામ્યતામ્ ।
૨૩૬.૫૭/૨પ્રમોહો ભ્રમ આવર્તો ઘ્રાણં શ્રવણદર્શને ॥ ૨૩૬.૫૭॥

૨૩૬.૫૮/૧અદ્ભુતાનિ રસઃ સ્પર્શઃ શીતોષ્ણમારુતાકૃતિઃ ।
૨૩૬.૫૮/૨પ્રતિભાન્ ઉપસર્ગાશ્ચ પ્રતિસંગૃહ્ય યોગતઃ ॥ ૨૩૬.૫૮॥

૨૩૬.૫૯/૧તાંસ્તત્ત્વવિદ્ અનાદૃત્ય સામ્યેનૈવ નિવર્તયેત્ ।
૨૩૬.૫૯/૨કુર્યાત્ પરિચયં યોગે ત્રૈલોક્યે નિયતો મુનિઃ ॥ ૨૩૬.૫૯॥

૨૩૬.૬૦/૧ગિરિશ‌ૃઙ્ગે તથા ચૈત્યે વૃક્ષમૂલેષુ યોજયેત્ ।
૨૩૬.૬૦/૨સંનિયમ્યેન્દ્રિયગ્રામં કોષ્ઠે ભાણ્ડમના ઇવ ॥ ૨૩૬.૬૦॥

૨૩૬.૬૧/૧એકાગ્રં ચિન્તયેન્ નિત્યં યોગાન્ નોદ્વિજતે મનઃ ।
૨૩૬.૬૧/૨યેનોપાયેન શક્યેત નિયન્તું ચઞ્ચલં મનઃ ॥ ૨૩૬.૬૧॥

૨૩૬.૬૨/૧તત્ર યુક્તો નિષેવેત ન ચૈવ વિચલેત્ તતઃ ।
૨૩૬.૬૨/૨શૂન્યાગારાણિ ચૈકાગ્રો નિવાસાર્થમુપક્રમેત્ ॥ ૨૩૬.૬૨॥

૨૩૬.૬૩/૧નાતિવ્રજેત્ પરં વાચા કર્મણા મનસાપિ વા ।
૨૩૬.૬૩/૨ઉપેક્ષકો યતાહારો લબ્ધાલબ્ધસમો ભવેત્ ॥ ૨૩૬.૬૩॥

૨૩૬.૬૪/૧યશ્ચૈનમભિનન્દેત યશ્ચૈનમભિવાદયેત્ ।
૨૩૬.૬૪/૨સમસ્તયોશ્ચાપ્યુભયોર્નાભિધ્યાયેચ્છુભાશુભમ્ ॥ ૨૩૬.૬૪॥

૨૩૬.૬૫/૧ન પ્રહૃષ્યેત લાભેષુ નાલાભેષુ ચ ચિન્તયેત્ ।
૨૩૬.૬૫/૨સમઃ સર્વેષુ ભૂતેષુ સધર્મા માતરિશ્વનઃ ॥ ૨૩૬.૬૫॥

૨૩૬.૬૬/૧એવં સ્વસ્થાત્મનઃ સાધોઃ સર્વત્ર સમદર્શિનઃ ।
૨૩૬.૬૬/૨ષણ્ માસાન્ નિત્યયુક્તસ્ય શબ્દબ્રહ્માભિવર્તતે ॥ ૨૩૬.૬૬॥

૨૩૬.૬૭/૧વેદનાર્તાન્ પરાન્ દૃષ્ટ્વા સમલોષ્ટાશ્મકાઞ્ચનઃ ।
૨૩૬.૬૭/૨એવં તુ નિરતો માર્ગં વિરમેન્ ન વિમોહિતઃ ॥ ૨૩૬.૬૭॥

૨૩૬.૬૮/૧અપિ વર્ણાવકૃષ્ટસ્તુ નારી વા ધર્મકાઙ્ક્ષિણી ।
૨૩૬.૬૮/૨તાવપ્યેતેન માર્ગેણ ગચ્છેતાં પરમાં ગતિમ્ ॥ ૨૩૬.૬૮॥

૨૩૬.૬૯/૧અજં પુરાણમજરં સનાતનમ્ ।
૨૩૬.૬૯/૨યમિન્દ્રિયાતિગમગોચરં દ્વિજાઃ ।
૨૩૬.૬૯/૩અવેક્ષ્ય ચેમાં પરમેષ્ઠિસામ્યતામ્ ।
૨૩૬.૬૯/૪પ્રયાન્ત્યનાવૃત્તિગતિં મનીષિણઃ ॥ ૨૩૬.૬૯॥

૨૩૭.૧/૧મુનય ઊચુઃ । યદ્યેવં વેદવચનં કુરુ કર્મ ત્યજેતિ ચ ।
૨૩૭.૧/૨કાં દિશં વિદ્યયા યાન્તિ કાં ચ ગચ્છન્તિ કર્મણા ॥ ૨૩૭.૧॥

૨૩૭.૨/૧એતદ્ વૈ શ્રોતુમિચ્છામસ્તદ્ ભવાન્ પ્રબ્રવીતુ નઃ ।
૨૩૭.૨/૨એતદ્ અન્યોન્યવૈરૂપ્યં વર્તતે પ્રતિકૂલતઃ ॥ ૨૩૭.૨॥

૨૩૭.૩/૧વ્યાસ ઉવાચ । શ◌ૃણુધ્વં મુનિશાર્દૂલા યત્ પૃચ્છધ્વં સમાસતઃ ।
૨૩૭.૩/૨કર્મવિદ્યામયૌ ચોભૌ વ્યાખ્યાસ્યામિ ક્ષરાક્ષરૌ ॥ ૨૩૭.૩॥

૨૩૭.૪/૧યાં દિશં વિદ્યયા યાન્તિ યાં ગચ્છન્તિ ચ કર્મણા ।
૨૩૭.૪/૨શ◌ૃણુધ્વં સામ્પ્રતં વિપ્રા ગહનં હ્યેતદ્ ઉત્તરમ્ ॥ ૨૩૭.૪॥

૨૩૭.૫/૧અસ્તિ ધર્મ ઇતિ યુક્તં નાસ્તિ તત્રૈવ યો વદેત્ ।
૨૩૭.૫/૨યક્ષસ્ય સાદૃશ્યમિદં યક્ષસ્યેદં ભવેદ્ અથ ॥ ૨૩૭.૫॥

૨૩૭.૬/૧દ્વાવિમાવથ પન્થાનૌ યત્ર વેદાઃ પ્રતિષ્ઠિતાઃ ।
૨૩૭.૬/૨પ્રવૃત્તિલક્ષણો ધર્મો નિવૃત્તો વા વિભાષિતઃ ॥ ૨૩૭.૬॥

૨૩૭.૭/૧કર્મણા બધ્યતે જન્તુર્વિદ્યયા ચ વિમુચ્યતે ।
૨૩૭.૭/૨તસ્માત્ કર્મ ન કુર્વન્તિ યતયઃ પારદર્શિનઃ ॥ ૨૩૭.૭॥

૨૩૭.૮/૧કર્મણા જાયતે પ્રેત્ય મૂર્તિમાન્ ષોડશાત્મકઃ ।
૨૩૭.૮/૨વિદ્યયા જાયતે નિત્યમવ્યક્તં હ્યક્ષરાત્મકમ્ ॥ ૨૩૭.૮॥

૨૩૭.૯/૧કર્મ ત્વેકે પ્રશંસન્તિ સ્વલ્પબુદ્ધિરતા નરાઃ ।
૨૩૭.૯/૨તેન તે દેહજાલેન રમયન્ત ઉપાસતે ॥ ૨૩૭.૯॥

૨૩૭.૧૦/૧યે તુ બુદ્ધિં પરાં પ્રાપ્તા ધર્મનૈપુણ્યદર્શિનઃ ।
૨૩૭.૧૦/૨ન તે કર્મ પ્રશંસન્તિ કૂપં નદ્યાં પિબન્ન્ ઇવ ॥ ૨૩૭.૧૦॥

૨૩૭.૧૧/૧કર્મણાં ફલમાપ્નોતિ સુખદુઃખે ભવાભવૌ ।
૨૩૭.૧૧/૨વિદ્યયા તદ્ અવાપ્નોતિ યત્ર ગત્વા ન શોચતિ ॥ ૨૩૭.૧૧॥

૨૩૭.૧૨/૧ન મ્રિયતે યત્ર ગત્વા યત્ર ગત્વા ન જાયતે ।
૨૩૭.૧૨/૨ન જીર્યતે યત્ર ગત્વા યત્ર ગત્વા ન વર્ધતે ॥ ૨૩૭.૧૨॥

૨૩૭.૧૩/૧યત્ર તદ્ બ્રહ્મ પરમમવ્યક્તમચલં ધ્રુવમ્ ।
૨૩૭.૧૩/૨અવ્યાકૃતમનાયામમમૃતં ચાધિયોગવિત્ ॥ ૨૩૭.૧૩॥

૨૩૭.૧૪/૧દ્વંદ્વૈર્ન યત્ર બાધ્યન્તે માનસેન ચ કર્મણા ।
૨૩૭.૧૪/૨સમાઃ સર્વત્ર મૈત્રાશ્ચ સર્વભૂતહિતે રતાઃ ॥ ૨૩૭.૧૪॥

૨૩૭.૧૫/૧વિદ્યામયોऽન્યઃ પુરુષો દ્વિજાઃ કર્મમયોऽપરઃ ।
૨૩૭.૧૫/૨વિપ્રાશ્ચન્દ્રસમસ્પર્શઃ સૂક્ષ્મયા કલયા સ્થિતઃ ॥ ૨૩૭.૧૫॥

૨૩૭.૧૬/૧તદ્ એતદ્ ઋષિણા પ્રોક્તં વિસ્તરેણાનુગીયતે ।
૨૩૭.૧૬/૨ન વક્તું શક્યતે દ્રષ્ટું ચક્રતન્તુમિવામ્બરે ॥ ૨૩૭.૧૬॥

૨૩૭.૧૭/૧એકાદશવિકારાત્મા કલાસમ્ભારસમ્ભૃતઃ ।
૨૩૭.૧૭/૨મૂર્તિમાન્ ઇતિ તં વિદ્યાદ્ વિપ્રાઃ કર્મગુણાત્મકમ્ ॥ ૨૩૭.૧૭॥

૨૩૭.૧૮/૧દેવો યઃ સંશ્રિતસ્તસ્મિન્ બુદ્ધીન્દુરિવ પુષ્કરે ।
૨૩૭.૧૮/૨ક્ષેત્રજ્ઞં તં વિજાનીયાન્ નિત્યં યોગજિતાત્મકમ્ ॥ ૨૩૭.૧૮॥

૨૩૭.૧૯/૧તમો રજશ્ચ સત્ત્વં ચ જ્ઞેયં જીવગુણાત્મકમ્ ।
૨૩૭.૧૯/૨જીવમાત્મગુણં વિદ્યાદ્ આત્માનં પરમાત્મનઃ ॥ ૨૩૭.૧૯॥

૨૩૭.૨૦/૧સચેતનં જીવગુણં વદન્તિ ।
૨૩૭.૨૦/૨સ ચેષ્ટતે જીવગુણં ચ સર્વમ્ ।
૨૩૭.૨૦/૩તતઃ પરં ક્ષેત્રવિદો વદન્તિ ।
૨૩૭.૨૦/૪પ્રકલ્પયન્તો ભુવનાનિ સપ્ત ॥ ૨૩૭.૨૦॥

૨૩૭.૨૧/૧વ્યાસ ઉવાચ । પ્રકૃત્યાસ્તુ વિકારા યે ક્ષેત્રજ્ઞાસ્તે પરિશ્રુતાઃ ।
૨૩૭.૨૧/૨તે ચૈનં ન પ્રજાનન્તિ ન જાનાતિ સ તાન્ અપિ ॥ ૨૩૭.૨૧॥

૨૩૭.૨૨/૧તૈશ્ચૈવ કુરુતે કાર્યં મનઃષષ્ઠૈરિહેન્દ્રિયૈઃ ।
૨૩૭.૨૨/૨સુદાન્તૈરિવ સંયન્તા દૃઢઃ પરમવાજિભિઃ ॥ ૨૩૭.૨૨॥

૨૩૭.૨૩/૧ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યઃ પરમં મનઃ ।
૨૩૭.૨૩/૨મનસસ્તુ પરા બુદ્ધિર્બુદ્ધેરાત્મા મહાન્ પરઃ ॥ ૨૩૭.૨૩॥

૨૩૭.૨૪/૧મહતઃ પરમવ્યક્તમવ્યક્તાત્ પરતોऽમૃતમ્ ।
૨૩૭.૨૪/૨અમૃતાન્ ન પરં કિંચિત્ સા કાષ્ઠા પરમા ગતિઃ ॥ ૨૩૭.૨૪॥

૨૩૭.૨૫/૧એવં સર્વેષુ ભૂતેષુ ગૂઢાત્મા ન પ્રકાશતે ।
૨૩૭.૨૫/૨દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ ॥ ૨૩૭.૨૫॥

૨૩૭.૨૬/૧અન્તરાત્મનિ સંલીય મનઃષષ્ઠાનિ મેધયા ।
૨૩૭.૨૬/૨ઇન્દ્રિયૈરિન્દ્રિયાર્થાંશ્ચ બહુચિત્તમચિન્તયન્ ॥ ૨૩૭.૨૬॥

૨૩૭.૨૭/૧ધ્યાનેઽપિ પરમં કૃત્વા વિદ્યાસમ્પાદિતં મનઃ ।
૨૩૭.૨૭/૨અનીશ્વરઃ પ્રશાન્તાત્મા તતો ગચ્છેત્ પરં પદમ્ ॥ ૨૩૭.૨૭॥

૨૩૭.૨૮/૧ઇન્દ્રિયાણાં તુ સર્વેષાં વશ્યાત્મા ચલિતસ્મૃતિઃ ।
૨૩૭.૨૮/૨આત્મનઃ સમ્પ્રદાનેન મર્ત્યો મૃત્યુમુપાશ્નુતે ॥ ૨૩૭.૨૮॥

૨૩૭.૨૯/૧વિહત્ય સર્વસંકલ્પાન્ સત્ત્વે ચિત્તં નિવેશયેત્ ।
૨૩૭.૨૯/૨સત્ત્વે ચિત્તં સમાવેશ્ય તતઃ કાલઞ્જરો ભવેત્ ॥ ૨૩૭.૨૯॥

૨૩૭.૩૦/૧ચિત્તપ્રસાદેન યતિર્જહાતીહ શુભાશુભમ્ ।
૨૩૭.૩૦/૨પ્રસન્નાત્માત્મનિ સ્થિત્વા સુખમત્યન્તમશ્નુતે ॥ ૨૩૭.૩૦॥

૨૩૭.૩૧/૧લક્ષણં તુ પ્રસાદસ્ય યથા સ્વપ્ને સુખં ભવેત્ ।
૨૩૭.૩૧/૨નિર્વાતે વા યથા દીપો દીપ્યમાનો ન કમ્પતે ॥ ૨૩૭.૩૧॥

૨૩૭.૩૨/૧એવં પૂર્વાપરે રાત્રે યુઞ્જન્ન્ આત્માનમાત્મના ।
૨૩૭.૩૨/૨લઘ્વાહારો વિશુદ્ધાત્મા પશ્યત્યાત્માનમાત્મનિ ॥ ૨૩૭.૩૨॥

૨૩૭.૩૩/૧રહસ્યં સર્વવેદાનામનૈતિહ્યમનાગમમ્ ।
૨૩૭.૩૩/૨આત્મપ્રત્યાયકં શાસ્ત્રમિદં પુત્રાનુશાસનમ્ ॥ ૨૩૭.૩૩॥

૨૩૭.૩૪/૧ધર્માખ્યાનેષુ સર્વેષુ સત્યાખ્યાનેષુ યદ્ વસુ ।
૨૩૭.૩૪/૨દશવર્ષસહસ્રાણિ નિર્મથ્યામૃતમુદ્ધૃતમ્ ॥ ૨૩૭.૩૪॥

૨૩૭.૩૫/૧નવનીતં યથા દધ્નઃ કાષ્ઠાદ્ અગ્નિર્યથૈવ ચ ।
૨૩૭.૩૫/૨તથૈવ વિદુષાં જ્ઞાનં મુક્તિહેતોઃ સમુદ્ધૃતમ્ ॥ ૨૩૭.૩૫॥

૨૩૭.૩૬/૧સ્નાતકાનામિદં શાસ્ત્રં વાચ્યં પુત્રાનુશાસનમ્ ।
૨૩૭.૩૬/૨તદ્ ઇદં નાપ્રશાન્તાય નાદાન્તાય તપસ્વિને ॥ ૨૩૭.૩૬॥

૨૩૭.૩૭/૧નાવેદવિદુષે વાચ્યં તથા નાનુગતાય ચ ।
૨૩૭.૩૭/૨નાસૂયકાયાનૃજવે ન ચાનિર્દિષ્ટકારિણે ॥ ૨૩૭.૩૭॥

૨૩૭.૩૮/૧ન તર્કશાસ્ત્રદગ્ધાય તથૈવ પિશુનાય ચ ।
૨૩૭.૩૮/૨શ્લાઘિને શ્લાઘનીયાય પ્રશાન્તાય તપસ્વિને ॥ ૨૩૭.૩૮॥

૨૩૭.૩૯/૧ઇદં પ્રિયાય પુત્રાય શિષ્યાયાનુગતાય તુ ।
૨૩૭.૩૯/૨રહસ્યધર્મં વક્તવ્યં નાન્યસ્મૈ તુ કથંચન ॥ ૨૩૭.૩૯॥

૨૩૭.૪૦/૧યદ્ અપ્યસ્ય મહીં દદ્યાદ્ રત્નપૂર્ણામિમાં નરઃ ।
૨૩૭.૪૦/૨ઇદમેવ તતઃ શ્રેય ઇતિ મન્યેત તત્ત્વવિત્ ॥ ૨૩૭.૪૦॥

૨૩૭.૪૧/૧અતો ગુહ્યતરાર્થં તદ્ અધ્યાત્મમતિમાનુષમ્ ।
૨૩૭.૪૧/૨યત્ તન્ મહર્ષિભિર્દૃષ્ટં વેદાન્તેષુ ચ ગીયતે ॥ ૨૩૭.૪૧॥

૨૩૭.૪૨/૧તદ્ યુષ્મભ્યં પ્રયચ્છામિ યન્ માં પૃચ્છત સત્તમાઃ ।
૨૩૭.૪૨/૨યન્ મે મનસિ વર્તેત યસ્તુ વો હૃદિ સંશયઃ ।
૨૩૭.૪૨/૩શ્રુતં ભવદ્ભિસ્તત્ સર્વં કિમન્યત્ કથયામિ વઃ ॥ ૨૩૭.૪૨॥

૨૩૭.૪૩/૧મુનય ઊચુઃ । અધ્યાત્મં વિસ્તરેણેહ પુનરેવ વદસ્વ નઃ ।
૨૩૭.૪૩/૨યદ્ અધ્યાત્મં યથા વિદ્મો ભગવન્ન્ ઋષિસત્તમ ॥ ૨૩૭.૪૩॥

૨૩૭.૪૪/૧વ્યાસ ઉવાચ । અધ્યાત્મં યદ્ ઇદં વિપ્રાઃ પુરુષસ્યેહ પઠ્યતે ।
૨૩૭.૪૪/૨યુષ્મભ્યં કથયિષ્યામિ તસ્ય વ્યાખ્યાવધાર્યતામ્ ॥ ૨૩૭.૪૪॥

૨૩૭.૪૫/૧ભૂમિરાપસ્તથા જ્યોતિર્વાયુરાકાશમેવ ચ ।
૨૩૭.૪૫/૨મહાભૂતાનિ યશ્ચૈવ સર્વભૂતેષુ ભૂતકૃત્ ॥ ૨૩૭.૪૫॥

૨૩૭.૪૬/૧મુનય ઊચુઃ । આકારં તુ ભવેદ્ યસ્ય યસ્મિન્ દેહં ન પશ્યતિ ।
૨૩૭.૪૬/૨આકાશાદ્યં શરીરેષુ કથં તદ્ ઉપવર્ણયેત્ ।
૨૩૭.૪૬/૩ઇન્દ્રિયાણાં ગુણાઃ કેચિત્ કથં તાન્ ઉપલક્ષયેત્ ॥ ૨૩૭.૪૬॥

૨૩૭.૪૭/૧વ્યાસ ઉવાચ । એતદ્ વો વર્ણયિષ્યામિ યથાવદ્ અનુદર્શનમ્ ।
૨૩૭.૪૭/૨શ ૃણુધ્વં તદ્ ઇહૈકાગ્ર્યા યથાતત્ત્વં યથા ચ તત્ ॥ ૨૩૭.૪૭॥

૨૩૭.૪૮/૧શબ્દઃ શ્રોત્રં તથા ખાનિ ત્રયમાકાશલક્ષણમ્ ।
૨૩૭.૪૮/૨પ્રાણશ્ચેષ્ટા તથા સ્પર્શ એતે વાયુગુણાસ્ત્રયઃ ॥ ૨૩૭.૪૮॥

૨૩૭.૪૯/૧રૂપં ચક્ષુર્વિપાકશ્ચ ત્રિધા જ્યોતિર્વિધીયતે ।
૨૩૭.૪૯/૨રસોઽથ રસનં સ્વેદો ગુણાસ્ત્વેતે ત્રયોઽમ્ભસામ્ ॥ ૨૩૭.૪૯॥

૨૩૭.૫૦/૧ઘ્રેયં ઘ્રાણં શરીરં ચ ભૂમેરેતે ગુણાસ્ત્રયઃ ।
૨૩૭.૫૦/૨એતાવાન્ ઇન્દ્રિયગ્રામો વ્યાખ્યાતઃ પાઞ્ચભૌતિકઃ ॥ ૨૩૭.૫૦॥

૨૩૭.૫૧/૧વાયોઃ સ્પર્શો રસોઽદ્ભ્યશ્ચ જ્યોતિષો રૂપમુચ્યતે ।
૨૩૭.૫૧/૨આકાશપ્રભવઃ શબ્દો ગન્ધો ભૂમિગુણઃ સ્મૃતઃ ॥ ૨૩૭.૫૧॥

૨૩૭.૫૨/૧મનો બુદ્ધિઃ સ્વભાવશ્ચ ગુણા એતે સ્વયોનિજાઃ ।

૨૩૭.૫૨/૨તે ગુણાન્ અતિવર્તન્તે ગુણેભ્યઃ પરમા મતાઃ ॥ ૨૩૭.૫૨॥

૨૩૭.૫૩/૧યથા કૂર્મ ઇવાઙ્ગાનિ પ્રસાર્ય સંનિયચ્છતિ ।
૨૩૭.૫૩/૨એવમેવેન્દ્રિયગ્રામં બુદ્ધિશ્રેષ્ઠો નિયચ્છતિ ॥ ૨૩૭.૫૩॥

૨૩૭.૫૪/૧યદ્ ઊર્ધ્વં પાદતલયોરવાર્કોર્ધ્વં ચ પશ્યતિ ।
૨૩૭.૫૪/૨એતસ્મિન્ન્ એવ કૃત્યે સા વર્તતે બુદ્ધિરુત્તમા ॥ ૨૩૭.૫૪॥

૨૩૭.૫૫/૧ગુણૈસ્તુ નીયતે બુદ્ધિર્બુદ્ધિરેવેન્દ્રિયાણ્યપિ ।
૨૩૭.૫૫/૨મનઃષષ્ઠાનિ સર્વાણિ બુદ્ધ્યા ભાવાત્ કુતો ગુણાઃ ॥ ૨૩૭.૫૫॥

૨૩૭.૫૬/૧ઇન્દ્રિયાણિ નરૈઃ પઞ્ચ ષષ્ઠં તન્ મન ઉચ્યતે ।
૨૩૭.૫૬/૨સપ્તમીં બુદ્ધિમેવાહુઃ ક્ષેત્રજ્ઞં વિદ્ધિ ચાષ્ટમમ્ ॥ ૨૩૭.૫૬॥

૨૩૭.૫૭/૧ચક્ષુરાલોકનાયૈવ સંશયં કુરુતે મનઃ ।
૨૩૭.૫૭/૨બુદ્ધિરધ્યવસાનાય સાક્ષી ક્ષેત્રજ્ઞ ઉચ્યતે ॥ ૨૩૭.૫૭॥

૨૩૭.૫૮/૧રજસ્તમશ્ચ સત્ત્વં ચ ત્રય એતે સ્વયોનિજાઃ ।
૨૩૭.૫૮/૨સમાઃ સર્વેષુ ભૂતેષુ તાન્ ગુણાન્ ઉપલક્ષયેત્ ॥ ૨૩૭.૫૮॥

૨૩૭.૫૯/૧તત્ર યત્ પ્રીતિસંયુક્તં કિંચિદ્ આત્મનિ લક્ષયેત્ ।
૨૩૭.૫૯/૨પ્રશાન્તમિવ સંયુક્તં સત્ત્વં તદ્ ઉપધારયેત્ ॥ ૨૩૭.૫૯॥

૨૩૭.૬૦/૧યત્ તુ સંતાપસંયુક્તં કાયે મનસિ વા ભવેત્ ।
૨૩૭.૬૦/૨પ્રવૃત્તં રજ ઇત્યેવં તત્ર ચાપ્યુપલક્ષયેત્ ॥ ૨૩૭.૬૦॥

૨૩૭.૬૧/૧યત્ તુ સમ્મોહસંયુક્તમવ્યક્તં વિષમં ભવેત્ ।
૨૩૭.૬૧/૨અપ્રતર્ક્યમવિજ્ઞેયં તમસ્તદ્ ઉપધારયેત્ ॥ ૨૩૭.૬૧॥

૨૩૭.૬૨/૧પ્રહર્ષઃ પ્રીતિરાનન્દં સ્વામ્યં સ્વસ્થાત્મચિત્તતા ।
૨૩૭.૬૨/૨અકસ્માદ્ યદિ વા કસ્માદ્ વદન્તિ સાત્ત્વિકાન્ ગુણાન્ ॥ ૨૩૭.૬૨॥

૨૩૭.૬૩/૧અભિમાનો મૃષાવાદો લોભો મોહસ્તથાક્ષમા ।
૨૩૭.૬૩/૨લિઙ્ગાનિ રજસસ્તાનિ વર્તન્તે હેતુતત્ત્વતઃ ॥ ૨૩૭.૬૩॥

૨૩૭.૬૪/૧તથા મોહઃ પ્રમાદશ્ચ તન્દ્રી નિદ્રાપ્રબોધિતા ।
૨૩૭.૬૪/૨કથંચિદ્ અભિવર્તન્તે વિજ્ઞેયાસ્તામસા ગુણાઃ ॥ ૨૩૭.૬૪॥

૨૩૭.૬૫/૧મનઃ પ્રસૃજતે ભાવં બુદ્ધિરધ્યવસાયિની ।
૨૩૭.૬૫/૨હૃદયં પ્રિયમેવેહ ત્રિવિધા કર્મચોદના ॥ ૨૩૭.૬૫॥

૨૩૭.૬૬/૧ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યશ્ચ પરં મનઃ ।
૨૩૭.૬૬/૨મનસસ્તુ પરા બુદ્ધિર્બુદ્ધેરાત્મા પરઃ સ્મૃતઃ ॥ ૨૩૭.૬૬॥

૨૩૭.૬૭/૧બુદ્ધિરાત્મા મનુષ્યસ્ય બુદ્ધિરેવાત્મનાયિકા ।
૨૩૭.૬૭/૨યદા વિકુરુતે ભાવં તદા ભવતિ સા મનઃ ॥ ૨૩૭.૬૭॥

૨૩૭.૬૮/૧ઇન્દ્રિયાણાં પૃથગ્ભાવાદ્ બુદ્ધિર્વિકુરુતે હ્યનુ ।
૨૩૭.૬૮/૨શ‌ૃણ્વતી ભવતિ શ્રોત્રં સ્પૃશતી સ્પર્શ ઉચ્યતે ॥ ૨૩૭.૬૮॥

૨૩૭.૬૯/૧પશ્યન્તી ચ ભવેદ્ દૃષ્ટી રસન્તી રસના ભવેત્ ।
૨૩૭.૬૯/૨જિઘ્રન્તી ભવતિ ઘ્રાણં બુદ્ધિર્વિકુરુતે પૃથક્ ॥ ૨૩૭.૬૯॥

૨૩૭.૭૦/૧ઇન્દ્રિયાણિ તુ તાન્યાહુસ્તેષાં વૃત્ત્યા વિતિષ્ઠતિ ।
૨૩૭.૭૦/૨તિષ્ઠતિ પુરુષે બુદ્ધિર્બુદ્ધિભાવવ્યવસ્થિતા ॥ ૨૩૭.૭૦॥

૨૩૭.૭૧/૧કદાચિલ્લભતે પ્રીતિં કદાચિદ્ અપિ શોચતિ ।
૨૩૭.૭૧/૨ન સુખેન ચ દુઃખેન કદાચિદ્ ઇહ મુહ્યતે ॥ ૨૩૭.૭૧॥

૨૩૭.૭૨/૧સ્વયં ભાવાત્મિકા ભાવાંસ્ત્રીન્ એતાન્ અતિવર્તતે ।
૨૩૭.૭૨/૨સરિતાં સાગરો ભર્તા મહાવેલામિવોર્મિમાન્ ॥ ૨૩૭.૭૨॥

૨૩૭.૭૩/૧યદા પ્રાર્થયતે કિંચિત્ તદા ભવતિ સા મનઃ ।
૨૩૭.૭૩/૨અધિષ્ઠાને ચ વૈ બુદ્ધ્યા પૃથગ્ એતાનિ સંસ્મરેત્ ॥ ૨૩૭.૭૩॥

૨૩૭.૭૪/૧ઇન્દ્રિયાણિ ચ મેધ્યાનિ વિચેતવ્યાનિ કૃત્સ્નશઃ ।
૨૩૭.૭૪/૨સર્વાણ્યેવાનુપૂર્વેણ યદ્ યદા ચ વિધીયતે ॥ ૨૩૭.૭૪॥

૨૩૭.૭૫/૧અવિભાગમના બુદ્ધિર્ભાવો મનસિ વર્તતે ।
૨૩૭.૭૫/૨પ્રવર્તમાનસ્તુ રજઃ સત્ત્વમપ્યતિવર્તતે ॥ ૨૩૭.૭૫॥

૨૩૭.૭૬/૧યે વૈ ભાવેન વર્તન્તે સર્વેષ્વેતેષુ તે ત્રિષુ ।
૨૩૭.૭૬/૨અન્વર્થાન્ સમ્પ્રવર્તન્તે રથનેમિમરા ઇવ ॥ ૨૩૭.૭૬॥

૨૩૭.૭૭/૧પ્રદીપાર્થં મનઃ કુર્યાદ્ ઇન્દ્રિયૈર્બુદ્ધિસત્તમૈઃ ।
૨૩૭.૭૭/૨નિશ્ચરદ્ભિર્યથાયોગમુદાસીનૈર્યદૃચ્છયા ॥ ૨૩૭.૭૭॥

૨૩૭.૭૮/૧એવંસ્વભાવમેવેદમિતિ બુદ્ધ્વા ન મુહ્યતિ ।
૨૩૭.૭૮/૨અશોચન્ સમ્પ્રહૃષ્યંશ્ચ નિત્યં વિગતમત્સરઃ ॥ ૨૩૭.૭૮॥

૨૩૭.૭૯/૧ન હ્યાત્મા શક્યતે દ્રષ્ટુમિન્દ્રિયૈઃ કામગોચરૈઃ ।
૨૩૭.૭૯/૨પ્રવર્તમાનૈરનેકૈર્દુર્ધરૈરકૃતાત્મભિઃ ॥ ૨૩૭.૭૯॥

૨૩૭.૮૦/૧તેષાં તુ મનસા રશ્મીન્ યદા સમ્યઙ્ નિયચ્છતિ ।
૨૩૭.૮૦/૨તદા પ્રકાશતેઽસ્યાત્મા દીપદીપ્તા યથાકૃતિઃ ॥ ૨૩૭.૮૦॥

૨૩૭.૮૧/૧સર્વેષામેવ ભૂતાનાં તમસ્યુપગતે યથા ।
૨૩૭.૮૧/૨પ્રકાશં ભવતે સર્વં તથૈવમુપધાર્યતામ્ ॥ ૨૩૭.૮૧॥

૨૩૭.૮૨/૧યથા વારિચરઃ પક્ષી ન લિપ્યતિ જલે ચરન્ ।
૨૩૭.૮૨/૨વિમુક્તાત્મા તથા યોગી ગુણદોષૈર્ન લિપ્યતે ॥ ૨૩૭.૮૨॥

૨૩૭.૮૩/૧એવમેવ કૃતપ્રજ્ઞો ન દોષૈર્વિષયાંશ્ચરન્ ।
૨૩૭.૮૩/૨અસજ્જમાનઃ સર્વેષુ ન કથંચિત્ પ્રલિપ્યતે ॥ ૨૩૭.૮૩॥

૨૩૭.૮૪/૧ત્યક્ત્વા પૂર્વકૃતં કર્મ રતિર્યસ્ય સદાત્મનિ ।
૨૩૭.૮૪/૨સર્વભૂતાત્મભૂતસ્ય ગુણસઙ્ગેન સજ્જતઃ ॥ ૨૩૭.૮૪॥

૨૩૭.૮૫/૧સ્વયમાત્મા પ્રસવતિ ગુણેષ્વપિ કદાચન ।
૨૩૭.૮૫/૨ન ગુણા વિદુરાત્માનં ગુણાન્ વેદ સ સર્વદા ॥ ૨૩૭.૮૫॥

૨૩૭.૮૬/૧પરિદધ્યાદ્ ગુણાનાં સ દ્રષ્ટા ચૈવ યથાતથમ્ ।
૨૩૭.૮૬/૨સત્ત્વક્ષેત્રજ્ઞયોરેવમન્તરં લક્ષયેન્ નરઃ ॥ ૨૩૭.૮૬॥

૨૩૭.૮૭/૧સૃજતે તુ ગુણાન્ એક એકો ન સૃજતે ગુણાન્ ।
૨૩૭.૮૭/૨પૃથગ્ભૂતૌ પ્રકૃત્યૈતૌ સમ્પ્રયુક્તૌ ચ સર્વદા ॥ ૨૩૭.૮૭॥

૨૩૭.૮૮/૧યથાશ્મના હિરણ્યસ્ય સમ્પ્રયુક્તૌ તથૈવ તૌ ।
૨૩૭.૮૮/૨મશકોદુમ્બરૌ વાપિ સમ્પ્રયુક્તૌ યથા સહ ॥ ૨૩૭.૮૮॥

૨૩૭.૮૯/૧ઇષિકા વા યથા મુઞ્જે પૃથક્ ચ સહ ચૈવ હ ।
૨૩૭.૮૯/૨તથૈવ સહિતાવેતૌ અન્યોન્યસ્મિન્ પ્રતિષ્ઠિતૌ ॥ ૨૩૭.૮૯॥

૨૩૮.૧/૧વ્યાસ ઉવાચ । સૃજતે તુ ગુણાન્ સત્ત્વં ક્ષેત્રજ્ઞસ્ત્વધિતિષ્ઠતિ ।
૨૩૮.૧/૨ગુણાન્ વિક્રિયતઃ સર્વાન્ ઉદાસીનવદ્ ઈશ્વરઃ ॥ ૨૩૮.૧॥

૨૩૮.૨/૧સ્વભાવયુક્તં તત્ સર્વં યદ્ ઇમાન્ સૃજતે ગુણાન્ ।
૨૩૮.૨/૨ઊર્ણનાભિર્યથા સૂત્રં સૃજતે તદ્ ગુણાંસ્તથા ॥ ૨૩૮.૨॥

૨૩૮.૩/૧પ્રવૃત્તા ન નિવર્તન્તે પ્રવૃત્તિર્નોપલભ્યતે ।
૨૩૮.૩/૨એવમેકે વ્યવસ્યન્તિ નિવૃત્તિમિતિ ચાપરે ॥ ૨૩૮.૩॥

૨૩૮.૪/૧ઉભયં સમ્પ્રધાર્યૈતદ્ અધ્યવસ્યેદ્ યથામતિ ।

૨૩૮.૪/૨અનેનૈવ વિધાનેન ભવેદ્ વૈ સંશયો મહાન્ ॥ ૨૩૮.૪॥

૨૩૮.૫/૧અનાદિનિધનો હ્યાત્મા તં બુદ્ધ્વા વિહરેન્ નરઃ ।
૨૩૮.૫/૨અક્રુધ્યન્ન્ અપ્રહૃષ્યંશ્ચ નિત્યં વિગતમત્સરઃ ॥ ૨૩૮.૫॥

૨૩૮.૬/૧ઇત્યેવં હૃદયે સર્વો બુદ્ધિચિન્તામયં દૃઢમ્ ।
૨૩૮.૬/૨અનિત્યં સુખમાસીનમશોચ્યં છિન્નસંશયઃ ॥ ૨૩૮.૬॥

૨૩૮.૭/૧તરયેત્ પ્રચ્યુતાં પૃથ્વીં યથા પૂર્ણાં નદીં નરાઃ ।
૨૩૮.૭/૨અવગાહ્ય ચ વિદ્વાંસો વિપ્રા લોલમિમં તથા ॥ ૨૩૮.૭॥

૨૩૮.૮/૧ન તુ તપ્યતિ વૈ વિદ્વાન્ સ્થલે ચરતિ તત્ત્વવિત્ ।
૨૩૮.૮/૨એવં વિચિન્ત્ય ચાત્માનં કેવલં જ્ઞાનમાત્મનઃ ॥ ૨૩૮.૮॥

૨૩૮.૯/૧તાં તુ બુદ્ધ્વા નરઃ સર્ગં ભૂતાનામાગતિં ગતિમ્ ।
૨૩૮.૯/૨સમચેષ્ટશ્ચ વૈ સમ્યગ્ લભતે શમમુત્તમમ્ ॥ ૨૩૮.૯॥

૨૩૮.૧૦/૧એતદ્ દ્વિજન્મસામગ્ર્યં બ્રાહ્મણસ્ય વિશેષતઃ ।
૨૩૮.૧૦/૨આત્મજ્ઞાનસમસ્નેહ+ ।પર્યાપ્તં તત્પરાયણમ્ ॥ ૨૩૮.૧૦॥

૨૩૮.૧૧/૧તત્ત્વં બુદ્ધ્વા ભવેદ્ બુદ્ધઃ કિમન્યદ્ બુદ્ધલક્ષણમ્ ।
૨૩૮.૧૧/૨વિજ્ઞાયૈતદ્ વિમુચ્યન્તે કૃતકૃત્યા મનીષિણઃ ॥ ૨૩૮.૧૧॥

૨૩૮.૧૨/૧ન ભવતિ વિદુષાં મહદ્ ભયમ્ ।
૨૩૮.૧૨/૨યદ્ અવિદુષાં સુમહદ્ ભયં પરત્ર ।
૨૩૮.૧૨/૩નહિ ગતિરધિકાસ્તિ કસ્યચિદ્ ।
૨૩૮.૧૨/૪ભવતિ હિ યા વિદુષઃ સનાતની ॥ ૨૩૮.૧૨॥

૨૩૮.૧૩/૧લોકે માતરમસૂયતે નરસ્- ।
૨૩૮.૧૩/૨તત્ર દેવમનિરીક્ષ્ય શોચતે ।
૨૩૮.૧૩/૩તત્ર ચેત્ કુશલો ન શોચતે ।
૨૩૮.૧૩/૪યે વિદુસ્તદ્ ઉભયં કૃતાકૃતમ્ ॥ ૨૩૮.૧૩॥

૨૩૮.૧૪/૧યત્ કરોત્યનભિસંધિપૂર્વકમ્ ।
૨૩૮.૧૪/૨તચ્ચ નિન્દયતિ યત્ પુરા કૃતમ્ ।
૨૩૮.૧૪/૩યત્ પ્રિયં તદ્ ઉભયં ન વાપ્રિયમ્ ।
૨૩૮.૧૪/૪તસ્ય તજ્જનયતીહ કુર્વતઃ ॥ ૨૩૮.૧૪॥

૨૩૮.૧૫/૧મુનય ઊચુઃ । યસ્માદ્ ધર્માત્ પરો ધર્મો વિદ્યતે નેહ કશ્ચન ।

૨૩૮.૧૫/૨યો વિશિષ્ટશ્ચ ભૂતેભ્યસ્તદ્ ભવાન્ પ્રબ્રવીતુ નઃ ॥ ૨૩૮.૧૫॥

૨૩૮.૧૬/૧વ્યાસ ઉવાચ । ધર્મં ચ સમ્પ્રવક્ષ્યામિ પુરાણમ્ ઋષિભિઃ સ્તુતમ્ ।
૨૩૮.૧૬/૨વિશિષ્ટં સર્વધર્મેભ્યઃ શ઼ૃણુધ્વં મુનિસત્તમાઃ ॥ ૨૩૮.૧૬॥

૨૩૮.૧૭/૧ઇન્દ્રિયાણિ પ્રમાથીનિ બુદ્ધ્યા સંયમ્ય તત્ત્વતઃ ।
૨૩૮.૧૭/૨સર્વતઃ પ્રસૃતાનીહ પિતા બાલાન્ ઇવાત્મજાન્ ॥ ૨૩૮.૧૭॥

૨૩૮.૧૮/૧મનસશ્ચેન્દ્રિયાણાં ચાપ્યૈકાગ્ર્યં પરમં તપઃ ।
૨૩૮.૧૮/૨વિજ્ઞેયઃ સર્વધર્મેભ્યઃ સ ધર્મઃ પર ઉચ્યતે ॥ ૨૩૮.૧૮॥

૨૩૮.૧૯/૧તાનિ સર્વાણિ સંધાય મનઃષષ્ઠાનિ મેધયા ।
૨૩૮.૧૯/૨આત્મતૃપ્તઃ સ એવાસીદ્ બહુચિન્ત્યમચિન્તયન્ ॥ ૨૩૮.૧૯॥

૨૩૮.૨૦/૧ગોચરેભ્યો નિવૃત્તાનિ યદા સ્થાસ્યન્તિ વેશ્મનિ ।
૨૩૮.૨૦/૨તદા ચૈવાત્મનાત્માનં પરં દ્રક્ષ્યથ શાશ્વતમ્ ॥ ૨૩૮.૨૦॥

૨૩૮.૨૧/૧સર્વાત્માનં મહાત્માનં વિધૂમમિવ પાવકમ્ ।
૨૩૮.૨૧/૨પ્રપશ્યન્તિ મહાત્માનં બ્રાહ્મણા યે મનીષિણઃ ॥ ૨૩૮.૨૧॥

૨૩૮.૨૨/૧યથા પુષ્પફલોપેતો બહુશાખો મહાદ્રુમઃ ।
૨૩૮.૨૨/૨આત્મનો નાભિજાનીતે ક્વ મે પુષ્પં ક્વ મે ફલમ્ ॥ ૨૩૮.૨૨॥

૨૩૮.૨૩/૧એવમાત્મા ન જાનીતે ક્વ ગમિષ્યે કુતોઽન્વહમ્ ।
૨૩૮.૨૩/૨અન્યો હ્યસ્યાન્તરાત્માસ્તિ યઃ સર્વમનુપશ્યતિ ॥ ૨૩૮.૨૩॥

૨૩૮.૨૪/૧જ્ઞાનદીપેન દીપ્તેન પશ્યત્યાત્માનમાત્મના ।
૨૩૮.૨૪/૨દૃષ્ટ્વાત્માનં તથા યૂયં વિરાગા ભવત દ્વિજાઃ ॥ ૨૩૮.૨૪॥

૨૩૮.૨૫/૧વિમુક્તાઃ સર્વપાપેભ્યો મુક્તત્વચ ઇવોરગાઃ ।
૨૩૮.૨૫/૨પરાં બુદ્ધિમવાપ્યેહાપ્યચિન્તા વિગતજ્વરાઃ ॥ ૨૩૮.૨૫॥

૨૩૮.૨૬/૧સર્વતઃસ્રોતસં ઘોરાં નદીં લોકપ્રવાહિણીમ્ ।
૨૩૮.૨૬/૨પઞ્ચેન્દ્રિયગ્રાહવતીં મનઃસંકલ્પરોધસમ્ ॥ ૨૩૮.૨૬॥

૨૩૮.૨૭/૧લોભમોહતૃણચ્છન્નાં કામક્રોધસરીસૃપામ્ ।
૨૩૮.૨૭/૨સત્યતીર્થાનૃતક્ષોભાં ક્રોધપઙ્કાં સરિદ્વરામ્ ॥ ૨૩૮.૨૭॥

૨૩૮.૨૮/૧અવ્યક્તપ્રભવાં શીઘ્રાં કામક્રોધસમાકુલામ્ ।
૨૩૮.૨૮/૨પ્રતરધ્વં નદીં બુદ્ધ્યા દુસ્તરામકૃતાત્મભિઃ ॥ ૨૩૮.૨૮॥

૨૩૮.૨૯/૧સંસારસાગરગમાં યોનિપાતાલદુસ્તરામ્ ।
૨૩૮.૨૯/૨આત્મજન્મોદ્ભવાં તાં તુ જિહ્વાવર્તદુરાસદામ્ ॥ ૨૩૮.૨૯॥

૨૩૮.૩૦/૧યાં તરન્તિ કૃતપ્રજ્ઞા ધૃતિમન્તો મનીષિણઃ ।
૨૩૮.૩૦/૨તાં તીર્ણઃ સર્વતો મુક્તો વિધૂતાત્માત્મવાગ્ શુચિઃ ॥ ૨૩૮.૩૦॥

૨૩૮.૩૧/૧ઉત્તમાં બુદ્ધિમાસ્થાય બ્રહ્મભૂયાય કલ્પતે ।
૨૩૮.૩૧/૨ઉત્તીર્ણઃ સર્વસંક્લેશાન્ પ્રસન્નાત્મા વિકલ્મષઃ ॥ ૨૩૮.૩૧॥

૨૩૮.૩૨/૧ભૂયિષ્ઠાનીવ ભૂતાનિ સર્વસ્થાનાન્ નિરીક્ષ્ય ચ ।
૨૩૮.૩૨/૨અક્રુધ્યન્ અપ્રસીદંશ્ચ નનૃશંસમતિસ્તથા ॥ ૨૩૮.૩૨॥

૨૩૮.૩૩/૧તતો દ્રક્ષ્યથ સર્વેષાં ભૂતાનાં પ્રભવાપ્યયમ્ ।
૨૩૮.૩૩/૨એતદ્ ધિ સર્વધર્મેભ્યો વિશિષ્ટં મેનિરે બુધાઃ ॥ ૨૩૮.૩૩॥

૨૩૮.૩૪/૧ધર્મં ધર્મભૃતાં શ્રેષ્ઠા મુનયઃ સત્યદર્શિનઃ ।
૨૩૮.૩૪/૨આત્માનો વ્યાપિનો વિપ્રા ઇતિ પુત્રાનુશાસનમ્ ॥ ૨૩૮.૩૪॥

૨૩૮.૩૫/૧પ્રયતાય પ્રવક્તવ્યં હિતાયાનુગતાય ચ ।
૨૩૮.૩૫/૨આત્મજ્ઞાનમિદં ગુહ્યં સર્વગુહ્યતમં મહત્ ॥ ૨૩૮.૩૫॥

૨૩૮.૩૬/૧અબ્રવં યદ્ અહં વિપ્રા આત્મસાક્ષિકમઞ્જસા ।
૨૩૮.૩૬/૨નૈવ સ્ત્રી ન પુમાન્ એવં ન ચૈવેદં નપુંસકમ્ ॥ ૨૩૮.૩૬॥

૨૩૮.૩૭/૧અદુઃખમસુખં બ્રહ્મ ભૂતભવ્યભવાત્મકમ્ ।
૨૩૮.૩૭/૨નૈતજ્જ્ઞાત્વા પુમાન્ સ્ત્રી વા પુનર્ભવમવાપ્નુયાત્ ॥ ૨૩૮.૩૭॥

૨૩૮.૩૮/૧યથા મતાનિ સર્વાણિ તથૈતાનિ યથા તથા ।
૨૩૮.૩૮/૨કથિતાનિ મયા વિપ્રા ભવન્તિ ન ભવન્તિ ચ ॥ ૨૩૮.૩૮॥

૨૩૮.૩૯/૧તત્પ્રીતિયુક્તેન ગુણાન્વિતેન ।
૨૩૮.૩૯/૨પુત્રેણ સત્પુત્રદયાન્વિતેન ।
૨૩૮.૩૯/૩દૃષ્ટ્વા હિતં પ્રીતમના યદર્થમ્ ।
૨૩૮.૩૯/૪બ્રૂયાત્ સુતસ્યેહ યદ્ ઉક્તમેતત્ ॥ ૨૩૮.૩૯॥

૨૩૮.૪૦/૧મુનય ઊચુઃ । મોક્ષઃ પિતામહેનોક્ત ઉપાયાન્ નાનુપાયતઃ ।
૨૩૮.૪૦/૨તમુપાયં યથાન્યાયં શ્રોતુમિચ્છામહે મુને ॥ ૨૩૮.૪૦॥

૨૩૮.૪૧/૧વ્યાસ ઉવાચ । અસ્માસુ તન્ મહાપ્રાજ્ઞા યુક્તં નિપુણદર્શનમ્ ।
૨૩૮.૪૧/૨યદુપાયેન સર્વાર્થાન્ મૃગયધ્વં સદાનઘાઃ ॥ ૨૩૮.૪૧॥

૨૩૮.૪૨/૧ઘટોપકરણે બુદ્ધિર્ઘટોત્પત્તૌ ન સા મતા ।
૨૩૮.૪૨/૨એવં ધર્માદ્યુપાયાર્થે નાન્યધર્મેષુ કારણમ્ ॥ ૨૩૮.૪૨॥

૨૩૮.૪૩/૧પૂર્વે સમુદ્રે યઃ પન્થા ન સ ગચ્છતિ પશ્ચિમમ્ ।
૨૩૮.૪૩/૨એકઃ પન્થા હિ મોક્ષસ્ય તચ્છૃણુધ્વં મમાનઘાઃ ॥ ૨૩૮.૪૩॥

૨૩૮.૪૪/૧ક્ષમયા ક્રોધમુચ્છિન્દ્યાત્ કામં સંકલ્પવર્જનાત્ ।
૨૩૮.૪૪/૨સત્ત્વસંસેવનાદ્ ધીરો નિદ્રામુચ્છેત્તુમર્હતિ ॥ ૨૩૮.૪૪॥

૨૩૮.૪૫/૧અપ્રમાદાદ્ ભયં રક્ષેદ્ રક્ષેત્ ક્ષેત્રં ચ સંવિદમ્ ।
૨૩૮.૪૫/૨ઇચ્છાં દ્વેષં ચ કામં ચ ધૈર્યેણ વિનિવર્તયેત્ ॥ ૨૩૮.૪૫॥

૨૩૮.૪૬/૧નિદ્રાં ચ પ્રતિભાં ચૈવ જ્ઞાનાભ્યાસેન તત્ત્વવિત્ ।
૨૩૮.૪૬/૨ઉપદ્રવાંસ્તથા યોગી હિતજીર્ણમિતાશનાત્ ॥ ૨૩૮.૪૬॥

૨૩૮.૪૭/૧લોભં મોહં ચ સંતોષાદ્ વિષયાંસ્તત્ત્વદર્શનાત્ ।
૨૩૮.૪૭/૨અનુક્રોશાદ્ અધર્મં ચ જયેદ્ ધર્મમુપેક્ષયા ॥ ૨૩૮.૪૭॥

૨૩૮.૪૮/૧આયત્યા ચ જયેદ્ આશાં સામર્થ્યં સઙ્ગવર્જનાત્ ।
૨૩૮.૪૮/૨અનિત્યત્વેન ચ સ્નેહં ક્ષુધાં યોગેન પણ્ડિતઃ ॥ ૨૩૮.૪૮॥

૨૩૮.૪૯/૧કારુણ્યેનાત્મનાત્માનં તૃષ્ણાં ચ પરિતોષતઃ ।
૨૩૮.૪૯/૨ઉત્થાનેન જયેત્ તન્દ્રાં વિતર્કં નિશ્ચયાજ્જયેત્ ॥ ૨૩૮.૪૯॥

૨૩૮.૫૦/૧મૌનેન બહુભાષાં ચ શૌર્યેણ ચ ભયં જયેત્ ।
૨૩૮.૫૦/૨યચ્છેદ્ વાઙ્મનસી બુદ્ધ્યા તાં યચ્છેજ્જ્ઞાનચક્ષુષા ॥ ૨૩૮.૫૦॥

૨૩૮.૫૧/૧જ્ઞાનમાત્મા મહાન્ યચ્છેત્ તં યચ્છેચ્છાન્તિરાત્મનઃ ।
૨૩૮.૫૧/૨તદ્ એતદ્ ઉપશાન્તેન બોદ્ધવ્યં શુચિકર્મણા ॥ ૨૩૮.૫૧॥

૨૩૮.૫૨/૧યોગદોષાન્ સમુચ્છિદ્ય પઞ્ચ યાન્ કવયો વિદુઃ ।
૨૩૮.૫૨/૨કામં ક્રોધં ચ લોભં ચ ભયં સ્વપ્નં ચ પઞ્ચમમ્ ॥ ૨૩૮.૫૨॥

૨૩૮.૫૩/૧પરિત્યજ્ય નિષેવેત યથાવદ્ યોગસાધનાત્ ।
૨૩૮.૫૩/૨ધ્યાનમધ્યયનં દાનં સત્યં હ્રીરાર્જવં ક્ષમા ॥ ૨૩૮.૫૩॥

૨૩૮.૫૪/૧શૌચમાચારતઃ શુદ્ધિરિન્દ્રિયાણાં ચ સંયમઃ ।
૨૩૮.૫૪/૨એતૈર્વિવર્ધતે તેજઃ પાપ્માનમુપહન્તિ ચ ॥ ૨૩૮.૫૪॥

૨૩૮.૫૫/૧સિધ્યન્તિ ચાસ્ય સંકલ્પા વિજ્ઞાનં ચ પ્રવર્તતે ।
૨૩૮.૫૫/૨ધૂતપાપઃ સ તેજસ્વી લઘ્વાહારો જિતેન્દ્રિયઃ ॥ ૨૩૮.૫૫॥

૨૩૮.૫૬/૧કામક્રોધૌ વશે કૃત્વા નિર્વિશેદ્ બ્રહ્મણઃ પદમ્ ।
૨૩૮.૫૬/૨અમૂઢત્વમસઙ્ગિત્વં કામક્રોધવિવર્જનમ્ ॥ ૨૩૮.૫૬॥

૨૩૮.૫૭/૧અદૈન્યમનુદીર્ણત્વમનુદ્વેગો હ્યવસ્થિતિઃ ।
૨૩૮.૫૭/૨એષ માર્ગો હિ મોક્ષસ્ય પ્રસન્નો વિમલઃ શુચિઃ ।
૨૩૮.૫૭/૩તથા વાક્કાયમનસાં નિયમાઃ કામતોઽવ્યયાઃ ॥ ૨૩૮.૫૭॥

૨૩૯.૧/૧મુનય ઊચુઃ । સાંખ્યં યોગસ્ય નો વિપ્ર વિશેષં વક્તુમર્હસિ ।
૨૩૯.૧/૨તવ ધર્મજ્ઞ સર્વં હિ વિદિતં મુનિસત્તમ ॥ ૨૩૯.૧॥

૨૩૯.૨/૧વ્યાસ ઉવાચ । સાંખ્યાઃ સાંખ્યં પ્રશંસન્તિ યોગાન્ યોગવિદુત્તમાઃ ।
૨૩૯.૨/૨વદન્તિ કારણૈઃ શ્રેષ્ઠૈઃ સ્વપક્ષોદ્ભવનાય વૈ ॥ ૨૩૯.૨॥

૨૩૯.૩/૧અનીશ્વરઃ કથં મુચ્યેદ્ ઇત્યેવં મુનિસત્તમાઃ ।
૨૩૯.૩/૨વદન્તિ કારણૈઃ શ્રેષ્ઠં યોગં સમ્યઙ્ મનીષિણઃ ॥ ૨૩૯.૩॥

૨૩૯.૪/૧વદન્તિ કારણં વેદં સાંખ્યં સમ્યગ્ દ્વિજાતયઃ ।
૨૩૯.૪/૨વિજ્ઞાયેહ ગતીઃ સર્વા વિરક્તો વિષયેષુ યઃ ॥ ૨૩૯.૪॥

૨૩૯.૫/૧ઊર્ધ્વં સ દેહાત્ સુવ્યક્તં વિમુચ્યેદ્ ઇતિ નાન્યથા ।
૨૩૯.૫/૨એતદ્ આહુર્મહાપ્રાજ્ઞાઃ સાંખ્યં વૈ મોક્ષદર્શનમ્ ॥ ૨૩૯.૫॥

૨૩૯.૬/૧સ્વપક્ષે કારણં ગ્રાહ્યં સમર્થં વચનં હિતમ્ ।
૨૩૯.૬/૨શિષ્ટાનાં હિ મતં ગ્રાહ્યં ભવદ્ભિઃ શિષ્ટસમ્મતૈઃ ॥ ૨૩૯.૬॥

૨૩૯.૭/૧પ્રત્યક્ષં હેતવો યોગાઃ સાંખ્યાઃ શાસ્ત્રવિનિશ્ચયાઃ ।
૨૩૯.૭/૨ઉભે ચૈતે મતે તત્ત્વે સમવેતે દ્વિજોત્તમાઃ ॥ ૨૩૯.૭॥

૨૩૯.૮/૧ઉભે ચૈતે મતે જ્ઞાતે મુનીન્દ્રાઃ શિષ્ટસમ્મતે ।
૨૩૯.૮/૨અનુષ્ઠિતે યથાશાસ્ત્રં નયેતાં પરમાં ગતિમ્ ॥ ૨૩૯.૮॥

૨૩૯.૯/૧તુલ્યં શૌચં તયોર્યુક્તં દયા ભૂતેષુ ચાનઘાઃ ।
૨૩૯.૯/૨વ્રતાનાં ધારણં તુલ્યં દર્શનં ત્વસમં તયોઃ ॥ ૨૩૯.૯॥

૨૩૯.૧૦/૧મુનય ઊચુઃ । યદિ તુલ્યં વ્રતં શૌચં દયા ચાત્ર મહામુને ।
૨૩૯.૧૦/૨તુલ્યં તદ્દર્શનં કસ્માત્ તન્ નો બ્રૂહિ દ્વિજોત્તમ ॥ ૨૩૯.૧૦॥

૨૩૯.૧૧/૧વ્યાસ ઉવાચ । રાગં મોહં તથા સ્નેહં કામં ક્રોધં ચ કેવલમ્ ।
૨૩૯.૧૧/૨યોગાસ્થિરોદિતાન્ દોષાન્ પઞ્ચૈતાન્ પ્રાપ્નુવન્તિ તાન્ ॥ ૨૩૯.૧૧॥

૨૩૯.૧૨/૧યથા વાનિમિષાઃ સ્થૂલં જાલં છિત્ત્વા પુનર્જલમ્ ।
૨૩૯.૧૨/૨પ્રાપ્નુવન્તિ તથા યોગાત્ તત્ પદં વીતકલ્મષાઃ ॥ ૨૩૯.૧૨॥

૨૩૯.૧૩/૧તથૈવ વાગુરાં છિત્ત્વા બલવન્તો યથા મૃગાઃ ।
૨૩૯.૧૩/૨પ્રાપ્નુયુર્વિમલં માર્ગં વિમુક્તાઃ સર્વબન્ધનૈઃ ॥ ૨૩૯.૧૩॥

૨૩૯.૧૪/૧લોભજાનિ તથા વિપ્રા બન્ધનાનિ બલાન્વિતઃ ।
૨૩૯.૧૪/૨છિત્ત્વા યોગાત્ પરં માર્ગં ગચ્છન્તિ વિમલં શુભમ્ ॥ ૨૩૯.૧૪॥

૨૩૯.૧૫/૧અચલાસ્ત્વાવિલા વિપ્રા વાગુરાસુ તથાપરે ।
૨૩૯.૧૫/૨વિનશ્યન્તિ ન સંદેહસ્તદ્વદ્ યોગબલાદ્ ઋતે ॥ ૨૩૯.૧૫॥

૨૩૯.૧૬/૧બલહીનાશ્ચ વિપ્રેન્દ્રા યથા જાલં ગતા દ્વિજાઃ ।
૨૩૯.૧૬/૨બન્ધં ન ગચ્છન્ત્યનઘા યોગાસ્તે તુ સુદુર્લભાઃ ॥ ૨૩૯.૧૬॥

૨૩૯.૧૭/૧યથા ચ શકુનાઃ સૂક્ષ્મં પ્રાપ્ય જાલમરિંદમાઃ ।
૨૩૯.૧૭/૨તત્રાશક્તા વિપદ્યન્તે મુચ્યન્તે તુ બલાન્વિતાઃ ॥ ૨૩૯.૧૭॥

૨૩૯.૧૮/૧કર્મજૈર્બન્ધનૈર્બદ્ધાસ્તદ્વદ્ યોગપરા દ્વિજાઃ ।
૨૩૯.૧૮/૨અબલા ન વિમુચ્યન્તે મુચ્યન્તે ચ બલાન્વિતાઃ ॥ ૨૩૯.૧૮॥

૨૩૯.૧૯/૧અલ્પકશ્ચ યથા વિપ્રા વહ્નિઃ શામ્યતિ દુર્બલઃ ।
૨૩૯.૧૯/૨આક્રાન્ત ઇન્ધનૈઃ સ્થૂલૈસ્તદ્વદ્ યોગબલઃ સ્મૃતઃ ॥ ૨૩૯.૧૯॥

૨૩૯.૨૦/૧સ એવ ચ તદા વિપ્રા વહ્નિર્જાતબલઃ પુનઃ ।
૨૩૯.૨૦/૨સમીરણગતઃ કૃત્સ્નાં દહેત્ ક્ષિપ્રં મહીમિમામ્ ॥ ૨૩૯.૨૦॥

૨૩૯.૨૧/૧તત્ત્વજ્ઞાનબલો યોગી દીપ્તતેજા મહાબલઃ ।
૨૩૯.૨૧/૨અન્તકાલ ઇવાદિત્યઃ કૃત્સ્નં સંશોષયેજ્જગત્ ॥ ૨૩૯.૨૧॥

૨૩૯.૨૨/૧દુર્બલશ્ચ યથા વિપ્રાઃ સ્રોતસા હ્રિયતે નરઃ ।
૨૩૯.૨૨/૨બલહીનસ્તથા યોગી વિષયૈર્હ્રિયતે ચ સઃ ॥ ૨૩૯.૨૨॥

૨૩૯.૨૩/૧તદ્ એવ તુ યથા સ્રોતો વિષ્કમ્ભયતિ વારણઃ ।
૨૩૯.૨૩/૨તદ્વદ્ યોગબલં લબ્ધ્વા ન ભવેદ્ વિષયૈર્હૃતઃ ॥ ૨૩૯.૨૩॥

૨૩૯.૨૪/૧વિશન્તિ વા વશાદ્ વાથ યોગાદ્ યોગબલાન્વિતાઃ ।
૨૩૯.૨૪/૨પ્રજાપતીન્ મનૂન્ સર્વાન્ મહાભૂતાનિ ચેશ્વરાઃ ॥ ૨૩૯.૨૪॥

૨૩૯.૨૫/૧ન યમો નાન્તકઃ ક્રુદ્ધો ન મૃત્યુર્ભીમવિક્રમઃ ।
૨૩૯.૨૫/૨વિશન્તે તદ્ દ્વિજાઃ સર્વે યોગસ્યામિતતેજસઃ ॥ ૨૩૯.૨૫॥

૨૩૯.૨૬/૧આત્મનાં ચ સહસ્રાણિ બહૂનિ દ્વિજસત્તમાઃ ।
૨૩૯.૨૬/૨યોગં કુર્યાદ્ બલં પ્રાપ્ય તૈશ્ચ સર્વૈર્મહીં ચરેત્ ॥ ૨૩૯.૨૬॥

૨૩૯.૨૭/૧પ્રાપ્નુયાદ્ વિષયાન્ કશ્ચિત્ પુનશ્ચોગ્રં તપશ્ચરેત્ ।
૨૩૯.૨૭/૨સંક્ષિપ્યેચ્ચ પુનર્વિપ્રાઃ સૂર્યસ્તેજોગુણાન્ ઇવ ॥ ૨૩૯.૨૭॥

૨૩૯.૨૮/૧બલસ્થસ્ય હિ યોગસ્ય બલાર્થં મુનિસત્તમાઃ ।
૨૩૯.૨૮/૨વિમોક્ષપ્રભવં વિષ્ણુમુપપન્નમસંશયમ્ ॥ ૨૩૯.૨૮॥

૨૩૯.૨૯/૧બલાનિ યોગપ્રોક્તાનિ મયૈતાનિ દ્વિજોત્તમાઃ ।
૨૩૯.૨૯/૨નિદર્શનાર્થં સૂક્ષ્માણિ વક્ષ્યામિ ચ પુનર્દ્વિજાઃ ॥ ૨૩૯.૨૯॥

૨૩૯.૩૦/૧આત્મનશ્ચ સમાધાને ધારણાં પ્રતિ વા દ્વિજાઃ ।
૨૩૯.૩૦/૨નિદર્શનાનિ સૂક્ષ્માણિ શ‌ૃણુધ્વં મુનિસત્તમાઃ ॥ ૨૩૯.૩૦॥

૨૩૯.૩૧/૧અપ્રમત્તો યથા ધન્વી લક્ષ્યં હન્તિ સમાહિતઃ ।
૨૩૯.૩૧/૨યુક્તઃ સમ્યક્ તથા યોગી મોક્ષં પ્રાપ્નોત્યસંશયમ્ ॥ ૨૩૯.૩૧॥

૨૩૯.૩૨/૧સ્નેહપાત્રે યથા પૂર્ણે મન આધાય નિશ્ચલમ્ ।
૨૩૯.૩૨/૨પુરુષો યુક્ત આરોહેત્ સોપાનં યુક્તમાનસઃ ॥ ૨૩૯.૩૨॥

૨૩૯.૩૩/૧મુક્તસ્તથાયમાત્માનં યોગં તદ્વત્ સુનિશ્ચલમ્ ।
૨૩૯.૩૩/૨કરોત્યમલમાત્માનં ભાસ્કરોપમદર્શને ॥ ૨૩૯.૩૩॥

૨૩૯.૩૪/૧યથા ચ નાવં વિપ્રેન્દ્રાઃ કર્ણધારઃ સમાહિતઃ ।
૨૩૯.૩૪/૨મહાર્ણવગતાં શીઘ્રં નયેદ્ વિપ્રાંસ્તુ પત્તનમ્ ॥ ૨૩૯.૩૪॥

૨૩૯.૩૫/૧તદ્વદ્ આત્મસમાધાનં યુક્તો યોગેન યોગવિત્ ।
૨૩૯.૩૫/૨દુર્ગમં સ્થાનમાપ્નોતિ હિત્વા દેહમિમં દ્વિજાઃ ॥ ૨૩૯.૩૫॥

૨૩૯.૩૬/૧સારથિશ્ચ યથા યુક્તઃ સદશ્વાન્ સુસમાહિતઃ ।
૨૩૯.૩૬/૨દેશમિષ્ટં નયત્યાશુ ધન્વિનં પુરુષર્ષભમ્ ॥ ૨૩૯.૩૬॥

૨૩૯.૩૭/૧તથૈવ ચ દ્વિજા યોગી ધારણાસુ સમાહિતઃ ।
૨૩૯.૩૭/૨પ્રાપ્નોત્યાશુ પરં સ્થાનં લક્ષ્યમુક્ત ઇવાશુગઃ ॥ ૨૩૯.૩૭॥

૨૩૯.૩૮/૧આવિશ્યાત્મનિ ચાત્માનં યોઽવતિષ્ઠતિ સોઽચલઃ ।
૨૩૯.૩૮/૨પાશં હત્વેવ મીનાનાં પદમાપ્નોતિ સોઽજરમ્ ॥ ૨૩૯.૩૮॥

૨૩૯.૩૯/૧નાભ્યાં શીર્ષે ચ કુક્ષૌ ચ હૃદિ વક્ષસિ પાર્શ્વયોઃ ।

૨૩૯.૩૯/૨દર્શને શ્રવણે વાપિ ઘ્રાણે ચામિતવિક્રમઃ ॥ ૨૩૯.૩૯॥

૨૩૯.૪૦/૧સ્થાનેષ્વેતેષુ યો યોગી મહાવ્રતસમાહિતઃ ।
૨૩૯.૪૦/૨આત્મના સૂક્ષ્મમાત્માનં યુઙ્ક્તે સમ્યગ્ દ્વિજોત્તમાઃ ॥ ૨૩૯.૪૦॥

૨૩૯.૪૧/૧સુશીઘ્રમચલપ્રખ્યં કર્મ દગ્ધ્વા શુભાશુભમ્ ।
૨૩૯.૪૧/૨ઉત્તમં યોગમાસ્થાય યદીચ્છતિ વિમુચ્યતે ॥ ૨૩૯.૪૧॥

૨૩૯.૪૨/૧મુનય ઊચુઃ । આહારાન્ કીદૃશાન્ કૃત્વા કાનિ જિત્વા ચ સત્તમ ।
૨૩૯.૪૨/૨યોગી બલમવાપ્નોતિ તદ્ ભવાન્ વક્તુમર્હતિ ॥ ૨૩૯.૪૨॥

૨૩૯.૪૩/૧વ્યાસ ઉવાચ । કણાનાં ભક્ષણે યુક્તઃ પિણ્યાકસ્ય ચ ભો દ્વિજાઃ ।
૨૩૯.૪૩/૨સ્નેહાનાં વર્જને યુક્તો યોગી બલમવાપ્નુયાત્ ॥ ૨૩૯.૪૩॥

૨૩૯.૪૪/૧ભુઞ્જાનો યાવકં રૂક્ષં દીર્ઘકાલં દ્વિજોત્તમાઃ ।
૨૩૯.૪૪/૨એકાહારી વિશુદ્ધાત્મા યોગી બલમવાપ્નુયાત્ ॥ ૨૩૯.૪૪॥

૨૩૯.૪૫/૧પક્ષાન્ માસાન્ ઋતૂંશ્ચિત્રાન્ સંચરંશ્ચ ગુહાસ્તથા ।
૨૩૯.૪૫/૨અપઃ પીત્વા પયોમિશ્રા યોગી બલમવાપ્નુયાત્ ॥ ૨૩૯.૪૫॥

૨૩૯.૪૬/૧અખણ્ડમપિ વા માસં સતતં મુનિસત્તમાઃ ।
૨૩૯.૪૬/૨ઉપોષ્ય સમ્યક્ શુદ્ધાત્મા યોગી બલમવાપ્નુયાત્ ॥ ૨૩૯.૪૬॥

૨૩૯.૪૭/૧કામં જિત્વા તથા ક્રોધં શીતોષ્ણં વર્ષમેવ ચ ।
૨૩૯.૪૭/૨ભયં શોકં તથા સ્વાપં પૌરુષાન્ વિષયાંસ્તથા ॥ ૨૩૯.૪૭॥

૨૩૯.૪૮/૧અરતિં દુર્જયાં ચૈવ ઘોરાં દૃષ્ણા ચ ભો દ્વિજાઃ ।
૨૩૯.૪૮/૨સ્પર્શં નિદ્રાં તથા તન્દ્રાં દુર્જયાં મુનિસત્તમાઃ ॥ ૨૩૯.૪૮॥

૨૩૯.૪૯/૧દીપયન્તિ મહાત્માનં સૂક્ષ્મમાત્માનમાત્મના ।
૨૩૯.૪૯/૨વીતરાગા મહાપ્રાજ્ઞા ધ્યાનાધ્યયનસમ્પદા ॥ ૨૩૯.૪૯॥

૨૩૯.૫૦/૧દુર્ગસ્ત્વેષ મતઃ પન્થા બ્રાહ્મણાનાં વિપશ્ચિતામ્ ।
૨૩૯.૫૦/૨યઃ કશ્ચિદ્ વ્રજતિ ક્ષિપ્રં ક્ષેમેણ મુનિપુંગવાઃ ॥ ૨૩૯.૫૦॥

૨૩૯.૫૧/૧યથા કશ્ચિદ્ વનં ઘોરં બહુસર્પસરીસૃપમ્ ।
૨૩૯.૫૧/૨શ્વભ્રવત્ તોયહીનં ચ દુર્ગમં બહુકણ્ટકમ્ ॥ ૨૩૯.૫૧॥

૨૩૯.૫૨/૧અભક્તમટવીપ્રાયં દાવદગ્ધમહીરુહમ્ ।
૨૩૯.૫૨/૨પન્થાનં તસ્કરાકીર્ણં ક્ષેમેણાભિપતેત્ તથા ॥ ૨૩૯.૫૨॥

૨૩૯.૫૩/૧યોગમાર્ગં સમાસાદ્ય યઃ કશ્ચિદ્ વ્રજતે દ્વિજઃ ।
૨૩૯.૫૩/૨ક્ષેમેણોપરમેન્ માર્ગાદ્ બહુદોષોઽપિ સમ્મતઃ ॥ ૨૩૯.૫૩॥

૨૩૯.૫૪/૧આસ્થેયં ક્ષુરધારાસુ નિશિતાસુ દ્વિજોત્તમાઃ ।
૨૩૯.૫૪/૨ધારણા સા તુ યોગસ્ય દુર્ગેયમકૃતાત્મભિઃ ॥ ૨૩૯.૫૪॥

૨૩૯.૫૫/૧વિષમા ધારણા વિપ્રા યાન્તિ વૈ ન શુભાં ગતિમ્ ।
૨૩૯.૫૫/૨નેતૃહીના યથા નાવઃ પુરુષાણાં તુ વૈ દ્વિજાઃ ॥ ૨૩૯.૫૫॥

૨૩૯.૫૬/૧યસ્તુ તિષ્ઠતિ યોગાદ્યૌ ધારણાસુ યથાવિધિ ।
૨૩૯.૫૬/૨મરણં જન્મદુઃખિત્વં સુખિત્વં સ વિશિષ્યતે ॥ ૨૩૯.૫૬॥

૨૩૯.૫૭/૧નાનાશાસ્ત્રેષુ નિયતં નાનામુનિનિષેવિતમ્ ।
૨૩૯.૫૭/૨પરં યોગસ્ય પન્થાનં નિશ્ચિતં તં દ્વિજાતિષુ ॥ ૨૩૯.૫૭॥

૨૩૯.૫૮/૧પરં હિ તદ્ બ્રહ્મમયં મુનીન્દ્રા ।
૨૩૯.૫૮/૨બ્રહ્માણમીશં વરદં ચ વિષ્ણુમ્ ।
૨૩૯.૫૮/૩ભવં ચ ધર્મં ચ મહાનુભાવમ્ ।
૨૩૯.૫૮/૪યદ્ બ્રહ્મપુત્રાન્ સુમહાનુભાવાન્ ॥ ૨૩૯.૫૮॥

૨૩૯.૫૯/૧તમશ્ચ કષ્ટં સુમહદ્ રજશ્ચ ।
૨૩૯.૫૯/૨સત્ત્વં ચ શુદ્ધં પ્રકૃતિં પરાં ચ ।
૨૩૯.૫૯/૩સિદ્ધિં ચ દેવીં વરુણસ્ય પત્નીમ્ ।
૨૩૯.૫૯/૪તેજશ્ચ કૃત્સ્નં સુમહચ્ચ ધૈર્યમ્ ॥ ૨૩૯.૫૯॥

૨૩૯.૬૦/૧તારાધિપં ખે વિમલં સુતારમ્ ।
૨૩૯.૬૦/૨વિશ્વાંશ્ચ દેવાન્ ઉરગાન્ પિતૃંશ્ચ ।
૨૩૯.૬૦/૩શૈલાંશ્ચ કૃત્સ્નાન્ ઉદધીંશ્ચ વાચલાન્ ।
૨૩૯.૬૦/૪નદીશ્ચ સર્વાઃ સનગાંશ્ચ નાગાન્ ॥ ૨૩૯.૬૦॥

૨૩૯.૬૧/૧સાધ્યાંસ્તથા યક્ષગણાન્ દિશશ્ચ ।
૨૩૯.૬૧/૨ગન્ધર્વસિદ્ધાન્ પુરુષાન્ સ્ત્રિયશ્ચ ।
૨૩૯.૬૧/૩પરસ્પરં પ્રાપ્ય મહાન્ મહાત્મા ।
૨૩૯.૬૧/૪વિશેત યોગી નચિરાદ્ વિમુક્તઃ ॥ ૨૩૯.૬૧॥

૨૩૯.૬૨/૧કથા ચ યા વિપ્રવરાઃ પ્રસક્તા ।
૨૩૯.૬૨/૨દૈવે મહાવીર્યમતૌ શુભેયમ્ ।
૨૩૯.૬૨/૩યોગાન્ સ સર્વાન્ અનુભૂય મર્ત્યા ।

૨૩૯.૬૨/૪નારાયણં તં દ્રુતમાપ્નુવન્તિ ॥ ૨૩૯.૬૨॥

૨૪૦.૧/૧મુનય ઊચુઃ । સમ્યક્ ક્રિયેયં વિપ્રેન્દ્ર વર્ણિતા શિષ્ટસમ્મતા ।
૨૪૦.૧/૨યોગમાર્ગો યથાન્યાયં શિષ્યાયેહ હિતૈષિણા ॥ ૨૪૦.૧॥

૨૪૦.૨/૧સાંખ્યે ત્વિદાનીં ધર્મસ્ય વિધિં પ્રબ્રૂહિ તત્ત્વતઃ ।
૨૪૦.૨/૨ત્રિષુ લોકેષુ યજ્જ્ઞાનં સર્વં તદ્ વિદિતં હિ તે ॥ ૨૪૦.૨॥

૨૪૦.૩/૧વ્યાસ ઉવાચ । શ ृણુધ્વં મુનયઃ સર્વમાખ્યાનં વિદિતાત્મનામ્ ।
૨૪૦.૩/૨વિહિતં યતિભિર્વૃદ્ધૈઃ કપિલાદિભિરીશ્વરૈઃ ॥ ૨૪૦.૩॥

૨૪૦.૪/૧યસ્મિન્ સુવિભ્રમાઃ કેચિદ્ દૃશ્યન્તે મુનિસત્તમાઃ ।
૨૪૦.૪/૨ગુણાશ્ચ યસ્મિન્ બહવો દોષહાનિશ્ચ કેવલા ॥ ૨૪૦.૪॥

૨૪૦.૫/૧જ્ઞાનેન પરિસંખ્યાય સદોષાન્ વિષયાન્ દ્વિજાઃ ।
૨૪૦.૫/૨માનુષાન્ દુર્જયાન્ કૃત્સ્નાન્ પૈશાચાન્ વિષયાંસ્તથા ॥ ૨૪૦.૫॥

૨૪૦.૬/૧વિષયાન્ ઔરગાઞ્ જ્ઞાત્વા ગન્ધર્વવિષયાંસ્તથા ।
૨૪૦.૬/૨પિતૃણાં વિષયાઞ્ જ્ઞાત્વા તિર્યક્ત્વં ચરતાં દ્વિજાઃ ॥ ૨૪૦.૬॥

૨૪૦.૭/૧સુપર્ણવિષયાઞ્ જ્ઞાત્વા મરુતાં વિષયાંસ્તથા ।
૨૪૦.૭/૨મહર્ષિવિષયાંશ્ચૈવ રાજર્ષિવિષયાંસ્તથા ॥ ૨૪૦.૭॥

૨૪૦.૮/૧આસુરાન્ વિષયાઞ્ જ્ઞાત્વા વૈશ્વદેવાંસ્તથૈવ ચ ।
૨૪૦.૮/૨દેવર્ષિવિષયાઞ્ જ્ઞાત્વા યોગાનામપિ વૈ પરાન્ ॥ ૨૪૦.૮॥

૨૪૦.૯/૧વિષયાંશ્ચ પ્રમાણસ્ય બ્રહ્મણો વિષયાંસ્તથા ।
૨૪૦.૯/૨આયુષશ્ચ પરં કાલં લોકૈર્વિજ્ઞાય તત્ત્વતઃ ॥ ૨૪૦.૯॥

૨૪૦.૧૦/૧સુખસ્ય ચ પરં કાલં વિજ્ઞાય મુનિસત્તમાઃ ।
૨૪૦.૧૦/૨પ્રાપ્તકાલે ચ યદ્ દુઃખં પતતાં વિષયૈષિણામ્ ॥ ૨૪૦.૧૦॥

૨૪૦.૧૧/૧તિર્યક્ત્વે પતતાં વિપ્રાસ્તથૈવ નરકેષુ યત્ ।
૨૪૦.૧૧/૨સ્વર્ગસ્ય ચ ગુણાઞ્ જ્ઞાત્વા દોષાન્ સર્વાંશ્ચ ભો દ્વિજાઃ ॥ ૨૪૦.૧૧॥

૨૪૦.૧૨/૧વેદવાદે ચ યે દોષા ગુણા યે ચાપિ વૈદિકાઃ ।
૨૪૦.૧૨/૨જ્ઞાનયોગે ચ યે દોષા જ્ઞાનયોગે ચ યે ગુણાઃ ॥ ૨૪૦.૧૨॥

૨૪૦.૧૩/૧સાંખ્યજ્ઞાને ચ યે દોષાંસ્તથૈવ ચ ગુણા દ્વિજાઃ ।
૨૪૦.૧૩/૨સત્ત્વં દશગુણં જ્ઞાત્વા રજો નવગુણં તથા ॥ ૨૪૦.૧૩॥

૨૪૦.૧૪/૧તમશ્ચાષ્ટગુણં જ્ઞાત્વા બુદ્ધિં સપ્તગુણાં તથા ।
૨૪૦.૧૪/૨ષડ્ગુણં ચ નભો જ્ઞાત્વા તમશ્ચ ત્રિગુણં મહત્ ॥ ૨૪૦.૧૪॥

૨૪૦.૧૫/૧દ્વિગુણં ચ રજો જ્ઞાત્વા સત્ત્વં ચૈકગુણં પુનઃ ।
૨૪૦.૧૫/૨માર્ગં વિજ્ઞાય તત્ત્વેન પ્રલયપ્રેક્ષણેન તુ ॥ ૨૪૦.૧૫॥

૨૪૦.૧૬/૧જ્ઞાનવિજ્ઞાનસમ્પન્નાઃ કારણૈર્ભાવિતાત્મભિઃ ।
૨૪૦.૧૬/૨પ્રાપ્નુવન્તિ શુભં મોક્ષં સૂક્ષ્મા ઇવ નભઃ પરમ્ ॥ ૨૪૦.૧૬॥

૨૪૦.૧૭/૧રૂપેણ દૃષ્ટિં સંયુક્તાં ઘ્રાણં ગન્ધગુણેન ચ ।
૨૪૦.૧૭/૨શબ્દગ્રાહ્યં તથા શ્રોત્રં જિહ્વાં રસગુણેન ચ ॥ ૨૪૦.૧૭॥

૨૪૦.૧૮/૧ત્વચં સ્પર્શં તથા શક્યં વાયું ચૈવ તદાશ્રિતમ્ ।
૨૪૦.૧૮/૨મોહં તમસિ સંયુક્તં લોભં મોહેષુ સંશ્રિતમ્ ॥ ૨૪૦.૧૮॥

૨૪૦.૧૯/૧વિષ્ણું ક્રાન્તે બલે શક્રં કોષ્ઠે સક્તં તથાનલમ્ ।
૨૪૦.૧૯/૨અપ્સુ દેવીં સમાયુક્તામાપસ્તેજસિ સંશ્રિતાઃ ॥ ૨૪૦.૧૯॥

૨૪૦.૨૦/૧તેજો વાયૌ તુ સંયુક્તં વાયું નભસિ ચાશ્રિતમ્ ।
૨૪૦.૨૦/૨નભો મહતિ સંયુક્તં તમો મહસિ સંસ્થિતમ્ ॥ ૨૪૦.૨૦॥

૨૪૦.૨૧/૧રજઃ સત્ત્વં તથા સક્તં સત્ત્વં સક્તં તથાત્મનિ ।
૨૪૦.૨૧/૨સક્તમાત્માનમીશે ચ દેવે નારાયણે તથા ॥ ૨૪૦.૨૧॥

૨૪૦.૨૨/૧દેવં મોક્ષે ચ સંયુક્તં તતો મોક્ષં ચ ન ક્વચિત્ ।
૨૪૦.૨૨/૨જ્ઞાત્વા સત્ત્વગુણં દેહં વૃતં ષોડશભિર્ગુણૈઃ ॥ ૨૪૦.૨૨॥

૨૪૦.૨૩/૧સ્વભાવં ભાવનાં ચૈવ જ્ઞાત્વા દેહસમાશ્રિતામ્ ।
૨૪૦.૨૩/૨મધ્યસ્થમિવ ચાત્માનં પાપં યસ્મિન્ ન વિદ્યતે ॥ ૨૪૦.૨૩॥

૨૪૦.૨૪/૧દ્વિતીયં કર્મ વૈ જ્ઞાત્વા વિપ્રેન્દ્રા વિષયૈષિણામ્ ।
૨૪૦.૨૪/૨ઇન્દ્રિયાણીન્દ્રિયાર્થાંશ્ચ સર્વાન્ આત્મનિ સંશ્રિતાન્ ॥ ૨૪૦.૨૪॥

૨૪૦.૨૫/૧દુર્લભત્વં ચ મોક્ષસ્ય વિજ્ઞાય શ્રુતિપૂર્વકમ્ ।
૨૪૦.૨૫/૨પ્રાણાપાનૌ સમાનં ચ વ્યાનોદાનૌ ચ તત્ત્વતઃ ॥ ૨૪૦.૨૫॥

૨૪૦.૨૬/૧આદ્યં ચૈવાનિલં જ્ઞાત્વા પ્રભવં ચાનિલં પુનઃ ।
૨૪૦.૨૬/૨સપ્તધા તાંસ્તથા શેષાન્ સપ્તધા વિધિવત્ પુનઃ ॥ ૨૪૦.૨૬॥

૨૪૦.૨૭/૧પ્રજાપતીન્ ઋષીંશ્ચૈવ સર્ગાંશ્ચ સુબહૂન્ વરાન્ ।
૨૪૦.૨૭/૨સપ્તર્ષીંશ્ચ બહૂન્ જ્ઞાત્વા રાજર્ષીંશ્ચ પરંતપાન્ ॥ ૨૪૦.૨૭॥

૨૪૦.૨૮/૧સુરર્ષીન્ મરુતશ્ચાન્યાન્ બ્રહ્મર્ષીન્ સૂર્યસંનિભાન્ ।
૨૪૦.૨૮/૨ઐશ્વર્યાચ્ચ્યાવિતાન્ દૃષ્ટ્વા કાલેન મહતા દ્વિજાઃ ॥ ૨૪૦.૨૮॥

૨૪૦.૨૯/૧મહતાં ભૂતસંઘાનાં શ્રુત્વા નાશં ચ ભો દ્વિજાઃ ।
૨૪૦.૨૯/૨ગતિં વાચાં શુભાં જ્ઞાત્વા અર્ચાર્હાઃ પાપકર્મણામ્ ॥ ૨૪૦.૨૯॥

૨૪૦.૩૦/૧વૈતરણ્યાં ચ યદ્ દુઃખં પતિતાનાં યમક્ષયે ।
૨૪૦.૩૦/૨યોનિષુ ચ વિચિત્રાસુ સંચારાન્ અશુભાંસ્તથા ॥ ૨૪૦.૩૦॥

૨૪૦.૩૧/૧જઠરે ચાશુભે વાસં શોણિતોદકભાજને ।
૨૪૦.૩૧/૨શ્લેષ્મમૂત્રપુરીષે ચ તીવ્રગન્ધસમન્વિતે ॥ ૨૪૦.૩૧॥

૨૪૦.૩૨/૧શુક્રશોણિતસંઘાતે મજ્જાસ્નાયુપરિગ્રહે ।
૨૪૦.૩૨/૨શિરાશતસમાકીર્ણે નવદ્વારે પુરેઽથ વૈ ॥ ૨૪૦.૩૨॥

૨૪૦.૩૩/૧વિજ્ઞાય હિતમાત્માનં યોગાંશ્ચ વિવિધાન્ દ્વિજાઃ ।
૨૪૦.૩૩/૨તામસાનાં ચ જન્તૂનાં રમણીયાનૃતાત્મનામ્ ॥ ૨૪૦.૩૩॥

૨૪૦.૩૪/૧સાત્ત્વિકાનાં ચ જન્તૂનાં કુત્સિતં મુનિસત્તમાઃ ।
૨૪૦.૩૪/૨ગર્હિતં મહતામર્થે સાંખ્યાનાં વિદિતાત્મનામ્ ॥ ૨૪૦.૩૪॥

૨૪૦.૩૫/૧ઉપપ્લવાંસ્તથા ઘોરાઞ્ શશિનસ્તેજસસ્તથા ।
૨૪૦.૩૫/૨તારાણાં પતનં દૃષ્ટ્વા નક્ષત્રાણાં ચ પર્યયમ્ ॥ ૨૪૦.૩૫॥

૨૪૦.૩૬/૧દ્વંદ્વાનાં વિપ્રયોગં ચ વિજ્ઞાય કૃપણં દ્વિજાઃ ।
૨૪૦.૩૬/૨અન્યોન્યભક્ષણં દૃષ્ટ્વા ભૂતાનામપિ ચાશુભમ્ ॥ ૨૪૦.૩૬॥

૨૪૦.૩૭/૧બાલ્યે મોહં ચ વિજ્ઞાય પક્ષદેહસ્ય ચાશુભમ્ ।
૨૪૦.૩૭/૨રાગં મોહં ચ સમ્પ્રાપ્તં ક્વચિત્ સત્ત્વં સમાશ્રિતમ્ ॥ ૨૪૦.૩૭॥

૨૪૦.૩૮/૧સહસ્રેષુ નરઃ કશ્ચિન્ મોક્ષબુદ્ધિં સમાશ્રિતઃ ।
૨૪૦.૩૮/૨દુર્લભત્વં ચ મોક્ષસ્ય વિજ્ઞાનં શ્રુતિપૂર્વકમ્ ॥ ૨૪૦.૩૮॥

૨૪૦.૩૯/૧બહુમાનમલબ્ધેષુ લબ્ધે મધ્યસ્થતાં પુનઃ ।
૨૪૦.૩૯/૨વિષયાણાં ચ દૌરાત્મ્યં વિજ્ઞાય ચ પુનર્દ્વિજાઃ ॥ ૨૪૦.૩૯॥

૨૪૦.૪૦/૧ગતાસૂનાં ચ સત્ત્વાનાં દેહાન્ ભિત્ત્વા તથા શુભાન્ ।
૨૪૦.૪૦/૨વાસં કુલેષુ જન્તૂનાં મરણાય ધૃતાત્મનામ્ ॥ ૨૪૦.૪૦॥

૨૪૦.૪૧/૧સાત્ત્વિકાનાં ચ જન્તૂનાં દુઃખં વિજ્ઞાય ભો દ્વિજાઃ ।

૨૪૦.૪૧/૨બ્રહ્મઘ્નાનાં ગતિં જ્ઞાત્વા પતિતાનાં સુદારુણામ્ ॥ ૨૪૦.૪૧॥

૨૪૦.૪૨/૧સુરાપાને ચ સક્તાનાં બ્રાહ્મણાનાં દુરાત્મનામ્ ।
૨૪૦.૪૨/૨ગુરુદારપ્રસક્તાનાં ગતિં વિજ્ઞાય ચાશુભામ્ ॥ ૨૪૦.૪૨॥

૨૪૦.૪૩/૧જનનીષુ ચ વર્તન્તે યેન સમ્યગ્ દ્વિજોત્તમાઃ ।
૨૪૦.૪૩/૨સદેવકેષુ લોકેષુ યેન વર્તન્તિ માનવાઃ ॥ ૨૪૦.૪૩॥

૨૪૦.૪૪/૧તેન જ્ઞાનેન વિજ્ઞાય ગતિં ચાશુભકર્મણામ્ ।
૨૪૦.૪૪/૨તિર્યગ્યોનિગતાનાં ચ વિજ્ઞાય ચ ગતીઃ પૃથક્ ॥ ૨૪૦.૪૪॥

૨૪૦.૪૫/૧વેદવાદાંસ્તથા ચિત્રાન્ ઋતૂનાં પર્યયાંસ્તથા ।
૨૪૦.૪૫/૨ક્ષયં સંવત્સરાણાં ચ માસાનાં ચ ક્ષયં તથા ॥ ૨૪૦.૪૫॥

૨૪૦.૪૬/૧પક્ષક્ષયં તથા દૃષ્ટ્વા દિવસાનાં ચ સંક્ષયમ્ ।
૨૪૦.૪૬/૨ક્ષયં વૃદ્ધિં ચ ચન્દ્રસ્ય દૃષ્ટ્વા પ્રત્યક્ષતસ્તથા ॥ ૨૪૦.૪૬॥

૨૪૦.૪૭/૧વૃદ્ધિં દૃષ્ટ્વા સમુદ્રાણાં ક્ષયં તેષાં તથા પુનઃ ।
૨૪૦.૪૭/૨ક્ષયં ધનાનાં દૃષ્ટ્વા ચ પુનર્વૃદ્ધિં તથૈવ ચ ॥ ૨૪૦.૪૭॥

૨૪૦.૪૮/૧સંયોગાનાં તથા દૃષ્ટ્વા યુગાનાં ચ વિશેષતઃ ।
૨૪૦.૪૮/૨દેહવૈક્લવ્યતાં ચૈવ સમ્યગ્ વિજ્ઞાય તત્ત્વતઃ ॥ ૨૪૦.૪૮॥

૨૪૦.૪૯/૧આત્મદોષાંશ્ચ વિજ્ઞાય સર્વાન્ આત્મનિ સંસ્થિતાન્ ।
૨૪૦.૪૯/૨સ્વદેહાદ્ ઉત્થિતાન્ ગન્ધાંસ્તથા વિજ્ઞાય ચાશુભાન્ ॥ ૨૪૦.૪૯॥

૨૪૦.૫૦/૧મુનય ઊચુઃ । કાન્ ઉત્પાતભવાન્ દોષાન્ પશ્યસિ બ્રહ્મવિત્તમ ।
૨૪૦.૫૦/૨એતં નઃ સંશયં કૃત્સ્નં વક્તુમર્હસ્યશેષતઃ ॥ ૨૪૦.૫૦॥

૨૪૦.૫૧/૧વ્યાસ ઉવાચ । પઞ્ચ દોષાન્ દ્વિજા દેહે પ્રવદન્તિ મનીષિણઃ ।
૨૪૦.૫૧/૨માર્ગજ્ઞાઃ કાપિલાઃ સાંખ્યાઃ શ◌ૃણુધ્વં મુનિસત્તમાઃ ॥ ૨૪૦.૫૧॥

૨૪૦.૫૨/૧કામક્રોધૌ ભયં નિદ્રા પઞ્ચમઃ શ્વાસ ઉચ્યતે ।
૨૪૦.૫૨/૨એતે દોષાઃ શરીરેષુ દૃશ્યન્તે સર્વદેહિનામ્ ॥ ૨૪૦.૫૨॥

૨૪૦.૫૩/૧છિન્દન્તિ ક્ષમયા ક્રોધં કામં સંકલ્પવર્જનાત્ ।
૨૪૦.૫૩/૨સત્ત્વસંસેવનાન્ નિદ્રામપ્રમાદાદ્ ભયં તથા ॥ ૨૪૦.૫૩॥

૨૪૦.૫૪/૧છિન્દન્તિ પઞ્ચમં શ્વાસમલ્પાહારતયા દ્વિજાઃ ।
૨૪૦.૫૪/૨ગુણાન્ ગુણશતૈર્જ્ઞાત્વા દોષાન્ દોષશતૈરપિ ॥ ૨૪૦.૫૪॥

૨૪૦.૫૫/૧હેતૂન્ હેતુશતૈશ્ચિત્રૈશ્ચિત્રાન્ વિજ્ઞાય તત્ત્વતઃ ।
૨૪૦.૫૫/૨અપાં ફેનોપમં લોકં વિષ્ણોર્માયાશતૈઃ કૃતમ્ ॥ ૨૪૦.૫૫॥

૨૪૦.૫૬/૧ચિત્રભિત્તિપ્રતીકાશં નલસારમનર્થકમ્ ।
૨૪૦.૫૬/૨તમઃસમ્ભ્રમિતં દૃષ્ટ્વા વર્ષબુદ્બુદસંનિભમ્ ॥ ૨૪૦.૫૬॥

૨૪૦.૫૭/૧નાશપ્રાયં સુખાધાનં નાશોત્તરમહાભયમ્ ।
૨૪૦.૫૭/૨૨જસ્તમસિ સમ્મગ્નં પઙ્કે દ્વિપમિવાવશમ્ ॥ ૨૪૦.૫૭॥

૨૪૦.૫૮/૧સાંખ્યા વિપ્રા મહાપ્રાજ્ઞાસ્ત્યક્ત્વા સ્નેહં પ્રજાકૃતમ્ ।
૨૪૦.૫૮/૨જ્ઞાનજ્ઞેયેન સાંખ્યેન વ્યાપિના મહતા દ્વિજાઃ ॥ ૨૪૦.૫૮॥

૨૪૦.૫૯/૧રાજસાન્ અશુભાન્ ગન્ધાંસ્તામસાંશ્ચ તથાવિધાન્ ।
૨૪૦.૫૯/૨પુણ્યાંશ્ચ સાત્ત્વિકાન્ ગન્ધાન્ સ્પર્શજાન્ દેહસંશ્રિતાન્ ॥ ૨૪૦.૫૯॥

૨૪૦.૬૦/૧છિત્ત્વાત્મજ્ઞાનશસ્ત્રેણ તપોદણ્ડેન સત્તમાઃ ।
૨૪૦.૬૦/૨તતો દુઃખાદિકં ઘોરં ચિન્તાશોકમહાહ્રદમ્ ॥ ૨૪૦.૬૦॥

૨૪૦.૬૧/૧વ્યાધિમૃત્યુમહાઘોરં મહાભયમહોરગમ્ ।
૨૪૦.૬૧/૨તમઃકૂર્મં રજોમીનં પ્રજ્ઞયા સંતરન્ત્યુત ॥ ૨૪૦.૬૧॥

૨૪૦.૬૨/૧સ્નેહપઙ્કં જરાદુર્ગં સ્પર્શદ્વીપં દ્વિજોત્તમાઃ ।
૨૪૦.૬૨/૨કર્માગાધં સત્યતીરં સ્થિતં વ્રતમનીષિણઃ ॥ ૨૪૦.૬૨॥

૨૪૦.૬૩/૧હર્ષસંઘમહાવેગં નાનારસસમાકુલમ્ ।
૨૪૦.૬૩/૨નાનાપ્રીતિમહારત્નં દુઃખજ્વરસમીરિતમ્ ॥ ૨૪૦.૬૩॥

૨૪૦.૬૪/૧શોકતૃષ્ણામહાવર્તં તીક્ષ્ણવ્યાધિમહારુજમ્ ।
૨૪૦.૬૪/૨અસ્થિસંઘાતસંઘટ્ટં શ્લેષ્મયોગં દ્વિજોત્તમાઃ ॥ ૨૪૦.૬૪॥

૨૪૦.૬૫/૧દાનમુક્તાકરં ઘોરં શોણિતોદ્ગારવિદ્રુમમ્ ।
૨૪૦.૬૫/૨હસિતોત્ક્રુષ્ટનિર્ઘોષં નાનાજ્ઞાનસુદુષ્કરમ્ ॥ ૨૪૦.૬૫॥

૨૪૦.૬૬/૧રોદનાશ્રુમલક્ષારં સઙ્ગયોગપરાયણમ્ ।
૨૪૦.૬૬/૨પ્રલબ્ધ્વા જન્મલોકો યં પુત્રબાન્ધવપત્તનમ્ ॥ ૨૪૦.૬૬॥

૨૪૦.૬૭/૧અહિંસાસત્યમર્યાદં પ્રાણયોગમયોર્મિલમ્ ।
૨૪૦.૬૭/૨વૃન્દાનુગામિનં ક્ષીરં સર્વભૂતપયોદધિમ્ ॥ ૨૪૦.૬૭॥

૨૪૦.૬૮/૧મોક્ષદુર્લભવિષયં વાડવાસુખસાગરમ્ ।
૨૪૦.૬૮/૨તરન્તિ યતયઃ સિદ્ધા જ્ઞાનયોગેન ચાનઘાઃ ॥ ૨૪૦.૬૮॥

૨૪૦.૬૯/૧તીર્વા ચ દુસ્તરં જન્મ વિશન્તિ વિમલં નભઃ ।
૨૪૦.૬૯/૨તતસ્તાન્ સુકૃતીઞ્ જ્ઞાત્વા સૂર્યો વહતિ રશ્મિભિઃ ॥ ૨૪૦.૬૯॥

૨૪૦.૭૦/૧પદ્મતન્તુવદ્ આવિશ્ય પ્રવહન્ વિષયાન્ દ્વિજાઃ ।
૨૪૦.૭૦/૨તત્ર તાન્ પ્રવહો વાયુઃ પ્રતિગૃહ્ણાતિ ચાનઘાઃ ॥ ૨૪૦.૭૦॥

૨૪૦.૭૧/૧વીતરાગાન્ યતીન્ સિદ્ધાન્ વીર્યયુક્તાંસ્તપોધનાન્ ।
૨૪૦.૭૧/૨સૂક્ષ્મઃ શીતઃ સુગન્ધશ્ચ સુખસ્પર્શશ્ચ ભો દ્વિજાઃ ॥ ૨૪૦.૭૧॥

૨૪૦.૭૨/૧સપ્તાનાં મરુતાં શ્રેષ્ઠો લોકાન્ ગચ્છતિ યઃ શુભાન્ ।
૨૪૦.૭૨/૨સ તાન્ વહતિ વિપ્રેન્દ્રા નભસઃ પરમાં ગતિમ્ ॥ ૨૪૦.૭૨॥

૨૪૦.૭૩/૧નભો વહતિ લોકેશાન્ રજસઃ પરમાં ગતિમ્ ।
૨૪૦.૭૩/૨રજો વહતિ વિપ્રેન્દ્રાઃ સત્ત્વસ્ય પરમાં ગતિમ્ ॥ ૨૪૦.૭૩॥

૨૪૦.૭૪/૧સત્ત્વં વહતિ શુદ્ધાત્મા પરં નારાયણં પ્રભુમ્ ।
૨૪૦.૭૪/૨પ્રભુર્વહતિ શુદ્ધાત્મા પરમાત્માનમાત્મના ॥ ૨૪૦.૭૪॥

૨૪૦.૭૫/૧પરમાત્માનમાસાદ્ય તદ્ભૂતા યતયોઽમલાઃ ।
૨૪૦.૭૫/૨અમૃતત્વાય કલ્પન્તે ન નિવર્તન્તિ ચ દ્વિજાઃ ॥ ૨૪૦.૭૫॥

૨૪૦.૭૬/૧પરમા સા ગતિર્વિપ્રા નિર્દ્વન્દ્વાનાં મહાત્મનામ્ ।
૨૪૦.૭૬/૨સત્યાર્જવરતાનાં વૈ સર્વભૂતદયાવતામ્ ॥ ૨૪૦.૭૬॥

૨૪૦.૭૭/૧મુનય ઊચુઃ । સ્થાનમુત્તમમાસાદ્ય ભગવન્તં સ્થિરવ્રતાઃ ।
૨૪૦.૭૭/૨આજન્મમરણં વા તે રમન્તે તત્ર વા ન વા ॥ ૨૪૦.૭૭॥

૨૪૦.૭૮/૧યદ્ અત્ર તથ્યં તત્ત્વં નો યથાવદ્ વક્તુમર્હસિ ।
૨૪૦.૭૮/૨ત્વદૃતે માનવં નાન્યં પ્રષ્ટુમર્હામ સત્તમ ॥ ૨૪૦.૭૮॥

૨૪૦.૭૯/૧મોક્ષદોષો મહાન્ એષ પ્રાપ્ય સિદ્ધિં ગતાન્ ઋષીન્ ।
૨૪૦.૭૯/૨યદિ તત્રૈવ વિજ્ઞાને વર્તન્તે યતયઃ પરે ॥ ૨૪૦.૭૯॥

૨૪૦.૮૦/૧પ્રવૃત્તિલક્ષણં ધર્મં પશ્યામ પરમં દ્વિજ ।
૨૪૦.૮૦/૨મગ્નસ્ય હિ પરે જ્ઞાને કિંતુ દુઃખાન્તરં ભવેત્ ॥ ૨૪૦.૮૦॥

૨૪૦.૮૧/૧વ્યાસ ઉવાચ । યથાન્યાયં મુનિશ્રેષ્ઠાઃ પ્રશ્નઃ પૃષ્ટશ્ચ સંકટઃ ।
૨૪૦.૮૧/૨બુધાનામપિ સમ્મોહઃ પ્રશ્નેઽસ્મિન્ મુનિસત્તમાઃ ॥ ૨૪૦.૮૧॥

૨૪૦.૮૨/૧અત્રાપિ તત્ત્વં પરમં શ ृણુધ્વં વચનં મમ ।

૨૪૦.૮૨/૨બુદ્ધિશ્ચ પરમા યત્ર કપિલાનાં મહાત્મનામ્ ॥ ૨૪૦.૮૨॥

૨૪૦.૮૩/૧ઇન્દ્રિયાણ્યપિ બુધ્યન્તે સ્વદેહં દેહિનાં દ્વિજાઃ ।
૨૪૦.૮૩/૨કરણાન્યાત્મનસ્તાનિ સૂક્ષ્મં પશ્યન્તિ તૈસ્તુ સઃ ॥ ૨૪૦.૮૩॥

૨૪૦.૮૪/૧આત્મના વિપ્રહીણાનિ કાષ્ઠકુડ્યસમાનિ તુ ।
૨૪૦.૮૪/૨વિનશ્યન્તિ ન સંદેહો વેલા ઇવ મહાર્ણવે ॥ ૨૪૦.૮૪॥

૨૪૦.૮૫/૧ઇન્દ્રિયૈઃ સહ સુપ્તસ્ય દેહિનો દ્વિજસત્તમાઃ ।
૨૪૦.૮૫/૨સૂક્ષ્મશ્ચરતિ સર્વત્ર નભસીવ સમીરણઃ ॥ ૨૪૦.૮૫॥

૨૪૦.૮૬/૧સ પશ્યતિ યથાન્યાયં સ્મૃત્વા સ્પૃશતિ ચાનઘાઃ ।
૨૪૦.૮૬/૨બુધ્યમાનો યથાપૂર્વમખિલેનેહ ભો દ્વિજાઃ ॥ ૨૪૦.૮૬॥

૨૪૦.૮૭/૧ઇન્દ્રિયાણિ હ સર્વાણિ સ્વે સ્વે સ્થાને યથાવિધિ ।
૨૪૦.૮૭/૨અનીશત્વાત્ પ્રલીયન્તે સર્પા વિષહતા ઇવ ॥ ૨૪૦.૮૭॥

૨૪૦.૮૮/૧ઇન્દ્રિયાણાં તુ સર્વેષાં સ્વસ્થાનેષ્વેવ સર્વશઃ ।
૨૪૦.૮૮/૨આક્રમ્ય ગતયઃ સૂક્ષ્મા વરત્યાત્મા ન સંશયઃ ॥ ૨૪૦.૮૮॥

૨૪૦.૮૯/૧સત્ત્વસ્ય ચ ગુણાન્ કૃત્સ્નાન્ રજસશ્ચ ગુણાન્ પુનઃ ।
૨૪૦.૮૯/૨ગુણાંશ્ચ તમસઃ સર્વાન્ ગુણાન્ બુદ્ધેશ્ચ સત્તમાઃ ॥ ૨૪૦.૮૯॥

૨૪૦.૯૦/૧ગુણાંશ્ચ મનસશ્ચાપિ નભસશ્ચ ગુણાંસ્તથા ।
૨૪૦.૯૦/૨ગુણાન્ વાયોશ્ચ સર્વજ્ઞાઃ સ્નેહજાંશ્ચ ગુણાન્ પુનઃ ॥ ૨૪૦.૯૦॥

૨૪૦.૯૧/૧અપાં ગુણાસ્તથા વિપ્રાઃ પાર્થિવાંશ્ચ ગુણાન્ અપિ ।
૨૪૦.૯૧/૨સર્વાન્ એવ ગુણૈર્વ્યાપ્ય ક્ષેત્રજ્ઞેષુ દ્વિજોત્તમાઃ ॥ ૨૪૦.૯૧॥

૨૪૦.૯૨/૧આત્મા ચરતિ ક્ષેત્રજ્ઞઃ કર્મણા ચ શુભાશુભે ।
૨૪૦.૯૨/૨શિષ્યા ઇવ મહાત્માનમિન્દ્રિયાણિ ચ તં દ્વિજાઃ ॥ ૨૪૦.૯૨॥

૨૪૦.૯૩/૧પ્રકૃતિં ચાપ્યતિક્રમ્ય શુદ્ધં સૂક્ષ્મં પરાત્ પરમ્ ।
૨૪૦.૯૩/૨નારાયણં મહાત્માનં નિર્વિકારં પરાત્ પરમ્ ॥ ૨૪૦.૯૩॥

૨૪૦.૯૪/૧વિમુક્તં સર્વપાપેભ્યઃ પ્રવિષ્ટં ચ હ્યનામયમ્ ।
૨૪૦.૯૪/૨પરમાત્માનમગુણં નિર્વૃતં તં ચ સત્તમાઃ ॥ ૨૪૦.૯૪॥

૨૪૦.૯૫/૧શ્રેષ્ઠં તત્ર મનો વિપ્રા ઇન્દ્રિયાણિ ચ ભો દ્વિજાઃ ।
૨૪૦.૯૫/૨આગચ્છન્તિ યથાકાલં ગુરોઃ સંદેશકારિણઃ ॥ ૨૪૦.૯૫॥

૨૪૦.૯૬/૧શક્યં વાલ્પેન કાલેન શાન્તિં પ્રાપ્તું ગુણાંસ્તથા ।
૨૪૦.૯૬/૨એવમુક્તેન વિપ્રેન્દ્રાઃ સાંખ્યયોગેન મોક્ષિણીમ્ ॥ ૨૪૦.૯૬॥

૨૪૦.૯૭/૧સાંખ્યા વિપ્રા મહાપ્રાજ્ઞા ગચ્છન્તિ પરમાં ગતિમ્ ।
૨૪૦.૯૭/૨જ્ઞાનેનાનેન વિપ્રેન્દ્રાસ્તુલ્યં જ્ઞાનં ન વિદ્યતે ॥ ૨૪૦.૯૭॥

૨૪૦.૯૮/૧અત્ર વઃ સંશયો મા ભૂજ્જ્ઞાનં સાંખ્યં પરં મતમ્ ।
૨૪૦.૯૮/૨અક્ષરં ધ્રુવમેવોક્તં પૂર્વં બ્રહ્મ સનાતનમ્ ॥ ૨૪૦.૯૮॥

૨૪૦.૯૯/૧અનાદિમધ્યનિધનં નિર્દ્વંદ્વં કર્તૃ શાશ્વતમ્ ।
૨૪૦.૯૯/૨કૂટસ્થં ચૈવ નિત્યં ચ યદ્ વદન્તિ શમાત્મકાઃ ॥ ૨૪૦.૯૯॥

૨૪૦.૧૦૦/૧યતઃ સર્વાઃ પ્રવર્તન્તે સર્ગપ્રલયવિક્રિયાઃ ।
૨૪૦.૧૦૦/૨એવં શંસન્તિ શાસ્ત્રેષુ પ્રવક્તારો મહર્ષયઃ ॥ ૨૪૦.૧૦૦॥

૨૪૦.૧૦૧/૧સર્વે વિપ્રાશ્ચ વેદાશ્ચ તથા સામવિદો જનાઃ ।
૨૪૦.૧૦૧/૨બ્રહ્મણ્યં પરમં દેવમનન્તં પરમાચ્યુતમ્ ॥ ૨૪૦.૧૦૧॥

૨૪૦.૧૦૨/૧પ્રાર્થયન્તશ્ચ તં વિપ્રા વદન્તિ ગુણબુદ્ધયઃ ।
૨૪૦.૧૦૨/૨સમ્યગ્ ઉક્તાસ્તથા યોગાઃ સાંખ્યાશ્ચામિતદર્શનાઃ ॥ ૨૪૦.૧૦૨॥

૨૪૦.૧૦૩/૧અમૂર્તિસ્તસ્ય વિપ્રેન્દ્રાઃ સાંખ્યં મૂર્તિરિતિ શ્રુતિઃ ।
૨૪૦.૧૦૩/૨અભિજ્ઞાનાનિ તસ્યાહુર્મહાન્તિ મુનિસત્તમાઃ ॥ ૨૪૦.૧૦૩॥

૨૪૦.૧૦૪/૧દ્વિવિધાનિ હિ ભૂતાનિ પૃથિવ્યાં દ્વિજસત્તમાઃ ।
૨૪૦.૧૦૪/૨અગમ્યગમ્યસંજ્ઞાનિ ગમ્યં તત્ર વિશિષ્યતે ॥ ૨૪૦.૧૦૪॥

૨૪૦.૧૦૫/૧જ્ઞાનં મહદ્ વૈ મહતશ્ચ વિપ્રા ।
૨૪૦.૧૦૫/૨વેદેષુ સાંખ્યેષુ તથૈવ યોગે ।
૨૪૦.૧૦૫/૩યચ્ચાપિ દૃષ્ટં વિધિવત્ પુરાણે ।
૨૪૦.૧૦૫/૪સાંખ્યાગતં તન્ નિખિલં મુનીન્દ્રાઃ ॥ ૨૪૦.૧૦૫॥

૨૪૦.૧૦૬/૧યચ્ચેતિહાસેષુ મહત્સુ દૃષ્ટમ્ ।
૨૪૦.૧૦૬/૨યથાર્થશાસ્ત્રેષુ વિશિષ્ટદૃષ્ટમ્ ।
૨૪૦.૧૦૬/૩જ્ઞાનં ચ લોકે યદ્ ઇહાસ્તિ કિંચિત્ ।
૨૪૦.૧૦૬/૪સાંખ્યાગતં તચ્ચ મહામુનીન્દ્રાઃ ॥ ૨૪૦.૧૦૬॥

૨૪૦.૧૦૭/૧સમસ્તદૃષ્ટં પરમં બલં ચ ।
૨૪૦.૧૦૭/૨જ્ઞાનં ચ મોક્ષશ્ચ યથાવદ્ ઉક્તમ્ ।

૨૪૦.૧૦૭/૩તપાંસિ સૂક્ષ્માણિ ચ યાનિ ચૈવ ।
૨૪૦.૧૦૭/૪સાંખ્યે યથાવદ્ વિહિતાનિ વિપ્રાઃ ॥ ૨૪૦.૧૦૭॥

૨૪૦.૧૦૮/૧વિપર્યયં તસ્ય હિતં સદૈવ ।
૨૪૦.૧૦૮/૨ગચ્છન્તિ સાંખ્યાઃ સતતં સુખેન ।
૨૪૦.૧૦૮/૩તાંશ્ચાપિ સંધાર્ય તતઃ કૃતાર્થાઃ ।
૨૪૦.૧૦૮/૪પતન્તિ વિપ્રાયતનેષુ ભૂયઃ ॥ ૨૪૦.૧૦૮॥

૨૪૦.૧૦૯/૧હિત્વા ચ દેહં પ્રવિશન્તિ મોક્ષમ્ ।
૨૪૦.૧૦૯/૨દિવૌકસશ્ચાપિ ચ યોગસાંખ્યાઃ ।
૨૪૦.૧૦૯/૩અતોઽધિકં તેઽભિરતા મહાર્હે ।
૨૪૦.૧૦૯/૪સાંખ્યે દ્વિજા ભો ઇહ શિષ્ટજુષ્ટે ॥ ૨૪૦.૧૦૯॥

૨૪૦.૧૧૦/૧તેષાં તુ તિર્યગ્ગમનં હિ દૃષ્ટમ્ ।
૨૪૦.૧૧૦/૨નાધો ગતિઃ પાપકૃતાં નિવાસઃ ।
૨૪૦.૧૧૦/૩ન વા પ્રધાના અપિ તે દ્વિજાતયો ।
૨૪૦.૧૧૦/૪યે જ્ઞાનમેતન્ મુનયો ન સક્તાઃ ॥ ૨૪૦.૧૧૦॥

૨૪૦.૧૧૧/૧સાંખ્યં વિશાલં પરમં પુરાણમ્ ।
૨૪૦.૧૧૧/૨મહાર્ણવં વિમલમુદારકાન્તમ્ ।
૨૪૦.૧૧૧/૩કૃત્સ્નં હિ સાંખ્યા મુનયો મહાત્મ+ ।
૨૪૦.૧૧૧/૪નારાયણે ધારયતાપ્રમેયમ્ ॥ ૨૪૦.૧૧૧॥

૨૪૦.૧૧૨/૧એતન્ મયોક્તં પરમં હિ તત્ત્વમ્ ।
૨૪૦.૧૧૨/૨નારાયણાદ્ વિશ્વમિદં પુરાણમ્ ।
૨૪૦.૧૧૨/૩સ સર્ગકાલે ચ કરોતિ સર્ગમ્ ।
૨૪૦.૧૧૨/૪સંહારકાલે ચ હરેત ભૂયઃ ॥ ૨૪૦.૧૧૨॥

૨૪૧.૧/૧મુનય ઊચુઃ । કિં તદ્ અક્ષરમિત્યુક્તં યસ્માન્ નાવર્તતે પુનઃ ।
૨૪૧.૧/૨કિંસ્વિત્ તત્ ક્ષરમિત્યુક્તં યસ્માદ્ આવર્તતે પુનઃ ॥ ૨૪૧.૧॥

૨૪૧.૨/૧અક્ષરાક્ષરયોર્વ્યક્તિં પૃચ્છામસ્ત્વાં મહામુને ।
૨૪૧.૨/૨ઉપલબ્ધું મુનિશ્રેષ્ઠ તત્ત્વેન મુનિપુંગવ ॥ ૨૪૧.૨॥

૨૪૧.૩/૧ત્વં હિ જ્ઞાનવિદાં શ્રેષ્ઠઃ પ્રોચ્યસે વેદપારગૈઃ ।
૨૪૧.૩/૨ઋષિભિશ્ચ મહાભાગૈર્યતિભિશ્ચ મહાત્મભિઃ ॥ ૨૪૧.૩॥

૨૪૧.૪/૧તદ્ એતચ્છ્રોતુમિચ્છામસ્ત્વત્તઃ સર્વં મહામતે ।

૨૪૧.૪/૨ન તૃપ્તિમધિગચ્છામઃ શ઼ૃણ્વન્તોઽમૃતમુત્તમમ્ ॥ ૨૪૧.૪॥

૨૪૧.૫/૧વ્યાસ ઉવાચ । અત્ર વો વર્ણયિષ્યામિ ઇતિહાસં પુરાતનમ્ ।
૨૪૧.૫/૨વસિષ્ઠસ્ય ચ સંવાદં કરાલજનકસ્ય ચ ॥ ૨૪૧.૫॥

૨૪૧.૬/૧વસિષ્ઠં શ્રેષ્ઠમાસીનમ્ ઋષીણાં ભાસ્કરદ્યુતિમ્ ।
૨૪૧.૬/૨પપ્રચ્છ જનકો રાજા જ્ઞાનં નૈઃશ્રેયસં પરમ્ ॥ ૨૪૧.૬॥

૨૪૧.૭/૧પરમાત્મનિ કુશલમધ્યાત્મગતિનિશ્ચયમ્ ।
૨૪૧.૭/૨મૈત્રાવરુણિમાસીનમભિવાદ્ય કૃતાઞ્જલિઃ ॥ ૨૪૧.૭॥

૨૪૧.૮/૧સ્વચ્છન્દં સુકૃતં ચૈવ મધુરં ચાપ્યનુલ્બણમ્ ।
૨૪૧.૮/૨પપ્રચ્છર્ષિવરં રાજા કરાલજનકઃ પુરા ॥ ૨૪૧.૮॥

૨૪૧.૯/૧કરાલજનક ઉવાચ । ભગવઞ્ શ્રોતુમિચ્છામિ પરં બ્રહ્મ સનાતનમ્ ।
૨૪૧.૯/૨યસ્મિન્ ન પુનરાવૃત્તિં પ્રાપ્નુવન્તિ મનીષિણઃ ॥ ૨૪૧.૯॥

૨૪૧.૧૦/૧યચ્ચ તત્ ક્ષરમિત્યુક્તં યત્રેદં ક્ષરતે જગત્ ।
૨૪૧.૧૦/૨યચ્ચાક્ષરમિતિ પ્રોક્તં શિવં ક્ષેમમનામયમ્ ॥ ૨૪૧.૧૦॥

૨૪૧.૧૧/૧વસિષ્ઠ ઉવાચ । શ્રૂયતાં પૃથિવીપાલ ક્ષરતીદં યથા જગત્ ।
૨૪૧.૧૧/૨યત્ર ક્ષરતિ પૂર્વેણ યાવત્કાલેન ચાપ્યથ ॥ ૨૪૧.૧૧॥

૨૪૧.૧૨/૧યુગં દ્વાદશસાહસ્રં કલ્પં વિદ્ધિ ચતુર્યુગમ્ ।
૨૪૧.૧૨/૨દશકલ્પશતાવર્તમહસ્તદ્ બ્રાહ્મમુચ્યતે ॥ ૨૪૧.૧૨॥

૨૪૧.૧૩/૧રાત્રિશ્ચૈતાવતી રાજન્ યસ્યાન્તે પ્રતિબુધ્યતે ।
૨૪૧.૧૩/૨સૃજત્યનન્તકર્માણિ મહાન્તં ભૂતમગ્રજમ્ ॥ ૨૪૧.૧૩॥

૨૪૧.૧૪/૧મૂર્તિમન્તમમૂર્તાત્મા વિશ્વં શમ્ભુઃ સ્વયમ્ભુવઃ ।
૨૪૧.૧૪/૨યત્રોત્પત્તિં પ્રવક્ષ્યામિ મૂલતો નૃપસત્તમ ॥ ૨૪૧.૧૪॥

૨૪૧.૧૫/૧અણિમા લઘિમા પ્રાપ્તિરીશાનં જ્યોતિરવ્યયમ્ ।
૨૪૧.૧૫/૨સર્વતઃપાણિપાદાન્તં સર્વતોક્ષિશિરોમુખમ્ ॥ ૨૪૧.૧૫॥

૨૪૧.૧૬/૧સર્વતઃશ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ।
૨૪૧.૧૬/૨હિરણ્યગર્ભો ભગવાન્ એષ બુદ્ધિરિતિ સ્મૃતિઃ ॥ ૨૪૧.૧૬॥

૨૪૧.૧૭/૧મહાન્ ઇતિ ચ યોગેષુ વિરિઞ્ચિરિતિ ચાપ્યથ ।
૨૪૧.૧૭/૨સાંખ્યે ચ પઠ્યતે શાસ્ત્રે નામભિર્બહુધાત્મકઃ ॥ ૨૪૧.૧૭॥

૨૪૧.૧૮/૧વિચિત્રરૂપો વિશ્વાત્મા એકાક્ષર ઇતિ સ્મૃતઃ ।
૨૪૧.૧૮/૨ધૃતમેકાત્મકં યેન કૃત્સ્નં ત્રૈલોક્યમાત્મના ॥ ૨૪૧.૧૮॥

૨૪૧.૧૯/૧તથૈવ બહુરૂપત્વાદ્ વિશ્વરૂપ ઇતિ શ્રુતઃ ।
૨૪૧.૧૯/૨એષ વૈ વિક્રિયાપન્નઃ સૃજત્યાત્માનમાત્મના ॥ ૨૪૧.૧૯॥

૨૪૧.૨૦/૧પ્રધાનં તસ્ય સંયોગાદ્ ઉત્પન્નં સુમહત્ પુરમ્ ।
૨૪૧.૨૦/૨અહંકારં મહાતેજાઃ પ્રજાપતિનમસ્કૃતમ્ ॥ ૨૪૧.૨૦॥

૨૪૧.૨૧/૧અવ્યક્તાદ્ વ્યક્તિમાપન્નં વિદ્યાસર્ગં વદન્તિ તમ્ ।
૨૪૧.૨૧/૨મહાન્તં ચાપ્યહંકારમવિદ્યાસર્ગ એવ ચ ॥ ૨૪૧.૨૧॥

૨૪૧.૨૨/૧અચરશ્ચ ચરશ્ચૈવ સમુત્પન્નૌ તથૈકતઃ ।
૨૪૧.૨૨/૨વિદ્યાવિદ્યેતિ વિખ્યાતે શ્રુતિશાસ્ત્રાનુચિન્તકૈઃ ॥ ૨૪૧.૨૨॥

૨૪૧.૨૩/૧ભૂતસર્ગમહંકારાત્ તૃતીયં વિદ્ધિ પાર્થિવ ।
૨૪૧.૨૩/૨અહંકારેષુ નૃપતે ચતુર્થં વિદ્ધિ વૈકૃતમ્ ॥ ૨૪૧.૨૩॥

૨૪૧.૨૪/૧વાયુર્જ્યોતિરથાકાશમાપોઽથ પૃથિવી તથા ।
૨૪૧.૨૪/૨શબ્દસ્પર્શૌ ચ રૂપં ચ રસો ગન્ધસ્તથૈવ ચ ॥ ૨૪૧.૨૪॥

૨૪૧.૨૫/૧એવં યુગપદ્ ઉત્પન્નં દશવર્ગમસંશયમ્ ।
૨૪૧.૨૫/૨પઞ્ચમં વિદ્ધિ રાજેન્દ્ર ભૌતિકં સર્ગમર્થકૃત્ ॥ ૨૪૧.૨૫॥

૨૪૧.૨૬/૧શ્રોત્રં ત્વક્ ચક્ષુષી જિહ્વા ઘ્રાણમેવ ચ પઞ્ચમમ્ ।
૨૪૧.૨૬/૨વાગ્ હસ્તૌ ચૈવ પાદૌ ચ પાયુર્મેઢ્રં તથૈવ ચ ॥ ૨૪૧.૨૬॥

૨૪૧.૨૭/૧બુદ્ધીન્દ્રિયાણિ ચૈતાનિ તથા કર્મેન્દ્રિયાણિ ચ ।
૨૪૧.૨૭/૨સમ્ભૂતાનીહ યુગપન્ મનસા સહ પાર્થિવ ॥ ૨૪૧.૨૭॥

૨૪૧.૨૮/૧એષા તત્ત્વચતુર્વિંશા સર્વાકૃતિઃ પ્રવર્તતે ।
૨૪૧.૨૮/૨યાં જ્ઞાત્વા નાભિશોચન્તિ બ્રાહ્મણાસ્તત્ત્વદર્શિનઃ ॥ ૨૪૧.૨૮॥

૨૪૧.૨૯/૧એવમેતત્ સમુત્પન્નં ત્રૈલોક્યમિદમુત્તમમ્ ।
૨૪૧.૨૯/૨વેદિતવ્યં નરશ્રેષ્ઠ સદૈવ નરકાર્ણવે ॥ ૨૪૧.૨૯॥

૨૪૧.૩૦/૧સયક્ષભૂતગન્ધર્વે સકિંનરમહોરગે ।
૨૪૧.૩૦/૨સચારણપિશાચે વૈ સદેવર્ષિનિશાચરે ॥ ૨૪૧.૩૦॥

૨૪૧.૩૧/૧સદંશકીટમશકે સપૂતિકૃમિમૂષકે ।
૨૪૧.૩૧/૨શુનિ શ્વપાકે ચૈણેયે સચાણ્ડાલે સપુલ્કસે ॥ ૨૪૧.૩૧॥

૨૪૧.૩૨/૧હસ્ત્યશ્વખરશાર્દૂલે સવૃકે ગવિ ચૈવ હ ।
૨૪૧.૩૨/૨યા ચ મૂર્તિશ્ચ યત્ કિંચિત્ સર્વત્રૈતન્ નિદર્શનમ્ ॥ ૨૪૧.૩૨॥

૨૪૧.૩૩/૧જલે ભુવિ તથાકાશે નાન્યત્રેતિ વિનિશ્ચયઃ ।
૨૪૧.૩૩/૨સ્થાનં દેહવતામાસીદ્ ઇત્યેવમનુશુશ્રુમ ॥ ૨૪૧.૩૩॥

૨૪૧.૩૪/૧કૃત્સ્નમેતાવતસ્તાત ક્ષરતે વ્યક્તસંજ્ઞકઃ ।
૨૪૧.૩૪/૨અહન્યહનિ ભૂતાત્મા યચ્ચાક્ષર ઇતિ સ્મૃતમ્ ॥ ૨૪૧.૩૪॥

૨૪૧.૩૫/૧તતસ્તત્ ક્ષરમિત્યુક્તં ક્ષરતીદં યથા જગત્ ।
૨૪૧.૩૫/૨જગન્ મોહાત્મકં ચાહુરવ્યક્તાદ્ વ્યક્તસંજ્ઞકમ્ ॥ ૨૪૧.૩૫॥

૨૪૧.૩૬/૧મહાંશ્ચૈવાક્ષરો નિત્યમેતત્ ક્ષરવિવર્જનમ્ ।
૨૪૧.૩૬/૨કથિતં તે મહારાજ યસ્માન્ નાવર્તતે પુનઃ ॥ ૨૪૧.૩૬॥

૨૪૧.૩૭/૧પઞ્ચવિંશતિકોઽમૂર્તઃ સ નિત્યસ્તત્ત્વસંજ્ઞકઃ ।
૨૪૧.૩૭/૨સત્ત્વસંશ્રયણાત્ તત્ત્વં સત્ત્વમાહુર્મનીષિણઃ ॥ ૨૪૧.૩૭॥

૨૪૧.૩૮/૧યદ્ અમૂર્તિઃ સૃજદ્ વ્યક્તં તન્ મૂર્તિમધિતિષ્ઠતિ ।
૨૪૧.૩૮/૨ચતુર્વિંશતિમો વ્યક્તો હ્યમૂર્તિઃ પઞ્ચવિંશકઃ ॥ ૨૪૧.૩૮॥

૨૪૧.૩૯/૧સ એવ હૃદિ સર્વાસુ મૂર્તિષ્વાતિષ્ઠતાત્મવાન્ ।
૨૪૧.૩૯/૨ચેતયંશ્ચેતનો નિત્યં સર્વમૂર્તિરમૂર્તિમાન્ ॥ ૨૪૧.૩૯॥

૨૪૧.૪૦/૧સર્ગપ્રલયધર્મેણ સ સર્ગપ્રલયાત્મકઃ ।
૨૪૧.૪૦/૨ગોચરે વર્તતે નિત્યં નિર્ગુણો ગુણસંજ્ઞિતઃ ॥ ૨૪૧.૪૦॥

૨૪૧.૪૧/૧એવમેષ મહાત્મા ચ સર્ગપ્રલયકોટિશઃ ।
૨૪૧.૪૧/૨વિકુર્વાણઃ પ્રકૃતિમાન્ નાભિમન્યેત બુદ્ધિમાન્ ॥ ૨૪૧.૪૧॥

૨૪૧.૪૨/૧તમઃસત્ત્વરજોયુક્તસ્તાસુ તાસ્વિહ યોનિષુ ।
૨૪૧.૪૨/૨લીયતે પ્રતિબુદ્ધત્વાદ્ અબુદ્ધજનસેવનાત્ ॥ ૨૪૧.૪૨॥

૨૪૧.૪૩/૧સહવાસનિવાસત્વાદ્ બાલોઽહમિતિ મન્યતે ।
૨૪૧.૪૩/૨યોઽહં ન સોઽહમિત્યુક્તો ગુણાન્ એવાનુવર્તતે ॥ ૨૪૧.૪૩॥

૨૪૧.૪૪/૧તમસા તામસાન્ ભાવાન્ વિવિધાન્ પ્રતિપદ્યતે ।
૨૪૧.૪૪/૨રજસા રાજસાંશ્ચૈવ સાત્ત્વિકાન્ સત્ત્વસંશ્રયાત્ ॥ ૨૪૧.૪૪॥

૨૪૧.૪૫/૧શુક્લલોહિતકૃષ્ણાનિ રૂપાણ્યેતાનિ ત્રીણિ તુ ।

૨૪૧.૪૫/૨સર્વાણ્યેતાનિ રૂપાણિ જાનીહિ પ્રાકૃતાનિ તુ ॥ ૨૪૧.૪૫॥

૨૪૧.૪૬/૧તામસા નિરયં યાન્તિ રાજસા માનુષાન્ અથ ।
૨૪૧.૪૬/૨સાત્ત્વિકા દેવલોકાય ગચ્છન્તિ સુખભાગિનઃ ॥ ૨૪૧.૪૬॥

૨૪૧.૪૭/૧નિષ્કેવલેન પાપેન તિર્યગ્યોનિમવાપ્નુયાત્ ।
૨૪૧.૪૭/૨પુણ્યપાપેષુ માનુષ્યં પુણ્યમાત્રેણ દેવતાઃ ॥ ૨૪૧.૪૭॥

૨૪૧.૪૮/૧એવમવ્યક્તવિષયં મોક્ષમાહુર્મનીષિણઃ ।
૨૪૧.૪૮/૨પઞ્ચવિંશતિમો યોઽયં જ્ઞાનાદ્ એવ પ્રવર્તતે ॥ ૨૪૧.૪૮॥

૨૪૨.૧/૧વસિષ્ઠ ઉવાચ । એવમપ્રતિબુદ્ધત્વાદ્ અબુદ્ધમનુવર્તતે ।
૨૪૨.૧/૨દેહાદ્ દેહસહસ્રાણિ તથા ચ ન સ ભિદ્યતે ॥ ૨૪૨.૧॥

૨૪૨.૨/૧તિર્યગ્યોનિસહસ્રેષુ કદાચિદ્ દેવતાસ્વપિ ।
૨૪૨.૨/૨ઉત્પદ્યતિ તપોયોગાદ્ ગુણૈઃ સહ ગુણક્ષયાત્ ॥ ૨૪૨.૨॥

૨૪૨.૩/૧મનુષ્યત્વાદ્ દિવં યાતિ દેવો માનુષ્યમેતિ ચ ।
૨૪૨.૩/૨માનુષ્યાન્ નિરયસ્થાનમાલયં પ્રતિપદ્યતે ॥ ૨૪૨.૩॥

૨૪૨.૪/૧કોષકારો યથાત્માનં કીટઃ સમભિરુન્ધતિ ।
૨૪૨.૪/૨સૂત્રતન્તુગુણૈર્નિત્યં તથાયમગુણો ગુણૈઃ ॥ ૨૪૨.૪॥

૨૪૨.૫/૧દ્વંદ્વમેતિ ચ નિર્દ્વંદ્વસ્તાસુ તાસ્વિહ યોનિષુ ।
૨૪૨.૫/૨શીર્ષરોગેઽક્ષિરોગે ચ દન્તશૂલે ગલગ્રહે ॥ ૨૪૨.૫॥

૨૪૨.૬/૧જલોદરેઽતિસારે ચ ગણ્ડમાલાવિચર્ચિકે ।
૨૪૨.૬/૨શ્વિત્રકુષ્ઠેઽગ્નિદગ્ધે ચ સિધ્માપસ્મારયોરપિ ॥ ૨૪૨.૬॥

૨૪૨.૭/૧યાનિ ચાન્યાનિ દ્વંદ્વાનિ પ્રાકૃતાનિ શરીરિણામ્ ।
૨૪૨.૭/૨ઉત્પદ્યન્તે વિચિત્રાણિ તાન્યેવાત્માભિમન્યતે ॥ ૨૪૨.૭॥

૨૪૨.૮/૧અભિમાનાતિમાનાનાં તથૈવ સુકૃતાન્યપિ ।
૨૪૨.૮/૨એકવાસાશ્ચતુર્વાસાઃ શાયી નિત્યમધસ્તથા ॥ ૨૪૨.૮॥

૨૪૨.૯/૧મણ્ડૂકશાયી ચ તથા વીરાસનગતસ્તથા ।
૨૪૨.૯/૨વીરમાસનમાકાશે તથા શયનમેવ ચ ॥ ૨૪૨.૯॥

૨૪૨.૧૦/૧ઇષ્ટકાપ્રસ્તરે ચૈવ ચક્રકપ્રસ્તરે તથા ।
૨૪૨.૧૦/૨ભસ્મપ્રસ્તરશાયી ચ ભૂમિશય્યાનુલેપનઃ ॥ ૨૪૨.૧૦॥

૨૪૨.૧૧/૧વીરસ્થાનામ્બુપાકે ચ શયનં ફલકેષુ ચ ।
૨૪૨.૧૧/૨વિવિધાસુ ચ શય્યાસુ ફલગૃહ્યાન્વિતાસુ ચ ॥ ૨૪૨.૧૧॥

૨૪૨.૧૨/૧ઉદ્યાને ખલલગ્ને તુ ક્ષૌમકૃષ્ણાજિનાન્વિતઃ ।
૨૪૨.૧૨/૨મણિવાલપરીધાનો વ્યાઘ્રચર્મપરિચ્છદઃ ॥ ૨૪૨.૧૨॥

૨૪૨.૧૩/૧સિંહચર્મપરીધાનઃ પટ્ટવાસાસ્તથૈવ ચ ।
૨૪૨.૧૩/૨ફલકં પરિધાનશ્ચ તથા કટકવસ્ત્રધૃક્ ॥ ૨૪૨.૧૩॥

૨૪૨.૧૪/૧કટૈકવસનશ્ચૈવ ચીરવાસાસ્તથૈવ ચ ।
૨૪૨.૧૪/૨વસ્ત્રાણિ ચાન્યાનિ બહૂન્યભિમત્ય ચ બુદ્ધિમાન્ ॥ ૨૪૨.૧૪॥

૨૪૨.૧૫/૧ભોજનાનિ વિચિત્રાણિ રત્નાનિ વિવિધાનિ ચ ।
૨૪૨.૧૫/૨એકરાત્રાન્તરાશિત્વમેકકાલિકભોજનમ્ ॥ ૨૪૨.૧૫॥

૨૪૨.૧૬/૧ચતુર્થાષ્ટમકાલં ચ ષષ્ઠકાલિકમેવ ચ ।
૨૪૨.૧૬/૨ષડ્રાત્રભોજનશ્ચૈવ તથા ચાષ્ટાહભોજનઃ ॥ ૨૪૨.૧૬॥

૨૪૨.૧૭/૧માસોપવાસી મૂલાશી ફલાહારસ્તથૈવ ચ ।
૨૪૨.૧૭/૨વાયુભક્ષશ્ચ પિણ્યાક+ ।દધિગોમયભોજનઃ ॥ ૨૪૨.૧૭॥

૨૪૨.૧૮/૧ગોમૂત્રભોજનશ્ચૈવ કાશપુષ્પાશનસ્તથા ।
૨૪૨.૧૮/૨શૈવાલભોજનશ્ચૈવ તથા ચાન્યેન વર્તયન્ ॥ ૨૪૨.૧૮॥

૨૪૨.૧૯/૧વર્તયઞ્ શીર્ણપર્ણૈશ્ચ પ્રકીર્ણફલભોજનઃ ।
૨૪૨.૧૯/૨વિવિધાનિ ચ કૃચ્છ્રાણિ સેવતે સિદ્ધિકાङ્ક્ષયા ॥ ૨૪૨.૧૯॥

૨૪૨.૨૦/૧ચાન્દ્રાયણાનિ વિધિવલ્લિઙ્ગાનિ વિવિધાનિ ચ ।
૨૪૨.૨૦/૨ચાતુરાશ્રમ્યયુક્તાનિ ધર્માધર્માશ્રયાણ્યપિ ॥ ૨૪૨.૨૦॥

૨૪૨.૨૧/૧ઉપાશ્રયાન્ અપ્યપરાન્ પાખણ્ડાન્ વિવિધાન્ અપિ ।
૨૪૨.૨૧/૨વિવિક્તાશ્ચ શિલાછાયાસ્તથા પ્રસ્રવણાનિ ચ ॥ ૨૪૨.૨૧॥

૨૪૨.૨૨/૧પુલિનાનિ વિવિક્તાનિ વિવિધાનિ વનાનિ ચ ।
૨૪૨.૨૨/૨કાનનેષુ વિવિક્તાશ્ચ શૈલાનાં મહતીર્ગુહાઃ ॥ ૨૪૨.૨૨॥

૨૪૨.૨૩/૧નિયમાન્ વિવિધાંશ્ચાપિ વિવિધાનિ તપાંસિ ચ ।
૨૪૨.૨૩/૨યજ્ઞાંશ્ચ વિવિધાકારાન્ વિધાશ્ચ વિવિધાસ્તથા ॥ ૨૪૨.૨૩॥

૨૪૨.૨૪/૧વણિક્પથં દ્વિજક્ષત્ર+ ।વૈશ્યશૂદ્રાંસ્તથૈવ ચ ।
૨૪૨.૨૪/૨દાનં ચ વિવિધાકારં દીનાન્ધકૃપણાદિષુ ॥ ૨૪૨.૨૪॥

૨૪૨.૨૫/૧અભિમન્યેત સંઘાતું તથૈવ વિવિધાન્ ગુણાન્ ।
૨૪૨.૨૫/૨સત્ત્વં રજસ્તમશ્ચૈવ ધર્માર્થૌ કામ એવ ચ ॥ ૨૪૨.૨૫॥

૨૪૨.૨૬/૧પ્રકૃત્યાત્માનમેવાત્મા એવં પ્રવિભજત્યુત ।
૨૪૨.૨૬/૨સ્વાહાકારવષટ્કારૌ સ્વધાકારનમસ્ક્રિયે ॥ ૨૪૨.૨૬॥

૨૪૨.૨૭/૧યજનાધ્યયને દાનં તથૈવાહુઃ પ્રતિગ્રહમ્ ।
૨૪૨.૨૭/૨યાજનાધ્યાપને ચૈવ તથાન્યદ્ અપિ કિંચન ॥ ૨૪૨.૨૭॥

૨૪૨.૨૮/૧જન્મમૃત્યુવિધાનેન તથા વિશસનેન ચ ।
૨૪૨.૨૮/૨શુભાશુભભયં સર્વમેતદ્ આહુઃ સનાતનમ્ ॥ ૨૪૨.૨૮॥

૨૪૨.૨૯/૧પ્રકૃતિઃ કુરુતે દેવી ભયં પ્રલયમેવ ચ ।
૨૪૨.૨૯/૨દિવસાન્તે ગુણાન્ એતાન્ અતીત્યૈકોઽવતિષ્ઠતે ॥ ૨૪૨.૨૯॥

૨૪૨.૩૦/૧રશ્મિજાલમિવાદિત્યસ્તત્કાલં સંનિયચ્છતિ ।
૨૪૨.૩૦/૨એવમેવૈષ તત્ સર્વં ક્રીડાર્થમભિમન્યતે ॥ ૨૪૨.૩૦॥

૨૪૨.૩૧/૧આત્મરૂપગુણાન્ એતાન્ વિવિધાન્ હૃદયપ્રિયાન્ ।
૨૪૨.૩૧/૨એવમેતાં પ્રકુર્વાણઃ સર્ગપ્રલયધર્મિણીમ્ ॥ ૨૪૨.૩૧॥

૨૪૨.૩૨/૧ક્રિયાં ક્રિયાપથે રક્તસ્ત્રિગુણસ્ત્રિગુણાધિપઃ ।
૨૪૨.૩૨/૨ક્રિયાક્રિયાપથોપેતસ્તથા તદ્ ઇતિ મન્યતે ॥ ૨૪૨.૩૨॥

૨૪૨.૩૩/૧પ્રકૃત્યા સર્વમેવેદં જગદ્ અન્ધીકૃતં વિભો ।
૨૪૨.૩૩/૨રજસા તમસા ચૈવ વ્યાપ્તં સર્વમનેકધા ॥ ૨૪૨.૩૩॥

૨૪૨.૩૪/૧એવં દ્વંદ્વાન્યતીતાનિ મમ વર્તન્તિ નિત્યશઃ ।
૨૪૨.૩૪/૨મત્ત એતાનિ જાયન્તે પ્રલયે યાન્તિ મામપિ ॥ ૨૪૨.૩૪॥

૨૪૨.૩૫/૧નિસ્તર્તવ્યાણ્યથૈતાનિ સર્વાણીતિ નરાધિપ ।
૨૪૨.૩૫/૨મન્યતે પક્ષબુદ્ધિત્વાત્ તથૈવ સુકૃતાન્યપિ ॥ ૨૪૨.૩૫॥

૨૪૨.૩૬/૧ભોક્તવ્યાનિ મમૈતાનિ દેવલોકગતેન વૈ ।
૨૪૨.૩૬/૨ઇહૈવ ચૈનં ભોક્ષ્યામિ શુભાશુભફલોદયમ્ ॥ ૨૪૨.૩૬॥

૨૪૨.૩૭/૧સુખમેવં તુ કર્તવ્યં સકૃત્ કૃત્વા સુખં મમ ।
૨૪૨.૩૭/૨યાવદ્ એવ તુ મે સૌખ્યં જાત્યાં જાત્યાં ભવિષ્યતિ ॥ ૨૪૨.૩૭॥

૨૪૨.૩૮/૧ભવિષ્યતિ ન મે દુઃખં કૃતેનેહાપ્યનન્તકમ્ ।

૨૪૨.૩૮/૨સુખદુઃખં હિ માનુષ્યં નિરયે ચાપિ મજ્જનમ્ ॥ ૨૪૨.૩૮॥

૨૪૨.૩૯/૧નિરયાચ્ચાપિ માનુષ્યં કાલેનૈષ્યામ્યહં પુનઃ ।
૨૪૨.૩૯/૨મનુષ્યત્વાચ્ચ દેવત્વં દેવત્વાત્ પૌરુષં પુનઃ ॥ ૨૪૨.૩૯॥

૨૪૨.૪૦/૧મનુષ્યત્વાચ્ચ નિરયં પર્યાયેણોપગચ્છતિ ।
૨૪૨.૪૦/૨એષ એવં દ્વિજાતીનામાત્મા વૈ સ ગુણૈર્વૃતઃ ॥ ૨૪૨.૪૦॥

૨૪૨.૪૧/૧તેન દેવમનુષ્યેષુ નિરયં ચોપપદ્યતે ।
૨૪૨.૪૧/૨મમત્વેનાવૃતો નિત્યં તત્રૈવ પરિવર્તતે ॥ ૨૪૨.૪૧॥

૨૪૨.૪૨/૧સર્ગકોટિસહસ્રાણિ મરણાન્તાસુ મૂર્તિષુ ।
૨૪૨.૪૨/૨ય એવં કુરુતે કર્મ શુભાશુભફલાત્મકમ્ ॥ ૨૪૨.૪૨॥

૨૪૨.૪૩/૧સ એવં ફલમાપ્નોતિ ત્રિષુ લોકેષુ મૂર્તિમાન્ ।
૨૪૨.૪૩/૨પ્રકૃતિઃ કુરુતે કર્મ શુભાશુભફલાત્મકમ્ ॥ ૨૪૨.૪૩॥

૨૪૨.૪૪/૧પ્રકૃતિશ્ચ તથાપ્નોતિ ત્રિષુ લોકેષુ કામગા ।
૨૪૨.૪૪/૨તિર્યગ્યોનિમનુષ્યત્વે દેવલોકે તથૈવ ચ ॥ ૨૪૨.૪૪॥

૨૪૨.૪૫/૧ત્રીણિ સ્થાનાનિ ચૈતાનિ જાનીયાત્ પ્રાકૃતાનિ હ ।
૨૪૨.૪૫/૨અલિઙ્ગપ્રકૃતિત્વાચ્ચ લિઙ્ગૈરપ્યનુમીયતે ॥ ૨૪૨.૪૫॥

૨૪૨.૪૬/૧તથૈવ પૌરુષં લિઙ્ગમનુમાનાદ્ ધિ મન્યતે ।
૨૪૨.૪૬/૨સ લિઙ્ગાન્તરમાસાદ્ય પ્રાકૃતં લિઙ્ગમવ્રણમ્ ॥ ૨૪૨.૪૬॥

૨૪૨.૪૭/૧વ્રણદ્વારાણ્યધિષ્ઠાય કર્માણ્યાત્મનિ મન્યતે ।
૨૪૨.૪૭/૨શ્રોત્રાદીનિ તુ સર્વાણિ પઞ્ચ કર્મેન્દ્રિયાણ્યથ ॥ ૨૪૨.૪૭॥

૨૪૨.૪૮/૧રાગાદીનિ પ્રવર્તન્તે ગુણેષ્વિહ ગુણૈઃ સહ ।
૨૪૨.૪૮/૨અહમેતાનિ વૈ કુર્વન્ મમૈતાનીન્દ્રિયાણિ હ ॥ ૨૪૨.૪૮॥

૨૪૨.૪૯/૧નિરિન્દ્રિયો હિ મન્યેત વ્રણવાન્ અસ્મિ નિર્વ્રણઃ ।
૨૪૨.૪૯/૨અલિઙ્ગો લિઙ્ગમાત્માનમકાલં કાલમાત્મનઃ ॥ ૨૪૨.૪૯॥

૨૪૨.૫૦/૧અસત્ત્વં સત્ત્વમાત્માનમમૃતં મૃતમાત્મનઃ ।
૨૪૨.૫૦/૨અમૃત્યું મૃત્યુમાત્માનમચરં ચરમાત્મનઃ ॥ ૨૪૨.૫૦॥

૨૪૨.૫૧/૧અક્ષેત્રં ક્ષેત્રમાત્માનમસઙ્ગં સઙ્ગમાત્મનઃ ।
૨૪૨.૫૧/૨અતત્ત્વં તત્ત્વમાત્માનમભવં ભવમાત્મનઃ ॥ ૨૪૨.૫૧॥

૨૪૨.૫૨/૧અક્ષરં ક્ષરમાત્માનમબુદ્ધત્વાદ્ ધિ મન્યતે ।
૨૪૨.૫૨/૨એવમપ્રતિબુદ્ધત્વાદ્ અબુદ્ધજનસેવનાત્ ॥ ૨૪૨.૫૨॥

૨૪૨.૫૩/૧સર્ગકોટિસહસ્રાણિ પતનાન્તાનિ ગચ્છતિ ।
૨૪૨.૫૩/૨જન્માન્તરસહસ્રાણિ મરણાન્તાનિ ગચ્છતિ ॥ ૨૪૨.૫૩॥

૨૪૨.૫૪/૧તિર્યગ્યોનિમનુષ્યત્વે દેવલોકે તથૈવ ચ ।
૨૪૨.૫૪/૨ચન્દ્રમા ઇવ કોશાનાં પુનસ્તત્ર સહસ્રશઃ ॥ ૨૪૨.૫૪॥

૨૪૨.૫૫/૧નીયતેઽપ્રતિબુદ્ધત્વાદ્ એવમેવ કુબુદ્ધિમાન્ ।
૨૪૨.૫૫/૨કલા પઞ્ચદશી યોનિસ્તદ્ ધામ ઇતિ પઠ્યતે ॥ ૨૪૨.૫૫॥

૨૪૨.૫૬/૧નિત્યમેવ વિજાનીહિ સોમં વૈ ષોડશાંશકૈઃ ।
૨૪૨.૫૬/૨કલયા જાયતેઽજસ્રં પુનઃ પુનરબુદ્ધિમાન્ ॥ ૨૪૨.૫૬॥

૨૪૨.૫૭/૧ધીમાંશ્ચાયં ન ભવતિ નૃપ એવં હિ જાયતે ।
૨૪૨.૫૭/૨ષોડશી તુ કલા સૂક્ષ્મા સ સોમ ઉપધાર્યતામ્ ॥ ૨૪૨.૫૭॥

૨૪૨.૫૮/૧ન તૂપયુજ્યતે દેવૈર્દેવાન્ અપિ યુનક્તિ સઃ ।
૨૪૨.૫૮/૨મમત્વં ક્ષપયિત્વા તુ જાયતે નૃપસત્તમ ।
૨૪૨.૫૮/૩પ્રકૃતેસ્ત્રિગુણાયાસ્તુ સ એવ ત્રિગુણો ભવેત્ ॥ ૨૪૨.૫૮॥

૨૪૩.૧/૧જનક ઉવાચ । અક્ષરક્ષરયોરેષ દ્વયોઃ સમ્બન્ધ ઇષ્યતે ।
૨૪૩.૧/૨સ્ત્રીપુંસયોર્વા સમ્બન્ધઃ સ વૈ પુરુષ ઉચ્યતે ॥ ૨૪૩.૧॥

૨૪૩.૨/૧ઋતે તુ પુરુષં નેહ સ્ત્રી ગર્ભાન્ ધારયત્યુત ।
૨૪૩.૨/૨ઋતે સ્ત્રિયં ન પુરુષો રૂપં નિર્વર્તતે તથા ॥ ૨૪૩.૨॥

૨૪૩.૩/૧અન્યોન્યસ્યાભિસમ્બન્ધાદ્ અન્યોન્યગુણસંશ્રયાત્ ।
૨૪૩.૩/૨રૂપં નિર્વર્તયેદ્ એતદ્ એવં સર્વાસુ યોનિષુ ॥ ૨૪૩.૩॥

૨૪૩.૪/૧રત્યર્થમતિસંયોગાદ્ અન્યોન્યગુણસંશ્રયાત્ ।
૨૪૩.૪/૨ઋતૌ નિર્વર્તતે રૂપં તદ્ વક્ષ્યામિ નિદર્શનમ્ ॥ ૨૪૩.૪॥

૨૪૩.૫/૧યે ગુણાઃ પુરુષસ્યેહ યે ચ માતુર્ગુણાસ્તથા ।
૨૪૩.૫/૨અસ્થિ સ્નાયુ ચ મજ્જા ચ જાનીમઃ પિતૃતો દ્વિજ ॥ ૨૪૩.૫॥

૨૪૩.૬/૧ત્વઙ્માંસશોણિતં ચેતિ માતૃજાન્યનુશુશ્રુમ ।
૨૪૩.૬/૨એવમેતદ્ દ્વિજશ્રેષ્ઠ વેદશાસ્ત્રેષુ પઠ્યતે ॥ ૨૪૩.૬॥

૨૪૩.૭/૧પ્રમાણં યચ્ચ વેદોક્તં શાસ્ત્રોક્તં યચ્ચ પઠ્યતે ।

૨૪૩.૭/૨વેદશાસ્ત્રપ્રમાણં ચ પ્રમાણં તત્ સનાતનમ્ ॥ ૨૪૩.૭॥

૨૪૩.૮/૧એવમેવાભિસમ્બન્ધૌ નિત્યં પ્રકૃતિપૂરુષૌ ।

૨૪૩.૮/૨યચ્ચાપિ ભગવંસ્તસ્માન્ મોક્ષધર્મો ન વિદ્યતે ॥ ૨૪૩.૮॥

૨૪૩.૯/૧અથવાનન્તરકૃતં કિંચિદ્ એવ નિદર્શનમ્ ।

૨૪૩.૯/૨તન્ મમાચક્ષ્વ તત્ત્વેન પ્રત્યક્ષો હ્યસિ સર્વદા ॥ ૨૪૩.૯॥

૨૪૩.૧૦/૧મોક્ષકામા વયં ચાપિ કાઙ્ક્ષામો યદ્ અનામયમ્ ।

૨૪૩.૧૦/૨અજેયમજરં નિત્યમતીન્દ્રિયમનીશ્વરમ્ ॥ ૨૪૩.૧૦॥

૨૪૩.૧૧/૧વસિષ્ઠ ઉવાચ । યદ્ એતદ્ ઉક્તં ભવતા વેદશાસ્ત્રનિદર્શનમ્ ।

૨૪૩.૧૧/૨એવમેતદ્ યથા વક્ષ્યે તત્ત્વગ્રાહી યથા ભવાન્ ॥ ૨૪૩.૧૧॥

૨૪૩.૧૨/૧ધાર્યતે હિ ત્વયા ગ્રન્થ ઉભયોર્વેદશાસ્ત્રયોઃ ।

૨૪૩.૧૨/૨ન ચ ગ્રન્થસ્ય તત્ત્વજ્ઞો યથાતત્ત્વં નરેશ્વર ॥ ૨૪૩.૧૨॥

૨૪૩.૧૩/૧યો હિ વેદે ચ શાસ્ત્રે ચ ગ્રન્થધારણતત્પરઃ ।

૨૪૩.૧૩/૨ન ચ ગ્રન્થાર્થતત્ત્વજ્ઞાસ્તસ્ય તદ્ધારણં વૃથા ॥ ૨૪૩.૧૩॥

૨૪૩.૧૪/૧ભારં સ વહતે તસ્ય ગ્રન્થસ્યાર્થં ન વેત્તિ યઃ ।

૨૪૩.૧૪/૨યસ્તુ ગ્રન્થાર્થતત્ત્વજ્ઞો નાસ્ય ગ્રન્થાગમો વૃથા ॥ ૨૪૩.૧૪॥

૨૪૩.૧૫/૧ગ્રન્થસ્યાર્થં સ પૃષ્ટસ્તુ માદૃશો વક્તુમર્હતિ ।

૨૪૩.૧૫/૨યથાતત્ત્વાભિગમનાદ્ અર્થં તસ્ય સ વિન્દતિ ॥ ૨૪૩.૧૫॥

૨૪૩.૧૬/૧ન યઃ સમુત્સુકઃ કશ્ચિદ્ ગ્રન્થાર્થં સ્થૂલબુદ્ધિમાન્ ।

૨૪૩.૧૬/૨સ કથં મન્દવિજ્ઞાનો ગ્રન્થં વક્ષ્યતિ નિર્ણયાત્ ॥ ૨૪૩.૧૬॥

૨૪૩.૧૭/૧અજ્ઞાત્વા ગ્રન્થતત્ત્વાનિ વાદં યઃ કુરુતે નરઃ ।

૨૪૩.૧૭/૨લોભાદ્ વાપ્યથવા દમ્ભાત્ સ પાપી નરકં વ્રજેત્ ॥ ૨૪૩.૧૭॥

૨૪૩.૧૮/૧નિર્ણયં ચાપિ ચ્છિદ્રાત્મા ન તદ્ વક્ષ્યતિ તત્ત્વતઃ ।

૨૪૩.૧૮/૨સોઽપીહાસ્યાર્થતત્ત્વજ્ઞો યસ્માન્ નૈવાત્મવાન્ અપિ ॥ ૨૪૩.૧૮॥

૨૪૩.૧૯/૧તસ્માત્ ત્વં શ ૃણુ રાજેન્દ્ર યથૈતદ્ અનુદૃશ્યતે ।

૨૪૩.૧૯/૨યથા તત્ત્વેન સાંખ્યેષુ યોગેષુ ચ મહાત્મસુ ॥ ૨૪૩.૧૯॥

૨૪૩.૨૦/૧યદ્ એવ યોગાઃ પશ્યન્તિ સાંખ્યં તદ્ અનુગમ્યતે ।

૨૪૩.૨૦/૨એકં સાંખ્યં ચ યોગં ચ યઃ પશ્યતિ સ બુદ્ધિમાન્ ॥ ૨૪૩.૨૦॥

૨૪૩.૨૧/૧ત્વઙ્ માંસં રુધિરં મેદઃ પિત્તં મજ્જાસ્થિ સ્નાયુ ચ ।
૨૪૩.૨૧/૨એતદ્ ઐન્દ્રિયકં તાત યદ્ ભવાન્ ઇત્થમાત્થ મામ્ ॥ ૨૪૩.૨૧॥

૨૪૩.૨૨/૧દ્રવ્યાદ્ દ્રવ્યસ્ય નિર્વૃત્તિરિન્દ્રિયાદ્ ઇન્દ્રિયં તથા ।
૨૪૩.૨૨/૨દેહાદ્ દેહમવાપ્નોતિ બીજાદ્ બીજં તથૈવ ચ ॥ ૨૪૩.૨૨॥

૨૪૩.૨૩/૧નિરિન્દ્રિયસ્ય બીજસ્ય નિર્દ્રવ્યસ્યાપિ દેહિનઃ ।
૨૪૩.૨૩/૨કથં ગુણા ભવિષ્યન્તિ નિર્ગુણત્વાન્ મહાત્મનઃ ॥ ૨૪૩.૨૩॥

૨૪૩.૨૪/૧ગુણા ગુણેષુ જાયન્તે તત્રૈવ વિરમન્તિ ચ ।
૨૪૩.૨૪/૨એવં ગુણાઃ પ્રકૃતિજા જાયન્તે ન ચ યાન્તિ ચ ॥ ૨૪૩.૨૪॥

૨૪૩.૨૫/૧ત્વઙ્ માંસં રુધિરં મેદઃ પિત્તં મજ્જાસ્થિ સ્નાયુ ચ ।
૨૪૩.૨૫/૨અષ્ટૌ તાન્યથ શુક્રેણ જાનીહિ પ્રાકૃતેન વૈ ॥ ૨૪૩.૨૫॥

૨૪૩.૨૬/૧પુમાંશ્ચૈવાપુમાંશ્ચૈવ સ્ત્રીલિઙ્ગં પ્રાકૃતં સ્મૃતમ્ ।
૨૪૩.૨૬/૨વાયુરેષ પુમાંશ્ચૈવ રસ ઇત્યભિધીયતે ॥ ૨૪૩.૨૬॥

૨૪૩.૨૭/૧અલિઙ્ગા પ્રકૃતિર્લિઙ્ગૈરુપલભ્યતિ સાત્મજૈઃ ।
૨૪૩.૨૭/૨યથા પુષ્પફલૈર્નિત્યં મૂર્તં ચામૂર્તયસ્તથા ॥ ૨૪૩.૨૭॥

૨૪૩.૨૮/૧એવમપ્યનુમાનેન સ લિઙ્ગમુપલભ્યતે ।
૨૪૩.૨૮/૨પઞ્ચવિંશતિકસ્તાત લિઙ્ગેષુ નિયતાત્મકઃ ॥ ૨૪૩.૨૮॥

૨૪૩.૨૯/૧અનાદિનિધનોઽનન્તઃ સર્વદર્શનકેવલઃ ।
૨૪૩.૨૯/૨કેવલં ત્વભિમાનિત્વાદ્ ગુણેષુ ગુણ ઉચ્યતે ॥ ૨૪૩.૨૯॥

૨૪૩.૩૦/૧ગુણા ગુણવતઃ સન્તિ નિર્ગુણસ્ય કુતો ગુણાઃ ।
૨૪૩.૩૦/૨તસ્માદ્ એવં વિજાનન્તિ યે જના ગુણદર્શિનઃ ॥ ૨૪૩.૩૦॥

૨૪૩.૩૧/૧યદા ત્વેષ ગુણાન્ એતાન્ પ્રાકૃતાન્ અભિમન્યતે ।
૨૪૩.૩૧/૨તદા સ ગુણવાન્ એવ ગુણભેદાન્ પ્રપશ્યતિ ॥ ૨૪૩.૩૧॥

૨૪૩.૩૨/૧યત્ તદ્ બુદ્ધેઃ પરં પ્રાહુઃ સાંખ્યયોગં ચ સર્વશઃ ।
૨૪૩.૩૨/૨બુધ્યમાનં મહાપ્રાજ્ઞાઃ પ્રબુદ્ધપરિવર્જનાત્ ॥ ૨૪૩.૩૨॥

૨૪૩.૩૩/૧અપ્રબુદ્ધં યથા વ્યક્તં સ્વગુણૈઃ પ્રાહુરીશ્વરમ્ ।
૨૪૩.૩૩/૨નિર્ગુણં ચેશ્વરં નિત્યમધિષ્ઠાતારમેવ ચ ॥ ૨૪૩.૩૩॥

૨૪૩.૩૪/૧પ્રકૃતેશ્ચ ગુણાનાં ચ પઞ્ચવિંશતિકં બુધાઃ ।
૨૪૩.૩૪/૨સાંખ્યયોગે ચ કુશલા બુધ્યન્તે પરમૈષિણઃ ॥ ૨૪૩.૩૪॥

૨૪૩.૩૫/૧યદા પ્રબુદ્ધમવ્યક્તમવસ્થાતનનીરવઃ ।
૨૪૩.૩૫/૨બુધ્યમાનં ન બુધ્યન્તેઽવગચ્છન્તિ સમં તદા ॥ ૨૪૩.૩૫॥

૨૪૩.૩૬/૧એતન્ નિદર્શનં સમ્યઙ્ ન સમ્યગ્ અનુદર્શનમ્ ।
૨૪૩.૩૬/૨બુધ્યમાનં પ્રબુધ્યન્તે દ્વાભ્યાં પૃથગ્ અરિંદમ ॥ ૨૪૩.૩૬॥

૨૪૩.૩૭/૧પરસ્પરેણૈતદ્ ઉક્તં ક્ષરાક્ષરનિદર્શનમ્ ।
૨૪૩.૩૭/૨એકત્વમક્ષરં પ્રાહુર્નાનાત્વં ક્ષરમુચ્યતે ॥ ૨૪૩.૩૭॥

૨૪૩.૩૮/૧પઞ્ચવિંશતિનિષ્ઠોઽયં તદા સમ્યક્ પ્રચક્ષતે ।
૨૪૩.૩૮/૨એકત્વદર્શનં ચાસ્ય નાનાત્વં ચાસ્ય દર્શનમ્ ॥ ૨૪૩.૩૮॥

૨૪૩.૩૯/૧તત્ત્વવિત્ તત્ત્વયોરેવ પૃથગ્ એતન્ નિદર્શનમ્ ।
૨૪૩.૩૯/૨પઞ્ચવિંશતિભિસ્તત્ત્વં તત્ત્વમાહુર્મનીષિણઃ ॥ ૨૪૩.૩૯॥

૨૪૩.૪૦/૧નિસ્તત્ત્વં પઞ્ચવિંશસ્ય પરમાહુર્મનીષિણઃ ।
૨૪૩.૪૦/૨વર્જ્યસ્ય વર્જ્યમાચારં તત્ત્વં તત્ત્વાત્ સનાતનમ્ ॥ ૨૪૩.૪૦॥

૨૪૩.૪૧/૧કરાલજનક ઉવાચ । નાનાત્વૈકત્વમિત્યુક્તં ત્વયૈતદ્ દ્વિજસત્તમ ।
૨૪૩.૪૧/૨પશ્યતસ્તદ્ ધિ સંદિગ્ધમેતયોર્વૈ નિદર્શનમ્ ॥ ૨૪૩.૪૧॥

૨૪૩.૪૨/૧તથા બુદ્ધપ્રબુદ્ધાભ્યાં બુધ્યમાનસ્ય ચાનઘ ।
૨૪૩.૪૨/૨સ્થૂલબુદ્ધ્યા ન પશ્યામિ તત્ત્વમેતન્ ન સંશયઃ ॥ ૨૪૩.૪૨॥

૨૪૩.૪૩/૧અક્ષરક્ષરયોરુક્તં ત્વયા યદ્ અપિ કારણમ્ ।
૨૪૩.૪૩/૨તદ્ અપ્યસ્થિરબુદ્ધિત્વાત્ પ્રનષ્ટમિવ મેઽનઘ ॥ ૨૪૩.૪૩॥

૨૪૩.૪૪/૧તદ્ એતચ્છ્રોતુમિચ્છામિ નાનાત્વૈકત્વદર્શનમ્ ।
૨૪૩.૪૪/૨દ્વંદ્વં ચૈવાનિરુદ્ધં ચ બુધ્યમાનં ચ તત્ત્વતઃ ॥ ૨૪૩.૪૪॥

૨૪૩.૪૫/૧વિદ્યાવિદ્યે ચ ભગવન્ન્ અક્ષરં ક્ષરમેવ ચ ।
૨૪૩.૪૫/૨સાંખ્યયોગં ચ કૃત્સ્નેન બુદ્ધાબુદ્ધિં પૃથક્ પૃથક્ ॥ ૨૪૩.૪૫॥

૨૪૩.૪૬/૧વસિષ્ઠ ઉવાચ । હન્ત તે સમ્પ્રવક્ષ્યામિ યદ્ એતદ્ અનુપૃચ્છસિ ।
૨૪૩.૪૬/૨યોગકૃત્યં મહારાજ પૃથગ્ એવ શ઼ૃણુષ્વ મે ॥ ૨૪૩.૪૬॥

૨૪૩.૪૭/૧યોગકૃત્યં તુ યોગાનાં ધ્યાનમેવ પરં બલમ્ ।
૨૪૩.૪૭/૨તચ્ચાપિ દ્વિવિધં ધ્યાનમાહુર્વિદ્યાવિદો જનાઃ ॥ ૨૪૩.૪૭॥

૨૪૩.૪૮/૧એકાગ્રતા ચ મનસઃ પ્રાણાયામસ્તથૈવ ચ ।

૨૪૩.૪૮/૨પ્રાણાયામસ્તુ સગુણો નિર્ગુણો માનસસ્તથા ॥ ૨૪૩.૪૮॥

૨૪૩.૪૯/૧મૂત્રોત્સર્ગે પુરીષે ચ ભોજને ચ નરાધિપ ।
૨૪૩.૪૯/૨દ્વિકાલં નોપભુઞ્જીત શેષં ભુઞ્જીત તત્પરઃ ॥ ૨૪૩.૪૯॥

૨૪૩.૫૦/૧ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યો નિવર્ત્ય મનસા મુનિઃ ।
૨૪૩.૫૦/૨દશદ્વાદશભિર્વાપિ ચતુર્વિંશાત્ પરં યતઃ ॥ ૨૪૩.૫૦॥

૨૪૩.૫૧/૧સ ચોદનાભિર્મતિમાન્ નાત્માનં ચોદયેદ્ અથ ।
૨૪૩.૫૧/૨તિષ્ઠન્તમજરં તં તુ યત્ તદ્ ઉક્તં મનીષિભિઃ ॥ ૨૪૩.૫૧॥

૨૪૩.૫૨/૧વિશ્વાત્મા સતતં જ્ઞેય ઇત્યેવમનુશુશ્રુમ ।
૨૪૩.૫૨/૨દ્રવ્યં હ્યહીનમનસો નાન્યથેતિ વિનિશ્ચયઃ ॥ ૨૪૩.૫૨॥

૨૪૩.૫૩/૧વિમુક્તઃ સર્વસઙ્ગેભ્યો લઘ્વાહારો જિતેન્દ્રિયઃ ।
૨૪૩.૫૩/૨પૂર્વરાત્રે પરાર્ધે ચ ધારયીત મનો હૃદિ ॥ ૨૪૩.૫૩॥

૨૪૩.૫૪/૧સ્થિરીકૃત્યેન્દ્રિયગ્રામં મનસા મિથિલેશ્વર ।
૨૪૩.૫૪/૨મનો બુદ્ધ્યા સ્થિરં કૃત્વા પાષાણ ઇવ નિશ્ચલઃ ॥ ૨૪૩.૫૪॥

૨૪૩.૫૫/૧સ્થાણુવચ્ચાપ્યકમ્પ્યઃ સ્યાદ્ દારુવચ્ચાપિ નિશ્ચલઃ ।
૨૪૩.૫૫/૨બુદ્ધ્યા વિધિવિધાનજ્ઞાસ્તતો યુક્તં પ્રચક્ષતે ॥ ૨૪૩.૫૫॥

૨૪૩.૫૬/૧ન શ્ૃણોતિ ન ચાઘ્રાતિ ન ચ પશ્યતિ કિંચન ।
૨૪૩.૫૬/૨ન ચ સ્પર્શં વિજાનાતિ ન ચ સંકલ્પતે મનઃ ॥ ૨૪૩.૫૬॥

૨૪૩.૫૭/૧ન ચાપિ મન્યતે કિંચિન્ ન ચ બુધ્યેત કાષ્ઠવત્ ।
૨૪૩.૫૭/૨તદા પ્રકૃતિમાપન્નં યુક્તમાહુર્મનીષિણઃ ॥ ૨૪૩.૫૭॥

૨૪૩.૫૮/૧ન ભાતિ હિ યથા દીપો દીપ્તિસ્તદ્વચ્ચ દૃશ્યતે ।
૨૪૩.૫૮/૨નિલિઙ્ગશ્ચાધશ્ચોર્ધ્વં ચ તિર્યગ્ગતિમવાપ્નુયાત્ ॥ ૨૪૩.૫૮॥

૨૪૩.૫૯/૧તદા તદુપપન્નશ્ચ યસ્મિન્ દૃષ્ટે ચ કથ્યતે ।
૨૪૩.૫૯/૨હૃદયસ્થોઽન્તરાત્મેતિ જ્ઞેયો જ્ઞસ્તાત મદ્વિધૈઃ ॥ ૨૪૩.૫૯॥

૨૪૩.૬૦/૧નિર્ધૂમ ઇવ સપ્તાર્ચિરાદિત્ય ઇવ રશ્મિવાન્ ।
૨૪૩.૬૦/૨વૈદ્યુતોઽગ્નિરિવાકાશે પશ્યત્યાત્માનમાત્મનિ ॥ ૨૪૩.૬૦॥

૨૪૩.૬૧/૧યં પશ્યન્તિ મહાત્માનો ધૃતિમન્તો મનીષિણઃ ।
૨૪૩.૬૧/૨બ્રાહ્મણા બ્રહ્મયોનિસ્થા હ્યયોનિમમૃતાત્મકમ્ ॥ ૨૪૩.૬૧॥

૨૪૩.૬૨/૧તદ્ એવાહુરણુભ્યોઽણુ તન્ મહદ્ભ્યો મહત્તરમ્ ।
૨૪૩.૬૨/૨સર્વત્ર સર્વભૂતેષુ ધ્રુવં તિષ્ઠન્ ન દૃશ્યતે ॥ ૨૪૩.૬૨॥

૨૪૩.૬૩/૧બુદ્ધિદ્રવ્યેણ દૃશ્યેન મનોદીપેન લોકકૃત્ ।
૨૪૩.૬૩/૨મહતસ્તમસસ્તાત પારે તિષ્ઠન્ ન તામસઃ ॥ ૨૪૩.૬૩॥

૨૪૩.૬૪/૧તમસો દૂર ઇત્યુક્તસ્તત્ત્વજ્ઞૈર્વેદપારગૈઃ ।
૨૪૩.૬૪/૨વિમલો વિમતશ્ચૈવ નિર્લિઙ્ગોઽલિઙ્ગસંજ્ઞકઃ ॥ ૨૪૩.૬૪॥

૨૪૩.૬૫/૧યોગ એષ હિ લોકાનાં કિમન્યદ્ યોગલક્ષણમ્ ।
૨૪૩.૬૫/૨એવં પશ્યન્ પ્રપશ્યેત આત્માનમજરં પરમ્ ॥ ૨૪૩.૬૫॥

૨૪૩.૬૬/૧યોગદર્શનમેતાવદ્ ઉક્તં તે તત્ત્વતો મયા ।
૨૪૩.૬૬/૨સાંખ્યજ્ઞાનં પ્રવક્ષ્યામિ પરિસંખ્યાનિદર્શનમ્ ॥ ૨૪૩.૬૬॥

૨૪૩.૬૭/૧અવ્યક્તમાહુઃ પ્રખ્યાનં પરાં પ્રકૃતિમાત્મનઃ ।
૨૪૩.૬૭/૨તસ્માન્ મહત્ સમુત્પન્નં દ્વિતીયં રાજસત્તમ ॥ ૨૪૩.૬૭॥

૨૪૩.૬૮/૧અહંકારસ્તુ મહતસ્તૃતીય ઇતિ નઃ શ્રુતમ્ ।
૨૪૩.૬૮/૨પઞ્ચભૂતાન્યહંકારાદ્ આહુઃ સાંખ્યાત્મદર્શિનઃ ॥ ૨૪૩.૬૮॥

૨૪૩.૬૯/૧એતાઃ પ્રકૃતયસ્ત્વષ્ટૌ વિકારાશ્ચાપિ ષોડશ ।
૨૪૩.૬૯/૨પઞ્ચ ચૈવ વિશેષાશ્ચ તથા પઞ્ચેન્દ્રિયાણિ ચ ॥ ૨૪૩.૬૯॥

૨૪૩.૭૦/૧એતાવદ્ એવ તત્ત્વાનાં સાંખ્યમાહુર્મનીષિણઃ ।
૨૪૩.૭૦/૨સાંખ્યે સાંખ્યવિધાનજ્ઞા નિત્યં સાંખ્યપથે સ્થિતાઃ ॥ ૨૪૩.૭૦॥

૨૪૩.૭૧/૧યસ્માદ્ યદ્ અભિજાયેત તત્ તત્રૈવ પ્રલીયતે ।
૨૪૩.૭૧/૨લીયન્તે પ્રતિલોમાનિ ગૃહ્યન્તે ચાન્તરાત્મના ॥ ૨૪૩.૭૧॥

૨૪૩.૭૨/૧આનુલોમ્યેન જાયન્તે લીયન્તે પ્રતિલોમતઃ ।
૨૪૩.૭૨/૨ગુણા ગુણેષુ સતતં સાગરસ્યોર્મયો યથા ॥ ૨૪૩.૭૨॥

૨૪૩.૭૩/૧સર્ગપ્રલય એતાવાન્ પ્રકૃતેર્નૃપસત્તમ ।
૨૪૩.૭૩/૨એકત્વં પ્રલયે ચાસ્ય બહુત્વં ચ તથા સૃજિ ॥ ૨૪૩.૭૩॥

૨૪૩.૭૪/૧એવમેવ ચ રાજેન્દ્ર વિજ્ઞેયં જ્ઞાનકોવિદૈઃ ।
૨૪૩.૭૪/૨અધિષ્ઠાતારમવ્યક્તમસ્યાપ્યેતન્ નિદર્શનમ્ ॥ ૨૪૩.૭૪॥

૨૪૩.૭૫/૧એકત્વં ચ બહુત્વં ચ પ્રકૃતેરનુ તત્ત્વવાન્ ।
૨૪૩.૭૫/૨એકત્વં પ્રલયે ચાસ્ય બહુત્વં ચ પ્રવર્તનાત્ ॥ ૨૪૩.૭૫॥

૨૪૩.૭૬/૧બહુધાત્મા પ્રકુર્વીત પ્રકૃતિં પ્રસવાત્મિકામ્ ।
૨૪૩.૭૬/૨તચ્ચ ક્ષેત્રં મહાન્ આત્મા પઞ્ચવિંશોઽધિતિષ્ઠતિ ॥ ૨૪૩.૭૬॥

૨૪૩.૭૭/૧અધિષ્ઠાતેતિ રાજેન્દ્ર પ્રોચ્યતે યતિસત્તમૈઃ ।
૨૪૩.૭૭/૨અધિષ્ઠાનાદ્ અધિષ્ઠાતા ક્ષેત્રાણામિતિ નઃ શ્રુતમ્ ॥ ૨૪૩.૭૭॥

૨૪૩.૭૮/૧ક્ષેત્રં જાનાતિ ચાવ્યક્તં ક્ષેત્રજ્ઞ ઇતિ ચોચ્યતે ।
૨૪૩.૭૮/૨અવ્યક્તિકે પુરે શેતે પુરુષશ્ચેતિ કથ્યતે ॥ ૨૪૩.૭૮॥

૨૪૩.૭૯/૧અન્યદ્ એવ ચ ક્ષેત્રં સ્યાદ્ અન્યઃ ક્ષેત્રજ્ઞ ઉચ્યતે ।
૨૪૩.૭૯/૨ક્ષેત્રમવ્યક્ત ઇત્યુક્તં જ્ઞાતારં પઞ્ચવિંશકમ્ ॥ ૨૪૩.૭૯॥

૨૪૩.૮૦/૧અન્યદ્ એવ ચ જ્ઞાનં સ્યાદ્ અન્યજ્જ્ઞેયં તદ્ ઉચ્યતે ।
૨૪૩.૮૦/૨જ્ઞાનમવ્યક્તમિત્યુક્તં જ્ઞેયો વૈ પઞ્ચવિંશકઃ ॥ ૨૪૩.૮૦॥

૨૪૩.૮૧/૧અવ્યક્તં ક્ષેત્રમિત્યુક્તં તથા સત્ત્વં તથેશ્વરમ્ ।
૨૪૩.૮૧/૨અનીશ્વરમતત્ત્વં ચ તત્ત્વં તત્ પઞ્ચવિંશકમ્ ॥ ૨૪૩.૮૧॥

૨૪૩.૮૨/૧સાંખ્યદર્શનમેતાવત્ પરિસંખ્યા ન વિદ્યતે ।
૨૪૩.૮૨/૨સંખ્યા પ્રકુરુતે ચૈવ પ્રકૃતિં ચ પ્રવક્ષ્યતે ॥ ૨૪૩.૮૨॥

૨૪૩.૮૩/૧ચત્વારિંશચ્ચતુર્વિંશત્ પ્રતિસંખ્યાય તત્ત્વતઃ ।
૨૪૩.૮૩/૨સંખ્યા સહસ્રકૃત્યા તુ નિસ્તત્ત્વઃ પઞ્ચવિંશકઃ ॥ ૨૪૩.૮૩॥

૨૪૩.૮૪/૧પઞ્ચવિંશત્ પ્રબુદ્ધાત્મા બુધ્યમાન ઇતિ શ્રુતઃ ।
૨૪૩.૮૪/૨યદા બુધ્યતિ આત્માનં તદા ભવતિ કેવલઃ ॥ ૨૪૩.૮૪॥

૨૪૩.૮૫/૧સમ્યગ્દર્શનમેતાવદ્ ભાષિતં તવ તત્ત્વતઃ ।
૨૪૩.૮૫/૨એવમેતદ્ વિજાનન્તઃ સામ્યતાં પ્રતિયાન્ત્યુત ॥ ૨૪૩.૮૫॥

૨૪૩.૮૬/૧સમ્યઙ્નિદર્શનં નામ પ્રત્યક્ષં પ્રકૃતેસ્તથા ।
૨૪૩.૮૬/૨ગુણવત્ત્વાદ્ યથૈતાનિ નિર્ગુણેભ્યસ્તથા ભવેત્ ॥ ૨૪૩.૮૬॥

૨૪૩.૮૭/૧ન ત્વેવં વર્તમાનાનામાવૃત્તિર્વર્તતે પુનઃ ।
૨૪૩.૮૭/૨વિદ્યતે ક્ષરભાવશ્ચ ન પરસ્પરમવ્યયમ્ ॥ ૨૪૩.૮૭॥

૨૪૩.૮૮/૧પશ્યન્ત્યમતયો યે ન સમ્યક્ તેષુ ચ દર્શનમ્ ।
૨૪૩.૮૮/૨તે વ્યક્તિં પ્રતિપદ્યન્તે પુનઃ પુનરરિંદમ ॥ ૨૪૩.૮૮॥

૨૪૩.૮૯/૧સર્વમેતદ્ વિજાનન્તો ન સર્વસ્ય પ્રબોધનાત્ ।

૨૪૩.૮૯/૨વ્યક્તિભૂતા ભવિષ્યન્તિ વ્યક્તસ્યૈવાનુવર્તનાત્ ॥ ૨૪૩.૮૯॥

૨૪૩.૯૦/૧સર્વમવ્યક્તમિત્યુક્તમસર્વઃ સર્વં પઞ્ચવિંશકઃ ।
૨૪૩.૯૦/૨ય એવમભિજાનન્તિ ન ભયં તેષુ વિદ્યતે ॥ ૨૪૩.૯૦॥

૨૪૪.૧/૧વસિષ્ઠ ઉવાચ । સાંખ્યદર્શનમેતાવદ્ ઉક્તં તે નૃપસત્તમ ।
૨૪૪.૧/૨વિદ્યાવિદ્યે ત્વિદાનીં મે ત્વં નિબોધાનુપૂર્વશઃ ॥ ૨૪૪.૧॥

૨૪૪.૨/૧અભેદ્યમાહુરવ્યક્તં સર્ગપ્રલયધર્મિણઃ ।
૨૪૪.૨/૨સર્ગપ્રલય ઇત્યુક્તં વિદ્યાવિદ્યે ચ વિંશકઃ ॥ ૨૪૪.૨॥

૨૪૪.૩/૧પરસ્પરસ્ય વિદ્યા વૈ તન્ નિબોધાનુપૂર્વશઃ ।
૨૪૪.૩/૨યથોક્તમ્ ઋષિભિસ્તાત સાંખ્યસ્યાતિનિદર્શનમ્ ॥ ૨૪૪.૩॥

૨૪૪.૪/૧કર્મેન્દ્રિયાણાં સર્વેષાં વિદ્યા બુદ્ધીન્દ્રિયં સ્મૃતમ્ ।
૨૪૪.૪/૨બુદ્ધીન્દ્રિયાણાં ચ તથા વિશેષા ઇતિ નઃ શ્રુતમ્ ॥ ૨૪૪.૪॥

૨૪૪.૫/૧વિષયાણાં મનસ્તેષાં વિદ્યામાહુર્મનીષિણઃ ।
૨૪૪.૫/૨મનસઃ પઞ્ચ ભૂતાનિ વિદ્યા ઇત્યભિચક્ષતે ॥ ૨૪૪.૫॥

૨૪૪.૬/૧અહંકારસ્તુ ભૂતાનાં પઞ્ચાનાં નાત્ર સંશયઃ ।
૨૪૪.૬/૨અહંકારસ્તથા વિદ્યા બુદ્ધિર્વિદ્યા નરેશ્વર ॥ ૨૪૪.૬॥

૨૪૪.૭/૧બુદ્ધ્યા પ્રકૃતિરવ્યક્તં તત્ત્વાનાં પરમેશ્વરઃ ।
૨૪૪.૭/૨વિદ્યા જ્ઞેયા નરશ્રેષ્ઠ વિધિશ્ચ પરમઃ સ્મૃતઃ ॥ ૨૪૪.૭॥

૨૪૪.૮/૧અવ્યક્તમપરં પ્રાહુર્વિદ્યા વૈ પઞ્ચવિંશકઃ ।
૨૪૪.૮/૨સર્વસ્ય સર્વમિત્યુક્તં જ્ઞેયજ્ઞાનસ્ય પારગઃ ॥ ૨૪૪.૮॥

૨૪૪.૯/૧જ્ઞાનમવ્યક્તમિત્યુક્તં જ્ઞેયં વૈ પઞ્ચવિંશકમ્ ।
૨૪૪.૯/૨તથૈવ જ્ઞાનમવ્યક્તં વિજ્ઞાતા પઞ્ચવિંશકઃ ॥ ૨૪૪.૯॥

૨૪૪.૧૦/૧વિદ્યાવિદ્યે તુ તત્ત્વેન મયોક્તે વૈ વિશેષતઃ ।
૨૪૪.૧૦/૨અક્ષરં ચ ક્ષરં ચૈવ યદ્ ઉક્તં તન્ નિબોધ મે ॥ ૨૪૪.૧૦॥

૨૪૪.૧૧/૧ઉભાવેતૌ ક્ષરાવુક્તૌ ઉભાવેતાવનક્ષરૌ ।
૨૪૪.૧૧/૨કારણં તુ પ્રવક્ષ્યામિ યથાજ્ઞાનં તુ જ્ઞાનતઃ ॥ ૨૪૪.૧૧॥

૨૪૪.૧૨/૧અનાદિનિધનાવેતૌ ઉભાવેવેશ્વરૌ મતૌ ।
૨૪૪.૧૨/૨તત્ત્વસંજ્ઞાવુભાવેવ પ્રોચ્યેતે જ્ઞાનચિન્તકૈઃ ॥ ૨૪૪.૧૨॥

૨૪૪.૧૩/૧સર્ગપ્રલયધર્મિત્વાદ્ અવ્યક્તં પ્રાહુરવ્યયમ્ ।
૨૪૪.૧૩/૨તદ્ એતદ્ ગુણસર્ગાય વિકુર્વાણં પુનઃ પુનઃ ॥ ૨૪૪.૧૩॥

૨૪૪.૧૪/૧ગુણાનાં મહદાદીનામુત્પદ્યતિ પરસ્પરમ્ ।
૨૪૪.૧૪/૨અધિષ્ઠાનં ક્ષેત્રમાહુરેતદ્ વૈ પઞ્ચવિંશકમ્ ॥ ૨૪૪.૧૪॥

૨૪૪.૧૫/૧યદ્ અન્તર્ગુણજાલં તુ તદ્ વ્યક્તાત્મનિ સંક્ષિપેત્ ।
૨૪૪.૧૫/૨તદ્ અહં તદ્ ગુણૈસ્તૈસ્તુ પઞ્ચવિંશે વિલીયતે ॥ ૨૪૪.૧૫॥

૨૪૪.૧૬/૧ગુણા ગુણેષુ લીયન્તે તદ્ એકા પ્રકૃતિર્ભવેત્ ।
૨૪૪.૧૬/૨ક્ષેત્રજ્ઞોઽપિ તદા તાવત્ ક્ષેત્રજ્ઞઃ સમ્પ્રણીયતે ॥ ૨૪૪.૧૬॥

૨૪૪.૧૭/૧યદાક્ષરં પ્રકૃતિર્યં ગચ્છતે ગુણસંજ્ઞિતા ।
૨૪૪.૧૭/૨નિર્ગુણત્વં ચ વૈ દેહે ગુણેષુ પરિવર્તનાત્ ॥ ૨૪૪.૧૭॥

૨૪૪.૧૮/૧એવમેવ ચ ક્ષેત્રજ્ઞઃ ક્ષેત્રજ્ઞાનપરિક્ષયાત્ ।
૨૪૪.૧૮/૨પ્રકૃત્યા નિર્ગુણસ્ત્વેષ ઇત્યેવમનુશુશ્રુમ ॥ ૨૪૪.૧૮॥

૨૪૪.૧૯/૧ક્ષરો ભવત્યેષ યદા ગુણવતી ગુણેષ્વથ ।
૨૪૪.૧૯/૨પ્રકૃતિં ત્વથ જાનાતિ નિર્ગુણત્વં તથાત્મનઃ ॥ ૨૪૪.૧૯॥

૨૪૪.૨૦/૧તથા વિશુદ્ધો ભવતિ પ્રકૃતેઃ પરિવર્જનાત્ ।
૨૪૪.૨૦/૨અન્યોઽહમન્યેયમિતિ યદા બુધ્યતિ બુદ્ધિમાન્ ॥ ૨૪૪.૨૦॥

૨૪૪.૨૧/૧તદૈષોઽવ્યથતામેતિ ન ચ મિશ્રત્વમાવ્રજેત્ ।
૨૪૪.૨૧/૨પ્રકૃત્યા ચૈષ રાજેન્દ્ર મિશ્રોઽન્યોઽન્યસ્ય દૃશ્યતે ॥ ૨૪૪.૨૧॥

૨૪૪.૨૨/૧યદા તુ ગુણજાલં તત્ પ્રાકૃતં વિજુગુપ્સતે ।
૨૪૪.૨૨/૨પશ્યતે ચ પરં પશ્યંસ્તદા પશ્યન્ નુ સંસૃજેત્ ॥ ૨૪૪.૨૨॥

૨૪૪.૨૩/૧કિં મયા કૃતમેતાવદ્ યોઽહં કાલનિમજ્જનઃ ।
૨૪૪.૨૩/૨યથા મત્સ્યો હ્યભિજ્ઞાનાદ્ અનુવર્તિતવાઞ્ જલમ્ ॥ ૨૪૪.૨૩॥

૨૪૪.૨૪/૧અહમેવ હિ સમ્મોહાદ્ અન્યમન્યં જનાજ્જનમ્ ।
૨૪૪.૨૪/૨મત્સ્યો યથોદકજ્ઞાનાદ્ અનુવર્તિતવાન્ ઇહ ॥ ૨૪૪.૨૪॥

૨૪૪.૨૫/૧મત્સ્યોઽન્યત્વમથાજ્ઞાનાદ્ ઉદકાન્ નાભિમન્યતે ।
૨૪૪.૨૫/૨આત્માનં તદ્ અવજ્ઞાનાદ્ અન્યં ચૈવ ન વેદ્મ્યહમ્ ॥ ૨૪૪.૨૫॥

૨૪૪.૨૬/૧મમાસ્તુ ધિક્ કુબુદ્ધસ્ય યોઽહં મગ્ન ઇમં પુનઃ ।
૨૪૪.૨૬/૨અનુવર્તિતવાન્ મોહાદ્ અન્યમન્યં જનાજ્જનમ્ ॥ ૨૪૪.૨૬॥

૨૪૪.૨૭/૧અયમનુભવેદ્ બન્ધુરનેન સહ મે ક્ષયમ્ ।
૨૪૪.૨૭/૨સામ્યમેકત્વતાં યાતો યાદૃશસ્તાદૃશસ્ત્વહમ્ ॥ ૨૪૪.૨૭॥

૨૪૪.૨૮/૧તુલ્યતામિહ પશ્યામિ સદૃશોऽહમનેન વૈ ।
૨૪૪.૨૮/૨અયં હિ વિમલો વ્યક્તમહમીદૃશકસ્તદા ॥ ૨૪૪.૨૮॥

૨૪૪.૨૯/૧યોऽહમજ્ઞાનસમ્મોહાદ્ અજ્ઞયા સમ્પ્રવૃત્તવાન્ ।
૨૪૪.૨૯/૨સંસર્ગાદ્ અતિસંસર્ગાત્ સ્થિતઃ કાલમિમં ત્વહમ્ ॥ ૨૪૪.૨૯॥

૨૪૪.૩૦/૧સોऽહમેવં વશીભૂતઃ કાલમેતં ન બુદ્ધવાન્ ।
૨૪૪.૩૦/૨ઉત્તમાધમમધ્યાનાં તામહં કથમાવસે ॥ ૨૪૪.૩૦॥

૨૪૪.૩૧/૧સમાનમાયયા ચેહ સહવાસમહં કથમ્ ।
૨૪૪.૩૧/૨ગચ્છામ્યબુદ્ધભાવત્વાદ્ ઇહેદાનીં સ્થિરો ભવ ॥ ૨૪૪.૩૧॥

૨૪૪.૩૨/૧સહવાસં ન યાસ્યામિ કાલમેતં વિવઞ્ચનાત્ ।
૨૪૪.૩૨/૨વઞ્ચિતો હ્યનયા યદ્ ધિ નિર્વિકારો વિકારયા ॥ ૨૪૪.૩૨॥

૨૪૪.૩૩/૧ન તત્ તદપરાદ્ધં સ્યાદ્ અપરાધો હ્યયં મમ ।
૨૪૪.૩૩/૨યોऽહમત્રાભવં સક્તઃ પરાઙ્મુખમુપસ્થિતઃ ॥ ૨૪૪.૩૩॥

૨૪૪.૩૪/૧તતોऽસ્મિન્ બહુરૂપોऽથ સ્થિતો મૂર્તિરમૂર્તિમાન્ ।
૨૪૪.૩૪/૨અમૂર્તિશ્ચાપ્યમૂર્તાત્મા મમત્વેન પ્રધર્ષિતઃ ॥ ૨૪૪.૩૪॥

૨૪૪.૩૫/૧પ્રકૃત્યા ચ તયા તેન તાસુ તાસ્વિહ યોનિષુ ।
૨૪૪.૩૫/૨નિર્મમસ્ય મમત્વેન વિકૃતં તાસુ તાસુ ચ ॥ ૨૪૪.૩૫॥

૨૪૪.૩૬/૧યોનિષુ વર્તમાનેન નષ્ટસંજ્ઞેન ચેતસા ।
૨૪૪.૩૬/૨સમતા ન મયા કાચિદ્ અહંકારે કૃતા મયા ॥ ૨૪૪.૩૬॥

૨૪૪.૩૭/૧આત્માનં બહુધા કૃત્વા સોऽયં ભૂયો યુનક્તિ મામ્ ।
૨૪૪.૩૭/૨ઇદાનીમવબુદ્ધોऽસ્મિ નિર્મમો નિરહંકૃતઃ ॥ ૨૪૪.૩૭॥

૨૪૪.૩૮/૧મમત્વં મનસા નિત્યમહંકારકૃતાત્મકમ્ ।
૨૪૪.૩૮/૨અપલગ્નામિમાં હિત્વા સંશ્રયિષ્યે નિરામયમ્ ॥ ૨૪૪.૩૮॥

૨૪૪.૩૯/૧અનેન સામ્યં યાસ્યામિ નાનયાહમચેતસા ।
૨૪૪.૩૯/૨ક્ષેમં મમ સહાનેન નૈવૈકમનયા સહ ॥ ૨૪૪.૩૯॥

૨૪૪.૪૦/૧એવં પરમસમ્બોધાત્ પઞ્ચવિંશોऽનુબુદ્ધવાન્ ।

૨૪૪.૪૦/૨અક્ષરત્વં નિગચ્છતિ ત્યક્ત્વા ક્ષરમનામયમ્ ॥ ૨૪૪.૪૦॥

૨૪૪.૪૧/૧અવ્યક્તં વ્યક્તધર્માણં સગુણં નિર્ગુણં તથા ।
૨૪૪.૪૧/૨નિર્ગુણં પ્રથમં દૃષ્ટ્વા તાદૃગ્ ભવતિ મૈથિલ ॥ ૨૪૪.૪૧॥

૨૪૪.૪૨/૧અક્ષરક્ષરયોરેતદ્ ઉક્તં તવ નિદર્શનમ્ ।
૨૪૪.૪૨/૨મયેહ જ્ઞાનસમ્પન્નં યથા શ્રુતિનિદર્શનાત્ ॥ ૨૪૪.૪૨॥

૨૪૪.૪૩/૧નિઃસંદિગ્ધં ચ સૂક્ષ્મં ચ વિશુદ્ધં વિમલં તથા ।
૨૪૪.૪૩/૨પ્રવક્ષ્યામિ તુ તે ભૂયસ્તન્ નિબોધ યથાશ્રુતમ્ ॥ ૨૪૪.૪૩॥

૨૪૪.૪૪/૧સાંખ્યયોગો મયા પ્રોક્તઃ શાસ્ત્રદ્વયનિદર્શનાત્ ।
૨૪૪.૪૪/૨યદ્ એવ સાંખ્યશાસ્ત્રોક્તં યોગદર્શનમેવ તત્ ॥ ૨૪૪.૪૪॥

૨૪૪.૪૫/૧પ્રબોધનપરં જ્ઞાનં સાંખ્યાનામવનીપતે ।
૨૪૪.૪૫/૨વિસ્પષ્ટં પ્રોચ્યતે તત્ર શિષ્યાણાં હિતકામ્યયા ॥ ૨૪૪.૪૫॥

૨૪૪.૪૬/૧બૃહચ્ચૈવમિદં શાસ્ત્રમિત્યાહુર્વિદુષો જનાઃ ।
૨૪૪.૪૬/૨અસ્મિંશ્ચ શાસ્ત્રે યોગાનાં પુનર્ભવપુરઃસરમ્ ॥ ૨૪૪.૪૬॥

૨૪૪.૪૭/૧પઞ્ચવિંશાત્ પરં તત્ત્વં પઠ્યતે ચ નરાધિપ ।
૨૪૪.૪૭/૨સાંખ્યાનાં તુ પરં તત્ત્વં યથાવદ્ અનુવર્ણિતમ્ ॥ ૨૪૪.૪૭॥

૨૪૪.૪૮/૧બુદ્ધમપ્રતિબુદ્ધં ચ બુધ્યમાનં ચ તત્ત્વતઃ ।
૨૪૪.૪૮/૨બુધ્યમાનં ચ બુદ્ધત્વં પ્રાહુર્યોગનિદર્શનમ્ ॥ ૨૪૪.૪૮॥

૨૪૫.૧/૧વસિષ્ઠ ઉવાચ । અપ્રબુદ્ધમથાવ્યક્તમિમં ગુણનિધિં સદા ।
૨૪૫.૧/૨ગુણાનાં ધાર્યતાં તત્ત્વં સૃજત્યાક્ષિપતે તથા ॥ ૨૪૫.૧॥

૨૪૫.૨/૧અજો હિ ક્રીડયા ભૂપ વિક્રિયાં પ્રાપ્ત ઇત્યુત ।
૨૪૫.૨/૨આત્માનં બહુધા કૃત્વા નાનેવ પ્રતિચક્ષતે ॥ ૨૪૫.૨॥

૨૪૫.૩/૧એતદ્ એવં વિકુર્વાણો બુધ્યમાનો ન બુધ્યતે ।
૨૪૫.૩/૨ગુણાન્ આચરતે હ્યેષ સૃજત્યાક્ષિપતે તથા ॥ ૨૪૫.૩॥

૨૪૫.૪/૧અવ્યક્તબોધનાચ્ચૈવ બુધ્યમાનં વદન્ત્યપિ ।
૨૪૫.૪/૨ન ત્વેવં બુધ્યતેઽવ્યક્તં સગુણં તાત નિર્ગુણમ્ ॥ ૨૪૫.૪॥

૨૪૫.૫/૧કદાચિત્ ત્વેવ ખલ્વેતત્ તદ્ આહુઃ પ્રતિબુદ્ધકમ્ ।
૨૪૫.૫/૨બુધ્યતે યદિ ચાવ્યક્તમેતદ્ વૈ પઞ્ચવિંશકમ્ ॥ ૨૪૫.૫॥

૨૪૫.૬/૧બુધ્યમાનો ભવત્યેષ મમાત્મક ઇતિ શ્રુતઃ ।
૨૪૫.૬/૨અન્યોન્યપ્રતિબુદ્ધેન વદન્ત્યવ્યક્તમચ્યુતમ્ ॥ ૨૪૫.૬॥

૨૪૫.૭/૧અવ્યક્તબોધનાચ્ચૈવ બુધ્યમાનં વદન્ત્યુત ।
૨૪૫.૭/૨પઞ્ચવિંશં મહાત્માનં ન ચાસાવપિ બુધ્યતે ॥ ૨૪૫.૭॥

૨૪૫.૮/૧ષડ્વિંશં વિમલં બુદ્ધમપ્રમેયં સનાતનમ્ ।
૨૪૫.૮/૨સતતં પઞ્ચવિંશં તુ ચતુર્વિંશં વિબુધ્યતે ॥ ૨૪૫.૮॥

૨૪૫.૯/૧દૃશ્યાદૃશ્યે હ્યનુગત+ ।તત્સ્વભાવે મહાદ્યુતે ।
૨૪૫.૯/૨અવ્યક્તં ચૈવ તદ્ બ્રહ્મ બુધ્યતે તાત કેવલમ્ ॥ ૨૪૫.૯॥

૨૪૫.૧૦/૧પઞ્ચવિંશં ચતુર્વિંશમાત્માનમનુપશ્યતિ ।
૨૪૫.૧૦/૨બુધ્યમાનો યદાત્માનમન્યોઽહમિતિ મન્યતે ॥ ૨૪૫.૧૦॥

૨૪૫.૧૧/૧તદા પ્રકૃતિમાન્ એષ ભવત્યવ્યક્તલોચનઃ ।
૨૪૫.૧૧/૨બુધ્યતે ચ પરાં બુદ્ધિં વિશુદ્ધામમલાં યથા ॥ ૨૪૫.૧૧॥

૨૪૫.૧૨/૧ષડ્વિંશં રાજશાર્દૂલ તદા બુદ્ધઃ કૃતો વ્રજેત્ ।
૨૪૫.૧૨/૨તતસ્ત્યજતિ સોઽવ્યક્તં સર્ગપ્રલયધર્મિણમ્ ॥ ૨૪૫.૧૨॥

૨૪૫.૧૩/૧નિર્ગુણાં પ્રકૃતિં વેદ ગુણયુક્તામચેતનામ્ ।
૨૪૫.૧૩/૨તતઃ કેવલધર્માસૌ ભવત્યવ્યક્તદર્શનાત્ ॥ ૨૪૫.૧૩॥

૨૪૫.૧૪/૧કેવલેન સમાગમ્ય વિમુક્તાત્માનમાપ્નુયાત્ ।
૨૪૫.૧૪/૨એતત્ તુ તત્ત્વમિત્યાહુર્નિસ્તત્ત્વમજરામરમ્ ॥ ૨૪૫.૧૪॥

૨૪૫.૧૫/૧તત્ત્વસંશ્રવણાદ્ એવ તત્ત્વજ્ઞો જાયતે નૃપ ।
૨૪૫.૧૫/૨પઞ્ચવિંશતિતત્ત્વાનિ પ્રવદન્તિ મનીષિણઃ ॥ ૨૪૫.૧૫॥

૨૪૫.૧૬/૧ન ચૈવ તત્ત્વવાંસ્તાત સંસારેષુ નિમજ્જતિ ।
૨૪૫.૧૬/૨એષામુપૈતિ તત્ત્વં હિ ક્ષિપ્રં બુધ્યસ્વ લક્ષણમ્ ॥ ૨૪૫.૧૬॥

૨૪૫.૧૭/૧ષડ્વિંશોઽયમિતિ પ્રાજ્ઞો ગૃહ્યમાણોઽજરામરઃ ।
૨૪૫.૧૭/૨કેવલેન બલેનૈવ સમતાં યાત્યસંશયમ્ ॥ ૨૪૫.૧૭॥

૨૪૫.૧૮/૧ષડ્વિંશેન પ્રબુદ્ધેન બુધ્યમાનોઽપ્યબુદ્ધિમાન્ ।
૨૪૫.૧૮/૨એતન્ નાનાત્વમિત્યુક્તં સાંખ્યશ્રુતિનિદર્શનાત્ ॥ ૨૪૫.૧૮॥

૨૪૫.૧૯/૧ચેતનેન સમેતસ્ય પઞ્ચવિંશતિકસ્ય હ ।
૨૪૫.૧૯/૨એકત્વં વૈ ભવેત્ તસ્ય યદા બુદ્ધ્યાનુબુધ્યતે ॥ ૨૪૫.૧૯॥

૨૪૫.૨૦/૧બુધ્યમાનેન બુદ્ધેન સમતાં યાતિ મૈથિલ ।
૨૪૫.૨૦/૨સઙ્ગધર્મા ભવત્યેષ નિઃસઙ્ગાત્મા નરાધિપ ॥ ૨૪૫.૨૦ ॥

૨૪૫.૨૧/૧નિઃસઙ્ગાત્માનમાસાદ્ય ષડ્વિંશં કર્મજં વિદુઃ ।
૨૪૫.૨૧/૨વિભુસ્ત્યજતિ ચાવ્યક્તં યદા ત્વેતદ્ વિબુધ્યતે ॥ ૨૪૫.૨૧ ॥

૨૪૫.૨૨/૧ચતુર્વિંશમગાધં ચ ષડ્વિંશસ્ય પ્રબોધનાત્ ।
૨૪૫.૨૨/૨એષ હ્યપ્રતિબુદ્ધશ્ચ બુધ્યમાનસ્તુ તેઽનઘ ॥ ૨૪૫.૨૨ ॥

૨૪૫.૨૩/૧ઉક્તો બુદ્ધશ્ચ તત્ત્વેન યથાશ્રુતિનિદર્શનાત્ ।
૨૪૫.૨૩/૨મશકોદુમ્બરે યદ્વદ્ અન્યત્વં તદ્વદ્ એતયોઃ ॥ ૨૪૫.૨૩ ॥

૨૪૫.૨૪/૧મત્સ્યોદકે યથા તદ્વદ્ અન્યત્વમુપલભ્યતે ।
૨૪૫.૨૪/૨એવમેવ ચ ગન્તવ્યં નાનાત્વૈકત્વમેતયોઃ ॥ ૨૪૫.૨૪ ॥

૨૪૫.૨૫/૧એતાવન્ મોક્ષ ઇત્યુક્તો જ્ઞાનવિજ્ઞાનસંજ્ઞિતઃ ।
૨૪૫.૨૫/૨પઞ્ચવિંશતિકસ્યાશુ યોઽયં દેહે પ્રવર્તતે ॥ ૨૪૫.૨૫ ॥

૨૪૫.૨૬/૧એષ મોક્ષયિતવ્યૈતિ પ્રાહુરવ્યક્તગોચરાત્ ।
૨૪૫.૨૬/૨સોઽયમેવં વિમુચ્યેત નાન્યથેતિ વિનિશ્ચયઃ ॥ ૨૪૫.૨૬ ॥

૨૪૫.૨૭/૧પરશ્ચ પરધર્મા ચ ભવત્યેવ સમેત્ય વૈ ।
૨૪૫.૨૭/૨વિશુદ્ધધર્મા શુદ્ધેન નાશુદ્ધેન ચ બુદ્ધિમાન્ ॥ ૨૪૫.૨૭ ॥

૨૪૫.૨૮/૧વિમુક્તધર્મા બુદ્ધેન સમેત્ય પુરુષર્ષભ ।
૨૪૫.૨૮/૨વિયોગધર્મિણા ચૈવ વિમુક્તાત્મા ભવત્યથ ॥ ૨૪૫.૨૮ ॥

૨૪૫.૨૯/૧વિમોક્ષિણા વિમોક્ષશ્ચ સમેત્યેહ તથા ભવેત્ ।
૨૪૫.૨૯/૨શુચિકર્મા શુચિશ્ચૈવ ભવત્યમિતબુદ્ધિમાન્ ॥ ૨૪૫.૨૯ ॥

૨૪૫.૩૦/૧વિમલાત્મા ચ ભવતિ સમેત્ય વિમલાત્મના ।
૨૪૫.૩૦/૨કેવલાત્મા તથા ચૈવ કેવલેન સમેત્ય વૈ ।
૨૪૫.૩૦/૩સ્વતન્ત્રશ્ચ સ્વતન્ત્રેણ સ્વતન્ત્રત્વમવાપ્યતે ॥ ૨૪૫.૩૦ ॥

૨૪૫.૩૧/૧એતાવદ્ એતત્ કથિતં મયા તે ।
૨૪૫.૩૧/૨તથ્યં મહારાજ યથાર્થતત્ત્વમ્ ।
૨૪૫.૩૧/૩અમત્સરસ્ત્વં પ્રતિગૃહ્ય બુદ્ધ્યા ।
૨૪૫.૩૧/૪સનાતનં બ્રહ્મ વિશુદ્ધમાદ્યમ્ ॥ ૨૪૫.૩૧ ॥

૨૪૫.૩૨/૧તદ્ વેદનિષ્ઠસ્ય જનસ્ય રાજન્ ।
૨૪૫.૩૨/૨પ્રદેયમેતત્ પરમં ત્વયા ભવેત્ ।
૨૪૫.૩૨/૩વિધિત્સમાનાય નિબોધકારકમ્ ।
૨૪૫.૩૨/૪પ્રબોધહેતોઃ પ્રણતસ્ય શાસનમ્ ॥ ૨૪૫.૩૨॥

૨૪૫.૩૩/૧ન દેયમેતચ્ચ યથાનૃતાત્મને ।
૨૪૫.૩૩/૨શઠાય ક્લીબાય ન જિહ્મબુદ્ધયે ।
૨૪૫.૩૩/૩ન પણ્ડિતજ્ઞાનપરોપતાપિને ।
૨૪૫.૩૩/૪દેયં તથા શિષ્યવિબોધનાય ॥ ૨૪૫.૩૩॥

૨૪૫.૩૪/૧શ્રદ્ધાન્વિતાયાથ ગુણાન્વિતાય ।
૨૪૫.૩૪/૨પરાપવાદાદ્ વિરતાય નિત્યમ્ ।
૨૪૫.૩૪/૩વિશુદ્ધયોગાય બુધાય ચૈવ ।
૨૪૫.૩૪/૪કૃપાવતેऽથ ક્ષમિણે હિતાય ॥ ૨૪૫.૩૪॥

૨૪૫.૩૫/૧વિવિક્તશીલાય વિધિપ્રિયાય ।
૨૪૫.૩૫/૨વિવાદહીનાય બહુશ્રુતાય ।
૨૪૫.૩૫/૩વિનીતવેશાય નહૈતુકાત્મને ।
૨૪૫.૩૫/૪સદૈવ ગુહ્યં ત્વિદમેવ દેયમ્ ॥ ૨૪૫.૩૫॥

૨૪૫.૩૬/૧એતૈર્ગુણૈર્હીનતમે ન દેયમ્ ।
૨૪૫.૩૬/૨એતત્ પરં બ્રહ્મ વિશુદ્ધમાહુઃ ।
૨૪૫.૩૬/૩ન શ્રેયસે યોક્ષ્યતિ તાદૃશે કૃતમ્ ।
૨૪૫.૩૬/૪ધર્મપ્રવક્તારમપાત્રદાનાત્ ॥ ૨૪૫.૩૬॥

૨૪૫.૩૭/૧પૃથ્વીમિમાં વા યદિ રત્નપૂર્ણામ્ ।
૨૪૫.૩૭/૨દદ્યાદ્ અદેયં ત્વિદમવ્રતાય ।
૨૪૫.૩૭/૩જિતેન્દ્રિયાય પ્રયતાય દેયમ્ ।
૨૪૫.૩૭/૪દેયં પરં તત્ત્વવિદે નરેન્દ્ર ॥ ૨૪૫.૩૭॥

૨૪૫.૩૮/૧કરાલ મા તે ભયમસ્તિ કિંચિદ્ ।
૨૪૫.૩૮/૨એતચ્છ્રુતં બ્રહ્મ પરં ત્વયાદ્ય ।
૨૪૫.૩૮/૩યથાવદ્ ઉક્તં પરમં પવિત્રમ્ ।
૨૪૫.૩૮/૪વિશોકમત્યન્તમનાદિમધ્યમ્ ॥ ૨૪૫.૩૮॥

૨૪૫.૩૯/૧અગાધમેતદ્ અજરામરં ચ ।
૨૪૫.૩૯/૨નિરામયં વીતભયં શિવં ચ ।

૨૪૫.૩૯/૩સમીક્ષ્ય મોહં પરવાદસંજ્ઞમ્ ।
૨૪૫.૩૯/૪એતસ્ય તત્ત્વાર્થમિમં વિદિત્વા ॥ ૨૪૫.૩૯॥

૨૪૫.૪૦/૧અવાપ્તમેતદ્ ધિ પુરા સનાતનાદ્ ।
૨૪૫.૪૦/૨ધિરણ્યગર્ભાદ્ ધિ તતો નરાધિપ ।
૨૪૫.૪૦/૩પ્રસાદ્ય યત્નેન તમુગ્રતેજસમ્ ।
૨૪૫.૪૦/૪સનાતનં બ્રહ્મ યથા ત્વયૈતત્ ॥ ૨૪૫.૪૦॥

૨૪૫.૪૧/૧પૃષ્ટસ્ત્વયા ચાસ્મિ યથા નરેન્દ્ર ।
૨૪૫.૪૧/૨તથા મયેદં ત્વયિ નોક્તમન્યત્ ।
૨૪૫.૪૧/૩યથાવાપ્તં બ્રહ્મણો મે નરેન્દ્ર ।
૨૪૫.૪૧/૪મહાજ્ઞાનં મોક્ષવિદાં પરાયણમ્ ॥ ૨૪૫.૪૧॥

૨૪૫.૪૨/૧વ્યાસ ઉવાચ । એતદ્ ઉક્તં પરં બ્રહ્મ યસ્માન્ નાવર્તતે પુનઃ ।
૨૪૫.૪૨/૨પઞ્ચવિંશં મુનિશ્રેષ્ઠા વસિષ્ઠેન યથા પુરા ॥ ૨૪૫.૪૨॥

૨૪૫.૪૩/૧પુનરાવૃત્તિમાપ્નોતિ પરમં જ્ઞાનમવ્યયમ્ ।
૨૪૫.૪૩/૨નાતિ બુધ્યતિ તત્ત્વેન બુધ્યમાનોઽજરામરમ્ ॥ ૨૪૫.૪૩॥

૨૪૫.૪૪/૧એતન્ નિઃશ્રેયસકરં જ્ઞાનં ભોઃ પરમં મયા ।
૨૪૫.૪૪/૨કથિતં તત્ત્વતો વિપ્રાઃ શ્રુત્વા દેવર્ષિતો દ્વિજાઃ ॥ ૨૪૫.૪૪॥

૨૪૫.૪૫/૧હિરણ્યગર્ભાદ્ ઋષિણા વસિષ્ઠેન સમાહૃતમ્ ।
૨૪૫.૪૫/૨વસિષ્ઠાદ્ ઋષિશાર્દૂલો નારદોઽવાપ્તવાન્ ઇદમ્ ॥ ૨૪૫.૪૫॥

૨૪૫.૪૬/૧નારદાદ્ વિદિતં મહ્યમેતદ્ ઉક્તં સનાતનમ્ ।
૨૪૫.૪૬/૨મા શુચધ્વં મુનિશ્રેષ્ઠાઃ શ્રુત્વૈતત્ પરમં પદમ્ ॥ ૨૪૫.૪૬॥

૨૪૫.૪૭/૧યેન ક્ષરાક્ષરે ભિન્ને ન ભયં તસ્ય વિદ્યતે ।
૨૪૫.૪૭/૨વિદ્યતે તુ ભયં યસ્ય યો નૈનં વેત્તિ તત્ત્વતઃ ॥ ૨૪૫.૪૭॥

૨૪૫.૪૮/૧અવિજ્ઞાનાચ્ચ મૂઢાત્મા પુનઃ પુનરુપદ્રવાન્ ।
૨૪૫.૪૮/૨પ્રેત્ય જાતિસહસ્રાણિ મરણાન્તાન્યુપાશ્નુતે ॥ ૨૪૫.૪૮॥

૨૪૫.૪૯/૧દેવલોકં તથા તિર્યઙ્ માનુષ્યમપિ ચાશ્નુતે ।
૨૪૫.૪૯/૨યદિ વા મુચ્યતે વાપિ તસ્માદ્ અજ્ઞાનસાગરાત્ ॥ ૨૪૫.૪૯॥

૨૪૫.૫૦/૧અજ્ઞાનસાગરે ઘોરે હ્યવ્યક્તાગાધ ઉચ્યતે ।
૨૪૫.૫૦/૨અહન્યહનિ મજ્જન્તિ યત્ર ભૂતાનિ ભો દ્વિજાઃ ॥ ૨૪૫.૫૦॥

૨૪૫.૫૧/૧તસ્માદ્ અગાધાદ્ અવ્યક્તાદ્ ઉપક્ષીણાત્ સનાતનાત્ ।
૨૪૫.૫૧/૨તસ્માદ્ યૂયં વિરજસ્કા વિતમસ્કાશ્ચ ભો દ્વિજાઃ ॥ ૨૪૫.૫૧॥

૨૪૫.૫૨/૧એવં મયા મુનિશ્રેષ્ઠાઃ સારાત્ સારતરં પરમ્ ।
૨૪૫.૫૨/૨કથિતં પરમં મોક્ષં યં જ્ઞાત્વા ન નિવર્તતે ॥ ૨૪૫.૫૨॥

૨૪૫.૫૩/૧ન નાસ્તિકાય દાતવ્યં નાભક્તાય કદાચન ।
૨૪૫.૫૩/૨ન દુષ્ટમતયે વિપ્રા ન શ્રદ્ધાવિમુખાય ચ ॥ ૨૪૫.૫૩॥

૨૪૬.૧/૧લોમહર્ષણ ઉવાચ । એવં પુરા મુનીન્ વ્યાસઃ પુરાણં શ્લક્ષ્ણયા ગિરા ।
૨૪૬.૧/૨દશાષ્ટદોષરહિતૈર્વાક્યૈઃ સારતરૈર્દ્વિજાઃ ॥ ૨૪૬.૧॥

૨૪૬.૨/૧પૂર્ણમસ્તમલૈઃ શુદ્ધૈર્ નાનાશાસ્ત્રસમુચ્ચયૈઃ ।
૨૪૬.૨/૨જાતિશુદ્ધસમાયુક્તં સાધુશબ્દોપશોભિતમ્ ॥ ૨૪૬.૨॥

૨૪૬.૩/૧પૂર્વપક્ષોક્તિસિદ્ધાન્ત+ ।પરિનિષ્ઠાસમન્વિતમ્ ।
૨૪૬.૩/૨શ્રાવયિત્વા યથાન્યાયં વિરરામ મહામતિઃ ॥ ૨૪૬.૩॥

૨૪૬.૪/૧તેઽપિ શ્રુત્વા મુનિશ્રેષ્ઠાઃ પુરાણં વેદસમ્મિતમ્ ।
૨૪૬.૪/૨આદ્યં બ્રાહ્માભિધાનં ચ સર્વવાઞ્છાફલપ્રદમ્ ॥ ૨૪૬.૪॥

૨૪૬.૫/૧હૃષ્ટા બભૂવુઃ સુપ્રીતા વિસ્મિતાશ્ચ પુનઃ પુનઃ ।
૨૪૬.૫/૨પ્રશશંસુસ્તદા વ્યાસં કૃષ્ણદ્વૈપાયનં મુનિમ્ ॥ ૨૪૬.૫॥

૨૪૬.૬/૧મુનય ઊચુઃ । અહો ત્વયા મુનિશ્રેષ્ઠ પુરાણં શ્રુતિસમ્મિતમ્ ।
૨૪૬.૬/૨સર્વાભિપ્રેતફલદં સર્વપાપહરં પરમ્ ॥ ૨૪૬.૬॥

૨૪૬.૭/૧પ્રોક્તં શ્રુતં તથાસ્માભિર્વિચિત્રપદમક્ષરમ્ ।
૨૪૬.૭/૨ન તેઽસ્ત્યવિદિતં કિંચિત્ ત્રિષુ લોકેષુ વૈ પ્રભો ॥ ૨૪૬.૭॥

૨૪૬.૮/૧સર્વજ્ઞસ્ત્વં મહાભાગ દેવેષ્વિવ બૃહસ્પતિઃ ।
૨૪૬.૮/૨નમસ્યામો મહાપ્રાજ્ઞં બ્રહ્મિષ્ઠં ત્વાં મહામુનિમ્ ॥ ૨૪૬.૮॥

૨૪૬.૯/૧યેન ત્વયા તુ વેદાર્થા ભારતે પ્રકટીકૃતાઃ ।
૨૪૬.૯/૨કઃ શક્નોતિ ગુણાન્ વક્તું તવ સર્વાન્ મહામુને ॥ ૨૪૬.૯॥

૨૪૬.૧૦/૧અધીત્ય ચતુરો વેદાન્ સાઙ્ગાન્ વ્યાકરણાનિ ચ ।
૨૪૬.૧૦/૨કૃતવાન્ ભારતં શાસ્ત્રં તસ્મૈ જ્ઞાનાત્મને નમઃ ॥ ૨૪૬.૧૦॥

૨૪૬.૧૧/૧નમોઽસ્તુ તે વ્યાસ વિશાલબુદ્ધે ।
૨૪૬.૧૧/૨ફુલ્લારવિન્દાયતપત્રનેત્ર ।

૨૪૬.૧૧/૩યેન ત્વયા ભારતતૈલપૂર્ણઃ ।
૨૪૬.૧૧/૪પ્રજ્વાલિતો જ્ઞાનમયઃ પ્રદીપઃ ॥ ૨૪૬.૧૧॥

૨૪૬.૧૨/૧અજ્ઞાનતિમિરાન્ધાનાં ભ્રામિતાનાં કુદૃષ્ટિભિઃ ।
૨૪૬.૧૨/૨જ્ઞાનાઞ્જનશલાકેન ત્વયા ચોન્મીલિતા દૃશઃ ॥ ૨૪૬.૧૨॥

૨૪૬.૧૩/૧એવમુક્ત્વા સમભ્યર્ચ્ય વ્યાસં તે ચૈવ પૂજિતાઃ ।
૨૪૬.૧૩/૨જગ્મુર્યથાગતં સર્વે કૃતકૃત્યાઃ સ્વમાશ્રમમ્ ॥ ૨૪૬.૧૩॥

૨૪૬.૧૪/૧તથા મયા મુનિશ્રેષ્ઠા કથિતં હિ સનાતનમ્ ।
૨૪૬.૧૪/૨પુરાણં સુમહાપુણ્યં સર્વપાપપ્રણાશનમ્ ॥ ૨૪૬.૧૪॥

૨૪૬.૧૫/૧યથા ભવદ્ભિઃ પૃષ્ટોઽહં સમ્પ્રશ્નં દ્વિજસત્તમાઃ ।
૨૪૬.૧૫/૨વ્યાસપ્રસાદાત્ તત્ સર્વં મયા સમ્પરિકીર્તિતમ્ ॥ ૨૪૬.૧૫॥

૨૪૬.૧૬/૧ઇદં ગૃહસ્થૈઃ શ્રોતવ્યં યતિભિર્બ્રહ્મચારિભિઃ ।
૨૪૬.૧૬/૨ધનસૌખ્યપ્રદં નૃણાં પવિત્રં પાપનાશનમ્ ॥ ૨૪૬.૧૬॥

૨૪૬.૧૭/૧તથા બ્રહ્મપરૈર્વિપ્રૈર્બ્રાહ્મણાદ્યૈઃ સુસંયતૈઃ ।
૨૪૬.૧૭/૨શ્રોતવ્યં સુપ્રયત્નેન સમ્યક્ શ્રેયોભિકાઙ્ક્ષિભિઃ ॥ ૨૪૬.૧૭॥

૨૪૬.૧૮/૧પ્રાપ્નોતિ બ્રાહ્મણો વિદ્યાં ક્ષત્રિયો વિજયં રણે ।
૨૪૬.૧૮/૨વૈશ્યસ્તુ ધનમક્ષય્યં શૂદ્રઃ સુખમવાપ્નુયાત્ ॥ ૨૪૬.૧૮॥

૨૪૬.૧૯/૧યં યં કામમભિધ્યાયઞ્ શ઼ૃણોતિ પુરુષઃ શુચિઃ ।
૨૪૬.૧૯/૨તં તં કામમવાપ્નોતિ નરો નાસ્ત્યત્ર સંશયઃ ॥ ૨૪૬.૧૯॥

૨૪૬.૨૦/૧પુરાણં વૈષ્ણવં ત્વેતત્ સર્વકિલ્બિષનાશનમ્ ।
૨૪૬.૨૦/૨વિશિષ્ટં સર્વશાસ્ત્રેભ્યઃ પુરુષાર્થોપપાદકમ્ ॥ ૨૪૬.૨૦॥

૨૪૬.૨૧/૧એતદ્ વો યન્ મયાખ્યાતં પુરાણં વેદસમ્મિતમ્ ।
૨૪૬.૨૧/૨શ્રુતેઽસ્મિન્ સર્વદોષોત્થઃ પાપરાશિઃ પ્રણશ્યતિ ॥ ૨૪૬.૨૧॥

૨૪૬.૨૨/૧પ્રયાગે પુષ્કરે ચૈવ કુરુક્ષેત્રે તથાર્બુદે ।
૨૪૬.૨૨/૨ઉપોષ્ય યદ્ અવાપ્નોતિ તદ્ અસ્ય શ્રવણાન્ નરઃ ॥ ૨૪૬.૨૨॥

૨૪૬.૨૩/૧યદ્ અગ્નિહોત્રે સુહુતે વર્ષે નાપ્નોતિ વૈ ફલમ્ ।
૨૪૬.૨૩/૨મહાપુણ્યમયં વિપ્રાસ્તદ્ અસ્ય શ્રવણાત્ સકૃત્ ॥ ૨૪૬.૨૩॥

૨૪૬.૨૪/૧યજ્જ્યેષ્ઠશુક્લદ્વાદશ્યાં સ્નાત્વા વૈ યમુનાજલે ।
૨૪૬.૨૪/૨મથુરાયાં હરિં દૃષ્ટ્વા પ્રાપ્નોતિ પુરુષઃ ફલમ્ ॥ ૨૪૬.૨૪॥

૨૪૬.૨૫/૧તદ્ આપ્નોતિ ફલં સમ્યક્ સમાધાનેન કીર્તનાત્ ।
૨૪૬.૨૫/૨પુરાણેऽસ્ય હિતો વિપ્રાઃ કેશવાર્પિતમાનસઃ ॥ ૨૪૬.૨૫॥

૨૪૬.૨૬/૧યત્ ફલં ક્રિયમાલોક્ય પુરુષોऽથ લભેન્ નરઃ ।
૨૪૬.૨૬/૨તત્ ફલં સમવાપ્નોતિ યઃ પઠેચ્છૃણુયાદ્ અપિ ॥ ૨૪૬.૨૬॥

૨૪૬.૨૭/૧ઇદં યઃ શ્રદ્ધયા નિત્યં પુરાણં વેદસમ્મિતમ્ ।
૨૪૬.૨૭/૨યઃ પઠેચ્છૃણુયાન્ મર્ત્યઃ સ યાતિ ભુવનં હરેઃ ॥ ૨૪૬.૨૭॥

૨૪૬.૨૮/૧શ્રાવયેદ્ બ્રાહ્મણો યસ્તુ સદા પર્વસુ સંયતઃ ।
૨૪૬.૨૮/૨એકાદશ્યાં દ્વાદશ્યાં ચ વિષ્ણુલોકં સ ગચ્છતિ ॥ ૨૪૬.૨૮॥

૨૪૬.૨૯/૧ઇદં યશસ્યમાયુષ્યં સુખદં કીર્તિવર્ધનમ્ ।
૨૪૬.૨૯/૨બલપુષ્ટિપ્રદં નૃણાં ધન્યં દુઃસ્વપ્નનાશનમ્ ॥ ૨૪૬.૨૯॥

૨૪૬.૩૦/૧ત્રિસંધ્યં યઃ પઠેદ્ વિદ્વાઞ્ શ્રદ્ધયા સુસમાહિતઃ ।
૨૪૬.૩૦/૨ઇદં વરિષ્ઠમાખ્યાનં સ સર્વમીપ્સિતં લભેત્ ॥ ૨૪૬.૩૦॥

૨૪૬.૩૧/૧રોગાર્તો મુચ્યતે રોગાદ્ બદ્ધો મુચ્યેત બન્ધનાત્ ।
૨૪૬.૩૧/૨ભયાદ્ વિમુચ્યતે ભીત આપદાપન્ન આપદઃ ॥ ૨૪૬.૩૧॥

૨૪૬.૩૨/૧જાતિસ્મરત્વં વિદ્યાં ચ પુત્રાન્ મેધાં પશૂન્ ધૃતિમ્ ।
૨૪૬.૩૨/૨ધર્મં ચાર્થં ચ કામં ચ મોક્ષં તુ લભતે નરઃ ॥ ૨૪૬.૩૨॥

૨૪૬.૩૩/૧યાન્ યાન્ કામાન્ અભિપ્રેત્ય પઠેત્ પ્રયતમાનસઃ ।
૨૪૬.૩૩/૨તાંસ્તાન્ સર્વાન્ અવાપ્નોતિ પુરુષો નાત્ર સંશયઃ ॥ ૨૪૬.૩૩॥

૨૪૬.૩૪/૧યશ્ચેદં સતતં શ઼ૃણોતિ મનુજઃ સ્વર્ગાપવર્ગપ્રદમ્ ।
૨૪૬.૩૪/૨વિષ્ણું લોકગુરું પ્રણમ્ય વરદં ભક્ત્યેકચિત્તઃ શુચિઃ ।
૨૪૬.૩૪/૩ભુક્ત્વા ચાત્ર સુખં વિમુક્તકલુષઃ સ્વર્ગે ચ દિવ્યં સુખમ્ ।
૨૪૬.૩૪/૪પશ્ચાદ્ યાતિ હરેઃ પદં સુવિમલં મુક્તો ગુણૈઃ પ્રાકૃતૈઃ ॥ ૨૪૬.૩૪॥

૨૪૬.૩૫/૧તસ્માદ્ વિપ્રવરૈઃ સ્વધર્મનિરતૈર્મુક્ત્યેકમાર્ગેપ્સુભિસ્- ।
૨૪૬.૩૫/૨તદ્વત્ ક્ષત્રિયપુંગવૈસ્તુ નિયતૈઃ શ્રેયોર્થિભિઃ સર્વદા ।
૨૪૬.૩૫/૩વૈશ્યૈશ્ચાનુદિનં વિશુદ્ધકુલજૈઃ શૂદ્રૈસ્તથા ધાર્મિકૈઃ ।
૨૪૬.૩૫/૪શ્રોતવ્યં ત્વિદમુત્તમં બહુફલં ધર્માર્થમોક્ષપ્રદમ્ ॥ ૨૪૬.૩૫॥

૨૪૬.૩૬/૧ધર્મે મતિર્ભવતુ વઃ પુરુષોત્તમાનામ્ ।

૨૪૬.૩૬/૨સ હ્યેક એવ પરલોકગતસ્ય બન્ધુઃ ।
૨૪૬.૩૬/૩અર્થાઃ સ્ત્રિયશ્ચ નિપુણૈરપિ સેવ્યમાના ।
૨૪૬.૩૬/૪નૈવ પ્રભાવમુપયાન્તિ ન ચ સ્થિરત્વમ્ ॥ ૨૪૬.૩૬॥

૨૪૬.૩૭/૧ધર્મેણ રાજ્યં લભતે મનુષ્યઃ ।
૨૪૬.૩૭/૨સ્વર્ગં ચ ધર્મેણ નરઃ પ્રયાતિ ।
૨૪૬.૩૭/૩આયુશ્ચ કીર્તિં ચ તપશ્ચ ધર્મમ્ ।
૨૪૬.૩૭/૪ધર્મેણ મોક્ષં લભતે મનુષ્યઃ ॥ ૨૪૬.૩૭॥

૨૪૬.૩૮/૧ધર્મોઽત્ર માતાપિતરૌ નરસ્ય ।
૨૪૬.૩૮/૨ધર્મઃ સખા ચાત્ર પરે ચ લોકે ।
૨૪૬.૩૮/૩ત્રાતા ચ ધર્મસ્ત્વિહ મોક્ષદશ્ચ ।
૨૪૬.૩૮/૪ધર્માદ્ ઋતે નાસ્તિ તુ કિંચિદ્ એવ ॥ ૨૪૬.૩૮॥

૨૪૬.૩૯/૧ઇદં રહસ્યં શ્રેષ્ઠં ચ પુરાણં વેદસમ્મિતમ્ ।
૨૪૬.૩૯/૨ન દેયં દુષ્ટમતયે નાસ્તિકાય વિશેષતઃ ॥ ૨૪૬.૩૯॥

૨૪૬.૪૦/૧ઇદં મયોક્તં પ્રવરં પુરાણમ્ ।
૨૪૬.૪૦/૨પાપાપહં ધર્મવિવર્ધનં ચ ।
૨૪૬.૪૦/૩શ્રુતં ભવદ્ભિઃ પરમં રહસ્યમ્ ।
૨૪૬.૪૦/૪આજ્ઞાપયધ્વં મુનયો વ્રજામિ ॥ ૨૪૬.૪૦॥

Available at http://www.indologie.unizh.ch/text/texttml

Contact Professors Renate Söhnen-Thieme and Peter Schreiner
for the Tübingen Purâna Project, a project institutionalized at the
Seminar for Indology and Comparative History of Religions of
the University of Tübingen (Germany)

*Brahmapurana*
pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*